श्री १०८ श्रीराधारमणो जयति ।

सप्तमस्कन्धः

महर्षिप्रवरश्रीकृष्णद्वैपायनप्रणीतम्

श्रीमद्भागवतम् ।

श्रीश्रीपादश्रीधरस्वामिकृतभावार्थदीपिका, श्रीराधारमणदासगोस्वामिविरचितदीपिन्याख्यतट्टिप्पनी श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका, श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली, श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी, श्रीगौडीयवैष्णवाचार्य्यप्रवरश्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भाख्यटीका, श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी, श्रीनिम्बार्कसम्प्रदायिश्रीमच्छुकदेवकृतसिद्धान्तप्रदीपाख्यटीका इत्यष्टभिर्व्याख्याभिर्भाषानुवादेनच समलङ्कृतम् ।

इदम्

परमहंसपरिव्राजकाचार्य्यश्रीमत्स्वामिप्रकाशानन्दसरस्वतीपूज्यपादशिष्य

श्रीनित्यस्वरूपब्रह्मचारिणा

सम्पादितम् ;

बङ्गदेशान्तर्गत ताड़ास भूपति श्रीराधाविनोद प्रेम सेवा परायण राजर्षि राय

श्रीवनमालिराय बहादुरस्य

सम्पूर्णसाहाय्येन

प्रकाशितञ्च ।

तच्च

काञ्चीमण्डलान्तर्वर्ति 'कान्दूर्' पं० श्रीरङ्गाचार्यद्वारा संशोध्य

श्रीवृन्दावनधामनि

स्वकीये "श्रीदेवकीनन्दन" यन्त्रालये

मुद्रितम् ।

सम्वत् १९६१

श्रीलक्ष्मीनृसिंहाय नमः ।

श्रीमद्भागवतम् ।

सप्तमस्कन्धः ।

प्रथमोऽध्यायः ।

॥ ॐ नमो भगवते वासुदेवाय ॥

राजोवाच ।

समः प्रियः सुहृद्ब्रह्मन् भूतानां भगवान् स्वयम् ।
इन्द्रस्यार्थे कथं दैत्यानवधीद्विषमो यथा ॥ १ ॥
नह्यस्यार्थः सुरगणैः साक्षान्निःश्रेयसात्मनः ।
नैवासुरेभ्यो विद्वेषो नोद्वेगश्चागुणस्य हि ॥ २ ॥
इति नः सुमहाभाग ! नारायणगुणान्प्रति ।
संशयः सुमहान्जातस्तद्भवाञ्छेत्तुमर्हति ॥ ३ ॥

श्रीशुक उवाच ।

साधुपृष्टं महाराज ! हरेश्चरितमद्भुतम् ।
यद्भागवतमहात्म्यं भगवद्भक्तिवर्धनम् ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

श्रीगणेशाय नमः ॥

स्वभक्तपक्षपातेन तद्विपक्षविदारणम् ।
नृसिंहमद्भुतं वन्दे परमानन्दविग्रहम् ॥ १ ॥
ऊतिः पञ्चदशाध्यायैः सप्तमे वर्ण्यतेऽधुना ।
ऊतिश्च वासनाप्रोक्ता तत्तत्कर्मानुसारिणी ॥ २ ॥
अशुभा च शुभा चेति द्विधा सा हेतुभेदतः ।
अशुभा महतां कोपाच्छुभा मद्वदनुग्रहात् ॥ ३ ॥
हरेर्द्वारपयोर्यद्वद्वैकुण्ठे वसतोरपि ।
चतुःसनरुषा विष्णुद्वेषाद्यशुभवासना ॥ ४ ॥
यथा च दैत्यगर्भेपि प्रह्लादस्य सतः स्थिरा ।
नारदानुग्रहादास विष्णौ सद्भक्तिवासना ॥ ५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्वभक्तंच सदा विष्णुर्द्विषन्तमपिरक्षति ।
तृतीयेऽथभवे द्वास्थावकरोदात्मसात्पुनः ॥ ६ ॥
अतोमनीषिणा यत्नः कार्योमहदनुग्रहे ।
इत्येतदर्थंमूतीनामत्र लक्षणमुच्यते ॥ ७ ॥
तत्रादौ दशभिर्दैत्यतत्पुत्रमातिभेदतः ।
महत्कोपानुकम्पोत्थवासनाभेद उच्यते ॥ ८ ॥
सद्वासनाच युज्येत कर्मभिः शुद्धचेतसः ।
परैस्तु पञ्चभिस्तस्मात्क्रियते धर्मनिर्णयः ॥ ९ ॥
तत्रतु प्रथमेऽध्याये हिरण्यकशिपोः सुते ।
विष्णुभक्ते विरोधस्तु विप्रशापजईर्यते ॥ १० ॥

यदुक्तम् पूर्वस्कन्धान्ते "हतपुत्रा दितिः शक्रपार्ष्णिग्राहेण विष्णुना । मन्युना शोकदीप्तेन ज्वलन्ती पर्यचिन्तयत्" इति । तच्छ्रुत्वा विस्मितः परीक्षित्पृच्छति—समइति त्रिभिः । न हि समस्य सुहृदश्च वैषम्यं नामास्ति नच प्रियस्य प्रीतिकर्तृषु वैषम्यं युक्तमित्यर्थः ॥ १ ॥

किञ्च यस्य यैः प्रयोजनं सिध्यति स तत्पक्षपातीभवति येभ्योबिभेति तान्द्वेषेण हन्ति नतु तदत्रास्तीत्याह—नहीति । निःश्रेयसं परमानन्दएव आत्मा स्वरूपं यस्य असुरेभ्यश्चोद्वेगो भयं नास्ति अतोविद्वेषोपि नास्त्येव. तत्र हेतुः, अगुणस्येति । गुणाधीनौ प्रीतिद्वेषावित्यर्थः ॥ २ ॥

श्रीनारायणस्य गुणानुग्रहनिग्रहादीन् प्रति तत्त्वं संशयम् ॥३॥

भागवतस्य प्रह्लादस्य माहात्म्यं गीयत इतिसम्बन्धः ॥ ४ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

॥ श्रीमते रामानुजाय नमः ॥

पूर्वस्मिन् स्कन्धे अष्टादशेऽध्याये "हतपुत्रा दितिः शक्रपार्ष्णिग्राहेण विष्णुना" इति विष्णोरिन्द्रस्य पक्षपातित्वमुक्तम् तत्र सर्वान्तरात्मनः सर्वभूतसुहृदोनिरतिशयप्रियरूपस्यावाप्तकामस्य निरस्ताखिलदोषस्य परमकारुणिकस्य श्रीभगवतः कथं प्राकृतवद्वैषम्यनैर्घृण्यादिकम् ? इति पृच्छति राजा—सम इत्यादिना त्रिभिः श्लोकैः । यद्यपि तत्तज्जीवकर्मगुणानुगुण्येनान्तरात्मतया नियन्तुर्न वैषम्यादिदोषप्रसक्तिरिति तत्रतत्र बहुवारमुक्तमिति न शङ्कावकाशः, तथापि तत्रतत्रप्रसङ्गादुक्तमेव तद्दृढयितुं किं गुणानां कर्मणां च प्रत्येकं सुखदुःखादिनिमित्तत्वम् उत समुच्चितानाम्, अथवा कर्मणामेवनिमित्तत्वं, गुणानां तु तद्धेतुत्वमुत गुणानामेव तन्निमित्तत्वं कर्मणां तु गुणोपचयापचयादिनिमित्तत्वमित्यादिशङ्का परिहारान् श्रोतुं च प्रश्नः, सम इति. हे ब्रह्मन् ! भगवान् पूर्णषाड्गुण्यो निरस्तनिखिलदोषश्च अनेनाप्तकामत्वं सूचितम् तत एव स्वप्रयोजननिरपेक्षत्वञ्च समः निरस्तनिखिलदोषत्वादेव द्वेष्यप्रियविभागरहितः स हि रागद्वेषादिमूलकः तदभावात्सम इति भावः । किञ्च सर्वभूतानां देवादीनां चासुरादीनां च सुहृद्धितैषी आत्मत्वादितिभावः नह्यात्मनः किञ्चिच्छरीरं हितमन्यदहितमात्मत्वादेव च निरतिशयप्रियः एवम्भूतः स्वयं साक्षादेवेन्द्रस्यार्थे प्रयोजनाय कथं दैत्यानवधीद्धतवान्, यथा विषमो रागद्वेषादिप्राकृतगुणयुक्तस्तद्वत् ॥ १ ॥

साक्षान्निःश्रेयसात्मनः पुरुषार्थस्वरूपस्य निरतिशयानन्दरूपस्येत्यर्थः अस्य भगवतः सुरगणैरिन्द्रादिभिर्नह्यर्थः तदनुगृहीतेन्द्रादिभिः साध्यः कश्चित्पुरुषार्थो न तस्यास्ति स्वयमेव सक्षान्निःश्रेयसात्मत्वादिति भावः तथा असुरेभ्य उद्वेगो भयं तेषु विद्वेषश्च नास्त्येव तत्र हेतुं वदन् तं विशिनष्टि, अगुणस्येति. हि यस्मादगुणस्य सत्त्वादिगुणतन्मूलकरागद्वेषभयरहितस्य ॥ २ ॥

इतरित्थं हे महाभाग ! निर्गुणस्य श्रीनारायणस्य गुणान्प्रति गुणविषयकोमहान् संशयो जातो वर्तते तद्गुणास्तु समत्वादयश्चेष्टातु, गुणानुगुणोत्येतत्संशयात्मकमज्ञानं छेत्तुमपोहितुं भवानेवार्हति नान्य इत्यर्थः ॥ ३ ॥

एवमापृष्टो मुनिस्तावद्राज्ञः प्रश्नमभिनन्दति--साध्विति । हे महाराज ! अद्भुतं प्राकृतचेष्टासजातीयत्वेन चिन्तयितुमशक्यं हरेश्चरितंप्रति साधु पृष्टं हरिचरित्रविषयकसंशयोद्घाटनरूपत्वात्प्रश्नः साधीयानित्यर्थः । साधुत्वमेव प्रश्नस्य स्पष्टयितुं चरित्रं विशिनष्टि—यदिति. यद्धरेश्चरितं भागवतानां माहात्म्यं यस्मिन्तादृशं अस्त्वेवं ततः किं तत्राह, भगवद्भक्तिं वर्द्धयतीति, भगवद्भक्तिवर्द्धनं भगवद्भक्तेर्वर्द्धनं वृद्धिर्यस्मादिति वा भागवतमाहात्म्येन भगवद्भक्तिवर्द्धकेन युक्तत्वाद्भगवच्चरित्रस्य तद्विषयकः प्रश्नः साधुरिति भावः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

॥ श्रीवायुपुत्रायनमः ॥

षष्ठस्कन्धाभिधे तीर्थे स्नातः सप्तमनाम्न्यथ ।
श्रीमद्भागवते स्नातुं प्रयते तत्त्वसम्विदे ॥ १ ॥
सेवा येषामपवर्गगतिर्जगताममलास्ते—
श्रीमद्विष्णवङ्घ्रिसरोरुहयुगले भ्रमन्तः ।
सन्तः कुर्वन्तु दयां मयि विजयध्वजतीर्थे—
नित्यानित्याभ्यस्तादितिजाङ्घ्रितनुनखतीर्थसुतीर्थे ॥

सन्ततवेदान्तपरिनिष्ठितानामपिश्रीनारायणपरमप्रसादमन्तरेणानापादितसमीचीनज्ञानामृतकलानां क्वचित्क्वचिदसुरजनमोहाय प्रदर्शितशुक्रशोणितसम्पर्कादिभिरिवभगवतः प्रादुर्भावैस्तत्त्वे संशयालूनां सतां विसंशयार्थं श्रीनृसिंहावतारस्तत्प्रसक्तये नानाविधवर्णाश्रमाचारभेदविचारस्तत्पूजाप्रकारश्च निरूप्यते ऽस्मिन्स्कन्धे. तदर्थं परीक्षित्प्रश्नपूर्वकमुपोद्घातं रचयति—सम इति । यो भगवान् भूतानां योग्यतातिरेकेण पक्षपरिग्रहशून्यः आत्मादेः प्रियश्च "तदेतत्प्रेयः" इति श्रुतेः सत्त्वादिप्रदत्वाच्चैरनुष्ठितसमर्चनादिसुकृतस्य सुखलक्षणफलदातृत्वेनोपकर्तृत्वाच्च सुहृत् किमत इति तत्राह, स्वयमिति. स स्वयं विषम इवेन्द्रस्यार्थे स्वप्रयोजनमन्तरेण परप्रयोजनार्थं कथन्दैत्यानवधीदित्यन्वयः ॥ १ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु, सुरगणैः क्रियमाणस्य स्वप्रयोजनस्य सम्भवाद्वधीदिति किं न स्यादिति तत्राह—न हीति । हि शब्दो हेत्वर्थः कुतो नास्तीत्यत्राह—निःश्रेयसात्मन इति, नित्यनिर्दुःखानन्दस्वरूपस्य तादृशत्वं मुक्तस्याप्यस्तीति तत्राह--साक्षादिति, नित्यनिर्दुःखानन्दानुभवस्वरूपस्य परप्राप्यप्रयोजनाभावान्मुक्तस्य तदभावात्. नन्वसुरप्रद्वेषात्सुरहितं क्रियत इति तत्राह--नैवेति, विद्वेषश्च तत्तत्स्वरूपद्योतनायासुरेभ्य इति पञ्चमी'वृक्षात्पर्णं पतति' इतिवत्कादाचित्कत्वाभावान्नित्ये द्वेषे वधानुपपत्तिरन्यथा वधस्यापि सन्ततानुवृत्तिः स्यादतो नोपपत्तिः स्यादिति भावः स्वाभिभवलक्षणभयात्तद्वध इति तत्राह—नेति, उद्वेगो भयलक्षणं कुत इत्यत उक्तम् अगुणस्येति "प्राकृतगुणसम्बद्धस्य तादृक्स्वभावत्वाद्धरेस्तदभावान्निर्गुणश्च" इतिश्रुतेः अनेन निःश्रेयसात्मनोपि गुणसम्बन्धेन जीववत्तथात्वं स्यादिति शङ्कापि निरस्तेति ज्ञायते ॥ २ ॥ ३ ॥

प्रामाणिकत्वद्योतनाय प्रश्नं स्तौति—साध्विति। तत्र हरिचरिते भागवतानां माहात्म्यं भगवद्भक्तिवर्द्धनमित्यनेन तन्माहात्म्यं भगवन्माहात्म्याविनाभूतमित्यवगन्तव्यम् ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ श्रीश्रीकृष्णोजयति ॥

अथ सप्तमस्कन्धस्यक्रमसन्दर्भः ।
सप्तमक्रमसन्दर्भे सन्दर्भाणां समाहृतिः ।
क्रियते यन्निदेशेन स मेऽनन्यगतेर्गतिः ॥

परमात्मत्वेन समः सुहृद्धितकारी प्रियः प्रीतिविषयो भगवान् एवं सति साम्येनैवोपकर्तव्यत्वेन प्रीतिविषयत्वेन च सर्वेष्वेवप्राप्तेषु कथं विषमइव दैत्यानवधीत् विषमत्वमुपलक्षणम् । असुहृदिवाप्रिय इव चेति ॥ १ ॥ २ ॥ ३ ॥

साधु पृष्ठमिति सार्द्धमेवान्वितम् । हे महाराज ! इदं यत् पृष्टं तत् साधु सुविचारितमेव. किन्तु हरेश्चरितमद्भुतमपूर्वम् अवैषम्येपि विषमतया प्रतीयमानत्वेन विचारातीतत्वात्. यत् यत्र हरेश्चरितं भगवद्भक्तिवर्द्धनं भागवतमाहात्म्यं भागवतानां श्रीप्रह्लादोपलक्षितभक्तवृन्दानां माहात्म्यं वर्त्तते । अनेन भागवतार्थमेव सर्वं करोति भगवान् नत्वन्यार्थमित्यस्यैवार्थस्य पर्यवसानं भविष्यतीति व्यञ्जितं । टीकाच स्वभक्तपक्षपातेनेत्यादिना । अतः गीयतइति। परमं पुण्यं यथास्यात्तथा या गीयते तां कथामिति यत्तदोरध्याहारेणान्वयः । अत्र च तैर्गीयमानत्वेन भक्तैकसुखप्रयोजनत्वमेव व्यञ्जितम् ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

॥ श्रीकृष्णाय नमः ॥

प्रणम्य श्रीगुरुं भूयः श्रीकृष्णं करुणार्णवम् ।
लोकनाथं जगच्चक्षुः श्रीगुरुं तमुपाश्रये ॥
गोपरामाजनप्राणप्रेयसेतिप्रभूष्णवे ।
तदीयप्रियदास्याय मां मदीयमहं ददे ॥
ऊतिः स्याद्वासना सात्र सप्तमे कथ्यते द्विधा ।
अशुभाच शुभाचापि कोपतोऽनुग्रहात् सताम् ॥
सन्तश्च त्रिविधाः शुद्धभक्ता ज्ञानादिमिश्रिताम् ।
भक्तिद्धानास्तन्मिश्रज्ञानवन्तश्च कीर्त्तिताः ॥
हिरण्यकशिपोः स्वाभाविकीया वासनाऽशुभा ।
तत्र हेतुः सनन्दादिकोपः प्राचीनएव सः ॥
तस्यापि पुत्रो यस्तस्य प्रह्लादस्य शुभोत्तमा ।
शुद्धभक्तौ वासना श्रीनारदाङ्घ्रिकृपाभरात् ॥
तत् संरक्ष्य सतामागः कुञ्जरात् तत्प्रसादजा ।
दीनता मानदत्वादि शिलाक्लृप्तमहाकृतिः ॥
भक्तिवल्ली नृभिः पाल्या श्रवणाद्याम्बुसेचनैः ।
एवं कथादशाध्यायां भक्तेः कैवल्यमीक्षयेत् ॥
पञ्चाध्यायां कथाभक्तेः प्राधान्यं गुणभूतताम् ।
तादृग्भक्तगुरोर्लभ्यं दर्शयेत्तादृगास्पदे ॥
स्युस्त्रिषु क्रमतः प्रेमशान्तभक्तत्वमुक्तता ।
एवं पञ्चदशाध्यायस्सप्तमः साधु सेव्यते ॥
तत्रतु प्रथमे विष्णोर्वैषम्यं वारयन्मुनिः ।
तस्य पार्षदयोराह सङ्क्षेपात्त्रिजनोः कथाम् ॥

पूर्वस्कन्धान्ते "हतपुत्रा दितिः शक्रपार्ष्णिग्राहेण विष्णुना । मन्युना शोकदीप्तेन ज्वलन्ती पर्यचिन्तयत्" इतीन्द्रपक्षपातलक्षणं विष्णोर्वैषम्यमसहमान इव स्वयमवगतसिद्धान्तोऽपि महामुनेस्तस्य मुखादपि समाधानामृतमास्वादयितुमाह--समइतित्रिभिः । समस्य कथं वैषम्यं ! प्रियस्य कथमसुरेषु प्रीत्यभावः ? सुहृदश्च कथं तेष्वसौहार्दम् ? ॥ १ ॥

न चेन्द्रादिभिस्तस्य सुखं सिद्ध्यतीत्यतस्तत्पक्षपात इतिवाच्यमित्याह--नेति । निःश्रेयसं परमानन्दएव आत्मा स्वरूपं यस्य तस्य नहिसुखस्वरूपस्य कश्चिदन्यः सुखंसाधयेदितिभावः। न चासुरादिभिरुद्वेजकैस्तस्य दुःखं भवेद्यतस्तेषु विद्वेष इत्याह, नैवेति. असुरेभ्य उद्वेगो नास्त्यतो न विद्वेषस्तत्र हेतुः अगुणस्येति ॥ २ ॥

गुणान् अनुग्रहनिग्रहादीन्प्रति ॥ ३ ॥

यद्यतः प्रश्नात् हरेश्चरितं तदुत्तरत्वेनावश्य वाच्यं गीयते ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

॥ श्रीकृष्णाय नमः ॥

श्रीकृष्णं नियमानन्दं प्रणम्येह सुखप्रदः ।
सिद्धान्तद्योतको दीपः सप्तमेऽथ विरच्यते ॥
विविधावासनास्तत्र कामद्वेषादिकारिताः ।
कृष्णे कृष्णप्रदाः प्रोक्ता अन्येष्वन्यप्रदास्तथा ॥
हरेर्ज्ञानं च भक्तिश्च तथा वर्णाश्रमक्रिया ।
अन्तःकरणशुद्ध्यर्था वर्ण्यते परमादरात् ॥

अतिक्रान्तस्कन्धस्याष्टादशाध्याये"हतपुत्रा दितिः शक्रपार्ष्णिग्राहेण विष्णुना। मन्युना शोकदीप्तेन ज्वलंती पर्यचिन्तयत्" इति विष्णोरिन्द्रपक्षपातित्वं श्रुत्वा पृच्छति-सम इति त्रिभिः ॥ १ ॥

गीयते परमं पुण्यमृषिभिर्नारदादिभिः ।
नत्वा कृष्णाय मुनये कथयिष्ये हरेः कथाम् ॥ ५ ॥
(१) (जिह्वां लब्ध्वापि यो विष्णुं कीर्त्तनीयं न कीर्त्तयेत् ।
लब्ध्वापि मोक्षनिश्रेणिं स नारोहति दुर्मतिः ॥ ० ॥
तस्माद्गोविन्दमाहात्म्यमानन्दरससुन्दरम् ।
शृणुयात्कीर्त्तयेन्नित्यं स कृतार्थो न संशयः ॥ ० ॥
तस्मादिमां कथां पुण्यां गोविन्दचरणाश्रिताम् ।
महापुण्यप्रदां यस्माच्छृणुष्व नृपसत्तम ! ॥ ० ॥)
निर्गुणोऽपि ह्यजोऽव्यक्तो भगवान् प्रकृतेः परः ।
स्वमायागुणमाविश्य बाध्यबाधकतां गतः ॥ ६ ॥
सत्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः ।
न तेषां युगपद्राजन् ! ह्रास (२) उल्लास एव वा ॥ ७॥
जयकाले तु सत्त्वस्य देवर्षीन् रजसोऽसुरान् ।
तमसोयक्षरक्षांसि तत्कालानुगुणोऽभजत् ।
ज्योतिरादिरिवाभाति सङ्घातान्न विविच्यते ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अगुणस्य उद्वेगादिकारिणीभूततमोरज आदिगुणरहितस्य ॥२॥

नारायणस्य गुणान् निग्रहानुग्रहरूपान् प्रति सुमहान् संशयो-जातस्तं भवान् छेत्तुमर्हति ॥ ३ ॥

एवमापृष्टोमुनिः राजप्रश्नाभिनन्दनपूर्वकम् नहि भगवति वैषम्यादिदोषगन्धवातस्पर्शोंपि प्रकृतिगुणविमोहितजीवकर्मानुरूपं निग्रहादिकं जीवोपकारार्थं स्वकृतधर्मसेतुरक्षार्थं सर्वकर्त्ता सर्वनियन्ता सर्वात्मा सर्वेश्वरोभगवान् करोतीत्युत्तरमाह-साधु-पृष्टमिति सार्द्धैरष्टभिः श्लोकैः । अद्भुतं सर्वपुरुषार्थप्रदत्वेनाश्चर्यभूतं हरेश्चरितं मां प्रति त्वया साधु पृष्टम्, यद्धरेश्चरितं भागवतमहात्म्यं भागवतानां माहात्म्यं यस्मिन् तथाभूतं भगवद्भक्तिं वर्द्धयतीति तथा ॥ ४ ॥

भाषाटीका ।

॥ श्रीरुक्मिणी रमणो जयति ॥

॥ श्रीकालीयफणमाणिक्यरञ्जितश्रीपदाम्बुजाय नमः ॥

नत्वा श्रीरुक्मिणीकान्तं ध्यात्वा रामानुजं हृदि ॥
वृन्दावनोद्भवान् गुल्मलतावृक्षान् प्रणम्य च ॥ १ ॥
सप्तमस्कन्धभावार्थबोधिनी भक्तसम्मता ॥
भाषा भागवतार्थेण क्रियते साभिवर्द्धताम् ॥ २ ॥

राजो वाच ॥

हे ब्रह्मन् ! भगवान् स्वयं प्राणियों का सम और प्रिय है । फिर इन्द्र के लिये विषम के तरह दैत्यों को क्यो मारा ? ॥ १ ॥

साक्षात् परमानन्द स्वरूप इस भगवान का देवताओं से कुछ प्रयोजन नहीं तथा असुर लोगों से कुछ द्वेष नहीं तथा प्राकृत गुण शून्य के कुछ उद्वेग नहीं ॥ २ ॥

हे महा भाग ! इस प्रकार श्री नारायण के निग्रह अनुग्रहादि रूप गुणों का मुझ को बडा संशय उत्पन्न हुआ है इस संशय के छेदन करने को आपही योग्य हैं ॥ ३ ॥

श्रीशुक उवाच ॥

हे बड भागी हे राजन् ! आपने हरिका अद्भुत चरित्र भला पूंछा । क्योंकि जिसमें भगवद्भक्ति के बढाने वाला भागवत (भक्त) का माहात्म्य है ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कृष्णाय व्यासाय कृष्णां मुनिं नत्वेत्यर्थः ॥ ५ ॥

---

(१) व्याख्यानमन्तरा एते श्लोकाः अधिकाः दृश्यन्ते—वीर० (क) पुस्तके । (२) उत्साह इतिपाठान्तरम्, विजय०

श्रीधरस्वामिकृतभावार्थदीपिका ।

यस्मात्प्रकृतेः परः अतोनिर्गुणः अतएवाजः अतएवाऽव्यक्तोरागद्वेषादिनिमित्तभूतदेहेन्द्रियादिरहितः सोऽपि स्वमायागुणं सत्त्वादिकमाविश्याधिष्ठाय बाध्यान्प्रति यद्वा देवासुराणां परस्परं या बाध्यबाधकता तां गतः प्राप्तः तत्र हेतुर्जात इत्यर्थः॥ ६ ॥

तत्र गुणानां स्वीयत्वे सति प्राकृतपुरुषवद्विषमः स्यात्तत्तु नास्तीत्याह—सत्त्वमिति । ननु, स्वेच्छया गुणाधिष्ठानेनापि पक्षपातवैषम्यं स्यादेव न तस्य कालकृतत्वादित्याह—न तेषामिति सार्द्धेन । उल्लासोवृद्धिः ॥ ७ ॥

सत्त्वस्य जयकाले देवादीनृषींश्चाभजत् तत्तद्देहं प्रविश्य वर्धयतीत्यर्थः। रजसोजयकाले यक्षरक्षांसि तस्य कालस्यानुगुणस्सन् ॥ ८ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अतस्तत्परमं पुण्यमतीवपुण्यतमं चरित्रं नारदादिभिः ऋषिभिर्गीयते यतस्त्वत्प्रश्नः साधुस्ततोहं कृष्णाय व्यासाय मुनये नत्वा हरेः कथां कथयिष्ये हरिगुणविषयकसंशयरूपत्वात्प्रश्नस्य तद्गुणवर्णनरूपकथाकथनेनैवोत्तरयामीत्यभिप्रायेण कथां कथयिष्ये इत्युक्तम् ॥ ५ ॥

एवं कथाकथनं प्रतिज्ञायाथ सत्त्वादिगुणोद्भवाभिभवादिना देवादीनां जयपराजयौ सत्त्वादिगुणाश्च तत्तज्जीवकर्माधीनोद्भवाभिभववन्तः प्रसिद्धाः "कर्मवश्या गुणाह्येते सत्त्वाद्याः पृथिवीपते" इत्यादिभिः, अतः सर्वान्तरात्मतया अवस्थाय तत्तज्जीवकृतकर्मानुगुणं गुणान्प्रेरयतः ईश्वरस्य न वैषम्यादिकमिति परिहरति—निर्गुणोपीति । निर्गुणः हेयगुणरहितः रागद्वेषादिरहित इत्यर्थः अव्यक्तः प्रमाणान्तराणामगोचरः अनेन प्रत्यक्षादिप्रमाणगोचररागद्वेषादिहेयगुणयुक्तप्राकृतवैलक्षण्यमुक्तम्, अत एव अजः कर्माधीनोत्पत्त्यादिरहितः भगवान्पूर्णषाड्गुण्यः प्रकृतेः परः"भूमिरापोनलोवायुः" "अपरेयमितस्त्वन्याम्" इत्युक्ताचिदचिदात्मकप्रकृतिद्वयाद्विलक्षणः अपिशब्देनैवंविधस्य वैषम्याद्यनर्हता सूच्यते. यद्यप्येवंविधः तथापि स्वमायागुणमाविश्य स्वांशभूतां गुणविशिष्टां प्रकृतिमाविश्येत्यर्थः, आवेशश्चात्र प्रेरणपर्यन्तः "अन्तः प्रविष्टः शास्ता जनानाम्" इति श्रुतेः। ईरयतीति वक्ष्यमाणत्वाच्च बाध्यबाधकतां गतः बाध्यबाधकदेवासुरवर्गयोरन्तरात्मतया तत्तच्छरीरकत्वेनावस्थित इत्यर्थः गुणकार्यानुगुणप्रेर्येमाणशरीरभूतदेवासुरवर्गगतो बाध्यबाधकभावः, न प्रकृतिद्वयविलक्षणतदात्मभूतपरमात्मगतः। यथा, देहादिगतावस्थाः नात्मगताश्तथेति भावः॥ ६ ॥

एतदेव प्रपञ्चयितुं तावद्गुणानां प्रकृतेरेव सम्बन्धित्वं तेषां तत्तज्जीवकर्मानुसारेण परिणामस्वभावत्वञ्चाह-सत्त्वमिति । सत्त्वादयः प्रकृतेरेव गुणाः, न त्वात्मनः; परमात्मनः परमात्मशरीरभूतप्रकृतिस्वरूपगताः न तु परमात्मस्वरूपगता इत्यर्थः तेषां सत्त्वादीनां सर्वेषां ह्रासोऽभिभवः उल्लास उद्भवश्च युगपन्न भवति किन्तु तत्तत्कर्मपरिपाककालानुगुणं कदाचित्कस्यचिद्ध्रासः कदाचिदुल्लासश्च भवतीत्यर्थः ॥ ७ ॥

ततः कथं वैषम्यपरिहारः ? इत्यत आह--जयकालेत्विति । सत्त्वस्य जयकाले उत्कर्षकाले कर्माधीनसत्त्वगुणोपचयकाले इत्यर्थः देवानृषींश्चाभजत्तदनुग्राहको भवति रजसो जयकाले इत्यनुषङ्गः असुरानभजत् तमसोजयकाले तु यक्षान् रक्षांसि च तत्कालानुगुणस्तत्तत्कर्मविपाककालानुगुणोऽभजत्. अयं भावः—

"गुणप्रवाहपतितो भूतवर्गोपि यात्ययम् ।
कर्मवश्या गुणाह्येते सत्त्वाद्याः पृथिवीपते ॥"

इति भगवत्पराशरवचनात्. सत्त्वादिगुणानां तत्तज्जीवकर्मविपाककालानुगुणह्रासोल्लासरूपपरिणामप्राचुर्यञ्च प्रसिद्धम्"आत्यन्तिकेन सत्त्वेन दिवं देवाः प्रपेदिरे । धरां रजः स्वभावेन" इत्यादुक्तरीत्या देवादीनां स्वस्वकर्माधीनसत्त्वादिगुणप्राचुर्यञ्च प्रसिद्धम्. सत्त्वादिगुणानामुल्लासः सुखदुःखमोहाद्यापादक इति भगवता गीतम्—

"ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत ।
लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा ॥
रजस्येतानि जायन्ते विवृद्धे कुरुनन्दन ।
अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ॥
तमस्येतानि जायन्ते विवृद्धे पुरुषर्षभ !" ॥ इति

ईश्वरस्य तु सर्वान्तरात्मत्वं बहुप्रमाणप्रतिपन्नम् एवं सत्येतदुक्तं भवति. सर्वान्तरात्मतयावस्थित ईश्वरः सर्वदा कस्यचिदेव विजयं कस्यचित्सर्वदा पराजयं च न प्रतिदिशति. अपि तु तत्तद्देवादिकर्मपरिपाककालानुगुणसत्त्वादिगुणोद्भवकालेषु देवादीनां विजयं प्रतिदिशति अन्येषां तु पराजयं.सत्त्वाद्युद्भवाभिभवयोश्च कर्माधीनत्वात्तदनुरूपप्रवृत्तेरीश्वरस्य न वैषम्यमिति. ननु, कर्मपरिपाककालानुगुणोज्वलसत्त्वकरत्वोपचयदशायां तद्गुणप्रचुराणां देवादीनां जयमावहतीति युक्तम्. इदन्त्वयुक्तं, रजस्तमसोरुपचयदशायामसुररक्षआदीन्भजत इति । तदुपचयस्य दुःखमोहादिफलकत्वेन पराजयाद्यावहत्वादुच्यते रजस्तमसोरुल्लासकालेऽसुरादीन् भजतीत्यस्य तेषां जयमावहतीत्यर्थः अपि तु रजस्तमसोरुल्लासफलभूतदुःखमोहादिनिमित्तपराजयादिकमावहतीत्येवञ्च यद्देवासुरादीनामपि स्वकर्मविशेषपरिपाकानुगुणं सत्त्वोल्लासस्तदा जयं प्रदिशत्यन्यथा तु पराजयम्. एवं देवादीनामपि कर्मविशेषपरिपाकानुगुणसत्त्वोद्रेकदशायां जयं, तेषामेव पुनः कर्मविशेषपरिपाकानुगुणरजस्तमसोरुल्लासे सति दुःखादिकरं पराजयादिकमिति. इयांस्तु विशेषः, देवादीनां पुण्यकर्मणां सत्त्वप्रचुरत्वात्प्रायशः तस्यैवोल्लासात्प्रायशो विजयः, कादाचित्कः पराजयः; असुरादीनां त्वपुण्येन रजस्तमःप्रचुरत्वात्तयोरेव प्रायश उल्लासात्प्रायशः पराजयः कादाचित्को विजय इति ॥ ८ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रश्नप्रतिवचनं भगवदनुग्रहमन्तरेण सुवचं न स्यादिति प्रकटनाय भगवन्तं प्रसाद्य वक्तव्यार्थं प्रतिजानीते नत्वेति ॥ ५ ॥

हरेर्हन्तृत्वधर्मो न घटत इति वदन् लोकेष्वेकत्वादुत तद्विलक्षणत्वादिति वावदीपि समत्वादिधर्मोपन्यासानुपपत्तेर्न प्रथमः अघटितघटकशक्तिमत्त्वेन सर्वस्योपपत्तेर्द्वितीयो युक्त एवेति भावेनाह—निर्गुण इति. अयं भावः । भगवान् स्वमायागुणं स्वेच्छागुणमनुसृत्य स्वाधीनप्रकृतिगुणनिर्मितदेवासुरदेहं वाविश्य तत्र स्थित्वा बहिश्च नृसिंहादिप्रादुर्भावरूपेणासुरादिबाधकतामसुरादिबाध्यवस्तुषु नियामकत्वेन स्थित्वा बाध्यतां गतो भवति किमत्र मानमितीयं शङ्का बाध्यादिस्थो हरिर्नित्यं बाध्यतादिगतेत्यपि गीयते । ननु, बाध्यत्वाद्यदोषयुतत्ववत इति भविष्यत्पर्वंवचनेन परिहर्तव्येति, हिशब्देन "लोकवत्तु लीलाकैवल्यम्" इति सूत्रशैलीं प्रयोजयति निर्गुणत्वादिकं वैलक्षण्ये लिंगमिति ज्ञापनाय प्रयुक्तं पुरुषाणां गुणदोषानुसारेण रक्षाद्यभावेन समत्वादिकमपि न युज्यत इति प्रदर्शनायापिशब्दः तर्हि कुतोऽविविच्य न ज्ञायत इत्यतोऽव्यक्तइति—

> "दधिस्थघ्रतवत्काष्ठे वह्निवच्चजनार्दनः ।
> देहेंद्रियासु जीवेभ्यो विविच्य ज्ञायते ननु ॥

इति । अतो विविच्या ज्ञानं युक्तम् ॥ ६ ॥

स्वमायागुणमाविश्येत्युक्तं विवृणोति—सत्त्वमित्यादिना। प्रकृतेः स्वरूपभूता आत्मनः परमात्मनो ज्ञानादिवन्नस्वरूपभूताः किंत्वधीनाः जीवस्याप्यभिमानादेव गुणानां भिन्नस्वभावत्वाद्युगपत्प्रवृत्त्यनुपपत्तेरित्यतः शक्तिप्रकटनप्रकारं दर्शयति नतेपामिति—ह्रासोऽनुद्भूतत्वमुन्नाहउद्भूतत्वं चयवृद्धिक्रमेणेति परिहारः ॥ ७ ॥

तं क्रमं विविनक्ति—जयेति । सत्त्वस्य जयकाले उन्नाहविषये देवर्षीन् भजन्नानाभातीत्यन्वयः रजसउन्नाहविषये असुरान्वर्द्धयन् तमस उन्नाहविषये यक्षादीन्वर्द्धयन्नेवं गुणानां शक्तिं जृम्भयतीत्यर्थः । तत्रापीत्थं भावोस्तीत्याह—तत्कालेति, तत्तत्कालगुणमनुसृत्य वर्तमानः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नत्वेत्यर्द्धकम् ॥ ५ ॥

तत्र तावद्व्यञ्जितार्थानुरूपमेव प्रश्नोत्तरमाह—निर्गुणोऽपीति ।

निर्गुणः प्राकृतगुणरहितः अत एवाजो नित्यसिद्धः अत एव चाव्यक्तः । प्राकृतदेहेन्द्रियादिरहितत्वान्नान्येन व्यज्यत इति स्वयंप्रकाशदेहादिरित्यर्थः । ततश्च प्रकृतिगुणेषु रागद्वेषादिरहितश्चेति भावः । एवमेवम्भूतोऽपि स्वेषु भक्तेषु या माया कृपा तत्रोचितो यो गुणो लीलाकौतुकमयविशुद्धोऽर्जितसत्त्वाख्यस्तमाविश्य आलम्ब्य भगवान् नित्यमेव प्रकाशितषड्गुणैश्वर्यस्सन् एतदप्युपलक्षणं कदाचिददित्यादौ जातः संल्लोकेन्द्रियेषु व्यक्तोऽपि सन् बाध्यबाधकतां गतः, कदाचिदसुरैर्बाध्यतां पराजयं कदाचित्तु तेषां बाधकतां जयं प्राप्त इत्यर्थः । अत्र सत्यप्यर्थान्तरे भागवतानुग्रहप्रयाजनत्वेनैवोपक्रान्तत्वादुपसंहरिष्यमाणत्वादूगति सामान्याच्छलमथमायया तत्कर्तृत्वेऽप्यधिकदोषपाताच्च तन्नापेक्ष्यते. तस्माद्भक्तचिनोदैकप्रयोजनकस्वैरलीलाकैवल्येनान्यत्र रागद्वेषाभावान्नात्र वैषम्यमिति भावः । अत एव बाध्यतामपि यातीति बाधकतया सहैवोक्तम्, तथा निजस्वरूपशक्तिविलासलक्षणलीलाविष्कारेण सर्वेषामेव हितं पर्यवस्यतीति सुहृत्त्वादिकञ्च नापयातीति ध्वनितम् ॥ ६

अथ तस्य बाध्यबाधकताव्यवस्थां स्थापयति द्वाभ्याम्—तत्र ये तु सत्त्वादयो गुणास्तेषु न तदीयत्वं न तदावेशो न च सदैकावस्थात्वं यतः पूर्वत्र पद्ये तस्य गुणस्यान्यतमत्वदर्शनाय स्वेति आविश्येति च विशिष्य स्वमायागुणमाविश्येत्युक्तम. न तु मायागुणमुपश्रायेत्याह—सत्त्वमित्यर्द्धकेन; सत्वादयो गुणाः प्रकृतेरेव नात्मनः परमेश्वरस्य तु ये सर्वेऽपि नित्यमेवोल्लासिनो गुणास्ते तु ते न भवन्तीत्यर्थः। तदुक्तम्

> "सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः।
> स शुद्धःसर्वशुद्धेभ्यः पुमानाद्यः प्रसीदतु इति ॥
> ह्लादिनी सन्धिनी सम्वित्त्वय्येका सर्वसंस्थितौ ।
> ह्लादतापकरी मिश्रा त्वयि नो गुणवर्जिते" ॥

इत्यादिवचनानि भगवत्सन्दर्भे दर्शितानि न तेषामिति सार्द्धकम् । यस्मान्नात्मनस्ते तस्मादेव युगपद्ध्रास एव उल्लास एव वा नास्ति । किन्तु विकारित्वेन परस्परमुपमर्द्दोपमर्द्यत्वात् कस्यचित् कदाचिद्ध्रासः कस्यचित् कदाचिदुल्लासो भवतीत्यर्थः । ततश्च देवादीनां तत्साहाय्ये असुरादीनां तद्युद्धे योग्यतां दर्शयति तथा सत्त्वाद्युल्लासकाले तल्लीलायास्तदधीनत्वमेव यत् प्रतीयते न तदनुवदन् परिहरति सत्त्वस्य जयकाले देवादीनृषींश्चाभजत् भजति भगवांस्तत्तद्देहेषु सत्त्वोपाधिकं निजं तेजः सञ्चारयति येन च तान् सहायमानान् करोतीत्यर्थः। एवं रजसो जयकाले असुरेषु रज उपाधिकं तमसो जयकाले यक्षरक्षस्सु तमउपाधिकमिति योजनीयम् । ततश्च येन तान् यक्षादीन् प्रतियोद्धॄन् भगवान् कुर्वन् देवादीन् पराजितान् करोति स्वमपि तथा दर्शयतीत्यर्थः । तदेवं भक्तरसपोषकलीलावैचित्र्याय बाध्यबाधकतां यातीति दर्शितं यच्च क्षीरोदमथने श्रूयते । "तथासुरानाविशदासुरेण रूपेण तेषां बलवीर्यमीरयन् ॥ उद्दीपयन् देवगणांश्च विष्णुर्दैवेन नागेन्द्रमबोधरूपः" इति । अत्रापि तद्वैचित्र्यार्थमेव तथा तत्तदावेशस्तस्येति लभ्येत नन्वायाता तस्य तत्तद्गुणोद्बोधककालपारवश्येन स्वैरलीलाहानिः । ततश्च गुणसम्बन्धातिशये वैषम्यादिकञ्च स्पष्टमेवेत्याशङ्क्याह—तत्कलानुगुण इति । तेषां सत्त्वादीनां काल एवानुगुणो यस्य सः भगवच्चरण इतिवत्. समासः स्वैरमेव क्रीडति तस्मिन् नित्यमेव तदनुगतिकया मायया यया तदनुसारेणैवानादिसिद्धप्रवाहं तं तं जगत्कर्मसमुदायं प्रेर्य, स्ववृत्तिविशेषरूपत्वेन प्रवर्त्यमानः सत्त्वादिगुणानां काल एव तदधीनो भवतीत्यर्थः । कालस्य मायावृत्तित्वमुदाहृतं कालो दैवमित्यादौ त्वन्मायैषेति । यद्वा तेषां कालोऽपि सदानुगतो भक्तानुग्रहमात्रार्थस्वैरचेष्टात्मकप्रभावलक्षणो गुणो यस्य स इत्यर्थः । ततोऽपि तच्चेष्टानुसारेणैव मायया तत्तत्प्रवर्त्तनमिति भावः। तदु-

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

क्रम ।"योऽयं कालस्तस्यते व्यक्तबन्धोश्चेष्टामाहुश्चेष्टते येन विश्वम्" इति । तथा चोभयथापि न पारवश्यमित्यायातम्. इत्थमेव श्री-कपिलदेवेनापि "यः कालः पञ्चविंशकः" इति । "प्रभावं पौरुषं प्राहुः कालमेके यतो भयम्" इति च तत्र मायाऽवज्ञ्यत्वपुरुष-गुणात्वलक्षणमतद्वयमुपन्यस्तवान् । अत्र चास्य चेष्टा प्रभा-वस्य भक्तिविनोदायैव मुख्यावृत्तिः गुणोदूवोधादिकार्यन्तु तत्र क्षत एव भवतीति तत्र प्रवृत्त्याभास एव ततश्च पूर्वोक्तः स्वय-मेवेति स्वरूपशक्तेरेव विलासः । परस्तु तदाभासरूप एवे-त्याभासशक्तेर्मायाया एवान्तर्गतः । योऽयं काल इत्यादौ निमे-षादिरित्युक्तिस्तु द्वयोरभेदविवक्षयैवेति ज्ञेयम् । अत एवं व्याख्येयं यथा भृत्यस्यानुगतो भृत्यः अनुभृत्यः तथा तत्र तत्प्रभावल-क्षणस्य गुणस्याऽनुगत आभासरूपो गुणः अनुगुणः तथा च तेषां कालोऽपि अनुगुणो न तु साक्षाद्गुणोऽपि यस्येति ॥ ७ ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

कृष्णाय व्यासाय ॥ ५ ॥

स्वमायागुणं सत्त्वादिं प्रविश्य अधिष्ठाय बाध्यत्वं बाधकत्वञ्च गतः प्राप्तः गुणानां परस्परबाध्यत्वबाधकत्वलक्षणं वैषम्यगुणाधि-ष्ठातरि भगवत्यारोपितमित्यर्थः ॥ ६ ॥

स्वरूपतस्तु भगवान् सर्वत्र सम एवेत्याह-सत्त्वमिति । प्रकृतेरेव गुणाः न त्वात्मनो भगवतः प्रकृतेःस्वशक्तित्वेऽपि स्वरूपभूतत्वा-भावादिति भावः तस्मात् सर्वत्र दृश्यमानं भगवतो वैषम्यं गुण-वैषम्यमूलकमेव तच्च गुणवैषम्यं गुणानां ह्रासाधिक्यरूपं तच्च ह्रासाधिक्यं न यौगपद्येन भवति किन्तु क्रमेणैवेत्याह--न तेषामिति। ह्रासो बाध्यत्वहेतुः उल्लास आधिक्यं बाधकत्वहेतुः । तेच सत्त्वा-दीनां ह्रासाधिक्ये ततुद्भवानां देवासुररक्षसां ह्रासाधिक्याऽवगमानु-मेये ॥ ७ ॥

तत्र गुणानांस्ततो जाड्यादेव ह्रासाधिक्ययोरप्यकिञ्चित्कर-त्वात्तत्र तत्राधिष्ठातृत्वेन भगवत्प्रवेशमाह-जयेति । सत्त्वस्य जयकाले आधिक्यसमये देवानृषींश्च अभजत् । तदा सत्त्वं यथा अधिकमभूत्तथा तत्राधिष्ठानमपि तस्याधिकमभूदिति स तत्तद्देहं प्रविश्य तत्तद्वलमधिकयन् असुरराक्षसादीन् बाधत इत्यर्थः । एवं रजसो जयकाले असुरान् तमसो जयकाले यक्षरक्षांसि तस्य कालस्य अनुगुणः अनुरूपः सन्निति गुणाधिक्यस्यापि कारणं काल एव न तु स इत्यर्थः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नारदादिर्भिर्गीयते यतः परमम् पुण्यम् अतोहरेश्चरितम् प्रति पृश्नः कृतोऽतस्तत्प्रत्युत्तरदानार्थं हरेः कथां कथयिष्ये कृष्णाय मुनये कृष्णद्वैपायनं तत्त्वावगन्तारं तथा ॥ ५ ॥

निर्गुणः प्राकृतगुणतन्निबन्धनकर्मतज्जन्यदेहादिरहितः अत-एवाऽजः प्राकृतगुणहेतुकजन्मरहितः अतएव अव्यक्तः व्यक्तश्चि-दचिदात्मकं विश्वं तद्भिन्नः सर्वदोषास्पृष्ट इत्यर्थः भगवान् स्वाभाविकैश्वर्यादिषड्गुणयुक्तः प्रकृतेरिति पदं सामन्यतया परा-परशब्दवाच्यप्रकृतिद्वयपरम् ।

"भूमिरापोनलोवायुः खं मनोबुद्धिरेवच ।
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्" ॥

इति प्रकृतिद्वयात्परस्तदाश्रय इत्यर्थः अत एव स्वमायागुणं स्वमायागुणपरिणामं जीवविशिष्टं देहेन्द्रियसंघातमाविश्य अन्तर्या-मितया प्रविश्य बाध्यबाधकतां जीवानां देवासुरादीनां परस्परं या कर्मयोगाद्बाध्यबाधकता तां हेतुतया गतोभवति तत्तत्कर्मानु-सारेण तां तां बाधकतां च देहिभ्यो ददाति स्वयं तु समएवे त्यर्थः ॥ ६ ॥

स्वमायागुणमाविश्येत्युक्त्वा शक्तिगुणाः कार्यकारणरूपाः शक्तिमन्तं सर्वात्मानं न विमोहयन्ति तदात्मकत्वात् जीवात्मानं तु ह्रासवृद्ध्यादिरूपैर्विमोहयित्वा शुभाशुभानि कर्माणि तेन कारयन्ति अतदात्मकत्वादित्याह सत्त्वमित्यादिना सत्वंरजस्तमइति गुणाः प्रकृतेः भगवच्छक्तेः, अतोभगवति न प्रभावं कुर्वन्तीतिभावः आत्मनोजीवस्य तु न तदात्मका न भवन्ति तस्य सर्वात्म-त्वाभावात् अतस्ते न साधु असाधु च कर्म कारयन्तीतिभावः गुणास्ततज्जीवकर्मपरिपाककालानुसारेण विषमाभवन्ति न तु युगपदित्याह न तेषामिति ॥ ७ ॥

सत्त्वस्य जयकाले देवादिकर्तृकसात्त्विककर्मपरिपाककाले भग-वान् तत्कालानुगुणः सन् देवादीन् अभजत् तद्वृद्धिहेतुर्भवति रजसोजयकालेऽसुरान् तमसो जयकाले यक्षरक्षादीन् अभजदि त्यन्वयः ॥ ८ ॥

भाषाटीका ।

जो परम पुण्य माहात्म्य नारदादि ऋषियों से गाया जाता है । अब मैं श्रीकृष्ण मुनि (वेद व्यासजी) को नमस्कार करके हरि कथा को कहता हूं ॥ ५ ॥

जो पुरुष जिह्वा को पाकर कीर्त्तनीय विष्णु का कीर्त्तन नहीं करता है वह दुर्मति मोक्ष की निसेनी को प्राप्त होकर भी आरोहण नहीं करता है ॥ ० ॥

तस्मात् आनन्द रस सुन्दर श्रीगोविंद के माहात्म्य को नित्य जो श्रवण करते हैं कीर्त्तन करते हैं वे पुरुष कृतार्थ हैं इस में संशय नहीं ॥ ० ॥

तिसी से गोविंद चरणाश्रित महापुण्य प्रद इस कथा को हे नृपसत्तम ! आप श्रवण करौ ॥ ० ॥

प्रकृति से पर अज अव्यक्त भगवान् निर्गुण होकर भी अपने माया के गुणों में । प्रविष्ट होकर, बाध्य बाधक भाव को प्राप्त हुए हैं ॥ ६ ॥

सत्त्व रज और तम ये तीनो प्रकृति के गुण हैं आत्मा के नहीं । हे राजन् ! उन गुणों का ह्रास वा उल्लास एक ही बार नहीं होता है ॥ ७ ॥

विदन्त्यात्मानमात्मस्थं मथित्वा कवयोऽन्ततः ॥ ९ ॥
यदा सिसृक्षुः पुर आत्मनः परो रजः सृजत्येष पृथक् स्वमायया ।
सत्त्वं विचित्रासु रिरंसुरीश्वरः शयिष्यमाणस्तम ईरयत्यसौ ॥ १० ॥
कालं चरन्तं सृजतीश आश्रयं प्रधानपुम्भ्यां नरदेव ! सत्यकृत् ।
(१) (सतत्रतत्रोभयसिद्धिमाप्नुयाल्लिङ्गात्मनोलिङ्गगुणाश्च सन्ति ॥ ० ॥)
य एष राजन्नपि काल ईशिता सत्त्वं सुरानीकमिवैधयत्यतः ।
तत्प्रत्यनीकानसुरान्सुरप्रियो रजस्तमस्कान्प्रमिणोत्युरुश्रवाः ॥ ११ ॥
(स वा पुनः स्वसृष्टस्य स्थितिरक्षानुवृत्तये ।
सत्त्वं सुरगणान्विष्णुरुपबृंहयते मुहुः ॥ ० ॥)
अत्रैवोदाहृतः पूर्वमितिहासः सुरर्षिणा ।
प्रीत्या महाक्रतौ राजन् ! पृच्छतेऽजातशत्रवे ॥ १२ ॥

भाषाटीका

सत्त्व गुण के वृद्धिकाल में ईश्वर देव और ऋषियों के शरीर में प्रविष्ट होकर, और रजो गुण के वृद्धिकाल में असुरों के देह में प्रविष्ट होकर, तथा तमो गुण के वृद्धि काल में यक्ष राक्षसों के देह में प्रविष्ट होकर, तिस २ काल के अनुगुण उनकी वृद्धि करते हैं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

समस्यापि निमित्तभेदेन वैषम्ये दृष्टान्तः ज्योतिरादिरिव ज्योतिरग्निर्यथाकाष्ठादिषु जलं यथा पात्रेषु आकाशो यथा घटादिषु तथा भगवान्नानारूपश्चाभाति. ननु, तर्हि तद्वदेव विवेकेन किं न प्रतीयते तत्राह, संघातात्सुरादिदेहाश्च विविच्यते न पृथक् प्रतीयते तर्हि तान्भजतीति कुतोज्ञायते तत्राह, विदन्तीति, आत्मस्थं परमात्मानं कवयोनिपुणाः मथित्वा कार्यदर्शनलिङ्गेन विचार्य जानन्ति अन्ततःस्वभावकालकर्मादिवादनिषेधेन विदन्तीति पाठे वाशोऽपि ज्ञानमेव अत्रापि ज्योतिरादिरिवेतिद्रष्टव्यं यथा सूर्यकान्तादौ दाहदर्शनाज्ज्योतिर्ज्ञायते यथा च गन्धदर्शनाद्वायुरित्यादि ॥ ९ ॥

तदेवं मायागुणवशेनैतद्वैषम्यं न स्वाभाविकमित्युक्तम्. तर्हि गुणपारतन्त्र्यादनीश्वरत्वमाशङ्क्याह—यदा आत्मनोजीवस्य भोगाय पुरः शरीराणि परः परमेश्वरः सिसृक्षुर्भवति तदा साम्येन स्थितं रजः पृथक् सृजति विचित्रासु तासु पूर्षु रिरंसुः क्रीडितुमिच्छुर्यदा तदा सत्त्वं पृथक् सृजति शयिष्यमाणः संहरिष्यन्यदा तदा तमः पृथगीरयति प्रेरयति आधिक्यं नयतीत्यर्थः ॥ १० ॥

यदासिसृक्षुरित्यादिनिर्देशात्प्रतीतं कालपारतन्त्र्यं वारयन्प्रधानपुरुषपारतन्त्र्यमपिवारयति-कालमिति । हे नरदेव ! प्रधानपुरुषयोः निमित्तभूतयोः सत्यकृदमोघकर्ता ईशस्तयोः सहकारित्वेनाऽऽश्रयभूतं चरन्तं वर्तमानं कालं स्वयमेव सृजति स्वचेष्टारूपत्वात्कालस्य न तत्पारतन्त्र्यमित्यर्थः । तथाऽपि प्रस्तुते किमायातं तत्राह यएषकालः सत्त्वमेधयति वर्धयत्यतोहेतोरीशिताऽपीश्वरोपि सत्त्वप्रधानं सुरानीकं देवसमूहमेधयतीव तत्प्रत्यनीकानसुरान्सुरप्रतिपक्षान्प्रमिणोति हिनस्ति चेत्यन्वयः उरु प्रभूतं श्रवः कीर्तिर्यस्य सः कालशक्तिक्षुभितगुणगतवैषम्यमिह सन्निधिमात्रेणातदधिष्ठातरि स्फुरतीति प्रकरणार्थः ॥ ११ ॥

तदानीं तयोर्न सुरपक्षपातेन वधः किन्तु ब्रह्मशापेनासुरीं योनिं प्राप्तयोरनुग्रहार्थं एवेति वक्तुमितिहासमुपक्षिपति—अत्रैवेति । अत्र द्वेषादिरहितस्यापि दैत्यवधे नारदेनेतिहासः प्रस्तावितः ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

"स्वमायागुणमाविश्य बाध्यबाधकतां गतः" इत्यनेन तत्तद्बाध्यबाधकेषु देवासुरादिवर्गेषु ईश्वरस्यानुप्रवेश उक्तः कथमनुप्रविष्टो विज्ञायत इत्यपेक्षायां तत्तदनुप्रवेशे अनुप्रविष्टस्य विविच्य द्रष्टुमशक्यत्वे सम्यगुपायेन विवेचनीयत्वे च दृष्टान्तमाह–ज्योतिरिति । काष्ठादिषु ज्योतिःप्रभृतिवस्तुवत् अनुप्रविष्टोप्याभाति तद्गतदोषास्पृष्टः प्रकाशते. "अनश्नन्नन्यो अभिचाकशीति" इतिश्रुतेरिति भावः सङ्घातात्काष्ठादिसङ्घातादिव देहेन्द्रियभोक्तृवर्गरूप-

(१) इदमधिकत्वेन पठ्यते–विजय० ।

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

सङ्घाताच्च विविच्यते प्रकृतिपुरुषेश्वरतत्त्वयाथात्म्यविद्भिः प्रकृतिपुरुषाभ्यां विलक्षणत्वेन न ज्ञायते इत्यर्थः कवयस्तत्त्वत्रययाथात्म्यविदस्त्वात्मस्थं जीवात्मनि स्थितम् "य आत्मनि तिष्ठन्, यो विज्ञाने तिष्ठन्" इति श्रुतेः आत्मानं परमात्मानं मथित्वा विवेकपूर्वकं तद्भक्तियोगमभ्यस्येत्यर्थः अन्ततोऽनेकजन्मावसाने विदन्ति साक्षात्कुर्वन्ति स्वमायागुणमाविश्येत्यनेन प्रेरणपर्यन्तानुप्रवेशोऽभिसंहितः ॥ ९ ॥

तदेवगुणप्रेरकत्वं विवृणोति–यदेति । एषः परः पुरुषो भगवान्यदा स्वमायया स्वसङ्कल्परूपज्ञानेन प्रकृत्या वा आत्मनो जीवस्य, जात्यभिप्रायमेकवचनम् आत्मनामित्यर्थः । पुरः शरीराणि सिसृक्षुः स्रष्टुमिच्छुस्तदा रजः सृजति प्रेरयतीत्यर्थः तम ईरयतीत्यनेनैकार्थ्यात् यदा सृष्ट्यनन्तरं विचित्रासु पूर्षु देहेषु रिरंसुः रन्तुमिच्छुः सिरक्षिषुरित्यर्थः । तदा सत्त्वं सृजति. यदाचेश्वरः शयिष्यमाणः उपसञ्जिहीर्षुस्तदासौ परमपुरुषस्तम ईरयति ॥ १० ॥

अथ तदा तत्कालानुगुणोऽभजदिति सूचितं कालप्रेरकत्वं विवृणोति—कालमिति । हे नरदेव ! ईशः परमात्मा चरन्तं प्रवर्त्तमानमाश्रयं स्वव्याप्यतया शरीरभूतं कालं सृजति निमेषकाष्ठाद्यवस्थं करोति एवं कालं सृष्ट्वा प्रधानपुरुषाभ्यां चिदचिन्मण्डिभ्यां सत्यकृत् सत् चिद्व्यष्टिः त्यत् अचिद्व्यष्टिः तदुभयं करोतीति तथा सत्यच्छब्दयोश्चिदचिद्व्यष्टयोः प्रयोगः "तदनुप्रविश्य सच्चत्यच्चाभवत्" इत्यादि श्रुतौ प्रसिद्धस्तथा सत्यच्छब्दयोस्तत्परत्वे श्रुतिः । "अथ यद्देवेभ्यःप्राणेभ्यश्च तत्सत्, अथ यद्देवाः प्राणाश्च तत्त्यं तदेकया वाचा समभिव्याहृियते सत्यमिति" इति. देवाः देवाधिष्ठितानीन्द्रियाणि तेभ्यः परः तत्संसृष्टश्चेतनः सत् देवाद्यचिद्व्यष्टिस्तु त्यं तदेतदुभयं सत्यमित्येकया वाचा एकशब्देन समभिव्याहृियते वोच्यते इति तदर्थः । एवमीश्वरस्य तत्तज्जीवकर्मपरिपाकानुगुणकालप्रेरकत्वमुक्तं तच्चात्मत्वेन तदनुप्रवेशपूर्वकमिति च, ईश्वराधीनः कालो देवादीनां तत्तत्कर्मपरिपाकानुगुणसत्त्वादिगुणवृद्धिहेतुरिति वदन् सर्वान्तरात्मतया देवादिकर्मानुगुणं गुणान् प्रेरयतो नेश्वरस्य वैषम्यमित्युत्तरमुपसंहरति--यइति । हे राजन् ! ततः कर्मानुगुण्येनेश्वरस्य गुणकालप्रेरकत्वात् य एषः गुणप्रेरकः कालः कालशरीरकः तत्प्रेरकश्चेशिता ईश्वरः सत्त्वं कर्मपरिपाकायत्तकालकृतगुणोन्मेषसत्त्वगुणप्रचुरं सुरानीकमिव सुरानीकमेव 'इवशब्दोऽवधारणे' वर्द्धयति तस्यैव जयमावहतीत्यर्थः तद्वृद्धेस्तत्प्रतिपक्षक्षपणपूर्वकत्वात्सुराणां प्रियस्सन् तत्प्रत्यनीकान् सुरानीकप्रतिपक्षरूपान् रजस्तमःप्रचुरान् अभिणोति विनाशयति उरुश्रवाः विपुलकीर्तिः असुरानीकविनाशनेन वैषम्यादिसम्भावनया नापकीर्त्तिमानीश्वरः, किन्तु विपुलतमकीर्त्तिमान् इत्यर्थः ॥ ११ ॥

एवं सर्वभूतसुहृदः समस्येश्वरस्य देवासुरादिजयापजयहेतुत्वेपि कर्मानुगुण्याद्वैषम्याभाव उक्तः इदानीं तस्य सर्वभूतसुहृत्त्वे इतिहासं दर्शयति—अत्रेति । अत्रैव तस्य सर्वभूतसुहृत्त्व एव हे राजन् ! महाक्रतौ राजसूये प्रीत्या अत्यादरेण पृच्छते अजातशत्रवे युधिष्ठिराय सुरर्षिणा नारदेनेतिहास उदाहृतः ॥१२॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इममर्थमनुभाविकं करोति–ज्योतिरादिरिति । अयमर्थः ज्योतिरादीत्युत्तरायणादिकालादिगुणः केषाञ्चित्फलानामुत्साहं केषाञ्चिद्ध्रासं कुर्वन् यथा सत्त्वादिजयादिविषये उत्साहादिकालमनुवर्तमानो भाति तथेतिकथमव्यक्तत्वं हरेरिति तत्राह—संघातादिति, देहेन्द्रियादिकार्यकारणसंघाताच्च विविच्यते पृथग्भूतो न ज्ञायते अत्रापीदमेवोदाहरणं ज्योतिरादि घृतादि द्रव्यं दध्यादिभ्यो मथनात्पूर्वं न विविच्यते पृथग्भूतं न ज्ञायते न प्रतीयते तथात्मापीतिभावः "तेजोऽसितंत्रेधाविधीयते" इतिश्रुतेः । घृतस्य ज्योतिःशब्दाभिधेयत्वं प्रामाणिकं "दधिस्थघृतवत्काष्ठे वह्निवच्चजनार्दनः" इत्यादेश्च. ननु, यदि केनचिद्देहादिव्यतिरिक्तत्वेनायं ज्ञायते तर्हि दधिस्थघृतवदित्यादिनिदर्शयितुं शक्यं, तदेव कुत इत्याह—विदन्तीति । कवयः ब्रह्मादयः शास्त्रेण मथित्वा ततो निर्णीयात्मस्थं देहादिस्थमात्मानं विदन्ति जानन्ति किंचान्ततश्चरमनाशे विदन्तिं लभन्ते "लभनिष्पत्तौ" इतिधातोः नितरां प्राप्नुवन्तीत्यर्थः अनेन कवीनां ज्ञानमस्मिन्नर्थे प्रमाणमुक्तं भवति ॥ ९ ॥

देहादेर्विविक्तत्वेन ज्ञानं कस्मान्नोत्पद्यत इति आशंक्य सृष्टिशरीरेषु जीववत्प्रतिष्ठत्वाच्च तद्विषयं ज्ञानमित्यभिप्रेत्याह—यदा सिसृक्षुरिति । यदा परमात्मात्मनोर्थे निवासाय पुरः शरीराणि सिसृक्षुः स्रष्टुमिच्छति तदा गुणवैषम्यन्यायेन स्वेच्छया नियतो रजोगुणमुपादाय महदहंकारपञ्चमहाभूतानि सृष्ट्वा तैः प्रथक् तत्तद्योग्यतानुसारेण शरीराणि सृजति । यदा चेश्वरस्तासु विचित्रासु सुरनरतिर्यक्संज्ञितासु पुरीषु रिरंसुः जीवगतस्वादृष्टयोग्यतामनुसृत्य सुखादिकमुत्पाद्य तत्साक्षित्वेन क्रीडितुमिच्छति तदा स्थितिहेतुत्वात्सत्त्वगुणमुपादत्ते यदा शयिष्यमाणो योगनिद्रां चिकीर्षति तदाऽसौ तमोगुणमीरयति तच्छक्तिमुज्जृंभयति ॥ १० ॥

किञ्च चरंतमतीतानागतवर्तमानभेदेन वर्तमानं कालं सृजतीत्यर्थः ईश आश्रय इत्येताभ्यां पदाभ्यां सर्जनसामर्थ्यं सूचयति अत्र प्रमाणमाह—सत्यकृदिति, सत्यं मीमांसाशास्त्रं तस्य कर्ता ॥ इदानीं स्वसृष्टानामन्तःशयनप्रकारमाह—स तत्रेति, तत्र तत्र देहेषु स्थितम् उभयसिद्धि महति वस्तुनि महत्परिमाणम् महासामर्थ्यप्रकटनमणुपरिमाणमणुसामर्थ्यं वाप्नुयात् "अणोरणीयान्महतोमहीयान्" इतिश्रुतेः अत्रेदं लिङ्गात्मनो लिङ्गगुणाश्च सन्तीति निदर्शनं चशब्द एवार्थे यथा लिंगं शरीरस्थानीयं काष्ठं व्याप्य तिष्ठन्नग्निर्लिंगात्मेत्युच्यते तस्याग्निर्लिंगस्य काष्ठस्य गुणाः महत्त्वाणुत्वलक्षणाः सन्ति महति काष्ठे महान् अणुनिकाष्ठे अणुरग्निरिति "लिङ्गं शरीरे चिह्ने च साधने शेफभस्मनि" इत्यभिधानं. ननु सृष्टौ प्रवर्तमानेश्वरस्य निरपेक्षत्वात्स्वातंत्र्येण किञ्चित्कारणापेक्षासम्भवः तदनपेक्षत्वे मृद्दंडादेरिवशक्त्यभावेन कार्यसायग्यभाव इति तत्राह—लिङ्गात्मनः प्रधानादेः कारणस्य ये लिङ्गगुणाः कार्यजनकशक्तिलक्षणाः सन्ति ते च लिङ्गात्मनः शरीरस्वामिनो हरेः सन्ति विद्यमानास्तदधीनत्वादिति द्विरावृत्त्या योजनीयं "द्रव्यं कर्म च कालश्च" इत्यादेः यद्वा लिङ्गस्य प्रधानादेर्गुणाः कार्योत्पादनशक्तिलक्षणाः लिङ्गात्मनः पूर्णज्ञानेश्वर्यलक्षणस्वरूपस्य

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हरेः सन्ति तेषां स्वरूपाभिन्नत्वद्योतनाय चशब्दः ऊर्णनाभिस्तुरीवेमादिविना स्वरूपभूतलीलयैव यथा जालं करोति तथायमित्यर्थपरोवा प्रधानसृष्टिर्ब्रह्मणोऽस्तु अवान्तरसृष्टिरवान्तरकारणात्स्यात् कुलालादिदृष्टत्वादित्यतोवाह—स इति, तत्रतत्र कार्यकारणेषु प्रातिस्विकेषु स्थित्वोभयसिद्धिं जगत्कारणस्य जनकत्वलक्षणं कार्यस्य जन्यत्वफलं प्रापयति उभयोः शक्त्योरेतदधीनत्वादित्याह--लिंगात्मन इति, लिङ्गात्मनो मृदादेर्लिंगगुणाः कार्यजननशक्तयः सन्ति ते चानेन नियता इति शेषः, लिङ्गात्मनः कार्यस्य ये लिंगगुणा पृथुबुध्नोदराकारादिलक्षणाः सन्ति ते च "तत्रतत्रान्वितो विष्णुस्तत्तच्छक्तिप्रबोधकः" इत्यादेः अनेन बाध्यबाधकताङ्गत इत्येतत्स्पष्टीकृतं तथाहि तत्रतत्र देवासुरेषु उभयसिद्धिं जयपराजयलक्षणां कार्यसिद्धिं प्राप्नोति शिरस्त्राणवर्मादिलक्षणं वहतो भटस्य ये लिङ्गगुणाः शौर्यादिलक्षणाजयापजयौ वा ते च हर्यधीनाः "स वै बलं बलिनां चापरेषाम्" इत्यादेः । अत्र सर्वस्य हर्यधीनत्वदर्शनाय प्रधानपुंभ्यां कार्यकारणाभ्यां कालः सृजतीत्यङ्गीकारे प्रधानपुरुषावन्तरेण कालसृष्ट्यशक्तिर्हरेःप्रकटिता स्यादित्यन्यथा प्रतीतिनिरासायाचार्यैस्ताभ्यां सहेति व्याख्यातम् ॥ ० ॥

नन्वत्र साम्यगुणाधिकरणस्य हरेर्वैषम्याधिकरणत्वं कथमित्यस्य प्रश्नस्य परिहारः कथं स्फुटमायात इत्याशंक्य स्वतो देवप्रियत्वमसुराप्रियत्वं मनुष्याणामुभयत्वमेव समत्वं तत्तद्योग्यतावतां तेषामन्यथा तदतिलंघने त्वदभिमतवैषम्यप्राप्तिसाम्यहानी स्यातामित्याशयवानाह--य एष इति । य एष हरिः काले कालविषयेपि ईशिता कालस्यापि प्रवर्त्तनसमर्थः प्रधानपुरुषयोरीशितृत्वं किं वक्तव्यमित्यपिपदं स विष्णुः सुरानीकमिवस्थितं सत्त्वमेधयति सत्त्वस्य देहादिकारणत्वात्सत्त्वगुणप्रधानान् देवान् समेधयतीत्यर्थः रजस्तमस्कान् रजस्तमःस्वभावान् तत्प्रत्यनीकान् तेषां सुराणां शत्रुभूतान् असुरान् प्रमिणोति निहन्ति 'मिञ् हिंसायाम्' इति धातुः सुरप्रिय इत्यनेनासुराणामप्रियो मनुष्याणामुभयात्मकः स्वभावत इति ध्वनितं तदुक्तं—

"स्वभावतः प्रियत्वात्तु सदा देवप्रियो हरिः ।
अप्रियश्चासुराणां स स्वभावात्तूभयं नृणाम्" इति ।

सत्त्वमेधयति इत्यनेन या सुखयोग्यता रजस्तमस्कानित्यनेन या वधयोग्यता ये च देहेन्द्रियादेः कारणभूतास्त्रयोगुणाः यश्च गुणानामुत्साहकरः कालः यच्च तेषां त्रयाणां गुणानां पुण्यपापोभयलक्षणं कर्म यच्च मूलकारणभूतं प्रकृतिपुरुषस्वरूपं यच्च भक्त्यादिकमेतत्सर्वमवेक्ष्य देवानां भक्त्यादिगुणानितरेषां द्वेषादिदोषान्मनुष्याणामुभयात्मकमुत्पाद्यसुखासुखजयापजयजननमरणादिफलदातृत्वेन समइत्युक्तं । तदुक्तं—

"देशकालौ गुणांश्चैव भक्त्यादीनप्यवेक्ष्य तु ।
योग्यताञ्च तथा कर्म सम इत्यभिधीयते ॥
स्वतः प्रियोपि देवानामुत्पाद्यैव गुणानिमान् ।
इतरेषां तथा दोषान्सुखदुःखे ददात्यजः ॥
उभयं तु मनुष्याणामतः सम इतीरितः" ॥ इति

ननु सुरादिषु स्थितानां गुणदोषाणां तत्तत्कालीनत्वेनोत्तरकाले नाशसंभवेनानित्यत्वे नियमो न स्यादित्याशंक्य शास्त्रविहितत्वान्नियमोऽस्त्येवेत्याशयवानाह--उरुश्रवा इति, उरु बहु श्रूयते इत्युरुश्रवाः शास्त्रं नियमप्रतिपादकं यस्यस तथा तदप्युक्तम्—

"अनादिनियताश्चैव गुणदोषाः सुरादिषु ।
यथाक्रमं पुनश्चैव नियमाद्वर्द्धितास्तथा ॥

"विष्णुनैव ततो नित्यं विषमश्च जनार्दनः" इति नियमाद्वर्द्धितास्तथेत्येतत्कुत्रप्रमाणीक्रियते इत्यस्य उरुश्रवाइत्यत्रेति वक्तव्यम्. उरु वर्द्धनलक्षणं श्रवो यस्य स तथेत्यर्थः । ननु, वैषम्यं तदवस्थमेवाभूदिति चेन्न योग्यतानिमित्तत्वात्तदुक्तम् "नविष्णोर्विषमत्वं तु योग्यतापेक्षया क्वचित्" इति हरेर्योग्यतानियत्यायत् आगच्छद्वैषम्यलक्षणमुरुश्रवस्तदा तदस्तु विहितत्वादतउक्तं उरुश्रवा इति तदप्युक्तं "योग्यतायास्तन्नियत्या विषमत्वं भवेदिति" नन्वेवं तर्हि क्वापि वैषम्यं नेत्यापन्नमिति चेदुच्यते शुभाशुभयोर्विपर्यये शुभवतामशुभकर्म अशुभवतामसुराणां शुभकर्मानुसृतफलदानेसति विषमत्वं विष्णोर्दोषाय स्यादिति यदतस्तत्तद्योग्यताबलविहितशुभाशुभोभयकर्मानुसारेण तत्तत्फलस्य विकर्मेन्द्रियार्थे अशुभकर्मदैत्यबललक्षणस्य दानेनेश्वरवैषम्यमित्यत उरुश्रवा- इति जयस्तम्भकल्पनाम हरेर्युक्तं "इन्द्रस्यार्थेकथं दैत्यानवधीद्विषमो यथा" इत्यादि प्रश्नपरिहार इति सिद्धं "विषमत्वन्तु दोषाय शुभाशुभविपर्यये । अतस्तादृशवैषम्यम् ब्रह्मसूत्रे निराकृतम् ॥ शुभाशुभनियंतृत्वं न दोषो गुण एव सः । अतस्तदिष्टं कृष्णस्य ब्रह्मसूत्रकृतो विभोः" इतिवचनात् ॥ ११ ॥

सुरप्रिय इत्येतद्विवृणोति-स वा इति । अयमर्थः सत्त्वं सत्त्वगुणसम्पन्नान् मुहुरनुयुगमुपबृंहयते सम्यक् वर्द्धयति किं कारणमत्राह--पुनरिति । स्वेन सृष्टस्य जगतः पुनःपुनः स्थितिरक्षानुवृत्तये स्थितिपालनयोः प्रवर्तनार्थं वा इत्यनेन सृष्ट्यादिह्यष्टकमपि हरेरेवेति दर्शयति-यदा सिसृक्षुरित्यनेन, यः प्रस्तुतस्तं स इति तच्छब्देन परामृशति तत्रापीश्वरशब्देन रुद्र उपक्रान्त इति भ्रान्तिनिवारणाय विष्णुरिति यद्वा यत्र क्वापि रुद्रादुत्सर्जनादिकं प्रतीयते तदपि तत्स्थहरिणेति प्रकटनाय विष्णुरिति० ॥

सुरप्रिय इत्येतदितिहासेन दर्शयति-अत्रेति । सुरप्रिय एव नासुरप्रियो हरिरिति अन्ययोगव्यवच्छेदार्थ एव शब्दः ॥ १२--१४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ननु, तेषुतेषु तेनाविश्यमानं तेजः कथं न लक्ष्यते ? तत्राह-- ज्योतिरिति । यद्यपि तेषुतेषु निजतेजोंऽशेनाविष्टोऽसौ सङ्घातात् संमिश्रत्वात् न विविच्यते लोकैर्विवेक्तुं न शक्यते तथापि कवयो विवेकनिपुणाअन्ततो मथित्वा तस्यापि साहय्यं तेनापि शुद्धमित्यादिकासम्भावर्णानिषेधेन विविच्य तदंशमात्मस्थं तत्तदात्मनि प्रविष्टं आत्मानमीश्वरं विदन्ति तत्र हेतुगर्भो दृष्टान्तः, यस्मात्तेजः ज्योतिरादिपदार्थं इवाभाति दृष्टिष्विति शेषः । अयमर्थः यथा- नेदं मणेस्तेजःपूर्वमदर्शनात् । किन्तु तदातपसंयोगेन सौरं तेज एवात्र प्रविष्टमिति सूर्यकान्तादौ तूलादिदाहेन तदनुभविषु तदाभाति

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हरेः सन्ति तेषां स्वरूपाभिन्नत्वद्योतनाय चशब्दः ऊर्णनाभिस्तुरीवेमादिविना स्वरूपभूतलीलयैव यथा जालं करोति तथायमित्यर्थपरोवा प्रधानसृष्टिर्ब्रह्मणोऽस्तु अवान्तरसृष्टिरवान्तरकारणात्स्यात् कुलालादिदृष्टत्वादित्यतोवाह—स इति, तत्रतत्र कार्यकारणेषु प्रातिस्विकेषु स्थित्वोभयसिद्धिं जगत्कारणस्य जनकत्वलक्षणं कार्यस्य जन्यत्वफलं प्रापयति उभयोः शक्त्योरेतदधीनत्वादित्याह--लिंगात्मन इति, लिङ्गात्मनो मृदादेर्लिंगगुणाः कार्यजननशक्तयः सन्ति ते चानेन नियता इति शेषः, लिङ्गात्मनः कार्यस्य ये लिंगगुणा पृथुबुध्नोदराकारादिलक्षणाः सन्ति ते च "तत्रतत्रान्वितो विष्णुस्तत्तच्छक्तिप्रबोधकः" इत्यादेः अनेन वाध्यवाधकताङ्गत इत्येतत्स्पष्टीकृतं तथाहि तत्रतत्र देवासुरेषु उभयसिद्धिं जयपराजयलक्षणां कार्यसिद्धिं प्राप्नोति शिरस्त्राणवर्मादिलक्षणं वहतो भटस्य ये लिङ्गगुणाः शौर्यादिलक्षणाजयापजयौ वा ते च हर्यधीनाः "स वै बलं बलिनां चापरेषाम्" इत्यादेः । अत्र सर्वस्य हर्यधीनत्वदर्शनाय प्रधानपुंभ्यां कार्यकारणाभ्यां कालः सृजतीत्यङ्गीकारे प्रधानपुरुषावन्तरेण कालसृष्टत्वशक्तिर्हरेःप्रकटिता स्यादित्यन्यथा प्रतीतिनिरासायाचार्यैस्ताभ्यां सहेति व्याख्यातम् ॥ ० ॥

नन्वत्र साम्यगुणाधिकरणस्य हरेर्वैषम्याधिकरणत्वं कथमित्यस्य प्रश्नस्य परिहारः कथं स्फुटमायात इत्याशंक्य स्वतो देवप्रियत्वमसुराप्रियत्वं मनुष्याणामुभयत्वमेव समत्वं तत्तद्योग्यतावतां तेषामन्यथा तदतिलंघने त्वदभिमतवैषम्यप्राप्तिसाम्यहानी स्यातामित्याशयवानाह--य एष इति । य एष हरिः काले कालविषयेपि ईशिता कालस्यापि प्रवर्त्तनसमर्थः प्रधानपुरुषयोरीशितृत्वं किं वक्तव्यमित्यपिपदं स विष्णुः सुरानीकमिवस्थितं सत्त्वमेधयति सत्त्वस्य देहादिकारणत्वात्सत्त्वगुणप्रधानान् देवान् समेधयतीत्यर्थः रजस्तमस्कान् रजस्तमःस्वभावान् तत्प्रत्यनीकान् तेषां सुराणां शत्रुभूतान् असुरान् प्रमिणोति निहन्ति 'मिञ् हिंसायाम्' इति धातुः सुरप्रिय इत्यनेनासुराणामप्रियो मनुष्याणामुभयात्मकः स्वभावत इति ध्वनितं तदुक्तं—

"स्वभावतः प्रियत्वात्तु सदा देवप्रियो हरिः ।
अप्रियश्चासुराणां स स्वभावादुभयं नृणाम्" इति ।

सत्त्वमेधयति इत्यनेन या सुखयोग्यता रजस्तमस्कानित्यनेन या वधयोग्यता ये च देहेन्द्रियादेः कारणभूतास्त्रयोगुणाः यश्च गुणानामुत्साहकरः कालः यच्च तेषां त्रयाणां गुणानां पुण्यपापोभयलक्षणं कर्म यच्च मूलकारणभूतं प्रकृतिपुरुषस्वरूपं यच्च भक्त्यादिकमेतत्सर्वमवेक्ष्य देवानां भक्त्यादिगुणानितरेषां द्वेषादिदोषान्मनुष्याणामुभयात्मकमुत्पाद्यसुखासुखजयापजयजननमरणादिफलदातृत्वेन समइत्युक्तं । तदुक्तं—

"देशकालौ गुणांश्चैव भक्त्यादीनप्यवेक्ष्य तु ।
योग्यतां च तथा कर्म सम इत्यभिधीयते ॥
स्वतः प्रियोपि देवानामुत्पाद्यैव गुणानिमान् ।
इतरेषां तथा दोषान्सुखदुःखे ददात्यजः ॥
उभयं तु मनुष्याणामतः सम इतीरितः" ॥ इति

ननु सुरादिषु स्थितानां गुणदोषाणां तत्तत्कालीनत्वेनोत्तरकाले नाशसंभवेनानित्यत्वे नियमो न स्यादित्याशंक्य शास्त्रविहितत्वान्नियमोस्त्येवेत्याशयवानाह--उरुश्रवा इति, उरु बहु श्रूयते इत्युरुश्रवाः शास्त्रं नियमप्रतिपादकं यस्यस तथा तदप्युक्तम्—

"अनादिनियताश्चैव गुणदोषाः सुरादिषु ।
यथाक्रमं पुनश्चैव नियमाद्वर्द्धितास्तथा ॥

"विष्णुनैव ततो नित्यं विषमश्च जनार्दनः" इति नियमाद्वर्द्धितास्तथेत्येतत्कुत्रप्रमाणीक्रियते इत्यस्य उरुश्रवाइत्यत्रेति वक्तव्यम्. उरु वर्द्धनलक्षणं श्रवो यस्य स तथेत्यर्थः । ननु, वैषम्यं तदवस्थमेवाभूदिति चेन्न योग्यतानिमित्तत्वात्तदुक्तम् "नविष्णोर्विषमत्वं तु योग्यतापेक्षया क्वचित्" इति हरेर्योग्यतानियत्यायत्, आगच्छद्वैषम्यलक्षणमुरुश्रवस्तदा तदस्त्रविहितत्वादतउक्तं उरुश्रवा इति तदप्युक्तं "योग्यतायास्तन्नियत्या विषमत्वं भवेदिति" नन्वेवं तर्हि क्वापि वैषम्यं नेत्यापन्नमिति चेदुच्यते शुभाशुभयोर्विपर्यये शुभवतामशुभकर्म अशुभवतामसुराणां शुभकर्मानुसृतफलदानेसति विषमत्वं विष्णोर्दोषाय स्यादिति यदतस्तत्तद्योग्यताबलविहितशुभाशुभोभयकर्मानुसारेण तत्तत्फलस्य विकर्मेन्द्रियार्थं अशुभकर्मदैत्यबललक्षणस्य दानेनेश्वरवैषम्यमित्यत उरुश्रवा- इति जयस्तम्भकल्पनाम हरेर्युक्तं "इन्द्रस्यार्थेकथं दैत्यानवधीद्विषमो यथा" इत्यादि प्रश्नपरिहार इति सिद्धं "विषमत्वन्तु दोषाय शुभाशुभविपर्यये । अतस्ताहशवैषम्यम् ब्रह्मसूत्रे निराकृतम् ॥ शुभाशुभनियंतृत्वं न दोषो गुण एव सः । अतस्तदिष्टं कृष्णस्य ब्रह्मसूत्रकृतो विभोः" इतिवचनात् ॥ ११ ॥

सुरप्रिय इत्येतद्विवृणोति-सखा इति । अयमर्थः सत्त्वं सत्त्वगुणसम्पन्नान् मुहुरनुयुगमुपबृंहयते सम्यक् वर्द्धयति किं कारणमत्राह--पुनरिति । स्वेन सृष्टस्य जगतः पुनःपुनः स्थितिरक्षानुवृत्तये स्थितिपालनयोः प्रवर्तनार्थं वा इत्यनेन सृष्ट्याविश्लिष्टकमपि हरेरेवेति दर्शयति-यदा सिसृक्षुरित्यनेन, यः प्रस्तुतस्तं स इति तच्छब्देन परामृशति तत्रापीश्वरशब्देन रुद्र उपक्रान्त इति भ्रान्तिनिवारणाय विष्णुरिति यद्वा यत्र क्वापि रुद्रादुत्सर्जनादिकं प्रतीयते तदपि तत्स्थहरिणेति प्रकटनाय विष्णुरिति० ॥

सुरप्रिय इत्येतदितिहासेन दर्शयति-अत्रेति । सुरप्रिय एव नासुरप्रियो हरिरिति अन्ययोगव्यवच्छेदार्थ एव शब्दः ॥ १२--१४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ननु, तेषुतेषु तेनाविश्यमानं तेजः कथं न लक्ष्यते ? तत्राह-- ज्योतिरिति । यद्यपि तेषुतेषु निजतेजोंशेनाविष्टोऽसौ सङ्घातात्वसंगिथत्वात् न विविच्यते लोकैर्विवेक्तुं न शक्यते तथापि कवयो विवेकनिपुणाअन्ततो मथित्वा तस्यापि साहय्यं तेनापि युद्धमित्यादिकासम्भावर्णानिषेधेन विविच्य तदंशमात्मस्थं तत्तदात्मनि प्रविष्टं आत्मानमीश्वरं विदन्ति तत्र हेतुगर्भो दृष्टान्तः, यस्मात्तेजः ज्योतिरादिपदार्थे इवाभाति दृष्टिष्विति शेषः । अयमर्थः यथा- नेदं मणेस्तेजःपूर्वमदर्शनात् । किन्तु तदातपसंयोगेन सौरं तेज एवात्र प्रविष्टमिति सूर्यकान्तादौ तूलादिदाहेन तदनुभविषु तदाभाति

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यथाच पूर्ववदेव वायावयंगन्धः पार्थिवएव प्रविष्ट इति तेष्वाभाति तथात्रापीति अथवा नन्वेवं तत्रतत्रावेशितैः स्वतेजोभिरेव क्रीडती त्यागतं कथं तर्हितैरपि क्रीड़तीति दृश्यते तत्राह—ज्योतिरिति । यथा चक्षुरादिज्योतिर्भिः स्वांशे रूपमात्रे प्रकाश्यमाने गन्धादि गुणप्रका मृदेवासौ प्रकाशत इति प्रतीयते यथा कर्णादिनभसा स्वांशे शब्दमात्रेऽपि गृह्यमाणे दुन्दुभिरेवासाविति प्रतीयते । तच्च तत्तद्गुणानां संमिश्रत्वादेव भवति न वस्तुतः । तथाकवय आत्मानम् ईश्वरं तत्तत्संघातस्थत्वेनान्यैरजानन्ति विविक्तमपि आत्मस्थं स्वांश ज्योतिर्भिरेव क्रीडन्तं जानन्तीत्यर्थः ॥ ६ ॥

तदेवं युद्धादिनिजलीलाभिर्भक्तविनोदनमेव प्रयोजनं विश्वपालनन्तु स्वत एव ततः सिद्ध्यतीत्युक्त्वा सृष्टिप्रलययोः प्रकृतीक्षणादावपि सर्वशङ्कानिरासार्थमिति दिशम् त्रिष्वप्यविशेषमाह—यदेति । यदा यत्र स्वचेष्टालक्षणे काले एष परः परमेश्वरः स्वमायया भक्तकृपया आत्मनः पुरः प्राचीनसृष्टिगतसाधकभक्तरूपाणि स्वस्याधिष्ठानानि सिसृक्षुर्भवति । प्रकृत्या सह तेषु लीनेषु आविर्भावनार्थमीक्षां करोति । तदा पृथक् स्वरूपशक्तेरितरा असौ जीवमायाख्या शक्तिः पूर्ववत्तच्चेष्टात्मकप्रभावाभासोद्दीप्ता रजः सृजति स्वांशभूताद्गुणत्रयसाम्याद्व्यक्तात्तद्विक्षिपति उद्बोधयतीति वा । यथा वा पृथङ्मायानुगत एष काल एव सृजति तथाऽसौ पदेन च काल एवोच्यते अथ विचित्रासु नानागुणवैचित्र्यवतीषु तल्लक्षणासु पूर्षु यदा रन्तुमिच्छुर्भवति तदा सत्त्वं सृजति । यदा पुनस्ताभिरेवमिलित्वा शयिष्यमाणः शयितुमिच्छुर्भवतीत्यर्थः । तदासौ तमः सृजतीति । ततो भक्तनिमित्तमेव सर्वा एव सृष्ट्यादिक्रियाः प्रवर्त्तन्त इति भावः । यथाङ्गीकृतमेकादशस्य तृतीये टीकाकृद्भिरपि किमर्थं ससर्ज । स्वमाऽऽत्मप्रसिद्धये । स्वं मिमीते प्रमिमीते य उपास्ते स स्वमाता । तस्यात्मनो जीवस्य प्रकृष्टायै सिद्धय इति । शयनमत्र पुरुषावतारस्य कदाचित् प्रलयोदधौ योगनिद्रा कदाचिद्भगवत्प्रवेशो वा यद्यपि सर्वेष्वपि जीवेषु अन्तर्यामितया परमेश्वरस्तिष्ठति तथापि तत्रासंसक्तत्वादस्थित एव भवति । स्वभक्तेषु तु समासक्तत्वान्न तथेति । न च तत्सङ्गादौ तस्येच्छेति यथोक्तव्याख्यानमेव बलवत् । तथा च श्रीगीतासु "मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः । न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्" इति "ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्" इति च । उक्तञ्च हरिभक्तिसुधोदये । "भक्तानां हृदयं शान्तं सन्निधो मे प्रियं गृहम् । वसामि तत्र शोभैव वैकुण्ठाख्यादिवर्णना" इति ॥ १०

ततो य एष चेष्टारूपः कालः स सत्त्वम् । सत्त्वप्रधानं सुरानीकमेधयतीव तत एव तत्प्रत्यनीकान् रजस्तमःप्रधानानसुरान् प्रमिणोतीव हिनस्तीव । ये तु देवेषु भक्ता असुरेषु भक्तद्वेषिणश्च तान् स्वयं पालयति हिनस्ति चैवेति पूर्वमेवोक्तम् । तस्मात्तच्चेष्टालक्षणस्य कालस्यैवं वार्त्ता तस्मादीशितापि एधयतीव प्रमिणोतीव चेति । हे राजन्निति पूर्वाभिप्रायमेव । ननु यदि चेष्टितुः प्रयोजनं न भवति तर्हि कथं कदाप्यसुरानपि स्वपक्षान् विधाय देवैर्न युज्येतेति तत्राह—सुरप्रियः सुरेषु वर्त्तमानाः प्रिया भक्ता यस्य सः । सत्त्वप्रधानेषु सुरेषु प्रायशस्तेषां सर्वेषामनुगमनेनैव तस्यानुगमनम् । कदाचिद्बृहस्पत्यादिषु महत्स्वपराधे तेषामाभिल्येन सुरत्वाच्छादनात्तेषां तस्य तेष्वनुगमनं न स्यादिति जयकाल तु सत्त्वस्येत्याद्युक्तमिति भावः । ननु कथं तेऽपि ताननुगच्छन्ति तत्राह—रजस्तमस्कानिति । अत्यन्तभगवद्बहिर्मुखताकयोस्तयोर्गुणयोररोचकत्वादेवेति भावः ।, तर्ह्यसौ सदेवासुराणां निग्रहमेव करोतीत्यथाप्यसामञ्जस्यमेवेत्याशङ्क्याह उरुश्रवाः वैरेण यं नृपतय इत्यादि । अहोबकीयमित्यादिभिः उरु सर्वतो विस्तृतं महत्तमं वा श्रवः कीर्तिर्यस्य सः । तेषामप्यनुग्रहं करोतीति भावः ॥ ११ ॥

तदेवं सिद्धान्तं प्रदर्श्य तत्र स्वभक्तानुग्रहमात्रप्रयोजनस्तत्तत्करोति परेश इति प्रतिज्ञातार्थोदाहरणाय प्रह्लादजयविजयादिकृपासूचकमितिहासविशेषमाह—अत्रैवेति । अत्र विद्वेषादिराहित्येन भक्तानन्दनार्थं स्वैरलीलामात्रत्वे असुराणामपि परमहितपर्य्यवसायकस्वभावत्वेच । एवकारेण सिद्धान्तान्तरं व्यावर्त्यते ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सत्त्वादीनामाधिक्यन्यूनताभ्यामेव तदधिष्ठानस्याप्याधिक्यन्यूनते इत्यत्र दृष्टान्तमाह—ज्योतिर्यथा—काष्ठेषु जलं—यथा—पात्रेषु आकाशं यथा घटेषु अधिकेष्वधिकरूपं न्यूनेषु न्यूनरूपं तिष्ठदपि न विषममुच्यते । तथैव देवनिष्ठसत्त्वेऽधिके सति सोऽपि देवेष्वधिकरूपः तदैवासुरनिष्ठे रजसि न्यूने तत्र न्यूनरूप इत्यसुराणां देववाध्यत्वे देवानामसुरबाधकत्वे सति सोऽपि देवपक्षपाती असुरबाधक इत्युच्यते । एवमसुरनिष्ठरजस्यधिके सोऽप्यसुरपक्षपाती देवबाधक इति लोकप्रतीत्या विषमोऽप्यविषम एवेत्यर्थः । जयकाले तु सत्त्वस्य देवर्षीनऽभजदित्याधिकभजनमेव तत्र विवक्षितं तदेव देवपक्षपातित्वव्यञ्जकम् । नत्वजयकाले केवलमभजनमेवेति ज्ञेयम् । ननु काष्ठादिषु ज्योतिरादिर्यथाऽस्मिन् काष्ठेऽयं वह्निरस्त्येवं विवेकेन प्रतीयते तथा देवादिदेहेऽपि भगवान् किं न प्रतीयते तत्राह सङ्घातात् देवादिदेहात् न विविच्यते सत्त्वन्य इव न पृथक् प्रत्यक्षीभवतीत्यर्थः । तर्हि स तान् भजतीति कुतो ज्ञायते तत्राह—विदन्तीति । आत्मस्थं देहस्थं परमात्मानं कवयो निपुणा मथित्वा कार्यदर्शनलिङ्गनानुमानाज्जानन्ति । अन्ततः स्वभावकर्मादिवादनिषेधेन विन्दन्तीति पाठेऽपि लभन्ते जानन्तीत्येवार्थः । नन्विन्द्रादिपक्षपाती भगवान् कदाचित् सर्वैः प्रत्यक्षीभूत एवासुरान् हन्ति । तथैव रजस्तमसोरपि वृद्धौ सत्यां कदाचिदसुरादीनामपि पक्षपाती भवन् देवादीन् हिनस्तु तदैवोक्तयुक्त्या तस्य साम्यं सिद्ध्येदित्यत आह—ज्योतिरादिरिवेति तमेव श्लोकं तन्त्रेणार्थान्तराभिधायकं ज्योतिरादिरिव ज्योतिरादिगतं रूपरसगन्धस्पर्शं यथा सङ्घाते तद्वति वस्तुनि आभाति स्पष्टतया भासते किञ्चित्तथा किञ्चित् सङ्घातात्तस्मान्न विविच्यते न पृथक् स्पष्टमाभाति

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

भातिच किन्तु तदन्तर्गततयैव भाति एवमेव जगत्यस्मिन् देवासुरादिषु मध्ये भगवान् क्वचित् स्पष्टं भासते। क्वचित्तद-न्तर्गतश्च तिष्ठतीत्यर्थः । तत्र ज्योतिषः सत्त्वप्राधान्यादनाव-रकत्वात् तद्गतं रूपं यथा किञ्चिद्दूरेऽपि शुक्लमिदं क्षीरमिति सुदूरे लक्षद्वयेऽपि चन्द्रोऽयं शुक्ल इति तत्र तत्र नयनेन्द्रियेण गृहीतं स्पष्टमाभाति तथैव देवादेः सत्त्वप्राधान्यात् सत्त्वेना-नावरणात्तद्गतो भगवांस्तत्पक्षपाती स्पष्टमेवोपेन्द्रादिरूपं आभाति यथा च जलादेस्तमोरजःप्राधान्यात्तेनावरणात्तद्गतं शब्दरसगन्धस्पर्शो न स्पष्टमाभाति किन्तु तद्गतः पदार्थस्य योग एवेन्द्रियगोलकेषु तमोरजसोरपि किञ्चित् सत्त्वसत्त्वात् सर्वथा आवरणाभावादेव तथाहि रसनायां रसवतो योग एव रसः। श्रोत्रे शब्दवत् आकाशस्य योगे सत्येवशब्दः । त्वचि शैत्यादिमद्वस्तुयोग एव स्पर्शः । नासायां गन्धवतो वायो-र्योग एव गन्ध इति तथैवासुरराक्षसादेरजस्तमःप्राधान्यात्ते-नावरणात्तद्गतो भगवांस्तत्पक्षपाती न स्पष्टमाभाति 'अभ्र मेघातपाभ्यामावरणानावरणो सूर्यस्य यथा तथैव तमःसत्त्वाभ्यां भगवतो ज्ञेये । ननु तर्हि स्पष्टमानाभावे असुरादिपक्षपा-तित्वं तस्य कथं प्रतीमस्तत्राह—विदन्तीति। देवपराभवादिकार्य दर्शनलिङ्गेन जानन्तीत्यर्थः ॥ ९ ॥

नचैवं गुणतारतम्येन तस्याधिष्ठातृत्वतारतम्यलक्षणयन्त्र-णेन गुणाधीनत्वमाशङ्क्यं किन्तु गुणानामपि स्रष्टुस्तस्य तत्तत् सर्वस्वैरलीलामयमेवेत्याह--यदा आत्मनो जीवस्य भोगाय पुरः शरीराणि परः परमेश्वरः सिसृक्षुर्भवति तदा साम्येन स्थितं रजः पृथक् सृजति । विचित्रासु तासु पूर्षुरिरंसु शिष्टपालनलक्षणां रमणांचिकीर्षुः सत्त्वं पृथक् सृजति शयिष्यमाणः संहरिष्यन् तमः पृथगीरयति प्रेरयति ॥ १० ॥

यदा सिसृक्षुरित्यादिनिर्देशात् प्रतीतं कालपारतन्त्र्यमपि वारयति—कालमिति। हे नरदेव ! सहकारित्वेनाश्रयभूतं चरन्तं वर्त्तमानं स्वयमेव सृजति कालस्य तच्चेष्टारूपत्वात् । अयमर्थः । जगत् सृष्ट्यादिकं हि तस्य लीलयैव, सा च स्वेच्छाधीनैव तत्र यदा सिसृक्षा भवति तदा रजो वृद्धिसृष्टिकालो जायते यदा पिपालयिषा तदा सत्त्ववृद्धिपालनकालः । यदा सं जिहीर्षा तदा तमोवृद्धिनाशकाल इति कालविशेषस्तेनैव सृज्यते तत्र यदा सृष्ट्यादिकालस्तदैव सिसृक्षादिकं स्यादिति यदा शब्दवाच्यः कालविशेष एव स तु सृज्य एव इति, जयकाले तु सत्त्वस्येत्यादिनापि प्रतीतं कालपारतन्त्र्यं वारितमिति-प्रधानेन मायाशक्त्या पुरुषेण स्वांशेन च सह वर्त्तमानः एवं स सर्वकारणत्वात् तस्यैव स्वातन्त्र्यं तत्कार्यत्वाज्जगतस्त-दधीनत्वं । ननु, तत् कार्यं जगदवस्त्वेव अवस्तुनः किमधीन-त्वानधीनत्वविचारेणेति केचिदाहुस्तत्राह सत्यकृत् भगवच्छ-क्तिकार्यस्य विश्वस्य मिथ्यात्वानर्हत्वात् । कार्यमात्रस्यैव मिथ्यात्वे तदनुमेये भगवत्यपि प्रमाणत्वाभावः प्रसज्जेदिति भावः "सत्यं ह्येवेदं विश्वमसृजते"ति माध्वभाष्य प्रमाणिता श्रुतिश्च अतः कालस्य तत्कार्यत्वात्कार्यधर्मः कारणेप्युपचरित इत्याह--य एव इति। अतएवईशः परमेश्वरोपि सत्त्वं सत्त्वप्रधानं सुरानीकमेध-यतीवेत्यर्थः तत्प्रत्यनीकान् सुरप्रतिपक्षान् प्रमिणोति हिनस्तीवेत्यर्थः। तदेवं वैषम्यं गुणस्यैव नान्यस्य तत्र काल एव निमित्तं यथा पुरुष सृज्यत्वाधीनत्वाधिष्ठेयत्वेपि गृहाणामुष्णत्व शैत्यादिकं गृहाणामेव न पुरुषस्य तथा, किञ्च सुरप्रिय इति अथवा सुराणां भक्तत्वाद्वैषम्यमपि भूषणमेव नतु दूषणमेवेति पृथगेव सिद्धान्तः यदुक्तम् "समोहं सर्वभूतेषु" इति। कदाचित् सुराणामसुरपरा-भूतत्वन्तु हितैषिणा भगवतैव तन्मत्ततानिवारणार्थं क्रियत इति ज्ञेयं । ननु, तस्य सर्वप्रियत्वं सर्वसुहृत्त्वञ्च कथमित्यत आह—उरुश्रवाः "अहो बकीयं स्तनकालकूटम्" इत्यादि वाक्य-प्रकाशितानि महादुश्चेष्टितपूतनादिगतिप्रदत्वलक्षणयशांस्येव सर्वप्रियत्वं सर्वसुहृत्त्वञ्च विख्यापयन्तीतिभावः ॥ ११ ॥

उक्तमेवार्थं । स्पष्टमेव बोधयितुमितिहासमुपाक्षिपति अत्रैव साम्य सौहार्दप्रियत्वेष्वर्थेषु ॥ १२—१४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स्वमायागुणमाविश्येत्युक्तं तत्र प्रविष्टस्तत्तद्दोषाऽस्पृष्टएव भगवान् वर्त्तते अज्ञैर्दुर्ज्ञेयोपि तत्वज्ञैर्ज्ञायते इत्याह— ज्योतिरा-दिरिवेति। काष्ठादिषु ज्योतिरिव घनादिषु वायुरिव जलादिषु खमिव सञ्जीवेषु मायागुणकार्येषु देहेन्द्रियादिसंघातेषु तत्तद्दो-षास्पृष्टएव भगवान् आभाति प्रकाशते तथापि संघातात् न विविच्यते भोक्तृभोग्यदेहविलक्षणतया भोक्तृभोग्यनियन्तृपदार्था-नभिज्ञैर्न ज्ञायते कवयः क्रान्तदर्शिनो भोक्तृभोग्यनियन्तृस्वरूपया-थात्म्यज्ञाः आत्मस्थं देहेन्द्रियादिसहिते आत्मनि "य आत्मनि तिष्ठन्" इत्यादिश्रुतिप्रसिद्धे जीवे प्रेरकतया स्थितम् आत्मानं परमेश्वरम् मथित्वा अन्नमयादिभ्यो चेतनेभ्यो भोग्यभूतेभ्यः भोक्ता विज्ञानमयोऽन्ते वर्णितस्तदन्ते नियन्तानन्दमय इत्येवं मथनं कृत्वा चतुर्भ्यः कोशेभ्योंते वर्त्तमानं विदन्ति जानन्ति साक्षात्कुर्वन्ती त्यर्थः ॥ ९ ॥

किञ्च जीवहितायैव सृष्ट्यादि कालानुसारेण गुणानपिवै-षम्यादिदोषास्पृष्टोभगवानेव प्रेरयतीत्याह यदेति एषः परः परमात्मा आत्मनः समष्टिव्यष्टिजीवानां जातावेकवचनम् नित्यो नित्यानां चेतनश्चेतनानानामेको बहूनामिति श्रुतौ जीवानां बहुत्वात् पुरः सिसृक्षुः समष्टिशरीराणि सिसृक्षुर्भवति यदा तदा स्वमायया स्वकीयया प्रकृत्याख्यया शक्त्या हेतुभूतया पृथक् रजः सृजति प्रवर्तयति विचित्रासु तासु पूर्षुरिरंसुः पालनली-लया क्रीडितुमिच्छुः सत्त्वमीरयति प्रेरयति शयिष्यमाणः संहरि-ष्यन् पृथक् पृथक् तम ईरयति ॥ १० ॥

कालमपि स्वशक्तिभूतं भगवानेव परमाण्वादिरूपेण सृजति नतु तावतापि विषमोभवतीत्याह–कालमिति। चरन्तमित्युपलक्षणं जङ्गमं स्थावरं च प्रति आश्रयं तेषामुत्पत्तिस्थित्यादिनिमित्तं परमाण्वादिद्विपरार्धान्तरूपं सृजति किम्बहुना विविधविचित्र-विश्वकर्तृत्वेपि भगवतोवैषम्यादिदोषलेशवातगन्धस्पर्शित्वं नास्ती-त्याशयेनाह हे नरदेव ! प्रधानपुंभ्यां स्वप्रकृतिभ्यां सत्यमेव विश्वं करोतीति सत्यकृत् अथैनमाहुः सत्यकर्मेतिसत्यं ह्येवेदमसौ सृजते

दृष्ट्वा महाद्भुतं राजा राजसूये महाक्रतौ ।
वासुदेवे भगवति सायुज्यं चेदिभूभुजः ॥ १३ ॥
तत्रासीनं सुरऋषिं राजा पाण्डुसुतः क्रतौ ।
पप्रच्छ विस्मितमना मुनीनां शृण्वतामिदम् ॥ १४ ॥

युधिष्ठिर उवाच ।

अहो अत्यद्भुतं ह्येतद्दुर्लभैकान्तिनामपि ।
वासुदेवे परे तत्त्वे प्राप्तिश्चैद्यस्य विद्विषः ॥ १५ ॥
एतद्वेदितुमिच्छामः सर्व एव वयं मुने ! ।
भगवन्निन्दया वेनो द्विजैस्तमसि पातितः ॥ १६ ॥
दमघोषसुतः पाप आरभ्य कलभाषणात् ।
सम्प्रत्यमर्षी गोविन्दे दन्तवक्त्रश्च दुर्मतिः ॥ १७ ॥
शपतोरसकृद्विष्णुं यद्ब्रह्म परमव्ययम् ।
श्वित्रो न जातो जिह्वायां नान्धं विविशतुस्तमः ॥ १८ ॥
कथं तस्मिन् भगवति (१) दुरवग्राह्यधामनि ।
पश्यतां सर्वलोकानां लयमीयतुरञ्जसा ॥ १९ ॥
एतद्भ्राम्यति मे बुद्धिर्दीपार्चिरिव वायुना ।
ब्रूह्येतदद्भुततमं (२) भगवांस्तत्र कारणम् ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

इतिश्रुतेः। उक्तार्थमुपसंहरति, हेराजन् ! एष भगवान् यत ईशिता तत्तत्कर्मफलदानादिना सर्वभोक्तृभोग्यवस्तुनियन्ता अतः काले असुरक्षयस्य सुरवृद्धेश्च काले सत्त्वं सत्त्वप्रधानं सुरानीकम्। एधयत्येव इवशब्द एवकारार्थे तत्प्रत्यनीकान् सुरानीकविरोधिनोऽसुरान् प्रहिणोति हिनस्ति ॥ ११ ॥

एवं सामान्यतः तत्तज्जीवकर्मानुसारेणानुग्रहादिकं भगवान् करोति न तु वैषम्यादिदोषवान् भवतीत्युक्तम् । अथेन्द्रार्थे दैत्ययोर्वधं तु तयोरनुग्रहायैव कृतवानित्याह—अत्रैवेति । अत्र इन्द्रार्थदैत्यवधे इतिहासः सुरर्षिणा नारदेन अजातशत्रवे युधिष्ठिराय उदाहृतस्तं शृण्विति शेषः ॥ १२ ॥

भाषा टीका ।

जैसे तेज (अग्नि) आदि पदार्थ काष्ठादि में नाना प्रकार प्रतीत होता है वैसेही परमात्मा भी नाना देहों में प्रकाशित होता है । और देह से भिन्न नहीं प्रतीत होता। निपुणजन अन्त में आत्मा में अन्तर्यामि रूप से स्थित परमात्मा को जानते है ॥ ९ ॥

जिस समय परमात्मा जीवों के सुखादि भोग के लिये सृष्टि की इच्छा करता है तव समता से स्थित रजोगुण को पृथक् प्रकट करता है । ऐसे ही उन विचित्र शरीरों में रमण की इच्छा वाला सत्त्व गुण को तथा शयन की इच्छा वाला तमो गुण को प्रकट करता है ॥ १० ॥

हे राजन् ! यह कालस्वरूप ईश्वर सत्त्व की वृद्धि करते हैं तव सत्त्व प्रधान देव समूह को भी बढाते हैं और सुरप्रिय श्री हरि, उन देवताओं के वैरी रजोगुण तमोगुण वाले जो असुर हैं उनका नाश करते हैं ॥ ११ ॥

हे राजन् ! इस विषय में देवर्षि [श्रीनारदजी] ने राजसूय यज्ञ में पूर्वकाल में राजा युधिष्ठिर के पूछने से यह इतिहास कहा था ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चेदिभूभुजः शिशुपालस्य ॥ १३ ॥ १४ ॥

(१) दुरवग्राह्य धामनि–इति पाठान्तरम्. विज० वीर० शुक० ।
(२) भगवन्नत्र कारणम्. इति पाठान्तरम्. वीर० ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

एकान्तभक्तानामपि दुर्लभा प्राप्तिर्विद्विषो जातेत्येतदत्यद्भुतं हि ॥ १५ ॥

तस्य तु वेनवन्नरकपात एवोचित इत्याह—भगवन्निन्दयेति । तमसि नरके ॥ १६ ॥

दमघोषस्य सुतः शिशुपालः कलभाषणाद् बाल्ये कोमलभाषणमारभ्य सम्प्रत्यधुनाऽप्यमर्षी क्रोधी मत्सरी वा ॥ १७ ॥

श्वित्रः श्वेतकुष्ठम् ॥ १८ ॥

दुरवग्राहं दुष्प्रापं धाम स्वरूपं यस्य तस्मिन् लयं सायुज्यमीयतुर्जग्मतुः अभूतस्यापि दन्तवक्त्रलयस्य तज्जातकप्रामाण्येन सिद्धवन्निर्देशः ॥ १९ ॥

एतदद्भुततममत एतत्प्रति मे धीर्भ्राम्यति भगवान् सर्वज्ञस्त्वं ब्रूहि ॥ २० ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

प्रश्नं तन्निमित्तञ्च विवृणोति—दृष्ट्वेति । राजसूयाख्ये महाक्रतौ चेदिभूभुजः शिशुपालस्य भगवता छिन्नशिरसः वासुदेवे भगवति श्रीकृष्णे सायुज्यं संश्लेषं महाद्भुतं दृष्ट्वा विस्मितचित्तः पाण्डुसुतो राजा युधिष्ठिरः तत्र क्रतौ यज्ञसभायामासीनम् उपविष्टं देवर्षिं नारदं मुनीनां शृण्वतां सतामिदं वक्ष्यमाणं पप्रच्छ पृष्टवान् ॥ १३ ॥ १४ ॥

तदेवाह—अहो इति षड्भिः, अहो एतदद्भुतं तदद्भुतत्वे हेतुः, एकान्तिनामनन्यप्रयोजनेन भगवन्तं भजतामपि दुर्लभम्. किंतत् ? परे तत्त्वे प्रकृतिपुरुषविलक्षणेश्वरतत्त्वरूपे श्रीकृष्णे विद्विषः चैद्यस्य प्राप्तिरिश्लेतत् ॥ १५ ॥

मुने नारद ! एतत्सर्वं वयं वेदितुमिच्छामः केनापि भावेन भगवन्तं स्मरतां तत्प्राप्तिर्भवत्येव किमत्र चित्रं, तत्राह-भगवन्निन्दयेति । वेनः पृथोःपिता भगवन्निन्दयैव निन्दामात्रेण हेतुना तमसि नरके द्विजैः ऋषिभिः पातितः ॥ १६ ॥

दमघोषसुतश्चैद्यस्तु कलभाषणात् बाल्यमधुरभाषणादारभ्य बाल्यादारभ्येत्यर्थः सम्प्रति एतत्कालपर्यन्तं गोविन्दे श्रीकृष्णे अमर्षी क्रोधी अतोऽयं नितरां पापात्मा तथा दन्तवक्त्रोपि दुरात्मा ॥ १७ ॥

अनयोः परब्रह्मभूतं निर्विकारं श्रीकृष्णमसकृच्छपतोः शिशुपालदन्तवक्त्रयोः जिह्वायां श्वित्रः श्वेतकुष्ठरोगोवापि न जातः नाप्येतावन्धं तमो नरकमपि विविशतुः किन्तु भगवन्तमेव विविशतुः ॥ १८ ॥

अतः सर्वलोकानां पश्यतां सतां दुरवगाह्यधामनि दुरवगमज्योतिर्मयस्वरूपे भगवत्यञ्जसा अनायासेन तत्प्राप्तिसाधनानुष्ठानमन्तरेणेत्यर्थः कथं लयमीयतुः ? भगवत्सायुज्यं कथं प्रापतुरित्यर्थः ॥ १९ ॥

इतीत्थं वायुना दीपशिखेव मम बुद्धिर्भ्राम्यति. हे भगवन् ! एतन्महदद्भुतमतोऽत्र कारणं ब्रूहीति ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एक एवान्तो निर्णयः येषामस्तीति भक्तिरेव पुरुषार्थसाधनं नान्यत्कर्मादिकमिति निर्णयवतां विष्णुरेव मुमुक्षुभिर्निषेव्य इति निश्चयवतां वा ॥ १५ ॥

श्रीहरिनिन्दनं सतां कर्णशूलायमानमप्येतच्छ्रोतुं तच्चित्रमित्याशयवानाह—भगवन्निन्दयेति ॥ १६ ॥ १७ ॥

श्वित्रः श्वेतकुष्ठम् ॥ १८ ॥

दुरवग्राह्यं दुर्ज्ञेयं धाम स्वरूपं यस्य स तथा तस्मिन् लयं सायुज्यलक्षणम्; ननु, "अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुते" इति वचनात् श्वित्रो न जात इत्यादिवाक्यं कथं संगच्छते ? भगवद्द्वेषिणोऽपि बहुविधाः, तत्र केचिन्मरणानन्तरं पापफलं भुञ्जते, केचिदत्रैव. तत्कुतः ? इतिचेन्न ॥

"नियमाद्भुज्यते पुंभिर्धर्माधर्मफलं मृतौ ।

कैश्चिदत्रापि भुज्येत तस्मान्नाधर्ममाचरेत्" ॥

इतिवचनात् अनेन धर्मिणोपि व्याख्याताः धर्मी स्वर्गं विधर्मी निरयमितिच अत्र कश्चिद्विशेषोप्यस्ति जयविजययोः सात्त्विकत्वेन भक्तत्वेनहरेरतिप्रियत्वात्सनकादिशापादसुरजन्मन्यपि कचिद्भक्त्यलोपात् द्वेषफलभोक्तुरन्यत्वाच्च द्वेषस्य पापिष्ठासुरत्वादनयोरूपचारितत्वाच्च अनेन स्वापराधनाशलक्षणानुग्रहपात्रत्वेन प्रतिज्ञातशपथत्वेन च हरेः सुरप्रियत्वं च विशदमभूदिति रहस्यम् ॥ १९ ॥ २० ॥ २१ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

दृष्ट्वेति युग्मकम् ॥ १३ ॥ १४ ॥

एकां नितरां परमज्ञानिनां "एकान्तमतिरुन्निद्रो गूढो मूढ इवेयते" इति पाप इत्यादिना तद्गुणोक्ति निन्दनञ्च तदोपाधिकानुकरणमात्रमवलम्ब्येति ज्ञेयं । दन्तवक्त्रस्यापि भूतत्वेन निर्देशो मुनिगण वचनेन निश्चितत्वात् ॥ १५—२१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

एकान्तिनां निष्परिग्रहाणामपि ॥ १५—१६ ॥

कलभाषणात् बाल्यकोमलभाषणमारभ्य यत् परं ब्रह्म तं विष्णुं कृष्णम् ॥ १७—१८ ॥

प्रत्युत लयं तात्कालिकलोकप्रतीत्या सायुज्यं किञ्चित् कालमेव सहयोगं सह युज्यत इति सयुक् तस्य भावः सायुज्यं ततः परं सारूप्यमीयतुः भाविनमपि दन्तवक्त्रलयं नारद

श्रीशुक उवाच।

राज्ञस्तद्वच आकर्ण्य नारदो भगवानृषिः।
तुष्टः प्राह तमाभाष्य शृण्वत्यास्तत्सदः कथाः ॥ २१ ॥

नारद उवाच।

निन्दनस्तवसत्कारन्यक्कारार्थं कलेवरम्।
प्रधानपरयोराजन्नविवेकेन कल्पितम् ॥ २२ ॥
हिंसा तदभिमानेन दण्डपारुष्ययोर्यथा।
वैषम्यमिति भूतानां ममाहमिति पार्थिव ! ॥ २३ ॥
यन्निबन्धोऽभिमानोऽयं तद्वधात् प्राणिनां वधः।
तथा न यस्य कैवल्यादभिमानोऽखिलात्मनः।
परस्य दमकर्त्तुर्हि हिंसा केनास्य कल्प्यते ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

मुखादेव श्रुत्वा तस्य जातप्रायत्वमननात्भूतनिर्देशः। पश्यतामित्यसम्भवे वस्तुनि प्रामाण्यसिद्ध्यर्थमित्यर्थः ॥ १९ ॥

एतत् फलं प्रति भ्राम्यति अत एतदद्भुततमं ब्रूहि यतो भगवान् सर्वज्ञः नन्वेतत्पदवाच्यमेव, किं तत्राह तत्र यये कारणम्॥ २० ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

चेदीनां देशविशेषाणां भूभुजः शिशुपालस्य भूपतेः ॥ १३ ॥ १४ ॥

परे तत्त्वे वासुदेवे श्रीकृष्णे एकान्तिनामपि दुर्लभा प्राप्तिः विद्विषो जातेत्यद्भुतमत्याश्चर्यम् ॥ १५ ॥ १६ ॥

कलं मधुरं भाषणं यस्मिन् तस्माद् बालत्वात् आरभ्य सम्प्रति अद्यापि गोविन्दे अमर्षी विद्वेषी ॥ १७ ॥

अव्ययं नित्यशरीरिणां परं ब्रह्म यत् ययोः शपतोः जिह्वायां श्वित्रः कुष्ठं न जातः अन्धन्तमो नरकं न विविशतुः ॥ १८ ॥

दुरवग्राह्यं दुर्ज्ञेयं धाम स्वरूपं यस्य तस्मिन् ॥ १९ ॥ २० ॥

———

भाषा टीका।

महा यज्ञ राजसूय में युधिष्ठिर महाराज ने श्रीवासुदेव भगवान् के विषे परमाद्भुत शिशुपाल का सायुज्य देखकर वहां बैठे हुए नारदजीसे सब मुनि लोगों के सुनतेर यह प्रश्न किया ॥१३॥१४॥

युधिष्ठिरजी बोले, कि अहो यह अति अद्भुत है परमैकांति लोगों को भी दुर्लभ परतत्त्व श्रीवासुदेव की प्राप्ति द्वेषी शिशुपाल को कैसे हुई ॥ १५ ॥

हे मुने ! यहबात हम सब लोग जानने की इच्छा करते हैं क्यों कि भगवान् की निन्दा करने से वेनराजा को ब्राह्मणों ने नरक में गिराया था ॥ १६ ॥

यह पापी दमघोष का पुत्र शिशुपाल तो बोलना सीखा तब से लेकर अबतक गोविन्द के विषय द्वेष करनेवाला और दुर्मति दन्तवक्र भी ऐसाही था ॥ १७ ॥

ये साक्षात् परब्रह्म अव्यय विष्णु को कुवाक्य कहने वाले इनदोनों के जिह्वा में कुष्ठ न हुआ और दोनो को नरक न हुआ ॥१८॥

दुःख से ग्रहण हो तेज जिनका ऐसे भगवान् में सब लोको के देखते २ ये दोनों कैसे लीन होगये ॥ १९ ॥

वायु से दीपकी जोत के सदृश मेरी बुद्धि भ्रमको प्राप्त होती है यह अति आश्चर्य बात का उत्तर आप दीजिये। इस में भगवान् ही कारण हैं ॥ २० ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका।

आभाष्य सम्बोध्य सीदन्ति निषीदन्त्यस्यामिति सद् सभा तस्याः सदः सदसः शृण्वत्याः सत्याः कथाः प्राहेत्यन्वयः ॥ २१ ॥

अहोभगवन्निन्दकस्य नरकपातेन भाव्यमिति वदतस्तव कोऽभिप्रायः भगवत्पीडाकरत्वेन वा तदभावेऽपि सुरापानादिवन्निषिद्धनिन्द्याचरणाद्वा तत्र तावद्देहाभिमानकृतनिन्दादिनिमित्तत्वाच पीडादीनां भगवतश्च तदभावात्त पीडाद्यङ्गास्तीत्याह—निन्दनेति

श्रीधरस्वामिकृतभावार्थदीपिका ।

सार्द्धैस्त्रिभिः । निन्दनं दोषकीर्तनम् न्यक्कारस्तिरस्कारः निन्दास्तुत्यादिज्ञानार्थं प्रधानपुरुषयोरविवेकेन कलेवरं कल्पितं रचितम् ॥ २२ ॥

तदभिमानेन भूतानां यथा ममाहमिति वैषम्यं तत्कृतं हिंसादिकं च भवति तथा न यस्येत्युत्तरेणान्वयः दण्डस्ताडनं पारुष्यं निन्दा तयोर्हेतुभूतयोर्हिंसा पीडा च भवति ॥ २३ ॥

यस्मिन्निबद्धोऽयमभिमानस्तस्य देहस्य वधाद्वधश्च यथा तथा यस्याभिमानोनास्ति अतोऽस्य परमेश्वरस्य हिंसा केन हेतुना कल्प्यते न केनापीति अभिमानाभावे हेतुः कैवल्याद्द्वितीयत्वेनाभिमन्तव्याभावात् वैषम्याभावे हेतुः अखिलात्मनः सर्वात्मनस्तर्हि किमिति हन्ति दैत्यांस्तत्राह—परस्य दमकर्तुः हितार्थं दण्डं करोतीत्यर्थः ॥ २४ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

इत्थमापृष्टो नारदः प्राहेत्याह मुनिः--राज्ञइति । राज्ञो युधिष्ठिरस्य तत्प्रश्नरूपं वचः श्रुत्वा भगवान्नारदस्तुष्टः समीचीनप्रश्नेन हृष्टः सदसः सभायाः शृण्वन्त्याः सत्यास्तं युधिष्ठिरमाभाष्य स्ववचःश्रवणाभिमुखं कृत्वा प्रश्नपरिहाररूपां कथां प्राह ॥ २१ ॥

तामेवाह–निन्दनमित्यादिना दशभिरध्यायैः । अस्य प्रश्नस्य मुख्यमुत्तरं वक्तुं तावत्संसारिचेतनानामिवेश्वरस्य देहात्माभिमानप्रयुक्तस्तुतिनिन्दाद्यभिमानित्वं नास्तीति चैद्यस्य मुक्तिं ददाविति कश्चित्परिहारमाह–निन्दनेति. हे राजन् ! निन्दनं दोषकथनं स्तवो गुणकथनं सत्कारश्चन्दनलेपादिः न्यक्कारः पांसुक्षेपणादिरेषामर्थो विषयः कलेवरं प्रधानशब्दो देहावस्थप्रधानवचनः परशब्दो देहात्परजीववचनः तयोरविवेकेन परस्परविलक्षणत्वविषयकज्ञानाभावेन देहात्माभिमानेनेति यावत् तेनाविवेकेन हेतुना कल्पितं कलेवरस्य निन्दनादिविषयत्वमविवेककृतं. न तु स्वतो जडत्वात्. न हि काष्ठं चन्दनलेपादिरूपसत्कारादिकं मन्यते इति तावन्निर्विवादमित्यर्थः ॥ २२ ॥

एवं स्थिते हे पार्थिव ! यथेह संसारे भूतानां देहात्माभिमानिनां देवमनुष्यादीनां ममाहमिति वैषम्यं ममेयं निन्दा निन्दितोऽहमित्यभिमानरूपवैषम्यं तदभिमानेन ममेयं निन्देत्यभिमानेन दण्डपारुष्ययोर्निमित्तयोर्हिंसा च स्यात् दण्डः ताडनं पारुष्यं निन्दनं परेण दण्डपारुष्ययोः कृतयोः सतोस्तत्प्रयुक्तो ममेयं निन्दा निन्दितोहं ममायं दण्डो दण्डितोहमित्येवंरूपो नानाविधोऽभिमानस्तत्प्रयुक्तं परेषु निन्दादिकारिषु हिंसाचरणं च यथा लोकानां दृश्यते न तथा यस्येत्युत्तरेणान्वयः देहविषयमपि दण्डपारुष्यादिकं परकृतं देहात्माभिमानेनात्मगतं मत्वा तदभिमानेन परेषु हिंसास्यादित्यनेन यथा हिंसाकारिषु दण्डपारुष्यादिकं देहगतमेव नत्वात्मगतम्. देहात्मनोरविवेकेन स्वात्मगतं न मन्यते तथा हिंस्यमानेष्वपि हिंसा च देहगतैव नत्वात्मगता. देहात्माभिमानात्तु हिंसितोहमित्यभिमान इति सूचितम् ॥ २३ ॥

तदेव स्पष्टमाह—यन्निबन्ध इति । अयमभिमानो दण्डितानां च लोकानां यथा दण्डितोहं निन्दितोहमित्यभिमानः यन्निबन्धो यद्धेतुको देहहेतुक इत्यर्थः देहात्माभिमानस्य देहहेतुकत्वाद्देहात्माभिमानहेतुको दण्डितोऽहमित्यभिमानो देहहेतुक एवेत्यभिप्रायेण यन्निबन्धोऽभिमानोऽयमित्युक्तम्. एवं तद्वधाद्धन्यमानेषु तस्य देहस्य वधादेव प्राणिनां देहात्माभिमानिनां वधः देहगत एव वधः नत्वात्मगतो देहात्माभिमानात्तु हतोऽहमित्यभिमान इत्यर्थः । एवं संसारिणां निन्दनादिकं सर्वं देहात्माभिमानकृतमित्युक्तम् अथोक्तार्थविषयमीश्वरे दर्शयति—तथेति । यथा संसारिणां देहात्माभिमानस्तन्मूलको निन्दितोऽहमित्याद्यभिमानश्च यस्येश्वरस्य नास्ति तस्यास्य अभिमानप्रयुक्ता परेषु हिंसा केन हेतुनावकल्पते इत्यन्वयः, अभिमानाभावे हेतुः–अखिलात्मन इति, सकलजगदात्मत्वादभिमानो नास्तीत्यर्थः । नत्वात्मत्वेपि तस्य जीववदभिमानः स्यादेव तत्राह—कैवल्यादिति । निरस्तनिखिलदोषत्वादित्यर्थः "अनृतेन हि प्रत्यूढा" इति श्रुत्युक्तरीत्या जीवानामनादिपुण्यपापात्मककर्ममूलको हि देहात्माभिमानः तस्य तु परमपुरुषस्य सर्वान्तरात्मनो निरस्तनिखिलकर्मवश्यत्वादिदोषत्वादभिमानाभाव इति भावः । निन्दितोहमित्याद्यभिमान एव नास्ति किं पुनस्तत्प्रयुक्तं परेषु निन्दकेषु हिंसादिकरणं नास्तीत्याह—हिंसेति. अस्य निन्दनादिना प्रयुक्ताभिमानरहितस्य हिंसा निन्दककर्मिका केन हेतुना कल्प्यते हिंसाहेतोरभिमानस्याभावाद्धेत्वन्तरस्यादर्शनात्सा नास्त्येवेत्यर्थः । ननु, कथमुच्यतेऽभिमानस्तत्प्रयुक्ता हिंसा च तस्य नास्तीति, यतोस्मदादिसमक्षमेव निन्दकं चैद्यं हतवानित्याशङ्कां निराकुर्वन्नीश्वरं विशिनष्टि—परस्य दमकर्तुरीति । परस्य निन्दकादेर्दमकर्तुः शिक्षाकर्तुः परस्य हितार्थमेव दण्डं कुर्वत इत्यर्थः शिक्षया परस्मै हिताचरणं च चैद्यस्य निहीनामासुरीं योनिं परिहार्य निरतिशयपुरुषार्थस्वरूपस्वप्रापणेनेदानीमेवास्मदादिभिरपरोक्षं दृष्टमिति भावः । एवं देहात्माभिमानाभावात्परमपुरुषस्य संसारिणामिव स्तुतिनिन्दाद्यभिमानित्वराहित्यमुक्तम्. एवञ्च निरभिमानित्वाच्चैद्यस्य मुक्तिं ददौ इति कश्चित्परिहारः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

देहाद्यभिमानवतः स्तवनिन्दनादिना मनःखेदहर्षादिसम्भवेन क्रोधादिकं स्याद्धरेस्तदभावान्निन्दनादिनाविशेषानुदयात् स्वतो नित्यतृप्तत्वेन परप्राप्यप्रयोजनाभवात् तत्तद्योग्यतानुसारेण तत्तत्फलदातृत्वं युक्तमित्यादिकं वक्तुमुपक्रमते–निन्दनेति । निन्दनं दोषसंकीर्तनं स्तवः स्तुतिर्गुणलक्षणास्तत्कारः कायिकपूजा न्यक्कारः कायिकावज्ञा तेषां निन्दनादीनामर्थं विषयभूतं कलेवरं प्रधानपरयोः प्रधानाद्देहेन्द्रियाद्यात्मकात्परस्य जीवस्याविवेकेनाभेदेन कल्पितं स्वदश्चिदानन्दस्य प्रकृतेरनात्मनो भेदाग्रहादिदं जडशरीरं क्लृप्तमित्यर्थः ॥ २२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ततः किंफलतीति तत्राह—हिंसेति । तदभिमानेन देहाभिमानेन भूतानामविवेकज्ञानिना ममाहमितीह देहे हिंसा ताडनादिलक्षणा दण्डपारुष्ययोर्निमित्तयोर्वैषम्यं विषमावस्था फलतीत्यर्थः ॥ २३ ॥

ततश्च किं तत्राह—यन्निबन्धइति । ममाहमित्यभिमानो यन्निबन्धः यस्मिन् देहे निबद्धः तद्वधात्तस्य देहस्य वधाद्धिंसादिलक्षणात् प्राणिनां चेतनानां वध इत्युपचारः इति यत्तस्मान्निन्दादिकं देहस्यैव फलति, नात्मनः; तस्य निष्फलमित्याशयः यथा, जीवस्य ममाहमिति देहाभिमानादनर्थपरम्परा तथा हरेरपि देहस्यत्वाविशेषात्साम्यार्त्तिकनेत्याह—तथेति, अखिलात्मनोऽखण्डस्वामिनो यस्य न तथा जीववद्देहाभिमानो नास्ति. कुतः? कैवल्यात् देहाद्यभावादेव. ननु, प्रकृत्यात्मकस्य देहस्याभावो हेतुः क्रियते सच्चिदानन्दात्मकदेहस्य वेत्येतयोरिदमेवोत्तरं प्रकृत्यात्मकदेहादेरभावात्प्रकृतिप्राकृतवैकृतामिश्राविराहितसच्चिदानन्दात्मकदेहसद्भावात् स देहः सुखमन्धश्चेत्यादेः ॥ अस्य प्रत्ययात्मनः इदमेषा हिंसा केन निमित्तेनास्तीति कल्प्यते निमित्ताभावान्नैमित्तिकाभाव इत्यर्थः । अन्यस्मिन् हिंसादिकर्तरि सति हरेर्हिंसादिकमस्तीति कल्पयितुं शक्यते स च नास्तीत्याशयेनोक्तम् अकर्तुरिति, तस्यान्यः कर्ता न विद्यत इत्यकर्ता तस्य हिशब्देन यद्यस्यायुधादिना प्रहर्तां दृश्यते तत्फलं छेदादिकन्नास्तीत्याह "अच्छेद्योयमदाह्योयम्" इत्यादेः । तत्सर्वं कथमित्यत उक्तं परस्येति, लोकविलक्षणस्य तर्ह्ययं शून्यकल्प इत्यस्यापीदमुत्तरं परस्य ब्रह्मणः "ब्रह्मविदाप्नोतिपरम्" इतिश्रुतेः । इदं हिंसेति लिङ्गव्यत्ययो हिंसायाः कुत्सितत्वद्योतनाय "त्वत्ययोऽतिशयकुत्सनभेदेषु" इतिसूत्राज्ज्ञायते हरौ हिंसाशङ्का कुत्सितेत्यर्थः "नास्य जरयैतज्जीर्यते न वधेनास्य हन्यते एतत्सत्यं ब्रह्मपरम् हन्यते हन्यमाने शरीरे" इत्यादेश्च ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत्रोत्तरं श्रीनारद उवाच-निन्दन इति । तत्र विमूढैर्जनैर्निन्दादिकं प्राकृतान् तमआदिगुणानुद्दिश्यैव प्रवर्त्यते । ततः प्रकृतिपर्य्यन्ताश्रयस्य तत्कृतनिन्दादेः अप्राकृतगुणविग्रहादौ तस्मिन् प्रवृत्तिर्नास्त्येव न च जीववत् प्रकृतिपर्य्यन्ते वस्तुजाते भगवदभिमानोऽस्ति । ततश्च तेन तस्य पीडा नास्त्येवेति भगवतस्तन्निन्दाद्यस्पर्शतया सिद्धान्तश्च पूर्ववत् ॥ २२ ॥

ततश्च हिंसेति सार्द्धयुग्मकम् । इह प्राकृते लोके यथा तत्कलेवराभिमानेन न तथेति कैवल्यात् "देहेन्द्रियासु हीनानां वैकुण्ठपुरवासिनाम्" इति कैवल्यादिप्राप्तशुद्धत्वात् तादृशनिन्दाद्यगम्यशुद्धसच्चिदानन्दविग्रहादित्यर्थः तस्य तदगम्यत्वञ्च । "नाहं प्रकाशः सर्वस्य योगमायासमावृतः" इति श्रीभगवद्गीतादिभ्यः तादृशवैलक्षण्ये हेतुः, अखिलानामात्मभूतस्य, तत्र हेतुः परस्य प्रकृतिवैभवासङ्गरहितस्य । हिंसायाम् अविषयत्वे हेत्वन्तरम् । दमकर्त्तुः परमाश्चर्य्यानन्तशक्तित्वात् सर्वेषामेव शिक्षाकर्त्तुरिति ॥ २३—२४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

सीदन्ति निषीदन्त्युपविशन्त्यस्यामिति सद सभा तस्याः शृण्वन्त्याः तस्यां कथाः शृण्वन्त्यामित्यर्थः । आभाष्य हे राजन् ! अवधेहीति सम्बोध्य ॥ २१ ॥

शिशुपालकृतनिन्दादिकं न भगवत्पीडाकरमिति वक्तुं प्रथमं निन्दास्तुत्यादिकं ज्ञानिनां न दुःखसुखदं किन्तु देहाभिमानिनामेवेत्याह—निन्दनस्तवौ वाचिकौ दोषगुणौ सत्कारन्यक्कारौ कायिकौ मानसौ च सम्माननासम्मानने तदर्थं तत्सिद्धयर्थं प्रकृतिपुरुषयोरविवेकेन आत्मानात्मविवेकाभावेन कल्पितं विरचितम् ॥ २२ ॥

तदभिमानेन देहाभिमानेन मामयं निन्दति स्तौतीत्यादिभिर्यथा दुःखसुखे भवतस्तथैव मामयं हिनस्तीति हिंसापि भवति कस्मिन् सति दण्डस्ताडनं पारुष्यं त्वामहञ्जानयिष्यामीति तर्जनं तयोः सतोः एवञ्च भूतानामिह संसारे वैषम्यं सिद्धं ममैते शत्रवो ममैते बन्धवश्च अहमेतान् हन्मि एतान् पालयामि चेति प्रकारकम् ॥ २३ ॥

यस्मिन्निबद्धोऽयमभिमानस्तस्य देहस्य वधाद्वधश्च यथा अज्ञानिनां तथा यस्य कृष्णस्याभिमानः प्राकृतो नास्ति अस्य परमेश्वरस्य हिंसा केन कल्पते न केनापीत्यर्थः । अभिमानाभावे हेतुः, कैवल्यात् केवलपरमात्मत्वात्. अयं भावः । यथा सर्वजीवानां अनात्मा देह आत्मा जीवश्चेत्युभयं वर्त्तते । तथा यदि कृष्णस्याप्यस्याभविष्यत् तदा कृष्णस्यापि जीवानामिव आविद्यकोऽभिमानोऽभविष्यदेव । कृष्णस्य तु देहस्तदभिन्नः परमात्मैव तस्मिन् स्वरूपभूते कृष्णोहमित्यभिमानोपि तन्मय एव अखिलात्मन इति तदंशस्यान्तर्य्यामिणोऽप्यस्वरूपभूते जीवे जीवदेहे वाभिमानो नास्तीति भावः । अत एव परस्य मायामायिकवस्तुजीवेभ्यो भिन्नस्याऽतस्तेष्वस्वरूपभूतेष्वभिमानाभावात् कस्तस्य द्वेष्यः को वा द्वेष्टा परमात्मभूते देहे यस्तस्याभिमानः परमात्मैवाहमित्यात्मकस्तेन स कं वा द्वेष्टुं परमात्मानं जानन् तं वा को द्वेष्टु । तर्हि किमिति स्वद्वेषिणः शिशुपालादीन् हिनस्ति तत्राह—दमकर्त्तुस्तेषां हितार्थमेव दण्डं कुर्वतः तस्य सर्वसुहृत्त्वादिति भावः ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

राज्ञः तद्वचः प्रश्नरूपं वचः आकर्ण्य सीदन्ति निषीदन्त्युपविशन्ति यस्यामिति सत्सभा तस्याः शृण्वन्त्याः हे युधिष्ठिर ! इति आभाष्य सम्बोध्य कथाः प्राह ॥ २१ ॥

निन्दनादिना देहात्मबुद्धेर्जीवस्य पीडा भवति न तु तत्त्वविदः भगवतस्तु सुतरां न भवति किन्तु निन्दनादिनापि भग-

तस्माद्वैरानुबन्धेन निर्वैरेण भयेन वा ।
स्नेहात्कामेन वा युञ्ज्यात् कथञ्चिन्नेक्षते पृथक् ॥ २५ ॥
यथा वैरानुबन्धेन मर्त्यस्तन्मयतामियात् ।
न तथा भक्तियोगेन इति मे निश्चिता मतिः ॥ २६ ॥
कीटः पेशस्कृता रुद्धः कुड्यायां तमनुस्मरन् ।
संरम्भभययोगेन विन्दते तत्स्वरूपताम् ॥ २७ ॥
एवं कृष्णे भगवति मायामनुजईश्वरे ।
वैरेण पूतपाप्मानस्तमीयुरनुचिन्तया ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

वति मनोनिवेशनं मोक्षहेतुरित्याह—निन्दनमित्यादिना । न्यक्कारस्तिरस्कारः निन्दनाद्यर्थं कलेवरं प्रधानपरयोर्मायाजीवयोरविवेकेनावोधेन कल्पितम् आत्मतयारोपितमित्यर्थः ॥ २२ ॥

तदभिमानेन कलेवरं आत्मत्वाभिमानेन यथा ममाहमिति वैषम्यं भवति तथा दण्डपारुष्ययोः दण्डे ताडने सति पारुष्ये निन्दायां च सत्यां हिंसा पीडा भवति ॥ २३ ॥

तथा यस्मिन् कलेवरेऽयमभिमानो निवद्धस्तस्य वधात् प्राणिनां वधो लोके प्रसिद्धः स अभिमानः यस्य कैवल्यात् देहेन्द्रियमनोबुद्धिप्राणादिविलक्षणकेवलक्षेत्रज्ञस्वरूपज्ञानात् नास्ति तस्य हिंसा केन कथ्यते अस्य प्रकृतस्य परस्य सर्वचेतनविलक्षणस्य अखिलात्मनः अत एव दमकर्तुः हितार्थं तदनुरूपं दमं दण्डं कुर्वाणस्य केन हिंसा कथ्यते इत्यन्वयः ॥ २४ ॥

भाषाटीका

श्रीशुक उवाच ।

भगवान् नारद महर्षिभी राजा युधिष्ठिर का वचन सुन कर संतुष्ट हो राजा को संबोधन देकर सभा के सुनतें २ कथा कहने लगे ॥ २१ ॥

नारद उवाच ।

निंदा स्तुति सत्कार और तिरस्कार इत्यादि के ज्ञानार्थ यह कलेवर प्रकृति पुरुष के अविवेक से रचा गया है ॥ २२ ॥

उस देह में अभिमानहोने से में मेरा इस प्रकार की विषमता है और उसी विषमता से निन्दा ताडनादि हेतुक हिंसा अर्थात् पीडा और जिस देह में यह अभिमान बँधा है उस देह के वध से प्राणियों का वध जैसे है। ऐसा अखिलात्मा परमेश्वर को अभिमान नहीं तब हितार्थ दूसरे को दंड देने वाले परमात्माको शत्रुहिंसा किस प्रकार कल्पन की जाय ॥ २३—२४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यस्माद्भगवतोनिन्दादिकृतं वैषम्यं नास्ति तस्माद्येन केनाप्युपायेन ध्यायतस्तेनैव ध्यानेन निन्दादिकृतपापस्यापि नाशात्सायुज्यं युक्तमित्याशयेनाह—तस्मादिति सप्तभिः । निर्वैरेण नास्ति वैरं केनापि यस्मिंस्तेन भक्तियोगेनेत्यर्थः युञ्ज्यान्मनइति शेषः यस्मादेतैरुपायैः पृथङ्नेक्षते ॥ २५ ॥

तेष्वपि वैरानुबन्धः श्रेष्ठइत्याह—यथेति । न तथा भक्तियोगेनापि ॥ २६ ॥

अत्र दृष्टान्तः, कीटः पेशस्कृता भ्रमरेण संरम्भोद्वेषोभयं च तएव योगस्तेन ॥ २७ ॥

वैरेण यानुचिन्ता चिन्तनं तयैव पूतः पाप्मा येषां ते तं प्रापुः ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नन्वेवं भगवन्निन्दासु कस्यचिदपि पापं न स्यान्न च निन्दाप्रयुक्ताभिमानरहितनिन्दया नितरां पापित्वप्रसङ्ग इति वाच्यं तादृशस्यापि चैद्यस्य परमपुरुषप्राप्तिदर्शनेन निन्दाया अपापरूपत्वादन्यथा तादृशे निरतिशयमुक्तिप्रतिबन्धे पापे सति तस्य मुक्त्यसम्भवात् किञ्चैवं भगवत्स्तोत्रादिषु पुण्यमपि न स्यात्तथा च सर्वशास्त्रार्थविरोधप्रसङ्गः । किञ्च—

"मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ।
तानहं द्विषतः क्रूरान्संसारेषु नराधमान् ॥
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु" ॥

इति भगवद्वचनाविरोधश्च स्यात्. भगवतः स्तुतिनिन्दाभिमानि-

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

त्वाभावकथनाद्वेनचैद्ययोर्वैषम्यं च न सिध्यति अतो वेनचैद्ययोर्वैषम्यप्रश्नस्य किमुत्तरमित्यपेक्षायां साक्षात्परिहारमाह—तस्मादिति । निन्दादिभाक्संसारितुल्यत्वदोषप्रसङ्गनिराकरणार्थं संसारिचेतनानामिव देहस्तुतिनिन्दाद्यभिमानित्वं भगवतो नास्तीति तद्वैलक्षण्यमात्रमुक्तं "निन्दनस्तवसत्कार" इत्यादिभिः श्लोकैरितो वक्ष्यमाण एव साक्षात्परिहारो वेदितव्यः तस्मादीश्वरस्यैवंविधस्वभावत्वाद्वैरानुबन्धनिर्वैरभयस्नेहकामानां पञ्चानामन्यतमेन केनचिद्युंज्यात् भगवति मनोयुञ्जीतेत्यर्थः "यथा भक्त्येश्वरं मनआवेश्य" इत्युत्तरग्रन्थैकार्थ्यात् वैरानुबन्धो वैराविच्छेदः निर्वैरेणेति न वैराभावो विवक्षितः अपि तु भक्तिर्विवक्षिता उत्तरग्रन्थे परिगणितहेतुषु पञ्चसु भक्तेरुक्तत्वात् स्नेहः सौहार्दं बाल्यादारभ्यैतत्पर्यन्तमविच्छिन्नवैरेण भगवति मनो युंजतश्चैद्यस्य भगवत्प्राप्तिः, वेनस्य तूक्तानामन्यतमेनापि भगवत्ययुक्तमनसो न मुक्तिः प्रत्युत निरयप्राप्तिरिति वैषम्यमिति भावः । मनोयोजनस्य काष्ठामाह—कथंचिन्नेक्षते पृथगिति । पृथग्भगवतोऽन्यद्वस्तु किञ्चिदपि केनापि प्रकारेण नेक्षते न विषयीकरोति मनस्तथा तद्युञ्जीत विजातीयप्रत्ययान्तराव्यवहितचित्तवृत्तिर्भवेद्यथा तथेत्यर्थः ॥ २५ ॥

वस्तुतः प्रीतिपूर्वकानुध्यानात्मकभक्तियोगादपि वैरानुबन्धानुध्यानमेव श्रेय इति मया निश्चितमित्याह—यथेति । मर्त्यः संसारी जीवः भगवति यथा वैरानुबन्धेन आशु तन्मयताम् इयात् प्राप्नुयात् तथा भक्तियोगेन आशु नेयादिति मे मया मतिर्बुद्धिर्निश्चिता. ममैवं बुद्धिनिश्चय इत्यर्थः । तन्मयतां तच्चिन्तनप्रचुरतामित्यर्थः । विकारावयवार्थासंभवात् प्राचुर्यमेवात्र मयडर्थः । पूर्वपूर्वचिन्तनादुत्तरोत्तरचिन्तनस्य प्राचुर्यं तच्च प्रत्ययान्तराव्यवहितत्वरूपम. यद्वा तन्मयतां तद्धर्मप्राचुर्यं प्राप्नुयादित्यर्थः मुक्तानां प्राचुर्येण भगवद्धर्मसाम्यश्रवणात् ॥ २६ ॥

यथा वैरानुबन्धयोगः श्रेयानेवं भययोगोऽपि भक्तियोगाच्छ्रेयानिति वदन्वैरानुबन्धभययोगयोर्भगवद्विषयकचिन्तासन्तानात्मकयोस्तत्साम्यापत्तिहेतौ दृष्टान्तमाह—कीट इति । पेशस्कृता भ्रमरेण कुड्यायां निरुद्धः कीटो यथा तमेव पेशस्कृतं संरम्भभययोगेन वैरानुबन्धभययोगाभ्याम् अनुस्मरन् तत्स्वरूपतां पेशस्कृता साम्यं विन्दते तथा संरम्भभययोगिनौ भगवत्स्वरूपतां विन्देते इत्यर्थः । तस्येव स्वरूपं यस्य तत्स्वरूपस्तस्य भावस्तत्स्वरूपता तां तुल्यरूपतां नत्वैक्यामित्यर्थः न हि पेशस्कृता रुद्धः कीटस्तेनैकीभवति उभयोरप्युपलभ्यमानत्वात् अतः साम्यमेव दृष्टान्तात्सिध्यति ॥ २७ ॥

उक्तार्थं दार्ष्टान्तिके दर्शयति—एवमिति । भगवति पूर्णषाड्गुण्ये मायामानुषे स्वसंकल्पोपात्तमनुजाकृतौ साक्षादीश्वरे श्रीकृष्णे विषये वैरेणानुचिन्तया वैरपूर्वकानुध्यानेन पूतपाप्मानः निरस्तवैरादिदोषाः तं कृष्णमापुः प्रापुः पूतपाप्मान इत्यस्यायमभिप्रायः । यद्यपि "यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्" इति श्रुत्युक्तरीत्या निरतिशयप्रीतिरूपया अविच्छिन्नस्मृतिसन्ततिरूपया भगवद्भक्तेरेव तत्प्राप्तिहेतुत्वम. तथा चोक्तम् भगवता—

"पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।
भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ! ॥
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ! ।
तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ॥
ददामि बुद्धियोगं तं येन मामुपयान्ति ते" ॥ इति.

श्रुतिश्च "तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते" इत्यादिका. भक्तिश्च प्रीतिपूर्वकमविच्छिन्नमनुध्यानम् "प्रीतिपूर्वमनुध्यानं भक्तिरित्यभिधीयते" इति भक्तिलक्षणात्. संरम्भभययोगयोस्तु प्रीतिरूपत्वाभावात्प्रत्युत तद्विपरीतरूपत्वाच्च न भगवत्प्राप्तिहेतुत्वं तथाप्यत्यन्तसंरम्भकृतभावनाप्रकर्षेण स्वहेतुभूतसंरम्भभययोरपि विस्मरणाद्भावनायाश्च निरतिशयानन्दावहशुभाश्रयविषयत्वेन प्रीतिरूपापन्नत्वात्तस्या अपि भगवत्प्राप्तिसाधनत्वमिति. एवञ्च येषां भावनाप्रकर्षेण स्वहेतुभूतवैरादिविस्मरणादिभावो वेनादीनां तेषां भगवन्निन्दादिप्रयुक्तभगवद्विषयकभावनाप्रकर्षाभावेन तन्मूलकनिन्दादिदोषाविस्मृतेर्भगवत्प्राप्त्यभावः प्रत्युत तन्निन्दादिदोषेण निरयप्राप्तिश्चेति वेनचैद्ययोर्वैषम्यमुक्तं भवति, अत एव न स्तुतिनिन्दयोः पुण्यापुण्यत्वप्रतिपादकशास्त्रविरोधोऽपि भावनाप्रकर्षेणाविस्मृतवैरादिदोषवत्पुरुषविषयत्वात्पुण्यापुण्यप्रतिपादकशास्त्राणाम् ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अत्रैवं हरिस्वरूपे स्थिते स्वयोग्यानन्दाविर्भावलक्षणमोक्षसाधनक्षमा क्षीणा भक्तिरेव द्वेषादिकमर्थवादलक्षणं तत्तत्स्वभावज्ञापनार्थमुच्यत इत्याशयेनाह—तस्मादिति । यस्माज्जडशरीरेन्द्रियाद्यभावेन हरेरहं ममाभिमाननिमित्तोपद्रवो दूरं निवारितः तस्माद्वैरानुबन्धादिना यो हरौ मनो युञ्ज्यात्प्रयुङ्क्ते स कथञ्चित्पृथङ्नेक्षते मनसस्तत्राभिनिवेशेन हरेरन्यं न चिन्तयति तमेवानुस्मरतीत्यन्वयः अनेन वैरादीनामेकतमेनापि हरौ मनो युञ्जानो वैरादिमानेव भवतीति तत्तद्वस्तुस्वभावास्तथोच्यत इति ज्ञातव्यं तदुदितमाचार्यैः "कथञ्चिन्नेक्षते पृथक् तत्रैवमनसोऽभिनिवेशेन तदन्यं नेक्षते वैरादीनामेकतमेनापि यो मनो युञ्ज्यात्स तदन्यं नेक्षत" इति स्वभावकथनम. नन्वत्र संयुञ्ज्यादित्यस्य प्रथमप्राप्तं विध्यर्थंपरित्यज्यान्यार्थं कल्पनायामश्रुतकल्पनास्यादितिचेन्न "भक्त्यात्वनन्यया शक्यः" अहमेवंविधोऽर्जुन" "यमेवैष वृणुते तेन लभ्यः" "प्रियोहि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः" इत्यादिना भक्तेरेव भगवत्प्रीतिजनकत्वोक्तेः "अननुभूतिरवधुस्वानः" इत्याद्यनर्थश्रुतेश्च अतो न विध्यर्थोऽङ्गीकारयोग्यः तदप्युक्तं न विधिरिति न केवलं द्रष्टुः स्वस्यैवानर्थोऽपि तु तत्पितॄणामपि तदुक्तम्—

कर्मणा मनसा वाचा यो द्विष्याद्विष्णुमव्ययम् ।
मज्जन्ति पितरस्तस्य नरके शाश्वतीः समाः" ॥ इति.

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नन्वेकदा कृतद्वेषप्राप्तनरकोपभोगेन क्षीणदोषस्य पुनः शुद्धान्तःकरणतया भक्तिकरणयोग्ययोनिप्राप्तिः स्यादिति तत्राह—

"तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥
आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ! ततो यान्त्यधमां गतिम्" ॥ इति.

कीदृशो द्वेष इति तत्राह—

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।
परम्भावमजानन्तो मम भूतमहेश्वरम्" ॥ इति.

'स्वर्गकामोयजेत' इत्यादेः सत्कर्मणा तेषां सद्गतिः स्यात्किन्नेत्याह—

मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः" ॥ इति

ननु तर्हि हिरण्यकशिप्वादेर्दुरन्ताघादुत्थितिः कथमभूदिति तत्राह—

"यदनिन्दत्पिता मे त्वामविद्वांस्तेज ऐश्वरम् ।
तस्मात्पिता मे पूयेत दुरन्ताद्दुस्तरादघात् ।
हिरण्यकशिपुश्चापि भगवन्निन्दया तमः ।
विविक्षुरत्यगात्सूनोः प्रह्लादस्यानुभावतः" ॥ इति

इति नन्वेवं तर्हि भक्तद्वेषिणोः शापवराभ्यां विपर्ययः स्यात्किन्नेत्याह—

"वरतोऽपि न मुच्यन्ते द्वेषिणः शापतोऽपि तु ।
भक्ता नैव निपात्यन्ते धर्माधर्मैस्तथेतरैः ॥

इति योग्यताया बलवत्त्वादिति शेषः । नन्वेवं चेत्पुनश्चानर्थं आपन्न इति तत्राह—"अन्यावेशकृतं यत्तु तद्गुरायैरपोह्यते । तद्विरुद्धस्वभावानामन्यथानकथञ्चन" इत्यादि हिरण्यकशिप्वाद्यावेष्टासु कृतपापं प्रह्लादादिभिः परिहृतं न तु स्वतो सुरस्येत्यर्थः ॥ २५ ॥

कुतः स्वतो सुरस्यपापं नपरिहृियत ? इत्याशङ्क्य द्वेषाभिनिविष्टमनस्कत्वेन तद्योग्यत्वेन भगवत्प्रेरितत्वेनाभीष्टनिवृत्तित्वेन तदात्मकत्वादित्याशयेनाह—यथेति । मर्त्यस्तमोयोग्यो वैरानुबन्धेन निरन्तरं वैरस्मरणेन तन्मयतां तत्तद्वेषविषयवस्तुनि यथा मनसोऽभिनिवेशम् इयात् प्राप्नोति तथा भक्तिलक्षणोपायेन भक्तिविषये वस्तुनि मनोऽभिनिवेशं न करोति अत्र किं प्रमाणमिति तत्राह—इतीति । निश्चिता मतिरित्यनेन साक्षिलक्षणा मतिर्गृह्यते भक्तियोगेन इति इत्यत्र सन्धिकार्याभावो द्वेषाभिनिवेशिनां बाहुल्यं भक्त्यभिनिवेशिनां कनीयस्त्वं च दर्शयितुं कुतः एतदवगतमितिचेन्न यथा वैराभिनिवेशिन इत्याद्याचार्योक्तेः वैरिणां बाहुल्यं अन्येषामल्पसङ्ख्यात्वं कथमिति चेन्न हरिणा भक्तानां बाहुल्याकरणात् एतदप्युक्तं कथमन्यथेत्यादि ततः कनीयांस एव देवाः ज्यायांसः असुरास्तत इति च भक्त्याऽभिनिवेशिष्वपि कश्चिद्विशेषोऽस्तीति ज्ञापनाय वा सन्ध्यभावः "ऋते ब्रह्माणमव्ययम्" इत्युक्तेः असुराणां निजद्वेषाग्राहित्वप्रकटनायानुबन्धनेति "मागधाद्या यथा नित्यं द्वेषादाग्रहिणो हरौ । न तथा ग्रहिणो भक्ता ऋते ब्रह्माणमव्ययम्" इत्युक्तेः ॥ २६ ॥

ननु तन्मयतामित्यस्य तादात्म्यार्थः किं न स्यादिति तत्राह—कीट इति । द्वेषेण निन्दतश्चैद्यस्य कृष्णेन सायुज्यं कथमभूदिति प्रश्नस्य परिहारः कथमागत इत्यतो वाह, कीट इति यथा पेशस्कृता भृङ्गेण कुड्ये भित्तिसुषिरे रुद्धः कीटः श्यामनामा कृमिः तस्यभृङ्गस्य सरूपतां समानाकारतां विन्दते न तु तादात्म्यं ततो भिन्नत्वेन दृश्यमानत्वात् कीदृशः यान्तं उपर्यागत्य गभीरं नदन्तं भृङ्गं संरम्भभययोगेन ईषत्कोपभययुक्तस्नेहेनान्नं सन्ददातीति स्नेहेन स्वात्मानमाकृष्य क्लिश्नातीति कोपयुक्तभयेन चानुस्मरन् अत्र स्नेहस्यैव प्राधान्यं प्राणधारणपोषणयोः सन्ततमिष्टत्वात् कोपभययोस्तात्कालिकत्वादप्राधान्यमित्यतो योगस्य संरंभभययोर्विशेषणतयोक्तेः योगस्य स्नेहार्थत्वम् ।

"प्रीतिस्नेहस्तथा योग प्रेमबन्धः इतीर्यते" । इति

शब्दनिर्णये सिद्धम् ॥ २७ ॥

कृष्णे भगवत्येवं वैरेण युक्तया अनुचिन्तया भक्तिपूर्वं स्मृत्या धूतपाप्मानश्चैद्यादयः तं कृष्णमापुरित्यन्वयः अत्र सज्जीवानां शापादिनासुराविष्टानामेव मुक्तिः न केवलानां तस्मात्तदाविष्टासुरा वैरेण प्राप्तपाप्मानः "असुर्यानामतेलोकाः" इति श्रुतेः तं लोकसमुदायं प्रापुः सन्तो जयादयो अनुचिन्तया तं कृष्णमवापुरित्ययं विशेषो वैरयुक्तया अनुचिन्तयेत्याचार्योऽपि शब्देन गर्हाभिधायिना ज्ञातव्यः "अनुचिन्तेति तां प्राहुर्भक्तिपूर्वां तु या स्मृतिः" इति वचनात् भक्तिपूर्वैवानुचिन्ताऽत्राभिप्रेतेति ज्ञातव्यम् अतोऽत्र चैद्यादीनां भक्तियुतत्वं प्रतिपाद्यत इत्युपगन्तव्यम् अन्यथा कीटोदाहरणं निरन्वितं स्यात् उदाहरणस्यापि भक्त्यर्थत्वं कुत इति चेन्न ।

स्नेहादन्नं ददातीति स्वाकर्षणभयेऽपि वा ।
विद्यमानेऽप्यल्पकोपे सङ्गतिस्नेहतस्तथा ॥
पेशस्कृद्रूपतां कीटो यथा याति तथैव तत् ।
चैद्यादयोऽसुरावेशाद्धरौ द्वेषयुता अपि ॥
निजस्वभावया भक्त्या जाता हरिसरूपताम् ।
तथापि करुणो विष्णुरन्यावेशाद्यदि द्विषन् ॥
हीयते किं ममानेन नित्यानन्दस्वरूपिणः ।
देहबन्धयुतानां हि द्वेषिणाऽपकृतं भवेत् ॥
ममकोह्यपराध्येत निर्दोषसुखरूपिणः ।
अतो मय्यपराधस्तु स्वस्मिन्नेव न मे भवेत् ॥
अतो यद्यसुरावेशात्कृतमेतेन दुष्कृतम् ।
अनादिभक्तो यस्मान्मे मोचयिष्ये ततस्त्वहम् ॥
इति मत्वा मोचयति चैद्यादीनपि केशवः ।

इति वचनात् किं च निर्वैरेणेत्याद्युक्तमत्रानुसन्धेयं तेन स्नेहाद्यायतनस्य देहस्य नाशादिना कीटस्योपद्रवाभावाद्धरेरप्युपद्रवाभावोऽनुमीयते "तथापि करुणो विष्णुरन्यावेशाद्यदि द्विषन् हीयते किं ममानेन नित्यानन्दस्वरूपिणः" इत्यादिना च ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तदेवं "सकृद्यदङ्गप्रतिमान्तराहिता" इत्यादिवत् तदाभासमपि ध्यायतस्तदावेशात् तत्र वैरेणापि ध्यायतस्तदावेशेनैव निन्दादिकृतपापस्यापि नाशात्. तत्सायुज्यादिकं युक्तमित्याशयेनाह—तस्मादित्यादिभिः, युञ्ज्यादिति । स्नेहकामादीनां विधातुमशक्यत्वात् सम्भावनायामेव लिङ् । वैरानुबन्धादीनामेकतरेणापि युञ्ज्यात् ध्यायेत् चेत् तदा भगवतः पृथक् नेक्षते तदाविष्टो भवतीत्यर्थः । वैरानुबन्धो वैरभावाविच्छेदः निर्वैरं वैराभावमात्रम् औदासीन्यमुच्यते तेन कामादिराहित्यमप्यायाति वैरादिभावराहित्यमित्यर्थः । तेन वा वैरादिभावराहित्येन युञ्ज्यात् । विहितत्वमात्रबुद्ध्या ध्यायेत्. ध्यानोपलक्षितं भक्तियोगं कुर्य्याच्चेत्यर्थः । स्नेहः कामातिरिक्तः परस्परमकृत्रिमः प्रेमाविशेषः स तु तेषु साधकेषु तदभिरुचिरेव ॥ २५ ॥

तदेवं सर्वेषां तदावेश एव फलमिति स्थिते झटिति तदावेशसिद्धये तेषु भावमयमार्गेषु निन्दितेनापि वैरानुबन्धेन विधिमय्या भक्तेर्न साम्यमित्याह—यथेति । वैरानुबन्धेनेति भयस्याप्युपलक्षणं यथा शीघ्रेण तन्मयतां तदाविष्टतां भक्तियोगेन विहितत्वमात्रबुद्ध्या क्रियमाणेन तु न तथा ॥ २६ ॥

अस्तां तादृशवस्तुशक्तियुक्तस्य तेषु प्रकाशमानस्य भगवद्विग्रहाभासस्य वार्त्ता प्राकृतेपि तद्भावमात्रस्य भाव्यावेशफलं महद्दृश्यते इति सदृष्टान्तं तदेव प्रतिपादयति—कीट इति । संरम्भो द्वेषो भयञ्च ताभ्यां योगस्तदावेशस्तेन तत्स्वरूपतां तस्य स्वम् आत्मीयं रूपं आकृतिर्यत्र तत् तां तत्सारूप्यमित्यर्थः ॥ २७ ॥

एवमिति । एवमपीत्यर्थः । नराकृतिपरब्रह्मत्वान्माययैव प्राकृतमनुजतया प्रतीयमाने. ननु, कीटस्य पेशस्कृत् द्वेषे पापं न भवति अत्र तु तत्स्यादित्याशङ्क्याह, वैरेण यानुचिन्ता तदावेशः तयैव पूतपाप्मानः तद्ध्यानावेशस्य तादृक् शक्तित्वादिति भावः ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ननु, मास्तु निन्दादेर्भगवत्पीडाकरत्वं निन्दकस्य दुरदृष्टजनकत्वन्तु स्यादेव. यदुक्तं कैमुत्येनापि "निन्दां भगवतः शृण्वंस्तत्परस्य जनस्य वा । ततो नापैति यः सोपि यात्यधः सुकृताच्च्युतः" ॥ इति सत्यम्. निन्दा हि द्विविधा. आनुकूल्यमयी प्रातिकूल्यमयी च तत्र प्रथमा प्रेमविलासरूपैव "मृगयुरिव कपीन्द्रं विव्यधे लुब्धधर्मा स्त्रियमकृत विरूपां स्त्रीजितः कामयानाम् । बलिमपि बलिमत्त्वावेष्टयद्ध्वाङ्क्षवद्यस्तदलमसितसख्यैर्दुस्त्यजस्तत्कथार्थः" । इति वा सा तु पुरुषार्थचूडामणिमरीचिमञ्जरीव व्रजदेवी तां विना नकैरपि लभ्या. द्वितीया द्विविधा. भगवदभिनिवेशोत्था भगवदनभिनिवेशोत्था च, तत्र प्रथमया शिशुपालादिकृतनिन्दया जन्यमानमेवदुरदृष्टं तत्कारणेनैव भगवत्यभिनिवेशेन सद्य एव विनष्टीकृत्य भक्तियोगेनापि समकक्षतां प्राप्य, विधियोग्यत्वमपि प्राप्यत इत्याह—तस्मादिति सप्तभिः । यस्मान्निन्दाया भगवत्पीडाकरत्वं नास्ति, निन्दकस्य च पापक्षयः सम्भवेत् तस्मादभिनिवेशाद्वैरानुबन्धादिना युञ्ज्यात् भगवति मन इति शेषः । निर्वैरेण नास्ति वैरं केनापि यस्मिन् तेन भक्तियोगेनेत्यर्थः; यद्वा, वैरं प्रतिपक्षत्वं निर्वैरं तत्प्रतियोगिस्वपक्षत्वं पुत्रादिभावः, यः खल्वग्रिमश्लोके सम्बन्धशब्दवाच्यत्वेन स्पष्टीभविष्यति तेन स्नेहादयः कामस्तेन प्रीतिजन्येन कामेनेत्येव व्याख्येयम्. न तु स्नेहस्य पृथक्साधनत्वं तृतीयान्तत्वप्रक्रमभङ्गापत्तेः फलमाह—कथञ्चिदपि तं भगवन्तं पृथक् नेक्षते. किन्तु स्वीयभावानुरूपमेव तं साक्षात् पश्यतीत्यर्थः । भयवैरभाववन्तावधिकारिणौ प्रति तु पृथक् नेक्षते किन्तु सायुज्यप्राप्त्या तं स्वाभिन्नमेवेक्षते इत्येवार्थः एकस्यापि वाक्यस्य पात्रभेदादर्थभेदः श्वेतो धावतीतिवदिति न्यायात् अत्र युञ्ज्यादिति लिङा वैरानुबन्धादिना भगवति मनोभिनिवेशं कुर्यादिति विधिरवगम्यते स च शिशुपालादिषु न सम्भवति तेषां रागप्राप्तत्वात् शिशुपालादिदृष्ट्या अन्येष्वेवैष विधिरित्यपि न शक्यते व्याख्यातुम् भगवत्प्रातिकूल्यस्य विधानानर्हत्वात्. यदुक्तम् "आनुकूल्यस्य ग्रहणं प्रातिकूल्यस्य वर्जनम्" इति. न च शिशुपालादिभ्यो ह्यन्येषु जनेषु विहितोपि वैरानुबन्धो भगवदभिनिवेशं जनयति "तानहं द्विषतः क्रूरान् संसारेषु नराधमान् । क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु" ॥ इत्यादि परस्सहस्रवचनविरोधात् नच रागप्राप्त एव वैरानुबन्धो नरकं जनयेन्न तु विहित इति वाच्यं शिशुपालादिषु व्यभिचारात्. न च शिशुपालादिभिन्नेष्वेवेयं व्यवस्थेति वाच्यं विधिदृष्ट्या वैरानुबन्धस्य शिष्टानुष्ठानादर्शनात् तस्यैव वैरानुबन्धो भगवदभिनिवेशं जनयति यस्य हन्तृत्वेनाभिज्ञातः श्रुतो दृष्टो वा भगवान् सम्भावितोभवति यथा लोके स्वहन्तृत्वेन निर्द्धारितेष्वेव वैरिव्याघ्रसर्पादिषु भीतस्य चित्ताभिनिवेशो नान्येष्विति तस्मादेतत् पद्यमेवं केचिद्व्याचक्षते यस्मात् स्ववैरभाववतामपि हितं करोति तस्मादत्र वैरस्यानौचित्यात् वैरभावव्यतिरिक्तेनैव भावेन मनोऽभिनिवेशयेदित्याह— तस्मादिति । निःशब्दस्य नञर्थत्वान्निर्वैरेण वैरभावभिन्नेन बन्धुमित्रपुत्रादिभावेन मनो युञ्ज्यात् कीदृशेन वैरानुबन्धेन वैरे इव अनुबन्धश्चित्ताभिनिवेशो यत्र तेन यो यस्मिन् अनुबन्धः स तस्मिन्नभिनिविष्ट एवेति ताटस्थ्यभावो वारितः तथा स्नेहात् कामेन स्नेहैकहेतुको यः कामस्तेन कीदृशेन भयेन स्वजनार्यपथत्यागोत्थभयवता व्रजयुवतिकानुगामिना कामेनेत्यर्थः भयेन वेतिवा शब्दात् निर्भयेन कामेन च रुक्मिण्यादिकामानुगामिना कामेनेत्यर्थः औपपत्यं दाम्पत्ययोर्द्वयोरप्यस्ति प्रमाणम्. तथाहि "जारभावेन सुस्नेहं सुदृढं सर्वतोधिकम्" इति बृहद्वामनम् "अग्निपुत्रा महात्मानस्तपसा स्त्रीत्वमापिरे । भर्तारं च जगद्योनिं वासुदेवमजं विभुम्" इति कूर्मपुराणञ्च ॥ २५ ॥

परमनिन्द्यस्यापि वैरभावस्य चित्ताभिनिवेशकत्वांशेनैव महिमा अपार एवेत्याह—यथेति । वैरे वैरभावे योऽनुबन्धः सातत्यन्तेन मर्त्यः पूर्वोक्तयुक्तेः स्वस्य भगवद्वध्यत्वज्ञानविशिष्ट एव नान्यः । तन्मयतां स्त्रीमयः कामुक इतिवत्तदेकाभिनिवेशवत्त्वं न तथेति सद्य इति शेषः निश्चिता मतिरिति ममायं निश्चय एव कृत इत्यतोत्र प्रमाणं न प्रष्टव्यं यदि भक्तियोगादपि वैरभावो मनो-

कामाद्द्वेषाद्भयात्स्नेहाद्यथा भक्त्येश्वरे मनः।
आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः ॥ २९ ॥
गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः।
सम्बन्धाद्वृष्णयः स्नेहाद्यूयं भक्त्या वयं विभो ! ॥ ३० ॥
कतमोऽपि न वेनः स्यात्पञ्चानां पुरुषं प्रति।
तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेत् ॥ ३१ ॥
मातृष्वस्रेयो वश्चैद्यो दन्तवक्त्रश्च पाण्डव !।
पार्षदप्रवरौ विष्णोर्विप्रशापात्पदाच्च्युतौ ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

भिनिवेशकत्वांशेनाधिकस्तदा किमुत वक्तव्यं तादृशाभिनिवेशवान् स भक्तियोग इति भावः। तेन श्वित्रो न जातः जिह्वायां नान्धं विविशतुस्तम इति त्वया शिशुपालादीनाम् निष्टसाधनत्वबुध्या वैरानुबन्धो निन्द्यते मयात्विष्टसाधनीशरोमयोर्भक्तियोगादपि स्तूयते इति, कुतः शिशुपालादीनां दुर्गतिसंभावनापीति ध्वनिः तेन भावमार्गेष्वतिनिन्द्योपि वैरभावो भगवदभिनिवेशशीघ्रसम्पादकत्वांशेनैव भक्तियोगात् शुद्धात् यदि स्तूयते तदा भावमार्गेष्वतिवंद्यो वसुदेवादीनां वात्सल्यसख्यादिः किमुततरां नंदादीनामात्यन्तिकतदभिनिवेशं प्रतिच्छयातिभूमसम्पादकः सस इत्यनुध्वनिः तेनार्वाचीनानामपि श्रीनन्दादिभावानुसारेण वात्सल्यादिभावेप्सुनां रागानुगा भक्तिर्वैधभक्तेः सकाशादुत्कर्षवतीति पर्य्यनुध्वनिः ॥ २६ ॥

तत्र वैरभाववतां मध्ये केचित् शिशुपालादयः सारूप्यमापुरितिसदृष्टान्तमाह–कीटइतिद्वाभ्याम्। पेशस्कृता भ्रमरविशेषेण संरंभोद्वेषः भयश्च तयोर्योगेन ॥ २७ ॥

माया कृपा सद्गतिप्रापणी मनुजेषु स्वद्वेष्टृष्वपि यस्य तस्मिन् यद्वा मायया स्वरूपेणैव "मनुजे स्वरूपभूतया नित्यशक्त्या मायाख्यया युतः" इति श्रुतेः। वैरेण वैरजनितध्यानावेशेन पूतो-नष्टपाप्मा तन्निन्दनातिरस्कारादिर्येषां ते ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

यस्माद्भगवतो निन्दनादिना पीडा न भवति प्रत्युत तत्पादपद्मप्राप्तिसाधनं स्मरणं भवति तस्माद्धेतोः वैरानुबन्धेन निर्वैरेण सर्वात्मभावेन भक्तियोगेनेत्यर्थः। युञ्ज्यात् भगवति मनो योजयेत् पृथक् भगवदन्यत् वस्तु कथञ्चिदपि नेच्छेत् नेक्षेत. किन्तु, भगवति सर्वात्मभावेन मनो युञ्ज्यादित्यर्थः ॥ २५ ॥ २६ ॥

पेशस्कृता भ्रमरेण कुड्यायां रुद्धः कीटः संरम्भो द्वेषो भयश्च ताभ्यां योगो न स एकाग्र्यं तेनानुस्मरन् तस्य पेशस्कृतः सरूपतां विन्दते ॥ २७ ॥

मायया कृपया भक्तवात्सल्येनेत्यर्थः। मनुजे मनुवंशे आविर्भूते चन्द्रवंशस्यापीलाद्वारा मनुवंशत्वात् वैरेण यानुचिन्ताऽनुध्यानं तेन पूतपाप्मानस्तमापुः ॥ २८ ॥

भाषाटीका।

तस्मात् वैर के संबंध से भक्ति में भय से स्नेह से अथवा काम से कृष्ण भगवान् में मन लगावै वे किसी प्रकार पृथक् नहीं देखते हैं ॥ २५ ॥

राजन् ! हमारा तौ निश्चय ऐसा है कि मनुष्य जैसे वैर से तन्मयता को प्राप्त होता है वैसा भक्ति योग से नहीं ॥ २६ ॥

जैसे भींत में भ्रमर का रोका हुआ कीट (कीडा) संरंभ (द्वेष) और भय के योग से उसका स्मरण करते २ भ्रमर स्वरूप हो जाता है ॥ २७ ॥

ऐसेही कृपा से मनुष्य रूप को धारण करने वाले साक्षात् ईश्वर ऐसे श्रीकृष्ण भगवान मे वैर से पवित्र होकर सदा उन के चिन्तन करने से कृष्ण ही को प्राप्त हो गये ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

तदघं कामादिनिमित्तं पापं हित्वा ॥ २९ ॥

तानाह—गोप्यइति ॥ ३० ॥

तर्हि वेनः किमिति नरके पातितः ? तीव्रध्यानाभावात्पापमेव तस्य फलितमित्याह–कतमोऽपीति। पुरुषं श्रीहरिंप्रति पुरुषे पुरुषस्य कामासम्भवाद्भयादिभिश्चिन्तयतां पञ्चानां मध्ये वेनो न कतमोऽपीत्युक्तम् ॥ ३१ ॥

तदेवमितिहासप्रस्तावकथामुक्त्वा श्रीकृष्णे शिशुपालस्य

युधिष्ठिरउवाच ।

कीदृशः कस्य वा शापो हरिदासाभिमर्शिनः ।
अश्रद्धेय इवाभाति हरेरेकान्तिनां भवः ॥ ३३ ॥
देहेन्द्रियासुहीनानां वैकुण्ठपुरवासिनाम् ।
देहसम्बन्धसम्बन्द्धमेतदाख्यातुमर्हसि ॥ ३४ ॥

नारद उवाच ।

एकदा ब्रह्मणः पुत्राविष्णोर्लोकं यदृच्छया ।
सनन्दनादयो जग्मुश्चरन्तो भुवनत्रयम् ॥ ३५ ॥
पञ्चषड्ढायनार्भाभाः पूर्वेषामपि पूर्वजाः ।
दिग्वाससः शिशून्मत्वा द्वास्स्थौ तान्प्रत्यषेधताम् ॥ ३६ ॥

श्रीधरस्वामिकृतभावार्थदीपिकायाम्

वैरानुबन्धे कोहेतुरित्यपेक्षायां तमेवेतिहासं वक्तुमाह–मातृष्वस्रेय इति । पदाद्वैकुण्ठाच्च्युतौ ॥ ३२ ॥

हरिदासावभिमृशत्यभिभवतीति तथा कस्य शापः कीदृशो वा अश्रद्धेयोऽनादरणीयइव असम्भवात् भवोजन्म ॥ ३३ ॥

असम्भवमेवाह—जन्महेतुभूतैः प्राकृतैर्देहेन्द्रियासुभिर्हीनां शुद्धसत्त्वमयदेहानामित्यर्थः । प्राकृतदेहसम्बन्धेन सम्बन्द्धमेतदाख्यानमाख्यातुमर्हसि ॥ ३४ ॥ ३५ ॥

कथम्भूता पञ्च वा षड् वा हायनानि वर्षाणि येषां ते अर्भा बालास्तद्वदाभा येषां ते पूर्वेषां मरीच्यादीनामपि पूर्वजास्तेभ्यः प्रथमं जाताः दिग्वाससो दिगम्बराः अतः शिशून् मत्वा ॥ ३६ ॥

———

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

एवमुक्तार्थं दार्ष्टान्तिके निदर्शयंश्च केचित्तल्लब्धमित्याह—कामादिति । यथा भक्तियोगेनेश्वरे मन आवेश्य भगवतो गतिं जग्मुस्तथा कामादिभिरपि तस्मिन् मन आवेश्य तदघं मनस आवेशननिमित्तं कामादिरूपमघं हित्वा अत्यन्तभावनाप्रकर्षेण कामादिकं विस्मृत्येत्यर्थः बहवस्तद्गतिं प्राप्ताः ॥ २९ ॥

एतदेवोदाहरणविशेषेषु दर्शयति–गोप्यइति । भगवति कामाद्गोप्यस्तद्गतिं गता इत्यनुषङ्गः भयात्कंसस्तद्गतिं गतः इति विभक्तिविपरिणामः । यद्वा, गोप्यादयः सर्वे प्रतिनियतकामादिभिरूपायैस्तद्गतिं गता इति यौगपद्येनान्वयः । सम्बन्धाद्वृष्णयः स्नेहाद्यूयमिति वृष्णयो यूयञ्च देहसम्बन्धकृतस्नेहादित्यर्थः । अन्यथा पञ्चप्रकारान्तर्भावायोगात् भक्त्या वयं नारदादयस्तत्र स्नेहस्तुल्यसन्निकृष्टविषयः प्रेमा भक्तिरुत्कृष्टविषयेतिभेदः ॥ ३० ॥

एवमुक्तेनार्थेन सिद्धं वेनचैद्ययोर्वैषम्यमाह–कतमइति । उक्तानां पञ्चानां कामुकद्वेषिविभ्यत्स्नेहवद्भक्तरूपाणां पञ्चानां मध्ये वेनस्त्वीश्वरं परमपुरुषंप्रति कोपि न भवति कामाद्यन्यतमो नभवत्यतस्तन्निन्दया निरयप्राप्तिरिति भावः । तस्मादुक्तानां पञ्चानां मध्ये केनाप्यन्यतमेनोपायेन भगवति श्रीकृष्णे मनो निवेशयेत् निवेशिते च मनसि मनोनिवेशननिमित्तं कामादिकमपि विस्मृत्य तं प्राप्नोतीति भावः, अत एव हि श्रीविष्णुपुराणे "अपगतदोषानुबन्धो भगवन्तमवाप" इति सुक्तम्. ननु, संरम्भभययोगादीनामपि भक्तियोगवद्भगवत्प्राप्तिसाधनत्वे यथा आरब्धविच्छिन्नभगवद्भक्तियोगः पुनर्जन्मान्तरे "पूर्वाभ्यासेन कौन्तेय" इत्यादिभगवदुक्तरीत्या पूर्वाभ्यासेनोपसंहृतसम्पूर्णभगवद्भक्तियोगो भगवन्तं प्राप्नोति एवमारब्धविच्छिन्नसंरम्भभयादियोगोपि जन्मान्तरे पूर्वाभ्यासेन परिपूर्णतद्योगो भगवन्तं प्राप्नुयात् नचैवं युक्तम्, अन्यथा विष्णुद्वेषिणां सर्वेषामपि मुक्तिप्रसङ्गः । एवञ्च "यः पुत्रः पितरं द्वेष्टि तं विद्यादन्यरेतसम् । यो विष्णुं सततं द्वेष्टि तं विद्यादन्त्यरेतसम्" ॥ इत्यादिविष्णुदूषकनिन्दावचनानामनवकाशप्रसङ्गः । उच्यते, संरम्भभयादीनां तस्मिन्नेव जन्मनि स्वविस्मारकभावनाप्रकर्षावहानामेव मुक्तिहेतुत्वं न तु विच्छिन्नानां. जन्मान्तरसम्बन्धिनामपि; प्रत्युत तेषां निरयहेतुत्वमेव. भक्तियोगस्य तु विच्छिन्नस्यापि पुनर्जन्मान्तरे भावनाप्रकर्षावहनद्वारा मुक्तिसाधनत्वमिति. नचात्र मानाभावः धर्मिग्राहकमानस्य सत्त्वात् "पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते" इत्यारभ्य "तत्र तं बुद्धिसंयोगं लभते पौर्वदैहिकम् । यतते च ततो भूयः संसिद्धौ कुरुनन्दन । पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोपि सः" इत्यन्तेन भगवतैवारब्धस्यापि भक्तियोगस्य पुनः कालान्तरे फलसाधनत्वस्योक्तत्वात् नत्वेवं संरम्भभयादीनां सकृदारब्धानां पुनर्जन्मान्तरे भगवत्प्राप्तिसाधनत्वप्रमापकं किञ्चिद्वचनं विद्यते प्रत्युत "योविष्णुम्" इत्यादिनिन्दा

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वचनान्येव सन्ति यदि भगवन्निन्दादिकारिणामपि सर्वेषां द्वेषादिविस्मारकभावनाप्रकर्षः स्यात्तर्हि स्यादेव तेषां मुक्तिरिति न कोपि विरोधः ॥ ३१ ॥

एवं संरम्भयोगादीनामपि भगवत्प्राप्तिसाधनत्वेन चैद्यदन्तवक्त्रयोर्न मुक्तौ विस्मयः कार्य इत्यभिधाय न केवलं तयोर्भगवद्विषयकभावनाप्रकर्षे तद्विषयकसम्बन्ध एव हेतुरपि तु पूर्वसिद्धं भगवदानुकूल्यञ्चेति वक्तुमितिहासं प्रतुष्टूषुः प्रश्नावसरप्रदानाय तयोस्तावद्विष्णुपार्षदत्वं विप्रशापाद्भ्रंशञ्चाह–मातृष्वसेय इति । मातुः स्वसा भगिनी तस्या अपत्यं पुमान् मातृष्वसेयः हे पाण्डव युधिष्ठिर ! यो भवतो मातृष्वसेयः चैद्यो दन्तवक्त्रश्च द्वाविमौ पूर्वं विष्णोः पार्षदप्रवरौ द्वारस्थितौ विप्रशापाद्धेतोः पदात्स्वस्थानाच्च्युतौ भ्रंशौ एवञ्च तयोः पाश्चात्यद्वेषातिशयात्प्राक्तनात्यन्तभगवदानुकूल्याच्च शापान्ते भावनाप्रकर्षसिद्ध्या मुक्तिरिति भावः । अण्डान्तर्वर्तिन्युपेन्द्रादिविष्णुलोके कस्मिंश्चित् "तदुपर्यपि बादरायणः सम्भवात्" इति न्यायेनोपेन्द्राद्युपासनया तद्द्वारपत्याधिकारं गतौ कौचिज्जीवौ स्थितौ पश्चाद्विप्रशापात्पदच्युताविति नारदस्याशयः ॥ ३२ ॥

इममाशयमजानन्नेवं प्रश्नावसरे दत्ते पृच्छति युधिष्ठिरः—कीदृशइतिद्वाभ्याम् । कीदृशः शाप इति शापप्रकारप्रश्नः कस्य वेति तत्कर्तृप्रश्नः, तस्य विशेषणं हरिदासाभिमर्शिन इति हरिदासानभिमृशति पराभवतीतिहरिदासाभिमर्शी तस्य अनेन तस्यानौचित्यं सूचितम्. हरेरेकान्तभक्तानां निकटवर्तिनां भवो जन्म अश्रद्धेय इव अनादर्तव्य इवाभाति प्रतीयते. अयं भावः "एतं देवयानं पन्थानमापद्य न च पुनरावर्तते न च पुनरावर्तते' इति श्रुत्युक्तरीत्या मुक्तानामेव पुनरावृत्तिर्न विद्यते किम्पुनर्नित्यसिद्धानां भगवत्पार्षदानां भगवत्स्थानाद्भ्रंशाभाव इह जन्माभवश्चेति अत इदं भगवत्पार्षदयोः तत्पदाद्भ्रष्टयोरुच्यमानमिह जन्मानादर्तव्यम् तज्जन्मप्रतिपादकं वाक्यम् "जरद्गवः कम्बलपादुकाभ्याम्" इत्यादिवाक्यवदसङ्गतार्थमिति ॥ ३३ ॥

तयोर्जन्मासम्भवमेव विवृण्वन्पृच्छति—देहेन्द्रियासु हीनानामिति । कर्मायत्तप्राकृतदेहेन्द्रियप्राणरहितानां वैकुण्ठपुरवासिनां नित्यसिद्धानामित्यर्थः । अनेन पूर्वमप्यसम्भावितप्राकृतदेहेन्द्रियप्राणसम्बन्धानामित्युक्तम् एवंविधानां देहसम्बन्धः प्राकृतदेहसम्बन्धस्तदनुबन्धिरागद्वेषादिसम्बन्धश्च तयोः समाहारः तदेतद्घटमानं मह्यमाख्यातुं कथयितुमर्हसि ॥ ३४ ॥

एवमापृष्टो भगवान्नारदः प्रश्नस्योत्तररूपमितिहासं वक्तुमुपक्रमते–एकदेत्यादिना । ब्रह्मणश्चतुर्मुखस्य पुत्राः सनन्दनादयः आदिशब्देन सनत्कुमारसनत्सुजाता विवक्षिताः एते भुवनत्रयं चरन्तः कदाचिद्यदृच्छया विष्णोर्लोकं जग्मुर्ययुः अयं विष्णुलोकशब्दो ब्रह्माण्डांतर्गतविष्णुलोकविषयः न तु मुक्तप्राप्यपरमव्योमविषयः "वैकुण्ठः कल्पितो येन लोकोलोकनमस्कृतः" इति वक्ष्यमाणत्वात् मुक्तप्राप्ये अर्चिरादिमार्गैणैव गम्ये परमव्योम्नि योगिनामपि सनकादिकानां गमनासम्भवान्नित्यसिद्धानामिहोत्पत्त्यसंभवाच्च ॥ ३५

सनन्दनादान् विशिंषन्नाह–पञ्चेति । पञ्च षड् वा हायना वत्सरा येषां ते अर्भा अर्भकास्तदाभासस्तद्वदवस्थिताः तान्, अर्भशब्दाभिप्रेतं विवृणोति पूर्वेषां रुद्रादीनामपि पूर्वं जातान् दिग्वाससो दिगम्बरानेवंभूतांस्तान्सनन्दनादीन् शिशून् शिशुत्वेनालक्ष्य विष्णोर्द्वाःस्थौ द्वारि स्थितौ द्वारपौ प्रत्यषेधतां न्यवारयताम् ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इतोपि भक्तिगर्भकामादिनैव भगवत्प्राप्तिरित्याह—कामादिति । तृतीयार्थे पञ्चमी कामादिभिरपि यथा यथावत् भक्त्या सहैव कृष्णे मन आवेश्य द्वेषादिना यदघमापादितं तदघं हित्वा तस्य कृष्णस्य गतिं लोकं गता इत्यन्वयः प्रथमतः कामादियुक्तया भक्त्या हरौ मनः आवेश्य पश्चाद्यथाभूतया भक्त्याऽघं हित्वेत्यर्थः ॥ २९ ॥

बहव इत्युक्तस्य विषयविभागमाह—गोप्य इति । कामात्कामयुक्तया भक्त्या कंसः कंसाविष्टो भृगुः भययुक्तया भक्त्या चैद्यादयः चैद्यादिस्थाजयादयः द्वेषयुक्तया वृष्णयः सम्बन्धो बन्धुना तन्निमित्तया यूयं पाण्डवः समतुलितबहुमानयुक्तया वयं शुकादिशब्दवाच्याः केवलया भक्त्या अत्र कश्चन विशेषः—

"गोप्यः कामयुताभक्ताः कंसाविष्टः स्वयं भृगुः ।
ज्ञेयो भययुतो भक्तश्चैद्यादिस्था जयादयः ॥
विद्वेषसंयुता भक्ता वृष्णयो बन्धु (१) संयुताः ।
बहुमानस्नेहसाम्याद्वा भक्ताः प्रकीर्तिताः ॥
स्नेहोपसर्जनादेव बहुमानान्मुनीश्वराः ।
बहुमानोपि देवानां ऋषिभ्योप्यधिको मतः ॥
ब्रह्मवीन्द्रेन्द्रकामादेरितरेषां यथाक्रमम्" ॥

इति वचनादवगन्तव्यः ॥ ३० ॥

भक्त्यैव पुरुषार्थो न केवलद्वेषेणेत्याशयवानाह—कतम इति । कामाद्युपसर्जनभक्तियोगानां पञ्चानां मध्ये कतमोपि भक्तियोगो वेनस्य नास्ति असौ (२) कश्चन द्वेषात्मक एव यस्माद्भक्तियोगमन्तरेण पुरुषार्थो नास्ति तस्मात्केनापि प्रकारेणापादितेनोपायेन भक्तिलक्षणेन कृष्णे मनो निवेशयेत् द्वेषादिना "उपायो भक्तिरुद्दिष्टो द्वेषाद्या अनुपायकः" इत्यभिधानादत उपायो भक्तिरेव अतो भक्तिमन्तरेणोपायो नास्तीत्यर्थः ॥३१॥

पैशस्कृता रुद्ध इत्यत्र चैद्यादयः स्वतो भक्ता असुरावेशाद्द्वेषिण इत्युक्तं तत्र हेतुमाह—मातृष्वस्रेय इति । पार्षदप्रवरत्वं स्वतो भक्तत्वे विप्रशापादसुराविष्टत्वं द्वेषित्वे हेतुः ॥ ३२ ॥

हरिदासान् हरिभक्तान् अभिमृशति स्पृशतीति हरिदासभिमर्शनः हरेरेकान्तिनां नियतभक्तानां भव उत्पत्तिः शरीरयोगलक्षणः स्वपदभ्रंशलक्षणः शापः अश्रद्धेय इवाभाति सयुक्तिकं निरूपयितुं न क्षममिति प्रतीयते ॥ ३३ ॥

तत्र कारणमाह-देहेति । देहाद्यभावश्च कुत्रत्यानामिति तत्राह–

(१) भावप्रधानोनिर्देशः (२) वेनः ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वैकुण्ठेति, तेषां प्राकृतदेहाद्यभावेन जन्मादिकं कथं घटत इति शङ्क्यत इत्यर्थः । देहसम्बन्धः देहयोगः तस्य सम्बन्धः निमित्तभूतः शाप एतच्छापनिमित्तं अनेन देहयोगं तन्निमित्तशापं तन्निमित्तं च व्याख्यातुमर्हसीत्यर्थसमुदायो लक्ष्यत-इत्यर्थः ॥ ३४ ॥

तदर्थजातं कुतोवगम्यत इतिपरिहारवचनादित्यत आदित वक्ति एकदेति ॥ ३५ ॥

पञ्चषड्ढायनार्भाभाः पञ्चवर्षाः षड्वर्षाः अर्भाः अर्भका बालास्तद्वदाभा दीप्तिर्येषां ते तथा तत्समाना इत्यर्थः । शिशून्मत्वा पुरप्रवेशकारणाय वेषान्तरमापन्नानित्याशङ्क्येत्यर्थः द्वाःस्थौ द्वारि स्थौ जयविजयौ तान् सनन्दनादीन् प्रत्यषेधतां वेत्रविधानेन न्यवारयतामित्यन्वयः द्वाःस्थावित्युक्त्या जयविजययोः अधिकारस्थत्वं सूचयति तेन वैकुण्ठे अधिकारस्थिताः मुक्ताश्चेति द्विविधा जनाः सन्ति । तत्राधिकारस्था देहादियोगित्वाद्वरशापयोग्याः पश्चान्नयोग्या इति ज्ञायते तदुक्तम् "अधिकारस्थिताश्चैव विमुक्ताश्च द्विधाजनाः । विष्णुलोकस्थितास्तेषां वरशापादियोगिनः । अधिकारस्थिता मुक्तिं नियतं प्राप्नुवन्ति च । विमुक्त्यनन्तरं तेषां वरशापादयो न तु । देहेन्द्रियाऽसु युक्ताश्च पूर्वम्पश्चान्नतैर्युताः ॥ अप्यसीमानिभिस्तेषां देवैः स्वात्मोत्तमैर्युताः" ॥ इति अनेन वैकुण्ठे मुक्तामुक्तस्थानद्वयमस्तीति ज्ञायते ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नच शास्त्रविहितेनैव भगवद्धर्मेण सिद्धिः स्यात् न तदविहितेन कामादिनेति वाच्यम्. यतः कामाद्द्वेषादिति । यथा विहितया भक्त्या ईश्वरे मन आवेश्य तद्गतिं गच्छन्ति तथैवाविहितेनापि कामादिना वहवो गता इत्यर्थः । तदघं तेषु कामादिषु मध्ये यद्द्वेषभययोरघं भवति तच्छित्वैव भयस्यापि द्वेषसम्मिलितत्वादघोत्पादकत्वं ज्ञेयम्. अत्र केचित् कामेप्यघं मन्यन्ते । तत्रेदं विचार्य्यते भगवति काम एव केवलः पापावहः किं वा पतिभावयुक्तः अथवा उपपतिभावयुक्त-इति. स एव केवल इति चेत् स किं द्वेषादिगणपातित्वात् तद्वत् स्वरूपेणैव वा, परम शुद्धे भगवति यदधरपानादिकं यच्च कामुकत्वाद्यरोपणं तेनातिक्रमेण वा, पापश्रवणेन वा ? नाद्येन. "उक्तं पुरस्तादेतत्ते चैद्यः सिद्धिं यथागतः । द्विषन्नपि हृषीकेशं किमुताधोक्षजप्रियाः" ; इत्यादौ द्वेषादेर्न्यक्कृतत्वात्. तस्य तु स्तुतत्वात्. अतस्तत्र प्रिया इति स्नेहवत् कामस्यापि प्रीत्यात्मकत्वेन तद्वदेव न दोषः । तादृशीनां कामो हि प्रेमैकरूपः "यत्ते सुजातचरणाम्बुरुहं स्तनेषु भीताः शनैः प्रियदधीमहि कर्कशेषु । तेनाटवीमटसि तद्व्यथते न किं स्वित् कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः" इत्यादावतिक्रम्यापि स्वसुखं तदानुकूल्य एव तात्पर्यदर्शनात्. सैरन्ध्यास्तु भावोरिरंसाप्रायत्वेन श्रीगोपीनामिव च केवलं तत्तात्पर्य्याभावात्तदपेक्षयैव निन्द्यते नतु स्वरूपतः "सानङ्गतप्तकुचयोः" इत्यादौ "अनन्तचरणेन रुजोमृजन्ती" इति "परिरभ्य कान्तमानन्दमूर्त्तिम्" इति कार्य्यद्वारा तत्स्तुतेः तत्रापि "सहोष्यतामिह प्रेष्ठ ! दिनानि कतिचिन्मया" इत्यत्र प्रीत्यभिव्यक्तेश्च । तदेवं तस्य कामस्य द्वेषादिगणान्तःपतितत्वं परिहृत्य तेन पापावहत्वं परिहृतम् अथ कामुकत्वाद्यारोपणाधरपानादिरूपस्तत्र व्यवहारोऽपि नातिक्रमहेतुः यतो "लोकवत्तु लीलाकैवल्यम्" इति न्यायेन लीला तत्र स्वभावत एव सिद्धा. तत्रच श्रीभूलीलादिभिस्तस्य तादृश लीलायाः श्रीवैकुण्ठादिषु नित्यसिद्धत्वेन स्वतन्त्रलीलाविनोदस्य तस्याभिरुचितत्वावगमात्. तादृशलीलारसमोहस्वाभाविकं भगवत्ताद्यनुसन्धानमपि तत्कामुकत्वादिमननमपि च तदभिरुचितत्वेनैवावगम्येत. तथा तत्प्रेयसीजनानामपि तत्स्वरूपशक्तिविग्रहत्वेन परमशुद्धरूपत्वात् ततो न्यूनत्वाभावाच्च तदधरपानादिकमपि नाननुरूपम् । पूर्वयुक्त्या तदभिरुचितमेव । तासां तत्स्वरूपशक्तिविग्रहत्वं श्रीकृष्णसन्दर्भे दर्शितमस्ति दर्शयिष्यते च श्रीदशमे, नच प्राकृतरामाजने दोषः प्रसञ्जनीयः तद्योग्यं तादृशं भावं स्वरूपशक्तिविग्रहञ्च प्राप्यैव तदिच्छयैव तत्प्राप्तेः । अथ पापश्रवणेन च न पापावहोऽसौकामः तच्छ्रवणादेव. अतः पतिभावयुक्ते च तत्र सुतरां न दोषः प्रत्युत स्तुतिः श्रूयते "यास्सम्पर्यचरन् प्रेम्णा पादसम्वाहनादिभिः । जगद्गुरुं भर्तृबुद्ध्या तासां किं वर्ण्यते तपः" इति महानुभावमतीनामपि तद्भावः श्रूयते । यथा श्रीमध्वाचार्यधृतं महाकौर्मवचनं "अग्निपुत्रा महात्मानस्तपसा स्त्रीत्वमापिरे । भर्तारञ्च जगद्योनिं वासुदेवमजं विभुम्" इति अत एव वन्दितम् "पतिपुत्रसुहृद्भ्रातृपितृवन्मातृवद्धरिम् ये ध्यायन्ति सदोद्युक्तास्तेभ्योपीह नमो नमः" इत्यनेन अथोपपतिभावेन च न पापावहोसौ "यत्पत्यपत्यसुहृदामनुवृत्तिः" इत्यादिना ताभिरेवोच्चरितत्वात् "गोपीनां तत्पतीनाञ्च" इत्यादिना, श्रीशुकदेवेन "न पारयेहं निरवद्य संयुजाम्" इत्यनेन स्वयं श्रीभगवता तादृशानामन्येषामपि तद्भावो दृश्यते यथोदाहरिष्यते श्रीदशमे "पुरा महर्षयः सर्वे दण्डकारण्यवासिनः" इत्यादि । अतः पुरुषेष्वपि स्त्रीभावेनोद्भवात् भगवद्विषयत्वात् न प्राकृतकामदेवतोद्भावितः प्राकृतकामोऽसौ किन्तु "साक्षान्मन्मथमन्मथः" इति श्रवणात् आगमादौ तस्य कामत्वेनोपासनाच्च भगवदेकोद्भावितोऽप्राकृत एवासौ काम इति ज्ञेयम् अत एव मुमुक्षुमुक्तनित्यपार्षदानामपि वाञ्छनीयोऽसाविति दर्शितम् श्रीदशमे "एताः परं तनुभृतः" इत्यादिना. यतः श्रुतयोपि "नित्यसिद्धगोपिकाभावाभिलाषिण्यः सत्यस्तद्रूपेणैव तद्गणान्तःपातिन्यो बभूवुः" इति "निभृतमरुन्मनोक्ष" इत्यादि श्रुतिस्तवे दर्शयिष्यते । तदेवं साधु व्याख्यातं कामादित्यादौ द्वेषभययोर्यदघमित्यादि ॥ २९ ॥

अथ 'वहवस्तद्गतिं गताः' इत्यत्र निदर्शनमाह—गोप्य इति सार्द्धेकेन । गोप्य इति साधकचरीणां गोपीविशेषाणां पूर्वावस्थामवलम्ब्योच्यते, वयमिति. यथा श्रीनारदस्य "प्रयुज्यमाने मयि तां शुद्धां भगवतीं तनुम्." इत्याद्युक्तरीत्या पार्षददेहत्वे सिद्धे तेन स्वयं वयमिति निजपूर्वावस्थामवलम्ब्योच्यते । तत्रैव वैधी भक्तिः ।

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अधुना लब्धरागस्य तस्य "नमत्येकान्तभक्तानां गुणदोषोद्भवा-गुणाः । गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितः" इति न्यायेन विध्यनधीना रागात्मिकैव विराजत इति. अत एव तद्गतिं गता इति तेषां फलप्राप्तेरप्यतीतत्वनिर्देशः एवमेव वक्ष्यते स्वयं भगवता "केवलेन हि भावेन गोप्यः" इत्यादि । "मत्कामारमणम्" इत्यादौ "सङ्गाच्छतमहस्रशः" इति च अत्र ता गोप्य इवाधुनिकयश्च तद्गुणादिश्रवणेनैव तद्भावा भवेयुः यथोक्तम्. "श्रुतमात्रोपि यः स्त्रीणां प्रसह्याकर्षते मनः । उरुगायोरुगीतो वा पश्यन्तीनां कुतः पुनः" इति । अथ पार्षदचरस्यापि चैद्यस्यागन्तुकोपद्रवाभासदर्शनेनैव साधकत्वनिर्देशः । सम्बन्धाद्यः स्नेहो रागस्तस्माद्वृष्णयो यूयं चेत्येकम्. 'तस्माद्वैरानुबन्धेन' इत्यादौ कामादित्यादौ चोक्तस्यैवार्थस्योदाहरणवाक्येस्मिन् तदैकार्थ्यावश्यकत्वात् पञ्चानामित्यनुरोधात् उभयत्रापि सम्बन्धस्नेहयोर्द्वयोरपि विद्यमानत्वाच्च । सम्बन्ध ग्रहणं रागस्यैव विशेषज्ञापनार्थं गोपीवदत्रापि सम्बन्धे स्नेहेच वृष्णिविशेषाः पाण्डवसम्बन्धिविशेषाश्च पूर्वावस्थामवलम्ब्य साधकत्वेन निर्दिष्टाः । अतः सम्बन्धे स्नेहोपि तदभिरुचिमात्रं ज्ञेयम्. 'भक्त्या विहितया' अस्या एव प्रतिलब्धत्वेन भावमार्गे निर्देष्टुमुपक्रान्तत्वात् ॥ ३० ॥

यदि द्वेषेणापि सिद्धिस्तर्हि वेनः किमिति नरके पातित इत्याशङ्क्याह—कतम इति । पुरुषं भगवन्तं लक्षीकृत्य पञ्चानां वैरानुबन्धादीनां मध्ये वेनः कतमोपि न स्यात् तस्य तं प्रति प्रासङ्गिकनिन्दामात्रात्मकं वैरं. नतु वैरानुबन्धः ततस्तीव्रध्यानाभावात् पापमेव तत्र प्रतिफलितमिति भावः । ततोऽसुरतुल्यस्वभावैरपि तस्मिन् स्वमोक्षार्थं वैरानुष्ठानसाहसं न कर्तव्यमित्यभिप्रेतम् अत एव "ये वै भगवता प्रोक्ता उपाया ह्यात्मलब्धये" इत्यादेरपि तेषु अतिव्याप्तिर्व्याहन्यते अनभिप्रेतत्वेनाप्रोक्तत्वात् यस्मादेवं तस्मादिति अत्रापि पूर्ववन्निवेशयेदिति सम्मतिमात्रं न विधिः केनापि तेष्वप्युपायेषु युक्ततमेनैकेनेत्यर्थः । अहो यस्तादृशबहुप्रयत्नसाध्यभक्तिमार्गेण चिरात् साध्यते स एव चिराद्भावविशेषमात्रेण तत्र च द्वेषादीनामपि तस्मादेवम्भूते परमसद्गुणसद्भावे तस्मिन् दूरेस्तु पामरजनभाव्यस्य वैरस्य वार्ता को वाधमः औदास्यमवलम्ब्य प्रीतिमपि न कुर्यादिति रागानुगायामेव तच्च युक्ततमत्वमङ्गीकृतं भवति ॥ ३१ ॥

चैद्यदन्तवक्त्रौ तु नासुरौ किन्तु हरेः स्वभक्तिप्रवर्त्तकविप्रकुलदाक्षिण्यभयस्वैरलीलेच्छया तदनुकारिणावेवेत्यभिप्रायं प्रश्नोत्तराभ्यां दर्शयितुमाह—मातृष्वस्रेय इति । तत्र तयोरन्यथाभावः सर्वथा न सम्भवत्येवेति प्रश्नस्यार्थः "न च पुनरावर्त्तते" इति श्रुतेः । "अनावृत्तिश्शब्दात्" इति न्यायात् "मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते" इति श्रीगीताभ्यः । सत्यमथैवासौ सिद्धान्तस्तु तत्रेतिहासमात्रम् तच्च पूर्वयुक्त्यैव सम्भवतीति तदभिप्रायः वक्ष्यते च स्वयम् 'विष्णुचक्रहतांहसौ" इति व्याख्यास्यते च तैः तयोः पापमेव हतं न तु ताविति ॥ ३२—३४ ॥

एकदेति युग्मकम् । यदृच्छया केनापि भाग्योदयेन विष्णोर्लोकं जग्मुः ॥ ३५ ॥ ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

भद्राभद्रभाववन्तः सर्वे एव तं प्राप्नुवन्ति साधनतारतम्यात् फलतारतम्यन्तु युक्त्या स्वयं विवेचनीयमित्याह—कामादिति । तदेवं द्वेषजन्यमघं हित्वा द्वेषजन्येनैवावेशेन विनष्टीकृत्येत्यर्थः । न चात्र कामेप्यघं व्याख्येयम "द्विषन्नपि हृषीकेशं किमुताधोक्षजप्रियाः" इति तद्गतीनां प्रियात्वेनाख्यास्यमानत्वात् तद्गतिं तदीयां गतिं प्रेमाणं मोक्षञ्च ॥ २९ ॥

भावानामास्पदानि नामग्राहमाह—गोप्यः कामात् पूर्वव्याख्या युक्त्यैव स्नेहोत्थादेव नतु सामान्यतः तादृगभिप्रायत्वे कुब्जाद्या इति प्रयुज्येत भयात् स्वस्य कृष्णवध्यत्वज्ञानत उद्भूतात् वृष्णयो यादवाः यूयं पांडवाश्च सम्बन्धात् पुत्रभ्रात्रादिभावात् मातुलेयभ्रातृस्वस्रेयादिभावाच्च, कीदृशात् स्नेहात् स्नेहमयादिति सत्राजित्प्रसेनशतधन्वकर्णदुर्योधनादयो व्यावृत्ताः न चात्र स्नेहस्य पृथक् तत्प्राप्तिसाधनत्वं व्याख्येयम्, उत्तरवाक्ये पञ्चसंख्यत्वेनैव भावानां निरूपणात् वयं नारदादयो भक्त्या तद्गतिं गता इति पूर्वस्यैवानुषंगः तत्र गोप्यः प्रेमवत् प्रेयसीभावं कंसः सायुज्यं चैद्यदंतवक्रपौंड्रकाः सारूप्यं अन्येचारयो यथायोग्यं सायुज्यसालोक्यादिकं वृष्णयः पांडवाश्च सख्यादिभाववत्पार्षदत्वं नारदादय एश्वर्य्यज्ञानवत् पार्षदत्वमित्येवं यथा साधनं तत्तत्प्राकर्णिकवाक्यदृष्ट्या निर्धारितां गतिं तदीयां गताः अत्र "यादवानां हितार्थाय धृतो गोवर्द्धनो मया" इति हरिवंशवाक्यात् नन्दादिगोपानामपि वृष्णिवंशत्वादैश्वर्य्यज्ञानशून्यत्वेन स्नेहवैस्वाधिक्यात् पुत्रादिसम्बन्धस्यातिदार्ढ्यमेषामेव प्राधान्यद्योतकं ज्ञेयम् । ननु, तर्हि शिशुपालवद्भगवन्निन्दान्यकारादिकर्त्ता वेनः किमिति नरके पतितस्तत्राह—पुरुषं भगवन्तंप्रति पञ्चानां पूर्वश्लोकोक्तानां भावानां मध्ये कस्याप्यनास्पदत्वात् कतमोपि न भवति नतावद्गोपीव स्नेहवत्कामवान् न च कंसवद्भीतः नच मां हनिष्यतीति बुद्ध्या भगवदत्यन्तावेशमय्या शिशुपालवत् द्वेष्टापि वृष्ण्यादिरिव तत्र कमपि सम्बन्धन्दधानो नापि नारदादिरिव भक्त इत्यर्थः तेन शिशुपालादिभिन्नः प्रतिकूलभावं दिधीर्षुर्वेन इव नरकं यातीति भावः । यस्मादेवं तस्मात् केनाप्यप्रतिकूलेनैव उपायेन कृष्णे मनो निवेशयेदिति विधेस्तस्माद्वैरानुबन्धेनेति श्लोकोक्तविधिना सहैकार्थं ज्ञयम् ॥ ३०—३१ ॥

तदेवं शिशुपालप्रस्तावादायातं भावमार्गसिद्धान्तं तं समाप्य श्रीकृष्णे शिशुपालस्य वैरानुबन्धे को हेतुरित्यपेक्षायामाह—मातृष्वस्रेय इति । पदाद्वैकुण्ठात् च्युतौ ॥ ३२ ॥

हरिदासावप्यभिमृशति स्पृशति अश्रद्धेयः शापवाक्ये विश्वासो नोत्पद्यते असम्भवादिति भावः ॥ ३३ ॥

असम्भवमेवाह—देह इति । जन्म हेतुभूतैः प्राकृतैर्देहेन्द्रियासुभिर्हीनानां शुद्धसत्त्वमयदेहानामित्यर्थः प्राकृतदेहसम्बन्धेन

अशपन्कुपिता एवं युवां वासं न चार्हथः ।
रजस्तमोभ्यां रहिते पादमूले मधुद्विषः ।
पापिष्ठामासुरीं योनिं बालिशौ यातमाश्वतः ॥ ३७ ॥
एवं शप्तौ स्वभवनात्पतन्तौ तैः कृपालुभिः ।
प्रोक्तौ पुनर्जन्मभिर्वां त्रिभिर्लोकाय कल्पताम् ॥ ३८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सम्बन्धम् एतदाख्यानमाख्यातुमर्हसीति श्रीस्वामिचरणानां व्याख्या ॥ ३४ ॥ ३५ ॥

पञ्च वा षड्वा हायनानि येषां ते अर्भा बालास्तद्वदाभा येषान्ते च पूर्वेषां मरीच्यादीनामपि दिग्वाससः शिशून् मत्वा पुंवद्भाव-आर्षः ॥ ३६ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यथा भक्त्या तथैव कामादिना ईश्वरे मन आवेश्य तदघं भगवत्पदप्राप्तिप्रतिबन्धकं स्वपापं हित्वा तद्गतिं भगवत्पदं गताः प्राप्ताः ॥ २९ ॥

तत्प्रकारभेदभक्तान् वर्णयति—गोप्य इति । वृष्णीनां युष्माकं च यः कृष्णे सम्बन्धस्तस्माद्यः स्नेहस्तस्माद् वृष्णयो यूयं च तद्गतिं गता इति योजना भक्त्या यथोक्तेन भजनेन ॥ ३० ॥

कामादिभिरेव भगवच्चिन्तनपराणां मुक्तिरित्यपि नियमो नास्तीत्याह—कतम इति । पुरुषं भगवन्तंप्रति कामादिभिश्चिन्तयतां पञ्चानां मध्ये वेनः कतमोपि न. स हि "भगवन्निन्दया वेनो द्विजैस्तमसि पातितः" इति वाक्यात्, द्विजैस्तमसि पातितोऽपि भगवता पुत्रीभूतेन तमसः पुनरुद्धृतः "यद्वेनोऽप्यतरत्तमः" इति वचनात्. अतोभगवन्निन्दया भगवति मनोनिवेशनेन तत्कृपापात्रतां प्राप्त उक्तेभ्यः पञ्चभ्योऽन्यः तस्मात्केनाप्युपायेन कामादिपञ्चप्रकारेष्वेकतमेन निन्दयाच साङ्केत्यनामग्राहित्वादिना वा आर्त्तत्वजिज्ञासुत्वार्थित्वाद्यन्यतमेन वा मनः श्रीकृष्णे निवेशयेत् इति सिद्धान्तः ॥३१॥

शिशुपालो दन्तवक्रश्चेति द्वौ न कर्मवशौ जीवौ किन्तु भगवत्पार्षदप्रवरौ भगवदिच्छया भगवदवतारभूतसनत्कुमारशापव्याजेन वैकुण्ठादागतौ, पुनर्वैकुण्ठं गतौ इत्याह—मातृष्वस्रेय इत्यादिना; पदाद्वैकुण्ठात् ॥ ३२ ॥

हरिदासौ अभिमृशति विषयीकरोतीति तथा किञ्च हरेः एकान्तिनां भवो जन्म च अश्रद्धेय इवाभाति ॥ ३३ ॥

प्राकृतदेहादिहीनानाम् अप्राकृतदेहादिमतामित्यर्थः । देहसम्बन्धेन जन्ममरणार्हाप्राकृतदेहसम्बन्धेन सम्बन्धमेतदाख्यानमाख्यातुं वर्णयितुमर्हसि ॥ ३४ ॥ ३५ ॥

पञ्च वा षड्वा हायनानि संवत्सराः यस्य तथाभूतो योऽर्भो-बालस्तद्वदाभा येषां ते पूर्वेषां भवादीनामपि पूर्वजाः ॥ ३६ ॥

———

भाषा टीका ।

बहुत जन काम द्वेष भय स्नेह और भक्ति से ईश्वर में मन लगा कर कामादि से होने वाले पाप को त्याग कर परमात्मा की गति को प्राप्त हुए ॥ २९ ॥

काम से गोपी, भय से कंस, द्वेष से शिशुपालादि राजा लोग, संबंध से यादव लोग, स्नेह से तुमलोग हे राजन् ! तथा भक्ति से हम लोग गोविन्द को प्राप्त हुए ॥ ३० ॥

इन पाचों में से राजा वेन तो भगवान के प्रति कोई भी नही हो सका है इसलिये वह नरक में गिराया गया तस्मात् किसी न किसी प्रकार से श्रीकृष्ण में मन लगाना चाहिये ॥ ३१ ॥

हे युधिष्ठिर ! तुमारी मौसी का पुत्र शिशुपाल और दंतवक्त्र ये दोनों विष्णु के पार्षदों में श्रेष्ठ थे, ब्राह्मणों के शाप से अपने पद से च्युत हो गये ॥ ३२ ॥

युधिष्ठिर उवाच ।

युधिष्ठिरजी बोले, कि हरिदासों को स्पर्श करने वाला कैसा शाप और किस हेतु से शाप हुआ, भगवान के एकही भक्तों का इस संसार में जन्म लेना तो कुछ ठीक नही मालूम पडता ॥ ३३ ॥

क्योंकि प्राकृत देह इन्द्रिय प्राणों से हीन ऐसे वैकुण्ठ को इस प्राकृत देह के संबंध से होने वाले इस आख्यान को आप कहने योग्य है ॥ ३४ ॥

नारद उवाच ।

नारदजी बोले, कि । एक समय ब्रह्मा के पुत्र सनंदनादिकों ने विष्णु के लोक की जाने की इच्छा की, और तीनों भुवनमें विचरते २ वैकुण्ठ लोक में पहुंचे ॥ ३५ ॥

देखने में पांच छः वर्ष के बालक से जाने जाते परंच अवस्था में तो पूर्व (मरीच्यादि) लोगों के भी पहिलें उत्पन्न हुए हैं दोनों द्वारपालों ने इन को नग्नदेखकर बालक जान भीतर जाने को रोक दिये ॥ ३६ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

वासमपि नार्हथः कुतः पुनस्तत्सेवामिति चकारार्थः हे बालिशौ ! अतो हेतोराशु यातम् ॥ ३७ ॥

जज्ञाते तौ दितेः पुत्रौ दैत्यदानववन्दितौ ।
हिरण्यकशिपुर्ज्येष्ठो हिरण्याक्षोऽनुजस्ततः ॥ ३९ ॥

हतो हिरण्यकशिपुर्हरिणा सिंहरूपिणा ।
हिरण्याक्षो धरोद्धारे बिभ्रता सौकरं वपुः ॥ ४० ॥

हिरण्यकशिपुः पुत्रं प्रह्लादं केशवप्रियम् ।
जिघांसुरकरोन्नाना यातना मृत्युहेतवे ॥ ४१ ॥

सर्वभूतात्मभूतं तं प्रशान्तं समदर्शनम् ।
भगवत्तेजसा स्पृष्टं नाशक्नोद्धन्तुमुद्यमैः ॥ ४२ ॥

ततस्तौ राक्षसौ जातौ केशिन्यां विश्रवस्सुतौ ।
रावणः कुम्भकर्णश्च सर्वलोकोपतापनौ ॥ ४३ ॥

तत्रापि राघवो भूत्वा न्यहनच्छापमुक्तये ।
रामवीर्यं श्रोष्यसि त्वं मार्कण्डेयमुखात्प्रभो ! ॥ ४४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वां युवयोस्त्रिभिर्जन्मभिः लोकाय स्वस्थानप्राप्तये कल्पतां तावताऽयं शापः समाप्यतामिति पुनः प्रोक्तावित्यर्थः ॥ ३८ ॥ ३९ ॥

धरोद्धारे निमित्ते तत्प्रतिघाती हतः ॥ ४० ॥

हिरण्यकशिपोर्वधे कारणं सूचयति--हिरण्यकशिपुः पुत्रमिति ॥ ४१ ॥

सर्वभूतानामात्मभूतं कुतः समं ब्रह्मैव पश्यतीति तथा ततः प्रशान्तं द्वेषादिरहितं अत एव भगवत्तेजसा स्पृष्टं व्याप्तम् उद्यमैः शस्त्रास्त्रप्रहारादिभिः ॥ ४२ ॥

विश्रवसः सुतौ ॥ ४३ ॥

न्यहनत् हतवानित्यर्थः । तर्हि तदेव कथनीयमित्युत्सुकं प्रत्याह—रामवीर्यमिति ॥ ४४ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ताभ्यां प्रतिषिद्धास्ते कुपिताः सन्तः एवं वक्ष्यमाणरीत्या अशपन्. शापप्रकारमेवाह—युवामित्यादिना । रागद्वेषादिरहिते भगवतः पादमूले वासं कर्तुं युवां नार्हथः अप्राकृतं भगवत्पादारविन्दमूलमुपाश्रित्यात्र स्थातुं प्राकृतरागद्वेषादियुक्तौ युवां नार्हथः इत्यर्थः किन्तु बालिशौ मूर्खौ युवामतो भगवत्स्थानादाशु शीघ्रं पापिष्ठां रागद्वेषादिबहुलामासुरीं योनिमासुरजन्मेत्यर्थः यातं प्राप्नुतम् ॥ ३७ ॥

एवमित्थं शप्तौ तौ पार्षदौ स्वस्थानात्पतन्तौ कृपालुभिस्तैः सनकादिभिः प्रोक्तौ. तदेवाह—पुनरिति । पुनर्वां युवयोस्त्रिभिर्जन्मभिर्लोकाय पुनरेतल्लोकप्राप्त्यै कल्पतां शापमोक्ष इति शेषः तावता कालेन शापः समाप्यतामित्यर्थः ॥ ३८ ॥

तावेव पार्षदौ विप्रैः शप्तौ इह लोके दितेः पुत्रौ जज्ञाते जातौ बभूवतुः तत्र हिरण्यकशिपुर्ज्येष्ठस्ततो हिरण्याक्षस्तस्यानुजः ॥ ३९ ॥

तत्र ज्येष्ठो हिरण्यकशिपुर्नृसिंहरूपिणा भगवता हतः हिरण्याक्षस्तु धरोद्धारे भूम्युद्धारे निमित्ते सौकरं वाराहं वपुर्बिभ्रता भगवता हतः ॥ ४० ॥

हिरण्यकशिपुवृत्तान्तप्रश्नावतरणाय तद्वृत्तान्तं संग्रहेणाह-हिरण्यकशिपुरिति । स केशवस्य भगवतो निरतिशयप्रियं प्रह्लादं पुत्रं जिघांसुर्हन्तुमिच्छुः पुत्रमरणनिमित्तं नानाविधा यातनाः अकरोत् ॥ ४१ ॥

यातनाः कुर्वाणोपि हिरण्यकशिपुस्तं पुत्रं हन्तुमुद्यमैः सर्वोपायैरपि नाशक्नोत्. तत्र हेतुं वदंस्तं विशिनष्टि—भगवतस्तेजसा स्पृष्टं व्याप्तं, तत्र हेतुः, प्रशान्तमशनायापिपासादिरहितं प्रशान्तेष्वेव भगवत्तेजस्पर्शो इतिभावः । यद्वा, अत एव प्रशान्तं तत्र हेतुः समदर्शनं सुखदुःखादिषु द्वन्द्वेषु समदृष्टिर्यस्सः स एव प्रशान्त इति भावः । यद्वा, अत एव समदर्शनं सर्वभूतानामात्मा ईश्वरस्तत्कृतं तत्प्रकारकतया तदात्मतामापन्नम् "शास्त्रदृष्ट्यातूपदेशो वामदेववत्" इत्युक्तरीत्या यथा "वामदेवस्तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चाहं कक्षीवानृषिरस्मि विप्रः" इति सर्वभूतान्तरात्मानं भगवन्तं स्वशरीरकं धीसारकृत्स्न सर्वप्रकारतया स एवावस्थित इति प्रकारभेदेऽपि प्रकार्यैक्याच्चद्भिप्रायेण वामदेवो मन्वादिभिः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सहात्मनो ऽभेदमनुसंहितवानेवं प्रह्लादोऽपि "अहं हरिः सर्वमिदं जनार्दनः" इति प्रकार्यैक्याद्विशिष्टवस्त्वेकदेशत्वात्स्वस्मिन्स्वनिष्ठत्वाभावमालक्ष्याहमेव सर्वभूतान्तरात्मा भगवानित्यनुसंहितवानित्याशयेन तस्य विशेषणं सर्वभूतात्मभूतमित्युक्तम् ॥ ४२ ॥

ततस्तावेव हिरण्यकशिपुहिरण्याक्षौ द्वितीये जन्मनि केकस्यां भार्यायां विश्रवस्सुतौ जातौ तत्र ज्येष्ठो रावणोऽनुजस्तु कुम्भकर्णस्तावुभौ सर्वलोकानुपतापयतः खेदयत इति सर्वलोकोपतापनौ ॥ ४३ ॥

तत्रापि जन्मनि भगवान् राघवो भूत्वा शापमुक्तये तयोः शापोत्तारणाय न्यहनत्. अनेन हितकारित्वं भगवतः सूचितम् कोऽसौ राघवः? कीदृशं तद्वीर्यम्? कथं वा हतवान्? इत्यत्राह–रामवीर्यमिति । वीर्यग्रहणं तज्जन्मादीनामप्युपलक्षणं तदवतारतद्वीर्यादिकं सर्वं, हे प्रभो ! मार्कण्डेयमुखाच्छ्रोष्यसि अतो नात्र तन्मया वितन्यत इति भावः ॥ ४४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नानायातनाः बहुविधतीव्रवेदनाकारणानि ॥ ४१ ॥

सर्वभूतात्मनि चराचरान्तर्यामिणि हरावेव भूतं स्थितम् ॥४२॥

नन्वासुरीं योनिं यातम् इत्ययं शापः आसुरयोनिप्राप्तिहेतुः तत्र जयविजययोः दित्यां जन्म तदनगुणं केशिन्यादिजन्म कथं युज्यते ? "राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः" इति भिन्नयोनित्वादितीमां मन्दाशङ्काम्—

"हिरण्यकशिपुर्भूतममन्यत मृतौ हरिम् ।
अतो भयानको जातस्तत्र राजानमेव च ॥
मत्वा राजैव सञ्जातः कृष्णं चक्रादिलक्षणैः ।
मृतिकाले हरिञ्चैव मत्वा भक्त्यैव केवलम् ।
द्वास्स्थत्वं हरिमाविश्य प्रापैवमनुजोऽपि तु" ॥

इत्यनेन परिहर्तव्यम्. "यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम् । तं तमेवैति कौन्तेय!" इत्यादेः सुरविरुद्धत्वमुभयोः सममित्यतो हरिद्वेषश्च सम इति भावः ॥ ४३—४५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अशपदिति सार्द्धकम् । रजस्तमोभ्यां रहिते प्राकृतसत्त्वादिराहित्येऽपि तन्मात्रराहित्यस्य विवक्षितत्वात्. प्राकृतसात्त्विकत्वेनैतादृशो दोषः सम्भवतीति ॥ ३७—४१ ॥

तमिति । यस्माद्भगवत्तेजसा स्पृष्टं नित्यतदाविष्टत्वात् तस्मात् सर्वेषां भूतानामात्मभूतं परमप्रेमास्पदं तस्मादेव प्रशान्तं विक्षेपरहितम् अन्यत्र समदर्शनं रागद्वेषरहितञ्च तस्मादेव च नाशक्नोदिति ॥ ४२—४५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

वां युवयोस्त्रिभिर्जन्मभिर्वां युवां लोकाय वैकुण्ठं प्रापयितुं कल्पतां समर्थो भवतु शाप इति शेषः ॥ ३७—३८—३९ ॥

धरोद्धारे कर्त्तव्ये सति ॥ ४०—४१ ॥

सर्वेषां भूतानामात्मभूतम् आत्मवत्प्रेष्ठं स्वद्वेष्टर्य्यपि पितरि द्वेषाभावात् प्रशान्तं स्वपरदुःखादीनां तुल्यदर्शनात्समदर्शनम् ॥४२-४४॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

रजस्तमोभ्यां रहिते रजस्तमोपलक्षितकार्यकारणप्रकृतिविलक्षणइत्यर्थः मधुद्विषः पादौ मूलमाश्रयो यस्य तस्मिन् वैकुण्ठे वासं युवां नार्हथ एवं ते कुपिता अशपन् ॥ ३७ ॥

बालिशौ मूढौ अतः आशु शीघ्रमासुरीं योनिं यातम् एवं शप्तौ पतन्तौ तैः कृपालुभिस्त्रिभिर्जन्मभिः पुनर्लोकाय वैकुण्ठाय कल्पतां प्राप्यताम् ॥ ३८ ॥

जज्ञाते जातौ ॥ ३९ ॥

धराया उद्धारे कर्तव्ये सति ॥ ४० ॥

यातनास्तीव्रवेदनाः ॥ ४१ ॥

सर्वेषां भूतानामात्मा भगवान् स भूतोऽनुभूतः साक्षाद्दृष्टो येन तम् अतएव भगवत्तेजसा स्पृष्टं व्याप्तम् अतएव उद्यमैर्हन्तुं नाशक्नोत् ॥ ४२ ॥

विश्रवस्सुतौ विश्रवः पुत्रौ ॥ ४३ ॥ ४४ ॥

भाषा टीका ।

तव उन्होने कुपित होकर शाप दिया कि तुम दोनों रज तम से रहित इस भगवान के लोक में वास के योग्यनही हो । इस लिये हे मूर्ख हो तुम दोनो शीघ्र पापिष्ठ आसुरी योनि को प्राप्त हो ॥ ३७ ॥

ऐसे शाप देने पर जब अपने वचन से पतन होने लगे तब कृपालु मुनिलोगों ने कहा कि तुम फिर तीन जन्म में इस लोक को प्राप्तहो जावोगे ॥ ३८ ॥

वोही दोनों दैत्यदानवों से वंदित ऐसे दिति के पुत्र उत्पन्न हुए उनमें ज्येष्ठ हिरण्यकशिपु और छोटा हिरण्याक्ष हुआ ॥ ३९ ॥

हिरण्यकशिपुको हरिने सिंहरूप धारण कर मारा, और हिरण्याक्ष को पृथिवी के उद्धार करने के समय (सूकर रूप) वराहावतार धर कर मारा ॥ ४० ॥

गोविन्द के प्रिय और अपने पुत्र ऐसे प्रह्लाद को मारने की इच्छावाला हिरण्यकशिपु पुत्र को मारने के लिये नाना प्रकार की यातना (त्रास) देने लगा ॥ ४१ ॥

तावेव क्षत्रियौ जातौ मातृष्वस्रात्मजौ तव ।
अधुना शापनिर्मुक्तौ कृष्णचक्रहतांहसौ ॥ ४५ ॥
वैरानुबन्धतीव्रेण ध्यानेनाच्युतसात्मताम् ।
नीतौ पुनर्हरेः पार्श्वं जग्मतुर्विष्णुपार्षदौ ॥ ४६ ॥

युधिष्ठिर उवाच ।

विद्वेषो दयिते पुत्र कथमासीन्महात्मनि ।
ब्रूहि मे भगवन्येन प्रह्लादस्याच्युतात्मता ॥ ४७ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां सप्तमस्कन्धे युधिष्ठिरनारदसम्वादे
प्रथमोऽध्यायः ॥ १ ॥

भाषा टीका ।

परंच सर्व प्राणियों का आत्मभूत प्रशांत और समदर्शी तथा भगवत्तेज से रक्षित ऐसे प्रह्लाद को हिरण्यकशिपु बहुत यत्नों से भी न मार सका ॥ ४२ ॥

फिर दूसरे जन्म में वे दोनों पार्षद विश्रवा ऋषि की पत्नी में सर्व लोकों को दुःख देने वाले रावण और कुंभकर्ण पैदा हुए ॥ ४३ ॥

उस जन्म में भी भगवान ने श्रीराघव होकर उनके शाप दूर करने के लिये उनको मारा. हे राजन् ! श्रीरामचरित्र तुम मार्कण्डेय जी के मुख से सुनोगे ॥ ४४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कृष्णचक्रेण हतमंहो ययोस्तौ तयोः पापमेव हतं न तु ताविल्यर्थः ॥ ४५ ॥ ४६ ॥

येन कारणेन प्रह्लादस्याच्युतात्मता अच्युतैकचित्तत्वं तदपि ब्रूहीति शेषः ॥ ४७ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तावेव रावणकुम्भकर्णावेवाद्य अधुना तृतीये जन्मनि तव मातृष्वस्रात्मजौ क्षत्रियौ शिशुपालदन्तवक्त्रौ जातावद्य शापेन निर्मुक्तौ श्रीकृष्णचक्रेण हतमंहः पापमूलकं शरीरं ययोस्तौ ॥ ४५ ॥

वैरानुबन्धेन तीव्रमुत्कृष्टं यद्ध्यानं भगवद्विषयकं तेनाच्युतस्य भगवतः सात्मतामात्मनो भावः प्रकारः आत्मता समाना आत्मता सात्मता तां साधर्म्यमित्यर्थः नीतौ प्रापितौ पुनर्विष्णुपार्षदौ भूत्वा हरेः पार्श्वं जग्मतुः ॥ ४६ ॥

यदुक्तं "हिरण्यकशिपुः पुत्रं प्रह्लादं केशवप्रियम् । जिघांसुः" इत्यादिना प्रह्लादस्य केशवप्रियत्वं हिरण्यकशिपोः प्रह्लादे मरणोद्योगपर्यन्तो द्वेषश्चेति तद्विस्तरेण बुभुत्सुः पृच्छति युधिष्ठिरः—विद्वेष इति । दयिते नितरां प्रीतिविषये तत्रापि महात्मनि सद्गुणाश्रये हिरण्यकशिपोर्विद्वेषः कथमासीत्केन हेतुना आसीदित्यर्थः तदेतत् या च येन कारणेन प्रह्लादस्याच्युतात्मता अच्युते भगवति आत्मा मतिर्यस्य सोऽच्युतात्मा तस्य भावस्तत्ता ताञ्च हे भगवन्, मे मह्यं ब्रूहि ॥ ४७ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वैरानुबन्धेन वैरयुक्तभक्त्या तीव्रेणात्युत्कटेनाच्युतसाम्यतां श्रीकृष्णस्वरूपप्रवेशलक्षणां हरेर्वैकुण्ठगमनानन्तरं पार्षदौ जयविजयाख्यमूलरूपेणैकीभूय हरेःपार्श्वं जग्मतुरित्यन्वयः "अनुबन्धस्तु भक्तिस्याद्बन्धःस्नेह उदाहृतः" इत्यभिधानादनुबन्धशब्दस्य नैरन्तर्यार्थोऽनुपपन्न इति ॥ ४६ ॥

दयितत्वं महात्मत्वञ्च प्रश्नस्य कारणं येन केन निमित्तेन अच्युते आत्मा मनो यस्य स तथा तस्मिन् ॥ ४७ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
प्रथमोऽध्यायः ॥ १ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

वैरानुबन्धेति । तदेवं ब्रह्मशापवर्णनेन ब्राह्मणादाज्ञियं मुहुर्युद्धवर्णनेन युद्धेच्छां च कारणत्वेनोपन्यस्तवान् युद्धेच्छैव तु मुख्या ज्ञेया यया पार्षदयोः मुनीनामपि मतिर्विपरीता जाता यथोक्तं तृतीये श्रीभगवतैव 'मतस्तु मे' इति । तथाप्यत्यन्तशापाद्यसम्भवात्सदाभास एव तत्कार्यत्वेन दर्शितः विष्णुचक्रहतांहसावित्यनेन पूर्वोक्तसिद्धान्त एव विवेचनीयः ॥ ४६—४७ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीयस्य
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

विष्णुचक्रेण हतमंहो ययोस्तौ, तयोरपराध एव बहिः शिशुपालदन्तवक्त्राकारतया परिणतो हतो न तु ताविल्यर्थः इति स्वामिचरणाः यथा वन्हिना कनकस्य मालिन्यमेव हन्यते न तु कनकं तथैव जयविजययोर्बाह्यमलिनावरणयोर्नष्टयोस्ततः जयविजयावेव तेजः—पुञ्जाकारौ श्रीकृष्णं प्रविष्टौ जनैर्दृष्टाविति भावः ॥ ४५ ॥

अच्युतेन सहस्थितौ आत्मानौ आकारौ ययोस्तस्य भावस्तत्ता तां ध्यानेनैव नीतौ पुनर्मौषललीलांते हरेर्नारायणस्य पार्श्वं जग्मतुरिति मौषललीलातः पूर्वं श्रीकृष्णशरीर एव नारायणस्यापि प्रविष्टत्वात् पार्षदौ जयविजयावपि तत्रैव प्रविश्यस्थिता वितितत्त्वं शिशुपालदन्तवक्रौ कृष्णे सायुज्यं प्रापतुरिति तु लोकप्रतीतिः ॥ ४६ ॥

अच्युतात्मतामच्युतैकचित्तत्वं येन तदपि ब्रूहीति शेषः ॥ ४७ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
सप्तमे प्रथमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कृष्णचक्रेण हतमंहः पापं ययोस्तौ ध्यानेन अच्युतसाम्यतां नीताविन्युत्तरेणान्वयः । अत्रेदं बोध्यम्, विष्णुपार्षदानां पापासम्भवात् देहपातासम्भवात् वैकुण्ठात्पुनरावृत्त्याद्यसम्भवाच्च भगवतो-बहुभिरवतारैर्विहर्तुमिच्छोरिच्छयैव मुनिशापेन रावणादिदेहयोगं प्राप्य बहुकालमासुरेण भावेन भगवन्तमाराध्य पुनर्भगवदिच्छयैव निर्मित इत्युक्तेर्भगवत्कारिताच्छापाद्विमुक्तौ आविष्कृतपार्षददेहौ, वैकुण्ठं गताविति ॥ ४५ ॥ ४७— ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धातप्रदीपे
प्रथमाध्यायार्थप्रकाशः ॥ १ ॥

भाषा टीका ।

वेही दोनों तुमारी माता की वहिन के पुत्र क्षत्रिय हुये अब शाप से छूट कर श्रीकृष्ण के चक्र से नष्ट हुआ पाप जिन्हो का ऐसे वेही दोनो विष्णु पार्षद, तीव्र वैर के संबन्ध से उत्पन्न हुए ध्यान से कृष्ण की समता को प्राप्त होकर फिर भगवान के समीप पहुच गये ॥ ४५ ॥ ४६ ॥

युधिष्ठिर बोले, कि—महात्मा प्रिय पुत्र मे हिरण्यकशिपु का विद्वेष क्यों भया हे भगवन् ! जिस कारण प्रह्लाद की भगवान में प्रीति हुई सो आप मुझ से कहो ॥ ४७ ॥

इति श्रीमद्भागवत महापुराण सप्तस्कन्ध
प्रथम अध्याय की भाषाटीका
समाप्त ॥ १ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे प्रथमोऽध्यायः ॥ १ ॥

॥ द्वितीयोऽध्यायः ॥

नारद उवाच ।

भ्रातर्येवं विनिहते हरिणा क्रोडमूर्तिना ।
हिरण्यकशिपू राजन्पर्यतप्यद्रुषा शुचा ॥ १ ॥

आह चेदं रुषा घूर्णः सन्दष्टदशनच्छदः ।
कोपोज्ज्वलद्भ्यां चक्षुर्भ्यां निरीक्षन्धूम्रमम्बरम् ॥ २ ॥

करालदंष्ट्रोग्रदृष्ट्या दुष्प्रेक्ष्यभ्रुकुटीमुखः ।
शूलमुद्यम्य सदसि दानवानिदमब्रवीत् ॥ ३ ॥

भो भो दानवदैतेयास्त्रिमूर्धंस्त्र्यक्ष शम्बर ।
शतबाहो हयग्रीव नमुचे पाक इल्वल ॥ ४ ॥

विप्रचित्ते मम वचः पुलोमन् शकुनादयः ।
शृणुतानन्तरं सर्वे क्रियतामाशु मा चिरम् ॥ ५ ॥

सपत्नैर्घातितः क्षुद्रैर्भ्राता मे दयितः सुहृत् ।
पार्ष्णिग्राहेण हरिणा समेनाप्युपधावनैः ॥ ६ ॥

तस्य त्यक्तस्वभावस्य घृणेर्मायावनौकसः ।
भजन्तं भजमानस्य बालस्येवास्थिरात्मनः ॥ ७ ॥

मच्छूलभिन्नग्रीवस्य भूरिणा रुधिरेण वै ।
रुधिरप्रियं तर्पयिष्ये भ्रातरं मे गतव्यथः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्वितीये विष्णुरोपेण लोकं विप्लाव्य दानवैः ।
तद्धतभ्रातृपुत्रादीनितिहासैरसान्त्वयत् ॥ १ ॥

भगवद्द्वेषप्रस्य तद्द्वेषेपि कारणमित्याशयेनाह–भ्रातरीत्यादिना । एवं देवपक्षपातेन ॥ १ ॥

कोपेन उत अतिशयेन ज्वलद्भ्यां कोपाग्निधूमेनैव धूम्रमम्बरं निरीक्षमाणः ॥ २ ॥

करालदंष्ट्राभिर्युक्तयोग्रया दृष्ट्या दुष्प्रेक्ष्यं भ्रुकुटीयुक्तं मुखं यस्य सः ॥ ३ ॥ ४ ॥ ५ ॥

समेनाप्युपधावनैर्भजनैर्निमित्तभूतैः पार्ष्णिग्राहेण सता ॥ ६ ॥

एवं त्यक्तः स्वभावः समत्वं येन तस्य घृणेः शुद्धतेजोमयस्यापि मायया वनौकसो वराहरूपस्य सतः अस्थिरात्मनोऽव्यवस्थितचित्तस्य कुतः यो यो भजति तं तं भजमानस्यानुसरतः ॥ ७ ॥

तस्य रुधिरेण यावत्तर्पयिष्यामि तावद्यूयं भुवं यातेति तृतीयेनान्वयः ॥ ८ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

एवं तयोः केशवात्मत्वविद्वेषविस्तरबुभुत्सुना पृष्टो भगवान्नारद आह—भ्रातरीति । एवं देवपक्षपातिना क्रोडमूर्तिना वराहरूपिणा भगवता भ्रातरि हिरण्याक्षे विनिहते सति, हे राजन्! रोषेण शुचा शोकेन चार्पितो व्याप्तः पर्यतप्यत् परितापञ्चकार ॥ १ ॥

इदं वक्ष्यमाणमाह च कथंभूत आह तत्राह, रुषा पूर्णो अत एव सन्दष्टः दशनच्छदः अधरो येन कोपेन उदतिशयेन ज्वलद्भ्यां चक्षुर्भ्यां धूम्रमम्बरमाकाशं कोपाग्निधूमेनैव धूम्रमम्बरं निरीक्षमाणः ॥ २ ॥

करालदंष्ट्राभिर्भयङ्करदंष्ट्राभिर्युक्तया उग्रया दृष्ट्या दुष्प्रेक्ष्यं दुर्निरीक्ष्यं भ्रुकुटीयुक्तं मुखं यस्य सदसि सभायां शूलमुद्यम्य उद्धृत्य अनेन स्वसामर्थ्यं सूचितम् दानवान्प्रति इदमुवाच ॥ ३ ॥

तदेवाह—भोभो इति । सामान्येन तावत्सम्बोधनं भोभो दानवा दैतेयाश्चेति विशेषतः सम्बोधनं द्विमूर्द्धन्नित्यादिना ॥ ४ ॥

एते सर्वे यूयं प्रथमं मम वचः शृणुत ततः श्रवणानन्तरमेव मदुक्तमाशु युष्माभिः क्रियतां चिरं विलम्बं मा कुरुत ॥ ५ ॥

किं तत्राह—सपत्नैरिति । समेन देवासुरवर्गयोः समेनापि उपधावनैरनुवर्त्तनैः पार्ष्णिग्राहेण पृष्ठोपोद्बलकेन देवानां सहायभूतेनेत्यर्थः । हरिणा प्रयोज्यकर्त्रा मत्सपत्नैः प्रयोजककर्तृभिः क्षुद्रैरल्पबलैर्देवैः प्रियः सुहृच्च मे भ्राता हिरण्याक्षो घातितः ॥ ६ ॥

तस्य हरेः कथंभूतस्य घृणेः सूर्यवत्तेजोमयविग्रहस्यापि मायावनौकसः मायोपात्तवराहरूपस्य अत एव त्यक्तः स्वभावो येन तस्य, देवतारूपत्यागादिति भावः । भजन्तं स्वमनुवर्तमानं भजमानस्यानुवर्त्तमानस्य बालस्येवास्थिरात्मनः अव्यवस्थितचित्तस्य ॥ ७ ॥

एवंभूतस्य हरेर्मम शूलेन भिन्ना ग्रीवा यस्य तस्य भूरिणा रुधिरेण रुधिरप्रियं मम भ्रातरं गतव्यथोहं यावत्तर्पयिष्ये तावद्यूयं भुवं यातेत्यन्वयः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हिरण्यकशिपुः स्वतो विष्णुभक्तोऽसुरावेशात्तद्द्वेषीत्ययं विवेकः तद्वचनेन ज्ञातुं शक्य इत्येतदर्थमस्याध्यायस्य प्रारम्भः । तत्र प्रह्लादनाम्नि पुत्रे द्वेषः कथं पितुरभूदित्यस्य प्रश्नस्य परिहारं वक्तुमारभते—भ्रातरीति ॥ १ ॥

हरिविषयरुषा भ्रातृविषयशुचा दशनच्छदः ओष्ठः चक्षुषोर्दीचिषा यथा धूम्रं भवति तथा पश्यन् ॥ २ ॥

भ्रुकुट्या नीलशिरया युक्तमुखः ॥ ३ ॥

हे पाक ! ॥ ४ ॥ ५ ॥

क्षुद्रैरल्पैः कपटिभिर्वा पार्ष्णिग्राहेण पृष्ठावेक्षकेण बालकेन "देवानां दानवानां च सामान्यमधिदैवतम्" इत्यतः समेनाप्युपधावनैः स्तोदर्चनैः विपर्ययेण ॥ ६ ॥

त्यक्तस्वभावस्य त्यक्तसाम्यावस्थस्य तत एवास्माभिः घृणेः शोच्यस्य "घृणिर्विभावसौ सूर्ये रश्मौ शोच्ये विघर्षणे" इत्यभिधानम्. भजन्तं स्वात्मानं सेवमानं भजमानस्य प्रत्युपकारं कुर्वतः ॥ ७ ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

एवं पर्य्यतप्यतेति सम्बन्धः । मूर्त्तिनेत्यत्र रूपिणेति क्वचित् ॥ १—२ ॥

आह चेदमिति यदुक्तं तदेव विशिनष्टि—करालेति । भो भो इति युग्मकम् ॥ ३—६ ॥

तस्येति युग्मकम् । वास्तवोऽप्यस्त्वयं त्यक्तः भक्तेभ्यो दत्तः स्वभावः सारूप्यादिकं येन 'घृणिग्रहणे' इत्यस्मात् घृणेः । कृपया स्वीकर्त्तुः मायया कृपा मायेति छान्दसतृतीया लुक् ततः सर्वज्ञत्वमः कृपयैव वनौकसः तल्लीलाविस्तारयितुः कृपयैव बालस्येवास्थिरात्मनः भक्तभावानुरूपनानाभावविस्तारयितुः मच्छूलाग्रिक्षता तदगोचरभूता ग्रीवा तदुपलक्षितो विग्रहो यस्य तस्य मे रुधिरेण श्रीनृसिंहतयाविर्भावे तस्माद्भूतमदीयरुधिरेण रुधिरप्रियं भ्रातरं तर्पयिष्ये 'यथा तरोर्मूलनिषेचनेन' इत्यादेः ॥ ७—९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

द्वितीये भ्रातृशोकेन धर्मनाशाय दानवान् ।
नियोज्य ज्ञातीन् हास्यैर्मित्राद्दीन् सद्यसान्त्वयत् ॥

भगवद्द्वेष एव प्रह्लादद्वेषे कारणमभूदिति वक्तुं प्रथमतो भगवद्द्वेषमेव सहेतुक माह-भ्रातर्य्येवमित्यादिना ॥ १ ॥

अम्बरं निरीक्षन्निति हरेर्निवासं वैकुण्ठं हरिञ्च स्वहस्तेनैव ध्वंसयिष्यामीति भावः । धूम्रामिति चक्षोरग्न्योर्धूमव्याप्तत्वादितिभावः ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

समेनापीति यद्यपि स हरिः सर्वत्र समस्तदपि उपधावनैरुपासनैर्निमित्तभूतैः पार्ष्णिग्राहेण लोभवशाद्देवपक्षपाती संवृत्त इत्यर्थः ॥ ६ ॥

वयमप्युपधावाम इति चेन्नैवं यूयं तावन्मन्नियुक्ते कर्मणि तिष्ठत अहमेक एव तं हनिष्यामीत्याह—तस्येति द्वाभ्याम् । ननु, हरिर्हि परमात्मोच्यते शास्त्रैरतस्तं कथं हनिष्यसि ? तत्राह, त्यक्तस्वभावस्य सर्वत्रोदासीन्यरूपः स्वभावो हि परमात्मनः प्रसिद्धः स यदि तेन त्यक्तस्तदा कुतस्तस्य सम्प्रति परमात्मत्वमितिभावः । प्रत्युत स परमात्मत्वं त्यक्त्वा पशुरभूदित्याह

तस्मिन्कूटेऽहिते नष्टे कृत्तमूले वनस्पतौ ।
विटपा इव शुष्यन्ति विष्णुप्राणा दिवौकसः ॥ ९ ॥
तावद्यात भुवं यूयं विप्रक्षत्रसमेधिताम् ।
सूदयध्वं तपोयज्ञस्वध्यायव्रतदानिनः ॥ १० ॥
विष्णुर्द्विजक्रियामूलो यज्ञो धर्ममयः पुमान् ।
देवर्षिपितृभूतानां धर्मस्य च परायणम् ॥ ११ ॥
यत्र यत्र द्विजा गावोवेदावर्णाश्रमाः क्रियाः ।
तं तं जनपदं यात सन्दीपयत वृश्चत ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

घृणेः पूर्वं शुद्धतेजोमयस्यापि सम्प्रति मायापारतन्त्र्याद्वनौकसः मत्स्यकच्छपादिरूपस्य च किञ्च भजन्तञ्जनमात्रमेव भजमानस्य वालस्येव एकेनैव खण्डलड्डुकेन वशीकृतस्येत्यर्थः । वस्तुतस्तु तस्य भक्तवात्सल्यादेव त्यक्तेत्यादिविशेषणपञ्चकम्भवति तच्च तस्य भूषणमेव न तु दूषणमिति भावः । घृणेः शुद्धतेजोमयस्यापि मायया कृपया इत्यादि योज्यम् । मच्छूलाच्छिन्ना पृथग्भूता ग्रीवा यस्येति प्राकृतस्य मच्छूलस्य तत्र प्रवेशोऽपि न सम्भवेदिति भावः "कुङ्कुमं रुधिरं प्रोक्तम्" इत्यभिधानात् रुधिरेण तदङ्गरागकुङ्कुमेन रुधिरप्रियं तन्निर्माल्यकुङ्कुमप्रियं मद्भ्रातुर्भक्तत्वादितिभावः ॥ ७ ॥ ८ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विष्णुना हिरण्याक्षे हते सति क्रुद्धो हिरण्यकशिपुर्दानवदैतेयैर्लोकं विप्लाव्य भ्रातृपुत्रादीनितिहासैरसांत्वयदिति भ्रातृवधं वमिति द्वितीयाध्यायेन वर्णयति—क्रोडमूर्तिना वराहरूपेण ॥ १ ॥

संदष्टौ दशनच्छदावोष्ठौ येन सः कोपेन उत् उत्पतन्तः ज्वलद्भ्यां चक्षुर्भ्यां धूम्रमम्बरं निरीक्ष्यन्निदमाह ॥ २ ॥

करालदंष्ट्राभिर्भयजनकदंष्ट्राभिर्युक्तया उग्रदृष्ट्या दुष्प्रेक्ष्यं दुर्निरीक्ष्यं भ्रुकुटीयुक्तं मुखं यस्य सः ॥ ३—५ ॥

समेनापि उपधावनैराराधनैः पार्ष्णिग्राहेण सहायेन हरिणा ॥ ६ ॥

घृणेस्तेजोमयविग्रहस्येश्वरस्यापि भजन्तं भजमानस्य अत एव त्यक्तः स्वभावः समत्वरूप ईश्वरस्वभावो येन तस्य अत एवास्थिरात्मनश्चलचित्तस्य मायया दम्भेन कापट्येन वनौकसः वराहरूपस्य ॥ ७—८ ॥

———

भाषाटीका ।

श्रीरुक्मिणीरमणो जयति ॥

नारदजी बोले, कि हेराजन् ! वाराह रूपधारी हरीने इस प्रकार भ्राता के मारने पर हिरण्यकशिपु रोष और शोक से बहुत ही तप्तहुआ ॥ १ ॥

और क्रोध से प्रज्वलित होकर दांतों से होठ काट कर कोप से जलते हुए नेत्रों से धुआँधार आकाश को देखता हुआ बोला ॥ २ ॥

कराल डाढें और उग्र दृष्टि से न देखी जाय मुख और भृकुटि जिसकी ऐसा हिरण्यकशिपु सभा में दानवों से यह वाक्य बोला ॥ ३ ॥

हे २ दैत्य दानवो ! हे द्विमूर्द्धन् ! हेऽयक्ष ! हे शम्बर ! हे शतबाहो ! हे हयग्रीव ! हे नमुचे ! हे पाक ! हे इल्वल ! ॥ ४ ॥

हे विप्रचित्ते ! हे पुलोमन् ! हे शकुनादिको ! तुम सब लोग मेरा वचन सुनो और पश्चात् जल्दी करो देर न करो ॥ ५ ॥

यद्यपि विष्णु सबों को सम था; तौ भी क्षुद्र वैरी देवताओं ने उसके पीछे पड सहाय बनाकर उसी हरि के द्वारा मेरे प्रिय सुहृत् भ्राता को मरवा डाला ॥ ६ ॥

अब अपने समत्वरूप स्वभाव को छोडने वाले, और अपने सेवक को भजने वाले, वालक के तरह अस्थिरमन वाले उस विष्णु के गले को अपने शूल से काट कर उसके बहुत से रुधिर से रुधिरप्रिय अपने भ्राता का तर्पण करूंगा तब मेरी व्यथा दूर होगी ॥ ७—८ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, देवैस्तद्वधः कारितोऽतस्ते किं न हन्यन्ते ? तत्राह—तस्मिन्हरौ कूटे कपटे अहिते प्रतिपक्षे कूटमीहितं यस्येति वा नष्टेऽदृष्टे सति देवाः शुष्यन्ति स्वयमेव नाशं यास्यन्ति, कुतः ?

इति ते भर्तृनिर्देशमादाय शिरसाऽऽदृताः ।
तथा प्रजानां कदनं विदधुः कदनप्रियाः ॥ १३ ॥
पुरग्रामव्रजोद्यानक्षेत्रारामाश्रमाकरान् ।
खेटखर्वटघोषांश्च ददहुः पत्तनानि च ॥ १४ ॥
केचित्खनित्रैर्बिभिदुः सेतुप्राकारगोपुरान् ।
आजीव्यांश्चिच्छिदुर्वृक्षान्केचित्परशुपाणयः ।
प्रादहञ्छरणान्यन्ये प्रजानां ज्वलितोल्मुकैः ॥ १५ ॥
एवं विप्रकृते लोके दैत्येन्द्रानुचरैर्मुहुः ।
दिवं देवाः परित्यज्य भुवि चेरुरलक्षिताः ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विष्णुरेव प्राणो येषां ते यथा कृत्तमूले वृक्षे शाखाः स्वयं शुष्यन्ति तद्वत् ॥ ९ ॥

तपोयज्ञादियुक्तान्सूदयध्वं घातयत ॥ १० ॥

ननु, तैः किमपराद्धम् ? तत्राह—विष्णुरिति । द्विजानां क्रिया अनुष्ठानं मूलं यस्य सः यतोऽसौ यज्ञो धर्ममयश्च देवादीनां परायणं परम आश्रयः अतो यज्ञरूपस्य विष्णोर्मूलत्वान्मामनादृत्य तदाश्रयणाच्च ते वध्या इति भावः ॥ ११ ॥

तस्मात्परं मन्त्रं शृणुतेत्याह–यत्रयत्रेति । सन्दीपयत दहत वृश्चत आजीव्यानां वृक्षाणां छेदं कुरुत ॥ १२ ॥ १३ ॥

पुरं हट्टादिमत् ग्रामस्तद्रहितः व्रजो गवां वासः उद्यानं कृत्रिमं वनं क्षेत्रं व्रीह्यादेः आरामोऽकृत्रिमं वनम् आश्रमः ऋषीणां स्थानम् आकरो रत्नादीनां खेटः कृषीवलानां वासः खर्वटो गिरिद्रोण्याश्रयो ग्रामः घोष आभीराणां वासः पत्तनं राजधानी ॥ १४ ॥

खनित्रैः खननसाधनैः आजीव्यानुपजीव्यान् जम्बाम्रकपित्थादीन् शरणानि गृहान् ॥ १५ ॥

विप्रकृते उपद्रुते यज्ञभागानामभावाद्दिवं परित्यज्यालक्षिताः सन्तो भुवि चेरुः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु, देवैस्तद्वधः कारितः अतस्ते किं न हन्यन्ते ? तत्राह–तस्मिन्निति । अस्माकमहिते शत्रौ कूटे देवानामाश्रये तस्मिन् विष्णौ नष्टे सति यथा वनस्पतौ छिन्नं मूलं यस्य तस्मिन् सति शाखाः शुष्यन्ति, तद्वद्विष्णुरेव प्राणो जीवनहेतुर्येषां ते दिवौकसः देवाः स्वयमेव नङ्क्ष्यन्ति अतःतन्नाशाय न पृथग्यत्नः कार्य इति भावः ॥ ९ ॥

यावत्तर्पयिष्ये तावद्यूयं ब्रह्मक्षत्रकुलाभ्यां समेधितां ब्रह्मक्षत्रबहुलामित्यर्थः । भुवं पृथ्वीं यात, गत्वा किं कर्त्तव्यम् ? तत्राह–सूदयध्वमिति, तप आदीनां द्वन्द्वे ततो मत्वर्थीयइनिः। तप आदिभिर्युक्तान् सूदयध्वं घातयत ॥ १० ॥

ननु, तैः किमपराद्धम् ? तत्राह–विष्णुरिति । द्विजानां क्रियामूलो यो यज्ञः स एव धर्मस्तन्मयस्तदाकृतिः पुमान् विष्णुर्द्विजक्रियामूल इति भिन्नपदत्वे द्विजानां क्रिया स्मार्त्ती मूलं यस्य श्रौतयज्ञरूपधर्ममयश्चेत्यर्थः। पुमान् श्रौतस्मार्त्तधर्मशरीरक इत्यर्थः। तथा देवर्षिपितृभूतानां धर्मः देवाद्युद्देश्यको यो धर्मस्तस्य च परायणं परम आश्रयः निर्वाहकः देवाद्युद्देश्यको यो धर्मस्तदाश्रय इत्यर्थः। द्विजेषु तत्तत्कर्तृकयज्ञादिधर्मेषु च विनाशितेषु शरीरविनाशेन विष्णुरपि विनाशितो भवति तद्विनाशे चाश्रयविनाशादाश्रिते धर्मे विनष्टे सति यज्ञधर्मीयचरुपुरोडाशादिहविर्भागादिरूपजीविकाया अभावाद्देवादयोपि स्वयमेव विनष्टा भवन्तीति भावः ॥ ११ ॥

तस्माद्यत्रयत्र देशे ब्राह्मणादयो वर्त्तन्ते तं तं जनपदं देशं यात गच्छत सन्दीपयत दहत वृश्चत लुनीत ॥ १२ ॥

इतीत्थं भर्तुर्हिरण्यकशिपोर्निर्देशमाज्ञाम् आदृता आदरयुक्ताः शिरसा आदाय स्वीकृत्य कदनप्रियाः कदनं भूतद्रोहस्तद्दुःखं वा तदेव प्रियं येषां ते दानवा दैतेयाश्च प्रजानां कदनं चक्रुः ॥१३॥

कदनक्रियामेव प्रपञ्चयति-पुरेति । तत्र पुरं हट्टादिमत् ग्रामस्तद्रहितः व्रजो गवां वासः उद्यानं कृत्रिमं वनम् क्षेत्रं व्रीह्यादेः आरामः अकृत्रिमं वनम् आश्रमं ऋषीणां स्थानम् आकरो रत्नानां वासः खेटः कर्षकग्रामः खर्वटो गिरिद्रोण्याश्रयो ग्रामः घोष आभीराणां वासः पत्तनं राजधानी एतानि केचिद्ददहुः अग्निप्रक्षेपेण दग्धवन्तः ॥ १४ ॥

केचित्खनित्रैः खननसाधनैः सेतून् प्राकारान् गोपुरांश्च सेत्वादींश्च बिभिदुः तत्र सेतवो जलबन्धार्थं निर्मितास्तटाकादयः केचिच्च परशुः पाणौ येषां ते आजीव्यानुपजीव्यान् फलिनश्चूतादिवृक्षांश्च चिच्छिदुः अन्ये च शरणान् गृहान् प्रादहन् प्रदग्धवन्तः केचिच्चोल्मुकैः साङ्गारकाष्ठैः प्रजान् जनान् जज्वलुः ॥ १५ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

एवं दैत्येन्द्रस्य हिरण्यकशिपोरनुचरैर्मुहुर्मुहुर्लोके विप्रकृते उपद्रुते सति सर्वे देवाः स्वर्गं परित्यज्य असुरैरलक्षितास्तत्र-तत्र भुविप्रदेशे विचेरुर्जग्मुः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अन्तर्दुष्टं दृश्यमानरमणीयं कूटम् अस्थिरात्मनः कूटत्वादि-भाववचनं मोहनार्थमासुरमतमुदीरितमिति ज्ञातव्यं, तदुक्तम्—

"विष्णुभक्तेश्च तज्ज्ञानादन्यतो मुक्तिवाचकाः ।
विष्णोर्गुणाभासवाचः श्रीब्रह्मादेस्तथा क्रमात् ॥
विष्णवादिद्वेषिणाश्चैव सुखवाचस्तथा खिलाः ।
मोहनार्थाः समुद्दिष्टास्तथार्थद्योतकास्तथा"इति॥९॥१०॥

द्विजक्रियामूलः द्विजाश्च यज्ञादिक्रियाश्च मूलं यस्य स तथा भक्तिज्ञानादिमन्तरेण केवलं यागादिक्रियया प्रसन्नो भवतीति एतदासुरं मतम् "विष्णुभक्तेश्च तज्ज्ञानादन्यतो मुक्तिवाचकाः" इत्येतदत्रापि प्रमाणम्, द्विजैः क्रियमाणां यागादि-क्रियां मूलयति प्रतिष्ठापयति इति द्विजक्रियामूल इत्येतद्वै-मतम् 'मूलप्रतिष्ठायाम्' इतिधातुः इज्यत इति यज्ञः धर्ममयः धर्मप्रधानः दानादिधर्मैर्यः प्रसीदतीत्येतदप्यासुरमतम् "यथार्थ-द्योतकः" इति वचनाद्धारकतम इत्यन्योऽर्थः । परायणमुत्तमाश्रय-मित्येतद्वैमतम् ॥ ११ ॥

सन्दीपयत दहत वृश्चत छिन्त ॥ १२ ॥

कदनं कदहिंसायाम् ॥ १३ ॥

गवामावासस्थानं व्रजः गोपालवसतिर्वा आश्रमो मुनिनिवासः आकरो रत्नाद्युत्पत्तिस्थानं खेटः नाट्यस्थानं खर्वटो वसनवि-क्रयस्य स्थानं घोष आभीरपल्लिः वणिग्भिरधिष्ठितं पत्तनम् ॥१४॥

आजीव्यान् वृक्षान् नारिकेलक्रमुकाम्पनसादीन् ॥ १५ ॥

विप्रकृते विपरीतमापादिते विनाशिते ॥ १६ ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यतस्तस्मिन्निति । यद्वा ननु, तस्य तद्भक्तमरणादिर्न्या गति र्जातैवास्ति किं तत्प्रयत्नेन तत्राह—अस्मिन्निति । कूटे कूटस्थे एकरूपतया सर्वकालव्यापिनि हिते भक्तसुहृदि नष्टे अद-र्शनं गते सति सर्वेपि प्राकृताप्राकृतदिवौकसस्तदेकप्राण-त्वाच्छुष्यन्ति सुखदनानासम्पद्यपि शोषं प्राप्नुवन्ति तस्मा-त्तदाराधनमेव कार्यमिति भावः । ततश्च यदि युष्माकमिच्छा तर्हि यावत्तद्दर्शनं तावदेव यातेति ॥ १०—१४ ॥

प्रादहन्नित्यर्द्धकम् ॥ १५ ॥

दिवं विमानस्वर्गं भुवं यातेति हिरण्यकशिपुना पूर्वमुक्तत्वात् तस्य सुमेरुस्थितिप्राप्तेः ॥ १६—१६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

कूटेहिते कपटचेष्टिते वस्तुतस्तु कूटेषु कपटिष्वपि मद्विधेषु ईहितं युद्धचेष्टा यस्य तस्मिन्नित्यहो मम भाग्यमिति भावः । देवानां तु सौभाग्यं किमद्वर्णनीयं ते तु तदेकप्राणा एवेत्याह तस्मिन्नष्टे दैवात् कदाचिददृष्टे सति नश्वरदर्शनार्थत्वात् छिन्नमूले वनस्पतौ यथा विटपाः शुष्यन्ति तथा शुष्यन्ति ते विष्णुरेव प्राणा येषान्ते किं वा विष्णोरपि प्राणतुल्यास्ते परमधन्या एवेति भावः ॥ ९ ॥

ब्रह्मक्षत्राभ्यां तपोबलप्रभावाभ्यां सम्यगेधितां वर्द्धितां भुवं यात किमर्थं सूदयध्वं घातयध्वम् ॥ १० ॥

यतस्तेषां नाशे सति विष्णुः स्वयमेव नङ्क्ष्यतीत्याह-विष्णुरिति । द्विजानां नाशे सति तत्क्रियालोपात् विष्णोर्मूलो-त्खातः यज्ञस्य धर्मस्य च नाशात् तत्स्वरूपस्य नाशो भावी किञ्च देवर्ष्यादीनां परायणं परम आश्रय इति देवर्ष्यादीनां वधे तच्छो-कादपि स मरिष्यतीति भावः ॥ ११ ॥

सन्दीपयत दहतेति जनपदस्य दाहे तद्वासिनान्तेषां स्वतएव दाह-सिद्धेः वृश्चत तदुपजीव्यवृक्षाणां छेदं कुरुत ॥ १२ ॥

कदनं कष्टम् ॥ १३ ॥

पुरं हट्टादिमत् ग्रामस्तद्रहितः व्रजोगवांवासः उद्यानं पुष्प-प्रधानं वनं क्षेत्रं व्रीह्यादेः आरामः फलप्रधानं वनम् आश्रमः ऋषी-णां स्थानं आकरो रत्नादीनां खेटः कृषीवलानां वासः खर्वटोगि-रिद्रोण्याश्रयो ग्रामः घोषः आभीराणां वासः पत्तनं राज-धानी ॥ १४ ॥ १५ ॥

विप्रकृते उपद्रुते यज्ञभागानामभावात् दिवं परित्यज्य ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कूटे कपटे ॥ ९ ॥

तप आदीनि सन्ति येषां तान् सूदयध्वं घातयध्वम् ॥ १० ॥

तप आदिनाशे विष्णुरपि न भविष्यतीत्याशयेनाह—विष्णु-रिति । द्विजाः तत्कर्तृकाः क्रियाश्च तप आद्या मूलं यस्य सः किञ्च यतोऽसौ यज्ञः धर्ममयश्च देवादीनां परायणं परम आश्रयः ॥ ११ ॥

सन्दीपयत अग्निना दहत वृश्चत आयुधैः छेदयत ॥ १२ ॥

आहताः भर्त्रा मानिताः कदनं कष्टम् ॥ १३ ॥

पुरादीन् ददहुः तत्र पुरं हट्टादियुक्तम् ग्रामस्तद्रहितः व्रजो गवामालयः उद्यानं कृत्रिमं वनम् क्षेत्रं व्रीह्यादेः आरामोऽ कृत्रिमं वनम् आश्रमः ऋषीणां स्थानम् आकरो रत्नादेः खेटः कृषीवलवासः खर्वटो गिरिद्रोण्याश्रयो ग्रामः घोष आभीरवासः पत्तनं राजधानी ॥ १४ ॥

हिरण्यकशिपुर्भ्रातुः सम्परेतस्य दुःखितः ।
कृत्वा (१) कटोदकादीनि भ्रातृपुत्रानसान्त्वयत् ॥ १७ ॥
शकुनिं शम्बरं धृष्टं भूतसन्तापनं वृकम् ।
कालनाभं महानाभं हरिश्मश्रुमथोत्कचम् ॥ १८ ॥
तन्मातरं रुषाभानुं दितिं च जननीं गिरा ।
श्लक्ष्णया देशकालज्ञ इदमाह जनेश्वर ! ॥ १९ ॥

हिरण्यकशिपुरुवाच ।

अम्बाम्ब हेवधूः पुत्रा वीरं माऽर्हथ शोचितुम् ।
रिपोरभिमुखे श्लाघ्यः शूराणां वध ईप्सितः ॥ २० ॥
भूतानामिह सम्वासः प्रपायामिव सुव्रते ! ।
दैवेनैकत्र नीतानामुन्नीतानां स्वकर्मभिः ॥ २१ ॥
नित्यआत्माऽव्ययः शुद्धः सर्वगः सर्ववित्परः ।
धत्तेऽसावात्मनो लिङ्गं मायया विसृजन्गुणान् ॥ २२॥

श्रीमच्छुकदवकृतसिद्धान्तप्रदीपः ।

खनित्रैः खननसाधनैः आजीव्यान् जीवनहेतून् शरणानि गृहान् ॥ १५ ॥

विप्रकृते पीडिते यज्ञभागानामप्राप्तौ दिवं त्यक्त्वा अलक्षिताः दानवदैत्याद्यज्ञाताः भुवि चेरुः ॥ १६ ॥

भाषाटीका।

उस कपटी शत्रु विष्णु के नष्ट हुए पर, वृक्ष की जड उखाडने से जैसे शाखायें आपही सूख जातीं हैं इसी प्रकार विष्णु जिनके प्राण है वो देवता लोग भी आप से नष्ट होजाँयगे ॥ ९ ॥

अच्छा तौ अब तुम सब लोग ब्राह्मण और क्षत्रियों से पूरित पृथिवी पर जाओ और तप, यज्ञ, स्वाध्याय, व्रत, और दान करने वालों को मार डालो ॥ १० ॥

क्योंकि ? यज्ञ स्वरूप विष्णु का मूल ब्राह्मणों की क्रिया ये हैं और विष्णु धर्म मय पुरुष है, देव ऋषि पितर भूत [प्राणि] और धर्म का वही परायण [उत्कृष्ट आश्रय] है ॥ ११ ॥

इससे जहां २ ब्राह्मण गायें वेद वर्ण आश्रम और वैदिक क्रिया होती हैं उसी २ देश को जाकर अग्नि से जलादो और काट डालो ॥ १२ ॥

कदन (नाश) करने में प्रीति वाले वे दैत्य लोग भी बडे आदर से अपने भर्त्ता की इस तरह की आज्ञा को शिर से ग्रहण कर प्रजा का नाश करने लगे ॥ १३ ॥

और पुर, ग्राम, व्रज, उद्यान क्षेत्र, वाटिका आश्रम खान किसानों के निवास, पर्वतों के समीप के ग्राम, घोष और राजधानी इत्यादि को जलाने लगे ॥ १४ ॥

कितने एक दैत्य कुदालों से सेतु प्राकार गोपुर द्वारों को और जीविका के वृक्षों को परसाओं से काटने लगे अन्य दैत्य प्रजा ओं के निवास स्थानों को जलाने लगे ॥ १५ ॥

जब हिरण्यकशिपु के अनुचरों ने ऐसा लोक का बहुत विप्रिय किया तब देवता लोग भी स्वर्ग को छोड अलक्षित होकर पृथिवी पर विचरने लगे ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेवं प्रजानां कदनं दानवेषु कुर्वत्सु स्वयं स्वर्गराज्यादि साधयितुं तपस्तप्तुकामः प्रथमं यत्कृतवांस्तदाह—हिरण्यकशिपुरित्यादिना । कटोदकं प्रेताय प्रदेयमुदकम् आदिशब्दात्प्रेतश्राद्धादिकम् ॥ १७ ॥ १८ ॥ १९ ॥

हे वधूरिति भ्रातुर्भार्यां सम्बोधयति ॥ २० ॥

भवतुनाम तस्य श्लाघ्यो वधः तथाप्यस्माकं तावद्बन्धुर्गत एवेति चेत्तत्राह—भूतानामिति । दैवेन प्राचीनकर्मणा एकत्र नीतानां संयोजितानां पुनश्च स्वैः कर्मभिः उन्नीतानां वियोजितानाम् ॥ २१ ॥

(१) करोदकादीनि. इति पाठान्तरम्. वीर० ।

यथाऽम्भसा प्रचलता तरवोऽपि चला इव ।
चक्षुषा भ्राम्यमाणेन दृश्यते चलतीव भूः ॥ २३ ॥
एवं गुणैर्भ्राम्यमाणे मनस्यविकलः पुमान् ।
याति तत्साम्यतां भद्रे ! ह्यलिङ्गो लिङ्गवानिव ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवं लोकदृष्ट्या शोकं निवार्य तत्त्वदृष्ट्याऽपि वारयति—नित्य इति । नित्यः मृत्युशून्यः अव्ययः अपक्षयशून्यः शुद्धः निर्मलः सर्वगतः सर्ववित् सर्वज्ञः, सर्वत्र हेतुः, परो देहादिव्यतिरिक्तः अतो मृत इति कृश इति मलिन इति वियुक्त इति अज्ञ इति च मत्वा शोको न कार्यं इत्यर्थः । कथं तर्हि तस्य संसारः? तत्राह—धत्ते इति । आत्मनो मायया स्वाविद्यया लिङ्गं मूर्तिं धत्ते गुणान् उच्चावचान् देहान् सुखदुःखादीन् वा विशेषेण सृजन् स्वीकुर्वन् लिङ्गशरीरोपाधिः संसार इत्यर्थः ॥ ॥ २२ ॥

एतत्सदृष्टान्तं प्रपञ्चयति—यथेति चतुर्भिः । तरवः प्रतिविम्बिताः उपाधिधर्मा उपहिते भवन्तीति दृष्टान्तमुक्त्वा ग्राहकधर्मा ग्राह्ये भवन्तीति दृष्टान्तमाह, चक्षुषेति ॥ २३ ॥

अविकलः परिपूर्णएव तत्साम्यताम् मनःसम्मतामित्यर्थः ॥२४॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततो दुःखितो हिरण्यकशिपुः संपरेतस्य मृतस्य भ्रातुः हिरण्याक्षस्य करोदकादीनि प्रेतोद्देशेन करेण हस्तेन देयं सलिलं जलं करोदकं तत्प्रभृतीनि प्रेतोद्देशेन कर्त्तव्यानि कृत्वा भ्रातुः हिरण्याक्षस्य पुत्रान् असांत्वयत् ॥ १७ ॥

भ्रातुः पुत्रानुद्दिशति—शकुनिमिति ॥ १८ ॥

तथा देशकालाभिज्ञो ऽसुरेश्वरो हिरण्यकशिपुस्तेषां शकुन्यादीनां मातरं रुषद्भानुं स्वमातरं दितिञ्च श्लक्ष्णया सूक्ष्मया निपुणया वा गिरा इदं वक्ष्यमाणमाह ॥ १९ ॥

तदेवाह—अम्बांबेत्यादिना, यावदध्यायसमाप्ति । अम्बाम्बेति दितेः सम्बोधनम्, हे वधूरिति भ्रातुर्भार्यायाः, हे पुत्रा इति तत्पुत्राणाम्. वीरं हिरण्याक्षंप्रति शोचितुं यूयं नार्हथ कुतो यतो रिपोरभिमुखे शूराणां वधः श्लाघ्यः प्रशस्तः ईप्सितः प्रशस्तत्वेनाभिमतइत्यर्थः ॥ २० ॥

भवतुनाम तस्य वधः श्लाघ्यस्तथाप्यस्माकं तावद्बन्धुर्गत एवेत्यत आह—भूतानामिति । इह संसारे भूतानां संवासः सहावस्थानं प्रपायामिव प्रपिवन्त्यस्यामिति प्रपा पान्थानां पिपासूनां जलादिपानेन विश्रान्त्यर्थं धार्मिकैर्निर्मिता शाला तस्यां यथा पान्थानां सहावस्थानमस्थिरं तद्वदिह भूतानामपीत्यर्थः । अस्थिरत्वे हेतुं वदन् भूतानि विशिनष्टि, स्वकर्मभिर्हेतुभिर्दैवेन तत्तज्जीव कर्मानुगुणं प्रवृत्तेनेश्वरेणेत्यर्थः । एकत्र नीतानां संयोजितानां पुनरन्यत्रोन्नीतानां वियोजितानाम् ॥ २१ ॥

ननु, जीवतामेव संयोगवियोगौ प्रपादिषु दृष्टौ, कथं पुनरजीवतोऽत्रैव. दग्धस्य तत्रतत्र संयोगवियोगौ? इत्यत्राह—नित्य इति । देहस्यास्थिरत्वेऽप्यात्मनः स्थिरत्वात् तत्तत्कर्मायत्तशरीरत्यागोपादानाभ्यां तैस्तैः संयोगवियोगौ उपपन्नाविति भावः । तदेतदुपपाद्यते, आत्मा अनित्यस्तत्र हेतुरव्ययः विनाशाद्यवस्थारहितः, तत्कुतः? शुद्धः प्रकृतिपरिणामानाश्रयस्वरूपः प्रकृतिपरिणामो हि प्रकृतिगतः तत्कुतः परदेहाद्विलक्षणः तत्कुतः सर्वविद्देहेन्द्रियमनःप्राणादीनां वित् अजडत्वेन देहाद्विलक्षण इति भावः । कथमेकदेशस्थः सर्वं वेत्ति? तत्राह—सर्वगः स्वधर्मभूतज्ञानद्वारा कृत्स्नदेहादिव्यापीति भावः । स्वतः एवम्भूतोऽप्यसावात्मा मायया स्वसम्बन्धिविचित्रपुण्यपापात्मककर्मणा गुणान् सत्त्वादीन्विसृजन् कर्मानुरूपं क्षोभयन्नित्यर्थः । आत्मनः स्वस्य कर्मफलभोगार्थमिति शेषः । लिङ्गं शरीरं धत्ते बिभर्ति गुणक्षोभस्य कर्मानुगुणत्वात्कर्मणः स्वात्मनः कर्तृत्वगुणविसर्गेऽपि कर्तृत्वमुक्तं गुणान्विसृजन्निति, . . उक्तविधोऽप्यनादिपुण्यपापात्मककर्मफलभोगाय तदनुगुणपरिणामसत्त्वादिगुणपरिणामात्मकं देहं बिभर्ति इत्यर्थः तथाच तस्य तत्रतत्र कर्मायत्तदेहसौलभ्यात्तत्प्रयुक्तावेकस्यैव संयोगवियोगौ सम्भवत इति भावः ॥ २२ ॥

ननु, नायमात्मा देहाद्विलक्षणः किन्तु स एव यतो देवोऽहं मनुष्योऽहमिति देहाद्यभेदेन प्रतीयते तत्राह—यथेति । देवोऽहमित्यादिप्रतीतिर्भ्रान्तिरूपा न प्रमितिरूपेतिभावः । तदेवोपपादयति—यथेति, यथा प्रचलता अम्भसा उदकेनोपाधिना तरवो वृक्षा अपि चलाइव कम्पमाना इव दृश्यन्ते यथाच भ्राम्यमाणेन चक्षुषा भूरपि चलतीव दृश्यते यथा तरुभूम्यादिचलनप्रतीतिर्भ्रान्तिरूपेत्यर्थः ॥ २३ ॥

एवं तथा हे भद्रे, गुणैः सत्त्वादिगुणपरिणामात्मकैः देहेन्द्रियादिभिः सह मनसि भ्राम्यमाणे व्यापृतवति, यद्वा, गुणैः शब्दादिविषयैर्हेतुभिस्तदर्थमित्यर्थः । मनसि भ्राम्यमाणे देहं विषयीकुर्वति सति पुमान् जीवः स्वयमविकलोऽपि निरवयवोऽपि देहाद्भिन्नोऽपीत्यर्थः । तत्साम्यतां देहतुल्यतां याति देवोऽहं मनुष्योऽहमित्यादिदेहरूपेणात्मानं प्रत्येति इत्यर्थः । तत्तां यातीत्यनुक्त्वा तत्साम्यतां यातीतिवदतोऽयमभिप्रायः देवोऽहमित्यादिदेहाकारमात्मानं मन्यमानस्यापि कदाचिद्व्यतिरेकप्रतिपत्तिरस्त्येवेति. तदेव विशदयति, अलिङ्गो लिङ्गवानिवेति. लिङ्गाच्छरीरादन्यः अलिङ्गः आत्मा लिङ्गवानिवात्मानं प्रत्येति. ममेदं शरीरमित्येवं रूपेण लिङ्गप्रतिसम्बन्धीवात्मानं प्रत्येतीत्यर्थः । ममेदं शरीरमिति शरीराद्व्यतिरिक्तत्वेनात्मनः प्रतीतावपि देहात्मभ्रान्तिमतां तत्प्रतीतिरस्फुटत्वद्योतनाय लिङ्गवानिवेतीवशब्दः प्रयुक्तः । अयं भावः, यद्यात्मनो देहाकारत्वेन प्रतीतिः प्रमितिरूपा स्यात्तर्हि तद्भिन्नत्वेन प्रतीतिर्भ्रान्तिरूपास्यात्

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तच्चायुक्तं शरीरप्रतिभासदशायां तदप्रतीतिदशायाञ्च सुषुप्त्यादावहमर्थस्यात्मनोऽनुवृत्तत्वेन प्रतीयमानत्वादिति ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कटोदकं प्रेतमुद्दिश्य दीयमानमुदकम् ॥ १८ ॥

तन्मातरं तेषां मातरं नाम्ना रुशद्भानु दितिं जननीं च श्लक्ष्णया गिरा इदमाहेत्यन्वयः ॥ १९ ॥

हे वधूः हे सहोदरभार्ये हे पुत्राश्च परेण वध ऐहिकामुष्मिकजनश्लाघ्यां न भवतीति कृत्वा शोक उतात्रैव कांश्चित्कालं जीवन्तीति अभीष्टहान्याप्राप्तः आहोस्वित्पतृमातृपुत्रभावस्य क्षणिकत्वेति तत्र प्रथमद्वितीयौ प्रत्याह रिपोरिति ॥ २० ॥

तृतीयं मानस्य एकां कटाक्षीकृत्याह-भूतानामिति । इह कर्मभुवि दैवेन विधिनाऽन्यत्र हरिणा वा एकत्र नीतानां सम्मीलितानामुन्नीतानां पुत्रपौत्रादिसमृद्धिं प्रापितानां भूतानामेकत्र सम्वासः सहवासः प्रपायां पानीयशालायामिव यथाऽध्रुवस्तथाऽनित्यो भवतीत्यन्वयः । "प्रपा पानीयशालास्यान्मंत्रशाला प्रति श्रयः" इत्यभिधानम् ॥ २१ ॥

भूतानां सहवासोऽनित्यश्चेत्तर्हि केन सहवासो नित्यो भवतीत्याशंक्य सर्वगतत्वाज्जीवस्य मन आदीन्द्रियाधारत्वाद्धरिणा सहवासो नित्यः "सता सोम्य तदा सम्पन्नो भवति प्राज्ञेनात्मनान्वारूढ उत्सर्जयन्,,इत्यादिना सुप्तिमरणावस्थयोरपि सहस्थित्युक्तेरन्यथा किंवक्तव्यमित्याशयेन देवं मतमाह-नित्य इति । असौ हरिरात्मनो जीवस्य मन आदीन्द्रियज्ञानं धत्ते तस्याधारभूत इत्यर्थः नित्यत्वादिकं स्वरूपत्वेनोच्यते, पर इति. जीवव्यावर्तकं मायया स्वेच्छया वासनया वा गुणान् शब्दादीन् विसृजन् ददानः संसारिण इव चिदचिद्देहेन मनआदीनां नित्यसम्बन्धो युज्यत इत्यतः सर्वगत इत्युक्तम. प्रपायां प्राणिसहवासवत् परमात्मनो देहसम्बन्धो नित्य इत्याशंकनासुरमतमपनोद्यते गुणान् विसृजन् बुभूषुरसावात्मा आत्मनो भोगायतनं लिङ्गं कर्मज्ञानेन्द्रियपञ्चवायुमनसां समुदितरूपं शरीरं धत्ते मायेत्युक्त्याऽनित्यो देहसम्बन्ध इति ॥ २२ ॥

इतोऽपि अविद्याबलाद्ब्रह्मैव संसरतीत्येतदासुरं मतमित्याशयेनाह-यथेति । एवं गुणैर्भ्राम्यमाणो इतस्ततश्चञ्चलीक्रियमाणो मनस्यविकलः पुमान्पूर्णपुरुषः श्रीनारायणः तस्य जीवस्य साम्यं दोषित्वं संसारित्वं यातीति प्रतीयते. कथमिव, लिङ्गवानिव जीव इव मनोदोषैराभासं ब्रह्मप्रतिबिम्बं जीवे दूषिते तद्विषयज्ञानहीने सति तन्महाभासिनो बिम्बभूतस्य ब्रह्मणोऽपि दुष्टत्वं कल्पयतीत्यर्थः । न चैतदुपपत्तिमदित्याह-आलिङ्ग इति । नीरूपं तस्मादघटिताविद्याकल्पितमित्यर्थः । अन्यत्र प्राकृतशरीररहितः, कथमिव, प्रचलिताम्भसा तरवोऽपि प्रचला इव दृश्यन्ते यथा, जलसञ्चलनाज्जले प्रतिबिम्बितवृक्षसञ्चलनात्तटस्थानिश्चलवृक्षसञ्चलनं कल्पयत्यज्ञस्तथेति. नन्वत्र प्रतिबिम्बितवृक्षचलनेन तटस्थवृक्षचलनकल्पनमुन्मत्तकल्पनमेव. प्रत्यक्षेणान्यथा दृश्यमानत्वादित्युक्त्वा दृष्टान्तान्तरमाह-चक्षुषेति, यथा, परिभ्रमतः पुरुषस्य भ्राम्यमाणेन चक्षुषा भूर्भ्रमतीव दृश्यते—

> "असमः समतामेति भ्रान्तिदृष्ट्यैव केवलम् ।
> जीवेन ब्रह्म न समं तत्त्वदृष्ट्या कथञ्चन ॥
> यथोदचालनाद्वृक्षप्रतिबिम्बप्रचालनात् ।
> तटस्थवृक्षचलनं कल्पयेदबुधो नरः ॥
> तथा मनोनिजैर्दोषैराभासे दूषिते नरे ।
> आभासिनो ब्रह्मणश्च दोषमज्ञः प्रकल्पयेत् ॥
> आत्मनश्चक्षुषो भ्रान्त्या यथा पश्येद्भ्रमं भुवः ।
> तथैव स्वात्मनो दोषाद्दोषवद्ब्रह्म पश्यति,, ॥

इत्येतत्प्रमाणासिद्धत्वादुक्त एवार्थो न त्वितरः 'विष्णुर्द्विजक्रियामूलः' इत्यारभ्योच्यमानं दैवमासुरञ्चेत्युभयमतज्ञापनाय—

> "विप्रयज्ञादिमूलं तु हरिरित्यासुरं मतम् ।
> हरिरेव हि सर्वस्य मूलं सम्यङ्मतं नृप" ॥

इत्येतद्वाक्यमाचार्यैरत्रोदाहृतमुपर्यप्यनुसन्धानाय वेति ॥ २३-२४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

रिपोरप्यभिमुखे किमुत श्रीविष्णोरिति च ॥ २०—२१ ॥

नित्य इत्यत्र जीवेऽपीश्वरधर्मोक्तिरसुरौचित्यात् सर्वज्ञस्याज्ञानमिति युक्तिविरुद्धञ्च तद्वदति वास्तवार्थे तु सर्वं लोकं गच्छति सर्वगः सर्वं शरीरं विन्दति सर्ववित् ॥ २२—२४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

कटोदकम् । प्रेताय प्रदेयमुदकं आदिशब्दात् प्रेतश्राद्धञ्च ॥ १७-१९ ॥

हे वधूरिति भ्रातुर्भार्यां सम्बोधयति ॥ २० ॥

बन्धुविच्छेददुःखञ्चैवं भावनायां निर्वाप्यतामित्याह-भूतानामिति । प्रपायां पानीयशालायां उन्नीतानां पुनर्वियोजितानाम् ॥ २१ ॥

युष्मत्प्रबोधार्थमुक्तमिदं लोकदृष्ट्या तत्त्वदृष्ट्या तु हिरण्याक्षः खल्वात्मैव न तु देहस्तस्यात्मनश्च स्वरूपं शृणुतेत्याह-नित्यः मृत्युरहितः अव्ययः अपक्षयशून्यः शुद्धः निर्मलः सर्वगः सर्वगतः इतीश्वरधर्मोक्तं जीवेऽप्यसुरस्वभावात् वस्तुतस्तु सर्वं लोकं गच्छतीति सः सर्वं सुखदुःखादिकं विन्दतीति सः परो देहादिव्यतिरिक्तः असावात्मा आत्मनः स्वस्य लिंगं देहं मायया स्वाविद्यया धत्ते किमर्थं गुणान् उच्चावचान् स्थूलदेहान् विशेषेण सृजन् स्वीकुर्वन् तथा तत्पदावृत्त्या विसृजन् त्यजन् स्थूलदेहान् स्वीकर्तुं त्यक्तुञ्चेत्यर्थः ॥ २२ ॥

एवं यल्लिङ्गं धत्ते तस्मात् सूक्ष्मदेहादप्यात्मा भिन्न एवेति दृष्टान्ताभ्यामाह-यथा अम्भसा प्रचलता हेतुना अम्भस्सु प्रतिबिम्बितास्तरवोऽपि चला इवेक्ष्यन्ते न तु चलाः अम्भोभ्यस्तेषां भिन्नत्वात् एवमेव लिङ्गधर्माः शोकमोहादयस्तदुपहिते आत्मन्यपि प्रतीयन्ते नत्वात्मा शोकमोहादिमान्. तस्माल्लिङ्गाद्भिन्नत्वादित्यर्थः । एवमुपाधिधर्मा उपहिते भवन्तीति दृष्टान्तमुक्त्वा ग्राहकधर्मा ग्राह्ये भवन्तीति

एषआत्मविपर्यासो ह्यलिङ्गे लिङ्गभावना ।
एष प्रियाप्रियैर्योगो वियोगः कर्मसंसृतिः ॥ २५ ॥
सम्भवश्च विनाशश्च शोकश्च विविधः स्मृतः ।
अविवेकश्च चिन्ताचा विवेकाऽस्मृतिरेव च ॥ २६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

दृष्टान्तमाह—चक्षुषेति । भ्राम्यमाणेन भ्रमिदोषाक्रम्यमाणेन चक्षुषा ती भ्रमतीव यथा भूताविष्टः पुरुषो भूतग्राह्यउच्यते एवं देहाविष्ट-आत्मा देहग्राह्योदेहधर्माक्रान्तउच्यत इत्यर्थः । एवम् अविकलः शुद्धएवात्मा तत्साम्यतां मनःसमतां मनोधर्मग्राहित्वम् ॥ २३ ॥ २४॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कटोदकादीनि प्रेतदेयतिलाञ्जल्यादीनि ॥ १७—१८ ॥

तेषां हिरण्याक्षसुतानां मातरं रुषाभानुं श्लक्ष्णया मधुरया ॥ १९—२० ॥

दैवेन प्राक्कर्मणा एकत्र नीतानां मातृपुत्रादिदेहसंयोजितानां पुनः स्वकर्मभिरुन्नीतानां मातृपुत्रादिसंयोगप्रददेहेभ्योवियोजितानां संवासः संयोगः प्रपायामिव पानीयशालिकायामिव अनित्य इत्यर्थः ॥ २१ ॥

ननु, कः स आत्मा ? यः कर्मभिर्देहादुन्नीयते, केन देहेन ? त्यक्ता देहादुद्गच्छति केन च हेतुना तमपि देहं बिभर्तीत्याकाङ्क्षायामाह—नित्य इति । यः कर्मभिरुन्नीयते स आत्मा नित्यो ध्रुवः यतअव्ययः विनाशाद्यवस्थारहितः अतएव शुद्धः सर्वगः "हृद्ययमात्मा, बुद्धेर्गुणेनात्मगुणेन चैव, ह्याराग्रमात्रो ह्यवरोपि दृष्टः" इत्यादिश्रुतिभ्यो हृद्गतोऽणुस्वरूपोपि ज्ञातृत्वलक्षणात् गुणात् सर्वेषु पादशिरआदिषु व्याप्तः अत एव पादे मे सुखमित्येवं सर्ववित् परः देहेन्द्रियमनोबुद्धिप्राणादिभ्यो विलक्षणः एवंभूतगुणान् प्रकृतिगुणपरिणामात्मकान् उत्तरदेहलब्धये पूर्वपूर्वदेहान् विसृजन् लिङ्गं सूक्ष्मं देहम् आत्मनः स्थाने आत्मत्वेन मायया धत्ते बिभर्ति माययात्मत्वेन धृतेन लिङ्गदेहेन देहाद्देहान्तरं यातीत्यर्थः ॥ २२ ॥

लिंगदेहे आत्मत्वभ्रान्तिमुपपादयति—यथेति द्वाभ्याम् । यथाऽम्भसा प्रचलता हेतुभूतेन तत्तीरगास्तरवोपि जलगतस्वच्छायाद्वारा चला इव प्रतीयन्ते, भ्रान्त्येति शेषः । यथा च भ्राम्यमाणेन चक्षुषा भूः भ्रमतीव प्रतीयते ॥ २३ ॥

एवं गुणैरनादिप्रकृतिगुणैर्भ्राम्यमाणे स्वरूपज्ञानात् चाल्यमाने मनसि मनोपलक्षिते आत्मनि अविकलः सुखरूपोपि अलिङ्गः देहभिन्नोपि पुमान् तत्साम्यतां लिङ्गदेहसाम्यतां देहोहमिति भावं याति लिङ्गवानिव प्रसिद्धो देहवान् यथा स्थूलोऽस्मि कृशोस्मीति मन्यते तद्वत् ॥ २४ ॥

———

भाषा टीका ।

हिरण्यकशिपु ने भी अपने मृत भ्राता के शोक से दुःखित होकर उसको तिलांजली देकर भ्राता के पुत्रों को समुझाने लगा ॥ १७ ॥

शकुनि शंवर धृष्ट भूत सन्तापन वृक काल नाभ महा नाभ हरिश्मश्रु और उत्कच, इन सब हिरण्याक्ष के पुत्रों को ॥ १८ ॥

और उनकी माता रुषाभानु तथा हे जनेश्वर ! अपनी माता दिति को देशकाल के जानने वाला हिरण्यकश्यपु मीठी वाणी से ऐसे कहना लगा ॥ १९ ॥

हिरण्यकशिपु बोला कि—हे जननि ! हे वधू ! हे पुत्रो उस वीर का शोक करने लायक नहीं है । क्योंकि शूरवीर का मरना तो शत्रु के सम्मुख ही श्लाघनीय है ॥ २० ॥

हे सुव्रते ! इस संसार में प्राणियों निवास [प्रपा] प्याउके निवास के तरह जानो क्योंकि सब लोग दैव योग [प्राचीन कर्म योग] से इकट्ठे होते हैं और उसी से फिर अलग २ होजाते हैं ॥ २१ ॥

क्योंकि ? आत्मा तो नित्य अव्यय शुद्ध सर्व (देहेन्द्रियादि) को जानने वाला और ज्ञान द्वारा सर्व (देहेन्द्रियादि) व्यापी है और देहादि से पर अर्थात् विलक्षण है ॥ एसा होकर भी अपने पूर्व कर्मों से सत्त्वादि गुणों को सृजता हुआ अपने प्रारब्ध भोग लिये शरीर को धारण करता है ॥ २२ ॥

जैसे जल के चलते से वृक्ष भी चलते से माल्ूम पडते हैं ॥ और जैसे भ्रमते हुए नेत्रों से पृथिवी चलती सी माल्म पडती है ॥ २३ ॥

इसी प्रकार माया के गुणों से मनके भ्रमने से यह अविकल पुरुष जीवात्मा भी हे भद्रे असंसारी होकर भी संसारी की तरह मन समता को प्राप्त हो जाता है ॥ २४ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

लिङ्गभावना देहाभिमानः एष आत्मनो विपर्यासोऽन्यथाभावः तमेवाह--प्रियैर्वियोगोऽप्रियैर्योगश्च कर्म च संसृतिश्च नानागर्भेषु प्रवेशः ॥ २५ ॥

ततश्च सम्भवउत्पत्तिः विवेकस्यास्मृतिरननुसन्धानम् ॥२६॥

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
यमस्य प्रेतबन्धूनां सम्वादं तं निबोधत ॥ २७ ॥
उशीनरेष्वभूद्राजा सुयज्ञ इति विश्रुतः ।
सपत्नैर्निहतो युद्धे ज्ञातयस्तमुपासत ॥ २८ ॥
विशीर्णरत्नकवचं विभ्रष्टाभरणस्रजम् ।
शरनिर्भिन्नहृदयं शयानमसृगाविलम् ॥ २९ ॥
प्रकीर्णकेशं ध्वस्ताक्षं रभसा दष्टदच्छदम् ।
रजःकुण्ठमुखाम्भोजं छिन्नायुधभुजं मृधे ॥ ३० ॥
उशीनरेन्द्रं विधिना तथाकृतं पतिं महिष्यः प्रसमीक्ष्य दुःखिताः ।
हताः स्म नाथेति करैरुरो भृशं घ्नन्त्योमुहुस्तत्पदयोरुपापतन् ॥ ३१ ॥
रुदत्य उच्चैर्दयिताङ्घ्रिपङ्कजं सिञ्चन्त्यश्रैः कुचकुङ्कुमारुणैः ।
विस्रस्तकेशाभरणाः शुचं नृणां सृजन्त्य आक्रन्दनया विलेपिरे ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अत्रापि शोकहेतुं विना वृथैवायं शोक इत्यस्मिन्नर्थे प्रेतस्य मृतस्य कस्यचित् ये बन्धवस्तेषाञ्च सम्वादं शृणुत ॥ २७ ॥

उपासत तत्समीपे आवृत्य स्थिताः ॥ २८ ॥

विशीर्णं रत्नमयं कवचं यस्य विभ्रष्टान्याभरणानि स्रजश्च यस्य शरेण निर्भिन्नं हृदयं यस्य असृजा रक्तेनाविलं लिप्तम् ॥२९॥

प्रकीर्णाः केशाः यस्य ध्वस्ते अक्षिणी यस्य रभसा संरम्भेण दष्टो दच्छद ओष्ठो येन रजसा कुण्ठमावृतं मुखाम्भोजं यस्य छिन्नमायुधं भुजश्च यस्य ॥ ३० ॥

तस्य पदयोरुपसमीपे आ समन्तादपतन् ॥ ३१ ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं देहाद्विलक्षणस्य नित्यस्यात्मनः कर्मपरिपाकानुगुणसत्त्वादिगुणपरिणामरूपदेहसम्बन्धस्तदनुध्याननिमित्तस्तदभिन्नत्वप्रत्ययश्च भ्रमरूप इत्युक्तम्. अथ यथा देहसम्बन्धस्तदनुध्याननिमित्तस्तदभेदभ्रमश्च यथा कर्ममूलकः एवं सुखदुःखादिकमपि सर्वं कर्ममूलकमेवेत्याह—एव इति.। अलिङ्गे लिङ्गादन्यस्मिन् शरीराद्भिन्ने आत्मनि लिङ्गभावना देहत्वेनानुध्यानं देवोऽहमित्यादिदेहाभेदप्रतीतिरित्येष आत्मनो विपर्ययः अन्यथा प्रतीतिः कर्मसंसृतिः कर्मकृतसंसारो भवतीत्यर्थः। एवं प्रियाप्रियैरिष्टानिष्टवस्तुभिर्योगो वियोगश्च सुखदुःखरूप इत्यर्थः ॥ २५ ॥

सम्भवः उत्पत्तिः विनाशो मरणं नानाविधः शोकः अविवेकः चिदचिदीश्वरयाथात्म्याविवेचनं चिन्ता विषयानुध्यानं विवेकस्यास्मृतिः कचिदाप्तोपदेशादिना जातस्यापि विवेकस्याननुसन्धानञ्चेत्येष सर्वोऽपि कर्मसंसृतिरेव कर्मकृतसंसाररूप एव स्मृतः ॥२६॥

अत्र शोकनिमित्तमन्तरेणापि यः शोकः स व्यर्थ एवेत्यस्मिन्नर्थे इतिहासमप्युदाहरन्ति तत्त्वविदः, इतिहासं विशिनष्टि—पुरातनं न त्वाधुनिककपोलपरिकल्पितं यमस्य प्रेतबन्धूनाञ्च सम्वादरूपं तमितिहासं निबोधत शृणुत ॥ २७ ॥

इतिहासमेवाह—उशीनरेष्वित्यादिना । उशीनरेषु देशेषु सुयज्ञ इति प्रसिद्धः कश्चिद्राजा बभूव स च सपत्नैः शत्रुभिर्युद्धे निहतः तं निहतं ज्ञातयः सापिण्डाः उपासत परिवृत्योपविविशुः ॥ २८ ॥

कथम्भूतं विशीर्णं रत्नमयं कवचं यस्य विभ्रष्टान्याभरणानि स्रक् च यस्माच्छरैर्नितरां भिन्नं हृदयं यस्य असृजा रुधिरेण आविलं व्याप्तम् ॥ २९ ॥

प्रकीर्णाः केशा यस्य स्तब्धे निश्चले अक्षिणी यस्य संरम्भेण क्षोभेण दष्टो दच्छदः दन्तच्छदः ओष्ठो येन रजसा कुण्ठमावृतं मुखाम्भोजं यस्य मृधे युद्धे छिन्नमायुधं भुजश्च यस्य तम् ॥ ३० ॥

विधिना दैवेनैवं कृतमुक्तदशां प्रापितम् उशीनरेन्द्रं पतिं भर्तारं प्रसमीक्ष्य तत्पत्न्यः अतीव दुःखिताः हे नाथ! वयं हताः स्मेति वदन्त्यः करैः पाणिभिः भृशं नितरामुरो मुहुर्मुहुर्घ्नन्त्यः तस्य भर्तुः पदयोश्चरणयोरुपापतन् समीपे समन्तादापतन् ॥ ३१ ॥

तत उच्चैस्स्वरेण रुदन्त्यः कुचकुङ्कुमेनारुणैः कुचयोः पतित्वा ततः प्रस्रवद्भिरिति भावः । अस्रैः शोकजलबिन्दुभिः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

दयितस्य प्रत्युरंघ्रिपङ्कजं सिञ्चन्त्यः विभ्रष्टाः केशाः आभरणानि च यासां ताः नृणामपि शुचं सृजन्त्यः शृण्वतां उत्पादयन्त्यः आक्रन्दनया रोदनेन सह विलेपिरे विलापञ्चक्रुः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

परमात्मानमेवं जानतः किं फलं ? तत्राह—एषइति । अलिङ्गे प्राकृतदेहेन्द्रियादिरहिते अत एव परतन्त्रत्वादिसर्वदोषरहिते परमात्मनि या लिङ्गभावना प्राकृतदेहेन्द्रियात्मत्वादिचिन्ता एव आत्मनः स्वस्यैवायोग्यस्य जनस्य विपर्यासस्तमःप्राप्तिलक्षणोऽनर्थो भवति इहापि यथा परत्र तमोलक्षणोऽनर्थ एवं प्रियाप्रियादियोगवियोगलक्षणापूर्वकर्मानुसारेण संसृतिर्भवति ॥ २५ ॥

कीदृशीति विशेष्याह–सम्भव इति । अज्ञानपूर्तिपर्यन्तं पुनः पुनः सम्भवस्तस्मिन्सति स्वरूपविनाशः विवेकस्मृतिः अविवेकिन एव विवेकभ्रान्तिः ज्ञानित्वभ्रान्तिः असुरसिद्धान्तनिष्ठितस्य हिरण्यकशिपोरेवं देवसिद्धान्तोपन्यासेन कथं स्वबन्धुबोधनमितीयमाशङ्का—

> "अन्तर्हिरण्यकादीनां भक्तिरस्त्येव केशवे ।
> असुरावेशतस्त्वन्यान् हरिस्तोतॄन् द्विषन्ति च" ॥

इत्यनेन परिहरणीयेति ॥ २६ ॥

पुत्रमित्रकलत्रादिभिः सह निवासो दैवाधीन इति मत्वा शोको न कार्य इत्यस्मिन्नर्थे इतिहासलक्षणकथास्तीत्याह—अत्रेति । प्रेतबन्धूनां कस्यचिन्मृतस्य ज्ञातीनाम् ॥ २७—२८ ॥

असृगाविलं रुधिररूषितम् ॥ २९ ॥

स्तब्धाक्षं निश्चलनेत्रं रजःकुण्ठं धूलिधूसरं मुखाम्बुजं यस्य स तथा तं छिन्नआयुधयुक्तौ भुजौ यस्य स तथा तम् ॥ ३०—३१ ॥

कुचकुंकुमधूलिभिररुणवर्णैराक्रन्दनया उच्चरोदनेन नृणां शुचः शोकान् विसृजन्त्यः कुर्वाणा विलेपिरे परिदेवनं चक्रुः ॥३२॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

एष इति युग्मकम् । अलिङ्गे देहातिरिक्ते आत्मनि ॥ २५—४५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अलिङ्गेऽप्यात्मनि लिङ्गभावना देहाभिमानः एष एवात्मनोविपर्यासः विपर्ययः तस्मादेवात्मनः एषः प्रियाप्रियैर्योगोवियोगश्च चकाराद्विपरीतश्च अप्रियैर्योगः प्रियैर्वियोगश्च कर्म च संसृतिश्च नानागर्भेषु प्रवेशः ॥ २५ ॥

विवेकस्य सतोऽप्यस्मृतिरस्फुर्तिः ॥ २६ ॥

अत्रापि अशोच्यस्यापि शोके इतिहासमपि प्रेतस्य मृतस्य ये बन्धवस्तेषाञ्च ॥ २७ ॥ २९ ॥

रभसा क्रोधेन दष्टो दन्तच्छदः अधरो येन तं तत्क्षण एव सपत्नैः शस्त्रहतत्वात्तथाभूतत्वेनैव मृत्वापि स्थितमित्यर्थः ॥ ३० ॥ ३१ ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

देहात्माभिमान एव संयोगवियोगादित्याह—एष इति द्वाभ्याम् । अलिङ्गे देहभिन्ने लिंगभावना देहोहमिति भावना सैष आत्मनोविपर्य्यासः अन्यथाभावः हि हेतौ अत एव विपर्य्यासाद्धेतोः एष प्रसिद्धः प्रियाप्रियैर्योगोवियोगश्च कर्मभिः संसृतिः संसारश्च ॥ २५ ॥

सम्भवो जन्म विनाशो मरणम् अविवेकः, कार्याकार्यविवेकाभावः कथञ्चिद्गुर्वादितो लब्धस्य विवेकस्य अस्मृतिरननुसन्धानम् ॥ २६ ॥

उक्तार्थे इतिहासमाह—अत्रापीति । अत्र आत्मनो ध्रुवत्वेनाशोच्यत्वे ॥ २७ ॥

उशीनरेषु देशेषु तस्य ज्ञातयः उपासत आवृत्य स्थिताः ॥२८॥

कथंभूतं विशीर्णं रत्नमयं कवचं यस्य विभ्रष्टानि आभरणानि स्रजो यस्य शरेण निर्भिन्नं हृदयं यस्य असृगाविलं रुधिरलिप्तम् ॥ २९ ॥

प्रकीर्णाः केशा यस्य ध्वस्ते अक्षिणी यस्य रभसा संरम्भेण दष्टो दन्तच्छदो येन रजसा छन्नं मुखाम्भोजं यस्य छिन्नौ आयुधयुक्तौ भुजौ यस्य तम् ॥ ३० ॥

विधिना कर्मफलदेन तथा कृतं पञ्चत्वं नीतं तस्य पदयोः उप समीपे आ समन्तात् अपतन् ॥ ३१ ॥

नृणां पश्यतां शुचं सृजन्त्यः आक्रन्दनया वैकल्यवाण्या विलेपिरे ॥ ३२ ॥

भाषा टीका ।

बस यही आत्मा का विपरीत पना है जो कि अशरीरी के विषय शरीरी की भावना हो जानी और इसी से प्रिय अप्रियों से संयोग और वियोग होता है। और इसी से कर्म निबन्धन संसार भी है ॥ २५ ॥

और इसी से शरीर की उत्पत्ति और विनाश और नाना तरह का शोक अविवेक चिन्ता विवेक और विस्मृति भी होती है ॥ २६ ॥

इस विषय में एक प्राचीन इतिहास कहते है॥ उसमें यमराज और प्रेतबन्धुओं का सम्वाद है उसे तुम सुनो ॥२७॥

उसीनर देशमें एक सुयज्ञ नामक राजा हुआ। उसको युद्ध में बैरियों ने मारडाला उस के जाति लोग उसको चारों तरफ से घेर कर बैठे थे ॥ २८ ॥

अहो विधात्राऽकरुणेन नः प्रभो ! भवान् प्रणीतो दृगगोचरां दशाम् ।
उशीनराणामसि वृत्तिदः पुरा कृतोऽधुना येन शुचां विवर्धनः ॥ ॥ ३३ ॥
त्वया कृतज्ञेन वयं महीपते ! कथं विना स्याम सुहृत्तमेन ते ।
तत्रानुयानं तव वीरपादयोः शुश्रूषतीनां दिश यत्र यास्यसि ॥ ३४ ॥
एवं विलपतीनां वै परिगृह्य मृतं पतिम् ।
अनिच्छतीनां निर्हारमर्कोऽस्तं संन्यवर्तत ॥ ३५ ॥
तत्र ह्रि प्रेतबन्धूनामाश्रुत्य परिदेवितम् ।
आह तान् बालकोभूत्वा यमः स्वयमुपागतः ॥ ३६ ॥

यम उवाच ।

अहो अमीषां वयसाधिकानां विपश्यतां लोकविधिं विमोहः ।
यत्रागतस्तत्र गतं मनुष्यं स्वयं सधर्मा अपि शोचन्त्यपार्थम् ॥ ३७ ॥
अहो वयं धन्यतमा यदत्र त्यक्ताः पितृभ्यां न विचिन्तयामः ।
अभक्ष्यमाणा अबलावृकादिभिः सरक्षिता रक्षति यो हि गर्भे ॥ ३८ ॥
य इच्छयेशः सृजतीदमव्ययो य एव रक्षत्यवलुम्पते च यः ।
तस्याबलाः ! क्रीडनमाहुरीशितुश्चराचरं निग्रहसङ्ग्रहे प्रभुः ॥ ३९ ॥
पथि च्युतं तिष्ठति दिष्टरक्षितं गृहे स्थितं तद्विहतं विनश्यति ।
जीवत्यनाथोऽपि तदीक्षितो वने गृहेऽपि गुप्तोऽस्य हतो न जीवति ॥ ४० ॥

भाषा टीका ।

उस राजा का रत्नों का कवच बिखर गया था, आभरण और मालायें टूट गई थीं। बाणों से हृदय विदीर्ण हो गया था शरीर रुधिर से भींग रहाथा ॥ २९ ॥

केश बिखरे हुए आखें बैठी हुई, रोष के मारे दांतों से होंठों को दबाये हुएँ रज से धूसर है मुख जिसका औ युद्ध में कट गये आयुध और भुजा जिसकी ॥ ३० ॥
प्रारब्ध ने इस तरह जिसको कर दिया उस उशीनरेन्द्र राजा को रानियों ने देख कर बडा दुःख पाया ॥ और हे नाथ ! हम सब मरचुकीं ऐसे कह कर हाथों से छाती कूटते हुए उस के पैरों में गिर पडीं ॥ ३१ ॥

ऊंचे स्वर से रोती हुई अपने प्रिय के चरणों को कुच कुंकुम से अरुण अपने अश्रुपातों से धोनें लगी। और खुल गये केश और आभरण जिनों के ऐसी वो रानियें बहुत ऊंचे स्वरसे चिल्लाकर मनुष्यों को शोक पैदा कराती हुई विलाप करने लगी ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विलापमेवाह—अहो इति द्वयेन। अकरुणत्वमेवाहुः, येन विधात्रा दृशामगोचरां दशां भवान्प्रणीतो गमितस्तेन विधात्रा त्वमधुना शुचां विवर्धनः कृतोऽसीत्यन्वयः ॥ ३३ ॥

हे महीपते ! त्वया सुहृत्तमेन विना वयं कथं स्याम भवेम जीवेमेत्यर्थः । अतो हे वीर, यत्र त्वं यास्यसि तत्र तेऽनुयानमनुगमनं तव पादयोः शुश्रूषां कुर्वतीनामस्माकं दिश देहि ॥ ३४ ॥

निर्हारं दाहार्थं नयनमनिच्छन्तीनाम् अस्तमस्ताचलंप्रति ॥ ३५ ॥

परिदेवितं रोदनं स्वपुर्यामेव स्थित आश्रुत्य श्रुत्वा तत्र स्वयमेवोपागतो यमो बालकोभूत्वा तानाह—अहो इत्यादिना ॥ ३६ ॥

अहो आश्चर्यम् अमीषां वयसाऽधिकानामपि लोकस्य विधिं जन्ममरणादिप्रकारं विपश्यतामपि विमोहः; मोहमेवाह, यत्र यस्मादव्यक्तादागतस्तत्रैव गतमपार्थं शोचन्ति तदुक्तं गीतासु,
"अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।
अव्यक्तनिधनान्येव तत्र का परिदेवना" इति ।
किञ्च स्वयमपि सधर्माः मृतेन सह समानो मृत्युलक्षणो धर्मो येषां तथाभूताश्चापि ॥ ३७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अवलाः दुर्बलाअपि वृकादिभिरभक्ष्यमाणाः वयं न विचिन्तयामः तत्र हेतुः, यो गर्भे रक्षति स एव सर्वत्र रक्षिता ॥ ३८ ॥

ननु, तस्य रक्षणे किम्प्रयोजनम् ? न किञ्चिदपि; किन्तु क्रीडैव केवलमित्याह–य इति । य ईश इदं विश्वं सृजति रक्षत्यवलुम्पते संहरति च भो अबलास्तस्येशितुश्चराचरं क्रीडासाधनमाहुः अतः स एव निग्रहे संहारे सङ्ग्रहे पालने च प्रभुः ॥ ३९ ॥

प्रभुत्वमेवान्वयव्यतिरेकाभ्यां दर्शयति–पथीति । दिष्टेन दैवेनेश्वरेण रक्षितं तेनेश्वरेण विहतमुपेक्षितम् अस्य हतस्तेनोपेक्षितः ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

विलापमेवाह--अहो इति द्वाभ्याम् । अस्माकं प्रभो हे भर्त्तः ! अकरुणेन निष्कृपेण विधात्रा ब्रह्मणा दृगगोचरां दशां भवाक्षीतो गमितः नः दृशामगोचरामवस्थां प्रणीत इति वान्वयः । येन विधात्रा पुरा उशीनराणां तद्देशोद्भवानां जनानां वृत्तिदः जीवनप्रदः कृतो भवानधुना तेनैव विधात्रा शुचां शोकानां विवर्द्धनः कृतोसि ॥ ३३ ॥

हे महीपते ! सुहृत्तमेन कृतज्ञेन च त्वया विना ते तव सम्बन्धिन्यो वयं कथं स्याम, कथं जीवेमेत्यर्थः । अतस्त्वं यत्र यास्यसि तत्रैव, हे वीर ! तव पदयोः शुश्रूषतीनां सेवाङ्कर्त्तुमिच्छन्तीनामस्माकमनुयानं सहगमनं दिश देहि ॥ ३४ ॥

एवं मृतं पतिं परिगृह्य विलपन्तीनां निर्हारं दाहार्थं नयनमनिच्छतीनां सतीनाम् अर्कः सूर्यः अस्तम् अस्ताचलंप्रति संन्यवर्त्तत सन्निकृष्टो बभूव ॥ ३५ ॥

प्रेतस्य मृतस्य ये बन्धवस्तेषां परिदेवितं रोदनमाश्रुत्य स्वपुर्यामेव श्रुत्वा भगवान् यमः स्वयमेव बालकोभूत्वा तत्राक्रन्दनस्थाने समुपागतस्तानाह, हेत्याश्चर्ये ॥ ३६ ॥

तदेवाह—अहो इत्यादिना । अहो इत्याश्चर्ये किन्तत् यद्वयसा मत्तः अधिकानामपि लोकविधिं जन्ममरणादिलोकपरिपाटीं पश्यतामप्यमीषां प्रेतबन्धूनां विशिष्टो मोह इत्येतत्, विमोहमेवाह—यत्र भुवि सम्भवः उत्पत्तिः तत्रैव गतं पुनस्तत्रैव लीनं मनुष्यंप्रति स्वयं सधर्माः मृतेन तुल्यं जन्ममरणादिभाजोपि अपार्थं मुधा शोचन्ति ॥ ३७ ॥

न्यूनवयस्का अपि वयमेवाहो धन्या श्रेष्ठाः, कुतः ? यतः पितृभ्यां मातापितृभ्यां त्यक्ता अपि वयं न विचिन्तयामश्चिन्तां न कुर्मः अवला दुर्बला अपि बाला अपीति वा वृकादिभिरभक्ष्यमाणा वयम्, तत्रहेतुः, यो हि गर्भे रक्षति जन्मनः पश्चादपि स एव हि ईश्वरो रक्षिता रक्षिष्यति ॥ ३८ ॥

कोसौ रक्षिता ? तत्राह—य इति । य ईश्वरः स्वेच्छयैव न तु कर्मणा इदं कृत्स्नं जगत्सृजति तर्हि सोप्यस्मदादिवत्किं जन्ममरणादिभाक् ? नेत्याह–अव्ययः अपक्षयादिविकाररहितः कर्माधीनप्राकृतदेहरहित इत्यर्थः । यश्च स्वेन सृष्टं जगद्रक्षति यश्च स्वेन रक्षितं जगत्पुनरवलुम्पते संहरति तर्ह्येवंविध ईश्वरः कर्मवश्य इवेत्थं किमर्थं करोति ? तत्राह—हे अबलाः ! तस्यैवं जगदुत्पत्त्यादिकर्त्तुरीशितुरीश्वरस्यान्तरात्मतयावस्थितस्य चराचरात्मकमिदं जगत् क्रीडनं क्रीडापरिकरं जगद्व्यापारस्तस्य क्रीडारूप इति भावः । अत एव निग्रहसंग्रहयोः निग्रहानुग्रहयोः प्रभुः समर्थः ॥ ३९ ॥

प्रभुत्वमेवान्वयव्यतिरेकाभ्यां दर्शयति–पथीति । यथा पथि च्युतं विसृष्टमपि दिष्टेन दैवेन ईश्वरेण रक्षितमनुगृहीतं सत् तिष्ठति पुनर्लब्धं भवतीत्यर्थः । गृहे स्थितमपि तेन दिष्टेन विहतं सद्विनश्यति एवमरण्ये अनाथः रक्षकान्तररहितोपि तेन दिष्टेन ईक्षितो जीवति तत्सङ्कल्पेन जीवति गृहे गुप्तोप्यस्य हतो अनेनोपेक्षितो न जीवति किन्तु विनश्यत्येव ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नो दृशां चक्षुषामगोचरमविषयं नीतः येन विधिना ॥ ३३ ॥

स्याम सत्तांप्राप्नुमः तर्हि किं कर्त्तव्यमत्राह—तत्रेति । यत्र यास्यसि तत्र पादयोरनुयानं दिश ॥ ३४ ॥

निर्हारं दाहम् ॥ ३५ ॥

हेत्यनेन कथांतरप्रसक्तिं सूचयति यमः ॥ ३६ ॥

मा कुरुध्वं यूयं शोकं युष्मभ्यं सुयज्ञो दत्त इत्यादेरिति तत्राह—अहोइति । लोकविधिं जन्ममरणादिप्रकारं विपश्यताममीषां प्रेतबन्धूनां विमोहः अहो धिक् स्वयं सधर्माः जन्मादिसमानधर्माः अमी बन्धवः यत्र यस्य मनुष्यदर्शनायोग्यात् स्वर्गनरकादन्यत्रोद्भव उत्पत्तिर्देहयोगलक्षणाभूत्तं तत्र तत् अस्मच्चक्षुरगोचरं स्वर्गादिकं गतं मनुष्यमनुशोचन्तीति यत्तदपार्थं व्यर्थं गतानुगतिकत्वात् "अदर्शनादिहायातः पुनश्चादर्शनं गतः" इति वचनात्. यत्र स्वर्गादेरुद्भवो यस्य स यत्रोद्भवस्तत्र गतं स्वर्गादिगतमितिवा अपार्थमनुशोचन्तीतिवा सर्वस्य दैवाधीनत्वं स्वानुभवसिद्धमिति ज्ञापयत्यहोइति, यद्वा यत्र उत्पन्नं तत्र पृथिव्यां गतं मनुष्यशरीरं प्रतिव्यर्थम् अनुशोचन्तीति ॥ ३७ ॥

तस्मात्सर्वं दैवाधीनमिति मत्वा न शोकः कार्य इत्याशयेनाह—अहोवयमिति । पितृभ्यां अबला दुर्बलाः कुतश्चिता नास्तीति तत्राह—सरक्षितेति, यो गर्भेऽस्मान् रक्षति स भगवानधुना बहिर्गतान् रक्षिता हि यस्मात्तस्मादिति शेषः ॥ ३८ ॥

न केवलं रक्षिताऽपि तु सृष्ट्यादिकर्ताप्यतो न संशयः कार्य इतिभावेनाह—यदृच्छयेति, अत्रेच्छयेतीच्छाग्रहणेन सर्वत्र सृष्टिप्रसङ्गे मायाशब्दस्येच्छार्थो ज्ञायते हे अबलाः सृष्ट्यादिकर्ता यतो अतः मरणलक्षणस्य निग्रहस्य संग्रहे परिहारलक्षणे प्रभोः समर्थस्य तस्येशितुश्चराचरं क्रीडनं लीलासाधनम् ॥ ३९ ॥

"दैवाधीनं जगत्सर्वम्"इत्युक्तेः कथमीश्वराधीनं चराचरमित्याशंक्य दिष्टदैवादिशब्देन संस्तुतोच्युत इत्याशयेनाह—पथीति । भक्तानामभीष्टं दिशतीति दिष्टशब्दवाच्यो मुकुन्दः तेन रक्षितं यन विहतं अस्यानेन हतः सकाशाद्वा ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

विलापमाह-अहो इति। प्रणीतो गमितः येन विधात्रा तेन अधुना उशीनराणां शुचां विवर्द्धनः कृतोसि ॥ ३३ ॥

यत्र त्वं यासि तत्र तेऽनुयानं अनुगमनं तव पादयोः शुश्रूषणार्थमित्यर्थः। दिश देहि वयमपि म्रियामहे इत्यर्थः ॥ ३४ ॥

निर्हारं दाहार्थं नयनम् अस्तम् अस्ताचलं प्राप्तो न्यवर्त्तत चलनान्निवृत्तो विश्रान्तवानित्यर्थः ॥ ३५ ॥

स्वयमुपागत इति पुण्यवज्जीवानां निर्हारान्त एव यमपुरगमनं प्रायः सम्भवतीति केचित् तासामेव मध्ये कस्याश्चिद्वैष्णवस्त्रियः तत्समीपायमदूतैर्नेतुमशक्यत्वात् तत्सामीप्यदूरीकरणार्थं स्वयं यम एवागत इत्यन्ये प्राहुः, बालको भूत्वेत्यन्येषां तत्र प्रवेशासामर्थ्यात् बालभाषितस्य मधुरत्वात् तत्कर्तृकत्वकथनस्यातिविस्मयावहत्वात्तत्त्वजिघृक्षोत्पादनसमर्थत्वाच ॥३६॥

यत्र यस्मादव्यक्तात् तदुक्तं गीतासु—

"अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत !।
अव्यक्तनिधनान्येव तत्र का परिदेवना" इति ॥ ३७ ॥

अस्माकमल्पवयसामपि यो विवेकः सोऽप्येषां नास्तीति साश्चर्यमाह—अहो इति ॥ ३८ ॥

ननु, त्वां गर्भवासे ररक्ष इममस्मत्पतिं संग्रामे न ररक्षेत्यत्र को हेतुस्तत्राह—य इति। इच्छया स्वेच्छयैव न तु कस्याप्यनुरोधेनेति भावः। नन्वीदृशीच्छैव किं हेतुका तत्राह—ईशः अन्यानधीनपरमैश्वर्य्यवान् तत्कारणकल्पने तदैश्वर्य्यस्यैव तादृशत्वं न सिद्ध्येदिति भावः। नन्वेवं सृष्ट्यादिकं किमर्थं करोति ? तत्राह—हे अबलाः चराचरं तस्य क्रीडनमेवाहुः निग्रहे संहारे सङ्ग्रहे पालने च स एव प्रभवनशीलः ॥ ३९ ॥

प्रभुत्वमेवान्वयव्यतिरेकाभ्यां दर्शयति—पथीति। दिष्टेन दैवेन ईश्वरेणेत्यर्थः। तेन ईश्वरेण विहतं तेन ईक्षितः अनेक्षितो ऽन्येनापि रक्ष्यते इत्यर्थः। अस्य हतः अनेनोपेक्षितः अन्येनापि हन्यते इत्यर्थः ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

अहो इति खेदे येन पुरा उशीनराणां नोऽस्माकं च वृत्तिदो भवान् कृतः तेनैवाकरुणेन दृशामगोचरां दशां प्रणीतो गमितस्सन् शुचां विवर्द्धनः कृतोऽसीत्यन्वयः ॥ ३३ ॥

हे वीर ! ते त्वदीया वयं त्वया विना कथं स्याम भवेम जीवेम अतः तव पादयोः शुश्रूषतीनां शुश्रूषां कुर्वतीनां यत्र त्वं यास्यसि तत्रानुयानमनुगमनं दिश देहि ॥ ३४ ॥

एवमुक्तप्रकारेण रुदन्तीनां निर्हारं दाहार्थं निस्सारणम् अस्तमस्ताचलंप्रति संन्यवर्तत ॥ ३५ ॥

यमः परिदेवितं रोदनमाश्रुत्य बालकोभूत्वा तत्र स्वयमेवोपागतस्तान् राजदारान् आह अहो इत्यादिना ॥ ३६ ॥

अहो वयसा अस्मत्तोऽधिकानामपि लोकस्य विधिं जन्ममरणादिप्रकारं विशेषतः पश्यतामपि विमोहोभवति. विमोहमेवाह—यत्र यतः आगतस्तत्रैव गतं मनुष्यं स्वय सधर्मा मरणशीला अप्यपार्थं शोचन्ति ॥ ३७ ॥

एवंविधेभ्यो वयोवृद्धेभ्यो जनेभ्यः वयं बाला एव धन्या इति साश्चर्यमाह—अहो इति। अबला असमर्था एव पितृभ्यां त्यक्ता वृकादिभिः अभक्ष्यमाणाः सन्तः न विचिन्तयामोऽतो वयं धन्यतमाः यतो य ईश्वरो गर्भे रक्षति स एव सर्वदा रक्षिता ॥ ३८ ॥

हे अबलाः ! स्वरूपतो निर्विकारः ईश्वरः प्रकृतिपुरुषनियन्ता इच्छया सङ्कल्पमात्रेणेदं विश्वं सृजति य एव रक्षति यो लुम्पते तस्येशितुश्चराचरं क्रीडनमाहुः स एव निग्रहसङ्ग्रहे निग्रहे संहारे सङ्ग्रहे पालने च प्रभुः समर्थः ॥ ३९ ॥

प्रभुत्वमन्वयव्यतिरेकाभ्यामुपपादयति—पथीति। दिष्टेन दैवेनेश्वरेण रक्षितं चेत्पथि च्युतमपि तिष्ठति तेन विहतं ताडितं गृहेऽपि स्थितं विनश्यति तदीक्षितः तेन कृपादृष्टिविषयीकृतः अनाथोऽपि जीवति अस्य हतो गृहे गुप्तोऽपि न जीवति ॥ ४० ॥

भाषा टीका।

हे प्रभो ! निर्दय विधाताने तुमको दृष्टि के अगोचर दशा को प्राप्तकर दिया ॥ जो आप पहिले उशीनर देश के जीविका देने वाले थे आज जिसने शोक के बढाने वाले कर दिये ॥ ३३ ॥

हे महीपते ! हम सब सुहृत्तम और कृतज्ञ ऐसे आपके विना कैसे रहेंगी। हे वीर ! आप जहां जांयगे आपके चरणों की शुश्रूषा करने वाली हम लोगों को भी उसी जगह अनुगमन की आज्ञा दीजिये ॥ ३४ ॥

मृतकपति को पकडकर ऐसे विलाप करने वाली और दाहादि कार्य की इच्छा न करने वाली उन रानियों के रोते २ सूर्य अस्त को प्राप्त हुए ॥ ३५ ॥

उस जगे उस मृतक के बंधुओं का विलाप सुनकर स्वयं यमराज एक बालक बनकर वहां आकर उन सबों से बोले ॥ ३६ ॥

यम उवाच ॥ यमराज बोले, कि–अहो बडे आश्चर्य की बात है लोक की रीति जानने वाले अवस्था से भी अधिक इन लोगों का बडा मोह है। जहां से आया वहीं जाने वाले मनुष्य को, आप भी वहीं जाने वाले होकर व्यर्थ शोच करते हैं ॥ ३७ ॥

अहो बडे खुसी की बात है कि हमही बडे धन्य है जो कि हमको माता पिताओं ने छोड दिये तौ भी हम चिन्ता नहीं करत हैं ॥ और हमको कोई वृक आदि वन के जंतु भी भक्षण

भूतानि तैस्तैर्निजयोनिकर्मभिर्भवन्ति काले न भवन्ति सर्वशः ।
न तत्र ह्यात्मा प्रकृतावपि स्थितस्तस्या गुणैरन्यतमो निबध्यते ॥ ४१ ॥

इदं शरीरं पुरुषस्य मोहजं यथा पृथग्भौतिकमीयते गृहम् ।
यथोदकैः पार्थिवतैजसैर्जनः कालेन जातो विकृतो विनश्यति ॥ ४२ ॥

यथाऽनलो दारुषु भिन्न ईयते यथानिलो देहगतः पृथक्स्थितः ।
यथा नभः सर्वगतं न सज्जते तथा पुमान् सर्वगुणाश्रयः परः ॥ ४३ ॥

सुयज्ञो नन्वयं शेते मूढा यमनुशोचथ ।
यः श्रोता योऽनुवक्तेह स न दृश्येत कर्हिचित् ॥ ४४ ॥

न श्रोता नानुवक्ताऽयं मुख्योऽप्यत्र महानसुः ।
यस्त्विहेन्द्रियवानात्मा स चान्यः प्राणदेहयोः ॥ ४५ ॥

भूतेन्द्रियमनोलिङ्गान् देहानुच्चावचान्विभुः ।
भजत्युत्सृजति ह्यन्यस्तच्चापि स्वेन तेजसा ॥ ४६ ॥

यावल्लिङ्गान्वितो ह्यात्मा तावत्कर्मनिबन्धनम् ।
ततो विपर्ययः क्लेशो मायायोगोऽनुवर्त्तते ॥ ४७ ॥

वितथाऽभिनिवेशोऽयं यद्गुणेष्वर्थदृग्वचः ।
यथा मनोरथः स्वप्नः सर्वमैन्द्रियकं मृषा ॥ ४८ ॥

भाषा टीका ।

नहीं करते. क्योंकि ? रक्षक तौ वही है जिसने गर्भ में रक्षा की है ॥ ३८ ॥

जो ईश अपनी इच्छा से इस जगत को सृजता है और जो अव्यय रक्षा करता है और अंतमें जो इसका संहार करता है, हे अबलाओं ! सब चराचर जगत को उसी ईश्वर का खिलौना कहते हैं ॥ वहीं ईश्वर संहार और पालन में समर्थ है ॥ ३९ ॥

प्रारब्ध का रखाया हुआ पदार्थ मार्ग में गिरा हुआ भी स्थित रहता है ॥ और प्रारब्ध का मारा हुआ गृह में धरा हुआ भी नष्ट होजाता है ॥ ऐसे ही अनाथ भी वन में भी उससे रक्षित जीवता है और उस का मारा हुआ घर में भी रक्षित हो तौ भी नहीं जीता ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेवमात्मनो जन्ममरणादिकमङ्गीकृत्येश्वराधीनत्वान्न शोकः कार्य इत्युक्तमिदानीं तु देहानामेव जन्मादि न त्वात्मन इत्याह-- भूतानीति त्रिभिः । भूतानि देहा निजयोनिः स्वकारणभूतं लिङ्गशरीरं तन्निमित्तैः कर्मभिर्भवन्ति जायन्ते न भवन्ति नश्यन्ति च सर्वशो देवादिदेहा अपि तत्र ह तदा प्रकृतौ देहे स्थितोऽप्यात्मा तस्याः प्रकृतेर्गुणैर्देहधर्मैर्जन्मादिभिर्न निबध्यते न युज्यते यतोऽन्यतमो देहादत्यन्तविलक्षणः ॥ ४१ ॥

नन्वहं कृशः स्थूल इत्यादौ वैलक्षण्यं न प्रतीयते तत्राह-- इदमिति । इदं शरीरं मोहजमविवेकादात्मत्वेन जातम्, वस्तुतस्तु पृथगेव यत ईयते दृश्यते भौतिकञ्च यथा गृहमित्यन्वयः । अत्रैवं प्रयोगः द्रष्टुरभौतिकाच्च पुरुषाच्छरीरं भिन्नं दृश्यत्वाद्भौतिकत्वाच्च यथाऽत्यन्ताविवेकिन आत्मत्वेनाभिमतमपि गृहं ततः पृथक् तद्वदिति भौतिकत्वानुमानं विवृण्वन्नात्मनोजन्माद्यभावमुपसंहरति यथा औदकैः परमाणुभिर्जातो बुद्बुदादिर्यथा च पार्थिवैर्जातो घटादिर्यथा च तैजसैर्जातः कुण्डलादिर्विनश्यति तथा तैरेव त्रिविधैः परमाणुभिर्जातो जनो देह एव विकृतः परिणतः सन्विनश्यति नत्वात्मेत्यर्थः ॥ ४२ ॥

पृथगवस्थानाभावेऽपि भिन्नत्वे दृष्टान्तद्वयमाह—यथेति । यथा अनलो दारुष्वेव स्थितोऽपि दाहकत्वेन प्रकाशकत्वेन भिन्न एव प्रतीयते. यथाच देहगतोऽप्यनिलो मुखनासिकादिषु पृथक् स्थितएव प्रतीयते. देहस्थत्वेप्यात्मनस्तद्धर्मयोगाभावे दृष्टान्तमाह— यथा नभो न सज्जते क्वापि सङ्गम् प्राप्नोति तथा पुमानपि

श्रीधरस्वामिकृतभावार्थदीपिका ।

सर्वेषां गुणानां देहेन्द्रियाणामाश्रयस्तेष्वाश्रितो वा परः पृथगेवेत्यर्थः ॥ ४३ ॥

किञ्च हे मूढाः, यमनुशोचथ सोऽयं युष्मद्वर्तां सुयज्ञः शेते किमिति शोचथ नन्वेतावन्तं कालमसौ शृणोत्यनन्तरं प्रतिवक्ति च, इदानीं तस्यादर्शनान्नष्ट इति शोचामेति चेत्स तु शोच्यो न भवति प्रागपि तस्यादर्शनादित्याह—यःश्रोतेति ॥ ४४ ॥

ननु, मुखनासिकासञ्चारी प्राणः श्रोता वक्ता च दृष्टएवेति चेन्नासौ श्रोता वक्ता वा चेतनत्वादित्याह—न श्रोतेति । महान्सर्वेन्द्रियचेष्टाहेतुः अत एव "मुख्यः प्राणो वै मुख्यः" इति श्रुतेः । कस्तर्हि श्रोता वक्ता च ? तत्राह—यस्त्विह देहेन्द्रियैस्तत्तदर्थद्रष्टा आत्मा स तु प्राणदेहाभ्यामचेतनाभ्यामन्य एव स चेतनः ॥ ४५ ॥

ननु, चेतनत्वेऽन्यत्वे च तस्याहं कृशः स्थूलः काणो बधिर इत्यादिदेहधर्मोपलब्धिः कुतस्तत्राह, भूतेन्द्रियमनोभिर्लिङ्गयन्ते लक्ष्यन्तइति तथा तान्देहांस्तेभ्योऽन्य एव भजत्यहमिति मन्यते तर्हि कथं मोक्षस्तत्राह, तच्च भजनं स्वेन तेजसा विवेकबलेनोत्सृजत्यपि हीत्यनुभवं प्रमाणयति ॥ ४६ ॥

ननु, विवेकानन्तरमप्याहारादिकर्मसु प्रवृत्तेर्बन्धः स्यादेवेत्यतआह—यावदिति । यावल्लिङ्गशरीरेणान्वितस्तदभिमानवानात्मा भवति तावदेव तस्य तत्कर्मनिबन्धनं बन्धहेतुर्भवति ततो विपर्ययो देहधर्मभाक्त्वं ततः क्लेशश्चानुवर्तते ननु लिङ्गाभिमाने निवृत्तेपि यतोऽयं मायायोगो विपर्ययादिः मायया युज्यत इति तथा न परमार्थ इत्यर्थः ॥ ४७ ॥

ननु, सुखदुःखादीनां तत्साधनानाञ्च सत्यत्वप्रतीतेः कुतो मायामयत्वम् ? तथाच बहवो वादिनः सत्यत्वमेव वदन्ति तत्राह—वितथेति । वितथो मिथ्याभूतोऽयमभिनिवेशः कोऽसौ गुणेषु तत्कार्येषु सुखदुःखादिष्वर्थः परमार्थ इति इग्वचश्चेति यत् स कुत इत्यतआह—यथेति ॥ ४८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किं तर्ह्ययमीश्वरोपि विषमः ? नेत्याह—भूतानीति । सर्वाणि भूतानि देवमनुष्यादीनि तैस्तैर्निजयोनिकर्मभिः स्वस्वजातिप्राप्तिनिमित्तकर्मभिः काले निजयोनिकर्मपरिपाककाले भवन्ति पुनस्तत्कर्मक्षये न भवन्ति देवमनुष्यादिभूतानां भावाभावौ तत्तत्कर्मानुगुणप्रवृत्तेश्वरायत्तौ, इति न तस्य वैषम्यमितिभावः । ननु, मास्तु वैषम्यं तस्यापि त्वन्तरात्मतयाऽवस्थितः स्वानर्थरूपं संसारं स्वयमेवापादयन् किम् अयमज्ञः ? नेत्याह—नेति । तत्र प्रकृतौ देवादिशरीरे जीवान्तरात्मतया स्थितोप्यात्मा परमात्मा न बध्यते न संसरतीत्यर्थः । हेतिविस्मये देहेस्थितस्याप्येकस्य न बन्धः अन्यतरस्य तु बन्धः इति विस्मयः इतरस्य बन्धमेवाह—तस्याः प्रकृतेर्गुणैः देवोऽहं स्थूलोहमित्यादिरूपप्रतीतिविषयैर्देहगतदेवत्वमनुष्यत्वादिभिर्देहात्मभ्रमादिभिरित्यर्थः अन्यतमो देहेन्द्रियादीनामन्यतमो जीवः इह परमात्मनोऽपीति च बोध्यम्. निबध्यते निबद्धो भवति संसरतीत्यर्थः । यद्वा, गुणैः शब्दादिभिर्विषयैर्हेतुभिस्तद्भोगहेतुभूतेषु वस्तुषु निबध्यत इत्यर्थः तद्भोग एव हि तस्य संसृतौ कारणमिति भावः । तथा च श्रुतिः "तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति" ॥ ४१ ॥

एवं सर्वभूतानामुत्पत्तिलयादेस्तत्तत्कर्मानुगुणप्रवृत्तेश्वरायत्तत्वान्न शोकः कार्य इत्यभिप्रायेदानीं देहस्य विनाशस्वभावत्वादात्मनस्तु तद्विपरीतरूपत्वादुभावपि न शोकविषयाविति वक्तुं तावद्देहात्मनोः परस्परवैलक्षण्यमाह—इदमिति द्वाभ्याम् । इदं परिदृश्यमानं राजादिशरीरं पुरुषस्य जीवस्य मोहजमविद्यासञ्चितकर्मकृतं पुरुषस्य मोहजम् इदं शरीरम् इति व्यतिरेकनिर्देशेन देहात्मनोः परस्परभेदो दर्शितः तत्र देहस्यानात्मत्वं दृष्टान्तेनाह—यथा गृहं गृहिणः पृथक् भिन्नं तथा भौतिकं भूतसङ्घातपरिणाममिदं शरीरमपि पृथक् शरीरिणो भिन्नमीयते अवगम्यत इत्यर्थः । यथा गृहस्य गृहिस्वरूपत्वमत्यन्तासम्भावितं तद्वत् देहस्य देहिस्वरूपत्वमिति दृष्टान्ताभिप्रायः । एवं गृहदृष्टान्तेन जीवाद्देहस्य भेद उक्तस्तेनैव दृष्टान्तेन देहस्य विनाशिस्वभावत्वं चाह—तथेति । यथा मृत्काष्ठादिविकारात्मकं गृहं कालेन विनश्यति तथा औदकैः पार्थिवैस्तैजसैश्चेदं वायवीयाकाशीयैश्चोपलक्षणम् उदकादीनामंशैः कालेन तत्तद्देवादिजातिप्राप्तिनिमित्तकर्मफलपरिपाककालेनेत्यर्थः । जातो जनो देहः जन्मनः पश्चादपि विकृतः बाल्ययौवनस्थविरत्वादिभिरवस्थाभिर्विकारं प्राप्तः पुनः स्वारम्भककर्मविनाशकाले विनश्यति ॥ ४२ ॥

अथात्मनो देहाद्भेदं सदृष्टान्तमाह—यथेति । यथा अनलोऽग्निर्दारुषु स्थितो भिन्न ईयते दारुगतह्रस्वत्वदीर्घत्ववक्रकुटिलत्वादिधर्मरहितस्तेभ्यो भिन्न एव दृश्यते यथा च देहगतोऽप्यनिलस्ततः पृथगेव दृश्यते यथा नभः सर्वत्र व्याप्तमपि न सज्जते सर्वगतधर्मैर्न सम्बध्नाति तथा सर्वगुणाश्रयः सत्त्वादिसर्वगुणपरिणामरूपदेहेन्द्रियाश्रयोऽपि पुमान् जीवः परः गुणेभ्यः देहाद्भिन्नः देहगतजन्ममरणादिभिरविकृतस्तस्माद्विलक्षणत्वेनावतिष्ठते इत्यर्थः । अविभागेनावस्थितस्यापि तद्गतधर्मास्पर्शे आद्यं निदर्शनं विजातीयस्यापि सहावस्थाने द्वितीयं तृतीयं तु तदवस्थानेपि पुनस्तद्गतधर्मास्पर्श इति भेदः ॥ ४३ ॥

एवं देहात्मनोः परस्परविलक्षणस्वरूपयोरभिहितयोरप्यतीवदेहात्मभ्रान्त्याऽनुशोचतां शोकमपनेतुं कः शोकविस्मयभयइत्याशङ्क्य प्रतिक्षिपति—सुयज्ञ इति । हे मूढाः ! भवत्पक्षे यमनु शोचथ सोयं सुयज्ञः शेते युष्माभिः शोच्यः सुयज्ञः शेते विद्यत एव किमर्थं शोक इति भावः । ननु, भवत्पक्षे शयान एव हि सुयज्ञ इति शङ्कार्थस्तत्प्रतिक्षिपति—य इति, य श्रोता भवद्भिलापश्रवणक्षमो यश्चानुवक्ता प्रतिवचनक्षमश्च स इह कर्हिचिदपि चिरं सुसूक्ष्मं निरीक्षमाणोऽपि न दृश्यते शयानो देह एव सुयज्ञश्चेद्भवद्भिलपितं किमिति न शृणोति न प्रतिवक्तीत्यर्थः ॥ ४४ ॥

मुख्यः प्राणोपि श्रवणप्रतिवचनक्षमो न स्यात्किंपुनर्देहो

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नत्त्वम इत्याह—नेति । मुख्योऽप्यसुः प्राणो वा न श्रोता न स्त्वद्वि- वपितस्य श्रोता नाप्यनुवक्ता । किं पुनर्देह इत्यर्थः । ननु, श्रोतारं प्रतिवक्तारं प्रत्यवानुशोचाम इत्यत्राह—यस्त्विति । यस्त्विन्द्रियवान् श्रवणप्रतिवचनादिसाधनश्रोत्रवागादीन्द्रिययुक्तः स त्वात्मा इह शरीरे प्राणदेहाभ्यामन्य एवासीत्. स तु तत् तेभ्यो देहेभ्यः अन्य एव साक्षीत्यर्थः ॥ ४५ ॥

स्वेन तेजसा ज्ञानेनोपलक्षितो भूतैः पृथिव्यादिभिरिन्द्रियैः ज्ञानकर्मोभयेन्द्रियैः मनसा च लिङ्ग्यन्ते लक्ष्यन्ते इति तथा तान् उच्चावचान् उत्कृष्टापकृष्टान्देहान् भजति बिभर्त्ति उत्सृजति त्यजति च अपि हीत्यनुभवं प्रमाणयति इन्द्रियवानात्मा देहत्यागतदुपादानशीलः शयानमिमं देहं त्यक्त्वा गत इति सोपि इदानीं न शोच्य इति भावः ॥ ४६ ॥

नन्वस्माकमुपभोग्यमिमं देहमन्तरेणापि हेतुं त्यक्त्वा गत इत्यनुशोचामस्तत्राह—तावदिति । यावन्निबन्धनं देहसम्बन्धकारणं कर्म पुण्यापुण्यात्मकं कर्म वर्त्तते तावल्लिङ्गान्वितः देहेनान्वितो भवति आत्मा तत एव देहान्वयादेव हेतोर्विपर्ययो देहात्मभ्रान्तिः ततः क्लेशः इत्येवंरूपो मायायोगः प्रकृतिसम्बन्धरूपसंसृतिरनुवर्त्तते, अयं भावः, सति देहसम्बन्धनिमित्ते कर्मणि देहेनान्वयः, तस्मिंश्च सति ममायं पतिरहमस्य भार्या इत्याद्यात्मको देहात्मभ्रमः तस्मिंश्च सति क्लेशः तत्र निदानस्य कर्मण एव निवृत्तत्वान्नास्यात्मनः पुनः शयानदेहसम्बन्धस्यैवाभावान्निर्हेतुको व्यर्थश्च शोकः देहसम्बन्धावहकर्मनिवृत्तिरेव च देहोत्सर्गे हेतुरिति ॥ ४७ ॥

देहस्योपभोग्यत्वं प्रतीतिमपनि-वितथेति । अयमभिनिवेशोऽभिमानो वितथो व्यर्थः, देहादेरपुरुषार्थरूपत्वादिति भावः । कोसावभिनिवेशः ? यद्गुणेषु सत्त्वादिगुणपरिणामात्मकेषु देहादिषु तदुपभोग्येषु शब्दादिषु चार्थदृग्वचः प्रयोजनत्वदर्शनवचने इत्येषः देहादिपूपभोग्यत्वज्ञानं तद्व्यवहारश्चेत्यभिमानो व्यर्थः; वै तथ्यमेव दृष्टान्तमुखेन विशदयति—यथेति यथा मनोरथरूपः स्वप्नदृष्टकर्मानुगुणमनोवृत्तिरूपः सङ्कल्पविकल्पात्मकस्वप्नानुगुणतयेश्वरसृष्टपदार्थः मृषा अनित्यः स्वप्नकालमात्रावस्थायी तथा सर्वमैन्द्रियकथाह्येन्द्रियविषयः शब्दादिकमपि मृषा अनित्यः अनित्यत्वादपुरुषार्थः स्वप्नद्रष्टैकानुभाव्यतत्कालमात्रावस्थायिपदार्थसृष्टिनिमित्तकर्मानुगुणमीश्वरसृष्टं स्वाप्नं पदार्थं प्रतीव जाग्रदवस्थानुभाव्यसर्वेन्द्रियगम्यभोग्यभोक्तृदृष्टसमानकालिकपदार्थं प्रत्युपभोग्यत्वाद्यभिमानो व्यर्थः अनित्यत्वेनापुरुषार्थरूपत्वादितिभावः । मृषाशब्दस्यानित्यत्ववाचित्वम्. 'अथ नित्यमनित्यञ्च' इत्यनन्तरग्रन्थादवगम्यते. "अनाशी परमार्थश्च प्राज्ञैरभ्युपगम्यते" इति पराशरोक्तेश्च, परमार्थानाशयादिशब्दानामनाशिपरत्वमवगम्यते ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सृष्ट्यादिकं कुर्वन्नात्मा तत्तत्प्राणिकर्माण्युल्लंघ्य करोत्युत

तदनुसारेणेति तत्राह—भूतानीति । निजयोनिकर्मभिः स्वजातिविहितकर्मभिः भूतानि विहितकाले भवन्ति न भवन्तीत्यात्मप्रेरितैरिति शेषः "द्रव्यं कर्म च कालश्च" इत्यादेः * कालशब्दवाच्यपरमात्माधिकरणतया सृष्ट्यादिकमाप्नुवंतीति वा. ननु, जीवात्मनोरुभयोरपि देहस्थितेः कस्य संसारबन्धाभाव इति मुहुर्द्धावन पृच्छन्तमाह—न तत्रेति, तत्र तयोर्जीवपरयोरन्यतम आत्मा प्रकृतौ प्रकृतिनिर्मितशरीरे स्थितोऽपि तस्याः प्रकृतेर्गुणैः सत्त्वादिभिर्न निबध्यते ह किल—

"सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत ।
ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत" ॥

इत्यादिवाक्योक्तबन्धो नास्तीत्यर्थः । हेत्यनेन "तुच्छयेनाऽप्यपि हितं यदासीत्तपसस्तन्महिमा जायतैकम्" इति वाक्यं सूचयति. सुविरुद्धस्वरूपत्वाज्जीवादन्यतमो हरिरित्यतो हरेरन्यतमत्वं प्रामाणिकमेव परमात्मा न बध्यतेऽन्यतमो बध्यते इत्येतदुत्तरश्लोकेन पुनरुक्तं स्यादित्यन्यथा व्याख्यातमाचार्यैरन्यतम आत्मा परमात्मेति ॥ ४१ ॥

परमात्मनो बन्धाभाववचनेन जीवात्मनोर्यो भेदः अर्थादाप्तः स केन प्रकारेणेत्याशङ्क्याह—इदं शरीरमिति । पुरुषस्य संसारिणो मोहेनान्यथाज्ञानेन "मुह वैचित्त्ये" इति धातोः विपरीतज्ञानजं यस्मात्तस्मादात्मनो भिन्नमिति ज्ञातव्यम्. तथा हि, भौतिकं भूतविकृतैर्वृत्तैर्विरचितं गृहं गृहस्थात्पृथग्भिन्नमीयते यथा विनश्यति च तथोदकैः पार्थिवतैजसैः परमाणुभिः कालनाम्ना हरिणा चोदितैर्विकृतो विकारं प्राप्तो जातो जन्यत इति जनो देहो विनश्यति स्वकारणावस्थितिमाप्नोतीति यस्मात्तस्माज्जीवाद्भिन्न इति निश्चीयते "नित्यो नित्यानाम्" इति श्रुतेः । जीवस्य नित्यत्वात् ॥ ४२ ॥

तदेव दृष्टान्तान्तरेण स्पष्टयति—यथेति । यद्वा ननु, जीवस्य शरीराद्भेदोऽस्तु तस्य नश्वरत्वात्परमात्मना जीवस्याभेदः किं न स्यादिति मन्दाशङ्कां परिहरति—यथेति । दारुषु स्थितो वन्हिर्दारुभ्यो भिन्नस्तद्गुणैस्तेषु न सज्जते यथा देहिनां देहगतो वायुर्देहात् पृथक् स्थितस्तद्गुणैश्च न लिप्यते यथा सर्वगतं नभः सर्वस्माद्भिन्नं ज्ञायते सर्ववस्तुगुणैश्च न लिप्यते यथा तथा ज्ञानानन्दादिसर्वगुणाश्रयः परः परमात्मा सर्वेषां जन्तूनां गुणभूतं भोगायतनं शरीरमाश्रयो यस्य सः सर्वगुणाश्रयः सर्वजीवदेहगतः परो विलक्षणो भिन्न इति यावत् । जीवादिति शेषः । प्रकृतत्वाज्जीवगुणैर्न लिप्यत इति. देहाद्भेदस्य प्रकृतत्वात्स एवात्रोच्यत इति किं न स्यादितीयं शङ्का—

"देहदारुगतौ प्राणवन्ही सर्वगतं नभः ।
देहादिभ्यो यथा भिन्ना न लिप्यन्ते च तद्गुणैः ॥
तथा जीवगतो विष्णुर्जीवाद्भिन्नो न तद्गुणैः" ॥

इति वाक्येन परिहर्तव्या. अत्रायं फलितोऽर्थः भगवन्माहात्म्यकथनेन सर्वस्य तद्वशत्वात् स एव भजनीयो शोके न प्रयोजनमिति ॥ ४३ ॥

---

* तथा च कालइति सप्तम्या अधिकरणत्वमिति सूचितम् ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

किञ्च भवच्छोकयोग्यस्य सुयज्ञस्य दृश्यमानत्वात्तंप्रति शोको न कार्य इति गूढाक्षेपं करोति–सुयज्ञ इति। हे मूढाः ! यमनु शोचथायं सुयज्ञः शेते निद्रां करोति। ननु न मृतः "ननु च स्याद्विरोधाद्यौ" इत्यभिधानात्. शेत एव लोकान्तरं न गत इति वा "प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु" इत्यभिधानात्. अवधारणार्थो ननुशब्दः। श्रोत्रादीन्द्रियव्यापारादर्शनादिना मरणानुमानात्कथं न मृत इत्याक्षिप्यत इति तत्राह––यः श्रोतेति। इह सुयज्ञशरीरे यः श्रोता यश्चानुवक्ता स परमात्मा कर्हिचित्कदाचिदपि न दृश्येत तस्य सूक्ष्मस्वभावत्वात् "तदव्यक्तमाह" इतिसूत्राच्च. तस्यैव श्रोतृत्वादिकं कुत इति चेन्न "नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता" इत्यादेः ॥४४॥

ननु, सुयज्ञशरीरस्थस्य मुख्यप्राणस्य श्रोतृत्वादि संभवात् कथं तदन्ययोगव्यवच्छेदः क्रियत इति तत्राह—न श्रोतेति। अत्र सुयज्ञदेहे श्वासोच्छ्वासादिलक्षणेन मुखे व्यज्यमानत्वान्मुख्यो यो महानसुः मुख्यप्राणः सोपि स्वतो न श्रोता नानुवक्ता च "तस्य वाङ्मनसि सम्पद्यते मनःप्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम्" इतिश्रुतेरन्ययोगव्यवच्छेदो युक्त इति। ननु, तर्हि सुयज्ञवाख्यो जीवस्य श्रोतृत्वादिकमासीत्प्राक् तदिदानीं न तस्मान्मृत इति प्राचीनशङ्काशेषं कैमुत्यन्यायेन परिहरति—यस्त्विति, तु शब्देन नेत्युनुकृष्यते इह सुयज्ञइत्युपलक्षणं जीवराशिदेहे य इन्द्रियवान् यश्च प्राणदेहयोरन्यः स जीवात्मा श्रोतुं वक्तुञ्च न शक्य इति किं वक्तव्यम् "एतद्ब्राह्मणमवष्टभ्य विधारयामि" इतिश्रुतेः। सर्वशक्तिमतोपि प्राणस्य स्वतः श्रोतृत्वाद्ययुक्तेरुक्तत्वात्तस्मात्सुयज्ञंप्रति शोकेन किं प्रयोजनं तस्माज्जीवतामपि श्रोतृत्वाद्यनुपपत्तेः प्रामाणिकत्वेन मृतोऽयमित्यस्य लक्षणान्तरं वाक्ति अन्य इत्यनेन, हरेर्माहात्म्यातिशयः प्रकटित इति सूचितम्. न केवलं प्राणदेहयोरन्यः किं तु पूर्णश्रोतृत्वादिगुणयुक्ताद्धरेश्चान्य इति चशब्दार्थः ॥ ४५ ॥

हरेर्देहस्थितिसद्भावे न तस्मादप्यन्य इति च वक्तुं युक्तं तत्कुत इति तत्राह—भूतेन्द्रियेति। भूतेन्द्रियमनांसि लिङ्गं रूपं येषां ते तथा तानुच्चावचान् सुरनरतिर्यगात्मन उत्तममध्यमाधमान् देहान् भजति पश्चादुत्सृजति हि यस्मात्तस्मादन्य इति वक्तुं युक्तं स्पष्टश्चाह–अन्य इति। देहयोगवियोगभाजो जीवादिति शेषः "लिङ्गं स्वरूपमुद्दिष्टं लिङ्गं ज्ञापकमेव च" इति वचनाल्लिङ्गशब्दस्य स्वरूपार्थो युक्तः यदि देहभजनोत्सर्जने हरेस्तर्हि जीवात्को विशेष इति तत्राह—तच्चेति, परिच्छिन्नविषये भजनोत्सर्जने व्याप्तस्य विष्णोः कथं घटेत इत्यतो वाह—तच्चेति, ततश्च शब्देन जीवस्य पारतन्त्र्येणेति विशेषमाह, अपिशब्देन रूपान्तरेणोत्सुपपत्तिमाह, अत्र जीवपरमात्मनोर्भेदस्य तयोरुभयोर्देहादेर्भेदस्य च हरेरेव मुख्यश्रोतृत्वादेश्च प्रकरणावान्तरभेदस्य च ज्ञापनायाचार्यैः पूर्वापरभावेनेन्द्रियवान् जीव इत्यादि व्याख्यातम्. ननु, जीवस्य प्राणदेहयोरन्यत्वे मरणे देहनाशान्मुक्तौ तदभावाद्विषयभोगाभाव इत्याशङ्कापरिहारायोक्तमाचार्यैः (१) अन्यो जीव इत्यादि ॥ जडदेहादन्यत्वं न स्वरूपभूतादुच्यत इत्यर्थः। (२) अचितो जडादिन्द्रियत्वं चामुख्यं तेषामवशत्वादभिमानादेव. (३)तद्दृश्यं पश्यामीत्यभिमानोऽस्येत्यादेः तर्हि चक्षुरादीनि कस्याधीनानि इत्यतः प्राणाधीनानीति द्योतयितुम् "चक्षुराद्यामनोजीवः" इत्यादेः प्राणोपि न पर्याप्तमित्युक्तं तस्यापि ज्ञातृगन्तृत्वं न स्वतः शक्यते क्वचिदिति यस्तस्य ज्ञातृगन्तृत्वदाता स भगवानित्याद्यपि सूचितम्. यः श्रोतेत्यत्र प्रमाणम्, "ज्ञाता च मन्ता च" इत्यादि. ज्ञानादिदानं तस्यान्य इत्येतदन्विति सूचितम् "सर्वस्य ज्ञानदो हरिः" इत्येतत् "न स दृश्येत" इत्यनेन सूचितं स्वविषयज्ञानदातेति चेति दृश्य इत्यर्थः। भूतेन्द्रियमन इत्यादिना विष्णुरुच्यते न जीव इत्यत्र मानं "स देहान् भजत" इत्यादिना ॥ ४६ ॥

नन्वयं जीवः कियन्तं कालं देहान्वितो भवति इति चोद्यं परिहरति—यावदिति। यावन्तं कालमन्नमयप्राणमयमनोमयलक्षणेषु लिङ्गेषु अन्वितो भवति आत्मा परमात्मा तावन्तं कालं कर्मभिर्नितरां बन्धनं यस्य स तथा जीवः येषु देहेषु अन्वितो भवति, हि शब्दाद्धरिर्यदा त्रिविधदेहानुत्सृजति तदा स्वयमप्युत्सृजतीति ग्राह्यम्, अत्रायं विशेषः यदा परमात्मा देहं सर्वात्मनोत्सृजति तदा अयमपि सर्वात्मना तदनुग्रहेणोत्सृज्य संसारान्मुक्तो भवति. नचेदनेन सह देहान्तरं भजतीति. तस्मादप्यनेन रूपान्तरेण कृतदेहोत्सर्जनत्वादनेनापि सुयज्ञेन तदाचरितमिति देहोत्सर्जनलक्षणमरणस्य पराधीनत्वेनापरिहार्यत्वान्न शोकेन प्रयोजनमिति भावः। "यावद्देहान्वितो विष्णुस्तावज्जीवः" इत्येतदत्र मानं "यदोत्सृजति देहं स हरिः सर्वात्मना विभुः" इति च. ननु, परमात्मा जीवाभिन्नस्सन् देहान् भजत्युत्सृजतीत्युच्यते इति किं न स्यात् कल्पनालाघवादेकमेव ब्रह्मज्ञानात्संसरति मुच्यत इत्यङ्गीकाराच्चेति तत्राह—तत इति। तस्माद्धरेर्जीवो विपर्ययो विरुद्धः पर्ययः निश्चयो यस्य स तथा विरुद्धलक्षण इत्यर्थः "अतिभिन्नस्वरूपौ तौ जीवेशावेकदेहगौ" इत्यादेः अतो ब्रह्मणोऽज्ञानकल्पनमप्रामाणिकमिति भावः। "देहाभिमानी त्वेकोऽत्र न मानी मानदः परः" इत्येतद्भेदोपपादकम्, इतोपि भिन्नइत्याह–क्लेशदेति, नानाक्लेशाधिकरणत्वाद्वा भिन्न इत्यर्थः। विपर्ययस्तावत् क्लेशादयश्चास्येत्यादेः क्लेशफलमाह—मायेति ॥ ४७ ॥

कोयं मायायोगोनाम येनासौ क्लेशफलः स्यादिति तत्राह—वितथेति, गुणेषु शब्दादिषु अर्थदृग्वचः प्रयोजनदर्शनं तद्वाचकं वचनञ्च स्वर्गे लोके न भयं किञ्चनास्तीत्यादिलक्षणं यत् अयं वितथाभिनिवेशः मिथ्याग्रहः भ्रान्तिज्ञानमित्यर्थः। क्लेशपरिजिहीर्षया शब्दादिष्विन्द्रियप्रवर्तनं तत्फलमित्युपचारः। वचनाद्धि वितथाभिनिवेशो भवति गुणेष्वर्थदर्शनस्यापि तथाभिनिवेशित्वं सदृष्टान्तमाह–यथेति, "स्वप्नस्तु प्रथमः" इतिसूत्रात्. मनोरथे कल्पितं राज्यं स्वप्ने दृष्टं रत्नं यथा मृषा वृथा तथा सर्वमिन्द्रियप्रवर्तनं मृषा सदसद्विलक्षणमित्यर्थं वृथेन्द्रियवृत्तय इत्येतद्विवृणाद्धि—

"इन्द्रियाद्यभिमानेन तद्वान् जीव उदीर्यते।
अतन्मानाद्धरिः प्रोक्तस्त्वदेहोऽनिन्द्रियस्तथा॥
जीवानभिमते देहे न विष्णुर्जीवतिस्थितः।
अतस्त्वदेह उद्दिष्टः परमात्मा सनातनः" ॥

(१) अन्योजीवोऽचितोदेहात् तद्वशो देह उच्यते।
(२) तात्पर्योक्तप्रमाणस्थमिदं पद्यम्।
(३) चक्षुराद्यभिमानवान्। नतद्वशाश्चक्षुराद्याः नद्दष्ट्यादौ स ईश्वरः। शेषतात्पर्यम्।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

इत्येनज्जीवपरयोर्भेदस्य जीवस्येन्द्रियवत्वमौपचारिकमित्यस्य चोपपादने प्रमाणं, जीवस्येन्द्रियवत्वमुपचरितं चेत् कस्य तन्मुख्य मित्याशङ्का—

"लेपाभिमानी जीवस्तु स्वरूपानुभवी नच।
मुक्तः प्राक् तेन मान्युक्तो न मानी विष्णुरुच्यते॥
स्वं ममेति पश्यन्नप्यलेपाभिमतिर्यतः।
सम्यक् स्वरूपानुभवात्स्वतन्त्रत्वाददोषतः"॥

इत्यनेन परिहर्तव्या स्वानधीने वस्तुनि स्वाधीनता बुद्धिर्लेपाभिमानः सोऽस्यास्तीत्येतादृशदोषो वितथाभिनिवेश इत्युच्यते हरेर्जीवदेहेन्द्रियादिषु स्वाधीनेषु स्वाधीनताबुद्धिर्लेपाभिमानः स गुणो यथार्थज्ञानलक्षणः तस्माद्धरेर्देहेन्द्रियादौ स्वामित्वेन तद्वत्त्वं मुख्यं तत्राविवेकग्रहणं कर्मनिबन्धनं ततो विपर्यय इत्यादिलक्षणोर्जीवोऽनीदृशः श्रीनारायण इति स्मर्तव्यम्॥ ४८॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

भूतेन्द्रियेति। विविधं भवतीति विभूः स्वतेजसा सर्वस्वरूपस्वेनोपासितस्य भगवतस्तेजसा अनाद्यविद्यायुक्तस्य पुरुषस्यात्मवेदनम् "स्वतो न सम्भवादन्यस्तत्त्वज्ञो ज्ञानतो भवेत्" इति श्रीभगवद्वाक्यात्॥ ४६—५०॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

ननु, तर्हि तस्मिन् ईश्वरे वैषम्यं प्रसक्तं कस्याप्युपेक्षणात् कस्याप्यपेक्षणादिति तत्राह–भूतानि मनुष्यपश्वादिदेहाः निजयोनिकारणीभूतैः कर्मभिस्तैस्तैरनेन कर्मणा गौर्भवत्यनेन कर्मणा सूकरो भवत्येवं शास्त्रप्रसिद्धैर्भवन्ति उत्पद्यन्ते न भवन्ति काले नश्यन्ति च सर्वशः सर्वाण्येव तत्र ह स्पष्टं प्रकृतौ देहे स्थितोऽप्यात्मा परमात्मा अन्यतमः पृथग्भूत एवातस्तस्यागुणैर्देहधर्मैर्जन्मादिभिर्न निबध्यते केवलं तत्तत्कृतशुभाशुभकर्मफलं स्वसन्निधानमात्रेण जीवयतीत्येतदेव तस्यापेक्षणमुपेक्षणञ्चेति भावः॥४१॥

तस्यान्यतमत्वमुपपादयति–इदमिति। मोहजं पुरुषस्य जीवस्य मोहादेव जातं अत्र स्थात् परमात्मनः पृथगेव यथा भौतिकं भित्तिद्वारादिमद्गृहं गृहस्थपुरुषात् पृथगीयते पार्थक्यं तदेवोपपादयति–यथा ओदकैः परमाणुभिर्बुद्बुदादिः पार्थिवैर्घटादिः तैजसैः कुण्डलादिर्जायते नश्यति च तथा तैरेव त्रिविधैः परमाणुभिर्जातो जनो देह एव विकृतः परिणतः सन् विनश्यति नत्वात्मनेत्यर्थः॥ ४२॥

पृथगवस्थानाभावेपि भिन्नत्वे दृष्टान्तमाह–यथा अनलो दारुष्ववस्थितोपि दाहकत्वेन प्रकाशकत्वेन भिन्न एव प्रतीयते यथा नभो न सज्जते क्वापि सङ्गं न प्राप्नोति तथा पुमानपि सर्वेषां गुणानां देहेन्द्रियादीनामाश्रयस्तेष्वाश्रितो वा परः पृथगेवेत्यर्थः। अतस्तेन परमेश्वरेणोपेक्षितमिमं स्वकर्मवशान्मृतं पतिं कथं नोपेक्षध्वे इति भावः॥ ४३॥

नन्वयं राजा सङ्ग्रामलब्धपराजयः संप्रति शेते कथमिममुपेक्ष्य निःस्नेहा भवितुं शक्नुमस्तत्राह—सुयज्ञ इति। नन्वस्मद्विलापमेतावन्तं कालमसावश्रृणोदन्ववोचच्च, तत्राह—य इति। कर्हिचित् प्रागपि मदृश्यो नासीदित्यर्थः, यस्तु दृश्यः स इदानीमपि दृश्यते देह इति भावः॥ ४४॥

ननु, यावत् प्राणः स्थितस्तावदेवश्रोतृत्ववक्तृत्वे दृष्टे न तु प्राणे गते सतीत्यतः प्राण एव श्रोता वक्तेति तत्राह—नेति। मुख्योपि "प्राणो वै मुख्यः" इति श्रुतेः। महान् सर्वेन्द्रियचेष्टाहेतुरपि न श्रोता। वक्ता च अचेतनत्वादिति भावः कस्तर्हि श्रोता वक्ता च तत्राह—यस्त्विह इन्द्रियवान् देहेन्द्रियादिमत्त्वेन प्रतीत आत्मा जीवः स च प्राणदेहयोः प्राणदेहेन्द्रियादिभ्योऽन्य एव सचेतनः॥ ४५॥

तर्हि स संप्रति कुत्र गत्वा किं करोतीति तत्राह—भूतं प्राप्तम् इन्द्रियमनोरूपं लिङ्गं सूक्ष्मदेहो येषु तान् स्थूलदेहान् भजति प्राप्नोति त्यजति च यथेमं देहं प्राप्योदसृजदिति भावः। किञ्च स्वेन तेजसा भाग्यलब्धज्ञानबलेन तच्चापि लिङ्गं देहमपि कदाचिदुत्सृजति॥ ४६॥

लिङ्गदेहत्यागे सत्येव कर्मबन्धान्मुच्यते नान्यथा इत्याह-यावदिति॥ ४७॥

तस्माद्यूयमपि कर्मबन्धमोक्षायैव यतध्वं न तु कर्मफलाय स्वर्गीयवैषयिकसुखदुःखस्यास्थिरत्वेन स्वप्नतुल्यत्वादित्याह वितथो व्यर्थ एवाभिनिवेशोयं कोऽसौ यत् गुणेषु गुणकार्येषु सुखादिषु अर्थः वास्तव इति दृग् वचश्च "अपामसोमममृता अभूम अप्सरोभिर्विहराम" इत्यादिकमित्यर्थः। यथा मनोरथः स्वप्न इति मनोरथोपनीतस्य धनपुत्रादिलाभानन्दस्य स्वप्ने स्त्रीसंभोगादिसुखस्य च स्वर्गसुखस्य च तुल्यत्वादित्यर्थः। सर्वमैन्द्रियकम् इन्द्रियग्राह्यं जगदिदं मृषा मिथ्यैव॥ ४८॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

तथा कर्तृत्वेऽपीश्वरस्य वैषम्यं बन्धनञ्च नास्तीत्याह–भूतानीति। निजयोनयः भूतोद्भवहेतवः सत्त्वादयो मायागुणाः सन्निमित्तैः कर्मभिर्भूतानि मनुष्यादीनि भवन्ति विनश्यन्ति गुणानां निजशब्दवाच्यजीवयोनित्वमाह—अन्यतमः कर्मफलदातुरीश्वरात् भिन्नः कर्मकर्ता जीवः प्रकृतौ तस्यागुणैर्बध्यते तत्तत्कर्मफलभोगार्थं जन्ममरणप्रवाहलक्षणे संसारे पात्यते इत्यर्थः। तत्र प्रकृतौ देहरूपायां जीवकर्मफलादिदानाय स्थितोऽपि आत्मा गुणैर्नैव निबध्यते गुणानां तद्वश्यजीवानां च नियन्तृत्वात्॥ ४१॥

सर्वेषां भूतानामुत्पत्तिमरणादिकं तत्तत्कर्मानुसारीश्वरायत्तमतः शोको न कार्य इत्युक्तमधुना यस्य जन्ममरणे भवतः स देहोऽनित्यो नित्यस्वरूपाज्जीवादन्योऽतो मोहो न कार्य इत्याह—

अथ नित्यमनित्यं वा नेह शोचन्ति तद्विदः।
नान्यथा शक्यते कर्तुं स्वभावः शोचतामिति ॥ ४९ ॥
लुब्धको विपिने कश्चित्पक्षिणां निर्मितोऽन्तकः।
वितत्य जालं विदधे तत्र तत्र[१] प्रलोभयन् ॥ ५० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

इदमिति द्वाभ्याम्। इदं प्रसिद्धं पुरुषस्य शरीरं मोहजं मोहहेतुभूतप्रकृतिगुणजं यथा गृहिणः पृथक् गृहं तथा शरीरिणः पृथगेवेक्ष्यते प्रतीयते गम्यते इत्यर्थः। यथौदकैर्जलविन्दुभिर्जातो विकृतः कार्यपदार्थः बुद्बुदादिः पार्थिवैर्मृत्पिण्डैर्जातो घटादिः तैजसैरग्निकणैर्जातः प्रदीपादिः कालेन विनश्यति तथा जनो देहः गुणैर्जातः कालेन विनश्यति न जीवः ॥ ४२ ॥

यथा दारुषु अनलोऽग्निः यथा च देहगतोऽनिलः प्राणवायुः पृथगेव स्थितो देहे यथा नभः सर्वगतं सर्वस्मिन् स्थितमपि न सज्जते तथा पुमान् जीवः सर्वेषां गुणानां देहेन्द्रियादीनामाश्रयो धारकस्तेभ्यः परः पृथगेव ॥ ४३ ॥

नन्विति वितर्के. हे मूढाः! यूयं यमनुशोचथ स देहरूपः सुयज्ञपदार्थोऽयं शेते यस्तुश्रोता योऽनुवक्ता श्रोतृत्वादिधर्मवान् सुयज्ञशब्दार्थः इह अस्मिन्देहे आसीत्स कर्हिचिदपि न दृश्यते ॥ ४४ ॥

ननु, तर्हि प्राणादिरूप आत्मा किमिति शङ्कां निवारयन् ज्ञानस्वरूपश्रोतृत्वादिधर्मकात्मतत्त्वप्रतिपत्तये प्राणादिजडवर्गवैलक्षण्यमात्मनो दर्शयति--न श्रोतेति द्वाभ्याम् ॥ ४५ ॥

विभुर्धर्मभूतज्ञानवत्त्वात् तथोक्तं भगवता "यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः। क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत!" भूतेन्द्रियमनांसि लिङ्गानि चिह्नानि येषां तान् देहान् भजति स्वीकरोति उत्सृजति च अत एव स्वेन तेजसा स्वकीयेन ज्ञानरूपेण तेभ्योऽन्यः ॥ ४६ ॥

ननु, देहविलक्षणस्यास्य देहसंयोगकर्माचरणसुखदुःखभोगादिकं कियत्कालपर्यन्तं भविष्यतीत्यत्रावधिमाह—यावदिति। यावन्मायायोगः अनादिप्रकृतिसम्बन्धः तावदात्मा जीवात्मा लिङ्गान्वितः तावदेव बन्धनं निगडोयमशुभाशुभं कर्म अनुवर्तते ततः कर्मानुवृत्तेः तावदेवक्लेशः दुःखानुभवः अशुभकर्मफलम् विपर्ययः सुखानुभवः शुभकर्मफलम् अनुवर्तते ॥ ४७ ॥

तावदेव यथा मनोरथः अनीशस्य सोऽहमिति स्वप्नोऽमृगस्य मृगोहमिति च सङ्कल्पो मृषा असत्ताहशः वितथाभिनिवेशः देहे अहमित्यसदभिनिवेशः अनुवर्तते यत यत एव गुणेषु गुणपरिणामभूतेषु दारापत्यादिषु अर्थदृग्वचः पुरुषार्थदृग्वचनं मम जीवनहेतव एते इत्येवंभूतं वाक्यं च अनुवर्तते। किञ्च यावन्मायायोगस्तावदेव सर्वमैन्द्रियकमिन्द्रियग्राह्यं कर्मफलमनुवर्तते इति पूर्वेणैवान्वयः ॥ ४८ ॥

भाषाटीका।

ऐसे ही प्राणी लोग भी अपने २ जन्म देने वाले तिन २ कर्मों से समय पर होते हैं समय पर सब ही नहीं होते। तहां आत्मा प्रकृति में स्थित होकर भी उसके गुणों से देह से अत्यंत भिन्न होने से नहीं बंधता हैं ॥ ४१ ॥

मोह से उत्पन्न यह शरीर भी पृथिव्यादि से उत्पन्न गृहों के सदृश आत्मा से पृथक् है ॥ जैसे जल पृथिवी तेज (सुवर्णादि) बुदबुदघटकटकादि होते हैं और काल पाकर नष्ट होजाते हैं इसी प्रकार यह शरीर भी है ॥ ४२ ॥

जैसे अग्नि काष्ठ में भिन्न मालूम होती है। जैसे वायु देह में स्थित होकर भी पृथक् रहता है ॥ और जैसे आकाश सर्वत्र वर्त्तमान होकर भी किसी में सक्त नहीं होता है ऐसे ही सर्व गुणाश्रय पुरुष भी इन सब से भिन्न है ॥ ४३ ॥

हे मूढ अबलाओ! जिसका तुम शोच करती हो वही यह सुयज्ञ तुमारे सन्मुख सोरहा है। जो सुनने वाला और बोलने वाला है वह तो कभी देखा ही न जासका फिर शोक किसका है ॥ ४४ ॥

न इस देह में कोई सुनने वाला और न कोई बोलने वाला है, केवल एक इसमें मुख्य महा प्राण हैं, जो इन्द्रियोंसे वासना का ज्ञाता आत्मा है वह इस शरीर से संबन्ध ही नहीं रखता है ॥ ४५ ॥

भूत इन्द्रिय मन लिंग और ऊंचे नीचे देहको धारण करता है और त्यागता है, तो भी वह आत्मा अपने तेज से पृथक् प्रतीत होता है ॥ ४६ ॥

जब तक आत्माको लिंग शरीर का संबंध है तब ही तक कर्मकृत यह शरीर है और उसी से विपर्यय क्लेश और माया का संबन्ध भी लगा हुआ है ॥ ४७ ॥

जो कि गुणों में अर्थ की दृष्टि का वचन है यही मिथ्या अभिनिवेश है ॥ और जैसे मनोरथ तथा स्वप्न के पदार्थ अचिरयी है ऐसे ही सर्व इन्द्रियों के विषय भी अनित्य हैं ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

उपसंहरति—अथेति। अथ तस्मात् नित्यमात्मानमनित्यं देहं वा तद्विदोनित्यमनित्यं च जानन्तो न शोचन्ति नन्वेवमुपदेष्टारोपि

(१) प्रलोभनमिति श्री वीर० श्री विजय० श्री शुक०।

कुलिङ्गमिथुनं तत्र विचरत्समदृश्यत ।
तयोः कुलिङ्गी सहसा लुब्धकेन प्रलोभिता ॥ ५१ ॥
साऽसज्जत शिचस्तन्त्यां महिषी कालयन्त्रिता ।
कुलिङ्गस्तां तथापन्नां निरीक्ष्य भृशदुःखितः ।
स्नेहादकल्पः कृपणः कृपणां पर्यदेवयत् ॥ ५२ ॥
अहो अकरुणो देवः स्त्रियाऽऽकरुणया विभुः ।
कृपणं मानुशोचन्त्या दीनया किङ्करिष्यति ॥ ५३ ॥
कामं नयतु मां देवः किमर्द्धेनात्मनो हि मे ।
दीनेन जीवता दुःखमनेन विधुरायुषा ॥ ५४ ॥
कथं त्वजातपक्षांस्तान् मातृहीनान्बिभर्म्यहम् ।
मन्दभाग्याः प्रतीक्षन्ते नीडे मे मातरं प्रजाः ॥ ५५ ॥
एवं कुलिङ्गं विलपन्तमारात् प्रियावियोगातुरमश्रुकण्ठम् ।
स एव तं शाकुनिकः शरेण विव्याध कालप्रहितो विलीनः ॥ ५६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

शोचन्तो दृश्यन्ते तत्राह—नान्यथेति । ज्ञानदार्ढ्याभावात्स्वभावो न निवर्तत इत्यर्थः ॥ ४९ ॥

स्वयं सधर्मा अपीति यदुक्तं तत्रेतिहासमाह—लुब्धकइत्यादिना । पक्षिणामन्तक ईश्वरेण निर्मितस्सन् यत्र यत्र ते तत्र तत्र तान् कणादिभिः प्रलोभयन् जालं विस्तार्य विशेषेण धृतवान् पाठान्तरे तेषामामिषादिभिः प्रलोभनं कृतवानित्यर्थः ॥ ५० ॥

कुलिङ्गः कन्दभक्षी पक्षिविशेषः कुलिङ्गयोर्मिथुनम् ॥५१॥

शिचस्तन्त्यां जालस्य सूत्रेऽसज्जत बन्धं प्राप तामापन्नामापदम्प्राप्ताम् दृष्ट्वा कुलिङ्गः पक्षी तां मोचयितुमकल्पस्सन् पर्यदेवयद्वृक्षशाखामाश्रित्यविलापं चकार ॥ ५२ ॥

आकरुणया सर्वतोऽनुकम्प्या स्त्रिया किङ्करिष्यति ॥५३॥

आत्मनो देहस्यार्धेन अनेन विधुरायुषा भार्याशून्यजीवितेन दुःखं यथा भवत्येवञ्जीवता किं मे प्रयोजनम् अतो मामपि कामं नयत्वित्यन्वयः ॥ ५४ ॥

न जाताः पक्षा येषां तान्बालकान् कथं बिभर्मि पुष्णामि मन्दभाग्या मे प्रजा मातरं प्रतीक्षन्ते ॥ ५५ ॥

शाकुनिकः पक्षिहन्ता विलीनः सन् ॥ ५६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं देहात्मनोरुभयोरपि शोकाविषयत्वमुक्तं सहेतुकमुपसंहरति-अथेति । अथ हे अबलाः! नित्यमात्मानम् अनित्यं देहं प्रत्यपि तद्विदः देहात्मयाथात्म्यविदो न शोचन्ति. कुतः इतिशब्दो-हेत्वर्थकः यस्मात्स्वभावः वस्तुनः स्वाभाविको धर्मः शोचतामपि शोचद्भिरप्यन्यथा कर्तुं न शक्यते न ह्यात्मनः स्वाभाविकं नित्यत्वमपनीयानित्यत्वं केनचिच्छोकाद्युपायेनापादयितुं शक्यं न वा देहस्यानित्यत्वमपनुद्य नित्यत्वम्. न हि वह्नेरौष्ण्यापनयेन शैत्यमापादयितुं शक्यमिति भावः ॥ ४९ ॥

यदुक्तं "स्वयं सधर्मा अपि शोचन्ति" इति तत्र दृष्टान्ततयेतिहासं प्रस्तौति–लुब्धक इति । कश्चिल्लुब्धको व्याधः पक्षिणामन्तकः मृत्युः निर्मितः ईश्वरेण मृत्युत्वेन निर्मितिः अत एव स तत्र तत्र जालं वितत्य पक्षिणां प्रलोभनं वञ्चकं विदधे कृतवान् ॥ ५० ॥

एवं लुब्धके प्रलोभयति सति तत्र समीपे कुलिङ्गयोः पक्षिणोर्मिथुनं द्वन्द्वं सञ्चरत्सत् लुब्धकेनादृश्यत तयोः स्त्रीपुंसयोः मध्ये कुलिङ्गी स्त्री सहसा वञ्चनोपायेन लुब्धकेन प्रलोभिता बभूव ॥ ५१ ॥

सा महिषी कुलिङ्गभार्या कालवशा सती शिचस्तन्त्यां जालसूत्रे प्रसज्जता बद्धा बभूव अथ ततस्ताम् आपन्नाम् आपदं प्राप्तां दीनां कर्मानुगुणेन कालेन यन्त्रितां सिचस्तन्त्यामासञ्जितां महिषीं भार्यां कुलिङ्गीं वीक्ष्य कुलिङ्गः पुमान् स्नेहादतीव दुःखितोऽकल्पो विमोचने ऽदक्षो अतएव केवलं स्वयमप्यातुरः दीनस्सन् कृपणां दीनं यथातथा पर्यदेवयत् परितप्तो बभूव ॥ ५२ ॥

तदेवाह—अहो इति त्रिभिः । अहो देवो विधाताऽकरुणो निर्घृणः, अकरुणत्वमेवाविष्करोति--स्त्रिया आकरुणयेति छेदः आकरुणया सर्वतोऽनुकम्प्यया स्त्रिया मम भार्यया नितरां कृपणं दीनं

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

मां प्रत्यनुशोचन्त्या दीनया कुलिङ्ग्या विधुर्दैवः किं करिष्यति न किमपि तस्य प्रयोजनम्. किन्तु मय्यकारुण्येन मां वियोज्य स्त्रियं नीतवान् इति भावः ॥ ५३ ॥

यतो मय्यकरुणो दैवस्ततो मामपि कामं यथेष्टं नयतु आत्मनोऽर्द्धेन मम किं किं प्रयोजनम्. एकस्मिन्मय्यर्द्धे भार्याख्यं नष्टम् अवशिष्टेनार्द्धेन नकिमपि प्रयोजनमस्तीत्यर्थः । अर्द्धं विशिनष्टि, दीनेन कृपणेन दुःखं यथा भवति तथा जीवता प्राणान्धारयता विधुरायुषा विधुरं भार्यारहितमायुर्यस्य तेन भार्याशून्यजीवितयुक्तेनेत्यर्थः । अनेनेति निस्स्पृहत्वमुक्तं कार्योपयोगित्वाभावादिति भावः ॥ ५४ ॥

किञ्च अजातौ पक्षौ येषां तान् मात्रा हीनान् रहितान् बालकान् कथमहं बिभर्म्मि पुष्णामि किञ्च मे मम प्रजाः नीडे मातरं प्रतीक्षन्ते ॥ ५५ ॥

एवं प्रियाया वियोगातुरं दुःखितम् अत एव विशेषेणारुदन्तम् अश्रुकण्ठमश्रुपूर्णकण्ठं तं कुलिङ्गं स एव शाकुनिकः शकुनीहन्तीति शाकुनिकः लुब्धकः आरात्समीपे निलीनस्तिरोहितस्सन् कालेन कर्मानुगुणेन प्रहितः प्रेरितः शरेण विव्याध ताडितवान् ॥ ५६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यस्मात्सर्वस्येश्वराधीनत्वेन जन्तूनां मरणादिकमपरिहार्यं तस्मात्सर्वथा देहेन्द्रियादेरनित्यत्वं नित्यत्वं चास्तु तथापि शोककरणं न पण्डितमतम् " गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः" इत्यादेरित्याह—अथेति, अतस्तन्मूर्खमतमिति सन्तोष्टव्यं स्वभावत्वादित्याह—नान्यथेति ॥ ४९ ॥

अस्मिन्नेवार्थे कञ्चनेतिहासमाह—लुब्धक इति । लुब्धको मृगयुर्निर्मितो विधिनेतिशेषः वितत्य विस्तृत्य प्रलोभनं वञ्चनम् ॥५०-५१॥

सिचा जालेन सह यन्त्रितया तन्त्या सूत्रेण महिषी कुलिङ्गभार्या कालयन्त्रिता कालाधीना अकल्पोऽसमर्थो, मोचयितुमिति शेषः, पर्यदेवयद्विलपितवान् ॥ ५२ ॥ ५३ ॥

दुःखं जीवता दीनेन क्षीणेनात्मनोर्द्धेन मे मम किं प्रयोजनं न किमपि कुतो विधुरायुषाऽऽयूरहितेनात्मनोर्द्धस्य नष्टत्वात् ॥५४॥

मे प्रजाः पुत्राः ॥ ५५ ॥

शाकुनिकः पक्षिमारकः कालेनान्तकेन प्रहितः प्रेरितः निलीनो वृक्षमूले छन्नः कुलिङ्गं दीर्घतुण्डं " दार्वाघाटो दारुकुट्टः कुलिङ्गो दीर्घतुण्डकः" इत्यभिधानम् ॥ ५६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तयोरिति । हे महिष्यः ॥ ५१—६१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अथ नित्यं मीमांसकानां मते अनित्यं नश्वरं सत्यमिति साङ्ख्यानां मते ; ननु, तदपि न वयं प्रबुध्यामहे इति तत्राह—नान्यथेति ॥४९॥

शोकस्वभावत्वेऽनर्थं इत्यत्रेतिहासमाह—लुब्धक इत्यादिना । निर्मितः ईश्वरेणेत्यर्थः । विदधे पक्षिणो विशेषेण दधार प्रलोभनमिति पाठे आमिषादिभिस्तेषां प्रलोभनं कृतवानित्यर्थः ॥५०-५१॥

सिचस्तन्त्यां जालस्य सूत्रे हे महिष्यः ॥ ५२ ॥

दैवो विधाता करुणाया मयि कृपावत्या ॥ ५३—५६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तद्विदः नित्यानित्यविदः नित्यं क्षेत्रज्ञः अनित्यं देहादिकं नैव शोचन्ति शोचतामतद्विदां स्वभावस्तु अन्यथा कर्त्तुं न शक्यः ॥ ४९ ॥

तादृक्स्वभावस्य फलं नाश एवेत्याह—लुब्धक इत्यादिना । निर्मितस्तत्कर्मानुसारिणा ईश्वरेणेति शेषः । जालं वितत्य तत्र प्रलोभनमन्नादिना विदधे ॥ ५० ॥ ५१ ॥

सिचो जालस्य ॥ ५२ ॥

कृपणं मा मां कृपया अनुशोचन्त्या स्त्रिया किं करिष्यति ॥५३॥

दैवः मामपि कामं यथेष्टं नयतु यतः आत्मनः देहस्य अर्द्धेन स्त्र्याख्यस्यार्द्धस्य विनष्टत्वादवशिष्टेन पुरुषाख्येन भागेन मम किंप्रयोजनम्. कथंभूतेन दीनेन दुःखं यथा भवति तथा जीवता विधुरं कलत्ररहितमायुर्यस्य तेन ॥ ५४ ॥

मे प्रजाः नीडे मातरं प्रतीक्षन्ते तान् कथं बिभर्मि पोष्यामि ५५॥

विलीनः वृक्षादिषु छन्नः सन् ॥ ५६ ॥

भाषा टीका ।

नित्यानित्य वस्तु विवेक वाले नित्य और अनित्य का शोक नहीं करते और शोक करने वालों के स्वभाव भी अन्य था नहीं कियो जासका है ॥ ४९ ॥

(एक दृष्टांत कहते हैं कि) परमेश्वर का निर्मित पक्षियों का वैरी एक लुब्धक बन में जाल लगाकर जहां तहां लोभ देता था॥ ५० ॥

इतने में वहां कुलिंग नामक पक्षियों का जोडा विचरता हुआ देखपडा उनमें से लुब्धक ने कुलिंगी को एक दम लुभालिया ॥ ५१ ॥

कालविवशहोकर वह कुलिङ्गी उस जालमें फँस गई । उसको उस प्रकार फँसीहुई देखकर कुलिङ्ग अतिदुःखित और असमर्थ आप दीन उस विचारी दीन कुलिङ्गी का बहुत शोक करने लगा, ॥ ५२ ॥

एवं यूयमपश्यन्त्य आत्मापायमबुद्धयः ।
नैनं प्राप्स्यथ शोचन्त्यः पतिं वर्षशतैरपि ॥ ५७ ॥

हिरण्यकशिपुरवाच ।

बाल एवं प्रवदति सर्वे विस्मितचेतसः ।
ज्ञातयो मेनिरे सर्वमनित्यमयथोत्थितम् ॥ ५८ ॥

यम एतदुपाख्याय तत्रैवान्तरधीयत ।
ज्ञातयोऽपि सुयज्ञस्य चक्रुर्यत्साम्परायिकम् ॥ ५९ ॥

ततः शोचत मा यूयं परं चात्मानमेव च ।
क आत्मा कः परो वाऽत्र स्वीयः पारक्य एव वा ।
स्वपराभिनिवेशेन विना ज्ञानेन देहिनाम् ॥ ६० ॥

नारद उवाच ।

इति दैत्यपतेर्वाक्यं दितिराकर्ण्य सस्नुषा ।
पुत्रशोकं क्षणात्त्यक्त्वा तत्त्वे चित्तमधारयत् ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां
सप्तमस्कन्धे युधिष्ठिरनारदसम्वादे दितिशोकापनयनंनाम
द्वितीयोऽध्यायः ॥ २ ॥

भाषाटीका।

और बोलाकि, अहो परमेश्वर तू वडा निर्दय है मुझ दीनको शोचनेवाली दयावाली उस विचारी दीन स्त्री के साथ मेरा वियोग कराकर तू क्या करेगा ॥ ५३ ॥

भलेही ईश्वर मुझे लेजाय क्योंकि? अपने अर्द्धशरीर से मेरा क्या प्रयोजनहै इस दीन विचारी से वियुक्त इस आयुसे दुःख पूर्वक जीकर भी क्या होगा ॥ ५४ ॥

अब कहो जिनके पङ्ख नही जामें ऐसे विना माताके उन छोटे २ बच्चोंका मैं कैसे पालन करूङ्गा मन्दभागी मेरे बच्चे माकी घाट देखरहे हैं ॥ ५५ ॥

इस तरह प्रियाके वियोग से दुखित रोते हुए विलाप करने वाले उसी कुलिङ्ग को छिपे हुये उसीलुब्धकने बाणसे वेधदिया ॥ ५६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आत्मापायं स्वमृत्युम् ॥ ५७ ॥

अयथोत्थितं मिथ्यैवाविर्भूतम् ॥ ५८ ॥

साम्परायिकं परलौककृत्यम् ॥ २९ ॥

अशोचतेतिपाठे अडागम आर्षः । स्वः पर इत्यभिनिवेश एवाज्ञानं तेन विना ॥ ६० ॥

सस्नुषा स्नुषासहिता ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
द्वितीयोऽध्यायः ॥ २ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

एवमितिहासं प्रस्तुत्य प्रकृतोपयोगित्वेनोपसंहरति--एवमिति । एवं यथा कुलिङ्गस्तथा यूयमप्यात्मापायं स्वमृत्युम् अपश्यन्तः अनालोचयन्त्योऽत एव अबुद्धयः विवेकशून्याः वर्षशतैरपि शोचन्त्यः एनं पतिं न प्राप्स्यथ ॥ ५७ ॥

एवं प्रेतबन्धुयमसम्वादरूपमितिहासं प्रस्तुत्योपसंहरति दैत्यः--बालइति द्वाभ्याम् । एवम् इत्थं बाले प्रवदति सति सर्वे ज्ञातयः सुयज्ञस्य सपिण्डाः विस्मितं चेतो येषां ते अयथोत्थितमपुरुषार्थत्वेनाप्रतीतं किन्तु पुरुषार्थत्वेन विपरीतरूपेण प्रतीतं सर्वं देहादिकमनित्यमस्थिरमपुरुषार्थरूपं मेनिरे इति निश्चितवन्त इत्यर्थः ॥ ५८ ॥

यमस्त्वेतदुक्तमुपाख्याय कथयित्वा तत्रैवान्तर्दधे ततो ज्ञातयः सुयज्ञस्य यत्कर्त्तव्यं सांपरायिकं मृतोद्देशेन कर्त्तव्यं कर्म तत् चक्रुः ॥ ५६ ॥

एवमितिहासमुपसंहृत्य तत्फलितार्थमुपदिशन्नुपसंहरति-तत इति । यतो देहात्मनोरेवं विभ्रष्टस्वभावोऽतो हिरण्याक्षादिरूपं परमन्यमात्मानं स्वं प्रति वा यूयं मा शोचत अहो मां विहाय स गतस्तं विहायाहं कथं जीवामीत्येवं स्वं परं प्रति वा मा शोचतेत्यर्थः । स्वः पर इत्यभिनिवेशोऽभिमानो यस्मात्तेनाऽज्ञानेनानाद्यज्ञानमूलकेन कर्मणा विना देहिनां कः परः को वा आत्मा कश्च स्वकीयः पारक्यो वा स्वपराविभागः स्वीयपरकीयविभागश्च सर्वोऽप्यनाद्यविद्यामूलककर्माधीनदेहसम्बन्धप्रयुक्तदेहात्माभिमानप्रयुक्त औपाधिक आत्मनान्तु केनापि प्रकारेण स्वाभाविकसम्बन्धः शोकहेतुर्नविद्यते अतो मा शोचतेत्याभिप्रायः ॥ ६० ॥

उपरितनं दैत्यस्य वृत्तान्तं वक्तुं तावद्वाक्यमुपसंहरन् दितेरवस्थितिप्रकारमाह भगवन् नारदः--इतीति । इतीत्थं दैत्यपतेर्हिरण्यकशिपोर्वाक्यमाकर्ण्य स्नुषया पुत्रस्य भार्यया सहिता दितिः क्षणमात्रेण पुत्रशोकं त्यक्त्वा तत्त्वे देहात्मयाथात्म्ये चित्तमधारयत् तत्त्वचिन्तनपरा बभूवेत्यर्थः ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिकायाम्
द्वितीयोऽध्यायः ॥ २ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अनेन प्रकृते किमभूत्तत्राह-एवमिति । आत्मापायं युष्मन्नाशं देहनाशं वा ॥ ५७ ॥

किं ज्ञातयो बालभाषितमित्युपेक्षां चक्रुरिति तत्राह-बाल इति । यद्देहादिकं तत्सर्वमनित्यं मेनिरे यद्देहात्मत्वं यदयथोत्थितं स्वप्नजाग्रत्स्ववद्भ्रान्तिं मेनिरे "अहं ममाभिमानादित्वयथोत्थमनित्यकम्" इति स्मृतेः । नन्वेवं तर्हि महदादिजगतश्चिरप्रकृतेश्च भ्रान्तिकल्पितत्वमायातं तयोरपि सर्वान्तर्गतत्वादित्याशङ्का नानेन परिहर्तव्या तथा हि, यन्महदादि तत्सर्वं जगत्कारणाच्यस्य हरेरनुग्रहात्स्थिरं भात् परमात्मनो यथार्थत्वेन सत्यत्वेनोत्थितं सृष्टं चित्प्रधानस्यापि नित्यत्वं भगवन्तमन्तरेण यथाऽस्वातंत्र्येण स्थितत्वञ्च तदुक्तं च—

"महदादिर्यथोत्थं च नित्या चापि यथोत्थिता ।
अस्वतन्त्रैव प्रकृतिः स्वतन्त्रो नित्य एव च ॥
यथार्थभूतश्च पर एक एव जनार्दनः" ॥ इति.

अनेन महदादेरप्यनित्यत्वादिकं नास्तीति किमु हरेरिति कैमुत्यन्यायो दर्शितः ॥ ५८ ॥

साम्परायिकं मृतविषयम् ॥ ५९ ॥

आत्मपरावुद्दिश्य किमिति शोको न कार्य इति तत्राह—क आत्मेति । देहादिकमप्यपेक्ष्यात्मपरावाक्षिप्येते तथा हि, आत्मपरयोश्चेतनत्वेन नित्यत्वाद्देहादेर्भौतिकत्वेन नश्वरत्वात्कि शब्दस्याक्षेपत्वमेव, नत्वनिर्वचनीयः । तर्ह्यहं पर इति व्यवहारस्य किं मूलमिति तत्राह-स्वपरेति, स्वः पर इति दुराग्रहलक्षणमज्ञानमन्तरेण न किमपि कारणं तस्मादात्मनो वृद्धिः श्रीवासुदेवे दृढा मनोरतिरज्ञाननामशत्रुनाशश्चापादनीयौ पुरुषेणेति निश्चेतव्यम्-

"न हि देहादिरात्मास्यान्न च शत्रुरुदाहृतः ।
अतो दैहिकवृद्धौ वा क्षये वा किं प्रयोजनम् ॥
यस्तु देहगतो जीवः स हि नाशं न गच्छति ।
अतः शत्रुविवृद्धौ वा स्वनाशे शोचनं कुतः ॥
देहादिव्यतिरिक्तौ तु जीवेशौ प्रति जानताम् ।
अत आत्मविवृद्धिस्तु वासुदेवे रतिः स्थिरा ॥
शत्रुनाशस्तथाऽज्ञाननाशो नान्यः कथञ्चन" ॥

इत्यनेन तात्पर्यमवगन्तव्यमिति सिद्धम् ॥ ६० ॥

प्रकरणसमाप्ताविति शब्दः ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
द्वितीयोऽध्यायः ॥ २ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीयस्य
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
द्वितीयोध्यायः ॥ २ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

आत्मापायं स्वयं स्वमृत्युम् ॥ ५७ ॥

सर्वं जगदनित्यं यतो यथोत्थितं येन प्रकारेणोत्थितं तथा न तिष्ठतीत्यर्थः ॥ ५८—५९ ॥

स्वश्च पर इत्यभिनिवेश एवाज्ञानं तेन विना ॥ ६०–६१ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
सप्तमस्य द्वितीयोयं सङ्गतः सङ्गतः सताम् ॥ २ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

आत्मनोऽपायं नाशमपश्यन्त्यः वर्षशतैरपि पतिं न प्राप्स्यथ॥५७॥ एवं बाले प्रवदति अयथोत्थितम् अमृतेपि आत्मनि मरणभ्रमेण वृथैवोत्पन्नं सर्वं शोकादिकम्, अनित्यं विवेकबाध्यं यद्वा एवमुक्तप्रकारेण बाले प्रवदति सति अयथैवोत्थितमात्मतयोपस्थितं सर्वं देहेन्द्रियादिकमनित्यं मेनिरे नत्वात्मानमित्यर्थः॥५८॥

साम्परायिकं पारलौकिकं यत् तच्चक्रुः कृतवन्तः॥५९॥

आत्मानं नित्यत्वात् परं देहादिकमनित्यत्वात् मा शोचत "अथ नित्यमनित्यं वा नैव शोचन्ति तद्विदः" इत्युक्तत्वात्॥६०॥

तत्वे "स रक्षिता रक्षति योहि गर्भे। यदृच्छयेशः सृजतीदमव्ययः" इत्यादिना यमेनोपदिष्टे॥६१॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धातप्रदीपे
द्वितीयाध्यायार्थप्रकाशः॥२॥

भाषा टीका।

हे निर्बुद्धिओ! इसी तरह तुमसब भी अपना नाश न देखकर इसका शोच करते२ सैकडों वर्ष में भी पति को प्राप्त न होवेगी॥५७॥

हिरण्य कशिपु उवाच।

हिरण्यकशिपुबोला कि, उस बालक के ऐसे बोलने से सब ज्ञाति लोग बडे विस्मित चित्त वाले होकर सब संसार को अनित्य मानते हुए॥५८॥

यमराज भी इतना कहकर वहीं अन्तर्धान होगये ज्ञाति लोगों ने भी सुयज्ञ का जो मृतक का कर्म है उसे किया॥५९॥

तिसीसे तुम भी सब दूसरे का और अपना भी कुछ शोच मत करो, इस संसार में कौन अपना और पराया कौन हैं। तथा आप कौन और दूसरा कौन है॥६०॥

प्राणियों ने ज्ञान के विना यह सब अपना और पराया मानलिया है॥ नारद उवाच॥ नारद जी बोले, कि--इस प्रकार हिरण्यकशिपु के वाक्य सुन कर बधू सहित दिति ने पुत्रशोक को क्षण मात्र में त्याग कर तत्त्व में चित्त लगाया॥६१॥

इति श्रीमद्भागवत महापुराण सप्तस्कन्ध
द्वितीय अध्याय की भाषाटीका
समाप्त॥२॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे द्वितीयोऽध्यायः॥२॥

॥ तृतीयोऽध्यायः ॥

नारद उवाच ।

हिरण्यकशिपू राजन्नजेयमजरामरम् ।
आत्मानमप्रतिद्वन्द्वमेकराजं व्यधित्सत ॥ १ ॥

स तेपे मन्दरद्रोण्यां तपः परमदारुणम् ।
ऊर्ध्वबाहुर्नभोदृष्टिः पादाङ्गुष्ठाश्रितावनिः ॥ २ ॥

जटादीधितिभीरेजे सम्वर्त्तार्क इवांशुभिः ।
तस्मिंस्तपस्तप्यमाने देवाः स्थानानि भेजिरे ॥ ३ ॥

तस्य मूर्ध्नः समुद्भूतः सधूमोऽग्निस्तपोमयः ।
तिर्यगूर्ध्वमधोलोकानतपद्विष्वगीरितः ॥ ४ ॥

चुक्षुभुर्नद्युदन्वन्तः सद्वीपाद्रिश्चचाल भूः ।
निपेतुः सग्रहास्तारा जज्वलुश्च दिशो दश ॥ ५ ॥

तेन तप्ता दिवं त्यक्त्वा ब्रह्मलोकं ययुः सुराः ।
धात्रे विज्ञापयामासुर्देवदेव जगत्पते ! ॥ ६ ॥

दैत्येन्द्रतपसा तप्ता दिवि स्थातुं न शक्नुमः ।
तस्य चोपशमं भूमन् विधेहि यदि मन्यसे ।
लोका न यावन्नङ्क्ष्यन्ति बलिहारास्तवा [(१)] भिभूः ॥ ७ ॥

तस्यायं किल सङ्कल्पश्चरतो दुश्चरं तपः ।
श्रूयतां किन्न विदितस्तवाथापि निवेदितः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तृतीये तस्य तपसा तप्तं वीक्ष्य जगद्विधिः ।
आगत्य विस्मितस्तेन संस्तुतश्च वरानदात् ॥

तदेवं साधूनां कदने दानवानादिश्य बन्धूनां शोकं तत्त्वनिरूपणेनापनीय यत्कृतवांस्तदाह— हिरण्यकशिपुरित्यादिना । अप्रतिद्वन्द्वं प्रतिपक्षहीनमेकराजमेकमेव राजानं व्यधित्सत कर्तुमैच्छत् ॥ १ ॥

ऊर्ध्वौ बाहू यस्य नभसि दृष्टिर्यस्य पादाङ्गुष्ठेनाश्रिताऽवनिर्येन ॥ २ ॥

जटानां दीधितिभिः कान्तिभिः अंशुभीरश्मिभिः प्रलयकर्ता अर्क इव रेजे पूर्वं ये अवस्थिताः सन्तो भुवि विचेरुस्ते देवाः पुनः स्वानि स्थानानि भेजिरे ॥ ३ ॥

विष्वगीरितः सर्वतः प्रसृतस्सन् ॥ ४ ॥

द्वीपैरद्रिभिश्च सहिता भूश्चलिता ॥ ५ ॥ ६ ॥

---

(१) तव प्रभो इति पाठान्तरम्. विज०।

श्रीधरस्वामिकृतभावार्थदीपिका ।

तव वलिहाराः करप्रदाः पूजाकारिण इति वा अभितो भवतीत्यभिभूः हे सर्वाधिपते ! पाठान्तरे भो इति सम्बोधनम् अभितो यावन्न नंक्ष्यन्तीति सम्वन्धः ॥ ७ ॥

ब्रह्मणस्तस्मिन्द्वेषमुत्पादयितुं तत्सङ्कल्पमाहुः–तस्येति चतुर्भिः । तस्य सङ्कल्पस्तव किं न विदितोऽथाऽप्यस्माभिर्निवेदितस्त्वया श्रूयताम् ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं तत्त्वोपदेशेन दित्यादीनां शोकं परिहृतवतो दैत्यस्योपरितनं वृत्तान्तमाह भगवान्नारदः–हिरण्यकशिपुरित्यादिना । हेराजन् युधिष्ठिर ! हिरण्यकशिपुरात्मानं व्यधित्सत विधातुमैच्छत् कथम्भूतम् अजेयमितरैर्जेतुमशक्यम् जरामरणरहितम् अप्रतिद्वन्द्वं प्रतिपक्षरहितम् एकराजम् एकः स्वयमेव राजा इत्येकराजस्तमेवंभूतमात्मानं साधयितुमैच्छदित्यर्थः । येन साधनेन स्वयमुक्तविधोभवेत्तादृशं साधनं कर्त्तुमैच्छदिति यावत् ॥ १ ॥

तत्साधनानुष्ठानप्रकारमेव प्रपञ्चयति–स इति । सः दैत्यः मन्दरगिरेर्द्रोण्यामत्युग्रं तपस्तेपे कृतवान् कथंभूतस्सन् ऊर्द्ध्वौ वाहू यस्य नभसि दृष्टिर्यस्य पादाङ्गुष्ठेनाश्रिताऽवनिर्भूमिर्येन ॥ २ ॥

एवं तपः कुर्वन् दैत्यो जटानां दीधितिभिः कान्तिभिरंशुभिः रश्मिभिः सांवर्तकः प्रलयकालिकः सूर्य इव रेजे रराज. तस्मिन् दैत्ये एवं तपः कुर्वति सति ये देवाः पूर्वं दैत्यैरलक्षितास्सन्तो भुवि चेरुस्ते स्थानानि स्वस्थानानि भेजिरे प्रापुः प्रतिपक्षस्यासुरस्य तपःस्थितत्वादुपद्रवाभावात् स्वस्थानानि भेजिरे इति भावः । तस्य दैत्यस्य मूर्द्ध्नः सकाशात्समुद्भूतः निष्क्रान्तस्तपोमयः तपस आगतस्तपोमयः तत आगत इत्यर्थे “मयट्च” इति मयट्, तपःकार्यं भूतइत्यर्थः । धूमेन सहितोऽग्निः प्रवृद्धस्तिर्यगूर्द्ध्वमधश्च सर्वतो लोकानतपत् तताप ॥ ३ ॥ ४ ॥

नद्यः उदन्वन्तः समुद्राश्च चुक्षुभुर्द्वीपैरद्रिभिश्च सहिता भूः भूमिः चचाल ग्रहैः सहितास्तारा: नक्षत्राणि निपेतुः दश दिशो जज्वलुश्च ॥ ५ ॥

तेन तपोऽग्निना तप्ता देवा दिवं स्वर्गं त्यक्त्वा सत्यलोकं ययुः धात्रे ब्रह्मणे विज्ञापयामासुश्च. विज्ञप्तिमेवाह—हे देवदेव देवानामिन्द्रादीनामपि देव, हे जगत्पते, दैत्येन्द्रस्य तपसा तप्ताः वयं दिवि द्युलोके स्थातुं न शक्नुमः ॥ ६ ॥

हे भूमन्, यदि त्वं लोकानां क्षेमं मन्यसे तर्हि हे अभिभो सर्वाभिभवक्षम ! तव वलिहाराः हविर्भागप्रदाः पूजाकारिणो वा सर्वे लोकाः यावन्न नङ्क्ष्यन्ति नाशं न यास्यन्ति तावदेव ततःपूर्वमेव तस्य दैत्येन्द्रस्य तपोऽग्नेरुपशमं वरप्रदानरूपोपायेन विधेहि कुरु ॥ ७ ॥

दैत्यस्य गूढाभिसन्धिं ब्रह्मणस्तस्मिन् द्वेषमुत्पादयितुं विज्ञापयन्त आहुः–तस्येति । दुश्चरमन्यैःकर्त्तुमशक्यन्तपश्चरतः कुर्वतः तस्य दैत्यस्यायं किल सङ्कल्पः यद्यपि सर्वज्ञस्य तवाविदितं किन्तु, किमपि नास्ति. तथाप्यस्मन्निवेदितं श्रूयतां त्वयेति शेषः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वहुकोटिसंख्या तत्कालेनानेकसंभारैरार्जितैरयोग्यं दुष्प्रापं योग्यञ्चानेकविधिसाधनैः सुसाध्यं तूष्णीं भावेनेत्यादिकं हिरण्यकशिपुतपश्चरणकथनव्याजेनाभिप्रेयतेऽस्मिन्नध्याये व्यधित्सत कर्तुमैच्छत् ॥ १-२ ॥

सम्वर्त्तार्कः प्रलयसूर्यः स्थानानि गमनवर्जनानीतस्ततो यात्रां मुक्त्वा स्वस्थानानि भेजुः ॥ ३—६ ॥

उपशमं परिहारम् वलिहारा उपहारार्थकाः ॥ ७—८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १——१० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तृतीये स तपस्तप्त्वा देवान् सुस्थितदुःस्थितान् ।
कृत्वा धातुः समायातात् स्तुतात् प्राप वरान् वरान् ॥

आत्मानं स्वम् एकएव राजत इत्येकराट् तं वक्ष्यमाणाभिप्रायेण ब्रह्मलोकपर्यन्तं स्वस्यैवैकाधिपत्यं कामयमानोऽभूदित्यर्थः ॥ १ ॥

अतएव तेपे इति ॥ २ ॥

स्थानानि स्वस्वगृहान् शत्रोस्तस्य शात्रवमनालक्ष्येत्यर्थः ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥

अभितो भवतीत्यभिभो हे सर्वाधिपते ! सविसर्गपाठे भो इति सम्बोधनं अभि अभितः ॥ ७ ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हिरण्यकशिपुतपःप्रसन्नोब्रह्मा तस्मै वरानदादितिवर्णयति तृतीये–हिरण्यकशिपुः आत्मानमजेयत्वादिगुणकं नास्ति प्रतिद्वन्द्वः प्रतिपक्षो यस्य तथाभूतम् एक एव राजते इत्येकराट् तं व्यधित्सत विधातुमैच्छत् ॥ १ ॥

ऊर्द्ध्वौ वाहू यस्य नभसि दृष्टिर्यस्य पादाङ्गुष्ठेनाश्रिताऽवनिर्येन स दारुणं तपस्तेपे ॥ २ ॥

सम्वर्तार्कः प्रलयार्कोऽंशुभिरिव जटानां दीधितिभिः रश्मिभिः रेजे रराज पूर्वं ये शत्रुभयादलक्षिता भुवि चेरुस्ते देवाः स्थानानि स्वस्वगृहान् भेजिरे प्रापुः ॥ ३ ॥

सृष्ट्वा चराचरमिदं तपोयोगसमाधिना ।
अध्यास्ते सर्वधिष्ण्येभ्यः परमेष्ठी निजासनम् ॥ ९ ॥
तदहं वर्द्धमानेन तपोयोगसमाधिना ।
कालात्मनोश्च नित्यत्वात्साधयिष्ये तथात्मनः ॥ १० ॥
अन्यथेदं विधास्येऽहमयथापूर्वमोजसा ।
किमन्यैः कालनिर्धूतैः कल्पान्ते वैष्णवादिभिः ॥ ११ ॥
इति शुश्रुम निर्बन्धं तपः परममास्थितः ।
विधत्स्वानन्तरं युक्तं स्वयं त्रिभुवनेश्वर ! ॥ १२ ॥
तवासनं द्विजगवां पारमेष्ठ्यं जगत्पते ! ।
भवाय श्रेयसे भूत्यै क्षेमाय विजयाय च ॥ १३ ॥
इति विज्ञापितो देवैर्भगवानात्मभूर्नृप ! ।
परीतो भृगुदक्षाद्यैर्ययौ दैत्येश्वराश्रमम् ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विष्वगीरितः सर्वतः प्रसृतः तिर्यगूर्द्ध्वमधोलोकानतपत् ततापं ॥ ४ ॥

नद्यश्चोदन्वन्तश्च नद्युदन्वन्तः चुक्षुभुः द्वीपैरद्रिभिश्च सहिता भूश्चचाल ग्रहैः सह ताराः निपेतुः ॥ ५ ॥

तेन तन्मूर्द्धसमुद्भूतेनाग्निना ॥ ६ ॥

अभितोभवतीत्यभिभूस्तत्सम्बोधने हे अभिभो ! सर्वाधिपते ! यावत्तव बलिहाराः पूजाकारिणः न नङ्क्ष्यन्ति ततःप्रागेव तस्योपशमं विधेहि कुरु ॥ ७ ॥

दुश्चरं तपश्चरतस्तस्यायं वक्ष्यमाणः सङ्कल्पः यद्यपि तव किं न विदितं सर्वं विदितमेव. अथाप्यस्माभिर्निवेदितं त्वया श्रूयताम् ॥ ८ ॥

भाषा टीका ।

नारदउवाच ।

श्रीनारदजी बोले, कि-हे राजन् ! हिरण्यकशिपुने अपने को अजेय अजर अमर और अप्रति द्वन्द्वी एक राजा कर लिया ॥१॥
क्योंकि ? उसने मंदरपर्वत की गुहा में ऊंचे को बाहू उठाकर आकाश में दृष्टि लगाकर पैरके अंगुष्ठ मात्र से पृथ्वी पर खडा होकर परमदारुण तप किया ॥ २ ॥

तब तो वह अपने जटाओं की किरणों से सूर्य के तद्वत् दीप्त हुआ ॥ जब वह तप करने लगा तब देवता लोग फिर अपने २ स्थानों पर पहुंच गये जो कि पहिले पृथ्वी पर विचरते थे ॥ ३ ॥

उसके मूर्द्धा से निकला हुआ धुआं सहित तपो मय अग्नि नीचे ऊपर और चारों तरफ के लोकों को तपाता हुआ ॥ ४ ॥
उस समय नदी और समुद्र क्षुभित होगये द्वीपों सहित पृथ्वी कांपने लगी आकाश से ग्रहों सहित तारे टूट २ कर नीचे गिरने लगे और दशों दिशा भी जलने लगी ॥ ५ ॥
तिसी से तपे हुए देवता स्वर्ग को छोडकर ब्रह्म लोक पहुंचे । और विधाता से विज्ञापन करने लगे कि हे देव देव ! हे जगत्पते ! हिरण्यकशिपु के तप से तपे हुए हम लोग स्वर्ग में रहने को समर्थ नहीं हैं । यदि आप विचारो तौ उसकी शांति करो. हे सर्वाधिपते ! जब तक आपके भेट देने वाले लोक न नष्ट होजावे तिसके पूर्वमें शांतिकरो ॥ ६—७ ॥

घोर तप करने वाले उस हिरण्यकश्यप का ऐसा संकल्प है । आपको क्या नहीं विदित है ? तौ भी निवेदन सुनीइये ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तपोयोगयोः समाधिना निष्ठया सर्वधिष्ण्येभ्यः श्रेष्ठं निजासनं सत्यलोकं यथा अध्यास्तेऽधितिष्ठति ॥ ९ ॥

तत्तथैवाऽऽत्मनः साधयिष्यामि. ननु, ब्रह्मणातिदीर्घायुषा तपस्तप्त्वा तत्साधितमन्यः कुतस्तत्साधयेत्तत्राहुः--कालात्मनोरिति ।

न ददर्श प्रतिच्छन्नं वल्मीकतृणकीचकैः ।
पिपीलिकाभिराचीर्णं मेदस्त्वङ्मांसशोणितम् ॥ १५ ॥
तपन्तं तपसा लोकान् यथाभ्रापिहितं रविम् ।
विलक्ष्य विस्मितः प्राह प्रहसन् हंसवाहनः ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यद्यप्यायुषोऽल्पत्वेन देहो वारंवारं म्रियेत तथापि कालस्यात्मनश्च नित्यत्वाद्बहुभिर्जन्मभिस्तपस्तप्त्वा तत्पदं साधयिष्याम्येवेति ॥ १० ॥

वर्धमानेनेति यदुक्तं तदभिप्रायमाह—अन्यथेति । अन्यथा सुरासुरादिव्यत्ययेन अयथापूर्वं पुण्यपापादिव्यत्ययेन इदं जगद्विधास्यामि अन्यैर्वैष्णवादिभिर्ध्रुवादिपदैः किं प्रयोजनमतस्तदेव साधयिष्यामि ॥ ११ ॥

इति त्वत्पदापहरणे तस्य निर्बन्धं शुश्रुमः अत एवासौ तपः परममास्थितो वर्तते यदत्रयुक्तं तदनन्तरमेव विधत्स्व ॥ १२ ॥

अन्यथा तव स्थानभ्रंशे सति साधूनामनिष्टं स्यादिति शोचन्त आहुः—तव पारमेष्ठ्यमिदमासनम् द्विजानां गवाञ्च भवायोद्भवाय श्रेयसे सुखाय भूत्यै ऐश्वर्याय क्षेमाय लब्धपालनाय विजयायोत्कर्षाय ॥ १३ ॥ १४ ॥

वल्मीकादिभिः प्रतिच्छन्नं प्रथमं न ददर्श पश्चात्कथञ्चिद्विलक्ष्य तं प्राहेति द्वयोरन्वयः। पिपीलिकाभिराचीर्णं समन्ताद्भक्षितं मेदश्च त्वक्च मांसं च शोणितं च यस्य ॥ १५ ॥

अभ्रैरापिहितं छन्नं रविमिव विलक्ष्य विस्मितः प्राह ॥ १६ ॥ १७ ॥

———

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

कोऽसौ संकल्पस्तत्राहुः—सृष्ट्वेति । सर्वधिष्ण्येभ्यः इन्द्रादिस्थानेभ्यः परमे स्थाने तिष्ठतीति परमेष्ठी ब्रह्मा तपोयोगे यः समाधिर्निष्ठा तेन चराचरात्मकमिदं सर्वं जगत्सृष्ट्वा यन्निजासनं सर्वोत्कृष्टं सत्यलोकमध्यास्ते ॥ ९ ॥

तदेवासनमहमात्मनो मम वर्द्धमानेन तपोयोगसमाधिना साधयिष्ये इति. ननु, ब्रह्मणा दीर्घायुषा तपस्तप्त्वा तत्साधितम्. अन्यः कथं तत्साधयेत् ? तत्राहुः-कालात्मनोश्च नित्यत्वादिति। यद्यप्यायुरल्पं तथापि कालस्यात्मनश्च नित्यत्वाद्बहुभिर्जन्मभिः साधयिष्ये इत्यभिसन्धिरित्यर्थः ॥ १० ॥

अभिसन्ध्यन्तरमाहुः-अन्यथेति । तपोबलेनाहमिदं जगदन्यथा अधरोत्तरमयथापूर्वं देवासुरादिव्यत्ययञ्च करिष्ये कल्पान्तैः कल्पावधिभिरत एव कालेन निर्वृत्तैर्विनाश्यैर्वैष्णवादिभिः पदैः वैकुण्ठादिभिः किं प्रयोजनं न किमपीत्यर्थः। अनेन "सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी" इत्युक्तरीत्या स्थायिनो वैष्णवपदस्यास्थिरत्वं सत्यादिलोकानां स्थिरत्वञ्चाभिसंहितवतो दैत्यस्य केवलतामसबुद्धिमत्त्वमावेदितम् ॥ ११ ॥

इतीत्थं त्वत्पदापहरणे तस्य निर्बन्धमभिसन्धिरूपं शुश्रुमः तदर्थमेव परमं तप आस्थितः अतो हे त्रिभुवनेश्वर ! अत्र कर्तुं यद्युक्तं तदनन्तरमाश्वेव स्वयमेव विधत्स्व कुरु ॥ १२ ॥

हे जगत्पते ! तवेदं पारमेष्ठ्यं सर्वोत्कृष्टमासनं स्थानं द्विजानां गवाञ्च भवाद्यर्थं तव स्थानभ्रंशे द्विजानां गवाञ्च न भवादिकमस्तीति भावः। तत्र, भवः अलभ्यलाभः क्षेमो लब्धपालनं श्रेयो धर्मादिपुरुषार्थः भूतिरैश्वर्यं विजयः उत्कर्षः ॥ १३ ॥

इतीत्थं देवैर्विज्ञापितो भगवानात्मभूः परमात्मनो जातो ब्रह्म भृग्वाद्यैः परिवृतो दैत्येश्वरस्याश्रमंप्रति ययौ ॥ १४ ॥

वल्मीकादिभिः वल्मीकैस्तृणैः कीचकैर्वेणुभिश्च प्रतिच्छन्नं तं दैत्यं प्रथमं हंसवाहनो ब्रह्मा न ददर्श ततश्च पश्चात्कथञ्चिद्विलक्ष्य विस्मितः प्रहसंस्तं प्राहेति द्वयोरन्वयः । कथंभूतं विलक्ष्य, पिपीलकाभिराचीर्णमासमन्ताद्भक्षितं मेदश्च त्वक्च मांसश्च शोणितं च यस्य ॥ १५ ॥

तपसा तपोऽग्निना लोकांस्तपन्तं कमिव विलक्ष्याभ्रैः पिहितं छन्नं रविं यथा सूर्यमिव ॥ १६ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

किं तद्विज्ञापनमत्राह—सृष्ट्वेति । ब्रह्मा तपोज्ञानादिनेदं चराचरं सृष्ट्वा सर्वधिष्ण्येभ्यो रुद्रादिपदेभ्यः परं यन्निजासनमध्यास्ते "अधिशीङ्स्थासांकर्म" इति सप्तम्यर्थे द्वितीया. अहं तदात्मनः साधयिष्ये इत्यन्वयः ॥ स्वनाशे दुर्घटमत्राह—कालात्मनोरिति। कालस्यात्मनश्चेतनस्य च नित्यत्वात् अविनाशात् अन्यस्य त्वसाध्यत्वे हिरण्यकशिपोरीदृशं कर्म नाद्भुतं यतो ब्रह्माणमेकमन्तरेणात्मयोग्याज्ञानेन रागादिना वा मोहिताः जानन्तोपि स्वासदृशं कर्माचरन्तो दृश्यन्ते, तदुदितम्—

"जानतामपि कर्तव्यं कर्मात्मसदृशं सदा ।
तत्रात्मसदृशाज्ञानाद्रागाद्यैर्वा विमोहिताः ॥
जानन्तोपि ह्यसदृशं कर्म कुर्युरृते विभुम् ।
चतुरास्यं सनायोग्यं कर्म कुर्यात्कथञ्चन" ॥ इति

नचैतत्तपआदिसाध्यम् अयोग्यत्वात्—

"तपसा विद्यया वापि ज्ञानध्यानादिना तथा ।
व्यस्तैः समस्तैरथवा कुर्वता यत्नमुत्तमम् ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

सम्भारविक्षेपशतैर्बहुकोटिभिरेव च।
न शक्यते समारोढुं ब्रह्माद्ययोग्यपदं त्विति" ॥

तस्माद्योग्यमेवानुष्ठेयं नायोग्यमिति सिद्धम्. एवं तर्हि चेत्तर्हि किमर्थं तपआदिविघ्नं कुर्वन्तीति चेन्न. तपआदीनां निष्फलत्वपरिहारार्थत्वात्—

"तपाऽऽचरतां कुर्युर्दैत्यानां सुरनायकाः।
विघ्नं तु तपआदीनां वैयर्थ्यस्यापनुत्तये" ॥

इति वचनात् ॥ ९—१० ॥

वैष्णवो ब्रह्मादिः कर्ता येषां ते तथा तैर्ब्रह्मनिर्मितैरित्यर्थः। "ब्रह्मा स्वयम्भूर्द्रुहिणो वैष्णवः शतधृत्तथा" इतिशब्दनिर्णये. तथापि साक्षाद्विष्णोः पदमत्रोच्यते इति किं न स्यादत्राह—कालनिर्धूतैरिति। तर्हि कियन्तं कालं स्थिरैरिति तत्राह, कल्पान्तैरिति। मन्वन्तरादिकल्पावसानिकैः "न यत्र माया न रजस्तमश्च" इत्यादिना विष्णोः पदस्य वैलक्षण्योक्तेः ॥ ११ ॥

निर्बन्धमसदाग्रहम् ॥ १२ ॥

ननु, हिरण्यकशिपोरन्येषां पदानि विहाय तव पदाकाङ्क्षायां को विशेषहेतुरत्राह—तवेति। तवासनं सकलदुःखानि निरस्य स्थातुं योग्यं पदं पारमेष्ठ्यं अत्यन्तसुखकारणं यस्मात्स्वमाज्ञगतां भवाय ज्ञानादिगुणसमृद्ध्यै भूत्यै समृद्धस्य पुनर्ह्रासराहित्याय श्रेयसे संसारान्मुक्तये क्षेमाय रक्षणाय विजयायेन्द्रियजयाय च भवति तस्मादत्युत्तमपदत्वाद्धिरण्यकशिपुरचीकॢपत्. तदुक्तम्—

"भवाय श्रेयसे चैव न कश्चित्तदपेक्षते।
मधुकैटभयोश्चैव हिरण्यादेस्तथैव च॥
नान्यो ब्रह्मपदं वाञ्छत्यृजून्योग्यान्विना क्वचित्।
ततः श्रेयांसि वाञ्छन्ति न तु तत्पदमाप्तये ॥ इति.
भवो वृद्धिः समुद्दिष्टा श्रेयो मोक्ष उदाहृतः।
वृद्धस्य न पुनर्ह्रासो भूतिरित्येव कथ्यते" ॥ इति शब्दनिर्णये.

दिवि स्थातुं न शक्नुमः इत्यतो हिरण्यकशिपुना ब्रह्मपदावाप्त्यै सकामं तपसि स्थितमिति ज्ञायते. यः सकामं तप आचरति तस्य तपसा तत्तल्लोके स्थितिर्न घटते स्वतन्त्रकटाहान्तस्थितिवद्यस्तु निष्कामं तपः करोति तेन सुखावाप्तिः स्यात्. तदुक्तम् "सकामन्तु तपः क्रूरं लोकानां क्षोभकृद्भवेत्। इतरच्छान्तये सर्वलोकानां भवति ध्रुवम्" इति. "ब्रह्माणमभजद्ब्रह्मपदार्थं स हिरण्यकः" इति च ॥ १३—१४ ॥

कीचकैरनिलोद्धूतत्वेन स्वनद्वेणुभिः पिपीलिकाभिर्व्याप्तत्वात् क्वचिच्छरीरावयवैर्मेदसा क्वचित्त्वचा क्वचिच्छोणितेन च युक्तम् १५

तपन्तमित्यनेनापि तपसः क्रूरत्वमाह—मासा विततं अहो दैत्यानामयोग्ये वस्तुनि प्रयत्नातिशय इत्यालोच्य हसन् मन्दस्मितं कुर्वन् हंसवाहनो ब्रह्मा "विष्णुपद्मासनावुक्तौ परमेष्ठिहंसवाहनौ" इत्यभिधानम् ॥ १६ ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

किमन्यैरित्यासुरदृष्ट्या ॥ ११—१६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

तपास्माभिर्निवेदितं श्रूयतां सर्वधिष्ण्येभ्यः श्रेष्ठम् ॥ ९ ॥

वर्द्धमानेनेति। सांप्रतिकादपि परमेष्ठिनो मम प्रभावोऽधिको भविष्यतीति भावः। ननु, ब्रह्मणा अतिदीर्घायुषा तपस्तप्त्वा तत्साधितं त्वमेतावदायुष्कं कथन्तत्साधयिष्यसीति तत्राह—कालेति! यद्यप्यायुषोऽल्पत्वे मदीयस्थूलं देहो वा वारम्वारं नङ्क्ष्यति तदपि कालस्यात्मनश्च नित्यत्वाद्बहुभिर्जन्मभिस्तपस्तप्त्वा तत्तदात्मनः पारमेष्ठ्यासनं साधयिष्याम्येवेति ॥ १० ॥

ततश्च इदं जगदन्यथा विधास्ये इति ये ब्रह्मचर्य्यतपोव्रतादिभिरिह लोके दुःखिनस्ते परलोकेऽपि नरकभाजो दुःखिनः कर्त्तव्याः ये इह लोके वैषयिकसुखभोगमात्रनिरतास्त एव परलोके स्वर्गिणः वैषयिकसुखभोगोन्मुख्यमेव पुण्यमिष्टसाधनं च तत्संकोच एव पापमनिष्टसाधनमित्यादिकं प्रवर्त्तनीयम्। नन्वेवं पूर्वपूर्वमहाकल्पेषु न प्रवृत्तं तत्राह—अयथापूर्वमपि ओजसा स्वतेजसा विधास्ये। ननु, स्वेन सिषाधयिषितं पारमेष्ठ्यासनमेव किं सर्वधिष्ण्येभ्यः श्रेष्ठं मन्यसे तत्राह—किमन्यैरिति। वैष्णवादिभिर्ध्रुवादिपदैः किं प्रयोजनं कालनिर्धूतैरिति ध्रुवपदस्यानित्यत्वमननमसुरस्वभावत्वात् ॥ ११ ॥

इति त्वत्पदाहरणे तस्य निर्बन्धं शुश्रुम अत एवायं तपः परममास्थितः ॥ १२ ॥

तव पारमेष्ठ्यमिदमासनं भवाय कीदृशाय श्रेयसे उत्तमसृष्ट्यर्थमित्यर्थः। स चेदिदं प्राप्स्यति तदा विरुद्धं स्रक्ष्यतीति भावः भूत्यै सृष्टानां लोकानां धर्मादिसम्पत्त्यै तदधिकारे त्वधर्मैर्विपत्तिर्भाविनीति भावः। क्षेमाय कल्याणाय विजयाय उत्कर्षाय तदधिकारे तु अकल्याणपराभावावेव भाविनाविति भावः ॥ १३ ॥

यथाविति तर्ह्यधुनैव वरदानैस्तत्तपसो निवर्तयामीत्याशयेन ॥ १४ ॥ १५ ॥

प्रथमं वल्मीकादिभिः प्रतिच्छन्नं तं न ददर्श ततः कथं चित्तं विलक्ष्य प्राहेति द्वयोरन्वयः। आचीर्णं समन्ताद्व्याप्तं मेघाच्छादितं रविमिव ॥ १६ ॥ १७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

यथा तपोयोगयोस्तपश्चित्तैकाग्र्ययोः समाधिना सम्पादनेन परमेष्ठी ब्रह्मा सर्वधिष्ण्येभ्यः श्रेष्ठमिति शेषः। निजासनं सत्यलोकम् अध्यास्ते तिष्ठति ॥ ९ ॥

तथा तपोयोगसमाधिना वर्द्धमानेन ततोऽप्यधिकेन तत्परमे-

ब्रह्मोवाच ।

उत्तिष्ठोत्तिष्ठ भद्रं ते तपःसिद्धोऽसि काश्यप ! ।
वरदोऽहमनुप्राप्तो व्रियतामीप्सितो वरः ॥ १७ ॥
अद्राक्षमहमेतत्ते हृत्सारं महदद्भुतम् ।
दंशभक्षितदेहस्य प्राणा ह्यस्थिषु शेरते ॥ १८ ॥
नैतत्पूर्वर्षयश्चक्रुर्न करिष्यन्ति चापरे ।
निरम्बुर्धारयेत्प्राणान्को वै दिव्यसमाः शतम् ॥ १९ ॥
व्यवसायेन तेऽनेन दुष्करेण मनस्विनाम् ।
तपोनिष्ठेन भवता जितोऽहं दितिनन्दन ! ॥ २० ॥
ततस्त आशिषः सर्वा ददाम्यसुरपुङ्गव ! ।
मर्त्यस्य ते अमर्त्यस्य दर्शनं नाफलं मम ॥ २१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

छ्यासनमात्मनः साधयिष्ये । ननु, तद्वत्त्ववायुर्नास्तीत्यत आह— कालात्मनोर्नित्यत्वादिति ॥ १० ॥

अहमिदं विश्वमन्यथा परमेष्ठिरचनाप्रकारादन्यप्रकारेण अयथापूर्वं परमेष्ठिनिर्मिताद्विपरीतम् ओजसा स्वतेजसा विधास्ये कल्पान्ते कालनिर्धूतैर्वैष्णवादिभिर्लोकैः किं प्रयोजनम् कालनिर्धूतेषु वैष्णवस्यापि लोकस्य गणना तु तामसीबुद्धियोगात् "अधर्मं धर्ममिति या मन्यते तमसावृता । सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी" इति श्रीमुखवचनात् ॥ ११ ॥

इति स्वत्पदापहरणे तस्य निर्बन्धं सङ्कल्पं शुश्रुमः अत एव परमं तप आस्थितः यदत्रयुक्तं तदनन्तरमेव विधत्स्व कुरु ॥ १२—१३—१४ ॥

वल्मीकादिभिः प्रतिच्छन्नम् पिपीलिकादिभिः आचीर्णं सर्वतो भक्षितं मेदश्च त्वक्च मांसञ्च शोणितञ्च यस्य तं प्रथमं न ददर्श ॥ १५ ॥

पश्चादभ्रैरपिहितं छन्नं रविमिव विलक्ष्य प्राह ॥ १६—१७ ॥

भाषा टीका ।

यह कहता है कि ब्रह्मा अपने तप योग और समाधि के बल से सब लोक से श्रेष्ठ सत्य लोक का अधिष्ठाता हुआ है ॥ ९ ॥

इस वास्ते मैं भी तप योग और समाधि के बल को बढाकर अपने को सिद्ध करूंगा क्यों कि ? काल का अंत नही और आत्मा भी नित्य है ॥ १० ॥

इस जगत को मैं पुण्यपापादि के व्यत्यास करके अन्य प्रकार का ही करूंगा ॥ क्योंकि ? कल्पान्त में काल से नष्ट होने वाले अन्य ध्रुव लोक आदि से क्या प्रयोजन हैं ॥ ११ ॥

हम लोगों ने उसका ऐसा निर्बन्ध सुना है इसी कारण वह परम तप में स्थित है । आप स्वयं त्रिभुवन के ईश्वर हो जैसा युक्त समुझें तैसा यत्न करें ॥ १२ ॥

क्योंकि ? हे जगत्पते ! आपकी परमेष्ठीपने की गद्दी गौ ब्राह्मणों के वृद्धि सुख ऐश्वर्य पालन और उत्कर्ष के लिये है ॥१३॥

हे नृप ! भगवान् श्रीब्रह्माजी से देवताओं ने जब ऐसे विज्ञापन किया तब ब्रह्माजी भी भृगुदक्षादिकों के सहित दैत्येश्वर हिरण्यकश्यप जहां तप करता था उस आश्रम पर गये ॥ १४ ॥

वहां देखें तो वल्मीक तृण और बांसो से ढका हुआ, और पिपीलिकाओं ने चर लिया त्वक् मेद मांस और रुधिर जिसका ॥ १५ ॥

और तप से लोकों को तपा रहा, जैसे मेघ से ढका हुआ सूर्य ऐसे उस दैत्य को देखकर हंस वाहन ब्रह्माजी विस्मय को प्राप्त होकर हंसते हुये बोले ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हृत्सारं धैर्यं दंशैर्मक्षिकादिविशेषैर्भक्षितो देहो यस्य ॥ १८ ॥

निरम्बुर्निषिद्धमम्बु येन सः त्यक्तोदक इत्यर्थः ॥ १९ ॥

ते त्वया अनेन व्यवसायेनैव तावज्जितोऽहम् तपोनिष्ठेन भवता तु सुतराञ्जितः ॥ २० ॥

मर्त्यस्य तवामर्त्यस्य मम दर्शनमफलं निष्फलं न भवति ॥२१॥

नारद उवाच ।

इत्युक्त्वादिभवो देवो भक्षिताङ्गं पिपीलिकैः ।
कमण्डलुजलेनौक्षद्दिव्येनामोघराधसा ॥ २२ ॥
स तत्कीचकवल्मीकात्सह ओजोबलान्वितः ।
सर्वावयवसम्पन्नो वज्रसंहननो युवा ।
उत्थितस्तप्तहेमाभो विभावसुरिवैधसः ॥ २३ ॥
स निरीक्ष्याम्बरे देवं हंसवाहमवस्थितम् ।
ननाम शिरसा भूमौ तद्दर्शनमहोत्सवः ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आदौ भवतीत्यादिभवो ब्रह्मा औक्षत्प्रोक्षितवान् ॥ २२ ॥

वज्रवत्संहननमङ्गदार्ढ्यं यस्य तप्तस्य हेम्न इवाभा देहकान्तिर्यस्य ॥ २३ ॥

तस्य दर्शनेन महानुत्सवो यस्य ॥ २४ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उक्तमेवाह—उत्तिष्ठेति । हे काश्यप ! उत्तिष्ठोत्तिष्ठ ते तव भद्रं कुशलमभीष्टमिति यावत् भविष्यति यतस्त्वं तपस्सिद्धः तपसा सिद्धः फलपर्यन्ततपस्सम्पन्नः अत एव च वरदस्त्वदभीष्टदोऽहमनुप्राप्तः “अत ईप्सित इष्टोऽर्थो व्रियतां याच्यताम् ॥ १७ ॥

ते तवैतत् हृत्सारं धैर्यं महदद्भुतमङ्गाश्चं दृष्टवानस्मि हि यस्माद्दंशैर्भक्षितो देहो यस्य तस्य प्राणा अस्थिषु शेरते अस्थीनि भक्षयन्तास्तिष्ठन्तीत्यर्थः ॥ १८ ॥

पूर्वर्षयो भृग्वादयोऽपि नैवंविधाः तपश्चक्रुः अपरे अर्वाचीना न करिष्यन्तीति किम्पुनर्वक्तव्यम्. को वै पुमान्देवमानेन शतं समाः वर्षाणि निरम्बु त्यक्तोदकं यथाभवति तथा प्राणान्धारयेत् ? न कोपीत्यर्थः ॥ १९ ॥

हे दितिनन्दन ! मनस्विभिर्योगिभिरपि दुष्करेण तेनानेन व्यवसायेनैव तावज्जितोऽहं तपोनिष्ठेन भवता तु सुतराञ्जितः ॥२०॥

यतोऽहं जितस्ततस्ते तुभ्यम् हे असुरश्रेष्ठ ! सर्वा आशिषः इष्टार्थान् ददामि मर्त्यस्य मरणधर्मवतस्ते तव अमर्त्यस्य तद्रहितस्य मम दर्शनमफलसाधनं न भवति किन्तु सफलमेवेत्यर्थः ॥ २१ ॥

इतीत्थमुक्त्वा आदिदेवो ब्रह्मा अमोघराधसा अमोघप्रभावेन दिव्येन कमण्डलुजलेन पिपीलिकैर्भक्षितमङ्गं यस्य तं दैत्यं औक्षत्प्रोक्षितवान् ॥ २२ ॥

ततः प्रोक्षणानन्तरं कीचकाच्छन्नवल्मीकादेधसः काष्ठनिचयाद्विभासुरग्निरिव उत्थितः वल्मीकं भित्वा बहिर्निर्गत इत्यर्थः । कथंभूतः सहसा प्राणबलेन ओजसा इन्द्रियबलेन बलेन देहबलेन चान्वितः तथा सर्वैरवयवैः पाणिपादादिभिः सम्पन्नो युक्तः वज्रवत्संहननमङ्गदार्ढ्यं यस्य स युवा यौवनयुक्तश्च तप्तस्य हेम्न इवाभा यस्य सः तप्तसुवर्णतुल्यकान्तिरित्यर्थः ॥ २३ ॥

एवंविधः उत्थायाम्बरे हंसवाहनमवस्थितमधिष्ठितं देवं ब्रह्माणं निरीक्ष्य स दैत्यस्तस्य ब्रह्मणो दर्शनेन महानुत्सवः सन्तोषो यस्य तादृशः शिरसा भूमौ ननाम ॥ २४ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हृदो हृदयस्य सारं दार्ढ्यं दंशाः सूचीमुखाः शूकाः ते तव अस्थिष्वेव शेरते इति यस्मात्तस्माद्द्भुतम् ॥ १८ ॥

इतोऽप्यद्भुतमित्याह--नैतदिति । निरम्बुर्जलपानरहितः “निर्निश्चयनिषेधयोः” इत्यमरः “स्युरेव तु पुनर्वै वेत्यवधारणवाचकाः” इत्यभिधानाद्वा इत्यनेन दिव्यशतसमास्वेकापि किञ्चिदूना न भवतीत्याह ॥ १९ ॥

इनः समर्थः तेन व्यवसायेन अमनस्विभिर्मनोबलरहितैः दुष्करेण दुस्साधनेन जितो वशीकृतः “पराभूतं वशत्वञ्च जितमित्युच्यते बुधैः” इति शब्दनिर्णये ॥ २० ॥

ददामि दास्यामीतीच्छानि मर्त्यस्य मरणशीलमनुष्यशरीरं प्राप्तस्य ते तव अमर्त्यस्य जरामरणशून्यस्य देवस्य मम दर्शनमभूद्धि यस्मात्तस्मान्निष्फलं नैव ॥ २१ ॥

आदेर्हरेर्भवो जन्म यस्य स तथा विष्णुभूरित्यर्थः । सर्वस्यादौ भवतीति वा औक्षत् प्रोक्षितवान् दिव्यत्वमाह, अमोघेति ॥ २२ ॥

एधसः इन्धनात् ॥ २३ ॥ २४ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

उत्तिष्ठेत्यनेन पूर्वं मूर्द्धस्थितस्य पश्चादुपवेशः सूचितः ॥ १७ ॥

उत्थाय प्राञ्जलिः प्रह्व ईक्षमाणो दृशा विभुम्।
हर्षाश्रुपुलकोद्भेदो गिरा गद्गदयाऽगृणात् ॥ २५ ॥

हिरण्यकशिपुरुवाच।

कल्पान्ते कालसृष्टेन योऽन्धेन तमसा वृतम्।
अभिव्यनक् जगदिदं स्वयञ्ज्योतिः स्वरोचिषा ॥ २६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

दंशभक्षितत्वं पूर्वं पिपीलिकाभक्षितत्वं पश्चादिति ज्ञेयम् ॥ ॥ १८—३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

इत्सारं धैर्य्यम् ॥ १८ ॥ १९ ॥ २० ॥

असुरजातित्वेऽपि मरणधर्मवत्वान्मर्त्त्यस्य ते मर्त्त्येन त्वया ॥२१॥

पिपीलिकैरिति । पिपीलिकादंशादिभिरित्यर्थः । आदिभवो ब्रह्मा अमोघमव्यर्थं राधः संसिद्धिर्यतस्तेन औक्षत प्रोक्षितवान् ॥ २२ ॥

वज्रस्येव संहननमङ्गस्य दार्ढ्यं यस्य सः ॥ २३ ॥ २४ ॥ २५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

इत्सारं धैर्यं दंशैर्भक्षितो देहो यस्य तस्य प्राणा अस्थिषु शेरते तिष्ठन्ति ॥ १८ ॥

निरम्बु निर्जलं यथा स्यात्तथा दिव्यसमाः शतं मानेन शतं सम्वत्सरान् प्राणान् को धारयेन्न कोऽपीत्यर्थः ॥ १९ ॥

मनस्विनां मनस्विभिर्दुष्करेण ते तव व्यवसायेन तपोऽर्थसङ्कल्पेनैव अहं जितः तपोनिष्ठेन भवता तु सुतरां जितोऽस्मीत्यन्वयः ॥ २० ॥

आशिषः वाञ्छितानर्थान् ॥ २१ ॥

दक्षादिप्रजापतिभ्यः आदौ भवो जन्म यस्य सः अमोघराधसा सफलप्रभावेन औक्षितवान् ॥ २२ ॥

राधसो विभावसुरिव तस्मात्कीचकवल्मीकात् सह ओजो बलान्वितः मनइन्द्रियदेहशक्तियुक्तः वज्रस्येव संहननमङ्गवार्ढ्यं यस्य स उत्थितः ॥ २३ ॥

तस्य दर्शनेन महोत्सवो यस्य सः ॥ २४ ॥

भाषा टीका।
ब्रह्मोवाच।

ब्रह्माजी बोले कि हे काश्यप! हे हिरण्यकश्यप! तुम तपसे सिद्ध हुए तुमारा मंगल हो तुम उठो २ हम वरदान देने वाले प्राप्त हुए जो तुमारा इच्छित वर है उसे मागलो ॥ १७ ॥

हमने तुमारा बड़ा अद्भुत धैर्य देखा देखो तुमारे देह को वन मक्षिकाओं ने भक्षण कर लिया तुमारे प्राण तौ अस्थियों में सोरहे हैं ॥ १८ ॥

ऐसा पूर्व ऋषियों ने भी नहीं किया और भी कोई लोग न कर सकेंगे ॥ भलां विना अन्न के देवताओं के सौ वर्ष तक कौन प्राण धारण करेगा ॥ १९ ॥

हे दितिनन्दन! मनस्वियों से भी दुष्कर तुमारे इस व्यवसाय से और तप में निष्ठावाले ऐसे तुम से हम जित हुए अर्थात् हार चुके ॥ २० ॥

हे असुर श्रेष्ठ! इसी से हम तुमारी सब कामनाओं को देते हैं तुमारे सदृश मरण धर्म वाले को हम सदृश देवताओं का दर्शन विफल नहीं हुआ करता है ॥ २१ ॥

नारद उवाच

नारदजी बोले, कि—श्रीब्रह्माजी ने ऐसे कहकर पिपीलिकाओं ने भक्षण किया अंग जिसका ऐसे हिरण्यकश्यप के शरीरको अमोघ प्रभाव वाले दिव्य कमंडलु के जल से प्रोक्षण किया ॥२२॥

वह हिरण्यकशिपु बांसों के वल्मीक से सह ओज बल से युक्त अवयवों से संपन्न वज्र सदृश पुष्टांग युवा सुवर्ण सदृश कांति वाला ऐसा इंधन से जैसे अग्नि इस प्रकार उठकर खड़ा हुआ २३

वह हिरण्यकशिपु आकाश में स्थित हंस वाहन श्रीब्रह्माजी को देखकर उनके देखने से बड़ा उत्सव युक्त होकर शिर से भूमि में प्रणाम करता हुआ ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

हर्षेणाश्रूणि पुलकोद्भेदश्च यस्य सः ॥ २५ ॥

अन्धेन निबिडेन तत्र हेतुः । कालसृष्टेन प्रकृतिगुणरूपेण न तु ध्वान्तेन तमसा वृतमिदं जगद्योऽभिव्यनगभिव्यक्तम् अकरोत् यश्च त्रिगुणेनाऽऽत्मना इदं जगत्सृजत्यवति पालयति लुम्पति संहरति च तस्मै रजःसत्त्वतमसां धाम्ने आश्रयाय महते पराय परमेश्वराय नम इति द्वयोरन्वयः ॥ २६ ॥ २७ ॥

आत्मना त्रिवृता चेदं सृजत्यवति लुम्पति ।
रजःसत्त्वतमोधाम्ने पराय महते नमः ॥ २७ ॥
नम आद्याय बीजाय ज्ञानविज्ञानमूर्तये ।
प्राणेन्द्रियमनोबुद्धिविकारैर्व्यक्तिमीयुषे ॥ २८ ॥
त्वमीशिषे जगतस्तस्थुषश्च प्राणेन मुख्येन पतिः प्रजानाम् ।
चित्तस्य चित्तेर्मनइन्द्रियाणां पतिर्महान् भूतगुणाशयेशः ॥ २९ ॥
त्वं सप्ततन्तून्वितनोषि तन्वा त्रय्या चातुर्होत्रकविद्यया च ।
त्वमेक आत्मात्मवतामनादिरनन्तपारः कविरन्तरात्मा ॥ ३० ॥
त्वमेव कालो निमिषो जनानामायुर्लवाद्यावयवैः क्षिणोषि ।
कूटस्थ आत्मा परमेष्ठ्यजो महांस्त्वं जीवलोकस्य च जीव आत्मा ॥ ३१ ॥
त्वत्तः परं नापरमप्यनेजदेजच्च किञ्चिद्व्यतिरिक्तमस्ति ।
विद्याः कलास्ते तनवश्च सर्वा हिरण्यगर्भोऽसि बृहत्त्रिपृष्ठः ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अत्र च स्वप्रकाशत्वं जगत्प्रकाशकत्वं तत्कारणत्वं तत्सृष्ट्यादिकर्तृत्वं परमेश्वरत्वं महत्वञ्चेति षड्विधत्वमुक्तम्. तदेव प्रपञ्चयन्नमस्करोति—नमइति चतुर्भिः । बीजाय कारणाय तत्र हेतुः आद्याय ज्ञानं ज्ञप्तिर्विज्ञानं विषयाकारं ज्ञानं मूर्तिर्यस्य तस्मै अनेन स्वप्रकाशत्वं जगत्प्रकाशकत्वञ्च दर्शितम्. बीजायेति निमित्तत्वमुक्तम्. उपादानत्वमाह, प्राणादयो ये विकारास्तैरूपैर्व्यक्तिं कार्याकारमीयुषे प्राप्तवते ॥ २८ ॥

एवमात्मना त्रिवृता चेत्यनेनोक्तं कारणत्वं द्वेधा दर्शितम् महत्त्वमीश्वरत्वं चाह—त्वमिति । त्वमेव जगतो जङ्गमस्य तस्थुषः स्थावरस्य च ईशिषे नियन्ताभवसि केन मुख्येन प्राणेन सूत्रात्मरूपेण अतस्त्वं प्रजानांपतिः तासां चित्तस्य चित्तेश्च तत्परिणामभूतायाश्चेतनाया मनसश्च तन्नियम्यानामिन्द्रियाणाञ्च पतिः अतस्त्वमेव महान् भूतानामाकाशादीनां तद्गुणानां शब्दादिविषयाणामाशयानां तद्वासनानामीशश्च एतेनैव स्रष्टृत्वम् दर्शितम् ॥ २९ ॥

इदानीं यज्ञप्रवर्तकत्वेनांतर्यामित्वेन जगत्पालकत्वमाह—त्वमेव सप्ततंतूनग्निष्टोमादियज्ञान्विस्तारयसि, कथम् ? त्रय्या तन्वा वेदत्रयरूपेण कथम्भूतया चत्वारो होतारो यत्र तच्चातुर्होत्रकं कर्म तद्विषयतया विद्यया आत्मवतां प्राणिनामात्मभूतस्त्वमेवान्तरात्मा चान्तर्यामी कुतः यतः कविः सर्वज्ञः तत्कुतः एकोऽखण्डः तत्र हेतुः अनादिरनन्तपारश्चेति नास्त्यन्तः कालतः पारश्च देशतो यस्य सः ॥ ३० ॥

कालरूपेण संहर्तृत्वमाह—त्वमेवेति । लवाद्यैः कालावयवैः क्षिणोषि क्षपयसि तदेवं सृष्ट्यादिकर्तृत्वेऽपि निर्विकारत्वमेवाह, कूटस्थइति. तत्र हेतवः आत्मा ज्ञानरूपः परमेष्ठी परमेश्वरः अजो जन्मशून्यः महान् अपरिच्छिन्नः किञ्च जीवलोकएव कर्मवशाज्जन्मादिभिर्विक्रियते त्वन्तु तस्य जीवो जीवनहेतुः यतस्तस्याऽऽत्मा नियन्ता ॥ ३१ ॥

तत्कुतस्तत्राह—त्वत्तइति । त्वत्तोव्यतिरिक्तं यदि किञ्चिद्भवेत्तर्हि तस्मात्तव जन्मादिविकारो नियम्यत्वादिकं वा भवेत्तत्तु नास्तीत्याह, परं कारणमपरं कार्यम् तत्र चैअजङ्गममनेजत्स्थावरञ्च त्वद्व्यतिरिक्तं नास्ति. ननु, मद्बोधकशास्त्रं व्यतिरिक्तमस्तीति चेन्न यतो विद्या वेदोपवेदादिविद्यास्थानानि कलाश्च तदङ्गानि तवैव तनवो ननु त्वद्व्यतिरिक्ताः तत्कुतः यतस्त्वं बृहद्ब्रह्मैवासि तदपि कुतस्तत्राह हिरण्यरूपं ब्रह्माण्डं गर्भे यस्य सः त्रिपृष्ठस्त्रिगुणात्मकस्य प्रधानस्य पृष्ठे परतः स्थितः "अक्षरात्परतः परः" इत्यादि श्रुतेः ॥ ३२ ॥.

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत उत्थाय प्राञ्जलिः बद्धाञ्जलिः प्रह्वः नम्रः दृशा चक्षुषा विभुं ब्रह्माणं निरीक्षमाणः हर्षेणाश्रूणि पुलकोद्भेदो रोमोद्गमश्च यस्य तादृशः गद्गदया गिरा अगृणात् अस्तौषीत् ॥ २५ ॥

तदेवाह कल्पान्त इत्यादिनवभिः । तामसत्वाद्ब्रह्माणमेव सर्वकारणं सर्वेश्वरञ्च मत्वा स्तौति. यद्वा, परमेश्वरधर्मारोपेण स्तौति—कल्पान्त इति । कल्पान्ते दैनं दिनकल्पान्ते कालेन निमित्तेन सृष्टेनान्धेन तमसा आवृतमिदं जगत्पुनर्यः स्वयंज्योतिः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्वप्रकाशरूपः स्वरोचिषा अभिव्यनक् अभिव्यक्तमकरोत् तस्मै नमः इत्युत्तरेणान्वयः ॥ २६ ॥

यश्च त्रिवृता सृष्ट्यादिशक्तित्रयवता आत्मना स्वेनैव इदं जगत्सृजति रक्षति लुम्पति संहरति च तस्मै रजआदिगुणत्रयस्य धाम्ने आश्रयाय पराय सर्वोत्कृष्टाय महते भूरिगुणाय तुभ्यं नमः ॥ २७ ॥

यतएवमत एव आद्याय वीजाय कारणकारणाय ज्ञानविज्ञानमूर्तये शास्त्रविवेकोत्थज्ञानगम्यमूर्त्तये प्राणैरिन्द्रियैरुभयेन्द्रियैः मनसा बुद्ध्या विकारैः पृथिव्यादिभूतैश्च व्यक्तिं कार्यरूपताम् ईयुषे प्राप्तवते तुभ्यं नमः ॥ २८ ॥

एवं कार्यकारणरूपेणावस्थितत्वमुक्तम् अथान्तरात्मत्वमाह—त्वमिति । जगतो जङ्गमस्य तस्थुषः स्थावरस्य च त्वमेव ईशिषे. अन्तरात्मतया नियमनधारकत्वमाह-प्राणेन मुख्येन मुख्यप्राणेनोपलक्षितस्त्वमेव, मुख्यप्राणनिर्वाहकस्त्वमेवेत्यर्थः। अत एव प्रजापतिः प्रजानां पतिः यत एव मनःपर्यन्तसकलेन्द्रियधारकमुख्यप्राणनिर्वाहकस्ततएव चित्तस्य चित्तेर्बुद्धेर्मनस इन्द्रियाणाञ्च पतिः निर्वाहकः न केवलं घटादेर्भूतलादिवद्धारकः किन्तु महाभूतानां पृथिव्यादीनां गुणानां शब्दादिगुणग्राहकाणामिन्द्रियाणामाशयस्यान्तःकरणस्य चेशोन्तःप्रविश्य नियन्ताऽन्तःप्रविश्य प्रशासनेन धारक इत्यर्थः ॥ २९ ॥

अन्तरात्मत्वमेव प्रपञ्चयति—सप्ततन्तून् सप्त त्रिधान् तन्तून् तन्यते विस्तार्यन्ते इति तन्तवः वैदिकाः क्रियाः पशुसोमेष्टिसत्राहीनहोमेष्टक चिदाग्निरूपेण सप्तविधास्तान्, यद्वा सप्तभिस्तन्यन्ते इति तथा तान्. अध्वर्युहोतृप्रस्तोतृप्रतिहर्तुद्गातृब्रह्मयजमानैः सप्तभिर्वितन्यते इति वा सप्ततन्तवस्तान् सप्त संस्था वा वितनोषि अन्तरात्मतया प्रवर्त्तयसि. कया त्रय्या वेदत्रयेण कथम्भूतया चतुर्होतृकविद्यया चतुर्होत्रादिसंज्ञकमन्त्रविद्यायुक्तया, अनेन यज्ञादिकर्तृकत्वमन्तरात्मतयोक्तम्. अथोपासनात्मकज्ञानप्रवर्त्तकत्वमाह—आत्मवतां प्रशस्तमनस्कानां योगिनां त्वमेक एवात्मा अन्तरात्मतया योगप्रवर्त्तक इति भावः । त्वमेव सत्यादिवाक्यप्रतिपाद्यस्वरूप इत्याह—अनादीति । अनादिः कालतः परिच्छेदरहितः अनन्तपारः अन्तो देशतः परिच्छेदः पारो वस्तुतः परिच्छेदस्तदुभयं यस्य नास्ति सोऽनन्तपारः अनेनानन्तशब्दार्थउक्तः, कविः सर्वज्ञः अनेन ज्ञानशब्दार्थ उक्तः, अन्तरात्मान्तर्यामित्व गतविकारास्पर्शेन नियन्ता त्वमेव, अनेन सत्यशब्दार्थ उक्तः ॥ ३० ॥

अथ कालान्तरात्मतया तन्नियन्तृत्वमाह—त्वमेवेति । त्वमेव अनिमिषः कालः कालशरीरकस्तन्नियन्ता अत एव लवाद्यैः कालावयवैस्त्वमेव जनानामायुर्जीवनं क्षिणोपि क्षपयसि त्वमेव कूटस्थो निर्विकार आत्मा परमात्मा परमेष्ठी निरतिशयस्थानवर्ती अजः कर्मायत्तजन्मादिशून्यः "महानज आत्मा" इति श्रुत्यर्थोऽत्राभिसंहितः । कृत्स्नस्य जीवलोकस्य जीवः जीवयिता आत्मा त्वमेव "कोह्येवान्यात्कः प्राण्यात्" इतिश्रुत्यर्थोऽत्राभिसंहितः॥ ३१ ॥

किंबहुना यत्किञ्चिदेजच्चरम् अनेजत् स्थावरञ्च त्वत्तः परमुत्कृष्टमपरं तुल्यञ्च नास्ति तथा व्यतिरिक्तमत्वदात्मकञ्च नास्ति त्वत्तोऽपकृष्टं त्वदात्मकञ्च सर्वं चराचरं जगदित्यर्थः। एवं रूपस्य तदात्मकत्वमुक्तम्. अथ नाम्नस्तदात्मकत्वमाह—विद्याः वेदाः कलाः उपवेदादयः सर्वाः शब्दात्मिकाः ते तव तनवः शरीरभूताः हिरण्यगर्भोऽसि हिरण्यात्मकं ब्रह्माण्डं गर्भे यस्य तथा भूतोऽसि "हिरण्यगर्भः समवर्त्तताग्रे" इत्याद्युक्तप्रतिपाद्यस्वरूपोसीत्यर्थः। स्वरूपेण गुणैश्च बृहन् त्रयाणां लोकानां पृष्ठो बहिर्भूतः परमव्योमनिलय इत्यर्थः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भक्तः प्रवणः ॥ २५ ॥

मिश्रामिश्रभेदेन द्विविधा स्तुतिर्वर्तते तत्र हिरण्यकशिपुर्मिश्रया परोक्षात्मगतया स्तुत्या देवतातृप्तिर्भवतीति तादृश्या स्तौति—कल्पान्त इत्यादिना । अत्र ये चतुर्मुखस्यासम्भाविता गुणास्ते तदन्तर्यामिण्येककार्यत्वेनैकस्थानस्थिते सर्वोत्तमे हरौ योज्याः तद्योग्यास्तत्र योज्याः न चैतावता स्तुतेर्भिन्नाधिकरणत्वमापन्नं तस्य तदधीनत्वेन नित्योपसंह्रियमाणगुणान्तर्भूतत्वेन तच्छ्रवणस्मरणाभ्यामन्तःकरणस्योल्लाससम्भवात्. तदुक्तम्—

"प्रायस्तु स्तुतिशब्देषु मिश्रा वाचो हरिं विना ।
केचिज्जीवगुणास्तत्र तन्नियन्तुर्हरेः परे ॥
एकस्थानैककार्यत्वाद्विष्णोः प्राधान्यतस्तथा ।
जीवस्य तदधीनत्वान्नाभिन्नाऽधिकृतं वचः" ॥ इति.

प्रलयकालप्रवर्तकेन हरिणा सृष्टेनान्धेन तमसा दुर्गाभिमन्यमानेनावृतमिदं जगदभिव्यनक् अभिव्यक्तं कृतवान् स्वरोचिषा स्वसामर्थ्येन ॥ २६ ॥

एतदेव विवृणोति—आत्मनेति। आत्मना क्षोभितया त्रिवृता त्रिगुणात्मिकया तेजोबन्नात्मिकया वा प्रकृत्या चेदं जगत्सर्जनादिक्रियाविशिष्टं करोति तस्मै नम इत्यन्वयः "रजःसत्त्वतमोधाम्ने" इत्यनेन सृष्ट्यादौ रजआदिगुणानां प्राधान्यं सूचयति—पराय महत इत्यनेन। "अणोरणीयान्महतोमहीयान्" इति श्रुतिसिद्धोभयविधानं संस्मारयति दृश्यविषययानया स्तुत्या किं स्यादिति नाशङ्क्यं तथाहि, आत्मना परमात्मना प्रेरितो वा उपादानभूतया प्रकृत्या रजःप्रधानयेदं सृजति सत्त्वप्रधानया जातैर्मन्वादिभिरिदमवति, तमः—प्रधानया जातेन रुद्रेण संहरति, तस्मै महते महत्तत्त्वाभिमानिने पराय रुद्राच्छ्रेष्ठाय भगवते नमः ॥ २७ ॥

आद्याय पुरुषरूपेण जगदादौ व्यक्ताय अन्यत्रादिकर्ता श्रीनारायणस्तस्माज्जाताय वीजाय व्यञ्जकाय फलरूपायेति वा जगदुत्पत्तौ बीजशक्तियुक्ताय वा ज्ञानविज्ञाने एव मूर्तिर्विग्रहो यस्य स तथा तस्मै अन्यत्र ज्ञानविज्ञानयोरुपदेष्टृविग्रहाय प्राणेन्द्रियमनोबुद्धिलक्षणैर्विकारैः सप्तदशकैर्व्यक्तिमीयुषे ब्रह्माण्डान्तर्विराट्पुरुषतयेतिशेषः । उभयत्र समम् ॥ २८ ॥

मुख्येन प्राणेन सह त्वं स्थावरजङ्गमात्मकस्येशिषे प्रवर्तकोसि

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

चित्तस्य चित्तिः स्मरणशक्तिप्रदः साक्षी वा महाभूतानां शब्दादीनामाशयस्यान्तःकरणस्य प्रवर्तकः पुनर्वचनं दैनं दिनप्रवृत्त्यर्थम् २६

त्रय्या तन्वा प्रतिमास्थानीयेन वेदत्रयेण चातुर्होत्राख्यमन्त्रप्रकाश्ये चतुर्होत्रं तद्विषयया विद्यया च सप्ततन्तून् वितनोषि विस्तृत्य करोषि द्रव्यमन्त्रक्रियादेवतात्मत्वेन वहिरुपदेष्टृत्वेन कर्तृत्वेन कारयितृत्वेन शास्त्रेज्यास्तुतिप्रायश्चित्तादिरूपया च "अग्निमीळेपुरोहितं यज्ञस्यदेवमृत्विजं होतारं रत्नधातमम्" इत्यादिश्रुतेः। "यज्ञः सवोध्वरो यागः सप्ततन्तुर्मखः क्रतुः" इति आत्मवतामात्मज्ञानिनां प्रेष्ठः—

"आत्मा प्रेष्ठे स्वरूपे च जीवे ज्ञातरि केशवे।
वायौ देहे स्वयं स्वान्ते नवसु प्रोच्यते बुधैः" ॥

अनादिः कारणशून्यः पुरातनो वा अनन्तपारोऽप्रमेयोऽव्यये हराबात्मा मनो यस्य स तथा "न भारती मेङ्ग मृषोपलक्ष्यते" इत्यादेरन्यत्राव्ययानां मुक्तानामात्मा स्वामी "असंसार्यव्ययो मुक्त आचिरानन्द उच्यते" ॥ ३० ॥

अनिमिष इत्यनेन नित्यं जाग्रत्स्वभाव उच्यते. कूटस्थो निर्विकारः आत्मा व्याप्तः परमेष्ठी सर्वोत्तमः महानजः ब्रह्मणोऽप्यधिक इत्यनेन सर्वोत्तमत्वं निर्णयति. अन्यत्र आत् जातोऽत एव महानव्यवधानेन तत्पुत्रत्वात् जीवलोकस्य जीवराशेर्जीवः प्राणधारकः "जीव प्राणधारणे" इति धातोः, कथं धत्त इत्यत उक्तम् आत्मेति इष्टादानादिकर्ता "अव सन्तर्पणे" इतिधातोरवतिरूपोयं शब्दः सामान्यविशेषाभ्यां योजनीयः ॥ ३१ ॥

इदानीं भगवत्येव सम्भाव्यमानैर्विशेषणैर्विशिष्टं तदंतर्यामिणमभिष्टौति–त्वत्त इति । परमतीतमपरमेष्यदपि वर्तमानं यत्किंचिदनेजत् स्थावरमेजज्जङ्गमञ्च वस्तु तत्सर्वं त्वत्तो व्यतिरिक्तं नास्ति त्वयैवांतर्बहिश्च व्याप्तत्वात्. त्वामन्तरेण स्वातंत्र्येण स्थितं नास्तीत्यर्थः "अन्तर्बहिश्चतत्सर्वंव्याप्यनारायणःस्थितः" इतिश्रुतेः। "सर्वं खल्विदंब्रह्म" इति च—

"परावरेषु यस्मात्त्वं व्याप्तो विष्णुः सनातनः।
तस्मात्त्वव्यतिरिक्तंत्वमित्याहुर्वेदवादिनः" इति. ॥

अतस्त्वत्तो भिन्नं नास्ति किन्तु त्वमेवेत्यर्थो न घटत इत्यत उक्त एवार्थः । ज्ञानं वेदादिविद्ययैव तदवाप्तिरपि तस्यास्त्वत्तनावाश्रितत्वात्त्वदनुग्रहमन्तरेण सुशका नस्यादित्यभिप्रेत्याह—विद्येति । विद्याश्च कलाश्च विद्याकलाः परविद्यापरविद्येति ते तनवः तव वपुषि स्थितत्वात्तथोच्यन्ते कलाः चतुःषष्टिलक्षणा वा विद्या कला वेदाङ्गानीत्यन्यथा प्रतीतिनिरासायाचार्यैर्विद्याश्च कलाश्चेति विगृहीतं एतस्मिन्नर्थे—

"महाविद्याः कलाश्चैव त्वत्तनावाश्रिता यतः।
विद्यातनुरितिप्राहुरतस्त्वां तत्त्ववेदिनः" ॥ इति मानश्चोदाहरति.

तस्मादयमेवार्थइति इदञ्च माहात्म्यं हरेरेव युक्तमित्याह—हिरण्यगर्भ इति. हिरण्मयमण्डं गर्भे उदरे यस्य स तथा गर्भीकृतानन्तब्रह्माण्डत्वात्तन्नाम तवैव युक्तम् "हिरण्यकोशं रजसा परीवृतम्" इति श्रुतेः । हिरण्मयब्रह्माण्डोदराभिव्यक्तत्वाद्वा तन्नामासि. निर्गुणस्य हरेरेते गुणाः कथं सम्भवेयुरत्राह—वृहदिति, गुणपूर्तित्वाद्वृहद्ब्रह्म "अथ कस्मादुच्यते ब्रह्मेति वृहन्तो ह्यस्मिन्गुणाः" इतिश्रुतेः । ननु, तर्हीदं शबलं किं न स्यादत्राह—त्रिपृष्ठ इति । जाग्रदाद्यवस्था अतिक्रम्य स्थितत्वात्त्रिपृष्ठइत्युच्यते त्रयाणां लोकानां पृष्ठे वर्तमान इत्यपव्याख्याननिरासाय तुरीय इत्याचख्युराचार्या इति चतुर्मुखादप्यधिकं विष्णुं जानता हिरण्यकशिपुना तदन्तर्यामियोग्यगुणैरयं ब्रह्मा न स्तूयते किन्त्वन्तर्यामी स्तूयत इति ज्ञापनाय.

तदुक्तम्—

"ब्रह्मणोप्यधिकं विष्णुं जानन्नपि हिरण्यकः।
ब्रह्माणं तद्गुणैः स्तौति तद्गविष्णुविवक्षया" ॥ इति.

वृहच्चासि महत्तत्त्वात्मकं चासीत्येकदेशीयैरिति व्याख्यातं तत्संप्रदायज्ञैर्हरेर्महत्तत्त्वात्मकमेवं गुणत्वेन सङ्कुच्छत इति निरूप्य "ब्रह्माणन्तद्गुणैः स्तौति तद्गविष्णुविवक्षया" इत्युक्तत्वात् न च तद्व्याप्तत्वेन तदात्मकत्वमुच्यत इति वाच्यं तर्ह्ययं व्याख्याता चतुर्मुखस्य तदभिमानित्वेन घटतां तस्याप्युक्तदोषानिस्तारादिति ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अभिव्यनक् योऽभिव्यक्तमकरोत् त्रीन् गुणान् वृणोति स्वीकरोतीति त्रिवृत् आत्मा तेन ॥ २६ ॥ २७ ॥

प्राणादयो ये विकारास्तैर्व्यक्तिं कार्य्याकारम् ईयुषे ॥ २८ ॥

ईशिषे नियन्ता भवसि केन मुख्येन प्राणेन सूत्रात्मरूपेण अतस्त्वं प्रजानां पतिः तासां चित्तस्य चित्तेश्च तत्परिणामभूतायाश्चेतनायाः मनसश्च तन्नियम्यानामिन्द्रियाणाञ्च पतिः तासां महाभूतानां तद्गुणानाम् आशयानां तद्वासनानामीशश्च ॥ २९ ॥

त्वमेव सप्ततन्तून् अग्निष्टोमादियज्ञान् त्रयी वेदत्रयं तद्रूपया तन्वा होता श्रोता उद्गाता अद्ध्वर्युर्ब्रह्मेति यत्र तच्चतुर्होत्रकं कर्म तद्विषयया विद्यया च आत्मवतां देहिनां आत्मा जीवः अन्तरात्मा अन्तर्य्यामी ॥ ३० ॥

कूटस्थः निर्विकारत्वेन कालव्यापी आत्मा अन्तर्य्यामी जीवलोकस्य जीवनच्छरीरस्य जीवाख्य आत्मा, पूर्वश्लोके कर्मप्रयोज्यत्वप्रयोजकत्वाभ्यां कर्मिणामात्मत्वपरमात्मत्वे उक्ते अत्र त्वन्येषां सर्वेषामपि ॥ ३१ ॥

परं कारणं अपरं कार्य्यं अनेजत् स्थावरं एजत् जङ्गमं विद्या वेदोपवेदादिविद्यास्थानानि कलाश्च तदङ्गानि ते तवैव तनवः हिरण्यरूपं ब्रह्माण्डं गर्भे यस्य सः वृहत् ब्रह्मैवासि त्रयाणां गुणानां पृष्ठे परतः स्थितत्वात्त्रिपृष्ठः ॥ ३२ ॥

व्यक्तं विभो ! स्थूलमिदं शरीरं येनेन्द्रियप्राणमनोगुणांस्त्वम् ।
भुङ्क्षे स्थितो धामनि पारमेष्ठ्ये अव्यक्त आत्मा पुरुषः पुराणः ॥ ३३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

प्रहः नम्रः हर्षेणाश्रूणि पुलकोद्भेदो रोमाञ्चश्च यस्य सः अनुग्रहात् अस्तौषीत् ॥ २५ ॥

चतुराननं भगवदंशं भगवत्तया स्तौति–कल्पान्ते इति नवभिः । किञ्च चतुर्मुख एव परमात्मेतिस्वीकारे "सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी" इति भगवदुक्ता तामसीबुद्धिरेव हेतुः अन्धेनातिनिबिडेन तमसावृतमिदं जगत् यः स्वयंज्योतिः स्वप्रकाशः स्वरोचिषाऽव्यनक् प्रादुश्चकार ॥ २६ ॥

त्रीन् गुणान् वृणोति नियम्यतया स्वीकारोतीति त्रिवृत् तेन सृजत्यवति लुंपति च रज आदिधाम्ने आश्रयाय मत इति द्वयोरन्वयः ॥ २७ ॥

आद्याय बीजाय सर्वकारणकारणाय ज्ञानं शास्त्रीयं विज्ञानं तदनुरूपोऽनुभवः तेन मूर्त्तिर्यस्य तदनुभवगम्यायेत्यर्थः । प्राणाश्चेन्द्रियाणि च मनश्च बुद्धिश्च विकाराः पृथिव्यादिभूतानि च तैर्व्यक्तिं विराड्रूपमीयुषे नमः ॥ २८ ॥

प्राणेन मुख्येन सर्वेन्द्रियनायकेन सहितस्य जगतो जङ्गमस्य तस्थुषः स्थावरस्य च त्वमेव ईशिषे ईशिता नियन्ता भवसि प्रजानां पतिः चित्तस्य चित्तेर्बुद्धेर्मनसः इन्द्रियाणाञ्च पतिः भूतानां खादीनां गुणानां शब्दादीनामाशयस्याहङ्कारस्य च ईशः अत एव महान् सर्वश्रेष्ठः ॥ २९ ॥

त्वमेव सप्ततन्तून् तन्यन्ते विस्तार्यन्ते इतितन्तवस्तान् अग्निष्टोमादियज्ञान् चतुर्होत्रकविद्यया चत्वारोहोतारः होता उद्गाता अध्वर्युः ब्रह्मेति यत्र तच्चतुर्होत्रकं कर्म तत्प्रकाशकया विद्यया त्रय्या वेदत्रयरूपया तन्वा वितनोषि आत्मवतां देहवतां त्वमेक आत्मा आधारः अन्तरात्मा अन्तर्यामी च अनादिः कारणशून्यः नास्ति अन्तः कालतः पारो देशतो यस्य सः यद्वा अनन्तो निरवधिकस्वरूपः पारोऽन्येषामवधिभूतः स चासौ सचेत्यर्थः । कविः क्रान्तदर्शी सर्वविदित्यर्थः ॥ ३० ॥

कालादीनां परमात्मशक्तित्वेन तदनतिरिक्तं वदन् परमात्मनः सर्वात्मत्वं दर्शयति--त्वमेव काल इत्यादिना । त्वमेव लवाद्यवयवैर्जनानामायुः क्षिणोषि अतः कालोऽसि स्वयं तु कूटस्थः अक्षीणः आत्मा परमात्मासि यतो अजो कर्मनिमित्तजन्मशून्यः परमेष्ठी परमलोकस्थः अत एव महान् सर्वपूज्यः जीवलोकस्य यद्वजीवानां लोकस्य कार्यकारणरूपस्यचेतनपदार्थस्य आत्मा आश्रयः चकाराज्जीवलोकश्च त्वमेवासि जीवःक्षेत्रज्ञश्च त्वमेवासि ॥ ३१ ॥

त्वत्तः परं कारणं प्रकृत्यादिरूपमपरं कार्यं महदादिरूपमेजच्चेतनमनेजदचेतनञ्च व्यतिरिक्तं नास्ति भवतः सर्वात्मत्वात् विद्या वेदाद्याः कलास्तदङ्गानि ते तनवः तन्यन्ते विस्तार्यन्ते इति तनवः त्वन्निश्वासादिरूपा इत्यर्थः । हिरण्यं ब्रह्माण्डं गर्भस्यान्तः प्रविष्टं यस्य सोसि बृहत् विपुलस्वरूपोसि एवंभूतोपि त्रयाणां लोकानां पृष्ठे उपरि सत्यलोके स्थितः माहशानां हितायेति शेषः ॥ ३२ ॥

भाषा टीका ।

हिरण्यकशिपु भी उठकर नम्र हो हाथ जोड़ दृष्टि से ब्रह्माजी को देखता हुआ मारे हर्ष के अश्रु और रोमांच वाला गद्गद वाणी से स्तुति करने लगा ॥ २५ ॥

हिरण्यकशिपुरुवाच ॥

हिरण्यकशिपु बोला, कि,—कल्पके अंत में काल से सृष्ट ऐसे अंधतम से ढके हुए इस जगत को जिस स्वयं ज्योति ने अपनी कांति से प्रकाशित किया ॥ २६ ॥

और जो अपने त्रिगुण आत्मा से इस जगतको सृजता पालता और संहार करता है ऐसे त्रिगुण धामा परमेश्वर को नमस्कार है ॥ २७ ॥

आद्यबीज रूप ज्ञान विज्ञान मूर्ति और इन्द्रिय मन बुद्धि के विकारों से व्यक्ति को प्राप्त होने वाले ऐसे आपको नमः ॥ २८ ॥

आपही मुख्य प्राण रूप से स्थावर और जंगमों के नियंता हो। और प्रजाओं के पति हो, तथा चित्त चेतना मन और इन्द्रियों के पति हो, महान् हो, भूतगुण और आशय (अंतः करण) के ईश हो ॥ २९ ॥

आपही (चातुर्होत्रक विद्या) अर्थात् चार हवन करने वाले जिसमें ऐसे कर्म को प्रति पादन करने वाली त्रयी (वेदत्रयी) रूप तनु से अग्निष्टोमादियज्ञों का विस्तार करते हैं ॥ और आपही प्राणियों के अंतर्यामी आत्मा हैं. क्योंकि ? आप सर्वज्ञ होकर आद्यन्तसे रहित हैं ॥ ३० ॥

आपही विना निमेष वाले काल हो जनों की आयु को क्षणलव आदि अवयवों से क्षीण करते हो । आप कूटस्थ आत्मा परमेष्ठी अज महान् और जीवों के जीव और नियंता हो ॥ ३१ ॥

जो कुछ पर अपर स्थावर जंगम जगत है सो आप से व्यतिरिक्त कुछ भी नहीं, सर्व विद्या और कला आपका तनू हैं आप हिरण्यगर्भ हो, और त्रिगुणात्मक ब्रह्मांड के ऊपर पृष्ठ परस्थित हो ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, ब्रह्माण्डशरीरस्य जीवस्य मम कुतो ब्रह्मत्वं कुतोवा ब्रह्माण्डगर्भत्वादि ? तत्राह,व्यक्तं कार्यमिदं तव शरीरं व्यक्तं सत्यमिति वा येन शरीरेण त्वमिन्द्रियप्राणमनसां गुणान्विषयान्भुङ्क्षे किञ्च पारमेष्ठ्ये पारमैश्वर्ये धामनि स्वरूपे स्थित एव भुंक्षे नत्वस्मदादिवत्स्वरूपतिरोधानेन अतस्त्वमव्यक्त आत्मा निरूपाधिब्रह्मैव पुराणः पुरुषश्चेत्यर्थः ॥ ३३ ॥

अनन्ताव्यक्तरूपेण येनेदमखिलं ततम् ।
चिदचिच्छक्तियुक्ताय तस्मै भगवते नमः ॥ ३४ ॥
यदि दास्यस्यभिमतान् वरान्मे वरदोत्तम ! ।
भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्माभून्मम प्रभो ! ॥ ३५ ॥
नान्तर्बहिर्दिवा नक्तमन्यस्मादपि चायुधैः ।
न भूमौ नाम्बरे मृत्युर्न नरैर्न मृगैरपि ॥ ३६ ॥
व्यसुभिर्वाऽसुमद्भिर्वा सुरासुरमहोरगैः ।
अप्रतिद्वन्द्वतां युद्धे ऐकपत्यं च देहिनाम् ॥ ३७ ॥
सर्वेषां लोकपालानां महिमानं यथात्मनः ।
तपोयोगप्रभावाणां यन्न रिष्यति कर्हिचित् ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां
सप्तमस्कन्धे हिरण्यकशिपोर्वरयाचनंनाम
तृतीयोऽध्यायः ॥ ३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, ब्रह्मत्वं पुराणपुरुषत्वं कथमेकस्य ? तत्राह–अनन्तइति । हे अनन्त, येन त्वया व्यक्तेन मनोवचनागोचरेण रूपेणेदं विश्वं ततं व्याप्तं तस्मै तुभ्यं भगवते अचिन्त्यैश्वर्याय नमः भगवत्त्वे हेतुः चिदचिच्छक्तियुक्ताय चिच्छक्तिर्विद्या अचिच्छक्तिर्माया ताभ्यां युक्तायेति ॥ ३४ ॥ ३५ ॥

अन्यस्मात्त्वत्सृष्टव्यतिरिक्तादपि आयुधैर्मृत्युर्माभूत् ॥ ३६ ॥

व्यसुभिरप्राणैः असुमद्भिः सप्राणैः यथा आत्मनस्तवास्ति महिमा तथाऽप्रतिद्वन्द्वतादिकं देहीतिशेषः ॥ ३७ ॥

तपसा योगेन च प्रभावो येषां तेषां यदणिमाद्यैश्वर्यं न रिष्यति न नश्यति तच्च देहीत्यर्थः ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रचन्द्रिका ।

यदुक्तम् कृत्स्नस्य तच्छरीरत्वं तस्य सर्वान्तरात्मत्वञ्च तदुपसंहरन्नमस्करोति–व्यक्तमिति द्वाभ्याम् । हे विभो देव ! स्थूलं चिदचिदात्मकमिदं जगत्तव व्यक्तं शरीरं, स्थूलशरीरमित्यर्थः। तर्हि किं सूक्ष्मं शरीरम् ? तत्राह––अव्यक्तः प्राकृतैरिन्द्रियैरगम्यः आत्मा सर्वान्तरात्मा जगत्कारणपुरुषः एवंविधस्त्वं येन शरीरेण चतुर्मुखशरीरेण पारमेष्ठ्ये स्थाने स्थितः इन्द्रियादीनां गुणान्विषयान् शब्दादीन् भुङ्क्ते, तत्सूक्ष्ममिति शेषः। येन शरीरेण जीवानामिन्द्रियादीन् सृष्ट्वा तद्व्यापाराँल्लीलारसत्वेन भुङ्क्ते अनुभवसि तत्सूक्ष्मं शरीरमित्यर्थः ॥ ३३ ॥

अनन्तं त्रिविधपरिच्छेदरहितमतीन्द्रियं यत्स्वरूपं तदनन्ताव्यक्तरूपं येनानन्ताव्यक्तरूपेण इदमखिलं जगदन्तरात्मतया ततं व्याप्तं तस्मै चिदचिच्छक्तिभ्यां कार्यापयुक्तापृथक्सिद्धस्वविशेषेण भूताभ्यां चेतनाचेतनाभ्यां युक्ताय, तच्छरीरकायेत्यर्थः। भगवते पूर्णषाड्गुण्याय तुभ्यं नमः ॥ ३४ ॥

एवं परमात्मत्वाभिमानेन तद्धर्मारोपेण वा तद्गुणयुक्तत्वेन परम् आवेशावताररूपं ब्रह्माणं स्तुत्वाऽथ वरान्वृणुते––यदीति । हे वरदश्रेष्ठ ! यदि ममाभिमतान् वरान्दास्यसि तर्हि तावत्त्वया सृष्टेभ्यो भूतेभ्यः सकाशान्मम मृत्युर्मरणं माभूत् एवमनुगृहाणेत्यर्थः। विष्णोरपि चतुर्मुखसृष्टत्वाभिमानेन त्वद्विसृष्टेभ्य इत्युक्तम् ॥ ३५ ॥

तथान्तः गृहादीनामन्तः तेभ्यो बहिः दिवा अह्नि नक्तं रात्रौ अन्यस्मात्त्वत्सृष्टव्यतिरिक्तात् त्वत्तोप्यायुधैरपि भूमौ पृथिव्याम् अम्बरे चाकाशे मृगैर्नरैश्च ॥ ३६ ॥

व्यसुभिरप्राणैः असुमद्भिः प्राणिभिश्च सुरैरसुरैर्महोरगैर्महासर्पैश्च मम मृत्युर्माभूत् अयमेको वरः। वरान्तरञ्च याचते––अप्रतिद्वन्द्वतामिति । युद्धे अप्रतिद्वन्द्वताम् अप्रतिपक्षताम्. अयं द्वितीयः। देहिनां प्रजानामैकपत्यमेकाधिपतित्वम्. अयं तृतीयो वरः ॥ ३७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

तथा आत्मनो मम सर्वेषां लोकपालानाम् इन्द्रादीनां महिमानं माहात्म्यम्. अयं चतुर्थः। किञ्च तपसा योगेन च प्रभावो येषां तेषां योगिनां यन्न रिष्यति न नङ्क्ष्यति अणिमाद्यैश्वर्यन्तदपि देहीति शेषः। पञ्चमोऽयं वरः॥ ॥ ३८॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् तृतीयोऽध्यायः॥ ३॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

ज्ञानानन्दादिलक्षणगुणमूर्तिं निरूप्याधुनाव्यक्तमूर्तिं निरूपयति—व्यक्तमिति। हिरण्यगर्भ इत्यनेन ब्रह्माण्डस्य शरीरस्थानीयत्वं सूचितम्, तत्र तिष्ठन् हरिः सुखलक्षणान् गुणान् भुंक्ते न तु देवदत्तवद्दुःखलक्षणानित्यतो वाह–व्यक्तमिति। पारमेष्ठ्ये धामनि वैकुण्ठादिस्थाने सत्यलोके वा स्वरूपभूते महिम्नि वा स्थितः पुराणः पुरुषस्त्वं येन शरीरेणेन्द्रियप्राणमनसां गुणान्विषयानेव भुंक्ते न तु दुःखलक्षणान्,कुत एतत्? अत्राहात्मेति "एष ह्यानन्दमादत्ते त आत्मेति" इतिश्रुतेः। आनन्दस्वभावत्वात्. तर्हि तद्विषयज्ञानं कथं नोत्पद्यते? इति तत्राह—अव्यक्त इति। "तदव्यक्तमाहहि" इति सूत्रात्. हे विभो, तदिदं व्यक्तं ब्रह्माण्डलक्षणं तव स्थूलशरीरमाचक्षत इति शेषः। यद्वाऽनेन ब्रह्माणमेव तद्योग्यैर्विशेषणैः स्तौति. तथाहि, पुरं शरीरमणतीति पुराणः आत्मेत्यभिधानादात्मा चतुर्मुखः अवतारेण व्यक्तिर्नास्तीत्यव्यक्तः जगत्सृष्ट्याद्यैश्वर्यलक्षणान् गुणान् इतरत्स्पष्टम्॥ ३३॥

स्थावरजङ्गमाख्यं जगत्त्वद्व्यतिरिक्तं नास्ति त्वया व्याप्तत्वादित्यर्थतो व्याप्तिरुक्ता. तदिदं कीदृशेन रूपेण व्याप्तमिति मन्दाशङ्कापरिहाराय स्पष्टमाह–अनन्तेति। अनेन परिच्छिन्नस्य सर्वस्यापरिच्छिन्नाद्धरेर्वहिष्ट्वं युक्तिविरुद्धमित्युक्तं भवति "तम आसीत्तमसा गूढमग्रे" इति श्रुतेः। प्रकृत्या व्याप्तत्वप्रतीतेः कथं हरेरेवेति शिष्योक्तिर्घटते? इति। तत्राह—चिदचिदिति। शक्तिपदस्य द्विरावृत्तिः कर्तव्या " शक्यत्वाच्छक्तयो भार्याः " इति वचनात् उभयविधा या शक्तिः प्रकृतिस्तस्याः या कार्येषु शक्तिस्तस्या अपि भगवच्छक्त्यविनाभूतत्वात्तद्व्याप्तिस्तन्नियतेत्यत एव युक्तायेत्युक्तं न चानेन गुणभूतत्वं हरेरिति वाच्यम् 'शिष्येणोपाध्याय आगतः'इत्यत्रोपाध्यायप्राधान्यवदुपपत्तेः। ननु, लोके प्रतिवस्त्वेकनियतत्वादर्शनात् चिदचिदात्मकप्रपञ्चे कस्यचित्तदनियतत्वसम्भवेन स्वातन्त्र्येण सर्वव्याप्तत्वं हरेः कथं युज्यते? इत्यतो वाह–चिदचिदिति, " द्रव्यं कर्म च कालश्च" इत्यादेः परमाणुमात्रवस्तुनोऽपि भगवदनियतत्वासम्भवात् एतादृशी शक्तिरस्यास्तीति कुत इत्यत उक्तं भगवत इति उक्तार्थपदम् "भूयिष्ठां ते नम उक्तिं विधेम" इति वाक्यार्थं स्मरता हिरण्यकेन नम इत्युक्तं तदुक्तेः फलाधिकत्वात्॥ ३४॥

किं बहुनोक्तेन त्वदभीष्टं वदेत्याशङ्कित आह–यदीति। विविधत्वेन सृष्टेभ्यः॥ ३५॥

अन्यस्मादपि कालात् अथवा भावात् अवयवविशिष्टात् भूतेभ्य इत्युक्तेऽव्यन्येभ्यः किमित्यतो विशिनष्टि–न नरैरिति॥ ३६॥

व्यसुभिर्विगतप्राणैः पाषाणादिभिः असुमद्भिर्ग्राहादिभिः ऐकपत्यं ऐकाधिपत्यम्॥ ३७॥

महिमानं वृण इति शेषः। आत्मनस्तव यो महिमा स यथा न रिष्यति न नश्यति तथा मम महिमाऽस्तु यो महिमा यथा कर्हिचित् न रिष्यति तथात्मनो मम महिमा न नश्यत्विति चेति॥ ३८॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् तृतीयोऽध्यायः॥ ३॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

त्वत्त इत्यस्य टीकायां वेदोपवेदादीत्यादि व्याख्यानात्. विद्याः कला इति द्वन्द्वसमासः अतो विद्याः कलाश्चेति पाठो न सम्यः॥ ३२॥ ३३॥

अनन्तेत्यस्य टीका वैष्णवसिद्धान्तानुगता तत्र चिच्छक्तिः स्वरूपभूता अचिच्छक्तिर्मायेति ज्ञेयम्॥ ३४॥

अमरत्ववरो न प्राप्यत इति छलेन तं वृणुते—यदीति। त्वद्विसृष्टेभ्यः साक्षात् त्वत्सृष्टेभ्यः॥ ३५॥

अन्यस्मात् रुद्रप्रजापत्यादिसृष्टादित्यर्थः। अन्नात उपर्य्यन्यामननात्. पुनः कर्तृगणं निषेधयति। न नरैरिति पादत्रयेण भगवतोऽप्राकृतप्राणत्वाद्व्यसुभिर्वासुमद्भिर्वेति तत्रैव सङ्क्रम्यते कर्तृकरणात् न चैतत्करणं निषेधपरम् अप्राणिभिः प्राणिभिर्वेत्युक्ते तस्यैव प्राप्तत्वात्। हन्तुर्जीवदेहसाम्येऽपि सप्राणभागान्निष्क्रान्तस्य कर्तनीयनखाग्रभागस्य त्यक्तप्राणत्वाच्च श्रीभगवति तु तन्निषेधितं श्रीरुक्मिण्यादिभ्यः "त्वक्श्मश्रुरोमनखकेशपिनद्धमन्तः" इत्यादिना प्राकृतानां निन्द्याऽप्राकृतानां तेषामानन्दरूपत्वं साधितम्. अत उक्तं वाराहे "न तस्य प्राकृता मूर्तिर्मेदोमज्जास्थिसम्भवा" इत्यादि॥ ३६—३८॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे तृतीयोऽध्यायः॥ ३॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

व्यक्तं वैराजरूपं तव स्थूलं येन शरीरेण त्वमिन्द्रियप्राणमनसां गुणान् विषयान् भुंक्षे किन्तु पारमेष्ठ्ये परमैश्वर्ये धामनि स्वरूपे स्थित एव भुंक्षे न तु स्वरूपतिरोधानेन अतस्त्वमव्यक्तो ब्रह्मा आत्मा अन्तर्यामी पुराणपुरुषो भगवांश्च॥ ३३॥

चिच्छक्तिरन्तरङ्गा स्वरूपभूता अचिच्छक्तिर्माया गुणमयी वहिरङ्गा ताभ्यां गुणातीतगुणमयलीलार्थं युक्ताय॥ ३४॥

नन्वलमेतावत्या स्तुत्या वरांस्तावद्गृहाण तत्राह—यदीति।

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

हिरण्यकशिपोराशयः यद्यहममृत्युर्भूयासमिति वरं याचिष्ये तदा वरोऽयमसंभव एव यतः कल्पान्ते वयं ब्रह्मादयोपि मरिष्याम एवेति मद्वरं प्रत्याख्यास्यत एव तस्मादेवं युक्त्या वरं वृणोमि यद फलतोऽमरत्वमेव प्राप्तं भविष्यतीति त्वद्विसृष्टेभ्यः इति सर्वेषां भूतानां ब्रह्मसृष्टत्वादपरः कोऽवशिष्ट इति भावः ॥ ३५ ॥

मृत्युः स्वतोपि सम्भवेदत आह—नांतर्वहिर्दिवा नक्तमिति । सर्वदेशकालनिषेधेन स्वाभाविको मृत्युर्वारितः साकारो वराहादिरूपो विष्णुर्ब्रह्मसृष्ट एव स तु निराकारस्सन् यदि चक्राद्यस्त्रं चालयेत्तर्ह्यनर्थ इत्याशङ्क्याह—अन्यस्मादपि आयुधैर्न मृत्युः अन्तर्बहिःशब्दाभ्यां सर्वदेशस्य प्राप्तत्वेपि तयोः सम्बन्धिशब्दत्वेन प्रतियोगिविशेषोपस्तापकत्वेऽनर्थ इत्याशङ्क्य पुनर्देशं निषिद्धयति न भूमाविल्यनेन सप्तपातालानाम् अम्बरे इत्यनेन सप्तस्वर्गाणां च निषेधः, पुनर्दक्षादिसृष्टभूतेभ्यो भयमाशङ्क्याह—न नरैरिति ॥ ३६ ॥

सर्वजीवजातीनामुल्लेखनाऽशक्यत्वादाह—व्यसुभिः प्राणहीनैः असुमद्भिः प्राणसहितैः ॥ ३६ ॥

एवं वस्तुतोऽहममरएवाभूवमिति मत्वा वरान्तरं वृणोति अप्रतीति ॥ ३७ ॥

यथा आत्मनस्तवास्ति तथा तपोयोगाभ्यां प्रभावो येषां तेषां यद् अणिमाद्यैश्वर्य्यं न रिष्यतिनं नश्यति तच्च देहीति ॥ ३८॥

इति सारार्थदर्शिन्याम् हर्षिण्याम् भक्तचेतसाम् ।
सप्तमे च तृतीयोऽयं सङ्गतः सङ्गतःसताम् ॥ ३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पारमेष्ठ्ये धामनि सत्यलोके स्थितः येन स्थितिरूपेण हेतुना अव्यक्तः पुराणः पुरुषस्त्वम् व्यक्तं स्थूलमिदं शरीरं वैराजम् इन्द्रियप्राणमनसां गुणांश्च भुङ्क्षेऽनुभवसि ॥ ३३ ॥
चिज्जीवरूपा अचित्कालादिरूपा ताभ्यां युक्ताय नमः ॥ ३४ ॥
त्वद्विसृष्टेभ्यः त्वन्निर्मितेभ्यः ॥ ३५ ॥
अन्यस्मात्वत्सदृशादपि ॥ ३६ ॥

व्यसुभिः प्राणहीनैः असुमद्भिः सप्राणैः ॥ ३७ ॥
लोकपालानां तपोयोगाभ्यां प्रभावो येषां तेषां मुनीनाञ्च आत्मनः स्वस्य च यद् येन लब्धेन कर्हिचिदपि न रिष्यति न हीयते, जन इति शेषः । तादृशं महिमानं देहि ॥ ३८ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
तृतीयाध्यायार्थप्रकाशः ॥ ३ ॥

भाषा टीका ।

हे विभो ! यह व्यक्त (कार्यरूप) आपका स्थूल शरीर है जिस शरीर से आप इन्द्रिय प्राण और मनके गुणों (विषयों) को पारमेष्ठ्य धाम में स्थित होकर भोगते हो, और आप साक्षात् अव्यक्त आत्मा पुराण पुरुष हो ॥ ३३ ॥

अनंत अव्यक्त रूपसे जिन आप से यह सब जगत् व्याप्त हो रहा है चेतन अचेतन शक्ति युक्त उस परमात्मा भगवान को नमस्कार हो ॥ ३४ ॥

हे वरदोत्तम ! यदि आप मुझे अभीष्टवर देते हो तो हे प्रभो ! तुम्हारे रचे हुए प्राणियों से मेरी मृत्यु न हो ॥ ३५ ॥

और भीतर बाहर दिन में रात में और किसी से तथा आयुधों से, भूमि में आकाश में मनुष्यों से मृगों से भी मेरी मृत्यु न हो ॥ ३६ ॥

बिना प्राण वालों से अथवा प्राणवालों से मृत्यु न होवै और देवता असुर और महोरगों से युद्ध में अप्रतिद्वंद्वता को प्राप्त होजाऊं अर्थात् इनसे न हारूं और प्राणि मात्र का एक पति होजाऊं ॥ ३७ ॥

तप और योग से है प्रभाव जिनका ऐसे लोक पालों की जो महिमा और जो कभी किसी प्रकार नष्ट न हो ऐसी आपकी महिमा को भी दीजिये ॥ ३८ ॥

इति श्रीमद्भागवत महापुराण सप्तमस्कन्ध
हिरण्यकश्यप वरयाचन
तृतीयाध्याय समाप्त ॥ ३ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥

॥ चतुर्थोऽध्यायः ॥

नारद उवाच ।

एवं वृतः शतधृतिर्हिरण्यकशिपोरथ ।
प्रादात्तत्तपसा प्रीतो वरांस्तस्य सुदुर्लभान् ॥ १ ॥

ब्रह्मोवाच ।

तातेमे दुर्लभाः पुंसां यान्वृणीषे वरान्मम ।
तथाऽपि वितराम्यङ्ग ! वरान् यदपि दुर्लभान् ॥ २ ॥
ततो जगाम भगवानमोघाऽनुग्रहो विभुः ।
पूजितोऽसुरवर्येण स्तूयमानः प्रजेश्वरैः ॥ ३ ॥
एवं लब्धवरो दैत्यो बिभ्रद्धेममयं वपुः ।
भगवत्यकरोद्द्वेषं भ्रातुर्वधमनुस्मरन् ॥ ४ ॥
स विजित्य दिशः सर्वा लोकांश्च त्रीन् महासुरः ।
देवासुरमनुष्येन्द्रान् गन्धर्वगरुडोरगान् ॥ ५ ॥
सिद्धचारणविद्याध्रानृषीन् पितृपतीन्मनून् ।
यक्षरक्षःपिशाचेशान्प्रेतभूतपतीनथ ॥ ६ ॥
सर्वसत्त्वपतीन् जित्वा वशमानीय विश्वजित् ।
जहार लोकपालानां स्थानानि सह तेजसा ॥ ७ ॥
देवोद्यानश्रिया जुष्टमध्यास्ते स्म त्रिविष्टपम् ।
महेन्द्रभवनं साक्षान्निर्मितं विश्वकर्मणा ।
त्रैलोक्यलक्ष्म्यायतनमध्युवासाखिलर्द्धिमत् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चतुर्थे तु वराँल्लब्ध्वा विजित्याखिललोकपान् ।
विष्णुद्वेषेण तान्सर्वान् दैत्येन्द्रः समपीडयत् ॥ १ ॥

शतधृतिर्ब्रह्मा ॥ १ ॥
मम मत्तः यदपि यद्यपीमे दुर्लभाः ॥ २ ॥
अमोघोऽनुग्रहो यस्य प्रजेश्वरैर्मरीच्यादिभिः ॥ ३ ॥
सदर्थं तपस्तप्तं तदाह–एवमित्यादिना ॥ ४—६ ॥
सर्वेषां सत्त्वानां प्राणिजातानां ये ये पतयस्तान् ॥ ७ ॥
त्रिविष्टपं स्वर्गमध्यास्ते स्माधिष्ठितवान् तत्र स्वर्गेऽपि महेन्द्रभवनमध्युवासाधिवसति स्म ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं दैत्येन वृतान् वरान् ददौ ब्रह्मेत्याह भगवान्नारदः–एवमिति ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

एवमित्थं वृतो याचितः शतधृतिर्ब्रह्मा हिरण्यकशिपोस्तपसा तोषितः तस्य दुर्लभान्वरान् प्रादात् ॥ १ ॥

तत्वेदमाह ब्रह्मा—हे तात ! मम मत्तो यान्वरान् वृणीषे ते इमे वराः पुंसो यद्यपि दुर्लभाः तथापि दुर्लभानपि तान्वरान् अङ्ग हे हिरण्यकशिपो ! तुभ्यं वितरामि वर्तमानसामीप्ये लट् दत्तवानस्मीत्यर्थः ॥ २ ॥

एवमुक्त्वा अमोघः सत्योऽनुग्रहो यस्य स विभुर्भगवान् ब्रह्मा असुरवर्येण पूजितः प्रजेश्वरैर्भृगुदक्षाद्यैः स्तूयमानः स्वस्थानं जगाम ॥ ३ ॥

एवं लब्धा वरा येन स दैत्यो हिरण्यवत्प्रकाशवद्वपुर्देहं बिभ्राणो भ्रातुर्हिरण्याक्षस्य वधं भगवत्कृतं स्मरन् भागवतद्वेषसहितं भगवति द्वेषमकरोत् ॥ ४ ॥

तदेव प्रपञ्चयितुमुपोद्घातमाह--स इत्यादिना। स महासुरो हिरण्यकशिपुर्त्रींल्लोकान् सर्वा दिशश्च विजित्य तथा देवादीन् सर्वसत्त्वपतीन्सर्वभूताध्यक्षांश्च जित्वा वशमानीय विश्वजिद्बभूव लोकपालानां तेजसा सह स्थानानि जहारापहृतवान् ॥ ५—७ ॥

देवोद्यानञ्च जहारेत्यनुषङ्गः श्रिया सर्वसमृद्ध्या जुष्टं युक्तं त्रिविष्टपं स्वर्गमध्यास्तेस्म अधिष्ठितवान् "अधिशीङ्स्थासां कर्म" इति कर्मत्वम्. विश्वकर्मणा निर्मितं त्रैलोक्यलक्ष्म्या आयतनमाश्रयं भोग्यभोगोपकरणादिसर्वसमृद्धिमन्महेन्द्रस्य भवनं साक्षादध्युवास अध्युषितवान्॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

वरदानादिना सम्भूतं लवणाब्धिजलवृद्धिह्रासवत् क्षयिकं भगवद्भक्तैश्वर्यं श्रीनारायणप्रसादाविर्भूतमनन्तकालीनं शाश्वतं स्यात्तदेवापाद्यं मुमुक्षुभिरित्यादितात्पर्यं निरूप्यते कतिपयेष्वध्यायेषु. तत्र हिरण्यकशिपवे ब्रह्मवरदानप्रकारं तेनास्य सर्वविजयप्रकारञ्च निरूपयति–एवं वृत इत्यादिना। अथशब्देन न केवलं ब्रह्मणो वरदानमेवोच्यते अपि तु हिरण्यकशिपुविषया कथा साकल्येन कथ्यत इति सूचयति ॥ १ ॥

मम सकाशाद्यदपि दुर्लभान् अन्ततो दुःखप्रापकान् "दुरशोभनदुःखयोः" इति यादवः ॥ २ ॥

भगवान् पूज्यः अत्र प्रतिक्षणं दृष्टश्रुतविस्मरणशीलानां मन्दानां स्फुरणार्थं कृतव्याख्यानानां पदानां पुनरपि तथा वचनं न दोषाय तदर्थं हीदं प्रवृत्तमिति, अमोघानुग्रहः योग्यानामितिशेषः ॥ ३ ॥

समग्रैश्वर्यादिगुणरत्नाकरे परे द्वेषमकरोदसुरावेशाज्जयांशत्वेन स्वतोभक्तोपीति तात्पर्यम्,तदुक्तम् "स्वतो भक्ता हिरण्याद्याः परावेशाद्धरौ द्विषः" इति "परोरिपरमात्मनोः" इत्यभिधानादत्र परः शत्रुरसुरः तदावेशादित्यर्थः ॥ ४ ॥ ५ ॥ ६ ॥

सर्वसत्त्वपतीन् सिंहादीन् बलश्रेष्ठान्वा किं बहुना विश्वं चराचरं विजितवानिति तेजसा प्रभावेन सह जहार ॥ ७ ॥

त्रिविष्टपं स्वर्गं स्वर्गे त्रीणि स्थानानि सन्ति ततोपि श्रेष्ठं महेन्द्रभवनममरावतीनाम तत्स्थानापेक्षया साक्षात्तुरीयमित्युच्यते "साक्षात्प्रत्यक्षतुर्ययोः" इत्यभिधानात्. अत एवाखिलर्द्धिमदित्युक्तं साक्षात्प्रत्यक्षमध्युवासेत्यनेन वा सङ्गमयितव्यं त्रीणि विष्टपानि स्थानानि सकलसमृद्धिमन्त्यस्मिन्निति त्रिविष्टपशब्दार्थपर्यालोचनयाऽयमर्थस्सम्पद्यते त्रिदिवपदस्याप्ययमेवार्थः अन्यथा त्रिशब्दस्य गतिर्वक्तव्येति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

॥ १–२४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

वरान् लब्ध्वा द्विषन् विष्णुं देवदेवान्निरास सः।
प्रह्लादस्यगुणाः प्रेमभक्त्युत्थस्तुर्ये ईर्यते ॥

हिरण्यकशिपोः हिरण्यकशिपुना तस्य तस्मै ॥ १ ॥

यदपि यद्यपीमे दुर्लभास्तदपि इमान् दुर्लभान् वितरामीति व्यवहितान्वयः सोढव्यश्चेदेवं व्याख्येयं वरान् कीदृशान् यतां प्राप्नुवतामपि दुर्लभान् यान् प्राप्यापि न प्राप्नुवन्ति तानित्यर्थः ॥ २——४ ॥

गरुडा गरुडजातयः पक्षिणः ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ॥ ११ ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

लब्धवरस्य हिरण्यकशिपोर्भगवति द्वेषं तत्पुत्रस्य प्रह्लादस्य च भक्तिं चतुर्थेऽध्याये श्रीनारदो वर्णयति—एवमिति। शतधृतिर्ब्रह्मा ॥ १ ॥

मम मत्तो यान् वृणीषे ते इमे यद्यपि दुर्लभास्तथापि वितरामि तुभ्यं ददामि ॥ २ ॥

अमोघः सत्योऽनुग्रहो यस्य स विभुर्विपुलज्ञानः ॥ ३ ॥

हेममयं सुवर्णवत्प्रकाशमानम् ॥ ४ ॥

स दिग्गजादीन् विजित्य लोकपालानां तेजसा सह स्थानानि जहारेति चतुर्थेनान्वयः ॥ ५—६ ॥

सर्वेषां सत्त्वानां प्राणिजातीनां पतीन् जित्वा वशमानीय एवं विश्वजित् सन् लोकपालानामिन्द्रादीनां तेजसा तत्सन्महिम्ना सह स्थानानि जहाराऽपहृतवान् ॥ ७ ॥

देवोद्यानानां श्रीभिर्जुष्टं त्रिविष्टपं देवलोकमध्यास्ते स्म अधिष्ठितोऽभूत् तत्रापि साक्षान्महेन्द्रभवनमध्युवासेत्युत्तरेणान्वयः ॥ ८ ॥

यत्र विद्रुमसोपाना महामारकता भुवः ।
यत्र स्फाटिककुड्यानि वैदूर्यस्तम्भपङ्क्तयः ॥ ९ ॥
यत्र चित्रवितानानि पद्मरागासनानि च ।
पयःफेननिभाः शय्या मुक्तादामपरिच्छदाः ॥ १० ॥
कूजद्भिर्नूपुरैर्देव्यः शब्दयन्त्य इतस्ततः ।
रत्नस्थलीषु पश्यन्ति सुदतीः सुन्दरं मुखम् ॥ ११ ॥
तस्मिन्महेन्द्रभवने महाबलो महामना निर्जितलोक एकराट् ।
रेमेऽभिवन्द्याङ्घ्रियुगः सुरादिभिः प्रतापितैरूर्जितचण्डशासनः ॥ १२ ॥
तमङ्ग ! मत्तं मधुनोरुगन्धिना विवृत्तताम्राक्षमशेषधिष्ण्यपाः ।
उपासतोपायनपाणिभिर्विना त्रिभिस्तपोयोगबलौजसां पदम् ॥ १३ ॥
जगुर्महेन्द्रासनमोजसा स्थितं विश्वावसुस्तुम्बुरुरस्मदादयः ।
गन्धर्वसिद्धा ऋषयोऽस्तुवन्मुहुर्विद्याधरा अप्सरसश्च पाण्डव ! ॥ १४ ॥
स एव वर्णाश्रमिभिः क्रतुभिर्भूरिदक्षिणैः ।
इज्यमानो हविर्भागानग्रहीत्स्वेन तेजसा ॥ १५ ॥
अकृष्टपच्या तस्याऽऽसीत्सप्तद्वीपवती मही ।
तथा कामदुघा द्यौस्तु नानाश्चर्यपदं नभः ॥ १६ ॥

भाषा टीका ।

श्रीरुक्मिणीरमणाय नमः ॥

॥ नारद उवाच ॥

नारदजी बोले, कि—जब हिरण्यकशिपु ने ऐसे वर माँगे तब उसके तप से प्रसन्न होकर ब्रह्माजी ने हिरण्यकश्यप को अति दुर्लभ भी ये वर थे तो भी दिये ॥ १ ॥

ब्रह्मोवाच ॥

ब्रह्माजी बोले, कि—हे तात ! जिन वरों को तू माँगता है ये पुरुषों को बडे दुर्लभ हैं, हे भाई ! यद्यपि ये वर दुर्लभ हैं तो भी मैं तुझ को देता हूं ॥ २ ॥

तदनंतर वर देकर असुरवर्य से पूजित होकर अमोघ अनुग्रह वाले प्रजेश्वरों से स्तूयमान श्रीब्रह्माजी भी अपने धाम को गये ॥ ३ ॥

दैत्य भी इस प्रकार वर पाकर सुवर्ण मय शरीर को धारण करता हुआ भ्राता के वध का स्मरण करता हुआ भगवान श्री विष्णु में द्वेष करने लगा ॥ ४ ॥

वह महासुर दशों दिशाओं को और तीनों भुवनों को जीत-कर देव असुर मनुष्येन्द्र गन्धर्व गरुड़ उरग सिद्ध चारण विद्याधर ऋषिगण पितर मनुष्य यक्ष राक्षस पिशाच भूत प्रेत और इनके अधिप तथा सर्व जन्तुओं के पतियों को जीत कर अपने वश में लाकर विश्व को जीत कर तेज सहित सर्व लोक पालोंके स्थानों को हरण करता हुआ ॥ ५ ॥ ६ ॥ ७ ॥

देवताओं के उद्यान की शोभा वाले स्वर्गका अधिष्ठाता होकर त्रैलोक्य की शोभा का एक स्थान अखिलसमृद्धिवाले साक्षात् विश्वकर्मा के रचे हुये महेन्द्रभवन में निवास करने लगा ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अखिलसमृद्धियुक्तत्वमेवाह—यत्रेति त्रिभिः ॥ ९ ॥
मुक्तादामानि परिच्छदाः परिकराः यासाम् ॥ १० ॥
सुदतीः सुदत्यः ॥ ११ ॥
ऊर्जितमधिकं चण्डं तीव्रं शासनं यस्य ॥ १२ ॥
अङ्ग हेराजन् ! उरुगन्धिनोग्रगन्धेन मधुना सुरया मत्तम् अत एव विवृत्ते विघूर्णिते ताम्रे अक्षिणी यस्य तम् अशेषधिष्ण्यपाः सर्वलोकपाला उपायनयुक्तैः पाणिभिरुपासत सेवन्ते त्रिभिर्ब्रह्मविष्णुरुद्रैर्विना पदमाश्रयभूतम् ॥ १३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

उपासनप्रकारमाह—जगुरिति ॥ १४ ॥ १५ ॥ १६ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

महेन्द्रभवनं विशिनष्टि—यत्र भवने विद्रुममयानि सोपानानि यासु ताः भुवःस्थलानि वेदिकादीनि महामारकताः इन्द्रनीलमय्यः यत्र भवने स्फाटिकमयानि कुड्यानि भित्तयः यत्र वैदूर्यमणिमयस्तम्भपंक्तयः सन्ति ॥ ९ ॥

यत्र च चित्रवितानानि चित्रकविस्तराणि पद्मरागरत्नमयान्यासनानि च पयःफेननिभाः दुग्धफेनवन्मृदुलाः शुभाश्च शय्याः मुक्तादामानि परिच्छदाः परिकराः यासां ताः ॥ १० ॥

यत्र च देव्यः देवानांसम्बन्धिन्यः सुदत्यः स्त्रियः कूजद्भिर्ध्वनद्भिर्नूपुरैःतत्रतत्र शब्दयन्त्यः शब्दं कुर्वत्यो रत्नस्थलीषु सुन्दरं स्वीयं मुखं पश्यन्ति ॥ ११ ॥

तस्मिन्नेवंभूते महेन्द्रस्य भवनेऽधिवसन्नपारबलः महामनाः अव्याहतसङ्कल्पः अतएव निर्जितो लोको येन स्वयमेक एव राजा ऊर्जितमधिकं चण्डं तापकं शासनं यस्य सः अत एव प्रतापितैः सुरादिभिर्वन्द्यावङ्घ्रीयस्य तादृशो रेमे ॥ १२ ॥

अङ्ग हे युधिष्ठिर! उरुगन्धिनोऽग्रगन्धेन मधुना सुरया मत्तअतएव विवृत्ते विघूर्णिते ताम्रे अक्षिणी यस्य तपोयोगस्य बलस्य देहबलस्य ओजस इन्द्रियबलस्य च पदमाश्रयं तं दैत्यं त्रिभिर्विना ब्रह्मविष्णुशिवैर्विना अन्ये सर्वे उपायनं पूजाद्रव्यं तद्युक्तपाणिभिरूपासत उपासितवन्तः ॥ १३ ॥

उपासनाप्रकारमेवाह— जगुरिति चतुर्भिः । ओजसा स्वबलेन महेन्द्रस्यासनमास्थितमधिष्ठितं तं दैत्यं विश्वावसुतुम्बुरुनारदादयश्च जगुर्गानञ्चक्रुः, तद्गुणान् जगुरित्यर्थः । गन्धर्वाः सिद्धाः ऋषयश्च विद्याधरा अप्सरसश्च मुहुर्मुहुरस्तुवन् हे पाण्डव! ॥ १४ ॥

स एवाऽसुरो वर्णाश्रमनिष्ठैर्ब्राह्मणगृहस्थादिभिः कर्तृभिर्भूरिदक्षिणा येषु तैः क्रतुभिर्मुहुर्मुहुरिज्यमान आराध्यमानः स्वबलेन हविर्भागानग्रहीत् ॥ १५ ॥

तस्यासुरस्य सम्बन्धिनी या सप्तद्वीपयुक्ता पृथिवी अकृष्टपच्या कर्षणेन विना फलिन्यभूत् तथा द्यौः स्वर्गाभिमानिनी देवता यथाकामं यथेष्टं दोग्धीष्टार्थान्पूरयतीति तथा अभूत् तथा नभः अन्तरिक्षाभिमानिदेवता नानाश्चर्यमयं विविधविचित्रवस्तुप्रदमभूत् ॥ १६ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सोपानमारोहावरोहलक्षणं कुट्टिमम् ॥ ९ ॥

वितानमुपरिपिधानवस्त्रम् ॥ १० ॥

सुदतीः प्रशस्तदन्तपंक्तयः स्त्रियः ॥ ११ ॥ १२ ॥

त्रिभिरादित्यवसुरुद्रैर्मरुदादिदेवानामेष्वन्तर्भावविवक्षया त्रिधा भिन्नैः, तदुक्तम्—

“ आदित्या वसवो रुद्रास्त्रिविधा हि सुरा यतः ।
मरुतश्चैव विश्वे च साध्याश्चैव च तद्गताः ॥
अतस्त्रय इति प्रोक्ताश्चत्वारो मानुषाः स्मृताः ।
उपानयनं ददुः सर्वे विना देवान् हिरण्यके ” ॥

इति वचनात् न ब्रह्मविष्णुमहेश्वरैरित्यर्थो ग्राह्यः किञ्चात्रेदं तात्पर्यं तथा हि, द्विविधा देवाः, यज्ञभागभुजस्तदभुज इति. तत्र प्रथमे त्रिधा भिन्ना जातिभिन्नत्वान्मन्त्रेणाह्वाने समूहेनागमनाच्च, चरमेषु सुरशब्दमात्रं वर्तते, तदन्तेवासिवद्वर्तमानाः—

“ अयज्ञभागेष्वपि तु सुरशब्दः प्रयुज्यते ।
यज्ञभागभुजस्त्वेव त्रय इत्यभिशब्दिताः ” ॥

इति वचनादयं विशेषः कल्प्यत इति इतोऽप्यत्र त्रित्वसंख्यया आदित्यादय उच्यन्त इत्यङ्गीकर्तव्यम्. दैत्यस्य देवोपास्यत्वे देवानां सदा सद्यशोभाजामयशः स्यात्तदनुपपन्नम् प्रमाणविरोधात्तदितरेषाम् उभयभाक्त्वमितीश्वरक्लृप्तमिदमिति—

“ यत्र क्वच यशः स्थानमन्येषामिति केशवः ।
सर्वत्रापि तु देवानामित्यन्यान्पूजयेत् क्वचित् ” ॥

इत्युक्तेश्च ‘ योगः सन्नहनः ’ इत्यभिधानादणिमादिनानोपायस्थानीभूतः ॥ १३ ॥ १४ ॥ १५ ॥

अकृष्टपच्या उल्लेखनमन्तरेण सस्यादिपरिपाकोपेता ॥ १६ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

उपायनयुक्तैः पाणिभिरुपासत त्रिभिः ब्रह्मविष्णुरुद्रैर्विना पदमाश्रयभूतम् ॥ १३—१४—१५ ॥

तस्य वेनवद्धर्मिष्ठत्वेपि तस्य राज्ये महीप्रभृतयोऽकृष्टपच्यत्वादिगुणयुक्ता यद्बभूवुस्तदातिभयादेव अन्यथा मह्यादीनां तत्कर्तृको वधः सद्य एव सम्भवेत् वेनस्तु न तादृक्प्रभाव आसीत् यं भृग्वादय एव भस्मीचक्रुरयन्तु भृग्वादीनां तेजः प्रथममेवाजहारेति विवेचनीयम् ॥ १६ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

त्रैलोक्यलक्ष्म्या आयतनमाश्रयम् यत्र महेन्द्रभवने विद्रुमाणां सोपानाः आरोहमार्गाः ॥ ९ ॥

पद्मरागरचितान्यासनानि सिंहासनानि ॥ १० ॥

पयःफेननिभाः मृदुलाः सिताः शय्याः मुक्तादामानि परिच्छदाः परिकराः यासां ताः सुदतीः सुदत्यः ॥ ११ ॥

प्रतापितैः पराजितैः सुरादिभिरभिनन्दितमङ्घ्रियुगं यस्य सः ऊर्ज्जितमधिकं चण्डं भयङ्करं शासनं यस्य स रेमे ॥ १२ ॥

हे अङ्ग! तं कशिपुं तप आदीनां पदमाश्रयम् उरुगन्धिना बहुगन्धेन मधुना सुरया मत्तमत एव विवृत्ते विघूर्णिते ताम्रेऽत्यरुणे

रत्नाकरश्च रत्नौघांस्तत्पत्न्यश्चोहुरूर्मिभिः ।
क्षारसीधुघृतक्षौद्रदधिक्षीरामृतोदकाः ॥ १७ ॥
शैला द्रोणीभिराक्रीडं सर्वर्तुषु गुणान् द्रुमाः ।
दधार लोकपालानामेक एव पृथग्गुणान् ॥ १८ ॥
स इत्थं निर्जितककुवेकराड्विषयान् प्रियान् ।
यथोपजोषं भुञ्जानो नातृप्यदजितेन्द्रियः ॥ १९ ॥
एवमैश्वर्यमत्तस्य दृप्तस्योच्छास्त्रवर्तिनः ।
कालो महान्व्यतीयाय ब्रह्मशापमुपेयुषः ॥ २० ॥
तस्योग्रदण्डसंविग्नाः सर्वे लोकाः सपालकाः ।
अन्यत्रालब्धशरणाः शरणं ययुरच्युतम् ॥ २१ ॥
तस्यै नमोऽस्तु काष्ठायै यत्रात्मा हरिरीश्वरः ।
यद्गत्वा न निवर्त्तन्ते शान्ताः सन्यासिनोऽमलाः ॥ २२ ॥
इति ते संयतात्मानः समाहितधियोऽमलाः ।
उपतस्थुर्हृषीकेशं विनिद्रा वायुभोजनाः ॥ २३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अधिपी यस्य तम् त्रिभिर्हरिविरिञ्चिहरैर्विना अखिलधिष्ण्यपाः उपायनयुक्तपाणिभिरुपासत ॥ १३ ॥

उपासनप्रकारं दर्शयति--जगुरित्यादिना ॥ १४—१५ ॥

अकृष्टपच्या कर्षणं विनैव सम्पन्नसस्या ॥ १६ ॥

———

भाषाटीका ।

जिस भवन में मूंगा की सीढी मरकतमणी की भूमि स्फटिक मणिके चौंतरे वैडूर्यमणी की खंभों की पंक्तियां हैं ॥ ९ ॥

और जहां पर विचित्र चँदेवा तन रहे पद्मरागमणि के आसन हैं ॥ दुग्ध के फेन के सदृश शय्यायें, मोतियों के मालाओं के सब परिकर जिनके ऐसी शब्दायमान नूपुरों से जहां तहां शब्द करती हुई सुंदर दंतपंक्तिवाली अपने सुंदर मुख को रत्नस्थली में देख रहीं हैं ॥ १०—११ ॥

उस महेन्द्रभवन में महाबली लोकों को जीतने वाला एक-राट् सुरादिकों से वंदितचरणयुगल प्रचंडशासन हिरण्यकशिपु रमण करता भया ॥ १२ ॥

हे राजन् ! बड़े सुगन्धि मधुसे मत्त, निकलेहुए लाल नेत्र जिसके ऐसे उस हिरण्यकश्यप को ब्रह्मा विष्णु महादेव को छोड़कर और सब लोकों के अधिपति हाथों में भेट लेलेकर उपासना करते थे। क्योंकि वह तप योग बल पराक्रम का एकही आश्रय था ॥ १३ ॥

हे पाण्डव ! जब अपने पराक्रम से वह इन्द्रासनपर बैठा तब विश्वावसु तुंबुरु और अस्मदादिक तथा गन्धर्व सिद्ध ऋषि विद्याधर और अप्सरा आदि हम सब लोग उसी का गान करते थे ॥ १४ ॥

उस समय वर्णाश्रम वाली प्रजाओं भूरि दक्षिणावाले यज्ञों से वही पूजित होकर अपने तेज से यज्ञ के भागों को ग्रहण करता था ॥ १५ ॥

उसके राज्य में भूमि विना कमाई हुई फल को देती थी स्वर्ग भी कामनाओं को पूर्ण करता रहा और आकाश नाना आश्चर्य वाला होगया ॥ १६ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्पत्न्यो नद्यः ऊहुर्वहन्तिस्म रत्नाकरानेवाह--क्षारेति ॥ १७ ॥

आक्रीडं क्रीडास्थानम् द्रुमाः सर्वेषु ऋतुषु गुणान् पुष्पफलादीन् सच लोकपालानाम्पृथग्विधान्गुणान्वर्षणादहनशोषणादीनेकएव दधार ॥ १८ ॥

निर्जिताः ककुभो येन यथोपजोषं यथाप्रीति ॥ १९ ॥

❀ (ॐ नमो भगवते तुभ्यम्पुरुषाय महात्मने ।
विशुद्धानुभवानन्दसन्दोहाय यतोऽभयम् ॥ ० ॥)
तेषामाविरभूद्वाणी अरूपा मेघनिस्वना ।
सन्नादयन्तीककुभः साधूनामभयङ्करी ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

महान्कालः एकसप्ततियुगानि किञ्चिदधिकानि ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥

अरूपा वक्तृरहिता ॥ २४ ॥

———

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

रत्नाकराः समुद्राः तत्पत्न्यो गङ्गादिनद्यश्च ऊर्मिभिस्तरङ्गैः रत्नसमूहानूहुः प्रापयामासुः रत्नाकरानेवाह—क्षारेति. सीधुः सुरा क्षौद्रमिक्षुरसः अमृतं शुद्धं क्षारादिमयान्युदकानि येषां ते क्रमोऽत्र न विवक्षितः ॥ १७ ॥

शैलः पर्वतः जात्यभिप्रायमेकवचनम् द्रोणीभिः कन्दरैर्द्रुमान् दधार कथंभूतान् सर्वर्तुषु वसन्तादिषु षट्सु सर्वे स्वस्वे गुणाः फलपुष्पादयो येषां तानाक्रीडान् क्रीडास्थानोपयुक्तान् सर्वर्तुषु सर्वान् वृक्षान्, सफलपुष्पानेव दधारेत्यर्थः । तदेव स्पष्टयति–लोकपालानां तदाधिपत्यवेलायामित्यर्थः । एको द्रुमः वसन्तादिकालनियमेन पृथग्गुणान् फलपुष्पादीन्दधार अस्यत्वाधिपत्ये अनियतकालं सर्वान्गुणान् दधारेत्यर्थः । यद्वा अयमसुर एक एव सर्वेषां लोकानां पृथग्गुणान् प्रतिनियतान्गुणान् दधार सर्वेषामाधिपत्यमेक एव चकारेत्यर्थः ॥ १८ ॥

इत्थं निर्जिताः ककुभो दिशो येन स दैत्यः एक एव राजा सन् यथोपजोषं यथाप्रीति प्रियानिष्टान्विषयाननुभवन्नपि नातृप्यत् न तृप्तवान् यतोऽयमजितेन्द्रियः ॥ १९ ॥

इत्थमैश्वर्येण मत्तस्याऽतएव दृप्तस्याऽतएव च उच्छास्त्रवर्त्तिनः वैदिकमार्गाननुवर्त्तिनः, उत्पथप्रतिपन्नस्येत्यर्थः । ब्रह्मशापं सनकादीनां शापमुपेयुषः प्राप्तवतः महान् कालो बहुवर्षात्मकः कालः व्यतीयाय अतिक्रान्तोऽभूत् ब्रह्मशापमुपेयुष इत्यनेन तज्जन्मावसानकालः प्राप्त इति सूच्यते ॥ २० ॥

तदेव वक्तुं तन्निमित्तं तावदाह–– तस्य दैत्यस्योग्रदण्डेनोग्रशासनेन संविग्नाः भीताः सपालकाः सर्वे लोकाः अन्यत्राऽलब्धं शरणं निवासस्थानं यैस्ते अच्युतं भगवन्तं शरणं ययुः प्राप्ताः अन्यत्रालब्धशरणा इत्यस्यानन्यरक्षका इति वार्थः । पूर्वं दैत्यतपःपीडितास्तदुपशमनाय ब्रह्माणं शरणमुपगम्य वरप्रदापनेन स्वानिष्टमेव चक्रुः पुनरेतदनिष्टपरिहारो ब्रह्मणापिकर्त्तुमशक्य इत्यालोच्याऽनन्यशरणा भगवन्तमेव शरणं ययुरित्यर्थः ॥ २१ ॥

शरणवरणप्रकारमेवाह–तस्या इति । तस्यै काष्ठायै दिशे नमः काष्ठां निर्दिशन्ति, यत्रेति । यत्र यस्यां काष्ठायामीश्वरः सर्वनियन्ता हरिराश्रितार्तिहरो भगवानास्ते शान्ताः रागादिरहिताः अत एव शुद्धान्तःकरणाः संन्यासिनः न्यासविद्यानिष्ठाः यत् याञ्च काष्ठां गत्वा प्राप्य न निवर्त्तन्ते पुनर्नावर्तन्ते न पुनः संसरन्ति तस्यै काष्ठायै नमः इति यस्यां दिशि प्रणतार्तिहरो भगवानास्ते तद्दिगधीनोऽस्मद्रक्षणोपाय इत्यध्यवसायपूर्वकं भगवन्तं शरणं ययुः, काष्ठायै नम इति दिक्शरणवरणकथनेन देवानामपि भगवत्स्वरूपं दुर्ग्रहमिति सूचितम् ॥ २२ ॥

इतीत्थं ते देवाः संयतात्मानः स एव भगवान् रक्षिष्यतीति विस्रम्भयुक्तमनसः समाहितधियः यद्वा संयतात्मान इति वाह्येन्द्रियजय उक्तः, समाहितधिय इत्यनेनान्तरिन्द्रियजयः, वायुभोजना इत्यनेन प्राणजयः, विनिद्रा इत्यनेन कायजयः एवंविधाः हृषीकेशमुपतस्थुस्तुष्टुवुः वक्ष्यमाणं मन्त्रं जपुर्वा ॥ २३ ॥

भगवते षाड्गुण्यपूर्णाय पुरुषाय सर्वान्तरात्मने महात्मने महाननुकम्पायुक्त आत्मा मनो यस्य तस्मै विशुद्धः अनुभवो ज्ञानम् आनन्दः सुखं तयोः सन्दोहः पूरः तद्रूपाय यतः यत्समाश्रयणादाश्रितानामभयं तस्मै नमः ॥ ० ॥

तेषां देवानामेवमुपतिष्ठतां वाणी शब्द आविरभूत्तैः श्रुतेत्यर्थः । कथम्भूता अरूपा अदृष्टवक्तृका मेघनिस्वना मेघघोषतुल्या ककुभो दिशः सन्नादयन्ती प्रतिध्वनयन्ती साधूनामभयङ्करी ॥ २४ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तत्पत्न्यः तेषां समुद्राणां पत्न्यो नद्यः क्षारं लवणम् ॥ १७ ॥ १८ ॥

यथोपजोषं यथासुखम् ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥

यतो यस्माद्धरेरभयं भवति तस्मा इति अरूपा अशरीरिणी ॥२४॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तत्पत्न्यः नद्यः रत्नाकरानेवाह—क्षारेति । आक्रीडं क्रीडास्थानम् ॥ १७—२१ ॥

काष्ठायै दिशे यत्र दिशि हरिरस्तीति सर्वदेशस्यासुरतेजोग्रस्तत्वात् वयं क्वचित् पुण्यतीर्थे गत्वा तं स्तुमहे इति भावः । यद्वा तस्मै उत्कर्षाय नमः यस्मिन्नुत्कर्षे हरिरिति अन्ये सर्वं यत्रोत्कर्षाः

* श्लोकोऽयमधिकः पाठः । विज० वीर० ।

माभैष्ट विबुधश्रेष्ठाः सर्वेषां भद्रमस्तु वः ।
मद्दर्शनं हि भूतानां सर्वश्रेयोपपत्तये ॥ २५ ॥
ज्ञातमेतस्य दौरात्म्यं दैतेयापसदस्य च ।
तस्य शान्तिं करिष्यामि कालं तावत् प्रतीक्षत ॥ २६ ॥
यदा देवेषु वेदेषु गोषु विप्रेषु साधुषु ।
धर्मे मयि च विद्वेषः स वा आशु विनश्यति ॥ २७ ॥
निर्वैराय प्रशान्ताय स्वसुताय महात्मने ।
प्रह्लादाय यदा द्रुह्येद्धनिष्येऽपि वरोर्जितम् ॥ २८ ॥

नारद उवाच ।

इत्युक्ता लोकगुरुणा तं प्रणम्य दिवौकसः ।
न्यवर्तन्त गतोद्वेगा मेनिरे चासुरं हतम् ॥ २९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अनेनासुरेण जिता इति भावः "काष्ठोत्कर्षे स्थितौ दिशि" इत्यमरः ॥ २२—२४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तत्पत्न्यः नद्यः ऊहुः प्रापयामासुः, रत्नाकरानाह—क्षारेति । क्षारादीन्युदकानि येषां ते तत्र सीधुः सुरा क्षौद्रमिक्षुरसः अमृतं शुद्धम् ॥ १७ ॥

आक्रीडं क्रीडास्थानम् पुष्पफलादीन् ॥ १८ ॥

निर्जिताः ककुभो दिशो येन सः यथोपजोषं यथाप्रीति विषयान् भुञ्जानोऽपि नातृप्यत् यतोऽजितेन्द्रियः ॥ १९ ॥

उच्छास्त्रवर्तिनः शास्त्रमुल्लङ्घ्य वर्त्तमानस्य ॥ २०—२१ ॥

काष्ठायै दिशे संन्यासिनः सम्यक् न्यासः आत्मात्मीयभरस्य भगवति अर्पणं सोऽस्ति येषान्ते भगवत्प्रपन्नाः ॥ २२—२३ ॥

अरूपा वक्तृमूर्त्तिदर्शनरहिता हे विबुधश्रेष्ठाः ॥ २४ ॥

भाषा टीका ।

समुद्र और नदी भी रत्नों के समूह को अपनी लहरों से फैकने लगीं समुद्रों से लवण मदिरा घृत मधु दधि दुग्ध अमृत और जल जो चाहो सो मिलनेलगा ॥ १७ ॥

और उस समय पर्वत भी गुहाओं से क्रीड़ास्थान को धारण करते हुए, वृक्ष सब ऋतुओं के गुणों को धारण करने लगे तथा हिरण्य कशिपु भी एकही पृथक् २ सबलोक पालों के गुणों को धारण करने लगा ॥ १८ ॥

वह हिरण्यकश्यप इस तरह सर्व दिशाओं को जीतकर यथेष्ट प्रिय विषयों को भोगता हुआ भी तृप्त न हुआ क्योंकि ? अजितेन्द्रिय था ॥ १९ ॥

ऐसा ऐश्वर्य से मत्त शास्त्र को छोड़कर वर्त्तनेवाले विप्र शाप को प्राप्त करनेवाले उस हिरण्यकश्यप का बहुत काल व्यतीत होगया ॥ २० ॥

उसके उग्र दंड से उद्विग्न होकर सबलोक लोकपाल अन्यत्र कहीं स्थान को न प्राप्त होकर गोविन्द के शरण गये ॥ २१ ॥

और ऐसा बोले, कि—उस दिशा को नमस्कार है जिसमें हमारा ईश्वर हरि है जहां जाकर शान्त सन्यासी लोग फिर नहीं निवृत्त होते हैं ॥ २२ ॥

इस प्रकार मनको रोक बुद्धि को समाहित कर हृषीकेश भगवान् का उपस्थान करनेलगे हैं कैसे कि ? रात दिन जिन को निद्रा नहीं आती और वायु का भोजन करते हैं ॥ २३ ॥

तब उन लोगों को मेघ सदृश शब्दवाली, साधुओं को अभय देनेवाली दिशाओं में नाद करती हुई, भगवान् की वाणी सुनपड़ी ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मम दर्शनं श्रवणं सर्वेषां श्रेयसामुपपत्तये भवति ॥ २५ ॥ २६ ॥ २७ ॥

ननु, देवादिविद्वेषेऽप्यस्य विनाशो नास्ति ब्रह्मवरेणोर्जितत्वात्तत्राह-निर्वैरायेति । सर्वमहं सहे न मद्भक्तद्रोहमितिभावः ॥२८॥

असुरश्च हतं मेनिरे तदानीं तद्द्वेषे प्रवृत्तत्वादितिभावः ॥२९॥

तस्य दैत्यपतेः पुत्राश्चत्वारः परमाद्भुताः ।
प्रह्लादोऽभून्महांस्तेषां गुणैर्महदुपासकः ॥ ३० ॥
ब्रह्मण्यःशीलसम्पन्नः सत्यसन्धो जितेन्द्रियः ।
आत्मवत्सर्वभूतानामेकः प्रियसुहृत्तमः ॥ ३१ ॥
दासवत्सन्नतार्याङ्घ्रिः पितृवद्दीनवत्सलः ।
भ्रातृवत्सदृशे स्निग्धो गुरुष्वीश्वरभावनः ।
विद्याऽर्थरूपजन्माढ्यो मानस्तम्भविवर्जितः ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तमेव द्वेषं वक्तुमादौ सुतस्य महत्त्वमाह—तस्येति । गुणैर्महानभूत्. गुणानेवाह, महदुपासक इत्यादिना ॥ ३० ॥

सत्या सन्धा प्रतिज्ञा यस्य एकएव प्रियश्च सुहृत्तमश्च ॥ ३१ ॥

दासवत्सम्यङ्नता अर्याणामङ्घ्रयो येन गुरुषु ईश्वर इति-भावना यस्य ॥ ३२ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वाणीमेवाह—माभैष्टेति । हे विबुधश्रेष्ठाः! यूयं माभैष्ट भयं माकुरुत वो युष्माकं सर्वेषां भद्रं सुखमेवास्तु हि यस्मात्मम दर्शनं कटाक्षो भूतानां श्रेयसे उपपत्तये प्राप्तये भवति ॥ २५ ॥

दैतेयाधमस्य तस्य हिरण्यकशिपोर्यद्दौरात्म्यं तन्मया ज्ञातं विदितमेव तस्य दैत्यस्य शान्ति वधं करिष्यामि कालः तद्वधोचितकालस्तावत्प्रतीक्षतां किञ्चित्कालविलम्बं सहध्वमित्यर्थः ॥२६॥

कोऽसौ तद्वधोचितः कालः? तत्राह—यदेति । यस्मिन् काले देवादिषु तस्य नितरां द्वेषस्तदा स आशु विनश्यति ॥ २७ ॥

ननु, देवादिषु विद्वेषिनः तस्य नाशः, कथम्? ब्रह्मवरेणोर्जितत्वादित्यत्राह—निर्वैरायेति । यदा प्रह्लादाय द्रुह्यत्तदा वरैरूर्जितमपि हनिष्ये हनिष्यामि कथम्भूताय महात्मने अहमेवात्मा यस्य स महात्मा तस्मै निर्वैराय सर्वभूतसुहृदे प्रशान्ताय रागादिरहिताय स्वस्यात्मजाय निरतिशयप्रियभक्ताविषये यदा द्रोहङ्करिष्यति आश्वेव तदा हनिष्यामि मद्भक्तविषयापराधस्य मम नितरामसह्यत्वादिति भावः ॥ २८ ॥

इतीत्थं लोकगुरुणा भगवता उक्ताः दिवौकसो देवाः भगवन्तं प्रणम्य गतोद्वेगाः गत उद्वेगो भयं येषां तादृशास्सन्तो न्यवर्तन्त. भगवदुपस्थितेरितिशेषः। असुरं हिरण्यकशिपुं हतप्रायञ्च मेनिरे अमन्यन्त ॥ २९ ॥

तस्य पूर्वमेव विप्रशापमुपेयुषः उचितकाले हनिष्यामीत्येवंविधभगवत्सङ्कल्पविषयस्य दैत्यपतेर्हिरण्यकशिपोः परमाद्भुताश्चत्वारः प्रह्लादानुह्लादसंह्लादह्लादाख्याः पुत्रास्तेषां मध्ये प्रह्लादो गुणैरक्रोधादिभिर्महाञ्छ्रेष्ठोऽभूत् माहात्म्यावहगुणैस्तं विशिनष्टि, महदुपासकइत्यादिना महतां भागवतानामुपासकः भागवतभक्तिपर्यन्तभगवद्भक्तिनिष्ठः इयमेव भगवद्भक्तेः परा काष्ठेति भावः ॥३० ॥

ब्रह्मण्यः ब्राह्मणकुले साधुरनुकूलो ब्रह्मण्यः यद्वा ब्रह्मणि परस्मिन्नितरां साधुः ब्रह्मण्यः शीलेन सुस्वभावसद्वृत्त्यात्मकेन युक्तः सत्यसन्धः सत्यप्रतिज्ञः जितानि इन्द्रियाणि अन्तर्बाह्यानि येन सर्वभूतानामात्मना तुल्यमात्मवत् एकएव असाधारणः प्रियतमः सुहृत्तमश्च प्रियसुहृत्तमः आत्मा यथा प्रियतमः स्वहितैषी च तद्वद्वयमपि सर्वभूतविषयकप्रीतियुक्तस्तद्धितैषीत्यर्थः ॥ ३१ ॥

दासवत्सम्यङ्नताः नमस्कृताः आर्याणां महतामङ्घ्रयो येन पितृवद्दीनेषु वात्सल्ययुक्तः भ्रातृवत्सदृशेषु स्वतुल्येषु स्निग्धोऽनुरागयुक्तः गुरुषु ईश्वरत्वेन भावना दृष्टिर्यस्य विद्यादिभिर्हेतुभिर्योऽभिमानो गर्वो दम्भश्च ताभ्यां विवर्जितः तत्रार्थो वित्तं रूपं सौन्दर्यं जन्माभिजात्यम्आदिशब्दः प्रकारार्थः विद्यादिसदृशमन्यदपि मानादिनिमित्तं विवक्षितम् ॥ ३२ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मद्दर्शनं मद्विषयज्ञानम् ॥ २५ ॥ २६ ॥

यस्य देवादिषु विद्वेषःस आशु साधनसामग्र्याम् । २७ । २८ ।
। २९ । ३० ।

आत्मवत् परमात्मवत्—

"अन्येषां हरिसाम्यं तु किञ्चित्साम्यमुदीरितम् ।
सम्यक्साम्यं तु मत्स्यादेरितिशास्त्रस्य निश्चयम्"

इतिवचनादत्रहरिसाम्यकथनं तात्पर्यादवगन्तव्यम् ॥ ३१ ॥

मानस्तम्भविवर्जितः अभिमाननिमित्तस्तम्भदोषरहितः ॥३२ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मद्दर्शनं श्रवणद्वारापि मदनुभवः ॥ २५ ॥ २६॥

यदा यस्य देवादिषु विद्वेषः स्यात् तदा स वै प्रसिद्धौ आश्वेव नश्यति ॥ २७ ॥

नोद्विग्नचित्तो व्यसनेषु निस्स्पृहः श्रुतेषु दृष्टेषु गुणेष्ववस्तुदृक् ।
दान्तेन्द्रियप्राणशरीरधीः सदा प्रशान्तकामो रहितासुरोऽसुरः ॥ ३३ ॥
यस्मिन्महद्गुणा राजन् गृह्यन्ते कविभिर्मुहुः ।
न तेऽधुनाऽपि धीयन्ते यथा भगवतीश्वरे ॥ ३४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तथाप्यमृतत्वादाश्चर्यप्रभावमपि सम्प्रति वरोर्जितमपि तं स्वयमहमेव हनिष्यामि । किन्त्वहमपि तत्प्रभावलोपकच्छिद्रविशेषं प्रतीक्षमाणोऽस्मीत्याह निर्वैरायेति ॥ २८—३५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

मद्दर्शनं हीति स्तम्भान्मद्दर्शनं यावदेव न भवति तावदेव युष्माकं दुःखमिति भावः ॥ २५—२७ ॥

ननु, ब्रह्मवरोर्जितोऽयं बहुकालत एव देवादीन् द्विषन्नपि नैव नश्यति तत्राह-निर्वैरायेति । सर्वमहं सहे न भक्तद्रोहमिति भावः ॥ २८—३१ ॥

सम्यक् नता आर्य्याणां अङ्घ्रयो येन सः गुरुष्विति बहुवचनं गौरवेणैव श्रीभगवन्मन्त्रोपदेशके गुरावित्यर्थः । रहित आसुरो भावो मत्सरादिर्यस्य सः ॥ ३२—३३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विबुधश्रेष्ठत्वमत्र भगवद्विषयकज्ञानवत्त्वं हे मज्ज्ञानवन्त इत्यर्थः । अतो माभैष्ट यतो मद्दर्शनं मज्ज्ञानं सर्वश्रेयसामुपपत्तये भवति सर्वश्रेयोपपत्तये इत्यत्र सन्धिरार्षः ॥ २५—२६ ॥

यदा यस्य देवादिषु विद्वेषस्तदा स आशु विनश्यति देवादिक्रोधादेवेति भावः ॥ २७ ॥

यदा तु मद्भक्तेषु यस्य विद्वेषस्तदा मद्भक्तानां समदर्शिनां क्रोधादिविकाराभावात् मद्भक्तद्रुहोहन्ताऽहमित्याशयेनाह--निर्वैरायेति ॥ २८—२९ ॥

निर्वैरायेति निर्वैरायेत्यनेन संक्षेपतो भगवता वर्णितान् प्रह्लादगुणान् मुनिर्विस्तरतो वर्णयति--तस्येत्यादिना ॥ ३० ॥

शब्दब्रह्मपरब्रह्मब्राह्मणेभ्यो हितकृत् ब्रह्मण्यः सत्यसन्धः सत्यप्रतिज्ञः सर्वभूतानामात्मवत् एक एव प्रियः सुहृत्तमश्च दासवत्सन्नता आर्याणां श्रेष्ठानामङ्घ्रयो येन गुरुषु ईश्वरमन्त्रस्वरूपगुणाद्युपदेष्टृषु ईश्वरवद्भावना यस्य सः ॥ ३१—३२ ॥

भाषा टीका ।

वाणी बोली, कि—हे देवता लोगों ! भय मतकरो तुम्हा[रा] मङ्गल हो हमारा दर्शन प्राणियों की सर्व मङ्गल की सिद्धि [के] लिये होता है ॥ २५ ॥

दैत्यों में भी इस हिरण्यकश्यप की दुरात्मता मैं जानचु[का] तिसकी शांति मैं करूंगा तब तक कुछ काल की प्रती[क्षा] करो ॥ २६ ॥

जिस समय यह देवताओं में वेदों में गौ ब्राह्मण [औ] साधुजनों में तथा धर्म में और मेरे विषय में द्वेष करने लो[गा] तब वह शीघ्र ही नष्ट होजायगा ॥ २७ ॥

निर्वैर प्रशान्त अपने पुत्र माहात्मा प्रह्लाद से जब द्रो[ह] करेगा बस कैसे भी वरों से वढा हो मैं उसी समय उस[को] मारूंगा ॥ २८ ॥

॥ नारद उवाच ॥

नारदजी बोले, कि- देवताओं को लोक गुरु गोविन्द [की] जब एसी आज्ञा हुई, तब उद्वेग को छोडकर गोवि[न्द] को प्रणाम कर वहां से लौटे और असुरको तो मरा स[म]झने लगे ॥ २९ ॥

उस दैत्य पति के परम अद्भुत चार पुत्र थे उन सव[में] प्रह्लाद गुणों से वड़ा था और महात्माओं की उपासना क[रने] वाला था ॥ ३० ॥

और ब्रह्मण्य शील सम्पन्न सत्य प्रतिज्ञा वाला जितेन्द्रि[य] तथा आत्मा के सदृश सर्व प्राणियों का एक प्रिय और सुहृ[त्] भी था ॥ ३१ ॥

और श्रेष्ठजनों के चरणों का दासवत् सेवक, और दीन[ों] का पितृवत् परिपालक, सदृश लोगों में भ्राता के तुल्य स्ने[ह] वाला तथा गुरजनों में ईश्वर भावना वाला विद्यार्थ रूप औ[र] जन्म युक्त और मान गर्व से वर्जित था ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

व्यसनेषु प्राप्तेष्वपि नोद्विग्नचित्तः दृष्टेषु श्रुतेषु गुणेषु विष[]येषु निःस्पृहः यतस्तेष्ववस्तुदृक् दान्ता इन्द्रियादयो यस्[य] रहित आसुरो भावो मत्सरादिर्यस्य सः असुरोऽपि सन् प्रशान्तकामः ॥ ३३ ॥

यं साधुगाथासदसि रिपवोऽपि सुरा नृप ! ।
प्रतिमानं प्रकुर्वन्ति किमुतान्ये भवादृशाः ॥ ३५ ॥
(१) गुणैरलमसङ्ख्येयैर्माहात्म्यं तस्य सूच्यते ।
वासुदेवे भगवति यस्य नैसर्गिकी रतिः ॥ ३६ ॥
न्यस्तक्रीडनको बालो जडवत्तन्मनस्तया ।
कृष्णग्रहगृहीतात्मा न वेद जगदीदृशम् ॥ ३७ ॥
आसीनः पर्यटन्नश्नन् शयानः प्रपिबन्ब्रुवन् ।
(२) नाऽनुसन्धत्त एतानि गोविन्दपरिरम्भितः ॥ ३८ ॥
क्वचिद्रुदति वैकुण्ठचिन्ताशबलचेतनः ।
क्वचिद्धसति तच्चिन्ताह्लाद उद्गायति क्वचित् ॥ ३९ ॥
नदति क्वचिदुत्कण्ठो विलज्जो नृत्यति क्वचित् ।
क्वचित्तद्भावनायुक्तस्तन्मयोऽनुचकार ह ॥४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अधुनाऽपि ते गुणा नापिधीयन्ते तिरोहिता न भवन्ति ॥ ३४ ॥

साधुगाथासदसि साधुकथाप्रसङ्गवत्यां सभायाम् यं प्रह्लादम् प्रतिमानं दृष्टान्तम् रिपवोऽपि सुराः कुर्वन्ति किं वक्तव्यं भवादृशा विष्णुभक्ताः ॥ ३५ ॥

सूच्यते मया केवलं द्योत्यते सुष्ठु कथ्यत इति वा ॥ ३६ ॥

नैसर्गिकरतेर्लिङ्गान्याह—न्यस्तक्रीडनक इति षड्भिः । तन्मनस्तया तदेकचित्तत्वेन ॥ ३७ ॥

एतान्यासनादीनि गोविन्देन परिरम्भित आत्मना एकीकृतः ॥ ३८ ॥

रुदति रोदिति रौति वैकुण्ठस्य चिन्तया शबला व्यामिश्रा क्षुभिता चेतना यस्य तस्य चिन्तयाऽह्लादो यस्य ॥ ४९ ॥

क्वचिदुत्कण्ठो मुक्तकण्ठः सन् अनुचकार तच्चेष्टादिकं स्वयं कृतवान् ॥ ४० ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

व्यसनेषु दुःखहेतुषु नोद्विग्नमभीतं चित्तं यस्य दृष्टेष्वैहिकेषु श्रुतेष्वामुष्मिकेषु च स्वर्गस्वाराज्यादिषु गुणेषु विषयेष्ववस्तुदृगानित्यबुद्धियुक्तोऽत एव तेषु स्पृहादिरहितः सदा दान्ताः नियमेन वशीकृताः इन्द्रियादयो यस्य प्रशान्ताः कामा यस्य, निस्स्पृह इत्यनेन सन्निहितेषु विषयेषु इच्छाराहित्यमुक्तम्. प्रशान्तकाम इत्यनेन त्वसन्निहितेष्वित्यतो न पौनरुक्त्यं. स्वयमसुरोऽपि रहितासुरः मात्सर्याद्यासुरभावरहितः ॥ ३३ ॥

हे राजन् ! यस्मिन् प्रह्लादे गुणा उक्ता वक्ष्यमाणा अन्ये च कविभिर्मुहुर्मुहुर्यद्यथा भवति तथा गृह्यन्ते बहुमन्यन्त इत्यर्थः । महदिति क्रियाविशेषणमन्यथा सामानाधिकरणसमासे "आन्महत्"इत्यात्वापत्तिः महतः प्रह्लादस्य गुणा इत्यर्थे यस्मिन्नित्यनेन पौनरुक्त्यापत्तिः महतां गुणा इति वा, ते गुणाः अधुना अद्यापि नापिधीयन्ते न तिरोहिता भवन्ति, न विस्मृता भवन्तीति यावत. यथा भगवतीश्वरे गुणाः पुनःपुनः कविभिर्गृह्यन्ते नापिधीयन्ते तद्वत् ॥ ३४ ॥

हे नृप युधिष्ठिर ! साधुगाथासदसि साधुकथाप्रसङ्गवत्यां सभायां रिपवः शत्रवोऽपि यं प्रह्लादं प्रतिमानं साधनत्वे दृष्टान्तं कुर्वन्ति किं पुनर्भवादृशा अन्ये प्रतिमानं कुर्वन्तीति ॥ ३५ ॥

मया परं केवलमसङ्ख्येयैर्गुणैस्तस्य माहात्म्यं सूच्यते, न साकल्येन तद्गुणा वर्णयितुं शक्या इति भावः । अलमिति पाठेऽधिकं तस्य माहात्म्यं सूच्यते. मया दिङ्मात्रं गुणप्रदर्शनेन माहात्म्यं सूच्यते, नत्वेतावत्तस्य माहात्म्यमित्युच्यते इत्यर्थः । अपारमाहात्म्ये हेतुं वदन् विशिनष्टि—वासुदेवेति. यस्य प्रह्लादस्य वासुदेवे भगवति नैसर्गिकी स्वाभाविकी उत्पत्तिसिद्धेत्यर्थः । रतिः स्वभावतः वासुदेवे रतानां वासुदेवस्येवानन्तमाहात्म्यमिति भावः ॥ ३६ ॥

(१) गुणैः परमसंख्येयैः इतिपाठान्तरम्—वीर० (२) नाऽनुसन्दधएतानि इति पाठान्तरम्. वीर० विज० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नैसर्गिकलिङ्गानि वदन्विशिनष्टि—न्यस्तेत्यादिषड्भिः । बाल एव बाल्यात्प्रभृतीत्यर्थः । तन्मनस्कतया भगवद्गतहृदयत्वेन न्यस्तक्रीडनकः परित्यक्तबालक्रीडः कृष्णग्रहः श्रीकृष्ण एव ग्रहस्तेन गृहीत आत्मा मनोयस्य, ग्रहगृहीतवद्वर्त्तमान इत्यर्थः । अत एव जगदीदृशं न वेद बाह्यवस्तुविषयकचिन्तारहित इत्यर्थः ॥ ३७ ॥

एतदेव प्रपञ्चयति—आसीन इति । आसनाद्यवस्थावास्थितोपि एतान्यासनादीनि नानुसन्दधे नानुसंहितवान् तत्र हेतुर्यतो गोविन्देन भगवता परिरम्भितः संश्लिष्टः गोविन्दानुसन्धानरूपतत्परिरम्भनिस्मृतदेहधर्म इत्यर्थः ॥ ३८ ॥

क्वचिद्गोविन्दानुसन्धानविच्छेददशायां रुदति रोदिति आर्षत्वाच्छ्यलुक्, इड्गुणाभावश्च. गोविन्दचिन्तया शबला व्यामिश्रा क्षुभिता चेतना बुद्धिर्यस्य तादृशः क्वचिद्धसति. क्वचित्तच्चिन्तया आह्लादो यस्य तादृश उच्चैर्गायति गोविन्दगुणानिति शेषः ॥ ३९ ॥

क्वचिच्चिन्ताह्लादएव नदति ध्वनति क्वचिदुत्कण्ठः कण्ठोपरिव्याप्तहर्षः विगतलज्जो नृत्यति उत्कण्ठो मुक्तकण्ठस्सन् ध्वनतीति वा क्वचितद्भावनया भगवदनुस्मृत्या युक्तस्तन्मयस्तदात्मकः स्वात्मानं तदपृथक्सिद्धत्वेन पश्यन्नपि तदपि तदनुसन्धानेन विस्मृत्य तद्रूपतापत्त्यभिमानेनानुचकारानुकरोति भगवानिव चेष्टते इत्यर्थः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

गुणेषु शब्दादिषु शरीरस्य दान्तत्वमुपवासादिना रहितासुरः असुरस्वभावकर्मरहितः जात्यासुरः ॥ ३३ ॥

यथा भगवतीश्वर इत्यत्रापि "अन्येषां हरिसाम्यन्तु किञ्चित् साम्यमुदीरितम्" इत्यादिप्रमाणमित्यत्रापि ज्ञातव्यमिति ॥ ३४ ॥

प्रतिमानं दृष्टान्तम् ॥ ३५ ॥ ३६ ॥

कृष्णाख्यो ग्रहस्तेन वशीकृतमनाः ॥ ३७ ॥

अनुसन्दधे सस्मार ॥ ३८ ॥

तद्भावनायुक्तः तस्य श्रीनारायणस्य ध्यानोपेतः तन्मयस्तत्प्रधानः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

असंख्येयैर्गुणैरलमिति ते वक्तुं न शक्यामित्यर्थः । अतस्तस्य माहात्म्यं सूच्यते द्योत्यते मात्रम् । यद्वा, असंख्येयैरेव बालमत्यर्थं तस्य माहात्म्यं संसूच्यते, वक्तुं शक्यत इत्यर्थः । उभयत्र च हेतुः वासुदेव इति ॥ ३६ ॥

तन्मनस्तयाकृष्टमनस्तया न्यस्तक्रीडनकः तदनन्तरं तथैव जडवत्तत्तुल्यः ततः पश्चात् कृष्णग्रहगृहीतात्मा ग्रहेणेव कृष्णेनाविष्टः सन् जगदीदृशं न वेद न ददर्श यथा लोकाः पश्यन्ति न तथा, किन्तु तत्स्फूर्त्तिकरत्वेनैव ददर्शेत्यर्थः । गोविन्देन परिस्फुरता परिरम्भित इवेत्यर्थः ॥ ३७ ॥

प्रथमा चिन्ता वियोगे स्फुरिते द्वितीया संयोगे एवं वियोगे क्वचिद्रुदति । संयोगे हसति । वियोगे नदति उच्चैराहूयते । संयोगे वियोगे क्वचित्तद्भावना इति ॥ ३८—४० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

महतो भगवतो गुणाः अप्राकृता धैर्यगाम्भीर्यादयः स्वभावेनैव स्थिताः कविभिर्विवेकिभिर्गृह्यन्ते एते गुणा जीवनिष्ठा न भवन्ति किन्तु भगवदीया एवेति शुद्धैर्मनआदीन्द्रियैर्विषयीक्रियन्ते इत्यर्थः । गुणानां नित्यत्वमाह—ते गुणा अधुना एतत्कालपर्यन्तं न पिधीयन्ते कालकर्मादिभिर्नाच्छाद्यन्ते एतावत्सु कालेषु गतेष्वपि प्रह्लादस्तादृग्गुणविशिष्ट एव वसुतले तथा वैकुण्ठे महावैकुण्ठे च विराजत एवेति भावः ॥ ३४ ॥

प्रतिमानं दृष्टान्तं प्रह्लादतुल्योऽयं भक्त इत्येवम् ॥ ३५ ॥

असङ्ख्यैः सङ्ख्यातुमशक्यैरेवंगुणैस्तस्यालं कः खलूत्कर्ष इत्यर्थः । अन्ये पुरुषा गुणैरुत्कर्ष्यन्तां नाम न तु प्रह्लादस्तस्य तूत्कर्षे हेतुरन्यद्वस्त्वन्तरं वर्त्तत इति भावः । तदेव किं तत्राह—माहात्म्यं सूच्यते सुष्ठु उच्यते किन्तत् वासुदेव इत्यादि. यद्वा तस्य माहात्म्यं सूच्यते तत अभिधातुमशक्यत्वाद्व्यज्यते मात्रं । कृष्णग्रहगृहीतात्मेत्याद्युत्तरग्रन्थे ग्रहादिशब्देनेति भावः । तस्य कीदृशस्येत्यपेक्षायामाह—वासुदेवे इति । नृसिंहाकारे इति केचित् प्रह्लादस्तुत्यनन्तरम् "आविर्बभूव भगवान् पीताम्बरधरो हरिः" इति वैष्णवोक्तेः कृष्णग्रहगृहीतात्मेति गोविन्दपरिरम्भितेत्यग्रिमोक्तेश्च वासुदेवे वसुदेवनन्दनाकार एवेत्यन्ये प्रह्लादस्य पूर्वोत्तरदशयोः क्रमेण वासुदेवनृसिंहनिष्ठत्वमित्यपरे नैसर्गिकी नत्वन्येषामिव पूर्वजन्मकृतैः साधनैः सिद्धेत्यर्थः ॥ ३६ ॥

नैसर्गिकरतेर्लिङ्गान्याह—न्यस्तक्रीडनक इतिषड्भिः । बालोपि त्यक्तबाल्यलीलस्तन्मनस्तया कृष्णैकाग्रमनस्कत्वेन जड इवान्यैर्लक्ष्यमाणः नचान्यभक्तैरिव तेन स्वमनः कृष्णविषयकं कृतं, किन्तु कश्चित्ग्रहो लोभ्यं द्रव्यमिव कृष्ण एव यन्मनो गृहीतवानित्याह—कृष्णेति । अत एव जगत् ईदृशं व्यवहारमयं न वेद किन्तु कृष्णमयमेवेत्यर्थः ॥ ३७ ॥

एतानि आसनवर्त्मभक्ष्यशयनीयपेयवक्तव्यानि नानुसन्धत्ते न जानाति. कुतः ? गोविन्देन परिरम्भितः अतिवत्सलेन पित्रा मात्रा वा एकाब्दिको बालो यथा प्रतिक्षणमेव परिरभ्य क्रोडस्थीक्रियते तथैव प्रह्लादो भोजनशयनादिसमयेपि भगवता आलिङ्ग्यते इति प्रह्लाद एव पश्यति नान्य इति भावः ॥ ३८ ॥

ततश्च क्वचिदिति स्वबालकं स्वक्रोडस्थलाद्भूमौ निधाय गृहकृत्यार्थमन्यत्र गतायां मातरि तामनालोच्य स बालो यथा रोदिति तथैव मामधुनैव परित्यज्य मत्प्रभुः क्व गत इति तच्चिन्तया शबला व्यामिश्रा विह्वला चेतना यस्य सः रुदति रोदिति क्वचिद्धसतीति तदैव पुनः स्फूर्तिप्राप्तेन भगवता भोः प्रह्लाद वत्स ! क्षणमात्रमेव मामनालोक्य कथमेवं रोदिषीत्युक्ते सति हसति चिरात् प्राप्तामालिङ्गतीं मातरमवलोक्य मुग्धबाल इवेत्यर्थः । तच्चिन्तेति मत्प्रभुर्मामेवं कृपया स्वदर्शनदानेन सुखयतीति चिन्तया आह्लादो यस्य सः ॥ ३९ ॥

नदतीति स्फूर्तिप्राप्तं हरिम् अतिदूरे दृष्ट्वा उत्कण्ठः उच्चीकृतकण्ठः भोः प्रह्लाद वत्स ! त्वामनालोक्याहं नैव निर्वृणोमि यतस्त्वमेव ममातिप्रिय इत्युक्तस्सन् आनन्दातिशयेन विचित्र

क्वचिदुत्पुलकस्तूष्णीमास्ते संस्पर्शनिर्वृतः।
अस्पन्दप्रणयानन्दसलिलामीलितेक्षणः॥ ४१॥
स उत्तमश्लोकपदारविन्दयोर्निषेवयाऽकिंचनसङ्गलब्धया।
तन्वन्परां निर्वृतिमात्मनो मुहुर्दुःसङ्गदीनान्यमनःशमं व्यधात्॥ ४२॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

एव विलज्जो नृत्यति तदैव स्फूर्तिभङ्गे सति तद्विरहखेदाधिक्येन तद्भावनातिशययुक्तः उन्मादसञ्चारिप्राबल्येन अहमेव हरिरिति तन्मयस्सन् तल्लीलां रामकृष्णाद्यवतारगतामपि अनुचकार अनुकृतवान्॥४०॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

व्यसनेषु आपत्सु नोद्विग्नचित्तः श्रुतेषु पारलौकिकेषु दृष्टेषु ऐहिकेषु च गुणेषु विषयेषु यतोऽवस्तुदृक् अनित्यत्वदर्शित्वतो निस्पृहः दान्ताः वशगाः इन्द्रियादयो यस्य सः॥ ३३॥

यथा भगवति तथा यस्मिन् ये महान्तो गुणाः ते कविभिर्विवेकिभिः स्वस्मिन् अधुनापि मुहुर्गृह्यन्ते पुनःपुनः संगृह्यन्ते ते चात्मनि न धीयन्ते अविवेकिभिरात्मनि धारयितुं न शक्यन्ते इत्यर्थः॥ ३४॥

हे नृप! साधूनां गाथायाः गुणकथायाः सदसि समाजे रिपवः सुरा अपि यं प्रह्लादं प्रतिमानमुपमानं प्रकुर्वंति अमुकः साधुः प्रह्लादसम इत्येवं वर्णयन्तीत्यर्थः। तर्हि भवादृशाः साधवः अन्ये रिपुभिन्नाः स्वकीयाश्च प्रतिमानं प्रकुर्वन्तीति किमुत॥ ३५॥

यस्य वासुदेवे भगवति नैसर्गिकी स्वाभाविकी रतिः प्रीतिः तस्य असङ्ख्येयैर्बहुभिर्गुणैः पर्याप्तमिति तस्य माहात्म्यं सूच्यते यावन्ति गुणास्तु मुख्यो वासुदेवे रतिरेव तत्रैव सर्वे गुणाः सन्ति तदभावे सर्वे गुणा दोषा एवेति भावः। उक्तं चैतच्चतुर्थे स्कन्धे "किं जन्मभिस्त्रिभिर्वेह शौक्लसावित्रयाज्ञकैः" इत्यादिना॥ ३६॥

तां नैसर्गिकीं वासुदेवे रतिं प्रह्लादस्य वर्णयति भगवान्नारदः न्यस्तक्रीडनक इति षड्भिः। तन्मनस्तया वासुदेवविषयकचित्तत्वेन॥ ३७॥

गोविंदेन परिरम्भितः एतानि आसनपर्यटनादीनि नानुसंधत्त न बुबुधे॥ ३८॥

वैकुण्ठचिन्तया शवला विह्वला चेतना यस्य रुदति रोदिति तस्य गोविन्दस्य चिन्तया ध्यानेनाह्लादो यस्य सः॥ ३९॥

क्वचिदुत्कण्ठः उर्ध्वीकृतकण्ठस्सन् नदति ध्वनति क्वचिच्च तन्मयो गोविन्दमयः सन् अनुचकार तल्लीलां स्वयं चकार॥४०॥

भाषा टीका।

व्यसन प्राप्त होने पर जिसका चित्त उद्विग्न नहीं होता और सदा निस्पृह रहता तथा दृष्ट श्रुत (देखे सुने हुए) विषय को कुछ वस्तु नहीं समुझता था, इन्द्रिय प्राण शरीर और बुद्धिका दमन करनेवाला सदा प्रशांत कामना वाला और आसुर भाव से रहित था॥ ३३॥

हे राजन्! जिस प्रल्हाद में बडे २ गुण थे जिन गुणों को बडे २ महात्मा लोग ग्रहण करते हैं वे गुण प्रल्हाद के अब भी तिरोहित नहीं है जैसे कि भगवान श्रीमन्नारायण में॥ ३४॥

हे नृप! साधु कथा प्रसंगवाली सभा में वैरी जो देवता लोग हैं वो भी जिस प्रल्हादको उत्तम पुरुषों का दृष्टांत बनाते हैं फिर आप सदृश विष्णुभक्तों का तो क्या ही कहना॥ ३५॥

उसके असंख्येय गुणों को तो कहां तक कहैं पर उसके माहात्म्यमात्र की सूचना करते हैं कि जिसकी भगवान वासुदेव के विषैं स्वाभाविक प्रीति थी॥ ३६॥

जो कि कृष्ण में मन लगने से जड़ के तरह बालक पने में भी खिलोनों को छोड बैठा, और कृष्णरूप ग्रह से गृहीत हुआ मन जिसका ऐसा प्रल्हाद, जगत् कैसा है यह भी नहीं जानता हुआ॥ ३७॥

बैठे चलते सोते खाते पीते बोलते में भी गोविन्द में पूर्ण रीति से चित्त लगजाने से प्रल्हाद को इन सब बातों का अनुसंधान नहीं रहता था॥ ३८॥

वैकुंठ भगवान की चिन्ता से क्षुभित होगई चेतना जिसकी ऐसा प्रल्हाद कभी रोने लगता कभी हंसने लगता कभी परमात्मा की चिन्ता के आल्हाद से गाने लगता॥३९॥

किसी समय ऊंचे स्वर से नाद करने लगता कभी निर्लज्ज होकर नांचने लगता किसी समय हरिभावना युक्त होकर तन्मय होकर भगवान का अनुकरण करने लगता॥४०॥

श्रीधरस्वामिकृतभावार्थदीपिका।

संस्पर्शस्तद्भावापत्तिस्तेन निर्वृतः अस्पन्दः स्थिरो यः प्रणयस्तेन य आनन्दस्तेन यत्सलिलं तेन युक्ते आमीलिते ईषन्निमीलिते ईक्षणे यस्य सः॥ ४१॥

आत्मनः परां निर्वृतिं तन्वन्दुःसङ्गेन दीनस्यान्यस्यापि मनः शमं शान्तं व्यधात्॥ ४२॥

तस्मिन्महाभागवते महाभागे महात्मनि ।
हिरण्यकशिपूराजन्नकरोदघमात्मजे ॥ ४३ ॥

॥ युधिष्ठिर उवाच ॥

देवर्ष एतदिच्छामो वेदितुं तव सुव्रत ! ।
यदात्मजाय शुद्धाय पिताऽदात्साधवे ह्यघम् ॥ ४४ ॥

(१) पुत्रान् विप्रतिकूलान् स्वान् पितरः पुत्रवत्सलाः ।
उपालभन्तो शिक्षार्थं नैवाघमपरो यथा ॥ ४५ ॥

किमुतानुवशान् साधूंस्तादृशान् गुरुदेवतान् ।
एतत्कौतूहलं ब्रह्मन्नस्माकं विधम प्रभो ! ॥
पितुः पुत्राय यद्द्वेषो मरणाय प्रयोजितः ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां सप्तमस्कन्धे प्रह्लादचरिते
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अघं द्रोहमकरोत् ॥ ४३ ॥

प्रथमाध्यायान्ते पृष्टमेवार्थमतिविस्मयेन पुनः पृच्छति--देवर्ष इति । तव त्वत्तस्तद्वाक्यमिति वा साधवेऽघमदात् साधे द्रोहं कृतवानिति यदेतद्वेदितुं ज्ञातुमिच्छामः ॥ ४४ ॥

उपालभन्ते आक्षिपन्ति अघन्तु नैव कुर्वन्ति अपरः शत्रुरिव ॥ ४५ ॥

अनुवशाननुकूलान् साधूनरागरोषान् गुरुः पितैव देवता येषां तानुद्दिश्याघं न कुर्वन्तीति किमु वक्तव्यमित्यर्थः । पुत्राय पुत्रमुद्दिश्य पितुर्द्वेषः पित्रा कृतो द्वेषः पुत्रस्य मरणार्थं प्रयोजितः प्रवर्तित इति यदेतत्कौतूहलं विधमापाकुरु यद्वा यद्यस्मात्पुत्राय यो द्वेषः स पितुर्मरणाय प्रयोजितोऽत एतत्कौतूहलं विधमेत्यर्थः ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायां
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कंचिच्च संस्पर्शेनाऽविच्छिन्नानुध्यानेन निर्वृतः सुखितः अस्पन्दः स्थिरो यः प्रणयः स्नेहस्तेन य आनन्दस्तेन यत्सलिलं तेनाऽऽमीलिते ईषन्मीलिते ईक्षणे यस्य उत्पुलकः उदञ्चितरोमा तूष्णीमास्ते॥ ४१॥

स प्रह्लादः अकिञ्चनसङ्गो निरुपाधिकस्नेहस्तेन लब्धया उत्तमश्लोकस्य भगवतः पदारविन्दयोः निर्वेषया मुहुर्मुहुरात्मनः स्वस्य परां निर्वृतिमानन्दं तन्वन् वितन्वन्, मन इत्यार्षत्वाल्लुप्तषष्ठीकं पृथक् पदम्, यद्वा, तत एव सविशेषणस्यापि समासः विषयासङ्गेन दीनस्य मनसः शमं शान्तिं रागादिराहित्यं व्यधाच्चक्रे दुःसङ्गदीनस्येति विशेषणं लोकपरिपाटीकृतं न तु तस्य कदाचिदपि विषयासक्तमभून्मन इति भावः ॥ ४२ ॥

हे राजन् ! तस्मिन्नेवंभूते महाभागवतश्रेष्ठे महाविवेकिनि महात्मन्युक्तविधमाहात्म्ये तत्राध्यात्मजे हिरण्यकशिपुरघं द्रोहमकरोत् ॥ ४३ ॥

एवंविधस्य द्रोहानर्हत्वशङ्कया पृच्छति युधिष्ठिरः—देवर्ष इति । हे देवर्षे ! एतद्वेदितुं ज्ञातुमिच्छामः, किन्तत् ? हे सुव्रत ! शुद्धाय निरपराधाय साधवे महाभागवताय तत्रात्मजाय अनेन द्रोहानर्हविषयत्वमुक्तम्. पितेत्यनेन द्रोग्धृत्वानर्हत्वम् अघं द्रोहमधाच्चक्रे इत्येतत् ॥ ४४ ॥

उक्तविशेषणलब्धार्थमेव विशदयति–पुत्रेष्विति । प्रतिकूलेषु पुत्रेषु विषयभूतेषु पुत्रवत्सलाः पितरः शिक्षार्थं केवलमुपालभन्ते आक्षिपन्ति अपरे यथा शत्रवइवाघं द्रोहं नैव कुर्वन्ति. प्रतिकूलानपि पुत्रान् केवलं शिक्षार्थमुपालभन्ते न तेभ्यो द्रुह्यन्ति, किम्पुनरनुकूलान् साधून् गुरुः पितैव दैवतं येषां तानुपालभन्ते न तु तेभ्यो द्रुह्यन्ति इति भावः ॥ ४५ ॥

अतो हे ब्रह्मन् ! अस्माकमेतत्कौतूहलम् एतत्प्रश्नकौतूहलं विधम अपनय हे प्रभो ! पुत्राय यः पितुर्द्वेषः स मरणाय पितुर्मरणाय

---

(१) पुत्रेषु प्रतिकूलेषु. इति पाठान्तरम्, श्री-वीर० ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रयोजितः प्रयोजकोऽभूदिति यदेतत्प्रश्नकौतूहलमित्यन्वयः पितुः पुत्रविषयकद्वेषः स्वस्यैव मरणप्रयोजकः कथमभूदित्येवं विप्रप्रश्नविषयकौतूहलं विधमेत्यर्थः ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्पर्शेषु विषयेषु स्पृहारहितः अस्पन्दप्राणः प्राणचेष्टारहितः आनन्दसलिलेन सन्तोषाश्रुजलेन निमित्तेन किञ्चिन्निमीलितनेत्रः ॥ ४१ ॥

अकिञ्चनानां महतां सतां सेवालक्षणसङ्गेन प्राप्तया ॥ ४२ ॥

अघं मरणलक्षणं व्यसनम् ॥ ४३ ॥

"विद्वेषो दयिते पुत्रे कथमासीन्महात्मनि" इतिस्वपृष्टं कथान्तरासक्त्या नारदेनापरिहृतम् जानन् राजा युधिष्ठिरः पुनरपि जानन्नकरोदघमात्मज इतिप्रसक्तं श्रुत्वा तदेव पृच्छति--देवर्षे इति । पुत्रस्य मरणकारणमासुरकर्म न तु शास्त्रीयमितिज्ञापनाय साधवे अघमिति संहिताकार्यं न कृतम् ॥ ४४ ॥

अपरे शत्रवः ॥ ४५ ॥

विधम परिहर पुत्राय प्रयोजितो विद्वेषः पितुर्मरणायाभूदिति यत्तस्मात्कौतूहलमिति ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

संयोगे क्वचिदुत्पुलकइति । संस्पर्शः कृपामयतत्कर्तृकालिङ्गनस्फूर्त्तिः ॥ ४१ ॥

दन्त्यपाठे स्वसमं स्वान्तःकरणतुल्यं व्यधात् ॥ ४२ ॥

महाभागवतत्वलक्षणं पूर्वमेव दर्शितम्. महान् भागो भाग्यं श्रीनारदकृपारूपं यस्य महान् पूज्य आत्मा धैर्यगाम्भीर्यादियुक्तः स्वभावो यस्य ॥ ४३ ॥ ४४ ॥

पुत्रानिति सार्द्धकम् ॥ ४५--४६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

क्वचिदुत्पुलक इति क्व यामि कुत्र प्रभुं प्राप्स्यामीति कदाचित्तद्विच्छेददुःखेन मुद्रितनेत्र अकस्मात् स्वहृदय एव तमालोक्य तत्पाणिस्पर्शेन निर्वृत उत्पुलकः न विद्यते स्पन्दनो यस्य सः प्रणयेनानन्दसलिलं ययोस्तथाभूते ईषन्मुद्रिते ईक्षणे यस्य स च स च सः ॥ ४१ ॥

ननु, तस्य हिरण्यकशिपुप्रभृतिदुःसङ्गत्वे कथं स्थिरा भक्तिस्तत्र प्रह्लादस्य तस्य सङ्गेनान्येपि दुःसङ्गिनस्तत्सहचरबालाः कृतार्था बभूवुः कथं तस्यैव दुःसङ्गाशङ्केत्याह--सइति । दुस्सङ्गदीनस्यान्यस्यापि मनः शमं "शमो मन्निष्ठता बुद्धेः" इति भगवद्वचनात् भगवन्निष्ठमकरोत् ॥ ४२ ॥

अघं द्रोहम् ॥ ४३ ॥

प्रथमाध्यायान्ते पृष्टमेवार्थमतिविस्मयेन पुनः पृच्छति देवर्षे इति । तव त्वत्तः अघं दुःखम् ॥ ४४ ॥

नैव अघं प्रापयन्ति अपरः अनुवशान् अनुकूलान् ॥४५॥

कुतूहले भवं कौतूहलं सन्देहं विधम अपाकुरु सन्देहः कः पुत्राय पुत्रं हन्तुं पितुर्द्वेषः यत् यो द्वेषः मरणाय स्वस्य मरणार्थमेव प्रकर्षेण योजितः ॥ ४६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

सप्तमेतु चतुर्थोयं सङ्गतः सङ्गतस्सताम् ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

उत्पुलको जातरोमाञ्चः संस्पर्शेन ध्यानदृष्टभगवच्चरणसंस्पर्शेन निर्वृतः सुखितस्तूष्णीमास्ते अस्पन्दप्रणयेन अचलप्रेम्णा य आनन्दस्तेन यत्सलिलं तेन युक्ते आमीलिते ईषन्मुद्रिते ईक्षणे यस्य सः ॥ ४१ ॥

अकिञ्चनानां भगवदनन्यशरणानां सङ्गमेन लब्धया उत्तमश्लोकस्य पुण्यकीर्तेर्हरेः पदारविन्दयोर्निषेवया आत्मनः परां निर्वृतिं परं सुखं तन्वन् दुःसङ्गेन दीनस्येतरस्यापि मनः शमं भगवन्निष्ठं व्यधादकरोत् ॥ ४२ ॥

अघं पापं द्रोहमित्यर्थः ॥ ४३ ॥

यत् शुद्धाय अघमदात् शुद्धे द्रोहं कृतवानित्यर्थः । एतत् तव त्वत्तः वेदितुमिच्छामः ॥ ४४ ॥

पुत्रवत्सलाः पितरो विप्रतिकूलानपि शिक्षार्थमेवोपालभन्ते आक्षिपन्ति अपरः शत्रुर्यथा तथा अघं नैव कुर्वंति किमुत वाच्यमनुवशत्वादिगुणयुक्तान्प्रति अघं न कुर्वन्तीति ॥ ४५ ॥

पुत्राय पुत्रं हन्तुं यो द्वेषः स पितुर्मरणाय प्रयोजितः, पित्रेति शेषः । इत्येतत्कौतूहलं विधम अपाकुरु ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

चतुर्थाध्यायार्थप्रकाशः ॥ ४ ॥

भाषा टीका।

किसी समय स्फूर्ति प्राप्त भगवत्स्पर्शानुभवसे आनंदित होकर रोमांचित होजाता और निश्चल होकर प्रेम से हुआ जो आनंदबाष्प तिससे किञ्चित् निमीलित है नेत्र जिसका ऐसा होकर तूष्णीं भाव को प्राप्त होजाता ॥ ४१ ॥

अकिंचनों के संग से प्राप्त हुई जो गोविन्द चरणार-विन्द की सेवा उससे अपने आनंद की परा काष्ठा का विस्तार करता हुआ, वारंवार दुःसंग से दीनजनों के मन की भी शांति करता हुआ ॥ ४२ ॥

हे राजन्! उस बडभागी महात्मा महा भागवत अपने पुत्र प्रल्हाद में हिरण्यकशिपुने ऐसा पाप क्यों किया ॥ ४३ ॥

युधिष्ठिरउवाच।

युधिष्ठिरजी बोले, कि—हे देवर्षे! हे सूत! मैं आप से इतने जानने की इच्छा करता हूं कि परमसुशील अपने पुत्रको पिताने कैसे द्रोह किया ॥ ४४ ॥

पिता लोग पुत्रों के विषय में ऐसे वत्सल होते हैं कि अत्यंत प्रतिकूल भी अपने पुत्रों को शिक्षा ही लिये कुछ आक्षेप करते हैं, शत्रुके तरह दुष्ट अभिप्राय वाले नहीं होते हैं ॥ ४५ ॥

फिर गुरु लोगों को देवता के सदृश मानने वाले अपने वशंवद सुशील प्रल्हाद सदृशों पर क्या ही कहना, हे ब्रह्मन् यही मुझे बड़ा कौतूहल है कि पिताने पुत्र के लिये मरणार्थ द्वेष किया इस कौतूहल को आप दूर करो ॥ ४६ ॥

इति श्रीमद्भागवत महापुराण सप्तमस्कन्ध
चतुर्थोध्याय की भाषा टीका समाप्त ॥ ४ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे चतुर्थोध्यायः ॥ ४ ॥

॥ पञ्चमोऽध्यायः ॥

नारद उवाच ।

पौरोहित्याय भगवान् वृतः काव्यः किलासुरैः ।
शण्डामर्कौ सुतौ तस्य दैत्यराजगृहान्तिके ॥ १ ॥
तौ राज्ञा प्रापितं बालं प्रह्लादं नयकोविदम् ।
पाठयामासतुः पाठ्यानन्यांश्चासुरबालकान् ॥ २ ॥
यत्तत्र गुरुणा प्रोक्तं शुश्रुवेऽनुपपाठ च ।
न साधु मनसा मेने स्वपरासद्ग्रहाश्रयम् ॥ ३ ॥
एकदाऽसुरराट् पुत्रमङ्कमारोप्य पाण्डव ! ।
पप्रच्छ कथ्यतां वत्स मन्यते साधु यद्भवान् ॥ ४ ॥

प्रह्लादउवाच ।

तत्साधु मन्येऽसुरवर्य देहिनां सदा समुद्विग्नधियामसद्ग्रहात् ।
हित्वात्मपातं गृहमन्धकूपं वनं गतोयद्धरिमाश्रयेत ॥ ५ ॥

नारदउवाच ।

श्रुत्वा पुत्रगिरो दैत्यः परपक्षसमाहिताः ।
जहास बुद्धिर्बालानां भिद्यते परबुद्धिभिः ॥ ६ ॥
सम्यग्विधार्यतां बालो गुरुगेहे द्विजातिभिः ।
विष्णुपक्षैः प्रतिच्छन्नैर्न भिद्येतास्य धीर्यथा ॥ ७ ॥
गृहमानीतमाहूय प्रह्लादं दैत्ययाजकाः ।
प्रशस्य श्लक्ष्णया वाचा समपृच्छन्त सामभिः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पञ्चमे गुरुतोऽधीतं त्यक्त्वा विष्णुस्तुतौ रतम् ।
घातयन्विपसर्पाद्यैः सुतं दैत्यो न चाशकत् ॥ १ ॥

भगवद्भक्तिरेव विद्वेषे कारणमिति वक्तुमाह--पौरोहित्यायेत्यादिना । काव्यः शुक्रः अतस्तस्य सुतौ दैत्यराजगृहान्तिके न्यवसतामितिशेषः ॥ १ ॥

पाठयान्दण्डनीत्यादीन् पाठ्यानसुरबालकानितिवान्वयः ॥ २ ॥

अनु श्रवणानन्तरं तथैव पपाठ च किन्तु तत्साधु न मेने तत्र हेतुः स्वः परः इत्यसद्ग्रहो मिथ्याभिनिवेशस्तदेवाश्रयो यस्य तत् ॥ ३ ॥ ४ ॥

हे असुरवर्य ! असद्ग्रहादहं ममेति मिथ्याऽभिनिवेशाद्धेतोः सम्यगुद्विग्ना विषण्णा धीर्येषां ते वनं गतः सन्हरिमाश्रयेतेति यत्तदेवाहं साधु मन्ये कथम्भूतं गृहम् आत्मपातमात्मनोऽधःपातनिमित्तम् कुतः अन्धकूपवन्मोहावहम् ॥ ५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

परपक्षे विष्णौ समाहिताः परिनिष्ठिताः हासे हेतुः बुद्धिरिति ॥ ६ ॥

विष्णुपक्षैर्भागवतैर्हेतुभूतैः ननु, त्वद्गृहे कुतस्तेषां प्रवेशः सत्यम् तथाऽपि प्रतिच्छन्नैर्वेषान्तरेण छन्नैः ॥ ७ ॥

दैत्यैर्गृहमानीतम् ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

एवमापृष्टद्वेषनिमित्तस्तद्वृत्तान्तावदुपोद्घातमाह भगवान्नारदः—पौरोहित्यायेत्यादिना । भगवान् काव्यः शुक्रः पौरोहित्याय पुरोहितकर्मकर्तुमसुरैर्वृतः, किलेति प्रसिद्धिं द्योतयति तस्य काव्यस्य सुतौ शण्डामर्काख्यौ दैत्यराजस्य हिरण्यकशिपोः गृहसमीपे आस्तामितिशेषः ॥ १ ॥

तौ च शण्डामर्कौ दैत्यराजेन प्रापितं नीतिशास्त्रपठनार्थं प्रापितं प्रह्लादमन्यांश्चासुरबालकांश्च पाठ्यान् दण्डनीत्यादीन् पाठयामासतुः पठनं कारितवन्तौ अत्र नयकोविदमिति क्रियाविशेषणं यथा नयकोविदाः नीतिशास्त्रनिपुणाभवन्ति तथा पाठयामासतुरिति ॥ २ ॥

तत्र एवं स्थिते प्रह्लादो यद्गुरुणा प्रोक्तं तच्छुश्रुवे श्रुतवान् अनुपठितवांश्च परन्तु तत्प्रोक्तं मनसा साधुयथातथा न मेने तत्र हेतुं वदन् प्रोक्तं विशिनष्टि—स्वपरासद्ग्रहाश्रयम् अयं स्वः स्वकीयो मित्रम् अयन्तु परः शत्रुरित्येवंरूपो योऽसद्ग्रहो वृथाग्रहरूपोऽभिमानस्तस्याश्रयं हेतुभूतम् ॥ ३ ॥

एवं स्थिते हे पाण्डव ! कदाचिदसुरराट् पुत्रं प्रह्लादमङ्कमारोप्योत्सङ्गे निधाय हे वत्स पुत्र, भवानाचार्यप्रोक्तेषु मध्ये यत्साधु मन्यते तत्कथ्यताम्. इत्येवं पप्रच्छ ॥ ४ ॥

एवं दैत्येन पृष्टः प्रह्लादस्तमाह—तदित्येकेन । हे असुरवर्य दैत्यराज ! असद्ग्रहात् देहात्माभिमानस्वतन्त्राभिमानतन्मूलशब्दादिविषयाभिनिवेशादिरूपादसद्ग्रहाद्धेतोः सदा नित्यं समुद्विग्ना नितरां भीता धीर्येषां तेषां देहिनां कुत्सितदेहधारिणामात्मपातं पतत्यनेनेति पातम् आत्मनः अधःपतनहेतुमन्धकूपतुल्यं गृहं त्यक्त्वा वनमरण्यं प्रविष्टो हरिम् आश्रितबन्धहरं भगवन्तमाश्रयेतेति यत्तदेव साधु मन्ये इति. हित्वेतिपदेन हेयसंक्षेपः हरिमाश्रयेतेत्येनेन उपादेयतत्त्वतदनुष्ठानसंक्षेपः वनं गतइति विविक्तदेशोपलक्षणम् ॥ ५ ॥

एवमुक्तो दैत्यराजः किमाहेत्याह देवर्षिः—श्रुत्वेति । परपक्षसमाहिताः परपक्षे विष्णौ समाहिताः परिनिष्ठिताः पुत्रस्य प्रह्लादस्य गिरः श्रुत्वा दैत्यो जहास हासपूर्वकमुवाचेत्यर्थः । तत्रेवाह—बालानां बुद्धिः परबुद्धिभिः परस्मिन् शत्रौ विष्णौ बुद्धिर्येषां तैर्भिद्यते अन्यथाक्रियते विपरीताक्रियते इत्यर्थः ॥ ६ ॥

नूनं गुरुगेहे प्रतिच्छन्नैर्विष्णोर्भक्तैर्द्विजातिभिः ब्राह्मणैः अयं बालो भिद्यते विपरीतबुद्धिः क्रियते अतोऽस्य बालस्य बुद्धिर्यथा नभिद्येत तथा सम्यग्विधार्यतां विचार्यतामित्यर्थः ॥ ७ ॥

ततो दैत्ययाजकाः दैत्यपुरोहिताः स्वगृहम्प्रति दैत्यभटैरानीतम् प्रापितं प्रह्लादम् आहूय प्रशस्य प्रस्तुत्य सामोक्तिभिः श्लक्ष्णया मृद्व्या उक्त्या च सम्यगपृच्छन् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हिरण्यकशिपुप्रह्लादसम्वादच्छलेन भक्तिस्वरूपं हरेर्निरतिशयस्वातन्त्र्यञ्च निरूपयत्यस्मिन्नध्याये--काव्यः शुक्रः शण्डश्च मर्कश्च शण्डामर्कौ तस्य शुक्रस्य दैत्यराजगृहान्तिके न्यवसतामितशेषः ॥ १ ॥

राज्ञा हिरण्यकशिपुना ॥ २ ॥

अपाठस्य विशेषणभूतेन हेत्यनेन सूचितं हेतुमाह—नेति असाधुत्वे किङ्कारणमत्राह—स्वरूपेति, "स्वातन्त्र्यात्स्वइतिप्रोक्तः" इत्यतःस्वस्य स्वतन्त्रस्य हरेरूपस्यासत्त्वं शून्यत्वं गृह्णातीति निराकारो हरिरिति यः पक्षः स आश्रयो यस्य तत्तथानिराकारपक्षविषयत्वादित्यर्थः । प्रपञ्चस्वरूपस्यासद्ग्रहः शून्यत्वप्रतिपादकः शून्यवादः स आश्रयो यस्य तत्तथा अद्वैतविषयत्वादित्यर्थःइतिवा जीवपरस्वरूपयोरसत्पृथगभावं गृह्णातीति स्वरूपासद्ग्रहः जीवपरमात्मानावभिन्नाविति यः सिद्धान्तः स आश्रयः यस्य तत्तथा अद्वैतविषयत्वादित्यर्थं इति वा, स्वरूपासद्ग्रहः औत्पत्तिकदुराग्रहोऽवैष्णवपक्षपातः स आश्रयो यस्य तत्तथा वैष्णवसिद्धान्तविरुद्धत्वादित्यर्थं इति वा विन्यासभेदः एवायन्तात्पर्यन्तस्त्वेकएवेति ॥ ३ ॥ ४ ॥

हे असुरवर्य ! असद्ग्रहाद्विषयाभिनिवेशात् समुद्विग्नाधियां परवशीकृतबुद्धीनां देहिनां तत्साधु संसारनिर्मूलसाधनं मन्य इत्यन्वयः । किं तदिति, तत्राह—हित्वेति. आत्मपातं स्वस्य निरयपातम् अन्धमज्ञानं यत्तस्य कूपं निधानस्थानं गृहं हित्वा वनं सज्जनसङ्गमलक्षणं गतः ॥ ५ ॥

सज्जनशिक्षार्थं प्रह्लादेन तत्त्वमुक्तं न तु तं आहर्तुं तस्यासुरावेशेन दुराग्रहगृहीतत्वात्तत्फलमाह—श्रुत्वेति । परिहासफलं परबुद्धिभिः प्रतिपक्षबुद्धिभिःपरपक्षसमीहिताः पूर्वपक्षविषयत्वेन प्रवृत्ताः ॥ ६ ॥

पुत्रस्नेहेनाभिमतोयं न हासः किं त्वनभिमत एवेत्यभिप्रेत्याह—सम्यगिति । विधार्यतामवधार्यतां विष्णुपक्षः प्रतिच्छन्नं येषां ते तथा तैर्विष्णुसिद्धान्तमभिगृह्यास्थितैरित्यर्थः ॥ ७ ॥

अवशवशीकरणाय चत्वार उपाया विहितास्तत्र द्विजातीनां सामोपाय एव श्रेयानिति दर्शयितुं परकृतबुद्धिभेदं ज्ञातुं तत्रापि योग्यानां भगवत्तत्त्वविषयज्ञाननिश्चयाय च दैत्यभयाच्च दैत्ययाजकाः प्रह्लादमपृच्छन्नित्याह । गृहमिति--सामिर्वचनैः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

॥ १——१० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

गुरुणाऽध्यापितः पित्रा पृष्टः कृष्णं स्तुवन् सुतः।
पञ्चमे दिग्गजाद्यैस्स हतोऽपि स्वस्थ्यराजत॥ ० ॥

प्रह्लादस्य भक्तिरेव विद्वेषकारणमिति वक्तुमाह—पौरोहित्यायेत्या दिना। काव्यः शुक्रः अतस्तस्य सुतौ तत्र न्यवसतामिति शेषः॥ १ ॥ २ ॥

यत् दण्डनीत्यादिकं तत् साधु न मेने कुतः ? स्वः पर इत्यसद्ग्रहं दुरभिनिवेशमेव आ सम्यक्प्रकारेण श्रयते इति तत् ॥ ३॥

कठिनपदार्थानां प्रश्ने बालस्यास्य स्तोभो भविष्यतीति मत्वा प्राह—यद्भवान् साधु मन्यते पठितानां वस्तूनां मध्ये साधु अभ्यस्तीकृतं यत् त्वं जानासि मदग्रे वक्तुञ्च शक्नोषि तदेव वदेति हिरण्यकशिपोरभिप्रायः ॥ ४ ॥

प्रल्हादस्तु तदभिप्रायं ज्ञात्वापि जगत्यस्मिन् जिज्ञास्यानां मध्ये भवान् किं वस्तु साधु मन्यते इति बुद्ध्या विचार्य्य स्वसम्मतीकरोतीति मां पृच्छति चेदस्य समुचितमुत्तरं शृणिवत्याह—तदिति। हे असुरवर्य्य ! असद्ग्रहात् अहं ममेति मिथ्याभिनिवेशात् उद्विग्नधियां जनानां तदेव साधुमन्ये. किं तत् ? आत्मपातहेतुं गृहं त्यक्त्वा वनं गतस्सन् यद्धरिमाश्रयेतेति, अत्र यत् हरिमाश्रयेत तदेव हरिचरणाश्रयणं साधु मन्ये गृहस्थितोपि स एव गृहमन्धकूपं हित्वा वनं गतः अन्यथा वनं गतोऽपि गृहमन्धकूपमेव श्रित इति च व्याचक्षते ॥ ५ ॥

परपक्षे शत्रुपक्षे विष्णौ समाहिताः परिनिष्ठिताः जहासेति बालोऽयं यो यद्धारयति तदेव धत्ते अस्य को दोषस्तदद्यारभ्य नारदाद्या वैष्णवा नात्र प्रवेशनीया इत्यादिदेशेति भावः ॥ ६ ॥

तदपि गुरुगेह एव ते नैवं वक्तव्या इत्याह—विष्णुपक्षैरिति ॥७॥

प्रशस्य श्लक्ष्णयेत्यन्यथा बालोऽयं भयेन स्वोपदेशकं वैष्णवं न वक्ष्यतीति भावः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

भगवद्भजनतः प्रह्लादः पित्रा गजादिभिर्घातितोऽपि भगवदनुग्रहान्न मृत इति पञ्चमे वर्णयति. भगवद्भजनरतं पुत्रं दृष्ट्वा हिरण्यकशिपुस्तं प्रति विद्वेषं कृतवानिति वक्तुमाह—पौरोहित्यायेत्यादि। काव्यः शुक्रः तस्य सुतौ दैत्यराजगृहान्तिके न्यवसतामिति शेषः॥ १ ॥

तौ प्रह्लादमन्यांश्चासुराणां बालकान् पाठ्यान् पाठयामासतुः ॥ २ ॥

दण्डनीत्यादिकं गुरुणा प्रोक्तं तत् शुश्रुवे श्रुतवान् श्रवणानन्तरं पपाठ च पठितवांश्च मनसा तु साधु न मेने यतः स्वपररूपो योऽसद्दुष्टो ग्रहोऽभिनिवेशस्तदाश्रयम् ॥ ३ ॥ ४ ॥

असद्ग्रहात् नित्यस्वरूपो जीवः तद्विपरीतोऽनित्यो देहोऽस्यच्चस्मिन् यो ग्रहोऽहमित्यभिनिवेशस्तस्मादनात्मन्यात्मभ्रमात् सदा समुद्विग्नधियाम् आत्मनः पातो यस्मिन् तमन्धकूपं गृहं हित्वा वनं गतस्सन् यद्धरिमाश्रयेत तत्साधु मन्ये ॥ ५ ॥

परपक्षे विष्णौ समाहिताः सम्यगाहिताः संयोजिताः पुत्रगिरः श्रुत्वा बालानां बुद्धिः परेषां बुद्धिभिर्भिद्यते इति मत्वा जहास ॥ ६ ॥

गुरुगेहे बालः सम्यग्विधार्यताम् अस्मद्भयात्प्रतिच्छन्नैर्गुप्तलक्षणैर्विष्णुपक्षैर्वैष्णवैर्द्विजातिभिर्यथाऽस्य धीर्न भिद्येत ॥ ७ ॥

दैत्ययाजकाःगृहमानीतं प्रह्लादं श्लक्ष्णया मधुरया वाचा प्रशस्य सामभिः प्रियवाक्यैः समपृच्छन्त ॥ ८ ॥

भाषा टीका।

श्रीविदर्भराजतनयाकुचकाश्मीरमुद्रितोरसे नमः ॥

नारद उवाच

नारदजी बोले, कि—असुर लोगों ने भगवान् श्रीशुक्राचारीजी को पुरोहित किये थे, उनके शंडा मर्क नामक दो पुत्र दैत्यराज के महलों के समीप रहते थे ॥ १ ॥

वो दोनों राजा के भेजे हुए, नीतिनिपुण प्रल्हाद नामक बालक को पढाते थे तथा और भी पढने के योग्य छोटे २ असुरबालकों को पढाते थे ॥ २ ॥

जो कुछ वहां पांडे ने पढाया उसको सुना भी और पढा भी परंच अपना पराया झूठेआग्रहवाला वह पढना प्रल्हाद् को मन से अच्छा न मालूम हुआ ॥ ३ ॥

हे पांडव ! एक दिन दैत्यराज ने अपने पुत्र को गोद में बैठाकर पूंछा कि हे वत्स ! तुम क्या अच्छा मानते हो ॥ ४ ॥

प्रल्हाद उवाच ॥

प्रल्हाद बोला, कि—हे असुरवर्य ! संसार से सदा उद्विग्नबुद्धिवाले प्राणियों को तो मैं यही अच्छा समझता हूं कि अपने पतन होने का गृह रूप अंधकूप को छोडकर वन में जाकर हरि का आश्रयण करै ॥ ५ ॥

नारदउवाच ॥

नारदजी बोले, कि—पुत्र की वाणी शत्रु के पक्ष में निष्ठावाली सुनकर दैत्य हँसा और बोला कि—बालकों की बुद्धि पराये की बुद्धि से भेद को प्राप्त होजाती है अर्थात् बिगड जाती है ॥ ६ ॥

इसी से गुरु के गृह में लेजाकर बालक को अच्छी तरह शिक्षा दो कि जिससे छिपे हुए विष्णु के पक्ष वालों से इस की बुद्धि न बिगडे ॥ ७ ॥

दैत्य पुरोहितों ने घर पर आये हुए प्रल्हाद को बुलाकर मधुरवाणी से बड़ाई देकर शांति से पूंछा ॥ ८ ॥

वत्स ! प्रह्लाद ! भद्रं ते सत्यं कथय मा मृषा ।
बालानति कुतस्तुभ्यमेष बुद्धिविपर्ययः ॥ ९ ॥
बुद्धिभेदः परकृत उताहो ते स्वतोऽभवत् ।
भण्यतां श्रोतुकामानां गुरूणां कुलनन्दन ! ॥ १० ॥
प्रह्लाद उवाच ।
(१) स्वः परश्चेत्यसद्ग्राहः पुंसां यन्मायया कृतः ।
विमोहितधियां दृष्टस्तस्मै भगवते नमः ॥ ११ ॥
स यदाऽनुव्रतः पुंसां पशुबुद्धिर्विभिद्यते ।
अन्य एष तथाऽन्योऽहमिति भेदगताऽसती ॥ १२ ॥
स एष आत्मा (२) स्वपरेत्यबुद्धिभिर्दुरत्ययानुक्रमणो निरूप्यते ।
मुह्यन्ति यद्वर्त्मनि वेदवादिनो ब्रह्मादयो ह्येष भिनत्ति मे मतिम् ॥ १३ ॥
यथा भ्राम्यत्ययो ब्रह्मन्स्वयमाकर्षसन्निधौ ।
तथा मे भिद्यते चेतश्चक्रपाणेर्यदृच्छया ॥ १४ ॥
नारद उवाच ।
एतावद्ब्राह्मणायोक्त्वा विरराम महामतिः ।
तं निर्भर्त्स्याथ कुपितः स दीनो (३) राजसेवकः ॥ १५ ॥
आनीयतामरे ! वेत्रमस्माकमयशस्करः ।
कुलाङ्गारस्य दुर्बुद्धेश्चतुर्थोऽस्योदितो दमः ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

बालान्सर्वानति अतिक्रम्य तुभ्यं तव ॥ ९ ॥ १० ॥

अहो मायामोहिताः भवन्तो मामाक्षिपन्तीत्याशयेन तावदाह—स्वःपरश्चेति । मिथ्याभिनिवेशो यदीयया मायथैव कृतो न तु वास्तवः अत एव तदीयया मायया विमोहितबुद्धीनां भवतामेव दृष्टो नतु मम तस्मै अचिन्त्यमायेश्वराय नमः ॥ ११ ॥

अहो किमेतत्प्रलपसि तव बुद्धिभेदो यतोजातस्तं कथयेत्याक्षिप्तः संस्तत्प्रसादादेवेत्युत्तरमाह—स इति त्रिभिः । स भगवान्यदानुव्रतोऽनुकूलो भवति तदा पशूनामविवेकिनामिव बुद्धिर्भेदगता असती मिथ्या संसारविषया विभिद्यते अभिन्नात्मनिष्ठा भवति ॥ १२ ॥

भेदस्यासत्त्वं दर्शयन्नाह—स एव परमात्मैव स्वःपर इतिचाविवेकिभिर्निरूप्यते युक्तश्चैतत् यतो यस्य वर्त्मनि जिज्ञासायां ब्रह्मादयोऽपि मुह्यन्ति, तत्र हेतुः, दुरत्ययं दुर्घटमनुक्रमणमनुचरितमनुवर्त्तनं वा यस्य ॥ १३ ॥

ननु, निर्विकारस्य कथं मतिभेदकत्वं ? तत्राऽह—यथेति । यथा अयो लोहमाकर्षस्यायस्कान्तस्य समीपे स्वयमेव भ्रमति तथा मे चेतश्चक्रपाणेः सन्निधौ तव कुतो जातस्तत्सन्निधिः ? तत्राऽह—यदृच्छयेति. कस्य तपोदानादेः फलमेतदिति न ज्ञायत इत्यर्थः ॥ १४ ॥

राजसेवक उवाचेति शेषः ॥ १५ ॥

अरे वेत्रं कशाऽऽनीयतां सामदानभेददण्डानां मध्ये चतुर्थो दमो दण्डोऽस्य दुर्बुद्धेरुदित उक्तः शास्त्रेषु दुर्बुद्धित्वे हेतुः कुलस्याङ्गारवन्नाशहेतोः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रश्नमेवाह—वत्सेति द्वाभ्याम् । हे वत्स ! प्रह्लाद ! ते तव भद्रमस्तु, न त्वां ताडयाम इति भावः । सत्यं यथार्थं कथय मृषा मिथ्या मा कथय. किं कथयेयम् ? तत्राह—बालानिति । बालानति अतिक्रम्य सर्वान् बालान् विहाय तुभ्यं तवैव एष. बुद्धिविपर्यासः कुतो हेतोः ? अभूदिति ॥ ९ ॥

किमयं बुद्धिविपर्यासः परैर्विष्णुपक्षपातिभिः कृतः

(१) परः स्वश्चेति पाठान्तरम्. वीर० विज० क्रम० वि-चक्र० सिद्धा० । (२) स्वपरेत्यबुद्धिर्दुरन्वयानुक्रमणो-इति पाठान्तरम्. वीर० । (३) राजसेवकमिति पाठा० वीर० ।

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

उताहो आहोस्विद् स्वत एव तथाभवत् हे दैत्यकुलनन्दन! त्वद्गुरूणां श्रोतुकामानामस्माकं भण्यतां कथ्यतामिति ॥ १० ॥

एवमुक्त आह प्रह्लादः-पर इत्यादिना चतुर्भिः। यत्पृष्टं बुद्धिभेदः परकृतः उत स्वाभाविक. इति तत्र तमिमं स्वपरविभागं देहात्माभिमानरूपाज्ञानमूलकं भगवन्मायामोहितानामिति निन्दितुं तावद्देहात्माभिमानादिरूपमोहनिमित्तविचित्रमायाशक्तियुक्तं भगवन्तं नमस्करोति-पर इति. यस्येश्वरस्य मायया हेतुना स्वः परश्चेत्यसद्ग्राहः इदं मित्रमयं शत्रुरयन्देवो मनुष्यो ब्राह्मण इत्यादिदेहात्मभ्रमः कृतः सम्पादितः विमोहितधियां भगवन्मायया विमोहिता धीर्येषां तेषां भवतामेव दृष्टो न ममेति भावः तस्मै पूर्णषाड्गुण्याय नमः विमोहितधियामित्यनेन "दैवी ह्येषा गुणमयी मममाया दुरत्यया" इति भगवदुक्तरीत्या भगवदप्रपन्नानां भवतामेवासद्ग्राहः न तु तत्प्रपन्नस्य मम इति सूचितम् ॥ ११ ॥

तदेव व्यञ्जयन्नसद्ग्राहं निन्दति—स इति। स भगवान् यदा पुंभिरनुव्रतः आश्रितः तदा पुंसां पशुबुद्धिः पशुष्विव बुद्धिः देहात्माभिमानरूपा बुद्धिर्विभिद्यते निरस्यते कासौ पशुबुद्धिः? या, अयं एषः अन्योऽहम् इत्येवंरूपा सर्वशरीरेषु ज्ञानैकाकारतया परमात्मशरीरतया चावस्थिता नात्मनो विस्मरतां स्वः पर इत्येकरूपा भेदगता अनात्मभूतदेवासुरमनुष्यादिशरीरगता अत एवासती दुष्टा अनर्थावहा सैषा पशुबुद्धिरित्यर्थः ॥ १२ ॥

एवं स्वपरविभागहेतुभूतदेहात्मभ्रमादेर्भगवन्मायाहेतुकत्वकथनेन तच्छरणात्तन्निवृत्तिकथनेन च भगवत एवाज्ञानप्रदत्वं तन्निवर्त्तकत्वञ्चोक्तम्. अथ ज्ञानप्रदातृत्वमपि तस्यैवेत्याह—स इति। स उक्तविध एष आत्मा प्रकृतः परमात्मा स्वपरेत्यबुद्धिः स्वः परश्चेति बुद्धिरहितः सर्वान्तरात्मतया सर्वत्र समत्वादित्यर्थः। दुरन्वयं पुरुषान्तरेष्वघटमानमनुक्रमणं व्यापारो यस्य तादृशो निरूप्यते अन्यैरशक्यं सर्वं सर्वशक्तिलीलया करोतीत्यर्थः। यस्य वर्त्मनि मार्गे यत्स्वरूपविमर्शने वेदवादिनो ब्रह्मादयोऽपि मुह्यन्ति स एष एव परमात्मा मम मतिं बुद्धिं भिनत्तीत्यर्थः। स्वपरेत्यबुद्धिरित्यनेन देवासुरादिविभागमन्तरेण सर्वेषां ज्ञानप्रदत्वमुक्तम्. दुरत्ययानुक्रमण इत्यनेन सर्वशक्तित्वं वैषम्यादिराहित्यञ्चोक्तम्. यद्वर्त्मनि ब्रह्मादयोऽपि मुह्यन्तीत्यनेन तत्प्रसादादेव ब्रह्मादीनामपि ज्ञानोदयः अन्यथा केवलं तेषामपि मोह एवेत्युक्तम्. स्वपरेत्यबुद्धिभिरिति तृतीयान्तमपि पाठान्तरं तत्र स्वः पर इति न विद्यते बुद्धिर्येषां तैः स्वपरविभागात्मकाविवेकरहितैरित्यर्थः। तादृशैर्दुरन्वयानुक्रमणोऽनितरसाधारणव्यापारो निरूप्यते ज्ञायते इत्यर्थः। तत्प्रसादान्निवृत्तदेहात्माभिमानादिभिः ज्ञानाज्ञानादिप्रदत्वेन परमात्मा ज्ञायते इत्यर्थः ॥ १३ ॥

एवं ज्ञानप्रदत्वमुक्तम् अथ तस्यैव तत्प्रदानेन स्वस्य प्रवर्त्तकत्वमाह—यथेति। आकर्षसन्निधौ अयस्कान्तसन्निधाने अयोलोहं स्वयमेव यथा भ्रमति, भ्राम्यति चञ्चलं भवतीत्यर्थः। तथा मम चेतोऽपि चक्रं पाणौ यस्य तस्य हरेः सन्निधौ यदृच्छया हेत्वन्तरनिरपेक्षं भिद्यते तत्प्रसादात्तत्सान्निध्यादेव ममैवंविधा बुद्धिर्वृत्तिरभूदित्यर्थः। अनेन "बुद्धिभेदः परकृतः उताहो ते स्वतोऽभवद्" इति प्रश्नस्योत्तरमुक्तं भवति ॥ १४ ॥

एवमुक्तो गुरुराहेत्याह-मुनिः—एतावदिति। ब्राह्मणान् दैत्ययाजकान् प्रत्येवम् एतावदेवोक्त्वा महामतिः स प्रह्लादो विरराम तूष्णीम्बभूव. ततो दीनः उपायान्तरेण तं स्ववशीकर्तुमशक्तो गुरुः तं निर्भर्त्स्य कुपितस्सन् राजसेवकम् उवाचेति शेषः ॥ १५ ॥

तदेवाह—आनीयतामिति द्वाभ्याम्। अरे हे राजभट! इत्यर्थः वेत्रं प्रहरणसाधनयष्टिविशेषमानीयताम् अस्माकमयशोऽपकीर्त्तिङ्करोतीत्ययशस्कृत्तस्य अतएव कुलस्य दैत्यकुलस्याङ्गारवन्नाशकः तस्य दुर्बुद्धेरितः परं दमः शिक्षणोपायः चतुर्थ एव स्यात् दण्ड एवोपायः कर्त्तव्यो, न सामादिरित्यर्थः। चतुर्थोऽस्योदितो दम इति पाठे उदितः शास्त्रेपूक्तः चतुर्थो दण्डोपाय एवास्य दमो दमनसाधनमित्यर्थः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तुभ्यं तव यो बुद्धिविपर्यय एव बालान् वयस्यान् अतिक्रम्य कुतोऽभूदिति शेषः बालानां बुद्धिमतिक्रम्यैष बुद्धिभेदः कुतः तस्मात्तुभ्यं रोचित इति वा ॥ ९ ॥

एतदेव विवृण्वन्ति-बुद्धिभेद इति। अस्माकं तत्त्वमेव वक्तव्यं त्वयेत्यतो गुरूणामिति ॥ १० ॥

उत्तरं वक्ति—पर इति। पुंसां योऽयं परस्वश्चेत्यसद्ग्राहः "एकमेवाद्वितीयम्" इतिश्रुतेः परमार्थवस्तुन एकत्वे प्रामाणिके सिद्धे तत्र श्रीनारायणमन्तरेण परविषयकर्तृत्वं स्वविषयकर्तृत्वमिति भेदः स्वातन्त्र्यकल्पनालक्षणमन्यथाज्ञानम् एष यस्येश्वरस्येच्छया कृतः कल्पितः सर्वकर्तृत्वात्तस्य तस्मै भगवते महामहिम्ने नम इत्यन्वयः। तत्प्रत्यक्षमित्याह-विमोहितधियामिति.दृष्टः प्रत्यक्षस्तस्मात्तादृशी बुद्धिर्भवादृशैर्न कार्येति शेषः। विमोहितेत्यनेनापीश्वरकर्तृत्वं ज्ञायते ॥ ११ ॥

यन्माययेत्युक्तं स्पष्टं दर्शयति-स यदेति। स भगवान् यदा पुंसां स्वात्मपरबुद्धिजनकत्वेनानुगतोऽनुकूलो भवति तदा पशुबुद्धिरज्ञबुद्धिर्विभिद्यते तत्कथमित्यत उक्तम्, अन्य इति. एष देवदत्तोऽन्यः स्वतन्त्रोऽहमन्यः स्वतन्त्र इति किमस्याधिकरणमिति तत्राह-देहगतेति. अत एवासती दृष्टिज्ञानत्वेन मोक्षानुपयोगित्वात् "अन्यो सावन्यो हमस्मीति न स वेद यथा पशुः" इति श्रुतिप्रतीकेनानेन श्लोकेन जीवपरयोर्भेदं निषिध्य चिदैक्यं विधीयत इतीसमर्थं विधायाऽर्थान्तरकल्पनायां किं प्रमाणमितीयमाशङ्का स्वातन्त्र्येणान्यस्वरूपनिषेधाय श्रुतिरित्वयम् "अन्योसावन्योहमिति पश्यन्ति इति स्म ह"—

"आत्मानमन्तर्यमयेदिति भेदं स्वरूपतः।
आह तद्वशगोऽधीना भिन्ना जीवाः सदैव तु ॥
स्वरूपसत्ताकर्तृत्वं भोगो मोक्षस्तथैव च।
मुक्तस्यावस्थितिश्चैव सर्वं विष्णोर्वशे सदा" ॥

इत्यनेन परिहृतेति ज्ञातव्यम् ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु, यदि जीवपरौ मिथो भिन्नौ तर्हि किमिति घटपटभेदज्ञानवत्तद्विषयज्ञानं नोत्पद्यत इत्याशङ्क्य प्रतियोगिज्ञानस्य दुःसाध्यत्वादित्यभिप्रेत्याह—स एष इति । यः स्वस्वकर्मानुसारेण स्वस्वयोग्यज्ञानमुत्पादयति स एव आत्मा परमात्मा स्वपरत्वबुद्धिभिः यथार्थज्ञानविरोधिज्ञानवद्भिः पुरुषैर्दुरन्वयानुक्रमणः दुरन्वयं दुर्ज्ञानमनुक्रमणं तत्तद्योग्यतानुसारेण प्रवर्तनं यस्य स तथा दुर्ज्ञेयचेष्ट इत्यर्थः । निरूप्यते निश्चीयते ननु "वेदाहमेतंपुरुषंमहान्तम् आदित्यवर्णम्" इति श्रुतेः ब्रह्मादेस्तद्विषयज्ञानश्रवणात्कथं प्रतियोगिज्ञानस्य दुःसाध्यत्वमित्यत आह—मुह्यन्तीति । ब्रह्मादीनां भगवद्विषयज्ञानं दुःसाध्यं किं न्वितरेषामित्यतो वाह-मुह्यन्तीति । हिशब्दोऽप्यर्थे हेतौ वा वेदवादे कोविदाः ब्रह्मादयोऽपि यद्वर्त्मनि यत्र स्वरूपविषये मुह्यन्ति यस्मात्तस्मात्स एव दुरन्वयानुक्रमण इति निरूप्यते अतनहरेरनुग्रहमन्तरेण तद्विषयज्ञानं नोत्पद्यते तस्मिन् सति तत्स्यात् "यमेवैष वृणुते तेन लभ्यः" इति श्रुतेः अन्वयव्यतिरेकौ दर्शिताविन्युक्तं भवति. ननु, त्वदुक्त्यैव त्वद्बुद्धिभेदजनकःकश्चित्स्यात्स क इति विचार्यत इति तत्राह-एष इति. मुह्यन्तीत्येतदत्राप्यनुकूल्यते यद्वर्त्मनि मुह्यन्त्येष हरिर्मम मतिं भिनत्ति विषयीकरोति सर्वस्य स्ववशत्वं स्वस्यानन्याधीनत्वं स्वप्रसादान्मोक्षादिफलपुरुषार्थप्राप्तिरित्यादिबुद्धिं जनयतीति भावः तदुक्तम् "आह तद्ब्रह्मणोऽधीना भिन्ना जीवाः सदैव तु" इत्यादि ॥१३॥

एतदर्थे सदृष्टान्तमाह-यथेति । यथाकर्षस्यायस्कान्तस्य सन्निधौ सत्ययः स्वयं भ्राम्यति स्वात्मानमुद्दिश्य गमनशक्तिं करोति तदिति शेषः तथा मे चेतो यदृच्छया तदिच्छया चक्रपाणौ भिद्यते तद्विषयीकरणशक्तीक्रियते अयोगमनशक्तिवच्चेतनस्यापि नैसर्गिकीति भावः । एतेन सर्वं हर्यधीनमित्युक्तं भवति. "एतस्य वा अक्षरस्य प्रशासने गार्गि! प्राच्योन्यो नद्यः स्यन्दन्ते य आत्मानमन्तर्यमयेत्" इतिभेदस्वरूप आहेत्यादि श्रुतिस्मृतिभ्याम् । विशेषणचराचरस्य सर्वस्य श्रीहर्यधीनप्रवृत्त्यवगमात्(१)पश्यन्नज्ञइत्यनेन पशुबुद्धिरबुद्धिभिरित्येतत्पदद्वयाभिप्रायो दर्शितः ॥ १४ ॥

सुदीनः वाचा शिक्षायां क्षीणोऽशक्त इत्यर्थः । राजसेवक इत्यनेन भेदज्ञानासामर्थ्यञ्च सूचितम् उभयोरपि वित्तसाध्यत्वात् ॥१५॥

अयशस्कृतो दुष्कीर्तिकरस्यास्य चतुर्थो दमो दण्डसंज्ञ इति उदित इत्यर्थः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पर इति पुंसां "भयं द्वितीयाभिनिवेशतः स्यात्" इत्यादिरीत्यानादित एव भगवद्बहिर्मुखानां जीवानाम् अत एव न्यूनं सेर्ष्यया यस्य भगवतो मायया मोहितधियां स्वरूपविस्मरणपूर्वकदेहात्मबुद्ध्या विशेषेण मोहितबुद्धीनामसतां यन्माययैव परः परकीयोऽयं स्वीयोऽयमित्यसदाग्रहः कृतस्तस्मै भगवते नमः, तेषां तदाग्रहशान्तये तमेव नमस्करोमीत्यर्थः । स्वशब्दोऽयमात्मवाचक-

(१) तात्पर्योक्तप्रतीक मिदम् ।

तायां नपुंसकमेव स्यात् "स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वो ऽस्त्रियां धने" इत्यमरः । तस्मादेवं व्याख्यातम् ॥ ११ ॥

ततश्च स यदेति कथञ्चिन्महतः प्रसङ्गेन तत्साम्मुख्ये सति यदा स भगवाननुकूलः स्यात्तदा पूर्वोक्ता पशुबुद्धिर्विभिद्य नश्यतीत्यर्थः । ततस्तामेव निवृत्य दर्शयति--अन्य इति. अर्थकामशास्त्रानुसारिणां भक्तानुगतानां नश्वरे सङ्घात एवात्मता मननादिति भावः ॥ १२ ॥

स प्रसिद्धः परमात्मा तु एष मद्दृष्टिगोचरतामिव गतः पूर्वोक्तैः स्वपरेत्यबुद्धिभिस्तु दुरत्ययानुक्रमणो निरूप्यते दुर्बोधरीतितया निश्चीयते ॥ अहो आसतां ते यतस्तद्वर्त्मनि वेदवादिनोऽपि मुह्यन्ति तेप्यासतां ब्रह्मादयोऽपि मुह्यन्तीति स एष एव मे मतिं भिनत्ति । भवन्मतात् पृथक्करोति ॥ १३ ॥

ननु, तेनैव त्वन्मतिर्भिद्यते न त्वस्माभिः तथा तेनैव मतिस्तेन भिद्यते न त्वस्माकमिति कथं ? तत्राह—यथेति । यदृच्छया स्वैरितया कारणान्तरनिरपेक्षतयेत्यर्थः । "यदृच्छास्वैरिता" इत्यमरः । आकर्षायसोर्यथासौ स्वभावस्तथावयोरपीति युक्तमेव तत्तदित्यर्थः ॥ १४ ॥

एतावदित्यर्द्धकम् । तमित्यर्द्धकम् ॥ १५ ॥

आनीयतामित्यस्याद्ये चरणे युष्माभिरिति द्वितीये यस्मादय-मिति परार्द्धे यतो यस्येत्यध्याहार्यम् 'आनयध्वमरे वेत्रम्' इत्यादिक तथा तु यन्नोक्तं तत् खलु तस्य कोमलतां दृष्ट्वा नातिस्पष्टं कर्तुमशक्त्वादितिगम्यते ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

भद्रं ते इति त्वदिष्टं मोदकादिकं दास्याम इति भावः । वाला अतिक्रम्य तुभ्यं तव ॥ ९ ॥

भयतामिति यद्ययं वैष्णवस्य कस्यचिन्नाम गृह्णाति तदा तं वैष्णवं ज्ञात्वा राज्ञः सभां नीत्वा घातयाम इति भावः ॥ १०॥

अहो मूढा इमे संसारे पापच्यमानाः मां मुग्धबालकं जानन्तीति मनसि विभाव्याह—परः परपक्षः स्वः स्वपक्ष इति असदाग्रह असदाग्रहः श्लेषेण पुंसां संसारसिन्धुपतितानां ग्राहो हिंस्रजलजन्तुविशेषः कृतः मायया सृष्टः दृष्टः पूर्वमनुमित एवासीत् संप्रति तु प्रत्यक्षीकृत इत्यर्थः । अतो यूयं तेन प्रतिक्षणं चर्व्यध्वे एवेति भावः ॥ ११ ॥

बुद्धिभेदोऽयं तव कुत इत्यस्य प्रश्नस्योत्तरमाह—स इति । अनुव्रतो ऽनुकूलः विशेषेण भिद्यते. विदीर्यते पशुबुद्धिरेव का ? तत्राह—अन्य एषोऽस्मद्विपक्षस्तथाऽन्योऽहमेतस्य घातयितेति भेदं गता असती असाधुः "न हि गोप्यं हि साधूनाममित्रोदस्तविद्विषाम्" इति भगवदुक्तेर्वस्तुतस्त्वात्मदृष्ट्या सर्वजीवानामैकरूप्यात् देहदृष्ट्यापि सर्वदेहानां पञ्चभूतात्मकत्वाद्भेदो नास्त्येवेति भावः ॥ १२ ॥

उक्तलक्षणपशुबुद्धिमतां सुदुर्ज्ञेय इत्याह-स इति । एष परमात्मा स्वः स्वपक्षः परो विपक्षः इति कुत्सिता बुद्धिर्येषां तैर्दुरन्वयं

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

दुर्गमम् अनुक्रमणं अनुसरणं यस्य सः न च सुबुद्धिभिः शास्त्रज्ञैः सुगममेव तदनुसरणमिति वाच्यमित्याह—यद्वर्त्मनि यत्प्राप्तिमार्गेऽनुसरणरूपे भक्तियोगे वेदवादिनो वेदार्थतात्पर्यविवेचका अपि मुह्यन्ति यूयन्तु ज्ञानलवदुर्विदग्धाः किमुतेति भावः । एष भगवान् मे मतिं भिनत्ति युष्मन्मतिभ्यस्सकाशाद्भिन्नां करोति ॥ १३ ॥

स एव मतेर्भेदः किमाकार इति चेत्तत्राह—यथा अयो लोहं आकर्षस्यायस्कान्तस्य सन्निधौ स्वयं भ्राम्यति तथैव मे चेतः चक्रपाणेः सन्निधौ स्वयमेव भ्राम्यति भिद्यते युष्मच्चेतोभ्यः सकाशाद्भिन्नं भवति यदृच्छयेति नात्र मत्कर्मतपोदानादेर्हेतुत्वं सम्भवतीत्यर्थः । अयमर्थः अयस्कान्तेन स्वशक्त्यैव लोहमाकृष्य स्वसंयुक्तीक्रियते तत्र किमपि कारणं प्रयोजनञ्च नास्तीत्ययस्कान्तस्य स्वस्वभाव एव यथा तथैव चक्रपाणेरपि स्वभाव एवायं यत्कृपापरवशतया स्वभक्तस्य चेतसः स्वस्मिन्नाकर्षणमिति तत्र मम किं स्वातन्त्र्यमस्तीतिभावः ॥ १४ ॥

राजसेवक उवाचेति शेषः ॥ १५ ॥

वेत्रं प्रहरणादण्डनिशेषः यद्ययमयशस्करस्ततोऽस्य दुर्बुद्धेरुपायानां मध्ये चतुर्थो दमो दण्डः उदितः उक्तः शास्त्रेषु ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

बालान्प्रति उल्लङ्घ्य तुभ्यं तव बुद्धिविपर्ययः कुतो जातः ॥ ९ ॥

ते बुद्धिभेदः प्रवृत्तिमार्गमस्मदाद्यनुष्ठितं त्यक्त्वा वासुदेवे बुद्धिप्रवेशः परेण केनापि कृतः उताहो स्वतोऽभवदिति भण्यताम् ॥ १० ॥

परः स्वश्चेति असद्ग्राहः दुष्टाग्रहः यस्य मायया प्रकृत्या कृतः तयैव मोहितधियां भवतां दृष्टो, न तु मम. तस्मै भगवते नमः सर्वस्य वासुदेवात्मकत्वात् यदनुग्रहतो वासुदेवबुद्धिप्रवेशस्तस्य श्रीमद्गुरोर्विशेषतः परत्वासम्भवात् हरिगुरुप्रसादं विना स्वतश्च वासुदेवे बुद्धिप्रवेशासम्भवात् बुद्धिभेदः परकृतः उताहो ते स्वतोऽभवदिति वाक्यं सर्वथाऽनुपपन्नमिति भावः ॥ ११ ॥

तव बुद्धिभेदः कुत इत्यत्राह—सएषइति । स भगवान् यदा अनुवृत्तः अन्तर्यामिरूपेण गुरुरूपेण च अनुकूलो भवति तदा एषोऽन्योऽहमन्यः इति भेदगता इत्थं वासुदेवात्मकभ्रान्तिलिखितं भेदं प्राप्ता अत एवासती संसारप्रापिका अत एव पशूनामिव विवेकहीना बुद्धिर्विभिद्यते प्रवृत्तिमार्गाद्भिन्ना भवति वासुदेवे प्रविशतीत्यर्थः ॥ १२ ॥

नन्वस्माकमनुव्रतः स कुतो नेत्यत्राह—स इति । स एष आत्मा परमात्मा दुरत्ययं दुरधिगममनुक्रमणम् अतत्त्वज्ञैर्वर्णनं यस्य अत एव स्वस्य परः शत्रुरिति अबुद्धिभिः परमात्मा भजनीय इति नास्ति बुद्धिर्येषां तैर्निरूप्यते न तु भवादृशास्तत्प्रपन्ना भवन्तीति भावः । "न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः । माययापहृतज्ञाना आसुरं भावमाश्रिताः" इति श्रीमुखोक्तेः ॥ भवतामसुरपक्षीयाणान्तु का वार्ता वेदवादिनो वेदत्रयीप्रोक्तकर्मनिष्ठास्तेभ्योऽपि श्रेष्ठाः ब्रह्मादयः यद्वर्त्मनि यत्प्राप्तिमार्गे मुह्यन्ति स्वपरेति सन्धिरार्षः ॥ १३ ॥

तत्कृपया तु मम बालस्यापि चेतस्तद्वर्त्मनि प्रविशतीत्याह—यथेति । यथा आकर्षसन्निधौ अयस्कान्तसमीपे अयो लोहः स्वयं भ्राम्यति तथा मे चेतो यदृच्छया चक्रपाणेः सन्निधौ भवतां प्रकृतिमार्गाद्भिन्नं भवति, तद्वर्त्मनि प्रविशतीत्यर्थः ॥ १४ ॥

तं प्रह्लादम् स ब्राह्मणो निर्भर्त्स्याहेति शेषः ॥ १५ ॥

अरे वेत्रमानीयताम् यतोऽयमस्माकमयशस्करः अतोऽस्य कुलाङ्गारस्य दैत्यकुलनाशहेतोः दमः दमनहेतुः उपायानां चतुर्थो दण्ड उदितः शास्त्रे उक्तः ॥ १६ ॥

भाषाटीका ।

हे वत्स प्रल्हाद ! तुमारा भला हो तुम सच कहो झूठ मत बोलो कि इन बालकों को भी अतिक्रमण करके यह तुमारी विपरीति बुद्धि कैसे हुई ॥ ९ ॥

यह तुमारी बुद्धि का भेद किसी दूसरे के सिखाने से है अथवा आपही से है, हे कुलनन्दन ! हम तुमारे गुरु लोक सच्ची सुनने की इच्छा करते हैं तुम कहो ॥ १० ॥

प्रल्हादउवाच ॥

प्रल्हाद बोले, कि यह अपना यह पराया ऐसा असत् ग्रहण जिसकी माया से मोहित बुद्धि वाले असत्पुरुषों को होरहा है उस भगवान को नमस्कार है ॥ ११ ॥

वही भगवान् जब पुरुषों पर अनुकूल होता है तब यह अन्य है मैं अन्य हूं इस प्रकार पशुओं के तरह भेद को प्राप्त जो दुष्ट बुद्धि सो मेरीतरह भेद को प्राप्त हो जाती है ॥ १२ ॥

जिसके चरित का अनुवर्णन दुर्घट है और अबुद्धि लोग जिस को स्व पर ऐसा करके वर्णन करते हैं और जिसके मार्ग में वेद वादि बड़े २ ब्रह्मादिक मोहित होते हैं वही परमात्मा हमारी मति का भेद करते हैं ॥ १३ ॥

हे ब्रह्मन् ! जैसे चुंबक के समीप में लोह आपही खिंच जाता है इसी प्रकार मेरा भी चित्त उन चक्रपाणि की इच्छा से भिन्न होरहा है ॥ १४ ॥

नारद उवाच ॥

नारदजी बोले, कि—महामति प्रल्हाद ब्राह्मण से इतना कह कर चुप होगए ॥ वह विचारा दीन ब्राह्मण राज सेवक प्रल्हाद को भय दिखाकर कुपित होकर बोला ॥ १५ ॥

अरे ! हमारा वेत्र तो लाओ यह हमारी आकीर्ति कराने वाला है इस कुलांगार दुर्बुद्धि को चतुर्थ उपाय दंड ही उचित है ॥ १६ ॥

दैतेयचन्दनवने जातोऽयं कण्टकद्रुमः ।
यन्मूलोन्मूलपरशोर्विष्णोर्नालायितोऽर्भकः ॥ १७ ॥
इति तं विविधोपायैर्भीषयंस्तर्जनादिभिः ।
प्रह्लादं ग्राहयामास त्रिवर्गस्योपपादनम् ॥ १८ ॥
तत एनं गुरुर्ज्ञात्वा ज्ञातज्ञेयचतुष्टयम् ।
दैत्येन्द्रं दर्शयामास मातृमृष्टमलङ्कृतम् ॥ १९ ॥
पादयोः पतितं बालं प्रतिनन्द्याऽऽशिषाऽसुरः ।
परिष्वज्य चिरं दोर्भ्यां परमामाप निर्वृतिम् ॥ २० ॥
आरोप्याङ्कमवघ्राय मूर्द्धन्यश्रुकलाऽम्बुभिः ।
आसिञ्चन्विकसद्वक्त्रमिदमाह युधिष्ठिर ! ॥ २१ ॥
हिरण्यकशिपुरुवाच ।
प्रह्लादानूच्यतां तात ! स्वधीतं किञ्चिदुत्तमम् ।
कालेनैतावताऽऽयुष्मन् ! यदशिक्षद्गुरोर्भवान् ॥ २२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्कुतः? तत्राह—दैतेया एव चन्दनद्रुमास्तेषां वनेऽयंकण्टकद्रुमतुल्यो जातः, तदेवाऽऽह, यस्य दैतेयचन्दनवनस्य मूलोन्मूलने परशुस्थानीयस्य विष्णोरयमर्भक एव नालायितो नालामिवाचरत् यथा परशोश्छेदकत्वं बब्बुलादिद्रुमनिर्मितो दण्डः सहकारी तं विना छेदनासम्भवात्तथाऽयं विष्णोर्दैत्यमूलोच्छेदे हेतुर्जात इत्यर्थः ॥१७॥

इति तं प्रह्लादं भीषयन्धर्मार्थकामवर्गस्य प्रतिपादकं शास्त्रमध्यापयामास ॥ १८ ॥

ज्ञातं ज्ञेयमुपायानां चतुष्टयं सामदानादि येन तं दैत्येन्द्रं प्रति मात्रा मृष्टमुद्वर्त्य स्नापितम् अलङ्कृतं भूषणतिलकादिभिः ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कुलनाशकत्वं व्यनक्ति—दैतेया एव चन्दनद्रुमाः तेषां वनेऽयं कण्टकद्रुमतुल्यो जातस्तन्मूलेऽपि तेषां दैतेयचन्दनवनानां यानि मूलानि तेषामुन्मूलनं छेदनं परशोः परशुस्थानीयस्य विष्णोरयमर्भको नालायितः नालवदाचरितवान् यथा परशोश्छेदकत्वे कर्बुरादिद्रुमनिर्मितो दण्डः सहकारी तं विना छेदनासंभवात् तथा अयं विष्णोः दैत्यमूलस्य छेत्तुः सहकारी जात इत्यर्थः ॥ १७ ॥

इतीत्थं वदन् तर्जनादिभिर्नानोपायैर्भीषयन् प्रह्लादं तं त्रिवर्गस्योपपादनं धर्मार्थकामप्रतिपादकं शास्त्रं ग्राहयामास ॥ १८ ॥

ततो गुरुरेनं प्रह्लादं ज्ञातं ज्ञेयानामुपायानां सामादीनां चतुष्टयं यस्य तादृशं ज्ञात्वा आलक्ष्य मात्रा मृष्टं उद्धर्त्य स्नापितम् अलङ्कृतञ्च प्रह्लादं दैत्येन्द्रंप्रति दर्शयामास, पितृसन्निधौ प्रापयामासेत्यर्थः ॥ १९ ॥

ततः पादयोः प्रणमन्तं नमस्कुर्वन्तं बालम् आशिषा आशीःपूर्वकं प्रतिनन्द्य असुरो हिरण्यकशिपुः दोर्भ्यां भुजाभ्यां (पुत्रस्य शिरः) परिष्वज्य परमां निर्वृतिमानन्दं प्राप्तवान् ॥ २० ॥

तत उत्सङ्गे निधाय मूर्द्धन्युपाघ्राय च अश्रुकलाम्बुभिर्हर्षाश्रुजलबिन्दुभिरसिञ्चन् विकसद्वदनं यस्य तादृशो दैत्यः सुतं प्रतीत्थं वक्ष्यमाणमाह—युधिष्ठिरेति पाठे सम्बोधनम् ॥ २१ ॥

तदेवाह—प्रह्लादेति । हे आयुष्मन् तात ! पुत्र प्रह्लाद ! भवानेतावता कालेन गुरोः सकाशाद्यदुपाशिक्षदधीतवांस्तन्मध्ये किंचिदुत्तमं स्वधीतं सम्यगावृत्त्या गृहीतं तत् हे तात ! प्रह्लाद, अनूच्यतां सम्यगनुक्रमेण पठ्यताम् ॥ २२ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उन्मूलयतीत्युन्मूलः स चासौ परशुश्च उन्मूलपरशुस्तत्स्वदैतेयचन्दनवनस्य मूलं तन्मूलपरशुस्तस्य नालायितः मण्डपवत्तन्वानः ॥ १७ ॥

त्रिवर्गस्योपपादनं शास्त्रम् ॥ १८ ॥

ज्ञातं ज्ञेयानां धर्मादिपुरुषार्थानां चतुष्टयं येन स तथा तं ज्ञातज्ञेयसाधनचतुष्टयं वा मातृमृष्टं शरीरमलत्यागेन स्नानं कारितम् १९ ॥ २० ॥ २१ ॥

प्रह्लाद उवाच ।

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥ २३ ॥
इति पुंसाऽर्पिता विष्णौ भक्तिश्चेन्नव लक्षणा ।
क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सुष्टु अधीतं पठितम् ॥ २२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पुनश्च स एव तादृशपरमशुद्धरूपस्य विष्णोर्नालायितः इत्यसामञ्जस्यमतीवेति भावः ॥ १७—२२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यस्य वनस्य मूलोन्मूलने परशुस्थानीयस्य विष्णोर्नालायितो-दण्डस्थानीयः लोके हि परशोर्दण्डो वर्बुर एव सिद्धः स च कण्ट-किद्रुमः ॥ १७ ॥

ग्राहयामास ग्राहयितुं यतते स्मेत्यर्थः ॥ १८ ॥

ज्ञातं ज्ञेयं ज्ञातुमर्हं चतुष्टयं सामदानभेददण्डात्मकमुपा-यचतुष्कं येन तत् ॥ १९—२१ ॥

सुष्टु अधीतं संशयादिरहितं अनुकूलं गुरोर्हिरण्यकशिपु-मते शुक्राचार्यात्मजात् प्रह्लादमते गुरोः श्रीनारदात् ॥ २२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

किञ्च दैतेयचन्दनवने अयं कण्टकद्रुमः यत् यस्य दैतेय-चन्दनवनस्य यन्मूलं हिरण्यकशिपुप्रभृतिदैत्ययूथपसमूहभूतन्त-दुन्मूलयतीति तथा तस्य परशोः परशुस्थानीयस्य विष्णोर्नाल-यियो नालमिवाचरदयमर्भकः ॥ १७ ॥

त्रिवर्गस्य धर्मार्थकामसमूहस्योपपादनं प्रतिपादकं प्रवृत्ति-शास्त्रं ग्राहयामास ॥ १८ ॥

ततस्तदनन्तरं गुरुः पाठकः एनं प्रह्लादं ज्ञातं ज्ञेयचतुष्टयं ज्ञातव्यभूतानां सामदानभेददण्डानां चतुष्टयं येन तं तथाभूतं ज्ञात्वा मात्रा मृष्टमुद्वर्त्यस्नापितमलंकृतञ्च दैत्येन्द्रंप्रति दर्शया-मास ॥ १९ ॥

चिरञ्जीवेत्याद्याशिषा प्रतिनन्द्य ॥ २० ॥

अश्रुकलाम्बुभिः आनन्दाश्रुबिन्दुजलैः ॥ २१ ॥

आयुष्मन् हे तात ! प्रह्लाद ! एतावता कालेन गुरोस्सका-शात् भवान् यत्किञ्चित् अशिक्षत् तत्र उत्तमं सारभूतं सुष्टु अधीतम् अनूच्यताम् अनुक्रमेण भण्यताम् ॥ २२ ॥

भाषा टीका ।

यह दैत्य रूप चंदन वन में कंटकद्रुम उत्पन्न हुआ है जिस दैत्य रूप चंदन वन की मूलका उन्मूलन करने वाला जो विष्णुरूप परशु (कुल्हाडी) उसका नाल (बेंटा) रूप सहकारी यह बालक है ॥ १७ ॥

इस तरह तर्जन आदि नाना उपायों से प्रल्हाद को भय देते हुए, अर्थ धर्म और काम इस त्रिवर्ग के प्रतिपादक शास्त्र को पढाने लगे ॥ १८ ॥

तदनंतर गुरुने जाना कि यह सामदानादि चारों उपयों को जानचुका तब माता से उबटन स्नान आदि पूर्वक अलं-कृत कराकर, दैत्येन्द्र के समीप ले गये ॥ १९ ॥

असुरराज भी चरणों में पड़े हुए बालक को अशीस द्वारा अभिनंदन कर बाहुओं से आलिंगन कर बड़े हर्ष को प्राप्त हुआ ॥ २० ॥

और गोद में बैठा कर मस्तक आघ्राणकर उसके प्रसन्न मुख को प्रेमाश्रुओं से सींचता हुआ, हे युधिष्ठिर ! यह वक्ष्य-माण वाक्य बोला ॥ २१ ॥

हिरण्यकशिपुरुवाच ॥

हिरण्यकशिपु बोला, कि—तात प्रह्लाद ! तुमारी दीर्घ आयु हो इतने काल तक जो तुमने कुछ गुरुजी से सीखा और जो अच्छा पढा उसे कहो ॥ २२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पादसेवनं परिचर्या, अर्चनं पूजा, दास्यं कर्मार्पणम्, सख्यं तद्विश्वासादि, आत्मनिवेदनं स्वशरीरसमर्पणम्, यथा विक्रीतस्य गवाश्वादेर्भरणपालनादिचिन्ता न क्रियते तथा देहं तस्मै समर्प्य तच्चिन्तावर्जनमित्यर्थः ॥ २३ ॥

निशम्यैतत्सुतवचो हिरण्यकशिपुस्तदा ।
गुरुपुत्रमुवाचेदं रुषा प्रस्फुरिताधरः ॥ २५ ॥
ब्रह्मबन्धो ! किमेतत्ते विपक्षं श्रयताऽसता ।
असारं ग्राहितो बालो मामनादृत्य दुर्मते ! ॥ २६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इति नव लक्षणानि यस्याः सा अधीते न चेद्भगवति विष्णौ भक्तिः क्रियते साचार्पितैव सती यदि क्रियेत नतु कृता सती पश्चादर्प्येत तदुत्तममधीतं मन्ये नत्वस्माद्गुरोरधीतं शिक्षितं वा तथाविधं किञ्चिदस्तीति भावः ॥ २४ ॥ २५ ॥

न विद्यते सारं यत्र तदसारम् न विद्यते सारं यस्मादिति वास्तवोऽर्थः ॥ २६ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यदुक्तमुत्तममधीतमध्ये किञ्चिदनूच्यतामिति तत्राह-श्रवणमिति । यदुक्तं पूर्वं "वनं गतो यद्धरिमाश्रयेत" इति तदेवाश्रयणं विवृणोति, श्रवणमिति द्वाभ्याम्. पुंसां श्रवणादीनि नव लक्षणानि यस्याः सा भक्तिश्चेन्नव लक्षणा भक्तिप्रतिपादकशास्त्रमधीतं चेत्तदेव स्वधीतमुत्तमं मन्ये न त्वधुना गुरोः सकाशादधीतं तत्तु गुरुभिर्नाध्यापितमिति भावः । स्वधीतप्रश्नोत्तरनिगमनमुत्तममधीतमिति. श्रवणमित्यादि तु पूर्वोक्ताश्रयणविवरणपरं भगवत्यद्धा क्रियते चेदधीतविद्याप्रतिपाद्या नव लक्षणाभक्तिर्निष्कपटभावेन भगवति क्रियते इति यत्कृतापि सा भक्तिर्विष्णावर्पितेति यच्च तदेतदुत्तमं मन्ये न केवलं नवलक्षणा भक्तिप्रतिपादकशास्त्राध्ययनमात्रमेवोत्तमम् अपि तु तदर्थानुष्ठानमनुष्ठितस्येश्वरे समर्पणं चेत्यत्युत्तमं मन्ये केवलाध्ययनमात्रस्य व्यर्थं त्वादिति भावः अर्पिता विष्णावित्यनेन भक्तेरनन्यप्रयोजनत्वेन कर्त्तव्यतोक्ता. तत्र विष्णोः श्रवणं तत्स्वरूपरूपगुणविभूतिश्रवणम्. कीर्त्तनं नामोच्चारणाद्यात्मकम्, स्मरणं स्वरूपादिविषयकमेव पादसेवनार्चनवन्दनदास्यसख्यानि तु तदीयपर्यन्तानि वन्दनं नमस्कारः पादसेवनं पादयोः सम्वाहनं तच्चार्चाविग्रहतदीयपादयोश्चेति वेदितव्यं परव्यूहविभवादेरतीन्द्रियत्वेन तत्पादसेवनासम्भवात् यद्वा भगवद्विषये मानसिकं तदीयविषये तु कायिकं विवक्षितम् आत्मनिवेदनम् "ओमित्यात्मानं युञ्जीत" इति श्रुत्युक्तरीत्या तच्छेषत्वानुसन्धानं यद्यपि भक्तिर्नाम ध्यानोपासनादिशब्दवाच्याऽहरहरभ्यासाधेयातिशया आप्रयाणादनुवर्त्तमाना विवेकादिसाधनसप्तकानुगृहीता तैलधारावदविच्छिन्नस्मृतिसन्तानात्मिका प्रीत्यात्मिका प्रत्यक्षतापन्ना ध्रुवानुस्मृतिः । ननु श्रवणादिरूपेण नवलक्षणा, तथाप्युक्तविधाया भक्तेरेव कर्मज्ञानयोगाद्विवच्छमदमादिवच्च श्रवणादीन्यप्यविलम्बेन निवर्त्तकान्युच्यन्ते. यद्वा, नवलक्षणा लक्ष्यते एभिरिति लक्षणानि चिह्नानि ज्ञापकानि भक्तियोगपरिपाकावस्थाज्ञापकानीति यावत्. उक्तविधभक्तियोगनिष्ठेन रागत एव श्रवणादीनि क्रियन्ते. लोकेऽपि हि यद्वस्तुविषय प्रीतिस्तद्विषयकश्रवणादीनि स्वत एव प्राप्तानीति न तत्र यत्ने भवितव्यम्. अतः श्रवणादीनि प्रीत्यात्मकभक्तियोगकारितावस्थाविशेषरूपाणि तन्निष्पत्तिसूचकानीति तात्पर्यम्. एवं प्रीतिकारितश्रवणादिपर्यन्तभक्तियोगानुष्ठानमेव "वनङ्गतो यद्धरिमाश्रयेत" इत्युक्तमाश्रयणमित्युक्तं भवति ॥ २३ ॥ २४ ॥

एतदेवंविधं सुतस्य वचो निशम्याकर्ण्य तदा हिरण्यकशिपुः रुषा प्रस्फुरितः कम्पमानः अधरोष्ठो यस्य तादृश एवं वक्ष्यमाणं गुरुपुत्रं प्रत्युवाच ॥ २५ ॥

तदेवाह—हे ब्रह्मबन्धो ब्राह्मणाभास ! किमेतत्ते त्वया कृतमिति शेषः, अतीवानुचितमेतत्कृतमित्यर्थः । किंतत् ? यन्मामनादृत्य विपक्षं शत्रुपक्षमाश्रयता अत एव असता मह्यमहितकारिणा त्वया हे दुर्मते ! असारं ग्राहितो बाल इति एतत् ॥ २६ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नियन्तृत्वेनात्मनि मयि स्थितो भगवानिति नितरां वेदनमात्मनिवेदनम्—

"मुक्तस्यापि ममान्तःस्थो नियन्तैव हरिः सदा ।
इति ज्ञानं समुद्दिष्टं सम्यगात्मनिवेदनम्" ॥

इत्येतदात्म समर्पणं नार्थः किंतूक्त एवार्थः इत्युक्तकारेण श्रवणादिभि लक्ष्यते असंभवव्यभिचारपरिहारेण ज्ञायत इति ॥ २३ ॥

नवलक्षणा विष्णौ भक्ति र्यस्मिन् शास्त्रेऽर्पिता प्रतिपादिता पुंसा सा भगवत्युत्तमश्लोके अद्धा निर्व्याजेन क्रियते चेदधीतं तर्हि तदधीतं शास्त्रमुत्तमं मन्ये नान्यदित्यन्वयः । नव श्रवणादीनि लक्षणानि चिह्नानि यस्यां सा तथा ॥ २४—२५ ॥

ते त्वया ॥ २६ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

श्रवणमिति युग्मकं । तत्र श्रवणन्नाम, रूपगुणपरिकरलीलामयशब्दानां श्रोत्रस्पर्शः एवं कीर्त्तनस्मरणयोरपि क्रमो ज्ञेयः स्मरणं यत्किञ्चिन्मनसानुसन्धानम्, पादसेवनं कालदेशाद्युचितपरिचर्या. अर्चनं विष्णुपूजा, वन्दनं नमस्कारः. दास्यं तद्दासोऽस्मीत्यभिमानः, सख्यं बन्धुभावेन तदीयहिताशंसनम्,

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

आत्मनिवेदनं देहादिशुद्धात्मपर्यन्तस्य सर्वतोभावेन तस्मिन्नेवार्पणम् इति नवलक्षणानि यस्याः सा भगवति तद्विषयिका श्रद्धा साक्षाद्रूपा न तु कर्माद्यर्पणरूपपरम्परा भक्तिरियं तत्रापि श्रीविष्णुरेवार्पिता तदर्थमेवेदमिति भाविता न तु धर्मार्थादिष्वर्पिता एवमेवम्भूता चेत् क्रियेत, तदा तेन कर्त्रा यदधीतं तदुत्तमं मन्ये इत्यर्थः । तथाच श्रीगोपालतापनी श्रुतिः "भक्तिरस्य भजनं तदिहामुत्रोपाधि नैराश्येनामुष्मिन् मनः कल्पनमेतदेव नैष्कर्म्यम्" इति. अत्र नवलक्षणसमुच्चयो नावश्यकः एकेनैवाङ्गेन साध्याव्यभिचारश्रवणात् क्वचिदन्याङ्गमिश्रणन्तु तथापि भिन्नश्रद्धारुचित्वात्. ततो नवलक्षणशब्देन सामान्योक्त्या तन्मात्रानुष्ठानं विधीयत इति ज्ञेयं नवलक्षणत्वञ्चास्याः अन्येषामप्यङ्गानां तदन्तर्भावादुक्तम्. किञ्चिदत्र विशिष्य लिख्यते—तदेवं नामादिश्रवणभक्त्यङ्गक्रमः, तत्र यद्यप्येकतरेणापि व्युत्क्रमेणापि सिद्धिर्भवत्येव तथापि प्रथमं नाम्नः श्रवणमन्तःकरणशुद्ध्यर्थमपेक्ष्यम्. शुद्धे चान्तःकरणे रूपश्रवणेन तदुदययोग्यता भवति. सम्यगुदिते च रूपे गुणानां स्फुरणं सम्पद्यते. सम्पन्ने च गुणानां स्फुरणेन परिकरविशिष्ट्ये तद्वैशिष्ट्यं सम्पद्यते ततस्तेषु नामरूपगुणपरिकरेषु सम्यक् स्फुरत्सु लीलानां स्फुरणं सुष्ठु भवतीत्यभिप्रेत्य साधनक्रमो लिखितः । एवं कीर्त्तनस्मरणयोश्च ज्ञेयम् इदञ्च श्रवणं श्रीमहन्मुखरितं तन्माहात्म्यं जातरुचीनां परमसुखदम्. तच्च द्विविधम्, महदाविर्भावितं महत्कीर्त्यमानञ्चेति. तत्रापि श्रवणे श्रीभागवतश्रवणन्तु परमश्रेष्ठं तस्य तादृशप्रभावमयशब्दात्मकत्वात् परमरसमयत्वाच्च. अत्र मूर्त्याभिमतयान इतिवन्निजाभीष्टनामादिश्रवणन्तु मुहुरावर्णयितव्यम् तत्रापि सवासनमहानुभवमुखात् सर्वस्य श्रीकृष्णनामादिश्रवणन्तु परमभाग्यादेवसम्पद्यते, तस्य पूर्णभगत्वात् इति. एवं सङ्कीर्त्तनादिष्वप्यनुसन्धेयम्. तत्र यत् स्वयं सम्प्रति कीर्त्यते तदपि श्रीशुकदेवादिमहत्कीर्तितचरत्वेनानुसन्धाय कीर्त्तनीयमिति तदेवं श्रवणं दर्शितम्. अस्य कीर्तनादितः पूर्वत्वं तद्विना तत्तदज्ञानात् । विशेषतश्च यदि साक्षादेव महत्कृतस्य कीर्तनस्य श्रवणभाग्यं सम्पद्यते तदैव स्वयं पृथक्कीर्तनीयमिति तत्प्राधान्यात्. एवमेवोक्तं तच्चाग्निसर्गइत्यादौ टीकाकृद्भिः यत् यानि नामानि वक्तरि सति शृण्वन्ति श्रोतरि सति गृणन्ति अन्यदातु स्वयमेव गायन्तीति. अथातः कीर्त्तनम्, तत्र पूर्ववत् नामादिक्रमो ज्ञेयः नामकीर्त्तनञ्चेदमुच्चैरेव प्रशस्तं "नामान्यनन्तस्य हतत्रपः पठन्" इत्यादौ. अथ तथोपदिष्टं कलियुगपावनावतारेण श्रीभगवता "तृणादपि सुनीचेन तरोरपि तितिक्षुणा । अमानिना मानदेन कीर्त्तनीयः सदा हरिः" ॥ इति. इयञ्च कीर्त्तनाख्या भक्तिर्भगवतो द्रव्यजातिगुणक्रियादीन् जनैकविषयापारकरुणामयीतिश्रुतिपुराणादिविश्रुतिः कलौ तद्दीनत्वम्. यथा ब्रह्मवैवर्त्ते "अतः कलौ तपोयोगविद्यायज्ञादिकाः क्रियाः । साङ्गा भवन्ति न कृता कुशलैरपि देहिभिः" ॥ इति. अत एव कलौ स्वभावत एवातिदीनेषु लोकेष्वाविर्भूय ताननायासेनैव तत्तद्युगगतमहासाधनानां सर्वमेव फलं ददाना सा कृतार्थयति. यत एव कलौ भगवतो विशेषतश्च सन्तोषो भवति. अत्र कश्चित्प्रसङ्गेन कीर्तनस्य गुणोत्कर्ष इति वक्तव्यं भक्तिमात्रे कालदेशादिनियमस्य निषिद्धत्वात्. तस्मात् सर्वत्रैव युगे श्रीमत्कीर्त्तनस्य समानमेव सामर्थ्यम् कलौ श्रीभगवता कृपया तद्ग्राह्यम् इत्यपेक्षयैव तत्तत्प्रशंसेति स्थितम् अत एव यद्यन्या भक्तिः कलौ कर्तव्या तदा तत्संयोगेनैवेत्युक्तं "यज्ञैः सङ्कीर्त्तनप्रायैर्यजन्ति हि सुमेधसः" इति । तत्र च स्वतन्त्रमेव नामकीर्त्तनमत्यन्तप्रशस्तं "हरेर्नाम हरेर्नाम हरेर्नामैव केवलम् । कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा" इत्यादौ. अत्र पाद्मोक्ताः दशापराधाः त्याज्याः यथा सनत्कुमारवाक्ये "सर्वापराधकृदपि मुच्यते हरिसंश्रयः । हरेरप्यपराधान् यः कुर्याद्द्विपदपांसनः ॥ नामाश्रयः कदाचित् स्यात् तरत्येव स नामतः । नाम्नोपि सर्वसुहृदो ह्यपराधात् पतत्यधः" ॥ अपराधाश्च संक्षिप्य लिख्यन्ते, यथा सतां निन्दा (१) श्रीविष्णोस्सकाशाच्छिवनामादेः स्वतन्त्र्यामननम् (२) गुर्ववज्ञा (३) श्रुतितदनुगतशास्त्र निन्दनम् (४) । हरिणाममहिम्नि अर्थवादमात्रमितिमननम् (५) तत्र प्रकारान्तरेणार्थकल्पनम् (६) । नामबलेन पापे प्रवृत्तिः (७) । अन्यशुभक्रियाभिर्नामसाम्यमननम् (८) । अश्रद्दधाने विमुखेप्यशृण्वन्ति नाम्नोपदेशः (९) । नाममाहात्म्ये श्रुतेप्यप्रीतिरिति (१०) । एतेषामपराधानामनन्यप्रायश्चित्तञ्चोक्तम्. तत्रैव "नामापराधयुक्तानां नामान्येव हरन्त्यघम् । अविश्रान्तप्रयुक्तानि तान्येवार्थकराणि च" इति । सत्स्वप्यपराधेषु तत्सन्तोषणार्थमेव सन्ततनामकीर्त्तनादिकं समुचितम् अम्बरीषचरितादौ तदेकक्षमत्वे नामापराधानां दर्शनात् उक्तञ्च नामकौमुद्याम् महदपराधस्य भोगएव निवर्त्तकस्तदनुग्रहो वेति. अत एवोक्तं श्रीशिवंप्रति दक्षेण—"योऽसौ मया विदिततत्त्वदृशा सभायाम्" इत्यादि. अस्मिन्कीर्त्तने निजदैन्यनिजाभीष्टविज्ञप्तिस्तवपाठावप्यन्तर्भावौ तथात्र श्रीभागवतस्थितनामादिकीर्त्तनन्तु पूर्ववदन्यदीयनामादिकीर्त्तनादधिकं ज्ञेयम्. अथ कीर्त्तनादिभिः शुद्धान्तःकरणश्चेत् "एतन्निर्विद्यमानानाम्" इत्याद्युक्तरवानामकीर्त्तनापरित्यागेन स्मरणं कुर्यात् तदेव नामादिसम्बन्धित्वेन बहुविधं भवति तच्च पञ्चविधं यत्किञ्चिदनुसन्धानं स्मरणं सर्वतश्चित्तमाकृष्य सामान्याकारे मनोधारणं धारणा. विशेषतो रूपादिचिन्तनं ध्यानं अमृतधारावदनवच्छिन्नं तद्ध्रुवानुस्मृतिः ध्येयमात्रस्फुरणं समाधिरिति क्वचिल्लीलादियुक्ते च तस्मिन् अन्यास्फुर्तिः समाधिस्स्यात् एतद्रूपो दासादिभक्तानां पूर्वस्तु प्रायः शान्तभक्तानाम् अथ रुचिः शक्तिश्च चेतदपरित्यागेन पादसेवाच कर्त्तव्या सेवा स्मरणसिद्ध्यर्थं सा कैश्चित्क्रियते पादसेवायां पादशब्दो भक्त्यैव निर्दिष्टः ततः सेवायाः सादरत्वं विधीयते अस्य श्रीमूर्तिदर्शनस्पर्शनपरिक्रमानुव्रजनभगवन्मन्दिरगङ्गापुरुषोत्तमद्वारकामथुरादितदीयतीर्थस्थान--गमनादयोऽप्यन्तर्भाव्याः तत्परिकरप्रायत्वात् गङ्गादीनां परमभागवतत्वपक्षे तु तत्सेवादिकं महत्सेवादावेव पर्यवस्यति तुलसीसेवा च तस्याश्चैवान्तर्भाव्या ततो महतामिव गङ्गादीनां भक्तिनिदानत्वम्. अथार्चनम्. तन्मार्गे श्रद्धा चेदाश्रितमन्त्रगुरुस्तं विशेषतः पृच्छेत् यद्यपि श्रीभागवतमते पञ्चरात्रादिवदर्चनमार्गस्यावश्यकत्वं नास्ति तद्विनापि श्रवणादीनामेकतरेणापि पुरुषार्थसिद्धेरभिहितत्वात्. तथोक्तं प्राचीनैरपि ।—

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

"श्रीविष्णोः श्रवणे परीक्षिदभवत् वैय्यासिकिः कीर्त्तने-
प्रह्लादः स्मरणे तदङ्घ्रिभजने लक्ष्मीः पृथुः पूजने ।
अक्रूरस्त्वभिवन्दने कपिपतिर्दास्येऽथ सख्येऽर्ज्जुनः-
सर्वस्वात्मनिवेदने बलिरभूत् कृष्णाप्तिरेषां परम्" ॥ इति.

तथापि श्रीनारदादिवर्त्मानुसरद्भिः श्रीभगवता सह सम्बन्धविशेषं दीक्षाविधानेन श्रीगुरुचरणसम्पादितं चिकीर्षद्भिः कृतायां दीक्षायामर्चनमवश्यं क्रियेतैव येतु सम्पत्तिमन्तो गृहस्थास्तेषां त्वर्चनमार्ग एव मुख्यः तदकृत्वापि निष्किञ्चनवत्केवलस्मरणादिनिष्ठत्वे वित्तशाठ्यप्रतिपत्तिः स्यात्. परद्वारा सम्पादनं व्यवहारनिष्ठत्वस्यालसत्वस्य वा प्रतिपादकं ततो श्रद्धामयत्वाद्धीनमेव तत्. किञ्च, गृहस्थानां परिचर्यामार्गे द्रव्यसाध्यतया तदर्चनमार्गादविशेषेण प्राप्तेप्यर्चनमार्गस्य प्राधान्यम् अत्यन्तविधिसापेक्षत्वात्तेषां तथा गार्हस्थधर्मस्य देवता यागरूपस्य शाखापल्लवादिसेकस्थानीयस्य मूलसेकरूपं तदर्चनमित्यपि तदकरणे महान् दोषः । दीक्षितानाञ्च सर्वेषां तदकरणे नरकपातः श्रूयते । अशक्तमयोग्यंप्रति चाग्नेये ।"पूजितं पूज्यमानं वा यः पश्येद्भक्तितो हरिम् । श्रद्धया मोदयेद्यस्तु सोपि योगफलं लभेत्" ॥ इति. योगोऽत्र पाञ्चरात्राद्युक्तः क्रियायोगः किञ्चास्मिन्नर्चनमार्गे अवश्यं विधिरपेक्षणीयः तत्र वैष्णवसम्प्रदाय एव प्रमाणम् । ननु, भगवन्नामात्मका एव मन्त्राः तत्र विशेषेण नमः शब्दाद्यलङ्कृताः । श्रीभगवता श्रीमहर्षिभिश्चाहितशक्तिविशेषाः श्रीभगवता सममात्मसम्बन्धविशेषप्रतिपादकाश्च. तत्र केवलानि भगवन्नामान्यपि निरपेक्षाण्येव परमपुरुषार्थफलपर्यन्तदानसमर्थानि. ततो मन्त्रेषु नामतोऽधिकसामर्थ्ये लब्धे कथं दीक्षाद्यपेक्षा ? उच्यते यद्यपि स्वरूपतो नास्ति तथापि प्रायः स्वभावतो देहादिसम्बन्धेन कदर्यशीलानां विक्षिप्तचित्तानां जनानां तत्सङ्कोचीकरणाय श्रीमहर्षिप्रभृतिभिरत्रार्चनमार्गे क्वचित् काचिन्मर्यादा स्थापितास्ति. ततस्तदुल्लंघने शास्त्रं प्रायश्चित्तमुद्भावयति तत उभयमपि समञ्जसमिति. तदेतदर्चनं द्विविधम् । केवलं कर्ममिश्रञ्च, तयोः पूर्वनिरपेक्षाणां श्रद्धावताम् उत्तरं व्यवहारचेष्टातिशयवत्ता याद्दच्छिकभक्त्यनुष्ठानवत्त्वादिलक्षणलक्षितश्रद्धानां । तथा तद्वैपरीत्यलक्षितश्रद्धानामपि प्रतिष्ठितानां भक्तिवार्तानभिज्ञबुद्धिषु साधारणवैदिककर्मानुष्ठानलोपोपि माभूदिति लोकसंग्रहपराणां गृहस्थानां दर्शितम् । अस्याङ्गानि चागमादौ ज्ञेयानि तथा श्रीकृष्णजन्माष्टमीकार्तिकादिव्रतैकादशीव्रतादिकम् अत्रैवान्तर्भाव्यम् अथास्मिन् पादसेवनार्चनमार्गे अपराधास्त्याज्या अत्रागमोक्तानुसारेण लिख्यन्ते—

"यानैर्वा पादुकैर्वापि गमनं भगवद्गृहे ।
देवोत्सवाद्यसेवा च अप्रणामस्तदग्रतः ॥
उच्छिष्टे वाप्यशौचे वा भगवद्वन्दनादिकम् ।
एकहस्तप्रणामश्च तत्पुरस्तात् प्रदक्षिणम् ॥
पादप्रसारणञ्चाग्रे तथा पर्यङ्कबन्धनम् ।
शयनं भक्षणञ्चापि मिथ्याभाषणमेव च ॥
उच्चैर्भाषा मिथो जल्पो रोदनानि च विग्रहः ।
निग्रहानुग्रहौ चैव नृषु च क्रूरभाषणम् ॥
कम्बलावरणञ्चैव परनिन्दा परस्तुतिः ।
अश्लीलभाषणञ्चैव अधोवायुविमोक्षणम् ॥
शक्तौ गौणोपचारश्च अनिवेदितभक्षणम् ।
तत्तत्कालोद्भवानाञ्च फलादीनामनर्पणम् ॥
विनियुक्तावशिष्टस्य प्रदानं व्यञ्जनादिके ।
पृष्ठीकृत्यासनञ्चैव परेषामभिवादनम् ॥
गुरौ मौनं निजस्तोत्रं देवतानिन्दनं तथा ।
अपराधास्तथा विष्णोर्द्वात्रिंशत् परिकीर्तिताः" ॥

वाराहेच येऽन्येपराधास्ते संक्षिप्य लिख्यन्ते । राजान्नभक्षण ध्वान्तागारे हरेः स्पर्शः विधिं विना हर्य्युपसर्पणं वाद्यं विना तद्द्वारोद्घाटनं कुक्कुरदृष्टे भक्ष्यसंग्रहः अर्चने मौनभङ्गः पूजाकाले विडुत्सर्गायगमनं । गन्धमाल्यादिकमदत्वा धूपनम् अनर्ह पुष्पेण पूजनं तथा—

"अकृत्वा दन्तकाष्ठञ्च कृत्वा निधुवनं तथा ।
स्पृष्ट्वारजस्वलां दीपं तथा मृतकमेव च ॥
रक्तं नीलमधौतञ्च पारक्यं मलिनं पटम् ।
परिधाय मृतं दृष्ट्वा विमुच्यापानमारुतम् ॥
क्रोधंकृत्वा श्मशानञ्च गत्वा भुक्त्वाप्यजीर्णभुक् ।
भुक्त्वा कुसुम्भं पिण्याकं तैलाभ्यङ्गं विधाय च ॥
हरेः स्पर्शो हरेः कर्मकरणं पातकावहम्" ॥

तथा तत्रैवान्यत्र । भगवच्छास्त्रानादरेण तत्प्रतिपत्तिः अन्यशास्त्र प्रवर्त्तनं तदग्रतस्ताम्बूलचर्वणं एरण्डपत्रस्थपुष्पैरर्चनं आसुर काले पूजा पीठे भूमौ चोपविश्य पूजनं स्नपनकाले वामहस्ते तत्स्पर्शः पर्युषितैर्याचितैर्वापुष्पैरर्चनं पूजायां ष्ठीवनं तस्यां स्वग र्वप्रतिपादनं तिर्यक्पुण्ड्रधृतिः अधौतपदत्वेपि तन्मन्दिरप्रवेश अवैष्णवपक्वनिवेदनं अवैष्णवदृष्टौ पूजनं विघ्नेशमपूजयित्व कपालिनं दृष्ट्वा वा पूजनं न खाम्भसा स्नपनं घर्माम्बुलिप्तत्वे पूजनम् इत्यादयः अन्यत्र निर्माल्यलंघनं भगवच्छपथादयोन्ये च बहवः अथ तथापि प्रमादिके भगवदपराधे पुनर्भगवत्प्रसादनानि कर्त्तव्यानि. यथा स्कान्धे अवन्तीखण्डे श्रीव्यासवाक्यम्. "अह न्यहनि यो मर्त्यो गीताध्यायं पठेत्तु वै । द्वात्रिंशदपराधांस्तु क्षमते तस्य केशवः" इति तत्रैव द्वारकामाहात्म्ये "सहस्रनाममाहात्म्यं य पठेत् शृणुयादपि । अपराधसहस्रेण न स लिप्येत् कदाचन इति तत्रैव रेवाखण्डे—

द्वादश्यां जागरे विष्णोर्यः पठेत्तुलसीस्तवम् ।
द्वात्रिंशदपराधान् हि क्षमते तस्य केशवः ॥ इति.

तत्रैवान्यत्र । तुलस्यारोपणं कार्यं श्रवणेन विशेषतः ।
अपराधसहस्राणि क्षमते पुरुषोत्तमः" ॥ इति.

अत्रैवान्यत्रकार्तिकमाहात्म्ये—

तुलस्या कुरुते यस्तु शालग्रामशिलार्चनम् ।
द्वात्रिंशदपराधांश्च क्षमते तस्य केशवः " ॥ इति.

ब्रह्मपुराणे—

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यः करोति हरेः पूजां कृष्णशस्त्राङ्कितो नरः ।
अपराधसहस्राणि नित्यं हरति केशवः" ॥ इति.

आदिवाराहे—

"सम्वत्सरस्य मध्ये तु तीर्थे सौकरवे मम ।
कृतोपवासः स्नानेन गङ्गायां शुद्धिमाप्नुयात् ॥
मथुरायां तथाप्येवं सापराधः शुचिर्भवेत् ।
अनयोस्तीर्थयोरेकं यः सेवेत् सुकृती नरः ॥
सहस्रजन्मजनि कृतानपराधान् जहाति सः" ॥ इति.

सौकरवे सूकरक्षेत्राख्ये अथार्चनमार्गे क्वचिन्मानसपूजाविहितास्ति यथा पाद्मे उत्तरखण्डे "साधारणं हि सर्वेषां मानसेज्या नृणां प्रिया" इति. गौतमीये—संन्यासिनां मुमुक्षूणां मानसोपहृतिः परा" इति. तन्महिमा यथा श्रीनारदपञ्चरात्रे श्रीनारायणवाक्ये "अयं यो मानसो योगो जराव्याधिभयापहः" इत्यादौ—

"यश्चैतत्परया भक्त्या सकृत् कुर्यान्महामते ।
क्रमोदितेन विधिना तस्य तुष्याम्यहं मुने ! " ॥ इति.

एषा क्वचित् स्वतन्त्रापि भवति—मनोमय्या मूर्तेरष्टमतया स्वातन्त्र्येण विधानात् "अर्चादौ हृदये वापि यथा लब्धोपचारकैः" इत्यर्चविहोत्रवचने वाशब्दात् । अत्र ब्रह्मवैवर्त्ते कथाच. यथा, प्रतिष्ठानपुरे कश्चिद्विप्र आसीत् सच दरिद्रोऽपि कर्माधीनमात्मानं मन्यमानः शान्त एवासीत् स तु सरलबुद्धिः कदाचिद्विप्रेन्द्राणां सदसि वैष्णवान् धर्मान् शुश्राव ते च धर्मा मनसापि सिद्ध्यन्तीति श्रुत्वा दरिद्रः स्वयं तथैवाचरितुमारब्धवान् ततश्च गोदावरीस्नानपूर्वकं नित्यं कर्म समाप्य शान्तमतिर्भूत्वा विविक्तासनप्राणायामादिपूर्वकं स्थिरीभूयमनसैवाभिमतां हरिमूर्तिं स्थापयित्वा स्वयं दुकूलादिकं परिधाय दृढं परिकरं बद्ध्वा तत्सदनं सम्मार्ज्य तां प्रणम्य च राजतसौवर्णघटैः सर्वेषां गङ्गादितीर्थानां जलमाहृत्य तथा नानापरिचर्याद्रव्याणुपनीय तदीयस्नपनादिकं आरात्रिकान्तं महाराजोपचारं समाप्य दिनन्दिनं सुखातिशयमाप्नुवन्नासीत् तदेवं बहुषु कालेषु गतेषु कदाचिन्मनसैव घृतसहितं परमान्नं निर्माय सौवर्णपात्रेण तद्भोजनार्थमुत्थाप्य स्थितः तत्तया स्फुरिते तस्मिन् प्रविष्टमङ्गुष्ठयुगलं दग्धं प्रतियन् हन्त तदिदं दुष्टं जातमिति दुःखेन समाधिभङ्गेऽपि जाते दग्धाङ्गुष्ठतया बहिरपि पीडितो बभूव तदवधाय वैकुण्ठे समुपविष्टेन श्रीवैकुण्ठनाथेन हसता श्रीप्रभृतिभिस्तत्कारणं पृष्टेन च सता स्वनिकटं विमानेनानयामासे तथाविधतया दर्शयामासे स्वनिकटयोग्यतया स्थापयामासे च । अथ वन्दनम्. तच्च यद्यप्यर्चाङ्गत्वेनापि वर्त्तते तथापि कीर्त्तनस्मरणवत् स्वातन्त्र्येणापीत्यभिप्रेत्य पृथग्विधीयते एवमन्यत्रापि वन्दनस्य पृथग्विधानं ज्ञानन्तगुणैश्वर्यश्रवणात् तद्गुणानुसन्धानपादसेवादौ विधूतदैन्यानां नमस्कारमात्रे कृताध्यवसायानामर्थे स एष नमस्कारस्तस्यार्चनत्वेनाप्यति दिष्टः नमस्कारेऽपराधाश्चैते परिहर्त्तव्याः विष्णुस्मृत्यादिदृष्टा ये खलु एकहस्तकृतत्ववस्त्रावृतदेहत्वभगवत्तदग्रपृष्ठवामभागांशतन्निकटगर्भमन्दिरगतत्वादिमयाः । अथ दास्यम् "जन्मान्तरसहस्रेषु यस्य स्यान्मतिरीदृशी । दासोऽहं वासुदेवस्य सर्वान् लोकान् समुद्धरेत्" ॥ इतीतिहाससमुच्चयोक्तलक्षणम् । अस्तु तावत्तत्तद्भजनप्रयासः केवलतादृशत्वाभिमानेनापि सिद्धिर्भवतीत्यभिप्रेत्यैवोत्तरत्र निर्देशश्च तस्य एतस्य कार्यभूतं परिचर्यादिकं केवलपरिचर्यादिकं केवलपरिचर्यारूपत्वे भेदो न स्यात्. अथ सख्यम् । यथा अगस्त्यसंहितायाम्—

परिचर्यापराः केचित् प्रासादेषु च शेरते ।
मनुष्यमिव तं द्रष्टुं व्यवहर्तुञ्च बन्धुवत्" ॥ इति.

अत एव "यन्मित्रं परमानन्दमित्यत्र मित्रपदविन्यासः कृतः । अस्य चोत्तरपाठः प्रेमविस्रम्भभावनामयत्वेन दास्यादप्युत्तमत्वापेक्षया. किञ्च परमेऽश्वरेपि यत् सख्यं विधीयते तन्नाश्चर्यं "नादेवोदेवमर्चयेत्" इति तद्भावस्यापि विधानश्रवणात् किन्तु तद्भावस्तत्सेवा विरुद्ध इति भक्तैरपेक्षते सख्यन्तु परमसेवानुकूलमित्युपादीयते इति । तदेतत् साक्षाद्भजनात्मकं दास्यं सख्यञ्च टीकायामपि दर्शितमस्ति तस्यैव मे सौहृदसख्यमैत्रीदास्यं पुनर्जन्मनि स्यादिति श्रीदामविप्रवाक्ये । यथा श्रीकृष्णस्य भक्तवात्सल्यं दृष्ट्वा भक्तिं प्रार्थयते तस्येति सौहृदं प्रेम च सख्यं हिताशंसनञ्च मैत्री उपकारकत्वं दास्यं सेवकत्वञ्च तत्समाहार एकवचनं तस्य तत् सम्बन्धि मे मम स्यात् नतु विभूतिरित्येतत् अत्र दास्यसख्याभ्यां कर्मार्पणविश्वासौ न स्यातां साक्षात् भक्तित्वाभावात् कर्मार्पणस्य फलं भक्तिविश्वासश्च भक्त्यभिनिवेशहेतुः श्रवणकीर्त्तनमित्यादौ विष्णोः श्रवणं विष्णोः कीर्त्तनमिति अथात्मनिवेदनं तत् कार्यञ्चात्मार्थचेष्टाशून्यत्वं तन्न्यस्तात्मसाधनसाध्यत्वं तदर्थैकचेष्टामयत्वञ्च इदं ह्यात्मार्पणं गोविक्रयवत् विक्रितस्य गोवर्त्तनार्थं विक्रीतवता चेष्टा न क्रियते तस्य च श्रेयःसाधकस्तं क्रीतवानेव स्यात् स च गौस्तस्यैव कर्म कुर्यात् न पुनर्विक्रीतवता चेष्टा न क्रियते तस्य च श्रेयःसाधकस्तं क्रीतवानेव स्यात् स च गौस्तस्यैव कर्म कुर्यात् न पुनर्विक्रीतवतोऽपीति अत्र केचिद्देहार्पणमेवार्पणमिति मन्यन्ते यथा भक्तिविवेके "चिन्तां कुर्यान्न रक्षार्थे विक्रीतस्य यथा पशोः । तथार्पयन् हरौ देहं विरमेदस्य रक्षणात्" ॥ इति केचिच्छुद्धक्षेत्रज्ञार्पणमेव. यथा श्रीमदालवन्दारस्तोत्रे "वपुरादिषु योपि कोपिवा गुणतो सानि यथा तथा विधः । तदहं तव पादपद्मयोरहमद्यैव मया समर्पितः" । इति अत्र योपि कोपि वेति वादिभेदान् स्वरूपतः अथवा गुणतो यथा तथाविधा देवमनुष्यादिरूपः भसानि भवानि कामचारे लोट् तदयमिति सचासावयञ्चेति विग्रहात् सोऽयमित्यर्थः । तत्र केवलमात्मनिवेदं दानसमये बलिराजे दृश्यते भावेषु मिश्रेषु दास्येनात्मनिवेदनं श्रीमदम्बरीषे प्रेयसी भावेन श्रीरुक्मिणी देव्याम् एवं सख्यादिनापि ज्ञेयम् ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥

सन्ति ह्यसाधवो लोके दुर्मैत्राश्छद्मवेषिणः ।
तेषामुदेत्यघं काले रोगः पातकिनामिव ॥ २७ ॥

गुरुपुत्र उवाच ।

न मत्प्रणीतं न परप्रणीतं सुतो वदत्येष तवेन्द्रशत्रो ! ।
नैसर्गिकीयं मतिरस्य राजन्नियच्छ मन्युं कददाः स्म मा नः ॥ २८ ॥

नारदउवाच ।

गुरुणैवं प्रतिप्रोक्तो भूय आहासुरः सुतम् ।
न चेद्गुरुमुखीयं ते कुतोऽभद्राऽसती मतिः ॥ २९ ॥

प्रह्लाद उवाच ।

मतिर्न कृष्णे परतः स्वतो वा मिथोऽभिपद्येत गृहव्रतानाम् ।
अदान्तगोभिर्विशतां तमिस्रं पुनःपुनश्चर्वितचर्वणानाम् ॥ ३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

विप्राधमयोरनयोर्गुरुत्वं नास्तीति गुरोः श्रीनारदात् सकाशात् केवलां भक्तिमेवाहमशिक्षमतस्तामेव ब्रवीमि इति मनसि कृत्वाह-श्रवणमिति । पादसेवनं परिचर्य्या अर्चनं पूजा दास्यं स्वस्य दासत्वभावना सख्यं स्वस्य तन्मित्रत्वभावना दृढविश्वासश्च आत्मनिवेदनम् आत्मसमर्पणञ्च तच्च भावविशेषेण सहितं रहितञ्च यथा रुक्मिण्यादीनां वैरोचन्यादीनां पुंसा पुम्मात्रेणेति नात्र वर्णाश्रमादिनियम इति भावः, पुंशब्दस्य जीवमात्रकत्वात् स्त्रियापि नवलक्षणानि यस्या इत्येषां मध्ये किमपिकृतञ्चेत्तदा भक्तिरित्यर्थः । अद्धा साक्षादेव नतु ज्ञानकर्मादिव्यवधानेनेत्यर्थः । साच अर्पितैवसतीयदिक्रियेत नतु कृता पश्चादर्प्येतेति श्रीस्वामिचरणाः । यद्वा सा यदि विष्णौ अर्पिता क्रियेत विष्णुसुखोद्देशेनैव नतु तत्फलस्य स्वस्मिन् विनियोगेनेत्यन्याभिलाषशून्यत्वं द्योतितं तदा उत्तमम् अधीतं मन्ये इति उत्तमा भक्तिरिति भावः ॥ २३ ॥ २४ ॥ २५ ॥

ते त्वया वस्तुतस्तु न विद्यते सारो यतस्तत् ॥ २६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हरिभजनोपदेष्टा गुरुर्भवत्यतः उत्तमं स्वधीतं हरिभजनवतश्च श्रीनारदाद्धरिभजनं स्वधीतमाह—श्रवणमिति । पादसेवनं परिचर्या अर्चनं पूजा दास्यं दासत्वभावना सख्यं मित्रत्वभावना आत्मनिवेदनं सपरिकरात्मसमर्पणम् ॥ २३ ॥

इति नवलक्षणानि यस्याः सा भक्तिः अद्धा साक्षात् विष्णौ अर्पिता तत्प्रीणनैकप्रयोजनकता सङ्कल्पिता सती पुंसा क्रियतेचेत् तदधीतमुत्तमं मन्ये ॥ २४—२५ ॥

हे ब्रह्मबन्धो ब्राह्मणाधम ! मामनादृत्य असता त्वया बालोऽसारं ग्राहितः ॥ २६ ॥

भाषा टीका ।

प्रह्लादउवाच ॥

प्रह्लाद बोले, कि—विष्णुका श्रवण कीर्त्तन स्मरण पाद सेवन अर्चन वंदन दास्य सख्य और आत्मनिवेदन ॥ पुरुष यदि साक्षात् विष्णु भगवान में इस नवधा भक्ति को समर्पण करै तौ मैं उसी को उत्तम पढना मानता हूं ॥२३-२४॥

हिरण्यकशिपु भी पुत्र के इस प्रकार के वचन सुन कर मारे रोष के होट फरफने लगे और क्रोध करके गुरुपुत्र से इस प्रकार बोला ॥ २५ ॥

हे ब्राह्मणाधम हे दुर्मते ! विपक्षका आश्रय लेमे वाले असत तुझने मेरा निरादर कर इस बालक को क्या असार पढादिया ॥ २६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मित्रत्वेन प्रवर्त्तमानस्यापि तव विरोधाचरणं नासम्भावित' मित्याह--सन्तिहीति । दुष्टं मैत्रं मित्रत्वं येषां ते दुर्मैत्राः रोगइति "ब्रह्महा क्षयरोगी स्यात्सुरापः श्यावदन्तकः । स्वर्णहारी तु कुनखी दुश्चर्मा गुरुतल्पगः" ॥ इत्यादिस्मृत्युक्तपात'

न ते विदुः स्वार्थगतिं हि विष्णुं दुराशया ये बहिरर्थमानिनः ।
अन्धा यथाऽन्धैरुपनीयमाना वाचीशतन्त्यामुरुदाम्नि बद्धाः ॥ ३१ ॥
नैषां मतिस्तावदुरुक्रमाङ्घ्रिं स्पृशत्यनर्थापगमो यदर्थः ।
महीयसां पादरजोऽभिषेकं निष्किञ्चनानां न वृणीत यावत् ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किनां काले नरकभोगानन्तरं रोगो यथोदेति तथा तेषां दुर्जनानां सुजनत्वेन वर्तमानानामप्यघं विद्वेषादिकमुदेतीत्यर्थः ॥ २७ ॥

मत्प्रणीतं मया पाठितं नोऽस्मच्छ्यं कत् कुत्सितं दोषं मास्म अदाः अडागम आर्षः, मयि दोषारोपं मा कृथा इत्यर्थः । इन्द्रशत्रो ! इति न हि ब्राह्मणेषु तव कोप उचित इति भावः ॥ २८ ॥

गुरुमुखी गुरुवाक्यजनिता हे अभद्र ! ॥ २९ ॥

आस्तामियं वार्ता भवादृशानां विषयासक्तानामत्रानधिकारादित्याशयेनाऽऽह—मतिरिति । परतो गुरोः स्वतो वा मिथोवाऽन्यतो नाभिपद्येत न सम्पद्येत केषां गृहव्रतानां गृह एव व्रतं सङ्कल्प इतिकृत्यचिन्ता येषाम् अत एवादान्तैरनुपरतैर्गोभिरिन्द्रियैर्हेतुभूतैस्तमिस्रं संसारं विशतां तत्र चर्वितस्यैव चर्वणं येषाम् ॥ ३० ॥

ननु, श्रीकृष्णस्य परमानन्दस्वरूपत्वात्तेऽपि तन्निष्ठा एव किन्न स्युः ? इति चेत्तदज्ञानादित्याह—नेति । ये दुराशयाः विषयवासितान्तःकरणास्ते हि विष्णुं न विदुः, तत्र हेतुः, स्वस्मिन्नेवार्थः पुरुषार्थो येषां गतिं गम्यताम् । ननु, तेऽपि गुरूपदेशाद्विष्णुं ज्ञास्यन्ति. तत्राऽऽह, बहिर्विषयेष्वर्थो येषां ते बहिरर्थास्तानेव गुरुत्वेन मन्तुं शीलं येषां ते अतोऽन्धैरुपनीयमाना अन्धाः यथा पन्थानं न विदुः किन्तु गर्ते पतन्ति तथा तेऽपीशस्य तन्त्यां दीर्घरज्ज्वां वेदलक्षणायामुरूणि दामानि ब्राह्मणादिनामानि यस्यां तस्यां काम्यैः कर्मभिर्बद्धा एव भवन्तीत्यर्थः । तदुक्तम्—

"विषयाविष्टचित्तानां विष्ण्वावेशः सुदूरतः ।
वारुणीदिग्गतं वस्तु व्रजन्नैन्द्रीं किमाप्नुयात्" ॥

इति ॥ ३१ ॥

ननु च "एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा" इत्यादिश्रुतिप्रतिपादितं विष्णुं कथं न विदुः ? कुतो वा तेषां तमिस्रप्रवेशः ? तत्राऽऽह—नैषामिति । निष्किञ्चनानां निरस्तविषयाभिमानानां महत्तमानां पादरजसोऽभिषेकं यावन्न वृणीत तावच्छ्रुतिवाक्यतो जाताप्येषां मतिरुरुक्रमस्याङ्घ्रिं न स्पृशति न प्राप्नोति, असम्भावनादिभिर्विहन्यत इत्यर्थः । अनर्थस्य संसारस्यापगमो यदर्थो यस्याङ्घ्रिस्पर्शिन्यामतेरर्थः प्रयोजनं महदनुग्रहाभावान्न तत्त्वनिश्चयो नापि मोक्षस्तेषामित्यर्थः ॥ ३२ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

मित्रत्वेन वर्तमानस्यापि तव विरोधाचरणं नासम्भावितमित्याह—सन्तीति । दुष्टं मैत्रं मित्रत्वं येषां ते अत एव असाधवश्छन्नवेषिणः कपटवेषधारिणो भवादृशा अपि हि लोके सन्ति तेषामघं द्रोहः काले उचितकाले प्रकटोभवति रोगः पातकिनामिव यथा "ब्रह्महा क्षयरोगी स्यात्सुरापी श्यावदन्तकः स्वर्णहारी तु कुनखी दुश्चर्मा गुरुतल्पगः" ॥ इति स्मृत्युक्तः पातकिनां रोगः उचितकाले उदेति तथा तेषामघं द्रोहादिकमुचितकाले उदेतीत्यर्थः ॥ २७ ॥

एवमुपालब्ध आह गुरुपुत्रः—नेति । न मया पाठितं नापि परेण, किन्तु केवलमेष तव पुत्र एव वदत्येवं, हे इन्द्रशत्रो ! तव ब्राह्मणेष्वनुग्रह उचितो विषयत्वादिति भावः । न स्वपरप्रणीतं चेत्कुतोऽस्याभूदियं मतिः?तत्राह—नैसर्गिकीति. हे राजन् ! अस्य त्वत्पुत्रस्येयं मतिर्नैसर्गिकी स्वाभाविकी न तु परैरुत्पादिता. अतो मन्युं क्रोधं नियच्छ उपसंहर नोऽस्मच्छ्यं कत् कुत्सितं दुःखमित्यर्थः । मास्मदाः न देहीत्यर्थः । माङ्योगेऽप्यडार्षः । कद्नात्मनां न इति पाठान्तरम् । तत्र कद्नात्मनां दीनात्मनां न मन्युं मद्विषयं क्रोधं नियच्छेत्यर्थः ॥ २८ ॥

इत्थं गुरुणा प्रत्युक्तो दैत्यः सुतमाहेत्याह देवर्षिः–गुरुणेति । तदेवाह–न चेदिति. हे अभद्र ! इयं बुद्धिर्गुरुमुखी गुरूपदेशजाता न चेत्तव कुतो हेतोस्तवासती दुष्टा मतिरभूत् ॥ २९ ॥

एवमुक्त आह प्रह्लादः–मतिरिति । यत्पृष्टं कुतस्तवेयं मतिरिति तत्र महतामनुग्रह एवेदृशीमतिहेतुरिति वक्तुं तावन्महद्भिरननुगृहीतानां भवादृशानामीदृशी मतिर्दुर्लभेत्याह–मतिरिति । गार्हस्थ्यरतानां स्वतः परतो वा मिथोऽन्योन्यस्माद्वा कृष्णे मतिर्भक्त्यात्मिका नाभिपद्येत तत्र हेतुं वदन् गृहव्रतान्विशिनष्टि–अदान्तगोभिरिति. अदान्तैरजितैर्गोभिरिन्द्रियैर्हेतुभिस्तमिस्रं निरयरूपं संसारं पुनःपुनर्विशतां चर्वितमनुभुक्तं तस्यैव पुनश्चर्वणमुपभोगो येषां पूर्वपूर्वैर्भुक्तमेव विषयं भुञ्जानानां पूर्वेद्युर्भुक्तानेव वनितादीन् विषयान् पुनरपरेद्युर्भुञ्जानानामिति वा एवं विषयासक्तचित्तानां त्वादृशां कृष्णे मतिर्दुर्लभा इत्युक्तम्. यद्वा चर्वितचर्वणाः पशवस्तत्तुल्यानामिति ॥ ३० ॥

मास्तु कृष्णे मतिः स्वश्रेयोऽपि न स्वयं जानन्तीत्याह—नेति । स्वार्थश्च गतिश्च स्वार्थगतिस्तं स्वस्य पुरुषार्थभूतं तदुपायभूतञ्च विष्णुं गृहव्रता न विदुः,तत्र हेतुं वदंस्तान्विशिनष्टि, बहिरर्थमानिनः बहिः शब्दादिविषयेषु अर्थमानिनः पुरुषार्थाभिमानिनः अतस्ते अन्धैरुपनीयमाना अन्धा यथा पन्थानं न विदुः किन्तु श्वभ्रे पतन्ति तथा तेऽपि ईशस्य तन्त्यां वेदलक्षणायां स्थूलरज्वामुरुदाम्नि· वर्णाश्रमधर्मादिरूपनानाविधकण्ठसूत्रे बद्धा भवन्ति वेदोक्तकेवलकाम्यकर्मण्यासक्तैः प्रलोभितास्तत्रैवासक्ताः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पुनःपुनः संसरन्तो दुःखमेव प्राप्नुवन्ति न तु निरतिशयानन्दरूपपुरुषार्थलक्षणं भगवन्तं प्राप्नुवन्तीत्यर्थः ॥ ३१ ॥

तदेव व्यनक्ति-नेति । एषामुक्तविधानां विषयासक्तचित्तानां मतिर्बुद्धिः उरुक्रमस्य निरतिशयमहिमशालिनो भगवतो निरतिशयपुरुषार्थरूपमङ्घ्रिं न स्पृशति न विषयीकरोति तदङ्घ्रिस्पर्शनं विशिनष्टि; यदर्थं यस्योरुक्रमस्याङ्घ्रिस्पर्शस्य अर्थः प्रयोजनं फलमनर्थापगमः दुःखनिरासरूपः कियत्पर्यन्तं न स्पृशति तत्राह—यावन्निष्किञ्चनानामनन्यप्रयोजनानां महीयसां महाभागवतानां पादरजस्सेवां न वृणीत न वृणुयात् महत्सेवां न कुर्यात्तावन्न स्पृशतीत्यर्थः । मम मातृगर्भावस्थानदशायामेव महीयसः श्रीनारदस्यानुग्रहादियं बुद्धिरुरुक्रमस्याङ्घ्रिविषयाऽभूदिति गूढोऽभिप्रायः ॥३२॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

साधुत्वेन वृतस्य गुरोर्दुर्मते इति सम्बोध्य निन्दनं कथं घटते ? इति तत्राह-सन्तीति ।—

"गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।
उत्पथं प्रतिपन्नस्य कार्यं भवति शासनम्" ॥

इति वाक्यं हिशब्देन स्मारयति पातकिनां पापफलत्वेन रोग उदेति यथा, तथा तेषामघमपराधलक्षणं व्यसनं प्रकाशत इत्यन्वयः ॥ २७ ॥

लोके सन्त्यसाधवः नाहं तादृशः यतस्त्वत्पुत्रो न मया रचितं नापि परेण पठ्यत इत्याह—नमदिति । तर्हि कस्मादियं मतिरभूदिति तत्राह-नैसर्गिकीति । तदा तस्मिन्पक्षे ममात्मनः स्वरूपाभिमानो मया ग्राहितेयं मतिरिति कस्तस्मात् कोपं संहरेति ॥ २८ ॥

पुत्राय क्रुध्यन्नाह-गुरुणेति । गुरुमुखी गुरुमुखादुत्पन्नेयं मतिः ॥ २९ ॥

सत्येव मन्मतिः त्वन्मतिरेवासतीति पितरं कटाक्षीकृत्य परिहरति-मतिरिति । परतो गुर्वादिबोधनप्रयत्नेन स्वतः स्वप्रयत्नेन तत्र निमित्तमाह—गृहेति । वनादिनिवासमन्तरेण गृह एवावस्थानलक्षणं व्रतं येषां ते तथा तेषाम्, ननु "कुटुम्बी शुचौ देशे स्वाध्यायमधीयानः" इतिश्रुतेर्गृहस्थानामपि श्रेयःप्राप्त्युपपत्तेरिति तत्राह—अदान्तेति । अदान्तानामिन्द्रियनिग्रहरहितानां पुरुषाणां गोभिर्वागिभस्तमिस्रं नरकसुखकल्पं विषयसुखं विशतां भुञ्जानानां तत्रापि नूतनापूर्वभोगो नास्तीत्यभिप्रेत्याह—पुनरिति । पुनःपुनर्भुक्तविषयानेव भुञ्जानानामित्यर्थः । अदान्तगोभिरशिक्षिताभिर्वाग्भिर्वेदगताभिस्तमिस्रमतस्वार्थविषयमज्ञानम् अन्यथाज्ञानञ्च विशतां गाहमानानां न तत्रापि यत्नोस्तीत्याह—पुनरिति वा ॥ ३० ॥

एतदेव स्पष्टमाह-न त इति । दुष्टेषु प्रतीतिसुन्दरेषु परिणामविरसेष्वाशयो येषां ते तथा तत्र हेतुमाह-बहिरिति । बहिरर्थेषु मुखतः प्रतीयमानार्थेष्वेव भावस्तात्पर्यार्थनिश्चयो येषां ते तथा श्रुतितात्पर्यार्थानभिज्ञा इत्यर्थः । एते स्वार्थगतिं पुरुषार्थस्वरूपं स्वभक्तप्रयोजनसाधकं वा कृष्णं न विदुरित्यन्वयः । अत्र कारणमाह-वाचीति । ईशतन्त्यामीशस्य वेदवाग्लक्षणतन्त्यां ब्राह्मणादिबहुनामाख्यलक्षणनामदाम्नि बद्धाः अत्रोदाहरणमाह—अन्धा इति । अन्धैरज्ञैरुपनीयमाना उपदिश्यमानकर्ममार्गाः अन्धा अज्ञा उपदिष्टान्यमार्गं यथा न विदुस्तथेति अनेन "अन्धेनैव नीयमाना यथान्धाः" इति स्मृतिं स्मारयन्ति ॥ ३१ ॥

नन्वेवं तर्हि गृहव्रतानां मुक्त्युपायः कः ? इत्याह—नैषामिति । यावदेषां गृहव्रतानां मतिर्महीयसां निष्किञ्चनानां संन्यासिनां पादरजोऽभिषेकं न वृणीत तावन्तं कालमुरुक्रमस्याङ्घ्रिं न स्पृशति न विषयीकरोति उरुक्रमस्याङ्घ्रिस्पर्शस्य किं फलम् ? अत्राह-अनर्थेति । यस्य हरेरङ्घ्रिस्पर्शोत्थफलमनर्थापगमः संसारनिवृत्तिः अथवाऽनर्थापगमो यस्मात् पादरजोभिषेकादुत्थितः प्रकाशितो भवति तम् ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

गुरुरेव मुखं द्वारं यस्याः सा गुरुमुखी ॥ २९ ॥ ३० ॥

स्वस्मिन् श्रीविष्णोरेवार्थः प्रेमरूपः पुरुषार्थो येषां तेषाम् ॥३१॥

अनर्थस्य तत्स्पर्शविघ्नस्याप्यगमः ॥ ३२—३५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

महैरिपक्षवर्ती त्वमेतावद्दिनान्ते मद्रेणैव व्यक्तोऽभूस्तदद्यैव ते समुचितां दक्षिणां दास्यामीत्यर्थान्तरस्य न्यासेनाह—सन्तीति दुष्टं मैत्र्यं मित्रत्वं येषान्ते अघं द्वेषादिकं उदेति दैवात् प्रकटीभवति रोग इति—

"ब्रह्महा क्षयरोगी स्यात् सुरापः श्यावदन्तकः ।
स्वर्णहारी तु कुनखी दुश्चर्मा गुरुतल्पगः" ॥

इत्यादिस्मृत्युक्तः ॥ २७ ॥

हे इन्द्रशत्रो ! इति मयि दीने ब्राह्मणे कोपस्ते नोचित इति भावः । नोऽस्मभ्यं कत् कुत्सितं दोषं मास्म अदाः अडागम आर्षः मयि दोषारोपणं माकृथा इत्यर्थः ॥ २८ ॥

हे अभद्र ! असती वस्तुतस्तु भद्रा सती सर्वोत्तमा ॥ २९ ॥

सत्यमियं कृष्णविषया मतिर्भवन्मते असत्येव किन्त्वेषा मतिर्भवादृशानां साधूनां कुतोऽपि कदाचिदपि नोत्पद्यत इति वक्रोक्त्या उपहसन्नाह-मतिरिति । परत ईदृशाद्गुरोरन्यतो वा स्वतो वा मिथोऽन्योन्यतो वा नाभिपद्येत न संपद्येत किन्तूत्तरग्रन्थदृष्ट्या महच्चरणरजोभिषेकलिप्सारहितानामिति तदीयस्वगतोक्तिरत्र श्लोकेऽपि ज्ञेया केषां गृहव्रतानां गृहासक्तानां गृहव्रतत्वमेवाह, अदान्तैरवशीकृतैर्गोभिरिन्द्रियैस्तमिस्रं नरकम् ननु, गृहव्रताः कदाचित्स्वर्गिणोऽपि भवन्ति तत्राह—स्वपराभ्यां

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

चर्वितस्यैव पुनःपुनश्चर्वणं येषां तेषां वेश्यालयः स्वर्गो वा तुल्य एवेति भावः ॥ ३० ॥

ननु, रे मूढ मामिन्द्रादिवन्द्यपादपीठं पितरमपि वक्रोक्तिविषयीकुरुषे शृणु रे कुमते शृणु शुक्राचार्यस्य शिष्या महाविद्वांसस्त्वद्गुरवः किं सर्वशास्त्रतात्पर्यं न जानन्ति ? यतस्तेभ्योऽधीतमर्थं न त्वं साधु मन्यसे, इत्यत आह—नेति । ते स्वस्य अर्थरूपां गतिं विष्णुं न विदुः किं त्वनर्थरूपाङ्गतिं स्वर्गादिमेव जानन्तीति भावः । यतो दुराशयाः दुष्टान्तःकरणाः बहिर्विषयसुखमनर्थमेव अर्थं मन्तुं शीलं येषां ते अतस्त एव यदि विष्णुं न विदुः तदा कथं तच्छिष्या ज्ञास्यन्तीति सदृष्टान्तमाह अन्धैरुपनीयमानाः उपदिष्टमार्गाः सन्तोऽन्धा यथा गर्त्ते पतन्ति तथैव वाचि वेदलक्षणायां तन्त्या दीर्घरज्ज्वां उरूणि दामानि ब्राह्मणादिनामानि यस्य तस्यां कर्मभिर्बद्धा एव भवन्तीत्यर्थः ॥३१॥

ननु च यदि विष्णुरेव स्वार्थरूपा गतिः शास्त्रैरुच्यते तदा त्वद्गुरूणां सर्वशास्त्रज्ञानामपि मतिः विष्णुनिष्ठैवोत्पद्येतेत्यतस्तेषां विष्णुनिष्ठमतित्वाभावादेव विष्णुभक्तिरशास्त्रीयेत्यनुमीयत इत्यत आह—नैषामिति । निष्किञ्चनानां "मत्कृतेत्यक्तकर्मास्त्यक्तस्वजनबान्धवाः" इति भगवद्वाक्यविश्वासात् त्यक्तव्यावहारिकवित्तपुत्रकलत्राभिलाषकर्मज्ञानादीनां भक्तिमात्रैकवासनत्वेन महीयसां पादरजसा स्वस्य वैष्णवत्वेनाभिषेकं यावन्न वृणीत तावन्मतिरुरुक्रमांघ्रिं नस्पृशयति—

"यथा देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्मै ते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः" इति ॥

"यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुतेतनुं स्वाम्" इत्यादि श्रुतिभ्यः अनर्थस्य संसारस्य अपगमोऽयम् स्यार्थः यथा अङ्घ्रिस्पर्शिन्या मतेरर्थः प्रयोजनमानुषङ्गिकमेव फलं मुख्यं फलन्तूरुक्रमांघ्रिस्पर्शः स एव ॥ ३२ ॥ ३३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

असाधवः दुराचाराः छद्मवेषिणः मित्रत्वेन वर्त्तमानाः शत्रवः अत एव दुष्टं मैत्रं मित्रत्वं येषां ते तेषामघं दुर्मित्रत्वं पातकिनां रोगो यथा तद्वत्काले उदेति प्रकटं भवति ॥ २७ ॥

हे इन्द्रशत्रो ! एष तव सुतो यद्वदति तन्मत्प्रणीतं न परप्रणीतं मत्पितृपितामहादिप्रणीतं वा न भवति किन्त्वस्येयं नैसर्गिकी मतिः मत्तोमन्युं नियच्छ उपसंहर नोऽस्मभ्यं कलं कष्टं मास्म अदाः अडागम आर्षः ॥ २८ ॥

गुरुमुखी गुरूपदिष्टा न चेत्तर्हि कुतोऽभूत् ॥ २९ ॥

कृष्णमतेरात्मनः कृतार्थतां द्योतयितुमकृष्णमतीनामकृतार्थतामाह—मतिरिति द्वाभ्याम् । गृहव्रतानां प्रवृत्तिमार्गनिष्ठानां पुनः पुनश्चर्वितचर्वणानां भुक्तविषयभोगरतानाम् अदान्तैर्गोभिरिन्द्रियैस्तमिस्रं जन्ममरणगर्भादुःखदुःखं संसारं विशताम् मतिः परतः स्वतो मिथोऽन्योन्यतो वा नाभिपद्येत ते शोच्या इति भावः ॥ ३० ॥

ये दुराशयाः दुष्टे विषयसुखे आशयोऽन्तःकरणं येषां तथाभूताः अत एव बहिरर्थेषु ध्यानानन्दाशक्तैर्दूरतस्त्यक्तेषु मानिनः पुरुषार्थाभिमानिनः वागीशस्य वेदस्वामिनो हरेः तन्त्यां वेदलक्षणायां दीर्घरज्जुस्थानीयायामुरूणि दामानि ब्राह्मणादीनि नामानि तत्सद्बन्धनस्थानानि यस्यां बद्धाः स्वार्थमार्तिं अश्यते इत्यर्थः । प्राप्योऽर्थः स्वस्यार्थः स्वार्थगम्यते अनयेति गतिः प्राप्यमार्गः स चासौ स च उपायोपेयरूपः तं न विदुः ते संसारे एव पतन्ति अन्धा यथान्धैर्नीयमानाः गम्यं देशं तन्मार्गञ्च न विदुः प्रत्युत गर्ते पतन्ति तद्वत् तेषामुपदेष्टारोऽपि स्वार्थगतिं विष्णुं न जानन्ति संसारे एव निमज्जन्तीति दृष्टान्ताभिप्रायः ॥ ३१ ॥

अज्ञानहेतुमाह—नैषामिति । एषां मतिः यावदकिञ्चनानां भगवच्चरणैकशरणानां पादरजोऽभिषेकं न वृणीत तावत् उरुक्रमाङ्घ्रिं न स्पृशति न विषयीकरोति यस्याम् उरुक्रमाङ्घ्रिस्पर्शिन्यामतेरर्थः प्रयोजनं अनर्थस्य अर्थो मोक्षस्तद्विपरीतस्य बन्धस्यापगमः ॥ ३२ ॥

भाषा टीका ।

लोक में कपट रूपी दुष्ट मैत्री वाला बहुत से असाधु (दुष्ट) हैं, कि जिनका पाप समय पाकर पातकियों के रोग की तरह प्रकट होता है ॥ २७ ॥

गुरुपुत्रउवाच ॥

गुरुपुत्र बोला, कि— हे इन्द्रशत्रो ! तुमारा पुत्र न हमारा बनाया हुआ न दूसरे का बनाया हुआ भी कहता है, इसकी मति ऐसी स्वाभाविक है राजन् ! आप क्रोध को रोकिये हम लोगों पर मिथ्या दोषारोपण न कीजिये ॥ २८ ॥

नारद उवाच ॥

नारदजी बोले, कि--जब गुरु ने लोट कर फिर ऐसा कथन किया तब असुर फिर पुत्र से बोला कि—यदि तेरी यहमति गुरुमुखी नहीं तो फिर यह खोटी मति कहां से हुई ॥ २९ ॥

प्रह्लाद उवाच ॥

प्रह्लाद बोले, कि—गृहकी चिंता वाले और अवशीकृत इन्द्रियों से बार २ चर्वित विषयों का चर्वण करने वाले अत एव बारंबार संसार में प्रविष्ट होने वाले ऐसे लोगो की मति कृष्ण में आप से वा गुरू के उपदेश से वा अन्य किसी से नहीं लगती ॥ ३० ॥

बहिर्विषय में अर्थ दृष्टि वाले जो दुराशय लोग हैं वे परम पुरुषार्थ के प्रापक श्री विष्णु को नहीं जान सके हैं, अंधो के हाथ पकड के चलने वाले अन्धे जैसे मार्ग न जान सक्ता किन्तु खड्डेड में पडते हैं इसी प्रकारये लोग भी ईश्वर की वाणी रूप तंती में बंधे हुए संसार ही में पडते है ॥ ३१ ॥

इत्युक्त्वोपरतं पुत्रं हिरण्यकशिपूरुषा ।
अन्धीकृतात्मा स्वोत्सङ्गान्निरस्यत महीतले ॥ ३३ ॥
आहामर्षरुषाविष्टः कषायीभूतलोचनः ।
वध्यतामाश्वयं वध्यो निस्सारयत नैर्ऋताः ॥ ३४ ॥
अयं मे भ्रातृहा सोऽयं हित्वा स्वान्सुहृदोऽधमः ।
पितृव्यहन्तुर्यः पादौ विष्णोर्दासवदर्चति ॥ ३५ ॥
विष्णोर्वा साध्वसौ किं नु करिष्यत्यसमञ्जसः ।
सौहृदं दुस्त्यजं पित्रोरहाद्यः पञ्चहायनः ॥ ३६ ॥
परोऽप्यपत्यं हितकृद्यथौषधं स्वदेहजोऽप्यामयवत्सुतोऽहितः ।
छिन्द्यात्तदङ्गं यदुतात्मनोऽहितं शेषं सुखं जीवति यद्विवर्जनात् ॥ ३७ ॥
सर्वैरुपायैर्हन्तव्यः सम्भोजशयनासनैः ।
सुहृल्लिङ्गधरः शत्रुर्मुनेर्दुष्टमिवेन्द्रियम् ॥ ३८ ॥
नैर्ऋतास्ते समादिष्टा भर्त्रा वै शूलपाणयः ।
तिग्मदंष्ट्रकरालास्यास्ताम्रश्मश्रुशिरोरुहाः ॥ ३९ ॥
नदन्तो भैरवान्नादांश्छिन्धि भिन्धीति वादिनः ।
आसीनं चाहनञ्छूलैः प्रह्लादं सर्वमर्मसु ॥ ४० ॥

भाषा टीका ।

इनकी मति जब तक निष्किञ्चन महज्जनों के चरणरज के अभिषेक को नहीं स्वीकार करता है तब तक इसकी मति भगवच्चरणारविंद का स्पर्श नही करती है जिस स्पर्श से संसार रूप अनर्थ दूर होता है ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

निरस्यत चिक्षेप ॥ ३३ ॥

अमर्षोऽसहनं तेन सहितया रुषाऽऽविष्टो व्याप्तः कषायीभूते आताम्रे लोचने यस्य हे नैर्ऋता राक्षसाः ! ॥ ३४ ॥

वध्यत्वे हेतुः यतोऽयं मे भ्रातृहा कुतः यो विष्णोः पादौ दासवदर्चति, तत्पक्षपातीत्यर्थः। अतः स एवायमित्यन्वयः ॥ ३५ ॥

अहो विष्णुरप्यविश्वसनीयं किमितिस्वीकृतवानित्याह-विष्णोर्वेति अहाज्जहौ ॥ ३६ ॥

ननु, तवायमपत्यं कथं वध्यस्तत्राऽऽह--परोऽप्यौषधमिव हितकृच्चेत्तर्ह्यपत्यमेव ज्ञेयः सुतः स्वदेहजोऽप्यहितश्चेदामय इव ज्ञेयः आस्तां ममतास्पदस्य कथा, अङ्गमपि च यत्करचरणादि तः ष्यात्मनोऽहितं चेच्छिन्द्यादेवेत्यर्थः ॥ ३७ ॥

अतः सर्वैरुपायैर्हन्तव्यः सम्भोजो भोजनम् भोजनादिषु विष विप्रयोगैरित्यर्थः । यथा दुष्टमिन्द्रियं मुनेः शत्रुः ॥ ३८ ॥

तिग्मास्तीक्ष्णा दंष्ट्रा येषाम् करालान्यास्यानि भयङ्कराणि मुख नि येषां ते च ते च ताम्राणि श्मश्रूणि शिरोरुहाश्च येषाम् ३९ ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इतीत्थमुक्त्वोपरतं तूष्णीमासीनं पुत्रं रुषा क्रोधेनान्धीकृ आत्मा विवेको यस्य स हिरण्यकशिपुः स्वस्योत्सङ्गात् मही तले निरस्य तं पातयित्वा आह चेत्युत्तरेणान्वयः । निरस्यती पाठे न्यपातयदित्यर्थः ॥ ३३ ॥

अमर्षः असहनं तत्सहितया रुषा आविष्टो व्याप्तः अतए कषायीभूते आताम्रे लोचने यस्य सः आह च उक्तवांश्च तदे वाह--वध्यतामिति । हे नैर्ऋताः ! इत एनं निःसारयत य गमयत अयं बालो वध्यो वधार्हः अतःआशु वध्यतां हन्यताम् ॥३४
वध्यत्वे हेतुर्यतोऽयं मे मम भ्रातुर्हन्ता कुतःयोऽयमधम

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

बालः स्वान् स्वकीयान् सुहृदोऽस्मान् हित्वा पितृव्यस्य पितृभ्रातुर्हिरण्याक्षस्य हन्तुर्विष्णोः पादौ चरणौ दासवदर्चति तत्पक्षपातीत्यर्थः । अतः स एवार्यमित्यन्वयः, हित्वाऽसून् सुहृद इति पाठे. अयं मे भ्रातृहा कुतः यद्यस्मादधमोऽयं सुहृदः प्रियानसून् प्राणान् हित्वा विष्णवे समर्प्य दासवत्तत्पादावर्चति अतोऽयमेव प्रह्लादो मे भ्रातृहेत्यर्थः ॥ ३५ ॥

मद्दृष्टान्तेन विष्णोरप्यसावसमञ्जसोऽननुकूलः साधुकरिष्यति किन्तु ? न करिष्यत्येव. अव्यवस्थितचित्तत्वादिति भावः । यतोऽसौ पञ्चहायनः पञ्चवर्षवयस्क एवसन् दुस्त्यजं त्यक्तुमशक्यं पित्रोः मातापित्रोः सौहृदमहादत्याक्षीत् ॥ ३६ ॥

ननु,तवायं पुत्रः तत्कथं वध्यः?तत्राह–परोपीति। परोऽपि शत्रुपक्षप्रभवोपि यथा औषधं तथा हितकृत् हितकारी चेत्तर्हि सोऽपत्यं पुत्र एव देहाज्जातोऽप्यामयवद्रोगवदहितो दुःखकृच्चेत्तर्हि आमयवत्परित्याज्यः । आस्तां ममतास्पदस्य कथा हि यस्माद्यदङ्गं करचरणादिकमपि सर्पदंशव्रणादिदूषितं सदात्मनोऽहितं दुःखकृच्चेत्तर्हि तदङ्गं छिन्द्यादेव यस्य दुष्टाङ्गस्य विसर्जनात्परिहाराच्छेषमवशिष्टमङ्गं सुखं जीवति ॥ ३७ ॥

अतोऽयं सुहृल्लिङ्गधरः पुत्रवेषधारी शत्रुर्यथा दुष्टमिन्द्रियं मुनेः शत्रुः तद्वद्वसंमानः सर्वैर्गरलादिमिश्रितसम्भोजनादिभिरुपायैर्हन्तव्यः ॥ ३८ ॥

एवं भर्त्रा दैत्येन्द्रेण समादिष्टाः ते नैर्ऋताः शूलपाणयः तिग्माः तीक्ष्णा दंष्ट्रा दन्ताः येषां करालान्यास्यानि येषां ताम्राणि श्मश्रूणि शिरोरुहाणि च येषां तादृशाः ॥ ३९ ॥

भैरवान् भयङ्करान्नादान्नदन्तः कुर्वन्तश्छिन्धिभिन्धीति वदन्त आसीनम् उपविष्टं प्रह्लादं सर्वेषु मर्मस्थानेषु शूलैरहनन् हतवन्तः ॥ ४० ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कषायीकृतलोचनः रक्तनेत्रः ॥ ३३—३४ ॥

पितृव्यस्य हिरण्याक्षस्य हन्तुः असावसमंजसः प्रह्लादः विष्णोः किं वा साधु करिष्यति ॥ ३५ ॥

कथमसमंजसो भूत्तत्राह–सौहृदमिति ॥ ३६ ॥

परः शत्रुरप्यवश्यं द्वेषेणापि हितकृच्चेत्स एव सुतः यथा औषधं तिक्तत्वेन "हरीतकी मनुष्याणां मातेव हितकारिणी" इति वचनात् स्वदेहजो ऽपि सुतो ऽपि अहितो ऽपकारीचेत्तं छिन्द्यादामयवत् किञ्चात्मनः स्वस्य यदहितमङ्गं सर्पदष्टं तच्छिन्द्यात्तदेव विशिनष्टि–यद्विवर्जनादिति शेषमङ्गं सुखं जीवतीत्यन्वयः ॥ ३७ ॥

संभोजो भोजनम् ॥ ३८—३९ ॥

भैरवं नादमुद्दिश्य ॥ ४० ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पञ्चहायन इति । गर्भे चिरकालस्थितत्वात् ॥ ३६—३८ ॥

नैर्ऋता इति युग्मकम् । दंष्ट्रा इति क्वचित् । किन्तु स्वाम्यसम्मतः ॥ ३९—४८॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अमर्षः असहनं तेन सहितया रुषा आविष्टः हे नैर्ऋताः ! राक्षसाः ॥ ३४ ॥

अयं मे भ्रातृहा, ननु, विष्णुस्ते भ्रातृहा प्रसिद्धस्तत्राह स विष्णुरयमेवेत्यर्थः । कुतः हित्वेत्यादि दासवदिति असुरमहाराजनन्दनोपि भूत्वेत्यर्थः विष्णुना स्वदासेषु स्वसारूप्यार्पणात् विष्णुरेवायमिति वध्यताम् ॥ ३५ ॥

विष्णुरप्यविश्वसनीयः कथमिमं बुद्धिमान् भूत्वा कथं विश्वस्तः स्यादित्याह—विष्णोर्वेति, ॥ ३६ ॥

ननु, त्वदपत्यमयमस्माभिः कथं हन्तुमर्हस्तत्राह–परोऽप्यौषधमिव हितकृच्चेत्तर्ह्यपत्यमिव ज्ञेयः आस्तां ममतास्पदस्य कथा अङ्गमपि यत् करचरणादि तदप्यात्मनोऽहितं चेत् छिन्द्यादेवेत्यर्थः ॥ ३७ ॥

भोज्यादिवस्तुषु विषाद्यर्पणैरपि हन्यतामित्याह—सर्वैरिति ॥ ३८ ॥ ३९ ॥ ४० ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

इत्येवमुक्त्वोपरतं तूष्णीं स्थितम् स्वस्योत्सङ्गात् महीतले निरस्यत अपातयत् ॥ ३३ ॥

अमर्षेण पुत्रसिद्धान्तासहनेन शुक्रया रुषाऽऽविष्टोऽभिभूतः कषायीभूतेऽतिताम्रे लोचने यस्य सः हे नैर्ऋताः अयं वध्यः आशु निरसारयत तदनन्तरं वध्यतामित्याह ॥ ३४ ॥

वध्यत्वे हेतुमाह–अयमिति । यो मे भ्रातृहा विष्णुः सोऽयं प्रह्लादः तद्दासत्वात्तदनन्य इत्यर्थः । तदेवाह,यः स्वान्सुहृदोऽस्मदादीन् हित्वा पितृव्यहन्तुर्विष्णोः पादौ दासवदर्चति सोऽयम् अधमः वधार्ह इत्यर्थः ॥ ३५ ॥

यः पञ्चहायनः पञ्चवर्षः पित्रोः सौहार्दं दुस्त्यजम् अहात् अत्यजत् सोऽसावसमञ्जसः अविश्वसनीयः विष्णोर्वा किं साधु प्रियं करिष्यति ॥ ३६ ॥

राजनीतिरियं यद्बलात्पुत्रोऽप्येवंविधो वध्य इत्याह–पर इति । परःशत्रुरपि अपत्यं यदि हितकृत् यथौषधम् स्वदेहजः सुतोऽप्यहितश्चेत्परः शत्रुरेव आमयवत् यदङ्गमङ्गुल्यादि अहिविषादिना आत्मनोऽहितं तच्छिन्द्यादेव यद्विवर्जनात् शेषं शरीरं सुखं यथा तथा जीवति ॥ ३७ ॥

यस्मादयं मुनेर्दुष्टमिन्द्रियमिव सुहृल्लिङ्गधरः शत्रुरतः सम्भोजोभोजनं तदादिभिः विषदूषितान्नदानादिभिर्मारणोपायैर्हन्तव्यः ॥ ३८ ॥

परे ब्रह्मण्यनिर्देश्ये भगवत्यखिलात्मनि ।
युक्तात्मन्यफला आसन्नपुण्यस्येव सत्क्रियाः ॥ ४१ ॥
प्रयासेऽपहते तस्मिन्दैत्येन्द्रः परिशङ्कितः ।
चकार तद्वधोपायान्निर्बन्धेन युधिष्ठिर ! ॥ ४२ ॥
दिग्गजैर्दन्दशूकैश्च अभिचाराऽवपातनैः ।
मायाभिः सन्निरोधैश्च गरदानैरभोजनैः ॥ ४३ ॥
हिमवाय्वग्निसलिलैः पर्वताक्रमणैरपि ।
न शशाक यदा हन्तुमपापमसुरः सुतम् ।
चिन्तां दीर्घतमां प्राप्तस्तत्कर्त्तुं नाभ्यपद्यत ॥ ४४ ॥
एष मे बह्वसाधूक्तो वधोपायाश्च निर्मिताः ।
तैस्तैर्द्रोहैरसद्धर्मैर्मुक्तः स्वेनैव तेजसा ॥ ४५ ॥
वर्तमानोऽविदूरे वै बालोप्यजडधीरयम् ।
न विस्मरति मेऽनार्यं शुनःशेप इव प्रभुः ॥ ४६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भर्त्रा हिरण्यकशिपुनाऽऽदिष्टाः तिग्माः तीक्ष्णाः दंष्ट्रा येषां करालानि भयङ्कराण्यास्यानि येषान्ते च तथा ताम्रायवरुणानि श्मश्रूणि शिरोरुहाश्च येषान्ते ॥ ३९ ॥ ४० ॥

भाषा टीका ।

इतना कहकर चुप होने पर मारे रोष के अंधा हो रहा जो हिरण्यकशिपु, उसने अपने पुत्र प्रल्हाद को गोद से उठाकर पृथ्वी पर पटक दिया ॥ ३३ ॥

क्रोध से व्याप्त होने से लाल नेत्र जिसके ऐसा हिरण्यकशिपु बोला, कि हे राक्षस हो ! यह लडका वध के योग्य है, इसको मारो और निकाल दो ॥ ३४ ॥

यह अधम हमारे भ्राता का घातक है, क्योंकि ? अपने सुहृदों को छोडकर पितृव्य के मारने वाले विष्णु के चरणों को दास के तरह पूजता है ॥ ३५ ॥

जो पांच वर्षका ही अपने मा बापों से सौहृद छोडचुका यह खोटा विष्णु का क्या भला करेगा ? ॥ ३६ ॥

जो दूसरा होकर भी औषध के तरह हितकारी है वह अपना पुत्र है और अपने देह से भी पैदा है पर रोग के तरह दुःखदायी हो तौ वह पुत्रभी वैरी है जो अपना अहित करने वाला अंग भी हो (जैसे सर्प की काटी अंगुली) तौ उसे काट डाले, कि जिस्के विना शेष में सुख पूर्वक जीवता रहे ॥ ३७ ॥

भोजनादिक में विषादि प्रदान से ऐसे सर्व उपायों से इसे मारना चाहिये क्योंकि यह सुहृद का चिन्ह धारण करने वाला शत्रु है जैसे मुनि के दुष्ट इन्द्रियें शत्रु हैं ॥ ३८ ॥

अपने भर्त्ता की आज्ञा पाकर तीक्ष्णडाढे और कराल मुख वाले लाल २ डाढी मूंछ और केश जिनके ऐसे वे राक्षस लोग हाथों में त्रिशूल लेने से भयंकर, बैठे हुए प्रल्हादके सर्व मर्म स्थानों में शूलों से प्रहार करने लगे ॥ ३९ ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

परे ईश्वरे युक्तः समाहित आत्मा मनो यस्य तस्मिन्प्रह्लादे तेषां नैर्ऋतादीनां प्रहाराः निष्फलाः आसन् जाताः तत्र हेतवः ब्रह्मणि निर्विकारेऽनिर्देश्येऽविषये भगवति निरतिशयैश्वर्येऽखिलात्मनि शस्त्रादीनामपि नियन्तर्येवम्भूते परे अपुण्यस्य निर्दैवस्य सत्क्रियाः महोद्यमा इव ॥ ४१ ॥ ४२ ॥

दन्दशूकैः सर्पैः अभिचाराः कृत्यादयः अवपातनानि गिरिशृङ्गादधःपातनानि तैः मायाभिः शम्बरनिर्मिताभिः अवटादिषु सन्निरोधैश्च ॥ ४३ ॥

पर्वताक्रमणैः पर्वतानां तदुपरि क्षेपैः बहुवचनैरभिचाराद्यावृत्तिं दर्शयति तद्धननं कर्तुं नाभ्यपद्यत न प्राप नाशक्नोदित्यर्थः ॥ ४४ ॥

अप्रमेयानुभावोऽयमकुतश्चिद्भयोऽमरः ।
नूनमेतद्विरोधेन मृत्युर्मे भविता न वा ॥ ४७ ॥
इति तं चिन्तया किञ्चिन्म्लानश्रियमधोमुखम् ।
शण्डामर्कावौशनसौ विविक्त इति ह्योचतुः ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चिन्तामेवाऽऽह-एष इति त्रिभिः । मे मया असाधु परुषं यथा भवति तथोक्तः असद्धर्मैरपकारैरभिचारैर्वा ॥ ४५ ॥

अविदूरे समीपे वर्तमानोऽपि बालोऽप्ययमजडधीर्निर्भयचित्तो मेऽनार्यमन्याय्यं शत्रुत्वं वा न विस्मरति अजीगर्तस्य मध्यमपुत्रः शुनःशेफोनाम पितृभ्यां हरिश्चन्द्राय विक्रीतस्सन्यथा तयोरपकारमविस्मरंस्तद्विपक्षं विश्वामित्रमाश्रित्य गोत्रान्तरमापन्नस्तद्वत् यद्वा स्वभावापरित्यागे दृष्टान्तः शुनः शेपः पुच्छमिवेति ॥ ४६ ॥

अप्रमेयोऽपरिमेयोऽनुभावो यस्य न कुतश्चिद्भयं यस्य अमरोमृत्युशून्यश्च न वा भविता अन्यथा मृत्युर्नैव भविष्यतीत्यर्थः ॥ ४७ ॥

औशनसौ उशनसः पुत्रौ नीतिज्ञौ विविक्ते एकान्ते ॥ ४८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अनिर्देश्ये चेतनाचेतनसजातीयत्वेन निर्देष्टुमशक्ये अखिलात्मनि हन्तृहन्तव्याद्यन्तरात्मनि पूर्णषाड्गुण्ये परे ब्रह्मणि युक्तः नियुक्तः आत्मा मनो यस्य तस्मिन् प्रह्लादे नैर्ऋतैः कृता अपि शूलघातादयो मारणोपायाः अफलाः व्यर्थाः बभूवुः, मरणहेतवो दुःखहेतवश्च न बभूवुरित्यर्थः । यथा अपुण्यस्य पापरतस्य कृता अपि सत्क्रियाः सन्ध्योपासनादयः अफलास्तद्ध्वैफल्यहेतुगर्भं विशेषणम् अखिलात्मनि युक्तात्मनीति । अयं भावः, कर्मायत्तदेहसम्बन्धप्रयुक्तसुखदुःखभोक्तृत्वतरतमपुण्यापुण्यपापकर्तृत्वा — नुगुणं जीवपर्यन्तदेहेन्द्रियादिप्रेरणरूपमखिलात्मत्वमत्राविवक्षितम्. तत्र हन्त्रन्तरात्मतया हन्तव्यदुःखजननानुगुणव्यापारानुगुणं नियमयन्नपि पुनर्हन्तव्यस्य हन्तृव्यापारजन्यदुःखाननुभवानुगुणतया नियमयतीति. कथमेकस्यैवंविधं परस्परविरुद्धं नियमनमितिशङ्कानिराचिकीर्षयाऽनिर्देश्य इत्युक्तम् लोकविलक्षणविविधविचित्रशक्तेरीदृशं नियन्तृत्वमुपपन्नमित्यभिप्रायः ॥ ४१ ॥

एवं शूलघातादिरूपमरणोद्योगरूपे प्रयासे अपहते व्यर्थे सति दैत्येन्द्रो हिरण्यकशिपुः परिशङ्कितः किमहो अयं शूलघातादिभिरपि नाहन्यत किमस्मादेव मम मृत्युर्भविष्यतीत्याशङ्कितः हे युधिष्ठिर ! निर्बन्धेन तस्य प्रह्लादस्य वधोपायान् चक्रे ॥ ४२ ॥

त्रिविधोपायानेव प्रपञ्चयंस्तैरप्यहतत्वमाह—दिग्गजैरिति । दिग्गजाक्रमणैः दन्दशूकेन्द्रैः सर्पश्रेष्ठदंशनैः अभिचारैर्मारणहोमैः अवपातनैः गिरिशृङ्गेभ्योऽधःपातनैः मायाभिरकस्मादशनिपातनादिभिः सन्निरोधैर्नबरन्ध्रापिधानैः गरदानैः विषप्रयोगैः अभोजनैरुपवासैः ॥ ४३ ॥

हिमादिषु पातनैः पर्वताक्रमणैः पर्वतानां तदुपरि निक्षेपैः एवंविधैरुपायैरसुरैः प्रयोज्यकर्तृभिः यदा निरपराधं सुतं हन्तुं न शशाक नाशक्नोत् तदा तत्कर्तुं तद्धननङ्कर्तुं नाभ्यपद्यत उपायान्तरं न लेभे इत्यर्थः । प्रत्युत दीर्घतमां चिन्तां प्राप्तः ॥ ४४ ॥

चिन्तामेव प्रपञ्चयति—एषइति । एष बालो मे मया बहुसाधु यथा भवति तथोक्तः तथा वधोपायाश्च निर्मिताः कारिताः असद्धर्मैरभिचारादिभिस्तैस्तैः द्रोहैः शूलघातादिभिश्च मुक्तोऽविहतः स्वेनैव तेजसा माहात्म्येन उक्तोपायेभ्योविदूर एव वर्त्तमानो बालोऽप्ययमजडा निपुणा धीर्यस्य तादृशः मे मम अनार्यं द्रोहं न स्मरति शुनःशेफ इव यथा शुनश्शेफाख्यः पितृभ्यां हरिश्चन्द्राय विक्रीतस्सन् तयोरपकारं विस्मरन् तद्विपक्षं विश्वामित्रमाश्रित्य गोत्रान्तरमापन्नस्तद्वत् यद्वा स्वभावापरित्यागे दृष्टान्तः शुनःशेफः पुच्छमिवेति प्रभुः जितेन्द्रियः ॥ ४५ ॥ ४६ ॥

अप्रमेयोऽपरिमेयोऽनुभावो यस्य न कुतश्चिद्भयं यस्य अत एवामरो मरणरहितः एतस्य विरोधेन हेतुना नूनं ममैव मृत्युः भविता भविष्यति न वा भविता एतद्विरोधेन मम मृत्यभावे हेत्वन्तरेण नैव भविष्यतीत्यर्थः ॥ ४७ ॥

इतीत्थं तच्चिन्तया पुत्रविषयकचिन्तया म्लानश्रियं निस्तेजस्कं किञ्चिदधःकृतमुखं तं हिरण्यकशिपुमौशनसौ उशनसः शुक्रस्य पुत्रौ शण्डामर्काख्यौ विविक्ते निर्जने देशे, तस्य प्रतिष्ठाभङ्गादितिभावः, इति वक्ष्यमाणप्रकारेण ऊचतुः ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अनिर्देश्यत्वादिगुणशालिनि हरौ युक्तात्मनि प्रयोजितमनस्के प्रह्लादे अपुण्यस्येव पापिन इव तत्क्रियाः तेषां नैर्ऋतानां ताडनादिक्रियाः ॥ ४१—४२ ॥

वधोपायमाह-दिग्गजैरित्यादिना । अवपातनं गिरिशृंगादधःपातनं सन्निरोधैरनिर्गमगर्तगृहे निक्षिप्य पीडनैः पर्वताक्रमणैः पर्वतारोहणैः उपरि पर्वतपातनैर्वा ॥ ४३—४४ ॥

तत्कर्तुं हननं कर्तुम् ॥ ४५ ॥

असद्धर्मैरसतां योग्यैः अविदूरे समीपे विदूरे वा वर्त-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मानोऽजडधीः पटुतरबुद्धिः अनार्यं मूर्खकर्म अन्वाय्यमिति पाठे नयशास्त्रविरुद्धं मह्यमपरं शतं दद्याहमेनं विशासिष्यामीत्याद्य-जीगर्तकृतकर्म शुनःशेपेन यथा सोढुं तथेति ॥ ४६—४७ ॥

इति वक्ष्यमाणप्रकारं हेत्युच्यमानेथें तात्पर्याऽतिशयं वक्ति ॥४८॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

भगवति हरौ युक्तः संयुक्तः आत्मा देहो यस्य तस्मिन्'गोविन्द-परिरम्भितः' इत्यादिं पूर्वोक्तेः पित्रा स्वाङ्कगुप्ते पुत्रे इवेति भावः ननु, तर्हि किं भगवदङ्गोपरि शस्त्रप्रहाराः अभूवंस्तत्र न हि न ह्यसम्भवादेवेत्याह—परे इत्यादि । ब्रह्मणि व्यापके निर्व्वि-कारे अनिर्देश्ये भगवति अतर्क्यैश्वर्ये अखिलात्मनि शस्त्रादीनामपि नियन्तरि शस्त्रघाताः कथं सम्भवतीतिभावः अपुण्यस्य दुर्भाग्यस्य ॥ ४१ ॥ ४२ ॥

अभिचारैः कृत्यादिभिः अवपातनैरत्युच्चदेशादधःपातनैः गर्त्तादिसंनिरोधैः बहुवचनैरभिचाराद्यावृत्तयः सूचिताः तद्ध-ननं कर्तुं नाऽभ्यपद्यत नाशक्नोदित्यर्थः ॥ ४३ ॥ ४४ ॥

चिन्तामाह—एष इति त्रिभिः । असतां धर्मैरभिचारैश्च ॥४५॥

अविदूरे वर्त्तमानोपि मे अनार्य्यं शत्रुं विष्णुं न विस्मरति स्व-भावापरित्यागे दृष्टान्तः शुनः शेफः पुच्छमिव वस्तुतस्तु शुन-श्शेफो नाम पितृभ्यां हरिश्चन्द्राय विक्रीतो मध्यमः पुत्रः स यथा तयोरपकारमविस्मरंस्तद्विपक्षं विश्वामित्रमाश्रित्य गोत्रान्तरमाप-न्नस्तद्वत् ॥ ४६ ॥ ४७ ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अखिलात्मनि परे अखिलविलक्षणे बृहत्स्वरूपगुणादिमति भगवति युक्त आत्मा मनो यस्य तस्मिन् प्रह्लादे प्रयासा अफला आसन् सम्यक् कृता अपि निष्फला जाता इत्यत्र दृष्टान्तमाह-अपुण्यस्य पापिनः बहुपापाचरणेन सत्कर्मनाशकस्य सत्क्रियाः नित्यनैमित्तिकानि सत्कर्माणि इव ॥ ४१ ॥

अपहते निष्फले जाते निर्बन्धेनात्याग्रहेण ॥ ४२ ॥

दिग्गजादिभिः हन्तुं यदा न शशाक तदा चिन्तां प्राप्तस्त-त्कर्तुं नाऽभ्यपद्येतेत्यनेनान्वयः दिग्गजैस्तदाक्रमणैः दन्दशूकेन्द्रै-स्तद्दंशनैः अभिचारैः कृत्यादिभिः अवपातनैः पर्वतादितः मायाभिः आसुरीविद्याभिः सन्निरोधैरवटादिषु ॥ ४३ ॥

पर्वताक्रमणैस्तदुपरिपर्वतनिष्पेषैः यदा हन्तुं न शशाक तदा दीर्घतमां दुस्तरां चिन्तां प्राप्तस्सन् तद्घातं कर्तुमुपायं नाभ्य-पद्यत न प्राप्तः ॥ ४४ ॥

चिन्तामेवाह—एषेत्यादिना । मे मया असाधु परुषं यथा स्यात्तथोक्तः वधोपायाश्च बहुधा निर्मिताः तैर्द्रोहैर्वधो पायैरसतां धर्मै-रसद्भिः कर्तुमुचितैः स्वेनैव तेजसा भजनबलेन मुक्तः ॥ ४५ ॥

यद्यप्ययं बालस्तथापि अविदूरे वर्त्तमानः अजडधीः पटुत[illegible] प्रभुः समर्थश्च शुनःशेफः पुच्छमिव स्वभावापरित्यागीत्यर्थः[illegible] अतो मेऽनार्य्यं न विस्मरति ॥ ४६ ॥

अतश्च नूनं निश्चितमेतद्विरोधेन मे मृत्युर्भविता भवि-ष्यति वाऽथवा अप्रमेयानुभावोऽपि अयममरो देवरूपः ममानार्यं विस्मृत्य मां न घातयेदित्यर्थः ॥ ४७ ॥

औशनसौ शुक्रपुत्रौ अतः शुक्रोक्तनीतिशास्त्राभिज्ञत्वाद्वि[illegible] विक्ते एकान्ते इति वक्ष्यमाणमूचतुः ॥ ४८ ॥

भाषा टीका ।

परब्रह्म अनिर्देश्य (प्राकृत इंद्रियों का अविषय) आख[illegible] जीवों का आत्मा षड्गुण सम्पन्न परमात्मा में चित्त लगा जिस[illegible] ऐसे प्रल्हाद के ऊपर वे शस्त्र सब निष्फल हो गये जैसे प्रारब्धही[illegible] पुरुष के उद्यम ॥ ४१ ॥

हे युधिष्टिर ! दैत्यों के प्रयास के नष्ट होने पर दैत्येन्द्र हिरण[illegible] कशिपु शंकित होकर निर्बन्ध से प्रल्हाद के वध का उपाय क[illegible] लगा ॥ ४२ ॥

हस्ती सर्प अभिचार अवपातन नाना प्रकार की माया औ[illegible] निरोध विषदान भोजन न देना ॥ हिम वायु अग्नि जल ऊपर पर्वत[illegible] पटकना इत्यादिक उपायों से निष्पाप अपने पुत्र को असुर जब[illegible] मार सका तब बडी दीर्घ शंका को प्राप्त हुआ और मारने के उपा[illegible] को न प्राप्त हुआ ॥ ४३-४४ ॥

और बोला कि—इसको मैंने बहुत परुष कहा और मारने[illegible] भी बहुत से उपाय रचे और द्रोह भी किये परंच उन २ द्रोहों[illegible] और अधर्मों से यह बालक अपने तेज से ही मुक्त होगया ॥ ४[illegible]

और मेरे समीप रहकर बालक होकर भी यह निर्भय [illegible] है और यह मेरी शत्रुता को नहीं भूलता, और इसका स्वभाव [illegible] त्यक्त होता, जैसे कुत्ते की पूंछ कितना ही यत्न करो पर सी[illegible] नही होती ॥ ४६ ॥

इसके प्रभाव का प्रमाण नहीं होसक्ता और इसको कहीं[illegible] भय भी नहीं और यह अमर मालूम होता है क्या इसके विरोध[illegible] मेरी मृत्यु तो न होगी ? ॥ ४७ ॥

इस तरह की चिंता से किञ्चित् म्लान हुई शो[illegible] जिसकी और नीचे को मुखकर बैठा हुआ ऐसे हिरण्[illegible] कशिपु से शुक्राचारी के पुत्र शंडामर्क दोने एकांत में [illegible] बोले ॥ ४८ ॥

जितं त्वयैकेन जगत्त्रयं भ्रुवो विजृम्भणात्त्रस्तसमस्तधिष्ण्यपम् ।
न तस्य चिन्त्यं तव नाथ ! (१) चक्ष्महे न वै शिशूनां गुणदोषयोः पदम् ॥ ४९ ॥
इमं तु पाशैर्वरुणस्य बद्ध्वा निधेहि भीतो न पलायते यथा ।
बुद्धिश्च पुंसो वयसाऽऽर्यसेवया यावद्गुरुर्भार्गव आगमिष्यति ॥ ५० ॥
तथेति गुरुपुत्रोक्तमनुज्ञायेदमब्रवीत् ।
धर्मो ह्यस्योपदेष्टव्यो राज्ञां यो गृहमेधिनाम् ॥ ५१ ॥
धर्ममर्थं च कामं च नितरां चानुपूर्वशः ।
प्रह्लादायोचतू राजन् ! प्रश्रितावनताय च ॥ ५२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

भ्रुवोर्विजृम्भणेनैव त्रस्ताः समस्ता धिष्ण्यपा लोकपालाः यस्मिन् तस्य तव चिन्त्यं न चक्ष्महे न पश्यामः पदमालम्बनं नैवास्ति यद्वा शिशूनां वृत्ताङ्गुणदोषयोः पदं विषयो न भवतीत्यर्थः ॥ ४९ ॥

तथाऽपि तु बन्धनमस्योचितमित्याहतुः—इमन्त्विति । यावद्गुरुर्भार्गव आगमिष्यति तावद्बद्ध्वा निधेहि ततः किमत ऊचतुः यतः पुंसो बुद्धिश्च वयसा तथा आर्यसेवया समीचीना भवति ॥ ५० ॥

अनुज्ञाय तथेत्यङ्गीकृत्य ॥ ५१ ॥

ततश्च तौ प्रह्लादाय धर्मादिकमूचतुः प्रश्रितश्चासाववनतश्च तस्मै ॥ ५२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवाह—जितमिति । तव भ्रुवो विजृम्भणेन चलनमात्रेण त्रस्ता भीताः सर्वे धिष्ण्यपाः लोकपालाः यस्मिन् तज्जगत्त्रयं त्वयैकेनासहायेन जितम् एवंभूतस्य तव हे नाथ प्रभो ! चिन्तनीयं न चक्ष्महे न पश्यामः शिशूनां वृत्तमिति शेषः तद्गुणदोषयोः पदं विषयो नवै न भवतीत्यर्थः ॥ ४९ ॥

अत इमं बालं यावद्गुरुर्भगवान्भार्गवः शुक्र आगमिष्यति तावद्वरुणस्य पाशैः बद्धं निधेहि कुरु भीतोऽयं यथा न पलायते तथा बद्धं निधेहीत्यर्थः । ततः किं तत्राहतुः वयसा आर्याणां सेवया च पुंसो बुद्धिर्भविष्यति ॥ ५० ॥

एवं गुरुपुत्रोक्तं तथेत्यनुज्ञायाङ्गीकृत्य दैत्येन्द्र इदं वक्ष्यमाणमब्रवीत्. तदेवाह—धर्मोइति । अस्य बालस्य धर्मा उपदेष्टव्याः, के ते ? ये राज्ञां ये च गृहस्थानां ते ॥ ५१ ॥

एवमुक्तौ गुरुपुत्रौ तथैवोपदिदिशतुरित्याह नारदः—धर्ममिति । धर्मार्थकामस्वरूपान् साधनान् नितरामत्यन्तमानुपूर्वशः हे राजन् प्रश्रयेण विनयेन अवनताय नम्राय प्रह्लादायोचतुरुपदिदिशतुः ॥ ५२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

धिष्ण्यपाश्चन्द्रादित्यादयः लोकपाला वा चक्ष्महे पश्यामः शिशूनां प्रेङ्खायां शयनशीलानां बुद्धिविकासरहितानां वा तत्करणं गुणदोषयोः पदमास्पदं न वै हि गुणदोषग्रहणबुद्धिविकासाभावादित्यर्थः । शिशूनां गुणदोषयोः पदं नास्तीति वा ॥ ४९ ॥

तर्हि का परबुद्धिरित्यत्रोच्यते—इममिति । तुनाऽधुनेयमेव बुद्धिरिति विशिनष्टि, कियन्तं कालमेवमिति तत्राह—यावदिति । तावदिति शेषः ततश्च किन्तत्राह, बुद्धिश्चेति. पापजननी च वयसा कालविशेषविशिष्टेनायुर्लक्षणेनार्याणां सेवया स्यादिति शेषः ॥ ५०—५१—५२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

शिशूनां गुणदोषयोः पदमालम्बनं नास्ति । यदालम्ब्य तौ प्रवर्त्तेत तदेव तेषां नास्ति सारासारविचाराभावात् ॥ ४९ ॥ ५० ॥

गृहमेधिनां तत्रापि राज्ञाम् ॥ ५१—५३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तस्य तव चिन्त्यं स्वाभिलषणीयवस्तुनोऽप्राप्त्या चिन्तनीयं किमपि न चक्ष्वहे न पश्याव इत्यर्थः पुत्रोऽयं मे मद्विरुद्धस्वभाव इति चेत्तत्राह—नेति । शिशूनां पदं व्यवसायं गुणदोषयोर्मध्ये न चक्ष्वहे न किमपि पश्यावः शैशवान्ते सति बुद्धेर्भद्राभद्रत्वं ज्ञास्याव इति भावः । वै इति चार्थे । चक्ष्महे इत्युभयत्रान्वयः ॥ ४९ ॥

भवतु सम्प्रति किं करोमि तत्राहतुः—इमन्त्विति । यतः पुंमात्रस्यैव बुद्धिर्वयसा बाल्यात् परेणैव तथा आर्यस्य सेवया च, क आर्यः ? कदा वा अनेन सेव्यः ? तत्राह—यावदेत्यर्थः भार्गवः शुक्राचार्य्य इत्यर्थः ॥ ५० ॥

अनुज्ञाय अङ्गीकृत्य ॥ ५१ ॥ ५२ ॥

---

(१) चक्ष्वहे इति—चक्रवर्ति० ।

यथा त्रिवर्गं गुरुभिरात्मने उपशिक्षितम् ।
न साधु मेने तच्छिक्षां द्वन्द्वारामोपवर्णिताम् ॥ ५३ ॥
यदाचार्यः परावृत्तो गृहमेधीयकर्मसु ।
वयस्यैर्बालकैस्तत्र सोपहूतः कृतक्षणैः ॥ ५४ ॥
अथ तान् श्लक्ष्णया वाचा प्रत्याहूय महाबुधः ।
उवाच विद्वांस्तन्निष्ठां कृपया प्रहसन्निव ॥ ५५ ॥
ते तु तद्गौरवात्सर्वे त्यक्तक्रीडापरिच्छदाः ।
बाला न दूषितधियो द्वन्द्वारामेरितेहितैः ॥ ५६ ॥
पर्युपासत राजेन्द्र तन्न्यस्तहृदयेक्षणाः ।
तानाह करुणो मैत्रो महाभगवतोऽसुरः ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां सप्तमस्कन्धे प्रह्लादचरिते
पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे नाथ भ्रुवोर्विजृम्भणेन त्रस्ताः समस्ताः धिष्ण्यपाः यस्मिन् तज्जगत्त्रयं त्वयैकेनैव जितं तस्य तव चिन्त्यं चिन्तास्पदं न चक्ष्महे न पश्यामः शिशूनां बालानाञ्च गुणदोषयोः पदं निमित्तं न चक्ष्महे बालाः पित्रादीनामप्रियमपि कुर्वन्तीत्यर्थः ॥४९॥

तथापि देवेषु स्वद्भयात्पलायते यथा तथेमं यावद्भार्गव-आगमिष्यति तावत्कालं वरुणस्य पाशैर्बद्ध्वा निधेहि एकत्र स्थापय भार्गवे आगते तु विचक्षणोऽयं भविष्यतीत्याशयेनाहतुः बुद्धि-श्चेति सर्वोऽपि जनः वयसा वृद्धसङ्गेन च ज्ञानवान् भवतीत्यर्थः ॥५०॥

गुरुपुत्रोक्तं तथेत्यनुज्ञाय स्वीकृत्यैवमब्रवीत् ॥ ५१ ॥

तौ च प्रश्रितश्चासाववनतश्च तस्मै धर्मादिकमूचतुः ॥ ५२ ॥

भाषाटीका ।

हे नाथ ! तुम इकले ने ही भृकुटि के विक्षेप से तीनो जगत और समस्त लोकेशों जीत लिया अब आप के चिंता के लायक कुछ नहीं दिखाई देते फिर आप सदृशों को बालकों का चरित कुछ भी गुण दोष का विषय नहीं हैं ॥ ४९ ॥

और इस लड़के को तो वरुण के पाशों से बांधकर रखो कि जिससे भय के मारे भाग न जाय और पुरुष की बुद्धि भी अवस्था अधिक होने तथा श्रेष्ठों के सेवा से अच्छी होजाती है और तब तक श्रीगुरुजी (शुक्राचारी) भी आए जाते हैं ॥ ५० ॥

गुरु पुत्र के वचन को अंगीकार कर हिरण्यकशिपु बोला कि अच्छा तो अब इसको गृहस्थ राजाओं के जो धर्म हैं उनको उपदेश करो ॥ ५१ ॥

नारदजी बोले, कि-हे राजन् तदनंतर वे दोनों गुरुपुत्र प्रश्रय और नम्रता युक्त प्रह्लाद को क्रम से निरंतर धर्म अर्थ और काम का उपदेश करने लगे ॥ ५२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यथा यथावत् त्रिवर्गमुपशिक्षितमपि न साधु मेने तत्तां शिक्षां च कुतः द्वन्द्वैः रागद्वेषादिभिर्विषयेष्वारमणं येषां तैरुपवर्णिताम् ॥ ५३ ॥

परावृत्तोऽन्यत्र गतः स उपहूतः स्निग्धः पादपूरणार्थं क्रीडार्थं कृतक्षणैः कृतोत्सवैर्लब्धावसरैरितिवा ॥ ५४ ॥

तन्निष्ठां तेषां निष्ठां जन्ममरणादिलक्षणां विद्वान् ॥ ५५ ॥

द्वन्द्वारामाणामीरितैरीहितैश्च न दूषिता धीर्येषाम् यतो बालाः ॥ ५६ ॥

तस्मिन्नेव न्यस्तं हृदयमीक्षणाश्च यैः ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तद्यथावत् त्रिवर्गमात्मने स्वस्मै उपशिक्षितमपि साधु न मेने नामन्यत तच्छिक्षाञ्च कुतः द्वन्द्वैः रागद्वेषादिभिः विषयेष्वारमणां येषां तैरुपवर्णितास् ॥ ५३ ॥

किञ्च यदा आचार्यः गार्हस्थ्यधर्मेषु परावृत्तः परोक्षं प्रवृत्तः व्यासङ्गान्तरपर इत्यर्थः । तदा कृतक्षणैः लब्धावकाशैः वयस्यैः समानवयस्कैः बालैस्तत्रोपहूतः सः प्रह्लादः ॥ ५४ ॥

महान्सुधीर्विद्वान् श्लक्ष्णया मधुरया वाचा तान् बालकान्प्रत्याहूय सम्बोध्य कृपया प्रहसन्निव तन्निष्ठां विज्ञानमार्गनिष्ठाम् उवाच ॥ ५५ ॥

ते तु बालकाः सर्वे तद्गौरवात् तद्वचनगौरवात् त्यक्ताः क्रीडापरिच्छदाः क्रीडोपकरणानि यैर्द्वन्द्वारामाणामीरितैरीहितैश्च न दूषिता धीर्येषान्ते ॥ ५६ ॥

हे राजेन्द्र ! तस्मिन्नेव प्रह्लादे न्यस्तं हृदयं मन ईक्षणञ्च यैस्ते तं प्रह्लादमेव पर्य्युपासत शुश्रूषवः परिवेष्ट्योपविविशुरित्यर्थः । तान्पर्युपासीनान् कारुण्यमैत्र्ययुक्तो महाभागवतो ऽसुरः प्रह्लादः प्राह आह॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यथा द्वन्द्वारामोपवर्णितां रागद्वेषादिव्यापृतबुद्धिभिर्व्याख्याताम् ॥ ५३ ॥

यदाचार्योऽध्यापनात्परावृत्त उपरतः गृहमेधीयकर्मस्वग्निहोत्रादिलक्षणेषु व्यापृतो वा तत्र तदा कृतक्षणैः कृतावसरैः वयस्यैर्बालकैः स उपहूतः क्रीडार्थमितिशेषः 'सोऽचिन्तुभद्रश्रुमता सोऽचिन्तुसर्वां' सैषदाशरथीराम इत्यादिषु दृष्टव्योऽयं प्रयोगः॥५४॥

अथागतस्सन् तस्यां क्रियायां निष्ठामिच्छां विद्वांस्तेषां वयस्यानां निष्ठां स्वस्मिन् स्नेहविशेषं वा ॥ ५५ ॥

द्वंद्वारामैरितैर्वचनैरीहितैः प्रवृत्तिभिश्च न दूषितधियः ॥५६॥

स एषोऽसुः "स एष प्राणः" इति श्रुतेः मुख्यप्राणे रमत इत्यसुरः ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यदेति तत्र तदा ॥ ५४—५७ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

यथावत् त्रिवर्गमुपशिक्षितमपि साधु न मेने तां शिक्षाञ्च यतो द्वंद्वारामे सांसारिकलोकविषये एव उपवर्णितां न तु पारमार्थिके ॥ ५३ ॥

परावृत्तः अध्यापनस्थानात् परावृत्त्य स्वगृहं गतः कर्मसु प्रावर्त्तत तदा स प्रह्लादः कृतक्षणैः क्रीडार्थं कृतोत्सवैः यद्वा भक्तिशिक्षार्थम् अयं निभृतः समय इति कृतावसरैः ॥ ५४ ॥

तेषां बालानां स्वस्मिन् गुरुत्वनिष्ठां विद्वान् जानन् प्रहसन्निव अहो इमे अपि भगवदनुकम्पाजाले पतिताः इति स्मयमानः ॥ ५५ ॥

द्वन्द्वारामाणां द्विजानां ईरितैर्व्याख्यातैरर्थैरीहितैश्चेष्टितैश्च न दूषिता धीर्येषान्ते ॥ ५६ ॥ ५७ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
सप्तमे पञ्चमोऽध्यायः सङ्गतः सङ्गतस्सताम् ॥ ५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

प्रह्लादस्तु गुरुभिर्यथावदात्मने उपशिक्षितं त्रिवर्गं न साधु मेने तच्छिक्षाञ्च द्वन्द्वारामाभ्यामुपवर्णितां न साधु मेने ॥ ५३ ॥

यदाऽऽचार्यौ गृहमेधीयकर्मसु परावृत्तः परोक्षो भूत्वा प्रवृत्तः तत्रावसरे कृतक्षणैर्लब्धावसरैः सः प्रह्लाद उपहूतः ॥ ५४ ॥

अथ तदाह्वानानन्तरं सोपि महाबुधस्तान्प्रत्याहूय सम्बोध्य प्रहसन् तन्निष्ठां तस्मिन् स्वोपास्ये विष्णौ निष्ठां कृपयोवाच ॥ ५५ ॥

ते बालकास्तु द्वन्द्वारामाणामसुराणामीरितैर्वाक्यैरीहितैश्चेष्टितैश्च न दूषिता धीर्येषां तथा भूताः ॥ ५६ ॥

पर्य्युपासत प्रह्लादस्य परित उपविविशुः, कथम्भूताः? तस्मिन् प्रह्लादे न्यस्तानि हृदयानीक्षणानि च यैस्ते तथा ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

पञ्चमाध्यायार्थप्रकाशः ॥ ५ ॥

भाषा टीका ।

गुरुने प्रह्लाद को त्रिवर्ग का विषय यथावत् सिखाया परंतु द्वंद्वारामो से उपवर्णित उस शिक्षा को प्रल्हाद ने अच्छा न माना ॥ ५३ ॥

जब एक समय आचार्य किसी गृह में स्वीय कर्म के निमित्त अन्यत्र चले गये तब अवसर मिलने पर समान वयस्क बालकों ने इनकों (क्रीडार्थ) बुलाया ॥ ५४ ॥

तब तौ बड़े बुद्धि वाले विद्वान प्रल्हादजी कृपा करके उनको समीप बुलाकर हंसते से उनकी निष्ठा (दशा) को कहने लगे ॥ ५५ ॥

वो लडके भी सब प्रल्हाद के गौरव से क्रीड़ा की सामग्री को छोडकर समीप आये, और हे राजन् संसारिओं के कथन और चेष्टा से नहीं दूषित हुई बुद्धि जिनकी एसे वो बालक लोग प्रल्हाद में हृदय और नेत्र लगाकर आँखे २ प्रल्हाद के चारों तरफ बैठ गये । तब बडे कारुणिक मैत्र महा भागवत प्रल्हाद उनसे बोले ॥ ५६—५७ ॥

इति श्रीमद्भागवत महापुराण सप्तमस्कन्ध, पञ्चमाध्याय की भागवताचार्यकृत भाषा टीका समाप्त ॥ ५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे पञ्चमोऽध्यायः ॥ ५ ॥

॥ षष्ठोऽध्यायः ॥

प्रह्लाद उवाच ।

* (हन्तार्भका ! मे शृणुत वचो वः सर्वतः शिवम् ।
वयस्यान्पश्यत मृतान् क्रीडान्धा माप्रमाद्यथ ॥ ० ॥
न पुरा विवशं बाला आत्मनोऽर्थे प्रियैषिणः ।
गुरूक्तमपि न ग्राह्यं यदनर्थेऽर्थकल्पनम् ॥ ० ॥
यदुक्त्या न प्रबुध्येत सुप्तस्त्वज्ञाननिद्रया ।
न श्रद्दध्यान्मतं तस्य यथाधोह्यन्धनायकः ॥ ० ॥
कः शत्रुः क उदासीनः किं मित्रं चेह आत्मनः ।
भवत्स्वपि नयैः किंस्याद्वैतं सम्पद्विपत्पदम् ॥ ० ॥
यो न हिंस्याद्धर्मकाममात्मानं स्वजने वशः ।
पुनः श्रीलोकयोर्हेतुः समुक्तान्ध्योतिदुर्लभः ॥ ० ॥)

प्रह्लाद उवाच ।

कौमार आचरेत्प्राज्ञो धर्मान् भागवतानिह ।
दुर्लभं मानुषं जन्म तदप्यध्रुवमर्थदम् ॥ १ ॥
यथा हि पुरुषस्येह विष्णोः पादोपसर्पणम् ।
यदेष सर्वभूतानां प्रिय आत्मेश्वरस्सुहृत् ॥ २ ॥
सुखमैन्द्रियकं दैत्याः ! देहयोगेन देहिनाम् ।
सर्वत्र लभ्यते दैवाद्यथा (१) दुःखमयत्नतः ॥ ३ ॥
तत्प्रयासो न कर्तव्यो यत आयुर्व्ययः परम् ।
न तथा विन्दते क्षेमं मुकुन्दचरणाम्बुजम् ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

षष्ठे गुरौ गृहव्यग्रे प्रह्लादो दैत्यबालकान् ।
अनुकम्प्य परं तत्त्वं नारदोक्तमुपादिशत् ॥ १ ॥
निरर्थकक्रियालापैरायुर्व्ययमजानताम् ।
प्रह्लादः सदयं प्राह धर्मं भागवतं कृती ॥ २ ॥

कौमार इत्यादिना इहैव मानुषजन्मनि धर्मानाचरेत्, यतोऽर्थदमेतत्. तत्र च कौमार एव यतस्तदप्यध्रुवम्; नचैवंभूतं जन्मान्तरम् यतो दुर्लभम् तत्र धर्मानेवाचरेन्न सुखार्थं प्रयासान्. तत्र भागवतानेव, न काम्यान् ॥ १ ॥

इह भागवतानेव धर्मानाचरेदित्येतदुपपादयति–यथाहीति,

---

* एते श्लोकाः विजयध्वजरीत्याऽधिकाःपठ्यन्ते ॥ (१) यथाऽसुखमिति वीर० पा० ।

[२६]

श्रीधरस्वामिकृतभावार्थदीपिका ।

चतुर्भिः । इह पुरुषस्य विष्णोः पादोपसर्पणमेव यथाऽनुरूपं योग्यमित्यर्थः । यद्यस्मादेष प्रिय इत्यादि ॥ २ ॥

ननु, भोगोद्यमः कथन्त्याज्य इति चेत्तत्राऽऽह–सुखमिति । सर्वत्र पश्वादावपि दैवात्पूर्वादृष्टादेव ॥ ३ ॥

अतस्तदर्थं प्रयासो न कर्तव्यः यतः प्रयासात्परं केवलमायुषो व्यय एव यतस्तथा तेन प्रकारेण क्षेमं न प्राप्नोति ॥ ४ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं दैत्यकुमारैः पर्युपासितो महाभागवतः प्रह्लादस्तेभ्यः करुणयाऽनन्तस्थिरफलब्रह्मानन्दानुभवसाधनभागवतधर्मानुपदि-दिक्षुरुपदेक्ष्यमाणधर्मप्रतिष्ठापनाय तद्धेतुवैराग्यजननाय च वैषयिकसुखानामल्पास्थिरत्वं दुःखगर्भत्वमत एव हेयत्वम-यत्नलभ्यत्वञ्च विवक्षुस्तावन्मनुष्यजन्मन एव भागवतधर्मा-चरणार्हत्वं तत्राप्यस्थिरत्वेन बाल्यात्प्रभृत्येव तद्धर्मानुष्ठानस्य कर्त्तव्यत्वञ्चाह—कौमार इति । इह मनुष्यजन्मन्येव प्राज्ञः हेयो-पादेयविभागाभिज्ञः पुमान् कौमारे बाल्य एव तत्प्रभृतीत्यर्थः भाग-वतान् भगवत्सम्बन्धिनः भगवत्प्राप्तिसाधनान् धर्मानेवाचरेत् भगवच्छब्देन तेषां निष्फलत्वशङ्काप्रयुक्ताऽननुष्ठेयत्वशङ्काप्यु-द्रस्यते. तथाहि—

"शुद्धे महाविभूत्याख्ये परे ब्रह्मणि शब्द्यते ।
मैत्रेय ! भगवच्छब्दः सर्वकारणकारणे ॥
सम्भर्त्तेति तथा भर्ता भकारोऽर्थद्वयान्वितः ।
नेता गमयिता गोप्ता गकारार्थस्तथा मुने ! ॥
ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥
वसन्ति यत्र भूतानि भूतात्मन्यखिलात्मनि ।
स च भूतेष्वशेषेषु वकारार्थस्ततोऽव्ययः ॥
ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः ।
भगवच्छब्दवाच्यानि विनाहेयैर्गुणादिभिः" ॥

इत्यादिना श्रीमत्पराशरोक्तप्रत्यक्षरसमुदायनिर्वचनावगताः संभ-र्तृत्वभर्तृत्वनेतृत्वगमयितृत्वस्रष्टृत्वसर्वशरीरकत्वसर्वभूतान्तरात्म-त्वनिरस्तनिखिलदोषत्वषाड्गुण्यपूर्णत्वादयोऽर्थाः अत्र विव-क्षिताः । तत्र संभरणं नामोपकरणसंविधानं तच्च, प्रकृतिपुरुष-कालानां कार्योत्पत्तियोग्यतापादनरूपम् भर्तृत्वम्. निरुपाधिकस्वा मित्वं नेतृत्वम्. गमयितृरूपं स्थितिकर्तृत्वं गमयितृत्वम्. सङ्गमयि-तृत्वरूपं संहर्तृत्वम्. स्रष्टृत्वमुद्गमयितृत्वरूपं सृष्टिकर्तृत्वम्. यशो-गुणवत्ता यथा. श्रीर्भोग्यसम्पत्. वैराग्यं विरक्तिः सा च परिपूर्ण-त्वादनादररूपा एवञ्चाऽनुष्ठितैर्धर्मैः प्राप्यस्य भगवत एवं विधत्वात्तत्प्राप्तेः निःश्रेयसरूपत्वात्तत्प्राप्तिसाधनभूता धर्माः परमपुरुषार्थार्थिभिरवश्यमनुष्ठेयास्ते च बाल्यादारभ्यैव कर्त्त-व्या इत्यर्थः । इहैवेत्यनेन मनुष्यजन्मन एव भगवद्धर्माचरणोपयु-क्तत्वमन्यस्य तु तदननुगुणत्वञ्चाभिप्रेतम्. तत्रापि पुरोवर्ति-

परामर्शिनेह शब्दप्रकृतिभूतेनेदंशब्देनाधुना वर्त्तमानमनुष्य-जन्मन्येव भगवद्धर्मकर्त्तव्यताऽभिप्रेता. नन्वन्यस्मिन्नपि मनुष्य-जन्मनि तेषां कर्तुं शक्यत्वात्किं विशेषेणाधुनिक एव जन्मनि कर्त्तव्यतोच्यते इत्यत आह—दुर्लभं मानुषं जन्मेति । विविध-विचित्रात्मकपुण्यपापात्मककर्मभिः देवतिर्यङ्मनुष्यस्थावरादि-रूपेण संसरतो जीवस्य नियमेन प्रतिजन्म मानुषंजन्मैवेति विश्वासहेतोरभावात् दुर्लभं मानुषं जन्म सुकृतपरिपाकविशे-षाल्लब्धमिति. तत्रैव भगवद्धर्मानाचरेदिति भावः । ननु, किं विशे-षेण कौमार एवाचरेदित्युच्यते यथेष्टं विषयभोगानन्तरं चतु-र्थे वयसि तेषां कर्तुं शक्यत्वादित्यतआह—तदप्यध्रुवमिति चतुर्थवयःपर्यन्तजीवन हेतोर्विश्वसनीयस्याभावात्कौमारात्प्रभृत्ये-वाचरेदितिभावः । ननु, चिरकालसाध्या भगवद्धर्माः कथमस्थिरेण मनुष्यजन्मना निर्वर्त्स्यन्ते! कथन्तरां निःश्रेयसप्राप्तिः? अत आह–अर्थ-दमिति, यद्यप्यध्रुवं तथाप्यर्थदमित्यर्थः । अयं भावः, यद्यप्यध्रुवं तथापि चिरकालजीवननिमित्ते कर्मण्यारब्धभगवद्धर्मविरोधिकर्म-मोभावे च सति यथावत्फलपर्यन्तभगवतद्धर्मोपसंहारद्वारा निः-श्रेयसरूपनिरतिशयपुरुषार्थदं चिरजीवनहेत्वभावे वा आरब्धभग-वद्धर्मविरोधिकर्मसद्भावेऽपि वा "नेहाभिक्रमनाशोऽस्ति, न हि कल्या-णकृत्कश्चिद्दुर्गतिं तात ! गच्छति" इत्यादिभगवदुक्तरीत्या जन्मान्तरे यथावद्भगवद्धर्मोपसंहारद्वारा निःश्रेयसरूपार्थदं भवतीति. अत्र "सर्वं वाक्यं सावधारणम्" इति न्यायेनाब्भक्षो वायुभक्ष इत्यादिव-त्कौमार एव भागवतान्धर्मानेवेहैवेत्यवधारणमभिप्रेतम् ॥ १ ॥

तत्र भागवतानेव धर्मानाचरेदित्यवधारणं तावदुपपादयति यथाहीति । हि तथाहीत्यर्थः यथाशब्दो योग्यताद्योतकः इह मनु-ष्यजन्मनि विष्णोः परमपुरुषार्थस्वरूपस्य पादयोरुपसर्पणं भजनं यथा योग्यं तदेव युक्तमित्यर्थः ।कुतः? यद्यस्मादेष परमपुरुषःसर्व-भूतानामात्मेश्वरः अन्तःप्रविश्य प्रशासनपूर्वकं भर्ता, शरीरस्यात्म-ऽनुवर्त्तनं युक्तमिति भावः । नन्वात्माप्यपुरुषार्थरूपत्वान्नानुवर्तनीयो-ऽत आह—प्रिय इति । प्रियः इष्टतमः निरतिशयानन्दरूप इत्यर्थः आनन्द एव हीष्टः स एव हि पुरुषार्थरूपः इति भावः । नन्वेवं-भूतोऽपि निष्कृपत्वादनुवर्त्तमानान् प्राख्यापयेत्तत्राह-सुहृ-दिति । "एषह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषति" इति श्रुत्युक्तरीत्या स्वानुवृत्तित्युपक्रममात्रेणाविर्भूत-परमकारुण्ययुक्त उत्तरोत्तरं स्वानुवृत्तिप्रवर्तनारूपहितकारी-त्यर्थः ॥ २ ॥

विष्णोः पादोपसर्पणमेव युक्तमित्यनेन वैषयिकसुखसाधन-यत्नो न युक्त इत्युक्तम् तदेव सहेतुकं सदृष्टान्तञ्चोपपादय-न्निहैवेत्यवधारणमप्युपपादयति–सुखमिति । हे दैत्याः ! देहिनां दैव-योगेन देहसम्बन्धमात्रेण इन्द्रियकं सुखं सर्वत्र पश्वादिजन्मस्वा-धुनिकयत्नमन्तरेणापि दैवात्प्राचीनकर्मणैव लभ्यते तत्र दृष्टान्तः यथाऽसुखमिति, असुखं दुःखं यथा यत्नमन्तरेणापि दैवाद् लभ्यते. तथा वैषयिकं सुखमपीत्यर्थः । सर्वत्र लभ्यते इत्यनेन वैष-यिकसुखलाभः सर्वजन्मसाधारणः भगवद्धर्मलाभस्तु मनुष्य-जन्मासाधारण इत्युक्तं भवति ॥ ३ ॥

यतो वैषयिकं सुखं सर्वजन्मसाधारणं तच्च दैवादेव सुखम्

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

असुखवत्तस्मात्प्रयासो वैषयिकसुखार्थंप्रयासो न कर्त्तव्यः एवमविजानता कृतोपि प्रयासः केवलमायुर्व्ययकर इत्याह—यत इति । यतोवैषयिकसुखार्थात्प्रयासात्परं केवलमायुःक्षयएव. नान्यत्किञ्चिदस्ति प्रयोजनमित्यर्थः । ननु, जन्मान्तरे पुनरैन्द्रियकसुखलाभाय कर्त्तव्य एव यत्नस्तत्राह—न तथेति. यद्यपि कृतोऽपि तदर्थंप्रयासो जन्मान्तरेयवैषयिकसुखसाधनस्तथापि तथा तद्वत्क्षेमं न प्राप्नोति । कथं यथा मुकुन्दचरणाम्बुजं, भजन्निति शेषः । यथा भगवच्चरणाम्बुजं भजन् पुमान् निःशेषदुःखनिवृत्तिपूर्वकं नित्यनिरुपाधिकनिरतिशयाऽपरिच्छिन्नब्रह्मानन्दानुभवरूपं क्षेमं प्राप्नोति. तथा वैषयिकसुखार्थं यतमानस्तादृशं क्षेमं न विन्दते किन्तु दुःखमिश्रानित्यसोपाधिकाल्यल्पमिदानीमनुभूयमानसजातीयं प्राप्नोतीत्यर्थः ॥ ४ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मुकुन्दचरणारविन्दनिरन्तरसेवैवेहामुत्रानश्वरानन्दनिदानम्. नान्यदतः सैव बुभूषुभिरनुदिनं कर्तव्येति विधीयतेऽस्मिन्नध्याये. तत्र प्रह्लादो बालकान् किमाहेत्याशंक्याह--हन्तेति । बालानुकम्पायां वाक्यारम्भे वा तद्वचःश्रवणात्कि फलं स्यादिति तत्राह-वइति । वः सर्वतः सर्वस्मात् शिवं सुखं स्यादिति शेषः कीदृशं वच इत्यतोवाह, व इति । शिवं शुभं मङ्गलम्. ननु, कस्मान्मङ्गलमिति तत्राह, वयस्यानिति संसारविरक्तिजनकत्वेन पुरुषार्थहेतुत्वान्मङ्गलमित्यर्थः । अनेनाधुनाऽस्माकं बाल्यमुत्तरत्र श्रेयःसम्पादनाय प्रयतामह इत्याशा निरस्तेति ज्ञायते यतोऽस्मदायुः कृतान्तविलुलितं तस्मात् क्रीडासक्तत्वेन युष्मद्धितविमर्शप्रमादो न कार्य इत्याह—क्रीडान्धा इति ॥ ० ॥

ननु, बालानां लीलान्धत्वं स्वभाव इति तत्राह—नेति । इतः पुरातना बाला अन्तःकरणं क्रीडायां विवशं न कुर्वन्तीति शेषः तर्हि किङ्कारं वर्तत इति तत्राह—आत्मन इति. अर्थे जन्मप्रभृति आत्मनोर्थे आत्मनः प्रियैषिणः परमात्मनः ज्ञानेच्छवः मोक्षलक्षणप्रियेच्छवो वा आत्मनः प्रियैषिणः स्वप्रयोजनमाकांक्षमाणा आबाल्यात्प्रवर्तंत इति वा. नन्वस्माभिरपि शंडामार्काभ्यां गुरुभ्यामुपदिष्टत्रिवर्गविषयशास्त्रश्रवणश्रेयसि प्रवर्त्यते तत्र गुर्ववसरप्रतीक्षणायेयं क्रीडेति तत्राह--गुरूक्तमिति । कुतो न ग्राह्यमिति तत्राह—यदनर्थ इति. संसारहेतुत्वादनर्थं त्रिवर्गलक्षणे श्रेयस्यर्थकल्पनं यत्तस्मादिति शेषः---

"त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयंते"
"इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रमूढाः"

इत्यादेश्च ॥ ० ॥

ननु, गुरूक्तर्यथार्थत्वेन ज्ञानहेतुत्वोपपत्तेः कथं तदनर्थेऽर्थकल्पनमिति तत्राह—यदुक्तेति । अज्ञानलक्षणानिद्रया सुप्तस्त्रिवर्गविषयलक्षणमाग्रहलक्षणो यथार्थज्ञानविरोधित्वादज्ञानं नाम न तु ज्ञानमात्राभावः सुप्तस्यापि गुरूक्त्या प्रबोधो हि प्रयोजनं स नोत्पद्यते चेत्तदुपदेशेन किं प्रयोजनं प्रत्युत तदनुष्ठानेनानर्थ एव स्यादिति भावः । अतः फलित माह--नेति-अत्रोदाहरणमाह—यथेति. अन्धो नायको नेता यस्य स तथा हि शब्देनोभयोरप्यन्धत्वान्मार्गज्ञानं नोत्पद्यते यथा, तथात्रापीत्यस्माच्छ्रद्धा न कार्या ॥ ० ॥

ननु,

"समूलघातमघ्नन्तः परान्नोद्यन्ति भूभृतः ।
गिच्छिप्योर्दर्चिषं कक्षे शेरते ते भिमारुतम् ॥
आपत्सु मित्रं जानीयात्पुत्रमुत्तरजन्मनि ।
य उदास्ते स्वकार्येषु स निद्यो यत्नतो नरः"

इत्यादि नीतिशास्त्रं शत्रुमित्रोदासलक्षणज्ञापकं हितकारित्वादित्याभ्यां नो बोध्येत तन्मतं कथं न श्रद्दध्यादित्युच्यत इति तत्राहक इति । यः शत्रुः स आत्मनो मम पक्षे कः न कोपीत्यादि योज्यं त्वत्पक्षे शत्र्वाद्यभावेष्यस्मत्पक्षेस्युरिति तत्राह--भवारित्विति । भवत्पक्षेपि के शत्र्वादयः स्युर्न केप्यतो नयैर्नीतिशास्त्रश्रवणार्जितैर्नीतिभिः किं फलं स्यान्न किमपीत्यर्थः । नीतिभिरापत्परिहारः सम्पत्प्राप्तिश्च स्यातामिति तत्राह, दैवमिति । सर्वोत्कृष्टत्वात् श्रीनारायण एव सम्पद्विपदाश्रयो न नीतिमांस्तस्यान्वयव्यतिरेकाभावात् अस्मत्पित्रादौ दर्शनात् आत्मनो देहस्य यः शत्र्वादिस्तस्य भवत्सु स्थितैर्नयैः किं स्यादपरिहार्यत्वान्मरणादिकं प्राप्यत एव कामादिकमज्ञानमन्तरेण न नयमात्रेण परिह्रियत इति शेषं पूर्ववत् ॥ ० ॥

ननु, तर्हि माभूच्छ्राव्यं नीतिशास्त्रं प्रवृत्तिलक्षणधर्मशास्त्रमभ्यसनीयं श्रेयोहेतुत्वादत्राह—य इति । य आत्मानं परमात्मानमुद्दिश्य धर्मकामं धर्मेच्छां न हिंस्यान्न हिनस्ति न त्यजति किं चानुतिष्ठति सोतिदुर्लभः प्रशान्तात्माकोटिष्वपि महान्मतः लोके अवशीकृतेन्द्रियग्रामस्य भगवद्विषयनिवृत्तलक्षणधर्मेच्छा कथं स्यादिति तत्राह—स्वजन इति. स्वेन सह जन्यत इति स्वजनः इन्द्रियग्रामस्तस्मिन्विषये वशो न भवति वशीकृतेन्द्रियग्राम इत्यर्थः यद्वा पुत्रमित्रादिलक्षणे स्वजने वशो न स्वानुष्ठानानुकूलपुत्रादिक इत्यर्थः अत एव मुक्तान्ध्यः उज्झितान्धस्वभावः नन्वैहिकामुष्मिकफलाकांक्षायां निवृत्तिधर्ममनुतिष्ठतः कथं तत्फलावाप्तिः स्यादत्राह—पुनरिति । पुनश्चार्थे निवृत्तिधर्ममनुतिष्ठच्छ्रीलोकयोरिह लोकपरलोकयोर्हेतुश्च भवति पुनर्निवृत्तिधर्मानुष्ठानानन्तरं वा प्रवृत्तिनिवृत्तिधर्मयोरनुष्ठानयोः पुनर्भेदोस्ति पूर्वस्य ततः पातोस्ति इमं लोकं हीनतरं वा विशन्ति "क्षीणे पुण्ये मर्त्यलोकं विशन्ति" इत्यादेः । अन्यस्य ज्ञानसामग्रीं सम्पाद्य ततः पुनरन्ते वैकुण्ठलोकप्राप्तिश्च स्यात् "स एतस्माज्जीवघनात् परात्परं पुरिशयं पुरुषमीक्षते यं यं लोकं मनसा संविभाति विशुद्धसत्त्वः कामयते यांश्च कामान् तं तं लोकं जयते तांश्च कामांस्तस्मादात्मज्ञं ह्यर्चयेद्भूतिकामः" इत्यादेः "पुनरप्रथमे भेदे" इत्यमरः । यद्वा आत्मानं धर्मयुक्तः कामो यस्य स तथा तं वा नरं नहिंस्यान्न पीडयति स्वात्मानं प्रवृत्तिधर्मकांक्षयेण पीडितं न करोति सोतिदुर्लभः धर्मधारके हरौ कामो यस्य स तथा निवृत्तिधर्मनिरत इत्यर्थः । तं नाधःपातयतीति वा सज्जनसेवानिर-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तत्त्वेन तद्वशश्च श्रिय ऐहिक्याः सम्पदः स्वतः सम्पन्नाया लोकस्य ज्ञानस्यापरोक्षलक्षणस्य च पात्रं वा अत्र प्रवृत्तिनिवृत्तिलक्षणौ धर्मावनुष्ठाय तत्फलानिच्छत्वेन भवगद्भक्तिमनिशं कुर्वीत पुरुष उत्तमइति तात्पर्यम् ॥ ० ॥

नन्वस्तु निवृत्तिधर्मानुष्ठानस्य श्रेयःसाधनत्वं तस्य नेदानीमवसरः वार्धके कर्तव्याऽविनाभूतत्वात्—

"बाल्ये विद्यां निषेवेत यौवने दारसंग्रहम् ।
स्थाविर्ये मोक्षमातिष्ठेत्सर्वदा धर्ममाचरेत्" ॥

इतिस्मृतेरिति तत्राह—कौमार इति । सर्वदेति विशेषणाद्विद्याभ्यासकालेपि मोक्षधर्मानुष्ठानं कर्तव्यमिति न तस्य स्मृतिविरोधः नानायोनिषु का योनिः श्रेयःसाधनमिति तत्राह—दुर्लभमिति । यन्मानुषं जन्म तदपि तदेवार्थदं ज्ञानादिप्रयोजनप्रदम् अत एव बहुपुण्यसाधनत्वाद्दुर्लभं तर्हि चिरकालस्यापि किम् ? नेत्याह—अध्रुवमिति । "सस्यमिव मर्त्यः पच्यते सस्यमिव जायते पुनः अपि सर्वं जीवितमल्पत्वमेव" इत्यादिश्रुतेः अध्रुवमपि मानुषं यज्जन्म सुदुर्लभं तत्राप्यर्थदं दुर्लभतरं "एतद्धि दुर्लभतरं लोके जन्म यदीदृशम्" इति श्रुतेः ॥ १ ॥

ननु, कथङ्कारं पुरुषार्थप्रदं तत् अन्यथा तद्वतां सर्वेषामपि पुरुषार्थः स्यान्न चासौ सम्भवति अदर्शनादश्रवणाच्चेत्याशङ्क्यचिकित्सामाह—यदाहीति । इह मानुषे यदा यदि बुभूषोः पुरुषस्य विष्णोः पादोपसर्पणं सम्भवति तर्ह्यर्थदं "यावत्सेवापरे तत्त्वे तावत्सुखविशेषता" इति. एतद्धिशब्देन सूचयति अतो मानुषी योनिरेव निःश्रेयसः कारणं नान्या असङ्गत्वाद्देवानर्हत्वेनान्यासाम्. अतः कौमारवय आरभ्य भगवत्सेवा कर्तव्येति भावः । ननु, श्रीहरिसेवामन्तरेणान्यसेवा अर्थदा किं न स्यादिति तत्राह, यदेष इति । सर्वभूतप्रियत्वादिगुणयुक्त एष इति यद्यस्मादेतत्सेवैव पुरुषार्थदा नान्यसेवा "तदेतत्प्रेयः" इति श्रुतेः "एष सर्वेश्वरः" इति च ॥ २ ॥

इतोपि भगवत्सेवालक्षणनिवृत्तिधर्मानुष्ठानमेव कर्तव्यं न प्रवृत्तिधर्मसेवनं विषयसुखसौलभ्याय तदनुष्ठानमिति नोच्यते तदन्तरेणापि तल्लभ्यते यथा दुःखमित्याह—सुखमिति । सर्वत्र नरकादावपि "सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम्" इति स्मृतेः दैवात् प्रारब्धकर्मप्रेरकात् ॥ ३ ॥

अतश्च किमिति तत्राह—तदिति । तस्मात्तत्प्रयासपेन्द्रियसुखप्राप्तये प्रवृत्तिधर्मकरणे बहुक्लेशो न विधेयः, कुतो न विधेयः ? इति तत्राह, आयासेति । परं केवलमायासेनायुषो व्ययः क्षय एवावशिष्यत इति शेषः । प्रवृत्तिधर्मानुष्ठानस्य दुःखासम्भिन्नप्रदेशोद्देशत्वात्तत्कथं दुःखफलत्वेन निन्द्यत इति तत्राह, न तथेति । मुकुन्दचरणाम्बुजं भजन्यथा क्षेमं विन्दते प्रवृत्तिधर्मानुष्ठायी न तथा नश्वरं सुखं लभत इत्यन्वयः "प्लवा ह्येते अदृढा यज्ञरूपाः" इति श्रुतेः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

भागवतान् धर्मानाचरेत् यतोऽर्थदमेतज्जन्म देवादिजन्मनि महाविषयावेशात् पश्वादिजन्मनि विवेकाभावाच्च तत्रापि न विलम्बेनेत्याह—कौमारे कौमारमारभ्येत्यर्थः । यतस्तदपि जन्म ध्रुवं पुनर्दुर्लभञ्च तथाच ब्रह्मवैवर्त्ते "प्राप्यापि दुर्लभतरं मानुष्यं विबुधेप्सितम् । यैराश्रितो न गोविन्दस्तैरात्मा वञ्चितश्चिरम् ॥ अशीति चतुरश्चैव लक्षांस्तान् जीवजातिषु । भ्रमद्भिः पुरुषैः प्राप्यं मानुष्यं जन्म पर्ययात् ॥ तदप्यफलतां जातं तेषामात्माभिमानिनाम् । वराकाणामनाश्रित्य गोविन्दचरणद्वयम्" इति शास्त्रस्य प्राधान्येन मानुषमधिकृत्य प्रवर्त्तत्वात् तदनुवादेनोक्तिरियं तद्बुद्ध्यादिसामान्येन मानुषत्वमारोप्यैवेति ज्ञेयम् ॥ १ ॥

तत्र भागवतधर्माचरणस्यैव युक्तत्वं दर्शयति—यथाहीति । यत् यस्मात् एष भूतानां स्वभाव एव प्रियः प्रेमविषयः प्रेमकर्त्ता च तत्र हेतुः आत्मा परमात्मा पादोपसर्पणे हेत्वन्तरं यस्माच्चेश्वरः कर्त्तुमकर्त्तुमन्यथाकर्त्तुं समर्थः सुहृत् सर्वेषां हितं चिकीर्षुश्चेति ॥ २ ॥ ३ ॥

मुकुन्दचरणाम्बुजरूपं क्षेमम् ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

षष्ठे तु ग्राहयामास प्रह्लादो भक्तिमर्भकान् ।
आसक्तिं देहगेहादौ त्याजयामास बोधयन् ॥

तानाह करुणो मैत्र इति पूर्वमुक्तं तत् किमाहेत्यत आह—कौमारे धर्मानाचरेत्. ननु, कौमारे वर्णाश्रमधर्माणामनाधिकारस्तत्राह भागवतान् श्रवणकीर्त्तनादीन् इह भारतभूमौ. ननु, तान् यौवनादावपि कृत्वा कृतार्थीभवति. तत्राह, प्राज्ञ इति । यदि कौमारान्त एव मृत्युः स्यात्तर्हि किं भवेदिति प्रकृष्टज्ञानवान्, ननु, तत्र का चिन्ता ? जन्मान्तरन्तु भावि तत्रैव भक्तिः कार्य्येति तत्राह, दुर्लभं मानुषं जन्म तदपि भाग्याल्लब्धमप्यध्रुवम् अध वर्त्तमानत्वेपि तस्य स्थितौ निश्चयाभावात्. ननु, तर्हि तावन्मात्रकालेन कुतो भक्तिसिद्धिस्तत्राह, अर्थदं मुहूर्त्तमात्रव्यापिभक्तिमतामपि खट्वाङ्गादीनां सिद्धिदर्शनात् ॥ १ ॥

भागवतधर्मान् केन प्रकारेणाचरेदित्यपेक्षायामाह, यथा येन प्रकारेण विष्णोः पादयोरुपसमीपे सर्पणं प्राप्तिर्भवेत्तथा आचरेदित्यनुषंगः तमेव प्रकारं चतुर्विधं व्यञ्जयन् विष्णुं विशिनष्टि—यद्यस्मादेष प्रिय इत्यादि तेन "येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टम्" इति भगवदुक्तिप्रामाण्येन कान्तभावशान्तिरतिदास्यभावसख्य भावानां मध्ये येन भावेन उपसर्पितुमिच्छेत्तेनैवोपसर्पणं भागवतान् धर्मानाचरेदिति रागभक्तावपि विधिर्व्यञ्जितः । आत्मतुल्यत्वादात्मा सुत इति तन्त्रेणोक्त्या पञ्चैव भावाः प्रह्लादेनोपदिष्टा इति वा ॥ २ ॥

सुखभोगार्थमुद्यमस्तु मानुषं देहं प्राप्य न कर्त्तव्य इत्याह सुखमिति । देहयोगेनेति सुखदुःखे देहधर्मावेवेत्यर्थः । सर्वत्र पश्वादावपि ॥ ३ ॥

ततो यतेत कुशलः क्षेमाय भयमाश्रितः ।
शरीरं पौरुषं यावन्न विपद्येत पुष्कलम् ॥ ५ ॥
पुंसो वर्षशतं ह्यायुस्तदर्धं चाजितात्मनः ।
निष्फलं यदसौ रात्र्यां शेतेऽन्धं प्रापितस्तमः ॥ ६ ॥
मुग्धस्य बाल्ये कौमारे क्रीडतो याति विंशतिः ।
जरया ग्रस्तदेहस्य यात्यकल्पस्य विंशतिः ॥ ७ ॥
दुरापूरेण कामेन मोहेन च बलीयसा ।
शेषं गृहेषु सक्तस्य प्रमत्तस्यापयाति हि ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तथा तेन प्रकारेण क्षेमं न विन्दते क्षेममेवाह, मुकुन्देति ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भगवद्भजनमेव परमपुरुषार्थं इत्याहाऽसुरबलकान्प्रति श्रीप्रह्लादः—कौमार इति, षष्ठेनाध्यायेन । मानुषं जन्म दुर्लभम् बहुपुण्यलभ्यं यतोर्थदं पुरुषार्थदम् तत्तस्मात् पुरुषार्थसिद्ध्यै इह मानुषजन्मनि भागवतान् धर्मान् आचरेत्. ननु, धर्मान्तराचरणे को दोषः ? अत्राह—प्राज्ञ इति । भगवद्धर्माचरणेऽपुनरावृत्तिपदप्राप्तिः तदितरधर्माचरणे तु पुनरावृत्तिपदप्राप्तिरित्येवं ज्ञानवानित्यर्थः—

"देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि ।
आब्रह्मभुवना लोकाः पुनरावृत्तिनोऽर्जुन ॥
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते"

इति श्रीमुखवचनमत्रानुसन्धेयम् तत्रापि कौमारे आचरेत् तत्र हेतुमाह, अध्रुवमनित्यम् अनियतकालस्यापि तारुण्यं स्थाविरम् आश्रमादाश्रमान्तरगमनञ्च न परीक्षेत ब्रह्मचर्यादेव सर्वं त्यक्त्वा भगवद्धर्मपरो भवेदित्यर्थः। तथा च श्रुतयः"यदहरेव विरजेत्तदहरेव परित्यजेत्" "किमर्थं वयं यजामहे येषामयमात्मालोकः किं धनेन किं प्रजया त्यागेनैकेनामृतमानशुः"इत्याद्याः। स्मृतिश्च"स्मर्तव्यः सततं विष्णुः विस्मर्तव्यो न जातु चित् । सर्वे विधिनिषेधाः स्युरेतयोरेवकिङ्कराः" इति ॥ १ ॥

एतदेवोपपादयति—यथा हीति, चतुर्भिः । पुरुषस्येह जन्मनि विष्णोः पादोपसर्पणमेव यथा योग्यम् यस्मात् सर्वभूतानां चेतनाचेतनानां भोक्तृभोग्यपदार्थानाम् ईश्वरः, ईश्वरत्वे हेतुः, आत्मा आश्रयः सर्वेषां चेतनाचेतनानां तत्परापरप्रकृतिरूपत्वात्, अत एव प्रियः स्थितिप्रवृत्त्यादिदत्वात् अत एव सुहृत् सर्वदा सर्वत्रानुकूलत्वात् ॥ २ ॥

ननु, ऐन्द्रियकसुखमपि मानुषजन्मन्येव सुकरमतस्तदर्थं यतिनव्यमित्यत्राह—सुखमिति । दैवात् पूर्वकर्मवशात् यथाऽयत्नतो दुःखं लभ्यते तथा सर्वत्र सर्वयोनिषु देहयोगेन सुखमपि ॥ ३ ॥

तत्तस्माद्धेतोः यत ऐन्द्रियकसुखप्रयासात्परं केवलमायुर्व्ययः तत्प्रयासो न कर्तव्यः, ननु, ऐन्द्रियकसुखरूपस्य फलस्य सत्त्वात्कथं केवलमायुर्व्ययस्तेन भवतीत्यत आह, तथा तादृशेनैन्द्रियकसुखप्रयासेन क्षेमं निरतिशयसुखदं मुकुन्दचरणाम्बुजं न विन्दते न प्राप्नोति ॥ ४ ॥

भाषा टीका ।

प्रह्लाद उवाच ॥

प्रल्हाद बोले, कि—इस संसार में यह मनुष्य जन्म बड़े प्रयोजन (मुक्ति पर्यन्त) का देने वाला है पर बड़ा दुर्लभ है सोभी अध्रुव (अनिश्चित) है इसी से बुद्धिमान् कुमार अवस्था में ही भागवत धर्मों का आचरण करें ॥ १ ॥

इस संसार में पुरुष को श्रीविष्णुभगवान् के चरणोंकी शरणजाना यही योग्य है, क्योंकि ? यह विष्णुही सर्वप्राणियों का प्रियआत्मा ईश्वर और सुहृद है ॥ २ ॥

हे दैत्यबालकों ! जीवों को इन्द्रियों का सुख तौ देह के योग से प्रारब्ध के आधीन सर्वत्र हीं मिलता है जैसे कि ये दुःख आप ही मिलता है ॥ ३ ॥

उस सुख के लिये प्रयास नहीं करना योग्य है क्योंकि इस में केवल व्यर्थ ही आयु गमाना है पुरुष जैसा गोविन्द के चरणारविन्द के शरण में सुख को प्राप्त होना है वैसा अन्यत्र नहीं होता है ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

भयमाश्रितः संसारं प्राप्तः पुरुषरूपं शरीरं यावत्पुष्कलमस्ति न विपद्येत सद्योगं न भवेन्न नश्येदितिवा तावच्छीघ्रं क्षेमाय यतेत॥५॥

आयुर्व्ययक्रममाह—पुंसइति त्रिभिः । अद्यस्माच्छेते ॥ ६ ॥

(१)(पश्यध्वं मतिवैषम्यं ज्ञातीनां नः कुटुम्बिनाम् ।
श्रेयो विघातादायासादीहतामनुसंसृतिम् ॥ ० ॥)
को गृहेषु पुमान् सक्तमात्मानमजितेन्द्रियः ।
स्नेहपाशैर्दृढैर्बद्धमुत्सहेत विमोचितुम् ॥ ९ ॥
कोन्वर्थतृष्णां विसृजेत् प्राणेभ्योऽपि य ईप्सितः ।
यं क्रीणात्यसुभिः प्रेष्ठैस्तस्करः सेवको वणिक् ॥ १० ॥
कथं प्रियाया अनुकम्पितायाः सङ्गं रहस्यं रुचिरांश्च मन्त्रान् ।
सुहृत्सु च स्नेहसितः शिशूनां कलाक्षराणामनुरक्तचित्तः ॥ ११ ॥
पुत्रान् स्मरंस्ता दुहितॄर्हृदय्या भ्रातॄन् स्वसॄर्वा पितरौ च दीनौ ।
गृहान्मनोज्ञोरुपरिच्छदांश्च वृत्तीश्च कुल्याः पशुभृत्यवर्गान् ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विंशतिर्वर्षाण्ययायुर्याति ॥७॥

दुरापूरेण दुःखैः समन्तादापूर्यमाणेन ॥ ८ ॥

ननु, यौवने गृहासक्तोऽपि पश्चाद्विरक्तस्सन् क्षेमं यास्यतीत्याशंक्य तदसम्भवं दर्शयन्कौमार एवाचरेदित्येतदुपपादयति-को गृहेष्विति सप्तभिः ॥ ९ ॥

यमर्थमसुभिः क्रीणाति प्राणहानिमङ्गीकृत्यापि साधयति तस्करादिः तस्मिन्नर्थे तृष्णां को नु विसृजेत् ॥ १० ॥

किञ्च कथमित्यादि प्रियायाः सङ्गादिकं स्मरन्कथं त्यजेतेति तृतीयेनान्वयः । मन्त्रान्हितशिक्षालापान् सुहृत्सु च सङ्गम् तेषां स्नेहेन सितो बद्धः कलानि मधुराण्यक्षराणि येषां तेषां च सङ्गम् तेष्वनुरक्तं चित्तं यस्य ॥ ११ ॥

ताः श्वशुरगृहे स्थिताः हृदय्या हृदयङ्गमाः मनोज्ञा उरवः परिच्छदा येषु तान् गृहान् वृत्तीर्जीविकाः कुल्याः कुलपरम्परागताः ॥ १२ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततः कारणाद्भवमनर्थावहं संसारमाश्रितः पुमान् कुशलः हेयोपादेयविभागकुशलस्सन् क्षेमायैव उक्तविधक्षेमार्थमेव यतेत कौमार एवेत्युक्तमवधारणं प्रतिपादयितुं तदवतारयति-शरीरमिति । पौरुषं पुरुषस्य जीवस्य स्वस्य सम्बन्धि शरीरं यावत् पुष्कलं पटुतरमस्ति न तु विपद्येत विपन्नं न भवति तावदेव क्षेमाय यतेतेति पूर्वेणान्वयः बाल्यादारभ्यैव यतेतेति भावः ॥ ५ ॥

एतदेव प्रतिपादयन् विषयासक्तस्य केवलं वृथायुर्व्ययमाह—पुंस इति । पुंसो मनुष्यस्य तावद्वर्षशतं ह्यायुर्जीवनयोग्यकालः शतवर्षपरिमितः तस्य शतवर्षपरिमितस्यायुषोऽर्द्धं पञ्चाशद्वर्षात्मकमजितेन्द्रियस्य निष्फलमेव यातीत्युत्तरेणान्वयः । नैष्फल्येन याने हेतुं वदन्पुमांसं विशिनष्टि, यदिति. यद्यस्मादसावजितात्मा पुमान् राज्याम् अन्धन्तमः निद्रात्मकं प्रापितस्तूष्णीं शेते जितेन्द्रियः कौमार एवारब्धभक्तियोगरूपभगवद्धर्मयोगस्तु राज्यामपि मध्यमं यामद्वयं निद्रार्थमुपयोज्य पूर्वोत्तरयोर्यामयोरनियतं कालं भगवद्धर्ममाचरतीति भावः ॥ ६ ॥

एवं बाल्ये मुग्धस्य मूढस्य दशवर्षाणि कौमारे क्रीडतो दशवर्षाणीत्येवं विंशतिर्वर्षाणां याति, जितेन्द्रियः कुशलस्तु तस्यामपि विंशत्यां भगवद्धर्ममनुतिष्ठतीति भावः । एवमुत्तरत्राप्यूह्यम्. जरया ग्रस्तो देहो यस्य अत एवाकल्पस्यासमर्थस्य स्वाधीनदेहस्य वर्षाणां विंशतिर्याति बाल्यात्प्रभृत्यारब्धभगवद्धर्मस्तु तदभ्यासशिक्षितदेहत्वात्तस्यामपि विंशत्यां तमनुतिष्ठतीति भावः ॥ ७ ॥

एवमदभोगात्मकाद्व्यायुषश्चत्वारिंशद्वर्षाणि गतानि शेषमवशिष्टं दशवर्षात्मकमायुः दुरापूरेण दुःखैः समन्तादापूर्यमाणेन कामेन तदनुबन्धिना बलीयसा मोहेन चकारात् क्रोधेन च गृहेषु गृहधर्मेषु सक्तस्यात एव प्रमत्तस्य स्वहितमजानतोऽपयाति जितेन्द्रियस्तु कुशलः कामाद्युपशमनेन तस्मिन्नपि दशवर्षात्मके वयसि भगवद्धर्ममनुतिष्ठतीति भावः ॥ ८ ॥

एवमजितेन्द्रियस्य वैषयिकसुखरतस्यायुषो नैष्फल्यमारब्धभक्तियोगस्य कुशलस्य जितेन्द्रियस्य तु निःश्रेयससाधनभगवद्धर्मप्रसाधनोपयुक्तत्वेन साफल्यं भागवतधर्माणामेव निरतिशयश्रेयस्साधनत्वं तेषाञ्च वर्त्तमानमनुष्यजन्मनैवानुष्ठेयत्वञ्चोक्तम्. अथ वैराग्यमन्तरेणोपदिष्टोऽपि भागवतधर्मः प्रतिष्ठितो न भवतीति वैराग्येण तावदेषां भवितव्यं तच्च स्वतंत्रतिमन्तरेण न सेत्स्यतीति तया भवितव्यम्. साच विषयासक्तचित्तजनसङ्गपरिहारमन्तरेण दुर्लभेत्यभिप्रेत्य तत्परिहारार्थं गृहवित्तकलत्रापत्यादिष्वनुरक्तचित्तस्य गद्यपद्यशक्यन्तत्याज्युप-

(१) श्लोकोऽयमधिकः पठ्यते विज० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

येन विवेकात्मना दुस्सङ्गः परिहार्य इति वक्तुं तावद्गृहादिष्वनुरागस्य दुस्त्यजत्वमनर्थावहत्वञ्चाह—को गृहेष्वित्यादिना । तावद्गृहानुरागस्य दुस्त्यजत्वमाह—क इति. गृहेष्वासक्तं ममेदं गृहमित्यभिमानयुक्तं दृढैः दुर्मोचनीयैः स्नेहा एव पाशास्तैर्बद्धमात्मानं विमोचितुमजितेन्द्रियश्च कः पुमानुत्सहेत, कोऽप्युत्साहं न कुर्यादित्यर्थः। जितेन्द्रियस्तूत्सहतैवेति भावः। अनेन "हित्वात्मपातं गृहमन्धकूपम्" इतिपूर्वमुक्तगृहाभिनिवेशत्याग एव भगवदाश्रयणे प्रथमं कारणमित्युक्तम् ॥ ९ ॥

तदभिनिवेशत्यागश्च वित्तकलत्रापत्याद्यनुरागत्यागपूर्वकः सोऽप्यजितेन्द्रियस्य दुश्शक इत्याह—कोन्विति । अर्थतृष्णां वित्तस्पृहाम् अजितेन्द्रियश्चेत् कःपुमान् विसृजेत् त्यजेत् दुस्त्यजत्वे हेतुं वदंस्तां विशिनष्टि—य इति. योऽर्थः प्राणेभ्योऽपि गरीयसीमिति. प्राणस्पृहापेक्षया गरीयसीं दृढतरामित्यर्थः। प्राणेभ्योऽपि गरीयस्त्वमेव दृष्टान्तमुखेन दर्शयन्नर्थं विशिनष्टि—यमिति. यमर्थमसुभिः प्राणैः तस्करश्चोरः सेवकः आयुधोपजीवी वणिक् नाविकश्च क्रीणाति प्राणहानमङ्गीकृत्यापि तस्करादिर्यमर्थं साधयति तस्मिन्नर्थे तृष्णां कोनु विसृजेदित्यर्थः ॥ १० ॥

किञ्च अनुकम्पितायाः दयायुक्तायाः प्रियायाः रहसि भवं सङ्गं रुचिरान् मनोज्ञान् हितालापांश्च सुहृत्सु च सङ्गं स्मरन् कथं प्रियासङ्गादींस्त्यजेदेति तृतीयेनान्वयः । कथम्भूतः ? तत्स्नेहसितः तेषां प्रियादीनां स्नेहेन सितो बद्धः कलानि मधुराव्यक्ताक्षराणि येषां तेषां शिशूनां च सङ्गमित्यनुषज्यते सङ्गं तेष्वनुरक्तं चित्तं यस्य सः ॥ ११ ॥

पुत्रान् हृद्याः हृदयङ्गमा दुहितॄः श्वशुरगृहे स्थिताः तथा भ्रातॄन् स्वसॄर्भगिनीश्च दीनौ मातापितरौ च उरवः बहवः परिच्छदाः भोगोपकरणानि येषु तान् मनोज्ञान् गृहांश्च कुल्याः कुलक्रमागताः वृत्तीर्जीविकाश्च पशून् भृत्यवर्गांश्च कथं त्यजेत कथन्तरां विरज्येत विरक्तः स्यात् ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तस्मादिदमेव कर्तव्यमिति तत्राह—तत इति । चशब्दोऽप्यर्थः। दृष्टं तत्पारस्य इत्याह—इतोऽपि बाल्य एव मुक्तये प्रयतेतेत्याह—शरीरमिति। पौरुषं पुरुषस्य विद्यमानं पुष्कलं पुष्टमन्धपङ्गुत्वाद्यङ्गवैकल्यविधुरमित्यर्थः । विपद्येत मरणलक्षणां विपत्तिं प्राप्नोति ततःप्रागेव यतेतेति शेषः ॥ ५ ॥

"शतायुर्वै पुरुषः" इतिवचनात् शतायुः शरीरस्थितेर्निश्चितत्वात्तदन्तरालकालेऽनेकश्रेयःसमार्जनोपपत्तेः बाल्य एव निवृत्तिलक्षणश्रेयसे यतनीयमिति नियमो नापेक्षित इत्याशङ्क्य गर्भवासमारभ्य शतायुःपर्यन्तं स्वतः परतो वा शरीरस्य नाशदर्शनान्न तत्स्थितिनिश्चयः शाश्वतः अस्तु वा कस्यचिच्छ्यापि न श्रेयो यत्नो दरीदृश्यते अन्यव्यापारायासग्रस्तत्वेन दिनमेलनलक्षितवत्सराणां क्षयाद्येवं न लक्षवर्षायुषेणापि मुकुन्दचरणारविन्दसेवालक्षणश्रेयःसम्पादनं सुशकमित्याह—पुंस इति ॥ ६ ॥ ७ ॥

दुरापूरेण न शक्यपूरणेन हिशब्दो हेतौ ॥ ८ ॥

निद्रादिकमन्तरेणावशिष्टकालान्तरालेऽपि श्रेयो विघ्नहेतुरस्तीत्याह—पश्यध्वमिति । कलहलक्षणं मतिवैषम्यं अनुसंस्मृतिमित्यनेनैकोऽपि क्षणोऽनावशिष्यत इति सूचयति ॥ ० ॥

नन्वस्माकं श्रेयइच्छा नास्ति चेदनेतेषु चेतनेषु कस्य चित्तस्यादवसरमापद्येतेति तत्राह—क इति ॥ ९ ॥

ननु, प्रवृत्तिधर्मेण माभूच्छ्रेयोऽर्थेन तत्स्यादतो मुकुन्दपादसेवा कुतो नियुज्यत इति तत्राह—कोन्विति । योऽर्थस्तदर्थतृष्णां अर्थान्वेषणवैतृष्णयैवार्जितस्य व्यये लिप्सयाऽर्थेन सुकृतं साधयेति बोधिते साधयिष्यामीति कण्ठोपरि गद्गदनिगदनैव कालो यातीति पुरुषायुषेणापि वित्तेन सुकृतार्जनं दवीय इति वित्तव्ययमन्तरेण कायक्लेशेनैव श्रीहरिचरणनिषेवणं जन्मसफलङ्करोतीति भावः तत्र दर्शनं प्रमाणयति तस्करादयो मृता अप्यर्थतृष्णां न मुञ्चन्तीत्येतदुपलक्षणं परितः प्रत्येमलं नानाजीवानां वर्तते ॥ १० ॥

ननु, माभूदर्थाच्छ्रेयः कामादस्त्वित्याशंक्य कीदृशो सौ भगवद्भक्तिकामो विषयकामो वा न द्वितीयः अभिध्यायन्वर्णरतिप्रगोवानतिदीर्घजीविते को रमेतेत्यादि शास्त्रानिन्दितत्वाच्छ्राद्यः विषयविरक्त्या तत्त्यागेन भाव्यं तस्य दुःसाधनत्वादित्याह—कथमिति. रहस्यं रहसि भवं सङ्गं मैथुनलक्षणं कथं त्यजेतेत्युत्तरेणान्वयः मन्त्रादिगृहीतानां सँल्लापानां रसेनेति शेषः ॥ ११ ॥

प्रत्ता दत्ताः हृद्याः हृदयप्रियाः रुचिरच्छदान् रुचिरपरिकरान् कुल्याः कुलपरंपरया समागताः वृत्तीर्जीवनकरीः ॥१२॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पुरुषरूपमिति स्वामीपौरुषमिति सम्बन्धोक्तिः ॥ ५ ॥ ६ ॥

कौमार इत्यत्र कैशोर इति क्वचित् ॥ ७—२० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

भयमाश्रित इति हरिभजनाभावे स्थानाद्भ्रष्टाः पतन्त्यध इति भवंश्रुत्वेति वैधभक्तौ विधिरुक्तः पुष्कलं जरारोगाद्यभावात् पुष्टं यत्नसमर्थमित्यर्थः ॥ ५ ॥

आयुर्व्ययक्रममाह—पुंस इति ॥ ६ ॥

क्रीडत इति बालैर्बालाभिश्च सह ॥ ७ ॥

शेषवयशिष्टमायुः ॥ ८ ॥

त्यजेत कोशस्कृदिवेहमानः कर्माणि लोभादवितृप्तकामः ।
औपस्थ्यजैह्वयं बहुमन्यमानः कथं विरज्येत दुरन्तमोहः ॥ १३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तत्रतत्र कृष्णं भजेदिति विवेकवत्त्वेऽपि भजनासामर्थ्यमाह—क इति । तस्मात् कौमारन एव भजने आरम्भमाणो भजन एवासक्त्या व्युत्पद्यमानयान्यत्रानासक्त्या भजनं सिद्ध्यति नान्यथेति भावः ॥ ६ ॥

द्रव्याशक्तेः प्राबल्यं दर्शयति—कोन्विति । योऽर्थः अर्थस्य प्राणेभ्योऽपिप्रियत्वमाह, यम् अर्थं प्राणैः क्रीणाति प्राणहानि-मङ्गीकृत्यैव तस्करो द्रव्यार्थं रात्रौ धनिनां गृहं प्रविशति सेवको राजकीयो युद्धाभिमुखं चलति वणिक् समुद्रादि दुर्गगामी ॥ १० ॥

स्त्रीपुत्राद्यासक्तेः प्राबल्यं दर्शयति—कथमिति । प्रियायाः सङ्गादिकं स्मरन् कथं त्यजेदिति तृतीयेनान्वयः मन्त्रान् हितशिक्षालापान् सितो बद्धः शिशूनाञ्च सङ्गं श्वशुरगृहे स्थिताः हृदय्याः हृदयङ्गमाः वृत्तीर्जीविकाः कुल्याः कुलपरंपराप्राप्ताः ॥ ११ ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ततो हेतोः भयमाश्रितः जन्ममरणप्रवाहलक्षणं संसारं प्राप्तो बद्धजीवः कुशलो मुमुक्षुः सन् पौरुषं मानुषं शरीरं यावन्न विपद्येत यावच्च पुष्कलं तावत् क्षेमाय मुकुन्दचरणाम्बुजाय तत्प्राप्त्य इत्यर्थः यतेत ॥ ५ ॥

कौमारे यो हि क्षेमाय न यतेत तस्याकुशलस्य तु मुकुन्दचरणाम्बुजप्राप्तिर्न घटते इत्याह—पुंसइति द्वादशभिः ॥ ६ ॥

मुग्धस्य बाल्ये बालैः क्रीडनैः कौमारे विद्याग्रहणादिना च क्रीडतः विंशतिवर्षाणि आयुर्याति ॥ ७ ॥

दुरापूरेण दुःखेनापि पूरयितुमशक्येन बलीयसा सर्वजीव जयकर्त्रा ॥ ८ ॥

गृहेष्वासक्तमात्मानं स्नेहपाशैर्बद्धं विमोचितुं क उत्सहेत-न कोपीश्वरकृपाभाजनं विनेत्यर्थः ॥ ९ ॥

योऽर्थः प्राणेभ्योपीप्सितः प्रियतमः यमर्थं तस्करः परगृह प्रवेशेन राजसेवको युद्धेन वणिक् दुर्गमदेशप्रवेशेन असुभिः प्राणैः क्रीणाति तस्यार्थस्य तृष्णां कोऽनु विसृजेत् ॥ १० ॥

प्रियायाः रहस्यं गोप्यं सङ्गं रुचिरान् मनोहरान् मन्त्रान् मधुरभाषणानि शिशूनाञ्च कलभाषिणां सङ्गं सुहृत्सु सङ्गं च स्मरन् स्नेहसितः प्रियादिस्नेहबद्धः प्रियाद्यनुरक्तचितश्च कथं त्यजेतेति तृतीयेनान्वयः ॥ १३ ॥

हृदय्याः हृदयङ्गमाः ताः लोके प्रसिद्धस्नेहविषयाः मनोहर उरवः परिच्छदाः ये तु तान् कुल्याः पितृपितामहाद्यागताः पशूनां भृत्यानां च वर्गान् समूहान् ॥ १२ ॥

भाषा टीका ।

तस्मात् कुशल पुरुष संसार को प्राप्त होकर अपने प... मक्षेम के लिये यत्नकरे जबतक कि यह अच्छा भला मनुष्य शरीर विपत्ति को न प्राप्त हो ॥ ५ ॥

देखो पुरुष की सौ वर्षकी आयु है तिसमें भी अजितात्म पुरुष की अर्द्ध आयु निष्फल है क्योंकि ? यह अन्धत... को प्राप्त होकर रात्रि में सोता है ॥ ६ ॥

और बीस वर्षे भोले भाले की बाल और कौमार अवस्था में खेलने में जाती हैं। और बीस वर्षे जरा अवस्था से ग्रस्त देह वाले असमर्थ की व्यर्थ जाती हैं अर्थात् उस समय कु... साधन नहीं बन सक्ता ॥ ७ ॥

शेष मध्य की जो आयु है वह दुष्पूर काम और बलवान मोह से गृह में आसक्त अत एव प्रमत्त पुरुष की व्यर्थ चली जाती है ॥ ८ ॥

अजितेन्द्रिय पुरुषों में ऐसा कौन होगा जो कि, गृह में आसक्त और दृढ स्नेह पाशों से बँधे हुए इस आत्मा को छुटाने का उत्साह करेगा ॥ ९ ॥

भला प्राणों से भी जो प्रिय इस तरह के द्रव्य की तृष्णा को कोन छोड सक्ता है, जिस द्रव्य को तस्कर चाकर और वणिक् अपने प्रिय प्राणों से कीनते हैं ॥ १० ॥

अनुकम्पित अपनी प्रिया के एकान्त सङ्ग को और सुहृदलोगों के स्नेह से बँधा हुआ, छोटे २ बच्चों की मधुर वाणी से अनुरक्त चित्त, अपने हृदयंगम (बहुत ही प्रिय) लडके लडकी और भ्राता लोगों की याद कर २ तथा दीन बिचारे माता पिताओं की और नाना प्रकार के मनोहर उपकरण वाले घरों की तथा अपनी कुल परम्परा और उत्तम पशु, और नोकर चाकरों की याद कर २ के इन सबों को कोन छोड सक्ता है ॥ ११ ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कोशस्कृत् कोशस्कारी कीटः स यथा आत्मनो हितं गृहं कुर्वाणो निर्गमाय द्वारमपि नावशेषयति तथा कर्माणीहमानः नन्ववितृप्तकामोऽपि दोषदर्शनेन विरक्तः संस्त्यजेत्...

कुटुम्बपोषाय वियन्निजायुर्न बुद्ध्यतेऽर्थं विहतं प्रमत्तः।
सर्वत्र तापत्रयदुःखितात्मा निर्विद्यते न स्वकुटुम्बरामः॥ १४॥
वित्तेषु नित्याभिनिविष्टचेता विद्वांश्च दोषं परवित्तहर्तुः।
प्रेत्येह चाथाप्यजितेन्द्रियस्तदशान्तकामो हरते कुटुम्बी॥ १५॥
विद्वानपीत्थं दनुजाः! कुटुम्बं पुष्णन्स्वलोकाय न कल्पते वै।
यः स्वीयपारक्यविभिन्नभावस्तमः प्रपद्येत यथा विमूढः॥ १६॥
यतो न कश्चित् क्व च कुत्रचिद्वा दीनः स्वमात्मानमलं समर्थः।
विमोचितुं* कामदृशां विहारक्रीडामृगो यन्निगडो विसर्गः॥ १७॥
ततोविदूरात्परिहृत्य दैत्याः! दैत्येषु सङ्गं विषयात्मकेषु।
उपेत नारायणमादिदेवं समुक्तसङ्गैरिषितोऽपवर्गः॥ १८॥
नह्यच्युतं प्रीणयतो बह्वायासोऽसुरात्मजाः!।
आत्मत्वात्सर्वभूतानां सिद्धत्वादिह सर्वतः॥ १९॥
परावरेषु भूतेषु ब्रह्मान्तस्थावरादिषु।
भौतिकेषु विकारेषु भूतेष्वथ महत्सु च॥ २०॥

श्रीधरस्वामिकृतभावार्थदीपिका।

औपस्थ्यं शैश्न्यं जैह्वयञ्च सुखं बहुमन्यमानस्तदेवाधिकं मन्यमानः अतो दुरन्तो मोहो यस्य स कथं विरज्येत विरक्तः स्यात्॥ १३॥

दुरन्तमोहत्वं दर्शयन्नाह, कुटुम्बपोषणाय वियत्क्षीयमाणं निजमायुः पुरुषार्थञ्च विहतं न बुध्यते अत एव तापत्रयेण दुःखितचित्तोऽपि न निर्विद्यते तत्र दुःखबुद्धिं न करोति यतः स्वकुटुम्बे रामो रतिर्यस्य॥ १४॥

प्रत्युत चौर्यं करोतीत्याह–वित्तेष्विति। नित्यमभिनिविष्टं चेतो-यस्य स परवित्तहर्तुः प्रेत्य नरकलक्षणमिह च दण्डादिरूपं दोषं यद्यपि विद्वान् जानन्नथाप्यशान्ताभिलाषस्तत्परवित्तं हरत्येव॥ १५॥

तदेवं को गृहेषु पुमानित्यादि सप्तभिः श्लोकैरुपपादितं गृहादिषु प्रसक्तस्य वैराग्याद्यसम्भवमुपसंहरति--विद्वानिति। स्वलोकायात्मपरामर्शाय न कल्पते किन्तु विमूढो यथा तथा विद्वानपि तमोऽभिनिवेशमेव प्रपद्यते. तत्र हेतुः, य इति. स्वीयमिदं पारक्यमिदमिति विभिन्नो भावो भावना यस्य सः॥ १६॥

तस्मात्कौमार एव भागवतान्धर्मानाचरेदिति सहेतुकमुपसंहरति--यत इति। यतः कश्चिदपि स्वमात्मानं मोचितुं न समर्थस्ततो नारायणमुपेत शरणं यातेत्युत्तरेणान्वयः। असामर्थ्ये हेतुः अलं दीनो लम्पटः अतः कामो दृशि यासां तासां विहारे क्रीडायां निमित्ते क्रीडामृगः, विहारमिति पृथक्पाठे तासां विहारसाधनमात्मानम् यतस्तासां क्रीडामृगः स इत्यन्वयः। किञ्च यद्यस्य निगडः शृङ्खलातुल्यो विसर्गः पुत्रपौत्रादिरूपो भवति॥ १७॥

विदूराद्दूरतः सङ्गं परिहृत्य यद्वा अविदूराच्छीघ्रं नारायणमुपेतेत्यन्वयः यस्मात्स एवाऽपवर्ग इषित इष्टः॥ १८॥

ननु, बालानामस्माकं तद्भजनमशक्यमिति चेत्तत्राऽह–नहीति। बह्वायासोऽतिप्रयासः॥ १९॥

आत्मत्वात्सर्वत्र सिद्धत्वादिति च हेतुद्वयमुपपादयति--परावरेष्विति, चतुर्भिः। ब्रह्मा अन्तो येषां स्थावर आदिर्येषां तेषु भूतेषु भौतिकेष्वजीवेषु घटादिषु महत्सु च भूतेष्वाकाशादिषु॥ २०॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

कथम्भूतः कोशस्कृदिव कोशकारी कीट इव कर्माणीहमानो यथा कोशस्कृद्दृढं कोशात्मकं गृहं कुर्वन्नात्मनो निर्गमाय द्वारमपि नावशेषयति। तथा स्वबन्धकानि कर्माणि कुर्वाण इत्यर्थः। अवितृप्तः कामो यस्य तादृशः औपस्थ्यं जैह्वयञ्च सुखं बह्वधिकं मन्यमानः अतो दुरन्तो मोहो यस्य॥ १३॥

दुरन्तमोहं दर्शयन्विशिनष्टि—कुटुम्बपोषणाय वियत्क्षीयमाणं निजायुः परिच्छिन्नायुर्यस्य तादृशो विशेषेण हितमनुकूलमर्थं परमं पुरुषार्थं न वेद, विहतमिति पाठे, विहतमपि स्वाभिप्रेतमर्थं न वेद दृष्टान्तत्वेन नानुसन्धत्ते सर्वत्र देशे काले च तापत्रयेण दुःखित आत्मा मनो यस्य तादृशो न निर्विद्यते संसृतो हेयत्वबुद्धिं न करोति यतःस्वकुटुम्बे रामो रतिर्यस्य॥ १४॥

* वामदृशामिति. पाठान्तरम्. वीर०—विज०॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रत्युताकार्यं करोति इत्याह—वित्तेष्विति । परद्रव्यापहारेणाऽयो दोषः प्रेत्य मरणानन्तरं नरकलक्षणः इह च लोके दण्डरूपश्च तं विद्वान् जानन्नपि वित्तेषु नित्यमभिनिविष्टं चेतो यस्य सोऽजितेन्द्रियोऽशान्तकामः कुटुम्बी च सन् तत्परस्य वित्तं हरति ॥ १५ ॥

एवं को गृहेष्वित्यादिभिः सप्तभिः श्लोकैर्गृहादिष्वनुरागो दुस्त्यज इत्युक्तम्,अथ तस्यानर्थावहत्वमाह-विद्वानिति। हे दनुजाः ! इत्थं विद्वानपि उक्तविधं संसारं जानन्नपि कुटुम्बं पुष्णन् बिभ्रत् यः स्वलोकाय आत्मयाथात्म्यदर्शनाय न कल्पते न समर्थो भवति प्रकृतिपुरुषेश्वरयाथात्म्यावमर्शनपरो न भवति, किन्तु इदं स्वीयमिदं परकीयमित्येवं विभिन्नो भावो यस्य, सर्वस्य परमात्मशेषतामजानन्नित्यर्थः, यथावत् विमूढः स तमो नरकमेव प्रपद्येत, यद्वा तत्त्वविदपि कुटुम्बभरणासक्तो देहात्माभिमानस्वतन्त्रात्माभिमानयुक्तो मूढवन्नरकमेव प्रपद्यते, न मुक्तिम् किं पुनः केवलमूढ इत्याह—विद्वानपीति। विद्वानपि प्रकृतिपुरुषेश्वरयाथात्म्यविदपि यःपुनः स्वीयपारक्यविभिन्नभावः इत्थं कुटुम्बं पुष्णन्भवति सः स्वलोकाय परमपदप्राप्तये न कल्पते किन्तु नितरां मूढवत्तम एव प्रपद्येत विदुष एवेयं गतिः, किं पुनरविदुष इति भावः यथा विमूढ इति दृष्टान्तवशात्किंपुनर्न्यायोऽत्रद्योत्यते ॥ १६ ॥

एवं गृहाद्यासक्तेर्दुस्त्यजत्वमनर्थावहत्वञ्चोक्तम्. अथोक्तमुपसंहरन् दुस्त्यजगृहाद्यनुरागत्यागनिमित्तमसत्सङ्गं परित्यज्य सत्सङ्गादिप्रसक्त्या भगवन्तमाश्रयेतेत्याह—यत इति। यतः कश्चिदपि पुमान् गृहाद्यभिनिविष्टश्चेदात्मानं क्वचिदपि काले कुत्रचिदपि देशे मोचितुं मोचयितुमसमर्थस्तत इत्युत्तरेणान्वयः।असामर्थ्ये हेतुरलमत्यर्थं दीनो विषयलंपटः वामा दृशो यासां तासां विहारे क्रीडामृगः क्रीडार्थंसंवर्द्धितशाखामृगादितुल्यः, विहारमिति पृथक्पदपाठे विहारस्थानमात्मानमित्यन्वयः। वामदृशां विहारक्रीडामृगत्वं विशिनष्टि, यदिति। यद्यस्माद्वामदृशां क्रीडामृगत्वाद्धेतोर्निगडरूपो विसर्गः संसारबन्धो भवति अयमिति वा छेदः यत् क्रीडामृग इत्येतदयमेव निगडरूपः संसार इत्यर्थः यदिति छेदपक्षे यच्छब्देन वामदृशां वा परामर्शः यत् यासु निगडः शृंखलरूपो विसर्गः पुत्रादिरूपः सर्ग इत्यर्थः । अविसर्ग इति वा छेदः यद्यस्मात्क्रीडामृगत्वादविसर्गः । अविमोच्यो निगडः शृंखलतुल्यः संसारबन्धो भवतीत्यर्थः ॥ १७ ॥

ततइति। ततः यतो गृहादिष्वासक्तः आत्मानं मोचितुमसमर्थस्ततो विषयेषु शब्दादिष्वेव आत्मा मनो येषां तेष्वसत्सु दैत्येषु सङ्गं दूरात्परिहृत्य आदिदेवं जगदुदयस्थितिलयलीलं स्वतेजसा दीप्यमानं नारायणं जीवानां प्राप्यं प्रापकमाधारञ्च भगवन्तम् उपेत सत्सङ्गादिप्रगाढयाशरणं व्रजेत यद्यप्यत्र सत्सङ्गतेः कण्ठोक्तिर्नास्ति तथापि स्वस्य सत्सङ्गतेरेव हेतोर्ज्ञानोदयस्य स्वेनैव वक्ष्यमाणत्वात्स्वसङ्गत्यैव तैः सत्सङ्गेः कृतप्रायत्वाच्च तदनुक्तावपि साभिप्रेतैव. एवं गृहाद्यासङ्गस्य दुस्त्यजत्वदोषावहत्वादिकथनेनैव तेषां वैराग्यमुदंष्यतीति वैराग्यमपि सम्पादनीयमिति शब्दतो नोक्तं स्वस्यैव ज्ञानोपदेष्टृत्वादाचार्यत्वेनावस्थितत्वाद्गुर्वभिगमनमपीह शब्दतः कर्तव्यत्वेननोक्तम्. किन्तु श्रीशप्रपदनमात्रमेव कुरुतेतिशब्देनोक्तम् धर्मान्भागवतानिति भगवच्छब्देनाभिप्रेतं निष्फलत्वशङ्काव्युदासं व्यनक्ति—स इति। स उपेयो नारायणः अपवर्गः परमपुरुषार्थलक्षणापवर्गहेतुत्वेन मुक्तः सङ्गो देहतदनुबन्धिषु यैस्तैरीरित इष्टः स एव मुक्तसङ्गानामिष्टोऽपवर्गः फलरूप इत्यर्थः ॥ १८ ॥

एतदेव प्रतिपादयितुं तावत्तत्समाश्रयणस्य दुःशकत्वशङ्कां निराकुर्वन्नाह—नहीति। हे असुरात्मजाः ! अच्युतं सकृदाश्रयणादेव आश्रितान्न च्यावयतीति अच्युतः तं प्रीणतः पुंसो बह्वायासो न हि विद्यते देवतान्तरप्रीत्युत्पादकसाधनाऽनुष्ठानवद्भगवत्प्रीत्युत्पादकतद्धर्मानुष्ठाने नायासो विद्यते इत्यर्थः अनायासे हेतुः आत्मत्वादिति सर्वभूतानामात्मत्वात्सर्वतः सिद्धत्वात्सुलभत्वात्सर्वत इति "सार्वविभक्तिकस्तसिः" षष्ठ्यर्थः। इह लोके सर्वतः सर्वेषां देवासुरादिस्त्रीपुंसवर्णाश्रमादिविभागमन्तरेण सर्वेषां सिद्धत्वादित्यर्थः। अयमभिप्रायः, न हि सुलभस्य तृणलोष्ठादेरन्वेषणाय विदूरगमनादिरूपः प्रयासोऽपेक्षितः सर्वत्र सर्वेषां सुलभत्वादेवं सर्वेषामात्मत्वेन सर्वत्र सुलभस्य प्रीणनेनातीवायास इति. यद्वा, सिद्धत्वादित्यस्य स्वर्गादिवन्न साध्यः पुरुषार्थः अपितु सिद्धरूपः साध्यपुरुषार्थसाधने हि यागाद्यनुष्ठानरूपप्रयासबाहुल्यम्. सिद्धस्यतु तल्लाभोपयुक्तप्रीणनोपायनत्समाश्रयणमात्रमपेक्षितमित्यर्थः यद्वा, आत्मत्वादित्यनायासे पृथग्घेतुः आत्मा हि स्वशरीरे निरतिशयप्रीतियुक्तस्तद्रक्षणशीलश्च लोके दृष्टः एवं सर्वेषां जीवानां परमात्मानं प्रतिशरीरत्वात्तद्विषयकप्रीतेस्तस्य स्वतःसिद्धाया अपि विपुलापराधैरनभिव्यक्तायास्तदभिव्यक्त्यावहं किञ्चिदानुकूल्यादिकमात्रमपेक्षितमिति भावः । सिद्धत्वादिति तत्रैवान्यो हेतुः, न हि सिद्धस्य हिरण्यनिधेस्तत्परिज्ञानमन्तरेण तल्लाभोपयुक्तोऽन्यः प्रयासोऽपेक्षितः एवं परमात्मनोपि निरतिशयपुरुषार्थरूपस्य हृदये सिद्धत्वात्तल्लाभोपयुक्तस्वामित्वशेषित्वादितद्याथात्म्यज्ञानपूर्वकतत्समाश्रयणमात्रेण तस्य समाश्रितविषयकप्रीतिरुदेष्यतीति नातीवायासो विद्यते इत्यर्थः ॥ १९ ॥

"आत्मत्वात्सर्वभूतानाम्" इत्येतदेव प्रपञ्चयति—परावरेष्विति चतुर्भिः। ब्रह्मा चतुर्मुखोऽन्तो येषां स्थावरा आदिर्येषां तेषु परावरेषूच्चावचेषु भूतेषु चराचरात्मकदेहभाक्षु चेतनेष्वित्यर्थः तथा भौतिकेषु पृथिव्यादिभूतपरिणामरूपेष्वचेतनेषु घटपटादिषु महत्सु पृथिव्यादिमहाभूतेषु ॥ २० ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कोशस्थः कोशकारी कीटः, एतदेव स्पष्टयति—औपस्थ्यमिति ॥ १३ ॥

यदिति कलृप्तं निजमात्मीयमायुर्यस्य स तथा शास्त्रविहितमर्थं अर्गालक्षणं न बुध्यते स्वकुटुम्बे भार्यादौ रामः क्रीडा यस्य स तथा न निर्विद्यते विरक्तो न भवति ॥ १४ ॥

परवित्तहर्तुश्चोरादेरिह देहात्प्रेत्य यत्पूर्वमार्जितम्

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

अथाप्यनन्तरमपि तच्च तदेव दुष्कर्म हरते नयतीत्यन्वयः परलोकेपि विषयेष्वलं बुद्धिर्नास्तीति भावः ॥ १५ ॥

अनुक्तविशेषप्रदर्शनाय कथितमेवार्थं विशिनष्टि—विद्वानिति। स्वलोकाय स्वक्लृप्तमोक्षाय स्वयोग्यज्ञानाय वा तत्र हेतुमाह—यदिति. न केवलं मोक्षाय कल्पत इति. प्रत्युतानर्थं चाप्नोति, तम इति। विमूढो विपरीतज्ञानी यथा तमः प्रतिपद्यते तथाऽयमित्यन्वयः ॥ १६ ॥

श्रीनारायणानुग्रहमन्तरेण विद्वत्ताप्यकिञ्चित्करीत्याह—यत इति। शास्त्रगुरूपदेशेन विद्वान् संसारस्यानित्यतामिति शेषः दीनं स्वात्मानं विमोचितुमलं समर्थो नेति यतोऽत इति शेषः यदि जीवराशौ कश्चिदस्तीत्यभिमानस्तर्हि कुत्र कस्मिन्काले न कश्मिश्चिदित्यर्थः। कुतोत्राह—वामदृशामिति. अयं पुरुषो वामदृशां विहारार्थं निर्मितक्रीडामृगइति यत्कथमयं तथाभूदिति तत्राह—निगड इति. आसामन्विसर्गः कटाक्षमोक्षो यस्य निगडः शृङ्खलायितः तस्मात्स इति शेषः ॥ १७ ॥

एतावन्तं दैत्यान् कटाक्षीकृत्योक्तं प्रकटयन्मथितार्थमाह तत इति। नन्वेवं तर्हि संसारमोक्षस्य दौर्घट्यमापादितमिति शंका माभूत् यदर्थितास्ति तर्ह्युपायं वदामीत्यतो वाह—तत इति। यतो धर्मार्थकामैर्ब्रह्मार्पणबुद्धिरकिंचित्सारहितैः संसारमोक्षो न सेत्स्यति ततो दैत्येषु सङ्गं दूरात्परिहृत्य नारायणं शरणमुपेत, यातेत्यन्वयः। सोपवर्गो मुक्तसङ्गैः पुरुषैरिषितः प्राप्तो भवति "इषुगतौ" इतिधातोः ॥ १८ ॥

नेदं दुःसाध्यमित्याह—न हीति। सर्वभूतानामात्मत्वात्तत्प्रेष्टत्वात्सर्वत्र व्याप्तत्वेन सुलभत्वाच्च ॥ १९ ॥

नारायणस्य सेव्यत्वे हेतुगर्भविशेषणमाह, परावरेष्विति ॥२०॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

कोशस्कृत् कोशकीटः स यथा गृहं कुर्वन्नात्मनो निर्गमाय द्वारमरचन् म्रियते तथैव कर्माणि ईहमानः औपस्थ्यं सुखं जैह्वयञ्च सुखम् ॥ १३ ॥

वियत् क्षीयमाणं निजमायुः पुरुषार्थञ्च हृतं न बुध्यते वटिकामात्रस्याप्यपचयन्तु बुध्यत एवेति भावः। तदपि तस्मान्न निर्विद्यते ॥ १४ ॥

प्रेत्य नरकलक्षणम् इह च राजदण्डादिरूपं दोषं यद्यपि विद्वान् तदपि तानि वित्तानि हरते ॥ १५ ॥

विद्वानपि शास्त्रज्ञोऽपि स्वलोकाय कोऽहं किं करोमीति स्वमवलोकयितुमित्यर्थः। यथा विमूढस्तथैव हे दनुजाः! ॥ १६ ॥

यतः कुटुम्बात् क्वापि देशे कुत्रचिदपि काले समर्थः शास्त्रज्ञानादिसामर्थ्यवानपि कश्चिदपि आत्मानं स्वीयं वा विमोचयितुम् अलं न शक्नोति. विहारमिति पाठे आत्मानमित्यस्य विशेषणं समानपाठे कर्तृविशेषणं याः कामदृश एव निगडो यत्र तथाविधः सर्गो जन्म भवेत् अपवर्गः संसारबन्धविमोचकः हरित इष्टः ॥ १७ ॥ १८ ॥

प्रीणयतः परिचर्य्यया प्रीणयितुं न बह्वायासः, यथा कुटुम्बं प्रीणयत इति भावः। न च तस्यान्वेषणे श्रमः आत्मत्वात् हृद्येव वर्त्तमानत्वात् न च तत्प्रीणनेऽपि श्रमः सर्वतः सर्वैरपि प्रकारैर्मानसैरप्युपचारैस्तत्प्रीणनस्य सिद्धत्वात्तथा अच्युतं प्रीणयामीति सङ्कल्पमात्रेणापि प्रीतेः सिद्धत्वात् श्रवणकीर्त्तनाद्यन्यतमेनापि वा सिद्धत्वात् ॥ १९ ॥

नकेवलं सस्वहृदय एव वर्त्तमानः परिचरणीयः अपितु सर्वत्रैव वर्त्तमानः सर्वसंमाननेनैव सन्तोषणीय इत्युपदेष्टुं तस्य सार्वत्रिकीं सार्वकालिकीञ्च सत्तामाह, द्वाभ्याम्. परावरेषु उत्कृष्टनिकृष्टेषु भूतेषु ब्रह्मा अन्तो येषां स्थावर आदि येषान्तेषु भौतिकेष्वजीवेषु घटादिषु च महत्सु भूतेष्वाकाशादिषु गुणसाम्ये प्रधानं गुणव्यतिकरे महत्तत्वादौ परः भूतादिभ्यः प्राकृतेभ्यः प्रकृतेश्च सकशादन्य एकः परं ब्रह्मेति आत्मा परमात्मेति भगवानिति शब्दत्रयवाच्य ईश्वर ईयत इत्युत्तरेणान्वयः। कीदृशः? अव्ययः सर्वेष्वपि कालेष्वशून्यः ॥ २० ॥ २१ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

दुरन्तो दुष्पारो मोहो यस्यात एवोपस्थजैह्व्यं सुखं बहु अधिकं मन्यमानः तेष्वप्यवितृप्तकामः असमाप्तवासनः अत एव कोशस्कृत् कीटविशेषो यथा स्वबन्धनाय कोशं करोति तद्वत्स्वबन्धनाय कर्माणीहमानः कथं विरज्येत पुत्रादिषु विरागं कुर्यात् तान् विरागाभावात्कथं त्यजेत ॥ १३ ॥

कुटुम्बपोषाय निजायुर्वियत् क्षिपयन् प्रमत्तो विहतमर्थं न बुध्यते सर्वत्र तापत्रयेन दुःखित आत्मा यस्य स कुटुम्ब एव रामः रमणस्थानं यस्य सः न निर्विद्यते ॥ १४ ॥

परवित्तहर्तुः प्रेत्येह च दोषं विद्वान् जानन्नपि हरते परवित्तमिति शेषः। यतो वित्तेषु नित्याभिनिविष्टं चेतो यस्य सः तत्र हेतुरविजितेन्द्रिय इति तत्रापि हेतुः आशान्तकामः प्रवृद्धवासनः ॥ १५ ॥

यो विद्वान् सोपि इत्थं पूर्वोक्तविमूढवत् स्वकुटुम्बं पुष्णन् स्वीयपारक्यविभिन्नभावश्चेत् इदं स्वमिदं पारक्यमित्येवं विभिन्नो विनाशिनो भावः सर्वात्मकवासुदेवभजनं येन सः स्वलोकाय विद्वत्प्राप्यलोकाय न कल्पते योग्यो न भवति किन्तु यथा विमूढस्तथा तमः संसारं प्रपद्येत प्राप्नुयादित्यर्थः ॥ १६ ॥

यतः कश्चिदपि क्व कस्मिँश्चिदुपायेपि सति कुत्रचित्काले आत्मानं विमोचितुं समर्थो न भवति ततो दैत्येषु सङ्गं परिहृत्य नारायणमुपेतेत्युत्तरेणान्वयः असामर्थ्ये हेतुः अलमत्यर्थं दीनः अनादिमायावश्यः अत एव कामे दृक् यासां तासां विहारे क्रीडामृगः विनोदप्रदः यत् यासां विसर्गः पुत्रादिरूपो विविधः सर्गो निगडो बन्धनम् ॥ १७ ॥

नारायणमुपेत शरणं यात स मुक्तसङ्गैः त्यक्तसर्वसङ्गैः परमहंसैरिषितः यतोऽपवर्गः मुक्तप्राप्यः ॥ १८ ॥

गुणेषु गुणसाम्ये च गुणव्यतिकरे तथा ।
एक एव परो ह्यात्मा भगवानीश्वरोऽव्ययः ॥ २१ ॥
प्रत्यगात्मस्वरूपेण दृश्यरूपेण च स्वयम् ।
व्याप्यव्यापकनिर्देश्यो ह्यनिर्देश्योऽविकल्पितः ॥ २२ ॥
केवलानुभवानन्दस्वरूपः परमेश्वरः ।
माययान्तर्हितैश्वर्य ईयते गुणसर्गया ॥ २३ ॥
तस्मात्सर्वेषु भूतेषु दयां कुरुत सौहृदम् ।
आसुरं भावमुन्मुच्य यया तुष्यत्यधोक्षजः ॥ २४ ॥
तुष्टे च तत्र किमलभ्यमनन्तआद्ये किन्तैर्गुणव्यतिकरादिह ये स्वसिद्धाः ।
धर्मादयः किमगुणेन च कांक्षितेन सारञ्जुषां चरणयोरुपगायतां नः ॥ २५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अच्युतस्य सर्वेषां भूतानां चेतनाचेतनानामात्मत्वान्मूलत्वात् सर्वतः धारकत्वनियन्तृत्वादितः इह जगति सिद्धत्वाभिष्पन्नत्वात् हेतोः अच्युतं प्रीणयतोवह्वायासो नहि ॥ १९ ॥

सर्वमूलत्वं सर्वत्र सिद्धत्वञ्चाह-परावरेष्विति द्वाभ्याम् । भूतेषु चेतनाचेतनरूपेषु अस्तीति शेषः ॥ २० ॥

———

भाषा टीका ।

कोश कर कीडे के सदृश चेष्टा करने वाला नाना प्रकार के कर्मों को करता हुआ कामनाओं से तृप्त नहीं होकर दुरन्त मोहवाला इन्द्रियोंको वहुत मानने वाले कैसे वैराग्य को प्राप्त हो सक्ता है ॥ १३ ॥

कुटुम्ब पोषण मे क्षीण होरहा जो आयु उसको और नष्ट हुए भये पुरुषार्थ को यह प्रमत्त नहीं जानता है सर्वत्र तापत्रय से दुःखित होकर भी उस दुःख को दुःख नही मानता है, क्योंकि ? अपने कुटुम्ब में रागवाला है ॥ १४ ॥

द्रव्य के विषै नित्य ही प्रविष्ट चित्त वाला होकर पराये के द्रव्य हरने में पर लोक और इस लोक में जो नरक और दण्डादि दोष है उसको जानता भी है तो भी अजितेन्द्रिय अशान्त काम यह कुटुम्बी चोरी करता ही है ॥ १५ ॥

हे दनुजो ! ऐसे जानता हुआ भी कुटुम्ब पोषण करता हुआ आत्म विचार करने को समर्थ नही होता और अपने पराये पदार्थ में भिन्न भावना वाला होकर जैसे मूढ नरक को प्राप्त होता है तैसे ही जानता हुआ भी ॥ १६ ॥

जिसकारण कहीं भी कोई भी अपने आत्माको इस संसारसे छुडाने को समर्थ नही क्योंकि ? विचारा दीन स्त्रियोंके विहार करने का क्रीडा मृग हो रहाहै जिन स्त्रियों पुत्रपौत्रादि [...] पादका वन्धन होता है ॥ १७ ॥

हेदत्य हो ! तस्मात् विषयात्मक दैत्यों के सङ्गको [...] परित्याग करके आदिदेव श्रीनारायणके शरण जानों क्यों[...] वही मुक्तसङ्ग मुनिलोगों का इष्ट हे ॥ १८ ॥

हे असुरात्मजहो ! नारायणको प्रसन्न करने में वहुत परि[...] नही है क्योंकि ? वह सर्व प्राणिओं के आत्मा है और सर्व [...] है ॥ १९ ॥

परा वर स्थावरों से लेकर ब्रह्मापर्यन्त प्राणिओं में [...] पञ्चभूतों के विकार घटपटादिक और पञ्च महाभूतों में । [...] में प्रकृति में और महत्तत्वादिकमें एकही ईश्वर अव्यय परम[...] भगवान श्रीमन्नारायण विराजते हैं ॥ २० ॥ २१ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

गुणसाम्ये प्रधाने गुणव्यतिकरे महत्तत्वादौ च परो[...] स्वरूपः ॥ २१ ॥

कथं तर्हि द्रष्टृदृश्यभोक्तृभोग्यादिभेदः ? माययेत्याह, प्रत्यग[...] द्रष्टा भोक्ता तत्स्वरूपेण व्यापकतया निर्देश्यः दृश्यं [...] देहादि तद्रूपेण च व्याप्यतया निर्देश्यो मायया ईयत इत्यु[...] णान्वयः वस्तुतस्तु स्वयमविकल्पितोऽनिर्देश्योऽपि सन् [...] अनिर्देश्योऽप्येवंनिर्देश्यः सन् विकल्पित ईयत इत्यन्वयः ॥ २२

यतः केवलोऽनुभवात्मक आनन्द एव स्वरूपं यस्य. ननु, [...] वचेत्सर्वज्ञ तर्हि सर्वत्र सर्वज्ञत्वाद्युपलभ्येत तत्राऽऽह, गुणा[...] सर्गो यस्याः सा गुणसर्गा तया माययाऽन्तर्हितमैश्वर्यं येन सः[...]

यस्मादेवं तस्मात्सर्वेषु भूतेषु यथोचितं दयां सौह[...] कुरुत यया दयया उन्मुच्य सन्त्यज्य ॥ २४ ॥

धर्मार्थकाम इति योऽभिहितस्त्रिवर्ग ईक्षा त्रयी नयदमौ विविधा च वार्त्ता ।
मन्ये तदेतदखिलं निगमस्य सत्यं स्वात्मार्पणं स्वसुहृदः परमस्य पुंसः ॥ २६ ॥
ज्ञानं तदेतदमलं दुरवापमाह नारायणो नरसखः किल नारदाय ।
एकान्तिनां भगवतस्तदकिञ्चनानां पादारविन्दरजसाऽऽप्लुतदेहिनां स्यात् ॥ २७ ॥
श्रुतमेतन्मया पूर्वं ज्ञानं विज्ञानसंयुतम् ।
धर्मं भागवतं शुद्धं नारदाद्देवदर्शनात् ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ततः किमत आह, तुष्टे च तत्र तस्मिन्किमलभ्यम् तथाऽपि गुणपरिणामाद्दैवादेव स्वसिद्धा अयत्नतः सिद्धा धर्मादयस्तैः किम् अगुणेन च मोक्षेण काङ्क्षितेन किं तमुपगायतामस्माकम्‌ अकाङ्क्षितस्यापि तस्य सिद्धेः यद्वा माभून्मोक्षस्तस्य चरणयोः सारं जुषां सुधां सेवमानानां तेनापि किमित्यर्थः ॥ २५ ॥

ननु, च धर्मादेरपुरुषार्थत्वे किमित्याचार्याभ्यां वेदोक्तत्वेन सत्यत्वाभिहितस्तत्राऽऽह, धर्मोऽर्थः कामश्चेति यस्त्रिवर्गस्तदर्थं च य ईक्षाद्या अभिहिताः ईक्षा आत्मविद्या त्रयी कर्मविद्या नयदमौ तर्को दण्डनीतिश्च द्विविधा च वार्ता जीविका तदेतत्सर्वं निगमस्यार्थजातं स्वसुहृदः स्वान्तर्यामिणः परमस्य पुंसः स्वात्मार्पणसाधनं चेत्तर्हि सर्वं सत्यं मन्ये सत्यपरत्वात् अन्यथा तदसत्यमेव यद्वा तदेतदखिलं निगमस्य त्रैगुण्यविषयस्य प्रतिपाद्यं मन्ये सत्यं पुनर्निस्त्रैगुण्यलक्षणं परमस्य पुंसः स्वात्मार्पणमेवेत्यर्थः । तदुक्तं भगवता "त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन!" इति ॥ २६ ॥

तेषां पुनर्विश्वासार्थं गुरुसम्प्रदायमाह-ज्ञानमिति । यत्र नारदः श्रोता तत्र कुतो माहशानामधिकार इति माशङ्कीत्याह-भगवत एकान्तभक्तानां यत्पादरजस्तेनाऽऽप्लुतानां स्नातानां देहिनां सर्वेषामपि तज्ज्ञानं स्यान्न तूत्तमानामेवेति नियमः ॥ २७ ॥

अत एव मयापि पूर्वं नारदाच्छ्रुतं विज्ञानसहितमनुभवपर्यन्तं ज्ञानं धर्मं च श्रुतम् ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

गुणेषु सत्त्वादिषु गुणानां सत्त्वादीनां साम्यं यस्मिंस्तस्मिन् प्रधाने मूलप्रकृतावित्यर्थः । गुणव्यतिकरे गुणवैषम्यवति महदहङ्कारादौ चेत्यर्थः ॥ २१ ॥

प्रत्यगात्मस्वरूपेण प्रत्यगात्मा जीवः स्वं स्वासाधारणं रूपं शरीरं यस्य तेन प्रत्यगात्मशरीरकत्वेनेत्यर्थः । दृश्यमचेतनं रूपं यस्य तेन अचेतनशरीरकत्वेन चेत्यर्थः । एकः स्वसमानरहित एव पर आत्मा परमात्मा अन्तः प्रविश्य भर्ता अव्ययः अस्पृष्टशरीरगतविकारः निरस्तनिखिलदोषः षाड्गुण्यपरिपूर्णः ईश्वरो जीवकर्मानुगुणं नियन्ता व्याप्यव्यापकनिर्देश्यः व्याप्येषु व्यापकतया निर्देश्यः अविकल्पितः जातिगुणादिरहितः ॥ केवलोऽनुभवः दुःखप्रतिभटं ज्ञानम् आनन्दरूपं तदेव स्वरूपं यस्य सः परमेश्वरः स्वव्यतिरिक्तेश्वरान्तररहितः गुणसर्गया संसारिणां मोहादिगुणान् सृजतीति तया मायया अन्तर्हितैश्वर्यः संसारिणामप्रकाशमानमहिमा ईयते गम्यते सदाचार्योपदेशेन ज्ञायत इत्यर्थः । उक्तविधतद्याथात्म्यज्ञानपूर्वकं तत्समाश्रयणमात्रमेव तत्प्राप्तिनिमित्ततत्प्रीतिहेतुरुपाय इति भावः । अत्र अविकल्पितः' 'केवलानुभवानन्दस्वरूपः' इति पदद्वयेन "अस्थूलमनण्वह्रस्वम्" 'सत्यं ज्ञानमनन्तम्' 'विज्ञानमानन्दम्" इति श्रुत्यर्थप्रत्यभिज्ञापनेन प्राप्यं ब्रह्मस्वरूपमुक्तम् अवशिष्टैरेक एवेत्यादिभिः प्रथमान्तपदैः 'प्रत्यगात्मस्वरूपेण' दृश्यरूपेण चेति पदद्वयेन च प्राप्यस्य गुणा उक्ताः, "परावरेषु भूतेषु प्रत्यगात्मस्वरूपेण चेत्यनेन जीवस्य तच्छेषत्वापरपर्यायतच्छरीरत्वकथनेन प्राप्तृस्वरूपमुक्तम् "गुणसर्गया माययाऽन्तर्हितैश्वर्यः" इत्यनेनाऽब्रह्मात्मकत्वस्वतन्त्रात्मत्वादिरूपमोहादिप्राकृतगुणगण एव प्राप्तिविरोधीति कथनेन विरोधिस्वरूपमप्युक्तम्. तत्प्राप्तिफलन्तु तच्चरणकैङ्कर्यादिरूपं "सारं जुषां चरणयोः" इति वक्ष्यति. एवमर्थपञ्चकमुपदिष्टं भवति पूर्वम् "उपेतनारायणम्" इति तत्समाश्रयणं कर्तव्यत्वेन विहितं तस्य दुष्करत्वशङ्कापरिहारप्रसङ्गात्समाश्रयणोपयुक्तार्थपञ्चकज्ञानं सदाचार्योपदेशात्सम्पाद्यमित्युक्तम्. एवमर्थपञ्चकज्ञानपूर्वकतत्समाश्रयणमात्रमेव तत्प्रसादजननद्वारा तत्प्राप्तिहेतुरित्यभिप्रेतम्,तत्समाश्रयणञ्च तद्भक्तिप्रपत्त्यन्यतरात्मकमधिकारभेदेन व्यवस्थितमिति तात्पर्यम्॥२२॥२३॥

यदुक्तं "न ह्यच्युतं प्रीणयतो बह्वायासः" इति तदुपसंहरन् तत्प्रीतिनिमित्ततत्सन्तोषजनकं हेत्वन्तरमाह-तस्मादिति । यस्मात् सर्वान्तरात्मत्वादिप्राप्यब्रह्मस्वरूपादिज्ञानपूर्वकतत्समाश्रयणमात्रमेव तत्प्राप्त्यावहतत्प्रीतिहेतुस्तस्माद्यूयं सर्वे आसुरं भावं भूतद्रोहशीलत्वादिरूपम् उन्मुच्य समूलं त्यक्त्वा परमात्मशरीरेषु सर्वेषु भूतेषु ब्रह्मादिस्तम्बपर्यन्तेषु यथोचितं दयां सौहृदञ्च कुरुत ययादयया अधोक्षजो भगवांस्तुष्यति तादृशीं भूतेषु दयां कुरुतेत्यर्थः ॥ २४ ॥

तुष्यत्यधोक्षजः ततः किमत आह—तुष्ट इति । तस्मिन्नाद्ये जगत्कारणभूते अनन्ते भगवति तुष्टे सति अलभ्यं किम्.?न किमपि सर्वं तस्मिन् तुष्टेसति अभिलषितं सुलभमेवेत्यर्थः । यद्यपि सुलभं तथापि निरतिशयपुरुषार्थं रूपतच्चरणारविन्दानुभवरूपममृतमनुभवद्भिः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

मादृशैर्धर्मैश्वर्यकामकैवल्यादिकममृतं पिबद्भिरूषरोदकमिव नेष्यते इत्याभिप्रयन्नाह-किमिति। नोऽस्माकं गुणव्यतिकरात् कर्मानुगुणसत्त्वादिगुणपरिणामादेव स्वसिद्धा अयत्नतस्सिद्धाः ये धर्मादयः धर्मार्थकामाः तैर्धर्मार्थकामैः किं, न किमपि प्रयोजनमित्यर्थः। कांक्षिते नाभिलषितेन अगुणेन गुणत्रयरहितेन कैवल्येन मोक्षेण वा किं सोऽपि न पुरुषार्थ इत्यर्थः। न कथम्भूतानां भगवच्चरणयोः सारमनुभवात्मकममृतसारं जुषतां सेवमानानाम् उपगायतां तद्गुणान् स्तुवतां मनसा तच्चरणारविन्दाऽनुभवामृतम् अनुभवतां वाक्छ्रवणाभ्यां तद्गुणानुभवामृतञ्चानुभवतामस्माकं धर्मादय ऊषरोदकप्राया इत्यर्थः ॥ २५ ॥

ननु, त्वदुक्तमेतत्सर्वं जानन्तोऽप्यस्मद्गुरवस्त्रिवर्गमेव पुरुषार्थत्वेनोपदिदिशुः त्वन्तु त्रिवर्गमनादृत्य भगवच्चरणारविन्दः श्रयणमेव सारतमं मन्यसे किञ्च गुर्वनुशिक्षितान्वीक्षिक्यादिशास्त्रेषु न त्वदुक्तधर्मः कर्तव्यत्वेनोपलभ्यते अतः किं तद्धर्मप्रमापकं तत्राह—धर्मेति धर्मादीनां समाहारद्वन्द्वः पुंस्त्वमार्षम् धर्मोऽर्थः कामश्चेति यस्त्रिवर्गोऽभिहितःअस्मदाचार्यैर्भार्गवादिभिरितिशेषः। यस्त्रिवर्गः पुरुषार्थत्वेनाचार्यैरुक्त इत्यर्थः। यच्च तत्प्रतिपादिकेक्षादिरूपा विद्या च तदेतत्सर्वमहं मन्ये तत्रेक्षा आन्वीक्षिकी संज्ञा तर्कविद्या, त्रयी वेदपूर्वभागः नयदमौ दण्डनीतिप्रतिपादके शास्त्रे, विविधा वार्ता कृष्याद्याजीविकाज्ञानजनकं शास्त्रम्,एतत्सर्वमहं मन्ये जानास्येव, किन्तु यत्स्वसुहृदः परमस्य पुंसो निरुपाधिकसुहृदे, परमपुरुषायेत्यर्थः। सम्प्रदानस्यैव शेषत्वविवक्षया षष्ठी. स्वात्मार्पणं भगवति स्वात्मसमर्पणं तदेतन्निगमस्य वेदोत्तरभागस्य, प्रमेयमिति शेषः। उपनिषद्भागस्य प्रतिपाद्यं सत्यं नित्यम् अक्षयपुरुषार्थसाधनं, मन्य इत्यर्थः। अस्मद्गुरुभिः ज्ञातमप्यहं जानामि नित्यनिरतिशयपुरुषार्थसाधनं भगवत्यात्मसमर्पणं वेदान्तप्रतिपाद्यं त्वधिकारं जानामीत्यर्थः। गुरवस्तु नैतज्जानन्तीत्यभिप्रायः आपाततो जानन्तो वा महदनुग्रहाभावान्नानुष्ठानोपयोगितया निस्संशयं जानन्तीति तात्पर्यं निगमस्येत्यनेनाऽस्मदुक्तार्थे वेदान्तभागः प्रमाणमित्युक्तम्। स च "ओमित्यात्मानं युञ्जीत मुमुक्षुर्वै शरणमहं प्रपद्ये" इत्यादिरूपः स्वात्मार्पणमित्यनेन चोपेतनारायणं हरिमाश्रयेतेत्याद्युक्तमाश्रयणमात्मसमर्पणरूपमिति विवृतम्. भगवति स्वात्मसमर्पणं नाम स्वात्मनो भगवच्छेषत्वैकस्वभावत्वानुसन्धानपूर्वकं भगवति स्वात्मरक्षाभरसमर्पणरूपम् एवं नारायणोपायत्वं नाम तच्छरणागतिरित्युक्तम्भवति. समनन्तराध्याये तदुपायनस्य तद्भक्त्यात्मकत्वं वक्ष्यति एवञ्च यथाधिकारं भक्तिप्रपत्त्यन्यतरात्मकं भगवत्समाश्रयणं कर्तव्यमिति तात्पर्यम् ॥ २६ ॥

ननु, गुरुभिरज्ञातमिदमन्तरेणापि सदुपदेशेन कथ त्वं ज्ञातवानित्याशङ्कायां भगवतो नारदस्यानुग्रहादेवेति वक्तुं तस्य साम्प्रदायिकत्वमाह-ज्ञानमिति। तदेतद्दुरवापं दुर्लभं ज्ञानं नरस्य सखा भगवान्नारायणो वदरिकाश्रमवासी नारदायाह उपदिष्टवान्. ननु, यत्र नारदः श्रोता नारायणो वक्ता तस्मिन्मादृशानां कथमधिकार इति शङ्कां निराह, एकान्तिनामिति एकान्तिनामकिञ्चनानामनन्यप्रयोजनानां भगवतः पादारविन्दरजसा आप्लुतानां स्नातानां देहिनां भगवत्सेवासक्तानां सर्वेषामपि तज्ज्ञानं स्यादेव नतूत्तमानामेवेति नियमः ॥ २७ ॥

अत एव मयापि नारदाच्छ्रुतमित्याह—श्रुतमिति. विज्ञानेन विवेकादिजन्येन संयुतं ज्ञानं शास्त्रोत्थं विशुद्धं भागवतधर्मं भगवद्याथात्म्यवेदिनो नारदाच्छ्रुतं श्रवणेन ज्ञातं भगवतो नारदस्य वचसां श्रवणान्मम ज्ञानविज्ञानसम्पत्तिरभूदित्यर्थः ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

गुणसाम्ये प्रलये गुणव्यतिकरे सृष्टौ ॥ २१ ॥

व्याप्तिप्रकारमाह-प्रत्यगात्मेति। सर्वपदार्थानामन्तः प्रत्यगात्मस्वरूपेणान्तर्यामिरूपेण बहिः कालरूपेण व्याप्तेन प्रज्ञापरपर्यायेण एवमेक एव व्याप्यव्यापकनिर्देश्यो विकल्पिनो द्विविधः कॢप्तः "अन्तर्यामी प्रत्यगात्मा व्याप्तः कालो हरिः स्मृतः" इति वाक्यसिद्धोऽयमर्थः घट इव निर्देश्यो नेत्यनिर्देश्यरूपः ॥ २२ ॥

"अचिन्त्यमव्यपदेश्यमैकात्म्यप्रत्ययसारम्,, इति श्रुतिनिर्दिष्ट इत्याह-केवलेति। सर्वत्र सिद्धश्चेत्किमिति न दृश्यत इति तत्राह-माययेति. मायया प्रकृत्या "तमसा गूढमग्रे" इति श्रुतेः। सत्त्वादिगुणैः सर्गसृष्टिर्यस्याः सा तथा तया ॥ २३ ॥

यतः सर्वभूतानि भगवन्निवासस्थानानि तस्मात्तथाभूतदयया आसुरं भावं द्वेषं "विष्णोर्गृहत्वाद्भूतेषु दया कार्या विजानता" इति स्मृतेः प्रद्विषन्तोऽभ्यसूयका इति ॥ २४ ॥

भगवत्तुष्ट्या किं प्रयोजनमिति तत्राह—तुष्ट इति। ये अनुसिद्धाः जन्मप्रभृतिप्राप्तास्तैर्गुणव्यतिकरैर्विषयसुखैर्हरेश्चरणयोः सारं जुषां गुणलक्षणमकरन्दं सेवमानानां तद्गुणांश्चोपगायतां गायमानानां नोऽस्माकं कांक्षितेनागुणेनान्यैर्वाञ्छितेन मोक्षेण किं अपक्वभक्तिलभ्यमुक्तेर्भक्तेः परमानन्दस्वरूपत्वात्तत्रापि सुखाधिक्यहेतुत्वात्सुतरां धर्मादिभिः सुतमां गुणव्यतिकरैः फलं नास्तीति किमु वक्तव्यम्. मोक्षे सुखमनाकाङ्क्षमाणस्य यथा सुखाधिक्यं भवति यथा मोक्षगतं सुखं काङ्क्षमाणस्य सुखं पूर्णं न लभ्यत इत्यभिप्रायेण कांक्षितेनेति विशेषणम् "काङ्क्षतो मोक्षगमपि दुःखमाकाङ्क्षतो यथा" इति वचनात् ॥ २५ ॥

ननु, शास्त्रविहितानां धर्मादीनां कथङ्कारं साफल्यं भवतीत्याशङ्का परिहरन्नाह-धर्मेति। धर्मार्थकाम इति नामभिन्नो यस्त्रिवर्गः शास्त्रे विहितस्तस्येक्षा ज्ञानमनुष्ठानं च या त्रयी त्रयो वेदास्तेषां शब्दतोऽर्थतश्च ज्ञानं यौ नयदमौ नीतिदण्डशास्त्रे तयोरीक्षा तात्पर्यज्ञानं या च विविधा वार्ता कृषिवाणिज्यादिलक्षणा तदीक्षा प्रयोगज्ञानं वा "ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वश्चतुर्थः" इत्यारभ्य "सर्वदेवयजनं विद्या" इत्यनेन यदुक्तं तस्य सर्वस्यानुकर्षणार्थश्चकारः यदेतदुक्तं तदेतदखिलं परमपुरुषस्य स्वात्मपूर्वकसमर्पणमर्पितुमुद्दिष्टं भवति. तर्हि निगमस्य ऋग्वेदादिसकलशास्त्रपठितस्य सत्यं यथार्थफलमिति मन्ये इत्यन्वयः ॥ २६

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

नेदं स्वमनीषोत्थं किन्तु सम्प्रदायतः प्राप्तत्वाच्छ्रद्धेयमित्याह, ज्ञानमिति। नरसखोऽनन्तसखः अनेन विशेषणेन सनकादिभ्य उपदिष्टमिदमिति ज्ञापितम्. किल शब्देन पुरातनत्वेन ग्राह्यत्वं दर्शयति ज्ञानाधिकारिण आह, एकान्तिनामिति॥ २७॥

तच्च कुतः प्राप्तमेतदत्राह, श्रुतमिति॥ २८॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

पूर्वोक्तं तत्तद्रूपत्वमेवोपपादयति—परावरेष्विति, चतुष्केण। तेषु तेष्विव एव पर आत्मा सर्वेषां मूलस्वरूपो भगवान् स्वरूपभूताऽचिन्त्यतत्तच्छक्तिः। अत एवेश्वरो दुर्घटघटनासमर्थः अत एवाऽव्ययः। स्वेनैव तत्तद्भावेऽप्यधिकारी सन् स्वयमेव प्रत्यगात्मस्वरूपेण जीवरूपेण केषाञ्चित् तन्मात्रज्ञानानामीयते केषाञ्चित्तु ततोऽप्यधमज्ञानानां दृश्यरूपेण प्रधानरूपेण चेयते। तत्र जीवरूपेण व्यापकत्वेन निर्द्देश्यो भवति। प्रधानादिरूपेण तु व्याप्यरूपतयेत्यनेनेत्यर्थः। केषाञ्चित्तु अद्वैत ज्ञानिनां स एव परमेश्वरः आनिर्देश्यः सन्नविकल्पितो भेदमात्रशून्यश्च सन् केवलानुभवानन्दस्वरूप एवेयते नतु स्वरूपशक्तिमयैश्वर्य्ययुक्तः। कथं ? तत्राह, माययेति। तत् कृपया मायान्तर्द्धाने सम्यक् सत्यैवेयते। न तत् प्रकाशत इति भावः तस्यास्तच्छादकधर्मत्वमेव दर्शयति—गुणसर्गायेति। सत्वादि गुणविक्षेपिकायेत्यर्थः। ब्रह्मज्ञानिनामप्यस्ति सत्त्वगुण एवावरक इति भावः॥ २१—२३॥

तस्मात् सर्वेष्वेव भूतेषु नरवात्ममात्रसम्बन्धिषु दयां कुरुत. भगवत एवाधिष्ठानत्वात्। सौहृदमात्मीयबुद्धिं कुरुत॥ २४॥

पूर्वानुसारेणैव भगवत्तोषस्य ब्रह्मसिद्धितोऽप्युत्कृष्टं फलमाह-तुष्टे चेति। अहो नश्वराणि फलानि तत्साधनान्यपि यत् सम्बन्धेनानश्वरत्वफलाय कल्पन्त इत्याह—धर्मार्थेति॥ २५—२६॥

एतादृश ज्ञानस्य विरलत्वं तद्भक्तकृपैकलभ्यत्वञ्चाह—ज्ञानमिति। नरसख इति तत्र श्रीमन्नरस्य तद्भक्तवरस्य कृपामाहात्म्यं दर्शितं यत एवैकान्तिनामिति। साक्षात्तदुपदेशोपि तद्भक्त कृपापेक्षते, किमुतान्यदेवेति भावः॥ २७॥

तत्रैव स्वस्य दर्शयति श्रुतमिति। ज्ञानं तत्प्रतिपादकं वाक्यं यदेव खल्वनुभवपर्य्यन्तं फलं तत्सहायत्वेन भागवतं धर्मञ्च श्रुतम्, तच्चशुद्धमेव नतु ज्ञानकर्मादिमिश्रम्॥ २८—३०॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

नतु, स ज्ञायते चेद्दिशमित्थंकारेण निर्दिश्यतामित्यत आह-प्रत्यगात्मेति। प्रतीचां सर्वजीवानामात्मा परमात्मा तत्स्वरूपेण व्यापकः दृश्यञ्जगत् तद्रूपेण व्याप्य इत्येवं व्याप्यव्यापकनिर्देश्यः वस्तुतः स्वयं ह्यनिर्देश्यः अनिर्देश्योऽपि विकल्पितः उपासकभेदैर्ब्रह्म परमात्माभगवानित्येवं विकल्पविषयीकृतोपि केवल एकोऽनुभवात्मक आनन्द एव स्वरूपं यस्य सः एवं सर्वत्र स्वस्वरूपभूतैश्वर्य्येण प्रकटमेव विराजमानोऽपि मायया स्वाविद्यया हेतुना जीवैर्द्रष्टुमशक्यत्वादन्तर्हितैश्वर्य्यं ईयते. कीदृश्या ? गुणानाम् इन्द्रियैरनुभूयमानानां शब्दादीनां सर्गः सृष्टिर्यतस्तयेति शब्दादय एवानुभाव्यन्ते न तु तत्रैव प्रति तया स्ववृत्त्या सन्नपीश्वरः ईश्वरं प्रतितया स्ववृत्त्या अविद्यया जीवदृष्टरावरणात्तेन—

> "दैवी ह्येषा गुणमयी मम मायादुरत्यया।
> मामेव ये प्रपद्यन्ते मायामेतान्तरन्ति ते"॥

इति भगवदुक्तेस्तद्भक्त्यैव मायातरणे सति स यथायोगं भक्तितारतम्येन निर्देश्योपि भवतीति भावः॥ २२॥ २३॥

यतो भक्तिगम्य एव भगवान् साचभक्तिः सर्वभूतेषुदयासौहृदाभ्यां सुस्थिरानिर्विघ्ना भवत्यतस्ते एव विधत्ते तस्मादिति सौहृदं स्नेहश्च सर्वाणीमानि भूतानि भगच्छक्तिमयत्वाद्भगवद्रूपाणयेन स्वरूपेणापि सर्वत्रैवैतेषु स मत्प्रभुर्विराजत एव श्रीमद्गुरुवैष्णवकृपया यदि मां भक्तिदेवी स्वीकरिष्यति तदा सोऽपि साक्षात् द्रष्टव्य इति बुद्ध्येति भावः यया दयया सौहृदेन च॥ २४॥

ततश्च तस्मिंस्तुष्टे त्वयि धर्मादिभिः काङ्क्षितैः किम् ? न किमपि फलमित्यर्थः। ये गुणानां व्यतिकरात् परिणामात् इह जगति स्वत एव सिद्धाः अगुणेन मोक्षेण च किं यतः चरणयोः सारञ्जुषां सेवमानानाम् उपमोक्षादप्याधिक्येन गायतामिति चरणयोः कमलत्वं सारस्यसौरभ्यमाधुर्य्यादित्वं तत्सेविनां भ्रमरत्वमारोपितं भ्रमरत्वेन स्वाभाविकं कांक्षितान्तरशून्यत्वं व्यञ्जितम्॥ २५॥

ननु, च धर्मादेरपुरुषार्थत्वे कथं त एव गुरुपुत्राभ्यां वेदोक्तत्वेनोक्तास्तत्राह—धर्मार्थ इति। ईक्षा आत्मविद्या त्रयी कर्मविद्या नयदमौ तर्कौ दण्डनीतिश्च विविधा च वार्त्ता जीविका तदेतदखिलं निगमस्यैव सम्यनघि वेदोक्तमेव मन्ये एव ननु, दूषयामि तादृशाधिकारिसम्मतत्वादिति भावः। सत्यं सद्भ्योहितं तु परमस्य पुंसः परमे पुंसि स्वात्मार्पणं स्वस्यात्मनस्तदीयत्वेनार्पणं श्रीस्वामिचरणास्तु तदेतदखिलं निगमस्य त्रैगुण्यविषयस्य प्रतिपाद्यं मन्ये सत्यं पुनर्निस्त्रैगुण्यलक्षणं परस्य पुंसः स्वात्मार्पणमेवेत्यर्थः। तदुक्तं भगवता "त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन!" इति व्याचक्षते स्म॥ २६॥

तेषां विश्वासार्थं गुरुसम्प्रदायमाह—ज्ञानमिति। यत्र नारदः श्रोता तत्र मादृशानां निकृष्टानां कुतोऽधिकार इति नाशङ्कनीयमित्याह, भगवता एकान्तभक्तानां यत्पादरजस्तेनाप्लुतानां स्नातानां देहिनां सर्वेषामपि तज्ज्ञानं स्यात् न तूत्तमानामेवेति नियमः॥ २७॥ २८॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

गुणसाम्ये प्रधाने च गुणव्यतिकरे महदादौ परः सर्वचेतनाचेतनाविलक्षणस्वरूप ईयते धारकत्वनियन्तृत्वादिना निश्चीयते

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आत्मा सर्वेषामात्मा मूलभूतः एको निरस्तसमानातिशयो भगवानेव. ननु, सर्वभूतत्वे सति तस्य विकारित्वं स्यान्नेत्याह, अव्ययः निर्विकारस्वरूपः विश्वं सृजतीति भावः ॥ २१ ॥

स्वरूपेण निर्विकारत्वं सर्वमूलत्वञ्चोपपादयति, प्रत्यगात्मस्वरूपेण "अणुर्ह्येष आत्मा चेतसा वेतसा वेदितव्य एषपरस्यांशः" इत्यादिश्रुतिप्रसिद्धजीवस्वरूपेण स्वांशेन अदृश्येन दृश्यरूपेण "देवात्मशक्तिं स्वगुणैर्निगूढाम्"इत्यादिश्रुतिप्रसिद्धशक्तिविकारेण च व्याप्यव्यापकानिर्देश्यः व्यष्टिसमष्टिकार्यरूपतया ।नदृश्यः स्वयं तु अविकल्पितः स्वरूपतो व्यष्टिसमष्टिकार्यभावेन नैव निरूपितोऽतोनिर्देश्यः परिणामित्वस्थूलत्वकृशत्वादि निर्देशानर्ह इत्यर्थः। यतःप्रत्यगात्मा द्रष्टा भोक्ता तत्स्वरूपेण व्यापकतया अनिर्देश्यः दृश्यं भोग्यं देहादि तद्रूपेण च व्याप्यतया निर्देश्य इत्यादि व्याख्यातं तदयुक्तम् प्रत्यगात्माणुत्वप्रतिपादकश्रुतिविरोधात् प्रत्यगात्मनो भोक्तुर्व्यापकत्वे सति उत्क्रान्त्याद्यसंभवप्रसङ्गात् स्वर्गनरकगतसर्वशरीरविषयकसुखदुःखाद्यनुभवप्रसङ्गाच्च ॥ २२ ॥

सर्वेषु जीवेषु स एवोक्तलक्षणः परमेश्वरो वर्त्तते इत्याह—केवलानुभवानन्दस्वरूप इति । केवलो निरस्तसमानातिशयः अनुभवो ज्ञानं स चावासावानन्दश्च स्वरूपं यस्य सः गुणः गुणात्मकः संसारः सृज्यते इति सर्गः कार्यं यस्याः तया अन्तर्हितमावृतमैश्वर्यं ज्ञानं यस्य तस्मिन् जीवे जातावेकवचनं सर्वेषु जीवेषु ईयते"अन्तःप्रविष्टः शास्ता जनानाम्" इति श्रुतेर्ज्ञायते ॥ २३ ॥

यस्मादेवं तस्मादासुरं भावमुन्मुच्य सर्वेषु भूतेषु दयां सौहृदञ्च कुरुतएतदेव तद्भजनं भवतामनुरूपमिति भावः । ययैव अधोक्षजस्तुष्यति ॥ २४ ॥

तस्मिंस्तुष्टे सर्वं यद्यदिष्टं तदयाचितमेव लब्धं भविष्यति धर्मादिकस्यायत्नलभ्यस्य का कथाऽतिदुर्लभो मोक्षोपि न कामितव्यो निष्कामतया तद्ध्यानमेव कर्तव्यमित्युपदिशति, तुष्टे—चेति । तस्मिन् तुष्टे सति किमलभ्यं न किमपीत्यर्थः । एवं सति उपगायतां तद्गुणादिकीर्तननिष्ठानां चरणयोः सारं सौन्दर्यजुषतां सेवमानानां तच्चरणध्यातृणां नोऽस्माकं यदा अगुणेन प्राकृतगुणसम्बन्धरहितेन मोक्षेणाप्याकाङ्क्षितेन किं, न किमपि तदा गुणव्यतिकरात् प्रकृतिगुणपरिणामात् स्वसिद्धाः अयत्नलभ्याः अर्थात्संसारे भ्रमता जीवेन यत्र कचन लभ्याः एव ये धर्मादयः धर्मार्थकामाः तैराकांक्षितैः किं, न किमपीत्यर्थः हरिदासेन यदि भजनफलभूते मोक्षेपि आकाङ्क्षा न कार्या तर्हि धर्मादिषु कुत इति फलितोऽर्थः ॥ २५ ॥

ननु,वेदोक्तानि कर्मज्ञानाद्यात्मकानिबहूनि श्रेयस्साधनान्यनादृत्य चरणयोःसारं जुषामिति परमपुरुषचरणध्यानमेव कुतोमुख्यं श्रेयस्साधनं मन्यसे इत्यत्र सर्वस्य वेदोक्तसाधनजातस्य परमपुरुषचरध्यानाङ्गत्वान्न कस्याप्यनादर इत्याह, धर्मार्थेति । परमस्येति अधिकरणस्य शेषत्वविवक्षया षष्ठी परमे पुंसि अंशिनि आत्मनोंऽशभूतस्यार्पणं परमपुरुषस्वरूपगुणाचिन्तया नियोजनंप्रति निगमस्यार्थं भूतं यदेतदखिलं धर्मादिकं श्रेयःसाधनं सत्यं मन्ये इत्यन्वयः। धर्मादीनां समाहारद्वंद्वे पुंस्त्वमार्षम्। धर्मादिरूपस्त्रिवर्गो योऽभिहितो वर्णित ईक्षा आत्मानात्मपरमात्मस्वरूपगुणादिज्ञानम् त्रयी कर्मविद्या नयदमौ तर्को दण्डनीतिश्च विविधा वार्त्ता जीविकाः तत्र धर्मस्य हृत्शुद्धिद्वारा ज्ञानसाधनत्वं ज्ञानस्य श्रुवास्मृतिपरभक्तियोगादिपदवाच्यपरध्यानसाधनत्वम्,अन्यस्य सर्वस्य जीवनद्वाराधर्मसाधनत्वमितिदिक् "सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्" इतिसूत्रमत्रानुसन्धेयम् ॥ २६ ॥

यदन्यैर्दुरवापं तदेतज्ज्ञानम् नारदाय अस्मद्गुरवे नरसखो नारायण आह उक्तवान् तदधुना एकान्तिनां मुमुक्षूणां भगवतः पादारविन्दरजसा आप्लुतदेहिनां स्यान्नान्येषाम् ॥ २७ ॥

विज्ञानेनाऽनुभवेन संयुतम् धर्मं धर्मरूपम् भागवतं भगवत्प्राप्तिसाधनम् एतज्ज्ञानं मया नारदाच्छ्रुतम् ॥ २८ ॥

भाषाटीका ।

स्वयं अनिर्देश्य और अविकल्पित जो ईश्वर है वही चेतनाचेन शरीर वाला होने से व्याप्य और व्यापक पने से निर्देश करने के योग्य है ॥ २२ ॥

वही केवलानुभव और आनन्द स्वरूप वाला होकर भी परमेश्वर है अर्थात् ईश्वरों का भी ईश्वर निरवधिक नियंता है परंच जीवों को मोहादि गुणों की सृष्टि करने वाली माया से अंतर्हित ऐश्वर्य प्रतीत होता है ॥ २३ ॥

हे दैत्य बालकों ! तस्मात् तुम लोग आसुर भाव को छोड़ कर सर्व प्राणियों पर दया करो और सौहृद रखो जिससे हरि प्रसन्न होवैं ॥ २४ ॥

सब से आदि में होने वाला और जिसका अंत नहीं ऐसा जब ईश्वर प्रसन्न होजाय तब क्या अलभ्य है तथापि जो प्रारब्ध के आधीन धर्मादिक आपही सिद्ध हैं उन सब से क्या प्रयोजन हैं और चरण रजकी सेवा करने वाले और चरणों के गुण गान करने वाले हम लोगों को मोक्ष से भी क्या प्रयोजन है ॥२५॥

धर्म अर्थ और काम यह कथितजो त्रिवर्ग तथा आत्मविद्या और कर्मविद्या तर्क दण्डनीति और दो प्रकारकी जीविका यह सम्पूर्ण निगमअर्थ, जो परम सुहृद परमात्माको जो आत्मा अर्पण करदेवेतो सर्व सत्य है, नहीतो असत्यही है ॥ २६ ॥

यह निर्मल और दुर्लभज्ञान नरके सखा श्रीमन्नारायणने नारद को दियारहा सो यह ज्ञान एकांती और भगवान के चरण कमलकी रजसे स्नान करने वाले अकिञ्चनमहात्माओं को होता है ॥ २७ ॥

मैने यह ज्ञान प्रथम देव दर्शन श्रीनारदजी के मुखसे सुना है और विज्ञान सहित शुद्धभागवत धर्म भी सुना है ॥ २८ ॥

दैत्यपुत्रा ऊचुः ।

प्रह्लाद ! त्वं वयं चापि नर्तेऽन्यं विद्महे गुरुम् ।
एताभ्यां गुरुपुत्राभ्यां बालानामपि हीश्वरौ ॥ २९ ॥
बालस्यान्तःपुरस्थस्य महत्सङ्गो दुरन्वयः ।
छिन्धि नः संशयं सौम्य ! स्याच्चेद्विस्रम्भकारणम् ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायाम्
वैयासिक्यां सप्तमस्कन्धे प्रह्लादानुचरिते
षष्ठोऽध्यायः ॥ ६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्रातिविस्मिताः पृच्छन्ति-प्रह्लादेति । हे प्रह्लाद ! त्वं वयमेताभ्यां शण्डामर्काभ्यामृते ऽन्यं गुरुं न विद्मः एतदागमनात्पूर्वमेवाहं नारदपार्श्वे गत इति चेत्तत्राऽऽहुः, बालानामप्यतिशिशूनामस्माकमेतावीश्वरौ नियन्तारावतस्तवान्यत्र गमनं न सम्भवति ॥ २९ ॥

स एवात्रागत इत्यपि न सम्भवतीत्याहुः—बालस्येति । दुरन्वयो दुर्घटः विश्रम्भकारणं विश्वासहेतुः ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्र विस्मिताः पृच्छन्ति दैत्यकुमाराः—प्रह्लादेति । हे प्रह्लाद ! त्वं वयञ्चाप्येताभ्यां गुरुपुत्राभ्यामृते विनाऽन्यं गुरुं न विद्महे, एतदागमनात्पूर्वमेवाहं नारदपार्श्वे गत इत्यत्राहुः, बालानामपि शिशूनामपि सतामस्माकमेतावेवेश्वरौ नियन्तारौ अतस्तवान्यत्र गमनं न सम्भवतीति नः शङ्का वर्त्तत इत्यर्थः ॥ २९ ॥

नारद एवात्रागत इति न सम्भवतीत्याहुः—बालस्येति । अन्तःपुरस्थस्य बालस्य तव महतो नारदस्य सङ्गो दुरन्वयो दुर्घटः हे सौम्य, प्रह्लाद ! नोऽस्माकं संशयं छिन्धि अपनुद विस्रम्भकारणं विश्वासहेतुः स्याच्चेत् असम्भावितत्वेनाऽस्माभिरविश्वसनीयो नारदसङ्गमः त्वदुक्तस्तत्र यद्यस्माद्विश्वासहेतुरस्ति चेत्तदुपपादनपूर्वकं तत्सङ्गतिविषयं संशयं छिन्धीत्यर्थः ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एतस्मिन्नवसरे दैत्यपुत्राः प्रह्लादकथितार्थशङ्कया तं पृच्छन्तीत्याह—प्रह्लादेति । एताभ्यां गुरुपुत्राभ्यां शण्डामर्काभ्यामृते नान्यं गुरुं विद्महे यस्मात् किञ्च विज्ञानञ्चेश्वरविषयं विवक्षितं तदुपाधिनापि बालानामक्षराभ्यासनिरतानामस्माकमीश्वरो न कांक्षित इति यस्मात् अन्यगुर्वभावेऽपीश्वर उपदेष्टा स्यादतो वाह, बालानामिति । बालानामीश्वरोऽस्त्यपि किं नास्तिप्रतिपत्त्यभावात् ॥ २९ ॥

कस्मिंश्चिदवसरे देशान्तरेऽन्यगुरुसङ्गतिः किं न स्यादिति तत्राह, बालस्येति । तस्मादुत्पन्नं नः संशयं जहीत्यन्वयः तत्र कृत्यमाहुरित्याह, स्यादिति ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सविस्मयं पृच्छन्ति—प्रह्लादेति । एताभ्यामृतेऽन्यं गुरुं न विद्मः बालानामीश्वराविति त्वयाऽप्येतद्दूरतात् खलुन्मोच्य तत्पार्श्वे गन्तुमशक्यमिति भावः ॥ २९ ॥

स एवात्रागत इत्यपि न सम्भवतीत्याहुः, बालस्येति ॥ ३० ॥

इति सारार्थदर्शिन्याम् हर्षिण्याम् भक्तचेतसाम् ।
षष्ठोऽध्यायः सप्तमस्य सङ्गतः सङ्गतः सताम् ॥ ६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे प्रह्लाद ! एताभ्याम् अन्यं ते गुरुं, वदसीति शेषः । वयन्तु न विद्महे न विद्मः एतावेव नो बालानामीश्वरौ गुरू अनयोर्भयाद्‌न्यत्र गमनासम्भवादिति भावः ॥ २९ ॥

नारदेन सह तव समागम इह न सम्भवतीत्याहुः, अन्तःपुरस्थस्य महता नारदेन सह सङ्गमो दुरन्वय इति विस्रंभस्य विश्वासस्य कार्यं मूलं स्यादस्ति चेत्तर्हि तद्दर्शनेन संशयं छिन्धि ॥ ३० ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

षष्ठाध्यायार्थप्रकाशः ॥ ६ ॥

भाषा टीका ।

दैत्यपुत्रा ऊचुः ।

दैत्यपुत्र बोले, कि—हे प्रह्लाद ! तुम और हम सब भी इन दोनो गुरुपुत्रों को छोड कर तीसरे किसी गुरू को जानते ही नहीं, क्योंकि ? हम लोगों के छोटी अवस्था से यही बोध शिक्षक हैं ॥ २९ ॥

और भीतर रानिवास में रहने वाले तुमको तौ महत्सङ्ग बहुत ही दुर्लभ है, हे सौम्य ! जो हम लोगों पर विश्वास हो ? तो यह हमारा संशय दूर करो ॥ ३० ॥

इति श्रीमद्भागवत महापुराण सप्तमस्कन्ध, षष्ठ अध्याय

की भागवताचार्यकृत भाषा टीका

समाप्त ॥ ६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे षष्ठोऽध्यायः ॥ ६ ॥

॥ सप्तमोऽध्यायः ॥

नारद उवाच ।

एवं दैत्यसुतैः पृष्टो महाभागवतोऽसुरः ।
उवाच स्मयमानांस्तान्स्मरन्मदनुभाषितम् ॥ १ ॥

प्रह्लाद उवाच ।

पितरि प्रस्थितेऽस्माकं तपसे मन्दराचलम् ।
युद्धोद्यमं परं चक्रुर्विबुधा दानवान्प्रति ॥ २ ॥
पिपीलिकैरहिरिव दिष्ट्या लोकोपतापनः ।
पापेन पापोऽभक्षीति वादिनो वासवादयः ॥ ३ ॥
तेषामतिबलोद्योगं निशम्यासुरयूथपाः ।
वध्यमानाः सुरैर्भीता दुद्रुवुः सर्वतो दिशम् ॥ ४ ॥
कलत्रपुत्रमित्राप्तान् गृहान् पशुपरिच्छदान् ।
नावेक्षमाणास्त्वरिताः सर्वे प्राणपरीप्सवः ॥ ५ ॥
व्यलुम्पन् राजशिबिरममरा जयकाङ्क्षिणः ।
इन्द्रस्तु राजमहिषीं मातरं मम चाग्रहीत् ॥ ६ ॥
नीयमानां भयोद्विग्नां रुदतीं कुररीमिव ।
यदृच्छयागतस्तत्र देवर्षिर्ददृशे पथि ॥ ७ ॥
प्राह मैनां सुरपते ! नेतुमर्हस्यनागसम् ।
मुञ्च मुञ्च महाभाग ! सतीं परपरिग्रहम् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सप्तमे मातृगर्भस्थे स्वस्मिन्नारदभाषितम् ।
प्रह्लादो वर्णयामास शिष्यप्रत्ययसिद्धये ॥ १ ॥
अश्रावि नारदादेतन्मया गर्भ इतीरितुम् ।
तत्प्रस्तावकथामाह पद्यैः षोडशभिः सुधीः ॥ २ ॥ १ ॥

अस्माकं पितरि हिरण्यकशिपौ स्वकृतेनैव पापेन पापोऽसावभक्षि भक्षित इति हर्षेण वदन्तो युद्धोद्यमं चक्रुः ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

राज्ञः शिबिरमावासं व्यलुम्पन् सर्वस्वापहारेण नाशितवन्तः ॥ ६ ॥ ७ ॥

अनागसं निरपराधामेनां नेतुं मार्हसीति प्राह, ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

दैत्यकुमारैरेवं पृष्टः प्रह्लादस्तत्सङ्गतिहेतुमुपपादयंस्तत्त्वत्रय-याथात्म्योपदेशपूर्वकं सपरिकरं भगवद्भक्तियोगमुपदिष्टवानित्याह,

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

भगवान्नारदः-एवमिति । एवम् इत्थं दैत्यसुतैः पृष्टो भागवतोत्तमः प्रह्लादस्तान्दैत्यपुत्रान्प्रति स्मयमानो मया नारदेनानुभाषितं स्मरन्नुवाच ॥ १ ॥

तदेवाह—पितरीत्यादिना, नाऽधुनाप्यजहात्स्मृतिरित्यन्तेन । अस्माकम् पितरि हिरण्यकशिपौ तपसे तपः कर्तुं मन्दराचलंप्रति प्रस्थिते प्रयाते सति इन्द्रादयो विबुधा देवाः दानवान्प्रति युद्धोद्यमं चक्रुः ॥ २ ॥

कथम्भूतास्सन्तः लोकोपतापनः लोकानां दुःखकारी पापः पापात्मा स्वपापेनैव दैवात्पिपीलिकैरहिः सर्प इव अभक्षि भक्षितः इति वादिनो वदन्तः सन्तः वासव इन्द्र आदिर्येषां ते युद्धोद्यमं चक्रुरिति पूर्वेणान्वयः ॥ ३ ॥

ततः किं जातम् ? तत्राह—तेषां वासवादीनां बलोद्योगं बलप्रयुक्तयुद्धोद्योगं निशाम्य दृष्ट्वा सुरैर्वध्यमाना अत एव भीताः सन्तोऽसुरयूथपाः सर्वे त्वरिताः सर्वतो दिशं दुद्रुवुः पलायितवन्तः ॥ ४ ॥

कथम्भूताः कलत्रादीन् नावेक्षमाणास्तेषु त्यक्तस्पृहा इत्यर्थः, तत्र हेतुः, सर्वे प्राणपरीप्सवः प्राणमात्रपरित्राणेच्छवः तत्र परिच्छदा भोगोपकरणानि ॥ ५ ॥

ततो जयशालिनोऽमरा देवाः राज्ञो हिरण्यकशिपोः शिबिरं गृहं व्यलुम्पन् सर्वस्वापहारेण नाशितवन्तः इन्द्रस्तु राज्ञो हिरण्यकशिपोर्भार्यां मम मातरमग्रहीत् ॥ ६ ॥

तांश्चेन्द्रेण नीयमानामत एव भयोद्विग्नां कम्पितां कुररीमिव क्रन्दन्तीं रुवतीं देवर्षिर्नारदो यदृच्छयोपगतः पथि ददर्श प्राह च ॥ ७ ॥

तदेवाह—हे सुरपते! अनागसं निरपराधामेनां नेतुं त्वं नार्हसि अतो हे महाभाग ! परेणाऽन्येन हिरण्यकशिपुना परिगृहीतां परदारानित्यर्थः, मुञ्च मुञ्च ॥ ८ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

श्रुतेषु सत्सु साधनानां भक्तेरेव प्राधान्यं हरेर्मुख्यप्रसादजनकत्वाद्भक्तिरेव पुरुषेणापाद्येत्यादिकं निरूप्यतेऽस्मिन्नध्याये, भक्तिप्रतिपादनात्मकत्वादस्य शास्त्रस्य पुनः पुनस्तत्प्रतिपादनान्न पुनरुक्तिशङ्का कार्या तत्र दैत्यपुत्रैः पृष्टः प्रह्लादः किं चकारेति युधिष्ठिरशङ्कान्वितस्तां परिहरन्नारद आह—नारद इति। नारदस्य मयाऽनुशासनम् ॥ १ ॥ २ ॥

अहिः सर्पः पिपीलिकैर्यथा भक्ष्यते तथा लोकोपतापनः पापो हिरण्यकशिपुः स्वपापेनाऽभक्षि नष्टप्रायोभूत् दिष्ट्या सुखमस्तु लोकार्थमिति ब्रुवाणाः "दिष्ट्या ह्यसुपतोपश्च" इत्यमरः ॥ ३—५ ॥

व्यलुम्पन् जयकांक्षिणो जितयुद्धाः असुरजयेन प्रकाशमानाना ॥ ६ ॥ ७ ॥

तवोपभोक्तुं योग्या न भवतीत्याह—परपरिग्रहमिति ॥ ८॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १—९ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सप्तमे नारदात् प्राप यज्ज्ञानं मातृगर्भगः ।
तदेवोपादिशद् बालान् भक्तिं प्रेम च तत्फलम् ॥

॥ १—५ ॥

राज्ञो हिरण्यकशिपोः शिविरं आवासं व्यलुंपन् सर्वस्वापहारेण नाशितवन्तः ॥ ६—८ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तद्विश्वासकारणं सप्तमे वर्ण्यते एवमुक्तरीत्या ॥ १ ॥

तपसे तपःकर्तुं मन्दराचलमस्माकं पितरि हिरण्यकशिपौ प्रस्थिते सति तत्रापि पिपीलिकैर्भक्षिते सति तदा वासवादयः पिपीलिकैरहिरिव लोकोपतापनः पापः पापेनाऽभक्षि भक्षित इति वदन्तो दानवान् प्रति युद्धोद्यमं चक्रुरिति द्वयोरन्वयः ॥ २ ॥ ३ ॥

अतिबलेन उद्योगं यत्नम् ॥ ४ ॥

नावेक्षमाणाः तत्प्रतीक्षामकुर्वाणाः ॥ ५ ॥

राजशिबिरं राजस्थानम् व्यलुम्पन् सर्वस्वापहारेण शून्यं कृतवन्तः ॥ ६ ॥

यदृच्छया भाग्यवशात् ॥ ७ ॥

परपरिगृहं परदारान् अनागसं नास्त्यागोऽपराधो यस्यास्ताम् एनां नेतुं नार्हसीति प्राह, ॥ ८ ॥

———

भाषा टीका ।

श्रीरुक्मिणीकान्ताय नमः ।

नारद उवाच ॥

नारदजी बोले, कि-इस प्रकार दैत्य पुत्रों ने महा भागवत प्रह्लाद को जब पूंछा तब प्रह्लाद विस्मय को प्राप्त होने वाले दैत्यपुत्रों के प्रति मेरे भाषण का स्मरण करता हुआ बोला ॥ १ ॥

प्रह्लाद उवाच ।

प्रह्लाद बोला, कि हमारे पिता जब तप के लिये मन्दराचल

इन्द्र उवाच ।

आस्तेऽस्या जठरे वीर्यमविषह्यं सुरद्विषः ।
आस्यतां यावत्प्रसवं मोक्ष्येऽर्थपदवींगतः ॥ ९ ॥

नारद उवाच ।

अयं निष्किल्बिषः साक्षान्महाभगवतो महान् ।
त्वया न प्राप्स्यते संस्थामनन्तानुचरो बली ॥ १० ॥
इत्युक्तस्तां विहायेन्द्रो देवर्षेर्मानयन्वचः ।
अनन्तप्रियभक्त्यैनां परिक्रम्य दिवं ययौ ॥ ११ ॥
ततो नो मातरमृषिः समानीय निजाश्रमम् ।
आश्वास्येहोष्यतां वत्से ! यावत्ते भर्तुरागमः ॥ १२ ॥
तथेत्यवात्सीद्देवर्षेरन्ति साऽप्यकुतोभया ।
यावद्दैत्यपतिर्घोरात्तपसो न न्यवर्त्तत ॥ १३ ॥
ऋषिं पर्यचरत्तत्र भक्त्या परमया सती ।
अन्तर्वत्नी स्वगर्भस्य क्षेमायेच्छाप्रसूतये ॥ १४ ॥
ऋषिः कारुणिकस्तस्याः प्रादादुभयमीश्वरः ।
धर्मस्य तत्त्वं ज्ञानं च मामप्युद्दिश्य निर्म्मलम् ॥ १५ ॥
तत्तु कालस्य दीर्घत्वात् स्त्रीत्वान्मातुस्तिरोदधे ।
ऋषिणानुगृहीतं मां नाधुनाऽप्यजहात्स्मृतिः ॥ १६ ॥

भाषा टीका ।

को गये, तब देवताओं ने दानवों के प्रति युद्ध का बडा उद्यम किया ॥ २ ॥

और देवता लोग बोले, कि–भला भया सब लोकों को दुःख देने वाले पापी को उसी के पाप से सर्प के नाई पिपीलिकाओं ने भक्षण करलिया ॥ ३ ॥

देवताओं की सेना का उद्योग देखकर असुर यूथप लोग भी भयभीत होकर ताडित हुए २ अपने २ स्त्री पुत्र मित्र आप्त लोकों को तथा गृह पशु और उपकरणादि को न देख कर बड़ी जल्दी सब दिशाओं को प्राण लेकर भाग गये ॥४–५॥

जीत की इच्छा वाले देवता लोगों ने भी राजा के निवास स्थान का भङ्ग कर दिया, और इन्द्र ने राजमहिषी मेरी माता को ग्रहण कर लिया ॥ ६ ॥

तब भय से उद्विग्न कुररी (पक्षिणी) के तरह रोनेवाली मेरी माता को इन्द्र ले चला, इतने में अकस्मात् उस मार्ग में आप हुए नारदजी दिखाई पडे ॥ ७ ॥

और नारद जी बोले, भी कि–हे सुरपते ! हे महाभाग ! तुम इस विचारी निरपराधिनी पराई स्त्री को लेजाने के योग्य नहीं हो, इस विचारी सती को छोडो २ ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अविषह्यं दुःसहम् अतोऽनया प्रसवपर्यन्तमत्रास्यताम् ततश्चार्थस्य पदवीं मार्गं गतः प्राप्तः सन् जातं पुत्रं हत्वा मोक्ष्यामीत्यर्थः ॥ ९ ॥

साक्षात्स्वगुणैरेव महान् न तु पित्रादिसम्बन्धात् त्वया हेतुभूतेन संस्थां मृत्युं न यास्यति तत्र हेतवो निष्किल्बिष इत्यादयः ॥ १० ॥

अनन्तस्य प्रियो योऽहं स वा प्रियो यस्य तस्य मम भक्त्या एनां प्रदक्षिणीकृत्य ॥ ११ ॥

इहोष्यतामित्याहेति शेषः ॥ १२ ॥

अन्ति समीपे ॥ १३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अन्तर्वत्नी गर्भिणी इच्छया भर्त्तुरागमनानन्तरं प्रसूतये एवमपि स्वगर्भस्य क्षेमाय ॥ १४ ॥

तस्याः शोकशान्त्यै धर्मस्य तत्त्वं भक्तिलक्षणम् ज्ञानमात्मानात्मविवेकस्तदुभयं प्रादात् ईश्वरः समर्थः ॥ १५ ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्युक्त आहेन्द्रः–आस्त इति। अस्याः जठरे कुत्त्वावविषह्यमस्माभिः सोढुमशक्यं सुरद्विषो हिरण्यकशिपोः वीर्यं गर्भरूपेण वर्द्धमानमास्ते तिष्ठत्यतोऽनया प्रसवपर्यन्तमास्यताम् मत्समीपे स्थीयतां ततश्चार्थस्य पदवीं मार्गं गतस्सन् मोक्ष्ये जातं पुत्रं हत्वा एनां त्यजामीत्यर्थः ॥ ९ ॥

एवमुक्तो देवर्षिराह–सोयमिति। सोयं गर्भस्थः शिशुस्त्वया हंत्रा संस्थां मरणं न प्राप्स्यते. तत्र हेतुं वदन् तमिमं विशिनष्टि, निष्किल्विषः मरणनिमित्तप्राचीनकिल्विषराहितः, तत्कुतः? महाभागवतः भगवद्भक्त्यैव ध्वस्तकिल्विष इति भावः। महागुणैः श्रेष्ठः अनन्तस्य भगवतोऽनुचरः बली महाबलसम्पन्नः यद्यपि गर्भस्थदशायां स्वानुग्रहात्पूर्वं न भागवतत्वादयो धर्मास्तथापि समनन्तरमेव स्वेनानुग्रहीष्यमाणस्य पुनर्जन्मकाले"जायमानं हि पुरुषं यं पश्येत्"इत्युक्तरीत्या भगवतेक्षिष्यमाणस्य उक्तधर्मान्वय इत्यभिप्रायेण निष्किल्विष इत्यादीनि विशेषणान्युक्तानि। ननु, इन्द्रेण मुक्तांप्रति स्वोपदेशे सति तद्गर्भस्थस्योक्तधर्मसम्पत्तिः तस्य तद्धर्मसम्पत्तौ हि तद्धेतुकस्तत्त्याग इतीतरेतराश्रयत्वमिति कथं देवर्षिणैवमुक्तमिति चेन्मैवं गर्भस्थं नितरामीश्वरकटाक्षविषयमत एव——

"ईश्वरस्य च सौहार्द्दं यदृच्छा सुकृतं तथा।
विष्णोः कटाक्ष अद्वेष आनुकूल्यं च सात्त्विकैः॥
संभाषणं षडेतानि ह्याचार्यप्राप्तिहेतवः"।

इत्युक्तहेतुषट्कसम्पन्नं दैवज्ञो देवर्षिराज्ञस्य त्वयैतस्यामनुरुध्यमानायामप्यहमुक्तधर्मयुक्तं नूनं करवाण्यतोऽयं त्वया संस्थां न प्राप्स्यतीत्युक्तवानिति नेतरेतराश्रयः ॥ १० ॥

इतीत्थमुक्त इन्द्रो देवर्षेर्नारदस्य वचो मानयन् गौरवादभ्युपगच्छन् तां राजमहिषीं विहाय अनन्तस्य भगवतः प्रियो योऽहं तस्य मम भक्त्या एनां मन्मातरं परिक्रम्य प्रदक्षिणीकृत्य दिवं प्रति ययौ ॥ ११ ॥

ततः ऋषिर्नारदः मम मातरं स्वाश्रमंप्रति समानीय सम्यगनायासेन उन्नीय गमयित्वा आश्वास्य सांत्वयित्वा हे वत्से, बाले! तव भर्तुर्यावदागमः तावत्पर्यन्तं त्वया इहास्मिन्मदाश्रमे उष्यतां स्थीयतामित्युवाचेति शेषः ॥ १२ ॥

ततस्तथेत्यङ्गीकृत्य सा मन्माता देवर्षेरन्तिके समीपे नास्ति कुतोऽपि भयं यस्यास्तादृशी अवात्सीदुषितवती ॥ दैत्यपतिरुग्रात्तपसो यावन्नन्यवर्त्तत तावत्सती मन्माता अन्तर्वत्नी गर्भिणी स्वगर्भस्य क्षेमाय रक्षणायेच्छया स्वभर्तुरागमनानन्तरं प्रसूतये च परमया भक्त्या ऋषिं नारदं पर्यचरत् शुश्रूषितवती ॥ १३ ॥ १४ ॥

ततस्तां देवर्षिरनुजग्राहेत्याह–ऋषिरिति। ईश्वरः समर्थ ऋषिः तस्याः परिचरन्त्याः मन्मातुर्मामप्युद्दिश्य निर्मलं धर्मस्य तत्त्वं ज्ञानञ्चेत्युभयं प्रादात् धर्मो भगवद्भक्तियोगलक्षणः तस्य तत्त्वं याथात्म्यं तदङ्गभूतं ज्ञानं देहविविक्तप्रत्यगात्मयाथात्म्यज्ञानं च प्रादात् उपदिष्टवान् इत्यर्थः ॥ १५ ॥

तदृद्वयामुपदिष्टं तदुभयं मम मातुः स्त्रीत्वात् कालस्य दीर्घत्वाच्च तिरोदधे, विस्मृतमभूदित्यर्थः। ऋषिणा भगवता नारदेनाऽनुगृहीतं मां तु सा स्मृतिस्तदुपदेशजनितं स्मृत्यात्मकं ज्ञानमधुनापि नाजहात् न तत्याज ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सुरद्विषो हिरण्यकशिपोर्वीर्यं रेतोलक्षणम् अस्या यावत्प्रसवस्तावन्मम वशे आस्यतां पश्चादहं मोक्ष्ये ततःपूर्वं कस्मान्मुञ्चसीति तत्राह, अर्थपदवीमिति ॥ ९ ॥

अनया प्रसूतः पुत्रो हन्तुं त्वया न शक्यत इत्याह, न त्वयेति संस्थां मरणं कुतोऽत्राह, अनन्तेति ॥ १० ॥

अनन्तप्रियः श्रीनारायणो अस्य भक्त्या अनन्तस्य हरेः प्रियबहुमानलक्षणा भक्तिरनन्तप्रिया भक्तिस्तया वा ॥ ११ ॥

तावदत्रोष्यतामित्याह—यावदिति ॥ १२ ॥

अभ्यान्तिके ॥ १३ ॥

अन्तर्वत्नी गर्भिणी ॥ १४ ॥

गर्भक्षेममिच्छाप्रसवञ्चेत्युभयम्. ईश्वरो वरप्रदानसमर्थः नारदाच्छ्रुतमित्यनेन नारदस्य बहुरुत्वमभिप्रेतमेवंविधमित्याह–धर्मस्येति। धर्मस्य हरेर्भागवतसंज्ञस्य वा तत्त्वं तदुभयंविधज्ञानं यद्गर्भस्थं मामुद्दिश्य मात्रे उपदिष्टम् ॥ १५ ॥

तदुभयं तयोः कालस्यातिक्रान्तत्वात् स्त्रीत्वात् शब्दादिविषयलौल्याच्च मातुस्तिरोहितमभूदित्यन्वयः "अनुरेषधर्मः" इति श्रुतिः। धर्मो हरिस्ततस्तव किमभूदिति तत्राह, ऋषिणेति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अनन्तानुचर इति। तस्य पूर्वत एव भक्तिसंस्कारो दर्शितः ॥ १०—१४ ॥

ऋषिरिति। शोकमात्रशान्त्यै धर्मस्य तत्त्वं साधारणस्वरूपं ज्ञानञ्चात्मविषयं प्रादात् तत्रैव मामप्युद्दिश्य निर्मलं यद्धर्मस्यैतस्य तत्त्वं भागवताख्यम्"न शोभते ज्ञानमलं निरञ्जनम्" इति न्यायेन ज्ञानञ्च यत्तदाख्यं तत् प्रादात् तत्कथने तत्तदपि प्रतिपादितवान्। किन्तु सा गृहीतुं न शशाकेति भावः ॥ १५ ॥

भवतामपि भूयान्मे यदि श्रद्दधते वचः।
वैशारदी धीः श्रद्धातः स्त्रीबालानां च मे यथा ॥ १७ ॥
जन्माद्याः षडिमे भावा दृष्टा देहस्य नात्मनः।
फलानामिव वृक्षस्य कालेनेश्वरमूर्तिना ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

तत्त्विति तदपीत्यर्थः। तेनैव स्वमातरि श्रीनारदस्य सम्यगनुग्रहो नाभूदिति व्यञ्जितम् ॥ १६—१७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

आस्यतां मत्कारागार एव प्रसवपर्य्यन्तमनया स्थीयतां अर्थपदवीं स्वार्थमार्गं गतः प्राप्तस्सन् मोक्ष्ये जातं पुत्रं हत्वा इमां मोक्ष्यामीत्यर्थः ॥ ९ ॥

त्वया हेतुभूतेन संस्थां मृत्युम् ॥ १० ॥

अनन्तप्रिये मयि या भक्तिस्तया हेतुना परिक्रम्य एतद्गर्भस्थाय हरेर्भक्ताय नम इति प्रणम्य च ॥ ११ ॥ १२ ॥

अन्ति अन्तिके ॥ १३ ॥

भर्त्तुरागमनानन्तरमेव वा इच्छयाप्रसूतिस्तस्यै ॥ १४ ॥

उभयं गर्भक्षेमं स्वेच्छाप्रसवं च निर्मलमिति विशेषणात् धर्मस्य तत्त्वं भक्तियोगं भागवतसम्मतं ज्ञानञ्च मामपीत्यपिकारेण मन्मातरमपि ॥ १५ ॥

तर्हि मातुस्ते भक्तिः कथं न दृश्यत इत्यत आह—तत्त्विति। तत्रापि बालत्वात् कालदैर्घ्याच्च कथं न तिरोदधे तत्राह, ऋषियेति। तेन मन्मातुस्तदनुगृहीतत्वाभावात् स्त्रीत्वकालदैर्घ्ये तत्र प्राभूतामिति भावः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

सुरद्विषो हिरण्यकशिपोः। अविषह्यं दुस्सहं वीर्यमस्याः जठरे आस्ते अतः अनया यावत्प्रसवमास्यतां ततश्चार्थपदवीं गतस्तमविषह्यं हत्वा एनां मोक्ष्ये ॥ ९ ॥

यतोऽयमनन्तानुचरः अतो महान्बली साक्षान्महाभागवतः अतस्त्वया संस्थां न प्राप्स्यते ॥ १० ॥

अनन्तप्रियस्य मम भक्त्या एनां परिक्रम्य तां तथाभूतां सत्कृतां विहाय ययौ ॥ ११ ॥

इहास्मिन् आश्रमे त्वगोप्यतां स्थीयताम् ॥ १२ ॥

नास्ति कुतोपि भयं यस्याः सा अन्ति निकटे ॥ १३ ॥

इच्छया स्वच्छन्देन प्रसूतयं तत्रापि गर्भस्य क्षेमाय ॥ १४ ॥

धर्मस्य हरिभक्तेस्तत्त्वं याथात्म्यं तत्साधनं हरिज्ञानञ्चेत्युभयं मामप्युद्दिश्य तस्याः प्रादात् ॥ १५ ॥

तत्तु तदुभयं तिरोदधे सूक्ष्मतां जातम् ॥ १६ ॥

भाषा टीका।

इन्द्र उवाच ॥

इन्द्र बोला, कि—इसके जठर में सुरद्वेषी हिरण्यकशिपु का असह्य वीर्य है, इस लिये जब तक इसके संतान पैदा होगी तब तक रहने दीजिये पीछे उत्पन्न हुए पुत्र को मार कर इसे छोड दूंगा ॥ ९ ॥

नारद उवाच ॥

नारदजी बोले, कि—इसके गर्भ में जो बालक है वह निष्पाप है और साक्षात् महा भागवत है वह तेरे से नहीं मरेगा, क्योंकि ? वह अनंत भगवान का अनुचर है और बली है ॥ १० ॥

ऐसे जब कहा तब देवर्षि का वाक्य मान कर मेरी मा को छोडकर मुझे अनंत प्रियजान मेरी भक्ति से माता की परिक्रमा कर स्वर्ग को चला गया ॥ ११ ॥

तत्पश्चात् ऋषि मेरी माता को अपने आश्रम में लाकर आश्वासन कर बोले, कि—हे वत्से! जबतक तुमारा पति न आवे तब तक यहां निवास करो ॥ १२ ॥

ठीकहै, ऐसा कहकर मेरी माताभी जबतक दैत्यपति घोरतप से नहीं निवृत्त हुआ तबतक ऋषिके आश्रममें निर्भय होकर रही ॥ १३ ॥

उस आश्रम में गर्भवती सती मेरी माता अपने भर्त्ता के आगमन के अनंतर प्रसव की इच्छा से ऋषि की परिचर्या करने लगी ॥ १४ ॥

परम दयालु समर्थ ऋषि श्रीनारदजी ने उसकी शोक शांति के लिये मेरे उद्देश्य करके भक्ति और ज्ञान दोनों दिये ॥ १५ ॥

बहुत कालहोने से वह स्त्री के कारण मेरी माता को भूलगया ऋषि के अनुग्रह से मुझ को अबपर्यंत भी नहीं भूला ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

भूयाद्भवेत् वैशारदी स्वार्थे तद्धितः देहाद्यहङ्कारच्छेदनिपुणेत्यर्थः ॥ १७ ॥

आत्मा नित्योऽव्ययः शुद्ध एकः क्षेत्रज्ञ आश्रयः ।
अविक्रियः[1] स्वदृग्घेतुर्व्यापकोऽसङ्ग्यनावृतः ॥ १९ ॥
एतैर्द्वादशभिर्विद्वानात्मनो लक्षणैः परैः ।
अहम्ममेत्यसद्भावं देहादौ मोहजं त्यजेत् ॥ २० ॥
स्वर्णं यथा ग्रावसु हेमकारः क्षेत्रेषु योगैस्तदभिज्ञ आप्नुयात् ।
क्षेत्रेषु देहेषु तथात्मयोगैरध्यात्मविद्ब्रह्मगतिं लभेत ॥ २१ ॥
अष्टौ प्रकृतयः प्रोक्तास्त्रय एव हि तद्गुणाः ।
विकाराः षोडशाचार्यैः पुमानेकः समन्वयात् ॥ २२ ॥
देहस्तु सर्वसङ्घातो जगत्तस्थुरिति द्विधा ।
अत्रैव मृग्यः पुरुषो नेतिनेतीत्यतत्त्यजन् ॥ २३ ॥
अन्वयव्यतिरेकेण विवेकेनोशताऽऽत्मना ।
सर्गस्थानसमाम्नायैर्विमृशद्भिरसत्वरैः ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कासौ वैशारदी धीरित्यपेक्षायां नारदोक्तमेव देहात्मविवेकप्रकारमाह-जन्मेति दशभिः । जन्माद्या जायते अस्ति वर्धते विपरिणमतेऽपक्षीयते नश्यतीत्येवम्भूता इमे षड्भावविकारा वृक्षे सत्येव यथा फलानां दृश्यन्ते तद्वदात्मनि तथैव स्थिते देहस्य दृष्टा इत्यर्थः ईश्वरी विकारसमर्था मूर्तिर्यस्य तेन ॥ १८ ॥

तदेवं देहधर्मैस्तद्वैलक्षण्येनात्मनो देहाद्भेदो दर्शित इदानीमात्मधर्मैरेव भेदं स्फुटयंस्तदहङ्कारादिकं त्याजयति-आत्मेति । आत्मा नित्यः "अविनाशी वारेऽयमात्मा"इति श्रुतेः, अव्ययोऽपक्षयशून्यः "ऋचो अक्षरे परमे व्योमन्" इति श्रुतेः, शुद्धः "निरवद्यं निरञ्जनम्"इतिश्रुतेः, एकः "एकमेवाद्वितीयम्" इति श्रुतेः, क्षेत्रज्ञः"विज्ञातारमरेकेन विजानीयात्"इति श्रुतेः, आश्रयः "यस्मिन्द्यौःपृथिवी चान्तरिक्षम्"इतिश्रुतेः,अविक्रियः'निष्कलंनिष्क्रियं शान्तम्'इतिश्रुतेः स्वदृक्"आत्मज्योतिःसम्राडिति होवाच"इति श्रुतेः,हेतुः"सइमाँल्लोकानसृजत्" इतिश्रुतेः"व्यापकः "सत्यं ज्ञानमनन्तम्"इतिश्रुतेः असङ्गी "असङ्गोह्ययं पुरुषः" इति श्रुतेः, अनावृतः "पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते" इति श्रुतेः ॥ १९ ॥

एतैर्द्वादशभिरात्मनो लक्षणैः परैः श्रेष्ठैर्विवेकसमर्थैर्देहाद्भेदं विद्वानसद्भावं मिथ्याबुद्धिं त्यजेत् ॥ २० ॥

नन्वेवं विविक्तात्मज्ञानिनोऽप्यपरोक्षानुभवेन ब्रह्मताप्राप्तिः कथं स्याद्यतोऽहङ्कारादिकं त्यजेदित्यपेक्षायां तत्प्राप्तिप्रकारं सदृष्टान्तमाह-स्वर्णाकरक्षेत्रेषु स्फुरत्स्वर्णकणेषु ग्रावसु योगैर्धमाद्युपायैस्तदभिज्ञ उपायाऽभिज्ञो हेमकारो यथा स्वर्णं प्राप्नुयात् । आत्मयोगैरात्मप्राप्त्युपायैः ब्रह्मगतिं ब्रह्मताम् अध्यात्मविदात्माधिकृतकार्यकारणसंघातज्ञाता ॥ २१ ॥

अध्यात्मविवेकमात्मप्राप्त्युपायमाह-अष्टाविति त्रिभिः । मू प्रकृतिर्महदहङ्कारौ पञ्चतन्मात्राणि चेत्यष्टौ, अतः सत्त्वाद च प्रकृतिगुणा एव, न तु भिन्नाः एकादशेन्द्रियाणि प महाभूतानि चेति षोडश पुमानात्मा एकः प्रोक्तः कपिला भिराचार्यैः । एकत्वे हेतुः, एषु साक्षित्वेनान्वयात्. तदुक्तम्"मू प्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त । षोडशकस्तु कारो न प्रकृतिर्न विकृतिः पुरुषः" इति ॥ २२ ॥

जगज्जङ्गमम् तस्थुः स्थावरम् अत्रैव सर्वसङ्घातात्मके दे एव पुरुषो मृग्योऽन्वेष्टव्यः सुशकश्चैतदित्याह, नेतिनेतीत्य पोहे क्रियमाणे स्वयमेवातत्त्यजन् अनात्मवर्गात्पृथगुपलभ्य इत्यर्थः ॥ २३ ॥

मणिषु सूत्रमिव सर्वत्रानुस्यूतत्वेनान्वयः अत एव मणि सूत्रस्येवैकव्यतिरेकश्च तयोर्द्वैक्यम्, तेन यो विवेकः पूर्वोक्तो तेन उशता शुद्धेनात्मना मनसा सर्गस्थानसमाम्नायैः स स्थिति संहारैः"यतो वा इमानि भूतानि जायन्ते" इत्यादिश्रुत्यु सर्गाद्यनुसन्धानेनेत्यर्थः।विमृशद्भिर्विचारयद्भिः असत्वरैरव्यग्रै इति पूर्वेणान्वयः ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवम्"प्रह्लाद त्वम्"इत्यादिना यद्दैत्यकुमारैःपृष्टं तस्योत्तरमुक्त अथैतत्सत्संप्रदायागतधर्मस्वरूपज्ञानजिघृक्षा वर्त्तते चेद्भव मदनुग्रहेण तदुभयं सम्पत्स्यत इत्याह-भवतामिति । यदि भव मद्वचः श्रद्धत्ते मदुक्तार्थग्रहणात्तदृढीकारविषये त्वरायुक्त श्रद्दधतामपि तदुभयं भूयात् श्रद्धामन्तरेणोपदिष्टमपि तत्त्व

(१) स्वदृग्वहयः. इति विजयध्वजपाठः ।

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

न प्रतिष्ठितं भवतीत्याह–वैशारदीति । वैशारदी निपुणतरा धीः तत्त्वविषया बुद्धिः स्त्रीणां बालानाञ्च श्रद्धात एव भूयान्न तु तां विनेत्यर्थः । तत्र दृष्टान्तः, मे यथेति. यथा श्रद्धावतः मम वैशारदी बुद्धिरभूच्छ्रद्धारहिताया मन्मातुर्नाभूत् एवं सर्वेषां बालानां स्त्रीणां च श्रद्धात एव ज्ञानं प्रतिष्ठितं भवत्यन्यथा मन्मातुरिवाप्रतिष्ठितमित्यर्थः ॥ १७ ॥

तदेवं तेषां श्रद्धामुत्पाद्य श्रद्धायुक्तान् शुश्रूषून्दैत्यकुमारानालक्ष्य, तेभ्यो भगवद्भक्तियोगमुपदिदिक्षुस्तावत्तदङ्गभूतप्रकृतिवियुक्तात्मयाथात्म्यज्ञानयोगमुपदिशति, जन्माद्याइत्यादिना । तावज्जीवात्मस्वरूपं देहाद्विलक्षणं विवक्षुर्देहधर्मानाह–जन्माद्या इति । ईश्वरी गुणपरिणामापादनसमर्था मूर्तिराकारो यस्य तेन कालेन निमित्तभूतेन "जायते अस्ति वर्द्धते विपरिणमते अपक्षीयते नश्यति" इत्येवं रूपा इमे षड्भावविकाराः दृष्टाः प्रत्यक्षमुपलभ्यमानाः देहस्यैव धर्माः नात्मनः यथा वृक्षे सत्येव फलानां जन्मादयो दृश्यन्ते न वृक्षस्य तद्वदात्मन्येकरूपत्वेनैवावस्थितेऽस्य देहस्य दृष्टा इत्यर्थः । आत्मव्यतिरिक्तस्य स्थिरस्यैकरूपस्य वस्तुनोऽभावात्कथंचित्प्रदर्शनार्थमस्थिरः षड्भावविकारवानपि वृक्षस्थात्मस्थानीयत्वेन दर्शितः ॥ १८ ॥

तदेवं देहधर्मैस्तद्वैलक्षण्येनात्मनो देहाद्भेदो दर्शितः । अथ स्वधर्मैरेवात्मनो देहाद्भेदमाह–आत्मेति । आत्मेति विशेष्यनिर्देशः आत्मा प्रत्यगात्मा नित्यः उत्पत्तिविनाशरहितः अव्ययः अपक्षयरहितः अविक्रियः अवशिष्टभावत्रयरहितः यद्यपि'दृष्टा देहस्य नात्मनः'इत्यनेनैव षड्भावविकाररहित्यमुक्तम्, तथापि फलानामिव वृक्षस्येति दृष्टान्तबलाद्यथा फलगतोत्पत्त्याद्यनाश्रयस्यापि वृक्षस्य स्वगतोत्पत्त्याद्याश्रयत्वम् एवं देहगतोत्पत्त्याद्याश्रयत्वाभावेपि स्वगतोत्पत्त्याद्यन्तराश्रयत्वं प्रसक्तं तदनेन निषिध्यते एवञ्च स्वतोऽन्यतो वा षड्भावविकाररहित इति फलितम्. शुद्धः प्राकृतरागादिगुणैरकलुषितस्वरूपः एकः ज्ञानैकाकारतया सर्वेषु देहेष्वेकरूपः 'एको व्रीहिः' इतिवज्जात्यभिप्रायक एकत्वव्यपदेशः न तु व्यक्त्यैकत्वाभिप्रायकः आत्मव्यक्तिबहुत्वस्य बहुप्रमाणप्रतिपन्नत्वात् क्षेत्रं शरीरं जानातीति तथा ममेदं शरीरमिति जानन्नित्यर्थः अनेन ज्ञानाश्रयत्वमुक्तम् स्वदृक् स्वं पश्यतीति स्वदृक् स्वस्मै भासमानः अनेन ज्ञानस्वरूपत्वमुक्तम् आश्रयः देहेन्द्रियादीनामाधारो हेतुर्देहेन्द्रियाणां व्यापारहेतुः व्यापकः धर्मभूतज्ञानेन व्यापकस्वरूपस्याणुत्वात् असङ्गी जीवान्तरेण सम्बन्धरहितः अनावृतः स्वरूपस्वभावतिरोधानरहितः इदं मुक्त्यवस्थं स्वाभाविकं जीवात्मस्वरूपम्, यद्वा, अनावृतः स्वरूपतिरोधानरहितः बद्धदशायामपि धर्मभूतज्ञानस्यैव कर्मणा तिरोहितत्वात् देहस्त्वनित्यः व्ययवानशुद्धः देवमनुष्यादिरूपेण नानाविधः ज्ञानाऽनाश्रयोऽन्येषां यावत्सत्त्वमनाश्रयः विरागहेतुर्व्याप्यः पितृपुत्रत्वादिसम्बन्धवान् संकोचभाक्चेति भावः ॥ १९ ॥

अस्त्वेवं देहात्मनः परस्परवैधर्म्यं ततः किमत आह–एतैरिति । विद्वानित्थं देहात्मनोर्याथात्म्यविदेतैरुक्तैर्द्वादशभिरात्मनो लक्षणैः परैः उत्कृष्टत्वापादकैर्देहादौ आदिशब्देन देहानुबन्धिपुत्रादिसङ्ग्रहः अहं ममेत्यसदभिमानं मोहजमज्ञानजं त्यजेत. देहात्माभिमानादिकं त्यक्त्वोक्तलक्षणलक्षितात्मस्वरूपावलोकनपरो भवेदिति भावः॥२०॥

ततोपि किमत आह–स्वर्णमिति । यथा हेमकारस्तदभिज्ञो हेमप्रकृतीनां ग्राव्णामभिज्ञः प्रथमं क्षेत्रेषु हेमग्राव्णामुत्पत्तिभूमिषु योगैरन्वेषणादिभिरुपायैराप्नुयात्, ग्राव्ण इति शेषः । विभक्तिविपरिणामेनानुषङ्गो वा पश्चाद्दहनादिभिरुपायैः ग्रावसु हेम आप्नुयात् एवं देहरूपेषु क्षेत्रेष्वात्मयोगैर्देहविलक्षणात्मयाथात्म्यविवेचनसाधनैरुपायैरात्मवित् उक्तविधात्मयाथात्म्यदर्शी पश्चात् ब्रह्मणः स्वरूपेण गुणैश्च निरतिशयबृंहतः पुरुषोत्तमस्य गतिमवगतिं तद्याथात्म्यज्ञानं लभेत प्राप्नुयात् यथावस्थिततत्साक्षात्कारं लभेतेति यावत् ॥ २१ ॥

एवं ज्ञानयोगस्य भगवत्साक्षात्कारावहभक्तियोगाङ्गत्वमुक्तम् 'एतैर्द्वादशभिः'इत्यादिनोक्तसङ्गत्यागप्रकारम्, "क्षेत्रेषु देहेषु तथात्मयोगैः"इत्युक्तमेव देहविलक्षणात्मस्वरूपविमर्शनं च सप्रकारं प्रपञ्चयति, अष्टावित्यादिभिः पञ्चभिः । तावदष्टौ प्रकृतयः–

"भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा" ॥

इत्युक्तरीत्या उक्ता अष्टौ प्रकृतयः अत्र भूम्यादिशब्दैः गन्धादितन्मात्रसहितानि पृथिव्यादीन्युच्यन्ते बुद्धिशब्देन महत्तत्त्वं त्रयः सत्त्वादयस्तद्गुणा एव प्रकृतिगुणा एव नत्वात्मनो गुणाः षोडश विकारा विकृतयः तेच कर्मज्ञानोभयेन्द्रियाणि दश पञ्चप्राणाः बुद्धिश्चित्तं वा एकं संभूय षोडश आचार्यैः गीताचार्यादिभिः प्रोक्ताः पुमानेक एकस्मिन् शरीरे एकः पुमान् जीवः प्रोक्तः कुतः ? समन्वयात्. एवमेव हि प्रतिशरीरं नियमेन सुखदुःखप्रतिसन्धानजीवेश्वरबद्धमुक्तशिष्याचार्यज्ञत्वादिव्यवस्थायाः समन्वयादुपपत्तिरिति भावः । सर्वशरीरेषु जीवैकत्वे उक्तविधा व्यवस्था दुर्घटा स्यादिति भावः ॥ २२ ॥

देहस्तु सर्वसङ्घातः प्रकृतिविकृतिसर्वसङ्घातात्मकः स च जगज्जङ्गमस्तस्थु स्थावरश्चेति द्विविधः एवं वस्तुस्थितिरिति भावः । अस्त्वेवं वस्तुतस्यात्मविवेचनस्य किमायातं ? तत्राह–अत्रैवेति । अत्रैव देहएव पुरुषः प्रत्यगात्मा मृग्यः विवेचनीयः कथं किं कुर्वन्, नेतिनेतीति, इति शब्दः प्रत्यक्षदृष्टप्रकारद्योतकः इति नेति एवंविधो न भवति गन्धवान् भवति रसवान् भवति रूपवान् भवतीत्येवं प्रकारेणेत्यर्थः । अतत् आत्मव्यतिरिक्तं मद्यत्पृथिव्यादिवस्तु तत् त्यजन् तस्मिन्नात्मबुद्धिमकुर्वन् तद्विलक्षण आत्मान्वेषणीय इत्यर्थः । अनेन "अहं ममेत्यसद्भावं देहादौ मोहजं त्यजेत्" इत्युक्तं विवृतं भवति ॥ २३ ॥

"तथात्मयोगैः" इत्युक्ताऽनात्मयोगान्विवृण्वन् नैर्मृग्यते इत्याह–अन्वयेति. अन्वयव्यतिरेकेणान्वयेन व्यतिरेकेण चाहं जानामीच्छामि द्वेष्मीत्येवं बुद्धीच्छादीनां ज्ञानरूपाणां ज्ञातर्यहमर्थे एवान्वयेन व्यतिरेकेण मम शिरः पाणिः पाद इति सर्वान्वयवेभ्यो व्यतिरेकप्रतीत्या चेत्येवंरूपेण विवेकेनानात्मनो विभागेन उशता निर्मूलेनात्मनाऽहं ममेति प्रतीयमानेनात्मनाऽहंप्रतीत्या चेत्यर्थः सर्गस्थानसमाम्नायैः सर्गास्थित्यादिपरवेदान्तवाक्यार्थानुसन्धानैरेतैरुपायैर्देहादिभ्यः परमात्मानं विमृशद्भिः सत्वरैः

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

अव्ययप्राचित्तैः पुंगिरात्मा मृग्य इतिपूर्वेणान्वयः"सन्मूलाः सौम्येमाःसर्वाः प्रजाः" इत्यादि सर्गस्थानादिसमाम्नायार्थानुसन्धानैरित्युक्तेभ्योऽन्येऽप्यात्मविमर्शनोपायाः परमात्मशेषत्वतच्छरीरत्वादयोऽवगता भवन्तीत्यभिप्रायेण सर्गस्थानसमाम्नायैरित्युक्तम् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ततोऽस्माकं किं प्रयोजनमिति तत्राह—भवतामपीति । यथा मे वैशारदी धीः भगवद्विषयज्ञानमभूत्तथा तर्हि भवतामपि भूयादित्यन्वयः । न केवलं युष्माकमेव, स्त्रीणां बालानाञ्च श्रद्धातस्तत्स्यादित्याह—श्रद्धात इति । यदि स्त्रीबालानां श्रद्धास्यादतस्तर्हि तेषामिति ॥ १७ ॥

प्रह्लादस्तेषां स्ववचसि श्रद्धामुत्पाद्य नारदोक्तं ज्ञानमुपदिशति—जन्माद्या इति । "जातः कंसवधार्थाय भूभारहरणाय च" "जनितो तद्विष्णोः" इत्यादिषु हरेर्जन्मादिकं प्रतीयते तत्र जन्मादिमतो हरेरितरवद्भुंगशरीरस्थस्य तच्छरीरयोग्यभोगप्राप्त्या व्याकुलचित्तस्य सर्वसमर्पणानुगुणफलदानं कथं घटत इत्यादि शङ्कां दैत्यपुत्रचित्तस्थां परिहरन्नित्यनो वाह—जन्माद्या इति । इमे षड्भावा जन्मास्तिवृद्धिपरिणामापक्षयविनाशाख्यविकारा देहस्य दृष्टाः प्रत्यक्षेण प्रमिता आत्मनः परमात्मनो न सन्तीत्यन्वयः "षड्विकाराः शरीरस्य न विष्णोस्तद्गतस्य तु" इत्यनेन निरस्तत्वात्. दृष्टाः इत्युक्तं स्पष्टयति, फलानामिति । वसन्ताद्यवयवविशेषेण कालेन वृक्षस्य चूतादिफलानां जन्मादिकं दृश्यते यथा वृक्षस्य कालाधीनत्वं तथा देहस्येश्वराधीनत्वमिति ज्ञापनायेश्वरमूर्तिनेत्युक्तं देवदत्तस्य सर्वमिदम्मदधीनमिति मिथ्याज्ञाननिरासायोक्तमिदं तात्पर्यमिति ज्ञातव्यं तदुक्तम् "तदधीनं शरीरं च ज्ञात्वा तन्ममतां त्यजेत्" इति ॥ १८ ॥

"क्षेत्रज्ञः पुरुषो ह्यात्मा संसारी चेतनो मतः" इत्युक्तेरात्मा जीवः किं नश्यादित्यतस्तन्निवर्तकलक्षणमाह—आत्मेति । परैरव्याप्त्यादिदोषरहितैरेतैर्द्वादशभिरात्मनोहरेर्लक्षणैः स्वरूपभूतैरुपेत इति, विद्वानहं ममेत्यसद्भावमतत्त्वं मोहजमज्ञानजं देहादौ त्यजेदित्यन्वयः । नित्यः स्वरूपतो विनाशरहितः अवयवादिव्ययो नास्तीत्यव्ययः प्रकृतिनिर्मितशरीरत्वेनाविद्यारागादिदोषविधुरत्वाच्छुद्धः एको मुख्यः मुख्यत्वं हरेरेव स्वरूपज्ञानेन क्षेत्राख्यशरीरज्ञातृत्वात् स क्षेत्रज्ञः आश्रय उपजीव्यः अविक्रियः स्वतः परतो वा परिणामरहितः स्वमात्मानं स्वयमेव पश्यतीति स्वदृक् "तद्ब्रह्मवेदाहंब्रह्मास्मि" इतिश्रुतिवश्योऽपराधीनः स्वतंत्र इति यावत् वशं यापयति सर्वमितिवा व्यापकोऽन्तर्बहिरितिशेषः "आकाशो नीलिमोदे" तिश्रुतेः भूताकाशस्य परिच्छिन्नत्वादव्याकृतस्य चित्प्रकृत्यात्मकत्वेन भगवदनुगृहीतत्वेन तस्याव्यापकत्वमुपचरितमनेनेति भवत्येव व्यापकः अप्राकृतत्वादसङ्गी "असङ्गोह्ययं पुरुषः" इति श्रुतेः । अनावृतो ज्ञानाद्यावरणरहितः एवंविधलक्षणोपेतस्य विष्णोः सर्वहेतुत्वाच्छरीरस्य तदधीनत्वेन तस्मिन्देहे ममतां त्यजेदित्यर्थः ॥ १९—२० ॥

हरेर्देहादिभ्यो विविक्तत्वेन ज्ञानोत्पत्तिप्रकारं वक्ति—हेमेति । यथा हेमकारो ग्रावसु क्षेत्रेषु निकषाश्मसु स्थानेषु हेमकारः क्षेत्रेषु हेमवत्सु पाषाणेषु वा योगैर्हेमावाप्त्युपायैः कषणाध्मानादिपरीक्षालक्षणैर्हेमप्राप्नुयादित्यन्वयः न सर्वस्य सुशकमित्यतउक्तं तदभिज्ञ इति तथा मुमुक्षुः पुरुष आत्मयोगैरौत्पत्तिकभक्त्याद्युपायैः देहेषु क्षेत्रेषु सम्यगालोच्य विविच्य ब्रह्मगतिलभेन देहादिभ्यो वैलक्षण्येन ब्रह्मविषयज्ञानमाप्नोतीत्यन्वयः कोसावधिकारीत्यत उक्तम् अध्यात्मविदिति. "तरति शोकमात्मवित्" इति श्रुतेः । आत्मानमधिकृत्य वर्तमानं वेदान्तशास्त्रमध्यात्मं तद्वाक्त सम्यग्जानातीति सात्त्विकादिस्वभावोऽध्यात्मं तद्वेत्तीति वा महाभूतादिर्वाऽध्यात्मं तद्वेत्तीति अध्यात्मवित् ॥ २१ ॥

कानि महाभूतादीनीति तत्राह--अष्टाविति । मूलप्रकृतिर्महदादयः * सप्तैवमष्टौ प्रकृतयः सत्त्वादिगुणानां प्रकृतावन्तर्भावसम्भवेनाष्टत्वं युक्तमितिभावेनाह, त्रय एवेति । तस्याः प्रकृतेर्गुणास्तद्गुणाः प्रकृतिजत्वाद्विकाराश्च तद्ग्रहणेन गृहीता इति नाष्टत्वासम्भव इत्याशयेनाह, विकारा इति । मनसा सहैकादशेन्द्रियाणि शब्दादिविषयाश्चेति विकाराः षोडशेति पूर्वाचार्यैः, संख्याता इति शेषः । शरीरेष्वनुगतत्वेन विकारसम्भवादेभिः सह किं न पठित इति तत्राह, पुमानिति । समन्वयादिति ल्यब्लोपे पञ्चमी समन्वयमनुगतं प्राप्येकः पुमान्नारायण एव केवलं शुद्ध इत्यतो विकारेषु न पठित इत्यर्थः । अत्रेदं तात्पर्यमवगन्तव्यम्. तथाहि, अभिमन्यमानजडापेक्षया पुमान् जीवः पञ्चविंशोभिमानचेतनविवक्षया विष्णुः षड्विंश इति सम्यगन्वयान्नियन्तृत्वेन अनुगतिज्ञानाज्ज्ञेय इति. तदुक्तम्—

"अभिमान्यपेक्षया विष्णुः पञ्चविंश इति स्मृतः ।
जडव्यपेक्षया जीवः सम्यग्ज्ञेयो हरिः स्मृतः" ॥ इति

यद्वा आकाशादिपञ्चभूतानि सत्त्वादित्रयोगुणा इत्यष्टौ प्रकृतयः तत्र मूलप्रकृतिमहदहङ्काराणामाकाशादिष्वनुगतत्वेन पृथग्ग्रहणं न क्रियते गुणानां तदात्मकत्वेन गुणग्रहणेन तद्ग्रहणोपपत्तेः शेषंपूर्ववत् ॥ २२ ॥

तत्त्वसंख्याकथनेन प्रकृते किमायातमिति तत्राह—देहस्त्विति सर्वेषां प्रकृतितत्कार्याणां सङ्घातः समूहः तन्निर्मित इत्यर्थः तत्त्वेभ्योऽथतदभिमानिभ्यो विविच्य परमात्मा ज्ञातव्य इत्यभिप्रायेण तत्त्वसंख्यानं कृतमितीममर्थन्दर्शयति, तुशब्देन देहशब्देन प्रपञ्चो विवक्षित इति कृत्वा तं देहं विभजति, जगदिति । अत्र चशब्दो द्विरावृत्त्या व्याख्येयः तथाहि जगत्समस्तं जगज्जङ्गमं तस्थु स्थावरमिति द्विधा विभक्तं किं चान इत्यत आह—अत्रेति ततत्वाद्ब्रह्म तत्र भवतीत्यतत्प्रकृत्यादिकं त्यजन् हित्वा स्वतः सर्वं भिन्न इत्यर्थः । पुरुषः पूर्णः षड्गुणोऽत्रैव देहलक्षणे प्रपञ्चे मृग्योऽन्वेषणीयो विचार्यो ज्ञातव्य इति यावत् । शतृप्रत्ययेन सः प्रकृत्यादित्यागो न कादाचित्क इति च सूचयति, तत्र किं प्रमाणमिति तत्राह—नेति । "स एष नेतिनेतीत्यात्मा " इति श्रुतिः प्रमाणमित्यर्थः । योऽतत्त्यजंस्तद्वपुस्त्यजंस्तेनेति वा अतत्त्यजन्नित्यतत्त्यक् तेनातत्त्यजेति वा पाठः ॥ २३ ॥

* महत्तत्त्वाहङ्कारतत्त्वपञ्चमहाभूतानि ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कया युक्त्या मृग्यत इति तत्राह-अन्वयेति । अन्वययुक्तव्यतिरेकेण यत्र यत्र जगत्तत्र तत्र ब्रह्मेत्यन्वयः यत्र यत्र ब्रह्म न तत्र तत्र जगत्परिच्छिन्नत्वादिर्व्यतिरेकलक्षणायुक्त्याऽऽकाशवत् जगदन्वितत्वेन यदेतदसङ्गलक्षणापृथक्त्वेन चेति युक्त्या निश्चितेन विवेकेनागतेन युक्तेनात्मना मनसा, ननु, व्याप्तिग्राहकप्रमाणाभावेनाभासत्वान्वयात्रिर्णयो न स्यादिति तत्राह—सर्गेति । अत्र सर्गस्थानाप्ययं संहारादिकमुपलक्ष्यते न सहिता त्वरा येस्ते असत्वरास्तैः "सर्वेश्वरा घोषवन्तो बलवन्तो वक्तव्या इन्द्रो बलं ददातीति सर्वे ऊष्माणो ग्रस्ता अनिरस्ता विवृता वक्तव्याः प्रजापतेरात्मानं परिददातीति सर्वे स्पर्शालेशेनानभिनिहिता वक्तव्या मृत्योरात्मानं परिहराणीय" इति श्रुतेः विमृशद्भिः विचारं कुर्वद्भिः "को न आत्मा किं ब्रह्म" इत्यादि श्रुतेः सर्गस्थानादिविषयैः समाम्नायैः निर्दोषगुणोपेतैर्वेदैः " यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति " इत्यादिलक्षणैः " अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः " इत्यादिकैश्चाऽनुगृहीतया ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत्र देहाद्यध्यासपरित्यागार्थं स्वमातृप्रतिपन्नमात्मज्ञानमात्रमापतत आह-जन्माद्या इत्यादिभिः ॥ १८ ॥

एको न तु देहेन्द्रियादिसंघातरूपः । क्षेत्रज्ञो ज्ञातृत्वादिधर्मकः इन्द्रियादीनामाश्रयः स्वाभाविकज्ञातृत्वादेवा विक्रियः स्वदृक् स्वस्मै स्वयं प्रकाशः हेतुः सर्गादेर्निमित्तम्. तदुक्तं श्रीसूतेन "हेतुर्जीवोऽस्य सर्गादेरविद्याकर्मकारकः" इति. व्यापको व्याप्तशीलः असङ्गी अनावृतश्च स्वतः स्वप्रकाशरूपत्वात् ॥ १९ ॥

मोहजं त्यजेदिति । देहाद्यधिकरणकमोहजस्यैव त्यागो न तु स्वरूपभूतस्येत्यहमर्थस्य इति व्यज्यते. तदेवं जीवस्तदंशत्वात् सूक्ष्म ज्योतीरूप इत्येके । तथैव हि कौस्तुभांशत्वेन व्यञ्जितम्. तथाच स्कान्दे प्रभासखण्डे जीवनिरूपणे "नतस्य रूपं वर्णो वा प्रमाणं दृश्यते कचित् । न शक्यं कथितुं वापि सूक्ष्मश्चाऽनन्तविग्रहः ॥ वालाग्रशतभागस्य शतधा कल्पितस्य च । तस्मात् सूक्ष्मतरो देवः स चानन्त्याय कल्पते ॥ आदित्यवर्णं सूक्ष्मागमांश्वनुमिव पुष्करे । नक्षत्रमिव पश्यन्ति योगिनो ज्ञानचक्षुषा" इति ॥ २० ॥

तत्पदार्थज्ञानमप्याह—स्वर्णमिति ॥ २१—२८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

भूयादित्याशीर्वादेन स्वस्मिन् वर्त्तमानं श्रीनारदानुग्रहं तेष्वपि भक्तिकारणत्वेनाशास्ते. यदि भवन्तः श्रद्दधते तदा वैशारदी विशारदो भगवांस्तद्विषया श्रद्धात इति महदनुग्रहात् श्रद्धा श्रद्धातो भक्तिः भक्तेः प्रेमेत्यग्रिमग्रन्थादवगन्तव्यम् ॥ १७ ॥

केषांचित् मुमुक्षुप्रभृतीनां तु ज्ञानमपेक्षितमिति तदाह-जन्माद्या इति दशभिः । जायते अस्ति वर्द्धते विपरिणमते अपक्षीयते नश्यतीत्येवंभावाः षड्विकाराः सदा स्थितस्य वृक्षस्य प्रतिवर्षं फलानामेव यथा न तु वृक्षस्य तथैव नित्यस्थितस्यैवाऽऽत्मनो देहस्यैव षडिमे दृष्टाः न त्वात्मनः ईश्वरस्य मूर्तिः समष्टिव्यष्ट्यात्मकं शरीरं यतो भवति तेन ॥ १८ ॥

जीवात्मनि षड्विकाराभावभावना त्वं पदार्थशुद्धिः सा च तत्पदार्थस्य परमात्मनश्चिन्तनरूपया भक्त्यैव स्यादित्यतः परमात्मस्वरूपमाह-आत्मेति द्वाभ्याम् । आत्मा परमात्मा नित्यः "अविनाशी वा अरेऽयमात्मा" इति श्रुतेः, अव्ययः अपचयशून्यः "ऋचो-अक्षरे परमे व्योमन्" इति श्रुतेः । शुद्धः "निरवद्यं निरञ्जनम्" इति श्रुतेः एकः "एकमेवाद्वितीयम्" इति श्रुतेः । क्षेत्रज्ञः "विज्ञातारमरे केन जानीयात्" इति श्रुतेः । आश्रयः "यस्मिन् द्यौः पृथिवी चान्तरीक्षम्" इति श्रुतेः । अविक्रियः "निष्कलं निष्क्रियं शान्तम्" इति श्रुतेः । स्वदृक् "आत्मज्योतिः सम्राडिति हो वाच" इति श्रुतेः । हेतुः "स इमान् लोकानसृजत" इति श्रुतेः । व्यापकः "सत्यं ज्ञानमनन्तम्" इति श्रुतेः । असङ्गी "असङ्गो ह्ययं पुरुषः" इति श्रुतेः । अनावृतः "पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते" इति श्रुतेः ॥ १९ ॥

आत्मनः परमात्मनः परैर्जीवात्मलक्षणेभ्योऽप्युत्कृष्टैः नित्यं चिन्तितैरिति शेषः देहादौ देहे दैहिकेषु च असदवास्तवम्भावम्परमात्मचिन्तनं विना सत्यपि विवेके दिग्भ्रम इव मोहो न निवर्त्तत इति भावः ॥ २० ॥

नन्वेवंभूतः परमात्मा क वर्त्तते ? इति चेत् स्वदेहेऽपीति तदुपलब्धिप्रकारं सदृष्टान्तमाह—स्वर्णमिति । ग्रावसु स्फुरत्स्वर्णकणापाषाणेषु क्षेत्रेषु स्वर्णाकरस्थानेषु योगैर्धमनादिभिर्गुरुवक्त्रशिक्षितैरेवोपायैः तमुपायाभिज्ञो हेमकारो यथा स्वर्णमाप्नुयात् तथैव देहरूपक्षेत्रेषु आत्मयोगैरात्मप्राप्त्युपायैश्चिन्तनाद्यैः ब्रह्मगतिं ब्रह्मणः परमात्मनो गतिमुपलब्धिम् ॥ २१ ॥

अध्यात्मविदित्युक्तमतोऽध्यात्मवस्तून्याह-अष्टाविति सार्द्धेन । मूलप्रकृतिर्महदहङ्कारौ पञ्चतन्मात्राणि चेत्यष्टौ । त्रयः सत्त्वादयो विकाराः एकादशेन्द्रियाणि पञ्च महाभूतानि चेति षोडश आचार्य्यैः कपिलादिभिः प्रोक्ताः पुमानात्मा एकः समन्वयात् एषु सम्यगन्वयं सम्बन्धं प्राप्य वर्त्तमानः यद्वा समन्वयं सम्बन्धं अतति सततं प्राप्नोति "अत सातत्यगमने" क्विबन्तः ॥ २२ ॥

सर्वसङ्घातः उक्तलक्षणसर्ववस्तुसमूहरूपः जगत् जङ्गमो मनुष्यादिः तस्थुः स्थावरो वृक्षादिः अत्रैव देह एव पुरुषः परमात्मा मृग्यः । अन्वेषणप्रकारमाह—नेतिनेतीत्यतत् तद्भिन्नं वस्तु त्यजन् त्यजद्भिरित्यर्थः ॥ २३ ॥

ननु, तर्हि तन्मय एव अतस्त्यागे शून्यमेवाऽवशिष्यते इत्यत आह—अन्वयेति । देहे परमात्मनोऽन्वयः परमात्मनि देहव्यतिरेको यः प्रसिद्धस्तेन जडानामपि बुद्ध्यादीनां यदन्वयेनैव प्रवृत्तिः बुद्ध्यादिव्यतिरिक्तश्च यः परमात्मा देहस्थ इति यो विवेकस्तेन तथा उशता शुद्धेनात्मना मनसा सर्गस्थानसमाम्नायैः सृष्टिस्थितिसंहारैः परामृशद्भिरिति शेषः "यतो वा इमानि

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

भूतानि जायन्ते" इत्यादि श्रुत्युक्त सर्गाद्यनुसन्धानेनेत्यर्थः । असत्त्वरैरव्यग्रैर्मृग्यः ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यदि भवन्तो मद्वचः श्रद्दधते तर्हि श्रद्धातो भवतां स्त्रीणां बालानाञ्चापि मे मम यथा वैशारदी विशारदो हरिस्तद्विषयकज्ञानभक्तिमती धीः भूयाद्भवेत् ॥ १७ ॥

हरिभक्तियोगं ज्ञानञ्च साङ्गं तद्ग्रहणयोग्यतानिष्पादकात्मानात्मविवेकोपदेशपूर्वकं जन्माद्या इत्यारभ्य "एतावानेव लोकेऽस्मिन् पुंसः स्वार्थः परः स्मृतः । एकान्तभक्तिर्गोविन्दे यत्सर्वत्र तदीक्षणम्" इत्यन्तेन ग्रन्थेनोपदिशति, ईश्वरात्सर्वप्रवर्त्तकात् क्षणादिद्विपरार्द्धलक्षणामूर्त्तिरभिव्यक्तिर्यस्य तेन वृक्षस्येव अतिप्रसिद्धषड्विकाराणां तत्फलानामिव च जन्माद्याः जायतेऽस्ति वर्द्धते विपरिणमतेऽपक्षीयते विनश्यतीतीमे षड्भावविकाराः देहस्यैव दृष्टाः नत्वात्मनः वृक्षगतस्य देहस्य चेत्यर्थः । एवं देहस्य षड्विकारयुक्तत्वेन च देहादावहं ममेत्यसदाग्रहो न कार्य इति भावः ॥ १८ ॥

अथ सर्वस्य चेतनाचेतनस्य भगवत्पृथक्स्थितिप्रवृत्त्याद्यभावात्तदीयत्वाच्च अहं ममेत्यसद्भावं देहादौ त्यजेदिति वक्तुं भगवतोऽपि जन्मादि षड्विकारराहित्यं तदसाधारणान् एकत्वसर्वाश्रयत्वसर्वहेतुत्वव्यापकत्वानावृतत्वादीन् गुणान् आह—आत्मेति । आत्मा "एष त आत्मान्तर्यामी, आत्मावाअरे द्रष्टव्यः" इत्यादिप्रसिद्धः परमेश्वरः नित्यः जन्ममृत्युशून्यः अव्ययोऽपक्षयशून्यः किंबहुना शुद्धः सर्वदोषरहितः एकः निरस्तसमानातिशयः क्षेत्रज्ञः समष्टिव्यष्टिरूपसर्वशरीरज्ञः आश्रयः सर्वचेतनाचेतनानां स्थित्यादिप्रदः हेतुः सर्वोपादाननिमित्तकारणभूतः तथापि अविक्रियः स्वरूपतोऽविकारी नित्यसिद्धाभिः स्वशक्तिभिः चेतनाचेतनरूपाभिः कूर्माङ्गप्रसारणाऽप्रसारणन्यायेन सृष्टिसंहारौ करोति । तथोक्तम्, भारते "प्रसार्य च यथाङ्गानि कूर्मः संहरते पुनः । एवं भूतानि भूतात्मा सृष्ट्वा संहरते पुनः" इति स्वदृक् स्वप्रकाशः व्यापकः सर्वत्र सर्वदा वर्त्तमानः असङ्गी सर्वचेतनाचेतनदोषास्पृष्टः अनावृतो निरावरणः । जीवपरो नायं श्लोकः "जन्माद्याः षडिमे भावा दृष्टा देहस्य नात्मनः" इत्यनेनैव जीवजन्माद्यभावप्रतिपादनात् एकत्वादीनां भगवद्धर्माणां जीवे सम्भवात् सति मुख्यार्थे अर्थान्तरकल्पनाया अनाय्यत्वाच्च ॥ १९ ॥

आत्मनः परमेश्वरस्य परैः परमेश्वरलक्षणैः नाहं देहरूपः न चाहं स्वातंत्र्येण मदीयः न च देहादिकं मम किन्तु भगवत एव सर्वं देहदैहादिकमित्येवमहंममाभिमाननिराकरणहेतुभूतैः अहं ममेत्यसद्भावं देहादौ वर्त्तमानं मोहजमज्ञानकृतं त्यजेत् ॥ २० ॥

अचेतनं जडत्वज्ञेयत्वादिना तद्भिन्नं ज्ञातृत्वादिना चेतनं चेतनाचेतनभिन्नं तदुभयनियंतृत्वादिना सर्वोपास्यं सर्वात्मभूतं ब्रह्म चेति तत्त्वत्रयज्ञानप्रकारमाह, स्वर्णमिति । यथा हेमकारः तदभिज्ञः ग्रावसु स्फुरत्स्वर्णकणेषु स्वर्णं तत्प्राप्तियोगैराप्नुयात् एवं क्षेत्रज्ञयोगैः तदभिज्ञः क्षेत्रज्ञोऽनेकदेहविज्जीवस्तत्स्वरूपगुणादि श्रवणमननादिरूपैर्योगैः ज्ञातृत्वाहमर्थत्वादियोगैश्च क्षेत्रेषु स्वपरशरीरेषु ज्ञेयत्वाचेतनत्वादिना क्षेत्रज्ञभिन्नतया निश्चितेषु आप्नुयात् क्षेत्रज्ञमिति शेषः । तथा देहेषु समष्टिव्यष्टिरूपेषु अध्यात्मवित् आत्मानं क्षेत्रज्ञं नियम्ये अधिवर्त्तमानमन्तरात्मानं वेत्तीति स तथा ब्रह्मवित् आत्मयोगैः आत्मा अन्तरात्मा तत्स्वरूपगुणादिश्रवणमननादिरूपैर्योगैरुपायैः सर्वनियन्तृत्वादिभिश्च ब्रह्मगतिं परमात्मतत्त्वं लभेतेत्यर्थः ॥ २१ ॥

चेतनाचेतनब्रह्मपदार्थान् दर्शयन् अचेतने चेतनस्य रतिर्बन्धहेतुः ब्रह्मणि भगवति रतिस्तु मोक्षहेतुरित्याह, अष्टौ इत्याद्यर्द्धैः प्रकृतिः महदहंकारौ पञ्च तन्मात्राणि चेत्यष्टौ प्रकृतयः । तस्याः प्रकृतेस्त्रयः सत्त्वादयो गुणाः एकादशेन्द्रियाणि पञ्चमहाभूतानि चेति षोडश विकाराः अचेतनात्मकाः आचार्यैः प्रोक्ताः । पुमान् चेतनश्च प्रोक्तः जातावेकवचनम् "चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्" इति जीवबहुत्वश्रवणात् "सर्वे वेदा यत्पदमामनन्ति" वेदैश्च सर्वैरहमेव वेद्यः "तत्तु समन्वयात्" इति श्रुतिस्मृतिसूत्रेभ्यः समन्वयात् सर्वेषु वेदेषु विषयत्वेन समन्वयात् एकः सर्ववेदार्थभूतो भगवांश्च आचार्यैरौपनिषदैः प्रोक्तः ॥ २२ ॥

तत्र भगवतो देहः सर्वसङ्घातः विराड्रूपः जीवस्य देहद्वयमाह, जगत्तस्थुरिति द्विधेति । तद्बोधप्रकारमाह—अत्रैवेति सार्द्धेन विमृशद्भिर्विचारयद्भिः असत्त्वरैरव्यग्रैर्मुमुक्षुभिः उशतात्म-शुद्धेन मनसा अत्रैव देहेन्द्रियमनोबुद्धिप्राणेभ्यो जीवो भिन्नः चेतनत्वादीश्वरवत् इत्यन्वयेन देहेन्द्रियमनोबुद्धिप्राणेष्वेकतमोऽपि न जीवस्तस्य चेतनत्वाभावात् पाषाणादिवदिति व्यतिरेकेण च हेतुना एवं नेतिनेतीति देहाद्यात्मत्वनिषेधेन अतदनात्मकं देहेन्द्रियादिकं त्यजन् देहो नात्मा पाञ्चभौतिकत्वात् गृहादिवत् इन्द्रियेष्वेकतमोऽपि नात्मा करणत्वाद्दात्र्यादिवत् प्राणो नात्मा वायुविशेषत्वात् व्यजनजन्यवायुवत् इत्येवमज्ञानगृहीतं तदात्मत्वं परिहरन् पुरुषो जीवः मृग्यः तन्त्रादिना पुरुषः परमेश्वरश्च सृष्टिस्थानसमाम्नायैः सृष्टिस्थितिप्रतिपादकैर्वेदैः "यतो वा इमानि भूतानि जायन्ते" इत्यादिभिः चेतनाचेतनरूपेभ्यः सृज्येभ्यो भूतेभ्यस्तत्स्रष्टा विलक्षण एवेति द्योतितो यो विवेकस्तेन मृग्यः इति द्वयोरन्वयः ॥ २३—२४ ॥

भाषा टीका ।

जो हमारे वाक्य में श्रद्धा हो तौ तुमारी भी देहाद्यहंकार छेदन में निपुण मतिहो, स्त्री और बालको की मति शुद्ध हो जैसे कि मेरी ॥ १७ ॥

जन्मादिक ये छः भाव देह के हैं आत्माके नहीं सो ईश्वरात्मक काल कृत है जैसे वृक्षके रहते २ फूलों के ॥ १८ ॥

और आत्मा तौ नित्य अव्यय शुद्ध एक क्षेत्रज्ञ आश्रय विकाररहित स्वदृक् हेतु और प्रकृति का व्यापक होकर भी असङ्ग और अनावृत है ॥ १९ ॥

इन आत्मा के द्वादश लक्षणों से विद्वान् देह गेहादि

बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति वृत्तयः ।
ता येनैवाऽनुभूयन्ते सोऽध्यक्षः पुरुषः परः ॥ २५ ॥
एभिस्त्रिवर्णैः पर्यस्तैर्बुद्धिभेदैः क्रियोद्भवैः ।
स्वरूपमात्मनो बुद्ध्येद्गन्धैर्वायुमिवान्वयात् ॥ २६ ॥
एतद्द्वारो हि संसारो गुणकर्मनिबन्धनः ।
अज्ञानमूलोऽपार्थोऽपि पुंसः स्वप्न इवेष्यते ॥ २७ ॥
* (मनोमयत्वात्सर्वार्थाः स्वप्नजागरयोः समाः ।
दृष्टानर्थानपि ध्यातुः शोकमोहभयप्रदाः ॥ ० ॥
परस्य निर्गुणस्यापि गुणसङ्गजनिर्मृतिः ।
व्यक्तं जन्माप्ययप्रोक्तं शयानस्येव न स्वतः ।
हरिसाश्चिन्तया सर्वे प्रयान्ति परमम्पदम् ॥ ० ॥)
तस्माद्भवद्भिः कर्तव्यं कर्मणां त्रिगुणात्मनाम् ।
बीजनिर्हरणं योगः प्रवाहोपरमो धियः ॥ २८ ॥
तत्रोपायसहस्राणामयं भगवतोदितः ।
यदीश्वरे भगवति यथा यैरञ्जसा रतिः ॥ २९ ॥
गुरुशुश्रूषया भक्त्या सर्वलब्धार्पणेन च ।
सङ्गेन साधुभक्तानामीश्वराराधनेन च ॥ ३० ॥
श्रद्धया तत्कथायां च कीर्तनैर्गुणकर्मणाम् ।
तत्पादाम्बुरुहध्यानात्तल्लिङ्गेक्षाऽर्हणादिभिः ॥ ३१ ॥
हरिः सर्वेषु भूतेषु भगवानास्त ईश्वरः ।
इति भूतानि मनसा कामैस्तैः साधु मानयेत् ॥ ३२ ॥

भाषाटीका ।

में. मोह से उत्पन्न जो मैं मेरा यह असद्भाव तिसको छोड दे ॥ २० ॥

जैसे अभिज्ञ सुवर्णकार क्षेत्र (खेत) में सुनहले पाषाण में से उपायों से स्वर्ण को प्राप्तहोता है, ऐसेही अध्यात्मवेत्ता आत्म योग से देह में ब्रह्मगति को प्राप्त होता है ॥ २१ ॥

आचार्यों ने अष्ट प्रकृति कहीं हैं और उनके गुण तीन कहे हैं तथा प्रकृति के विकार षोडश हैं और इन में साक्षित्वेन अन्वित होने वाला पुरुष एक है ॥ २२ ॥

सर्व संघात रूप देह स्थावर जंगम भेद से दो प्रकारका है इसी देह में अनात्म वस्तु के लक्षणों से भिन्न आत्मा को ढूँढना चाहिये ॥ २३ ॥

अन्वय व्यतिरेक से हुआ जो विवेक तिससे और शुद्ध मनसे तथा सृष्टि स्थिति संहार के अनुसंधान द्वारा विचार करने वाले अव्यग्रपुरुषों से ढूँढने के योग्य है ॥ २४ ॥

——

श्रीधरस्वामिकृतभावार्थदीपिका ।

विमर्शप्रकारमाह-बुद्धेरिति द्वाभ्याम् । अध्यक्षः साक्षी ॥ २५ ॥

अत एभिर्बुद्धिभेदैः परिणामैः पर्यस्तैः परितः क्षिप्तैरनात्मधर्मत्वेन निरस्तैः बुद्धिधर्मत्वे हेतुः त्रिवर्णैस्त्रिगुणात्मकैः क्रियोद्भवैः

* श्लोकाविमौ विजयध्वजरीत्याऽधिकौ पठ्येते ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कर्मजन्यैः बुद्धेरेव त्रिगुणात्मकत्वात् कर्मकर्तृत्वाच्च तस्या एवैता अवस्थाः आत्मा तु बुद्ध्यन्वयात्तदवस्थावानिवाभाति न तत्त्वत इत्यनात्मनः स्वरूपं बुध्येज्जानीयादित्यर्थः । अत्र दृष्टान्तः कुसुमधर्मैर्गन्धैस्तदाश्रयं वायुमिव ॥ २६ ॥

ननु, तर्हि यथा कुसुमोपाधिकोपि वायोर्गन्धो विवेकज्ञानेन निवर्त्तते एवमात्मनः संसारो न निवर्त्तत इत्याशङ्क्याऽऽह, एतद्द्वारो बुद्धिद्वारकस्तदवस्थाद्वारको वा संसारो न स्वतः हि यस्मात् बुद्धेर्ये गुणाः कर्माणि च तैर्निबध्यत इति तथा स चाज्ञानमूलोऽतोऽपार्थो मिथ्याभूतोऽपि स्वप्न इवेष्यते वायोस्तु गन्धद्रव्यसम्बन्धस्य वास्तवत्वाद्विषमो दृष्टान्तः ॥ २७ ॥

यस्मादेवं निवृत्तिर्घटते तस्माद्बीजमज्ञानं तस्य निर्हरणं दहनम् किं तत् योगः कथम्भूतः धियः प्रवाहं जाग्रदादिरूपमुपरमयतीति तथा ॥ २८ ॥

तदेवं ज्ञानप्रकारमुक्त्वा तत्साधनं धर्मस्य तत्त्वं नारदोक्तमेवाऽह–तत्रेति, पञ्चभिः । यैर्धर्मैर्यथा यथावदनुष्ठितैर्वा भगवति श्रीनारायणे रतिरिति, यदयमुपायो भगवतोक्तः । तथा च गीतासूक्तम्—

" यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यच्च पश्यसि कौन्तेय तत्कुरुष्व मदर्पणम् " ॥

इति "भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः" इत्यादि च ॥ २९ ॥

तत्रैवान्तरङ्गान्धर्मानाऽऽह, गुरोः शुश्रूषया भक्त्या प्रेम्णा सर्वेषां लब्धानामर्पणेन च ॥ ३० ॥

तस्य लिङ्गानां मूर्तीनामीक्षणमर्हणमादिर्येषां वन्दनादीनां तैश्च ॥ ३१ ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अन्यानपि तद्विमर्शनोपायान् वदंस्तैः प्रत्यगात्मस्वरूपं देहविलक्षणमवगच्छेदित्याह––बुद्धेरिति । जागरणं स्वप्नः सुषुप्तिरिति एतास्तिस्रो बुद्धेर्वृत्तयः 'व्यापारः ता वृत्तयो येनैवाऽनुभूयन्ते स एव परः देहेन्द्रियबुद्ध्यादिभ्योऽन्यः अध्यक्षो देहादीनां द्रष्टा धारको वा पुरुषः प्रत्यमात्मा जागरणं नाम बाह्येन्द्रियव्यापारानुविद्धा बुद्धिवृत्तिः स्वप्नस्तदननुविद्धा सुषुप्तिर्बुद्धिवृत्त्युपरमः तदुपरमोपि तत्सम्बन्ध्येवेति बुद्धेर्वृत्तय इत्युक्तम् एतद्वृत्तित्रयज्ञाज्ञानाश्रयत्वेन यः प्रतीयते स प्रत्यगात्मेति भावः ॥ २५ ॥

एतदेव सदृष्टान्तं विशदयन्नेवमादिभिरुपायैरात्मस्वरूपं बुद्ध्येदित्याह—एभिरिति । एभिस्त्रिवर्णैस्त्रिविधैः सत्त्वादिगुणत्रयमूलकैर्वा पर्यस्तैरस्थिरैः क्रियोद्भवैः पुण्यपापात्मककर्मनिमित्तैर्बुद्धिभेदैर्बुद्धिवृत्तिभेदैर्जागरादिभिरुपलक्षितमात्मनः स्वरूपं विद्यात् यथा गन्धैः कुसुमादिगतैरुपलक्षितं तदाश्रयं वायुं बुध्यति तद्वत्. कुतः? अन्वयाज्जागरणाद्यवस्थात्रयेऽन्वयादनुवृत्तेः यथा पवनात्मकाकर्मणा तत्तत्पङ्कजादिकुसुमादिगतं गन्धमानीय तदाश्रयतया तदन्वितं प्रवहन्तं वायुं ततःपृथग्भूतमुपलक्ष्यते पार्थिवकुसुमादिगतस्य गन्धस्य न वायुराश्रयस्तदन्वयाच्च वा[...] तदाश्रयत्वम्. अत एव तदन्वयापाये केवलस्पर्शगुणस्य वायोरु[...] लम्भः ततो गन्धात्पृथगेव वायुः स्वाभाविकस्पर्शगुण इति[...] यथोपलक्ष्यते तथा बुद्धिभेदो न स्वभावतः आत्मगताः तेषां स्वा[...] विकत्वेऽन्यतमबुद्धिभेदेऽन्यतमस्योपलम्भप्रसङ्गः किन्तु कर्माय[...] बुद्धिसम्बन्धप्रयुक्तवद्वृत्त्यन्वयात्तदनुभवोपलम्भः स्वभावस्त्वा[...] तद्वृत्त्यनन्वितएव ततःपृथग्भूत इत्येवं तं बुद्ध्येदित्यर्थः ॥ २६ ॥

तदेवं देहादावसङ्गावत्यागप्रकारो देहविलक्षणत्वेना[...] विमर्शनप्रकारश्चोक्तः अथैवंभूतस्य प्रत्यगात्मनः कुतस्तद्देहा[...] सम्बन्धरूपः संसारो यस्मिन् न सद्भाव इत्याशङ्कायां त्रिव[...] क्रियोद्भवैरिति परिहारः सूचितः । तमेवविशदयितुं स्वरूपया[...] त्म्यज्ञानमूलकदेहात्मभ्रमादिरूपाऽनादिमोहनिमित्तगुणकर्मसम्ब[...] न्धप्रयुक्तः संसारस्तत एवात्मनः स्वरूपप्रयुक्तत्वाभावादपुरु[...] र्थोऽप्यौपाधिकत्वाद्यावदुपाधिबुद्धिसंम्बन्धद्वाराऽनुवर्त्तते इत्याह[...] एतदिति । एष बुद्धिसम्बन्ध एव द्वारं यस्य स संस[...] स्वप्न इवाल्पास्थिरत्वात्स्वप्नतुल्योऽतएवापार्थः अपुरुषार्थोपि पु[...] प्रत्यगात्मनोऽर्थ्यते प्राप्यते कर्तुः पुंसः शेषत्वाविवक्षया [...] पुंसां संसारः प्राप्यत इत्यर्थः । बुद्धिसम्बन्धे हेतुं वदन्सं[...] विशिनष्टि–अज्ञानमूल इति । अज्ञानं मूलं कारणं यस्याज्ञानमू[...] स्वपरयाथात्म्याज्ञानमूलकबुद्धीन्द्रियसम्बन्धनिमित्तोदेहतदनुब[...] रूपः संसार इत्यर्थः । कथमुक्तविधस्यात्मनो ज्ञानसङ्क[...] इति शङ्कां निराकुर्वन् संसारमेव विशिनष्टि. गुणकर्मनिबन्ध[...] इति । गुणकर्माधीनः सत्त्वादिगुणपरिणामानुगुणकर्मपरिपाका[...] धीन इत्यर्थः । अयं भावः । स्वभावतः सर्वे प्रत्यगात्मानः "अ[...] नित्योऽव्ययः" इत्याद्युक्तविधा अप्यनादिकर्मणा सत्त्वादिमाह[...] गुणसंसृष्टास्तत्र तत्तत्कर्मपरिपाकवशाद्गुणपरिणामस्ततः स्व[...] याथात्म्याज्ञानं ततो गुणकर्मानुरूपं परमात्मसृष्टबुद्धीन्द्रियसम्ब[...] ततो देहतदनुबन्धिसम्बन्धरूपः संसारस्ततो देहात्माभिम[...] स्ततः पुनः कर्म ततः पुनर्गुणपरिणामादिरित्येवं परिवृत्ति[...] वत्कर्मोपाध्यनुवर्तत इति ॥ २७ ॥

यतोऽयमुक्तविधस्याप्यात्मनो देहात्मभ्रमादिरूपाऽज्ञानमूलक[...] निमित्तः संसारस्तस्माद्भवद्भिः कर्मनिर्हरणोपायोऽनुष्ठेय इत्य[...] तस्मादिति । तस्मात्संसारस्याज्ञानमूलगुणकर्मायत्तत्वात् त्रिगु[...] त्मनां सत्त्वादिगुणत्रयपरिणामहेतूनां कर्मणां यद्बीजं मूलं देहा[...] भ्रमादिरूपं तस्य निर्हरणं निर्हरणोपायात्मको यो योगो व[...] माणः स च धियः प्रवाहः शब्दादिविषयकं ज्ञानं तस्योपर[...] रूपो भवद्भिः कर्त्तव्यः ॥ २८ ॥

वक्ष्यमाणभगवद्भक्तियोगस्यैव बीजनिर्हरणोत्तमोपायत्वम[...] तत्रेति । तत्रावश्यं बीजनिर्हरणोपाये कर्तव्ये सति उपाय[...] न्तराणां मध्येऽयमेवोत्तम उपायः कथितो भगवता, कोऽसौ ? [...] साधनैः भगवतीश्वरे रतिरनुरागः प्रीतिरञ्जसा सुखेन यथा स्या[...] त्येषः, स्वसाधनैरनुगृहीता भगवति रतिरित्येष एव उ[...] उपाय इति–

"नाहं वेदैर्न तपसा न दानेन न चेज्यया ।
भक्त्या त्वनन्यया शक्य अहमेवं विधोऽर्जुन !" ॥ इति.

"न मे भक्तः प्रणश्यति" इत्यादिना तत्र तत्र भगवता प्रोक्त[...]

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

रतिरित्यनेन निरतिशयप्रीतिरूपापन्ना भक्तिरुच्यते तस्या एवसाचाद्भगवत्प्राप्तिहेतुत्वं संसारनिवर्त्तकत्वञ्च सूच्यते ॥ २९ ॥

सा च कैः साधनैर्निष्पद्यते इत्यपेक्षायां साधनानि वदंस्तैरुपकृतेन ध्यानयोगेन निष्पद्यते इत्याह—गुरुशुश्रूषयेत्यादिभिश्चतुर्भिः । गुरुशुश्रूषया गुरूणां परिचर्यया गुरुभ्यस्तत्त्वश्रवणेच्छया वा भक्त्या गुरूणां भक्त्या उपासनेन सर्वेषां गुर्वपेक्षितानां मध्ये लाभः लभ्यते इति लाभः स्वस्य सुलभं यत्तस्य समर्पणेन, यथाशक्ति तदपेक्षितसमर्पणेनेत्यर्थः । साधु यथा भवति तथा भगवद्भक्तानां सङ्गेन साधवः क्रोधमात्सर्यलोभाशुभमतिराहित्यरूपसाधुलक्षणलक्षिता भक्तास्तेषां सङ्गेन वा ईश्वराराधनेनार्चाविग्रहाराधनेन हृदयकमलस्थस्य मानसोपचारैराराधनेन वा. अर्हणादिभिरित्यर्चाराधनस्य वक्ष्यमाणत्वात् ॥ ३० ॥

तत्कथायामीश्वरकथायां श्रद्धया श्रवणासक्त्या ईश्वरस्य गुणानां कर्मणां कीर्तनैस्तस्येश्वरस्य पादाम्बुजयोर्ध्यानात्तल्लिङ्गस्यार्चाविग्रहस्येक्षणार्हणादिभिर्दर्शनपूजादिभिः आदिशब्देन प्रणामपरिक्रमादिसंग्रहः ॥ ३१ ॥

किञ्च भगवानीश्वरः सर्वभूतेष्वन्तरात्मतया वर्त्ततेऽतः सर्वाणि भूतानि भगवदात्मकानीति बुद्ध्या यथाशक्ति यथायोग्यं तद्भूतान्यपेक्षितैः कामैः साधु मानयेत्सम्मानयेदित्यनेन च ॥३२॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विमृश्य निर्णयप्रकारं दर्शयति, बुद्धेरिति । सत्त्वबुद्ध्यादिशब्दैस्तु जीवोपि कचिदीर्यते इति वचनाद्बुद्धेर्जीवस्य जागरणाद्यावृत्तयोऽवस्थास्ता येन परमात्मना प्रेरितेन जीवेनानुभूयन्ते "जाग्रदाद्याः कर्म चैव सुखदुःखे च तस्य हि" इति वचनात् । स परः पुरुषोऽध्यक्षः "जाग्रदादेः परो द्रष्टा सुखनित्यो हरिः स्मृतः" इति वचनात् । सोऽध्यक्षो जाग्रदादिनाधिगतेन्द्रियसुखदुःखपरो जीवः परो विश्वादिविग्रहाद्धरेरन्य इत्युत्तरार्द्धस्यार्थभेदो ज्ञातव्यः एव शब्देन कालादिकं व्यावर्तयति ॥ २५ ॥

"कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ । प्राज्ञः कारणबद्धस्तु" इति वचनाद्विश्वादिविग्रहान्नारायणादन्यत्वं जीवस्य कथं जीवधर्माक्रान्तत्वात्तस्येति तत्राह,एभिरिति । बुद्धीनां जीवानां भेदस्तारतम्यलक्षणो यैर्ज्ञाप्यते तैर्जीवतारतम्यज्ञापकैरत एव पर्यस्तैरेकत्र समस्तैरभिन्नैर्वर्णैस्त्रिधावर्णैर्वर्णनं येषां ते तथा तैर्जाग्रदादिभिस्त्रयो वर्णाः शुक्लकृष्णपीतलक्षणा येषां ते तैः सत्त्वादिगुणैर्वा स परमात्माऽज्ञजनदृष्ट्यात्मनो जीवस्य सरूपं रूपेणसमानरूपं कार्यादिवद्धं धत्त इति दृश्यते न तु प्राज्ञजनदृष्ट्या तद्दृष्ट्या ज्ञानानन्दादिसमानं रूपं धृत्वा तत्स्वरूपं धत्त इति "स जीवेन सहस्थानात्तत्स्वरूपः प्रदृश्यते" इति स्मृतेः । अन्वयाद्व्यतिरेकाद्यादिष्वनुगतत्वात्कीदृशैः क्रियोद्भवैः क्रियया उद्भवो येषां ते तथा तैः कर्मजनितैः यद्वा क्रियाया उद्भवो येभ्यो गुणेभ्यस्ते तथा तैः शुक्लसत्त्वजन्यं जागरणं पीतरजोजन्यं स्वप्नं कृष्णतमोजन्या सुप्तिः कर्माण्येवंविधानि "अजामेकां लोहितशुक्लकृष्णाम्" इति श्रुतेः । कुत्रायं व्यवहारो दृष्ट इति तत्राह, गन्धैरिति । यथा गन्धैरन्वयात् सौरभ्यादिगन्धसम्पर्कात् सुगन्धो दुर्गन्धो मिश्रगन्धो वायुरिति व्यवह्रियते न तावता तादात्म्यं वायोस्तथात्वे सर्वदा तथा स्यात् न चैवं तस्माद्भिन्न एव वायुस्तथाहरिरपि "यथागन्धयुतोनिलः" इति च "तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवत्" इति श्रुतेः । देहाख्यप्रपञ्चसम्पर्कोस्त्येव हरेरिति भावः ॥ २६ ॥

अभेददर्शने बाधकमाह, एतद्द्वार इति । इदमभेददर्शनं द्वारं यस्य संसारस्य स तथा पुंसः संसारः प्राप्यते हि यस्मात् "अदृष्टेर्जीवपरयोर्भेदस्याप्नोति संसृतिम्" इति वचनात् । अभेददर्शने कारणमाह, गुणेति । अभेददर्शनजनकत्वेन गुणकर्मणोः संसारनिमित्तत्वमाह, तस्येति । विक्षेपकर्मणः कारणमज्ञानं तद्द्वारा संसारइत्याशयेनाह, अज्ञानेति । अज्ञाननिमित्तकर्मपरम्परया मुग्धमनसः पुंसोऽभेदनिश्चयादन्ततस्तमएव शरणमित्याशयेनाह अपार्थ इति । अपगतानिवृत्तिस्तमस इति शब्दः

"अर्थः स्याद्विषये मोक्षे शब्दवाच्ये प्रयोजने ।
व्यवहारे धने शास्त्रे वस्तुहेतुनिवृत्तिषु "।

इत्यभिधानात्. मशकार्थे धूम इति प्रयोगाच्च "अभेदनिश्चयाद्याति तमो नास्त्यत्र संशयः" इति स्मृतेः । अपिशब्देन नित्यदुःखभूयिष्ठतमःप्राप्तिं सूचयति, "दुःखरूपोपि संसारो बुद्धिपूर्वमवाप्यते" इति संसारस्तमः इन्द्रियार्थसन्निकर्षादर्थोपलब्धिर्जाग्रत् जाग्रदनुभवसंस्कारोपस्थापितविषयाभासोपलब्धिः स्वप्नः उपरतसर्ववृत्तीन्द्रियविषयज्ञानं सुप्तिः अत्र जाग्रद्दृष्टश्रुतपदार्थसंस्कारकृतः स्वप्नः स्वशिरश्छेदनादिलक्षणो दुःखादिहेतुर्यथा, तथा जाग्रदपि राजाऽहं वद्दत्तोनर्थपरम्परा इत्थिवज्जीवपरयोरभेदं जानतः पुंस इहामुत्र दुःखबाहुल्यहेतुरित्यर्थः । "यथास्वप्ने शिरश्छेदं स्वयं कृत्वात्मनोवशः । ततोदुःखमवाप्येत तथा जागरितेऽपितु ॥ जानन्नप्यात्मनो दुःखमवशस्तु प्रवर्तते" इति स्मृतौ दर्शनात् ॥ २७ ॥

अर्थक्रियाकारित्वात् न स्वप्नादेर्मिथ्यात्वमित्याह—मनोमयत्वादिति । मनसा निर्मितकर्मनिमित्तत्वादनित्यत्वाभिप्रायेण स्वप्नजाग्रत्साम्यम् अन्यथा शोकमोहभयप्रदा इत्येतदसम्बद्धम् स्यात् न च शुक्तिरजतादिकं वलयकरणादियोग्यम् ॥ ०॥०॥

विपक्षे बाधकमुक्त्वा विपर्यये पर्यवसानच्छलेन संसारबीजनिर्हरणोपायमाह — तस्मादिति । यस्मात्पुंसो गुणकर्मनिर्मिताभेददर्शनद्वारः संसारस्तस्माद्भेदनिमित्तानिगुणमयकर्मबीजभर्जनोपायो भवद्भिः कर्तव्यः नन्वग्निष्टोमादिकमन्तरेण कर्मणां बीजभूतस्य लिङ्गशरीरस्य दहनोपायः । कोऽसौ ? यमनियमादिलक्षणश्चेतदुभयत्र साधारणत्वेनानन्तरङ्गत्वान्न गत आपाकनिक्षिप्तामघटदहनयोग इत्यादस्य तत्साधनं वक्तव्यमिति तत्राह, प्रयाह इति । धियः प्रवाहस्य सजातीयप्रत्ययानन्तरितया विपश्चीकरणनिपुणोपासनालक्षणस्य उं रुद्रं पाति रक्षतीत्युपः "उपोधिके" इति सूत्रादुपः सर्वाधिको वा परमेश्वरस्तस्मिन् रमणं निरन्तरश्रीनारायणचरणसरसिजसाक्षात्कारलक्षणोपासनात् स एवेत्यभिप्रायः ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

धियः प्रवाहस्यान्तरङ्गसाधनमाह, तत्रेति । भगवतेत्यनेन ग्राह्यत्वे आप्तमूलत्वं दर्शयति—अन्यथा वाधकमाह—नेति ॥ २९ ॥

भक्त्या गुरुशुश्रूषया "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ" इति श्रुतेः सर्वलाभार्पणेन हराविति शेषः "ब्रह्मार्पणं ब्रह्म हविः" इत्यादेः साधु भक्तानाम् "नाऽवैष्णवाय दातव्यं नोदबिन्दुं न तण्डुलम्" इत्यादेर्नियतभगवद्भक्तानां सेवालक्षणप्रसंगेन "महत्सेवां द्वारमाहुर्विमुक्तेः" इत्यादेः ईश्वराराधनेन पञ्चरात्रोक्तेन पञ्चकालीनभगवत्पूजया पञ्चकालपरायणं पञ्चकालैकमनसामित्यादेः ॥ ३० ॥

तत्कथायां श्रद्धया "पानेन ते देवकथासुधायाः" इत्यादेः गुणकर्मणां सङ्कीर्तनैः "कलौ सङ्कीर्त्यकेशवम्" इत्यादेः विभवविखण्डध्यानविधानार्थं तत्पदांबुरुहध्यानादिति "सञ्चिन्तयेद्भगवतश्चरणारविन्दम्" इत्यादेः तस्य हरेर्लिङ्गं प्रतिमा तस्येक्षा दर्शनं अर्हणं पूजनम् आदिशब्देन प्रदक्षिणादि गृह्यते "बर्हायिते ते नयने नराणाम्" इत्यादेः ॥ ३१ ॥

"हरिः सर्वेषु भूतेषु" इत्यादिना हरिरेवपूज्यो न तु भूतानि योग्यतातिरेकेणेतीदमेव कथ्यते "ईश्वरो जीवकलया प्रविष्ट" इत्यादेर्वा ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अथ स्वप्रतिपत्तिं प्रतिपादयति—तत्रोपायेत्यादिभिः । तत्र पूर्वोक्ते त्रिगुणात्मककर्मणां बीजनिर्हरणेऽपि उपायसहस्रैः सिद्धानां मध्ये अयमेव उपायो भगवता श्रीनारदेन मां प्रत्युपदिष्टः यैरुपायसहस्रैः सिद्धात् यद्यस्मादुपायात् यथा यथावत् ईश्वरे भगवति अञ्जसा व्यवधानान्तरं विनैव रतिः प्रीतिर्भवति । अतः कर्मबीजनिर्हरणमपि तस्यानुषङ्गिकमेव फलमिति भावः । यद्वा तत्र बीजनिर्हरणे निमित्ते यान्युपायसहस्राणि तेषामप्ययमेवोपायो भगवता श्रीनारदेनोदितः । अनेनैवोपायेन कृतकृत्यानि भवन्तीत्यर्थः । कोऽसौ ? तत्राह—यैरुपायैः सिद्धात् यद्यस्मादुपायादीश्वरे भगवति यथा यथावदञ्जसा उपायान्तर व्यवधानं विना रतिर्भवतीति ॥ २९ ॥

गुरुशुश्रुषयेति त्रिकम् ॥ ३०-३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

विमर्शप्रकारमाह, बुद्धेरिति द्वाभ्याम् । यदन्वितायाः एवबुद्धेस्तिस्रोऽवस्था उद्भवन्ति सः परः पुरुषः परमात्मा ॥ २५ ॥

यस्त्वेतद्बुद्ध्यवस्थात्रयवानाभाति स जीवात्मेत्याह—एभिः बुद्धेर्भेदैः परिणामैः जागरादिभिः त्रिवर्णैः त्रिगुणात्मकैः क्रियोद्भवैः कर्मजन्यैः पर्यस्तैः अनात्मधर्मत्वेन निरस्तैरपि एभिरेव आत्मनोऽशुद्धजीवस्य स्वरूपं बुद्ध्येत् जानीयात् यथा अन्वयात् सम्बन्धमात्रादेव गन्धैः पुष्पादिगन्धैर्वायुं गन्धवन्तं जानीया[त्]

यदन्विता बुद्धिः प्रवर्त्तते स परमात्मा यो बुद्ध्यन्वितः स जी[वा]त्मेति भेदः ॥ २६ ॥

एषा बुद्धिरेव द्वारं यस्य सः अत एव गुणकर्मभ्यां त[...] याभ्यां नितरां बन्धनं यत्र सः किञ्चन ज्ञानं यस्य तथाभूतं मूलय[...] सः, यस्य मूलं न ज्ञायत इत्यर्थः । अपार्थः अवस्तुभूतोपि जीव[...] संसारो देहाध्यासरूपः स्वप्न इव अर्प्यते इति तस्मिन् पुंसि परमेश्व[र]शक्त्यैवेत्यर्थः ॥ २७ ॥

तस्मात्तन्निवृत्तये यतितव्यमित्याह, तस्मादिति । बीजं प्राहु[...] बुद्धिः तस्य निर्हरणं दहनं दहनमेव किं तदाह, धियो बु[द्धेः] प्रवाहाणां जागराद्यवस्थानां उपरमः स एव योगः फलम् "यो[गो]ऽपूर्वार्थसंप्राप्तौ सङ्गतिध्यानयुक्तिषु" इति मेदनी ॥ २८ ॥

तत्र बीजनिर्हरणे विषये उपायसहस्राणां मध्ये अयमुपा[यो] भगवता उदितः अन्ये त्वन्यैर्मुनिभिरुदितत्वादस्मात्ते निकृष्टा ए[व] भावः । अयमेव कस्तत्राह, यदिति । यैर्गुरुशुश्रूषणाद्यंगैरुत्पन्नात् [...] यस्माद्भक्तियोगाद्रतिर्भवति अयं भक्तियोग एवोपाय इत्यन्वय[ः] अत्र पञ्चम्यन्तयत्पदात् अञ्जसा शब्दाच्च रतिरेव भक्तियोग[स्य] मुख्यं फलं बीजनिर्हरणं त्वानुषङ्गिकमयत्नतएव शुद्धभक्तानां भव[ति] यदुक्तम्, "जरयत्याशु या कोषं निगीर्णमनलो यथा" इति ॥ २९ ॥

धर्मस्य तत्त्वं ज्ञानञ्चेति द्वयमुपदेष्टव्यत्वेन यत् प्रक्रान्तं तत्र ज्ञा[न]मुक्त्वा धर्मे तत्त्वं भक्तियोग एवेति द्योतयन् पूर्वोक्तयत्पदवाच्य[...] तदङ्गान्याह—गुर्वितित्रिभिः । गुरोः शुश्रूषया स्नपनसम्वाहना[दि]कया तथा सर्वेषां लब्धानां वस्तूनां तदर्पणेन च तच्चार्पणं भक्त[...] न तु प्रतिष्ठादिना हेतुना साधवः सदाचारा ये भक्तास्तेषां सङ्गे[न] दुराचारा भक्ताः सेव्या वन्द्या दर्शनीयाश्च न तु सङ्गार्थमुपा[...] इति भावः ॥ ३० ॥

एव मेतत्प्रकारकया भक्त्यैव निर्जितः षण्णां कामादीनामि[न्द्रि]याणां वा वर्गोयैस्तैर्गुरुशुश्रूषाद्यैरङ्गैर्भक्तिरिति पूर्वोक्तं बु[द्धि]प्रवाहोपरमरूपमानुषंगिकं फलमुक्तं भक्तेर्मुख्यं फलमाह, यया[...] रतिं प्रेमाणम् ॥ ३१—३३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

जागरणाद्यवस्थानुवृत्तेश्च जीवात्मानं बुद्ध्येदित्याह, बुद्धे[रि]ति द्वाभ्याम्, बुद्धेर्जागरणाद्याः वृत्तयो येन ज्ञानस्वरूपेणानुभू[...] सोऽध्यक्षः बुद्ध्यादिस्वामी परो बुद्ध्याद्यचेतनवर्गविलक्षणः ॥ [२५ ॥]

एभिस्त्रिवर्णैः सत्त्वादिगुणत्रयमयैः पर्यस्तैरनित्यैः [...]त्यत्वे हेतुं दर्शयितुं विशेषणं क्रियोद्भवैरिति क्रिया जीवक[र्म] तदनुसारेण जातैः यस्य जीवस्य शुभं कर्म तेन जीवेन स्व[...] जन्या बुद्धिवृत्तयः सुखप्रदा अनुभूयन्ते अशुभकारिणो दुः[ख]प्रदा अनुभूयन्ते यन्मते तु बुद्धेरेवकर्मत्वं तन्मतमुपेक्षणीयं स[...] "विज्ञानं यज्ञं तनुते, "कर्त्ता शास्त्रार्थवत्त्वात्" इत्यादिश्रुतिसूत्रवि[रो]धात् करणभूतायाः अचेतनायाः कर्तृत्वसम्भवाच्च तद्वत्प्र[...]रपि जगत्कर्तृत्वप्रसङ्गाच्च एवंभूतैर्बुद्धिभेदैः बुद्धिवृत्तिभिः गन्ध[...] द्वारकं वायुमिव आत्मनः स्वरूपं बुद्ध्येत् अन्वयानुकावस[...] तद्वृत्तिसाक्षिणो जीवस्यैवानुवृत्तेः ॥ २६ ॥

एवं निर्जितषड्वर्गैः क्रियते भक्तिरीश्वरे।
वासुदेवे भगवति यया संलभते रतिम् ॥ ३३ ॥
निशम्य कर्माणि गुणानतुल्यान्वीर्याणि लीलातनुभिः कृतानि।
यदाऽतिहर्षोत्पुलकाश्रुगद्गदं प्रोत्कण्ठ उद्गायति रौति नृत्यति ॥ ३४ ॥
यदा ग्रहग्रस्त इव क्वचिद्धसत्याक्रन्दते ध्यायति वन्दते जनम्।
मुहुः श्वसन् वक्ति हरे! जगत्पते! नारायणेत्यात्ममतिर्गतत्रपः ॥ ३५ ॥
तदा पुमान्मुक्तसमस्तबन्धनस्तद्भावभावानुकृताऽऽशयाकृतिः।
निर्दग्धबीजाऽनुशयो महीयसा भक्तिप्रयोगेण समेत्यधोक्षजम् ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

एषा बुद्धिरेव द्वारं यस्य यतो बुद्धिगुणनिमित्तानि यानि जीवकर्तृकाणि कर्माणि तैर्मितरां बन्धनं यस्मिन् अज्ञानं तत्वबोधाभावो मूलं यस्य अपगतोऽर्थः आत्मा परमात्मबोधरूपः पुरुषार्थो यस्मात् एवम्भूतः संसारः जन्ममरणप्रवाहलक्षणः पुंसः पुंसि अर्पिताः, कर्मफलदेनेति शेषः। एवम्भूतसंसारश्रवणेनातिभीतान् प्रत्याह, स्वप्न इवेति। स्वप्नो यथा तात्कालिककर्मफलदेन पुंस्यर्पितस्तेनैव निराक्रियते तद्वत्स्वाराधितेन भगवतैव संसारो निवार्यत इत्यर्थः ॥ २७ ॥

तन्निवृत्त्युपायः कर्त्तव्य इत्याह–तस्मादिति। यस्मादेवं तस्माद्भवद्भिः बीजानिर्हरणं पूर्वोक्तस्य संसारमूलस्याज्ञानस्य निर्हरणं दहनं तद्दहनार्थं तत्त्वज्ञानसंपादनं कर्त्तव्यं धियो बुद्धेः कारणभूतायाः यानि कर्माणि तेषां फलभूतस्य प्रवाहस्य जन्ममरणप्रवाहभूतस्य संसारस्योपरमो यस्मात् स योगः संसारतरणोपायश्च कर्त्तव्य इत्यन्वयः ॥ २८ ॥

तत्र तत्त्वज्ञानसंपादने संसारतरणे यैर्धर्मैः यथा यथावत् अञ्जसा भगवति रतिरिति यत् अयमेवोपायसहस्राणां मध्ये मुख्य उपायः भगवतोदितः“भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः” इति “मां च योऽव्यभिचारेण भक्तियोगेन सेवते। स गुणान्समतीत्यैतान् ब्रह्मभूयाय कल्पते” ॥ इति ॥ २९ ॥

तस्याः परभक्तिरूपाया रतेः साधनरूपान् धर्मानाह—गुरुशुश्रूषयेति चतुर्भिः। गुरुशुश्रूषारूपया भक्त्या सर्वेषां लब्धानां प्रियपदार्थानां भगवति अर्पणेन च ॥ ३० ॥

तस्य भगवतः कथायां श्रद्धया गुणानां सर्वज्ञत्वादीनां कर्मणां विश्वसर्जनादीनां कीर्त्तनैः तल्लिङ्गानां तस्य मूर्त्तीनाम् ईक्षणमर्हणञ्चादिर्येषां वन्दनप्रणामादीनां तैश्च ॥ ३१ ॥

सर्वेषु भूतेषु हरिः आस्ते इति हेतोस्तैस्तद्धितैः कामैर्भूतानि साधु यथा भवति तथा मानयेत् ॥ ३२ ॥

भाषा टीका।

जागरण स्वप्न सुषुप्ति, बुद्धि की इन तीनों दशाओं का जो अनुभव करता है और बुद्धि से पर है वही अध्यक्ष पुरुष है ॥ २५ ॥

क्रिया से उत्पन्न होने वाले त्रिगुणात्मक विस्तृत बुद्धि के परिणामों से आत्मा के स्वरूप को जाने, जैसे पुष्प के गंध से उसके आश्रय वायु को जानता है ॥ २६ ॥

गुण कर्म निबंधन यह संसार बुद्धि की दशा द्वारक ही है और अज्ञान मूलक और अपार्थ भी है, और पुरुष को स्वप्न के तरह अनित्य है ॥ २७ ॥

तस्मात् तुम लोग त्रिगुणात्मक कर्मों के बीज की हानि के लिये, बुद्धि के प्रवाह के उपराम करने वाले योग का साधन करो ॥ २८ ॥

तहां पर हजारों उपायों के मध्य में यह उपाय भगवान ने कहा है, कि जैसे जिन धर्मों से साक्षात् भगवान् में रति होवै ॥ २९ ॥

वही भगवान् में रति जिन अन्तरंग धर्मों से होती है उनको कहते हैं कि गुरु की शुश्रूषा, भक्ति, जो प्राप्त हो तिस सबका अर्पण, साधु और भक्तों का संग, ईश्वर का आराधन, ॥ हरिकथा में श्रद्धा, हरि के गुण कर्मों का कीर्त्तन उनके चरणकमल का ध्यान और भगवत्प्रतिमाओं [मूर्तियों] का दर्शन पूजनादि, इन सबों से ॥ ३० ॥ ३१ ॥

और सर्व भूत प्राणियों में हमारे ईश्वर भगवान् विराजमान हैं इस प्रकार के मनसे प्राणियों को सम्यक् प्रकार से तत्तत् कामों से मानें ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

निर्जितः षण्णां कामक्रोधलोभमोहमदमत्सराणामिन्द्रियाणां वा वर्गो यैः ॥ ३३॥

भगवद्रतेर्लिंगान्याह, निशम्येति त्रिभिः। गुणान्भक्तवात्सल्यादीन् अतिहर्षेणोद्गताः पुलका अश्रूणि च तैर्गद्गदं यथा भवत्येवं प्रोत्कण्ठो मुक्तकण्ठ उद्गायति ॥ ३४ ॥ ३५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्य भावश्चेष्टादिस्तस्य भावो भावना तेनानुकृते आशयाकृती मनश्शरीरे यस्य निर्दग्धं बीजमज्ञानमनुशयो वासना च यस्य सः स्वरूपगेति प्राप्नोति ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्येतैः साधनैर्जितैः षण्णां कामक्रोधलोभमोहमदमात्सर्याणां वर्गैर्भगवतीश्वरे भक्तिः क्रियते कर्त्तव्येत्यर्थः भक्तिरहरहर्ध्यानम् एवमहरहःक्रियमाणया(१)ध्यानात्मिकयोत्तरोत्तरसाक्षात्कारेच्छात्मिकया भक्तिपरंपरया यथा वासुदेवे ध्यानात्मिकाया भक्तेः प्रीत्यात्मिकां भक्तिं लभते इत्याह—वासुदेवे इति । ययाऽहरहः क्रियमाणया गुरुशुश्रूषादिसाधनानुगृहीतया अनुध्यानात्मिकया उत्तरोत्तरसाक्षात्कारेच्छात्मकपरभक्त्यपरपर्यायया वासुदेवे भगवति रतिं परमभक्त्यपरपर्यायभूतां निरन्तरानुबुभूषात्मिकां तत्प्रीतिरूपां लभत इत्यर्थः ॥ ३३ ॥

एवं विधभक्तियोगनिष्पत्तिलिङ्गानि वदंस्तेन परिनिष्पन्नेन भगवद्भक्तियोगेन परमात्मानं प्राप्नोतीत्याह—निशम्येति त्रिभिः। यदा भगवतो गुणानतुल्याननितरसाधारणान् । तथा लीलातनुभिः स्वेच्छोपात्ताप्राकृतदिव्यावतारविग्रहैः रामकृष्णादिभिः कृतानि कर्माणि चेष्टितानि निशम्य श्रुत्वा अतिहर्षेणोद्गता उदञ्चिताः पुलकाः रोमाणि अश्रूणि आनन्दवाष्पविन्दवश्च तैर्गद्गदं यथा भवत्येवं प्रोत्कण्ठः मुक्तकण्ठः उद्गायति अत्युच्चैर्गायति रौति ध्वनति नृत्यति च ॥ ३४ ॥

सर्वदा च ग्रहग्रस्त इव हसति कचिदाक्रन्दते रोदिति कचिच्च ध्यायति कचिच्च जनं भगवदात्मकं वन्दते नमस्करोति कचिच्च पुनः पुनः श्वसन् श्वासं मुञ्चन् गतत्रपो निर्लज्जः हे नारायण ! जगत्पते ! हरे ! इतीत्थं वक्ति वदति तदेत्युत्तरेणान्वयः इयमेव भक्तियोगस्य निष्पन्नस्येति भावः ॥ ३५ ॥

तदा एवं परिनिष्पन्नभक्तियोगावस्थायां पुमानुक्तविधभक्तियोगनिष्ठः महीयसा सर्वोत्तमेन भक्तियोगरूपेणोपायेन प्रारब्धावसाने मुक्तं समस्तबन्धनं भगवत्प्राप्तिविरोधिपूर्वोत्तरपुण्यपापात्मकाघरूपं यस्मात्तादृशो निर्दग्धो नितरां दग्धो बीजाऽनुशयः संसृतिमूलभूतकर्मवासनात्मको यस्य तस्य भगवतो भावः प्रकारः आकृतिरित्यर्थः । तस्य भावो भावनाऽनुध्यानं तेनाऽनुकृतः आशयोन्तःकरणम् आकृतिर्विग्रहश्च यस्य भगवता समानरूप इत्यर्थः । अधोक्षजं भगवन्तमुपैति प्राप्नोति ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यया भक्त्या हरौ रतिमुपासनां लभते तया स्वरूपानन्दाऽनुभवलक्षणां रतिं लभत इति परम्परया योज्यम् ॥ ३३ ॥

(१) ध्यानात्मिकया भक्त्या प्रीत्यात्मकां प्रकृष्टां भावनां लभते इत्यन्याक्षरमुद्रित पुस्तके ।

सृष्ट्यादीनि कर्माणि कंसवधादीनि वीर्याणि उद्गानादीनि न सर्वभक्तसाधारणं तदुक्तम्—

"केचिद्भक्ताः प्रनृत्यन्ति गायन्ति च यथेप्सितम् ।
केचित्तूष्णीं भजन्त्येव केचिच्चोभयकारिणः" ॥

इति ॥ ३४ ॥ ३५ ॥

एतदेवाह- तद्भावेति । तस्य भावे यथा स्वरूपे भावोऽभि- स्तस्यानुकृतेऽनुकूलत्वेन प्रकटित आशयाकृती अन्तःकरणाकारौ यस्य स तथा कश्चिदुद्गानेनान्तरा भक्तिं प्रकटयति, कश्चि- द्रोदनाश्रुपातकरणेन कश्चिन्नर्तनेन कश्चित्तूष्णीं भजनेनेति तस्य ब्रह्मणो भावो लीला तत्र यो भावो भक्तिस्तया रञ्जिताभि- प्रायाकार इति वा स्थानाभिप्राय आशय इति वा निर्दग्धं कर्म- बीजं यस्य स तथा स चानुशयोन्तःकरणं यस्य स तथा अनु- शयः संसारो वा ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अथ तस्यैवोपायस्यैवाङ्गान्युक्त्वाऽऽह—एवमिति । ए- पूर्वोक्तगुरुशुश्रूषादिप्रकारेणैव न तु तदर्थपृथक्प्रयत्नेन निर्जि- तकर्मबीजलक्षणकामादिभिर्जनैः पुनरपि भक्तिः क्रियत एव ॥ ३३ ॥

निशम्येति त्रिकम् ॥ ३४—३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

रतेश्चिह्नान्याह, निशम्येति । कर्माणि दधिपयश्चौर्यादीनि गुणान् भक्तवात्सल्यादीन् वीर्याणि गोवर्द्धनोद्धरणकंसवधादीनि ॥ ३४ ॥

हरे ! जगत्पते ! नारायणेति वाचा वक्ति आत्मना मनसा मतिर्मननं यस्य सः तस्मिन् भावा दास्यसख्यादयस्तेषां भाव- दासोऽहं सखाहमित्याद्यात्मनो मननं तेन अनुकृते अनुरूपीकृ- आशयाऽऽकृती मनः शरीरे येन सः न च शरीरसद्भाव ए- संसार आशंक्य इत्याह, निर्दग्धं पूर्वमेवाविनष्टं बीजं प्राकृ- बुद्धिः अनुशयो विषयवासना च यस्य सः महीयसा अनुराग- मार्गवता साम्मतिः अधोक्षजसंयोगं प्राप्नोति ॥ ३५—३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं यया गुरुशुश्रूषणादिवहङ्गया वासुदेवे रतिं परां भक्ति लभते मुमुक्षुः सापि निर्जितः षण्णामिन्द्रियाणां वर्गो यैस्तैः क्रियते न त्वजितेन्द्रियैरित्यन्वयः ॥ ३३ ॥

रतिशब्दोक्ताया परभक्तेर्लिङ्गानि वदन् तया सर्वबन्धावि- निर्मुक्तो भवतीत्याह—निशम्येति त्रिभिः । वासुदेवस्य अतुल्या- सर्वेश्वरत्वसर्वैकवेद्यत्वसर्वशक्तित्वसर्वात्मत्वादीन् अनुपमान् गुणान् लीलातनुभिः स्वेच्छोपात्ताप्राकृतविग्रहावतारैः कृतानि कर्माणि वीर्याणि प्रभावांश्च निशम्य श्रुत्वा अतिहर्षेणोद्गता- पुलका अश्रूणि वा तैर्गद्गदं यथा भवत्येवं प्रोत्कण्ठः प्रकृष्टा उत्कण्ठा यस्य सः तथाभूतः यदा उद्गायति उच्चैर्गायति रौति जयकृष्णेत्यादीन् पुण्यान् शब्दान् करोति नृत्यति च ॥ ३४ ॥

आत्मनि परमात्मनि मतिर्यस्य यदा च ग्रहग्रस्त इव कचिद्

अधोक्षजालम्भमिहाशुभात्मनः शरीरिणः संसृतिचक्रशातनम् ।
तद्ब्रह्म निर्वाणसुखं विदुर्बुधास्ततो भजध्वं हृदये हृदीश्वरम् ॥ ३७ ॥
कोऽतिप्रयासोऽसुरबालकाः ! हरेरुपासने स्वे हृदि छिद्रवत्सतः ।
स्वस्यात्मनः सख्युरशेषदेहिनां सामान्यतः किं विषयोपपादनैः ॥ ३८ ॥
रायः कलत्रं पशवः सुतादयो गृहा मही कुञ्जरकोशभूतयः ।
सर्वेऽर्थकामाः क्षणभङ्गुरायुषः कुर्वन्ति मर्त्यस्य कियत्प्रियं चलाः ॥ ३९ ॥
एवं हि लोकाः क्रतुभिः कृता अमी क्षयिष्णवः सातिशया न निर्मलाः ।
तस्माददृष्टश्रुतदूषणं परं भक्त्यैकयेशं भजतात्मलब्धये ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आत्मानं भगवद्दासत्वेन कृतार्थं मत्वा हसति कश्चिच्च भगवन्तं दुर्दर्शं मत्वा स्वकृतसाधनानां तत्कृपां विनाऽकिञ्चित्करत्वं च मत्वा आक्रन्दते रोदिति कश्चिच्च भक्तवत्सलत्वदीनबन्धुत्वसर्वशरण्यत्व पतितपावनत्वादीन् भगवद्गुणान् स्मृत्वा तमेव भजनं दृढविश्वासेन ध्यायति कश्चिच्च गता भगवन्नामोच्चारणादिसङ्कोचकरी अमङ्गला त्रपा लज्जा यस्य सः हे हरे ! इत्यादि वक्ति ॥ ३५ ॥

तदा प्रारब्धक्षये मुक्तानि समस्तानि बन्धनानि यस्य सः निर्दग्धबीजरूपः संसृतिहेतुः अनुशयः संसारिकवासनाग्रंथिर्यस्य सः तस्य भगवतो भावः कार्यकारणत्रिगुणप्रकृतिविलक्षणस्वरूपगुणविग्रहवत्त्वं तस्य भावो ध्यानं तेन अनुकृतोऽनुयोजितः आशयोन्तः करणं तदुपलक्षिताप्राकृतसकलकरणकलापः आकृतिरप्राकृतविग्रहश्च यस्य सः भक्तिप्रयोगेण भक्तिरूपेण प्रकृष्टयोगेन अधोक्षजं भगवन्तं प्राप्नोति "निरञ्जनः परमं साम्यमुपैति "इदं ज्ञानमुपाश्रित्य ममसाधर्म्यमागताः । सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च" ॥ इति श्रुतिस्मृतिप्रसिद्धं भगवत्साधर्म्यलक्षणं मोक्षं प्राप्नोतीत्यर्थः ॥ ३६ ॥

भाषा टीका ।

इस प्रकार जितेन्द्रिय होकर जगन्नियंता भगवान वासुदेव के विषय भक्ति करे, कि जिससे रति को प्राप्त हो ॥ ३३ ॥

भगवान में रति प्राप्त होने पर, भगवान ने लीलाशरीर को धारण कर जो कर्म किये, उन कर्म वीर्य और गुणों को सुनकर जब अति हर्ष से पुलकित गात्र और अश्रुओं से गद्गद कण्ठ होजाता है तब मुक्त कंठ होकर उंचेस्वर से गान करता है रोता है, और नांचता है ॥ ३४ ॥

जब ग्रहग्रस्त सरी का हो जाता है तब कभी हँसता है कभी आक्रोश करता है, किसी समय ध्यान करता है, किसी समय मनुष्यों दण्डवत करता है, कभी बडी श्वास लेता हुआ परमात्मा में मन लगा कर, हे हरे ! हे जगत्पते ! हे नारायण ! इस प्रकार निर्लज्जहोकर नाम सङ्कीर्तन करता है ॥ ३५ ॥

पुरुष जब ऐसा हो जाता है तब समस्त बन्धनों से छूटकर भगवान की चेष्टाकी भावनासे भावित हुआ अन्तःकरण और शरीर जिसका ऐसा, और महान् भक्ति के प्रयोगसे निर्दग्ध हो गया वासना रूप संसार का बीज जिसका ऐसा हो कर अधोक्षज श्रीहरिको प्राप्त होजाता है ॥ ३६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ततः किमत आह—अधोक्षजस्यालम्भं मनसा स्पर्शम् पाठान्तरे तस्याऽऽश्रयणम् अशुभात्मनः अशुभो रागादियुक्त आत्मा मनो यस्य संसृतिचक्रशातनं तन्निवर्तकं बुधा विदुस्तदेव ब्रह्मणि निर्वाणं लयो मोक्षस्तदात्मकं सुखं विदुः हृदीश्वरमन्तर्यामिणम् ॥ ३७ ॥

भक्तिरशक्येति च न मन्तव्यमित्याह—क इति । छिद्रवदाकाशवद्धृदि तिष्ठतः विषयाणामुपपादनैरर्जनैः किम् । तत्र हेतुः सर्वदेहिनां सामान्यतः विषयानिष्ठत्वे सूकरादिसाधारण्यापत्तेरित्यर्थः न चैवमादौ पौनरुक्त्यदोषः नारदोक्तानुवादरूपत्वादस्य प्रकरणस्य ॥ ३८ ॥

अनर्थकं विषयार्जनमित्याह—रायोऽर्थाः क्षणभङ्गुरमायुर्यस्य तस्यैते कियत्प्रियं कुर्वन्ति तदुक्तमितिहासेषु "धनं हि पुरुषो लोके पुरुषं धनमेव वा । अवश्यमेकं त्यजति तस्मात्किं धनतृष्णया" इति ॥ ३९ ॥

"यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् । अभिलाषोपपन्नं च सुखं स्वर्गपदास्पदम्" इत्यवंभूताःस्वर्गादिभोगा अपि न सेवार्हा इत्याह, एवं हीति । क्षयिष्णुत्वे हेतुः क्रतुभिः कृता इति "तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इति श्रुतेः । अत एव

श्रीधरस्वामिकृतभावार्थदीपिका ।

पुण्यतारतम्येन सातिशयाः न च निर्मलाः स्पर्धादिमत्त्वात् न विद्यते दृष्टं श्रुतञ्च दूषणं यस्मिन् ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उपैतु ततः किमत आह—अधोक्षजेति । इह लोकेऽशुभात्मनस्तापत्रयदुःखितमनसः शरीरिणः संसृतिचक्रं चक्रवत्परिवर्त्तमानानिष्टरूपा संसृतिस्तस्याः शातनं निवर्त्तकमधोक्षजस्यालम्भः स्पर्शः प्राप्तिरितियावत् एवं भगवत्प्राप्तेरनिष्टनिवर्तकत्वमुक्तम्. अथेष्टप्रापकत्वमाह—तदधोक्षजालम्भनमेव ब्रह्मनिर्वाणसुखं ब्रह्मसम्बन्धि यन्निर्वाणं निर्वाणो मोक्षस्तद्दशायामनुभूयमानमित्यर्थः । तत्सुखं यस्मिंस्तादृशं, यद्वा, निर्वाणं निरतिशयानन्दो ब्रह्मरूपं यन्निर्वाणं तस्य सुखमनुभवरूपं यस्मिंस्तादृशं बुधाः ब्रह्मविदो विदुः यतोऽनिष्टनिवर्तनेष्टप्रापणाच्चमभगवत्प्राप्तिसाधनभूतस्तद्भक्तियोगस्ततो यूयं हृदये हृद्गे "अय गतौ" हृदयस्थानगते जीवे इत्यर्थः । "हृदिह्ययमात्मा प्रतिष्ठितः" इति श्रुतेः । तस्मिन्नीश्वरं नियन्तृतयावस्थितं हृदयपुण्डरीके भगवन्तं भजध्वम् अनेन "तमात्मस्थं येनु पश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम्" इति श्रुत्यर्थः. प्रत्यभिज्ञायते ॥ ३७ ॥

तदेवं निरतिशयानन्तस्थिरफलभगवत्प्राप्तिसाधनधर्मानुष्ठानस्य दुःशकत्वशङ्का निरासं "न ह्यच्युतं प्रीणयतो बह्वायासः" इत्युपक्रम्य तद्धर्मतदनुष्ठानप्रकारकथनेन तदाशङ्कां निरस्याथैवमस्मिन् सुकरे भगवद्धर्मानुष्ठाने न कोऽपि प्रयास इत्युपसंहरन् वैराग्यजननाय स्वर्गस्वाराज्याद्यर्वाचीनपुरुषार्थस्य साऽतिशयाल्पास्थिरत्वं वक्तुं तावद्दृष्टान्ततया वैषयिकस्यैहकलौकिकसुखस्य तुच्छतामाह—क इति द्वाभ्याम् । हे असुरबालकाः ! स्वे स्वकीये हृत्पद्मे छिद्रवदाकाशवत् सतो वर्त्तमानस्य सत्यस्य सत्यकामत्वादिनिखिलाविर्भूतगुणाष्टकाश्रयस्य आत्मनः परमात्मनः अशेषदेहिनां सामान्यतः साधारणतया सख्युः "द्वासुपर्णौ" इत्यादि श्रुत्युक्त सख्ययुक्तस्य हरेरुपासनेन कोवाऽतीव प्रयासः न कोऽपीत्यर्थः । विषयाणां शब्दादीनामुपपादनैरर्जनैः किम् ? न किमपि ते ऽतितुच्छा इति भावः । छिद्रवत्सत इत्यनेन "यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः" इति दहरविद्योदितभूताकाशदृष्टान्तोऽभिमतः तत्र हि भूताकाशस्येवाग्निवायुसूर्याचन्द्रमोविद्युन्नक्षत्रादिकृत्स्नजगदाधारत्वं हृत्पुण्डरीकस्थस्य दहराकाशस्य प्रतिपादितम् "उभावग्निश्चवायुश्च सूर्याचन्द्रमसौ विद्युन्नक्षत्राणि यच्चास्येहाऽस्ति यच्च नास्ति सर्वं तदस्मिन् समाहितम्" इति. एवं हृत्पुण्डरीके दहराकाशरूपेण वर्त्तमानस्याऽपहतपाप्मत्वादिगुणाष्टकयुक्तस्य हरेरुपासनं सुशकमित्यभिप्रायः ॥ ३८ ॥

"किं विषयोपपादनैः" इत्यनेन सूचितं विषयाणामल्पास्थिरत्वसातिशयत्वरूपं तुच्छत्वमुपपादयति—रायइति । रायो धनानि सुतादय इत्यादिशब्दनान्ये पित्रादयो देहानुबन्धिनो विवक्षिताः मही क्षेत्रम् आजीविकारूपं विषयो वा कुञ्जरा गजास्तेषां कोशः शाला धनकोशस्य रायः इत्यनेनोक्तत्वात् भूतयः भोग्यभोगोपकरणानि समृद्धयः सर्वे च एते अर्थकामाः काम्यमाना अर्थाः चयोनालयेन क्षणभङ्गुरमायुरवस्थानं येषां ते अत एव चञ्चला अस्थिराः मर्त्यस्य मरणशीलस्य पुंसः कियत्प्रियं सुखं कुर्वन्ति जनयन्ति कियदपि, साऽतिशयमस्थिरमल्पमेव सुखं जनयन्ति न तु निरतिशयमनन्तं स्थिरञ्चेत्यर्थः ॥ ३९ ॥

अथैतद्दृष्टान्तेन स्वर्गादेरपि साऽतिशयत्वाल्पास्थिरत्वान्याह एवं हीति । यथा रैप्रभृतिजन्यानि सुखानि तुच्छानि एवं क्रतुभिः यागादिकर्मभिः कृताः सञ्चिता अमी स्वर्गादयो लोका अपि चयिष्णवः नश्वराः साऽतिशयाः न निर्मला अनिर्मला दुःखमिश्राश्चेत्यर्थः । "तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते, प्लवाह्येते अदृढा यज्ञरूपाः, परीक्ष्य लोकान् कर्मचितान्" इत्यादि श्रुत्यर्थोऽभिप्रेतः । यत एवं तस्माददृष्टश्रुतदूषणं न विद्यते दृष्टं श्रुतं वा दूषणं यस्य श्रुतिस्मृतिभ्यामदूषितम्, निर्दोषं प्रशस्तमित्यर्थः । तं भक्त्यैवोपायेन लभ्यं परं परमपुरुषमात्मलब्धये भजत आत्मलाभाय आत्मलब्धये आत्मनः सत्तायै भजत । अन्यथा संसरत आत्मनोऽन्ततः स्थावरत्वादिप्राप्त्या असत्प्रायतैव स्यात् इति भावः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भक्त्यनन्तरं भगवत्कथा निर्वाणसुखजननीत्याह, अधोक्षजे अधोक्षजालापं संसृतिचक्रशातनं नाशनं तद्धरिविषयकथनं ब्रह्मनिर्वाणसुखं ब्रह्मणोऽनुग्रहात्प्राप्य मुक्तिसुखं विदुः यस्ततो देहहृदयेस्थितं जीववत् हृदि स्थितमीश्वरं भजध्वं अन्वयः "योऽयं बहिर्धा पुरुषादाकाशो योवै यं वोवसयो वा पुरुष आकाशो यो वै सोऽन्तः पुरुष आकाशो यं वा वसयो वा हृदय आकाशः" इति श्रुतेः । हृदीश्वरं मनः प्रेरकत्वेन तस्मिन् "स हि सर्वमनोवृत्तिप्रेरकः समुदाहृतः" इति वाक्याद्वा ॥

भगवदुपासनं द्वीयस्त्वेन बहुपाथेयसाध्यत्वेन मार्गयात्रावत् दुःसाधनं । किं नेत्याह, कोऽतिप्रयास इति । अस्य जीवस्य स्वे स्वाधीने हृदि छिद्रवदाकाशवत्सतः स्थितस्य हरेरुपासने कोऽतिप्रयासः न कोऽपि सर्वगतत्वेन समीपस्थत्वात् "तद्दूरेतदन्तिके" इति श्रुतेः । अशेषदेहिनां सामान्यतः स्वामित्वेन हृदिस्थितत्वेन सख्युः तस्माद्विषयोपपादनैः किम्? व्यर्थैरिति शेषः ॥ ३८ ॥

भक्तेरन्तरङ्गसाधनं वैराग्यमेवेत्याशयेनाह, राय इति ॥ ३९ ॥

विहितयज्ञसाध्यत्वेन स्वर्गादेर्नित्यत्वं सम्भाव्यमिति, नैवमिति । एवं मर्त्यलोकवत्अनिर्मलाः प्राकृतत्वात् न दृष्टं श्रुतं यस्य स तथा तं सहचरीभूतवैराग्यैकया मुख्यया आत्मस्वरूपानन्दानुभवलक्षणमुक्तिप्राप्त्यर्थमात्मनो देहादेर्विविक्तज्ञानलक्षणलाभाय वा ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

नन्वधोक्षजालम्भे सति संसारो विद्यते न वा तत्राह—अधोक्षजेति। शातनमिति शीलार्थे ल्युट्। तत्स्वभावतः स्वत एव सोऽपि यातीति भावः॥ ३७॥

सामान्यतः सख्युः "सयुजौ सखायौ" इत्युक्तेः॥ ३८—३९॥

आत्मलब्धये आत्मनः स्वस्यैवेशस्य लब्धये। यद्वा आत्मनो लब्धये भजत। अन्यथात्मानं नाशयिष्यथ इति भावः॥ ४०—४७॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

ननु, ब्रह्मनिर्वाणसुखमेव पुरुषार्थसार इति प्रसिद्धिः। सत्यं तदपि अधोक्षजसंयोगसुख एवान्तर्भवतीत्याह, अधोक्षजस्यालम्भं मनसा ईषत् स्पर्शं साक्षात् प्राप्तिं वा संसृतिचक्रस्य शातनं निवर्त्तकं विदुर्जानन्ति. तदेव ब्रह्मनिर्वाणसुखं च अधोक्षजस्यैव ब्रह्मत्वात् तच्चरणमाधुर्य्यानुभवस्यैव परमानन्दरूपत्वेन निर्वाणसुखरूपत्वात् तत्र दास्यादिभावत्वेन ममताविशेषोत्थं तु सुखमधिकमपारमेव यथा सर्वजनसुभगे परमाह्लादके चन्द्रे दृष्टे यःस्वाभाविक आनदस्तस्मात् कोटिगुणित आनन्दःस्वपुत्रे षोडां धवधिरेपि सर्वजनदुर्भगेपि ममतोत्थः स्यादित्यतो भगवति दास्यादिभाववत्त्वे परब्रह्मणिस्वरूपोत्थ एव परमानन्दावधिस्तत्रैव यदि ममतोत्थोपि स्यात्तदा किं वक्तव्यमानन्दपारावारपरस्सहस्रसम्मर्दमध्यपातित्वसौभगोत्कर्षमहामहत्त्वम् अतएवोक्तम् "यानिर्वृत्तिस्तनुभृताम्" इत्याद्यन्यत्र च "ब्रह्मानन्दो भवेदेष चेत् परार्द्धगुणीकृतः। नैति भक्तिसुखांभोधेः परमाणु तुलामपि" इति अधोक्षजालम्बमिति पाठे अधोक्षज आलम्बो विषयालम्बनो यत्र तम् अर्थाद्दास्यसख्यादिरसं हृदीश्वरं हृदयनाथमिति दास्यादिभावविशिष्टा भक्तिर्व्यञ्जिता॥ ३७॥

सर्वश्रेष्ठाया अपि भक्तेः सुखसाध्यत्वमाह, कोऽतीति। छिद्रवत् आकाशवत् आत्मनो जीवस्य सख्युः "सयुजौ सखायौ" इतिश्रुतेः न हि सख्युरुपासने किञ्चित् कष्टमिति भावः। उपास्यस्य स्वतो विद्यमानत्वात् प्रियत्वाच्च उपासनस्य च श्रवणादिरूपत्वात् तत्साधनानां श्रवणादीनाञ्च स्वत एव विद्यमानत्वात् नहि कुतश्चन काचन तत्सामग्री आनेतव्येति भावः। वरं नरकसाधनेऽपि अमोऽस्तीति व्यञ्जयन् वैषयिकसुखप्रवृत्तिं निन्दति, विषयाणां स्रक्चन्दनवनितादीनाम् उपपादनैर्द्रव्यादिनोपार्जनैः किम्? तत्र हेतुः सर्वदेहिनां सामान्यतः विषयनिष्ठत्वे सूकरादिसाधारण्यापत्तेरिति भावः॥ ३८॥

न च कामिनां वैषयिकं सुखमपि वस्तुतोऽस्तीत्याह, रायो धनानि अर्थाश्च कामाश्च॥ ३९॥

स्वर्गादिभोगा अपि न सेवार्हा इत्याह, एवं हीति। क्षयिष्णवः "तयथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इति श्रुतेः पुण्यतारतम्येन सातिशयाः स्पर्द्धादिमयत्वाच्च न निर्मलाः आत्मलब्धये आत्मकर्तृकहरिप्राप्तये परमात्मप्राप्तये वा यद्वा आत्मरूपरत्नस्य प्राप्त्यै अन्यथा तत्स्वर्गनरकादिकर्दमे क्षिप्तं नष्टमेव जानीतेति भावः॥ ४०॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

यतः अधोक्षजस्य आलम्भम्भजनीयतया ग्रहणं अशुभे संसारे आत्मा यस्य तस्य बद्धजीवस्य संसृतिचक्रशातनं जन्ममरणप्रवाहनिवर्तकम्। तत्तस्मादधोक्षजालम्भात् शरीरिणां ब्रह्मणाऽधोक्षजेन सह निर्वाणं निर्गता वाणाः उपद्रवा यस्मात्तथाविधं सुखं मुक्त्यानन्दं बुधा विदुः अतः हृदये हृदीश्वरमधोक्षजं भजध्वम्॥ ३७॥

अधोक्षजस्य सुकरत्वमाह, हे असुरबालकाः! अधोपदेहिनां हृदि सामान्यतः सतो विद्यमानस्यापि स्वे हृदि तु स्वकीये भक्तहृत्सरोजे तु छिद्रवत् छिद्रे इव सतः चोरो यथा महता यत्नेन छिद्रे धनलोभेन धनिकगृहछिद्रे प्रविष्टो भवति तद्भक्तिरसलोभेन स्वभक्तहृदि प्रविष्टस्य हरेः आत्मात्मीयभरन्यासवेलायां सर्वस्वहारिणः स्वस्य भक्तजनस्य आत्मनः अन्तर्यामिणः सर्वकृत्यनिर्वाहकतया सख्युश्च उपासने को ऽतिप्रयासः विषयोपपादनैर्विषयाणामर्जनैस्तदुपासनविरोधिभिः किं प्रयोजनम्? न किमपीत्यर्थः॥ ३८॥

विषयोपपादनस्य निष्प्रयोजनत्वं दर्शयति–रायइति। क्षणभङ्गुरमायुर्यस्य तस्य रायो धनानि कलत्रादयः सर्वे अर्थाश्च कामाश्च चलाः क्षणभंगुराः कियत्प्रियं कुर्वन्ति? न किमपीत्यर्थः। तथोक्तमितिहाससमुच्चये "सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः। संयोगा विप्रयोगान्ताः मरणान्तं हि जीवितम्" इति भगवताप्युक्तं "ये हि संस्पर्शजाभोगाः दुःख योनय एव ते। आद्यन्तवन्तः कौन्तेय! न तेषु रमते बुधः" इति॥ ३९॥

यथा ऐहिकाः धनादिपदार्थाः चलाः एवं अमी स्वर्गादयः क्रतुभिः कृता निर्मिताः क्षयिष्णवः चला एव सातिशयाः क्रतुतारतम्यतोऽतिशयेन युक्ताः हर्षशोकप्रदा इत्यर्थः। न निर्मलाः मलिनाश्च यस्मादेवं तस्मात् परं निरतिशयानन्दनिधिं न विद्यते दृष्टं श्रुतं च दूषणं यस्मिन्तम् ईशं सर्वनियन्तारम् आत्मलब्धये तत्प्राप्त्यर्थम् एकया सर्वेभ्यः साधनेभ्यः श्रेष्ठया भक्त्या भजत॥ ४०॥

भाषा टीका।

रागादियुक्त मनवालों के संसार चक्र का नाश करने वाला केवल भगवानही का ध्यान है। उसी को बुध लोग निर्वाण ब्रह्म सुख जानते हैं, तिसी कारणसे अपने हृदयमें हृदीश्वर (अन्तर्यामी) श्रीहरि को भजो॥ ३७॥

हे असुर बालको! आकाशवत् हृदयमें रहने वाले हरिके उपासनमें कौनसा प्रयासहै। क्योंकि वह सामान्यसे समस्त

यदध्यर्थेह कर्माणि विद्वन्मान्यसकृन्नरः ।
करोत्यतो विपर्यासममोघं विन्दते फलम् ॥ ४१ ॥
सुखाय दुःखमोक्षाय सङ्कल्प इह कर्मिणः ।
सदाप्नोतीहया दुःखमनीहायाः सुखावृतः ॥ ४२ ॥
कामान्कामयते काम्यैर्यदर्थमिह पूरुषः ।
स वै देहस्तु पारक्यो भङ्गुरो यात्युपैति च ॥ ४३ ॥
किमु व्यवहितापत्यदारागारधनादयः ।
राज्यं कोशगजामात्यभृत्याप्ता ममतास्पदाः ॥ ४४ ॥
किमेतैरात्मनस्तुच्छैः सह देहेन नश्वरैः ।
अनर्थैरर्थसङ्काशैर्नित्यानन्दमहोदधेः ॥ ४५ ॥
निरूप्यतामिह स्वार्थः कियान्देहभृतोऽसुराः ! ।
निषेकादिष्ववस्थासु क्लिश्यमानस्य कर्मभिः ॥ ४६ ॥
कर्माण्यारभते देही देहेनात्मानुवर्तिना ।
कर्मभिस्तनुते देहमुभयं त्वविवेकतः ॥ ४७ ॥
तस्मादर्थाश्च कामाश्च धर्माश्च यदपाश्रयाः ।
भजतानीहयात्मानमनीहं हरिमीश्वरम् ॥ ४८ ॥

भाषा टीका ।

देहियों का सखा और आत्मा है, उसीका उपासन करो, और विषयों के उपपादनसे क्या प्रयोजन है ॥ ३८ ॥

द्रव्य स्त्री पशु पुत्रादि गृह पृथ्वी हाथी खजाना संपदायें, और सब चीजें, चपल भंगुर आयुवाले इस प्राणी का कितना प्रिय करते हैं ? क्योंकि आप भी चल हैं ॥ ३९ ॥

जैसे इस लोक के पदार्थ नाशमान हैं ऐसे ही परलोक में. यज्ञ यागादि से संपादित जो लोक हैं वे भी सब नाशमान और सातिशय हैं (अर्थात् ऐसे तरतम भाव वाले हैं कि जिसमें एक दूसरे के वैभव को देख कर जला करें) तस्मात् जिसका दोष कभी देखने सुननें में नहीं आया अपने आत्म लाभ के लिये उसी परमात्मा को भक्ति से भजो ॥ ४० ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

किञ्च यदध्यर्थं यत्सङ्कल्प्य अतः सङ्कल्पिताद्विपर्यासम् विपरीतं फलममोघमवश्यं प्राप्नोति ॥ ४१ ॥

तदेव दर्शयति, सुखायेति । ईहया इच्छया क्रियया वा यः पूर्वमनीहाया हेतोः सुखेनावृतो व्याप्त आसीत्स ईहया दुःखमाप्नोत्येव ॥ ४२ ॥

किञ्च कामान् भोगान् काम्यैर्विषयैः कर्मभिर्वा पारक्यः श्वादिभोग्यो न त्वात्मीयो भंगुरश्च ॥ ४३ ॥

किमु देहाद्व्यवहिता अपत्यादयो ममताविषयाः पारक्या इति वक्तव्यम् ॥ ४४ ॥

किञ्च स्वयं पुरुषार्थरूपस्य किमेतैरतितुच्छैरित्याह, किमेतैरिति ॥ ४५ ॥

भोगावसराभावाच्चैतैः क उपयोग इत्याह, निरूप्यतामिति प्राचीनैः कर्मभिः क्लिश्यमानस्य कर्मभिः कियान्स्वार्थं इति वाऽन्वयः ॥ ४६ ॥

ननु, कुर्वत्सु समाप्तेषु भोगावसरः स्यात्तत्राऽऽह—कर्माणीति न चेदं कर्म तस्य फलं देहादिकञ्च परमार्थ इत्याह, उभयं कर्म च देहं च अविवेकतोऽज्ञानेनैव तनुते ॥ ४७ ॥

अर्थादयो यदपाश्रया यदधीनाः ॥ ४८ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्च वैषयिकसुखलिप्सया कुर्वन्नपि न तत्प्राप्नोति किन्तु तद्विपरीतं दुःखमेवातस्तत्परित्यज्य भगवन्तमेव भजतेत्याह—यदर्थं इति. विद्वन्मानी नरः विद्वांसमात्मानं मन्यते इति विद्वन्मानी केवलकर्ममीमांसोपचितबुद्धिरित्यर्थः । नरो यदर्थं यद्वैषयिकसुखार्थमिह लोके असकृद्वारंवारं कर्माणि यागादीनि करोति स ततोऽभिलषितसुखाद्विपरीतं फलं दुःखात्मकमेवामोघमवश्यं विन्दते प्राप्नोति ॥ ४१ ॥

तदेव दर्शयति—स चेति । यः पुमाननीहायां निमित्तभूतायां वैषयिकसुखार्थव्यापारारम्भात्प्राङ्निर्व्यापाराद्धेतोः सुखावृतः सुखेन व्याप्त आसीत् स एवेहया आरब्धेन व्यापारेण हेतुना दुःखमेवाप्नोति स्वर्गादिसुखार्थयागादिव्यापारेण दुःखमेवाप्नोतीत्यर्थः। भगवत्प्राप्त्यर्थभक्तियोगानुष्ठानेन दशायामपि निरतिशयानन्दभगवदनुभवरूपं सुखमेव प्राप्नोति अन्ततस्तु नित्यनिरतिशयब्रह्मानन्दमग्नो भवति स्वर्गाद्यर्थं यागादिकं कुर्वाणस्तु जीवद्दशायां वित्ताद्यार्जनेन तदनुष्ठानप्रयासरूपं दुःखमन्ततस्तु सातिशयाल्पास्थिरफलरूपं स्वर्गादिकं तन्निमित्तपुण्यचयं तु नरकमिति वैषम्यमभिप्रेतम् ॥ ४२ ॥

किञ्चेह लोके पुरुषो यदर्थं यस्य देहस्य प्रयोजनाय काम्यन्त इति कामाः 'कर्मणि घञ्' तान् शब्दादींश्च कामैः 'करणे घञ्' कामोत्पत्तिसाधनैः कामयते इच्छति स एव तु देहः पारक्यः श्वसृगालादिभक्ष्यः भङ्गुरो नश्वरः उपैति कदाचिद्देहिनमालिङ्गति कदाचिच्चापैति जहातीत्यर्थः ॥ ४३ ॥

देहस्यैवेयमवस्था किंपुनर्देहानुबन्धिनां दारादीनामित्याह, किमिति । देहेनैव साक्षादात्मनः सम्बन्धो दारादिभिस्तु देहद्वारेति व्यवहितेत्युक्तम् व्यवहिता ये दारादयः अगारं मन्दिरम् आदिशब्देन पशुपुत्रादयः कोशो वस्त्रादिपेटिका बलं चतुरङ्गयुक्तम् भृत्याः परिचारकाः एते सर्वे ममतास्पदाः ममेमे इत्यभिमानविषयाः उपयन्त्यपयन्तिचेति किमुवक्तव्यमित्यर्थः॥ ४४ ॥

ननु, न देहार्थो विषयार्थो व्यापारः किन्तु आत्मार्थ इति चेत्तर्हि नित्यानन्दसुखरूपस्यात्मनः समुद्रस्य विप्रुडिव किमेतद्वैषयिकं सुखमित्याह—किमेतैरिति । नित्यानन्दः स एव रसः स एवोदकं तस्याश्रयस्यात्मनः एतैर्देहेन साकं नश्वरैरत एव तुच्छैरल्पैर्वस्तुतोऽनर्थैः पुरुषार्थत्वशून्यैरर्थलक्षणैः पुरुषार्थाभासैः कामैः किं प्रयोजनं तदनुभवजनितं सुखमतितुच्छमित्यर्थः ॥ ४५ ॥

किञ्चाऽत्यायासेनार्जितमपि वैषयिकसुखमनुभूयमानदुःखापेक्षयाल्पमेव तदनुभवावसराभावादित्याह—निरूप्यतामिति । हे असुराः ! इह संसारे कर्मभिः प्राचीनैः क्लिश्यमानस्य दुःख्यतः देहभृतो निषेकादिष्ववस्थासु स्त्रीसम्भोगाद्यवस्थासु स्वार्थं उत्पन्न आनन्दः कियान् तन्निरूप्यतां दुःखापेक्षया सुखमल्पमिति भावः । यद्वा निषेकादिष्ववस्थासु पितूरेतोद्वारा मातृयोनिप्रवेशप्रभृतिषु श्मशानान्ताः तासु अवस्थासु प्राचीनैः कर्मभिः क्लिश्यमानस्य अनेन दुःखप्राचुर्यमुक्तम् ॥ ४६ ॥

ननु, निषेकाद्यवस्थायाः कर्मनिमित्तत्वान्निःशेषकर्मक्षये प्रभूतं सुखं स्यादित्याशङ्कां निराकर्तुमन्तरेण परमात्मोपासनं न कदाचिदपि कर्म निवर्तते इत्याह—कर्माणीति । देहात्मानुवर्तिना देहेन तावत्कर्माणि देहान्तरारम्भकाणि पुण्यपापात्मकानि कर्माणि कुरुते तैश्चारब्धैः कर्मभिर्निमित्तभूतैर्देहं तनुते विभर्ति, तेन पुनः कर्माणि तैश्च पुनर्देहमित्येवं बीजाङ्कुरतुल्या परिवृत्तिर्न निवर्तेत इति न कदाचिदपि निःशेषकर्मक्षय इति भावः। कुतस्त्वियं परिवृत्तिस्तत्राह—उभयं तु देहेन कर्माणि कर्मभिर्देहः इत्येतदुभयम् अविवेकतः स्वात्मपरमात्मयाथात्म्याज्ञानादेव हेतो र्भवतीत्यर्थः ॥ ४७ ॥

एवं वैराग्योदयायैहिकामुष्मिकसुखस्याल्पाऽस्थिरत्वादिदुःखमिश्रत्वानर्थावहत्वादिकमभिधायाऽथेश्वरं भजतां यद्यपि सर्वे पुरुषार्थाः सुलभास्तथाप्यनन्यप्रयोजनत्वेनैव तद्भजनं श्रेय इत्याह—तस्मादिति। तस्माद्देहकर्मणोः परिवृत्तिरूपसंसारस्य कदाप्यनिर्मोक्षाद्वैषयिकसुखस्याल्पत्वादस्थिरत्वाद् दुःखमिश्रत्वाद्भूयस्त्वाच्च तन्निवृत्तये निश्शङ्कं सदा हरिमाश्रितानां संसृतेर्बन्धहर ईश्वरः अनीहया निष्कामेन भजत, हरिं विशिनष्टि, धर्मश्चार्थाश्च कामाश्च यदपाश्रया यस्त्रिवर्गस्यापि दाता तमित्यर्थः। तथा च श्रुतिः "इष्टापूर्तंबहुधा जातं जायमानं विश्वं विभर्ति भुवनस्यनाभिः" इति. "को ह्येवान्यात्कः प्राण्यात् यदेष आकाश आनन्दो न स्यात्" इति "य आत्मदा बलदा य एको बहूनां विदधाति कामान्" इति च. अर्थादयो यदपाश्रयास्तं हरिमनीहया भजतेत्यनेन समस्तपुरुषार्थदोऽप्यनीहया भजतामनर्थहेतुं संसृतिबन्धं हरति, ईहया भजतां त्वहितमात्रमेव ददातीति सूचितम् भवति ॥ ४८ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भगवदनर्पणबुद्ध्यानुष्ठितयज्ञादिकर्माऽनर्थहेतुरित्याशयेनाह—यदर्थमिति। यजेतेत्यादि विध्यङ्गानि विपर्यासं दुःखम् अमोघं सदातनत्वेनावश्यम् ॥ ४१ ॥

एतदेव विवृणोति—सुखायेति । ब्रह्मार्पणलक्षणेन करणमनीहा। तदुक्तम् *"अप्रयत्नेन करणमनीहा प्रोच्यते बुधैः" इति ॥४२॥

शाश्वतसुखानुभवकामं विहाय शरीरे सुखकामं प्रयतमानो विमूढत्वेनातिहास्यो बुधैरित्याशयेनाह—कामानिति । काम्यान् कामान् विषयान् यदर्थं यस्य शरीरस्यार्थे पारक्यस्तु श्वसृगालादेर्विद्यमानो न स्वकीयः । व्यवहिताः शरीरमपेक्ष्य दूरस्थाः ॥ ४३—४४ ॥

ननु, विषयभोगार्थं श्रीनारायणोपि विग्रहं गृह्णातीति केचित्तत्राह, किमेतैरिति । आत्मनो हरेः तस्मात्स्वतश्चिदानन्दस्वरूपस्य जीवात्मनो भौतिकादिना किं न किमपि कृत्यमित्यतो वाह, किमेतैरिति ॥ ४५ ॥

विचारासहत्वाच्चदेहादिना प्रयोजनमित्याह, निरूप्यतामिति । निषेकादिषु गर्भाधानादिष्ववस्थासु कर्मभिः क्लिश्यमानस्य देहभृतः कियान्स्वार्थं इति निरूप्यतामित्यन्वयः ॥ ४६ ॥

* भकारवाच्यभगवदुद्देशेन ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

संसारस्य प्रवाहरूपेण नित्यत्वान्नहरेर्ज्ञानमन्तरेण निवृत्तिः स्यादित्याशयेनाह, कर्माणीति । आत्मानुवर्तिना परमात्माधीनेन कर्मदेहश्चेत्युभयमविवेकतोऽज्ञानात् ॥ ४७ ॥

नन्वीश्वरसेवायां भक्तिरेव प्रयोजिका चेन्नार्थादिना प्रयोजनमित्याशङ्कां परिहरन्नुपसंहरति, तस्मादिति । अर्थादेर्हरिविषयत्वे साफल्यं भवतीत्यर्थः । ननु, अनीतं चेष्टाराहित्यमनीहशब्दार्थं परित्यज्यान्यार्थकल्पने किं प्रमाणम् उक्तं हि प्रमाणमिति चेन्न, तस्य बह्वर्थवाचित्वेन स्वाभिप्रेतार्थसन्देहात् "करणं कारणे कार्ये साधनेऽनुव्रजनादिषु" इत्युक्तेरिति तत्राह, अनीहमिति. श्रमसाध्यक्रियाराहित्यादनीहमित्यस्योक्तएवार्थः (१) अप्रयत्नेनेति विशेषणाच्च श्रमसाध्यक्रियाराहित्यमेवोच्यते--

"स्पष्टाद्युच्चारणाभेदे ध्यानपद्मासनादिषु ।
व्रतबन्धे नाट्यभेदे गीतके कर्मणीन्द्रिये" ॥

इत्युत्तरवाक्ये कर्मण्यपि प्रयोगाच्च ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

अनीहया निरुपाधिकया अनीहं तथैव निरुपाधिकृपाकरम् । "अहन्त्वकामस्त्वद्भक्तस्त्वञ्च स्वाम्यनपाश्रयः" इति वक्ष्यमाणात् ॥ ४८—५० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

यदर्थं यत्सङ्कल्प्य अतः सङ्कल्पितात् विपर्यासं विपरीतं फलममोघमवश्यं प्राप्नोति ॥ ४१ ॥

अनीहाया हेतोः सुखावृतः सुखपरिपूर्णः स्यात् ॥ ४२ ॥
काम्यैः कर्मभिः अपैति नश्यति उपैति पुनरपि दुःखदानार्थम् उत्पद्यायाति ॥ ४३—४४ ॥

आत्मनः स्वस्य नित्यो भजनरूप आन्नदरसोदधिर्यस्य तस्य भक्तजनस्य ॥ ४५ ॥

क्लिश्यमानस्येति भोगेऽवसर एव नास्तीति भावः ॥ ४६ ॥

देहेन मानुषशरीरेण कर्मसाधकेन देहं स्वर्गिशरीरम् उभयं तद्देहद्वयं अविवेकतः तदुभयस्य अहं कर्म कुर्वे इति. अहं कर्मफलं स्वर्गमुपभञ्जे, इत्यभिमानमूलत्वात् तदभिमानस्याऽविवेकमूलत्वात् आत्मनश्च देहद्वयातिरिक्तत्वात् ॥ ४७ ॥

तर्हि विवेक एव कस्तत्राह, तस्मादिति । यदपाश्रया यदधीनाः अनडुहां वृषाणां कर्तृत्वभोक्तृत्वादयः स्वाम्यधीना इवेत्यर्थः अनीहया कामनाराहित्येन अनीहं निरपेक्षम् ॥ ४८ ॥

(१) तात्पर्योक्तमिदम् ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

भगवद्भजनातिरिक्तकर्मगतिमाह, यदर्थं इति । ययोः सुख दुःखमोक्षयोरर्थं कर्माणि असकृत्करोति अतः विपर्यासं विप फलममोघं विन्दते ॥ ४१ ॥

एतदेव प्रपञ्चयन् कर्मफलेहा दुःखदा कर्मफलानीह सुख त्याह—सुखायेति । ईहया कर्मफलेच्छया दुःखमाप्नोति, न सुख अतोऽनीहायाः कर्मफलानीहातः सुखावृतः सुखव्याप्तो भवति
पुरुषो यदर्थं कामान् भोगान् काम्यैः कर्मभिः कामयते देहस्तु पारक्यः परेषां पितृवृत्तिप्रदादिममताविषयः भङ्गुरो त्यश्च यतो याति जायते उपैति नाशं प्राप्नोति च ॥ ४३ ॥

यद्यव्यवहितोऽहन्तास्पदो देहः पारक्यादि दोषवान् व्यवहिताः ममतास्पदा अपत्यादयः पारक्यादिदोषवन्त किन्तु वक्तव्यम् ॥ ४४ ॥

किञ्च अनर्थैरपुरुषार्थरूपैः अर्थसंकाशैः पुरुषार्थवदाभासः एतैरपत्यदारादिभिः देहेन सह नश्वरैरनित्यैः नित्यानन्दमहो अपरिच्छिन्नपरमानन्दनिधेः श्रीभगवतः सम्बन्धिनः अंशभू आत्मनः प्रत्यगात्मनः किम् ? न किमपि प्रयोजनमित्यर्थः ॥ ४

प्राचीनैः कर्मभिर्निषेकादिष्ववस्थासु क्लिश्यमानस्य भृतो जीवस्य इह संसारे कियान् स्वार्थः तन्निरूप्यताम् ॥ ४
देहेन कर्माणि आरभते देहं तु कर्मभिरारभते एव कर्मदेहयुगलमविवेकतो हेयोपादेयबोधाभावतस्तनुते न तु वद्धक्त्या मुक्तो भवतीति भावः ॥ ४७ ॥
अर्थादयो यदपाश्रया यदधीनाः अनीहया ऐहिकामुष्मिकफ वासनात्यागेन आत्मानमन्तर्यामिणम् "एषत आत्मान्तर्यामी" वेदप्रसिद्धम् अनीहं स्वतोऽवाप्तसमस्तकामत्वात् भोगेच्छा भजत ॥ ४८ ॥

भाषा टीका।

पंडित मानी मनुष्य जिस संकल्प से वारं वार कर्म है उस संकल्पित पदार्थ को न प्राप्त होकर विपरीत फ ही अवश्य प्राप्त होता है ॥ ४१ ॥

इस संसार में कर्म करने वाले पुरुष को सुख की प्राप्ति दुःख छूट ने का ही संकल्प रहता है परंच जव तक नही करता तव तक सुख में रहता है, और सुख के चेष्टा करने से सदा दुःख ही को प्राप्त होता है ॥ ४२ ॥
पुरुष जिस देह के पोषण के लिये विषयों के द्वारा प्रकार के भोगों की इच्छा करता है, वह देह तो पराए अर्थात् श्वशृगालादिकों का भोग्य है, क्षण भंगुर है और मापायी है ॥ ४३ ॥

जव साक्षात् शरीर की यह दशा है फिर जो शरीर संवांधि ममतास्पद हैं जैसे कि पुत्र स्त्री गृह धन राज्य (खजाना) हस्ती अमात्य नौकर चाकर इत्यादि इन तुच्छों आत्मा का क्या प्रयोजन होनें वाला है, क्योंकि ? आत्म

सर्वेषामपि भूतानां हरिरात्मेश्वरः प्रियः ।
भूतैर्महद्भिः स्वकृतैः कृतानां जीवसंज्ञितः ॥ ४९ ॥
देवोऽसुरो मनुष्यो वा यक्षो गन्धर्व एव च ।
भजन्मुकुन्दचरणं स्वस्तिमान्स्याद्यथा वयम् ॥ ५० ॥
नालं द्विजत्वं देवत्वमृषित्वं वाऽसुरात्मजाः ! ।
प्रीणनाय मुकुन्दस्य न वृत्तं न बहुज्ञता ॥ ५१ ॥
न दानं न तपो नेज्या न शौचं न व्रतानि च ।
प्रीयतेऽमलया भक्त्या हरिरन्यद्विडम्बनम् ॥ ५२ ॥
ततो हरौ भगवति भक्तिं कुरुत दानवाः ! ।
आत्मौपम्येन सर्वत्र सर्वभूतात्मनीश्वरे ॥ ५३ ॥
दैतेया यक्षरक्षांसि स्त्रियः शूद्रा व्रजौकसः ।
खगा मृगाः पापजीवाः सन्ति ह्यच्युततां गताः ॥ ५४ ॥
एतावानेव लोकेऽस्मिन्पुंसः स्वार्थः परः स्मृतः ।
एकान्तभक्तिर्गोविन्दे यत्सर्वत्र तदीक्षणम् ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायाम्
वैयासिक्यां सप्तमस्कन्धे दैत्यपुत्रानुशासनं नाम
सप्तमोऽध्यायः ॥ ७ ॥

भाषा टीका ।

नित्याऽऽनन्द का महासागर है, और ये सब अर्थ सदश जान पड़ते हैं, और हैं अनर्थ तथा देह के साथ नष्ट होने वाले हैं, ॥ ४४—४५ ॥

प्रह्लाद कहते हैं कि–हे असुर पुत्रहो ! तुमही बतलाओ कि इस संसार में निषेक आदि संपूर्ण अवस्थाओं में कर्मो से क्लेशित इस देहधारी का कितना स्वार्थ है ॥ ४६ ॥

देही (जीव) स्वाधीन देह से कर्म करता है, तथा कर्मों से देह को प्राप्त होता है तथा देह और कर्म दोनों अविवेक से अर्थात् हेयोपादेय के अज्ञान से होते हैं ॥ ४७ ॥

तस्माद् अर्थ काम और धर्म ये सब जिसके अधीन हैं कर्मो की चेष्टा न कर के अपने आत्मा उस हरि ईश्वर को भजो ॥४८॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

भूतानां प्राणिनाम् जीवसंज्ञितोऽन्तर्यामी ॥ ४९ ॥

असुराणामस्माकमत्राऽनधिकार इत्यपि न वाच्यमित्याह, देव इति पञ्चभिः ॥ ५० ॥ ५१ ॥

अमलया निष्कामया अन्यद्विडम्बनं नटनमात्रम् ॥ ५२ ॥ ५३ ॥

अच्युततताममृतत्वम् ॥ ५४ ॥

अध्यायद्वयोक्तमुपसंहरति, एतावानिति । तदीक्षणं गोविंददृष्ट्या सम्माननम् ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ दैत्यकुमाराणां सर्वेषामात्मनां भगवद्भजनेऽनधिकार-शङ्कां निराकुर्वन्ननीहया भजतामेवानिष्टनिवृत्तिरिष्टप्राप्तिश्चेति स्वदृष्टान्तेनाह—सर्वेषामपीति द्वाभ्याम् । स्वकृतैः स्वसृष्टैर्महद्भिः

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

भूतैः पृथिव्यादिभिः कृतानां सृष्टानां भूतानां देवादीनां सर्वेषां भगवान् वीजसंज्ञितः आदिकारणभूतः आत्मा अत एव निरतिशयप्रिय ईश्वरोऽन्तःप्रविश्य नियन्ता तावद्भगवान् सर्वेषां साधारण इति भावः ॥ ४९ ॥

अतो देवादिजातिविभागमन्तरेण यः कश्चिन्मुकुन्दचरणं भजन् स्वस्तिमान्निवृत्ता ऽनिष्टः प्राप्तेष्टश्च स्यादेव यथा वयमिति वयमसुरा अपि भगवन्तं भजन्तः स्वस्तिमन्तो ऽभूम, तथेतरेऽपीत्यर्थः । यथा वयमिति दृष्टान्तस्वारस्याद्भगवतः सर्वभूतसाधारण्यप्रतिपादनस्वारस्याच्च निरुपाधिकोक्तविधात्मत्वादिसम्बन्धज्ञानपूर्वकमनन्यप्रयोजनेन भजन्तः स्वस्तिमन्तो भवेयुरन्यथा तु समीहितमात्रवन्त इति सूचितम्. तथा च श्रुतिः "नान्यः पन्था अयनाय विद्यते" इत्यादिका ॥ ५० ॥

तदेतदुपपादयति–नालमिति द्वाभ्याम् । हे असुरात्मजाः ! द्विजत्वादयो मुकुन्दस्य प्रीणनाय प्रीतिजननाय नालं न प्रभवः किं त्वमलया अनन्यप्रयोजनया भक्त्यैव हरिः प्रीयते अन्यदुपायान्तरन्तु विडम्बनं नटनमात्रम्. द्विजत्वमिति वर्णाधिक्योपलक्षकम् देवत्वमिति जात्याधिक्यस्य ऋषित्वमित्यतीन्द्रियद्रष्टृत्वादिरूपज्ञानाधिक्योपलक्षणम् बहुज्ञतेति तु शास्त्रजन्यज्ञानाधिक्यस्य वृत्तं पित्रादि परंपरागता सद्वृत्तिः ॥ ५१ ॥

दानं पात्रे वित्तत्यागः तपः कृच्छ्रादि इज्या यागः शौचं स्नानादिकृतं शुचित्वं व्रतानि प्राजापत्यादीनि ॥ ५२ ॥

यतो भक्त्यैव भगवान्प्रीयते नोपायान्तरेणाऽतो हे दानवाः ! यूयमाश्रितसंसारबन्धहारिणि सर्वभूतानामन्तरात्मनि भगवति ईश्वरे भक्तिमनन्यप्रयोजनां कुरुत कथम्भूताः सर्वत्रात्मौपम्येन स्वात्मतुल्यत्वदृष्ट्या स्वस्मिन्निवेश्वरशरीरभूतेषु सर्वेषु दययोपलक्षिताः भगवद्भक्तिं कुरुतेत्यर्थः ॥ ५३ ॥

किमेवं भजन्तः केऽपि मुक्ता बभूवुरित्यपेक्षायां पापजातयोऽपि केनचिद्भगवत्सम्बन्धविशेषेण मुक्ताः किं पुनरेवं भजन्तो मुच्यन्ते इति वक्तव्यमित्याशयेनाह—दैतेया इति । रक्षांसि वकवेश्यादयः स्त्रियः पूतनादयो व्रजौकसो नन्दादयः शूद्राश्चाणूरादयः खगाः जटायुप्रभृतयः मृगाः मायामृगादयः एवंविधाः पापजीवा अच्युततां भगवत्साधर्म्यङ्गताः प्राप्तास्सन्ति हीति प्रसिद्धौ. त्रिकालज्ञत्वाद्भगवता प्रह्लादेनैवमुक्तम् ॥ ५४ ॥

अध्यायद्वयोक्तार्थं निष्कृष्योपसंहरति–एतावानिति । अस्मिँल्लोके पुंसां पर उत्कृष्टः स्वार्थः पुरुषार्थः एतावानेव कियान् यत् गोविन्दे भगवत्येकान्तभक्तिरनन्यप्रयोजना भक्तिर्यच्च सर्वेषु भूतेषु तदीक्षणं गोविन्देक्षणं भगवदात्मत्वदर्शनमित्येतावानेव निरतिशयपुरुषार्थसाधनभूत इत्यर्थः ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हरेरेव भजने कारणमाह, सर्वेषामिति । व्यंजकत्वाद्बीज
इति शेषः "व्यञ्जनाज्जगतो विष्णुर्बीजं न परिणामतः" इति
नात्र बीजशब्दस्य विकारोर्थः अप्रयत्नेनेति "अविक्रियः स्व
इति स्मोक्तेः ॥ ४६—५० ॥

भूतानामुत्पत्त्यादिना भक्त्यभावे जातिविशेषो वृत्ता
शेषोऽप्यकिञ्चित्कर इत्याह, नालमिति । वृत्तमाचारः "वृत्तं
चरिते" इति यादवः ॥ ५१—५२ ॥

आत्मौपम्येनात्मस्नेहवत्स्नेहेन ॥ ५३ ॥

वेदान्तादिशास्त्रानधिकारित्वेन पापजीवत्वं ननु पापका
अच्युततां च्युतिवर्जनं मोक्षं गताः सन्ति हि यस्मात्त
मुकुन्दभक्तिरेव सम्पाद्या ॥ ५४ ॥

तात्पर्यात्पुनरेतदेव हि करणं श्रेय इत्याह, एतावानिति ।
हरेः सर्वसत्ताप्रदत्वेनावस्थितेरीक्षणं दर्शनं ज्ञानमिति
भक्तिरिति ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नालमिति युग्मकम् ॥ ५१—५२ ॥

तत् इति सर्वत्र सर्वस्मिन् देशे कालेच आत्मौपम्येन आ
यथा आनुकूल्येन कायमनोवचनवृत्तिरूपं भजनं कुरुत तद्
कुरुतेति ॥ ५३ ॥

व्रजौकसोऽत्र नीचसहपाठात् "किरातहूणान्ध्रपुलिन्द पुल्क
आभीरकङ्का यवनाः खगादयः" इत्यादाविव गवोपजीवना
जातिविशेषा एव आभीरा ज्ञेयाः । ननु "कृषिवाणिज्यगोर
कुसीदं तुर्यमुच्यते । वार्त्ता चतुर्विधा तत्र वयं गोवृत्तयो
शम्" इतिवद्वैश्यभेदा इति विशेषः प्रतिपत्तव्यः ॥ ५४ ॥

तस्य भागवत एव ईक्षणं स्फूर्तिः "सर्वभूतेषु यः पश्ये
इत्यादेः ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

यतः सर्वेषां देहश्च जीवश्च परमात्मा च प्रियश्च वस्तुतो हरि
तस्मात्तं भजतेत्याह, सर्वेषां देवतिर्य्यगादीनामपि आत्मा परमा
स एवेश्वरः स्वेनैव कृतैः कृतानामिति देहोपि तत्कारणकत्वा
स एव जीवसंज्ञा सञ्जाता यस्य सः जीवस्य तदीयतटस्थश
क्तिरूपत्वात् । यद्वा सर्वेषां प्रियत्वादपि तमेव भजतेत्याह, सर्वे
भूतानां यो जीवसंज्ञः जीवनामा ततोपि प्रियः ॥ ४९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यस्मादेवं तस्मात्सर्वे एव भक्तिं कुर्युरित्याह, देव इति ॥५०॥

प्रीणनाय न अलं न समर्थमित्यर्थः । विडम्बनं पुंसः प्रत्युत तिरस्कारकारणमित्यर्थः ॥ ५१ ॥ ५२ ॥

आत्मौपम्येनेत्यत्र सुखदुःखादिदृष्ट्येति शेषः ॥ ५३ ॥

नच भक्तिः सज्जात्यादिकमपेक्षत इत्याह, दैतेया इति । अच्युततां चिन्मयशरीरत्वेन अच्युततुल्यत्वम् अच्युतता अच्युतिं गता कर्मिण इव न च्युता भवन्तीत्यर्थः । यदुक्तं काशीखण्डे—

नच्यवन्ते च यद्भक्ता महत्यां प्रलयापदि ।
अतोऽच्युतोऽखिले लोके विद्वद्भिः परिगीयते ॥

इति ॥ ५४ ॥

एकान्तभक्तिरनन्यभक्तिः यत् यस्यां भक्तौ सत्यां सर्वत्रैव स्थावरजङ्गमवस्तुषु तदीक्षणं भगवतो भावना परिपाकेन भगवदीक्षणं यदुक्तम्—

"नारायणमयं धीराः पश्यन्ति परमार्थिनः ।
जगद्धनमयं लुब्धाः कामुकाः कामिनीमयम्"॥ इति.

यथायं प्रह्लादश्च स्तम्भेपि भगवन्तमपश्यत् ॥ ५५ ॥

इति सारार्थदर्शिन्याम् हर्षिण्याम् भक्तचेतसाम् ।
सप्तमे सप्तमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स्वकृतैः स्वसृष्टैः महद्भिर्भूतैः पृथिव्यादिभिः कृतानां सर्वेषां सुरादीनाम् आत्मा अन्तर्यामी प्रियो हितकृद्यासौ ईश्वरो नियन्ता हरिरेव अतो जीवसंज्ञितः यः कश्चिदपि जीवपदार्थः देवादिनामको मुकुन्दचरणं भजन् स्वस्तिमान् स्यादित्युत्तरेणान्वयः ॥ ४९ ॥ ५० ॥

वृत्तं वर्णाश्रमक्रियात्मकम् ॥ ५१ ॥

व्रतानि नानातिथ्युपवासतीर्थवासादीनि ॥ ५२ ॥

यथा मयि स्वांशभूते दासे भगवानन्तर्यामिरूपेण वर्त्तते तथा सर्वेषु भूतेष्वपि एवमात्मौपम्येन सर्वत्र वर्त्तमाने सर्वभूतानामात्मनि अन्तर्यामिणि भगवति भक्तिं कुरुत भूतद्रोहो नकार्यः किन्तु सर्वत्र हरिदृष्ट्या यथाशक्ति यथायोग्यमानुकूल्यं कुरुतेत्यर्थः ॥ ५३ ॥

यतो भक्त्यैव दैतेयादयः अच्युततां भगवद्भावापत्तिलक्षणां मोक्षं गताः सन्ति ॥ ५४ ॥

अध्यायद्वयोक्तार्थमुपसंहरति, एतावानिति । गोविन्दे भक्तिः सर्वत्र तदीक्षणं तदात्मकत्वदर्शनमित्येतावानेव स्वार्थः ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
सप्तमाध्यायार्थप्रकाशः ॥ ७ ॥

भाषा टीका ।

अपने रचे हुए महाभूतों से निर्मित सर्व भूतों का आत्मा और प्रिय नियन्ता श्रीहरि हैं और अंतर्यामी भी वोही है ॥ ४९ ॥

देव हो असुर हो वा मनुष्य हो यक्ष हो अथवा गन्धर्व हो वा कोई भी हो, श्रीमुकुन्द के चरणारविन्द के भजन से स्वस्तिमान् होता है जैसे कि ? हम ॥ ५० ॥

हे असुरात्मजहो ! श्रीमुकुन्द की प्रसन्नता के लिये ब्राह्मणपना देवतापना अथवा ऋषिपना नहीं चाहिये तथा न वृत्त न बहुज्ञता न दान न तप न इज्या न शौच न बहुत से व्रत ये कुछ भी न चाहिये, क्योंकि ? हरि तो केवल निर्मल भक्ति मात्र से प्रसन्न होते हैं, और तो सब विडंबन ही है ॥ ५१-५२ ॥

हे दानव हो ! आत्मा की उपमा से सर्वत्र सर्व भूतात्मक ईश्वरही है, तिसी हेतु से भगवान श्रीहरि में भक्ति करो ॥ ५३ ॥

दैत्य यक्ष राक्षस स्त्री शूद्र व्रजवासी खग मृग और बहुत से पापी जीव भी हरि भक्त होकर अमृतत्व को प्राप्तहो गये ॥ ५४ ॥

इस लोक में इतना ही पुरुषों का परम स्वार्थ है कि गोविंद में एकांत भक्ति वाला होकर सर्व जगत को गोविन्द दृष्टि से देखे ॥ ५५ ॥

इति श्रीमद्भागवत महापुराण सप्तमस्कन्ध, सप्तम अध्याय
की भागवताचार्यकृत भाषा टीका
समाप्त ॥ ७ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे सप्तमोऽध्यायः ॥ ७ ॥

॥ अष्टमोऽध्यायः ॥

नारद उवाच ।

अथदैत्यसुताः सर्वे श्रुत्वा तदनुवर्णितम् ।
जगृहुर्निरवद्यत्वान्नैव गुर्वनुशिक्षितम् ॥ १ ॥
अथाचार्यसुतस्तेषां बुद्धिमेकान्तसंस्थिताम् ।
आलक्ष्य भीतस्त्वरितो राज्ञ आवेदयद्यथा ॥ २ ॥
श्रुत्वा तदप्रियं दैत्यो दुस्सहं तनयाऽनयम् ।
कोपावेशचलद्गात्रः पुत्रं हन्तुं मनो दधे ॥ ३ ॥
क्षिप्त्वा परुषया वाचा प्रह्लादमतदर्हणम् ।
आहेक्षमाणः पापेन तिरश्चीनेन चक्षुषा ॥ ४ ॥
प्रश्रयावनतं दान्तं बद्धाञ्जलिमवस्थितम् ।
सर्पः पदाऽऽहत इव श्वसन् प्रकृतिदारुणः ॥ ५ ॥

हिरण्यकशिपुरुवाच ।

हे दुर्विनीत ! मन्दात्मन् ! (१) कुलभेदकराधम ! ।
स्तब्धं मच्छासनोद्धूतं नेष्ये त्वाऽद्य यमक्षयम् ॥ ६ ॥
क्रुद्धस्य यस्य कम्पन्ते त्रयो लोकाः सहेश्वराः ।
तस्य मेऽभीतवन्मूढ ! शासनं किम्बलोऽत्यगाः ॥ ७ ॥

प्रह्लाद उवाच ।

न केवलं मे भवतश्च राजन्स वै बलं बलिनां चापरेषाम् ।
परेऽवरेऽमी स्थिरजङ्गमा ये ब्रह्मादयो येन वशं प्रणीताः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अष्टमेऽतिरुषा सूनुं निघ्नन् दैत्यो हतः स्वयम् ।
आविर्भूय नृसिंहेन स च ब्रह्मादिभिः स्तुतः ॥ १ ॥
अन्तः कृपासुधापूर्णो बहिःक्षोभो नृकेसरी ।
दैत्येन्द्रमरिभावेन भजन्तं समभावयत् ॥ २ ॥

एकान्तसंस्थितां प्रत्यङ्निष्ठाम् यथा यथावत् ॥ १ ॥ २ ॥

स च पुत्रं हन्तुं मनोदधे कथम्भूतः कोपस्यावेशेनोद्रेकेण चलद्गात्रं वपुर्यस्य सः ॥ ३ ॥

क्षिप्त्वा तिरस्कृत्य पापेन सरोषेण तिरश्चीनेन वक्रेण ॥ ४ ॥
हेमन्दात्मन्नल्पबुद्धे ! मदाज्ञाऽनिलङ्घिनं त्वामद्य यमा नेष्यामि ॥ ६ ॥
अभीतवत् किं बलं यस्य सः किम्बलः ॥ ७ ॥ ८ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

एवं भगवता प्रह्लादेनोपदिष्टतत्त्वत्रययाथात्म्यहेयोपादेय स्वमेतदनुष्ठानोद्योगान् दैत्यकुमारानालक्ष्याचार्यसुतो दैत्ये

---

(१) कुलच्छेद इतिपाठः—वीर०।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

न्यवेदयदित्याह देवर्षिः—अथेति । भगवद्धर्मोपदेशानन्तरं तेन प्रह्लादेनानुवर्णितमाकर्ण्य निर्दुष्टत्वात्प्रह्लादोक्तमेव जगृहुर्दैत्यकुमाराः नतु गुर्वनुशिक्षितमसुरोपाध्यायानुशिक्षितम् जगृहुः ॥ १ ॥

अथ तेषां दैत्यपुत्राणामेकान्तसंस्थितामव्यभिचारिणीं भगवद्धर्मविषयां बुद्धिमालक्ष्य लिङ्गैर्ज्ञात्वा भीतस्त्वरितः सञ्जातत्वरः यथावद्राज्ञे हिरण्यकशिपवे आवेदयद्विज्ञापितवान् ॥ २ ॥

ततो दैत्यो हिरण्यकशिपुर्गुरुणोक्तं सुतस्यानयमनीतिस्वमार्गाऽननुवर्तनम् अत एवाऽप्रियं तच्छ्रुत्वा कोपावेशेन क्रोधव्याप्त्या चलत्कम्पमानं गात्रं शरीरं यस्य तादृशः पुत्रं प्रह्लादं हन्तुं मनोदधे मनोरथं कृतवान् ॥ ३ ॥

कठोरया गिरा अतदर्हणां तिरस्कारानर्हं प्रह्लादं क्षिप्त्वा तिरस्कृत्य क्रोधेन तिरश्चीनेन वक्रेण चक्षुषेक्षमाणः आह उवाच ॥ ४ ॥

कथम्भूतं विनयेन नितरां नम्रं दान्तं तिरस्कारादिभिरसञ्जातक्रोधं बद्धो अञ्जलिर्येन तं सम्यगुपसमीपे स्थितं कथम्भूतः पादेनाहतस्ताडितः सर्प इव श्वसन् श्वासं मुञ्चन् स्वभावेनैव क्रूरः ॥ ५ ॥

उक्तिमेवाह—हे दुर्विनीत इति द्वाभ्याम् । हे दुर्विनीत ! मन्दात्मन्नल्पबुद्धे ! मदाज्ञातिलङ्घिनं त्वामधुना यमालयं नेष्यामि ॥ ६ ॥

यस्य मे क्रुद्धस्य सतः सपालास्त्रयोलोकाः परितः कम्पन्ते तस्य मे मम शासनमभीतवद्भयरहितवन्मत्तो भयरहितः कोऽपि नास्तीत्यभिप्रायेण वतिः प्रयुक्तः अत्यगाः अतिवर्त्तसे एवमतिवर्तने भवान् किंबलः को बलं यस्य तादृशः ॥ ७ ॥

एवमुक्त आह भगवान्प्रह्लादः—न केवलमिति चतुर्भिः । तावद्युक्तं किंवल इति तत्रोत्तरमाह, द्वाभ्याम् । हे राजन् ! स न केवलं ममैव बलं किन्तु भवतो ऽन्येषाञ्च बलिनां बलम्, कोऽसौ ? येन ब्रह्मादयः चतुर्मुखप्रभृतयः उच्चावचाश्चराचरात्मकाः सर्वे लोकाः वशं स्ववशं प्रणीताः प्रापिताः ॥ ८ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वैराग्याद्यङ्गोपाङ्गरुचिरभक्तिसुन्दरीसुन्दरावयवसन्निवेशलक्षणपरमपुरुषार्थकरणं यदुत्तरचरितमित्येतन्निदर्शयितुं नरसिंहावतारो निरूप्यतेऽस्मिन्नध्याये, तत्र दैत्यसुतैः प्रह्लादवर्णितं श्रुत्वा किं कृतमिति युधिष्ठिरस्य मानसीं शङ्कां परिहरति, अथेति । निरवद्यत्वान्निर्दोषत्वात् ॥ १ ॥

एकान्ते हरौ सम्यक् स्थितामैक्येस्थितामभिन्नविषयामिति वा यथा यथावत्साकल्येन यथा तैस्तेनोक्तं गृहीतं तथेति वा ॥ २ ॥

तनयस्यानयं स्वसिद्धान्तविरुद्धसिद्धान्तम् ॥ ३ ॥

पापेन पापसाधनेन ॥ ४—५ ॥

यमक्षयं यमगृहम् ॥ ६ ॥

कस्य बलं यस्य स किम्बलः मद्बलमनादृत्य तव बलभूतः क इत्यर्थः ॥ ७ ॥

किम्बलमित्यस्योत्तरमाह, न केवलमिति । बेत्यनेन "बलमानन्द ओजश्च सहो ज्ञानमनाकुलम्" इति श्रुतिं सूचयति, पराश्चावराश्च परावरे एतदेव विशदयति, स्थिरजङ्गमा इत्यादिना ॥ ८ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

टीका पक्षे अरिभावेन भजन्तमिति तदाज्ञाकृतत्वाद्बहिरङ्गेणैव तेन भजन्तं स्वं प्रति अभावयत् प्रापयत्. श्रुत्वेति पद्यार्द्धं गौडमिथिलयोर्नास्ति स्वाम्यसम्मतश्च । सचेत्यध्याहारस्य वैयर्थ्यात् ॥ १—१३ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अष्टमे स्वसुतं हन्तुमहंस्तम्भं रुषाऽसुरः ।
स्तम्भोत्थस्तमहन् साक्षान्नृसिंहो दैवतैस्तुतः ॥

एको मुख्यश्चासावन्तः सर्वेषां चेत्येकान्तो विष्णुर्भक्तियोगो वा तत्र संस्थिताम् ॥ २ ॥ ३ ॥ ४ ॥

दुर्विनीतेति वस्त्वर्थश्चायं दुष्टेष्वपि विशिष्टं नीतं कृपालक्षणं यस्य परदुःखासहिष्णुत्वात् मन्दानामप्यात्मा मनो यत्र सर्वचित्ताकर्षकत्वात् कुलभेदकराः कुलविशेषस्रष्टारः प्रजापतयोऽप्यधमा यस्मात् महाविभूतिमत्त्वात् स्तब्धम् असुरेषु पूज्यबुद्धित्वाभावात् मच्छासनोद्भूतं मदाज्ञालंघिनं यमक्षयं यमालयं पक्षे यमानामष्टांगयोगानां क्षयं निवासभूतं त्वां नेष्ये स्वत्रायकत्वेनांगीकरिष्यामीत्यर्थः ॥ ५ ॥ ६ ॥

अभीतवत् किं बलं यस्य सः ॥ ७—९ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अष्टमे प्रह्लादं हन्तुं प्रवृत्तो हिरण्यकशिपुर्नृहरिणा हतः स च ब्रह्मादिभिस्तुत इति वर्ण्यते—अथेति । निरवद्यत्वान्निर्दोषत्वात्तेन प्रह्लादेन वर्णितं जगृहुः ॥ १ ॥

एकस्मिन्भगवति अन्तःसमावेशो यस्य तेन प्रह्लादवाक्येन संस्थितां बुद्धिमालक्ष्य ज्ञात्वा ॥ २ ॥

तनयस्याऽनयं पक्षाश्रयणं तत्तादृशमप्रियं श्रुत्वा कोपस्यावेशेनोद्रेकेन चलत्कम्पनं गात्रं यस्य सः ॥ ३ ॥

क्षिप्त्वा भर्त्सयित्वा पापेन दुष्टेन तिरश्चीनेन वक्रेण ॥४-५॥

मच्छासनान्मदादेशादुद्धूतं बहिर्भूतम् त्वा त्वाम् ॥ ६ ॥

किं किञ्चिन्मात्रं विष्णवाख्यं बलं यस्य सः किंबलः अभीतवत् प्रशासनम् अत्यगाः अतिक्रान्तवानसि ॥ ७ ॥

स ईश्वरः काल उरुक्रमोऽसावोजः सहः सत्त्वबलेन्द्रियात्मा ।
स एव विश्वं परमः स्वशक्तिभिः सृजत्यवत्यत्ति गुणत्रयेशः ॥ ९ ॥
जह्यासुरं भावमिमं त्वमात्मनः समं मनोधत्स्व न सन्ति विद्विषः ।
ऋतेऽजितादात्मन उत्पथस्थिताच्चद्धि ह्यनन्तस्य महत्समर्हणम् ॥ १० ॥
दस्यून् पुरा षण्ण विजित्य लुम्पतो मन्यन्त एके स्वजिता दिशो दश ।
जितात्मनो ज्ञस्य समस्य देहिनां साधोः स्वमोहप्रभवाः कुतः परे ॥ ११ ॥

हिरण्यकशिपुरुवाच ।

व्यक्तं त्वं मर्तुकामोऽसि योऽतिमात्रं विकत्थसे ।
मुमूर्षूणां हि मन्दात्मन्ननु स्युर्विप्लवा गिरः ॥ १२ ॥
यस्त्वया मन्दभाग्योक्तो मदन्यो जगदीश्वरः ।
क्वासौ यदि स सर्वत्र कस्मात् स्तम्भे न दृश्यते ॥ १३ ॥
सोऽहं विकत्थमानस्य शिरः कायाद्धरामि ते ।
गोपायेत हरिस्त्वाऽद्य यस्ते शरणमीप्सितम् ॥ १४ ॥

एवं दुरुक्तैर्मुहुरर्दयन् रुषा सुतं महाभागवतं महासुरः ।
खड्गं प्रगृह्योत्पतितो वरासनात् स्तम्भं तताडातिबलः स्वमुष्टिना ॥ १५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यदुक्तं क्विबलइति तत्र बलमाह, हेराजन् मे ममैव स बलं नास्ति किन्तु भवदादीनां सर्वेषां बलम् ॥ ८ ॥

भाषाटीका ।

श्रीरुक्मिणीपतये नमः ॥

॥ नारद उवाच ॥

नारदजी बोले, कि-तदनन्तर सब दैत्यपुत्रों ने प्रह्लाद का कथन सुनकर, शुद्ध होनेके कारण उसीको ग्रहण किया और गुरु का सिखाया हुआ नहीं ग्रहण किया ॥ १ ॥

अनंतर आचार्य पुत्र ने उन सबों की बुद्धि परमात्मनिष्ठ देख कर, भय भीत होकर उसी समय राजा से सब समाचार निवेदन किया ॥ २ ॥

दैत्य (हिरण्यकशिपु) ने भी उस दुःसह अप्रिय पुत्र की अनीति को सुनकर, कोप के आवेश से चलायमान गात्रवाला होकर पुत्र के मारने का मन किया ॥ ३ ॥

नम्रता से अवनत दान्त और हाथ जोड योग्य प्रह्लादको कोप के आवेश से चलायमान गात्र जिसका प्रकृति से दारुण, पादताडित सर्प के नाई स्वास लेता हुआ और रोषयुक्त तिरछी दृष्टि से देखता हुआ हिरण्यकशिपु यों बोला ॥ ४-५ ॥

हिरण्यकशिपु बोला, कि—हे दुर्विनीत ! हे मन्दबुद्धे अरे कुल भेदक ! अरे अधम ! मेरी आज्ञा को उल्लंघन करने वाले स्तब्ध तुझ को अबही यमराज के घर पहुंचाता हूं ॥ ६ ॥

जब में कुपित होताहूं तब लोकपालों सहित तीनो लोक कांपने लगते हैं, हे मूढ ! तिस मेरी आज्ञा को निडर के किस के बल से तूंने उल्लंघन किया ॥ ७ ॥

प्रह्लाद उवाच ।

प्रह्लाद बोले, कि—हे राजन् ! न केवल हमारा किंतु तुम और संसार में अन्य जितने बली लोग हैं उन सबों का परमात्माही बल है, कि जिसने पर अवर (बडे छोटे) स्थावर जंगम जो ब्रह्मादिक जीव हैं सब को वश में कर के रखे हैं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वशे प्रणीता इत्यत्र हेतुः—स ईश्वर इति । उरवः क्रमाः पादविक्षेपा यस्य बहुपराक्रम इति वा ओज आदिरूपः सत्त्वं ... बुद्धिर्वा ॥ ९ ॥

ननु, मच्छत्रुरसौ कथं ममापि सएव बलं स्यादत आह, जहीति आत्मनः स्वस्य भावं स्वभावं त्यज यतोऽजितादात्मनो मनस

तदैव तस्मिन्निनदोऽतिभीषणो बभूव येनाण्डकटाहमस्फुटत् ।
यं वै स्वधिष्ण्योपगतं त्वजादयः श्रुत्वा स्वधामात्ययमङ्ग ! मेनिरे ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिकायाम्

विनाऽन्ये विद्विषो न सन्ति किञ्च तद्धि तदेव हि साम्येन मनसो-धारणमेव समर्हणमाराधनम् ॥ १० ॥

ननु, मया दिग्विजये सर्वे रिपवो जिता अतः साम्प्रतं विद्विषो न सन्तीति चेत्सत्यं तत्राऽऽह—दस्यूनिति । एके भावादृशा मन्दाः पुरा आदौ लुम्पतः सर्वस्वंहरतः षडिन्द्रियलक्षणान् शत्रून् विजित्याऽजित्वा दश दिशः स्वयंजिता मन्यन्ते साधोस्तु जितचित्तस्य देहिनां समस्य ज्ञस्य विदुषः स्वाज्ञानकल्पिताः परे शत्रवः कुतः स्युः ॥ ११ ॥

व्यक्तं निश्चितम् विप्लवा अनन्विता इत्यर्थः ॥ १२ ॥

हे मन्दभाग्य ! मदन्यो जगदीश्वरो यद्यस्ति,तर्ह्यसौ क्वास्ति?प्रह्लाद-आह, स सर्वत्रास्ति, हिरण्यकशिपुराह,तर्हि कस्मात्स्तम्भे नास्ति प्रह्लादस्तु तं स्तम्भं निरीक्षमाणो नमस्यन्नाह, दृश्यति इति ॥१३॥

हिरण्यकशिपुस्तु तत्र तमपश्यन्नाह, सोऽहमिति । विकत्थमानस्य विपरीतं ब्रुवाणस्य ते शिरः कायाद्धरामि पृथक्करोमि ॥ १४ ॥

प्रह्लादेन मूर्ध्नि बद्धाञ्जलिना निरीक्ष्यमाणं स्तम्भं मुष्टिना ताडितवान् ॥ १५ ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कोऽसौ तस्य नाम कथयेत्यत्राह—स इति । स सर्वेषां बलाधायकः ईश्वरः,कोऽसावीश्वरः? उरुक्रमः उरवः लोकत्रयसंग्राहकाः क्रमाः पादविक्षेपा यस्य सः त्रिविक्रम इत्यर्थः । "सर्वं पदं हस्तिपदे निमग्नम्" इति न्यायेन पादत्रयेणैव लोकत्रयाक्रमणरूपमहामहिमशालिनस्तस्य सन्निधौ त्वद्बलं कियदेतदित्यभिप्रायः न केवलमुरुक्रमः सर्वेषाञ्च बलाधायक एव, किंत्वसावोज आदीनामात्मा आश्रयो धारक इति यावत् । ओज इन्द्रियशक्तिः सहः मनोबलं सत्त्वं धैर्यं बलं देहबलम् इन्द्रियाणि च तेषामप्याश्रय इत्यर्थः । किञ्च स एवोरुक्रमः परमः निस्समाभ्यधिकः स्वशक्तिभिः स्वांशभूताभिः प्रकृतिपुरुषकालात्मिकाभिः शक्तिभिः कृत्स्नं विश्वं सृजति अवति रक्षति अत्ति संहरति च स्वयं गुणत्रयेशः सत्त्वादीनां त्रयाणां गुणानामीशो नियन्ताऽगुणवश्यो न कर्मवश्यश्चेति भावः ॥ ९ ॥

ननु, शत्रुरसौ कथं ममापि बलं स्यादत आह—जहीति । त्वमिममात्मनः स्वस्याऽऽसुरं भावं जहि त्यज समं भिन्नाभिन्नानुसन्धानरहितं यथा भवति तथा मनो भत्स्व धारय, तथा मनः शिक्षयेत्यर्थः । एवं चेत्क्वोऽपि विद्विषो न सन्ति, किञ्च "आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः" इत्युक्तरीत्या आत्मैव रिपुर्नतदन्यः कोपि रिपुरस्तीत्याह—ऋते इति । अजितादविधेयादत एव उत्पथे दुर्विषये स्थिताद्वर्त्तमानादात्मनोऽन्तःकरणादृते न सन्ति विद्विष इति पूर्वेणान्वयः तद्धि मनसः साम्यमेव ह्यनन्तस्य त्रिविधपरिच्छेदरहितस्य परमात्मनः समर्हणं सम्यगाराधनम् ॥ १० ॥

किञ्च सर्वदिशां जयिनोऽप्यजितेन्द्रियस्य भवादृशस्य केवलं जयशालित्वाभिमानमात्रमेव न वस्तुतो जयित्वमस्तीत्याह—दस्यूनिति । पुरा तावल्लुम्पत आत्मनोऽपहतपाप्मत्वादिगुणाऽष्टकरूपमैश्वर्यमपहरतः षडिन्द्रियरूपान् दस्यून् दुष्टजन्तुतुल्यान् शत्रून् न विजित्याऽजित्वा एके त्वादृशाः दश दिशः स्वजिताः स्वेनैव जिता इति मन्यन्ते अभिमानमात्रमेतदित्यर्थः । जितात्मनो जितेन्द्रियस्य तु ज्ञस्य स्वात्मपरमात्मयाथात्म्यवेदिनो देहिनां समस्य सर्वाणि भूतानि परमात्मशरीरत्वेन समं पश्यतः साधोः महाभागवतस्य स्वमोहप्रभवाः देहात्मभ्रमस्वतन्त्रात्मभ्रमनिमित्ताः परे शत्रवः कुतो भवन्ति न सन्त्येवेति भावः ॥ ११ ॥

एव मुक्तवन्तमाह हिरण्यकशिपुः—व्यक्तिमिति । हे अल्पबुद्धे । त्वं व्यक्तं नूनं मर्तुकामोऽसि मर्तुमिच्छसि यस्त्वम् अत्यन्तं विकत्थसे अथैवं विकत्थनं तव न स्यादिति भावः । हि तथाहि मुमूर्षतां मर्तुमिच्छतां विप्लवा अनन्विता वाचो न नस्युर्भवेयुरेव ॥ १२ ॥

हे मन्दभाग्य ! यस्त्वया मत्तोऽन्यो जगत ईश्वरः उक्तः असौ क्वास्ते ? यदि स भवदभिमतो जगदीश्वरः सर्वत्रान्तरात्मतया वर्त्तेत तर्हि कस्माद्धेतोः स्तम्भे पुरोवर्त्तिनि न दृश्यते मदन्यो जगदीश्वरः क्वोसावस्तीति दैत्यः प्राह ईशः सर्वत्रास्तीति प्रह्लादः ईशो यदि सर्वत्रास्ते तर्हि स्तम्भे नास्तीति हिरण्यकशिपुः प्रह्लादः स्तम्भे पश्यन्नाह, न दृश्यतेऽपितु दृश्यते एवेति व्याख्यान्तरम् ॥ १३ ॥

सोहं सर्वेषामीश्वरोहमेवं विकत्थमानस्य ते तव देहाच्छिरो हरामि छिनद्मि यो हरिस्तव शरणम् रक्षकः ईप्सितः सोऽधुना त्वां गोपायेत स रक्षिता चेदधुना त्वां रक्षिष्यतीति अन्यथा तु तदेव मिथ्येति भावः ॥ १४ ॥

एवमित्थं रुषा क्रोधेन दुरुक्तैः मुहुर्मुहुर्महाभागवतं सुतं प्रह्लादमर्दयन् महासुरो हिरण्यकशिपुः खड्गं प्रगृह्य वरासनात्सिंहासनादुत्पतित उत्थितोऽत्यन्तं बलं यस्य तेन स्वमुष्टिना स्तम्भं तताड ताडितवान् बभञ्ज ॥ १५ ॥

तदैव ताडनान्तरमेव तस्मिन्स्तम्भेऽतिभीषणो निनदो ध्वनिर्बभूव, निनदं विशिनष्टि, येन निनदेनाण्डकटाहं ब्रह्माण्डकटाहमस्फुटद्भिन्नमभूत् अङ्ग हे युधिष्ठिर ! यञ्च निनदं श्रुत्वा स्वस्थानगता अजादयो ब्रह्मादयः स्वधिष्ण्यानां व्ययं नाशं मेनिरे प्रलयकालममन्यन्तेत्यर्थः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु "स्थाणुमन्ये प्रपद्यन्ते शरीरत्वाय देहिनाम्" इति श्रुतेः शिवं बलं वदन्ति केचित् "कालाद्भवन्ति भूतानि मन्यन्ते कालचिन्तकाः" इत्यतः कालमथ कथमयं निर्णयः परमात्मबलमिति तत्राह, स इति ॥ ९ ॥

कुतो न सन्ति विद्विष इति तत्राह, ऋते इति। उत्पथस्थितात्तत्त्वमार्गविरुद्धमार्गनिरतादजितात् अवशीकृतादात्मनो मनआदीन्द्रियग्रामादृते शुद्धमनआदिना विचार्यमाणो शत्रवो न सन्तीत्यर्थः ननु, तर्हीदं "युद्धोद्यमं परं चक्रुर्विबुधादानवान्प्रति" इत्यादि कथं सङ्गच्छत इत्याशङ्क्य यथायोग्यतादर्शनलक्षणं समत्वं कर्तव्यम् अन्यथा शास्त्रविरोध इति भावेनोक्तसमत्वफलमाह, तद्धीति। तत्तद्योग्यतानुसारेण तन्मनोधारणं हरेः समर्हणं विद्धीत्यन्वयः नैतदल्पं किन्तु महदित्याह, महदिति ॥ १० ॥

एतदेव विशदयति–दस्यूनिति । एके भवादृशाः पुरं शरीरं लुम्पतः षड्दस्यून् षडिन्द्रियाख्यचोरानविजित्य दश दिशः स्वेन जिता इति मन्यन्त इत्यन्वयः आन्तरशत्रुजयं विना कुतो बाह्यशत्रुजय इति भावेनाह, जितेति। परे बाह्यशत्रवः यद्वा एके मादृशाः षडिन्द्रियजयो नास्ति चेत् बाह्यशत्रुविषयादशादिशः सुष्ठ्वाजिता इति मन्यन्ते शेषं पूर्ववत् ॥ ११ ॥

असुरावेशोद्भिन्नत्वात्पुत्रोक्तं तत्त्वं न तस्य श्रोत्रविवरगतमभूत्प्रत्युतार्चिष्मत्याज्यहोमवदभूदिति भावेनोत्तरमवतारयति, व्यक्तमिति। अतिमात्रं वक्तव्यांशादधिकं विकत्थसेऽयुक्तं भाषसे विप्लुतानवद्धकप्लुतिवदसङ्गताः ॥ १२ ॥

यदि त्वदुक्तं युक्तं स्यात्तर्हि तथा प्रतीयेत तस्मादसम्बद्धमिति भावेनाह, यस्त्वयेति ॥ १३ ॥

अस्येदम्फलितमित्याह, सोऽहमिति। गोपायेत रक्षेत ॥ १४ ॥

यदिन्द्रियं जयस्वेति वचः न हार्दमसम्भावितत्वात्तत्राह, एवमिति ॥ १५ ॥

स्तंभभङ्गेनाधेयपातेन सभ्यानां शरीरचूर्णनादिव्यथा सम्भावितेत्याशङ्क्य भगवत्सन्निधानबलाद्भग्नतिष्ठुरस्तंभोत्थनिर्ह्रादोऽभूदित्याह, तदैवेति। अस्फुटत् अभिनत् स्वधिष्ण्योपगतं स्वकीयत्वेनाभिमतं सत्यलोकं प्राप्तं स्वधामाप्ययं स्वलोकनाशम् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

विकत्थमानस्येति—तत्तदुक्तेरात्मश्लाघायामेव पर्य्यवसानात् ॥ १४—१६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

जहि त्यज आत्मनः स्वस्य मनः समं स्वस्मिन्निव सर्वत्र तुल्यं कुरु, ननु, शत्रुषु स्वसमं मनः कथं करोमि तत्राह, विद्विषः शत्रवो नैव सन्ति अजितादवशीकृतादात्मनो मनसः ऋते मनसः सर्वत्र स्वतुल्यदर्शनलक्षणं साम्यमेव वशीभावस्तस्मिन् [...] शात्रवादर्शनान्न कोपि शत्रव इति भावः। साम्यमेव समर्ह[...] माराधनम् ॥ १० ॥

एके युष्मादृशाः मन्दा दस्यून् कामादीन् लुम्पतः सर्वस्व[...] स्वसङ्गिनानपि अविजित्य अजित्वा दश दिशः स्वजिता[...] जिता मन्यन्ते जितचित्तस्य चित्तजयेनैव विजितषट्सपत्नस्य [...] विदुषः परे शत्रवः कुतो हेतोरपि तु नैव इत्यर्थः । यतः[...] हप्रभवाः ॥ ११ ॥

विकत्थसे हरिभक्तत्वादहमेव विजितषडमित्रो न तु मम [...] जनक इत्यात्मश्लाघां करोषीत्यर्थः विप्लुता अनन्विताः ॥ १२ ॥

हे मन्दभागेति यथा जगदैश्वर्यं मम तथैव मत्पुत्रत्वात्तव [...] तच्च न्यायप्राप्तमिति तत्त्वया त्यज्यत इति भावः। यद्यसावस्ति [...] क्वास्ति प्रह्लाद आह, सर्वत्रास्ति हिरण्यकशिपुराह, कस्मात् [...] नास्ति प्रह्लादस्तु सप्रणामं पश्यन्नाह, दृश्यत इति ॥ १३ ॥

हिरण्यकशिपुस्तत्र तमपश्यन्नाह सोऽहमिति ॥ १४—१५

अस्फुटदभिनदित्यर्थः यं निनदं अप्ययं नाशम् ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ईश्वरः सर्वनियन्ता कालः "ज्ञः कालकालः" इति श्रुतेः। उ[...] क्रमाः पादविक्षेपा यस्य सः सएव ओजः इन्द्रियशक्तिः सहो[...] क्तिः सत्त्वं धैर्यं बलं देहशक्तिः इन्द्रियाणि च तेषामात्माश्रयः ॥ [...]

त्वमिममात्मनः स्वस्य आसुरं भावं जहि त्यज अजिता[...] त्मनो मनसः ऋते अन्ये विद्विषः शत्रवो न सन्ति अतो मनः [...] यथा भवति तथा धत्स्व धारय तद्धि साम्येन मनसो धा[...] हि अनन्तस्य महत्समर्हणं श्रेष्ठं पूजनम् ॥ १० ॥

एके भवादृशाः पुरा आदौ भजनार्हमायुर्धनं लुम्पतः ष[...] न्द्रियनामकान् दस्यूनविजित्य दशापि दिशः स्वाजिता मन्य[...] जित आत्मा मनो येन तस्य मनोपलक्षितसकलेन्द्रियजयशा[...] लस्य सर्वं भगवदात्मकमित्येवं ज्ञानवतः अतएव सर्वदे[...] समस्य साधोः मोहप्रभवाः परे शत्रवः कुतो न कुतोपि ॥ [...]

अतिमात्रमतिमर्य्यादम् विकत्थसे अतोऽवक्तं निश्चितं [...] कामोसि तत्र लिङ्गमाह ननु नूनं मुमूर्षूणां गिरो विप्ल[...] असम्बद्धाः स्युः ॥ १२ ॥

हे मन्दभाग्य ! प्रथमतस्त्वीश्वरो हमेव यदि मदन्यः [...] अन्योपि यईश्वरस्त्वयोक्तोसौ क्वास्ति ? प्रह्लाद आह सर्वत्र, हि[...] रण्यकशिपुराह कस्मात्स्तम्भे नास्ति प्रह्लाद आह दृश्यते ॥ [...]

हिरण्यकशिपुस्तमपश्यन्नाह—सोऽहमिति ॥ १४ ॥ १५ ॥

यं निनदम् अप्ययं नाशम् ॥ १६ ॥

स विक्रमन् पुत्रवधेप्सुरोजसा निशम्य निर्ह्रादमपूर्वमद्भुतम् ।
अन्तःसभायां न ददर्श तत्पदं वितत्रसुर्येन सुरारियूथपाः ॥ १७ ॥
सत्यं विधातुं निजभृत्यभाषितं व्याप्तिं च भूतेष्वखिलेषु चात्मनः ।
अदृश्यतात्यद्भुतरूपमुद्वहन् स्तम्भे सभायां न मृगं न मानुषम् ॥ १८ ॥
स सत्त्वमेनं परितोपि पश्यन् स्तम्भस्य मध्यादनुनिर्जिहानम् ।
नायं मृगो नापि नरो विचित्रमहो किमेतन्नृमृगेन्द्ररूपम् ॥ १९ ॥
मीमांसमानस्य समुत्थितोऽग्रतो नृसिंहरूपस्तदलं भयानकम् ।
प्रतप्तचामीकरचण्डलोचनं स्फुरत्सटाकेसरजृम्भिताननम् ॥ २० ॥
करालदंष्ट्रं करवालचञ्चलक्षुरान्तजिह्वं भ्रुकुटीमुखोल्बणम् ।
स्तब्धोर्ध्वकर्णं गिरिकन्दराद्भुतव्यात्तास्यनासं हनुभेदभीषणम् ॥ २१ ॥
दिविस्पृशत्कायमदीर्घपीवरग्रीवोरुवक्षःस्थलमल्पमध्यमम् ।
चन्द्रांशुगौरैश्छुरितं तनूरुहैर्विष्वग्भुजानीकशतं नखायुधम् ॥ २२ ॥
दुरासदं सर्वनिजेतरायुधप्रवेकविद्रावितदैत्यदानवम् ।
प्रायेण मेऽयं हरिणोरुमायिना वधः स्मृतोऽनेन समुद्यतेन किम् ॥ २३ ॥

भाषा टीका ।

क्योंकि ? बडे पराक्रम वाला वही ईश्वर काल ओज सह सत्त्व बल इन्द्रिय और मनोरूप है, और वही परमेश्वर गुणत्रय का ईश इस विश्व की सृष्टि स्थिति और संहार करता है ॥ ९ ॥

आप भी इस अपने आसुर भाव को छोड दीजिये और मन को शांत कीजिये, उत्पथ में स्थित और अनिर्जित [नहीं जीतां हुआ] अपने मन के सिवाय संसार में कोई भी वैरी नहीं है, और मन को समता में लाना यही एक परमात्मा का भी बडा आराधन है ॥ १० ॥

कितने एक प्रथम अपने देह मे स्थित षडिन्द्रिय रूप वैरियों न जीत् कर हमने दश दिशाओ को जीत लिया, ऐसा मानते हैं, ॥ जितेन्द्रिय और सर्व प्राणियों को साधु विद्वान को स्वाज्ञान से बने हुए शत्रु ही कहाँ ॥ ११ ॥

हिरण्यकशिपुरु वाच ।

हिरण्य कशिपु बोला, कि-अब निश्चित ही तूं मरने की इच्छा करता है क्यों कि ? अब तू बहुत विकत्थन [वकवाद] करता है । हे मन्दात्मन् ! मरने वालों की ऐसी ही विपरीत वाणी होती है ॥ १२ ॥

और हे मन्द भाग्य ! जो तूने मेरे से दूसरा जगदीश्वर बताया, तौ फिर वह कहां पर है, यदि वह सर्वत्र है तौ स्तम्भमें क्यों नहीं देख पडता है ॥ १३ ॥

सो मैं अब तेरे वकवाद करने वाले के शरीर से शिर को हरलेता हूं, जिस्को तू ने रक्षक समुझा है वह हरि अब तेरी रक्षा करै ॥ १४ ॥

वह महा असुर ऐसी दुरुक्तियों से कोप के मारे महाभागवत पुत्र को पीडा करता हुआ खड्ग को हाथ में लेकर सिंहासन से उत्तर कर वडे जोर से अपनी मुष्टि से स्तम्भ को ताडन करता हुआ ॥ १५ ॥

बस उसी समय उस स्तम्भ मे से अति भयङ्कर वडा नाद हुआ, कि जिसके मारे ब्रह्माण्ड फूटने लगा और वह शब्द इतनी दूरतक पहुंचा कि जिसको सुनकर ब्रह्मादि कभी अपने २ धाम का अप्यय (नाश) मानने लगे ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्पदं तस्य ध्वनेराश्रयम् येन नादेन ॥ १७ ॥

भगवांस्तदा स्तम्भं विदार्याऽदृश्यत दृश्यो बभूव किमर्थम् निजभृत्येन प्रह्लादेन यद्भाषितं दृश्यत इति तत्सत्यं विधातुं कर्तुम् तथाऽखिलेषु भूतेष्वात्मनोव्याप्तिश्च सत्यां कर्तुं स्तम्भेऽदृश्यत तत्किमर्थम् "भौतिकेषु च भावेषु भूतेष्वथ महत्सु च" भगवानास्ते इति तेनैव भृत्येन यद्भाषितं तत्सत्यं कर्तुम् तथाऽत्यद्भुतं दैत्यघातकमतिघोरं रूपमुद्वहन् दधत्. तत्किमर्थम् ? निजभृत्यैः सनकादिभिः शापानन्तरमनुतप्तैर्भाषितं यत् त्रिभिर्जन्मभिः शापमोक्षो भवत्विति

एवं ब्रुवंस्त्वभ्यपतद्गदायुधो नदन्नृसिंहंप्रति दैत्यकुञ्जरः ।
अलक्षितोऽग्नौ पतितः पतङ्गमो यथा नृसिंहौजसि सोऽसुरस्तदा ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्सत्यं कर्तुम् तथाऽत्यद्भुतं रूपं ब्रह्मसृष्टावदृष्टमश्रुतञ्च रूपमुद्वहन् तच्च न मृगाकारं न मनुष्याकारमुद्वहन् सभायां मध्येऽदृश्यत. तत्किमर्थम् ? निजभृत्येन हिरण्यकशिपुना ब्रह्माणम्प्रति यद्भाषितम् "भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्माभुन्मम प्रभो" इति तथा नान्तर्न बहिरिति न नरैर्न मृगैरपीति च ब्रह्मणा च निजभृत्येन तथास्त्विति यद्भाषितम् तदुभयोर्वाक्यं सत्यं कर्तुम् नहि तद्ब्रह्मसृष्टं भूतं नच नरोवा मृगोवा नच सभागृहस्यान्तः नच प्राङ्गणवद्बहिः एवं ताभ्यां यद्भाषितम् तत्सत्यं कृतम् यच्च हिरण्यकशिपुना भाषितम्,"नूनमेतद्विरोधेन मृत्युर्मे भविता"इति अकुतश्चिद्भयोऽमर-इतिच, यच्चनारदेन निजभृत्येन भाषितमिन्द्रंप्रति "अयं महात्मत्वया संस्थां न प्राप्स्यति अनन्तानुचरः" इत्यनेन स्वभक्तपक्षपातित्वं च यद्भाषितं तच्च सत्यं कर्त्तुं तथा अदृश्यत चकारान्निजभाषितञ्च. किं?तत् "कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति" इति. तथा "तेषामहं समुद्धर्त्ता मृत्युसंसारसागरात्" इत्यादि तच्च सत्यं कर्तुमदृश्यतेति द्रष्टव्यम् अलमतिविस्तरेण ॥ १८ ॥

स दैत्य एवमद्भुतं ध्वनिं श्रुत्वा तदाश्चर्यं सत्त्वं प्राणिविशेषं सर्वतो विलोकयन्स्तम्भमध्यान्निर्गच्छत् नृमृगेन्द्रयोर्मिश्रं रूपमहो किमेतदिति मीमांसितवानिति शेषः ॥ १९ ॥

तस्यैवमलं भयानकं तन्नृसिंहरूपं मीमांसमानस्याग्रतो नृसिंहरूपो हरिः समुत्थितः, भयानकत्वमेव दर्शयंस्तद्रूपमनुवर्णयति, प्रतप्तेत्यादिना,विद्रावितदैत्यदानवमित्यन्तेन।प्रतप्तं चामीकरं सुवर्णं तद्वत्पिङ्गानि चण्डानि लोचनानि यस्मिन् सटा जटाः केसराः कण्ठरोमाणि स्फुरद्भिः सटाकेसरैर्जृम्भितं साटोपमाननं यस्मिन् ॥ २० ॥

करालास्तुङ्गा दंष्ट्रा यस्मिन् करवालः खड्गस्तद्वच्चञ्चला क्षुरान्तवत्तीक्ष्णा च जिह्वा यस्मिन् भ्रुकुटीयुक्तेन मुखेनोल्बणम् स्तब्धावुन्नतौ शङ्कुवदूर्ध्वौ कर्णौ यस्मिन् गिरिकन्दरवदद्भुतं व्यात्तं प्रसृतमास्यं नासे च यस्मिन् हनू कपोलप्रान्तौ तयोर्भेदेन विदारणेन भीषणम् कर्णान्तमुखविस्तारमित्यर्थः ॥ २१ ॥

दिविस्पृशन् कायो यस्मिन् अलुक्समासः अदीर्घा ह्रस्वा पीवरा च स्थूला ग्रीवा यस्मिन् उरु विशालं वक्षःस्थलं यस्मिंस्तच्च तच्च अल्पं मध्यमुदरं यस्मिन् चन्द्रांशुवद्गौरैस्तनूरुहैर्लोमभिश्छुरितं व्याप्तम् विष्वञ्चः सर्वतः प्रसृता भुजास्तेषामनीकानि स्तोमास्तेषां शतानि यस्मिन् नखान्येवायुधानि यस्मिन् ॥ २२ ॥

दुरासदं प्राप्तुमशक्यम् सर्वाणि च निजानि चक्रादीनीतराणि वज्रादीनि त एवायुधप्रवेकाः शस्त्रोत्तमास्तैर्विद्राविता दैत्यदानवा येन तद्रूपं मीमांसमानस्याग्रतः समुत्थित इति पूर्वेणैवान्वयः, तदाविर्भावप्रयोजनाविमर्शपूर्वकं तेन सह दैत्यस्य युद्धमाह—सप्तभिः । प्रायेण महामायिना हरिणानेऽयमेवंभूतो मे मृत्युहेतुः स्मृतश्चिन्तितस्तथाऽप्यनेन समुद्यतेन किं न क्रियेतेत्यादित्येवं ब्रुवन्नभ्यपतदित्यन्वयः ॥ २३ ॥

तदा सोऽसुरो नृसिंहस्यौजसि दीप्तौ पतितः सन्नलक्षितोऽदृष्टोभूत् ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततः किं जातं तदाह, स विक्रमन्निति । ओजसा पुत्रवधेप्सुः पुत्रवधं कर्तुमिच्छुस्तदर्थं विक्रमन् पराक्रमं कुर्वन् स दैत्येन्द्रो यं निर्ह्रादं ध्वनिम् अपूर्वं कदाचिदपि न श्रुतम् पश्चादद्भुतमाश्चर्यजनकं निशम्य श्रुत्वा तस्य निनादस्य पदमा... यमन्तःसभायां सभामध्ये न ददर्श येन निनादेन सुरारियूथपदानवश्रेष्ठाः वितत्रसुर्विशेषेण तत्रसुः त्रासं प्रापुरित्यर्थः ॥ १७ ॥

तदा भगवान्निजभृत्यस्य प्रह्लादादेर्भाषितं कृत्स्नजगदन्तरात्मत्वादिभाषणं सर्वेषु चराचरात्मकेषु भूतेषु आत्मस्वरूपस्य व्याप्तिञ्च सत्यं यथा भवति तथा कर्तुमत्यद्भुतरूपमुद्वहन् विभ्रत् सभायां यस्तम्भस्तस्मिन्नदृश्यत तद्दृष्टं रूपं कथम्भूतं रूपं न मृगं नापि मानुषं रूपमपितूभयमिश्रमित्यर्थः निजभृत्यभाषितमित्यत्र बहुवचनान्तेन निजभृत्यशब्देन समा... स्तदयमर्थः, यत्तावत्प्रह्लादस्य निजभृत्यस्य भाषितम् "भौतिकेषु भावेषु भूतेषु च महत्सु च । भगवानास्ते" इति तत्सत्यं कर्तुं तथाऽत्यद्भुतदैत्यघातकमतिघोरं रूपमुद्वहन्निति तथा निजभृत्यैः सनकादिभिर्यद्भाषितं त्रिभिर्जन्मभिः शापमोक्षो भवत्विति तत्सत्यं कर्तुम्, तथा ब्रह्मसृष्टावदृष्टमश्रुतञ्चात्यद्भुतं रूपमुद्वहन् सभायां मध्येऽदृश्यत तत्किमर्थं निजभृत्येन हिरण्यकशिपुना ब्रह्माणं प्रति यद्भाषितम् "भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्माभून्मम प्रभो" इति तथा नान्तर्बहिरिति न नरैरिति मृगैरिति च ब्रह्मणा निजभृत्येन यद्भाषितं तथास्त्विति तत्सत्यं कर्तुं न च तद्ब्रह्मसृष्टं रूपं न च नरो न मृगो वा न च सभागृहस्यान्तः न च प्राङ्गणवद्बहिः एवं ताभ्यां भाषितं सत्यं कर्तुं यच्च हिरण्यकशिपुना भाषितं "नूनमेतद्विरोधेन मृत्युर्मे भविता" इति तथा "अकुतश्चिद्भयोऽमरः" इति यच्च नारदेन स्वभृत्येनेन्द्रंप्रति भाषितम् "अयं महान् संस्थां न प्राप्स्यते" इति अनन्तानुचर इत्यनेन स्वभक्तपक्षपातित्वं च यद्भाषितं तच्च सत्यं कर्तुमदृश्यत चकारान्निजभाषितं च यत् "कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति । तेषामहं समुद्धर्ता" इति तच्च सत्यं कर्तुमदृश्यतेति ॥ १८ ॥

स दैत्येन्द्र एवं ध्वनिं श्रुत्वा तदा सत्त्वं प्राणिविशेषं सर्वतो विलोकयन् स्तम्भस्य मध्यान्निर्गच्छन्तं नायं मृगो ना...

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नरः किन्तु नृमृगेन्द्रयोरुभयोरपि रूपमहो किमेतदिति मीमांसितवानिति शेषः ॥ १९ ॥

तस्यैव मलंभयानकं तन्नृसिंहरूपं मीमांसमानस्य दैत्येन्द्रस्याऽग्रतः स नृसिंहरूपो हरिः समुत्थितः भयानकत्वमेव दर्शयंस्तद्रूपमनुवर्णयति, त्रिभिः । प्रतप्तेति । प्रतप्तं चामीकरं स्वर्णं तद्वत्पिशङ्गे चण्डे उग्रे लोचने यस्मिन् स्फुरन्त्यः सटाः जटाः केसराः स्कन्धलोमानि च तैर्जृम्भितं साटोपमाननं मुखं यस्मिन् ॥ २० ॥

कराला उग्रा दंष्ट्रा यस्मिन् करवालः खड्गस्तद्वत् चञ्चला क्षुरान्तवत्तीक्ष्णा च जिह्वा यस्मिन् भ्रुकुटी युक्तेन मुखेनोल्वणं स्तब्धावुदञ्चितावूर्ध्वौ कर्णौ यस्मिन् गिरिकन्दरवदद्भुतं व्यात्तं प्रसृतमास्यं नासे च यस्मिन् हनू कपोलप्रान्तौ तयोर्भेदेन विदारणेन भीषणम् ॥ २१ ॥

दिवि स्पृशन् कायो यस्मिन् अलुक्समासः अदीर्घा ह्रस्वा पीवरा स्थूला च ग्रीवा उरु विशालं वक्षःस्थलं च यस्मिन् अल्पं मध्यमं उदरं यस्मिन् चन्द्रांशुवद्गौरैस्तनूरुहैर्लोमभिश्छुरितं व्याप्तं विष्वक्षः सर्वतः प्रसृताः भुजास्तेषामनीकानि स्तोमास्तेषां शतानि यस्मिन् भुजा एवानीकं सेना तच्छतं यस्मिन्निति वा खेनानीकेन मर्दितमिति प्रयोगात् नखा एवायुधानि यस्मिन् ॥ २२ ॥

दुरासदं प्राप्तुमशक्यं सर्वाणि निजानि चक्रादीनीतराणि च वज्रादीनि त एवायुधप्रवेकाः शस्त्रस्तोमास्तैर्विद्राविता दैत्या दानवाश्च येन तद्रूपं मीमांसमानस्याऽग्रतः समुत्थितमिति पूर्वेणान्वयः ॥ २३ ॥

तथा आविर्भावे प्रयोजनविमर्शनपूर्वकं तेन सह दैत्यस्य युद्धमाह सप्तभिः—प्रायेणेति । प्रायेण महामायाविना हरिणा मे मम अयमेवंभूतो वधः वधोपायः स्मृतश्चिन्तितस्ततथाप्यनेन समुद्यमेन किं न किञ्चित्स्यादित्येवं ब्रुवन् गदैव आयुधं यस्य स दैत्य एव कुञ्जरो गजो नदन् जगत् नृसिंहं प्रत्यभ्यपतत् अभिमुखमागतवान् तदा सोऽसुरो नृसिंहस्यौजसि दीप्तौ पतितः सन्नलक्षितो ऽदृष्टो ऽभूद्यथा पतितः पतङ्गमः शलभस्तद्वत् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तदा हिरण्यकशिपुः किङ्कृतवानिति तदवस्थामाह, अभिक्रमन्निति । पुत्रमभिक्रमन् पादविक्षेपं कुर्वन् तस्य निर्ह्रादस्य पदं विषयं कर्तुंभूतं न ददर्शेत्यन्वयः येन नादेन अनेन हिरण्यकशिपोर्हृदयभारातिशयो दर्शित इति ज्ञायते ॥ १७ ॥

आकाशविशेषगुणस्य शब्दस्य चेतनाश्रयत्वेन दर्शनात् किमिदमिति मीमांसमानेषु सत्सु तदाश्रयोऽप्यदर्शि इत्याह, सत्यं विधातुमिति । रूपं बिभ्रदपि, न मृगमिति नाभावान्यविरोधेऽवितेः वचनात् न मृगं केवलं मृगस्य विद्यमानं न भवति न मानुषं मानुषस्य विद्यमानं न किन्तु तयोः समाहारलक्षणम् ॥ १८ ॥

एवम्विधं सत्त्वं प्राणिविशिष्टं रूपमुद्वहंस्तस्याग्रतोऽग्रे समुत्थितोऽदृश्यतेत्यन्वयः । किम्विशिष्टस्य स्तम्भस्य मध्यान्निर्जिहानमुत्तिष्ठमानमेतन्नृमृगेन्द्ररूपं किमितिमीमांसमानस्य विचारं कुर्वतो हिरण्यकशिपोः तद्रूपं बिभ्रदपि, तदद्भुतमित्यादिना । चामीकरं सुवर्णं सटाकेसरैः कर्णगतरोमविशेषलक्षणान्तर्दलैर्जृम्भितं विकसितमाननं यस्य स तथा ॥ १९—२० ॥

करालाः क्रूरदंष्ट्रा यस्य स तथा करवालवत् चन्द्रहासवच्चञ्चलं क्षुरान्तः क्षुरधारा तद्वत्स्थिता जिह्वा यस्य तत्तथा भ्रुकुट्या मुखेन पूर्वभागेनोल्वणां क्रूरं स्तब्धौ दृढौ ऊर्ध्वीकृतौ च कर्णौ यस्य तत्तथा तद्गिरिकन्दरवत् अद्भुतं व्यात्तश्चास्यं नासापुटं च यस्य तत्तथा तत् हनुभेदेन विदीर्णकपोलेन भीषणं भयजनकम् ॥ २१ ॥

ग्रीवा चोरू च वक्षःस्थलं च तानि तथा अदीर्घाणि पीवराणि ग्रीवोरुवक्षःस्थलानि यस्य तत्तथा तत् "चन्द्रो हेम्नि हिमांशौ ना चन्द्रकं रोचिषेपि च"इत्यभिधानात् चन्द्रांशुवर्णवद्गौरैररुणैस्तनूरुहैः छुरितं व्याप्तम् "पीतेऽरुणे सिते गौरे"इत्यभिधानं विष्वक् व्याप्तैर्भुजानीकशतैर्युक्तं बहुत्वापेक्षयानीकेत्युक्तम् ॥ २२ ॥

"निजमात्मीयनित्ययोः" इत्यमरः निजान्यात्मीयानि नखापेक्षयेतराणि चक्रादीनि यानि तैरायुधप्रवेकैरायुधमुख्यैर्विद्राविता दैत्यदानवा येन तत्तथोक्तं तत् यद्वा निजं सहजं नखलक्षणमायुधम् इतराणि पृथक्स्थितानि चक्रादीनीति मे औरसारिणा निसर्गशत्रुणा हरिणा अनेन रूपेण प्रायेण ममायं वधः स्मृतो निरूपितः किं स्मृतो वधोयं किमितिचा कीदृशस्य मे पुत्रवधे समुद्यतस्य पुत्रहन्तुर्योवधः शास्त्रेषु स्मृतो विहितिः सोयमद्य प्राप्तः किञ्चेति ॥ २३ ॥

एवं विमृश्य वधाभिवृत्तः किञ्चेत्याह, एवमिति । क्रमभ्यपतदित्यत्रउक्तं नृसिंहंप्रतीति । दैत्यकुञ्जरो दैत्येन्द्रः निदर्शनमाह, अलक्षितः इति । साहसिकः पतङ्गमः शलभः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मीमांसेति सार्द्धत्रिकं तत्र मीमांसेत्यर्द्धकम् ॥ २०—२१ ॥

चन्द्रेति । भुजा एवानीकानि सेनाः ॥ २२—४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तस्य ध्वनेः पदमाश्रयम् ॥ १७ ॥

निजभृत्यस्य प्रह्लादस्य भाषितं दृश्यत इति वचनं सत्यं विधातुं सत्यमेव तल्लोकेपि सत्यत्वेन प्रकटीकर्तुमित्यर्थः । तथैवाखिलेषु भूतेषु आत्मनो नृसिंहाद्याकारस्य व्याप्तिं च सत्यां कर्तुं स्तंभे अदृश्यत दृष्टो बभूव, कीदृशः ? न मृगं न मृगसर्वांश्च नापि मानुषं रूपं सभायामुद्वहन् अत्रापिहेतुः, सत्यमिति. निजभृत्यस्य हिरण्यकशिपोर्भाषितम् "भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्माभून्मम प्रभो" इति तथान्तर्न बहिरिति न नरैर्न मृगैरिति प्रार्थितं सत्यं

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

कर्तुं यतो न हि तद्ब्रह्मसृष्टं भूतं न च नरोवा मृगोवा नच सभागृहस्यान्तः नापि प्राङ्गणवद्बहिरिति एवञ्चकोचित् निजस्य भृत्यानां नारदादीनामपि भाषितं सत्यं विधातुमिति व्याचक्षते तथाहि "कौंतेय प्रतिजानीहि न मे भक्त प्रणश्यति" इतिनिजोक्तम् "अयंमहान् संस्थां न प्राप्स्यतीतीन्द्रं प्रति नारदोक्तं "नूनमेतद्विरोधेन मृत्युर्मे भविता" इति हिरण्यकशिपुना नीयमाने वरे तथास्त्विति ब्रह्मोक्तं च ॥ १८ ॥

स दैत्यः एवंभूतं प्राणिविशेषं स्तम्भमध्यान्निर्गच्छन्तं परितः स्तंभस्य चतुर्दिक्षु विपश्यन् किमेतदिति मिमांसितवानिति शेषः ॥ १६ ॥

तद्वलमतिशयेन भयानकं नृमृगेंद्ररूपं मीमांस्समानस्य तस्याग्रत एव नृसिंहरूपः समुत्थित इत्यन्वयः भयानकत्वं विवृण्वन् रूपं विशिनष्टि त्रिभिः, प्रतप्तेति । चामीकरं सुवर्णं सटाः जटाःकेसराः कण्ठरोमाणि ॥ २० ॥

करवालः खड्गः । भ्रुकुटीयुक्तेन मुखेन उल्वणं हनू कपोलप्रान्तौ तयोर्भेदेन विदारणेन भीषणम् ॥ २१ ॥

अदीर्घा पीवराच ग्रीवा यस्मिन् उरु विशालं वक्षःस्थलं यस्मिन् तत् अल्पमध्यं क्षीणमध्यदेशं चन्द्रांशुवद्गौरैः श्वेतैः विष्वक् सर्वदिक्षु स्थितानां भुजानीकानां शतानि यस्मिंस्तत् । नखान्यायुधतुल्यानि यस्मिन् तत् ॥ २२ ॥

सर्वाणि निजानि चक्रादीनि इतराणि वज्रादीनि । तान्येवायुधप्रवेकाः शस्त्रोत्तमास्तैर्विद्राविता दैत्यदानवा यत्र तत् तदद्भुतं दृष्ट्वा तस्य मानसं वाचिकञ्च व्यवहारमाह—प्रायेणेति । वधः स्मृत इति प्राक् चिकीर्षित एवासीत् । सम्प्रति संस्मृतिविषयीकृत इत्यर्थः । तदप्यम्येन हरिणा समुद्यतेन तदर्थं कृतोद्यमेनापि किं न किञ्चदपीत्यर्थः । मद्बलस्यानेन दुष्पारत्वादिति भावः ॥ २३ ॥

स नृसिंहस्यौजसि दीप्तौ पतितस्सन्नलक्षितोऽदृष्टोऽभूत् । सत्वधामनि शुद्धसत्त्वप्रकाशे हरौ तत् तस्य तमोमयस्यादर्शनं न विचित्रम् । यतः पुरा सृष्ट्यादौ प्रलयकालीनं तमोऽपियत् महत्तत्त्वमधिष्ठायैव नाशयामास । सम्प्रति साक्षात् स्वरूपभूतत्वेन किमुतेति भावः ततस्तस्मात् पृथग्भूय अभिपद्य अभिमुखमागत्य ॥ २४—२५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तस्य निह्रादस्य पदमुद्भवस्थानम् ॥ १७ ॥

निजभृत्यभाषितम् निजभृत्यान्प्रति श्रीमुखेन भाषितं "न मे भक्तः प्रणश्यति" इति मन्दादिना यच्च भृत्येन प्रह्लादेन भाषितं दृश्यते इति तथाऽस्मनोऽप्यार्त्तिं प्रति निजभृत्येन प्रह्लादेन भाषितं ससर्वत्रेति तथा निजभृत्येन हिरण्यकशिपुना भाषित... कुतश्चिद्भयोऽमरः एतद्विरोधेन मे मृत्युर्भवितेति तथा हिरण्यकशिपुना "यदि दास्यस्यभिमतान्वरान्मे वरदोत्तम। भूतेभ्यस्त्व... द्विसृष्टेभ्योमृत्युर्माभून्मम प्रभो" इत्याद्विवरं प्रार्थिते सति यद्ब्रह्मणा... निजभृत्येन भाषितं "तातेमे दुर्लभाः पुंसोयान् वृणीषे वरान्मम... तथापि वितराम्यङ्ग" इति तथा निजभृत्यैः सनकादिभिः शापा... नन्तरमनुतप्तैः त्रिभिर्जन्मभिः शापमोक्षोभवत्विति भाषि... तत्सर्वं सत्यं विधातुं कर्तुम् अद्भुतं रूपमुद्वहन् दधत् स्तम्भे... अदृश्यत दृश्योबभूव, भगवानिति शेषः ॥ १८ ॥

हिरण्यकशिपुः एवं ध्वनिरूपं कार्यं यथा ज्ञातवान्तद्व... तत्कर्तृ सत्वं प्राणिविशेषमपि ज्ञातुं परितः विपश्यन् विलोक... यन् अनु अनन्तरं स्तम्भस्य मध्यान्निर्जिहानं निर्गच्छन्तं नृमृ... गेन्द्ररूपम् विपश्यन् अहो अयं न मृगः नापि नरः एतादृ... चित्रं किमिति मीमांसितवानिति शेषः ॥ १९ ॥

एवमलं भयानकं न मृगेन्द्ररूपं मीमांसमानस्य अग्रत नृसिंहरूपोभगवान् समुत्थितोऽभूत्. तदेवरूपमनुवर्णयति प्रतप्तेत्यादि त्रिभिः । प्रतप्तं यच्चामीकरं स्वर्णं तद्वत्पिशङ्गे चण्डे ऽरुणे लोचने यस्मिन् स्फुरन्त्यः सटाः जटाः केसराः कण्ठरोमाणि च यस्मिन् तत् स्फुरत्सटाकेसरं जृम्भितमाननं यस्मिन्तज्जृम्भिताननं त... तच्च तत् ॥ २० ॥

कराला उग्रा दंष्ट्रा यस्मिन् करवालः खड्गः भ्रमत्करवाल... वत् चञ्चला क्षुरान्तवत्तीक्ष्णा च जिह्वा यस्मिन् भृकुटीयुक्ते... मुखेनोल्वणं स्तब्धौ ऊर्ध्वौ कर्णौ यस्मिन् गिरिकन्दराव... अद्भुतं व्यात्तं प्रसृतमास्यं नासे च यस्मिन् हन्वोः कपोलप्रान्तयोः... र्भेदेन प्रसारणेन भीषणम् ॥ २१ ॥

दिविस्पृशत्कायः कायोयस्मिन् अलुक्समासः अदीर्घा... पीवरा पुष्टा च ग्रीवा यस्मिन् उरु विशालं बहु विस्ती... वक्षःस्थलं यस्मिन् तच्च तच्च तत् अल्पं मध्यममुदरं यस्मि... चन्द्रांशुवद्गौरैः तनूरुहैः विष्वक् परितः छुरितं व्याप्तम् भुज... एवोभयतोनीकशतं यस्मिन् नखान्येवायुधानि यस्मिन् ॥ २२ ॥

दुरासदं आसादितुमशक्यम् सर्वाणि च निजानि सुदर्श... नादीनि इतराणि वज्रादीनि एवायुधप्रवेकाः शस्त्रश्रेष्ठाः... विद्राविताः दैत्या दानवाश्च येन एवंभूतं रूपं मीमांसत सम... त्थितइति पूर्वेणान्वयः प्रायः उरुमायिना अत्यद्भुतशक्तिमता... हरिणा विष्णुना मे ममायं सङ्ग्रामे श्लाघ्यत्वेन प्रसिद्धोवधः स्म... श्चिन्तितस्तथाप्यनेन समुद्यतेन किं स्यात् ॥ २३ ॥

स दैत्यकुञ्जरएवं ब्रुवन् गदायुधः नदन् नृसिंहं प्रत्यभ्यपतद... तु पुनर्नृसिंहौजसि पतितः सन् अग्नौ पतङ्गमो यथा तद्वदलक्षितो... ऽभवत् ॥ २४ ॥

भाषा टीका ।

यह पुत्र वध की इच्छा करने वाला बड़े शरीर... बल से पराक्रम करता हुआ अद्भुत और अपूर्व शब्द...

न तद्विचित्रं खलु सत्त्वधामनि स्वतेजसा यो नु पुराऽपिबत्तमः ।
ततोऽभिपद्याभ्यहनन्महाऽसुरो रुषा नृसिंहं गदयोरुवेगया ॥ २५ ॥
तं विक्रमन्तं सगदं गदाधरो महोरगं तार्क्ष्यसुतो यथाऽग्रहीत् ।
स तस्य हस्तोत्कलितस्तदाऽसुरो विक्रीडतो यद्वदहिर्गरुत्मतः ॥ २६ ॥
असाध्वमन्यन्त हृतौकसोऽमरा घनच्छदा भारत ! सर्वधिष्ण्यपाः ।
पुनस्तमासज्जत खड्गचर्मणी प्रगृह्य वेगेन जितश्रमो मृधे ॥ २७ ॥
तं श्येनवेगं(१) शतचन्द्रवर्त्मभिश्चरन्तमच्छिद्रमुपर्यधो हरिः ।
कृत्वाऽट्टहासं (२) खरमुत्स्वनोल्बणं निमीलिताक्षं जगृहे महाजवः ॥ २८ ॥
विष्वक्स्फुरन्तं ग्रहणातुरं हरिर्व्यालो यथाऽऽखुं कुलिशाक्षतत्वचम् ।
द्वार्यूर आपात्य ददार लीलया नखैर्यथाऽहिं गरुडो महाविषम् ॥ २९ ॥
संरम्भदुष्प्रेक्ष्यकराललोचनो व्यात्ताननान्तं विलिहन्स्वजिह्वया ।
असृग्लवाक्तारुणकेसराननो यथाऽन्त्रमाली द्विपहत्यया हरिः ॥ ३० ॥

भाषा टीका ।

सुनकर, उस सभा के भीतर उस शब्द के आश्रय को न देखता भया कि जिस शब्द से दैत्य यूथप लोग त्रास को प्राप्त हुए ॥ १७ ॥

प्रभु ने भी अपने निजदास के भाषण को सत्य करने के लिये और प्रह्लादोक्त निखिल भूतों में अपनीव्याप्ति को सत्य करने के लिये ऐसा अति अद्भुत रूप धारण करके दर्शन दिया कि उस सभा मे उसस्तम्भ के मध्य में आप का रूप न सिंह का मालूम पडता और न मनुष्यका ॥१८॥

हिरण्यकशिपु भी उस शब्द के कारण को चारो तरफ देखता हुआ. उस स्तम्भ के मध्य से निकलते हुए श्रीनृसिंह देवरूप एक अपूर्व प्राणि विशेष को देखता हुआ, और देखकर बोला, कि यह न मृग है न नर है अहो अति आश्चर्य है यह मिलकर नरसिंह रूप क्या है ॥ १९ ॥

हिरण्यकशिपु ऐसा विचार करता रहा इतने में अग्रभाग में बडे भयानक नृसिंह रूपसे भगवान उठ खडे हुए वह नृसिंहरूप कैसा है कि प्रतप्त सुवर्ण के सदृश पीले लोचन हैं जिसमें और स्फुरायमाण होरहे जटा और कंठ रोम जिसमें॥ २०॥

बडी ऊंची २ डाढे जिसमें खड्ग छुरीकी चंचल और छुरा सरीकी तीक्ष्ण जिह्वा, शंकु सदृश ऊंचे खडे हुए कर्ण गिरि गुहा के सदृश अद्भुत पसरा हुआ है मुख और नासिका जिसमें, और हनु (ठोडी) के विदारण करने से बडा भयानक ॥ २१ ॥

शरीर आकाश में स्पर्श कररहा जिसमें, बडी पुष्ट ग्रीवा वाला भारी वक्षःस्थल वाला अल्प मध्य भाग वाला और चन्द्रकिरण वत् गौर लोम समूह से व्याप्त चारों तरफ फैली हुई सैकडों भुजायें जिसमें और नख ही आयुध जिसमें ॥ २२ ॥

और बडा दुरासद, कि जिसको देखकर समीप न जासके और निज तथा इतर जो चक्र वज्रादि आयुध तिनों से विद्रावित किये हैं दैत्यदानव जिसने ऐसे रूपको हिरण्यकशिपु देखकर विचारने लगा, कि प्राय करके बडा मायावी इस हरि ने मेरे वधका विचार किया है तौ भी इसके उद्योग से क्या होना है ॥ २३ ॥

उस समय वह दैत्यकुंजर हिरण्यकशिपु ऐसे कहता हुआ हाथ में गदा लेकर श्रीनृसिंह देव के ऊपर चला जैसे अग्नि पतंग गिरने से अलक्षित होजाता है ऐसे ही वह असुर भी नरहरि के तेज में अलक्षित होगया ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सत्त्वधामनि सत्त्वप्रकाशे हरौ पतितस्य तमोमयस्यादर्शनं तद्विचित्रं न भवति तत्र हेतुः यो हरिः पुरा सृष्टयादौ प्रलयकालीनं तमः नु अहो अपिबद्ग्रसितवान् ॥ २५ ॥

विक्रमन्तं ततस्ततः प्रहरन्तम् हस्तादुत्कलितो निस्सृतः ॥२६॥

तदा अमरा देवाः सर्वे धिष्ण्यपा असाध्वमन्यन्त हृतान्योकांसि स्थानानि येषां ते तद्भिया घनच्छदा मेघान्तरिताः सन्तः यस्य हस्तात्स्वयं मुक्तस्तं नृहरिं स्ववीर्याच्छङ्कितं मन्यमानः खड्गचर्मणी प्रगृह्य पुनस्तमासज्जताऽभ्यपद्यतेत्यन्वयः ॥ २७ ॥

श्येनस्येव वेगो यस्य तम् शतचन्द्रवर्त्मभिः खड्गचर्ममार्गैः

(१) शतचन्द्रवर्मभिरिति-विज० ॥ (२) खरनिस्वनोल्बणः इति. श्री-वीर० ।

नखाङ्कुरोत्पाटितहृत्सरोरुहं विसृज्य तस्यानुचरानुदायुधान् ।
अहन्समन्तान्नखशस्त्र * पार्ष्णिभिर्दोर्दण्डयूथोऽनुपथान्सहस्रशः ॥ ३१ ॥
सटाऽवधूताजलदाः परापतन् ग्रहाश्च तद्दृष्टिविमुष्टरोचिषः ।
अम्भोधयः श्वासहता विचुक्षुभुर्निर्ह्रादभीता दिगिभा विचुक्रुशुः ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अच्छिद्रं यथा भवत्येवमुपर्यधश्चरन्तम् अट्टहासमेवाऽऽह, खरं तीव्रम् उत्स्वनेन महाशब्देनोल्बणां भयङ्करम् तद्भयेन हरेस्तेजसा च निमीलिते अक्षिणी यस्य ॥ २८ ॥

ग्रहणे दृष्टान्तः व्यालो यथा आखुं मूषकम् विदारणे दृष्टान्तः अहिं गरुड इवेति विष्वक् सर्वतः स्फुरन्तं निःसरन्तम् ग्रहणेनातुरं विवशम् इन्द्रेण सह युद्धे तत्प्रयुक्तेन कुलिशेन न क्षता त्वगपि यस्य द्वारि सभायां नान्तर्नबहिः ऊरे ऊरौ निपात्य न भूमौ न चाम्बरे नखैः व्यसुभिरसुमद्भिर्वा एवं दिवानक्तपरिहाराय सन्ध्यायामिति द्रष्टव्यम् ॥ २९ ॥

दैत्यवधमुक्त्वा तद्भृत्यवधमाह, द्वाभ्याम् । संरंभेण दुष्प्रेक्ष्याणि करालानि लोचनानि यस्य असृजो रक्तस्य लवैर्बिन्दुभी रक्ताः सिक्ता अत एवारुणाः केसरा आननं च यस्य सः क इव द्विपहत्यया गजवधेन हरिः सिंहो यथा एवंभूतस्तस्यानुचरानहन्नित्युत्तरेणान्वयः आन्त्राणां माला कण्ठे विद्यते यस्य॥३०॥

नखांकुरैरुत्पाटितं हृत्सरोरुहं यस्य तम् दोर्दण्डानां यूथानि समूहा यस्य सः तं दैत्येन्द्रमनुपन्था येषां तान् अन्यानपि तत्पक्षपातिन इत्यर्थः ॥ ३१ ॥

दैत्यवधर्ध्वंसस्य नृहरेराटोपमाह द्वाभ्याम् । सटाभिरवधूताः प्रकम्पिता जलदा मेघाः परापतन् व्यशीर्यन्त अनेन ये मेघान्तरिताः देवास्ते स्पष्टं पश्यंन्तित्यदाक्षां दत्तवानित्यर्थः । तस्य दृष्ट्या विमुष्टं रोचिर्येषां ग्रहाणां ते तिरस्कृतप्रभा अभवन्निति शेषः । दिगिभा दिग्गजाः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सत्त्वधामनि शुद्धसत्त्वाश्रये हरौ पतितमोमयस्य दैत्यस्याऽदर्शनं यत्तद्विचित्रं न भवति तत्र हेतुर्यो हरिः पुरा सृष्ट्यादौ प्रलयकालिकं तमः स्वतेजसा अपिबत् ततो महासुरोऽभिपत्याभिमुखमागत्य रुषा क्रोधेन उरुवेगया भ्राम्यमाणया गदया नृसिंहमभ्यहनत्ताडितुमुद्युक्त इत्यर्थः । सगदमग्रहीदित्युत्तरस्वारस्यादिति भावः ॥ २५ ॥

विक्रमन्तं कथञ्चित्प्रहर्तुमुद्यतवन्तं तं दैत्येन्द्रं गदाधरो नृसिंहः सगदमग्रहीत् यथा तार्क्ष्यसुतो गरुत्मान् महासर्पं तद्वदित्यर्थः । स गृहीतोऽसुरस्तदा विक्रीडतस्तस्य नृसिंहस्य हस्ता-
दुत्कलितो विसृष्टो यद्वद्यथा विक्रीडतो गरुत्मतो ऽहिर्गलितो भ-
वति तद्वत् भगवतस्तत्क्रीडनं तद्विसर्जनरूपमजानन्तो लोकपालाः
सर्वे इन्द्रादयः सुराः हृतं दैत्येन्द्रेणापहृतम् ओकः स्थानं येषां ते
अतएव तद्भयेन घनच्छदा मेघेषु छन्नाः सन्तः असाध्वमन्यन्त अहो
भगवतोऽप्ययं बलीयाऽननेनैव तस्य किं स्यादित्येवममन्यन्तेत्यर्थः
यस्य हस्तात्स्वयं मुक्तस्सन् नृहरिं स्ववीर्याच्छङ्कितं मन्य-
मानो ऽत एव महामना अहमेव बलीयानित्याभिमानयुक्तो ऽसुरो
मृधे युद्धे जितश्रमः श्रमरहितः खड्गचर्मणी खड्गखेटे प्रगृह्य
पुनस्तं नृसिंहं पुरा असज्जत अभ्यपतत् ॥ २६ ॥ २७ ॥

श्येनस्येव वेगो यस्य शतचन्द्रवर्त्मभिः शतचन्द्रश्चर्म तस्य
वर्त्मभिः खड्गचर्ममार्गैरच्छिद्रं यथा भवति एवमुपर्यधश्च च-
रन्तं दैत्यं हरिरट्टहासं कृत्वा खरेण कठिनेन निस्वनेन ध्व-
निना उल्बणो भीषणो महावेगो निमीलिते ऽट्टहासखरनिस्वनाभ्या
निमीलिते ऽक्षिणी यस्य तं जग्राह, खरनिस्वनोल्बणामिति द्विती-
यान्तपाठे तु खरेण निस्वनेन महाशब्देनोल्बणां भयंकरमट्टहासं
कृत्वा तद्भयेन हरेस्तेजसा च निमीलिताक्षमग्रहीत्
इत्यर्थः ॥ २८ ॥

ततः विष्वक् सर्वतः स्फुरन्तं सर्वावयवान् प्रचालयन्तमित्यर्थः
ग्रहणेन हेतुना आतुरं विवशमिन्द्रेण सह युद्धे तत्प्रयुक्तेन कुलिशे-
नाक्षता त्वगपि यस्य तं दैत्यं द्वारि सभायाः नान्तर्बहिः ऊरौ
वङ्क्षे निपात्य न भूमौ न चाम्बरे नखैर्न तु व्यसुभिरसुमद्भिर्वा ए
दिवानक्तं विहाय संध्यायामिति द्रष्टव्यं लीलया क्रीडया द
विदारितवान्, तत्र ग्रहणे दृष्टान्तः यथा व्यालः सर्पः आ
मूषकमिति विदारणे दृष्टान्तः महाविषमहिं सर्पं गरुड इवेति ॥

एवं दैत्येन्द्रवधमुक्त्वा तद्दशावस्थितं नृसिंहमनुवर्णयन् दैत्ये
भृत्यवधमाह संरम्भेणेति द्वाभ्याम् । अहिते संरम्भेण क्रोधेन दु
ष्प्रेक्ष्ये दुर्निरीक्ष्ये कराले लोचने यस्य व्यात्तं विकासितं य
ननं मुखं तत्पर्यन्तं स्वजिह्वया विलिहन्सन् असृजो रक्तस्य
बिन्दुभिः अक्तासिक्ता अतएवारुणाः केसरा आननञ्च य
आन्त्रमालाधरः क इव द्विपहत्यया गजवधेन हरिः सिंहो य
तद्वत् ॥ ३० ॥

एवंभूतो नखांकुरैः उत्पाटितं हृदयसरोजं यस्य तदै
शरीरं विसृज्य तस्य दैत्येन्द्रस्यानुचरान् कथम्भूतान् वरायुधा
येषां तमनुपन्थाः अनुवृत्तिर्येषां तान् दोर्दण्डानां यूथानि यस्य
नखा एव शस्त्राणि यस्य तैः समन्तात्सहस्रशो न्यहनत् ह
तान् ॥ ३१ ॥

* पाणिभिरिति पाठः श्रीवीर० विज० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

दैत्यवधव्यग्रस्य नृहरेराटोपमाह—सटेति द्वाभ्याम् । सटाभिरवधूताः प्रकम्पिताः जलदाः मेघाः परापतन् व्यशीर्यन्त तस्य नृहरेर्दृष्ट्या विमुष्टमपहृतं रोचिः येषां तादृशाः ग्रहाः सूर्यादयोऽभूवन् श्वासेन हताः पीडिता अम्भोधयः समुद्राः चुक्षुभुः संचेलुः निर्ह्रादेन भीताः दिग्गिभा दिग्गजाः मुदं हर्षं जहुः तत्यजुः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

द्विसप्तलोकैकारेः केवलं तुच्छीकरणं भगवद्भक्तिवैशद्यात्र तत्त्वत इति नेत्याह—नतदिति । सत्त्वधामनि बलज्ञानसमाहारमूर्तौ पराक्रममूर्तौ वा जगदादौ तमः पानं पुरुषरूपेण अनेन जगदावरकं तमःपानरतो हरेरसुरभस्मी करणं किमिति दर्शितम्, अथो लोकं विडम्बयतो हरेरसुरेण सह समरप्रकारं वर्णयति, ततइति ॥ २५ ॥

तस्य गदाशिक्षालाघवं वक्ति, स तस्येति । हस्तोत्कलितः हस्ताद्गलित उत्प्लुतो वा ॥ २६ ॥

तस्य हरेर्विडम्बनम् अजानताममराणां निरूपणप्रकारं वक्ति, असाध्विति । हतौजसः अष्टावष्टंभा इव घनेन च्छदा च्छादनं येषां ते तथा मेघच्छायायां विलीना इव लुप्तोपमेयं सर्वधिष्ण्यपाः सर्वनक्षत्रपतयः चन्द्रादयोऽमराः तदसाध्वमन्यन्तेत्यन्वयः । तत्र हेतुः तं मन्यमान इति, नृहरेर्हस्तमुक्तोऽसुरः तं नृहरिं निजवीर्ये आत्मपराक्रमे शङ्कितं मन्यमानोऽभूदिति यत्तदिति हरेर्हस्तमुक्तोऽसुरः पराद्रवत् उताभ्यपतत् ? इति संशयो माभूदित्याह, पुनस्तमिति । आसज्जत सक्तोऽभूद्युद्धाय सन्नद्धोऽभूदित्यर्थः । शतचन्द्रवर्गभिः शतचन्द्रवर्मभ्यां खड्गचर्मणीति प्रकृतत्वात् "भद्रं कर्णेभिः शृणुयाम देवाः" इत्यादिश्रुतेः छान्दसाभिप्रायेणायं प्रयोगः । सम्भाव्यते च परिभ्रमणे शिक्षाप्रकर्षद्रष्टृणां द्वे एव बहूनीव दृश्यन्त इत्यतो वा बहुवचनं युज्यते अच्छिद्रं निरवकाशमिति क्रियाविशेषणेनैतदेव सूचयति, असुरवीर्यमाशङ्कमानो हरिः किमिकरोदिति तत्राह, हरिरिति ॥ २७–२८ ॥

विष्वक् परितः स्फुरन्तं समन्तगित्यनेनापि शिक्षोत्कर्षं ध्वनयति, हरिः पुनर्ग्रहणेनातुरमकरोदिति शेषः । अनेनातुरस्वरं लक्षयति, तत्र दृष्टान्तमाह, व्याल इति । व्यालः सर्पः खननशीलत्वादाखुः ब्रह्मवररक्षणार्थमाह, द्वारीति । द्वार्यधस्तिरश्चीनदारुणि स्थित्वा उरावङ्के उत्तानतयाऽऽपात्य अत्रापि ह्रस्वत्वं छान्दसं संरम्भेण द्वेषाद्दात्यन्तिककोपेन दुष्प्रेक्ष्ये कराले लोचने यस्य व्यात्ताननान्तं विवृतवदनस्याधरोष्ठम् असृक्लवसया रुधिरबिन्दुनाक्ते रूषिते अत एवारुणकेसरानने यस्य स तथोक्तः स हरिः सिंहः ॥ २९—३० ॥

न केवलमेनमेव हतवान् किन्तु तदनुचरानासुरानित्याह, नखाङ्कुरेति । अहन् हतवान् नखशस्त्रपाणिभिर्नखैः शस्त्रैः पाणिभिश्च हरेर्दण्डानां यूथानुपथान् निकराकृष्टान् ॥ ३१ ॥

तदवसरविक्रमं वक्ति, सटाविधूता इति । दिग्गिभा दिग्गजा मदं जहुस्त्यक्तवन्तः प्रोत्सर्पत प्रोदसर्पत उद्गतेत्यर्थः ॥ ३२—३३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

हस्तादुत्कलितः निःसृतः । घनच्छदा मद्वधमेते विदृक्षन्त इति दैत्यकोपभयान्मेघान्तरिताः हृतौकसोऽसाध्वमन्यन्तेति अोकांस्यपहृतवानेव सम्प्रति यद्ययं जीविष्यति तदस्माकमवशिष्टान् प्राणानपि हरिष्यतीति भावः । निजवीर्याच्छङ्कितं मन्यमानः यद्यस्मात् हस्तान्मुक्तः ॥ २६—२७ ॥

शतचन्द्रवर्त्मभिः खड्गचर्ममार्गैः अट्टहासशब्दोत्थभयेन निमीलिते अक्षिणी येन तम् ॥ २८ ॥

व्यालो यथा मूषिकमिति ग्रहणे दृष्टान्तः गरुडो यथाहिमिति, विदारणे कुलिशेनाक्षता त्वगपि यस्य तम् लीलयाऽवहेलयैव ददार द्वारि सभायां नान्तर्न बहिः ऊरे ऊरौ निपात्य न भूमौ नाम्बरे नखैर्न व्यसुभिरसुमद्भिर्वा एवं दिनान्तं परिहाय सन्ध्यायामिति ज्ञेयम् ॥ २९ ॥

असृजो रक्तस्य लवैर्बिन्दुभिराक्ताः सिक्ताः अत एवारुणाः केसरा आननञ्च यस्य आन्त्रमाली मालारूपेणान्त्रं दधान इत्यर्थः । द्विपहत्यया हस्तिवधेनान्वितो हरिः सिंह इव नखाङ्कुरैरुत्पाटितं हृत्सरोरुहं यस्येति यत्राहमेव प्रतिक्षणं सुखमवसं तत्र सम्प्रत्ययं मन्दभाग्यः क्रोधमत्सरादिकं तामसं कथं वासयति स्मेति द्रष्टुमिवेत्युत्प्रेक्षा सरोरुहरूपकेण व्यज्यते । अत एवाङ्कुररूपकं सरोरुहभङ्गाभावायैव बुद्ध्यते दोर्दण्डानां यूथानि यस्य सः अनुपथान् अनुवर्त्तिनः ॥ ३०–३१ ॥

तत् प्रतापानाह, सटेत्यादि ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सत्त्वस्याप्राकृतस्य तेजसो धामनि आश्रये भगवति पतितस्य तमोमयस्य दैत्यस्य यददर्शनं तद्विचित्रं न भवति यः पुरा सृष्ट्यादौ प्रलयकालीनं तमः नु अहो अपिबत् संक्षेपेणोक्तं पतनादर्शनप्रकारं विस्तरेण वर्णयति ततइत्यादिना ॥ २५ ॥

विक्रमन्तं ततस्ततः प्रहरन्तं तार्क्ष्यसुतो गरुडो महोरगं यथाऽग्रहीत् तथा विक्रीडतोऽहरेर्हस्तादुत्कलितो भवेत् तद्वत् सोऽसुरः तस्य हस्तादुत्कलितो मुक्तः ॥ २६ ॥

तेन हृतौकसोऽमराः देवाः सर्वे धिष्ण्यपाः दिक्पालाः घनच्छदाः मेघान्तरिताः तदुत्कलनमसाध्वमन्यन्त महासुरः यस्य हस्तान्मुक्तस्तं नृहरिं निजवीर्यशङ्कितं मन्यमानः खड्गचर्मणी प्रगृह्य मृधे जितश्रमः श्रमशून्यः वेगेन पुनस्तमासज्जत् ॥ २७ ॥

तं खरं खलं हिरण्यकशिपुं श्येनस्येव वेगो यस्य स तथा तम्, शतचन्द्रवर्त्मभिः खड्गचर्मभ्रामणमार्गैः अच्छिद्रं यथा स्यात्तथोपर्यधश्चरन्तं महाजवो हरिः उत्स्वनेनोन्नादेनोल्बणं भयङ्करं

द्यौस्तत्सटोत्क्षिप्तविमानसङ्कुला प्रोत्सर्पत क्ष्मा च पदातिपीडिता ।
शैलाः समुत्पेतुरमुष्य रंहसा तत्तेजसा खं ककुभो न रेजिरे ॥ ३३ ॥
ततः सभायामुपविष्टमुत्तमे नृपासने संहततेजसं विभुम् ।
अलक्षितद्वैरथमत्यमर्षणं प्रचण्डवक्त्रं न बभाज कश्चन ॥ ३४ ॥
निशम्य लोकत्रयमस्तकज्वरं तमादिदैत्यं हरिणा हतं मृधे ।
प्रहर्षवेगोत्कलितानना मुहुः प्रसूनवर्षैर्ववृषुः सुरस्त्रियः ॥ ३५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अट्टहासमुच्चैर्हासं कृत्वा जगृहे कथंभूतमट्टहासेन निमीलिते अक्षिणी यस्य तम् ॥ २८ ॥

विष्वक् सर्वतः स्फुरन्तं निस्सरन्तं ग्रहणेनासुरम् इन्द्रेण सह युद्धे कुलिशेनापि न क्षता त्वक् यस्य तम् यथा आखुं मूषकं व्यालः सर्पोविदारयेद्दन्तैरिति शेषः "व्यालोदुष्टगजे सर्पे" इति कोशात् यथा गरुडो महाविषमहिं नखैर्विदारयेत् तथा द्वारि नांतर्न बहिः ऊरू ऊरौ निपात्य न भूमौ न व्योम्नि नखैरेव नतु व्यसुभिरसुमद्भिर्वा लीलया ददार दिवानक्ताभावाय संन्ध्यायामिति शेषम् ॥ २९ ॥

हिरण्यकशिपुवधमुक्त्वा तदनुचरवधमाह—संरम्भेति द्वाभ्याम् । संरम्भेण कोपेन दुष्प्रेक्ष्ये द्रष्टुमशक्ये कराले लोचने यस्य स्वजिह्वया व्यात्ताननान्तं विलिहन् द्विपस्य हत्यया वधेन हरिः सिंहइव असृक्लवैरक्तबिन्दुभिः आक्ता अतएव अरुणाः केसराः आननं च यस्य आन्त्राणां माला यस्य स हरिः ॥३०॥

नखांकुरैरुत्पाटितहृत्सरोरुहं तं विसृज्य तस्य सहस्रशः अनुचरान् भृत्यान् अनुपथान् तमनुपन्था जीवनमार्गो येषान्तान् दोर्दण्डायूथानि यस्य स नखादिभिः अहन् हतवान् ॥ ३१ ॥

तस्य निरतिशयं प्रतापमाह, सटेति द्वाभ्याम्। सटाभिरवधूताः अपनीताः परापतन् दूरमगमन् ॥ ३२ ॥

भाषा टीका।

जिस हरि ने सृष्टि काल में प्रलयकाल के तम को पान किया उस हरि में दैत्य का अलक्षित होना कुछ विचित्र नहीं ॥ तदनन्तर महाअसुर ने समीप में जाकर रोप से नर हरि के ऊपर बडे वेग वाली गदा चलाई ॥ २५ ॥

जहां तहां प्रहार करने वाले गदा सहित उस असुर को पकडा जैसे भारी सर्प को गरुड का बालक पकडे इतने ही में वह असुर भगवान के हस्त से सटकगया जैसे कि गरुड के खेलने में हस्त हे सर्प निकलजावे ॥ २६ ॥

हे भरत ! उस समय जिनों के घर द्वार छुडाये गये वो सब लोकपाल मेघों में छिपे हुए अच्छा नहीं मानते हुए हिरण्यकशिपु भी जिनके हाथ से छूटा है उन श्री नर हरि को अपने वीर्य से शंकित मानकर, श्रम को न मानकर फिर भी खड्ग चर्म (तरवार ढाल) को लेकर संग्राम के निमित्त वेग से प्रभु के समीप पहुंचा ॥ २७ ॥

श्येन सरीके वेग वाले और नीचे ऊपर खड्ग के चालों से निश्छिद्र विचरते हुए और उच्च स्वर से भयंकर तीक्ष्ण किया जो अट्टहास तिससे निमीलित (बंद) हुए नेत्र जिसके ऐसे उस दैत्य को भगवान ने पकड लिया ॥ २८ ॥

इन्द्र के वज्र से जिसके त्वचा में खरोंट भी नहीं आई सर्प के ग्रहण करने से मूषक जैसे ऐसे ग्रहण करने से आतुर चारों तरफ छटपटाते हुए उस दैत्य को द्वार में अपने जघन पर पटक कर, महा विष हरे सर्प को गरुड जैसे ऐसे लीलाई से नखों से विदारण करडाला ॥ २९ ॥

संरम्भ से दुर्निरीक्ष्य (देखे न जासकें) और कराल भयानक नेत्र जिनके, फाडे हुए मुख की दोनों बगलों को जिह्वासे चाटते हुए रुधिर कणों से सिंचा हुआ है मुख और केसर (बाल) जिनके हिरण्यकशिपु की आंतों की माला पहिने हुए ऐसे नर हरि हाथी की हिंसा से सिंह जैसे, ऐसे शोभित हुए ॥३०॥

नखों से फाडडाला हृदय कमल जिसका ऐसे हिरण्यकशिपु को फेंककर चारों तरफ शस्त्रों लिये खडे हुए जो हजारों दैत्यानुचरों को भुजा रूप दंडों का समूह विद्यमान जिनके, ऐसे नर हरि नख रूप शस्त्रों से मारते हुए ॥ ३१ ॥

उस समय आपका रूप कैसा है कि जिनके शिरके बालों टक्कर के से मेघ तितर बितर होगये और जिनकी दृष्टि से ग्रह और नक्षत्रों की कांति फीकी पडगई, और जिनकी श्वास से ताडित हुए २ समुद्र क्षुभित होगये, और जिनके शब्द से त्रस्त होकर दिग्गज भी चिल्लाने लगे ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्य सटाभिरुत्क्षिप्तानि विमानानि तैः सङ्कुला व्याप्तासती प्रोत्सर्पत स्वस्थानात्प्रकर्षेणोद्सर्पच्चलिता ॥ ३३ ॥

स्वभृत्यैश्वर्यमिव मत्वा कौतूहलेन तस्याऽऽसने उपविष्टं भयात्कोऽप न बभाज नासेवत न लक्षितोद्वैरथः प्रतियोद्धा येन ॥ ३४ ॥

तदा विमानावलिभिर्नभस्तलं दिदृक्षतां सङ्कुलमास नाकिनाम् ।
सुरानका दुन्दुभयोऽथ जघ्निरे गन्धर्वमुख्या ननृतुर्जगुः स्त्रियः ॥ ३६ ॥
तत्रोपव्रज्य विबुधा ब्रह्मेन्द्रगिरिशादयः ।
ऋषयः पितरः सिद्धा विद्याधरमहोरगाः ॥ ३७ ॥
(१)मनवः प्रजानां पतयो गन्धर्वाप्सरचारणाः ।
यक्षाः किम्पुरुषास्तात ! वेतालाः सिद्धकिन्नराः ॥ ३८ ॥
ते विष्णुपार्षदाः सर्वे सुनन्दकुमुदादयः ।
मूर्ध्नि बद्धाञ्जलिपुटा आसीनं तीव्रतेजसम्।
ईडिरे नरशार्दूलं नातिदूरचराः पृथक् ॥ ३९ ॥

ब्रह्मोवाच ।

नतोऽस्म्यनन्ताय दुरन्तशक्तये विचित्रवीर्याय पवित्रकर्मणे ।
विश्वस्य सर्गस्थितिसंयमान्गुणैः स्वलीलया सन्दधतेऽव्ययात्मने ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

लोकत्रयस्य मस्तकज्वरं शिरोव्यथेव दुःसहम् प्रहर्षस्य वेगेनोत्कलितानि विकसितान्याननानि यासां ताः सुरस्त्रियः पुष्पवर्षैः नृहरिं ववृषुः ॥ ३५ ॥

नाकिनां देवानां विमानावलिभिर्नभस्तलं सङ्कीर्णमास सुराणामानकाः पटहास्तैर्जघ्निरे वादिताः स्त्रियो अप्सरसो ननृतुर्गन्धर्वाः जगुः ॥ ३६ ॥ ३७ ॥

गन्धर्वाप्सरसश्चारणाश्चेत्यर्थः ॥ ३८ ॥

नरशार्दूलं पुरुषोत्तमम् ॥ ३९ ॥

ब्रह्मादयो नृसिंहस्य शङ्कयाकुलचेतसः ।
आराद्देवास्तुवन् सप्तदशश्लोकैः पृथक् पृथक् ॥—

अनन्तायानन्तं त्वां प्रसादयितुं नतोऽस्मि अनन्तत्वे हेतुः दुरन्ताः अनन्ताः शक्तयो यस्य, तत्कुतः ? विचित्राणि वीर्याणि प्रभावा यस्य, तत्किमर्थम् ? पवित्राणि श्रवणमात्रेण शोधकानि कर्माणि यस्य, वीर्यत्वमेवाह, विश्वस्येति। सन्दधते सम्यक्कुर्वते एवमप्यव्ययात्मने अप्रच्युतस्वरूपाय ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तस्य नृहरेः सटाभिरुत्क्षिप्तानि विमानानि तैः सङ्कुला व्याप्ता द्यौः प्रोत्सर्पैतेतस्ततश्चालितेवाभूत्. नृहरेः पद्भ्यामतीव पीडिता क्ष्मा भूमिरभूत् अत एव तस्यास्तस्य रंहसा वेगेन बलेन वा शैलाः समुत्पेतुः उत्पलुत्य पतितवन्तः तस्य नृहरेः तेजसा खमाकाशं ककुभो दिशश्च न रेजिरे ॥ ३३ ॥

ततोऽहमेव सर्वेश्वर इति लोकस्य प्रदर्शयितुं सभायामुत्तमे नृपासने उपविष्टं संभृतं संपूर्णं तेजो यस्य अलक्षितः न लक्षितो द्वैरथः प्रतियोद्धा येन प्रचण्डमुग्रं वक्त्रं यस्य तं विभुं नृसिंहं कश्चन कोऽपि न बभाज नासेवत कोऽपि समीपं गन्तुं नाशक्तो दित्यर्थः ॥ ३४ ॥

लोकत्रयस्य मस्तकज्वरं शिरोव्यथावद्दुस्सहं तमादिदैत्यं हिरण्यकशिपुं हरिणा नृसिंहेन युद्धे हतं निशाम्य हृष्टा प्रहर्षवेगेन उत्कलितानि विकसितान्याननानि यासां ताः सुराणां स्त्रियः पुष्पवर्षैः पुनःपुनर्नृहरिं ववृषुः ॥ ३५ ॥

तदा दिदृक्षतां द्रष्टुमिच्छतां दर्शनार्थमागतानामित्यर्थः। नाकिनां देवानां विमानपंक्तिभिर्नभस्तलं सङ्कुलं संमर्दं बभूव सुराणामानकाः पटहास्तैर्दुन्दुभयो जघ्निरे ताडिताः गन्धर्वश्रेष्ठाः ननृतुः स्त्रियः अप्सरसो जगुः ॥ ३६ ॥

तत्रोपव्रज्य किंचित्समीपमागत्य ब्रह्मरुद्रप्रभृतयो देवादयः हे तात! मूर्ध्नि बद्धान्यञ्जलिपुटानि यैस्ते आसीनमुपविष्टं तीव्रं दुस्सहं तेजो यस्य तं श्रीनृसिंहं नातिदूरवर्तिनः पृथगेकैकश ईडिरे तुष्टुवुः ॥ ३७-३८—३९ ॥

तावदपारभिविधविचित्रशक्तिवीर्यमकर्मायत्तजगद्व्यापारं जगत्कारणं स्तुवन्नमस्करोति ब्रह्मा--नतोऽस्म्यहमिति। अनन्ताय स्वरूपतस्त्रिविधपरिच्छेदरहिताय दुरन्तशक्तये अपारशक्तये अचिन्त्यशक्तये वा शक्तिः स्वेतरसर्वसामर्थ्यनिर्वाहिका. "जगत् प्रकृतिभावो मे यः सा शक्तिरुदीरिता" इत्यादिषूक्ता. यद्वा यदन्यैरशक्यत्वादघटितमिव विभाति तद्घटनसामर्थ्यरूपा. यतस्त्वमुक्तविधदुरन्तशक्तिरनन्तशक्तिरत एव मद्वरेण सर्वतोऽघटितमरणं दैत्यं हतवानसीति भावः। यतस्त्वमनन्तोऽत एवाऽचेतने स्तम्भेऽप्याविर्भूतोऽसीत्याभिप्रायः

(१) मनुः प्रजानामिति, वीररा० पाठः ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अनन्तपदेन हि सर्वव्यापित्वाद्देशपरिच्छेदराहित्यम्, सर्वकालवर्तित्वात्कालपरिच्छेदराहित्यम्. साक्षात्परम्परया सर्वप्रकारत्वेन सर्ववस्तुसामानाधिकरण्यार्हत्वाद्वस्तुपरिच्छेदराहित्यम् विवक्षितम्, येन केनापि प्राशस्त्येन स्वस्मादुत्कृष्टैः कैश्चिद्वस्तुभिरधरीकृतत्वाभावरूपं वा वस्तुपरिच्छेदराहित्यम्. इति त्रिविधपरिच्छेदराहित्यं विवक्षितम् । नन्वस्त्वेवं स्वरूपं कृत्स्नजगदुदयविभवलयलीलस्य कियदेतद्दैत्यहननमित्यभिप्रयन्, तावज्जगत्कारणत्वप्रयुक्तं विकारं निराह, विचित्रवीर्यायेति । वीर्यं नाम सर्वोपादानत्वे सर्वसाधारणे सर्वनियमने विकाररहितत्वम्. यथोक्तम्. "विकारविरहो वीर्यं प्रकृतित्वेपि मे सदा" इत्यादि. विचित्रशब्देनैवंविधस्य वीर्यस्यानितरसाधारण्यमुच्यते. पवित्रकर्मणे अकर्मायत्तजगद्व्यापाराय त्वद्व्यापारं शृण्वतां दुरितनिवर्तनक्षमव्यापारायेतिवा. गुणैः सर्वज्ञत्वसर्वशक्तित्वादिभिर्जगन्निमित्ततदुपादानत्वोपयुक्तैः स्वनियाम्यसत्त्वादिप्राकृतगुणैर्वा कृत्स्नस्य विश्वस्य सर्गादीन् स्वलीलयैव न तु कर्मणा सन्दधते विदधते अव्ययात्मने एवमप्यव्ययः विकाररहितः आत्मा स्वभावो यस्य. स्वभावतोपि विकाररहितायेत्यर्थः स्वरूपतोऽपि विकारराहित्यस्योक्तत्वात् ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सभावस्थानं तस्य वक्ति,तत इति । सम्भृततेजसं राशीकृततेजसं मलक्षितं न केनापि दृष्टम् ॥ ३४ ॥

नन्वयं जयः केनापि न लक्षितः तदङ्कुरव्यक्त्यदर्शनादित्याशङ्क्य, पुरुषकोपोपशमनं स्त्रीणामेव सुशकमिति भावेन सुरस्त्रीपुष्पवर्षप्रकारमाह, निशम्येति । लोकत्रयस्य मस्तकज्वरं शिरोरोगायमाणं प्रहर्षातिरेकेणोत्कलितं विकसितमाननं यासां तास्तथा ताः ॥ ३५ ॥

सुरस्त्रीवृष्टपुष्पसौरभ्याघ्राणेन किञ्चिच्छान्तकोपत्वादस्माकमप्ययमवसर इति मत्वा नानादेवानां नभसि विमानावलिसाङ्कुल्यप्रकारं वक्ति, तदेति । सुराणामानका दुंदुभयः ॥ ३६ ॥

चण्डशुण्डानाश्चिचाह्लादकरी स्तुतिरेवेति भावेन ब्रह्मादीनामुपक्रममाह, तदुपव्रज्येति । ये पूर्वमुपगन्तुं तत्रास ते ब्रह्मादयस्तं पृथगीडिर इत्यन्वयः ॥ ३७ ॥

नातिदूरचराः किञ्चित्समीपवर्तिनः ॥ ३८-३९ ॥

तत्र पृथक्पृथङ्मतिलक्षणं स्तुतिप्रकारं ब्रूते, नतोऽस्मीति । गुणैः सत्त्वादिभिः स्वलीलया स्वरूपभूतलीलया अव्ययात्मने नित्यदेहाय ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सटाभिरुर्द्ध्व क्षिप्तैश्चालितैर्विमानैः सङ्कुला व्याप्ता क्ष्मा च प्रोत्सर्पत अङ्गागमाभावतङ्गाचार्या । तिर्यगूर्द्ध्वाधो भावेनातिष्ठत् ॥ ३३ ॥

नृपासने उपविष्टमिति येन यः पराभूयते तेन तदधिकारः स्वीक्रियते इति राजनीतिं प्रदर्शयन्तमिव । यद्वा । शापग्रस्तोपि स्वभृत्ये स्वाभिमानत्यागाभावो व्यञ्जितः । यः किल ऋषिभिरपि समर्पितानन्यानुपहृतान्मन्त्रपूतानप्यासनाद्युपहारान् साक्षान्नाङ्गीकरोति स एव भगवान् स्वभक्तेनासुरभावग्रस्तेन शापभ्रष्टेनाप्यदत्तमपि तदुपभुक्तमपि सिंहासनं यत् स्वयमेवाप तद्भक्तसौभाग्यमेव सर्वान् दर्शयामासेति तत्त्वं । सम्भृततेजसं सम्पूर्णप्रकाशं न लक्षितो द्वैरथः प्रतियोद्धा येन तं न वभाज भयाद्राजनाद्विना भक्तोपि कोपि नासेवत ॥ ३४ ॥

निशाम्य दृष्ट्वा मस्तकस्य ज्वरमिव दुःसहम् ॥ ३५ ॥

नाकिनां स्वर्गिणां आस बभूव ॥ ३६—३७ ॥

अप्सरचारणा इत्यार्षम् ॥ ३८ ॥

सनकादीन् कोपयसि स्वभक्तौ भ्रंशयसि मया वरान् दापयसि दैत्यगृहे भक्तराजमाविर्भावयसि । दैत्यं प्रेरयं भक्तं तिरस्कारयसि भक्तरक्षार्थं स्वयमेवमाविर्भवसीति तव विधित्सितं न कोऽपि वेत्तीत्याह—नतोस्मीति । अनन्ताय नष्टातुं शक्योऽन्तो यस्य तस्मै अनन्तं त्वां प्रसादयितुं दुरन्तशक्तये दुर्बोधोऽन्तो यासां तथाभूताः शक्तयो यस्य तस्मै विचित्रवीर्याय नखमात्रेण सर्वाजेयदैत्यनिहन्त्रे क्रोधचेष्टितत्वेपि शुद्ध सत्त्वमयत्वात् पवित्रं कर्म यस्य तस्मै सन्दधते कुर्वते ॥ ३९—४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

द्यौस्तस्य सटाभिः क्षिप्तैराकृष्टैर्विमानैः सङ्कुला व्याप्ता जाता यदा भतिपीडिता क्ष्मा प्रोत्सर्पत अनुव्यचलत् अम्बुरंहसा वेगेन तस्य तेजसा खं नभः ककुभो दिशश्च न रेजिरे ॥ ३३ ॥

ततस्तदनन्तरं सभायामुत्तमे नृपासने प्रह्लादार्थं तत्प्रसादं कर्तुमुपविष्टं सम्भृतं सम्यक् स्वभावत एव भृतं पूर्णं तेजो यस्य तं न लक्षितो द्वैरथः प्रतियोद्धा येन तत् अत्यमर्षणं प्रचण्डवक्त्रं भीत्या कश्चन कोपि न बभाज नासेवत ॥ ३४ ॥

सुराणां स्त्रियः लोकत्रयस्य मस्तकज्वरं दुःसहशिरःपीडामिव तमादिदैत्यं हरिणा दुःखनाशकेन मृधे हतं निशम्य प्रहर्षवेगेनोत्कलितान्याननानि यासां ताः प्रसूनवर्षैर्ववृषुः ॥ ३५ ॥

तदा तस्मिन्नवसरे दिदृक्षतां द्रष्टुमिच्छतां नाकिनां दिवौकसां विमानावलिभिर्नभस्तलं सङ्कुलमास बभूव सुराणामानकाः दुन्दुभयश्च जघ्निरे तैर्वादिताः गन्धर्वमुख्याः जगुः स्त्रियश्च ननृतुः ॥ ३६-३७ ॥

गन्धर्वाश्च अप्सरसश्च चारणाश्चेति द्वन्द्वे अप्सर इत्यत्र सकाराभावः आर्षत्वात् ॥ ३८—३९ ॥

दुरन्तशक्तये नित्यशक्तये स्वलीलया स्वाधीनविहारेण हेतुना गुणैः स्वशक्तिगुणैः रजआदिभिः विश्वस्य सर्गादीन् विदधत अतएवाऽव्ययात्मने निर्विकारस्वरूपाय नतोऽस्मि ॥ ४० ॥

रुद्र उवाच ।

कोपकालो युगान्तस्ते हतो ऽयमसुरो ऽल्पकः ।
तत्सुतं पाह्युपसृतं भक्तं ते भक्तवत्सल ! ॥ ४१ ॥

इन्द्र उवाच ।

प्रत्यानीताः परम ! भवता त्रायता नः स्वभागा दैत्याक्रान्तं हृदयकमलं त्वद्गृहं प्रत्यबोधि ।
कालग्रस्तं कियदिदमहो नाथ ! शुश्रूषतां ते मुक्तिस्तेषां न हि बहुमता नारसिंहाऽपरैः किम् ॥ ४२ ॥

ऋषय ऊचुः ।

त्वं नस्तपः परममात्थ यदात्मतेजो येनेदमादिपुरुषाऽऽत्मगतं ससर्ज ।
तद्विप्रलुप्तममुना ऽद्य शरण्यपाल रक्षागृहीतवपुषा पुनरन्वमंस्थाः ॥ ४३ ॥

पितर ऊचुः ।

श्राद्धानि नोऽधिबुभुजे प्रसभं तनूजैर्दत्तानि तीर्थसमयेऽप्यपिबत्तिलाम्बु ।
तस्योदरान्नखविदीर्णवपाद्य आर्च्छत्तस्मै नमो नृहरयेऽखिलधर्मगोप्त्रे ॥ ४४ ॥

भाषा टीका ।

खडे हुए जिनके शिरके केशों से उत्क्षिप्त (चालित) जो विमान तिनसे व्याप्त भया स्वर्ग लोक भी चलायमान होगया तथा चरणों से पीडित पृथिवी भी प्रचालित होगई, और वेगसे पर्वत उखड गये तेज से आकाश और दिशा शोभित न होने लगीं ॥ ३३ ॥

तदनन्तर सभा में उत्तम नृपासन के ऊपर वैठे हुए प्रशान्त तेज वाले और नहीं देखा गया शत्रु जिन का ऐसे प्रचण्ड वदन वाले असह्य रूप विभु श्रीनरहरि के समीप कोईभी न जा सका ॥ ३४ ॥

तीन लोकों के मस्तक का ज्वर रूप उस आदि दैत्यको प्रभुके हाथ से मरा हुआ देखकर, हर्षके वेग से प्रसन्न मुख वाली देवाङ्गनां पुष्पों की वर्षा करने लगी ॥ ३५ ॥

उस समय देखने वाले देवताओं के विमानों की पंक्तियों से आकाश व्याप्त होगया, और देवताओं के आनकदुन्दाभि बाजे बाजने लगे, और गन्धर्व प्रभृति गाने लगे और अप्सरायें नाचने लगीं ॥ ३६ ॥

उस समय वहां पर ब्रह्मा महादेव प्रभृति देवता, ऋषि पितर सिद्ध विद्याधर महोरग मनु प्रजापति गन्धर्व अप्सरा चारण यक्ष किंपुरुष वेताल सिद्धेश किन्नर और सुनन्द कुमुदादिक सब विष्णु पार्षद मस्तकपर अञ्जलि बांधकर समीप जाकर अति दूरस्थित न होकर तीव्र तेज वाले श्री नरहरिको पृथक २ स्तुति करने लगे ॥ ३७—३९ ॥

ब्रह्मो वाच ।

ब्रह्माजी बोले, कि-अन्त शून्य दुरन्त शक्तिवाले विचित्र वीर्यवाले और पवित्र कर्मा जो आप हैं तिनको नमस्कार हो, और अपने गुण और लीलासे अव्ययात्मा को नमस्कार हो ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

रुद्रस्तु तत्कोपकालाभिज्ञो नायं कोपावसर इति तं प्रार्थयते, कोपेति। सहस्रयुगान्त एव कोपस्य कालः कोपायोग्यश्चायमित्याह; अल्पकोऽल्पः अतः कोपानिवृत्त्या प्रह्लादं मा हिंसीरित्याह, तत्सुतामिति। यद्वा अकालेऽप्ययं कोपोऽस्य भक्तस्य रक्षार्थमितिचेत्तर्हीदानीं कोपं त्यक्त्वेमं पाहीत्यर्थः ॥ ४१ ॥

इन्द्रस्तु नास्माकं हविर्भागादिलाभः पुरुषार्थः, किन्तु त्वत्परिचर्यैव भवता पुनरनेन संरम्भेण स्वकार्यमेव साधितं तस्य च सिद्धत्वादुपसंहरैनं क्षोभमित्याशयेनाऽऽह,हे परम! नो अस्मांस्त्रायता रक्षता भवता स्वीया एव भागा दैत्यात्प्रत्याहृताः अन्तर्यामिणस्तवैव यज्ञेषु भोक्तृत्वात् अस्मदीयं हृदयकमलं त्वद्गृहमेवैतावत्पर्यन्तं भयहेतुत्वेनास्मत्स्मृतिपथे नित्यं स्थितेन दैत्येनाक्रान्तं व्याप्तं सत्प्रत्यबोधि भयापाकरणेन विकासं नीतम्। ननु, तव त्रैलोक्यैश्वर्यसाधनार्थमयमुद्यम इति चेत्तत्राऽऽह—कालग्रस्तमिति। ते त्वाम् हे नारसिंह नरस्य सिंहस्य चाकाराभ्यामाविर्भूत! अपरैः स्वर्गादिभिः किम् ॥ ४२ ॥

ऋषयस्तु तपःप्रवर्तनेनास्माकं महाननुग्रहः कृत इत्याहुः,

सिद्धा ऊचुः ।

यो नो गतिं योगसिद्धामसाधुरहार्षीद्योगतपोबलेन ।

नानादर्पं तं नखैर्विददार तस्मै तुभ्यं प्रणताः स्मो नृसिंह ! ॥ ४५ ॥

विद्याधरा ऊचुः ।

विद्यां पृथग्धारणयाऽनुराद्धां न्यषेधदज्ञो बलवीर्यदृप्तः ।

स येन संख्ये पशुवद्धतस्तं मायानृसिंहं प्रणताः स्म नित्यम् ॥ ४६ ॥

नागा ऊचुः ।

येन पापेन रत्नानि स्त्रीरत्नानि हृतानि नः ।

तद्वक्षःपाटनेनासां दत्तानन्द ! नमोस्तु ते ॥ ४७ ॥

मनवऊचुः ।

मनवो वयं तव निदेशकारिणो दितिजेन देव ! परिभूतसेतवः ।

भवता खलः स उपसंहृतः प्रभो ! करवाम ते किमनुशाधि किङ्करान् ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्वं नो यदात्थ परमं ध्यानलक्षणं तपः परमत्वे हेतुः आत्मनस्तव तेजः प्रभावरूपं तदेवाङ्गः येन तपसाऽऽत्मनि लीनमिदं विश्वं ससर्ज सृष्टवानसि तदमुना दैत्येन विप्रलुप्तं कुण्ठितं सत् हे शरण्यपाल ! अद्य रक्षार्थं गृहीतेनानेन वपुषा पुनरपि तपः कुरुतेत्यनुज्ञातवानसि तस्मै ते नम इत्युत्तरश्लोकचतुर्थपादस्यानुषङ्गः॥ ४३ ॥

पितरस्तु श्राद्धोद्धरणेन परमोपकारिणं श्रीनृसिंहं प्रणमन्ति—श्राद्धानि श्रद्धायुक्तानि पिण्डादीनि नोऽस्मभ्यं पुत्रैः दत्तानि प्रसभं बलाद्यः स्वयमधिकृत्य बुभुजे किञ्च तीर्थस्नानसमये दत्तं तिलोदकमप्यपिबत् तानि च तस्योदराद् आच्छिद्य आहृतवान् कथंभूतात् नखैर्विदीर्णा वपा यस्य तस्मात् वपाविदारणस्य तद्गतपिण्डोद्धरणमेव फलमिति भावः ॥ ४४ ॥

योगसिद्धां गतिमणिमादिसिद्धिम् नाना अनेके दर्पा यस्य तम्, तस्मै तुभ्यं तं त्वामुद्दिश्य ॥ ४५ ॥

विद्यामन्तर्धानादिलक्षणाम् अनुराद्धां संप्राप्तां संख्ये युद्धे॥४६॥

रत्नानि फणास्थितानि तथा स्त्रीरत्नानि चोत्तमाः स्त्रियः आसां स्त्रीणां दत्त आनन्दो येन तत्सम्बोधनं पाठान्तरेऽस्माकं दत्त आनन्दो येनेति ॥ ४७ ॥

नृसिंहेनावलोकिताः सन्तो मूर्ध्नि बद्धाञ्जलयो मनवः प्रोचुः मनवो वयं धर्मपालकाः परिभूताः सेतवो वर्णाश्रमधर्ममर्यादाः येषां ते अनुशाध्यनुशिक्षय ॥ ४८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यद्ब्रह्मणोभिप्रेतं कृत्स्नजगत्सर्गादिकर्तुंस्तव कियदेतदिति तदे[illegible] विशदयन्वात्सल्ययुक्तं स्तौति, रुद्रः—कोपकालइति. तव कोप[illegible] कालो युगान्तः द्विपरार्द्धावसानं कोपकाल इत्यनेन मदन्तर्यामितया[illegible] मन्मुखेन संहर्त्ता त्वमेवेत्युक्तं भवति. अयन्तु कोपाविषय इत्याह[illegible] अयमल्पकोऽल्पबलो हतोऽतः कोपनिवृत्त्या हे भक्तवत्सल ! त[illegible] भक्तं तत्सुतं तस्य दैत्येन्द्रस्य सुतं उपसृतं तव समीपमाग[illegible] मिष्यन्तं पाहि संरक्ष ॥ ४१ ॥

इन्द्रस्तु स्वदुःखमावेदयन्सर्वरक्षकं सर्वान्तरात्मानं सम[illegible] पुरुषार्थदं स्तौति—प्रत्यानीता इति । हे परम सर्वोत्कृष्ट ! नोऽस्मा[illegible] त्रायता त्रात्रा भवता दैत्येनाक्रान्ताः प्रसह्य गृहीताः स्वभाग[illegible] स्वकीया यज्ञीयभागा अस्मदादिमुखेन त्वमेवयज्ञभोक्तेत्यभिप्राये[illegible] स्वशब्दः प्रयुक्तः प्रत्याहृताः दैत्याक्रान्तमिति द्वितीयान्तपाठे [illegible] दैत्यभयाकुलमिति हृदयविशेषणम्. एवं दैत्यवधेन स्वभागप्रत्या[illegible] नयनेन च त्वद्गृहं त्वदावासभूतम् अत एवाऽमलमस्माकं हृद[illegible] प्रत्यबोधि भयेन पूर्वं मुकुलितमिदानीं तदपाकरणेन विकासि[illegible] भवतीत्यनुषङ्गः । त्वां सेवतामस्माकं त्वत्तो लौकिकपुरुषार्थ[illegible] प्राप्तिरित्येतत्कियदित्याह. हे नाथ स्वामिन् ! ते शुश्रूषतां परि[illegible] यांपरार्ध्यामिदं लौकिकं पुरुषार्थजातं कालेन नंक्ष्यमाणं किय[illegible] यत्किञ्चिदेतदित्यर्थः । तदेवाह, तेषां त्वां परिचरतां मुक्तिर[illegible] न बहुमता त्वत्सेवासुखासक्तानां मुक्तिरपि न परमं प्रयोजनम्[illegible] अतः हे नारसिंह ! अपरैरर्वाचीनैः पुरुषार्थैः किम् ? न किमपि[illegible] तेषामतितुच्छमर्वाचीनपुरुषार्थजातमिति भावः ॥ ४२ ॥

ऋषयस्तु सर्वगुरुं स्वाश्रुपरित्रातारं दुष्कृन्निनाशकञ्च तुष्टु[illegible]

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

त्वमिति । परममुत्कृष्टं तपस्त्वद्ध्यानरूपं नोऽस्माकं त्वमात्थ उपदिष्टवानसि. तपो विशिंषन्ति, यत्तप आत्मनस्तव तेजः प्रकाशकम् अस्माकं त्वत्स्वरूपावेदकमित्यर्थः । येन च तपसा आदिपुरुषश्चतुर्मुखः इदं जगदात्मगतं परमात्मना त्वया गतमन्तरात्मतया व्याप्तं ससर्ज. आदिपुरुषात्मगतामित्यत्र "गूढोत्मा न प्रकाशते" इतिवत्सन्धिरार्षः आदिपुरुषात्मेति पाठे आदिपुरुषेति लुप्तप्रथमान्तं पृथक्पदम्. यद्वा हे आदिपुरुष ! इति सम्बोधनं ससर्ज ब्रह्मेति शेषः । तत् तपोऽमुना दैत्येन्द्रेण विप्रलुप्तं विशेषेण प्रलोपितमासीत् तदेवाधुना हे शरण्य ! शरणमर्हतीति शरण्यः तथाभूत ! हे पालक ! रक्षागृहीतवपुषा साधुपरित्राणार्थं गृहीतेन नरसिंहशरीरेण पुनरन्वमंस्थाः अनुज्ञापितवान्. वः शत्रुर्मया विनाशितोऽतः पुनर्निर्भयं तपः कुरुतेति नोऽनुज्ञापितवानसीत्यर्थः ॥ ४३ ॥

पितरस्तु स्वदुःखमावेदयन्तोऽखिलधर्मगोप्तारं हितकारिणं स्तुवन्तो नमस्कुर्वन्ति—श्राद्धानीति । अस्माकं तनूजैः पुत्रादिभिरस्मदुद्देशेन दत्तानि श्राद्धानि श्राद्धसम्बधीनि पिण्डानि यो दैत्यः प्रसभं बलात्स्वयमभिबुभुजेऽनुभूतवान् । तथा तीर्थसमये पुण्यतीर्थस्नानसमये अस्मत्तनूजैः यद्दत्तं तिलोदकं तदप्यपिवत् तस्य दैत्यस्य उदराच्छ्राद्धानि तिलाम्बु च यः पुनराच्छेदाहृत्यास्माकं दत्तवान् कथंभूतादुदरात् नखैर्विदारिता वपा यस्य तस्य तस्मात्. वपाविदारणस्य तद्धृतपिण्डोद्धरणमेव फलमिति भावः । तस्मै समस्तधर्माणां गोप्त्रे रक्षित्रे नृहरये ते नमः तिलाम्बुसभ्यां इत्यपि पाठः । तदाऽसभ्य इति दैत्येन्द्रविशेषणम्. तिलाम्बु तिलोदकमसभ्यः सभाऽनर्हो यो दैत्येन्द्रोऽभिबुभुजे पीतवानित्यर्थः ॥ ४४ ॥

सिद्धा अपि स्वयोगगत्यपहारकदैत्येन्द्रवधद्वारा स्वयोगगत्याधायकं परमसुहृदं वर्णयन्तो नेमुः—य इति । योऽसाधुर्दुरात्मा दैत्यो नोऽस्माकं योगसिद्धां गतिं भक्तियोगप्राप्तां गतिम् अणिमादिरूपां स्वयोगेन तपोबलेन अहार्षीदपहृतवान्. तम् नानादर्पं नानाऽनेकाः दर्पा यस्य तं नखैर्यो विददार विदारितवान्. तस्मै तुभ्यं हे नृसिंह ! वयं प्रणताः स्मो नमस्कुर्मः ॥ ४५ ॥

विद्याधरा अपि तेनापहृतविद्याप्रत्यादानेन हितकारिणं स्तुवन्तो नमन्ति—विद्यामिति । धारणया मनोधारणयाऽनुरुद्धां संसिद्धां विद्यामस्मत्सम्बन्धिनीमन्तर्धानादिलक्षणां योऽज्ञो मूर्खो बलवीर्याभ्यां गर्वितो दैत्येन्द्रो न्यषेधन्निषेधितवान् बलं देहबलं वीर्यं पराभिभवसामर्थ्यम्. स दैत्यो येन संख्ये युद्धे पशुवद्धतस्तं त्वां मायानृसिंहमात्मीयसङ्कल्पोपात्तनृसिंहतनुं नित्यं प्रणताः स्मः कर्त्तरिक्तः नमस्कृतवन्तः स्मेत्यर्थः ॥ ४६ ॥

नागास्त्वेवं तदपहृतरत्नप्रदानेनानन्दकरं स्तुवन्तो नेमुः—येनेति । येन पापात्मना नोऽस्माकं रत्नानि स्त्रीरत्नानि नागकन्यारूपाणि रत्नानि चापहृतानि तस्य वक्षोविदारणेनासां स्त्रीणां दत्त आनन्दो येन तस्य सम्बोधनं ते तुभ्यं नमोऽस्तु ॥ ४७ ॥

तवाज्ञापरिपालनरूपकैङ्कर्यविरोधिनिरसनेन कैङ्कर्याधापनरूपहितकारिणं स्तुवन्तस्तदेव प्रार्थयन्ते मनवः—मनव इति । वयं तव निदेशकारिणः कैङ्कर्यकारिणो मनव इति प्रसिद्धाः ते वयमेतावन्तं कालं येन दितिजेन दैत्येन परिभूताः परिहापिताः सेतवः स्वस्कृताः वर्णाश्रममर्यादा येषां तादृशा वभूविम अधुना स खलो दितिजस्त्वया उपसंहृतो हतः हे प्रभो ! निवृत्तकैंकर्यविरोधिनो वयं किं कैंकर्यं ते तुभ्यं करवाम तथा किंकराणोऽस्मान् अनुशाधि विविच्याऽऽज्ञापयेत्यर्थः ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

येनायमसुरो हतः स कोपकालो युगान्तो युगावसानोचितो नेदानीमत्यल्पासुरहनने तस्मात्कोपं संहृत्याऽनुसृतं शरणं प्राप्तं तस्य सुतं प्रह्लादं रक्षेत्यन्वयः ॥ ४१ ॥

हे परम ! नस्त्रायता रक्षता भवता दैत्यहृता यज्ञेषु स्वभागा अस्मद्योग्यहविर्भागाः प्रत्यानीता इत्यन्वयः । तपोबलेन दैत्येनाक्रान्तं निमीलितं च तव गृहं तव वासयोग्यं हृदयकमलं प्रत्यबोधि विकसितमस्माकं भवतेति शेषः । विरक्तिभक्तिभ्यामेव वशीकर्तुं योग्यो नान्येनेत्याशयेनाह, कालेति । नाथ ! यदिदं स्वर्गादिस्थानं कालग्रस्तं कियत्सुखजनकम् ? नकिमपीति मत्वा भजति. ते शुश्रूषतां त्वां सेवमानानां तेषां करगता मुक्तिरपि बहुमता न हि यस्मात्तस्मात् हे नारसिंह ! तेषां भक्तानां अपरैर्धर्मादिभिः प्राप्तैः किम् ? इत्यन्वयः ॥ ४२ ॥

हे आदिपुरुष ! त्वं यदात्मतेज आत्मनो हरेर्ज्ञानलक्षणं तेजस्तपोनोऽस्माकं परमश्रेयसे आत्थ येन तपसा आलोचनरूपेण गहिमेदं समस्तमात्मगतं व्याप्तं हे शरण्यपाल ! अमुना दैत्येन विप्रलुप्तं नष्टं तत्तपो जगद्रक्षार्थं गृहीतवपुषा नरसिंहात्मना पुनरप्यस्मान्प्रति कटाक्षमन्वगंस्थाः उद्धरिष्यामीति शेषः । "तप आलोचने" इति धातोः "यस्य ज्ञानमयं तपः" इति श्रुतेश्च. भगवज्ज्ञानसादृश्यादस्यात्मतेज इत्यभेदवचनं युज्यते विप्रलोपस्तिरोधानं न स्वरूपनाशः ॥ ४३ ॥

यो भवान्नखविदीर्णवपान्नखविदारितान्त्रात् तस्य दैत्यस्योदरादाच्छेत् "ऋच्छगतौ" इति धातोः श्राद्धान्यस्माकमगमयदित्यन्वयः ॥ ४४ ॥

योगसिद्धामणिमाद्यष्टैश्वर्यलक्षणां गतिं योगः पवनविजयः तपः कायक्लेशलक्षणं तयोर्बलेन नानाविधो दर्पो यस्य स तथा ॥ ४५ ॥

पृथक् जगद्विलक्षणस्य हरेर्धारणयाऽखण्डोपासनयानुरुद्धां लब्धां विद्यामन्तर्धानलक्षणाम् ॥ ४६ ॥

आसां स्त्रीणामर्थे दत्तानन्द ! ॥ ४७ ॥

निदेशकारिणः आज्ञाकारिणः ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ ४१ ॥

इन्द्रस्तु स्वोपकारविशेषानुमोदनेन तं प्रसादयति—प्रत्येति । स्वभागा अस्मद्रूपसेवकवर्गाः प्रत्यानीताः पुनर्निकट एव प्रापिताः तथा दैत्याक्रान्तमिति तावेतावेव परमोपकारौ त्रैलोक्यराज्यदानन्तु यत्किञ्चिदेवेत्याह—कालेति ॥ ४२—४३ ॥

समयेष्वपिबत्तिलान्तु इति पाठः स्वामिसम्मतः । मायानृसिंहमिति कृपाप्रधानं नृसिंहमित्यर्थः ॥ ४४—४७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मनवोऽत्र वर्तमानमनुसहितास्तपःस्थिनाः अतीता इत्यर्थः ते च भाविनोऽप्यात्मानमेनं मत्वा निवेदयन्ति स्मेति मनव ऊचुरित्युक्तम् ॥ ४८--५० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तव घोरस्वरूपमालक्ष्य प्रलयशङ्कया सर्वे बिभ्यति नत्वहमित्याह—कोपेति । युगान्तः प्रलयः तव कोपस्य कालः प्रलयस्तत्र संहारे कर्मणि अहमेव त्वदंशोवर्त्तएवेति भावः भक्तवात्सल्यार्थमयं कोप इति चेत् अल्पकः त्वदपेक्षया अत्यल्पोऽय मसुरो हत एव । अतस्तत्सुतं प्रह्लादम् उपसृतमनुगतम् ॥ ४१ ॥

एतावद्दिनपर्य्यन्तं त्वच्चरणस्मरणविमुख एवाहं वर्त्ते इत्याह-हे परम ! नोऽस्मांस्त्रायता रक्षता भवता स्वीया एव भागाः दैत्यात् प्रत्यानीताः प्रत्याहृताः इन्द्रादीनां त्वद्दासानामस्माकं वस्तुषु वस्तुतः प्रभोस्तवैव स्वत्वौचित्यात् किञ्चास्माकं हृदयं खलु कमलं तत्र शश्वत्तवैव ध्यातस्वास्त्वद्गृहं । तच्च कमलं यथा निःश्रीकं रात्रौ तमसाक्रान्तं मलिनं निद्रितं भवेत् तथैव दैत्यजन्मारभ्य एतावद्दिनपर्य्यन्तं भयाद्दैत्यस्यैव ध्यातत्वाद्दैत्याक्रान्तं सम्प्रति तव नृसिंहसूर्य्यस्योदये मतिः प्रत्यबोधि त्वच्चरणाक्रान्तं सङ्कुचकरदित्यर्थः । यद्वा, त्वद्गृहं वैकुण्ठं प्रति अबोधि त्वच्चरणसेवार्थं बुद्धिं प्रापेत्यर्थः । ननु, मत्ताभिमानिन्निन्द्रपदं गृहाणेति तत्र सत्यमहं सकामो भक्तिशून्यो गृहीष्यामीत्याह, त्वन्निष्कामभक्तानान्तु कालग्रस्तमिति इममिन्द्रपदं अपरैः योगैश्वर्य्यादिभिः ॥ ४२ ॥

एतावद्दिनपर्य्यन्तमस्माभिर्न तपस्तप्तमित्याहुः । त्वं नोऽस्माकं परमं शुक्लध्यानमयं यत्तपस्तत् आत्मनः स्वस्य तेजः आत्थ-अस्मासु तपःप्रवर्त्तनार्थमिति भावः । येन तेजसा तपो रूपेण आत्मनि लीनमिदं विश्वं ससर्ज असाक्षीः । ससर्ज्जेत्यपि पाठः "सृजामि तपसैवेदम्" इति त्वदुक्तेः । तत्तपः अमुना दैत्येन सौरं तेजो राहुणेव विप्रलुप्तं । तत् सम्प्रति रक्षार्थं गृहीतेनानेन वपुषा नृसिंहाकारेण अन्वमंस्थाः पुनरप्यस्मत्कर्त्तव्यत्वेन अनुमतं सम्मतमकरोः ॥ ४३ ॥

वयमेतावद्दिनपर्य्यन्तमुपवासपरा एवाभूमेत्याहुः । श्राद्धानि श्राद्धपिण्डादीनि तीर्थस्नानसमये तिलाम्बु तिलतर्पणोदकं तानि तच्च । तस्य उराय आच्छत् आहृतवान् । कथम्भूतात् नखैर्भिन्नीर्णा वपा मेदो यस्य तस्मात् "वपा विवरमेदसोः" इति मेदिनी । वपाः विदार्य्य पिण्डतिलोदकादीन्येवास्मान् दर्शयामासेत्यर्थः ॥४४॥

योगैश्वर्य्यसम्पद्विहीना रङ्का एव वयमेतं कालं प्रतीक्षामहे इत्याहुः, यो नो गतिमणिमादिसिद्धिं नानादर्पमनेकदर्पवन्तं वमसुरम् ॥ ४५ ॥

वयमप्येतावद्दिनपर्य्यन्तं विद्या रहिता एवास्मेत्याहुः । विद्यामन्तर्द्धानादिलक्षणां राज्ञां सिद्धां संख्ये युधे । मायानृसिंहं कृपाप्रधानं नृसिंहम् ॥ ४६ ॥

हृतधना हृतस्त्रीका एव वयमेतावद्दिनपर्य्यन्तं सन्तप्ता एवेत्याहुः-येनेति । तद्वक्षसः पाटनेन विदारणेन आसां स्त्रीणां हे दत्तानन्द ॥ ! ४७ ॥

नृसिंहेनाकस्मादवलोक्यमाना मनवो मूर्द्धिन बद्धाञ्जलयो वयं त्वदाज्ञाकारिणो मनवो भवामेत्याहुः-एवमग्रेऽप्यवतारिका ज्ञेया मनव इति । सेतवो वर्णाश्रमधर्ममर्य्यादाः ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

रुद्रोपि भगवन्तं प्रणम्याहेति योज्यम् एवमग्रेऽपि यत्र नातिर्नास्ति तत्र योज्यम् ते तव कोपस्य कालः युगान्तः प्रलयः इदानीमपि सत्यसङ्कल्पस्य तव यत्प्रति कोपः स तु अत्यल्पोऽसुरो हतः अतः कोपं त्यक्त्वा तत्सुतं ते भक्तमुपसृतं त्वां शरणं गतं पाहि ॥ ४१ ॥

हे परम ! नोऽस्मान् त्रायता रक्षता स्वभागाः "अहं हि सर्वयज्ञानां भोक्ता च" इति स्मृतेः स्वीया एव भागाः दैत्यात्प्रत्याहृताः "ईश्वरः सर्वभूतानां हृद्देशेऽर्ज्जुन तिष्ठति" इति अस्मदादिहृदयकमलं त्वद्गृहमेव तच्चैतावत्पर्यन्तं दैत्याक्रान्तम्. तद्भयात्स्वाद्विस्मृते स्तत्स्मृतेश्च तेन रुद्धम् इदानीं प्रत्यबोधि त्वत्स्वरूपगुणग्राहकं कृतम् स्वर्गादिसुखं दुःखोदर्कं ज्ञात्वा हरिभक्तानां सुखं निरुपाधिकं कामयमान आह, हे नाथ ! हयाच्य ! हेभक्तिरसप्रद ! हेनारसिंह ! कालग्रस्तमिदं देवैश्वर्यं कियत् ते त्वां शुश्रूषतां मुक्तिरपि न बहुमता अपरैः पुरुषार्थैः किम् ? त्वद्भजनसुखं तावदनुपमं त्वज्ज्ञानापत्तिलक्षणस्य त्वद्भजनफलस्य मोक्षस्य निरतिशयत्वं को वर्णयेदिति भावः ॥ ४२ ॥

हे आदिपुरुष विश्वहेतो ! येनेदं विश्वं आत्मगतं सूक्ष्मरूपेण त्वमपि वसन्तं ससर्ज स्थूलतया प्रकटितवान् नोऽस्मभ्यं यदात्थ उपदिष्टवानसि कथम्भूतं परमं सर्वैश्वर्यप्रदम् आत्मनो विभूतिरूपम् "तपो ब्रह्म" इति श्रुतेः तदमुना दैत्येन विप्रलुप्तं पुनस्त्वं रक्षार्थं गृहीतेन वपुषा नरहरिरूपेणान्वमंस्थाः तपः कुरुतेत्यभ्यनुज्ञातवानसि ॥ ४३ ॥

योऽस्मभ्यो विहृत्सभानर्हः श्राद्धानि श्राद्धनिमित्तानि पिण्डादीनि तिलाम्बु च तनूजैर्नोऽस्मभ्यं तीर्थसमये तिथिपात्रादियोगकाले दत्तानि प्रसभं बलात् स्वयमधिबुभुजे तस्योदरान्नखैर्विदीर्णा वपा यस्य तस्मात् य आच्छत् आहृतवान् तस्मै नमः ॥४४॥

योऽसाधुः नोऽस्माकं योगसिद्धां तपश्चित्तैकाग्र्यरूपयोगेन साधितां गतिमणिमादिसिद्धिमहार्षीत् अपहृतवान् तं नानादर्पमनेकाभिमानवन्तं यो नखैर्विददार विदारितवान् तस्मै तुभ्यं प्रणताः स्मः ॥ ४५ ॥

योऽज्ञः विद्यां अन्तर्द्धानादिलक्षणां पृथग्धारणया तत्तद्विद्यार्थमनोधारणयाऽनुरुद्धां सम्पादितां न्यषेधत् स येन संङ्ख्ये संग्रामे पशुवद्धतः तं मायया वयुनेन सङ्कल्पेन नृसिंहरूपेणाविर्भूतं नित्यं प्रणताः स्मः ॥ ४६ ॥

रत्नानि मण्यादीनि स्त्रीरत्नानि च आसां भवत्प्रजानां नस्तद्वक्षःपाटनेन दत्त आनन्दो येन तत्सम्बुद्धौ हे दत्तानन्द ! ते तुभ्यं नमः ॥४७॥

प्रजापतय ऊचुः ।

प्रजेशा वयं ते परेशाभिसृष्टा न येन प्रजा वै सृजामो निषिद्धाः ।
स एष त्वया भिन्नवक्षा नु शेते जगन्मङ्गलं सत्त्वमूर्तेऽवतारः ॥ ४९ ॥

गन्धर्वा ऊचुः ।

वयं विभो ! ते नटनाट्यगायका येनात्मसाद्वीर्यबलौजसा कृताः ।
स एष नीतो भवता दशामिमां किमुत्पथस्थः कुशलाय कल्पते ॥ ५० ॥

चारणा ऊचुः ।

हरे तवाङ्घ्रिपङ्कजं भवापवर्गमाश्रिताः ।
यदेष साधुहृच्छयस्त्वयाऽसुरः समापितः ॥ ५१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

निदेशकारिणः आज्ञाकारिणः येन परिभूताः निराकृताः सेतवो वर्णाश्रममर्यादा येषां ते स उपसंहृतो हतः अतः अनुशाधि अनुशिक्षय ॥ ४८ ॥

भाषा टीका ।

रुद्र उवाच ।

श्रीमहादेवजी बोले, कि आपके कोपका समय तो युगान्त अर्थात् प्रलय है यह तो आपने अभी छोटे से असुर को मारा है ॥ तस्मात् हे भक्तवत्सल ! शरणागत आपके भक्त, उस के पुत्र प्रह्लाद की रक्षा करो ॥ ४१ ॥

इन्द्र उवाच ।

इन्द्र बोले, कि–हे नाथ ! हे परमेश्वर ! हे नरहरे ! आपने बडे प्रचण्ड दैत्य का बधकर के हमारे भाग हम को दिवायें, और आपका निवास्थान जो हमारा हृदय कमल उसको आपने निर्भय करके प्रफुल्लित किया, और काल ग्रस्त यह ऐश्वर्य तो क्या है, पर आप के चरण की शुश्रूषा करने वाले तो मुक्ति का भी बहुमान नही करते फिर औरो से क्या है ॥ ४२ ॥

ऋषय ऊचुः ।

ऋषिलोग बोले, कि हे परमेश्वर ! हे शरण्यपाल ! जिस तपो बल से अपने में लीन इस जगत् को रचा और जो आत्मा का तेज रूप है उसी तप की हम लोगों आज्ञा आपने दी है, आज हमारे उस तप का इस दैत्यने लोप कर दिया, फिर जिन आपने रक्षार्थ वपु को धारण कर उसी तप की अनुमति दी तिन आप को ननस्कार हो ॥ ४३ ॥

पितर ऊचुः ।

पितृलोग बोले, कि—हमारे पुत्रों ने श्राद्ध में जो हमको पिण्ड समर्पण किये इसने उनको बलात्कार से भोगा, और स्नान काल में जो तिलांजलि हम को पुत्रों ने दी उसको भी यही पी गया, जिन आपने उस के उदर से अपने नखों से वपा को विदीर्ण कर खाये हुए सबरे पिण्ड निकाल दिये, अखिल धर्म की रक्षा करने वाले नृसिंह देव आकोप नमस्कार हो ॥ ४४ ॥

सिद्धा ऊचुः ।

सिद्धलोग बोले, कि जिस दुष्टने अपने योग और तपोबल से हमारी योग सिद्ध गति को चुराली उस नानादर्प वाले दैत्य को आप ने नखों से विदारण किया । हे नृसिंह ! ऐसे आपको हम लोग प्रणत हैं ॥ ४५ ॥

विद्याधरा ऊचुः ।

विद्याधरलोग बोले, कि बल और वीर्य के दर्पसे जिस अज्ञ ने हमारी पृथक् धारणा से सिद्ध करी हुई विद्या का निषेध किया उसको जिन आपने संग्राम में पशु के तरह मार दिया ऐसे मायानृसिंह रूप आप को हम नित्य प्रणाम करते हैं ॥ ४६ ॥

नागा ऊचुः ॥

नाग लोग बोले, कि जिस पापी ने हमारे रत्न और स्त्रीरत्न दोनो छुडा लिये, उस के वक्षस्थल के फाडने से दिया है आनन्द जिन ने ऐसे आप को नमस्कार हो ॥ ४७ ॥

मनव ऊचुः ॥

मनु लोग बोले, कि हम आपके आज्ञाकारी मनु लोग हैं । हे देव ! इस दैत्य ने हमारे मर्यादा सेतु तोडदिये परञ्च आपने उसी खल का उप संहार किया । प्रभो ! हम आपके किंकर क्या करें, आप हमको आज्ञा दीजिये ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रजापतयोऽपि तदवलोकिता प्रोचुः, हे परेश ! वे त्वया अभिसृष्टाः वयं प्रजेशा येन निषिद्धाः सन्तः प्रजा न सृजामः स एषः भिन्नं वक्षो यस्य सः नु निश्चितं मृतः शेते अतःपरं

यक्षा ऊचुः ।

वयमनुचरमुख्याः कर्मभिस्ते मनोज्ञैस्त इह दितिसुतेन प्रापिता वाहकत्वम् ।
स तु जनपरितापं तत्कृतं जानता ते नरहर ! उपनीतः पञ्चतां पञ्चविंश ! ॥ ५२ ॥

किम्पुरुषाः ऊचुः ।

वयं किम्पुरुषास्त्वं तु महापुरुष ईश्वरः ।
अयं कुपुरुषो नष्टो धिक्कृतः साधुभिर्यदा ॥ ५३ ॥

वैतालिका ऊचुः ।

सभासु सत्रेषु तवाऽमलं यशो गीत्वा सपर्यां महतीं लभामहे ।
यस्तां व्यनैषीद्भृशमेष दुर्जनो दिष्ट्या हतस्ते भगवन्यथाऽऽमयः ॥ ५४ ॥

किन्नरा ऊचुः ।

वयमीश ! किन्नरगणास्तवानुगा दितिजेन विष्टिममुनाऽनुकारिताः ।
भवता हरे ! स वृजिनोऽवसादितो नरसिंह ! नाथ ! विभवाय नो भव ॥ ५५ ॥

विष्णुपार्षदा ऊचुः ।

अद्यैतद्धरिनर रूपमद्भुतं ते दृष्टं नः शरणद ! सर्वलोकशर्म ।
सोऽयं ते विधिकर ईश विप्रशप्तस्तस्येदं निधनमनुग्रहाय विद्मः ॥ ५६ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायाम् वैयासिक्यां
सप्तमस्कन्धे प्रह्लादानुचरिते दैत्यराजवधे नृसिंहस्तवो नाम
अष्टमोऽध्यायः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रजाः प्रजाम इति हृष्यन्तः प्राहुः, हे सत्त्वमूर्त्ते ! तवायमवतारो जगतो मङ्गलम् ॥ ४९ ॥

गन्धर्वा अपि तदवलोकिताः प्रोचुः, हे प्रभो ! वयं ते त्वदीया नटा नर्त्तका नाट्ये नृत्ये गायकाश्च येन स्वाधीनाः कृताः कथम्भूतेन वीर्यं शौर्यं बलं शक्तिः ताभ्यामोजः प्रभावो यस्य तेन स एव भवता इमां दशां मृतिम् नीतः उचितश्चैतदित्याहुः किमिति ॥ ५० ॥

भवापवर्गं संसारनिवर्त्तकम् । आश्रयणे हेतुः यद्यस्मात् साधूनां हृदि भयजनकत्वेन शेते तिष्ठतीति तथा स एषोऽसुरः त्वया समापितः अन्तं नीतः ॥ ५१ ॥

मनोज्ञैः कर्मभिः तवानुचरेषु मुख्यास्ते वयं दितिसुतेन शिबिकावाहकत्वं प्रापिताः पञ्चतां मृत्युं हे पञ्चविंश ! चतुर्विंशतितत्त्वनियामक ॥ ५२ ॥

किम्पुरुषास्तु त्वां स्तोतुं के वयं वराका इत्याहुः,—वयमिति वयं किम्पुरुषास्तुच्छप्राणिनः त्वन्तु महान् अद्भुतप्रभावः पुरुष नन्वयं महान् दैत्यो हत इति किं न वर्ण्यते इत्याशङ्क्य कियदे दित्याहुः अयमिति यदा साधुभिर्भगवद्भक्तैस्तिरस्कृतस्तदैव नष्टः ॥ ५३ ॥

सत्रेषु यज्ञेषु ते त्वया हतः एतद्दिष्ट्या भद्रं कृतम् ॥ ५४ ॥

अमुना दितिजेन विष्टिं निर्मूल्यं कर्म अनु निरन्तरं कारिताः अतःपरं नो विभवाय समृद्धये भव ॥ ५५ ॥

नोऽस्माकं भक्तानां शरणद ! आश्रय प्रद ! सर्वेषां लोकानां शर्म मङ्गलमेतदद्भुतम् । रूपमद्यैव दृष्टं ननु पूर्वं विधिकर किङ्करः ॥ ५६ ॥

इति, श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
अष्टमोऽध्यायः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सद्वारकतद्व्यापाररूपजगत्सर्गात्मकास्मद्व्यापारविरोधिनिरसनेन तदधिकाराधायकं सर्वेषां शुभाधायकमूर्तिं तुष्टुवुः प्रजापतयः-प्रजेशाइति । हे परेश ! परेषां ब्रह्मादीनामपीश ते त्वया अभिसृष्टा व्यष्टिसर्गार्थं त्वया सृष्टाः प्रजेशाः प्रजापतय इति प्रसिद्धाः ते वयमेतत्पर्यन्तं येन दैत्येन्द्रेण निषिद्धाःसन्तः प्रजाः न वै सृजामः न सृष्टवन्तः स एव दैत्यस्त्वया भिन्नं विदीर्णं वक्षो यस्य तादृशोऽद्य शेते अतःपरं प्रजाः सृक्ष्यामः इति द्योत्यन्त आहुः हे सत्वमूर्त्ते अप्राकृतशुद्धसत्त्वविग्रह ! ते तवावतारो जगन्मङ्गलं जगतो मङ्गलावहः ॥ ४९ ॥

तन्मुखोल्लासार्थं नाट्यादिकैंकर्यविरोधिनिरसनेन तदाधायकं सुहृदं तुष्टुवुर्गन्धर्वाः—वयमिति । हे विभो ! ते तव नटनाट्यगायका नटाः नर्त्तकाः नाट्ये कर्मणि गायकाश्च वयं येनैतावत्पर्यन्तमात्मसात्कृताः स्वाधीनाः कृताः कथम्भूतेन वीर्यं शौर्यं बलं शक्तिः ताभ्यामोजः प्रभावो यस्य तादृशेन स एव दैत्यो भवता निरतिशयरूपायुक्तेन इमां दशां मरणमित्यर्थः नीतः प्रापितः तथाहि उत्पथस्थः उत्पथे कुमार्गे पापकर्मणि तिष्ठतीति तथा कुशलाय क्षेमाय कल्पते किम् ? क्षेमयुक्तो भवति किम् ? न कल्पत एवेत्यर्थः ॥ ५० ॥

तत्पादपङ्कजपरिचर्याविरोधिनिरसनेन पुनस्तदाधायकं हितकरन्तुष्टुवुश्चारणाः,हरे इति । हे हरे-आश्रितार्तिहर ! भवापवर्गमैहिकामुष्मिकसुखहेतुं तवाङ्घ्रिपङ्कजमाश्रिताः परिचरन्तो वयमनेन निषिद्धा इति शेषः स एषोऽसुरः साधूनां प्रपन्नानां हृच्छयः हृदयरोगरूपस्त्वया समापितः उपसंहृतो हत इत्यर्थः ॥ ५१ ॥

स्वदुःखमावेदयन्तस्तन्निवर्त्तकं सुखाधायकं वर्णयन्ति यक्षाः, वयमिति । मनोज्ञैः कर्मभिर्वयं तवानुचरश्रेष्ठाः ते वयमिह तावद्दितिजेन वाहकत्वं यानादिवाहकत्वं भारवाह—कत्वं वा प्रापिताः हे नरहरे ! तेन दितिजेन कृतं तव नतजनानां भक्तजनानां परितापं जानता ते त्वया पञ्चविंशो दैत्येन्द्राख्यो जीवः पञ्चतां मृत्युम् उपनीतः प्रापितः "विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवाऽनुविनश्यति" इति वत्पञ्चविंशस्य शरीरद्वारका पञ्चताप्राप्तिरत्र विवक्षिता पञ्चविंशेति पाठे, हे जीवशरीरकेति सम्बोधनम्, स तु जनपरितापमिति पाठे । येन दितिसुतेन वाहकत्वं नीताः स तु पञ्चविंश इत्यन्वयः ॥ ५२ ॥

स्वनैच्यानुसन्धानपूर्वकमनितरसाधारणप्रभावं तुष्टुवुः किंपुरुषाः-वयमिति । वयं किंपुरुषाः कुत्सिताः पुरुषास्त्वं तु महापुरुषः अनितरसाधारणगुणपूर्णः ईश्वरः सर्वान्तरात्मा च अयं महान् दैत्यो हतस्त्वयेति किं न वर्ण्यते इत्याशङ्क्य कियदेतदित्याहुः, "वयमिति. कापुरुषः ईषत्पुरुषः अस्मदपेक्षया बलीयांस्त्वत्तोऽधम इति भावः । ईषदर्थे विभाषा पुरुषे" इति सूत्रेण कुशब्दस्य कादेशः यदा साधुभिर्धिक्कृतस्तिरस्कृतस्तदैव नष्टो नष्टप्रायः अतः किमेतत्त्वयेति भावः ॥ ५३ ॥

अस्मत्सम्मानावहत्वद्गुणगानविरोधिनिरसनेन त्वयैव वयं बहुमता इत्याहुर्वैतालिकाः—सभास्विति । तवामलं यशः सभासु सत्रेषु च गीत्वा वयं महतीं सपर्यां पूजां पूर्वं लभामहे तानस्मान्यो दुर्जनो दैत्यः स्ववशं यथा भवति तथाऽनैषीत् स एष दुर्जनः, हे भगवन् ते त्वया हतः एतद्दिष्ट्या भद्रं जातं दिष्ट्या दैवेन त्वयेति वान्वयः । यथा आमयः यथा शिरोव्यथारूपो रोगः पीडाकारकः तद्वद्वयमासीत्किलेति शेषः ॥ ५४ ॥

स्वदुःखमावेदयन्तः सर्वसुखाधायकं लोकार्तिहरं तुष्टुवुः किन्नराः—वयमिति । हे ईश ! वयं किन्नरगणा इति प्रसिद्धास्तवानुगाः अनुचरास्ते वयमेतावदमुना दितिजेन विष्टिमनुकारिताः मूल्यरहितं कर्म विष्टिस्तामनुनिरन्तरं कारिताः, हे हरे अनुचरार्तिहर ! स वृजिनः पापात्मा दैत्यो भवता उपसादित उपसंहृतः हे नरसिंह ! हे नाथ ! नोऽस्माकं विभवाय सुखसमृद्धये त्वं भव ॥ ५५ ॥

स्वामिनदृष्टपूर्वं रूपं दिदृक्षतामप्यनुग्राहकं धृतवानसीत्याहुः विष्णुपार्षदाः-अद्येति । नोऽस्माकं भक्तानां हे शरणद आश्रयप्रद !निरतिशयपुरुषार्थसाधनभूतोपायप्रद!इति वा, सर्वेषां लोकानां शर्म सुखावहमेतदद्भुतं रूपमद्यैव दृष्टं न तु पूर्वं हे ईश ! स्वामिन् ! सोऽयं दैत्यस्तव विधिकरः निदेशकारी किङ्करः स च विप्रैः सनकादिभिः शप्तः मध्ये कैङ्कर्यविरोधी जात इति भावः । तस्य दैत्यस्येदं निधनं त्वत्कृतमनुग्रहाय पुनः कैंकर्यलाभरूपतदनुग्रहार्थमेवेति वयं जानीमः ॥ ५६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

अष्टमोऽध्यायः ॥ ८ ॥

—————

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हे परेश ! त्वयाभिसृष्टा येन दैत्येन निषिद्धावयं प्रजाः न सृजामो वै सदैत्यस्त्वयैव तु इदानीं भिन्नवक्षाः शेते तथाऽयमवतारो जगन्मङ्गलं जगति शुभसारभूतः जगतो मङ्गलमुद्दिश्य गृहीतो-वा ॥ ४९ ॥

नटो नटनं कथाबन्धवचनं नाट्यं शृङ्गारादिभावदर्शनम् एतयोर्गायकाः । एतदुक्तम् "नटनं तु कथाबन्धं नाट्यकं भावदर्शनम्" इति वीर्यबलौजसा येनात्मसात् आत्माधीनाः कृताः कल्पते समर्थो भवति ॥ ५० ॥

साधून् हरन्तीति साधुहृतः सज्जनास्तेषां श्रय आश्रयः साधूनां हृदयं शयति तापदत्वेनेति वा समापितो विनाशं गमितः भवस्यापवर्गस्य त्यागो यस्मात्तया तद्द्वारसंसारान्मोक्षो यस्मात्तयेति वा ॥ ५१ ॥

पञ्चतां विनाशं हे पञ्चविंश ! चतुर्विंशानां मध्य इति शेषः ॥ ५२ ॥

किंपुरुषाः पुरुषाभासाः ॥ ५३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सत्रेषु सभासु सत्रकारिणः दिष्ट्या सुखं कर्तुम् ॥ ५४ ॥

वेतनहीनतया क्रियमाणं कर्म विष्टिं वृजिनं दुःखं करो- तीति वृजिनः कर्त्रर्थः प्रत्ययः सः अपसादितोऽपहृत्य नाशितः विभवाय संसारान्मुक्तये ॥ ५५ ॥

हरिनरयोः सिंहनरयोरूपं विधिकरो भृत्यः किं विप्रशापात् * असुरयोनिमाप्तस्य ॥ ५६ ॥

इति श्रीमद्भागवते महापुराणे श्रीमद्विजयध्वज-

तीर्थकृत पदरत्नावल्याम्

अष्टमोऽध्यायः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

हरे इति पूर्वमनाश्रयणे हेतुः साधुहृच्छय इति । सम्प्रत्या- श्रयणे हेतुः समापित इति ॥ ५१ ॥

हे नरहरे ! ते तव मनोज्ञैः कर्मभिरनुचरा ये शिवकुबेरादयः ते मुख्याः स्वामिनो येषां ते वयम् ॥ ५२—५५ ॥

एते विष्णुपार्षदाः श्रीविकुण्ठानन्दनसम्बन्धिनो ज्ञेयाः श्रीनृ- सिंहदेवेनैकीभूय तस्यावतरणात् ॥ ५६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीजीवगोस्वामिकृतक्रमसन्दर्भे

अष्टमोऽध्यायः समाप्तः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

हे परेश परमेश्वर ! निषिद्धाः अरे मा प्रजाः सृजतेत्या- ज्ञप्ताः । हे सत्त्वमूर्ते तवावतारो जगन्मङ्गलम् ॥ ४९ ॥

येन दैत्येनात्मसात्कृतास्सन्तः स्तस्यैव नटा नाट्ये गाय- काश्चाभूमेत्यर्थः ॥ ५० ॥

साधूनां हृदि तच्छय्यायामपि शेते इति सः । अत एव तदसहिष्णुनेव त्वया समापितः अन्तं नीतः । अत एवाद्यारभ्य तेषां हृदि त्वमेव शेष्वेति भावः ॥ ५१ ॥

ते तव मनोज्ञैः कर्मभिरनुचरेषु मुख्याः । यद्वा । अनुचरा त्वद्भक्ता एव मुख्या येषां ते वयमपि शिबिकावाहकत्वं प्रापिताः । तेन दितिसुतेन कृतं जनपरितापं जानता त्वया पञ्चतां मृत्युं हे पञ्चविंश चतुर्विंशतितत्त्वनियामक ॥ ५२—५३ ॥

ताम् अस्मत्संप्रदानकसपर्यां वयं स्वाधीनतां विशेषेण अनैषीत् नीतवान् ॥ ५४ ॥

विष्टिं निर्मूल्यं कर्म अनु निरन्तरं कारिताः । वृजिनो दुःखदः ॥ ५५ ॥

---

* अध्याहृतं पदम् ॥

सोऽयं हिरण्यकशिपुस्ते विधिकरो दास एव विप्रैः सनका- दिभिः शप्तः ॥ ५६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

सप्तमस्याष्टमोऽध्यायः सङ्गतः सङ्गतस्सताम् ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे परेश "सत्त्वं स्वातन्त्र्यमुद्दिष्टं तच्च कृष्णेन चापरे" इति वचनात्सत्त्वेन स्वातन्त्र्येण मूर्तिर्यस्य तत्सम्बुद्धौ हे सत्त्वमूर्ते ! ते त्वया अभिसृष्टाः प्रजेशा वयं येन निषिद्धाः प्रजाः न सृजाम स एष त्वया भिन्नवक्षाः भिन्नं विदारितं वक्षो यस्य स तथा शेते तस्मात्त्वमङ्गलस्यैकस्य का कथा ते तवावतारो नु निखिलं जगन्मङ्गलम् ॥ ४९ ॥

हे विभो ! ते त्वदीयाः नटाश्च नाट्यगायकाः नाट्येषु तत्त- नुरूपगानकर्त्तारश्च वयं वीर्यवलौजसा वीर्यबलाभ्यां गूरत्व- सामर्थ्याभ्यामोजः प्रभावो यस्य स तथा एवंभूतेन येन आत्म- सात्कृताः स्ववशगाः कृताः स एष भवता इमां दशां नीतः उत्पथगस्यः किं कुशलाय कल्पते नैव कुशलयोग्यो भवतीत्यर्थः ॥ ५० ॥

हे हरे क्लेशहर ! यस्मादेष साधूनां हृदि भयदत्वेन शेते तिष्ठतीति तथाभूतः त्वया समापितो हतः अतो निर्भया वयं भवस्य संसारस्यापवर्गो निवृत्तिर्यस्मात्तत्त्वांघ्रिपङ्कजमा- श्रिताः ॥ ५१ ॥

हे पञ्चविंश ! प्रकृतिर्महत्तत्त्वमहंकारश्चेति त्रिकम् पञ्च तन्मा- त्राणि पञ्च महाभूतानि एकादशेन्द्रियाणि चेति चतुर्विंशति प्राकृतपदार्थनियन्तः हेनरहरे ! ते त्वदीयाः मनोज्ञैः कर्मभिरनुचर- मुख्याः वयं येन दितिसुतेन वाहकत्वं प्रापिताः स तु तत्कृतं जनपरितापं जानता त्वया पञ्चतां मृत्युमुपनीतः अथ निर्भयाः मनोज्ञैः कर्मभिस्त्वां भजाम इति भावः ॥ ५२ ॥

वयं किंपुरुषाः दीनाः त्वं महापुरुषो दीनबन्धुः अयं कुपुरुषः न दीनो न दीनबन्धुः अतः साधुभिर्धिक्कृतः अतो नष्टः ॥ ५३ ॥

सपर्यां पूजां पुरा लभामहे यस्तां व्यनैषीत् स एव त्वया यथाऽऽमयो रोगस्तद्वद्धतः एतद्दिष्ट्या भद्रं जातम् ॥ ५४ ॥

हे ईश ! दितिजेनामुना विष्टिं निर्मूल्यसेवाख्यं अनु निरन्तरं कारिताः स वृजिनो दुःखदः हे हरे ! भवता अपसादितः उप- संहृतः हे नरसिंह ! हे नाथ ! नोऽस्माकमसवाय मोक्षाय भव ॥ ५५ ॥

हे शरण्य ! सर्वेषां लोकानां शर्म मङ्गलं तेऽद्भुतमेतद्रूपं नररूपमद्य नोऽस्माभिर्दृष्टम् हे ईश ! सोयं विप्रशप्तस्ते विधिकरः किंकरोऽत एव तस्येदं निधनम् अनुग्रहाय विद्मो जानीमः ॥ ५६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

अष्टमाध्यायार्थप्रकाशः ॥ ८ ॥

भाषाटीका।

प्रजापतय ऊचुः।

प्रजापति लोग बोले, कि—हेपरेश ! हम आप के रचे हुए प्रजेश हैं जिस्के निषेध के मारे हम प्रजा को सृजते रहे, सो आपकी कृपा से विदीर्ण वक्षःस्थल वाला सोरहा है हे सत्वमूर्त्ते ! जगत के मङ्गल के लिये आप का अवतार है ॥ ४९ ॥

गंधर्वा ऊचुः।

गंधर्व लोग बोले, कि—हे विभो ! हमतौ आप के नाचने गानेवाले हैं इसने बलसे जबरजस्ती हम लोगों को अपने वश में कर लिये, तिस्को अपने इस दशाको प्राप्त किया, भलों कुमार्गगामी का कब भला हो सका है ॥ ५० ॥

चारणा ऊचुः।

चारण लोग बोले कि। हेहरे ! संसार से पार लगाने वाले आपके चरणकमल का हमलोगो ने आश्रय लिया है, क्योंकि ? यह साधुओं के हृदय में खटकने वाला असुर आपने समाप्त कर डाला ॥ ५१ ॥

यक्षा ऊचुः।

यक्ष लोग बोले, कि-हम लोग आपके मनोज्ञ कर्मों से अनुचरों में मुख्य है तिन हम को इस दैत्य पुत्र हिरण्य कशिपुने पालकी उठाने वाले और बोझा उठाने वाले बना लिये हे नर हरे ! तब अपने जनों के दुःख जानने वाले आपने उसको पञ्चता को प्राप्त किया आप कैसे हो कि पचीसवां तत्व रूप है ॥ ५२ ॥

किंपुरुषा ऊचुः।

किंपुरुष लोग बोले, कि—प्रभो हम लोग तौ किं पुरुष (खोटे पुरुष) हैं और आप महा पुरुष ईश्वर हो, और जब साधु जनों ने धिकार कर दिया तब यह कुपुरुष नष्ट होगया ॥ ५३ ॥

वैतालिका ऊचुः।

वैतालिक लोग बोले, कि—हे भगवन् ! सभा और यज्ञ यागादिकों में हम लोग आप के निर्मल यश का गान करके बडी पूजा को प्राप्त होते हैं, जिस दुर्जनने हमारी उस पूजा को उडाली इस दुर्जन को रोगके नाईं आपने ठंडा किया हे भगवन् ! यह बडा मङ्गल भया ॥ ५४ ॥

किन्नरा ऊचुः।

किन्नर लोग बोले कि हे ईश ! हम लोग आपके अनुग किन्नर गण हैं इस दैत्य ने हम लोगोंको सदा के वेगारी बना लिये हैं हे हरे ! हे नरसिंह ! आपने इस पाप का नाश किया हे नाथ आप हमारी के अर्थ होवे ॥ ५५ ॥

विष्णुपार्षदा ऊचुः।

विष्णुपार्षद लोग बोले, कि—इस समय यह अद्भुत नरहरि रूप आप का देखा है आश्चर्य प्रद ! कैसा आपका यह रूप है कि सर्व लोक के सुख देने वाला है हे ईश सो यह विप्र आप को प्राप्त हुआ आप का किंकर है इसका यह निधन (मरण) इसी के अनुग्रह के लिये हैं ॥ ५६ ॥

इति श्रीमद्भागवत महापुराण सप्तमस्कन्ध, अष्टम अध्याय की भागवताचार्यकृत भाषा टीका समाप्त ॥ ८ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे अष्टमोऽध्यायः ॥ ८ ॥

॥ नवमोऽध्यायः ॥

नारद उवाच ।

एवं सुरादयः सर्वे ब्रह्मरुद्रपुरस्सराः ।
नोपैतुमशकन्मन्युसंरम्भं सुदुरासदम् ॥ १ ॥
साक्षाच्छ्रीः प्रेषिता देवैर्दृष्ट्वा तन्महदद्भुतम् ।
अदृष्टाश्रुतपूर्वत्वात्सा नोपेयाय शङ्किता ॥ २ ॥
प्रह्लादं प्रेषयामास ब्रह्माऽवस्थितमन्तिके ।
तात ! प्रशमयोपेहि स्वपित्रे कुपितं प्रभुम् ॥ ३ ॥
तथेति शनकै राजन्महाभागवतोऽर्भकः ।
उपेत्य भुवि कायेन ननाम विधृताञ्जलिः ॥ ४ ॥
स्वपादमूले पतितं तमर्भकं विलोक्य देवः कृपया परिप्लुतः ।
उत्थाप्य तच्छीर्ष्ण्यदधात्कराम्बुजं कालाहिवित्रस्तधियां कृताभयम् ॥ ५ ॥
स तत्करस्पर्शधुताखिलाशुभः सपद्यभिव्यक्तपरात्मदर्शनः ।
तत्पादपद्मं हृदि निर्वृतो दधौ हृष्यत्तनुः क्लिन्नहृदश्रुलोचनः ॥ ६ ॥
अस्तौषीद्धरिमेकाग्रमनसा सुसमाहितः ।
प्रेमगद्गदया वाचा तन्न्यस्तहृदयेक्षणः ॥ ७ ॥

प्रह्लाद उवाच ।

ब्रह्मादयः सुरगणा मुनयोऽथ सिद्धाः सत्त्वैकतानमतयो वचसां प्रवाहैः ।
नाराधितुं पुरुगुणैरधुनापि पिप्रुः किं तोष्टुमर्हति स मे हरिरुग्रजातेः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नवमे ब्रह्मणा भीत्या चोदितोऽसुरबालकः ।
कोपं प्रशमयन्नस्तौन्नृसिंहमतिभीषणम् ॥ १ ॥
"उग्रोऽप्यनुग्र एवायं स्वभक्तानां नृकेसरी ।
केसरीव स्वपोतानामन्येषामुग्रविग्रहः"—
इत्याद्यागमोक्तां भक्तानुकम्पितामाह—एवमिति सप्तभिः । एवं दूरतएव स्थितवा स्तुवन्तः मन्युना संरंभ आवेशो यस्य तं उप समीपे गन्तुं नाशक्नुवन् ॥ १ ॥

श्रीर्लक्ष्मीर्देवैः प्रेषिताऽपि महदद्भुतं तद्रूपं दृष्ट्वा शंकिता सती तं नोपजगाम अद्भुतत्वे हेतुः अदृष्टेति ॥ २ ॥

उपेह्युपगच्छ ॥ ३ ॥ ४ ॥

कालएवाहिस्तस्माद्वित्रस्ता धीर्येषां तेषां कृतमभयं येन तत्कराम्बुजम् ॥ ५ ॥

तस्य श्रीनृसिंहस्य करस्पर्शेन धुतं निरस्तमखिलमशुभं यस्य सपदि तत्क्षणमेवाभिव्यक्तमपरोक्षीभूतं परात्मदर्शनं ब्रह्मज्ञानं यस्य निर्वृतस्सन् हृदि दधौ हृष्यन्तीरोमाञ्चिता तनुर्यस्य क्लिन्नं प्रेमार्द्रं हृदयस्य अश्रूणि लोचनयोर्यस्य परमपुरुषार्थतया दधौ न साधनत्वेनेत्यर्थः ॥ ६ ॥

सुसमाधिमेवाऽऽह—तस्मिन्नेव न्यस्तं हृदयमीक्षणञ्च येनेति ॥ ७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्वस्मिन्निव समस्तेषु तत्कृपाऽमृतदृष्टये ।
प्रह्लादस्तौति सत्पद्यैर्द्विचत्वारिंशता हरिम् ॥

तत्र तावदात्मनो भगवत्स्तुतावनधिकारमिवाशङ्कयाधिकारं सम्भावयन्नाह—ब्रह्मादय इति पञ्चभिः । मुनयो मननशीलाः सिद्धाः ज्ञानिनोऽपि कथम्भूताः सत्त्व एवैकस्मिंस्तानो विस्तारो यस्याः सा मतिर्येषां तथाविधा अपि वचसां प्रवाहैरपि तथा बहुभिर्वक्ष्यमाणैर्गुणैरपि यमाराधयितुं न पिपुर्न पूर्णा न शक्ता इत्यर्थः स हरिर्मे मम कथं तोषं प्राप्तुमर्हति तत्र हेतुः उग्रजातेः उग्रा घोरा आसुरी जातिर्यस्य ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं प्रत्येकं ब्रह्मादिभिः संस्तुतमप्यशान्तसंरम्भम् इतरैर्दुरासदं श्रीनृसिंहं चतुर्मुखप्रेषितः प्रह्लादः प्रसादयामासेत्याह देवर्षिः—एवं प्रत्येकम् इत्थं स्तुवन्तोऽपि ब्रह्मादयः सर्वे देवाः मन्युना संरम्भ आवेशो यस्यात एव दुरासदं दुष्प्रापं भगवन्तमुपैतुं समीपं गन्तुं नाशक्नुवन् समर्था न बभूवुः ॥ १ ॥

किं पुनर्निरतिशयप्रिया साक्षात्प्रसिद्धा श्रीर्लक्ष्मीरपि देवैर्ब्रह्मादिभिः प्रेषिता पतिसमीपमेहीति प्रार्थिताऽप्यद्भुतं महानृसिंहरूपं दृष्ट्वा पूर्वमदृष्टमश्रुतञ्च यत्तददृष्टाश्रुतपूर्वं तस्य भावस्तत्त्वं तस्माद्धेतोः शंकिता सती नोपेयाय न समीपमगात् ॥ २ ॥

एवं स्थिते ब्रह्मा चतुर्मुखोऽन्तिके समीपेऽवस्थितं प्रह्लादं प्रेषयामास, प्रेषणप्रकारमेवाह—तातेत्यर्द्धेन । तात हे वत्स ! त्वत्पित्रे कुपितं क्रुद्धं प्रभुं श्रीभगवन्तं प्रशमय प्रसन्नं कुरु उपेहि समीपं गच्छेति ॥ ३ ॥

हे राजन् युधिष्ठिर ! तथेत्यभ्युपगम्य भागवतश्रेष्ठोऽर्भकः प्रह्लादः शनकैः समीपमेत्य प्राप्य विधृतो बद्धोऽञ्जलिर्येन तादृशो भुवि देहेन दण्डवन्ननाम नमस्कृतवान् ॥ ४ ॥

ततः स्वस्य पादयोः मूले पतितं तमर्भकं प्रह्लादं विलोक्य देवः श्रीनृसिंहः कृपया परिप्लुतः परितः प्लुतो व्याप्तः तमुत्थाप्य तस्य प्रह्लादस्य शिरसि स्वकराम्बुजमदधात् निहितवान् कथंभूतं काल एवाहिः सर्पस्तस्माद्वित्रस्ता भीता धीर्येषां तेषां कृतमभयमभयप्रदानं येन तादृशं संसृतिभीरूणां कृताभयप्रदानमित्यर्थः ॥ ५ ॥

स प्रह्लादस्तस्य भगवतः करस्य स्पर्शेन धुतं निरस्तमखिलमशुभं यस्य तादृशः सद्य एवाभिव्यक्तौ प्रत्यक्षितौ परात्मानौ स्वात्मपरमात्मानौ तयोर्दर्शनं याथात्म्यसाक्षात्कारात्मकं यस्य पूर्वं प्रत्यक्षतापन्नरूपभगवद्विषयज्ञानयुक्तः तत्करस्पर्शेन तु "ज्ञातुं द्रष्टुं च तत्त्वेन" इत्युक्तविधपरमात्मदर्शनयुक्त इत्यर्थः । अत एव निर्वृतः सुखितोऽतएव हृष्यत्तनुरुदाश्रितरामेयुक्ततनुः क्लिन्नं प्रेमार्द्रं हृत् हृदयं यस्य अश्रूणयानन्दजानि लोचनयोर्यस्य तादृशस्तस्य भगवतः पादाब्जं हृदि दधौ धृतवान्निरतिशयपुरुषार्थत्वेनानुसंहितवानित्यर्थः ॥ ६ ॥

ततः प्रेमगद्गदया वाचा एकाग्रमनसा श्रीभगवदेकविषयेण मनसा हरिमस्तौषीच्च कथम्भूतः सुसमाहितः सुसमाधिमेवाह, तस्मिन्नेव न्यस्तं हृदयम् ईक्षणञ्च येनेति "हृदा मनीषा मनसाभिक्लृप्तः" इति वचनबुद्धिवृत्तीनाम् एकविषयत्वाभिप्रायेणैकाग्रमनसा तन्न्यस्तहृदयेन्द्रणा इति चोक्तम् ॥ ७ ॥

स्तुतिमेवाह—ब्रह्मादय इत्यादिद्विचत्वारिंशच्छ्लोकैः । तावद्भगवत्स्तुतावात्मनोऽनधिकारमाशङ्कते—ब्रह्मादय इति । चतुर्मुखप्रभृतयो देवगणाः सत्त्वैकतानमतयः सत्त्वस्यैकताना मुख्याश्रयभूता मतिर्येषां ते केवलसत्त्वप्रधानमतय इत्यर्थः । अनेनात्र "तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम्" इत्युक्तरीत्याऽतीन्द्रियार्थदर्शनयोग्यत्वं सूचितम् एवंविधा अपि मुनयः सिद्धाश्च स्ववचसां प्रवाहैस्तोमैः तथा वक्ष्यमाणैर्बहुभिर्गुणैरपि यमाराधितुं स्तुत्यादिरूपाराधनद्वारा यस्य तोषमुत्पादयितुमद्यापि न पिप्रुः आराधयितुं न पर्याप्ता न समर्था इत्यर्थः । स हरिः उग्रा आसुरी जातिर्यस्य तस्य मे अनेन च वक्ष्यमाणगुणराहित्यमुक्तम् । ईदृशस्य मे मम किं कथं तोष्टुं तोषं प्राप्तुमर्हति, वाङ्मनसाऽपरिच्छेद्यस्वरूपरूपगुणस्वभावविभूत्यादिको भगवान् विपुलबुद्धिभिर्ब्रह्मादिभिरपि स्तोतुमशक्यः कथमल्पबुद्धेरासुरस्वभावस्य मम स्तुत्या कथं तुष्यादित्यर्थः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अत्रापि भक्तमाहात्म्यमेव प्रकटयति, ब्रह्मादिदेवतास्तुत्यनन्तरं कथं कथाप्रसङ्ग इति श्रोतुरान्तरीं शङ्कां परिहर्तुमाह—एवमिति । एवं स्तुवन्तोऽपि उपेतुं समीपं गन्तुं मन्युसंरम्भं कोपसारभूतं "मन अवबोधने" इति धातुः "ज्ञानसारं प्रत्ययसारम्" इति श्रुतेः । ज्ञानिविवक्षयैतत् । ननु, तर्हि कथं समीपं गन्तुं नाशक्नुवन्नित्युच्यते ? इति चेदज्ञेयत्वज्ञापनायेति तात्पर्यम् । "न तत्र चक्षुर्गच्छति न वाग्गच्छति, तेभ्यो ह प्रादुर्बभूव तन्न व्यजानत" इत्यादिश्रुतेरेतदेव दर्शयति, सुदुरासदमिति । सुखेन विषयीकर्तुमशक्यम् ॥ १ ॥

एतदेव विवृणोति, साक्षादिति । सत्स्वस्यादिव्यावृत्त्यर्थं साक्षादिति अदृष्टाश्रुतपूर्वत्वादन्यैः साधारणैर्जनैरिति शेषः । द्वावेतौ नित्यमुक्तावित्यादेः । तर्हि नोपेयाय शङ्कितेत्येतत्कथं घटतीति चेत् ममापीश्वरः परिच्छेद्यो न भवति किमन्यैरिति ज्ञापनायासुरजनमोहनायेति वा "अदृष्टाश्रुतपूर्वत्वादन्यैः साधारणैर्जनैः ॥ नृसिंहं शङ्कितेव श्रीर्लोकमोहाय नोययौ" इति वाक्यशिष्टम् ॥ २ ॥

मयेदानीं प्रह्लादे वात्सल्यातिशयोऽस्ति भक्तानां मत्सेवातिशयफलाधिकार्थमिति भगवन्मनोज्ञापनाय ब्रह्मणा प्रह्लादः प्रेषित इत्याशयेनाह, प्रह्लादमिति । अयमपि लक्ष्मीकान्तसमीपागमनहेतुरन्यथा प्रह्लादे वात्सल्यातिशयो न प्रकटितः स्यात्तदुक्तम् "प्रह्लादे चैव वात्सल्यं दर्शनाय हरेरपि ॥ ज्ञात्वा मनस्तदा ब्रह्मा प्रह्लादं प्रेषयत्तदा" इति प्रकृष्टो ह्लादो निर्वृतिर्यस्य स तथा इत्यनेन प्रह्लादशब्दनिरुक्तिः सूचिता लक्ष्म्यादिवत्सलतां हित्वा प्रह्लादे तत्करणाद्धरेर्वैषम्यबुद्धिर्नाशङ्कनीया असुरजनमोहनार्थोपपत्तेरुक्तं च "एकस्यैकस्य वात्सल्यं विशेषाद्दर्शयेद्धरिः ॥ अवरस्यापि मोहाय"

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इति भक्त्यादिदानं नैव करोति किन्तु वात्सल्यानुसारेणोत्यभिप्रायेण दर्शितं क्रमेणैवापि वत्सल इत्युक्तं उपेहि उपेत्य ॥ ३-४ ॥

नृहरेः प्रह्लादे वात्सल्यातिशयं दर्शयति—स्वपादमूले इति । कालाब्रह्मादिकराम्बुजेभ्योहरेः कराम्बुजं विशिनष्टि, कालाहीति । कालाख्याहिना निर्दष्टा ग्रस्ता धीर्येषां ते तथा तेषाम् ॥ ५ ॥

इतरकरस्पर्शवैशिष्ट्यदर्शनायेशकरस्पर्शफलाभिव्यक्तिं वक्ति । सतत्कर इति । सभगवत्करस्पर्शविधूतसमस्तपापत्वात्तत्क्षण एव सम्यगंकुरितपरमात्मज्ञानः अभिव्यक्तं परस्य हरेरात्मनः संसारिणश्च दर्शनं स्वरूपविषयज्ञानं यस्य स तथेति वा क्लिन्नहृद्भक्तिलक्षणामृतजलेनार्द्रीकृतान्तःकरणोऽश्रुणा युक्ते लोचने यस्य स तथा ॥ ६ ॥

तत्त्वज्ञानमस्योत्पन्नमित्यस्य किञ्चिह्नमित्यतस्तत्स्तुत्या व्यज्यत इति भावेन दर्शयति, अस्तौषीदिति ॥ ७ ॥

सत्त्वे नित्याविर्भूतबलज्ञानसमाहार एक एव नान्य इति वितानमतिर्विस्तृतबुद्धिर्येषां ते सत्त्वैकतानमतयः यद्वा सत्त्वे हरावेव नियतबुद्धयः अधुना परतः परस्य यस्यान्तं नापि नैव यान्ति स हरिरुग्रजातेरसुरजातेर्मे तोष्टुं स्तोतुमर्हति किमित्यन्वयः “न ते विष्णो”इति श्रुतेः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १ ॥

साक्षात् श्रीरिति साऽपि तस्यैव प्रेयसी अदृष्टाश्रुतपूर्वत्वात्वादिति । अत्रादृष्टाश्रुतपूर्वत्वं संभ्रमादेव जातमिवेत्यूह्यम् ॥ २--५ ॥

अथ प्रह्लादस्य श्रीभगवत्साक्षात्कारकृतसर्वाघधूननपूर्वकं ब्रह्मसाक्षात्कारानन्तरं भगवत्साक्षात्कारविशेषात्मकानिर्वृतिं परमाभीष्टत्वेनाह, स तदिति ॥ ६—७ ॥

तत्र तावन्निजायोग्यतायां कैमुत्यं व्यञ्जयति—ब्रह्मादय इति । वचसां कर्मयोगज्ञानप्रधानानां शब्दानां प्रवाहैर्निरन्तराभ्यासैः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सर्वविघ्नस्तदागन्तुमन्तिकं नवमे हरेः ।
प्रह्लादो ब्रह्मणाऽऽदिष्टस्तुष्टुवे सन्निधिं गतः ॥
रमापि यत्र न प्राभूदन्येषां तत्र का कथा ।
वात्सल्यं मूर्त्तिमत् किन्तु प्राह्लदोऽनुवभूव तम् । ०।

ननु, स्वदुःखमावेदयन्तो दूरत एव स्तुवाना देवादयः किमिति समीपमेत्य नोपासते स्म तत्राह—एवमिति । मन्युना संरम्भ आवेशो यस्य तम् ॥ १ ॥

अदृष्टाश्रुतपूर्वत्वादिति नृहरिरूपस्य पूर्वकल्पदृष्टत्वेऽपि नृसिंहस्य वैकुण्ठे सदैव दृष्टत्वेऽपि तदानीमदृष्टाश्रुतत्वप्रतीतिर्लीलाशक्त्यैव कारिता । अद्भुतरसास्वादप्रापणार्थमित्याहुः ॥ २—४ ॥

कृतमभयं येन तत् ॥ ५ ॥

असुरजातित्वात्तदीयस्पर्शादिप्राप्त्यसंभावनालक्षणमशुभं यत् पूर्वमासीत् तत् धुतं निरस्तं यस्य सः । तत्करस्पर्शप्रभावात् अभिव्यक्तं पूर्वसिद्धमेव तदानीं सर्वतोभावेन व्यक्तीभूतं परात्मदर्शनं परमात्मानुभवो यस्य सः ॥ ६ ॥

सुसमाधिमाह——अस्मिन्नेव न्यस्तं हृदयमीक्षणञ्च येन सः ॥ ७ ॥

भो दुरवगमाश्चर्य प्रभो ! मयि कं गुणमालम्ब्य कृपयसीत्याह, ब्रह्मादय इति । सात्त्विकत्वमपि न ते कृपायाः कारणं किं पुनस्तामसत्वमित्याह, सत्त्वेषु धर्मज्ञानतपःस्वेव एकताना अनन्यवर्त्तिनी मतिर्येषां ते । किं पुनरधर्माज्ञानविषयभोगैकतानमतयो वयमिति भावः ।“एकतानोऽनन्यवृत्तिः”इत्यमरः । नच केवलं स्तुतिवादानामेव त्वत्प्रसादकत्वमित्याह, वचसां प्रवाहैः पुष्कलैर्गुणैर्ध्वनिगुणालंकारयुक्तैः प्रवाहपक्षे स्वच्छत्वशैत्यमाधुर्यपावित्र्याद्यैः । आराधितुं स्वेषु सन्तोषयितुमित्यर्थः । न पिप्रुः नाशक्नुवन्नित्यर्थः । मे मयीत्यर्थः । उग्रजातेर्महातामसजातेः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नवमे प्रह्लादस्तोत्रेण विगतकोपोऽभूद्धरिरिति वर्ण्यते—मन्युसंरम्भः आवेशो यस्य तमुपेतुमासादितुं नाशकन् ॥ १ ॥

देवैः तद्रूपस्य अदृष्टाश्रुतपूर्वत्वाद्धेतोः साक्षादनेकावतारचरितज्ञा श्रीः प्रेषितापि तन्नृहरिरूपं महदद्भुतं दृष्ट्वा शङ्कित इदानीं समीपगमने आनुकूल्यं प्रातिकूल्यं वा स्यादित्येवं जात शङ्का सा नोपेयाय समीपं नैवाऽगात् ॥ २ ॥

हे तात वत्स ! त्वत्पित्रे कुपितं हरिं प्रशमय तदर्थमुपेहि शरणं व्रजेत्युक्त्वा प्रह्लादं प्रेषयामास ॥ ३ ॥

उपेत्य समीपं गत्वा शिरसि विधृताञ्जलिः कायेन भुवि ननाम ॥ ४ ॥

स्वपादमूले स्वचरणसमीपे कृपया परिप्लुतो व्याप्तः उत्थाप्य काल एवाऽहिस्तस्माद्भिन्नस्ता धीर्येषां तेषां कृतमभयं येन तत्कराम्बुजं शीर्ष्ण्यदधात् ॥ ५ ॥

स प्रह्लादः तस्य भगवतः करस्पर्शेन धुतानि निरस्तान्यखिलान्यशुभानि यस्य सपदि त्वरितमेवाभिव्यक्तं प्रोद्भूतं परस्योपास्यस्य व्यापकस्वरूपस्य आत्मन उपासकस्याणुस्वरूपस्य स च दर्शनं यस्य विग्रहदर्शनानन्तरं स्वरूपानुभवोजात इत्यर्थः । हृष्यन्ती आनन्दिता तनुर्यस्य क्लिन्नं प्रेमार्द्रं हृदयस्य अश्रूणि लोचनयोर्यस्य सः निर्वृत सुस्थितः तत्पादपद्मं कार्यकारणप्रकृतिसम्बन्धनिवृत्तिपूर्वकतत्स्वधर्म्यमाणिलक्षणगोचरार्थं हृदि दधौ ॥ ६ ॥

मन्ये धनाभिजनरूपतपःश्रुतौजस्तेजःप्रभावबलपौरुषबुद्धियोगाः।
नाराधनाय हि भवन्ति परस्य पुंसो भक्त्या तुतोष भगवान् गजयूथपाय ॥ ९ ॥
विप्राद्द्विषड्गुणयुतादरविन्दनाभपादारविन्दविमुखाच्छ्वपचं वरिष्ठम्।
मन्ये तदर्पितमनोवचनेहितार्थप्राणः पुनाति स कुलं न तु भूरिमानः ॥ १० ॥
नैवात्मनः प्रभुरयं निजलाभपूर्णो मानं जनादविदुषः करुणो वृणीते।
यद्यज्जनो भगवते विदधीत मानं तच्चात्मने प्रतिमुखस्य यथा मुखश्रीः ॥ ११ ॥
तस्मादहं विगतविक्लव ईश्वरस्य सर्वात्मना महि गृणामि यथामनीषम्।
नीचोऽजया गुणविसर्गमनुप्रविष्टः पूयेत येन हि पुमाननुवर्णितेन ॥ १२ ॥
सर्वे ह्यमी विधिकरास्तव सत्त्वधाम्नो ब्रह्मादयो वयमिवेश !(१) न चोद्विजन्तः।
क्षेमाय भूतय उतात्मसुखाय चास्य विक्रीडितं भगवतो रुचिरावतारैः ॥ १३ ॥
तद्यच्छ मन्युमसुरश्च हतस्त्वयाऽद्य मोदेत साधुरपि वृश्चिकसर्पहत्या।
लोकाश्च निर्वृतिमिताः प्रतियन्ति सर्वे रूपं नृसिंह ! विभयाय जनाः स्मरन्ति ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

एवं कृतध्यानः सपद्येव तस्मिन् भगवति न्यस्तं समर्पितं हृदयं मन ईक्षणञ्च येन सः एकाग्रेण हरिमस्तौषीत् ॥ ७ ॥

"सर्वं स्वातंत्र्यमुद्दिष्टं तच्च कृष्णे न चापरे" इत्येवंभूते भगवत्स्वातंत्र्ये एकस्मिन् तानो विस्तारो यस्याः सा मतिर्येषां ते भगवदुत्कर्षाभिज्ञा इत्यर्थः। ब्रह्मादयः प्रजास्रष्टारो राजसाः सुरगणाः प्रजापालकाः सात्त्विकाः "सत्त्वसत्त्वनः सुर गुणा रजसः प्रजेशाः" इति वक्ष्यमाणात् किं बहुना मुनयो मननशीलाः पराशरादयः सिद्धाः कपिलादयः गुणातीताश्च वचसां प्रवाहैर्वेदैः पुरुगुणैः सृष्टिपालनमननध्यानैः यमाराधयितुं न विघ्नर्न पूर्णाः स हरिः उग्रजातेः उग्रा दैत्यवाचामसी जातिर्यस्य तस्य मे किं कथं तोष्टुमर्हति ॥ ८ ॥

भाषा टीका।

श्रीरुक्मिणीपतये नमः ॥

॥ नारद उवाच ॥

नारदजीबोले, कि—इस प्रकार ब्रह्मा महादेव प्रभृति सम्पूर्ण देवता लोग कोपावेश युक्त, और अत्यन्त दुरासद, श्री नृसिंह देवके समीप जाने को समर्थ न हुए ॥ १ ॥

तब देवताओं ने साक्षात् श्री लक्ष्मीजी को भेजा, लक्ष्मी जी ने भी आप का ऐसा स्वरूप कभी न देखा सुना अत एव वो भी शंकित होकर समीप में नहीं गईं ॥ २ ॥

तब समीप मे स्थित प्रह्लाद को ब्रह्मा जी ने ऐसे कहकर भेजा, कि-हे तात ! अपने पिता पर कुपित प्रभु को समीप जाकर शान्त करो ॥ ३ ॥

तब तो हे राजन् महा भागवत अर्भक [छोटासा लडका] प्रह्लाद 'जो आज्ञा' ऐसा धीरे से कह कर प्रभु के समीप में जाकर हाथ जोडकर शरीर से पृथिवीमें दण्डवत करता हुआ४ ॥

तब प्रभु भी अपने चरणों में पडे हुए उस अर्भक [लडके] को देखकर कृपा में डूबगये, और उसको उठाकर काल रूप सर्प से ग्रस्त बुद्धि वालों को अभय देने वाले अपने करकमल को, प्रह्लाद के मस्तक पर धारण करते हुए ॥ ५ ॥

प्रह्लाद का भी नरहरि के कर स्पर्श से सम्पूर्ण अशुभ नष्ट हुआ, और तत्काल में पर ब्रह्म के स्वरूप रूप गुण विभूति का ज्ञान वाला होकर 'पुलकितांग आर्द्र हृदय अश्रु लोचन और आनन्दित होकर हरि के चरणों को हृदय में धारण करता हुआ॥६॥

और एकाग्र मन से समाहित होकर प्रभु में हृदय और दृष्टि को लगाकर प्रेमपूर्वक गद्गद वाणी से स्तुति करने लगा ॥७॥

प्रह्लाद उवाच।

प्रह्लाद बोले, कि— सत्व गुण के एक विस्तार वालीबुद्धिवाले ब्रह्मादिक देवता और मुनि सिद्ध लोग बहु गुणयुक्त वाणीके प्रवाहों से जिस हरि के आराधन करने को अबतक भी न समर्थ हुए वो हरि क्या मेरे सदृश उग्रजाति के स्तुति करनेके योग्य हैं ? ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

एवं हरितोषणे स्वस्यायोग्यतामाशङ्क्य योग्यतां सम्भावयति, मन्य इति द्वाभ्याम्। अभिजनः सत्कुले जन्म रूपं सौन्दर्यं श्रुतं पाण्डित्यं ओज इन्द्रियनैपुण्यम् तेजः कान्तिः प्रभावः प्रतापः पौरुषमुद्यमः बुद्धिः प्रज्ञा योगोऽष्टाङ्गः एते धनादयो द्वादशाऽपि गुणाः परस्य पुंस आराधनाय न भवन्ति हि यतः केवलया भक्त्यैव गजेन्द्राय तुष्टोऽभवत् ॥ ९ ॥

तद्वोद्विजन्त इति वीर०।

नाहं बिभेम्यजित ! तेऽतिभयानकास्यजिह्वार्कनेत्रभ्रुकुटीरभसोग्रदंष्ट्रात् ।
आंत्रस्रजः क्षतजकेसरशङ्कुकर्णान्निर्ह्रादभीतदिगिभादरिभिन्नखाग्रात् ॥ १५ ॥
त्रस्तोऽस्म्यहं कृपणवत्सल ! दुःसहोग्रसंसारचक्रकदनाग्रसतां प्रणीतः ।
बद्धः स्वकर्मभिरुशत्तम तेऽङ्घ्रिमूलं प्रीतोऽपवर्गशरणं ह्वयसे कदा नु ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवं भक्त्यैव केवलया हरेस्तोषः सम्भवतीत्युक्तमिदानीं भक्तिविना नान्यत्किञ्चित्तोषहेतुरित्याह—विप्रादिति । पूर्वोक्ता धनादयो द्विषट् द्वादशगुणास्तैर्युक्ताद्विप्रादपि श्वपचं वरिष्ठं मन्ये यद्वा सनत्सुजातोक्ता द्वादशधर्मादयो गुणा द्रष्टव्याः। तदुक्तम्

"धर्मश्च सत्यश्च दमस्तपश्च अमात्सर्यं ह्रीस्तितिक्षाऽनसूया ।
यज्ञश्च दानं च धृतिः श्रुतं च व्रतानि वै द्वादश ब्राह्मणस्य" ॥

इति यद्वा—

"शमोदमस्तपः शौचं क्षान्त्यार्जवविरक्तताः ।
ज्ञानविज्ञानसन्तोषाः सत्यास्तिक्ये द्विषड्गुणाः" ॥——

इति कथम्भूताद्विप्रात् अरविन्दनाभस्य पादारविन्दाद्विमुखात् कथम्भूतं श्वपचं तस्मिन्नरविन्दनाभेऽर्पिता मनआदयो येन तं ईहितं कर्म वरिष्ठत्वे हेतुः । स एवंभूतः श्वपचः सर्वं कुलं पुनाति भूरिमानो गर्वो यस्य स तु विप्र आत्मानमपि न पुनाति कुतः कुलम्, यतो भक्तिहीनस्यैते गुणा गर्वायैव भवन्ति न तु शुद्धयेऽतो हीन इति भावः ॥ १० ॥

तर्हि किं धनाद्यर्पणेन संमानं प्राकृत इव भगवानपेक्षते? नेत्याह—नैवेति । अयं प्रभुरीश्वरोऽविदुषोऽल्पकाज्जनात्मानं पूजामात्मनोऽर्थं न वृणीते नेच्छति यतो निजलाभेनैव पूर्णः तर्हि पूजां नेच्छत्येव तत्राह, करुणः कृपालुस्तो वृणीते च तत्र हेतुः यद्यदिति । यं यं मानं यद्वा यद्यस्माद्येन धनादिना भगवते मानं विदधीत तद्देवाऽऽत्मने भवति नान्यत् यथा मुखे कृतैव तिलकादिश्रीः शोभा प्रतिबिम्बस्य भवति नतु साक्षात्तस्यैव कर्तुं शक्यते तद्वत् ॥ ११ ॥

यस्मादेवं भगवान्भक्त्यैव तुष्यति तस्मादहं नीचोपि विगतविक्लवोगतशंकः सर्वेश्वरस्य महि महिमानं सर्वप्रयत्नेन स्वमनीषानुसारेणाऽनुवर्णयामि अजानतोऽपि स्तुतिकरणे हेतुमाह—येनैव महिम्नाऽनुवर्णितेनाऽविद्यया संसारमनुप्रविष्टः पुमान्पूयेत शुध्येत तन्महि अन्यस्य तथा शोधकत्वाभावादित्यर्थः ॥ १२ ॥

तदेवमात्मनः स्तुतावनधिकारं परिहृत्येदानीं तं स्तुवन् कोपोपसंहारं प्रार्थयते—सर्वेहीति द्वाभ्याम् । भो ईश ! अमी उद्भिज्जन्तोविभ्यतः सर्वे ब्रह्मादयः सत्त्वमूर्तेस्तव विधिकरास्त्वन्नियोगकर्तारो भक्ता एव नान्ये नच वयमसुरा इव वैरभावेनैते भक्ताः किन्तु श्रद्धयैव तव रुचिरैरवतारैर्विविधं क्रीडनमस्य विश्वस्य क्षेमादिप्रयोजनाय न तु भयोत्पादनाय ॥ १३ ॥

तत्तस्मादेषां भयपरिहाराय मन्युं यच्छोपसंहर यदर्थमयं मन्युः स चासुरः साधूनां सन्तोषार्थमद्य हतः । अतःपरं क्रोधेन कार्याभावात्तं नियच्छ. नन्वन्येषां वधेन साधुः किं मोदेत? तत्राह—वृश्चिकादेः परोपद्रवकारिणोऽन्यतो जातया हत्या वधेन तस्यैव तद्भद्रं जातमिति साधुरपि मोदेतैव तर्हि बहूनां सुखावहत्वादमुं क्रोधं न त्यजामीति चेत्तत्राह—लोकाश्च निर्वृतिमिताः प्राप्ताः सन्तः प्रतियन्ति क्रोधोपसंहारं प्रतीक्षन्ते तर्हि जनानां पुनर्भयाभावाय मन्युं धारयामीति चेत्तत्राह—रूपमिति । विभयाय भयनिवृत्त्यै एतद्रूपस्मरणादेव भयनिवृत्तेर्न मन्युधारणेन कृत्यमस्तीत्यर्थः ॥ १४ ॥

त्वं चेद्बिभेषि तर्हि त्यजामीति चेत्तत्राह—नाहमिति । भो अजित ! तेऽस्माद्रूपादहं न बिभेमि कथंभूतात् आस्यं च जिह्वा चार्कसदृशनेत्राणि च भ्रुकुटीनां रभस आटोपश्च उग्रा दंष्ट्राश्च एतान्यतिभयानकानि यस्मिंस्तस्मात् अन्त्रमय्यः स्रजो यस्मिंस्तदांत्रस्रक् तस्मात् क्षतजाक्ताः केसरा यस्मिन् शंकुवदुन्नतौ स्तब्धौ कर्णौ यस्मिन् तच्च तच्च तस्मात्. निर्ह्रादेन भीता दिगिभा यस्मात् अरीन् भिन्दन्तीत्यरिभिन्दि तानि नखाग्राणि यस्मिन् एवंभूतादपि ते रूपादहं न बिभेमि ॥ १५ ॥

महद्भयं त्वन्यदस्तीत्याह—त्रस्तोस्मीति । दुःसहं यदुग्रं संसारचक्रे कदनं दुःखं तस्मादहं त्रस्तोऽस्मि तत्र च ग्रसतां हिंस्राणां मध्ये स्वकर्मभिर्बद्धः सन्प्रणीतो निक्षिप्तोऽस्मि हे कृपणवत्सल ! हे उशत्तम ! कदा नु त्वं प्रीतः सन्नपवर्गभूतं शरणं तवांघ्रिकमलंप्रति ह्वयसे मामाह्वयसि ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमनधिकारमात्मन आशङ्क्य पुनरधिकारंसम्भावयितुं तावद्भगवतो जातिगुणवृत्तादितारतम्यानादरेण भक्त्यैकतोष्यत्वमाह—मन्य इति द्वाभ्याम्। धनादयः परमपुरुषस्याराधनाय सन्तोषनिमित्ताराधनाय न भवन्ति इति मन्ये किन्तु भक्तिरेव परमपुरुषसन्तोषाराधनाय भवतीति मन्य इत्यर्थः । कुतः हि यस्माद्भगवान् गजयूथपाय धनादिविरहिताय गजेन्द्राय भक्त्यै तुतोष. तत्र धनं वित्तम्, अभिजनः सत्कुले जन्म, रूपं सौन्दर्यं तपः स्वधर्मः कृच्छ्रादिरूपं वाऽनशनरूपं वा श्रुतं पाण्डित्यं ओज इन्द्रियबलं तेजः कायकान्तिः प्रभावः प्रतापः बलं शारीरं पौरुषमुद्यमः बुद्धिः प्रज्ञा योगः प्राणजयः ॥ ९ ॥

एवं धनाद्यभावेपि केवलभक्तेरेव श्रीभगवत्तोषहेतुत्वं निदर्शितम्. यतो भक्तेरेव श्रीभगवत्तोषहेतुत्वमतएवेतरगुणसंपत्त्यपेक्षया श्रीभगवद्भक्तिसम्पत्तिरेव श्रेयसीत्याह—विप्रादिति. द्विषड्गुणा द्वादश गुणास्ते च—

"धर्मश्च सत्यं च दमः श्रुतश्च अमात्सर्यं ह्रीस्तितिक्षाऽनसूया
दानं च यज्ञश्च धृतिः शमश्च व्रतानि वै द्वादश ब्राह्मणस्य ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

इतिसनत्सुजातोक्ताः श्रीमहाभारते । एतैर्युक्तादरविन्दनाभस्य पादारविन्दविमुखद्ब्राह्मणाच्छ्वपचं श्वपाकं वरिष्ठं श्रेष्ठं मन्येश्वपचं विशिनष्टि. तदर्पितेति तस्मिन्नरविन्दनाभे अर्पितास्समर्पिता मन आदयो येन तं तत्रेहितं कर्म तस्य श्रेष्ठत्वे ततो विप्रस्याऽधमत्वे च हेतू आह, स एवंभूतः श्वपचः कुलं स्वकुलमपि पुनाति भूरिमानो गर्वो द्विषड्गुणप्रयुक्तो यस्य स तु विप्रः नत्वात्मानमपि पुनातीत्यर्थः । यद्यप्युक्ता एव गुणाः भगवद्भक्त्यनुग्राहका भक्तिश्च वेदान्तविहितब्रह्मोपासनात्मिका तत्र चाधिकारस्त्रैवर्णिकस्यैव. नतु शूद्रस्य एतच्च शारीरकाऽपशूद्राधिकरणन्यायसिद्धम्. एवं च तत्र सुतरां श्वपाकस्याधिकारो न सम्भवतीति उक्तगुणयुक्तात् द्विजाद्भक्तियुक्तस्य श्वपाकस्य परत्ववर्णनमनुचितम् तथाप्यत्र प्रकरणे भक्तिशब्देन भक्तिः प्रपत्तिश्चोच्यते प्रपत्तौ च सर्वेषामधिकारो बहुप्रमाणप्रतिपन्नः अतएव हि—

"दैतेया यक्षरक्षांसि स्त्रियः शूद्राव्रजौकसः ।
खगामृगाः पापजीवा सन्ति ह्यच्युततांगताः" ॥ इति

स्त्रीशूद्रादीनामपि भगवति भक्त्या तत्साधर्म्यापत्तिरुक्तोपपन्ना भवति "वनङ्गतो यद्धरिमाश्रयेत, उपेत नारायणमादिदेवम्, ॥ मन्येतदेतदखिलं परमस्य पुंसः, स्वात्मार्पणं स्वसुहृदः परमस्य पुंसः, इति प्रपत्तिरपि कर्त्तव्यत्वेन पूर्वमुक्ताचेत्यतो नविरोधः। उपपादितश्चैतत्पुरस्तान्मन आदीनां भगवति समर्पणं नाम तच्छेषत्वेन तदायत्तसत्तादिमत्वेन चानुसन्धानरूपाध्यवसायात्मकज्ञानं प्राणशब्दः प्राणाश्रयप्रत्यगात्मस्वरूपस्याप्युपलक्षक एवञ्चात्मरक्षायादिसमर्पणेन भगवति न्यस्तरक्षाभरः श्वपाकोऽपि श्रीभगवत्तोषकत्वादुक्तविधाद्विप्राच्छ्रेयानिति भावः । तदुक्तम् श्रीभगवता—

"अपिचेत्सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥
प्रियो हि ज्ञानिनोत्यर्थमहं च मम प्रियः" ।

इत्यादि—

अपिपापेष्वभिरता मद्भक्ताः पाण्डुनन्दन ! ।
मुच्यन्ते पातकैः सर्वैः पद्मपत्रमिवाम्भसा ॥ इति ॥१०॥

ननु, परिपूर्णस्य भगवतो जातिगुणविद्याविनिहीनश्वपाकसमर्पितमनआदिभिः किं प्रयोजनम् ? कथं वा ततस्तस्य तोषः ? कथंचैतदेवंविधोपि मामनन्यभावेन भजन्नितरां मत्प्रिय इति श्रीभगवतोक्तम्?इत्यत्राह-नैवेति । प्रभुरीश्वरो निजलाभपूर्णः निजेन स्वाभाविकेन लाभेन समस्तकामावाप्त्या पूर्णः अत एव मानं स्वाराधनरूपं कर्म नैव जगाद आत्मने इत्यपकृष्यते आत्मने आत्मार्थं स्वप्रयोजनाय न जगादेत्यर्थः । किन्तु करुणो वृणीते करुणः करुणावान् "गुणवचनेभ्यो मतुपो लुग्वक्तव्यः" इति लुप्तमतुबन्तं पदं लुप्तलुगिति टापो लुक् हेतुगर्भमिदं दयालुत्वाद्विदुषो वृणीते प्रबुद्धजनान्स्वाराधनविधानेनांगीकरोतीत्यर्थः । करुणयाऽऽराधकोज्जीवनार्थमेवाराधनं स्वीकारोतीति भावः । तदेव विशदयति, यद्यदाराधनं भगवते जनो विदधीत करोति तच्चात्मने स्वार्थमेव भवति "यंस्तुवन्स्तव्यतामेति वन्द्यमानश्च वन्द्यताम्" इति न्यायाद्भगवत्पूजनेन स्वयमपि पूज्या भवन्तीत्यर्थः । कथमन्यस्य पूजनेन अन्यस्य पूज्यतेत्यपेक्षायां, तदधीनसत्तादिमतो वस्तुनस्तत्सत्कारेण तत्साम्यावाप्तौ दृष्टान्तमाह, यथा मुखश्रीः प्रतिमुखस्येति । यथा साक्षादलङ्कारादिजन्या मुखस्य शोभा तदधीनच्छायामुखस्य भवत्येवं भगवतः पूज्यता तदाराधकानां तथैव भवतीत्यर्थः । "तद्यथामातारुणवत्सं वत्सो वा मातरम्, छाया सत्त्वमनुगच्छेत् तथाप्रकारः" इति श्रुतिर्हिजीवस्यच्छायावदीश्वरपारतन्त्र्यमवगमयति जनादविदुष इतिपाठे । अविदुषः किञ्चिज्ज्ञादपि जनान्मानमात्मार्थेन वृणीत इत्यर्थः ॥ ११ ॥

एवं भगवतो भक्त्यैकतोष्यत्वं तत्तोषस्य च भक्तोज्जीवनार्थत्वं चोक्तं तदेवं स्वस्योग्रजातेरपि तद्भक्तस्य तत्तोषकस्तुतावनधिकारः सम्भावितः यत एवंभूतो अहमतो यथामति स्तोष्यामीत्याह-तस्मादिति । यस्माद्भगवान्भक्त्यैकस्तोष्यस्तस्मान्नीचोप्यहं तद्भक्तियुक्तोहमतएव विगतविक्लवः गतशङ्कस्सन् सर्वात्मना करणत्रयैक्येनेश्वरस्य भगवतो महि महिमानं यथामति स्तौमि गृणामि किमीश्वरस्य स्तुत्या प्रयोजनमिति शङ्कां निराकुर्वंस्तन्महिमानुवर्णनं विशिनष्टि, येनेश्वरगुणानुवर्णनेन अनुवर्णितेनेति भावः अजया प्रकृत्या गुणविसर्गं गुणकार्यं शरीरमनुप्रविष्टः पुमान्पूयेत शुद्ध्येत् स्तुत्या न तस्य कोप्यतिशयः किन्तु स्तुवतएवात्मविशुद्धिरूपोतिशयइतिभावः ॥ १२ ॥

एवमात्मनः स्तुतावनधिकारं परिहृत्य तत् स्तुतिं प्रतिज्ञाय तं शुश्रूषुस्तावत्कोपोपशमं प्रार्थयते—सर्वे हीति द्वाभ्याम् । हे ईश वयमिव यथा वयं तव किंकरास्तथा अमी सर्वे ब्रह्मादयोपि सत्त्वधाम्नस्तव विधिकराः किंकराएव अस्त्वेवं ततः किमत आह उद्विजन्तः त्वत्कोपादुद्विभ्यतो वर्त्तन्ते ततो मन्युं यच्छेत्युत्तरेणान्वयः सत्त्वधाम्न इत्यनेन शुद्धसत्त्वैकतानस्य तव कोपः स्वाभाविको न भवति किन्तु लोकरक्षणोभिकृतस्य तव तद्रक्षणरूपक्रीडार्थमाह्नि इत्याभिप्रेतं तदेव व्यनक्ति क्षेमायेति अस्य जगतः क्षेमाय लब्धपरिरक्षणाय भूतयेयोगायालब्धलाभायात्मसुखाय ब्रह्मात्मकस्वात्मानंदानुभवजसुखाय च भगवतस्तव रुचिरैः सुन्दरैरवतारैर्नृसिंहादिभिर्विक्रीडितं भावेक्तः विविधाक्रीडा इत्यर्थः इयं दुष्कृद्विषयक्रोधादिरूपा तव क्रीडा लोकक्षेमाद्यर्थमिति भावः । एवंविधक्रीडया हि दुष्कृद्विनाशद्वाराश्रितपरिपालनमपूर्वश्रेयःप्राप्तिःश्रवणादिना क्रीडामनुभवतो लोकस्य निःशेषबन्धककर्मक्षयरूपमोक्षद्वारात्मसुखानुभूतिश्च भवेदित्येतदर्थं तव विक्रीडितमितिभावः ॥ १३ ॥

यतस्तव विक्रीडितं लोकस्य क्षेमाद्यर्थं तत्तस्माद्धेतोः हे नृसिंह मन्युं यच्छ उपसंहर इतःपरं न मन्युना प्रयोजनमस्तीत्याह—अधुनाऽसुरो मत्पिता त्वया हतः लोकाः निर्वृतिं सुखमिताः प्राप्ताश्च ननु लोका निर्वृतिं यान्तुनाम लोकान्तर्गतःसाधुजनस्तु मत्कृतामिमां भूतहिंसां नानुमोदेत अत आह साधुरपि लोकोपद्रवकारिवृश्चिकसर्पादिहत्या मोदेत वृश्चिकसर्पादितुल्यस्य मत्पितुर्हत्या साधुजनोपि मोदेतैवेत्यर्थः इति शब्दः किंपतः सर्वे ब्रह्मादयो निर्भयाः प्रतियान्तु स्वस्थानानि प्रतिगच्छन्तु इतःपरमिदं त्वद्रूपमभयाय जनाः स्मरन्ति ॥ १४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु, ब्रह्मादय उद्विजन्त इति विशेषेण ब्रह्मादीनामेव क्रोधयुक्तान्मदुग्ररूपाद्भयं ब्रूषे त्वन्तु न विभेषि किमतआह-नेति । हेऽजित ! तवास्माद्रूपादिति विशेष्याध्याहारः अहं न विभेमि कथंभूतादास्यं च जिह्वा चार्कसदृशे नेत्रे च भ्रुकुटीनां रभस आटोपश्च उग्रा दंष्ट्राश्चैतान्यतिभयानकानि यस्मिन् अन्त्रमय्यः स्रजो यस्मिन् क्षतजाः रुधिराक्ताः केसरा यस्मिन् तत् क्षतजकेसरं शंकुवदुन्नतौ स्तब्धौ कर्णौ यस्मिंस्तच्छंकुकर्णौ द्वयोर्बहुव्रीह्योः कर्मधारयक्षतजकेसरशंकुकर्णनिर्ह्रादेन भीता दिगिभा दिग्गजा यस्मात् तत्पूर्वेण पुनः कर्मधारयः क्षतजकेसरशंकुकर्णनिर्ह्रादभीतदिगिभं तस्मादरीन् भिन्दन्तीत्यारिभिन्दि तानि नखाग्राणि यस्मिन्नेवं भूताद्रूपादहं न विभेमीत्यर्थः ॥ १५ ॥

तर्हि कुतो विभेषि इत्यपेक्षायां तद्भीति इतो विभेमीत्याह-त्रस्तोस्मीति । हे कृपणवत्सल ! दुस्सहं यदुग्रं संसारचक्रं कदनं तस्मादहं त्रस्तः भीतोस्मि कथंभूतोहं ग्रसतांप्रणीतः ग्रसतामिति कर्त्तरिषष्ठी ग्रसद्भिः त्वच्छेषभूतं मत्स्वरूपं तिरोधापयद्भिर्देहात्माभिमानस्वतन्त्रात्माभिमानममकारादिभिः तत्र संसारे प्रणीतः प्रापितस्तन्मूलभूतैः कर्मभिश्च बद्धः निगलितः हे उरुसत्तम कमनीयतम ! उक्तविधं मां प्रीतः मद्विषयकनिरतिशयप्रीतियुक्तस्त्वं ते तवाङ्घ्रिमूलंप्रति कथंभूतमंघ्रिमूलमपवर्गशरणमपवर्गोपायभूतं कदानु ह्वयसे आह्वयसे कदा मां त्वदंघ्रिमूलं प्रापयिष्यसि तावन्मामनुवर्त्तते भयमिति भावः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भक्त्या ननु भक्त्यैव यूथपाय गजेन्द्राय "सनानेतरि नागेन्द्रे यूथनाथः प्रकीर्तितः" इत्यभिधानम् अनेन धनादिकमपि भक्त्युपबृंहितं सफलमित्युक्तं भवति ॥ ९ ॥

इतोपि भक्तिरेव हरेः प्रसादे प्रधानसाधनमित्याह, विप्रादिति । द्विषड्गुणा द्वादशगुणा एतैर्युक्तात् "ज्ञानं च सत्यं च दमः शमश्च अमात्सर्यं ह्रीस्तितिक्षानसूया । दानं च यज्ञश्च तपः श्रुतं च महाव्रतं द्वादश ब्राह्मणस्य ॥" एतेभ्यः प्रवरो द्वादशेभ्यः सर्वाभ्योपीमां पृथिवीं प्रशिष्यात् त्रिभिर्द्वाभ्यामेकतोवा विशिष्टो नास्य समोऽस्तीतिवेदितव्य इत्येते भक्तिमत एव सम्भवन्ति नान्यस्य कश्चित्सम्भवेयुस्ततो न तेभ्योऽर्थः स्यात् " अनेवंविन्महत्पुण्यं कर्म करोति तद्धास्यान्ततः क्षीयतएव" इति श्रुतेः । तस्माद्भक्तिरेव प्रयोजिकेति तात्पर्यम्. सकलं मनआदिकं पुनाति विपर्ययपरकं मलं निरस्य दर्पणवत्स्वच्छं करोति जगत्पुनातीति वा "यस्तु विज्ञानवान्भवति युक्तेन मनसा सदा तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः" इति श्रुतेः । अन्यत्र बाधकमाह-नाविति । भूरिमानोऽहङ्कारस्यागमन्ता नैव पुनातीत्यन्वयः "समर्थं मन्यसे यच्च कुन्तीपुत्रं वृकोदरं । तन्मिथ्या हि न मे कृत्स्नं प्रभावं वेत्थ भारत ॥ मत्समो हि गदायुद्धे पृथिव्यां नास्ति भारत । नासीत्कश्चिदतिक्रान्तो भविता वा न कश्चन" इत्यादि भारते दुर्योधनोक्ताहङ्कारप्रतीतेरेवंविधो भूरिमान इत्यर्थः । "नाविरतो दुश्चरितान्नाशान्तो नासमाहितः । नाशान्तमानसो वापि प्रज्ञानेनैवमाप्नुयात्" इति श्रुतेः "शमोदमस्तपः शौचं क्षान्त्यार्जववैरक्तता । ज्ञानविज्ञानसन्तोषाः सत्याज्येऽपि द्विषड्गुणाः" इति केचित्. "सत्यं दमस्तपः शौचं सन्तोषो ह्रीःक्षमार्जवम् ॥ ज्ञानं शमो दया ध्यानं विप्रस्यैते द्विषड्गुणाः" इति केचित् असम्प्रदायज्ञैरुक्तत्वादत्र न ग्राह्यमेतन्मतद्वयमिति ॥ १० ॥

ननु, श्वपचं वरिष्ठमितीदमसम्भावितं वर्णहीनत्वेन तत्कृतसपर्यास्वीकारानुपपत्तेः " नाहं तथाद्मि यजमानहविर्वितानेः" इत्यादावन्यथाकथनाच्चेति तत्राह, नैवेति । अयं प्रभुरविदुषो ज्ञानोपदेशानधिकारिणः पूर्वचीर्णपुण्यनिचयात्तज्ज्ञानेन यथार्थतत्त्वज्ञानिनो वर्णहीनाज्जनान्मानं पूजां वृणीते स्वीकरोति इति यदात्मनोऽर्थे अप्राप्तप्राप्तये नैवेत्यन्वयः । कुत इत्यत उक्तं निजेति निजलाभेन नित्यानन्देन पूर्ण इति हेतुगर्भविशेषणम् " को ह्येवान्यात्" " योवैभूमा तत्सुखम् " इत्यादि श्रुतेः । ननु, स्वार्थाभावे सपर्यास्वीकारे किङ्कारणमिति तत्राह—करुण इति । करुणयतीति करुणः " देवस्यैष स्वभावो यम् यमेवैष वृणुते " इत्यादि श्रुतेः करणस्य क्षणभङ्गुरत्वात् कृपया तत्फलप्रदानाय तत्स्वीकारोपचार इति तात्पर्यं विद्वद्भिः क्रियमाणं मानं स्वार्थमपि किन्न स्यादित्याशङ्क्य विशेषमाह, यद्यदिति । विद्वदविद्वद्भेदमन्तरेण समानो जनः भगवते यद्यन्मानं विदधीत तत्तदात्मने च स्वप्रयोजनायैवेत्युपगन्तव्यम् अत्रदृष्टान्तमाह-प्रतिमुखस्येति । तथालङ्कृतमुखश्रीर्दर्पणादौ प्रतिफलितस्य प्रतिबिम्बलक्षणमुखस्य स्वालंकारमन्तरेण श्रीर्लभ्यते तथा स्वबिम्बभूतपरमात्मनो निर्दोषगुणराशिध्यानलक्षणमानेन तत्प्रतिबिम्बत्वात्स्वस्यापि निर्दोषसुखलक्षणश्रीर्लभ्यतइत्यर्थः अनेन ब्रह्मादिजीवराशिरस्यैतत्तुच्छीभूतइति सूचितं "श्वपचादपि कष्टत्वं ब्रह्मेशानादयः सुराः" इत्यादेः अयं तु नरसिंहआत्मनएव न प्रभुः किन्तु सर्वस्याप्यतोऽखण्डैश्वर्यत्वात् चक्रवर्तिकरमिवाविदुषोजनान्मानं वृणीते अनेन विद्वज्जनमानाङ्गीकारो व्याख्यातः स्वतः सिद्धत्वात्. ननु, जनपदादर्थादानादिना राज्ञः स्वप्रयोजनोपलब्धिवदीश्वरस्यापि तथा स्यात्किन्नेत्याह, निजेति. ननून्मत्तः किमीश्वरइति तत्राह,करुण इति. कस्यार्थे मानकरणमिति तत्राह, यद्यदिति. कथमिव यथा मुखस्य मुख्यस्य स्वामिनोराज्ञो मानलक्षणा श्रीः प्रतिमुखस्य राजमुखमनुवर्तमानस्य जनपदस्य परोपद्रवराहित्येन धनधान्यादिसमृद्धिलक्षणा श्रीर्भवति तथा हरिविषया क्रियमाणा मानश्रीरनुरक्तजनस्य संसारश्रृङ्खलान्मोक्षलक्षणा श्रीर्भवतीत्यर्थः ॥ बलमानन्दओजश्चेत्यादेः ननु, हरेर्जन्मादिमत्त्वेन विशेषमाहात्म्यायोगात् देवदत्तवदतोयुक्तं विप्रादितरजनपरिगृहीतत्वमिति तत्राह-नैवेति. अयं नृसिंहआत्मनोदेहस्यप्रभुः प्रभूतउत्पन्नोनैव किन्तु स्तम्भात् दृष्टत्वादिति शेषः अदेहस्य जननायोगात् जननवतएव विषयसुखानुभवोपपत्तेरतः कथं हरेर्विषयानुभूतिरिति तत्राह निजेति सत्यं परतश्चेत्प्राप्तिर्नाम तथा निजो लाभो यस्य स तथा स्वतःसिद्धानुभवश्च पूर्णो व्याप्तश्च नहि व्याप्तस्य परिच्छिन्नगर्भवासादिकं युज्यते "प्रादेशमात्रं पुरुषम्" इत्यादौ परिच्छेदप्रतीतेरितिचेत् "तस्यान्ते सुषिरं सूक्ष्मम्

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इति श्रुतेराकाशवदुपपत्तेरुपाधिकल्पनायामनवस्थादिदोषापत्तेरतः स्वभृत्यभाषितं सत्यं कर्तुं स्वस्य सर्वत्र व्याप्तिं दर्शयितुमितरत्र जानवद्दर्शनमसुरजनमोहार्थमित्यादि ज्ञातव्यं स्वभृत्यभाषितस्य सत्यकरणायेत्येतत्कथमवगतमिति तत्राह--मानमिति। अविदुषः स्वरूपाज्ञानिनोऽस्माज्जनान्मानं वृणीते न केवलमस्माज्जनात्किन्तु सर्वस्मादपि योग्यादित्याशयेनाह—यद्यदिति । शेषं पूर्ववत्. श्वपचोपि भक्तएव वरीयाञ्शाभक्तकृतस्य द्वेषित्वेन दम्भार्थत्वेन विहितपूजाया अस्वीकारादित्यनोवाह, नेति. अयं हरिराविदुषोनित्यांज्ञानिनोसुरजनादात्मनः स्वस्य मानं लोके दम्भाभिप्रायेण कृतपूजां नैव वृणीते प्रत्युतानर्थं च करोतीत्याह करुण इति “कृ विक्षेपे” इति धातोः असुरजननिरसनशीलत्वादन्धं तमएव प्रापयतीत्यर्थः “परा पूर्वेषाम्” इति श्रुतेः तस्मादसुरजनकृतसपर्यानर्थजननीत्याशयेनाह यद्यदिति आत्मने अनर्थायेति शेषः यथा मुखश्रीः प्रधानभटयोग्यश्रीः प्रतिमुखस्याल्पस्य प्रतिभटस्यानर्थाय मरणलक्षणाय स्यादिति शेषः ॥ ११ ॥

तस्माद्भक्तिरेव प्रयोजिकेत्याह—तस्मादिति । यस्मादचिन्त्यमहिमत्वात्सर्वात्मनेश्वरस्य स्वरूपं स्तोतुं न शक्नोमि तस्माद्विगतविक्लवोनिर्धूनचापल्योहं यथामनीषं भक्त्या गृणामीत्यन्वयः स्तुतेः फलमाह, नीचइति अजया प्रकृत्या नीचगुणविसर्गे संसारमनुप्रविष्टं पुमान्येनानुवर्णितेन गुणसङ्कीर्तनेन पूयेत शुद्धोभवति हि यस्मात्तेन संसारमोक्षोभवतीत्यर्थः ॥ १२ ॥

यथामनीषं गृणामीत्युक्तं विवृणोति--सर्वइति । अमी वयं ब्रह्मादयश्च सर्वे सत्त्वधाम्नस्तव विधिकराहि “विष्णोस्तिष्ठन्ति प्रदिशाविधर्मणि”इति श्रुतेः तत्र विशेषोस्ति यथा वयं उद्विजन्तस्तथा ब्रह्मादयोनैवोद्विजन्तः प्रधानभक्तत्वात्कुतएतद्भयं विज्ञापयतइति तत्राह क्षेमायेति अस्य हरेरुचिरावतारैः विक्रीडितम् अस्य जगतः क्षेमाद्यनेकप्रयोजनाय स्यादिति यदनेनास्मन्निबन्धेनास्माकमुद्वेगोब्रह्मादिरक्षणेन तेषामनुद्वेगश्च ज्ञायतइत्यर्थः ॥१३॥

अथैवंकर्तव्यमित्याह—तद्यच्छेति । अद्य त्वया असुरो हतश्च यस्मात्तस्मान्मथ्नाति कलुषीकरोति ज्ञानमिति मन्युः कोपः इतरेषामेवम्विधोहरेस्तु स्वेदाधरस्फुरणादिविडम्बनलक्षणादिस्तं यच्छ संहर, प्रसन्नभावं दर्शयेत्यर्थः । मन्युश्च त्वद्विषयं ज्ञानं च यच्छानुगृहाणेत्यर्थः “मन अवबोधने” इति धातोरिति वा त्वद्विषयं पूजालक्षणं यज्ञमिति वा “मन्युः कोपे क्रतौ युद्धे” इत्यभिधानम्. सज्जनानन्दाकांक्षापि भगवत्प्रसादकरीत्याशयेनाह मोदेतेति वृश्चिकसर्पलक्षणासुरहननेन साधुः सज्जनोपि मोदेत साधुरपि मोदेतेति वा योगविभागः, वृश्चिकसर्पलक्षणासुरहत्या निर्वृतिमानन्दमिताः प्राप्ताः सर्वे लोकाः प्रतियान्तु स्वगृहमिति शेषः यद्वा किङ्कुर्वन्तीति तत्राह रूपमिति । हे नृसिंह ! जनाः तव नृसिंहाकारं रूपं दुरितनिवृत्तिलक्षणाय विभवाय स्मरन्तीत्यन्वयः साधुरहिंसापरोपि वृश्चिकादिहत्या मोदेत किम्पुनः सर्वलोकोपद्रवकृत् असुरहत्यातोवाह मोदेतेति हत्यामिति पाठे साधुः शास्त्रतत्त्वज्ञोदुष्टवृश्चिकादिहत्यां यथा मोदेत तथाहमपि भगवद्द्वेषित्वेन दुष्टत्वात्पितृहत्यां मोदइत्यभिप्रेत्यातोवाह मोदेतेति. नृसिंहेति सम्बोधनं नामकरणाभिप्रायेणेति ज्ञातव्यम् ॥ १४ ॥

पूर्वमज्ञातनामत्वादिति तव कोपाकुलरूपदर्शनाद्भीत्या लोकस्य स्मरणं न सम्भाव्यतइति चेत्तच्छमनं कर्तव्यमित्युक्तं तन्मम ज्ञाततत्त्वस्य विषयो न भवति मम भयं संसारचक्रादित्याह, नाहमिति. भयानकस्य ते तव रूपान्नबिभेमीत्यन्वयः कीदृशात् जिह्वे वक्रे अग्नियुक्ते नेत्रे यस्य तत्तथा जिह्वया भ्रुकुट्या रभसौ यस्य तत्तथा उग्रे दंष्ट्रे यस्य तत्तथा जिह्वाग्निनेत्रं च जिह्वा भ्रुकुटी रभसं च उग्रदंष्ट्रं च तत्तथा तस्मादान्त्रमेव स्रक् माला यस्य तत्तथा तस्मात्क्षतजेन रुधिरेण सिक्ताः केसराः यस्य तत्तथा शङ्कुवत्स्थूणावत्स्तब्धौ कर्णौ यस्य तत्तथा क्षतजकेसरं च शङ्कुकर्णं च तत्तथा तस्मात् निर्ह्रादेन भीता दिगिभा दिग्गजा यस्य तत्तथा तस्मात् अरिभिन्दि नखाग्राणि यस्य तत्तथा तस्मात् अरीन् भिन्दन्तीत्यरिभिन्दि नखानामग्राणि दुःसहं चोग्रं च संसारचक्रं च यत्तेन सह कदनात् हिंसालक्षणाद्युद्धादुरुशत्तम सत्यकाम, भीतानां अपवर्गं भीतिजनकसंसारमार्जनमरणं शरणं समियां यामि ॥ १५—१६ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तस्मादेवं दृष्टत्वादेवं निर्णीय इत्याह—मन्य इति । चरणत्रयेण धनादयस्तत्तच्छास्त्राङ्ग्यासफलरूपास्तेपि नाराधनाय न परितोषाय । तर्हि केन तोषः स्यादित्यपेक्षायां दृष्टान्तद्वारैव तद्दर्शयति, भक्त्येति । ब्रह्मादिषु ब्रह्मादिकतिपयानां भक्तत्वेपि तेन तेन तु तेषामपि स परितुष्टो न भवतीति विवक्षयोक्तम् ॥ ९ ॥

ननु, भक्तिव्यतिरिक्ता अपि केचित्ते वरिष्ठतयोद्घुष्यन्ते तत्रासहमान आह, विप्रादिति ॥ १० ॥

भक्तास्तु श्रीभगवतोपि स्वत एव परमाभीष्टरूपाः भक्तिरेवच भक्तानां सुखरूपेति भक्त्या तुतोषेत्येनोत्कर्षयन् स्वकर्तव्यत्वेन शमेव निगमयितुमाह—नैवात्मन इति । अयं प्रभुरात्मनो मानं पूजां जनात् निजभक्तात् न वृणीते नेच्छति । तत्र हेतुः । निजस्य भक्तस्य लाभेनैव पूर्णः परमसन्तुष्टः । हेत्वन्तरं करुणः पूजार्थतत्प्रयासादावसहिष्णुः कथंभूतात् जनात् अविदुषः । पितुरग्रे बालकवत्तस्याग्रे न किञ्चिदपि जानतः एषा स्वस्य जनैकवर्गत्वेन दैन्योक्तिः । यद्वा तदावेशेनान्यत् किञ्चिदपि न जानत इत्यर्थः । उभयत्र पक्षेऽपि तस्य तस्य कारुण्यं हेतुरिति भावः । तर्हि किं जनस्तस्य मानं न कुरुत एवेत्याशङ्क्याह—यद्यदिति । सच जनोयत् यं यं मानं भगवते विदधीत सम्पादयति स सर्वोऽप्यात्मार्थमेव तत्सम्मानमात्रेणैव स्वसम्मानाभिमननात् सुखं मन्यमानस्तन्मानं करोत्येवेत्यर्थः तत्सम्मानमात्रेण स्वसम्मानश्च तदेकजीवनस्य जनस्य युक्त एवेति दृष्टान्तमाह—यथा मुखे या शोभा क्रियते तन्मात्रमेव प्रतिमुखस्य शोभायैव भवति नान्यादिति ॥ ११ ॥

निगमयति तस्मादिति ॥ १२ ॥

नन्वेवं ब्रह्माद्याः भक्ता न भवन्ति भवानेव तु भक्त इत्याशङ्क्यासुरकुलजन्मत्वात् दैन्येनात्मानमपि तत्स्वभावत्वेन

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

निर्दिशन् ब्रह्मादीन् प्रसादविषयीकारयितुं व्यतिरेकदृष्टान्तेन तेषां भक्तत्वमेव दृढयति—सर्वे इति। नच ननु वयमिवासुराइवोद्विजन्तः त्वदसमोर्द्ध्ववैभवदर्शनेनोद्वेगमीर्ष्यादिभावं प्राप्नुवन्तो भवन्ति। भवांस्तु सर्वमङ्गलचरित एवेत्याह, क्षेमायेति ॥ १३ ॥

ननु, परमसाधोस्तव हिंस्रकोयमिति महाप्राणिनोऽप्यस्य मया हननं साधवोऽप्येतत्तत्त्वानभिज्ञा एते ब्रह्ममरीच्यादयो न सहेरन् । अत एवैतेष्वपि प्रसादो न युक्त इत्याशङ्क्याह—मोदेतेति। अहं को वराकः किन्तु वृश्चिकादेरिव सर्वहिंसकस्यास्य हननं साधुजनोऽप्यनुमोदेत किमुतैत इत्यर्थः । किं वक्तव्यं त एव मोदं लब्धा इति । यतो लोकाश्चेति अतो विश्वसुखदत्वात् साध्वेवानुष्ठितमिति। प्रसादस्यावसरोयं ननु मन्योरिति भावः। किञ्च। रूपमिति ॥ १४—१५ ॥

दुस्सहेति तद्बहिर्मुखतामयत्वादिति भावः । तत्रापि ग्रसतां स्वङ्कैः सर्वङ्गिलानामसुराणां मध्ये ततो हे उत्तम ! ते तवांघ्रिमूलं चरणारविन्दयोः नित्याधिष्ठानं श्रीवैकुण्ठंप्रति कदानुह्वयसे ॥ १६ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

नच बहुधन प्रदानादिभिस्त्वं तुष्यसीत्याह–मन्य इति। अभिजनं सत्कुले जन्म ओज इन्द्रियनैपुण्यं तेजः कान्तिः प्रभावः प्रतापः पौरुषमुद्यमः योगोऽष्टाङ्गः कर्मयोगो ज्ञानयोगश्च नाराधनाय न सन्तोषणाय तर्हि केनाहं सन्तुष्यामीत्यत आह भक्त्येति तुतोषेति भूतनिर्द्देशेन नात्र काप्यन्या युक्तिरन्वेष्टव्या किन्तु भवतस्स्वभाव एवायं भक्तेर्वा काप्यद्भुता शक्तिरिति द्योतते । तेन च त्वत्सन्तोषान्यथानुपपत्त्या मय्यपि श्रीनारदकृपाद्भूतो भक्तिगन्धो वर्त्तत इति व्यञ्जितम् ॥ ९ ॥

किमन्यद्वक्तव्यं भक्त्यभावसद्भावाभ्यामेवं विविच्यत इत्याह, भक्तिहीनाद् विप्रादपि श्वपचं वरिष्ठं मन्ये किमुत क्षत्रियादिभ्यः तत्रापि द्विषड् पूर्वोक्ताधनादयो द्वादशगुणास्तैर्युक्ताद् किमुत समाष्टभिश्चतुरादि गुणयुक्ताद् किमुततरां तत्तद्गुणहीनाद् तत्रापि वरिष्ठमतिशयेनाधिकमेव सनत्सुजातोक्ता द्वादश वा गुणा द्रष्टव्याः तदुक्तं "ज्ञानञ्च सत्यञ्च दमः श्रुतञ्च ह्यमात्सर्यं ह्रीस्तितिक्षानसूया। यज्ञश्च दानञ्च धृतिः शमश्च महाव्रता द्वादश ब्राह्मणस्य"इति अरविन्देति तेन ज्ञानयोगादि सत्त्वे विप्रो भगवद्बहिर्मुखोनोच्यते इति मतं परास्तं श्वपचं कीदृशं तस्मिन्नरविन्दनाभे अर्पिता मन आदयो येन तम् ईहितं कर्म अर्थोधनं विप्राद्वरिष्ठत्वे हेतुः स श्वपचः कुलं स्वीयं सर्वमेव पुनाति भूरिर्मानो लोकेष्वादरो यस्य तथाभूतोपि सतु विप्रः आत्मानमपि न पुनाति कुतः कुलमिति भावः। भक्तिहीनस्यैते गुणाः गर्वायैव भवन्ति ननु शुद्धये इति श्रीस्वामिचरणाः ॥ १० ॥

ननु, तर्हि श्रवणकीर्त्तनार्हणादिभिर्मत्सम्माननं हि भक्तिस्तयैव तुष्यामि ननु तपःश्रुतादिभिः पुंनिष्ठैर्गुणैरिति चेत् स्वार्थपरत्वं प्रसक्तं तत्र नहि नहीत्याह—नैवेति। अयं प्रभुरीश्वरो भवान् आत्मनः स्वस्य मानं संमाननं जनात् जनमात्राद् न वृणीते कीदृशात् अविदुषः तदपेक्षया ब्रह्मादिस्तंबपर्य्यन्तः सर्व एव जनो ह्यविद्वानेवेत्यर्थः । नहि शास्त्रादिविद्याज्ञानशून्यजनकृतं सम्माननं भवथः कश्चिद्वृणातीति मानाग्रहणे जननिष्ठोऽज्ञानलक्षणो धर्मोहेतुरुक्तः तत्र त्वन्निष्ठो धर्मोऽपि हेतुरस्तीत्याह निजलाभेन पूर्णः किन्तु करुणः कृपालुः सन् वृणीते च यत् कुतश्चिद् वृणीते इति दृश्यते तत्तमनुग्रहीतुमेवेति मानग्रहणेपि करुणालक्षणस्त्वन्निष्ठो धर्म एवहेतुरस्तीति भावः। न च प्राकृतजनदत्तेन मानेन तव कश्चिदुत्कर्षोभवेदपितु मानप्रदातुरेवेत्याह यद्यं यं मानं पूजां भगवते विदधीत कुर्यात् तत्संमानः आत्मने स्वस्मै स्वोत्कर्षायैव भवेत् यथा मुखश्रीः मुखेकृता तिलकादिः शोभा प्रतिमुखस्य प्रतिविम्बस्य भवेत् ननु प्रतिबिम्बे कृता प्रतिबिम्बस्येत्यर्थः॥११॥

यस्मादेवं भवान् भक्त्यैव तुष्यति ननु सज्जात्यादिभिः यस्माच्च त्वत्संमाननं स्वस्यात्मने एव फलति तस्मादहं नीचोऽपि महि महिमानं गृणामि स्तौमि येन त्वन्महिम्ना अनुवर्णितेन गुणविसर्गे संसारव्याधिमनुप्रविष्टो जनः पूयेत तस्मान्मुच्येत इत्यर्थः ॥ १२ ॥

वयमसुरा एवास्मिन् जगत्यभक्ता मन्दभाग्याः अन्येतु सर्वे तव भक्ता भूरिभागा एवेत्याह सर्वेविधिकरास्त्वन्नियोगकरो दासा एव नच वयमसुरा इव वैरभावत्वादुद्विजन्तः सं... भीता अतोऽस्य स्वभक्तरूपस्य विश्वस्य क्षेमाय भूतये संपत्तये च उत आत्मनः स्वस्यच सुखार्थं तवेदमसुरवधादिविक्रीडितं भवेत् ॥ १३ ॥

यस्माद्विश्वस्य क्षेमायभूत् तस्मान्मन्युं यच्छ दूरीकुरु ... परदुःखेन सुखित्वात् कथमस्य विश्वस्य साधुत्वं तत्राह ... धुरपि परोद्वेजकवृश्चिकसर्पादीनां हत्या हिंसयाऽन्यकृतया ... देतेति विधेर्नासाधुत्वमित्यर्थः । प्रतियन्ति तव दुष्टनिग्रह शिष्टपालन कर्तृत्वे प्रतीतिं प्राप्नुवन्ति न चात... तवैतादृशावतारापेक्षापीत्याह हे नृसिंह ! तव रूपमेव विभयाय भयाभावाय स्मरन्ति तवै तद्रूपस्मरणेनैवातःपरं ... असुरा नंक्ष्यन्तीतिभावः ॥ १४ ॥

असुरजातित्वेप्यन्येषामसुराणामिव त्वत्तो न मे भयमित्याह नाहमिति । ते अस्माद्रूपादहं न विभेमि कीदृशात् अतिभयानकं आस्यं जिह्वा अर्कतुल्यनेत्राणि भ्रुकुट्यारभस ... उग्रा दंष्ट्रा च यत्र तस्मात् अन्त्रमय्यः स्रजो यत्र तदान्त्रस्रक् तस्मात् क्षतजाक्ता केसरा यस्मिन् शंकुवदुन्नतौ स्तब्धौ कर्णौ यस्मिन् तच्च तच्च तस्मात् निर्ह्रादेन भीता दिग्गजा यस्मात् अरीन् भिन्दन्तीत्यरिभिन्दि तानि नखाग्राणि यस्मिन् तस्मात् ॥

किन्तु त्वद्वैमुख्यप्रदायकदुःसङ्गादिभ्य एव भीतोस्मीत्याह त्रस्तोस्मीति। दुस्सहं यत्त्वन्निन्दा द्वेषादिमयत्वादुग्रं संसारकदनं तस्मादेव त्रस्तोस्मि ननु साधारणसंसारादिति प्रह्लाद...

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

भिप्रायो व्याख्येयः "नैवोद्विजे परदुरत्ययवैतरण्यास्त्वद्वीर्यगायनमहामृतमग्नचित्तः" इत्यग्रिमतदुक्तेः यतः ग्रसतां त्वद्भक्तं मां भक्षितुमिवेच्छतामसुराणां मध्ये प्रणीतो निक्षिप्तः ननु त्वं किं मया निक्षिप्तस्तत्र नहि नहीत्याह बद्धः सन् स्वकर्मभिरेव तस्मात् कदानु प्रीतस्सन् अपवर्गभूतं शरणं तवाङ्घ्रिकमलं प्रति ह्वयसे पादसम्वाहनार्थं मामाह्वास्यसि ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

किञ्च धनादिभिरपि भगवान्न तुष्यति किन्तु भक्त्या तुष्यतीत्याह, मन्ये इति । धनादयः परस्याराधनाय न भवन्ति यतस्तद्रहिताय गजयूथपाय भगवान् भक्त्यैव तुतोष अभिजनः सत्कुले उद्भवः रूपं सौन्दर्यम् तपः कृच्छ्रादि श्रुतं शास्त्रश्रवणम् ओजः इन्द्रियापाटवम् तेजः प्रकाशः प्रभावः प्रभुत्वम् बलं देवान्तरोपासनादिजम् पौरुषं कार्यक्षमत्वम् बुद्धिरर्थधारणशक्तिः किंबहुना भक्तिविरुद्धाः युज्यन्ते इति योगाः सर्वे उपाया इत्यर्थः ॥ ९ ॥

अथ हरिभक्तप्रशंसार्थं तद्वहिर्मुखनिन्दार्थञ्च सर्वेभ्योऽधमस्यापि श्वपचस्य हरिभक्तत्वे सति सर्वश्रेष्ठत्वं सर्वेभ्यः श्रेष्ठस्यापि विप्रस्य हरिविमुखत्वे सति सर्वेभ्योऽधमत्वञ्चाह, विप्रादिति । अरविन्दनाभपादारविन्दविमुखात्तु पूर्वोक्तधनादिद्विषड्गुणयुतात् यद्वा "धर्मश्च सत्यं च दमस्तपश्च अमात्सर्यं ह्रीस्तितिक्षा ऽनसूया । यज्ञश्च दानं च धृतिः श्रुतं च व्रतानि वै द्वादश ब्राह्मणस्य ॥" इत्युद्योगपर्वणि धृतराष्ट्रं प्रति सनत्सुजातोक्तैर्द्वादशगुणैर्युक्ताद्विप्रादपि तदर्पितमनोवचनेहितार्थं तस्मिन्नरविन्दनाभे अर्पिताः मनआदयो येन तं श्वपचमपि वरिष्ठं मन्ये यतः स उक्तलक्षणः श्वपचः प्राणं प्राणोपलक्षितमात्मानं सकुलं पुनाति. न तु भूरिमानः उक्तद्विषड्गुणाभिमानी हरिपादारविन्दविमुखो विप्रः कुलमात्मानं च पुनाति ॥ १० ॥

मनोवचनाद्यर्पणादिना पूजां स्वानन्यभक्तहितायैव भगवान् स्वीकरोति नत्वन्यथेत्याह, निजलाभपूर्णः "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति स्वाभाविकेन निजानन्दलाभेनैव पूर्णः अविदुषः "ज्ञाज्ञौ द्वावजावीशानीशौ" इति श्रुतिप्रोक्तस्वाभिन्नाज्जीवात् स्वानन्योपासकादित्यर्थः । मानं पूजां करुणः कृपालुः आत्मनः सुखार्थं न वृणीते नेच्छति किन्तु यद्यन्मानं पूजां जन उपासको भगवते विदधीत कुर्यात्तत्तत् आत्मने स्वस्यैव स्यात् यथा मुखश्रीः मुखो मुख्यः राजादिः तदर्पिता प्रतिमुखेनाऽऽमात्यादिना श्रीः धनविद्याविनयादिरूपा लक्ष्मीः प्रतिमुखस्यामात्यादेरेव सुखदा भवति तद्वदित्यर्थः । यद्वा आश्रयगतं वस्तु आश्रितेपि गच्छतीति दृष्टान्तेनाह मुखे स्थिता श्रीः प्रतिमुखस्य दर्पणादिस्थस्यापि भवतीत्यर्थः । अनेन दृष्टान्तेन जीवो भगवदंशभूतः स्वरूपतोऽपि स्वायत्तस्थितिप्रवृत्तिमान्न भवति यदा तदा केन पदार्थेन भगवत उपकारं कुर्यादिति द्योतितम् अनेन दृष्टांतेन ब्रह्मप्रतिबिम्बो जीव इति शङ्का न कार्या व्यापकस्य प्रतिबिंबासम्भवात् न चाकाशस्य जले प्रतिबिंबो दृश्यते इति वाच्यम् आकाशगतस्य परिच्छिन्नस्य मेघादिद्रव्यस्य तथा द्रव्यमानत्वात् विस्तरस्तु अध्यासगिरिवज्रादौ द्रष्टव्यः ॥ ११ ॥

यस्माद्भगवान् भक्त्यैव तुष्यति तस्मात् अहं नीचोऽसुरजोऽपि विगतविक्लवो निःशङ्क ईश्वरस्य महि महिमानं यथामनीषं यथामति सर्वात्मना सम्पूर्णेन मनसा गृणामि वर्णयामि येन महिम्नाऽनुवर्णितेन अजया प्रकृत्या गुणविसर्गं संसारमनुप्रविष्टः पुमान् पूयेत शुद्ध्येत ॥ १२ ॥

ब्रह्मादिषु कृपावलोकनं कुरु मन्युं चोपसंहरेति प्रार्थयते, सर्वे इति द्वाभ्याम् । हे ईश ! सत्त्वधाम्नः प्रकृतिसम्बन्धवर्जितं स्वाभाविकं यत्सत्त्वं गुणविशेषस्तदाश्रयस्येत्यर्थः । अमी ब्रह्मादयः उद्विजन्तः बिभ्यतः, भवदीयगौरवयन्त्रिता इत्यर्थः । न च वयमिवाधुनैव त्वां शरणं गताः किन्तु प्राञ्चः कृपावलोकार्हा इति फलितोऽर्थः किंच तव रुचिरैरवतारैः विविधं क्रीडितं अस्याधिकारिजनस्य क्षेमाय रक्षणाय भूतये ऐश्वर्याय आत्मसुखाय मोक्षाय च न तु भयोत्पादनाय ॥ १३ ॥

तत्तस्मात् हे नृसिंह ! मन्युं नियच्छोपसंहर यदर्थेऽयं मन्युः सोऽसुरस्त्वया अद्य हतः यथा वृश्चिकसर्पहत्या परोद्वेजकस्य वृश्चिकस्य सर्पस्य च वधेन साधुरहिंसकोऽपि जनो मोदेत एकवधेन बहूनां भयनिवृत्तेः तथा असुरवधेन लोका निर्वृतिं सुखमिताः प्राप्ताः सन्तः प्रतियन्ति भवत्प्रसादं प्रतीक्षन्ते जना मुमुक्षवः तवैतद्रूपं अभवाय मोक्षाय स्मरन्ति ॥ १४ ॥

किंत्वमस्मद्रूपाद्बिभेषि ? नेत्याह—नाहमिति । हे अजित ! अतिभयानकमास्यं च जिह्वा च अर्कवन्नेत्रे च भ्रुकुटीरभसश्च उग्रा दंष्ट्राश्च यस्मिन् तस्मात् आंत्रमय्यः स्रजो यस्मिन् क्षतजा रुधिराक्ताः केसराः शङ्कुवदुन्नतौ कर्णौ च यस्मिन्निर्ह्रादेन भीता दिगिभा यस्मात् अरीन् भिंदन्तीति अरिभिदीनि नखाग्राणि यस्मिन् तस्मात्ते रूपादहं न बिभेमि रूपादित्यध्याहारः ॥ १५ ॥

तर्हिकुतस्तवभयमित्यत्राह, हे कृपणवत्सल ! दुःसहमुग्रं यत्संसारचक्रे कदनं दुःखं तस्मादहं त्रस्तोऽस्मि ग्रसतां आत्मपरमात्मस्मृतिज्ञानामिन्द्रियाणां अन्योन्यघातिनां बद्धजीवानां वा मध्ये स्वकर्मभिर्बद्धः "बन्धको भवपाशेन भवपाशाच्च मोचकः" इति स्मृतेर्भवतैव प्रणीतो निक्षिप्तो ऽस्मि हे उरुशत्तम ! अपवर्गशरणं मोक्षाश्रयं तें ऽङ्घ्रिमूलंप्रति प्रीतः सन्मां कदा ह्वयसे आह्वास्यसि ॥ १६ ॥

भाषा टीका ।

परञ्च मैं जानताहूं कि-धन अच्छे कुलमें जन्म रूप तप पाण्डित्य और तेज प्रभाव बल पौरुष बुद्धि इत्यादि सब भी परम पुरुष श्रीगोविन्द की प्रसन्नता के हेतु नही हो सके हैं क्योंकि गजेन्द्र के ऊपर भगवान् केवल भक्ति मात्र से प्रसन्न हुए ॥ ९ ॥

यस्मात्प्रियाप्रियवियोगसंयोगजन्मशोकाऽग्निना सकलयोनिषु दह्यमानः ।
दुःखौषधं तदपि दुःखमतद्धियाऽहं भूमन् ! भ्रमामि वद मे तव दास्ययोगम् ॥ १७ ॥
सोऽहं प्रियस्य सुहृदः परदेवताया लीलाकथास्तव नृसिंह ! विरिञ्चिगीताः ।
अञ्जस्तितर्म्यनुगृणन्गुणविप्रमुक्तो दुर्गाणि ते पदयुगालयहंससङ्गः ॥ १८ ॥
बालस्य नेह शरणं पितरौ नृसिंह ! नार्तस्य चागदमुदन्वति मज्जतो नौः ।
तप्तस्य तत्प्रतिविधिर्य इहाञ्जसेष्टस्तावद्विभो ! तनुभृतां त्वदुपेक्षितानाम् ॥ १९ ॥
यस्मिन्यतो यर्हि येन च यस्य यस्माद्यस्मै यथा यदुत यस्त्वपरः परो वा ।
भावः करोति विकरोति पृथक्स्वभावः सञ्चोदितस्तदखिलं भवतः स्वरूपम् ॥ २० ॥

भाषा टीका ।

पद्मनाभ श्रीहरि के पादारविन्द से विमुख द्वादश गुण विशिष्ट ब्राह्मण से मैं श्वपच (चांडाल) को श्रेष्ठ मानता हूं वह चांडाल कैसा हो कि श्रीहरि में अर्पण किया है मन वाणी चेष्टा अर्थ (द्रव्यादि) प्राण पर्यन्त जिसने, वह चांडाल कुल को पवित्र करता है, और अभक्त, गर्व वाला ब्राह्मण अपने आत्मा को भी पवित्र नहीं कर सक्ता है ॥ १० ॥

और हमारे प्रभु श्रीहरि तौ निज लाभसों पूर्ण हैं दयालु हैं अत एव अज्ञजन से मान की इच्छा नहीं करते परंच यह जन जो कुछ श्रीहरिके अर्थ मान (पूजोपहारादि.) करता है वह अपने ही लिये होता है जैसे साक्षात् मुख का अलंकार प्रतिबिंब में होता है ॥ ११ ॥

तस्मात् सर्व प्रकार से विगत शंका वाला मैं भी यथा मति ईश्वर के महिमा को वर्णन करता हूं यद्यपि मैं माया के गुणों से रचित संसार में प्रविष्ट और नीच असुर जाति हूं तौभी गुण वर्णन से पवित्र हो जाऊंगा क्योंकि ? जिसके गुण वर्णन करने से पुरुष पवित्र होजाता है ॥ १२ ॥

हे ईश ! ये सब ब्रह्मादिक सत्त्व धामा आप के किङ्कर हैं. और सब आप से डरते हैं, और हमारे असुर लोगों के सदृश वैर भाव से भक्त नहीं किंतु श्रद्धापूर्वक हैं, और आपके रुचिरावतार धारण करके जो विक्रीडित है वह इस जगत के क्षेम और वृद्धि के अर्थ हैं तथा आत्म सुख के लिये भी हैं ॥ १३ ॥

तस्मात् कोप को शांत कीजिये और इस असुर को आपने अच्छा मारा क्योंकि साधु जन भी वृश्चिक (विच्छु) सर्प की हिंसा से सुख ही पाते हैं और संपूर्ण लोक भी सुखित होकर आप के क्रोध शांति की प्रतीक्षा कर रहे हैं हे नृसिंह ! और आप के इस रूप को मनुष्य भय निवृत्ति के लिये स्मरण करते हैं ॥ १४ ॥

हे अजित ! अत्यंत भयानक मुख, जिह्वा, और सूर्य सदृश नेत्र, और भृकुटियों का आटोप और उग्रडाढे जिसमें और आंतों की माला, रुधिर की केसर, शंकु सदृश कर्ण जिसमें, शब्दा से डरे है दिग्गज जिसके, वैरी के भेदन करने वाले नखाग्र हैं जिसमें ऐसे आप के इस रूप से मैं नही डरता हूं ॥ १५ ॥

किन्तु हे कृपावत्सल ! इस संसार के दुसह दुःख में बडा दुःखी हूं क्योंकि ? अपने कर्मों के बंधन में बंधा हुआ मैं इन हिंसक जीवो में पडा हूं अत एव संसार के दुःखों से डरता हूं हे अति कमनीय ! मेरे ऊपर प्रसन्न हो मोक्ष के गृह रूप आप के चरणारविन्दों में कब बुलाओ गे ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दास्ये सति मत्प्रीतिरिति चेत्तर्हि नानायोनिषु क्लिश्यमानस्य मम दास्यज्ञानाभावात्त्वमेव तदुपदिशेति प्रार्थयते, यस्मात्प्रियैरप्रियैश्च यथासंख्यं वियोगसंयोगाभ्यां जन्म यस्य तेन शोकाग्निना सकलयोनिषु दह्यमानोऽस्मि दुःखस्य प्रतीकारः कार्य इति चेत्तत्राऽऽह दुःखस्यौषधं प्रतीकारस्तदपि दुःखमेव एवमप्यतद्धिया देहाद्यभिमानेन मुह्यामि अतो हे भूमन्विभो ! मे तव दास्यरूपं योगं निस्तारोपायं वद ॥ १७ ॥

ननु, दास्ययोगेन प्रवृत्तस्यापि तदन्तरायभूतानां पूर्वोक्तानां दुःखानां कुतः परिहारस्तत्राह—सोऽहं त्वद्दासः सन् भो नृसिंह तव लीलाकथा अनुगृणन्दुर्गाणि महादुःखान्यञ्जसा तितर्मि तरामि नगणयिष्यामीत्यर्थः । तत्र हेतुः गुणै रागादिभिर्विशेषेण प्रमुक्तः सन् तत्कुतः ते पदयुगमेवालयो येषां भक्तानां तएव हंसाः ज्ञानिनस्तैः सङ्गो यस्य मम सोऽहम् कथंभूतस्य कथास्तत्राऽऽह प्रियस्येत्यादि कुतो ज्ञाताः विरिञ्चेन गीतास्तत्सम्प्रदायप्रवृत्ताः तथाचाथर्वणी श्रुतिः "देवाह वै प्रजापतिमब्रुवन्" इत्यादि दास्ये प्रवृत्तस्य भवदनुग्रहेण सत्सङ्गस्ततो वीतरागतया भगवद्गुणानुवर्णनं ततश्च न दुःखाभिभवः स्यादिति वाक्यार्थः ॥ १८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, दुःखैस्तप्तस्यैतत्प्रतीकारो लोके प्रसिद्ध एव किं मद्दास्यादिना, तत्राऽऽह—बालस्येति । भो नृसिंह ! तप्तस्य तत्प्रतिविधिर्दुःखप्रतीकार इह लोके योऽञ्जसेष्टः स त्वयोपेक्षितानां तावदेव क्षणमात्रमेव नत्वात्यन्तिकः तदेवाऽऽह बालस्य पितरौ शरणं रक्षकाविह न भवतः ताभ्यां पाल्यमानस्यापि तस्य दुःखदर्शनात् कचिद्‌जीगतांविपु ताभ्यामेव तद्वधदर्शनाच्च, न चार्तस्य रोगिणोऽगदमौषधं शरणम् कृतेप्यौषधे मृत्युदर्शनात् न चोदन्वति समुद्रे मज्जतः पुंसो नौः शरणं तया सह मज्जनदर्शनात् अतस्त्वमेव शरणमित्यर्थः । अथवैवं काका व्याख्येयं तप्तस्य तत्प्रतिविधिर्य इह तावत्प्रसिद्धः स त्वदुपेक्षितानां किमञ्जसेष्टोऽपितु नेष्ट एव यद्वा यस्तावदिह प्रतिविधिरिष्टः स किमञ्जसा नैवाञ्जसेत्यादि योज्यम् बालस्येत्यादि पूर्ववदेव ॥ १९ ॥

ननु, कचित्कुतश्चित्केनचित्कदाचित्कश्चिद्रक्षकोपि दृश्यत एवेत्याशङ्क्य तत्रापि तत्तद्रूपेण त्वमेव रक्षक इत्युररीकृत्य तस्यैव सर्वात्मतामाह—यस्मिन्निति । अपरोऽर्वाचीनः पित्रादिः परो ब्रह्मादिर्वा भावः कर्ता तत्तत्कारकैर्यद्यत्करोति तत्सर्वं भवत एव स्वरूपं नतु पृथक् यस्मिन्नधिकरणे यतोनिमित्तात् यर्हि यस्मिन्काले येन करणेन येन हेतुकर्त्रा सञ्चोदितश्च यस्य सम्बन्धि यस्मादपादानाद्यस्मै सम्प्रदानाय यदीप्सिततमं यः कर्तेत्येवं सप्तविभक्त्यर्थाः यथा येन प्रकारेणेति क्रियाविशेषणभूतानामव्ययानामर्थः पृथक्स्वभावः सत्त्वादिप्रकृतिः करोत्युत्पादयति विकरोति रूपान्तरं नयतीति ॥ २० ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु, भयं चेत्तद्दुःखदर्शनजं किन्तत्संसारचक्रे दुःखमित्यपेक्षायां तद्दर्शयन्नात्मानं विशिनष्टि—तस्मादित्यर्द्धेन । येन कर्मणाऽहं बद्धः तस्मात्कर्मणो निमित्तात्प्रियैरप्रियैश्च विषयैर्यथासंख्यं वियोगसंयोगौ ताभ्यां जन्म उत्पत्तिर्यस्य तेन शोकाग्निना सकलयोनिषु दह्यमानोतीव दुःखितोऽहमित्यर्थः भ्रमामीत्यन्वयः तर्हि दुःखनिमित्तकर्मनिवृत्त्युपायमनुतिष्ठेत्यपेक्षायामन्तरेण भवद्दास्यमन्यन्निःशेषदुःखनिवृत्त्युपायभूतं नास्त्येव कथंचित्सदपि दुःखात्मकमेवेत्याह दुःखौषधमिति यद्दुःखस्यौषधं प्रतीकारात्मकं तदपि दुःखं दुःखात्मकमित्यर्थः दुःखस्य प्रतीकारो हि दुःखनिमित्तदुरितनिरसनेन भवति निःशेषदुरितनिवर्त्तकं च न किञ्चिदन्यदस्ति प्रतिपदोक्तप्रायश्चित्तादिकं न विशेषदुरितनिवर्त्तकं प्रत्युत दुःखात्मकं चेत्यर्थः अतो हे भूमन् अतद्धिताय तज्जनहिताय न भवति अतद्धियाहमिति पाठे अहं देहात्माभिमानेन भ्रमामि अतस्तव दास्ययोगं दिश तव नित्यदास्यसम्बन्धं देहि वदेति पाठे उपदिश नित्यप्रवृद्धत्वद्दास्यसम्बन्धयान्यथा भवेयं तथा मामनुगृहाणेत्यर्थः ॥ १७ ॥

एवं कोपोपशमः प्रार्थितः भगवद्दास्यमेव दुःखौषधमिति चोक्तम् "पूयेत येन हि पुमाननुवर्णितेन" इति भगवद्वर्णनामात्मविशुद्धिफलकमित्युक्तम् अथ त्वदनुग्रहेण प्रवृद्धनित्यभवद्दास्यसम्बन्धोऽहं यथामति त्वां स्तुवन् दुःखनिमित्तकर्मभिर्विमुक्तः सर्वाणि दुःखानि यथा तरेयं तथा अनुगृहाणेत्याह—सोहमिति । सोहं त्वदनुग्रहेण प्रवृद्धनित्यभवद्दास्यसंबन्धोहं सुहृदो हितैषिणः प्रियस्य मम निरतिशयप्रीतिविषयस्य परदेवतायास्तव ब्रह्मादिभिर्गीताः लीलारूपव्यापारविषयाः कथाः अनुगृणन् गुणविप्रयुक्तः सत्त्वादिगुणमूलककर्मबन्धैः रागादिभिर्वा विमुक्तः ते तव पदयुगलमेवालयमाश्रयो येषां ते भक्तास्त एव हंसाः परिशुद्धा जनास्तैः सङ्गो यस्य तादृशः अञ्जस्तितर्मि सुखेन तितर्मि अतितरामि तथानुगृहाणेत्यभिप्रायः अत्रायं क्रमः तावत्त्वदनुग्रहेण सत्सङ्गस्ततो भगवद्गुणवर्णनं ततो विरागः तस्त्वद्भक्त्या दुःखनिमित्तकर्मक्षयद्वारा संसृतेस्तरणमिति ॥ १८ ॥

एतत्सर्वं त्वदनुग्रहेणैव भाव्यम् नतूपायान्तरेणेति कैमुत्यन्यायेन वक्तुं तावत्त्वदुपेक्षितानां न दुःखप्रतिक्रियास्तीत्याह—बालस्येति ! हे नृसिंह ! इह लोके बालस्य त्वदुपेक्षितस्य पितरौ मातापितरौ न शरणं न रक्षकौ एवमार्त्तस्य रोगपीडितस्य त्वदुपेक्षितस्यागदमौषधं न शरणं तथोदन्वति समुद्रे मज्जनस्त्वदुपेक्षितस्य नौर्न शरणं पित्रादिषु सत्स्वपि बालादीनां विनाशदर्शनादिति भावः । अतो हे विभो नृसिंह ! इह लोके तप्तस्य दुःखितस्य तत्प्रतिविधिस्तापप्रतीकारोपायः तावत्प्रसिद्धः स त्वदुपेक्षितानां त्वामनाश्रितानां तनुभृतां शरीरमेव पोषणपराणां किमञ्जसेष्टः अपितु नेष्ट एव बालादिदुःखोपशमने एव पित्रादयो न प्रभवः किंपुनर्निःशेषदुःखोपशमने न प्रभवइत्यतस्त्वदनुग्रहेणैव निःशेषं दुःखात्मकसंसृतिनिवृत्तिरिति संसृतिचक्रादुत्तारकस्त्वमेवेति भावः ॥ १९ ॥

यतस्त्वमेवंभूतोऽतः संसृतिचक्रपतितं त्वत्प्रपन्नं मामुत्तारयेति विज्ञापयिष्यन् त्वत्प्रपत्तिमन्तरेण न कोप्यात्मानं तारयितुं प्रभुरिति वक्तुं तावदाचार्यादिमुखेन कारितमपि त्वच्छरणवरणं त्वत्कारितमेव यतस्तत्तत्क्रियाश्रयकर्त्रादिकारकषट्कसम्बन्धिशरीरकत्वेन च कालशरीरकत्वेन च त्वमेवावस्थित इत्याह—यस्मिन्निति । यस्मिन्नित्यधिकरणकारकनिर्देशः यत इति हेतुत्वशक्त्याश्रयं निर्दिश्यते यर्हीत्यनेन कालः येनेति करणत्वशक्त्याश्रयं यस्येति सम्बन्धी यस्मादित्यपादानत्वशक्त्याश्रयं यस्मै इति संप्रदानत्वशक्त्याश्रयं यथेत्यनेनोक्ताधिकरणादिनः प्रकारः यदिति कर्मत्वशक्त्याश्रयं उतापिच य इत्यनेन प्रयोजककर्त्ता सञ्चोदिति इत्यनेन प्रयोज्यकर्त्ता तावेवापरः परश्च यद्वा पर उत्कृष्टः अपरोऽवरः भावः पदार्थः सप्रकारकारकषट्करूपः सम्बन्धिरूपः कालरूपश्च यो यः पदार्थः पृथक्स्वभावप्रविभक्तः स्वभावो यस्य सः पृथक्स्वभावः कर्तृकर्मद्वारा तन्निष्ठक्रियाश्रयत्वमधिकरणत्वद्रव्यगुणक्रियान्वितमनिरूपितत्वे तत्कारणत्वे च सति सव्यापारनिर्व्यापारनिष्ठत्वं हेतुत्वं धातूपात्तव्यापारजन्यफलाव्यवहितपूर्वव्यापाराश्रयत्वं करणत्वं सम्बन्धसामान्याश्रयत्वं सम्बन्धित्वम् प्रकृतधातूपात्तव्यापारानाविष्टत्वे सति तज्जन्यविभागाश्रयत्वमपादानत्वं दानस्य कर्मणा क्रियया वा सम्बध्यमानत्वं सम्प्रदानत्वं धातूपात्तव्यापारव्यधिकरणतज्जन्यफलाश्रयत्वं कर्तृत्वं प्रकृतधातूपात्तव्यापारानुकूलव्यापाराश्रयत्वं प्रयोजकत्वं धातूपात्त-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

व्यापाराश्रयत्वं कर्तृत्वमित्येवं सप्तविभक्त्यर्थानां प्रविक्तस्वभावः कालस्यत्वात्मव्यतिरिक्तपरिच्छेदकत्वं स्वभावः एवं पृथक्स्वभावः उच्चावचं रूपः करोति उत्पादयति विकरोति विनाशयति उत्पादनाश्रयो विनाशनाश्रयोवा भवति तदखिलं कारकषट्कादिरूपं वस्तु भवतः स्वाभाविकं रूपं शरीरमित्यर्थः एवंच सर्वभावान्तरात्मतया तच्छरीरकतयावस्थितस्य तवैव सर्वे निग्रहानुग्रहादयः सद्वारकव्यापारा इतिभावः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

देवादियोनौ सुखसम्भवात्तस्मात्संसारचक्रात्कथं बिभेषीति तत्राह—यस्मादिति । देवादिसकलयोनिषु प्रियस्य वियोगोऽप्रियस्य संयोगः तयोर्जन्म यस्य स तथा स च शोकाग्निस्तेन प्रियादिवियोगादिना जन्मना च यः शोकाग्निस्तेन वा दह्यमानोहं यत् दुःखपरिहारलक्षणं कर्म तदपि दुःखरूपमिति मत्वा अतद्धिया नतद्धीरतद्धीस्तया दुःखपरिहारौषधाज्ञानेन भ्रमामि कुत्रगतेन केनौषधेन वा मे सुखं स्यादित्यनवस्थितिं प्राप्तोस्मीति यस्मात्तस्मादिदमेव संसारनाशनमिति मत्वा भवन्तं प्रार्थये किं तदाह वदेति तव दास्यलक्षणं योगमौषधं वदानुगृहाणेत्यन्वयः ॥ १७ ॥

मदुपासनाद्युपायमन्तरेण दास्यमात्रेण तव किं स्यादित्याशङ्क्य बहुप्रयत्नसाध्यामुपासनामन्तरेणोपायोस्तीत्याह । सोहमिति । गुणमयसंसाराद्विप्रमुक्तः पादयुगलमेवालयमाश्रयोयेषां ते तथा ते च हंसाः निस्सङ्गाः परमहंसास्तेषां सङ्गः सेवालक्षणो यस्य स तथा दुर्गाणि कलत्रादीनि नरकाणि वा ॥ १८ ॥

नृसिंह आर्तस्येत्यनेन सन्ध्यकरणेन दृष्टान्तदार्ष्टान्तिकयोर्मिहद्वैलक्षण्यमस्तीति ज्ञापनायाज्ञानजनबुद्ध्यवताराय चेति ज्ञातव्यं निदाघतप्तस्य जलादिना तर्पणविधिराप्यायनलक्षणपरिहारः ज्वराद्यभिभूतस्य ज्वरादिपरिहारप्रकारोयत् इष्टः इष्टसाधनञ्च ॥ १९ ॥

ब्रह्माद्यन्यतमइष्टः किं न स्यादित्याशङ्क्य कर्तृत्वाद्यभिमतस्य ब्रह्मादेः सत्तायाअपि यदा यदधीनत्वं प्रमाणिकं तदा सर्वस्माद्धरेरिष्टत्वं किं वक्तव्यमितिभावेनाह—यस्मिन्निति । अपरः कालादियः परो ब्रह्मादिर्वा यस्मिन्नधिष्ठाने स्थित्वा यतोमृदादेर्येहिं यस्मिन्काले येन चक्रसलिलादिना यस्यादृष्टादेः सहायेन यस्मै जलाहरणाद्यर्थं यथाविधिना । यं भावं घटादिपदार्थं करोति विकरोति सामान्यतोविशेषतोवा कीदृशः पृथक् स्वभावः कार्याद्भिन्नस्वरूपः सञ्चोदितत्वादृशेन पुरुषेण प्रेरितः तदखिलं कार्यकारणलक्षणं सर्वं भवतः स्वरूपञ्च त्वदधीनसत्तात्मकमित्यन्वयः "कर्तृकर्मक्रियादीनां सत्तावृत्तिस्तथैवच । विष्ण्वधीनं यतः सर्वं सर्वरूपस्तदुच्यते" इति वचनान्नाभेदोत्रेति बोद्धव्यम् ॥२०॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ननु, यावदाह्वयामि तावत पैतृकं राज्यसुखमनुभवेति चे. दुःखमेव तत् तावच्च प्रार्थनीयस्त्वेष एवेत्याह—यस्मादिति दास्यं दासस्य कर्म तच्च श्रीभगवत्प्रतिमापरिचर्या तदेव योगस्त्वत्संयोगरूपस्त्वम ॥ १७ ॥

तत्तदुपद्रवहानिस्तु तत्र स्वतस्सिद्धप्रकारान्तरेण भवत्स्फूर्तिविशेषादेव स्यादित्याह—सोहमिति ॥ १८ ॥

नान्यत इत्याह—बालस्येति । तर्हि कथं शास्त्रान्तरे तत्तत्प्रतीकार इष्यते तत्राह—तप्तस्येति च त्वदुपेक्षितानां सज्ञानत्वद्विषयोपेक्षायां त्वद्बहिर्मुखानामित्यर्थः । तेषामर्थं साक्षादुपदेशेन यः प्रतिविधिः तत्रतत्रेष्टः स तावदेव आपातधैर्यार्थंमेवेत्यर्थः । तेषामतस्तत्रापि सर्वभक्ताश्रयपरमशक्तिना तवैव रक्षणमितिभावः ॥ १९ ॥

तस्य तादृशत्वमेव दर्शयति—यस्मिन्निति । टीकायां योऽपरोऽर्वाचीन इति यद्यत् कारकैरिति च पाठोऽवगन्तव्यः । स्वकृमिति स्वोपादान कार्यभूतमित्यर्थः ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु, मदङ्घ्रिसेवया किं करिष्यसि पैतृकं त्रिजगदैश्वर्यंसुखं तावद्भुंक्ष्वेत्यत आह । यस्मात् प्रियैरप्रियैश्च यथा सख्यं वियोगसंयोगाभ्यां जन्म यस्य तेन शोकाग्निना सकलयोनिष्विति राजदेहेपि तादृशशोकाग्निदाहस्य नासद्भाव इतिभावः ननु शोकाग्नेः प्रतीकारा अपि बहवो वर्त्तन्त इत्यत आह दुःखस्यौषधं प्रतीकारास्तदपि दुःखमेव तदपि अतद्धिया अदुःखबुद्ध्यैव सुखादियोनावप्यहं सुखीति बुद्ध्यैव भ्रमामि अतस्तव दास्ययोगमुपायं वद केनोपायेन तव दास्यं प्राप्नुयाम् तत्त्वमेवोपदिश त्वद्दास्यवत्त्वे सति नानायोनिगतस्यापि न मे किमपि दुःखमिति भावः ॥ १७ ॥

ननु मद्दास्ये वर्त्तमानेपि त्वया प्रस्तुत संसारिकदुःखस्यौषधमन्यदप्यन्वेष्टव्यमेवेति तत्र साटोपं स प्रगल्भास्फोटश्चाह सं त्वदनन्यभक्तः श्रीनारदभृत्यत्वेन प्रसिद्धः प्रह्लादोहम् अन्य न ज्ञानकर्मादिकं स्वप्नेप्यङ्गीकरोतीति भावः । तव लीलाकथागृणान् कीर्त्तयन्नेव गुणान् कीर्त्तयन्नेव गुणविप्रमुक्तो गुणातीत इति यद्यहं गुणातीतोऽभवं तदा मे कुतः प्रस्तुतदुःखं दुःखौषधं वेति भावः । ननु गुणातीतस्य भक्तस्यापि दुःखानि दृश्यन्ते तत्राह दुर्गाणि त्वद्विरहसन्तापान् अञ्जः शीघ्रं तितरामतिशयेन तरामीति त्वत्साक्षात्सेवाप्राप्तावपि त्वत्कीर्तनप्रसादान्मे नाति विलम्बो भावीति भावः त्वत्पदयुगस्य कमलत्वात् तदालयैर्हंसैस्त्वत्पार्षदैर्मां नेतुमागच्छद्भिः सहसंगो यस्य सः विरहगीताद्यति कथानां प्रामाण्यं नच त्वत्कथाकीर्तने केषामपि श्रम इत्याह सुहृदः सखा भक्तानां सख्युः परदेवतायाः दास्यभक्तानां मद्विधानां प्रभो ॥ १८ ॥

**माया मनः सृजति कर्ममयं बलीयः कालेन चोदितगुणाऽनुमतेन पुंसः ।
छन्दोमयं यदजयाऽर्पितषोडशारं संसारचक्रमज ! कोऽतितरेत्त्वदन्यः ॥ २१ ॥**

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

नच दुःखस्य प्रतीकारा अपि त्वां विनाफलन्तीत्याह—बालस्य पितरौ शरणं रक्षकाविह न भवतः ताभ्यां पाल्यमानस्यापि तस्य दुःखदर्शनात् क्वचिदजीगर्तादिषु तद्वधदर्शनाच्च नचार्तस्य रोगिणः अगममौषधं शरणं कृतेप्यौषधे मृत्युदर्शनात् न च उदन्वति समुद्रे मज्जतः पुंसो नौः शरणं तयासहैव मज्जनदर्शनात् अतस्तप्तस्य दुःखिनस्तत्प्रतिविधिर्दुःखप्रतीकारो य इह इष्टः स त्वदुपेक्षितानां त्वदिच्छाया अविषयीभूतानां जनानां नेति पूर्वेणान्वयः तावदिति वाक्यालङ्कारे ॥ १९ ॥

केषाञ्चित् यः पित्रादिको रक्षको दृश्यते सोऽपि त्वद्रूप एवेत्याह—यस्मिन्निति । अपरोऽर्वाचीनजनः परः प्राचीनो ब्रह्मादिर्वाभावः कर्त्ता कारकैर्यत् यत् करोति तत् सर्वं भवतो मायाशक्तियुक्तस्य स्वरूपं स्वीयं रूपमित्यर्थः । यस्मिन्नधिकरणे यतो निमित्तात् यर्हि यस्मिन् काले येन करणेन येन हेतुकर्त्रा सञ्चोदितश्च यस्य सम्बन्धि यस्मादुपादानात् यस्मै संप्रदानाय यदीप्सिततमं यः कर्त्तेत्येवं सप्तविभक्त्यर्थः यथा येन प्रकारेणेति क्रियाविशेषणभूतानामव्ययानामर्थाः त्वत्तो निर्गुणात् पृथक्स्वभावः सत्त्वादि प्रकृतिः करोति उत्पादयति विकरोति रूपान्तरं नयति ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

चरणप्राप्त्युपायः भगवत्प्रसाद एवेति प्रीत इत्यनेनोक्तमथ त्वत्प्रसादकारणं त्वद्दास्यमेव तत्त्वमेवोपदिशेति प्रार्थयते—यस्मादिति । यस्मात् तद्ब्रह्म न तदतत्संसारस्तद्धिया संसाराभिनिवेशेन प्रियाप्रियाभ्यां वियोगसंयोगौ वियोसंयोगौ च जन्म च तैर्यः शोकाग्निस्तेन सकलयोनिषु दह्यमानः तातप्यमानो भ्रमाम अस्य दुःखस्य त्वद्दास्यव्यतिरिक्तं यदौषधं तदपि दुःखमेव अतो हे भूमन् तव दास्ययोगं सर्वदुःखघ्नं मे मह्यं वद ॥ १७ ॥

हे नृसिंह ! सोऽहं भवद्दासस्सन् ते पादपद्मयुगे आलयो निष्ठा येषां परमहंसानां सारग्राहिणां भागवतानां संगो यस्य सः अत एव गुणैः रागादिभिः विशेषेण प्रमुक्तः तव लीलाकथाः अनुगृणन् दुर्गाणि अञ्जः अनायासेन तितर्मि तरामि ॥ १८ ॥

हे नृसिंह ! हे विभो ! तावत्त्वदुपेक्षितानां त्वत्तोऽप्राप्तत्वद्दास्यानां मध्ये इह संसारे बालस्य शरणं दुःखहरं पितरौ न आर्त्तस्य रोगार्दितस्यागदमौषधं शरणं न उदन्वति समुद्रे मज्जतो नौः न तप्तस्य च यस्तत्प्रतिविधिरिहाञ्जसेष्टस्तच्छरणं न किन्तु त्वमेव सर्वेषां शरणमिति भावः ॥ १९ ॥

"सर्वं खल्विदं ब्रह्म, तत्त्वमसि" "क्षेत्रज्ञं चापि मां विद्धि" "आत्मेति तूपगच्छान्ति ग्राहयन्ति च" इति श्रुतिस्मृतिसूत्रसाधितं स्वात्मनः त्वदात्मकत्वानुसन्धानं विना संसारचक्रं कोऽतितरेदित्याह—यस्मिन्निति द्वाभ्याम् । यस्मिन्नधिकरणे यतो निमित्तात् यर्हि यस्मिन् काले येन करणेन येन हेतुकर्त्रा सञ्चोदितश्च यस्य सम्बन्धि यस्मादुपादानात् यस्मै संप्रदानाय यदीप्सिततमं यश्च स्वयंकर्त्ता यथा येन प्रकारेण पृथक् स्वभावः करोति उत्पादयति विकरोति रूपान्तरं नयति भावः अन्योन्ययुक्तः पदार्थः अपरः प्राकृतः परोऽप्राकृतः तदखिलं भवतः स्वरूपं भवदात्मकमित्यर्थः "एतदात्म्यमिदं सर्वम्" इति श्रुतेः ॥ २० ॥

भाषा टीका ।

हेभूमन् ! इसप्रिय अप्रिय पदार्थों के संयोग वियोग से उत्पन्न हुआ जो अग्नि तिस्से सेर्व योनियों में जलता हुआ दुःख की शान्ती के लिये जो औषध करताहूं वहभी दुःख रूपही है परञ्च उससमय मेरी उसमे दुःख की वुद्धि नही रहती है इस तरह से इस संसार में भटक रहाहूं इसलिये अब आप अपना दास्य कैंकर्य रूप सिद्ध महौषधि बताइये कि जिस्से फिर न भटकूं ॥ १७ ॥

हे नृसिंह देव ! अब मैं परमप्रिय और सुहृद तथा परात्पर देव जो आप तिनकी ब्रह्मादिकों की गाई हुई जो आपकी कथा ये तिनको गाताहुआ विन प्रयास गुणों से छूटकर दुःखों को तर जाऊंगा केवल इतना अपेक्षित है कि आपके चरण कमल घर हैं जिनके एसे हंसो का सङ्ग मुझे हो ॥ १८ ॥

हे विभो ! हे नृसिंह ! आपने जिनोंकी उपेक्षा की है उन पुरुषों का कोई रक्षक नहीं, जैसे कि, इस संसारमें आपकी उपेक्षा होने से वालक के माता पिता रक्षक नही हो सके रोगी की औषध अच्छानहीं करसकी, समुद्रमें डूवते हुये को नौका नहीं बचासकी इसी प्रकारी तप्तकी शान्तिके लिये जो कुछ कहा उससे उस्की शान्ति नही हो सकी जबतक आपकी कृपा नहीं ॥ १९ ॥

ब्रह्मा से लेकर अपने पिता पितामह प्रभृति जो हुए हैं करते हैं विकार को प्राप्त होते हैं जिस अधिकरण में जिसकाल में जिस कारण से जिसके लिये जिस हेतु से जैसे जो कुछ कार्य जाता है वह सब आपकाही स्वरूप है ॥२०॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अतोऽन्यस्य रक्षकस्याभावादसंसारित्वाच्च नित्यमुक्तस्त्वमेव मां शरणागतं रक्षेति प्रार्थयते—मायेति द्वाभ्यां । त्वदंशस्य पुंसोऽनुमतेनेक्षणरूपेणानुग्रहेण मनो मनः प्रधानं लिङ्गं माया सृजति

स त्वं निहत्य विजितात्मगुणः स्वधाम्ना कालो वशीकृतविसृज्य विसर्गशक्तिः ।
चक्रे विसृष्टमजयेश्वर ! षोडशारे निष्पीड्यमानमुपकर्ष विभो ! प्रपन्नम् ॥ २२ ॥
दृष्टा मया दिवि विभो ऽखिलधिष्ण्यपानामायुः श्रियो विभव इच्छति यान् जनोऽयम् ।
येऽस्मत्पितुः कुपितहासविजृम्भितभ्रूविस्फूर्जितेन लुलिताः स तु ते निरस्तः ॥ २३ ॥
तस्मादमूस्तनुभृतामहमाशिषोऽज्ञ आयुः श्रियं विभवमैन्द्रियमाविरिञ्च्यात् ।
नेच्छामि ते विलुलितानुरुविक्रमेण कालात्मनोऽपनय मां निजभृत्यपार्श्वम् ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कथंभूता कालेन चोदिताः क्षोभिता गुणा यस्याः कथम्भूतं मनः कर्ममयं कुर्वद्रूपम् बलीयो दुर्जयम् छंदोमयं वेदोक्तकर्मप्रधानञ्च अजया जीवस्याविद्यया तद्भोगार्थमर्पिताः षोडश अरा विकारा यस्मिन् यदेवंभूतं संसारचक्रात्मकं मनस्तत् कोऽतितरेत्, मां अज ! त्वदन्यः त्वत्तः पृथक् स्थितः त्वामभजन्नित्यर्थः ॥ २१ ॥

ननु, ममापि मायासम्बन्धात्कर्तृत्वाद्यविशेषाच्च त्वत्तः कोविशेष इत्याह—स इति । स्वधाम्ना चिच्छक्त्या नित्यं विजिता आत्मनोबुद्धेर्गुणा येन स हि त्वम् यतः कालो मायाप्रेरकः अतएव वशीकृता विसृज्यानां कार्याणां विसर्गाणां साधनानाञ्च शक्तयो येन अत इक्षुदण्डवन्निष्पीड्यमानं मामुपकर्ष स्वसमीपं नय ॥ २२ ॥

ननु, लोकपालानां भोगान्भुंक्ष्व पित्र्यं वा राज्यमिदं दास्यामि किमिति संसारादुद्विजसे तत्राह—दृष्टा इति विभः । श्रियः सम्पदः विभव उद्भवः आयुरादयो दृष्टाइति काका तुच्छत्वमुक्तम्. तदेवाऽऽह येऽस्मत्पितुः कोपहासविकृतभ्रूभङ्गमात्रेण विध्वस्ताः सच त्वया निरस्तः ॥ २३ ॥

यस्मादेवं तस्मादाशिषो भोगान् अस्तत्परिपाकं विद्वानहमैन्द्रियमिन्द्रियैर्भोग्यं ब्रह्मणोभोगमभिव्याप्य किमपि नेच्छामि ते कालात्मन उरुविक्रमेण विलुलितान्विध्वस्तानणिमादीनपि ॥ २४ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

अथ त्वत्प्रपदनमन्तरेण कः पुमानतितरेत्संसारचक्रमित्याह—मायामनइति । त्वदन्यः त्वत्समाश्रयणविमुखः कः पुमान्संसारचक्रमतितरेत्,न कोपीत्यर्थः । संसारचक्रं चक्रवत्परिवर्त्तमानं संसारं चक्रशब्देन तत्र पतितस्य दृढतरावलम्बनमन्तरेण न यथा ततो निष्क्रमणं सम्भवति तथा संसारे पतितस्यालम्बनभूतं श्रीभगवन्तं भवन्तमन्तरेण न तस्मादतितरणं सम्भवतीत्यभिप्रेतम्. संसारं चक्रत्वेन रूपयन् तं विशिनष्टि, यद्यस्मिन्मनसि नाभिरूपे पुंसः परमपुरुषस्य अजया भगवन्मायया हेतुभूतया अर्पिताः षोडश ज्ञानकर्मोभयेन्द्रियव्यापाराः दश प्राणापानादिरूपाः पञ्च प्राणवृत्तयः मनोवृत्तिश्चेति षोडश एत एव अराणि यस्य तत्र तत्तज्ज्ञानकर्मोभयेन्द्रियव्यापाराणां मनोव्यापारानुविद्धत्वस्वाभाव्यात् तद्व्यापारपूर्वकत्वाच्च तदायत्तत्वेन तदर्पितत्वं मनोवृत्तेस्तु साक्षान्मनस एवाश्रयत्वात्तदर्पितत्वं यद्यपि मनःपर्यन्तानामिन्द्रियाणां प्राणायत्तस्थितित्वेन प्राणव्यापारपूर्वकत्वेन च प्राणवृत्तीनां साक्षात्परंपरया वा न मन आश्रयः तथापि मनोव्यापाराभावदशायां विद्यमानापि प्राणवृत्तिरज्ञाता अतएवासत्प्रायेति, तद्वृत्तिसत्ताज्ञानस्य मनोव्यापारपूर्वकत्वात्तस्यास्तदर्पितत्वमवगन्तव्यम्. यद्वा अजया हेतुभूतयार्पिताः षोडशैकादशेन्द्रियाणि पञ्च भूतानीति षोडश विकारा एवाराणि यस्य यदेतत्संसृतिचक्रमित्यन्वयः । संसारस्य सर्वेन्द्रियव्यापारपूर्वकत्वात्तद्वृत्तमवगन्तव्यम्. अस्मिन् पक्षे नाभित्वेन न किञ्चिद्निरूपितं यद्वा अजया नाभिरूपया हेतुभूतया चार्पिताः षोडशैकादशेन्द्रियपञ्चभूतात्मकानि अराणि यस्येत्यर्थः संसारचक्रस्यार्पितषोडशारत्वेऽजाया हेतुत्वमुक्तम्. सा किं साक्षादेव हेतुः ? नेत्याह, मायेति । मनस्सृष्टिद्वाराहेतुरिति भावः । किं तर्हि तस्याः सहकारिकारणमतआह, कालेनेति । कालेन सह माया मनस्सृजति कालसहकृता प्रकृतिर्मनः सृजतीत्यर्थः । कालोपि न स्वरूपेण प्रकृतेर्मनः सर्गे सहकार्यपितु गुणक्षोभद्वारेति वदन् कालं विशिनष्टि, चोदितगुणानुमतेनेति चोदिताः कालेन क्षुभिताः सत्त्वादयः गुणास्तैरनुमतेन सह कृतेन स्वचोदितगुणत्रयसचिवेन कालेन सहकृता भगवतो माया मनःसृजति संसारचक्रस्य दुस्तरत्वं भगवदाभिमुख्येतु सुतरत्वञ्चाविष्कर्तुं मनो विशिनष्टि, कर्ममयमिति । त्रिगुणात्मकप्रकृतिपरिणामरूपत्वेन स्वयमपि त्रिगुणात्मकत्वाद्रजोमयतया पुण्यपापरूपकर्मविषयप्रवृत्तिप्रचुरं बलीयः अनतिवर्त्यदोषं छन्दोमयं सत्त्वानुयानाच्छास्त्रावगतिसाधनप्रचुरम् इच्छामयमित्यर्थस्त्वनुपपन्नः छन्दशब्दः इच्छावाची न तु छन्दशब्दः अनेन सत्त्वप्राचुर्ये सति श्रीभगवदाभिमुख्येन संसृतिचक्रं सुतार्यमित्यभिप्रेतम्. एवंभूतं मनः सृजतीत्यन्वयः । तदेवं मनोदोषात्संसारानतिवृत्तिस्त्वत्समाश्रयणविमुखस्येत्युक्तं भवति त्वदन्यः कः संसारचक्रमतितरेत् इत्यनेन त्वदनन्यस्त्वतितरेदेवेति सूचितम् ॥ २१ ॥

तदेवाविष्कुर्वन् त्वदनन्यं मां संसारचक्रान्निर्गमयेति प्रार्थयते—स त्वं हीति । यः स्वमाया मनःसर्गद्वारा संसृतिचक्रे जीवलोकं पातयति स त्वमजया स्वकीयया मायया षोडशारे चक्रे संसारात्मके विसृष्टमत एव नितरां पीड्यमानमधुना

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

त्वां प्रपन्नं मां हे विभो ! अपकर्ष संसृतिचक्राद्बहिर्निर्गमय "य एव बन्धकः स एव मोचकः" इति न्यायेन त्वमेव ततो निर्गमयितुं समर्थइति भावः । सामर्थ्यमेव दर्शयंस्तं विशिनष्टि, नित्यबेत्यादिना । आत्मगुणाः स्वशरीरभूतप्रकृतिगुणा नित्यं विजिता आत्मगुणा येन नित्यास्पृष्टदेहधर्मेण स्वधाम्ना स्वस्वरूपेणैव यद्वा विजितात्मगुणो यः स्व आत्मा तस्य धाम्ना प्रकाशेनैव वशीकृतविसृज्यविसर्गशक्तिः विविधं सृज्या विसृज्याः जीवास्तेषां विसर्गे शक्तिर्यस्याः सा प्रकृतिः शक्तिर्वशीकृता येन स तथोक्तः कालशरीरकश्च वशीकृतसंसृतिनिमित्तप्रकृतित्वान्मोचयितुं त्वमेव प्रभुरिति भावः । नित्यविजितात्मेत्यादिना निसृज्यजीववर्गाद्ब्रह्मादिस्तम्बपर्यन्ताद्वैलक्षण्यमुक्तम् । अतः संसारिजीववर्गे न कोपि तन्मोचने दक्षः नहि स्वयं कारागृहबद्धोऽन्यं तादृशं मोचयितुं प्रभुरित्युक्तं भवति ॥ २२ ॥

ननु, त्वं बालस्तत्रैव किं संसारान्निर्विद्यसे भुंक्ष्व भोगानित्यत्राह-दृष्टा इति त्रिभिः । हे विभो ! अयं संसारिजनो यानिच्छति कामयते ते अखिलधिष्ण्यपानां इन्द्रादीनामायुरादयो मया विविच्य दृष्टाः श्रियः भोग्यभोगोपकरणादिसमृद्धयः विभवाश्च लोकाधिपत्यरूपमैश्वर्यम् आयुरादयो दृष्टा इति काका तुच्छत्वमुक्तं तदेवाह, येइति । येऽस्मत्पितुः कोपहासविकृतभ्रूभङ्गमात्रेण विलुलिताःध्वस्ताः स तु मत्पिता त्वया हतो निरस्तः ॥ २३ ॥

यस्मादायुरादयो मत्पितृदृष्टान्तेन तुच्छत्वेन दृष्टा तस्मात्तनुभृतां देहिनाम् अमूः अयुरादिरूपाः आशिषस्तत्परिपाकं विद्वान् अहइति च्छेदः,अहमुरुक्रम हे पन्द्रियम् इन्द्रियैरनुभाव्य मन्यददपि सुखमार्चरिच्चाद्ब्रह्मणोनुभाव्यमभिव्याप्यापि तथा कालात्मना कालरूपेण उरुविक्रमेण विपुलपराक्रमेण विपुलपादविक्षेपेण वा विलुलितान्विध्वस्तानखिलादीनपि न इच्छामि अतो निजभृत्यानां स्वपार्षदानां पार्श्वे समीपमेव मां प्रापय ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

संसारचक्रं भक्त्या जनितश्रीहरिप्रसादं विना दुस्तरं, प्रसादश्च निगृहीतमनसां दुःसाध्यो मनोमयत्वात्संसारचक्रस्यातः स एव सम्पाद्य इत्याशयेन संसारस्वरूपं निरूपयति—मायेति । चित्प्रकृत्याभिमतमायाप्रकृतिरुदितगुणानुमतेनोद्भूतरजआदिगुणानुसारिणा कालेन प्रेरितेनादृष्टेन च सहकारिणा पुंसो जीवस्य कर्ममयं नानाविकारकोशमतएव बलीयो निगृहीतुमशक्यं छन्दोमयं सङ्कल्पविकल्पलक्षणेच्छात्मकं यन्मनः सृजति हे अज ! तन्मनोमूलं संसारचक्रं त्वदन्यस्त्वदनुग्रहरहितः पुरुषः कोतितरेत्, न कोपीत्यन्वयः । केवलात्परिकरोपेतस्य बलाधिक्यं स्यादित्यभिप्रायेणाह अजयेति, अजया प्रकृत्याऽर्पिताः कल्पिता भिन्नवर्तिना मनसा सह षोडशेन्द्रियाणि पञ्च प्राणा एवारा दलस्थानीया यस्य तत्तथा तत् ॥ २१ ॥

"मनएव मनुष्याणां कारणं बन्धमोक्षयोः"इति श्रुतेः सम्यक् नियुक्तं मुक्तिनिमित्तं च त्वदनुग्रहेण स्यादित्याशयेनाह-सत्वमिति यस्त्वं स्वधाम्ना नित्यं विजिता आत्मनो देहस्य गुणा जननादिलक्षणा धर्मा जीवस्य वा दुःखादिलक्षणा येन स तथा यश्च कलयति जानाति सर्वमिति कालो वशीकृता स्वसमवेता विसृज्यस्य सुरनरादिनानाविधस्य जगतो विसर्गशक्तिर्विविधसृष्टिर्यस्मिन्स तथा हे ईश्वर ! स त्वं षोडशारे संसारचक्रे लिङ्गशरीरे वा अजया विसृष्टमुत्पन्नमतएव दुःखेन निष्पीड्यमानं तत्परिहाराय शरणं प्रपन्नं मां ततोऽपकर्ष उत्तर विभो ! समुद्धरणसमर्थ ॥२२॥

त्वया कस्मात्स्वर्गादैश्वर्यं नेष्यत इत्याशंक्य तस्य नश्वरत्वादित्याशयेनाह-दृष्टाइति । अखिलानां धिष्ण्यपानामिन्द्रादीनां विभवो हिरण्यलक्षणोर्थः अस्मत्पितुर्हिरण्यकशिपोः कुपितहासो दुर्हासस्तेन विजृम्भितयोः स्फुरितलक्षणयोर्भ्रुवोर्विस्फूर्जितेन विकासविशेषेण लुलिता विनाशिताः स तु हिरण्यकशिपुरपि ते त्वया ॥ २३ ॥

यस्मात्क्षणभंगुरास्तस्मात् इ अनित्या इति जानन्नैन्द्रियं श्रोत्रादीन्द्रियभोगयोग्यमिन्द्रियस्य विद्यमानं वा आविरिञ्चाद् विरिञ्चपर्यन्तं निजभृत्यानां मुक्तानां पार्श्वम् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सर्वस्यच तदधीनत्वं दर्शयंस्तदेकरक्ष्यत्वं स्थापयति-मायेति । मायातावत् कर्म मायादिरूपं मनःसृजति तस्मात् तस्य दुर्बलत्वात् छन्दोमयादिरूपं संसारचक्रं त्वत्कृपामप्राप्तः कोऽतितरेत्र कोपीत्यर्थः ॥ २१ ॥

पुनस्तदेव विशेषतो दर्शयन् स्वामीष्टं निवेदयति——स त्वमिति ॥ २२ ॥

पुनरपि स्वदुःखदर्शनया कृपयन् स्वाभीष्टं प्रार्थयते—दृष्टा इति द्वाभ्याम् । एकैव निजपरमासीष्टरूपा तत्सेवकचरणानुगत्या साक्षाच्चरणारविन्दप्रेमसेवादैन्यभङ्ग्याच्छाद्य बहुविधं प्रार्थ्यत इति ज्ञेयं पूर्वत्र परत्र च ॥ २३ ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु, यद्यहमेव सर्वरूपस्तर्हि संसारोप्यहमेव कुतो मद्रूपात् संसारादस्माद्विमोक्तुमिच्छसीत्यतआह द्वाभ्यां । माया त्वदीयबहिरङ्गा शक्तिर्मनोमहदाद्यात्मकं लिङ्गदेहं जीवस्योपाधिं सृजति कर्माणि लौकिकवैदिकव्यापारास्तन्मयं बलीयो दुर्जयं पुंसस्त्वदंशस्य अनुमतेन ईक्षणरूपेण चोदिताः क्षोभिता गुणाः यस्याः सा छन्दोमयं वासनामयं "छन्दः पद्येभिलाषेच" इत्यमरः यदेव चक्रं खलु संसारचक्रं भवेत् कीदृशम् अजया अविद्यया अर्पितं वस्तुतो निःसङ्गेभ्योऽपि जीवेभ्यो बलात् समर्पितं च षोडश अरा विकारा यस्मिंस्तच्च तद कोऽतितरेत् त्वदन्यः त्वत्तः पृथग्भूतः स्वामनजजित्यर्थः । त्वदनन्यभक्तस्तु तरेदेवेत्यर्थः ॥ २१ ॥

अतो मायायास्त्वच्छक्तित्वात्तन्मयं संसारचक्रं यद्यपि त्वद्रूपं तदपि त्वं स्वरूपशक्त्या तस्मात् पृथग्भूतोऽत एवाहमपि

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तस्माद्विमोक्तुमिच्छामि मां स्वचरणान्तिकं नयेत्याह—स त्वमिति। यन्माया हि गुणमयं जीवोपाधिं सृजति स त्वं स्वधाम्ना स्वरूपशक्त्या विजिता आत्मगुणा बुद्धिगुणा येन सः यो गुणान् क्षोभयति स कालोऽपि त्वम् अत एव वशीकृता विसृज्या माया-कार्य्यभूता उपाधयस्तेषु विसर्गो निक्षेपः शक्तिरविद्या च येन स अत इक्षुदण्डवन्निष्पीड्यमानं प्रपन्नं जनमुपकर्ष समीपं नय ॥ २२ ॥

न च त्वां विनाऽन्यं कमप्यैश्वर्य्यवन्तं पश्यामि यमहं प्रपद्ये यं यो मां संसारादुद्धरिष्यतीत्याह—दृष्टा इति। दिविस्थानामखिल-लोकपालानामायुरादयो दृष्टाः श्रियो धनसम्पदः विभव ऐश्वर्यं ये धिष्ण्यपाः अस्मत्पितुः कोपहासविकृतभ्रूभङ्गमात्रेणैव विध्वस्ताः स च त्वया निरस्तः इत्यसाधारणप्रभावादपि त्वमेव परमेश्वर इति जानामीति भावः ॥ २३ ॥

एवञ्चेत् मत्तः परमेश्वरतः किमत आह—तस्मादिति । यस्मान्मत्पिता तादृशैश्वर्य्यसम्पन्निमानपि निरस्तस्तस्मादहं आशिषो भोगान् ज्ञस्तत्परिपाकं विद्वान् ऐन्द्रियम् इन्द्रियैर्भोग्यं आविरंचयात् ब्रह्मणो भोग्यमप्यभिव्याप्य किमपि नेच्छामि ते कालरूपेण विलुलितान् विध्वस्तान् अणिमादीनपि निजभृत्यपार्श्वमिति तदेव सर्वोत्तमं जानामीति भावः ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवंभूतस्य सर्वात्मनः पुंसः "पुरुष एवेदं सर्वम्" इत्यादि-श्रुतिप्रसिद्धस्य श्रीभगवतस्तव माया प्रकृत्याख्या शक्तिः संसारचक्रं सृष्टिसंहारप्रवाहम् सृजति पुंसो भवत एवानुमतेन शक्तिभूतेन कालेन चोदिता सृष्ट्यर्थविस्ताराय संसारार्थसंकोचाय च प्रेरिताः गुणाः यस्याः सा यद्यस्मिन् अजया नित्यरूपया भवच्छक्त्या तयैव मायया अर्पिताः एकादशेन्द्रियाणि पञ्च तन्मात्राणि चेति षोडश आराः अवयवा अस्मिन् बलीयः दृढतरं जीवबन्धनं मनस्तत्प्रधानं लिङ्गशरीरं भवति कथंभूतं कर्ममयं मायामोहितजीवकर्मफलभूतम् छन्दोमयं मायामोहितजीवाभिलापजन्यं च "छन्दः पद्येऽभिलापे च" इति कोशात् हे अज ! तत्संसारचक्रं त्वदन्यः अंशस्य स्वरूपेण भिन्नत्वेपि अंशयभिन्नस्थितिप्रवृत्त्याद्यभावात् य आत्मानं त्वदन्तर्गतं जानाति सत्वदनन्यः यस्तु "एष परमांशः" तत्त्वमसि "ममैवांशो जीवलोके जीवभूतः सनातनः" "क्षेत्रज्ञं चापि मां विद्धि" "अंशो नानाव्यपदेशादन्यथाचापि दाशकितवादित्वमधीयत एके" इति श्रुतिस्मृतिसूत्रोक्तरीत्यात्मनो भवदंशभूतस्य भवदन्यत्वं न जानाति स त्वतन्त्यः जीवब्रह्मणोऽत्यन्ततो एवेति भ्रान्ति-मोहितः कोऽतितरेत् न कोपीत्यर्थः त्वदनन्यस्तु तरेदेवेति भावः ॥ २१ ॥

हे ईश्वर ! सर्वात्मा सर्वशक्तिस्त्वं चक्रे संसारचक्रे तत्रापि षोडशारे लिङ्गदेहे अजया मायाख्यया भवच्छक्त्या विसृष्टं निष्पीड्यमानं च मां प्रपन्नं त्वां शरणं गतं हे विभो ! उपकर्ष संसारचक्रात् निस्सारय यतस्त्वं बहुबन्धनयोः जीव-माययोः स्वामीत्याह, वशीकृते विसृज्य विसर्गशक्ती विसृज्यो देवमनुष्यादियोनिषु पात्यते माययाभिभूयते इति विसृज्यो जीवः विसर्गे देवमनुष्यादिजीवयोनिजनने शक्तिर्यस्याः सा माया एवंभूते जीवमायो येन सः "प्रधानक्षेत्रज्ञपतिः" इति श्रुतेः कथम्भूतः कालः स्वशक्तिभूतो यः कालस्तस्यापि क्षोभक नियन्तृभूतः काल इत्यर्थः "ज्ञः कालकालः" इति श्रुतेः कुतः अन्ये अन्यान् ब्रह्मरुद्रादीनपीश्वरान्मन्यन्ते ते एव भवना कुतः संसारचक्रान्निर्गमनार्थं न प्रार्थ्यन्ते इत्यत्राह हि निश्चि स्वधाम्ना स्वाम्नाधारणेन स्वरूपेण नित्यं सर्वदा विजित स्ववशे कृताः आत्मानः सर्वे ब्रह्मादयो जीवाः गुणास्तत् द्गुणाश्च येन सः एष. सर्वेश्वरः "एष सर्वाधिपतिः" इति श्रुतेः ॥ २२ ॥

ननु, संसारचक्रेऽपि भोगाः सन्ति तान् भुंक्ष्व । किं मोक्ष णोत्यत आह—दृष्टा इति त्रिभिः। हे विभो ! यानयं बुभुक्षुजन इच्छति ते दिवि अखिलधिष्ण्यपानां आयुः श्रियः सम्प विभवः उद्भवः एते सर्वे मया दृष्टाः येऽस्मत्पितुः कुपि हासाभ्यां कोपहासाभ्यां विजृम्भितेन विकृतेन भ्रूविस्फूर्जित लुलिता निरस्ताः स तु ते त्वया निरस्तो हतः ॥ २३ ॥

तस्माद्धेतोः "ज्ञाज्ञौ द्वावजावीशानीशौ" इति श्रुतिप्रसिद्ध अज्ञोऽल्पज्ञो जीवोऽहं भवदीयदास अभूः तनुभृतामाशि भोगान् आयुरादिकं ऐन्द्रियैर्भोग्यं आविरिंच्यात् किमपि नेच्छामि ते त्वया कालात्मनोरुविक्रमेण लुलितान् विध्व स्तानणिमादिपदार्थानपि नेच्छामि अतो मां निजभृत्यानां पार्श्व मुपनय ॥ २४ ॥

भाषा टीका ।

पुरुष की अनुमति से काल करके क्षुभित हुए गु जिसके ऐसी माया कर्म प्रधान दुर्जन मनको सृजती हे अज ! अजा (अविद्या) ने अर्पित कि वे सोलह वि रूप आरा जिसके ऐसे संसार चक्र वाले वेद मय म आपको विना भजन किये कौन तरसक्ता है ॥ २१ ॥

हे ईश्वर ! सो आप मुझे आपना ज्ञान देकर इस षोड आरे वाले चक्र में माया से पडा हुआ निष्पीड्यमान अर्थ ऊख के तर पिर रहा जो मैं तिसको हे विभो ! हे सम आप खैंचलो ॥ क्योंकि आपने इस माया के गुणों को तेज (चैतन्यशक्तिरूप) से जीता है और आप काल अर्थात् माया के प्रेरक हौ और कार्य कारण शक्ति को ने वश में किया है ॥ २२ ॥

हे विभो ! मैंने स्वर्गसे आदि लेकर अनेक लोकपालों आयु श्री और वैभव देख लिये, जिनके लिये यह मनुष्य इच्छा करता रहता है. उनके वैभव कैसे हैं कि मेरे पित कोप युक्त हास से विकराल भृकुटी के अंग मात्र से

कुत्राशिषः श्रुतिसुखा मृगतृष्णिरूपाः क्वेदं कलेवरमशेषरुजां विरोहः ।
निर्विद्यते न तु जनो यदपीति विद्वान्कामानलं मधुलवैः शमयन्दुरापैः ॥ २५ ॥
क्वाहं रजःप्रभव ईश ! तमोऽधिकेऽस्मिन् जातः सुरेतरकुले क्व तवानुकम्पा ।
न ब्रह्मणो न तु भवस्य न वै रमाया यन्मेऽर्पितः शिरसि पद्मकरः प्रसादः ॥ २६ ॥
नैषा परावरमतिर्भवतो ननु स्याज्जन्तोर्यथात्मसुहृदो जगतस्तथाऽपि ।
संसेवया सुरतरोरिव ते प्रसादः सेवाऽनुरूपमुदयो न परावरत्वम् ॥ २७ ॥
एवं जनं निपतितं प्रभवाहिकूपे कामाभिकाममनु यः प्रपतन्प्रसङ्गात् ।
कृत्वाऽत्मसात्सुरर्षिणा भगवन्गृहीतः सोऽहं कथं नु विसृजे तव भृत्यसेवाम् ॥ २८ ॥

भाषाटीका ।

होगये उस मेरे पिता को तो आपने सहज ही निरस्त करदिया ॥ २३ ॥

इसी कारण से मैं आप का अज्ञ दास ब्रह्मादिक पर्यन्त के वैभव आयु लक्ष्मी इन्द्रिय सुख इत्यादिकों की इच्छा नहीं करता हूं, क्योंकि ? ये सब तो काल स्वरूप आपके महान् पराक्रम से नष्ट प्राय हैं तस्मात् आप केवल मुझको अपने दासों के समीप में पहुचा दीजिये ॥ २४ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

किञ्च वर्तमानकालेऽपिन भोगार्हा इत्याह--कुत्रेति। श्रुतिः श्रवणं तदेव सुखं यासु ताः मृगतृष्णिकावन्मिथ्याभूताश्चाशिषः क्व अशेषाणां रुजां रोगाणां विरोह उद्भवस्थानं क्वचेदं कलेवरम्. एवं चेत्सर्वोऽपि जनः किं न विरज्यते ? तत्राऽह—यद्यपि यद्यपि इति एवं विद्वानयं जनस्तथापि न निर्विद्यते विरक्तो न भवति कुतः काम एवानलस्तं मधुतुल्यैः सुखलवैर्दुःसाध्यैरपि शमयन्, कामाग्निशमनव्यग्रस्य निर्वेदावकाशो नास्तीत्यर्थः। यद्वा, अचिन्त्यमिदं त्वन्मायाचेष्टितमिति भावः ॥ २५ ॥

तर्हि त्वं कथं निर्विण्णोऽसि अनर्हेऽपि मयि प्रवृत्तया त्वत्कृपयैवेत्याशयेनाह--क्वेति। रजसैव प्रभवो जन्म यस्य सः सप्तम्यन्तं वा कुलविशेषणं तमोऽधिकं यस्मिंस्तस्मिन्नसुराणां कुले जातोऽहं क, क्व च तवानुकम्पा, तामेवाह ब्रह्मादीनां शिरसि यो नैवार्पितः स पद्मवत्सकलसन्तापहरः करः प्रसादः पुरुषार्थरूपो मे शिरस्यर्पित इति यत् यद्यथाऽनुकम्पयेति वा ॥ २६ ॥

न च त्वयीदमतिचित्रमित्याह--नैषेति। एते ब्रह्मादय उत्तमाः अयमसुरो नीच इत्येषा परावरमतिर्जन्तोः प्राकृतस्य यथा, तथा भवतो नैव स्यात् अत्र हेतुः जगत आत्मनः सुहृदश्च तर्हि सर्वत्र मत्प्रसाद एवंरूपश्च किं न स्यात्तत्राह संसेवया तव प्रसादो भवति तत्र च सेवानुरूपं तत्तादिच्छानुसारेण धर्मादीनामुदयो भवति एवं सत्यपि वैषम्याभावे दृष्टान्तः सुरतरुर्यथा सेवकस्यैव सङ्कल्पानुसारेण फलं ददाति न च विषमस्तद्वत् न परावरत्वमत्र कारणमिति शेषः ॥ २७ ॥

एतच्च त्वद्भृत्यकृपया मया प्राप्तमिति त्वद्भृत्यपार्श्वमेव मां नयेत्याशयेनाह--एवमिति। यथा त्वया अनुकम्पितो ऽस्म्येवं नारदेनात्मसात्कृत्वा पूर्वमनुगृहीतः सोऽहं कथन्नु त्वद्भृत्यसेवां विसृजामि कथम्भूतोऽनुगृहीतोऽस्मि प्रभव एवाहियुक्तः कूपस्तस्मिन्कामानभितः कामयमानं जनं निपतितमनुतत्प्रसङ्गात्प्रपतन्योहम् तदेवं त्वद्भृत्यस्य नारदस्यानुग्रहेण त्वयात्यन्तमनुकम्पितोस्म्ययमेव च मम परमोऽनुग्रहो न पुनरिदमतितुच्छं मत्प्राणरक्षणादि ॥ २८ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्च श्रुतिः श्रवणं तदेव सुखं यासु ताः अत एव मृगतृष्णिरूपाः मरीचिकावदवस्थिताः आशिषः कुत्र पुरुषार्थाभासा आशिषः केत्यर्थः। अशेषाणां रुजां रोगाणां विरोहः उद्भवस्थानं क्वचेदं कलेवरं दुर्घटमेतदिति भावः। एवं चेत्सर्वोपि जनः किमिति संसारान्न निर्विद्यते तत्राह-निर्विद्यत इति। यद्वैषयिकं सुखम् इतीत्थं मृगतृष्णिकातुल्यं विद्वान् जानन्नपि न निर्विद्यते विद्वानपीत्यपिशब्देनाविदुषो नितरां निर्वेदाभावः सूचितः विदुषोप्यनिर्वेदे हेतुं वदन् विद्वांसं विशिनष्टि—दुरापैर्दुःखेनापि लब्धुमशक्यैर्मधुलवैर्वैषयिकसुखलेशैः काम एवानलस्तमुपशमयन्विषयासक्तस्सन् विद्वानपि न निर्विद्यत इत्यर्थः। विषयासक्तस्य निर्वेदेऽप्यवकाशोनास्ति इति भावः ॥ २५ ॥

एवं तत्प्राप्तये तदनुग्रहं संप्रार्थ्य स्वशिरसि दुर्लभेन तत्करपल्लवनिधानेनात्मनः कृतार्थतामाविष्करोति—क्वेति। हे ईश ! तमोधिके तमःप्रचुरे रजःप्रभवे रजस उत्पत्तिस्थाने रजस्तमःकार्यकामक्रोधलोभादिमोहप्रचुरे सुरेतरकुले, असुरकुले जातोऽहं क्व क्व च तवानुकंपा दुर्घटमेतदित्यर्थः। किं तदित्यत्राह ब्रह्मादीनां शिरसि यो नैवार्पितस्तेषामपि दुर्लभ इति भावः। सः प्रसादः

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

प्रसादसूचकः पद्ममिव तापहरः करः मम शिरस्यर्पित इति यदेतत् दुर्घटमिति भावः । अतोहमलभ्यलाभेन कृतार्थोऽस्मीति तात्पर्य्यम् ॥ २६ ॥

नैतावता तव वैपम्यादि दोषप्रसङ्ग इत्याह–नैषेति । यथा या जन्तोः प्राकृतस्य परावरमतिरुत्कृष्टापकृष्टबुद्धिर्विषमाबुद्धिरिति यावत् सैषा बुद्धिर्भवतो नैव स्यात् ननु तदभावे हेतुं वदंस्तं विशिनष्टि, जगत आत्मसुहृदः आत्मनोऽन्तरात्मनः सुहृदो हितैषिणश्च आत्मन इत्यनेन जगतः शरीरत्वमवगम्यते नहि कस्मिंश्चिच्छरीरे आत्मनः प्रीतिरन्यस्मिन्नप्रीतिरिति भावः । सर्वस्यापि जगतः स्वाभाविकसुहृद इति वार्थः । तर्हि सर्वेष्वेकरूपो मत्प्रसादः किन्नस्यात्तत्राह–यद्यप्येवंभूतस्त्वं तथापि वैपम्यरहितस्यापि तव संसेवया प्रसादो भवति तत्र सेवानुरूपं तत्तदपेक्षानुसारेण धर्मादिपुरुषार्थानामुदयो भवत्यपेक्षानुरूपफलदत्वे दृष्टान्तः सुरतरोरिवेति. यथा सुरतरोः कल्पद्रुमस्य तत्तत्सेवकापेक्षानुसारेण फलप्रदत्वं न च तावता तस्य वैपम्यं तद्वन्न परावरत्वं सर्वेष्वेकरूपप्रसादाभावे परावरत्वं वैपम्यं न कारणमित्यर्थः ॥ २७ ॥

एवमात्मनस्तत्प्रसादेन कृतार्थतामाविष्कृत्याथ न केवलमधुनैव त्वत्प्रसादविषयोऽहं जातः किन्तु यदा मातृगर्भस्थं मामनुजिघृक्षता त्वया सञ्चोदितेन सुरर्षिणानुगृहीतस्तदैव त्वदनुग्रहविषयोऽभवम् अतो जन्मन आरभ्य त्वयानुगृहीतोऽहं त्वद्भृत्यपार्श्वं न विसृज इत्याह—एवमिति । हे भगवन् ! यः सुरर्षिणा नारदेनात्मसात्कृत्वा आत्माधीनंकृत्वा "तदधीनवचने च" इति सातिप्रत्ययः पूर्वं विषयपरवशत्वेन तदधीनं मां स्वाधीनं कृत्वेत्यर्थः । यद्वा, "अभिविधौ सम्पदा च" इति सातिः अभिविधिश्च किञ्चिदन्यथात्वं पूर्वं भगवत्प्रातिकूल्येन स्थितं मां किञ्चित्त्वदनुकूलं कृत्वेत्यर्थः । गृहीतस्तत्त्वत्रयोपदेशेनानुगृहीतः सोऽहं इदानीं तव भृत्यसेवां दासानुदास्यं कथं नु विसृजे न कथं चिदपित्यक्ष्यामीत्यर्थः कथम्भूतोऽनुगृहीतोऽस्मि प्रभवः संसार एवाहिकूपः सर्पजुष्ट कूपस्तस्मिन्कामाभिकामं काम्यन्त इति कामाः विषयाः शब्दादयस्तान् कामयमानं जनं निपतितमन्वनुसृत्य तत्प्रसङ्गात्तस्य तत्र निपतितजनस्य यः प्रकृष्टः सङ्गस्तस्माद्धेतोः प्रपतन्नहं विषयासक्तचित्तजनसङ्गात्प्रभवाहिकूपे पतन्नहमित्यर्थः ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इतोपि संसारसुखं हेयमित्याह—कुत्रेति । श्रुतिं कर्णौ सुखयन्तीति श्रुतिसुखा मृगतृष्णारूपा ऊष्मोदकसदृशाः अशेषाणां रुजां रोगाणां विशेषेण रोहो यस्मात्तत्तथा तुराणैर्मधुलवैरुदबिन्दुकल्पैः सुखलेशैः कामाग्निं शमयन् शान्तिं कर्तुमिच्छन् यदपि पर्यायेण कलेवरं विषयसुखं चेत्युभयं नश्वरं विद्वानयं जनः इहोभयस्मिन्नपि ननु निर्विद्यते निर्वेदं नैव प्राप्नोतीत्यन्वः ॥ २५ ॥

हरेर्भक्तवात्सल्यं प्रकटयन् प्रह्लादस्तत्त्वज्ञानविधुर इवायोग्यजनमोहायाह—क्वाहमिति । हे ईश्वर ! तमोगुणप्रचुरे रजोगुणोत्पत्तिहेतौ अस्मिन् सुरेतरकुले असुरकुले जातोऽहं क्व भक्तानुग्रहलक्षणा तवानुकम्पा क्व मिथो विरुद्धस्वभावत्वात् किञ्चायमत्रैति तत्राह न ब्रह्मण इति निरन्तरसेवा मे दूरत्वेनतस्मादाधिक्यादयोऽपीदानीं रमादीनां शिरसि नार्पितो मम शिरसि तव पद्मकरः पद्मोदरप्रभावत्पाणिनिधानलक्षणः प्रसादोऽर्पित इति यत्तस्माच्चित्रं तव चरितमित्यर्थः । "श्रीर्ब्रह्म ब्राह्मीर्वीन्द्राहित्रिकं तत्स्त्रीपुरुषाः तदन्ये च क्रमात्सर्वे सदा मुक्तौ सृतावपि । हरिभक्तौ च तज्ज्ञाने सुखेन नियमेन तु । परतः स्वतः कर्मतो वा न कथंचित्तदन्यथा" इति वचनादुक्त एवार्थ इति ॥ २६ ॥

सेवाधिक्यमेव फलाधिक्ये कारणं न त्वाभिजात्यादिकमित्यभिप्रेत्याह–नैषेति । यथा जन्तोर्या परावरमतिस्तथैषा भवतो न स्यान्न तु कुत आत्मसुहृदः "तदेतत्प्रेयः" इति श्रुतेः लोके यद्यप्याभिजात्यादिकं परावरत्वे निमित्तं तथापि लोकविलक्षणमहिमत्वात् भवतः प्रसादः जगतः संसेवया सेवानुगुणः फलाधिक्योदयः स्यात् "यावत्सेवा परे तत्त्वे तावत्सुखविशेषता" इतिस्मृतेः परावरत्वं च सेवानिमित्तं "शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते" इतिवचनात् ॥ २७ ॥

नन्वेवं सेवानुरूपफलोदये शास्त्रीये सिद्धे त्वं किङ्करोपीति तत्राह–एवमिति । फलोदयस्य सेवानुविधायित्वात् सोऽहं तव भृत्यसेवां कथं नु विसृजे मम हितरूपत्वादित्यतस्त्वदत्यागे कारणमाह । जनमिति । प्रभवाहिकूपे जन्माख्यसर्पविषकलिलसंसारगर्ते पतितं कामाः विषयास्तानभिकामयत इति कामाभिकामस्तं जनमनु तस्य जनस्य प्रकर्षेण सङ्गः जन्मलक्षणस्तस्मात्प्रपतन् आत्मसात्कृत्वात्मीयेष्वेक इति बुद्धिं कृत्वा सुरर्षिणा गृहीतोनुगृहीतोऽयः सोहमिति यस्मात्तस्मादिति शेषः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पुनः स्वस्यातिदैन्यं दर्शयितुं सामान्यतो जीवानां दैन्यं दर्शयति—कुत्रेति । मधुरूपकं तेनाग्नेः प्रत्युत वृद्धेः ॥ २५ ॥

अथ स्वस्यापि दैन्यं दर्शयन् तत्कृपया निरुपाधित्वं प्रावल्यञ्च दर्शयति—क्वाहमिति । नच ब्रह्मण इति तदानींतन वृत्तान्तापेक्षया ॥ २६ ॥

यत्तु भवान् भक्ताननुगृह्णाति तच्च यद्यपि चित्रं तथापि दृष्टान्तसद्भावात् नातिचित्रं मय्यनुग्रहस्तु तदभावादतीव चित्रमिव पूर्वार्थमेवोत्कर्षयितुमाह—नैषेति ॥ २७ ॥

अथैतादृश्याः कृपायाः कारणं स्मरन्नपि तदेवाभीष्टं प्रार्थयते एवमिति । एवं त्वत्कृपायोग्यं यथास्यात्तथा अनुगृहीतो योऽहं दृष्टभगवद्भृत्यकृपातिशयत्वात् कथं विसृजे त्यक्तुं शक्नोमि नैवेत्यर्थः ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

तर्हि किमिति भोगैश्वर्य्यं सर्व एव लोको वांछतीति चेत्सर्वोऽप्यनभिज्ञ एवेत्याह—कुत्रेति। मृगतृष्णिरूपाः मृगतृष्णा यथा दृष्टिसुखरूपास्तथैवाशिषो राज्याद्या अपि श्रुतिसुखमात्रयः स्पर्द्धाऽसूया रागद्वेषापायचिन्तादिभिर्वस्तुतः सुखलेशस्याप्यभावात् अस्तु वा सुखं तस्य भोगाऽसामर्थ्यात् महदेव दुःखमित्याह क्वेदमिति. यद्यतो विद्वानपि जन इति विचार्य्यापि न निर्विद्यते ततो मूर्खः किमुतेति भावः कीदृशः कामरूपमनलं मधुलवैः सुखलेशैः शमयन्निति नहि मधुलवैरनलः शाम्यति प्रत्युत दीप्यते एव दुरापैरिति ते च सुखलेशा दुःखैरेवोपार्ज्यन्ते ॥ २५ ॥

किञ्च यद्यपि मादृशो नास्तिकोऽप्यधमस्तदपि त्वं मां सर्वोत्तममकरोस्तत्ते कृपामाहात्म्यं किं वर्णयामीत्याह—क्वाहमिति। यत् यः पद्मकरः मम शिरस्यर्पितः सन् ब्रह्मणा इत्यादि ॥ २६ ॥

न च त्वं स्वकृपया उत्तमाधमौ गणायसीत्याह—नैषेति। एते ब्रह्मादय उत्तमाः. अयमसुरो नीच इत्येषपरावरमतिर्जतोः प्राकृतस्य यथा तथा भवतो नैव स्यात् तत्र हेतुः जगत आत्मनः सुहृदश्च तर्हि सर्वत्रैव सम एव मत्प्रसादोऽस्तु तत्राह संसेवया यथा सुरतरुराश्रितस्यैव सङ्कल्पानुसारेण फलं ददद्पि न विषमस्तथैव त्वमपि तत्रापि सेवानुरूपम् उदयः सेवातारतम्येनैव कृपाया उदयतारतम्यं नतु परावरत्वं उत्कृष्टनिकृष्टत्वमेव कृपोदयतारतम्यस्य कारणमित्यर्थः ॥ २७ ॥

ननु, मत्संसेवया त्वयि मम सम्यक् प्रसाद इत्यत्र सुरतरुदृष्टांतेन मद्वैषम्यं पर्य्यहार्षीः किंतु संसेवया किं कारणं तद्ब्रूहीति तत्राह एवम् उत्कृष्टनिकृष्टाभावेन जनं सर्वमेव कामानभिकामगमानं प्रभव एवाहियुक्तः कूपस्तत्र निपतितम् अनु तत् प्रसङ्गात् प्रयतन्नेवाहं सुरर्षिणा श्रीनारदेन आत्मसात्कृत्वा अयं जीवो मदीयो भवत्विति मयि स्वस्वत्वमारोप्य गृहीतः यद्वात् स्वपाणिनैव गृहीत्वा ततः सकाशात् स्वांतिकं नीत्वा तन्मंत्रराजमुपदिश्य स्वसेवकीकृत इति भावः सोऽहं संसारकूपपतित एव संप्रत्यहं प्रह्लादस्त्वद्भक्तो यत्प्रसादादभवं तस्य तव भृत्यस्य श्रीमद्गुरोःसेवां कथं विसृजामि त्यजामि यथा कर्मज्ञानियोगिनः फलप्राप्तौ साधनं त्यजन्ति, तथेत्यर्थः। भक्तिमार्गे हि साधनस्यापि फलीभावात् भगवन्तं प्राप्तानामपि ध्रुवादीनां साधुसङ्गादिसाधनस्पृहा यथा भक्तिं मुहुः प्रवहतां त्वयि मे प्रसङ्गो भूयादनंतमहतामलाशयानामिति ध्यायंश्चराम्यनुगृहाण यथास्मृतिः स्यादिति चातएव विचार्य्यैव मया प्रार्थितं नय मां निजभृत्यपार्श्वमिति ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

ननु, स्वत एव भवान् कुतो न गच्छति अत्राह—कुत्रात मृगतृष्णिरूपाः मृगतृट् मृगतृष्णा यथा जलाभासरूपा तथा पुरुषार्थाभासाः श्रुतिः श्रवणं तदेव सुखं यासु ताः आशिषः कुत्र अशेषरुजां विरोहो जन्मस्थानमिदं सकलेवरं च क इत्येवं यदपि जनो विद्वान् तथापि दुरापैर्दुःखलभ्यैर्मधुलवैर्विषयसुखलेशैर्दुष्पूरं कामानलं शमयन् आस्ते नतु विरज्यते त्वद्भृत्यपार्श्वे न गच्छतीति भावः ॥ २५ ॥

आत्मनो लब्धभगवत्प्रसादत्वमाह—क्वाहमिति। रजसः प्रभवो यस्मिन् तस्मिन् तमोधिकं यत्र तस्मिन् सुरेतरकुले जातोऽहं क क्व च तवानुकम्पा यत् यया प्रसादः प्रसादद्योतकः पद्मकरः पद्मवत् सुखदः करः मे शिरसि अर्पितः नतु ब्रह्मणो न भवस्य नतु रमायाः शिरसि आर्पितः यद्वा एवंविधः पद्मकरो ब्रह्मणो न भवस्य रमाया अपि नेति योज्यम् ॥ २६ ॥

ननु, अहो अयं परः उत्तमः अयमपरो ऽधमः एषा मतिर्जतोः प्राकृतस्य जीवस्य यथा भवति तथा जगतः आत्मनः परमसत्त्वरूपस्य सुखदः हितकारिणो भवतो नैव स्यात् तथापि सुरतरोः कल्पद्रुमात् सेवानुरूपमुदयो वांछितार्थलाभः इव संसेवया ते प्रसादो भवति एवमयं पर उत्कृष्टः मम प्रसादार्हः न त्ववर इति तव प्रसादे परावरत्वं कारणं न भवति ॥ २७ ॥

प्रकर्षेण भवन्तीति प्रभवाः कामक्रोधलोभादयस्ते एवाहयस्तद्युक्ते कूपे कूपवद्दुस्तरे संसारे नितरां पतितं कामान् विपयानभिकामयतीति कामाभिकामस्तं जनं कलत्रापत्यादिरूपमनुअनुसृत्य प्रसङ्गात् तस्मिन् जने प्रकृष्टो यः सङ्गस्तस्मात्प्रपतन् योऽहं देवर्षिणाऽऽत्मसात्कृत्वा गृहीतो अनुकम्पितः सोऽहं तव भृत्यसेवां कथं विसृजे अतस्तव भृत्यपार्श्वे मां नयेति भावः ॥ २८ ॥

भाषा टीका।

अवण रमणीय और मृग तृष्णा रूप आशिष (ऐहिक पारक्य सुख सामग्रीं) तौ कहां, और अनंत रोगों के जमने की भूमि यह कलेवर कहां। ऐसा यह पुरुष जागता है तौ भी वैराग्य को नहीं प्राप्त होता, क्योंकि ? वडे दुष्प्राप्य काम सुख के विंदुओं से काम रूप अग्नि के शमन करने में व्यग्र होरहा है ॥ २५ ॥

हे ईश ! कहां रजोगुण से उत्पन्न होने वाले तमोगुण प्रधान इस असुर कुल में, मैं उत्पन्न हुआ, और आपकी निर्हेतुक कृपा कहां, क्योंकि यह प्रसाद तौ ब्रह्मा को भी नही मिला शिवको भी नही प्राप्त हुआ, और निश्चय करके रमा (श्रीलक्ष्मीजी) को भी नहीं मिला जोकि ? मेरे असुर वालक के मस्तक पर आपने अपना करकमल अर्पित किया ॥ २६ ॥

ये ब्रह्मादिक उत्कृष्ट हैं और यह असुर नीच है इस प्रकार की पर अवर मति जगत के आत्मा और सुहृद ऐसे आप की कभी नहीं होती, तथापि कल्प वृक्ष के तरह आपकी प्रसन्नता है, जैसे कल्प वृक्ष समीप जाने से और इच्छा करने से फल देता है, ऐसे ही आप भी शरण आने से इच्छा के अनुकूल फल देते हैं ॥ २७ ॥

मत्प्राणरक्षणमनन्त ! पितुर्वधश्च मन्ये स्वभृत्यऋषिवाक्यमृतं विधातुम् ।
खड्गं प्रगृह्य यदवोचदसद्विधित्सुस्त्वामीश्वरो मदपरोऽवतु कं हरामि ॥ २९ ॥
एकस्त्वमेव जगदेतदमुष्य यत्त्वमाद्यन्तयोःपृथगवस्यसि मध्यतश्च ।
सृष्ट्वा गुणव्यतिकरं निजमाययेदं नानेव तैरवसितस्तदनुप्रविष्टः ॥ ३० ॥
त्वं वा इदं सदसदीश ! भवांस्ततोऽन्यो माया यदात्मपरबुद्धिरियं ह्यपार्था ।
यद्यस्य जन्म निधनं स्थितिरीक्षणं च तद्वै तदेव वसुकालवदष्टितर्वोः ॥ ३१ ॥
न्यस्येदमात्मनि जगद्विलयाम्बुमध्ये शेषेऽऽत्मना निजसुखानुभवो निरीहः ।
योगेन मीलितदृगात्मनिपीतनिद्रस्तुर्ये स्थितो न तु तमो न गुणांश्च युङ्क्षे ॥ ३२ ॥

भाषा टीका ।

संसार रूप सर्प विशिष्ट कूप में पडे हुए जनों के प्रसङ्ग से मैं भी उसी कूप में गिरता हुआ वर्त्तमान था, श्रीनारदजी ने अपना करके मुझे ग्रहण किया है भगवान् ! सो मैं आप के दासों की सेवा को कैसा भूल सकता हूं ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

न चेदं त्वया मदनुग्रहार्थं कृतं किन्त्वन्यार्थमित्याह—भो अनन्त ! यदेतन्मत्प्राणरक्षणं मां हन्तुमुद्यतस्य मत्पितुर्वधश्च तदुभयं स्वभृत्यऋषिवाक्यमृतं सत्यं विधातुमित्यहं मन्ये कुतः यद्यस्मादसदयुक्तं विधित्सुः खड्गं प्रगृह्यावोचत् किं मदपरो मद्व्यतिरिक्तश्चेदीश्वरोऽस्ति तर्हि त्वामिदानीमवतु तव कं शिरोऽहं हरामीति पाठान्तरेऽप्ययमेवार्थः । यद्यदाऽवोचत्तदा मत्प्राणरक्षणमिति वाऽन्वयः एतच्च सत्यं विधातुं निजभृत्यभाषितमित्यत्रैव बहुधा व्याख्यातम् ॥ २९ ॥

न चेदं पक्षपातेन रक्षणं दैत्यहननञ्च त्वयि स्वाभाविकं किन्त मायागुणोपाधिकं सर्वात्मके त्वयि स्वतस्तदयोगादित्याह एकइति । एतच्च जगत् त्वमेवैकः यद्यतः अमुष्यादावन्ते च पृथगवस्यसि विरामं करोषि सन्मात्रतया कारणत्वेनावधित्वेन च वर्तसइत्यर्थः । अतोमध्यतश्च त्वमेव कुतस्तर्हि भेदप्रतीतिस्तत्राह, निजमायया गुणपरिणामात्मकमिदं जगत्सृष्ट्वा तदनुप्रविष्टस्त्वन्तैर्गुणैर्हेतुभूतैर्नानेव रक्षकइव हन्तेव चावसितः प्रतीतः तदुक्तं स्कन्धोपक्रमे "निर्गुणोऽपि ह्यजोऽव्यक्तोभगवान्प्रकृतेः परः । स्वमायागुणमाविश्य बाध्यबाधकतां गतः ॥ " इत्यादिना ॥ ३० ॥

ननु, यद्येतज्जगदहमेव तर्हि जगतो वैषम्येण मम वैषम्यमपि किं न स्यादित्यतआह । त्वं वै त्वमेवेदं सदसत्कार्यकारणात्मकं जगन्नतु त्वत्तः पृथक् भवांस्तु ततोऽन्यः आद्यन्तयोः पृथगवस्थानात् यद्यस्मादेवमतोऽयमात्मीयोऽयं परइति या बुद्धिः साऽपार्था मायैव कार्यकारणाभेदं दृष्टान्तेन साधयति—यद्यतो यस्य जन्म ईक्षणं प्रकाशश्च यस्मिन्निधनञ्च स्थितिश्च तद्वै तदेव अष्टितं कारणं तरुः कार्यं तयोर्यथा वसुकालमात्रत्वम् अयमर्थः कार शब्देन नीलत्वाद्यसाधारणगुणयोगात्पृथ्वी वसुशब्देन वस्तुमा भूतसूक्ष्मं तत्र तरोर्यथा पृथिवीमयबीजमात्रत्वं तस च यथा भूतसूक्ष्ममात्रत्वमेवं सर्वमपि कार्यकारणात्म जगत्परमकारणात्मकमेवेति तथाच पारमर्षं सूत्रं "तदनन्यत्वमारम्भणशब्दादिभ्यः" इति. श्रुतिश्च "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्"इति ॥ ३१ ॥

तत्र तावदन्ते पृथगवस्थानं दर्शयति–न्यस्येदमिति । इदं जग दात्मनैवात्मनि निक्षिप्य स्वसुखमेवानुभवन्निष्क्रियः सन्प्रलयो दकमध्ये शयनं करोषि, तर्हि किं जीवस्येव ममापि तमोवृत्ति रूपा निद्राऽस्ति ? नहि नहि. योग एव तु बहिर्वृत्त्यभावसाम्यावि द्रोच्यत इत्याह–योगेन मीलिते दृशौ येन आत्मना स्वरूपप्रका शेन निपीता निद्रा येन यतस्तुर्येऽवस्थात्रयातीते स्वरूपे स्थित स्त्वं नतु सुप्तइवाऽऽत्मना तमोयुङ्क्षे योजयसि न पश्यसि न जाग्र त्स्वप्नयोरिव गुणान्विषयांश्चेत्यर्थः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यो नारदमुखेन मयि कृतः स एव परमोऽनुग्रहः न चेद मतितुच्छं मत्प्राणरक्षादिरूपं न चेदं त्वया मदनुग्रहार्थं कृ किंत्वन्यार्थमित्याह–मत्प्राणरक्षणमिति । हे अनन्त ! यदेतन्मत्प्राण रक्षणं मत्पितुर्वधश्चेति तदुभयं स्वभृत्य ऋषिवाक्यम् ऋतं सत यथा भवति तथा विधातुं कर्तुं कृतमित्यहं मन्ये स्वभृत्य ऋषिवाक्यमित्यत्र निजभृत्यभाषितम् इत्यत्रेवार्थो द्रष्टव्यः कि यदस्मत्पिता विधित्सुर्मद्वधमिति शेषः । मां जिघांसुरित्यर्थः । ख प्रगृह्य मत्तोऽन्यश्चेदीश्वरस्त्वद्रक्षकोऽस्ति तर्हि स त्वामिदानीं मवतु रक्षतु तव कं शिरोहरामीति यदवोचदुक्तवान् तदीश्वरान्त रराहित्य वचः असदसत्यं च विधातुं मत्प्राणरक्षादिकं त्वया कृतमित्यहं मन्ये इत्यर्थः ॥ २९ ॥

एवं कोपोपशमनप्रार्थनानुकूलोक्तं स्वाभिप्रेतं तद्दास्ययां

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

संप्रार्थ्य इदानीं कृत्स्नचिदचिदात्मकजगदन्तरात्मानं तच्छरीरकं तदुत्पत्तिस्थितिलयकारणं तदनन्यं स्तौति–एक इति। एतत्परिदृश्यमानं जगाच्चिदचिदात्मकं कृत्स्नं जगदेकस्त्वमेव. एतदित्यनेन विभक्तनामरूपं चिदचिदात्मकं जगन्निर्दिश्य तस्य त्वंशब्दवाच्यब्रह्मणोऽनन्यत्वं साध्यते "तदनन्यत्वमारम्भणशब्दादिभ्यः" इत्यत्र यथैक इत्यनेनाविभक्तनामरूपचिदचिच्छरीरकत्वं कारणावस्थावस्थितमुच्यते यथै कमेवाद्वितीया मित्यत्रैक शब्देन तत्र हि वक्ष्यमाणनामरूपविभागनिबन्धनबहुत्व प्रति सम्बन्धैक्यं एकदचिच्छरीकत्वं कारणावस्थावस्थितमुच्यते. यथा "एकमेवाद्वितीयाम्" इत्यत्रैकशब्देन तत्रहि वक्ष्यमाणनामरूपविभागनिबन्धनबहुत्वप्रतिसम्बन्धैक्यम् ह्येकशब्दार्थः। अत्राप्येतच्छब्देन प्रसिद्धपरामर्शिना यदभिप्रेतं नामरूपविभागप्रयुक्तं बहुत्वं तत्प्रतिसम्बध्येकत्वं तद्विभागाभावनिबन्धनमुच्यते, तदयमर्थः। यथा कारणावस्थायां घटशरावादिनामरूपविभागरहित एकत्वेनावस्थितो मृत्पिण्डः पश्चाद्घटादिरूपेण परिणमन्नामरूपविभागविभक्तस्तेभ्योऽनन्य एव, एवं त्वमपि कारणावस्थायां नामरूपविभागानर्हचिदचिच्छरीरकतयैकत्वेनावस्थितो देवादिनामरूपविभागार्हस्थूलचिदचिच्छरीरकत्वेन परिणमंस्ततोऽभिन्न इति कार्यकारणयोरनन्यद्रव्यत्वात्त्वत्कार्यभूतजगदनन्यस्त्वं कार्यत्वकारणत्वयोस्सतोर्द्रव्यस्यावस्था विशेषरूपत्वेन सर्वावस्थास्वनुस्यूतं द्रव्यमेकमेवेति भावः। तदेव सहेतुकमुपपादयति, यत् यस्मात्त्वममुष्य जगत आद्यन्तयोरवस्थयोः पृथगवस्यस्यात्मानमितिशेषः। पृथक् मध्यावस्थारहितमात्मानम् अवस्यासि पर्यवसितं करोषि जगत आदौ सृष्टेः पूर्वं तस्यान्ते प्रलये चात्मानं पर्यवशेषयसि ततो मध्यतः मध्यावस्थायाञ्च त्वमेव, तथाहि कटकमकुटादिकारणतया कटकाद्यवस्थातः पूर्वमवस्थितः स्वर्णपिण्डः कटकाद्यवस्थायाःपर्यवशेषितो मध्यतः कटकाद्यवस्थायास्तदवस्थावतोद्रव्यान्नभिद्यते तद्वदितिभावः एवं जगतो भिन्नत्वोपपादनेन जगदुपादानत्वमुक्तम् अथ तन्निमित्तकारणत्वं वदनुपादानत्वप्रयुक्तविकारित्वादिदोषपरिहारं ——— सूचयन् कार्यावस्थायां नानात्वेनावस्थानञ्चाह सृष्ट्वेति गुणव्यतिकरं सत्त्वादिप्राकृतगुणपरिणामात्मकम् इदं जगत् निजमायया आत्मीयसङ्कल्परूपज्ञानेन सृष्ट्वा तत्सृष्टं जगदणुप्रविष्टोन्तरात्मतयानुप्रविष्टः "तत्सृष्ट्वा तदेवानुप्रविशत्" इति श्रुत्युक्तरीत्या तावत्स्वानुप्रवेशेनैव सृष्टं जगच्चिदचिदात्मकं पुनः संरक्षणोपयुक्तसङ्कल्परूपज्ञानद्वारान्तरात्मतयानुप्रविष्टस्तैः स्वशरीरभूतैश्चिदचिदात्मकैः देवादिकैः शरीरैर्नानेव भिन्न इवावसितः प्रतीतः अतो देवमनुष्यादिभेदभिन्नं जगत्त्वमेवेति भावः। सृष्ट्वानुप्रविष्ट इति सृष्ट्यनुप्रवेशयोरेककर्तृकत्वकथनेन जगन्निमित्तकारणत्वं तच्च निष्कृष्टविशेष्यांशभूतस्वरूपस्यैवेति च फलितं येनाकारेणानुप्रवेशस्तेनैवाकारेण स्रष्टृत्वमपि. एवञ्च विशिष्टाकारेणानुप्रवेशस्तेनैवाकारेण स्रष्टृत्वं हि क्त्वाप्रत्ययस्वारस्यादवगम्यते अनुप्रवेशश्च विशेष्याकारेणेति तेनैवाकारेण स्रष्टृत्वमपि एवं च विशिष्टाकारेणोपादानत्वं विशेष्याकारेण तु निमित्तकारणत्वमित्युक्तं भवति. अत एव चेदं सृष्ट्वेतीदं शब्दनिर्दिष्टं सृष्टिंप्रति कर्मभूतं जगत् चिदचिदुभयात्मकमेव साक्षादुत्पत्त्याद्यवस्थाश्रयमित्यवगम्यते, अनुप्रविष्ट इत्यनेन तत्तदवस्थानिर्वोढृतयान्तरात्मतयानुप्रवेशकथनेन स्वविशेषणीभूतचिदचिद्द्वारा तद्गतोत्पत्त्याद्यवस्थाश्रयत्वमवगम्यते अनुप्रविष्ट इत्यनेनात्मत्वकथनेन साक्षाद्देहगतविकारास्पर्शश्चोक्तः अत एवोपादानत्वप्रयुक्तविकारित्वादिदोषश्च परिहृतः जगतः शरीरत्वकथनेन शरीरशब्दबुद्धीनामाकृत्य अधिकरणन्यायेनात्मपर्यन्तत्वलाभोपि तस्य जगदनन्यत्वे हेतुरित्युक्तं भवति ॥ ३० ॥

ननु, त्वत्पित्रादयश्चतुर्मुखादिकमेवेश्वरं मन्यमानाः कृत्स्नं जगत्तत्कारणकं तदनन्यमभ्यदधत त्वन्तु मदेककारणकं मदभिन्नं च जगन्मन्यसे तदेतद्विरुद्धमित्याशङ्कायां देहात्मबुद्धिवज्जीवेश्वरबुद्धेर्भ्रान्तिरूपतां वदन्नुक्तमेव कार्यकारणयोरनन्यत्वं दृष्टान्तमुखेन दर्शयति–त्वमिति। हे ईश! सदसदात्मकं चिदचिदात्मकम् इदं जगत्त्वमेव चिदचिदात्मकजगत्कारणभूतस्तदनन्यश्चेश्वरस्त्वमेव, नान्य ईश्वर इत्यर्थः। ईशेति सम्बोधनस्वारस्यादिदं जगत्कारणभूतस्तदनन्यश्चेश्वरस्त्वमेवेत्यर्थः। आत्मनि जीवात्मनि परबुद्धिर्या ईश्वरबुद्धिः सा अपार्था अर्थशून्या मायाऽविद्याकार्यभूता अज्ञानमूला भ्रान्तिरूपेति यावत् देहात्मवादवज्जीवेश्वरवादोऽपि भ्रममूल एवेत्यर्थः। यद्यत एवं ततस्तस्माज्जीवादन्य एव भवानीश्वरः कर्मवश्यस्य जीवस्यैवंविधजगन्निमित्तोपादानकारणत्वासंभवान्मुक्तस्य जगद्व्यापारवर्जनाच्चेति भावः। अतश्चिदचिदात्मकं जगत्त्वमेव. ननु, मत्कारणकत्वमात्रेण कथं मदनन्यं जगत्तत्राह—यदिति। जन्म उत्पत्तिर्निधनं नाशः स्थितिः पालनम् ईक्षणं प्रकाशः जन्मादिशब्दैस्तद्धेतुर्लक्ष्यते यस्योत्पत्तिस्थितिविनाशप्रकाशानां यद्धेतुभूतं तद्धैतदेव तत्कार्यं स्वोपादानकारणादव्यतिरिक्तम्, यद्वा, यद्यतः यस्य जन्मादयस्तत्तदेव तत्र दृष्टान्तद्वयमाह—वसुकालवदुष्टितर्वोरिति। वसु शब्दो वसुमतीं पृथ्वीं लक्षयति यथा भानुशब्दो भानुमन्तं लक्षयति प्रतिपादयति तद्वत् उष्टिः प्रभातकालः तरुर्वृक्षस्तयोर्जन्मादिहेतुभुतकालवद्वसुमतीवदिति व्युत्क्रमेणान्वयः। यथा प्रभातादिकालावयवाः स्वोपादानभूतमहाकालादनतिरिक्ताः यथा च वृक्षः पृथिव्या अनतिरिक्तस्तद्वदित्यर्थः। खलु कालवदुष्टितर्वोरिति पाठे, सत्येवं योजना ईश्वरो जगदुपादानं निमित्तं चातस्तद्द्वन्द्वे दृष्टान्तः कालः प्रभातादिकालावयवानां कालत्वमुपादानं वृक्षादीनां तु निमित्तं यथा प्रभातादिः कालाव्यतिरिक्तः यथा वृक्षश्चाभूदस्ति भविष्यतीति कालाविनाभूतः प्रतीयते तद्वन्निमित्तोपादानभूतादीश्वराज्जगदव्यतिरिक्तमित्यर्थः। अष्टितर्वोरित्यपि पाठः तत्रैवं व्याचक्षते अष्टिर्बीजं कारणं तरुः कार्यं तयोर्यथा वसुकालात्मकत्वम्, अयमर्थः कालशब्देन नीलत्वादि साधारणगुणयोगात् पृथ्वी लक्ष्यते वसुशब्देन वस्तुमात्रं भूतसूक्ष्मं तत्र तरोर्यथा पृथ्वीमयबीजपरिणामात्मकत्वेन ततो भेदः तस्य च यथाभूतसूक्ष्मात्मकत्वम् एवं सर्वस्य जगतः परमकारणभुतपरमात्मात्मकत्वमेवेति ॥ ३१ ॥

एवं जगतस्तदनन्यत्वं तदेकेश्वरत्वं तदेककारणत्वं चोक्तम् अथ चतुर्मुखस्य तत्कार्यत्वं तदाहितसृष्ट्युपयुक्त ज्ञानशक्त्यादिमत्त्वञ्च विवक्षुस्तावद्यदुक्तं विश्वस्याद्यन्तयोः पृथगवस्थानं

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्रान्ते पृथगवस्थितिप्रकारमाह—न्यस्येति । इदं परिदृश्यमानं चिदचिदात्मकं जगत् आत्मनि न्यस्योपसंहृत्य शेषे शयानोसि शेषात्मनेति पाठे, शेषस्य कारणात्मनावशिष्टस्य चिदचिद्द्रव्य स्यान्तरात्मना स्वरूपेणात्मनि स्वस्मिन्नेवावस्थित इत्यन्वयः। कथंभूतः स्वनो निरुपाधिकं निजसुखस्यानुभवो यस्यात एव निरीहः निष्क्रियः योगेन निजसुखानुभवरूपयोगेन मीलितदृक् निवृत्तसंकल्परूपज्ञानः मीलितदृशेति पाठे मीलितदृशा योगेन निवृत्तसङ्कल्परूपज्ञानावस्थानयोगेन विशिष्ट इति शेषः । मीलितदृगित्यनेन प्रसक्तं निद्राप्रसङ्गं निराह, वीतनिद्र इति आधारान्तरनैरपेक्ष्यमाह आत्मनि स्थितः इति कथम्भूते तुर्ये जाग्रदाद्यवस्थात्रयातीते प्रथमान्तपाठोपि दृश्यते तत्राप्युक्त एवार्थः । तमः सूक्ष्मावस्था प्रकृतिः "अक्षरं तमसि लीयते" "आसीदिदं तमोभूतम्" इति श्रौतस्मार्त्तप्रयोगात् तमस्तद्गुणान् सत्वादींश्च न युङ्क्षे न सम्बध्नासि प्रकृतितद्गुणास्पृष्टो भवसीत्यर्थः ॥ ३२ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्वभृत्यभाषितमृतं कर्तुं स्तम्भादभूदिति यत्सूचितं पूर्वत्र तदिदानीं स्पष्टमाह—मत्प्राणेति । मत्प्राणरक्षणं मम पितुर्वधं च स्वभृत्यनारदऋषिवाक्यं च असद्विधित्सुः खड्गं प्रगृह्य हिरण्यकशिपुर्यदि मदपर ईश्वरोऽस्ति स त्वामवतु तस्य तव कं शिरो हरामीति यदवोचत् तच्च ऋतं विधातुं अयमवतारइति मन्य इत्यन्वयः ॥ २९ ॥

भ्रूविजृंभणविभ्रंशितेन्द्राद्यैश्वर्यस्य मत्पितुर्हननमस्माकं चित्रं चेदपि न तव चित्रं तस्य जगत्येकत्वात् जगच्च त्वत्सृष्टं त्वत्प्रविष्टं त्वदधीनसत्ताकमतः स्तम्भादाविर्भावोऽपि युक्त इत्याह—एक इति । अयमर्थः एतज्जगत्त्वमेव नान्यः कुतः एकः प्रधानः प्राधान्यं च कुतोऽवगम्यत इति तत्राह—अमुष्य इति । अमुष्य जगत आद्यन्तयोरुत्पत्तेः पूर्वं विनाशादूर्ध्वं च मध्यतः स्थितिकाले च त्वमेवावस्थसि सन्निर्णीतोऽसि शाश्वत इति यस्मात् ननु जगतस्त्वद्विकारत्वेन तद्विवर्तत्वेन वा त्वदवसानं युक्तमत्राह—पृथगिति । भिन्नत्वेनेत्यर्थः। पुनः सृष्टिकाले निजमायया स्वसामर्थ्येन स्वाधीनया चिदचित्प्रकृत्या चेदं गुणव्यतिकरं जगत्सृष्ट्वा तदनुप्रविष्टस्त्वं तैर्भिन्नैः पदार्थैर्निर्मितैः नानेव भिन्न इव ननु भिन्न इत्यवसितोऽसीति यस्तस्माच्च । प्रतिदृशमिव नैकधार्कमेकमिति श्लोकेः "इन्द्रो मायाभिः पुरुरूप ईयत" इति श्रुतेश्च "नेह नानास्ति किञ्चन"इत्यादि श्रुत्या नानात्वस्य निषिद्धत्वात् वानैवानुविधावतीत्यादिनानर्थहेतुत्वाच्च भेददृष्टेः ॥ ३० ॥

हरेर्जगदन्यत्वस्य स्पष्टमप्रतीतेः तदर्थं पूर्वपद्योक्तं विशदयति त्वं वाइति । हे ईश ! इदं सदसच्चराचरलक्षणं जगत्रयं सत्ताया अपि त्वदधीनत्वादयं व्यपदेशो न तादात्म्यात् तत्वतस्तदात्मत्वं किं न स्यादिति तत्राह—भवानिति । ततो जगतो भवानन्योऽपि स्वतोभिन्नोपीत्यर्थः मत्स्वातन्त्र्यवज्जगत्स्वातन्त्र्यमपि किन्न स्यादुभयोर्भेदोऽपि दृढतरः स्यादिति तत्राह—मायेति । आत्मेत्युपलक्षणम् आत्मानात्मलक्षणस्य प्रपञ्चस्य परत्वबुद्धिः स्वातन्त्र्यज्ञानं यत्सेयं मायाऽविद्यमाना कुतइति तत्राह—अपार्थेति । श्रीनारायणस्य तव स्वातन्त्र्यज्ञानं यथा पुरुषार्थसाधनं तथान्यस्य स्वातन्त्र्यज्ञानमनर्थहेतुरिति उभयं हिशब्देनासिद्धमिति दर्शयति स्वतन्त्रजीवात्मकत्वात्स्वतन्त्रं जगदित्यतोवाह—मायेति आत्मनो जीवस्य परत्वबुद्धिः जीवस्य परमैक्ये परमात्मना यज्जन्मादिकं क्रियते तदनेनापि कर्त्तव्यम् । तदनुभवविरुद्धमतो यदधीनं जन्मादिकं तद्वस्तु तदेवेति प्राधान्यविवक्षया अभेदव्यपदेशोपपत्तेरिति प्रकारान्तरेण तद्भातिमाह—यद्यस्येति । अयमर्थः। यस्य जगतो जन्मादिकं यदधीनं तज्जगत्तदेवेत्युच्यते इति यस्मात्तज्जगत्त्वमेवेत्यर्थः । अस्मिन्नर्थे दृष्टान्तमाह--खल्विति। उष्टितयोः वृक्षदाहवृक्षयोः कालवत् कालाधीनत्ववत् एतदेवाचार्यैः समयविवृतं यथा वृक्षश्च वृक्षदाहकश्च दैवकालाधीनत्वाद्दैवं कालश्चेत्युच्यते एवञ्च त्वदधीनत्वात्सर्वस्य सर्वमित्युच्यते स्वतस्तद्भिन्नोऽपीति । "उष दाहे" इति धातुः अत्र खलु शब्दः साक्षादैक्यनिषेधे वर्तते "अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वे" इति सूत्रात् अलमैक्यकथानिष्टत्वमित्यर्थः । "यएष आदित्ये पुरुषो दृश्यते सोहमस्मि सएवाहमस्मि यएषचन्द्रमसि पुरुषोदृश्यते सोहमस्मि" इत्यादि श्रुतौ स्वस्यान्यस्य परमात्मत्वोपदेशः प्रतीयते अतः कथं भेदः कथ्यते इत्यतोवाह—मायेति । आत्माहं च परोन्यश्च परश्च परमेश्वरएवेति याबुद्धिरियमपार्था मायाभ्रान्तिस्तस्मात्तदधीनत्वात्तदन्तर्यामित्वेन स्थितत्वाच्च सोहमस्मीत्युच्यते नतु तद्रूपत्वादेतदप्याचार्यैरुक्तम् अहं चान्यश्च परमेश्वरएवेत्यपार्थाभ्रान्तिस्तदधीनत्वात्सइत्युच्यते न स्वरूपत्वादित्यर्थः । इति ईक्षणं ज्ञानम् ॥ ३१ ॥

सत्वमाद्यन्तयोरित्यत्रांते श्रीहरिरवशिष्यते इत्युक्तं तं प्रकारं दर्शयति---न्यस्येति । विलयांबुमध्ये इदं जगदात्मनि स्वोदरे न्यस्य शेषासनोभूत्वा तुर्यस्थितोजाग्रदाद्यवस्थाप्रवृत्तिशून्यमूर्तौ स्थितस्त्वं तमः प्रकृतिं गुणान्सत्वादींश्चात्मनि युंक्षे नतु "प्रकृतिं पुरुषं चैव प्रविश्य पुरुषोत्तमः क्षोभयामास" इत्यादौ प्रतीतप्रस्ताद्भानः ॥ ३२ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मत्प्राणरक्षणादिकञ्च तथैवेत्याह—मत्प्राणेति ॥ २९ ॥

अथ रसान्तरेण तत्क्रोधशमनं तथाहि कथमयं वराकस्तव क्रोधविषयो यत एक इत्यादि तथापि पूर्वेण सङ्गतिर्दृश्यते तथाहि—तदेवं भक्तानुग्रहसम्बन्धेन साक्षादेवावतीर्यास्मद्विधरक्षणं करोषीति स्थिते सर्वमन्तर्यामितया सामान्यतो विश्वरक्षणं तच्च त्वयैव क्रियमाणमपि न साक्षात् किन्त्वन्यद्वारेणेति दर्शयंस्तदनुसङ्गतः सृष्ट्यादि लीलामाह—एक इति॥ ३० ॥

तत्र तस्य वैलक्षण्यं स्थापयति त्वम्वा इति॥ ३१ ॥

प्रसङ्गेन महाभक्तविरुच्याद्यनुग्रहतः सृष्ट्यादिमयीं साक्षाल्लीलामेव विशेषतो वर्णयति—न्यस्येदमिति सप्तभिः। आत्मनि

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

गर्भोदकशायिरूपे जगत् त्रैलोक्यं योगमाह तुर्ये स्वतुरीयतत्त्वे श्रीवासुदेवाख्ये स्थितः । तन्मात्रत्वेनात्मन्युररीकृत स्फूर्त्तिः इत्यर्थः ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अतस्तव भक्तवश्यत्वाद्भक्तकृपानुगामिन्येव लोकेषु तव कृपा दृष्टा ननु त्वं स्वभक्तमनाश्रितान् कांश्चिदपि कृपयसीति नते क्वापि वैषम्यं मय्यपि तव स्वभक्तानुरोधेनैव सर्वं एवानुग्रह इत्याह–मदिति । स्वभृत्यः ऋषिर्योनारस्तस्य वाक्यं सत्यं कर्त्तुमित्यहं मन्ये मन्माता मदर्थं प्रार्थितेन श्रीनारदेन त्वत्पुत्रस्य विद्वेषकनाशादिना कल्याणं भविष्यतीति वरदानात् यदुक्तम् "ऋषिं पर्य्यचरत्तत्र भक्त्या परमयासती । अन्तर्वत्नी स्वगर्भस्य क्षेमायेच्छा प्रसूतये ऋषिः कारुणिकस्तस्याः प्रादादुभयमीश्वरः" इति यद्यस्मादसत् मद्धिसनं विधित्सुःकं शिरो हरामीति तथाहि दिग्गजादिभ्यो यथा मद्रक्षणं तथा तद्धस्तान्नसम्भवतीति तद्वधश्च त्वया कृत इति एवं भगवतः सर्वत्र साम्येपि भक्तवश्यत्वं विशिष्यत इति प्रह्लादेन ज्ञापितम् ॥ २९ ॥

एवं गुणातीतानां मादृशभक्तानां गुणातीतेन त्वया भक्तवत्सलेन पालनं गुणातीतमेव गुणमयस्य जगतस्तु सृष्टिपालनसंहारा उदासीनेनैव त्वया गुणमया एवेति वदंस्तस्य जगतस्तत्कारणकत्वात् त्वन्मयत्वमेवेत्याह–एक इति । यद्यस्मादमुष्य आदौ अन्ते मध्येच अमुष्मात् प्रथग्भूतोऽपि त्वमेव अवस्यासि अवसीयसे विवेकिभिः प्रतीयसे इत्यर्थः कुतस्तर्हि तथा न प्रतीतिस्तत्राह निजमायया गुणपरिणामात्मकमिदं जगत्सृष्ट्वेति निर्गुणस्य तव शक्तेः स्वरूपशक्तित्वाभावादितिभावः । तदनुप्रविष्टस्त्वं तैर्गुणैर्हेतुभूतैर्नानेव हंतेवपालक इव उत्पादक इव अवसितः वस्तुतस्तु तमोगुण एव हन्ता सत्त्वगुणएव पालकः रजो गुण एव स्रष्टा तेष्वौदासीन्येन त्वत्प्रवेशादेव त्वं हन्तेत्यादि व्यपदेशः ॥ ३० ॥

ननु, जगतोमायिकत्वेपि मायाया मच्छक्तित्वाज्जगतो वैषम्ये ममापिवैषम्यं किं नस्यादित्यत आह त्वं वै इदं सदसत् कार्य्यकारणात्मकं जगत्प्राधानिकत्वात् सत्यमेव न तु त्वत्तः पृथक् । ततोऽस्माज्जगतस्तु भवानन्यः पृथगेव आद्यन्तयोः पृथगवस्थानात् यद्यस्तु तस्मिन्नेव जगति आत्मा अयं ममात्मीयः परः अयं ममशत्रुरिति बुद्धिः सा माया अविद्या जीवस्याविद्या कल्पितैवेत्यर्थः । अपार्था सातु मिथ्याभूतैवेत्यर्थः । कार्यस्य कारणाभेदमपि साधयन् दृष्टान्तेन परमकारणस्य भगवतो वैषम्यमपि निराकरोति यद्यतः यस्य जन्मईक्षणञ्च प्रकाशश्च यस्मिन्निधनं स्थितिश्च तद्वैतदेव अष्टि बीजं कारणं तरुः कार्यं तयोर्वसुधाकालवत् वसुत्वकालत्वे यथेत्यर्थः वसुशब्देन वस्तुमात्रं भूतसूक्ष्ममुच्यते कालशब्देन नीलत्वासाधारणगुणयोगात् पृथ्वी कालशब्दोऽत्र नीलगुणवाची ततश्चकारणकार्य्यात्मकयोरष्टि तर्वोर्द्वयोरेव यथा पृथिवीत्वं गन्धवत्त्वञ्च तथैव कारणकार्य्यात्मकस्य जगतः प्रधानत्वं परमेश्वरत्वं च अयमर्थः यथा वसुमात्रत्वकालस्य कालमात्रमष्टेः अष्टिमात्रत्वं प्रधानस्य प्रधानमात्रत्वं महदादीनां महदादिमात्रत्वं देवतिर्य्यगादिमयं जगतः, एवं च तर्वादि सर्वकार्य्यकारणात्मकं यथा भूतसूक्ष्ममेको गन्धएव तथा देवतिर्य्यगादिसर्वकार्य्यकारणात्मक एको भवानेव तथा च पारमर्षं सूत्रं "तदनन्यत्वमारंभणशब्दादिभ्यः" इति. श्रुतिश्च "वाचारम्भणं विकारोनामध्येयं मृत्येके त्येव सत्यम्" इति तेन पार्थिवपदार्थानां काष्ठपाषाणादीनां वैषम्येपि तत्परमकारणस्य गन्धस्य यथा न वैषम्यं तथैव जगतो वैषम्येपि न भगवत इति ॥ ३१ ॥

आद्यन्तमध्यावस्थानेनोक्तं जजत्कारणत्वं प्रपञ्चयति–न्यस्येति पञ्चभिः । इदं जगत् आत्मन्येव न्यस्य विलयानि विगतलयान्यनश्वराणि अंबूनि यस्य तस्य कारणार्णवस्य मध्ये शेषे स्वपिषि आत्मना आत्मस्वरूपशक्त्यैव निजसुखस्यानुभवो यस्य सः निरीहः मायिकलीलामनिच्छुः तर्हि किं जीवस्येव ममापितमोरूपा निद्रास्ति नहि नहि वहिः वृत्यभावसाम्यान्निद्रोच्यते इत्याह योगेन मीलितदृशौ येन आत्मना स्वरूपप्रकाशेन निपीता निद्रा येन यतस्तुरीये अवस्थात्रयातिरिक्ते स्वरूपे स्थित एव ननु तमः सुषुप्तइव युंक्षे जीववत् स्वीकरोषि नापि जाग्रत् स्वप्नयोरिव गुणान् विषयान् ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

श्रीनारदेनोक्तमिन्द्रं प्रति अनन्तानुचर इति तदृषिवाक्यं स्वानुचरत्वसूचकेन मद्रक्षणेन सत्यं कृतमित्याह--मदिति । यत् यदा असदयुक्तं पुत्रं वधं विधातुं खड्गं प्रगृह्य मदपरः मद्यतिरिक्तश्चेदीश्वरोऽस्ति तर्हि त्वामिदानीमवतु तव कं शिरो हरामीत्यवोचत् मम पितेति शेषः तदा यत् मत्प्राणरक्षणं तद्वधं मत्पितुर्वधश्च तद् हे अनन्त ! स्वभृत्यो य ऋषिस्तस्य अनन्तानुचर इति वाक्यमृतं यथा भवति तथा विधातुमिति अहं मन्ये ॥ २९ ॥

एवं सर्वत्र समेनापि भगवता स्वभक्तपक्षपातित्वेनासुरं हत्वा मद्रक्षणं कृतमित्युक्तमथैवं सर्वहेतुत्वेन सर्वात्मनापि त्वया बहूनां ब्रह्मादीनां बहून् मधुकैटभादीन् हत्वा रक्षा कृता इत्येवं भगवन्तं स्तौति । एकस्त्वमित्यादिभिर्नवभिः । एतच्चिदचिदात्मकं जगत् त्वमेव "सर्वं खल्विदं ब्रह्म" इति श्रुतेः एकः सर्वकारणभूतः "स कारणं करणाधिपाधिपः" इति श्रुतेः कुत एतदहमस्मीत्यत आह अमुष्यकार्यभूतस्य यस्त्वम् आद्यन्तयोर्मध्यतो मध्ये च औषध्यादेर्भूमिरिव त्वमसि हेतुतया वर्त्तसे इत्यर्थः ननु तर्हि संसारित्वजडत्वादयो दोषाः मयि स्युरित्यत्राह पृथक् चासि चेतनाचेतनरूपात्स्वकार्यभूताज्जगतः स्वरूपतो भिन्न एवासि चिदचिदात्मकजगद्भिन्नोसीत्यर्थः तथाह भगवान्सूत्रकारः "उभयव्यपदेशात्त्वहिकुण्डलवत्" इति सूत्रार्थस्तु वेदान्तकौस्तभे द्रष्टव्यः । यतः गुणव्यतिकरं स्वशक्तिगुणपरिणामरूपं स्वांशभूतजीवभोगार्थं अपरिणामस्वस्वरूपमेवेदं जगत् मायया वयुनेन सङ्कल्पेनेत्यर्थः ततः पृथक् स्वरूप एव सृष्ट्वा तत्सृष्टं जगदनुप्रविष्टः यैर्गुणैरावृतान् जीवानालक्ष्य निग्रहानुग्रहादिकं करोषि तैर्गुणैर्नानेव निग्रहादिकर्त्तेव

तस्यैव ते वपुरिदं निजकालशक्त्या संचोदितप्रकृतिधर्मण आत्मगूढम् ।
अम्भस्यनन्तशयनाद्विरमत्समाधेर्नाभेरभूत्स्वकणिकावटवन्महाऽब्जम् ॥ ३३ ॥
तत्सम्भवः कविरतोऽन्यदपश्यमानस्त्वां बीजमात्मनि ततं स्वबहिर्विचिन्त्य ।
नाविन्ददब्दशतमप्सु निमज्जमानो जातेऽङ्कुरे कथमुहोपलभेत बीजम् ॥ ३४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अवसितः तमोगुणावृत्तेन जीवेन पापकर्मफलदत्वेन निग्रहकर्ता रजोगुणावृत्तेन ऐहिकपुण्यकर्मफलदत्वेनानुग्रहकर्ता सत्वगुणावृत्तेन जीवेन पारलौकिकसुखदत्वेनानुग्रहकर्त्ता निश्चितः सन् इद-मवसि ॥ ३० ॥

इमं कार्यकारणयोर्जगद्ब्रह्मणो भेदाभेदसम्बन्धं दृष्टान्तेनोपपाद-यति, त्वमिति । यद्यतो यस्य जन्मोत्पत्तिः निधनं समाप्तिः स्थितिः पालनमीक्षणं दर्शनम् तद्भिन्नमपि तदेव तदभिन्नमेव वसुकालवत् वसुकालयोरिव वसुकालवत् एको वै शब्द इवार्थे तस्य अष्टितवों-रित्यन्वयः वसुशब्देन वसुधा गृह्यते तथा च वसुतः वसुधातः उत्पत्तिरौषध्यादेः तद्वसुधातो भिन्नमप्यभिन्नमेव कालतः समाप्ति-क्षणादेस्तच्च ततो भिन्नत्वेप्यभिन्नम् अष्टितोऽन्नात्पालनं शरीरस्य तच्च ततो भिन्नत्वेऽप्यभिन्नम् रुदतो दर्शनं हरितादेस्तच्चापि ततो भिन्नम् एवं हे ईश ! यद्यपि भवान् स्वासाधारणरूपेण ततो जगतो ऽन्यो पि तथापि इदं चिदचिदात्मकं सदसत्स्थूलसूक्ष्मरूपं जगत् वै निश्चितं त्वमेव त्वत्तो भिन्नमप्यभिन्नमेव तथा च श्रुतिः "सर्वं ख-ल्विदं ब्रह्म तज्जलानिति" इति यत् या आत्मनि विश्वात्मनि त्वयि पर बुद्धिः मत्तः सर्वथान्योयमिति केवलभेदबुद्धिः सा माया दम्भरूपा अपार्था च "अन्यो सावन्योऽहमस्मि न स वेद यथा पशुः" इति श्रुतेः ॥ ३१ ॥

अथ भगवतः महाप्रलयान्ते परे वैकुण्ठे शयनं तदनन्तरं ब्रह्माण्डो-त्पादनं ब्रह्मोत्पादनं तद्रक्षणादिकं च चेष्टितं जीवहितायैवेति वर्णा-यति–त्वस्येत्यादिना । निरीहः त्यक्तलोकक्रीडेच्छः अत एव निजसुख-स्याऽनुभवो यस्य सः त्मना आत्मना आत्मनि कारणरूपे कार्यरूपमिदं जगत् न्यस्य विलयानि विगतलयानि नित्यानि अप्राकृतानि अम्बूनि यस्मिन् तत्परमं धाम तन्मध्ये योगेन निजानन्दयोगेन निमीलितदृक् प्राकृतनिद्राप्रसङ्गं निवारयति आत्मनिपीतनिद्र इति आत्मना परा-नंदस्वरूपप्रकाशेन निपीता निद्रा येन सः शेषे शयनं करोषि तस्य लोकस्य प्रकृतितद्गुणवर्जितत्वमाह, तुर्ये प्रकृता ये लोकाः ऊर्द्ध्वाधो मध्यभेदात् त्रिविधाः तदपेक्षया चतुर्थे—

"ऊर्द्ध्वं गच्छन्ति सत्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः" ॥

इत्येवं त्रिविधजीवागम्ये इत्यर्थः । तत्र स्थितः तमः प्रकृतिं तदीयान् गुणांश्च न युंक्षे न योजयसि तत्र प्रकृतितद्गुणतत्कार्यव्यवहारं नैव प्रवर्त्तयसीत्यर्थः ॥ ३२ ॥

———

भाषा टीका ।

हे अनंत ! आपने मेरे प्राणों की रक्षा और पिता वध ये दोनों जो किये सो मैं जानता हूं कि अपने और ऋषि लोगों के वाक्य सत्य करने के वास्ते किये, मेरा पिता हाथ में खड्ग लेकर बोला कि मेरे से दूसरा ईश्वर है तब तेरी रक्षा करे मैं तेरा मस्तक हरण करताहूं । पर आपने रक्षा करी ॥ २९ ॥

यह संपूर्ण जगत् एक आपही का स्वरूप है इस के आदि अंत में आपही विराम करते हैं अर्थात् वर्त्तमान हैं अत एव मध्य में भी आपही हैं आप अपनी निज मायासे गुण के परिणामात्मक इस जगत् को रचकर उसमें प्रविष्ट हो नाना सरीके मालूम पडते हौ ॥ ३० ॥

हे ईश ! यह कार्य कारणात्मक जगत् आपसे पृथक् है आप तो जगत से भिन्न हो क्योंकि ? आदि तथा अंत में चेतनाचेतन युत जगत नहीं रहता और आप तौ स्थित हौ, और यह जो बुद्धि है कि "यह मेरा और यह पराया, अपार्थ माया ही है जिस परमात्मा से इस जगत् का जन्म स्थिति और प्रकाश है उसी स्वरूप यह है, जैसे बीज और कार्य कारण मात्र अवस्था से भिन्न हैं ॥ जो जिससे होता है वह भी तत्स्वरूप ही है जैसे मृत्तिका से हुआ सृत सरूपही है ॥ ३१ ॥

प्रलय काल के जल मध्य में आप अपने में इस जगत् को कर, निज सुख मात्र के अनुभव वाले निश्चेष्ट होकर सोते उस समय में आप योग से निमीलित दृष्टि वाले होकर में निपीत की निद्रा जिसने ऐसे चतुर्थ अवस्था में स्थित हो तम और गुणों का योग नहीं करते हैं ॥ ३२ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

इदानीं कारणत्वेनाऽद्यावपि पृथगवस्थानं दर्शयन्मध्यतश्च त्वं वेत्येतत्प्रपञ्चयति चतुर्भिः । यस्त्वमम्भसि शेषे तस्यैव ते इदं वपुः स्वरूपं नान्यस्य यतस्त्वं मध्यतोऽपि तस्य कथम्भूतस्य निज कालशक्त्या सञ्चोदिताः प्रकृतेर्धर्माः सत्वादयो येन हेतुः अनन्तशयनाच्छेषपर्यङ्काद्विरमन्समाधिर्यस्य तस्य तव सकाशात् एकार्णवोदके महाब्जं लोकपद्ममभूत् कथम्भूतं त्वय्येव गूढं सत् स्वकणिकातः सूक्ष्माद्वटबीजान्महावट इव ॥ ३३ ॥

स त्वात्मयोनिरतिविस्मित आस्थितोऽब्जं कालेन तीव्रतपसा परिशुद्धभावः ।
त्वामात्मनीश भुवि गन्धमिवातिसूक्ष्मं भूतेन्द्रियाशयमये विततं ददर्श ॥ ३५ ॥
एवं सहस्रवदनाङ्घ्रिशिरःकरोरुनासास्यकर्णनयनाभरणायुधाढ्यम् ।
मायामयं सदुपलक्षितसन्निवेशं दृष्ट्वा महापुरुषमाप मुदं विरिञ्चः ॥ ३६ ॥
तस्मै भवान्हयशिर[1]स्तनुवं च बिभ्रद्वेदद्रुहावतिबलौ मधुकैटभाख्यौ ।
हत्वाऽनयच्छ्रुतिगणांस्तु रजस्तमश्च सत्त्वं तव प्रियतमां तनुमामनन्ति ॥ ३७ ॥
इत्थं नृतिर्यगृषिदेवझषावतारैर्लोकान्विभावयसि हंसि जगत्प्रतीपान् ।
धर्मं महापुरुष पासि युगानुवृत्तं छन्नः कलौ यदभवस्त्रियुगोऽथ स त्वम् ॥ ३८ ॥
नैतन्मनस्तव कथासु विकुण्ठनाथ ! सम्प्रीयते दुरितदुष्टमसाधु तीव्रम् ।
कामातुरं हर्षशोकभयैषणार्त्तं तस्मिन्कथं तव गतिं विमृशामि दीनः ॥ ३९ ॥
जिह्वैकतोऽच्युत ! विकर्षति मा वितृप्ता शिश्नोऽन्यतस्त्वगुदरं श्रवणं कुतश्चित् ।
घ्राणोऽन्यतश्चपलदृक्क्व च कर्मशक्तिर्बह्व्यः सपत्न्य इव गेहपतिं लुनन्ति ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेवं कारणत्वेनानुगतः सन्मध्यतश्च त्वमेव वर्तस इत्युक्तम् एतदेव शुद्धसत्त्वस्य ब्रह्मणोऽनुभवेन स्फुटयितुं तस्य प्राक्तनीमवस्थामाह—तस्मिन्नब्जे सम्भवो यस्य कविर्ब्रह्मा अतः पद्मादन्यदपश्यन् बीजमुपादानकारणभूतं त्वां स्वस्मिन्व्याप्तं सन्तमपि नाविन्दत् युक्तं चैतत् उह अहो अङ्कुरे जाते सति बीजं तदनुगतं कारणं पृथक्कथं नाम पुमान्पश्येत् ॥ ३४ ॥

भवदुपासनया तु स्वस्मिन्नेव दृष्टवानित्याह--सत्विति। परावृत्त्याऽब्जमास्थितः सन् तीव्रेण तपसा ध्यानेन अनेन सन्मात्ररूपेणोपादानतया दर्शनमुक्तम् ॥ ३५ ॥

ईश्वरत्वेन च दृष्ट्वा कृतार्थोऽभवदित्याह—एवमनेन प्रकारेण सहस्रमपरिमितानि यानि वदनादीनि तैराढ्यं समृद्धम् मायामयं मायाप्रधानं सता प्रपञ्चेनोपलक्षितः सन्निवेशः पादादिरचना यस्य ॥ ३६ ॥

तदा च भवांस्तस्यानुग्रहं कृतवानित्याह—तस्मादिति। हयग्रीवमूर्तिं बिभ्रत्सन् रजस्तमोरूपौ मधुकैटभाख्यौ हत्वा तस्मै श्रुतिगणान्समर्पितवान् तत्र हेतुः सत्त्वमिति ॥ ३७ ॥

एकस्त्वमेवेत्यादिभिरष्टभिः श्लोकैर्यदुक्तं पक्षपातेन रक्षणं तद्विपक्षवधश्च सत्त्वोपाधिको ननु स्वतइति तदुपसंहरति- इत्थमिति। विभावयसि पालयासि हंसि घातयसि कलौ तु तन्न करोषि यतस्तदा त्वं छन्नोऽभवः अतस्त्रिष्वपि युगेष्वाविर्भावात्स एवंभूतस्त्वं त्रियुग इति प्रसिद्धः ॥ ३८ ॥

तदेवं भगवतस्तत्त्वं निरूप्य स्वस्य च तद्विचारायोग्यतां निवेदयन्प्रार्थयते—नैतदितित्रिभिः। असाधुबहिर्मुखम् तीव्रं दुर्धरम् हर्षशोकभयैरेषणात्रयेण चार्तं दुःखितमपि त्वत्कथासु न संप्रीयते तस्मिन्नेवम्भूते मनसि सति कथं तव तत्त्वं विचारयामि ॥ ३९ ॥

किञ्च जिह्वा अवितृप्ता सती भो अच्युत! मा मां यतो मधुरादिरसस्तत आकर्षति उदरं तु क्षुधासन्तप्तं सत्सद्य एव यत्किञ्चिदाहारमात्रंप्रति चपला दृक् चक्षुः कर्मशक्तिः कर्मेन्द्रियाणि लुनन्ति त्रोटयन्ति ॥ ४० ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

एवमुपसंहृतजगतः कारणतयावस्थितात्जगत उत्पत्तिप्रकारं मध्यतस्तदनन्यत्वप्रदर्शनायाह--तस्यैवेति। तस्योक्तविधमवस्थितस्य तव नाभेर्वपुस्त्वच्छरीरभूतं जगदाकारं महाब्जमभूदुद्भूतं कथंभूतस्य तव निजकालशक्त्या स्वांशभूतया कालाख्यया शक्त्या सञ्चोदिता क्षुभितगुणा प्रकृतिरेव धर्मः अपृथक्सिद्धविशेषणं यस्य तस्य अम्भसि अनन्तशयनादिति ल्यब्लोपे पञ्चमी शेषपर्यङ्कादुत्थाय विरमन्समाधिः जगद्व्यापारवैमुख्येनावस्थानरूपो यस्य सिसृक्षोरिति फलितोर्थः, एवंभूतस्य तव नाभेः त्वच्छरीरभूतं जगदात्मकमात्मनि त्वयि निगूढं सूक्ष्मावस्थापन्नं महाब्जं स्वकणिकात्स्वबीजाद्वटवदभूदित्यर्थः ॥ ३३ ॥

तत्संभवस्तन्महाब्जसंभवः कविर्ब्रह्मा अतः पद्मादन्यदपश्यमानः स्वात्मन्यन्तरात्मतया ततं व्याप्तं बीजं पद्मस्य कारणभूतं त्वां स्वस्मादूवहिस्तथा अब्दशतं वर्षशतमप्सु निमज्जमानो विचिन्वन्नन्वेषयन्नाविन्दत नोपलब्धवान् अहो तथाहि, अङ्कुरे जाते बीजं कथमुपलभेत नोपलभेतैवेत्यर्थः। यथाऽङ्कुरे जाते सति ततः पृथक्स्थितं बीजं नोपलभते लोकस्तथा मत्कार्य-

(१) तनुतामिति पाठः वीर०।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

भूतं जगदात्मकं पद्मं मदभिन्नमिति दर्शयितुं भवान्बहुधा विचिन्वतापि ब्रह्मणा नोपलब्धइति भावः ॥ ३४ ॥

ततो भगवदुपासनया स्वस्मिन्नेव दृष्टवानित्याह—सत्विति। स तु विचिन्वन्नात्मयोनिर्ब्रह्मा अतिविस्मितः अब्दशतपर्यन्तान्वेषणेनापि अनुपलम्भप्रयुक्तविस्मययुक्तः परावृत्त्याऽब्जमाश्रितस्सन् तीव्रेण तपसा ध्यानेन परिशुद्धभावः परिशुद्धमनाः निरस्तत्वद्दर्शनविरोधिकर्मा हे ईश ! त्वामात्मन्येव विततं व्याप्तं ददर्श कथंभूतं भुवि गन्धमिवातिसूक्ष्मं स्वात्मनः पृथग्विभागानर्हम् अति सूक्ष्मभूतेति समस्तपाठे भुवि गन्धमिवात्मनि विततं ददर्श भुवि गन्धमिवेत्यवस्थानमात्रे दृष्टांन्तः अति सूक्ष्माणि विभागानर्हाणि कारणात्मतामापन्नानि भूतान्याकाशादीनि इन्द्रियाणयाशयोन्तःकरणञ्च तन्मयं तत्प्रचुरमेवंभूतं तावद्ददर्श ॥ ३५ ॥

ततः सहस्रमपरिमितानि यानि वदनादीनि तैराढ्यं समृद्धमतएव मायामयमाश्चर्यरूपं सदुपलक्षणसन्निवेशं सता सत्त्वेनानित्यत्वनोपलक्षणीयः सन्निवेशः वदनाद्यवयवसंस्थानं यस्य तं सता सूक्ष्मरूपेण सता प्रपञ्चनोपलक्षितः सन्निवेशो वदनादिविन्यासो यस्य तमितिवा एवंभूतं महापुरुषं दृष्ट्वा विरिञ्चो ब्रह्मा मुदं हर्षमाप प्राप्तवान् ॥३६॥

तदा च तं भवाननुगृहीतवान् इत्याह—तस्मा इति। तस्मै तीव्रतपसा परिशुद्धभावयोक्तविधं त्वां दृष्टवते विरिञ्चाय भवान् हयशिरस्तनुतां हयग्रीवरूपं बिभ्रत्श्रुतिगणान्सृष्ट्युपायावेदकान् वेदगणान् आनीय समर्पितवान् किं कृत्वा आनयत् रजस्तमश्च रजस्तमोरूपौ वेदद्रुहौ वेदापहारिणावतिवलौ मधुकैटभाख्यातिबलावसुरौ हत्वा समर्पितवान् यतस्समर्पितवानत एव तव प्रियतमां तनुं हयशिरस्तनुं सत्यं शुद्धसत्त्वात्मिकाम् आमनन्ति धर्मस्थापनायोपात्तां तनुं शुद्धसत्त्वमयीमामनंति जानन्ति अवतारयाथात्म्यविद इति शेषः ॥ ३७ ॥

एवं जगतउत्पत्तिप्रकार उक्तः अथ रक्षाप्रकारमाह, इत्थमुचितकालेषु तैस्तैः स्वेच्छोपात्तैः शुद्धसत्त्वमयैः नृतिर्यगृषिदेवझषावतारैः रामकृष्णवराहपरशुरामोपेन्द्रमत्स्यावतारैः अवतारान्तराणामपीदमुपलक्षणं लोकान् विभावयसि पालयसि जगद्विरोधिनो रावणादीन्हंसि च हे महापुरुष ! युगानुवृत्तं कृतादियुगेष्वनुवृत्तं धर्मं वर्णाश्रममर्यादादिरूपं जगत्प्रतीपनिरसनेन पासि पालयसि यतस्त्वं कलौ युगे छन्नोऽभवः आसीः अथ ततः त्रियुगशब्दप्रवृत्तिनिमित्ताश्रयोसि कृतत्रेताद्वापरेष्वेवावतारमुखेनाविर्भावात् त्रियुग इत्यभिधीयत इत्यर्थः ॥ ३८ ॥

एवमखिलजगदुदयविभवलयैककारणं तदन्तरात्मानं तच्छरीरकं संस्तुत्य यथावत्स्वरूपरूपादिविमर्शने मन्मनो न समर्थमिति वदन् किञ्चित्प्रार्थयते नैतदिति त्रिभिः । हे विकुण्ठनाथ ! दुरितैर्दुष्टमतएवासाधुवृत्ति कामातुरं विषयप्रवणं हर्षेणाभिमतविषयलाभे हर्षेण तद्विपरीतविषयलाभे तु शोकेनेषणाया पुत्रदारधनैषणाया चार्तं मदीयं मनः तव कथास्वेव न सम्यक् प्रीयते, नासक्तं भवतीत्यर्थः । तस्मिन्मनस्येवं स्थिते सति दीनः विषयपारवश्येन दुःखितोऽहं तव गतिं याथात्म्यं कथं विमृशामि ॥ ३९ ॥

न केवलं मन एव ममैवं जातं किंत्विन्द्रियान्तराण्यपीत्याह-जिह्वेति । हे अच्युत ! जिह्वा मा अवितृप्ता अतृप्तासती एकतो मधुरादिरसान् प्रति मां विकर्षति तथा शिश्नोप्यतृप्तः त्वगादयश्च कुतश्चिद्विकर्षन्ति तत्तद्विषयभोगाय कर्षन्ति चपलदृक् चञ्चला दृष्टिः क्वचाभिमतरूपदर्शनाय विकर्षति उदरशब्दः प्राणोपलक्षकः तथा कर्मशक्तिः क्रियाशक्तिः पाणिपादादिरपि विकर्षति क्वचिद्गेहपतिं गृहस्थं बह्व्यः सपत्न्य इव देहपतिम् इन्द्रियाणि लुनन्ति विकर्षन्तीत्यर्थः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सृष्टेः प्रागित्युक्तं दर्शयति—तस्येति । तस्य तुरीयस्यास्य जगत्कारणस्य च कश्चिद्विशेषोनास्तीति द्योतनायैवकारः आत्मनि देहे जठरे गूढं निलीनमिदं जगज्जगदात्मकं महाब्जं यस्य तव नाभेरभूत्तदब्जं तस्यैव ते वपुः सन्निधानविषयत्वात् प्रतिमास्थानीयम् । कीदृशं स्वरूपं भूतसृष्टिकालशक्त्या संचोदितं सृष्ट्यै प्रेरितं कटाक्षीकृतं कीदृशस्यास्य प्रकृतिधर्मिणः प्रकृतिप्रेरकधर्मवतः प्रलयोदकेऽनंताख्यशयनादुत्थाय विरमन् समाप्तिं कुर्वन् समाधिर्योगनिद्रालक्षणो यस्य स तथा तस्य कथमिव वटवत् वटलक्षणोंकुरोयथा स्वकणिकात् उत्पत्स्यमानकणिकात् कणिकाख्यवटबीजादित्यर्थः। नन्वयंविषमोदृष्टान्तस्तथाहि,कणिकानाम। वटबीजविकारोहि वटाख्यांकुरः न चायं प्रकृते सम्भवति. "निर्विकारोक्षरः शुद्धः"इति वचनादुच्यते स्वकणिकादितिलिङ्गव्यत्ययेन कश्चिद्विशेषोविज्ञायते कोयमिति चेदुच्यते कणिकानामादृश्या देवता सर्वस्थावरबीजानामभिमानिन्यपि वटाश्वत्थबीजयोर्विशेषतः संनिहिता अतस्तत्तद्बीजेभ्यस्तदंकुरव्यंजनात्तत्प्रागपि तत्र स्थित्वा जातेत्युच्यते यथा, तथा श्रीहरेरपि प्रकृत्यादिस्वामित्वेन च तत्सान्निहितत्वेन च स्थितस्तत्कार्येष्वनुविष्टत्वेन जातइत्युच्यते "आत्मन आकाशः सम्भूतः" इत्यादौ श्रुतत्वात् तत्रापि वटबीजाद्वटांकुरस्य साक्षादुत्पत्तिर्वटवृक्षिणश्चेतनस्य चेतनाभिमानादुत्पत्तिः उभयाभिमानिन्या देवताया अभिव्यंजकत्वेनाऽभिव्यक्तिस्तथा यथायोग्यं सत्त्वतमोमिश्ररजोगुणान् जगदात्मनः पद्मस्य साक्षादुद्भवः पद्मिनो हिरण्यगर्भस्याभिमानजननं हरेः पुरुषांतरेणाविर्भावइत्यादिकमिति, "स्थावराणां तु सर्वेषां देवतायाभिमानिनी । विशेषाद्वटबीजे च अश्वत्थे च व्यवस्थिता ॥ अदृश्या कणिका नाम सा वृक्षाद्व्यंजयत्यपि । अतोबीजमिति प्रोक्ता सा जातेत्यंकुरे स्थिता ॥ एवं हरिः कार्येषु स्थितः कार्यजनेरनु । कार्याण्यनुप्रविष्टः सन् प्रथमं तत्र दृश्यते" इत्यनेनोक्तविशेषोविज्ञायतइति न कापि शंका कार्येति, तस्माद्दृष्टांतदार्ष्टांतिकयोरुपपत्तिरस्तीति युक्तएव दृष्टान्तः ॥ ३३ ॥

तत्र विरिञ्चस्य लोकपद्मलक्षणदेहाभिमानोत्पत्तिपूर्वकं हरेर्वटबीजाभिमानिदेवतावददृश्यत्वं प्रकटयंस्तस्य मीमांसामाह-तत्सम्भवइति । पद्मस्य प्रकृत्यात्मकत्वेन तस्मात्पद्मात् सम्भवो जननं यस्य स तथा लोकात्मकत्वेन तस्मिन्देहस्थानीयेऽभिमानसम्भवो यस्य स तथा उभयोरप्यत्र विवक्षितत्वात् अतः

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अब्जादन्यद्वस्तु न पश्यन्नप्सु निमज्जमानोनिमज्य मूलं विचिन्वन् लोके बीजादङ्कुरे जाते नष्टं बीजमिव पृथिव्यां कथमुपलभेत पुरुषइति तच्चिन्तां दर्शयन्नेवं विभुःकविर्ब्रह्माऽऽत्मनि स्वस्मिन्नेव अब्जांतस्तस्मादूबहिश्च विततं व्यञ्जकत्वादूबीजदेवतावत् बीजसंज्ञत्वान्नाविदन्नोपलब्धवानित्यन्वयः ॥ ३४ ॥

आत्मा परमात्मा योनिः कारणं यस्य स तथा तुशब्देनैकस्य हरेर्बहुधाजन्मास्तीति विशेषं दर्शयति सएव ब्रह्मा अब्दशतसंज्ञितेन कालेन विचिन्त्य विविधपृथिव्याद्याधाराणामनुत्पन्नत्वादस्य केनचिदाधारेण भवितव्यं लौकिके बीजनाशवत् नाशायोगात् सन्नपि न दृश्यते कुतूहलमेतदिति अतिविस्मितोऽब्जमाश्रितस्तपेतिद्व्यक्षरं श्रुतवान् तपसाहं द्रष्टुं शक्तइत्यनेनोक्तमभिजानन् तीव्रेण तपसा परिशुद्धांतःकरणोभूतेन्द्रियाशये जगति विततं त्वामात्मनि स्वस्मिन् स्थितं ददर्शेत्यन्वयः कथमिव भुवि व्याप्तमतिसूक्ष्मं गन्धाख्यदेवतास्वरूपं यथा पश्यति योगी तथेत्यर्थः गन्धाख्या देवता यद्वत्पृथिव्यां व्याप्य तिष्ठति एवं व्याप्तं जगद्विष्णुं ब्रह्मात्मस्थं ददर्श हेतिवाक्यं गन्धशब्देन देवताकथनं युक्तमिति भावः ॥ ३५ ॥

यथा सूक्ष्मरूपं दृष्ट्वा मुमुदे तथा विराड्रूपमपि तयोरीषदपि विशेषाभावादित्याह—एवमिति । अनेन ब्रह्माण्डशरीरी ब्रह्मा "पातालमेतस्य हि पादमूलम्"इत्याद्युक्तं यद्रूपमपश्यत्तदेव पद्मजोपीति ज्ञातव्यम्. आत्मयोनिरिति विशेषणान्मायामयं ज्ञानरूपम्. अनिर्वाच्याविद्यामायानामेति—किंनस्यादित्यत्राह सदिति । आनन्दादिलक्षणसमुदायरूपम्. अथ कस्मादुच्यते सदिति "सन्तो ह्यस्मिन्नानन्दओजोबलम्"इति स्पष्टश्रुतेः ।"सन्निवेशश्च यः स्तोमः समुदायोगणः स्मृतः"इत्यभिधानम् आनन्दादिलक्षणानां सन्निवेशो यस्मिन् स तथा तं गुणगुणिनोरभेदात्स्वरूपत्वं सिध्यति "विज्ञानमानन्दं ब्रह्म"इति श्रुतेः, लक्षणत्वज्ञापनायादिशब्देन ज्ञानग्रहणम् ॥ ३६ ॥

रजस्तमःस्वभाववतिबलौ वेदद्रुहौ मधुकैटभाख्यौ हत्वा श्रुतिगणाननयत् आनीयास्मै विरिञ्चायावोचादिति शेषेणान्वयः अनेनैतत्सिद्धमभूदित्याह—सत्त्वमिति ॥ ३७ ॥

चतुष्पद्धर्मं पासि यस्त्वं कलौ छन्नोऽभवइति यस्मात्तस्मात्स त्वं त्रियुगइति ख्यातः ॥ ३८ ॥

एवं हरेर्भक्तवात्सल्यं विज्ञाप्य स्वाशक्तिं विज्ञापयति—नैतदिति । यदेतन्मनस्तव कथासु न सम्प्रीयते तस्मिन्मनसि तव गतिं कथं विमृशामीत्यन्वयः ईषणां वित्तादीनामिति शेषः ॥ ३९ ॥

मनःसमाधानाभावादन्येन्द्रियाण्यपि मत्पुरुषार्थविरुद्धानीत्याह जिह्वेति । स्पर्द्धाभाषणशीलत्वाज्जिह्वा दुःसंगेन पुण्यश्लथनशीलत्वात् शिश्नः"त्वच संपर्के"इति धातोः दुःसंपर्कशीलत्वात्त्वक् उदात्कक्कुदं नमयतीत्युदरं कर्मशक्तिरित्यनेन कर्मेन्द्रियाणि वागादीनि लक्षयति गेहपतिं देहस्वामिनं अन्यत्र गृहपतिम् ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

जातमात्रेप्यंकुरेऽधिकरणे स्वांशेन वर्त्तमानमपि बीजं कथमुपलभते ? नैवेत्यर्थः । किन्तु तत्तल एवोपलभते तत्तु तस्यागम्यमेवासीदिति भावः ॥ ३३ ॥ ३४ ॥

ततश्च समाधिना प्रथमं तावत् तत्रैव ब्रह्माख्य सन्मात्रत्वेन तमनुभूतवानित्याह—सत्त्विति ॥ ३५ ॥

ततश्च सच्चिदानन्दरूपं तस्य विग्रहमपि दृष्टवानित्याह—एवमिति । ननु, कथं तलस्थबीजस्थानीयस्य तस्य तत्रैव दर्शनं तत्राह एवं समाधौ विततत्वानुभवप्रकारेणैवेति तद्विग्रहस्य मध्यमपरिमाणतया दृश्यमानत्वेपि विष्णुत्वानुभवादिति भावः मायामयं प्रचुरतच्छक्तिमिति प्रपञ्चाधिष्ठातृत्वात् ॥ ३६ ॥ ३७ ॥

तत्रतत्र साक्षादवतीर्य तत्पालनत्वेनोपसंहरति—इत्थमिति ॥ ३८ ॥

तदेवं तत्कथामनूद्य पूर्वपूर्वजन्मस्वभावमनुस्मृत्य तच्च दैन्येनास्मिन् जन्मन्यारोप्य तस्यामप्यतितृष्णया तामसेवमानमिव मत्वा स्वमनस्तिरस्करोति—नैतन्मन इति ॥ ३९ ॥

तदेव दुःखसादृश्येन जनदुःखमनुस्मृत्य कृपापरवशः स्वदुःखमप्यनादृत्य तदर्थमेव निवेदयति—जिह्वैकत इति द्वाभ्याम् ॥ ४० ॥ ४१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ततश्च तस्यैव तव पुनः सृष्ट्यारंभे निजकालशक्त्या सञ्चोदिताः प्रकृतेर्धर्माः सत्त्वादयो येन तस्य आत्मनि स्वस्मिन् गूढमेव इदं ब्रह्माण्डरूपं वपुः प्रकृतेः सकाशात् प्रकटमभूत् ततश्च अम्भसि तदण्डगर्भोदे शयानस्य तव अनन्तशयनात् विरमन् समाधिर्यस्य तस्य नाभेः सकाशात् महाब्जम् अभूत् स्वकणिकातः सूक्ष्माद्वटबीजान्महावट इव ॥ ३३ ॥

तत्संभवः तदब्जजातः कविर्ब्रह्मा अतोऽब्जादन्यदपश्यन् तद्बीजं स्वशक्त्यैवोपादानकारणं त्वाम् आत्मनि स्वस्मिन् विततं व्याप्त्या सन्तमपि स्वबहिरेव वर्त्तमानं विचार्य अब्दशतं व्याप्यान्विष्यन्नपि ना विदत् युक्तं चैतत् उ अहो अंकुरे जाते तत्र स्वांशेन वर्त्तमानमपि बीजं तत्रांकुरेऽधिकरणे कथं उपलभेत किन्तु तत्तले एव उपलभ्येतेत्यर्थः । कमलशूरणादीनां अंकुरेषूत्पद्योत्पद्य नष्टेष्वपि बीजनाशादृष्टेः तत्तलंतु तदानीं ब्रह्मणोऽगम्यमेवासीदिति भावः ॥ ३४ ॥

आस्थित अन्वेषणान्निवृत्य अब्जमेवाश्रितस्सन् तीव्रतपसा त्वदीयध्यानेन आत्मनि स्वदेहे एव भुवि कार्य्यभूतायां स्थितं कारणं गन्धमिव त्वां ददर्श ॥ ३५ ॥

एवमनेन प्रकारेण सहस्रमपरिमितानि यानि वदनादीनि तैराढ्यं महापुरुषं चिदानन्दं विग्रहयतो मायामयं स्वरूपभूतया नित्यशक्त्या मायाख्यया युतः "अतो मायामयं विष्णुं प्रवदन्ति मनीषिणः" इति श्रुतिः यद्वा मायाया जीवस्याविद्यया आमयं

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

रोगमिव विनाशकं सन् समुचितत्वेनोत्तमः उप आधिक्येन लक्षितः सामुद्रकलक्षणाङ्कितः सन्निवेशोनयनग्रीवादिविन्यासो यस्य तं यद्वा तमेव कारणकार्ययोरैक्यात् सता प्रपञ्चेन पातालादिना उपलक्षितः संनिवेशः पादादिरचना यस्य तथाभूतं वैराजं मायामयं दृष्ट्वेति सम्बन्धः ॥ ३६ ॥

स्वभक्तं तञ्च पुनःपुनरवतीर्य्य त्वमरक्षीरित्याह–तस्माद्इति । हयग्रीवमूर्तिं दधत् श्रुतिगणान् अनयत् तस्मै समर्पयामास मधुकैटभाख्यौ कीदृशौ रजस्तमस्स्वभावावित्यर्थः तयोर्हननेहेतुः, सत्त्वमिति. यद्यपि गुणमात्र एवोदासीनस्य हरेः सत्त्वगुणोन प्रियः तदपि तत्स्वरूपभूते शुद्धसत्त्वे सत्त्वगुणस्य प्रातिकूल्याभावदर्शनादेव प्रियतमत्वमुत्प्रेक्षितं नतु वस्तुतःप्रियतमत्वमपि किंतु सात्त्विकलोकपक्षपातित्वमेव तव तादृशोत्प्रेक्षायां हेतुः शिष्टपालनार्थमेव तव दुष्टनिग्रहो यत्तत् खलु गुणानामेव स्वभावो न तु वस्तुतस्त्वयि वैषम्यमिति भावः ॥ ३७ ॥

यथा विरिंचस्य कृते हयग्रीवावतारस्तथैवान्येषामपि भक्तानां कृते अन्येप्यवतारा इत्याह—इत्थमिति । विभावयसि पालयसि हंसि घातयसि युगेयुगे अनुरूपं वृत्तं चरित्रं यस्य सः यत् यस्मात् त्वं कलौ छन्नः अन्यदीयरूपभावाभ्यां वहिराच्छन्नः अतः स एव त्वं त्रियुग इति प्रसिद्धः सत्यादियुगत्रय एव स्वस्य प्रख्यापनात् नतु कलावित्यर्थः अत एवाग्रे तत्प्रमाणवचनमप्यर्थान्तराच्छन्नतयैव वक्ष्यते "नानातंत्रविधानेन कलावपितथा शृणु । कृष्णवर्णं त्विषा कृष्णं सांगोपांगास्त्रपार्षदम् । यज्ञैस्सङ्कीर्त्तनप्रायैर्यजन्ति हि सुमेधसः" इति ॥ ३८ ॥

तदेवं मुहुरप्यवतीर्य्य त्वं स्वीयरूपगुणलीलामृतं वर्षसि तदप्यस्माकं पापिष्ठं मनस्तत्र न प्रीणाति दुर्विषयविषगर्त्त एव मुहुः पतति किं कुर्मं इत्याह–नैतदिति त्रिभिः । तव रूपगुणलीलादीनां कथासु नन्वतिसाध्वीष्वपि कथासु किमिति न प्रीयते तत्राह दुरितदुष्टं यथा पित्तदुष्टा रसना सिताखित्यर्थः तीव्रं दुर्वारम् ईषणाधनादिवासना तस्मिन् मनसि तव गतिं तत्त्वं कथं विमृशामि यद्यपि महाभागवतस्य प्रह्लादस्य मनो न प्राकृतमेतादृशं त्वद्वीर्य्यगायनमहामृतमग्नचित्त इत्यस्यैवाग्रिमोक्तेस्तदपि प्रेम्णो विचित्रविधतरंगवत्त्वेनातिदैन्योदयादेव प्रेमिलोकस्यैव मुक्तिर्न विरुद्ध्यते ॥ ३९ ॥

मनसो दुष्टत्वेपि मत्कीर्त्तनादिना जनः कृतार्थो भवतीति चेत्तत्राह--जिह्वा वागिन्द्रियरसनन्द्रियञ्च अवितृप्ता सती भो अच्युत मामाकर्षति ग्राम्यकटुमिथ्यादिप्रलापंप्रति मधुरादिरसंप्रतिचेति भावः । अन्यतस्ततोप्यन्यत्र कामिनीषु कर्मणि धनोपार्जनादावन्यताडनादौ वा शक्तिः सामर्थ्यं लुनन्ति त्रोटयंत्यतस्त्वत्कीर्त्तनादाववकाशमेव न प्राप्नोमीति भावः ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तदनन्तरं यः परमधाममध्येशयनं करोति तस्यैव तु पुनः सृष्टिवेलायां निजकालशक्त्या सञ्चोदिताः प्रकृतेः स्वशक्तेर्धर्माः सत्त्वादयो येन तथाभूतस्य आत्मनि स्वस्मिन् गूढं सूक्ष्मरूपे संस्थितम्[म] इद ब्रह्मांडाख्यं वपुरभूत् स्वस्मात् स्थूलतयो[...] दितमित्यर्थः । तदनंतरं नारायणरूपेण अम्भसि ब्रह्मांडांत[...] जले शयानस्य अनन्तशयनाद्धिरमत्समाधियस्य तस्य ते ना[...] सकाशात् महाब्जमभूत् स्वफणिकातः स्वर्वीजाद्वट इव ॥ ३[...]

तस्मिन् सम्यग्भवोजन्म यस्य सः कविर्वहुज्ञोब्रह्मा अतो[...]ब्जादन्यदपश्यमानः त्वां बीजं स्वात्मनि स्ववहिश्च विततं [...]मानमपि जातेऽङ्कुरे वीजं कथमुपलभेतेति विचिंत्यापि तदन्वेष[...]र्थमब्दशतमप्सु निमज्जमानोपि नाविन्दत् ॥ ३४ ॥

हे ईश ! आत्मा भावन् योनिः कारणं यस्य सः परावृ[...]ब्जमास्थितस्सन् तीव्रेण तपसा ध्यानेन परिशुद्धभावः आत्मनि चेतने ततो बहिरपि भूतेन्द्रियाशयमयेऽचेतनवर्गे च भुवि गन्धमिव अतिसूक्ष्मं विततं त्वां ददर्श ज्ञातवानित्यन्वयः ॥ ३[...]

चेतनाचेतनविलक्षणभगवत्स्वरूपज्ञानं निर्दिश्याथप्राकृ[...] विग्रहमपि दृष्टवानित्याह–एवमिति । यथा स्वरूपं ददर्श तथा मह[...] पुरुषं महाविग्रहयुक्तमपि दृष्ट्वा विरिञ्चो मुदमापेत्यन्वयः । कथं[...]भूतं सहस्राण्यपरिमितानि यानि वदनादीनि तैराढ्यं सहस्र[...] मायामयं माया कृपा तत्प्रधानं कृपयाविष्कृतमित्यर्थः । सदुपल[...]क्षितसन्निवेशम् सता वेदेन हिरण्यश्मश्रुः हिरण्यकेशः "आप्र[...]नखात्सुवर्णः" इत्यादिनोपलक्षितसन्निवेशः अवयवविन्यास[...] यस्य तम् ॥ ३६ ॥

भवान् हयशिरस्तनुं हयग्रीवमूर्त्तिं बिभ्रत् वेदद्रुहौ रज[...]मश्च रजस्तमःस्वभावौ मधुकैटभौ ब्रह्मणो वेदान् गृहीत्वा तद्वध[...] प्रवृत्तौ हत्वा तस्मै श्रुतिगणान् अनयत् दत्तवान् यतः सत्त्वं सत्त्व[...] स्वभावं जनं तव प्रियतमां तनुं वासस्थानमामनन्ति सत्त्वस्वभा[...] जनहितार्थमसुरवधब्रह्मरक्षणवेदानयनानि कृतवानित्यर्थः ॥ ३७ ॥

ब्रह्मणि कृतमनुग्रहमन्यत्रादिशति—इत्थमिति । यथा ब्रह्मा[...] पालितवान् एवं नृतिर्यगादिषु कृतैरवतारैः लोकान् धार्मिक[...] जनान् विभावयासि पालयसि जगत्प्रतीपान् अधार्मिकान् हं[...] घातयसि युगे अनुवृत्तं धर्मं पासि कथंभूतो यो धर्मः [...] छन्नः कथंभूतस्त्वमभवः भवोपलक्षितसर्वविकारशून्यदेहवा[...]न्नित्यर्थः । यद्यतस्त्वं त्रियुगः त्रीणि युगानि युगलानि षड्भगव[...]णानि यस्य सः भगवानित्यर्थः कलौ त्वं छन्नो ऽभवः इत्यन्[...] भाव इत्यध्याहारो बोध्यस्तत्रापि बुद्धाद्यवतारप्रसिद्धेः ॥ ३८ ॥

अथ स्वदैन्यनिवेदनपूर्वकं मां पालयेति प्रार्थयते–नैतदि[...] त्रिभिः । हे विकुण्ठनाथ ! एतत् दुरितैर्दुष्टम् अत एव काम[...] विषयासक्तं तीव्रं दुर्द्धरम् हर्षशोकभयैषणाभिरार्तं मनःतव कथा[...] न सम्प्रीयते अतस्तास्मिन् मनसि सति दीनोहं तव गतिं त्वत्[...]प्रसाधनं विमृशामि ॥ ३९ ॥

किञ्च हे अच्युत ! मा मां जिह्वा रसनेन्द्रियमवितृप्ता ह[...] एकतो रसंप्रति तथा अवितृप्तेति पदं लिङ्गव्यत्ययेन स[...] योज्यम् शिश्नो अन्यतो मैथुनानन्दंप्रति त्वक् अन्यतः स्प[...] प्रति उदरं क्षुधासन्तप्तं अन्यत आहारं प्रति अवणं कचित् [...] प्रति घ्राणो अन्यतः गन्धंप्रति चपला दृक् दृष्टि क्वच रूपं[...]

एवं स्वकर्मपतितं भववैतरण्यामन्योऽन्यजन्ममरणाशनभीतभीतम् ।
पश्यन् जनं स्वपरविग्रहवैरमैत्रं हन्तेति पारचर ! (१)पीपृहि मूढमद्य ॥ ४१ ॥
कोन्वत्र तेऽखिलगुरो ! भगवन्प्रयास उत्तारणे ऽस्य भवसम्भवलोपहेतोः ।
मूढेषु वै महदनुग्रह आर्तबन्धो ! किं तेन ते प्रियजनाननुसेवतां नः ॥ ४२ ॥
नैवोद्विजे परदुरत्ययवैतरण्या(२)स्त्वद्वीर्यगायनमहाऽमृतमग्नचित्तः ।
शोचे ततो विमुखचेतस इन्द्रियार्थमायासुखाय भरमुद्वहतो विमूढान् ॥ ४३ ॥
प्रायेण देवमुनयः स्वविमुक्तिकामा मौनं चरन्ति विजने न परार्थनिष्ठाः ।
नैतान्विहाय कृपणान्विमुमुक्ष एको नान्यं त्वदस्य शरणं भ्रमतोऽनुपश्ये ॥ ४४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तथा कर्मशक्तिः वाक्पाण्यादिकर्मेन्द्रियशक्तिः क्व वचनदानादिकं प्रति विकर्षति सर्वाणीन्द्रियाणि संसारप्रापकस्वस्वविषयगर्तपातनेन मां त्वद्विमुखं कुर्वन्तीत्यर्थः । बह्वयः सपत्न्यः गेहपतिं स्वस्वामिनं लुनन्तीव त्रोटयन्ति यथा स्वस्वार्थनिर्बन्धेन तद्दिदृक्षांत् विमुखं कुर्वन्ति यथेत्यर्थः ॥ ४० ॥

भाषा टीका ।

यह जगत् आपही का शरीर है, क्योंकि ? जब आप की प्रलय काल के जलमें शेषजी के शयन से समाधि विराम को प्राप्त हुई तब आपने अपनी काल शक्ति से प्रकृति के धर्मों को प्रेरणा की, उस समय आपके विषै गूढ रहा जो जगत् वही, वटके बीज से जैसे महावट उत्पन्न होता है, उसी तरह आपकी नाभि से (चतुर्दशभुवनात्मक) महाकमलरूप से उत्पन्न हो गया ॥ ३३ ॥

उस नाभि कमल से उत्पन्न हुआ जो ब्रह्मा वह उस कमल के सिवाय और कुछ नहीं देखता हुआ, आत्मा के विषै व्याप्त, उस कमल के बीज रूप आपको अपने से बाहर ढूंढता हुआ, उन प्रलय के जलों में डूबता हुआ, सौवर्ष तक मूल कारण को नहीं प्राप्त हुआ, यह भी तो ठीकही है क्योंकि ? जब अंकुर उत्पन्न होचुका तब अंकुर से पृथक् बीज कैसे उपलब्ध होवे ॥ ३४ ॥

फिर वही ब्रह्मा अत्यंत विस्मित होकर उसी कमल पर बैठ गया और बहुत काल में तीव्रतप करने से शुद्ध भाव वाला होकर, हे ईश ! जैसे पृथिवी में गन्ध इसी प्रकार भूत इन्द्रिय अन्तःकरणमय अपने आत्मा ही में अति सूक्ष्म रूप से आप को देखता भया ॥ ३५ ॥

इसी प्रकार फिर आप को हजारों वदन चरण शिर हस्त ऊरु नासा मुख कर्ण मन और आभरणों से युक्त, माया मय, (कृपा प्रधान) और समीचीन उपलक्षित हैं विग्रह संनिवेश जिनका, ऐसे महापुरुषरूप को देख कर ब्रह्मा परम आनन्द को प्राप्त हुआ ॥ ३६ ॥

तिस ब्रह्मा के अर्थ आपने हयग्रीव स्वरूप को धारण कर, वेदके द्रोही अतिबलिष्ठ मधु कैटभ दैत्यों को मारकर, फिर वेद समर्पण किये, इसी से बुध लोग रज तम और सत्त्व इनको आपकी प्रिय तनु कहते हैं ॥ ३७ ॥

हे महापुरुष ! इसी प्रकार आप मनुष्यों में (रामकृष्णादि) तिर्यकों में (वराहादि) ऋषियों में (कपिलादि) देवताओं में (वामनादि) अवतारों को धारण करके, लोकों को पालन करते हो, जगत् के दुःख देने वालों का नाश करते हो, और युगानुगुण धर्म को पालन करते हो, और जिस कारण कलि में आप छन्न (आवृत) होकर रहते हैं, और तीन युगों में धर्म का रक्षण करते इसी से आपका नाम त्रियुग है ॥ ३८ ॥

हे विकुण्ठ नाथ ! यह मेरा मन दुरितदुःख असाधु तीव्र कामातुर हर्ष शोक भय इच्छाओं से आतुर हे विकुण्ठनाथ ! यह मेरा मन पाप कर्मों से दुष्ट होरहा है, असाधु तीव्र और कामातुर, हर्ष शोक भय इच्छाओं से आर्त हैं इसी से आपकी कथा में प्रीत नहीं होता है, मैं अति दीन हूं इस मन में आपकी गति को कैसे विचारूँ ॥ ३९ ॥

हे अच्युत ! अवितृप्त मेरी जिव्हा मुझे एक ओर खींचती है, शिश्न एक ओर, त्वचा और ओर को, उदर और श्रवण किसी ओर को, घाण और ओर को, चपल दृष्टि किसी ओर को, कर्मशक्तियें कहीं को खीचती हैं । जैसे बहुत सी पत्नी किसी के हों और वे अपने पति की खैंचातानी करती हैं वह दशा मेरी होरही है ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

न केवलमहमेक एवैवं कष्टां दशामापन्नः किन्तु महाजनोऽप्येवमेव क्लिश्यत्यतः सर्वं जनं पालयेति प्रार्थयते, एव-

(१) पारमति पीपृहि मूढस्त्वम् इति विजय० । पिपृहि इति वीर० पा० । त्वद्वीर्थमिति पाठः विज० ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

मिति । भवः संसार एव वैतरणी यमद्वारनदी तस्याम् अन्योऽन्यतो यानि जन्मादीनि तेभ्योऽतिभीतं स्वेषां परेषां च विग्रहेषु यथायथं वैरं मैत्रं च यस्य एवं मूढं जनं पश्यंस्त्वं हे पारचर! तस्याः पारे स्थितनित्यमुक्त हन्तेति अहो कष्टमित्येवमनुकम्प्याद्य पीपृहि वैतरणीमुत्तार्य पालय ॥ ४१ ॥

एकेन मया कथं सर्वोजनस्तारणीय इतिचेत्तत्राऽऽह कोन्विति । को नु ते अत्र सर्वजनोत्तारणे प्रयासो न कोऽपि कुतः अस्य विश्वस्य भवसम्भवलोपानामुत्पत्तिस्थितिसंहाराणां हेतोः ततोऽपि किमेतद्दुष्करमिति भावः । उचितं चैतदित्याह, मूढेष्विति । त्वां च त्वदीयांश्च तारयिष्यामीमं दुराग्रहं मा कृथा इतिचेत्तत्राऽऽह तव ये प्रियजनाः भक्तास्ताननुसेवमानानां नोऽस्माकं तेनोत्तारणेन किम् । "कोऽति प्रयासोऽसुरबालका हरेः कोऽन्यत्र तेऽखिलगुरो भगवान् प्रयासः । प्रह्लाद इत्थमुपमन्य मिथो नराणामीशेन सख्यमकरोदपनीय मायाम्" ॥४२ ॥

वत्स प्रह्लाद ! त्वां तावत्तारयिष्यामि तावतैव कृतार्थः स्याः किमनेन निर्बन्धेनेत्यत आह–नैवेति । हे पर ! सर्वोत्तम त्वद्वीर्यगायनमेव महामृतं तस्मिन्मग्नं चित्तं यस्य सोऽहं भववैतरण्या नैवोद्विजे किन्तु विमूढान् शोचामि, तानेवाह. ततो महामृताद्विमुखं चेतो येषाम् प्रत्युतेन्द्रियार्थनिमित्तं यन्मायासुखं तदर्थं भरं कुटुम्बादिभारमुद्वहतः ॥ ४३ ॥

त्वं तावन्मुक्तिं गृहाण–तांस्तु तत्त्वज्ञा मुनय उपदेक्ष्यन्तीतिचेत्तत्राह, प्रायेणेति. न विमुमुक्षे विमुक्तिं नेच्छामि तर्ह्यन्यं कमपि प्रार्थय मामेव किमिति निर्बध्नासीतिचेदत आह त्वत्तोऽन्यमस्य जनस्य शरणं न पश्यामि ॥ ४४ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

न केवलमहमेवेदृशीं दशां प्राप्तः किन्तु मदीयो जनोऽप्येवमेव क्लिश्यत्यतः सर्वं मदीयं जनं संसारान्मोचयेति प्रार्थयते, एवमिति । भव एव वैतरणी दुःखप्रदा यमलोकनदी तस्यां स्वकर्मभिः पुण्यपापात्मकैः पतितमन्योन्यं यानि मरणादीनि शत्रूणां पुत्रादिजन्मना स्वस्य भयं स्वस्य पुत्रादिजन्मना परेषां शत्रुभ्यःस्वस्य भयं स्वस्माच्छत्रूणाम् एवं परैः स्वद्रव्यभक्षणेन स्वस्य भयं स्वेन परद्रव्यभक्षणे स्वस्मात्परेषामिति यथा सम्भवमूह्यम् । तेभ्यो जन्मजरामरणाशनेभ्यो भीतभीतं भीतादपि भीतं स्वेषां परेषां च विग्रहेषु देहेषु यथायथं वैरं मैत्रञ्च यस्य तमेवमद्यापि मूढमज्ञं जनं पश्यन् त्वं हे पारचर ! भववैतरणीपारे चरतीति तथा तस्य सम्बोधनम्. अति पिपृहि "पृपालनपूरणयोः" इति धातुः अतीव पालयेत्यर्थः । यद्वा अतिपीपृहि हन्तेति अहो कष्टमित्यनुकम्प्य भववैतरण्या अतिपारय पारं नय संसारान्मोचयेत्यर्थः ॥ ४१ ॥

ननु, त्वदीयसर्वजनोत्तारणे मम महान्प्रयासो भवेन्नेत्याह–कोन्विति । हे अखिलानां गुरो हितोपदेष्टः ! हे भगवन् ज्ञानशक्त्यादिषाड्गुण्यपूर्ण ! अस्मिन् मदीयजनस्योत्तारणे तव तुप्रयासः ? न कोऽपीत्यर्थः । प्रयासाभावे हेतुं वदन् भगव विशिनष्टि, अस्य कृत्स्नस्य चिदचिदात्मकप्रपञ्चस्य भवसंभ लोपहेतोरुत्पत्तिस्थितिलयकारणस्य कृत्स्नजगदुदयविभवल लीलस्य मदीयजनोत्तारणे न कोऽपि प्रयास इति भावः । युक्तं चैतत्तवेत्याह, मूढेष्वज्ञेषु विशेषेण महतामनुग्रहो भवतीति ननु, मम सेवामन्तरेणाहं नाऽति पारयामि, अन्यथा सर्वमुक्ति प्रसङ्गः तत्राह, हे आर्तबन्धो ! किन्तेनार्तबन्धुस्त्वमिति यत्तेन ऽस्माकं किं त्वत्सेवया स्यात्तवार्तबन्धुत्वनिर्वाहार्थं त्वत्सेवा मप्यशक्ता वयमार्तानुकंप्या इति भावः । सर्वमुक्तिप्रसङ्गं नि कुर्वन्नात्मनो विशिनष्टि, ते तव ये प्रियाः भक्तजनास्तान सेवनां त्वद्दासानुदास्यं कुर्वतामस्माकमित्यर्थः । तावन्मात्रमपे मज्जनोत्तारणोपपत्तेनं सर्वमुक्तिप्रसङ्गश्चेति भावः । माम गृहीतवता त्वया मदीयजनस्य भवद्दासानुदास्यमपि संपाद्य मिति तात्पर्यम् ॥ ४२ ॥

इदमेव मया प्रार्थनीयमित्यभिप्रयन्नाहं भववैतरण्या बिभे किन्तु तस्यां पतिष्यमाणान्मज्जनानवलोक्य दुःखामीत्या नैवेति । हे परम ! दुरतिक्रमणीयो भवः संसारः स एव वैतर ततो नैवाहमुद्विजे बिभेमि उद्वेगाभावे हेतुं वदन्नात्मानं विशिन त्वाद्वीर्येति. त्वद्वीर्यगायनं त्वद्वीर्यसूचकगुणनामगायनमेव महद तस्मिन् मग्नं चित्तं यस्य सोहमतो न मदर्थं शोचे कि विशेषेण मूढान्मदीयान्प्रति शोचे तदर्थं शोचे इत्यर्थः । तत्र वदंस्तान्विशिनष्टि, ततस्त्वद्वीर्यगायनाद्विमुखं चेतो येषाम्. इ यार्थाः शब्दादयो विषयास्तेषां मायासुखाय तदनुभवज प्राकृतसुखाय तदर्थंभरं कुटुम्बादिभारम् उद्वहन्तीति ता तान् ॥ ४३ ॥

ननु, यथा श्रीनारदानुग्रहात्त्वं मुमुक्षुस्तथा त्वदीया अपि ता तामनुग्रहात् मुमुक्षवश्चेत्तान् मोक्षयिष्याम्यतस्त्वमेव मु मिच्छेत्यत्राह–प्रायेणेति । हे देव ! प्रायशो मुनय आत्मनामेव मु कामयमाना विजने निर्जने अरण्यादिदेशे मौनं शुभाश्र संशीलनं कुर्वन्ति, नतु परार्थम्. अन्येषां प्रयोजने निष्ठा येषां भवन्ति अतस्तदनुग्रहो मदीयजनस्य दुर्लभ इति भावः । तत ए कृपणान्विहाय अहमेको न मुमुक्षे न संसृतिबन्धं मोक्तुमिच्छ तर्ह्यन्यं कमपि प्रार्थय मामेव किमिति निबध्नासीति चेत् तत्र भ्रमतः संसृतौ भ्राम्यतोऽस्य जनस्य त्वत् त्वत्तोऽन्यं शरणं रक्ष पायभूतञ्च नानुपश्यामि ॥ ४४ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्वैः परैश्च सह विग्रहलक्षणं वैरं विरुद्धाचरणं च यस्य तथा तं जनं पश्यन्नतस्तमसो भवस्य पारमतिपा अतिपारं गमय मूढसत्त्वं मूढप्राणिनमसुरजातित्वात् तिर्यग्जा त्वात्तामसमिव स्थितं गजेन्द्रं पारं नीत्वा यथाऽपालयस्तथा च प्रापय्य मां पालयेति वा ॥ ४१ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

मम संसारपारनेतृत्वं तव दुःशकं नेत्याह–क इति। हे अत्र! अन्यपातृरहित, भगवन्! मम संसारोत्तारणे ते तव कोनु प्रयासो न कोपि अत्र जीवराशौ वा कुतो न प्रयासइति तत्राह अस्येति। अस्य जगतो भवो जन्मसंभवः स्थापनंन संभावनं लोपः संहारोयेषां हेतोः करणस्यास्य जगत उत्तारणे तव प्रयासो नास्ति ममोत्तारणे कोन्विति वा, कुत इति तत्राह, भवेति भवस्य संसारस्य संभव उत्पत्तिस्तस्य नाशहेतोस्तव किं प्रकृतइत्याशंक्यास्मद्वारसत्य-मन्तरेण न किमपि प्रयोजनं तवेत्याह—मूढेष्विति। गजेन्द्रकल्पार्त जनबन्धो मूढेष्वस्मासु यो महदनुग्रहस्तेन तव किं प्रयोजनम् नकिम-पीत्यर्थः। ननु, प्रयोजनाभावे किमर्थं तथाकरणमित्याशंक्य स्वभाव इत्याशयेनाह–प्रियेति। प्रियजनाननुसेवमानस्त्वमिति यत् स तव स्वभाव इति शेषः ॥ ४२ ॥

संसारभीरूणां संसारवैतरण्युत्तरणोपायः क इत्याशंक्य निरन्तर-वेदान्तशास्त्रश्रवणमननादिर्येषामस्ति तेषां तद्भयं नास्ति अन्यथा न कदापि तत उत्तरणमित्याशयेनाह—नैवेति. त्वत्तीर्थं त्वद्विषयं वेदान्तशास्त्रं तस्य गायनं श्रुत्वा मत्वा व्याख्यानं व्याख्यापनं च तदेव महामृतं यत्तेन मत्तं हृष्टं विवशं वा चित्तं यस्य स तथा एवंविधोहं संसारवैतरण्या नैवोद्विजे। न विभेमि एव शब्देन त्वत्तीर्थसेवाभावे संसारकदनाद्बिभेमि तत्संभवेनेत्ययोग-व्यवच्छेदः क्रियते अनेनासंगतं प्रह्लादस्तवनमित्येतदपि परिहृतं "सत्स्वन्यत्र ततोदया"इति वचनात् इदं च भक्तिलक्षणमिति प्रकट यन्नाह–शोच इति। ते त्वत्त इन्द्रियार्थेभ्यो विषयेभ्यो मायासुखं प्राकृतमस्वरूपं सुखं यत्तदर्थं भरं कुटुंबभारम् ॥ ४३ ॥

स्वेतरेषु क्रियमाणा कृपा स्वाश्रितेष्वेव कर्तव्या देवादिभिः क्रियमाणत्वादित्याभिप्रेत्याह–प्रायेणेति। देवा मुनयश्च विजनैकान्त-स्थलेन साधनेन सहिताः काष्ठमौनादिव्रतं चरन्ति कीदृशाः स्वकीयानां जनानां विमुक्तिः स्यादिति स्वविमुक्तिकामाः स्व म-हतां स्वभावइत्याह–परेति। परप्रयोजनतात्पर्योपेता देवेषु तात्त्विकै विशेषतो मुनिषु कैश्चिदेवेति विशेषप्रकाशनाय प्रायेणेति तदुक्तं "आश्रितेषु कृपा कार्या विशेषात्तात्त्विकैः सुरैः॥ मुनिभिश्च तथा कैश्चित्कैश्चित्कार्याखिलेष्वपि ॥ तथापि तात्त्विकसुराः कृपाविषयतां गताः॥ एत एव विमुच्यन्ते तदन्ये न कथंचन"इति यतो देवादयोऽच्या श्रितेषु कृपां कुर्वन्ति अतोहमप्याश्रितानेतान्कृपणान् कृपाविष-यान् विहाय एको न विमुमुक्षे त्वमेको मत्प्रसादेन मुक्तो भव अन्ये ऽप्येनं वर्त्मनाऽमुक्ताः सन्त्विति तत्राह–नान्यमिति। स्वकर्मणा नाना योनिषु भ्रमतो मामाश्रितजनस्यानुकूलं त्वदन्यं शरणं नानुपश्ये इत्यन्वयः ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

तत्र स्वस्मिंस्तदतिकृपणीयत्वाभिमानेन सप्रणयोपालम्भ-मिवापि निवेदयति, कोन्विति ॥ ४२ ॥

ननु, मत्प्रियजनसेविनामपि भवादनुत्तीर्णानां तदुद्वेगः स्यादेवेत्याशङ्क्य नहि नहीति स्वं दृष्टान्तयति—नैवेति। त्वद्वी-र्याणां ये गायकास्तत्प्रियजनाः तत्सम्बन्धि यन्महामृतं तद्गान-रूपमेव तत्र मग्नं चित्तं यस्य सोऽहं नैवोद्विजे अत्र पूर्वं त्रस्तो-स्म्यहमित्यादिकं यदुक्तं तत् खलु स्वस्य तद्बहिर्मुख साङ्गारोचकत्वेन। सम्प्रति नैवोद्विज इत्यादिकं तत्कथामृत माधुर्याविष्टत्वेन मध्ये च नैतन्मन इत्यादिकमतितृष्णयेति विवेचनीयम्। भावानां विचित्रगतित्वात् ॥ ४३ ॥

यथा श्रीभगवन्तं कोन्वत्र इत्यादिकमुवाच तथैव मुनीनपि गत्याह—प्रायेणेति ॥ ४४—४७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

न केवलमहमेक एव, अपि तु सांसारिकः सर्व एव जनः क्लिश्यतीति तदुद्धारं प्रार्थयते—एवमिति। भव एववैतरणी यमद्वारनदी तस्यां स्वेषां परेषां च विग्रहे यथायथं वैरं मैत्रं च यस्य तं हे पारचर! एवंभूतवैतरण्याः पार एव विरचित क्रीड इति हेतोर्हन्त कृपया पीपृहि वैतरणीमुत्तार्य्यं पालय ॥ ४१ ॥

एकेन मया कथं सर्वोजनस्तारणीयः? इति चेत्तत्राह-कोन्विति अखिलगुरो! गुरुरूपधारिणा एकेनापि त्वया परः परार्धेनापि भवितुं समर्थेन सर्व एव जनो निस्तार्य्यतामिति भावः। न चैतावत् सामर्थ्यं मे नास्तीति वाच्यमित्याह–अस्य विश्वस्य जन्मस्थिति-संहारकारणस्य यदि जन्मादेः कारणमभूस्तदा उद्धारस्यापि कारणं भवितुमर्हस्येवेति भावः। उचितमेवैतदित्याह–मूढेष्विति। त्वां च त्वदीयांश्चतारयिष्यामि इममतिदुराग्रहं माकृथा इति चेत् तत्राह, तव ये प्रियजना भक्तास्ताननुसेवमानानां नोऽस्माकं तेन त्वत्कर्तृकोत्तारणेन किं त्वद्भक्तसेवाप्रभावात्स्वयमेव वयं तरिष्याम इति भावः ॥ ४२ ॥

किञ्चाहं स्वार्थं तु संसारतारणं नैवार्थय इत्याह—नैवेति। हे पर सर्वश्रेष्ठ! वैतरण्याः सकाशान्नोद्विजे तत्र हेतुः त्वद्वीर्येति किन्तु विमूढान् शोचामि इन्द्रियार्थहेतुकं यन्मायामयं सुखं तदर्थंभरं कुटुम्बभरणादिभारमुद्वहतः ॥ ४३ ॥

त्वं तावन्मुक्तिं गृहाण तांस्तु तत्त्वज्ञा मुनयो मुक्तिसाधनमुपदे-क्ष्यन्तीति चेत्तत्राह—प्रायेणेति। अहं तु न तथा बुभूषामित्याह, नैतानिति। त्वत्तोऽन्यमस्य जनस्य शरणं न पश्यामि ॥ ४४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

एवमन्येऽपि संसारनद्यां निमग्ना अतः सर्वाञ्जनस्मादादीन् पाल-येति प्रार्थयते–एवमिति। एवं स्वकर्मभिः भवो जन्ममरणप्रवाहल-क्षणः संसारः स एव वैतरणी नरकपरिखाभूता नदी तस्यां पति-तम् अन्योन्यतो यानि जन्मादीनि तेभ्यो भीतादपि भीतवत् स्वेषां परेषां च विग्रहेषु कलहेषु देहेषु वा स्वप्रयोजनानुसारेण वैरमैत्रं च यस्य तम् मूढं स्वपुरुषार्थानभिज्ञं जनं मादृशम् त्वं पश्यन् पारे

यन्मैथुनादि गृहमेधिसुखं हि तुच्छं कण्डूयनेन करयोरिव दुःखदुःखम् ।
तृप्यन्ति नेह कृपणा बहुदुःखभाजः कण्डूतिवन्मनसिजं विषहेत धीरः ॥ ४५ ॥
मौनव्रतश्रुततपोऽध्ययनस्वधर्मव्याख्यारहोजपसमाधय आपवर्ग्याः ।
प्रायः परं पुरुष ! ते त्वजितेन्द्रियाणां वार्ता भवन्त्युत न वात्र तु दाम्भिकानाम् ॥ ४६ ॥
रूपे इमे सदसती तव वेदसृष्टे बीजाङ्कुराविव न चान्यदरूपकस्य ।
युक्ताः समक्षमुभयत्र विचिन्वते त्वां योगेन वह्निमिव दारुषु नान्यतः स्यात् ॥ ४७ ॥
त्वं वायुरग्निरवनिर्वियदम्बुमात्राः प्राणेन्द्रियाणि हृदयं चिदनुग्रहश्च ।
सर्वं त्वमेव सगुणो विगुणश्च भूमन्नान्यत्त्वदस्त्यपि मनोवचसा निरुक्तम् ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भववैतरण्यविषये चरतीति तथा तस्य सम्बोधनं हे पारचर! हन्त अहो कष्टमित्येवमनुकम्प्य अद्याधुना पीपृहि वैतरणीमुत्तार्य पालय ॥ ४१ ॥

दीनजनोत्तारणे विश्वसृष्ट्यादिकर्तुस्तव श्रमो नास्ति अहं तु त्वद्दासचरणसेवयैव कृतार्थ इति प्रार्थयते, कोन्वत्रेति । हे अखिल-गुरो ! अस्य विश्वस्य भवस्तम्भवलोपानां सृष्टिस्थितिसंहाराणां हेतोः ते तु निश्चितम् अत्र दीनस्य जनस्य तारणे कः प्रयासः? न कोपीत्यर्थः । ननु, निर्मितजनोत्तारणे सर्वमोक्षप्रसङ्गः स्यादत्राह, मूढेषु हे दीनबन्धो! महतां त्वद्दासानां त्वद्भजनोपदेशरूपो अनुग्रहो भवत्कृपया भवतु इति शेषः । नन्वात्मतरणं कुतो न प्रार्थयसे? अत्राह, हे भगवन् ! ते प्रियजनान् भागवतान् सेवतां नोऽस्माकं तेन भवनदीतरणेन किम् ? त्वत्प्रियजनसेवयैव कृतार्था इत्यर्थः ॥ ४२ ॥

एतदेवाह–नैवेति। हे पर पूर्ण ! त्वद्वीर्यगायनं भवत्प्रियसेवालभ्यत्वदीयपराक्रमगानमेव महाऽमृतं तत्र मग्नं लब्धरुचि चित्तं यस्य सोऽहं दुरत्ययवैतरण्या नैवोद्विजे किन्तु ततस्त्वद्वीर्यगायन-महामृतात् महदनुग्रहाभावेन विमुखं चेतो येषां तान् इन्द्रियार्थ-मिन्द्रियनिमित्तं यन्मायासुखं प्राकृतमानन्दं तदर्थं नानादुःखदं गृहकुटुम्बादिभरमुद्वहतोऽहं शोचामि अतस्तान् भववैतरण्याः उत्तार्य पालयेति भावः ॥ ४३ ॥

त्वं मद्भजनेन मुक्तो भव एतान् मुनयस्तदर्थमुपदेक्ष्यन्तीत्यत्राह, हे देव ! यतः प्रायेण स्वमुक्तिकामा नतु परार्थनिष्ठाः मुनयो विजने मौनं स्वधर्मं चरन्ति, अतः त्वत् त्वत्तः अन्यं शरणं नानुपश्ये त्वं तान् प्रेरय इति भावः । अहं तु एतान् कृपणान् विहाय एकः न विमुमुक्षे विमुक्तिमिच्छामि ॥ ४४ ॥

भाषाटीका ।

मेरी ही यह दशा नहीं है—यह सब जने अपने कर्मों से इस भव वैतरणी में पड़े हैं। परस्पर जन्म मरण अशन और भय से भीत हैं अपने पराये के वैर और भिन्नता में लिप्त हैं हे पा-चर ! (आप इस वैतरणी के पार पर हो) कृपाकर इन मूढ़ों को दुखित देखकर आज इसके पार उतार कर पालन कीजिये ॥ ४१ ॥

हे भगवन् ! हे अखिल गुरो ! आप इस जगत के उत्पत्ति स्थिति प्रलय के हेतु हैं इनको संसार वैतरणी से उतारने में आपको क्या प्रयास है ?। हे आर्तबन्धो ! मूढों पर अनुग्रह करना महा पुरुषों को उचित ही है । (भगवान् यह न कहें कि तुम क्यों जगत् के निमित्त दुराग्रह करते हो तुमको और तुम्हारे सबों को उद्धार करूँगो) यह विचार कर प्रलहाद कहते हैं प्रभो ! आपके प्रियजनों के सेवन करने वाले हमको उससे (तरने से) क्या है ? हमतो आपके भक्तों के अनुग्रह से ही तर जांयगे ॥ ४२ ॥

हे पर ! (सर्वोत्तम !) तुम्हारे लीला पराक्रमगान महा अमृत में मग्न मन, मैं इस दुरत्यय भव वैतरणी से उद्विग्न नहीं हूं मैं केवल उन मूढ पुरुषों का सोच करता हूं जो आप की लीला गान से विमुखचित्त हैं । और इन्द्रियार्थ माया सुख के निमित्त भार वहन कर रहे हैं ॥ ४३ ॥

हे देव ! प्रायः बड़े २ मुनिजन अपनी विमुक्ति की कामना से विजन वन में मौनधारण करते हैं किन्तु वे भी स्वार्थ रत हैं परार्थ-निष्ठ नहीं है मैं इन कृपण जीवों को छोड़कर अकेला नहीं मुक्त होना चाहता हूं क्योंकि इस भ्रमते जीव समूह का शरण तुम से अन्य मैं नहीं देखता हूं। जो आप इनका उद्धार न करेंगे तो कौन करेगा ? ॥ ४४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नन्वेते स्त्रीसम्भोगादिना सुखिन एव न कृपणास्तत्राह-यदिति । करयोः कण्डूयनेन सङ्घर्षणेनेव दुःखमनु दुः[खं] यस्मिन् तर्हि दुःखत्वादेव ततो निर्विद्य मुच्येरंस्तत्राह—कृपणाः कामुका बहुदुःखभाजोऽपीह गृहमेधिसुखे न तृप्यन्त्यलमिति न मन्यन्ते कण्डूतिवत्कामस्य दुःसहत्वात्. ननु, केचित्कण्डू[ति]

श्रीधरस्वामिकृतभावार्थदीपिका ।

मपि सहन्ते कामं चेत्यत्राह—त्वत्प्रसादात्तु कश्चिद्धीर एव मनसिजं कामं विषहेत न तु सर्वे अत्रापि कण्डूतिवदिति दृष्टान्तः ॥ ४५ ॥

ननु, मौनादिभिर्मोक्षसाधनैः सुखमेव तेषामपि मुक्तिस्तत्राह, मौनेति । हे पुरुष ! अन्तर्यामिन् ! ये मौनादयो दश आपवर्ग्याः अपवर्गहेतवः प्रसिद्धाः रहो विविक्तवासः ते तु प्रायशोऽजितेन्द्रियाणामिन्द्रियभोगायार्थार्थं विक्रीणातां वार्त्ता जीवनोपाया भवन्ति दाम्भिकानां तु वार्ता अपि भवन्ति वा न वा दम्भस्यानियतफलत्वात् ॥ ४६ ॥

त्वज्ज्ञानं भक्तिं विना सकामैर्मौनादिभिर्न भवत्येवेत्याह—रूपे इति, त्रिभिः । बीजाङ्कुराविव प्रवाहापन्ने इमे सदसती कार्यकारणे एव ते रूपे उपलक्षणभूते वेदेन सृष्टे प्रकाशिते नचान्यत् स्वसमन्वेतं गौरत्वादिकमिव देवदत्तादेः कुतः अरूपकस्य प्राकृतरूपादिशून्यस्य अतो युक्ताः संयता एव भक्तियोगेन प्रत्यक्षं त्वामुभयत्र कार्ये कारणे चानुगतं पश्यन्ति मथनेन दारुषु वह्निमिव नान्यतः स्यात्त्वज्ज्ञानमिति शेषः । यद्वा ज्ञानप्रकारमेवाह—एतदुभयमन्यतः प्रधानपरमाणवादेर्न स्यात् "स ऐक्षत"इत्यादि श्रुतेः । अतस्त्वमेव कारणत्वात्सर्वत्रानुस्यूत इति ४७॥

तदेवाऽऽह—त्वं वायुरिति । हृदयं मनः चित्त्विस्तम् अनुग्रहोऽहङ्कारो देवतावर्गो वा सगुणः स्थूलः विगुणः सूक्ष्मः मनश्च वचश्च मनोवचस्तेन निरुक्तं प्रकाशितं किमपि त्वत्तोऽन्यन्नास्ति ॥ ४८ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

ननु, त्वदीया जना न दैन्यं प्राप्ताः किन्तु विषयानुभवेन हृष्टा एवातस्तेषां दैन्यापादनेन त्वं किमितीत्थं प्रार्थयसे तत्राह—यदिति । यन्मैथुनादिकं गृहमेधिनो गृहस्थस्य सुखं तत्करयोः पाम्नादूषितयोर्हस्तयोः कण्डूयनेन संघर्षणेनेव तज्जन्यदुःखवद्दुःखदुःखमतीव दुःखात्मकं दुःखादुपरिदुःखं दुःखोदर्कमिति वार्थः । अत एव तुच्छं तर्हि तस्य दुःखत्वादेव ततो निर्विद्य मुमुक्षेयुस्तत्राह—कृपणाः कामिनः बहुदुःखभाजोऽपीह गृहमेधिसुखं न तृप्यन्त्यलमिति न मन्यते कण्डूतिवत्कामस्य दुस्सहत्वादतस्ते स्वानर्थमेव न जानन्तीति भावः । ननु, केचित्कण्डूतिमपि सहन्ते कामं चेत्यत्राह—सत्यं, धीरश्चेत्त्वदनुग्रहाज्जितेन्द्रियश्चेन्मनसिजं कामं सहेत नत्वजितेन्द्रिय इति भावः ॥ ४५ ॥

तर्हि कैश्चिन्मौनादिभिरुपायैरिन्द्रियाणि जयद्भिरपवर्गः साध्यस्तत्राह—मौनेति । हे पुरुष परमपुरुष ! मौनादय आपवर्ग्याः जितेन्द्रियाणामपवर्गोपाया एवेति सत्यमेव अजितेन्द्रियाणां तु वार्त्ता जीवनोपाया भवान्ति'अयं मौनादिसम्पन्नस्ततोऽस्मै देयम्'इति मन्यमानेभ्यः परेभ्यः लब्धवित्तो भवतीति जीवनोपाया भवन्ति सतीन्द्रियजये मौनादय आपवर्ग्याः ननु तस्मिन् असति भवदनुग्रहाच्च विषयवैतृष्ण्येन भवितव्यमिति भावः । अपवर्गार्थतया अनुष्ठिता अपि मौनादयोऽजितेन्द्रियाणां वार्ता एव न त्वापवर्ग्याः किंपुनर्दंभार्थं कृता आपवर्ग्याः न भवन्तीत्याह—उतेति दांभिकानां मौनादयो वार्त्ता अपि भवन्त्युत । न वा किंपुनरापवर्ग्या न भवन्तीति. दाम्भिकानां दाम्भिकत्वे प्रकटे सति जीवनहेतवोऽपि न भवन्तीत्युत न वा शब्दार्थः, तत्र मौनं वाङ्नियमः व्रतमनशनादिरूपं श्रुतमध्ययनं तपः कृच्छ्रादि अध्ययनमध्ययनजं पाण्डित्यं स्वधर्मः स्ववर्णाश्रमोचितो धर्मः व्याख्याऽध्यापनं रहो निर्जनदेशवसतिः जपो मन्त्रजपः समाधिर्ध्यानं मनसिजं विषहेत धीर इतीन्द्रियजयमूलकः कामजय इत्युक्तं तथाऽजितेन्द्रियाणां वार्ता भवन्तीत्यनेन जितेन्द्रियाणां त्वापवर्ग्या भवन्तीति सूचितम् ॥ ४६ ॥

तर्हीन्द्रियजयः कथं स्यादित्यपेक्षायां सर्वात्मकनिरतिशयानन्दरूपब्रह्मोपासननिष्ठस्यार्थादेवेन्द्रियजयः स्यादिति वक्तुं तावत्तदुपासनाप्रकारं विवक्षुश्चेतनाचेतनयोः परमात्मशरीरत्वमाह—रूपे इति । इमे सदसती चिदचिद्द्रव्यरूपे बीजाङ्कुराविव स्थिते अरूपकस्य कर्माधीनदेहरहितस्य तव वेददृष्टे वेदबोधिते रूपे शरीरे "य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं यः पृथिव्यां तिष्ठन् पृथिवीमन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यस्याक्षरं शरीरं यस्याव्यक्तं शरीरम्"इत्यादिवेदबोधितशरीर इत्यर्थः । बीजाङ्कुरौ इत्यनेन कदाचित्कारणावस्थया कदाचित्कार्यावस्थया चोभयथावस्थिते उभे अपि चिदचिद्द्रव्ये तव शरीरभूते इत्युक्तं भवति । अरूपकस्य रूपे इत्यनेन तच्छरीरकत्वं न तव कर्माद्युपाधिप्रयुक्तमपितु निरुपाधिकमित्युक्तं यत उभयावस्थावस्थितयोश्चिदचितोस्त्वच्छरीत्वमत एव न चान्यत्. अन्यत्त्वदनात्मकं किञ्चिदपि वस्तु नास्त्येवमुभयत्र त्वच्छरीरभूतयोश्चिदचितोस्त्वां योगेनोपासनात्मकेन युक्ताः सन्तो मुनयो विचक्षते पश्यन्ति । तत्र दृष्टान्तः, वह्निमिव दारुषु यथा दारुषु मथनाद्युपायेन वह्निं विचक्षते तद्वत्. अन्यतो योगादन्यत उपायान्तरान्नस्यात् साक्षात्कार इति शेषः उपायान्तरेण साक्षात्कारो न स्यादित्यर्थः ॥ ४७ ॥

न चान्यदित्यनेनान्यत् त्वदात्मकं नास्तीत्युक्तं नान्यतः स्यादित्यनेनोपायान्तराद्दृश्यत्वञ्च तदेतदुभयं प्रपञ्चयन् सर्वात्मकब्रह्मसाक्षात्कारादेव निःशेषमिन्द्रियजय इत्याह—त्वमिति, द्वाभ्याम् । तावत्सर्वात्मकत्वं प्रपञ्चयति, त्वमिति । त्वमेव वाय्वादिरूपेणावस्थितः तच्छरीरकत्वेनावस्थित इत्यर्थः । पूर्वं "तव रूपे" इति व्यतिरेकनिर्देशादत्राभेदनिर्देशाच्चेदं तादात्म्यं शरीरात्मभावनिबन्धनमित्यवगम्यते. तत्र मात्राः शब्दादयस्तन्मात्राः प्राणाश्चेन्द्रियाणि हृदयं मनः चिदनुग्रहं ज्ञानोत्पत्त्यनुग्राहकं हृदयविशेषणं चिदनुग्रहश्चेति पाठे ज्ञानोत्पत्त्यनुग्राहको महान् बुद्धितत्त्वात्मक उच्यते किं बहुना सगुणः सत्त्वादिगुणयुक्तः प्रकृतिपरिणामात्मकः सर्वः पदार्थः विगुणः सत्त्वादिगुणरहितस्तदपरिणामात्मको जीववर्गश्च मनश्च वचश्च तयोः समाहारो मनोवचस्तेन निरुक्तं विषयीकृतं तदेतत्सर्वं त्वमेव त्वच्छरीरभूतमेव ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सुखानुभवार्थं हि मोक्षाकांक्षा तच्छब्दादिविषयेभ्योपि स्यादतोऽजागलस्तनायितमोक्षसुखाय को वा प्रेक्षावान् महाप्रयत्नं कुर्यादुन्मत्तमन्तरेणेति तत्राह—यन्मैथुनादीति । मैथुनादिगृहस्थसुखं यत् तल्लब्ध्वा देहकृपणा देहमात्रपोषणपरायणास्तृप्यन्ति नान्ये प्रेक्षावन्त इति शेषः । तदपि न सुलभमित्याह, बहुदुःखेति, तत्र बुद्धिमतैवं कार्यमित्याह—कण्डूतिवदिति । मनसिजं कामम् ॥ ४५ ॥

मुमुक्षुभिः प्रथमत इन्द्रियजय एव समर्थनीयोऽन्यथा मुक्तिसाधनानामपि मौनादीनां लोके जीवनोपायमात्रत्वं भवतीत्याह, मौनेति । आपवर्ग्या मुक्तिहेतवः प्रायः सम्यग्भक्त्यानुष्ठिता इति शेषः । हे पुरुष ! परं न चेत् त एवाजितेन्द्रियाणां पुंसां वार्तास्तत्कालजीवनमात्रोपाया भवन्त्युत अपि संभावनामात्रं नतु मुख्यत इत्यर्थः । लोकमोहनार्थं मौनादिकमनुतिष्ठतां दांभिकानां तदपि न सेत्स्यतीत्याह, अत्र जीवलोके वा यथा अजितेन्द्रियाणां जीवनमात्रोपाया न तथा दांभिकानां भवन्तीति "वा विकल्पोपमानयोः"इत्यभिधानं नवा भवन्तीत्येकं वाक्यमिति वा ॥ ४६ ॥

मौनादीनां क्लेशसाध्यत्वेनासर्वाधिकारिकत्वात् सर्वाधिकारिकोपासनाविषयं निरूपयति, रूपे इति । इमे सदसती कार्यकारणे तव रूपे त्वदङ्शत्वात्त्वत्सन्निधानयोग्ये अत्रप्रमाणमाह, वेदेति । "द्वावेव ब्रह्मणो रूपे" इत्यादौ कार्यकारणत्वं किंविकारभावेन निमित्तनैमित्तिकभावेन चेत्याशंक्य यथायोग्यमित्यूहनीयमित्यत्र दृष्टान्तमाह—बीजेति । व्याख्यातमेतत् "विज्ञानमानन्दं ब्रह्म"इतिवत् वेददृष्टे चेत् किं साक्षाद् रूपे इति ? नेत्याह—नचेति । अन्यद्विलक्षणं ज्ञानानन्दादिलक्षणं नैव कुतोऽत्राह—अरूपकस्येति । प्राकृतरूपाभावादित्यर्थः । महतां प्रत्यक्षं चात्रप्रमाणमित्याह, युक्ता इति । भक्तियोगेनोभयत्र रूपद्वये युक्ता उपासनालक्षणध्यानेनेतिशेषः । युक्ता योगिनः उभयत्र सन्निहितं त्वां पश्यन्तीति वा दर्शनप्रकारमाह—वह्निमिति । योगेन मथनाद्युपायेन अन्ययोगं निवारयति—नान्यत इति । भक्तियोगादन्यतोऽन्येनेति । साक्षात्स्वरूपादन्यत् प्राकृतं रूपं नैव "अरूपमक्षरं ब्रह्म" इति श्रुतेः । अतो न साक्षाद्रूपे इति वा योजना, साक्षात्स्वरूपापेक्षया स्वरूपादन्यद्रूपं नेत्याचार्यविवरणमत्र प्रमाणम् ॥ ४७ ॥

के ते कार्यकारणे इत्यतस्तन्नामनिर्देशः तत्सत्ताप्रदत्वेन तद्वशत्वे तद्रूपत्वाभिप्राय इत्याशयेनाह—त्वमिति । चिदनुग्रहश्चेतनस्तन्मनसा वचसा निरुक्तं न त्वदन्यत् त्वां विना प्रवृत्तिमन्नास्ति सगुणः संसारी शौक्ल्यादिगुणयुक्तो वा. विगुणो मुक्त उत्पन्नानन्तरक्षणविशिष्टपदार्थो वा ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

त्वमिति । हृदयमन्तरिन्द्रियं मनोबुद्ध्यहङ्कारचित्तात्मकं । चित् शुद्धो जीवः अनुग्रहः स्वसन्मुखीकरणशक्तिः किं बहुना सगुणो मायिकः निगुणश्चामायिकः सर्वार्थस्त्वमेवेति ॥ ४८ ॥ ४९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

नन्वेते स्त्रीसम्भोगादिभिः सुखिन एव न कृपणास्तत्राह—यदिति । करयोः कण्डूयनेन सङ्घर्षणेनैव दुःखमनुदुःखं यत्र त... तर्हि दुःखत्वादेव ततो निर्विद्य मुच्येरंस्तत्राह—कृपणाः कामुका बहुदुःखभाजोपि इह गृहमेधिसुखे दुःखरूपेऽपि न तृप्यन्ति अलमिति न मन्यन्ते कण्डूतिवत् कण्डूताविवेत्यर्थः । ननु, कश्चित् कश्चित्ततो निर्विण्णोऽपि दृश्यते सत्यं त्वत्प्रसादाद्धीर एव मनसिजं कामं दुःखस्वरूपमेव विषहते न तु सर्वे ॥ ४५ ॥

ननु, ब्राह्मणानां तावन्मौनादिभिर्मोक्षसाधनैः स्वत ए... सिद्धैर्मोक्षोऽपि स्वत एव सिद्धस्तत्राह, मौनेति । हे पुरुष ! अन्तर्या... मिन् ! त्वां किं विज्ञापयामीति भावः । ये मौनादयो दश आपवर्ग्या अपवर्गहेतवः प्रसिद्धाः रहः विविक्तवासः ते तु प्रायशः अजि... तेन्द्रियाणां विषयभोगार्थमेव तान् विक्रीणतां वार्त्ता जीवनोपाय एव भवन्ति दांभिकानां तु वार्त्ता अपि भवन्ति न वा दम्भस्य नियतफलत्वात् ॥ ४६ ॥

त्वत्प्राप्तिस्तु भक्तियोगं विना मौनादिभिर्नैव भवतीत्याह—रूपे इति । इमे सदसती कार्य्यकारणे बीजाङ्कुराविव प्रवाहाप... समष्टिव्यष्टी तवैव रूपे न च अन्यत्समष्टिव्यष्ट्यात्मकं विश्व... मिदं त्वत्तो भिन्नं न भवति अरूपकस्य प्राकृतरूपरहितस्य त... अतो युक्ता विवेकिनः त्वाम् उभयत्र समष्टौ व्यष्टौ च विचिन्व... प्राप्तुमन्विष्यन्ति यतस्त्वं कारणत्वेनोभयत्र वर्त्तसे इति भावः योगेन उपायेन भक्तियोगेनैव न चान्यतो ज्ञानादिना "भक्त्याह... मेकया ग्राह्यः" इति त्वदुक्तेरिति भावः । वह्निपक्षे योगेन मन्थ... नेन अत एव भक्त्येत्यस्य स्पष्टशब्दस्याप्रयोगः ॥ ४७ ॥

उक्तमर्थं विवृणोति—त्वमिति । हृदयं मनः चित् चित्तं अनुग्रहोऽनुग्राहको देवतावर्गः सगुणः स्थूलः विगुणः सूक्ष्मः मनश्च वचश्च मनोवचस्तेन निरुक्तं प्रकाशितं किमपि त्वत्तो नास्ति ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु, एते कृपणाः विषयसु... दोषदर्शनेन विरक्ताः सन्तो... गज्जिज्ञासया मुक्ता भविष्यन्तीत्यत्र त्वदनुग्रहं विना दुःखोदर्का... विषयसुखादपि जनानां विरागो न भवतीत्याशयेनाह, यदिति । यन्मैथुनादिगृहमेधिसुखं यद्यपि तुच्छं क्षणभङ्गुरादिदोषग्रस्तं कण्डूयनेन सङ्घर्षणेन दुःखं यस्मिन् तत्... विधं च तथापि कृपणा बहुदुःखभाजो न तृप्यन्ति कश्चित्त्वत्कृपापात्रो धीर... एवं कण्डूतिवन्मनसिजं कामं विषहेत ॥ ४५ ॥

किञ्च मौनादयः आपवर्ग्याः मुक्त्युपायाः ते तु तथा भूता अपि हे पुरुष ! अत्र लोके त्वजितेन्द्रियाणां बुभुक्षूणां परं केवलं वार्ता जीवनोपाया न वा भवन्ति उत अपि च दांभिकानां वार्ता जीवनोपाया वा न भवन्ति दम्भेन तत्फलनाशात् इत्यर्थः । तत्र मौनं वृथा वचनत्यागः व्रतानि एकादश्युपवासादीनि श्रुतं शास्त्रश्रवणम् तप आलोचनं ज्ञानम् अध्य...

नैते गुणा न गुणिनो महदादयो ये सर्वे मनःप्रभृतयः सहदेवमर्त्याः ।
आद्यन्तवन्त उरुगाय ! विदन्ति हि त्वामेवं विमृश्य सुधियो विरमन्ति शब्दात् ॥ ४९ ॥
तत्ते ऽर्हत्तम ! (१) नमःस्तुतिकर्मपूजाः कर्म स्मृतिश्चरणयोः श्रवणं कथायाम् ।
संसेवया त्वयि विनेति षडङ्गया किं भक्तिं जनः परमहंसगतौ लभेत ॥ ५० ॥

नारद उवाच ।

एतावद्वर्णितगुणो भक्त्या भक्तेन निर्गुणः ।
प्रह्लादं प्रणतं प्रीतो यतमन्युरभाषत ॥ ५१ ॥

श्रीभगवानुवाच ।

प्रह्लाद ! भद्र ! भद्रं ते प्रीतो ऽहं तेऽसुरोत्तम ! ।
वरं वृणीष्वाभिमतं कामपूरोऽस्म्यहं नृणाम् ॥ ५२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विधिवद्वेदाध्ययनम् स्वधर्मः वर्णाश्रमधर्मः व्याख्या अध्यापनम्-रह एकान्तवासः जपो मन्त्रजपः समाधिर्देवप्रावण्यम् एवं त्वदनुग्रहं विना भववैतरण्याः तरणं त्वत्पदप्राप्तिश्च कस्याप्यधिकारिणः केनाप्युपायेन न सम्भवतीति फलितोर्थः ॥ ४६ ॥

अथ त्वदनुग्रहलब्धया सर्वत्र त्वद्दर्शनपूर्वकया त्वद्भक्त्यैव मुक्तिर्जनस्य स्यादित्याह—रूपे इति चतुर्भिः । वेदसृष्टे वेदेन प्रकाशिते इमे सदसती स्थूलसूक्ष्मे वीजाङ्कुराविव कार्यकारणे कारणं प्रधानं कार्यं ब्रह्माण्डं चेत्यर्थः । अरूपकस्य कर्मजन्यरूपरहितस्य तवैव नान्यत् त्वदन्यत् किमपि न "पुरुष एवेदं सर्वम्" इति श्रुतेः । अत एव युक्ताः त्वदनुग्रहयुक्ता उभयत्र रूपद्वये समक्षं यथा भवति तथा दारुषु वह्निमिव योगेन त्वदनुग्रहलब्धबुद्धियोगेन त्वां विचिन्वते प्राप्तुमन्विष्यन्ति नान्यतः स्यात् एवमन्वेषणम् अन्यतः अधिकारिसामर्थ्यात् साधनसामर्थ्याच्च न स्यात् किन्तु त्वदनुग्रहत एव स्यादित्यर्थः "ददामि बुद्धियोगं तं येन मामुपयान्ति ते" इति श्रीमुखवचनात् रूपे इमे इत्यनेन चराचरयोर्ग्रहणं न भवति वीजाङ्कुराविवेति निर्देशात् अत एव द्वितीये "अतः परं यदव्यक्तम्" इत्यत्र प्रधानस्यैव ग्रहणं न जीवस्य ॥ ४७ ॥

सर्वं त्वदात्मकमेवेत्याह—वायुरादिस्त्वमेव मात्राः शब्दादयः हृदयमन्तःकरणम् चित्चेतनवर्गः अनुग्रहोऽनुग्राहको देवतावर्गः सगुणः सर्वोपि प्राकृतपदार्थः विगुणः प्रकृतिगुणरहितः कालः अप्राकृतलोकश्च किं बहुना मनश्च वचश्च तयोः समाहारस्तेन निरुक्तं विपर्यांकृतं त्वत्त्वत्तः अन्यत् नास्ति सर्वस्य त्वच्चेतनाचेतनशक्तिमयत्वात् ॥ ४८ ॥

भाषा टीका ।

यह जो सांसारिक गृह मेधीय सुख है अति तुच्छ है जैसा हातों के खुजाने से फिर दुःख होता है एसाही यह भी दुःख दुःख है कृपणाजन बहुत दुःख भोगने पर भी इससे तृप्त नहीं होते हैं। धीर पुरुष को उचित है कंडूति (खुजाल) के समान मनासिज (काम) को सहन करे ।। ४५ ॥

मौन, व्रत, श्रुत, तप, वेदाध्ययन, स्वधर्म, व्याख्या, एकान्त निवास, जप, समाधि, ये दशों मुक्ति के साधन हैं, किन्तु हे पुरुष ! ये ही सब अजितेन्द्रियों की वार्ता (जीविका) होजाते हैं वे इन्ही से धन उपार्जन कर कुटुंब पालन करते हैं । और दांभिकों की तौ वार्ता भी नहीं होसकते हैं। दंभार्थ व्यर्थ परिश्रम होता है ॥ ४६ ॥

(हे भगवन्) ये स्थूल सूक्ष्म कार्य कारण दोनो आप कें रूप हैं वेदने प्रकाश किये हैं, बीजांकुर के समान स्थित हैं आपसे पृथक् नही है । युक्त जन योग से इन दोनों में आप को प्रत्यक्ष ढूंढ लेते हैं। जैसे काष्ठों में अग्नि को, आपके विना इस जगत् की सृष्टि नही होसकती है ॥ ४७ ॥

हे भूमन् ! वायु अग्नि पृथिवी आकाश जल और पञ्चतन्मात्रा प्राण इन्द्रियें मन चित्त अहङ्कार सर्व आप ही हौ, स्थूल सूक्ष्म जो कुछ मन और वाणी से प्रकाशित है वह आप से अलग कुछ भी नहीं है ॥ ४८ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

अभक्तास्तु स्वस्मिन्ननुगतमपि त्वां न जानन्तीत्याह—नैत इति । एते गुणाद्यभिमानिनो देवा आद्यन्तवन्तो जडोपाधित्वादनाद्यन्तं निरुपाधिं त्वां न विदन्ति हि यस्मात् सुधियो विद्वांस एवं विचार्य

---

(१) तत्ते महत्तम ! इति वीर० पा०

श्रीधरस्वामिकृतभावार्थदीपिका ।

शब्दादध्ययनादिव्यापारादुपरमन्ति त्वामेव समाधिनोपासत इत्यर्थः । तथाच श्रुतिः“किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे” इति “नानुध्यायेद्बहून् शब्दान्वाचो विग्लापनं हि तत्” इति स्मृतिश्च—

“यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च” ॥

इत्यादिः ॥ ४६ ॥

उपसंहरति–तदिति । हे अर्हत्तम ! नमःस्तुतिकर्मपूजाः प्रणिपातस्तुति सर्वकर्मार्पणानि कर्म च परिचर्या चरणयोः स्मृतिश्च कथायां श्रवणं चेत्येवं षडङ्गया सम्यक्सेवया विना परमहंसानां गतौ प्राप्ये त्वयि जनः कथं भक्तिं लभेत? यस्मादेवं भक्तिं विना न मोक्षो न च भक्तिः संसेवया विनाऽतः प्राक् प्रार्थितं त्वद्दास्ययोगमेव देहीति प्रकरणार्थः ॥ ५० ॥

एतावन्तो वर्णिता गुणा यस्य यतमन्युरुपसंहृतकोपः ॥ ५१ ॥

कामान्पूरयतीति तथा यद्वा पुरुषार्थप्रवाहो ऽस्मीत्यर्थः ॥ ५२ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नैत इति, गुणाः सत्त्वादयः गुणिनः प्राकृतगुणपरिणामात्मकाः महदादयः आदिशब्देनाहङ्कारतन्मात्राकाशादिभूतानि विवक्षितानि सह देवमर्त्याः देवमर्त्यादिभिः सहिताः मनःप्रभृतयश्च करणानि करणिनश्च ये इत्यर्थः । त एते सर्वे त्वां न विदन्ति गुणाः न विदन्ति गुणिनोऽपि न विदन्तीति प्रत्येकान्वयाभिप्रायेण नञ्द्वयोपादानं सकरणाः सर्वे देवमनुष्यादयः स्वान्तरात्मतयावसन्तमपि न त्वामुपायान्तरेण विदन्तीत्यर्थः । तत्र हेतुं वदंस्तान् विशिनष्टि, आद्यन्तवन्त इति । कर्मायत्तोत्पत्तिविनाशिनः कर्मणा संकुचितज्ञानत्वाच्च विन्दतीति भावः । मुनयःसर्वान्तरात्मभूतत्वत्स्वरूपमननशीलास्तु । हे उरुगाय ! त्वामेव सर्वात्मकब्रह्मानुसन्धानरूपयोगेन त्वत्साक्षात्कारविरोधिकर्मनिरसनेन विसृश्य विमर्शनपूर्वकं साक्षात्कृत्य शब्दात् शब्दादिविषयाद्विरमन्ति एवमेव हि निःशेषमिन्द्रियजय इति भावः ॥ ४६ ॥

एवमुपासनात्मकभक्त्यैकवेद्यत्वं निरतिशयानन्दरूपत्वत्स्वरूपविषयकभक्तियोगगतस्यार्थादेव शब्दादिविषयेभ्यो विरामश्चोक्तः सा च भक्तिर्वक्ष्यमाणषडङ्गसेवया विना दुर्लभेति तदुपसंहरति–तदिति । हे महत्तम ! तव नमस्तुतिकर्म नमस्क्रिया नमस्कारः स्तुतिक्रिया च. पूजा अर्घ्यपाद्यादिनिवेदनात्मिका कर्म परिचर्यात्मकम्, यद्वा, प्रथमकर्मशब्देन पादसेवनादिपरिचर्यात्मकं कर्म उच्यते पूजाकर्म पूजात्मकं कर्मचरणयोः स्मृतिः स्मरणं कथायां विषयभूतायां श्रवणं कथाविषयकश्रवणं चेतीत्थं षडङ्गया सेवया विना परमहंसानां प्राप्ये त्वयि भक्तिं जनो लभेत किम् ? नैव लभेतेत्यर्थः ॥ ५० ॥

तदेवं प्रह्लादेन संस्तुतो नृसिंहस्तमुवाचेत्याह देवर्षिः—एतावदिति । भक्तेन प्रह्लादेन भक्त्या एतावदेतावन्मात्रं वर्णिता गु...णा यस्य एतावच्छब्देन गुणानामानन्त्यं सूचयति— निर्गु...हेयगुणरहितः श्रीनृसिंहःयतमन्युरुपसंहृतक्रोधः प्रीतः स्तुत्या ... “स महात्मा सुदुर्लभः” इत्युक्तरीत्या दुर्लभस्वभक्तलाभेन वा प्री... प्रणतं तं प्रह्लादमभाषतोवाच ॥ ५१ ॥

तदेवाह–प्रह्लादेति, त्रिभिः । हे प्रह्लाद वत्स ! ते भद्रमनि... निवृत्तिरिष्टप्राप्तिश्च भवेत् कुतः हे असुरोत्तम ! यतो ऽहं ते त... प्रीतः प्रीतिं प्रापितः अत एवाभिलषितं वरं वृणीष्व ... अहं नृणामर्थिनां कामपूरः काम्यन्त इति कामाः धर्मादयस्ता... पूरयति ददातीति तथा ऽहमस्मि ॥५२ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पृथिव्यादिमहत्तत्वान्तं पदार्थजातं कार्यकारणात्मना द्विते... क्रोडीकृतं भगवद्रूपं ततोभिन्नमित्युक्तम् इदानीं तदवस्थितपरा... त्मानं तदभिमानिनो देवा अपि साकल्येन न जानन्तीत्येव. विश्वा... नन्तमाहात्म्याम्बुराशिरिति निश्चित्य, तमुपासते सन्त इत्याह, नैते... गुणाः सत्त्वादिगुणाभिमानिनः गुणिनो गुणविकाराः सहदेवमर्त्या... इत्यत्र देवशब्देन पृथग्विग्रहवन्त इन्द्रादयो गृह्यन्ते सुधियो निश्चि... शास्त्रार्थाः शब्दाद्वदादिशब्दराशिप्रमाणादेते आद्यन्तवन्तस्त्वां... विदन्तीत्येवं विमृश्य विचार्योपास्य तत्प्रसादेन संदृश्य विरम... संसारादिति शेषः ।“यद्वाचानभ्युदितम्”इत्यादि श्रुतेः शब्दाद्विर... तीत्यत्र शब्दत्यागो नार्थः किंतु वेदेन निर्णीततत्त्वस्य तत्त्वे निरन्त... स्यन्दमानबुद्धिजलराशेः पुंसो हरिगुणानुस्मरणायासो नास्ती... वा ॥ ४९ ॥

श्रीनारायणप्रसाद एव पुरुषार्थसाधनमित्युक्तं तस्य भ... ज्ञाने तयोश्च षडङ्गोपासनासाध्यं ध्यानं विना नान्यदन्यथा ... स्यादित्याशयेनाह–तत्त्व इति । हिशब्देनान्यथाजीवञ्छव इत्याह–... शब्दात् पादौ तव क्षेत्रानुगमनेनियोज्याविितिग्राह्यं एवं षडङ्ग... सेवया विना जनो मुमुक्षुः परमहंसानां गतावाश्रयभूते त्वयि भ... ज्ञानं च लभेत किम् ? साधनान्तराभावान्नाप्नोतीत्यन्वयः । भ... ज्ञानयोर्हेतुहेतुमद्भावादेकग्रहणेन द्वयोर्ग्रहणं युज्यत इति भाव... “परा पूर्वेषां सङ्ख्या वृणक्ति”इति श्रुतेः ॥ ५० ॥

हरेरसुरेषु प्रद्वेषाशयात्प्रह्लादस्यापि तज्जातित्वेन तत्स्तुत्या... कोपोपशमः स्यात्किम् ? प्रत्युतास्पेपकरत्वेनाग्नौ शुष्केन्धनप्रक्षे... वज्ज्वलनाय स्यादिति तत्राह, एतावदिति । योग्यतानुकूल्येन भ... भक्तेनेति विशेषणद्वयेन शङ्कानिरस्तेति ज्ञातव्यं जातित्वमप्र... जकं भक्तिरेवेति सूचनेन देवदत्तवदुन्मत्तो न भवति भग... निति सिद्धम् ॥ ५१ ॥

मन्युशान्तेः किं गमकमिति तत्राह—प्रह्लादेति । वरदानसाम... हेतुमाह—कामपूर इति । नृणां भक्तानामिति शेषः ॥ ५२ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

कर्म पूजापरिचर्या कर्मस्मृतिर्लीलास्मरणं चरणयोरिति सर्वत्रान्वितम्, भक्तिव्यञ्जकं तस्मात् सर्वकृतार्थतामूलत्वत्-प्रेमभक्तिसम्पादनीं षडङ्गां संसेवामेव सर्वेष्वपि देहि. अहञ्च त्वद्भक्तकृपया साक्षादङ्घ्रिमूलप्राप्तौ त्वदसाक्षाद्दर्शनयोगाद्वा कृतार्थतामापन्नोऽपि तेनैव कृतार्थतां मंस्ये इति. ब्रह्मादिषु प्रसादो यः प्रथमं प्रार्थितःतस्यापि कैमुत्येन गमितत्वात् सर्वप्रार्थना वाक्यैकवाक्यत्वे सिद्धे तदनुगतानामन्येषामपि वाक्यानां तत् स्वतःसिद्धम् ॥ ५० ॥

गुणाः कारुण्यादयः तत्तद्दानादिक्रियाशक्ति रूपाश्च ॥ ५१ ॥

तदेवं श्रीमत्प्रह्लादस्य सर्वजीवगतां कृपामनुमोदमानः तस्याश्च पूरकं च एतत् कीर्त्तयेदिति पर्यन्तमाशंसनं करिष्यन्न-भीष्टान्तरमर्थयितुमुत्साहयति—अभिमतमन्यमन्यमपि वरम् ॥५२॥५३

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

त्वज्ज्ञानं त्वद्भक्त्यैव भवेत् ननु शास्त्राध्ययनबुद्धिकौशलादिभि-रित्याह—नेति। यद्यते त्वां न विदन्ति तर्ह्येतैरेव मनोबुद्ध्यादिभिः शास्त्राण्यध्ययनाध्यापनादिभिर्विचार्य्य जीवाः कथं ज्ञास्यन्ति विमृश्य,शब्दादध्ययनादिव्यापारादुपरमन्ति तथा च श्रुतिः"किमर्था वयं यक्ष्यामः" इति "नानुध्यायेद्बहून् शब्दान् वाचो विग्लापनं हि तद्"इति स्मृतिश्च "यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति। तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च" इत्यादि ॥ ४९ ॥

स्तुतिमुपसंहरति—तदिति। यस्मादध्ययनादिभिस्त्वज्ज्ञानं भवे-त्तस्मात् त्वज्ज्ञानार्थमप्यहं परित्यज्य सर्वपुरुषार्थसारस्य त्वत्प्रेम्णः साधनार्थमेव यतेत्याह, हे अर्हत्तम! नमो नमस्कारश्च स्तुतिकर्म स्तव करणञ्च पूजा अर्चनञ्च ताः कर्मपरिचर्य्या चरणयोः स्मृतिश्च कथायां श्रवणं चेत्येवं षडङ्गया सेवया भक्त्या विना त्वयि किं भक्तिं प्रेमाणं लभेत? नैव लभेतेत्यर्थः। परमहंसानां ज्ञानिनां गति-र्मुक्तिर्यस्मात्तस्मिन्निति कथंचिद्भक्तिमिश्रज्ञानेन मुक्तिमेव लभेतेति भावः। तस्मात्सर्वकृतार्थता—मूलत्वप्रेमभक्तिसम्पादनीं षडङ्गां संसेवामेव सर्वेष्वपि देहि सा दुर्लभा चेत् मुक्तिमेव दत्वा संसार-दुःखाद्वात्सर्वांस्त्रायस्व अहन्तु त्वद्भक्तसेवयैव कृतार्थीकृत एव वर्त्ते इति न काचिच्चिन्तेति भावः ॥ ५० ॥

गुणाः कारुण्यादयः निर्गुणः प्राकृतगुणरहितः यतमन्युः भक्तकाय प्रह्लादायापि क्रुध्यतीति यो दुर्वारो मन्युरभूत् स प्रह्ला-दस्यानन्ददर्शनादुपशान्त इत्यर्थः ॥ ५१ ॥

अभिमतं वृणीष्वेति मयिभृत्यवत्सले परमोदारचूडामणौ कः संकोच इति भावः। येषां कृते त्वं मां प्रार्थयसे तेषामपि नृणामहं कामपूरोऽस्मि पुरुषार्थप्रवाहरूप एव वर्त्ते. किं पुनरेकां मुक्तिमेव ददे इति भावः। तेन प्रह्लादबुद्धिविषयीकृतास्ता त्कालिका जीवा निस्तीर्णा एव जीवानामानन्त्यात्तदन्यैरेव जीवैः तदनन्तरं ब्रह्माण्डमपूरीति ज्ञेयम् ॥ ५२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

एते गुणाः सत्त्वादयो जडत्वात् त्वां न विदन्ति गुणिनो महदादयो गुणकार्यभूता ये च मनःप्रभृतयस्ते सर्वे आद्य-न्तवन्तः जडाश्च अतो न विदन्ति। हे उरुगाय! सह देवमर्त्याः देवैर्मर्त्यैश्च सहिताः सुधियः साधवस्तु "एवं युक्ताः समक्षमुभ-यत्र विचिन्वते त्वां योगेन वह्निमिवदारुषु" इत्युक्तप्रकारेण त्वां विमृश्य शब्दात् ज्ञानोपायबोधकात् शास्त्राद्विरमन्ति फलं प्राप्या-ध्यापनाध्ययनश्रमं विहाय त्वां ध्यायन्तीत्यर्थः ॥ ४९ ॥

हे अर्हत्तम! यस्मात्त्वमेव सर्वात्मा तस्मात्ते सेवया साधन-रूपया भक्त्या विना परमहंसानां गतौ प्राप्ये त्वयि जनः भक्तिं परां भक्तिं किं लभेत? नैव लभेतेत्यर्थः। अतः सेवां देहि, यया परा भक्तिर्यया जनस्य मुक्तिरिति फलितोर्थः। कथंभूतया नमो नतिश्च स्तुतिकर्म स्तुतिकरणं च पूजा ऽर्चनञ्च कर्म परिचर्या च चर-णयोः स्मृतिः कथायां श्रवणं चेति षडङ्गया ॥ ५० ॥

निर्गुणो हेयगुणरहितः भक्त्या प्रह्लादेन एतावत् एतावन्मात्रं वर्णिताः गुणाः कल्याणरूपा यस्य सः जित उपसंहृतो मन्युर्येन सः प्रह्लादमभाषत ॥ ५१ ॥

कामान् पूरयतीति कामपूरः ॥ ५२ ॥

भाषा टीका।

न ये गुण और न गुणी जो मनः प्रभृति हैं और म-हदादिक हैं देवता और मनुष्यों सहित वे सबी आदि अन्त वाले हैं हे उरुगाय! (वेदपुराणादिकों में आप बहुत गाये गये हो) इसी कारण से ये सब आपको नहीं जान सके हैं ऐसा विचार कर ही सुधीजन शब्द अर्थात् बहुत पठन पाठन की खट पट से विराम को प्राप्त हो जाते हैं ॥ ४९ ॥

हे अर्हत्तम! हे पूज्यतम! आप को न मस्कार स्तुति और सर्व कर्मार्पण परिचर्या चरणस्मृति कथाश्रवण, इन छै अङ्गों सहित आप की सेवा के विना मनुष्यक्या परमहंसों के प्राप्य आप में भक्ति को पासका है? नहीं, किन्तु आप की सेवा ही से सिद्धा भक्ति मिलती है ॥ ५० ॥

नारद उवाच ॥

नारदजी बोले, कि—आप स्वयं निर्गुण है अर्थात् प्राकृत गुण शून्य हैं, तो भी अपने भक्त प्रह्लाद ने भक्ति से आप के गुण वर्णन किये, तब प्रभुने कोप शान्त कर प्रसन्न हो प्रणत भक्त प्रह्लाद से भाषण किया ॥ ५१ ॥

श्रीभगवान् उवाच।

श्री भगवान अर्थात् श्री नरसिंह देव बोले, कि—हे भद्र! हे प्रह्लाद! हे असुरोत्तम! हम तुमारे ऊपर प्रसन्न हैं तुम अपने अभीष्ट वर मांगलो मैं मनुष्यों का कामनाओं को पूर्ण करने वाला हूं ॥ ५२ ॥

मामप्रीणत आयुष्मन् ! दर्शनं दुर्लभं हि मे ।
दृष्ट्वा मां न पुनर्जन्तुरात्मानं तप्तुमर्हति ॥ ५३ ॥
प्रीणन्ति ह्यथ मां धीराः सर्वभावेन साधवः ।
श्रेयस्कामा महाभागाः सर्वासामाशिषां पतिम् ॥ ५४ ॥
एवं प्रलोभ्यमानोऽपि वरैर्लोकप्रलोभनैः ।
एकान्तित्वाद्भगवति नैच्छत्तानसुरोत्तमः ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायाम् वैयासिक्यां
सप्तमस्कन्धे प्रह्लादाऽनुचरिते दैत्यराजवधे नृसिंहस्तवो नाम
नवमोऽध्यायः ॥ ९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अप्रीणतः अप्रीणयतः तप्तुमपूर्णकामत्वेन शोचितुम् ॥ ५३ ॥
प्रीणन्ति तोषयन्ति ॥ ५४ ॥
एकान्तित्वान्निरुपाधिभक्तत्वात् ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
नवमोऽध्यायः ॥ ८ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

हे आयुष्मन् ! मामप्रीणतः प्रीतमकुर्वतः पुंसो दुर्लभं हि मम दर्शनं मां दृष्ट्वा जन्तुर्देही पुनरात्मानं तप्तुमपूर्णकामत्वेन शोचितुं नार्हति ॥ ५३ ॥

अथातो धीरा जितेन्द्रियाः श्रेयस्कामयमाना महाभागा विवेकिनः साधवः सर्वासामाशिषां पुरुषार्थानां पतिं दातारं मां सर्वभावेन करणत्रयैक्येन प्रीणन्ति तोषयन्ति हि खलु ॥ ५४ ॥

एवं वराय चोदितोपि नैच्छदसुरोत्तम इत्याह, नारदः एवमिति । लोकानां विषयातुराणां प्रलोभनैर्विमोहकैर्वरैरेवमित्थं प्रलोभ्यमानोऽप्यसुरोत्तमः प्रह्लाद एकान्तभक्तत्वादनन्यप्रयोजनभगवद्भक्तियुक्तत्वात्तान् धर्मादीन्वरान्नैच्छन्नेयेष ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिकायाम्
नवमोऽध्यायः ॥ ९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मत्प्रसाद एव दर्शने कारणमित्याह—मामिति । मामप्रीणतोऽप्रीणयतः मद्दर्शनफलं च पान्थदर्शनवन्नेत्याह, दृष्ट्वेति ॥ ५३ ॥

यतो न तत्पात्रैश्च्या तस्माद्धीरा माधवं मां प्रीणन्ति प्रीणयन्ति केन सर्वभावेन पूर्णभक्त्या माधव इत्यस्यार्थो मङ्गलदेवतापतिरित्यभिप्रायेणाह—सर्वेषामिति । सर्वेषामविशेषेण या या अभिलषिता आशिषस्तासां तासामाशिषां पतिं पातृत्वेन दातारमित्यर्थः ॥ ५४ ॥

प्रह्लादोपि सामान्यभक्तो न भवति किंतु भक्तोत्तम इति प्रकटनाय भगवता विप्रलब्धोऽपि तान्वरान्नैच्छदित्याह, एवमिति । एकान्तित्वान्नैसर्गिकभक्तत्वात् ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे श्रीमद्-
विजयध्वजतीर्थकृतपदरत्नावल्याम्
नवमोऽध्यायः ॥ ९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अथ अत एव अभिमत वरेच्छात एव ॥ ५४ ॥
एवं पूर्वोक्त प्रकारेण वरैः स्वयमेव निर्दिष्टैः ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
नवमोऽध्यायः समाप्तः ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अप्रीणतः अप्रीणयतः तप्तुम् अपूर्णकामत्वेन शोचितुम् ॥ ५३ ॥
प्रीणन्ति प्रीणयति मां प्रति तुष्यन्तीति वा सर्वभावेन दास्यसख्यादिना ॥ ५४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

एकान्तित्वाद् "एकान्तिनो यस्य न कञ्चनार्थं वाञ्छन्ति" इति तल्लक्षणात् ॥ ५५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।
सप्तमेनवमोऽध्यायः सङ्गतः सङ्गतस्सताम् ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

मामप्रीणितोऽप्रीणयतः जनस्य मे दर्शनं दुर्लभम् भक्त्या प्रसन्नं मां दृष्ट्वा तु आत्मानं तप्तुमपूर्णकामत्वेन सन्तापयितुं नार्हति ॥५३॥ सर्वभावेनाखण्डया भक्त्या प्रीणन्ति तोषयन्ति ॥ ५४ ॥ एकान्तित्वान्निष्कामभक्तत्वात् ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
नवमाऽध्यायार्थे प्रकाशः ॥ ९ ॥

भाषा टीका।

हे आयुष्मन्! मुझे प्रसन्न न करके मेरा दर्शन दुर्लभ है वस मेरा दर्शन पाकर जन्तु सन्ताप को प्राप्त नहीं होसकता है ॥५३॥

साधुजन धीर पुरुष सर्व भाव से मुझे प्रसन्न करते हैं जो कि श्रेय की कामना वाले महाभाग हैं, मैं भी कैसा हूं कि सर्व संपत्ति और अभीष्ट पुरुषार्थों का देने वाला हूँ ॥ ५४ ॥

इस प्रकार बहुत लुभाने वाले वरों से प्रह्लाद को लोभ दिखाया परंतु असुरोत्तम श्रीप्रह्लाद जी ने भगवान् के एकांति भक्त होने से उनवरों की इच्छा नहीं की ॥ ५५ ॥

इति श्रीमद्भागवत महापुराण सप्तम स्कन्ध में
श्रीप्रह्लाद चरित में श्रीनरहरि स्तुति नामक
नवम अध्याय की भागवताचार्य कृत
भाषा टीका समाप्त ॥ ९ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे नवमोऽध्यायः ॥ ९ ॥

॥ दशमोऽध्यायः ॥

नारद उवाच ।

भक्तियोगस्य तत्सर्वमन्तरायतयाऽर्भकः ।
मन्यमानो हृषीकेशं स्मयमान उवाच ह ॥ १ ॥

प्रह्लाद उवाच ।

मा मां प्रलोभयोत्पत्त्याऽऽसक्तं कामेषु तैर्वरैः ।
तत्सङ्गभीतो निर्विण्णो मुमुक्षुस्त्वामुपाश्रितः ॥ २ ॥
भृत्यलक्षणजिज्ञासुर्भक्तं कामेष्वचोदयत् ।
भवान्संसारबीजेषु हृदयग्रन्थिषु प्रभो ! ॥ ३ ॥
नान्यथा तेऽखिलगुरो ! घटेत करुणात्मनः ।
यस्त आशिष आशास्तेऽन स भृत्यः स वै वणिक् ॥ ४ ॥
आशासानो न वै भृत्यः स्वामिन्याशिष आत्मनः ।
न स्वामी भृत्यतः स्वाम्यमिच्छन्यो राति चाशिषः ॥ ५ ॥
अहं त्वकामस्त्वद्भक्तस्त्वं च स्वाम्यनपाश्रयः ।
नान्यथेहावयोरर्थो राजसेवकयोरिव ॥ ६ ॥
यदि रासीश ! मे कामान्वरांस्त्वं वरदर्षभ ! ।
कामानां हृद्यसंरोहं भवतस्तु वृणे वरं ॥ ७ ॥
इन्द्रियाणि मनः प्राण आत्मा धर्मो धृतिर्मतिः ।
ह्रीः श्रीस्तेजः स्मृतिः सत्यं यस्य नश्यन्ति जन्मना ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दशमे त्वनुग्रहाम्मुं भक्तमन्तर्हिते हरौ ।
प्रसङ्गाद्धरिणा रुद्रे कृतो ऽनुग्रह ईर्यते ॥ १ ॥

तत्सर्वं वरजातम् ॥ १ ॥

उत्पत्त्या स्वभावेनैवासक्तं माम् तेषां कामानां सङ्गाद्भीतः ॥२॥

ननु, किमहं भक्तं प्रलोभयामि? नहि,किन्तु वरं वृणीष्वेति वदतस्तवाभिप्रायोऽन्य एवेत्याह-भृत्यलक्षणेति । हृदयस्य ग्रन्थिवद्बन्धकेषु ॥ ३ ॥

अन्यथा ऽनर्थसाधने प्रवर्त्तनं न घटेतेत्यर्थः कथमेवं भृत्य[...]णाज्ञानं स्यात्तत्राह-य इति । ते त्वत्तः ॥ ४ ॥

ननु, कामनयाऽपि सेव्यसेवकयोः स्वामिभृत्यभावः प्र[...] सत्यम्, सोपाधिको ऽसौ नतु तात्त्विक इत्याह—स्वामिन्या[...] आशिषो ऽपेक्षमाणो नैव भृत्यः भृत्यहेतुकमात्मनः स्वाम्यमिच्छ[...] भृत्याय ददाति स च नैव स्वामी ॥ ५ ॥

आवयोस्तु तात्त्विकोऽसावित्याह-अहं त्विति । अनपाश्रयो[...] भिसन्धिः अन्यथा कामाद्यभिसन्धिनाऽर्थः प्रयोजनं नास्ति ॥[...]

ननु, तथाऽपि परमोदारस्य मम सन्तोषार्थं किमपि वृणी[...]

श्रीधरस्वामिकृतभावार्थदीपिका ।

चेदत आह–यदीति । कामाङ्कुराणामसंरोहमनुत्पत्तिम् भवतः सकाशात् ॥ ७ ॥

ननु, कामोत्पत्तौ सत्यां को दोषस्तत्राह–इन्द्रियादीनि यस्य जन्मना नश्यन्ति आत्मा देहः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वराऽनिच्छायां हेतुं वदन् तं विशिषन्भगवन्तं प्रह्लादः प्राहेत्याह–देवर्षिः, भक्तियोगस्येति । तद्भगवता चोदितं धर्मादिवरजातं सर्वमनन्यप्रयोजनभक्तियोगस्यान्तरायतया विघ्नरूपतया मन्यमानः स्मयमानः अहो मदभिप्रायज्ञो मदन्तरात्मा सन्मामेवं प्रलोभयतीति स्मयमानो हृषीकेशं भगवन्तमुवाच ॥ १ ॥

तदेवाह–दशभिः, मेति । उत्पत्त्या स्वभावेनैव कामेषु सक्तमासक्तमिति वा छेदः उत्पत्तिप्रभृतिकामेष्वासक्तं मान्तैःकामरूपैर्वरैर्मा प्रलोभय प्रलुब्धं मा कुरु यतोऽहं तत्सङ्गेन कामासक्त्याऽनर्थावहया भीतस्तत्र कामेषु निर्विण्णः संसृतिबन्धान्मोक्तुमिच्छुस्त्वामुपाश्रितः शरणं गतः ॥ २ ॥

वरं वृणीष्वेति वराय चोदयतस्तव चोदनाद्वारा याचमानाय मह्यं न वरप्रदानेऽभिप्रायः किन्तु भृत्यस्य मम मनःपरीक्षायामित्याह–भृत्येति । कामेषु भृत्यं मां चोदयन् भवान् भृत्यस्यानन्यप्रयोजनत्वरूपं लक्षणं जिज्ञासुः सर्वज्ञोपि भवान् मन्मुखेन मन्मनः परिजिज्ञासुरेव भृत्यं मां मन्मनः परीक्षार्थमेव मां भृत्यं कामेषु भवान् चोदितवानित्यर्थः । अचोदयदिति पाठः सुगमः अन्यथा वरयाञ्चायै चोदना कारुण्यजन्यधेर्हितोपदेष्टुर्मेकानुग्राहकस्यानर्थावहेषु कामेषु भृत्यं प्रति चोदना न घटत इत्याह–अन्यथैवं चोदयतस्तव भृत्यलक्षणजिज्ञासुत्वाभावे तव करुणात्मनः कारुण्यमूलैरखिललोकहितोपदेष्टुरहितरूपेषु दुःखरूपगर्भजन्ममरणादिरूपसंसारस्य बीजभूतेषु हृदयग्रन्थिबद्धमोचकेषु न घटेत चोदनेति शेषः । अतो भृत्यलक्षणजिज्ञासुः सन्नेव कामेषु मामचोदयदित्यर्थः । अत्र घटेत करुणात्मन इत्यस्यानन्तरं क्वचित् "नष्टदृष्टेस्तमस्यन्धे त्वमेकः पारदर्शनः" इति पठ्यते. तत्रायमर्थः । इतोपि न कामेषु चोदना भवतो घटत इत्याह–नष्टदृष्टेरिति । अन्धेतमसि संसारात्मके नरके नष्टदृष्टेः स्वात्मपरमात्मयाथात्म्यज्ञानरहितस्यान्धतमस्तरणोपायानभिज्ञस्य वा पुंसः त्वमेवैकः पारदर्शनोऽन्धतमसः पारभूतमात्मानं दर्शयतीति तादृशः यत एवंभूतस्त्वं ततस्तव न घटत इति ॥ ३ ॥

नन्वाशिषः कामयमानोऽपि भृत्यो मम दृश्यत एवेत्यत आह–य इति । ते त्वत्तः निरतिशयपुरुषार्थस्वरूपाद्यः पुमानाशिषः कामानाशास्ते त्वत्सेवापूर्वकं प्रार्थयते. स तव न भृत्यः न भृत्यलक्षणलक्षितः किं तर्हि सतु वणिक्तुल्यः यथा वणिग्यावत्स्वप्रयोजनमन्यमनु वर्त्तते तद्वत्सोपाधिकानुवृत्तिमानित्यर्थः ॥ ४ ॥

एवं भृत्यात्किञ्चित्प्रयोजनमपेक्ष्य तस्मै कामान्ददतः स्वामित्वमपि निरुपाधिकं नास्तीत्याह–आशासान इति । आत्मनः स्वस्य स्वामिन्याशिषः कामानाशासानः कामयमानः न वै भृत्यः भृत्यो न भवति. इदं दृष्टान्तार्थम् अस्यार्थस्य पूर्वमुक्तत्वादयथार्थं भृत्यो न भवतीत्यर्थः । तथा भृत्यात्स्वाम्यं स्वामिनः प्रयोजनं स्वाम्यं तदिच्छन्कामयमानो यो भृत्यायाशिषो राति ददाति सवै न स्वामी स्वामिशब्दवाच्य एव न भवति नित्यं निरुपाधिकं स्वमस्यास्तीति स्वामीति नित्ययोगार्थमत्वर्थीयप्रत्ययान्तस्वामीशब्दवाच्य एव न भवति तस्य सोपाधिकस्वामित्वादितिभावः । अत्र "राति चाशिष" इत्यस्यानन्तरम् "स वै स्वामी स वै भृत्यो गुणलुब्धौ न कामुकौ" इति क्वचित् पठ्यते. तत्रायमर्थः कौ तर्हि स्वामिभृत्यौ इत्यत आह–सवा इति । यौ गुणलुब्धौ परस्परानुरागजनकसद्गुणमात्रमोहितौ न कामुकौ परस्परं प्रयोजनान्तरमनपेक्षमाणावनुवर्त्तेते स एव भृत्यः स एव स्वामीति ॥ ५ ॥

आवयोस्तु भृत्यस्वामिभावः स्वाभाविक इत्याह–अहमिति । अहन्तु, कीदृशो वा भवतु लोके भृत्यः अहं त्वकामोऽनन्यप्रयोजनः त्वद्भृत्य इति तु शब्दार्थः । त्वमनपाश्रयः स्वामीति त्वद्भक्तोऽहमकामोऽनन्यप्रयोजनः ।

"स्वत्वमात्मनि सञ्जातं स्वामित्वं ब्रह्मणि स्थितम् ।
नान्यथा लक्षणं तेषां बन्धे मोक्षे तथैव च" ॥

इत्युक्तरीत्या प्रवृत्तनित्यनिरुपाधिकत्वद्दास्योऽहं त्वं तु निरुपाधिकस्वामीत्यध्यवसायपूर्वकं नित्यं स्वस्य स्वाम्यनुवर्त्तनं स्वस्वरूपानुबन्धीत्यध्यवसायेन परिहृतान्यप्रयोजनस्त्वद्भक्तोऽस्मीत्यर्थः । अतोऽन्यथा प्रकारान्तरेणावयोरिह स्वस्वामिभावेऽर्थः प्रयोजनं नास्ति राजसेवकयोरिवेति व्यतिरेकदृष्टान्तः यथा राजसेवकयोः प्रयोजनान्तरमूलकः स्वस्वामिभावः; तथा नावयोरिति तदेतत्सर्वज्ञस्त्वं जानास्येवेति भावः ॥ ६ ॥

अहो सर्वज्ञस्यापि किमेतद्वरयाञ्चायै चोदयतः सत्यसङ्कल्पस्य मम वचसः प्रत्याख्यानं तव शोभते इति भगवदभिप्रायमभिप्रेत्य यदि भवतो मह्यं वरप्रदानेऽभिलाषस्तर्हीदं वरय इत्याह–यदीति । हे ईश ! वरदश्रेष्ठस्त्वं मे मह्यं कामानिष्टान्वरान् रासि ददासि तर्हि भवतस्त्वत्तोऽहं मद्धृदये कामानां कामाङ्कुराणामसंरोहमनुत्पत्तिरूपं वरं वृणे धर्मादिपुरुषार्थेच्छानुदयरूपं वरं याच इत्यर्थः ॥ ७ ॥

ननु, कामोत्पत्तौ सत्यां को दोषस्तत्राह–इन्द्रियाणीति । यस्य हृदि सञ्जातकामाङ्कुरस्य कामान् कामयमानस्येन्द्रियादीनि जन्मना जन्मपरम्परया नश्यन्ति कामिनोऽन्ततः स्थावरत्वप्राप्तौ इन्द्रियमनःप्राणात्मानः एवासत्प्राया भवन्ति किं पुनर्द्धर्मादय इति भावः । नहीतोऽन्यः कश्चिदनर्थो विद्यत इति तात्पर्यम्, तत्रात्मा प्रत्यगात्मा. धर्मो वर्णाश्रमानुगुणो भगवदाराधनरूपः धृतिधैर्यमिन्द्रियजयो द्वन्द्वसहिष्णुता वा. मतिः स्वात्मपरमात्मविषया. ह्रीरनुचितकृत्यविषया लज्जा. श्रीर्ज्ञानसम्पत्तिरैश्वर्यं वा. तेजोऽन्याऽनपेक्षता स्मृतिः हेयोपादेयाऽविस्मरणात्मिका. सत्यं भूतहितत्वं सत्यवचनं वा ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अस्मिन्नध्याये भक्त्यैव पुरुषार्थो न द्वेषेणेत्येतत्प्रतिपादनं पुनः पुनर्भक्तेः प्राधान्यज्ञापनायान्यदासुरमोहनायेति तात्पर्यम्, वरानिच्छन् प्रह्लादो हरिं किमुवाचेति हार्दं युधिष्ठिरप्रश्नं परिहरन्

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नारदस्तत्र वक्तीत्याह-नारद इति। वयसार्भको ननु ज्ञानेनेत्येतद्विशे-षप्रकाशनाय हेति विशेषणं हि हेतावित्यमरः ॥ १ ॥

ज्ञातसर्वेन्द्रियवृत्तित्वाद्धृषीकेशेन त्वया मन्मनोगतं ज्ञात-मिति यदतो मनःपरीक्षणार्थं एतैर्मनप्रलोभनं न कुर्विति प्रार्थयते, इत्याशयेनाह—मामेति । गुरुवचनमज्ञातेष्टबोधकत्वेन प्रमाणं स्यादिदं स्वभावत एव ज्ञातेष्टबोधकत्वाद्व्यर्थमिव प्रति-भातीत्याशयवानाह-उत्पत्त्येति । आसक्तमिति लोकवृत्तान्तप्रदर्शन-परं प्रह्लादस्यार्भकावस्थामारभ्य विष्णुधर्मैकनिष्ठत्वात् यतो विषय-सङ्गिनामनर्थपरम्परा दृश्यते तत्तस्माद्विषयेभ्यः । विषयिणो विष-याऽसिद्ध्या तात्कालिकप्रसूतनिर्वेदवन्नायं निर्वेद इत्याह-मुमुक्षुरिति । अनेन प्रह्लादस्याधिकारलक्षणसामग्री विद्यत इति दर्शितम् ॥ २ ॥

ननु, भगद्वाक्यं क्वापि विप्रलम्भकं न भवति "अजस्यावक्र-चेतसः"इति श्रुतेः । भवता तथैव प्रोच्यते तथाच भगवद्वाक्यस्या विश्वसनीयत्वं स्यादिति तत्राह—भृत्येति । चोदयात् चोदयति "धियो यो नः प्रचोदयाद्"इति श्रुतेः ॥ ३ ॥

वञ्चनार्थमेव तथोच्यत इति किन्नस्यादत्राह—नान्यथेति । अखिलगुरुत्वान्यथानुपपत्त्या न वञ्चनं युक्तमित्यर्थः । इतोऽपि-भृत्यलक्षणजिज्ञासैव प्रयोजनं त्वद्वचनस्यान्यथा तवेष्टजनघातक-त्वदोषापत्तिः स्यात् सा निर्दोषत्वेन न युक्तेत्याशयवानाह-नष्टेति । न केवलमितरगुरुवन्मार्गमात्रप्रदर्शकः किन्तु गम्यं च, अतो विप्रलोभनं न युक्तमतो वाह-नष्टेति। पारदर्शिनः पारं चान्तं द्रष्टुमिच्छतः ननु, मत्प्राप्तिकामाय्याशीर्दानवचनमस्तु नाम प्रलोभनं तत्कामुकस्याभीष्टदानाद्वचनेऽनाकाङ्क्षिताभिधानं स्यादिति तत्राह, यस्त इति । ते तव सकाशात् आशिषः सम्पदः सेवायाः । तर्हि स क इति तत्राह—स इति ।"वन षण सम्भक्तौ"इति धातोः सम्भजनं विक्रयं द्रव्यं प्रसार्य दानलक्षणं तत्कर्त्ता वाणिग्वै । हि अयं च किञ्चित्सुकृतकरणलक्षणादानेन भवादृशाज्जनात्पुण्य-लक्षणफलादानं करोतीति यस्मात्तस्माद्वणिगित्यर्थः । आशास्ते इच्छति अनेन फलदस्य स्वामित्वं च विघटितं भवतीति दर्शितम्.* तर्हि कयोः स्वामिभृत्यभाव इति तत्राह-सचा इति।"लुभ गार्ध्ये"इति धातोः भक्त्यादिगुणोद्रेकाकाङ्क्षिणौ गुणलुब्धौ मिथः फलानि न कामुकौ ॥ ४ ॥

ननूभयोः फलकामित्वे को दोष इति तत्राह-आशासान इति। स्वामिनि समवेता आशिष आत्मनः स्वस्याशासानो यः स भृत्यो न वै नैव किन्तु प्रतिभट एव वरदानादिना भृत्यात्स्वस्य स्वामित्व-मिच्छन् यो भृत्यायाशिषो राति ददाति स स्वामी न च । कल्पितस्वामित्वेन तच्छब्दस्य मुख्यार्थालाभात् ॥ ५ ॥

प्रकृते किमभूदिति तत्राह-अहन्त्विति । अनपाश्रयो भृत्यप्राप्य फलानाश्रयः स्वामी अव्याहतस्वामीत्यर्थः । एतदेव दृढयति, नान्यथेति । निष्कामत्वेन भृत्यत्वं मम अनपाश्रयत्वेन स्वामित्वम् एतस्मादन्यथा प्रकारान्तरेणावयोरर्थो नास्ति किन्तत्प्रकारान्तरं तत्राह—राजेति । इह लोके यथा राज्ञः सेवकस्य च स्वाज्ञानाति-लङ्घनप्रीत्यादिलक्षणश्चेतनादिलक्षणः स्वार्थोऽस्ति तथेति ॥ ६ ॥

* "सर्वे स्वामी सर्वे भृत्यो गुणलुब्धौ न कामुकौ" इति विजय० पाठाऽधिकः ।

ननु, शास्त्रेषु प्रतिपाद्यमानसेव्यसेवकभावो ज्ञातृज्ञेयभावो-दातृस्वीकर्तृभाव इत्यादि सम्बन्धिसम्बन्धलक्षणार्थसम्भवादावयो-रर्थोनास्तीति निषेधःकथं क्रियते? इत्याशङ्कां परिहर्तुमाह-यदीति। "नान्यथेश्वरभाषितम्"इति वचनात् भवदुक्तम् अन्यथा माभूदिति भीत्या च तं वृण इत्यतो वाह—यदीति। "रादाने" इति धातु कारयन्ते कामाः अभिमता एव वरास्तान् कामानां विषयाणाम् असंरोहं सम्यगनुत्पादं नाम वरं वृणे इत्यन्वयः ॥ ७ ॥

केन दोषेण तेषामनुत्पादः प्रार्थ्यत इति तत्राह-इंद्रिया-णीति। येषां कामानां विषयाणां जन्मना इन्द्रियादयो नश्यन्ति तेषा-मिति शेषः "सर्वेन्द्रियाणां जरयति तेज"इतिश्रुतेः। आत्माभक्तिः...

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १ ॥

मुमुक्षुस्तान् कामान् त्यक्तुमिच्छुः ॥ २ ॥

भृत्येति सार्द्धकम् । भृत्यस्य लक्षणम् असाधारणं धर्मं जिज्ञासु लोकेषु ज्ञापयितुमिच्छुरित्यर्थः ॥ ३ ॥

यस्त इत्यर्द्धकम् ॥ ४ ॥ ५ ॥

व्यतिरेके दृष्टान्तः राजसेवकयोरिवेति ॥ ६—१० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

प्रह्लादाय वरं दत्वा दशमेऽन्तर्हिते हरौ ।
तस्यैवानुग्रहादीशः पुरस्तिस्रो ददाह सः ॥

तत्सर्वं वरजातं स्मयमान इति मां बालकमद्य प्रलोभय प्रभुरयं मद्बुद्धिं परीक्षते इति विचारोत्थं स्मितम् ॥ १ ॥

उत्पत्त्या स्वभावेनैव वरैर्वरदानैस्तेषां कामानां सङ्गाद्... अत एव मुमुक्षुस्तान् कामान् मोक्तुमिच्छुः ॥ २ ॥

ननु, किमहं भक्तं प्रलोभयामि ? न हि न हि स्वभक्त सर्वोत्कृष्टां निष्ठां लोके ख्यापयामीत्याह-भृत्येति । मयादीयमाना वरान् कथं न गृह्णासीत्युक्ते मद्भृत्य एव मद्भृत्यस्य लक्षणं क... यिष्यतीत्यभि प्रायस्तवावगम्यते इति भावः। प्रभुरिति सर्वज्ञस्य जिज्ञासा नोपपद्यत इत्यतः सर्वान् ज्ञापयितुमेवेति भावः अखिलगुरोः सर्वहितोपदेष्टुस्तव ब्रह्मरुद्रादीनामिवेति भावः ॥ ३ ॥

तद्ब्रूहि भृत्यलक्षणमिति चेत्स्वामिभृत्ययोरुभयोरपि लक्षणं ब्रवीमीत्याह—य इति । ते त्वत्तः वणिगिति तुभ्यं किञ्चित् पत्रपुष्पनैवेद्यादिकं दत्वा हस्त्यश्वरथादिमतीं सम्पत्तिं ब्रह्मेन्द्रादि पदं वा जिघृक्षतीति भावः ॥ ४ ॥

उक्तमेवार्थं पुष्यति—आशासान इति । भृत्यहेतुकमात्मनः स्वाम्यमैश्वर्यं इच्छन् यो भृत्याय ददाति स च नैव स्वामी ॥

आवयोस्तु स्वामिभृत्यभावस्तात्त्विक इत्याह-अहं त्विति अनपाश्रयः सेवकाधीनमपकृष्टमैश्वर्यं नाश्रयस इत्यर्थः । अन्य स्वकामिताभिसन्धिना ते नाभिसन्धिकः स्वामिभृत्यभावो प्रसिद्धोऽपि सोपाधित्वाद्विगीत एवेति द्योतितम् ॥ ६ ॥

विमुञ्चति यदा कामान्मानवो मनसि स्थितान् ।
तर्ह्येव पुण्डरीकाक्ष ! भगवत्त्वाय कल्पते ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

ननु, तथापि मम परमोदारस्य सुखार्थं किमपि वृणीष्वेति चेदत्राह, असंरोहं मम हृदि कामा नोत्पद्यतामित्यर्थः ॥ ७ ॥

यस्य कामस्य इन्द्रियादीनां त्वन्माधुर्याऽग्रहणमेव कुपथगामिता सैव नाशः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

अथ प्रह्लादं प्रत्यनुग्रहं कृत्वा ब्रह्माणं प्रत्येवंविधो वरो ऽसुरे-ऽयस्त्वया न देय इत्युक्त्वा हरिरन्तर्हितोऽभूदिति अनेन भक्तवत्सलेन हरिणा रावणादिभावं गतयोः स्वपार्षदयोर्युद्धलीलया ऽनुग्रहः कृत इति शिवेऽप्यनुग्रहः कृतः इति च दशमे श्रीनारद आह—भक्तियोगस्येति। भक्तियोगस्यान्तरायतया विच्छेदकतया तत्सर्वं वरजातं मन्यमानः ॥ १ ॥

मामुत्पत्त्यास्वभावेनैव कामेषु सक्तं तैर्वरैर्मा प्रलोभय ततस्तेषां कामानां सङ्गाद्भीतो मुमुक्षुरहं त्वामुपाश्रितोऽस्मि ॥ २ ॥

भृत्यलक्षणजिज्ञासुः जानन् अपि भृत्यलक्षणं ज्ञातुमिच्छुः लोके ख्यापयितुमित्यर्थः। हृदये ग्रन्थिर्वासनात्मकं मूलं येषां तेषु संसारबीजेषु कामेषु मामचोदयत् अन्यथा करुणात्मनः करुणाया आश्रयस्य करुणानिधेः तेषु भक्तप्रेरणा न घटेत ॥ ३ ॥

ते त्वत्तः आशिषः कामान् य आशास्ते प्रार्थयते स वणिक् न तु स भृत्यः किन्तु यः आत्मनः स्वकृते स्वामिनि आशिषः नाशासानो वै निश्चितं स भृत्यो भवति. भृत्यतः स्वाम्यं स्वार्थं मिच्छन् यः आशिषो राति स स्वामी न भवति सोऽपि वणिक् ॥ ४ ॥ ५ ॥

आवयोः स्वस्वामिभावस्तु शुद्ध इत्याह–अहमिति। अहमकामो निष्कामस्त्वद्भक्तस्त्वं च अनपाश्रयः स्वानन्दपूर्णः मम स्वामी अतः आवयोरर्थः प्रयोजनम् राजसेवकयोरिव अन्यथा इतरेतरप्रयोजनमूलो न हि ॥ ६ ॥

हे ईश ! यदि भक्तवात्सल्यतः मे कामान् वाञ्छितान् वरान् रास्येव तर्हि हे वरदर्षभ ! कामानां विषयसङ्कल्पानाम् हृदि असंरोहमनुत्पत्तिं भवतः सकाशात् वरं वृणे ॥ ७ ॥

यस्य विषयसङ्कल्पस्य जन्मना इन्द्रियादयो नश्यन्ति तत्रेन्द्रियमनःप्राणानां नाशो ऽधर्मप्रवृत्तिरूपः आत्मनो देहस्य चिन्ताशोकादिजन्यज्वरार्त्तत्वरूपश्च आत्मनो जीवस्य वा स्वरूपविस्मरणरूपः धर्मादीनां ततो निर्गमनरूपः तथोक्तम्——

"देहीति वचनं श्रुत्वा देहस्थाः पञ्च देवताः ।
तत्क्षणादेव गच्छन्ति धीश्रीह्रीधृतिकीर्त्तयः" ॥ ८ ॥

भाषा टीका।

नारद उवाच।

नारद जी बोले, कि—छोटा सा बालक प्रह्लाद, इन सब-वरों को भक्ति के विघ्नकारी जानकर हसता सा हृषीकेश श्रीनरहरि से बोला, ॥ १ ॥

प्रह्लाद उवाच ॥

प्रह्लाद बोले, कि—हे प्रभो ! मैं तो उत्पत्ति से ही विषयों मे आसक्त हूं, मुझे वरों से मत लुभाइये, उस सङ्ग से भय भीत निर्वेद को प्राप्त हुआ मैं मुमुक्षु आपके शरण आया हूं ॥ २ ॥

हे प्रभो ! आप अपने भक्त के लक्षण जानने की इच्छा-से हृदय के ग्रन्थि रूप और संसार के बीज रूप कामों के लिये प्रेरणा करते हो ॥ ३ ॥

हे अखिल गुरो ! अन्यथा परम दयालु आपका ऐसा कथन कैसे घटे, जो आप से कुछ चाहना करता है वह भृत्य नहीं किन्तु वणिक् है ॥ ४ ॥

स्वामी से अपने लिये कुछ चाहना जो करने वाला है, वह भृत्य नहीं है, और वह स्वामी भी नहीं है. जो अपने भृत्य से स्वामीपने की इच्छा करता हुआ कुछ इच्छित प्रदान करता है ॥ ५ ॥

मैं तो आपका निष्काम भक्तहूं. और आप मेरे निरुपाधिक स्वामी हैं, यदि जो कामादि की अभिसंधि होती तौ राजा और सेवक के तरह कुछ प्रयोजन ही नहीं था ॥ ६ ॥

हे वरद श्रेष्ठ ! यदि आप मुझे वरही देते हैं तौ आपसे मैं यही वर मागता हूं कि मेरे हृदय में किसी कामना का अंकुर नहो। कि जिस से मैं फिर भी कभी वर न मागूं ॥ ७ ॥

क्योंकि ? जिस कामना के उत्पन्न होने से ही इन्द्रिय मन प्राण आत्मा धर्म धृति मति लज्जा श्री तेज स्मृति सत्य ये सब ही नष्ट होजाते हैं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

कामाभावे गुणमाह—विमुञ्चन्तीति। भगवत्त्वाय त्वत्समानैश्वर्याय तथाच श्रुतिः "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः। अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते" इति ॥ ९ ॥

नमो भगवते तुभ्यं पुरुषाय महात्मने ।
हरये ऽद्भुतसिंहाय ब्रह्मणे परमात्मने ॥ १० ॥

श्रीनृसिंह उवाच ।

नैकान्तिनो मे मयि जात्विहाशिष आशासते ऽमुत्र च ये भवद्विधाः ।
अथापि मन्वन्तरमेतदत्र दैत्येश्वराणामनुभुङ्क्ष्व भोगान् ॥ ११ ॥
कथा मदीया जुषमाणः प्रियास्त्वमावेश्य मामात्मनि सन्तमेकम् ।
सर्वेषु भूतेष्वधियज्ञमीशं यजस्व योगेन च कर्म हिन्वन् ॥ १२ ॥
भोगेन पुण्यं कुशलेन पापं कलेवरं कालजवेन हित्वा ।
कीर्तिं विशुद्धां सुरलोकगीतां वितत्य मामेष्यसि मुक्तबन्धः ॥ १३ ॥
य एतत्कीर्तयेन्मह्यं त्वया गीतमिदं नरः ।
त्वां च मां च स्मरन् काले कर्मबन्धात्प्रमुच्यते ॥ १४ ॥

प्रह्लाद उवाच ।

वरं वरय एतत्ते वरदेशान्महेश्वर ! ।
यदनिन्दत्पिता मे त्वामविद्वांस्तेज ऐश्वरम् ॥ १५ ॥
विद्धामर्षाशयः साक्षात्सर्वलोकगुरुं प्रभुम् ।
भ्रातृहेति मृषा दृष्टिस्त्वद्भक्ते मयि चाघवान् ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

निर्दोषान्कामान्दातुमिच्छन्तं प्रत्याख्यास्यन्नमस्यति, नम इति ॥ १० ॥

सत्यमेकान्तभक्तस्त्वं तथापि मदाज्ञा करणीयेत्याह—नेति । मे एकान्तिनः कदाचिदपि इहामुत्र च मत्त्याशिषो न वाञ्छन्त्येव तथाप्येतन्मन्वन्तरमात्रं भोगान्भुङ्क्ष्व ॥ ११ ॥

ननु, तर्हि बन्धः स्यादित्यत आह, कथा इति द्वाभ्याम् । सर्वेषु भूतेषु सन्तमेकमीशं यज्ञाधिष्ठातारं मामात्मन्यावेश्य यजस्व तर्ह्यनेनैवापि कर्मणा बन्धः स्यान्नेत्याह, योगेन मय्यर्पणेन कर्म हिन्वंस्त्यजन्यजस्व ॥ १२ ॥

किञ्च भोगेन सुखानुभवेन प्रारब्धं पुण्यं हित्वा मुक्तबन्धः सन् लोकानुग्रहार्थं कीर्तिं च विस्तार्य मां प्राप्स्यसि कुशलेन पुण्याचरणेन पापं हित्वेति विभीषामात्रम्, अन्यथा तस्य राज्येऽप्रवृत्तेः । ननु तस्य प्राचीनं पापमस्ति "तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्" इति न्यायात् "तत्सुकृतदुष्कृते विधुनुते" इति श्रुतेश्च । नचेदं प्रारब्धं पापाभिप्रायं तस्य भोगेनैव क्षयात् कुशलेन हित्वेति वचनाऽनुपपत्तेः नचाऽसावविद्वानिति वाच्यं भगवतैव कृतार्थत्वस्यानन्तरं वक्ष्यमाणत्वात् अत एव योगेन कर्म हिन्वन्नितीदमपि लोकसङ्ग्रहार्थं कर्मणि प्रवर्तितस्यानुद्वेगमा[...]येति सर्वमनवद्यम् ॥ १३ ॥

किञ्च य इति, त्वां च मां चेदं मच्चरित्रं च स्मरन्नेतत्स्तोत्रं कीर्तयेत्सो ऽपि कर्मबन्धाद्विमुच्यते कुतस्तव बन्धशङ्केत्यर्थः ॥ १४ ॥

ईश्वराज्ञया प्राप्तकर्माधिकारः सन्पितुर्निष्कृतिं प्रार्थयते, त्रिभिः[...] वरं वरणीयमेतदपरं वृणे ते त्वत्तः ॥ १५ ॥

विद्धो ऽमर्षेण क्रोधेनाऽऽशयो यस्य ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

निष्कामस्तु त्वां भजंस्त्वत्साधर्म्यं प्राप्नोतीत्याह—विमुञ्चति[...] यदा मानवो मनुष्यःस्वहृदि स्थितान् कामान् विमुञ्चति अन[...] प्रयोजनेन त्वां भजतीति भावः । हे पुण्डरीकाक्ष ! तर्हि [...] स मानवः भगवत्त्वाय भगवतो भावः भगवत्त्वं तस्मै क[...] अपहतपाप्मत्वादिधर्माविर्भावाय कल्पते आविर्भूतगुणाष्ट[...]त्वेन भगवत्साधर्म्यमागतो मुक्तो भवतीति यावत् ॥ ९ ॥

मम हृदि कामानुदयरूपाद्वरादन्यं वरं सर्वथा मादा[...] प्रार्थनाऽभिप्रायेण भगवन्तं नमस्करोति—ओमिति भगवते [...]

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

षाड्गुण्याय पुरुषाय सर्वान्तरात्मने महात्मने केवलं भक्तानुग्रहैकस्वभावाय हरये आश्रितार्तिहराय अद्भुतसिंहाय मादृशसाधुपरित्राणार्थमुपात्तनृसिंहरूपाय ब्रह्मणे स्वरूपेण गुणैश्च निरतिशयवृद्धते परमात्मने लोकत्रयस्यान्तःप्रवेशेन भर्त्रे प्रणवप्रतिपाद्याय तुभ्यं नमः ॥ १० ॥

एवं प्रत्याख्यातवरयाञ्चं प्रह्लादमाह भगवाञ्छ्रीनृसिंहः—नैकान्तिन इति चतुर्भिः भवद्विधास्त्वादृशा मयि एकान्तिन एकान्तभक्ता अनन्यप्रयोजनेन भजन्तः मे मत्तः जातु कदाचिदपि इहामुत्र च लोके आशिषः कामान्नाशासते. यद्यपि न प्रार्थयन्ते तथाप्येतन्मन्वन्तरपर्यन्तमत्रैव लोके दैत्येश्वराणामधिपो भूत्वेतिशेषः । भोगान् भुङ्क्ष्व ॥ ११ ॥

तर्हि बद्धः स्यामित्यत्राह—कथेति । प्रियः मम निरतिशयप्रियः त्वं मदीयाः कथाः जुषमाणः सेवमानः प्रिया इति पाठे कथाविशेषणं मत्कथाः शृण्वंस्त्वं न बद्धः स्या इति भावः । नन्वनिच्छन्तमपि बलात्कामेषु किमर्थं योजयसीत्यत आह—आत्मनि सर्वेषु भूतेषु चान्तरात्मतया सन्तमधियज्ञं यज्ञाधिपतिमीश्वरं मां भक्तियोगेन यजस्वाराधयस्व किं कुर्वन् मत्प्राप्तिविरोधिपुण्यपापात्मकं कर्म हित्वन्नपनुदन्मुमुक्षोरप्यभ्युपगतमत्प्राप्तिविरोधिप्रारब्धफलस्य सुखदुःखात्मकस्यावश्यमनुभाव्यत्वादनिच्छन्तमपि त्वां कामेषु योजयामीति भावः ॥ १२ ॥

. एतदेव व्यनक्ति—भोगेनेति । पुण्यमभ्युपगतप्रारब्धपुण्यकर्म तत्फलभोगेन हित्वा त्यक्त्वा अपनुद्यपापमभ्युपगतप्रारब्धाख्यं पापं कर्म कुशलेन भोगेन हित्वा भोगकौशलेन हित्वेत्यर्थः । पापफलभोगस्य दुःखरूपत्वान्मनोविकारः स्यादिति यथा मनो न विक्रियते तथा भोगकौशलेनेत्यर्थः । "दुःखेष्वनुद्विग्नमनाः सुखेसु विगतस्पृहः । समदुःखसुखं धीरम्" इत्याद्युक्तरीत्याऽनुद्वेगसमत्वादिभोगकौशलेनेति यावत्. कुशलेन पुण्येन यज्ञादिकर्मणा पापमभ्युगतप्रारब्धमपुण्यं कर्म हित्वेति नार्थः । अनुभवैकविनाश्यस्य पुण्यकर्मणा निवृत्त्यनुपपत्तेः । न चात्र पापशब्दः सञ्चितानभ्युपगतादिपापपरः तस्य भक्तियोगेनैव निवृत्तेः न च भक्तियोगप्रतिबन्धकपापपरः परिपूर्णभक्तियोगनिष्ठत्वात्प्रह्लादस्य तन्निवृत्तेः पूर्वमेव जातत्वात्तस्माद्यथोक्त एवार्थः, कालजवेन कालवेगेन कलेवरं हित्वा कालवेगेन निमिसेनानुभूतप्रारब्धावसाने कलेवरं हित्वेत्यर्थः । सुरलोकेपि गीयमानं स्वीयां कीर्तिं विताय विस्तीर्य मुक्तबन्धः मद्भक्तियोगेन विनष्टाश्लिष्टपूर्वोत्तराघरूपमत्प्राप्तिप्रतिबन्धको मामेष्यसि प्राप्स्यसीत्यर्थः ॥ १३ ॥

किञ्च यः पुमान् त्वां च मां च स्मरन्यदिदं मह्यं त्वया गीतं मत्स्तुत्यात्मकं स्तोत्रं कीर्तयेत् सोपि पुमान् काले प्रारब्धाऽनुभवावसानकाले कर्मबन्धान्मत्प्राप्तिबन्धकात्पुण्यपापात्मककर्मरूपाद्विमुच्यते त्वद्गतकीर्तनसञ्जातमद्भक्तियोगनिरस्तमत्प्राप्तिप्रतिबन्धककर्मबन्धाद्विमुक्तो भवतीत्यर्थः ॥ १४ ॥

ईश्वराज्ञया प्राप्तदैत्याधिपत्यः स्वपितुर्निष्कृतिं प्रार्थयते त्रिभिः प्रह्लादः वरामिति । हे महेश्वर ! वरदानां ब्रह्मादीनामपि ईश्वरात्त त्वत्तोऽहमेतद्वरं वृणे, किं तत् ? यन्मे पिता ईश्वरस्य तव सम्बन्धि तेजः प्रभावमविद्वानजानन् ॥ १५ ॥

सर्वलोकहितोपदेष्टारं प्रभुं त्वामनिन्दन्निन्दितवान्, कथंभूतः, त्वं भ्रातृहेति मृषादृष्टिर्दुरभिमानयुक्तः अत एव वृद्धामर्षाशयः प्रवृद्धो यो ऽमर्षः क्रोधः तद्युक्त आशयोन्तःकरणं यस्य तादृशः इद्धेति पाठेऽप्ययमेवार्थः । विद्धेति पाठे विद्धो व्यथितः सचासावमर्षयुक्तान्तःकरणश्चेत्यर्थः । एवं भूतस्त्वां सर्वलोकहितोपदेष्टारं प्रभुमनिन्ददिति यत् यच्च त्वद्भक्ते मय्यघवान् द्रोहीति द्रोहं कृतवानिति ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु, कामासंरोहो नाम काममोक्षो विवक्षितस्तस्मात्किं फलमिति तत्राह—विमुञ्चतीति । भवाय पुनर्जननाय ॥ ९ ॥

भवक्षमनादिलक्षणा भक्तिश्च तत्फलमित्याह*नम इति । भगवत इत्यनेन किञ्चित्पूज्यमात्रवस्तुसिध्यत्यतः पुरुषायेत्यनेनापि कश्चिदेवेत्यतो महात्मन इति. कोसावित्यतो हरय इति. हरिशब्दस्यानेकार्थत्वादत्र क इत्यतोऽद्भुतेति. तिर्यक्प्राणिना त्वया किं स्यादित्यतो ब्रह्मण इति. अस्याप्यनेकार्थत्वादत्र क इत्यतः परमात्मन इति ॥ १० ॥

अहं त्वकाम इत्येकांतभक्तलक्षणं यत्त्वयोक्तं तत्सत्यं तथापि मदाज्ञाकारिणस्तव पुण्याभिवृद्धिः स्यादत एतत्कर्तव्यमित्याह, नैकान्तिन इति । किन्तदिति तत्राह, तथापीति ॥ ११ ॥

ननु, कर्दमजलस्नानाऽनिच्छया ह्येतावन्तं कालं मया कण्ठशोषणमकारि तदरण्यरोदनवद्व्यर्थमभूद्यतस्त्वं तत्रैव स्नाहीत्युपदिशस्यतस्त्वदाज्ञानुलङ्घ्या त्वमेव जानासीति शङ्कारोगनिर्मूलनाय सुखसाध्यमौषधं विधास्यामीत्याशयवानाह–कथा इति । बहुवचनेन सर्वावतारादिकथा उपलक्षयति, भूतेष्वित्युपलक्षणं चरुपुरोडाशादिष्वपि यज्ञमूर्तिसन्निहित इति योगेन भक्तियुक्तध्यानेन हिन्वन् नाशयन् ॥ १२ ॥

नन्वेतावता मम किं कालान्तरभाविनी त्वत्प्राप्तिः स्यादेवेत्याह—भोगेनेति । भुक्त्वानभिमतं पुण्यं भोगेन क्षपयित्वा प्रायश्चित्तादिकुशलकर्मणा पापं निर्मूलयित्वा विताय विस्तृत्य ॥ १३ ॥

मया तवोक्तयोगकरणाशक्तस्यानायाससाध्यं योगमुपदिशामीत्युपसंहरति—य इति । मह्यं मामुद्दिश्य युक्तकाले ॥ १४ ॥

अभिमतमित्युक्तत्वादिमं त्वदभिमतं वरं वृण इत्याह—वरमिति । ते सकाशात् अनेन दातृस्वीकर्तृभावसम्बन्धोस्तीति ज्ञायते ॥ १५—१६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अथापीति, श्रीनृसिंहवाक्येनैतान् विहायेति तत्प्रार्थनानुसारेण सर्वलोककृतार्थीकरणमेव मुख्यं प्रयोजनम् अन्यत्तु लक्ष्यमात्रं । तथैव वक्ष्यते "कीर्त्तिं विशुद्धां सुरलोकगीतां विताय" इति । य एतदिति च ॥ ११ ॥

* नारदेनोपदिष्टं मे तवमन्त्रमिमं स्मरे । इत्यधिकः पाठः ।

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

यांस्तु दृष्टश्रुतांस्त्वमधुना स्मरसि तेषां का वार्त्तेति तच्छ्रवण-गतानामपि कीर्त्यर्थमभिप्रेतम् ॥ १२ ॥

भोगेन पुण्यं प्रारब्धं कुशलेन मद्भजनेन तत्प्रतियोगितया पापञ्च प्रारब्धमेव "श्वादोऽपि सद्यः सवनाय कल्पते" इति न्यायात् "भक्तिः पुनाति मन्निष्ठा श्वपाकानपि सम्भवात्" इति न्यायाच्च ॥ ॥ १३ ॥ १४ ॥

वरं वरय इत्यर्द्धकम्। अनेन श्रीप्रह्लादस्य स्वपित्रोर्जयविजयत्वादि ज्ञानं नासीदिति गम्यते यदाह साद्धयुग्मकम् ॥ १५-१७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

ननु, यदि कामं न कामयसे तर्हि वद मे तव दास्ययोग-मिति ब्रुवन् कथं मद्दास्यं कामयसे तत्राह-विमुञ्चतीति। मनसि स्थितान् स्थायिभावतया वर्त्तमानान् कामान् अप्राकृतांस्त्वद्दा-स्यसख्यादीनपि यदा विशेषेण मुञ्चति भगवत्त्वाय सायुज्याय तच्च सायुज्यं मे नाभीष्टं किं तैर्गुणव्यतिकरादिह ये स्व-सिद्धा धर्मादयः किमगुणेन च काङ्क्षितेन "सारं जुषाम् चरणयो रुपगायताम् नः" इति मदुक्तेरेवातो भवद्दास्यरूपमप्राकृतम् काम-महं वृणे एव भगवतत्त्वाय भगवत्समानैश्वर्य्यायेति श्रीस्वामि-चरणाः ॥ ९ ॥

ननु, मत्सायुज्यमात्मारामसुनिभिरप्यादरणीयं किमित्य-सुरबालकोपि भूत्वा तत्र कटाक्षयसीति भगवद्वाचा पराजित-म्मन्यः प्रणमति-ॐ नम इति ॥ १० ॥

न केवलं तवैवायं स्वभावः अपि तु सर्वेषामेव मद्भक्ताना-मित्याह-नेति। एतन्मन्वन्तरमात्रं नत्वधिकं ददामि मा क्रुध्येति-भावः ॥ ११ ॥

ननु, मां विषयान्धकूपे केनापराधेन क्षिपसीत्यत आह—कथा इति। अभियज्ञं सर्वयज्ञाधीश्वरं मां स्वयोगेन स्वीयभक्ति-योगेनैव यज भज इनिभक्तता अपि अश्वमेधादयो यज्ञाः कृता एव भविष्यन्तीत्यभियज्ञपदेन द्योत्यते कर्म वैदिकं लौकिकं च हित्वा त्यजन् मद्भक्त्यधिकारिणः कर्मकरणानौचित्यात् ॥ १२ ॥

भोगहेतुकात् कर्मबन्धात्तु नैव शङ्कितव्यस्तव पूर्वजन्मन्येव सर्वं कर्म नष्टमेवेत्याह—भोगेन सुखासुखभवेन प्रारब्धं पुण्यं कुशलेन सुकृताचरणेन पापं कलेवरं पूर्वदेहं च हित्वा यदि मां सम्प्रति प्राप्तोऽपि असि मुक्तबंधः इत्यस्मिन् जन्मनि तु मुक्तबन्धो जीवन्मुक्त एव वर्त्तसे इत्यर्थः। एवं प्रह्लादस्यांशेन साधनसिद्धत्वं नित्यसिद्धत्वं च नारदादिवद् ज्ञेयम् ॥ १३ ॥

तव कर्म बन्धाभावे कैमुत्यं श्रावयत्याह-य इति। मद्वां मां प्रसादयितुम् ॥ १४ ॥

किञ्च पूर्वं संसारिणां वृणां मोचाय श्रीमच्चरणेषु प्रार्थितं सम्प्रति यद्येनाद्दशं सौभाग्यं मह्यमदास्तर्हि कस्य महापराधिनोऽपि निस्ताराय प्रार्थये इत्याह—वरमिति त्रिभिः,। वरये वृणे ॥ १५ ॥

विद्धोऽमर्षेणाऽशयो यस्य सः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

भगवत्त्वाय कल्पते भगवद्भावापत्तियोग्यो भवति, भगवद्भावापत्तिर्नाम भगवत्साधर्म्यप्राप्तिः—

"इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः।
सर्गे पि नोपजायन्ते प्रलये न व्यथन्तिच" ॥

इति श्रीमुखवचनात् ॥ ९ ॥

अतिदुर्लभभगवद्दर्शनचरणस्पर्शवचनामृतश्रवणादि निर्वृतो नमस्करोति नम इति ॥ १० ॥

भगवानपि तत्प्रारब्धकर्मानुसारेण तद्दर्शनादिना लोका... वियोगार्थितुं च किञ्चित्कालमत्रैव मां भजन् वासं कुरु पुनर्मा... मेष्यतीत्याह—नैकान्तिन इति त्रिभिः ॥ ११ ॥

सर्वेषु चेतनाचेतनेषु भूतेषु एकं नियन्तारं मां सम... आत्मनि हृदि आवेश्य मदीयाः कथाः जुषमाणः सेवमा... योगेन मदर्पणविधियोगेन अभियज्ञं यज्ञाधिष्ठातारं मां ... प्रारब्धं कर्म हिन्वन् क्षपयन् ... ॥ १२ ॥ १३ ॥

प्रह्लादोक्तस्वश्लोकपठनादिफलमाह—य इति ॥ १४ ॥

ते त्वत्तो वरं वरये वृणे मे पिता ऐश्वरं भवदीयं तेज... अविद्वान् त्वां यदनिंदत् तस्मात् अघात् मे पिता पूयेतेति तृतीयेनाऽन्वयः ॥ १५ ॥

विद्धो व्याप्तो ऽमर्षेण क्रोधेनाशयो यस्य सः ॥ १६ ॥

भाषा टीका।

और पुरुष जब मन के मनोरथों को छोड़ देता है, ... पुण्डरीकाक्ष ! तब वह आप ही भगवद्भाव को ... होता है ॥ ९ ॥

षडैश्वर्य सम्पन्न पुरुष महात्मा हरि अद्भुत सिंह ... स्वरूप परमात्मा एसे आप को नमस्कार हो ॥ १० ॥

श्री नृसिंह उवाच ॥

श्री नृसिंहजी बोले, कि—तुमारे सदृश हमारे ... भक्त लोग इसलोक और परलोक के पुरुषार्थों की ... कभी चाहना नहीं करते हैं, तौभी इस मन्वन्तर ... यहां पर दैत्येश्वरों के भोगों को तुम भोगो ॥ ११ ॥

हमारी प्रिय कथाओं का सेवन करते हुए, सर्वभूतों ... वर्त्तमान एक ईश्वर यज्ञों का अधिष्ठाता ऐसे मुझको ...

तस्मात्पिता मे पूयेत दुरन्ताद्दुस्तरादघात् ।
पूतस्ते ऽपाङ्गसन्दृष्टस्तदा कृपणवत्सल ! ॥ १७ ॥

श्रीभगवानुवाच ।

त्रिःसप्तभिः पिता पूतः पितृभिःसह तेऽनघ ! ।
यत्साधो ऽस्य गृहे जातो भवान्वै कुलपावनः ॥ १८ ॥
यत्र यत्र च मद्भक्ताः प्रशान्ताः समदर्शिनः ।
साधवः समुदाचारास्ते पूयन्त्यपि कीकटाः ॥ १९ ॥
सर्वात्मना न हिंसन्ति भूतग्रामेषु किञ्चन ।
उच्चावचेषु दैत्येन्द्र ! मद्भावेन गतस्पृहाः ॥ २० ॥
भवन्ति पुरुषा लोके मद्भक्तास्त्वामनुव्रताः ।
भवान्मे खलु भक्तानां सर्वेषां प्रतिरूपधृक् ॥ २१ ॥
कुरु त्वं प्रेतकार्याणि पितुः पूतस्य सर्वशः ।
मदङ्गस्पर्शनेनाङ्ग ! लोकान्यास्यति सुप्रजाः ॥ २२ ॥
पित्र्यं च स्थानमातिष्ठ यथोक्तं ब्रह्मवादिभिः ।
मय्यावेश्य मनस्तात ! कुरु कर्माणि मत्परः ॥ २३ ॥

नारद उवाच ।

प्रह्लादो ऽपि तथा चक्रे पितुर्यत्साम्परायिकम् ।
यथा ऽह भगवान् राजन्नभिषिक्तो द्विजोत्तमैः ॥ २४ ॥

भाषाटीका ।

आत्मा में आविष्ट करके मेरा यजन करौ मेरे विषै कर्मों का अर्पण करते हुए त्याग करते जावो ॥ १२ ॥

सुखानुभव करके पुण्य को और कुशलाचरण से पाप को और काल के वेग से कलेवर को छोड कर तथा सुरलोक गीत विशुद्ध कीर्ति को विस्तार समस्त बन्धनों से मुक्त होकर हमको प्राप्त होगे ॥ १३ ॥

जो नर इस तुमारे गाये हुए स्तोत्र का कीर्त्तन करेगा तथा तुमारा और हमारा स्मरण करेगा वह समय पर कर्मों के बन्धों से मुक्त हो जावेगा ॥ १४ ॥

प्रह्लादउवाच ॥

प्रह्लाद बोले, कि—हे महेश्वर ! वर देने वालों के ईश्वर आप से मैं यही वर मागताहूँ कि आप के ऐश्य तेज को न जानने वाला और "यह मेरे भ्राता का मारने वाला है" इस प्रकार मिथ्या दृष्टि वाला और क्रोध से विद्धचित्त जिस्का, ऐसे मेरा पिताने, सर्व लोक के गुरु और प्रभु ऐसे आपकी जो निन्दा की है, और आप के भक्त ऐसे मेरे विषै अपराध किया है ॥ १५—१६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ते ऽपाङ्गेन सन्दृष्टो ऽतः पूत एव तथापि भोः कृपणवत्सल ! कार्पण्येन प्रार्थय इत्यर्थः ॥ १७ ॥

यद्यपि कश्यपो मरीचिर्ब्रह्मा चेति तत्पितृत्रय एव पूर्वजास्तथापि त्रिःसप्तभिः सहेति प्राक्कल्पगतपित्राभिप्रायेणोक्तं यद्यस्माद् ॥ १८ ॥

सम्यगुत्तम आचारो येषां ते कीकटा अपि देशास्तत्तुल्या वंशाश्च पूयन्ते शुद्धा भवन्ति ॥ १९ ॥

ननु, त्वद्भक्तानामयं महिमेति न चित्रं अहं तु तादृशो न भवामि

श्रीधरस्वामिकृतभावार्थदीपिका ।

इति चेत्तत्राह—सर्वात्मनेति, द्वाभ्याम् । मद्भावेन मद्भक्त्या विगता स्पृहा येषाम् ॥ २० ॥

त्वामनुगता ये केचित्पुरुषास्ते ऽप्येवं लक्षणाः सन्तो मद्भक्ता भवन्त्यतो भवान्मे भक्तानां सर्वेषां प्रतिरूपधृगुपमानास्पदं श्रेष्ठः खल्वित्यर्थः ॥ २१ ॥

मदङ्गस्पर्शनेन सर्वशः पूतस्य ते पितुः पापशङ्कैव नास्ति केवलं पुत्रकृत्यानि प्रेतकार्याणि कुरु ॥ २२ ॥

ब्रह्मवादिभिर्वेदवादिभिः उक्तमनतिक्रम्य मत्परः सन्कर्माणि कुरु ॥ २३—२६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तस्माद्दुस्तरादघात् पापान्मे पिता पूयेत विशुद्ध्येत् एतद्वरं वरये इत्यन्वयः । यद्यपि ते तवापाङ्गेन सन्दृष्टो ऽतएव पूतएव मम पिता तथापि हे कृपणवत्सल ! कार्पण्येन प्रार्थये इत्यर्थः ॥ १७ ॥

एवं प्रह्लादेन प्रार्थितो भगवांस्तमाह—त्रिस्सप्तभिरिति षड्भिः । न केवलं तव पितैव पूतः अपितु हे अनघ ! त्रिःसप्तभिः पितृभिः सह तव पिता त्रिः पूत इति त्रिवारमनुगृह्णामीत्यर्थः । त्रिसप्तभिरिति पाठे, एकविंशतिपर्यन्तैः पितृभिः सह पूत इत्यर्थः । कुतः यद्यस्मात् हे साधो ! महाभागवतः कुलपावनो भवान् तस्य हिरण्यकशिपोर्गृहे जातः । यद्यपि हिरण्यकशिपोः पितरः कश्यपो मरीचिर्ब्रह्मा चेति त्रय एव ; तथापि प्राकृत्पगतपित्राद्यभिप्रायेण त्रिसप्तभिरित्युक्तं मद्भक्तस्य तव जननादेवेदं त्वत्कुलं पूतमित्यभिप्रायः ॥ १८ ॥

एतदेव स्वभक्तप्रभावप्रदर्शनमुखेनाह—यत्रेति । समदर्शिनः कृत्स्नं जगत् ब्रह्मात्मकत्वेन पश्यन्तः प्रशान्ताः जितेन्द्रियाः सत्यगुत्तमः आचारो येषां ते साधवः परोपकारशीलाः मद्भक्ताः यत्र यत्र देशे सन्ति ते कीकटा अपि कीकटकल्पाम्लेच्छदेशा अपिशब्दात्तत्प्रभवा अपि पूयन्ते शुद्धाभवन्ति ॥ १९ ॥

ननु, मद्भक्तानामयं प्रभाव इति न चित्रं नाहं तु तादृशः इति चेत् तत्राह—सर्वात्मनेति, द्वाभ्याम् । हे दैत्येन्द्र ! लोके ये मद्भक्ताः पुरुषास्ते त्वां मद्भक्तश्रेष्ठमनुव्रता अनुवर्त्तमाना भवन्ति. त्वं यथा मद्भक्तश्रेष्ठस्तथा वयमपि भगवद्भक्ता भवेम इति त्वत्पदवीमनुवर्तमाना मद्भक्ता भवन्ति. अतः सर्वेषां भक्तानां भवान् प्रतिरूपधृक् दृष्टान्तभूतः अतस्त्वं भागवतोत्तमोत्तम इति भावः । तदनुवृत्तिप्रकारमाह—उत्कृष्टेषु च भूतग्रामेषु देवमनुष्यादिभूतसङ्घेषु सर्वात्मना करणत्रयेण न किञ्चिदपि हिंसन्ति. मद्भावेन मद्भक्त्या विगता स्पृहा येषां मत्साम्याप्तिनिस्स्पृहा इति वा तादृशाश्च भवन्ति. त्वद्दृष्टान्तेनैवात्मानं शिक्षयन्तीत्यर्थः ॥ २० ॥ २१ ॥

अतः सर्वथा पूतस्य विशुद्धस्य तव पितुः प्रेतकार्याणि दाहादिकर्माणि कुरु अङ्ग हे प्रह्लाद ! शोभना प्रजास्त्व[...] यस्य सः त्वत्पिता मदङ्गस्पर्शनेन मच्छरीरसंस्पर्शनेन [...] लोकान्पुण्यलोकान् यास्यति प्राप्स्यति. पश्यतीति पाठे द्रक्ष्य[...]त्यर्थः वर्त्तमानसामीप्ये भविष्यति लट् ॥ २२ ॥

पित्र्यं पितृसम्बन्धि पित्राधिष्ठितं महेन्द्रभवनं विहाय [...] दानवाधिपत्यस्थानमधितिष्ठेत्यर्थः । हे तात ! मयि मन आ[...] ब्रह्मवादिभिरुक्तमनतिक्रम्य कर्माणि मदाराधनरूपाणि म[...] अहमेव परस्तेषां कर्मणां फलं यस्य तादृशः सन् कुरु ॥ [...]

एवमुक्तः प्रह्लादो यथोक्तमकरोदित्याह नारदः—प्रह्लादोऽपि [...] हे राजन् युधिष्ठिर ! यथा भगवानाह तथैव प्रह्लादः पि[...] त्साम्परायिकं प्रेतोद्देशेन कर्त्तव्यं तत्सर्वं चक्रे ततो द्विजो[...] रभिषिक्तश्च बभूव दानवादीनामाधिपत्यमकरोदित्यर्थः ॥ [...]

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

शुद्ध्यर्थं साधनान्तरानुष्ठानं नापेक्षितमित्याह—पूत इति । [...]

न केवलमयमेव पिता पूतः किन्तु जन्मान्तरेऽपि विद्यम[...] पितरः पूताः स्युरित्याशयवानाह—त्रिःसप्तभिरिति । सा विशु[...] मत्कटाक्षपात्रीभूतत्वज्जन्मनेत्याह—यत्साधोऽस्येति ॥ १८ ॥

एतन्न्यायमन्यत्रातिदिशति—यत्रेति । कीकटा इति पाठे मा[...] इत्यर्थः ॥ २९ ॥

ननु, त्वद्भक्तानामेवंविधमाहात्म्यं कस्मादित्याशङ्क्य [...] वृद्धिक्षयहेतुहिंसाद्यभावादित्याह—सर्वात्मनेति । सर्वात्मना [...] किञ्चन कृकलासादिकमपि "तस्मात्प्राणभृतः प्राणं न हिं[...]न्यादपि कृकलासस्य" इति श्रुतेः । तत्र निमित्तमाह—मद्भा[...] "ईश्वरोजीवकलया प्रविष्टः" इति वचनात् सर्वत्र मम भावः [...]स्तीति भावो भावना निरन्तरानुस्मरणं तेन गतस्पृहाः नष्ट[...] हिंसायाः कारणं निमित्ताभावान्नैमित्तिकाभाव इत्यर्थः ॥ [...]

इह लोके ये मद्भक्ताः पुरुषा भवन्ति विद्यन्ते ते न हिं[...]त्यन्वयः मद्भक्तेष्वपि तव विशेषोस्तीत्याह—भवानिति । [...] धृक् दृष्टान्तस्थलभूतः खलुशब्देन कांश्चिन्निषिध्यावि[...] सर्वेषामित्यर्थो गृह्यते तेन यावत्तावदित्यर्थः । "ऋते तु सा[...]न्देवान्नारदादींस्तथैव च । प्रह्लादादुत्तमः को नु विष्णुभक्तो ज[...] इति वचनात् "निषेधवाक्यालङ्कारजिज्ञासाऽनुनेय स[...] भिधानम् ॥ २१ ॥

मत्पिता भगवद्द्वेषीति मत्वा तत्प्रेतकार्याणि न कर्त[...] मतिर्माभूत् "श्रौतं स्मार्तं न लङ्घयेत्" इति वचनात् मदाज्ञया [...] कर्तव्यानि "नावैष्णवाय दातव्यं नोदबिन्दुं न तण्डुलम्" [...] सम्बन्धिविषयत्वेन सावकाशमित्याशयेनाह मदङ्गेति [...] सुपुत्रः ॥ २२ ॥

पितृमेधं कृत्वा विरज्य वनं न व्रज किन्तु राज्यं [...]त्याह—पित्र्यमिति । राज्यं कुर्वन् पितृवल्लोकोपद्रवं न कु[...] ब्रह्मवाद्युक्तधर्मेणेत्याह यथोक्तमिति न तावता पूयते [...]

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आवश्यकमित्याह–मयीति । कर्माणि सामादिविषयाणि पूजादीनि वा ॥ २३ ॥

भगवदाज्ञानुल्लङ्घनेन भगवत्प्रीतिः स्यादिति कृत्वा तदाज्ञाकरणप्रकारमाह—नारद इति । साम्परायिकं पारलौकिकम् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

त्रिःसप्तभिरिति । यदि सप्तत्रयसङ्ख्यास्तव पितरः सम्भवन्ति तदा तैरपि सह पूतः स्यादित्यर्थः । प्राक्कल्पगतत्वे यदिति हेतुवाक्यं न सङ्गच्छते. श्रीप्रह्लादस्यात्र जन्मना सह पूर्वपितॄणामसम्बन्धात् स्वत एव सम्बन्धाच्च हिरण्यकशिपोश्च पूर्वजन्माभावात् ॥ १८ ॥ १९ ॥

सर्वात्मनेति युग्मकम् ॥ २० ॥ २१ ॥

कुर्विति, अस्य भवता सुप्रजस्त्वं भगवत्प्रार्थनया भवदपराधखण्डनमुत्तमलोकप्रापणाञ्च करिष्यतीत्यर्थः ॥ २२—३९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

यद्यपि अपाङ्गेन दृष्टः पूत एव तदपि श्रीमुखात् प्रसादवाचं श्रोतुं कार्पण्यात्प्रार्थये इति भावः ॥ १७ ॥

त्रिःसप्तभिरित्यस्मिन् जन्मन्ययं तव पिता पूत इति किं वक्तव्यं तव त्रिसप्तजन्मसु ये त्रिसप्तसङ्ख्याः पितरोऽभूवन् तेऽपि पूता इत्यर्थः । पितॄन् पुनासीत्येतमपि कियत् यतस्त्वं कुलपावनः पितृमात्रादिकुलमपि ते पूतम् ॥ १८ ॥

मद्भक्तः स्वसङ्गिनं देशमपि पुनाति किमुत पित्रादीनित्याह–यत्रेति । पूयन्ति पूयन्ते पूता भवन्तीत्यर्थः ॥ १९ ॥

ननु, त्वद्भक्तानामयं महिमा न चित्रम् अहं तु तादृशो न भवामीति चेत्तत्राह–सर्वेति । ये पुरुषास्त्वामनुव्रता भवन्ति तेऽपि मद्भक्ता भवन्ति कीदृशाः मम भावेन प्रेम्णैव विगतविषयस्पृहाः सर्वात्मना अहिंसकाश्च भवन्ति. अतस्तव महिमा केन निरुच्यतामिति भावः । यतो भवान् मे भक्तानां प्रतिरूपधृक् उपमानास्पदं तेषु श्रेष्ठत्वादिति भावः ॥ २० ॥ २१ ॥

मदङ्गस्पर्शनेनैव सर्वशः पूतस्य ते पितुः पापशङ्कैव नास्ति तदपि प्रेतकार्याणि प्रेतस्येव कृत्यानि कुरु, केवलं व्यवहाररक्षार्थमित्यर्थः ॥ २२ ॥

यद्यपि मद्भक्तस्य तव नास्ति कर्माधिकारस्तदपि मदाज्ञयैव व्यवहाररक्षार्थं कर्माणि कुरु मत्पर इति कर्मसु श्रद्धाशून्यः इत्यतः कर्मणां करणमप्यकरणम् एव पर्य्यवस्यतीति मा शुच इति भावः ॥ २३ ॥ २४ ॥ २५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यद्यपि हे कृपणवत्सल ! ते अपाङ्गेन दृष्टः तस्मादघात् ते निन्दारूपात् मे पिता पूत एव तथापि पूयेत स्वपित्रादिसाहित्येनेत्यर्थः ॥ १७ ॥

त्रयो ब्रह्ममरीचिकश्यपाः अष्टादश जन्मान्तरीयाः एवं त्रिसप्तभिस्ते पितृभिः सह ते पिता पूतोऽस्ति । हे साधो ! यस्मादस्य गृहे भवान् कुलपावनो जातः । दैत्यकुलमपि त्वज्जन्मना पूतमित्यर्थः ॥ १८ ॥

किं बहुना सम्यगुद्युत्तमः मत्प्रावण्यप्रधान आचारो येषां ते यत्र यत्र सन्ति ते कीकटा अपि देशास्तत्तुल्याश्च पूयन्ते ॥ १९ ॥

स्वभक्तस्तुतिपूर्वकं प्रह्लादमभिनन्दति–सर्वात्मनेति, द्वाभ्याम् । भूतग्रामेषु किञ्चन अपि न हिंसन्ति उच्चावचेषु कुलेषु भवन्तीत्युत्तरेण सम्बन्धः । अतो हे दैत्येन्द्र ! दैत्योस्मीति मा शुच इति भावः ॥ २० ॥

त्वामनुव्रताः ये दैत्यादयस्तेऽपि मद्भक्ता भवष्यन्ति भवांस्तु मे भक्तानां सर्वेषां प्रतिरूपधृक् प्रतिनिधिरूपधृक् ॥ २१ ॥

त्वज्जन्मना मदङ्गस्पर्शनेन च सर्वशः पूतस्यापि लोकसंग्रहार्थं पुत्रकृत्यानि प्रेतकार्याणि कुर्वित्यर्थः ॥ २२ ॥

वेदवादिभिर्मन्वादिभिर्यथोक्तं तदनुसारेण कर्माणि कुरु मत्परो मद्भजनाऽविरोधेनेत्यर्थः ॥ २३—२४ ॥

भाषाटीका ।

उस दुस्तर पापसे मेरा पिता पवित्र होजाय, हे कृपणवत्सल ! यद्यपि उसी समय आप के कृपा कटाक्ष से पवित्र हो गया है तौ भी मैं अपनी कृपणता से एसा वर मागताहूँ ॥ १७ ॥

श्रीभगवानुवाच ॥

श्री भगवान् बोले, कि—हे अनघ ! सप्तविंशन्ति पितरों सहित तुमारा पिता पवित्र हुआ; क्योंकि ? हे साधो ! कुल को पवित्र करने वाले तुमारे सरी के इस के घर में पुत्र हुए ॥ १८ ॥

जहाँ २ प्रशांत समदर्शी साधु उत्तमाचार वाले मेरे भक्त रहते हैं, वे कीकट (मगद) देश भी पवित्र हो जाते हैं ॥ १९ ॥

हे दैत्येन्द्र ! मेरी भक्ति से विगत स्पृहावाले लोग ऊंचे नीचे भूत ग्रामों को किसी प्रकार भी किञ्चित् पीडा नहीं देते हैं ॥ २० ॥

लोक में हमारे भक्त लोग तुमारे सदृश होते हैं और तुमतौ सम्पूर्ण हमारे भक्तों में उपमा देने के योग्य हौ ॥२१॥

मेरे अंगस्पर्श से सर्व प्रकार पवित्र ऐसे तुमारे पिता, के

प्रसादसुमुखं दृष्ट्वा ब्रह्मा नरहरिं हरिम् ।
स्तुत्वा वाग्भिः पवित्राभिः प्राह देवादिभिर्वृतः ॥ २५ ॥

ब्रह्मोवाच ।

देवदेवाऽखिलाध्यक्ष ! भूतभावन ! पूर्वज ! ।
दिष्ट्या ते निहतः पापो लोकसन्तापनो ऽसुरः ॥ २६ ॥
योऽसौ लब्धवरो मत्तो न वध्यो मम सृष्टिभिः ।
तपोयोगबलोन्नद्धः समस्तानिगमानहन् ॥ २७ ॥
दिष्ट्या ऽस्य तनयः साधुर्महाभागवतोऽर्भकः ।
त्वया विमोचितो मृत्योर्दिष्ट्या त्वां समितो ऽधुना ॥ २८ ॥
एतद्वपुस्ते भगवन् ! ध्यायतः प्रयतात्मनः ।
सर्वतो गोप्तृ सन्त्रासान्मृत्योरपि जिघांसतः ॥ २९ ॥

श्रीनृसिंह उवाच ।

मैवं वरोऽसुराणां ते प्रदेयः पद्मसम्भव ! ।
वरः क्रूरनिसर्गाणामहीनाममृतं यथा ॥ ३० ॥

नारद उवाच ।

इत्युक्त्वा भगवान् राजन् तत्रैवान्तर्दधे हरिः ।
अदृश्यः सर्वभूतानां पूजितः परमेष्ठिना ॥ ३१ ॥
ततः सम्पूज्य शिरसा ववन्दे परमेष्ठिनम् ।
भवं प्रजापतीन्देवान् प्रह्लादो भगवत्कलाः ॥ ३२ ॥

भाषा टीका ।

प्रेतकार्य (मरण नंतर के कृत्य) करौ, तुमारे सदृश सुन्दर जिसके पुत्र हैं, एसा तुमारा पिता उत्तम लोकों को जावेगा ॥२२॥

ब्रह्मवादि लोगों की उक्ति के अनुगुण अपने पिता की गादी पर बैठ कर मेरे विषैं मन लगाकर मत्परायण होकर कर्म करौ ॥ २३ ॥

नारद उवाच

नारदजी बोले, कि—हे राजन् ! द्विजोत्तमों से अभिषिक्त होकर, प्रह्लाद ने भी भगवदाज्ञा के अनुगुण पिता का अंतिम कृत्य यथावत् किया ॥ २४ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

मम सृष्टिभिर्मयासृष्टैर्भूतैः समस्तान्निगमान्धर्मान्नित्यर्थः अह हतवान् स त्वया हतः एतद्दिष्ट्या भद्रम् ॥ २७ ॥

समितः सम्यक् प्राप्तः ॥ २८ ॥

सर्वतः सन्त्रासात् गोप्तृ रक्षकम् ॥ २९ ॥

एवं वरस्त्वया न प्रदेयः क्रूरो निसर्गः स्वभावो येषाम् अह चीरम् ॥ ३०—३४ ॥

———

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

ततः प्रसादाभिमुखं सुन्दरं मुखं यस्य तं नरहरिं श्रीनृसिं रूपं हरिमाश्रितार्तिहरं भगवन्तं दृष्ट्वा ब्रह्मा चतुर्मुखः हं

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

दिग्भिः परिवृतः पवित्राभिर्वाग्भिः स्तुत्वा वाचां भगवद्गुणविषयकत्वेन लोकपावनकरत्वात्पवित्राभिरित्युक्तं प्राहोवाच ॥२५॥

तदेव चतुर्मुखोक्तमाह–देवेति चतुर्भिः। हे देवदेव, देवानामपि देव! ननु, त्वम्, इन्द्रादिदेवानामपि देवो नाहं तत्राह—हेऽखिलाध्यक्ष! ननु, सोपि त्वमेव तत्राह–हे भूतभावन! भूतानि भावयत्युत्पादयतीति तथा ननु, सोपि त्वमेव तत्राह—हे पूर्वज! ममापि पूर्वं कारणत्वेनावस्थित लोकानां सन्तापनकरोऽत एव पापोऽयमसुरो दिष्ट्या दैवात्ते त्वया निहतः दिष्ट्या हत इति तद्वधस्य दुष्करत्वं सूचितम् ॥ २६ ॥

तदेवाविष्कुर्वन् असुरं विशिनष्टि—योसाविति। योसावसुरः मत्तः लब्धो वरो येन तादृशः मम सृष्टिभिर्मया सृष्टैर्भूतैर्न वध्यः हन्तुमशक्यः तपोयोग एव बलं तेनोत्बद्धः गर्वितः समस्तनिगमान्शास्त्रीयधर्मानहन् विनाशितवान् सतु त्वया विनाशितः एतद्दिष्ट्या जातमिति भावः ॥ २७ ॥

किं तदापि दिष्ट्या जातं किमस्यासुरस्य तनयो महाभागवतोऽर्भकः प्रह्लादः त्वया मृत्योः सकाशात् विमोचित इति सच त्वामतीव क्रोधाविष्टं सम्यगितः प्राप्तो ऽधुनाचेति चैतदाप दिष्ट्या जातमित्यर्थः ॥ २८ ॥

हे भगवन्! तवैतद्वपुः नृसिंहरूपं ध्यायतः प्रयतात्मनः समाहितमनसः पुंसः सर्वतः सन्त्रासात् भयाद्गोप्तृ रक्षकं जिघांसतः हन्तुमिच्छतः मृत्योरपि सकाशाद्गोप्तृ एतश्च प्रह्लादद्दृष्टान्तेनास्माभिरनुमितमिति भावः ॥ २९ ॥

एवमभिहितस्तमाह श्रीभगवान्–नेति। हे पद्मसम्भव! इतः प्रभृत्येवं विधो वरोऽसुराणां ते त्वया न प्रदेयः। क्रूरो निसर्गः स्वभावो येषां तेषाम् अहीनां सर्पाणाममृतं क्षीरं यथा क्षीरप्रदत्वेन तद्वर्द्धनं यथा लोकोपद्रवकारि तद्वदिदं तेषां वरप्रदानमित्यर्थः ॥ ३० ॥

एवं ब्रह्मणमनुज्ञाप्यान्तर्दधे हरिरित्याह—नारदः, इतीति. हे राजन्! इति इत्थमुक्त्वा परमेष्ठिना पूजितः सर्वप्राणिनामदृश्यः हरिरित्युक्त्वान्तर्दधेऽदृश्योऽभूत् ॥ ३१ ॥

ततः प्रह्लादः परमेष्ठिनं ब्रह्माणं भवं रुद्रं प्रजापतीन् मरीच्यादीन् देवान् इन्द्रादींश्च भगवत्कलाः भगवदंशभूतान् सम्पूज्य शिरसा ववन्दे ननाम ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

तत्रागतेषु देवेष्वेकतमेनापि संलापोऽहरेरभूत वा आद्ये केन द्वितीये दैत्येभ्य एषां को विशेषः? किञ्च सेव्यसेवकादिभावेन ब्रह्मविद्याधिकारोऽप्युत्पादितः स्यादित्याशङ्कां परिहरति—प्रजादेति, देवादिभिर्वृत इत्यनेन तैरपि स्वच्छन्दवचनं कृतमिति ज्ञातव्यम् ॥ २५ ॥

दिष्ट्या सुखमभूत् ॥ २६ ॥

मम सकाशात् सृष्टं सर्जनमेषामस्ति ते मम सृष्टिनस्तैर्मयासृष्टैरित्यर्थः ॥ २७ ॥

दिष्ट्या सज्जनसुखहेतुतः मधुना तस्मै दिष्ट्या सुखलक्षणोवरो दत्त इति शेषः ॥ २८ ॥

अनेन वपुषा न केवलं दैत्यहननमेव प्रयोजनं किन्त्वन्यथास्तीत्याह—एतदिति ॥ २९ ॥

एवं स्तुतोभगवान् कमनुग्रहमकार्षीत्तेषामिति तत्राह–श्रीभगवानिति। निसर्गतः क्रूराणाम् अमृतं पयः "देवान्ने सलिले क्षीरे त्वमृतं नाविमुक्तिमे" इति अत्र हिरण्यकशिपुमन्तरेणान्येषां न दातव्य इत्याज्ञा क्रियते नत्वस्य हि। "यथा हिरण्यकस्यादादन्तः स्थितहरीरितः" इत्यादिना स्वप्रेरितत्वावगमादिति ॥ ३० ॥

मङ्गल्यानामपि योग्यप्रत्यक्षत्वे "हरेरुपर्युपरि व्यवहारेण ध्यायन्ति देवमनुष्याः" इति श्रुतेः। देवस्वभावो यः स विहितः स्यादिति मत्वा तद्रक्षणार्थं तद्विग्रहेणादृष्टोऽभूदित्याह–नारद इति। सर्वभूतानामदृश्य इत्यनेन भक्तानुकम्पित्वं प्रदर्शितम् ॥ ३१ ॥

अनन्तरं प्रह्लादेन ब्रह्मादयो देवाः सत्कृता उतात्मनोभगवदनुग्रहपात्रत्वेनाहम्भावेन धिक्कृताः? आद्ये वैष्णवाचारः प्रवर्तितः स्यात् द्वितीये भगवच्चिह्नक्षणं गजस्नानवत्स्यादिति तत्राह, ततइति। भगवतः कलालेशा येषु तथा भगवतो भिन्नांशा वा ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

भूतभावनाः ब्रह्ममरीच्यादयः पूर्वजाः प्रथमजाता यस्मात् ॥ २६ ॥ २७ ॥ २८ ॥

मृत्योः सकाशादपि गोप्तृ ॥ २९ ॥

एवं वरो वरः अतिवृहत्तमो वरः ॥ ३०—३४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

हे पूर्वज, सर्वेभ्यो ऽस्मदादिभ्यः पूर्ववर्तिन्! पूर्वं बहुधा कृतावतार इत्यर्थः ॥ २६ ॥

मम सृष्टिभिः निगमान् त्वदाज्ञारूपान् वेदान् महन् उपेक्षितवान् ॥ २७ ॥

दिष्ट्या अङ्ग त्वां समिः सम्यक् प्राप्तः ॥ २८ ॥

गोप्तृ रक्षकम् ॥ २९ ॥

अहीनाममृतं यथा न देयम् तथा वरः श्रेष्ठः एवं वरो ते त्वया क्रूरनिसर्गाणां दुष्टस्वभावानामसुराणां मा प्रदेयः न देयः ॥ —३०—३४ ॥

ततः काव्यादिभिः सार्द्धं मुनिभिः कमलासनः ।
दैत्यानां दानवानां च प्रह्लादमकरोत्पतिम् ॥ ३३ ॥
प्रतिनन्द्य ततो देवाः प्रयुज्य परमाशिषः ।
स्वधामानि ययू राजन् ! ब्रह्माद्याः प्रतिपूजिताः ॥ ३४ ॥
एवं तौ पार्षदौ विष्णोः पुत्रत्वं प्रापितौ दितेः ।
हृदि स्थितेन हरिणा वैरभावेन तौ हतौ ॥ ३५ ॥
पुनश्च विप्रशापेन राक्षसौ तौ बभूवतुः ।
कुम्भकर्णदशग्रीवौ हतौ तौ रामविक्रमैः ॥ ३६ ॥
शयानौ युधि निर्भिन्नहृदयौ रामसायकैः ।
तच्चित्तौ जहतुर्देहं यथा प्राक्तनजन्मनि ॥ ३७ ॥
ताविहाथ पुनर्जातौ शिशुपालकरूषजौ ।
हरौ वैरानुबन्धेन पश्यतस्ते समीयतुः ॥ ३८ ॥
एनः पूर्वकृतं यत्तद्राजानः कृष्णवैरिणः ।
जहुस्त्वन्ते तदात्मानः कीटः पेशस्कृतो यथा ॥ ३९ ॥
यथा यथा भगवतो भक्त्या परमया ऽभिदा ।
नृपाश्चैद्यादयः सात्म्यं हरेस्तच्चिन्तया ययुः ॥ ४० ॥

भाषा टीका ।

अपने ऊपर प्रसन्न जानकर सुमुख श्रीनृसिंहदेव की पवित्र वाणी से स्तुतिकर, सब देवताओं के सहित ब्रह्माजी बोले ॥ २५ ॥

ब्रह्मोवाच ॥

ब्रह्माजी बोले, कि——हे देव देव ! हे अखिलाऽध्यक्ष ! हे भूतभावन ! हे पूर्वज ! लोकों को संताप देनेवाले पापी का आपने वध किया यह बडा मंगल हुआ ॥ २६ ॥

एकतो इसने मेरेसे यह वरपाया था कि "मेरीसृष्टि से न मरे और दूसरे तप योग और बलसे उन्मद्ध (मत्त) होने से इसने सब वेदों का नाश करदिया ॥ २७ ॥

यह भी बडे मंगल की बात हुई, कि इसका छोटा सा पुत्र परम भागवत साधु एसे प्रह्लादको आपने मृत्युसे छुडाया, और यह उससे भी मंगल हुआ जोकि ? वह इसी समय में आपको प्राप्त होगया ॥ २८ ॥

हे भगवन् ! जोपुरुष आपके इसदिव्य मंगल विग्रह का ध्यान करेगा वह सर्व त्रासों से और मारते हुए मृत्युके त्रास से भी छूट जावेगा ॥ २९ ॥

श्रीनृसिंह उवाच ॥

श्रीनरसिंहजी बोले, कि——हे पद्मसंभव, हे ब्रह्माजी इसप्रकार के क्रूरस्वभाव वाले असुरों को तुम ऐसे वर मतदियाकरो । जैसे कि सर्पों को अमृत ॥ ३० ॥

नारद उवाच ॥

नारदजी बोले, कि——हे राजन्, हे युधिष्ठिर श्री हरिभी ब्रह्माजी से ऐसे कहकर ब्रह्माजी से पूजित होके सर्व प्राणियों के अदृश्य होकर अंतर्धान होगये ॥ ३१ ॥

तबप्रह्लादने ब्रह्मा शिव प्रजापति और सर्व देवों के भगवानकी कला जानकर शिर से वंदना की ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

शिशुपालदन्तवक्त्रयोर्द्विषतोः श्रीकृष्णसायुज्यं कथमिति यत्पृष्टं तदेव तयोः पूर्वजन्मकथनादिभिरुपपादितमुपसंहरति——एवमिति सप्तभिः । दितेः पुत्रत्वं प्रापितौ विप्रशापेनेत्युत्तरस्यानुषङ्गः ॥ ३५ ॥ ३६ ॥

तच्चित्तौ श्रीरामे चित्तं ययोस्तौ ॥ ३७ ॥

करूषजो दन्तवक्त्रः हरौ सायुज्यं समीयतुः ॥ ३८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

कृष्णनिन्दादिना पूर्वकृतं च यदेनः पापं तद्ध्यानेन तदात्मानः सन्तो जहुः। तदात्मत्वे दृष्टान्तः, कीटः पेशस्कृतो ध्यानेन यथा तदात्मा भवतीति ॥ ३९ ॥

अभिदा भेददर्शनशून्यया हरेः सात्म्यं सारूप्यम् ॥४०॥ ४१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

ततः कमलासनो ब्रह्मा काव्यादिभिर्भार्गवादिभिस्सह सहितः प्रह्लादं दैत्यानां दानवानां च पतिमकरोत् ॥ ३३ ॥

हे राजन्! ततो ब्रह्मादयः सर्वे देवाः प्रह्लादं प्रतिनन्द्याहो त्वत्प्रभावोऽनितरसाधारण इत्यभिनन्द्य, परमाः श्रेष्ठाः आशिषः प्रयुज्य प्रह्लादेन प्रतिपूजिताः स्वधामानि स्वकीयस्थानानि ययुः ॥ ३४ ॥

तदेवं शिशुपालदन्तवक्त्रयोर्भगवन्तं द्विषतोः कथं मुक्तिरिति युधिष्ठिरप्रश्नस्य तत्पूर्वजन्मकथनादिमुखेनोक्तमुत्तरमुपसंहरति—एवमिति, सप्तभिः। विष्णोः पार्षदौ स्थितौ विप्रशापेन सनकादीनां शापेन दितेः पुत्रत्वमेवं प्रापितौ वैरभावेन हेतुना स्वहृदि स्थितेन हरिणा नृसिंहरूपं बिभ्रता हतौ ॥ ३५ ॥

पुनः कुम्भकर्णरावणाख्यौ राक्षसौ बभूवतुः तौ च दाशरथेः रामस्य विक्रमैर्हतावभिभूतावित्यर्थः ॥ ३६ ॥

तौ च रामस्य राघवस्य बाणैर्युधि निर्भिन्नं हृदयं ययोस्तौ तच्चित्तौ तस्मिन् श्रीरामे एव चित्तं ययोस्तौ यथा प्राक्तनजन्मनि तद्वद्देहं जहतुः सन्तत्यजतुः ॥ ३७ ॥

तावेवेह शिशुपालकरूषजौ, करूषजो दन्तवक्त्रः शिशुपालदन्तवक्त्ररूपेण जातौ पुनर्हरिणा हतौ वैरानुबन्धेन हेतुना ते तव पश्यतः सतः समीयतुः सायुज्यं प्रापतुः ॥ ३८ ॥

न केवलं शिशुपालकरूषजौ एव समीयतुः अपित्वन्येऽपि राजानः कृष्णवैरिणस्ते सर्वेऽपि यदेनः पापं पूर्वं कृतं तच्च उज्जहुः तत्यजुः तदात्मानः कृष्णात्मानश्चाभवन्. यथा पेशस्कृतश्चिन्त्यमानाद्धेतोः कीटः तदात्मा भवति, तद्वत् तदात्मानस्तत्तुल्यस्वभावा अभवन् इत्यर्थः। आत्मशब्दः स्वभाववाची तस्यैवाऽऽत्मा स्वभावो येषां ते इत्युपमानबहुव्रीहिः अन्यथा दृष्टान्तवैषम्यात्. न हि कीटः पेशस्कृता ऐक्यं याति किन्तु तस्य समानाकारो भवत्यत एव ह्यनन्तरग्रन्थे साम्यं ययुरित्युक्तम् ॥ ३९ ॥

यथा अभिधा अनन्यया भक्त्या भगवतः साम्यं यान्ति तद्भक्तास्तथा चैद्यादयोऽपि नृपास्तस्य भगवतश्चिन्तया संरम्भपूर्वकचिन्तया हरेः साम्यं ययुः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

भगवच्चित्तज्ञेन ब्रह्मणा वेदमन्वग्राहीत्याह—तत इति। अनेन भक्तेन भगवद्भक्तेषु यथायोग्यं प्रेमकर्तव्यमिति शास्त्राचारो दर्शितः ॥ ३३ ॥

प्रह्लादवरदानानन्तरं भगवता स्वाचारत्वेन यददर्शनमकारि तदस्माभिरप्यनुष्ठेयमिति कृत्वा ब्रह्माद्या अपि स्वगृहान्ययुरित्याह, प्रतिनन्द्येति ॥ ३४—३५ ॥

इदानीं विशकलितोक्तमर्थं निक्षिप्योपसंहरति—एवमिति। हृदि स्थितेन वैरभावेन हेतुना हरिणा हतौ ॥ ३६ ॥

प्राक्तनजन्मनि जयविजयशब्दवाच्यौ पूर्वजन्मनि यथा तच्चित्तौ तथा ऽत्रापीति शेषः। हिरण्यकशिपुर्हिरण्याक्षाख्यः पूर्वजन्मनि यथा तथेति वा ॥ ३७ ॥

वैरानुबन्धेन वैरोपसर्जनेनाऽनुबन्धेन स्नेहेन समीयतुर्हरिमिति शेषः। तत्रासुरौ तम इयतुरित्यनुसन्धेयम् सम्यग्भक्त्यैव श्रीहरिप्राप्तिः तदभावेन तम एवेति द्योतनाय समित्युपसर्गः—

"मधुकैटभौ भक्त्यभावाद्दूरौ भगवतो मृतौ।
तम एव क्रमादाप्तौ भक्त्या चैद्यो हरिं ययौ"

इति वचनात् ॥ ३८ ॥

अन्येषामपि सद्भावादेतदुपलक्षणार्थमुक्तमित्यभिप्रेत्याह—एन इति। अत्रापि वैरानुबन्धेनेत्यनुवर्तते. ये राजानः पौण्ड्रकादिशब्दवाच्यास्तेष्वसुरदेहेष्वात्मारूपविशेषो येषां ते तथा तत्रापि तस्मिन्कृष्णे आत्मा चित्तं येषां ते तथा तदनुष्ठितपुण्यफलस्वीकारार्थं तत्राविष्टास्तद्भक्ता इत्यर्थः। ते भक्त्यैव यत्पूर्वकृतं तत्सम्बन्धाप्राप्तमेनः पापं तज्जहुः तद्धित्वा हर्याज्ञाकरणप्राप्तपुण्यप्रचयेन तं हरिमीयुः त एव कृष्णवैरिणो ऽनादिकालमारभ्य भगवद्द्वेषिणः कृष्णाश्च तामसाश्च वैरिणः वैरिरूपिणो राजानो राजसाः तमःप्रकृतयो दैत्याः तदात्मानो द्वेषरूपिणः ते जन्मप्रभृतिचीर्णं यदेनः तेन पापेन वैरानुबन्धेन निरन्तरवैरिचिन्तया पूर्वकृतं ब्रह्मणा पूर्वं क्लृप्तं तमो जहुर्जग्धुरित्यन्वयः। "ओहाङ्गतौ" इति धातुः इति 'सखे कहास्तंन्यस्य समुकुलं सुरं प्रवेके हास्ने, इति प्रयोगश्च। अन्ते भक्त्यादिसाधनसामग्र्यनन्तरं इतरत्र द्वेषपूर्त्यनन्तरमित्यत्र "तस्य तावदेव चिरम्" इति श्रुतेः "अनेवंविन्महत्पुण्यं कर्म करोति तद्धास्यान्ततः क्षीयते" इत्यादेश्च कीटाः पेशस्कृच्चिन्तनया पेशस्कृताकारमाप्नुवन्ति नतु तदात्मत्वम् अत्र प्रमाणम् "पौण्ड्रके नरके चैव शाल्वे कंसे च रुक्मिणि। आविष्टास्ते हरेर्भक्तास्तद्भक्त्या हरिमाविशन्॥ असुरास्तु स्वयं ते तु महातमसि पातिताः" इति वाक्यम् ॥ ३९ ॥

अत्रापि तारतम्यमस्तीत्याह, यथेति। भिदां विशेषम् "भेदो विशेष दलने" इत्यभिधानम् अभिदामसम्प्रज्ञातसमाध्यवस्थां ययुरिति वा. साम्यं निर्दोषत्वादिचतुर्भुजलक्षणम्। अन्यथा कीटाः पेशस्कृतो ध्यानेन केचन पेशस्कृतो भवन्ति नतु स एव पृथग् दृश्यमानत्वादित्ययं दृष्टान्तोऽनर्थः स्यादिति ॥ ४० ॥

आख्यातं सर्वमेतत्ते यन्मां त्वं परिपृष्टवान् ।
दमघोषसुतादीनां हरेः सात्म्यमपि द्विषाम् ॥ ४१ ॥
एषा ब्रह्मण्यदेवस्य कृष्णस्य च महात्मनः ।
अवतारकथा पुण्या वधो यत्रादिदैत्ययोः ॥ ४२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यथेति । यथा यथा भगवतः परया भक्त्या अन्ये सारूप्यं ययुस्तथा चैद्यादयो नृपा अपि परमया तच्चिन्तया तद्ध्यानावेशेन ययुः अभिदा व्यवधानशून्यया निरन्तरयेत्यपि भक्तिचिन्तयोः विशेषणं तत्र चैद्यकारूषकयोः सारूप्याविर्भाव एव तत्प्राप्तिरिति गम्यम् ॥ ४०—४२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

शिशुपालदन्तवक्त्रयोः सायुज्यं कथमिति यत्पृष्टं तत्तयोः पूर्वजन्मकथनादिभिरुपपादितमित्युपसंहरति, एवमिति ॥ ३५ ॥

एनोऽपराधः कृष्णनिन्दादिनेत्यर्थः । पूर्वकृतं यत् पापं तदपि तद्ध्यानेन तदात्मानः सन्तो जहुः । तदात्मत्वे दृष्टान्तः कीटः पेशस्कृतः कीटविशेषस्य ध्यानेन यथा तदात्मा भवतीति ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥

भक्त्या यथा यथा अभिदा अभेदेन ज्ञानिभक्ता हरेः सात्म्यं ययुः तथा चैद्यादयोपि तच्चिन्तया तद्ययुः भक्त्या कीदृश्या तदीयज्ञानवैराग्यादिभ्योऽपि परमया अग्रेप्येवं "निभृत मरुन्मनः" इत्यत्र "तदरयोपि ययुः स्मरणात्" इति वक्ष्यते ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भगवद्द्रोहवासनया तौ जन्मद्वयानन्तरं भगवन्तं साम्यं गताविन्याह—एवमित्यादिना । हरेः पार्षदौ तौ जयविजयौ दितेः पुत्रत्वं प्रापितौ विप्रशापेनेत्युत्तरस्याऽनुषङ्गः ॥ ३५—३७ ॥

तौ राक्षसौ वैरानुबन्धेन शिशुपालकरूपजौ शिशुपालदन्तवक्रौ पुनर्जातौ ते पश्यतः हरौ सायुज्यं च समीयतुः ॥ ३८ ॥

कृष्णवैरिणो राजानः पेशस्कृतः सारूप्यं तद्ध्यानेन कीटो यथा प्राप्नोति तथान्ते तदात्मानः कृष्णसाधर्म्यं गताः सन्तः यत्पूर्वं कृतमेनः पापं तत् जहुः ॥ ३९ ॥

यथा यथा स्वद्रोहानुरोधेन चिंतया हरिस्मरणेन चैद्यादयो हरेः सात्म्यं सुरूप्यं ययुर्यदा तदा नृपा अंबरीषादयः भगवतो भक्त्या तत्रापि परमया तत्रापि अभिदा "आत्मेति तूपगच्छन्ति ग्राहयन्ति च" ४।१।३ इति पारमार्षसूत्रोक्ततदात्मकत्वानुसन्धानयुक्तया हरेः सात्म्यं ययुरिति किमुत वक्तव्यम् ॥ ४० ॥

भाषा टीका ।

तदनंतर ब्रह्माजी ने शुक्रआदि मुनियों को साथ लेकर प्रह्लादजीको दैत्य और दानवोंका पति बनाया ॥ ३३ ॥

हे राजन् ! उस समय ब्रह्मादिक सर्व देवता लोग पूजित होकर प्रह्लादके अभिषेक का अभिनंदन कर उत्तम आशीर्वाद देकर अपने २ घर को पधारे ॥ ३४ ॥

एसे वे दोनों (जय विजय) श्रीविष्णुके पार्षद दिति के पुत्र होकर हृदयमें स्थित हरि के साथ वैरभाव से युद्धकरके हरि ही से मृत्युको प्राप्त हुए ॥ ३५ ॥

फिर वेहीदोनों सनकादिकों के शाप से कुंभकर्ण और रावण नामसे राक्षस हुए, जोकि ? सर्व लोकाभिराम दूर्वादलश्याम श्रीचक्रवर्तिकुमार श्रीराघवेन्द्र के पराक्रम से मारे गये ॥ ३६ ॥

संग्राममें श्रीराम के बाणों से विदीर्ण हृदय पृथ्वीमें सोये हुए, श्रीराम में चित्त लगाकर देहको छोड़ते हुए जैसे पूर्वजन्म में (हिरण्यकशिपुके जन्ममें) छोडा ॥ ३७ ॥

वेही दोनों फिर यहां शिशुपाल और दन्तवक्रहुए श्रीहरि में वैरके संबंधसे आपही को प्राप्तहुए ॥ ३८ ॥

ऐसेही श्रीकृष्ण से वैर करने वाले और राजा लोग ध्यान पूर्वकृत पाप को छोडतेहुए, और जैसे कीट [कीड़ा] भृंगी के भयसे भृङ्गीरूप होजाता है एसे ही, आपके स्वरूप को प्राप्त हुए ॥ ३९ ॥

भगवान से कुछ भेदभाव न रखकर अर्थात् कपट न रखकर परमभक्तिसे जैसे भक्तलोग आपको प्राप्त होते हैं ऐसेही शिशुपालादिक रिपुगणभी हरि की चितासे आपके सात्म्यको (समान विग्रहयोग्य) प्राप्तहुए ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रह्लादचरितार्थमुपसंहरति—एषेति,चतुर्भिः । अवतारः श्रीनृहरूपस्तस्य कथा आख्यातेति शेषः ॥ ४२ ॥

प्रह्लादस्यानुचरितं महाभागवतस्य च ।
भक्तिर्ज्ञानं विरक्तिश्च याथात्म्यं चास्य वै हरेः ॥ ४३ ॥
सर्गस्थित्यप्ययेशस्य गुणकर्माऽनुवर्णनम् ।
परावरेषां स्थानानां कालेन व्यत्ययो महान् ॥ ४४ ॥
धर्मो भागवतानां च भगवान् येन गम्यते ।
आख्याने ऽस्मिन्समाम्नातमाध्यात्मिकमशेषतः ॥ ४५ ॥
य एतत्पुण्यमाख्यानं विष्णोर्वीर्योपबृंहितम् ।
कीर्त्तयेच्छ्रद्धया श्रुत्वा कर्मपाशाद्विमुच्यते ॥ ४६ ॥
एतद्य आदिपुरुषस्य मृगेन्द्रलीलां दैत्येन्द्रयूथपवधं प्रयतः पठेत ।
दैत्यात्मजस्य च सतां प्रवरस्य पुण्यं श्रुत्वा ऽनुभावमकुतोभयमेति लोकम् ॥ ४७ ॥
यूयं नृलोके बत भूरिभागा लोकं पुनाना मुनयो ऽभियन्ति ।
येषां गृहानावसतीति साक्षाद्गूढं परं ब्रह्म मनुष्यलिङ्गम् ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रह्लादस्यानुचरितमित्यादेः समाम्नातमिति तृतीयेनान्वयः अस्येत्यनेनोक्तं सर्गस्थित्यप्ययानामीशस्य हरेर्याथात्म्यं तत्त्वम् अनेन कृतं हरेर्गुणकर्मानुवर्णनं चेत्यर्थः ॥ ४३ ॥

परावरेषां देवदैत्यादीनां यानि स्थानानि तेषां व्यत्ययो विपर्यासः ॥ ४४ ॥

आध्यात्मिकमात्मानात्मविवेकादि ॥ ४५ ॥

एतच्छ्रवणादिफलमाह–य इति, द्वाभ्याम्।एतच्छ्रुत्वा यः कीर्तयेत् ॥ ४६ ॥

एतदेतां मृगेन्द्रस्य लीलां, तामेवाह—दैत्येन्द्रस्य यूथपानां च वधं यः शुचिस्सन्पठेत पुण्यमनुभावं प्रभावं मतिनिश्चयं वा लोकं वैकुण्ठम् ॥ ४७ ॥

अहो प्रह्लादस्य भाग्यं येन देवो दृष्टो वयं तु मन्दभाग्या इति विषीदन्तं प्रत्याह–यूयमिति, त्रिभिः । येषां युष्माकं गृहान्मुनयः अभियन्ति सर्वतः समायान्ति तत्कस्य हेतोः येषु गृहेषु नराकारं गूढं सच्चीकृष्णाख्यं परं ब्रह्म साक्षाद्वसतीति ॥ ४८ ॥

———

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

हे नृप त्वं मां यत्पृष्टवान् किं तद्द्विषतामपि दमघोषसुतादीनां शिशुपालादीनां हरेः साम्यमित्येतत्सर्वं ते तुभ्यमाख्यातं कथितं मयेति शेषः ॥ ४१ ॥

तदेवं प्रश्नस्योत्तरमुपसंहृत्य तदेतदाख्यानं विशिंषन् तत्कीर्तनश्रवणादिफलमाह–एषेति, षड्भिः । ब्रह्मणि ब्रह्मकुले साधुब्रह्मण्यः स चासौ देवस्तस्य लोकत्रयमन्तःप्रविश्य विभ्रतः कृष्णस्येयमवतारकथा पुण्या पुण्यावहा यत्र कथायामादिदैत्ययोर्हिरण्याक्षहिरण्यकशिप्वोर्वधः प्रतिपाद्यते ॥ ४२ ॥

तथा यत्र महाभागवतस्य प्रह्लादस्य चरित्रं भक्तिर्ज्ञानं विरक्तिश्च. भक्तिशब्देन भक्तियोगानुष्ठानप्रकारो विवक्षितः विरक्तिशब्देन तदुत्पत्तिप्रकारः ज्ञानशब्देनात्मयाथात्म्यविवेचनपूर्वकतदनुसन्धानप्रकारः । एतत्सर्वं यत्र कथायां प्रतिपाद्यत– इत्यर्थः ॥ ४३ ॥

तथा जगत्सर्गस्थितिलयकारणस्य हरेर्याथात्म्यं तत्त्ववर्णनं तस्य गुणानां कर्मणां च वर्णनम् परावरेषां देवासुरादीनां यानि स्थानानि तेषां कालेन निमित्तेन महान् व्यत्ययो विपर्यासश्च ॥ ४४ ॥

भगवान् येन गम्यते लभ्यते स भागवतानां धर्मश्च यश्चाध्यात्मिकमात्मानमधिकृत्य वर्त्तमानः वस्तु चेति तदेतत्सर्वमस्मिन्नाख्याने सम्यगाख्यातम् ॥ ४५ ॥

यः पुमानेतद्विष्णोर्वीर्येण पराक्रमादिगुणजातेनोपबृंहितां तत्प्रतिपादनेन विस्तीर्णमत एव पुण्यमाख्यानं श्रद्धया श्रुत्वा कीर्तयत् स पुमान् कर्मपाशैः पुण्यपापात्मकैः कर्मभिरेव पाशैर्विमुच्यते ॥ ४६ ॥

किञ्च यः पुमानादिपुरुषस्य मृगेन्द्रस्य सिंहस्येव या लीला दैत्येन्द्रयूथपवधात्मिका प्रतिपाद्या यस्मिन् तदेतदाख्यानं प्रयतः समाहितचित्तः सतां प्रवरस्य दैत्यात्मजस्य प्रह्लादस्य पुण्यं प्रभावं च श्रुत्वा पठेतपठेत् सोऽकुतोभयं कुतश्चिद्भयरहितं लोकं वैकुण्ठाख्यमेति प्राप्नोति. पूर्वं कर्मपाशैर्विमुच्यत इत्युक्तमत्राकुतोभयं लोकमेतीत्युक्तं कर्मपाशविमोचनद्वाराऽकुतोभयं लोकमेतीत्यर्थः । अतोऽत्र न पौनरुक्त्यम् ॥ ४७ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

अहो प्रह्लादस्य भाग्यं येन भगवान् दृष्टः वयं तु मन्दभाग्या इति विषीदन्तं युधिष्ठिरमाह—यूयमिति त्रिभिः । नृलोके यूयमहो वतभूरिभागाः अहो वहुभाग्यवन्तः तदेव व्यञ्जयन् तान्विशिनष्टि, येषां युष्माकं गृहान् लोकं पुनानाः मुनयोऽभियान्ति सर्वतः समायान्ति. तत्कुतः मनुष्यलिङ्गं मनुष्यस्येव लिङ्गं शरीरं यस्य तत् परं ब्रह्म श्रीकृष्णरूपं गूढं प्रच्छन्नं सर्वेषां युष्माकं गृहानावसति इति हेतोः समायान्ति ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ग्रन्थाधिकभयादुपसंहरति, आख्यातमिति । अतश्चैद्यादयो दमघोषसुतादीनामित्यादि वहुवारोक्तिर्भक्तेरनादिकालसम्वन्धित्वद्योतनार्थां अन्यथा वेनादीनामित्याद्युक्तिरपि स्यात् ॥ ४१ ॥

श्रद्धाजननाय स्तौति—एषेति । ब्रह्मण्यदेवस्य रामस्य चशब्दान्नरसिंहस्य यत्र कथायाम् ॥ ४२ ॥

भक्त्यादिकमेव मुक्तिसाधनं न द्वेषादिकमित्येतदत्र प्रतिपाद्यते इत्युपसंहरति—प्रह्लादस्येति । भक्त्यादिलक्षणो धर्मश्चात्र कथित इत्यन्वयः ॥ ४३ ॥

येन भक्त्यादिलक्षणधर्मेण हरिमितरेभ्योव्यावर्त्तयति, सर्गेति । अव्यत्ययो यथास्थितत्वम् ॥ ४४ ॥

आत्मानमधिकृत्य वर्तमानमिन्द्रियादिस्वरूपं च कथितमस्मिन्नाख्यान इत्याहुः, तदुपाख्यान इति । अत्रैव वै पार्षदौ विष्णोरित्यावृतानुकथनं च भक्त्यादिकं मुक्तिसाधनं न द्वेषादिकमिति ज्ञापनाय येन भागवतधर्मेणैव भगवान् गम्यते न द्वेषादिनेति शेषः,

"भक्तिर्ज्ञानं विरक्तिश्च नवकं श्रवणादिकम् ।
धर्मो भागवतः प्रोक्तस्तद्भक्तेषु तथा नव" ॥

इति वचनात् भागवतधर्मेणैव श्रीहरिर्गम्यत इति कथमुच्यते ? भक्त्यादिना विनेतीयमाशंका परिहृता भक्त्यादेर्धर्मशब्दवाच्यत्वात् श्रवणं कीर्तनं विष्णोरित्यादिश्रवणादि नवकम् ॥ ४५ ॥

अधुनाऽऽख्यानकीर्तनादिना यत्पुण्यं तदाह य इति ॥ ४६ ॥

सामान्यत उक्तं विवृणोति एतदिति ॥ ४७ ॥

ननु, प्रह्लादानुभवस्यात्युत्तमत्ववर्णनेन युधिष्ठिरादीनां ततोऽधमत्वं प्रतीयत इति मन्दाशङ्कां परिहरति—यूयमिति । मुनयश्चतानिति यथानीत्य वर्तयन्ति वत विस्मये "खेदानुकम्पासन्तोपविस्मयामन्त्रणे वत:" इति ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

प्रह्लादस्येति त्रिकम् अस्य श्रीकृष्णाख्यस्य हरेर्याथात्म्यं तत्तद्यथावन्माहात्म्यं सर्वावतारित्वात्. टीकायामस्येति पाठमुत्थाप्य व्याचष्टे, अनेन प्रह्लादेनोक्तमित्यादिकं गम्यम् ॥ ४३—४७ ॥

अहो प्रह्लादस्य भाग्यम् इति सविस्मयं तं राजानं प्रत्याह- यूयमिति,त्रिभिः । मनुष्यलिङ्गमिति तदाकारे तदाविर्भावस्यापि न तादृशत्वमिति व्यञ्जितम् ॥ ४८ ॥ ४९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अनुचरितम् आख्यातमिति पूर्वेण समाम्नातमिति पदे- वान्वयः । हरेर्याथात्म्यं हरेः स्वरूपम् अनतिक्रम्य स्वार्थे यत्र सर्ग- सृष्ट्यादयोऽपि उक्ताः परावरेषां देवदैत्यादीनां यानि स्थाना- तेषां व्यत्ययो विनाशः ॥ ४१–४६ ॥

एतत् एतां मृगेन्द्रस्य सिंहस्य लीलाम् "ऋद्धस्य राजमातङ्ग- इति वत्समास आर्षः । लीलामाह–दैत्येन्द्रएव यूथपो हस्ती त- दैत्येन्द्राणां यूथपस्य हिरण्यकशिपोश्च वधम् ॥ ४७ ॥

अहो !! प्रह्लादस्य भाग्यं येन देवो दृष्टः वयं तु मन्दभा- इति विषीदन्तं राजानंप्रति यूयं प्रह्लादात् प्रह्लादगुणे- त्तोपि अन्येभ्योऽपि भक्तेभ्यो युष्मत्पूर्वजेभ्यो यदुपुरुवंश्- तिभ्योपि वसिष्ठमरीचिकश्यपादिऋषिभ्योऽपि ब्रह्मरुद्राभ्याम् भूरिसौभाग्यवन्त इत्याह, यूयं नृणां जीवानां लोकमध्ये भू- भागाः येषां युष्माकं गृहान् लोकं स्वदर्शनदानादिना पवि- कुर्वन्तोपि मुनयो अभि सर्वतोभावेन स्वीकृतार्थीकरणा- हेतुनाऽपि गच्छन्ति, यतो गूढं सवताऽपि रहस्यं यन्मनुष्या- नराकृतिपरं ब्रह्म तत्सम्यक् प्रकारेण युष्माभिरनाहूतमप्यासि- पूर्वकं येषां गृहेषु साक्षाद्वसति, सदैव. न हि प्रह्लादादीनां गृ- नराकृतिपरं ब्रह्म साक्षाद्वसति न च तद्दर्शनेन कृतार्थीभ- मुनयो गच्छन्तीति भावः ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः :

उपसंहरति–आख्यातमित्यादिना । दमघोषसुतः शिशुपा- दादीनाम् ॥ ४१ ॥

कृष्णस्य अवतारः श्रीनृसिंहस्तस्य कथा आख्या- लिङ्गव्यत्ययतः पूर्वेणान्वयः ॥ ४२ ॥

प्रह्लादस्यानुचरितमित्यादेः अस्मिन्नाख्याने । समाम्नातं- तृतीयेनान्वयः । अस्य हरेर्याथात्म्यं तत्त्वम् ॥ ४३ ॥

सर्गादीनामीशस्य हरेः प्रह्लादकृतं गुणकर्मानुवर्णनं च वरेषां अहरादिमनुष्यान्तानां यानि स्थानानि तेषां व्य- विपर्यासः ॥ ४४ ॥

आध्यात्मिकमात्मानमधिकृत्य वर्त्तमानं जीवात्मानो ब्रह्म- कत्वं चैतत्सर्वं समाम्नातम् ॥ ४५ ॥

आख्यानकीर्त्तनादिफलमाह—य इति, द्वाभ्याम् ॥ ४६ ॥
अकुतोभयमप्राकृतं लोकम् ॥ ४७ ॥

स वा अयं ब्रह्म महद्विमृग्यं कैवल्यनिर्वाणसुखानुभूतिः ।
प्रियः सुहृद्वः खलु मातुलेय आत्मा ऽर्हणीयो विधिकृद्गुरुश्च ॥ ४९ ॥
न यस्य साक्षाद्भवपद्मजादिभी रूपं धिया वस्तुतयोपवर्णितम् ।
मौनेन भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतां पतिः ॥ ५० ॥
स एष भगवान्राजन्! व्यतनोद्विहतं यशः ।
पुरा रुद्रस्य देवस्य मयेनाऽनन्तमायिना ॥ ५१ ॥

राजोवाच ।

कस्मिन्कर्मणि देवस्य मयोऽहन् जगदीशितुः ।
यथाचोपचिता कीर्तिः कृष्णेनाऽनेन कथ्यताम् ॥ ५२ ॥

नारद उवाच ।

निर्जिता असुरा देवैर्युध्यनेनोपबृंहितैः ।
मायिनां परमाचार्यं मयं शरणमाययुः ॥ ५३ ॥
स निर्माय पुरस्तिस्रो हैमीरौप्यायसीर्विभुः ।
दुर्लक्ष्यापायसंयोगा दुर्वितर्क्यपरिच्छदाः ॥ ५४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

यूयमपि धन्या इति प्रसङ्गाद्राजनमभिनन्दति यताहो नृलोके यूयं भूरिभागाः येषां युष्माकं गृहान् लोकं पुनाना ये मुनयस्ते ऽभियन्ति सर्वतः समायान्ति. तेषां समागमने हेतुमाह; येषु गृहेषु गूढं अतिगोप्यं ब्रह्म श्रीकृष्णाख्यं साक्षात् वसति कथंभूतं मनुष्यलिङ्गं मनुष्यार्थं मनुष्योपलक्षितभक्तहितार्थं लिङ्गानि चक्रादीनि चिह्नानि वंशीवेत्रनियोगपाशादीनि च यस्य तत् ॥ ४८ ॥

नारद उवाच।

राजन्! जो आपने शिशुपालादि द्वेषियों कोभी भगवत्प्राप्ति का आख्यान हमसे पूंछा सो हमने सब कहा ॥ ४१ ॥

यहसाक्षात् ब्रह्मण्यदेव महात्मा श्रीकृष्णकी नृसिंह अवतार की कथा है, कि जिसमें दोनो आदिदैत्यों का वध है ॥ ४२ ॥

और महाभागवत श्रीप्रह्लादका चरित है जिसमें भक्ति ज्ञान वैराग्य और प्रह्लाद को हरि के याथात्म्य की प्राप्ति का वर्णन है ॥ ४३ ॥

सृष्टि पालन और संहार करने वाले ईश्वर के गुणकर्मों का वर्णन है, और देवदैत्यों के स्थानों के कालकृत व्यत्यास का वर्णन है ॥ ४४ ॥

और जिनसे भगवान् प्राप्त होते हैं ऐसे भागवतों के धर्मों का वर्णन है, और इस आख्यान में संपूर्ण आध्यात्मिक शास्त्र का वर्णन है ॥ ४५ ॥

श्रीविष्णुके पराक्रमोंसे पूरित इस पुण्य आख्यान को जो श्रवणकर श्रद्धासे कीर्तन करे वह कर्मकी पाश (फाँसी) से छूटता है ॥ ४६ ॥

जो पुरुष आदिपुरुष श्रीनृसिंहदेवकी दैत्येन्द्र यूथपवधरूप मृगेन्द्रलीला को, और सत्पुरुषों में श्रेष्ठ ऐसे दैत्यात्मज श्री प्रह्लाद के प्रभाव को श्रवण कर प्रयत्न से पढते हैं वे सबसे निर्भय श्री वैकुंठलोक को प्राप्त होते हैं ॥ ४७ ॥

हे राजन्! युधिष्ठिर! इस मनुष्यलोक में तुम तो बडे बडभागी हो, क्योंकि ? लोकों को पवित्र करने वाले मुनिजन चारों तरफ से जिन तुमारे यहां आते हैं, और उसका भी यह हेतु है, कि तुमारे यहां मनुष्य के चिन्हों से छिपा हुआ वह गुप्त और स्वरूपसे सबसे बडा साक्षात् परब्रह्म निवास करता है ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

ननु, कृष्णोऽस्माकं मातुलेयः कथं ब्रह्मेत्युच्यते तत्राह, सवा इति, सो ऽयं ब्रह्मैव कथम्भूतः महद्भिर्विमृग्यं यत्कैवल्यनिर्वाणसुखं निरुपाधिः परमानन्दस्तदनुभूतिरूपो वो युष्माकं खलु प्रियः सुहृदित्यादिरूपो भवति विधिकृत् आज्ञानुवर्ती ॥ ४९ ॥

ननु, परं ब्रह्म चेत्कथं द्व्यष्टसहस्रस्त्रीषु रतिः कथं वा धर्माद्याचरणं तस्येत्यत आह-नेति। यस्य रूपं तत्वं भवादिभिरपि धिया

ताभिस्तेऽसुरसेनान्यो लोकांस्त्रीन्सेश्वरान्नृप ! ।
स्मरन्तो नाशयाञ्चक्रुः पूर्ववैरमलक्षिताः ॥ ५५ ॥
ततस्ते सेश्वरा लोका उपासाद्येश्वरं विभो ! ।
त्राहि नस्तावकान्देव ! विनष्टांस्त्रिपुरालयैः ॥ ५६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्वबुद्ध्या वस्तुतयेदमित्थमिति साक्षान्नोपवर्णितं स युष्माकं स्वयमेव प्रसन्नः अस्माकं तु मौनादिसाधनैस्तत्प्रसादः प्रार्थनीय एवेत्याह–मौनेनेति । स एष सात्वताम्पतिर्नः प्रसीदतु नहि प्रह्लादस्य गृहेषु परं ब्रह्म वसति नच तद्दर्शनाय मुनयस्तद्गृहानाभियन्ति नच तस्य ब्रह्म मातुलेयादिरूपेण वर्तते नच स्वयमेव प्रसन्नमतो यूयमेव ततोऽप्यस्मत्तो ऽपि भूरिभागा इति भावः ॥ ५० ॥

नन्वन्यैर्दुष्करं त्रिपुरभेदादिकं श्रीरुद्रः कृतवान् स एवम्भूतः ईश्वरोऽप्यस्य तत्त्वं न जानातीति कथमित्यपेक्षायां तस्याप्येतत्साहाय्यादेवासौ प्रभावो न केवलस्येति वक्तुमाख्यानमुपक्षिपति—स एष इति ॥ ५१ ॥

राजा युधिष्ठिर उवाच ।

जगदीशितुर्देवस्य कीर्तिं कस्मिन्कर्मणि मयो हतवान् ॥ ५२ ॥

अनेन श्रीकृष्णेनोपबृंहितैः सम्वर्द्धितैः ॥ ५३ ॥

हैमी च रौप्या चायसी चेति तिस्रः पुरो निर्माय तेभ्यो ददाविति शेषः । दुर्लक्ष्यावपायसंयोगौ गमनागमने यासां दुर्वितर्क्याः परिच्छदा यासु ॥ ५४ ॥

सेनान्यः सेनापतयः पूर्ववैरं स्मरन्तः ॥ ५५ ॥ ५६ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

ननु, श्रीकृष्णोऽस्माकं मातुलेयः कथं परं ब्रह्मेत्युच्यते? तत्राह, स वा इति । सवै सोयं श्रीकृष्णो ब्रह्मैव; किंतद्ब्रह्म ? यदभिन्नः श्रीकृष्णो वो युष्माकं न केवलं मातुलेयोऽपितु प्रियः सुहृच्च आत्मा अन्तरात्मा अर्हणीयः पूज्यः विधिकृन्नियोगकारी गुरुर्हितोपदेष्टा च एवमनेकधा युष्माकं तत्सम्बन्धिनां भाग्यं कियदिति वक्तव्यमिति भावः । महद्भिर्मृग्यमित्यनेन महतामपि तत्स्वरूपं यथा वद्दुरवगममित्युक्तम् प्रियः सुहृद्द इत्यनेन तन्महद्भिर्मृग्यं ब्रह्म स्वयमेव युष्माकं प्रसन्नमिति च ॥ ४९ ॥

तन्महद्भिर्मृग्यत्वमेव प्रपञ्चयन् तत्प्रसादं प्रार्थयते—नेति । यस्य भगवतो रूपं भवपद्मजादिभिः रुद्रब्रह्मादिभिः धिया स्वमनीषया वस्तुतया याथात्म्येन नोपवर्णितम् उपवर्णितं विपर्यीकृतं न भवति वाङ्मनसागोचरस्वरूपस्वभावत्वाच्चैरेतावदित्युपवर्णितुमशक्यमित्यर्थः । किन्तु केवलं मौनेन शुभाश्रयसंशीलनरूपेण भक्त्योपासनात्मिकया प्रीतिरूपया उपशमेनेन्द्रियजयादिना च पूजितः आराधितः स सात्वतां योगेश्वराणां पतिर्भगवान् मे मह्यं प्रसीदताम् प्रसन्नो भवतु ॥ ५० ॥

एवं संप्रार्थ्य श्रीकृष्णस्य मनुष्यलिङ्गस्य परब्रह्मत्वसूचक इतिहासं प्रस्तोष्यन् तत्प्रश्नावसरप्रदानाय श्रीकृष्णं विदि नष्टि–स इति । हे राजन् ! स एष भगवान् ज्ञानशक्तिबलैश्वर्यादि षाड्गुण्ययुक्तः श्रीकृष्णः पुरा अनन्तमायिना ऽनन्ता माया यस्य तेन मयेन निमित्तभूतेन रुद्रस्य देवस्य यशः हतं यशः तद्व्यतनोत् तेनानेन रुद्रादीनामपि यश आदिगुण बृहत्वाधायकत्वकथनेन स्वयमबृहत् इतरेषां तदाधायकत्व योगात् सामर्थ्यातिशयस्यापि तन्नाम्नेन च परब्रह्मत्वं सूचितम् ॥ ५१ ॥

तदेवं लब्धप्रश्नावसरो युधिष्ठिरः बृहद्यश उपचयप्रकारं बुभुत्सुः पृच्छति–कस्मिन्निति । जगदीशितुः भगवदायत्तजगदीशितृत्वस्य "विलोक्य भग्नसङ्कल्पं विमनस्कं वृषध्वजम्" इत्यादिना भगवदायत्तसामर्थ्यस्य वक्ष्यमाणत्वाद्देवस्य रुद्रस्य कीर्तिः कस्मिन् कर्मणि ययनेन श्रीकृष्णेन कर्त्रा मयेन निमित्तेनोपचिता वर्द्धिता तत् कथ्यताम् ॥ ५२ ॥

इति पृष्ट आह देवर्षिः–निर्जिता इत्यादिना । अनेन रुद्रेणोपबृंहितैराहितबलैर्देवैर्निर्जिता असुराः मायिनां परमाचार्यं मयाचार्यं मयं शरणं जग्मुः ॥ ५३ ॥

ततः स विभुः समर्थो मयः हेम्नो विकृतिर्हैमीरूपा रजतस्य रौप्या आयसो लोहस्यायसी त्रयाणामितरेतरयोगाद् तास्तिस्रः पुरो निर्मायासुरेभ्यो ददाविति शेषः । पुरो विशिनष्टि दुर्लक्ष्यः दर्शनाविषयः अपायः संयोगश्च यासां ता इमाः पुरः अत्रागताः इतो गताश्चेति जनैरलक्षिता इत्यर्थः । तथा दुर्वितर्क्याः सार्वजनीनसाधारण्येन तर्कितुमशक्याः परिच्छदा उपकरणानि यासां ताः ॥ ५४ ॥

ताभिर्विमानरूपाभिरपेक्षितदेशगमनक्षमाभिः पुरीभिस्ते सेनान्यः दैत्यसेनानायकाः हे नृप ! अलक्षिताः देवैरदृश्यमानाः पूर्ववैरं स्मरन्तः सेश्वरान् सपालान् त्रीन् लोकान् नाशयाञ्चक्रुः नाशयितुमारब्धवन्त इत्यर्थः ॥ ५५ ॥

ततस्ते सेश्वरा इन्द्रादिलोकपालैः सहिता लोका ईश्वरं रुद्रमुपासाद्य प्राप्य आनताः सन्त ऊचुः, तदेवाह हे विभो ! त्रीणि पुराणि आलयाः स्थानानि येषां तैर्विनाशितान् तावकान् त्वदीयान् अस्मान् हे देव, रुद्र ! त्राहि पालयेति ॥ ५६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु, परब्रह्मणि मुक्तिगा इत्यतः परब्रह्मशब्देन विष्णु

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

निश्चयः कथमिति ? तत्राह–स वा इति । कैवल्येनाऽनासक्तत्वेन यन्निर्वाणसुखमशरीरसुखम् तस्यानुभूतिरनुभवो यस्य स तथा अनन्ययोग्यस्वरूपानन्दमनुभवतीत्यर्थः । अनेन विष्णुत्वं निरणायि विधिकृदाज्ञाकारी गुरुर्हितोपदेष्टा ॥ ४९ ॥

ननु, दुर्ज्ञेयरूपत्वं हि विष्णुलिङ्गं "नहि सुज्ञेयमणुह्येष आत्मा सः" इति श्रुतेः । स्वरूपानन्दानुभवित्वं सायुज्यभाजोऽप्यस्त्यतः कथं निर्णयः ? इति तत्राह–न यस्येति॥ ५० ॥ *

अस्मिन्नध्याये हरौ भक्तिविधानार्थं रुद्रमाहात्म्यकथनव्याजेन तन्माहात्म्यं प्रतिपाद्यते. अधुना "तत्रैको रुद्रो न द्वितीयो वतस्थे" इत्यादि श्रुतेः प्रतीयमानरुद्रस्याद्वितीयार्थत्वं प्रतिपाद्यमानैर्जनैर्महाद्रव्यव्ययेन पूज्यमानस्य "ईशानः सर्वविद्यानामीश्वरः सर्वभूतानाम्"इत्यादि मन्त्रैः स्तूयमानस्य सतः रुद्रस्यासुरावेशात्संशयो बभूव. इदं सर्वं भगवदधीनं नवेति तत्र दयालुर्भक्तवत्सलः श्रीनारायणो रुद्रस्य तं संशयमपाचक्रे कथं केनेति तत्राह–स एष इति। स भगवान्नृसिंहात्मना ब्रह्मदत्तवरेण हसहिरण्यकशिपुपुरस्सरासुरजातिं निर्मूलयित्वा प्रह्लादादिभक्तसमुदायस्याऽनुग्रहीता स एष युष्मद्बन्धुभूतः श्रीकृष्णः पुरा कल्पविशेषे देवस्य हरेः स्तुतिध्यानादिकं कुर्वाणस्य रुद्रस्य रोदनाद्यवगततल्लक्षणस्यात एव तन्नाम्नः शिवस्यानन्तमायिनाऽनेकशतसहस्रमायावताऽत एवार्थादल्पेन मयेन वक्ष्यमाणप्रतीकारं कृत्वा तस्य रुद्रस्य भगवद्भक्तप्रधान इत्यादि यशो विततं त्रिपुरनाशनेन व्याप्तमकरोदात्मनोऽनिशयस्वामित्वेन तदनुग्राहकत्वेन च विमलमकृतेत्यन्वयः ॥ ५१ ॥

"नापृष्टः कस्यचिद्ब्रूयात्" इति वचनात्प्रसक्तं प्रमेयं विस्तृत्य श्रोतुं राजा पृच्छति–कस्मिन्कर्मणीति । कस्मिन्कर्मणि यशोविपरीतं चकार येनेशितुर्देवस्य यशोऽभूत् सा च कीर्त्तिः कृष्णेन यथायथमुपचिता प्रचिता स कथाविशेषो मम कथ्यतामित्यन्वयः॥ ५२॥

नारदः प्रश्नं परिहरति–निर्जिता इति ।अनेन हरिणोपबृंहितैः अन्यसहायेनासुरा जिता इत्येतद्देवानां न दोषाय विष्णवपेक्षणस्य स्वतस्सिद्धत्वाद्देवानां सापेक्षं न तु दोषाय "यत्र सिद्धमपेक्षिनम्" इति वचनात् ॥ ५३ ॥

मयेन त्रिपुरनिर्माणकर्मविपरीतं कृतमित्याह–स निर्मम इति । स निम्नः दुर्लक्ष्यो दुर्ज्ञेयोऽपायसंयोगो नाशसम्बन्धोऽतःप्रवेशसम्बन्धो वा यासां तास्तथाऽत एवाहश्य बहुतरायुधादिपरिकराः ॥ ५४ ॥

असुरसेनान्यः असुरसेनानायकाः ॥ ५५ ॥

सेश्वराः सहरयः अत्रापि विष्णुसहितदेवानां रुद्रापेक्षितत्वं न दोषाय त्रिपुरहननं रुद्रेण कार्यमिति हरिणाक्लृप्तत्वात् इन्द्रादिभिर्वा ॥ ५६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ननु, कैश्चिदस्यैतद्रूपमन्यवस्तुत्वेन मन्यते तत्राह—न यस्येति, यस्य साक्षात् प्रत्यक्षमपि रूपं परमविद्वद्भिर्भवपद्मजादिभिस्तु अवस्तुतया अपरमार्थतया नोपवर्णितं किन्तु परमार्थतया निर्णीतमित्यर्थः।"त्वं ब्रह्म परमं साक्षादिति,यन्मित्रं परमानन्दमित्यादिना, मल्लानामशनिर्नृणां नरवर इत्यादौ, विराड्विदुषां तत्त्वं परं योगिनाम् इत्यनेन च ॥ ५० ॥ ५१ ॥

अनेनेति । सर्वत्र श्रीकृष्णमेव स्वालम्बनत्वेनावतारित्वेन च दर्शयति, एवमुत्तरत्रापि ॥ ५२—७० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

न च परं ब्रह्मैव नराकृतिः कृष्णोऽभूदिति वाच्यं किन्तु कृष्ण एव परं ब्रह्म भवतीत्याह—सोयं प्रसिद्धो नराकृतिः कृष्ण एव ब्रह्म कीदृशं महद्भिर्विमृग्यं यत् कैवल्यनिर्वाणसुखं निरुपाधिः परमानन्दः तस्यानुभूतिरनुभवरूपमित्यर्थः । कृष्णस्तु भगवान् स्वयमिति वदनुवादिविधेयभावेन व्याख्येयमत्र प्रमाणम् "ब्रह्मणो हि प्रतिष्ठाहम्" इति गीतोपनिषदेव एतावदर्थस्य निश्चायिकेतिवै शब्दार्थः । न केवलं स युष्मद्गृहे वसति मात्रं किन्तु प्रियः सन्निति युष्माकं तेनानन्दनीयत्वं सुहृदिति हिते प्रवर्तनीयत्वं मातुलेय इति सम्बन्धविशेषणानुगम्यत्वम् आत्मेति स्वीयशरीरभावेनाभिमन्तव्यत्वम् अर्हणीय इति कृपया प्रतिपाल्यत्वं विधिकृत् किङ्कर इति सारथ्यादिनोपास्यत्वं गुरुरित्यनुशासनीयत्वमिति. न च प्रह्लादादीनां गृहेषु सगुरुकिङ्करादिभावेन तिष्ठतीति भावः ॥ ४९ ॥

नन्वेवं साक्षात्परब्रह्मप्रतिष्ठाभूतस्यास्य ग्राम्यानामस्मादृशानां कैङ्कर्यादौ किङ्करणमिति चेत् सत्यम्, अस्यमैश्वर्यस्य प्रेमवश्यतायाश्च तत्त्वं विज्ञातुं कोऽहं वराको यतो ब्रह्माद्या अपि न जानन्तीत्याह—न यस्येति । रूपं तत्त्वं वस्तुतया याथात्म्येन इदमित्थमिति साक्षान्नोपवर्णितं धियेति तत्र बुद्धेः प्रवेशाभावादेवेति भावः । मौनेनेत्यस्मदादयो यत् प्रसादं मौनादिभिः साधनैः प्रार्थयते स कृष्णो युष्मत्प्रसादं कैङ्कर्यादिना प्रार्थयत इति युष्मदस्मदादोरेतदेवान्तरमिति भावः ॥ ५० ॥

ननु, पद्मजो न जानातु भवस्त्वीश्वर एव सत्यं तस्याप्यैश्वर्यमेतद्दत्तमेवेति वक्तुमाख्यानमारभ्यते स एष इति ॥ ५१

राजा युधिष्ठिरः अहन् कीर्तिम् ॥ ५२ ॥

अनेन कृष्णेन ॥ ५३

दुर्लक्ष्यौ अपायसंयोगौ गमनागमने यासां ताः निर्माणासुरेभ्यो ददावितिशेषः ॥ ५४—५५ ॥

ईश्वरं रुद्रम् ॥ ५६-५७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भक्तहितकारित्वं भगवतो वर्णयति–स इति। सोऽयंवो युष्माकं भक्तानां सुहृत् अनुकूलः विधिकृत् दूत्यसारथ्यादिकर्त्ता गुरु-

---

* विजयध्वजटीकायामत्रैवदशमोऽध्यायः समाप्तः । इत एकादश आरब्धः ॥

अथानुगृह्य भगवान्माभैष्टेति सुरान्विभुः ।
शरं धनुषि सन्धाय पुरेष्वस्त्रं व्यमुञ्चत ॥ ५७ ॥
ततो ऽग्निवर्णा इषव उत्पेतुः सूर्यमण्डलात् ।
यथामयूखसन्दोहा नाऽदृश्यन्त पुरो यतः ॥ ५८ ॥
तैः स्पृष्टा व्यसवः सर्वे निपेतुः स्म पुरौकसः ।
तानानीय महायोगी मयः कूपरसे ऽक्षिपत् ॥ ५९ ॥
सिद्धामृतरसस्पृष्टा वज्रसारा महौजसः ।
उत्तस्थुर्मेघदलना (१)वैद्युता इव वह्नयः ॥ ६० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हितोपदेष्टा आत्मा अन्तर्यामी अर्हणीय उपास्यः सर्वथा प्रियः प्रीतिविषयः कैवल्यनिर्वाणसुखं निरतिशयनित्यानंदस्तदनुभवरूपः एवंभूतो मातुलेयः महद्भिमृग्यं ब्रह्मैव ॥ ४९ ॥

भगवतो गूढत्वं वर्णयन् तत्प्रसादं प्रार्थयते–नेति । यस्य रूपं साक्षाद्भवपद्मजादिभिर्धिया निपुणया बुद्ध्यवस्तुतया इदमित्थमिति भावेन नोपवर्णितम् स एषः श्रीकृष्णः सात्वतां भक्तानां पतिः पालकः मौनेन मुनिधर्मेण ब्रह्मचर्यादिरूपेण भक्त्योपशमेन पूजितो ऽस्माकं प्रसीदताम् ॥ ५० ॥

भवादयोपि तद्रूपं साकल्यन नैव वर्णयन्तीत्युक्तं तत्र हेतुं दर्शयितुं भववृत्तान्तकथनेन तेषां भगवद्दत्तैश्वर्यत्वं द्योतयति, स एष इत्यादिना ॥ ५१ ॥

जगदीशितुः शिवस्य कस्मिन् कर्मणि मयो ऽहन् हतवान् कार्तिभिति शेषः । यथा चानेन कृष्णेन जगदीशितुः कीर्तिरुपचिता वर्द्धिता तथा कथ्यताम् ॥ ५२ ॥

अनेन श्रीकृष्णेनोपवृंहितैः स्वशक्त्या सम्वर्द्धितैः ॥ ५३ ॥

दुर्लक्ष्यापायसंयोगाः दुर्ज्ञेयो ऽपायः तिरोभावः संयोग आविर्भावश्च यासां ता निर्माय तेभ्यो ददाविति शेषः ॥ ५४ ॥

पूर्ववैरमनुस्मरन्तस्ते असुराणां सेनान्यः सेनापतयः ताभिः पूर्भिः सेश्वरान् इन्द्रादिसहितान् नाशयाञ्चक्रुः नाशितवन्तः ॥५५॥

उपासाद्य निकटं गत्वा ॥ ५६ ॥

भाषा टीका ।

यह श्रीकृष्ण वहीपरब्रह्म हैं जोकि–महात्माजनों के ढूढने योग्य कैवल्य मोक्षसुख के अनुभवरूप, प्रिय, और सुहृद और आपके मामाके पुत्र, आत्मा पूजनीय और आज्ञा करने वाले तथा गुरुभी हैं, तस्मात् तुमारे भाग्य धन्य हैं ॥ ४९ ॥

जिनके रूपका वर्णन वास्तव रीतिसे अपनी बुद्धिसे शिव ब्रह्मादिक भी नहीं कर सके, किंतु मौन होकर भक्तिसे और शांतिसे पूजनमात्र किया, वो यह भक्तों का पति श्रीकृष्ण मेरे ऊपरप्रसन्न हो ॥ ५० ॥

हे राजन् यह वही भगवान् हैं कि जिनोंने, बडे मायावी मयदानव से खंडित हुए रुद्रके यशको फिर विस्तार किया ॥ ५१ ॥

राजा उवाच ॥

राजायुधिष्ठिर बोले, कि–जगदीश्वर श्रीमहादेवजी के यश को मयदानवने किसप्रकार नष्टकिया और फिर श्रीकृष्णने कैसे श्रीभोलानाथ की कीर्तिका विस्तार किया, सोआप कहिये ॥ ५२ ॥

नारद उवाच ॥

नारदजी बोले, कि–इन श्रीकृष्ण की सहायस देवताओं ने असुरोंको जब जीता तब असुर लोग मायावियोंके परम गुरु मय दैत्यके शरण गये ॥ ५३ ॥

मयनेभी सोने चांदी और लोहेकी तीन पुर एसे निर्माण किये, कि–जिनकी सामग्री तर्कना करने में न आवे, और जिन के नाश का संवन्ध भी किसी को लखाई नहो ॥ ५४ ॥

हेराजन् ! उनतीन पुरोंसे वे असुरों के सेनापति लोग देवतों के पहिले वैरकी यादकर २ लोकपालों सहित तीनों लोकों को नाश करने लगे ॥ ५५ ॥

तदनन्तर अधिष्ठाताओं सहित तीनों लोक श्रीशिवजी के समीप जाकर बोले, कि—हे विभो ! तीन पुरों में रहने वाले असुरों से नष्ट हुए ऐसे हम देव लोग आपके हैं हमारी आप रक्षा करौ ॥ ५६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अस्त्रमभिमन्त्रितं शरं पुरेषु व्यमुञ्चत् ॥ ५७ ॥

ततः शरात् सूर्यमण्डलान्मयूखसन्दोहा रश्मिसमूहा इव ... बेभ्यः ॥ ५८ ॥

कूपरसे स्वयं निर्मितकूपामृते ॥ ५९ ॥

(१) मेघ दलनादिति पा० वीर०

विलोक्य भग्नसङ्कल्पं विमनस्कं वृषध्वजम् ।
तदा ऽयं भगवान्विष्णुस्तत्रोपायमकल्पयत् ॥ ६१ ॥
वत्स आसीत्तदा ब्रह्मा स्वयं विष्णुरयं हि गौः ।
प्रविश्य त्रिपुरं काले रसकूपामृतं पपौ ॥ ६२ ॥
ते ऽसुरा ह्यपि पश्यन्तो न न्यषेधन्विमोहिताः ।
तद्विज्ञाय महायोगी रसपालानिदं जगौ ॥ ६३ ॥
स्वयं विशोकः शोकार्तान्स्मरन्दैवगतिं च ताम् ।
देवो ऽसुरो नरोऽन्यो वा नेश्वरो ऽस्तीह कश्चन ॥ ६४ ॥
आत्मनोऽन्यस्य वा दिष्टं दैवेनाऽपोहितुं द्वयोः ।
अथाऽसौ शक्तिभिः स्वाभिः शम्भोः प्राधनिकं व्यधात् ॥ ६५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वज्रसाराः वज्रवद्दृढाङ्गाः महौजसो महाबलाः मेघदलनाः मेघभेदिनो विद्युद्रूपा वह्नय इव ॥ ६० ॥ ६१ ॥

काले मध्याह्ने ॥ ६२ ॥ ६३ ॥ ६४ ॥

आत्मनो वा अन्यस्य वा द्वयोरपि वा दैवेन दिष्टमुपकल्पितम् अपोहितुं परिहर्तुमिह कश्चिदपीश्वरः समर्थो नास्ति असौ श्रीकृष्णः प्रधनं संग्रामस्तत्साधनम् ॥ ६५ ॥ ६६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ तद्विज्ञापनानन्तरं तान् सुरान् माभैष्ट अयं माकार्ष्ट इत्यनुगृह्य भगवान् विभू रुद्रः धनुषि शरं बाणं सन्धायास्त्रं पाशुपतं तस्मिन् संयोज्येति शेषः । पुरेषु व्यमुञ्चत ॥ ५७ ॥

ततः शराद्यथा सूर्यमण्डलान्मयूखसन्दोहाः रश्मिसमूहाः तथाग्निवर्णा इषवो बाणा उत्पेतुः यतो येभ्य इषुभ्यः पुरो नादृश्यन्त जनैरिति शेषः । तावद्भिरिषुभिः प्रच्छन्ना बभूवुरित्यर्थः ॥ ५८ ॥

ततः किमत आह, तैरिषुभिः स्पृष्टास्ताडिताः त्रीणि पुराण्योकांसि स्थानानि येषां ते असुराः सर्वे व्यसवः विगता असवो प्राणा येषां तादृशाः सन्तो निपेतुः पतितवन्तः तान् व्यसूनसुरानानीय महायोगी मयः कूपरसे स्वयं निर्मितकूपगते रसेऽमृतसंजीवहृतर्यक्षिपदपातयत् ॥ ५९ ॥

तेच सिद्धामृतरसेन स्पृष्टा असुराः वज्रसारवत् दृढाङ्गाः महौजसः महाबलाः सन्तः मेघदलनात् मेघच्छेदाद्विद्युद्रूपा वह्नयः इवोत्तस्थुरुत्थितवन्तः ॥ ६० ॥

तथा भग्नः सङ्कल्पो यस्मात एव विमनस्कं दुःखितमनस्कं वृषध्वजं रुद्रं विलोक्यायं भगवान् श्रीकृष्णरूपो विष्णुस्तत्र सिद्धामृतरसविनाशे उपायमकल्पयत् ॥ ६१ ॥

तदेवाह—वत्स इति । अयं श्रीकृष्णरूपो विष्णुः स्वयं गौर्धेनुरूपा आसीत् ब्रह्मा चतुर्मुखो वत्स आसीत् ततो गोरूपोऽयं विष्णुस्सवत्सः त्रिपुरं त्रयाणां पुराणां समाहारस्तत्प्रविश्य काले मध्याह्ने रसकूपामृतं रसरूपं कूपगतममृतं पपावपिबत् ॥ ६२ ॥

तेऽसुराः पिबन्तीं गां पश्यन्तोपि भगवन्मायाविमोहिताः न न्यषेधन् न न्यवारयन्तः तत्पानं ज्ञात्वा महायोगी मयः रसं कूपामृतरसंपालयन्तीति तथा तानसुरान् शोकार्त्तान् तां दैवगतिं स्मरन् अत एव विगतशोकः स्वयं स्मयन्निदं वक्ष्यमाणं जगौ उवाच ॥ ६३ ॥

तदेवाह—देव इति । आत्मनोऽन्यस्य वा द्वयोरपि दैवेनेश्वरेण दिष्टमुपकल्पितं सुखं दुःखं वाऽपोहितुमिह लोके देवादन्यतमो यः कश्चिद्देवादिर्नेश्वरः न प्रभुर्नसमर्थः दैवमेव सुखदुःखादहेतुरित्यर्थः । अथ निःशेषकूपामृतरसपानानन्तरम् असौ श्रीकृष्णः धर्मादिभिः स्वाभिः शक्तिभिः शम्भोरुद्रस्य प्राधनिकं प्रधनं संग्रामः तत्साधनं यत् रथसूतादिरूपं तद्व्यधात् क्रमेण धर्मादिस्वशक्तीरेव रथादिरूपेण अकरोदित्यर्थः स्वशक्त्याहितशक्तिमकरोदिति यावत् ॥ ६४ ॥ ६५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विभुः शिवः माभैष्टेत्युक्त्वा .पुर्यामित्येकवचनं जातिविवक्षया ॥ ५७ ॥

ततो धनुषो मयूखसन्दोहाः रश्मिराशयः यतो यैः शरैःपुरः पुराणि ॥ ५८ ॥

स्पृष्टास्तत्रा व्यसवः गतप्राणाः इदं च मयेन कृतं विपरीतमित्याशयवानाह—तानिति ॥ ५९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सिद्धामृतरसोमृतसञ्जीवनरसः तस्मिन् स्पृष्टाः स्नाताः वद्युताः विद्युत्सम्बन्धिनः चशब्देन जलादिना यथा नाशो नास्ति तथैषामिति सूचयति ॥ ६० ॥

कथं कृष्णेनोपचिता कीर्तिरितीमं प्रश्नं परिहर्तुमाह—विलो-क्येति ॥ ६१ ॥

कोसाविति तत्राह—वत्सइति । हिशब्देन विष्णुर्ब्रह्माण-मपेक्षते इति न दोषायेति तत्संकल्पतकारित्वेन सिद्धत्वादिति सूचयति काले माध्यन्दिने ॥ ६२ ॥

ग्रन्थान्तरसिद्धत्वाद्धिशब्देन भगवन्मायास्तन्मायातोऽपरि-मितमाहात्म्यमस्तीति सूचयति, स्वकृतापराधप्रहाणाय स्वस्य भगवद्भक्तिप्रकटनाय च मयस्तद्विषयज्ञानं च ममास्तीत्यभि-प्रायेणाह—तदिति । तद्दैत्यवधोपायकरणं किञ्चित्कालमसुराणां जयदायिनीमिदानीं देवानामिति दैवगतिं किं जगदिति तत्राह, देव इति । आत्मनः स्वस्य अन्यस्य देवदत्तस्य चेति द्वयोर्दैवेन विष्णुना दिष्टं कल्पतं व्यपोहितुम् अन्यथा कर्तुम् इह जीवराशौ देवोऽसुरोऽन्यो वा कश्चनेश्वरः समर्थो नास्तीत्यतस्तूर्ष्णीभाव एव वरीयानित्यर्थः ॥ ६३ ॥ ६४ ॥

ननु, सिद्धरसपानं व्यर्थमिव प्रतिभाति त्रिपुराणामनाशा-दित्याशङ्क्य तन्नाशसाधनमाह—अथेति । अथ दैत्यजीवन-साधनरसनाशानन्तरं स्वाभिः शक्तिभिः भूम्यादिभिः शम्भोः प्राधनिकं युद्धसाधनं रथादिकं व्यधादित्यन्वयः ॥ ६५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यथेति सूर्यमण्डलादित्यस्मात् पूर्वं योज्यं यतो येभ्य इषुभ्यो हेतुभ्यः ॥ ५८ ॥

कूपरसे स्वनिर्मितकूपरसामृते ॥ ५९ ॥

मेघदलना मेघभेदिनो विद्युद्रूपावह्नयः इव मेघस्थाविद्युतो यथा मेघकान्तितिरस्कारिण्यस्तथैव ते वीरा अपि श्यामविमान-कान्तितिरस्कारिण इत्यर्थः ॥ ६०—६१ ॥

काले मध्याह्ने ॥ ६२—६३ ॥

आत्मनो वा अन्यस्य वा द्वयोरपि वा दैवेनोपकल्पितं दिष्टम् अपोहितुं दूरीकर्तुम् इह कश्चिदपीश्वरः समर्थो नास्ति ॥ ६४ ॥

असौ कृष्णःप्राधनं संग्रामस्तदर्हं रथादिकं स्वाभिः शक्तिभिः धर्मादिभिराविष्टं क्रमेण व्यधादिति स्वशक्तीनामनश्वरत्वाच्च तदाविष्टानां रथादीनामपि तादृशत्वं तत्र स्वीयधर्मस्य भक्तियोग-स्यावेशो रथे भक्तियोगाश्रितानां ज्ञानादीनां रथाश्रितेषु सूतादिषु ज्ञेयः ॥ ६५ ॥ ६६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

शरं शस्त्रविशेषं तदेवास्त्रम् अस्त्रेण पाशुपतेनाधिष्ठितत्वात् ।५७॥

ततः भस्त्राधिष्ठिताच्छरात् यतो येभ्यः पुरो नादृश्यन्त [illegible] अभवन् ॥ ५८ ॥

तान् व्यसून् मयः कूपरसे स्वनिर्मितकूपस्थसिद्धामृतरसे ॥५९॥

वज्रस्येव सारः काठिन्यं येषाम् महौजसो महाबलाः मेघदलना घनभेदिनस्तडिद्रूपा वह्नय इवोत्तस्थुः ॥ ६०—६१ ॥

काले सुरासुरसमृद्ध्यसमृद्धिकरे ॥ ६२—६३ ॥

आत्मनोऽन्यस्य वा द्वयोर्वा दैवेन कर्मफलदात्रा आदिष्टं प्रापितं फलमपोहितुं परिहर्तुं देवो ऽसुरो नरो वा नेश्वरः समर्थो नास्ति असौ श्रीकृष्णः धर्मादिभिः स्वशक्तिभिः सह प्राधनिकं प्रधनं संग्रामस्तदर्हं रथादिकं व्यधात् ॥ ६४—६६ ॥

भाषा टीका ।

तब तौ भगवान् श्रीशङ्कर अनुग्रह करके देवतों से बोले, कि—तुम लोग भय मत करौ बस इतना कहकर धनुष के ऊपर बाण लगाकर श्रीभोलानाथ ने अस्त्र छोंडे ॥ ५७ ॥

तब तौ अग्निके समान वर्ण वाले बाण श्रीमहादेवजी के धनुष से चलने लगे, जैसे सूर्य मण्डल से किरणों का समूह निकलें, जिन बाणों के मारे तीनों पुर अदृश्य होगये ॥ ५८ ॥

बस उन तीनों पुरो के रहने वाले जिन २ दैत्यों को बाणों का स्पर्श हुआ, वो सब बिना प्राण के होकर पतन हुए, बडे योगी मय दैत्य ने भी उन सबों को लाकर कूप के अमृत रस में डाला ॥ ५९ ॥

उस कूप के सिद्ध उस अमृत रसके स्पर्श होते ही वज्र सदृश अंग वाले बडे पराक्रमी एकही बार सब उठ खडे हुए जैसे मेघों का दलन करने वाली विद्युतों की अग्नियां ॥ ६० ॥

उस समय वृषभध्वज श्रीमहादेव के संकल्प के भंग होने से उदास होने पर, इनहीं श्रीकृष्ण ने वहां उपाय रचा ॥ ६१

तब ब्रह्माजी तो बछरा बने और ये विष्णु स्वयं गौ बनें, और समय पर त्रिपुर में प्रवेश करके उस कूप के अमृतरस का पान कर गये ॥ ६२ ॥

वे असुर लोग सब देखते ही रहे पर आपकी माया से विमोहित होकर देखने पर भी निषेधन किया, एसा समाचार जान कर बडा योगी विमरा शोक वाला स्वयं मय दैत्य, उस दैव गतिका स्मरण करता हुआ शोक से व्याकुल एसे उन रखवालों से यों बोला, कि देव असुर नर अथवा और भी कोई, दैव रचित प्रारब्ध के हटाने को समर्थ नहीं। बस वहां तो यों बातें होती थीं इतने में इन श्रीकृष्णने अपनी शक्तियों से भोलानाथ श्रीशम्भुकी संग्रामकी सामग्री त्यार करदी ॥ ६३—६५ ॥

धर्मज्ञानविरक्त्यृद्धितपोविद्याक्रियादिभिः ।
रथं सूतं ध्वजं वाहान्धनुर्वर्म्मशरादि यत् ॥ ६६ ॥
सन्नद्धो रथमास्थाय शरं धनुरुपाददे ।
शरं धनुषि सन्धाय मुहूर्तेऽभिजितीश्वरः ॥ ६७ ॥
ददाह तेन दुर्भेद्या हरोऽथ त्रिपुरो नृप !।
दिवि दुन्दुभयो नेदुर्विमानशतसङ्कुलाः ॥ ६८ ॥
देवर्षिपितृसिद्धेशा जयेति कुसुमोत्करैः ।
अवाकिरन् जगुर्हृष्टा ननृतुश्चाप्सरोगणाः ॥ ६९ ॥
एवं दग्ध्वा पुरस्तिस्रो भगवान्पुरहा नृप !।
ब्रह्मादिभिः स्तूयमानः स्वधाम प्रत्यपद्यत ॥ ७० ॥
एवंविधान्यस्य हरेः स्वमायया विडम्बमानस्य नृलोकमात्मनः ।
वीर्याणि गीतान्यृषिभिर्जगद्गुरोर्लोकान्पुनानान्यपरं वदामि किम् ॥ ७१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे पारमहंस्यां संहितायाम्
वैयासिक्यां युधिष्ठिरनारदसंवादे त्रिपुरविजयो नाम
दशमोऽध्यायः ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अभिजिति मध्याह्ने ॥ ६७ ॥

विमानशतानि सङ्कुलानि सङ्कीर्णानि येषां ते देवादयः। ॥ ६८ ॥ ६९ ॥

आदित आरभ्य स्कन्धार्थं निगमयति,एवं विधानीति नृलोकं नराकारमात्मनो विडम्बमानस्याऽनुकुर्वतः ॥ ७० ॥ ७१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
दशमोऽध्यायः ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्र शक्तिर्नाम स्वापृथक्सिद्धविशेषणभूतकार्योपयुक्ता सा-च धर्मादिरूपेण बहुविधा तत्र धर्मशक्तिर्नाम साधुपरित्राण-सामर्थ्यात्मिका ज्ञानशक्तिरिह"यः सर्वज्ञः सर्ववित् सर्वदृक् स्वा-धीनोऽनादिः सर्वेश्वरः सर्वदृक्"इत्यादिभ्योऽवगता सर्वसाक्षात्कार-सामर्थ्यात्मिका तथा चोक्तं श्रीमन्नाथमुनिभिः "यो वेत्ति युग-पत्सर्वं प्रत्यक्षेण सदा स्वतः" इति. विरक्तिर्नाम "सर्वमिद-मभ्यात्तोऽवाक्यनादरः"इति श्रुत्यवगताऽवाप्तसमस्तकामत्वेपि तद-नादरेणाऽवस्थानसामर्थ्यात्मिका, ऋद्धिर्नामैश्वर्यम्"एष सर्वेश्वरः कृष्णः"इत्यादिप्रमाणाऽवगतं सर्वान्तरात्मत्वेन नियन्तृत्वसामर्थ्यम्. तपश्शक्तिर्नाम "स तपोऽतप्यत सतपस्तप्त्वा इदं सर्वमसृजत" इत्याद्यवगता जगद्रक्षणोपयुक्तसङ्कल्परूपज्ञानात्मिका, विद्यानाम "सत्यकामः सत्यसङ्कल्पः"इत्याद्यवगता सत्यसङ्कल्पात्मिका सत्य-संकल्पत्वं च स्वावताराद्यपूर्वभोग्यान्तरसृष्टौ जगद्व्यापारादिषु चामोघसङ्कल्पत्वम्. क्रियानामाघटितघटनात्मिका"स्वाभाविकी ज्ञान-बलक्रिया च" इत्याद्यवगता. आदिशब्देन बलवीर्यतेज आदयस्तत्र बलं श्रमप्रसङ्गरहितं सर्वधारणसामर्थ्यम् "एषसेतुर्विधरणः" इत्यादिभ्योऽवगतम्. वीर्यनाम, सर्वधारणेपि विकाररहितत्वम् तेजः अस्वाधीनसहकार्यनपेक्षत्वम्. रथमिति वाहानाश्वान् वर्म कवच-मादिशब्देन प्रग्रहादिकं गृह्यते ॥ ६६ ॥

भगवद्धर्मशक्त्यात्मकं रथमारुह्य सन्नद्धः कवचित ईश्वरो रुद्रः शरं धनुश्चोपाददे स्वीकृतवान् ततो धनुषि शरं सन्धायाभिजिति मुहूर्ते अभिजिन्नामक मुहूर्ते दिवसस्याष्टमे मुहूर्ते ॥ ६७ ॥

भगवतः श्रीकृष्णस्य तेजसोक्तविधेन युक्तस्त्रिपुरं ददाह बाणप्रयुक्तद्वारेण दग्धवान् । हे नृप ! तदा दिवि दुन्दुभयो नेदुः दध्वनुः विमानशतानि सङ्कुलानि येषां ते ॥ ६७ ॥

देवर्ष्यादयः जयेति वदन्तः इति शेषः । उत्कर्षेण वर्त्तस्वेति

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वदन्तः कुसुमोत्करैः पुष्पवर्षैः शम्भुमवाकिरन् ववृषुः अप्सरसांगणाश्च जगुर्ननृतुश्च ॥ ६९ ॥

हे नृप ! एवमित्थं तिस्रः पुरः पुरीर्दग्ध्वा पुरहा भगवान् रुद्रः ब्रह्मादिभिः स्तूयमानः स्वस्थानं प्रत्यपद्यत प्राप्तवान् ॥ ७० ॥

श्रीकृष्णस्य परब्रह्माभिन्नत्वसूचकप्रभावप्रतिपादनम् उपसंहरन् प्रश्नान्तरावसरं प्रयच्छति—एवमिति । आत्मनः स्वस्य मायया सङ्कल्पेन न तु कर्मणेति भावः । नृलोकं विडम्बमानस्यानुकुर्वतः इतरसजातीयचेष्टां कुर्वत इत्यर्थः । हरेराश्रितार्त्तिहरस्य लोकस्य हितोपदेष्टुरस्य श्रीकृष्णस्य ऋषिभिरस्मदादिभिर्गीतान्येवंविधानि वीर्याणि लोकं पुनानानि बहूनि सन्तीतिशेषः । साकल्येन केनापि वक्तुं न शक्यानीतिभावः । अपरमन्यत्किं वदाम अतो अन्यत्किञ्चित्त्वया प्रष्टव्यमस्तिचेत् तत्कथयामेत्यर्थः ॥ ७१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमद्वीरराघवाचार्यकृत भागवतचन्द्रचन्द्रिकायाम्

दशमोऽध्यायः ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

धर्मादिबलोपेतत्वात् अमेयाभिः किं तत्साधनिकमिति तदाह—रथमिति । भगवतो हरेस्तेजसा गुप्तो रक्षितः ॥ ६६॥६७ ॥

यशोविततिप्रकारमाह—दिवीति । जयेत्युक्त्वा जगुरित्यनेन यशोविततिर्ज्ञायते ॥ ६८ ॥ ६९ ॥

ब्रह्मादिभिर्ब्रह्मोत्पन्नैः सनकादिभिः "इमा रुद्राय स्थिरधन्विने गिरः क्षिप्रेषवः" इत्यादिवेदवाक्यैर्वा शम्भोः पुरदहनमाहात्म्यं यत् तत् श्रीनारायणैकनिष्ठमित्याशयेनोपसंहरति—एवंविधानीति । अपरं भगवच्चरितं तद्वदेति शेषः । अपरमन्यद्वस्त्वेवंविधमाहात्म्योपेतं किं वदामि न किमपीति वा ॥ ७० ॥ ७१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

दशमोऽध्यायः ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

एवमिति । नृलोकं तच्चेष्टाम् ॥ ७१ ॥

इ त श्रीत्यादौ प्रह्लादचरितं त्रिपुरविजयं च दशमो[...] इत्येव पाठः

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

दशमोऽध्यायः ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अभिजिति मध्यान्हे ॥ ६७—७० ॥

स्वमायया विडम्बमानस्य अत एव मोहवशात् मा[...] नृलोकस्तं न भजत इति भावः ॥ ७१ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

सप्तमे दशमोऽध्यायस्सङ्गतः सङ्गतस्सताम् ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सन्नद्धो वर्द्धितः अभिजिति मध्याह्ने ॥ ६७ ॥

विमानशतानि सङ्कुलानि सङ्कीर्णानि येषां ते देवादयः [...] वदन्तः कुसुमोत्करैरवाकिरन् ववृषुः ॥ ६८—७० ॥

आत्मनः स्वस्य नृलोकं भक्तजनं स्वमायया विडम्ब[...] स्वकृपया ऽनुकुर्वतः तत्तद्भक्तानुरूपं चेष्टितं कुर्वतः अस्य [...]ष्णस्य हरेः भक्तदुःखहारिणः लोकान् पुनानानि वीर्[...] ऋषिभिर्गीतानि एवम्विधानि सन्ति. तत्र किञ्चिदुक्तमपरं वदामि तदुच्यतामिति शेषः ॥ ७१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

दशमोऽध्यायार्थ प्रकाशः ॥ १० ॥

भाषा टीका ।

अर्थात् धर्म ज्ञान विरक्ति ऋद्धि तप विद्या क्रिया [...] कों से रथ सूत ध्वजा घोड़े धनुष कवच बाण आदि चाहिये से सवही कुछ रचदिया ॥ ६६ ॥

श्री शिवजी भी कटिबद्ध होकर रथ पर बैठ धनु[...] हाथ में लेकर मध्याह्न काल अभिजित मुहूर्त में धनु[...] ऊपर बाण लगाकर ॥ ६७ ॥

भाषा टीका।

हे नृप ! उस बाण से श्रीहर ने दैत्यों के तीनों पुर जलादिये, बस तब तो स्वर्ग में सैकड़ों विमानों पर बैठकर देवता लोग दुंदुभी बजाने लगे ॥ ६८ ॥

देव ऋषि पितृ सिद्धेश जय २ शब्द करके कुसुमों की वर्षा करने लगे, और हर्ष के मारे गाने लगे अप्सरा गण नृत्य करने लगे ॥ ६९ ॥

हे नृप ! ऐसे भगवान् श्री शंकर जी तीनों पुरों को जलाकर अपने धाम को सिधारे ॥ ७० ॥

इस प्रकार मनुष्य लोक का अनुकरण करने वाले इन जगद्गुरु श्री हरिके पराक्रम है जिनको ऋषि लोग गान करते हैं, और जो लोकों को पवित्र करते हैं ऐसे आपके वीर्य हैं सो मैंने तुमसे कहे अब और क्या कहूं ॥ ७१ ॥

इति श्रीमद्भागवत महापुराण सप्तम स्कन्ध में

दशम अध्याय की भागवताचार्य कृत

भाषा टीका समाप्त ॥ १० ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे दशमोऽध्यायः ॥ १० ॥

॥ एकादशोऽध्यायः ॥

श्रीशुक उवाच ।

श्रुत्वेहितं साधुसभासभाजितं महत्तमाग्रण्य उरुक्रमात्मनः ।
युधिष्ठिरो दैत्यपतेर्मुदायुतः पप्रच्छ भूयस्तनयं स्वयम्भुवः ॥ १ ॥

युधिष्ठिर उवाच ।

भगवन् ! श्रोतुमिच्छामि नृणां धर्म्मं सनातनम् ।
वर्णाश्रमाचारयुतं यत्पुमान्विन्दते परम् ॥ २ ॥
भवान्प्रजापतेः साक्षादात्मजः परमेष्ठिनः ।
सुतानां सम्मतो ब्रह्मंस्तपोयोगसमाधिभिः ॥ ३ ॥
नारायणपरा विप्रा धर्मं गुह्यं परं विदुः ।
करुणाः साधवः शान्तास्त्वद्विधा न तथा परे ॥ ४ ॥

नारद उवाच ।

नत्वा भगवतेऽजाय लोकानां धर्महेतवे ।
वक्ष्ये सनातनं धर्म्मं नारायणमुखाच्छ्रुतम् ॥ ५ ॥
योऽवतीर्यात्मनोंऽशेन दाक्षायण्यां तु धर्म्मतः ।
लोकानां स्वस्तये ऽध्यास्ते तपो बदरिकाश्रमे ॥ ६ ॥
धर्ममूलं हि भगवान्सर्ववेदमयो हरिः ।
* स्मृतं च तद्विदां राजन् ! येन चात्मा प्रसीदति ॥ ७ ॥
सत्यं दया तपः शौचं तितिक्षेक्षा शमो दमः ।
अहिंसा ब्रह्मचर्यं च त्यागः स्वाध्याय आर्जवम् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एकादशे नृणां धर्माः साधारण्येन वर्णिताः ।
विशेषेण च वर्णानां मुख्यामुख्याश्च योषिताम् ॥ १ ॥
"तदेवं दशभिर्ज्ञानभक्तियोगावुदीरितौ ।
अथ पञ्चभिरध्यायैः कर्मयोगोऽनुवर्ण्यते ॥ २ ॥

दैत्यपतेः प्रह्लादस्य साधूनां समासु सभाजितं सत्कृतमीहितं चरितं श्रुत्वा पुनर्नारदं पप्रच्छ कथम्भूतस्येहितं महत्तमानामग्रण्यो मुख्यस्य तत्र हेतुः उरुक्रमे आत्मा मनो यस्य ॥ १ ॥

श्रवणेच्छायां हेतुः यद्यतो धर्मादनुष्ठितात्परं ज्ञानं भक्तिं च विन्दते ॥ २ ॥ ३ ॥

ननु, स्मृतिकारैर्धर्म उक्त एव तत्राह—नारायणपरा इति ॥ ४ ॥

अजाय श्रीनारायणाय तस्यैव मुखाच्छ्रुतम् ॥ ५ ॥

* स्मृतिरिति पाठः, वीरराघ० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

तन्मुखादात्मनः श्रवणं सम्भावयन्विशिनष्टि, य इति ॥ ६ ॥

प्रथमं तावद्धर्मे प्रमाणमाह–धर्मेति। धर्मस्य मूलं प्रमाणं स्मृतं च स्मृतिः तद्विदां वेदविदां येन चाऽऽत्मा मनः प्रसीदति तुष्यति च। तथाच याज्ञवल्क्यः "श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः। सम्यक्सङ्कल्पजः कामो धर्ममूलमिदं स्मृतम्"इति. मनुश्च "वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्। आचारश्चैव साधूनामात्मनस्तुष्टिरेव च"इति ॥ ७ ॥

तत्र तावन्नरमात्रसाधारणधर्ममाह–सत्यमिति, पञ्चभिः। तपः एकादश्युपवासादिः ईचा युक्तायुक्तविवेकः शमो मनसस्संयमः दमो बाह्येन्द्रियाणाम्. त्यागो दानं स्वाध्यायो यथोचितजपः ॥ ८ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

तदेवं श्रुतप्रह्लादचरितोऽपरं वदाम किमिति प्रश्नाय चोदितो युधिष्ठिरः वर्णाश्रमादिधर्मान् तत्रतत्र भगवद्भक्तियोगाङ्गत्वेनोक्तान् बुभुत्सुः पप्रच्छ देवर्षिमित्याह भगवान् बादरायणिः, श्रुत्वेति। उरुविक्रमे भगवत्यात्मा मनो यस्य तस्य दैत्यपतेः प्रह्लादस्य साधुभिः सभाजितमनुसेवितम् आदृतं वा ईहितं चरित्रं श्रुत्वा मुदा हर्षेण अन्वितो युक्तो युधिष्ठिरः पुनर्महत्तमानामग्रण्यं प्रथमतो गण्यं स्वयंभुवो ब्रह्मणः तनयं नारदं पप्रच्छ "साधु सभासभाजितं महत्तमाग्रणयउरुक्रमात्मनः" इति पाठान्तरं तत्र महत्तमानामग्रणयः मुख्यः उरुक्रमे भगवति आत्मा मनो यस्य दैत्यपतेः प्रह्लादस्येहितं साधूनां सभायां सभाजितं सत्कृतं श्रुत्वेत्यर्थः ॥ १ ॥

प्रश्नमेवाह—भगवन्निति, त्रिभिः। हे भगवन् ! अहं वर्णानां ब्राह्मणादीनाम् आश्रमाणां ब्रह्मचर्याद्याश्रमनिष्ठानां चाचारैर्युतं नृणां सनातनमनादिपरंपरागतं नत्वर्वाचीनपाषण्डकल्पितं वर्णाश्रमाचारयुतं नतूत्पथप्रतिपन्नजनाचारयुतम् एवंविधाद्धर्मादेव परमात्मानं विन्दत इतिभावः—

"वर्णाश्रमाचारवता पुरुषेण परः पुमान्।
विष्णुराराध्यते नान्यः पन्थास्तत्तोषकारणम्" ॥

इति स्मृतेः। धर्मं श्रोतुमिच्छामि तच्छ्रवणेच्छायां हेतुं वदन्विशिनष्टि–यद्यस्माद्धर्मात्परं परमपुरुषं विन्दते भक्तियोगनिष्पत्तिद्वारा प्राप्नोतीत्यर्थः ॥ २ ॥

नन्वेतद्धर्मविदो बहवः सन्ति अतस्तांप्रति नाहं पृष्टव्यस्तत्राह—भवानिति। त्वमिवान्ये धर्मं गुह्यं न विदुरतस्त्वमेव ब्रूहीति भावः। तदेव व्यञ्जयंस्तं विशिनष्टि, प्रजानां पत्युः परमेष्ठिनः साक्षाद्भगवानात्मजः पुत्रः सर्वोऽपि धर्मः परमेष्ठिमुखोपदिष्ट इति ततो गृहीतधर्मरहस्यस्त्वमेव तद्वक्तुं समर्थ इति भावः। ननु, परमेष्ठिनः सुता अपि बहवः सन्तीत्यत्राह–हे ब्रह्मन् ! सुतानां मध्ये भवान्परमेष्ठिनः संमतः सुतः नितरां प्रीतिविषयः सुतोऽतो धर्मरहस्यं तेन तुभ्यमुपदिष्टम् भवेदितिभावः ॥ ३ ॥

ननूपदिष्टधर्मरहस्योऽप्यहं तद्विस्मृतवानस्मीत्यत्राह–तप आदिभिरुपायैर्नारायणपराः नारायणः पर उत्कृष्ट उपास्यो येषां तादृशा विप्रा यूयं परं धर्मं गुह्यं विदुः भगवद्भक्त्यङ्गत्वेन वर्णाश्रमादिधर्ममनुतिष्ठतां युष्माकं न तद्विषया विस्मृतिरितिभावः। जानन्तो वयं रहस्यत्वादेव न कथयाम इति चेत्तत्राह–करुणा इति। करुणाः करुणावन्तः करुणावतां मम धर्मरहस्याऽज्ञानप्रयुक्तदुःखस्य निराचिकीर्षायुक्तैवेति भावः। ननु, तच्छ्रवणेत्वमनधिकारीति शङ्कां निराकुर्वन्विशिनष्टि, शान्ता रागादिप्रयुक्तवैषम्यरहिताः किं तवैतद्रहस्योपदेशेन मम प्रयोजनं तत्राह. साधवः स्वार्थनिरपेक्षपरोपकारशीलाः एवंभूतास्त्वद्विधा एव न त्वपरे सन्तीत्यर्थः ॥ ४ ॥

एवमापृष्टो धर्मान् भगवान् नारदस्तान्विवक्षुः स्वस्य साक्षात्तदुपदेष्टारं श्रीमन्नारायणं नमस्कुर्वन् प्रतिज्ञाय तं विशिनष्टि—नत्वेति द्वाभ्याम्। अजाय कर्माधीनोत्पत्तिरहिताय भगवते नारायणाय लोकानां योधर्मस्तस्य हेतवे नारायणाय प्रवर्त्तकाय नत्वा नारायणमुखाच्छ्रुतं सनातनं धर्ममहं वक्ष्ये ॥ ५ ॥

एवं प्रतिज्ञां कृत्वा ऽथ तन्मुखादात्मन श्रवणं संभावयन् तं विशिनष्टि—य इति। यो भगवानात्मनोंऽशभूतेन नरेण सह दाक्षायण्यां दक्षदुहितरि मूर्तौ धर्मतो मूर्त्यां भर्त्तुर्धर्मादवतीर्य लोकानां स्वस्तये बदरिकाश्रमे ऽद्याप्यध्यास्ते ॥ ६ ॥

तावद्विवक्षिते धर्मे प्रमाणमाह—धर्ममूलमिति. धर्मस्य मूलं प्रमाणं धर्मप्रमापको भगवानेवेत्यर्थः। ननु, भगवतः प्रत्यक्षादिप्रमाणानन्तर्भूतत्वात्कथंतस्य धर्मप्रमापकत्वमितिशङ्कां निराकुर्वन् तं विशिनष्टि, सर्ववेदमयः ऋग्यजुस्सामादिसर्ववेदप्रचुरः न साक्षाद्धर्मे भगवान् प्रमाणमपितु साक्षात्प्रमाणभूतसर्ववेदाविष्कारद्वारेतिभावः। तदाविष्कारकारकत्वं च तस्य श्रूयते"तस्यहवाएतस्य महतो भूतस्य निःश्वसितमेतद् यदृग्वेदः" इत्यादि. किञ्च हे राजन् ! तद्विदां वेदविदां स्मृतिश्च तद्धर्ममूलमित्यर्थः तद्विदामित्यनेन स्मृतीनां स्वमूलभूतश्रुत्यनुमापनद्वारा धर्मप्रमापकत्वमिति सूचितम् तद्विदां स्मृतय इत्यनेनन तद्वेदनमूलकशाक्यादिस्मृतिव्यावृत्तिः। स्मृतिश्चेति च शब्देन शिष्टाचारादिसंग्रहः। तदुक्तं मनुना—

"वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥ इति.

याज्ञवल्क्यश्च——

"श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
सम्यक सङ्कल्पजः कामो धर्ममूलमिदं स्मृतम् ॥ इति.

धर्मं विशिनष्टि, येन धर्मेण स्वाराधनभूतेनात्मा परमात्मा प्रसीदति परमात्मप्रसादहेतुत्वादवश्यं तच्छ्रवणादिकर्त्तव्यम् इति भावः ॥ ७ ॥

एवं धर्मप्रमाणान्यभिधाय तावन्नृणां ये साधारणा धर्माः तानाह—सत्यमिति पञ्चभिः,। सत्यं भूतहितत्वं दया स्वार्थनिरपेक्षपरदुःखासहिष्णुत्वम्. तप अनशनादिरूपम्. शौचं स्नानादिजं शुचित्वम्. तितिक्षा शीतोष्णादिद्वन्द्वसहिष्णुता. ईचा हेयोपादेयविवेकः, शमोऽन्तरिन्द्रियजयः दमो बाह्येन्द्रियजयः अहिंसा करणत्रयेणापि परपीडानिवृत्तिः । ब्रह्मचर्यमनुचितकालेषु

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

श्रीमद्वराहित्यं त्यागो लोभराहित्यं स्वाध्यायो यथोचितमन्त्रजपः आर्जवं मनोवाक्कायानामैक्यरूप्यम् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भगवद्भक्त्या यथावद्गीतवर्णाश्रमाचाराचरणेन समुत्पन्नाऽपरोक्षज्ञानेन प्रसन्नो हरिः स्वस्वयोग्यां मुक्तिं ददातीत्येतदर्थमुत्तरेषामध्यायानामारम्भः । तत्र वर्णाश्रमधर्मांञ्छ्रोतुकामो युधिष्ठिरो नारदं पृच्छतीत्याह—श्रुत्वेति । महत्तमानामग्रयस्य श्रेष्ठस्य उरुक्रमे हरावात्मा मनो यस्य स तथा तस्य दैत्यपतेः प्रह्लादस्य ईहितं चरितं साधुसभासु सभाजितं सम्भावितं महत्तमानां ब्रह्मादीनां उत्तमस्य दैत्यानामपि पत्युरुरुक्रमात्मनो नरसिंहस्येति वा ॥ १ ॥

धर्मं विशिनष्टि-वर्णेति । वर्णाश्रमाचारयुतं "युु मिश्रणे" इति धातुः ॥ २—५ ॥

पुरुषार्थोपयोगित्वाद्वक्तुमिच्छामीत्याह—यो वतीर्येति । दाक्षायण्यां नाम्ना मूर्तौ धर्मतो धर्मप्रवर्तनार्थम् "स्यादध्यधिक ईश्वरः" इत्यभिधानादीश्वरः तप उद्दिश्य वदरिकाश्रम आस्त इत्यन्वयः वदरिकाश्रमे तपोऽध्यास्त इति वा ॥ ६ ॥

तत्रानुष्ठानधर्मविषये ज्ञाते क्षिप्रप्रवृत्तिः स्यादधिकारिणामिति तमाह—धर्ममूलमिति । धर्ममूलं धर्मविषयः सर्ववेदमयः सर्ववेदप्रतिपाद्येषु प्रधानः अनेन रुद्रादयो निवृत्ता इति ज्ञातव्यं न केवलं धर्मविषय एव तत्प्रतिष्ठापकश्चेत्यतो धर्ममूलमित्यत्र प्रमाणं सर्ववेदमय इति, प्रमाणान्तरं चास्तीत्याह—स्मृतिरिति, प्रमाणमिति शेषः । भगवत्प्रसादहेतुत्वात्प्रमाणमित्याह—येनेति । अनेन भगवत्तत्त्वज्ञैः स्मृतो धर्मो न कपिलादिभिरित्युक्तम् भवति ॥ ७ ॥

विषयं निरूप्य सर्वसाधारणं सर्वधर्मसाधनमाह—सत्यमिति । सत्यादिचतुष्टयमन्तरङ्गं तितिक्षादिकमुपाङ्गमिति ज्ञातव्यम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

हतसन्देहत्वान्मुदा युतः । अत एव राज्याऽनुकूलैरधर्मकथामकरोदित्याह, पप्रच्छेति ॥ १ ॥

तामपि लोकहितायैव परमार्थमाश्रित्यैव श्रीनारदेन सममेव वाक्रोदित्याह—यत् पुमानिति ॥ २ ॥ ३ ॥

ननु, मन्वादयो नारायणपरा एव तत्राह-गुह्यमिति । गुह्यत्वात्तेऽपि न प्रकाशयन्तीत्यर्थः ॥ ४ ॥

धर्महेतव इति । धर्मोऽत्र ज्ञानभक्तिजनको धर्मविशेषो ज्ञेयः ॥ ५ ॥

आत्मवतामनुकम्पया तपोऽव्यक्त गतिश्चरतीति पञ्चमस्कन्धात् आत्मनोंशेन नरेण ॥ ६ ॥

तस्य प्रमाणं—आश्यां तद्बहिर्मुखधर्मस्य अपार्थत्वं भगवद्धर्मस्यैवावश्यकत्वं चोक्तम् अत एव "वेदोखिलोधर्ममूलम्" इत्यादि मनुस्मृतिवाक्यादप्यत्र विशिष्टतयोपदिष्टं तच्च युक्तं "धर्मः प्रोज्झित कैतवोऽत्र परमो निर्मत्सराणां सताम्" इत्याद्युक्तत्वात् येन धर्मेण मनः प्रसीदतीत्यनेन ययात्मा सुप्रसीदतीतिवत् सुप्रसन्न विशिष्टतया अनुक्तत्वात्तच्छ्रवणलक्षणा साक्षाद्भक्तेरेव प्रशस्तत्वञ्च बोधितं येन चात्मेत्यात्मतोषोऽपि प्रमाणमित्यर्थः ॥ ७ ॥

सत्यमित्यादि सार्द्धपञ्चकम् ॥ ८—१२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

वासनाभगवद्भक्तसङ्गात् साध्वी निरूपिता ।
दशभिः पञ्चभिश्चाथ सत्कर्म प्रभवोच्यते ॥
नृणां साधारणान् धर्मान् विप्रादीनां विशेषतः ।
स्त्रीणां सङ्करजातीनां चोवाचैकादशे मुनिः ॥

तदेवं निर्गुणभक्तिवासनायाः कारणत्वेन महत्कृपां दश-
रध्यायैरुक्त्वा सगुणभक्तिवासनायाः कारणं निष्कामकर्म
पञ्चभिरध्यायैर्वक्तुमारभते-श्रुत्वेति । साधूनां सभासु सभाजितं
सत्कृतं महत्तमानामग्रण्यो मुख्यस्य प्रह्लादस्य ॥ १ ॥

सनातनं फलप्राप्तावपिस्थास्नु भक्तियोगमित्यर्थः । वर्णाश्र-
माचारयुतमिति वर्णाश्रमाचारधर्मं च श्रोतुमिच्छामीत्यर्थः ॥ २ ॥

नन्वन्ये मुनयः स्मार्त्ताः पृच्छयन्तामित्यत आह, नारायणेति ॥ ३ ॥

अजाय श्रीकृष्णाय ॥ ५—६ ॥

धर्मस्य मूलं कारणं प्रमाणं च हि निश्चितं भगवानेव यतः सर्व-
वेदेति तद्भक्त्या विना धर्मा नैव सिद्ध्यन्तीति भावः । स्मृतं स्मृ-
तद्विदां सर्ववेदमयभगवद्विदां तेन प्राथमिकविष्णुपूजाविधि-
श्राद्धादिसप्तमीविद्धरोहिण्यष्टमीव्रतादिविधायिकाः स्मृतयो द्-
वृत्ताः येन च आत्मा मनः प्रसीदतीति.

"सवै पुंसां परो धर्मो यतो भक्तिरधोक्षजे ।
अहैतुक्यप्रतिहता ययाऽऽत्मा सुप्रसीदति" ॥

इतिवत्सुशब्दाप्रयोगात् यथा केवलया भक्त्या न तथा कर्म-
मिश्रया भक्तिमिश्रकर्मणा वा मनः प्रसीदतीति ज्ञापितं भक्ति-
रहितो धर्मस्त्वग्राह्य एव तेन—

"श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
सम्यक् सङ्कल्पजः कामो धर्ममूलमिदं स्मृतम्" ॥

इति याज्ञवल्क्योक्तेः

"वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चापि साधूनामात्मन स्तुष्टिरेवच" ॥

इतिमनूक्तेरपि सकाशात् धर्ममूलं हि भगवानिति नारदोक्तिः
श्रेयसी यदुक्तं नारसिंहे—

सन्तोषः समदृक्सेवा ग्राम्येहोपरमः शनैः।
नृणां विपर्ययेहेक्षा मौनमात्मविमर्शनम् ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

"सनकाद्यो निवृत्ताख्ये ते च धर्मे नियोजिताः।
प्रवृत्ताख्ये मरीच्याद्या मुक्त्वैकं नारदं मुनिम्"

इति नारदस्यैव तेभ्य उभयेभ्यः श्रैष्ठ्यं सर्वधर्मसारविज्ञत्वं च ध्वनितम् ॥ ७ ॥

तत्र तावन्नरमात्रसाधारणं सनातनं भक्तियोगं धर्ममाह, सत्यमिति, पञ्चभिः। तत्र सत्याद्या एकविंशतिभक्त्युपकरणीभूताः श्रवणाद्या नव तु साक्षाद्भक्तिरेवेति ज्ञेयं तप एकादश्युपवासादिः शमो मनसो निग्रहः दमो बाह्येन्द्रियाणां स्वाध्यायो यथोचितजपः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

एवमतिक्रान्तेन ग्रन्थेन भगवत्प्रियो भक्तियोगो ज्ञानयोगश्च वर्णितः अथ तत्प्रियः कर्मयोगः पञ्चभिरध्यायैर्वर्ण्यते तत्रैकादशेनाध्यायेन सर्वेषामधिकारिणां साधारणा धर्माः विशेषतश्च वर्णानां स्त्रीणां च धर्मा वर्ण्यन्ते। युधिष्ठिरः, महत्तमा हरिध्याननिष्ठास्तेषामग्रं हरिध्यानं नयति वहतीति महत्तमाग्रणीस्तस्य महत्तमाग्रण्यः यतः उरुक्रमे हरौ आत्मा मनो यस्य तस्य दैत्यपतेः प्रह्लादस्य साधुसभासु सभाजितं प्रशंसितमीहितं हरिज्ञानभक्तिगर्भं सुचरितं श्रुत्वा पुनर्ज्ञानभक्तिसाधनभूतकर्मयोगज्ञानार्थं स्वयंभुवस्तनयं नारदं पप्रच्छ ॥ १ ॥

सनातनं नित्यसिद्धवेदप्रोक्तम् यतो धर्माद् ज्ञानभक्तिद्वारा परं परमेश्वरं विन्दते प्राप्नोति ॥ २ ॥

परमेष्ठिनः साक्षात्सुतः सुतानां मरीच्यादीनां मध्ये तपआदिनिमित्तैः सम्मतः प्रीतिविषयश्च ॥ ३ ॥

भवद्विधा नारायणपरा एव धर्मं जानन्ति ते एवोपदेष्टुं कुशलाः नान्ये इत्याह-नारायणपरा इति ॥ ४ ॥

अजाय श्रीनारायणाय ॥ ५ ॥

यः धर्मस्तद्भार्यायां दाक्षायण्यां मूर्त्तौ आत्मना स्वेच्छया अंशेन स्वांशेन नरेण सह अवतीर्य लोकानां स्वस्तये तपोऽध्यास्ते ६ ॥

धर्मे प्रमाणमाह-धर्ममूलमिति। आत्मा परमात्मा प्रसीदति तस्य धर्मस्य सर्ववेदमयो वेदमूर्तिः भगवान् मूलं प्रवर्तकः प्रमाणमित्यर्थः। तद्विदां वेदविदां स्मृतं स्मृतिश्च धर्ममूलम् ॥ ७ ॥

प्रथमं सर्वसाधारणं धर्ममाह-सत्यमिति, पञ्चभिः। सत्यं सार्वत्रिकं याथार्थ्यं तप एकादश्युपवासादिः ईक्षा हेयोपादेयविवेकः शमोऽन्तरिन्द्रियसंयमः दमो बाह्येन्द्रियसंयमः त्यागो दानम् स्वाध्यायो यथाधिकारं गुरुवाक्यसाधारणम् ॥ ८ ॥

भाषा टीका।

श्रीरुक्मिणीप्राणनाथाय नमः ॥

श्रीशुक उवाच।

श्रीशुकदेवजी बोले, कि—हे परीक्षित! महत्तमों में अग्र गण्य श्रीहरि में लग्नचित्त दैत्यपति ऐसे श्रीप्रह्लादके साधु सभामें संश्लाघनीय चरितों को सुनकर हर्षमें निमग्न हुए युधिष्ठिरजी ब्रह्मपुत्र श्रीनारदजीसे फिरपूँछने लगे ॥ १ ॥

युधिष्ठिर उवाच।

युधिष्ठिरजी बोले, कि-हे भगवन्! हे श्रीनारद जी! मैं वर्णाश्रम के आचार सहित मनुष्यों के सनातन धर्मों के श्रवण करने की इच्छा करता हूं जिनसे पुरुष परमात्माको प्राप्त होता है ॥ २ ॥

हे ब्रह्मन् आप परमेष्ठी श्रीब्रह्माजीके पुत्र हैं तपयोगसमाधि से सब पुत्रों में सम्मत हैं ॥ ३ ॥

कारुणिक साधु शान्त आप सदृश नारायणपरायण विप्रजन-ही उत्कृष्ट ऐसा गुप्त जो सनातन धर्म है तिसको जानते हैं ऐसा और हरिविमुख जन नहीं जानते हैं ॥ ४ ॥

नारद उवाच।

नारद जी बोले, कि—भगवान् अजन्मा श्रीनारायण को नमस्कार करके उनही श्रीनारायण के मुख से सुने हुए सनातन धर्मों को कहता हूं ॥ ५ ॥

जो साक्षात् अपने अंश से दक्षपुत्री श्रीमूर्ति मातामें धर्म-से अवतार लेकर लोकों के स्वस्ति (कल्याण) के लिये श्रीबदरिका आश्रम में तप आचरण करते हैं ॥ ६ ॥

धर्मका मूलतौ हे राजन्! सर्व देवमय भगवान श्रीहरी ही हैं, और वेदार्थ साक्षात्कार करनेवाले महर्षियों की स्मृतियें हैं कि जिनके आचरण से मन सन्तुष्ट होताहै ॥ ७ ॥

सत्य दया तप शौच (शुद्धि) तितिक्षा (सहन स्वभाव) शम दम अहिंसा ब्रह्मचर्य त्याग स्वाध्याय आर्जव ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

सन्तोषो दैवलब्धेनालम्बुद्धिः समदृशां महतां सेवा. ग्राम्येहोपरमः प्रवृत्तकर्मभ्यो निवृत्तिः, विपर्ययेहेक्षा निष्फलक्रियाणामीक्षणम्. मौनं वृथालापनिवृत्तिः, आत्मविमर्शनं देहादिव्यतिरिक्तात्मानुसन्धानम् ॥ ९ ॥

अन्नाद्यादेः संविभागो भूतेभ्यश्च यथाऽर्हतः ।
तेष्वात्मदेवताबुद्धिः सुतरां नृषु पाण्डव ! ॥ १० ॥
श्रवणं कीर्तनं चास्य स्मरणं महतां गतेः ।
सेवेज्या ऽवनतिर्दास्यं सख्यमात्मसमर्पणम् ॥ ११ ॥
नृणामयं परो धर्मः सर्वेषां समुदाहृतः ।
त्रिंशल्लक्षणवान् राजन् ! सर्वात्मा येन तुष्यति ॥ १२ ॥
संस्कारा यदविच्छिन्नाः स द्विजो ऽजो जगाद यम् ।
इज्याऽध्ययनदानानि विहितानि द्विजन्मनाम् ।
जन्मकर्मावदातानां क्रियाश्चाश्रमचोदिताः ॥ १३ ॥
विप्रस्याध्ययनादीनि षडन्यस्याऽप्रतिग्रहः ।
राज्ञो वृत्तिः प्रजागोप्तुरविप्राद्वा करादिभिः ॥ १४ ॥
वैश्यस्तु वार्तावृत्तिश्च नित्यं ब्रह्मकुलानुगः ।
शूद्रस्य द्विजशुश्रूषा वृत्तिश्च स्वामिनो भवेत् ॥ १५ ॥
वार्ता विचित्रा शालीनं यायावरशिलोञ्छनम् ।
विप्रवृत्तिश्चतुर्धेयं श्रेयसी चोत्तरोत्तरा ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आत्मेति देवतेपि च बुद्धिः ॥ १० ॥

अस्य श्रीकृष्णस्य श्रवणादयो नव इज्या ऽर्चनम् ॥ ११ ॥

एवं त्रिंशल्लक्षणवान् ॥ १२ ॥

इदानीं वर्णधर्मान्वक्तुं द्विजानां लक्षणमाह-संस्कारा मन्त्रवन्तो गर्भाधानादयो यस्मिन्नविच्छिन्नाः स द्विजः तर्हि शूद्रस्यापि संस्काराविच्छेदे सति द्विजत्वं स्यात्तत्राऽऽह-अजो ब्रह्मा यमेवंभूतसंस्कारयुक्तं जगाद स द्विजः शूद्रं तु न मन्त्रवत्संस्कारयुक्तं जगाद न चोपनयनवन्तमतो नासौ द्विजः तथाच स्मृतिः "विवाहमात्रसंस्कारं शूद्रोऽपि लभतां सदा । न केनचित्समसृजच्छन्दसा तं प्रजापतिः" इति. श्रुतिश्च "गायत्र्या ब्राह्मणमसृजत् त्रिष्टुभा राजन्यं जगत्या वैश्यं न केनचिच्छूद्रम्" इति अतो विवाहव्यतिरिक्तसंस्कारस्यानावश्यकत्वादुपनयनस्य तु सर्वथा निषेधाच्च तस्य द्विजत्वमित्यर्थः । पाठान्तरे वैदिकादय इति गर्भाधानादय इत्यर्थः त्रैवर्णिकानामावश्यकान्धर्मानाह-इज्येति । जन्मना विशुद्धेन कुलेन कर्मणा चाचारेण अवदातानां शुद्धानां दुष्कुलानां दुराचाराणाञ्च नैतानि विहितानीत्यर्थः । ब्रह्मचर्याद्याश्रमविहिताः क्रियाश्च शूद्रस्य तु वर्णधर्मा एव आश्रमभेदकृतविशेषाभावात् ॥ १३ ॥

ब्राह्मणादीनां चतुर्णामपि वृत्तिरूपान्धर्मानाह-विप्रस्येति सार्द्धैः सप्तभिः । विप्रस्य षट् कर्माणि विहितानीत्यनुषङ्गः । तत्र त्वध्यापनं याजनं प्रतिग्रहश्च जीविका यथाह मनुः "षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका । याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः" इति. अन्यस्य क्षत्रियस्य अप्रतिग्रह इति प्रतिग्रहातिरिक्तं याजनमध्यापनं चापद्यनुजानाति वक्ष्यति चानन्तरमेव क्षत्रं राजन्यमिति । श्रूयते चाश्वपतिकैकयप्रभृतीनां क्षत्रियाणामुपदेष्टृत्वादि प्रजापालने ऽधिकृतस्य क्षत्रियस्य वृत्त्यन्तरमाह-राज्ञ इति, आदिशब्देन दण्डशुल्कादि ॥ १४ ॥

वार्ता कृषिवाणिज्यादिलक्षणा वृत्तिर्यस्य शूद्रस्य द्विजानां शुश्रूषा विहिता स्वामिनो द्विजस्य तु शुश्रूषावृत्तिश्च भवेत् ॥ १५ ॥

विप्रस्य मुख्याऽनुकल्पभेदेन वृत्त्यन्तराण्याह—वार्तेति । वार्ता विचित्रा कृष्यादिरूपा. शालीनं धार्ष्ट्यं विनैव प्राप्तमयाचितम्. यायावरं प्रत्यहं धान्ययाच्ञा शिलं शालिक्षेत्रादौ स्वामित्यक्तकणिशोपादानं उञ्छनमापणादिपतितकणोपादानं शिलोञ्छनद्वयमेकीकृत्य चतुर्धेत्युक्तं श्रेयसी उत्तमा ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सन्तोषो दैवाल्लब्धेनालम्बुद्धिः समदृक्सेवा समदृशां महतां सेवा ग्राम्येहाभ्यः प्रवृत्तिकर्मचेष्टाभ्यः उपरमो निवृत्तिः नृणां

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

विपर्ययेहेचा निष्फलचेष्टानिरूपणां मौनं मितभाषणम् आत्मविमर्शनं देहविलक्षणात्मयाथात्म्यपरिशीलनम् ॥ ९ ॥

भूतेभ्यो यथायोग्यमन्नाद्यमन्नभक्षणां तदादेः संविभागः विभज्य प्रदानं तेषु भूतेष्वात्मदेवताबुद्धिः आत्मेति च देवतेति च बुद्धिः आत्मनः स्वस्य देवता दैवतं परमात्मा तद्बुद्धिः ब्रह्मात्मकत्वबुद्धिरिति वा स्वात्मतुल्यता बुद्धिः देवताबुद्धिश्चेति वा. इष्टदेवताबुद्धिः । हे पाण्डव ! भूतानांमध्ये नृषु मनुष्येषु तु सुतरामतीवात्मदेवताबुद्धिरित्यर्थः ॥ १० ॥

महतां गतेः भक्तानां शरण्यस्य भगवतः श्रवणं गुणश्रवणं कीर्त्तनं गुणप्रतिपादकनामादिकीर्त्तनम्. स्मरणं स्वरूपरूपगुणविभूतिस्मरणम्. सेवा पादपीडनादिरूपा. इज्याऽर्घ्यपाद्यादिनिवेदनरूपा. अवनतिः नमस्कृतिः प्रह्वीभावो वा. सख्यं सर्वात्मना आनुकूल्यम्. आत्मसमर्पणं स्वात्मनस्तदनुबन्धिनश्च तदायत्तसत्तादिमत्त्वानुसन्धानं चेत्ययं त्रिंशल्लक्षणवान् सर्वेषां नृणां साधारणः पर उत्कृष्टो धर्मः उदाहृतः प्रदर्शितः येन धर्मेण सर्वान्तरात्मा भगवान् तुष्यति प्रसन्नो भवति सोऽयं त्रिंशल्लक्षणवानित्यर्थः ॥ ११ ॥ १२ ॥

एवं नृणां साधारणं धर्ममभिधायाथ नरविशेषाणां ब्राह्मणादीनां वर्णानां त्रयाणामावश्यकान् धर्मान्विवक्षुस्तावत् त्रैवर्णिकसाधारण्येन द्विजत्वलक्षणमाह–संस्कार इति । यद्यत्र संस्काराः गर्भाधानादयः षोडश अविच्छिन्नाः स द्विजः । ननु, शूद्रस्यापि तदविच्छेदे द्विजत्वं स्यात्तत्राह, अजो ब्रह्मा यमेव संस्कारयुक्तं जगाद श्रुतिस्मृतिमुखेन स द्विजः, शूद्रं तु न मन्त्रवत्संस्कारयुक्तं जगाद. न चोपनयनवन्तमतो नाऽसौ द्विजः । तथा च स्मृतिः—

"विवाहमात्रं संस्कारं शूद्रोऽपि लभतां सदा ।
न केन चित्समसृजच्छन्दसा तं प्रजापतिः" ॥ इति.

श्रुतिश्च—गायत्र्या ब्राह्मणमसृजत्त्रिष्टुभा राजन्यं जगत्या वैश्यं न केनाचिच्छूद्रम्"इति । अतो विवाहव्यतिरिक्तसंस्कारस्याभावात् उपनयनस्य निषेधाच्च तस्य द्विजत्वमुच्यते इति व्याचक्षते । वस्तुतस्तु, द्विजत्वादिकमदृष्टविशेषसम्बन्धरूपं न जातिरूपं न ब्राह्मणादेर्ब्राह्मण्यादिषूत्पत्तिमात्ररूपं केवलसंस्कारमात्रवत्त्वं वा अन्यथाऽऽदिकाले ब्रह्मणो मुखबाहूरुपत्प्रभवानांपश्चाद्विश्वामित्रप्रभृतीनां च ब्राह्मण्याद्यभावप्रसङ्गात् सन्तानविशेषप्रसूतत्वादिकं च तादृगदृष्टविशेषवत्त्वसूचकं सन्तानविशेषोत्पत्तेस्तन्मूलकसंस्कारादेश्च प्रकृष्टादृष्टकार्यत्वाद्लौकिकप्रकर्षविशेषकारणत्वाच्च । एवं च "कार्येण कारणानुमानम्"इति न्यायेन यत्र कार्यभूताः संस्काराः अविच्छिन्नाः पित्रादिपरम्पराऽविच्छिन्ना दृष्टाः स द्विज इत्यर्थः । सन्तानविशेषप्रभवत्वतन्मूलकसंस्कारादिमत्त्वानुमितादृष्टसम्बन्धविशेषवान् द्विज इति यावत् संस्काराश्च ब्राह्मणादेर्ब्राह्मण्यादिषु प्रसूतस्यैव कर्त्तव्यत्वेन प्रजापतिना"अष्टवर्षं ब्राह्मणमुपनयीत" इत्यादिश्रुतिस्मृत्यादिमुखेन प्रगदिताः तथा च यत्सन्तानविशेषप्रभवं संस्कारमजो जगाद तत्सन्तानप्रभवत्वानुमितादृष्टविशेषसम्बन्धवान् द्विज इति फलितोऽर्थः । त्रैवर्णिकानामावश्यकान् धर्मानाह–इज्येति । जन्मना कुलेन कर्मणा चावदातानां शुद्धानां द्विजानां त्रैवर्णिकानामिज्यादीनि स्वाश्रमचोदिताः ब्रह्मचर्याद्याश्रमेषु विहिताः क्रियाः चोदितानि विहितानि एषामकरणे प्रत्यवाय इति भावः । तुर्याश्रमिणामनग्नित्वेनेज्याया अभावात्तदभिप्रायेण स्वाश्रमचोदिताः क्रिया इत्युक्तम्. साग्नित्वे इज्यादीनि त्रीणि स्वाश्रमचोदिताः क्रियाः चेत्येतानि विहितानि अनग्नित्वेत्वाश्रमचोदिताः क्रियाविहिता इत्यर्थः । अनाश्रमिणां विधुरादीनां तु पूर्वोक्तत्रिंशल्लक्षणवान् धर्म इति भावः ॥ १३ ॥

एवं त्रैवर्णिकानामावश्यकान् धर्मानभिधायाऽथ तत्र विप्रस्य जीविकाधर्मानाह—विप्रस्याध्यापनादीनीति । आदि शब्देन याजनप्रतिग्रहौ विवक्षितौ याजनाध्यापनप्रतिग्रहाः जीविकाधर्माः इज्याऽध्ययनदानादीनि त्वावश्यकाधर्मा इत्यर्थः । एवं संभूय विप्रस्य षट् धर्माः तथा चोक्तं मनुना—

"षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका ।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः" ॥ इति.

अथ क्षत्रियस्य जीविकाधर्मानाह—अन्यस्याऽप्रतिग्रह इति, अत्रान्यस्य क्षत्रियस्याऽप्रतिग्रह इति प्रतिग्रहातिरिक्तं याजनमध्यापनं चानुजानाति, वक्ष्यति चानन्तरमेव "ऋतेराजन्यम्"इति. श्रूयते च अश्वपतिकैकयप्रभृतीनांक्षत्रियाणामुपदेष्टृत्वादिप्रजापालनेऽधिकृतस्यक्षत्रियस्य वृत्त्यन्तरमाह–राज्ञ इतीति व्याचक्षते तच्चिन्त्यम्. "प्रभुत्वादार्त्विज्यं सर्ववर्णानां स्यात्"इति द्वादशाध्यायान्त्याधिकरणे क्षत्रियादेर्याजनाध्यापनयोः प्रतिषिद्धत्वात् । तत्र हि दर्शपौर्णमासज्योतिष्टोमादिषु किं त्रिभिरपि द्विजातिभिरार्त्विज्यं कारयितव्यमुत ब्राह्मणैरेवेति संशय्य तत्र त्रयोऽप्यार्त्विज्यमर्हन्ति विद्वत्त्वाद्वरणं पुनः पुरुषार्थमतः कर्मवैगुण्यं नास्ति । किञ्च याजनाध्यापनप्रतिग्रहाः ब्राह्मणस्यैव वृत्त्युपाया इति नियमः पुरुषार्थतया स्मर्यते न क्रत्वर्थतया तेन क्षत्रियवैश्यावार्त्विज्यं कुर्वन्तौ नियमाऽतिक्रमात्कामं स्वधर्मात्प्रच्यवेयातां न क्रतोः कदाचिद्गुणहानिः तस्मात् त्रिभिरप्यार्त्विज्यं कारयितव्यमिति पूर्वपक्षं प्रापय्य "द्विजोत्तमानामार्त्विज्यं ननु क्षत्रियवैश्ययोः ब्राह्मणार्त्विज्यनियमः क्रत्वर्थेनापिहि स्मृतः" यद्वा व्याख्यास्याम इत्युपक्रम्य "ब्राह्मणानामार्त्विज्यम्"इति यज्ञसूत्रकाराः क्रत्वर्थेन स्मरन्तीति स्पष्टमेतत्. तथा च भगवद्रामायणेऽपि—

"क्षत्रियो याजको यस्य चण्डालस्य विशेषतः ।
कथं सदसि भोक्तारो हविस्तस्य सुरर्षयः" ॥ इति.

सुरा देवता ऋषयश्च ऋत्विक्भूता इति देवताहविर्भागनिराकरणात् क्रतुवैगुण्यमेवदर्शितम् "राजयाजकयाजस्य विनश्यति यथा हविः" इति ब्राह्मणार्त्विज्ये हविर्विनाशः स्मृतः लिङ्गानि च दर्शितानि "ब्राह्मणानामिदंहविः"इत्येवमादीनि तस्माद्ब्राह्मणानामेवार्त्विज्यं सिद्धमिति राद्धान्तितम्. तस्माच्च राजन्यवैश्ययोर्याजनाध्यापनाधिकारः अश्वपतिकैकयप्रभृतीनां यद्वेदान्तेषूपदेष्टृत्वमवगतम् नतदध्यापनरूपं किन्तु सूतादीनामिव

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ब्रह्मस्वरूपतदुपासनाद्युपदेष्टृत्वरूपम्. अध्यापनंनाम स्वोच्चारणानूच्चारणाय शिष्योद्देशेन भागद्वयात्मकवेदराशेः साङ्गस्य स्वरवर्णाद्यनपभ्रंशपूर्वकमुच्चारणम् तस्मादप्रतिग्रह इत्यस्यायमर्थः। प्रतिग्रहग्रहणं याजनाध्यापनयोरप्युपलक्षणम्. ये ब्राह्मणानां याजनाध्यापनप्रतिग्रहरूपा वार्तारूपा धर्माः न ते राजन्यादेर्जीविका धर्मा इति. का तर्हि राजन्यादेर्वृत्तिरित्याह—राज्ञ इति. तत्र राजन्यो द्विविधः प्रजापालनाधिकृतस्तदनधिकृतश्चेति. तावदाद्यस्य वृत्तिरनेनो च्यते द्वितीयस्य तु ऋतामृताभ्यामित्यनेन वक्ष्यति प्रजागोप्तुः प्रजापालनाधिकृतस्य राज्ञो राजन्यस्याऽविप्राद्विप्रेतरात् करादिभिर्वृत्तिः स्वामिग्राह्यभागः करः तद्वादिभिरादिशब्देन दण्डशुल्कादिकं विवक्षितं वा शब्देन प्रजापालनानधिकृतस्य तु वृत्त्यन्तरमेवेति सूचयति ॥ १४ ॥

अथ वैश्यस्याह–वैश्य इति। नित्यं ब्रह्मकुलं विप्रकुलमनुगच्छत्यनुवर्त्तते इति अनुगः तादृशस्सन् वार्त्ता कृषिवाणिज्यादिलक्षणा वृत्तिर्यस्य स भवेत् । अथ शूद्रस्याऽवश्यकं धर्मं वृत्तिरूपंचाह–शूद्रस्येति। तत्र द्विजशुश्रूषा शूद्रस्यावश्यको धर्मः स्वामिनो वृत्तिश्च भवेत्स्वामिदत्तेनान्नादिना जीवनं भवेदित्यर्थः ॥ १५ ॥

एवं चतुर्णां वर्णानामावश्यकान् जीविकारूपांश्च धर्मानभिधायाऽथतेषामेवोक्तवृत्त्यलाभे वृत्त्यन्तराणि विवक्षुस्तावद्ब्राह्मणस्य मुख्यानुकल्पभेदेन वृत्त्यन्तराण्याह–वार्त्तेति। विचित्रावार्त्ता कृषिगोरक्षादिरूपा शालीनं धार्ष्ट्यं विनैव प्राप्तमयाचितमित्यर्थः।"शालीन कौपीने धृष्टा कार्ययोः"इति निपातितः शालीनशब्दः। इदं द्वितीयं यायावर्यं यायावरः प्रवासी तस्य कर्म यायावर्यं प्रवासादिना याच्ञापूर्वकमर्जनं तृतीयं शिलोञ्छनम् "उञ्छः कणश आदानं कणिशाद्यर्जनं शिलम्" तदुभयमेकीकृत्य चतुर्थंयं विप्रस्य वृत्तिरित्युक्तम् आसां चतसृणां वृत्तीनां पूर्वपूर्वापेक्षयोत्तरोत्तरा श्रेयसी ज्यायसी उत्तमेति यावत्। यद्यपि पूर्वं विप्रस्याध्ययनादीनि षडन्यस्याप्रतिग्रह इति विप्रस्य प्रतिग्रहवृत्तेः कथितत्वात् अत्र शालीनं यायावर्यमिति च न कथनीयम्; तथापि स एव प्रतिग्रहो याच्ञापूर्वकस्तदपूर्वकश्चेति द्विविध इति वक्तुं शालीनं यायावर्यंचेत्युक्तम् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ग्राम्येहोपरमः विषयभोगेच्छानिवृत्तिः विषयविपर्ययेहेच्छा प्राणिनां स्वत एव निषिद्धकर्मचेष्टा ईहा तस्याः पर्यालोचनं मोक्षविपरीतप्रवृत्तिदर्शनं वा मौनं मन्त्रार्थचिन्तनं प्रलापवर्जनं वा आत्मविमर्शनमात्मविचारः ॥ ९ ॥

तेषु नृषु आत्मदेवताबुद्धिः परमात्माऽस्थित इति ज्ञानम् सुतरामित्यनेन नृषु विशेषतः कर्त्तव्यमिति सूचयति—

"अहिंसा सत्यमस्तेयं शौचमिन्द्रियसंयमः।
दमः क्षमार्जवं दानं सर्वेषां धर्मसाधनम्" ॥

इति स्मृतत्वाद्देषां धर्माङ्गत्वं नतु धर्मत्वमिति ज्ञातव्यम् ॥ १० ॥

ननु, तर्हि कोयं धर्मो नामेत्याशङ्क्य सर्वसाधारणं धर्ममाह—श्रवणमिति। महतां या गतिः स्थितिस्तस्याः सेवा सङ्गतेः सेवेति वा दास्यात्मसमर्पणयोरेकार्थत्वात् कथं पृथग्ग्रहणं कृतमित्याशङ्का—

अनाद्यनन्तकालेषु मुक्तौ संसार एव च ।
मयिस्थश्चोदयत्येको विष्णुर्मां सर्वदैव तु ॥
इति सम्प्रीतिकं ज्ञानं विद्यादात्मसमर्पणम् ।
वहिश्चेश्वरदासत्वं दास्यमित्युच्यते बुधैः ॥

इत्यनेन परिहरणीया, अनाद्यनन्तकालं मयि स्थित्वा विष्णुः सर्वत्र मां प्रेरयतीति प्रीतिपूर्वकज्ञानमात्मसमर्पणं प्रतिमादिसन्निहितभगवद्दासत्वज्ञानं दास्यम् ॥ ११ ॥

तारतम्यज्ञानार्थं ब्रह्मादिविषयश्रवणादिरपि धर्मः स्यादतो विशिष्योच्यत इत्यत उक्तं पर इति, "एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः" इति वचनात्समुदाहृत इति समीचीनत्वं कुतोऽत्राह—त्रिशल्लक्षणेति। अनन्तलक्षणस्य हरेस्त्रिंशल्लक्षणयुक्तत्वं "तथापि पुरुषाकारो भक्तानां त्वं प्रकाशसे" इति वचनाद् भक्तप्रकाश्याकारविषयविवक्षया "सप्तपादश्चतुर्हस्तः" इत्यादिशास्त्रेषु पुरुषलक्षणस्य निरूपितत्वात् इदं च भक्तिप्रचयाय प्रोक्तमिति ज्ञायते अनेन भगवत्तोषकरो धर्मो नान्य इत्युक्तं भवति ॥ १२ ॥

एवं धर्मस्वरूपं निरूप्य तदधिकारिणं निरूपयति—संस्कारा इति। निषेकादिश्मशानान्ता ये संस्कारास्ते यस्याविच्छिन्ना अखण्डिताः स द्विजः स एवाधिकार्यत्रेति शेषः। अविच्छेद्यत्वेन कर्तव्यत्वे कोहेतुरिति तत्राह—वैदिकेति । वेदप्रतिपाद्यत्वेन प्रामाणिकत्वेन कर्तव्या इत्यर्थः। नन्विदं द्विजमात्रसामान्यं किन्नेत्याह—आदय इति स्त्रीणां ब्राह्मणजातित्वेपि मन्त्रेण क्रिया एता इति यदतः शिष्टाचारत्वेन संगृहीतत्वात् एवं वैदिकत्वेपि कर्तव्यत्वं नतु स्त्रीणां वैदिकसंस्काराभावे यागानधिकारित्वमित्यस्येदमेवोत्तरं वैदिकादय इति वैदिका अवैदिकाश्च सन्तीत्यर्थः तदुक्तम्—

"निषेकाद्याः श्मशानान्तास्तेषां वै मन्त्रतः क्रियाः।
गर्भाधानमृतौ पुंसवनं च स्पन्दनात्पुरा ॥
षष्ठेऽष्टमे वा सीमन्तो मासुतो जातकर्म च।
अहन्येकादशे नाम चतुर्थे मासि निष्क्रमः ॥
षष्ठेऽन्नप्राशनं मासे चूडा कार्या यथाकुलम् ।
एवमेनः शमं याति वीजगर्भसमुद्भवम् ॥
तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समन्त्रकः ।

इत्यादि—

तां पूषञ्छिवतमामेरयस्व यस्यां वीजं मनुष्या वपन्ति ।
या न उरू उशती विश्रयाते यस्यामुशन्तःप्रहराम शेपं ॥
उपोयमे परामृश्य मा मे दभ्राणि मन्यथाः ।
सर्वाहमस्मि रोमशा गन्धारीणामिवाम्बिका ॥

इत्यादि संस्कारमन्त्राः ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चत्वारः वर्णास्तेषां आद्यास्त्रयो द्विजाः तेषां साधारणं धर्ममाह इज्येति "ब्रह्मक्षत्रियविट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः" इति स्मृतेः "इज्याध्ययनदानानि विप्रस्य क्षत्रियस्य च" इत्यादेः एतान्यपि द्विजमात्रस्य न किन्तु विशिष्टानामित्याशयेनाह—जन्मेति। जन्मना

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कर्मणा वाऽवदातानां "कारीर्या यजेत वृष्टिकामः, मलवद्वाससा न सम्वदेत्" इत्यादिवेदोदिताः क्रियाश्च विहिता इत्याह, क्रिया इति ॥ १३ ॥

विशेषधर्ममाह—विप्रस्येति । अध्यापनयाजनप्रतिग्रहाः ततो ब्राह्मणादन्यस्य क्षत्रियादेरप्रतिग्रहः "प्रतिग्रहाधिको विप्रो याजनाध्यापने तथा" इति वचनात् प्रतिग्रहादिनापि प्रवृत्तिमभिप्रेत्य राजादिवृत्तिमाह—राज्ञ इति । आदिशब्देन न्यायतो दण्डाद्यागतं धनं गृह्यते प्रजागोप्तुरित्यनेन प्रजागुप्त्यैव ततो धनमाहर्तव्यम् अन्यथा दुष्कृतमेवादत्त इति सूचयति, वाशब्देन देवा गृह्यन्ते देवविप्रैर्विनेत्यर्थः दण्डार्हविप्रमन्तरेण चेति॥१४॥

वार्ता कृषिगोरक्षवाणिज्यलक्षणा स्वामिनः सकाशाज्जीवनं चेति शेषः । भृत्यानां स्वामिनः तच्छ्रूषा च वृत्तिरिति वा ॥ १५॥

विप्रवृत्तिं कण्ठोक्त्याह—वार्तेति । अत्र वार्तादिकमापदीति ग्राह्यं विप्राऽनुज्ञया क्षत्रियवैश्ययोस्तत्त्वविज्ञापनं धर्म इत्युच्यते ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

संस्कारा इत्यर्द्धकम्. ननु, शूद्रस्यापि तेषु संस्कारेषु कृतेषु द्विजत्वं स्यात्तत्राह—अजो यं सृष्ट्वा द्विजं जगाद द्विजत्वेन निर्दिदेश तज्जातिक एव संस्कारेषु लब्धेषु द्विजः स्यादित्यर्थः ॥ १३ ॥

अविप्राद्वेति वा शब्दात् क्वचिद्विप्रादपीत्यर्थः । वपनं द्रविणादानमित्यादेः ॥ १४ ॥ ३५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

समदृशां महतां सेवा विपर्ययेहा निष्फलक्रियास्तासां पर्य्यालोचनं मौनं वृथा वाक्यनिवृत्तिः आत्मविमर्शनमात्मनो देहभिन्नत्वभावना ॥ ९ ॥

अन्नाद्यादेः अन्नमोदनं आद्यं मोदकादि तत्तदादेर्वस्त्रस्रक्चन्दनादेर्यथोचितं विभज्यैव ग्रहणम् आत्मवत् देवतावच्च बुद्धिर्भावना ॥ १०—१२ ॥

इदानीं वर्णधर्मान् वक्तुं द्विजानां लक्षणमाह—संस्कारा मन्त्रवन्तो गर्भाधानादयो यस्मिन् स वा स द्विजः विच्छिन्नसंस्कारो द्विजबन्धुरित्यर्थः । अजो ब्रह्मा यं जगादेति ब्रह्मसृष्ट्यारम्भत एव प्रवृत्तायां द्विजजातौ विशुद्धमातापितृकं जन्मैव मुख्यं लक्षणमित्यर्थः ॥ १३ ॥

ब्राह्मणादीनां चतुर्णां वृत्तिरूपान् धर्मानाह—विप्रस्येति सार्द्धैः सप्तभिः । षट् विहितानीत्यनुषङ्गः । तत्र त्वध्यापनं याजनं प्रतिग्रहश्च जीविका । तथा च मनुः—

"षण्णान्तु कर्मणामस्य त्रीणि कर्माणि जीविका ।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः" ॥ इति

अन्यस्य क्षत्रियस्य अप्रतिग्रह इति याजनाध्यापने आपद्वृत्ती प्रतिग्रहस्तस्यापद्यपि निषिद्धः प्रजागोप्तुरिति पाल्यमानाभिः प्रजाभिर्दत्तं प्रणत्युपायनमेव वृत्तिरित्यर्थः । विप्रभिन्नात् लोकात् करदण्डशुल्कादिभिर्वा ॥ १४ ॥

वार्ता कृषिवाणिज्यादयो वृत्तिर्यस्य सः द्विजशुश्रूषा धर्मः स्वामिनो द्विजस्य शुश्रूषा सेवा वृत्तिश्च ॥ १५ ॥

विप्रस्य वृत्त्यन्तराण्याह—वार्ता विचित्रा विविधा तत्र शालीनमयाचितं यायावरं प्रत्यहं धान्यमात्रयाच्ञा शिलं शालिक्षेत्रादौ स्वामित्यक्तकणिशोपादानं उञ्छनं आपणादिपतितकणोपादानम् ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः :

सन्तोषो न्यायागतेनान्नादिना ऽलंबुद्धिः ग्राम्येहोपरमः अधार्मिकजनचेष्टात्यागः विपर्ययेहा विपरीतफलासु चेष्टासु हेयदृष्टिः मौनं निष्फलभाषणत्यागः आत्मविमर्शनं देहेन्द्रियमनोबुद्धिभ्यः पृथक्भूतस्यात्मनो ऽनुसन्धानम् ॥ ९ ॥

तेषु भूतेषु आत्मवत् मानार्हत्वात् देवतावद्भगवद्वत् भगवदंशत्वात् बुद्धिर्भावना ॥ १० ॥

अस्य श्रीकृष्णस्य सेवा परिचर्या इज्याऽर्चनम् ॥ ११ ॥

नृणामित्युपलक्षणं तत्कलत्रस्यापि त्रिंशल्लक्षणवान् सत्यत्वादित्रिंशद्विभागवान् येन सर्वात्मा भगवान् तुष्टो भवति ॥१२॥

इदानीं वर्णधर्मान् वक्तुं द्विजलक्षणमाह—यमजो ब्रह्मा गायत्र्यादिना सृष्ट्वा जगाद द्विजकुलत्वेनोक्तवान् यत्रैव गर्भाधानादयः संस्काराः अविच्छिन्नाः स द्विजः ब्रह्मप्रवर्तितकुलजः संस्कारवान् द्विज इत्यर्थः । "गायत्र्या ब्राह्मणमसृजत् त्रिष्टुभा राजन्यं जगत्या वैश्यं न केनचिच्छन्दसा शूद्रम्" इति श्रुतिरत्रानुसन्धेया शूद्रकुलं मंत्रपूर्वकं ब्रह्मणानप्रवर्तितमत एव शूद्रस्य द्विजातिसंस्काराभावान्न द्विजत्वं "विवाहमात्रसंस्कारं शूद्रोऽपिलभतां सदा" "न केनचित् समसृजच्छन्दसा तं प्रजापतिः" इति श्रुतिः द्विजावश्यकान् धर्मानाह—इज्येति । जन्मना ब्रह्मप्रवर्तितकुलोत्पत्त्या कर्मणा संस्कारेण चावदातानां शुद्धानाम् आश्रमचोदिताः ब्रह्मचर्याद्याश्रमविहिताः ॥ १३ ॥

चतुर्णां वर्णानामावश्यकान् जीविकारूपांश्च धर्मानाह—विप्रस्येति, सार्द्धैः सप्तभिः । अध्ययनाध्यापनयजनयाजनदानप्रतिग्रहाः इत्यध्ययनादीनि षट् कर्माणि निरस्य, तत्राध्यापनयाजनप्रतिग्रहाश्च जीविकाः

"षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविकाः ।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः" ॥ इति.

मनुवचनात् अन्यस्य क्षत्रियस्य अप्रतिग्रहः प्रतिग्रहाभावः अर्थात्प्रतिग्रहातिरिक्तानि अध्ययनाध्यापनयजनयाजनदानानीत्यर्थः ॥ १४ ॥

जघन्यो नोत्तमां वृत्तिमनापदि भजेन्नरः ।
ऋते राजन्यमापत्सु सर्वेषामपि सर्वशः ॥ १७ ॥

ऋतामृताभ्यां जीवेत मृतेन प्रमृतेन वा ।
सत्यानृताभ्यां जीवेत न श्ववृत्त्या कथञ्चन ॥ १८ ॥

ऋतमुञ्छशिलं प्रोक्तममृतं यदयाचितम् ।
मृतं तु नित्ययाञ्चा स्यात्प्रमृतं कर्षणं स्मृतम् ॥ १९ ॥

सत्याऽनृतं तु वाणिज्यं श्ववृत्तिर्नीचसेवनम् ।
वर्जयेत्तां सदा विप्रो राजन्यश्च जुगुप्सिताम् ।
सर्ववेदमयो विप्रः सर्वदेवमयो नृपः ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कृषिवाणिज्यादिरूपा वार्त्ता वृत्तिर्यस्य सः शूद्रस्य द्विज-शुश्रूषा आवश्यको धर्म इत्यर्थः । स्वामिन. अन्नादिदानेन नियत-कैंकर्यंकारयितुस्तु द्विजस्य शुश्रूषा वृत्तिर्जीविका भवेदित्यर्थः ॥१५॥

विप्रस्य जीविकान्तरमाह—वार्तेति । विचित्रा वार्त्ता कृष्यादि-रूपा शालीनमयाचितग्रहणम् यायावरं भिक्षाटनम् शिलोंछनं चेति चतुर्द्धा ॥ १६ ॥

भाषा टीका ।

सन्तोष, समदर्शियों की सेवा, धीरे धीरे ग्राम्य चेष्टाओं से विराम, मनुष्यों की लौकिक चेष्टाओं को निष्फल देखना, मौन और आत्मा का विचार ॥ ९ ॥

हे पाण्डव ! और यथा योग्य प्राणी मात्र को अन्नादिका अच्छी तरह विभाग करना उन अतिथि प्रभृति प्राणियों में और मनुष्यों में निरन्तर दैवत बुद्धि करना ॥ १० ॥

आपने दैवत श्रीहरिके गुणोंका श्रवणऔर कीर्तन तथा महज्जनों के प्राप्य श्रीगोविन्दकी सेवा पूजा साष्टांगप्रणाम, दास भाव सख्य भाव, और आत्मसमर्पण, अर्थात् पञ्चरात्र शास्त्रोक्त भगवत्-शरणागतिः ॥ ११ ॥

हे राजन्! यह सर्व मनुष्यों का साधारण तीस (३०) लक्षण वाला धर्म कहा गया है सर्वात्मा श्रीमन्नारायण इसी के आचारण से सन्तुष्ट होते हैं ॥ १२ ॥

और अविच्छिन्न अर्थात् परम्परासे संस्कार गर्भाधानादि निरन्तर जिनके यहां चले आते हैं और ये संस्कार ब्रह्माने जिस व्यक्तिके कहे हैं वेही द्विजहै । और द्विजन्माओं को अर्थात् ब्राह्मण क्षत्रिय और वैश्यको जोकि जन्मकर्म से शुद्ध हैं उनको इज्या (यज्ञ करना) अध्ययन (वेदपढना) दान (दान देना) यह तीन कर्म वेद विदित हैं, और आश्रम के उचित जो किया है वो भी विहित हैं ॥ १३ ॥

और ब्राह्मण को अध्ययनादिक छै (६) कर्म विहित हैं, वो छै ये हैं कि (यजन याजन अध्ययन अध्यापन, दान प्रतिग्रह) ब्राह्मण से अन्य को प्रतिग्रह (दानलेना) निषिद्ध है प्रजा-पालक राजा की जीविका यह है कि विप्र को छोडकर और लोगों से षष्ठांश कर लेवै ॥ १४ ॥

वैश्य की जीविका वार्त्ता (खेती, गोरक्षा, व्यापार, व्याज) है । और सदा ब्राह्मण कुलके अनुगामी रहना यह वैश्य का धर्म है शूद्र को तीन वर्णों की शुश्रूषा करके जीविका करना यही शूद्र का धर्म है ॥ १५ ॥

खेती, १ ढिठाईके विना, विना मांगे मिलजावै; २ प्रतिदिन अन्न की भिक्षा, ३ (शिल) खेत में शिला बीनले, ऊंछ बाजार में दाना बीनले, ४ बस यह चार प्रकार की वृत्ति ब्राह्मण की हैं, इसमें उत्तरोत्तर श्रेष्ठ हैं ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वृत्तिष्वेव व्यवस्थां दर्शयन्नापद्वृत्तीराह—जघन्यो नीचः उत्तमामध्यापनादिरूपां ऋते राजन्यं क्षत्रियस्तु प्रतिग्रहादन्यां भजेत् ॥ १७ ॥

चतुर्विधां पूर्वोक्तां विप्रवृत्तिमितरेषामपि दर्शयन्नाह—ऋतामृताभ्यामिति ॥ १८ ॥

श्लोकं व्याचष्टे ऋतमिति ॥ १९ ॥

तयोस्तद्वर्जने हेतुमाह—सर्ववेदमय इति ॥ २० ॥

शमो दमस्तपः शौचं सन्तोषः क्षान्तिरार्जवम् ।
ज्ञानं दया ऽच्युतात्मत्वं सत्यं च ब्रह्मलक्षणम् ॥ २१ ॥
शौर्यं वीर्यं धृतिस्तेजस्त्याग आत्मजयः क्षमा ।
ब्रह्मण्यता प्रसादश्च रक्षा च क्षत्रलक्षणम् ॥ २२ ॥
देवगुर्वच्युते भक्तिस्त्रिवर्गपरिपोषणम् ।
आस्तिक्यमुद्यमो नित्यं नैपुण्यं वैश्यलक्षणम् ॥ २३ ॥
शूद्रस्य सन्नतिः शौचं सेवा स्वामिन्यमायया ।
अमन्त्रयज्ञो ह्यस्तेयं सत्यं गोविप्ररक्षणम् ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वर्णानामभिव्यञ्जकरूपान्धर्मानाह—शम इति, चतुर्भिः । अच्युतात्मत्वं श्रीविष्णुपरत्वम् ॥ २१ ॥

शौर्यं युद्धोत्साहः वीर्यं प्रभावः तेजःप्रागल्भ्यम् त्यागो दानं आत्मनो मनसो जयः ॥ २२ ॥ २३ ॥

अमन्त्रयज्ञः नमस्कारेणैव पञ्चयज्ञानुष्ठानं तथाच याज्ञवल्क्यः "नमस्कारेण मन्त्रेण पञ्चयज्ञान्नहापयेत्" इति ॥ २४ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एव विप्रस्य याजनाद्यलाभे वार्तादिरूपा वृत्तिस्तत्राप्युत्तरोत्तरोत्तमत्वं चोक्तम् अथोत्तरोत्तरवर्णस्य स्वस्ववृत्त्यलाभरूपापदिपूर्वपूर्ववर्णस्य चोत्तरोत्तरस्य वा वृत्त्याश्रयणं वक्तुं तावदनापदितदाश्रयणं निषेधति—जघन्य इति । जघन्यवर्णो नरः अनापदि स्वस्ववृत्त्यलाभरूपापदभावे उत्तमां पूर्वपूर्ववर्णसम्बन्धिनीं वृत्तिं न भजेन्नाश्रयेत् आपत्सु तु राजन्यं विना राजन्यव्यतिरिक्तानां सर्वेषामपि यथालाभं सर्वा अपि वृत्तय आश्रयणीया भवन्ति सर्वेषां सर्वश्च इत्येतावत्युक्ते राजन्यस्य प्रजापालनप्रयुक्तकरादानरूपस्ववृत्त्यलाभरूपापदि याजनाध्यापनप्रतिग्रहादिरूपपूर्ववर्णवृत्त्याश्रयणं वार्ताशुश्रूषयोरुत्तरवर्णवृत्त्योश्चाश्रयणं प्रसक्तमृतेराजन्यमिति निषिध्यते ॥ १७ ॥

अथ विप्रराजन्ययोः स्वस्ववृत्त्यलाभरूपापद्युपादेयां वृत्तिं निष्कृष्य दर्शयन्नुत्तरोत्तरवर्णसेवारूपां वृत्तिं प्रतिषेधति—ऋता मृताभ्यामिति । ऋताद्यन्यतमेन जीवेत श्ववृत्त्या तु कथञ्चन न जीवेत सर्वथा श्ववृत्तिं नाश्रयेदित्यर्थः ॥ १८ ॥

ऋतादिपदार्थानाह—सार्द्धेन ऋतमिति । स्पष्टोऽर्थः ॥ १९ ॥

न कथञ्चनेति व्याचष्टे—वर्जयेदिति । विप्रो राजन्यश्च तां नीचसेवां स्वोत्तरवर्णसेवां जुगुप्सितां निन्दितां परिवर्जयेत् जुगुप्सितत्वमेव वदन्विप्रराजन्यौ विशिनष्टि—सर्ववेदमय इति । प्राचुर्ये मयट् पूज्ययोः पूजकसेवानिन्दितेति भावः ॥ २० ॥

अथवर्णानामभिव्यञ्जकान् धर्मानाह—शम इति चतुर्भिः । शमादिपदार्थानामर्थास्त्रिंशल्लक्षणधर्मव्याख्यायामुक्ताः । तत्र शान्तिरक्रोधः अच्युतात्मत्वमच्युतप्रवणचित्तत्वम् । शमादिकं ब्रह्मलक्षणं ब्राह्मणकुलाभिव्यञ्जकमित्यर्थः ॥ २१ ॥

शौर्यमिति । शौर्यादिक्षत्रलक्षणं क्षत्रियत्वाभिव्यञ्जकं तत्र शौर्यं स्वगृह इव युद्धे प्रवेशसामर्थ्यं वीर्यं परैरनभिभाव्यत्वं धृतिः धैर्यमापद्यदुःखित्वं तेजः पराभिभवसामर्थ्यं त्यागः लोभराहित्यदानशीलता आत्मजयो देहजयः देहधर्मैरनभिभाव्यत्वं क्षमा सहिष्णुता ब्रह्मण्यता ब्राह्मणकुलानुवृत्तिः प्रसादोऽनुग्रहः रक्षा प्रजापालनम् ॥ २२ ॥

एवं देवादिभक्त्यादिकं वैश्यलक्षणं तत्र देवगुर्वच्युतेभक्तिः देवाश्च गुरवश्चार्या ज्ञानवृद्धागावश्चैषां भक्तिः त्रिवर्गेण धर्मादिपुरुषार्थत्रयेण परितोषणं परितुष्टिः अस्ति परलोक इति मतिर्यस्य सः आस्तिकस्तस्य भाव आस्तिक्यं नित्यमुद्यमः अर्थार्जने प्रयत्नः तत्र नैपुण्यम् ॥ २३ ॥

शूद्रस्य सन्नत्यादिकं लक्षणमित्यनुषङ्गः । सन्नतिः पूर्ववर्णविषये नम्रता. शौचं स्नानादिजं स्वस्वामिन्यमायया निष्कपटभावेन सेवा. अमन्त्रयज्ञः नमस्कारेणैवच यज्ञानुष्ठानम्. तथाच याज्ञवल्क्यः "नमस्कारेण मन्त्रेण पञ्च यज्ञान्नहापयेत्" इति. अस्तेयमचौर्यं सत्यमनृतावदनं गवां विप्राणाञ्च रक्षणम् ॥ २४ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तदभावे शूद्रस्य कथमिति तत्राह—जघन्य इति । जघन्यो नरः शूद्रोऽनापदि तत्सद्भावे उत्तमां वृत्तिं तत्त्वज्ञानलक्षणां न भजेन्न कुर्यादित्यन्वयः । आपदि तदभावे तदनुज्ञया कुर्यादित्यतो नापदीति विशेषणं पालनादि वृत्तिं वा । ननु, वर्णहीनस्य कथमित्यस्येदमेवोत्तरं जघन्यो वर्णहीनो नापद्यप्युत्तमां वृत्तिं न भजेत "वर्णोत्तमेषु वर्णस्तु न ज्ञानी स्यात् कथञ्चन" इति श्रुतिः ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

राजानं विना सर्वेषां विप्रादीनामापद्युक्तसर्ववृत्तिभिर्जीवने दोषो नास्तीत्याह—ऋते राजन्यमिति ॥ १७ ॥

ऋतादीनामप्रतीतार्थत्वाद्व्याचष्टे—ऋतमित्यादिना । कर्षणम् कृषिः ॥ १८ ॥ १९ ॥

श्ववृत्तिवर्जनेहेतुमाह-सर्वेति । "सर्वा देवता वेदविदि ब्राह्मणे वसन्ति" इति श्रुतेः नाविष्णुः पृथिवीपतिरित्यादेश्च ॥ २० ॥

विप्रादीनां विविच्य ज्ञाने प्रथमं लक्षणमाह—शम इत्यादिना । अच्युतात्मत्वमच्युतमनस्कत्वम् ॥ २१ ॥

त्यागो दातव्ये मुक्तहस्तता आत्मजयो मनोजयः ॥ २२ ॥

त्रिवर्गैर्धर्मार्थकामैः ईश्वरपरितोषणं त्रयो वर्गा येषां ते त्रिवर्गाः तेषां द्रव्यादिना परितोषणम् ॥ २३ ॥

शूद्रस्यांततः सकृत्स्पृष्टाभिरद्भिराचमनलक्षणं शौचं "हृत्कण्ठतालुगाभिस्तु यथासंख्यं द्विजातयः । शुध्येरन् स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरन्ततः" इति वचनात् केशश्मश्रुनखाद्यधारणं मौण्ड्येन ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

आपद्वृत्तीराह—जघन्यो नीचः उत्तमां अध्ययनादिरूपां ऋते राजन्यं चत्रियस्तु प्रतिग्रहादन्यां भजेत् ॥ १७ ॥

विप्रवृत्तीर्वैश्यवृत्तीश्च काश्चित् सर्वेषामप्यापद्यनुजानीते ऋता मृताभ्यामिति ॥ १८ ॥

श्लोकमिमं व्याचष्टे ऋतमिति सार्द्धेन ॥ १९ ॥

तयोस्तद्वर्जने हेतुमाह—सर्वेति । तेन वैश्यशूद्रयोः नीचसेवाप्यापदि न तावान् दोष इति भावः ॥ २० ॥

वर्णानामभिव्यंजकानि लक्षणान्याह-शम इति चतुर्भिः । अच्युतात्मत्वं विष्णुमनस्कत्वम् ॥ २१—२४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

जघन्यः कनिष्ठवर्णः उत्तमां श्रेष्ठवर्णोचितामनापदि न भजेत् ऋते राजन्यं स तु अनापद्यपि उत्तमामपि याजनरूपामध्यापनरूपां च भजतित्यर्थः आपत्सु तु यथोक्तवृत्त्यलाभे सर्वेषां सर्वाः वृत्तयः ॥ १७ ॥

पूर्वोक्ताश्चतुर्विधा विप्रवृत्तयो ऽन्यैरपि ग्राह्याः श्वापेक्षया नीचसेवा तु न कर्त्तव्या विप्रराजन्याभ्यां तु विशेषतो नीचसेवा वर्ज्येत्याह-ऋतामृताभ्यामित्यादि सार्द्धैस्त्रिभिः ॥१८—२०॥

वर्णानां लक्षणान्याह शम इति चतुर्भिः । अच्युतात्मत्वं विष्णुमनस्कत्वम् ॥ २१ ॥

शौर्यं न्यायप्राप्तयुद्धोत्साहः वीर्यं प्रभावः तेजःप्रागल्भ्यम् त्यागः उदारत्वम् आत्मजयो जितमनस्कत्वम् प्रसादः प्रसन्नता ॥ २२ ॥

आस्तिक्यं श्रद्धा उद्यमो ऽनालस्यम् ॥ २३ ॥

शूद्रस्य सन्नत्यादिकम् लक्षणमिति शेषः अमायया निष्कपटेन अमन्त्रयज्ञः नमस्कारेण पञ्चयज्ञानुष्ठानम् तथाच याज्ञवल्क्यः "नमस्कारेण मन्त्रेण पञ्चयज्ञान्नहापयेत्" इति ॥ २४ ॥

भाषा टीका ।

नीचवर्ण ऊंचे वर्ण की वृत्तिको अनापद्काल में न करे एक चत्रिय को छोडकर अध्ययनादिमात्र ब्राह्मण की वृत्ति करले, आपद के विनादूसरेकी वृत्ति न करे यह तात्पर्य है सो आपदमेंभी श्रह को छोडकर सब कोई सब की वृत्ति करे ॥ १७ ॥

ऋत अमृत मृत प्रमृत इन चारो से अपना जीवन करे अथवा सत्यानृत से जीवे परञ्च श्ववृत्ति से कदापि जीवन न करे ॥ १८ ॥

ऋत, यह उंछ शिल का नाम है । अमृत, यह बिना मांगे जो मिले उसकानाम है । मृत, यह नित्य भीख मांगे से जो प्रमृत, यह खेती से प्राप्त किये का नाम है ॥ १९ ॥

सत्या नृत, यह वाणिज्य का नाम है । श्ववृत्ति, यह नीच सेवा का नाम है। ब्राह्मण और चत्रिय इस निन्दित वृत्ति को सर्वदा वर्जन करे क्योंकि ? वि सर्वदेव मय है, और राजा सर्व देव मय है ॥ २० ॥

शम, दम, तप, शौच, संन्तोष, क्षान्ति, (सीधापन) ज्ञान, दया, और गोविन्द में चित्त लगाना, सत्य. बोलना, ये ब्राह्मण के लक्षण हैं ॥ २१ ॥

शूरता, वीरता, धृति, तेज, त्याग, मनका जीतना, क्षमा, ब्राह्मणोंकी भक्ति, प्रसन्नता, और सर्व वर्णो कीरक्षा यह चत्रिय का लक्षण हैं ॥ २२ ॥

देव गुरु गोविन्द में भक्ति, अर्थ धर्म काम की पुष्टि आस्तिक होना, नित्य उद्यम करना, और निपुणता यह वैश्य का लक्षण हैं, ॥ २३ ॥

नम्ररहना, शुद्ध रहना, निष्कपट स्वामिकी सेवा करना, विना मंत्र के यज्ञ करना चोरी न करना सत्य बोलना, गो विप्र की रक्षा करना ये शूद्रके लक्षण हैं ॥ २४ ॥

स्त्रीणां च पतिदेवानां तच्छुश्रूषाऽनुकूलता ।
तद्बन्धुष्वनुवृत्तिश्च नित्यं तद्व्रतधारणम् ॥ २५ ॥
सम्मार्जनोपलेपाभ्यां गृहमण्डनवर्त्तनैः ।
स्वयं च मण्डिता नित्यं परिमृष्टपरिच्छदा ॥ २६ ॥
कामैरुच्चावचैः साध्वी प्रश्रयेण दमेन च ।
वाक्यैः सत्यैः प्रियैः प्रेम्णा कालेकाले भजेत् पतिम् ॥ २७ ॥
सन्तुष्टाऽलोलुपा दक्षा धर्मज्ञा प्रियसत्यवाक् ।
अप्रमत्ता शुचिः स्निग्धा पतिं त्वपतितं भजेत् ॥ २८ ॥
या पतिं हरिभावेन भजेच्छ्रीरिव तत्परा ।
हर्यात्मना हरेर्लोके पत्या श्रीरिव मोदते ॥ २९ ॥
वृत्तिः सङ्करजातीनां तत्तत्कुलकृता भवेत् ।
अचौराणामपापानामन्त्यजान्तेऽवसायिनाम् ॥ ३० ॥
प्रायः स्वभावविहितो नृणां धर्मो युगेयुगे ।
वेददृग्भिः स्मृतो राजन् ! प्रेत्य चेह च शर्मकृत् ॥ ३१ ॥
वृत्त्या स्वभावकृतया वर्त्तमानः स्वकर्मकृत् ।
हित्वा स्वभावजं कर्म शनैर्निर्गुणतामियात् ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्त्रीधर्मानाह-स्त्रीणामिति, पञ्चभिः । पतिरेव देवो यासाम् तस्य पत्युरेव शुश्रूषा पादसंवाहनादिभिः तदनुकूलता च हिताचरणं तस्य यद्व्रतं नियमस्तस्य धारणमाचरणं एतच्चतुष्टयं पतिव्रतानां लक्षणं धर्मश्च ॥ २५ ॥

किञ्च सम्मार्जनोपलेपाभ्यामित्यादेः पतिं भजेदित्युत्तरेणान्वयः परिमृष्टा उद्वर्तनादिना निर्मलीकृताः परिच्छदा गृहोपकरणानि यया ॥ २६ ॥ २७ ॥

किञ्च सन्तुष्टा यथालाभेन तावन्मात्रभोगे ऽप्यलोलुपा दक्षा अनलसा प्रिया सत्या च वाग्यस्याः सर्वत्राप्यप्रमत्ता ऽप्रहिता अपतितं महापातकशून्यम्, यथाह, याज्ञवल्क्यः "आशुद्धेः सम्प्रतीक्ष्यो हि महापातकदूषितः" इति ॥ २८ ॥

तत्परा सती भजेत् श्रीर्हरिमिव हर्यात्मना पत्या सह ॥ २९ ॥
प्रतिलोमजानुलोमजानां वृत्तिमाह—वृत्तिरिति । तत्तत्कुलकृता कुलपरम्पराप्राप्ता परम्पराप्राप्तमपि चौर्यं हिंसादिकं च प्रतिषेधति, अचौराणामपापानां चेति तत्तत्प्रदर्शनार्थं कांश्चित्प्रतिलोमजविशेषानाह-अन्त्यजेति "रजकश्चर्मकारश्च नटो बुरुड एव च । कैवर्तमेदभिल्लाश्च सप्तैते अन्त्यजाः स्मृताः" अन्तेऽवसायिनस्तु चण्डाल-

पुल्कसमातङ्गादयः तेषां परम्पराप्राप्तैव वस्त्रनिर्णेजनादिवृत्तिरित्यर्थः ॥ ३० ॥

श्रेष्ठादपि परधर्मात् नीचोऽपि स्वधर्म एव श्रेयानित्याह-प्राय इति, स्वभावेन सत्त्वादिप्रकृत्या विहितो धर्मः शर्मकृत्सुखहेतुः स्मृतः कैः वेदा एव दृक् चक्षुर्येषां तैः भगवता चोक्तम् "श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्" इति ॥ ३१ ॥

ननु, स्वाभाविकस्य कर्मणो बन्धहेतुत्वात्कथं सुखहेतुत्वं तत्राऽऽह-वृत्त्येति ॥ ३२ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

अथ स्त्रीणां धर्मानाह—स्त्रीणामिति । पतिरेव देवो दैवतं यासां तासां स्त्रीणाम्. तस्य पत्युः शुश्रूषा परिचर्या तदनुकूलता च तस्य पत्युर्बन्धुषु पितृभ्रात्रादिषु अनुवृत्तिः तस्य तु यद्व्रतं पत्यर्थं यो नियमस्तस्य धारणमेतच्चतुष्टयं पतिदेवतानां पतिव्रतानां स्त्रीणां लक्षणं धर्मश्चेत्यर्थः ॥ २५ ॥

किञ्च संमार्जनोपलेपाभ्यां गृहस्येति शेषः । गृहसंमार्जनादिभिः पतिं भजेदित्युत्तरेणान्वयः । सेकः जलविक्षेपः मण्डनं पिष्टैरलङ्कारः

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

वर्त्तनं नित्यं स्वगृह एवावस्थानम् एतैः कथंभूता स्वयं मण्डिता अलंकृता परिमृष्टाः विशोधिताः परिच्छदाः पात्रवस्त्राभूषणादयो यया तादृशी ॥ २६ ॥

उच्चावचैर्नानाविधैः पत्युरपेक्षितैः कामैः प्रश्रयेण विनयेन दमेन उपशान्त्या सत्यैः प्रियैश्च वाक्यैः प्रेम्णा च कालेकाले उचितसमये उचितकामेषु सन्तुष्टा यथालाभेन तावन्मात्रभोगेऽप्यलोलुपा दक्षाऽनलसा धर्मज्ञा भर्तृशुश्रूषणमेव परं धर्मं जानातीति प्रिया तथोक्ता सत्या च वाग्यस्याः सा वाक्यैः सत्यैरिति पतिविषये सत्यवाक्यमुक्तम् प्रियसत्यवागित्यनेन तदितरविषयेऽपीत्यतो न पौनरुक्त्यम् ॥ २७ ॥

सर्वत्राप्यप्रमत्ता अवहिता शुचिः परिशुद्धा स्निग्धा अनुरक्ता पतिं भजेदपतितं महापातकरहितं पतिं भजेत् तु शब्देन पतितं न भजेदिति सूचितम्. यदाह, याज्ञवल्क्यः "आशुद्धेः संप्रतीक्ष्यो हि महापातकदूषितः" इति ॥ २८ ॥

एवंविधस्य भर्तृभजनस्य फलमाह–येति । श्रीर्लक्ष्मीर्हरिमिव या स्त्री हरिभावेन तत्परा स पतिरेव परो दैवतं यस्याः सा पतिं भजेत् सा हर्य्यात्मना हरिरूपेण हरिसमानरूपेण पत्यासह श्रीर्हरिणा सहैव हरेर्लोके मोदते शनैः पत्या सह मुक्ता भवेदित्यर्थः ॥ २९ ॥

अथ सङ्करजातीनां वृत्तिमाह–वृत्तिरिति । सङ्करजातयः प्रतिलोमजाः अनुलोमजाश्चेति द्विविधाः तत्रोत्तरवर्णात्पूर्ववर्णायां स्त्रियां जाताः प्रतिलोमजाः पूर्ववर्णादुत्तरवर्णायां जातास्त्वनुलोमजाः तेषां तत्कुलकृता कुलपरम्पराप्राप्तैव वृत्तिर्भवेदिति. कुलक्रमागतमपि चौर्यहिंसादिकं निषेधन् तान्विशिनष्टि–अचोराणामपापानाञ्चेति । तत्र प्रदर्शनार्थं कांश्चित्प्रतिलोमजविशेषानाह–अन्त्यजाश्चांतेवसायिनश्च तेषां सङ्करजातीनामित्यन्वयः तत्र—

"रजकश्चर्मकारश्च नटोबुरुडएव च ।
कैवर्त्तमेदभिल्लाश्च सप्तैते अन्त्यजातयः" ॥

अन्तेऽवसायिनस्तु चण्डालपुल्कसमातङ्गादयः तेषां परम्पराप्राप्तैव वस्त्रनिर्णेजनादिवृत्तिरित्यर्थः ॥ ३० ॥

"श्रेयान् स्वधर्मो विगुणः परधर्मान् स्वनुष्ठितात्" इति भगवदुक्तमर्थमाह–प्रायइति, द्वाभ्याम् । हे राजन् ! नृणां ब्रह्मक्षत्रादिरूपेणावस्थितानां सर्वेषामपि प्रायशः स्वभावविहितः सात्त्विकादिस्वभावानुसारेण विहितः । यद्वा भावः प्रकारः वर्णाश्रमादिरूपः स्वस्ववर्णाश्रमोद्देशेन विहित इत्यर्थः । इज्याऽध्ययनादिरूपः स एव धर्म इह लोके प्रेत्याऽमुत्र च लोके शर्मकृत् सुखकृद्वेदृग्भिर्मन्वादिभिः स्मृतः कथितः ॥ ३१ ॥

एवं वृत्तिरपि प्रातिस्विकीज्यायसीति वदन्नेवंवर्त्तमानस्य फलमाह–वृत्येति. स्वभावकृतया वर्णाश्रमादिस्वभावकृतया वृत्या अध्यापनादिरूपया जीविकया स्वकर्मणीज्यादिरूपे वर्त्तमानः स्वस्वकर्मानुतिष्ठन् स्वभावजं सात्त्विकादिस्वभावप्रयुक्तं प्राकृतसत्त्वादिगुणवश्यताप्रयुक्तं बन्धकं पुण्यपापात्मकं कर्म हित्वा "धर्मेण पापमपनुदत्यविद्यया मृत्युं तीर्त्वा" इत्यादि श्रुत्यर्थोऽत्राभिसंहितः शनैर्निर्गुणतां सत्त्वादिगुणराहित्यं प्रकृतिसम्बन्धराहित्यं मुक्तिमितियावत् इयात् प्राप्नुयादिति शनैरित्यस्य भगवदुपासननिर्वृत्तिद्वारा प्राप्नुयादित्याशयः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्त्रीणां सामान्यलक्षणमाह–स्त्रीणामिति । अनुकूलतोक्तकारित्वं "यत्रानुकूल्यं दंपत्योस्त्रिवर्गस्तत्रवर्द्धते । स्त्रीभिर्भर्तृवचः कार्यमेष धर्मः परं स्त्रियः" इतिवचनात् तद्बन्धुषु भर्तृबन्धुषु भागिनेयादिषु तद्व्रतधारणं पातिव्रत्यं तस्य यद्व्रतं तदेवास्या व्रतमिति वा ॥२५॥

गृहमण्डनवर्तनैर्गृहालङ्कारकरणैः ॥ २६ ॥

कामैर्विषयैः ॥ २७ ॥

अलोलुपा अयोग्याऽभिलाषरहिता अपतितं ब्रह्महत्यादिपातकरहितम् ॥ २८ ॥

अस्मिन् पत्यौ हरिः सन्निहित इति या बुद्धिः स हरिभावः "हरिरस्मिन् स्थित इति स्त्रीणां भर्तरि भावना । शिष्याणाञ्च गुरौ नित्यं शूद्राणां ब्राह्मणादिषु ॥ भृत्यानां स्वामिनि तथा हरिभाव इतीरितः" इतिवचनान्नतयोरैक्यार्थः हर्यात्मना हरेर्विशेषसन्निधानवता पत्या सह ॥ २९ ॥

क्षत्रियाद्विप्रस्त्रीसूतानां विप्रात् क्षत्रियस्त्रीजातानां क्षत्रियाद्वैश्यस्त्रीसूतानां वैश्याच्छूद्रस्त्रीसूतानामित्येवं जातानां का वृत्तिरिति तत्राह,येषां जातिविशेषाः अम्बष्ठनिषादपारशवादिनाम्ना ज्ञातव्याः तदुक्तं विप्रान्मूर्द्धावसिक्ताख्ली राज्ञोऽम्बष्ठविशोऽङ्गना"इत्यादि अध्ययनमन्तरेणाम्बष्ठादीनां संस्कारादिकं तत्कुलानुकूल्येन तेषां गुणमाह, अचौराणामिति. यद्य यस्याविहितं तत्करणं चौर्यं तद्रहितं शूद्राद्ब्राह्मण्यां जाता अन्त्यजाः रजकादिसप्त कारवस्ततो जाता अन्तेऽवसायिनः पुल्कसमातङ्गादयः येषां तत्कुलविहित एव धर्मः "ब्राह्मण्यां क्षत्रियात्सूतो वैश्याद्वैदेहिकस्तथा । शूद्राज्जातस्तु चण्डालः सर्ववर्णविगर्हितः" इति च ॥ ३० ॥

तत्तद्वर्णैस्तत्तत्स्वभावेनानुष्ठितस्य धर्मस्य फलमाह–प्रायइति, सात्त्विकादिस्वभावानुसारेण ब्राह्मणानां विहितः अत्रप्रमाणमाह, वेदेति स्मृतो ग्रन्थस्वरूपेण कृतः प्रेत्य परलोके "नाधमः कारणं धर्मे क्रियमाणो भवेद्धि सः ॥ अतो यदात्मानः पथ्यं परस्य न तदा चरेत्॥ सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज"इत्यादिवचनात् भक्त्युपबृंहितस्य धर्मस्यापेक्षिताशेषपुरुषार्थहेतुत्वं न केवलस्येत्यभिप्रायेण प्राय इत्युक्तम्. तत्र तत्तद्विशेषणवर्णने ग्रन्थबाहुल्यं स्यादित्युपरम्यते ॥ ३१ ॥

न केवलमनेन धर्मेण स्वर्गादिप्राप्तिरपि तु भक्त्यादिसाधनपूर्णेन मुक्तिरपि स्यादित्याह–वृत्त्येति । स्वभावेन स्वात्मना कृतया प्रेरितया सात्त्विकादिस्वभावपूर्णया वा वृत्त्या जडलक्षणया भक्त्या वा योग्यतया स्वाविहितकर्मणि वर्तमानः पुरुषः शनैःशनैर्बहूनां जन्मनामन्ते स्वभावजं कर्म पुण्यपापलक्षणं मुक्त्वा निर्गुणतां मुक्तिम्. "यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भवति" इति श्रुतेः । ज्ञानपूर्वकमनुष्ठितो नित्यानन्दाविर्भावलक्षण-पुरुषार्थस्य हेतुः यदप्यनेवंविन्महत्पुण्यं कर्मकरोति "तद्धस्यान्ततः क्षीयत एव"इति श्रुतेः तत्त्वज्ञानपूर्वकं भगवद्भक्तप्रद्वेषोपरक्तः प्रवृद्धो-धर्मो नित्यदुःखाविर्भावलक्षणपुरुषार्थस्य त्रैविद्या मां सोमपाः पूत-पापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्त इत्यादि नित्यं प्रार्थनादिगुणो-परक्तो नित्यसत्त्वगुणानिमित्तसुखलक्षणस्येत्यादि ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

साध्वीनां लक्षणानि धर्मांश्चाह—स्त्रीणामिति, पञ्चभिः । पति-रेव देवः पूज्यो यासाम् ॥ २५—२८ ॥

हर्य्यात्मना पत्या सह ॥ २९ ॥

अनुलोमप्रतिलोमजानां वृत्तिमाह—वृत्तिरिति । कुलकृता कुल-परम्पराप्राप्ता यथा नापितरजकादीनां मुण्डनवस्त्रनिर्योजनादिका अपापानामिति कुलपरम्पराप्राप्तमदिरापानविधवाविवाहादिपा-पवतां पापाभाव उक्तः । चौर्य्यं तु तेषामपि प्रतिषिद्धमित्याह-अचौराणामिति । अचौरत्वे सत्त्वे सत्येव वृत्तिः कुलकृता विहिता पापाभावश्चोक्त इति भावः । तत्र प्रदर्शनार्थं कांश्चित् प्रतिलोमज विशेषानाह-अन्त्यजेति-

"रजकश्चर्मकारश्च नटो वुरुड एवच ।
कैवर्त्तमेदभिल्लाश्च सप्तैते अन्त्यजाः स्मृताः" ॥
अन्तेऽवसायिनस्तु चाण्डालादयः ॥ ३० ॥

श्रेष्ठादपि परधर्मान्नीचोऽपि स्वधर्मः श्रेयानित्याह-प्राय इति । वेदहग्भिर्वेदज्ञैः शर्मकृत् सुखहेतुः स्मृतः भगवता चोक्तम्. "श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् इति प्रायग्रहणात् दुर्जातीनां दुराचारत्यागस्तु नाधर्मकृत् ॥ ३१ ॥

शनैर्बहुजन्मान्त एव । यदुक्तम्. "स्वधर्मनिष्ठः शतजन्मभिः पुमान् विरञ्चितामेति" इत्यादि ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अथ स्त्रीधर्मानाह-स्त्रीणामिति, पञ्चभिः । पतिरेव देवः पूज्यो यासां तासाम् तस्य पत्युः शुश्रूषा सेवा अनुकूलता तच्चित्तानु-सारित्वं तस्य यद्व्रतं नियमस्तस्यनित्यं धारणमिति लक्षण-मिति शेषः ॥ २५ ॥

किञ्च संमार्जनादिभिः पतिं भजेदित्यग्रिमेणान्वयः ॥२६-२७॥

किञ्च अलोलुपेति छेदः स्निग्धा प्रीतिमती अपतितं भजेत् महापातकी तु आशुद्धेः परीक्ष्यः तथाह-याज्ञवल्क्यः "आशुद्धेः संपरीक्ष्यो हि महापातकदूषितः" इति ॥ २८ ॥

हरिरात्मा आश्रयो यस्य तेन पत्या सह ॥ २९ ॥

अन्त्यजान्तेघसायिनाम् अन्त्यजान्तेऽवसायिप्रभृतीनां सङ्करजा-तीनां प्रतिलोमजानां तत्तत्कुलकृता तत्तत्परम्पराप्राप्ता वस्त्रनिर्यो-जनादिरूपा वृत्तिर्भवेदिति परम्पराप्राप्तमपि चौर्यहिंसादिकं त्याज्य-मित्याशयेनाह-अचौराणामपापानामिति । तत्रान्त्यजाः "रजकश्च-र्मकारश्च नटो वरुड एव च । कैवर्त्तो मेदभिल्लाश्च सप्तैते ह्यन्त्यजाः स्मृताः" अन्तेऽवसायिनस्तु चाण्डालपुष्कसमातङ्गादयः ॥ ३० ॥

वेदहग्भिः वेदविद्भिः मन्वादिभिः स्वभावतः वर्णादिभावा-नुसारेण विहितो ऽनुज्ञातः नृणां धर्मः इह प्रेत्य च शर्मकृत्सुखदः स्मृतः तथा च स्मृतिः "श्रेयान्स्वधर्मो विगुणः परधर्मो भयावहः", इति ॥ ३१ ॥

निर्गुणतां गुणातीतताम् ॥ ३२ ॥

भाषा टीका ।

और स्त्रियों के लक्षण (धर्म) यही हैं कि पति को देवता के सदृश माने, और उसकी शुश्रूषा करे, पति के अनुकूल रहे और पति के बन्धुवर्गों का अनुवर्त्तन करे, तथा नित्य पति ही के व्रत को धारण करे ॥ २५ ॥

सम्मार्जन (झाड़ूलगाना) उपलेप (लीपनापोतना) और से मण्डलवर्त्तन (चौकपूरने) से गृह को मण्डित (भूषित)रखे और नित्य आप भी अपने उपकरणों से स्वयं भूषित रहे ॥ २६ ॥

सुशीला स्त्री घर के ऊंचे नीचे सर्व कामों से नम्रता से इन्द्रियों के जीतने से तथा सत्य और प्रिय वाक्यों से प्रेम से समय २ पर पति की सेवा करे ॥ २७ ॥

सदा सन्तोष राखे भोगों मे लोलुपता छोडे, चतुराई रखे साची मीठी वाणी बोले, प्रमाद छोडकर शुद्धरहे और स्नेहवाली होकर पति को भजे यदि पति पतित न होवै तौ ॥२८॥

जो स्त्री लक्ष्मी के नाईं पति को हरि की भावना से भज-ती है, वह हरिलोक में हरि स्वरूप अपने पति के साथ लक्ष्मी के तरह मोद को प्राप्त होती है ॥ २९ ॥

रजक आदि सङ्कर जाति लोग, तथा अन्त्यज वर्णं बाह्य लोग अपने२ कुलोचित जीविका करे चोरी और हिंसा को छोड कर, ॥ ३० ॥

प्राय करके मनुष्यों का युग २ में वेद दृष्टाओं ने स्वभाव वि-हित धर्म ही कहा है वही इस लोक और पर लोक में सुख करने वाला है ॥ ३१ ॥

अपने स्वभाव से प्राप्तवृत्ति से अपने कर्म को करता हुआ वर्त्तमान रहे, कालांतर में धीरें २ स्वभाव से जायमान कर्म को भी छोडकर, अर्थात् कर्म करता हुआ भी परमात्मा में समर्पण कर निर्गुणता को प्राप्त हो जावे, अर्थात् गुणकर्म कृत बन्धन से छूट जावे ॥ ३२ ॥

उप्यमानं बहु क्षेत्रं स्वयं निर्वीर्यतामियात् ।
न कल्पते पुनः सूत्यै उप्तं बीजं च नश्यति ॥ ३३ ॥
एवं कामाशयं चित्तं कामानामतिसेवया ।
विरज्येत तथा राजन्नाग्निवत्कामबिन्दुभिः ॥ ३४ ॥
यस्य यल्लक्षणं प्रोक्तं पुंसो वर्णाभिव्यञ्जकम् ।
यदन्यत्रापि दृश्येत तत्तेनैव विनिर्दिशेत् ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे पारमहंस्यां संहितायाम्
वैयासिक्यां युधिष्ठिरनारदसंवादे सदाचारनिर्णयोनाम
एकादशोऽध्यायः ॥ ११ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, काम्यानि कर्माणि कुर्वतस्तत्फलभोगपरस्य कथं नैर्गुण्यं स्यात्? तदुक्तं प्रह्लादेन "औपस्थ्यजैह्व्यं बहुमन्यमानः कथं विरज्येत दुरन्तमोहः" इत्यादि तत्राधिकारिभेदेन व्यवस्थां सदृष्टान्तमाह—उप्यमानमिति द्वाभ्याम्. पुनः सूत्यै सस्यप्रसवाय ॥ ३३ ॥

कामा आशेरते वासनारूपेण यस्मिंस्तत् । अयम्भावः उत्कट-वासनाविष्टस्य सहसैव कामत्यागासम्भवाच्छास्त्रोक्तनियमेन बहुशः कामान् भुञ्जानस्यैव नित्यनैमित्तिकैर्विशुद्धचेतसस्तद्दोषदर्शनेन ययातिसौभरिप्रमुखानामिव शनैर्विरागो भवति यथा स वीर्ये क्षेत्रं शनैर्निर्वीर्यं भवति यथाच प्रज्वलितोऽग्निर्न घृतबिन्दुभिः शाम्यति महता तु घृतपूरेण शाम्यत्येव तद्वत् प्रह्लादकुमारस्तु तौ कौमार एव निवृत्त्युपदेशो मन्दवासनानामधिकारेण । तदुक्तं तत्रैव "बालानदूषितधियो द्वन्द्वारामैरिलेहितैः" इति अतः सर्वमनवद्यम् ॥ ३४ ॥

शमादिभिरेव ब्राह्मणादिव्यवहारो मुख्यो न जातिमात्रादित्याह–यस्येति । यद्यदि अन्यत्र वर्णान्तरेऽपि दृश्येत तद्वर्णान्तरं तेनैव लक्षणेनिमित्तेनैव वर्णेन विनिर्दिशेत् न तज्जातिनिमित्तेनेत्यर्थः ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु स्वभावकृतया वृत्त्या स्वकर्मणि वर्तमानस्य पुनःकामक्रोधादिवर्द्धकबन्धककर्मसम्भावनया कथं नैर्गुण्यप्राप्तिरिति शङ्कां निराकर्तुं गृहस्थस्य ज्ञानवैराग्यवतः शास्त्राविरुद्धान्नपानादिसेवया रागवर्द्धकत्वाभवे तावद्दृष्टान्तमाह–उप्यमानमिति । यथा मुहुर्मुहुरुप्यमानं क्षेत्रं निर्वीर्यतामसारतां प्राप्नुयात्पुनः सूत्यै सस्यप्रसवाय न कल्पते न समर्थमत एव उप्तं बीजं च नश्यति ॥ ३३ ॥

तथा कामानामाशयमाश्रयं चित्तं पुनः कामानामतीव सेवया विरज्येत नाग्निवदिति घृतबिन्दुभिरग्निरिव न वर्द्धत इत्यर्थः यथा प्रज्वलितोऽग्निः घृतबिन्दुभिर्न शाम्यति किन्तु महता घृतपूरेण. तथा चित्तं कामलेशैर्न शाम्यति महद्भिः कामैरित्यर्थः ॥ ३४ ॥

शमादिभिरेव ब्राह्मणादिव्यवहारो मुख्यो न जातिमात्रादित्याह—यस्येति । यस्य पुंसो यल्लक्षणं वर्णाभिव्यञ्जकं प्रोक्तं "शमो दमस्तपः" इत्यादिना तद्यद् यद्यन्यत्रापि वर्णान्तरेऽपि दृश्येत तर्हि तद्वर्णान्तरं तेनैव लक्षणनिमित्तेनैव वर्णेन निर्दिशेत् न जातिनिमित्तेनेत्यर्थः ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु सगुणो धर्मः सगुणपुरुषार्थहेतुर्भवत्यनुकूलत्वान्निर्गुणपुरुषार्थस्य कथं विरुद्धत्वादित्याशंक्य मनो हि पुरुषार्थकारणं तद्विपक्षोपरक्तं दुःखोदर्कविषयसुखाय स्यात्तदेव विषयाणां क्षणभङ्गुराणां दुःखोदर्काणां दुःसाधनत्वचिन्तया वैराग्यानलभर्जितं पुनस्तदंकुरीभावासमर्थं भगवच्चरणारविन्दभक्तिसलिलसिक्तं चेत् तज्ज्ञानांकुरीकरणनिदानं भवतीत्येतमर्थं सदृष्टान्तमाह—उप्यमानमिति यथा बीजैरुप्यमानं पुनः मेदुरसाधनहीनं क्षेत्रं केदारलक्षणं निर्वीर्यतां सस्यजननशक्तिराहित्यमेति तदेव स्फुटयति पुनरिति सूत्यै उत्पत्त्यै न केवलमुत्पादनासमर्थं किन्तु बीजनाशहेतुश्च ॥ ३३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

एवं यथा कामाशयं कामाद्यविश्रमं चित्तं विषयसेवासमये दुःखस्य तदभावे सुखस्य च स्मरणासमर्थं मनः कामानां विषयाणामतिसेवया क्षयरोगादिहेतुभूतया द्रव्यादिनाशकारणानिलसुखाय विरज्येत विरक्तं भवति असारताबुद्धिं प्राप्नोति इदं च योग्यानामेव नायोग्यानामिति. किञ्चिद्विषयसेवया किं स्यादिति तत्राह-यथेति। कामानां विन्दुभिः किञ्चित्सेवितैः मनो यथावत्पुरुषार्थहेतुतया न विरज्यते विरक्तं न भवति पुनः तृष्णातिशयः स्यात् कथमिव सुखकान्तिहेतुत्वात्कामः आज्यं तद्विन्दुभिर्यथा अग्निर्वर्धते तथेति भावः ॥ ३४ ॥

नन्वत्र वर्णादिज्ञानं यथा तारतम्यतत्पूजापि यथायोग्यस्य निःश्रेयसी यस्य एतदभावे तद्धितकरणाद्यभीष्टा सिद्धिः स्यादिति तत्राह-यस्येति. यस्य ब्राह्मणादेः ब्राह्मणत्वादिव्यञ्जकं शमदमादिलक्षणं प्रोक्तं शास्त्र इति शेषः। तल्लक्षणं यद्यन्यत्र व्यक्तं दृश्येत अपिशब्देनान्याप्त्यादिदोषाभावं सूचयति-तर्हीतरलक्षणेनैव तद्वस्तु ब्राह्मणादिकमिति निर्दिशेत् उपदिशेत्. गोः किं लक्षणमिति पृष्टः सास्नादिमान् गौरिति उपदिशति. यदा तदा पुच्छवत्त्वभङ्गवत्त्वादि व्यभिचार्यं विहाय यं गोपिण्डं सास्नादिमन्तं पश्यति. यथा प्रत्येति तत्प्रयुक्तं व्यवहारं करोति आप्तायोपदिशति च तथात्रापि विरक्तिबलभक्तिरेव ब्राह्मणादेः मुक्तिसाधनं लक्षणमिति सकलशास्त्रतात्पर्यार्थः ततः सैव मुमुक्षुभिः सम्पादनीयेति भावः ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
एकादशोऽध्यायः ॥ ११ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

अत्युत्कटवासनाविशिष्टानां तु वेदोक्तनियमेन कामस्याजासम्भवात् बहुशः कामान् निषिद्धेतरान् ययातिसौभरिप्रमुखानामिव भुञ्जानानामकुटिलचित्तानां विरागः स्यादिति सदृष्टान्तमाह-उप्तमानमिति, द्वाभ्याम्। निर्वीर्यतामेवाह, क्वचित् सूत्यै सस्य प्रसवाय न कल्पते क्वचित् उप्तमेव बीजं नश्यति ज्वलति कामा आसम्यगेव शेरते वासनारूपेण यत्र तत् नाग्निवदिति यथा प्रज्वलितोऽग्निर्न घृतविन्दुभिः शाम्यति किन्तु महता घृतपूरेण शाम्यत्येव तद्वत् ॥ ३३ ॥ ३४ ॥

लिङ्गं यस्य पुंसो वर्णाभिव्यञ्जकं यल्लक्षणं वर्णे ब्राह्मणादिजातिमभिव्यञ्जयति यत् तच्च सामान्यतो विहितमेव शमदमादिकं नतु विशेषतो विहितं संध्योपास्त्यादिकं यद्यन्यत्र जात्यन्तरेऽपि दृश्येत तज्जात्यन्तरमपि तेनैव ब्राह्मणादिशब्देनैव विनिर्दिशेदिति ब्राह्मणादितुल्यादरं लभयति न च "परधर्मो भयावहः" इति वाच्यं शमदमादीनां परधर्मत्वाभावादिति भावः ॥ ३५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।
एकादशः सप्तमस्य सङ्गतः सङ्गतस्सताम् ॥ ११ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

सूत्यै प्रसवाय ॥ ३३ ॥

उत्तमाधिकारिपक्षे "कौमारे आचरेत्प्राज्ञः" इत्यादिना सर्वभोगत्यागपूर्वकं भजनमुक्तम् मन्दाधिकारिपक्षे "गृही भूत्वा वनी भवेत्" "कुर्वन्नेवेह कर्माणि, जिजीविषेच्छतं समाः" इत्याद्याश्रुतयः आश्रमादाश्रमान्तरगमनं यावज्जीवं तावत्कर्मानुष्ठानं च बहुभोगेन विषयेभ्यो निर्वेदोदयार्थमाहुः यथोक्तकर्मसम्पादितबहुभोगेन मनः शाम्यति न स्वल्पभोगेन यद्वद्घृतेनाग्निर्यथा शाम्यति न घृतविन्दुभिरित्याह-एवमिति। कामाः विषयाः आशेरते वासनारूपेण यस्मिन् तत् अतिसेवया बहुभोगेन विरज्यते विषयेभ्य उपरम्यते नतु कामविन्दुभिः ॥ ३४ ॥

यद्यपि प्रजापतिप्रवर्तिता वर्णा मुख्यास्तथापि कालकृतसङ्करादिदोषतस्तन्निश्चयाभावे सत्यादिलक्षणेन तत्तत्कुले ब्राह्मणादिनिश्चयः कर्तव्यः अन्यवर्णेष्वपि यद्यन्यवर्णलक्षणं दृश्येत तर्हि तेन लक्षणेनापि तं वर्णितं विजानीयादित्याह—यस्येति। यस्य पुंसो वर्णाभिव्यञ्जकं यल्लक्षणं यदि अन्यत्र वर्णान्तरेऽपि दृश्येत तद्वर्णान्तरं तेनैव लक्षणादिनिमित्तेन विनिर्दिशेत् "न वयं विद्मो ब्राह्मणाःस्मोऽब्राह्मणा वा ये यजामहे" इति श्रुतिः "जातिरत्र महासर्पमनुष्यत्वे महामते! सङ्करात्सर्ववर्णानां दुष्परीक्ष्येति मे मतिः॥ तस्माच्छीलं प्रधानेष्टं विदुर्वै तत्त्वदर्शिनः" इति स्मृतिश्चात्रानुसन्धेया ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
एकादशाध्यायार्थप्रकाशः ॥ ११ ॥

भाषा टीका।

जिस खेत में बहु अर्थात् (बारंबार) बीज बोया जाता है वह क्षेत्र निर्वीर्य आपही होजाता है, उसमें बोया हुआ बीज

भाषा टीका ।

फिर उत्पन्न होने को नहीं समर्थ होता किन्तु वहीं नष्ट होजाता है ॥ ३३ ॥

हे राजन् ! ऐसेही जिस पुरुष का चित्त सदा कामनाओं से वासित हैं उसका चित्त वैदिक कर्म करते २ नियम पूर्वक बहुत काल भोग भोगने से जैसा धीरें २ आपही वैराग्य को प्राप्त होता है, तैसा शीघ्रता से नहीं । जैसे कि ? घृत के बिंदुओं से अग्नि नहीं शान्त होती है ॥ ३४ ॥

जिन पुरुषों के वर्णों का अभिव्यंजक (जानने वाला) जो लक्षण कहा है वह यदि वर्णान्तर में देख पडे तब उसको और उसी निमित्त से निर्देश करे कुछ जाति के निमित्त से नहीं जाने तौ जिसकी जो है वही रहेगी ॥ ३५ ॥

इति श्रीमद्भागवत सप्तस्कन्ध में एकादश अध्याय की भागवताचार्यकृत भाषा टीका समाप्त ॥ ११ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे एकादशोऽध्यायः ॥ ११ ॥

॥ द्वादशोऽध्यायः ॥

नारद उवाच ।

ब्रह्मचारी गुरुकुले वसन्दान्तो गुरोर्हितम् ।
आचरन्दासवन्नीचो गुरौ सुदृढसौहृदः ॥ १ ॥
सायं प्रातरुपासीत गुर्वग्न्यर्कसुरोत्तमान् ।
उभे सन्ध्ये च यतवाग्जपन्ब्रह्म समाहितः ॥ २ ॥
छन्दांस्यधीयीत गुरोराहूतश्चेत्सुयन्त्रितः ।
उपक्रमे ऽवसाने च चरणौ शिरसा नमेत् ॥ ३ ॥
मेखलाऽजिनवासांसि जटादण्डकमण्डलून् ।
बिभृयादुपवीतं च दर्भपाणिर्यथोदितम् ॥ ४ ॥
सायं प्रातश्चरेद्भैक्ष्यं गुरवे तन्निवेदयेत् ।
भुञ्जीत यद्यनुज्ञातो नो चेदुपवसेत्क्वचित् ॥ ५ ॥
सुशीलो मितभुग्दक्षः श्रद्दधानो जितेन्द्रियः ।
यावदर्थं व्यवहरेत्स्त्रीषु स्त्रीनिर्जितेषु च ॥ ६ ॥
वर्जयेत्प्रमदागाथामगृहस्थो बृहद्व्रतः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥ ७ ॥
केशप्रसाधनोन्मर्दस्नपनाऽभ्यञ्जनादिकम् ।
गुरुस्त्रीभिर्युवतिभिः कारयेन्नात्मनो युवा ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्वादशे वर्ण्यते धर्मो ब्रह्मचारिवनस्थयोः ।
चतुर्णामाश्रमाणां च साधारण्येन कश्चन ॥ १ ॥

वर्णादीनां धर्मा उक्ताः इदानीम् आश्रमधर्मा उच्यन्ते. तत्रास्मिन्द्वादशेऽध्याये ब्रह्मचारिवानप्रस्थयोरसाधारणाश्चतुर्णाम्—साधारणाश्चोच्यन्ते. त्रयोदशे यतेर्धर्माः, चतुर्दशे गृहस्थस्य पञ्चदशे सर्वधर्मसारसंग्रहः ब्रह्मचारी गुरुकुले वसन्गुर्वादीनुपासीतेत्युत्तरेणान्वयः ॥ १ ॥

तानाह–सायमिति। ब्रह्म गायत्रीं जपन् सन्ध्यात्रयमुपासीत उभे सन्ध्ये तु यतवाक् सायं प्रातः सन्ध्याकालनिमित्तं मौनं कुर्यादित्यर्थः ॥ २ ॥

उपक्रमे आदाववसाने अन्ते गुरोश्चरणौ नमेत् ॥ ३ ॥

यथोदितमिति, "पालाशो दण्डो ब्राह्मणस्य" इत्यादिनियममनतिक्रम्य, जटाधारणं तु केशप्रसाधनाभावमात्रम् ॥ ४ ॥ ५ ॥

यावदर्थं यथोपयोगमात्रमेव ॥ ६ ॥

बृहद्व्रतः ब्रह्मचर्यवान् ग्रहस्थव्यतिरिक्तः सर्वोपि प्रमदागाथां वर्जयेत् तत्र हेतुः इन्द्रियाणि बलवन्ति संयतस्यापि मनो हरन्तीति ॥ ७ ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवं चातुर्वर्ण्यादिधर्मानभिधायाऽथ चातुराश्रम्यधर्मान्विवक्षुस्तावद्ब्रह्मचर्याश्रमधर्मानाह-ब्रह्मचारीति।ब्रह्मचर्यं द्विविधमौपकुर्वाणं

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

नैष्ठिकश्चेति। तत्र गार्हस्थ्यादिवन्नैष्ठिकमप्यौपकुर्वाणपूर्वकमेवेति-दर्शयितुं तावदौपकुर्वाणब्रह्मचर्यधर्म्मा उच्यन्ते. यो गुरुकुले वसन् स ब्रह्मचारी उपकुर्वन् ब्रह्मचारीत्यर्थः। कथम्भूतो वसन् दान्त उपशान्तः दासवन्नीचः स्वनैच्यमनुसन्दधत् गुरोर्हितमाचरन् गुरौ सुदृढं सौहार्द्दं यस्य तादृशः ॥ १ ॥

किञ्च सायम्प्रातश्च गुरुमग्नीनर्कं सूर्यं सुरोत्तमं भगवन्तञ्च उपासीत उभे सन्ध्ये प्रातः सायं च यतवाङ्मौनी समाहितचित्तो ब्रह्म गायत्रीं जपन् गुर्वादीनुपासीतेत्यन्वयः ॥ २ ॥

आहूतश्चेत्सुयन्त्रितः समाहितो गुरोः छन्दांसि वेदानधीयीत नित्यमध्ययनोपक्रमसमाप्त्योर्गुरोश्चरणौ शिरसा नमेत् ॥ ३ ॥

यथा विहितं मेखलादीनि बिभृयात् जटाधारणं तु केशप्रसाधनाभावमात्रं दर्भं पवित्रं पाणौ यस्य सः ॥ ४ ॥

सायं प्रातश्च भैक्षं भिक्षाकर्म चरेत्कुर्यात् तद्भिक्षया लब्धमन्नं गुरवे निवेदयेत् गुरोः पुरतो निदध्यात् ततो यदि गुरुणाऽभ्यनुज्ञातश्चेत् तदन्नं भुञ्जीत नोचेत् कदाचिदुपवसेत् कदाचिदित्यनेन तन्मनः परीक्षायै कदाचिद्गुरुर्नाज्ञापयेदिति सूच्यते ॥ ५ ॥

मितं भुङ्क्ते इति तथा सुशीलः सुस्वभावः सदाचारो वा दक्षोऽनलसः श्रद्दधानः गुरूपदिष्टार्थेषु विश्वासयुक्तः जितानीन्द्रियाणि येन स्त्रीषु स्त्रीभिर्निर्जिता ये स्त्रीवश्यास्तेषु च यावदर्थं यावत्प्रयोजनं व्यवहरेन्नाधिकं ताभिस्तैश्च सम्भाषेतेत्यर्थः ॥ ६ ॥

प्रमदागाथां स्त्रीविषयां वार्तां वर्जयेत् यतः स्वयमगृहस्थो वृहद्व्रतः ब्रह्मचर्यवान् स्त्रीसङ्गादिरहितः। ननु, तद्गाथामात्रेण को दोषस्तत्राह—इन्द्रियाणीति। प्रमाथीनि बलवन्ति. अतः संयतचित्तस्यापि मनः प्रमदागाथाश्रवणकथनादिना स्ववशङ्कुर्वन्ति अतस्तां परिवर्ज्जयेत् इत्यर्थः ॥ ७ ॥

गुरुस्त्रीभिर्गुरुपत्नीभिरन्याभिश्च युवतिभिः केशप्रसाधनादिकं न कारयेत् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

नीचः प्रश्रितः हितं हिताचरणं। मनोवाक्कायकर्मभिरिति शेषः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥

कचिदपराधे सति। एकान्नादनवर्जनार्थमुपवसेदित्युक्तम् ॥५॥
स्वार्थमात्रासिद्धिः तन्मात्रं यावदिति ॥ ६ ॥

वृहद्व्रतो ब्रह्मचारी स्त्र्यादिव्यवहारवर्जननिमित्तमाह—इन्द्रियाणीति। निर्जितेन्द्रियग्रामो यतिः। "ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते" इत्यभिधानात् ॥ ७ ॥

प्रसाधनं संस्करणम्—

"मधुमांसोच्छुनोच्छिष्टं शुक्लस्त्रीप्राणिहिंसनम्।
भास्करालोकनाश्लीलपरिवादांश्च वर्जयेत्" ॥

इत्यपव्याख्यानं न कर्तव्यम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

१—४ ॥

नोचेदिति, गुरोरन्यत्र गमनादौ ॥ ५—१० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

द्वादशे वर्णिनो धर्मो वनस्थस्याऽपिवर्ण्यते।
साधारणश्चाश्रमाणां देहत्यागविधिस्तथा ॥

ब्रह्मचारी गुर्वादीनुपासीतेत्युत्तरेणान्वयः ब्रह्म गायत्रीम् ॥ १—५ ॥

यावदर्थं गुरुसेवार्थं गुरुगृहे भिक्षार्थं गृहस्थगृहेषु च यथोपयोगमेव च ॥ ६ ॥

अगृहस्थो गृहस्थभिन्नः सर्वोऽपि वृहद्व्रतो ब्रह्मचारी ॥ ७ ॥

कारयेदिति गुरुपत्न्यो हि शिष्यमपि पुत्रमिव वात्सल्येन पश्यन्त्यो यदि केशप्रसाधनादिकं स्वेच्छयैव कुर्वन्ति तदपि न कारयेदित्यर्थः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

ब्रह्मचारी वनस्थयोर्धर्मः सर्वाश्रमसाधारणश्च कश्चन धर्मो द्वादशेनाऽध्यायेन वर्ण्यते. ब्रह्मचारी गुरुकुले वसन् गुरोर्हितमाचरन् उभे सन्ध्ये ब्रह्म गायत्रीं जपन् गुर्वादीनुपासीतेति द्वयोः अन्वयः ॥ १ ॥ २ ॥ ३ ॥

जटाधारणं केशप्रसाधनाभावमात्रं यथोक्तं "पालाशो दण्डो ब्राह्मणस्य" इत्यादिनियममनतिक्रम्य दर्भपाणिः कुशहस्तः ॥ ४ ॥ ५ ॥

यावदर्थं भिक्षाद्यर्थम् ॥ ६ ॥

वृहद्व्रतः नैष्ठिकब्रह्मचर्यवान् अगृहस्थो वानप्रस्थादिश्च प्रमाथीनि बलवन्ति यतेः जितेन्द्रियस्यापि ॥ ७ ॥ ८ ॥

भाषा टीका।

श्रीरुक्मिणीप्रियवल्लभाय नमः ॥

नारद उवाच।

नारदजी बोले, कि—ब्रह्मचारी दमन शील होकर गुरुकुल में वास करता हुआ, गुरु का हित आचरण करे और दास के नाईं नीचाऽनुसंधान कर गुरु में दृढ सौहृद राखे ॥ १ ॥

प्रातःकाल और सायंकाल में गुरु अग्नि सूर्य और देवताओं की उपासना करे, और दोनों संध्याओं में मौन होकर सावधान से गायत्री का जप करे ॥ २ ॥

गुरुजी के बुलाने से बडी नम्रता पूर्वक वेद का अध्ययन करे पढने के प्रथम और पश्चात् (अन्तमें) गुरुजी के चरणों को शिरसे प्रणाम करे ॥ ३ ॥

नन्वग्निः प्रमदानाम घृतकुम्भसमः पुमान्।
सुतामपि रहो जह्यादन्यदा यावदर्थकृत् ॥ ९ ॥
* कल्पयित्वाऽऽत्मना यावदाभासमिदमीश्वरः।
द्वैतं तावन्न विरमेत्ततो ह्यस्य विपर्ययः ॥ १० ॥
एतत्सर्वं गृहस्थस्य समाम्नातं यतेरपि।
गुरुवृत्तिर्विकल्पेन गृहस्थस्यर्तुगामिनः ॥ ११ ॥
अञ्जनाभ्यञ्जनोन्मर्दस्त्र्यवलेखामिषं मधु।
स्रग्गन्धलेपालङ्कारांस्त्यजेयुर्ये धृतव्रताः ॥ १२ ॥
उषित्वैवं गुरुकुले द्विजोऽधीत्यावबुध्य च।
त्रयीं साङ्गोपनिषदं यावदर्थं यथाबलम् ॥ १३ ॥
दत्त्वा वरमनुज्ञातो गुरोः कामं यदीश्वरः।
गृहं वनं वा प्रविशेत्प्रव्रजेत्तत्र वा वसेत् ॥ १४ ॥
अग्नौ गुरावात्मनि च सर्वभूतेष्वधोक्षजम्।
भूतैः स्वधामभिः पश्येदप्रविष्टं प्रविष्टवत् ॥ १५ ॥
एवंविधो ब्रह्मचारी वानप्रस्थो यतिर्गृही।
चरन्विदितविज्ञानः परं ब्रह्माधिगच्छति ॥ १६ ॥

भाषा टीका।

जसा शास्त्र में कहा है उसरीत से मेखला मृगचर्म वस्त्र जटा दंड कमंडलु और दर्भों को धारण करे ॥ ४ ॥

सांझ सवेरें भिक्षाटन करके गुरुजी के अर्पण करे, जो गुरुजी आज्ञा देवें तौ भोजन करे नहीं तौ कभी उपवास भी करजावै ॥ ५ ॥

सुशील मितभोजी चतुर श्रद्धावान् और जितेन्द्रिय रह कर, स्त्रियों में और स्त्रीनिर्जित अर्थात् लंपटों में जितना प्रयोजन उतना ही व्यवहार राखे ॥ ६ ॥

बृहद्व्रत (बडे व्रत वाला) विरक्त पुरुष स्त्रियों के गीत को न सुनें, क्योंकि ? इन्द्रियें बडी मथन करने वाली है बलात्कार से मन को हरलेतीं हैं ॥ ७ ॥

यदि आप युवा अवस्था वाला हो तौ युवा अवस्था वाली गुरु पत्नियों से केशप्रसाधन, (केस सम्हारना) उन्मर्दन (उबटन) स्नान, अभ्यंजन, (तेल लगावना) इत्यादिक कार्य न करावै ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

न कारयेदित्यत्र हेतुः—नन्विति। रहः एकान्ते अन्यदा केशप्रसाधनादिव्यतिरिक्तावसरे अनेकान्तावसरे वा यावदर्थं तदुक्तं कुर्यात् ॥ ९ ॥

ननु, मिथ्यात्वात् अतिकश्मलत्वाच्च स्वयं त्यक्तप्रायं स्त्र्यादि जह्यादिति कोऽयमतिनिर्बन्धः ? तत्राह—कल्पयित्वेति। आत्मना स्वरूपसाक्षात्कारेणेदं देहेन्द्रियादिकम् आभासमात्रं कल्पयित्वा निश्चित्य यावदसौ जीव ईश्वरः स्वतन्त्रो न भवेत् तावत् द्वैतम् अहं पुमानियं स्त्रीति भेदो न विरमेत्. ततः किमत आह, ततो हि द्वैताद्विपर्ययः गुणाध्यासेन भोग्यताबुद्धिः अतो जह्यादेवेत्यर्थः ॥ १० ॥

एतत् सर्वं सुशील इत्याद्युक्तं गृहस्थस्य विशेषमाह—गुरुवृत्तिरिति ॥ ११ ॥

अञ्जनादीनामामिषान्तानां द्वन्द्वैक्यम् अञ्जनं शरीरस्य अभ्यञ्जनं शिरसः स्त्रियश्चावलेखाश्च चित्रकर्म स्त्रीणां कुड्यादौ लेखनं वा तन्निरीक्षणं वा अत्राभ्यङ्गादि स्वरूपतो निषिध्यते पूर्वन्तु कथञ्चिदापदि प्राप्तमपि स्त्रीकर्तृकं निषिद्धमिति भेदः ॥ १२ ॥

* कल्पयत्यात्मना इति वीर० पाठः।

श्रीधरस्वामिकृतभावार्थदीपिका।

अङ्गैः शिक्षादिभिरुपनिषद्भिश्च सहितां वेदत्रयीमधीत्य अवबुध्य च तदर्थंश्च विचार्य यावदर्थं स्वाधिकारानुसारेण ॥ १३ ॥

यदीश्वरः शक्तः तर्हि गुरोः काममपेक्षितं वरं दत्वा यथाधिकारं गृहस्थाद्याश्रमं स्वीकुर्यात्तत्रैव वा वसेत् नैष्ठिकः स्यादित्यर्थः ॥ १४ ॥

स्वधामभिः स्वाश्रयैर्भूतैर्जीवैः सह तं नियन्तृतया ॥ १५ ॥

चरन् एवमाचरन् विदितं विज्ञानं विज्ञेयं येन सः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

कुतस्तन्मात्रकरणे दोषः? तत्राह—नन्विति। अग्निः अग्निसदृशी प्रमदा यथाचातीवाग्निसहचरितं घृतकुम्भं क्षरति तथा पुमानपि प्रमदासहचारी संमुह्येदित्यर्थः। अतः सुतामपि पुत्रीमपि पुमान् रह एकान्ते जह्यात् त्यजेत् अन्यदा केशप्रसाधनादिव्यतिरिक्ताव-सरे अनैकान्तावसरे वा यावत्तदुक्तमर्थं प्रयोजनं तावन्मात्रं करो-तीति तादृशो भवेत् ॥ ९ ॥

एवं ब्रह्मचारिणो धर्मानभिधाय यदुक्तं "सुशीलो मितभुक्" इत्यादि तद्यतिगृहस्थयोरपि ब्रह्मोपासननिष्ठयोरतिदेक्ष्यन् ताव-द्यावच्छरीरावसानमेवं धर्मा अनुष्ठेया इत्याह-कल्पयतीति। ईश्वरो भगवान् यावदिदमात्मन आभासं दृश्यं शरीरं कल्पयति प्रवृत्तिः समर्थं करोति तावद्द्वैतं देवत्वमनुष्यत्वब्राह्मणत्वाद्यभिमानरूपं भेदज्ञानमनुवर्त्तत इति शेषः। नन्वनुवर्त्ततां ततः किं तत्राह, अस्य पुंसस्ततो ऽध्यासाद्विपर्ययः उत्तरोत्तरविपर्ययः देहात्मभ्रमः पुरुषार्थविपर्ययो वा भवति तस्माद्यावद्द्वैतानुवृत्तिः स्वधर्मेभ्यो न विरमेत्। कल्पयित्वेति पाठान्तरम् तत्र यावदिदमाभासं शरीरं ता-वदीश्वरः प्रभुः समर्थः स्वधर्मानुष्ठानशक्तस्सन् आत्मनः स्वस्य द्वैतं मनुष्यत्वब्राह्मणत्वादिभेदं कल्पयित्वा स्थित इति शेषः। देहात्मा-भिमानयुक्त इत्यर्थः। अत एव तावन्न विरमेद्धर्मादितिशेषः। विरामे बाधकमाह—हि यस्मादध्यासाद्विरामाद्वाऽस्य विपर्ययः उत्तरो-त्तरदेहात्मभ्रमः यद्वा यावदिदं शरीरमनुवर्त्तते तावदिदं द्वैतं मनुष्यत्वादिकमात्मन आभासगात्रं कल्पयित्वा द्वैतं देहाकारो न त्वात्माकार इति कल्पयित्वा देहविलक्षणमात्मानमनुसन्धाये-त्यर्थः। ईश्वरः कर्त्तुं समर्थः न विरमेत् स्वधर्मान्नविरमेदि-त्यर्थः ॥ १० ॥

उक्तं यतिगृहस्थयोरप्यतिदिशति-एतदिति। एतत्सुशील इत्या-दिनोक्तं सर्वं व्रतस्थस्य ब्रह्मोपासनरूपव्रतनिष्ठस्य यतेस्तुर्याश्रमि-णः अपि शब्दाद्गृहस्थस्यापि समाम्नातं तत्र गृहस्थस्य किंचिद्वि-शेषमाह-गुरुवृत्तिरिति। गुर्वी वृत्तिर्गुर्वनुवृत्तिः स्त्रीसङ्गराहित्यादि-रूपा ब्रह्मचर्यवृत्तिः गृहस्थस्य तु विकल्पेन कदाचिद्भवेत् कदाचिन्न स्यात्। कदा न भवेत्? इत्यपेक्षायां तं कालं निर्दिशन्विकल्पे हेतुं वदन् गृहस्थं विशिनष्टि—ऋतुगामिन इति। ऋतुगामित्वाद्गुरुवृ-त्तिविकल्प इति भावः। ऋतुकालेषु गुरुवृत्तिर्नास्तीति च भावः अस्या वृत्तेर्दुष्करत्वाभिप्रायेण गुर्वीति विशेषणमुपात्तम् ॥ ११ ॥

किञ्च ये धृतव्रताः गृहस्थास्ते अञ्जनादीन् त्यजेयुः अञ्जनाद्या-मिषांतानां द्वन्द्वैक्यं तत्राञ्जनं शरीरस्य तैलाद्यञ्जनम् शिरस अभ्यञ्जनमवशिष्टदेहस्य उन्मर्दः उद्वर्तः स्वप्र-लेखा कुड्यादिषु स्त्रीप्रतिकृतिलेखनमामिषं मांसं मधु मद्यमिदं स्त्रियाद्यभिप्रायकं स्रक् च गन्धलेपश्चाऽलङ्कारश्च तान् ॥ १२॥

एवं ब्रह्मचर्याश्रमधर्मानभिधायाथाश्रमान्तरधर्मान्विवक्षुस्ता-वदाश्रमन्तराणामुक्तविधब्रह्मचर्याश्रमपूर्वकत्वमाह. उषित्वैवमिति, द्वाभ्याम्। द्विजस्त्रैवर्णिकः एवमित्थं गुरुकुले. उषित्वा साङ्गो-पनिषदं सांगसशिरस्कां त्रयीं यथाबुद्धिबलं यावत्स्वापेक्षितम-धीत्याऽवबुध्य तदर्थं ज्ञात्वा अवबध्येति पाठस्तूचितः "वेदमधी-त्याभिसमावृत्य कुटुम्बे शुचौ देशे" इति श्रुत्यर्थस्याऽत्र प्रत्यभि-ज्ञानादवबध्य समावर्त्तनं कृत्वा ॥ १३ ॥

यदीश्वरः शक्तश्चेत्तर्हि गुरोः काममपेक्षितं वरं दत्वा गुरुणा ऽभ्यनुज्ञातः गृहं वनं वा प्रविशेद्गृहस्थाश्रमं संन्यासा-श्रमं वा स्वीकुर्यादित्यर्थः। वनशब्दः शुचिदेशोपलक्षकः कुटुम्बे शुचौ देशे इति श्रुत्यनुरोधान्न तु वानप्रस्थाश्रमोपलक्षकः ब्रह्मचर्यानन्तरं तत्परिग्रहानुपपत्तेः स हि गार्हस्थ्यानन्तरभावि "ब्रह्मचर्यं समाप्य गृही भवेत् गृहाद्वनी भूत्वा प्रव्रजेत् यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वनाद्वा" इति जाबालिश्रुतेः गार्हस्थ्यानन्तरं प्रव्रजेत् प्रव्रजनन्तु सन्यासाश्रमपरिग्रहो वानप्रस्थाश्रमपरिग्रह-श्चेत्युभयविधं विवक्षितं यथेष्टं संन्यसेद्वनं वा प्रतिष्ठेते-त्यर्थः। तत्र वा वसेत् तत्र शब्देन ब्रह्मचर्यं गार्हस्थश्च विव-क्षितं ब्रह्मचर्यं एव निष्ठितो भवेत् गृहं प्रविश्य तत्रैव वा स्थितो भवेदित्यर्थः ॥ १४ ॥

एवं यथेष्टं परिगृहीतानां सर्वाश्रमाणामनुगतं धर्मं तत्फलं चाह—द्वाभ्याम्, अग्नाविति। अग्नाविति तुर्याश्रमव्यतिरिक्ताश्रमा-भिप्रायकं तस्यानग्नित्वात् गुरावग्नावात्मनि स्वस्मिन् सर्वभूते-ष्वान्तःप्रविश्यानियमनपूर्वकं धारकतयास्थितमितिशेषः। स्थितं अधोक्षजं भगवन्तं पश्येत् अधोक्षजो धामाऽऽधारो येषां तैर्भूतैरप्रविष्टं पश्येत् व्याप्यवस्तुगतदोषासंस्पृष्टं पश्येत् प्रविष्टवच्च पश्येत् अन्तर्बहिश्च व्याप्यस्थितत्वादितिभावः ॥ १५ ॥

एवंविधदर्शी ब्रह्मचर्याद्यन्यतमश्चरन्स्वाश्रमधर्माननुतिष्ठन् विदितं विज्ञानं विज्ञेयं स्वात्मपरमात्मयाथात्म्यं येन तादृशः पर ब्रह्माधिगच्छति प्राप्नोति ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

कुतो न कार्यमत्राह—नन्विति। अन्यदा व्यवहारयोग्य मर्थे ॥ ९ ॥

ननु, बन्धनिवृत्त्यर्थं भगवदर्पणबुद्ध्या धर्मोऽनुष्ठेय विधीयते तस्य मिथ्यात्वेन स्वत एव निवृत्त्युपपत्तेर्न तद्विधा मत्रावश्यकमित्याशङ्क्येश्वरकल्पितस्य मिथ्यात्वासम्भवेन यद्बुद्ध्या यस्य शृङ्खलाबन्धस्तस्य तत्प्रसादेन तन्निवृत्तिर्वा

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

श्वरप्रसादजनकधर्मग्रामो विधेयो ऽन्यथा बन्धानुस्थितिरित्याश-यवांस्तस्येश्वरकल्पितत्वमाह-कल्पयेदिति । यावंतं कालमीश्वरः आत्मनो जीवस्य ज्ञानलक्षणारहितं ज्ञानवदवभासमानमिदमा-भासमज्ञानं कल्पयेत्तावंतं कालं द्वैतमयथार्थज्ञानं न विरमेन्ना-पगच्छेत् ततोऽ ज्ञानादस्य विपर्ययो बन्धो ऽनुवर्तेत इति शेषः तदुक्तम्—

(१) "व हुत्वेनैव वस्तूनां यथार्थज्ञानमुच्यते ।
अद्वैतज्ञानमित्येव द्वैतज्ञानं तदन्यथा ॥
(२) यथा ज्ञानं तथा वस्तु यथा वस्तु तथा मतिः ।
नैव ज्ञानार्थयोर्भेदस्तत एकत्ववेदनम्" इति च ।

ननु, वर्णादेर्विहितो धर्मग्रामः कियन्तं कालमनुष्ठेयो बहुसमय-साध्यत्वे दुःखप्रयासत्वेनाशक्त्यविरक्त्यानधिकारिकः स्यादि-त्याशङ्क्याह—कल्पयेदिति । यावदीश्वर इदमाभासं मिथ्याभूतं जगत्कल्पयेत् तावद् द्वैतं वर्णाश्रमादिधर्मलक्षणं न विरमेत् नापगच्छेत् ततो ऽधिष्ठानं ज्ञानं स्यात्ततो विहितधर्मग्रामस्य विपर्ययो निवृत्तिरित्ययमर्थो हिशब्दसूचितया "सत्यसृष्टावशक्ता हि मायासृष्टिं वितन्वत" इति स्मृत्या विरुद्धत्वेनानुपपन्नः ईश्वर इत्यनेन सत्यसृष्टिसामर्थ्यं सूचयति तात्पर्येण विधानं चानुप-पन्नं यत उक्त एवार्थः ॥ १० ॥

नन्वयं धर्मो ब्रह्मचारिणो भवेदुतान्यस्यापि सम्भवति ? नाद्यः अतिव्याप्तेः न द्वितीयः पृथग्विधानानुपपत्तिरित्यतोऽतिदे-शन्यायेन यथासम्भवमन्यस्यापीत्याह-एतदिति । अन्यद्वक्ष्यमाणं न केवलं गृहस्थस्यैव किन्तु यतेरपीत्याह—यतेरपीति । यथासम्भ-मित्युक्तं विवृणोति-गुरुवृत्तिरिति । गुरुवृत्तिर्गुरौ वासः ब्रह्मचर्यं भिक्षावृत्तिरित्येतत्सर्वं गृहस्थस्य निवर्तेत इत्यर्थः । विकल्पेन व्यवस्थितविकल्पेनोदितानुदितहोमवदित्यर्थः । कुतो निवर्तेत इति तत्राह-ऋतुगामिन इति ॥ ११ ॥

पञ्चयज्ञाद्याचरणाभ्यासेन कालायापनं कुर्वतो गृहस्थस्यापि व्रतधारणं ब्रह्मचारिवदक्ष्यंजनादिकं वर्जनीयमित्याह—अञ्जनेति । गवलेपं दर्पम् ॥ १२ ॥

अवबुध्य अर्थविचारं कृत्वा तत्त्वं ज्ञात्वा ॥ १३ ॥

गार्हस्थ्यधर्मस्य वानप्रस्थधर्मस्य यतिधर्मस्य चानुष्ठानेन समर्थश्चेदेष्वभीष्टं कुर्यादित्याह—यदिति—

"नैष्ठिको ब्रह्मचारी तु वसेदाचार्यसन्निधौ ।
तदभावे * स्यतनये पत्न्यां वैश्वानरेपिच" ॥

(१) वस्तूनांबहुत्वेन बहुत्वप्रकारकवस्तुविषयकत्वेन यथा-र्थज्ञानमेवाद्वैतज्ञानमित्युच्युते । वस्त्वैक्यविषयकं तु द्वैतज्ञान मित्युच्यते नन्वेतद्विरुद्धम् ॥

(२) अद्वैतज्ञानस्यैव वस्त्वैक्यज्ञानत्वेन वक्तव्यत्वादित्या-शङ्क्यतद्धटयति-यथेति । ज्ञानार्थयोः सादृश्यलक्षणमैक्यमादाया-ऽद्वैतज्ञानं भेदज्ञानमित्युच्यते नतु वस्त्वैक्यविषयम् ॥

* गुरुपुत्रे गुरुपत्न्यांवेति

इति वचनात्. एतादृशस्य गुरौ वासो ऽनुज्ञायते अन्यस्य गुरो-राज्ञया दूरं गत्वा गृहाश्रम इति तदुक्तं "गुरोराज्ञानुरोधेन दूरस्थो वा गृही भवेत्" इति चेति ॥ १४ ॥

भगवदर्पणबुद्ध्याऽग्न्यादौ क्रियमाणं कर्म तस्य बुद्ध्या कर्तव्यं नतु तदैक्यबुद्ध्येत्याशयेनाह अग्नाविति—

"सगुरुर्यः क्रियाः कृत्वा वेदमस्मै ददाति च ।
उपनीय वदेद्वेदमाचार्यः स उदाहृतः ॥
एकदेश उपाध्याय ऋत्विग्यज्ञकृदुच्यते ।
एते मान्या यथापूर्वमेभ्यो मातागरीयसि" ॥

इति वचनात् गुरुशब्देन सर्व एते विवक्ष्यन्ते स्वधामभिरावासस्था-नभूतैरप्रविष्टं सर्वगतं प्रविष्टवत्स्थितं अनुरूपवन्तं अप्रविष्टः सर्वगतः प्रविष्टस्त्वनुरूपवान् "एवं द्विरूपो भगवान्हरिरेको जनार्दनः" इतिवचनात् ॥ १५ ॥

एवमाकारेण क्रियमाणस्य कर्मणः फलमाह एवं विध इति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

गुरुवृत्तिरिति, गुर्वनुवृत्तिः ॥ ११ ॥

अञ्जनेत्यस्य टीकायां स्त्रीकर्तृकं निषिद्धमिति विचार्यम् अभ्य-ञ्जनेनाति विशेषात् ॥ १२ ॥

उषित्वेति युग्मकम् ॥ १३—३१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तत्र हेतुः—नन्वग्नि रिति । रहः रहसि एकान्ते अन्यदा अन्यत्र अनेकान्तेपि यावदर्थंकृत् यावताऽवस्थानेनार्थःप्रयोजनं सिद्ध्ये-त्तावदेवस्थितिं कुर्यादित्यर्थः ॥ ९ ॥

ननु, निवृत्ताभिमानस्य विजितेन्द्रियज्ञानिनो युवतयः किम-पकर्तुं प्रभवेयुः ? तत्राह—कल्पयित्वेति । ईश्वरोज्ञानसमर्थोऽपि इदं देहदैहिकविषयाभिमानादिकं बाधितानुवृत्तिन्यायेनाभासं कल्प-यित्वा तत्त्वज्ञानेन विजितं नाममात्रेणैव स्थितमकिञ्चित्करं कृत्वाऽपि यावदात्मना मनसा सह वर्त्तेत. तावत् द्वैतं अहं पुमान् इयं स्त्री इदं मे प्रियमिदमप्रियमिति भेदबुद्धिर्न विरमेत. ततश्च विपर्ययः पूर्ववत् संसारावृत्तिः । यद्वा ननु,त्यक्तसुतभगिन्यादिबन्धु-वर्गस्य जितेन्द्रियस्य किमस्माद्भयं ? तत्राह-कल्पयित्वेति । व्यवहारं व्यावहारिकं वस्तु च त्यक्त्वापि आत्मना मनसा यावत् यत् प्रमाणकम् इदम् आभासं इयं मे भगिन्येव इयं माता इयं सुते-त्यादिसम्बन्धाभासं कल्पयित्वा ईश्वरः तत्तत्कृतस्नेहोत्थसुखेन ईशीतः तावत् तत्प्रमाणकं द्वैतं भेदो न विरमेत् नत्वस्य स्तोक-त्वात् कल्पितत्वाच्च न काचिच्चिन्ता तत्राह—ततो हीति ॥ १० ॥

सर्वं सुशीलं इत्याद्युक्तं विकल्पेन कर्त्तव्यावेत्यर्थः ॥ ११ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अञ्जनं शरीरस्य अभ्यञ्जनं शिरसः स्त्रियं च अवलेखां चित्र कर्म च अत्राभ्यङ्गादिकं स्वरूपत एव निषिद्धयते पूर्वन्तु कथञ्चिदापदि प्राप्तमपि स्त्रीकर्तृकं निषिद्धमिति भेदः ॥ १२—१३ ॥

यदीश्वरः शक्तस्तदा गुरोः काममपेक्षितं वरं दत्वा गृहं प्रविशेत् गृहस्थो भवेदित्यर्थः । तत्रैव वा वसेत् नैष्ठिकब्रह्मचारी स्यात् ॥ १४ ॥

स्वधामभिः स्वाश्रयैर्जीवैः सह तन्नियन्तृतया ॥ १५—१७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अन्यदा अनैकान्ते यावदर्थं यथोपयोगं तल्लालनादिकम् कुर्यात् ॥ ९ ॥

सुताया एव का कथा सर्वोपि लोकवेदप्रसिद्धः ग्राह्याऽग्राह्यभेदः यावन्महाप्रलयस्तावदनिवार्य एव यस्तु सर्वं प्राकृतमिदमेकमेव किमत्राग्राह्यं वाति साहसेन ग्राह्याभेदं न स्वीकरोति तस्य विपर्ययः स्यादित्याह—कल्पयित्वेति । ईश्वरः सर्वात्मा जगद्धेतुरिदं स्वशक्तिविकारभूतमाभासं आ समन्ततः ग्राह्याग्राह्यादितया भासमानम् आत्मना कल्पयित्वा यावद्वर्तते तावत् द्वैतमिदं ग्राह्यमिदमग्राह्यमिति भेदो न विरमेत् अङ्गीकार्य्य एव भवेत् हि यस्तु नाङ्गीकरोति ततो अनङ्गीकारात् अस्यानङ्गीकर्तुः अमृतवद्विषोदकपानेन जलवदग्निस्नानेन विपर्ययः शरीरनाश एव स्यादित्यर्थः ॥ १० ॥

एतत्सर्वं सुशील इत्यादिनोक्तं गृहस्थस्य यतेस्तुर्य्याश्रमिण उपलक्षणं यतेरित्युक्तिस्वानप्रस्थस्यापि समाम्नातम् गृहस्थस्य गुरुशुश्रूषायां विकल्पं वदन् ब्रह्मचारिप्रभृतिभिर्नित्यं गुरुशुश्रूषा यथोपयोगं कार्येति द्योतयति गुरुवृत्तिरिति गुरौ वृत्तिर्वर्तनं तच्छुश्रूषेत्यर्थः गृहस्थस्य विकल्पेन बोध्या तत्र हेतुगर्भं विशेषणम् ऋतुगामिन इति आवश्यकर्तुगमनादिपरवशस्य नित्यं गुरुशुश्रूषायामावकाशाभावादित्यर्थः ॥ ११ ॥

अञ्जनं नेत्रयोः अभ्यञ्जनं शिरसः उन्मर्दश्च उन्मर्दनं शरीरस्य स्त्री च अवलेखा च दृश्यादिप्रतिकृतिश्च आमिषं च तेषां द्वन्द्वैक्यम् मधु मद्यं स्रगादिकान् च ये धृतव्रतास्ते त्यजेयुः ॥ १२ ॥

अङ्गैः शिक्षादिभिरुपनिषद्भिश्च सहितां त्रयीं वेदत्रयीम् द्विज स्त्रैवर्णिकः अधीत्य तदर्थं चावबुध्य ॥ १३ ॥

यदीश्वरः समर्थस्तर्हि गुरोः कामं यथेष्टं वरं दत्त्वा यथेष्टां दक्षिणां दत्त्वा गृहं प्रविशेत् गृही भवेत् विषयेभ्यो विरक्तश्चेद्वनं घनोपलक्षितं जितेन्द्रियवासयोग्यं स्थानं प्रविशेत् तत्र द्वैविध्यमाह—प्रव्रजेत् सन्यासी भवेत् तत्र वा वसेत् तत्रैव ब्रह्मचर्याश्रमे वसेत् नैष्ठिको भवेदित्यर्थः ॥ १४ ॥

भूतैः चेतनाचेतनरूपैरधोक्षजशक्तिमयैः स्वधामभिः अधोक्षजाधिष्ठितैः सहाधोक्षजं सर्वभूतेषु अप्रविष्टमपि विभुस्वरूपस्य शक्तिद्वयं वितत्य संस्थितस्य प्रवेशायोगात् प्राविष्टवत्पश्यन् एकैकस्मिन् भूते चराचरभगवद्रूपाणि पश्येत् तथोक्तम्—

"क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ।
उत्तमः पुरुषः स्त्वन्यः परमात्मेत्युदाहृतः ॥
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः" ।

अग्नौ गुरौ च तदभेदेनोपासनार्थं पश्येत् आत्मनि चोपासके भावि कृतमङ्गलमूर्तिं पश्येदित्यग्न्यादिपृथक् निर्देशाभिप्रायः ॥ १५ ॥

एवंविधः विदितं विज्ञानं तत्वत्रयज्ञानं येन सः ब्रह्मचारी वानप्रस्थो वा यतिर्वा गृही वा चरन् प्रारब्धंकर्मफलं भुञ्जन् परमधोक्षजं ब्रह्माधिगच्छति भगवत्प्राप्तिरूपा मुक्तिस्तत्त्वत्रयज्ञानपूर्वकभगवद्ध्याननिष्ठा यस्मिन्नाश्रमे भवेत्तस्यै वाश्रमिणः स्यादिति फलितोर्थः ॥ १६ ॥

भाषा टीका ।

क्योंकि ? यह निश्चित और प्रसिद्ध है, कि—स्त्री अग्नि रूप है और पुरुष घृत कुंभमय (घीके कुप्पे के समान) है, इस लिये प्रयोजन से अधिक अपनी पुत्री को भी एकांत में त्यागदे ॥ ९ ॥

ज्ञान समर्थ होकर भी भान होने वाले इस जगत को जबतक अपने मनसे द्वैत भाव से अर्थात् स्त्री पुत्रादि में भेद भाव कल्पना करके वर्तमान है, तब तक विहित कर्मों से विराम को न प्राप्त होवे क्योंकि ? विराम को प्राप्त होने से ही इसको विपर्यय है अर्थात् उत्तरोत्तर संसार है ॥ १० ॥

ये जो सुशील मितभोजी इत्यादि षष्ठ श्लोक में कहे हुए धर्म हैं, सो गृहस्थ के और यति के भी हैं, और ऋतु गामी होने से गृहस्थ को गुरुकी वृत्ति में विकल्प है ॥ ११ ॥

जो अध्ययनादि व्रत धारण करने वाले हैं उनको अंजन (काजर) अभ्यंजन, उन्मर्दन, स्त्री चित्र दर्शन, आमिष मधु माला चंदनलेप और अलंकार ये सब वर्जित हैं ॥ १२ ॥

ब्राह्मण इस प्रकार गुरुकुल वासकर षट् अङ्ग और उपनिषदों सहित वेद का यावत्प्रयोजन और बुद्धि बलके अनुसार अध्ययनकर के गुरुजीको दक्षिणा देकर गुरुकी आज्ञापाकर यथेष्ट गृहमें प्रवेश करे, यदि समर्थ होय तो आज्ञालेकर वनमें जावे अथवा संन्यास ग्रहण करे, वा गुरु के समीप ही निवास करे ॥ १३ ॥ १४ ॥

अग्नि गुरु आत्मा तथा सर्वभूतों मे अपने आश्रयरूप भूतों सहित अप्रविष्ट भी ईश्वर को नियमन कर्तृत्व बुद्धिसे प्रतीति सरीका देखें ॥ १५ ॥

इस प्रकार का ब्रह्मचारी हो वानप्रस्थ हो यति हो वा गृहस्थ

वानप्रस्थस्य वक्ष्यामि नियमान्मुनिसम्मतान् ।
यानातिष्ठन्मुनिर्गच्छेदृषिलोकमिहाञ्जसा ॥ १७ ॥
न कृष्टपच्यमश्नीयादकृष्टं चाप्यकालतः ।
अग्निपक्वमथाऽऽमं वा अर्कपक्वमुताहरेत् ॥ १८ ॥
वन्यैश्चरुपुरोडाशान्निर्वपेत्कालचोदितान् ।
लब्धे नवेनवेऽन्नाद्ये पुराणं तु परित्यजेत् ॥ १९ ॥
अग्न्यर्थमेव शरणमुटजं वाऽऽद्रिकन्दरम् ।
श्रयेत हिमवाय्वग्निवर्षार्कातपषाट् स्वयम् ॥ २० ॥
केशरोमनखश्मश्रुमलानि जटिलो दधत् ।
कमण्डल्वजिने दण्डवल्कलाग्निपरिच्छदान् ॥ २१ ॥
चरेद्वने द्वादशाब्दानष्टौ वा चतुरो मुनिः ।
द्वावेकं वा यथा बुद्धिर्न विपद्येत कृच्छ्रतः ॥ २२ ॥
यदा ऽकल्पः स्वक्रियायां व्याधिभिर्जरया ऽथवा ।
आन्वीक्षिक्यां वा विद्यायां कुर्यादनशनादिकम् ॥ २३ ॥
आत्मन्यग्नीन्समारोप्य सन्न्यस्याहंममात्मताम् ।
कारणेषु न्यसेत्सम्यक्सङ्घातं तु यथाऽर्हतः ॥ २४ ॥

भाषा टीका ।

हो ऐसे आचरण करता हुआ विज्ञान को प्राप्त होकर परब्रह्म को प्राप्त होताहै ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ऋषिलोकं महर्लोकम् ॥ १७ ॥

अकृष्टमकृष्टपच्यम् अकालतः पाककालात्पूर्वमेव निष्पन्नमित्यर्थः । अर्कपक्वं फलादि आहरेदश्नीयात् ॥ १८ ॥

वन्यैर्नीवारादिभिश्चरुपुरोडाशान् कालचोदितान्नित्यान् पुराणं पूर्वसञ्चितम् ॥ १९ ॥

हिमादीन्सहत इति तथा ॥ २० ॥

केशादीन्मलं चाप्रक्षालनेन धारयन् कमण्डल्वादींश्च दधत् ॥ २१ ॥

कृच्छ्रतस्तपःक्लेशाद्यथा बुद्धिर्न नश्येत्तथा चरेत् ॥ २२ ॥

द्वादशाब्दाद्यनन्तरमपि यदि स्वधर्मानुष्ठाने शक्तस्तर्हि वन एव वसेत् यदि तु ज्ञानाभ्यासे योग्यस्तर्हि संन्यसेदित्युत्तराध्याये वक्ष्यति तदुभयरहितस्य तु यत्कृत्यं तदाह, यदाऽकल्पोऽसमर्थः आन्वीक्षिक्यां विद्यायां ज्ञानाभ्यासे ॥ २३ ॥

अनशनादिकरिष्यतः पूर्वकृत्यमाह—आत्मनीत्यादि, यावत्समाप्ति । यथाऽर्हतो यथायोग्यं स्वकारणेष्वाकाशादिषु संघातं देहं न्यसेत्प्रविलापयेत् ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तावद्वानप्रस्थधर्मान् वक्तुं प्रतिजानीते—वानप्रस्थस्येति । मुनीनां सम्मतान् वानप्रस्थस्य नियमान् धर्मान् वक्ष्यामि. नियमान् विशिनष्टि—यान्नियमानिह लोके ऽनुतिष्ठन् मुनिरञ्जसा ऋषीणां लोकं महर्लोकं प्राप्यं भगवल्लोकं वा गच्छेत् ॥ १७ ॥

नियमानाह—नेति । कृष्टपच्यं कृष्याद्युपायैर्निष्पन्नं शाल्यन्नादिकं नाश्नीयाद्वनस्थ इति शेषः । अकृष्टपच्यमपि फलमूलादिकमकालतः पाककालात् पूर्वमेव परिपाकावस्थायाः पूर्वमेव तथाग्निपक्वमामञ्च नाश्नीयात् उतापितु अर्कपक्वं सूर्यकिरणपक्वं फलादिकमेवाहरेदश्नीयात् ॥ १८ ॥

एवं वानस्थो धर्म उक्त अथावश्यकान् नियमानाह-वन्यैरिति । वन्यैर्नीवारादिभिश्चरुपुरोडाशान् कालचोदितान्नित्यान्निर्वपेत् नीवारादिनिष्पन्नैरेव चरुपुरोडाशैर्यथोदितधर्मान् कुर्यादित्यर्थः । नवेनवे नूतने नूतनेऽन्नाद्येऽन्ने लब्धे पुराणं पूर्वसञ्चितमन्नाद्यं परित्यजेत्॥१९॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अग्न्यर्थमग्नीनां रक्षणार्थमेव उटजं पर्णशालात्मकं शरणं स्वगृहं कुर्यादथवाद्रिकन्दरं पर्वतगुहां वा श्रयेत स्वयन्तु हिमं च वायुश्चाग्निश्च वर्षश्च सूर्यातपश्च तान्सहत इति हिमवाय्वग्निवर्षार्कातपषाट् ॥ २० ॥

जटाः सन्त्यस्येति तादृशः केशादीन् देहमलञ्चाघमर्षणेन धारयन् कमण्डल्वादींश्च दधदग्निपरिच्छदाः स्रुक्स्रुवाद्युपकरणानि च दधत् ॥ २१ ॥

कृच्छ्रतः क्लेशाद्यथा बुद्धिर्न विपद्येत न नश्येत् तथा द्वादशाब्दान् संवत्सरानष्टौ वा चतुरो वाब्दौ द्वौ वा एकं वा चरेन्नियमानिति शेषः ॥ २२ ॥

यदा द्वादशाब्दाद्यनन्तरं व्याध्यादिभिरुत जरया वा स्वक्रियायां स्वकीयधर्माचरणे आन्वीक्षिक्यामात्मविचाररूपायां विद्यायां तुरीयाश्रमधर्मे चाशकस्तदाऽनशनादिकमादिशब्देनाग्न्यारोपणादिकं वक्ष्यमाणं विवक्षितं तत्कुर्यात् । २३ ॥

तदेवाह—आत्मनीति । अग्नीनात्मनि समारोप्याहङ्कारममकारौ संन्यस्य त्यक्त्वा यथायोग्यं स्वस्वकारणे संघातं भूतसंघातरूपं शरीरेन्द्रियजातादिकं सम्यक् न्यसेल्लीनमनुसन्दधीत ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ब्रह्मचारिवानप्रस्थनियमानां कृच्छ्रसाध्यत्वेन साम्यात्प्रथमाश्रमधर्मकथनानन्तरं वानप्रस्थधर्मानाह—वानप्रस्थस्येति । ऋषेः सर्वज्ञस्य लोकं वैकुंठं "त्वमग्ने प्रथमो अङ्गिरसः" इति श्रुतेः "ऋषिर्हरौ तापसे च ज्ञानवत्यपि कीर्तितः" इति ॥ १७ ॥

कृष्टपच्यं कर्षणादिना पक्वं व्रीह्यन्नं अकालतो विहितकालमुल्लङ्घ्य आममग्न्यादिनाऽनातपाकम् आमलकादि ॥ १८ ॥

वन्यैर्देवव्रीह्यादिभिः कालचोदितान् तत्तत्कालविहितान् ॥१९॥

अग्न्यर्थमग्निरक्षार्थम् उटजं पर्णशालां शरणं गृहं अन्यदा हिमादिकं श्रयेत आतपनमातपः ॥ २० ॥

अग्निपरिच्छदा दर्भादयः ॥ २१ ॥

न विपद्येत क्लिष्टो न भवेत् ॥ २२ ॥

अकल्पोऽसमर्थः आन्वीक्षिक्यां आत्मविचारलक्षणायाम् अनशनमशनत्यागः तत्राशकौ मासे गते पक्षे वा दिवसे वा ऽश्नीयादित्यादिकमादिपदेन गृहीतं यथाह, याज्ञवल्क्यः "पक्षे गते वा प्राश्नीयान्मासे वाऽहनि वागते" इति ॥ २३ ॥

म्रियमाणेन पुरुषेण ऽप्यारम्भं कार्यकारणजातं यत्तत्तद्वं कार्यमेतस्मिन्कारणे विलीयत इति ध्यानं कर्तव्यमित्यभिप्रायेणाह, कारणेष्विति । सङ्घातं कार्यजातं न्यासो ज्ञानपूर्वकं ध्यानं "कार्यस्य कारणलयज्ञानमात्रं विलापनम्" इति वचनात् ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अकालतः पाककालात्पूर्वमेव पक्वमित्यर्थः ॥ १८ ॥

वन्यैः नीवारादिभिः निर्वपेत् दद्यात् कालचोदितान् विहितान् ॥ १९ ॥

हिमादीन् सहत इति सः ॥ २० ॥

मलानि दन्ताद्यधावनोत्थानि ॥ २१ ॥

यदा द्वादशाब्दादि मध्य एव अकल्प- असमर्थः आन्वीक्षिक्यां ज्ञानाभ्यासे ॥ २२—२३ ॥

अनशनादिकरिष्यतः पूर्वकृत्यमाह—आत्मनीत्यादि, यावत् समाप्ति । यथार्हतः यथायोग्यं स्वकारणेष्वाकाशादिषु सङ्घातं देहं न्यसेत् प्रविलापयेत् ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ऋषिलोकं महरादिलोकं सकामश्चेद्‌यच्छेत् उक्तरीत्या मधोक्षजध्याननिष्ठस्य तु मुक्तिरुक्तैवेति विवेकः ॥ १७ ॥

कृष्टपच्यं कृष्या निष्पन्नं नाश्नीयात् अकृष्टमकृष्टपच्यमपि फलादिकमकालतः पक्वं नाश्नीयात् वन्यैर्वनोद्भवैः फलादिभिः कालचोदितान् कालेकाले विहितान् चरुपुरोडाशान् निर्वपेत् दद्यात् पुराणं पूर्वसञ्चितम् ॥ १८ ॥ १९ ॥

स्वयं हिमादीन् सहते इति तथा अग्न्यर्थे तु शरणं वृष्ट्यादिनिवारकं गृहमुटजम् पर्णादिनिर्मितमद्रिकन्दरम् वा श्रयेत् ॥ २० ॥

जटाः सन्त्यस्येति जटिलः केशादीन् मलं चोद्वर्तनमाधकरणेन कमण्डल्वादीन् अग्निपरिच्छदान् स्रुक्स्रुवादीन् दधत् चरेदित्युत्तरेणान्वयः ॥ २१ ॥

द्वादशाब्दान् अष्टौ वा चतुरो वा एकमब्दं वा यथा कृच्छ्रतः क्लेशाद्बुद्धिर्न विपद्येत नावसीदेत् तथा वने चरेत् विचरेत् ॥ २२ ॥

यदा स्वक्रियायां स्वनियमे अकल्पः असमर्थः स्यात्तदा आन्वीक्षिक्यां ज्ञानाभ्यासे वर्तेत अनशनादिकं वा कुर्यात् ॥२३॥

अनशनादिकं करिष्यतः पूर्वकृत्यमुपदिशति—आत्मनीत्यादिना । आत्मनि अग्नीन्समावेश्य प्रत्यहं पूज्यानग्नीन्परमपूज्ये आत्मनि परमात्मनि विसृज्य यथार्हतो यथायोग्यं स्वकारणेषु आकाशादिषु सङ्घातं देहं न्यसेत् प्रविलापयेत् लीनं भावयेत् ॥ २४ ॥

भाषा टीका ।

नारदजी बोले, कि—अब हम मुनि संमत वानप्रस्थों के उन नियमों को कहते हैं, जहां पर मनन शील होकर जिनके अनुष्ठान करने से ऋषि लोक को प्राप्त होता है, ॥ १७ ॥

खे खानि वायौ निश्वासांस्तेजस्यूष्माणमात्मवान् ।
अप्स्वसृक्श्लेष्मपूयानि क्षितौ शेषं यथोद्भवम् ॥ २५ ॥
वाचमग्नौ सवक्तव्यामिन्द्रे शिल्पं करावपि ।
पदानि गत्या वयसि रत्योपस्थं प्रजापतौ ॥ २६ ॥
मृत्यौ पायुं विसर्गं च यथा स्थानं विनिर्दिशेत् ।
दिक्षु श्रोत्रं सनादेन स्पर्शमध्यात्मनि त्वचम् ॥ २७ ॥
रूपाणि चक्षुषा राजन् ! ज्योतिष्यभिनिवेशयेत् ।
अप्सु प्रचेतसा जिह्वां घ्रेयैर्घ्राणं क्षितौ न्यसेत् ॥ २८ ॥
मनो मनोरथैश्चन्द्रे बुद्धिं बोध्यैः कवौ परे ।
कर्माण्यध्यात्मना रुद्रे यदहम्ममता क्रिया ।
सत्त्वेन चित्तं क्षेत्रज्ञे गुणैर्वैकारिकं परे ॥ २९ ॥
अप्सु क्षितिमपो ज्योतिष्यदो वायौ नभस्यमुम् ।
कूटस्थे तच्च महति तदव्यक्ते ऽक्षरे च तत् ॥ ३० ॥
इत्यक्षरतया ऽऽत्मानं चिन्मात्रमवशेषितम् ।
ज्ञात्वा ऽद्वयो ऽथ विरमेद्दग्धयोनिरिवानलः ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायाम् वैयासिक्यां
सप्तमस्कन्धे युधिष्ठिरनारदसम्वादे आश्रमधर्मो नाम
द्वादशोऽध्यायः ॥ १२ ॥

भाषाटीका ।

वानप्रस्थ, जोतने बोने से पैदा हुए अन्न को न भोजन करे, और विना जोते बोये होने वाले को भी यदि विना समय का हो, तौ वर्जन करे, अग्नि पक्व वा कच्चा वा सूर्य के तेज से पक्व हो उसका आहार करे, ॥ १८ ॥

वन में स्वयं उत्पन्न होने वाले नीवारादि धान्य से समय २ पर शास्त्र विहित पुरोडाशादि का निर्वाप करे, नये २ अन्नादि के प्राप्त होने पर पुराने संचय का त्याग करता जावे ॥ १९ ॥

अग्नि की रक्षा मात्र के लिये कुटी वा पर्वतादि की कंदरा (गुहा) का शरण ले, और आप तौ स्वयं हिम वायु अग्नि वर्षा सूर्य का आतप (घाम) इन सवों को सहे ॥ २० ॥

केश मस्तक पर रोम शरीर पर, नख डाढी मूँछ, और शुद्ध स्नान से शरीर पर मैल, जटा कमण्डलु मृग-चर्म दण्ड वल्कल और अग्नि के उपकरण [दर्भादि] को धारण करे ॥ २१ ॥

इस प्रकार वानप्रस्थ द्वादशवर्ष आठ वर्ष चार वर्ष दो वर्ष वा एकही वर्ष वन में निवास करे जिस प्रकार अति दुःख से शरीर न नष्ट होजावे, ॥ २२ ॥

जब व्याधियों से वा जरा अवस्था से अपने क्रिया करने में असमर्थ होजावै, अथवा ज्ञानाभ्यास करने में भी अशक्त होजावे, तब अनशन व्रत को धारण करले, अर्थात् भोजनादि का त्याग कर दे ॥ २३ ॥

अहंकार ममकार का त्याग कर आत्मा में अग्नि का समारोपण करके भूत संघात शरीर को अपने २ कारणों में न्यास करे ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेव विभज्य दर्शयति, खे आकाशे खानि देहगतच्छिद्राणि आत्मवान्धीमान् शेषमस्थिमांसादिकाठिनांशम् ॥ २५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवं स्थूलशरीरस्य लयमुक्त्वा लिङ्गशरीररूपस्याध्यात्मादित्रयस्य लयमाह—वाचमित्यादिना । तत्र यद्यपि यथोद्भवं लयस्य युक्तत्वादध्यात्मादीनां स्वस्वकारणेषु राजसाहङ्कारादिषु लयो वाच्यस्तथापीह तेषां लयभावने यमद्वितीयात्मप्रतिपत्तिः परेति यथाकथञ्चिल्लये भाव्ये देवतानां प्रवर्तकत्वेन प्राधान्यादिन्द्रियतद्विषययोर्दैवतासु लयः कथ्यते वक्तव्यसहितां वाचमग्नौ न्यसेत् एवं सर्वत्र पदानि पादौ वयसि विष्णौ ॥ २६ ॥

सनादेन शब्देन सह अध्यात्मनि वायौ अध्यात्मविदिति पाठे वायाविति ज्ञातव्यम् ॥ २७ ॥

ज्योतिष्यादित्ये रूपाणि रसगन्धयोस्त्विन्द्रियाद्याकर्षकत्वेन प्राधान्यविवक्षया देवतासहितस्येन्द्रियस्य विषये लयमाह,प्रचेतसा सह जिह्वां रसनमप्सु रसरूपासु घ्राणशब्देनाश्विनोरप्युपलक्षणं अश्विभ्यां सह घ्राणं ग्रैयैर्गन्धैरुपलक्षितायां क्षिताविस्यर्थः ॥ २८ ॥

परे कवौ ब्रह्मणि अध्यात्मनाऽहङ्कारेण अध्यात्मतामितिपाठे कर्माण्यहङ्कारं चेत्यर्थः कथम्भूते रुद्रे यद्यस्मादहंममतापूर्विका क्रिया भवति तस्मिन् सत्त्वेन चेतनया गुणैर्गुणत्रयकार्यैः प्रागवशिष्टैर्दैवैः सह । यद्वा सत्त्वादिभिर्गुणैर्हेतुभूतैः वैकारिकं भोक्तृत्वादिविकारवन्तं क्षेत्रज्ञं परे निर्विकारे ब्रह्मणि ॥ २९ ॥

ननु, विकारवतः कथं परेऽविकारे लयः स्यात् ? विकारहेतूनां सर्वोपाधीनां लयद्वारेणेत्याह—अप्स्विति । अदो ज्योतिः तच्च नभः कूटस्थे ऽहन्तत्त्वे तच्च कूटस्थं महति महत्तत्वे तदव्यक्ते प्रधाने तच्चाव्यक्तमक्षरे परमात्मनि ॥ ३० ॥

इति सर्वोपाधिलयाद्धेतोरवशेषितं चिन्मात्रमात्मानं क्षेत्रज्ञमक्षरतया ज्ञात्वाऽद्वयः सन्विरमेत् दग्धकाष्ठो यथाऽनलः ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
द्वादशोऽध्यायः ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेव सविस्तरमाह—खइत्यादिना । खे आकाशे खानि शरीरगतच्छिद्राणि प्रलीनानि भावयेत् निश्वासान् देहगतानुच्छ्वासादीन् प्राणान् वायौ तथा ऊष्माणं तेजसि न्यसेत् आत्मवान् धीमान् असृग्रुधिरं च श्लेष्म च पूयं मूत्रादिकं चेत्येतान्यप्सु शेपमास्थिमांसादिकं कठिनांशं क्षितौ इत्येवं यथोद्भवं यद्यत उत्पन्नं तथा तदनतिक्रमेण स्वकारणेषु प्रलीनानि अनुसन्दधीत ॥२५॥

एवंभूतसङ्घातात्मकशरीरावयवानां यथोद्भवं स्वस्वकारणे लयाऽनुसन्धानमुक्तमथ सव्यापाराणां वागादीन्द्रियाणां स्वाऽधिदैवतेषु लयानुसन्धानप्रकारमाह—वाचामिति । यद्यप्यधिदैवतेभ्यो नेन्द्रियाणामुत्पत्तिरिति तत्र तेषां लयाऽनुसन्धानकथनमसङ्गतं तथापि तेषां तत्प्रवर्तकत्वेन प्रधान्याच्चैस्तावत्संश्लेषाऽनुसन्धानं तेषामं... स्वकारणे लयानुसन्धानाय कथ्यते——वक्तव्यमुक्तिः ... तव्यः सवक्तव्यां सोक्तिकां वाचं वागिन्द्रियमग्नावधिदैवते ... निर्दिशेदित्युत्तरेणान्वयः । करौ शिल्पमादानादिरूपं व्यापारं ... न्द्रे तदधिदैवते गत्या सह पादौ वयसि कालात्मके विष्णौ ... रत्या सहोपस्थमिन्द्रियं प्रजापतावधिदैवते ॥ २६ ॥

सोत्सर्गं पुरीषोत्सर्गादिव्यापारसहितं अपानं पायुमिन्द्रि... मृत्यावधिदैवते यथास्थानं यत् यस्याधिदैवतरूपं स्थानं तदनति... मेण निर्दिशेत् संश्लिष्टमनुसन्दधीत एवं कर्मेन्द्रियाणां तदधिदैव... संश्लेषाऽनुसन्धाने क्रम उक्तः । अथ श्रोत्रादीज्ञानेन्द्रियाणामा... दिक्ष्विति । श्रोत्रमिन्द्रियं नादेन शब्देन विषयभूतेन सह दि... अधिदेवतासु त्वचमिन्द्रियं स्पर्शेन विषयेण सहाध्यात्म... वायावधिदैवते; हे राजन् ! चक्षुरिन्द्रियेण सह रूपाणि तद्विषय... भूतानि ज्योतिषि सूर्येऽधिदैवतेऽभिनिवेशयेदभिनिविष्टं संश्लि... भावयेत् ॥ २७ ॥

जिह्वां रसनेन्द्रियमप्सु रसेषु विषयभूतेषु अप्शब्दो रसोप... लक्षकः प्रचेतसा वरुणेनाऽधिदैवतेन सहाभिनिवेशयेदित्यनुष... त्रयाणां संश्लेषमात्रविवक्षया प्रचेतसेत्यप्रधाने तृतीया ग्रैवेयं... विषयैः सह घ्राणमिन्द्रियं क्षितौ क्षितिशब्दोपलक्षितयोरश्वि... नोर्न्यसेत् मनोरथैर्व्यापारैः सह मन इन्द्रियं चन्द्रे ऽधिदैव... बोध्यैर्विषयैः सह बुद्धिं परे श्रेष्ठे कवौ चतुर्मुखे ऽध्यात्मना ... त्मनि देहवर्त्तमानेनाहङ्कारेण सह तत्कर्माणि देहात्माभि... मानादिरूपाणि अहङ्काराधिदैवते रुद्रे विन्यसेत् अहङ्कार... मांयेव दर्शयति, यद्यस्मादहंकारात् अहंममताक्रियाः । देहेऽहंबुद्धि... देहानुबन्धिषु ममकारस्तन्मूलाः क्रियाः प्रवृत्तयश्च भवन्ति चि... चित्तावस्थमन्तःकरणं सत्त्वेन सत्वगुणकार्यभूतस्वच्छत्वप्र... शत्वादिरूपचित्तवृत्त्या सह क्षेत्रज्ञे ऽधिदैवते न्यसेत् ततो वै... कारिकं सात्विकाहङ्कारं गुणैः स्वकार्यभूतैरिन्द्रियैः सह ... तत्कारणे महत्तत्वे न्यसेत् ॥ २८ ॥ २९ ॥

एवं वैकारिकाहङ्कारस्य महति लयाऽनुसन्धानमुक्तं पूर्वं ... खानीत्यादिना तत्तत्कार्यप्रलयानुसन्धानमुक्तम् अथ तत्त्वैः ... तत्कारणभूतस्य तामसाहङ्कारस्य महति लयाऽनुसन्धानप्रका... माह—अप्स्वित्यादिना । तावत्क्षितिमप्सु आपो ज्योतिषि अदः ज्योति... र्वायावमुं वायुं नभसि आकाशे तच्च कूटस्थे तामसाहङ्कारे तं ... महति महत्तत्वे तच्च महत्तत्त्वम् अव्यक्ते चित्समष्टिसंसृष्टे अविभक्त... माष्टयात्मके प्रधाने तच्चाक्षरे परमात्मात्मके जीवे न्यसेत् ॥ ३० ॥

अत एवमवशेषितं प्रत्यगात्मानमक्षरतया परमात्मशरीरा... त्वस्वाभाविकस्वरूपतया ज्ञात्वाऽद्वयः आत्मनि जातिगुणाद्यभि... नरहितः विरमेत् दग्धयोनिर्निर्दग्धकाष्ठोऽनलोऽग्निर्यथा विर... तद्वत् धर्मानुष्ठाने ऽशक्तो वानप्रस्थ एवमनुसन्दधानो देहत्या... यानशनव्रतं कुर्यादित्यर्थः ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
द्वादशोऽध्यायः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यथार्हत इत्युक्तं विवृणोति—खे खानीति । खे आकाशे खानि शरीरावच्छिन्नाकाशानि श्वासं शरीरवायुवाह्यवायौ शरीरमूष्माणं कारणतेजसि । आत्मवान् परमात्मज्ञानवान् वशीकृतमना वा श्लेष्मपूयासृक्कार्याण्यप्सु लीयन्त इति चिन्तयेत् शेषं गन्धं क्षितौ नन्वाकाशादेर्लाघवादीनामुत्पत्तेः कथमियतामेव लयश्चिन्त्यत इति तत्राह—यथोद्भवमिति—

"आकाशाल्लाघवं सौक्ष्म्यं शब्दं श्रोत्रं तथा बलम् ।
वायोस्तु प्रेरणा चेष्टा व्यूहनं सौक्ष्म्यमेव च ॥
अग्नेस्तु दर्शनं शक्तिरौष्ण्यं रूपप्रकाशकम् ।
रसेभ्यो रसनं शैत्यं स्नेहक्लेदनमार्दवम् ।
भूमेर्गन्धस्तथा घ्राणं गौरवं मूर्तिरेव च" ॥

इति वचनात् उत्पत्त्यनुसारेण लयश्चिन्तनीय इत्यर्थः ॥ २५ ॥

इदानीं वागादीन्द्रियाणां अग्न्यादिदेवताधीनत्वमपि चिन्तनीयमित्याह—वाचमिति । सवक्तव्यमिति क्रियाविशेषणं प्रजापतौ दक्षे ॥ २६ ॥

यथास्थानमित्यनेनाभिमानिनामभिमन्यमानानां तत्तदुत्पत्तिकारणमनुस्मरेत्युच्यते सनादेन श्रोत्रेण सह त्वचं त्वगिन्द्रियं स्पर्शेन सह वायाविति शेषः ॥ २७ ॥

ज्योतिष्यादित्ये निवेशयेत् निविशतीति चिन्तयेत् जिह्वां रसनेनेति शेषः परे कवौ बृहस्पतौ उशनसोऽपि कविशब्दवाच्यत्वात्तद्व्यावृत्त्यर्थं पर इति अध्यात्मनाऽहङ्कारेण सह कर्माणि रुद्रे तत्र हेतुर्यदहमिति क्रिया यत् अहं ममता अहङ्कारादुत्पन्नत्वेन ममता इति यत्तस्मादिति शेषः सत्त्वेन साधुपुण्यकर्मणा सह चित्तं क्षेत्रज्ञे हिरण्यगर्भे निवेश्य एतल्लक्षणां विलयं स्मृत्वा वैकारिकनामानं हिरण्यगर्भं गुणैः सह क्षेत्रज्ञाख्ये परे परमात्मनि लक्ष्मीद्वारा लयमार्गं चिन्तयेत्—

"चित्तं हिरण्यगर्भे तु विलाप्य परमात्मनि ॥
क्षेत्रज्ञाख्ये लापयेच्च ततोनान्यत्स्मरेद्बुधः"

इति चात्रमानम् ॥ २८ ॥ २९ ॥

इदानीमवादीनां लयप्रकारं निरूपयति—अद्भिरिति । तच्च नभः कूटस्थे वैकारिकतैजसतामसकूटरूपे ऽहङ्कारतत्त्वे तदहङ्कारतत्त्वं महति महत्तत्त्वे तन्महत्तत्त्वमव्यक्ते तदव्यक्तमक्षरे हरौ विलयप्रकारं स्मरेत् जडस्य स्वकारणैक्यमभिमानिनो जीवस्य प्रवेशलक्षणं तत्तत्कार्यस्थहिरण्यगर्भस्योत्तररूपेणैक्यं हिरण्यगर्भस्थहरेरप्युत्तरोत्तररूपैकीकरणमिति लयमेवं तु शब्दो ज्ञापयति ॥ ३०

इति शब्दो लयसमाप्तिसूचकः "कूटस्थोऽक्षर उच्यते" इति वचनात् अक्षरनाम्न्यां चित्प्रकृतौ स्थित्वा ऽक्षरलक्षणनित्यत्वहेतुत्वादक्षरनामत्वेन स्थितमात्मानं परमात्मानं चिन्मात्रमवशेषितं सृष्ट्यादिव्यापारोदासीनं ज्ञात्वा ऽद्वयो हरिव्यतिरिक्तवस्तुस्वातन्त्र्यस्मरणरहितो ऽत्र कृत्याद्विरमेदित्यन्वयः कृत्याद्विरमोक्तिरत्र कथमित्याह—दग्धयोनिरिति । दग्धयोनिरिन्धनलक्षणा येन स तथा यथाग्नेरिन्धनदहनात्परं कृत्यं नास्ति तथा श्रीनारायणोपासकस्य सविकासं तत्त्वज्ञानात्परं कृत्यं नेति भावः "न हरिस्स्मरतः कृत्यं दग्धेन्धनहुताशवत्" इति वचनात् ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
द्वादशोऽध्यायः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
द्वादशोऽध्यायः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

खानि देहच्छिद्राणि अभिनिवेशयेदित्युत्तरेणैव सर्वेषामन्वयः शेषं अस्थिमांसादिकठिनांशम् ॥ २५ ॥

स्थूलशरीरस्य लयमुक्त्वा लिङ्गशरीरलयमाह—वाचमिति । इन्द्रियाणां तद्विषयाणाञ्च प्रवर्त्तकत्वेन देवतास्वेवात्र लय उक्तः, वयसि विष्णौ यथास्थानं स्थानमनतिक्रम्य तत्तत् स्थानं स्पृष्ट्वा विनिर्दिशेत् प्रथमं इमं वाचमग्नौ विलापयामीति प्रयुञ्जीत ततोऽभिनिवेशयेदित्यन्वयः ॥ २६ ॥

स ज्ञानी नादेन सहेत्यर्थः अध्यात्मनि वायौ ज्योतिषि सूर्ये ॥२७॥

प्रकृष्टं चेतो यत्र स प्रचेतोमधुरादिरसस्तेन सह जिह्वां अप्सु जलाधिष्ठातरि वरुणे श्रेयैर्विविधगन्धैः सह घ्राणेन्द्रियं क्षितौ क्षीयते लीयते ऽत्रेति क्षितिस्तदधिष्ठातृदेवता तस्यामश्विनावित्यर्थः । मनोरथैर्मननीयैर्विषयैः बोध्यैर्बुद्धिविषयैः परे कवौ ब्रह्मणि अध्यात्मना अहङ्कारेण सहकर्माणि तद्बुद्धिपयान् रुद्रे यत्स्मादहं ममता पूर्विका क्रिया भवति तस्मिन् रुद्रे सत्त्वेन चेतनया सह-क्षेत्रज्ञेचित्ताधिष्ठातरि वासुदेवे गुणैर्गुणकार्यैर्देवैः सहेति वासुदेवस्य गुणकार्यैर्लयाभावात्तदितरैरित्यर्थः । वैकारिकं जीवं परे ब्रह्मणि ॥ २८—२९ ॥

ननु, तदपि कथमद्वयब्रह्मज्ञानं, स्यात्? समष्टितत्त्वानां पृथिव्यादीनां वर्त्तमानत्वादिति चेत्तेषामपि यथोद्भवं लयं ज्ञातवत एवेत्याह—अद्भिरिति । अदो ज्योतिः अमुं वायुं तच्च नभः कूटस्थे ऽहङ्कारे तच्च कूटस्थं महति महत्तत्त्वे तदव्यक्ते प्रधाने तदक्षरे परमात्मनि ॥ ३०—३१ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
सप्तमे द्वादशोऽध्यायः सङ्गतः सङ्गतस्सताम् ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं स्थूलदेहलयमुक्त्वा सूक्ष्मदेहावयवानां सविषयाणामिन्द्रियाणां तत्तत्प्रवर्त्तके तत्तदधिदैवते तत्तन्नियम्यतया सम्बन्धमात्रं सूचयन् तत्तत्कारणे लयमाह—वाचमिति त्रिभिः । वागादिकं वक्तव्यादिसहितमग्न्यादौ प्रवर्त्तके नियम्यतया विनिर्दिशेत् यथास्थानम् उत्पत्तिस्थानमनतिक्रम्याभिनिवेशयेच्च विलीनं भावयेदिति त्रयाणामन्वयः । अग्न्याद्युत्पत्तिस्थानं सात्त्विकाहंकारस्तेषां लयं तत्र भावयेत् वागादीनामुत्पत्तिस्थानं राजसाहंकारस्तेषां लयं तत्र भावयेत् अथ पदयोजना सवक्तव्यां वाचमग्नौ अधिदैवते नियम्यतया विनिर्दिशेत् यथास्थानमभिनिवेशयेच्च एवमग्रेपि पदानि पादौ वयसिविष्णौ ॥ २६ ॥

: सनादेन शब्देन सह अध्यात्मनि अधिदैवते वायौ ॥ २७ ॥

ज्योतिषि आदित्ये अप्सु रसरूपां सलोलुपां जिह्वां रसनेन्द्रियं प्रचेतसा अधिदैवतेन प्रवर्त्यां यथास्थानं निवेशयेत् घ्रेयैर्गन्धैः सघ्राणम् अश्विदैवत्यं क्षितौ उत्पत्तिभूमौ राजसाहंकारे एव ॥ २८ ॥

अन्तःकरणस्य चतुर्विधस्य लयं सात्विकाहङ्कारे आह—मन इति । मनः मनोरथैः सह चन्द्रे बोध्यैः सह बुद्धिं परे कवौ ब्रह्मणि च कर्माणि अहङ्कारविषयाणि अध्यात्मना अहंकारेण सह यस्माद्रुद्रात्प्रवर्तकादहंममतापूर्विकाक्रिया भवति तस्मिन् रुद्रे च चित्तं गुणैश्चित्तविषयभूतैः सह क्षेत्रज्ञे च नियमतया स्थितं विभावयेति शेषः सत्त्वेन वैकारिकाहंकारेण कारणेन योजयेदिति शेषः अन्तःकरणचतुष्टयं वैकारिके अभिनिवेशयेदित्यर्थः । वैकाविकं तु परे तत्कारणे महत्तत्वे योजयेदित्यर्थः ॥ २९ ॥

महाभूतानां तामसाहंकारे तस्य महत्तत्त्वे तस्य प्रकृतौ प्रकृतेः परमात्मनि च लयमाह—अप्सु इति । क्षित्यादिभूतानि अबादिषु न्यसेत् कूटस्थे तामसाहङ्कारे अव्यक्ते प्रकृतौ तत्तद्व्यक्रमक्षरे परमात्मनि न्यसेत् चकारोऽनुक्तसमुच्चयार्थः ॥ ३० ॥

इत्येवं दग्धयोन्यनल इवाद्यः देहेन्द्रियादिद्वयरहितोऽत एवावशेषितं चिन्मात्रं ज्ञानस्वरूपमात्मानं जीवं अक्षरतया परमात्मांशत्वेन तदपृथक्तयाज्ञात्वा विरमेत् मुक्तो भवेत् ॥ ३१ ॥

इतिश्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
द्वादशोऽध्यायः ॥ १२ ॥

भाषा टीका ।

जैसे कि ! छिद्रों को आकाश में श्वासों को वायु मे उष्णता को तेज में, रुधिर कफ पीवको जल में वाकी पृथिवी के विकार अस्थि आदि को पृथिवी में इस प्रकार जो जहां से उत्पन्न है उसको उसी तत्त्व में लीन होने का अनुसन्धान करता जाय ॥ २५ ॥

ऐसे ही वक्तृता सहित वाणी को अग्नि में शिल्प अर्थात् हस्तों के कर्म सहित हस्तों को इन्द्र में पाद के कर्म गति सहित पगों को पद के अधिष्ठातृ देवता विष्णु में, आनंद सहित उपस्थ इन्द्रिय को प्रजापति में निर्देश करे, ॥ २६ ॥

विसर्ग सहित पायु (गुदा) इन्द्रिय को मृत्यु में यथा स्थान निर्देश करे, शब्द सहित श्रोत्र इन्द्रिय को दिशाओं में स्पर्श सहित त्वचा को वायु में लीन होने का अनुसन्धान करे, ॥ २७ ॥

चक्षु इन्द्रिय सहित रूपको ज्योति में, प्रचेता सहित जिह्वा को जल में अश्विनी कुमार सहित नासिका को पृथिवी में लीन करे ॥ २८ ॥

मनोरथ सहित मनको चन्द्र में, ज्ञेय सहित बुद्धि को ब्रह्मा में, अध्यात्म सहित कर्मों को रुद्र में वे रुद्र कैसे हैं अहङ्कार ममकार जिनसे होता है, सत्त्व के सहित चित्त को क्षेत्रज्ञ में और क्षेत्रज्ञ जीवको परब्रह्म में लीन माने यहां लीन होना ऐसा समुझना चाहिये कि जैसे वृक्ष में पक्षी लीन होजाते हैं अर्थात् पृथिवी को जल में जलको तेज में तेज को वायु में वायु को आकाश में आकाश को अहङ्कार में अहङ्कार को महत्तत्त्व में महान् को प्रकृति में प्रकृति को परमेश्वर में लीन भावना करे ॥ ३० ॥

इस प्रकार चैतन्यमात्र अवशिष्ट अक्षर आत्मा को जानकर तदनंतर अद्वितीय आपही एक विराम को प्राप्त होजावे, जैसे कि ? काष्ठ के जलजाने से अग्नि आपही शांत होजाती है ॥ ३१ ॥

इति श्रीमद्भागवत महापुराण सप्तमऽस्कन्ध में
द्वादशअध्याय की भागवताचार्यकृत भाषाटीका
समाप्त ॥ १२ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे द्वादशोऽध्यायः ॥ १२ ॥

॥ त्रयोदशोऽध्यायः ॥

नारद उवाच ।

कल्पस्त्वेवं परिव्रज्य देहमात्रावशेषितः ।
ग्रामैकरात्रविधिना निरपेक्षश्चरेन्महीम् ॥ १ ॥
बिभृयाद्यद्यसौ वासः कौपीनाच्छादनं परम् ।
त्यक्तं न दण्डलिङ्गादेरन्यत्किञ्चिदनापदि ॥ २ ॥
एक एव चरेद्भिक्षुरात्मारामोऽनपाश्रयः ।
सर्वभूतसुहृच्छान्तो नारायणपरायणः ॥ ३ ॥
पश्येदात्मन्यदो विश्वं परे सदसतोऽव्यये ।
आत्मानं च परं ब्रह्म सर्वत्र सदसन्मये ॥ ४ ॥
सुप्तप्रबोधयोः सन्धावात्मनो गतिमात्मदृक् ।
पश्यन्बन्धं च मोक्षं च मायामात्रं न वस्तुतः ॥ ५ ॥
नाभिनन्देद्ध्रुवं मृत्युमध्रुवं वाऽस्य जीवितम् ।
कालं परं प्रतीक्षेत भूतानां प्रभवाप्ययम् ॥ ६ ॥
नासच्छास्त्रेषु सज्जेत नोपजीवेत जीविकाम् ।
वादवादांस्त्यजेत्तर्कान्पक्षं कं च न संश्रयेत् ॥ ७ ॥
न शिष्याननुबध्नीत ग्रन्थान्नैवाभ्यसेद्बहून् ।
न व्याख्यामुपयुञ्जीत नारम्भानारभेत्क्वचित् ॥ ८ ॥
न यतेराश्रमः प्रायो धर्महेतुर्महात्मनः ।
शान्तस्य समचित्तस्य बिभृयादुत वा त्यजेत् ॥ ९ ॥
अव्यक्तलिङ्गो व्यक्तार्थो मनीष्युन्मत्तबालवत् ।
कविर्मूकवदात्मानं स दृष्ट्या दर्शयेन्नृणाम् ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्रयोदशे यतेर्धर्मः साधकस्योच्यते महान् ।
अवधूतेतिहासेन सिद्धावस्था च वर्ण्यते ॥ १ ॥

एवं ध्यात्वा कल्पो नाशनादिकं कुर्यात् आन्वीक्षिक्यां कल्पस्त्वेवं ध्यात्वा परिव्रज्येति सम्बन्धः ? कियदत्रत्याज्यम् देहव्यतिरिक्तं सर्वमित्याह—देहमात्रेति । तस्य धर्मानाह ग्रामैकरात्रेति नवभिः ॥ १ ॥

कौपीनं गुह्यमाच्छाद्यते यावता तावन्मात्रं परं केवलमन्यद्विति वा त्यक्तं प्रैषोच्चारणात्पूर्वमेव ॥ २ ॥ ३ ॥

सदसतः परे कार्यकारणव्यतिरिक्ते ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नन्वात्मानं परं ब्रह्मेति कथं सामानाधिकरण्यनिर्देशः ? नहि बद्धमुक्तयोरैक्यं सम्भवति तत्राह—सुप्तेति । सुषुप्तौ हि तमसावृतमात्मतत्त्वं जाग्रत्स्वप्नयोस्तु विक्षिप्तं प्रकाशते सन्धौ तु न तमो नापि विक्षेपः अतस्तदा आत्मदृगात्मानं लक्षीकृत्य स्थितः सन्नात्मनो गतिं तत्त्वं पश्यन् अत एव बन्धं मोक्षं च मायामात्रं पश्यन् आत्मानं परं ब्रह्म सर्वत्र पश्येदित्यन्वयः तदुक्तं योगग्रन्थे—

"निद्रादौ जागरस्यान्ते यो भाव उपजायते ।
तं भावं भावयन्नित्यं मुच्यते नेतरो यतिः" ॥

इति ॥ ५ ॥

अस्य देहस्य प्रभवो ऽप्ययश्च यस्मात्तं कालम् ॥ ६ ॥

असच्छास्त्रेष्वनात्मपरेषु जीविकां नक्षत्रविद्यादिवृत्तिम् वादवादान् जल्पवितंडादिनिष्ठान् कञ्च कमपि पक्षं निर्बन्धेन न संश्रयेत ॥ ७ ॥

शिष्यान्नानुबध्नीत प्रलोभनादिना बलान्नापादयेत् आरम्भान्मठादिव्यापारान् ॥ ८ ॥

परमहंसस्य विशेषमाह—न यतेराश्रमो धर्मार्थः कथम्भूतस्य यतेः महात्मनः तस्य लक्षणं शान्तस्येत्यादि प्राय इत्यस्यायं भावः ज्ञानोत्पत्तिपर्यन्तं बहूदकादिलिङ्गमाश्रित्य सत्त्वशुद्ध्यर्थं यमांश्च नियमांश्चाचरन्नेव ज्ञानोत्पत्तौ यतेत उत्पन्ने तु ज्ञाने न नियमैः कृत्यमस्ति यमाश्च स्वत एव स्युः अतस्तदा लिङ्गादिभिः प्रयोजनाभावाल्लोकसंग्रहार्थं धारयेद्वा त्यजेद्वेति ॥ ९ ॥

तस्यैव ज्ञानदार्ढ्याभावे योगभ्रंशपरिहारार्थमाह–न बहिर्व्यक्तं लिंगं यस्य व्यक्तोर्थः प्रयोजनमात्मानुसन्धानं यस्य स मनीष्युन्मत्तवद्बालवच्च कविरपि मूकवदात्मानं नृणां दृष्ट्या दर्शयेत् ते यथोन्मत्तादिरूपं मन्येरंस्तथा वर्त्तेत स्वदृष्ट्येति पाठे बाह्यानुसन्धानाभावेनेत्यर्थः ॥ १० ॥

———

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

एवं स्वधर्मानुष्ठाने तुर्याश्रमधर्मे चाशक्तस्य वानप्रस्थस्यैवमनुसंधानपूर्वकानशनव्रतेन देहत्याग उक्तः अथ तच्छक्तस्य तुर्याश्रमपरिग्रहं वदंस्तद्धर्मानाह त्रयोदशेनाध्यायेन—कल्पइति । आश्रमान्तरधर्मानुष्ठानसमर्थश्चेदेवमनुसंदधत्परिव्रज्य संन्यस्य देहमात्रेणावशेषितः देहातिरिक्तं तदनुबन्धि सर्वं परित्यज्येत्यर्थः ग्रामैकरात्रविधिना एकैकस्मिन् ग्रामे एकैकरात्रनयनविधिना निरपेक्षो महीं चरेत् ॥ १ ॥

यद्यसौ परिव्राट् त्यक्तं देहाद्यतिरिक्तं किञ्चन विभृयाच्चेत्तर्हि कौपीनमाच्छाद्यते येन तच्च वासः परं केवलं विभृयात् दण्डकमण्डलुभ्यामन्यत्किञ्चिदप्यनापदि न बिभृयात् दण्डपात्रग्रहणमुपवीतकटिसूत्रादेरप्यावश्यकस्योपलक्षणम् अनापदीत्यनेन शीताद्यसहिष्णुत्वरूपापदितु किञ्चित्तन्निवारकं वासोन्तरादिकमपि विभृयादिति सूचितम् ॥ २ ॥

अनपाश्रयः परित्यक्तनियतनिवासदेशः एकोऽसहायः भिक्षुः भिक्षोपजीवी आत्मारामश्चरेत् सर्वेति सर्वभूतेषु तरतमेषु सुहृद्भगवदात्मकत्वानुसन्धानेन नितरामनुकूलः शान्तः क्रोधरहितः नारायणएव परायणं प्राप्यं प्रापकमाधारश्चेत्यध्यवसाययुक्त इत्यर्थः ॥ ३ ॥

सदसतः चिदचिद्भ्यां परे विलक्षणोऽतएवाव्यये स्वरूपतः स्वभावतश्च विकाररहिते आत्मनि परमात्मन्यदः इदं विश्वं पश्येत्तदायत्तसत्तास्थितिप्रवृत्तिमत्त्वेन तच्छरीरत्वेन च पश्येदित्यर्थः । तथा परं ब्रह्मात्मानं परमात्मानं सदसन्मये चिदचिदात्मके सर्वत्र जगति नियंतृतयात्मतया च स्थितं पश्येदेव वासुदेवशब्दार्थानुसन्धानमुक्तम् ॥ ४ ॥

सुप्तेति । सुप्तप्रबोधयोः सन्धौ सायंप्रातरित्यर्थः यद्वा तयोस्सन्धिमध्यमावस्थायामित्यर्थः स्वप्नावस्था तदानीं शयानदेहात्मनोव्यतिरेकः सुग्रहः परमात्मनो विचित्रसृष्टियोगश्च "न तत्र रथानरथयोगानपन्थानो भवन्त्यथ रथानरथयोगान्पथः सृजत" इति श्रुतिः एवं च सुप्तप्रबोधयोः सन्धौ स्वप्नावस्थायामात्मदृग्देहविलक्षणप्रत्यगात्मस्वरूपविमर्शनपरः आत्मनः परमात्मनो गतिं विचित्र पथरथयोगादिस्रष्टृत्वादिप्रकारं पश्येदनुसन्दधीत तथा बन्धं मोक्षं च मायामात्रं न वस्तुत इति पश्येत् सम्बन्धादिकमीश्वरसंकल्प[illegible] ज्ञानाधीनं नत्वात्मस्वरूपप्रयुक्तमिति पश्येदित्यर्थः । मायाशब्द[illegible] ज्ञानपर्यायः "माया च वयुनं ज्ञानम्" इति नैघण्टुकाः बन्धमोक्षयोश्च परमात्मसङ्कल्पाधीनत्वं सूचितम् "पराभिध्यानात्तु तिरोहितं ततोह्यस्य बन्धविपर्ययौ" इति बन्धमोक्षयोः प्रकृत्यन्वयव्यतिरेकरूपत्वाच्च मायामात्रत्वं ननु कथंमोक्षस्य स्वरूपप्रयुक्तत्वाभावः ? बन्धप्रतियोगित्वादिति ब्रूमः नह्यबद्धस्य मोक्षसंभवः ॥ ५ ॥

ध्रुवं निश्चितं मृत्युमध्रुवमस्थिरं जीवितं च नाभिनंदेन्मृत्युमितिदृष्टान्तार्थम् वा यथा मृत्युं नाभिनन्दति तथाऽध्रुवं जीवितमपि नाभिनन्देदिति परं केवलं तु भूतानां प्रभवाप्ययौ यस्मात्तमुत्पत्तिप्रलयहेतुं कालमेव प्रतीक्षेत कालगतिमेवालोचयेदित्यर्थः ॥ ६ ॥

असच्छास्त्रेष्वनाध्यात्मशास्त्रेषु न सज्जेत न सक्तो भवेत् जीविकां जीवनोपायभूतां वृत्तिं नोपजीवेत् अतिवादान् जल्पवितण्डादिनिष्ठान् तर्कान् त्यजेत् कमपि पक्षमाग्रहेण नाश्रयेत् ॥ ७ ॥

शिष्यान्नानुबध्नीत तद्वित्तलोभाभावादिति भावः बहून् ग्रन्थान्नैवाभ्यसेन्नैवपठेत व्यख्यां नोपयुञ्जीत न पाठयेदित्यर्थः चित्तस्यान्यपरत्वप्रसङ्गादिति भावः आरंभान् माठपत्याद्यारंभान् क्वचिदपि नारभेत् न कुर्यात् निग्रहानुग्रहादिवैषम्यप्रसङ्गादिति भावः यद्वा आरम्भान् गृहाद्यारंभान्नारभेदित्यर्थः ॥ ८ ॥

शान्तस्य समचित्तस्य महात्मनो यतेराश्रमः प्रायो न धर्म हेतुः अपितु ज्ञानप्रयोजकः अतो धर्मं विभृयाद्वा त्यजेद्वा [illegible] ग्रहत्यागौ व्यवस्थितविकल्पौ ज्ञानहीनः संन्यासाश्रमनिष्ठः [illegible]

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रयोजनत्वेन विभृयात् ज्ञानवांस्तु धर्माख्यं फलं त्यजेदित्यर्थः । यद्वा उपवासादिदेहक्लेशकररूपधर्मः शरीरदौर्बल्यमुखेन योगविघातको न चेत् विभृयात् विघातकश्चेत्तं त्यजेदित्यर्थः । यद्वा ननु, शिष्यानुबन्धनग्रन्थाभ्यासव्याख्योपयोजनादिभिः कश्चिद्धर्म एवार्जितः स्यादिति किमर्थं ते निषिध्यन्ते ? इत्यत्राह—नेति । यदि यतेराश्रमो धर्मार्थः स्यात्तर्हि कर्तव्याः स्युः शिष्याऽनुबन्धनादयः सतु प्रायशो न धर्महेतुः यत्याश्रमस्य धर्महेतुत्वाभावे हेतुत्वं वदन् तं विशिनष्टि—शान्तस्येति । शान्तस्य जितेन्द्रियस्य धर्मसाध्यैहिकामुष्मिकशब्दादिविषयभोगादिरहितस्य समचित्तस्य अधर्मस्य इव धर्मस्यापि स्वफलजननद्वारा मुक्तिप्रतिबन्धकत्वज्ञानवत्त्वेन धर्माऽधर्मयोः समचित्तस्य प्राय इत्यनेन क्वचिद्यत्याश्रमस्यापि धर्महेतुत्वमस्त्येवेति सूचितम् । अतो यदि यतिधर्मप्रयोजनकयत्याश्रमनिष्ठश्चेच्छिष्याऽनुबन्धनादीन् विभृयात् धर्महेतुत्वाभावे तु त्यजेदित्यर्थः ॥ ९ ॥

ननु, शिष्याद्यनुबन्धनाद्यभावे स्वस्य ज्ञानित्वादिमाहात्म्यं न प्रकाशितं स्यादित आह—अव्यक्तलिङ्ग इति । अव्यक्तलिङ्गो अस्फुटचिह्नः स्वमाहात्म्यमनाविष्कुर्वन् वर्त्तेत यतिरिति भावः तथा च शारीरकं सूत्रम् "अनाविष्कुर्वन्नन्वयात्" इति. श्रुतिश्च "तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्" इति बालस्य कर्म स्वमाहात्म्याऽनाविष्काररूपं बाल्यं तेन तिष्ठासेदित्यर्थः । ज्ञानित्वाद्यनाविष्काराभिप्रायेण दृष्टान्तयति—उन्मत्तबालवदिति । उन्मत्तवद्बालवच्च किञ्चाव्यक्तार्थः परैरविदितप्रयोजनः मुनिरालस्यसंशीलनशीलश्च वर्त्तेताऽऽलस्यसंशीलनं शुभाश्रयपरिशीलनमेतदेव "बाल्यञ्च पाण्डित्यञ्च निर्विद्याऽथ मुनिर्भवति" इति मुनिशब्देन विहितं तद्विषयकं चेदं सूत्रम् "सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् । ३ । ४।४६।" इति. नत्वत्र बालवदिति दृष्टान्तेन बालस्य यत्कर्म कामचारादिकं तदभिप्रेतम् "नाविरतो दुश्चरितान्नाशान्तो नाऽसमाहितः नाऽशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात्" इति दुश्चरितस्य परिनिष्पन्नसाधनविरोधित्वश्रवणात् मनीष्युन्मत्तबालवदिति पाठे मनीष्युन्मत्तादिवच्चरेदिति यथोक्त एवार्थः । कविर्विद्वानपि सुनिपुणं भाषितुं समर्थोऽपि स्वमात्मानं मूकमिव नृणां दृष्ट्या दर्शयेत् यथोन्मत्तादिरूपं मन्येरंस्तथा वर्त्तेत स्वदृष्ट्येति पाठे स्वदृष्ट्या देहविलक्षणया स्वात्मदृष्ट्येत्यर्थः ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

क्रमप्राप्तं यतिधर्मं निरूपयति—कल्प इति । एवमुक्तं कृच्छ्रं सोढुं कल्पः अभ्यर्थस्तुशब्दस्तर्हि परिव्रज्य सन्यस्य महीं चरेदित्यन्वयः । देहमात्रावशेषित इत्यनेन प्रव्रजनं विशिनष्टि—

"अधीतवेदो जपकृत्पुत्रवानन्ददोऽग्निमान् ।
शक्त्या च यज्ञकृन्मोक्षे मनः कुर्यात्तुनान्यथा" ॥ इति

नियमं तुशब्देन वारयति, "यदहरेव विरजेत् तदहरेव प्रव्रजेत्" इति विशेषविधानात् ब्रह्मचारिणोऽपि तुर्याश्रमग्रहणोपपत्तेरत एव कल्प इत्युक्तं कामक्रोधादिसहजशत्रुजयसमर्थ इत्यर्थः—

"उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकम् ।
वेदमध्यापयेत्पश्चाच्छौचाचारांश्च शिक्षयेत्" ॥

इति वचनात् ब्रह्मचारिणो ऽध्ययनप्रारम्भेणा ऽधीतवेदत्वं युज्यत इति वा सन्न्यासाश्रमश्चतुर्धा भिद्यते कुटीचको बहूदको हंसः परपरमहंस इति तत्र परमहंसधर्मः कथ्यत इत्यर्थद्योतको वा तुशब्दो निरपेक्षः अलोलुपः ॥ १ ॥

देहमात्रावशेषित इत्यस्यापवादमाह–विभृयादिति । यद्यसौ भिक्षुरप्सु त्यक्तं वासः परं पश्चात्प्रतिनिधिलक्षणं विभृयाद्धर्तुमिच्छेत्तर्हि कौपीनलक्षणमाच्छादनं विभृयादथवा कौपीनं शीतातपनिवारकमेकमाच्छादनं च विभृयात् परं न विभृयादित्यर्थः—

"शीतातपनिवारार्थमेकमाच्छादनं यतेः ।
कौपीनात्परमित्याहुरेके नान्यद्विना वपुः" इति—

वचनात् कौपीनाच्छादनं चेत्येकवद्भावः । नन्वयं यतिरिति केन ज्ञातुं शक्यते तत्राह–न लिङ्गेति । लिङ्गदण्डाभ्यां विना किञ्चित् न विभृयात् लिङ्गं चक्रशङ्खादिमुद्राधारणं कमण्डल्वादिकं वा "सर्वभूतहितः शान्तस्त्रिदण्डी सकमण्डलुः" इति वचनात् वाक्कायचेतसां यमनं त्रिदण्डित्वं लिङ्गदण्डाभ्यामिति विशेषणादेक एव तु लक्षणो दण्डो ऽन्यथा परमहंसत्वं न स्यात् दण्डो वाग्देहचेतसामिति वक्ष्यति ॥ २ ॥

अनपाश्रयः ग्रामाद्यावासविधुरः यथाह, याज्ञवल्क्यः—

"एकारामः परिव्रज्य भैक्षार्थं ग्राममाश्रयेत् ।
अप्रमत्तश्चरेद्भैक्ष्यं सायाह्ने ऽनुपलक्षितः" ॥

इति वचनात् ॥ ३ ॥

नारायणपरत्वं दर्शयति–पश्येदिति । अदो विश्वमात्मनि पश्येत् तदाधारत्वेन स्थितमिति शेषः । आत्मनीति जीवः किं न स्यादिति तत्राह–पर इति । सदसतः परे उत्कर्षवाचित्वेन विकल्पात् सर्वनामसंज्ञा नास्ति जीवस्य संसारित्वेनाऽनुत्कृष्टत्वान्नैतादृशोऽन्यो स्तीत्याह–अद्वय इति । नैतावता पूर्यत इत्याह, आत्मानं चेति । सर्वत्र सदसन्मये जगति अवसितमात्मानं परं ब्रह्म पश्येदीदृशं नामचिन्तनम् ॥ ४ ॥

सुप्तप्रबोधयोः सुप्तिजाग्रतोः सन्धौ अरुणोदयकाले शयनप्रारम्भकाले चात्मनः स्वस्य गतिं "सता सौम्य ! तदा सम्पन्नो भवति" "अतः प्रबोधो स्मात्" ३।२।८ इत्यादि प्रमाणबलात्परमात्माधीनलक्षणां स्थितिं हरेश्च स्वातन्त्र्यलक्षणं पश्यन् बन्धं मोक्षं मायामात्रमयं हरेरिच्छया निर्मितं ज्ञातं पश्यन्वस्तुतः स्वातन्त्र्येण नान्याधीनत्वेन पश्येत् ॥ ५ ॥

मृत्युं ध्रुवमिति नाभिनन्देत् स्वजीवितं चाऽध्रुवमिति तर्हि कथं निश्चय इति तत्राह–कालमिति । भूतानां प्रभवाप्ययं कालाख्यभगवदधीनं प्रतीक्षेत किं बहुना सर्वं भगवदधीनमिति पश्येत् ॥ ६ ॥

जीविकार्थेतनादिलक्षणां वेदवादमतीत्य तर्कान्वैशेषिकादिशास्त्रनिष्ठितान् अप्रयोजकं पक्षं सिद्धान्तं "नाप्रयोजनपक्षी स्यान्न वृथा शिष्यबन्धकृत् । न चोदासीनशास्त्राणि न विरुद्धानि चाभ्यसेत्" ॥ ७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

"न व्याख्ययोपजीवेत न निषिद्धान्समाचरेत् । एवंभूतो यतिर्याति तदेकशरणो हरिम्" इति निर्णीतमानं बहून् ग्रन्थान् वैष्णवाभासान् मोक्षविरुद्धान् वात्स्यायनादीन् ज्योतिःशास्त्रादीन् व्याख्ययोपजीवनं न कुर्यात् आरम्भान्निषिद्धान् कृष्यादीन् ॥ ८ ॥

कृष्यादिनोत्पन्नद्रव्येण दानादिधर्मसम्पादनोपपत्तेः कथमारम्भान्वारमेतेत्युच्यत इति तत्राह—न यतेरिति । प्रायो यतेराश्रमो धर्महेतुर्न भवति किन्तु निरन्तरोपासनया ज्ञानहेतुः ज्ञानाधिकारे प्रवृत्तस्य कर्माधिकारप्रवृत्तिरधःपातहेतुः स्यात् ईश्वराज्ञोल्लङ्घनदोषापातात् समे ब्रह्मणि चित्तं सततस्मरणसमर्थमन्तःकरणं यस्य स तथा तस्यैवम्विधस्य यतेः आश्रमलक्षणदण्डादि साधारणं न चावश्यकमित्याह—बिभृयादिति । यदाह याज्ञवल्क्यः "नाश्रमः कारणं धर्मे क्रियमाणो भवेद्धि सः । अतो यदात्मनः पथ्यं परस्य न तदाचरेत्" ॥ ६ ॥

बाह्यलिङ्गाभावेऽप्यान्तरं लिङ्गमस्तीत्याह—अव्यक्तेति । अव्यक्तं जनेनाज्ञातं मानसं क्लृप्तं लिङ्गं यस्य स तथा विद्या तप आदिभिरप्रकटितस्वरूपो वा तर्ह्यस्य किं वक्तव्यमत्राह—व्यक्तार्थ इति । अपरोक्षीकृतभगवत्स्वरूपलक्षणपुरुषार्थः अनेन लिङ्गादिदण्डधारणमेवंविधस्य नावश्यकमन्यस्येत्युक्तं भवति मनीषी निरन्तरमननशीलः अव्यक्तस्वरूपं दर्शयति—अदृश्यः प्राकृतजनाज्ञेयः कविरतिक्रान्तदर्शी ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

१—११ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

त्रयोदशे यतेर्धर्मस्तस्य चाजगरी परा ।
दशाऽवधूतप्रह्लादसम्वादेनैवदर्श्यते ॥

एवं ध्यात्वाऽकल्पश्चेदनशनादिकं कुर्यात् आन्वीक्षिक्यां कल्पस्त्वेवन्यात्वा परिव्रज्य चरेदिति सम्बन्धः तस्य धर्मानाह—ग्रामैकरात्रेति, त्रिभिः ॥ १ ॥

त्यक्तं व्यावहारिकजनसङ्गं न बिभृयात् लिङ्गदण्डादिकादन्यद्वस्त्वपि न अनापदीति आपदि तु देहरक्षार्थं त्यक्तमपि धारयेत् ॥ २—३ ॥

सदसतः परे कार्य्याकारणव्यतिरिक्ते ॥ ४ ॥

सुप्ते सुषुप्ते हि तमसा वृतमात्मतत्त्वं जाग्रत्स्वप्नयोस्तु विक्षिप्तं प्रकाशते सन्धौ तु न तमो नापि विक्षेपः अतस्तदा आत्मदृक् आत्मानं लक्ष्यीकृत्य स्थितः सन्नात्मनो गतिं तत्त्वं पश्यन् अत एव बन्धं मोक्षं च मायामात्रं पश्यन् आत्मानं परं ब्रह्म सर्वत्र पश्येदित्यन्वयः तदुक्तं योगग्रन्थे—

"निद्रादौ जागरस्यान्ते यो भाव उपजायते
तं भावं भावयेन्नित्यं मुच्यते नेतरो यतिः"

इति ॥ ५ ॥

अस्य देहस्य ॥ ६ ॥

किञ्च कमपि पक्षं न संश्रयेत् ॥ ७ ॥

नानुबध्नीयात् प्रलोभनादिना बलान्नकुर्य्यादित्यर्थः । आरम्भान् मठादिव्यापारान् ॥ ८ ॥

संन्यासिनां मध्ये परमहंसस्य विशेषमाह—न यतेरिति । यतेराश्रमो न धर्मप्रयोजनकः तस्य लक्षणं शान्तस्येत्यादि प्रायस्त्वनेन कथञ्चित् कश्चिदपरिपक्वज्ञानस्तु सत्त्वशुद्ध्यर्थं यमनियमधर्मांश्च चरेदपि ज्ञानपरिपाके तु न नियमैः कृत्यमस्ति यमाश्च स्वत एव स्युः अतस्तदा लिङ्गादिभिः प्रयोजनाभावाल्लोकसंग्रहार्थं धारयेत् त्यजेद्वा इति ॥ ९ ॥

स च योगभ्रंशपरिहारार्थमेवंभूतो भवेदित्याह, न बहिर्व्यक्तं लिङ्गं यस्य स व्यक्तोऽर्थः प्रयोजनमात्मानुसन्धानं यस्य सः ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

त्रयोदशे तुर्याश्रमधर्मानाह—कल्प इति । वानस्थप्रस्थनियमाचरणेऽकल्पोऽनशनादिकं कुर्यादित्युक्तं नियमान्समाप्यादि कल्पो दृढदेहेन्द्रियश्चेद्दृढे न गच्छेत्किन्तु परिव्रज्य तुर्य्याश्रमी भूत्वा ग्रामैकरात्रवासविधिना महीं चरेत् ॥ १ ॥

यद्यसौ वासो बिभृयात्तर्हि कौपीनमाच्छाद्यते येन तावत्कौपीनाच्छादनं परं केवलं बिभृयात् लिङ्गभूतदण्डादेरन्यत् त्यक्तं परित्यक्तं वस्त्रादिकमन्यदनापदि न बिभृयात् ॥ २ ॥

नारायणपरायणः नारायण एव परमयनमाश्रयो यस्य सः ॥ ३ ॥

सदसतः क्षेत्रक्षेत्रज्ञतः परे पुरुषोत्तमे अदो विश्वमात्मानं च पश्येत् सर्वत्र सदसन्मये जडचेतनमये विश्वस्मिन् आत्मानं च परं ब्रह्म पुरुषोत्तमं च पश्येत् ॥ ४ ॥

सुप्तप्रबोधयोः सन्धौ सायं प्रातश्च आत्मदृक् देहेन्द्रियमनोबुद्धिप्राणादिविलक्षणस्वस्वरूपदृक् आत्मनः स्वस्योपासकस्य गम्यते इति गतिर्भगवान् तं पश्यन् ध्यायन् मायात्रिगुणा प्रकृतिस्तया ऽनादितस्तत्सुखबुद्ध्या गृहीतया बन्धदुःखत्रयभयात्यक्तया मोक्षः एवं मायामात्रं न वस्तुतः केवलस्वरूपतः बन्धं मोक्षं च पश्यन् विचरेदिति शेषः ॥ ५ ॥

अस्य देहस्य ध्रुवमावश्यकं मृत्युम् अध्रुवमानित्यं जीवितं च नाभिनन्देत् प्रभवाप्ययौ जन्ममरणे यदमाक्षम् ॥ ६ ॥

असच्छास्त्रं पूकध्यानविरोधिषु जीविकां चिकित्सानक्षत्रादिविद्यावृत्तिं नोपजीवेत् वाद्वादान् ग्राम्यजनयोग्यान् वादप्रतिवादान् तर्कान् हेतुवादान् त्यजेत् किञ्च किमपि पक्षं संश्रयेत् भगवद्ध्यानविच्छेदं न कुर्यादिति भावः ॥ ७ ॥

शिष्याननुबध्नीयात् प्रलोभनादिना आत्मसेवार्थं बहून् कुर्यात् नाभ्यसेत् पठेत् व्याख्यानं नोपयुञ्जीत न पाठयेत् आरम्भान् जीविकाव्यापारान् ॥ ८ ॥

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
प्रह्लादस्य च संवादं मुनेराजगरस्य च ॥ ११ ॥
तं शयानं धरोपस्थे कावेर्यां सह्यसानुनि ।
रजस्वलैस्तनूदेशैर्निगूढामलतेजसम् ॥ १२ ॥
ददर्श लोकान्विचरँल्लोकतत्त्वविवित्सया ।
वृतो ऽमात्यैः कतिपयैः प्रह्लादो भगवत्प्रियः ॥ १३ ॥
कर्मणा कृतिभिर्वाचा लिङ्गैर्वर्णाश्रमादिभिः ।
न विदन्ति जना यं वै सो ऽसाविति न वेति च ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

शान्तस्य"शान्त उपासीत"इतिश्रुत्युक्तध्यानार्हशान्तिं प्राप्तस्य समे भगवति चित्तं यस्य भगवद्ध्याननिष्ठस्य परमहंसभागवतनिष्ठां गतस्य महान् अतिविशुद्धः आत्मा चित्तं यस्य तस्य यतेः आश्रमः प्रायो धर्महेतुर्न भवति धर्मः प्रवर्तनीयतया हेतुर्निर्मितं फलं यस्य स तथा धर्मप्रवृत्त्यर्थो न भवति किन्तु मुक्त्यर्थं इत्यर्थः । अतः आश्रमसूचकलिङ्गादिभिः प्रयोजनाभावादाश्रमित्वाभिमानं त्यक्त्वा तानि धारयेत्त्यजेद्वेति सिद्धान्तः "मौनानीहानिलायामदण्डा वाग्देहचेतसाम् । न ह्येते यस्य सन्त्यङ्ग वेणुभिर्न भवेद्यतिः ।

ज्ञाननिष्ठो विरक्तोवामद्भक्तो वा नपेक्षकः ।
सलिङ्गानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः" ।

इति वक्ष्यमाणत्वाच्च ॥ ९ ॥

अव्यक्तं लिङ्गमाश्रमचिह्नं यस्य सः व्यक्तोऽपरोक्षोर्थः परमपुरुषार्थः भगवत्प्रावण्यं यस्य सः मनीषी भगवदनुसन्धानपरः कविरपि स्वकीये ध्येये भगवति दृष्ट्या निमग्नचित्ततया मूकवदात्मानं दर्शयेत् ॥ १० ॥

भाषा टीका ।

श्रीरुक्मिणीकान्ताय नमः ॥

नारद उवाच ।

नारद जी बोले, कि—ये अनशनादिक तौ शरीर यात्रामें असमर्थ के कहे, और यदि समर्थ होवै तौ संन्यास लेकर सब का परित्याग करदे, एक देहमात्र अवशिष्ट रखे, और ग्रामैकरात्र विधिसे अर्थात् एक ग्राम में एक ही रात्रि रहना अधिक नहीं, इस प्रकार निरपेक्ष होकर पृथिवी पर विचरे ॥ १ ॥

यदि कुछ रखने की इच्छा हो तौ केवल एक लज्जांग ढाकने के लिये कौपीन रखे, और ज्यास्ती इच्छा हो तो एक शरीर के आच्छादन (औढने) के लिये वस्त्र रखे बस इससे जास्ती नहीं, और अनापद् काल में दण्डऔर संन्यास के चिन्ह के सिवाय त्यागकिये हुए किसी पदार्थ को न ग्रहण करे, यदि कोई आपद (दुःखादि) आ पडे तौ उतने मात्र काल की चिन्ता नहीं ॥ २ ॥

आत्माराम होकर किसी का आश्रय न लेकर सर्व प्राणियो का सुहृद और शान्त होकर संन्यासी एकला ही विचरे, परञ्च सदा नारायण परायण होकर ॥ ३ ॥

इस विश्वको कार्य कारण से पर अव्यय पर ब्रह्म में देखे, और आत्मा जो पर ब्रह्म है उसको कार्य कारण मय समस्त विश्व मे अनुस्यूत अर्थात् व्याप्त देखे ॥ ४ ॥

और वह आत्मज्ञानी दोनो सन्ध्याओं में अपने आत्माकी गति का चिंतन करे, तथा बन्ध और मोक्षको माया मात्र जाने वास्तव में नहीं ॥ ५ ॥

ध्रुव (निश्चित) मृत्युका अभिनन्दन न करे, अथवा अध्रुव इसके जीवित को भी न चाहे, केवल भूतों के उत्पत्तिनाश का हेतु काल मात्र की प्रतीक्षा करै ॥ ६ ॥

असत् शास्त्र में आसक्त न होवै, और किसी जीविका का उपजीवन न करे और शुष्कवाद विवाद को त्यागदे, और केवलतर्क में किसी का पक्ष न लेवे ॥ ७ ॥

और वहुत से शिष्य न करडाले और वहुन से ग्रन्थों का अभ्यास न करे, लोकप्रतिष्ठा के लिये वडी व्याख्या का उपयोग न करे, और वहुन से कार्यों का आरंभ न करे ॥ ८ ॥

प्राय करके यति का धर्महेतु कोई आश्रम नहीं है, शांत हो समचित्त हो तौ आश्रम को धारण करे वा त्यागदे कुछ चिंता नहीं ॥ ९ ॥

अव्यक्त चिन्हों वाला अप्रकट प्रयोजन वाला मनीषी व्याख्यान समर्थ होकर भी अपने को उन्मत्त और वालक के तरह, तथा ज्ञानी होकर भीनेको मूक सदृश जनावे, ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

परमहंसधर्ममेवेतिहासेन स्फुटयति—अत्रापीति यावदध्यायसमाप्ति । आजगरव्रतस्य मुनेश्च ॥ ११ ॥

तं नत्वा ऽभ्यर्च्य विधिवत्पादयोः शिरसा स्पृशन् ।
विवित्सुरिदमप्राक्षीन्महाभागवतो ऽसुरः ॥ १५ ॥
बिभर्षि कायं पीवानं सोद्यमो भोगवान्यथा ।
वित्तं चैवोद्यमवतां भोगो वित्तवतामिह ।
भोगिनां खलु देहो ऽयं पीवा भवति नान्यथा ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

धरोपस्थे भूपृष्ठे सह्याद्रेस्तटे रजोभिर्धूसरैस्तनूदेशैर्देहावयवैर्निगूढममलं तेजो यस्य तम् ॥ १२ ॥ १३ ॥

कर्मादिभिर्जना यं न विदुस्तं पादयोः शिरसा स्पृशन्नत्वा अप्राक्षीदित्युत्तरेणान्वयः ॥ १४ ॥ १५ ॥

उद्यमसहित इव भोगवानिव पीवानं स्थूलं देहं धारयसि तत्र हेतुं वदेति तृतीयेनान्वयः उद्यमं विनैव मम भोगोऽस्तीति चेत्तत्राह, वित्तं चेति ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

आजगरव्रतस्य सन्न्यासाश्रमाऽनपेक्षित्वेऽपियदृच्छयोपनतसन्तोषस्य मोक्षविरोधिप्रवृत्त्युपरत ज्ञानानाविष्कारस्य च तदपेक्षितत्वात् तदवगमनाय तदितिहासं प्रस्तौति—अत्रापीति । अत्र स्वमहात्म्यानाविष्कारादिना ज्ञानिनोऽवस्थाने इतिहासमपि दृष्टान्तत्वेन उदाहरन्ति निदर्शयन्ति इतिहासं विशिनष्टि-पुरातनं नत्वस्मत्कपोलकल्पितं प्रह्लादस्याजगरस्याजगरव्रतपरस्य मुनेश्च संवादरूपम् ॥ ११ ॥

तमजगरव्रतस्थं सह्यपर्वतस्य सानुनि कावेर्यां कावेरीतटे धरोपस्थे भूपृष्ठे शयानं रजस्वलैर्धूलिभिर्धूसरैस्तनूदेशैर्देहावयवैर्निगूढं प्रच्छन्नममलं तेजो देहकान्तिर्यस्य तं प्रह्लादो ददर्शेत्यन्वयः ॥ १२ ॥

कथम्भूतः भगवत्प्रियः कतिपयैरमात्यैः परिवृतो लोकानां तत्त्वस्य विधित्सया वेत्तुमिच्छया चरन् कर्मादिभिर्यं सोऽसौ भवति न भवति वेत्येवं जना न विदुः । तं पादयोः शिरसा स्पृशन् नत्वा विधिवदभ्यर्च्य, वेत्तुमिच्छुर्महाभागवतः प्रह्लाद इदं वक्ष्यमाणमप्राक्षीत् पृष्टवान् ॥ १३—१५ ॥

तदेवाह—बिभर्षीति सार्द्धैस्त्रिभिः, । उद्यम्युद्यमसहितः भोगवान् देहपोषणशीलो यथा तद्वत्त्वं पीवानं कायं देहं बिभर्षि इति सन्देहः । ननूद्यमं विनैव मम प्रारब्धवशादेव भोगः सम्पन्नोतीत्यत्राह— इह लोके तावदुद्यमवतामेव वित्तं धनं भवति वित्तवतामेव भोगः । त्वन्तु निरुद्यमः कुतस्तव वित्तं कुतस्तरां भोग इति भावः । अन्तरेणापि भोगं मम देहः पीवा इत्यत्राह—भोगिनां भोगवतामिव देहः पीवा भवति भोगेन पीवा भवत्यन्यथा तु कृशोभवति तत्कथमन्तरेणापि भो[गं] देहपुष्टिरिति भावः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अत्राऽपरोक्षज्ञानाय यत्याचारे इतिहासशब्दार्थमाह—पुरात[न]मिति । आजगरस्य अजगरव्रतधारिणः ॥ ११ ॥

सह्यसानुनि सह्याख्यपर्वततटे कावेर्यां कावेर्युत्पत्तिदे[शे] तनूदेशैः शरीरावयवैः ॥ १२ ॥

विवित्सया वेदितुमिच्छया ॥ १३ ॥

स एव देवदत्तो सौ न वेति नाविन्दत न ज्ञातवान् ॥१४॥१५॥

भोगवान् सम्पन्नः ननु परिणममानस्य देहस्य पीन[त्व]विशेषः परिणामोऽपि कस्माश्चित् स्यान्मादिरासेव्यस्येव कि[मु]चोद्यमत्राह-वित्तमिति । सत्यं कृष्याद्युद्योगवतो देहिनो व्रीह्या[]दिवित्तं भवतीहलोके तद्वतां भोगः खलु भोगिनामयं दे[हः] पीनो भवति, हेत्वन्तरं नास्तीत्याह—नान्यथेति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तं शयानमिति युग्मकम्. तनू इत्यत्र त्वङ्ग इति पाठो बहु[त्र] १२ ॥ १३ ॥

कर्मणेति युग्मकम् ॥ १४ ॥ १५ ॥

बिभर्षीत्यर्द्धकम् ॥ १६ ॥ १७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

आजगरस्य अजगरवृत्तेः ॥ ११ ॥

सह्यनाम्नः तनूदेशैः तन्ववयवैः ॥ १२ ॥ १३ ॥

जनास्तज्जन्मभूमिनिवासिनोपि विवित्सुर्विविदिषुः महाभा[ग]वत इति महाभागवतत्वादेव तत्र सचित्ताकर्षणलिङ्गैरेव महानुभावं निश्चित्येनेतिभावः ॥ १४ ॥ १५ ॥

न ते शयानस्य निरुद्यमस्य ब्रह्मन्नु ह्यर्थो यत एव भोगः ।
अभोगिनोऽयं तव विप्र ! देहः पीवा यतस्तद्वद नः क्षमं चेत् ॥ १७ ॥
कविः ✱ कल्पो निपुणदृक् चित्रप्रियकथः समः ।
लोकस्य कुर्वतः कर्म शेषे तद्वीक्षिताऽपि वा ॥ १८ ॥

नारद उवाच ।

स इत्थं दैत्यपतिना परिपृष्टो महामुनिः ।
स्मयमानस्तमभ्याह तद्वागमृतयन्त्रितः ॥ १९ ॥

ब्राह्मण उवाच ।

वेदेदमसुरश्रेष्ठ ! भवान्नन्वार्यसम्मतः ।
ईहोपरमयोर्नॄणां पदान्यध्यात्मचक्षुषा ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

पीवानं स्थूलं न च स्वभावेनैव मत्कायः पीवेति वाच्यमित्याह-उद्यमवतां वित्तं वित्तवतां भोगः भोगवतामेव देहः पीवेति पीवत्वस्यापि कारणमुद्यम एव नतु स्वभाव इत्यर्थः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

परमहंसभगवद्धर्ममेवेतिहासेन दर्शयति—अत्रापीत्यादिना । आजगरस्य अजगरवृत्तदत्तस्य ॥ ११ ॥

धरोपस्थे भूपृष्ठे कावेर्या तत्समीपे सह्यसानुनि सह्यगिरितटे रजोव्याप्तैस्तनूदेशैः शरीरावयवैर्निगूढममलं तेजो यस्य तम् ॥ १२ ॥ १३ ॥

कर्मणा निवृत्तिप्रवृत्तिरूपेण आकृतिभिः अनाशकसुशकत्वादिचेष्टावद्भिरङ्गैः तथा वागादिभिर्जना यं न विदन्ति पादयोः शिरसा स्पृशन् नत्वा अभ्यर्च्य च अप्राक्षीदित्युत्तरेणान्वयः ॥१४॥

अप्राक्षीत् पृष्टवान् ॥ १५ ॥

सोयमो व्यापारपरो भोगवान् यथा पीवानं पुष्टं देहं बिभर्ति स देहो यतः पीवा तन्नो वदेत्यनेनान्वयः ॥ १६ ॥

भाषा टीका ।

इस प्रकरण में एक पुरातन इतिहास को उदाहरण करते हैं जिसमें और आजगर मुनि श्री दत्तात्रेय का संवाद है ॥ ११ ॥

एक समय की बात है कि—भगवत्प्रिय श्रीप्रह्लादजी कितने एक मन्त्रियों सहित लोकों के तत्त्व जानने की इच्छा से लोकों में विचरते हुए, श्री कावेरी गंगा के किनारे सह्य पर्वत की शिखर पर पृथिवी के ऊपर पडे हुए, धूलि भरे हुए, शरीर से गूढतेजवाले एक मुनि को देखते हुए ॥ १२ ॥ १३ ॥

जिन को देखकर कर्म आकृति वाणी और वर्णाश्रमोंके चिन्हों से मनुष्य नहीं जान सके ये किये वही प्रसिद्ध दत्तात्रेय जी महाराज हैं ॥ १४ ॥

प्रह्लादजीने उनकोविधिवत् पूजन करके मस्तक से चरणों को छूकर नमस्कार किया, और महा भागवत असुर प्रह्लाद जी ज्ञान की इच्छा करके यों पूछने लगे ॥ १५ ॥

प्रह्लादजी बोले, कि आप शरीर को तो ऐसे पुष्टको धारण करते हो, कि जैसे बडा उद्यम वाला भोगों को भोगने वाला अपने शरीर को पुष्ट रखता है परन्तु भोग तो वित्त से होता है और वित्त (धन) से भोग प्राप्त होता है, यह देह तो भोग भोगने वालों का ही ऐसा पुष्ट होता है आपसे दर्शों का और विना भोग भोगने के नहीं ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नु इति निश्चये ह इति प्रसिद्धौ तवार्थो नास्तीति प्रसिद्धमेवेत्यर्थः । यतोऽर्थादेव यतो हेतोः पीवा क्षमं योग्यं चेत् ॥ १७ ॥

किञ्च वित्तार्जनाद्यसमर्थोऽप्ययं जनस्तदर्थमुद्यमं करोति त्वं तु समर्थोऽपि किमिति न करोषीत्याह—कविर्विद्वान् कल्पो दक्षः निपुणदृक् चतुरः चित्राः प्रियाः लोकरञ्जनाः कथा यस्य तथाऽपि लोकस्य कर्म कुर्वतः सतः शेषे तद्वीक्षिताऽपि तत्सर्वं पश्य-

✱ कल्प इति पाठः वीर० ॥

यस्य नारायणो देवो भगवान् हृद्गतः सदा ।
भक्त्या केवलया ऽज्ञानं धुनोति ध्वान्तमर्कवत् ॥ २१ ॥
अथापि ब्रूमहे प्रश्नांस्तव राजन् ! यथाश्रुतम् ।
सम्भावनीयो(१) हि भवानात्मनः शुद्धिमिच्छताम् ॥ २२ ॥
तृष्णाया भववाहिन्या योग्यैः कामैरपूरया ।
कर्माणि कार्यमाणो ऽहं नानायोनिषु योजितः ॥ २३ ॥
यदृच्छया लोकमिमं प्रापितः कर्मभिर्भ्रमन् ।
स्वर्गापवर्गयोर्द्वारं तिरश्चां पुनरस्य च ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अपि पाठान्तरे न द्वेक्षि, तत्कर्म न द्वेक्षि, नौषि वा न च स्तौषीत्यर्थः ॥ १८ ॥

तस्य वागेवामृतं तेन यन्त्रितो वशीकृतः सन्प्राह ॥ १९ ॥

अध्यात्मचक्षुषाऽन्तर्दृष्ट्या भवान्वेदैव आर्याणां ज्ञानिनां सम्मतो ननु भवान् इदमिति यदुक्तं तदेवाह—नृणामीहोपरमयोः प्रवृत्तिनिवृत्त्योः पदानि स्थानानि फलानीत्यर्थः ॥ २० ॥

वेदेत्यत्र हेतुः, यस्येति । हृदि प्रविष्टस्सन्नज्ञानं धुनोति नाशयतीति अर्को यथा बाह्यध्वान्तम् ॥ २१ ॥

यथाश्रुतमित्यौद्धत्यपरिहारायोक्तम् ॥ २२ ॥

लोकः कर्मसु प्रवर्त्तते त्वं तु निवृत्तः सन्किं शेषे इति यदुक्तं तत्राऽऽह—तृष्णयेति, चतुर्भिः । भवप्रवाहकारिण्या यथोचितैरपि विषयैः पूरयितुमशक्यया तृष्णया कर्मसु प्रवर्त्यमानोऽहं पूर्वं नानायोनिषु प्रवेशितः ॥ २३ ॥

तयैव तृष्णयेमं लोकं मनुष्यदेहं यदृच्छया प्रापितः कथम्भूतं लोकं धर्मेण स्वर्गस्य द्वारं साधनम् । अधर्मेण तिरश्चां श्वसूकरादियोनेर्द्वारं मिश्राभ्यां ताभ्यां पुनरस्यैव मनुष्यत्वस्य द्वारं सर्वतो निवृत्त्याऽपवर्गस्य द्वारमित्यर्थः ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेव विवृण्वन् पृच्छति—नेति । हे ब्रह्मन् ! शयानस्यात एव निरुद्यमस्य निर्व्यापारस्य तव । न ह्यऽर्थः नूनं वित्तं नास्ति हि तु इति निश्चयं हृद्गति प्रसिद्धौ तवार्थो नास्तीति प्रसिद्धमेवेत्यर्थः यतो वित्तादेव हेतोर्भोगाः देहपोषणादयो भवन्ति अतो भोगरहितस्य तव देहो हे विप्र ! यतो हेतोः पीवाऽभवत् तत्कारणं नोऽस्माकं श्रोतुमितिशेषः । क्षमं योग्यं चेत्तर्हि वद कथय अगोप्यं चेत्तर्हि वर्णयेत्यर्थः ॥ १७ ॥

किञ्च त्वं कविर्विद्वान् कल्यः दक्षः निपुणाद्दक् चतुरः चित्राः प्रियाः लोकरञ्जनाः कथा यस्य स एवंभूतोऽपि लोकस्य कर्म व्यापारं कुर्वतः सतः तद्वीक्षिताऽपि सम उदासीनस्सन् तूष्णीं शेषे शयानोऽसि तत्कारणं च वदेति भावः ॥ १८ ॥

एवं दैत्यपतिना प्रह्लादेन पृष्टस्सन् महामुनिस्तस्य प्रह्लादस्य वागेवामृतं तेन यन्त्रितः चोदितः स्मयमानः तमभ्याहाऽभिमुखमुक्तवान् ॥ १९ ॥

तदेवाह—यावदध्यायमसमाप्ति, वेदेति । असुरश्रेष्ठ ! इदं किन्न्नृणामीहोपरमयोः प्रवृत्तिनिवृत्त्योः पदानि कारणानीति यत्तदिदं भवानध्यात्मचक्षुषा सर्वलोकमनोऽभिप्रायविषयकज्ञानेन वेद जानात्येव कुतः यतस्त्वमार्याणामतीन्द्रियार्थदर्शिनां सम्मतोऽग्रेसरः ॥ २० ॥

किञ्च भगवान् षाड्गुण्यपूर्णः स्वतेजसा दीप्यमानो नारायणोऽनन्यप्रयोजनया भक्त्या तुष्टो यस्य त्वादृशस्य सदा हृद्गतः सन्नर्कवत् सूर्यवत् ध्वान्तमज्ञानरूपमन्धकारं धुनोति निरस्यति निःशेषनिरस्ताज्ञानानां सर्वज्ञानां भवादृशां किमविदितमस्तीति भावः । २१ ॥

यद्यप्येवमथापि हे राजन् ! यथाश्रुतं तव प्रश्नान्प्रति ब्रूमहे प्रश्नानामुत्तराणि वदामहइत्यर्थः । यथाश्रुतमित्यौद्धत्यपरिहारायोक्तम् आत्मनः स्वस्य शुद्धिमिच्छता पुंसा भवानवश्यंत्वं सम्भावनीयो हि ॥ २२ ॥

लोकः कर्मसु प्रवर्त्तते त्वं तु निवृत्तः सन्किं शेषे इति यत्पृष्टं तत्र तावदुत्तरमाह–तृष्णयेति, चतुर्भिः । नावदहं योग्यैर्यथोचितैरपि कामैरपूरया पूरयितुमशक्यया भववाहिन्या जन्मपरम्पराकारिण्या तृष्णया विषयेच्छया कर्माणि पुण्यपापात्मकानि कार्यमाणः कर्मसु प्रवर्त्तमानः पूर्वं नानायोनिषु योजितः प्रवेशितः ॥ २३ ॥

तैरेव कर्मभिर्भ्रमन्यदृच्छया दैवादिमं लोकं मनुष्यजन्मप्रापितः लोकं विशिनष्टि स्वर्गमोक्षयोः तिरश्चां तिर्यक्त्वानां पुनरस्य मनुष्यत्वस्य च प्राप्तेर्द्वारं कारणम् । धर्मेण स्वर्गस्य द्वारं ज्ञानसम्पादनेन त्वपवर्गस्या ऽधर्मेण तिरश्चः तिर्यक्त्वस्य पूर्व-

(१) सम्भावनीय इति वीर० विज० पा० ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सजातीयसुकृताऽऽचरणेन तु पुनर्मनुष्यत्वस्य च कारणमित्यर्थः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रकृतेऽपि तथा स्यादिति तत्राह, न त इति. अर्थोवित्तं यतो वित्तार्थीवेति यत्तस्मात् यत विस्मयो जायते लोके निमित्तान्तराभावे सति पीनत्वं भोगित्वेन दृष्टम् अत्र भोगित्वं न दृश्यते पीनत्वं तु दृश्यते तस्मिन्निमित्तान्तरमस्ति तदस्माकं श्रोतुं क्षमं चेद्वदेत्यन्वयः ॥१७॥

इतोऽपि निमित्तान्तरेण भाव्यमन्यथा कवित्वादयो भोगिगुणा न स्युरित्याह–कविरिति । न चेत्तर्हि वेदानुभवसि "अन्नमयं हि सौम्य ! मन आपोमयः प्राणस्तेजोमयी वाक्"इति श्रुतेः

"यः कण्टकैर्वितुदति चन्दनैर्यश्च लिम्पति—
अक्रुष्टो परिक्रुष्टश्च समस्तस्य स तस्य च" इति श्रुतेः

सर्वस्य समः न द्वेक्षि न द्वेषं करोषि नौषि स्तुतिं करोषि अनेन समत्वं विवृतम् ॥ १८ ॥

इतरत्र विरक्त्या भक्त्या श्रीनारायणचरणारविन्दस्मरणमकरन्दपानमेव पीनत्वे निमित्तमिति परिहारमभिप्रेत्य प्रह्लादं प्रति ब्रूते इत्याह–नारद इति ॥ १९ ॥

ज्ञानिष्वेको भवानिदं वेदेत्यन्वयः । इदमिति किं केन साधनेन वेद अत्राह—वेदेति । भवानध्यात्मचक्षुषा परमात्मानुग्रहोत्पन्नज्ञानेन नृणामीहोपरमयोः प्रवृत्तिनिवृत्तिलक्षणयोर्मार्गयोः पदं निश्चितं विषयस्थानं वेदेति शेषः ॥ २० ॥

देहिनामज्ञानसम्भवात्तेष्वेकत्वात् ममाऽपि तद्विषयं ज्ञानं नास्तीति किं न स्यादित्याशङ्क्य सत्यं विशेषोऽस्ति तवेत्याह—यस्येति । हृद्गतत्वं सामान्यमिति मत्वा श्लिष्ट इत्युक्तं केवलया फलानामाकाङ्क्षया ध्वान्तमज्ञानलक्षणम् अन्यत्रान्धकारमज्ञानं तत्तत्प्रतिपत्तौ कारणत्वेन दृष्टं यतस्तव नास्ति तस्माद्भवान् जानातीत्यर्थः ॥ २१ ॥

यद्यपि वक्तव्यांशो नास्त्यथापीदमप्राक्षीदित्येकविषयप्रश्नः कुतः परिहारे प्रश्नानित्याद्यनेकविषयः कथमयं सङ्गच्छन इति चेत्, निरुद्यमस्य वित्तं कथम् ? निर्वित्तस्य भोगः कथम् ? अभोगिनः पीनत्वं कथम् ? इति प्रश्नानामपि बहुत्वात् इदमित्यस्याव्ययत्वेन जातिविशेषत्वेन चोपपत्तेः तव प्रश्नान् ब्रूमह इत्यनेन तदनुवादः क्रियते उत परिहारः नाद्यो ऽदर्शनात् द्वितीयोऽपि तद्वाचकपदप्रयोगाभावादनुपपन्नः तव प्रश्नानुद्दिश्य परिहारान् ब्रूमह इति पक्षोऽपि गौरवादयुक्त इति चेदुच्यते "ब्रूञ् व्यक्तायां वाचि" इति धातोर्व्यक्तिनाम स्पष्टीकरणं तस्य परिहारार्थोपपत्तेः यथाश्रुतमित्यनेनापि स्पष्टीकरणप्रतीतेरिति. ननु, यदज्ञातज्ञापकं तदेवोपादेयं न चेदं तथा प्रह्लादस्य भगवदनुग्रहेण ज्ञाताऽशेषार्थत्वादतः कस्मै स्पष्टीक्रियत इत्याशङ्क्य तदज्ञानमस्माभिर्न वोच्यते किन्तु महत्सम्भाषणलक्षणार्थसेवयाऽन्तःकरणशुद्धिः स्यादिति मत्वा स्पष्टीक्रियत इत्याह—सम्भाषणीय इति । अनेन ब्रूमह इत्यात्मनेपदार्थो विवृत इति ज्ञायते ॥ २२ ॥

निवृत्तिमार्ग एव संसारोन्मूलनहेतुरिति वक्तुं प्रवृत्तिमार्गस्तु नानादुःखहेतुत्वेन हेयः प्रेक्षावतेत्येतत्स्वानुभवसिद्धमित्याह–तृष्णयेति । भववाहिन्या नदीवद्वर्तमानया संसारापादिकया वा इतरनदीनामृतुभेदेन पूर्त्यपूर्ती स्यातां नास्याः कदापि पूर्तिरित्याह–ग्रामैरिति ॥ २३ ॥

यदृच्छया दैवेच्छया लोकं शरीरम् "अस्माल्लोकात्प्रेत्य"इति श्रुतेः न केवलं स्वर्गादेर्द्वारं किन्तु तिर्यगादिजन्मनोऽपि कारणमित्याह—तिरश्चामिति । अस्य मनुष्यशरीरस्याऽपि द्वारमिति शेषः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तद्वीक्षितापि इत्यत्र त्वं न द्वेक्षि नौषि वेति पाठः न द्वेषीति गौडपाठः ॥ १८—३६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ननु,'पीनो देवदत्तो दिवा नभुङ्क्ते' इति वन्ममोद्यमादिकमनुमीयतामिति चेत्तत्राह–नेति । नुनिश्चये ह स्पष्टं हे विप्र ! इति ब्रह्मतेजसैव विप्रत्वस्यावगमात् ॥ १७ ॥

किमेवं ते विचारेणेति चेत् त्वद्देहे सामुद्रकसल्लक्षणदृष्ट्या कवित्वकल्पत्वादिकमनुमाय त्वया त्वं कृतार्थीकर्तुं कमप्याखापामृतमिच्छामीत्याह—कविरिति । कर्म कुर्वतः कर्मोद्यमवन्तं लोकमनादृत्य तमपश्यन्नेव शेषे शयनं करोषि तस्य वीक्षिता कौतुकेन तं पश्यन्नेव वा ॥ १८ ॥ १९ ॥

अध्यात्मचक्षुषा अन्तर्दृष्ट्या इदं भवान् वेदैव किम् ईहोपरमयोः सकामत्वनिष्कामत्वयोः पदानि स्थानानि फलानीत्यर्थः । भोगार्थमुद्यमैर्देहंपुष्टीकुर्वतां लोकानां दुःखं यद्यहं नाशास्यं तदा उद्यममहमप्यकारिष्यमिति भावः ॥ २० ॥

वेदेत्यत्र हेतुः यस्येति केवलया ज्ञानकर्माद्यमिश्रया ॥ २१ ॥

अतो मया त्वं सम्माननीय एवेत्यतः सर्वत्र मौनवतापि त्वयि मौनमनादृत्यैवोच्यते इत्याह—अथापीति । यद्यपि भवान् वेदैव अथापीति यथाश्रुतं नतु स्वकपोलकल्पितम् ॥ २२ ॥

यदहं निरुद्यमोऽस्मि तत्र कारणं शृण्वित्याह–तृष्णयेति त्रिभिः । भवसंबन्धिन्या वाहिन्या नद्येति यथा नद्या अन्तो दुष्प्रापस्तथा तृष्णाया अपि किञ्च नदी इन्द्रेण वृष्यमाणैरम्बुभिः पूर्यते इयं तु ब्रह्मणापि वृष्यमाणैः कामैर्न पूर्यत इत्याह यान्यैरिति यथा च नद्या वाहितोऽशेषतृणकाष्ठपाषाणकण्टकादिषु योज्यते तथैवाहमपि नानायोनिषु यथा च नद्या ग्राहकच्छपावर्त्तादिभिर्भीषयितुमतत्परित्राणायनानासाधनानि कार्यन्ते तथैवाहमपि कर्माणि ॥ २३ ॥

यथा च नद्या कदाचित् कश्चिच्चतुष्पथसैकतदेशादि प्राप्यते तथैवाहमपि साम्प्रतमिमं लोकं नृशरीरं कीदृशं पुण्येन स्वर्गस्य द्वारं साधनं ज्ञानभक्तिभ्यामपवर्गस्य पापेन तिरश्चां सूकरादि-

अत्रापि दम्पतीनां च सुखायाऽन्यापनुत्तये ।
कर्माणि कुर्वतां दृष्ट्वा निवृत्तोऽस्मि विपर्ययम् ॥ २५ ॥
सुखमस्या ऽऽत्मनो रूपं सर्वेहोपरतिस्तनुः ।
मनःसंस्पर्शजान्दृष्ट्वा भोगान्स्वप्स्यामि संविशन् ॥ २६ ॥
इत्येतदात्मनः स्वार्थं सन्तं विस्मृत्य वै पुमान् ।
विचित्रामसति द्वैते घोरामाप्नोति संसृतिम् ॥ २७ ॥
जलं तदुद्भवैश्छन्नं हित्वा ऽज्ञो जलकाम्यया ।
मृगतृष्णामुपाधावेद्यथा ऽन्यत्रार्थदृक्स्वतः ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यानेरपि पुण्यपापाभ्यां चकारात्तद्भोगान्ते च पुनरप्यस्य नृजन्मनोऽपि द्वारम् ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अमं श्रावयितुं च योग्यं चेत्तर्हि नोऽस्मभ्यं वद ॥ १७ ॥

त्वं कवित्वादिगुणयुक्तोऽपि लोकस्य कर्म कुर्वतः कुर्वन्तं न द्वेष्टि न स्तौषि स्वयं च शेषे अन्तर्वृत्तिरसि यतस्तद्वदेति पूर्वेणान्वयः कविः क्रान्तदर्शी दक्षः समर्थः निपुणदृक् स्वार्थे दृढदृष्टिः चित्राः अद्भुताः प्रियाः कथाः यस्य सः सर्वत्र तुल्यदृष्टिः ॥ १८ ॥

स्मयमानः मन्दस्मितयुक्तः तद्वागेवामृतं तेन यन्त्रितो वशीकृतः ॥ १९ ॥

हे असुरश्रेष्ठ ! नन्वहो भवानार्यसम्मतः नृणामीहोपरमयोः प्रवृत्तिनिवृत्त्योः पदानि स्थानानि फलानि अध्यात्मचक्षुषा अन्तर्दृष्ट्या वेद ॥ २० ॥

केवलया तदेकविषयिण्या भक्त्या नारायणो देवः सदा हृद्गतः अज्ञानं धुनोति ध्वान्तं तिमिरमर्को यथा ॥ २१ ॥

यद्यपि भगवान् वेद तथापि ब्रूमहे यथाश्रुतमित्यनेनौद्धत्याभावः सूच्यते ॥ २२ ॥

भववाहिन्या जन्ममरणलक्षणसंसारवाहिन्या योग्यैरपि कामैर्विपर्ययैरपूरया कर्माणि कार्यमाणः कर्मसु प्रवर्त्यमानः नानायोनिषु योजितः ॥ २३ ॥

इमं लोकं नरदेहम् ॥ २४ ॥

भाषा टीका ।

परंच हे ब्रह्मन् ! आप तौ विना उद्यमके सोये हुए हैं, आपको धन कहां से प्राप्त होसक्ता है, और विना धन के भोग कहां ? हे विप्र ! विना भोग के आपका यह देह जो पुष्ट होरहा है इसका क्या कारण है ? यदि हमारे कहने के योग्य हो तौ कहिये ॥ १७ ॥

आप तौ कवि (पंडित) समर्थ निपुणदृष्टि वाले और विचित्र प्रिय बोलने वाले हैं, और लोगों को कर्म करते हुए देखकर भी सोते रहते हैं ॥ १८ ॥

नारद उवाच ॥

नारदजी बोले कि,—उन महामुनि श्रीदत्तात्रेय को जब दैत्यपति प्रह्लादजी ने इस प्रकार पूँछा, तव प्रह्लाद की वाणी रूप अमृत के वश होकर किञ्चित् हँसतेहुए मुनि बोले ॥ १९ ॥

ब्राह्मण उवाच ॥

दत्तात्रेयजी बोले, कि—हे असुर श्रेष्ठ, हे प्रह्लाद ! आप श्रेष्ठ लोगों के सम्मत हौ और ज्ञानदृष्टि से, मनुष्यों की चेष्टा और उपराम से जो फल होता है उसको भी जानते हौ ॥ २० ॥

क्योंकि ? जिन तुमारे हृदय में केवल भक्ति, से भगवान् श्री नारायण देव सदा स्थित हैं, और सूर्य जैसे तम को तैसे ही अज्ञान को नाश करते हैं ॥ २१ ॥

हे राजन् ! तथापि तुमारे प्रश्नों का उत्तर जैसा सुना है तैसा कहते हैं क्योंकि ? आप तौ आत्मा की शुद्धि की इच्छा वाले महाजनों के भी माननीय हौ वा संभाषणीय हौ ॥ २२ ॥

योग्य कार्यों से जिस्का कभी पूरा न पड़े ऐसी तृष्णा के वश होकर मैंने ऊँचे नीचे वहुत प्रकार के कर्म किये फिर उन कर्मों से नाना योनियों में जोता गया ॥ २३ ॥

फिर हरीच्छा से भ्रमते २ इस मनुष्य देह को भी प्राप्त हुआ जो मनुष्य देह स्वर्ग और अपवर्ग (मोक्ष) का द्वार है और इसी देह के कर्मों से जीव तिर्यक् योनि को तथा फिर भी इसी मनुष्य देह को प्राप्त होसक्ता है ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अत्रापि मनुष्यत्वेऽपि अन्यापनुत्तये दुःखनिवृत्त्यै विपर्ययं दृष्ट्वा निवृत्तोऽस्मि ॥ २५ ॥

ननु प्रवृत्त्या कदाचित्सुखं स्यान्निवृत्त्या तु किं स्यात् चेत्तत्राह—सुखमस्य जीवस्य स्वस्वरूपमेव, तर्हि किं न प्रकाशते तत्राऽऽह—सर्वेति । तनोतीति तनुः सर्वक्रियानिवृत्तौ स्वतएव

देहादिभिर्दैवतन्त्रैरात्मनः सुखमीहतः ।
दुःखात्ययं चाऽनीशस्य क्रिया मोघाः कृताः कृताः ॥ २९ ॥
आध्यात्मिकादिभिर्दुःखैरविमुक्तस्य कर्हिचित् ।
मर्त्यस्य कृच्छ्रोपनतैरर्थैः कामैः क्रियेत किम् ॥ ३० ॥
पश्यामि धनिनां क्लेशं लुब्धानामजितात्मनाम् ।
भयादलब्धनिद्राणां सर्वतो ऽभिविशङ्किनाम् ॥ ३१ ॥
राजतश्चोरतः शत्रोः स्वजनात्पशुपक्षितः ।
अर्थिभ्यः कालतः स्वस्मान्नित्यं प्राणार्थवद्भयम् ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

शत इत्यर्थः । भोगांश्च मनःसंस्पर्शजान्मनोरथमात्रजानशाश्वतान् दृष्ट्वा स्वप्स्यामि निरुद्यमोऽस्मीत्यर्थः । तर्हि कदाचित्कथं भुङ्क्षे ? तत्राऽऽह—संविशन् प्रारब्धभोगान्भुञ्जान इत्यर्थः ॥ २६ ॥

एवञ्चेत्कोपि संसारं न प्राप्नुयात्तत्राऽऽह—इत्येतदात्मनः सुखात्मकं रूपं स्वार्थं स्वस्मिन्नेव सन्तं पुरुषार्थं विस्मृत्य असत्यपि द्वैते ॥ २७ ॥

तदेव दृष्टान्तेन स्पष्टयति—जलमिति । तदुद्भवैस्तृणशैवाला-दिभिः जलकाम्यया जलेच्छया स्वत आत्मस्वरूपादन्यत्र पुरुषार्थं पश्यन् ॥ २८ ॥

एवं स्वस्य निरुद्यमत्वे कारणमुक्त्वा विपर्ययं दृष्ट्वेति यदुक्तं तद्विवृणोति—देहादिभिरिति, पञ्चभिः । ईहत इच्छतः अनीशस्य निर्दैवस्य पुनःपुनः प्रारब्धाः क्रियाः मोघाः विफला एव भवन्ति ॥ २९ ॥

क्रियाणां सफलत्वेऽपि फलस्याऽनुपयोगमाह—आध्यात्मिका-दिभिरिति । मर्त्यस्य मरिष्यतः कृच्छ्रेण दुःखेनोपनतैः प्राप्तैः ॥३०॥

कृच्छ्रं विनैव प्राप्तेष्वर्थेषु दुःखं तदवस्थमित्याह—पश्यामीति ॥ ३१ ॥

भयं प्रपञ्चयति—राजत इति । स्वस्मान्मत्त एव कथञ्चित्त्याग-भोगविस्मरणादिना नाशः स्यादिति प्राणवतामर्थवतां च भयं नित्यम् ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अत्रापि अस्मिन्नपि मनुष्यजन्मनि स्वर्गापवर्गदेऽपि दम्पतीनां यन्मैथुनादिसुखं तदर्थमन्याप्त्युत्तये दुःखनिवृत्तये च कर्माणि कुर्वतां लोकानां विपर्ययं सुखार्थं कृतेभ्यः कर्मभ्यः दुःखप्राप्तिरूपं विपर्ययं दृष्ट्वा निवृत्तोस्मि ॥ २५ ॥

ननु, प्रवृत्त्या कदाचित्सुखं स्यादपि किं निवृत्त्या स्यादित्यत्राह—सुखमिति । सुखमस्यात्मनः प्रत्यगात्मनो रूपं स्वरूपमेवातो न तदर्थं यत्नः कार्य इति भावः । तर्हि स्वतः सुखरूप आत्मा तत्त्वेन किं नोपलभ्यते इति शङ्कां निराकरोति—सर्वासामीहानां देहगतव्यापाराणामुपरमः अभावोऽस्यात्मनस्तनुराकारः निष्क्रियं सुखमेव तस्य तनुरित्यर्थः । कार्त्स्न्येनेहोपरमपूर्वकं तद्याथात्म्य-विमर्शनेन सुखरूपतयोपलभ्यत इति भावः । यत एवमतोभोगान् शब्दादिविषयभोगान् मनसस्संस्पर्शजान्मनोरथमात्रजानशाश्वतान् दृष्ट्वा संविशन्नात्मयाथात्म्याऽवलोकने प्रविष्टोऽहं प्रारब्धानुभवे प्रविष्टो वा स्वप्स्यामि शयानोऽस्मि ॥ २६ ॥

तर्हि सर्वोपि लोकस्त्वमिव सुखरूपमात्मानं किन्नोपलप्स्यते इति शङ्कां निराकुर्वन् स्वाभाविकसुखरूपात्मस्वरूपाविमर्शनमूलकदेहात्मभ्रमेण न शेते किन्तु संसरतीत्याह—इतीति । इत्येतदात्मनः सुखात्मकं रूपं स्वार्थं स्वस्य पुरुषार्थरूपं स्वत एव सन्तं विस्मृत्य स्वत एव सन्तमात्मनः सुखरूपं स्वरूपात्मकं स्वपुरुषार्थं विस्मृत्येत्यर्थः । पुमान् देही असति स्वत आत्मन्यविद्यमानेपि द्वैते देवमनुष्यादिभेदे देवोऽहं मनुष्योऽहमित्यभिमानरूपे द्वैते भेदनि-मित्ते द्वैतेनेत्यर्थः । विचित्रां गर्भजन्मजरामरणादिरूपामत एव घोरां भयङ्करां संसृतिमाप्नोति ॥ २७ ॥

एतदेव दृष्टान्तमुखेनाह—जलमिति । जलं तदुद्भवैस्तृणशै-वालादिभिश्छन्नं जलं हित्वा अज्ञो यथा जलकाम्यया मृग-तृष्णां जलवत्प्रतीयमानामुपधावेत्तथा स्वतः सुखरूपमात्मनः स्वरूपं विस्मृत्याऽन्यत्र वैषयिकसुखेष्वर्थदृक् पुरुषार्थदृष्टिर्धावति लोकः स्वत आत्मनोऽन्यत्र देहादौ पुरुषार्थदृग्वा ॥ २८ ॥

विपर्ययं दृष्ट्वा निवृत्तोस्मीत्येतदेव विवृणोति—देहादिभिरिति, पञ्चभिः । दैवतन्त्रैः कर्मायत्तैर्देहेन्द्रियादिभिरात्मनः स्वस्य सुखं दुःखनिवृत्तिञ्चेहतः इच्छतः अनीशस्य कर्मवशस्य पुंसः कर्त्तरि षष्ठी इच्छता कृता कृताः पुनःपुनरारब्धाः क्रियाः मोघाः व्यर्थाः न सुखजनका नाऽपि दुःखनिवर्त्तकाश्च दृष्टा इति भावः ॥ २९ ॥

कथञ्चित्क्रियाणाममोघत्वेपि तज्जन्यं सुखमनुभूयमानदुःखेभ्यो-ऽल्पमित्याह—आध्यात्मिकादिभिः । आदिशब्देनाधिदैवकाधिभौ-तिके ग्राह्ये तैर्दुःखैः कर्हिचित्कदाचिदपि अविमुक्तस्य मर्त्यस्य मरणशीलस्य कृच्छ्रोपनतैर्दुःखेनार्जितैरर्थैर्विषयैस्तान्नमित्तैः कामैश्च किं कियत्सुखं क्रियेत न किमपीत्यर्थः ॥ ३० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु, धनार्जने हि दुःखं लब्धधनानां तु सुखमेवेत्यत्राह–पश्यामीति । धनिनां लब्धधनानामपि क्लेशं पश्यामि क्लेशित्वे हेतुं वदन् धनिनो विशिनष्टि—लुब्धानामिति । लुब्धानामलब्धधनलिप्सया लब्धधनव्ययभयेन च क्लिश्यतामिति भावः । अजितात्मनामजितेन्द्रियाणां कामानामपर्याप्त्या च क्लिश्यतामिति भावः । भयाद्लब्धा निद्रा यैस्तेषां चोरादयो धनमपहरेयुरिति भयाद्विगत निद्राणामित्यर्थः । इतोऽपि क्लेश इति भावः । भये हेतुं वदन्विशिनष्टि–सर्वतः सर्वेभ्योऽप्यतीव विशङ्किनामपहरेयुरिति शङ्कां कुर्वताम् ॥ ३१ ॥

एतदेव विवृणोति—राजत इति । राजादिभ्यः पशुतः पशुभ्यः गजाश्वादिभ्यः पक्षितः पक्षिभ्यः सस्यादिभक्षणार्थं प्रवृत्तेभ्यः कालतः स्वस्माद्दानभोगयोः प्रवृत्तात् स्वस्माच्च प्राणस्तत्तुल्यमर्थ-श्चैषामस्तीति तथा तेषां नित्यं भयमनुवर्तते ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कृष्याद्युद्योगवतो वित्तं स्यादित्यादिना यदुक्तं सुखं स्यादिति तत्परिहरति–अत्रापीति । अत्रापि मनुष्यशरीरेऽपि दम्पतीनां विपर्ययं दुःखं दृष्ट्वा निवृत्तिमार्गमाश्रितोऽस्मीत्यन्वयः । अन्यापनुत्तये सुखादन्यस्य दुःखस्य निरासाय "सुखाय कर्माणि करोति लोको न तैः सुखं नान्यदुपारमं वा"इति स्वोक्तेः ॥ २५ ॥

कर्मणो निवृत्तस्य दुःखस्य निरासाय सुखावाप्तौ किमन्तरङ्गमित्याशङ्क्य यदि सुखं स्वरूपाद्भिन्नं तर्हि तत्प्राप्तौ यत्नः कर्तव्यो न चैवं स्वरूपत्वात् सुखस्य तद्व्यक्तौ स्वरूपाच्छादकसर्वनिषिद्धकर्मनिवृत्त्याविर्भूतभगवत्प्रसाद एव मुख्यनिमित्तमित्याह–सुखमिति ।"बलमानन्द ओजश्च सहो ज्ञानमनाकुलम् । स्वरूपाण्येव जीवस्य व्यज्यन्ते परमाद्विभोः"इत्यादि हिशब्देन दर्शयति, अस्यात्मनो जीवस्य स्वरूपभूतं यत्सुखं तत्सर्वेहोपरतेः प्रसन्नात्सर्वा पूर्णोद्दा चेष्टा यस्य स सर्वेहः "को ह्येवान्यात्"इति श्रुतेः । उपाऽधिका ऽत्युद्रिक्तारनिरानन्दो यस्य स उपरतिः" यदेष आकाश आनन्दो न स्यात्"इति श्रुतेः । सर्वेहश्च उपरतिश्च सर्वेहोपरतिस्तस्माद्धरेराविर्भवतीति शेषः ।"उपाधिके" इति सूत्रात् । ततः किं तत्राह, मनःसंस्पर्शजानिति । मनोऽधिष्ठितेन्द्रियाणां विषयैः संस्पर्शनात्सम्बन्धात् जातान्छ्रस्तान् स्रगादिभोगांश्च सम्विशेत् न सेवेत बुद्धिमानिति शेषः ॥ २६ ॥

एतदङ्गीकारविरुद्धस्य बाधकमाह–इतीति । आत्मन इत्येतदुक्तमित्येवं तत्र सिद्धमिति शेषः । इति शब्दः प्रकारवचनः तत्र पुमान्सन्तं सदातनं स्वार्थं पुरुषार्थं विस्मृत्य असति भगवत्प्रसादेन निवर्तमाने द्वैतेऽन्यथा ज्ञाने विषये चित्रां सुरनरादिनानायोनिविषयां घोरां संसृतिमाप्नोतीत्यन्वयः ॥ २७ ॥

स्वतृष्णाया अनिवृत्तकरत्वात्संसारस्य घोरत्वमितीममर्थं सदृष्टान्तमाह—जलमिति । तदुद्भवैर्जलोद्भवैः शैवलादिभिरछ्न्नो ज्ञानरहितोऽजितेन्द्रियो मृगतृष्णां सूर्यमरीचिसम्पृक्तसलिलं यथोपधावेत्तथा स्वतः स्वतन्त्राद्धरेरन्यत्र देवदत्तादावर्थस्य पुरुषार्थदर्शी ॥ २८ ॥

ननु, पुरुषार्थसाधनत्वेन जातैर्देहादिभिरनुष्ठिताः क्रियाः सुखादिहेतवः स्युरित्याशङ्क्य भगवदर्पणबुद्धिचिकित्सारहिता व्यर्था इत्याह—देहादिभिरिति । या याः कृताः कृताः क्रियास्ताः सर्वा अपि मोघाः तत्र हेतुगर्भं विशेषणम् अनीशस्येशविरुद्धस्य ॥ २९ ॥

इतोपि वित्तापादने न प्रयतनीयम्. आध्यात्मिकादिक्लेशग्राहगृहीतत्वेन डुंडुभग्रस्तमण्डूकवत्समृद्धशारीरबलाभावात् कृतान्तपाशबद्धगलस्य पुरुषस्य पुरतो निहितक्षीरासववद्व्यर्थं वित्तमित्याह–आध्यात्मिकादिभिरिति । कामैः शब्दादिविषयैः ॥ ३० ॥

कस्याचिददृष्टबलादुपार्जितवित्तस्य समृद्धशारीरबलस्यापि लोभाभिभूतमनस्कत्वेनाऽपि भोगो दुर्घट इत्याह, पश्यामीति ॥ ३१ ॥

प्राणार्थवद्भयम् अर्थवतः प्राणभयं भवति प्राणवतोऽर्थवतश्चेति वा ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अत्रापि मनुष्यत्वेऽपि अन्यापनुत्तये दुःखनिवृत्त्यै विपर्ययं दुःखमेव दृष्ट्वा निवृत्तोऽस्मि कर्ममात्रेभ्य इत्यर्थः ॥ २५ ॥

कर्मणा कदाचित् सुखं स्यादपि सर्वकर्मनिवृत्त्या किं स्यादिति चेत्तत्राह—सुखमस्य जीवस्य मम स्वरूपमेव तर्हि किं नप्रकाशते तत्राह—सर्वेति । सर्वा ईहाः कर्माणि तद्धेतुः तृष्णा च तासाम् उपरत्तिरेव तनुः तनुं विना यथा सुखं नोपलभ्यते तथा तामपि विनेत्यर्थः । भोगांस्तु प्राकृतान् मनःस्पर्शजान् मनोरथमात्रजान् क्षणभङ्गुरान् दृष्ट्वा तत्राश्चिरेषु संविशन् स्वाभाविकानश्वरात्मसुखमुपभुञ्जानः स्वप्स्यामि स्वापिमि वैतृष्ण्यादिदिव्यकुसुमशय्यायामिति स्वस्य पीनत्वे सुखभोग एव हेतुरुक्तः "निवृत्तिः पुष्टीकरणानाम्"इति वैद्यकोक्तेः यद्वा स्वप्स्यामि संप्रत्यपि तृष्णाभावस्यानिवृत्त्या यद्यपि सम्यगात्मसुखानुपलम्भस्तथापि पञ्चषैर्दिनैस्तस्यापि निवृत्त्या सम्यक् संविशन् शयिष्य इत्यर्थः । "सम्वेशः स्वापस्त्रीरतवन्भयोः" इति मेदिन्युक्तेरत्र सामान्यत एवोपभोगवाची संवेशशब्दो ज्ञेयः ॥ २६ ॥

एवं चेत् सर्वेप्येवं किमिति सुखिनो नस्युस्तत्राह—इत्येतदिति । स्वार्थं स्वीयं सुखरूपमर्थं विस्मृत्य द्वैते दुःखरूपे असति देहादौ वस्तुत आत्मनः अविद्यमानेऽपि यद्वा असति असार्वकालिके ॥ २७ ॥

एतदेव दृष्टान्तेन स्पष्टयति—जलमिति । तदुद्भवैर्जलप्रवोद्भवैर्नतु जलादुद्भूतैस्तृणशैवालादिभिश्छन्नमिवात्मसुखं तद्भूतैर्मायिकतृणादिभिः छन्नंहित्वा स्वतोऽन्यत्र पुरुषार्थं पश्यन् ॥ २८ ॥

विपर्ययं दृष्ट्वेति यदुक्तं तद्विवृणोति–देहादिभिरिति पश्चाभिः सुखं दुःखात्ययश्च ईहत ईहमानस्य क्रिया मोघाः निष्फलाः ॥ २९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

यदि कदाचित् सफलाः स्युस्तदपि फलभोगाऽसामर्थ्य-माह—आध्यात्मिकादिभिरिति। दुःखसहितः सुखभोगोऽपि नेत्याह-मर्त्यस्य अकस्मादेव सम्भावितमृत्योः ॥ ३० ॥

तदेवमर्थैर्नदुःखनिवृतिः प्रत्युत दुःखाधिक्यमेवेत्याह, पश्यामीति ॥ ३१ ॥

सस्मादिति मत्तएव कथञ्चिद्दानभोगविस्मरणादिना नाशः स्यादिति प्रायोणु अर्थेषु चासक्तिमतां भयं प्राणोऽत्र शारीरवलं सम्भोगादिप्रयोजकं क्षेयं जीवनमात्रन्तु विहितमेव "जीवस्य तत्त्वजिज्ञासा" इत्यादौ ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अत्रापि नरदेहे ऽपि सुखाय अन्यस्य दुःखस्यापनुत्तये कर्माणि कुर्वतां विपर्ययं सुखाभावं दुःखप्राप्तिञ्च दृष्ट्वा निवृत्तोऽस्मि तादृशकर्मत इति शेषः ॥ २५ ॥

सुखं तु अस्य हृदि दृश्यमानस्य भगवतः रूपं सर्वैः कुतो नाऽनुभूयते अत्राह—सर्वासामीहानामुपरतिर्यस्मात्समाधिः अस्याऽत्मनस्तु शरीरम् ध्यानसमाधिशून्यैर्जनेनाऽनुभूयते इतिफलितोऽर्थः अतः मनःसस्पर्शजान् मनसा संस्पृश्यते विचार्यते इति मनःसंस्पर्शं प्रारब्धं कर्म तज्जान् भोगान् दृष्ट्वा आवश्यभोग्यतया विलोक्य संविशन् भुञ्जन् स्वप्स्यामि शयानो ऽस्मीत्यर्थः ॥ २६ ॥

इत्येतद्भगवद्ध्यानरूपम् आत्मनः स्वार्थं स्वपुरुषार्थं सन्तं साधुमङ्गलावहमित्यर्थः। विस्मृत्य असत्यमङ्गले द्वैते द्वाभ्यां चेतनाचेतनाभ्यां युतं द्वितं तदेवद्वैतं द्वयोर्भावो द्वितद्वितैव द्वैतं वा तस्मिन् चेतनाचेतनात्मके प्रपञ्चे जगति घोरां भयङ्करां संसृतिं जन्ममरणादिरूपामाप्नोति ॥ २७ ॥

यथा तदुद्भवैस्तृणादिभिः छन्नं जलं हित्वा मृगतृष्णामज्ञ उपधावेत् तद्वत्स्वतः स्वीयादीश्वरादन्यत्रार्थदृक् अज्ञ एव स्याद् ॥ २८ ॥

तस्यानीशस्य ईश्वरादन्यत्राऽर्थदृशः देहादिभिः सुखं दुःखाऽत्ययञ्च इच्छतः कृताः कृताः पुनः पुनः प्रवर्त्तिताः क्रिया मोघाः निष्फलाः स्युः ॥ २९ ॥

कर्हिचित् कदाचित्क्लेशा कष्टसाध्यया कयाचित् क्रियया उपनतैः प्राप्तैरपि अर्थैः धनैः कामैर्भोगैश्च मर्त्यस्य मरिष्यतः आध्यात्मिकादिभिर्दुःखैरमुक्तस्य किं न किमपि सुखमित्यर्थः ॥ ३० ॥

प्राप्तार्थस्य प्रत्युत दुःखं पश्यामीत्याह—पश्यामीति, द्वाभ्याम् ३१ ॥

राजादिभिः प्राणोपलक्षितदेहवतामर्थवतां च नित्यं भयं भवति ॥ ३२ ॥

भाषा टीका ।

इस योनि में भी सुख और दुःखनिवृत्ति के लिये कर्म करने वाले स्त्री पुरुषों के विपरीत फल को देखकर अब में सुखादि की कामनाओं से कर्म करने से निवृत्त भया हूं ॥ २५ ॥

सुख तो इस आत्मा का स्वरूप ही है, पर वह मनको स्पर्शकरने वाले विषयों से जायमान भोगों को देख कर, सर्व चेष्टाओं से उपराम को प्राप्त होकर अनुभव करने से ज्ञात होता है, ऐसे ही प्रारब्ध से आनेवाले भोगों को भोगते हुए हम भी सो रहे हैं ॥ २६ ॥

पुरुष इस प्रकार के सत् स्वार्थ को विस्मरण करके देव मनुष्यादि द्वैत भाव को असत् होने पर भी विचित्र घोर संसृति को प्राप्त होता है ॥ २७ ॥

जल से उत्पन्न होने वाले शैवाल (सिमार) काई प्रभृति से छन्न (ढके हुए) जल को छोडकर, अज्ञ पुरुष जल की कामना से जैसे मृगतृष्णा को दौडता है। और फल को नहीं प्राप्त होता, ऐसे ही अपने अन्तर्यामी से अन्यत्र अर्थ दृष्टि करने वाला भी निष्फल प्रयत्नवान् होता है ॥ २८॥

प्रारब्ध के परतन्त्र इन देहादिकों से स्वयं असमर्थ होकर भी सुख प्राप्ति और दुःख के छूटने की चेष्टा करने वाले पुरुष की करीहुई सब क्रियायें निष्फल होती हैं ॥ २९ ॥

कदाचित् बडे कष्ट उठाने से द्रव्य प्राप्त भी होजावै तौ-भी आध्यात्मिकादि दुःखों से नहीं छूटनेवाले पुरुष का द्रव्य से क्या स्वार्थ किया जायगा ॥ ३० ॥

और तुम कहते हो कि धन के विना भोग उपपन्न नहीं होता है, पर हम तो जिन लुब्धोंने धन जोड २ कर इकट्ठा किया है, अजितेन्द्रिय ऐसे उन धनियों को भी मैं बडा दुःखी देखता हूं। भय से निद्रा उन को नहीं आती, सब ही लोगों से सदा शङ्का करते रहते हैं ॥ ३१ ॥

राज से चोरों से शत्रुओं से स्वजनों से पशु से पक्षियों से याचकों से द्रव्यवाले को भय रहता है। ऐसे ही प्राण वाले को भी ॥ ३२ ॥

शोकमोहभयक्रोधरागक्लैब्यश्रमादयः ।
यन्मूलाः स्युर्नृणां जह्यात् स्पृहां प्राणार्थयोर्बुधः ॥ ३३ ॥
मधुकारमहासर्पौ लोकेऽस्मिन्नो गुरूत्तमौ ।
वैराग्यं परितोषं च प्राप्ता यच्छिक्षया वयम् ॥ ३४ ॥
विरागः सर्वकामेभ्यः शिक्षितो मे मधुव्रतात् ।
कृच्छ्राप्तं मधुवद्वित्तं हत्वा ऽप्यन्यो हरेत् पतिम् ॥ ३५ ॥
अनीहः परितुष्टात्मा यदृच्छोपनतादहम् ।
नो चेच्छये बह्वहानि महाहिरिव सत्त्ववान् ॥ ३६ ॥
क्वचिदल्पं क्वचिद्भूरि भुञ्जे ऽन्नं (१) स्वाद्वस्वादु वा ।
क्वचिद्भूरिगुणोपेतं गुणहीनमुत क्वचित् ॥ ३७ ॥
श्रद्धयोपाहृतं क्वापि कदाचिन्मानवर्जितम् ।
भुञ्जे भुक्त्वाऽथ कस्मिंश्चिद्दिवा नक्तं यदृच्छया ॥ ३८ ॥
क्षौमं दुकूलमजिनं चीरं वल्कलमेव वा ।
वसे ऽन्यदपि सम्प्राप्तं दिष्टभुक् तुष्टधीरहम् ॥ ३९ ॥
क्वचिच्छये धरोपस्थे तृणपर्णाश्मभस्मसु ।
क्वचित्प्रासादपर्यङ्के कशिपौ वा परेच्छया ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अतोऽनर्थहेतुत्वात्प्राणे जीवनेऽर्थे च स्पृहा न कार्येत्याह—शोकेति ॥ ३३ ॥

नन्वेवमनर्थाननुभवन्तो ऽपि न केचिद्विरज्यन्ते न च यथालाभेन तुष्यन्ति त्वं तु कथं वैराग्यादिकं प्राप्तोऽसि? तत्राऽऽह, मधुकारेति. मधुमक्षिकाऽजगरौ ययोः शिक्षया वृत्तपर्यालोचनया ॥३४॥

मधुकाराच्छिक्षितमाह—विराग इति । वित्तपतिं हत्वाऽन्यो वित्तं हरेदित्येवम् ॥ ३५ ॥

अजगराच्छिक्षितमाह—अनीह इति । सत्त्ववान्धैर्यवान् ॥ ३६ ॥

पीनत्वे हेतुं वदन्यदृच्छया प्राप्तात्परितोषं प्रपञ्चयति—क्वचिदल्पमिति, षड्भिः ॥ ३७ ॥ ३८ ॥

चीरं जीर्णवस्त्रखण्डम् वसे परिदधे दिष्टभुक् प्रारब्धकर्मफलभोगी ॥ ३९ ॥

प्रासादमध्ये पर्यङ्के तत्रापि कशिपौ तूलिकायाम् ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

न केवलं भयमेवापितु शोकमोहभयादयः सर्वे यन्मूलाः यदर्थमेव मूलं येषां ते नृणां स्युर्भवेयुः तस्माद्बुधः हेयोपादेयविवेकवान् तयोः प्राणार्थयोः स्पृहां जह्यात् त्यजेत् ॥ ३३ ॥

यदुपदेशात् त्वमीदृशं निवृत्तिधर्ममास्थितस्तं कथयेत्यत्राह—मधुकारेति । अस्मिन् लोके नोऽस्माकं गुरुश्रेष्ठौ मधुकार महासर्पौ मधुमक्षिकौ अजगरावेवेदृशधर्मशिक्षकौ भवतः तदेवाह—ययोर्मधुकारमहासर्पयोः शिक्षया वृत्तिपर्यालोचनया वयं वैराग्यं परितोषं दैवाल्लब्धात् सन्तोषं च प्राप्ताः तत्र मधुकाराद्वैराग्यं महासर्पात् परितोषं च प्राप्ता इत्यर्थः ॥ ३४ ॥

एतदुभयं विवृणोति—विराग इति, द्वाभ्याम् । तावत्सर्वेभ्यः विरागो मया मधुव्रताद्भ्रमराच्छिक्षितः तच्छिक्षया मम वैराग्योदय इत्यर्थः । किं तच्छिक्षितम्? तदाह—यथा मधुव्रतैरितस्ततः पुष्पेभ्य आनीय क्वचिन्निवेशितं मधु तत्स्वामिनो मधुव्रतान् हत्वाऽन्यो हरति तथा मधुवत् दुःखेनार्जितं धनमन्यः धनस्यपतिं हत्वा हरेदित्येतन्मधुव्रताच्छिक्षितमित्यर्थः ॥ ३५ ॥

अजगराच्छिक्षितमाह—अनीह इति । महाहिरिवाऽहमनीहः निर्व्यापारः यदृच्छोपनताद्दैवाल्लब्धाच्चादेः परितुष्टात्मा सन्तुष्टचित्तः नो चेत् यदृच्छोपनतं नो प्राप्तं चेत्तर्हि सत्त्ववान् धैर्यवान् बहून् अहानि शये शयानोऽस्मि ॥ ३६ ॥

पीनत्वे हेतुत्वेन यदृच्छया प्राप्तात्परितोषं प्रपञ्चयति—

(१) स्वाद्वस्वादु इति वीर० पा० ।

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

क्वचिदल्पमिति । कचित् कदाचिदल्पं कदाचिच्च भूरि बहु कचिच्च साधु कचिच्चासाध्वसमीचीनमहृद्यं कचिच्च गुणावद्रसवत् कदाचिन्निर्गुणम् ॥ ३७ ॥

कदाचिच्छ्रद्धया नीतं कदाचिन्निन्दापूर्वकमानीतं वाऽन्नादिकं भुञ्जे अपि कदाचिद्दिवा नक्तं च यदृच्छया प्राप्तं भुञ्जे ॥ ३८ ॥

एवं वस्त्रमपि दुकूलाद्यन्यतममन्यद्वा दैवाल्लब्धं वसे आच्छादयामि परिदधे च चीरं जीर्णवस्त्रञ्च एवं दिष्टभुक् प्रारब्धभुक् सन्तुष्टचित्तश्चाहम् ॥ ३९ ॥

कचिद्भूपृष्ठेऽप्येव कचिच्च तृणादिषु शये कचिच्च प्रासादोपरि पर्यङ्के तथापि कशिपौ वा तस्य दौर्बल्याच्छङ्कां निराह-परेषामिच्छयेति । इदमुत्तरत्राप्यनुषञ्जनीयः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु, सर्वोऽनर्थशमने किं कारणमित्याशङ्क्य स्पृहा सर्वापदो निदानमतस्तत्याग एव प्रथमतः कारणमित्याह-शोकेति । या स्पृहा मूलं येषां ते तथा प्राणे ऽर्थे च स्पृहां वैष्णवसिद्धान्ते तद्विरोधिनो जनात् प्राणसङ्कटे प्राप्ते प्राणरक्षणे स्पृहाऽपि न कार्या किमुतार्थे इति प्रदर्शनाय प्राणग्रहणम् ॥ ३३ ॥

वित्तवतः प्राणभयं वित्तस्पृहया शोकादिकं स्यादित्याद्युक्तमर्थं मधुकराजगरदृष्टान्तेन बोधयति—मधुकरेति । गुरूत्तमाद्या शिक्षा साऽऽश्यामेवासेति गुरूत्तमावित्यूचे ॥ ३४ ॥

यथा च तं मधुव्रतं हत्वा ऽन्यो मधु हरति तथा वित्तापादकं हत्वा कृच्छ्रादर्जितं राजाद्यन्यतमो हरेत् मधुव्रतस्थितिं दृष्ट्वा सर्वकामेभ्यो विरागः शिक्षितः ॥ ३५ ॥

उदरपोषणप्रयत्नशून्योऽनीहः नोचेद्यदृच्छया ऽप्राप्तं चेन्महाहिरजगरः ॥ ३६ ॥

भूरिगुणोपेतं कस्मिंश्चिद्दिवाऽह्न्येव भुक्त्वा नक्तं भुञ्जे कस्मिंश्चिद्दिने नक्तं भुक्त्वाऽह्नि भुञ्जे ॥ ३७ ॥ ३८ ॥

क्षौमं दुकूलमित्यादिकमेकस्मिञ्जन्मनि बहु जन्मनि चेति यथायोग्यमङ्गीकर्तव्यम् दैवलब्धेन भुञ्जे इति दिष्टभुक् क्षौमाद्याच्छादनं गजादिभिश्चरणं चत्रजन्मनि प्रासादादिशयनं भूपृष्ठशयनं च पश्वादिजन्मनि भस्मादौ शयनं श्वानादिजन्मनि वाससे च अजिनादि अजिनाद्याच्छादनमृष्यादिजन्मनि अस्मिन् जन्मनि जन्मान्तरे वा दिग्वासाः दिगम्बरः ॥ ३९ ॥ ४० ॥ ४१ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

कचिदिति, सार्द्धकं । स्वाद्वस्वादु वेत्यत्र साध्वसाधु वेति कचित् पाठः ॥ ३७ ॥

भुञ्जे इत्यर्द्धकम् ॥ ३८—४४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

"प्राणार्थयोः स्पृहां जह्यात्" इति शरीरबलाभिवृद्ध्यर्थं धनाधिकार्थं च न यतेत स्वल्पेनापि बलेन स्वल्पेनापि धनेन पारमार्थिककृत्यसिद्धेरिति भावः ॥ ३३ ॥

ननु, कस्माद्गुरोरेतत्त्वया शिक्षितम् ? तत्राह-मधुकारेति ॥ ३४ ॥

मधुमक्षिकातः शिक्षितमाह—वित्तपतिं हत्वाऽप्यन्यो वित्तं हरेदिति मे वित्ते विरागः ॥ ३५ ॥

अजगराच्छिक्षितमाह—अनीह इति । शये स्वपिमि सत्त्ववान् धैर्यवान् ॥ ३६ ॥ ३७ ॥ ३८ ॥

वसे परिदधे ॥ ३९ ॥

धरोपस्थे धराक्रोडे "उपस्थः श्रेफसि तथा क्रोडे मदनमन्दिरे" इति मेदनी ॥ ४० ॥ ४१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अतो नृणां शोकादयो यन्मूलाः स्युस्तां प्राणार्थयोः स्पृहां बुधो जह्यादेव ॥ ३३ ॥

यच्छिक्षया यद्वृत्तिपर्यालोचनया वैराग्यं परितोषं च वयं प्राप्ताः ॥ ३४ ॥

हत्वा पतिं वित्तपतिम् ॥ ३५ ॥

यदृच्छोपनतादन्नादितः नो चेदनुपनते अन्नादौ सत्त्ववान् धैर्यवान् शये स्वपिमि ॥ ३६-३७-३८ ॥

चीरं वस्त्रखण्डम् वसे परिदधे दिष्टभुक् प्रारब्धभुक् ॥ ३९-४० ॥

भाषाटीका ।

शोक मोह भय क्रोध राग दैन्य श्रम आदिक सबों का मूल कारण तो, प्राण और द्रव्य की स्पृहा है, अर्थात् चाहना है, बुद्धिमान उसे छोड देवें ॥ ३३ ॥

मधुकार और महासर्प ये दोनों इस लोक में हमारे उत्तम गुरू हैं, हमने वैराग्य और सन्तोष नहीं की शिक्षा से पाया है ॥ ३४ ॥

सर्व कामों से वैराग्य हमने मधु की मांखी से सीखा है । जैसे कि ? मधुमक्षिका मधु जोडती है, फिर फल को नहीं प्राप्त होती है, कोई दूसरा पुरुष पति को मारकर लेता है ऐसे ही धन की दशा है ॥ ३५ ॥

और अजगर से हमने यह सीखा है, कि विना चेष्टा किये हरीच्छा से जो प्राप्त हो जावे, उसी से सन्तोष करे, यदि कभी कुछ नहीं प्राप्त होवे । तब धैर्य को धारणकर अजगर के तरह सोते रहते हैं ॥ ३६ ॥

क्वचित्स्नातोऽनुलिप्ताङ्गः सुवासाः स्रग्व्यलङ्कृतः ।
रथेभाश्वैश्चरे क्वापि दिग्वासा ग्रहवद्विभो ! ॥ ४१ ॥
नाऽहं निन्दे नच स्तौमि स्वभावविषमं जनम् ।
एतेषां श्रेय आशासे उतैकात्म्यं महात्मनि ॥ ४२ ॥
विकल्पं जुहुया(१)च्चित्तौ तां मनस्यर्थविभ्रमे ।
मनो वैकारिके हुत्वा तं मायायां जहोत्यनु ॥ ४३ ॥
आत्मानुऽभूतौ तां मायां जुहुयात्सत्यदृङ् मुनिः ।
ततो निरीहो विरमेत् स्वानुभूत्या ऽऽत्मनि स्थितः ॥ ४४ ॥
स्वात्मवृत्तं मयेत्थं ते सुगुप्तमपि वर्णितम् ।
व्यपेतं लोकशास्त्राभ्यां भवान्हि भगवत्परः ॥ ४५ ॥

नारद उवाच ।

धर्म्मं पारमहंस्यं वै मुनेः श्रुत्वा ऽसुरेश्वरः ।
पूजयित्वा ततः प्रीत आमन्त्र्य प्रययौ गृहम् ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे पारमहंस्यां संहितायाम्
वैयासिक्यां युधिष्ठिरनारदसंवादे यतिधर्मे
त्रयोदशोऽध्यायः ॥ १३ ॥

भाषा टीका ।

कभी थोडा कभी बहुत स्वादु वा अस्वादु जैसा अन्न-मिले वैसा भोजन करलेते हैं, कभी बहुगुण वाला, कभी किसी जगह गुणहीन भी मिलता है, तो उसी से सन्तुष्ट रहते हैं ॥३७॥

किसी समय श्रद्धा से लाया हुआ, कभी मानवर्जित, किसी समय दिन में, कभी रात में, यदृच्छा से भोजन करलेते हैं। कभी न भोजन करके भी रहजाते हैं ॥ ३८॥

बहुत उत्तम क्षौम (अतसीका वस्त्र) कभी रेशमी कभी मृग चर्म वा चीर अथवा वल्कल अथवा और जो कुछ प्राप्त होगया उसको पहिन लेते हैं। और प्रारब्ध को भोगते हुए उसी में बुद्धि-का सन्तोष करलेते हैं ॥ ३९ ॥

किसी समय पृथिवी के पृष्ठपर कभीतृण पर, कभी पत्तोंपर, कभी पत्थर पर, कभी धूलि वा भस्म में पडे रहते हैं, किसी समय दूसरे की इच्छा से महलों में पर्यंक के ऊपर, कभी खट्टा के ऊपर सो जाते हैं ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चरे विचरामि क्वचिद्ग्रहवद्दिगम्बरो विचरामि ॥ ४१ ॥

न च मानापमानकर्तृषु मम वैषम्यमित्याह—नाहमिति। नाहं निन्दामि नच स्तौमि महात्मनि विष्णौ ॥ ४२ ॥

एवंभूतत्वेन स्थितस्तदुपायमाह–विकल्पमिति, द्वाभ्याम् । चित्तौ भेदग्राहकमनोवृत्तौ अर्थरूपो विभ्रमो यस्मिन्मनसि तन्मनो वैकारिके ऽहङ्कारे तमहङ्कारमन्वनन्तरं महत्तत्त्वद्वारेणेत्यर्थः ॥ ४३ ॥

सत्यमेव पश्यतीति तथा ॥ ४४ ॥

मन्दहष्ट्या लोकशास्त्राभ्यां व्यपेतं नतु तत्त्वदृष्ट्या यतो भवान्भगवत्परः ॥ ४५ ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
त्रयोदशोऽध्यायः ॥ १३ ॥

(१) चित्तं तन्मनसि इति पाठः—वीर० विजय० ।

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

स्नातमनुलिप्तं चन्दनेन चाङ्गं यस्य शोभनं वासो वस्त्रं यस्य स्रग्भिरलंकृतः रथादिभिर्यानैः चरे सञ्चरामि कचिच्च-दिग्वासा दिगम्बरः ग्रहवच्चरे हे विभो ! ॥ ४१ ॥

न च मानावमानादिकर्तृषु मम वैषम्यमित्याह—नाहमिति । स्वभावत एव विषमं जनं स्तुतिनिन्दयोः कर्त्तारं न स्तौमि न निन्दे च किन्तु तेषां जनानां सर्वेषां श्रेयः धर्मादिरूपम् उताऽपि च महात्मनि भगवत्यैकात्म्यमेकचित्तत्वं चाशासे प्रार्थये ॥ ४२ ॥

इत्थमन्यस्याप्यवस्थितौ उपायमाह—विकल्पमिति । विकल्पं जातिरूपादिविकल्पं चित्ते मनोव्यापारे जुहुयात् प्रलीनं भावयेत्तच्चित्तमर्थविभ्रमे देहात्मभ्रमहेतौ मनसि मनश्च वैकारिके सात्त्विकाहंकारे तं च वैकारिकं मायायां मूलप्रकृतौ जुहुयात् सर्वत्र होमोनाम लयानुसन्धानरूपः ॥ ४३ ॥

तां च मायां स्वात्माऽनुभूतौ जुहुयात् ततः सत्यंस्वात्मशरीरकं परमात्मानं पश्यतीति सत्यदृक् मुनिः तन्मननशीलः निरीहो निश्चेष्टः स्वानुभूत्यात्मनि परमात्मात्मके परिशुद्धजीवस्वरूपे स्थितः तदनुसन्धानपरः विरमेत्प्रारब्धावसाने कलेबराद्विरमेत् ॥ ४४ ॥

उक्तं स्ववृत्तमुपसंहरति—स्वात्मवृत्तमिति । इत्थं मया गुप्तमपि स्वात्मनो मम वृत्तं मन्ददृष्ट्या लोकशास्त्राभ्यां व्यपेतं न तु तत्त्वदृष्ट्या व्यपेतं बहिर्भूतं ते तुभ्यमुपवर्णितं हि यस्माद्भवान् भगवत्परोऽतो गुप्तमुपवर्णितमित्यर्थः ॥ ४५ ॥

एवं मुनिनोपवर्णितं पारमहंस्यं तुर्य्याश्रमनिष्ठानां गुणं श्रुत्वाऽसुरेश्वरः प्रह्लादः तं यतिं प्रीतस्सन् पूजयित्वा आमन्त्र्य अनुज्ञाप्य स्वगृहं प्रति ययौ ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिकायाम्

त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सत्त्वादिगुणस्वभावेन विषमं सात्त्विकराजसतामसभेदं भिन्नं सर्वेभ्यो भयं मत्त इति यतिधर्मत्वात् भूतानां भद्रमेवाशासे तत्रापि भगवत्स्वामित्वं न विस्मरामीत्याह—आशास इति । उतेत्याशास इत्यनुवर्तते जगत एक एव स्वामीतिभावमैकात्म्यम् उताशासे कस्मिन्विषये महात्मनि भगवद्विषय इत्यर्थः ॥ ४२ ॥

तुर्यावस्थेन विहितोपासनानन्तरमिदं च कर्तव्यं ब्रह्मप्राप्तिमार्गत्वादित्याह—विकल्पमिति । विकल्पं जगच्चित्ते मनोवृत्त्यभिमानिनि न्यसेज्जुहुयात् जगच्चित्ताख्याग्न्यधीनमिति चिन्तयेत् चित्तमग्निमर्थेषु भ्रममाणे भगवत्युपाधावमाने मनसि मनो नामेन्द्राधीनतया तिष्ठतीति चिन्तयेत् मन इन्द्रं वैकारिके रुद्रे हुत्वा स्वाश्रित्यामुं रुद्रं मायायां प्रकृतिविकारे महत्तत्त्वे विरिञ्चे सन्निन्स्य तां मायां तं विरिञ्चं वाऽऽत्मानुभूतौ चित्प्रकृतौ जुहुयात् चिन्तयेत्"चित्ताख्याऽग्नेरधीनं हि जगदेतद्विचिन्तयेत् । मनो नामेन्द्रवशगमग्निं च प्रतिचिन्तयेत्" इति वा वाक्यात्सर्वमवगन्तव्यम् । अत्र जडकार्यस्य जडकारणात्मकत्वं चेतनस्य चेतनाधीनत्वं चिन्तनीयमित्यर्थः । तामात्मानुभूतिं स्वानुभूतेर्लक्ष्म्या आत्मनि स्वामिनि पत्यौ निरन्तरं चिन्तयेत् ततो मुनिरनन्तरं कृतकृत्यो "वेत्ता वेद्यस्य सर्वस्य मुनिः सद्भिरुदाहृतः" इत्युत्पलमालावचनात्. किञ्च सत्यं साधुगुणपूर्णं विष्णुं पश्यतीति सत्यदृक् स्वानन्दानुभवात्मनि स्वमहिम्नि स्थितः "महिम्निस्वे महीयते" इति वचनात् स्वरूपानन्दज्ञानात्मनि ब्रह्मणि स्थित इति वा निरीहः अत एव निषिद्धचेष्टारहितो विरमेत् कृत्यादिति शेषः ॥ ४३ ॥ ४४ ॥

प्रतिपादितमर्थं निगमयति—स्वात्मेति । मया स्वात्मनो मम वृत्तं तुभ्यमनुवर्णितमित्यन्वयः । स्वात्मनो जीवस्य वा परमात्मनो वा कीदृशं मुखतो लोकशास्त्राभ्यां व्यपेतं रहितं आन्तरतो विपरीतत्वेन प्राप्तं शास्त्रसिद्धत्वाच्छास्त्रीयमित्यर्थः—

"अशास्त्रीयत्वान्मुखतः शास्त्रापेतमिदं विदुः ।
शास्त्रनिर्णयगम्यत्वाच्छास्त्रीयमभिधीयते" ॥

इति वचनादुक्त एवार्थः । इदं सिद्धमित्यभिप्रेत्याह—भवानिति ॥ ४५ ॥

ततः प्रह्लादेन किं कृतमित्यतस्तद्वचनमाह—नारद इति । पारमहंस्यं परमहंसानां निवृत्तिमार्गस्थानां विद्यमानम् ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

भगवत्पर इति क्वचित् पाठः ॥ ४५ ४६ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

श्रेयो भक्तियोगं तस्य भगवतः सकाशाद्दुर्लभत्वमाशंक्याह, उतेति । ऐकात्म्यं मोक्षं महात्मनि परमात्मनि ॥ ४२ ॥

एवंभूतत्वेन योगिनः स्थितावुपायमाह–विकल्पमिति, द्वाभ्याम् । विविधं कल्पत इति विकल्पो व्यवहारस्तं चित्ते मनोवृत्तौ तत एव तस्य प्रवृत्तेः तां मनसि अर्थानां विविधं भ्रमणं यातायातं यतस्तस्मिन् वैकारिकेऽहंकारे तं महति तच्च महान्तं मायायाम् अत्र तं महतीति पदद्वयमध्याहार्यम् ॥ ४३ ॥ ४४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

लोकशास्त्राभ्यां व्यपेतं रहितमिति मन्ददृष्ट्या नतु तत्त्वदृष्ट्या किञ्च हीति हि यतो भवान् भगवत्प्रियो महाभागवतः तवाऽनेन प्रयोजनाभाव इति भावः ॥ ४५ ॥ ४६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
त्रयोदशः सप्तमस्य सङ्गतः सङ्गतस्सताम् ॥ १३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीप ।

चरे विचरामि ॥ ४१ ॥

श्रेयो मुमुक्षूणां मायामयमैश्वर्य्यम् महात्मनि भगवति मुमुक्षूणामैकात्म्यं तद्भावापत्तिलक्षणं मोक्षम् ॥ ४२ ॥

महात्मन्यैकात्म्यलक्षणस्य मोक्षस्योपायमाह—विकल्पमिति, द्वाभ्याम् । स्वानुभूत्या स्वीयस्य परमात्मनो ध्यानेन आत्मनि परमात्मनि स्थितः भगवद्ध्याननिष्ठो मुमुक्षुः विकल्पं चित्तं चित्तौ बुद्धौ जुहुयात्तां मनसि मनो वैकारिके सात्विकाहङ्कारे हुत्वा अनु अनन्तरं तं महतत्त्वद्वारा मायायां प्रकृतौ जुहोति जुहुयात् ॥ ४३ ॥

तां मायाम् आत्मानुभूतौ जगत्कारणे जुहुयात्तच्छक्तितया तस्मिन्प्रविलाप्य स्वयमात्मनि भगवति अंशिनि दृग् दृष्टिर्यस्य सः विरमेत् संसारादिति शेषः । देवयानेन तत्पदं व्रजेदित्यर्थः ॥४४॥

भवान् भगवत्प्रियोऽतस्ते आत्मवृत्तं सुगुप्तमपि मया वर्णितम् कथम्भूतं लोकशास्त्राभ्यां लोकः प्रसिद्धः शिश्नोदरतृट्-शास्त्रं तदनुरूपं कर्मादिप्रतिपादकं भगवच्छास्त्रविरुद्धं ताभ्यां व्यपेतं दूरीभूतम् ॥ ४५—४६ ॥

इति श्रीमद्भागवते महापुराणेसप्तमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
त्रयोदशाऽध्यायार्थप्रकाशः ॥ १३ ॥

भाषा टीका ।

किसी समय किसी की इच्छा से स्नान कर चन्दन लेपन कर सुन्दर वस्त्रों को धारण कर माला पहिन अलं होकर, रथ हस्ती घोडाओं पर बैठकर चलते हैं । हे विप्र और कभी दिगम्बर (नग्न) होकर, जैसे कोई राहु केतु आदि नवग्रहोंमें से कोई ग्रह आगया हो वा पिशाच हो,इस त विचरते रहते हैं ॥ ४१ ॥

जनतौ स्वभाव से विषम हैं, कोई प्रतिकूल वर्त्तता है, अनुकूल वर्त्तता है, परञ्च मैं तौ किसी की निन्दा भी नही कर और किसी की वडाई भी नहीं करता हूं कि इन सबों के श्रेय (मङ्गल) को मनाता हूं, और प त्मामे एकता (निष्कपटता) चाहता हूँ ॥ ४२ ॥

मनके संकल्पविकल्पों को चित्त की वृत्तियों में हवन उनको अर्थ के विभ्रम करने वाले मन में होमदें, मन सात्विक अहंकार में, उसको महतत्त्व में, उसको प्रकृतिमें, का अनुसंधान करे ॥ ४३ ॥

उस प्रकृति पद वाच्य माया को आत्मानुभव में करे, फिर वह सत्य दृष्टा मुनि निश्चेष्ट होकर विराम को हो जाय, और अपने अनुभव से परमात्मा में स्थित होरहे

हे प्रह्लाद ! अतिगुप्तभी अपना समाचार हमने तुमसे प्रकार वर्णन किया और यह लोक शास्त्रसे अविरुद्ध है आप तौ भगवत्प्रिय हो सब जानत ही हो ॥ ४५ ॥

नारद उवाच ॥

नारदजी बोले, कि असुरेश्वर प्रह्लाद, इस प्रकार परम के धर्मोंको सुनकर बड़े प्रसन्न हुये, और मुनि की पूजा आज्ञा लेकर घर को सिधारे ॥ ४६ ॥

इति श्रीमद्भागवत सप्तस्कन्ध में त्रयोदश अध्याय की
भागवताचार्यकृत भाषा टीका समाप्त ॥ १३ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे त्रयोदशोऽध्यायः ॥ १३ ॥

॥ चतुर्दशोऽध्यायः ॥

युधिष्ठिर उवाच ।
गृहस्थ एतां पदवीं विधिना येन चाञ्जसा ।
याति देवऋषे ! ब्रूहि मादृशो गृहमूढधीः ॥ १ ॥
नारद उवाच ।
* साधु पृष्टं महाराज ! लोकान्साध्वनुगृह्णता ।
एतत्तुभ्यं प्रवक्ष्यामि नैष्कर्म्यं कर्मणो यतः ॥ ० ॥
गृहेष्ववस्थितो राजन् क्रियाः कुर्वन् गृहोचिताः ।
वासुदेवार्पणं साक्षादुपासीत महामुनीन् ॥ २ ॥
शृण्वन्भगवतोऽभीक्ष्णमवतारकथामृतम् ।
श्रद्दधानो यथाकालमुपशान्तजनाऽऽ(२)वृतः ॥ ३ ॥
सत्सङ्गाच्छनकैः सङ्गमात्मजायात्मजादिषु ।
विमुञ्चेन्मुच्यमानेषु स्वयं स्वप्नवदुत्थितः ॥ ४ ॥
यावदर्थमुपासीनो देहे गेहे च पण्डितः ।
विरक्तो रक्तवत्तत्र नृलोके नरतां न्यसेत् ॥ ५ ॥
ज्ञातयः पितरौ पुत्रा भ्रातरः सुहृदोऽपरे ।
यद्वदन्ति यदिच्छन्ति चानुमोदेत निर्ममः ॥ ६ ॥
दिव्यं भौमं चाऽऽन्तरिक्षं वित्तमच्युतनिर्मितम् ।
तत्सर्वमुपभुञ्जान एतत्कुर्यात्स्वतो बुधः ॥ ७ ॥
यावद्भ्रियेत जठरं तावत्स्वत्वं हि देहिनाम् ।
अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चतुर्दशे गृहस्थस्य परमो धर्म ईर्यते ।
देशकालादिभेदेन पुत्तः श्रेयो विशेषकृत् ॥ १ ॥

गृहस्थमुल्लङ्घ्य मोक्षं प्रत्यन्तरङ्गत्वे प्रथमं वनस्थयतिधर्मेष्वभिहितेषु तर्हि गृहस्थस्य मोक्षो न स्यादिति शङ्कितचित्तः पृच्छति, गृहस्थ इति ॥ १ ॥

तस्य मोक्षधर्मानाह—गृहेष्वित्यादि, यावदध्यायसमाप्ति । साक्षाद्वासुदेवार्पणं यथा भवत्येवं कुर्वन्नुपासीत ॥ २ ॥ ३ ॥

स्वयमेव मुच्यमानेषु वियुज्यमानेषु यथा स्वप्नादुत्थितः पुमान् स्वप्नदृष्टेषु पुत्रादिषु सङ्गं विमुञ्चति तद्वत् ॥ ४ ॥

नन्वेवम्भूतस्य दुर्जनैरभिभूयमानस्य कुतो गृहोचिताः क्रियाः स्युस्तत्राऽऽह—यावदर्थमिति । अन्तस्त्वनासक्तो बहिस्त्वासक्त इव नृलोके जनमध्ये नरतां मनुष्यतां न्यसेत् पुरुषकारमाविष्कुर्यादित्यर्थः ॥ ५ ॥

आग्रहं तु क्वापि न कुर्यादित्याह, ज्ञातय इति ॥ ६ ॥

नन्वेवं सर्वानुमोदने वित्तव्ययप्रसङ्गात्कुतो जीवनं कुतो वा कर्मकरणं तत्राह—दिव्यं वृष्ट्यादिभिर्जातं धान्यादि भौमं

* श्लोकोयमधिकः पठ्यते वीर० ॥ (२) हतमिति विज० पाठः ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

निधानादि, आन्तरिक्षमकस्मादेव प्राप्तम्. एवं स्वत एवाऽच्युतनिर्मितं दैवलब्धं यत् एतत्पूर्वोक्तं कर्मादि ॥ ७ ॥

दैवाद्भूरिलाभे जातेऽपि तत्राऽभिमानो न कार्य इत्याह—यावदिति । म्रियेत पूर्येत ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमाश्रुताश्रमत्रयधर्मो गृहस्थाश्रमधर्मान् बुभुत्सुः पृच्छति, युधिष्ठिरः—गृहस्थ इति । हे देवऋषे ! सन्ध्यभाव आर्षः गृहेष्वेव मूढा धीर्यस्य गृहासक्तचित्तो यादृशो गृहस्थाश्रमस्थः पुमान् येन विधिना एतां पदवीं तुर्याश्रमिगम्यां पदवीं मार्गं मुक्तिमित्यर्थः । यायात् प्राप्नुयात् तं विधिं ब्रूहि ॥ १ ॥

एवमापृष्टगार्हस्थ्यधर्मो देवर्षिस्तत्प्रश्नमभिनन्दंस्तान् धर्मान् वक्तुं प्रतिजानीते—साध्विति । हे महाराज ! जानतापि त्वया लोकान् साधु यथा तथाऽनुगृह्णता साधु पृष्टमेतत्त्वत्पृष्टं गार्हस्थ्यव्रतमहं तुभ्यं प्रवक्ष्यामि यतः कर्मणः मया वक्ष्यमाणगार्हस्थ्यधर्मात् कर्मणां मुक्तिप्रतिबन्धकानां पुण्यपापात्मकानां निरासद्वारा नैष्कर्म्यं ज्ञानयोगलाभो भवेत् ॥ ० ॥

एवं प्रतिज्ञाय गार्हस्थ्यधर्मानाह—गृहेष्वित्यादिना यावदध्यायसमाप्ति । यद्यपि प्रथमाश्रमधर्मकथनानन्तरम् एवैतदाश्रमधर्मवर्णनं युक्तं क्रमप्राप्तत्वात्तथापि गार्हस्थ्यधर्माणां बाहुल्यान्महता प्रबन्धेन वर्णनीयत्वादाश्रमान्तरधर्मवर्णनानन्तरं ते कथ्यन्ते क्रमानादराद्वा । अत्र केचिद्वदन्ति मोक्षान्तरङ्गत्वेन प्रथमं वनस्थयतिधर्मानभिधाय पश्चाद्गृहस्थधर्मानभिदधातीति,तन्मन्दम्"अतस्त्वितरज्ज्यायो लिङ्गाच्च"३।४।३९। इति शारीरकन्यायेन ब्रह्मविद्याऽनुग्राहकाल्पधर्माश्रमान्तरापेक्षया तदनुग्राहकबहुधर्मकगार्हस्थ्यस्यैवान्तरङ्गत्वादतो यथोक्त एवाशयः । हे राजन् ! गृहेष्ववस्थितः गृहाश्रमस्थः गृहोचिता आश्रमाऽनुगुणाः क्रियाः कर्माणि सन्ध्योपासनपञ्चमहायज्ञादीन्यावश्यकानि साक्षाद्वासुदेवार्पणं यथा भवति तथा कुर्वन् फलसङ्गकर्तृत्वत्यागपूर्वकं कुर्वन् महामुनीनुपासीत भगवद्गुणमननशीलान्महाभागवतानुपासीत सेवतेत्यर्थः ॥ २ ॥

कथम्भूतः तेभ्यो भगवत अवतारकथामृतमभीक्ष्णं पुनः पुनः यथाकालमावश्यकधर्मानुष्ठानावशेषितं कालमुपशान्तजनैः सहितः श्रद्धापूर्वकं शृण्वन् ॥ ३ ॥

एवं सतां सङ्गात् देहदारपुत्रादिषु शनकैः सङ्गं विमुञ्चेत्तेष्वहंममताद्यभिमानं त्यजेदेवं मुच्यमानेषु मुक्ताऽभिमानविषयेषु सत्सु देहादिषु स्वप्नवदुत्थितो यथा स्वप्ने तद्विषये पुत्रादौ तस्मादुत्थितः तत्कालमात्राऽनुभाव्यतां भाव्यते ॥ ४ ॥

तथा देहे गेहे च चशब्दाद्दारादिषु च पण्डितः अस्थिरत्वाऽपुरुषार्थत्वज्ञानवान् तत्र देहादौ स्वयं विरक्तोऽपि रक्तवदासक्तवद्यावदर्थं प्राणधारणाऽपेक्षितमर्थमुपासीनः स्वीकुर्वन् नृलोके नृशरीरे नरतां न्यसेदनुसन्दधीत नरत्वादिकं देहगतमनुसन्दधीत नत्वात्मन्यनुसन्दधीतेत्यर्थः ॥ ५ ॥

ज्ञात्यादयस्तेभ्योऽन्ये च यद्वदन्ति यदिच्छन्ति तत्स्वनिर्ममः ममकाररहितो मोदेताऽनुमोदेत ॥ ६ ॥

यावदर्थपरिग्रह इत्येतदेव विवृणोति-यद्भगवता निर्मितं प्राप्तं दिव्यादिभेदभिन्नं वित्तं तत्र दिव्यं वित्तं वृष्ट्यादिभिर्जातं धान्यादि भौमं भूम्याञ्जातं सुवर्णादिरूपम् आन्तरिक्षमकस्मादेव प्राप्तं यद्वा दिव्यं वित्तमर्काऽऽलोकादि आन्तरिक्षं वर्षं भौमं तृणादि तथैतत्सर्वमुपयुञ्जानो विनियुञ्जान अबुधोऽविवेकी चेत् स्वत्वेन कुर्यात् अबुधश्चेदेतत्सर्वं स्वत्वेनाभिमन्येतेत्यर्थः । बुध इत्येवच्छेदः विवेकी तत्सर्वमुपयुञ्जानः एतद्यथोपयुक्तं स्वत्वेन कुर्यात् स्वत्वेन स्वीकुर्यादिहधारणमात्रोपयुक्तमेव स्वीकुर्यादित्यर्थः।

अधिकं न स्वीकुर्यात् इत्यभिप्रायेण तस्मिन् स्वत्वाभिमानं कुर्यादित्याह—यावदिति । हि यस्माद्यावज्जठरमुदरं म्रियेत पूर्येत तावदेव स्वत्वं देहिनामुदरभरणोपयुक्त एव हि वित्ते देहिनां स्वत्वाभिमान इत्यर्थः । एवं हि योऽधिकमपि स्वत्वेनाभिमन्येत स पुमांस्तेनश्चोर एव यत एवं ततो दण्डमेवार्हति इह दण्डाद्यनर्होऽप्यमुत्र दण्डमर्हत्येव यद्वा संसृतिरूपं दण्डमर्हतीति भावः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सर्ववर्णाश्रमाणां गृहाश्रममूलत्वात्सूचीकटाहन्यायेन यद्यपि सर्वाश्रमधर्मं निरूप्य गृहाश्रमधर्मं निरूपयत्यस्मिन्नध्याये, तत्र "नापृष्टः कस्यचिद्ब्रूयात्"इति न्यायात् युधिष्ठिरः पृच्छतीत्याह—युधिष्ठिर इति । एतां पदवीमन्याश्रमविषयां विधिना प्रकारेण ॥ १ ॥

* नैष्कर्म्यं मोक्षसाधनत्वम् ॥ ० ॥

गृहोचिताः क्रियाः पञ्चयज्ञलक्षणाः—

"पञ्चयज्ञप्रसिद्ध्यर्थं विद्यां चाध्यात्मिकीं जपेत् ।
बलिकर्मस्वधाहोमस्वाध्यायातिथिसत्क्रियाः ॥
भूतपित्रमरब्रह्ममनुष्याणां महामखाः"—

इति याज्ञवल्क्यः । वासुदेवार्पणं कुर्वन्निति शेषः ॥ २ ॥

उपशान्तजनेन संन्यासिजनेनावृतं कामितम् ॥ ३ ॥

स्वप्नं दृष्ट्वोत्थितः स्वप्नदृष्टपदार्थसङ्गं यथा जहाति तथा जायादिसङ्गं मुञ्चेदित्यन्वयः ॥ ४ ॥

यावदर्थो यावद्देहयात्राप्रयोजनो देहादावुपासीनो ऽर्थानुमानस्तत्र देहादौ रक्तवत् स्निग्धवन्नरतां नरत्वं न्यसेत्स्वयतिर्भवेदित्यर्थः ॥ ५ ॥ ६ ॥

अन्तरिक्षं द्यावापृथिव्योर्मध्यभवमच्युतेन निर्मितं यद्वित्तं उपयुञ्जीरन् लोका इति शेषः तत्सर्वं जानन् स्वकीयमिति स्वीकुर्यात् ॥ ७ ॥

यावदर्थं इत्युक्तं विवृणोति—यावदिति । जठरं यावदन्नं गृह्णाति तावदन्नं स्वत्वं स्वकीयमिति स्वीकुर्यात् ततोऽधिकदाने दण्डयोग्यमित्याह, अधिकमिति ॥ ८ ॥

---

* साधु पृष्टं महाभाग लोकानामनुगृह्णता । तत्त्वेन तदहं नैष्कर्म्यं येन कर्मणाम् ॥ इति मूलग्रन्थे ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

गृहस्थ इति युग्मकम् ॥ १ ॥

साक्षादिति । तत्प्रीत्यर्थमेव न तु फलसाद्गुण्यार्थमित्यर्थः ॥ २—११ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

निवृत्तं त्रिषु निर्वर्ण्य प्रवृत्तस्तु गृहाश्रमे।
देशकालादिभेदेन धर्म उक्तश्चतुर्दशे ॥

तदेवं ब्रह्मचारिवानप्रस्थयतिषु त्रिष्वधिकारिषु निवृत्तधर्ममुक्त्वा प्रवृत्तधर्ममेकस्मिन् गृहस्थ एवाधिकारिणि वक्तुं प्रवर्त्तमानं मुनिं प्रत्यक्षं प्रवृत्तधर्मेण जन्ममृत्युप्रवाहानुकूलेन वक्तव्येन यद्विच प्रवृत्तधर्मेणापि निवृत्तिधर्मफलं मोक्षः सिद्ध्येत्तर्हि तं गृही लाययेनाह—गृहस्थ इति ॥ १ ॥

वासुदेवार्पणं यथा स्यात्तथा कुर्वन् महामुनीन् उपासीत यथाकालं कालेकाले अपराह्णादौ उपशान्तजनावृतस्सन् कथामृतमभीक्ष्णं शृण्वन् न तु कथाश्रवणकाले वार्त्तान्तरं शृण्वन्नित्यर्थः ॥ २—३ ॥

स्वयमेव मुच्यमानेषु वियुज्यमानेषु यथा उत्थितः प्रबुद्धः पुमान् स्वप्नदृष्टेषु पुत्रादिषु सङ्गं मुञ्चति तद्वत् ॥ ४ ॥

उपासीनो भोग्यादिवस्तूनीति शेषः। देहे गेहे च विषये पण्डित इति तत्र तत्र औदासीन्येन वर्त्तमान इत्यर्थः। रक्तवत् अन्तर्विरक्तो बहिस्त्वासक्तवत् तत्र गृहमध्यवर्तिनि नरतां पुरुषत्वं न्यसेत् पुरुषकारमाविष्कुर्यादित्यर्थः ॥ ५ ॥

निर्ममः अनासक्त एव अनुमोदेत ॥ ६ ॥

दिव्यं वृष्ट्यादिभिर्जातं धान्यादि भौममाकराद्युत्थम् आन्तरिक्षमकस्मात् प्राप्तं तत्तद्रूपत्वेन सर्वमच्युतेनैव विनिर्मितमतो विचार्य नैव चिन्तां कुर्य्यादित्यर्थः। एतत् पूर्वोक्तं नित्यनैमित्तिकादि स्वतः स्वं वित्तं तेनेत्यर्थः ॥ ७ ॥

दैवाद्भूरिलाभे जातेऽपि न तत्राभिमानो नापि यथेष्टोपभोगः कार्य्य, इत्याह—यावत् यावता भ्रियेत पूर्य्येत ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

गृहस्थधर्मो वर्ण्यते, चतुर्दशेऽध्याये तदेव पृच्छति—गृहस्थ इति ॥ १ ॥

वासुदेवार्पणं यथा स्यात्तथा यथोचिताः क्रियाः कुर्वन् महामुनीन् वासुदेवभावगन्तृन् ॥ २ ॥ ३ ॥

स्वयमेवागमापायित्वेन मुच्यमानेषु आत्मा देहस्तदादिषु सङ्गं मुञ्चेत् यथा उत्थितः प्रबुद्धः स्वप्नवत् स्वप्नदृष्टेषु सङ्गं विमुञ्चति तद्वत् ॥ ४ ॥

पण्डितः कार्य्याऽकार्यवित् देहे गेहे लोके च यावदर्थं यथाप्रयोजनमुपासीत सङ्गं कुर्यात् हृदि विरक्तस्तत्र रक्तवद्वर्तेत नरतां नरत्वाभिमानं न्यसेत् अहन्तां परित्यजेदित्यर्थः ॥ ५ ॥

स्वनिर्बन्धं विहाय ज्ञात्यादीनामुक्तिमिच्छांते चानुमोदेत निर्ममो ममतारहितो भवेत् ॥ ६ ॥

बुधः अच्युतसामर्थ्यवित् दिव्यं देवप्रसादसिद्धं भौमं भूमिजं आन्तरिक्षमकस्मादागतं वित्तं सर्वमच्युतनिर्मितमिति मत्वा भुञ्जान एतत्प्रागुक्तं कुर्यात् ॥ ७ ॥

यावत् यावता जठरमुदरं भ्रियेत पूर्येत तावत्स्वत्वं देहिनः यस्तु अधिकमभिमन्येत स तु स्तेनश्चौरः अतो दण्डमर्हति ॥ ८ ॥

भाषा टीका।

श्रीरुक्मिणीशो जयति।

युधिष्ठिर उवाच।

युधिष्ठिरजी बोले, कि—हे देवर्षे ! इस आप की कही हुई पदवी (मोक्षोपयोगिदशा) को जिस विधि से मेरे सदृश मूढ बुद्धि गृहस्थ भी सुलभ से प्राप्त हो जावै, सो विधि आप कहिये ॥ १ ॥

नारद उवाच।

नारदजी बोले, कि—हे राजन् ! गृह में स्थित रहकर ही पुरुष गृह के उचित क्रियाओं को करता हुआ भी ऐसा करे कि जिस में वे क्रियायें देवतान्तर के अद्वारक साक्षात् श्री वासुदेव के अर्पण होतीं जाय—ऐसा करता हुआ महा मुनि अर्थात् ज्ञानियों की उपासना करा करे ॥ २ ॥

और सदा शान्त जनों के सत्संग में रहकर श्रद्धा युत होकर, निरन्तर गोविन्द के अवतार कथा रूप अमृत को सुनता रहे ॥ ३ ॥

और अपने को आप ही छोडने वाले ऐसे पुत्र कलत्रादिकों में से, सन्त सङ्ग के प्रभाव से, धीरे २ सङ्ग को छोड ता जाय, जैसे कि—स्वप्न से उठा हुआ पुरुष, स्वप्न के देखे हुए पदार्थों में से ममता को छोड देता है, ॥ ४ ॥

ज्ञानी पुरुष, प्रयोजन के अनुगुण देह गेहादिकों में उदासीन रहे, परञ्च विरक्त होकर भी, ऊपर से रागवान् के तरह कुछ उद्यमता करता रहे ॥ ५ ॥

अपने जाति के लोग माता पिता पुत्र भ्राता और सुहृद लोग, जो कुछ कहें और जो २ इच्छा करें, ममता शून्य होकर उसका अनु मोदन करता रहे ॥ ६ ॥

स्वर्ग भूमि और आकाश में होने वाले जो पदार्थ परमात्मा के बनाये हुए हैं, उन सबों को भोगता हुआ बुद्धिमान पुरुष आप से ऐसे ही (पूर्वोक्त शान्ति के कार्यों को ही) किया करे ॥ ७ ॥

मृगोष्ट्रखरमर्काखु सरीसृप्खगमक्षिकाः ।
आत्मनः पुत्रवत्पश्येत्तैरेषामन्तरं कियत् ॥ ९ ॥
त्रिवर्गं नाऽतिकृच्छ्रेण भजेत गृहमेध्यपि ।
यथादेशं यथाकालं यावद्दैवोपपादितम् ॥ १० ॥
आश्वाघान्तेऽवसायिभ्यः कामान्संविभजेद्यथा ।
अप्येकमात्मनो दारां नृणां स्वत्वग्रहो यतः ॥ ११ ॥
जह्याद्यदर्थे स्वप्राणान् हन्याद्वा पितरं गुरुम् ।
तस्यां स्वत्वं स्त्रियां जह्याद्यस्तेन ह्यजितो जितः ॥ १२ ॥
कृमिविड्भस्मनिष्ठान्तं क्वेदं तुच्छं कलेवरम् ।
क्व तदीयरतिर्भार्या क्वायमात्मा नभश्छदिः ॥ १३ ॥
सिद्धैर्यज्ञावशिष्टार्थैः कल्पयेद्वृत्तिमात्मनः ।
शेषे स्वत्वं त्यजन्प्राज्ञः पदवीं महतामियात् ॥ १४ ॥
देवानृषीन्नृभूतानि पितॄनात्मानमन्वहम् ।
स्ववृत्त्यागतवित्तेन यजेत पुरुषं पृथक् ॥ १५ ॥
यर्ह्यात्मनोऽधिकाराद्याः सर्वाः स्युर्यज्ञसम्पदः ।
वैतानिकेन विधिना अग्निहोत्रादिना यजेत् ॥ १६ ॥

भाषा टीका ।

प्राणियों का उतना ही स्वत्व है, कि—जितने से जठर पूर्ण होता है, उतने से अधिक पदार्थ को जो अपना मानता है वही तस्कर है, और दण्ड के योग्य है ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अत एव यं कमपि स्वगृहं क्षेत्रं वा प्रविश्य भुञ्जानं न निवारयेदित्याह—मृगेति । मर्को मर्कटः सरीसृप् सर्पः माक्षिकाश्च तैः पुत्रैरेषां मृगादीनां कियदन्तरम् ॥ ९ ॥

अतिकृच्छ्रेणापाद्य न भजेत्किन्तु यावद्दैवप्रापितं तावदेव भजेत् ॥ १० ॥

श्वानश्च अघाश्च पतिताः अन्तेऽवसायिनश्चाण्डालादयः तानभिव्याप्य यथार्हं कामान् संविभजेत् स्वभोज्याद्विभज्य दद्यात् यद्यप्येकैवात्मनो दारा भार्या तस्यामतिथिशुश्रूषणे नियुक्तायां स्वस्य शुश्रूषा हीयेत यस्यां च नृणां स्वत्वग्रहो ममैवेयमिति त्याग्रहस्तामेकामपि संविभजेत् अतिथिशुश्रूषणे नियुञ्जीतेत्यर्थः । नत्वन्यथा मन्तव्यम् यथाऽर्हं विभजेदित्युक्तत्वात् ॥ ११ ॥

एवञ्चेत्तेनेश्वरो वशीकृतः स्यादित्याह—जह्यादिति । यदर्थं यन्निमित्तम् अन्यैरजितो ऽपीश्वरस्तेन जित एव ॥ १२ ॥

ननु, कथमेवं तस्यां स्वत्वाऽभिमानो हातुं शक्यस्तत्रविचारेणेत्याह—कृमिविड्भस्मसु निष्ठा पर्यवसानमन्ते यस्य तदीया देहार्थो रतिर्यस्यां सा स्वमहिम्ना नभो ऽपि छादयतीति तथा ॥ १३ ॥

किञ्च सिद्धैर्दैवलब्धैर्यज्ञावशिष्टार्थैः पञ्चयज्ञशेषैरन्नादिभिः महतां निवृत्तानां परमहंसानाम् ॥ १४ ॥

एतद्विवृण्वन्नाह—देवादीन्पञ्चयज्ञदेवताः आत्मानं च एवं पृथक् पुरुषमन्तर्यामिणमेव यजेत ॥ १५ ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यतोऽधिके स्वत्वाभिमानो दण्डहेतुरत एव तद्गृहे प्रवृत्तान्मृगोष्ट्रादीनात्मनः स्वस्य पुत्रवत्पश्येत् पुत्रानिव मन्येत नतु निगृह्णीयादित्यर्थः । तथाहि तैः पुत्रैः सह एषां मृगादीनां कियदन्तरं न किञ्चिदप्यन्तरं नाकिञ्चिदपि तारतम्यमस्तीत्यर्थः । तत्र मृगाः शुककमार्जारादयः मर्को मर्कटः आखुः मूषकः सरीसृपा अन्ये सर्पाः

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

स्वभावा जन्तवः *विमच्छिकाः विशब्दः पादपूरणार्थः विशिष्टम-च्छिका इति वा सरीसृप्खगेति वा पाठः ॥ ९ ॥

विवृतमर्थमुपसंहरति–त्रिवर्गमिति । स्वयं गृहस्थोऽप्यनेन तदुपयुक्तवर्गत्रयनिष्ठता सूच्यते. अतिऽकृच्छ्रेणाऽतिप्रयासेन त्रिवर्गं धर्मार्थकामाञ्च भजेत न सेवेत. दैवात्प्राप्तैरेव तुष्येदित्यर्थः । तदेवाह—यावद्दैवेन देशकालाऽनुगुण्येन प्रापितं तदेव यथोपयुक्तम् भजेत ॥ १० ॥

धर्मान्तरमाह—श्वानश्चाघा अतिपाप्मानश्चाऽन्ते ऽवसायिनश्चण्डालादयश्च तानभिव्याप्य तेभ्यः यथोचितं कामान् संविभजेद्यथाशक्ति तदपेक्षितान् अन्नादीन्दद्यादित्यर्थः । सङ्गमात्मजायासुतादिषु विमुञ्चेदित्युक्तं जायासङ्गत्यागमुपपादयति-अपीति । आत्मनः स्वस्य दारान् भार्यामेकामपि जह्यात्तस्यां स्वत्वाऽभिमानं त्यजेदित्यर्थः । एतदेव वक्तुं तावत्तस्या दुस्त्यजत्वमाह-यतो यस्यां भार्यायां नृणां स्वत्वग्रहः ममैवेयमित्याग्रहः ॥ ११ ॥

यदर्थं यद्धार्यार्थं स्वकीयान् प्राणान्पितरं गुरुं वा हन्यात् एवं दुस्त्यजा भार्येत्युक्तम् । एवंभूतायां तस्यां स्त्रियां भार्यायां स्वत्वं जह्यात्स्वत्वाभिमानं न कुर्यादित्यर्थः । यः पुमानेवं जह्यात्तेन पुंसा अजितः कैरप्यजितः परमात्मा जितः वशीकृतो भवति ॥ १२ ॥

कथमेवं तस्यां स्वत्वाभिमानस्त्यक्तुं शक्यः ? तत्त्वविचारेणेत्याह, कृमीति । कृमिविट्भस्मसु निष्ठा पर्यवसानमन्तो यस्य तदिदं कलेवरं क. तदीया देहार्था रतिर्यस्या सा भार्या क. नभश्छदः आकाशस्यापि छादयिता आकाशतुल्यो निर्लेप इत्यर्थः । ईदृश आत्मा क्वेत्येवं तत्त्वविचारेण जह्यादित्यर्थः ॥ १३ ॥

यावदर्थपरिग्रह इति दैवाल्लब्धेष्वपि प्राणमात्रोपयुक्तान्नादिपरिग्रह उक्तः इदानीं तैरपि यज्ञाऽवशिष्टैरेवार्थैरात्मनो वृत्तिं कल्पयेदित्याह—सिद्धैरिति । सिद्धैर्दैवाल्लब्धैः यज्ञावशिष्टैः पञ्चमहायज्ञादिभिरवशेषितैरेवार्थैरन्नादिभिरात्मनः स्वस्य वृत्तिं प्राणधारणरूपां कल्पयेत्. शेषे यज्ञाद्यनुपयुक्ते स्ववृत्त्यनुपयुक्ते च दैवाल्लब्धेऽप्यर्थे स्वत्वाभिमानं त्यजेत् प्राज्ञः एवंविधज्ञानवान् महतां पदवीं महद्भिर्गम्यां मुक्तिरूपां पदवीं प्राप्नुयात् ॥ १४ ॥

एतद्विवृण्वन्नाह—देवानृषीन् नॄन् मनुष्यान् भूतानि पितॄंश्च पञ्च महायज्ञदेवता आत्मानं च स्ववृत्त्या याजनाध्यापनादिपूर्वाकवृत्त्या आगतेनार्जितेन वित्तेनाऽन्वहमहरहः पृथक् पुरुषं देवाद्यन्तरात्मानं परमपुरुषं यजेतएकमेव परमपुरुषं देवादिशरीरभेदेनान्तरात्मत्वेनाऽवस्थितमाराधयेदित्यर्थः ॥ १५ ॥

किञ्च यर्हि यदात्मनः स्वस्याधिकारः "अर्थी समर्थो विद्वांश्च"इत्युक्तोऽधिकारः स्यात्तदा सर्वा यज्ञसम्पदः स्युरेव यथाधिकारं सर्वे यज्ञाः कर्तव्या एवेत्यर्थः । वितानो यज्ञग्रन्थः श्रौतकल्पसूत्रादिरूपस्तदुक्तेन विधिनाऽग्निहोत्रादिकर्मणा परमपुरुषं यजेत ॥ १६ ॥

* सरीसृपाविमच्छिका इति मूलपाठः ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

"आखुभुक् वृषदंशश्च मार्जारो मर्क उच्यते" इत्यभिधानं वयः पक्षिणः अन्तरं भेदः कियान्न कोपि पराधीनत्वाविशेषात् ॥९॥

अतिकृच्छ्रेण शास्त्राविहितमार्गेण शूद्रप्रतिग्रहादिलक्षणेन गृहमेधी गृहस्थो ऽपि सर्वाश्रयत्वे पि दैवोपपादितं यवादिव्रीहिजातमयाचितोपपन्नं वा ॥ १० ॥

कर्माङ्गं चेद्दारग्रहणं प्रयोजनं न ग्राम्यभोगः तथात्वे तदाशापूरणस्य दुःसाध्यत्वेन तत्प्रयत्ने महान्दोष आपद्येत तदभिप्रायेणाह—आप्त्वेति । यदर्थं येषामर्थे कामपूरणार्थं स्वप्राणान् जह्यात् पितरं वा हन्यात् तद्विरोधे सतीति शेषः । किञ्च यतो येभ्यो नृणां सत्वग्रहो सत्त्वगुणग्राहो धैर्यनिग्रहो भवतीति शेषः । तानेतान्महतो दारानाप्त्वा कामान्यथायोग्यं संविभज्य श्रेयसे घटेतेति शेषः ॥ ११ ॥

यद्यङ्गना प्राणाद्यपहारिणी तर्हि तया श्रेयसे घटनं कथम् ? इत्याशङ्क्याह—तस्यामिति । सत्वग्रह इत्यादिकमुत्तरत्रापि सम्बध्यते अजितोऽपि यस्याः सत्वग्रहस्तस्यां स्त्रियां तेन सत्त्वेन जितो वशं गतः स पुमांस्तस्यां स्त्रियां सत्त्वं जह्यादित्यन्वयः । यदि स्वात्मानमुल्लङ्घ्य सा वर्तेत तर्हि तस्यास्त्याग एव वरीयानिति इममर्थं हि शब्देन दर्शयति—

"हृताधिकारां मलिनां पिण्डमात्रोपजीविनीम् ।
परिभूतामधःशय्यां वासयेद्व्यभिचारिणीम्" ॥

इति च—

"यत्रानुकूल्यं दम्पत्योस्त्रिवर्गस्तस्य वर्द्धते ।
मृते जीवति वा पत्यौ या नान्यमुप गच्छति ॥
सेह कीर्तिमवाप्नोति मोदते चोमया सह ।
स्त्रीभिर्भर्तृवचः कार्यमेष धर्मः परः स्त्रियः" ॥

इति च ॥ १२ ॥

ग्राम्यधर्मेण शरीरमेवानित्यं क्षणिकं भयग्रस्तं भयमुपजायते ननु नित्यमतश्च नित्यदुःखं शरीरं च कृमिविड्भस्माऽवसायि न वरमनेनाकाशशरीरब्रह्मज्ञानं दुरुत्पादमेतत्करुणामन्तरेणाऽतो दुःखहेतुत्वाद् दुश्चरित्रस्त्रीत्याग एव श्रेयानित्याशयवानाह—कृमीति । तदीयदेहेन क्रियमाणा रतिर्यस्याः सा तथा आत्मा परमात्मा अनात्मा जीवः किं न स्याच्छरीरप्रसङ्गादित्यत उक्तं नभश्छदिरिति नभसश्छदिराच्छादनं यस्य स तथा नभो व्याप्यावस्थित इत्यर्थः । "आकाशशरीरं ब्रह्म"इति श्रुतेः "अणुर्ह्येष आत्मा यं वा एते स नीतः पुण्यं च पापञ्च"इति श्रुतेर्जीवस्याणुपरिमाणत्वेन सिद्धत्वात् ॥ १३ ॥

"यज देवपूजासङ्गतिकरणदानेषु"इति धातोः यज्ञो नारायणाख्यदेवपूजा तत्करणावशेषितैः सिद्धैर्ज्ञानसाधनयोग्यैरर्थैः स्ववृत्तिं देहयात्रालक्षणां कल्पयेत् तत्रापि शेषे ऽवशिष्टे वस्तुनि स्वत्वं स्वकीयत्वं त्यजेद्यः स प्राज्ञो महतां संन्यासिनां पदवीमाप्नोतीत्यन्वयः ॥ १४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

देवादियागेषु तदन्तर्यामित्वेन ततो भिन्नत्वेन भगवत्पूजैव विधेयेत्याशयेनाह—देवानिति ॥ १५ ॥

यर्हि यदाऽस्य यज्ञाधिकारोऽस्ति यदा वा सर्वा यज्ञसम्पदः स्युस्तदा वैतानिकविधिनाऽग्निहोत्रविधिना वा यजेदित्यन्वयः ॥१६॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

जह्यादिति, अजितवशीकारेणैव तादृशत्वं सिद्ध्यतीति भावः ॥ १२ ॥

आत्मा परमात्मा ॥ १३—१६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

पुत्रवदिति । यथा पुत्रेभ्यो भोज्यं विभजेत् तथैव यथोचितमेभ्योऽपि विभजेदित्यर्थः ॥ ९ ॥

अतिकृच्छ्रेण सम्यक् संपाद्य न भजेत् किन्तु अल्पायासेनैव दैवप्रापितं यावत् तावदेव न तु भूरिसंसारमपेचेतेत्यर्थः। अधिकाराद्ब्रह्मचर्यादिस्तु गुरुकृत्यादिषु किमुतेति भावः ॥ १० ॥

श्वानश्च अघाः पतिताश्च अन्तेऽवसायिनश्चण्डालादयश्च तानप्यभिव्याप्य यथार्हं कामान् स्वभोग्यान् दारामिति स्त्रीत्वैकत्वे आर्षे यद्यप्येकैवात्मनः सैव भार्य्या तस्यामतिथिशुश्रूषया नियुक्तायां स्वस्य शुश्रूषा हीयते तदपि तामपि विभजेत् अतिथ्यादिशुश्रूषायां नियुञ्जीतैव. नत्वन्यथा मन्तव्यं यथार्हं संविभजेदित्युक्तत्वादिति श्रीस्वामिचरणाः अन्येत्वन्यथापि व्याचक्षते यतः यस्याम् ॥ ॥ ११ ॥

स्वभार्य्यायामभिमानत्यागोऽतिदुष्कर इत्याह, जह्यादिति ॥१२॥

तस्यामभिमानत्यागे विवेकं दर्शयति—कृमिविड्भस्मसु निष्ठा पर्य्यवसानमन्ते यस्य तदीया रतिर्यस्यां सा क, आत्मा परमेश्वरः स्वमहिम्ना नभोऽपि छादयतीति स केति. यदि तस्यामभिमानत्यागेनैव स प्राप्यते तर्हि कियदेतदिति भावः ॥ १३ ॥

यावता उदरभरणं स्यात्तावत्स्वेव वस्तुन्यभिमानं कुर्य्यादिति यद् पूर्वोक्तं तत्रापि व्यवस्थामाह–सिद्धैर्दिव्यभौमान्तरिक्षैर्यज्ञावशिष्टार्थैः पञ्च यज्ञशेषैरन्नादिभिः ॥ १४ ॥ १५ ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मर्को मर्कटः सरीसृप् सर्पः अन्तरं भेदः ॥ ९ ॥

गृहमेध्यपि त्रिवर्गं धर्ममर्थं कामं च यथादेशं यथाकालं यावद्दैवोपपादितं भजेत् अतिकृच्छ्रेण तु न भजेत् ॥ १० ॥

श्वा सारमेयः अघः पतितः अन्तेऽवसायी चाण्डालादिः तानभिव्याप्य यथायोग्यं कामान् अन्नादीन् विभजेत्. यतः यस्यां स्वत्वग्रहः आत्मीयत्वाग्रहस्तामेकां स्वगृहकृत्ये जनान्तररहितामपि यथायोग्यं अतिथ्याद्यर्चने विभजेत् ॥ ११ ॥

जनो यदर्थे यस्याः प्रयोजनार्थं प्राणान् रणादौ स्वान् बन्धून् अन्नाद्यविभागेन जह्यात् पित्रादिकं च हन्यात् खड्गादिना. त्वस्यां यः स्वत्वं जह्यात्तेनाऽजितो ऽपि भगवान् जितः ॥ १२ ॥

अहो अत्यल्पे पदार्थे ममत्वत्यागेन परमपदार्थलाभः इत्याह कृमीति । कृम्यादिषु निष्ठा पर्यवसानमन्ते यस्य ततुच्छं कलेवरं क. क पुनस्तदीया कलेवरार्था रतिर्यस्यां सा. क चाऽयमात्मा अजितः स्ववैभवेन नभो ऽपि छादयतीति तथा ॥ १३ ॥

सिद्धैर्दिव्यभौमान्तरिक्षैः यज्ञावशिष्टैः पञ्चयज्ञशेषैरर्थैरन्नादिभिरात्मनो वृत्तिं कल्पयेत् शेषे स्वनिर्वाहादधिके स्वत्वं त्यजन् महतां निवृत्तानां पदवीं मोक्षमार्गमियात् ॥ १४ ॥

एतदेव विवृण्वन्नाह–देवादीन्पञ्चयज्ञदेवताः आत्मानं च स्वास्यागतवित्तेन अन्वहं प्रतिदिनं पृथक् पुरुषमन्तर्यामिणमेव यज्ञाङ्गभूतेषु देवादिषु तदङ्गिनं भगवन्तं पूजयेदित्यर्थः ॥ १५ ॥

यर्हि आत्मनो ऽधिकाराद्याः अधिकारः यज्ञाद्यधिकारः दाद्याः अर्थित्वसमर्थत्वादिसर्वाः यज्ञसम्पदः स्युः तदा वैतानिकेन वितानः कर्मप्रतिपादको ग्रन्थस्तदुक्तेन विधिना अग्निहोत्रादिना यजेत पुरुषमित्यन्वयः ॥ १६ ॥

भाषाटीका ।

मृग, उष्ट्र, खर, मर्कट, मूषक, सर्प, खग, मक्षिका, [...] सबों को अपने पुत्र सदृश देखे, क्योंकि ? इनसे और पुत्रादिकों में क्या अन्तर है ॥ ९ ॥

गृहमेधी पुरुष भी त्रिवर्ग को बहुत कष्ट से न सेवन करे, किंतु देश काल के अनुरूप जो प्रारब्ध से उत्पन्न होजावे, उसी से त्रिवर्ग को चलावे ॥ १० ॥

श्वान चांडाल पर्यंत यथायोग्य अन्नादि का सम्यक् विभाग कर दिया करे, और जिस स्त्री के विषैं मनुष्य का 'स्वत्वग्रह' नाम यह स्त्री केवल अनन्य होकर हमारी है, ऐसा ज्ञान है, उस अपनी स्त्री को भी अतिथि आदि की सेवा में उचित रीति से विभक्त कर दे ॥ ११ ॥

जिसके लिये पुरुष अपने प्राणों को त्याग देता है [...] पिता वा गुरु को मार डालता है उस स्त्री में [...]

न ह्यग्निमुखतोऽयं वै भगवान् सर्वयज्ञभुक् ।
इज्येत हविषा राजन् यथा विप्रमुखे हुतैः ॥ १७ ॥
तस्माद् ब्राह्मणदेवेषु मर्त्यादिषु यथाऽर्हतः ।
तैस्तैः कामैर्यजस्वैनं क्षेत्रज्ञं[1] ब्राह्मणाननु ॥ १८ ॥
कुर्यादापरपक्षीयं मासि प्रौष्ठपदे द्विजः ।
श्राद्धं पित्रोर्यथावित्तं तद्बन्धूनां च वित्तवान् ॥ १९ ॥
अयने विषुवे कुर्याद्व्यतीपाते दिनक्षये ।
चन्द्रादित्योपरागे च द्वादशीश्रवणेषु च ॥ २० ॥
तृतीयायां शुक्लपक्षे नवम्यामथ कार्तिके ।
चतसृष्वप्यष्टकासु हेमन्ते शिशिरे तथा ॥ २१ ॥
माघे च सितसप्तम्यां मघाराकासमागमे ।
राकया चानुमत्या वा मासर्क्षाणि युतान्यपि ॥ २२ ॥
द्वादश्यामनुराधा स्याच्छ्रवणस्तिस्र उत्तराः ।
तिसृष्वेकादशीवासु जन्मर्क्षश्रोणयोगयुक् ॥ २३ ॥
त एते श्रेयसः काला नृणां श्रेयोविवर्द्धनाः ।
कुर्यात्सर्वात्मनैतेषु श्रेयोऽमोघं तदायुषः ॥ २४ ॥

भाषा टीका।

अपने स्वत्व का अभिमान छोड दिया है, उसने अजित (श्रीहरि) को भी जीत लिया अर्थात् वश कर लिया ॥ १२ ॥

अन्त में कृमि विष्ठा और भस्म भाव को प्राप्त होने वाला कहाँ ? यह तुच्छ कलेवर, और कहां इस की रति का साधन भार्या ? और आकाश के तरह निर्लेप और ज्ञानकृत विभुत्व से आकाश को भी आच्छादन करने वाला यह आत्मा कहाँ ? ॥ १३ ॥

और श्राद्ध, पंचमहायज्ञ, अथवा श्रीविष्णु के आराधन से अवशिष्ट जो सिद्ध पदार्थ, तिसी से अपना जीवन करे, और बाकी पदार्थों में से अपने स्वत्व को छोडता जावे, तौ पूर्वोक्त परम हंसों की पदवी को प्राप्त होता है ॥ १४ ॥

तथा देवों को ऋषियों को मनुष्यों को और भूत तथा पितृगणों को एवं आत्मा अन्तर्यामी पुरुष श्रीमन्नारायण को अपनी वृत्ति से प्राप्त जो वित्त तिससे पृथक् यजन करे ॥ १५ ॥

यदि अपने को अधिकार से आदि लेकर सर्व संपदा यज्ञ की प्राप्त होवें, तौ वैतानिक विधि से अग्निहोत्रादि यज्ञ से भी यजन करे ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

न पुनरतिनिर्बन्धो यज्ञार्थे कार्य इत्याह—नहीति। विप्रमुखे हुतैरन्नादिभिर्यथा इज्येत पूज्येत न तथा ऽग्निमुखतो हविषा इज्येत ॥ १७ ॥

ब्राह्मणेषु च देवेषु पञ्चयज्ञदेवतासु च मर्त्यादिष्वन्येष्वपि नरेषु पश्वादिषु च क्षेत्रज्ञमन्तर्यामिणं ब्राह्मणाननु मर्त्यादियजने ब्राह्मणयजनानन्तरमन्येषु यजस्व पठान्तरे ब्राह्मणा आननं यस्य तम् ॥ १८ ॥

प्रौष्ठपदे भाद्रपदे ॥ १९ ॥ २० ॥

शुक्लेमासि वैशाखे शुक्लपक्षे अक्षय्यतृतीयायामित्यर्थः। हेमन्ते शिशिरे च मार्गशीर्षादिमासचतुष्टये ऽपि याश्चतस्रोऽष्टकास्तासु ॥ २१ ॥

सम्पूर्णचन्द्रा पौर्णमासी राका न्यूनचन्द्रा सैवानुमतिः तथा मासर्क्षाणि तत्तन्मासनामप्रवर्तकनिमित्तानि नक्षत्राणि युतानि यदा स्युस्तदा तदुक्तं त्रिकाण्डायाम्—

"पुष्ययुक्ता पौर्णमासी पौषी मासे तु यत्र सा।
नाम्ना स पौषो माघाद्याश्चैवमेकादशापरे" ॥

इति ॥ २२ ॥

(१) ब्राह्मणानामिति वीर० पा०।

श्रीधरस्वामिकृतभावार्थदीपिका ।

अनुराधा श्रवण उत्तराफाल्गुनी उत्तराषाढा उत्तराभाद्रपदा वा द्वादश्यां यदा स्यात् आसूत्तरास्वेकादशी वा यदा स्यात्तदा च जन्मनक्षत्रस्य श्रवणस्य वा योगेन युक्तं दिनं यदा तदा, योगग्रहणं सम्बन्धबाहुल्यार्थम् ॥ २३ ॥

न केवलं श्राद्धस्यैवैते कालाः किन्तु धर्ममात्रस्येत्याह– त एत इति, द्वाभ्याम्। तदेवाऽऽयुषः अमोघं साफल्यमित्यर्थः ॥२४॥ २५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अग्निमुखाराधनाद्विप्रमुखाराधनमतीव भगवतस्तोषकृदित्याह, नहीति । हे राजन् ! विप्रमुखे हुतैरन्नादिभिर्यथायं सर्वयज्ञभुग्भगवानिज्येताऽऽराध्येत न तथाऽग्निमुखतो हविषाऽऽराध्येत ॥१७॥

तस्माद्ब्राह्मणेषु देवेषु पञ्चमहायज्ञदेवेषु मर्त्यादिषु च यथाशक्ति यथायोग्यं च तैस्तैः कामैरन्नादिभिर्ब्राह्मणाननं ब्राह्मणा एवाननं मुखं यस्य तमेनं क्षेत्रज्ञं परमात्मानं देवाद्यवस्थजीवशरीरकं वा यजस्वाऽऽराधय ब्राह्मणानन्विति पाठे ब्राह्मणेषु यजनानन्तरमन्येषु मर्त्यादिषु यजस्वेत्यर्थः। युधिष्ठिरस्य गृहस्थत्वात्त्वयाप्येवमाराधनमवश्यं कर्तव्यमित्यभिप्रायेणाऽऽह यजस्वेति मध्यमपुरुषप्रयोगः ॥ १८ ॥

किञ्च प्रोष्ठपदे भाद्रपदे मासि द्विजः त्रैवर्णिको धनवांश्चेत् यथावित्तं वित्तानुसारेण पित्रोर्मातापित्रोस्तद्बन्धूनाञ्चापरपक्षीयं कृष्णपक्षीयं श्राद्धं महालयाख्यं कुर्यात् ॥ १९ ॥

किञ्चायनादिषु कालेषु पित्रोः श्राद्धं कुर्यादित्यन्वयः तत्रायनं कर्कटसङ्क्रान्तिर्मकरसङ्क्रान्तिश्च मेषतुले विषुवसंज्ञिके तथा च वृद्धवसिष्ठः—

"झषकर्कटसङ्क्रान्ती द्वेतूदग्दक्षिणायने ।
विषुवे तु तुलामेषे गोलमध्ये ततोऽपराः ॥ इति

कुहुर्नष्टेन्दुकला चन्द्रादित्ययोरुपरागो ग्रहः ॥ २० ॥

शुक्लपक्षे तृतीयायाम् अक्षयतृतीयायामित्यर्थः। कार्तिके मासे शुक्लपक्षे नवम्यां हेमन्तशिशिरे च ऋतौ चतसृष्वष्टकासु मार्गशीर्षादिमासचतुष्टयकृष्णाष्टमीषु ॥ २१ ॥

माघे मासि सितसप्तम्यां शुक्लसप्तम्यां मघानक्षत्रपौर्णमास्योस्संयोगकाले च सम्पूर्णचन्द्रा पौर्णमासी राका कलाहीनचन्द्रा पौर्णमासी सानुमती ताभ्यां युक्तानि यानि मासर्क्षाणि मासनामप्रवृत्तिनिमित्तानि नक्षत्राणि तदुपलक्षितेषु च कालेषु ॥ २२ ॥

यद्वा द्वादश्यामनूराधाश्रवणमुत्तराफाल्गुनी उत्तराषाढोत्तराभाद्रेति तिस्र उत्तरा वा स्युः अनूत्तरासूक्तासु तिसृषु एकादशी वा यदा स्यात्तदा च जन्मर्क्षश्रोणायोगयुक्तजन्मनक्षत्रस्य श्रवणनक्षत्रस्य वा योगेन युक्तः कालः तदा च योगग्रहणं सम्बन्धबाहुल्यज्ञापनायेति सूचितम् ॥ २३ ॥

न केवलं श्राद्धस्यैवैते कालाः किन्तु धर्ममात्रस्येत्याह–त इति, द्वाभ्याम् । त एते अयनादयः नृणां श्रेयसः श्रेयस्साधनधर्मानुष्ठानस्य योग्याः श्रेयो वर्द्धयन्तीति तथा तादृशाः काला तस्मात्सर्वात्मना करणत्रयैक्येन एषु कालेषु श्रेयः श्रेयस्साधनं वक्ष्यमाणं स्नानादिकमनुतिष्ठेत्तदेव ह्यायुषः अमोघममोघत्वं साफल्यमित्यर्थः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु, मुख्यं होमादिकरणं भगवत्प्रीतिजनकं किम् ? तत्राह नहीति ॥ १७ ॥

उपसंहारमुखेनोक्तार्थं निर्धारयति—तस्मादिति। ब्राह्मणा आननं यस्य स तथा तम् ॥ १८ ॥

ननु, यज्ञसम्भारे सति विशिष्टफलप्रदः कालः क इति तत्राह कुर्यादिति। प्रौष्ठपदे कन्याख्ये सिंहमासामावास्यामारभ्य कन्यामावास्यापर्यन्ते तत्राप्यपरपक्षीयकाले श्राद्धं कुर्यादित्युपस्कर्तव्यं तद्बन्धूनां पितृमातृबन्धूनां पितामहमातामहादीनाम् ॥१९॥

अयने उत्तरदक्षिणसङ्क्रमे विषुवं सम्वत्सरान्तसङ्क्रमणं कुहूममावास्यायां श्रवणेषु श्रवणादित्रिषु चशब्दात्सप्तम्यादित्रिषु त्रयोदश्यां च तदुक्तम्—

"सप्तम्यादित्रयं चैव तथा चैव त्रयोदशी।
चतस्रस्त्वष्टकाः प्रोक्ताः सर्वपक्षाद्विशेषतः"

इति ॥ २० ॥

वृश्चिकमासामावास्यामारभ्य मकरमासामावास्यापर्यन्तः कालो हेमन्तः तदुपरिकालः शिशिरः "हेमन्ते शिशिरे चैव नित्यश्राद्धे गुणोत्तरम्"इति वचनात् अयमपि विशिष्टकालः ॥२१॥

राकापौर्णमासी मघा पौर्णमास्योः सङ्गमे "शशिनि सिनीवाली स्यात्, दृष्टे नष्टे कुहूरमावास्या। अनुमतिरूने राका सम्पूर्णे पौर्णमासी च"इति हलायुधः राकया ऽनुमत्या युतानि मासनक्षत्राणि ॥ २२ ॥

यास्तिस्रः श्रवणादितारा आसु तारासु प्राप्तैकादशी पुण्यः कालो ऽत्र श्राद्धकरणं च विकल्पः एकादश्यां श्राद्धकरणस्य निषिद्धत्वाच्च वैष्णवसिद्धान्तिनस्तदाचरन्ति त्रैविद्याश्चरन्ति वा यथैकादशी पुण्यदिनम् अत्र क्रियमाणं कर्म सफलं तथा तिसृष्वपि तारास्विति वा जन्मनक्षत्रं श्राद्धकाल इति शेषः सौम्ययोगयुग् मृगशिरःसम्बन्धयुक्तं दिनं च ॥ २३—२७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अयने इति चतुष्कम् ॥ २०—२२ ॥

तिसृष्वेकादशी चाविति—तत्रोपवासा श्राद्धाः वैष्णवानां

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

तत्र श्राद्धनिषेधात् तथाहि ब्रह्मयामले "श्राद्धञ्चैकादशीदिने" इति दीक्षासङ्कल्पनिषेधः। ब्रह्मवैवर्त्ते "ये कुर्वन्ति महीपाल श्राद्धञ्चैकादशीदिने। त्रयस्ते नरकं यान्ति दाता भोक्ता परेतकः" इति. पाद्मोत्तरखण्डे—एकादश्याऽस्तु प्राप्तायां मातापित्रोर्मृतेऽहनि। तद्दिनन्तु परित्यज्य द्वादश्यां श्राद्धमाचरेत् ॥ पुष्करखण्डे— "एकादश्यां यदा राम श्राद्धं नैमित्तिकं भवेत्। तद्दिनन्तु परित्यज्य द्वादश्यां श्राद्धमाचरेत् ॥ २३-३४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

न पुनरातिनिर्बन्धो यज्ञार्थमेव कार्य्य इत्याह—नहीति। यथा विप्रमुखे हुतैरन्नादिभिरिज्येत तथा न अग्निमुखे इज्येत इत्यर्थः ॥ १७ ॥

ब्राह्मणा एव देवास्तेषु भोज्यदानैः क्षेत्रज्ञं परमेश्वरं यजस्व ब्राह्मणाननु ब्राह्मणपूजानन्तरं मर्त्यादिषु च, ब्राह्मणाननमितिपाठः स्पष्टः ॥ १८ ॥

प्रौष्ठपदे भाद्रपदे ॥ १९ ॥

अयने विषुवे च कुर्यादिति श्राद्धमिति पूर्वस्यानुषङ्गः एवमग्रेऽपि ॥ २० ॥

शुक्लपक्षे अक्षयतृतीयायामित्यर्थः। हेमन्तशिशिरेषु च याश्चतस्रो ऽष्टका भवन्ति तासु ॥ २१ ॥

मासर्क्षाणि वैशाखादिमासेषु विशाखादीनि राकया पूर्णचन्द्रया पौर्णमास्या अनुमत्या न्यूनचन्द्रया वा तया यदि युक्तानि स्युस्तदा तेष्वित्यर्थः। "कलाहीने सानुमतिः पूर्णे राका निशाकरे" इत्यमरः ॥ २२ ॥

अनुराधाश्रवणउत्तरफाल्गुनी उत्तराषाढे उत्तरभाद्रपदा वा यदि द्वादश्यां स्यात् आसु उत्तरासु तिसृषु एकादशी वा स्यादिति अत्रोपवासानर्हविद्धैकादश्येव ग्राह्या तत्र श्राद्धनिषेधात् यदुक्तम् ब्रह्मवैवर्त्ते—

"ये कुर्वन्ति महीपाल श्राद्धं चैकादशीदिने।
त्रयस्ते नरकं यान्ति दाता भोक्ता च प्रेरकः" ॥ इति

उपवासानर्हायास्तस्या अप्राप्तौ तु परदिने, यदुक्तम्—

एकादश्यां तु प्राप्तायां मातापित्रोर्मृतेऽहनि।
द्वादश्यां तत्प्रदातव्यं नोपवासदिने क्वचित्" ॥

पुष्करखण्डे च—

एकादश्यां यदा राम श्राद्धं नैमित्तिकं भवेत्।
तद्दिनं तु परित्यज्य द्वादश्यां श्राद्धमाचरेत्" ॥ इति

जन्मर्क्षं स्वीयजन्मनक्षत्रं तस्य श्रोणस्य श्रवणस्य वा योगेन युक्तं यदि दिनं स्यात्तदा तत्रापि योगद्वयं सम्बन्धबाहुल्यार्थम् ॥ २३ ॥

श्रेयसो धर्ममात्रस्यैव न केवलं श्राद्धमात्रस्येत्यर्थः। तदेव आयुषः अमोघममोघत्वम् ॥ २४ ॥ २५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

किञ्च यज्ञार्थमपि नाऽग्निहुतः कर्त्तव्य इत्याह—नहीति। अयम् "अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च" इति प्रसिद्धः सर्वयज्ञभुग्भगवान् यथा विप्रमुखे हुतैरन्नाद्यैरिज्येत तथा अग्निमुखतो हविषा नेज्येत ॥ १७ ॥

यस्मादेवं तस्माद्ब्राह्मणेषु पञ्चयज्ञदेवेषु ब्राह्मणाननु ब्राह्मणार्चनानन्तरं मर्त्यादिषु मनुष्यपश्वादिषु च तैस्तैः कामैरेनं क्षेत्रज्ञमन्तर्यामिणं यजस्व ॥ १८ ॥

प्रौष्ठपदे भाद्रपदे मासि अत्रामावास्यापर्यन्तो मासो बोध्यः ॥ १९ ॥

अयने मकरकर्कसङ्क्रमणे मकरकर्कसङ्क्रान्ती "द्वे तूदग्दक्षिणायने" इति वृद्धवसिष्ठवचनात्. विषुवे मेषतुलासङ्क्रमणे "विषुवे तु तुलामेषे गोलमध्ये ततो ऽपरा" इति वृद्धवसिष्ठवचनात् "समरात्रिदिने काले विषुवद्विषुवं च तत्" इति कोशाच्च. कुर्याच्छ्राद्धमिति पूर्वस्यानुषङ्गः एवमग्रेऽपि दिनक्षये त्रिस्पृशातिथौ ॥ २० ॥

शुक्लपक्षे वैशाखे इति शेषः। तृतीयायामक्षयतृतीयाम् कार्तिके शुक्लपक्षे नवम्याम् हेमन्ते शिशिरे मार्गशीर्षादिमासचतुष्टये चतसृष्वष्टकासु अष्टमीषु ॥ २१ ॥

मघानक्षत्रसम्पूर्णचन्द्रयुक्तपौर्णमासी समागमे राका सम्पूर्णचन्द्रा पौर्णमासी सैव कलाहीनचन्द्रयुताऽनुमतिः "कलाहीने सानुमतिः पूर्णे राका निशाकरे" इति कोशात् तथा मासर्क्षाणि तत्तन्मासनामनिर्वर्तकानि नक्षत्राणि युतानि यदा स्युः तदा च यदुक्तं नामलिङ्गानुशासने "पुष्ययुक्ता पौर्णमासी पौषीमासे तु यत्र सा। नाम्ना स पौषो माघाद्याश्चैवमेकादशापरे" इति ॥ २२ ॥

यदा द्वादश्यामनुराधा श्रवणो वा उत्तराफाल्गुनी वा उत्तराषाढा वा उत्तराभाद्रपदा वा स्यात् आसूत्तरासु एकादशी वा स्यात् तदा स्नानदानादिकं विशेषतः कुर्यात् श्राद्धं तु तन्निमित्तं द्वादश्यां कुर्यात्—

"एकादश्यां यदा राम! श्राद्धं नैमित्तिकं भवेत्।
तद्दिनं तु परित्यज्य द्वादश्यां श्राद्धमाचरे ॥

इति पुराणान्तरात् जन्मर्क्षश्रोणयोगयुक् स्वजन्मनक्षत्रयुक्तं श्रवणायुक्तं वा दिनं यदा तदाऽपि श्राद्धं कुर्यात् ॥ २३ ॥

तएते श्रेयसः पुण्यमात्रस्य कालाः न श्राद्धमात्रस्य अत एतेषु सर्वात्मना श्रेयः कुर्यात् ततः आयुषः अमोघमवैफल्यं स्यात् ॥२४॥

एषु स्नानं जपो होमो व्रतं देवद्विजार्चनम् ।
पितृदेवनृभूतेभ्यो यद्दत्तं तद्ध्यनश्वरम् ॥ २५ ॥
संस्कारकालो जायाया अपत्यस्यात्मनस्तथा ।
प्रेतसंस्था मृताहश्च कर्मण्यभ्युदये नृप ! ॥ २६ ॥
अथ देशान्प्रवक्ष्यामि धर्मादिश्रेय आवहान् ।
स वै पुण्यतमो देशः सत्पात्रं यत्र लभ्यते ॥ २७ ॥
बिम्बं भगवतो यत्र सर्वमेतच्चराचरम् ।
यत्र ह ब्राह्मणकुलं तपोविद्यादयाऽन्वितम् ॥ २८ ॥
यत्र यत्र हरेरर्चा स देशः श्रेयसां पदम् ।
यत्र गङ्गादयो नद्यः पुराणेषु च विश्रुताः ॥ २९ ॥
सरांसि पुष्करादीनि क्षेत्राण्यर्हाश्रितान्युत ।
कुरुक्षेत्रं गयाशिरः प्रयागः पुलहाश्रमः ॥ ३० ॥
नैमिषं फाल्गुनं सेतुः प्रभासो ऽथ कुशस्थली ।
वाराणसी मधुपुरी पम्पा बिन्दुसरस्तथा ॥ ३१ ॥
नारायणाश्रमो नन्दा सीतारामाऽऽश्रमादयः ।
सर्वे कुलाचला राजन् महेन्द्रमलयादयः ॥ ३२ ॥

भाषा टीका ।

हे राजन् ! सर्व यज्ञों के भोक्ता ये भगवान् श्रीकृष्ण, जैसे ब्राह्मणों के मुख में प्रेम से हविष्यान्न के हवन करने से तृप्त होते हैं, वैसे अग्नि के मुख से नहीं तृप्त होते, ॥ १७ ॥

तस्मात् ब्राह्मण देव मनुष्य आदिकों में इन श्रीकृष्ण का यथा योग्य यजन करो, और ब्राह्मणों के पश्चात् अपने क्षेत्रज्ञ का भी यजन करो ॥ १८ ॥

ब्राह्मण, प्रौष्ठपद नाम (भाद्रपद) मास में कृष्णपक्ष में जैसा द्रव्य हो तैसा माता पिता का श्राद्ध करे, और वित्तवाला हो तो उनके बन्धुओं का भी महालय श्राद्ध करे, (यहां अमान्त-मास मान कर पितृपक्ष को भाद्रपद के कृष्ण पक्ष में जानना चाहिये) ॥ १९ ॥

अयन अर्थात् दक्षिणायन उत्तरायण के सूर्य की गती के समय में. जैसेकि कर्क और मकर के सूर्य में, और विषुव नाम तुला और मेष के सूर्य में, व्यतीपात में, क्षय तिथिमें, सूर्यग्रहण में, चन्द्रग्रहण में, और द्वादशी श्रवण नक्षत्र में, ॥ २० ॥

अक्षयतृतीया में, कार्तिक शुक्लनवमी में, और हेमन्त शिशिर ऋतुओं में चार अष्टका नाम तिथियों में ॥ २१ ॥

माघशुक्ल सप्तमी में, मघा और अमावास्या के संगम में, माघशुक्ल पूर्णमासी में, और अमावास्या वा पूर्णिमा से युक्त मास प्रधान नक्षत्रों में, (जैसे कि ? चैत्रमें चित्रायुत अमावास्या पूर्णिमा वैशाख में विशाखा युत इत्यादि) ॥ २२ ॥

जब द्वादशी में अनुराधा श्रवण उत्तरा भाद्रपद नक्षत्र होवे, और तीनों उत्तराओं में यदि अनिषिद्ध एकादशीश्राद्ध प्राप्त होवे तो, श्राद्ध करे और जन्म नक्षत्र तथा श्रवण नक्षत्र में श्राद्ध करे ॥ २३ ॥

ये सब मांगलिक काल हैं, मनुष्यों के श्रेयकी वृद्धि करने वाले हैं, तस्मात् इनकालों में श्राद्धादि शुभकर्म करे तब आयुक अमोघ श्रेय होता है ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

संस्कारकाल इति, जायायाः पुंसवनादि अपत्यस्य जातकर्मादि. आत्मनो यज्ञदीक्षादि. प्रेतस्य संस्था दहनादि. मृताहश्च सांवत्सरिकं यदा अन्यस्मिन्नप्यभ्युदयार्थे कर्मणि श्रेयः कुर्यादित्यनुषङ्गः ॥ २६ ॥

यत्र यस्मिन्नेतच्चराचरमास्ति तस्य भगवतो बिम्बं रूपं

श्रीधरस्वामिकृतभावार्थदीपिका ।

सत्पात्रं यत्र लभ्यते स वै पुण्यतमो देशः ॥ २७ ॥ २८ ॥ २९ ॥

अर्हैरुत्तमैराश्रितानि ॥ ३० ॥ ३१ ॥

सीतायारामस्य चाश्रम आदिर्येषां द्वयोः पृथग्ग्रहणं वियोगकालाभिप्रायेण ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एषु कालेषु कृतं यजपादिकं यच्च पित्राद्युद्देशेन दत्तं 'भावेक्तः' दानं च तदुत्तनश्वरमक्षय्यफलसाधनम् ॥ २५ ॥

किञ्च हे नृप ! जायापत्यात्मनां संस्कारकाले । तत्र जायायाः संस्कारः पुंसवनादिः अपत्यस्य संस्कारो जातकर्मादिः आत्मनः स्वस्य संस्कारो यज्ञदीक्षादिः एतेषां कालेषु यदा प्रेतस्य संस्था दहनादि कर्म मृताहश्च तदाऽन्यस्मिन्नभ्युदयार्थे कर्मणि कृतं स्नानादिकमनश्वरमिति पूर्वेणान्वयः ॥ २६ ॥

एवं श्रेयस्कराः काला उक्ताः अथ देशान्वक्तुं प्रतिजानीते—अथेति । कर्मादि श्रेयस आवहानाधायकान् देशान् प्रवक्ष्यामि तावदयं मुख्यो देशः श्रेयस्कर इत्याह–स इति । यत्र देशे सत्पात्रं लभ्यते ॥ २७ ॥

यत्र यस्मिन् सर्वमेतच्चराचरमाधेयतया नियाम्यतया चाऽस्ति तस्य भगवतो बिम्बं यत्र च देशे वर्त्तते यत्र च देशे तपोविद्यादयाभिर्युक्तं ब्राह्मणकुलं वर्त्तते ॥ २८ ॥

यत्र यत्र देशे हरेर्भगवतोऽर्चा पूजा प्रवर्त्तते स सर्वोपि देशः पुण्यतमः श्रेयसां पदं श्रेयःसाधनधर्माऽनुष्ठानयोग्यं स्थानं किञ्च यत्र येषु देशेषु पुराणेषु प्रसिद्धाः गङ्गादयो नद्यः सन्ति ॥ २९ ॥

तथा पुष्करप्रभृतीनि सरांसि च यत्र सन्तीति पूर्वेण संबन्धः । उत किञ्च यानि चार्हाश्रितानि महात्मभिरधिष्ठितानि क्षेत्राणि सन्ति. तान्येव दर्शयति–कुरुक्षेत्रमिति । यद्वा कुरुक्षेत्रादिव्यतिरिक्तक्षेत्राभिप्रायेणोक्तमर्हाश्रितानीति । गयस्यासुरस्य शिरः तत्पतनस्थानं गयेत्यर्थः । प्रयागो गङ्गायमुनयोस्सङ्गमस्थानं पुलहाऽऽश्रमः सालग्रामक्षेत्रम् ॥ ३० ॥

फल्गुनी नदी गयायामेव तत्स्थानं फाल्गुनम् सेतुः रामसेतुः प्रभासः प्रत्यक्सरस्वतीसंगमस्थानं कुशस्थली द्वारवती पम्पा सरोवरम् विन्दुसरः कर्दमाश्रमः ॥ ३१ ॥

नारायणाश्रमो बदरिकाश्रमः नन्दा अलकनन्दातटं सीतारामयोराश्रमश्चित्रकूटाद्रिः । एतत्प्रभृतयः । तथा हे राजन् महेन्द्रमलयादयः सर्वे कुलगिरयश्च ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सत्पात्रं विशिनष्टि–विश्वमिति । यस्मिन्देशे भागवतस्तादृशं चराचरं सर्वं जगदस्तीति ज्ञातव्यम्—

"यतिर्यस्य गृहं भुङ्क्ते तत्र भुङ्क्ते हरिः स्वयम् ।
हरिर्यस्य गृहं भुङ्क्ते तत्र भुङ्क्ते जगत्त्रयम्" इति

वचनात् ॥ २८ ॥

अर्चाः, सालग्रामादिप्रतिमाः पुराणेषु, भागवतादिषु विश्रुताः ॥ २९ ॥

कृष्णावेण्यादयश्च क्षेत्राणि पुरुषोत्तमादीनि अर्हैः पूज्यैरगस्त्यादिभिराश्रितान्यधिष्ठितानि ॥ ३० ॥

फल्गुनं स्थानं हरपुरं कन्यातीर्थं वा "कन्यापुरं फल्गुनं स्यात्स्थानं हरपुरं च तत्"इत्यभिधानं वाराणसीपुरी काशी ॥ ३१ ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

संस्कारकाले जायायाः पुंसवनादि अपत्यस्य जातकर्मादि आत्मनो यज्ञदीक्षादि प्रेतसंस्था प्रेतस्य दाहनादि मृताहः पित्रादेः सांवत्सरिकं श्राद्धम् एतेषु अन्यस्मिन्नभ्युदये च श्रेयः कुर्यादित्यनुषङ्गः ॥ २६ ॥

सन् साधुश्चासौपात्रश्चेति सत्पात्रं तच्च कीदृशं ? यत्र चराचरमेतज्जगत् तस्य भगवतो बिम्बं बिम्बतुल्यमित्यर्थः । प्रतिमा हि प्रतिबिम्बरूपेति तस्याः सकाशादपि भक्तस्योत्कर्षः अत एव मद्भक्तः पूजाऽभ्यधिकेति—

"अर्चायामेव हरये पूजां यः श्रद्धयेहते ।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः" ॥

इति च वक्ष्यति अर्चा प्रतिमा सालग्रामादिरूपा ॥ २७ ॥ २८ ॥

अर्चा स्थिरप्रतिमा श्रीजगन्नाथादिस्तदाश्रिता उत्कलादयः ॥ २९—३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अनश्वरं बहुफलम् ॥ २५ ॥

जायायाः भार्यायाः संस्कारकाले पुंसवनादौ अपत्यस्य जातकर्मादौ आत्मनो यज्ञदीक्षादौ प्रेतस्य पित्रादेः संस्था दहनादिस्तत्र यदा पित्रादिमृताहस्तत्र साम्वत्सरिके अन्यस्मिन् अभ्युदयार्थे कर्मणि श्रेयः कुर्यादित्यनुषङ्गः ॥ २६ ॥

तत्र सत्पात्रं "ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिविधस्मृतः" इति भगवद्वचनात् सच्छब्दवाच्यस्य भगवतो भजनीयस्य वासस्थानं भगवद्भक्त इत्यर्थः । यत्र लभ्यते स पुण्यतमो देशः ॥ २७ ॥

यत्र सर्वमेतच्चराचरं तस्य भगवतो बिम्बं शब्दमयी वेदभागवतादिरूपा मूर्तिः । ब्राह्मणां कुलं च यत्र देशे स पुण्यतमो देश इति पूर्वेणान्वयः ॥ २८ ॥

अर्चा मूर्त्तिः ॥ २९ ॥

अर्हैः शिष्टैराश्रितानि ॥ ३०—३१—३२ ॥

एते पुण्यतमा देशा हरेरर्चाश्रिताश्च ये ।
एतान्देशान्निषेवेत श्रेयस्कामो ह्यभीक्ष्णशः ।
धर्मो ह्यत्रेहितः पुंसां सहस्राधिफलोदयः ॥ ३३ ॥
पात्रं त्वत्र निरुक्तं वै कविभिः पात्रवित्तमैः ।
हरिरेवैक उर्वीश ! यन्मयं वै चराचरम् ॥ ३४ ॥
देवर्ष्यर्हत्सु वै सत्सु तत्र ब्रह्मात्मजादिषु ।
राजन्यदग्रपूजाया मतः पात्रतयाऽच्युतः ॥ ३५ ॥
जीवराशिभिराकीर्ण आण्डकोशाङ्घ्रिपो महान् ।
तन्मूलत्वादच्युतेज्या सर्वजीवात्मतर्पणम् ॥ ३६ ॥
पुराण्यनेन सृष्टानि नृतिर्यगृषिदेवताः ।
शेते जीवेन रूपेण पुरेषु पुरुषो ह्यसौ ॥ ३७ ॥

भाषा टीका ।

इन कालों में स्नान जप होम व्रत देवपूजा ब्राह्मणपूजा, और पितृ देव मनुष्य भूत प्राणियों को जो दिया जाय वह नष्ट नहीं होता है ॥ २५ ॥

हे नृप ! स्त्री के पुंसवनादि काल मे, पुत्र के जातकर्मादि काल में, आप के यज्ञादि दीक्षा काल में, प्रेत के संस्था दहनादि काल में, और मृतक के वार्षिक काल मे, और अन्य कालों में भी अभ्युदय कमा में श्रेय करे ॥ २६ ॥

नारद जी बोले कि ? अब हम धर्मादिश्रेयों को प्राप्तकरने वाले देशों को कहते हैं, एक तो यही निश्चित है, कि वही अति पुण्य देश जानना जहां सत्पात्र पुरुष मिलते होवें ॥२७॥

और जिसमें यह सर्वचराचर स्थित है, ऐसे भगवान् की श्रीमूर्ति जहां पर विराजमान हैं, और जहां तप विद्या और दया सहित ब्राह्मण कुल विद्यमान है ॥ २८ ॥

और जहां २ श्री हरि की अर्चा (पूजा अथवा) विद्यमान है। और जहां पुराणों में विख्यात श्रीगंङ्गा आदि पुण्य नदीं विद्यमान हैं, वही देश श्रेयोंका स्थान है ॥ २९ ॥

और जहा पुष्करादि सरोवर हैं, । और महात्माओं से आश्रित जो क्षेत्र हैं, और कुरुक्षेत्र, गया, प्रयाग, पुलहाश्रम ॥ ३० ॥

नैमिषारण्य, फाल्गुनतीर्थ, सेतु, प्रभास, द्वारका, काशी, मधुपुरी, पंपासरोवर, विन्दुसरोवर ॥ ३१ ॥

श्रीबदरीनारायणाश्रम अलकनन्दा, श्रीचित्रकूट से आदि लेकर हे राजन्! महेन्द्र, मलय, प्रभृति सबपर्वत ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अर्चाश्रिताश्च स्थिरप्रतिमाश्रिताः पूर्वं तु शालिग्रामशिलाद्यर्चनदेश उक्त इत्यपौनरुक्त्यम्. अत्र एषु देशेषु ईहितः कृतः सहस्रगुणमधिकस्य फलस्योदयो यस्मात्स तथा ॥ ३३ ॥

अथ पात्रमाह, हरिरेव पात्रं निरुक्त निर्णीतम् ॥ ३४ ॥

तदेवाऽऽह, देवेषु च ऋषिषु चार्हत्सु च तपोयोगादिसिद्धेषु ब्रह्मात्मजादिषु सनकादिष्वपि सत्सु तत्र त्वदीये राजसूये यद्यस्मादच्युत एव पात्रतया सम्मतः ॥ ३५ ॥

संमतत्वे हेतुमाह, जीवराशिभिर्व्याप्तो ब्रह्माण्डकोश एव योऽङ्घ्रिपः सर्वजीवानामात्मनश्च तर्पणम् ॥ ३६ ॥

एतदेव पुरुषनामनिरुक्त्या द्रढयति–पुराणीति । नृतिर्यगादिरूपाणि पुराणि शरीराणि तेष्वन्तर्यामिरूपेण प्रत्यगंशेन च यः शेते अतः पुरुष इति प्रसिद्धः ॥ ३७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तथा ये हरेरर्चा स्थिरा पूजा प्रतिमावा तया आश्रिताः अधिष्ठितास्त एते सर्वे पुण्यतमा देशाः विस्वं भगवतो यत्रेति सालग्रामशिलाद्यर्चन देश उक्तः । अत्र तु वेंकटाद्रिस्थानादीन्युच्यन्ते इत्यपौनरुक्त्यम् श्रेयस्कामः पुमानभीक्ष्णशः पुनः पुनरेतान् देशान्नितरां सेवेत ॥ ३३ ॥

पुंसां यत्फलसाधनत्वे यो धर्म उदितो विहितः स एषु देशेषु कृतः सहस्रगुणमधिकस्य फलस्य उदयो यस्मात्तादृशो भवेत् । एवं देशकालौ उक्तौ. अथ पात्रमाह—पात्रंत्वित्यादिना हे उर्वीश ! पात्रवित्तमैः सत्पात्रयाथात्म्यविद्भिः कविभिः हरिरेक एव पात्रं निरुक्तं हरिरेक एव सत्पात्रमिति निर्णीतमित्यर्थः । पात्रं पूज्य समर्हणीयं वस्तु

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

विशिनष्टि—एतच्चराचरात्मकं जगद्यन्मयं यद्धरिप्रचुरमेतेन तत्समर्हणेन सर्वे समर्हिता भवन्तीति सूचितम् ॥ ३४ ॥

हरेरेव पात्रत्वं यतो राजसूये ऽधुना त्वयैव दृष्टमित्याह, देवेष्विति । हे राजन् ! देवेषु ऋषिषु अर्हत्सु तपोयोगादिसिद्धेषु ब्रह्मादिषु सनकादिष्वपि सत्सु तत्र त्वदीयराजसूये यद्यस्मादच्युत एवाग्रपूजायां पात्रतया मतो ज्ञातः ॥ ३५ ॥

हरेः समर्हणेन सर्वेषामर्हणं कृतप्रायमित्याह—जीवेति । जीवराशिभिराकीर्णो व्याप्तः ब्रह्माण्डकोश एव यो महानङ्घ्रिपो वृक्षस्तस्य मूलत्वात् कारणत्वादच्युतस्येज्या ऽऽराधनं सर्वेषां जीवात्मनां तर्पणं तृप्तिकरं यथाङ्घ्रिपस्य मूलेऽर्पितं जलं तच्छाखोपशाखानां वृद्धिकरं तथा ब्रह्माण्डकोशमूलभूतेऽच्युते कृते कृतमर्हणमण्डान्तरगतेषु सर्वेषु कृतप्रायमेवेत्यर्थः । अतः स एवोत्तमं पात्रमिति भावः । इतरत्रापि तद्दृष्ट्यैवाऽर्हणं कार्यमिति च ॥ ३६ ॥

एतदेव पुरुषनामनिरुक्त्या दृढयति—पुराणीति । मनुष्यतिर्यगृषिदेवतारूपाणि पुराणि शरीरात्मकान्यनेन भगवता सृष्टानि सृष्टेषु च पुरेषु यतो भगवान् जीवेन रूपेण जीवाख्येन शरीरेण "यस्यात्माशरीरम्" इति श्रुतेः । पुरे शेते अतो ऽसौ पुरुषः पुरुषशब्दः पुष्कलप्रवृत्तिनिमित्ताश्रयः । पुरे शेते इति पुरुषः शकारस्य सकारः अकारस्येकारश्च व्यत्ययात् "अन्येष्वपि दृश्यते" इति डश्च जीवेन रूपेणेत्यनेन केवलं सर्वकारणत्वादेव तदर्हणं तत्कार्यपर्यन्तं पर्यवसन्नमपि तु तत्तदन्तरात्मतया तत्तद्रूपेणा ऽवस्थितत्वाच्चेत्युक्तं भवति ॥ ३७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हरेरर्चाश्रिताः हरिक्षेत्रादयः पुनर्वचनं सर्वस्मात्तेषां श्रैष्ठ्यद्योतनाय ॥ ३३ ॥

एतद्दर्शनिषेवणेन किं विशेषफलमिति तत्राह—धर्म इति ।

"कृष्णातरङ्गसम्भूतपवनस्पर्शमात्रतः ।
निर्धूतपातकाः सर्वे जना विष्णुपदं ययुः ॥"

इत्यादिशास्त्रेषु सहस्राधिकफलोदयत्वेनोदितः पात्रेष्वपि तारतम्यमस्ति तत्र मुख्यपात्रं हरिरित्याह—पात्रमिति । पात्रतारतम्यवित्तमैः कविभिः पात्रं च निरुक्तं वै मुख्यत्वेन निर्णीतं हीत्यन्वयः, किं तत्?इत्यत उक्तं हरिरिति, चराचरं यन्मयं यत्स्वामिकं यद्व्याप्तं सर्वं यस्मात्तस्माद्धरिरेव मुख्यं पात्रमित्यन्वयः ॥ ३४ ॥

इदं भवतोऽपि सिद्धमित्याह—देवेति । ब्रह्मात्मजादिषु सत्सु देवाश्च ऋषयश्च देवर्षयस्त एवार्हन्तः पूजायोग्या येष्वपि सत्सु तत्र तत्र यज्ञशालायामच्युतो गुणतो वयतः स्वरूपतश्च च्युतिरहितत्वात् श्रीनारायणो ऽग्रपूजायां पात्रतया मतस्त्वया ज्ञात इति यदतो मुख्यपात्रं हरिरित्यवधारणा युक्ता ॥ ३५ ॥

किञ्च प्रत्येकं पूजापि न विधेया भगवत्पूजया तत्तृप्ति सम्भवात्तन्मूलत्वात्तेषां तरुमूलनिषेचणां च शाखानामिवेति मुख्यवैष्णवसिद्धान्तमाह—जीवराशिभिरिति ॥ ३६ ॥

ननु, मुख्यपात्रालाभे विहितकर्मानुष्ठानविषयाभावेन तद्विधानं ऽयर्थमित्याशङ्क्य तत्तद्योग्यपात्रं वक्तुं कञ्चन सृष्टिप्रकारमाह—पुराणीति । अनेन दयालुना हरिणा नृतिर्यगादिसंज्ञितानि पुराणि शरीराणि सृष्टानीत्यन्वयः । ततः किम् ? तत्राह, शेत इति । श्रीहरिरेषु पुरेषु भोगायतनेषु जीवेन रूपेण स्वप्रतिबिम्बेन सह शेते इति यत्तस्मादसौ पुरुष इत्युच्यते जीवोऽपि तन्नामेति शेषः । "पुरिशयनात्पुरुषः" इति श्रुतिं हिशब्देन सूचयति ॥ ३७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

देवर्षीति–तत्र, राजसूये ॥ ३५ ॥

सर्वेषां जीवानामात्मनश्च तर्पणरूपा सैव भवतीत्यर्थः ॥३६ ॥

पुराणीति जीवेन जीवयित्रा जीवान्तर्यामिरूपेणेत्यर्थः ॥३७॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

देशान्तरात्सहस्रगुणाधिकस्य फलस्य उदयो यस्मात् सः ॥ ३३ ॥

अत्र धर्मार्थं कस्मै देयमिति चेत् साक्षाद्धरये वैष्णवेभ्यो ब्राह्मणेभ्यः सर्वप्राणिभ्यश्चेति वक्तुं प्रथमं दानस्य पात्रं निर्वक्ति प्रात्रमिति ॥ ३४ ॥

हरेः प्रात्रत्वे निर्विवादत्वं तत्र राजसूययज्ञ एव सिद्धमित्याह । देवेषु ऋषिषु अर्हत्सु तपोयज्ञादिसिद्धेषु ब्रह्मादिषु तदात्मजादिषु सनकादिषु च अग्रपूजायां पात्रतया अच्युत एव मतः ॥ ३५ ॥

संमतत्वे हेतुमाह–जीवेति । य आण्डकोशस्तस्य मूलत्वात् ॥ ३६ ॥

अतस्तस्यावतारसमये साक्षात्तस्मा एव अन्यदा तु तदुक्ताय सत्पात्रं यत्र लभ्यते बिम्बं भगवत इति पूर्वोक्तः तदनन्तरं तु प्राणिमात्रेभ्य इत्याह–पुराण्यनेनेति ॥ ३७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हरेरर्चाश्रिता इति पुनरुक्तिः अर्चाश्रितदेशस्याऽतिगुणवत्तम त्वाभिप्राया हि यतः अत्र एषु देशेषु ईहितः कर्तुं वाञ्छितोऽपि धर्मः किमुताऽनुष्ठितः सहस्रगुणमधिकस्य फलस्योदयो यस्मात्स तथाभूतो भवति ॥ ३३ ॥

प्रसङ्गात्पात्रमाह–पात्रमिति । हे अवनीश! हरिरेवैकः पात्रं पूज्य इत्यर्थः ॥ ३४ ॥

तेष्वेषु भगवान्राजंस्तारतम्येन वर्त्तते ।
तस्मात्पात्रं हि पुरुषो यावानात्मा यथेयते ॥ ३८ ॥
दृष्ट्वा तेषां मिथो नृणामवज्ञानात्मतां नृप ! ।
त्रेतादिषु हरेरर्चा क्रियायै कविभिः कृता ॥ ३९ ॥
ततोऽर्चायां हरिं केचि*त्संश्रद्धाय सपर्यया ।
उपासत उपास्तापि नाऽर्थदा पुरुषद्विषाम् ॥ ४० ॥
पुरुषेष्वपि राजेन्द्र ! सुपात्रं ब्राह्मणं विदुः ।
तपसा विद्यया तुष्ट्या धत्ते वेदं हरेस्तनुम् ॥ ४१ ॥
नन्वस्य ब्राह्मणा राजन् ! कृष्णस्य जगदात्मनः ।
पुनन्तः पादरजसा त्रिलोकीं दैवतं महत् ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायाम्
वैयासिक्यां सप्तमस्कन्धे सदाचारनिर्णयो नाम
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे राजन् ! तत्र त्वदीये राजसूये देवेषु ऋषिषु अर्हत्सु ब्रह्मशिवादिषु ब्रह्मात्मजादिषु अर्घात्पूज्येषु पूजकेषु सत्सु यत् यः मयोक्तः अच्युत एव अग्रतः पूजायां पात्रतया मतः तथोक्तं राजसूयप्रकरणे
"कृष्णंकमलपत्राक्षं नार्चयिष्यन्ति ये जनाः ।
जीवन्मृतास्तु ते ज्ञेया न सम्भाष्या कदाचन"—
इत्यादि ॥ ३५ ॥

अच्युतपूजनेन सर्वपूजनं भवतीत्याह—जीवानां राशिभिः समूहैराकीर्णो व्याप्त आण्डकोश एवाङ्घ्रिपः तत्तस्याच्युतस्य मूलत्वादुक्ताङ्घ्रिपमूलदत्वाच्युतेज्या सर्वजीवानामात्मनश्च तर्पणं भवति ॥ ३६ ॥

तस्य सर्वत्र पूजार्थं सान्निहितत्वमाह—अनेन अच्युतेन नृतिर्यगाद्याख्यानि पुराणि सृष्टानि तेषु पुरेषु रूपेण अन्तर्यामिरूपेण शेते, किमर्थम् ? तत्राह—जीवेन पालनीयेन सह शेते जीवपालनार्थमित्यर्थः । अतो असौ पुरेषु शेते इति पुरुष इत्युच्यते ॥ ३७ ॥

भाषाटीका ।

ये सब पुण्यतम देश हैं । और जो२ श्रीहरीकी अर्चाश्रित देश है वे बडे पुण्यतम देश हैं श्रेय की कामना वाला-पुरुष इन देशों का निरन्तर सेवन करे, इन देशों धर्म की चेष्टा करने से पुरुषों को सहस्राधिक फल होता है ॥ ३३ ॥

हे राजन् ! अच्छे पात्र अपात्र जानने वाले लोगोंने तो, जिन से चराचर जगत व्याप्त हो रहा है, उन एक श्रीहरि ही को पात्र कहा है ॥ ३४ ॥

क्योंकि ? हे राजन् ! देव, ऋषि, और ब्रह्मपुत्रादिकों में पूजनीयों के मध्य में भी, इनही की अग्र पूजा हुई । और बडे बडे कविलोगों ने पूज्यत्वेन इन ही को पात्र बताया ॥ ३५ ॥

असंख्येयजीव राशियों से व्याप्त यह ब्रह्माण्डही एक महान् वृक्ष है, उस वृक्ष का मूल रूप होने से अच्युत (श्रीकृष्ण) की पूजा सर्वजीवात्माओं की तृप्ति करने वालीहै ॥ ३६ ॥

इन श्रीकृष्ण ने मनुष्य, तिर्यक् ऋषि, देवता, आदि रूप बहुत से पुरों की सृष्टि करी है, और जीव रूप से आप उनमे शयन करते हैं, इसी से इनका नाम पुरुष भी है ॥ ३७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तारतम्येन तिर्यगादिभ्यः पुरुषे यस्माद्धाधिक्येन वर्तते तस्मात्पुरुषः पात्रम् तत्रापि यावानात्मज्ञानांशो यथा यथा ईयते तप आदियोगेन यत्र यत्र प्रतीयते, तथा तथा ऽसौ पात्रमित्यर्थः । तथाच श्रुतिः"पुरुषत्वे चाविस्तरामात्मा"इत्यादि ॥ ३८ ॥

तर्हि प्रतिमादौ हरेः किमिति पूजां कुर्वन्ति ? तत्राह—दृष्ट्वेति द्वाभ्याम् । मिथोऽवज्ञानमसन्मानस्तस्मिन्नात्मा बुद्धिर्येषां तेषां भावं दृष्ट्वा क्रियायै पूजाद्यर्थम् ॥ ३९ ॥

* संश्रद्धया इति पाठः विज० ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

हरिमुपासते उपासिताऽप्यर्चा पुरुषद्वेषिणामर्थदा न भवति पुरुषेषु द्वेषं हित्वाऽर्चिता सती साऽपि मन्दाधिकारिणां पुरुषार्थप्रदा भवत्येवेत्यर्थः ॥ ४० ॥

पुरुषेष्वेव जात्या तप आदिभिश्च पुनर्विशेषान्तरमाह—पुरुषेष्वपीति । यो धत्ते तं सुपात्रं विदुः ॥ ४१ ॥

एतदेव कैमुत्यन्यायेन द्रढयति—नन्वस्येति ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
चतुर्दशोऽध्यायः॥ १४ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

इतोऽपि पुरुषशब्दवाच्यः स्वसमर्हणेनान्येषां तदाधायकश्चेत्याह—तेष्विति । हे राजन् ! तिर्यगादिभ्यस्तेषु पुरुषेषु तारतम्येन स्वकीयज्ञानशक्त्यादिगुणाविर्भावतारतम्येन वर्त्तते भगवानतोऽसौ पुरुषः पुरु अधिकं पुरुषेषु शेत इति पुरुषः यत एवंभूतोऽतस्तद्दृष्ट्यैवार्हणमर्हणीयेषु सर्वेषु पुरुषेषु विधेयमिति भावः यतो देवमनुष्यादिपुरुषेष्वन्तर्यामितया जीवशरीरकतया च भगवान् वर्त्तते यतश्च सर्वे पुरुषा देवादयो भगवच्छरीरभूतास्तेन तारतम्यं व्याप्ताश्च तस्मादात्मा परमात्मा पुरुषः परमपुरुषो यावान्यावद्गुणाविर्भाववान् यथा यत्र यत्र ईयते प्रतीयते तत्तत्पात्रं यत्र यत्राधिकं भगवतो ज्ञानशक्त्यादिगुणाविर्भावस्तत्तदुत्तमम् पात्रं न्यूनाविर्भाववत्त्वमुक्तमिति भावः तदेवं भगवत एवोत्तमपात्रत्वमितरेषामपि तदात्मकत्वेनैवार्हणीयत्वं तदपि तदाविर्भावानुसारेण व्यवस्थितमिति चोक्तम् ॥ ३८ ॥

ननु, भगवतस्तदात्मकानां पुरुषाणामेवार्हणीयत्वे स्मृतिकारादिभिराराधनीयत्वे विहिता हरिप्रतिकृतिः पूजिता न फलदा स्यादिति चेद्भूतद्रोहिणां व्यर्थैवेत्याह—दृष्ट्वेति द्वाभ्याम् । मिथोऽवज्ञानं तिरस्कारः तस्मिन्नात्मा बुद्धिर्येषां तेषां भावं दृष्ट्वा हे नृप ! हरेः क्रियायै पूजार्थमर्चाप्रमाणं कविभिः त्रेतादिषु युगेषु कृता पूज्यत्वेन विहिता त्रेतादिष्वित्यनेन प्रायशः कृते सर्वात्मकब्रह्मोपासनमेव विहितमिति सूचितम् ॥ ३९ ॥

तत्रार्चायां पूजार्थप्रतिमायाम् केचिद्धरिं संश्रद्धाय श्रद्धापूर्वकमुपासते एवमुपास्ताराधिताप्यर्चा पुरुषद्विषां भगवदात्मकान् पुरुषान्द्विषन्तीति पुरुषद्विषः तेषां नार्थदा न पुरुषार्थदा भवति पुरुषान् बहुमन्यमानानामेवार्चाराधनं फलवदित्यर्थः ॥ ४० ॥

यदुक्तं "तस्मात्पात्रं हि पुरुषः" इत्यादि, तद्विवृणोति—पुरुषेष्विति । हे राजेन्द्र ! पुरुषेष्वपि ब्राह्मणं सत्पात्रं विदुः सुपात्रतयाऽध्यात्मविदः सुपात्रत्वे हेतुं वदन्विशिनष्टि, इदं ब्राह्मणात्मकं सुपात्रं तपसानशनेन विद्ययाऽऽत्मयाथात्म्यज्ञानपूर्वकभगवदुपासनरूपविद्यया तुष्ट्या दैवाल्लब्धसन्तोषेण चेदं स्वधर्मशमदमादीनामप्युपलक्षणम् एभिर्गुणैर्हरेस्तनुं धत्ते बिभर्ति चशब्दः पादपूरणार्थः एवकारार्थे वा हरेरेव तनुं धत्त इत्यर्थः ॥ ४१ ॥

एतदेव कैमुत्तिकन्यायेन द्रढयति—नन्वस्येति । हे राजन् ! न त्रिलोकीं पादरजसा पुनन्तः पवित्रीकुर्वन्तः जगदन्तरात्मनः श्रीकृष्णस्यापि ब्राह्मणा महद्दैवतं किमुतान्येषामस्मद्विधानां ब्राह्मणा दैवतमित्यर्थः ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिकायाम्
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ईशो भगवांस्तेषु पुरेषु स्थितः पुरुषनामसु जीवेषु च तारतम्येन तत्तद्भक्त्यादिगुणतारतम्यानुसारेण सन्निधानतारतम्येन वर्तत इति यस्मात्तस्मात्तत्तद्योग्यानुसारेण पुरुषो जीवराशिश्च पात्रं तदन्तर्यामिहरिस्मरणपूर्वकमिति शेषः अत्र सन्निधानतारतम्यमेव हरेर्नतु स्वरूपतारतम्यं तदुक्तं—

"ब्रह्मादिस्थावरान्तेषु न विशेषो परे क्वचित् ।
व्यक्तिमात्रविशेषेण तारतम्यं वदन्ति च" इति.

अत्रापीत्थं भावमाह—यावानिति । पुरुषे तु आत्मा यावान् महिम्ना यथा येन प्रकारेण ज्ञायते तदानुकूल्येन जीवराशिः पात्रमित्यर्थः ॥ ३८ ॥

हरिप्रतिमापूजायाः पुरुषस्थितपुरुषनाम्नो हरेः पूजा सम्यक् फलवतीत्याशयेनाह—दृष्ट्वेति । कविभिस्तेषां नृणां मिथ आत्मनो हरेरवज्ञां दृष्ट्वा त्रेतायां सपर्याक्रियायै हरेरर्चा कृता यस्मात् ॥ ३९ ॥

ततः केचित्संश्रद्धया सपर्यया अर्चायां हरिमुपासते ये तेषां पुरुषस्थितहरिद्विषां सोपासैहिकफलमन्तरेण परमपुरुषार्थप्रदा न भवतीत्यन्वयः ॥ ४० ॥

मुख्यपात्रमाह—पुरुषेष्विति । कीदृशो ब्राह्मणो मुख्यं पात्रमित्यतस्तद्विशिनष्टि—तपसेति । तनुं प्रतिमास्थानं अत्र "शिलावत्प्रतिमाः सन्तो विप्राद्याश्च हरेः स्मृताः" इति वचनात् विप्रादिमात्रं हरिशिलास्थानीयं न किन्तु तप आदिगुणविशिष्टब्राह्मणकुलं अन्यथा हरेरर्चैषा सा पुरुषार्थप्रदा न स्यादिति तदुपासां विनिन्द्य सुपात्रं ब्राह्मणं विदुरिति कथनं व्यर्थं स्यादत एव ब्राह्मणा इति तत्पदं प्रायोजि ॥ ४१ ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् ।
(पञ्चदशोऽध्यायः) श्रीधररीत्या चतुर्दशः ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तेष्विति तस्माद् तारतम्यवर्तनात् पुरुषः प्रायो मनुष्यः पात्रं तत्र ज्ञानादिकं विशिष्टमिति भगवद्दर्शनस्याऽतिशयात् तत्राऽपि आत्मा यावान् यथा ज्ञानादिपरिमाणादिकः तथा पात्रमित्यर्थः ॥ ३८ ॥

एवं स्थितेपि कालेनोपासकदोषोत्पत्तौ सत्यां वेदहृष्ट्या विशिष्टमधिष्ठानान्तरं प्रकाशितमित्याह—दृष्ट्वेति । क्रियार्थे पूजार्थम् अर्चा कृता तत्परिचर्यामार्गदर्शनाय सा प्रकाशितेत्यर्थः । एतेन तादृशदोषयुक्तेष्वपि कार्यसाधकत्वात् श्रीमदर्चाया आधिक्यमेव व्यञ्जितम् प्रतिमास्वल्पबुद्धीनामित्यत्राल्पबुद्धीनामपीत्यर्थः । श्रीनृसिंहपुराणादौ ब्रह्माम्बरीषादीनामपि तत्पूजाश्रवणात् ॥ ३९ ॥

ततः एवं प्रभावात् केचिदित्यधिष्ठानवैशिष्ट्येन पूर्वतोऽप्युत्तमसाधनतत्परा इत्यर्थः । नन्ववज्ञातुर्द्विषोपि सिद्धिः स्यादित्याशङ्कयाऽतिप्रसङ्गवारणेच्छया प्रस्तुतपुरुषरूपाधिष्ठानादरेच्छया च तं वारयति, उपास्तापीति ॥ ४० ॥ ४१ ॥

प्रथमपुरुषे पूर्वोक्तं ब्राह्मणरूपं पात्रमेव स्तौति—नन्वस्येति, जगदात्मनः जगति लोकसंग्रहधर्मादिप्रवर्त्तनेन तन्नियन्तुरित्यर्थः । दैवतं लीलया पूज्यत्वेन दर्शितम् ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तारतम्येन तिर्य्यगादिभ्यः पुरुषे यस्मादाधिक्येन वर्त्तते तस्मात् पुरुषः पात्रं तत्रापि यथायथा ज्ञानवैराग्यादिभिर्याबानात्मा जीवः उत्कृष्टो भवेत् यः स पात्रं तथाच श्रुतिः "पुरुषत्वेचाविस्तरामात्मा" इत्यादि ॥ ३८ ॥

सर्वप्राणिसंमाननासमर्थानामवज्ञा स्पर्द्धाविमतां तु भगवत्प्रतिमैव पात्रमित्याह—दृष्ट्वेति । मिथः परस्परमवज्ञाने एवात्माबुद्धिर्येषां तेषां भावस्तत्ता ताम् ॥ ३९ ॥

उपास्ता उपासितापि पुरुषद्विषां नार्थदेति अवज्ञादिभ्योपि द्वेषेऽपराधाधिक्यं सूचयति ॥ ४० ॥

पुरुषस्येव ज्ञात्वा तपआदिभिश्च श्रैष्ठ्यमाह—पुरुषेष्वपीति । वेदं ब्रह्मशब्दवाच्यं यो धत्ते ज्ञानेन स ब्राह्मण इति तदधीते तद्वेदेत्यणा ब्राह्मणपदव्युत्पत्तिर्दर्शिता ॥ ४१ ॥

कृष्णस्य महत् दैवतमिति तेनाप्याद्रियते ब्रह्मण्यत्वात् नच तद्दैवतत्वात् ब्राह्मणास्तस्मात् सकाशादपि वस्तुत एव पूज्या इति सिद्धान्त एवेति वाच्यं राजसूये बहुष्वपि ब्राह्मणे- विद्यमानेषु कृष्णस्यैवाग्रपूजनात् ॥ ४२ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

चतुर्दशः सप्तमस्य सङ्गतः सङ्गतस्सताम् ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तेष्वेषु नृतिर्यगादिषु भगवान् तारतम्येन वर्तते यस्मा- त्स्मात् यावान् यथा ईयते तावान् यथा आत्मा तदन्व- पुरुषः पात्रम् नृतिर्यगादिषु यथा यथेयते तथा तथा इत्यर्थः ॥ ३८ ॥

एवं नृतिर्यगादिषु प्राणिषु भगवदर्चनमुक्तम् । अथ तद्दर्शनार्थं महर्षिभिः संस्थापिता भगवत्प्रतिमा पूजा पुरुषार्थदा प्राणिद्रोहिणां नार्थदेत्याह—दृष्ट्वेति, द्वाभ्याम् । मिथोऽवज्ञाने- ऽन्यतिरस्कारे आत्मा बुद्धिर्येषां तेषां भावस्तत्ता तां दृष्ट्वा कि- भगवत्पूजार्थम् अर्चा प्रतिमा कविभिः त्रेतादिषु कृता प्र- कृता ॥ ३९ ॥

तत्रार्चायां प्रतिमायां केचिन्मुमुक्षवः हरिं संश्रद्धाय स- योपासते ततस्तान्प्रत्यर्थदा भवति. पुरुषद्विषां नृतियगादिप्रा- पीडया परमेश्वरद्वेषिणां तु तदर्चनाग्रहणेनोपास्ताऽपि न भ- किमुतार्थदा न भवतीतिवाच्यम् ॥ ४० ॥

पुरुषेषु नृषु च ब्राह्मणं सुपात्रं विदुः यतस्तपआदि- वेदं हरेस्तनुं मूर्तिं च धत्ते अध्ययनेन ध्यानेन च ॥ ४१ ॥

पादरजसा त्रिलोकीं पुनन्तः ब्राह्मणाः । ननु, अहो अ- त्मनः सर्वात्मनः श्रीकृष्णस्यापि महद्दैवतमादराविषयाः किमुता- पामित्यर्थः ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धीये

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

चतुर्दशाऽध्यायार्थप्रकाशः ॥ १४ ॥

भाषा टीका ।

हे राजन् ! इन सर्व पुरों (देहों) में भगवान् तार- से वर्त्तमान हैं, पर जिस कारण से पुरुष में अधिकता से व- मान हैं, तस्मात् पुरुष ही पात्र है, पुरुषों में भी ज्ञानी लोग- भी पात्र है ॥ ३८ ॥

भाषा टीका ।

असन्मान में अर्थात अन्य के तिरस्कार में जिनों की बुद्धि लग्न रहती है, ऐसे मनुष्यों की भी जैसे श्री हरि में प्रीति होवे। हे राजन्! इसी हेतु से वेदवेत्ताओं ने त्रेतादि युगों में क्रिया के अर्थ श्रीहरि की अर्चा प्रतिष्ठादि करी है, ॥ ३९ ॥

तिसी से कितने एक अन्य महात्मा जन सम्यक् श्रद्धाकर के अर्चा ही में श्रीहरि की पूजा करके उपासना करते हैं, परञ्च वह उपासित मूर्ति भी पुरुष द्वेषियों को अर्थदेने वाली नहीं होती है, अर्थात भूतद्रोही का प्रतिमा पूजन व्यर्थ है ॥ ४० ॥

हे राजेन्द्र! मनुष्यों में भी महाजन, ब्राह्मण को सुन्दर पात्र जानते हैं, क्यों कि ? वह, तप विद्या और सन्तोष से साक्षात श्रीहरि के तनु रूप वेद को धारण करता है ॥ ४१ ॥

हे राजन् ! ये ब्राह्मण लोग इन जगदात्मा श्रीकृष्ण ही के प्रिय और परम देवत अर्थात पूजनीय हैं ॥ ४२ ॥

इति श्रीमद्भागवत सप्तमस्कन्ध में चतुर्दश अध्याय की भागवताचार्य कृत भाषा टीका समाप्त ॥ १४ ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे चतुर्दशोऽध्यायः ॥ १४ ॥

॥ पञ्चदशोऽध्यायः ॥

नारद उवाच ।

कर्मनिष्ठा द्विजाः केचित्तपोनिष्ठा नृपापरे ।
स्वाध्याये ऽन्ये प्रवचने ये केचिज्ज्ञानयोगयोः ॥ १ ॥
ज्ञाननिष्ठाय देयानि कव्यान्यानन्त्यमिच्छता ।
दैवे च तदभावे स्यादितरेभ्यो यथा ऽर्हतः ॥ २ ॥
द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा ।
भोजयेत्सुसमृद्धोऽपि श्राद्धे कुर्यान्न विस्तरम् ॥ ३ ॥
देशकालोचितश्रद्धा द्रव्यपात्रार्हणानि च ।
सम्यग्भवन्ति नैतानि विस्तरात्स्वजनार्पणात् ॥ ४ ॥
देशे काले च सम्प्राप्ते मुन्यन्नं हरिदैवतम् ।
श्रद्धया विधिवत्पात्रे न्यस्तं कामधुगक्षयम् ॥ ५ ॥
देवर्षिपितृभूतेभ्य आत्मने स्वजनाय च ।
अन्नं संविभजन्पश्येत् सर्वं तत्पुरुषात्मकम् ॥ ६ ॥
न दद्यादामिषं श्राद्धे न चाद्याद्धर्मतत्त्ववित् ।
मुन्यन्नैः स्यात्परा प्रीतिर्यथा न पशुहिंसया ॥ ७ ॥
नैतादृशः परो धर्मो नृणां सद्धर्ममिच्छताम् ।
न्यासो दण्डस्य भूतेषु मनोवाक्कायजस्य यः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ततः पञ्चदशे सर्ववर्णाश्रमनिबन्धनम् ।-
सारतः सङ्ग्रहेणाऽथ वर्ण्यते मोक्षलक्षणम् ॥

सर्वेषामपि मोक्षधर्माणां सारसङ्ग्रहार्थमध्यायप्रारम्भः, तत्र आश्रमगतान्विशेषानाह-कर्मनिष्ठा इति। स्वाध्यायादिषु परिनिष्ठिता इति शेषः ॥ १ ॥

कव्यानि पितॄनुद्दिश्य देयानि दैवे च हव्यान्यपि तस्मै देयानि यथार्हत इति सर्वत्र ज्ञानादितारतम्येन ॥ २ ॥ ३ ॥

ननु, विस्तरः कुतः प्राप्तो येन निषिध्यते तत्राह, स्वजनानामर्पणात् जामाता चेन्निमन्त्र्यते तत्पित्रादयः कथं व[...]
इत्येवं प्राप्ताद्विस्तरादित्यर्थः ॥ ४ ॥

मुन्यन्नमारण्यं व्रीह्यादि हरिदैवतं हरये निवेदितं सत् [...]
पुरुषात्मकमीश्वरस्वरूपम् ॥ ६ ॥ ७ ॥

दण्डस्य न्यासो हिंसायास्त्यागो य एतादृशो ऽन्यो [...] नास्ति ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तपसा विद्ययेत्यादिना ब्राह्मणेष्वपि तप आदिगुणतार[...] म्येन पात्रत्वं तारतम्येन व्यवस्थितमिति सूचितम् एतं[...]

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

विद्वद्बन्धुपात्रायैव श्राद्धादिष्वन्नादिकं दद्यादिति वदन्नन्यानपि श्राद्धीयनियमानाह, देवर्षिः—कर्मनिष्ठा इत्यादिना । हे नृप ! केचित् द्विजाः त्रैवर्णिकाः कर्मनिष्ठाः स्ववर्णाश्रमोचितकर्मनिष्ठाः केचिच्चाऽनशनादितपोनिष्ठाः केचित्स्वाध्याये प्रवचने अध्यापने च परिनिष्ठिताः केचिच्च ज्ञानयोगयोरुभयोरपि निष्ठिता इति शेषः । ज्ञानमात्मयाथात्म्यज्ञानपूर्वकभगवदुपासनात्मकम् योगोऽनभिसंहितफलकर्मयोगः ॥ १ ॥

तत्र ज्ञाननिष्ठाय ज्ञानकर्मयोगानुगृहीतभगवदुपासनात्मकज्ञानयोगनिष्ठाय पितॄनुद्दिश्य देयानि कव्यानि श्राद्धान्नादीनि आनन्त्यमपरिमितं फलं मोक्षरूपं फलमिच्छतां पुंसां देयानि तथा दैवे च कर्मणि हव्यान्यपि ज्ञाननिष्ठायैव देयानि तदभावे ज्ञाननिष्ठस्याभावे इतरेभ्यः कर्मनिष्ठादिभ्योऽपि यथायोग्यं ज्ञानादितारतम्येन देयं स्यात् ॥ २ ॥

दैवे विश्वेदेवस्थाने द्वौ ब्राह्मणौ पितृकार्ये पितृप्रयोजने पित्रर्थमिति यावत् । त्रीन् ब्राह्मणानुभयत्र द्वयोरपि स्थानयोरेकैकं वा ब्राह्मणं भोजयेत्सुसमृद्धोऽपि धनाढ्योऽप्येवं ब्राह्मणान् भोजयेत् न तु श्राद्धे विस्तरं कुर्यात् ॥ ३ ॥

श्राद्धविस्ताराद्दोषमाह—देशेति । देशकालपात्राणि यथोक्तान्येव उचिता श्रद्धा विश्वासः कर्तव्यविषया त्वरा वा अर्हणं पूजासाधनं तानि समीचीनान्यपि स्वजनार्पणाद्विस्तराच्च सम्यग्भवन्ति विगुणान्येव स्युरित्यर्थः । ननु, कुतो विस्तरः प्राप्तः येन निषिध्यते इति शङ्कां वारयितुं स्वजनार्पणादित्युक्तं स्वजनानामर्पणाद्दौहित्रो निमन्त्रितश्चेत्तत्पुत्रादयः कथं वर्ज्या इत्याद्येवं प्राप्ताद्विस्तरादित्यर्थः ॥ ४ ॥

श्राद्धे विष्ण्वर्थमपि ब्राह्मणं भोजयेदित्याह—देश इति । देशे पूर्वोक्ते कालेऽपरपक्षादिरूपे मृताहादिरूपे च काले प्राप्ते कर्तव्यत्वेन प्राप्ते श्राद्धे पात्रे सत्पात्रे विधिवच्छ्रद्धया न्यस्तं मुन्यन्नमारण्यं व्रीह्यादिजमप्यन्नं हरिदैवतं विष्णुदैवत्यं तस्मै निवेदितं तदुद्देश्येन च दत्तमन्नं कामधुक् कामदमक्षयफलदं मुक्तिसाधनं चेत्यर्थः ॥ ५ ॥

सर्वाश्रमसाधारणान् कांश्चिद्धर्मानाह—देवर्षीति । देवादिभ्य आत्मने स्वजनाय बन्धुजनाय चान्नं विभजेद्विभज्य दद्यात् तद्देवादिकं सर्वं प्राणिजातं पुरुषात्मकं भगवदात्मकं पश्येत् ॥ ६ ॥

आमिषं मांसं श्राद्धे पित्राद्युद्देशेन न दद्यात् इदं क्षत्रियाभिप्रायकं तथा धर्मयाथात्म्यवित्स्वयमप्यामिषं नाश्नीयात् यथा मुन्यन्नैरपि परोत्कृष्टा पित्रादीनां प्रीतिः स्यात्तथा पशुहिंसया न स्यात् ॥ ७ ॥

किञ्च सद्धर्ममिच्छतां नृणामेतादृशः एव पर उत्कृष्टो धर्मः कोऽसौ ? यो भूतेषु मनोवाक्कायजस्य दण्डस्य न्यासस्त्यागः करणत्रयेण भूतद्रोहाभाव एव नृणां परो धर्म इत्यर्थः । एतादृशो ऽन्यः परो धर्मो नास्तीति भावः । न दद्यादामिषमित्यनेन, पशुमृगादिहिंसागर्भमांसादिद्रव्यकश्राद्धादेरपि मुन्यन्नेनापि कृतं श्राद्धादिकं नितरां पित्रादीनां प्रीतिकृदित्युक्तं नैतादृश इत्यनेन भूतहितमेवोत्कृष्टधर्म इत्युक्तम् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कर्ममार्गो ज्ञानमार्गश्च कार्याणां कारणेषु लयः प्रवेशलक्षणं च तत्साधनं च प्रपञ्चस्वरूपं च निरूपयत्यस्मिन्नध्याये । तत्र प्रथमतो ब्राह्मणादपि ज्ञाननिष्ठमुत्तमं पात्रं दैवोपलब्धेन द्रव्येणैव नित्यनैमित्तिकक्रियाकरणं धर्माधर्मविवेकश्च कथ्यते. तत्र ब्राह्मणान्विवेचयति—कर्मेति । कर्मनिष्ठा गृहस्थाः तपोनिष्ठा वानप्रस्थाः स्वाध्यायनिष्ठा ब्रह्मचारिणः प्रवचननिष्ठाः कुटीचकाः बहूदकाश्च योगनिष्ठा हंसाः ज्ञाननिष्ठाः परमहंसाः ॥ १ ॥

तत्र सन्ततेरानन्त्यं मुक्तिं चेच्छता ज्ञाननिष्ठाय परमहंसाय कव्यानि पितृभ्यो दीयमानान्यन्नानि दातव्यानीति विधिरित्यन्वयः । दैवे कर्मणि च तस्मा इति शेषः । तदभावे परमहंसाभावे इतरेभ्यो हंसादिभ्यः श्राद्धादिदानं स्यात् तत्रापि यथार्हतः यथायोग्यम् ॥ २ ॥

अत्र भोक्तुः सङ्ख्या नियमानाह—द्वाविति, ॥ ३ ॥

कुतो विस्तारो न कर्तव्य इति तत्राह—देशेति । स्वजनार्पणात् आत्मीयार्पणलक्षणात् विस्तारादेतानि देशकालोचितश्राद्धादीनि सम्यक् न भवन्तीति यत्तस्माद्विस्तारं न कुर्यादिति पूर्वेणान्वयः ॥ ४ ॥ ५ ॥ ६ ॥

यतः श्राद्धभोजने मुख्याधिकारित्वे मांसविधानं कथमुपपद्यत इति तदपवादत्वेन विधत्ते—न दद्यादिति । शास्त्रान्तरविधिमोहितेन केनचित्कामपरिमोक्षणेन मस्करिणा न भोक्तव्यमिति विधत्ते—नचेति । नच श्राद्धभङ्ग इत्याह, धर्मेति—

“विना मांसेन मधुना विना दक्षिणयाऽऽशिषा ।
अक्षयं भवति श्राद्धं यतिषु श्राद्धभोजिषु ॥
ग्रामे वा नगरेऽरण्ये ज्ञातभिक्षुर्वसेद्यदि ।
तमन्तरेण यच्छ्राद्धं तदासुरमथो भवेत्”

इत्यादि स्मृतेः । तद्विधायकशास्त्रमासुरजनमोहनार्थत्वेन देशकालविशेषविषयत्वेन वा योजनीयम् आमिषाभावे भोक्तुः सौहित्याभावेन पितॄणां सौहित्यं न स्यादिति तत्राह—मुनीनामिति, मुनीनां संयमिनां यथा मांसानदनेन परा प्रीतिः सौहित्यं स्यात्तथा पशुहिंसया जातमांसेन न स्यात्. यथा मुनीनां पितॄणां यतिभोजनेन परा प्रीतिस्तथा पशुहिंसाजातामिषभोजनेन न स्यादिति द्विरावृत्त्यायोजनीयम् “वाचां यमे च सर्वज्ञे मुनिशब्दः पितृष्वपि” इत्यभिधानम्. मुनीनां सर्वज्ञानां देवानां यथा परमा प्रीतिः तथा पशुहिंसालक्षणेन यागेन नेति वा ॥ ७ ॥

श्राद्धे चतुर्थाश्रस्यैव पूज्य इति नियमः प्रायिकः तद्धर्मो यस्याऽस्ति सोऽपि मान्य इत्याशयेनाह—नैतादृश इति । सद्धर्ममिच्छतां नृणां भूतेषु मनोवाक्कायकर्मजस्य दण्डस्य न्यासः सन्न्यासो य एतादृशो धर्मः परोऽन्यो नास्ति । अयमेव मुख्यो धर्मः तस्मादेतादृशधर्मोऽपि श्राद्धे मान्य इत्याशयः । “वेणुभिर्न भवेद्यतिः” इति वक्ष्यति न केवलं पश्वालम्भनलक्षणहिंसाभावान्मुनीनां प्रीतिजनकोऽपि तु मनआदिना क्रियमाणदण्डलक्षणहिंसाभावोऽपीत्यतो वाह, नेति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अथ तेषु सर्वोत्कृष्टमाह–द्वाभ्याम्, कर्मनिष्ठा इत्यादयः । क्रमेण गृहस्थवानप्रस्थब्रह्मचारिसन्यासिनो ज्ञेयाः अनेन यथाऽत्र मुमुक्षुप्रभृतीनां ज्ञानिपूजैव मुख्या । पुरुषान्तरपूजा तु तदभाव एव, तथा प्रेमभक्तिकामानाम् प्रेमभक्तपूजापि ज्ञेया । ततः प्रेमभक्तानामपि यांश्चत्रस्य परमाश्रयरूपं च तदभिव्यक्तेः सुतरामेवार्चाया आधिक्यमपि । एवं तदाश्रयरूपस्य विलक्षणप्रकाशत्वादेव श्रीविष्णोः व्यापकत्वेऽपि शालग्रामादिषु निर्धारणं तच्च पुरुषवन्नान्तर्यामिदृष्ट्यपेक्ष्यं किन्तु स्वभावनिर्देश्यः

"तत्र श्राद्धं जपो होमः सर्वं कोटिगुणं भवेत्" ।
"शालग्रामसमीपे तु क्रोशमात्रं समन्ततः ॥
कीकटोऽपि मृतो याति वैकुण्ठभवनं नरः" इति ।

तस्मादर्चाया आधिक्यमेव स्थितम् ॥ १—१२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

गृहस्थस्यैव धर्मान्तः सर्वधर्मनिरूपणम् ।
अत्र पञ्चदशे सारसङ्ग्रहाख्ये प्रदर्शितम् ॥

पूर्वत्र ब्राह्मणोत्कर्षः प्रतिपादितः तेषु ब्राह्मणेष्वपि तारतम्यमाह—कर्मनिष्ठा गृहस्था विप्राः तपोनिष्ठा वानप्रस्थाः अन्ये स्वाध्याये प्रवचने इति नैष्ठिकब्रह्मचारिणः केचित् ज्ञानयोगयोरिति संन्यासिनः समासान्तर्वर्त्तिना ऽपि निष्ठापदेनात्रानुवर्त्तितेन लक्षणया निष्ठावन्तो व्याख्येयाः ततश्चैषां यथोत्तरमेव श्रैष्ठ्यं दर्शितम् ॥ १ ॥

कव्यानि पित्रुद्देश्यकवस्तूनि दैवे च हव्यानि देवोद्देश्यकवस्तूनि च ज्ञाननिष्ठाय देयानि आनन्त्यं मोक्षं पितॄणां स्वस्यचेति मोक्षार्थिना गृहस्थेन संन्यासिन एवाधिक्येन भोजनीया इति पञ्चाध्याय्या अस्या मोक्षप्रकरणपरत्वात् अत एव शुद्धभक्तानां कर्मानधिकारात् गृहस्था अपि ते अत्र कर्मज्ञानप्रकरणेन पठिताः तैस्तु सुप्रतिष्ठैर्व्यवहाररक्षाभारताम्बरीषादिभिरिव स्वप्रतिनिधिद्वारा कर्मकरणेन भक्तिमार्गनिन्दावादाद्यनुत्थानार्थमेव क्रियत इत्युक्तं पञ्चमे, एकादशे च प्रतिपादयिष्यते तस्मान्मोक्षार्थिनां यथा ज्ञानिपूजैव मुख्या पुरुषान्तरपूजा तु तदभाव एव; तथा प्रेमभक्त्यर्थिनामैकान्तिकभक्तपूजैव मुख्येति ज्ञापितमत्रापि "स वै पुण्यतमो देशः" इति पद्यव्याख्यायाम्—

"मुक्तानामपि सिद्धानां नारायण परायणः ।
सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने ! " ॥

इत्यादिना ज्ञानिभ्योऽपि तदुत्कर्षश्रवणात्—

"नमेऽभक्तश्चतुर्वेदी मद्भक्तः श्वपचः प्रियः ।
तस्मै देयं ततो ग्राह्यं स हि पूज्यो यथाह्यहम्" ॥ इति

…स्यापि तस्य संप्रदानत्वश्रवणाच्च यथा च ब्राह्मणेतर… …जा हि "दृष्ट्वा तेषां मिथो नृणाम्" इत्यनेन कानिज्ञानिनामर्चायां … …ता न तथा भक्तानां व्याख्येया तेषां हि …ष्ठाधिकारिणां व्या…

मुख्याधिकारिणामपि अर्चायां पूजादिकं मुख्यमेव भक्त्यङ्ग… कमेकादशे—

"मल्लिङ्गमद्भक्तजन दर्शनस्पर्शनार्चनम् ।
परिचर्यास्तुतिप्रह्वगुणकर्मानुकीर्त्तनम् ॥
ममार्चास्थापने श्रद्धा स्वतः संहत्यचोद्यमः" ॥ इति ।
"वस्त्रोपवीताभरणपत्रस्रग्गन्धलेपनैः ।
अलङ्कुर्वीत सप्रेम मद्भक्तो मां यथोचितम्" ॥ इति

"प्रतिमास्वल्पबुद्धीनाम्" इत्यादिकं तु ज्ञानिपरमल्पबुद्धीनाम… पीति वा व्याख्येयम् । नृसिंहपुराणे ब्रह्माम्बरीषादीनामपि त… जाश्रवणात् तस्याः महिमाधिक्यं विष्णुधर्मे च तामधिकृ… अम्बरीषं प्रति श्रीविष्णुवाक्यम्—

"तस्यां चित्तं समावेश्य त्यजता ऽन्यान् व्यपाश्रया…
पूजिता सैव ते भक्त्या ध्याता चैवोपकारिणी ॥
गच्छंस्तिष्ठन् स्वपन् भुञ्जंस्तामेवाग्रे च पृष्ठतः ।
उपर्यधस्तथा पार्श्वेचिन्तयंस्तामथात्मनः" ॥ इत्यादि

स्कान्दे च "शालग्रामशिला यत्र तत्तीर्थं योजनत्रयम्" …
पाद्मे च

"शालग्रामसमीपे तु क्रोशमात्रं समन्ततः
कीकटेऽपि मृतो याति वैकुण्ठभवनं नरः" ॥

इति ॥ २ ॥

विस्तरं भोक्तृबाहुल्यम् ॥ ३ ॥

स्वजनार्पणात् स्वजनेभ्योऽन्नदानात् जामाता चेन्निमन्त्… तत्पित्रादयः कथमुपेक्षणीया इत्येवं प्रसात् विस्तरात् ।…

मुन्यन्नम् आरण्यं व्रीह्यादि न्यायार्जितं वा हरिदैवतं प्रथमं ह… निवेदितं ततः तदेव पितृभ्यो दत्तं ततः पात्रे न्यस्तम् ॥ ५—…

दण्डस्य हिंसनस्य न्यासस्त्यागः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सर्वधर्मसारः पञ्चदशे उच्यते, तत्रादौ श्राद्धगतान् विशे… नाह–कर्मनिष्ठा इत्यादिना । द्विजाः केचित्कर्मनिष्ठाः अपरे त… निष्ठा अन्ये स्वाध्याये वेदादिपाठे प्रवचने तदर्थव्याख्याने च… निष्ठिता इति शेषः । केचित्तु कर्मादिना निर्मलान्तःकरणा ज्ञा… योगयोः ज्ञानभक्त्योः परिनिष्ठिताः ज्ञाननिष्ठाय ज्ञानभक्त्योरत्य… भेदाभावादेकस्य निर्देशः ज्ञानभक्तिसम्पन्नायेत्यर्थः । कव्या… पितॄनुद्दिश्य देयानि दैवे हव्यानि च देयानि तदभावे इतरे… कर्मनिष्ठादिभ्यो यथार्हतो देयं स्यात् ॥ १—२ ॥

दैवे विश्वेदेवकार्ये द्वौ ब्राह्मणौ पितृकार्ये त्रीन् उभयत्रै… कं वा भोजयेत्सुसमृद्धोऽपि धनाढ्योऽपि श्राद्धे विस्तरं… कुर्यात् ॥ ३ ॥

विस्तरे दोषमाह—देशेति । विस्तरात् स्वजनेभ्यो निमन्त्रि… भ्यो ऽन्नार्पणात् देशकालोचितानि श्रद्धादीनि सम्यङ्… भवन्ति ॥ ४ ॥

एके कर्ममयान्यज्ञान् ज्ञानिनो यज्ञवित्तमाः ।
आत्मसंयमने ऽनीहा जुह्वति ज्ञानदीपिते ॥ ९ ॥
द्रव्ययज्ञैर्यक्ष्यमाणं दृष्ट्वा भूतानि बिभ्यति ।
एष माऽकरुणो हन्यादतज्ज्ञो ह्यसुतृब् ध्रुवम् ॥ १० ॥
तस्माद्दैवोपपन्नेन मुन्यन्नेनाऽपि धर्म्मवित् ।
सन्तुष्टो ऽहरहः कुर्यान्नित्यनैमित्तिकीः क्रियाः ॥ ११ ॥
विधर्मः परधर्मश्च आभास उपमा छलः ।
अधर्मशाखाः पञ्चेमा धर्म्मज्ञो ऽधर्म्मवत्त्यजेत् ॥ १२ ॥
धर्मबाधो विधर्म्मः स्यात् परधर्म्मो ऽन्यचोदितः ।
उपधर्मस्तुपाखण्डो दम्भो वा शब्दभिच्छलः ॥ १३ ॥
यस्त्विच्छया कृतः पुम्भिराभासो ह्याश्रमात्पृथक् ।
स्वभावविहितो धर्मः कस्य नेष्टः प्रशान्तये ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हरिदैवतं हरये निवेदितं मुन्यन्नमारण्यं व्रीह्यादिकं श्रद्धयोकपात्रे न्यस्तमर्पितं सर्वकामधुगक्षयं च भवति ॥ ५ ॥

देवर्ष्यादिभ्यः सर्वत्राऽन्नं विभजन् तत्सर्वं देवर्ष्यादिकम्पुरुषात्मकं भगवदात्मकं पश्येत् ॥ ६ ॥

उत्तमाधिकारी हिंस्रं कर्म त्यजेदेवेत्याह—न दद्यादित्यादिना ॥ ७ ॥

भूतेषु मनोवाक्कायजस्य दण्डस्य हिंसनस्य न्यासस्त्यागो यः स सद्धर्मे भगवद्भक्तिलक्षणं समीचीनं धर्ममिच्छतां परोधर्मश्रेष्ठो भक्तिसाधन एतादृशोऽन्यो धर्मो नास्ति ॥ ८ ॥

भाषा टीका ।

॥ श्रीरुक्मिणीरमणचरणनखिनेभ्यो नमः ॥

॥ नारद उवाच ॥

नारद जी बोले, कि—हे राजन् ! कितने एक ब्राह्मण, कर्म निष्ठा वाले हैं, कोई तप में निष्ठा वाले हैं, बहुत स्वाध्याय में निष्ठा करते हैं, अन्य ब्राह्मण लोग प्रवचन (वेद पढाने) में निष्ठावाले हैं, कितने एक ज्ञान में कितने एक योग में निष्ठावाले ब्राह्मण लोग हैं ॥ १ ॥

परंच देव पितृ कार्य में कव्य (देवताओं के निमित्त प्रदेय अन्न) हव्य (पितरन के निमित्त प्रदेय अन्न) केवल ज्ञान निष्ठावाले ब्राह्मण को ही देना चाहिये, यदि ज्ञाननिष्ठ न मिले तो यथा योग्य ज्ञान तारतम्य देखकर औरों को देवे ॥ २ ॥

देवकार्य में दो ब्राह्मण, पितृकार्य में तीन ब्राह्मण, अथवा दोनों कार्यों में बडा धनी भी एक ही एक ब्राह्मण को भोजन करावे, श्राद्ध में विस्तार कभी न करै ॥ ३ ॥

देश काल के उचित श्रद्धा, द्रव्य, पात्र, पूजन, इन सबके विस्तार से, और श्राद्ध में स्वजनों के अर्पण करने से, ये सब श्राद्धादिक कर्म समीचीन (अच्छे) नहीं होते हैं ॥ ४ ॥

श्राद्ध के देश काल प्राप्त होने पर, प्रथम श्रीहरि को निवेदन कराकर उसी निवेदित मुन्यन्न (मुनियों के अन्न, ओदनादि) को श्रद्धा से विधि पूर्वक सत्पात्र को भोजन करावे, तब वह कामनाओं को पूर्ण करने वाला और अक्षय होता है ॥ ५ ॥

देव, ऋषि, पितृ, भूत, (प्राणी) आत्मा, और स्वजनों को अन्न का विभाग करता हुआ सबों को भगवदात्मक देखे ॥ ६ ॥

धर्म के तत्त्व को जानने वाला श्राद्ध में मांस न देवे । और आप भी स्वयं मांस भक्षण न करे, जैसी पितृ लोगों को मुनि अन्न से परमप्रीति अर्थात् तृप्ति होती है, वैसी पशु हिंसा से नहीं होती है ॥ ७ ॥

वस समीचीन धर्म की इच्छा वाले मनुष्यों को इससे आगे बडा परमधर्म और कोई भी नहीं है, जो कि ? मन वाणी और शरीर से प्राणियों के दंडका त्याग, अर्थात् अपने मन वाणी और शरीर से प्राणि मात्र को पीडा न देना ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अत एवोत्तमाधिकारिणो बाह्यानि कर्म्माणि त्यजन्तीत्याह, एक इति । अनीहा निष्कामाः ज्ञानदीपिते आत्मस्फूर्तिमत्यात्मसंयमने

धर्मार्थमपि नेहेत यात्रार्थं वा ऽधनो धनम् ।
अनीहा ऽनीहमानस्य महाहेरिव वृत्तिदा ॥ १५ ॥
सन्तुष्टस्य निरीहस्य स्वात्मारामस्य यत्सुखम् ।
कुतस्तत्कामलोभेन धावतो ऽर्थेहया दिशः ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

जुहति मनो नियम्य तदन्तरायतया त्यजन्तीत्यर्थः । तदुक्तं सर्वज्ञसूक्तैः——

"प्रत्यक्स्फूर्तिरसत्स्फुर्तिस्तत्तुनिष्ठाविघातकम् ।
संलक्ष्य सन्त्यजेत्कर्म त्यजन्विघ्नहतो ऽन्यथा" ॥

इति ॥ ९ ॥

मा मामेष ध्रुवं हन्यादिति कुतः अकरुणः तत्कुतः असुतृप् प्राणतर्पकः तत्किम् अतज्ज्ञः आत्मतत्त्वाऽनभिज्ञः तथाच श्रुतिः—

"न तं विदाऽथ य इमा जजानाऽन्यद्युष्माकमन्तरं बभूव
नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति"

इति ॥ १० ॥

प्रस्तुतमनुवर्त्तयति-तस्मादिति ॥ ११ ॥

अधर्मवत्साक्षान्निषिद्धवत् ॥ १२ ॥

क्रममनादृत्य पञ्चापि व्याचष्टे-धर्मबाधो धर्मबुद्ध्याऽपि यस्मिन् क्रियमाणे स्वधर्मबाधः अन्यस्य चोदितो ऽन्यस्य परधर्मः उपमेति व्याचष्टे-उपधर्मस्त्विति । शब्दस्य भित् भेदो ऽन्यथा व्याख्यानं यस्मिन् यथा दशावरान्भोजयेदित्युक्ते दशभ्यो ऽवरानिति, शब्दभृदिति पाठे धर्मशब्दमात्रं बिभर्त्तीति तथा यथा गां दद्यादित्युक्ते मरिष्यन्त्या गोदानम् ॥ १३ ॥

स्वधर्मानुष्ठानाऽनन्तरं धर्मभूयस्त्वार्थमपि परधर्मो नाऽनुष्ठेयो ऽनुपयोगादित्याह-स्वभावविहित इति ॥ १४ ॥

किञ्च अधनो धर्मार्थं धनं नेहेत नापेक्षेत धनार्थं न व्याप्रियेतेति वा दैवोपपन्नेनैव स्वधर्मसिद्धेरुक्तत्वात् यात्रार्थमपि नेहेतेत्येतत् प्रपञ्चयति—अनीहेति, सार्द्धैः षड्भिः ॥ १५ ॥ १६ ॥

———

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

यत एवमत एव केचिज्ज्ञाननिष्ठा हिंसागर्भद्रव्ययज्ञान् जहति ज्ञानयज्ञनिष्ठाश्च भवन्तीत्याह-एक इति । यज्ञवित्तमा यज्ञयाथात्म्यविदः अनीहा निष्कामाः केचिद् ज्ञानिनः पूर्वोक्तोत्कृष्टधर्मज्ञानवन्तः कर्ममयान् यज्ञान्पशुपुरोडाशादिद्रव्यकान्यज्ञान् ज्ञानदीपिते आत्मसंयमने जुह्वति. ज्ञानेन परमात्मोपासनात्मकेन दीपिते प्रज्वलिते आत्मनो मनसः संयमो नियमस्तस्मिन् योगाग्नावित्यर्थः । तत्र जुहति "तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिः" इत्यादि पुरुषविद्योक्तविधया क्रियामयान् यज्ञान् हित्वा ज्ञानमयान् यज्ञान् अनुति- ष्ठन्तीत्यर्थः ॥ ९ ॥

एवं जुह्वतामयं भाव इत्याह—द्रव्ययज्ञा इति । द्रव्यैः पशुपुरोडाशादिद्रव्ययज्ञैर्यक्ष्यमाणं दृष्ट्वा भूतानि पश्वादीनि यक्ष्यमाणो निर्घृणोऽज्ञश्चासुतृप् अस्माकमसुभिः तृप्यतीति ता मां ध्रुवं नूनं हन्यादिति बिभ्यतीत्याशयेन द्रव्ययज्ञान् हि ज्ञानयज्ञाननुतिष्ठन्तीत्यर्थः ॥ १० ॥

तस्मात् पूर्वोक्तभूतसुहृत्त्वरूपोत्कृष्टधर्मवित् पुमान् दैवा पनेनेन मुन्यन्नेनाऽपि न तु मांसादिना ऽहरहः नित्यनैमित्तिका क्रियाः सन्तुष्टः कुर्यात् यद्यप्यत्र "मुन्यन्नैः स्यात्परा प्रीतिः न पशु हिंसया" इत्यनेन "द्रव्ययज्ञैर्यक्ष्यमाणम्" इत्यनेन च श्राद्धाग्नीषोमीयादिकर्मणां हिंसागर्भत्वेन पापमिश्रत्वं प्रतीयते "अशुद्धमितिचेन्न शब्दात् ३।१।२५" इति शारीरकाधिकरणन्यायां तत्र ह्यग्नीषोमीयादिकर्मणां पशुहिंसादिरूपपापमिश्रत्वेनाऽशुद्ध युक्तत्वं परिचोद्य,नैतद्युक्तम् कुतः शब्दादग्नीषोमीयादेः सं पनस्य स्वर्गलोकप्राप्तिहेतुतया हिंसात्वाभावशब्दात्पशोर्हि सं पननिमित्तां स्वर्गलोकप्राप्तिं वदन्तं शब्दमामनन्ति "हिरण्य रीर ऊर्द्ध्वं स्वर्गं लोकमेति" इत्यादिकमतिशयिताऽभ्युदयसाधन व्यापारोऽल्पदुःखदोऽपि न हिंसा, प्रत्युत रक्षणमेव तथा मन्त्रवर्णः "न वा उ वैतन्म्रियसे न रिष्यसि देवा ॐ इदे पथिभिः सुगेभिः यत्र यन्ति सुकृतो नापि दुष्कृतस्तत्र त्वा दे सविता दधातु" इति. चिकित्सकश्च तादात्विकाल्पदुःखकारिण रक्षकमेव वदन्ति पूजयन्ति च तज्ज्ञा इति हिंसात्वाभा सिद्धान्तितः । तथाऽप्यत्र हिंसागर्भत्वमात्रे पश्वादिहिंसायाश्च भूतसुहृदां ज्ञानिनामननुरूपत्वे च तात्पर्यं नतु यागीयहिंसा पापत्वेऽपि,त एव केवलं भूतानि बिभ्यतीत्येतावदेवोक्तं नतु तद्धिं सायाः पापत्वमपीत्यतो न शारीरकन्यायविरोधः ॥ ११ ॥

तदेवं प्रातिस्विकान् साधारणांश्च वर्णाश्रमधर्मानभिधाय तेषां धर्माभासेभ्यो विविक्तत्वज्ञापनाय तान् सङ्गृह्य वर्ण तेषां त्याज्यत्वमाह—विधर्म इति । विधर्मादयः पञ्चेमे धर्माभा अधर्मस्य वृक्षरूपस्य शाखाः शाखाभूताः ततस्तान् धर्मया त्स्यचित् अधर्मवत्त्यजेत् ॥ १२ ॥

विधर्मादीन् पञ्च व्याचष्टे-धर्मबाध इति । धर्मबुद्ध्या यस्मिन् क्रियमाणे स्वधर्मबाधः स्यात् स विधर्म इत्यर्थः । अन्यस्य वर्णादेश्चोदितो विहितो धर्मः स ब्राह्मणादेः परधर्मः उप इति पाषण्डः वेदविरुद्धागमोक्तः दम्भो वा परवञ्चनार्थो उपधर्म इत्यर्थः । छलं व्याचष्टे-शब्दभिच्छल इति । शब्दस्य प्रमाण स्य भिदन्यथा व्याख्यानं यस्मिन् । यथा द्वादशावरान् भोज

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

इत्युक्ते द्वादशसंख्याकेऽर्थोऽवरानेकादश दश वेत्यादि. शब्दभृदिति पाठे धर्मशब्दमात्रं विभर्तीति तथा यथा गां दद्यादित्युक्ते मरिष्यन्त्या गोर्दानमिति ॥ १३ ॥

आभासं व्याचष्टे—यस्त्विति। पुम्भिः स्वेच्छया पृथक् चतुर्भ्यःआश्रमेभ्यः पृथक्कल्पितः आश्रमो ऽवधूतादिः स्वधर्मानुष्ठानाऽनन्तरमपि धर्मभूयस्त्वार्थमपि परधर्मो नानुष्ठेयोऽनुपयोगादित्याह—स्वभावेति। स्वभावेन ब्राह्मणादिस्वभावा ऽनुगुणत्वेना ऽभिहित इज्यादिरूपः स एवाऽस्योपशान्तये मनःप्रशान्तये कल्पतेऽतो न परधर्मस्योपयोग इत्यर्थः ॥ १४ ॥

एवं भगवदुपासनाङ्गभूता वर्णाश्रमधर्मा उक्ताः अथ प्रधान भूतभगवदुपासनात्मकाष्टांगयुक्तभक्तियोगानुष्ठानप्रकारं वक्ष्यंस्तावत्तद्विरोधिनां कामक्रोधलोभभयशोकमोहदम्भतापत्रयनिद्रादीनां जयोपायानाह—धर्म्मार्थमपीत्यादिना। पूर्त्तमिष्टं तथा सत् इत्यन्तेन तत्र तावदसन्तोषस्य लोभात्मकस्याऽनर्थावहत्वं तन्निमित्ताया धनलिप्सायास्त्याज्यत्वं च वक्तुं दैवादुपनतेनैव द्रव्येण स्वधर्मं देहधारणं च कुर्यान्न तु तदर्थं धनं कामयेतेत्याह—धर्मार्थमिति। अधनो निर्द्धनः पुमान् स्वधर्म्मार्थमपि यात्रार्थं देहधारणार्थमपि वा धनं वित्तं नेहेत न कामयेत यात्रार्थमपि नेहेतेत्येतत्प्रपञ्चयति—अनीहेति, सार्द्धैः षड्भिः। महाऽहेरिवाऽनीहमानस्य यात्रार्थं धनार्थमपि चेष्टामकुर्वतः दैवोपनतेन प्राणान् धारयमाणस्येत्यर्थः। अनीहाऽकामना एव वृत्तिदा जीवनावहा दैवादुपनतेन जीवतोऽकामयमानस्याकामनैव नितरां सुखजननद्वारा वृत्तिदेति भावः ॥ १५ ॥

तदेवाह—सन्तुष्टस्येति। निरीहस्य सन्तुष्टस्य दैवाल्लब्धेन सन्तुष्टस्य आत्मारामस्य स्वस्यात्माऽन्तरात्मा परमपुरुषस्तस्मिन् रममाणस्य स्वशरीरकब्रह्मानन्दाऽनुभवपरस्य यत्सुखं तत्कामलोभेन काम्यन्त इति कामाः शब्दादयो विषयास्तेषु लोभेन सङ्गेन निमित्तेनार्थेहया धनेच्छया कामलोभनिमित्तकधनेच्छया सर्वा दिशः प्रतिधावतो भ्राम्यमाणस्य पुंसः कुतो हेतोर्भवति अनीहया यत्सुखं तदीहया नास्तीत्यर्थः ॥ १६ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

श्राद्धादिकर्मग्रामो यत्यादिपात्रमुद्दिश्य कर्तव्यमित्यभिहितम् अधुना परमभागवतास्तदपि न कुर्वन्तीत्याशयेनाह—एक इति, "सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज"इति शिक्षिताः एके भगवदेकार्पितदेहयात्रा ज्ञानिनः कर्ममयान् श्राद्धादियज्ञानात्मसंयमने मनःसंयमनाग्नौ जुह्वति मानसयागं कुर्वन्तीत्यन्वयः। आत्मसंयमनं विशिनष्टि—ज्ञानेति। ज्ञानेन्धनदीपिते यज्ञवित्तमाः मानसयज्ञप्रयोगपटवः अनीहा इति हेतुगर्भविशेषणं निवृत्तमार्गप्रवृत्तत्वादित्यर्थः ॥ ९ ॥

नतु, द्रव्ययज्ञं सन्त्यज्य ज्ञानयज्ञकरणे किं कारणमित्याशङ्क्य भूतभयजनकहेतुत्वेन निरयहेतुत्वमित्याशयेनाह—द्रव्येति, एष द्रव्ययज्ञकारिसमुदायो मा मां हन्यादिति भूतानि बिभ्यतीत्यन्वयः। "अग्नीषोमीयं पशुमालभेत"इति विहितत्वात्तदुक्तं कुर्वतो दृष्ट्वा कथं भयं स्यात् ? इत्यत उक्तमतज्ज्ञ इति, विध्यभिप्रायमजानन् "ब्रह्मार्पणं ब्रह्महविः"इत्यादिविहितविधेरभिप्रायः। अत एवाऽकरुणा इत्युक्तम् एतादृशो सुरदेश इत्याशयेनोक्तमसुतृविति, "नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति"इति श्रुतिर्दौत्यनेन गृह्यते. ध्रुवमित्ययं शब्दः श्रीहरिविमुखस्यानर्थं निश्चाययति। "असुन्वन्तं समं जहिदूणाशं यो न ते मयः"इति श्रुतेः। ते मयस्त्वत्प्रधानकः दूणाशं दुर्नाशम् असुन्वन्तं सुन्वद्विरोधिनम् अन्यथा "सुन्वन्तं वा पराचिच्छीर्षा ववृजुस्त इन्द्रा यज्वानो यज्वभिः स्पर्द्धमानाः" इति श्रुतेः ॥ १० ॥

नतु, तर्हि "नित्यनैमित्तिके कुर्यात्प्रत्यवायजिहासया"इति विधानं व्यर्थमिति तदुपायमाह—तस्मादिति। दैवोपपन्नेनाऽयाचितादिविधिना प्राप्तेन नीवारादिना तदभावे उत्पन्नेन फलशाकादिना ॥११॥

धर्मवित्त्वं नाम तत्प्रतिपक्षधर्मभेदलक्षणे ज्ञाते शुद्धं स्यादित्यतस्तच्छाखा आह—विधर्म इति, ॥ १२ ॥

अधर्मवद्विधर्मादीनां स्वरूपं दर्शयति—धर्मेति। अधर्मवद्धर्मपीडनं विधर्मः अन्यस्य क्षत्रियादेश्चोदितो विहितो धर्मो ब्राह्मणेनानुष्ठीयमानः परधर्मः दम्भेन क्रियमाणो धर्मो दंभः स चोपधर्म इत्युच्यते धर्म्मशब्दार्थमिच्छतां धारको हि धर्मस्तमर्थं भिनत्तीति स छलधर्म इत्युच्यते ॥ १३ ॥

पुम्भिः काम्यफलेच्छया कृतो यो धर्मः स आभास इत्युच्यते हि शब्दः इयानेषां भेद इत्याह—धर्मप्रतिपक्षभेदस्वरूपमुक्त्वा धर्मप्रयोजनमाह—आश्रम इति। हि शब्द उत्तरत्रापि सम्बद्ध्यते तेन वर्णं लक्षयति—यो ब्राह्मणादिवर्णो यश्च ब्रह्मचर्याद्याश्रमः अत्र तत्तत्स्वभावानुसारेण भगवदर्पणबुद्ध्या पृथक् पृथग् विहितो यो धर्मः स जीवस्योपशान्तये संसारनिर्मूलनाय कल्प्यते समर्थ्यते शास्त्रेष्विति शेषः। स्वभावपदसामर्थ्यात्सात्त्विको धर्मो मुक्तिहेतुर्नान्यः। राजसतामसः स्वर्गनरकादिहेतुः—

"धर्मो भवत्यधर्मोऽपि कृतो भक्तैस्तवाच्युत !।
पापं भवति धर्मोऽपि यो न भक्तैः कृतो हरे ! " ॥

इति वचनात् अस्य जीवस्योपशान्तये मोक्षायेति वा ॥ १४ ॥

नतु, निष्कर्मणा पुरुषेण धर्मकरणं दुःसाध्यं अर्थाभावात्तस्मादधनेन तदर्थं कृष्यादिकं कर्म कर्तव्यमिति तत्राह—धर्मार्थमिति। तर्हि देहादियात्रार्थं कर्म कर्तव्यम् अन्यथा तन्नाशे न पुरुषार्थोऽनुदय इति तत्राह—यात्रार्थमिति। नन्वेवं चेत्कथं देहयात्रासिद्धिः ? इति तत्राह—अनीहेति। अत्रानीहा स्वदेहपोषणायासनिवृत्तिः महाहेरजगरस्य ॥ १५ ॥

निरन्तरं भगवदुपासनामृतपायिनोऽनीहा परमानन्दकारणमित्याह—सन्तुष्टस्येति। यदृच्छया सन्तुष्टस्य यत्सुखं कामलोभेन कामभोगेच्छयार्थेहया धनयाचनप्रवृत्त्या च दिशो धावतः पुंसः कुतः कस्मात्कर्मणस्तत्सुखं लभ्यते ? इत्यन्वयः ॥ १६ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

धर्म्मबाध इति सार्द्धकम् । पाषण्डो वेदबाह्यः दम्भः सकपटः ॥ १३ ॥

स्वभाव इत्यर्द्धकम् ॥ १४—१७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अत एवोत्तमाधिकारिणो बाह्यानि कर्माणि त्यजन्तीत्याह—एक इति अनीहा निष्कामाः आत्मनो मनसो यत् संयमनं निग्रहः ज्ञानेन दीपितं तत्र कर्ममयान् यज्ञान् कर्माणि जुह्वति मनोनियमनस्यान्तरायतया त्यजन्तीत्यर्थः ॥ ९ ॥

एषः अकरुणो मा मां हन्यात् हनिष्यति अतज्ज्ञः आत्मतत्वाऽनभिज्ञः तथाच श्रुतिः "न तं विदाथ य इमा जजानाऽन्य द्युस्माकमन्तरम्बभूव नीहारेण प्रावृता जल्प्या (तार्किकाः मीमांसकाः कार्म्मिन्यः)श्चासुतृप उक्थशास(:कार्मिणः)श्चरन्तीति ॥१०॥

सर्वत्र सन्तुष्टः भूतान्यहिंसन्नित्यर्थः ॥ ११ ॥

अधर्म्मवत् निषिद्धमिव ॥ १२ ॥

क्रममनादृत्य पञ्चेमा व्याचष्टे—धर्मबाधः धर्मबुद्ध्यापि यस्मिन् क्रियमाणे स्वधर्मबाधः स विधर्मः अन्यस्य चोदितो विहितो यः सोऽन्यस्य परधर्मः यः पाषण्डः जटाभस्मादिधारणमयः दम्भः स्वस्य धार्मिकत्वज्ञापनामयो वा स उपधर्मः उपमा धर्मस्योपमा न तु धर्म इत्यर्थः । शब्दस्य भित् भेदः प्रकारान्तरेण व्याख्यानं यत्र दशावरान् विप्रान् विभोजयेदित्यत्र बहुव्रीहिं त्यक्त्वा दशभ्योऽवरान् नवाष्टौ वा नत्वेकादशेति तत्पुरुषव्याख्यानेन यः शब्दभित् स छलः । शब्दभृदिति पाठे धर्मशास्त्रमात्रं बिभर्तीति तत् यथा गां दद्यादित्युक्ते मरिष्यन्त्यागोदानम् इच्छया कृतः कल्पितदेवतापूजादिमयो यः स आभासः ॥ १३ ॥

तस्मात् स्वस्य भावेन जन्मनैव ब्राह्मणादि—जात्यैव विहितः ॥ १४ ॥

अधनो निर्द्धनः यात्रार्थं देहनिर्वाहार्थं न ईहेत न वाञ्छेत् धनं प्रति न चेष्टेतेति वा अनीहमानस्य अवाञ्छतः अनीहा निष्कामत्वं निर्व्यापारत्वं वा महाहेरजगरस्य ॥ १५ ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एतदेव सदाचारेण दृढीकरोति—एके इति । एके उत्तमाधिकारिणः उत्तमत्वमाह—यज्ञवित्तमाः—

"यत्करोषि यदश्नासि यज्जुहोसि ददासि यत् ।
यत्तपस्यसि कौंतेय ! तत्कुरुष्व मदर्पणम् ॥
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे" ॥

इति भगवदुक्तरीत्या यज्ञरहस्यज्ञाः ज्ञानिनः भगवद्विषयकज्ञानवन्तः अनीहा निष्कामाः कर्ममयान् ज्ञानभक्तिप्राधान्यरहितान् भगवदाराधनविरुद्धान् संसारफलकानित्यर्थः । आत्मनो मनसः संयमने भगवत्प्रावण्ये ज्ञानदीपिते भगवानेव सर्वात्मनाऽऽराधनीय इत्येवंभूतेन ज्ञानेनोद्दीपिते जुह्वति निःक्षिपन्ति न कुर्वन्तीत्यर्थः ॥ ९ ॥

तस्मात्सकामाधिकारिविषयानि भूतभयावहानि हित्वा निष्कामः सन् भगवदाराधनात्मकानि कर्माणि कुर्यादित्याह—द्रव्ययज्ञैरिति, द्वाभ्याम् । द्रव्ययज्ञैर्भूतभयावहपशुपुरोडाशादिसाध्यैः मा माम् ॥ १० ॥ ११ ॥

अधर्मो निषिद्धाचारः पापद्रुमस्तस्य शाखाः ॥ १२ ॥

धर्मस्य स्वधर्मस्य बाधो यस्माद्धर्मदृष्ट्या क्रियमाणात्स विधर्मः स्यात् अन्येनोदितः वनस्थादेर्विहितो गृहस्थादेः परधर्मः पाषण्डः वेदविरुद्धस्मृतिप्रोक्तः दम्भो वा स्वस्य धार्मिकत्वख्यापनाय प्रकाशितो वा उपधर्मः उपमा शब्दस्य भित् भेदनं दुराग्रहादिना मुख्यार्थाद्वियोजनं छलः ॥ १३ ॥

यस्तु आश्रमात्पृथक् स्वेच्छया कल्पितः स आभासः स्वधर्मं प्रशंसति—स्वभावेति । स्वभावविहितो वेदेन स्वभावतः स्वार्थं प्रामाण्यतो विहतो धर्मः प्रशान्तये कस्य नेष्टः सर्वस्येष्ट एव तस्मादधर्मशाखाः दूरतस्त्याज्या इति भावः ॥ १४ ॥

अधनो धर्मार्थं स्वभोगार्थं वा धनश्रमं न कुर्यात्किन्तु अनुयत्नेन धर्मरक्षणं कुर्यादित्याह——धर्मार्थमपीत्यादिना । अनीहोपरामः ॥ १५ ॥

स्वस्य क्षेत्रज्ञः स्वात्मान्तर्यामी तदारामस्यात एव सन्तुष्टस्यात एव निरीहस्य यत्सुखं तत् कामस्य भोगस्य लोभेन वा अर्थस्य धनस्येहा तथा दिशो धावतः कुतो न कुतोऽपि ॥ १६ ॥

भाषा टीका ।

कितने एक यज्ञ के परमवेत्ता ज्ञानीलोग, ज्ञान से दीपित आत्मसंयम रूप अग्नि में कर्ममय यज्ञों को हवन करते हैं, अर्थात् मन का नियमन कर कर, उसके विघ्न रूप कर्म की खटपट छोड केवल श्रीहरि ही में चित्त लगाते हैं ॥ ९ ॥

द्रव्य यज्ञ से यजन करने वाले को देखकर सब जीव बडा भय करते हैं, कि अब यह प्राण पोषक, निर्दयी, धर्म के तत्त्व को न जानने वाला, इन विचारे दीन जीवों को मारेगा ॥ १० ॥

तस्मात् धर्म को जानने वाला, प्रारब्ध से प्राप्त जो मुनिअन्न उसी से सन्तुष्ट होकर दिन २ प्रति नित्य नैमित्तिक क्रियाओं को चलावै ॥ ११ ॥

विधर्म, परधर्म, आभास, उपमा, छल, ये पांच अधर्म की शाखायें हैं, इसलिये धर्मज्ञ पुरुष इन को अधर्म की तरह दूर से त्याग देवै ॥ १२ ॥

सदा सन्तुष्टमनसः सर्वाः सुखमया दिशः ।
शर्कराकण्टकादिभ्यो यथोपानत्पदः शिवम् ॥ १७ ॥
सन्तुष्टः केन वा राजन्न वर्तेतापि वारिणा ।
औपस्थ्यजैह्व्यकार्पण्याद्गृहपालायते जनः ॥ १८ ॥
असन्तुष्टस्य विप्रस्य तेजो विद्या तपो यशः ।
स्रवन्तीन्द्रियलौल्येन ज्ञानं चैवाऽव कीर्यते ॥ १९ ॥
कामस्याऽन्तं च क्षुत्तृड्भ्यां क्रोधस्यैतत्फलोदयात् ।
जनो याति न लोभस्य जित्वा भुक्त्वा दिशो भुवः ॥ २० ॥
पण्डिता बहवो राजन् ! बहुज्ञाः संशयच्छिदः ।
सदसस्पतयो ऽप्येके असन्तोषात्पतन्त्यधः ॥ २१ ॥
असङ्कल्पाज्जयेत्कामं क्रोधं कामविवर्जनात् ।
अर्थानर्थेक्षया लोभं भयं तत्त्वावमर्शनात् ॥ २२ ॥
आन्वीक्षिक्या शोकमोहौ दम्भं (१) महदुपासया ।
योगान्तरायान्मौनेन हिंसां (२) कायाद्यनीहया ॥ २३ ॥
कृपया भूतजं दुःखं दैवं जह्यात्समाधिना ।
आत्मजं योगवीर्येण निद्रां सत्त्वनिषेवया ॥ २४ ॥

भाषा टीका ।

जो धर्म की बाधा करे वह विधर्म होता है, पराये को आचरण के लिये कहा हुआ धर्म परधर्म है । पाखण्ड अथवा दम्भ का नाम उपमा । है जिसको उपधर्म भी कहते हैं, जो शब्द के अर्थ का अनर्थ करने से सिद्ध हो, उसको छल कहते हैं ॥ १३ ॥

आभास उसे कहते हैं कि? जो आश्रमधर्मों से पृथक पुरुषों ने अपनी इच्छा से कल्पन किया हो ॥ मखाँ जिस जाति वर्ण वा आश्रम को उन के स्वभाव से जो शास्त्र विहित धर्म है, वह धर्म किस मनुष्य को शान्ति नहीं दे सक्ता है ॥ १४ ॥

निर्धन पुरुष धर्मार्थ भी धन की प्राप्ति के लिये चेष्टा- (उपाय) न करे, एवं देह यात्रा के लिये भी धन प्राप्त्यर्थ चेष्टा (उपाय) न करे, यह चेष्टा का न करना ही उस पुरुष को अजगर के तरह वृत्ति (जीविका) देने वाला है ॥ १५ ॥

निश्चेष्ट सन्तुष्ट स्वात्मारामों को जो सुख है, काम के लोभ से धन की इच्छा से दशों दिशाओं को दौड़ने वाले पुरुष को वह सुख कहां से होगा । ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

उपानहौ पादयोर्यस्य स उपानत्पात्तस्य ॥ १७ ॥

गृहपालः श्वा तद्वदाचरति ॥ १८ ॥ १९ ॥

क्षुधा तृषा च जनः कामस्यान्तं याति अन्नोदकातिरिक्तकामान्तराभावात् क्रोधस्य वाऽन्तं याति एनस्य क्रोधस्य यत्फलं हिंसा तस्योदयान्निष्पत्तेः दिशो जित्वा ऽपि भुवं भुक्त्वा ऽपि लोभस्य नैवान्तं यातीत्यर्थः ॥ २० ॥ २१ ॥

इदानीं कामादिजयोपायानाह—सङ्कल्पादिति, चतुर्भिः । जयेदिति यथापेक्षमन्वेति· अर्थे ऽनर्थदर्शनेन तत्त्वाऽवमर्शनादद्वैताऽनुसन्धानेन ॥ २२ ॥

आन्वीक्षिक्या आत्मानात्मविवेकेन महतां सात्त्विकानां सेवया योगस्यान्तरायान् लोकवार्तादीन् ॥ २३ ॥

येभ्यो भूतेभ्यो भयं जायेत तेष्वेव कृपया हिताचरणेन दैवं देवोपसर्गमित्त वृथा मनःपीडादि नतुक्तं याज्ञवल्क्येन "विमना विफलारम्भः संसीदत्यनिमित्ततः" इति आत्मजं देहजम् । योगवीर्येण प्राणायामादिबलेन सत्त्वनिषेवया सात्त्विकाहारादिना ॥ २४ ॥ २५ ॥

(१) महदुपाश्रयात् (२) कामाद्यनीहया इति विज० पा० ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं दैवोपनतया यात्रयाऽर्थेच्छायास्त्याज्यत्वमुक्तम् अथाऽसन्तोषस्य दुःखहेतुत्वं वक्तुं तावत् सन्तोषस्य सुखहेतुत्वमाह, सदेति । सदा सन्तुष्टं दैवादुपनतेनैव सन्तुष्टं मनो यस्य तस्य पुंसः सर्वा दिशः सुखमयाः यत्र क्वापि गतस्य तस्य सुखमेवेत्यर्थः । यथा उपानहौ पादत्राणे पादयोर्यस्य स उपानत्पात् तस्योपानत्पदः शर्कराकण्टकादिभ्योऽपि शिवं सुखमेव तद्वत् ॥ १७ ॥

हे राजन्! सन्तुष्टश्चेत्को नु पुमान् वारिणापि न वर्तेत सन्तुष्टस्तु वारिणापि यात्रां विधाय सुख्यतीत्यर्थः । असन्तुष्टश्चेज्जन औपस्थ्य-जैह्व्यकार्पण्यादुपस्थजिह्वासुखार्थदैन्यान्निमित्ताद् गृहपालायते गृहपालः श्वा तद्वत् आचरति ॥ १८ ॥

किञ्चा ऽसन्तुष्टस्य ब्राह्मणस्य तेज आदयः स्रवन्ति तेजो ब्रह्मवर्चसं विद्या शास्त्रजन्यं ज्ञानं तप अनशनादिरूपं यशः प्रथा तथेन्द्रियलौल्येनेन्द्रियार्थासक्त्या ज्ञानं विवेकादिजन्यमवकीर्यते च विक्षिप्यते च अपगच्छतीत्यर्थः ॥ १९ ॥

किञ्च कामक्रोधादयः सावधिकाः लोभस्त्वसन्तोषात्मको निरवधिक इत्याह—कामस्येति । जनः कामक्रोधलोभवान् जनः क्षुत्तृड्भ्याम् निवृत्ताभ्यामिति शेषः । निवृत्ताभ्यां क्षुत्तृड्भ्यां निमित्तभूताभ्यां कामस्यान्तं याति अन्नोदकादिना क्षुत्पिपासादौ निवृत्ते सति अन्नादिव्यतिरिक्तकामान्तराभावात्कामस्यान्तं गच्छतीति भावः । तथा क्रोधस्याप्यन्तं तत्फलोदयात् तस्य क्रोधस्य यत्फलं परपीडादिरूपं तस्योदयान्निष्पत्तेः हेतोर्याति लोभस्यान्तं तु भुवो दिशो जित्वा भुक्त्वाऽपि नैव याति ॥ २० ॥

अत एव हे राजन्! बहवः पंडिताः शास्त्रजन्यज्ञानवन्तः बहुज्ञाः बहुविधलौकिकवैदिकन्यायाभिज्ञाः अत एव संशयान् छिन्दन्तीति तथा ऽत एव सदसः सभायाः पतयोऽप्येके जनाः असन्तोषाद्धेतोरधो नरके पतन्ति ॥ २१ ॥

एवमसन्तोषस्याऽनर्थावहत्वमुक्तम् अथ कामादीनां जयोपायानाह—असङ्कल्पादिति, चतुर्भिः । असङ्कल्पाद्भोगार्हतावुद्धिवर्जनात्कामं शब्दादिविषयस्पृहां जयेत् । क्रोधं तु कामविवर्जनाज्जयेदित्यनुषङ्गः । क्रोधः कामानुभावविरोधिविषयको ऽमर्षः लोभं त्वसन्तोषात्मकम् अर्थाऽनर्थेक्षयाअर्थे धने ऽनर्थेक्षयाऽनर्थहेतुत्वदर्शनेन जयेत् । भयं तु तत्त्वावमर्शनात् चिदचिदीश्वरयाथात्म्यरूपतत्त्वत्रयाऽनुसन्धानात् ॥ २२ ॥

आन्वीक्षिक्या—

"जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि" ॥ इत्यादि-

पर्यालोचनयेत्यर्थः । जातस्य विनाशो ध्रुव इति पर्यालोचनया शोक मोहौ, दम्भन्तु. महतामदाम्भिकानां ज्ञानिनामुपासनया सेवया. योगान्तरायान् योगस्यान्तरायभूतान्, लोकवार्तादींस्तु मौनेन. भूतहिंसां कायाद्यनीहया स्वदेहादिषु निस्पृहया जयेत् ॥ २३ ॥

भूतजं दुःखमाधिभौतिकं दुःखं कृपया येभ्यो भूतेभ्यः स्वस्य दुःखं तेष्वेव कृपया दैवमाधिदैविकं दुःखं समाधिना, इदं प्राप्तमेव किमस्माभिर्विधेयमित्येवं मनःसमाधानेन आत्मजं देहजमाध्यात्मिकं दुःखं योगवीर्येण योगबलेन प्राणायामादिना निद्रां सत्त्वनिषेवया सात्त्विकाहारसेवनेन जह्यात् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दुस्त्यजेषु विषयेषु सर्वतो दिशं जाग्रत्सु निष्कर्मणः क्व सुखमुपलभ्यते ? इति तत्राह–सदेति "यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः" इत्यादेः एतमर्थं निदर्शयति–शर्करेति । शिवं सुखमाप्नोतीति शेषः । शर्कराः पाषाणशकलानि ॥ १७ ॥

अन्नाद्यर्जनायासाभावे ऽपि प्राणधारणार्थं पानीयादिप्रयत्नः स्यादेव "आपोमयाः प्राणाः" इति श्रुतेः ! इति तत्राह–सन्तुष्ट इति केन वा येन केनापि प्रयत्नमन्तरेणोपनतेन द्रव्येण लोकविलक्षणेन परमात्मना वा सन्तुष्टः विषयालम्बुद्धिमान् वारिणाऽपि न वर्ततेत्यन्वयः । ननु, सर्वात्मना सर्वनिषेधस्य कोऽभिप्रायः? इत्याशङ्क्य किञ्चिदभ्यनुज्ञाते महान्दोषः स्याज्जलस्यन्दनवत् [illegible] विना स्वतन्त्रवज्जनस्य कार्पण्यदर्शनाच्चेत्याह–औपस्थ्येति । गृह-पालयते ऽसौ गृहपालः सारमेयस्तद्वच्चरति–

"कृशः काणः खञ्जः श्रवणरहितः पुच्छविकलो
व्रणी पूयक्लिन्नः कृमिकुलशतैरावृततनुः ॥
क्षुधाक्रान्तो जीर्णो ह्यपि वरकपालार्पितगलः
शुनीमन्वेति श्वा हतमपि च हन्त्येव मदनः"

इत्यादेः ॥ १८ ॥

उक्तार्थाऽनङ्गीकारे बाधकमाह–असन्तुष्टस्येति । तेजः शापानुग्रहशक्तिः रेतोलक्षणं वा. विद्या शास्त्रविषया, ज्ञानं मनोत्थमखण्डं शास्त्रानुपंक्ति दीपज्वालानिभमवकीर्यते विक्षिप्यते शिक्षा निक्षिप्तपांसुपिण्डवन्नश्यतीत्यर्थः । 'कॄ विक्षेपे' इति धातोः कृपणनिपाणाहतमेतुवत् सुडागमाभावः छान्दसः "अवकीर्णी क्षतव्रत" इत्यभिधानम् असन्तुष्टस्य विषयानलम्बुद्धेः ॥ १९ ॥

अत्रानलम्बुद्धिर्द्वेधा विषयाणामुपर्युपरिभोगतृष्णैका द्वितीया विश्रान्तिनिश्चयाने तत्पर्याप्तं भवतीत्यतो न व्ययामि किन्तु राशीकरोमीत्याकाङ्क्षा तत्र प्रथमाया अलाभे कामः क्रोधश्च तयोरुभयोः शान्तिरनायाससाध्या द्वितीयाया लोभाऽपरपर्यायाया नाशो दुःसाध्य इत्याह–कामस्येति । जनोऽङ्कुरिताभ्यां क्षुत्तृड्भ्यां कामस्योपस्थादिविषयतृष्णापरपर्यायस्यान्तं नाशं याति कुत इत्यत उक्तं हीति "विषया विनिवर्तन्ते निराहारस्य देहिनः" इति स्मृतेः प्रसिद्धेः एतत्फलोदयात् एनयोः क्षुत्तृषोरशनपानलक्षणाभ्यां तृप्तिलक्षणफलोत्पत्तेः तदलाभोत्पन्नस्य क्रोधस्य च शान्तिं याति. दिशो जित्वा भुवो भुक्त्वा ऽपि लोभस्यान्तं याणाद्युपार्जितवित्तव्ययेच्छालक्षणं न यातीत्यन्वयः ॥ २० ॥

ननु, बहुत्यागेन वित्तव्ययेन स्वयं नष्टः स्यात्

"अल्पसारस्तु यो मोहाद्विस्तारं कर्तुमिच्छति
स विनश्यति दुर्मेधा नारिकेलाम्बुकं यथा"

इति वचनात् तस्माल्लोभो महान्गुणो देहयात्राहेतुत्वादित्यत्र पण्डिता इति । पाण्डित्यं नाम सभाकम्पादिदोषराहित्यं तत्पूर्वस्यापि किं न स्यादित्यत उक्तं, बहुज्ञा इति । सर्वज्ञं अदृष्टार्थज्ञानमित्याह–संशयच्छिद इति । एवंविधधर्मवन्तः क इति तत्राह, सदस

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ह्पतय इति । एताहशाश्च केचनेत्याह–एक इति । एवंविधा अपि असन्तोषाल्लोभादधः कीटादियोनौ पतन्तीति यस्मात्तस्माद्वैष्णवविषय एव लोभो गुणो नतु वैष्णवविषय इति भावः।एके असन्तोषादिति सन्धिकार्याभावो यदि तर्हि इति पदद्वयाध्याहारसूचनार्थः यद्येवंविधा असन्तोषाद्यथा योग्यं यथालब्धद्रव्यं यथापात्रं न नियुञ्जते तर्ह्यधः पतन्तीत्यभ्युपगमसिद्धान्तो ऽयं न केवलमसन्तुष्टस्य विद्यादि नाशो ऽपि त्वधऽ पातः स्यादित्यतो वाह–पण्डिता इति ॥ २१ ॥

इदानीं कामादिजयोपायमाह–असङ्कल्पादिति।अत्र सङ्कल्पो ऽपि द्विविधः पुण्यविषयःपापविषयश्चेति अत्रासङ्कल्पात्पापविरुद्धपुण्यविषयादित्यर्थः। कामान् निषिद्धान् क्रोधः कामितालाभकारणकः कारणनाशेन कार्यनाश इत्यर्थः। अनर्थकार्यस्य लोभस्य नाशः केनेति तत्राह–अर्थेति। अर्थेषु राजादिनिमित्तानर्थदर्शनेनासञ्चयो नश्वरफलहेतुरिति निरीक्षणेन च तत्त्वावमर्शनात् तत्त्वज्ञानाद्भयं वैष्णवसिद्धान्तसञ्चलनम् "भी भयसञ्चलनयोः" इति धातुः ॥ २२ ॥

शोकमोहौ देहगताऽन्तऽकरणस्यैव नान्यस्य ज्ञानानन्दस्वरूपस्याऽसम्भवात् इत्यादिकया आन्वीक्षिक्या अनुकूलतर्कोपेतव्याप्तिज्ञानेन आत्मन्यविद्यमानमहिमारोपो दम्भः महतां प्रावण्यादिगुणाकाराणां आत्मस्तुतिवर्जितानां पुरुषाणां निरन्तरनिषेवया सद्गुणाभ्यास लक्षणाय योगान्तरायान् भगवदुपासनाविघ्नान्मौनेन सम्भाषणवर्जनेन जयेदिति शेषः। कामाद्यनीहया कामादिनिषिद्धेच्छाराहित्येन विवादलक्षणां हिंसां जयेद् इत्यन्वयः ॥ २३ ॥

भूतजं भौतिकं दुःखमुन्मादादिकं वा कृपया मन्त्रौषधसामर्थ्येन 'कृपू सामर्थ्ये' इति धातुः अनुक्रोशलक्षणगुणेन वा दैवमाधिदैविकं दुःखं समाधिनेन्द्रादिदेवताध्यानेन "यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट् करिष्यन्, "कारीर्या यजेत वृष्टिकामः" इति श्रुतेः। अनावृष्ट्यादिदुःखं जह्यात् क्षीरसागरतरङ्गसीकराप्लुतश्रीनारायणध्यानेन वा आत्मजमाध्यात्मिकं दुःखं योगवीर्येण अष्टाङ्गसामर्थ्येन पवनवशीकरणेनेत्यर्थः। सत्त्वनिषेवया सात्त्विकपुरुषनिषेवया निद्रामज्ञानम् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सन्तुष्ट इति । केन वा न वर्त्तेत अपितु वारिणाऽपि वर्त्तेतेत्यर्थः ॥ १८–२१ ॥

असङ्कल्पादिति युग्मकम्। तत्त्वावमर्शेन परमेश्वराधीनताविचारेण. कृपयेति सार्द्धकम् ॥ २२—२४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

उपानहौ पादयोर्यस्य स उपानत्पात् तस्य ॥ १७ ॥

केन वा न वर्त्तेत अपितु वारिणापि वर्त्तेतेत्यर्थः । उपस्थस्य कर्म औपस्थ्यं तत्र कार्पण्यात् गृहपालः श्वा ॥ १८ ॥

अवकीर्य्यते अधः क्षिप्तं भवति ॥ १९ ॥

असन्तोषो हि लोभमूलको भवति लोभस्य तु दुर्जयत्वादसन्तोषो दुर्वार इत्याह–कामस्येति, द्वाभ्याम् । क्षुत्तृड्भ्यामिति भोज्यस्यालाभे क्षुत्तृषोरतिदीप्तत्वे धातुदाहप्रवृत्तेरिति भावः । एतस्य क्रोधस्य यत्फलं हिंसा तस्योदयान्निष्पत्तेः दिशो जित्वाऽपि भुवो भुक्त्वापि लोभस्य वासनात्मकस्यान्तं न प्राप्नोति भक्ष्यविषयकलोभस्य तूदरपूर्त्यैव शान्तिरिति दुरुपशमत्वाभावान्नासौ पृथग्निर्दिष्टः ॥ २० ॥

लोभप्राबल्ये गुणानां वैयर्थ्यमाह—पण्डिता इति ॥ २१ ॥

तर्हि कथमेतान् जयेत् ? इत्यपेक्षायामाह—असङ्कल्पात् स्त्रीस्मरणादिना कामोत्पत्तावपि नैव स्त्री मया सम्भोक्तव्येति सङ्कल्पसहशान्निश्चयात् कामं जयेत् साहश्ये नञ् यथाद्य न भोक्तव्यमिति निश्चये सत्युपवासादौ क्षुत्पिपासाजयः कामविवर्जनात् काम इच्छाविषयः कोऽपि न हिंसनीय इति (जिघांसा नैव कार्येति) हिंसेच्छावर्जनात् क्रोधं जयेत्. अर्थे लाभ्ये वस्तुनि आयत्यामनर्थदर्शनाभ्यामाल्लोभं तत्त्वावमर्शनात् प्रारब्धफलस्यावश्यभोग्यत्वेन कः कस्य दुःखहेतुरित्यादितत्त्वविचारात् आन्वीक्षिक्या आत्मानात्मविचारेण ॥ २२ ॥ २३ ॥

येभ्यो भूतेभ्यो दुःखं जायेत तेष्वेव कृपया हिताचरणेनेत्यर्थः। दैवं दैवोपसर्गनिमित्तवृथामनःपीडादि। तदुक्तं याज्ञवल्क्येन "विमना विफलारम्भः संसीदत्यनिमित्ततः" इति समाधिना भगवति चित्तैकाग्र्येण आत्मजं देहोत्थं दुःखं योगवीर्य्येण प्राणायामादिबलेन सत्त्वनिषेवया सात्त्विकाल्पाहारादिना प्राणिमात्रपरिचर्य्यया वा रजस्तमसी सत्त्वेन सत्त्वाभिवर्धन सत्त्वं च उपशमेन तत्कार्य्येष्वौदासीन्येन ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

उपानहौ पादयोर्यस्य सः उपानत्पात्तस्य शिवमयाः कल्याणप्रचुराः ॥ १७ ॥

सन्तुष्टः वारिणा अपिशब्दाच्छाकादिना केन वा "कं ब्रह्म" इति श्रुतेः। विश्वंभरेण भगवता वा न वर्तेत न जीवेत अपितु जीवेतैवेत्यर्थः। असन्तुष्टो जनस्त्वौपस्थ्यजैह्वयोः शिश्नरसनसुखयोः कार्पण्यात् गृहपालायते गृहपालः श्वा तद्वदाचरति ॥ १८—१९ ॥

अन्नोदकातिरिक्त कामान्तरा ऽभावात् एतत्फलोदयात्क्रोधस्य यत्फलं जयपराजयादि तदुदयात् ॥ २०—२१ ॥

कामादिजयोपायं दर्शयति–असङ्कल्पादित्यादिना । भयं संसारभयं तत्त्वावमर्शनात् तन्निवर्त्तकभगवद्ध्यानावृत्तेः ॥ २२ ॥

आन्वीक्षिक्या आत्मानात्मविवेकेन योगस्य ध्यानस्य अन्तरायान् निष्फलवादादीन् ॥ २३ ॥

कृपया भूतहिताचरणेन दैवं समाधिना परदेवाभिनिवेशेन आत्मजं मनो भवं योगवीर्येण चित्तैकाग्र्ययत्नेन ॥ २४ ॥

रजस्तमश्च सत्त्वेन सत्त्वं चोपशमेन च ।
एतत्सर्वं गुरौ भक्त्या पुरुषो (१) ह्यञ्जसा जयेत् ॥ २५ ॥
यस्य साक्षाद्भगवति ज्ञानदीपप्रदे गुरौ ।
मर्त्याऽसद्धीः श्रुतं (२) तस्य सर्वं कुञ्जरशौचवत् ॥ २६ ॥
एष वै भगवान् साक्षात् प्रधानपुरुषेश्वरः ।
योगेश्वरैर्विमृग्याङ्घ्रिर्लोको (३) वै मन्यते नरम् ॥ २७ ॥
षड्वर्गसंयमैकान्ताः सर्वा (४) नियमचोदनाः ।
तदन्ता यदि नो योगानावहेयुः श्रमावहाः ॥ २८ ॥
यथा वार्त्तादयो (५) ह्यर्था योगस्यार्थं न बिभ्रति ।
अनर्थाय भवेयुस्ते पूर्त्तमिष्टं तथाऽसतः ॥ २९ ॥
यश्चित्तविजये यत्तः स्यान्निःसङ्गोऽपरिग्रहः ।
एको विविक्तशरणो भिक्षुर्भिक्षामिताशनः ॥ ३० ॥
देशे शुचौ समे राजन् ! संस्थाप्यासनमात्मनः ।
स्थिरं समं सुखं तस्मिन्नासीतर्ज्वङ्ग ओमिति ॥ ३१ ॥
प्राणापानौ सन्निरुन्ध्यात्पूरकुम्भकरेचकैः ।
यावन्मनस्त्यजेत्कामान् स्वनासाग्रनिरीक्षणः ॥ ३२ ॥

भाषा टीका ।

सदा ही सन्तुष्ट मन वाले को सब दिशायें आनन्द से भरी हुई हैं । जैसे कि? पगरखी (जोडी) पहिरने वाले को काँकर कंटक आदि से कभी कुछ भी दुःख नहीं ॥१७॥

हे राजन् ! संतोषी पुरुष तो जलमात्र से भी संतोष कर कर रहसक्ता है, और उपस्थ इन्द्रिय और जिह्वा की दीनता से पुरुष श्वान के समान घर २ मे अपमान का पात्र होता है ॥ १८ ॥

असन्तुष्ट ब्राह्मण के इन्द्रियों की चपलता से, तेज, विद्या, तप, यश, और ज्ञान, ये सब अवकीर्ण (नष्ट) हो जाते हैं ॥१९॥

काम का अंत अर्थात् नाश तो भूख प्यास से होजाता है, जिसके लिये क्रोध किया जाय उस फल के होने पर क्रोध भी नष्ट हो जाता है, परञ्च मनुष्य दशों दिशाओं को जीतकर सब पृथिवी का राज्य भोगकर भी लोभ के अंत को नहीं पहुंचता है ॥२० ॥

हे राजन् ! बडे २ पंडित लोग बहुज्ञ और संशय के छेदन करने वाले कितने एक सभापति लोग भी सन्तोष के न होने से अधःपात को प्राप्त होते हैं ॥ २१ ॥

मन में संकल्प के न करने से काम को जीते, और काम के वर्जन से क्रोध को जीते, धन में अनर्थपने की दृष्टि से लोभ को जीते, और तत्त्व विचार करने से भय को जीत लेवै ॥ २२ ॥

ब्रह्मविद्या के विचार से शोक और मोह को, महात्माओं की सेवा करने से दम्भ को, योग के विघ्नों को मौन धारण करने से, और शरीर की चेष्टा न करने से हिंसा को जीत लेवै ॥ २३ ॥

जिनप्राणियों से अपने को दुःख होता हो, उनपर कृपाकरे, अर्थात् यों विचारले कि? ये गरीव आपही दैवी माया के वश होकर हमको दुःख देतेहैं, ये क्या स्वाधीन थोडे हैं, बस इस विचार से भूतज दुःखको जीतलेवै, समाधि से दैविक दुःखको जीतलेवै, और अपने से होनेवाले दुःख को योग के बल से जीत लेवे, तथा सत्त्व के सेवन से निद्रा को जीतलेवे, अर्थात् सात्त्विक भोजनादि से निद्रा न्यून हो जावेगी ॥ २४ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, कथं गुरौ भक्त्या सर्वस्य जयः स्यात् ? तस्याऽपि मनुष्यत्वेन तद्वत्स्थत्वात्तत्राह—यस्येति । मर्त्योऽसद्धीर्मनुष्य इति दुर्बुद्धिस्तस्य शास्त्रश्रवणं कुञ्जरस्नानवद्व्यर्थम् ॥ २६ ॥

ननु, गुरोरपि पुत्रादयस्तं नरमेव मन्यन्ते ऽत आह—एष गुरु

(१) मनसा (२) असिसन्धिः श्रुतः (३) यंमन्यते (४) निगमचोदनाः (५) विद्या इत्येवं विजयध्वजपाठाः ।

श्रीधरस्वामिकृतभावार्थदीपिका।

साक्षाद्भगवानेव भवेत् लोकस्य नरो ऽसाविति बुद्धिर्भ्रान्तिरित्यर्थः। यद्वा नहि तत्पुत्रादेर्मनुष्यबुद्ध्या प्रतीयमानो ऽपि गुरुर्भगवान्न भवेत् यथैष श्रीकृष्ण इत्यर्थः॥ २७॥

एवं सर्वैरुपायैः कामादिवेगं जित्वा नियतेन्द्रियो भूत्वा ध्यानपरो भवेत् अन्यथा तं प्रतिसर्वशास्त्रवैफल्यं स्यादित्याह—षड्वर्गेति। सर्वा अपि नियमचोदना इष्टापूर्त्तादिविधयः षडिन्द्रियवर्गस्य यः संयमस्तस्मिन्नेवैकस्मिन्नन्तो यासां तदेकपरा इत्यर्थः। नच तावताऽपि चरितार्था इत्याह—तदन्ताः सत्यो ऽपि यदि योगान्धारणाध्यानसमाधीन्नो आवहेयुर्न साधयेयुस्तर्हि केवलं श्रमावहा एवेत्यर्थः॥ २८॥

एतदेव दृष्टान्तेनाह—यथा वार्तादयः कृष्यादयो ऽर्थास्तत्फलानि च योगस्यार्थं मोक्षं न साधयन्ति प्रत्युताऽनर्थाय संसारायैव असतो बहिर्मुखस्येष्टापूर्तादयपि तथा॥ २९॥

एवं योगं युञ्जतो ऽपि यस्य कुटुम्बादिसङ्गेन चित्तं विक्षिप्येत तस्य कृत्यमाह—यश्चित्तस्य विजये यत्त उद्युक्तः स भिक्षुः स्यात् सन्न्यसेत् तथाच स्मृतिः—

"द्वन्द्वाहतस्य गार्हस्थ्यं ध्यानभङ्गादिकारणम्।
लक्षयित्वा गृही स्पष्टं संन्यसेदविचारयन्" ॥ इति

भिक्षया प्राप्तं मितमशनं यस्य सः॥ ३०॥

ऋजुसममङ्गं यस्य सः सुखं यथाभवत्येवमासीत ओमित्युच्चारयन्निति शेषः॥ ३१॥ ३२॥ ३३॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

रजस्तमश्च सत्त्वेन सात्त्विकाहाराद्युपजातसत्त्वगुणावृद्ध्यासत्त्वमन्तःकरणमुपशमेन हर्षाजननलक्षेन एतदुक्तं कामादिरूपं सर्वं पुरुषो गुरौ भक्त्या त्वञ्जसा सुखेनैव जयेत्॥ २५॥

गुरुभक्त्यभावे सर्वं कामादिजयात्मकं व्यर्थमित्याह—यस्येति। साक्षाद्भगवति "आचार्यं मां विजानीयात्" इत्युक्तरीत्या भगवदभिन्नत्वेन दर्शनीये ज्ञानमेव दीपस्तत्प्रदे महोपकर्त्तरि गुरौ यस्य पुंसो मर्त्यबुद्धिः 'सोऽपि मादृश एव कश्चिन्मर्त्यः' इति बुद्धिस्तस्य श्रुतमध्ययनं सर्वं कामादिजयादिकञ्च कुञ्जरशौचतुल्यं यथा कुञ्जरस्य स्नानं पुनर्धूलिप्रक्षेपेण कृतमप्यकृतं तद्वत् इत्यर्थः॥ २६॥

गुरोर्भगवत्त्वं श्रीकृष्णदृष्टान्तेनाह—एष इति। एष श्रीकृष्णः साक्षात्प्रकृतिपुरुषयोरीश्वरो ऽत एव योगेश्वरैरस्मदादिभिः विमृग्यौ ध्येयौ अङ्घ्री पादौ यस्य स भगवानेव नात्र सन्देहः एवं भूतमपि यं श्रीकृष्णं नरं मन्यते तत्स्वरूपाऽनभिज्ञो लोकस्तथा गुरुयाथात्म्याऽनभिज्ञस्तं नरं मन्यते तद्याथात्म्यवित्तु साक्षाद्भगवन्तं मन्यत इत्यर्थः॥ २७॥

एवं गुरुभक्त्यभावे सर्वं विफलमित्युक्तम् अथावश्यकानां सर्वेषां वर्णधर्माणामाश्रमधर्माणां चेन्द्रियजयार्थत्वं तदभावे वैयर्थ्यमिन्द्रियपर्यन्तानामपि तेषां भगवदुपासनात्मकयोगनिष्पादकत्व एव साफल्यमन्यथा वैफल्यं चाह—षड्वर्गेति। सर्वा नियमचोदनाः वर्णाश्रमानुगुणाऽऽवश्यकधर्मनियमविधयः चोदनाशब्देन चोद्यमुपलक्ष्यते चोदिता धर्मा इत्यर्थः। यद्वा नियमस्य चोदनाः येषु ते धर्माः। षड्वर्गः मनः पर्य्यन्तषडिन्द्रियवर्गः तस्य संयमो नियमः तदेकान्ताः तदेकप्रयोजना इत्यर्थः। अन्यथा तेषां वैफल्यमेवेति भावः। तदन्ताः षड्वर्गनियमपर्य्यन्ता अपि यदि योगान् योगावयवान् धारणाध्यानसमाधीन्नावहेयुर्न साधयेयुस्तर्हि केवलं श्रमाऽऽवहा एवेत्यर्थः॥ २८॥

एवमावश्यकधर्माणामिन्द्रियजयद्वारा योगावहत्वमेव साफल्यमन्यथा केवलश्रमफलकत्वञ्चोक्तम् अथ वृत्तिधर्माणामपि योगप्रयोजकत्वाभावे वैयर्थ्यं प्रत्युतानर्थावहत्वं तैः सहावश्यकानामपि वैयर्थ्यं चाह—यथेति। वार्त्तादयो ह्यर्था वृत्तेर्जीवनस्येमे वार्त्ता अर्था याजनादयः यदा योगस्यार्थं न बिभ्रति योगानुष्ठानैकप्रयोजनं जीवनं न बिभ्रति न पुष्णन्ति न कुर्वन्ति तदाऽनर्थाय नैरर्थक्याय भवेयुः असदर्थव्ययरूपानर्थाय भवेयुरिति वा तथासतस्तथा वर्त्तमानस्य वार्त्तानर्थान्योगैकप्रयोजनजीवनमात्रोपयुक्तानकुर्वतः पुरुषस्य पूर्त्तं स्मार्त्तं कर्म इष्टं यागादिकं वैदिकं कर्म चानर्थकयाय भवेताम्॥ २६॥

अथेन्द्रियजयपर्यन्तस्ववर्णाश्रमधर्मकामादिजयनिष्ठस्य भगवद्भक्तियोगानुष्ठानप्रकारमाह—य इत्यादिना। यः पुमान् चित्तस्य विजये यत्त आयत्तो दक्षः स्यात् तर्हि निःसङ्गस्त्यक्तकलत्रपुत्रादिसङ्गोऽपरिग्रहः शरीरमात्रावशेषितः भिक्षुस्तुर्याश्रमी भूयात् भिक्षुर्भूत्वा चैकोऽसहायः विविक्तशरणः निर्जनदेशेऽवास्थितः भैक्षं भिक्षया लब्धं मितं चाशनमन्नं यस्य भैक्षं मितं चाश्नातीति वा कर्त्तरि ल्युः॥ ३०॥

शुचौ परिशुद्धे समेऽनिम्नोन्नते च देशे हे राजन्! आत्मनः स्वस्यासनं "चैलाजिनकुशोत्तरम्" इत्युक्तविधमास्थाप्य स्थिरं चाञ्चल्यरहितं सुखं च यथा भवति तथा तस्मिन्नासने आसीत उपविशेत् ऋज्वङ्गः ऋज्ववक्रमङ्गं यस्य ऋजुकायः सन्नोम् इत्यनुसन्दधदिति शेषः॥ ३१॥

पूरकुम्भकरेचकैः प्राणाऽपानौ वायू सम्यङ्निरुन्ध्यादपानेन प्राणाभिभवो रेचकः प्राणेनाऽपानाभिभवः पूरकः उभयोः समानः कुम्भकः यावन्मनः कामान् शब्दादिविषयांस्त्यजेत् नाऽनुसन्दधीत तावत् स्वस्य नासाया अग्रं निरीक्षत इति निरीक्षणः कर्त्तरि ल्युः॥ ३२॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

सत्त्वगुणेन रजस्तमसी उपशमेन भगवन्निष्ठया सर्वत्राऽपि भगवद्भक्तिरेव प्रयोजिकेत्याशयेनाह—एतदिति॥ २५॥

विपक्षे बाधकमाह—यस्येति। अभिसन्धिरतिक्रमणं भक्त्यनुसन्धानराहित्यं अवज्ञेति यावत्॥ २६॥

कथमवज्ञाप्रकारः? इति तत्राह—एष इति। एष एवंविधमाहात्म्यो-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

येतो लोको * यं नरं सुखदुःखभोक्तारं मन्यत इत्येतमवज्ञाप्रकार इत्यर्थः ॥ २७ ॥

ननु, हरेः प्रकृतिनिलीनत्वेन नरत्वं सम्भाव्यते "तुच्छ्येनाऽभ्वपिहितं यदासीत्प्रकृतौ लीनः संसारमेति सच त्यच्चाभवत्" इति श्रुतेः। इति तत्राह—षड्वर्गेति। सर्वानिगमचोदनाः "सन्ध्यामुपासीत" इत्यादिवेदविधयोऽपि हरौ भक्तियोगं न कुर्युस्तर्हि श्रमावहाः क्लेशहेतव एवेत्यन्वयः। आवहन्ति चेत्कथंकारमित्यत उक्तं षडिति, षडिन्द्रियाणां संयमो विषयादाहृत्य हर्येकविषयीकरणलक्षणः तस्मिन्नेवैकान्तो निश्चयेन तात्पर्यं यासां ताः तथाऽन्यत्तात्पर्यं किन्न स्यादिति तत्राह—तदन्ता इति। तस्य भक्तियोगस्यान्तो निर्णयो यासां तास्तथा यथा षड्वर्गसंयमैकान्ताः सर्वाः। निगमचोदनाः तदन्ता निगमा यदि योगं नो आवहेयुरिति वा ॥ २८ ॥

इष्टापूर्तादिना पुरुषस्य पुरुषार्थसम्भवेन तद्विधायिवेदः पूर्णार्थो लभत इत्यतो वेदस्य श्रमावहत्वं कथम्? अत्राह—यथेति। यस्य पुंसो या वार्तादयो विद्यास्ता अर्थं न बिभ्रति प्रत्युतानर्थाय भवेयुश्च तथा ऽसतस्तस्य पूर्तमिष्टं चार्थं न विधत्त इत्यन्वयः। पूर्तादेरनित्यफलहेतुत्वेन निन्दितत्वात् तदर्थविधायित्वं वेदस्य जुगुप्सितम् अतस्तद्विधाने श्रमावहत्वं प्रकटमित्यर्थः। "इष्टापूर्तं मन्यमाना वरिष्ठम्" इत्यादिश्रुतेः ॥ २९ ॥

* यदि नो योगमित्यत्र योगशब्देन ध्यानं चोच्यते तदा तद्ध्यानं ध्येये मनो निधायोपासनापरपर्यायं भवेत्तत्र जलचरस्येवान स्थानस्य मनसो जयेन सफलं स्यादतस्तदुपायमाह—यश्चित्तेति। यश्चित्तविजयेच्छुः स्यात्स ओमिति मन्त्रमुच्चार्य तस्मिन्नासीनेत्यन्वयः। तद्विजयोपायमाह—निःसङ्ग इति। निःसङ्गत्वं कथम्? अत्राह-निष्परिग्रह इति। तत्फलमेक इति एकस्यापि स्वजनरहितस्य जनतामध्यस्थितस्य नानावार्ताश्रवणेन विक्षिप्तस्य पुंसो मनोजयः कथमुपपद्यते? इत्यत उक्तं विविक्त एतदपि गृहस्थस्य न घटत इत्यत उक्तं, भिक्षुरिति। तस्याप्यशनचिन्तया द्वितीयापेक्षमोक्तं न युक्तमित्यत उक्तं, भैक्ष्येण। भैक्ष्यमपि बहुसम्पन्नं न भोगापवर्गि स्यादित्यत उक्तं मितेति ॥ ३० ॥

ऋज्वङ्गः समीकृतकायशिरोग्रीवः ॥ ३१—३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

उपशमेन निवृत्त्यात्मकेन सत्त्वेन एतन्निम्यर्द्धकम्। श्रुतिश्च। "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः" इति। अतो ब्रह्मवैवर्ते "गुरुभक्त्या स मिलति स्मरणात् सेव्यते बुधैः। मिलितोऽपि न लभ्येत जीवैरहमिकापरैः" इति। पाद्मे देवद्युतिस्तुतौ "भक्तिर्यथा हरौ मेऽस्ति तद्वरिष्ठा गुरौ यदि। ममाऽस्ति तेन सत्येन स्वं दर्शयतु मे हरिः" इति ॥ २५ ॥

* हरिम्। * अष्टाविंशश्लोकस्यप्रतीकम्।

मर्त्योऽसद्धीरिति। अत एवोक्तं प्राचीनैः। "अर्च्ये विष्णौ शिलाधीर्गुरुषु नरमतिर्वैष्णवे जातिबुद्धिर्विष्णोर्वा वैष्णवानां कलिमलमथने पादतीर्थेऽम्बुबुद्धिः॥ शुद्धे तन्नाम्नि मन्त्रे सकलकलुषहे शब्दसामान्यबुद्धिर्विष्णौ सर्वेश्वरेशे तदितरसमधीर्यस्य वा नारकी सः" इति ॥ २६ ॥

न चेदं लोकेष्वाश्चर्यं साक्षाद्भगवति तथा मननादित्याह, एष इति ॥ २७—४० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अञ्जसा शीघ्रमायासाभावेन सर्वं जयेत् सर्वरोगोपशमनमुख्यमेकमेव महौषधमिवेत्यर्थः। अत्र कामादिजयो ज्ञानिनां गुरुभक्तेरनुसंहितं फलं शुद्धभक्तानां त्वानुषङ्गिकमिति विशेषो द्रष्टव्यः ॥ २५ ॥

किञ्च सत्यां भूयस्यामपि भक्तौ गुरौ मनुष्यबुद्धित्वे सर्वमेव व्यर्थं भवतीत्याह—यस्येति। साक्षाद्भगवतीति भगवद्बुद्धिरपि गुरौ न कार्येति भावः। यद्वा उपास्ये भगवत्येव साक्षाद्विद्यमाने मर्त्योऽसद्धीः मर्त्य इति दुर्बुद्धिस्तस्य श्रुतं मन्त्रादिकं शास्त्रादिकं श्रवणमननादिकं च व्यर्थमित्यर्थः ॥ २६ ॥

ननु, गुरोः पितृपुत्रादयः प्रतिवेशिनश्च तं नरमेव मन्यन्ते कथमेक एवायं शिष्यस्तं परमेश्वरं मन्यताम्? अत आह—एष हीति। भगवान् यदुनन्दनो रघुनन्दनो वा वै निश्चितमेव प्रधानपुरुषयोरीश्वरः यं लोकस्तदवतारकालोत्पन्नो जनः नरं मन्यते तेन किं स नरो भवति? अपितु परमेश्वर एवेत्येवं गुरुरपीति भावः ॥ २७ ॥

किञ्चः य कामादिजयो गुरुभक्त्या साध्यते स एव सर्वशास्त्रोक्तनानासाधनानामपि वास्तवं फलमित्याह—षड्वर्गेति-सर्वा अपि नियमचोदना इष्टापूर्तादिविधयः षडिन्द्रियवर्गस्य यः संयमस्तस्मिन्नेवैकस्मिन्नन्तो यासां तदेकपरा इत्यर्थः। ननु, य यथा गुरुभक्त्या कामादयो जीयन्ते भगवानपि प्राप्यते "तुष्येयं सर्वभूतात्मा गुरुशुश्रूषया" इति "तरन्त्यञ्जो भवार्णवम्" इति च भगवद्वचनात् तथा नियमचोदनाभिः षड्वर्गसंयमः साध्यते। भगवान् तासां न वा तत्राह—तदन्तास्तदेकपरत्वादेव योगान् भगवद्ध्यानादीन् न आवहेयुः न साधयेयुः कुतो भगवन्तं प्रापयेयुरित्यर्थः। यदि नावहेयुस्तर्हि श्रमावहा एवाऽत्र कः सन्देह इति भावः ॥ २८ ॥

एतदेव दृष्टान्तेनाह—यथा वार्त्तादयः कृष्यादयोऽर्थान् भोगार्थान् साधयन्तोऽपि योगस्यार्थं मोक्षं न साधयन्ति यदि मोक्षं न साधयन्ति तदा ते अनर्थाय प्रयोजनाभावायैव भवेयुस्तथैव असतो भगवदभक्तस्य इष्टापूर्तादि विफलायैव ॥ २९ ॥

तदेवं ग्रहस्थस्यापि कामादिजयो मोक्षप्रकारश्च यस्य तु कुटुम्बादिसङ्गदोषेण कामादिजयो यतमानस्यापि न स्यात् स तु निःसङ्गो भिक्षुरेव स्यादित्याह—य इति। यतनान् स भिक्षुः स्यात् तथा च स्मृतिः—

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

"द्वन्द्वाहतस्य गार्हस्थ्ये ध्यानभङ्गादिकारणम्।
लक्षयित्वा गृही स्पष्टं संन्यसेदविचारयन्" ॥

इति ऋजु समम् अङ्गं यस्य सः ओमिति समुच्चारयन्निति शेषः ३०-३३॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

उपशमेनोपशान्त्या एतत्कामादिकं सर्वं गुरौ भक्त्या ॥ २५ ॥

उक्तार्थे सम्भावनादिदोषनिवृत्तये श्रीगुरौ मानुषभाववतः सर्वशास्त्रश्रवणादि निरर्थकमेवेति वदन् श्रीगुरोर्माहात्म्यमाह-यस्येति, द्वाभ्याम्। अयं मर्त्यो मनुष्य इत्यसद्धीर्यस्य तस्य श्रुतमित्युपलक्षणम् जपतप आदि कुञ्जरशौचवन्निष्फलं भवति २६

एष श्रीगुरुरूपी साक्षात् भगवान् श्रीकृष्ण एव लोकः अज्ञो जनः नरं मन्यते तस्याभाग्यमिति भावः ॥ २७ ॥

अथ सर्वे उपायाः भगवत्प्राप्तिसाधनानां ज्ञानभक्त्यादीनां योगानामुत्पादका यदि न स्युस्तर्हि कृष्यादिवज्जीवनोपायतया संसारपर्यवसायिन एव न मुक्तिपर्यवसायिन इत्याह—षड्वर्गेति, द्वाभ्याम्। सर्वा अपि नियमचोदना इष्टापूर्त्तादिविधयः षाडिन्द्रियवर्गस्य यः संयमस्तस्मिन्नेवैके साध्यभूते साधनतयाऽन्तः पर्यवसानं यासां ताः तदन्ताः स षड्वर्गः अन्ते अग्रे यासां ताः स्वफलेन षड्वर्गसंयमेन सहिता इत्यर्थः। यदि योगान् मुक्त्युपायान् नावहेयुर्न साधयेयुस्तर्हि श्रमावहाः संसारप्रदा एव ॥ २८ ॥

यथा वार्त्तादयः कृष्यादयः अर्थास्तत्फलानि च योगस्य ज्ञानवैराग्यभक्तिरूपस्य अर्थं मोक्षं न बिभ्रति ज्ञानाद्युत्पादनद्वारा मोक्षं न साधयन्ति, प्रत्युत अनर्थाय शिश्नोदरपर्यवसायितया संसाराय भवेयुः तथा असतो हरिविमुखस्य पूर्त्तादिकम् ॥ २९ ॥

मुमुक्षुर्गृहे तिष्ठन्नुक्तरीत्या कामादिविजयेन नानानियमसाध्यषड्वर्गसंयमेन साधितैर्ज्ञानभक्त्यादियोगैर्मुक्तः स्याद्यदि कुटुम्बादिसङ्गेन सर्वसाधनमूलभूतमनोनिग्रहो दुष्करस्तर्हि गृहात्परिव्रज्येद् कुर्यादित्याह—य इति, षड्भिः। यश्चित्तविजये यत्तः उद्युक्तः भिक्षया प्राप्तं मितमल्पमशनं यस्य सः दण्डादिलिङ्ग युक्तया—

"ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वाऽनपेक्षकः।
सलिङ्गानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः" ॥

इति भगवदाज्ञया आश्रमलिङ्गादिपरित्यागेन वा भागवतो भिक्षुः स्यात् यतिर्भवतु ॥ ३० ॥

हे राजन्! शुचौ देशे पवित्रस्थाने आसनमास्थाय ऋज्वङ्गः समकायशिरोग्रीवः सुखं यथा भवत्येवमासीन ओमित्युच्चारयन्निति शेषः। प्राणापानौ सन्निरुन्ध्यादित्यग्रिमेन सम्बन्धः ॥३१॥

पूरकादिभिः प्राणापानौ संनिरुन्ध्यात् प्राणायामं कुर्यात् तदवधिमाह—यावन्मनः कामान् त्यजेदिति ॥ ३२ ॥

भाषा टीका।

रज और तम को सत्त्व से जीतै, उपशांति से सत्त्व को भी जीतै. और पुरुष इन सबों को गुरुके विषै भक्ति करने से तो अनायास ही जीत सक्ता है ॥ २५ ॥

जिस पुरुष की साक्षात् भगवत् स्वरूप ऐसे, ज्ञानदीपप्रद गुरु में खोटी मनुष्यपने की बुद्धि है, उसका सर्व श्रुत (वेदादिका सुनना) कुञ्जर शौचवत्, है अर्थात् हाथी के नहाँन तुल्य है ॥२६॥

नारद जी सभा में बैठे हुए श्रीकृष्ण को लक्ष्य कर गुरु के विषैं दृष्टान्त देने को बोले, कि हे राजन्! ये जो तुमारी सभा में मनुष्याकार से बैठे हुए श्रीकृष्ण हैं, ये मनुष्य नहीं है, किंतु साक्षात् प्रधान (प्रकृति) और पुरुष (जीव) के नियंता हैं. और बडे२ योगेश्वरों के ढूंढने योग्य चरण कमल वाले हैं, तो भी लोक इनको नर अर्थात् मनुष्य मानता है, इसीप्रकार गुरु भी मनुष्य नहीं हैं किंतु साक्षात् भगवान ही हैं ॥ २७ ॥

षट् इन्द्रियों के जीतने में परम उपयोगी सम्पूर्ण नियम और शास्त्रीय विधियों का उन श्रीकृष्णमें ही पर्यवसान है, यदि सर्व नियम विधि आदि के अनुष्ठान से भी इनमें प्रीति न हुई, तो ये नियमादि सब श्रम मात्र देने वाले जानों ॥ २८ ॥

जैसे कि—कृषि वाणिज्य आदि वृत्ति योग के अर्थ को नहीं सिद्ध करसक्ती है, ऐसे ही इनमें जिसकी प्रीति नहीं एसे असत् पुरुष के इष्ट, आपूर्त्त, आदि सब कर्म अनर्थ के ही करने वाले होंगे ॥ २९ ॥

जो पुरुष चित्त के जीतने का उद्योग वाला हो तो संन्यास लेकर सर्व सङ्ग और परिग्रहों (उपकरणों) को छोडकर एकला ही एकान्त स्थल का आश्रय लेकर भिक्षा से मित भोजन करता हुआ ॥ ३० ॥

हे राजन्! सम और शुद्ध प्रदेश में स्थिर सम और सुखदाई ऐसे अपने आसन को बिछाकर, उस पर ऋजु (सीधा) अंग कर कर प्रणव (ओंकार) का उच्चारण करता हुआ बैठे ॥ ३१ ॥

पूरक कुंभक रेचक प्राणायामों से प्राण और अपान का अच्छे प्रकार निरोध करे जब तक कि अपना मन कामनाओं को न छोड देवे, और अपने नासिका के अग्र भाग का निरीक्षण भी करता जावे ॥ ३२ ॥

यतो यतो निःसरति मनः कामहतं भ्रमत् ।
ततस्तत उपाहृत्य हृदि रुन्ध्याच्छनैर्बुधः ॥ ३३ ॥
एवमभ्यसतश्चित्तं कालेनाल्पीयसा यतेः ।
अनिशं तस्य [1]निर्वाणं यात्यनिन्धनवह्निवत् ॥ ३४ ॥
कामादिभिरनाविद्धं प्रशान्ताखिलवृत्ति यत् ।
चित्तं ब्रह्मसुखस्पृष्टं नैवोत्तिष्ठेत कर्हिचित् ॥ ३५ ॥
यः प्रव्रज्य गृहात्पूर्वं त्रिवर्गाऽऽवपनात्पुनः ।
यदि सेवेत तान्भिक्षुः स[2] वै वान्ताश्यपत्रपः ॥ ३६ ॥
यैः स्वदेहः[3] स्मृतो नात्मा मर्त्यो विट्कृमिभस्मसात् ।
त एन मात्मसात्कृत्वा श्लाघयन्ति ह्यसत्तमाः ॥ ३७ ॥
गृहस्थस्य क्रियात्यागो व्रतत्यागो बटोरपि ।
तपस्विनो ग्रामसेवा भिक्षोरिन्द्रियलौल्यता ॥ ३८ ॥
आश्रमापसदा ह्येते खल्वाश्रम[4]विडम्बकाः ।
देवमायाविमूढांस्तानुपेक्षेताऽनुकम्पया ॥ ३९ ॥
आत्मानं चेद्विजानीयात्परं ज्ञानधुताशयः ।
किमिच्छन्कस्य वा हेतोर्देहं पुष्णाति लम्पटः ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवमनिशमभ्यस्यतस्तस्य यतेश्चित्तं निर्वाणं शान्तिं याति ॥ ३४ ॥

नच पुनर्विक्षिप्येतेत्याह—कामादिभिरक्षुभितं यच्चित्तं तन्नोत्तिष्ठेत् यतः प्रशान्ता अखिला वृत्तयो यस्य कुतः ब्रह्मसुखेन स्पृष्टम् ॥ ३५ ॥

यस्तु प्रव्रज्यां कृत्वा ऽपि भोगमभिलिप्सुः स्यात्तं निन्दति, य इति । त्रयाणां धर्मादीनां वर्ग आसमन्तादुप्यते यस्मिंस्तस्माद् गृहात् तान्धर्मादीन् वान्ताशी छर्दितभोजी निर्लज्जश्च ॥ ३६ ॥

नचेदमघटितं दृष्टत्वादित्याह—यैः पूर्वं स्वदेहो ऽनात्मादिरूपः स्मृतश्चिन्तितस्त एव पुनरेनमात्मेति मत्वा श्लाघयन्ति स्तावयन्ति हि ॥ ३७ ॥

यतिमुपलक्षणीकृत्याऽन्यानपि स्वधर्मत्यागिनो निन्दति--गृहस्थस्येति, द्वाभ्याम् ॥ ३८ ॥ ३९ ॥

नन्वात्मतत्त्वज्ञस्य भिक्षो रिन्द्रियलौल्येऽपि को दोषस्तत्राऽऽह, आत्मानं परं ब्रह्म चेज्जानीयात् ज्ञानेन धुता निरस्ता आशया वासना यस्य तस्य ज्ञानिनो लौल्यमेव न सम्भवतीत्यर्थः । तथाच श्रुतिः—

"आत्मानं चेद्विजानीयादयमस्मीति पूरुषः ।
किमिच्छन्कस्य कामाय शरीमनुसञ्ज्वरे" ॥

इति ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कामैः शब्दादिविषयध्यानैर्हतं विक्षिप्तं सन्मनो भ्रमद्यतो यतः यं यं विषयं निः सरति विषयीकरोति ततस्ततो विषयात् तस्मा उपाहृत्य प्रत्याहृत्य बुधस्तत्प्रत्याहारविद्हृदि हृदयस्थे शुभाश्रये शनैर्निरुन्ध्याच्छुभाश्रयचिन्ताप्रवणं कुर्यात् अत्र नियमोऽयंसिद्धचित्तविजय इति नियम उक्तः स्थिरं सुखमासीतेत्यासनम् । प्राणापानावित्यादिना प्राणायामः यावन्मन इत्यादिना ततस्तत उपाहृत्य इत्यन्तेन प्रत्याहारः निरुन्ध्याच्छनैर्बुध इत्यनेन ध्यानं धारणा चोक्ते ॥ ३३ ॥

अथ समाधिमाह—एवमिति, द्वाभ्याम् । एवमनिशम् अहरहः सर्वदा वाऽभ्यसतः तस्य यतेश्चित्तमल्पीयसैव कालेन निर्वाणं याति बहिर्वृत्तिविनाशं याति अनिन्धनवह्निवत् यथाऽनिन्धनः ज्वालाधूमादिरहितो दाहरहितो ऽङ्गाररूपेणाऽऽवशेषितोऽग्निस्तद्वत् इत्यर्थः ॥ ३४ ॥

---

(१) आविषयाश्च (२) सपापो निरपत्रपः (३) यस्यदेहः । इति विज० पाठ० (४) विडम्बिनः । इति विज० वीर० पाठ० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

न तु विक्षिप्तंमभवनीत्याह–कामेति। यद्यस्मात् कामादिभिः शब्दादिविषयानुध्यानादिभिरनाविद्धमसंक्रान्तं प्रशान्ता अपगता अखिला वृत्तयो व्यापारात्मका यस्य तादृशं चित्तमभूत् तस्माच्चित्तं ब्रह्मसुखस्पृष्टं ब्रह्माऽनुभवसुखाविद्धं सत् कर्हिचिदपि नैवोत्तिष्ठेत शुभाश्रयान्न प्रच्युतं भवति, अयमेव समाधिर्यद् ब्रह्माऽनुभवमग्नचित्ततेति ॥ ३५ ॥

एवमष्टाङ्गयुक्तभगवद्भक्तियोगनिष्ठं तत्फलत्वेन त्रिवर्गं कामयमानं यतिं निन्दति–य इति। त्रिवर्गस्य धर्मार्थकामरूपस्यावपनात् क्षेत्रभूताद् गृहात्प्रव्रज्य पुनर्यः पुमांस्तान् धर्मादीनेव सेवेत सवै भिक्षुर्निरपत्रपो निर्लज्जो वान्ताशी छर्दितान्नभक्षी उद्गीर्णान्नभक्षयितृतुल्य इत्यर्थः। यद्वा प्रव्रज्यापि पुनर्भोगासक्तं यतिं निन्दति—य इति ॥ ३६ ॥

न चेदसघटितं दृष्टत्वादित्याह--यैरिति। यैः परिव्राड्भिः पूर्वं स्वदेहो नात्मा स्मृत आत्मत्वेन न निश्चितः किन्त्वात्मनः व्यतिरिक्तो मर्त्यः मरणशीलः विट्कृमिभस्मसान्तान्ततः क्रिम्याद्यवस्थामापत्स्यमानश्चिन्तितः त एव पुनस्तमेनं देहमेव आत्मसात्कृत्वाऽऽत्माऽभिन्नं कृत्वा श्लाघयन्ति हि, केचिदसत्तमाः परिव्राज इत्यर्थः ॥ ३७ ॥

भोगाऽऽसक्तयतिनिन्दाप्रसङ्गात्तेन सहाऽऽश्रमान्तरस्थानपि स्वधर्मादित्यागिनो निन्दति—गृहस्थस्येति। क्रियात्यागः स्ववर्णाश्रमोचितक्रियात्यागः वटोर्ब्रह्मचारिणो व्रतत्यागः गुरुकुलवासादिव्रतत्यागः तपस्विनो वानप्रस्थस्य ग्रामसेवा पुनर्ग्रामवासः भिक्षोः सन्यासिन इन्द्रियलोलता ॥ ३८ ॥

एते आश्रमापसदा येषां गृहस्थादीनां चतुर्णां क्रियात्यागादयस्त एते आश्रमेषु आश्रमस्थेषु अपसदा निकृष्टा इत्यर्थः एते ह्याश्रमान् विडम्बयन्त्यनुकुर्वन्तीत्याश्रमविडम्बिनः विडम्बनमात्रमेवैषां नत्वाश्रमसिद्धिरित्यर्थः। अतस्तान् भगवन्मायया विमूढान् अनेन नित्यनिरतिशयाऽऽनन्दरूपपरमात्मप्राप्तिसाधनभूततदुपासनतदङ्गधर्माऽनुष्ठानोपयुक्तमनुष्यजन्मवर्णाऽऽश्रमादिरूपसामग्रीं लब्ध्वापि ये स्वधर्मादित्यागिनस्ते नूनं देवमाया मोहिता इत्युक्तम् भवति। अनुकम्पया अहो इमे उच्चपतिताः किं विधेयमित्येवमनुकम्पापूर्वकचिन्तया तानुपेक्षेत नानुवर्तेतेत्यर्थः ॥ ३९ ॥

आत्मपरमात्मतत्त्वज्ञस्य ब्रह्माऽनुभवसुखतृप्तस्य तु यतेरिन्द्रियलौल्यमेवासम्भावितं तस्य देवमाययामोहाभावादित्याह—आत्मानमिति। परं प्रकृतिपुरुषविलक्षणमात्मानम् यद्वा आत्मानं परं परमपुरुषं च विजानीयाच्चेत् तज्ज्ञानेन निर्धूतवासनः कस्य कामाय इष्टसम्पत्तये लम्पटः किमिच्छन्देहं पुष्णाति देहपोषणेन स्वात्मनः परमपुरुषस्य च नेष्टं सम्पद्यतेऽनयोरन्यतरस्येत्यर्थः। यद्वा इच्छन् शब्दादिविषयान्कामयमानः कस्य स्वपरयोरन्यतरस्य कस्य कामायेष्टार्थं देहं पुष्णाति किम्? न पुष्णीयादेवेत्यर्थः। कस्य कामायेत्यनेन देहपोषणं न स्वात्मनो नाऽपिपरमात्मनश्च सुखाधायकं तयोः स्वत एव निरतिशयसुखरूपत्वादिति सूच्यते. निरतिशयानन्दपरमात्मोपासनात्तत्कृतदनुभवतृप्तो निरीहो देहपोषणजसुखार्थं न यतत एव, किन्तु परमात्मप्राप्तय एव यतत इति सूचितम्। देवमायाविमूढानित्यनेन परमाऽऽनन्दरूपपरमात्मप्राप्तिसाधनाऽनुष्ठानोपयुक्तशरीरेन्द्रियादिसामग्रीं लब्ध्वाऽपि ये न यतन्ते ते देवमाया विमूढा इति चोक्तम्।४०॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

उपाहृत्य हृदि स्थिते हरौ ॥ ३३ ॥

इन्धनरहितो वह्निर्यथा निर्वाणं नाशं याति तथा चित्तं प्राकृतं नाशमेति अप्राकृतं स्वरूपभूतं शरीराभिमानरहितं ब्रह्म यातीत्यन्वयः।“वाणं शरीरं सम्प्रोक्तं वाणो वल्लिसुते शरः” इत्यभिधानम् “निर्वाणममृतमक्षरं ब्रह्म”इत्यभिधानम् ॥ ३४ ॥

एवं विषयीकृतब्रह्मणोऽप्राकृतस्य चित्तस्य स्वभावफलमाह, कामादिभिरिति। यच्चित्तं कामादिभिरनाविद्धत्वात् प्रशान्ताखिलवृत्तित्वाच्च ब्रह्म पूर्णसुखरूपं स्पृष्टं विषयीकुर्वत् तत्कर्हिचित्ततो नोत्तिष्ठेत ततोऽन्यत्र न गच्छतीत्यर्थः ॥ ३५ ॥

ननु, कस्यचिच्चेतोऽन्यत्र गच्छति चेत्किन्दूषणमित्याशंक्य तस्य पापकरणत्वेन सर्वहास्यत्वं दूषणमित्याशयेनाह—यःप्रव्रज्येति। त्रिवर्गावपनाद्धर्मार्थकामबीजानामावपनक्षेत्रभूतात् तान् कामादीन् यदा सेवेत तर्हीति शेषः ॥ ३६ ॥

एवं विधा असुरजातय इत्यभिप्रायेणाह—यस्येति। यस्य देहिनः अनात्मा देहो विट्कृमिभस्मवत्स्मृतः तस्य तमेव देहं तत्सदृशमेव भोगायतनं स्वात्मसात्कृत्वाऽहमेवात्मेति कृत्वा ये देहं श्लाघयन्ति ते असत्तमा असुरा इत्यन्वयः।“आत्मैव ह्ययान्” इति श्रुतिं हिशब्देन सूचयति–यैः स्वदेह इति पाठे यैर्मर्त्यैरनात्मा स्वदेहो विट्कृमिभस्मवत्स्मृतः ते तमेव स्वात्मसात्कृत्वा श्लाघयन्ति तर्हि असत्तमा इत्यन्वयः ॥ ३७ ॥

न केवलं यतेराश्रमत्यागे दूषणमपि तु गृहस्थानामपि स्वधर्मत्यागे दोषः [illegible]दित्याह—गृहस्थस्येति। यत्यादेः कस्य कस्य धर्मत्यागे दोषः स्यादित्यतो वाऽऽह—गृहस्थस्येति वटोर्ब्रह्मचारिणः यदि गृहस्थादीनां क्रियात्यागादयः सन्ति तर्ह्येते आश्रमापसदा इत्यन्वयः ॥ ३८ ॥

नन्वेतावताऽपि फलं स्यात्किं नेत्याह—खल्विति। आश्रमान्विडम्बयन्ति अनुकुर्वन्तीत्याश्रमविडम्बिनः खलु आश्रमफलाहेतुत्वादित्यर्थः। निषेधवाक्यालङ्कारादौ खलुशब्दप्रयोगात् न चैते पुण्याश्रया मान्या इत्याह—देवेति। अतो भगवन्महिमेति भगवद्विषयैवाऽनुकम्पा प्रेमविशेषः ॥ ३९ ॥

यतः स्वधर्मत्यागी निंद्योऽतो विहितातिरेकेण देहपोषो न युक्त इत्याह–आत्मानमिति। विवेकज्ञानेन धृताशयः वशीकृतान्तःकरणः पुरुषः आत्मानं स्वस्वरूपं परमात्मानं च विजानीयात् चेत्तर्हि स किं सुखमिच्छन् कस्य हेतोः सुखस्यार्थे वा लम्पटो रागी-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इन्द्रियलोलुपो भूत्वा देहं पुष्णातीत्यन्वयः "सुखार्थी वा त्यजेद्विद्यां विद्यार्थी वा सुखं त्यजेत्" इति वचनात् ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

निर्वाणं शान्तिं याति ॥ ३४—३५ ॥

त्रिवर्गं ञा उच्यते यस्मिन् तस्मात् गृहात् पूर्वं प्रव्रज्य पुनः पश्चात् तानेव गृहस्थधर्मान् सेवेत वान्ताशी छर्दितभोजी निर्लज्जः ॥ ३६ ॥

अनात्मा देह आत्मा न भवतीति चिन्तितः विट्कृमिभस्मवदित्यन्ते विट्कृमिभस्मरूपो भविष्यतीत्यतोऽधुनापि विट्कृमिभस्मतुल्य इत्यर्थः । त एव एतं देहम् आत्मसात्कृत्वा आत्मानमेव मत्वेत्यर्थः ॥ ३७ ॥

लौल्यता लौल्यम् अनुकम्पया सह उपेक्षेत अनुकम्पया तदन्तिकमुपेत्य तत्रोपदेशादिकं न कुर्य्यात् तस्य तेषु वैयर्थ्यादिति भावः ॥ ३८ ॥

तेष्वपि मध्ये भिक्षुं विशेषतो निन्दति–आत्मानमिति। अत्र विजानीयादिति विधिलिङ् तेन चायमर्थ आक्षेपलब्धो भवति ज्ञानधुताशयः सन् आत्मानं विजानीयादिति विधेर्विषयीभूतः स्याच्चेत्तदाकिमिच्छन्नित्यादि देहं पुष्णातीति जिह्वेन्द्रियलौल्यं लम्पट इत्युपस्थलौल्यञ्च व्यञ्जितं परं देहात् पृथग्भूतम् ॥ ३९ ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भ्रमदनवस्थितम् यतो यतो यत्र यत्र विषये ॥ ३३ ॥

अनिशं निरन्तरमेवम् अभ्यसतस्तस्य यतेश्चित्तं निर्वाणं नैश्चल्यम् ॥ ३४ ॥

अनाविद्धमक्षुभितम् अत एव प्रशान्ता अखिला वृत्तयो यस्य तत् ब्रह्मणः चिन्तनीयस्य भगवतः सुखेन स्पृष्टं यत् यर्हि भवेत्तदा कर्हिचिदपि नोत्तिष्ठति ॥ ३५ ॥

ब्रह्मसुखस्पर्शोऽभावे तूत्तिष्ठति विषयेषु यतेश्चित्तमतः स निन्द्यो भवतीत्याह—त्रयाणां धर्मार्थकामानां वर्गं ञा समन्तादुच्यते यत्र ततो गृहात्प्रव्रज्य यदि तान् गृहस्थोचितान् धर्मादीन् पुनः सेवेत स वान्ताशी छर्दितभोजी अपत्रपो निर्लज्जश्च भवति ॥ ३६ ॥

आत्मविदोपि अनात्मानं देहं ये श्लाघयन्ति ते निन्द्या एवेत्याह—यैरिति । यैः स्वदेहः अनात्मा आत्मभिन्नः मर्त्यो मरणधर्मा कृमिविट्भस्मसात् च स्मृतः चिन्तितः पुनरेनमात्मसात् कृत्वा श्लाघयन्ति त असत्तमाः ॥ ३७ ॥

यतिमुपलक्षीकृत्याश्रमानपि स्वधर्मत्यागिनस्तत्तद्धर्मदृढीकरणार्थं निन्दति—गृहस्थस्येति, द्वाभ्याम् ॥ ३८ ॥

अनुकम्पया उपेक्षेत नतु दुरुक्त्या पीडयेत् ॥ ३९ ॥

"आत्मानं चेद्विजानीयादयमस्मीति पुरुषः ।
किमिच्छन्कस्य कामाय शरीरमनु संज्वरेत्" ॥

इति श्रुत्यर्थमुपबृंहयन् जाते आत्मज्ञानेऽपि देहासक्तं निन्दति—आत्मानमिति । परं देहादन्यम् ॥ ४० ॥

भाषा टीका ।

कामनाओं की ताडना से भ्रमता हुआ मन जहां २ से निकले तहां २ से रोक कर बुद्धिमान् धीरे से हृदय में रोके ॥ ३३ ॥

इस प्रकार निरंतर अभ्यास करने वाले यति का चित्त थोड़े ही काल में शांति को प्राप्त होजाता है, जैसे, कि—विना इन्धन का अग्नि ॥ ३४ ॥

कामादिकों से क्षोभ को नहीं प्राप्त होने वाला शान्त होगई सर्व वृत्ति जिसकी और ब्रह्म सुख का स्पर्श करने वाला ऐसा यति का चित्त फिर कभी कामनाओं की तरफ नहीं उठता है ३५

जो पुरुष त्रिवर्ग के क्षेत्र रूप अपने गृह से सन्यास लेकर त्यागी होकर यदि फिर उन विषयों का सेवन करे, तो वह निर्लज्ज वान्ताशी है, अर्थात् वमन करे हुए का भक्षण करने वाला है ॥ ३६ ॥

क्योंकि, जिनोंने पहले इस देह को अनात्मा और विष्ठा कृमि भस्म रूप समझा फिर वे ही इसको आत्मा मानकर श्लाघा करें और पालन पोषण करें तो उनके सदृश असत्तम निन्दनीय और कौन है ॥ ३७ ॥

गृहस्थ होकर क्रियाओं का त्याग, ब्रह्मचारी होकर व्रतों का त्याग तपस्वी होकर ग्राम सेवा और भिक्षु होकर इन्द्रियों की चंचलता जिनकी है॥ ३८ ॥

ये लोग आश्रम धारियों में नीच हैं, और आश्रम का विडंबन करने वाले हैं, श्रीहरि की माया से मोहित एसे मूढों को कृपा करके दूरसे उपेक्षा करे अर्थात् उनके समीप न वैठे ॥ ३९ ॥

जिसने ज्ञान से वासनाओं का निरास किया है, ऐसा आत्मज्ञानी यति किस इच्छा से और कौन से हेतु से देह का पोषण करेगा, और वह लंपट ही क्यों होगा अर्थात् ज्ञानी एसा कर ही नहीं सका है ॥ ४० ॥

आहुः शरीरं रथमिन्द्रियाणि हयानभीषून्मन इन्द्रियेशम् ।
वर्त्मानि मात्रा धिषणां च सूतं सत्त्वं बृहद्बन्धुर[1]मीशसृष्टम् ॥ ४१ ॥
अक्षं दशप्राणमधर्मधर्मौ चक्रे ऽभिमानं रथिनं च जीवम् ।
धनुर्हि तस्य प्रणवं पठन्ति शरं तु जीवं परमेव लक्ष्यम् ॥ ४२ ॥
रागो द्वेषश्च लोभश्च शोकमोहौ भयं मदः ।
मानो ऽवमानो ऽसूया च माया हिंसा च मत्सरः ॥ ४३ ॥
रजः प्रमादः क्षुन्निद्रा शत्रवस्त्वेवमादयः ।
रजस्तमः प्रकृतयः सत्त्वप्रकृतयः क्वचित् ॥ ४४ ॥
यावन्नृकायरथमात्मवशोपकल्पं धत्ते गरिष्ठचरणार्चनया निशातम् ।
ज्ञानासिमच्युतबलो दधदस्तशत्रुः स्वाराज्यतुष्ट उपशान्त इदं विजह्यात् ॥ ४५ ॥
नो चेत्प्रमत्तमसदिन्द्रियवाजिसूता नीत्वोत्पथं विषयदस्युषु निक्षिपन्ति ।
ते दस्यवः सहयसूतममुं तमोऽन्धे संसारकूप उरुमृत्युभये क्षिपन्ति ॥ ४६ ॥
प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम् ।
आवर्तेत प्रवृत्तेन निवृत्तेनाऽश्नुते ऽमृतम् ॥ ४७ ॥
हिंस्रं द्रव्यमयं काम्यमग्निहोत्राद्यशान्तिदम् ।
दर्शश्च पूर्णमाशश्च चातुर्मास्यं[2] पशुः सुतः ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अक्षस्य तु कौल्येन नरकपातापत्तेरप्रमत्तेन सदा तत्त्वज्ञाने यतितव्यमितीममर्थम् "आत्मानं रथिनं विद्धि शरीरं रथमेव च" इत्यादि श्रुत्युक्तरथरूपकद्वारेणाह—आहुरिति, षड्भिः । इन्द्रियेशं मनोऽभीषून् रश्मीनाहुः मात्रा शब्दादीन्वर्त्मानि गन्तव्यदेशानाहुः सत्त्वं चित्तं बृहद्देहव्यापि बन्धुरं बन्धनं चित्तं विना ह्यनिबद्धमिव शरीरं भवति ईशसृष्टमिति बन्धनकर्त्ता त्वीश एवेत्यर्थः ॥ ४१ ॥

प्राणादयः पञ्च "नागः कूर्मश्च कृकलो देवदत्तो धनञ्जयः" इत्येवं दशविधं प्राणमक्षम् अभिमानं साहङ्कारं जीवं रथिनं शुद्धं जीवं शरं परं ब्रह्म लक्ष्यं यथा धनुषा शरो लक्ष्ये निपात्यते तथा प्रणवेन जीवो ब्रह्मणि निपात्यत इत्यर्थः ॥ ४२ ॥

रागादयो जेतव्याः शत्रवः ॥ ४३ ॥

तत्र रजोऽभिनिवेशः क्वचिदारूढसमाधेः सत्त्वप्रकृतयोऽपि परोपकारादिप्रवृत्तयः शत्रवः ॥ ४४ ॥

नृकायरूपं रथमात्मवशः उपकल्प इन्द्रियादिपरिकरो यस्मिंस्तथाभूतं यावत् धत्ते तावदेव गरिष्ठानां गुरूणां चरणसेवया निशितं ज्ञानखड्गं बिभ्रदच्युताश्रयः सन्निरस्तशत्रुरुपशान्तः स्वानन्देन तुष्टो भूत्वेदं रथादिकमुपेक्षेतेत्यर्थः ॥ ४५ ॥

अच्युताश्रयाभावे बाधकमाह—नोचेदिति । असन्तो बहिर्मुखा ये इन्द्रियवाजिनः सूतश्च ते उत्पथं प्रवृत्तिमार्गं नीत्वा विषयाख्येषु दस्युषु निक्षिपन्ति हयैः सूतेन च सह वर्तमानं तमोऽन्धे तमसा व्याप्ते उरु मृत्युभयं यस्मिन् ॥ ४६ ॥

ननु, वेदविहितेष्टापूर्तादिकारिणः पुंसः कथमेवमनर्थप्राप्तिः स्यादित्याशङ्क्य वेदोक्तकर्मणां द्वैविध्यं दर्शयन्फलभेदमाह-प्रवृत्तं चेति, दशभिः ॥ ४७ ॥

हिंस्रं श्येनादि कर्म अशान्तिदमत्यासक्तियुक्तम् आदिशब्दार्थविवरणं दर्शश्चेति पशुः पशुयागः सुतः सोमयागः ॥ ४८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

न केवलं मयैव शरीरेन्द्रियादेः परमात्मप्राप्तिसाधनाऽनुष्ठानोपयुक्तसामग्रीत्वमुच्यते, अपि तूपनिषद्वाक्यान्यपि—
"आत्मानं रथिनं विद्धि शरीरं रथमेव च ।
बुद्धिं तु सारथिं विद्धि मनःप्रग्रह मेव च ॥
इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् ।
सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्" ॥

(१ मीशधाम (२) पशुः पुन इति विज० पा० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

इत्यादीनि संसाराध्वनः पारं वैष्णवं पदं प्रेप्सुस्तमात्मानं रथित्वेन तच्छरीरादीनि रथरथाङ्गत्वेन रूपयित्वा तदाहुरित्याह—आहुरिति। शरीरादीन् रथादिभावेन रूपयन्तस्तेषां परमात्मप्राप्तिसाधनाऽनुष्ठानोपयुक्तसामग्रीत्वमभीष्टदेशप्रेप्सोर्विजिगीषोश्च प्रसिद्धरथादीनां साधनत्वमित्याहुर्वेदान्ता इत्यर्थः। शरीरं रथं रथस्थानीयमिन्द्रियाणि हयानश्वानिन्द्रियाणामश्वस्थानीयानामीशं मुख्यं मनः अभीशून् रश्मीन् रज्जूनिति यावत् मात्राः शब्दादीन् वर्त्मानि मार्गस्थानीयान् धिषणां बुद्धिं सूतं सारथिं सत्त्वं बलं बृहद् दृढं बन्धुरं देहादीनां बन्धनम् ईशसृष्टमिति यथायोग्यं विभक्तिविपरिणामेन शरीरादीनां विशेषणम् ईशेन परमात्मना सृष्टमीशसृष्टम् ॥ ४१ ॥

दशानां प्राणानां समाहारो दशप्राणं प्राणादिपञ्चकं नागकूर्मकृकलदेवदत्तधनंजयाख्योपप्राणपञ्चकात्मकम् अक्षमक्षस्थानीयम् अधर्मधर्मौ पुण्यपापे चक्रे पुण्यपापात्मकयोः कर्मणोरेव रथत्वरूपितशरीरप्रवृत्तिहेतुत्वात्तदायत्तत्वेन च चक्रत्वेन रूपणम् अभिमानिनं देहाभिमानं जीवं रथिनमाहुः तस्य रथिनः प्रणवमोङ्कारं धनुः पठन्त्याहुः शरं तु जीवं परं परमात्मानं तु लक्ष्यं पठन्ति "प्रणवो धनुः शरो ह्यात्मा ब्रह्मतल्लक्ष्यमुच्यते। अप्रमत्तेन वेद्धव्यं शरवत्तन्मयोभवेत्" इति ह्यन्यत्राप्युक्तं विप्रकृष्टयोः शरलक्ष्ययोरिव जीवपरयोः सम्बन्धज्ञापनहेतुत्वात्प्रणवो धनुरुक्तम् ॥ ४२ ॥

रथित्वेन रूपितजीव एव शरत्वेनापि रूप्यते तत्र जेतव्यानाह—राग इति। रागः शब्दादि विषयाऽऽसक्तिः द्वेषः तद्विरोधिविषयाऽप्रीतिः लोभोऽसन्तोषः मोहः कार्याऽकार्याऽविवेकः भयमागामिदुःखदर्शनजं प्रतिकूलज्ञानं मदो गर्वः मानो बहुमानः अवमानस्तिरस्कारः असूया गुणेषु सत्स्वपि दोषाविष्कारः माया वञ्चनं हिंसा भूतद्रोहः मत्सरः परकृतद्रोहचिन्ता ॥ ४३ ॥

रजः क्रोधः स चामर्षः प्रमादो ऽनवधानता एवमादयः एतत्प्रभृतयः शत्रवो जेतव्यास्त एते रजस्तमःप्रकृतयः कचित्सत्त्वप्रकृतयश्च रजस्तमसी प्रकृती कारणे येषां ते सत्त्वं प्रकृतिः कारणं येषां ते चेति बहुव्रीहिः रजस्तमसोरन्यतरमिश्रसत्त्वप्रकृतय इत्यर्थः ॥ ४४ ॥

तदेवं शरीरेन्द्रियमनोविषयबुद्धिबलप्राणधर्माधर्मजीवाः रथरथाङ्गादि रथ्यादिभावेन परमात्मप्राप्त्युपायसाधनाऽनुष्ठानोपयुक्तत्वज्ञापनाय रूपिताः प्रणवजीवेशास्तु जीवपरयोः सम्बन्धज्ञानजनकत्वपरमात्मैकशेषत्वप्राप्यत्वज्ञापनाय धनुःशरलक्ष्यभावेन रूपिताः हेयत्वज्ञापनाय रागादयः शत्रुत्वेन रूपिताः अथ यस्यैते रथादयो वशे तिष्ठन्ति स एवाध्वनः पारं वैष्णवपदमाप्नोतीति "सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्" इति श्रुतेरर्थमभिप्रयन् रथादिकमपि उपेक्षेत इत्याह—यावदिति। यावच्छरीरं समीहितसाधने दक्षं स्ववशं च तावदेव ज्ञानासिना जितरागादिशत्रुर्मुक्तिसाधनमनुतिष्ठन् शरीरादिषु निःस्पृहो भवेदित्याह—यावदिति। नृकायरथं नरशरीररूपं रथं यावदात्मवशोपक्लृप्तं स्वाधीनतयोपक्लृप्तं यथा भवति तथा धत्ते तावदेव गरिष्ठानां महतां चरणार्च-

नयालब्धं निशातं ज्ञानरूपं खड्गं दधद् विभ्राणः अस्ता निरस्ताः शत्रवो रागादयो येन अच्युतः स्वाश्रितानच्यावयतीत्यच्युतः भगवानेव बलं यस्य तादृश उपशान्तः रागाद्यकलुषितचित्तः स्वाराज्यतुष्टः स्वराडकर्मवश्यः तस्य भावः स्वाराज्यं मुक्तैश्वर्यं तेन तुष्टः अवश्यमच्युतः स्वाराज्यं दास्यतीति सन्तुष्ट इदं नृकायरथादिकं विजह्यादुपेक्षेत तेषु स्पृहारहितो भवेदित्यर्थः। इदमेतद्धिसंसारकं फलं वा विवक्षितम् ॥ ४५ ॥

यद्युक्तविधो न स्यात्तदा तस्यानर्थमाह—नेति। नोचेदुक्तविधो न भवेत्तदा प्रमत्तमिमं देहिनमसन्तो बहिर्मुखा इन्द्रियवाजिनः इन्द्रियाण्येवाश्वाः सूतो बुद्धिश्चैते उत्पथं प्रवृत्तिमार्गं नीत्वा विषयरूपेषु दस्युषु निक्षिपन्ति ते विषयाख्या दस्यवः ... सूतेन च सह वर्त्तमानममुं प्रमत्तं देहिनमुर्वीधिकं मृत्यु... यस्मिन्नन्धे तमस्यन्धतामिश्रनरकतुल्ये संसारकूपे क्षिपन्ति ॥ ४६ ॥

तदेवं वर्णाश्रमधर्मान् तदनुग्राह्यं भक्तियोगं शरीरेन्द्रियादीनां तदनुष्ठानोपयुक्तत्वं तैरनुष्ठितेन वर्णाश्रमधर्मानुगृहीतेन भक्तियोगेन स्वाराज्यप्राप्तिं सांसारिकफललिप्सयाऽनुष्ठितानां तु धर्माणां संसृतिरूपानर्थावहत्वं चाभिधायाऽथ तेषामेव धर्माणामिष्टापूर्तभेदेन द्वैविध्यं सांसारिकफलसाधनत्वेन ... प्रवृत्तकर्माख्यत्वं पुनरावृत्तिहेतुत्वमुपासनानुग्राहकतया ... तु निवृत्तकर्माख्यत्वं तस्याऽपुनरावृतिहेतुत्वं चाह—प्रवृत्तमिति। वैदिकं वेदविहितं कर्म प्रवृत्तं निवृत्तमिति द्विविधं तत्र प्रवृत्तेन कर्मणा आवर्त्तते फलाऽनुभवाय लोकान्तरं प्राप्य तत्र तदनुभवाऽवशिष्टेन कर्मणा ततः पुनरिहावर्त्तते निवृत्तेन त्वमृतमश्नुते तत्फलरूपममृतं मुक्तिं प्राप्य ततः पुनर्नावर्त्तते ॥ ४७ ॥

प्रवृत्तनिवृत्तभेदभिन्नस्य वैदिकस्यैव कर्मणस्तत्स्वरूपं ... इष्टसंज्ञकत्वं च वक्तुं तद्विशिषंस्तदवान्तरभेदान्दर्शयति—हिंस्रमिति। अग्निहोत्रनामधेयकं कर्म आदिर्यस्य तदग्निहोत्रादि ... शब्दग्राह्यान्दर्शयति—दर्शश्चेति। दर्शादयः शब्दाः कर्मनामधेयानि पशुः पशुयागः सुतः सोमयागः ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

नन्वयं देहो हेयश्चेत्किमनेनार्थं इत्याशङ्क्य महाप्रयोजनमस्त्येवं कृतं चेदित्याशयेनाह—आहुरिति। अभीशुं प्रग्रहं इन्द्रियं श्रोत्रादीन्द्रियनेतारं मात्राः विषयाः धिषणा बुद्धिः ईशसृष्टं गृहस्थानीयं सत्त्वंमन्तःकरणविशेषम् ॥ ४१ ॥

दशप्राणं प्राणादशकमक्षमाहुरिति सर्वत्र योज्यं प्राणापानव्यानोदानसमाननागकूर्मकृकलदेवदत्तधञ्जयनामानां दश प्राणाः अधर्मधर्मौ पापपुण्यलक्षणे चक्रे शकटपदस्थानीये अभिमानं महङ्कारलक्षणं जीवं रथिनं पठन्तीत्यन्वयः। शरं तु ... त्यत्र तु शब्देनैतत्प्रवृत्तिविशेषभेदं सूचयति—नतु स्वरूपं "प्रणवो धनुः शरो ह्यात्मा" इति श्रुतेः। अथ देवरथस्तस्य वाणीरिति च परं ब्रह्म ॥ ४२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अस्य रथिनो जेतव्यानाह—राग इत्यादिना "अपूज्ये पूज्यबुद्धिस्तु मानः सद्भिरुदाहृतः" इति "मानो अभिमानोऽवज्ञे च परिमाणे च पूजने" इति च, "अभिमानोऽर्थादिदर्पे ज्ञाने प्रणयहिंसयोः" इति च माया कैतवं रागादय आन्तरीयाः शत्रवः बाह्याः शत्रवः सहोदरादयः आदिशब्देन दुन्दुभ्यादयः सुग्रीववाल्यादयः ते सर्वे शत्रवो रागादय उपायेन परिहर्तव्या इति शेषः ॥४३॥४४

एवं वर्णितोपयोगमाह—यावदिति । नृकायरथं मनुष्यशरीराख्यरथं "रथ गतौ" इति धातोर्ज्ञानसाधनत्वात्तच्छब्दशब्दितं यावद्दात्मवशोपकल्पं स्ववशत्वेन कल्पितं धत्ते तावद्गरिष्ठचरणार्चनया महापुरुषश्रीपादपूजनेन निशातं धौतं ज्ञानासिं दधदच्युतो बलं यस्य स तथा अच्युतं बलं यस्य स तथेति वा अस्तशत्रुः निरस्तरागादिशत्रुः स्वाराज्येनैश्वर्येण दृष्टेन तुष्टो विषयालम्बुद्धिमानुपशान्तः पूर्वक्रमादाधिक्येनोपात्तभगवन्निष्ठः पुरुष इदं संसाराख्यं हेयत्वेन सर्पनिर्मोकवत् क्लृप्तं वस्तु जह्यादित्यन्वयः ॥ ४५ ॥

इतो ऽन्यथा ऽस्य मुक्तिरेव न सेत्स्यतीत्याह—नोचेदिति । नोचेदिन्द्रियग्राममात्मवशं कृत्वा ज्ञानासिना संसाराऽनुच्छेदः शब्दादिविषयाभिलाषश्चेद्यदि तर्हि असन्तोषिता इन्द्रियहयबुद्धिसूताः प्रमत्तं रागान्धीभूतचक्षुषममुं रथिनं उत्पथमशास्त्रमार्गं नीत्वा शब्दादिविषयलक्षणेषु दस्युषु दुःखाकारेषु चौरेषु निक्षिपन्ति ते विषयचौराः सहयसूतं इन्द्रियबुद्धिसूतमिमं रथमुरुमृत्युभये तमोलक्षणाज्ञानान्धे चक्षुरविषये संसारकूपे क्षिपन्तीत्यन्वयः॥४६॥

ननु, स्वर्गकामो यजेत" इत्यादिशब्दार्थश्रवणसमनन्तरं तदुक्तकर्मणि प्रवर्तमानदुष्पापापारसंसारकूपे पातयन्तीति कथमुच्यते तस्यापि वैदिकत्वेनाङ्गीकार्यत्वादन्यस्य सर्वधर्मपरित्यागस्यावैदिकस्यापि संसारोच्छेदकत्वं च कथं सर्वधर्मान्परित्यज्येति स्मृतेरिति तत्राह—प्रवृत्तं चेति । चः समुच्चये द्विविधमित्यनेनात्यन्तभिन्नविषयत्वं दर्शयति—यद्यप्यनेवंविद् महापुण्यं कर्म करोति "तद्धास्यान्ततः क्षीयते' 'नारायणोऽसौ परमो विचिन्त्यः" इत्यादिना वैदिकत्वाच्च ॥ ४७ ॥

कीदृशं तत्प्रवृत्तं येनाऽनुष्ठितेन पुनरावृत्तिः स्यादिति तत्राह, हिंस्रमित्यादिना । अश्वत्थादिद्रव्यच्छेदनात्मकत्वाद्धिंस्रमशान्तिदं मुक्तिविपरीतफलप्रदम् ॥ ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

आहुरिति युग्मकम् । अधर्मोऽत्र धर्मपरित्यागरूपः सन्न्यासः । तदेवं सर्व्वेष्यां रथसामग्र्यां सत्यामपि धनुरादिकं विना वैयर्थ्यमेवेत्याह—धनुर्हीति ॥ ४१—४७ ॥

हिंस्रमिति युग्मकम् । सुरालयादिलक्षणं पूर्तञ्च प्रवृत्ताख्यामित्यर्थः ॥ ४८—५६ ॥

---

[८३]

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

यदेव देहेन्द्रियादिकं प्रमत्तस्यानर्थहेतुस्तदेवाप्रमत्तस्य योगिनस्त्विष्टसाधनमितीममर्थम् "आत्मानं रथिनं विद्धि शरीरं रथमेव च" इत्यादि श्रुत्युक्तरथरूपकद्वारेणाह—आहुरिति, षड्भिः। इन्द्रियेशं मनोऽभीषून् रश्मीनाहुः मात्राः शब्दादीन् वर्त्मानि गन्तव्यदेशानाहुः सत्त्वं चित्तं वृहत् देहस्यापि बन्धुरं बन्धनमाहुः चित्तं विना शरीरानिबद्धं भवतीति भावः । ईशसृष्टमिति बन्धनकर्त्ता त्वीश इति भावः । ईशसृष्टमिति रथादीनां सर्वेषामेव विशेषणं दशविधं प्राणमत्तम् अभिमानमभिमानमयं जीवं रथिनं पठन्ति. प्रणवं गुरुप्रसादरूपमहामूल्यप्राप्तं धनुः शुद्धं जीवं शरं परं ब्रह्म लक्ष्यं यथा धनुषा शरो लक्ष्ये निपात्यते तथा प्रणवेन जीवो ब्रह्मणि निपात्यत इत्यर्थः । ननु, तर्हि रथादिरूपकसाहचर्य्यात् परब्रह्मणोऽपि लक्ष्यत्वेन शत्रुरूपकत्वमायातं शत्रुरेव रथमारुह्य शरेण भिद्यते युज्यते च तस्य जीवशत्रुत्वम् स्वमायाशक्त्या जीवबन्धकत्वात् सत्यम् । "निभृतमरुन्मनोऽक्षदृढयोगयुजो हृदि यन् मुनय उपासते तदरयोऽपि ययुः स्मरणात्" इत्यरिसाहचर्येण मुनीनां मुक्तिरिव साधर्म्यं व्यनक्ति उभयेषामपि परमेश्वरे शरनिःक्षेपकत्वात् परमेश्वरस्तु स्वीयवीररससुखोपकारं ज्ञानान्तर्वर्त्तिगुणीभूतस्वभक्तिकलाश्चाऽऽलक्ष्य उभयेभ्य एव तेभ्यो मोक्षं ददातीति केचित् । अन्ये तु परमात्मनो लक्ष्यत्वेऽपि द्रौपद्यादिस्वयंवरसमाधारचक्रवर्तिमीनायमानत्वमेव तत्त्वन्यथा यथा चार्जुनाद्यास्तं स्वबाहुबलेनैव शरेण भित्वा द्रौपद्यादिकां प्रापुस्तथैव ज्ञानिनोऽपि भक्तिबलेनैव मुक्तिमित्याचक्षते ॥ ४१ ॥ ४२ ॥

यथा च स्वयंवरकन्याप्राप्तिप्रतिबन्धकदुष्टराजन्या बलिष्ठेन हन्यन्ते तथैव भगवद्भक्तिबलेन यतिना ज्ञानासिमादाय रागद्वेषाद्या हन्तव्या इत्याह—राग इति, त्रिभिः । रागद्वेषादयो रजस्तमःप्रकृतयः कश्चित् परोपकारादयः सत्त्वप्रकृतयः ॥४३॥४४॥

नृकायरूपं रथम् आत्मवश उपकल्प इन्द्रियादिपरिकरो यस्मिन् तथाभूतं यावद्धत्ते तावदेव गरिष्ठानां गुरूणां चरणसेवया निशितं ज्ञानखड्गं बिभ्रत् अच्युतभक्तिबलः सन्नेव निरस्तशत्रुर्भूत्वा स्वाराज्यस्य स्वाऽऽनन्दस्य प्राप्त्या तुष्टो भवन्निदं रथादिकं त्यजेदुपयोगाभावादेवेत्यर्थः । अत्र यथासाध्यस्य शत्रुजयस्य स्वाराज्यलाभस्य च सिद्धौ रथादिकात् धनुःशरादिकाच्च पुरुषो वियुज्यते तथा बलात् शरीराच्च वियुज्यते । एवमेव ज्ञानी प्राधानिकादुपाधेर्मुक्तिसाधनाज्ज्ञानाच्च वियुज्य ज्ञानान्तर्भूतया केवलया भक्तिकलया सहित एव परमात्मनि सायुज्यं लभते नतु ततो वियुज्यते तस्याः स्वरूपशक्तिवृत्तित्वेन परमात्मैक्यात् ज्ञाना ऽज्ञानयोस्तु मायाशक्तिवृत्तित्वात्तद्द्वयोपेक्षासमुचितैव. अत एव "धनुर्हि तस्य प्रणवं पठन्ति. शरं तु जीवं परमेव लक्ष्यम्" इत्यत्रापि यथा रथादिभ्यो धनुषश्च वियुज्यापि शरः पुरुषबलेन वेगरूपतामापन्नेन सहैव तत्प्रभावादेव लक्ष्यं प्रविशति; तथैव शुद्धजीव देहेन्द्रियादिकमशुद्धजीवं चाज्ञानस्वरूपामविद्यां त्यक्त्वा मुक्तिसाधनज्ञानकारणप्रणवस्वरूपां विद्यां च त्यक्त्वा अशुद्धजीववर्तिन्या भक्तिकलयैव केवलया सहितस्तद्-

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

भावादेव परमात्मानं ज्ञात्वा तत्र सायुज्यं लभते । यदुक्तम् भगवता

"ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥
भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः ।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्" ॥

इत्यस्य पद्यद्वयस्यायमर्थः भक्तिमिश्रज्ञानपरिपाकेनोपाध्यपगमे ब्रह्मभूतः अनावृतचैतन्यत्वेन ब्रह्मरूप इत्यर्थः । गुणमालिन्यापगमात् प्रसन्नश्चासावात्मा चेति स ततश्च पूर्वदशायामिव नष्टं न शोचति न चाप्राप्तं काङ्क्षति देहाद्यभिमानाभावादिति भावः । भूतेषु भद्राऽभद्रेषु समः बाह्यानुसन्धानाभावादिति भावः । ततश्च निरिन्धनाग्नाविव ज्ञाने शान्तेऽप्यनश्वरां ज्ञानान्तर्भूतां मद्भक्तिं लभते तस्या मत्स्वरूपशक्तिवृत्तित्वेन मायाशक्तिभिन्नत्वात् अविद्याविद्ययोरपगमेऽप्यनपगमात् अत एव परां निष्कामकर्मज्ञानाद्युर्वरितत्वेन केवलां लभत इति । पूर्वं ज्ञानवैराग्यादिषु मोक्षसिद्ध्यर्थं कलया वर्त्तमानाया अपि सर्वभूतेष्वन्तर्यामिण इव तस्य स्पष्टोपलब्धिर्नासीदिति भावः । अत एव कुरुते इत्यनुक्त्वा लभत इति प्रयोगः । माषमुद्गादिषु मिलितां कालेन तेषु नष्टेष्वप्यनष्टां काञ्चनमणिकामिव तेभ्यः पृथक्तया केवलां लभत इति वत् स्वरूपायाः प्रेमभक्तेस्तु तदानीं लाभसम्भावना नैवास्ति नापि तस्या फलं सायुज्यमित्यतःपरांप्रेमलक्षणामिति न व्याख्येयं ननु तया लब्धया भक्त्यातस्य किं स्यादित्यतोऽर्थान्तरोपन्यासेनाह-भक्त्येति । अहं यावान् यश्चास्मि तस्मां तत्पदार्थं ज्ञानी वा नानाविधो भक्तो वा भक्त्यैव तत्त्वतोऽभिजानाति"भक्त्याऽहमेकया ग्राह्यः"इत्यादिमदुक्तेः।यस्मादेवं तस्मात्ततस्तया भक्त्यैव तदनन्तरं विद्योपरामादुत्तरकाल एव मां ज्ञात्वा मां विशते मत्सायुज्यसुखमनुभवति मम मायातीतत्वात् विद्यायाश्च मायात्वात् विद्ययाऽप्यहमगम्य इति भावः यत्तु—

"साङ्ख्ययोगौ च वैराग्यं तपोभक्तिश्च केशवे ।
पञ्चपर्वेति विद्येयं यया विद्वान् हरिं विशेत्" ॥

इति विद्यावृत्तित्वेन भक्तिःश्रूयते मत्सायुज्य सुखमनु तत् खलु ह्लादिनीशक्तिवृत्तेरेव कला काचिद्विद्यासाफल्यार्थं विद्यायां प्रविष्टा यथा कर्मसाफल्यार्थं कर्मयोगेऽपि प्रविशति तया विना कर्मज्ञानयोगादीनां श्रममात्रत्वोक्तेरतो निर्गुणा भक्तिः सत्त्वगुणमय्या विद्याया वृत्तिवस्तुतो न भवतीति किञ्च "सत्त्वात् सञ्जायते ज्ञानम्" इति स्मृतेः । सत्त्वजं ज्ञानं विद्यैव यथा तथा भक्त्युत्थं ज्ञानं भक्तिरेवेति ज्ञानमपि द्विविधं द्रष्टव्यम् ॥ ४५ ॥

अच्युतबलत्वाभावे साध्यं न सिद्ध्येत् प्रत्युताधःपातश्चेत्याह—नोचेत् यदि रथिनो बलं न स्यात् पक्षे जीवस्य यदि भक्तिर्न स्यादित्यर्थः । प्रमत्तं जीवं बलाभावेऽपि लक्ष्यवेधार्थं रथारोहणमेव प्रमादः पक्षे भक्त्यभावे मुमुक्षैव प्रमादः ते दस्यवः रागद्वेषाद्याः ॥ ४६ ॥

ननु, विषयभोगोऽपि शास्त्रेण विहितो न केवलं निषिद्ध एव सत्यम्,अधिकारिभेदात् फलभेदाच्च तत्र व्यवस्थाहष्टव्येत्याह-प्रवृत्तं चेति, दशभिः । आवर्त्तते गृहस्थः अमृतमश्नुते यतिः ॥ ४७ ॥

हिंस्रं श्येनादिकर्म अशान्तिदं अत्यासक्तिप्रदम् । आदिशब्दा... विवृणोति—दर्शश्चेति । पशुः पशुयागः सुतः सोमयागः ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

"आत्मानं रथिनं विद्धि शरीरं रथमेव च"इत्यादि श्रुत्यर्थमु... बृंहयन् श्रीगुरुप्रसादलब्धज्ञानभक्तिभ्यां सुदृढदेहादिसम्ब... मुक्तो भवेदिति उपदिशति—आहुरिति, पञ्चभिः । शरीरं रथ... न्द्रियाणि हयान् इन्द्रियेशं मनो ऽभीषून् रश्मीन् मात्राः शब्दादि... विषयान् वर्त्मानि उल्लङ्घनीयान् देशान् धिषणां बुद्धिं सूतं सत्... चित्तं ईशेन जीवकर्मानुसारिणा सृष्टं बृहद्बन्धुरं पूर्णं बन्धन... माहुः ॥ ४१ ॥

प्राणापानव्यानोदानसमाननागकूर्मकृकलदेवदत्तधनञ्जयाभि... दशप्राणमक्षम् धर्माधर्मौ चक्रे अभितो देहादौ मानो यस्य... साधनावस्थावन्तं जीवं रथिनम् प्रणवं भगवन्मन्त्रं धनुः प्राप्त... जीवं विमुक्ताभिमानं सिद्धावस्थावन्तं शरं गन्तारं परं पु... षोत्तमं लक्ष्यं गम्यं पठन्ति. प्रणवादिभगवन्मन्त्रजपभावितो जीवं... भगवन्तं प्राप्नोतीति फलितो ऽर्थः ॥ ४२ ॥

शत्रूनाह—राग इति । द्वाभ्याम् ॥ ४३ ॥

रजो ऽभिनिवेशः सत्त्वप्रकृतयो ऽपि बहुपुण्यकर्मप्रवृत्तिप्र... रिणयो हि साधनावस्थायां हिता अपि ध्याननिष्ठस्य शत्र... एवात आह—सत्त्वप्रकृतयः क्वचिदिति ॥ ४४ ॥

आत्मवशः स्वायत्तः उपकल्प इन्द्रियादिनामकाश्वादिपरि... करो यस्य तथा भूतं नृकायरथं यावद्धत्ते तावदेव गरिष्ठस्य... गुरोश्चरणसेवया निशितं ज्ञानखड्गं दधत् अच्युतबलः भग... वदनन्यभक्तः जितरागादिः सन् स्वाराज्यतुष्टः भगवद्ध्यानान... न्देन तुष्ट इदं संसारं विजह्यात् मुक्तो भवेदित्यर्थः ॥ ४५ ॥

गुरुचरणसेवालब्धज्ञानभक्त्यभावे संसारनिवृत्तिर्न स्यादि... त्याह—नोचेदिति । असन्तो भगवद्ज्ञानभक्त्यनुपयुक्ताः ये इन्द्रि... यत्राजिनः सूनश्च ते उत्पथं प्रवृत्तिमार्गं नीत्वा विषयदस्यु... निक्षिपन्ति ते दस्यवस्तु अमुं रथिनम् उरु मृत्युभयं यत्र तस्मि... तमोन्धे तमसा व्याप्ते संसारकूपे क्षिपन्ति ॥ ४६ ॥

एवं भगवद्ज्ञानभक्तिसम्पन्नो मुक्तो भवेत्तदसम्पन्नः संसा... प्राप्नोतीत्युक्तम् । अथ प्रवृत्तकर्मनिष्ठतया तस्यैव भगवज्ज्ञानभक्ति... नस्य धूममार्गेणावृत्त्या संसारं निवृत्तकर्मनिष्ठतया तस्यैव भ... वज्ज्ञानभक्तिसम्पन्नस्यार्चिरादिमार्गेणमुक्तिं चाह—प्रवृत्तमिति दशभिः । अमृतं मोक्षम् ॥ ४७ ॥

प्रवृत्तं कर्माह—हिंस्रमिति, द्वाभ्याम् । हिंस्रं श्येनादिकर्म पशु... शब्दः पशुयागपरः सुतः सोमयागः ॥ ४८ ॥

भाषा टीका ।

बुधजन इस शरीर को ईश्वर का बनाया हुआ रथ क... हैं, इसमें इन्द्रियें घोडे हैं, इन्द्रियों का ईश अर्थात् नियन्ता ... मन वागडोर है, विषयों की वासनायें गमन के मार्ग हैं, अ... प्रदेश हैं बुद्धि सारथी है और चित्त इसका बन्धन है ॥ ४१ ॥

एतदिष्टं प्रवृत्ताख्यं हुतं प्रहुतमेव च ।
पूर्तं सुरालयाऽऽरामकूपाऽऽजीव्यादिलक्षणम् ॥ ४९ ॥
द्रव्यसूक्ष्मविपाकश्च[१] धूमो रात्रिरपक्षयः ।
अयनं दक्षिणं सोमो दर्श ओषधिवीरुधः ॥ ५० ॥
अन्नं रेत इति क्ष्मेश ! पितृयानं पुनर्भवः ।
एकैकश्येनानुपूर्वं[२] भूत्वा भूत्वेह जायते ॥ ५१ ॥
निषेकादिश्मशानान्तैः संस्कारैः संस्कृतो द्विजः ।
इन्द्रियेषु क्रियायज्ञान् ज्ञानदीपेषु जुह्वति ॥ ५२ ॥
इन्द्रियाणि मनस्यूर्मौ वाचि वैकारिकं मनः ।
वाचं वर्णसमाम्नाये तमोङ्कारे स्वरे न्यसेत् ।
ओङ्कारं बिन्दौ नादे[३] तं तं तु प्राणे महत्यमुम् ॥ ५३ ॥
अग्निः सूर्यो दिवा प्राह्णः [४]शुक्लो राकोत्तरं स्वराट् ।
विश्वश्च तैजसः प्राज्ञस्तुर्य आत्मा समन्वयात् ॥ ५४ ॥

भाषा टीका ।

और दशों प्राण अक्ष अर्थात् धुरी हैं अधर्म और धर्म ये दोनों चक्र (पहिये) हैं, उसमें अभिमानी जीव चढने वाला रथी है, इसका प्रणव (ओंकार) ही धनुष है और शुद्ध जीवस्वरूप ही बाण है, और लक्ष्य (निशाना) परमेश्वर है अर्थात् जैसे बाण निशाने में लगता है ऐसे ही जीव को परमेश्वर में लगना चाहिये ॥ ४२ ॥

राग, द्वेष, लोभ, शोक, मोह, भय, मद, मान, अवमान, असूया, माया, हिंसा, मत्सर, ॥ ४३ ॥

रजोगुण, प्रमाद, क्षुधा, निद्रा, ये सब जीतने के योग्य इसके शत्रु हैं। और रजोगुणी तमोगुणी प्रकृति तथा कचित् सतोगुणी प्रकृति भी शत्रु है ॥ ४४ ॥

जब तक मनुष्य देह रूप रथ अपने वश का और समर्थ है तब तक ही गुरुजनों के चरणों की सेवा से तीक्ष्ण ज्ञानरूप खड्ग को धारण कर परमेश्वर के बलका आश्रय लेकर सर्व शत्रुओं का अस्त (नाश) कर उपशांत होकर ब्रह्मानन्द में मग्न होकर इस रथादिक की उपेक्षा कर देवे ॥ ४५ ॥

यदि अच्युत अर्थात् अपने भक्त के कार्य से कभी न चूकने वाले श्रीगोविन्द के बल का आश्रय न लेवेगा तो दुष्ट इन्द्रियरूप-घोडे और बुद्धि रूप सारथि ये सब इस रथी को उत्पथ अर्थात् कुमार्ग में लेजाकर विषयरूप चोरों में छोड देते हैं। वे चोर, घोडा और सारथि सहित इस रथी को बडे मृत्यु के भय वाले संसार रूप घोर अंधकूप में डाल देते हैं ॥ ४६ ॥

वैदिक कर्म दोप्रकार का है एकप्रवृत्तकम, दूसरा निवृत्तकर्म तहां प्रवृत्तकर्म के आचरण से फिर पुनरावृत्ति होती है, और निवृत्ति प्रधान कर्म के आचरण से अपुनरावृत्ति पूर्वक अमृत (मोक्ष) को प्राप्त होता है ॥ ४७ ॥

हिंसा प्रधान श्येनयागादि द्रव्यमय काम्य अग्नि होत्रादि ये अशांतिप्रद है, और दर्श, पौर्णमास, चातुर्मास्य पशुयाग सोमयाग ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हुतं वैश्वदेवम् प्रहुतं बलिहरणम् एतत्सर्वमिष्टमुच्यते एतदेव यदि काम्यमशान्तिदञ्च तर्हि प्रवृत्ताख्यमपीत्यर्थः । आजीव्यं प्रपादि ॥ ४९ ॥

प्रवृत्तेन कर्मणा आरोहावरोहाभ्यामावृत्तिप्रकारमाह, द्रव्यस्य चरुपुरोडाशादेः सूक्ष्मो विपाकः परिणामो देहान्तरारम्भको येनसम्परिष्वक्तो गच्छति य एव श्रुतौ अप्शब्देनोक्तः "इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" इति पाठान्तरे द्रव्यशब्देन तेजोमात्राशब्दोक्तानीन्द्रियाणि ऊष्मविपाकशब्देन हृदयाग्रप्रद्योतः तथा च श्रुतिः "स इमास्तेजोमात्राः समभ्याददानो हृदयमेवान्वक्रामदिति तथा तस्य हैतस्य हृदयाग्रं प्रद्योतते तेनैष आत्मा निष्क्रामति" इति धूमादिशब्दैस्तत्तदभिमा-

(१) द्रव्यसूक्ष्मविपाकश्च (२) एकैकस्याऽनुपूर्व्याच्च (४) दिना वायुरिति विज० पा०। (३) बिन्दुनादे तु. इति विज० वीर० पा०॥

देवयानमिदं प्राहुर्भूत्वा भूत्वाऽनुपूर्वशः ।
आत्मयाज्युपशान्तात्मा ह्यात्मस्थो न निवर्त्तते ॥ ५५ ॥
य एते पितृदेवानामयने वेदनिर्म्मिते ।
शास्त्रेण चक्षुषा वेद जनस्थोऽपि न मुह्यति ॥ ५६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

निन्यो देवताः तत्रापक्षयः कृष्णपक्षः सोमः सोमलोकः तत्र भुक्तभोगस्यावरोहणप्रकारमाह—दर्श इत्यादि, विपरीत लक्षणया विशिष्टभोगक्षयशोकाग्निना देहलयेनादर्शनमुच्यते एतदुक्तं भवति भूतसूक्ष्मयुक्तो धूमाद्यातिवाहिकदेवताभिः सोमलोकं प्रापितस्तद्भोगावसाने विलीनदेहो वृष्टिद्वारेणौषधिवीरुधादिसास्यापत्तिक्रमेण जायते एवं पुनर्भवहेतुः पितृयानं प्रवृत्तकर्ममार्ग इति ॥ ५० ॥

क्ष्मेश, हे भूपते ! पुनर्भवमेवाऽऽह—एकैकश्येन प्रत्येकं क्रमेण भूत्वा तत्तत्सान्निध्यं प्राप्येह भूमौ जायते ॥ ५१ ॥

तत्राधिकारिणमाह—निषेकादीति । अन्यस्त्ववण्यादिकार्येष्वेवं लम्भ लभत इत्यर्थः । निवृत्तकर्मनिष्ठस्योपासनादिविशेषमुपदिशन्नर्चिरादिमार्गेण ब्रह्मलोकप्राप्तिमाह—इन्द्रियेष्वित्यादिना । यद्वा द्रव्ययज्ञेषु हिंसाया दुर्निवारत्वादतिमुख्यं निवृत्तं कर्मैव दर्शयन्नाह—ज्ञानेन दीप्यन्त इति तथा तेषु इन्द्रियव्यापाराणामिष्टापूर्त्तादीनामिन्द्रियतावन्मात्रतां भावयन्तीत्यर्थः । एवमुत्तरत्रापि ॥ ५२ ॥

ऊर्मौ दर्शनादिसङ्कल्परूपे मनसि वैकारिकं विकारयुक्तं मनो वाचि विध्यादिलक्षणया वाचा हि मनः कर्तृत्वाद्विविकारं भजति. वर्णानां समाम्नाये समुदाये तद्विशेषत्वाद्वाचः स्वरे अकारादिस्वरत्रयात्मके ओङ्कारं विन्दौ तं च नादे प्राणे सूत्रात्मनि महति ब्रह्मणि ॥ ५३ ॥

अग्निरिति तत्तदभिमानिन्यो देवतास्ताः प्राप्नोतीति पूर्ववत् दिवाऽहः प्राह्णस्तस्यैवान्तः राका शुक्लपक्षस्यान्तः यद्वा प्राह्णो राका इति च पुराणमतम् उत्तरं त्वयनम् स्वराट् ब्रह्मा एवं ब्रह्मलोकं गतस्य भोगावसाने मोक्षप्रकारमाह—विश्व इति । विश्वः स्थूलोपाधिः सः स्थूलं सूक्ष्मे विलाप्य सूक्ष्मोपाधिस्तैजसो भवति सूक्ष्मं कारणे विलाप्य कारणोपाधिः प्राज्ञो भवति कारणं च सर्वसाक्षित्वेनान्वयात्साक्षिस्वरूपे विलाप्य तुर्यो भवति तेषां च व्यभिचारिणां साक्ष्याणां लये शुद्ध आत्मा भवति मुच्यत इत्यर्थः ॥ ५४ ॥

यथेतरो भूत्वा निवर्तते तथा न निवर्तत इत्यर्थः ॥ ५५ ॥

वेदेन निर्मिते "ते धूममभिसम्भवन्ति" इत्यादिना "ते अर्चिरभिसम्भवन्ति" इत्यादिना च निश्चयेन विविच्य ज्ञापिते इत्यर्थः । जनस्थोऽपि देहस्थोऽपि न मुह्यति ॥ ५६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हुतं वैश्वदेवं प्रहुतं वलिहरणं तदेतत्सर्वं वैदिकं कर्म इष्टमित्याख्यम् यद्यतदेव कर्म हिंस्रद्रव्यमयं हिंसा विषयद्रव्यप्रचुरम् । हिंस्रामिति पाठे पश्वादिहिंसागर्भं पुरोडाशादिद्रव्यप्रचुरं च काम्यं स्वर्गादिकामार्थमशान्तिदं पूर्वोक्तरागाद्यनर्थदं स्याच्चदा प्रवृत्ताख्यमकाम्यं शान्तिदं स्यात्तदा निवृत्ताख्यमित्यर्थः । अथ पूर्त्तसंज्ञकं कर्माह–पूर्त्तमिति । देवालयादिनिर्माणादिकर्मपूर्त्तम् आजीव्यमाजीविका ॥ ४९ ॥

तत्र प्रवृत्तिधर्मपरायणस्य त्रैवर्णिकस्य तत्फलानुभवाय लोकान्तरारोहणमार्गे फलानुभवाऽवसाने ततः पुनरवरोहणमार्गमेवं सञ्चरतो भूतसूक्ष्मपरिष्वक्तत्वं चाह–द्रव्येत्यादिना, सार्द्धद्वयेन निषेकादिश्मशानान्तैः गर्भाधानादि श्मशानान्तैः संस्कारैः संस्कृतो द्विजस्त्रैवर्णिकः इष्टापूर्त्तदत्तकारी देहत्यागानन्तरं द्रव्यसूक्ष्मविपाक द्रव्याणां पृथिव्यादिभूतानां सूक्ष्मा विपाकाः सूक्ष्मावस्थाः यस्य सूक्ष्मावस्थपृथिव्यादिभूतयुक्तः भूतसूक्ष्मपरिष्वक्त इति यावत् हे क्ष्मेश, पृथिवीपते ! धूमादयः शब्दास्तदभिमानिदेवतापरा तत्र अपक्षयः अपरपक्षः अयनं दक्षिणं दक्षिणायनं सोमश्चन्द्र इति शब्दः प्रत्येकमन्वेति । धूम इति रात्रिरिति तानेकैकश आनुपूर्व्येण भूत्वा भूत्वा । भूप्राप्तावात्मनेपदीति भवतिरत्र प्राप्त्यर्थः प्राप्य प्राप्येत्यर्थः । धूमादिक्रमेण चन्द्रं प्राप्य तत्रामृतमयशरीरयुक्त इष्टादिकर्मफलमनुभूय ततः दर्शः दर्शस्य चन्द्रकलाक्षयहेतुत्वादिना दर्शशब्देन चन्द्रं प्राप्तस्याऽमृतमयशरीरनाशो लक्ष्यते विनष्टामृतमयशरीर इत्यर्थः । चन्द्रमसः स्थानात् क्रमेणौषध्यादिं प्राप्येह लोके जायते एतच्च पितृयानं पुनर्भवहेतुरित्यर्थः । यद्वा चन्द्रपर्यन्तं पितृयानं ततो रेतः पर्यन्तं पुनर्भवयानमित्यर्थः । तत्र दक्षिणायनसोमयोर्मध्ये पितृलोकः आकाशश्च द्रष्टव्यः ओषधेः पूर्वं क्रमेणाकाशवायुधूमाभ्रमेघवर्षाणि द्रष्टव्यानि तत्रारोहणं धूमरात्र्यपरपक्षदक्षिणायनषण्मासपितृलोकाकाशचन्द्र क्रमेण. अवरोहणन्तु चन्द्रमसः स्थानादाकाशवायुधूमाभ्रमेघवर्षौषधिवीरुदन्यतरान्नरेतःक्रमेणेत्यर्थः । तथा च श्रूयते छान्दोग्ये "अथ य इमे ग्रामे इष्टापूर्त्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति धूमाद्रात्रिं रात्रेरपरपक्षमपरपक्षाद्यान् षड्दक्षिणैति मासांस्तानेवैते सम्वत्सरमभिप्राप्नुवन्ति मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चन्द्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति तस्मिन् यावत्सम्पातमुषित्वाथैतमेवाध्वानं पुनर्निवर्त्तन्ते यथैतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वा अभ्रं भवति अभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा जायन्तेऽतो वै खलु दुर्निष्प्रपतरं यो यो ह्यन्नमत्ति यो यो रेतः सिञ्चति तद्भूय एव भवति तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिंवा चण्डालयोनिंवा अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिंवा चाण्डालयोनिं वा" इति. तत्रारोहणदशायां धूमाद्यभिमानिदेवतालोकगमनमेव धूमादिभावः,अवरोहणे त्वाकाशवायुधूमाभ्रमेघवर्षेषु तद्भावोनाम तत्संसर्गकृततत्साद्दश्यापत्तिरेव "तत्स्वाभाव्यापत्तिरुपपत्तेः३।१।२२। इति शारीरकन्यायात् व्रीह्यादिभावोनाम जीवान्तराधिष्ठितव्रीह्यादिसंश्लेषमात्रम् "अन्याधिष्ठितं पूर्ववदभिलापात्३।१।२४। इति न्यायात् एवंवान्वयः। द्रव्यसूक्ष्म विपाक इति. द्रव्यसूक्ष्मविपाकादय इत्येते सोमपर्यन्ताः पितृयानं दर्शादयो रेतःपर्यन्ताः पुनर्भवः गर्भाधानादिश्मशानान्तैः संस्कृत इष्टादिकारी आनुपूर्व्यात्क्रमेण भूत्वाभूत्वा राज्यादीन् प्राप्य प्राप्य पुनरिह जायते इति ॥ ५० ॥ ५१ ॥

अथापुनर्भवं देवायानं वक्तुं तेन जिगमिषोर्निवृत्तधर्मनिष्ठस्य तावत् कृत्यमनुसन्धानमाह–इन्द्रियेष्विति द्वाभ्याम्।ज्ञानदीपेषु ज्ञानदीपकेषु चक्षुरादीन्द्रियेषु क्रियायज्ञान्कर्मेन्द्रियव्यापारान् जुह्वति देवयानेन जिगमिषव इति शेषः। चक्षुरादिभिर्ज्ञानेन्द्रियैः पाणिपादादिकर्मेन्द्रियाणि नियच्छेयुरित्यर्थः। इन्द्रियाणि चक्षुरादीनि ज्ञानेन्द्रियाणि सङ्कल्पविकल्पादिरूपोर्मिमति मनसि जुह्वति मनसा तानि नियच्छेयुरित्यर्थः। वैकारिकं सत्त्वोत्तरं वाचि शास्त्रात्मिकायां मनः मनसः उच्छास्त्रप्रवृत्तिं निरुंध्यादित्यर्थः। वाचं वर्णसमाम्नाये पञ्चाशदक्षरात्मिकामनुसन्दधीरन् वर्णसमाम्नायमोङ्कारेऽन्तर्गतं विदुः तमोकारं बिन्दुनादे चतुर्थ्यां मात्रायां बिन्दुनादञ्च प्राणे प्राणसहचारिणि मकारवाच्ये जीवे वाचकत्वेनान्तर्भावयेयुः। अमुं जीवं महति महदात्मनि परब्रह्मणि समर्पयेयुरिति मुमुक्षोरनुसन्धानप्रकारउक्तः ॥ ५२ ॥ ५३ ॥

अथ तस्य गतिहेतुभूतमर्चिरादिमार्गमंशतो दर्शयति–अग्निरिति। अग्न्यादिशब्दास्तदभिमानिदेवतापराः अत्र न क्रमविवक्षा श्रौतक्रमविरोधात् ननु सूर्योऽग्नेरनन्तरं दिवसादिभ्यः पूर्वं श्रूयते किन्त्वेवम् "तद्यइत्थं विदुर्ये चेमेऽरण्ये श्रद्धां तप इत्युपासते तेऽर्चिषमभिसंभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङ्ङेतिमासांस्तान्मासेभ्यः संवत्सरं सम्वत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान् ब्रह्मगमयत्येष देवयानः पन्थाः" इति । अत्र सम्वत्सरादनन्तरं वायुं विद्युतोऽनन्तरं वरुणेन्द्रौ च जानीयात् कौषीतकिब्राह्मणे "एतं देवायानं पन्थानमापद्याऽग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स आदित्यलोकं स इन्द्रलोकं स प्रजापतिलोकम्" इति श्रवणात्. स्वराडत्रामानवः प्रजापतिर्वा अयं च सकलश्रुत्यविरोधेन निर्णीतः क्रमो वरदगुरुभिरभिहितः "अग्निरहःसितपक्षानुदगयनाब्दमरुदर्केन्दून् । अपि वैद्युतवरुणेन्द्रप्रजापतीनातिवाहिकानाहुः"इति, पूर्वाह्नोराका चानश्रीतशाखान्तरेण्वामन्तव्यौ उत्तरम् उत्तरायणम् एवं मुक्तप्राप्यभगवल्लोकमार्गो दर्शितः तत्र प्राप्यस्य भगवतश्चतुर्व्यूहविशिष्टतामाह—विश्व इति। यथा सर्वज्ञसंहितायाम् "सृष्टिस्थित्यन्तकारिण्यः शक्तयस्तत्र ऊर्जिताः" इत्युपक्रम्य—

"अकारशक्तिर्विश्वाख्या उकाराख्या तु तैजसी ।
मकारशक्तिः प्राज्ञाख्या तासां रूपं पुनःशृणु" ॥

इत्यादिना जाग्रदाद्यवस्थान्वयादिकमुक्त्वा—

"एतास्तिस्रो दशास्तिस्रः शक्तीः संप्रीणयन्ति ताः ।
अनिरुद्धादिरूपास्ताः मोक्तुः शक्तीर्विचिन्तयेत् ॥
अर्द्धमात्राऽधिपा दिव्याऽप्रकाशार्यप्रकाशिका ।
वासुदेवमयीं शक्तिं विद्धि तामनुपस्कृताम्" ॥ इत्युक्तम् ।

अतः सृष्ट्यधिष्ठाता जाग्रदवस्थानिर्वाहकोऽनिरुद्धो विश्वः स्थित्यधिष्ठाता स्वप्ननिर्वाहकः प्रद्युम्नस्तैजसः संहृतिशक्त्यधिष्ठाता सुषुप्तिनिर्वाहकः संकर्षणः प्राज्ञः एते चाऽकारोकारमकारवाच्याः। सर्वकारणभूतः सर्वशक्तिर्मोक्षप्रदः प्रणवार्थमात्रावाच्यो वासुदेवस्तुर्यश्चतुर्थमात्रासहितप्रणवस्य पूर्वमनुसन्धेयतया प्रकृतत्वादेवं तस्यार्थः फलदशायां प्राप्यतयोक्तः। इदं प्रदर्शनार्थमुक्तम् । परव्यूहविभवादिसर्वाऽवस्थाविशिष्टो भगवान् मुक्तप्राप्य इत्यर्थः । समन्वयात्सर्वेषां व्यूहादीनां प्राप्यान्तर्भावादित्यर्थः ॥ ५४ ॥

इदं देवायानं प्राहुर्वेदान्ता इति शेषः। आत्मयाजी परमात्मोपासकः अनुपूर्वशः क्रमेणाऽर्चिरादीन् प्राप्य उपशान्तः निःशेषनिवृत्त आत्मा प्रकृतिर्यस्य ताद्दशः आत्मनि परमात्मनि स्थितः आधेयतया स्थितः आत्मन्याविर्भूतापहतपाप्मत्वादिगुणाष्टकयुक्ते ब्रह्मात्मके स्वस्वरूपे स्थितः उक्तविधब्रह्मशेषत्वेनात्मानमनुभवन्नित्यर्थः। पुनस्ततो न निवर्त्तते एवं देवयानपथगोभूत्वा न निवर्त्तते जन्ममरणादिकं तद्धेतुभूतपुनरावृत्तिं च न प्राप्नोतीत्यर्थः ॥ ५५ ॥

"नैते सृती पार्थजानन्योगी मुह्यति कश्चन ।
तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन !" ॥

इति श्रीभगवदुक्तमार्गद्वयचिन्ताफलमाह–य एत इति। यः पुमान्मुमुक्षुर्वेदनिर्मिते वेदबोधिते एते पितृदेवानां अयने वर्त्मनी देवयानपितृयाने शास्त्रात्मकेन चक्षुषा वेद सोऽपि पुमान्नमुह्यति जनस्थोपीऽति पाठे, देहस्थोऽपीत्यर्थः। स्वानुष्ठेयभगवद्भक्तियोगेन मोहं न प्राप्नोतीत्यर्थः ॥ ५६ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हुतं वैश्वदेवं प्रहुतं हुत्वा बलिहरणमेतद्वयमिष्टं सुरालयादिविपाकान्ताः पूर्तम् आजीव्याः सर्वसेव्याः कुट्टिममूला विस्तृतशाखाः तरवः ॥ ४९ ॥

द्रव्यसूक्ष्मविपाकः पुरोडाशादिद्रव्यजनितापूर्वं फलं धूम इत्यादिना धूमादिशब्दवाच्यादेवताश्चाऽत्र गृह्यन्ते इति ज्ञातव्यम् अपक्षयः कृष्णपक्षः सोमश्चन्द्रः पर्वदर्शशब्देन तत्प्रयुक्तकर्मविशेषो ऽत्र तु तदभिमानिदेवा उच्यन्ते. अनेन मार्गेण गतस्य

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

गतिप्रकारमाह—ओषधीति । पितृयानं गतः अम्बुवृष्ट्यादिद्वारेण भुवं प्राप्तः ओषध्यादिर्भवति ॥ ५० ॥

अन्नरूपेण पितरं प्रविश्य रेतोरूपेण मातरं चेति पुनः पुनर्भवतीति पुनर्भवः, स्यादिति शेषः । न केवलमोषध्यादिभावोऽस्य, किन्तु धूमादिभावोऽप्यस्तीति भावेनोक्तं विशदयति-एकैकस्येति । अत्रानुपूर्व्यात्क्रमात् । "अथ इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति" इत्युपक्रम्य 'यो यो ह्यन्नमत्ति यो यो रेतः सिञ्चति तद्भूप एव भवत्यन्ते" अनेनायमर्थः प्रपञ्च्यते ॥५१॥

अत्र च "त इह रमणीयचरणाभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा" इत्यादेरभिप्रायं दर्शयति—निषेकादीति । निषेको रेतःसेकः अनेनापि पुनर्भव इत्यस्य भावो विवृत इति ज्ञायते देवयानापरपर्यायार्चिरादिमार्गाभिमानिदेवचक्रं वदिष्यंस्तन्मार्गगतावित्थंभूतसाधनमाह—इन्द्रियेष्विति । क्रियायज्ञान् क्रियात्मकयज्ञाभिमानिदेवान् ज्ञानं दीपयन्ति जनयन्तीति ज्ञानदीपानि ज्ञानमेव दीपो येषां तानि तथा तेष्विन्द्रियेष्विन्द्रियाभिमानिदेवेषु जुहोति हवनं नाम तद्वशत्वेन स्मरणं, तदुक्तम्—

"यज्ञाभिमानिनो देवान् स्मरन्तीन्द्रियमानिनम् ।
वशगांस्तान्मनो मानिसुरेन्द्रस्य वशे स्थितान् ॥
वेदात्मिकायाः पार्वत्यास्तं तां रुद्रवशे स्थिताम् ।
वर्णत्रयात्मकं रुद्रं शेषे तु प्रणवात्मके ॥
विन्दुरूपे सरस्वत्यां तं तां तस्यां पुनर्न्यसेत् ।
मूलस्थनादरूपायां तां वायौ तं जनार्दने ।
प्रकृत्यामथवा प्राणं तामेव पुरुषोत्तमे" ॥

इति ॥ ५२ ॥

इन्द्रियाणि तदभिमानिदेवान्मनसि मनोभिमानीन्द्रवशे तानेवं पूर्ववत्स्मरन्तीति शेषः । विशिष्टाकारपराक्रमलक्षणं कर्मास्यास्तीति, वैकारिकं मनोऽभिमानिनमिन्द्रं वाचि वेदाभिमानिन्यां पार्वत्यां तामुमां वर्णसमाम्नाये पदवर्णस्वरक्रमाणां सम्यगाम्नायः सम्प्रदायोऽनन्यथापाठलक्षणो यस्मिन् स तथा अकारोकारमकाराणां त्रयाणां वर्णानां समाम्नायो मेलनं यस्मिन् ओंकारे स तथा तस्मिन् तदभिमानिनि रुद्रे स्थितामिति शेषः । तुशब्देन भार्याभर्तृभावं पूर्वस्माद्विशिनष्टि; तं रुद्रम् ओङ्काराभिमानिनि स्वं परमात्मानं रमयतीति स्वरः शेषः तस्मिन् स्थितं न्यसेत् मनस्तद्विषयं करोति ॥ ५३ ॥

तमोङ्कारं शेषं विन्दुनादे विन्दुनादरूपसरस्वत्यां तदाधारत्वेन स्थितं तुशब्देन पूर्वयोरेकत्र त्वमत्र स्वस्वामिभावं सूचयति-तां विन्दुरूपां मूलाधारस्थनादरूपायां प्रकृतिनाम्न्यां सरस्वत्यामेकीभूय स्थितिशब्देन तयोरेकत्वं दर्शयति—तं तां नादरूपां प्राणे प्रकृष्टानन्दरूपे वायौ स्थितनाम् अत्रापि तुना भार्याभर्तृभावमाह—अमुं वायुं महति जनार्दने स्थितं स्मरेत् अथवा प्राणनामानं वायुं महति प्रधाने प्रकृतिशब्दवाच्ये स्थितं अमुं मत्परं प्रकृतिनामानं महति पुरुषोत्तमे स्थितमिति महति शब्दो द्विरावृत्त्या व्याख्येयः एतत्सर्वं विन्दुरूपसरस्वत्यां तं तां तस्यां पुनर्न्यसेत् इत्यादिपूर्वोक्तेन मानेन सविस्तरमुक्तम्. इदानीमर्चिरादिमार्गे देहादुत्क्रान्तस्य ज्ञानिनः प्राप्यान् देवानाह—अग्निरिति । दिवा दिवसाभिमानी शुक्लः शुक्लपक्षाभिमानी राका पूर्णागाख्याभिमानिनी उत्तरमुत्तरायणाभिमानिनी स्वराडिन्द्रः ॥ ५४ ॥

अत्र न केवलमग्न्यादय एव प्राप्याः, अपि तु विश्वाद्या अनिरुद्धाद्या भगवतो मूर्तिविशेषाश्च प्राप्या इत्याशयेनाह—विश्व इति । अथशब्देनाऽनिरुद्धादिग्रहणं तेषामुभयेषां विष्णुरूपत्वं सूचयति,

"विश्वाद्या अनिरुद्धाद्यास्त द्विधा संप्रकीर्तिताः ।
विष्णुरूपास्तदन्ये च तान्सर्वान्याति मोक्षगः" इत्युक्तेः

किञ्चान्ये च दिवस्पुत्रास्तन्निकटवर्त्तिनः सन्ति ते अथशब्देन सूचिताः—

"तदन्ये च दिवस्पुत्राः सर्वे च द्युसमीपगाः ।
ते दिवं प्रापयन्त्येनं स वायुं स हरिं पृथक् ॥
विश्वादिरूपं तुर्यश्च वासुदेवश्च नापरः" ।

इत्युक्तेः गतिक्रमोऽप्यनेन ज्ञातव्यः । न परं विश्वादिकमेवाप्यं किन्तु तन्मूलरूपो हरिराप्तव्य इत्याह—आत्मेति । आत्मा विश्वादिरूपो हरिः सम्यगन्वीयते अनेन ज्ञानेनेति समन्वयः तदुक्तं स हरिं पृथग्विश्वादिरूपामिति वासुदेवो तुर्यादन्यो नेत्याह—तुर्यं इति । तुर्य आत्मा वासुदेवः "अत सातत्यगमने" इति धातोः सततगमनं व्याप्तिः "यश्चाऽस्य सततोभावः" इति श्रुतेः सर्वत्र वसनशीलत्वात् क्रीडारूपत्वात् जपाकुसुमाद्युपाध्यनाविद्धस्फटिकवन्निर्मलज्ञानरूपत्वाद्वासुदेवः—

"शुद्धस्फटिकसंकाशं वासुदेवं निरञ्जनम्" इति स्मृतिः ।
ऐकात्म्यप्रत्ययं सारं प्रपञ्चोपशमं शिवम् ।
अद्वैतं तुर्यं मन्यन्ते स आत्मा स विज्ञेयः" ॥ इति स्मृतेः

तुर्यश्च वासुदेवश्च नापर इति च किञ्च मार्गस्थानां सर्वेषां देवानामपि परमात्मनि समन्वयोऽस्तीति ज्ञापनाय समन्वय इत्युक्तं एतस्य नाम निर्दिशति । देवयानमिति । "संवत्सरो वै प्रजापतिस्तस्यायने दक्षिणं चोत्तरं च' इत्यारभ्य 'एतस्मान्न पुनरावर्तन्त इत्येष निरोधः" इत्यन्तं वेदान्ताः प्राहुरित्यन्वयः । अश्यफलं भूत्वेति । अनुपूर्वशः क्रमेणोपर्युपरि सुखादिभिरधिको भूत्वात्मरं मुक्तो न निवर्तत इत्यन्वयः कुत आत्मयाजी परमात्मपूजकत्वात् पुनरावृत्तीच्छापि तस्य नास्तीति भावेनाह, उपशान्तात्मा पूर्णानन्दस्वरूपः धूमादिमार्गवदस्यापि पुनरावृत्तिभीरस्ति किमित्यतो भूत्वेति ॥ ५५ ॥

ननु, किमेतज्ज्ञानेन प्रयोजनम् ? येनावश्यं वक्तव्यतामियादिति तत्राह-य एते इति । जनस्थो देहस्थः "तद्य इत्थं विदुर्ये चामी श्रद्धातप इत्युपासते तेधिषमभिसम्भवन्ति" इत्यादिना शास्त्रेण केवलं मोहं प्राप्नोति नीचां गतिमपि न यातीत्यतोऽपि "भक्तिमान्मार्गविन्नैव नीचां गतिमवाप्नुयात्" इतिस्मृतेः ॥ ५६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

हुतं वैश्वदेवं प्रहुतं बलिहरणम् एतत् सर्वमिष्टमुच्यते आजीव्यं प्रपादि ॥ ४९ ॥

प्रवृत्तेन कर्मणा आरोहावरोहाभ्यामावृत्तिप्रकारमाह–द्रव्येति। सोमपर्य्यन्तम् आरोहणे सोपानानि दर्शयति–प्रथमं द्रव्यस्य चरुपुरोडाशादेः सूक्ष्मो विपाकः परिणामः देहान्तरारम्भकः येन परिष्वक्तो गच्छति य एव श्रुतावपशब्देनोक्तस्तं प्रथमं प्राप्नोति तथा हि "इह तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" इति. द्रव्यसूक्ष्मविपाकश्चेति पाठे द्रव्यशब्देन तेजोमात्राशब्दोक्तानीन्द्रियाणि ऊष्मविपाकशब्देन हृदयाग्रप्रद्योतः तद्वाच्च नरकर्मसाध नीन्द्रियाणि प्रथमं प्राप्नोति ततो निर्याणकाले हृदयाग्रप्रद्योतं प्राप्नोति ततो धूममित्येव क्रमः। तथा च श्रुतिः "य इमास्तेजो मात्राः समभ्यादादानो हृदयमेवानुचंक्रमति" तथा च इति तस्य ''हैतस्य हृदयस्याग्रं प्रद्योतते तेनैवात्मा निष्क्रामति" इति धूमादिशब्दैस्तत्तदभिमानिन्यो देवता उच्यन्ते ततो धूमाभिमानिनीं देवतां प्राप्नोति ततो राज्यभिमानिनीमित्येवं अपक्षयः कृष्णपक्षः सोमः चन्द्रलोकः धूमाद्यातिवाहिकदेवताभिः सोमं लोकं प्रापितो भोगान् भुङ्क्ते इत्यर्थः। तत्र भुक्तभोगस्य तस्यावरोहप्रकारमाह–दर्श इति। चन्द्रक्षयवत्या अमावास्यया भोगदेहक्षयो लक्षितः ततो वृष्ट्यादिद्वारेण ओषधिवीरुधादिः ॥ ५० ॥

ततोऽन्नं तदेव भुक्तं रेतः हे क्ष्मेश ! उक्तमवरोहप्रकारं व्याचष्टे–एकैकश्येनेति। क्रमेणौषध्यादिकं भूत्वेत्यर्थः ॥ ५१ ॥

तत्र मुख्यं कर्माधिकारिणमाह–निषेकादिष्विति। प्रवृत्तकर्मनिष्ठमुक्त्वा निवृत्तिकर्मनिष्ठस्यार्चिरादिमार्गेण ब्रह्मलोकप्राप्तिमाह, इन्द्रियेषु ज्ञानेन दीप्यन्ते इति तेषु क्रियायज्ञान् जुहोति इष्टापूर्त्तादीनां क्रियायज्ञानाम् इन्द्रियव्यापारमयत्वादिन्द्रियतावन्मात्रतां भावयतीत्यर्थः। एतमुत्तरत्रापि ऊर्म्मौ शोकमोहादितरङ्गात्मके तादृशं मनो वाचि विध्यवादिलक्षणायां नयैव मनः कर्त्तृत्वादिविकारवद्भवतीत्यर्थः। वर्णानां समाम्नाये समूहे तद्विशेषत्वाद्वाचः स्वरे स्वरत्रयात्मके तञ्च विन्दुं नादे तञ्च नादं प्राणे सूत्रात्मनि असुं प्राणं महति ब्रह्मणि ॥ ५२ ॥ ५३ ॥

अग्निरिति तत्तदभिमानिन्यो देवताः ताः प्राप्नोतीति पूर्ववत् दिवा अहः अन्हः तस्यैवान्तः शुक्लः शुक्लपक्षः राका तस्यैवान्तः उत्तरमुत्तरायणं स्वराट् ब्रह्मा एवं ब्रह्मलोकं गतस्य तस्य भोगावसाने मोक्षप्रकारमाह—विश्वः स्थूलोपाधिः स्थूलं सूक्ष्मे प्रविलाप्य सूक्ष्मोपाधिस्तैजसो भवति सूक्ष्मं च कारणे प्रविलाप्य कारणोपाधिः प्राज्ञो भवति कारणं च सर्वसाक्षित्वेनान्वयात् साक्षिस्वरूपे विलाप्य तुर्य्य आत्मा भवति मुच्यत इत्यर्थः ॥ ५४ ॥

अर्चिरादिमार्गस्थो भूत्वा अनुपूर्वशः आनुपूर्व्यक्रमेण ॥५५॥

वेदेन निर्मिते "तेजसा धूममभिसम्भवन्ति" इत्यादिना "तेऽर्चिरभिसम्भवन्ति" इत्यादिना च जनस्थोऽपि देहस्थोऽपि ॥ ५६ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

हुत वश्वेदव प्रहुतं बलिहरणामितीष्टम् पूर्त्तन्तु सुरालयादि तत्राजीव्यं जलान्नदानादि एतत् प्रवृत्ताख्यम् भवति ॥ ४९ ॥

प्रवृत्तकर्मफलं जन्ममरणलक्षणं संसारं धूममार्गारोहावरोहाभ्यां दर्शयति–द्रव्येत्यादिद्वाभ्याम्। द्रव्यस्य चरुपुरोडाशादेः सूक्ष्मो विपाकः परिणामो देवादिदेहारम्भको भूतसूक्ष्मात्मकस्तेन तदावृतो जीवो लक्ष्यते धूमादिशब्दैस्तत्तदभिमानिन्यो देवताः बोध्याः अपक्षयः कृष्णपक्षः सोमः सोमलोकः भूतसूक्ष्मावृतो जीवः धूमाद्यातिवाहिकदेवताभिः सोमलोकं नीतो भोगान्भुङ्क्ते स पुनर्भोगावसाने यथेह देहं प्राप्नोति तथाऽवरोहप्रकारं सूचयति, दर्श इति। दर्शे चन्द्रो यथा अदृश्यो भवति तथा अदृश्यः विलीनदेवदेह इत्यर्थः। उपमादीनां लोपादत्र लुप्तोपमालङ्कारः ततो मेघादिद्वारा ओषधिवीरुधः ओषध्याद्याश्लिष्टो भवति ॥ ५० ॥

ततोऽन्नं भवति अन्नसंश्लिष्टो भवति ततो रेतो भवति अन्ने पितृभुक्ते तद्वीर्यसंश्लिष्टो भवति एवमेकैकश्यैव प्रत्येकं क्रमेणाऽनुपूर्वं भूत्वा भूत्वा तत्तत्संश्लेषं प्राप्य इह मातृयोनौ जायते हे क्ष्मेश ! इति पितृयानं पुनर्भवोपलक्षितजन्ममरणप्रवाहलक्षणसंसारहेतुरित्यर्थः ॥ ५१ ॥

तदधिकारिणमाह–निषेकादीत्यर्द्धेन। अथ निवृत्तकर्मनिष्ठा देवयानेन परब्रह्मभावापत्तिलक्षणं मोक्षं प्राप्नुवन्तीति वक्तुं तेषां स्थूलदेहत्यागवेलायां यत्कृत्यं तदाह–इन्द्रियेष्विति, द्वाभ्याम्। ज्ञानेन जीवेन दीप्यन्ते इति तथा आत्मप्रकाशितेषु इत्यर्थः। क्रियायज्ञान् क्रिया मुमुक्षुयोग्यं प्रत्यहमनुष्ठेयं निवृत्तं कर्म तद्रूपान् यज्ञान् भगवदाराधनात्मकान् जुहति इन्द्रियायत्तान् भावयन्ति ॥ ५२ ॥

इन्द्रियाणि ऊर्म्मौ इन्द्रियाणां प्रवर्त्तकं ऊर्मिरूपं तत्तत्सङ्कल्परूपं यन्मनस्तस्मिन् वैकारिकम् ऊर्मिरूपं मनः वाचि उपदेशविधौ मनसो नियोजकायां च वर्णसमाम्नाये वेदे तं स्वरे ओङ्कारे ओंकारं विन्दौ तन्नादे तं प्राणे भगवन्निश्वासे ऽसुं प्राणं वेदस्य पूर्वरूपं महति "एतस्यैव महतो भूतस्य निश्वसितं यदृग्वेदः" इत्यादिश्रुतिप्रोक्ते परे ब्रह्मणि जुहतीत्यन्वयः ॥ ५३ ॥

अथैवंविधा येन मार्गेण भगवन्तं प्राप्नुवन्ति तमेकदेशकथनतः सूचयति–अग्निरित्यर्द्धेन। अग्निः सूर्यः दिवा दिनाभिमानी देवः प्राह्णस्तस्यैवान्तस्तदन्तर्गत एव बोध्यः शुक्लपक्षः राका तस्यैवान्तर्भूता सम्पूर्णचन्द्रा पूर्णमासी धान्यविवक्षया पृथङ्निर्देशः उत्तरमुत्तरायणम् स्वराट् प्रजापतिः एवं मार्गं सूचयित्वा गन्तुः स्वरूपं सर्वावस्थासाक्षित्वेन दर्शयति—विश्व इत्यर्द्धेन। विश्वो जागृदवस्थासाक्षी स एव तैजसः स्वप्नाऽवस्थासाक्षी स एव प्राज्ञः सुषुप्तवस्थासाक्षी अत एव तिसृषु अवस्थासु समन्वयात् अनुगतत्वात् तुर्यः अवस्थात्रयभिन्नः आत्मा जीवात्मेत्यन्वयः। अग्न्याद्यवयवान् मार्गः सर्वावस्थासाक्षी ज्ञानस्वरूपो गन्ता इति फलितोर्थः। क्रमस्तु विद्वान् स्थूलशरीरान्मूर्द्धन्यनाड्या निष्क्रम्य सूर्यरश्मीनारुह्य यदा परं पदं गन्तुमिच्छति तदार्चिषोभिमानिनाऽऽतिवाहिकेन सुसत्कृत्य दिनाभिमानिनं नीतस्तथैव तेन पक्षाभिमानिनं तेन च षण्मासाभिमानिनं तेन संवत्सराभिमानिनं तेन वायुं

आदावन्ते * जनानां सद्बहिरन्तः परावरम् ।
ज्ञानं ज्ञेयं वचो वाच्यं तमो (१) ज्योतिस्त्वयं स्वयम् ॥ ५७ ॥
(२) आबाधितो ऽपि ह्याभासो यथा वस्तुतया स्मृतः ।
दुर्घटत्वादैन्द्रियकं तद्वदर्थविकल्पितम् ॥ ५८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तेन खस्मिन् छिद्रं दत्वाऽऽदित्यं तथैव तेन चन्द्रमसं तेन विद्युदभिमानिनं देवताविशेषं नीतस्तनश्च वरुणेन्द्रप्रजापतीन् प्राप्य प्राकृतमण्डलं निर्भिद्य विरजां प्राप्नोति तदा परस्मिन् लिङ्गशरीरं हित्वा तां नदीन्तीर्त्वा परब्रह्मलोकं प्रविश्य परब्रह्मसाधर्म्यं प्राप्नोतीति ॥ ५४ ॥

आत्मयाजी परमात्मनि तदंशत्वेनात्मनिक्षेपकारी पूर्वोक्तलक्षणो गन्ता अग्न्यादिकमनुपूर्वशो भूत्वा भूत्वा येनात्मस्थः मुक्तगस्य परमात्मस्थः सन् न निवर्त्तते तदिदं देवयानं प्राहुरित्यन्वयः ॥ ५५ ॥

अनयोर्मार्गयोर्हेयोपादेययोर्ज्ञानमात्रेण बद्धो ऽपि विगतमोहो भवति किमुत हेयं विहायोपादेयेन मोक्षं लब्धा न विमुह्यतीत्याह, य इति। "ते धूममभिसम्भवन्ति" इत्यादिना "ते ऽर्चिषमभिसम्भवन्ति" इत्यादिना च वेदेन निर्मिते निर्णीते पितृदेवानां अयने मार्गौ यो वेद स जनस्थो जनानां मध्येवर्त्तमानो ऽपि बद्धावस्थायामपीत्यर्थः । न विमुह्यति पितृयाने रुचिं देवयाने रुचिं च न करोति किमुत मुक्तः ॥ ५६ ॥

भाषा टीका ।

हुत प्रहुत अर्थात् वैश्वदेव, बलिहरण, ये सब कर्म इष्ट नाम से प्रसिद्ध है, और मंदिर बगीचा कूप तडागादि कर्मों को आपूर्त कहते हैं और यही सब कर्म कामना से किया जाय तो प्रवृत्तकर्म कहाते हैं ॥ ४६ ॥

द्रव्ययज्ञका फल यही है कि--याज्ञिकपुरुष चरुपुरोडाशादि के सूक्ष्म विपाक अर्थात् शरीरान्तर से धूमाभिमानी देवके लोक को जाताहै, वहांसे कृष्णपक्ष के अभिमानी देवके लोक को जाता है, वहां से दक्षिणायन के अभिमानी देवलोक को जाताहै, वहांसे सोमलोक को जाताहै, इस प्रकार भोग भोगने के पश्चात् विलीनदेह होकर वृष्टिद्वारा औषधि वीरुधाद के साम्यको प्राप्तहोकर, हे राजन्! अन्न वीर्य आदि क्रमसे फिर इसी संसार में उत्पन्न होताहै बस इसी प्रकार प्रवृत्तकर्म के आचरण से इसी प्रकार हो होकर फिरफिर जन्म लेताहै ५० ५१ ।

निषेकसे आदि लेकर श्मनान्त संस्कारों से संस्कृत द्विज लोग ज्ञान के प्रकाशक इन्द्रियों में क्रिया यज्ञों को हवन करते हैं अर्थात् ज्ञानेन्द्रियों से कर्मेन्द्रियों के व्यापारों का नियमन करते हैं ॥ ५२ ॥

और ज्ञान इन्द्रियों संकल्पात्मक मन में और सात्विक ... को शास्त्ररूप वाणी में और वाणी को पश्चात् अक्षरात्मक ... समुदाय में उसको अक्षरात्मक ओंकार में उसको चतुर्थी मात्रा ... विन्दुनादमें उसको प्राण सहचारी जीवमें न्यास करे अर्थात् अनुसन्धान करे ॥ ५३ ॥

इस प्रकार निवृत्त कर्मानुष्ठानी ज्ञानी पुरुष अर्चिरादि मार्ग से जाने समय प्रथम अग्नि लोक को जाता है फिर सूर्य लोक को पश्चात् दिवसाभिमानी देव के लोक को फिर शुक्ल पक्षाभिमानी देव के लोक को अनंतर उत्तरायणाभिमानी देव के लोक को, इत्यादि क्रम से मोक्ष में प्राप्त होकर स्वराट् होता है ॥ (अर्थात् उत्तरायणाभिमानी देव लोक से वर्षाभिमानी देव लोक में वहां से वायु लोक में वहां से सूर्य लोक में वहां से चंद्र लोक में वहां से विद्युत लोक में वहां से वरुण लोक में वहां से इन्द्र लोक में वहां से प्रजापति साक्षात् ब्रह्मा के लोक में पूजित होकर आतिवाहिकों के द्वारा सीमांत में विरजा में स्नान कर श्रीवैकुंठ में प्राप्त होकर नित्य सेवा पात्र ... होता है, वहां पर भी अनिरुद्ध, प्रद्युम्न, संकर्षण रूप से ... पर ब्रह्म विराजते हैं और इन सबों का जिनमें समन्वय ... पूर्ण पुण पुरुषोत्तम श्रीवासुदेव भगवान सपरिकर विराजते हैं उन को प्राप्त होता ॥ ५४ ॥

सकल वेदांत इसको देवयान कहते हैं। आत्मायाजी अर्थात् परमात्मो पासक पुरुष क्रम से इस देवयान को प्राप्त होकर ... भूत गुणाष्टक होकर परमात्मा में आधेय विधेय रूप से ... होकर सर्व विभसे वा परायण होकर फिर इस संसार के ... खों को कभी नहीं प्राप्त होता है ॥ ५५ ॥

जो पुरुष ईश्वर निर्मित इन दोनों पितृयान देवयानों ... शास्त्र रूप चक्षु से जानता है वह संपूर्णजनों में स्थित रह ... भी मोह को प्राप्त नहीं होता है ॥ ॥ ५६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्र हेतुमाह-आदाविति । जनानां देहनामादौ कारणत्वेन ... चाऽवधित्वेन यत्सत्तथा बहिर्भोग्यमन्तर्भोक्तृपरमवरं वोच्चनी...

* जनानाशम्. इति विज० जनानां यो इति वीर० (१) ज्योतिश्च सत्स्वयम्-इति वीज० ज्योतिश्च यत्स्वयम्-इति वीर०
(२) अबाधित इति. विज० वीर० पाठा दृश्यते

क्षित्यादीनामिहार्थानां छाया न कतमा ऽपि हि ।
न सङ्घातो विकारो ऽपि न पृथङ् नान्वितो मृषा ॥ ५९ ॥
धातवो ऽवयवित्वाच्च तन्मात्रावयवैर्विना ।
न स्युर्ह्यसत्यवयविन्यसन्नवयवो ऽन्ततः ॥ ६० ॥
स्यात्सादृश्यभ्रमस्तावद्विकल्पे ऽसति वस्तुनः ।
जाग्रत्स्वापौ यथा स्वप्ने तथा विधिनिषेधता ॥ ६१ ॥
भावाद्वैतं क्रियाद्वैतं द्रव्याद्वैतं तथात्मनः ।
वर्तयन्स्वानुभूत्येह त्रीन्स्वप्नान्धुनुते मुनिः ॥ ६२ ॥
कार्यकारणवस्त्वैक्यमर्शनं पटतन्तुवत् ।
अवस्तुत्वाद्विकल्पस्य भावाद्वैतं तदुच्यते ॥ ६३ ॥
यद्ब्रह्मणि परे साक्षात्सर्वकर्मसमर्पणम् ।
मनोवाक्तनुभिः पार्थ ! क्रियाद्वैतं तदुच्यते ॥ ६४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तमो ऽप्रकाशः ज्योतिः प्रकाशः तत्तु सर्वमयं ज्ञानी स्वयमेव न तस्माद्व्यतिरिक्तं वस्तु किञ्चिदस्ति येन मुह्योदित्यर्थः ॥ ५७ ॥

ननु तर्हि कथं पृथगर्थस्तस्या ऽपि प्रतीयते तत्रा ऽऽह—आबाधितस्तर्कविरोधेन सर्वतो बाधितो ऽप्याभासः प्रतिबिम्बादिर्वस्तुवत् यथा स्मृतस्तद्वदैन्द्रियकं सर्वमर्थत्वेन विकल्पितं न तु परमार्थतः दुर्घटत्वात् ॥ ५८ ॥

तदेवाऽऽह–क्षित्यादीनां पञ्चभूतानां छाया ऐक्यबुद्ध्यालम्बनरूपं देहादिसङ्घातारम्भपरिणामानां मध्ये कतमाप्यन्यतमापि न भवति न तावत्तेषां सङ्घातो वृक्षाणामिव वनम् एकदेशाकर्षणे सर्वाकर्षणानुपपत्तेः न ह्येकस्मिन्वृक्ष आकृष्टे सर्वं वनमाकृष्यते न च विकार आरब्धो ऽवयवी अपिशब्दान्न परिणामोपि कुतः स किं स्वावयवेभ्यः परिणतेभ्यो वा पृथक् तदन्वितो वा न तावदत्यन्तं पृथक् तथा ऽप्रतीतेः नचान्वितः स किं प्रत्यवयवं सर्वो ऽप्यन्वेत्यंशेन वा आद्ये अङ्गुलिमात्रेपि देहबुद्धिः स्यात् द्वितीये तस्याप्यंशांगीकारे सत्यनवस्था स्यादतो मृषैवेत्यर्थः ॥ ५९ ॥

एवं देहादेर्मिथ्यात्वमुक्त्वा तद्धेतूनां क्षित्यादीनामपि मिथ्यात्वमाह—धारयन्तीति धातवो महाभूतानि तन्मात्रैः सूक्ष्मैरवयवैर्विना न स्युः अवयवित्वात्तेषामपि तर्ह्यवयवः सत्य इति चेत्तत्राऽऽह, उक्तप्रकारेणावयविन्यसत्यवयवोऽप्यन्ततोऽसन्नेव स्यात् अवयविप्रतीत्यन्यथानुपपत्तिं विना तत्सद्भावे प्रमाणाभावादित्यर्थः । तदुक्तं पञ्चमस्कन्धे "एवं निरुक्तं क्षितिशब्दवृत्तम्" इत्यादि ॥ ६० ॥

नन्ववयविनोऽभावे आगमापायिषु बाल्यादिषु सोऽयं देवदत्तः इति प्रत्यभिज्ञानं न स्यात् तदुक्तं भट्टैः "आविर्भावतिरोभावधर्मकेष्वनपायि यत् तद्धर्मी" इति तत्राह–स्यादितिावस्तुनः परमात्मनो विकल्पे भेदे ऽसति यद्वा वस्तुनो ऽविद्यया विकल्पे सति पूर्वपूर्वारोपसादृश्यात्स एवेति भ्रमः स्यात् स च तावदेव यावदविद्यानिवृत्तिः । ननु, सर्वमिथ्यात्वे शास्त्रस्य विधिनिषेधकता कथम्? तत्राह–स्वप्नमध्ये जाग्रत्स्वापव्यवस्था यथेति ॥ ६१ ॥

इदानीमुक्तमेवाद्वैतं भावनात्रयोपदेशेन दृढीकरोति–भावाद्वैतमिति चतुर्भिः । वर्तयन्नालोचयन् स्वानुभूत्या आत्मतत्त्वानुभवेन त्रीन् जाग्रदादीन् त्रय आवसथास्त्रयः स्वप्न इति श्रुतेः यद्वा वस्तुभेदबुद्धिरेकः स्वप्नः ततस्तदधिकारभेदेन कर्मभेदबुद्धिर्द्वितीयः ततो मत्कर्मसाधितमेतत्फलं ममैव भोग्यमिति तृतीयः तान्धुनुते निवर्तयति ॥ ६२ ॥

कार्यकारणयोर्वस्त्वैक्यस्य मर्शनमालोचनं तन्तुरेव न पट इति ॥ ६३ ॥

मनोवाक्तनुभिः कृतानां कर्मणां समर्पणं तैः समर्पणमिति वा उद्देश्यफलभेदो हि क्रियाभेदे हेतुः ईश्वरार्पणे च तदभावात्क्रियाणामद्वैतम् ॥ ६४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ प्राप्यतया प्रकृतस्य भगवतः सर्वात्मकत्वमाह—अदाविति । आदौ सृष्ट्यादौ अन्ते प्रलये च मध्यस्थानां जनानामन्तर्बहिश्च सन्वर्त्तमानः । किञ्च यत्परावरमुत्कृष्टापकृष्टं वा तत्रोत्कृष्टमाह

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

ज्ञानं ज्ञानात्मकं जीवस्वरूपं ज्ञेयमचिद्वस्तु परं वचोनाम वाच्यं रूपं नामरूपात्मकं चिदचिदात्मकं सर्वं वस्तु इत्यर्थः । तमो मूलप्रकृतिः ज्योतिः समष्टिजीवश्चेत्येतत्सर्वं साक्षादयमेव परमात्मैव परमात्मात्मात्मकमेवेत्यर्थः ॥ ५७ ॥

एवं सर्वात्मकत्वमभिधाय तस्यैव प्राप्यस्य ब्रह्मणो निरतिशयपुरुषार्थत्वज्ञापनाय प्राकृतदेहस्य तदनुभाव्यशब्दादिविषयाणाञ्चापुरुषार्थत्वमाह–अबाधित इति । आभासो दृश्यो देहः म अबाधितोऽपि अविनष्टोप्यनुवर्त्तमानोपि अवस्तुतया अपुरुषार्थतया स्मृतः एवं शब्दाद्यर्थरूपेण विकल्पतमैन्द्रियकवस्तुजातमप्यवस्तु अपुरुषार्थं यद्वा अहङ्कारगोचरं शरीरं यथाऽनित्यं हेयं तथा ममकारगोचरः शब्दादिरप्यपुरुषार्थः न स्थिरः तस्यानित्यपुरुषार्थतया दुर्घटत्वादित्यर्थः । यद्वा आभासः स्वप्नदेहः स तदानीमनिवृत्तोपि प्रबोधवेलायामवस्तुतयाऽनात्मतया स्मृतः जात्यादिविकल्पितजाग्रच्छरीरमपि तद्वदनात्मा आत्मधर्माणां नित्यत्वादीनां तत्र दुर्घटत्वादित्यर्थः ॥ ५८ ॥

शरीरस्य सर्वत्र सर्वकाले सर्वस्मिन्नप्यात्मनाविनास्थित्यभावाच्छरीरमप्यात्मा स्यादिति शङ्कानिरासार्थमाह—क्षित्यादीनामिति । क्षित्यादीनां पृथिव्यादिपरिणामरूपाणां वृक्षाणां छाया संघातादिष्वर्थेषु न कतमोपि सङ्घाततद्विकारपृथग्भूतया यावद्द्रव्यभाविषु नकश्चितदपीत्यर्थः । तदेव विवृणोति—न सङ्घात इति । वृक्षसङ्घातो न छाया नापि वृक्षविकारः नापि वृक्षात्पृथक् वृक्षं हित्वा स्थातुं न योग्यः नान्वितः नाविनाभूतः यावद्वृक्षसत्ताकं नान्वितोऽप्यर्थाभिप्रायः पुंल्लिङ्गनिर्देशः मृषा अनित्या एवं शरीरमप्यात्मनाविनास्थित्यभावात्प्रतिच्छाया सदृशं नचात्मसङ्घातः शरीरं नचात्मविकारः नचात्मानं हित्वा तिष्ठति न यावदात्मभावी अनित्यत्वात् अतो नात्मा शरीरमित्यर्थः ॥ ५९ ॥

शरीरस्यानित्यत्वादात्मप्रतिपत्त्यर्थं तत्तुल्यन्यायेषु पृथिव्यादिष्वनित्यत्वमुपपादयति–धातव इति। पृथिव्यादयो धातव अवयवित्वात्सङ्घातरूपत्वात्तन्मात्रावयवैर्विना न स्युरवयवविनाशे सङ्घातो नश्यतीत्यर्थः । सङ्घातरूपत्वमेव प्रतिपादयति–असतीतियतोऽवयवसंघातरूपोऽवयवी अतएवावयविन्यसति विनष्टे अतन्तोऽवयवोऽप्यन्तेव अवयविन्यनुपलभ्यमानेऽवयवा एव धातवो नह्युपलभ्यन्ते एवमवयवित्वादनित्यं शरीरं नित्यमात्मा न भवतीत्यर्थः ॥ ६० ॥

तर्हि स्थूलोहमितिप्रतीतिः कथमित्यपेक्षायां भ्रान्तिरित्याह–। स्यात्सादृश्यमिति। तत्रसंसर्गनिमित्ता भ्रान्तिरिति प्रतिपत्त्यर्थं सादृश्यनिमित्तत्वं प्रतिक्षिपति–स्यादिति–द्वयोरप्यर्थयोर्ज्ञानादिगुणाविकल्पे सति कस्यचिद्वस्तुनः केनचित्सादृश्यं भ्रममभेदनिमित्तं स्यात्। देहात्मनोस्तु समानजातिगुणाद्यभावात्सादृश्यमनुपपन्नम् उष्णाङ्गमिति संसर्गभ्रम इत्यर्थसिद्धम् एवमात्मविषयकज्ञानाभावेपि जानामि न जानामीति विभागप्रतिपत्तौ दृष्टान्तमाह—जाग्रत्स्वप्नाविति । कश्चित्सुप्तिवेलायामेव सुप्तं प्रबुद्धञ्चात्मानं पश्यति यदा प्रबुध्यते तदा स्वप्नदृष्टप्रबोधो न वास्तव इति बुध्यते एवमनात्मविदां संसारिणां कदाचिदहज्ञानाभिमानि ज्ञानं निषेधश्चात्मयाथात्म्यज्ञानानुवृत्तावेव भवत इति विधिनिषेधता विधिनिषेधौ स्वप्नदृष्टस्वापप्रबोधतुल्यावित्यर्थः संसारिणामात्मज्ञानाभावाद्बाह्यार्थविषयज्ञानमप्यज्ञानतुल्यमित्युक्तं भवति यथा "तज्ज्ञानमज्ञानमतोन्यदुक्तम्" इति शास्त्रविरुद्धार्थविषयज्ञानभ्रान्तिरियं ज्ञानिनां नास्तीत्याह-भावाद्वैतमिति । यद्वा एवं देहविलक्षणात्मज्ञानिनामपि यावत् स्थूलोहं ब्राह्मणोऽहमिति देहात्मभ्रमानुवृत्तिराप्रयाणं तावद्विधिनिषेधात्मकशास्त्रवश्यतेत्याह–जाग्रत्स्वप्नाविति । यथा स्वप्ने जाग्रत् स्वप्नौ स्वाप्नजाग्रत्स्वप्नावस्थे स्वप्नपर्यन्तावेव प्रबुद्धस्य तु तावुभौ निवर्त्तेते तद्वदित्यर्थः ॥ ६१ ॥

एवं यावद्देहात्मभ्रमानुवृत्तिस्तावद्विधिनिषेधता स्थूलोऽहं ब्राह्मणोऽहमिति प्रतीतेर्देहात्मनोरभेदे भ्रममूलकत्वेन प्रतिषिद्धे किमेवमेव सर्वमद्वैतं भ्रमविषयम् ? उतकिञ्चित्प्रमितिविषयमस्तीत्याशंकायां यच्छास्त्रानुमतमद्वैतं तत्प्रमाविषयं तन्मुमुक्षोरनुसन्धेयमेवेति वक्तुं तदनुमतं त्रिविधमद्वैतं दर्शयन् तदनुसन्धानस्य भ्रममूलकद्वैतत्रयनिरासकत्वमाह–भावाद्वैतमिति। यथा देहात्मनोर्भेदः शास्त्रानुमतोऽनुसन्धेयः तथा भावाद्वैतादिरूपं त्रिविधमद्वैतमात्मनः स्वस्य वर्त्तयन् यद्वा आत्मनो मनसो वर्त्तयन् मनसि प्रतिष्ठितं कुर्वन्नध्यवस्यन्निति यावत् इह मुनिः परमात्मोपासकः स्वानुभूत्या देहविलक्षणब्रह्मात्मकस्वात्मयाथात्म्यानुभवेन त्रीन् स्वप्नान् भावाद्वैतकर्माद्वैतद्रव्याद्वैतज्ञानानि भ्रमात्मकानि धुनते निरस्यति ॥ ६२ ॥

भावाद्वैतादिस्वरूपं विवृण्वन् त्रिविधभ्रान्तिनिरासं श्लोकत्रयेण विवृणोति–कार्येति । तत्रोपादानस्य कार्यस्य चानन्यत्वपरोभावाद्वैतविषयः श्लोकः यत्कार्यकारणयोर्वस्तुनोरैक्यदर्शनं तद्भावाद्वैतं कार्यकारणयोरैक्ये पटतन्तुवदिति दृष्टान्तः यथा तन्तूनामेव व्यतिषङ्गविशेषभाजां नामरूपात्मकावस्थान्तरापत्त्या पटावस्थत्वमिति पटस्य तेभ्योऽनन्यत्वं तद्वत्कृत्स्नं जगच्चिदचिदात्मकं सूक्ष्मचिदचिद्विशिष्टाद्ब्रह्मणोऽनन्यदित्येतद्भावाद्वैतं भावयन् कार्यकारणवस्तुनोरद्वैतं भावाद्वैतं अवस्तुत्वाद्विकल्पस्येत्यर्थः भावद्वैतं निरस्यति विकल्पस्योपादानातिरिक्तद्रव्यकल्पनरूपाद्वैतस्यावस्तुत्वाद्वस्तुशून्यत्वान्न भावयोर्द्वैतं किन्त्वद्वैतमेवेत्यर्थः । एवमसत्कार्यवादभ्रमो निरस्तः ॥ ६३ ॥

क्रियाद्वैतं विवृणोति–यदिति । हे पार्थ ! साक्षात्परे ब्रह्मणि यत्करणत्रयेण सर्वकर्मणां समर्पणं तत्क्रियाणामद्वैतं भगवदाराधनत्वेन सर्वकर्मणामेकफलावच्छेदः क्रियाद्वैतम् अनेन कर्मणामीश्वरप्रीतिमनपेक्ष्यस्वातन्त्र्येण फलवत्त्वभ्रमो निरस्तः ॥ ६४ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

जाग्रदाद्यवस्थाप्रवर्तकान्विश्वादीन् कल्पितानतिक्रम्य प्रपञ्चोपशमं तुर्यात्मा भूत्वा निर्द्वंद्व आस्ते इति केचिद्व्याचक्षते तन्न

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दूषणायाह—आदाविति । आदावुत्पत्तिकाले मुक्तिकाले च यज्जनानाशं जननं विनाशं च "जनी प्रादुर्भावे" इत्यस्मात् टापि कृते जनेतिरूपं सिध्यति वध्यघातकभावो मार्जारमूषकवत् यच्च बहिरन्तर्विद्यमानं परावरमुत्तमाधमं भूतं भविष्यद्वा यच्च ज्ञानादिकं सर्वस्य ग्लापकत्वात् ग्लानिजनकत्वात्तमः प्रकृतिर्ज्योतिस्तदवभासकः स्वप्रकाशश्च यस्तदेतत्सर्वं स्वयं तुर्यात्मा श्रीहरिस्तत्सत्ताया अपि तदधीनत्वात्स इत्युच्यते ननु तदात्मकत्वात् "पुरुष एवेदं सर्वम्" इति श्रुतेः आदौ यथा तदधीनत्वं तथान्तेपि श्रीनारायणाधीनत्वमित्यतो वाह आदाविति उक्तार्थः श्लोकः निरुपचरितापराधीनत्वं हरेरेव न मुक्तस्यापीत्यतो वाह आदाविति, आदावन्ते उत्पत्तेः प्रागूर्ध्वम् अयं परमात्मा वर्तत इति शेषः । कथङ्कारमत्राह—जनेति । जनकत्वेन नाशकत्वेनेत्यादिरूपेण सर्वकर्तृत्वस्वातन्त्र्येण तच्छब्दवाच्यत्वं हरेरप्युक्तं तमःशब्दस्य ग्लापकत्वादिति णिच् प्रत्ययान्तत्वेन विवरणादयमर्थो ज्ञायत इति ॥ ५७ ॥

ननु, सत्तायास्तदधीनत्वं प्रामाणिकश्चेत् ब्रह्मत्वेनोक्तिर्घटेत ततः कात्र युक्तिरित्याशङ्क्योपपादयति—अबाधित इति । प्राकृतवैकृतलक्षणकार्येषु विशिष्टकान्तिमत्तया भासते विद्योतत इत्याभासो देहः प्रतिबिम्बलक्षणो यथावस्तुतया "वसनाद्वासयेद्वस्तु नित्याप्रतिहतत्वतः" इति स्मृतेर्वस्तुपरमात्मा तत्त्वेन स्मृत "इदं हि विश्वं भगवानिवेतरः" इन्द्रो मायाभिः" इत्यादिना ननु देहस्य सत्त्वं तत्सत्ताया भगवदधीनत्वेन तद्वक्तुं युक्तं तस्य दग्धपटाभासवदर्थक्रियानर्हत्वादिति तत्राह, अबाधित इति. शुक्तिकायां प्रतिभासितं रजतं वलयकरणाद्यर्थक्रियानर्हत्वेन नेदं रजतमिति बाधितं स्याद्यथा न तथाऽयं बाधितः हानोपादानाद्यर्थक्रियायोग्यत्वात् अपिशब्दोऽत्र स्वातन्त्र्यशंकां सूचयति, हिशब्देन प्रत्यक्षसिद्धत्वेन दग्धपटाभासवैलक्षण्यं दर्शयति, तद्वत्तथैन्द्रियकमिन्द्रियविषयं घटपटादिकम् अर्थशब्दो भावप्रधानः अर्थत्वेनार्थक्रियार्थं प्रयोजनतया कल्पितं समर्थितं, परमात्मनेति शेषः "कर्तृकर्मक्रियादीनां सत्तावृत्तिस्तथैव च । विष्णवधीनं यतः" इति वचनादर्थक्रियासामर्थ्यस्य भगवदधीनत्वेन "सर्वं खल्विदं ब्रह्म" इति सर्वस्य तत्त्वं युक्तमिति भावः । एवमनङ्गीकारे बाधकमाह—दुर्घटत्वादिति । ईश्वरान्येन कर्तुमशक्यत्वात् ॥ ५८ ॥

दुर्घटत्वमेव दर्शयति—क्षित्यादीनामिति । क्षित्यादीनामर्थानां पदार्थानां कतमापि छाया कतमोऽपि प्रकारो विचार्यमाणे सति न घटत इति शेषः "छाया रीतिः प्रकाशश्च भावश्चेत्यभिधीयते" इत्यभिधानम्. इह कार्यप्रपञ्चे हिशब्दो हेत्वर्थः निर्धारणार्थवाचिना तमप्प्रत्ययेन कस्यापि प्रकारस्यासंभवोक्तेः परमेश्वरकल्पितत्वेनैतत्कार्यं सत् इतिवक्तुं युक्तं प्रकारभावमुपपादयति—न सङ्गत इति । परमेश्वरकल्पनामन्तरेण कार्यं भवतीति वदन् प्रष्टव्यो भवति क्षितिलक्षणं कार्यं केवलमपां पुञ्जः तद्विकारो वा तद्व्यतिरेकेणोत्पन्नं वा वृक्षद्वयसंयोगवदुभयोः संयोगमात्रं वा ? न प्रथम इत्याह—नेति । अयं संघातो न असम्भवात्. क्षितेः कठिनावयवारब्धत्वात्केवलमपान्द्रवत्वेन तत्कार्ये पर्वतादीनां मज्जनापत्त्या क्षितेः स्वरूपलयप्राप्तेः आधाराभावेन सर्वप्राणिप्राणनाशप्रसङ्गात् न द्वितीय इत्याह—विकार इति । अत्र नञः अध्याहारः कर्तव्यः अपां विकारोपि नोपपद्यते कालुष्यादिलक्षणविकारमात्रेण क्षितित्वानुपपत्तेः न तृतीय इत्याह—न पृथगिति । अद्भ्यः क्षितेः पृथक्स्थित्यदर्शनात् नापि चतुर्थ इत्याह—नान्वित इति । सहावस्थानमात्रेण कार्योत्पत्त्यदर्शनात् क्षित्यादीनामर्थानां पदार्थानां मध्ये कतमापि छाया कतमोऽपि भावः पदार्थः कार्यजननशक्तिमान् न घटेत विचारासहत्वात्. तथाह, "अद्भ्यः पृथिवी" इति श्रूयते तत्र प्रस्तुतात्मशक्तिमन्तरेण केवलानामपां पृथिवीजनकत्वं कथमिति वा शेषं पूर्ववत् ॥ ५९ ॥

ननु, विश्लिष्टानां पदार्थानामन्योन्यं महत्कार्योत्पत्तावसामर्थ्यमस्तु । संश्लिष्टानां नेयमनुपपत्तिरित्याशंक्य श्रीनारायणकटाक्षबीजमन्तरेणावयवावयविनोरप्यनुपपत्तिः स्यादेवेत्याह—धातव इति । धातवः क्षित्यादिप्रपञ्चभूतादिपदार्थाः तन्मात्रावयवैर्विना गन्धादिव्यतिरेकेण सुरभिगन्धवती पृथिवी शुक्लभास्वरं सलिलमित्यादिव्यावर्तकधर्माभावे स्वरूपाभावप्राप्तिरेव स्यादित्यर्थः अवयवित्वादिति नह्यवयविनोऽवयवाभावे अवयविव्यवहारो युक्तस्तस्मात् चशब्द एवार्थे समुच्चयार्थे वा प्रत्यक्षसिद्धत्वादवयवित्वाच्चेति अयं निर्णयः कुत्र दृष्ट इति तत्राह—असतीति इव यथा आसमन्तात्सन्नावयवाः सर्वात्मना तन्तुलक्षणाः । अवयवा नष्टा यदि तह्र्यसदवयविनि तन्तुरहिते पटे पटव्यवहारोऽपि नष्ट इति शेषः तन्तुव्यतिरेकेण पटाभावात् यथावयवाभावो अवयवी नास्ति तथा अवयविनि निवृत्ते अवयवा अपि निवृत्ताः स्युरित्यतो वाह—आसन्नावयवा अपि नष्टाः स्युरित्यर्थः यथाऽऽसन्नावयवा आतानवितानावयवत्वसंसर्गम् प्राप्तास्तन्तुलक्षणा अवयवाः प्रागसत्यवयविनि पटे पटव्यवहारं न जनयन्ति तथा गन्धाद्यवयवाः प्रागसत्सु क्षित्यादिषु पश्चात्क्षित्यादिव्यवहारं न जनयन्तीत्यतस्तदभावे तदभावः स्पष्ट इत्यन्वयव्यतिरेकौ दर्शिताविति ज्ञातव्यमिति एवं दुर्घटत्वेनाविद्याकल्पितप्रपञ्चस्याविद्याबाधानन्तरमनुवृत्तस्यापि न वस्तुतत्वमिति कल्पनमनुपपन्नं "विश्वं सत्यं मघवाना युवोरिदापश्चन प्रमिनन्ति व्रतं" "वा यद्वियुक्त्या विरुध्येन तदीशकृतमेव हि" इति श्रुतिस्मृतिप्रसिद्धां युक्तिशब्देन दर्शयति अमत्तस्यावयविन्यामन्नावयवा न चेतिकेचित्पठन्ति अयमर्थः गन्धावयवव्यतिरेकेण पृथिव्याद्यवयविनो न स्युश्चेत् किं तच्छिन्नमिति तत्राह—असतीति । क्षित्यामवयविन्यसति गन्धाद्यवयवा एव नासन्नित्यन्वयः अन्वयाभावे व्यतिरेकभावेन कारणाभावापत्त्या सर्वासत्त्वासंङ्गलक्षणोच्छेद इति भावः ॥ ६० ॥

नन्ववयवावयविनोः सादृश्यमात्रेण तस्यायमवयव इति व्यवहारस्तस्मात्तद्व्यतिरेकेण सोपि नास्तीति कथमापद्यत इति तत्राह—स्यादिति । सत्यं सादृश्यभ्रमः स्यात्तावत्कस्मिन् सतीति तत्राह—विकल्प इति । वस्तुनो विकल्पे भेदे सतीत्यन्वयः यथा पट्टणादिषु रूप्यमवलोक्य तत्संस्कारवतः सहस्रकिरणसम्पर्केण चकाशमानं क्वापि शुक्तिकाशकलं संदृश्य द्वयोः

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सादृश्यमात्रादिदं रजतमिति भ्रमो दृश्यते तथाक्षित्यादेर्गन्धादेर्भेदे वस्तुसादृश्यमात्रेण व्यवहारः स्यात् नचात्रभेदो युज्यते स्वरूपहानेरतो वयवाभावे ऽवयव्यभाव आपद्यते स्वरूपत्वादिति भावः पटस्य प्रत्येकं तन्तुना भेदेऽपि समुदायरूपेणाभेदादुक्तं युक्तमिति नन्ववयविपदार्थसद्भावे इयं चिन्ता स एव नास्ति परमाणव एव पुञ्जीभूय कार्यं जनयन्तीत्यङ्गीकार्यत्वात्प्रतिक्षणं विनाशाच्च अभेदग्राहिप्रत्यभिज्ञायाश्च संस्कारजनितसादृश्यगात्रविषयतया भ्रान्तित्वादित्यतो वाह–स्यादिति । वस्तुनां भेदे सति तदुक्तं सत्यं स्यात्तदेव नास्ति एकत्वस्य साक्षिप्रत्यक्षेणानुभूयमानत्वात् साक्षिणो भ्रान्तित्वे सर्वस्य विनाशसाधकस्यापि व्याप्तिग्राहकप्रमाणप्रामाण्यस्य साम्यात्परमाणुपुञ्जपक्षेपि निगदितदोषानिस्तारात् परमाणुभिर्विना पुञ्जाभावेन स्वरूपं न स्यादतो दुर्घटघटकेन केनचिद्भवितव्यं स चादृष्टकर्मणोश्चेतनाश्रयत्वेन पृथक् सामर्थ्याभावाच्चेतन एव भवेत् चेतनसामान्यस्याहिताकरणादिना पारतन्त्र्यप्रतीतेर्निरवयवत्वेन प्रवृत्त्यनुपपत्तेश्च तत्प्रवर्तकत्वेनाघटितघटकत्वेन महात्म्याकरपरमचेतनपरिकल्पनयैव शरीरपदार्थोपादानभूतपृथिव्यादियोगो दृश्यत इति सिद्धम्—

"कार्यकारणवस्तूनां विशेषो न निरूपितः ।
तथापीशेच्छयैवासौ दृश्यते नियतो पि च" इतिस्मृतेः

एतादृशो विशेषः कुत्र दृष्ट इति तत्राह—जाग्रदिति । यथा स्वप्ने जाग्रदिदमयं स्वप्न इतिविशेष ईश्वरेच्छया दृश्यते "य एष स्वप्नान्दर्शयति"इति श्रुतेः न तत्र "रथा न रथयोगा न पन्थानो भवन्ति अथ रथान् रथयोगान् पथः सृजतः" इत्यादेः स्वप्ने प्रतीयमानं सर्वमीश्वरेच्छाकर्तृकमिति ज्ञायते तथा विधिनिषेधविशेषोपीश्वरकल्पनयैव प्रवर्तत इत्याह–तथेति । "अग्निष्टोमेन स्वर्गकामो यजेत"इत्यादि. महाविधित्वं अरुणया पिङ्गाक्ष्यैकहायिन्या गवा सोमं क्रीणातीत्याद्यवान्तरविधित्वं । तथा ब्राह्मणो न हन्तव्य इत्यादि महानिषेधत्वं न मृषा वदेदित्याद्यवान्तरनिषेधत्वं चेश्वरेच्छाक्लृप्तमित्यन्वयः "स इदं सर्वमसृजत"इत्यादेः संकोचेकारणाभावान्मुख्यार्थ एवाङ्गीकर्तव्यः । अत्र तत्तद्विशेषस्य परमेश्वरक्लृप्तत्वनिश्चयाय मिथ्याभूतजाग्रत्स्वप्नग्रहणं न तु तद्वत्स्वप्नस्यापि मिथ्यात्वनिश्चयाय तस्यार्थक्रियाकारित्वेन सत्यत्वनिश्चयात् अनेन सर्वस्य मिथ्यात्वे रज्जुसर्पस्य मिथ्यात्वं रज्जुखण्डं सत्यमितीयं व्यवस्था कुत इत्याशङ्क्य मिथ्याभूतस्वप्ने ऽपि जाग्रत्स्वप्नव्यवहारवत् व्यवहारमात्रमत्र चेत्यादि श्रुत्योच्यत इति ॥ ६१ ॥

एवं सर्वस्मादात्मन उपकारकत्वेन प्रेष्ठत्वाद्येन विना तत्प्रसादो न भवेद्यस्मिन्सति सञ्जाघटीति भगवति तत्समर्पणसमये तं नवानाप्रकारं दर्शयति–भावेति । मुनिः शास्त्रतत्त्वज्ञानी आत्मनः भावाद्वैतं क्रियाद्वैतं तथा द्रव्याद्वैतञ्चैव वर्तयत् स्मरणं कुर्वन् स्वानुभूत्याविर्भूतस्वरूपज्ञानेन । इह जगति सतस्त्रीन् स्वप्नान् जाग्रदाद्यवस्थानुभवनिमित्ताज्ञानशब्दवाच्यानर्थान् धुनुते निरस्यतीत्यन्वयः ॥ ६२ ॥

किं तद्भावाद्वैतादिकं येन तदवश्यमनुष्ठेयमिति तत्राह । कार्यकारणेति । महदादिकार्येषु प्रकृतितद्गुणाख्यकारणेषु च स्थितस्य वस्तुनो नित्याप्रतिहतस्य हरेरेकत्वदर्शनं तत्कथमिव पटतन्तुवत् पटस्य तन्तूनां चाभेदलक्षणैकत्वं यथा प्रामाणिकं तथेत्यर्थः । "प्रकृतिं पुरुषं चैव प्रविश्य पुरुषोत्तमः" इत्यादेः सृष्ट इति सामानाधिकरण्येन कार्यकारणयोरभेदोक्त्या श्रीहरिसम्बन्धप्रतीतेः प्रकृतासङ्गतं स्यान्निदर्शनं चैकत्वप्रदर्शनपरमित्युक्त एवार्थः प्रतीतार्थं परित्यज्याप्रतीतार्थकथने किं कारणमन्यत् अवस्तुत्वादिति । घटादिप्रपञ्चस्यानित्यत्वेन प्रतिहतत्वात्स्वत एव कार्योत्पादनसामर्थ्याभावादवस्तुत्वादसामर्थ्यत्वाद्विशिष्टत्वाद्भिखितत्वात्कार्यजननशक्त्यभावाद्वा, इदं च भगवन्माहात्म्यप्रकरणं युगपदाविशदिति श्लोकेः कार्यकारणानुविष्टानां भगवद्रूपाणामत्यैक्यमेकत्वं "तत्सृष्ट्वा तदेवानु प्राविशत्" "समाधिगतात्मस्मिविधूनभेदमोहः"इत्यादिश्रुतिस्मृतिभिरुच्यत इति ज्ञानपूर्वमुपासनं कार्यमिति शेषः ॥ ६३ ॥

न ऋते त्वत्क्रियते किञ्चनारे महामर्के मघवं चित्रमर्चीः क्रियाद्वैतम् ॥ ६४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मोहाभावकारणं सर्वस्य परमात्मानन्यत्वं विवृणोति आदाविति । यत् परमात्मलक्षणं वस्तु तत् सत् वर्तमानं तदेव स्वयं बहिर्भोग्यम् । ज्योतिः प्रकाशश्च स्फुरति नान्यद् अन्यस्य तद्विना स्वतः स्फुरणानिरूप्यत्वादिति भावः ॥ ५७॥

ननु, कथं तर्हि तस्मादत्यन्तपृथगिवार्थजातं प्रतीयते तत्राह–आबाधितः स्वातन्त्र्यसत्तायाः सकाशान्निरस्तोऽपि यथा आभासः सूर्यादिप्रतिरश्मिः बालादिभिः पृथक् प्रकाशमानादर्शनाद्वस्तुतया स्वतन्त्रपदार्थतया स्मृतः कल्पितः । तद्वदैन्द्रियकं सर्वं मूढैः स्वतन्त्रार्थत्वेन विविधं कल्पितम् । तत्तु न तत्त्वदृष्ट्या स्वातन्त्र्यनिरूपणस्य दुर्घटत्वादित्यर्थः ॥ ५८ ॥

क्षित्यादीनामिति, तैः तत्र कुत इत्यन्ते स किम् अवयवेभ्यः पृथगारभ्यते परिणमते च तदन्वितो वेत्यूह्यम् । अतो मृषैवेत्यत्र अतो देहादेः स्वातन्त्र्येणावस्थितिर्मृषैवेत्यर्थ इति ज्ञेयम् ॥ ५९ ॥

एवं देहादेः स्वातन्त्र्येणानिरूप्यत्वमुक्त्वा तद्धेतूनाम् क्षित्यादीनामपि तथैवानिरूप्यत्वमाह–धातव इति । तर्ह्यवयव एव स्वतन्त्र इति चेत्तत्राह, उक्तप्रकारेणावयविनि निरूपयितुमशक्ये अवयवोप्यन्ततो निरूपयितुमसन्नेव स्यात् तस्मादैक्यबुद्ध्यावभासरूपम् यत् प्रतीयते तत् सर्वत्र परमात्मलक्षणं सर्वकारणं वस्त्वेवेति साधूक्तः आदावन्ते जनानाम् सदित्यादिना एवमेव तृतीयेऽप्युक्तं "इति तासां स्वशक्तीनां सतीनामसमेत्य सः । प्रसुप्तलोकतन्त्राणां निशाम्य गतिमीश्वरः ॥ कालसंज्ञां ततो देवीं बिभ्रच्छक्तिमुरुक्रमः त्रयोविंशतितत्त्वानां गणं युगपदाविशत्॥सोऽनुप्रविष्टो भगवांश्चेष्टारूपेण तम् गणम्।भिन्नं संयोजयामास सुप्तं कर्म प्रबोधयन्" इति एव "यस्य पृथिवी शरीरम्"इत्यादौ श्रुतौ परमात्मशरीरत्वेन प्रसिद्धिः

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

परमात्मनस्तु शरीरित्वेन तदेवमवयवरूपेण प्रधानपरिणामः सर्वत्रावयवीतु परमात्मवस्त्वेवेति सिद्धं ततोऽप्यमिथ्यात्वमेव जगत उपपद्येत् ॥ ६० ॥

ननु, यदि परमात्मवस्त्वेव सर्वत्रावयवी देहः स्यात् । ततश्चात्रैव ब्राह्मणत्वादि संज्ञा प्राप्तेर्गुणदोषहेतुविधिनिषेधावपि स्यातां तौ च न सम्भवतः । तस्मादन्यत्र वावयवी युज्यते इत्याशङ्क्याह—स्यादिति । वस्तुनः परमात्मनः विकल्पे संशये सतीति तस्य तादृशत्वेन निर्णयो यावन्न स्यादित्यर्थः । तावदेव तस्मात् सर्वैक्यबुद्धिनिदानात् पृथग्देहैक्यनिदानबुद्धिः सादृश्यभ्रमः स्यात् । पुर्वापरावयवानुसंज्ञाने सति परस्परमासज्यैकत्र स्थितत्वेनावयवत्वसाधारण्येन चैक्यसादृश्यात् । यतो प्रत्यवयवमेकतया प्रतीतेः सोऽयं देह इति भ्रम एव भवतीत्यर्थः । प्रतिवृत्तं तदिदं वनमिनिवत् यथोक्तं स्वयं भगवता "सोऽयं दीपोर्च्चिषां यद्वत् स्रोतसां तदिदं जलम् । सोऽयं पुमानिति नृणां मृषाधीर्गीर्मृषायुषाम्" इति । ततश्च तत्रैव ब्राह्मणत्वाद्यभिमाने सति स्वप्नविषयकौ जाग्रत्स्वप्नाविव तद्विषयकौ विधिनिषेधौ स्यातामित्याह । तथा तेन प्रकारेण विधेर्विधिता निषेधस्य निषेधतेत्यर्थः । एवं "परस्वभावकर्म्माणि न प्रशंसेन्न गर्हयेत् । विश्वमेकात्मकं पश्यन् प्रकृत्या पुरुषेण च" इत्यादिरेकादशाष्टाविंशतितमाध्यायोऽपि ज्ञेयः । तत्र "किं भद्रं किमभद्रं वा द्वैतस्यावस्तुनः कियान्" इत्यादिकं स्यात् सादृश्य भ्रम इत्याद्यानुसारेणैव व्याख्येयम् । अवस्तु यत् द्वैतं तस्येत्यर्थः । तस्मात् स्वातन्त्र्येण निरूपणाशक्त्या परमात्मनोऽनन्यदेव सर्वमिति प्रकरणार्थः ॥ ६१—६३ ॥

प्रसिद्धज्ञानत्वात्तथापि स्वधर्म्यमेव कुर्यादित्याह—यदीति । ॥ ६४—६५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

अत्र सर्वं ब्रह्मेति भावनैव मोहाभावे नैव हेतुरित्याह—आदाविति जनानां देहादीनां आदौ कारणत्वेन अन्ते चावधित्वेन यत् सत् स्वयंब्रह्म तदेव बहिर्भोगं मायिकं वस्तु अन्तर्भोक्तृजीववृन्दं परावरं उत्कृष्टनिकृष्टात्मकं ज्ञानमिन्द्रियं ज्ञेयं शब्दादिवचो घटपटादिवाच्यं जात्यादि तमो जीवस्याविद्या ज्योतिर्विद्या तस्माद्व्यतिरिक्तं वस्तु किमपि नास्ति येन मुह्येदिति भावः ॥ ५७ ॥

ननु कथं तर्हि तस्मादत्यन्त पृथगिवार्थं प्रतीयते तत्राह— ननु भोक्तृभोग्यादिवस्तूनां सर्वजनैरेव पृथक्तया प्रतीयमानत्वात् कथमेको यतिरेव सर्वं ब्रह्मैवेदमिति प्रत्येतु तत्राह—आबाधित इति । अत्र अद्वयं ज्ञानमेव ब्रह्मोपासनायां पद्धतिः साच विविधशक्तिवैचित्रीमयस्य विश्वस्य सत्यत्वप्रतीतौ नसिद्ध्येदतस्तदर्थं ज्ञानिनमधिकारिणं विश्वस्य मिथ्यात्वं प्रत्याययितुं विवर्त्तवादोयमष्टभिः प्रस्तूयते यथा भक्तिमते "तस्मात् केनाप्युपायेन मनः कृष्णे निवेशयेत्" इत्युक्तं तथैव ज्ञानिमतेऽयमुपायो ज्ञानिमनो ब्रह्ममात्रग्रहणार्थः विश्वस्य सत्यत्वे मनसा निश्चिते तेन निरालंबेन मनसा विश्वस्याग्रहणं निषेधकोटिभिरपि दुर्घटमित्यतोऽत्रविवर्त्तवादेऽपि शास्त्रस्य तात्पर्यमित्यवसेयं विश्वदेव भगवद्धामनामरूपादेरसत्यत्वमननेतु ज्ञानिनोऽप्यधःपात इति प्राक्प्रतिपादितं प्रतिपादयिष्यते च यथास्थानमुपरिष्टादपि श्रीभरतेनापि रघुगणप्रबोधनार्थम् "अयं जनो नाम चलन्पृथिव्याम्" इत्यादिना विश्वमिथ्यात्वमुक्त्वा तर्हि किमित्यपेक्षायां भगवच्छब्दसंज्ञं "यद्वासुदेव कत्यो वदन्ति" इत्युपसंहृतम् अथ प्रकृतमनुसरामः आभासो हि चन्द्रादिर्मिथ्याभूतोऽपि यथा बालैर्वस्तुतया स्मृतः तद्वदैन्द्रियकं सर्वमर्थत्वेन कल्पितमेव नतु वस्तुतः दुर्घटत्वात् ॥ ५८ ॥

एतदेवाह—क्षित्यादीनां पञ्चभूतानां छाया ऐक्यबुद्ध्या आलम्बनं देहादिकं संघातारं तु परिणामानां मध्ये कतमापि न भवति न तावत् पञ्चभूतानां सङ्घातः वृक्षाणामिव वनम् एकदेशाकर्षणेन सर्वाकर्षणानुपपत्तेः नह्येकस्मिन् वृक्षे आकृष्टे सर्वं वनमाकृष्यते न च पञ्चभूतानां विकारः पञ्चभूतैरारब्धो ऽवयवीत्यर्थः । कुत इति चेत् तत्राह—न पृथङ्नान्वित इति । अवयवेभ्यो ऽवयवी नतावदत्यन्तं प्रथक् तथाऽप्रतीतेः अवयवात्पृथगवयविवादिनां मते दोषान्तरमपि द्रष्टव्यं तद्यथा स्वर्णघटमहं ददे इति वाक्यपूर्वकस्वर्णघटदानानन्तरं तद्घटावयवस्य कपालादेर्ग्रहणे न ब्राह्मणस्य स्वर्णस्तेयजन्यं पातित्यं स्यात् दातृतस्तनुनाशकस्य दान कर्मत्वाद्धस्तस्य घटपदार्थे घटएव सत्वे न घटस्यैव स्वत्वनाशात् कपालादेस्तस्य घटपदार्थभिन्नत्वात् प्रकारान्तरस्वीकारस्य गौरवसहस्रपरहतत्वादेतन्मतमनुपादेयमेव न च तेष्वन्वितः स किम्प्रत्यवयवमवयवी सर्व एवान्वेति अंशेन वा आद्येप्राणौ पादयङ्गुल्यादौ वा देहबुद्धौ तन्नाशे देहो नष्ट इति प्रतीतिरापद्येत द्वितीये अंशस्याप्यंशङ्गीकारे अनवस्था स्यात् अपिकारात् पञ्चभूतानां परिणामोऽपि यतो न पञ्चभूतेभ्यः स पृथक् नापि तेष्वन्वितइत्यतो मृषैव मिथ्यैवेति विवर्त्तवादएवोपादेय इत्यर्थः ॥ ५९ ॥

एवं देहादेर्मिथ्यात्वमुक्त्वा तद्धेतूनां क्षित्यादीनामपि मिथ्यात्वमाह—धातवइति । धारयन्तीति धातवो महाभूतानि तन्मात्रैः सूक्ष्मैरवयवैर्विना न स्युः अवयवित्वात्तेषामपि तर्ह्यवयवः सत्य इति चेत्तत्राह उक्तप्रकारेणावयविन्यसति अवयवो ऽप्यन्ततो ऽसन्नेव स्यात् अवयविप्रतीत्यन्यथानुपपत्तिं विना तत्सद्भावे प्रमाणाभावादित्यर्थः तदुक्तं पञ्चमे "एवं निरुक्तं क्षितिशब्दवृत्तम्" इत्यादि ॥ ६० ॥

ननु,तदपि क्षित्यादीनां सत्यत्वेन प्रतीतिः कुतो नयतीत्यत आह—स्यादिति । विकल्पे क्षित्यादावसति मिथ्याभूतेऽपि वस्तुनः सत्यभूतस्य भगवन्नित्यधामस्थक्षित्यादीनां सादृश्येन भ्रमः सत्यस्य जलस्य मरीचिकायामिवेत्यर्थः । यथैव सत्य एव तेजसि सत्यस्यैव जलस्य भ्रान्तिमूलके आरोपे सति मरीचिका जलं भवेत् तथैव सत्य एव ब्रह्मणि सत्यस्यैव भगवद्धामस्थक्षित्यादेरज्ञानमूलके आरोपे सति जगदिदं भवेदित्यर्थः । न च भगवद्धामन्यपि

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

विवर्त्तः प्रवर्तत इति तदप्यसत्यमिति वाच्यं भूगोलचक्रे सप्त पूर्य्यो भवन्ति तासां मध्ये साक्षाक्षादूब्रह्मगोपालपुरीहीति गोपालतापिनीश्रुत्या गोपालपुर्या ब्रह्मस्वरूपभूतत्वप्रतिपादनात्तासामितिनिर्द्धारणपष्ठ्यासाक्षादिति ब्रह्मेति पदयोश्च वैयर्थ्यादन्यवस्तूनामिव ब्रह्मणि गोपालपूर्य्यारोपितत्वमिति व्याख्यातुमशक्यत्वात् किञ्च अर्वाचीना अद्वैतवादिनस्तु मायाशक्त्या तत्वनप विनोप्य भावे आगमापायिषु वाल्यादिषु सोयं देवदत्त इति प्रत्यभिज्ञानं नस्यात् तदुक्तं भट्टैः "आविर्भावतिरोभाव धर्मकेष्वनमापियत् तद्धर्मीति" तत्राह—स्यादिति । वस्तुतः परमात्मनो कल्पभेदो प्रसतिय इव वस्तुनो विकल्पे सति पूर्वपूर्वारोप साहश्यात् एवेति भ्रमः स्यात्सत्त्वतादेवाविद्यानिवृत्तिः ननु, सर्गमिथ्यात्वे शास्त्रस्य विधिनिषेधता कथ्यते तत्राह—स्वप्नमध्ये जाग्रत्स्वप्नं यथायथेति इतिस्वामिचरणातिरिक्तामंतरङ्गाह्लादिन्यादिशक्तिं तद्विलासान् भगवन्नित्यधामाक्षित्यादींश्च मन्यमाना अन्धपरंपरयैव विवर्तं मिथ्याभूतस्यैव साहश्यभ्रममाचक्षाणा विगीयन्त एव नन्वेवं जगतो मिथ्यात्वे सर्वज्ञेनापि वेदेन विधिनिषेधौ कथमुच्येते नहि मरीचिका जलस्य गुणदोषौ विज्ञेनोपदिश्येते इत्यत आह—जाग्रत्स्वप्नाविति । स्वप्नमध्ये यथा जाग्रत्स्वप्नव्यवस्था तथैव मिथ्याभूतो जगति तावपि मिथ्याभूतावेवेत्यर्थः । अविद्वदधिकारित्वादिति "त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन"इत्यादेः ॥ ६१ ॥

इदानीमुक्तमेवाद्वैतं भावनात्रयोपदेशेन दृढीकरोति—भावाद्वैतमिति चतुर्भिः । वर्त्तयन्नालोचयन् स्वानुभूत्या आत्मतत्त्वानुभवेन वस्तु भेदबुद्धिरेकः स्वप्नः ततस्तदाधिकारभेदेन कर्मभेदबुद्धिर्द्वितीयः मत्कर्मसाधितमेतत्फलं ममैव भोग्यमिति तृतीयः तान् धुनुते निवर्त्तयति ॥ ६२ ॥

कार्य्यकारणयोर्वस्त्वैक्यस्य मर्शनमालोचनं तंतुरेव न पटे इत्येव जगत्प्रकृत्योः कार्य्यकारणयोरैक्यम् ॥ ६३ ॥

मनोवाक्तनुभिः कृतानां कर्मणां ब्रह्मण्यर्पणमिति उद्देश्यफलभेदो हि क्रियाभेदहेतुः ईश्वरार्पणेच तदभावात् क्रियाणामद्वैतम् ॥ ६४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मुक्तप्राप्तस्य भगवतो मार्गविशेषगम्यत्ववर्णनेन प्राप्तमेकदेशित्वं निराकरोति-आदाविति । आदौ उत्पादकरूपेण अन्ते प्रवेशस्थानत्वेन बहिर्धारकत्वेन अन्तः प्रेरकत्वेन सत् सर्वदा सत्ताप्रदत्वेन जनानां स्वयं साक्षादयमेव भगवान् अस्ति परं कारणमवरं कार्यं चायमेव ज्ञानं च ज्ञानतत्त्वं ज्ञेयमचेतनत्वं चायमेव तयोः परावरभगवच्छक्तित्वेन भगवत्पृथगवस्थानाभावात् वचो वाच्यं शब्दार्थौ चायमेव तमो ज्योतिः प्रकाश्यं प्रकाशकं वस्तु अयमेव सर्वात्मत्वात् ॥ ५७ ॥

शरीरादुत्क्रांतस्य पितृयानेन सोमलोकं देवयानेन परं पदमात्मा यातीत्युक्तं तत्र देहेन्द्रियादिविलक्षणमात्मतत्त्वं प्रतिपादयन् भूतसंघात एवात्मेति पक्षं बहुपदार्थसंयोगे मदशक्तिर्यथोत्पद्यते तद्वद्भूतसंघाते शरीरे विज्ञानमुत्पद्यते इति पक्षं च तथा चक्षुराद्यात्मवादं च बाह्याभिमतं निराकरोति—अबाधित इत्यादि चतुर्भिः । आभासं मृगादिरूपेणाभासमानः स्वप्नदेहो यथा अवस्तुतया अवस्तुमृगादिरूपेऽहंभूतमात्मतत्त्वं तद्भिन्नतया स्फुरत् अपि निश्चये हि हेतौ यतो हेतोः निश्चयेन आबाधितः प्रबोधसमये नाहं मृगादिरूप इत्येवं निराकृतः तद्वत् ऐन्द्रियं शरीरं अर्थविकल्पितम् अर्थात् आत्मस्वरूपाद्विकल्पेन भेदेन निर्णीतम् कुतः दुर्घटत्वात् तस्मिन् आत्मत्वासम्भवादित्यर्थः ॥ ५८ ॥

इह वस्तुनि जीवे क्षित्यादीनां भूतानां तथाऽन्येषामिन्द्रियाद्यर्थानामचेतनपदार्थानां कतमा छायापि नास्ति न संघातो न विकारः तेषामचेतनानां मध्ये पृथगेकतमः अन्वितः क्षितिरूपो वा पदार्थस्तत्र नास्तीति किमु वक्तव्यम तस्माद्भूतसंघातात्मवादः बहुपदार्थसंयोगजतद्विकारभूतमद्यशक्तिवद् भूतसंघातोत्थितविज्ञानात्मवादश्च मृषेत्यर्थः ॥ ५९ ॥

भूतभौतिकानामनात्मत्वदर्शनाय तेषामनित्यतां दर्शयति-धारयन्ति नाना अवयवान् इति धातवो देहाः अवयवित्वात् पांचभौतिकत्वात् तन्मात्रावयवैर्देहसंस्थानमात्रावयवैर्भूतलेशैर्विनष्टा न भवन्तीत्यर्थः । एवं अवयविनि देहे असति नष्टे अन्त्ये स्वकारणे भूते लयात् अवयवः भूतलेशः असद्भवति कारणाकारं सूक्ष्मभावं प्राप्नोतीत्यर्थः ॥ ६० ॥

तर्हि देहे मृते तद्भिन्न आत्मा नैवास्तीति वा हृत्पदं वरीयान् अत्राह—स्यादिति । लोहपिंडे अग्नौ सति अग्निसादृश्य भ्रमो भवति यथा, एवं विकल्पे आत्मभिन्ने देहे यावत्काल पर्य्यन्तं वस्तुनि सति तावदेव वस्तुनः सादृश्यभ्रमश्चेतनत्व भ्रमः स्यात् तस्मिन् असति न तु स्यात् तद्वस्तुदेहविवर्त्त नित्यमित्यर्थः । तर्हि देहविभिन्न आत्मा देहो नात्मेति आत्मानात्मविधानप्रतिषेधौ कदा स्याताम् ? जाते ज्ञाने भवत, इत्याह—जाग्रत्स्वापाविति । यथा अयं जागरः नायं स्वापः इत्येवं विहित प्रतिषिद्धौ जाग्रत्स्वापौ अस्वप्ने प्रबोधे एव भवतः एवं जाते आत्मानात्मज्ञाने ज्ञानस्वरूपोऽहमात्मा जडवर्गो देहेन्द्रियादिरूपो नात्मेत्युभयोर्विधिनिषेधता स्यादित्यर्थः ॥ ६१ ॥

एवमात्मस्वरूपज्ञानदाढर्च्यार्थं नास्तिकानां संघाताद्यात्मभ्रान्तिवादा निराकृताः अथ तार्किकमीमांसकादिभ्रान्तिवादाननन्तरं क्रिमत्सर्वात्मभूतपरमात्मज्ञानदाढर्च्यार्थं निराकरोति-भावाद्वैतमिति चतुर्भिः । भावयोर्जगत्परमात्मनोरद्वैतं क्रियाणां परमात्मांशभूत जीवकृतानां परमात्मन्यर्पणात्मकमद्वैतं द्रव्याणां भोक्तृभोग्य पदार्थानां परमेश्वरात्मकत्वरूपमद्वैतं स्वानुभूत्या वेदान्तश्रवणजन्येन स्वानुभावेन वर्त्तयन् चिन्तयन् आत्मनः त्रीन् स्वप्नवदागन्तुकान् दोषान् तार्किकाः जगत्परमात्मनोरत्यन्तं भेदं तच्छास्त्रश्रवणादेकः मीमांसकाः जीवकृताः क्रियास्तत्तज्जीव

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

गाथां ननु पुरमेश्वरेऽर्पयन्ति तच्छास्त्रश्रवणात् द्वितीयः उभयपक्षेऽपि भोक्तृभोग्यपदार्थानामत्यन्तभेदः स तृतीयः आगन्तुको दोषः एवं विधान् दोषान् इहास्मिन् लोके मुनिर्वेदान्तोक्ततत्त्वावज्ञता धुनुते निराकरोति ॥ ६२ ॥

कार्यकारणयोर्जगत्परमात्मनोर्वस्तुनोः कार्यत्वकारणत्वाभ्यां भिन्नयोरपि पटतन्तुवदैक्यस्य मर्शनमनुसन्धानं तदभावाऽद्वैतमुच्यते श्रुतिभिः "ब्रह्मैवेदमग्र आसीत् सदेव सौम्येदमग्र आसीत् सर्वं खल्विदं ब्रह्म" इत्यादिभिः परमात्मनो ऽत्यन्तं भिन्नं जगत् परमाणुमयत्वादिति विकल्पस्य अत्यन्तभेदस्य अवस्तुत्वात् पटतन्तुवदिति दृष्टान्तेन ब्रह्म सत्यं जगन्मिथ्येति प्रच्छन्नबौद्धानां पक्षोऽपि निरस्तो वेदितव्यः।तन्तूनां मिथ्यात्वं नपटमिथ्यात्वस्यासंभवात् बह्वध्यासवादनिराकरणदर्शने कौतूहलं तर्हि अध्यासगिरिवज्राख्यो ग्रन्थो द्रष्टव्यः। पटस्य तन्त्वभिन्नत्वं दृष्टान्ते दार्ष्टान्ते तु जगतश्चेतनाचेतनरूपपरमात्मशक्तिद्वाराऽभिन्नत्वमिति विवेकः ॥ ६३ ॥

साक्षाद्ब्रह्मणि परे श्रीपुरुषोत्तमे सर्वकर्मणां कारयितरि फलदातरि मनोवाक्तनुभिः सर्वकर्मसमर्पणं यत्तत् क्रियाद्वैतम् ॥ ६४ ॥

भाषा टीका।

जनों के आदि अन्त में तथा बाहर और भीतर और जगत् में जो पर, अवर, ज्ञान, ज्ञेय, वचन, वाच्य, तम, और ज्योति अर्थात् समष्टि जीव हैं वे सब्ही स्वयं भगवान्ही हैं तस्मात् पूर्वोक्तज्ञानी को सर्ववस्तुके भगवदात्मक समुझने से कुछ मोहका कारण ही नहीं है ॥ ५७ ॥

भावहोनेवाला जात्यादि के विकल्पास्पद यहदेह सत्यहोकर भी शास्त्र में अवस्तुत्वेन अर्थात् अपुरुषार्थत्वेन कहाहै, क्योंकि—इसमें आत्मधर्म दुर्घट है इसदेह के तरह जितने इन्द्रियों के विषय हैं वे भी अपुरुषार्थ रूपही है ॥ ५८ ॥

इहाँपर पृथिवी के परिणाम रूप वृक्षादिकों की छाया जैसे न वृक्षों का समुदायरूपहै, न वृक्षोंका विकाररूप है, न वृक्षो के विना स्थिति के योग्य, है और न वृक्षोके अन्वित अर्थात् सदा वृक्षों के साथ रहनेवाली है, क्योंकि अनातप समयपर नहीं रहती है, इसी प्रकार यह शरीर भी न आत्मा का संघात न विकार न पृथक्स्थिति योग्य और न अन्वित तस्मात् मृषा अर्थात् अनित्य है, इसी से आत्मा शरीर नहीं हो सका है ॥ ५९ ॥

ऐसेही पृथिव्यादि धातुओं को भी अवयवि होने से नित्य नहीं कहसके हैं क्योंकि? वे अवयवों के विना नहीं रहसकी है, और अवयवि के असत् काल में अर्थात् नाश होने पर अन्त में अवयवों की भी उपलब्धि नहीं होती है, इस प्रकार अवयवि होने से अनित्य शरीर नित्य आत्मा नहीं हो सका है ॥ ६० ॥

यदि कहो कि शरीर आत्मा नहीं है तब स्थूलोहं अर्थात् मैं स्थूलहूं इस प्रकार की आत्मा को विषय करने वाली अहंप्रतीति इस देह में क्यों होती है? तहां पर कहते है कि—वस्तु के विकल्प (संशय) होने पर तो सादृश्य और भ्रम हुआ करते हैं तहां जड और चेतन का सादृश्य न होने से सादृश्य से तो ब्राह्मणोहं अर्थात् (मैं ब्राह्मण हूं) इत्यादि प्रतीति हो नहीं सकी। किन्तु अग्नि के संसर्ग से जैसे उष्णं जलं (जल उष्ण है) ऐसा ज्ञान होता है, ऐसे ही शरीर और आत्मा का संसर्ग (सम्बन्ध) होने से शरीर गत स्थूलत्व आदि धर्मों का आत्मा में भ्रम होता है, भलाँ यदि आत्मा शरीर नहीं है? तो विहित और निषिद्ध का अनुष्ठान तो शरीर ही से होता दीखते हैं फिर शास्त्र आत्मा के लिये क्यों विधि निषेध कहता है? तहाँ कहते हैं कि—जैसे सोते हुए पुरुष को स्वप्नावस्था में भी स्वप्नावस्था और जाग्रत् अवस्था का अनुभव होता है, और जागने पर सोते समय की दोनो अवस्थाओं के अनुभव का उस को सम्बन्ध नहीं रहता, इसी प्रकार आत्मा को भी प्रकृति सम्बन्ध तक ही अज्ञानकी शय्या पर सोने से विधि निषेध का सम्बन्ध है, और ज्ञान दशा होने पर (मुक्तयोऽपि न बद्ध्यमानाः) अर्थात् मुनि लोग भी बन्धन से छूट जाते हैं ॥ इस उक्त प्रकार से स्वस्वरूपादि का पूर्ण ज्ञान होने से विधि निषेध का पात्र नहीं होता है। और आविर्भूत गुणाष्टक होकर मुक्त होने पर भी केवल आत्मा को विधि निषेध से कुछ प्रयोजन ही नहीं रहता ॥ ६१ ॥

आत्मा का यह तीन प्रकार का अद्वैत है एक भावाद्वैत, दूसरा क्रियाद्वैत, तीसरा द्रव्याद्वैत, तहां मनन शील ज्ञानी लोग आलोचना करते हुए जाग्रदादितीनों अवस्थाओं को निवृत्त कर देते हैं, ॥ ६२ ॥

तीन प्रकार के अद्वैत में भावाद्वैत वह है, कि पट तन्तु (वस्त्र सूत) के तरह विकल्प (देव मनुष्यादि अवस्था) को कुछ वस्तु न होने से अर्थात् स्थिर न होने से कार्य कारण वस्तु का जो ऐक्य विचार है, ॥ ६३ ॥

हे युधिष्ठिर! जो कि साक्षात्। पर ब्रह्म परमात्मा में मन वाणी और शरीर से कर्मों का समर्पण है उस को क्रिया द्वैत कहते हैं ॥ ६४ ॥

आत्मजायासुतादीनामन्येषां सर्वदेहिनाम् ! ।
यत्स्वार्थकामयोरैक्यं द्रव्याद्वैतं तदुच्यते ॥ ६५ ॥
यद्यस्य वा ऽनिषिद्धं स्याद्येन यत्र यतो नृप ।
स तेनेहेत कर्माणि नरो नान्यैरनापदि ॥ ६६ ॥
एतैरन्यैश्च वेदोक्तैर्वर्तमानः स्वकर्मभिः ।
गृहे ऽप्यस्य गतिं यायाद्राजंस्तद्भक्तिभाङ्नरः ॥ ६७ ॥
यथा हि यूयं नृपदेव ! दुस्त्यजादापद्गणादुत्तरतात्मनः प्रभोः ।
यत्पादपङ्केरुहसेवया * भवानहारषीन्निर्जितदिग्गजः क्रतून् ॥ ६८ ॥
अहं पुरा ऽभवं कश्चिद्गन्धर्व उपबर्हणः ।
नाम्ना ऽतीते महाकल्पे गन्धर्वाणां सुसम्मतः ॥ ६९ ॥
रूपपेशलमाधुर्यसौगन्ध्यप्रियदर्शनः ।
स्त्रीणां प्रियतमो नित्यं मत्तस्तु पुरुलम्पटः ॥ ७० ॥
एकदा देवसत्रे तु गन्धर्वाप्सरसां गणाः ।
उपहूता विश्वसृग्भिर्हरिगाथोपगायने ॥ ७१ ॥
अहं च गायंस्तद्विद्वान्स्त्रीभिः परिवृतो गतः ।
ज्ञात्वा विश्वसृजस्तन्मे हेलनं शेपुरोजसा ।
याहि त्वं शूद्रतामाशु नष्टश्रीः कृतहेलनः ॥ ७२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आत्मनः स्वस्य जायादीनां च स्वार्थश्च कामश्च तयोः देहादीनां पञ्चभूतात्मकत्वेन भोक्तुश्च परमात्मत्वेनाभेदालोचनेनार्थकामयोर्यदैक्यदर्शनमित्यर्थः ॥ ६५ ॥

उक्तानाश्रमधर्मान्संक्षिप्याह–यदिति । यद्द्रव्यम् येनोपायेन यतः सकाशात् ॥ ६६ ॥

प्रस्तुतमुपसंहरति—एतैरिति । अस्य श्रीकृष्णस्य गतिम् तद्भक्तिभाक् तस्य भक्तः ॥ ६७ ॥

एतत्सर्वसाधारणमुक्तम् भक्तस्य तु भक्तिरेव सर्वपुरुषार्थहेतुरिति पाण्डवानेव लक्षीकृत्याह–यथाहीति । हे नृपदेव ! नृपैर्देवैश्च सहायैर्दुस्त्यजादिति वा आत्मनः श्रीकृष्णादेव प्रभोर्हेतोः अत्र भाव आर्षः उत्कर्षेणातरतेत्यर्थः यथा यथावत् तमेव भजतेति शेषः यद्वा यथा आपद्गणादुत्तीर्णास्त्वम् यथा च क्रतूनहार्षीत्तथा श्रीकृष्णादेव तारकात्संसारादप्युत्तरतेत्यर्थः ॥ ६८ ॥

श्रीकृष्णसेवा महतामवज्ञया भ्रश्यति तत्कृपया च सिध्यतीति दर्शयन्पूर्ववृत्तमाह—अहमिति सार्द्धैः पञ्चभिः । नाम्ना उपबर्हणः ॥ ६९ ३

पेशलं सौकुमार्यं रूपादिभिः प्रियं दर्शनं यस्य ॥ ७० ॥ ७१ ॥

तद्गानं विद्वान् उन्मत्तः सन् गायन्नेव गतः ॥ ७२ ॥–७३

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

द्रव्याद्वैतं विवृणोति—आत्मेति । अर्थशब्दो धनपरः कामशब्दः काम्यस्रक्चन्दनादिभोग्यवस्तुविषयः सच भोगोपकरणभोगस्थानादि प्रदर्शनार्थः यदर्थकामयोरात्मजायादि सर्वदेहिनामैक्यं तद्द्रव्याद्वैतं वित्तगृहक्षेत्रपात्रस्रक्चन्दनादीनामात्मजायाद्यनेकभोक्तृवर्गसाधारणत्वं द्रव्याद्वैतमित्यर्थः । ते एवं गृहादीनां स्वासाधारणत्वभ्रमो निरस्तः यद्वा द्रव्ययोश्चिदचिद्द्रव्ययोरद्वैतं द्रव्याद्वैतं तत्र चिदचिद्द्वैतं दर्शयति-आत्मजायेति । आत्मादि सर्वदेहिनां जीवानां ज्ञानैकाकारत्वेनैकरूपेण दर्शनं चिदद्वैतं प्रकाराद्वैतम् अर्थकामादीनामचिदन्यपरिणामरूपत्वभ्रमश्च निरस्तः ज्ञानाद्वैतमितिपाठेऽप्येवं विभदर्शनं ज्ञानाद्वैतमित्यर्थः ॥ ६५ ॥

न केवलं त्रिविधमेवाद्वैतमनुसन्धेयमपितु अन्यदपि शास्त्रानुमतं चेत्तदपीत्याह–यदिति । हे नृप ! येन शास्त्रेण यस्य पुंसः

* भगवान्महर्षिभिर्निर्जितदिग्जनः इति पाठः–वीर० ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यस्य वस्तुनो यतो यस्माद्वस्तुनः सकाशाद्यदद्वैतमनिषिद्धं किन्त्वनुमतं स पुमान् तेनाद्वैतेनाऽनुसन्धीयमानेनेति शेषः । तदनुसन्धानपूर्वकमेव कर्माणि कर्त्तव्यानीहेत कुर्यादन्यैः शास्त्रप्रतिषिद्धैस्तु न कुर्यात् यतोऽयमनापदि न विद्यते आपत्संसारो यतस्तस्यां ज्ञाननिष्ठायां वर्त्तमानः यथा "वाचारम्भणं विकारो नामधेयम्" "व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन !" इत्यादिशास्त्रेण भावाद्वैतादिकं प्रतिपाद्यते न तथा प्रकाराद्वैतप्रकार्यद्वैतगुरुदेवताद्वैतादिकमपि शास्त्रैः प्रतिपाद्यत इति तदप्युपादेयमेवेत्यभिप्रायेणाऽयं श्लोकः प्रवृत्तः तत्र प्रकार्यद्वैतं नाम ब्रह्माद्वैतं "सर्वं खल्विदं ब्रह्म" इत्यादिब्रह्मप्रकरणे सामानाधिकरण्येन ब्रह्माद्वैतप्रतिपादनात्सामानाधिकरण्यस्य च प्रकारभेदविशिष्टप्रकारैकत्वपरत्वाच्च ब्रह्माद्वैतमेव प्रकार्यद्वैतं "नित्यो नित्यानां चेतनश्चेतनानाम्" इत्यादिश्रुतिभिर्जीवस्वरूपभेदप्रतिपादनेन स्वरूपेणाभेदानुपपत्तेः बद्धमुक्तादिव्यवस्थाऽनुपपत्तेः सुखादिव्यवस्थाऽनुपपत्तेश्च क्वचिज्जीवैकत्वप्रतिपादनं प्रकारैक्याभिप्रायकमेवेति तदद्वैतमेव प्रकाराद्वैतम् "आचार्यं मां विजानीयात् "आचार्यदेवो भव" "आचार्यः स हरिः साक्षाच्चररूपी न संशयः" इत्यादिभिर्गुरुदैवतादीनामद्वैतं प्रतिपाद्यत एव ॥ ६६ ॥

यत्पृष्टं "गृहस्थ एतां पदवीं विधिना येन चाञ्जसा । यायाद्देवऋषे ब्रूहि" इति यस्योत्तरमुक्तमुपसंहरति—एतैरिति । हे राजन् ! वेदोक्तैरिति वेदशब्दस्तन्मूलकस्मृतिपुराणादीनामपि प्रदर्शनार्थः वेदादिभिरुक्तैः कर्तव्यत्वेनोक्तैरेतैर्भावाद्वैताऽनुसन्धानादिभिरित्यन्यैर्देहात्मजीवेश्वरादिभेदाऽनुसन्धानैः स्वस्ववर्णाश्रमोचितकर्मभिश्च तस्य भगवतो भक्तिभाग्भक्तिकुर्वन् गृहेऽपिजनः गृहस्थोऽपि जनोऽस्य श्रीकृष्णस्य गतिं प्राप्नुयादित्यर्थः ॥ ६७ ॥

"मादृशो गृहमूढधीः" इत्यनेनाभिप्रेतां स्वस्य मुक्तिदौर्लभ्यशङ्कां किम्पुनर्न्यायेन निराकरिष्यमाणः तावच्छ्रीकृष्णसेवयैव तरिष्यसीत्याह—यूयमिति । हे नृप देव ! यथा प्रभोः सर्वशक्तेरात्मनोऽन्तरात्मनः श्रीकृष्णादेव हेतोर्यूयं दुस्त्यजादापदां गणादुत्तरत अडभावः अन्तादेशाभाव आत्मनेपदञ्चार्षाणि उदतरत उत्तीर्णाः यथा च भवान् यस्य श्रीकृष्णस्य पादपङ्कजयोः सेवया हेतुभूतया निर्जिता दिग्गजादिक्पालकाः येन तादृशः सन् महर्षिभिः सह क्रतूनकार्षीदिति शेषः तथा तस्यैव सेवया मोक्ष्यस इत्यध्याहारः ॥ ६८ ॥

लब्धतदीयसेवामात्रेण हेतुना मादृशानां मुक्तिसम्भवे किं पुनः साक्षाल्लब्धतत्सेवानां तादृशामिति प्रतिपादनार्थं स्वपूर्वजन्मवृत्तान्तमाह—अहमिति । अतीते ब्रह्मकल्पे पूर्वजन्मन्यहं नाम्नोपबर्हण इति प्रसिद्धः कश्चिद्गन्धर्व अभूवम् आत्मानं विशिनष्टि—गन्धर्वाणां सुसम्मतः ॥ ६९ ॥

रूपादिभिः प्रियदर्शनः प्रियं यथा भवति तथा दृश्यत इति तथा रूपं सौन्दर्यं पेशलं सौकुमार्यं दृष्टिचित्तापहारित्वेन रसावहत्वं सौगन्ध्यं स्रक्चन्दनादिगन्धवत्त्वं रूपादिभिः प्रियं दर्शनं यस्येति वा स्त्रीणां नित्यं सदा प्रियतमः मत्तः उर्वधिकं लम्पटः विषयलालसः एवं भूतोऽहं स्थितः ॥ ७० ॥

तत्रैकदा देवसत्रे हरिगुणाऽनुभवात्मकब्रह्मसत्रे विश्वसृग्भिः प्रजापतिभिः हरिकथागायने निमित्ते तदर्थमप्सरसां गणा उपहूताः ॥ ७१ ॥

तथाऽहमपि तद्गन्धर्वाह्वानं जानन् स्त्रीभिः परिवृतः गायन् हरीतरगाथा गायन् तत्र गतः अगायन्निति पाठे अगायन्नेव गत इत्यर्थः तत् मे मम हेलनमपराधं ज्ञात्वा विश्वसृजः ओजसा तपोबलेन शेपुः ॥ ७२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आत्मजायादीनामन्येषां च देवदत्तादीनां भगवदधीनत्वदर्शनं यद्यच्चार्थकामयोरैक्यं भगवद्विषयत्वदर्शनं तत्सर्वं द्रव्याद्वैतं "मन्ये तदर्पितमनोवचनात्मगेहप्राणाः पुनाति" इत्यादिनोच्यत इत्यन्वयः अनेन जीवस्य श्रीहरिणा द्वैतमुच्यते तत्रैव चाद्वैतशब्दार्थग्रहणं ननु स्वरूपैक्यमिति शिष्याग्राह्येति ज्ञायत इति ॥ ६५ ॥

उपासनाप्रकारं निरूप्याधुनार्चनादिप्रकारं दर्शयति—यद्यस्येति । यस्य पुरुषस्य येन द्रव्येण यत्र यस्मिन्देशे काले वा यतो यस्मादुपात्तमनिषिद्धं श्रुतिस्मृतिलोकविहितं स नरस्तेन तस्मिन् देशे काले वा तस्मात्पुरुषादाप्तेन कर्माणि पूजालक्षणानीहेत कुर्यात् अन्यैर्निषिद्धैर्न कुर्यादित्यन्वयः । नन्वेवं तर्ह्यापद्यपरम एव प्राप्त इति तत्राह—अनापदीति ॥ ६६ ॥

एतैरनापदि विहितैरन्यैरापदि विहितैः अस्य हरेर्गतिं ज्ञानं स्थानं वा यायादिति लडर्थे लिङ् आप्नोतीत्यर्थः ॥ ६७ ॥

उक्तमर्थमनुभवसिद्धं करोति—यथेति । दिग्गजशब्देन दिग्पालानुपलक्षयति तस्य सेवा कर्तव्येति शेषः ॥ ६८ ॥

ममाप्यनुभवसिद्धं दर्शयितुं स्वचरितमाह—अहमिति । कश्चिदित्यात्मानं निन्दयत्यथ नाम्नोपबर्हणो गन्धर्व इति । पूर्वे अतीते महाकल्पे अतीतब्रह्मकाले "ब्राह्मकालः परश्चेति महाकल्पश्च कीर्तितः" इति ॥ ६९ ॥

तत्पुरलम्पटः तासां पुरे गृहे लम्पटः स्थातुमुत्सुकमनाः ॥ ७० ॥

गन्धर्वादिगणा अगायन् ॥ ७१ ॥

तद्विदित्वा गतः स्त्रीभिः परिवृतोऽगायं हेलनं विश्वसृजां पुरतः स्त्रीभिः सम्भूय मदोपरक्तगानलक्षणाम् ॥ ७२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यथा येन भक्तिमात्रप्रकारेण आत्मनः स्वस्य यः प्रभुः श्रीकृष्णः तस्मादेव हेतोर्यूयमापद्गणात् उत्तरत उत्तरिष्यथ तदेव प्रत्यापयति । यदिति ॥ —६८ ॥

तत्र स्वमपि दृष्टान्तयति—अहमित्यादिना । तत्राहमिति युग्मकम् । येनैव भक्तिमात्रप्रकारेण नारदत्वमपि लब्धवानहमिति प्रकरणार्थः ॥ ६९–७८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

आत्मनः स्वस्य जायादीनाञ्च अन्येषाञ्च स्वसम्बन्धरहितानां स्त्रीपोषसाधनं कामश्च तत्प्राप्यं यद्भोग्यन्तयोः साधनसाध्ययोरैक्या-दैक्यभावनेति यावेवार्थकामौ स्वस्य तावेव सर्वेषामेव देहा-दीनां पञ्चभूतात्मकत्वेनैक्यात् सर्वेषामेव जीवात्मनां भोक्तृत्वे-नैक्याद्भेदाभावादिति भावः ॥ ६५ ॥

उक्तानाश्रमधर्मान् संक्षिप्याह-यद्द्रव्यं येनोपायेन यतः सकाशात् ॥ ६६ ॥

प्रस्तुतमुपसंहरति-एतैरिति । अस्य श्रीकृष्णस्य गतिं गृहे गृहस्थोऽपि यदि तद्भक्तिभाक् स्यादित्यर्थः ॥ ६७ ॥

एषा च पञ्चाऽध्यायी सर्वसाधारण्येनैवोक्ता ऐकान्तिक-भक्तानां तु सिद्धानां साधकानां च भगवानेव गतिः तत्र च सिद्धान् स्वयमपरोक्षीभूत एव भगवान् स्वप्रेमतरङ्गे नर्त्त-यितुं तत्पद्धिपद्रावर्त्तगमितांस्तान् यथावदेव कारयति तथैव ते कुर्वन्ति तदभिप्रेताचरणमेव तेषां भजनमिति तत्र पाण्डवानेव प्रमाणीकुर्वन्नाह—यथा हीति । नृपैर्देवैश्च सहायैः दुस्त्यजात् आप-दाङ्गणात् स्वप्रभोर्ध्यानादिलक्षणचरणसेवयैवात्तरेत उतरथे-त्यर्थः । यत् यथा च भवांस्तयैव क्रतून् अहार्षीत् तथैवान्ये उग्रसेनादयोऽपि तं सेवन्ते इति शेषः । तेन मादृशो गृहमूढधीरि-त्युक्त्वा स्वेषां गृहस्थार्कैर्भिन्नान्तर्भावो न भाव्य इति भावः ॥ ६८ ॥

याहच्छिकसाधुसङ्गलब्धभक्तीन् साधकांश्च "धर्मान् सन्त्यज्य यः सर्वान्मां भजेत् स च सत्तमः" इत्यादि श्रीभागव-तशास्त्रस्वरूपेण स एव भगवान् यथादिशति तथैव ते कुर्वन्ति "सलिङ्गानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः" इति भगवदुक्तं विधिवाक्यमेव प्रमाणीकुर्वन्तो वर्णाश्रमाचारादिकं नापेक्षन्ते तत्र पूर्वजन्मनि स्वमेव प्रमाणीकुर्वन्नाह-अहमिति, सार्द्धैः पञ्चभिः । पेशलश्चातुर्य्यम् ॥ ६९ ॥ ७० ॥

तदाह्वानं विद्वान् उन्मत्तः सन् गायन्नेव गतः ॥ ७१ ॥ ७२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आत्मनः स्वस्य जायादीनां च स्वार्थस्य स्वरूपस्य कर्मफल-भोक्तुः काम्यते इति कामः भोग्यवस्तुजातं तस्य चैक्यं सर्वा-र्थभूतेन भगवता सह अपृथक्त्वं यत्तद्द्रव्ययोर्भोक्तृभोग्ययोरद्वै-तम् "भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्म मेतत्" इति श्रुतिरत्राऽनुसन्धेया ॥ ६५ ॥

अनापदि द्रव्यदेशकालाद्यनुसारेण कार्याणि कुर्यादित्युपदि-शन् प्रस्तुतमुपसंहरति-यद्यस्येत्यादिना । हे नृप ! यस्य कर्त्तुः यत्कार्यजातम् येन द्रव्येण यतः सकाशाच्च यस्मिन् देशे काले च अनिषिद्धं स्यात् स कर्ता तान्येव कार्याणि तेन द्रव्येण तत्तस्मादेव तस्मिन्देशे काले च समाहेत नान्यत्कुर्या-दित्यर्थः ॥ ६६ ॥

एतैरुक्तप्रकारैरन्यैरनुक्तैर्वेदोक्तकर्मभिर्हेतुभूतैः तस्य श्रीकृष्ण-स्य भक्तिभाङ्नरः गृहेऽपि वर्त्तमानः अस्य श्रीकृष्णस्य ग[तिं] पदवीं यायात् मुक्तो भवतीत्यर्थः । अत्रेदं बोध्यं कर्मणामन्तः-करणशुद्ध्युपास्योपासकस्वरूपज्ञानद्वारा प्रेमलक्षणा भक्तिः सा[…] जातायां तस्यां प्रेमगृहगृहीतस्य सिद्धभक्तस्य कर्मयवक[…] शाभावात्कर्मत्यागः "धर्मान्संत्यज्य यः सर्वान्मां भजेत्स च सत्त[मः]" इत्यस्मिन् शास्त्रे एव सत्तमशब्देन सिद्धभक्तो निर्दिष्टः सा[ध]-कस्य तु कर्माभावेऽन्तःकरणशुद्ध्यभावान्न ज्ञानभक्तिसम्[…] तदभावे मुक्त्यभाव इति दिक् ॥ ६७ ॥

हे नृपदेव ! यथा यूयं आत्मनः स्वकीयादुपास्यभूतात्[…] श्रीकृष्णादेव हेतुभूतात् आपद्गणादुत्तरत अडभाव [आर्षः] उत्कर्षेणातरतेत्यर्थः । यथा च भवान् यत्पादपंकेरुहसेवया क्र[तून्] अहार्षीत् तथा असौ प्रसिद्धोऽन्योऽपि गृहे वर्त्तमानः तद्भ[क्तः] कृतार्थः स्यादिति भावः ॥ ६८ ॥

श्रीकृष्णभक्तिमाहात्म्यं सूचयितुं स्ववृत्तान्तमाह-अहमि[ति] सार्द्धैः पञ्चभिः । नाम्ना उपबर्हणः ॥ ६९ ॥

रूपादिभिः प्रियं दर्शनं यस्य सः तत्र पेशलं चातुर्[यम्] ॥ ७०—७१ ॥

अहञ्च तदाह्वानं विद्वान् स्त्रीभिः परिवृतः उन्मत्तः स[न्] गायन्नेव गतः ॥ ७२—७३—७४ ॥

भाषा टीका ।

अपनी स्त्री पुत्रादिकों का तथा अन्य सर्व प्राणियों [की] जो अपने अर्थ और काम के निमित्त एकता होनी है[…] को द्रव्याद्वैत कहते हैं ॥ ६५ ॥

जिस मनुष्य को जिस शास्त्र से जिस विषय में [जिस] उपाय से जिस कार्य का निषेध नहीं किया है, हे [नृप] वह पुरुष अनापद काल में उसी उपाय से अपने कार्यों[को] चलावै और से नहीं ॥ ६६ ॥

हे राजन् ! वेदोक्त इन कर्मों का अथवा और अन्[य वे]-दोक्त स्वकर्मों का आचारण करता हुआ श्रीहरि में भ[क्ति] वाला पुरुष अपने गृह में रहकर भी श्रीकृष्ण की [गति] को प्राप्त होता है, अर्थात् मोक्ष को प्राप्त होता है ॥ [६७ ॥]

हे राजन् ! बडे २ राजाओं से और देवों से दुस्त्यज आपदगणों से आप को जैसे प्रभु ने छुडाये हैं ऐसे संसार के भी पार उतारेंगे क्योंकि इनही के चरण[…] की सेवा से आपने दिग्विजय करके उत्तम यज्ञ [किये] गये हैं ॥ ६८ ॥

अब नारद जी अपनी पहिली कथा कहने लगे । [आ]प बोले, कि—अतीत कल्प में मैं गन्धर्वों का मान्य उप[बर्हण] नामक एक गन्धर्व भया रहा ॥ ६९ ॥

सौन्दर्य सौकुमार्य सौगन्ध्य गुण वाला और अति[…] दर्शन वाला सदा स्त्रियों को बडा प्रिय और उन्मत्त[…] बडा लम्पट रहा ॥ ७० ॥

तावद्दास्यामहं जज्ञे तत्रापि ब्रह्मवादिनाम् ।
शुश्रूषया ऽनुषङ्गेण प्राप्तो ऽहं ब्रह्मपुत्रताम् ॥ ७३ ॥
धर्मस्ते गृहमधीयो वर्णितः पापनाशनः ।
गृहस्थो येन पदवीमञ्जसा न्यासिनामियात् ॥ ७४ ॥
यूयं नृलोके बत भूरिभागा लोकं पुनाना मुनयो ऽभियन्ति ।
येषां गृहानावसतीति साक्षाद्गूढं परं ब्रह्म मनुष्यलिङ्गम् ॥ ७५ ॥
स वा अयं ब्रह्म महद्विमृग्यं कैवल्यनिर्वाणसुखाऽनुभूतिः ।
प्रियः सुहृद्वः खलु मातुलेय आत्माऽर्हणीयो विधिकृद्गुरुश्च ॥ ७६ ॥
न यस्य साक्षाद्भवपद्मजादिभी रूपं धिया वस्तुततयोपवर्णितम् ।
मौनेन भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतां पतिः ॥ ७७ ॥
श्रीशुक उवाच ।
इति देवर्षिणा प्रोक्तं निशम्य भरतर्षभः ।
पूजयामास सुप्रीतः कृष्णं च प्रेमविह्वलः ॥ ७८ ॥
कृष्णपार्थावुपामन्त्र्य पूजितः प्रययौ मुनिः ।
श्रुत्वा कृष्णं परं ब्रह्म पार्थः परमविस्मितः ॥ ७९ ॥
इति दाक्षायणीनां ते पृथग्वंशाः प्रकीर्तिताः ।
देवासुरमनुष्याद्या लोका यत्र चराचराः ॥ ८० ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे पारमहंस्यां संहितायाम्
वैयासिक्यां प्रह्लादाऽनुचरिते युधिष्ठिरनारदसंवादे सदाचारनिर्णयो नाम
पञ्चदशोऽध्यायः ॥ १५ ॥
समाप्तश्चायं सप्तमस्कन्धः ॥ ७ ॥
हरिः ॐ तत्सत् ॥

भाषा टीका ।

एक समय देवताओं के यज्ञ में विश्व सृष्टाओं ने हरि गाथा गान के लिये बहुत से गन्धर्व और अप्सराओं को बुलाये रहे ॥ ७१ ॥

उस समय उन के आह्वान को जानता हुआ स्त्रियों के झुंड सहित उन्मत्त की तरह गाता हुआ मैं भी गया, विश्व सृष्टाओं ने मेरे अपराध को जान कर एका एकी मुझे शाप दे दिया ॥ ७२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्वं तु कृतार्थ एवेति हर्षेण पुनः पूर्वश्लोकानेव पठति यूयमिति शेषं स्पष्टम् ॥ ७५ ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९ ॥ ८० ॥

सप्तमस्कन्धगूढार्थपदभावार्थदीपिका ।
संसेव्यतां सदा सद्भिर्यतिश्रीधरनिर्मिता ॥
इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे श्रीधरस्वामि-
विरचितायां भागवतभावार्थदीपिकायाम्
पञ्चदशोऽध्यायः॥ १५ ॥
समाप्तोयं सप्तमस्कन्धः ॥ ७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

शापमेवाह—याहीति । कृतं हेलनं येन स त्वं नष्टा श्रीः गन्धर्वशोभा यस्य स तादृशः आशु शूद्रत्वं याहि शूद्रयोनिं प्राप्नुहीति तावत्तदाहं दास्यां शूद्रयां जज्ञे जातः तत्राऽपि शूद्रजन्मन्यपि ब्रह्मवादिनां शुश्रूषयाऽनुषङ्गेण तत्सङ्गेन च हेतुना ऽस्मिन्कल्पे ब्रह्मणश्चतुर्मुखस्य पुत्रतां प्राप्तः ॥ ७३ ॥

अध्यायद्वयोक्तार्थमुपसंहरन् तच्छ्रवणतदनुष्ठानफलमाह—धर्म इति । ते तुभ्यं गृहमेधीयो धर्मो वर्णितः कथंभूतः पापनाशनः येन गृहमेधीयेन धर्मेण श्रुतेनाऽनुष्ठितेन च गृहस्थः सन्न्यासिनां भगवति संन्यस्तात्मनां पदवीं मुक्तिरूपामियात्प्राप्नुयादित्यर्थः ॥ ७४ ॥

त्वंतु कृतार्थ एव इति हर्षेण पूर्वश्लोकानेव पुनः पठति यूयमिति । श्लोकाः पुरस्तादेव व्याख्याताः कैवल्यनिर्वाणसुखाऽनुभूतिः निर्दोषनिर्दुःखसुखरूपविज्ञानमयः विधिक्रियायोगकारी वस्तुतया इदन्तया ॥ ७५ ॥ ७६ ॥ ७७ ॥

स्कन्धादावुपक्रान्तम् "अत्रैवोदाहृतः पूर्वमितिहासः सुरर्षिणा" इति नारदयुधिष्ठिरसम्वादमुपसंहरति भगवान् शुकः-इतीति । इत्थं देवर्षिणा प्रोक्तं निशम्याकर्ण्य भरतर्षभो युधिष्ठिरः सुशान्तः कृष्णं श्रवणवेलायां पार्श्वे स्थितं चशब्दाद्देवर्षिं च प्रेम्णा विह्वलः पूजयामास ॥ ७८ ॥

ततः पूजितोदेवर्षिः कृष्णपार्थावुपामन्त्र्य अनुज्ञाप्य ताभ्यामनुज्ञातः प्रययौ पार्थो युधिष्ठिरः कृष्णं परब्रह्मामितं श्रुत्वा परमविस्मितः निरतिशयाश्चर्ययुक्तो बभूव ॥ ७९ ॥

यत्पृष्टं षष्ठस्य तृतीयाध्यायादौ "देवासुरनृणां सर्गो नागानां मृगपक्षिणाम्" इत्यादिना तस्योत्तरं ततःप्रभृत्येतावत्पर्यन्तेन उक्तम उत्तरप्रश्नान्तरावसरप्रदानाय उपसंहरति–इतीति । इत्थं दाक्षायणीयानां दित्यादीनां वंशाः पृथक् तत्तत्परम्परापूर्व्या प्रकीर्तिताः कथम्भूताः यत्र वंशेषु देवादयश्चराचरात्मकाः जाता इति शेषः । यद्यपि दाक्षायणीवंशवर्णनोपसंहारः षष्ठान्तएवकर्त्तव्यस्तत्रैव समाप्तेः तथापि तद्वंशान्तर्भूतदितिजप्रसङ्गानुप्रसक्तशङ्कापरिहारतदनुप्रसक्तवर्णनात्मकत्वादस्य स्कन्धस्यैतदन्त एव दाक्षायणीवंशवर्णनमुपसंहृतमित्यवगन्तव्यम् ॥८०॥

इति श्रीवत्सान्वयपयःपारावारराकासुधाकरस्य सर्वविद्यानिधेः श्रीशैलगुरोः सुतेन तच्चरणकमलपरिचर्याप्रसन्नतत्सूक्तिसमधिगतश्रीमद्भागवतार्थहृदयेन श्रीवैष्णवदासेन श्रीवात्स्यश्रीवीरराघवविदुषा विरचितायां श्रीमद्भागवतचन्द्रचन्द्रिकायां श्रीभागवतव्याख्यायां सप्तमस्कन्धे

पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमते रामानुजाय नमः ॥

समाप्तोऽयं सप्तमस्कन्धः ॥ ७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तावत्तदानीमेव अनुषङ्गेण निरन्तरसेवालक्षणसङ्गेन भक्त्या वा "तीव्रस्नेहो ऽनुषङ्गो ऽथ नैरन्तर्यानुसेवनम्" इत्यभिधानात् ॥ ७३ ॥

अत इत्येतदपास्तं निगमयति—धर्म इति । न्यासिनां पदवीं निवृत्तिमार्गम् अर्चिरादिमार्गेण वैकुण्ठं वा ॥ ७४ ॥

यूयमित्यादिपद्यमुक्तार्थम् ॥ ७५ ॥

कैवल्येन प्रकृतिप्राकृतमिश्ररहित्येनाप्तं यन्निर्वाणसुखं स्वरूपसुखं तस्यानुभूतिरनुभवो यस्य स तथा ॥ ७६ ॥ ७७ ॥

यत्र यस्य प्रेमरसस्तत्र स स्नातः ॥७७॥७८॥

परमप्रमेयमुपसंहरति—इतीति । दाक्षायणीवंशस्य शाखोपशाखाभेदेन वर्णितत्वाद—इतिशब्दः समाप्तिवचनः यत्र येषु वंशेषु स्थानमात्रं विहाय स्थावरसंग्रहणाय चराचरा इति ७९.८०

भुजविकसितशौर्यं भुजङ्गदमजितं विष्णुम् ।
वन्दे भुजगशयनं भुजयुगकलितस्रीवम् ॥
पदरत्नावलिरेषा सप्तमस्कन्धसङ्गता ।
तुलसीव हरेः प्रीत्यै भूयाद्भिवबारिधेः ॥

इतिश्रीमन्महेन्द्रतीर्थपूज्यपादशिष्यविजयध्वजतीर्थमुनीन्द्रकृतायाम् पदरत्नावल्याम् श्रीभागवतटीकायां सप्तमस्कन्धे

पञ्चदशोऽध्यायः (विजयध्वजरीत्याषोडशः)॥ १५॥

समाप्तोऽयं सप्तमस्कन्धः ॥ ७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

कृष्णपार्थाविति पूर्वं तावद्गृहस्थ ज्ञानेन विस्मृत आसीदेव । अधुनातु परमबृहत्त्वज्ञानेन परम विस्मितआसी- दित्यर्थः ॥ ७९—८० ॥

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

पञ्चदशोऽध्यायः ॥ १५ ॥

समाप्तश्चायं सप्तमस्कन्धः ॥ ७

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तत्रापि शूद्रजन्मन्यपि यद्वा तादृशाऽभिशापे सति तत्र तादृशेतिहासकथनं भक्तेः प्रागभावज्ञापनार्थम् अनुषङ्गेण पुनः सङ्गेन अनुकूलेन संगेन वा ॥ ७३ ॥ ७४ ॥

यूयन्तु प्रह्लादादिसर्वभक्तेभ्यो यथा श्रेष्ठास्तथा विप्रादिवर्णेभ्यो ब्रह्मचर्याद्याश्रमेभ्यश्च परमश्रेष्ठा इति व्याख्यातां ताभेव श्लोकत्रयीं पुनराह—यूयमिति ॥ ७५ ॥ ७६ ॥ ७७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

कृष्णं चकारत्नारावश्च त्वमेवंभूतो मम भ्रातेति प्रेम्णा विह्वलः ॥ ७८ ॥

कृष्णपार्थौ कृष्णार्जुनौ कृष्णयुधिष्ठिरौ वा प्रयाणसमये पुनरपि पूजितः ॥ ७९ ॥ ८० ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
पञ्चादशः सप्तमस्य सङ्गतः सङ्गतः सताम् ॥ १५ ॥

श्रीतिश्रपो मौल्यवलात्निगीर्य्य यद्वेधि तद्भक्ष्मि मनो विनोदात् ।
बुधाः कृधा गर्हत वर्हचूलः पुरः स्फुरत्तस्तु स नोऽनुकूलः ।
पौषस्य कृष्णैकादश्यां गान्धर्वायाः सरस्तटे ।

अपूरि सप्तमस्यापि टीकेयं सत्प्रसादतः ।

समाप्तोऽयं सप्तमस्कन्धः ॥ ७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मनुष्याणामिव लिङ्गानि वस्त्रावङ्कारादीनि यस्य तत् ॥ ७५—७६ ॥

वस्तुतया साकल्येन नोपवर्णितम् ॥ ७७—८० ॥

शुकेन विदुषा स्वल्पः सम्प्रदायानुरोधतः ।
सप्तमस्कन्धगो दीपः कृतः श्रीकृष्णप्रीतये ॥
इतिश्रीमद्भगवन्निम्बार्कचरणचिन्तकश्रीशुकदेवसुधी-
प्रणीते श्रीमद्भागवतसप्तमस्कन्धीये सिद्धान्तप्रदीपे
पञ्चदशाध्यायार्थप्रकाशः ॥ १५ ॥
ग्रन्थसंख्या २७००
समाप्तश्चायं सप्तमस्कन्धः ॥ ७ ॥

भाषा टीका ।

तदनन्तर मैं फिर दासी में उत्पन्न हुआ वहां पर भी ब्रह्मवादि ब्राह्मणों की और महात्माओं की शुश्रूषा के प्रसङ्ग से ब्रह्मा जी के पुत्रत्व को प्राप्त भया ॥ ७३ ॥

नारदजी बोले, कि-राजन् ! पापोंका नाशक ऐसा गृहस्थों का धर्म हमने वह तुमारे आगे वर्णन किया है कि जिस धर्म क आचरण करने से पुरुष घर में रहकर भी सन्यासियों की पदवी को प्राप्त होजावे ॥ ७४ ॥

बस राजन् ! मनुष्य लोक में तो तुम लोग बडभागी हो, क्योंकि ? जिनके घरों को लोकों को पवित्र करने वाले बडे २ मुनि लोग चले आते हैं, सो भी क्योंकि ? तुमारे घर में साक्षात् पर ब्रह्म मनुष्य नाट्य से छिपा हुआ वास करता है ॥ ७५ ॥

ये श्रीकृष्ण वही ब्रह्म है कि जिनको महात्मा लोग समाधिस्थ होकर ढूंढते हैं और वही कैवल्य सुख अनुभव करदेने वाले हैं। परञ्च आपका तो प्रिय सुहृद, मातुलेय, (मामा का पुत्र) आत्मा, पूजनीय, आज्ञाकारी, और गुरु भी येही हैं ॥ ७६ ॥

जिनके रूप का साक्षात् शंकर और ब्रह्मादिक अपनी बुद्धि से यास्तवरीति से (ठीक २) वर्णन नही करसके हैं किंतु केवल मौन और शान्ति पूर्वक भक्ति से पूजा होते हैं ये भक्तों के पति हम पर प्रसन्न होवै, ॥ ७७ ॥

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि—युधिष्ठिर महाराज ने श्रीनारदजी के इस प्रकार के कथन को सुनकर बडे प्रसन्न होकर राजा-युधिष्ठिर जीने श्रीनारदजी की पूजाकरी और श्रीकृष्ण के माहात्म्य को सुनकर प्रेम से विह्वल होकर श्रीकृष्ण की भी पूजा करी ॥ ७८ ॥

तदनंतर नारदजी भी श्रीकृष्ण और युधिष्ठर से पूजित होकर श्रीकृष्ण और युधिष्ठिर से पूंछकर यदृच्छा से चले गये और श्रीकृष्ण को परब्रह्म सुनकर युधिष्ठिर भी परम विस्मय को प्राप्त हुए ॥ ७९ ॥

हे परीक्षित, हे राजन् ! इस प्रकार दक्षकी पुत्रियों के पृथक् २ वंश हमने तुमारे आगे वर्णन किये, जिनके वंश में देव असुर मनुष्य आदिक चराचर लोग सभी उत्पन्न हुए हैं ॥ ८० ॥

श्रीमद्भागवतेऽस्मिन् रुचिरकथः सप्तमस्कन्धः ॥
भागवतार्यविनिर्मितभाषाटीकासमन्वितो जयति ॥१॥
इति श्रीमद्भागवत सप्तम स्कन्ध में, पंचदश अध्याय की
श्रीवृन्दावनस्थ भागवताचार्य कृत भाषा टीका समाप्त ॥
सप्तमस्कन्ध भी समाप्त भया ॥
श्रीरुक्मिणीरमणो जयति ।

इति श्रीमद्भागवते महापुराणे सप्तमस्कन्धे पञ्चदशोऽध्यायः ॥ १५ ॥

समाप्तश्चायं सप्तमस्कन्धः ॥ ७ ॥

संशोधकौ चास्य ग्रन्थरत्नस्य का० 'कान्दूर' श्रीरङ्गाचार्य—वृन्दावनस्थ भागवताचार्य्यौ ।

महर्षिप्रवरश्रीकृष्णद्वैपायनप्रणीतम्

श्रीमद्भागवतम्।

श्रीश्रीपादश्रीधरस्वामिकृतभावार्थदीपिका, श्रीराधारमणदासगोस्वामिविरचितदीपिन्याख्यतट्टिप्पनी श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका, श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली, श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी, श्रीगौडीयवैष्णवाचार्य्यप्रवरश्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भाख्यटीका, श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी, श्रीनिम्बार्कसम्प्रदायिश्रीमच्छुकदेवकृतसिद्धान्तप्रदीपाख्यटीका इत्यष्टभिर्व्याख्याभिर्भाषानुवादेनच समलङ्कृतम्।

इदम्

परमहंसपरिव्राजकाचार्य्यश्रीमत्स्वामिप्रकाशानन्दसरस्वतीपूज्यपादशिष्य

श्रीनित्यस्वरूपब्रह्मचारिणा

सम्पादितम्;

वङ्गदेशान्तर्गत ताड़ास भूपति श्रीराधाविनोद प्रेम सेवा परायण राजर्षि राय

"श्रीवनमालिराय बहादुरस्य"

सम्पूर्णसाहाय्येन

प्रकाशितञ्च।

तच्च

काञ्चीमण्डलान्तर्वर्त्ति 'कान्दूर' पं० श्रीरङ्गाचार्यद्वारा संशोध्य

श्रीवृन्दावनधामनि

स्वकीये "श्रीदेवकीनन्दन" यन्त्रालये

मुद्रितम्।

सम्वत् १९६१

श्रीवृन्दावनान्तसञ्चारिणे नमः ॥

श्रीमद्भागवतम् ।

॥ अष्टमस्कन्धः ॥

प्रथमोऽध्यायः ।

ओं नमः श्रीकृष्णाय ।

राजोवाच ।

स्वायम्भुवस्येह [(१)]गुरो वंशोऽयं विस्तराच्छ्रुतः ।
* (यत्र धर्माश्च विविधाश्चातुर्वर्ण्याश्रिताश्शुभाः ।)
यत्र विश्वसृजां सर्गो मनूनन्यान्वदस्व नः ॥ १ ॥
[(२)]यत्र यत्र हरेर्जन्म कर्माणि च महीयसः ।
गृणन्ति कवयो ब्रह्मंस्तानि नो वद शृण्वताम् ॥ २ ॥
यद्यस्मिन्नन्तरे ब्रह्मन् ! भगवान्विश्वभावनः ।
कृतवान्कुरुते कर्ता ह्यतीते ऽनागतेऽद्य वा ॥ ३ ॥

ऋषिरुवाच ।

मनवोऽस्मिन् व्यतीताः षट् कल्पे स्वायम्भुवादयः ।
आद्यस्ते कथितो यत्र देवादीनाञ्च सम्भवः ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

॥ श्रीगणेशाय नमः ॥

नमः श्रीमत्परमहंसास्वादितचरणकमलचिन्मकरन्दाय ।
भक्तजनमानसनिवासाय श्रीरामचन्द्राय ॥
अथाष्टमे चतुर्विंशत्यध्यायैर्मनुवर्णनम् ।
तत्सुतैर्ऋषिदेवेन्द्रैर्मूर्तिभिश्च हरेः सह ॥ १ ॥
प्रतिमन्वन्तरं चैव मन्वाद्याः षट् पृथक् पृथक् ।
प्रवर्तयन्ति सद्धर्मान् पालयन्त्याचरन्ति च ॥ २ ॥
अतो मन्वन्तरस्योक्तं सद्धर्म इति लक्षणम् ।
येन वै क्रियमाणेन नरो न निरयं व्रजेत् ॥ ३ ॥
तत्र तु प्रथमे स्वायम्भुवः स्वारोचिषस्तथा ।
उत्तमस्तामसश्चेति चतुर्मनुनिरूपणम् ॥ ४ ॥
स्वायम्भुवेऽन्तरेऽनन्तदुरन्तगुणवर्णनात् ।
मुदितः परिपप्रच्छ सर्वमन्वन्तरस्थितिम् ॥ ५ ॥

स्वायम्भुवस्येति त्रिभिः यत्र विश्वसृजां मरीच्यादीनां मनुकन्यासु पुत्रपौत्रादिसर्गः ॥ १ ॥

---

* इत्यधिकः पठ्यते विरराघ० (१) गुरोर्वंशः इति पाठान्तरम् ॥ (२) यत्र धर्मा हि विविधाश्चतुर्वर्णाश्रिताश्शुभाः । मन्वन्तरे हरेर्जन्म कर्माणि च महीयसः ॥ इति पाठः विज० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

महीयसो हरेः अत्र क्वचिद्बहुपाठान्तरमस्ति तदुपेक्षितमस्माभिः ॥ २ ॥

यस्मिन्नतीते यत्कृतवान् यस्मिन्ननागते यत्कर्त्ता करिष्यति अद्य वा वर्त्तमाने यत्कुरुते तद्वदेत्यन्वयः ॥ ३ ॥

अस्मिन् कल्पे षण्मनवो व्यतीताः ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

॥ श्रीमते रामानुजाय नमः ॥

तृतीये "स्वायंभुवस्य च मनोर्वंशः परमसम्मतः" इति पृष्टं तद्वंशकथनं प्रक्रम्य तावत्तत्र तद्दुहितुर्देवहूत्या वंशः कथितः चतुर्थे त्वाकूतिदेवहूत्योस्तद्दुहित्रोर्देवहूतिदुहितॄणां वंशमभिधायाथ स्वायंभुवपुत्रवंशमुपक्रम्य तावदुत्तानपादसंततिं सावशेषामभिधायान्तरागर्भिणीन्यायेन प्रसङ्गात् प्रियव्रतस्य वंशः पञ्चमे कथितः षष्ठे तु पुनः प्रसक्तानुप्रसक्तकथनानन्तरमुत्तानपद एव वंशोऽवशिष्टः कथितः सप्तमे तु तदनुप्रसक्तमुक्तं तदेवं स्वायंभुवमनुवंशकथनव्याजेन बहुधा भगवतो जन्मकर्मगुणादिषु वर्णितेषु पुनस्तानेव शुश्रूषुस्तुल्यन्यायादन्येष्वपि मनुवंशेषु कथ्यमानेषु हरेर्जन्मादिकथनमर्थात्प्रसक्तमेव भविष्यतीत्यालोच्य प्राधान्येनान्यान्मनून् सवंशान् पृच्छति राजा–स्वायंभुवस्येति त्रिभिः । तत्रोक्तमनुवदति पादत्रयेण. हे गुरो ! गुरोरिति पाठे गुरोस्त्वत्तः इह वृत्ते ग्रन्थे स्वायम्भुवस्य मनोर्वंशो विस्तराच्छ्रुतः वंशं विशिनष्टि यत्र वंशे विश्वसृजां मरीच्यादीनां मनुकन्यासु पुत्रपौत्रादिरूपः सर्गः अथ नोऽस्मभ्यम् अन्यान्मनून्वदस्व सचरित्रान् सवंशान् कथयेत्यर्थः ॥ १ ॥

यत्रयत्र मन्वन्तरे महीयसः निस्समाभ्यधिकस्य हरेः जन्मानि अवतारूपाणि कर्माणि चेष्टितानि च कवयो विद्वांसः गायन्ति तान्यपि चरित्राणि श्रृण्वतां श्रोतुं प्रवृत्तानां नः अस्माकं वद कथय ॥ २ ॥

हे ब्रह्मन् ! यस्मिन्मन्वन्तरे मनोरन्तरमवस्थानदशा तस्मिन् विश्वभावनः विश्वपालको भगवान् कृतवान् यस्मिन्नतीते यत् यस्मिन्ननागतेकृतवान् करिष्यति यस्मिन्नद्य वर्त्तमाने यत्करोति तद्वदेत्यन्वयः ॥ ३ ॥

एवमापृष्टो मुनिराह–मनव इति । अस्मिन् कल्पे स्वायम्भुवादयः षण्मनवो व्यतीताः तत्राद्यः स्वायम्भुवः मनुः तुभ्यं कथितः सचरित्रः यत्र देवादीनां सम्भवश्च कथितः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

॥ श्रीकृष्णाय नमः ॥

अस्तावि श्रुतिमस्तकेन मनुना स्वायंभुवेनापि यो–
येनाराधि जगत्त्रयं च मुनिभिः स्वात्माऽनुविद्धात्मभिः ॥
येनामोचि गजाधिपः क्रकचवक्त्रक्रेण नक्राननात्–
क्षीराम्भोधिरमन्थि येन धृतभूः सोऽयं हरिः पातु नः ॥१॥
येनाधारि गिरिः पपे च विबुधैर्येनामृतं प्रेरितैः–
येनातापि सुरद्विषां च हृदयं शर्वोऽप्यमोहि स्त्रिया ॥
येनामायि जगन्त्यबन्धि च बलिर्येनाप्यदायि श्रुतिः–
धात्रे येन निहत्य मत्स्यवपुषा दैत्यं तमीडे हरिम् ॥२॥
सप्तमस्कन्धवाराशौ निमज्योन्मज्य शुद्धधीः ।
अष्टमस्कन्धसद्व्याख्यामृतं पातुमुपक्रमे ॥ ३ ॥

अत्रापि हरिभक्तिरेव भगवन्मनःकर्षणनिपुणेति विधातुमनन्तोपनिषदर्थभूतस्य हरेर्जगद्रक्षणादिमाहात्म्यं निरूप्यते, तत्रापि विमलतरमुरुमथनदुरितहरचरिताऽमृतपानाप्यायितप्राणो विस्मृताऽनशनक्लेशः परीक्षिच्छुकमच्युतकथानुवादपूर्वकाभिलषितात्मन: श्रोतव्यकथां प्रार्थयते–राजेति । अन्यान् स्वायम्भुव्यतिरिक्तान् ॥१॥

तत्रापि तत्प्रसङ्गे विशेषकथापि वक्तव्येत्याह—यत्रेति । महीयसः महत्तमस्य हरेः ॥ २—३ ॥

अस्मिन्वैवस्वतान्तरे स्वायम्भुवप्रभृतिवैवस्वतान्ताः सप्त मनवो व्यतीतप्राया उच्यन्ते अत्र सप्तसु आद्यः कथित इत्यन्वयः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ श्री श्री राधाकृष्णाभ्यां नमः ॥

श्रीकृष्ण कृष्णचैतन्य ससनातनरूपक ।
गोपाल रघुनाथाप्त व्रजजीवक पाहि माम् ॥
अथाष्टमस्कन्धस्य क्रमसन्दर्भः ॥
स्वामिपादेन यद्व्यक्तम् तद्व्यक्तम् चास्फुटम् क्वचित्
तत्र तत्रैव विज्ञेयः सन्दर्भः क्रमसंज्ञकः ॥
वैष्णवा परितोषः स्याद्यत्र यत्र ततस्ततः ।
लेख्यं वैष्णवसिद्धान्तं दाक्षिण्यो नैव किञ्चन ॥ १–४॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

॥ श्रीमद्गोवर्द्धनधराय नमः ॥

प्रणम्य श्रीगुरुं भूयः श्रीकृष्णं करुणार्णवम् ।
लोकनाथं जगच्चक्षुः श्रीशुकं तमुपाश्रये ॥ १ ॥
गोपरामाजनप्राणप्रेयसेऽतिप्रभुष्णवे ।
तदीयप्रियदास्याय मां मदीयमहं ददे ॥ २ ॥
॥ श्रीगोकुलानन्द ! जय जय ॥
मन्वन्तरस्य सद्धर्म इति लक्षणमीरितम् ।
तस्य प्रवर्तकाः किन्तु मन्वाद्याः षट् पृथक् पृथक् ॥३॥
प्रतिमन्वन्तरं तस्माच्चतुर्विंशतिसंज्ञकैः ।
अध्यायैरष्टमस्कन्धे ते वर्ण्यन्ते यथोचितम् ॥ ४॥

आकूत्यां देवहूत्याञ्च दुहित्रोस्तस्य वै मनोः ।
धर्मज्ञानोपदेशार्थं भगवान्पुत्रतां गतः ॥ ५ ॥
कृतं पुरा भगवतः कपिलस्याऽनुवर्णितम् ।
आख्यास्ये भगवान्यज्ञो यच्चकार कुरुद्वह ! ॥ ६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अध्यायेनोक्तमेकेन मन्वन्तरचतुष्टयम् ।
त्रिभिर्गजेन्द्रोपाख्यानमथोक्तः पञ्चमो मनुः ॥ ५ ॥
षष्ठश्चाप्यंबुधेर्मन्थश्चामृताख्यानमष्टभिः ।
एकेन सप्तमादीनां मनूनामनुकीर्तनम् ॥ ६ ॥
एकेन तेषां कर्माणि नवभिर्वामनेहितम् ।
मत्स्यावतार एकेनेत्यवं स्कन्धोऽष्टमो मतः ॥ ७ ॥
अथात्र प्रथमे स्वायम्भुवस्तोत्रं प्रकीर्त्यते ।
मन्वन्तरीयमन्वादिषट्कानाञ्च चतुष्टयम् ॥ ८ ॥

तदेवं चतुर्थादिस्कन्धेषु स्वायम्भुवमनुवंशकथाप्रासङ्गिकमरिच्यादिवंशप्रह्लादाद्युपाख्यानाऽमृतपानप्रमुदितो राजा सर्वं मन्वादिकथां जिज्ञासमानः पृच्छति—स्वायम्भुवस्येति ॥ १ ॥

महीयसो हरेः ॥ २ ॥

यदिति तद्वदेत्यध्याहृतेनान्वयः । अन्तरे मन्वन्तरे अद्य वर्तमाने ॥ ३ ॥

तेषु मध्ये आद्यः स्वायम्भुवः ॥ ४ ॥

अस्मिन् श्वेतवाराहाख्ये षण्मनवो व्यतीताः यन्मध्ये आद्यः स्वायम्भुवः ते तुभ्यं कथितस्तृतीये स्कन्धे । चतुर्थस्कन्धोपक्रमे च ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

श्रीमते मङ्गलमूर्तये भगवन्निम्बार्काय नमः ।
सर्वेश्वरं नमस्कृत्य गुरुं तद्वंशिकं प्रभुम् ।
निम्बार्कं देशिकं नत्वा प्रदीपोऽयं विरच्यते ॥
अष्टमे यत्र सद्धर्मलक्षणं वर्ण्यते क्रमात् ।
मन्वन्तरं हि मन्वादिरक्षितं भुक्तिमुक्तिदम् ॥

तृतीयादिषु स्कन्धेषु स्वायम्भुवमनुदुहितृदौहित्रपुत्रपौत्रादिसङ्गतो वर्णितस्य भगवदवताराणां तद्दासानां च परमाद्भुतचरितामृतस्य पानेन प्रमुदितो राजर्षिः सर्वमन्वन्तरगतभगवदवतारतद्दासादिचेष्टितं जिज्ञासुः पृच्छति—स्वायंभुवस्येति, त्रिभिः । हे गुरो ! स्वायम्भुवस्य वंशः यत्र विश्वसृजां मरीच्यादीनां सर्गः पुत्रादिसृष्टिः सोऽयं विस्तराच्छ्रुतः अधुना नोऽस्मभ्यमन्यान् मनून् वदस्व ॥ १ ॥

यत्र यत्र यस्मिन् यस्मिन् मन्वन्तरे महीयसो हरेः ॥ २ ॥

हे ब्रह्मन् ! विश्वभावनः सर्वहेतुः अन्तरे मन्वन्तरे यस्मिन् अतीते यत्कृतवान् यस्मिन् अनागते यत्कर्ता करिष्यति अथवा वर्तमाने यत्कुरुते तत्तद्वदेति पदयोजना ॥ ३ ॥

भाषा टीका ।

श्रीश्रीरुक्मिणीरमणो जयति ।

नत्वा भागवताचार्यो रुक्मिणीशपदाम्बुजे ।
शुकशास्त्राष्टमस्कन्ध-भाषाटीकां तनोति हि ॥ १ ॥

राजोवाच ॥

परीक्षित महाराज बोले, कि हे श्रीशुकदेवजी महाराज पूर्वकथा में आपके मुखारविन्द से मैंने यह स्वायंभुव मनुका वंश बड़े विस्तार से सुना, कि–जिसमें मरीच्यादि प्रजापतियों का मनुकन्याओं में पुत्र पौत्रादि रूप सर्ग हुआ है अब आप अन्य मनुओं के चरित्र को कहिये ॥ १ ॥

जिन जिन मन्वन्तरो में अति महान् श्रीहरि के जो जो जन्म और कर्म है और जिनको ज्ञानी लोग गान करते हैं, हे ब्रह्मन् ! श्रवण की इच्छा वाले ऐसे हम लोगों के आगे आप उनका वर्णन कीजिये ॥ २ ॥

हे ब्रह्मन् ! विश्व के पालन करने वाले भगवान् जिन २ भूतभविष्यत् मन्वन्तरों में जो कुछ किये हैं करते हैं और करेंगे सो भी आप वर्णन करिये ॥ ३ ॥

ऋषिरुवाच ॥

श्रीशुकदेवजी बोले कि—हे राजन् ! इस कल्प में स्वायंभुवादिक छै मनु व्यतीति हुए हैं तिन में से आदि स्वायंभूमनु का चरित्र मैने तुमसे कहा कि जिसमें देवादिकों की उत्पत्ति है ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्य मनोर्दुहित्रोः कपिलयज्ञमूर्तिभ्यां पुत्रतां गतः प्राप्तः ॥ ५ ॥ ६ ॥ ७ ॥

विरक्तः कामभोगेषु शतरूपापतिः प्रभुः ।
विसृज्य राज्यं तपसे सभार्यो वनमाविशत् ॥ ७ ॥
सुनन्दायां वर्षशतं पदैकेन भुवं स्पृशन् ।
तप्यमानस्तपो घोरमिदमन्वाह भारत !॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

घोरं दुश्चरं तपस्तप्यमानः समाधावनुभूतमिदं वक्ष्यमाणं निद्रितोच्छ्वसितवद्विस्मित इवोपदिशन्निवानुवदन्निव चाष्टभिः श्लोकैरन्वाह ॥ ८ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तस्य स्वायम्भुवस्य मनोर्दुहित्रोराकूत्यां देवहूत्यां च भगवान्महेश्वरः सर्वेश्वरो मूर्तिभ्यां कपिलयज्ञरूपाभ्यां मूर्तिभ्यां पुत्रत्वं प्राप्तः ॥ ५ ॥

तत्र भगवतः कपिलस्य तृतीयस्कन्धे इति शेषः अनुवर्णितं चरित्रं त्वया हे भरतर्षभ ! श्रुतमेव अधुना यज्ञाख्यो भगवान्यच्चकार तच्चेष्टितं हे कुरूद्वह ! आख्यास्ये कथयिष्यामि यद्यपि मन्वन्तरान्तरकथनमेव प्रतिज्ञातव्यं तेषामेव प्राधान्येन पृष्टत्वात् तथापि भावज्ञो मुनिः भगवद्गुणकर्मजन्मादिशुश्रूषयैवापृष्टमित्यालोच्याद्य मन्वन्तरस्थस्य यज्ञाख्यस्य भगवतश्चरित्रस्याकथितत्वात्तदेव कथयितुं प्रतिजानीते अर्थात्तत्कथनेन मन्वन्तरकथनमपि प्रसक्तमेव भविष्यतीति मुनेरभिप्रायः ॥ ६ ॥

तत्र यज्ञस्य भगवतः चरित्रं विवक्षुस्तदुपोद्घातेन स्वायंभुवस्य मनोर्वृत्तान्तमाह–विरक्त इत्यादिना । यद्यपि कपिलोपि तन्मन्वन्तरावताररूप एव तथापि तस्य जगत्पालनानधिकृतत्वात्केवलं ज्ञानयोगप्रवर्त्तनाधिकृतत्वात्तच्चरित्रस्य कथितत्वप्रदर्शनाच्च यज्ञो यच्चकार तदाख्यास्य इत्युक्तं शतरूपायाः पतिः भर्त्ता विभुः स्वायम्भुवो मनुः काम्यन्त इति कामाः शब्दादयो विषयास्तेषां भोगेषु विरक्तः राज्यं विसृज्य तपसे तपःकर्त्तुं सभार्यो वनं आविशत् ॥ ७ ॥

सुनन्दायां सुनन्दातीरे पदेनैकेनैव भुवं स्पृशन् वर्षशतं घोरं दुश्चरं तपस्तप्यमानः कुर्वाणो हे भारत । इदं वक्ष्यमाणमन्वाह जजाप ॥ ८ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अत्रापि शतरूपापतिपालनादिविषयमनुदितं यज्ञमूर्तिचरितं वक्तुमाह—आकूत्यामिति ॥ ५ ॥

कपिलस्य हरेः कृतं चरितं पुरा तृतीयस्कन्धे ॥ ६-७ ॥

सुनन्दायां त्रिधा भिन्नायां विष्णुपद्यां पतत्याम् अन्वाह[illegible] तिरूपामुपनिषदमाह ॥ ८ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

आकूत्यामिति कयोः तत्राह—दुहित्रोरिति ॥ ५-८ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

दुहित्रोः कयोरित्यपेक्षायामाह—आकूत्यां देवहूत्याञ्[illegible] अन्वाह जजाप ॥ ८ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तस्य मनोः आकूत्यां देवहूत्यां चेति दुहित्रोः कपिल[illegible] मूर्तिभ्यां पुत्रतां भगवान् गतः ॥ ५ ॥

भगवतः कपिलस्य कृतं कर्म वर्णितं मयेति शेष[illegible] कुरूद्वह ! यज्ञो यच्चकार तदाऽऽख्यास्ये अस्मिन्नध्याये क[illegible]ष्यामि ॥ ६ ॥

यद्यपि स्वायम्भुवस्य चरितं वर्णितं तथापि तन्म[illegible]न्येभ्यो मन्वन्तरेभ्यः किञ्चिद्विशेषं दर्शयिष्यन् तद्गुणविशेष[illegible] विरक्त इत्यादिना ॥ ७ ॥

सुनन्दायां तत्तीरे इदमष्टभिः श्लोकैर्वक्ष्यमाण[illegible] जजाप ॥ ८ ॥

———

भाषा टीका ।

जिन स्वायंभुवमनु की आकूति और देवहूति [illegible] कन्याओं में धर्म और ज्ञान के उपदेश के लिये [illegible] भगवान् यज्ञ और कपिल रूप से पुत्र होकर प्रकट [illegible] प्रथम हमने भगवान श्रीकपिल देव का चरित्[illegible] आगे वर्णन किया, हे कुरूद्वह ! अब यज्ञ भगवान[illegible] चरित किया, उसका आख्यान (वर्णन) करेंगे ॥ ६ ॥

मनुरुवाच।

* येन चेतयते विश्वं विश्वं चेतयते न यम्।
यो जागर्त्ति शयाने ऽस्मिन्नायं तं वेद वेद सः॥ ९॥
आत्मावास्यमिदं (१) विश्वं (२) यत्किञ्चिज्जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मा गृधःकस्यस्विद्धनम्॥ १०॥
यन्न पश्यति पश्यन्तं चक्षुर्यस्य न रिष्यति।
तं भूतनिलयं देवं सुपर्णमुपधावत॥ ११॥
(३) न यस्याद्यन्तौ मध्यञ्च स्वः परो नान्तरं बहिः।
विश्वस्यामूनि यद्यस्माद्विश्वञ्च तदृतं महत्॥ १२॥
स विश्वकायः पुरुहूत ईशः (४) सत्यः स्वयञ्ज्योतिरजः पुराणः।
धत्ते ऽस्य जन्माद्यजयात्मशक्त्या तां विद्ययोदस्य निरीह आस्ते॥ १३॥
अथाग्रे ऋषयः कर्माणीहन्तेऽकर्महेतवे।
ईहमानो हि पुरुषः प्रायो ऽनीहां प्रपद्यते॥ १४॥
ईहते भगवानीशो न हि तत्र विषज्जते।
आत्मलाभेन पूर्णार्थो नावसीदन्ति ये ऽनु तम्॥ १५॥
तमीहमानं निरहङ्कृतं बुधं निराशिषं पूर्णमनन्यचोदितम्।
(५) नॄन् शिक्षयन्तं निजवर्त्मसंस्थितं प्रभुं प्रपद्येऽखिलधर्मभावनम्॥ १६॥

भाषाटीका।

परम समर्थ शतरूपापति स्वायंभुव मनु काम भोगों से विरक्त होकर राज्य को छोडकर भार्या सहित तपके अर्थ वन में प्रवेश करते हुए॥ ७॥

हे भारत! वन में जाकर सुनंदा गंगा के तीर पर सौ वर्ष तक एक पग से पृथिवी पर खडे होकर घोर तप तपते हुए इस प्रकार कथन करने लगे॥ ८॥

श्रीधरस्वामिकृतभावार्थदीपिका।

येन चिदात्मना विश्वं चेतयते चेतनीभवति विश्वं तु यं न चेतयते न चेतनीकरोति स्वत एव चिद्रूपत्वात् तत्र हेतुः अस्मिन् शयाने स्वपिति यो जागर्ति साक्षितया वर्तते अहो चित्रं नायं जनस्तं वेद स तु इमं वेद॥ ९॥

तस्येश्वरत्वं दर्शयन् लोकस्य हितमुपदिशति—आत्मना ईश्वरेणावास्यं सत्ताचैतन्याभ्यां संव्याप्तं विश्वं सर्वं जगत्यां लोके यत्किञ्चिज्जगद्भूतजातमतस्तेनैवेश्वरेण यत्किञ्चित्त्यक्तं दत्तं धनं तेनैव भुञ्जीथाः भोगान् भुङ्क्ष्व यद्वा तेन हेतुना त्यक्तेनेश्वरार्पणेन भुञ्जीथा न स्वार्थं कस्य स्वित्कस्यचिदपि धनं मा गृधो माभिकाङ्क्षीः यद्वा कस्यस्विदिति कस्यान्यस्य धनमस्ति यतो धनाकाङ्क्षा क्रियेतेत्यर्थः। तथाच श्रुतिः "ईशावास्यम्" इति यथाश्लोकमेव॥ १०॥

ननु, यदि सर्वं व्याप्नोति तर्हि चक्षुरादिभिः किं न प्रतीयते तत्राऽऽह—यत्पश्यन्तं जनश्चक्षुर्वा न पश्यति चक्षुराद्यविषयत्वात् न हि प्रमातारं प्रमाणं विषयीकरोतीति भावः। तथा च श्रुतिः "चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रम्" इत्यादि। ननु, तर्हि घटनाशे देवदत्तस्य तद्विषयं चाक्षुषं ज्ञानमिवेश्वरस्यापि स्वरूपभूतं तद्विषयं ज्ञानं नश्येत्तत्राऽऽह—यस्य तु पश्यतश्चक्षुर्ज्ञानं न रिष्यति न नश्यति तत्तदाकारेणोत्पन्नाया वृत्तेरेव नाशो न स्वतःसिद्धज्ञानस्य न हि सवितृप्रकाशः प्रकाश्यनाशे नश्यतीति भावः। भूतानि निलयो यस्य तं सर्वान्तर्यामिणं तथापि सुपर्णं शोभनपतनमसङ्गमुपधावत भजध्वम्॥ ११॥

तस्य स्वरूपस्य नित्यत्वमेवोपपादयन्नाह—न यस्येति। अमून्याद्यन्तादीनि विश्वस्य यस्माद्भवन्ति विश्वञ्च यत् यद्रूपमत एवाव्यभिचारित्वादृतं सत्यं महत्परिपूर्णं ब्रह्म॥ १२॥

* वासुदेवो वसत्येष सर्वदेहेष्वनन्यदृक्। येनायं तपते विश्वं विश्ववीर्यं यतस्तपः॥ इति पाठान्तरम्। (१) सर्वमिति पाठः वीर० (२) यज्जगत्यां जगन्मनः इति विज०॥ (३) न यस्याद्यन्तमध्यानीति पाठः वीर०॥ (४) सर्वस्य गोप्ता ह्यजरः इति पाठः वीर० (५) स्वानिति पाठः वीर० तच्छिक्षयन्तं निजवर्त्ममूढान् इति. विज०

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, विश्वं चेत्तद्रूपं तर्हि तस्य कुतो जन्माद्यभावः स्वप्रकाशत्वं वा कथं वा जगज्जन्मादिकर्तृत्वेन विकारिणः सत्यत्वं पूर्णश्च ? तत्राऽऽह—स ईशोऽजः सत्यश्च स्वप्रकाशश्च पुराणश्च निर्विकारो विश्वं कायो यस्य पुरूणि हूतानि नामानि यस्य तथाविधोऽपि यतोऽस्य विश्वस्य जन्मादि स्वशक्त्या मायया धत्ते तां च नित्यसिद्धया विद्ययोदस्य हित्वा निष्क्रिय एवाऽऽस्ते ॥ १३ ॥

यस्मादेवमीश्वरः कर्म कृत्वा सन्त्यज्य नैष्कर्म्येणाऽऽस्ते अथास्माद्धेतोः ऋषयोऽप्यग्रे आदौ कर्माणि कुर्वन्ति किमर्थमकर्महेतवे मोक्षार्थम्पाठान्तरे कर्मनाशाय हि यस्मात् ॥ १४ ॥

नन्वीहमानः कर्मभिरवगुण्ठितः कोशकार इव बध्येतैव तत्राऽऽह, ईहत इति । अतस्तमनुवर्त्तमाना ये ते नाऽवसीदन्ति न विषज्जन्ते ॥ १५ ॥

तदेवं लोकाऽनुग्रहाय विश्वसृष्ट्यादि यः करोति श्रीरामकृष्णाद्यवतारैश्च वेदोक्तमप्याचरति तं शरणं व्रजामीत्याह—तमिति । निजं वर्त्म नरावताराऽनुरूपो मार्गस्तत्रसम्यक्स्थितमत ईहमानं कर्माचरन्तम् तथाहि जीववैलक्षण्यमाह—निरहङ्कृतं निराशिषमनन्यचोदितमिति च निरहङ्कारत्वे हेतुः बुधं निराशीष्ट्वे हेतुः पूर्णम् अनन्यनियुक्तत्वेहेतुः प्रभुं तथाऽपि कर्माऽनुष्ठाने हेतुः नृन्स्वाचारेण शिक्षयन्तं तत्किमर्थं तत्राऽऽह—अखिलान् धर्मान्भावयति प्रवर्तयतीति तथा तम् ॥ १६ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

तज्ज्ञपिता मन्त्रोपनिषदमेवाह—येनेति । विश्वं जगद्येन परमात्मना चेतयते प्रवृत्तिक्षमं भवति सत्तास्थितिप्रवृत्तिमद्भवतीत्यर्थः । यं परमात्मानं विश्वं कर्तृ न चेतयते तत्रोभयत्र हेतुमाह—य इति । अस्मिँल्लोके शयाने सति स्वात्मपरमात्मयाथात्म्यज्ञानाभावेन मायापारवश्येन देहात्मभ्रमादिना च शयानतुल्ये सति यो जागर्ति सर्वं युगपत्साक्षात्करोति अयं लोकस्तं परमात्मानं न वेद सतु परमात्मा लोकं वेद अत्र विश्वशब्दो जीववर्गपरः अचेतनवर्गस्य परमात्मनापि न चेतनीकर्तुमशक्यत्वात्तस्य ज्ञातृत्वप्रसक्त्यभावेन नायं वेदेति निषेधायोगाच्च यथा अचेतनं न वेद तद्वत् चेतनोऽपि न तं वेद वेदेति दृष्टान्ताभिप्रायेण चिदचिदात्मकंजगत्परो वा चेतयते इत्यत्र "चितीसंज्ञाने" इति णयन्तात्स्मिचश्चेति कर्त्रर्यात्मनेपदं तत्र शब्दादिविषयसाक्षात्कारात्मकं ज्ञानं प्रकृत्यर्थः तदाश्रयो जीववर्गस्तत्र कर्ता तदनुकूलव्यापारोन्तःप्रविश्यनियमनादिरूपो णयन्तार्थः तत्र कर्ता येनेति निर्दिष्टः परमात्मा एवं च यदेतत्सर्वशब्दादिविषयसाक्षात्कारात्मकं ज्ञानं तदनुकूलतयान्तःप्रविश्य नियन्तुः परमात्मन अधीनमिति फलितोर्थः । एवं शब्दतः प्रवृत्तिस्तदधीनेत्युक्तम् अन्तःप्रविश्य नियन्तृस्वरूपप्रयोजककर्तृत्वकथनेनैव जीववर्गस्य तत्प्रति शरीरत्वप्रतीत्या शरीरस्यात्मायत्तसत्तास्थितित्वलाभात्कृत्स्नं तच्चदायत्तसत्तास्थितिप्रवृत्तिमदित्युक्तं भवति यतो यदधीनसत्तासि-
मज्जगदत एव यं न चेतयते, ननु, स्वात्मायत्तसत्तादिमन्तं करोतीति विश्वं चेतयते न यं इत्यस्यार्थः परमात्मनश्चेतयितृत्वे विश्वस्य तदभावे च नित्यं प्रकृत्यपारवश्येन युगपत्सर्वसाक्षात्कर्तृत्वं हेतुतयोच्यते यो जागर्ति शयानेऽस्मिँल्लोके यतो जागर्ति अत एव तं न शयानो वेद किन्तु जाग्रत्स एव तद्विश्वं वेदेत्यर्थः । येन चेतयत इति । श्लोकस्य स्थाने क्वचित् पुस्तकेषु—

*वासुदेवो वसत्येष सर्वदेहेष्वनन्यदृक् ।
येनायं तपते विश्वं विश्ववीर्यं यतस्तपः ॥

इति श्लोकः पठ्यते तत्रायमर्थः अनन्यदृगन्यानपेक्षः युगपत्सर्वसाक्षात्कर्ता सर्वेषु चिदचिदात्मकेषु देहेषु वसति यतस्तत एव वासुदेवः वासुदेवशब्दप्रवृत्तिनिमित्ताश्रयस्तत्रानन्यदृगित्यनेन देवशब्दार्थः उक्तः । अन्यानपेक्षस्वतेजसा दीप्यमानत्वं हिदेवशब्दार्थः वसत्येष सर्वदेहेष्वित्यनेन वासुशब्दार्थउक्तः इदमधिकरणव्युत्पत्तेरप्युपलक्षणं वसतीति वासुः वसत्यस्मिन्निति वासुरिति द्वेधा व्युत्पत्तेस्तत्रतत्र प्रदर्शितत्वात् अनन्यदर्शनं विशिनष्टि—येनान्यदर्शनेनायं वासुदेवो विश्वं न तपते पर्यालोचयति विश्वस्य सृष्टिस्थित्यादिकमालोचयतीत्यर्थः । एवंभूतमनन्यदर्शनं ततस्तपः विश्वपर्यालोचनात्मकत्वमापन्नम् अनन्यदर्शनं विश्ववीर्यं कृत्स्नस्य चिदचिदात्मकविश्वस्य कारणभूतमिति येन चेतयत इत्यनेनान्तःप्रविश्य नियन्तृस्वरूपप्रयोजयितृत्वं सूचितम् ॥ ९ ॥

तदेव व्यञ्जयन् लोकं शिक्षयमाणाम् "ईशावास्यमिदं सर्वम्" इति मन्त्रमेव श्लोकरूपेण दृढयति—आत्मेति । ईशशब्दस्थाने आत्मशब्दपाठ एव विशेषः जगत्यां यज्जगत् चेतनाचेतनात्मकं सर्वमिदं वस्तु आत्मना परमात्मनाऽन्तःप्रविश्य नियमनपूर्वकं भर्त्रा आवास्यम् अधिष्ठेयं यतः सर्वमात्मावास्यमतस्तेन परमात्मना त्यक्तेनाऽधिष्ठिते ऽब्रह्मात्मके स्वतन्त्रे वस्तुनि न भुञ्जीथा नानुभवेः अब्रह्मात्मकं स्वतन्त्रं वस्तु न मन्यस्वेत्यर्थः । कर्मण एवानुभोगविषयत्वविवक्षया त्यक्त इति सप्तमी प्रयुक्ता मागृधः तच्छेषभूतं सर्वं देहतदनुबन्ध्यादिकं स्वात्मशेषत्वेन माकाङ्क्षीरित्यर्थः कृत्स्नस्य तच्छेषत्वमेव काक्वा दर्शयति—कस्यस्विद्धनमिति । कृत्स्नमात्मात्मीयादिकं कस्यस्विद्धनं न कस्याऽपि धनं किन्तु तस्यैवेतिभावः ॥ १० ॥

यो जागर्तीति सर्वसाक्षात्कर्तृत्वं सूचितम् तदेवव्यञ्जयन् तमेव भजनीयं भजत हे लोकाः! इत्याह—यमिति । यस्य चक्षुर्दर्शनं न रिष्यति न क्षयमेष्यति जीवस्येव न सङ्कोचं यास्यतीत्यर्थः अत एव नित्यमसङ्कुचितापरिच्छिन्नज्ञानेन युगपत्सर्वं पश्यन्तं साक्षात्कुर्वन्तं यं न पश्यति कर्मणा सङ्कुचितज्ञानो लोकः न साक्षात्करोति तं सर्वज्ञमिष्टप्रापणाऽनिष्टनिवर्तनक्षमं देवं स्वतेजसा दीप्यमानं भूतानां निलयमाश्रयं धारकमिति यावत् सु- "द्वासुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते" इति सुपर्णत्वेन रूपितम् अनेन जीवविनाभावेन तदन्तरात्मतया तद्धितकारितयाचा ऽवस्थितमिति लभ्यते उपधावत भजत इति ॥ ११ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तेन त्यक्तेन भुञ्जीथा इति सर्वस्य तदात्मकत्वेन तद्व्यतिरिक्तं स्वनिष्ठं वस्तु नास्तीत्युक्तम् अथ सर्वस्य तत्कारणकत्वाच्च तदन्यदित्याह—नेति । तस्य सर्वकारणत्वं वक्तुं तस्यापि कारणान्तरशङ्कां व्युदस्यति—न यस्याद्यन्तौ मध्यञ्चेति । कार्यमेववस्त्वाद्यन्तादिमध्यवत्स्वयमाद्यादि विरहात्सर्वकारणमित्यर्थः । कारणत्वञ्च निमित्तत्वरूपमुपादानत्वरूपं चोभयमप्यभिप्रेतं तत्र निमित्तत्वप्रयुक्तं वैषम्यं परिहरति—स्वः परश्च यस्य नास्तीति देवमनुष्यादिवैचित्र्यस्य तत्तज्जीवकर्ममूलकत्वाच्च तस्याऽनुग्राह्यो निग्राह्यश्च स्वतोऽस्तीति भावः। "अनेन जीवेनात्मनानुप्रविश्य" इत्यादिश्रुत्यवगतं सृष्टेरनुप्रवेशपूर्वकत्वं सूचयन् जीवानुप्रवेशयोग्यतामाह—यस्य नान्तरंबहिरिति तिलेषु तैलस्यैव वेद्यामग्नेरिव नव्यवस्थिता व्याप्तिः किन्तु वहिरन्तः साधरण्येन यस्य जीवादिषु व्याप्तिरित्यर्थः । यस्मादेवंभूतात्परमात्मनः विश्वस्याऽमूनि आद्यन्तमध्यानि सृष्टिलयरक्षणाणि भवन्ति यस्मादिति हेत्वर्थे पञ्चमी यतो हेतुभूतादुपादानात् विश्वस्यादि लयः यतो यस्मिन् हेतुभूतेऽधिकरणे विश्वस्य यज्ञः यतो येन हेतुभूतेन कर्त्रा विश्वस्य रक्षणं भवतीत्यर्थः । यत् यत एवं विश्वोपादानभूत स्वस्माद्विश्वमपि तदेव तदन्यदेव जगदाकारेण परिणतः सं एवाऽवतिष्ठत इति ततो ऽनन्य देव जगदित्यर्थः उपादानत्वप्रयुक्त विकारित्वं परिहरति—ऋतमिति । ऋतं सत्यं स्वरूपतः स्वभावतश्च विकाररहितमित्यर्थः । विकाराणां स्वशरीरभूतचिदचिद्द्वारकत्वात्स्वतो निर्विकारमेव कारणत्वोपयुक्तसर्वज्ञत्वसर्वशक्तित्वादिगुणयोगमाह—महदिति । गुणैर्महन्निरतिशयबृहदित्यर्थः ॥ १२ ॥

श्लोकचतुष्टयप्रतिपादितविशेषणसामर्थ्यलब्धगुणविशेषैः संभूय विशिनष्टि—स इति । सः श्लोकचतुष्टयगतयच्छब्दैर्निर्दिष्टस्य प्रतिनिर्देशपरः तच्छब्दः विश्वंकायः शरीरं यस्य विश्वकायः अतएव पुरुभिर्देवमनुष्यादिनामभिः शरीरवाचिभिरात्मपर्यन्तबोधकैशब्दैर्हूयते ऽभिधीयत इति पुरुहूतः सत्यः निर्विकारः विश्वकायोपि विश्वगतविकारैरस्पृष्ट इत्यर्थः । ईशः सर्वावस्थचेतनाचेतनयोर्नियन्ता स्वयंज्योतिः स्वप्रकाशः अनन्यापेक्षप्रकाशइत्यर्थः । अजः जीववत्कर्मायत्तोत्पत्तिरहितः पुराणः जगत्कारणभूतः पुरापि नवो वा अस्य विश्वस्य जन्मादिकमात्मनः स्वस्यशक्त्या अंशभूतया अजया प्रकृत्या करोति ताञ्च अजां विद्यया नित्याविर्भूतापरिच्छिन्नस्वयाथात्म्यविषयकज्ञानेनोदस्य परिहृत्य तदपरवशोभूत्वा निरीहः जीववदीहारहितः स्वानन्दानुभवपूर्त्या अवाप्तसमस्तकामोऽनादृतकामः "सर्वमिदमभ्यात्तोऽवाक्यनादरः" इति श्रुतेः, आस्ते सर्वान्तरात्मतयावतिष्ठतीत्यर्थः ॥ १३ ॥

निरीह आस्तइत्येतदेव व्यञ्जयितुं तावज्जीवस्य तदभावमाह—अथेति । अथ नन्वग्रे प्रथममृषयो जीवा दृष्टृत्वात्कर्महेतवे कर्महेतुर्यस्य तस्मै कर्मसाध्यसुखरूपफलार्थं कर्माणीहन्ते फलसाधनतया कुर्वन्तीत्यर्थः। अनेन जीवस्यापरिपूर्णत्वं सूचितं क्रमानुसारिबुद्ध्यायत्तप्रवृत्तिमज्जीवप्रेरयितृत्वाच्च परमात्मनः प्रथमं जीवस्यैव प्रवृतेरग्रे ऋषयः कर्माणीहन्ते इत्युक्तम् एवमीहमानोपि पुरुषो जीवः प्रायशोऽनीहां प्रपद्यते स्वविहितकर्मसाध्ये फले निस्पृहां प्रायः प्रपद्यते सुखार्थतया कृतैः कर्मभिः दुःखप्राप्तौ तत्र निस्पृहामेव प्रायशः प्रतिपद्यत इत्यर्थः । सुखार्थतया विहितानां कर्मणां प्रायशो दुःखजनकत्वदर्शनात् "प्रायोऽनीहां प्रपद्यते" इत्युक्तम् ॥ १४ ॥

भगवान् षाड्गुण्यपरिपूर्णः ईशः परमात्मा तु ईहते जीवकर्मानुगुणमन्तरात्मतया यद्यपि प्रेरयति तथापि न हि तत्र विषज्जते स्वप्रेर्यजीवकर्मसाध्ये फले रक्तो न भगति तत्र हेतुं वदन् तं विशिनष्टि, आत्मलाभेन नित्यं स्वानन्दानुभवलाभेनैव पूर्णः समग्रः अर्थः पुरुषार्थो यस्य तादृशः अतो न विषज्जत इत्यर्थः । न केवलं स एव न विषज्जते ऽपितु तमनु ये तमनुवर्त्तमाना ये जनास्तेपि नावसीदन्ति कर्मफलेषु सक्ता न खिद्यन्ति परमात्मन आत्मलाभपरिपूर्णार्थत्वेन कामानासक्त्योक्त्या जीवस्यापूर्णत्वमेव सेहत्वे हेतुरित्युक्तं भवति ईहमानोप्यनीहां प्रपद्यत इत्यनेन जीवस्य सुखे स्पृहा दुःखे तु निस्पृहेत्युक्तम ॥ १५ ॥

उक्तविशेषणसामर्थ्यलब्धगुणविशेषैर्विशिंषन् शरणं व्रजतितमिति । तम् उक्तविधम् ईहमानं जीवकर्मानुगुणं प्रेरयन्तं निरहङ्कृतमहङ्काररहितं बुधं सर्वज्ञं निराशिषं निरीहं पूर्णमात्मलाभेनैव पूर्णम् अनन्यचोदितमनन्यप्रेर्यं स्वान् स्वानुवर्तिनो भक्तजनान् शिक्षयन्तं स्वसमानानापादयन्तं निजवर्त्मसंस्थितं स्वस्वभावेस्थितं प्रभुं सर्वशक्तिम् अखिलान् धर्मान् भावयति पालयतीति तमहं प्रपद्ये शरणं व्रजामि ॥ १६ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कीदृशीत्यतोर्थतस्तामुपलक्षयति—*येनेति । अयमादित्यो येन हरिणा प्रेरितो विश्वं तपते प्रकाशयति विश्वस्य वीर्यं वीर्यप्रदं तपो यतो भवति अस्मिन् सूर्ये शयाने निद्रामाचरति सति यो हरिर्जागर्ति अयं सूर्यस्तं हरिं न वेद स हरिस्तमादित्यं वेदेत्यन्वयः "भयात्तपति सूर्यः" "भीषोदेतिसूर्यः" इति श्रुतेः यो नवेदेति वेदेति च अनेन "आप्राद्यावापृथवी अन्तरिक्षम्" इत्यादि श्रुतिप्रतीतसर्वाधिपत्यादित्यस्य श्रीहर्यधीनत्ववर्णनेन निरतिशयमाहात्म्यं युक्तं हरेरिति ज्ञातव्यं अयं जीवो येन नियतो विश्वं सुखदुःखादिकं तपते अनुभवति "तपआलोचने" इति धातुः आलोचनं ज्ञानं स एवानुभवः "स्वाद्वत्त्यनश्नन्न्यो अभिचाकशीति" इति श्रुतेः । हरिनियत अनुभवतीति कुत इति तत्राह विश्ववीर्यमिति । विश्वस्य वीर्यभूतं तपोनुभवो यस्माद्भवति "एषह्येवआनन्दयाति" इति श्रुतेः आनन्दयति सुखयति जीवमिति शेषः तस्मादित्यर्थः अस्मिन् जीवे शयाने सति "सतासौम्य" इति श्रुतेः यो जागर्ति "न निद्रां नैव च स्वप्नं तुर्ये पश्यन्ति निश्चिताः" इति श्रुतेः "तस्मादेनं स्वपित्याचक्षत" इति च अयं जीवस्तं न वेद "न तत्र चक्षुर्गच्छति न वाक्

* येनायं तपते विश्वं विश्ववीर्यं यतस्तपः । इति मूलपाठः ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वा गच्छति न मनो न विद्म न विजानीम" इति श्रुतेः स हरिः सर्वं वेद "यः सर्वज्ञः" इति श्रुतेः इति वा ॥ ९ ॥

न राजादिवत्सूर्यप्रेरकत्वं हरेः किन्तु तदन्तःस्थितत्वेनापीत्यभिप्रेत्याह—आत्मेति । इदं सूर्यादि विश्वं आत्मन ईशस्यावास्यम् आवासयोग्यं स्वसृष्टत्वात् इदमित्यनेन कियत्कवलीक्रियत इति तत्राह—यज्जगत्यामिति ! जगत्यां प्रकृतौ यज्जगत् स्थावरजंगमलक्षणं प्रकृतावित्युक्तोत्पन्नमनुत्पन्नं च यत्सर्वं स्वव्यतिरिक्तं कवलीक्रियते प्रकृतिरावासयोग्येति कैमुत्यन्यायेन सिद्धा "प्रकृतिं पुरुषं च" इति वचनाच्च अस्त्वावासयोग्यत्वं ततः किं तत्राह—मन इति हे मनः यत इदमीशस्य विद्यमानं तेन कारणेन तेनेशेन त्यक्तेन दत्तेन धनेन भुञ्जीथाः स्वीकुरु शरीरयात्रामिति शेषः । यतस्त्वं तदधीनसत्ताकः अत एवं न कुर्वित्याह—मागृध इति । कम्यपरमानन्दरूपस्य हरेश्चिदानन्दस्वरूपज्ञानलक्षणं धनं मागृधः तेनैक्यमाप्नुवानीत्याकाङ्क्षां न कुर्वतोऽनर्थहेतुत्वादित्यर्थः भगवता दत्तं (१) कस्यचिद्धनं मदीयमिति श्रद्धां न कुर्विति वा "ईशावास्यम्" इति श्रुतिः ॥ १० ॥

ननु, किमस्य लक्षणं येन तत्सद्भावेनेदं तदावास्यं स्यादिति तत्राह—यन्नेति । स्वप्रसादमन्तरेणाज्ञेयत्वं सर्वज्ञत्वं नित्याविनष्टचक्षुष्ट्वं च तस्यैव लक्षणं मुख्यं "अदृश्येनात्म्येनिरुक्तेनिलयनेऽभयंप्रतिष्ठां विन्दते""यच्चक्षुर्न पश्यति येन चक्षुंषि पश्यति" इति श्रुतेः । न रिष्यति न नश्यति सुपर्णं पूर्णानन्दम् उपधावत भजत ॥ ११ ॥

लक्षणान्तरमाह—यस्येति । पर इन्युपलक्षणं अपरोपि परोपि च अत्र परापरवस्तुनोः स्वातन्त्र्यं निषिद्ध्यते न तु शून्यत्वं तदृतं महद् ब्रह्मेत्यर्थः । "तदेवर्तं तदुसत्य माहुः" इति श्रुतिः ॥ १२ ॥

इदं च ब्रह्मलक्षणमित्याह—सविश्वेति । आत्मशक्त्या आत्ममायया प्रकृत्यास्य जगतो जन्मादि धत्ते यश्च तां प्रकृतिं विद्ययोदस्य निरस्य निरीहः सृष्ट्यादिशून्य आस्ते स ब्रह्मनामा परमात्मेत्यन्वयः प्रलये विश्वकायः उदरान्तर्गतप्रपञ्च इत्यर्थः । सृष्ट्वा विश्वमेव कायः शरीरं यस्य स तथा प्रतिमास्थानीयप्रपञ्च इत्यर्थः । अतः पुरुहूतः पुरूणि बहूनि हूतानि नामानि यस्य स तथा "सर्वनामा सर्वकर्मा" इति श्रुतिः । सर्वनामवाच्यत्वे हेतुरीश इति. तत्तच्छब्दप्रवृत्तिनिमित्तसामर्थ्योपेतइत्यर्थः नैतदौपचारिकमित्यभिप्रेत्याह—सत्यमिति । तत्तन्नामवाच्य तत्तत्साधुगुणसद्भावे सामर्थ्यमिदमस्तीति वक्तुमुचितं स एव कथमित्यतो वाह—सत्यमिति । साधुगुणपूर्णः इदं च लक्षणांतरं परंज्योतिरिति "परंज्योतिरूपं सम्पद्यते" इति श्रुत्या मुक्तप्राप्यत्वमुच्यते तदेवानेनोच्यते इति परंज्योतिः सूर्याद्यन्यतमः किं न स्यादित्यनोऽजः पुराण इति ॥ १३ ॥

एवं सिद्धे वस्तूनि तत्साधनज्ञाने साधनमाह—अथेति । यतो ज्ञानप्रतिबन्धके दुष्कर्मणि सति सर्वं दुःसाधनं स्यादिति अथ लोकसंग्रहार्थं ऋषयोऽग्रे * कर्महन्तवे दुष्कर्मपरिहाराय यागादि कर्माणि ईहन्ते कुर्वन्तीति विज्ञाय ज्ञानार्थी पुरुष ... मानः कर्मकुर्वाणो विधूतदुष्कर्माऽनीहां निवृत्तिपदवीं प्राप्य ... बहुलं ज्ञानं प्रपद्यत इत्यन्वयः । कश्चित्फलार्थी अन्यथाऽपि ... तीति प्राय इत्युक्तम् । अनेन "कुर्वन्नेवेहकर्माणि" इति श्रुति ... हीता "आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्माति ... रतिविशेषेण समावृत्य कुटुम्बी शुचौ देशे स्वाध्याय ... यानो धार्मिको विदधदात्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्या ... सन् सर्वभूतान्यन्यत्रतीर्थेभ्यः स खल्वेवं वेदं वर्तयन्याव ... म्" इति श्रुतिर्हिशब्देन गृहीता ॥ १४ ॥

न केवलमृषय एव लोकसंग्रहार्थं कर्माण्याचरन्ति ... श्रीहरिरपीति भावेन आह—ईहते इति । कर्मानभिषङ्गे कमुत्ता ... यमाह—नावसीदन्तीति । ये तमनुवर्त्तन्ते तेऽपि नावसीदन्ति ... किमुत श्रीहरिरित्यन्वयः ॥ १५ ॥

पुरुषेण फलानीच्छता कर्म कर्तव्यमात्मविदेति भावेन ... तीत्याह—तमीहमानमिति । बुधैरीहमानं निजवर्त्मसूदांस ... शिक्षयंतं प्रभुं प्रपद्य इत्यन्वयः ॥ १६ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इदं येनेत्यादिकं तदीहमानमित्याद्यन्तमन्वाह—योऽा ... प्रपद्यत इति पर्यवसानक्रियायां स्वतात्पर्यात् ॥ येनेति ... इत्यर्थः सुपां सुपोभवन्तीति छान्दसवार्त्तिकात् नार्था ... जाग्रद्दशायां तज्ज्ञानच्छाययैव विश्वस्य ज्ञानात् सुषुप्त्य ... याम् तस्या अपि तिरोधानात् तस्य तु स्वतःसिद्धसर्वज्ञ ... ज्ञानत्वादयुक्तमेवैतदिति भावः ॥ ९ ॥ १० ॥

चक्षुः स्वरूपभूता ज्ञानशक्तिः "स्वभाविकीज्ञानबल ... च" इति श्रुतेः । शेषं सुगमम् ॥ ११ ॥

तदेवं ज्ञानशक्तेर्नित्यत्वमुक्त्वा तत्स्थापनाय स्वरू ... नित्यत्वमाह न यस्येति ॥ १२ ॥

तदेवोपपादयति—स इति । विश्वस्य व्यापकः कार्याप ... विश्वे अनन्ताः काया वा यस्य सः अत एव पुरु ब ... हूतोवेदैर्गीतः तत्र हेतुः ईशोऽचिन्त्यशक्तिः यतः सत्यः ... सत्ताहेतुस्वरूपः यतः स्वयंज्योतिः स्वप्रकाशः अतश्च ... पुरापि नवत्वाद्विकारान्तरशून्यश्च तदेवं परमपूर्णोऽपि ... प्रपञ्चस्यापि अजया मायाख्ययात्माधीनशक्त्या जन्मादि वि ... करोति तां च मायां विद्यया उदस्य तस्यां सकार्यायामना ... ज्यैवास्ते अत एव निरीह एवास्त इत्यर्थः । तदेतदचिन्त्य ... भावमयं लीलामात्रमेवेति भावः ॥ १३ ॥

सैषाच लीलाशिक्षया भक्तसुखपर्यवसानैवेत्याह—अथेति ... यस्मादेवमसौ कर्मकृत्वाप्यनासज्य नैष्कर्म्येनास्ते अथास्मा ... ऋषयोप्यग्रे अथमावस्थत्वे कर्माणि कुर्वन्ति तेष्वनासक्ता ... भवन्तीत्यर्थः । किमर्थं अकर्महेतवे लब्धनिरीहत्वे प्राप्त्यै तां ... पूर्वमेव निरीहा न स्युः तत्राह—हि यस्मादीहमान एव ...

(१) कस्यचिद्धनम् ॥ * कर्महन्तवे इति च मूलपाठः ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

प्रायोऽनासक्ते सति अनीहां प्रपद्यते क्रमात् प्राप्नोति नतु हठाद्-नीहमान एवेत्यर्थः। तदुक्तम् "आरुरुक्षोर्मुनेर्योगं कर्मकारणमुच्यते। योगारूढस्य तस्यैव समः कारणमुच्यते। कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्। इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते" इति ॥ १४ ॥

विद्ययोदस्य निरीह आस्त इति यदुक्तं तदेव ऋषयोनुसंसरन्ति तदेव विशदयति—ईहत इति । स्वरूपसुखस्फूर्तिरूप-विद्यया पूर्णत्वेन भगवतः कार्यान्तरे क्रियमाणेऽप्यनासक्तिः ऋषीणामपि तदनुगत्येत्यर्थः ॥ १५ ॥

एतानि निजोक्तान्यनूद्य फलितमाह—तमीहमानमिति । अत्र सविश्वकाय इत्यादि त्रयस्याऽनुवादः स्पष्टएव। किञ्च बुधमिति येन चेतयत इत्यस्य यं न पश्यतीत्यस्यच प्रभुमित्यात्मावास्यमित्यस्य पूर्णमिति न यस्येत्यस्य ज्ञेयः । अर्थश्चायम् तं प्रपद्ये तत्र हेतवः ईहमानम् जगत्सृष्ट्यादिकं कुर्वन्तमपि निरहङ्कृतम् तदासक्तिशून्यं यतो बुधम् स्वानन्दाऽनुभवशीलम्। यतः पूर्णं निराशिषश्च तर्हि किमर्थं करोति तत्राह—नृनीति। ननु, नरशिक्षणमपि बहिरावेश एव, तत्राह—निजाभक्तास्तेषां वर्त्मनि सम्यक् स्थितम् तदनुकूल्यायैव सर्वं कुर्वन्तमित्यर्थः । अत एव सर्वधर्म्ममूलस्य तेषां धर्म्मस्य भावनेनाऽखिलधर्म्मभावनमपीति तमेव प्रपद्ये ॥ १६—२३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

येन य इत्यर्थः। चेतयते विश्वं चेतनीकरोति विश्वं कर्तृ यं न चेतयते अस्मिन् विश्वस्मिन् शयाने सुप्तिसुषुप्तिप्रलयगतेऽपि सति यो जागर्त्ति यस्मिंश्च योगनिद्रां गते तु नेदं विश्वं जागर्त्तीति प्रक्रमाक्षेपलब्धं तस्मादयं विश्ववर्त्ती जनस्तं न वेद स च हरिरिमं वेद ॥ ९ ॥

तस्येश्वरत्वं दर्शयन् स्वपुत्रपौत्रादिकमुद्दिश्य हितमुपदिशति आत्मेति। जगत्यां त्रिभुवने यत् किञ्चिज्जगत्स्थानं स्वीयदेहेन्द्रियादिकमपि तत्सर्वं आत्मनो भगवत एव आवास्यम् आवासविषयीभूतं कर्म्माणि यथत् सम्यग्वासार्हमिति वा तेनैव स्वक्रीडास्पदत्वेन सृष्टत्वादिति भावः। अतस्तत्र तत्र स्थाने भगवन्मन्दिरं तदर्च्चाञ्च संस्थाप्य तदनुज्ञां सम्प्रार्थ्यैव स्ववासगृहं ततो निकृष्टमेव सेवकबुद्ध्या निर्मीयतां न तु तत्र स्वस्यैव स्वत्वमारोप्य तन्मन्दिरमनिर्माय्यैवेत्यादिकोध्वनिः। एवं बहुधनसद्भावेऽपि तेन परमेश्वरेण यत्यक्तं कर्मकारेभ्यो वेतनमिव यद्दत्तं धनं तेनैव भुञ्जीथाः भोगान् भुङ्क्ष्व मा गृधः अधिकमदत्तं वा माभिकाङ्क्षीः तत्सेवाय तद्भक्तसेवायां च बहुधनं तेनैव भुञ्जीथाः भोगान् भुंक्ष्व मा गृधः अधिकमदत्तं वा माभिकांक्षीः तत्सेवायां तद्भक्तसेवायां च बहुधनं पर्य्याप्तीकृत्य तच्छेषेणैव पुत्रमित्रकलत्रादीनां स्वस्य चोदरभरणं कुर्व्विति भावः। ननु, ते पुत्रकलत्रादयो नात्र व्यवस्थायां समान्येरन्

तत्र सतर्जनमाह—स्वित् प्रश्ने अरे कस्य धनं स्वगृहे स्थितमपि धनं परमेश्वरं विना कस्य न कस्यापीत्यर्थः। "यावद्भ्रियेत जठरं ताव त्स्वत्वं हि देहिनाम्।अधिकं यो भिमन्येत स स्तेनो दण्डमर्हति" इति नारदोक्तेः। यद्वा कस्यचिदन्यस्यापि धनं मा गृधः तथाच श्रुतिः "ईशावास्यमिदं सर्वम्" इति यथाश्लोकमेव ॥ १० ॥

ननु, यदि जगदिदं तस्यैवाऽऽवास्यं तर्हि कथं स क्वापि न दृश्यते तत्राह, यमिति । ननु, तर्हि घटनाशे देवदत्तस्य तद्विषयं चाक्षुषं ज्ञानमिव दृश्यस्य जगतो नाशे परमेश्वरस्यापि तद्विषयं ज्ञानं नश्येत् तत्राह। चक्षुः स्वरूपभूता ज्ञानशक्तिर्न नश्यति "स्वाभाविकी ज्ञानबलक्रियाच" इति श्रुतेः। नहि सवितृप्रकाशः प्रकाश्यनाशे नश्यतीति भावः। भूतनिलयं सर्वान्तर्यामिणं देवं दिव्यं तमसङ्गं सुपर्णं जीवात्मसखं "द्वा सुपर्णा सयुजौ" इति श्रुतेः। उपधावत सेवध्वम् ॥ ११ ॥

सर्वव्यापकत्वमाह-न यस्येति। अमूनि आद्यन्तादीनि विश्वस्य यस्माद्भवन्ति विश्वं च यत् यद्रूपम् अतएवाऽव्यभिचारित्वात् तत् ऋतं सत्यं महत् परिपूर्णं ब्रह्मेति तत्स्वरूपस्य नित्यत्वमुक्तम् ॥ १२ ॥

सर्वात्मत्वमाह-स इति। पुरूणि हूतानि नामानि यस्य सः यत्र "विद्याविद्ये न विदामो विद्याविद्याभ्यां भिन्नो विद्यामयो हि यः स कथं विषयीभवति" इति गोपालतापनीश्रुतेः। विद्याशब्देन स्वरूपभूता चिच्छक्तिरभिधीयते तयैव सुभगया पट्टमहिष्येव अजां दुर्भगां निरस्येत्यर्थः। तदुक्तम् "मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि" इति ॥ १३ ॥

एवं तस्य यौगपद्येनैवेहमानत्वमनीहत्वं धर्त्तुमशक्नुवन्तो मुनयः कालभेदेनाऽपि तत् स्वास्मिन् सम्पादयितुं यतन्त इत्याह—अथ अत एव अकर्महेतवे नैष्कर्म्यार्थं हन्तवे इति पाठे कर्महननार्थम् ॥ १४ ॥

नन्वीहमानः कर्मभिरवगुण्ठितः कोषकारवद्बध्येतैवेत्यत आह-ईहत इति। अतस्तमनुवर्त्तमाना ये ते नावसीदन्तीति तद्भक्तिरुपदिष्टा ॥ १५ ॥

ननु, त्वमेवमस्मानुपदिशसि स्वयं तावत् साम्प्रतं किं करोषीति तत्राह—तमिति । अहं तु प्रभुं नामविशेषानुक्तेर्नाम्नापि प्रभुं ये न चेतयते विश्वमिति प्रक्रमोक्तेश्चैतन्यं प्रभुं भगवन्तं प्रपद्ये। कीदृशं तं प्रसिद्धं परमेश्वरमात्मानमेव ईहमानं कामयमानं यथान्ये भक्ताः तमीहन्ते तथाऽसावपि स्वमीहते आत्मारामत्वादिति भावः। निरहंकृतम् अहं सर्वेश्वर इत्यहङ्कारशून्यम् अनन्यचोदितं स्वेनैवादिष्टं यन्निजवर्त्म स्वप्राप्तिसाधनं संस्थितं चिरकालव्यवधानात् विलुप्तं तत् नॄन् शिक्षयन्तं स्वाचरणादिनेति शेषः। अखिलमन्यूनं धर्मं भक्तियोगं भावयत्याविर्भावयति प्रवर्त्तयति वा तम् ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

येन विश्वं चेतयते चेतनीभवति स्वकार्यक्षमं भवतीत्यर्थः । विश्वं तु यं चेतयते अन्यनिरपेक्षसामर्थ्ययुक्तत्वात् "महदादयोऽण्डमसृजन् यदनुगृहीताः" इति वक्ष्यमाणत्वात्ऽनुसन्धेयम् अस्मिन् प्रसिद्धे जने शयाने मायामोहितत्वेन विनष्टात्मपरमात्मविवेके सति यो जागर्ति सर्वं पश्यति अत एव तं सर्वज्ञम् अयं न वेद स तु वेद यद्वाऽस्मिन् विश्वस्मिन् शयाने प्रलीने सति यो जागर्त्ति तं भज इति शेषः ॥ ९ ॥

एवं सर्वप्रेरकत्वसर्वज्ञत्वादिगुणवर्णनेन भगवतो भजनीयत्वं स्वस्य तद्भक्तत्वमुक्त्वाऽथ बुभुक्षुंप्रति परमेश्वरदत्तेन जीवमानो भव परधनाऽऽकाङ्क्षां मा कुर्वित्याह—आत्मेति । आत्मना परमेश्वरेण इदं विश्वं समष्टिप्राकृतः प्रपञ्चः जगत्यां यत्किञ्चिज्जगत् व्यष्टिपदार्थश्च तत्सर्वम् आवास्यं कारणतया व्याप्यम् पृथिव्यामौषध्यादिकमिव तेन परमेश्वरेण स्वकर्मानुरूपं त्यक्तं दत्तं यद्धनं तेन भुञ्जीथाः भोगान्भुंक्ष्व कस्यचिदपि धनं मागृधः माकाङ्क्षीः ॥ १० ॥

मुमुक्षून्प्रत्याह—यमिति । यं पश्यन्तं न पश्यति जन इति शेषः । यस्य च चक्षुर्नैव रिष्यति नैव नश्यति नित्यत्वात् तं भूतानां निलयं भूतानि वा निलयं यस्य तं शोभनं भक्तहिताय पर्णं पतनं यस्य तमुपधावत भजत ॥ ११ ॥

यस्य ब्रह्मणः आद्यन्तादि न यद्यतो हेतोः यस्माद्विश्वस्यामूनि आद्यन्तादीनि सन्ति तदेव विश्वं कार्यस्य कारणानन्यत्वात् तदेव ऋतं सत्यं तदितरस्याधिकस्य समस्यचाऽसत्वात् अत एव तदेव महत् निरतिशयम् ॥ १२ ॥

एतदेवोपपादयन् शक्तिपरिणामं स्वीकृत्य स्वरूपतो निर्विकारत्वं भगवत आह—स इति । अजया नित्ययाआत्मशक्त्या प्रकृत्या "देवात्मशक्तिं स्वगुणैर्निगूढाम्"इति श्रुतेः अस्य विश्वस्य जन्मादि यो धत्ते करोति स एव विश्वं कार्यं प्रवेशस्थानं यस्य सः सर्वविकारविलक्षणः यत ईशः पुरुभिर्नामभिर्हूयतेऽभिधीयते इति तथा निरीहः स्वतोऽवाप्तसमस्तकामः तां कार्यकारणरूपामुदस्य तदपेक्षामकृत्वा आस्ते ॥ १३ ॥

तदेवं भगवान् विश्वरचनादिकर्माणि जीवहिताय करोति स्वयं तु तन्निरपेक्ष एव तिष्ठतीत्युक्तम् । अथोपास्यभूताद्भगवतः सकाशादुपासकानां वैलक्षण्यं द्योतयितुं मुनयस्तु तत्प्राप्त्यर्थं कर्माणि कुर्वन्तीत्याह—अथाग्रे इति । नास्ति कर्म हेतुः साधनं यस्य "नास्त्यकृतं कृतेन प्लवा ह्येतेऽदृढा यज्ञरूपाः" इति श्रुतेः । भगवदाराधनव्यतिरिक्तकर्माऽलभ्यभगवत्प्राप्तये कर्माणि तदाराधनरूपाणि ईहन्ते कुर्वन्ति । "मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु । मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे । इति श्रीमुखोक्तेः । ईहमानः यत्नं कुर्वाणः पुरुषः अनीहां यत्नसिद्धिसौख्यं प्रायः प्रपद्यते निर्यत्नस्य यत्नसिद्धिसौख्यं कुत इति प्रायोग्रहणेन सूच्यते ॥ १४ ॥

भगवत्स्वभावानुवर्त्तिनः सुखिनो भवन्तीत्याह—ईहते इति । ये तमनुवर्त्तमानाः कर्मफले अविपज्जमानास्ते नाऽवसीदन्ति न क्लिद्यन्ति परमं फलं प्राप्य सुखिनो भवन्तीत्यर्थः ॥ १५ ॥

भगवद्गुणान् संक्षेपतो वर्णयन् तं शरणं व्रजति—तमिति । ईहमानं विश्वसृष्ट्यादिलीलां कुर्वाणं तथापि निरहंकृतं बुधं सर्वज्ञं निराशिषं क्रियासाध्यसुखनिरपेक्षं यतः पूर्णं अनन्य- चोदितं स्वाधीनं निजवर्त्मनि वेदोक्तमार्गे सम्यक् शिक्षयन्तं तत्र हेतुगर्भं विशेषणं नृन् शिक्षयन्तमिति अखिलधर्मभावनम् अखिलानां बुभुक्षूणां मुमुक्षूणां च धर्मान् भावयति प्रवर्त्तयतीति तथा ॥ १६ ॥

भाषा टीका ।

मनुरुवाच ।

स्वायम्भुवमनुबोले, कि जो कोई विश्व अर्थात् चेतनवर्ग को, करणकलेवरादि प्रदान कर ज्ञान देता है, और विश्व जिसको चेतन नहीं कर सक्ता है, और जो नित्यसर्वज्ञ इसको अज्ञान की निद्रामें सोनेपर भी जागता है, और यह जीव वर्ग जिसको नहीं जानता और वह इस को सदा जानता है ॥ ९ ॥

इस जगती (लोक) में जो विश्व (सर्ववस्तु) है वह केवल ईश की सत्ता और चैतन्य से व्याप्त हो रहा है, और जो तुम लोग कुछ भोग भोगो सो ईश्वर को समर्पण कर कर भोगो, और किसी के धन की आकांक्षा मत करो ॥ १० ॥

यह जीव वर्ग आपको देखते हुए जिस ईशको नहीं देख सका है, और जिसका ज्ञान कभी नष्ट नहीं होता, ऐसे उन सर्वप्राणियों के निवासस्थानरूप अथवा सर्वान्तर्यामी सुपर्ण (सुन्दर पक्षवाला पक्षी) को आप सब लोग भजो ॥ ११ ॥

जिसका आदि, अन्त, मध्य, अपना, पराया, भीतर, बाहर कुछ भी नहीं और इस विश्व के आद्यन्तादिक जिस से होते हैं, और जो आप विश्वरूप है, वही स्वरूप से भिन्न और निरतिशय बृहत् पूर्ण ब्रह्म है ॥ १२ ॥

फिर वह ब्रह्म कैसा है, कि—सर्व विश्व काय अर्थात् शरीर है जिसका, और बहुत से नाम वाला नियन्ता है, स्वयं ज्योति अर्थात् स्वयं सिद्धज्ञान वाला है, अज है, अनादि है, और अजा नामवाली अपनी मायाशक्ति से इस विश्व के जन्मादि को धारण करता है और अपनी विद्या शक्ति से माया का निरास कर निश्चेष्ट होकर विराजता है ॥ १३ ॥

पहिले ऋषि लोगोंने निवृत्ति के लिये कर्म किये क्योंकि ? पुरुष प्राय करके कर्मों को करता २ आपही कर्मों से निवृत्ति को प्राप्त होजाता है ॥ १४ ॥

आत्म मात्र के लाभ से पूर्णार्थ अर्थात् अवाप्तसमस्तकाम होकर भगवान् भी कर्म करते हैं परन्तु उस में आसक्त कभी नहीं होते, ऐसे ही परमात्मा के जो लोग अनुगामी हैं वे भी कभी संसार के क्लेशों से दुःखित नहीं होते हैं ॥ १५ ॥

श्रीशुक उवाच ।

इति मन्त्रोपनिषदं व्याहरन्तं समाहितम् ।
दृष्ट्वाऽसुरा यातुधाना जग्धुमभ्यद्रवन्क्षुधा ॥ १७ ॥
तांस्तथाऽवसितान्वीक्ष्य यज्ञः सर्वगतो हरिः ।
यामैः परिवृतो देवैर्हत्वाऽशासत्त्रिविष्टपम् ॥ १८ ॥
स्वारोचिषो द्वितीयस्तु मनुरग्नेः सुतोऽभवत् ।
द्युमत्सुषेणरोचिष्मत्प्रमुखास्तस्य चात्मजाः ॥ १९ ॥
तत्रेन्द्रो रोचनस्त्वासीद्देवाश्च तुषितादयः ।
(१)ऊर्जस्तम्भादयः सप्त ऋषयो ब्रह्मवादिनः ॥ २० ॥
ऋषेस्तु वेदशिरसस्तुषिता नाम पत्न्यभूत् ।
तस्यां जज्ञे ततो देवो विभुरित्यभिविश्रुतः ॥ २१ ॥
अष्टाशीतिसहस्राणि मुनयो ये धृतव्रताः ।
अन्वशिक्षन् व्रतं तस्य कौमारब्रह्मचारिणः ॥ २२ ॥
तृतीय उत्तमो नाम प्रियव्रतसुतो मनुः ।
(२)पवनः सृञ्जयो यज्ञहोत्राद्यास्तत्सुता नृप ! ॥ २३ ॥
वसिष्ठतनयाः सप्त ऋषयः प्रमदादयः ।
सत्या वेदश्रुता भद्रा देवा इन्द्रस्तु सत्यजित् ॥ २४ ॥

भाषा टीका ।

चेष्टाकर भी निरहङ्कार और बुद्धि सागर, कामनाओं से रहित, सदा परिपूर्ण, किसी से कभी प्रेरित न हो, मनुष्यों को शिक्षा देने वाला, अपने मार्ग में स्थित, और अखिल धर्मों का प्रवर्त्तक ऐसे प्रभु के मैं शरण हूं ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

समाहितमपि सन्तं मन्त्रोपनिषदं व्याहरन्तं दृष्ट्वा सुप्तोच्छ्वसितवद्विवशमिव मन्वाना असुरा यातुधानाश्च क्षुधा निमित्तेन जग्धुमत्तुमभ्यद्रवन्नभिदुद्रुवुः ॥ १७ ॥

यामैः स्वपुत्रैः त्रिविष्टपं स्वर्गमपालयत्स्वयमेवेन्द्रो बभूवेत्यर्थः तत्र प्रतिमन्वन्तरं मन्वादयः षडन्येऽन्ये भवन्ति. तथाहि सूतो द्वादशे वक्ष्यति—

"मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वरः ।
ऋषयोंऽशावतारश्च हरेः षड्विधमुच्यते ॥"—

इति तत्राऽद्ये स्वायम्भुवो मनुः प्रियव्रतोत्तानपादौ मनुपुत्रौ यामादयो देवाः मरीचिप्रमुखाः सप्त ऋषयः यज्ञो हरेरवतारः इन्द्रश्च स एवेति तन्मन्वतरं पञ्चविधमेव तच्चतुर्थस्कन्धोपक्रमे निरूपितम् ॥ १८ ॥

द्वितीयादिषु त्रिषु मन्वन्तरेषु मन्वादिषट्कमाह-स्वारोचिषो द्वितीयस्त्विति यावद्गजेन्द्रमोक्षप्रश्नम् ॥ १९ ॥ २० ॥ २१ ॥

विभोरसाधारणं चरितमाह-अष्टाशीतिसहस्राणीति, ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इति इत्थं मन्त्रात्मिकामुपनिषदं व्याहरन्तं जपन्तं समाहितचित्तं स्वायम्भुवं मनुं दृष्ट्वा असुरा यातुधानाश्च क्षुधा निमित्तेन जग्धुमत्तुमभ्यद्रवन् ॥ १७ ॥

तथावसितान् मनुं हन्तुं समुद्यतांस्तानसुरान्यातुधानांश्च दृष्ट्वा सर्वगतः सर्वान्तरात्मा भगवान् यज्ञाख्यः यामैर्युगपत्

(१) और्जस्तम्भा इति वीर० । (२) सवन इति—वीर०

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

प्रसूतैः स्वपुत्रैर्देवैः परिवृतस्तान् हत्वा त्रिविष्टपं स्वर्गमशासत् अपालयत् स्वयमेवेन्द्रो बभूवेत्यर्थः । तत्र प्रतिमन्वन्तरं मन्वादयः षडन्ये अन्ये भवन्ति तथाहि सूतो द्वादशे वक्ष्यति-

"मन्वन्तरं मनुर्देवाः मनुपुत्राः सुरेश्वरः ।

ऋषयोऽंशावताराश्च हरेः षड्विधमुच्यते" ॥ इति

तत्राद्यः स्वायम्भुवो मनुः प्रियव्रतोत्तानपादौ मनुपुत्रौ तोषप्रतोषसंतोषभद्रशान्तिइडस्पतीध्मकविविभुस्वह्नसुदेवरोचनाख्या द्वादश यज्ञस्य पुत्रा एतत्प्रभृतयो देवाः मरीचिप्रमुखाः सप्तर्षयः यज्ञो हरेरवतार इन्द्रश्च स एव यद्यपि पृथगिन्द्राभावात्षाड्विध्यं नास्ति तथापि अत्र मन्वन्तरे यज्ञो भगवानेव इन्द्राधिपत्ये जगद्रक्षणेऽधिकृतवानिति तदधिकारद्वयमपेक्ष्य षाड्विध्यमुपपादनीयम् ॥ १८ ॥

द्वितीयादिषु त्रिषु मन्वन्तरेषु मन्वादिकमाह—स्वारोचिष इति यावद्गजेन्द्रमोक्षप्रश्नं । अग्नेः सुतः स्वारोचिषाख्यः मनुर्द्वितीयोऽभवत् द्युमदादयस्तस्यात्मजाः ॥ १९ ॥

तत्र द्वितीये मन्वन्तरे रोचनो भगवतो यज्ञस्य पुत्र एवेन्द्रो बभूव देवास्तु तद्व्यतिरिक्तास्तुषितसंज्ञास्तोषादय एकादश आदिशब्दादन्ये चाभवन् ऊर्जस्तम्भादयः सप्त ब्रह्मवादिनो ऋषयो बभूवुः एवं मन्वादयः पञ्चोक्ताः ॥ २० ॥

अथावतारमाह—ऋषेरिति । वेदशिरस ऋषेस्तुषितेति प्रसिद्धा भार्या बभूव तस्यां तुषितायां भगवान्देवैः प्रार्थित इति शेषः । विभुरिति प्रसिद्धो जज्ञे ॥ २१ ॥

विभोर्भगवतोऽसाधारणं चरित्रमाह—अष्टाशीतीति । तस्य कौमारब्रह्मचारिणः तस्य विभ्वाख्यस्य भगवतो व्रतमाचारमन्वशिक्षन्ननुसृतवन्तः ॥ २२ ॥

प्रियव्रतस्य सुत उत्तमाख्यस्तृतीयो मनुः तस्योत्तमस्य मनोः सुताः सवनादय अभवन् ॥ २३ ॥

प्रमदादयः वसिष्ठस्य सुताः प्रमदादयः सप्तर्षयः सत्यादिसंज्ञका देवगणा इन्द्रस्तु सत्यजिदाख्यः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मन्त्रवर्णेन युक्तोपनिषदम् ॥ १७ ॥ १८ ॥

तस्य स्वारोचिषस्य ॥ १९ ॥

नाम्ना रोचनः ॥ २० ॥

नाम्ना विभुः ॥ २१ ॥

तस्य विभोः ॥ २२—२५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

वसिष्ठेति दन्त्यमध्योयं वसिष्ठ ऋषि प्रजापतिगृहीतस्वयेति श्रुतेः ॥ २४—३३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

समाहितं समाधिस्थमपि सन्तं मन्त्रोपनिषदं व्याहरन्तं दृष्ट्वा सुप्तोच्छ्वसितवह्विवशमिव मन्वानाः क्षुधा बुभुक्षया जग्धुमत्तुमभ्यद्रवन् ॥ १७ ॥

यामैर्यामसंज्ञकैः ॥ १८ ॥

मन्वन्तरं हि मन्वादिषट्कयुक्तं भवति । यदुक्तम् "मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वरः । ऋषयोंऽशावताराश्च हरेः षड्विधमुच्यते" तत्राद्ये स्वायम्भुवमन्वन्तरे स्वायंभुवो मनुः प्रियव्रतोत्तानपादौ मनुपुत्रौ यामादयो देवाः मरीचिप्रमुखाः सप्तर्षयः हरेरवतारः यज्ञ एवेन्द्रश्चेति षट्कं चतुर्थस्कन्धोपक्रमे निरूपितं द्वितीयादिषु त्रिषु मन्वादिषट्कान्याह—स्वारोचिष इति द्वादशभिः ॥ १९—२८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

क्षुधा बुभुक्षया निमित्तभूतया जग्धुमत्तुमभ्यद्रवन् ॥ १७ ॥

अवसितान् कृतनिश्चयान् वीक्ष्य यज्ञो हरिः यामैः यामसंज्ञकैः स्वसुतैः परिवृतः त्रिविष्टपं स्वर्गमपालयत् स्वयमिन्द्रोऽप्यभूदित्यर्थः । स्वायंभुवो मनुः प्रियव्रतोत्तानपादौ तत्सुतौ यामाद्या देवाः मरीच्याद्याः सप्तर्षयः यज्ञो हरेरवतारः स एवेन्द्रश्चेत्याद्यं मन्वन्तरं पञ्चविधमिति भावः । अन्यानि तु मन्वन्तराणि षड्विधानि "मन्वन्तरं मनुर्देवाः मनुपुत्राः सुरेश्वरः । ऋषयोंऽशावताराश्च हरेः षाड्विधमुच्यते" इति वक्ष्यमाणात् ॥ १८—१९—२०—२१ ॥

तस्य विभोः ॥ २२—२७ ॥

भाषा टीका ।

श्रीशुक उवाच ।

श्रीशुक देवजी बोले, कि—स्वायम्भुवमनुसमाहित होकर इस प्रकार के मन्त्रोपनिषद को उच्चारण करते रहे में असुर यातुधान अर्थात् राक्षसलोग क्षुधा से भक्षण करने को दौडे ॥ १७ ॥

सर्व व्यापी श्रीहरि ने उस समय उन यातुधानों इस प्रकार के दुरभिप्राय वाले देखकर उन सबों को कर इन्द्र होकर याम नामक देवताओं सहित स्वर्ग पालन किया ॥ १८ ॥

धर्म्मस्य सूनृतायान्तु भगवान्पुरुषोत्तमः ।
सत्यसेन इति ख्यातो जातः सत्यव्रतैः सह ॥ २५ ॥
सोऽनृतव्रतदुःशीलानसतो यक्षराक्षसान् ।
भूतद्रुहो भूतगणांस्त्ववधीत्सत्यजित्सखः ॥ २६ ॥
चतुर्थ उत्तमभ्राता मनुर्नाम्ना च तामसः ।
(१)पृथुः ख्यातिर्नरः केतुरित्याद्या दश तत्सुताः ॥ २७ ॥
सत्यका हरयो वीरा देवास्त्रिशिख ईश्वरः ।
ज्योतिर्धामादयः सप्त ऋषयस्तामसेऽन्तरे ॥ २८ ॥
देवा वैधृतयो नाम विधृतेस्तनया नृप ! ।
नष्टाः कालेन यैर्वेदा विधृताः स्वेन तेजसा ॥ २९ ॥
तत्राऽपि जज्ञे भगवान् हरिण्यां हरिमेधसः ।
हरिरित्याहृतो येन गजेन्द्रो मोचितो ग्रहात् ॥ ३० ॥

भाषा टीका ।

द्वितीय मनु अग्निके पुत्र स्वारोचिष नाम के हुए और द्युमत, सुषेण, रोचिष्मत, इत्यादिक उन के पुत्र हुए ॥ १९ ॥

उस मन्वन्तर में रोचन नाम वाले इन्द्र हुए, और तुषिता देवता हुए, और ऊर्जस्तंभादिक ब्रह्मवादी लोग सप्त ऋषि हुए ॥ २० ॥

वेदशिरा ऋषि की तुषिता नाम वाली पत्नी हुई, तिसमें वेदशिरा ऋषि से विभु इस नाम से प्रख्यात एक देव उत्पन्न हुए ॥ २१ ॥

कुमार अवस्था से ब्रह्मचारी ऐसे उन विभु के व्रत (आचार) को धृतव्रत अट्ठासी हजार ऋषिओंने सीखा ॥ २२ ॥

हे राजन् ! तिसमें मनु प्रिय व्रत के पुत्र उत्तम हुए और पवन सृञ्जय, यज्ञ होत्रादिक उनके पुत्र हुए ॥ २३ ॥

और वसिष्ठ के पुत्र प्रमादादिक सप्त ऋषि हुए और सत्य, वेदश्रुत, भद्र, इत्यादिक देव हुए, सत्य जित नामक इन्द्र हुए ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सत्यजित इन्द्रस्य सखा सन् ॥ २६ ॥

उत्तमस्तृतीयो मनुस्तस्य भ्राता तामसश्चतुर्थो मनुः ॥ २७ ॥

त्रिशिख ईश्वर इन्द्रः ॥ २८ ॥

अन्यानपि विशिष्टपराक्रमान्देवानाह—देवा वैधृतय इति ॥२९॥

हरिरित्याहूतो व्याहृतः ग्रहात् ग्राहात् ॥ ३० ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

अवतारमाह—धर्मस्य सूनृताख्यायां भार्यायां भगवान्पुरुषोत्तमः सत्यसेनाख्यो जातः स सत्यव्रतादिभिः देवैः सहितः सत्यजितः इन्द्रस्य सखा भूत्वा यक्षराक्षसानवधीत् ॥ २५ ॥

तान् विशिनष्टि—स इति। अनृतमेव व्रतं येषां ते दुष्टं शीलं येषां ते दुःशीला तेच ते तान् असतः दुरात्मनः भूतानि द्रुह्यन्तीति तथा तान् ॥ २६ ॥

चतुर्थस्तु मनुरुत्तमस्य भ्राता प्रियव्रतसुतः स च नाम्ना तामस इति प्रसिद्धः वृषादयो दश तथाऽस्य तामसस्य मनोः सुताः ॥ २७ ॥

सत्यकादिसंज्ञा देवगणाः त्रिशिख ईश्वर इन्द्रः ॥ २८ ॥

अन्यानपि विशिष्टपराक्रमान्सुरानाह—देवा इति । हे नृप ! विधृतेस्तनया वैधृतय इति प्रसिद्धास्तामसमन्वतरे देवाः बभूवुः तान्विशिनष्टि—यैर्वैधृतिभिः स्वेन तेजसा स्वबुद्धिबलेन वेदा विधृताः कथम्भूताः कालेन नष्टा विप्लुता अध्येतृपरम्पराद्यभावादिति भावः । एवं मन्वादयः पञ्चोक्ताः ॥ २९ ॥

अवतारमाह—तत्रापीति । चतुर्थेऽपि मन्वन्तरे हरिमेधसोभर्तुर्हरिण्यां भार्यायां भगवान् हरिरित्याहूतः व्याहूतः ह्याख्यो जज्ञे प्रश्नावसरं प्रयच्छन् तं विशिनष्टि—येन हरिनाम्ना भगवता ग्रहान्मकरात् गजेन्द्रो मोचितः ॥ ३० ॥

---

(१) वृषाख्यातरिपाठः वीर० विजय० ॥

रजोवाच ।

बादरायण ! एतत्ते श्रोतुमिच्छामहे वयम् ।
हरिर्यथा गजपतिं ग्राहग्रस्तममूमुचत् ॥ ३१ ॥
तत्कथासु महत्पुण्यं धन्यं स्वस्त्ययनं शुभम् ।
यत्र यत्रोत्तमश्लोको भगवान् गीयते हरिः ॥ ३२ ॥

सूत उवाच ।

परीक्षितैवं स तु बादरायणिः प्रायोपविष्टेन कथासु चोदितः ।
उवाच विप्राः ! प्रतिनन्द्य पार्थिवं मुदा मुनीनां सदसि स्म शृण्वताम् ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायाम्

वैयासिक्यामष्टमस्कन्धे मन्वन्तराऽनुचरिते

प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सत्यजिनेन्द्रेण स्तुतः ॥ २६—२९ ॥

आहुतः आहूतः ॥ ३०—३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

देवा वैधृतय इत्यत्र मन्वन्तरे द्विविधा देवा अभवन्निति दर्शितम् ॥ २९ ॥

आहूतो व्याहृतः ॥ ३० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

त्रिशिखाऽभिधः ईश्वर इन्द्रः ॥ २८ ॥

अन्यानपि देवानाह—देवा वैधृतय इति ॥ २९ ॥

आहूतो व्याहृतः अह्वात आह्वात ॥ ३० ॥

भाषा टीका ।

और धर्म्म की सूनृता नामकी भार्या में भगवान् श्रीपुरुषोत्तम, सत्यसेन इस नाम से विख्यात होते हुए, सत्यव्रतों के सहित उत्पन्न हुए ॥ २५ ॥

और सत्यवादी, दुःशील, प्राणियों से द्रोह करने वाले खोटे यक्ष राक्षसों को, इन्द्र के सखा होकर मारडाले ॥ २६ ॥

चतुर्थ मनु उत्तम के भ्राता तामस नाम वाले हुए उन के पृथु, ख्याति, नर, केतु, इत्यादिक दश पुत्र हुए ॥ २७ ॥

सत्यक, हरि, वीर, इत्यादिक देवता हुए, त्रिशिख नाम वाले इन्द्र हुए और उसी तामस मन्वन्तर में ज्योतिर्धामादिक सप्त ऋषि हुए ॥ २८ ॥

हे राजन् ! तथा विधृति के पुत्र वैधृति नाम वाले देवता हुए, जिनोंने काल के प्रभाव से नष्ट होने वाले वेदों का अपने तेज के बल से उद्धार किया ॥ २९ ॥

तहां पर भी भगवान् हरिणी माता में हरिमेधा नामके पिता से उत्पन्न हुए, जिनोंने "हरिः" ऐसे उच्चारण करने पर गजेन्द्र को ग्राह के सङ्कट से छुडाया ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अमूमुचत् मोचयामास ॥ ३१ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

श्रवणेच्छायां हेतुः तत्कथासु तासु कथासु सा कथैव वा सुमहत्पुण्यम् पुण्यस्य विशेषणं धन्यमित्यादि ॥ ३२ ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे

श्रीधरस्वामिकृतभावार्थदीपिकायाम्

प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

लब्धावसरः पृच्छति राजा—बादरायण इति । हे बादराय-णे ! वयमेतच्छ्रोतुमिच्छामहे किन्तद्धर्याख्यो भगवान् यथा ग्राह-ग्रस्तं गजेन्द्रममूमुचत् मोचयामासेत्येतत् ॥ ३१ ॥

श्रवणेच्छायां हेतुं वदन् पृष्टं विशिनष्टि—तदिति । तन्मया पृष्टं गजेन्द्रमोक्षणरूपं हरेश्चरित्रं कथासु मध्ये महत्पुण्यं यद्वा तत्कथा गजप्रमोक्षणरूपा मया पृष्टा कथा सुमहत्पुण्यं महापुण्यावहं महच्छब्दस्याऽऽत्वाभाव आर्षः सामान्याऽभिप्रायेण प्रतिनिर्देशे नपुंसकनिर्देशः धन्यं धनावहं कृतार्थत्वावहं वा स्वस्त्ययनं शुभा-वहमत एव * महद्गुणवत्तमं पुण्यत्वादिकं श्रवणपठनद्वारेत्यवगं-तव्यं पुण्यत्वादौ हेतुमाह—यत्रेति । यासु यासु कथासु हरिरा-श्रिताघहरो भगवान् गीयते सा सा कथा पुण्यादिगुणयुक्ताहीत्यर्थः । यद्वा यत्र यत्र कथायां हरिर्गीयते सा सा पुण्यादिगुण-युक्ताऽतो गजेन्द्रमोक्षकथायामपि हरिगायन एवेति साऽपि पुण्यावहा तस्तामपि शुश्रूषितां कथयेत्यर्थः ॥ ३२ ॥

एवमापृष्टगजेन्द्रमोक्षकथः श्रीशुकस्तां कथायामासेत्याह, सूतः—परीक्षितेति । हे विप्राः ! प्रायोपाविष्टेन परीक्षिता राज्ञा कथासु हरिकथाकथने चोदितः प्रवर्तितः स बादरायणिर्व्यासपुत्रः एवमित्थं पार्थिवं पृष्टइति शेषः परीक्षितं प्रतिनन्द्याऽहो साधुपृष्ट-मित्यभिनंद्य सदसि सभायां मुनीनां शृण्वतां स तामुवाच पृष्टां कथामिति शेषः ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

प्रथमोऽध्यायः ॥ १ ॥

* महद इति मूलपाठः ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हे विप्राः ! इति सूतः शौनकादीन् सम्बोधयति ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

प्रथमोऽध्यायः ॥ १ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अमूमुचत् गजेन्द्रं मोचयामस ॥ ३१ ॥

श्रवणेच्छायांहेतुः तत्कथासु तासु कथासु साकथैव वा सुमहत्पुण्यं पुण्यस्य विशेषणं धन्यमित्यादि ॥ ३२ ॥ ३३ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

अष्टमे प्रथमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यथा अमूमुचत् मोचयामास एतत्ते त्वत्तः श्रोतुमिच्छामहे ॥ ३१—३३ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

प्रथमाऽध्यायार्थप्रकाशः ॥ १ ॥

भाषा टीका ।

क्यों कि ? श्रीहरिकथाओं में यह गजेन्द्र मोक्षका आख्यान बड़ा पुण्य रूप है, और जहां जहां भगवान श्रीहरि गाये जावें वह सब ही धन्य और कल्याण का घर और शुभ है, ॥ ३२ ॥

सूत उवाच ।

सूतजी बोले, कि—हे शौनकादि हो ! हे विप्रो ! गंगा तट पर प्रायोपवेश लेने वाले महाराज परीक्षित ने जब श्रीव्यास नन्दन से ऐसा प्रश्न किया, तब तो उस सभा में मुनिलोगों के सुनते २ श्रीशुकदेवजी राजा को अभिनन्दन करके बोले ॥ ३३ ॥

इति श्रीमद्भागवत महापुराण अष्टम स्कन्ध में

प्रथम अध्याय की भागवताचार्य कृत

भाषा टीका समाप्त ॥ १ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे प्रथमोऽध्यायः ॥ १ ॥

॥ द्वितीयोऽध्यायः ॥

श्रीशुक उवाच ।

आसीद्गिरिवरो राजंस्त्रिकूट इति विश्रुतः ।
क्षीरोदेनावृतः श्रीमान् योजनायुतमुच्छ्रितः ॥ १ ॥
तावता विस्तृतः पर्यक् त्रिभिः शृङ्गैः पयोनिधिम् ।
दिशः खं रोचयन्नास्ते रौप्यायसहिरण्मयैः ॥ २ ॥
अन्यैश्च ककुभः सर्वा रत्नधातुविचित्रितैः ।
नानाद्रुमलतागुल्मैर्निर्घोषैर्निर्झराम्भसाम् ॥ ३ ॥
सचाऽवनिज्यमानाङ्घ्रिः समन्तात्पय ऊर्म्मिभिः ।
करोति श्यामलां भूमिं हरिन्मरकताश्मभिः ॥ ४ ॥
सिद्धचारणगन्धर्वविद्याधरमहोरगैः ।
किन्नरैरप्सरोभिश्च क्रीडद्भिर्जुष्ट(१)कन्दरः ॥ ५ ॥
यत्र सङ्गीतसन्नादैर्नदद्गुहममर्षया ।
अभिगर्जन्ति हरयः श्लाघिनः परशङ्कया ॥ ६ ॥
नानाऽरण्यपशुव्रातसङ्कुलद्रोण्यलङ्कृतः ।
चित्रद्रुमसुरोद्यानकलकण्ठ विहङ्गमः ॥ ७ ॥
सरित्सरोभिरच्छोदैः पुलिनैर्मणिवालुकैः ।
देवस्त्रीमज्जनामोदसौरभाम्ब्वनिलैर्युतः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तुर्यें मन्वन्तरे प्रोक्तं गजेन्द्रस्य विमोक्षणम् ।
द्वितीयादित्रिभिस्तत्तु विस्तरेणोपवर्ण्यते ॥ १ ॥
द्वितीये तु गजेन्द्रस्य गजीभिः क्रीडतो जले ।
दैवाद्ग्राहगृहीतस्य हरिस्मृतिरुदीर्यते ॥ २ ॥

आसीदस्ति ॥ १ ॥

तावता योजनाऽयुतेन पर्यक् परितः त्रिकूटसमाख्याबीजमाह त्रिभिः—शृङ्गैर्मुख्यैः ॥ २ ॥

अन्यैश्च शृङ्गैर्निर्झराम्भसां निर्घोषैश्च ककुभः सर्वा रोचयन्नास्त इति पूर्वेणैवान्वयः । कथम्भूतैः शृङ्गैः रत्नैर्धातुभिश्च विचित्रितैर्नानाविधानां द्रुमलतानां गुल्मा येषु तैः ॥ ३ ॥

पयस ऊर्म्मिभिः समन्तादवनिज्यमाना अङ्घ्रयो मूलप्रान्ता यस्य हरिद्भिः पलाशवर्णैः ॥ ४ ॥ ५ ॥

किन्नरादीनां सङ्गीतसन्नादैर्नदन्त्यो गुहा यस्मिन्प्रदेशे तमभिगर्जन्ति हरयः सिंहाः अमर्षया असहनेन ॥ ६ ॥

नाना ये आरण्याः पशवस्तेषां व्रातैः सङ्कुलाभिर्द्रोणीभिरलङ्कृत आस्ते किञ्च चित्रा द्रुमा येषु तेषु सुरोद्यानेषु कलकण्ठाः मधुरस्वना विहङ्गमा यस्मिन् ॥ ७ ॥

किञ्च स्वच्छोदकैः सरित्सरोभिर्युतः मणय इव वालुका येषु तैः पुलिनैश्च युतः देवस्त्रीणां मज्जनेन य आमोदस्तेन सौरभयुक्तान्यम्बून्यनिलाश्च तैश्च युत आस्ते ॥ ८ ॥

---

(१) द्रोण्याय इति पाठः वीर० ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उक्तमेवाह—आसीदित्यादिनाऽध्यायत्रयेण । ग्राहग्रहणात्प्राक्तनीं गजेन्द्रस्यावस्थां वक्तुं तावत्तदावासस्थानं त्रिकूटाचलं वर्णयति-आसीदिति । हे राजन् ! त्रिकूट इति प्रसिद्धः कश्चित् गिरिश्रेष्ठः आसीत् स च क्षीरसमुद्रेणावृतः क्षीराब्धिद्वीपस्थ इत्यर्थः । श्रीमान् शोभावान् रत्नादिसमृद्धिमान्वा योजनायुतोन्नतः ॥ १ ॥

परितस्तावता योजनायुतेन विस्तृतश्च त्रिकूटसमाख्यावीजमाह—रौप्यायसहिरण्मयैस्त्रिभिः शृङ्गैर्मुख्यैः पयोनिधिं दिशश्च रोचयन्व्याप्यास्ते ॥ २ ॥

तथा रत्नैर्धातुभिर्गैरिकादिभिश्च विचित्रैरन्यैश्च शृङ्गैः ककुभो दिशः रोचयन्नास्त इति पूर्वेणान्वयः नानाविधैर्द्रुमैर्लतानां गुल्मैः लताभिः गुल्मैश्चेति वा निर्झराम्भसां गिरिनदीजलानां घोषैश्च रोचयन्नास्त इति पूर्वेणान्वयः ॥ ३ ॥

स च त्रिकूटः पयोधेः क्षीराब्धेरूर्मिभिः परितः आवनिज्यमाना विशोध्यमाना अङ्घ्रयः प्रत्यन्तपर्वता यस्य । सदेति पाठे सदा नित्यमवनिज्यमानाङ्घ्रिरित्यर्थः । हरिद्भिः पलाशवर्णैर्मरकतात्मकैरश्मभिः पाषाणैः श्यामलां भूमिं करोति बिभर्तीत्यर्थः ॥ ४ ॥

क्रीडद्भिः सिद्धादिभिः जुष्टा द्रोण्यः यस्य कन्दरेति पाठान्तरं तदा सिद्धादिभिः जुष्टा सेविता कन्दरा शिखरमूलभूमिर्यस्येत्यर्थः । किन्नरादीनां सङ्गीतसन्नादैर्नदन्त्यो गुहा यस्मिन् प्रदेशे तमभिगर्जन्ति प्रतिगर्जन्ति हरयः सिंहाः कथम्भूताः परशङ्कया सिंहान्तरागमनशङ्कया निमित्तभूतया अमर्षया असहनेन श्लाघिनः स्ववीर्यश्लाघायुक्ताः ॥ ५ ॥ ६ ॥

नानाविधा ये आरण्याः अरण्यप्रभवाः पशवो महिषादयस्तेषां व्रातैः सङ्घैः सङ्कुलाभिः व्याप्ताभिर्द्रोणीभिरलङ्कृतोऽस्ति किंच चित्रा द्रुमा येषु तेषु देवोद्यानवनेषु कलकण्ठा मधुरस्वराः विहङ्गमा यस्मिन् ॥ ७ ॥

किञ्च सरितश्च सरांसि च तैरच्छोदैः निर्मलोदकयुक्तैर्मणय एव वालुका येषु तैः पुलिनैश्च देवस्त्रीणां मज्जनेन य आमोदस्तेन सौरभेण युक्तान्यम्बून्यनिलाश्च तैश्च युक्तः आस्ते ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अत्र शरण्येषु शश्वदप्रतिहतशरण्यः श्रीभगवानेवेति दर्शनाय गजेन्द्रविषय इतिहासः कथ्यते । क्षीरोदेन क्षीरसमुद्रेण पर्यक् परिवृतः ॥ १ ॥

रौप्यायसहिरण्मयैः रजतायोहेममयैस्त्रिभिः शृङ्गैः पयोनिधिं दिशश्च रोचयन् विद्योतयन् ॥ २ ॥

अन्यैर्नानाधातुमयैः शृङ्गैश्च रोचयन्निति शेषः ॥ ३ ॥

निर्णिज्यमानाङ्घ्रिः प्रक्षाल्यमानप्रत्यन्तपर्वतः शुभैरन्याश्मनाविद्धैर्मरकताश्मभिरिन्द्रनीलरत्नैर्भूमिं श्यामलां नीलां करोतीति ॥ ४ ॥

यश्च सिद्धादिभिर्निलीनिपेवितगुहः ॥ ५ ॥

किन्नरादिसङ्गीतसन्नादैः नदद्गुहं प्रतिध्वनितगुहं स्थलमभ्युपेत्य प्रतिगजशंकयाऽमर्षया असह्यमानबुद्ध्या श्लाघिनः प्रशस्ताः हरयः सिंहा गर्जन्ति ॥ ६ ॥

चित्रा द्रुमा येषु तथा तानि च सुराणामुद्यानानि चित्रद्रुमसुरोद्यानानि तेषु कलकण्ठाख्याः विहङ्गमा यत्र स तथा ॥ ७ ॥

अच्छोदैर्निर्मलजलैर्मणिगणलक्षणानि वालुकानि येषु तानि तथा तैः देवस्त्रीणां मज्जनादुत्पन्नो य आमोदः तस्मादुत्कृष्टं यत्सौरभं परिमललक्षणं तेनाक्ता भाविता अनिला यैस्ते "आमोदोऽथ परिमलः" इत्यमरः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १—१९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

त्रिकूटतत्रस्थोद्यानसरोवर्णनविश्रुतेः ।
द्वितीये ऽत्र गजेन्द्रेण ग्राहार्त्तेन हरिः स्मृतः ॥

आसीत् अस्ति ॥ १ ॥

पर्यक् परितः तावता योजनायुतेनैव त्रिकूटसमाख्याया बीजमाह—त्रिभिः । मुख्यैः शृङ्गैः दिशः ऊर्द्ध्वगता एव अन्यैः शृङ्गैः ककुभः सर्वाः अप्राचेव पर्यक् दिशो रोचयन्नास्त इति पूर्वेणान्वयः निर्घोषैर्दिशां रोचना तासु प्रतिध्वनिसमर्पणादिति ज्ञेयम् ॥ २ ॥

पयस ऊर्मिभिः समन्तादवनिज्यमाना अंघ्रयो मूलप्रान्ता यस्य सः हरित्सु अष्टदिक्षु स्थितैर्मरकताश्मभिर्मध्यवर्त्तिनीं भूमिं दूर्वादलश्यामलां करोति ॥ ३—४ ॥

किन्नरादीनां सङ्गीतसन्नादैर्नदन्त्यो गुहा यस्मिन् तं प्रदेशं अभिलक्षीकृत्य अमर्षया असहनेन परशङ्कया सिंहान्तरशङ्कया गर्जन्ति श्लाघिनः कत्थमानाः ॥ ५—६ ॥

चित्रा द्रुमा येषु सुरोद्यानेषु कलकण्ठा विहङ्गमा यत्र स आस्ते ॥ ७ ॥

देवस्त्रीणां मज्जनेन च आमोदस्तेन सौरभयुक्तान्यंबूनि अनिलाश्च तैर्युतः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तृतीयादित्रिभिर्गजेन्द्रमोक्षणमुच्यते, तत्र द्वितीये ग्राहगृहीतस्य गजेन्द्रस्य हरिः स्मृतिर्जातेत्युच्यते विश्रुतो विख्यातः आसीत् ॥ १ ॥

तावता योजनायुतेन पर्यक् परितो विस्तृतः रौप्यायसहिरण्मयैः रजतायस्सुवर्णप्रचुरैः त्रिभिः त्रिकूटसमाख्यापादकैः मुख्यैः शृङ्गैः दिशः खञ्च रोचयन्नास्ते ॥ २ ॥

तस्य द्रोण्यां भगवतो वरुणस्य महात्मनः ।
उद्यानमृतुमन्नाम आक्रीडं सुरयोषिताम् ॥ ९ ॥
सर्वतोऽलङ्कृतं दिव्यैर्नित्यं पुष्पफलद्रुमैः ।
मन्दारैः पारिजातैश्च पाटलाऽशोकचम्पकैः ॥ १० ॥
चूतैः प्रियालैः पनसैराम्रैराम्रातकैरपि ।
क्रमुकैर्नालिकेलैश्च खर्जूरैर्बीजपूरकैः ॥ ११ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अन्यैश्च शृङ्गैः निर्झरांभसां निर्घोषैश्च सर्वाः ककुभः रोच-
न् आस्ते इति पूर्वेण सम्बन्धः । कीदृशैः रत्नैः धातुभिश्च
विचित्रितैः नानाविधानां द्रुमलतानां गुल्मा येषु तैः ॥ ३ ॥

पय ऊर्मिभिः क्षीरतरङ्गैः समन्तादवनिज्यमानाः प्रक्षाल्यमानाः
अङ्घ्रयो यस्य सः हरिद्भिः पलाशवर्णैः मरकताश्मभिः मरकत-
ामकपाषाणैः भूमिं श्यामलां करोति ॥ ४ ॥

क्रीडद्भिः सिद्धादिभिः जुष्टा सेविता कन्दरा यस्य सः ॥ ५ ॥

यत्र त्रिकूटे किन्नराणां सङ्गीतसन्नादैर्नदन्त्यो गुहा यत्र तं
देशं अभिश्लाघिनः स्वबलख्यापकाः परशङ्कया सिंहान्तरप्रवे-
शशङ्कया अत एवामर्षया असहनेन हरयो गर्जन्ति ॥ ६ ॥

नानाविधानामारण्यानां व्रातैः यूथैः संकुलाभिर्द्रोणीभिरल-
ङ्कृतः चित्रद्रुमेषु सुरोद्यानेषु कलकण्ठाः मधुरस्वनकण्ठाः विहं-
गमा यत्र स आस्ते ॥ ७ ॥

अच्छोदैर्निर्मलजलयुक्तैः सरितश्च सरांसि च तैः मणय
एव वालुकाः येषु तैः पुलिनैश्च देवस्त्रीमज्जनेन च आमोदस्त-
सौरभयुक्तान्यस्वून्यनिलाश्च तैश्च युक्त आस्ते ॥ ८ ॥

———

भाषा टीका ।

श्रीरुक्मिणीमधुसूदनाभ्यां नमः ।

श्रीशुक उवाच ।

श्रीशुकदेवजी बोले, कि-हे राजन्! एक त्रिकूट इस नाम
विख्यात पर्वतों में श्रेष्ठ पर्वत है, और वह चारों तरफ
क्षीरोद (दुग्ध के समुद्र) से घिरा हुआ, और बड़ा
आभा वाला तथा दश हजार योजन ऊंचा है ॥ १ ॥

और उतने ही प्रमाण का चारोंतरफ से विस्तार वाला
और चांदी, लोहा, और सोने के ऐसे तीन शिखरों से
दश दिशायें और आकाश को प्रकाशित कर रहा है ॥२॥

और रत्न धातुओं से चित्र विचित्र ऐसे अन्य शिखरों से
भी दिशाओं को दीप्त करता हुआ है, और उन शिखरों में
भी नाना प्रकार के लता, गुल्म, शोभा दे रहे हैं, और
झरणाओं के जलों के निर्घोष (शब्द) हो रहे हैं ॥ ३ ॥

फिर वह पर्वत चारों तरफ के जल के तरङ्गों की टक्क-
रों से अपने चरणों को धुवा रहा है, और हरित वर्ण
के ऐसे मरकत मणिओं के खण्डों से भूमि को श्याम कर
रहा है ॥ ४ ॥

और बडे २ सिद्ध लोग, चारण, गन्धर्व, विद्याधर, महो-
रग, किन्नर, और अप्सरा लोग जिस की कन्दराओं का
सेवन करते हैं, अर्थात् वहां रहते हैं ॥ ५ ॥

और जहां पर सङ्गीतों के नादों से गुहाओं में प्रति-
ध्वनि होनेपर बडे बडे श्लाघावाले सिंह लोग, शत्रुकी शङ्का से
चारों तरफ से गर्जते हैं ॥ ६ ॥

और नाना प्रकार के आरण्य (जङ्गली) पशुओं के झुंडों
से व्याप्त ऐसी गुहाओं से अलंकृत होरहा है, और चित्र
विचित्र द्रुम जिनों में ऐसे देवताओं के बाग बगीचा
जिसमें लगरहे हैं, जिन बागबगीचाओं में मधुर और सुरीले
कण्ठवाले पक्षिगण बोल रहे हैं ॥ ७ ॥

जिस में नाना प्रकार की स्वच्छ जल वाली नदियें और तालाब
शोभा दे रहे हैं, कि जिनके पुलिनों में मणिओं की वालु-
का है । और देवस्त्रियों के स्नान से अति सुगन्धित जल
के गन्ध को लिये हुए जहां पवन चल रहा है ॥ ८ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्य द्रोण्यां वरुणस्योद्यानमास्ते ॥ ९ ॥

गिरिवनादिसर्वं ध्येयमिति वक्ष्यत्यतो गिरिमुपवर्ण्य वनं वर्ण-
यति—सर्वतोऽलङ्कृतमिति । पुनर्गिरिं वर्णयति—मन्दारैरिति
चतुर्भिः, । मन्दारादिभिः वृतइत्यन्वयः ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥

मधूकैः सालतालैश्च तमालैरसनाऽर्जुनैः ।
अरिष्टोदुम्बरप्लक्षैर्वटैः किंशुकचन्दनैः ॥ १२ ॥
पिचुमन्दैः कोविदारैः सरलैः सुरदारुभिः ।
द्राक्षेक्षुरम्भाजम्बूभिर्बदर्यक्षाभयामलैः ॥ १३ ॥
बिल्वैः कपित्थैर्जम्बीरैर्वृतो भल्लातकादिभिः ।
तस्मिन्सरः सुविपुलं लसत्काञ्चनपङ्कजम् ॥ १४ ॥
कुमुदोत्पलकल्हारशतपत्रश्रियोर्जितम् ।
मत्तषट्पदनिर्घुष्टं शकुन्तैश्च कलस्वनैः ॥ १५ ॥
हंसकारण्डवाकीर्णं चक्राह्वैः सारसैरपि ।
जलकुक्कुटकोयष्टिदात्यूह(१)कुलकूजितम् ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्मिन् गिरौ सर आस्ते तद्वर्णयति । सुविपुलमित्यादि सार्द्धैः पञ्चभिः । लसन्ति काञ्चनपङ्कजानि यस्मिन् ॥ १४ ॥

कुमुदादीनां श्रिया ऊर्जितं कलः स्वनो येषां तैः शकुन्तैश्च निर्घुष्टम् ॥ १५ ॥

चक्राह्वैः सारसैरप्याकीर्णम् जलकुक्कुटादीनां कुलैः कूजितम् ॥ १६ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

"ये मां त्वां च सरश्चेदम्"इत्यादिना गिर्यादिवर्णनं सर्वेन्ध्येयमिति वक्ष्यति भगवानतो गिरिसुपवर्ण्य वनं वर्णयति—तस्योक्तविधस्य त्रिकूटस्य द्रोण्यां महात्मनो वरुणस्य ऋतुमदाख्यम् उद्यानवनमस्ति कथम्भूतं सुरयोषितामाक्रीडं विहारस्थानम् ॥ ९ ॥

नित्यं फलानि पुष्पाणि च येषां तैर्द्रुमैः परितोऽलङ्कृतं द्रुमानेव कांश्चिद्दर्शयति-मन्दारैरिति । मन्दारादिभिर्वृतः वनप्रदेशापेक्षया पुंल्लिङ्गनिर्देशः । तस्मिन्नुद्याने सरोऽस्ति कथम्भूतं सुविपुलं विस्तृतं लसन्ति काञ्चनमयानि पद्मानि यस्मिन् ॥ १०—१४ ॥

कुमुदादीनां श्रियोर्जितं समृद्धं मत्तैर्मधुपानमत्तैः षट्पदैः भृङ्गैः कलो मधुरः स्वनो येषां तैः शकुन्तैः पक्षिभिश्च निर्घुष्टं ध्वनितम् ॥ १५ ॥

हंसैः कारण्डवैश्चाकीर्णं सङ्कुलं चक्रवाकैः सारसैरप्याकीर्णं समस्तेनाप्याकीर्णपदेन प्रधानत्वात्सापेक्षस्याप्यन्वयः जलकुक्कुटादीनां कुलैः कूजितं कलेति पाठान्तरं तत्र कलं मधुरं भवति यथा तथा कूजितम् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आक्रीडं क्रीडारङ्गम् ॥ ९ ॥

चूतोऽङ्गनाप्रियः प्रियालः स्फुटोनाम वृक्षः द्रुमिलंद चूतो वा आम्रः पिकोदरो माकन्दनामा स चूतः आम्र आम्रवृक्षः सालः सर्जविशेषः अरिष्टो बृहत्पत्रः पिचुमन्दः किंशुकः पलाशः ॥ १०—१२ ॥

पिचुमन्दः ह्रस्वपत्रः रोमशनामा वा सरलः जीरवृक्षः लुर्वा ॥ १३—१७ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ऋतुमन्नाम उद्यानमास्ते ॥ ९ ॥

मन्दारादिभिर्वृत इति पुंल्लिङ्गनिर्देशेन गिरिवर्णने व्या- माने तस्मिन् सर इत्यत्र तत्पदेन प्रक्रान्ते गिरावेवोपमाने सरसि गजेन्द्रावगाहनादिकथायां सत्याम् ऋतुमन्नाम्नो उ- द्यानस्य वर्णनमप्रस्तुतत्वाद्व्यर्थं स्यात्तस्मात् वृत इत्यादि तमित्युद्यानविशेषणमेव व्याख्येयम् ॥ १०—१६ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

"ये मां त्वाञ्च सरश्चेदम्"इत्यादिना गिरिवनादिकं सर्वं ...यमिति वनमास्ते ॥ ९ ॥

पुनर्गिरं वर्णयति—मन्दारैरिति, चतुर्भिः । मन्दारादि... इति चतुर्णामन्वयः ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥

(१) कलमिति पाठान्तरम् ।

मत्स्यकच्छपसञ्चारचलत्पद्मरजः पयः।
कदम्बवेतसनलनीपवञ्जुलकैर्वृतम् ॥ १७ ॥
कुन्दैः कुरवकाशोकैः शिरीषैः कुटजेङ्गुदैः।
कुब्जकैः स्वर्णयूथीभिर्नागपुन्नागजातिभिः ॥ १८ ॥
मल्लिकाशतपत्रैश्च माधवीजालकादिभिः।
शोभितं तीरजैश्चान्यैर्नित्यर्तुभिरलन्द्रुमैः ॥ १९ ॥

तत्रैकदा तद्गिरिकाननाश्रयः करेणुभिर्वारणयूथपश्चरन्।
*सकण्टकान्कीचकवेणुवेत्रवद्विशालगुल्मं प्ररुजन्वनस्पतीन् ॥ २० ॥

यद्गन्धमात्राद्धरयो गजेन्द्रा व्याघ्रादयो व्यालमृगाः सखड्गाः।
महोरगाश्चापि भयाद्द्रवन्ति सगौरकृष्णाः शरभाश्चमर्यः ॥ २१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

तस्मिन्सरो वर्णयति—तस्मिन्निति, सार्द्धैः पञ्चभिः। तस्मिन् गिरौ सुविपुलं सर आसीत् लसन्ति काञ्चनपद्मानि यस्मिन् ॥ १४ ॥

कुमुदानां श्रिया शोभया ऊर्जितं समृद्धम् मत्तैः षट्पदैः भ्रमरैः कलो मधुरः स्वनो येषां तैः शकुन्तैश्च निर्घुष्टं नादितम् ॥ १५ ॥

हंसैः कारण्डवैराकीर्णं चक्राह्वैः सारसैरप्याकीर्णम् जलकुक्कुटादीनां कुलैः समूहैः कूजितम् ॥ १६ ॥

भाषा टीका।

उस पर्वत की गुहा में महात्मा भगवान् वरुण का भी एक ऋतुमान् नामवाला बगीचा है, वह भी एक देवस्त्रियोंके खेलने का स्थान है ॥ ९ ॥

और सदा दिव्य पुष्प फल वाले द्रुमों से अलंकृत रहता है वे द्रुम कौन से हैं, कि—मंदार, पारिजात, पाटल, अशोक, चंपक, ॥ १० ॥

चूत, (यह एक आम की जाति है) प्रियाल, पनस, आम्र, आम्रातक, क्रमुक, नारिकेल, खर्जूर, बीजपूर, ॥ ११ ॥

मधुक, साल, ताल, तमाल, असन, अर्जुन, अरिष्ट, उदुम्बर, प्लक्ष, वट, किंशुक, चन्दन, ॥ १२ ॥

पिचुमन्द, कोविदार, सरल, सुरदारु द्राक्षा, इक्षु, रंभा, जम्बू, बदरी, अक्षामय, आमलक, ॥ १३ ॥

बिल्व, कपित्थ, जंबीर, भल्लातक, इत्यादि द्रुमो से व्याप्त हो रहा है उस पर्वत, के विषै एक बडा विशाल सरोवर है, जिस में कांचन के कमल खिले हुए हैं, ॥ १४ ॥

और कुमुद, उत्पल, कल्हार, शतपत्र, इत्यादि जाति के कमलों की शोभा से सुशोभित हो रहा है और मत्त भ्रमरों की गुञ्जार से तथा मधुर स्वर पक्षियों के कूजने से व्याप्त हो रहा है ॥ १५ ॥

तथा हंस, कारंडव, चक्राह्व, और सारस पक्षियों से भी व्याप्त हो रहा है, और जल कुक्कुट, कोयष्टि, दात्यूह, इन पक्षियों के समूहों से कूज रहा है ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

मत्स्यानां कच्छपानां च सञ्चारेण चलतां पद्मानां रजसा युक्तं पयो यस्मिंस्तत् ॥ १७—१८ ॥

नित्यमृतवः फलपुष्पादिसंपत्तिहेतवो येषां तैरलं शोभितम् ॥ १९ ॥

तत्रैवं सत्येकदा तद्गिरिकाननाश्रयो वारणयूथपः करेणुभिश्चरंस्तृषार्दितेन स्वयूथेन वृतः सरोवरस्याभ्याशं समीपमगमादिति पञ्चमेनान्वयः, किंकुर्वन् कीचकवेणुवेत्रवन्तं विशालं गुल्मं लतादिसन्दर्भं वनस्पतींश्च प्ररुजन्प्रभञ्जन् ॥ २० ॥

कथम्भूतः यस्य गन्धमात्रद्धरयः सिंहा गजेन्द्रादयश्च भयाद्द्रवन्ति पलायन्ते ॥ २१ ॥

* सकण्टकमिति, वीर० विज०।

वृकावराहामहिषर्क्षशल्या गोपुच्छसाला वृकमर्कटाश्च ।
अन्यत्र क्षुद्रा हरिणाः शशादयश्चरन्त्यभीता यदनुग्रहेण ॥ २२ ॥
स घर्मतप्तः करिभिः करेणुभिर्वृतो मदच्युत्कलभैरनुद्रुतः ।
गिरिं गरिम्णा परितः प्रकम्पयन्निषेव्यमाणोऽलिकुलैर्मदाशनैः ॥ २३ ॥
सरोऽनिलं पङ्कजरेणुरूषितं जिघ्रन्विदूरान्मदविह्वलेक्षणः ।
वृतः स्वयूथेन तृषार्दितेन तत्सरोवराभ्याशमथागमद्द्रुतम् ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वृकादयः क्षुद्रा अल्पाः प्राणिनोऽन्यत्र तद्दृष्टिपथं त्यक्त्वा चरन्ति ॥ २२ ॥

पुनः कीदृशः घर्मतप्तः मदच्युन्मदस्रावी मदमश्नन्तीति तथा तैः ॥ २३ ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

मत्स्यानां कच्छपानां च सञ्चारेण च चलतां चलानां पद्मानां रजसा युक्तं पयो जलं यस्मिन्कदम्बादिभिर्युतम् ॥ १७॥

कुन्दादिभिः शोभितम् इत्युत्तरेणान्वयः ॥ १८ ॥

नित्यमृतवः फलपुष्पादिसम्पत्तिहेतवो येषां तैरन्यैश्च तीरजैः द्रुमैरलमलङ्कृतमलमत्यर्थं शोभितमितिवाऽन्वयः ॥ १९ ॥

तत्रैवं स्थिते एकदा तद्गिरिकाननाश्रयः वारणयूथपः गजेन्द्रः करेणुभिर्गजीभिः चरन् तृषार्दितेन स्वयूथेन वृतस्तस्य सरोवरस्याभ्याशं समीपमगमदिति पञ्चमेनान्वयः । किंकुर्वन् कण्टकैः सहितं कीचकवेणुवेत्रवन्तं विशालं गुल्मं लतादिसन्दर्भं वनस्पतींश्च प्ररुजन्प्रभञ्जन् ॥ २० ॥

तमेव विशिनष्टि—यस्य गजेन्द्रस्य गन्धमात्राद्घ्राणप्रसारमात्रात् सिंहप्रभृतयः मृगाः प्रतिपक्षिणो गजाश्च भयात् पलायन्ते ॥ २१ ॥

अन्ये क्षुद्रा हरिणादयो मृगास्तु यस्य गजेन्द्रस्यानुग्रहेणानुज्ञानेनाऽभीता निर्भयाश्चरन्ति चेरुः ॥ २२ ॥

स गजेन्द्रो घर्मेणातपेन तप्तः मदस्राविकरिभिः करेणुभिः कलभैश्चानुद्रुतः मदस्राविभिः कलभैश्चानुद्रुत इति वा गरिम्णा स्थौल्येन गिरिं प्रकम्पयन् मदमश्नन्तीति तथा तैरलिकुलैर्निषेव्यमाणः ॥ २३ ॥

सरसः सम्बन्धिनमनिलं वायुं पङ्कजरेणुभिरूषितं व्याप्तं विदूरादेव जिघ्रन्मदेन विह्वले चलिते ईक्षणे यस्य तृषा पिपासयाऽर्दितेन पीडितेन स्वयूथेन वृतः तत्सरोवराभ्याशं द्रुतं सत्वरमगात् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अशोकः सितरक्तपुष्पभेदेन द्विविधः कुरवकः कुटजः कुर… भ्रमरीपुष्पं स्वर्णीकृतमाद्यः कमलात्पृथक् ॥ १८ ॥

शतपत्रं जालकं मत्कुलिका लता "अलन्द्रुमः स विज्ञे… नित्यपुष्पफलो द्रुमः" इत्यभिधानम्. तस्मिन्नुद्याने सरोवरोऽस्ती… न्वयः । तत्रोद्याने तत्सरोवराभ्याशमाद्रवदित्यन्वयः ॥ १९ ॥

सकन्टकं विशालगुल्मं वनस्पतींश्च प्ररुजन् ॥ २० ॥

हरिप्रभृतिमर्कटान्ताः यस्य गन्धमात्रात् अद्भुतभयात् द्र… न्तीत्यन्वयः । खड्गो मृगविशेषः व्यालमृगः सर्पाकारो मृगः … भ्योऽन्ये ह्रस्वक्षुद्रा हरिणादयो मृगविशेषा यदनुग्रहेणाभीता… श्चरन्ति सिंहादिभयराहित्यात् ॥ २१—२३ ॥

सरःसम्बन्धिवायुम् ॥ २४—२६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत्रैकदेति पञ्चकम् ॥ २०—३३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तस्मिन्नुद्याने सर आस्ते तद्वर्णयति–सार्द्धैः पञ्चभिः। शकुन्… पक्षिभिः सहितम् मत्स्यानां कच्छपानां च सञ्चारेण चलतां पद्मा… रजसा युक्तं पयो यस्मिंस्तत् नित्यमृतवः फलपुष्पादिसम्पा… नार्थं येषु तैः ॥ १७—१९ ॥

तत्रैकदा वारणयूथपः अगमदिति पञ्चमेनान्वयः । किङ्कुर्व… करेणुभिश्चरन् स्वभक्ष्यं भुञ्जानः कीचकवेत्रवन्तं विशालं गु… प्ररुजन् प्रभञ्जन् ॥ २० ॥

हरयः सिंहाः ॥ २१ ॥

यदनुग्रहेण तु वृकाद्याः क्षुद्रा अपि चरन्ति किन्त्वन्… दृष्टिपथं त्यक्त्वा ॥ २२-२४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मत्स्यकच्छपसञ्चारेण चलतां पद्मानां रजसा युक्तं"… यत्र तत् कदम्बादिभिर्वृतमावेष्टितम् ॥ १७ ॥

कुन्दादिभिरलं शोभितमित्युत्तरेण सम्बन्धः ॥ १८ ॥

विगाह्य तस्मिन्नमृताम्बु निर्मलं हेमारविन्दोत्पलरेणुवासितम् ।
पपौ निकामं निजपुष्करोद्धृतं ह्यात्मानमद्भिः स्नपयन्गतक्लमः ॥ २५ ॥
स्वपुष्करेणोद्धृतशीकराम्बुभिर्निपाययन् संस्नपयन्यथा गृही ।
*घृणी करेणूः कलभांश्च दुर्मदो नाचष्ट कृच्छ्रं कृपणोऽजमायया ॥ २६ ॥
तं तत्र कश्चिन्नृप दैवचोदितो ग्राहो बलीयांश्चरणे रुषाऽग्रहीत् ।
यदृच्छयैवं व्यसनं गतो गजो यथाबलं सोऽतिबलो विचक्रमे ॥ २७ ॥
तथातुरं यूथपतिं करेणवो विकृष्यमाणं तरसा बलीयसा ।
विचुक्रुशुर्दीनधियोऽपरे गजाः पार्ष्णिग्रहास्तारयितुं न चाशकन् ॥ २८ ॥
नियुध्यतोरेवमिभेन्द्रनक्रयोर्विकर्षतोरन्तरतो बहिर्मिथः ।
समाः सहस्रं व्यगमन्महीपते ! सप्राणयोश्चित्रममंसतामराः ॥ २९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नित्यमृतुः फलपुष्पादिसम्पत्तिसमयो येषां तैः ॥ १९ ॥

यत्रैवं स्थिते एकदा वारणयूथपः सरोवराभ्याशमगमत् इति पञ्चमेनान्वयः । किं कुर्वन् करेणुभिर्गजीभिश्चरन् कीचकवेणुवेत्रवन्तं विशालं विपुलं गुल्मं लतादिसमूहं सकण्टकान् वनस्पतींश्च प्ररुजन् प्रभञ्जन् ॥ २० ॥

कीदृशः यस्य गन्धमात्रात् हरिप्रभृतयः भयाद्द्रवन्ति पलायन्ते तत्र व्यालाः दुष्टगजाः दुष्टसर्पाश्च "व्यालोदुष्टगजे सर्पे" इति मेदिनीकारकोशात् ॥ २१ ॥

क्षुद्राः अल्पप्राणिनो वृकादयः अन्यत्र गजप्रातिकूल्यासम्पादके प्रदेशे यस्यानुग्रहेण अन्येभ्यो भीताश्चरन्ति ॥ २२ ॥

घर्मेणातपेन तप्तः मदच्युत् मदस्रावी मदमश्नन्तीति तथा तैर्गरिम्णा स्थौल्येन ॥ २३ ॥

पङ्कजरेणुभिः रूषितं व्याप्तं सरसोऽनिलं वीदूरात् जिघ्रन् सरोवरस्य अभ्याशं निकटम् ॥ २४ ॥

भाषा टीका ।

और मच्छ कच्छों को संचार (चलने) से चलायमान हो रहा है कमल रज वाला जल जिस में, और फिर वह तटाक चारों तरफ से वेतस, नल, नीप, और वंजुलक के वृक्षों से घिर रहा है ॥ १७ ॥

और कुन्द, कुरवक, अशोक, शिरीष, कुटज, इंगुद, कुब्जक, स्वर्णयूथी,(पीत चमेली)नाग, पुन्नाग,जाति, इन वृक्षोंसे॥१८

तथा मल्लिका और शतपत्र अर्थात् शतदल कमलों से शोभित हो रहा है, और माधवी लताओं के जालों से तथा तीर पर उत्पन्न होने वाले और सदा फल पुष्पों की संपत्ति वाले ऐसे अन्य वृक्षों से भी अति शोभित है ॥ १९ ॥

ऐसे उस तटाक पर उस गिरि के कानन में रहने वाला हाथियों का यूथपति, हथिनियों सहित और तृषा से व्याकुल ऐसे अपने यूथ सहित उसी सरोवर के किनारे पर शीघ्र आया, और क्या करता हुआ आया, कि कंटकों सहित कीचक वेणु, वेत्र, और विशाल गुल्म लतादिकों को भंगकरता (तोडता खींचता) हुआ आया ॥ २० ॥

फिर वह हस्ति यूथपति कैसा है, कि—जिसके गन्ध मात्र से वडे२ सिंह वडे२ गजेन्द्र और व्याघ्रादिक भयंकर जन्तु मारे भय के भाग जाते हैं, तथा व्याल, मृग. खड्ग, महोरग, तथा गौर कृष्ण रंग वाले शरभ और चमरी (सुरागाय) ये भी जिसके गन्धमात्र से भय भीत होकर भाग जाते हैं ॥ २१ ॥

तथा वृक, वराह, महिष, ऋक्ष्य, शल्य, गोपुच्छ, शाला वृक, और मर्कट, ये सब भी जिसके भय से भाग जाते हैं, और जो छोटे२ क्षुद्र जन्तु हैं हरिण, शश, आदिक सो जिसके अनुग्रह से निर्भय चरते हैं ॥ २२ ॥

वही गजेन्द्र घर्म से तप्त होकर अपने यूथ के हाथी और हथनियों के सहित, मद जिसके चुचाता हुआ है, पीछे से छोटे २ बच्चे जिसके दौडे हुए आ रहे हैं, अपने भारी बोझ से चारों तरफ से पर्वत को कम्पाता हुआ, और मदके भोजी भ्रमरों के झुण्ड से व्याप्त हो रहा ॥ २३ ॥

कमल के पराग वाले तटाक के पवन को दूरसे ही सूंघता हुआ, और मद से विह्वल नेत्र वाला, ऐसा वह गजेन्द्र अपने यूथ सहित उस सरोवर पर पहुँचा ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

निजेन पुष्करेण कराग्रेणोद्धृतम् गतक्लमस्सन्निकामं पपौ ॥ २५ ॥ २६ ॥ २७ ॥

* घृणान्, इति पाठः वीर० ॥

ततो गजेन्द्रस्य मनोबलौजसां कालेन दीर्घेण महानभूद्व्ययः ।
विकृष्यमाणस्य जलेऽवसीदतो विपर्ययोऽभूत्सकलं जलौकसः ॥ ३० ॥
इत्थं गजेन्द्रः स यदाप सङ्कटं प्राणस्य देही विवशो यदृच्छया ।
अपारयन्नात्मविमोक्षणे चिरं दध्याविमां बुद्धिमथाभ्यपद्यत ॥ ३१ ॥
न मामिमे ज्ञातय आतुरं गजाः कुतः करिण्यः प्रभवन्ति मोचितुम् ।
ग्राहेण पाशेन विधातुरावृतोऽप्यहं च तं यामि परं परायणम् ॥ ३२ ॥
यः कश्चनेशो बलिनोऽन्तकोरगात्प्रचण्डवेगादभिधावतो भृशम् ।
भीतं प्रपन्नं परिपाति यद्भयान्मृत्युः प्रधावत्यरणं तमीमहि ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे पारमहंस्यां संहितायाम्
वैयासिक्यां मन्वन्तरानुवर्णने गजेन्द्रोपाख्याने
द्वितीयोऽध्यायः ॥ २ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दीनधियः करेणवस्तं केवलं विचुक्रुशुः ॥ २८ ॥ २९ ॥

मन उत्साहशक्तिर्बलं शारीरमोज ऐन्द्रियं तेषाम् सकलं बलादिविपर्ययो विपरीतमधिकम् जलौकसो ग्राहस्य ॥ ३० ॥

स इत्थं यदा प्राणस्य सङ्कटमाप यतो देही ॥ ३१ ॥

बुद्धिमेवाऽऽह—नमामिति । अहं न च प्रभवामि यतो ग्राहरूपेण केवलं विधातुः पाशेनावृतस्तथापि तं परं परमेश्वरं परेषां ब्रह्मादीनामयनमाश्रयभूतं शरणं यामि ॥ ३२ ॥

कोऽसौ ? यं शरणं यासि तत्राऽऽह—यः कश्चनेति । अन्तक एवोरगस्तस्मात् तं शरणमीमहि व्रजेम यद्भयादित्यत्र श्रुतिः "भीषाऽस्माद्वातः पवते भीषोदेतिसूर्यः भीषाऽस्मादग्निश्चेन्द्रश्च मृत्युर्धावतिपञ्चम इति ॥ ३३ ॥

इति श्रीमद्भागवते महपुराणे अष्टमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
द्वितीयोऽध्यायः ॥ २ ॥

———

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

तस्मिन् सरसि विगाह्य प्रवेशपूर्वकं विलोक्य कल्हारादीनां रेणुभिर्वासितं परिमलितं निर्मलममृताम्बु स्वपुष्करेण तुण्डाग्रेणोद्धृतं कामं यथेष्टं पपौ अपिबत् आद्भिः सरोजलैरात्मानं स्नपयन् गतश्रमो बभूव गतक्लमः पपाविति वान्वयः ॥२५॥

स्वपुष्करेणोद्धृतैः शीकराम्बुभिर्जलबिन्दुभिः दुर्मदान् कलभान् करिपोतकान् करेणूश्च यथा गृही गृहासक्तस्तथा कृपावान् निपाययन् संस्नपयंश्च गृणान्बृंहितं कुर्वन् अजमायया भगवन्माय[...] यदागतं कृच्छ्रं दुःखं तन्नाचष्ट नालोचितवानित्यर्थः ॥ २[...]

कृच्छ्रमेव दर्शयन्नाह—स इति । हे नृप ! तत्र सर[...] दैवेन प्रारब्धकर्मानुगुणं प्रवृत्तेनेश्वरेण चोदितः कश्चिद्बलीय[...] ग्राहो मकरः तं गजेन्द्रं चरणे पादे रुषा क्रोधेनाऽग्रहीत्[...] यदृच्छया दैवात्प्राप्तं व्यसनं दुःखं गतः प्राप्तः सोऽतिब[...] गजेन्द्रो यथाबलं विचक्रमे त्याजयितुं पराक्रममकरोत् ॥ [...]

तदा बलीयसा ग्राहेण तरसा बलेन विकृष्यमाण[...] एवातुरं दुःखितं गजेन्द्रंप्रति दीनधियः करेणवो विचुक्रु[...] रुरुदुः पार्ष्णिग्रहाः पृष्ठत उपोद्बलका अन्ये गजास्तार[...] दुःखात्तारयितुं मोचयितुं नाशक्नुवन् ॥ २८ ॥

हे महीपते ! इत्थं गजेन्द्रग्राहयोर्मिथोऽन्तरतो बहिश्च वि[...] र्षतोस्सतोः सहस्रं समाः संवत्सराः व्यगमन्नतिक्रान्ताः [...] सप्राणयोः तयोः समानबलयोः तद्विकर्षणरूपं कर्म तदा [...] चित्रं विचित्रं मेनिरे ॥ २९ ॥

ततः सहस्रसमानन्तरं दीर्घेण भूयसा कालेन जले वि[...] ष्यमाणस्याऽत एवाऽवसीदतः खिद्यतः गजेन्द्रस्य मनआदीनां [...] क्षयोऽभूत्, तत्र मनः उत्साहशक्तिः बलं शारीरमोज ऐन्द्रियं [...] मोक आश्रमो यस्य तस्य ग्राहस्य तु इदं हेतुगर्भं [...] मन आदिकं विपर्ययो ऽभूदधिकमभूदित्यर्थः ॥ ३० ॥

स गजेन्द्र इत्थं प्राणस्य सङ्कटं संशयं यदा प्राप, [...] सोऽपि देही देहभृत्तदा विवश आत्मनः स्वस्य मोक्षणे [...] यत्नसमर्थस्सन् चिरं दध्यौ चिन्तितवान् अथ चिन्तानन्तरम् [...] वक्ष्यमाणां बुद्धिमन्वपद्यत कृतवान् ॥ ३१ ॥

तामेवाह—नेति । आतुरं पीडितं मामिमे ज्ञातयो [...] एव मोचितुं न प्रभवन्त्यहं तु प्रभुरेव न कुतः कथं करि[...]

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रभवेयुः ? अतो विधातुर्दैवस्य पाशरूपेण ग्राहेणाऽऽवृतोऽहं तमेव विधातारं केवलं परम् उत्कृष्टमयनं शरणं रक्षणोपायं यास्यऽव्यवस्यामीत्यर्थः । यत्सङ्कल्पान्मयायं ग्राहग्रहस्तमेव शरणं व्रजामीत्यर्थः ॥ ३२ ॥

कोऽसौ शरण्यः ? विधातेत्यत्राह—य इति । बलिनोऽन्तं करोतीत्यन्तकः "अन्येष्वपि दृश्यते" इति डः अन्तको मृत्युः स एव उरगः महासर्पः तस्माद् प्रचण्डवेगात् दुस्सहवेगादभिधावतो निमित्ताद्भृशं नितरां भीतं प्रपन्नं च यः कश्चन योऽयमीशः परिपाति यस्य भयान्मृत्युरपि प्रधावति तदादिष्टस्वव्यापारे प्रवर्तते तमरणं शरणम् ईमहि प्राप्नुयाम यद्वा यः कश्चनेशः अवश्यं यः कश्चित् ईश्वरो भविता कोऽसौ योऽन्तकोरगाद्भीतं प्रपन्नं परिपाति यस्य भयान्मृत्युः प्रधावति तं शरणं व्रजेमेत्यर्थः । ईश इति सप्तम्यन्तपाठोऽपि दृश्यते तदा यस्येशे ईशने यः कश्चिन्नास्ति "न तस्येशे कश्चन" इतिश्रुतेः यश्च मृत्युभयाद्भीतं प्रपन्नं परिपाति यस्य च भयान्मृत्युः प्रधावति "मृत्युर्धावति पञ्चमः" इति श्रुतेः तमरणमीमहीत्यर्थः । इति बुद्धिमभ्यपद्यतेत्यन्वयः ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

द्वितीयोऽध्यायः ॥ २ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हे नृप ! पादाक्रान्तिनिमित्तरुषा यथाबलं यथाशक्ति विचक्रमे विक्रमं कृतवान् ॥ २७–२९ ॥

इन्द्रियादीनामवसादनप्राप्ताद्युत्तम्भनशक्तिः सहः प्राणशक्तिः बलं शरीरसामर्थ्यमोजः ॥ ३० ॥

अपारयन्पारङ्गन्तुमशक्तः ॥ ३१ ॥

कर्मलक्षणपाशेन ग्राहेण रुद्धः उपद्रवं प्राप्तः विधातुर्दैवाऽमोचितुम् ॥ ३२ ॥

कश्चन लोकविलक्षणः य ईशः बलिनोऽन्तकाख्यसर्पाद्भीतं प्रपन्नं प्रपाति यस्य भयान्मृत्युरन्तको दुर्गा वा प्रधावति " मृत्युर्धावति पञ्चमः " इति श्रुतेः । तमीशमरणं शरणमीमहि प्राप्नुम इत्यन्वयः ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

द्वितीयोऽध्यायः ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

द्वितीयोऽध्यायः ॥ २ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तस्मिन्नेव सरोवरे अभ्यासो यस्य तद्यथास्यात्तथेति तत्राऽवगाहनादौ निश्शङ्कत्वं व्यञ्जितं निजेन पुष्करेण कराग्रेण ॥ २५ ॥

करेणुः स्त्रीः कलभान् सुतांश्च स्नपयन् ॥ २६–२७ ॥

ग्राहेण विकृष्यमाणं तं दीनधियः करेणवः केवलं विचुक्रुशुरेव, पार्ष्णिग्रहास्तदुद्धरणे साहाय्यवन्तः ॥ २८ ॥

जलौकसो ग्राहस्य विपर्ययः बलादीनां व्ययस्याभावः प्रत्युताधिक्यमित्यर्थः ।सकलं सर्वं यथा स्यात्तथाऽभूत् विपर्ययस्योत्पत्तिः सम्पूर्णेनैव न त्वंशेनेत्यर्थः ॥ २९–३० ॥

दध्यौ किमिदं मे कर्मेति यदा परामर्शं तदा इमां बुद्धिं सहसैव प्राप ॥ ३१ ॥

बुद्धिमेवाह—न मामिमे गजा अपि मोचितुं मोचयितुं प्रभवन्ति करिण्यः कुतः, यतो ग्राहरूपेण विधातुः पाशेनाऽऽवृतः तदपि परं परमेश्वरं परायणं परममाश्रयं शरणं यामि । अहं चेति, यद्यप्यहं पशुत्वादज्ञस्तदपीत्यर्थः ॥ ३२ ॥

कोऽसौ यं शरणं यासीति तत्राह—यइति । यद्भयादित्यत्र श्रुतिः " भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषाऽस्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः " इति ॥ ३३ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
अष्टमस्य द्वितीयोऽयं सङ्गतः सङ्गतः सताम् ॥ २ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तस्मिन् आत्मानमद्भिः स्नपयन् विगाह्य विलोड्य गतक्लमः सन् निजपुष्करेण कराग्रेणोद्धृतममृताम्बु अमृतवत्स्वादु जलं निकामं यथेष्टं पपौ ॥ २५ ॥

घृणी दयावान् स्वपुष्करेणोद्धृतैः शीकराम्बुभिः करेणूः स्वभार्याः कलभान् पुत्रांश्च संस्नपयन् निपाययन् कृच्छ्रं यथा गृही न पश्यति नाचष्ट यतोऽजमायया कृपणो दुर्मदश्च ॥ २६ ॥

तदेव कृच्छ्रं दर्शयति—तमिति ॥ २७ ॥

आतुरंप्रति दीनधियः करेणवः केवलं विचुक्रुशुः रुरुदुः अपरे गजाः पार्ष्णिग्रहाः साहाय्यकरास्तारयितुं नाशक्नुवन् ॥ २८ ॥

एवं नियुध्यतोः सप्राणयोः समबलयोः अन्तरतः बहिश्च मिथो विकर्षतः सहस्रं समाः सम्वत्सराः व्यगमन् ॥ २९ ॥

ततस्तदनन्तरं दीर्घेण कालेन जले विकृष्यमाणस्याऽन्नपत्रावसादितो गजेन्द्रस्य मनःप्रभृतीनां व्ययोऽभूत् । तत्र मनः

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

अन्तःकरणसामर्थ्यं बलं देहसामर्थ्यम् ओज इन्द्रियसामर्थ्यम् जलौकसः ग्राहस्य तु सकलं मन आदिकंप्रति विपर्ययः व्ययाभावोऽभूत् ॥ ३० ॥

स इत्थं प्राणस्य सङ्कटं मरणभयं यदाऽवाप तदा विवशः आत्मनो विमोक्षणे अपारयन् असमर्थस्सन् चिरं दध्यौ अथानन्तरमिमां बुद्धिमभ्यपद्यतेत्यन्वयः ॥ ३१ ॥

तां बुद्धिं दर्शयति–नेति। आतुरं माम् इमे ज्ञातयो विमोचितुं न प्रभवन्ति अहञ्च न प्रभवामि करिण्यः कुतः प्रभवन्ति अतो यस्य विधातुः कर्मफलदस्य पाशेनावृतस्तं परं परमेश्वरं परेषां ब्रह्मादीनामयनमाश्रयं शरणं यामि ॥ ३२ ॥

कः सः यं शरणं यासीत्याकाङ्क्षायामाह–अन्तं करोतीत्यन्तको मृत्युः स एव उरगस्तस्मात् उरगाद् ग्राहात् प्रचण्डो भयङ्करो वेगो यस्य तस्मात् भीतभत एव प्रपन्नं शरणापन्नं कश्चनेशो दुर्ज्ञेयप्रभावः परिपाति तमरणं शरणमीमहि व्रजेम यस्य भयान्मृत्युः प्रधावति, तथाच श्रुतिः " भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चम " इति ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
द्वितीयाऽध्यायार्थप्रकाशः ॥ २ ॥

भाषा टीका ।

और पहुँचते ही उस तटाक में घुसकर अच्छेप्रकार अवगाहन (झकोर) कर अमृत सदृश स्वादु और हेमारविंद के पराग से वासित उस निर्मल जल को अपनी शुण्डा से भर२ कर स्नान करता हुआ पीने लगा, इसीसे उसकी सम्पूर्ण ग्लानि दूर हुई ॥ २५ ॥

गृहस्थ जैसे हो तिसप्रकार अपनी शुण्डा भर२ कर अपनी हथिनियों को और छोटे२ बच्चों को जल पिवाता हुआ और स्नान कराता हुआ वह दुर्मद जल क्रीडा में लग गया, और उस कृपणने अज (ईश) की माया से आते हुए सङ्कट को नहीं देखा ॥ २६ ॥

हे नृप! उस गजेन्द्र को उस तटाक में दैव प्रेरित किसी एक बडे बलिष्ठ ग्राहने रोष से चरण में पकड लिया, तब वह गज भी यदृच्छा से ही बडे व्यसन (कष्ट) को प्राप्त हुआ, और उस अति बलिष्ठ गजने अपने बलके अनुसार पराक्रम किया ॥ २७ ॥

पर जब उस गजयूथपति को बलिष्ठ ग्राह वेगसे खींचने लगा, और गज अति आतुर हुआ, तब विचारी दीन मनवाली हथिनियें आक्रोशकरने (चिंघाडने) लगीं और जो बडे२ गज लोग रहे वोभी सब गजेन्द्र को पकड कर बाहर को खींचने लगे परञ्च तारने (तीरपर खींचलेने को) समर्थ नहीं हुए ॥ २८ ॥

इस प्रकार गजेन्द्र और नक्र (ग्राह) को युद्ध करते तथा दोनों को परस्पर बाहर और भीतर को खींचते हे महीपते! एक हजार वर्ष व्यतीत हो गये, परञ्च तथापि दोनों के प्राण बने रहे इस बातको देखकर देवताओं ने बडा आश्चर्य माना ॥ २९ ॥

तब तो जल में खिंचने से दुःख पाते हुए गजेन्द्र का उत्साह और शरीर का बल तथा इन्द्रियों का बल अति दीर्घ काल व्यतीत होने से सब नष्ट हो गया, और जलचर होने से ग्राह का बलादिक सब अधिक ही होता गया ॥ ३० ॥

इस प्रकार वह गजेन्द्र, देहधारी होने से जब सङ्कट को प्राप्त भया और विवश होने से अपने मोचन (छुडाने) में जब समर्थ न हुआ, तब चिन्ता करने लगा, और फिर उसको ऐसी बुद्धि आई ॥ ३१ ॥

कि जब ये मेरे ज्ञाति के गज लोग, आतुर ऐसे मेरे लिये छुडाने को समर्थ नहीं हैं, फिर विचारी हथिनियें कहां से समर्थ होंगी, अब में इस ग्राह रूप विधाता के पाश बंधा हुआ भी उसी ब्रह्मादिकों के परम आश्रय के शरण जाऊं ॥ ३२ ॥

जो कोई ईश, बडे बलिष्ठ प्रचंड वेग वाले, तथा अत्यन्त चारों ओर दौडने वाले, काल सर्प से भयभीत शरणागत की रक्षा करता है, और जिसके भय से मृत्यु दौडता है, मैं भी उस श्रीनारायण के शरण को प्राप्त होता हूं ॥ ३३ ॥

इति श्री मद्भागवत अष्टम स्कन्ध में द्वितीयाऽध्याय की,
भागवताचार्यकृत भाषाटीका समाप्त ॥ २ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे द्वितीयोऽध्यायः ॥ २ ॥

॥ तृतीयोऽध्यायः ॥

श्रीशुक उवाच ।

एवं व्यवसितो बुद्ध्या समाधाय मनो हृदि ।
जजाप परमं जाप्यं प्राग्जन्मन्यनुशिक्षितम् ॥ १ ॥

गजेन्द्र उवाच ।

ॐ नमो भगवते तस्मै यतएतच्चिदात्मकम् ।
पुरुषायादिबीजाय परेशायाभिधीमहि ॥ २ ॥
यस्मिन्निदं यतश्चेदं येनेदं य इदं स्वयम् ।
योऽस्मात्परस्माच्च परस्तं प्रपद्ये स्वयम्भुवम् ॥ ३ ॥
यः स्वात्मनीदं निजमाययाऽर्पितं क्वचिद्विभातं क्व च तत्तिरोहितम् ।
अविद्धदृक्साक्ष्युभयं तदीक्षते स आत्ममूलोऽवतु मां परात्परः ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तृतीये तु गजेन्द्रेण स्तुतो हरिरुपेत्य तम् ।
समुद्दधार तं ग्राहाद्ग्राहं देवलशापतः ॥ १ ॥

जाप्यं जप्यं स्तोत्रम् प्राग्जन्मनि इन्द्रद्युम्नसंज्ञे ॥ १ ॥

तस्मै नमो नमनमभिधीमह्यभिध्यायेम केवलम् ग्राहगृहीतत्वेन कायप्रणतेरशक्यत्वात् स्वस्य तज्ज्ञानं सम्भावयितुं विशिनष्टि, यतश्चिद्रूपादेतद्देहादिचिदात्मकं चेतनं भवति तदुक्तं "येन चेतयते विश्वम्" इति. तत्र हेतुः, पुरुषाय पूर्षु कारणत्वेन प्रविष्टाय ननु प्रकृतिपुरुषौ कारणमिति प्रसिद्धं तत्राऽऽह आदिः प्रकृतिः बीजं पुरुषस्तद्रूपाय प्रविष्टत्वेऽपि जीववत्पारतन्त्र्यं वारयति परेशायेति ॥ २ ॥

परमैश्वर्यं विवृण्वन्नाऽऽह यावत्समाप्ति, यस्मिन्नधिष्ठाने यत उपादानोद्यन कर्त्रा यश्च स्वयमेवेदं विश्वं भवति अस्मात्कार्यात्परस्मात्कारणाच्च यः परस्तं स्वयम्भुवं स्वतःसिद्धं प्रपद्ये शरणं व्रजामि ॥ ३ ॥

विश्वहेतुत्वं स्वतस्सिद्धत्वञ्चोक्तमिदानीं विश्वप्रकाशकत्वं स्वप्रकाशकत्वं च वर्णयन्प्रार्थयते-यः स्वात्मनीति। विभातमभिव्यक्तं सत्कचित्प्रलये तिरोहितं लीनं सत् तदुभयं कार्यं कारणं च साक्षीसन्नीक्षते साक्षित्वे हेतुः अविद्धदृगलुप्तदृष्टिः आत्ममूलः स्वयंप्रकाशः कुतः परात्प्रकाशकाच्चक्षुरादेरपि परस्तस्यापि प्रकाशक इत्यर्थः । "चक्षुषश्चक्षुः" इत्यादिश्रुतेः ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

"तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम् ।
यतते च ततो भूयः संसिद्धौ कुरुनन्दन ! ॥
पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः" ।

इति भगवदुक्तरीत्यैवङ्कृतनिश्चयो गजेन्द्रः पूर्वजन्माभ्यस्तं जजापेत्याह मुनिः—एवमिति। एवं नमामीत्यादिश्लोकद्वयोक्तरीत्या व्यवसितः निश्चितमनाः मनो हृदि समाधाय हृदयस्थं कृत्वा विषयान्तरेभ्यः प्रत्याहृत्य प्राग्जन्मनि इन्द्रद्युम्नाख्यजन्मन्यनुशिक्षितमभ्यस्तं परमं जप्यं स्तोत्रं जजाप ॥ १ ॥

जप्यमेवाह—ॐ इत्यादिना । तावत् "कारणं तु ध्येयम्" इति श्रुत्युक्तविधया जगत्सृष्ट्यादिकारणं प्रकृतिपुरुषविलक्षणं नमस्कृत्य शरणं व्रजति—ओमिति । "ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः"इत्युक्तरीत्या ब्रह्मणो निर्देशपरः ओंकारः ब्रह्मण इत्यर्थः । ओंकाराभिप्रेतब्रह्मशब्दप्रवृत्तिनिमित्तगुणबृहत्वं भगवत इत्यनेन पूर्णषाड्गुण्यवाचिनाऽस्पष्टीकृतम. एवं कारणत्वोपयुक्तगुणयोग उक्तः एवंविधाय तस्मै भगवते नमः । कोसौ भगवान्यं नमस्करोषि इत्यत्र तं लक्षयंस्तद्ध्यानं प्रतिजानीते—यतो भगवत एतच्चिदात्मकं चित्संसृष्टमचेतनात्मकं चिदचिदात्मकमिति यावत् यत एवमत आदिबीजाय परमकारणायातएव परेषां ब्रह्मादीनामपीशाय परमपुरुषायाभिधीमहि अभिध्यायेम ध्यायतेर्लिङ्यार्षत्वादात्मनेपदं विकरणाभावे सम्प्रसारणे च रूपं "क्रियायामभिप्रैति सोऽपि सम्प्रदानम्"इति वचनेन पत्ये शेत इत्यादाविव ध्यान-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

क्रियायाः सम्बध्यमानविवक्षया सम्प्रदानसंज्ञायां पुरुषायेति चतुर्थी. सत्यं परं धीमहीत्यादौ तु आप्यमानत्वविवक्षया कर्मसंज्ञायां द्वितीया यतइति हेत्वर्थे पञ्चमी हेतुत्वं चाधिकरणोपादानकर्त्रादिसाधारणं ततश्च यस्मिन् यतः येनेति विवक्षितं तदन्वयानुगुणानि लीनजातरचितादिपदान्यध्याजिहीर्षितानि ॥ २ ॥

तदेतत्सर्वमभिप्रेत्य विशदयन् शरणं व्रजति—यस्मिन्निति। इदं चिदचिदात्मकं जगद्यस्मिन् प्रलीनं सृष्टेर्लयपूर्वकत्वात् लयाधिकरणत्वसूचनाय तावद्यस्मिन्नित्युक्तं यत उपादानभूतात् सूक्ष्मचिदचिद्विशिष्टादेतत्स्थूलचिदचिद्विशिष्टात्मकं जगज्जातं येन कर्त्रा सृष्टं रचितं च येनेति तन्त्रेण स्रष्टृत्वं रचितृत्वं चोभयमपि विवक्षितं तथा यस्मिन्नित्यनेन सृज्यमानचिदचिदधिकरणत्वमपि विवक्षितं यत इदमित्यनेन जगद्ब्रह्मणोरुपादानोपादेयभाव उक्तः तत्कृतं तयोर्मिथोऽनन्यत्वमाह—य इदं स्वयमिति। इदं सर्वं यदात्मकमित्यर्थः। उपादानत्वप्रयुक्तं विकारित्वं परिहरति, योऽस्मात्परस्माच्च पर इति. अस्मात्स्वरूपान्यथाभावमापद्यमानादचेतनजातात्परो विलक्षणः यः स्वभावान्यथाभावमापद्यमानो जीवः तस्माच्च परो विलक्षणः स्वरूपेण स्वभावेन च विकाररहितः चिदचिद्द्वारकत्वाद्विकाराणामिति भावः। तमेवंभूतं स्वयम्भुवं स्वायत्तसत्तादिमन्तं नतु जीववदन्यायत्तसत्तादिमन्तमित्यर्थः प्रपद्ये शरणं गतोऽस्मीत्यर्थः। यद्यप्यत्र गत्यर्थेन पद्यतिना बुद्ध्यर्थेन सता अध्यवसायमात्रमुपस्थाप्यते, तथापि प्रमाणानुसारादरणान्तमीमहीति पूर्वत्र शरणशब्दपर्यायस्यारणशब्दस्य प्रयोगाच्च प्रार्थनाद्यन्वितरक्षाभरन्यासं करोतीत्युच्यते तथाचोच्यते"अनन्यसाध्ये स्वाभीष्टे महाविश्वासपूर्वकम्। तदेकोपायतायाच्ञ प्रपत्तिः शरणागतिः"इति रक्षाप्रार्थनं तु समनन्तरश्लोकेष्ववतुमास्परात्परइत्यादिषु स्फुटम् इयं च गजेन्द्रेण विहिता प्रपत्तिर्मुक्त्यर्थैव नतु प्राणसंरक्षणार्था—

> "गजेन्द्रो भगवत्स्पर्शाद्विमुक्तो ऽज्ञानबन्धनात् ।
> प्राप्तो भगवतो रूपं पीतवासाश्चतुर्भुजः" ॥

इति तत्फलतया मुक्तेरेव वक्ष्यमाणत्वादितिभावः ॥ ३ ॥

यस्मिन्निदमित्यनेनाभिप्रेतं सृष्टिसंहारविषयचेतनाचेतनात्मकजगदधिकरणत्वं विवृण्वन् सृष्ट्याद्युपयुक्तसार्वज्ञ्यादिगुणयुक्तं रक्षायै प्रार्थयते–यइति। आत्मनि स्वस्मिन्नेव यः क्वचित्कदाचित् निजमाययात्मीयसङ्कल्पेन विभातं प्रकाशितं देवादिनामरूपविभागत्वेन प्रकाशितं क्वचिच्च तिरोहितं नामरूपविभागत्यागेन सूक्ष्मरूपतया प्रलीनमित्यर्थः। इदमुभयं कार्यावस्थं कारणावस्थं च चिदचिदात्मकं जगत् अविद्धदृक् नित्यं सङ्कोचविकासादिरहितापरिच्छिन्नधर्मभूतज्ञानाश्रयः साक्षी सर्वज्ञश्च सन्नीक्षते स आत्ममूलः अनन्यकारणः परात्प्रधानात्पराज्जीवात्परो . विलक्षणः मामवतु परस्माच्च पर इत्युपादानत्वप्रयुक्तविकारप्रसङ्गपरिजिहीर्षयोक्तम् अत्र तु जीवान्तरस्यापि स्वसदृशत्वे स्वरक्षणासामर्थ्यसूचनायोक्तम् अवत्विति प्रार्थिता रक्षाऽत्र यावदनिष्टपरिहारपूर्वकेष्टप्रापणरूपा सा च मुक्तिरेव ब्रह्मविदो गजेन्द्रस्य केवलप्राणमात्ररक्षाप्रार्थनानुपपत्तेः "जिजीविषेना इमिह" "मादृक्प्रपन्नपशुपाशविमोक्षणाय" इति स्पष्टन्तवुक्तेश्च मत सर्वज्ञो भगवान् तदभिप्रायमालोच्य मुक्तिमेवा दा भावनीयम् ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

ध्यानपूर्वकस्तुत्याप्रसन्नाद्धरेर्गजेन्द्रस्य ग्रहापदो मोक्षो यथाऽभूत्तथा संसारग्रहादपि मोक्षो भगवत्प्रसादेन स्यादिति प्रद नाय तन्मोक्षप्रकारो निरूप्यतेऽस्मिन्नध्याये, किंप्रकारो गजे शरणमयासीदिति तं प्रकारं दर्शयितुमाह—एवमिति। जा मन्त्रं तिर्यग्योनेरनधिकारिण एतदसम्भावितमिति तत्रा प्रागिति ॥ १ ॥

एतच्चिदानन्दात्मकं चेतनजातं यतो यस्मादेवाप्ताभीष्टं त इति हिशब्देन पुरुषादिविशेषणानां "परात्परं पुरुषं पु मीक्षते" इतिश्रुतिसिद्धं दर्शयति ॥ २ ॥

मन्त्रोक्तविशेषणविवरणपूर्वकं ध्यानमाह—यस्मिन्निति। जगद्यस्मिन्हरौ प्रतीयते "यत्प्रयन्ति" इति श्रुतेः। इदं यस्माच्चैव जायते "यतो वा इमानि भूतानि" इति श्रुतेः। शब्देनान्यस्मादुत्पादं निवारयति, इदं येन ब्रह्मणा प्रवर्त्तते न जातानि जीवन्ति" इति श्रुतेः। इदं विश्वं यः स्वयं प्राप्तम दिकः "सर्वं खल्विदं ब्रह्म" इति श्रुतेः। ननु यः स्वयमित्य तादात्म्यं किं न स्यादिति तत्राह,अस्मादिति. अस्मात्प्रत्यक्षप्रप त्परस्मात्परोक्षान्मुक्तप्रपञ्चाच्च पर उत्तमो यस्तं स्वयम्भुवं स्व प्राप्तसत्ताकं शरणं प्रपद्य इत्यन्वयः—

> "उत्पन्नस्यापि यत्सत्ता हरेस्तत्स्म इतीर्यते ।
> हरेर्विश्वं भिन्नमपि परमोऽसौ यतो विभुः" ॥

इतिवचनान्न तादात्म्यमत्रोच्यते किमु ततः प्राप्तसत्ताकं दिति ॥ ३ ॥

पूर्वोक्तार्थं भेदस्पष्टीकरणाय विवृणोति—यः स्वात्मनीति यो भवान् क्वचिज्जाग्रति विभातं क्व सुषुप्तौ तिरोहि अप्रकाशितं तदुभयं तदिदं जगत् निजमायया स्वेच्छया स्वात्म स्वोदरे अर्पितमीक्षते? इत्यन्वयः। ननु,शरीरे स्थित्वा ईक्षणे वल्लुप्तज्ञानत्वेनेक्षणायोगः स्यादिति तत्राह, अविद्धदृगिति तर्हि कथमीक्षत इति तत्राह, साक्षीति. समामवत्वित्यन्व आत्मा स्वयमेव मूलं कारणं प्रतिष्ठा च सत्तावांस्तथा स्वयंभूशब्दो विवृतः "स्वे महिम्नि" इति श्रुतेः।"अक्षरात्परतः पर इति च. क्वचिच्चतुर्मुखादौ विभातं क्वचास्मदादौ तिरोहित इति वा ॥ ४ ॥

**कालेन पञ्चत्वमितेषु कृत्स्नशो लोकेषु (१) पालेषु च सर्वहेतुषु ।
तमस्तदासीद्गहनं गभीरं यस्तस्य पारेऽभिविराजते विभुः ॥ ५ ॥**

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नमो भगवत इत्यस्य टीकायां ग्राहगृहीतेत्यादि । यद्यपि प्राग्जन्मजप्यमस्य न सम्भवति । तथापि प्रस्तावबलादनेनात्र तथा भावितमिति ज्ञेयम् ॥ १ ॥ २ ॥ ३ ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तृतीये संस्तुतो विष्णुर्जलादुद्धृत्य हस्तिनम् ।
ग्राहं चक्रेण संछिद्य तं तच्छापात् कृपाम्बुधिः ॥

एवं व्यवसितं निश्चयो यस्य ॥ ॥ १ ॥

नमस्कुर्मः धीमहि ध्यायामश्च यतो यस्मात् नमस्कनात् ध्यानाच्च एतत् मायात्मकमपि जगत् स्थूलसूक्ष्मदेहमयं चिदात्मकं भवति पुरुषाय पुरुषाकाराय आदिबीजाय पुरुषाकारत्वेनैवादिकारणाय अतः परेशाय परमेश्वराय ॥ २ ॥

परमेश्वरस्य जगदुपादानादिकारणकलापत्वञ्चाह—यस्मिन् इदं जगत् गृहे घटादिकमिव यतश्च कुम्भकारादिव येन चक्रदण्डादिनेव यः मृत्पिण्ड इव एवं योऽस्य विश्वस्य स्वयमेव सर्वाणि कारणानि भवतीत्यर्थः । इदमित्यस्य पुनः पुनरुक्तिस्तदन्वयनिर्द्धारणार्था यस्तु अस्मात् विश्वस्मात् परस्मात् विश्वकारणकलापाच्च परस्तं स्वयम्भुवं कृष्णरामादिरूपेण यः स्वयमेव भवतीत्यर्थः ॥ ३ ॥

किञ्चेदं कार्य्यकारणात्मकं जगदप्यनादितः सत्यमेवास्तीति वदन् स्वपरप्रकाशकत्वमाह-य इति । निजमायया यदिच्छावशात् सृष्ट्वा सृष्ट्वा अर्पितं स्वात्मन्येव कदाचित्कल्पादौ विभातं क्व कदाचित् कल्पान्ते तिरोहितम् अविद्धदृक् अलुप्तदृष्टिरेव साक्षी सन्नीक्षते उभयं विभातं तिरोहितं च आत्ममूलः आत्मा स्वयमेव मूलं यस्य सः स्वप्रकाशः परात् प्रकाशकादपि परः "चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रम्" इति श्रुतेः ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

गजेन्द्रस्तुतेन हरिणा ग्राहाद्गजेन्द्रस्य देवलशापाद्ग्राहस्य च विमोचनं कृतमित्याह-एवमिति तृतीयेन । एवं व्यवसितं व्यवसायो यस्य सः जाप्यं जप्यं स्तवम् प्राग्जन्मनीन्द्रद्युम्नाख्ये ॥ १ ॥

यतः कारणात् एतत् चिदात्मकं चिदचिदात्मकं चिदचिद्रूपं विश्वमुत्पद्यते तस्मै नमो नमनमभिधीमहि अभिध्यायेम केवलं न तु शरीरेण प्रणमामि परवशत्वात् । ननु, "कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुषः" इति चिन्त्यमित्यनेकानि कारणानि श्रूयन्ते इत्यत्राह——पुरुषायादिबीजायेति । आदीनां सर्वेषां कालादीनां कारणानां बीजाय परमकारणाय पुरुषाय अत एव परेशाय ॥ २ ॥

यस्मिन्धारके यत उपादानात् येन निमित्तेन य एवस्वयमिदं सर्वजन्मादिहेतुत्वात् "सर्वं खल्विदं ब्रह्म तज्जलानिति" इति श्रुतेः । अस्मात् स्थूलात्प्रपञ्चात् परस्मात्सूक्ष्मरूपात् परो विलक्षणस्वरूपः स्वयम्भुवम् अनन्यसिद्धम् प्रपद्ये शरणं गच्छामि ॥ ३ ॥

यः अविद्धदृक् अनावृतज्ञानः अत एव साक्षी साक्षाद्द्रष्टा तदुभयमीक्षते इति क्वचित्सृष्टिसमये अभिव्यक्तनामरूपतया विभातं क्व क्वचित्प्रलयसमये अनभिव्यक्तनामरूपतया तिरोहितं यदिदं स्थूलसूक्ष्मरूपं विश्वम् । निजमायया स्वयुनाऽऽत्मकेन सङ्कल्पेन स्वात्मनि धारके अर्पितम् तदुभयमीक्षते परात् देहेन्द्रियविलक्षणान्मम स्वरूपादुपासकात्परः समामवतु ॥ ४ ॥

भाषा टीका ।

श्रीरुक्मिणीदेवीसमेतश्रीदेवकीनन्दनाय नमः ।

श्रीशुक उवाच ।

श्रीशुकदेवजी बोले कि—हे राजन् ! गजेन्द्र ने ऐसा व्यवसाय (निश्चय) कर, बुद्धि से हृदय में मन का समाधान कर जो पहिले जन्म में सीखा था उसी परम जाप्य का जप करने लगा ॥ १ ॥

गजेन्द्र बोला, कि-उस भगवान् (षड्गुणसंपन्न) को नमस्कार है कि—जिससे यह चिदात्मक जगत् उत्पन्न हुआ है, पुरुष रूप, और इस जगत् के आदि बीजरूप, और ब्रह्म रुद्रादि के भी नियन्ता, ऐसे भगवान का मैं ध्यान करता हूं ॥ २ ॥

जिस अधिष्ठान में यह जगत है, और जिस उपादान से यह जगत हुआ है, और जिस कर्त्ता ने इस जगतको बनाया है, और जो स्वयं आपही इस जगत् रूप है, और जो कार्य कारण दोनों से पर है, उस स्वयम्भू परमात्मा के मैं शरण प्राप्त हूं ॥ ३ ॥

अपने शरीर में अपनी माया से अर्पित कभी प्रादुर्भूत (प्रकट) कभी तिरोहित ऐसे विश्व को, और कार्य कारण को, नित्यही अनष्टदृष्टि वाला जो साक्षी होकर सदा देखता है, वह स्वयंप्रकाश परात्पर हमारी रक्षा करो ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तिरोहितमीक्षते इत्येतत्प्रपञ्चपूर्वकं दुर्ज्ञेयत्वं वदन् प्रार्थयते—कालेनेति द्वाभ्याम् । पञ्चत्वमितेषु नाशं प्राप्तेषु गहनं दुरवगाहम्

(१) क्षीणेषु इति विजय० पाठः ।

न यस्य देवा ऋषयः पदं विदुर्जन्तुः पुनः कोऽर्हति गन्तुमीरितुम् ।
यथा नटस्याकृतिभिर्विचेष्टतो दुरत्ययानुक्रमणः स माऽवतु ॥ ६ ॥
दिदृक्षवो यस्य पदं सुमङ्गलं विमुक्तसङ्गा मुनयः सुसाधवः ।
चरन्त्यलोकव्रतमव्रणं वने*भूतात्मभूताः सुहृदः स मे गतिः ॥ ७ ॥
न विद्यते यस्य च जन्म कर्म वा न नामरूपे (१) गुणदोष एव वा ।
तथापि लोकाप्ययसम्भवाय यः स्वमायया तान्यनु(२)कालमृच्छति ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

गभीरमनन्तम् तस्य तमसः "आदित्यवर्णं तमसः परस्तात्" इति श्रुतेः ॥ ५ ॥

अत एव देवादयो यस्य स्वरूपं न विदुः जन्तुरर्वाचीनः को ऽपि गन्तुं ज्ञातुमीरितुं वक्तुं वा दुरत्ययं दुर्गममनुक्रमणं चरितं कथनं वा यस्य सः मा माम् ॥ ६ ॥

कथं तर्हि "तमेव विदित्वाऽतिमृत्युमेति" इत्यादिश्रुतिः इत्याशङ्क्य तज्ज्ञानोपायं कथयन्नाऽऽह–दिदृक्षवइति । अलोकव्रतं ब्रह्मचर्यादि अव्रणमच्छिद्रम् भूतानामात्मभूता भूतेष्वात्मदृष्टयः सन्तः स मे गतिरस्तु ॥ ७ ॥

दुरत्ययानुक्रमणत्वं प्रपञ्चयन्प्रणमति—न विद्यत इत्यादिना । लोकानामप्ययः प्रलयः सम्भवो जन्म तयोर्द्वन्द्वैक्यम् तदर्थं यस्तानि जन्मादीनि स्वीकरोति तस्मै नम इत्युत्तरेणान्वयः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

क्वचित्तिरोहितमिदमीक्षते इत्युक्तं तज्जगत्तिरोभूय कां दशामापद्यते स च तद्दशायां कथम्भूतोऽवस्थित ईक्षते? इत्यपेक्षायां तद्दर्शयति–कालेनेति । कालेन द्विपरार्द्धावसानरूपेण कालेन निमित्तेन सर्वस्य जगतो हेतुषु सर्वेषु हेतुषु वा पृथिव्यादितत्त्वेषु तत्कार्येषु लोकेषु तत्पालकेषु ब्रह्मादिषु च पञ्चत्वं लयमितेषु प्राप्तेषु सत्सु गहनमतिसूक्ष्मत्वात् दुरवबोधं गभीरं परिच्छेत्तुमशक्यम् अणुत्वादिनाऽपि परिच्छेत्तुमशक्यं निरतिशयसूक्ष्मदशापन्नत्वादितिभावः । एवंविधं तम आसीत् "नासदासीन्नो सदासीत्तदानीं तम आसीत्" इति श्रुतेः तमःशब्दो निरतिशयसूक्ष्मदशापन्नाचिद्द्रव्यवाची "अक्षरं तमसि लीयते तमः परे देव एकीभवति" इतिश्रुतेः । तदेवंभूतस्य तमसःपारे योऽभिविराजते पारोऽत्र पालनं नियमनरूपम् "पृपालनपूरणयोः" इतिधात्वर्थानुरोधात् उक्तविधतमोनियमने कार्याक्षमत्वापादनरूपे स्थित इति शेषः विराजते प्रकाशते न तु जीववत्संकुचितज्ञानो भवतीत्यर्थः ॥ ५ ॥

क्वचित् विभातमीक्षत इत्युक्तं कीदृशं तस्येक्षणम्? इत्यपेक्षायां तत्तद्देवमनुष्याद्यवस्थजीवसम्बन्धिनानाविधविचित्रकर्मा-ऽनुगुणनियमनरूपत्वादित्थं तया दुरवबोधमिति वक्तुं तावत् स्वरूपस्य दुर्ज्ञेयत्वात्तदीक्षणमपि दुरवबोधमेवेति दर्शयन् स्वरूपस्य दुर्ज्ञेयत्वं वदन् तं स्वरक्षायै प्रार्थयते–न यस्येति । दे[…] सत्त्वप्रचुराः "तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम्" इत्यनेन […] यार्थदर्शनयोग्यत्वं सूच्यते ऋषयो योगिनः अनेनाऽपि तदेव सू[…] एत एव यस्य पदं पद्यत इति पदं स्वरूपं न विदुरन्[…] ऽर्वाचीनो जन्तुः प्राणी तत्पदं गन्तुं यथावद्बोद्धुम् ईरितुं […] च कः पुनर्गर्हति? तत्र दृष्टान्तः, यथा आकृतिभिर्वैपरीत्[…] नटस्यायमसौ इति तत्स्वरूपमतज्ज्ञाः न विदुस्तथेत्यर्थः । स ए[…] दुरवबोधस्वरूपोऽत एव दुरत्ययाऽनुक्रमणः दुर्गमव्यापारः इ[…] तया दुरवबोधनियमनरूपव्यापारयुक्तो मामवतु, यद्वा नटसं[…] कृतिभिर्देवादिविचित्रशरीरैर्विचेष्टतो जीवद्वारा विचेष्टतो यस्[…] वान्वयः आकृतिभिरवतारविशेषैः विचेष्टतो यस्येति वार्थः ॥ ६[…]

दुरवगमत्वोक्तिप्रसक्तामनुपास्यत्वशङ्कां निराचिकीर्षुस्तस्य […] स्येति दृष्टान्तसाधर्म्यलब्धं कैश्चित्सुबोधत्वं वदन् तस्यैव स्वरक्षो[…] यत्वम[…]वस्यति–दिदृक्षव इति । सुमङ्गलं नित्यसुखरूपं यस्य स्व[…] दिदृक्षवः साक्षात्कर्तुमिच्छवो मुनयः विमुक्तः सङ्गो दारा[…] रादिषु शब्दादिविषयेषु वा यैस्ते सुसाधवः अन्यैरपि सा[…] धर्मैर्युक्ताः भूतेषु उच्चावचेष्वात्मभूता आत्मतुल्यतां प्राप्ताः स्वा[…] समदर्शिनः सन्तो वनेऽरण्येऽव्रणमच्छिद्रमलोकव्रतमितरै[…] कर्तुमशक्यं व्रतमुपासनात्मकं चरन्ति उपासनात्मकव्रतपरिशु[…] मनसा तत्पदं साक्षात्कुर्वन्त्येवेति भावः । तथा च श्रुतिः "[…] मनीषा मनसाभिक्लृप्तः, दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्म[…] र्शिभिः" इति "तं दुर्दर्शं गूढमनुप्रविष्टं, यत्तदद्रेश्यमग्राह्यम्" "न सं[…] चक्षुरभिवीक्षते तम्, न चक्षुषा पश्यति कश्चनैनम्" इत्याद्[…] श्यत्वश्रुतयस्तु योगापरिशुद्धमतिभिरग्राह्यत्वं वदन्तीति भाव[…] स एवंभूतो मे गतिः रक्षोपाय इत्यर्थः ॥ ७ ॥

एवं दृश्यत्वादृश्यत्वश्रुतीनां विषयविभागोऽर्थात् प्रदर्शितः […] तुल्यन्यायतया "अजायमानः" "निष्कलं निष्क्रियं, 'तदरूपमनाम[…]' इत्यादिजन्मादिप्रतिषेधपराणां "बहुधा विजायते" 'यस्य चैतत्कर्म' […] वै वेदितव्यः' 'सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः' 'हिरण्[…] पुरुषो दृश्यते" इत्यादीनां जन्मादिप्रतिपादनपराणाञ्च श्रुती[…] विषयविभागं दर्शयन्स्तौति—नेति । यद्यपि यस्य जन्माद[…]

* स्वात्मभूता इति विज० पो० । (१) गुणदोषमतिव चक्र० पो० । (२) कूलमिति विज० पा० ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सन्ति जीवस्येव कर्मायत्ता न सन्तीति भावः । तथापि लोकानां दुष्कृतामप्ययो विनाशः सम्भवः साधूनां परित्राणं तयोः समाहारस्तस्मै तदर्थं तानि जन्मादीन्यनुकालं "यदा यदा हि धर्मस्य ग्लानिर्भवति" इत्याद्युक्तकालेषु इत्यर्थः । स्वमायया ऽऽत्मीयसङ्कल्पेन ऋच्छति प्राप्नोति स्वीकरोति अकर्मायत्तानि जन्मादीनि स्वेच्छयैवोपादत्त इत्यर्थः । तत्र दोषो विकारः इममेव विषयविभागमभिप्रेत्य वरदगुरुभिरयं श्लोकोऽभिहितः—

यद्ब्रह्मणो गुणशरीरविकारभेद—
कर्मादिगोचरविधिप्रतिषेधवाचः ॥
अन्योन्यभिन्नविषयानविरोधगन्ध—
मर्हन्ति तन्नविधयः प्रतिषेधवाध्याः" इति ॥

यस्तानि ऋच्छति स मे गतिरिति पूर्वेणान्वयः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

परात्परत्वं स्पष्टयन् दुर्ज्ञेयत्वमाह—कालेनेत्यादिश्लोकद्वयेन । लोकेषु पृथिव्यादिभूतकार्येषु साकल्येन पञ्चत्वं पृथिव्यादिपञ्चभूतात्मतामितेषु सर्वहेतुषु पृथिव्यादिसर्वकारणेषु चशब्दात् महदादिषु लीनेषु स्वस्वकारणतामाप्तेषु सत्सु यत्तद्गहनं दुर्ज्ञेयं गभीरम् अत एवागाधं तम आसीत् यो विभुः तस्य तमसःपारे तमःसम्पर्करहितदेशेऽभिविराजते स्वतो नेत्याह, कालेनेति. कालनाम्ना हरिणा ॥ ५ ॥

देवादयो यस्य पदं न विदुरिति यदतः पुनः को जन्तुः तत्पदं गन्तुम्. ईरितुं वक्तुमर्हतीत्यन्वयः हनुमदाद्याकृतिभिः तत्तदाकारानुसारेण विचेष्टमानस्य नटस्य स्वरूपं यथा न ज्ञायते तथेति स दुरत्ययानुक्रमणो दुर्ज्ञेयपरिक्रमणो हरिर्मामवत्वित्यन्वयः ॥ ६ ॥

हरेरेवंविधस्वरूपसद्भावे मानमाह—दिदृक्षव इति । व्रमणमव्रतम् अलोकव्रतं लोकैः कर्तुमशक्यं सृष्ट्यादिव्रतं यस्य स तथा तम् ॥ ७ ॥

देवदत्तवज्जन्माद्यभावाद्दुर्ज्ञेयत्वं युक्तमित्यभिप्रेत्याह—न विद्यत इति । आमघटादिश्यामादिगुणवन्नश्वरगुणो नास्ति दोषः कुत एव शब्देन "निरनिष्टो निरवद्यः" इति श्रुतिं सूचयति, सत्त्वादिनिमित्तदोषश्च नास्तीति वा दोषो नास्त्येव गुणायुतदोषश्च नास्तीति वा यद्यपि देवदत्तस्येव हरेर्जन्मादिकं नास्ति तथापि स्वमायया स्वमहिम्ना स्वेच्छया वा लोकस्य तदाश्रयप्राणिनां च सम्भवाय सुखादिप्राप्तिलक्षणजननाय तानि जन्मादीनि सर्जनादिकालमनुसृत्य ऋच्छति प्राप्नोतीत्यन्वयः लोकत्रय सम्भवायेति केचित्पठन्ति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

कालेनेति त्रिकम् । तस्य पारे महावैकुण्ठे ॥ ५ ॥

यथा नटस्येति तस्य तद्यथा साधारणैर्दुर्गमं तथेत्यर्थः ॥ ६ ॥

अलोकव्रतं लोकातीतभागवतव्रतम् अतएवाव्रणम् "धावन्निमील्य वा नेत्रे" इत्यादेः ॥ ७ ॥

नावद्यत इति युग्मकम् । अयमर्थः अवस्थान्तरप्राप्तिर्विकारः । तत्र प्रथमो विकारो जन्मेति अपूर्णस्य निजपूर्त्यर्थं चेष्टा कर्मेति मनोग्राह्यस्य वस्तुनो व्यवहारार्थं केनापि सङ्केतितः शब्दोनामेति । चक्षुषा ग्राह्योगुणोरूपमिति सत्त्वादिप्राकृतगुणनिदानो द्रव्यस्योत्कर्षहेतुधर्मविशेषो गुण इति प्रकृतिजे लोके दृश्यते यस्य तु सर्वदा स्वरूपस्थत्वात् पुर्णत्वान्मनसोप्यगोचरत्वात् स प्रकाशत्वात् प्रकृत्यतीतत्वात् तानि न विद्यन्ते तथापि यस्तानि ऋच्छति प्राप्नोति । तस्मै नम इत्युरश्लोकस्येनान्वयः । अत एव श्रुत्यापि "निष्कलं निष्क्रियं शान्तम्" इत्यादौ अशब्दमस्पर्शमरूपादौ च तत्तन्निषिध्यापि "ससर्वकामः सर्वगन्धः सर्वरसः" इत्यादौ विधीयते । गुणादोष इति परमार्थत्वात् गुण एव दोष इत्यर्थः । ततो रूढदोषस्तु सर्वथा न सम्भवत्येवेति व्यज्यते । तथाच कौर्म्ये "ऐश्वर्ययोगाद्भगवान् विरुद्धार्थोभिधीयते । तथापि दोषा परमे नैवाहार्य्याः कथञ्चन ॥ गुणा विरुद्धा अपितु समाहार्याश्च सर्वतः" इति । "अयमात्माऽपहतपाप्मा" इत्याद्या श्रुतिश्च । नत्वेकत्र तेषां जन्मादीनां भावाभावयोर्विरोध इत्याशङ्क्य तदविरोधे हेतुमाह—माययेति । अन्यथानुपपत्तिप्रमिता दुस्तर्कस्वरूपशक्तिरेव. तत्र हेतुः अतएव च स्वरूप भूतत्वेन तेऽयः प्राकृतेभ्यो विलक्षणत्वात्तान्यपि न विद्यन्त इत्यपि वक्तुं नशक्येत इति भावः । अतएव विष्णुपुराणे । "गुणांश्च दोषांश्च मुने व्यतीतः" इत्युक्त्वा "समस्तकल्याणगुणात्मको हि" इति । तथा "ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः । भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः" इतिच । पाद्मोत्तरखण्डे— "सोऽसौ निर्गुण इत्युक्तः शास्त्रेषु जगदीश्वरः । प्राकृतैर्हेयसंयुक्तैः गुणैर्हीनत्वमुच्यते" इति । नच स माययेत्यन्यथाऽर्थो मन्तव्यः । "स्वतेजसा नित्यनिवृत्तमायागुणप्रवाहं भगवन्तमीमहि" इति । "धाम्ना स्वेन सदा निरस्तकुहकम्" इति "मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि" इत्यादि वचनेभ्यः "स्वसुखनिभृतचेताः" इत्यादि वक्तृहृदयविरोधाच्च, अतः स्वामिभिरपि योगमायाशब्देन चिच्छक्तिः व्याख्याता । ननु, प्राप्नोतीत्युक्ते कादाचित्कत्वमवगम्यते, तत्राह—अनुकालं नित्यमेव प्राप्नोति कदाचिदपि न त्यजतीत्यर्थः । स्वरूपशक्तिप्रकाशितत्वस्य नित्यत्वस्य च मिथो हेतुहेतुमत्ता ज्ञेया । ननु, कथं जन्मकर्मणोर्नित्यत्वं तेहि क्रियेक्रियात्वञ्च प्रतिनिजांशलक्षणमप्यारम्भपरिसमाप्तिभ्यामेव सिद्ध्यतीति । ते विना स्वरूपहान्यापत्तिः नैष दोषः श्रीभगवति सदैवाकारानन्त्यात् । प्रकाशानन्त्यात् जन्मकर्मलक्षणलीलानन्त्यात्, अनन्तप्रपञ्चानन्त वैकुण्ठगततत्तल्लीलास्थानतत्तल्लीलापरिकराणां व्यक्तिप्रकाशयो

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

रानन्त्याच्च । एतदेवोक्तं श्रीब्रह्मणा "को वेत्ति भूमन् ! भगवन् ! परात्मन् ! योगेश्वरोतीर्भवतस्त्रिलोक्याम् । क्वाहो कथं वा कति वा कदेति विस्तारयन् क्रीडसि योगमायाम्" इति । यत एव सत्यांरपि तत्तदाकारप्रकाशगतयोस्तदारम्भसमाप्त्यो रेकत्रैव ते जन्मकर्मणोरंशा यावत्समाप्यन्ते न समाप्यन्ते वा तावदेवान्यत्रारब्धा भवन्तीत्येवं श्रीभगवति विच्छेदाभावात् नित्ये एव ते जन्मकर्मणी वर्त्तेते तत्र ते क्वचिद्विलक्षणत्वेनारभ्येते क्वचिदेकरूपेण चेति ज्ञेयम् । विशेषस्य भेदात् विशेषणैक्याच्च । एक एवाकारः प्रकाशभेदेन पृथक् क्रियास्पदं भवतीति । "चित्रं बतैतदेकेन वपुषा युगपत् पृथक् । गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावहत्" इत्यादौ प्रतिपादितम् । ततः क्रियाभेदात् तत्तत्क्रियात्मकेषु प्रकाशभेदेषु अभिमानभेदश्चावगम्यते । स च श्रीनारदेन योगमायावैभवदर्शने द्वारकायां प्रसिद्धः तथा सत्येकत्रैकत्र लीलाक्रमजनितरसोद्बोधश्च जायते । ननु, कथं ते एव जन्म कर्मणी वर्त्तेते । पृथगारब्धत्वादन्ये एव ते उच्यते कालभेदेनोदितानामपि समानरूपाणां क्रियाणामेकत्वं यथा श्रीशङ्करशारीरके "द्विर्गोशब्दोयमुच्चरितो नतु द्वौ गोशब्दौ" इतिप्रतीति निर्णीतं शब्दैकत्वम् । तथैव द्विः पाकः कृतोऽनेन द्विधा पाकः कृतोऽनेनेति प्रतीत्या भविष्यति । ततो जन्मकर्मणोरपि नित्यता युक्तैव । अतएवागमादावपि भूतपूर्वलीलोपासनविधानं युक्तं । तथाचोक्तं मध्वभाष्ये । "परमात्मसम्बन्धित्वेन नित्यत्वात् त्रिविक्रमादिष्वप्युपसंहार्यश्च युज्यते" इति । मनुमतञ्चैतच्छ्रुत्या "यद्भूतं भवच्च भविष्यच्च" इत्यनयैव उपसंहार्यत्वम् । उपासनायामुपादेयत्वमित्यर्थः । इत्थमेवाभिप्रेतम् । श्रीगीतोपनिषद्भिः "जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः" इति । नागपत्नीभिरपि "अव्याकृतविहाराय" इति । अतएव श्रीशुकादीनामपि तल्लीलाश्रवणे रागतः प्रवृत्तिर्युज्यते । यथोक्तम् "अजितरुचिरलीलाकृष्टसारः" इत्यादि आत्मारामाश्चेत्यादि । ननु भवन्तस्वरूपभूतान्येव जन्मादीनि तथापि स्वरूपस्यैव पूर्णत्वात् तत्प्राप्तौ किं प्रयोजनम् ? तत्राह—लोकाप्ययसम्भवाय लोको भक्तजनः तस्याप्ययं संसारध्वंसः तत् पूर्वकः सम्भवो भक्तिसुखप्राप्तिः भूप्राप्तौ तदर्थम् एतदप्युपलक्षणम् । नित्यपार्षदानामपि भक्तिसुखोत्कर्षार्थञ्च । तदुक्तं प्रथमे "तथायं चावतारस्ते भुवोभारजिहीर्षया । स्वानाञ्चानन्यभावानामनुध्यानायचासकृत्" इति ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सर्वकालविराजमानत्वमाह—कालेनेति । तमः प्रलयकालोद्भूतं तस्य पार इति "आदित्यवर्णं तमसः परस्तात्" इति श्रुतेः ॥ ५ ॥

सर्वदुर्ज्ञेयत्वमाह—न यस्येति । पदं स्वरूपं जन्तुरर्वाचीनः तत्त्वाऽनभिज्ञः गन्तुं ज्ञातुम् ईरितुं वक्तुं वा यथा नटस्य गीतपदार्थानां चन्द्रकमलादीनां आकृतिभिरभिनायमानानाभिर्विविध चेष्टमानस्यं स्वरूपं भ्रूनेत्रपाणयङ्गुल्यादिचेष्टया किमाकृतिमयं दर्शयतीति ... नाट्यतत्त्वानभिज्ञः ज्ञातुं वक्तुञ्च नार्हति, तथा दुरत्ययाऽनुक्रम... दुर्ज्ञेयचरित्रः ॥ ६ ॥

सर्वात्मचैवादृश्यत्वेऽपि भागवतव्रतदृश्यत्वमाह—दिदृ... इति । पदं चरणकमलं विमुक्तसङ्गास्त्यक्तसङ्गा मुक्तेश्चो... विशिष्टा ये भक्तास्तत्सङ्गिनश्च अलोकव्रतं लोकाः वर्णाश्रमाचा... वन्तस्तदतीतं भागवतं व्रतमित्यर्थः । अत एव अव्रणं भ्रं... शंकारहितम् "धावन्निमील्य वा नेत्रे न स्खलेन्न पतेदि..." इत्यादेः ॥ ७ ॥

प्राकृतजन्मकर्माद्यभावेऽपि प्राकृतजन्मकर्मादिमत्त्वमाह—नैव... गुणदोषमिति समाहारद्वंद्वः गुणदोष एवेति पाठे सर्वो द्व... विभाषैकवद्भवतीतीतरेतरयोगेप्येकत्वं "ऊकालोऽज्झ्रस्वदीर्घ प्लुतः" इतिवत् तदपि लोकानामप्ययः प्रलयः सम्भ... सृष्टिस्तयोर्द्वन्द्वैक्यं तदर्थं स्वमायया मायिकतमोर... गुणाभ्यां तानि रुद्ररूपेण ब्रह्मरुपेण च जन्मा... दीनि अनुकालं प्रतिप्रलयसृष्टिसमये ऋच्छति प्राप्नोति अत्र ... स्थित्यर्थं विष्णुजन्मादीनि न निर्दिष्टानि तेषां मायिकत्वाभा... मायिकजन्मकर्मादीनि तु नानेन निषिद्ध्यते तानि देवक... दिजन्म गोवर्द्धनधारणादिकर्म कृष्णरामादिनाम रूपाणि स्व... भूतान्येव न निषेद्धुं शक्यते श्रुत्यापि "निष्कलंनिष्क्रियं शा... निरवद्यं निरञ्जनं अशब्दमस्पर्शमरूपमव्ययम्" इत्यादौ मायि... निषिद्ध्य "स सर्वकर्मा सर्वगन्धः सर्वरसस्सर्वकामः" इत्यमायि... कर्मादि विधीयते अत एव श्रीविष्णुपुराणे "गुणांश्चदोषां... मुनेऽव्यतीतः" इत्युक्त्वा पुनराह "समस्तकल्याणगुणात्मको हि ..." तथा—

> "ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः ।
> भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः" ॥ इति

पाद्मोत्तरखण्डे च—

> "योऽसौ निर्गुण इत्युक्तः शास्त्रेषु जगदीश्वरः ।
> प्राकृतैर्हेयसंयुक्तैर्गुणैर्हेयत्वमुच्यते" इति

हेयसंयुक्तैर्हेयत्वयुक्तैरित्यर्थः । प्राकृता गुणा हि हेया भ... यत इति भावः । नाम्नश्चिन्मयत्वं श्रुतिराह यथा "ओं आस्य जा... नामचिद्विविक्तन वृहत्ते' विष्णो सुमतिं भजामहे ओंतत्सत्" ... अस्या अयमर्थः । हे विष्णो ! ते तव नामचित् चित्स्वरूपम् अत... महः स्वप्रकाशरूपं तस्मादस्य नाम्न आ इषदेव जानंतो वयं... तु सम्यक् उच्चारणमाहात्म्यादि पुरस्कारेणेत्यर्थः । तथापि वि... कन् ब्रुवाणाः केवलं तदभ्यासमात्रं कुर्वाणाः सुमतिं ... त्वद्विषयां बुद्धिं भजामहे प्राप्नुमः यतस्तदेव नाम ओं प्र... सत् स्वतःसिद्धिमिति अरूपाय प्राकृतरूपरहिताय उरुपाय... कृतचिद्घनरामकृष्णादिबहुरूपाय ॥ ८ ॥ ९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कालेन स्वशक्तिभूतेन लोकेषु स्थूलरूपविश्वावयवेषु ... मितेषु गतेषु सूक्ष्मपञ्चभूतद्वारा प्रकृतौ प्रविष्टेषु गहनं दुर... गभीरं विपुलं तमः प्रकृतिस्तदासीत् तस्य पारे ...

तस्मै नमः परेशाय ब्रह्मणे ऽनन्तशक्तये ।
अरूपायोरुरूपाय नम आश्चर्यकर्मणे ॥ ९ ॥
नम आत्मप्रदीपाय साक्षिणे परमात्मने ।
नमो गिरां विदूराय मनसश्चेतसामपि ॥ १० ॥
सत्त्वेन प्रतिलभ्याय नैष्कर्म्येण विपश्चिता ।
नमः कैवल्यनाथाय निर्वाणसुखसंविदे ॥ ११ ॥
नमः शान्ताय घोराय*मूढाय गुणधर्मिणे ।
निर्विशेषाय साम्याय नमो ज्ञानघनाय च ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सूक्ष्मरूपप्रकृतिविलक्षणो निजधाम्नि योऽभिविराजते समामवतु इत्यनुषङ्गः ॥ ५ ॥

यस्य पदं स्वरूपं देवादयो न विदुः ज्ञानाभावे सुतरां तत्पदं वक्तुमनर्हा इति भावः । एवं सति जन्तुरर्वाचीनोऽस्मदादिः प्राणी कः पुनस्तत्पदं गन्तुं ज्ञातुम् ईरितुं वक्तुं च अर्हति न कोऽपीत्यर्थः । यथा नटस्याऽऽकृतिभिर्वेषैर्विचेष्टतोऽयमसाविति तत्स्वरूपमतज्ज्ञा न विदुस्तद्वत् स तथाभूतः दुरत्ययं दुर्गममनुक्रमणमनुवर्णनं यस्य स मामवतु ॥ ६ ॥

ननु, "तमेव विदित्वाऽतिमृत्युमेति" "ज्ञात्वा मां शान्तिमृच्छ"तीत्यादिश्रुतिस्मृतिभिस्तत्त्वज्ञानान्मुक्तिरुक्ता सा कुतः स्यादत्राह—दिदृक्षव इति । भूतानि आत्मभूतानि स्वतुल्यानि येषां ते सर्वभूतेषु दयावन्त इत्यर्थः । अत एव सुहृदः सुसाधवः स्वधर्मशीलाः मुनयो हेयोपादेयमननपराः अत एव विमुक्तसङ्गाः सन्तः यस्य पदं दिदृक्षवः अलोकव्रतं सामान्यलोकदुस्सम्पादकं ब्रह्मचर्यतीर्थवासमहच्चरणसेवादिकमव्रणं निर्दोषं चरन्ति ते त्वदनुग्रहेण त्वां विदुरिति भावः । समे गतिर्भवतु ॥ ७ ॥

यद्यपि तथापि अनुकालं स्वमायया "माया च वयुनं ज्ञानम्" इति निघण्टुपाठात् स्ववयुनात्मकेन सङ्कल्पेन तानि स्वाऽनुरूपाणि "जन्म कर्म च मे दिव्यम्" इत्यादिशास्त्रप्रसिद्धानि ऋच्छति स्वीकरोति तस्मै नमः इत्युत्तरेणान्वयः । तत्र जन्म वसुदेवादिगेहे, कर्म गोवर्द्धनोद्धरणादि, नाम वासुदेवादि, रूपं चतुर्भुजत्वद्विभुजत्वादि, गुणाः नन्दाद्याज्ञापालनादि, दोषः दधिभाण्डभञ्जनादि, कस्मै प्रयोजनाय ऋच्छति लोकाप्ययसम्भवाय लोकानामसाधूनामप्ययाय विनाशाय साधूनां च सम्भवाय परित्राणाय तथोक्तं श्रीमन्मुखेन "यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ! । अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्, परित्राणाय साधूनां विनाशाय च दुष्कृताम् । संस्थापनाय धर्मस्य सम्भवामि युगेयुगे' इति ॥ ८ ॥

भाषा टीका ।

कालशक्ति से सर्वहेतुओं के, तथा समग्र लोकपालों सहित लोकों के नष्ट होने पर, जब केवल गम्भीर गहन तम, अर्थात् मूलप्रकृतिमात्र अवशिष्ट रही, और उस प्रकृति के भी पार में जो विभु विराजमान हैं, ऐसे ॥ ५ ॥

और देव तथा ऋषि लोग भी जिसके पद (स्थान) को नहीं जानते हैं, फिर और प्राणी कोन ऐसा है, कि—जो जानने को और कहने को समर्थ होगा, जैसे नाना वेष धारण कर चेष्टा करने वाले नट के चरितों को सब नहीं जानसके हैं ऐसे ही दुर्गम चरित्र वाला वह परमात्मा हमारी रक्षा करै ॥ ६ ॥

जिसके सुमङ्गल पद के देखने की इच्छा वाले, और प्राणि मात्रों में आत्म सदृश दृष्टि वाले, सर्व सुहृद मुक्तसङ्ग मननशील साधुजन वन में निर्दोष ब्रह्मचर्य आदि व्रत का आचरण करते हैं वह हमारी गति होवै, अर्थात् रक्षा करै ॥ ७ ॥

जिसके प्राकृत जन्म, कर्म, नाम, रूप, गुण, दोष, कुछ नहीं हैं । तथापि निर्हेतुक कृपा से जगत के उत्पत्ति (स्थिति) संहार के लिये समय २ पर जन्म कर्मादि को जो धारण करता है उसको मेरा नमस्कार होवै ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ब्रह्मणे अरूपाय अनन्तशक्तये उरुरूपाय अत आश्चर्याणि कर्माणि यस्य तस्मै परेशाय नमः ॥ ९ ॥

आत्मप्रदीपाय प्रकाशान्तरस्याविषयाय कुतः साक्षिणे प्रकाशकाय परमात्मने जीवनियन्त्रे अत एव गिरां विदूरायाप्राप्याय चेतसां चित्तवृत्तीनां तथा च श्रुतिः "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" इति ॥ १० ॥

एवमपि विपश्चिता निपुणेन नैष्कर्म्येण सन्यासेन सत्त्वेन शुद्धेन "सन्न्यासयोगाद्यतयः शुद्धसत्त्वाः" इति श्रुतेः । प्रतिलभ्याय प्रत्यक्त्वेन प्राप्याय निर्वाणसुखसंविदे मोक्षानन्दानुभूतये ॥ ११ ॥

* गूढाय इति पाठः वीर० ।

क्षेत्रज्ञाय नमस्तुभ्यं सर्वाध्यक्षाय साक्षिणे ।
पुरुषायात्ममूलाय मूलप्रकृतये नमः ॥ १३ ॥
सर्वेन्द्रियगुणद्रष्ट्रे सर्वप्रत्ययहेतवे ।
(१)असता च्छाययोक्ताय सदाभासाय ते नमः ॥ १४ ॥
नमो नमस्तेऽखिलकारणाय (२) निष्कारणायाऽद्भुतकारणाय ।
सर्वागमाम्नाय महार्णवाय नमोऽपवर्गाय परायणाय ॥ १५ ॥
गुणारणिच्छन्नचिदूष्मपाय तत्क्षोभविस्फूर्जितमानसाय ।
(३)नैष्कर्म्यभावेन (४)विवर्जितागमस्वयम्प्रकाशाय नमस्करोमि ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

गुणधर्मिणे सत्त्वादिधर्माऽनुकारिणे ज्ञानघनायचेति निर्विशेषत्वेऽपि प्रधानवैलक्षण्यमुक्तम् ॥ १२ ॥

साक्षिण इति सर्वाध्यक्षत्वेऽपि निर्विकारत्वमुक्तम् आत्मनां क्षेत्रज्ञानां मूलाय मूलस्य प्रधानस्यापि प्रकृतये उद्भवहेतवे तत्र हेतुः पुरुषाय पूर्वमेव सते तथा च श्रुतिः "पूर्वमेवाहमिहासमिति तत्पुरुषस्य पुरुषत्वम्" इति पूर्णायेति वा ॥ १३ ॥

सर्वेन्द्रियाणां ये गुणा विषयास्तेषां द्रष्ट्रे सर्वे प्रत्यया इन्द्रियवृत्तयो हेतवो ज्ञापका यस्य तस्मै तदेवाऽह, असताऽहङ्कारादिप्रपञ्चेन छाययाऽसद्रूपया उक्ताय प्रतिबिम्बेन बिम्बमिव सूचिताय तत्र हेतुः सद्रूपो विषयेष्वाभासो यस्य तस्मै तदुक्तं तृतीये "यथा जलस्थ आभासः" इत्यादिना पाठान्तरे असत्यस्य छायया ऽध्यासेनाक्ताय युक्ताय तदधिष्ठानायेत्यर्थः ॥ १४ ॥

अखिलकारणाय सर्वकारणरूपाय अत एव स्वयं निष्कारणाय कारणत्वेऽपि मृदादिवद्विकारं वारयति—अद्भुतकारणायेति । एवम्भूतत्वे प्रमाणमाह—सर्वे आगमाः पञ्चरात्रादय आम्नायाश्च वेदास्तेषां महार्णवाय स्रोतसामिव पर्यवसानस्थानाय अपवर्गाय मोक्षरूपाय अतः परायणायोत्तमानामाश्रयाय ॥ १५ ॥

गुणा एवारणिस्तया छन्नश्चिदूष्मपो ज्ञानाग्निस्तस्मै तेषां गुणानां क्षोभे कार्ये विस्फूर्जितं बहिर्वृत्तिकं मानसं यस्य "सोऽकामयत बहुस्याम्" इति श्रुतेः । नैष्कर्म्यमात्मतत्त्वं तस्य भावेन भावनया विवर्जिता आगमा विधिनिषेधलक्षणा यैस्तेषु स्वयमेव प्रकाशो यस्य तस्मै ॥ १६ ॥

———

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

एवं शरण्यत्वोपयुक्तगुणकथनपूर्वकं स्वरक्षायै शरणमुपगम्याथ पात्रपरिवेष्टितबहुव्यञ्जनोपेतान्नादिभोजनप्रवृत्तभन्यायेन झंझामारुतविधूतचूतादिफलादानप्रवृत्तन्यायेन च पौनरुक्तचक्रमावनाहत्य उक्तैरनुक्तैश्च गुणैर्यथामत्युपस्थितैः शरण्यत्वोपयुक्तैः स्तुवन् प्रणमति—तस्माइति । परेषां ब्रह्मादीनामपि ईशाय अनन्ताः शक्तयः सृष्ट्यादिशक्तयो यस्य न विद्यते रूपं कर्मायत्तं शरीरं यस्य उरूणि बहूनि रूपाणि अकर्मायत्तानि स्वेच्छोपात्तान्यप्राकृतानि रूपाणि यस्याश्चर्य लोकविसजातीयत्वेनाद्भुतं कर्म जगद्व्यापाराद्यात्मकं यस्य ॥ ९ ॥

आत्मनैव दीप्यत इत्यात्मदीपः तस्मै स्वयंप्रकाशाय साक्षिणे सर्वस्य युगपत्साक्षाद्द्रष्ट्रे परमात्मने लोकत्रयमाविश्य प्रशासेन भर्त्रे गिरां मनसश्चेतसामविदूरायाविषयाय वाङ्मनसाऽपरिच्छेद्यस्वरूपस्वभावाय चित्तावस्थस्य मनसः सत्त्वप्रचुरत्वेनाधिष्ठेयविषयीकरणयोग्यत्वसूचनाय मनसः पृथक् चेतसामपीत्युक्तम् ॥ १० ॥

विपश्चिता ज्ञानिना कर्त्रा सत्त्वेन विशुद्धेनानन्यप्रयोजनेन नैष्कर्म्येण उपासनात्मकानिवृत्तिधर्मेणोपलभ्याय कैवल्यं प्रकृतिसम्बन्धराहित्यं मोक्ष इति यावत् तस्याधिपतये निर्वाणसुखसम्विदे निर्दुःखानन्दज्ञानस्वरूपाय ॥ ११ ॥

शान्ताय अशनयापिपासाशोकमोहजरामृत्युरूपषडूर्मिरहिताय यद्वा साधूनां शान्ताय प्रसन्नाय घोराय खलानामुग्राय गूढाय संसारिणां प्रच्छन्नाय गुणधर्मिणे सत्त्वादिगुणानामाश्रयाय निर्विशेषाय हेयगुणरहिताय सत्त्वादिगुणाश्रयत्वेऽपि तदवश्यायेत्यर्थः । साम्याय वैषम्यादिरहिताय ज्ञानघनाय कचिदपि जाड्यरहिताय, यद्वा शान्ताय अतिसौम्यमाधुर्यसौशील्यादिगुणगणलक्षितमधुरमूर्तये घोराय अतिभयानकात्युग्रश्रीनृसिंहरूपाय गूढाय अन्तर्यामिरुपायोत्पादिकाप्रकटितरूपायेत्यर्थः । मूढायेति पाठे केष्वपि स्वस्वरूपादन्यत्र केष्वप्यदत्तचित्ताय सर्वत्रानासक्ताय स्वात्मारामाय सदास्वानन्दतुष्टायेत्यर्थः ॥ १२ ॥

क्षेत्रज्ञशरीरकाय सर्वाध्यक्षाय सर्वभूताधिपतये साक्षिणे सर्वद्रष्ट्रे पुरुषायान्तःप्रविश्य नियन्त्रे आत्ममूलाय स्वयं कारणान्तररहिताय मूलप्रकृतये सर्वोपादानभूताय ॥ १३ ॥

सर्वेषामिन्द्रियाणां तद्गुणानां शब्दादिविषयाणां च गुण- त्सदाद्रष्ट्रे सर्वप्रत्ययहेतवे संशयविपर्ययादिसर्वधर्मप्रत्ययहेतवे सता सततपरिणामिन्या छायया छायावदपृथक्सिद्धया माय-

(१) असत्याच्च विमुक्ताय इति विजय० । (२)नारायणायार्ति विनाशनाय इति विजय० । (३)नैष्कर्म्यभावाय इति वीर० युक्तात्मनि स्वहृदये परिभाविताय ज्ञानात्मने भगवते नम ईश्वराय इति विजय० । (४) निवर्त्तितागमेति वीर० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उक्ताय सूचिताय जडत्वेन स्वयं प्रवृत्तिशून्यया मायया प्रवर्त्तयितृत्वेन सूचितायेत्यर्थः । अक्तायेति पाठान्तरं तदा युक्तायेत्यर्थः । यद्वा गूढाय गुणधर्मिणे निर्विशेषाय साम्याय ज्ञानघनायेत्यचेतनसमष्टिशरीरकत्वमुक्तम् तत्र गूढाय नमोमयाय गुणधर्मिणे सत्त्वादिगुणानामाश्रयाय निर्विशेषाय पृथिव्यादिविशेषरहिताय "महदाद्याविशेषान्ताः" इति प्रयोगात् साम्याय गुणसाम्यावस्थाय अज्ञानघनायेति वा छेदः तदा जाड्यस्वभावायेत्यर्थः । गूढत्वादिकं च "काठिन्यवान्यो बिभर्ति" इतिवत्प्रकृतिद्वारकं विशेषणं क्षेत्रज्ञाय सर्वाध्यक्षाय साक्षिणे पुरुषायेति समष्टिजीवशरीरकत्वमुच्यते क्षेत्रज्ञाय "एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञमिति तद्विदः" इत्युक्तविधक्षेत्रज्ञाय सर्वाध्यक्षाय करणाधिपतये साक्षिणे बुद्धीन्द्रियादीनां साक्षाद्द्रष्ट्रे पुरुषाय सर्वशरीरान्तर्वर्तिने एतान्यपि सद्वारकाण्येव विशेषणानि ज्ञेयानि सर्वेन्द्रियगुणद्रष्ट्रे इति श्लोके तु व्यष्टिजीवशरीरकनमस्कारः तत्रासताऽनित्यया छायया छायावत्सानुबन्धया वासनया अक्ताय रूषितायं उक्तायेति पाठे सूचितायाश्रयमन्तरेण वासनाया अनुपपत्तेः तया सूचितायेति भावः स्वप्रकाशाय इमान्यपि सद्वारकाण्येव विशेषणानि इतराणित्वद्वारकाणीति विवेकः ॥ १४ ॥

अखिलकारणाय सर्वकारकशरीरकाय निष्कारणाय स्वयंकारकान्तरासाध्यायाकृतकारणाय मृदादिवत्स्वरूपपरिणामरहितकारणस्वरूपाय सर्वे आगमाः पाञ्चरात्रादयः आम्नाया ऋगादयो वेदाश्च तेषां महार्णवाय स्रोतसामिव पर्यवसानभूमये अपवर्गाय मोक्षहेतुभूताय परायणाय परमाश्रयाय परमप्राप्याय ते तुभ्यं नमः ॥ १५ ॥

गुणारणिच्छन्नचिदूष्मपाय सत्त्वादिगुणात्मिकाप्रकृतिरेवारणिः तत्संच्छन्नं जीवसमष्टिरूपमूष्माणमग्निं पिबति संहारकाले स्वस्मिन्नुपसंहृत्य यो निदधाति स तथोक्तस्तस्मै तत्क्षोभविस्फूर्जितमानसाय मानसशब्दो मनःकार्यसङ्कल्पपरः तत्क्षोभे चिदचितोर्विक्षोभकाले सृष्टिकाले स्फुरितसङ्कल्पाय नैष्कर्म्यं मोक्षः स येन भाव्यते तस्मै निवर्त्तितागमस्वयंप्रकाशाय "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" इत्युक्तप्रकारेण वाङ्मनसाऽपरिच्छिन्नज्ञानस्वरूपायेत्यर्थः । नैष्कर्म्यभावेनेतिपाठे नैष्कर्म्यभावेन मोक्षलाभेन निवर्तितः आगमः शास्त्रं यैः तेषां स्वयमेव प्रकाशमानाय मुक्तिपर्यन्ता हि शास्त्रवश्यता मुक्तानां तु निवर्त्तितागमानामकर्मवश्यानां तत्फलतया प्रकाशमानायेत्यर्थः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अनन्तरातीतश्लोकोक्तार्थविवरणपूर्वकं यच्छब्दविशिष्टं तच्छब्दावच्छिन्नं च नमति, तस्मा इति ॥ ९ ॥

अरूपायेत्युक्तं विवृणोति–नम आत्मेति । आत्मप्रदीपाय स्वतःप्रकाशाय आत्मनः जीवस्य स्वरूपज्ञापनप्रकाशाय वा ॥ १० ॥

(१) अरूपप्राप्तिसाधनज्ञानं तत्सद्भावे ज्ञानिप्राप्यत्वलक्षणं मानमित्यभिप्रायेण नमति—सत्त्वेनेति । विपश्चितां सत्त्वेन ज्ञानेन प्रतिलभ्याय प्राप्याय "बलज्ञानसमाहारः सत्त्वं केवलमेव च" इत्यभिधानम्. नैष्कर्म्येण निवृत्तिधर्मलब्धेन ॥ ११ ॥

उरुरूपायेत्युक्तरूपविशिष्टं तात्पर्यादरूपविशिष्टं च नमति, शान्तायेत्यनेन सत्त्वप्रवर्तकवासुदेवादिरूपं लक्षयति, घोरायेत्यनेन रजःप्रवर्तकजामदग्न्यादिरूपम्. मूढायेत्यनेन तमःप्रवर्त्तकवराहादिरूपम्. गुणकर्मणइत्यनेन तत्तद्योनिविशिष्टगुणकर्मवते ज्ञानघनायेत्यनेनाऽरूपस्य शून्यत्वं निवारयति सत्त्वेनेत्याद्युक्तविशेषणसमुच्चायकश्चकारः ॥ १२ ॥

रूप्यरूपित्वेन निरूप्यमाणस्य हरेर्मिथो न कोऽपि विशेषोऽस्तीति ज्ञापयितुमुभययोग्यविशेषणविशिष्टत्वेन नमति–क्षेत्रज्ञायेति । सर्वाध्यक्षाय सर्वस्वामिने आत्मैव मूलं यस्य तथा तस्मै आत्मनां मूलाय वा ॥ १३ ॥

साक्षिशब्दविवरणपूर्वकमस्मदादिज्ञाने हेतुत्वेनाऽस्मदादिप्रपञ्चाद्भिन्नं नमति—सर्वेति । असत्यादस्वतन्त्रात्प्रपञ्चाद्विमुक्ताय सन्निर्दोषो आभासो देहो यस्य स तथा तस्मै "सत् देहः सुखगन्धश्च" इत्यादेः अनेन प्राकृतरूपं नास्तीत्युक्तं भवति सन्नाभासः प्रकाशो यस्य स तथा तस्मा इति वा "परंज्योतिरुपसम्पद्यते" इति श्रुतेः ॥ १४ ॥

अखिलकारणत्वादिविशिष्टत्वेनोक्तः क इत्याशंक्य श्रीनारायण एव नान्य इति तन्नामनिर्देशपूर्वकं पूर्वोक्ताऽनुक्तविशेषणविशिष्टत्वेन नमति—नमो नम इति । सर्वैरागमैः पञ्चरात्रादिभिः आम्नायैर्ऋगादिभिर्वेदैश्च समुद्राय ॥ १५ ॥

सर्वप्रत्ययहेतव इत्येतद्विशेषणं विवृण्वन्नाह–गुणेति । गुणारणिच्छन्नं सत्त्वादिगुणलक्षणकाष्ठ छन्नं चिदुष्म ज्ञानाख्यं ज्योतिर्यत्तत्पाति रक्षतीति स तस्मै "बलमानन्द ओजश्च" इत्यादेः अन्यथा तद्रक्षणकथनं व्यर्थं स्यात् शान्ताय इत्यादिना यद्गुणलुब्धत्वं तद्विडम्बनमात्रमित्यभिप्रेत्याह—तत्क्षोभेति । तत्क्षोभे गुणविक्षोभेऽपि विस्फूर्जितं समुल्लसितं मानसं यस्य स तथा तस्मै गुणशक्त्युद्रेकावस्थायामपि मनोविकाररहितायेत्यर्थः । स्वतन्त्रोऽपि भक्तवश्यो भवतीत्याह—युक्तात्मभिरिति । वशीकृतमनआदीन्द्रियैः पुरुषैः ज्ञानघनायेत्यनेन ज्ञानं किं स्वरूपमुत भिन्नमुच्यते ? इति विकल्पावकाशो नास्तीत्याह—ज्ञानेति । न केवलं ज्ञानं गुणोऽस्य अन्येऽपि सन्तीत्याशयेनाह—भगवत इति । गुणानां गुणिनो भेदे "विज्ञानमानन्दं ब्रह्म" इति व्यवहारानुपपत्तिरित्याशंक्योभयविधव्यवहारघटकत्वशक्तियोगोऽस्यास्तीत्याशयेनाह, ईश्वरायेति ॥ १६—१८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ननु, तर्हि भक्तसौख्यप्रयोजनं जातमिति । स्वरूपस्य पूर्णत्वं कथमुपपद्येत ? उच्यते । भक्तसुखप्रयोजनकत्वं नाम स्वरूपानन्दविलास एवेति दिक् । अत्र विशेषजिज्ञासायाम्

(१) भगवान्

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

भगवत्परमात्मसन्दर्भौ दृश्यौ । अरूपाय प्राकृतरूपरहिताय उरुरूपाय अप्राकृतानन्तरूपाय ॥ ९ ॥ १० ॥

सत्त्वेन शुद्धसत्त्वात्मकेन नैष्कर्म्येण भक्तियोगेन हेतुना । विपश्चिता कर्त्रा "तन्त्रं सात्त्वतमाचष्ट नैष्कर्म्यं कर्मणां यतः" इति प्रथमोक्तेः । कैवल्यस्य शुद्धप्रेम्णो नाथाय दानादानयोः प्रभवे "कैवल्यसम्मतपथस्त्वथ भक्तियोगः" इति "कैवल्यैकप्रयोजनम्" इति च. तच्छब्देन तत्र—प्रसिद्धेः । निर्वाणसुखस्यापि संविदनुभवो यस्मात्तस्मै "मदीयं महिमानञ्च" इत्यादि-श्रीमत्स्यदेवोक्तेः । उभयमपि "ब्रह्मणो हि प्रतिष्ठाऽहममृतस्य" इत्यादि श्रीगीतोपनिषद्भ्यः ॥ ११ ॥

शान्तायेति पदयुग्मत्रयं प्रतिस्वं मिथोविरोधित्वेन निर्दिश्य कार्यकार्ययोस्तादात्म्यात् तदभिन्नतया तथा चाऽङ्गीकृत्य तस्य मिथो विरोधिशक्त्याश्रयत्वं दर्शितम् । उक्तञ्च "सर्वाश्रयस्वरूपायानन्दज्ञानघनाय" इति । सच्चिदानन्दस्वरूपायेत्यर्थः । तत्र गुणा ज्ञानादयो धर्म्माः स्वभावास्ते विद्यन्ते यस्य तस्मै । साम्याय विशेषेष्वनुगतायेत्यर्थः ॥ १२—१३ ॥

छायया निजाभासरूपेणेत्यर्थः । पाठान्तरे असति खपुष्पादौ या मच्छाया स्फूर्त्यभावः तद्युक्ताय सदाभासाय सति तु वस्तुनि स्फुरते ॥ १४ ॥

अद्भुतकारणायेति "श्रुतेस्तु शब्दमूलत्वात् २।१।२७" इति न्यायं दृढीकरोति शुक्तिरजतवत्त्वेऽद्भुतत्वायोगात् गुणारणीत्यादि द्वये तृतीयान्यपदार्थो बहुव्रीहिः । तत्र च चिन्मानसे जीवस्येति ज्ञेयम् । विस्फूर्जितत्वम् वहिर्वृत्तित्वम् । नैष्कर्म्याय योभावो भक्तिज्ञानात्मकस्तेन ॥ १५—१६ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

जीवात्मवाङ्मनस्तद्वृत्तिभिरगम्यत्वमाह—आत्मप्रदीपाय । जीवात्मप्रकाशकाय प्रकाश्यकस्य तत्त्वं प्रकाश्यो न जानातीति भावः—

"सर्वं पुमान् वेदगुणांश्च तज्ज्ञो-
न वेद सर्वज्ञमनन्तमीडे ॥

इति हंसगुह्योक्तेः विदूराय अगम्याय चेतसां चित्तवृत्तीनाम् ॥१०॥

कथं तर्हि स गम्यो भवतीत्यत आह—सत्त्वेन साधुत्वेन सन् साधुः सतो भावः सत्त्वं वैष्णवत्वं तेन प्रतिलभ्याय वचनप्रतिवचनलक्षणप्रतिलाभोऽयं भक्तभगवतोर्ज्ञेयः भक्तिरस्य भजनं "तदिहामुत्रोपाधिनैराश्येनामुष्मिन्मनःकल्पनमेतदेव नैष्कर्म्यम्" इति गोपालतापनीश्रुतेः । सत्वेन यन्नैष्कर्म्यं तेन विपश्चिता प्रतिलभ्यायेत्यन्वयः ॥ ११ ॥

अज्ञानिलक्ष्यविश्वरूपत्वमाह—नम इति । शान्ताय सात्त्विकलोकरूपाय तत्रापि ज्ञानिवेद्यब्रह्मरूपत्वमाह—निर्विशेषायेति ॥ १२ ॥

योगिवेद्यान्तर्यामिरूपत्वमाह—क्षेत्रज्ञेति, चतुर्भिः । क्षेत्रं शे... द्वयं तत्त्वेन जानातीति क्षेत्रज्ञोऽन्तर्यामी तस्मै "क्षेत्रज्ञञ्चापि मां विद्धि" इतिगीतोक्तेः । आत्मनां जीवानां मूलायांशिने प्रकृतेः... मूलं मूलप्रकृतिस्तस्मै राजदन्तादित्वात् परनिपातः ॥ १३ ॥

सर्वाणीन्द्रियाणि गुणा विषयाश्च तेषां द्रष्ट्रे सर्वप्रत्ययाः इन्द्रियवृत्तयो हेतवो ज्ञापका यस्य तस्मै "गुणप्रकाशैरनुमीयते भवान्" इत्युक्तेः । असता असर्वकालस्थायिना छायया "छायेव यस्य भुवनानि बिभर्त्ति दुर्गा" इति ब्रह्मसंहितोक्तेः । छायायुक्ताय... याकार्य्येण विश्वेन उक्ताय ज्ञापिताय कार्य्येण कारणानुमान... दिति भावः । कुम्भकारशक्त्या जनितेन घटेन यथा कुम्भकारो... ऽनुमीयते तद्वदित्यर्थः । असत्यच्छायया कायेति पाठे असति असत्... जने अच्छायया अकाय युक्ताय खचरणच्छायामदात् इत्यर्थः । ... अच्छाया ज्वाला तद्युक्ताय "छाया सूर्य्यप्रिया कान्तिः प्रतिबिम्बम् ... नातपः" इत्यमरः । अनातपवाचकः छायाशब्दः तदितरत्वमा... आतपरूपां ज्वालां बोधयति, यद्वा अच्छाया अकान्तिरस्फूर्तिः ... यावत् तद्युक्ताय सत्सु साधुषु आभासः स्फूर्तिर्यस्य तस्मै ॥ १४ ॥

अद्भुतकारणाय उपादानकारणत्वेऽप्यद्भुतत्वं निर्विकारत्वेति भावः । यदुक्तं देवैः "आत्मनैवाविक्रियमाणेन सगुणं ... सृजसि" इति स्वामिचरणैरप्यत्रावतारितं कारणत्वे च सूत्रा... द्विकारं वारयति—अद्भुतकारणायेति । एवंभूतत्वे प्रमाणमाह— आगमाः पञ्चरात्रादयः आम्नाया वेदाश्च तेषां महार्णवाय ... ज्ञानामिव पर्य्यवसानस्थानायेति अपवर्गरूपाय परायणाय ... मानामाश्रयाय ॥ १५ ॥

गुणा एवारणिस्तया छन्नो यश्चिदुष्मपो ज्ञानाग्निस्तस्मै ... गुणानां क्षोभविस्फूर्जिते क्षोभोत्कर्षे मानसमिच्छा यस्य "सोऽकामयत बहुस्याम्" इतिश्रुतेः । नैष्कर्म्यमात्मतत्त्वं तस्य भावेन ... विवर्जिता आगमा विधिनिषेधलक्षणा यैस्तेषु स्वयमेव प्रका... यस्य तस्मै ॥ १६ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अरूपाय प्राकृतरूपरहिताय उरुरूपाय अप्राकृतबहुरूपाय ... सर्वाधारत्वेपि नृसिंहादिरूपेण स्तम्भादितो गमना... आश्चर्याणि कर्माणि यस्य तस्मै ॥ ९ ॥

आत्मप्रदीपाय स्वप्रकाशाय साक्षिणे सर्वप्रकाशाय ... विदूराय इयत्तावच्छिन्नतया वेदैरवर्णिताय मनसश्चेतसां ... वृत्तीनाञ्च विदूराय "यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह" इति श्रुतेः । वेदैर्यथाशक्ति प्रतिपाद्य एव तदनुगृहीतेन ... सा द्रष्टव्य एव "सर्वे वेदा यत्पदमामनन्ति, मनसैवानुद्रष्टव्यम्" इत्यादि श्रुतेः ॥ १० ॥

विपश्चिता विवेकिनोपासकेन कर्त्रा सत्त्वेन शुद्धेन ... करणेन नैष्कर्म्येण निवृत्तिमार्गेणोपायेन प्रतिलभ्याय ... कैवल्यं कार्यकारणप्रकृति विलक्षणं मोक्षस्थानं तस्य ...

माहृक्प्रपन्नपशुपाशविमोक्षणाय मुक्ताय भूरिकरुणाय[1] नमो ऽलयाय।
स्वांशेन सर्वतनुभृन्मनसि प्रतीतप्रत्यग्दृशे भगवते बृहते नमस्ते ॥ १७ ॥
आत्मात्मजाऽऽप्तगृहवित्तजनेषु सक्तैर्दुष्प्रापणाय गुणसङ्गविवर्जिताय।
मुक्तात्मभिः स्वहृदय परिभाविताय ज्ञानात्मने भगवते नम ईश्वराय ॥ १८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

निर्गताः बाणाः विघातकाः सर्वे उपद्रवाः यस्मात्ताहक् सुखसंविद्रूपाय नमः ॥ ११ ॥

शान्ताय धार्मिकजनसुखदात्रे घोराय अधार्मिकजनदण्डदात्रे गूढाय दुर्बुद्धिभिर्दुर्लक्षाय गुणाः कल्याणरूपा ज्ञानशक्त्यादयस्त एव धर्माः संत्यस्येति गुणधर्माः तस्मै नित्यगुणयुक्तायेत्यर्थः। निर्विशेषाय हेयगुणवर्जिताय साम्याय वैषम्यादिराहिताय ज्ञानघनाय ज्ञानपुञ्जाय निरातिशयज्ञानस्वरूपायेत्यर्थः ॥ १२ ॥

क्षेत्रं कृत्स्नं विश्वं जानातीति तथा तस्मै सर्वाध्यक्षाय तथादि साक्षिणे निर्विकाराय आत्मनां स्वांशभूतानां मूलाय स्थितिप्रवृत्यादिप्रदाय मूलस्य महदाद्युपादानस्य स्वशक्तिभूतस्य प्रधानस्य प्रकृतये स्थितिप्रवृत्त्यादिप्रदाय पुरुषाय पूर्णाय नमः ॥ १३ ॥

सर्वेषामिन्द्रियाणां गुणानां विषयाणां च द्रष्ट्रे सर्वेषां प्रत्ययानां प्रत्यायकानां हेतूनां हेतवे कारणाय "प्रत्ययोधीतशपथज्ञानविश्वासहेतुषु" इत्यमरः "सत्ये साधौ विद्यमाने प्रशस्तेभ्यर्हिते च सत्" इति कोशात्सच्छब्दः प्रशस्तवाचकः नास्ति सत्प्रशस्तं प्रमाणमन्यद्यस्मात्तेनाऽसता परमेण प्रमाणेन वेदाख्येन"छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः" इति कोशाच्छायाशब्दः कान्तिवाचकः तथा च छायया कान्तिवच्छेदाऽनुवर्तिन्या स्मृत्या च उक्ताय श्रुतिस्मृतिवर्णितायेत्यर्थः। सति प्रशस्ते उपासकचित्ते आभासः स्फूर्तिर्यस्य तस्मै नमः ॥ १४ ॥

अखिलानां सकलानां कारणाय मूलाय निष्कारणायाऽनन्यभूलाय अखिलकारणत्वेऽपि निर्विकारस्वरूपत्वादद्भुतकारणाय शक्तिपरिणामाङ्गीकारात् सर्वेषामागमानां पञ्चरात्रादीनामाम्नायानां वेदानां च महार्णवाय समन्वयस्थानाय अपवर्गाय मुक्तोपसृप्याय अत एव परायणाय परे मोक्षाधिकारिणस्तेषामाश्रयाय यद्वोत्कृष्टलयस्थानाय ॥ १५ ॥

गुणानां ज्ञानवैराग्यादीनामरणिरुत्पादिका भक्तिस्तयाच्छन्नं व्याप्तं चिद्रूपमाणं ज्ञानज्योतिर्भूतं जीवं स्वानन्यभक्तं पातीति तथा तस्मै तत्क्षोभेन स्वभक्तविषयकस्नेहेन विस्फूर्जितं प्रमुदितं मानसं यस्य तस्मै नैष्कर्म्यं भगवच्चरणं तस्मिन् भावेन भक्त्या विवर्जिता आगमा भक्तिविरुद्धा विधिनिषेधरूपलक्षणा यैस्तेषु स्वयमेव परमानन्दमूर्त्याविष्कारेण प्रकाशो यस्य तस्मै नमस्करोमि ॥ १६ ॥

भाषा टीका।

ब्रह्मादिकों के ईश प्राकृत रूप से रहित दिव्यकल्याण अनन्त रूपवाले आश्चर्यकर्मा अनन्तशक्ति ऐसे परब्रह्म को नमस्कार हो॥९॥

आत्मप्रदीप, अर्थात् दीप के तरह प्रकाशक साक्षी और मन चित्त वाणी के अप्राप्य, ऐसे परमात्मा को नमस्कार हो ॥ १० ॥

मनीषी पुरुष को सत्त्व और नैष्कर्म्य से प्रतिलभ्य, और कैवल्य के नाथ, तथा मोक्ष सम्बन्धि सुख और ज्ञानके देने वाले ऐसे प्रभुको नमस्कार हो ॥ ११ ॥

शांत घोर तथा मूढ रूप को धारण करने वाले, तथा सत्त्वादिगुणों के अनुकरण करने वाले, तथा निर्विशेष (साम्याधिक्यरहित) अर्थात् जिनके सम और जिससे अधिक कोई नहीं, अथवा पृथिव्यादि विशेष रहित और साम्यस्वरूप अर्थात् वैषम्यरहित, तथा ज्ञानघन नाम जाड्यांश रहित एसे हरि को नमः हो ॥ १२ ॥

सर्वाध्यक्ष होकर सर्व साक्षी ऐसे क्षेत्रज्ञ रूप आपको नम हो। तथा पुरुष रूप और आत्मा के मूल रूप ऐसे तथा मूलप्रकृति स्वरूप आपको नमः हो ॥ १३ ॥

सर्व इन्द्रियों के विषयों के द्रष्टा, और सर्वज्ञान के हेतु, और सततपरिणामवाली छाया (परिछांहीं) के तुल्य अपृथक्सिद्ध ऐसी माया से सूचित, अर्थात् माया को जड होने से उसके प्रवर्त्तकपने से सूचित होने वाले, तथा स्वयंप्रकाश नित्य यथार्थज्ञान वाले प्रभु को नमः ॥ १४ ॥

अखिल जगत् के कारण, और जिनका कोई कारण नहीं, और कारण भी लोक विलक्षण, जैसा कि जगत में घटादि का कुलाल निमित्त कारण होता है, मृत्तिका उपादान कारण अलग होती है वैसे नहीं. किंतु आप अभिन्ननिमित्तोपादान कारण हैं, अर्थात् एकही आप निमित्तकारण भी और उपादान कारण भी हैं, तथा पञ्चरात्रादि सर्व आगम और समग्र वेद के महार्णव रूप हैं, तथा अपवर्ग अर्थात् मोक्षरूप और परमगति हैं, ऐसे आप को नमः हो ॥ १५ ॥

तथा गुणरूप अरणि (काष्ठ) से ढका हुआ चैतन्यरूप अग्नि जिनका, और समय पर गुणों के क्षोभ करने को समर्थ है मानस सङ्कल्प जिनका, और स्वतः नैष्कर्म्यभाव से विधिनिषेध रूप शास्त्र से वर्जित और स्वयंप्रकाश एसे श्रीहरि को मैं नमस्कार करता हूँ ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

माहक् मद्विधश्चासौ प्रपन्नः पशुस्तस्य पाशोऽविद्या तस्य विशेषेण मोक्षणं येन तत्र योग्यतामाह, मुक्ताय मोचने हेतुः भूरिः करुणा यस्य अतस्तत्रार्थेऽलयायानलसाय स्वांशेनान्तर्यामि-

(१) मनोलयाय इति वीर० ॥

यं धर्मकामार्थविमुक्तिकामा भजन्त इष्टां गतिमाप्नुवन्ति ।
किं त्वाशिषो रात्यपि देहमव्ययं करोतु मेऽदभ्रदयो विमोक्षणम् ॥ १९ ॥
एकान्तिनो यस्य न कञ्चनार्थं वाञ्छन्ति ये वै भगवत्प्रपन्नाः ।
अत्यद्भुतं तच्चरितं सुमङ्गलं गायन्त आनन्दसमुद्रमग्नाः ॥ २० ॥
तमक्षरं ब्रह्म परं परेशमव्यक्तमाध्यात्मिकयोगगम्यम् ।
अतीन्द्रियं सूक्ष्ममिवातिदूरमनन्तमाद्यं परिपूर्णमीडे ॥ २१ ॥
यस्य ब्रह्मादयो देवा वेदा लोकाश्चराचराः ।
नामरूपविभेदेन फल्ग्व्या च कलया कृताः ॥ २२ ॥
यथाऽर्चिषोऽग्नेः सवितुर्गभस्तयो निर्यान्ति संयान्त्यसकृत्स्वरोचिषः ।
तथा यतोऽयं गुणसम्प्रवाहो बुद्धिर्मनः खानि शरीर(१ सर्गाः ॥ २३ ॥
स वै न देवासुरमर्त्यतिर्यङ् न स्त्री न षण्ढो न पुमान्न जन्तुः ।
नाऽयं गुणः कर्म न सन्न चासन्निषेधशेषो जयतादशेषः ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

रूपेण सर्वेषां तनुभृतां मनसि प्रतीता प्रख्याता या प्रत्यक् दृक्तस्मै तथा च श्रुतिः "य आत्मनि तिष्ठन्नात्मानमन्तरो यमयति" इति भगवते सर्वेषां तनुभृतां नियमने समर्थाय तेषां मनःस्थितत्वेऽपि बृहते ऽपरिच्छिन्नाय ॥ १७ ॥

अन्तःस्थत्वेऽपि देहादिष्वासक्तैर्दुष्प्रापणायाऽऽप्तुमशक्याय तत्र हेतुः गुणसङ्गेन विवर्जिताय अत एव मुक्तात्मभिर्देहादिष्वनासक्तैश्चिन्तिताय तैः परिभावितं रूपमाह—ज्ञानात्मन इत्यादि ॥ १८ ॥

इष्टां गतिं कामितं धर्मादिफलं प्राप्नुवन्त्येव न तु तावदेव किं तु यास्तैरकामिता अन्या अप्याशिषो राति देहमप्यव्ययं राति एवं योऽदभ्रदयः स मे विमोक्षणमेव केवलं करोतु नाधिकं प्रार्थये ॥ १९ ॥

एतावदप्यहं भक्तिसुखानभिज्ञत्वेन वाञ्छामि यस्यैकान्तभक्ता न कञ्चिदर्थं वाञ्छन्ति तं परेशं परमेश्वरमीडे स्तौमीत्युत्तरेणाऽन्वयः तेषां निष्कामत्वे हेतुः ये वै भगवतः सर्वज्ञान्मुक्तान्प्रपन्नाः सेवितवन्तः ॥ २० ॥

अत्यद्भुतसुमङ्गलत्वप्रदर्शनार्थमक्षरत्वादीनि विशेषणानि ॥ २१ ॥

परिपूर्णत्वं प्रदर्शयन्नाह—त्रिभिः । यस्य फल्ग्व्या च स्वल्पयैव कलयांऽशेन कृताः स जयतादिति तृतीयेनाऽन्वयः ॥ २२ ॥

कथं कृता इत्यपेक्षायां दृष्टान्तौ—यथाऽर्चिषोऽग्नेरिति । प्रवाहे दृष्टान्तः सवितुर्गभस्तय इत्यानन्त्ये. निर्यान्त्युद्गच्छन्ति संयान्ति लीयन्ते गुणसम्प्रवाहमेवाऽऽह, बुद्धिर्मन इति । खानि करणानि शरीरसर्गाः कार्यदेहप्रवाहाश्च यतो भवन्ति सः ॥ २३ ॥

अत एव देवादीनां मध्ये कोऽपि न भवति न जन्तुर्लिङ्गत्रयशून्यं प्राणिमात्रमपि किन्तु सर्वस्य निषेधेऽवधित्वेनावशिष्यत इति निषेधशेषोऽशेषात्मकश्च जयतान्मद्विमोक्षणायाऽविर्भवतु ...

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

मादृशो यः प्रपन्नः पशुश्च तस्य यः पाशः कर्मबन्धस्तस्य विमोक्षणं यस्मात्तस्मै तन्मोक्षयतीति वा सः तस्मै मुक्ताय ... प्रकृतिपारवश्यरहिताय भूरिकरुणाय दयासमुद्राय मनोलयाय मनसो लयः शब्दादिविषयेभ्यो वैमुख्यं यत्प्रावण्यात् तस्मै, ... लयायेति पाठे ऽअलयायेति छेदः । न विद्यते लयो नाशो यद्भजनादि ... त्यलयस्तस्मै "न मे भक्तः प्रणश्यति" इति भगवदुक्तेः । ... दशायां जीवशरीरकतया गृह्यमाणत्वमाह—स्वांशेनेति । प्रत्यग् ... शब्दोऽहंबुद्धिबोध्यजीवविषयः स्वांशेनेति भावप्रधानो निर्देशः स्वांशेन विशिष्टवस्त्वैकदेशत्वेनाकारेण सर्वयोगिनां मनसि प्रतीतः यः प्रत्यगहंबुद्धिबोद्ध्यो जीवस्तस्य दृक् तद्विषयकं ज्ञानं ... तस्मै स्वांशभूतजीवान्तरात्मत्वेन तद्रूपतया प्रतीयमानायेत्यर्थः ॥

देहपुत्रमित्रादिषु सक्तैर्दुःखेनाऽपि प्राप्तुमशक्याय गुण... शब्दादयो विषयास्तेषु सङ्गस्तेन विवर्जितस्तस्मै शब्दादि विषयेष्वसङ्गरहितायेत्यर्थः । मुक्तात्मभिः रागादिनिर्मुक्तमनोभिः स्वहृदये परिभाविताय मुहुर्मुहुरभ्यस्ताय ज्ञानस्वरूपायेश्वराय सर्वनियन्त्रे ॥ १८ ॥

धर्मादिचतुर्विधपुरुषार्थान् कामयमाना यं भजन्तः इष्टां ... भिप्रेतां गतिं धर्मादिफलं प्राप्नुवन्त्येव न तु तावदेव किं ... यस्तैरकामिता अन्या अप्याशिषो राति ददात्यव्ययमक्षरं च ...

(१) वर्गाः इति वीर० ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

राति स्वदेहतुल्यं देहं च ददाति (१) मुक्तिंचेति यावत् सोऽदभ्रदयोऽपारकरुणो मम विमोक्षणं करोतु मुक्तिं ददातु इत्यर्थः ॥ १९ ॥

मूर्खत्वादहं मुक्तिं प्रार्थये एकान्तिनस्तु तामपि न प्रार्थयन्ते इत्याह-एकान्तिन इति । एकान्तिनोऽनन्यप्रयोजना भगवत्प्रपन्नाः यस्मात्कञ्चनार्थं मुक्तिमपि न वाञ्छन्ति वै, अनिच्छायां हेतुं वदंस्तान्विशिनष्टि—अत्यद्भुतं सुमङ्गलं च यस्य चरित्रं गायन्तस्तद्गुणाऽनुभवानन्दसमुद्रमग्नाः ॥ २० ॥

तमक्षरं नित्यं परं ब्रह्म परेशं ईशानामपीशमव्यक्तं चक्षुराद्यगम्यम् आध्यात्मिकयोगेन भक्तियोगेनैव गम्यमत एवाऽतीन्द्रियं इन्द्रियाऽविषयं सूक्ष्ममणोरप्यणीयांसम् । इव शब्देन महतो महीयांसमिति लभ्यते । अतिदूरम् उपायान्तराऽगम्यत्वात् यद्वा सूक्ष्मम् अतिदूरं च यद्वस्तु तदेवातीन्द्रियं त्रिविधपरिच्छेदरहितमादौ भवमाद्यम् परिपूर्णमन्तर्बहिश्च व्याप्य वर्त्तमानमवाप्तसमस्तकामं वा स्तौमि ॥ २१ ॥

चतुर्मुखप्रभृतयो देवाश्चराचराऽऽत्मका लोकाः वेदाश्च नामरूपविभागेन यस्य फल्ग्व्या कलया कृताः "कस्याऽयुताऽयुतशतैककलांशकांशे विश्वं विचित्रचिदचित्प्रविभागवृत्तम्" इत्युक्तविधया निर्माय धृता इत्यर्थः । यस्येत्यस्य स वै इत्युपरिष्टादन्वयः॥२२

कथं कृता इत्यपेक्षायां दृष्टान्तौ तत्राद्यः प्रवाहे द्वितीयस्त्वानन्त्ये दृष्टान्तः यथाग्नेरर्चिषः यथा च सवितुर्गभस्तयो मरीचयोऽसकृन्निर्यान्तिः उद्भवन्ति संयाति पुनस्तत्रैव लीयन्ते स्वरोचिषः स्वांशभूता रोचिषः हेतुगर्भमिदं स्वरोचिष्ट्वान्निर्यान्ति संयाति चेत्यर्थः तथा बुद्धिर्मनः खानि इन्द्रियाणि शरीरवर्गाः देवादिशरीरसङ्घातेश्चत्ययं गुणसंप्रवाहः गुणपरिणामरूपः प्रपञ्चो यतो निर्याति यत्र संयाति यदंशत्वादिति भावः ॥ २३ ॥

य एवंभूतः स वै न देवादीनां मध्ये कतमोऽपि देवत्वादिजातिरहित इत्यर्थः । तथा स्त्रीत्वादिलिङ्गरहितः न जन्तुर्नापि प्राणी गुणाः कर्मचाऽयं न भवति गुणैः कर्मभिश्च रहित इत्यर्थः । अत एव न सत् न जीववर्गान्तर्भूतः न चाऽसन्नाप्यचेतनवर्गान्तर्भूतः चिदचितोरेव जात्याद्याश्रयत्वादिति भावः । जात्यादिरूपो न भवतीति वार्थः । किन्तु निषेधशेषः जात्यादिषु "ॐ नमो भगवते" इत्याद्युक्तकल्याणगुणाश्रयत्वे ऽप्रतिषिद्धे सति यस्तद्गुणाश्रयतयाऽवशिष्यते यश्चाशेषः अशेषाश्रयः साक्षात्परंपरान्यतरसम्बन्धेन जात्यादीनामाश्रयः तत्र चिदचितोः साक्षादाश्रयः जात्यादीनां तु चिदचिद्द्वारेति विवेकः । एवंभूतः स जयतात् सर्वोत्कृष्टत्वं प्राप्नोतु । यद्वा "जि अभिभवे" इति धातुर्ज्ञेयः तदा जयतादभिभवतात् मम स्वप्राप्तिविरोधिवर्गं निरस्यत्वित्यर्थः॥२४॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मोक्षादिसर्वपुरुषार्थावाप्तिरप्यस्मादेव स्यात्तदर्थमन्यसेवा न कार्येत्याशयेनाह-यमिति । यं भजन्ते तत्प्रसादादिष्टांगतिमाप्नुवन्तीत्यन्वयः । नन्ववान्तरपुत्राद्याशाप्राप्तयेऽन्यसेवापेक्षितेति तत्राह-कीं चेति । पुत्राद्याशिषोऽपि प्राप्नुवन्तीति शेषः । मोक्षं ददातीति न निराकारलक्षणं किन्त्वनाद्यन्तकालीनं साकारं ददातीतित्याह-रातीति । राति ददाति मयोक्ताश्चाशीः श्वियमेवाशीः प्रार्थ्यत इत्याह, करोत्विति ॥ १९ ॥

आशीःप्रार्थनम् अल्पभक्तलक्षणं यत एकान्तभक्तैस्तन्नक्रियत इत्याह-एकान्तिन इति । ये एकान्तिनस्ते यस्य सकाशात्कञ्चन पदार्थं न वाञ्छन्ति तं परेशं ईड इत्यन्वयः । एकान्तिन इत्यस्य विवरणं भगवत्प्रधाना इति अनाकाङ्क्षेण निमित्तमाह—यच्चरितमिति ॥ २० ॥

अक्षरात्सम्भवतीह-विश्वं "एतस्य वा अक्षरस्य" "ब्रह्मविदाप्नोति परम्" "परात्परं परमः परार्ध्यः" "अव्यक्तमचलं शान्तम्" "अध्यात्मयोगेन सुनिष्ठितेन मत्वा देवं शोकमोहौ जहाति" "त्रिमेकणां पतयतः सूक्ष्मात् सूक्ष्मतरं प्रपद्ये तद्दूरे तद्वदन्तिके" इत्याद्युपनिषत्प्रतिपाद्यं मया स्तूयत इति द्योतनायाक्षरादिशब्दप्रयोग इत्यनेन न पुनरुक्तिः पदानामिति ज्ञायते. न क्षरन्तीत्यक्षरं जीवव्यावृत्त्यर्थं परं ब्रह्मेति. ब्रह्मणि मुक्तव्यावृत्त्यर्थं परेशमिति. आराधनेऽप्यनुग्रहमन्तरेण न व्यज्यत इति अव्यक्तं प्रसादे सति ज्ञायत इत्यध्यात्मयोगगम्यमिति. वागादीन्द्रियमतीत्य वर्तमानत्वादतीन्द्रियं "यतो वाचो निवर्त्तन्ते" इति श्रुतेः । यथा सूक्ष्मं तथा महान्तमिति सूचनाय इवशब्दः "अणोरणीयान्" इति श्रुतेः आनन्त्यघटनाय परिपूर्णमिति ॥ २१ ॥

ब्रह्मादिस्थावरान्तं जगद्यस्य भिन्नांशो न तु स्वरूपांश इति ज्ञानं मुक्तिसाधनं नान्यदित्याशयेनाह—यस्येति । यस्य कलया जल्पया वचसा वाचेति पाठेऽप्ययमेवार्थः "गीर्वाग्वाणी भारती च ब्राह्मीला गौः सरस्वती" इत्यभिधानम् ॥ २२ ॥

गुणसंप्रवाह इत्यस्य विवरणं बुद्धिरित्यादि, अनेन जगत् प्रवाहस्य नित्यत्वं ज्ञापितमितिज्ञातव्यम् ॥ २३ ॥

अधुना श्रीनारायणसद्भावे प्रमाणदर्शनपूर्वकं स्तौति—स इति । यस्माद्गुणसंप्रवाहः स देवासुरमर्त्यतिर्यक्जातिर्न वै यस्मादित्यन्वयः । यतो बहुव्यक्त्यभावात् विशेषतो निषेधति, न स्त्रीति । नियतस्त्रियाद्याकाराभावान्न जन्तुः कृमिलक्षणः अमूर्त्ताकारोऽपि नास्तीत्याह—नायमिति । देवादिशरीरकारणपृथिव्याद्यन्यतमोऽपि न स्यादित्याह-नसन्निति । इति मूर्त्तामूर्त्तनिषेधेन शेषो यस्य स निषेधशेषः ततो विलक्षणत्वेन परिशेषप्रमाणसिद्धः स जयतात् ममानर्थभूतसंसारमभिभूय वर्ततामित्यन्वयः । तत्स्वरूपमाह-अशेष इति । परिपूर्णत्वेन सिद्धः निषेधशिष्टश्चेदुच्छिष्टवरणागयोग्य इत्यतो वाह अशेष इति परिपूर्णत्वेन सिद्धः "स एष आत्मा नेतिनेति" इत्यादि श्रुतेः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

स्वांशेनेति । परात्परूपाय भगवते महावैकुण्ठेश्वराय वृहते ब्रह्मणे ॥ १७ ॥

---

(१) गजेन्द्रो भगवत्स्पर्शात् विमुक्तोऽज्ञानबन्धनात् । प्राप्तो भगवतो रूपं पीतवासाश्चतुर्भुजः ॥ इति स्वदेह तुल्यदेह दानस्य वक्ष्यमाणत्वात् ।

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ज्ञानात्मने ब्रह्मणे ईश्वराय परमात्मने ॥ १८ ॥

आशिषः सामीप्याद्याः अव्ययमनश्वरं देहं पार्षदादिरूपम् ॥ १९ ॥

एकान्तिन इति युग्मकम् । आध्यात्मिकयोगगम्यमित्यात्मानं तमेवाधिकृत्य यो योगो भक्त्याख्यस्तन्मात्रगम्यम् ॥ २०-२१ ॥

यस्येति त्रिकम् । संयान्ति भूतसूक्ष्मरूपे तत्र तत्रेति ज्ञेयम् । न वै इति । तत्तदन्तर्यामित्वात् तत्तच्छरीरप्रविष्टेऽपि तत्तज्जीववत् । तत्तदभिमानाभावात्तत्तन्निषेधशेषः । तदन्तर्यामित्वात्तेनैव तत्तद्धर्म्याणां सिद्धत्वादशेषरूपश्च जयतात् । कचित्तत्साहश्येन तत्र स्वरूपशक्त्यावतीर्णत्वाच्चेत्यर्थः । अत एव माद्विधमोक्षणायाविर्भवन्त्विति तत्रैव तात्पर्यं टीकायां दर्शितम् ॥ २२ ॥ २३ ॥ २४ ॥

——— —

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

भक्तवेद्यभगवत्स्वरूपमाह-माद्दगिति, यावत्स्तुति । पाशो ग्राहरूपः संसाररूपश्च मुक्ताय अर्थान्माद्दग्भिरेतावत्कालं परित्यक्ताय असेवितायेत्यर्थः । तदपि माद्दग्भ्यो न क्रुध्यते प्रत्युत भूरिकरुणाय यतोऽमलाय प्रकृतानामिव ईर्ष्यामालिन्याभावादिति भावः । अलयायेति पाठे तत्र करुणायां न विद्यते लयः स्वाप आलस्यं यस्य तस्मै न च त्वयि दुःखज्ञापनापेक्षेत्याह-स्वांशेनेति । "विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्" इति श्रीमुखोक्तेः प्रतीतो यः प्रत्यग्दृक् अन्तर्यामी तस्मै बृहते श्रीकृष्णाय ॥ ॥ १७ ॥

मर्त्यलोके क्रीडापरत्वे ऽपि प्राकृतगुणसङ्गशून्याय मुक्तात्मभिर्मुक्तजीवैः आत्मारामैर्भाविताय ध्याताय यद्वा मुक्तात्मभिः आत्मघातिभिरित्यर्थः । परिभाविताय मायिकविग्रहः परमेश्वरोऽयमिति दृष्ट्यातिरस्कृताय वस्तुतस्तु ज्ञानात्मने ज्ञानपूर्णा चिदेव आत्मा वपुर्यस्य तस्मै यद्वा तं तदपराधं जानते अचिरात्तदुचितफलदानार्थमिति भावः ॥ १८ ॥

सकामभक्तसेव्यत्वमाह-यं धर्मादिकामनया भजन्तो ऽपि इष्टां सेवितामाराध्यामिति यावत् गतिं प्रेमलक्षणां "सत्यं दिशत्यर्थितमर्थितो नृणाम्" इत्यादेः । किन्तु आशिषः कामितान् अर्थान् राती ददाति अव्ययमप्राकृतं देहं च ध्रुवादिभ्य इव ददाति अतः स अदभ्रदयः अनल्पकृपाराशिः विमोक्षणं ग्राहात्संसाराच्च करोतु नित्यसिद्धदेहञ्च प्रेमभक्तिञ्च ददात्विति ॥ १९ ॥

ऐकान्तिकभक्तस्वभावं तु माद्दशः पशुः कथं प्राप्स्यतीति द्योतयन् निष्कामभक्तसेव्यत्वमाह-एकान्तिनो यस्य भक्ता न कञ्चनाप्यर्थं वाञ्छन्ति तमीड इत्युत्तरेणान्वयः । कुतो न वाञ्छन्ति भगवत्प्रपन्नाः भगवत्प्राप्तिमहासम्पत्त्यैव परिपूर्णा इत्यर्थः । तेषां सुखं सर्वतोऽप्यधिकमित्याह—अत्यद्भुतमित्यादि ॥ २० ॥

ननु, तं केचिन्मायाशबलब्रह्मेति केचिच्च प्रभूतपुण्यकृज्जीव इत्याचक्षते सत्यं ते नारकिण एव । स तु साक्षात् पूर्णं परंब्रह्मैवेत्याह, तमिति । आध्यात्मिकयोगगम्यं यद्ब्रह्म तदेव परेशं परमेश्वरं ईडे यद्वा आत्मानं तमेवाधिकृत्य यो योगो भक्त्याख्यस्तेन "भक्त्याहमेकयाग्राह्यः" इति तदुक्तेः । सूक्ष्मं परमाणुमिव अतीन्द्रियं सर्वेन्द्रियागम्यम् ॥ २१ ॥

परिपूर्णत्वमाह—त्रिभिर्यस्येति, फल्ग्व्याचेति । तस्य द्विविधा फल्गुरफल्गुश्च आद्या ब्रह्मेन्द्रचन्द्रादिजीवरूपा द्वितीया मत्स्यकूर्मादीश्वररूपाचेति स एव सर्व इत्यर्थः । वेदाः वेदोक्तकर्मादयः भगवन्निःश्वासभूतत्वेन वेदानामफल्गुत्वात् ॥ २२ ॥

उक्तमर्थं दृष्टान्तेन साधयति—यथेति । तथाच श्रुतिः "यथा... क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति" इति तथा तेनैव प्रकारेण जीवसमुपाधयो ऽपि अपरया ऽफल्ग्व्या कलया कृता इत्याह—यत... गुणप्रवाहमेवाह—बुद्धिरित्यादि । समष्टिव्यष्टिशरीरस्य ... सर्गहेतवः ॥ २३ ॥

अत एव सर्वकारणत्वात् स देवादीनां मध्ये न कतमोऽपि स इति । जन्तुः लिङ्गत्रयशून्यप्राणिविशेषः किन्तु सर्वस्य ... अवधित्वेन शिष्यत इति निषेधशेषः । अशेषः स्वशक्तिकार्य... शेषश्च ॥ २४ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

माद्दक् यः प्रपन्नः पशुस्तत्पाशस्य कर्मबन्धस्य मोक्षणं ... स्तस्मै मुक्ताय सर्वदोषरहिताय न विद्यते लयो यस्य ... स्वांशेन "अथवा बहुनैतेन किं ज्ञानेन तवार्जुन ! विष्टभ्याह-मिदं कृत्स्नमेकांशेन स्थितो जगत्" इति निजमुखोक्तेन सं... भून्मनसि प्रतीता प्रत्यक् दृक् जीवचेष्टा येन तस्मै नमः ॥ १७ ॥

आत्मा देहस्तदादिषु शक्तैर्दुष्प्रापणाय प्राप्तुमशक्याय ... सङ्गविवर्जिताय प्राकृतगुणमयदेहेन्द्रियरहिताय मुक्तः रा... दिदोषविनिर्मुक्तः आत्मा मनो येषां ते तथा तैः स्वहृदये भाविताय चिन्त्याय नमः ॥ १८ ॥

यं धर्मादिकामा भजन्तः इष्टां गतिं कामितं धर्मादि... फलं प्राप्नुवन्ति । किन्तुशब्देन निष्कामा विवक्षिताः ... सर्वा आशिषोऽव्ययं देहं स्वविग्रहतुल्यं देहं च राति एवं... ऽदभ्रदयो मे विमोक्षणं करोतु ॥ १९ ॥

निष्कामान्भगवत्प्रपन्नान् स्तौति—एकान्तिन इति । ऐका... न्तिनो भगवत्प्रपन्नाः ते यस्य यस्मात् कञ्चनार्थं न वाञ्छन्ति ... तत्र हेतुः अत्यद्भुतं सुमङ्गलं तस्य चरितं गायन्तः ... समुद्रे तत्स्वरूपरूपगुणाऽनुभवानन्दसिन्धौ मग्नाः तमीडे ... णान्वयः ॥ २० ॥

तच्चरितस्यादूभुतत्वे हेतुप्रदर्शनार्थं तस्याऽक्षरत्वबृहत्... त्वादीन् गुणानाह, तमित्यादिना ॥ २१ ॥

फल्ग्व्या अत्यल्पया कृताश्चकारात्तयैव संरक्षिताः स ... दिति तृतीयेनाऽन्वयः ॥ २२ ॥

जिजीविषे नाऽहमिहामुया किमन्तर्बहिश्चाऽऽवृतयेभयोन्या ।
इच्छामि कालेन न यस्य विप्लवस्तस्यात्मलोकावरणस्य*मोक्षम् ॥ २५ ॥
सोऽहं विश्वसृजं विश्वमविश्वं विश्ववेदसम् ।
विश्वात्मानमजं ब्रह्म प्रणतोऽस्मि परं पदम् ॥ २६ ॥
योगरन्धितकर्माणो हृदि योगविभाविते ।
योगिनो यं प्रपश्यन्ति योगेशं तं नतोऽस्म्यहम् ॥ २७ ॥
नमो नमस्तुभ्यमसह्यवेगशक्तित्रयायाऽखिलधीगुणाय ।
प्रपन्नपालाय दुरन्तशक्तये कदिन्द्रियाणामनवाप्यवर्त्मने ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

उक्तार्थं दृष्टान्ताभ्यां साधयति—यथेति । अर्चिषोऽग्नेरिति प्रवाहे सवितुर्गभस्तय इत्यानन्त्ये च दृष्टान्त । निर्यान्त्युद्भवन्ति संयान्ति तत्रैव लीयन्ते तथा स्वरोचिषः स्वप्रकाशतो यतो गुणसम्प्रवाहः गुणविकारः संसारः तमेवाह, बुद्धिर्मनः खानीन्द्रियाणि शरीरसर्गः समष्टिव्यष्टिदेहसङ्घातो भवति ॥ २३ ॥

य एवंविधः स देवादीनां मध्ये कतमोऽपि न भवति न स्त्री न षण्डः न पुमान् न जन्तुः प्राणिमात्रमपि न भवति न गुणः न च कर्म न सत् साधुः क्षेत्रज्ञः नासत् असाधुरूपं क्षेत्रं च किन्तु निषेधशेषः सर्वस्य देहादिकस्य चेतनाचेतनस्य परमात्मस्वरूपत्वानङ्गीकाररूपे निषेधे योऽवशिष्यते सः अनेन स्तोत्रेण वर्णितस्वरूपगुणशक्तिः अशेषः सर्वरूपः सर्वभिन्नत्वे सति सर्वोऽभिन्नः सर्वात्मत्वादित्यर्थः । एवंभूतो जयतान्मोक्षणेन स्वोत्कर्षमाविःकरोतु ॥ २४ ॥

भाषा टीका ।

मेरे सदृश शरणागत पशु के भी पाश को छुडाने वाले, और स्वयं सदा मुक्त. परमदयालु, अत एव स्वभक्तकार्य में किञ्चित् भी जिनको आलस्य नहीं ऐसे, और अपने अंश से सर्व देहधारियों के मन में प्रतीत जो प्रत्यक् (आन्तरज्ञान) अर्थात् अन्तर्यामि रूप से विराजने वाले, षड्गुणसम्पन्न निरतिशय वृहत् ऐसे परमात्मा को नमः ॥ १७ ॥

देह, पुत्र, बन्धु, गृह, द्रव्य, स्वजन आदि में आसक्त पुरुषों को दुष्प्राप्य और गुण संग से विवर्जित, तथा मुक्त जन भी अपने हृदय में जिनका सदा ध्यान करें ऐसे, ज्ञान स्वरूप अखिल ज़गत् के नियामक भगवान् को नमः ॥ १८ ॥

अर्थ, धर्म, काम, मोक्ष, इन चारों पुरुषार्थों की इच्छा वाले जिसको भजते हुए अपनी २ अभीष्ट गति को प्राप्त होते हैं, इतना मात्र नहीं । किंतु जो विना मांगें और भी वांच्छितों देता है तथा अव्यय [अप्राकृत] देहादिको जो देता है, [जैसे ध्रुव आदि को] वह अपारकरुणागुणसागर मेरा विमोक्षण करे ॥ १९ ॥

जो परमैकान्ती भगवान के प्रपन्नजन हैं वो लोग जिन से कुछ भी अर्थ की चाहना नहीं करते हैं, किन्तु जिनके अति अद्भुत परममांगलिक चरित्रों को आनन्दसागर में डूबे हुए सदा गान करते हैं ॥ २० ॥

अक्षर, ब्रह्मादिक के स्वामी, अव्यक्त और आध्यामिक योग से गम्य, अतीन्द्रिय, सूक्ष्म के नाईं अति दूर, अनंत, आद्य, और परिपूर्ण, ऐसे उन पर ब्रह्म की मैं स्तुति करता हूं ॥ २१ ॥

ब्रह्मादिक देवता, वेद, और चराऽचर सम्पूर्ण लोक, नाम रूप विभाग पूर्वक जिसकी छोटी सी कला के किये हुए हैं ॥ २२ ॥

अग्नि से जैसे ज्वाला का प्रवाह निकलता है, सूर्य से जैसे अनंत किरणें निकलती हैं तथा वारंवार प्रकाशादि फिर जैसे उसी में लीन होते हैं, तैसे ही यह गुणों का प्रवाह जिस से है, और बुद्धि, मन, इन्द्रियें, तथा शरीरों की सृष्टि की परंपरा जिससे है ॥ २३ ॥

वह न देव न असुर न मनुष्य न तिर्यक् न स्त्री न नपुंसक न पुरुष न जन्तु न गुण न कर्म न सत् न असत् किं तु निषेध का जो शेष अर्थात् जिसका अचिन्त्य ऐश्वर्य होने से वर्णन न हो सके और अशेष जगत् स्वरूपभी आप ऐसा परमेश्वर सर्वोत्कृष्ट होकर वर्त्ते है ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

न च ग्राहाच्छरीरस्य मोक्षणेनाऽहं जीवितुमिच्छामि तत्र हेतुः अमुया अन्तर्बहिश्चाविवेकव्याप्तया गजजात्या किं प्रयोजनम् आत्मलोकस्याऽऽत्मप्रकाशस्य यदावरणमज्ञानं तस्यैव तु मोक्षमिच्छामि यस्य मोक्षस्य कालेन नाशो नास्ति यद्वा देहस्य बन्धो देहनाशे नश्येदेव किन्तन्मोक्षप्रार्थनेन आत्मलोकावरणस्य तु कालेन विप्लवो नास्ति ज्ञानैकनिवर्त्त्यत्वात् अतस्तस्यैव मोक्षमिच्छामीत्यर्थः ॥ २५ ॥

* मोक्षणमिति वीर० ।

नायं वेद स्वमात्मानं यच्छक्त्याऽहन्धिया (१) ततम् ।
तं दुरत्ययमाहात्म्यं भगवन्तमितोऽस्म्यहम् ॥ २९ ॥

श्रीशुक उवाच ।

एवं गजेन्द्रमुपवर्णितनिर्विशेषं ब्रह्मादयो विविधलिङ्गभिदाऽभिमानाः ।
नैते यदोपससृपुर्निखिलात्मकत्वात्तत्राखिलामरमयो हरिराविरासीत् ॥ ३० ॥
तं तद्वदार्तमुपलभ्य जगन्निवासः स्तोत्रं निशम्य दिविजैः सह संस्तुवद्भिः ।
छन्दोमयेन गरुडेन समुह्यमानश्चक्रायुधोऽभ्यगमदाशु यतो गजेन्द्रः ॥ ३१ ॥
सोऽन्तःसरस्युरुबलेन गृहीत आर्तो दृष्ट्वा गरुत्मति हरिं ख उपात्तचक्रम् ।
उत्क्षिप्य साम्बुजकरं गिरमाह कृच्छ्रान्नारायणाऽखिलगुरो ! भगवन्नमस्ते ॥ ३२ ॥
तं वीक्ष्य पीडितमजः सहसाऽवतीर्य सग्राहमाशु सरसः कृपयोज्जहार ।
ग्राहाद्विपाटितमुखादरिणा गजेन्द्रं सम्पश्यतां हरिरमूमुच (२) दुच्छ्रियाणाम् ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे पारमहंस्यां
संहितायां वैयासिक्यां गजेन्द्रमोक्षणे
तृतीयोऽध्यायः ॥ ३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सोऽहं मुमुक्षुः विश्वं विश्वरूपम् अविश्वं विश्वव्यतिरिक्तं च विश्वं वेदो धनमुपकरणं यस्य तं विश्वस्याऽऽत्मानञ्च केवलं प्रणतोऽस्मि न तु तं जानामि ॥ २६ ॥

योगं विना दुर्ज्ञेयत्वादित्याह—योगेन भगवद्धर्मेण रन्धितानि दग्धानि कर्माणि येषां ते यं प्रपश्यन्ति ॥ २७ ॥

नहि सर्वेऽपि योगमेव किं नास्थितास्तत्राऽऽह-नम इति द्वाभ्याम्। असह्यो वेगो रागादिलक्षणो यस्य तथाभूतं शक्तित्रयं यस्य तस्मै वहिश्चाखिलधियां सर्वेन्द्रियाणां गुणाय शब्दादिरूपेण प्रतीयमानाय अतः कदिन्द्रियाणां कुत्सितानीन्द्रियाणि येषां तेषामनवाप्यं वर्त्म यस्य ॥ २८ ॥

यच्छक्त्या यस्य मायया या अहन्धीस्तया हतमावृतमयं जनो न वेद दुरत्ययं माहात्म्यं यस्य तमित आश्रितो ऽस्मि ॥ २९ ॥

उपवर्णितं निर्विशेषं मूर्तिभेदं विना परं तत्त्वं येन तं विविधा चामी लिङ्गभिदा मूर्तिभेदस्तस्यामभिमानो येषां ते अत एते यदा नोपजग्मुः तत्र तदा अखिलामरमयः सर्वदेवमयमूर्तिः ॥ ३० ॥

दिविजैर्देवैः सह छन्दोमयेनेति शैघ्र्यायोक्तम् ॥ ३१ ॥

खे दृष्ट्वा उपात्तमुधृतं चक्रं येन ॥ ३२ ॥

गरुडोऽपि मन्दगतिरिति ततः सहसाऽवतीर्यारिणा ग्राहाद्विपाटितं मुखं यस्य उच्छ्रियाणां देवानाम् ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

स्वाभिप्रायमाविष्करोति—जिजीविषे इति । नाहं जीवितुमिच्छामि तत्र हेतुरमुयान्तर्बहिश्चावृतयाऽहङ्कारममकारास्पदभूतयेत्यर्थः । इभयोन्या गजजन्मना किम् ? न कोऽपि पुरुषार्थ इत्यर्थः । किन्त्वात्मलोकावरणस्य मोक्षणम् इच्छामि कथ्यत इति लोकः आत्माख्यलोकस्यावरणरूपात्कर्मणो मोक्षम् इच्छामि यद्वा आत्मनो लोकः धर्मभूतज्ञानं तस्यावारकात्कर्मणो मोक्षम् इच्छामि यस्य मोक्षणस्य कालेन निमित्तेन न विध्वंसो न पुनरावृत्तिस्तं मोक्षमिच्छामीत्यन्वयः ॥ २५ ॥

सोऽहमात्मलोकावरणस्य मोक्षणमिच्छुरहं विश्वस्य स्रष्टारं विश्वं विश्वशरीरकम् अविश्वं विश्वविलक्षणं विश्ववेदनं सर्वज्ञं विश्ववेदसमिति पाठे विश्वस्य वेदसं धनं पुरुषार्थरूपम् इत्यर्थः

(१) हतः इति वीर०   (२) उस्त्रियाणामिति वीर० विज०

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यद्वा विश्वं वेदो धनं शेषभूतं यस्य तम् इत्यर्थः । विश्वस्यान्तः-प्रविश्य भर्तारम् अजं कर्मायत्तोत्पत्त्यादिरहितं गुणपूर्णं परमप्राप्यं नतोऽस्मि परमप्राप्यं परं केवलं नतोऽस्मीति वा प्रणाममन्तरेण तत्प्रसादनोपायं न जानामीति भावः ॥ २६ ॥

योगेनोपासनात्मकेन रन्धितानि दग्धानि कर्माणि दर्शनविरोधीनि पुण्यपापात्मकानि येषां ते योगिनः योगेन विभाविते विशोधिते हृदि यं प्रपश्यन्ति साक्षात्कुर्वन्ति तं योगिनाम् ईशमहं नतोऽस्मि शक्तास्त्वेवं योगविशुद्धमनसा साक्षात्कुर्वन्ति तत्कर्तुं मशक्तोऽहं तु केवलं नतोऽस्मीति भावः ॥ २७ ॥

असह्योऽप्रतिहतो वेगो व्यापारो यस्य तच्छक्तीनां सृष्ट्यादिशक्तीनां त्रयं यस्य तस्मै शक्तिक्रियायेति पाठान्तरं तदा अप्रतिहता शक्तिरघटितघटनात्मिका क्रिया जगत्सृष्ट्यादिरूपा च यस्य तस्मै अखिलाः धीगुणाः धीगतसंशयविपर्ययाद्यवस्थाः यस्मात्तः तथोक्तस्तस्मै प्रपन्नानां पालाय रक्षित्रे दुरन्ता अपारा शक्तिर्यस्य कदिन्द्रियाणामजितेन्द्रियाणामनवाप्यं दुरवगमं वर्त्म याथात्म्यं यस्य तस्मै तुभ्यं नमो नमः ॥ २८ ॥

अयं जनो यस्य शक्त्या मायया हेतुभूतया अहन्धिया देहात्माभिमानेन यन्मायामूलकदेहात्माभिमानेन हतं हतप्रायं स्वमात्मानं न वेद तं दुरत्ययमाहात्म्यमनतिक्रमणीयमहिमानं भगवन्तमहं * नतोऽस्मि, इतोऽस्मीति पाठान्तरम् । तदा प्रपन्नोऽस्मीत्यर्थः ॥ २९ ॥

एवमित्थमुपवर्णितं निर्विशेषं हेयगुणवर्जितभगवत्स्वरूपं येन तं यद्वा ब्रह्मादिषु कस्यचिदसाधारणशब्दविशेषरहितत्वं येन वर्णितं स तथोक्तस्तं गजेन्द्रमत एवैते ब्रह्मादयो यदा नोपससृपुर्नोपजग्मुः कथम्भूतास्सन्तः लिङ्गं शरीरं नानाविधनामरूपाभिमानवन्तः यद्वा लिङ्गं चिन्हं चतुर्मुखत्वहंसवाहनत्वादिरूपं तस्य भिदा त्र्यक्षत्ववृषभवाहनत्वशूलपाणित्वादेर्व्यावृत्तिस्तस्याममिमानो येषां ते परस्परव्यावृत्तचतुर्मुखत्व हंसवाहनत्व त्र्यक्षत्ववृषभवाहनत्वसहस्राक्षत्वैरावतवाहनत्वादिलिङ्गाभिमानयुक्ताः गजेन्द्रोपवर्णितचिन्हेषु अस्मदसाधारणानि लिङ्गानि न कानिचिदपि सन्तीत्यभिमानयुक्तास्सन्त इति फलितोर्थः । तत्र तदा हरिः हर्याख्यो भगवानखिलामरमयः अखिलदेवप्रचुरः "स आत्मा अङ्गान्यन्या देवताः" इति श्रुतेः । निखिलात्मकत्वात् निखिलानां गजेन्द्रोपवर्णितानां गुणानामात्मकत्वादाश्रयत्वाद्धेतोराविरासीदाविर्बभूव स्तोत्रे ब्रह्मविष्णुशिवादि शब्दरहितेऽप्युक्तविशेषणानां ब्रह्मादिष्वसम्भवान्न ते समागताः वस्तुसामर्थ्यात्पुरुषोत्तम एव विशेषणानामन्वितत्वात् स एवआगत इति भगवतो वास्तवाऽनवच्छिन्नमाहात्म्ययोगो दर्शितः ॥ ३० ॥

आविर्भावप्रकारमाह—तमिति । तद्वत्तथा आर्त्तं ग्राहेण पीडितं गजेन्द्रमुपलभ्य ज्ञात्वा दृष्ट्वा तत्कृतं स्तोत्रं च निशम्य श्रुत्वा कुतः यतो ऽयं जगन्निवासः जगति कृत्स्ने अन्तरात्मतया वसतीति तथा अतउपलभ्य निशम्य च छन्दोमयेन त्रिवृद्गायत्र्यादिछन्दोरूपत्वेनोपास्यमानशिरःपक्षपुच्छाद्यवयवत्वाच्छन्दःप्रचुरस्तेन गरुडेन

* नतोऽस्मि इति मूलपाठः ।

समुह्यमानः अनेन शैघ्र्यातिशयः सूचितः चक्रं सुदर्शनमायुधं यस्य तादृशः संस्तुवद्भिर्देवैः सह यत्र गजेन्द्रः तत्राशु अभ्यगमदभिजगाम ॥ ३१ ॥

अन्तःसरस्युरुबलं यस्य तेन ग्राहेण गृहीतो अत एवार्तः स गजेन्द्रो गरुत्मति गरुडे स्थितमिति शेषः । उपात्तं धृतं चक्रं येन तं हरिं खेऽन्तरिक्षे दृष्ट्वा साम्बुजकरं शुण्डामुद्धृत्य "रिक्तहस्तेन नोपेयाद्राजानं दैवतं गुरुम्" इत्युक्तन्यायेन गृहीताम्बुजकरम् उद्धृत्येत्यर्थः । कृच्छ्रात्काश्चिद्गिरमाह, गिरमेवदर्शयति—नारायणायेत्यादि ॥ ३२ ॥

ततः पीडितं गजेन्द्रं वीक्ष्याऽजो हरिः कृपया सहसा आश्ववतीर्य गरुडोऽपि मन्दगतिरिति ततोऽवरुह्याशु त्वरया सग्राहं गजेन्द्रं सरस उज्जहारोद्धृत्य बहिर्निष्कासितवान् ततोऽरिणा चक्रेण विपाटितं भिन्नं मुखं यस्य तस्माद्ग्राहाद्गजेन्द्रं उस्त्रियाणां देवानां पश्यतां सताममूमुचन्मोचयामास ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ज्ञानसाधनमन्तरेणानेन शरीरेण चिरं रक्षितेन किं प्रयोजनमित्याशयेनाह—जिजीविषे इति । अहं शरीरेऽन्तर्बहिश्चावृतयाऽमुयेभयोन्या प्रकृत्या किं न किमपि इति यस्मात्तस्मादिह तन्निर्मिते शरीरनाश एव प्रार्थ्यत इत्याह—इच्छामीति । तस्यात्मलोकावरणस्य स्वज्ञानावरकस्य लिङ्गशरीरस्य मोचनं नाशमिच्छामीत्यन्वयः । अस्यापि कालेन नाशः किं न स्यादत्राह—कालेनेति । विप्लवो नाशः अनेनात्मज्ञानमन्तरेण लिङ्गशरीरस्य नाशो नास्ति सति तस्मिन् तत्स्यादित्युक्तं भवति "तस्मिन्दृष्टे परावरे" इति श्रुतेः ॥ २५ ॥

ननु, गुणोपसंहारलक्षणोपासना वेदान्तज्ञानेन सम्भवेत्तिर्यग्योनित्वेन तदनधिकारादात्मज्ञानासम्भवाल्लिङ्गशरीरनाशो आशामात्रं तव स्यादित्याशङ्क्यास्मज्जातिविहितप्रणामेनापि प्रसन्नेश्वर प्रसादादुत्पन्नज्ञानेन तत्स्यादित्यतस्तमाचरति—सोहमिति । योऽहं लिङ्गशरीरमोक्षमाकांक्षे सोहं परस्पदं प्राप्तव्योत्तमं प्रणतोऽस्मीत्यन्वयः । सर्वस्मादस्योत्तमत्वं कुत इत्यतस्तदुपपादकविशेषणैः सिद्धमित्याह—विश्वसृजमित्यादिना । विश्वसृजत्वाद्विश्वं तर्हि मृद्घटवत्तदात्मकत्वमापन्नमिति नेत्याह अविश्वमिति. जगतो विलक्षणं स्वस्वरूपपदार्थप्रविष्टत्वाद्विश्वं बहिष्ट्वादविश्वमिति वा शुभेणशरीरस्थत्वेऽपि ज्ञानलोपो नेत्याह-विश्ववेदसामिति । विश्वं वेत्तीति सर्वज्ञमित्यर्थः । सर्वज्ञत्वं चास्यैव सुलभमित्याह-विश्वेति । विश्वं व्याप्य वर्तमानं विश्वम् आदत्त इति वा विश्वस्य स्वामीति वा विश्वात्मानं जगत्स्रष्टुरस्य जगदाकारेण परिणामः किम् नेत्याह, अजमिति । अहङ्कारात्मा रुद्रोप्युच्यत इति नेत्याह—ब्रह्मेति । वेदो नेत्याह परमिति मुक्तो नेत्याह पदमिति ॥ २६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ज्ञानप्रत्यक्षमीश्वरसद्भावे प्रमाणमित्याशयेन नमति—योगेति । योगेन रन्धितानि दग्धानि कर्माणि येषां ते तथा ॥ २७ ॥

ननु, तत्तच्छक्तिमतस्तत्तत्कर्मदृष्टं हरेस्तु सृष्ट्यादिकर्म कथम्? इत्याशङ्क्य तत्तच्छक्तिविशिष्टत्वेन तं नमति—नम इति । असह्यो वेगो यासां ताः तथा तादृशीनां शक्तीनां उत्पत्तिस्थितिसंहार-विषयाणां उत्साहमन्त्रप्रभुविषयाणां वा त्रयं यस्य स तथा तस्मै उत्पत्त्यादिशक्तयश्च ज्ञानवत एव युक्ता इत्याह—अखिलेति । न चैताः शक्तयो देवदत्तशक्तिवत्परिमिता इत्याशयवानाह-दुरं तेति । परिच्छिन्नत्वमनुमानेन साध्यत इति चेत्तत्राह—बुद्धीति । हेतोराश्रयासिद्धत्वेनानुमानानुदयात् ॥ २८ ॥

हरेः स्तुतिफलं दर्शयति—नायमिति । यः स्वमात्मानं न वेद न जानाति पूर्वमिति शेषः ॥ २९ ॥

अनन्तरं किमिभूदत्राह—एवमिति। उपवर्णितं निर्विशेषं समं ब्रह्म येन स तथा तं पृथिव्यादिविलक्षणं ब्रह्म येन स तथा तमिति वा अवतारमूलरूपयोर्विशेषो नास्तीति वा निर्विशेषं वदति वा "पूर्णमदः पूर्णमिदम्" इति श्रुतेः । विविधानि लिङ्गानि पद्मवज्रादीनि वा हंसवृषभादीनि वा एवं भिदया भेदेन जातोऽभिमानोऽहं पद्मपाणिरहं वज्रपाणिरित्यादि लक्षणो येषां तथा स्रष्टृत्वसंहर्तृत्वादिलक्षणो वा ये ब्रह्मादय एते यदा गजेन्द्रं नोपससृपुः तदा सकलदेवनाथो हरिः यत्र गजेन्द्रस्त-त्राविरासीत् तत्स्थ एव तत्र प्रत्यक्षीभूतो न तु दूरागत्य कुत इति तत्राह—निखिलेति सर्वव्यापकत्वात् यद्वा ब्रह्मादीनामना-गमे निमित्तमाह निखिलेति हरेः सर्वस्वामित्वाद्धरेः पूर्वमा-गमने प्रयोजनाऽसिद्धेरित्यर्थः ॥ ३० ॥

तद्व्यथादर्शनकृपोदेति तथा तम् ॥ ३१ ॥

अखिलगुरो न हि परिच्छिन्नस्य सर्वगुरुत्वं घटत इति नाराय-णेत्यादि हेतुगर्भविशेषणम् ॥ ३२ ॥

ततः फलितमाह—तं वीक्ष्येति । उस्त्रियाणां देवानां "उस्त्रिया विजया देवा आदित्या अमराः सुराः" इत्यभिधानम् ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
तृतीयोऽध्यायः ॥ ३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तदेवं प्राग्जन्मन्यनुशिक्षितं विज्ञापयति—जिजीविष इत्या-दिना । आत्मलोको भगवदाविर्भावः ॥ २५ ॥

परस्पदं परमाश्रयम् ॥ २६ ॥ २७ ॥

असह्येति अन्तःकरणेन दुर्ज्ञेयत्वम् अखिलानां ब्रह्मादीनां धियां येभ्यः तादृशा गुणा यस्य तस्मा इति स्वतोऽपि दुर्ज्ञे-यत्वम् । तथापि प्रपन्नपालायेति प्रपत्तिमात्रेण सुज्ञेयत्वम् । शक्त्यन्तरेण तु सुलभत्वं निषेधयति—दुरन्तशक्तय इति । अत एव कदिन्द्रियाणामिति अतो नमो नमः ॥ २८ ॥ २९ ॥

स वै न देवेति पद्यार्द्धं विशदयंस्तद्विवक्षितं साक्षाद्दर्शयति एवमिति।उपवर्णितं निर्विशेषं श्रीहरेर्देवत्वादिप्राकृतविशेषराहित्यं येन तम् अखिला अखिलसंपादकशक्तयस्तत्राप्यमरासुर-सम्पादकशक्तयोऽपि——————प्राचुर्येण विद्यन्ते यस्मिन् त[त्र] हेतुः निखिलाऽऽत्मकत्वादिति स्वार्थे कन् । कं सुखं सर्वं वा ॥ ३० ॥ ३१ ॥

कृच्छ्रात् प्रेमवैवश्यात् ॥ ३२—३३ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

नन्वेतावत्या स्तुत्या ग्राहात्स्वशरीरमोक्षणमिच्छसि तत्राह-जिजिविषेनेति—तत्र हेतुः अन्तर्बहिश्च अविद्यया आवृतया हा[नि-]योन्या किं प्रयोजनम्. तर्हि किमिच्छासि?इति तत्राह—यस्य का[ल]-विप्लवो नाशो नास्ति तस्य आत्मलोकावरणस्य मदादि[जी]-वानामविद्यया भगवद्विस्मारिकायाः मोक्षं यद्वा आत्मन[ः] लोको वैकुण्ठस्तदावरणस्य तद्द्वारकपाटस्य मोचनं म[त्प्रि]-यास्तत्प्राप्त्ययोग्यताया नाशमित्यर्थः ॥ २५ ॥

तर्हि भक्तिः क्रियतामिति चेद्भक्तिमप्यहं कर्तुं पशुत्व-विपद्ग्रस्तत्वाच्च न जानामि तस्मात् यत्किञ्चित् स्वचक्षु-र्भिरिदं विश्वं जानामि तस्य यः कर्ता भवेत्तं केवलं [त-]स्यैव नमामीत्याह—सोहं प्रसिद्धः पशुः विश्वं विश्वरूपम् [अपि] स्वरूपशक्त्या विश्वव्यतिरिक्तं विश्ववेदसं विश्वज्ञातारं [वि-]श्यात्मानम् ॥ २६ ॥

न च तत्प्राप्त्युपायो मयि वर्त्तत इत्याह—योगेति । [यो-]गिनो न तु मादृशाः पशवः योगेन भगवद्धर्मेण दग्ध[क-]र्माणः ॥ २७ ॥

हृदि तद्भावनायां प्रतिबन्धकमाह–असह्यवेगं शक्तित्रयं [यु-]त्रयं यस्य तस्मै तत्कृपया प्रतिबन्धकाभावे तु अखि[ला-]नां सर्वेषामपि धियो यत्र तथाभूता गुणाः सौन्दर्यादयो [य-]स्मै । किञ्च प्रपन्नमात्रमपि पालयति तस्मै. तत्र हेतुः दु[रन्त-]शक्तये दुर्ज्ञेयकृपाशक्तये कृपां विना तु बहिर्मुखेन्द्रियाणां दु[र्ग-]मवर्त्मने ॥ २८ ॥

अयं मदीयो जीवः यस्य शक्तिर्माया तया या अ[ह-]न्तया हतं स्वं न वेद ॥ २९ ॥

उपवर्णितं निर्विशेषं निष्प्राकृतस्वरूपं येन तं ब्रह्मा[द्याः] आधिकारिकाः शिष्टरक्षणादौ भगवन्नियुक्ता अपि त[स्य] असामर्थ्यादेव नोपससृपुः किन्तु विविधलिङ्गभिदायां [...]

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

वाहनत्वैरावतवाहनत्वादौ स्पष्टत्वमहेन्द्रत्वादावेव अभिमानो येषां ते गजेन्द्रेण वयं नत्वीषदपि स्तुताः प्रत्युत—

"यस्य ब्रह्मादयो देवा वेदा लोकाश्चराचराः ।
नामरूपविभेदेन फल्ग्व्या च कलया कृताः" ॥ इति

फल्ग्व्येति पदेन तुच्छीकृता एवाऽतो यमेव स्तौति स एव भगवान् रक्षतु स तु शीघ्रं न प्रत्यक्षीभविष्यति दुराराध्यस्य तस्य स्वभावं वयं जानीम एवातो ग्राहग्रस्तो मरिष्यत्येवं दुरभिमानेनौदासीन्यं यदा व्यञ्जयामासुरिति भावः तदा तत्क्षण एव तत्र हरिः निखिलात्मकत्वात् हेतोरखिलामरमय इति तरुमूलसेचने पल्लवाद्याः सिक्ता इव विष्णुस्तुत्यैव सर्वेस्तुता इति ते तत्त्वमविद्वांस इति भावः दिविजैर्ब्रह्मादिदेवैः सहितः एव संस्तुवद्भिरिति स्वापराधखण्डनार्थमेवेति भावः छन्दोमयेन इच्छामयेन इच्छातुल्यवेगेनेत्यर्थः । यतो यत्र ॥ ३० ॥ ३१ ॥

आर्तस्तत्पीडाऽभिभूतोऽपि खे आकाशे अतिदूरेऽपि दृष्ट्वा साम्बुजेति तत्रत्यान्यम्बुजानि सद्य एव शुण्डेनैवावचित्य चरणयोरर्पयितुमित्यर्थः ॥ ३२ ॥

गरुडोऽपि मन्दगतिरिति तत्पृष्ठादवतीर्य वामकरेण शुण्डं धृत्वा सरसः सकाशात्तटे उज्जहार ततश्च दक्षिणकरेण अरिणा चक्रेण विपाटितं मुखं यस्य तस्मात् उच्छ्रियाणां देवानां सम्पश्यतां सम्यक्तया पश्यन्तोऽपिताननादृत्य ॥ ३३ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
अष्टमस्य तृतीयोऽयं सङ्गतः सङ्गतः सताम् ॥ ३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अहं न जिजीविषे जीवितुं नेच्छामि यतः अन्तर्बहिश्च आवृतया अविवेकेनेति शेषः । अमुया इभयोन्या गजोत्पन्नया तन्वा किम् ? आत्मानौ जीवेशौ लोक्येते अनेनेत्यात्मलोकः उपास्योपासकस्वरूपज्ञानं तस्याऽऽवरणमज्ञानम् "अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः" इति श्रीमुखवचनात् तस्य मोक्षणमिच्छामि यस्य मोक्षणस्य अज्ञाननिवृत्तेः कालेन विप्लवो नास्ति ॥ २५ ॥

सोऽहं मुमुक्षुः परं पूर्णं पदं मुमुक्षुगम्यं स्वरूपं विश्वसृजं विश्वकर्तारं नतोऽस्मि कीदृशमविश्वं विश्वाभिन्नं विश्वं तदभिन्नं च विश्वभिन्नाभिन्नमित्यर्थः । नन्विदमयुक्तं नहि घटकर्ता भिन्नाभिन्नो दृश्यते इत्यत आह—विश्वात्मानमिति । विश्वस्य आत्मा आश्रयः यथा औषधीनां पृथिवी अतो विश्वभिन्नाभिन्नो भवान् नतु घटाद्यथा कुलालोत्यन्तभिन्नस्तद्वदस्त्यन्ततो विश्वभिन्न इति भावः । तथा च श्रुतिः "यथा पृथिव्याः ओषधयः सम्भवन्ति यथा पुरुषात्केशलोमानि तथाऽक्षरात् सम्भवतीह विश्वम्" इति विश्वं वेदो धनं लीलोपकरणं यस्य तम् ॥ २६ ॥

योगेन भगवति चित्तसमाधानेन रन्धितानि कर्माणि येषां ते योगेन विभाविते विशोधिते हृदि यं प्रपश्यन्ति ध्यायन्ति तं नतोस्मि ॥ २७ ॥

असह्यो दुर्द्धरो वेगो यस्य तथाभूत हे अनिवार्य्यगते ! यत् शक्तीनां ग्राहादिगतानां तमआदिमायागुणानां त्रयं तमसाऽनेन गृहीतो रजसा बन्धुभिस्त्यक्तः सत्त्वेन त्वां प्रार्थयामि इत्येतत्सर्वं यस्मात्तस्मै ग्राहादिप्रवर्त्तकायेत्यर्थः । अखिलः समग्रो धीः गुणो बुद्धियोगो यस्मात्तस्मै यद्दत्तेन बुद्धियोगेन यं शरणं गतोऽस्मि तस्मै इत्यर्थः "ददामि बुद्धियोगं तं येन मामुपयान्ति ते" इति श्रीमुखोक्तेः दुरन्ताः अनन्ताः शक्तयो यस्य तस्मै कदिन्द्रियाणामनवाप्यं वर्त्म प्राप्तिमार्गो यस्य तस्मै प्रपन्नपालाय नमो नमः ॥ २८ ॥

अयं जीवः अहन्धिया देहात्मबुद्ध्या हतं विस्मृतम् आत्मनो विस्मरणमेव हननम् स्वमात्मानं यद्यस्य शक्त्या त्रिगुणाया मायया न वेद तं दुरत्ययमाहात्म्यमनन्तमाहात्म्यम् इतोऽस्मि शरणं गतोऽस्मि ॥ २९ ॥

उपवर्णितः निर्विशेषः सर्वात्मत्वाद्देवादिविशेषरहितो भगवान् येन तं गजेन्द्रं विविधा चासौ लिङ्गभिदा देवादिमूर्तिविशेषभेदस्तस्यामभिमानो येषां तस्मादेते यदा नोपससृपुर्नोपजग्मुस्तत्र तस्मिन् समये निखिलात्मकत्वात्सर्वाश्रयत्वात् अखिलामरमयः शर्वब्रह्मादिदेवेषु प्रधानो हरिः स्वभक्तक्लेशहरः आविरासीत् । अयं भावः यद्यपि "नमो भगवते तस्मै यत एतच्चिदात्मकम्" इति जगत्कारणस्तोत्रेण जगत्कारणमानिनां तेषामप्यागमनमुचितं तथापि तेषां विविधलिङ्गभिधाभिमानानामितरेतरसातिशयत्वशङ्कयानागमनं निरतिशयस्य श्रीमद्धरेरागमनं च सुयुक्तमिति ॥ ३० ॥

आविर्भावप्रकारं वर्णयति—तमिति । तं गजेन्द्रं तद्वदुक्तरीत्यार्त्तमुपलभ्य ज्ञात्वा तत्कृतं स्तोत्रन्निशम्य श्रुत्वा जगन्ति निवसन्ति यस्मिन् जगत्सु निवसतीति वा छन्दोमयेन छन्दःप्रचुरेण शीघ्रवेगेन गरुडेन सम्पगुह्यमानः संस्तुवद्भिर्दिविजैर्ब्रह्मादिभिः सह यत्र गजेन्द्रस्तत्राभ्यगमत् अयमभिप्रायः भगवता सह तेषां गगनासम्भवात् गरुडपक्षवातेन तेऽपीश्वरत्वाभिमानिनस्तत्तल्लोकादाकृष्टाः नतु तत्तल्लोकाः आकृष्टा जगन्निवास रक्षितत्वादिति अन्यथा नैते ससृपुरित्यनेन विरोधः स्यात् ॥ ३१ ॥

गजेन्द्रस्तु हरिं दृष्ट्वा साम्बुजकरं भगवदर्पणार्थं गृहीतपद्मं करमुत्क्षिप्योन्नतं कृत्वा भगवन्नम इति गिरं कृच्छ्रादाह ॥ ३२ ॥

अजो हरिस्तु तं पीडितं दृष्ट्वा अति शैघ्र्येण रक्षार्थं गरुडादपि अवतीर्य सग्राहं कृपयोज्जहार तदनन्तरमुच्छ्रियाणाम् उद्गतेश्वरत्वाभिमानद्योतका श्रीर्येषां तेषां देवानां सम्पश्यतां अरिणा चक्रेण विपाटितमुखात् ग्राहात् अमूमुचत् ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
तृतीयाध्यायार्थप्रकाशः ॥ ३ ॥

भाषाटीका ।

हे महाराज ! मैं जीने की इच्छा नहीं करता हूँ क्योंकि बाहर भीतर आवृत हो रही जो यह हस्ती की योनि इससे कुछ प्रयोजन नहीं है । किन्तु जिसका काल से नाश नहीं उस आत्मा के आवरण करने वाले केवल अज्ञान मात्र के बन्धन से मोक्षण (छूटना) चाहता हूँ ॥ २५ ॥

वह मैं विश्व की सृष्टि करने वाले, स्वयंविश्वरूप, और विश्व से व्यतिरिक्त, तथा विश्व उपकरण वाले, विश्व के आत्मा, अज, और मुक्तजनों के प्राप्य, ऐसे पर ब्रह्म को केवल प्रणाम करता हूँ ॥ २६ ॥

भगवद्धर्मों से दग्ध हुए कर्म जिनों के ऐसे योगीजन, योग से भावित ऐसे अपने हृदय में जिनका दर्शन करते हैं उन योगेश श्रीहरि को मैं प्रणत हूं ॥ २७ ॥

असह्यवेग जिनका ऐसी तीन शक्तियों से विशिष्ट, और अखिल चेतनों की बुद्धि के गुण जो संशय विपर्यय इत्यादि अवस्था वो जिनसे होवैं ऐसे, तथा प्रपन्न जनों के पालन करने वाले, दुरन्त शक्ति वाले, और अजितेन्द्रिय पुरुषों को न प्राप्त हो मार्ग जिनका एसे आपको वारंवार नमः हो ॥ २८ ॥

जिसकी माया की करी हुई देहादि में जो अहंबुद्धि तिससे, नष्ट प्राय अपने आत्मा को यह जीव नहीं जानता, उस दुरत्यय माहात्म्य वाले भगवान का मैंने आश्रय लिया है ॥२९॥

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि—गजेन्द्रने जब इस प्रकारअपनी स्तुति में किसी देवताओं के विशेष चिन्होंको न पुरस्कारकर केवलपरतत्त्व, का वर्णन किया और जब चतुर्मुखत्व हंसवाहनत्व, त्र्यम्बकत्व वृषभवाहनत्व आदि चिन्हों के भेद के अभिमान वाले, ब्रह्मा महादेव आदि देवता समीप नहीं आये, तब निखिलात्मक होने से सर्वदेव स्वरूप आप साक्षात् श्रीहरि प्रकट हुए ॥ ३० ॥

जगन्निवास हरि ने गजेन्द्र को ऐसा आर्त्तजानकर, गजेन्द्र की स्तुति को सुनकर, स्तोत्रकरनेवाले स्वर्गके देवताओं के सहित, जिनके पङ्खोंसे सामगान स्वयं होवै ऐसे छन्दो मय गरुड के ऊपर विराजमान होकर, श्रीसुदर्शनचक्रको हस्तमें लेकर अति शीघ्र वहां आपहुंचे जहां गजेन्द्र रहा ॥ ३१ ॥

सरोवर के भीतर अति बलिष्ठ ग्राह से ग्रसित, ऐसे गजेन्द्रने, आकाश में गरुड के ऊपर विराजमान हाथ में चक्र लिये हुए श्रीहरि को देखकर, अपनी शुण्डा से कमल लेकर भगवान की ओर को शुण्डा उठाकर वडे कष्ट से इतनी वाणी को बोला, कि—हे नारायण ! हे अखिल गुरो हे भगवन् ! आपको नमस्कार हो ॥ ३२ ॥

कर्म कृत जन्म रहित श्री हरिने भी ग्राह को अति पीडित देखकर, वडे शीघ्र गरुड से उतर कर, कृपा देवी के परवश होकर ग्राह सहित गजेन्द्र को बाहर निकाल कर, देवताओं के देखते २ (चक्रराज) श्रीसुदर्शन से ग्राह का मुख फाडकर, गजेन्द्र को छुडाया, (यहां कृपा का यही अधिक फल है, कि—ग्राह को भी श्री सुदर्शन का स्पर्श होने से उत्तम गति की प्राप्ति होनी ॥ ३३ ॥

श्री गजेन्द्र मोक्षणो हरिर्जयति ॥

इति श्रीमद्भागवत सप्तम स्कन्ध में, तृतीय अध्यायकी
श्रीवृन्दावनस्थ भागवताचार्य कृत
भाषा टीका समाप्त ॥ ३ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥

॥ चतुर्थोऽध्यायः ॥

श्रीशुक उवाच ।

तदा देवर्षिगन्धर्वा ब्रह्मेशानपुरोगमाः ।
मुमुचुः कुसुमासारं शंसन्तः कर्म तद्धरेः ॥ १ ॥
नेदुर्दुन्दुभयो दिव्या गन्धर्वा ननृतुर्जगुः ।
ऋषयश्चारणाः सिद्धास्तुष्टुवुः पुरुषोत्तमम् ॥ २ ॥
योऽसौ ग्राहः स वै सद्यः परमाश्चर्यरूपधृक् ।
मुक्तो देवलशापेन हूहूर्गन्धर्वसत्तमः ॥ ३ ॥
प्रणम्य शिरसाऽधीशमुत्तमश्लोकमव्ययम् ।
अगायत यशोधामकीर्तन्यगुणसत्कथम् ॥ ४ ॥
सोऽनुकम्पित ईशेन परिक्रम्य प्रणम्य तम् ।
लोकस्य पश्यतो लोकं स्वमगान्मुक्तकिल्बिषः ॥ ५ ॥
गजेन्द्रो भगवत्स्पर्शाद्विमुक्तोऽज्ञानबन्धनात् ।
प्राप्तो भगवतो रूपं पीतवासाश्चतुर्भुजः ॥ ६ ॥
स वै पूर्वमभूद्राजा पाण्ड्यो द्रविडसत्तमः ।
इन्द्रद्युम्न इति ख्यातो विष्णुव्रतपरायणः ॥ ७ ॥
स एकदाऽऽराधनकाल आत्मवान्गृहीतमौनव्रत ईश्वरं हरिम् ।
जटाधरस्तापस आप्लुतोऽच्युतं समर्चयामास कुलाचलाश्रमः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चतुर्थे तु तयोर्ग्राहः प्राप गन्धर्वतां पुनः ।
गजं स्वपार्षदं कृत्वा हरिर्निन्ये निजं पदम् ॥ १ ॥

१——२ ॥

हूहूसंज्ञो गन्धर्वसत्तमः असौ देवलस्य शापेन ग्राहो जातः स वै स तु ततः सद्यो मुक्तस्सन्नुत्तमश्लोकमगायतेत्यन्वयः । एवं ...तिहासोत्तमे कथा, सरसि स्त्रीभिः क्रीडन्नसौ स्नातुं प्रविष्टं ...वलं पादे प्रगृह्य विचकर्ष स च कुपितो ग्राहो भवेति शशाप ...न च प्रसादितस्सन्नुवाच एवमेव गजेन्द्रं गृह्णीष्व ततश्च गजे-...मुद्धरन्हरिस्त्वामपि मोचयिष्यतीति ॥ ३ ॥

कथम्भूतं यशसो धाम आश्रयम् अतः कीर्तन्या कीर्तनीया गुणाः सती कथा च यस्य तम् ॥ ४ ॥

स्वं लोकं गन्धर्वलोकम् ॥ ५ ॥ ६ ॥ ७ ॥

कुलाचले मलयाद्रावाश्रमो यस्य ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदा किमभूत्तदाह—तदा गजेन्द्रमोचनदशायां ब्रह्मरुद्रमुख्या देवादयस्तत् गजेन्द्रमोचणरूपं हरेः कर्म मद्भुतं शंसन्तः प्रशंसन्तः कुसुमवर्षं मुमुचुः ॥ १ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तथा दिव्या दुन्दुभयः नदुः गन्धर्वा ननृतुर्जगुश्च ऋषिप्रभृतयः पुरुषोत्तमं हरिं तुष्टुवुः ॥ २ ॥

योऽसौ ग्राहः सपूर्वस्मिन् जन्मनि हूहूर्नाम गन्धर्वश्रेष्ठः स देवलस्य शापेन निमित्तेन ग्राहो जातः सवैग्राहो देवलस्य शापेन मुक्तः सद्यः परमाश्चर्यरूपधृत् प्राक्तनाद्भुततमगन्धर्वरूपधृत ॥ ३ ॥

उत्तमश्लोकमव्ययं यशसोधाम आश्रयम् अतः कीर्तन्याः कीर्तनीयाः गुणाः सत्कथाश्च यस्य तमधीशं हरिं शिरसा प्रणम्यागायतेत्यन्वयः ॥ ४ ॥

एवमितिहासोत्तमे कथा सरसि स्त्रीभिः सह क्रीडन्नसौ हूहूः स्नातुं प्रविष्टं देवलं प्रगृह्य विचकर्ष सच प्रकुपितो ग्राहो भवेति शशाप स च प्रसादितस्सन्नुवाच एवमेव गजेन्द्रं गृहाण तत‌श्च गजेन्द्रमुद्धरन् हरिः त्वामपि मोचयिष्यतीति ईशेन हरिणा गानप्रीतेनानुकम्पितः अनुकम्पाविषयीकृतः स गन्धर्वस्तमीशं परिक्रम्य प्रदक्षिणीकृत्य प्रणम्य च लोकस्य ब्रह्मादिजनस्य पश्यतः सतः मुक्तं किल्विषं देवलशापरूपं यस्य तादृशस्सन् स्वलोकमगात् ॥ ५ ॥

गजेन्द्रस्तु भगवतो हरेः स्पर्शाद्धेतोरज्ञानबन्धनात्कर्मबन्धनाद्विमुक्तः भगवतः रूपं प्राप्तः भगवतः सारूप्यं प्राप्तः तदेव दर्शयति पीतं पिशङ्गं वासो वस्त्रं यस्य चत्वारो भुजा यस्य सः ॥ ६ ॥

गजेन्द्रपूर्वजन्मवृत्तान्तमाह—सवा इति। स वै गजेन्द्रः पूर्वस्मिन् जन्मनि पाण्ड्यदेशपतिः द्रविडेषु श्रेष्ठः इन्द्रद्युम्नाख्यः राजा बभूव स च विष्णुव्रतपरायणः विष्णुव्रतं श्रीविष्णुभजनात्मकं तदेव परमुत्कृष्टमयनमनुष्ठेयं यस्य तादृशः आसीत् ॥ ७ ॥

एवं स्थिते जटा बिभर्तीति तथा तापसःतपोनिष्ठः कुलाचले मलयाद्रावाश्रम आश्रयो यस्य तादृशः स इन्द्रद्युम्नः एकदा भगवदाराधनकाले समाहितचित्तस्सन् गृहीतं मौनात्मकं व्रतं येन तादृश ईश्वरं हरिं समर्चयामास ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रणष्टदुरितस्य हरौ निरतिशयभक्तिः स्यादिति तन्नाशसाधनादि निरूप्यते स्मिन्नध्याये तत्र प्रथमं देवादीनां पुष्पवर्षादिकं भगवत्प्रीतिसाधनमाह—तदेति । यदा गजेन्द्रम् अमूमुचत्तदा ॥ १—२ ॥

स पश्चात्पूर्वचीर्णपुण्योदयेनाविर्भूतज्ञानो हरिं स्तुत्वा तत्प्रसादेन देवलशापेन तृतीया पञ्चम्यर्थे तस्माच्छापान्मुक्तः परमाश्चर्यरूपधृक् हरिं शिरसा प्रणम्य यशोधामागायतेत्यन्वयः कीर्तनीया गुणरूपाः सत्यः कथा यस्य स तथा तं यस्मिस्तथेति वा अनेन हरिगुणकीर्तनरूपं गानं गायकशापादिमोक्षसमर्थमित्युक्तं भवति ॥ ३—५ ॥

ननु, किमनेनान्यगुणकीर्तनेन इदानीं गजेन्द्रस्य भगवत्स्तुत्या किमभूदित्याशङ्क्य स्तुत्या प्रसन्नस्य हरेर्दर्शनेन मुक्तकिल्विषस्य तत्सारूप्यं फलमभूदित्याह—गजेन्द्र इति ॥ ६ ॥

हरेर्नाममात्रतो ऽवाप्ताविष्णुप्रसादः पूर्वं क इति तत्राह—वा इति ॥ ७ ॥

गजेन्द्रयोनिप्राप्तिनिमित्तं वक्तुमुपोद्घातं रचयति—स ए देति ॥ ८——१२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

१——५ ॥

विमुक्त इति तत्सारूप्यस्य मायातीतत्वमुक्तम् ॥ ६—८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

पार्षदत्वं गजेन्द्रस्य गन्धर्वत्वं च यादसः ।
चतुर्थे भगवद्वाक्यं हितमुक्तं मरिष्यताम् ॥ १ ॥

१——२ ॥

देवलशापेनेत्येवमत्र कथा सरसि स्त्रीभिः क्रीडन्नसौ स्न प्रविष्टं देवलं पादे प्रगृह्य विचकर्ष स च कुपितो ग्रा भवेति शशाप तेन च प्रसादितसन्नुवाच एवमेव गजे गृहीतवन्तं त्वां हरिर्मोचयिष्यतीति अधीशं कीदृशं यश धाम आश्रयम् ॥ ३—५ ॥

भगवत्स्पर्शात् तत्र मनोवाचोऽभ्यां स्पर्शात् अज्ञानब मुक्तः स्थूलदेहेन स्पर्शात् स्पर्शमणिन्यायेन भगवतो रूपं प्र ध्रुव इवेति ज्ञेयम्. रूपं सारूप्यं देहमव्ययं करोत्विति पूर्वं नात् ॥ ६—७ ॥

कुलाचले मलयाद्रावाश्रमो यस्य सः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

चतुर्थे ग्राहो गन्धर्वो गजेन्द्रश्च हरिपार्षदोऽभूदित्युच्यते।
गजेन्द्रमोक्षादि स्मरणफलञ्च वर्ण्यते ॥ १ ॥

तदा गजेन्द्रमोचनवेलायाम् ॥ १ ॥ २ ॥

योऽसौ ग्राहः स पुरा हूहूनाम गन्धर्वसत्तमः स दे शापतो ग्राहोऽभूत् स देवलशापेन मुक्तः सन्सद्यः परमा रूपधृक् गन्धर्वरूपभृत् उत्तमश्लोकमगायतेत्यन्वयः इति हासोत्तमे कथा कदाचित् सरसि स्त्रीभिः क्रीडन्नसौ स्ना प्रविष्टं देवलं पादे गृहीत्वा विचकर्ष स कुपितो ग्राहो भ शशाप तेन प्रसादितः सन्नुवाचैवमेवं गजेन्द्रं गृहीतवन्तं हरिर्मोचयिष्यतीति ॥ ३ ॥

उत्तमश्लोकमुत्तमयशसम्———यशसो धाम आश्र कीर्त्तन्याः गुणाः सती कथा च यस्य तम् ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

यदृच्छया तत्र महायशा मुनिः समागमच्छिष्यगणैः परिश्रितः ।
तं वीक्ष्य तूष्णीमकृतार्हणादिकं रहस्युपासीनमृषिश्चुकोप ह ॥ ९ ॥
तस्मा इमं शापमदादसाधुरयं दुरात्मा ऽकृतबुद्धिरद्य ।
विप्रावमन्ता विशतां तमोऽन्धं यथा गजस्तब्धमतिः स एव ॥ १० ॥

श्रीशुक उवाच ।

एवं शप्त्वा गतोऽगस्त्यो भगवान्नृप सानुगः ।
इन्द्रद्युम्नोऽपि राजर्षिर्दिष्टं तदुपधारयन् ॥ ११ ॥
आपन्नः कौञ्जरीं योनिमात्मस्मृतिविनाशनीम् ।
हर्यर्चनानुभावेन यद्गजत्वे ऽप्यनुस्मृतिः ॥ १२ ॥
एवं विमोक्ष्य गजयूथपमब्जनाभस्तेनापि पार्षदगतिं गमितेन युक्तः ।
गन्धर्वसिद्धविबुधैरुपगीयमानकर्माद्भुतं स्वभवनं गरुडासनोऽगात् ॥ १३ ॥
एतन्महाराज ! तवेरितो मया कृष्णानुभावो गजराजमोक्षणम् ।
स्वर्ग्यं यशस्यं कलिकल्मषापहं दुःस्वप्ननाशं कुरुवर्य ! शृण्वताम् ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कुलाचले मलयाद्रावाश्रमो यस्य सः आप्लुतः स्नातः आराधनकाले गृहीतं मौनव्रतं येन स हरिमाराधयामास ॥ ८ ॥ ९ ॥

भाषा टीका ।

श्रीरुक्मिणीवल्लभो जयति ॥

श्रीशुक उवाच ।

श्रीशुकदेवजी बोले, कि—जब इस प्रकार श्रीहरिने गजेन्द्र को ग्राह से छुड़ाया उस समय देव, ऋषि, गन्धर्व, ब्रह्मा, महादेव प्रभृति सब देवता लोग, श्रीहरि के उस कर्म की प्रशंसा करते हुए पुष्पों की वर्षा करने लगे ॥ १ ॥

आकाश में देवताओं की दुंदुभी बाजने लगीं गन्धर्व लोग नाचने लगे, गाने लगे ऋषि, चारण और सिद्ध लोग श्रीपुरुषोत्तम की स्तुति करने लगे ॥ २ ॥

और जो यह ग्राह रहा वह भी, देवल ऋषि के शाप से छूट कर, तत्काल परम आश्चर्य रूप को धारण कर, गन्धर्वों में सत्तम, प्रथम के सदृश हूहू नामक गन्धर्व होगया ॥ ३ ॥

तब तो उत्तम श्लोक अव्यय अधीश श्रीहरि को प्रणामकर यश के धाम और कीर्त्तन करने योग्य है सुन्दर गुण और कथायें हैं जिनकी ऐसे प्रभुका गान करता भया ॥ ४ ॥

वह भी ईश्वर से अनुकम्पित होकर, श्रीहरि को प्रणाम कर, मुक्तकिल्विष होकर सब लोगों के देखते २ अपने लोक को गया ॥ ५ ॥

और गजेन्द्र भी भगवान के स्पर्श होने से अज्ञान बन्धन से छूटकर भगवान के सारूप्य को प्राप्त होकर पीताम्बरधारी और चतुर्भुज (चार भुजा वाला) होगया ॥ ६ ॥

वह भी पूर्व जन्म में विष्णु व्रत परायण द्रविड देशान्तर्गत पाण्ड्यदेश का राजा इन्द्रद्युम्न इस नाम से विख्यात रहा ॥ ७ ॥

वह एक समय आराधन काल में आत्मज्ञानी मौनव्रत को धारण कर सकल जगत के नियन्ता श्रीहरि का कुलाचल पर्वत के ऊपर आश्रम में बैठकर पूजा करता रहा, इतने में एक जटाधारी तपस्वी आकर प्राप्त हुआ ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तूष्णीं रहस्युपासीनं वीक्ष्य ॥ ९ ॥

शापमेवाऽऽह—असाधुरित्यादि । अकृता ऽशिक्षिता बुद्धिर्यस्य गजो यथास्तब्धमतिस्तथैवायमतः स एव गज एव भवत्विति शेषः ॥ १० ॥

दिष्टं दैवार्पितं तदुपधारयन्नालोचयन् ॥ ११ ॥

कौञ्जरीं योनिमापन्नः तर्हि पश्चात्कथं स्मृतिर्जाता तत्राऽऽह हरेरर्चनस्यानुभावेनेति ॥ १२ ॥

यथाऽनुकीर्तयन्त्येतच्छ्रेयस्कामा द्विजातयः ।
शुचयः प्रातरुत्थाय दुःस्वप्नाद्युपशान्तये ॥ १५ ॥
इदमाह हरिः प्रीतो गजेन्द्रं कुरुसत्तम ! ।
शृण्वतां सर्वभूतानां सर्वभूतमयो विभुः ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अद्भुतं स्वभवनमगात् ॥ १३ ॥

एतद्गजराजमोक्षणं नाम कृष्णानुभावस्तवेरितः कथम्भूतं तत्राऽऽह स्वर्ग्यमित्यादि दुःस्वप्नं नाशयतीति तथा ॥ १४ ॥

अतः श्रेयस्कामा ये एतद्यथावदनुकीर्तयन्ति ॥ १५ ॥

अनेन श्रेयो भवतीति कुतो ज्ञातम् ? साक्षाद्भगवद्वचनादेवेत्याह–इदमाहेत्यादि यावत्समाप्ति ॥ १६ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदा शिष्यगणैः परिवृतो महाशया मुनिरगस्त्योयदृच्छया तत्र इन्द्रद्युम्नाश्रमे समागतः तमिन्द्रद्युम्नं तूष्णीमवस्थितमकृतमसमर्पितमर्घ्यादिकं येन तं रहसि एकान्ते उपासीनमुपविष्टं वीक्ष्य ऋषिरगस्त्यश्चुकोप हेति कष्टं ईदृशस्यापि महानिग्रहविषयता बभूवेति खिद्यति मुनिः ॥ ९ ॥

तस्मै इन्द्रद्युम्नाय शापमदादाहेतिरित्यनुषङ्गः, शापमेवाह—असाधुरिति । अयम् इन्द्रद्युम्नोऽसाधुर्दुरात्मा अकृता अशिक्षिता बुद्धिर्यस्य तादृशोऽद्याधुना विप्रावमन्ता विप्रानस्मानवमन्यते परिभवतीति तथा अतो हतोऽस्त्वनिस्तमज्ञानं विशतां प्राप्नोतु, यथा गजः स्तब्धमतिस्तथैवायमज्ञो भवतु स एव गज एव भवत्विति शेषः ॥ १० ॥

हे नृप ! इत्थं शप्त्वा भगवानगस्त्यः सानुगः सशिष्यो गतः ययौ तत इन्द्रद्युम्नोऽपि राजर्षिस्तदगस्त्यशापात्मकं दिष्टं प्रारब्धमेव उपधारयन्निश्चिन्वन्नात्मनः परमात्मनः स्मृतिविनाशिनीं कौञ्जरीं योनिमापन्नः प्राप्तः तर्हि पश्चात्कथं स्मृतिर्जाता तत्राह—गजत्वेऽप्यनुस्मृतिरिति यत्तद्धर्यर्चनानुभावेन पूर्वजन्मनि भगवदाराधनप्रभावेनाभूदित्यर्थः ॥ ११ ॥ १२ ॥

एवमित्थं गजयूथपं गजेन्द्रं विमोक्ष्य पार्षदत्वं प्रापितेन तेनापि गजेन्द्राख्यजीवेनापि अपिशब्दात्स्वपार्षदैश्च युक्तोऽब्जनाभो हरिर्गन्धर्वादिभिरुपगीयमानं कर्म यस्य गरुड आसनं वाहनं यस्य सः अद्भुतं स्वभवनं ययौ इत्यर्थः ॥ १३ ॥

यत्पृष्टं "बादरायण एतत्ते" इत्यादिना तस्योत्तरमुक्तम् उपसंहरन् गजेन्द्रमोक्षकथाश्रवणफलमाह–एतादिति । हे महाराज ! एतद्गजेन्द्रमोक्षणरूपः कृष्णानुभावः हरिप्रभावः तव तुभ्यं मयेरितः कथितः इदं गजेन्द्रमोक्षणं शृण्वतां जनानां स्वर्ग्यं स्वर्गसाधनं यशस्करं कलिकल्मषापहं कलौ युगे यत्कल्मषं पापं तदपहं तथा कलिः कलहः तन्निमित्तं पापं हरतीति वा । हे कुरु... दुस्स्वप्ननाशं दुस्स्वप्नं नाशयतीति तथा ॥ १४ ॥

अतः श्रेयस्कामा द्विजातयस्त्रैवर्णिकाः प्रातरुत्थाय शुचिभूताः दुःस्वप्नाद्युपशान्तये एतद्यथावदनुकीर्तयन्ति ॥ १५ ॥

अनेन कीर्तितेन दुःस्वप्नाद्युपशान्तिर्भवति इति कुतो ज्ञातं इत्यपेक्षायां भगवद्वचनादेवेत्याह—इदमिति । हे कुरुसत्तम सर्वभूतानां शृण्वतां सर्वभूतप्रचुरो विभुर्हरिः प्रीतो गजेन्द्रं इदं वक्ष्यमाणमाह ॥ १६ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उपगीयमानानि कर्माणि यस्य स तथा अगाल्लोका... तु तत्रैवान्तर्दधे इत्यर्थः ॥ १३ ॥

दुःस्वप्नस्य नाशो यस्माद् गजेन्द्रमोक्षणात्तत्तथा तम् ॥ १४–...

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

चुकोपह इति न स्वावमानेन किन्तु विध्यतिक्रमेण ।... एव विप्रावमन्तेति वक्ष्यति । अनेन च पूर्वपूर्वविप्र... कृतवानिति बोध्यते. तत्र हेतुः । स्तब्धमतिरित्यनेन दर्शित... कोपविधानं चेदं तदपराधजन्यमहादुःखभोगान्तरशा... अभूदिति कृपामयमेव ज्ञेयम् ॥ ९ ॥

एवमित्यर्द्धकम् । अत एवागस्त्यो भगवानिति दयालु... सर्वज्ञत्वादिनैव तं शशापेति भावः । तत्रचान्यथा स्यान्बहवोऽदृशापराधास्तत्फलदुर्भोगाश्च समुत्पत्स्यन्ते । स्तब्धे सति शिक्षामात्रेण चिकित्स्यत्वात् । ततश्चास्य कदाचिन्निस्तारः स्यादिति तदभिप्रायो ज्ञेयः ॥ १० ॥ ११ ॥

हर्य्यर्चनेति । गजत्वेऽप्यनुस्मृतिर्यदभूत्तत्तु हर्यर्चनाऽनुभावेनेत्यर्थः ॥ १२—१६ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

मुनिरगस्त्यः ॥ ९ ॥

अकृतबुद्धिः अशिक्षितधीः स एव गज एव भवत्विति शेषः ॥ १० ॥

श्रीभगवानुवाच ।

ये मां त्वां च सरश्चेदं गिरिकन्दरकाननम् ।
वेत्रकीचकवेणूनां गुल्मानि सुरपादपान् ॥ १७ ॥
शृङ्गाणीमानि धिष्ण्यानि ब्रह्मणो मे शिवस्य च ।
क्षीरोदं मे प्रियं धाम श्वेतद्वीपं च भास्वरम् ॥ १८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

दिष्टं दुरदृष्टम् उपधारयन् जानन् ॥ ११ ॥
यस्य गजत्वे यद्गजत्वे ॥ १२ ॥
विमोक्ष्येति ग्राहादिति शेषः ॥ १३ ॥ १४ ॥
यथा यथावत् ॥ १५-१६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तस्मै इमं शापमदात् शापमेवाह—असाधुरित्यादि । अकृता अनियोजिता पञ्चयज्ञलक्षणे अतिथिपूजने धर्मे बुद्धिर्येन सः अत एव दुरात्मा दुष्टबुद्धिः स्तब्धमतिः अयं यथा गजस्तथा तमोन्धमज्ञानं स एव गज एव सन् विशताम् स च धर्मः उक्तो महाभारते "चक्षुर्दद्यान्मनो दद्याद्वाचं दद्यात्सुसूनृताम् । उत्थाय चासनं दद्यात्स यज्ञः पञ्चदक्षिणः" इति ॥ १० ॥

तच्छापरूपेण परिणतं दिष्टं प्राचीनं कर्मोपधारयन् ॥११॥

यत् यस्य हर्यर्चनाऽनुभावेन गजत्वेऽप्यनुस्मृतिः हरिस्मरणम् ॥ १२ ॥

गन्धर्वादिभिरुपगीयमानानि कर्माणि यस्य स अद्भुतमलौकिकं स्वभवनमगात् ॥ १३ ॥

दुःस्वप्नं नाशयतीति तथा शृण्वतामित्युपलक्षणं श्रावयितॄणामपि ॥ १४ ॥

अत एव श्रेयस्कामाः धर्मार्थकाममोक्षाख्यश्रेयस्कामाः दुःस्वप्नाद्युपशान्तये च यथा वदनुकीर्तयन्ते ॥ १५ ॥

गजेन्द्रमोक्षस्मरणफलवर्णनप्रसङ्गादन्यद्भगवद्विभूतिस्मरणफलमपि भगवदुक्तिद्वारा वर्णयति----इदमाह हरिरित्यादिना ॥ १६ ॥

भाषा टीका ।

जब उस जगह पर हरीच्छा से अपने शिष्यों सहित महा यशा मुनि (अगस्त्य जी) आये और राजा उन ऋषि को देखकर भी पूजा सत्कार कुछ न करके चुप बैठा रहा तब ऋषि ने एकान्त में ऐसे बैठे हुए को देखकर कोप किया ॥ ९ ॥

और उस राजा को यह शाप दिया कि यह दुरात्मा असाधु अशिक्षित बुद्धि विप्र का अवमान [तिरस्कार] करने वाला अब अन्धतम को अर्थात् तामसी योनि को प्राप्त हो जैसे गज के नाईं स्तब्ध मति होकर बैठा रहा इसी प्रकार वही गज हो ॥ १० ॥

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले कि–हे नृप! इस प्रकार अगस्त्य भगवान् शाप देकर अपने अनुचरों सहित चले गये और राज ऋषि इन्द्रद्युम्न भी अपनी उस प्रारब्ध को धारण करता हुआ ॥ ११ ॥

आत्म स्मृति के विनाश करने वाली कुञ्जर की योनि को प्राप्त हुआ, तौ भी श्रीहरि की परिचर्या (पूजा) के प्रभाव से गज योनि प्राप्त होने पर भी स्मृति नष्ट नहीं भई ॥ १२ ॥

कमल नाभ श्रीहरि गज यूथ पति को इस प्रकार छुडा कर, पार्षद गति को प्राप्त होने वाले उस गजेन्द्र के सहित गरुडाशन [गरुड पर बैठने वाले] अपने अद्भुत भवन को पधारे, उस समय गंधर्व सिद्ध, और देवता लोग भगवान् के कर्म को गान करते हुए ॥ १३ ॥

शुकदेवजी बोले, कि हे महाराज ! यह हमने तुमारे आगे श्रीकृष्ण का प्रभाव, कहा और हे कुरुवर्य ! स्वर्ग के देने वाला, यश के देने वाला, और श्रवण करने वालों के कलिकल्मषों को दूर करने वाला, यह गजराज का मोक्षण भी कहा ॥ १४ ॥

और इस गजेन्द्र मोक्ष को श्रेय की कामना वाले शुचि द्विजाति लोग, प्रातःकाल उठकर, दुःस्वप्नादि की शान्ति की लिये कीर्तन करते हैं ॥ १५ ॥

हे कुरु सत्तम ! सर्व भूत मय समर्थ श्रीहरि गजेन्द्र का मोक्षण कर सब लोगों के सुनते २ गजेन्द्र के ऊपर प्रसन्न होकर यों बोले ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रसङ्गादन्यस्यापि स्मरणे फलमुच्यते सर्वेषां द्वितीयान्तानां स्मरन्तीत्यष्टमेनान्वयः ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥

श्रीवत्सं कौस्तुभं मालां गदां कौमोदकीं मम ।
सुदर्शनं पाञ्चजन्यं सुपर्णं पतगेश्वरम् ॥ १९ ॥
शेषं च मत्कलां सूक्ष्मां श्रियं देवीं मदाश्रयाम् ।
ब्रह्माणं नारदमृषिं भवं प्रह्लादमेव च ॥ २० ॥
मत्स्यकूर्मवराहाद्यैरवतारैः कृतानि मे ।
कर्माण्यनन्तपुण्यानि सूर्यं सोमं हुताशनम् ॥ २१ ॥
प्रणवं सत्यमव्यक्तं गोविप्रान्धर्ममव्ययम् ।
दाक्षायणीर्धर्मपत्नीः सोमकश्यपयोरपि ॥ २२ ॥
गङ्गां सरस्वतीं नन्दां कालिन्दीं सितवारणम् ।
ध्रुवं ब्रह्मऋषीन्सप्त पुण्यश्लोकांश्च मानवान् ॥ २३ ॥
उत्थायापररात्रान्ते प्रयताः सुसमाहिताः ।
स्मरन्ति मम रूपाणि मुच्यन्ते ह्येनसो ऽखिलात् ॥ २४ ॥
ये मां स्तुवन्त्यनेनाङ्ग! प्रतिबुध्य निशात्यये ।
तेषां प्राणात्यये चाहं ददामि विमलां मतिम् ॥ २५ ॥

श्रीशुक उवाच ।

इत्यादिश्य हृषीकेशः प्रध्माय जलजोत्तमम् ।
हर्षयन्विबुधानीकमारुरोह खगाधिपम् ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायाम्
वैयासिक्याम् अष्टमस्कन्धे गजेन्द्रमोक्षणं नाम
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अव्यक्तं मायाम् अव्ययं धर्मं भक्तिलक्षणं सोमकश्यपयोरपि पत्नीर्दाक्षायणीः ॥ २२ ॥

सितवारणमैरावतम् ॥ २३ ॥

सुसमाहिता एकाग्रचित्ताः मम रूपाणि मद्विभूतीः ॥२४॥२५॥

जलजोत्तमं शङ्खवरं प्रध्माय वादयित्वा ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

भगवदुक्तिमेव दर्शयति--य इत्यादिना विमलां अतिमि... न्तेन । ये जनाः त्वां मां च एतत्सरोवरादींश्चापररात्रान्ते प्र... उत्थाय स्मरन्ति तेऽखिलांहसो मुच्यन्त इत्युत्तरत्रान्वयः । ... दीनां समाहारद्वन्द्वः वेत्रादीनाम् इतरेतरयोगद्वन्द्वः तेषां गुल्मा... सन्दर्भविशेषात्मकानि सुरपादपान्मन्दारादीन् ॥ १७ ॥

इमानि त्रिकूटस्यशृङ्गाणि प्रसङ्गादन्येषामपि प्रातः स्म... व्यतामाह—ब्रह्मणश्चतुर्मुखस्य मे हरेः शिवस्य च धिष्ण्या... स्थानानि त्रयाणां त्रिकूटगिरिशृङ्गाणां ब्रह्मादिस्थानाभिप्राय... वा इमानीत्युक्तं चीरोदं क्षीरसागरं मम प्रियं स्थानं भा... श्वेतद्वीपञ्च ॥ १८ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

तथा मम श्रीवत्सादीन् तत्र मालां वनमालां कौमोदकीनाम्नीं गदां पतगेश्वरं पतगानां पक्षिणामीश्वरं सुपर्णं गरुडम् ॥ १९ ॥

शेषमनन्तं कथम्भूतं मत्कलां सूक्ष्मां दुःप्रतर्क्यमत्कलाभूतमित्यर्थः । अहमेवाश्रयो यस्यास्ताम देवीं श्रियं महालक्ष्मीं ब्रह्माणं चतुर्मुखमृषिं नारदं भवं रुद्रम् ॥ २० ॥

मम मत्स्याद्यवतारैः कृतान्यनन्तपुण्यानि श्रूयन्तामिति शेषः यानि कर्माणि चरितानि तानिच सोमश्चन्द्रं हुताशनमग्निम् ॥ २१ ॥

प्रणवमोङ्कारं सत्यं भूतहितरूपं धर्ममव्यक्तं प्रधानमव्ययं धर्मं भगवद्भक्तियोगलक्षणं दाक्षायणीः दक्षदुहितॄः धर्मस्य पत्नीः सोमकश्यपयोरपि पत्नीः ॥ २२ ॥

गङ्गामलकनन्दां कालिन्दीं यमुनां सितवारणम् ऐरावतं ध्रुवमौत्तानपादिं सप्त ब्रह्मर्षीन्पुण्येन श्लोक्यन्ते कथ्यन्त इति पुण्यश्लोकास्तान्धार्मिकान्मानवांश्च ॥ २३ ॥

प्रातरुत्थाय ये स्मरन्ति कथम्भूताः प्रयताः सुसमाहिताश्च नियमितान्तर्बाह्येन्द्रियाः कथम्भूतानि सरआदीनि मम रूपाणि मद्विभूतानि ते स्मर्तारोऽखिलादंहसः पापान्मुच्यन्ते दुःस्वप्नादिनिमित्तेभ्यः सर्वपापेभ्यो मुच्यत इत्यर्थः ॥ २४ ॥

ये च जनाः निशात्यये निशापगमे प्रभाते प्रतिबुद्ध्यानेन त्वत्कृतेन स्तोत्रेण मां स्तुवन्ति तेषां प्राणात्यये प्रयाणकाले विमलां मद्विषयां मतिमहं ददामि ॥ २५ ॥

इतीत्थमादिश्याज्ञाप्य हृषीकेशो हरिः जलजोत्तमं शंखश्रेष्ठं प्राध्माय ध्वनयित्वा ब्रह्मादिदेवतावर्गं हर्षयन् खगाधिपं गरुडमारुरोह आरुह्य स्वभवनमगादित्यर्थः ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिकायाम्
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अपररात्रान्ते अरुणोदयप्रारम्भे उत्थाय त्वां मां चेत्यादिकं स्मरन्ति ते सर्वस्मादंहसो मुच्यन्त इत्यन्वयः ॥ २४ ॥

नन्वस्तु पापक्षयोऽस्मात्तद्विषयज्ञानं कस्मादित्यतस्तत्साधनमाह—ये मामिति । प्राणात्यये देहोत्क्रमणे ॥ २५ ॥

जलजोत्तमं शङ्खोत्तमम् ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ये मामित्यष्टकम् । ये मामित्यादिना स्वभक्तोद्धारजातपरमानन्दः श्रीभगवानाशिषो ददाति य एतत् प्रसङ्गसङ्गिनस्तेषां स्मरणानुवादेन तत्र तु शेषादिनामप्यागमनं ज्ञेयम् । दिविजैः सहसंस्तुवद्भिरित्युक्तेः । प्रह्लादोऽयं नित्यपार्षदः अक्रूरेण ब्रह्महृदे दृष्टत्वात् । मत्स्याद्यवतारकृतानि तदानीं गन्धर्वादिभिर्गीयमानानि । प्रणवादिकमपि तत् प्रसङ्गे कीर्त्यमानं गङ्गाद्यास्तदधिष्ठात्र्यः । पुण्यश्लोकाश्च तल्लीलान्तः कीर्त्यमानाः तत्पार्षदादिना प्राप्तत्वेन तत् सहिता एव चेति ॥ १७—२६ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

मां त्वांचेत्यादिर्द्वितीयान्तानां स्मरन्तीत्यष्टमेनान्वयः ॥१७-२१॥

अव्यक्तं मायाम् अव्ययं धर्मं भक्तिं सोमकश्यपयोरपि पत्नीः ॥ २२ ॥

सितवारणमैरावतम् ॥ २३—२६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
अष्टमे चतुर्थोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ये मामित्यादीनां स्मरन्तीत्यष्टमेनान्वयः ॥ १७—२१ ॥

सत्यं व्यक्तं कार्यजातम् अव्यक्तं प्रधानम् अव्ययं धर्मं मदीयभक्तियोगम् मोक्षदत्वात् सोमकश्यपयोरपि पत्नीः । २२ ॥

सितवारणमैरावतम् पुण्यश्लोकान् पवित्रकीर्त्तीन् । २३ ॥

मम रूपाणि मद्विभूतीः ॥ २४ ॥ ॥ २५ ॥ ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
चतुर्थोऽध्यायार्थप्रकाशः ॥ ४ ॥

भाषा टीका ।

श्री भगवान उवाच ।

श्री भगवान बोले कि हे गजेन्द्र ! जो लोग, हमारा तुमारा इस सरोवर का गिरिकन्दरा और कानन का तथा वेत्र कीचक और वेणुओं के गुल्मों का तथा देव वृक्षों का स्मरण करते हैं ॥ १७ ॥

तथा इन तीनों शृङ्गों का, ब्रह्मा हम और महादेव ये तीनों के धामों का तथा हमारा भास्वर श्वेत द्वीपका ॥१८॥

भाषा टीका ।

तथा श्रीवत्स, कौस्तुभ, वनमाला, और हमारी प्रिय गदा कौमोदकी, सुदर्शन पाञ्चजन्य तथा पतगेश्वर सुपर्ण गरुडजी॥१६॥

तथा हमारी सूक्ष्मकला श्री शेषजी, और सत्यनारायण श्री देवी, तथा ब्रह्मा, नारद ऋषि, महादेव, प्रह्लाद ॥ २० ॥

और मत्स्य कूर्मादि अवतारों को धारणकर जो हमने अनन्त और पुण्यरूप चरित्र किये उनको तथा सोम सूर्य और अग्नि को ॥ २१ ॥

तथा प्रणव (ॐकार) सत्य, अव्यक्त, गौ, ब्राह्मण, तथा अव्यय धर्म, तथा दक्ष की पुत्री धर्म की पत्नी तथा सोम और कश्यप की भी पत्नियें ॥ २२ ॥

तथा गंगा, सरस्वती, अलकनन्दा, कालिन्दी, सितवारण, (ऐरावत,) तथा ध्रुव और सप्त ऋषि, तथा और पुण्य श्लोक मनुष्य ॥ २३ ॥

हमारी विभूति रूप इन सबों को पिछली रात्रि अर्थात् ब्राह्म मुहूर्त में उठ कर प्रयत्न पूर्वक समाहित होकर जो लोग स्मरण करते हैं वे लोग सम्पूर्ण पापों से छूट जाते हैं ॥ २४ ॥

हे गजेन्द्र ! जो लोग बडे प्रातः काल जाग कर इस स्तोत्र से हमारी स्तुति करते हैं उन लोगों को प्राण निकलने के काल में मैं ही विमल मति को देता हूं ॥ २५ ॥

श्रीशुक उवाच ॥

श्रीशुकदेव जी बोले, कि—हृषीकेश श्रीहरि, इस प्रकार आदेश कर, पाञ्चजन्य को बजा कर देवताओं की सेना को हर्ष देते हुए, खगाधिप श्री गरुड़जी पर सवार होकर पधारे ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे अष्टम स्कन्ध में चतुर्थ अध्याय की श्री वृ० भागवताचार्यकृत भाषा टीका समाप्त ॥ ४ ॥

श्रीहरये नमः

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे चतुर्थोऽध्यायः ॥ ४ ॥

॥ पञ्चमोऽध्यायः ॥

श्रीशुक उवाच ।

राजन्नुदितमेतत्ते हरेः कर्माऽघनाशनम् ।
गजेन्द्रमोक्षणं पुण्यं रैवतं त्वन्तरं शृणु ॥ १ ॥
पञ्चमो रैवतो नाम मनुस्तामससोदरः ।
बलिविन्ध्यादयस्तस्य सुता अर्जुनपूर्वकाः ॥ २ ॥
विभुरिन्द्रः सुरगणा राजन् (१) भूतरयादयः ।
हिरण्यरोमा वेदशिरा ऊर्ध्वबाह्वादयो द्विजाः ॥ ३ ॥
पत्नी विकुण्ठा शुभ्रस्य वैकुण्ठैः सुरसत्तमैः ।
तयोः स्वकलया जज्ञे वैकुण्ठो भगवान्स्वयम् ॥ ४ ॥
वैकुण्ठः कल्पितो येन (२) लोको लोकनमस्कृतः ।
रमया प्रार्थ्यमानेन देव्या तत्प्रियकाम्यया ॥ ५ ॥
तस्यानुभावः कथितो गुणाश्च परमोदयाः ।
भौमान्रेणून्स विममे यो विष्णोर्वर्णयेद्गुणान् ॥ ६ ॥
षष्ठश्च चक्षुषः पुत्रश्चाक्षुषो नाम वै मनुः ।
(३) पुरुपूरुषसुद्युम्नप्रमुखाश्चाक्षुषात्मजाः ॥ ७ ॥
इन्द्रो (४) मन्त्रद्रुमस्तत्र देवा आप्यादयो गणाः ।
मुनयस्तत्र वै राजन् हविष्मद्वीरकादयः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अमृताख्यानमष्टाभिरध्यायैरनुवर्ण्यते ।
स्वभक्तपक्षपातेन यत्र योषायितं प्रभोः ॥ १ ॥
पञ्चमे पञ्चमं चाथ षष्ठं चाकथयन्मनुम् ।
विप्रशापाञ्च निःश्रीकैः कृतां देवैर्हरेः स्तुतिम् ॥ २ ॥

॥ १ ॥

तामसश्चतुर्थो मनुस्तस्य सोदरो भ्राता ॥ २—५ ॥

तस्य वैकुण्ठसंज्ञस्य हरेरनुभावः सनकादिशापेन दैत्यतां प्राप्ताभ्यां स्वपार्षदाभ्यां वराहादिरूपेण युद्धादिलक्षणः गुणाश्च ब्रह्मण्यतादयः परमोदयाश्च महर्द्धयः कथितास्तृतीयस्कन्धादिषु ॥ ६—१० ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

एवं तामसमन्वन्तरकथनप्रसङ्गानुप्रसक्तं गजेन्द्रमोक्षोपवर्णनमनुवदन् पञ्चममन्वन्तरं श्रोतुं चोदयति मुनिः——राजन्निति । हे राजन् ! एतत्पुण्यतमं गजेन्द्रमोक्षणात्मकं कर्म हरेः अघनाशनं दुरितनिवर्तकं मे मया तुभ्यं कथितमथ पञ्चमं रैवतं मन्वन्तरं शृणु ॥ १ ॥

(१) भूतदयादयः इति वीर० (२) लोकालोक इति वीर० (३) पुत्राः इति विज० (४) मन्द्र इति विज० वीर०

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्र पञ्चमो मनुः रैवत इति प्रसिद्धः स च तामसस्य प्रियव्रतात्मजस्य सोदरः तस्य रैवतस्य मनोः सुताः पुत्रास्तु बलिविन्ध्यादयः तेचार्जुनः पूर्वो मुख्यो येषां तादृशाः ॥ २ ॥

इन्द्रस्तु विभुरिति प्रसिद्धः हे राजन् ! भूतरयादयः भूतरयप्रभृतयः देवाः हिरण्यरोमादयः सप्तर्षयः ॥ ३ ॥

एवं मन्वादयः पञ्चोक्ताः अथावतारमाह—पत्नीति । शुभ्रस्य भर्तुः विकुण्ठाख्या पत्नी तयोर्विकुण्ठाशुभ्रयोर्भगवान् कलया अंशेन वैकुण्ठ इति प्रसिद्धोऽन्यैश्च वैकुण्ठाख्यैः सुरसत्तमैः सह जज्ञेऽवतीर्णः ॥ ४ ॥

वैकुण्ठाख्यं भगवन्तं विशिनष्टि—वैकुण्ठ इति । देव्या रमया लक्ष्म्या प्रार्थ्यमानेन येन वैकुण्ठेन भगवता तस्या लक्ष्म्याः प्रियं कर्तुमिच्छया वैकुण्ठः वैकुण्ठाख्यो लोकः कश्चिदण्डान्तवर्ती कल्पितः स च लोकालोकपर्वतस्थैर्जनैः नमस्कृतः लोकालोकपर्वतोपरि-निर्मित इति भावः ॥ ५ ॥

तस्य वैकुण्ठस्य भगवतोऽनुभावः सनकादिशापेन दैत्यतां प्राप्ताभ्यां जयविजयाभ्यां वराहादिरूपेण युद्धादिलक्षणः प्रभावो गुणाश्च ब्रह्मण्यतादयः परमोदयाः महर्द्धयश्च कथिताः तृतीयसप्तमस्कन्धादिषु कथिताः संग्रहेण कथिताः कार्त्स्न्येनाधुना कथयेत्यत्राह—भौमानिति । यः पुमान् विष्णोर्गुणान्वर्णयन् साकल्येनेति शेषः । स भौमान् भूमेर्भवान् रेणून् विममे गणयेत् भौमानां रेणूनां गणनवद्विष्णोर्गुणानां साकल्येन वर्णनमशक्यमित्यर्थः । यद्यपि वराहावतारः स्वायम्भुवमन्वन्तरारम्भकालिकः तृतीस्कन्ध उक्तः जयविजययोः सनकादिशापेन दैत्यताप्राप्तिस्तु रैवतमन्वतर इति तस्याऽनुभावः कथित इत्येतदसङ्गतं तथापि दंष्ट्राग्रेण भूमिमुद्धृत्य यावद्धिरण्याक्षसमागमस्तावत्समुद्रं विहरति सति वाराहेऽस्मिन्मन्वन्तरे दैत्यतां प्राप्तो जयस्तेन हत इत्यवगन्तव्यं नचैवमपि तद्वधस्य वराहावताराऽनुभावत्वाद्वैकुण्ठावतारानुभावत्वकथनमसङ्गतम् इति वाच्यम् अवताराणां भिन्नत्वेऽप्यवतारिणो भगवत एकत्वात्पार्षदयोर्दैत्यत्वप्राप्तेर्वैकुण्ठावतारसमकालिकत्वात्तद्धननस्याप्येतत्सङ्कल्पमूलकत्वाच्चेति—विभावनीयम् ॥ ६ ॥

षष्ठं मन्वन्तरमाह—षष्ठश्चेति । षष्ठस्तु मनुश्चाक्षुषः पुत्रश्चाक्षुष इति प्रसिद्धः पूर्वादयश्चाक्षुषस्य मनोरात्मजाः ॥ ७ ॥

इन्द्रस्तु मन्द्रद्रुम इति प्रसिद्धः तत्र मन्वन्तरे आप्यादयो गणा देवगणाः हे राजन् ! तत्र मन्वन्तरे हविष्मदादयः सप्तर्षयः एवं मन्वादयः पञ्चोक्ताः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भक्त्या स्तुवतः पुरुषस्यापि प्रसन्नो भवति हरिरित्ययमर्थः प्रतिपाद्यतेऽस्मिन्नध्याये, तत्रादौ क्रमप्राप्तमन्वन्तराधिपकथां प्रसञ्जयति—राजन्निति । रेवतस्य विद्यमानं रैवतम् ॥ १ ॥

बलिविन्ध्यादी येषां ते तथा अर्जुनः पूर्वः प्रधानो येषां ते तथा ॥ २ ॥

विभुर्विभुनामा हरिः द्विजाः सप्तर्षयः ॥ ३ ॥

विकुण्ठायाः तयोर्विकुण्ठाशुभ्रयोः कलयांशेन ॥ ४—५ ॥

भौमान् रेणून् पृथ्वीरजांसि विममे मानं संख्यां करोति [illegible]
पुत्रा उच्यन्ते इति शेषः । चाक्षुषात्मजाः पुरुपादय इ-
न्वयः ॥ ७ ॥

अत्रादिशब्दार्थों ग्रन्थान्तरादवगन्तव्यः ॥ ८—९—१० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १-३ ॥

पत्नीति द्वयम् । यथा भगवत आविर्भावमात्रं जन्मेति मन्यते तथैव वैकुण्ठस्यापि कल्पनमाविर्भावनमेव नतु प्राकृतवत् कृत्रिमत्वम् । उभयत्रापि नित्यत्वादित्यभिप्रायेण त[त्]साम्येनाह—जज्ञ इति । श्रीविकुण्ठासुतस्यैवेदं वैकुण्ठं मूल-वैकुण्ठन्तु सृष्टेः प्राक् श्रीब्रह्मणा दृष्टमिति द्वितीयस्कन्धे प्रसिद्धमेव । स तन्निकेतं परिसृत्य शून्यमपश्यमानः कुपितो[...] चेति निर्दिष्टं तत् स्थानं तु सर्गादिगतमेव ज्ञेयम् ॥ ४—१० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

षष्ठे मन्वन्तरे श्रीमदजितस्य कथामनु ।
दुर्वासःशापनिःश्रीकाः पञ्चमे तुष्टुवुः सुराः ॥

॥ १—३ ॥

शुभ्रस्य पत्नी विकुण्ठा आसीदिति शेषः तयोर्भगवा[न्] वैकुण्ठैः सह जज्ञे ॥ ४ ॥

यथा भगवत आविर्भावमात्रं जन्मेति भण्यते; तथैव वैकुण्ठस्य कल्पनमाविर्भावनमेव न तु प्राकृतवत्कृत्रिमत्वम् उभयत्रापि नित्यत्वानित्यत्वाभिप्रायेण तत्साम्येनाह—जज्ञ इति । श्रीविकुण्ठसुतस्तस्यैवेदं वैकुण्ठं मूलवैकुण्ठं तु अष्टावरणपारे नित्यं सृष्टेः प्राक्ब्रह्मणा दृष्टमिति द्वितीयस्कन्धे प्रसिद्धमिति सन्दर्भः ।

कथितस्तृतीयस्कन्धे गुणा ब्रह्मण्यत्वादयः ॥ ६—१० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पञ्चमादिभिरष्टभिरध्यायैः पयोब्धिमन्थनं वर्णयन्[...] पञ्चमं षष्ठं च मनुदुर्वासःशापान्निःश्रीकैर्देवैः कृतं भग[वत्]स्तोत्रं चाह राजन्निति पञ्चमेनाध्यायेन ॥ १ ॥

तामसस्य चतुर्थस्य मनोः सोदरो भ्राता ॥ २ ॥ ३ ॥

सुरसत्तमैः प्रार्थित इति शेषः ॥ ४ ॥

लोकनमस्कृतो वैकुण्ठः कल्पितः ब्रह्माण्डमध्ये आविर्भा[वितः] स च नित्य एवेति पूर्वत्रोपपादितम् ॥ ५ ॥

तस्य भगवतो वैकुण्ठस्याऽनुभावः प्रभुत्वं कथितः गुणा[ः] कथिताः तृतीयादौ ॥ ६—१० ॥

तत्रापि देवः सम्भूत्यां वैराजस्याभवत्सुतः ।
अजितो नाम भगवानंशेन जगतः पतिः ॥ ९ ॥
पयोधिं येन निर्मथ्य सुराणां साधिता सुधा ।
भ्रममाणोऽम्भसि धृतः कूर्मरूपेण मन्दरः ॥ १० ॥

राजोवाच ।

यथा भगवता ब्रह्मन् ! मथितः क्षीरसागरः ।
यदर्थं वा यतश्चाद्रिं दधाराम्बुचरात्मना ॥ ११ ॥
यथाऽमृतं सुरैः प्राप्तं किञ्चान्यदभवत्ततः ।
एतद्भगवतः कर्म वदस्व परमाद्भुतम् ॥ १२ ॥
त्वया सङ्कथ्यमानेन महिम्ना सात्वतां पतेः ।
नाऽतितृप्यति मे चित्तं सुचिरं तापतापितम् ॥ १३ ॥

सूत उवाच ।

(१)सम्पृष्टो भगवानेवं द्वैपायनसुतो द्विजाः ! ।
अभिनन्द्य हरेर्वीर्यमभ्याचष्टुं प्रचक्रमे ॥ १४ ॥

श्रीशुक उवाच ।

यदा युद्धे ऽसुरैर्देवा बाध्यमानाः शितायुधैः ।
गतासवो निपतिता नोत्तिष्ठेर(२)न्स्म भूयशः ॥ १५ ॥

भाषा टीका ।

श्रीरुक्मिणीरमणो विजयताम् ।

श्रीशुक उवाच ।

श्रीशुकदेवजी बोले, कि–हे राजन् ! यह संपूर्ण पापों को नाशक, और बडा पुण्य रूप, श्रीहरिका गजेन्द्र से मोक्षणरूप चारित्रं तुमारे आगे वर्णन किया, अब रैवत मन्वन्तर को श्रवण करो ॥१॥

पंचम मनुरैवत नाम वाले तामस मनु के भ्राता हुए। और अर्जुन है पूर्व जिनके ऐसे बलि, विन्ध्य, से आदि लेकर मनु के पुत्र हुए॥२॥

हे राजन् ! उस समय साक्षात् विभु (श्रीहरि) आपही इन्द्र हुए, और हिरण्यरोमा, वेदशिरा, तथा ऊर्ध्वबाहु से आदि लेकर सप्त ऋषि हुए ॥ ३ ॥

शुभ्र की पत्नी विकुंठा भई इन दोनों से साक्षात् स्वयं भगवान् अपनी कला से वैकुण्ठवासी देवताओं सहित वैकुंठ नाम वाले प्रभु उत्पन्न हुए ॥ ४ ॥

जिन वैकुंठ नाम वाले श्रीहरि ने, आप(प्रभु)के प्रिय की चाहना वाली श्रीरमा देवी [लक्ष्मीजी] की प्रार्थना से सर्व लोक नमस्कृत वैकुंठ लोक रचा ॥ ५ ॥

उन श्रीहरि का सनकादिके शाप से दैत्य होने वाले स्वपार्षदों के साथ युद्धादिरूप प्रभाव और परमउदार ब्रह्मण्यतादिगुणों का हमने वर्णन किया, जो विष्णु के गुणों का वर्णन करसके. वह समझो कि–पृथिवी के रेणुओं की भी गणना करसकेगा ॥६॥

और छठमे चक्षु के पुत्र चाक्षुष नाम मनु हुए, तथा पुरु, पुरुष, और सुद्युम्न आदिक मनु के पुत्र हुए, ॥ ७ ॥

और उस समय में मंत्रद्रुम नामक इन्द्र हुए, और आप्यादिक देव हुए, हे राजन् ! उस मन्वन्तर में हविष्मान् वीरकादिक सप्तऋषि हुए ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यतो हेतोः अम्बुचरात्मना कूर्मरूपेण ॥ ११ ॥

सुराणां साधिता सुधेत्युक्त्या युद्धाद्यपि सूचितमतः पृच्छति, किञ्चान्यादिति ॥ १२—१४ ॥

नोत्तिष्ठेरन्न पुनर्जीवन्ति स्मेत्यर्थः ॥ १५ ॥

(१) विष्णुरातेन संपृष्टो भगवान् बादरायणिः । इति वीर० ।

(२) पुनश्च ते इति वीर० ॥

यदा दुर्वाससः शापात्सेन्द्रा लोकास्त्रयो नृप ! । निःश्रीकाश्चाभवंस्तत्र नेशुरिज्यादयः क्रियाः ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दुर्वाससा हि कदाचिन्मार्गे गच्छन्तमिन्द्रं दृष्ट्वा स्वकण्ठस्था माला तस्मै दत्ता तेन च श्रीमदेनाऽनादृत्यैरावतस्य कुम्भयोर्निक्षिप्ता स च गजोमत्तः पद्भ्यां तां मालां चूर्णीचकार ततः कुपितो दुर्वासास्तं शशाप त्रिभिर्लोकैः सह त्वं निःश्रीको भवेति, तदेतदाह, यदा दुर्वाससः शापादिति। इज्यादयो यागाद्याः ॥ १६—१८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अवतारमाह—तत्रापीति। तत्रापि षष्ठे मन्वन्तरे वैराजस्य भर्तुः संभूत्याख्यायां भार्यायां जगतीपतिर्भगवानंशेनाजित इति प्रसिद्धो ऽभवत् ॥ ९ ॥

अवतारप्रश्नावसरं प्रयच्छन्नजितं विशिनष्टि—पयोधिमिति। येनाऽजितेन पयोधिं क्षीरोदधिं निर्मथ्य सुराणां सुधाऽमृतं साधिता संपादिता येन च कूर्मरूपेणाम्भसि भ्रममाणो मन्दरोऽद्रिः पृष्ठे धृतः ॥ १० ॥

लब्धावसरः पृच्छति राजा—यथेति, त्रिभिः। हे ब्रह्मन् ! भगवता ऽजितेन यथा क्षीरसागरो मथितः यया रीत्या मथितः यदर्थं येषां प्रयोजनार्थं मथितः यतश्च हेतोरम्बुचरात्मना कूर्मरूपेणाद्रिं मन्दरं दधार ॥ ११ ॥

येन च प्रकारेण देवैरमृतं लब्धं ततो मथनादन्यदमृताद्व्यतिरिक्तमपि वस्तु किं किमभवत् एतत्पयोदधिमथनात्मकं भगवतोऽद्भुतं कर्म वदस्व ॥ १२ ॥

स्वस्वशुश्रूषां व्यनक्ति–त्वयेति। त्वया सम्यक्कीर्त्यमानेन सात्वतां पतेर्भगवतो महिम्ना मे चित्तं नैव तृप्यति. अतृप्तौ हेतुं वदंश्चित्तं विशिनष्टि—सुचिरं बहुकालं तापेनाऽध्यात्मकादितापत्रयेण तापितं दुःखितम् ॥ १३ ॥

एवमापृष्टो भगवान्बादरायणिः प्रश्नमभिनन्द्य कथयामासेत्याह सूतः—संपृष्ट इति । हे द्विजाः ! इत्थं संपृष्टो भगवान् द्वैपायनसुतो द्विजः शुकः राज्ञः प्रश्नमभिनन्द्य हरेर्वीर्यं माहात्म्यम् अभ्याचष्टुं कथयितुं प्रचक्रमे आरेभे ॥ १४ ॥

तदेवाह–यदेत्याद्यष्टभिरध्यायैः। पयोदधिनिर्मथनात्मकं भगवतश्चरित्रं वक्तुं तावत्तदुपोद्घातं प्रपञ्चयत्यध्यायद्वाभ्यां यदाऽसुरैः कर्तृभिः निशितायुधैः साधनैर्युध्यमाना देवाः गतप्राणाः निपातिताः बहुशः पुनर्नोत्तिष्ठेरन्नाजीवन्नुस्म ॥ १५ ॥

यदा च दुर्वाससो मुनेः शापेनेन्द्रेण सहितास्त्रयो लोकाः निःश्रीकाः निर्लक्ष्मीकाः निःसम्पदो ऽभवन् दुर्वाससा हि कदाचिन्मार्गे गच्छन्तमिन्द्रं दृष्ट्वा स्वकण्ठमाला कृपया तस्मै दत्ता तेन चेन्द्रेण श्रीमदेनाऽनादृत्य मालैरावतस्य कुम्भे निक्षिप्ता स च मत्तः पद्भ्यां मालां चूर्णीचकार ततः कुपितो दुर्वासास्तं शशाप त्रिभिर्लोकैः सह त्वं निःश्रीको भवेति तदेतदुक्तं यदा दुर्वाससः शापेनेति तत्र तदा इज्यादयो यागादयः क्रिया नेशुर्न समर्थाः श्रियं वर्द्धयितुं नाशक्नुवन्नित्यर्थः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यथा कथं यतः कुतः अम्बुचरात्मना कूर्मरूपेण ॥ ११–१२

तापैराध्यात्मिकादिदुःखैः तापितं क्लेशितम् ॥ १३ ॥

सूतः शौनकादिसम्वादाविस्मरणार्थं राज्ञा पृष्टः श्रीशुकस्तस्य चोद्यं परिहर्तुमुपक्रमत इत्याह, सूत इति ॥ १४ ॥

कथमुपक्रान्तवानिति तत्राह–यदेति । गतासवः प्राणरहिताः यदा च नोत्तिष्ठेरन् यदा च निःश्रीका अभवन् तदा इज्यादयः क्रियाः नेशुरित्यन्वयः ॥ १५–१६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यदा युद्धे इति युग्मकम् । सेन्द्रा इन्द्रानुगता एत एव सुरा इत्यर्थः ॥ १५—१८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अम्बुचरः कूर्मस्तदात्मना ॥ ११—१४ ॥

नोत्तिष्ठेरन् नपुनर्जीवन्तिस्मेति देवानां पराभव ... स्तत्र कारणमाह—दुर्वाससश्शापेनेति । दुर्वासा हि कदाचिन्मार्गे गच्छन्तमिन्द्रं दृष्ट्वा स्वकण्ठस्थ माला तस्मै दत्ता ... श्रीमदेनाऽनादृत्यैरावतस्य कुम्भयोर्निक्षिप्ता स च ... त्वान्मत्तः पतितां तां मालां पद्भ्यां चूर्णीचकार तद्दृष्ट्वा कुपितो दुर्वासास्त्रिभिर्लोकैः सह त्वं निःश्रीको भवेति शशाप ॥ १५–१६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यथा येन प्रकारेण यदर्थं यत्प्रयोजनार्थं क्षीरसागरो मथितः यतो हेतोः अम्बुचरात्मना कूर्मरूपेणाद्रिं मन्दरं दधार ॥ ११ ॥

यथा येन प्रकारेण देवैरमृतं लब्धं ततः क्षीरसागरात् अन्यदमृतव्यतिरिक्तं किमभवत् एतत् भगवतः कर्म वदस्व ॥ १२ ॥

निशाम्यैतत्सुरगणा महेन्द्रवरुणादयः।
नाध्यगच्छन्स्वयं मन्त्रैर्मन्त्रयन्तो विनिश्चयम् ॥ १७ ॥
ततो ब्रह्मसभां जग्मुर्मेरोर्मूर्धनि सर्वशः।
सर्वं विज्ञापयाञ्चक्रुः प्रणताः परमेष्ठिने ॥ १८ ॥
स विलोक्येन्द्रवाय्वादीन्निस्सत्त्वान्विगतप्रभान्।
लोकानमङ्गलप्रायानसुरानयथा विभुः ॥ १९ ॥
समाहितेन मनसा संस्मरन्पुरुषं परम्।
उवाचोत्फुल्लवदनो देवान्स भगवान्परः ॥ २० ॥
अहं भवो यूयमथो ऽसुरादयो मनुष्यतिर्यग्द्रुमघर्मजातयः।
तस्यावतारांशकलाविसर्जिता व्रजाम सर्वे शरणं तमव्ययम् ॥ २१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

सङ्कथ्यमानेनापि नातितृप्यति अत्यन्ततस्तल्लुब्धाय विस्तारतो ब्रूहीति भावः ॥ १३ ॥

अभिनन्द्य राज्ञः प्रश्नमिति शेषः। हरेर्वीर्यमभ्याचष्टुं वक्तुं प्रचक्रमे आरेभे ॥ १४ ॥

नार्त्तष्टरन् तत्र हेतुः गतासवः गतप्राणाः ॥ १५ ॥

एवंविधे देवानां पराभवे हेतुं वदन् कश्चिद् दुर्वाससा स्वकण्ठस्था माला गजेन्द्र वृजते इन्द्राय दत्ता तेन श्रीमदाविष्टेन साऽनादृत्य गजकुम्भयोर्निक्षिप्ता गजेन तु सा पद्भ्यां चूर्णीकृता ततः कुपितो दुर्वासाः त्रिभिर्लोकैः सह त्वं निःश्रीको भवेतीन्द्रं शशापेत्याह–यदा दुर्वाससः शापेनेति। इज्यादयो यागादयः क्रियाः नेशुः श्रियं वर्द्धयितुं नाशक्नुवन् ॥ १६ ॥

भाषाटीका।

उस मन्वन्तर में भी जगतपति भगवान् अपने अंश से सम्भूति देवी में वैराज के पुत्र अजित नाम से प्रकट हुए ॥ ९ ॥

जिनों ने समुद्र मथन करके देवताओं को अमृत पिवाया, और मथने समय में जिनने कूर्मरूप को धारण कर भ्रमते हुए मन्दराचल को धारण किया ॥ १० ॥

राजोवाच

राजा परीक्षित बोले, कि–हे ब्रह्मन्! जैसे भगवान ने क्षीर सागर का मंथन किया और जिस प्रयोजन को मथा, और जिस हेतु से आपने जलचर [कूर्म] रूप को धारण कर पर्वत को धारण किया ॥ ११ ॥

और जैसे देवताओं को अमृत प्राप्त हुआ, और जो जो कुछ चरित्र वहां पर हुआ हो, वह सब परमाद्भुत श्रीहरिका पराक्रम आप कहो ॥ १२ ॥

हे महाराज! आप भक्तों के प्रति श्रीहरि की महिमा को जैसे २ कथन करते हो, वह सब सुनता हूं तौ भी बहुत काल से संसार के तापों से तप्त मेरा चित्त अत्यंत तृप्त नहीं होता है॥१३॥

सूत उवाच ॥

सूतजी बोले, कि–हे शौनकादिको! द्वैपायन महर्षि श्रीवेदव्यास जी के पुत्र भगवान् श्रीशुकदेवजी से राजा ने जब इस प्रकार प्रश्न किया तब श्रीशुकदेवजी भी राजा के प्रश्न का अभिनन्दन करके श्रीहरि के वीर्य [पराक्रम] के कथन करने का प्रारम्भ करते हुए ॥ १४ ॥

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि–जब संग्राम में देवताओं को तीक्ष्ण आयुधों से असुरों ने ताडित किये और देवता लोग भी गत प्राण वाले होकर पृथिवी पर गिर कर फिर बहुत से नहीं उठे ॥ १५ ॥

हे नृप! और जब दुर्वासा के शाप से इन्द्र सहित तीनों लोक विना श्री के होगये, और इज्या [यज्ञ] आदि क्रिया करने को जब समर्थ न हुए, ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

असुरान् अयथा देववैलक्षण्येन बलपुष्ट्यादियुक्तान्विलोक्येत्यर्थः ॥ १९ ॥

हरिं शरणं गतास्सन्तो यथापूर्वं सर्वं प्राप्स्याम इति हर्षेणोत्फुल्लं विकसितं वदनं यस्य ॥ २० ॥

मनुष्यादयो जरायुजाण्डजोद्भिज्जस्वेदजाः यस्यावतारः पुरुषस्तस्यांशो ब्रह्मा तस्य कला मरीच्यादयस्ताभिर्विसर्जिताः पुत्रपौत्रादिद्वारा जनिताः ॥ २१ ॥

न यस्य वध्यो न च रक्षणीयो नोपेक्षणीयादरणीयपक्षः ।
अथापि सर्गस्थितिसंयमार्थं धत्ते रजस्सत्त्वतमांसि काले ॥ २२ ॥
अयं च तस्य स्थितिपालनक्षणः सत्त्वं जुषाणस्य भवाय देहिनाम् ।
तस्माद्व्रजामः शरणं जगद्गुरुं स्वानां स नो धास्यति शं सुरप्रियः ॥ २३ ॥

श्रीशुक उवाच ।

इत्याभाष्य सुरान्वेधाः सह देवैररिन्दम ! ।
अजितस्य पदं साक्षाज्जगाम तमसः परम् ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, तर्हि सर्वेष्वसौ समः स्यात्किं तच्छरणाश्रयेण सत्यम्, यद्यप्येवं तथाऽप्यस्मत्पक्षपाती भविष्यतीत्याशयेनाऽऽह—न यस्येति द्वाभ्याम् ॥ २२ ॥

स्थितिपालनस्य क्षणः कालः अतः सुरप्रियस्स्वकीयानां नः शं सुखं करिष्यति ॥ २३ ॥

यत्र क्षीराब्धौ हरेर्वासस्तदेव तमसः परं स्थानम् यद्वा लोकालोकात्परतो यत्तमस्ततः परं स्थानं जगाम ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

तदा सुरगणाः इन्द्रादिदेवगणाः पतत्त्रैलोक्यस्य निःश्रीकत्वं पतितानां देवानामनुत्थानञ्च निशाम्य दृष्ट्वा स्वयं मंत्रैर्मन्त्रयन्तोऽप्यालोचयन्तोऽपि विनिश्चयं सश्रीकत्वाद्यावहोपायनिश्चयं नाध्यगच्छन् प्रापुरित्यर्थः ॥ १७ ॥

ततो निश्चयानधिगमनानन्तरं मेरोर्मूर्द्धनि स्थितां ब्रह्मणः चतुर्मुखस्य सभां सर्वशः सर्वे जग्मुः तत्र गत्वा सर्वे प्रणताः कृतप्रणामाः परमेष्ठिने ब्रह्मणे विज्ञापयाञ्चक्रुर्विज्ञापनञ्चक्रुरित्यर्थः ॥१८ ॥

ततः श्रुत्वा ब्रह्मा किमकरोदित्यत आह—स इति । ततः स परमेष्ठी विगतप्रभान् निस्तेजस्कान्निस्सत्वान् बलहीनानिन्द्रवाय्वादीन् देवगणान् तथाऽमङ्गलप्रायान् मङ्गलरहितानिव स्थितान् त्रीन् लोकांश्च विलोक्य तथाऽसुरान्देवगणाद्विलक्षणान् तेजोबलादियुक्तांश्च विलोक्य सुरानाहेत्युत्तरेणान्वयः विभुर्ब्रह्मा ॥ १९ ॥

समाहितेनैकाग्रेण मनसा परमपुरुषं संस्मरन् परपुरुषशरणवरणेन यथापूर्वं सर्वं प्राप्स्याम इति हर्षेणोत्फुल्लं विकसितं वदनं यस्य स भगवान् ब्रह्मा हरीनिन्द्रमुखान्सुरान् देवानाहोवाच ॥ २० ॥

तदेवाह—अहमिति त्रिभिः । अस्मदादयः सर्वे यस्य भगवतो अवतारः सृष्ट्यधिकृतोऽनिरुद्धः तस्यांशकलया अंशांशेन ज्ञानशक्त्यादिगुणलेशेन विसर्जिताः उत्पादिता तमेवाव्ययं भगवन्तं शरणं व्रजाम गच्छेम यः स्रष्टा स एवास्माकं रक्षिता अतस्तमेव शरणं व्रजाम इतोऽन्यो न कश्चिदुपायोऽस्तीति भा[...] तत्राहं ब्रह्मा भवो रुद्रः यूयं देवाः द्रुमाः वृक्षाः घर्मजा[...] स्वेदजोद्भिज्जादयः ॥ २१ ॥

ननु, तेन यथा वयं सृष्टास्तथा ऽसुरा अपि, अतस्त[...] न्निगृह्य वैषम्यादिप्राकृतगुणरहितः कथमस्मान् रक्षिष्यतीत्याश[...] निराह—न यस्येति द्वाभ्याम् तत्रार्द्धेनाक्षेपः सार्द्धेन तु परिहा[...] यद्यप्यस्य वैषम्यनैर्घृण्यादिप्राकृतगुणरहितस्य वध्यादि[...] नास्ति तथापि जगतः सृष्ट्याद्यर्थं काले सृष्ट्याद्युपयुक्त[...] रजस्सत्त्वतमांसि धत्ते बिभर्ति त्रिगुणोन्मेषनिमित्तकर्मा[...] प्रवर्तत इत्यर्थः ॥ २२ ॥

तर्हि रज आदिधर्त्तां नाम तथापि प्रकृते किमायात[...] चेत्तत्राह—अयन्त्विति । देहिनां भवाय सत्तायै स्थितय [...] सत्त्वं जुषाणस्य सत्त्वगुणोन्मेषनिमित्तकर्माऽनुगुणं प्रवृत्त[...] शस्य भगवतोऽयं स्थितिपालनक्षणः स्थित्यात्मकपालनस्य का[...] सत्त्वप्रधानदेवादिपालनकालोऽयमितिभावः। यत एवं तस्मात्सर्वे[...] जगद्धितकारिणं शरणं व्रजामः रक्षणोपायत्वेन/ध्यवस्यामः [...] शरणव्रजनमात्रेण स्वीयत्वेन परिगृहीतानामस्माकं शं [...] धास्यति दास्यति यतोऽयं भगवान् स्वत एव सुराः प्रियाः[...] तादृशः ॥ २३ ॥

एवं ब्रह्मा सुरान्प्रत्युक्त्वाऽजितस्य भगवतः स्थानं तै[...] सह जगामेत्याह, भगवान् बादरायणिः—इतीति । हे अरिन्द[म] कामक्रोधादिदमन ! राजन् ! इतीत्थं सुरान्देवानाभाष्य वेधा [...] जगद्विदधाति सृजतीति तथा तादृशः चतुर्मुखः देवैः [...] लोकाद्यत्परमलोकाख्यं तमस्तस्मात्तमसः परम् अजितस्य [...] वतः पदं स्थानं जगाम ययौ ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यदा देवा निश्चयं नाध्यगच्छन् ततस्तदा ब्रह्मसभां [...] रित्यन्वयः ॥ १७—१९ ॥

परं पूरकं सृष्ट्वेति शेषः ॥ २० ॥
घर्मजातयः स्वेदजाः ॥ २१ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यस्य वध्यादयो न सन्ति ॥ २२ ॥

तस्य हरेरयं कालः स्थितिपालनाऽवसरः भास्यति ददाति शं सुखम् ॥ २३ ॥

अजितस्य हरेः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सविलोक्येति युग्मकम् । असुरान् यथेति ज्ञानदृष्ट्यैव दृष्टम् तेषामत्रानागमनात् । उत्फुल्लवदन इति समाधौ हरेः प्रसादानुभवात् ॥ १९ ॥ २० ॥

यस्यावताररूपा ये ईशाः कलाश्च पुरुष त्रिदेव्यादयो मरीच्यादयश्च ताभिर्विसर्जिताः । तत्र मूलावतारिणः पुरुषत्रयं तत्र द्वितीयात् पुरुषात् त्रिदेवी तत्र ब्रह्मणो मरीच्याद्याः। तेऽन्योऽन्येऽन्य इति विवेचनीयम् तदेतदवतारिदृष्ट्योक्तम् ॥ २१ ॥

न यस्येत्यादौ सर्गादयो "लोकवत्तु लीला कैवल्यम् २।१।३३" इति न्यायेनैवेति भावः । तदुक्तम् "सृष्ट्यादिकं हरिर्नैव प्रयोजनमपेक्ष्य तु । कुरुते केवलानन्दाद्यथा मत्तस्य नर्त्तनम्" इत्यादि ॥ २२ ॥

ननु, सर्गादिकालाऽनुसारी चेदसौ तर्हि कालान्तरेऽस्मद्विपक्षीभावात्ताऽतिविश्वसनीयस्तत्राह—स्वानामिति । ननु, तर्हि स्वीयत्वमप्यस्मासु न घटते तत्राह-सुरप्रियः । सुरेषु प्रियास्तद्भक्ताः श्रीनारदादयो यस्य स इति सुरेष्वेव तद्भक्तानां स्थितिप्राचुर्यादस्मास्वेवास्याऽनुग्रहः पर्यवस्यतीति भावः ॥ २३ ॥

अजितस्य पदं विकुण्ठासुतस्यैव तेनैव प्रकाशितं वैकुण्ठविशेषं तमसः परम् । प्रपञ्चमध्याविर्भूतत्वेऽपि श्रीभगवद्विग्रहवदेव प्रकृत्या न स्पृष्टं यत्तज्जगाम तत्समीपदेशं प्रापेत्यर्थः ॥ २४—२५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

स परमेष्ठी असुरांस्तु अयथावलपुण्यादियुक्तान् ॥ १९—२० ॥

धर्मजातयः स्वेदजाः यस्याऽवतारः पुरुषस्तेनाऽहं भवश्च विसर्जितौ विविधां सृष्टिं कारितौ पुरुषांशेन मया च मरीच्यादयः मत्कलाभिर्मरीच्यादिभिः पुत्रपौत्रद्वारा असुरादयो विसर्जिताः ॥ २१ ॥

न यस्य वध्या इति । तस्य सर्वत्र साम्यादिति भावः । ननु, तर्हि वध्यादयः कथं जगति दृश्यन्ते तत्राह-धत्ते इति । गुणानां तच्छक्तित्वात् सृष्ट्याद्यर्थं स एव रज आदि धत्त इत्युच्यते तमस्सत्त्वरजोभिर्गुणैरेव वधरक्षणोपेक्षणानि क्रियन्ते तत्र परमेश्वरे केवलमुपचार इति भावः ॥ २२ ॥

किन्तु सम्प्रति तमःकार्य्यवधकालो नेत्याह—अयं स्थितिमर्य्यादा तस्याः पालनलक्षणः समयः सत्त्वं जुषाणस्येति सम्प्रति सत्त्वं स्वीकुर्वन् सुरप्रिय एव भवितुमर्हतीति भावः ॥ २३ ॥

पदं क्षीरोदधिस्थश्वेतद्वीपं तमसः प्रकृतेः परम् ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एतच्छापेन निःश्रीकत्वम् ॥ १७ ॥ १८ ॥

निःसत्त्वान् बलहीनान् विगतप्रभान् निस्तेजस्कान् असुरान् अयथाबलादियुक्तान् विलोक्य उवाचेत्युत्तरेणान्वयः ॥ १९ ॥

परं पुरुषं वासुदेवं देवकार्यसाधकं स्मरन् अत उत्फुल्लवदनः परो देवश्रेष्ठः देवान् प्रत्युवाच ॥ २० ॥

मनुष्याश्च तिर्यञ्चश्च द्रुमाश्च धर्मजातयः स्वेदजाश्च यस्यावतारः पुरुषः तस्यांशो लेशस्तस्य कलया लेशमात्रेण अस्मदादिस्वेदजान्ताः विसर्जिताः उत्पादिताः ॥ २१ ॥

ननु, सः असुरेषु निग्रहं सुरेष्वनुग्रहं कथं करिष्यतीत्यत्राह—नेति, द्वाभ्याम् । काले सर्गस्थितिसंयमसमये रजःसत्त्वतमांसि धत्ते बिभर्ति स्वशक्तिगुणान्प्रवर्त्तयतीत्यर्थः ॥ २२ ॥

सत्त्वं जुषाणस्य प्रवर्त्तकतया सेवमानस्य ॥ २३ ॥

तमसःपरं पदं तमोवर्जितं भगवत्स्थानविशेषं यत्र देवैः सहितस्य ब्रह्मणो गतिः सम्भवति तत्र क्षीराब्धिस्थमित्यर्थः ॥ २४ ॥

भाषा टीका ।

तब महेन्द्र वरुण आदि देवता ऐसा देखकर नाना प्रकार के विचार करके सलाह करते हुए भी निश्चय न कर सके ॥ १७ ॥

तब तो सर्व देवगण मेरु पर्वत के ऊपर ब्रह्माजी की सभा को गये, और परमेष्ठी [श्रीब्रह्माजी] को प्रणाम कर विज्ञापन किया ॥ १८ ॥

तब विभु ब्रह्माजी ने इन्द्रवायु आदि देवों को निर्बल और विनाकांति के देखकर और सम्पूर्ण लोकों को और देवताओं को भी अमंगल प्राय अयथावत् देखकर ॥ १९ ॥

ब्रह्माजी अपने मन को समाधान युक्तकर, परम पुरुष श्रीमन्नारायण का स्मरण करते हुए, देवों से उत्कृष्ट ऐसे भगवान् श्रीब्रह्माजी प्रफुल्ल मुख होकर देवताओं से बोले ॥ २० ॥

श्रीब्रह्माजी बोले, कि-मैं और महादेव तथा तुम सब देवता लोग और मनुष्य, तिर्यक्, और जरायुज, अंडज स्वेदज, उद्भिज्ज, सर्व जीवजात जिसके अवतार के अंश के कलाओं से, आर्थात्

तत्रादृष्टस्वरूपाय श्रुतपूर्वाय[1] वै विभो ।
(२) स्तुतिमब्रूत दैवीभिर्गीर्भि*स्त्ववहितेन्द्रियः ॥ २५ ॥

ब्रह्मोवाच ।

अविक्रियं सत्यमनन्तमाद्यं गुहाशयं निष्कलमप्रतर्क्यम् ।
मनोऽग्रयानं वचसा निरुक्तं नमामहे देववरं वरेण्यम् ॥ २६ ॥
विपश्चितं प्राणमनोधियात्मनामर्थेन्द्रियाभासमनिद्रमव्रणम् ।
छायातपौ यत्र न गृध्रपक्षौ तमक्षरं खं त्रियुगं व्रजामहे ॥ २७ ॥
अजस्य चक्रं त्वजयेर्यमाणं मनोमयं पञ्चदशारमाशु ।
त्रिणाभि विद्युच्चलमष्टनेमि यदक्षमाहुस्तमृतं प्रपद्ये ॥ २८ ॥
(३) य एकवर्णं तमसः परं तदलोकमव्यक्तमनन्तपारम् ।
आसाञ्चकारोपसुपर्णमेनमुपासते योगरथेन धीराः ॥ २९ ॥
न यस्य कश्चाति[4]तितर्ति मायां यया जनो मुह्यति वेदनार्थम् ।
तं निर्जितात्मात्मगुणं परेशं नमाम भूतेषु समं चरन्तम् ॥ ३० ॥

भाषा टीका ।

पुरुष के अंश ब्रह्मा मरीच्यादि कों के पुत्र पौत्रादि द्वारा, रचे हुए हैं ॥ वे हम सब उसी अव्यय परमात्मा के ही शरण जावें ॥ २१ ॥

न जिसके कोई मारने के योग्य है और न पालन करने के योग्य है, और न कोई उपेक्षा करने योग्य न कोई आदर करने के योग्य है, तौ भी जगत् की सृष्टि, पालन, और संहार के लिये सत्त्व रज और तमोगुण को धारण करता है ॥ २२ ॥

और यह तौ उस सत्त्व को धारण करने वाले परमात्मा का जीवों की वृद्धि के लिये पृथिवी के पालन का काल है, तस्मात् हम लोग उस जगद्गुरु के शरण को प्राप्त होवें, क्योंकि हम उसीके हैं, तौ फिर वह देवताओं पर प्रीति करने वाला हमारे लोगों का अवश्य ही मंगल करेगा ॥ २३ ॥

श्रीशुक उवाच ।

श्रीशुकदेवजी बोले, कि– हे अरिन्दम, हे शत्रुओं के दमन करने वाले ! राजन् ! ब्रह्माजी ने देवताओं से ऐसे कहकर, और देवताओं को साथ लेकर प्रकृति से पर जो साक्षात् आपका धाम क्षीरसागर है तहां पर गये ॥ इहां इतनी बात जानने के योग्य है, कि–जैसे आप स्वयं प्रभु नित्य हैं और प्रकृति से पर हैं इसी प्रकार आपके धाम वैकुंठ गोलोक साकेत प्रभृति भी नित्य और अप्राकृत हैं । परंच जैसे भक्तों के कार्य के लिये आप समय २ पर आविर्भाव तिरोभाव को प्राप्त होते हैं वैसे ही आपके निजभक्त ब्रह्मादिकों की प्रार्थना [विनती] सुनने के लिये क्षीरसागर में अपने धाम को प्रगट करके शेषजी के ऊपर योग निद्राकरते हैं । अर्थात् एकांत में पौढे हुए भक्त जनों के हित का चिंतन करते हैं ॥ और क्षीर सागर के तुल्य लोकालोक पर्वत पर जो रमा वैकुंठ है, तथा जहां वृकासुर से शंकर की रक्षाकरी, वह श्वेतद्वीप, और जो ध्रुव को प्रकट करके दिया वह ध्रुवलोक, इत्यादिक और जो आपके धाम हैं वे भी सब नित्य और अप्राकृत ही है । परंच इनका आविर्भाव तिरोभाव तौ है, जैसे कि–आपके दिव्य मंगल विग्रह का ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दैवीभिर्लोकेऽप्रसिद्धाभिर्वैदिकीभिर्गीर्भिः स्तुतिमकरोत् ॥ २५ ॥

देववरं त्वां नमामहे हे देव ! वरं त्वां नमामेति वा । वरत्वे हेतुः सत्यम्, कुतः अविक्रियम्, तत्कुतः अनन्तमाद्यं चानादिम् आद्यन्तवन्तो हि वृद्ध्यादिविक्रियायुक्ता भवन्ति किञ्च गुहाशयं सर्वान्तरं कुतः निष्कलं निरुपाधिम्, तत्कुतः अप्रतर्क्यम् तत्कुतः मनोऽग्रयानं मनसोऽपि जविष्ठम् मनःप्राप्ये स्थाने इतः प्रागेव विद्यमानत्वात् तथा च श्रुतिः—"अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्षत् । तद्धावतोऽन्यानत्येति तिष्ठत्"

(१) चाभिभोः । (२) स्तुतम् । (३) * स्तवहितेन्द्रियः । यदेकवर्णम्. इति च वीर० पाठाः । (४) पिपर्ति इति वीज० ।

इमे वयं यत्प्रिययैव तन्वा सत्त्वेन सृष्टा बहिरन्तराविः ।
गतिं न सूक्ष्मामृषयश्च विद्महे कुतोऽसुराद्या इतरप्रधानाः ॥ ३१ ॥
पादौ महीयं स्वकृतैव यस्य चतुर्विधो यत्र हि भूतसर्गः ।
स वै महापूरुष आत्मतन्त्रः प्रसीदतां ब्रह्म महाविभूतिः ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वचसा अनिरुक्तम् अविषयत्वात् "यद्वाचाऽनभ्युदितं येन वागभ्युद्यते" इति श्रुतेः मनोवचसोरगोचरत्वादप्रतर्क्यम् बयेष्टं वा सर्वेषां हेतुहेतुमद्भावः ॥ २६ ॥

किञ्च प्राणादीनां विपश्चितं ज्ञातारम् आत्माऽहङ्कारो देहो वा न तु तद्व्यतिरिक्तं ज्ञेयमस्तीत्याह-अर्थो विषयः इन्द्रियाणि तद्ग्राहकाणि तदुभयरूपेणाभासत इति तथा तम् । तथाऽप्यनिद्रं स्वप्नद्रष्टृवदज्ञानरहितम्. कुतः अजरामदेहम् अत एवाजरं खमिव व्यापिनं च सर्वत्र हेतुः यत्र यस्मिन्गृध्रपक्षौ जीवपक्षपातिनी ज्ञायातपाविद्या च तन्निवर्तिका विद्या च नास्ति तं त्रियुगं त्रिषु युगेष्वाविर्भवन्तं शरणं व्रजाम ॥ २७ ॥

तदेवमविक्रियत्वादिभिश्च सत्यत्वं वरेण्यत्वं चोक्तं संसारचक्राधारत्वेनापि तदेव दर्शयन्नाह—अजस्य जीवस्य चक्रं चक्रवदावर्तमानं देहादि अजया मायया प्रेर्यमाणं यत् योऽक्षो यस्य यद्धिष्ठानमाहुस्तमृतं सत्यं प्रपद्ये कथम्भूतं चक्रं मनोमयं मनःप्रधानं दशेन्द्रियाणि पञ्चप्राणाश्चेत्येवं पञ्चदश अरा यस्य आशु शीघ्रगम् त्रयो गुणा नाभिरिव मध्ये यस्य विद्युदिव चलम् अष्टौ प्रकृतयो नेमय इवाऽऽवरणानि यस्य ॥ २८ ॥

सर्वजीवनियन्तृत्वादिना च वरिष्ठत्वमाह—य इति। य उपसुपर्णो जीवसमीपे तन्नियन्तृत्वेनाऽऽसाक्षात्काराऽऽस्ते स्म "द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते" इति श्रुतेः । यद्वा मकररक्षार्थं गरुडस्योपरि च उपविष्ट इत्यर्थः । तर्हि देहस्थत्वाद्भक्तरक्षणादिक्रियावेशाज्जीवसाम्यं स्यात्तत्राऽऽह-एकवर्णो ज्ञानैकस्वरूप तमसः प्रकृतेः परमलोकमहद्यमव्यक्तं निर्विकल्पमनन्तपारं कालतो देशतश्चापरिच्छिन्नं तद्ब्रह्मैव यः अप्रच्युतस्वरूपत्वान्न जीवसाम्यं "तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति"इति विशेषश्रवणादित्यर्थः। अत एव यमेनं धीरा योगेन रथेन प्राप्तिसाधनेनोपासते भजन्ते तमहमामेत्युत्तरेणान्वयः ॥ २९ ॥

मायानियन्तृत्वेनापि जीवसाम्यं परिहरन्वरिष्ठत्वमाह—यस्य मायां कश्च कश्चिदपि नातितितर्ति नातिक्रामति कथंभूताम्, ? जनो यया मुह्यति अर्थमात्मस्वरूपं न तु वेद निर्जितात्मा आत्मशक्तिर्माया च तद्गुणाश्च येन तम् ॥ ३० ॥

अर्थं न वेदेति यदुक्तं तत्प्रपञ्चयन्नाह-इमे वयं देवा ऋषयश्च यस्य प्रियया तन्वा सत्त्वेनैव सृष्टा अपि बहिरन्तश्च सत्त्वप्रकाशाभ्यामाविःप्रकटामपि सूक्ष्मां गतिं निरुपाधिस्वरूपं न विद्मः इतरप्रधानाः रजस्तमोमयाः कुतो विदुः तं नमामेति पूर्वेणान्वयः ॥ ३१ ॥

इदानीं वैराजरूपेण स्तुवन्प्रार्थयते । पादौ महीति द्वादशभिः यत्र मह्यां जरायुजादिभूतसर्गः सा मही यस्य पादौ स नः प्रसीदतु आत्मतन्त्रः पादादिमत्त्वेऽपि न तत्परतन्त्रः कुतः ब्रह्म अप्रच्युतरूपः तत्कृतः महती विभूतिरैश्वर्यं यस्य सः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्र पदे अदृष्टस्वरूपाय"न मांसचक्षुरभिवीक्षते तम्"इत्याद्युक्तरीत्या स्वस्य दुर्दर्शनत्वं ज्ञापयितुमदृष्टं ब्रह्मादिभिः कदापि न दृष्टं स्वरूपं यस्य तस्मै श्रुतपूर्वाय पूर्वं श्रुतः वेदशास्त्रादिभिः इति श्रुतपूर्वः तस्मै. अजिताख्यो भगवान् अवतीर्णः इत्येतावन्मात्रं ब्रह्मादिभिः श्रुतं न तु दृष्ट इति भावः । एवंविधाय तस्मै प्रणम्येति शेषः स्तवहितेन्द्रियः स्तवाय हितेन्द्रियः स्तोतुं समाहितेन्द्रियो ब्रह्मा दैवीभिरौपनिषदर्थानुकारिणीभिर्गीर्भिरभिमोः स्वयमनभिभूतः इतरानाभिभवति जयतीत्यभिभूरजितस्तस्य स्तुतं भावेक्तः स्तुतिमब्रूत उवाचाकरोदित्यर्थः ॥२५॥

स्तुतमेवाह-अविक्रियमित्यादिना । तावत्प्रकृतिपुरुषविलक्षणं तत्तदुपनिषत्प्रतिपाद्यं परमात्मस्वरूपं विशोध्य नमस्कृत्य शरणं व्रजति-अविक्रियमिति द्वाभ्याम् । हे देव ! त्वां नमामः नमस्कुर्मः बहुवचनमिन्द्रादिदेवताभिप्रायकं कथम्भूतं वरं श्रेष्ठं निस्समाभ्यधिकमत एव वरणीयं वरमित्यनेन "न तत्समश्चाभ्यधिकश्च दृश्यते" इति श्रुत्यर्थः सूचितः। देववरेण्यशब्दाभ्यां गायत्र्यर्थः, वरत्वे हेतुः मनोग्रयानं वचसा निरुक्तं मनसोऽग्रे अविषयत्वेन योऽतिवर्तते इति तथा वचसा निर्वक्तुमशक्यं वाङ्मनसाविषयमित्यर्थः । सर्वं हि चेतनाचेतनात्मकं जगद्वाङ्मनसयोर्विषयमत एवावरं परमात्मा तु तदविषयत्वाद्वर इत्यर्थः यद्यपि परमात्मापि योगपरिशुद्धमनोविषयो वेदान्तवाग्विषयश्च तथापियत्तया ताभ्यामपि परिच्छेत्तुमशक्यो ऽनन्तस्वरूपस्वभावत्वादिति भावः । वाङ्मनसाविषयत्वे हेतुरप्रतर्क्यमिति प्रकृतिपुरुषसजातीयत्वेन तर्कितुमशक्यं यत्प्रतर्क्यं तदेव वाङ्मनस विषयम् इति भावः । अप्रतर्क्ये हेतुः निष्कलमिति कला अवयवाः। निरवयवं कर्मायत्तप्राकृतशरीररहितमित्यर्थः । यत्सकलं तदेव प्रतर्क्यमिति भावः । आकाशादिकमपि सकलमेवेति तात्पर्यं तर्हि ईदृशः कुत्रास्त इत्यत आह-गुहाशयम् अस्मदादिहृदयगुहायामेव।शयानं वसन्तमित्यर्थः। स तर्हि किं जीवः "हृदि ह्ययमात्मा प्रतिष्ठितः"इति श्रवणात्तेत्याह-आद्यम् आदौ भवमाद्यं हृदयावस्थजीवानामपि उपादानकारणतया आदौ वर्तमानं गुहाशयत्वप्रयुक्तं परिच्छिन्नत्वं वारयति—अनन्तमिति । उपासकाऽनुग्रहायान्तरात्म-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तया नियमनाय च हृदयावच्छिन्नत्वेपि स्वरूपतो देशकाल-वस्तुपरिच्छेदराहितम् आद्यत्वप्रयुक्तं स्वरूपतः स्वभावतश्च प्रकृति-पुरुषयोरिव प्राप्तं विकारं वारयति-अविक्रियं सत्यमिति । अवि-क्रियं प्रकृतिरिव स्वरूपाऽन्यथाभावरूपविकाररहितं सत्यं पुरुष इव स्वभावान्यथाभावरूपविकाररहितं सद्वारकत्वाद्विकारस्याद्यत्वेऽपि स्वरूपतः स्वभावतश्च निर्विकारमेवेति भावः। अत्र प्रा तपदं "सत्यं ज्ञानमनन्तम्" "निष्क्रियं निष्कलं शान्तं निरवद्यम्" "तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितम्" "अनेजदेकं मनसोजवीयो नैनद्देवाआप्नुवन्" "यद्वाचाऽनभ्युदितम्" इत्यादिश्रुत्यर्थोऽनु-सन्धेयः ॥ २६ ॥

अन्यैरपि प्रकृतिपुरुषयोरसंभावितैर्गुणैर्देवं विशिंषन् शरणं व्रजति-विपश्चितमिति । प्राणादीनां विपश्चितं साक्षात्कर्तारं तत्रात्मानो जीवाः न हि सर्वप्रकृतिविकारजीवयुगपत्साक्षा-त्कर्तृत्वमेकस्य जीवस्य सम्भावितमिति भावः। अर्थाः शब्दा-दयो विषयास्तद्ग्राहकाणि श्रोत्रादीन्द्रियाणि च तेषामाभासं प्रकाशकं जीवानामर्थेन्द्रियप्रकाशकमित्यर्थः। अनिद्रं निद्राग्रहणं जाग्रदाद्यवस्थात्रयोपलक्षणमवस्थात्रयरहितायेत्यर्थः । तत्र हेतुः अव्रणं कर्मायत्तशरीररहितं तत्रापि हेतुः छायातपौ अज्ञानं तन्मिश्रं ज्ञानं च गृध्रपक्षौ "गृधू अभिकांक्षायाम्" रागादिमत्पुरुषाश्रयौ यत्र यस्मिन् न स्तः तादृशमक्षरम् अश्नोतेस्सरप्रत्ययः सर्वव्यापकं तत्र दृष्टान्तः खमाकाशमिव व्याप्तमित्यर्थः। त्रियुगं पूर्णषाड्गुण्यं कृतादियुगत्रयाविर्भाववन्तं वा व्रजामहे शरणमिति शेषः ॥ २७ ॥

पुनरप्यसाधारणेन धर्मान्तरेण विशिंषन् शरणं व्रजति-अज-स्येति। मनोमयं चक्रं यदत्तं यः परमात्मा अक्षो यस्य तत्तथोक्तम् यच्छब्दस्य प्रतिनिर्देशस्तमिति तं परमात्मानम् ऋतं सत्यं प्रपद्ये शरणं व्रजामीत्यन्वयः । मनोव्यापारमूलकं संसाररूपं चक्रम् अजस्य भगवतो अजया मायया ईर्यमाणं प्रवर्त्यमानं पञ्चदशारं दशे-न्द्रियपञ्चवृत्तिप्राणारम् आशुगामी त्रिणाभि त्रयः सत्त्वादयो गुणा एव नाभिर्यस्य तत् अनुकूलप्रतिकूलोदासीनवृत्युपेतं वा अष्टनेमि "भूमिरापो नलो वायुः खं मनो बुद्धिरेव च अहङ्कारः"इत्यष्ट प्रकृतय एव नेमिर्यस्य विद्युदिव चलं यः परमात्मा अक्षमाश्रयो यस्य तत् यत्सङ्कल्पमूलकमित्यर्थः। आशु शीघ्रं गच्छतीति तथा ॥ २८॥

एवं बन्धदत्वरूपोऽनितरसाधारणधर्म उक्तः अथमुक्तिदत्वं सूचयन्मुक्तगम्यं लोकं विशिनष्टि-यदेकमिति। यदेकवर्णमेकप्रकारं केवलं शुद्धसत्त्वमयं इत्यर्थः। तमसः प्रकृतिमण्डलात्परं परस्ता-द्विद्यमानं"क्षयं तमस्यरजसः पराके'आदित्यवर्णं तमसः परस्तात्" इतिश्रुतेः। स्थानमिति शेषः अलोकं संसारिभिर्द्रष्टुमशक्यम् अव्यक्तं रागादिदोषैर्विशेषेणाक्तं न भवतीत्यव्यक्तम् उपसुपर्णं "यत्र पूर्वे साध्याः सन्ति देवाः"इत्युक्तनित्यसिद्धात्मकाः सुपर्णाः हंसाः तेषां समीपं सन्निकृष्टं तदधिष्ठितमित्यर्थः । अनन्तपारं निर-वधिं "त्रिपादस्यामृतं दिवि" इति श्रुतेः । एवम्भूतं पदं य आसाञ्चकार उपविवेशाऽधिष्ठितवानित्यर्थः । यश्च धीराः योग-पथेन योगमार्गेण उक्तविधपदप्राप्तये उपासते यच्छब्दस्य तमित्युत्तरत्राऽन्वयः । तमृतमिति पूर्वेण वा उपसुवर्णमिति पाठे उपेत्यस्याञ्चकारेत्यनेन सम्बन्धः उपसर्गस्य व्यवहित... प्रयोग आर्षः । सुवर्णवत्प्रकाशबहुलं पदं य उपासाञ्च... उपविष्टवानित्यर्थः ॥ २९ ॥

एवं मुमुक्षुभिरुपास्यत्वं मुक्तप्राप्यत्वं नित्यविभूत्यधि... त्वञ्चानितरसाधारणमुक्तम् अनेन मुक्तिदत्वमप्यनितरसाधा... सूचितं तदेव व्यञ्जयन् नमस्करोति-नेति । कश्चिदप्ययं जनो ... प्रभृतिजनो यस्य भगवतो मायां नातितितर्ति नातिक्रा...

"दैवीह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते" ॥-

इति भगवदुक्तार्थोऽत्रानुसन्धेयः नातितितर्ति किन्तु तया मुह्य... अत एव भूतेषु समं सह चरन्तम् अन्तरात्मतया नियमय... प्यर्थं परमपुरुषार्थस्वरूपं यं परमात्मानं न वेद न जानाति... त्प्रसादात्त्वतितितर्ति न मुह्यति वेदचेति भावः। तं भूतेषु ... श्चरन्तमपि निर्जितात्मात्मगुणम् एक आत्मशब्दो देह... अपरस्तु जीवपरः चिदचिद्दोषास्पृष्टमित्यर्थः। अत एव ... मस्माकमपीशं नमामः ॥ ३० ॥

कश्चाप्यस्य मायां नातितितर्ति इत्यनेनास्य दुरवगमचेष्टि... सूचितं तदेव व्यक्तीकरोति-इम इति । इमे वयं देवा ऋषयश्च ... प्रियया तन्वा शरीरभूतेन सत्त्वेन सृष्टा अपि "तत्र सत्त्वं निर्म... त्वात्प्रकाशकम्"इत्युक्तविधसत्त्वगुणप्रधाना अपीति भावः। ... एव बहिरन्तरश्च आविः आविर्भूतज्ञाना अपि यस्य भगवतो ... चेष्टां सूक्ष्मां दुर्विभाव्यां न विद्महे उक्तविधा वयमेव न वि... कुत इतरप्रधानाः रजस्तमःप्रधाना असुराद्या जानीयुः ॥ ३१ ॥

यदेकवर्णमिति । नित्यविभूत्यधिपतित्वमुक्तमथ लीलाविभूत्य... पतित्वमनितरसाधारणं वक्तुं कृत्स्नजगदन्तर्गतानां पृथि... दीनां तदवयवत्वेन तच्छरीरकत्वं तत्प्रभवत्वञ्च वदंस्तं पु... सूक्तप्रतिपाद्यविराड्रूपमुभयविभूत्यधिपतित्वरूपमहाविभूत्या... काऽनितरसाधारणधर्मयुक्तं वारंवारमनुस्मरंस्तत्प्रसादं प्रार्थ... पादौ इत्यादिद्वादशभिः। इयं मही यस्य स्वकृतैव स्वेन ... "पद्भ्यां भूमिः"इति श्रुतेः। पादौ स महाविभूतिर्ब्रह्मशब्दवाच्यः प्रसीदतामित्यन्वयः। महीं विशिनष्टि, यत्र मह्यां चतुर्विधः ... जाण्डजस्वेदजोद्भिज्जरूपो भूतसर्गो भवति"पुमाश्च देवो न ... पशुर्न च पादपः"इत्युक्तचतुर्विधो वा स भगवानात्मतन्त्रः स्वतन्त्रः ... हापुरुषः परमपुरुषो वैराजपुरुषो वा नोऽस्माकं प्रसन्नो भवतु ...

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

नित्यत्वेनाद्भुताभिः देवस्य हरेः विद्यमानाभिर्हरिगुण... न्प्रतिपादिकाभिः नन्वादरणीयपक्षो नास्तीति कथं सङ्ग... "परा पूर्वेषाम्" इति श्रुतेः। देवानां भगवत्पक्षत्वावगमात् देवार्थममृतमथनादिति चेन्न, भक्तिवशः पुरुषः "यमेवैष ... तेन लभ्यः" इत्यादिश्रुतेः। देवानामनुग्राह्यत्वात्तत्पक्षत्वं ... नेति विवेकात् "अनुग्राह्यतया पक्षा देवानात्मार्थतो हरेः" वचनात् ॥ २५ ॥

वेदाशिरो विद्यारक्षानामर्हिमस्तोत्रेऽधिकार इति ज्ञापयद...

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वेदान्तोक्तविशेषणविशिष्टत्वेन स्तौतीत्याह—ब्रह्मेति । "निष्कलं निष्क्रियं शान्तम्" "सत्यं ज्ञानमनन्तम्" "आत्मा वा इदमेक एवाग्र आसीत्" "हृदय आहितं यन्नैषा तर्केण मतिरापनेया, 'नहि सुज्ञेयमणुरेषधर्मः" "महद्भूतस्य निःश्वसितमेतदृग्वेदः" "विद्यानां प्रथमो वक्ता" "यद्वाचाऽनभ्युदितम्" "यो देवानां नामधा एक एव" "तत्सवितुर्वरेण्यम्" इत्यादिश्रुतयः । प्रतीकतो ग्राह्याः बहुश्रुतिसंग्रहरूपत्वात्पूर्वोत्तरसंबन्धोऽत्र नान्वेषणीयः ॥ २६ ॥

प्राणमनोधियात्मनां विपश्चितं वेदितारम् "यः प्राणे तिष्ठन्, प्राणस्य प्राणमुत चक्षुषश्चक्षुः"इत्यादयः "आत्मनि तिष्ठन्"इत्यादि अर्थानीन्द्रियाणि चाभासयति दीपयतीत्यर्थेन्द्रियाभासः अर्थेन्द्रियाणां सन्निकर्षमुत्पाद्य तद्विषयं ज्ञानं जनयतीत्यर्थः । "यस्य भासा सर्वमिदं विभाति" यस्ततो भयविच्छेदः एवमस्यामेतं दिवि अनिद्रं अस्वप्नमव्रणम् अकायं लिङ्गशरीररहितम् अद्वतं वा यत्र यस्मिन् हरौ गृध्रस्य सर्वकांक्षमाणस्य जीवस्य पक्षौ पतत्रवद्वर्तमानौ पृथक् अधोर्ध्वमार्गहेतू छायातपौ अविद्या शास्त्रजन्यविद्यालक्षणौ न स्तः—

"छाया त्वविद्या संप्रोक्ता जन्यविद्या तपः स्मृतम् ।
जीवगृध्रस्य तौ पक्षावध और्ध्वपथोःपृथक् ॥
तौ विष्णोस्तु न विद्येते नित्यविद्यास्वरूपिणः"—

इति वचनादुक्त एवार्थ इति तं त्रियुगं व्रजामह इत्यन्वयः त्रीणि युगानि यस्य स तथा तं तेष्ववतारादिति "स्वयंभूस्त्रियुगः कृष्णः शार्ङ्गी दामोदरस्तथा"इत्यभिधानम्."अक्षरात्संभवतीह विश्वम्" एतद्ध्येवाक्षरं ब्रह्म" खं सुखरूपं ज्ञानरूपं वा"कं ब्रह्म खं ब्रह्म" ॥ २७ ॥

अजस्य विष्णोरधीनं चक्रं पुनः प्रवाहरूपेण परिवर्तमानत्वाच्चक्रसंज्ञं जगत् यः केशवोऽक्षमक्षस्थानीयो यस्य तत् यदक्षमाहुः तमृगं प्रपद्य इत्यन्वयः । चक्रं नवृत्तं तदेवर्तमित्यादि चक्रं चेत्केन चिदीर्यमाणं परिवर्तते । अस्य किं प्रेरकमित्यत उक्तम् अजयेति "कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः" इति अस्य वैलक्षण्यमाह-मनोमयमिति । कान्यस्याराणीत्यत्राह-पञ्चदशारमिति । श्रोत्रादीनि दश शब्दादयः पञ्च पृथिव्यादीनि वा प्राणादयो वा पञ्च एत एवाराणि दलानि यस्य तत्तथा तत् आशु शीघ्रभ्रमं व्याप्तं वा त्रिणाभिः त्रयो गुणाः सत्त्वादयो नाभिर्यस्य तत्तथा यदक्षमित्यनेनोक्तं केशवाधारत्वं स्पष्टयति-*विद्युद्चल मित्यादिना. विद्युद्विशेषेण द्योतमानत्वात् ब्रह्म चलमाधारो यस्य तत्तथा "विद्युद्ब्रह्मेत्युपासीत" "जगच्चक्रस्याक्षभूतो चलरूपश्च केशवः"इति च देवासुरमनुष्यादयोऽष्टौ नेमिर्यस्य तत्तथा तत् ॥ २८ ॥

इदानीं तुरीयमूर्तिं नमति-यदिति । एको वर्णो यस्य तदेकवर्णं स्वरव्यञ्जनविभागविवक्षामन्तरेण व्यक्तेरेकत्वम् अन्यथा षोडशस्वरा इति संख्यानुपपत्तिः ओमित्येतदक्षरमिदं सर्वं "प्रणवं हीश्वरं विद्यात्सर्वस्य हृदयेस्थितम् । सर्वव्यापिनमोंकारम्" तमसो ऽज्ञानात्परं तद्रहितमित्यर्थः । तुरीयं तत्स्वरूक् सदा प्रकृतेः परं वा "अक्षरात्परतः परः" कूटस्थो क्षर उच्यते" उत्तमपुरुषः" सत्सत्यं ज्ञानम् अवसादयति नाशयतीत्यज्ञानं "न निद्रां नैव च स्वप्नं तुर्ये पश्यन्ति निश्चिताः" निर्दोषज्ञानंवा ऐकात्म्यप्रत्ययसारं "षद्लृगतौ" इति धातुः अलोकं लोकव्यवहाराविषयम् अदृष्टमव्यवहार्यमलक्षणम् अचिन्त्यमव्यपदेश्यम् अत एवाव्यक्तम् अनन्तपारम् अन्तपारवर्जितम् पारं पूर्णं समुदायो मात्राणामिति शेषः । अनन्तमात्रमित्यर्थः इति वा अमात्रोऽनन्तमात्रश्च धीरा योगरथेन भक्तिपूर्वकध्यानलक्षणरथेन यदुपासते भजन्ति "ओंकारं आत्मैव संविशत्यात्मनात्मानं य एवं वेद" यश्चोपसुपर्णपत्रं सुपर्णपक्षसमीपे जीवाख्यवाहनपृष्ठे आसाञ्चकार उपविवेश "सर्वस्य हृदये स्थितः" " य आत्मनि तिष्ठन्" " द्वा सुपर्णा सयुजा" ॥ २९ ॥

जनो यया मायया वेदनार्थं ज्ञानविषयं हरिंप्रति ज्ञानाख्यपुरुषार्थं वा मुह्यति "अनीशया शोचति मुह्यमानः" कश्चन तामसप्रकृतिर्यस्य तां मायां नाऽतिपिपर्ति नातिक्रामति अत्येतुं समर्थो न भवति सात्त्विकश्चेदस्य प्रसादेन जानाति "अनादि मायया सुप्तो यदा जीवः प्रबुद्ध्यते' 'यमेवैष वृणुते" तं नमामीत्यन्वयः । नितरां जित आत्मा आत्मगुणाश्च येन स तथा तं "निवृत्तेः सर्वदुःखानामीशानः प्रभुरव्ययः" एकोदेवः सर्वदेवेषु गूढः" "स एषसर्वेश्वरः एष सर्वं एषोन्तर्यांम्येव योनिः सर्वस्य" ॥ ३० ॥

सात्त्विकानामपि भगवत्कटाक्षवीक्षामन्तरेण तज्ज्ञानं दुरापमित्यर्थोदुक्तं तत्स्पष्टमाह-इमइति । विभो यत्कृपयैव येन सत्त्वेन गुणेन सृष्टा येन बहिरन्तरञ्च सृष्टाश्चेमे वयं यस्य तव सूक्ष्मां गतिं विश्वव्यापिनीं सच्चिदानन्दाकृतिं न विद्महे यदनुग्रहमन्तरेणेति शेषः । न च ज्ञानाभावात्सज्ज्ञानाभाव इत्याह-ऋषयश्च ज्ञानिनोऽपि अन्यथा ब्रह्मादीनाम् अप्राधान्यं स्यात्कैमुत्यन्यायमाह-कुत इति हेतुगर्भविशेषणमाह, इतरेति. इतरस्तमो गुणः प्रधानो येषां ते तथा ॥ ३१ ॥

स्वकृतेयं मही यस्य पादाविव न स्वरूपपादौ यत्र यस्यां मह्यां जरायुजादिचतुर्विधो भूतसर्गः सवै स एव प्रसीदतामित्यन्वयः । महापुरुषः पुरुषोत्तमः महद्विविधं भवनं यस्य स तथा, विविधभवनमेकस्य कथमुपपद्यते ? इति तत्राह—ब्रह्म अपरिच्छिन्नगुणपूर्णत्वात् अथ कस्मादुच्यते ब्रह्मेति "बृहन्तो ह्यस्मिन् गुणाः" इति श्रुतेः पादावित्यनेन "पादोऽस्य विश्वाभूतानि" इति श्रुत्युक्तार्थः"पातालमेतस्य हि पादमूलम्"इति स्मृत्युक्तार्थश्चेत्युभयं वक्ष्यत इति ज्ञातव्यम् ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ब्रह्मत्वेन स्तौति—अविक्रियमिति ॥ २६ ॥

परमात्मत्वेन स्तौति—विपश्चितमिति द्वाभ्याम् । तत्तदवतारूपेण त्रियुगम् ॥ २७ ॥

यदक्षमाहुरित्यस्य टीकायां गुणीभूतप्रथमान्तयच्छब्देनैव तमित्यस्यान्वयः कृतः । अष्टौ प्रकृतय इति "भूमिरापोऽनलो वायुः"इत्यादिगीतोक्ताः ॥ २८ ॥

* विद्युद्चलमिति मूलपाठः ।

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

भगवत्त्वेन स्तौति—य इति युग्मकेन । यस्तमसः परं स्वधाम आसाञ्चकार अनादित एवाऽध्यास्ते तमेनं योगरूपप्राप्तिसाधनेन धीरा उपासते । तच्चोपसुपर्णो यथास्यात्तथेति । गरुडमप्यनुगम्योपासत इत्यर्थः । इति दार्क्ष्यं दर्शितम् । तद्धाम विशिनष्टि—एकवर्णं शुद्धसत्त्वैकस्वरूपम् यतस्तमसः प्रकृतेः परम् यत एवालोकम् लोकातीतम् । यत एवानन्तपारमव्ययम् प्राकृतागोचरमिति ॥ २९ ॥

अधीराणान्तु दुर्गमत्वमाह—न यस्येति । अर्थं परमार्थं यं न वेद तं परमेशं भगवन्तं नमामि कीदृशं निर्जिता वशीकृता आत्मानः स्वांशभूताः महापुरुषादयः आत्मभूता गुणा ऐश्वर्यादयश्च येन तम् एवंभूतैश्वर्यत्वेपि न तूष्णावचा दृष्टिरित्याह, भूतेष्विति ॥ ३० ॥

दुर्गमत्वमेव दर्शयति—इमे वयमिति ॥ ३१ ॥

तथापि ब्रह्मणोऽपि प्रतिष्ठारूपं तमर्वाग्दृष्ट्यैव भजेमहीत्याह—पादौ महीति द्वादशभिः । ब्रह्म च महाविभूतिर्यस्य अतो महाविभूतीत्यत्रापि महती ब्रह्म लक्षणा विभूतिर्यस्य स इत्येव एकादशे विभूतिकथनप्रसङ्गे विस्तरेण दर्शयिष्यते ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अदृष्टस्वरूपायेति तत्र वर्त्तमानत्वेऽपि तदिच्छां विना द्रष्टुमशक्तेः अब्रूत अकरोत् दैवीभिः पुरुषसूक्तादिभिः वैदिकीभिः ॥ २५ ॥

हे देव ! त्वां वयं नमाम एव न तु ध्यातुं स्तोतुं च प्रभवाम इत्याहुः मनसोऽग्रे यानं यस्य तं तथाच श्रुतिः "अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन् पूर्वमर्शत् तद्धावतो न्यानत्येति तिष्ठत्" इति वचसापि अनिरुक्तं "यद्वाचाऽनभ्युदितं येन वागभ्युद्यते" इति श्रुतेः अस्मन्मनोवचसोर्मायिकत्वात् तत्र तु मायातीतत्वादिति भावः । मायातीतत्वे लिङ्गमाह, अविक्रियं गुणानामेव विकारधर्मत्वादिति भावः । न च मनआद्यगम्यत्वेपि तदावस्तुत्वमित्याह—सत्यं, ननु, किं घटपटादिकमिव ? नेत्याह—अनन्तं कालदेशपरिच्छेदरहितं यत आद्यं सर्वजगत्कारणम् अत एव सर्वेषामगम्यत्वाद्गुहायामिव शेते इति तं यतो निष्कलं निरुपाधि यद्वा अप्रमेयत्वान्निष्कलं "कलो ना कालमानयोः" इति मेदिनी । तत्र हेतुः अप्रतर्क्यम् ॥ २६ ॥

अतस्तस्य सर्वज्ञत्वं चाह—विपश्चितं प्राणादीनां ज्ञातारम् आत्मा अहङ्कारो देहो जीवो वा अर्था विषयाः इन्द्रियाणि तद्ग्राहकाणि तैर्न असते इति तं विषयनिष्ठेन्द्रियागोचरमित्यर्थः । अनिद्रं द्रष्टारं तदपि अव्रणं जीवदुःखदर्शनेप्यदुःखितं सर्वत्र हेतुः यत्र यस्मिन् गृद्धपक्षौ जीर्णपक्षतुल्यौ छायातपौ अविद्याविद्ये न स्तः अत एवाक्षरं खं नित्यसुखरूपमित्यर्थः "खमिन्द्रिये सुखे स्वर्गे" इति कोशः नित्यसुखमेव गणयन्ति त्रियुगं त्रीणि युगानि यत्र तं षडैश्वर्य्यवन्तमित्यर्थः । व्रजामहे शरणं व्रजामः ॥ २७ ॥

एवंभूतः स एव जीवैरुपास्यो यतो जीवाविद्या तदाश्रयैवेत्याह—अजस्य जीवस्य चक्रं संसारचक्रम् अजया मायया प्रेर्यमाणं चाल्यमानं मनोमयं मनःप्रधानं दशेन्द्रियाणि पञ्च प्राणाश्चेत्येवं पञ्चदश आरा यस्य आशु शीघ्रगं त्रयो गुणा नाभिरिव मध्ये यस्य विद्युदिव चपलम् अष्टौ प्रकृतयो नेमय इवाऽऽवरणानि यस्य तत् यदक्षं यः परमेश्वर एवाक्षो यस्य तत् यदधिष्ठानमाहुरित्यर्थः । तम् ऋतं प्रपद्ये ॥ २८ ॥

प्रपत्तिप्रकारमभिव्यञ्जयति—य इति । एकवर्णमेकाक्षरं प्रणवरूपं सुपर्णं गरुडं यः उपआधिक्येन उपरि वा आसाञ्चकार अध्यास्तेस्म कीदृशं तमसः प्रकृतेः परं तत् तं प्रसिद्धम् अलोकं लोकातीतम् अत एव अव्यक्तं लोकागम्यं तत्र हेतुः अनन्तपारं सर्ववेदरूपत्वादर्थतः शब्दतश्च एतावत्तया निश्चेतुमशक्यम् एवंभूतं प्रणवसुपर्णमारूढम् एनं परमेश्वरं योग एव रथस्तेन योगलक्षणं रथमारुह्येत्यर्थः । उपासते उत्साहस्थायिना वीररसेन युद्ध्यमान इवेत्यर्थः । तस्मान्मोक्षानन्दाजिघृक्षयेति भावः । धीरा युद्धादनपसरन्तः तं नमामेत्युत्तरेणान्वयः ॥ २९ ॥

प्रभविष्णुतामाह—न यस्येति । कश्च कोऽपि प्रपत्तिं विनेति शेषः । निर्जिता वशीकृता आत्मानो जीवा आत्मशक्तिर्माया तद्गुणाश्च येन तम् ॥ ३० ॥

अर्थं न वेदेति यदुक्तं तत् प्रपञ्चयति—इमे इति । बहिः कालरूपेण अन्तरन्तर्यामिरूपेण आविः प्रकटामपि गतिं चारित्रम् ऋषयस्सन्तो न विद्मः इतरप्रधाना रजस्तमोमयाः कुतो विदुः नमामेति पूर्वेणान्वयः ॥ ३१ ॥

अतो वयं तव स्थूलं दृश्यं वैराजरूपं जानीम इति व्यञ्जयन् प्रार्थयते—पादौ महीति, द्वादशभिः । महत्यः पृथ्वीजलाद्या विभूतयो यस्य सः प्रसीदतां प्रसीदतु ब्रह्ममूर्तित्वाद्ब्रह्म "पृथिवी वायुराकाश आपो ज्योतिरहं महान् । विकारः पुरुषोऽव्यक्तं रजः सत्त्वं तमः परम्" इति विभूतिगणनाध्याये परमित्यस्य ब्रह्मेति व्याख्यानात् "परात् परं ब्रह्म च ते विभूतयः" इति श्रीयामुनाचार्य्यकृतस्तोत्राच्च ब्रह्मापि महाविभूतिर्यस्येति सत्त्वं ततश्च प्राकृते लोके प्राकृत्यः पृथिव्यादयः क्षुद्रा एव विभूतय इति ता एव निर्दिशति—पादाविति । चिन्मयमूर्त्तेस्तस्य पादयोर्विभूतित्वात् पादौ इयं मही स्वकृता स्वेनैव सृष्टा यत्र महीं जरायुजादिश्चतुर्विधः स वै स तु महापुरुष इति वैराजोऽयं न तु प्राकृतः पुरुष इति भावः । आत्मतन्त्रः वैराजोऽयं न तु परतन्त्र इति भावः ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे विभो राजन् ! अवहितेन्द्रियः संयतान्तःकरणः श्रुतपूर्वाय भगवते नमस्कृत्येतिशेषः दैवीभिः देवनिश्वासरूपवैदिकोक्तिभिः स्तुतिमकरोत् ॥ २५ ॥

अविक्रियं निर्विकारस्वरूपत्वात् सत्यं यथार्थमनन्तं विदेश आद्यं सर्वकारणं गुहाशयं अन्तर्यामित्वात् निष्कलं हेयकला

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

रहितत्वात् अप्रतर्क्यं तर्कैरप्रतिपाद्यं वेदैकवेद्यत्वात् मनोग्र-यायां शीघ्रगत्वात् वचसा अनिरुक्तम् इयात्ताशून्यत्वात् वरं श्रेष्ठं वरेण्यं वरणीयम् एवंविधं त्वां हे देव नमाम ॥ २६ ॥

प्राणादीनां विपश्चितं द्रष्टारम् तत्रात्मानो जीवाः अर्थेन्द्रियाणि विषयाक्तानीन्द्रियाणि तैर्न भासते इति तथा तं यद्वा अर्थानां विषयाणामिन्द्रियाणां च आभासं प्रकाशकम् अनिद्रं निद्रोपलक्षितदोषरहिताप्राकृतेन्द्रिययुक्तम् अव्रणं व्रणोपलक्षितप्राकृतदेहदोषरहिताप्राकृतदेहयुक्तम् स्वरूपतस्तु अनिद्रत्वमव्रणत्वं च जीवस्यापि किमुतपरमात्मनः गृध्रपक्षौ गृध्रस्य भुक्तिमुक्त्याकांक्षावतो जीवस्य पक्षौ संसारविष्णुपदप्रापकौ छायातपौ अविद्या विद्ये यत्र न स्तः तमक्षरमविकारिस्वरूपं खमसङ्गं त्रीणि युगानि षड्गुणा यस्मिन् तथाभूतं व्रजामहे शरणं व्रजाम ॥ २७ ॥

अजस्य जीवस्य चक्रं संसारलक्षणम् अजया भगवच्छक्त्या ईर्यमाणम् मनोमयं मनःप्रधानं यतः संसारभ्रमणं मनोमूलम् दशेन्द्रियाणि पञ्च प्राणाश्चेति पञ्चदश आरा यस्य तम् आशु शीघ्रगम् त्रयो गुणाः नाभिरिव मध्ये यस्य तत् विद्युदिव चलं चपलम् "भूमिरापो नलो वायुः खं मनो बुद्धिरेव च। अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा" इति अष्टौ प्रकृतयो नेमय इवावरणानि यस्य तत् यः परमात्मा अक्षमा-अयो यस्य तदक्षमाहुः तमृतं सत्यं परमात्मानं प्रपद्ये ॥२८॥

य एकवर्णो कार्याकारानेकरूपरहितं नित्यमित्यर्थः। तमसः प्रकृतेः परं "क्षयं तमस्य रजसः पराके, आदित्यवर्णो तमसः परस्तात्" इत्यादिश्रुतेः अनन्तपारं व्यापकं तथाप्यव्यक्तं सर्वैः सर्वत्र द्रष्टुमशक्यम् एवंभूतमलोकमकारार्थस्य स्वस्य वासुदेवस्य लोकं परवैकुण्ठं यद्वा अलोकं प्रसिद्धलोकभिन्नम् आसाञ्चकार अधिष्ठितवान् एनं धीरा मुमुक्षवः योगरथेन ध्यानसाधनेन उपसुपर्णो सुपर्णस्य कर्मफलभोगे शोभनं पर्णं पतनं यस्य तस्य जीवस्य समीपे उपासते अन्तर्यामिणं ध्यायतीत्यर्थः। तं नमामेत्युत्तरेणान्वयः अस्य श्लोकस्य निर्णयः श्रुत्यंत सुरद्रुमादिषु अन्येषु द्रष्टव्यः ॥ २९ ॥

यस्य भगवतः मायां यया जनो मुह्यति अत एव अर्थं आत्मानात्मपरमात्मस्वरूपं न वेद तां कश्च भगवत्प्रपन्नेतरः नातितितर्ति "दैवी ह्येषा गुणमयी मममाया दुरत्यया। मामेव ये प्रपद्यन्ते मायामेतान्तरन्ति ते" इति श्रीमुखवचनात् तं नमाम कथंभूतं निर्जितौ आत्मानौ प्रकृतिजीवौ आत्मनोस्तयोर्गुणाश्च सर्वनियन्तृत्वात् एनं तं परेशमीश्वराणामपीश्वरम् अत एव भूतेषु समं चरन्तम् ॥ ३० ॥

इमे लोकनाथत्वाद्यभिमानयुक्ता वयं देवा ऋषयश्च यस्य प्रियया तन्वा तनुवन्नियस्येन "सत्त्वं यद्ब्रह्मदर्शनम्" इति वचनात् ब्रह्मदर्शनस्थानेन सत्त्वेन सृष्टाः अपीत्यर्थः। अन्तर्भगवत्स्वरूपगुणमननादौ वहिस्तत्स्वरूपगुणश्रवणादावप्याविरभिमुखा अपि अस्य भगवतःसूक्ष्मां दुर्दर्शां गतिं पदवीं न विद्मःइतरप्रधानाः रजस्तमःप्रधानाः कुतो विदुस्तं नमामेति पूर्वेण सम्बन्धः ॥ ३१ ॥

अथ सर्वभूतेषु स्पर्द्धादिकं हित्वा भगवान्भजनीय इति सूचयितुं वैराजरूपेण स्तुवन् प्रार्थयते–पादाविति द्वादशभिः। यत्र महाअण्डजजरायुजाण्डजस्वेदजोद्भिज्जभेदाच्चतुर्विधो भूतसर्गो भवति महती विभूतिरैश्वर्यं यस्य सः नो ऽस्माकं प्रसीदतां प्रसन्नो भवतु ॥ ३२ ॥

भाषा टीका।

शुक देवजी कहने लगे कि—हे प्रभो ! सर्व देवताओंके सहित ब्रह्माजी वहां जाकर, नहीं देखा स्वरूप जिनका और पूर्व मे सुनेमात्र ऐसे श्री हरि की समाहित इन्द्रियहोकर वैदिक वाणी से स्तुति करने लगे ॥ २५ ॥

ब्रह्मो वाच।

ब्रह्माजी बोले, कि—सर्व देवों में श्रेष्ठ ऐसे आपको मैं नमस्कार करताहूं आप कैसे हैं, कि—विकाररहित, सत्यस्वरूप, अनन्त. आद्य, अन्तर्यामि, और अप्रमेय, किसी तर्क में न आने वाले, और मन से अग्र गमन करने वाले, तथा वाणी से जिनका वैभव न कहा जाय, ऐसे अति कमनीय हैं ॥ २६ ॥

और जो प्राण, मन, बुद्धि, और आत्मा के ज्ञाता हैं, तथा विषयों में आसक्त इन्द्रियों से जो न भासमान होवैं सदा प्रबुद्ध, व्रणादि विशिष्ट कर्मजन्य से रहित, और जिसमें जीव के तरह विद्या और अविद्या नहीं ऐसे अक्षर नित्य स्वस्वरूप तीन युगल गुण वाले, अर्थात् ज्ञानशक्ति बल ऐश्वर्य, वीर्य तेज, इस प्रकार षट् गुण परिपूर्ण, ऐसे प्रभु के हम शरण गत हैं ॥ २७ ॥

इस जीव का यह चक्र रूप देह माया से प्रेरित मन जिसमें प्रधान, और दश इन्द्रिय पञ्च प्राण ऐसे पञ्चदश आरा जिसमें, शीघ्र गति वाला, और तीन गुण नाभि के सदृश मध्य में वर्त्तमान जिसके, तथा विद्युत (विजली) के सदृस चञ्चल, और अष्ट प्रकृति हैं नेमि के तरह आवरण जिसके, ऐसे चक्र के अक्ष के तुल्य आधारभूत जिसको कहते हैं, उस सत्य स्वरूप गोविन्द के मैं शरण को प्राप्त हूँ ॥ २८ ॥

जो एक वर्ण और तमसे परे अलोक अव्यक्त अनन्तपार वाला होकर भी जो जीव का अन्तर्यामि होकर नियमन करने वाला है, और जिसको धीरजन योगरूप रथसे उपासना करते हैं ॥ २९ ॥

और जिस की माया को कोई नहीं तर सक्ता है,जिस माया से जन मोहित हो रहा है, और वास्तव अर्थ को नहीं जान सक्ता है, और जिसने आत्मा को और माया के गुणों को अपने वश किया है, और सर्व भूत प्राणियों में समान रीति से विराज मान ऐसे परेश को नमस्कार करते हैं ॥ ३० ॥

ये हम सब ऋषि और देव लोग जिसकी प्रियतनु

अम्भस्तु यद्रेत उदारवीर्यं सिध्यन्ति जीवन्त्युत वर्धमानाः ।
लोकास्त्रयोऽथाखिललोकपालाः प्रसीदतां ब्रह्ममहाविभूतिः ॥ ३३ ॥
सोमं मनो यस्य समामनन्ति दिवौकसां वै बलमन्ध आयुः ।
ईशो नगानां प्रजनः प्रजानां प्रसीदतां नः स महाविभूतिः ॥ ३४ ॥
अग्निर्मुखं यस्य तु जातवेदा जातः क्रियाकाण्डनिमित्तजन्मा ।
अन्तस्समुद्रे ऽनुपचन्स्वधातून्प्रसीदतां नः स महाविभूतिः ३५ ॥
यच्चक्षुरासीत्तरणिर्देवयानं त्रयीमयो ब्रह्मण एष धिष्ण्यम् ।
द्वारं च मुक्तेरमृतं च मृत्युः प्रसीदतां नः स महाविभूतिः ॥ ३६ ॥
प्राणादभूद्यस्य चराचराणां प्राणः सहो बलमोजश्च वायुः ।
अन्वास्म सम्राजमिवानुगा वयं प्रसीदतां नः स महाविभूतिः ॥ ३७ ॥
श्रोत्राद्दिशो यस्य हृदश्च खानि प्रजज्ञिरे खं पुरुषस्य नाभ्याः ।
प्राणेन्द्रियात्माऽसुशरीरकेतम्प्रसीदतां न स महाविभूतिः ॥ ३८ ॥
बलान्महेन्द्रस्त्रिदशाः प्रसादान्मन्योर्गिरीशो धिषणाद्विरिञ्चः ।
खेभ्यश्च छन्दांस्यृषयो मेढ्रतः कः प्रसीदतां नः स महाविभूतिः ॥ ३९ ॥
श्रीर्वक्षसः पितरश्छायायाऽऽसन्धर्मः स्तनादितरः पृष्ठतो ऽभूत् ।
द्यौर्यस्य शीर्ष्णोऽप्सरसो विहारात्प्रसीदतां नः स महाविभूतिः ॥ ४० ॥

भाषाटीका ।

अर्थात् सत्त्वगुण से सृष्ट है तौ भी बाहर भीतर प्रकट सूक्ष्म गति को नहीं जान सके हैं फिर जो तमोगुण प्रधान असुरादिक हैं वे कैसे जानेंगे ॥ ३१ ॥

सङ्कल्प मात्र से रची हुई पृथिवी को जिसके चरण कहते हैं जिस पृथिवी में जरायुज आदि भेद से चार प्रकार की प्राणियों की सृष्टि वर्त्तमान है । वह महा विभूति (संपत्ति) वाला परम स्वतन्त्र महापुरुष हमारे ऊपर प्रसन्न हो ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

उदारं वीर्यं शक्तिर्यस्य तदम्भो यस्य रेतः स नः प्रसीदतु उदारवीर्यतामाह–यतोऽम्भसो लोकादयः सिध्यन्ति जायन्ते ॥ ३३ ॥

यः सोमो देवानामन्धोऽन्नम् अत एव बलमायुश्च नगानां वृक्षाणां प्रकर्षेण जनयति वर्धयतीति प्रजनः तं यस्य मनः समामनन्ति स नः प्रसीदतु ॥ ३४ ॥

अग्निर्यस्य तु मुखं जातः कथम्भूतः ज्ञातं वेदो धनं यस्मात् क्रियाकाण्डं तत्प्रतिपाद्यं कर्म तन्निमित्तं जन्म यस्य अन्तः[illegible] उदरमध्ये स्वधातून्पाकार्हानेवान्नादीननुपचन् प्रसिद्धसमुद्रे वाडवरूपेणोदकान्येवानुपचन्नग्निः ॥ ३५ ॥

एष तरणिर्यस्य चक्षुरासीत् कथम्भूतः देवयानमर्चिर[illegible] मार्गदेवता "त्रयीमयः सैषा त्रय्येव विद्या तपति" इति श्रुतेः [illegible] धिष्ण्यमुपासनास्थानम् "य एषोऽन्तरादित्ये हिरण्मयः पु[illegible]" इति श्रुतेः मुक्तेर्द्वारं देवयानत्वात् अमृतं च पुण्यलोकत्वात् [illegible] कालात्मकत्वात् एवम्भूतस्तरणिर्यस्य चक्षुः स प्रसीदतु ॥ [illegible]

कथम्भूतो वायुश्चराणां सह आदिधर्मवान्प्राणः यं प्राणं [illegible] बुद्ध्याद्यधिष्ठातारो देवाः सम्राजं भृत्या इवान्वास्मानु[illegible] स्थिताः एवम्भूतो वायुर्यस्य प्राणादभूत्सः ॥ ३७ ॥

खानि देहगतानि छिद्राणि प्राणः पञ्चवृत्तिः इन्द्रि[illegible] च आत्मा मनश्च असवो नागकूर्मादयः शरीरं च तेषां [illegible] श्रयभूतं खं यस्य पुरुषस्य नाभ्याः प्रजज्ञे सः ॥ ३८ ॥

यस्य बलान्महेन्द्रो जज्ञे छन्दांसि ऋषयश्च खेभ्यः कः प्रजा[illegible] पतिः ॥ ३९ ॥

इतरो ऽधर्मः ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तथा अम्भो जलं यद्रेतः यत्कार्यभूतं त्रयो लोकाः लोकपालाश्च सिद्ध्यन्ति । इति शेषः यस्मादुत्पद्यन्ते जीवन्ति येनेति शेषः वर्द्धमानाः यत्रेति शेषः स ब्रह्मशब्दवाच्यो महाविभूतिर्नः प्रसीदताम् ॥ ३३ ॥

सोमं चन्द्रमसं यस्य मनो वदन्ति "चन्द्रमा मनसो जातः" इति श्रुतेः । सोमं विशिनष्टि,यः सोमो दिवौकसां देवानाम् अन्धमन्नम् अमृतकरत्वादिति भावः अतएव बलमायुश्च नगानां वृक्षाणां प्रजानां चराणां च प्रकर्षेण जनयति वर्द्धयतीति प्रजनः अतएव तेषामीशो यः सोमस्तं यस्य मनो वदन्ति मनसो जातं विराड्रूपस्य मनःस्थानीयं च वदन्ति स ब्रह्म महाविभूतिर्नः प्रसीदतां बलादीनि परमात्मविशेषणानि वा देवादीनां यश्च बलादि हेतुः स ईशो ब्रह्म महाविभूतिरित्यन्वयः ॥ ३४ ॥

तथा यस्याग्निर्मुखमुच्यते 'मुखादिन्द्रश्चाग्निश्च' इत्यादिश्रुतिभिर्यस्य मुखस्थानीयो मुखाज्जातश्चाग्निः स ब्रह्ममहाविभूतिप्रसीदतामित्यन्वयः यस्य मुखम् अग्निर्जात इति वान्वयः आग्निं विशिनष्टि, जातवेदाः जातं स्वस्मिन्निहितं चरुपुरोडाशादिकम् इन्द्रादिभ्यो वेदयति "विदूलाभे" प्रापयतीति जातवेदाः तथा क्रियाकाण्डनिमित्तजन्मा क्रियाकाण्डनिमित्तं—————
यज्ञादिक्रियाकलापात्मकवेदपूर्वभागार्थानुष्ठाननिमित्तं ———
जन्म यस्य सः अन्तस्समुद्रे समुद्रो देहम् "त्र्यात्मकत्वात्तु भूयस्त्वात्" इति न्यायेन जलांशप्रचुरत्वात् अन्तस्समुद्रे देहमध्ये जाठररूपेण स्वधातून् स्वाधिष्ठितदेहस्थान् धातून् शुक्रशोणितादि सप्तधातून् पचन्परिणामयन् एवम्भूतोऽग्निर्यस्य मुखं सः प्रसीदताम् ॥ ३५ ॥

तथा तरणिरादित्यो यस्य चक्षुरासीत् "चक्षोस्सूर्योअजायत" इतिश्रुतेः स महाविभूतिर्नोऽस्माकं प्रसीदतां तरणिं विशिनष्टि— देवयानमर्चिरादिमार्गभूतः त्रयीमयः ऋग्यजुस्सामप्रचुरः स एष तरणिर्ब्रह्मणः परस्य धिष्ण्यं स्थानं "य एषोन्तरादित्ये हिरण्मयः पुरुषो दृश्यते" इति श्रुतेः ब्रह्मण उपासनस्थानमित्यर्थः । मुक्तेर्द्वारं देवयानत्वादिति भावः अमृतं चामृतसाधनं पुण्यानुष्ठान कालज्ञापकत्वादिति भावः मृत्युरुदयास्तमयाभ्यामायुर्व्यय— करत्वात् एवम्भूतस्तरणिर्यस्य चक्षुः स. महाविभूतिः प्रसीदताम् ॥ ३६ ॥

तथा यस्य प्राणाद्वायुरभूत् "प्राणाद्वायुरजायत" इतिश्रुतेः स महाविभूतिः प्रसीदतां कथम्भूतो वायुश्चराचराणां भूतानां सह आदिः जनयिता तत्र सहो मनसो बलं दैहिकम् ओजः इन्द्रियाणां बलं प्राणः पञ्चवृत्तिमान् यं पञ्चवृत्तिं प्राणं वयं बुद्ध्याद्यधिष्ठातृदेवताः सम्राजं सार्वभौमं भृत्या इवान्वास्मानुवर्तिनः स एवंभूतो वायुर्यस्य प्राणादभूत् सः प्रसीदताम् ॥ ३७ ॥

तथा यस्य श्रोत्राद्दिशो जज्ञिरे "दिशः श्रोत्रात्" इति पुरुषसूक्ते श्रवणात् खानि देहगतच्छिद्राणि हृदा जज्ञिरे हृदयादुद्बभूवुः पुरुषस्य वैराजस्य नाभ्याः खमन्तरिक्षं जज्ञे "नाभ्या आसीदन्तरिक्षम्" इति श्रुतेः प्राणशब्दः कर्मेन्द्रियपरः इन्द्रियशब्दो ज्ञानेन्द्रियपरः आत्मा मनः असुशब्दः पञ्चवृत्तिप्राणवायुपरः शरीरश्चेत्येतेषां केतनम् आश्रयं खं यस्य नाभ्या जज्ञे सः प्रसीदताम् ॥ ३८ ॥

यस्य बलान्महेन्द्रो जज्ञे प्रसादात् त्रिदशा जज्ञिरे मन्योः क्रोधात् गिरित्रो रुद्रः हर्षाद्विरिञ्चो ब्रह्मा खेभ्यः छन्दांसि गायत्र्यादीनि "छन्दांसि जज्ञिरे तस्मात्" इतिश्रुतेः ऋषयश्च खेभ्यः विवरेभ्यः जज्ञिरे मेढ्रात्कः प्रजापतिर्मेढ्राधिष्ठाता सः प्रसीदताम् ॥३९॥

तथा यस्य वक्षसः श्रीः सम्पज्जज्ञे छायया छायातः पितरः आसन् स्तनाद्धर्मः पृष्ठतः इतरोऽधर्मः शीर्ष्णः शिरसः द्यौः "शीर्ष्णो द्यौस्समवर्तत" इतिश्रुतेः विहारादप्सरसः आसन् सः प्रसीदताम् ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इदञ्चैकं महाविभूतित्वं हरेर्युक्तमित्याह—अम्भ इति । त्रयो लोका अथाखिललोकपालाश्चोदारवीर्यम् उत्कृष्टबलं यदम्भो यस्य रेतो भवति तेन वर्धमानाः सिद्ध्यन्ति सिद्धा अवाप्तफला भवन्ति जीवन्त्युत अन्तरमपि तृप्तिलक्षणां जीवनमाप्नुवन्त्यपि सोऽर्चत परं तस्यार्चत आपो जायन्त "आपो नारा इति प्रोक्ता आपो वै नरसूनवः" "यद्वत्प्रथमममृतं तद्वसव उपजीवन्ति" इत्यादिसूर्यसोममहेन्द्रादीन्वा विनान्येऽखिललोकपाला अद्भिर्जीवन्ति किञ्चापां सोमस्य च जीवनप्रदा इन्द्राद्या इतीमं विशेषं तुशब्दो ज्ञापयति इममेवविशेषं तुशब्दो ज्ञापयतीति कुतः अन्यत्किं न स्यादितीयं शङ्का—

"सूर्यसोमयमेन्द्रादीनृतेऽन्ये लोकपा अपि ।
अद्भिर्जीवन्ति सोमाच्च महेन्द्रादीनृतेऽखिलाः ॥
अपां सोमस्य चेन्द्राद्याः सर्वे वै जीवनप्रदाः"—

इत्यनया परिहृतेति ज्ञायते महती विभूतिः सूर्यसोमविधिविशेषकल्पकैश्वर्यलक्षणा यस्य स तथा एवंविधः क इति तत्राह— ब्रह्मेति ॥ ३३ ॥

यो दिवौकसां बलमन्ध आयुर्वै बलाद्यभिवृद्धिहेतुः यश्च नगानां वृक्षाणां अङ्कुरजननसामर्थ्यप्रदत्वेनेशः यश्च प्रजानां प्रजनः सुरतानन्दगर्भलक्षणहेतुस्तं सोमं यस्य मनः समामनन्तीत्यन्वयः तं देवानामन्नमिन्द्रादीन् ऋत इति शेषः । अथ यच्चतुर्थममृतं तन्मरुतः उपजीवन्ति सोमेन सुखेन इति । सोमं यस्य मनः समामनन्ति यो देवानां बलादिहेतुः यश्च नगानामीशो यश्च प्रजानां प्रजनः स हरिः प्रसीदताम् इति वा सोमेन देवादिबलप्रदत्वेन महाविभूतिः "सोमो ददद्गन्धर्वाय सोमः प्रथमः" "ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणां श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येतिरेभन्" अथवा देवादिबलप्रदमहाविभूतिः ॥ ३४ ॥

अग्निर्यस्य मुखं मुखाज्जातः सप्तसु प्रथमेति, पञ्चम्यर्थे प्रथमा मुखमाश्रित्य वर्तते च अग्रणीत्वादग्निरित्यग्निशब्दस्यान्यत्र प्रवृत्तिसम्भवात्कथं निर्णयः स्यादिति तत्राह–जातवेदा इति । "अग्निर्वा अहमस्मीत्यब्रवीज्जातवेदा वा अहमस्मि" इति. जातं सर्वं वेत्तीति जातवेदश्शब्दस्यापि सावकाशत्वेन पूर्वोक्तसंशयानिस्तारः स्यादिति तत्राह–क्रियेति । क्रियाकाण्डमेव निमित्तं तत् तथा तेन जन्म यस्य स तथा "अग्निर्वै देवानां मुखं हृदयतमः" इति

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

श्रुतेः अग्निमुखेनेन्द्रादिदेवानां स्वहविर्भोगप्राप्त्यर्थमग्निहोत्रादौ मथनादिना अग्नेः प्रसिद्धस्य जन्मोपपत्तिरिति तद्वसव उपजीवन्ति अग्निनैव मुखेनेति च अग्नेः पाचकत्वशक्तिरपि श्रीहरिनियतेत्यभिप्रायेणाह, अन्तस्समुद्रे उदरान्तः स्थित्वा स्वधातून् स्वाधीनानि चतुर्विधान्यन्नानि पचतः जरयतः " अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुः तत्पुरीषं भवति योमध्यमस्तन्मांसं योऽणुस्तन्मन इति पचाम्यन्नञ्चतुर्विधम्" इति सर्वोपकारकाग्निजनकत्वलक्षणमहाविभूतिः तुना वाचापि हरेर्मुखं क्षेत्रमिति सूचयति "वाचो वह्नेर्मुखं क्षेत्रम्"इतिश्लोके: ॥ ३५ ॥

तरणिः सूर्यः यस्य चक्षुषः आसीदित्यन्वयः " चक्षोः सूर्यो अजायत" तरन्त्यनेन संसारं पुरुषाः, इति तरणिरिति नामसूचितमर्थं स्पष्टमाह–देवेति । देवानां संसारं मुक्त्वा गतानां यानं मार्गंउत्तरायणमार्गदेवतेत्यर्थः । अथोत्तरेण तपसा ब्रह्मचर्येण श्रद्धया विद्ययात्मानमन्विष्यादित्यमभिजायते त्रय्यामीयत इति त्रयीमयः वेदप्रतिपाद्येषु प्रधानं वा त्रयीमयाय त्रिगुणात्मधारिणे एष तरणिर्ब्रह्मणः परमात्मनोधिष्ण्यमभिव्यक्तिस्थानं " यश्चासावादित्ये " " ध्येयः सदा सवितृमण्डलमध्यवर्ती " मृत्योः संसारान्मुक्तेर्द्वारं द्वयोः मुक्त्योः कस्याइति । तत्राह–अमृतस्येति. विदुषां विषयस्येत्यर्थः । स यावत्क्षिप्येन्मनस्तावदादित्यं गच्छत्येतद्वै खलु लोकद्वारं विदुषां प्रपदनं विरोधोऽविदुषां श्चामृतस्य मुक्तेर्मृत्योश्च प्राप्तिहेतुरिति वा एवं विधमाहात्म्योपेतसूर्यजनकमहाविभूतिः ॥ ३६ ॥

चराचराणां सहो बलौजो हेतुः स्वयं च तादृग्गुणः आधिभौतिकं वायुरध्यात्मं प्राणो यस्य हरेः प्राणात्सह आदिगुणवदात्मनोऽभूत् "आत्मन एष प्राणो जायते तान्वरिष्ठप्राण उवाच मामोहमापद्यथ अहमेवैतत्पञ्चविधमात्मानं विभज्यैतद्बाणमवष्टभ्य विधारयामि" इति ते प्रीताः प्राणं स्तुवन्त्येषोग्निस्तपत्येष सूर्यः प्राणेक ऋषिरत्र विश्वस्य सत्पतिः वयमासाद्य दातारः पिता त्वं मातरिश्वनः वयं यं च संम्राजमन्वास्म वयं प्राणनामानं चक्रवर्तिनमनुवर्तिनमनुवर्तिमाद्दवद्दव प्राणचतुर्मुखयोरेकत्वादित्येत्यन्यत्रावधारणार्थं यथा सम्राडिवाधिकृतान्नियुंक्त एतान् ग्रामानधितिष्ठस्वैतान् ग्रामानाधितिष्ठस्वेत्येवमेवैष प्राण इतरान् प्राणान् पृथगेव सन्निधत्ते । पायूपस्थेपानं चक्षुः श्रोत्रे मुखनासिकाभ्यां प्राणः स्वयं प्रातिष्ठितइति शेषः सम्राजं यं भगवन्तमन्वास्मैवेति वा सर्वोत्तमप्राणजनकमहाविभूतिः "प्राणस्य प्राणमुत चक्षुषश्चक्षुः" ॥ ३७ ॥

यस्य श्रोत्राद्दिशो यस्य हृदयाच्च खानीन्द्रियाणि यस्य पुरुषस्य नाभेश्च खमाकाश इत्येते प्रजज्ञिर इत्यन्वयः अत्र " चन्द्रमा मनसो जातः " इत्यारभ्य"दिशः श्रोत्रात्" इत्यन्तं वाक्यं प्रमाणं दर्शयति. तैजसाऽहंकारगुणव्यंजकहृदयादीन्द्रियाणीत्यर्थः । तैजसानीन्द्रियाणीत्युक्तेः । सहस्र शीर्षापुरुषः " प्रसन्नो भवत्वित्यन्वयः । "प्राणेन्द्रियाणि व्याप्य तिष्ठतीति प्राणेन्द्रियात्मा ब्रह्मणो वा एतानि करणानि "एत त्सर्वे परे आत्मनि संप्रतिष्ठते पृथिवीच इत्यारभ्य "प्राणश्च विधारयितव्य"श्चान्तेन काठकोपनिषद्गतेन वाक्येन साविस्तर उच्यते स्वशरीरभूतायाः पृथिव्या बन्धुः " यस्य पृथिवी शरीरम्" दिङ्नामदेवतादिसर्जनप्रतीतमहाविभूतिः ॥ ३८ ॥

गुणगुणिनोरभेदाभिप्रायेणाह–बलादिति । बलादिगुणेभ्य इन्द्रादीनामुद्भवः निर्दोषत्वेन मन्युरहितस्य न मन्युस्वभावस्तादृक्स्वभावरूपीतिसर्जनाभिप्रायाद्दर्शितं "कारणगुणाः कार्येषु समवैति"इति न्यायरक्षणार्थश्च अशरणा(१)त्स्वाधिष्ठानाल्लयोदधौ पृथिव्याद्यधिष्ठानाभावात् स्वमहिम्न एवत्यर्थः । किंस्विदासीदधिष्ठानमारम्भणे स्वे माहिम्नि धिषणादिति केचित्पठंति ससेन्द्रैः सप्त छन्दांसि ऋषयः प्रजापतयः कस्तस्य मेढ्रादित्युक्तेः विरिञ्चादिदेवजनकमहाविभूतिः ॥ ३९–४०–४१ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

लोकाश्चय इति पाठः सर्वत्र लोका यत इति स्वामिसम्मतः शलाकालब्धश्च ॥ ३३—४३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

उदारवीर्य्यं महाशक्तिकं यतोऽम्भसः लोकादयः सिद्ध्यन्ति जायन्ते ॥ ३३ ॥

यः सोमो देवानामन्धः अन्नम् अत एव बलमायुश्च नराणां वृत्तानां प्रकर्षेण जनयतीति प्रजनः शुक्रस्य सोमात्मकत्वात् ॥३४॥

जातं वेदो धनं यस्मात् सः अन्तस्समुद्रे उदरमध्ये स्वधातून्पाकार्हानेवान्नादीन् पचन् प्रसिद्धसमुद्रेऽपि वाडवरूपेण जलानि ॥ ३५ ॥

तरणिः सूर्य्यः देवयानम् अर्चिरादिमार्गदेवता त्रयीमयः "सैषा त्रय्येव विद्या तपति" इति श्रुतेः । ब्रह्मणो धिष्ण्यमुपासनास्थानं "य एषोऽन्तरादित्ये हिरण्मयः पुरुषः" इति श्रुतेः मुक्तेः द्वारं देवयानत्वात् अमृतञ्च पुण्यलोकत्वात् मृत्युश्च कालात्मकत्वात् ॥ ३६ ॥

यस्य प्राणाद्वायुरित्यन्वयः । यो वायुः चराचराणां सह आदिधर्मवान् प्राणः यं प्राणं वयं बुद्ध्याद्यधिष्ठातारो देवाः सम्राजं भृत्या इव अन्वास्म सम्राजमिवानुगा वयं प्रसीदतां नः स महाविभूतिः ॥ ३७ ॥

हृदः यस्य हृदयाकाशात् खानि देहगतच्छिद्राणि नाड्याः सकाशात् खं कीदृशं प्राणः पञ्चवृत्तिश्च इन्द्रियाणि च आत्मा मनश्च असवो नागकूर्मादयः शरीरश्च तेषां केतनमाश्रयभूतम् ॥ ३८ ॥

धिषणायाः बुद्धेः सकाशात् खेभ्यः देहच्छिद्रेभ्यः ॥ ३९ ॥ इतरोऽधर्मः ॥ ४० ॥

(१) अकारो वासुदेवस्यादित्युक्तेः ।

विप्रो मुखं ब्रह्म च यस्य गुह्यं राजन्य आसीद्भुजयोर्बलं च ।
ऊर्वोर्विडोजोऽङ्घ्रिरवेदशूद्रौ प्रसीदतां नः स महाविभूतिः ॥ ४१ ॥
लोभोऽधरात्प्रीतिरुपर्यभूद्द्युतिर्नस्तः पशव्यः स्पर्शेन कामः ।
भ्रुवोर्यमः पक्ष्मभवस्तु कालः प्रसीदतां नः स महाविभूतिः ॥ ४२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यद्यतोऽम्भसः लोकादयः सिद्ध्यन्ति जायन्ते वर्द्धमानाः भवन्ति जीवन्ति च तदम्भ उदारवीर्यं तीव्रशक्तिर्यस्य वीर्यं रेतः स नः प्रसीदताम् ॥ ३३ ॥

यो दिवौकसामन्धोऽन्नं तदादिः नगानां वृक्षाणामीशः प्रजानां प्रकर्षेण जनयतीति प्रजनस्तं सोमं यस्य मनः समामनन्ति स नः प्रसीदताम् ॥ ३४ ॥

जातं वेदो धनं यस्मात् क्रियाकाण्डनिमित्तं जन्म यस्य अन्तस्समुद्रे जठरमध्ये स्वधातून् अन्नादीन् अनुपचरन् अग्निः यस्य मुखं जातः स नः प्रसीदताम् ॥ ३५ ॥

देवयानमर्चिरादिमार्गदेवता त्रयीमयः "सैव त्रय्यैव विद्या तपति" इति श्रुतेः ब्रह्मणो धिष्ण्यमुपासनास्थानम् "य एषोन्तरादित्ये हिरण्मयः पुरुषो दृश्यते" इति श्रुतेः मुक्तेर्द्वारं देवयानत्वात् ब्रह्मोपासनाधिष्ण्यत्वाच्च अमृतं मोक्षद्वारकत्वात् मृत्युरायुर्व्ययकरत्वात् एवंभूतस्तरणिर्यस्य "चक्षोस्सूर्यो अजायत" इति श्रुतेः स नः प्रसीदताम् ॥ ३६ ॥

यस्य भगवतः प्राणाद्वायुरभूत् स नः प्रसीदतामित्यन्वयः यो वायुः चराचराणां जङ्गमानां स्थावराणां च सह आदिः धर्मवान् प्राणः वयं बुद्ध्याद्यधिष्ठातारो देवाः सम्राजमनुगा इव अन्वास्म ॥ ३७ ॥

यस्य श्रोत्राद्दिशः हृदः हृदयाकाशतः खानि देहगतच्छिद्राणि च प्रजज्ञिरे प्राणः पञ्चवृत्तिवायुः इन्द्रियाणि च आत्मा मनश्च असवो नागकूर्मादयो वायवः शरीरं च तेषां केतमाश्रयभुतं खं च नाभ्याः प्रजज्ञे स नः प्रसीदताम् ॥ ३८ ॥

यस्य बलान्महेन्द्रो जज्ञे प्रसादात् प्रसन्नतायाः त्रिदशाः जज्ञिरे मन्योः क्रोधात् गिरीशः धिषणात् बुद्धेः खेभ्यः विराट् शरीरच्छिद्रेभ्यः छन्दांसि ऋषयश्च जज्ञिरे कः प्रजापतिः जज्ञे स नः प्रसीदताम् ॥ ३९ ॥

इतरो ऽधर्मः विहारात् क्रीडात् ॥ ४० ॥

भाषा टीका ।

जिस जल से समस्त लोक और लोकपाल उत्पन्न होते हैं जीवते हैं और वृद्धिको प्राप्त होते हैं वह उदार शक्ति वाला जल जिसका (रेतस्] वीर्य है वह निरतिशय वृहत् महाविभुति वाला श्रीहरि हमारे ऊपर प्रसन्न हों ॥ ३३ ॥

जिस चन्द्रमा को स्वर्गवासियों का अन्न बल, और वायु कहते हैं और औषधियों का ईश है तथा प्रजाओं की वृद्धि करने वाला है, वैसे चन्द्रको जिसका मन कहते हैं महा ऐश्वर्य वाला परमात्मा हम पर प्रसन्न हों ॥ ३४ ॥

जिसके वेद धन उत्पन्न हुआ, और वैदिक क्रिया काण्ड निमित्त जिसका जन्म, और जो समुद्र के भीतर वडवा अग्नि रूप से और उदर के भीतर जठराग्नि रूपसे जलों को तथा धातुओं को परि पक्व करता है, वह परम ऐश्वर्य विशिष्ट पुरुष हमारे ऊपर प्रसन्न हो ॥ ३५ ॥

जो सूर्य देवयान अर्थात् अर्चिरादि मार्ग के देवता, वेद त्रयी मय, और ब्रह्मका एक स्थान रूप हैं अर्थात् जिन के मंडल में चतुर्भुज मूर्ति नारायण का ध्यान होता है और जो मुक्ति का द्वार, अर्थात् जिनके मंडल को भेदन करके ही मुक्त लोग वैकुण्ठ को जाते हैं तथा अमृत रूप और कालात्मक होने से मृत्यु रूप, ऐसे सूर्य जिनके नेत्र हैं वह महा ऐश्वर्य वाले परमात्मा हमारे ऊपर प्रसन्न होवै ॥ ३६ ॥

जो चर अचर (स्थावर जङ्गम) का प्राण, और सह, बल ओज, रूपधर्म वाला, और बुद्धि आदि के अधिष्ठाता हम सब देवलोग, सम्राट् के पीछे जैसे नोकर इस प्रकार जिसका अनुसरण करते हैं ऐसा वायु जिन के प्राण से उत्पन्न हुआ वह महा ऐश्वर्य वाले परमेश्वर हम पर प्रसन्न हो ॥ ३७ ॥

जिन के श्रोत्र से दिशायें उत्पन्न हुई और हृदय से अनेकछिद्र, और प्राण, इन्द्रियें, मन, असु, (नागकूर्म आदि) शरीर, इन सबों का आश्रयभूत आकाश जिस पुरुष के नाभि से उत्पन्न हुआ वह महाविभूति परम पुरुष हमारे ऊपर प्रसन्नहो ॥ ३८ ॥

और जिनके बल से महेन्द्र उत्पन्न भया, प्रसन्नता से देव लोग, क्रोध से कैलासवासीश्रीरुद्र, धिषणा (बुद्धी) से ब्रह्मा छिद्रों से ऋषि लोग तथा छन्द और मेढ्र इन्द्रिय से प्रजापति हुए, वह अचिन्त्य ऐश्वर्य वाला पुरुष हमारे ऊपर प्रसन्न हो ॥ ३९ ॥

जिन के वक्षःस्थल से श्री (सम्पत्) छाया से पितर, स्तन से धर्म, पीठ से अधर्म, मस्तक से स्वर्ग, विहार से अप्सरायें हुई वह महाविभूति श्रीहरि हमपर प्रसन्न हों ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विड्विद्यः ओजो नैपुण्यं तस्य वृत्तिः अङ्घ्रिः अङ्घ्रिजावित्यर्थः अवेदशूद्रौ अवेदो वेदव्यतिरिक्ता शुश्रूषा तद्वत्तिमान् शूद्रश्च पाठान्तरं सुगमम् ॥ ४१ ॥

द्रव्यं वयः कर्मगुणान्विशेषं यद्योगमायाविहितान्वदन्ति ।
यद्दुर्विभाव्यं[1] प्रबुधापिबाधं प्रसीदतां नः स महाविभूतिः ॥ ४३ ॥
नमोऽस्तु तस्मा उपशान्तशक्तये स्वाराज्यलाभप्रतिपूरितात्मने ।
गुणेषु मायारचितेषु वृत्तिभिर्न सज्जमानाय[2] नभस्वदूतये ॥ ४४ ॥
स त्वं नो दर्शयात्मानमस्मत्करणगोचरम् ।
प्रपन्नानां दिदृक्षूणां सस्मितं ते मुखाम्बुजम् ॥ ४५ ॥
तैस्तैः स्वेच्छाधृतै रूपैः कालेकाले स्वयं विभो ! ।
कर्म दुर्विषहं यन्नो[3] भगवांस्तत्करोति हि ॥ ४६ ॥
क्लेशभूर्यल्पसाराणि कर्माणि विफलानि वा ।
देहिनां विषयार्तानां न तथैवार्पितं त्वयि ॥ ४७ ॥
नावमः कर्मकल्पोऽपि विफलायेश्वरार्पितः ।
कल्पते पुरुषस्यैष सह्यात्मा दयितो हितः ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

उपर्युत्तरोष्ठात् नस्तो नासिकातः द्युतिः कान्तिः पशव्यः पशूनां हितः कामः स्पर्शेनाभूत् ॥ ४२ ॥

द्रव्यं भूतानि वयः कालं विशेषं भौतिकप्रपञ्चं यस्माद्दुर्विभाव्यं कुतः प्रबुधापबाधं विद्वद्भिरपोह्यमानं पाठान्तरे प्रबुधानां मायेत्यवबोधो यस्मिन्नित्यर्थः ॥ ४३ ॥

तदेवं सप्रपञ्चमुपवर्ण्य निष्प्रपञ्चमनुवर्णयन्प्रणमति—नमोऽस्त्विति । वृत्तिभिर्दर्शनादिभिः नभस्वान्वायुस्तस्येव ऊतिर्लीला यस्य तस्मै ॥ ४४ ॥

सस्मितं मुखाम्बुजं दिदृक्षूणां नोऽस्मच्चक्षुरादिकरणगोचरं यथाभवत्येवमात्मानं दर्शय ॥ ४५ ॥

भक्तेच्छानुवर्तित्वं च तव बहुशो दृष्टमेवेत्याह—तैस्तैरिति । यन्नो दुर्विषहमशक्यं कर्म तद्भगवान्स्वयमेव करोति हि ॥ ४६ ॥

न च बहिर्मुखानामिव त्वद्भक्तानामस्माकं त्वय्यर्पितानि पूर्वपुण्यानि विपरीतफलानि भवितुमर्हन्तीत्याह, क्लेशो भूरिर्येषु अल्पं सारं फलं येषु यद्वा विफलान्येव सकामानां कर्माणि त्वय्यर्पितं तु नैव तथा ॥ ४७ ॥

तत्राऽवैफल्यमुपपादयति—अवमो ऽल्पोऽपि कर्मकल्पः कर्माभासोऽपीश्वरार्पितश्चेद्विफलायायासाय न कल्पते हि यस्मात्स एष ईश्वरः पुरुषस्याऽऽत्मा अत एव दयितो हितश्च न ह्यात्मनि दयिते चार्पितं निष्फलं स्यात् ॥ ४८ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

तथा यस्य मुखाद्विप्रःविप्रकुलं गुह्यमतीन्द्रियार्थाऽवबोधि वेदश्चासीत् "ऋचस्सामानि जज्ञिरे" "ब्राह्मणोऽस्य मुखमासीत्" श्रुतिः भुजयोर्बाहुभ्यां राजन्यो बलञ्चासीत् "बाहू राजन्यः इतिश्रुतेः ऊर्वोर्विट् वैश्यः ओजः नैपुण्यं तस्य वृत्तिश्च अंघ्रिजावित्यर्थः । अवेदशूद्रौ अवेदः वेदव्यतिरिक्ता शुश्रूषा तद्वृत्तिमान् शूद्रश्च विडंघ्रेरभवच्चशूद्र इति पाठान्तरम् "ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायत" इतिश्रुतेः ॥ ४१ ॥

अधरादधरोष्ठाल्लोभः उपर्युत्तरोष्ठात्प्रीतिरभूत् नस्तः नासिकातः द्युतिः कान्तिः पशव्यः पशूनां हितः कामः स्पर्शेनाभूत् यमः कालः पक्ष्मभवः पक्ष्मणो जातः सः प्रसीदताम् ॥ ४२ ॥

किं बहुना द्रव्यं भूतपञ्चकं वयः कालं कर्म गुणान् सत्त्वादीन् विशेषं ब्रह्माण्डं तदुपलक्षितं कार्यं यस्य योगमायया ईक्षणात्मकसङ्कल्पेन विहितान्वदन्ति द्रव्य कारणात्मकं विशेषं रूपं कार्यात्मकं च सर्वं वस्तु यत्सङ्कल्प विहितं वदन्तीत्यर्थः । अतएव यद्यत्स्वरूपं दुर्विभाव्यं चेतनाचेतन सजातीयत्वेन चिन्तयितुमशक्यं प्रबुधावबाधं प्रकृष्टविद्वद् स महाविभूतिः प्रसीदताम् ॥ ४३ ॥

एवं कार्यावस्थप्रपञ्चशरीरकं वैराजपुरुषं प्रसाद्याथ कार वस्थं नमस्करोति—नम इति । उपशान्तशक्तये सर्गाद्यनभि चिदचित्कालादिशक्तये स्वराट् स्वतन्त्रं स्वस्वरूपं तस्य याथात्म्यं स्वाराज्यं तस्य लाभेन स्वानन्दानुभवेनेत्यर्थः ।

(१) बबोधम् । (२) नमस्वभूतये । (३) भवांस्त्वै इति च वीर० पाठाः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रतिपूरित आत्मा स्वरूपं यस्य तस्मै स्वतन्त्रानवधिकानन्दस्वस्वरूपानुभवपूर्त्यावाप्तसमस्तकामायेत्यर्थः। मायया रचितेषु गुणेषु न सज्जमानाय लीलारसविमुखाय स्वभूतये स्वाभाविकैश्वर्याय तस्मै नमोनमः ॥ ४४ ॥

एवं प्रकृतिपुरुषविलक्षणं विभूतिद्वयाधिपं सर्वकारणं भगवन्तं प्रसाद्य नमस्कृत्य स्वाभिप्रेतं विज्ञापयितुं तावत्तद्दर्शनं प्रार्थयति—स त्वमिति । उक्तविधस्त्वमात्मानं दिव्यमङ्गलविग्रहं दिदृक्षूणां प्रपन्नानां नोऽस्माकमस्मच्चक्षुरादिकरणगोचरं यथा भवति तथा सस्मितं ते मुखाम्बुजं दर्शय ॥ ४५ ॥

ननु "न चक्षुषा पश्यति कश्च नैनम्"इति श्रुत्युक्तविधया चक्षुराद्यगोचरोऽहं कथं त्वच्चक्षुरादिकरणविषयः स्याम् ? इत्यत्राह, तैरिति । हे विभो ! कालेकाले "यदायदा हि धर्मस्य ग्लानिर्भवति भारत ! अभ्युत्थानमधर्मस्य" इत्युक्तकाले स्वेच्छाधृतैर्न तु पुण्यपापात्मककर्मधृतैरूपैरवतारैर्भवान्नोऽस्माकं दुर्विषहं दुरासदं दुष्करं कर्म करोति हि अघटितघटनात्मकक्रियाशक्तेस्तव स्वविग्रहदर्शयितृत्वं न दुर्घटमिति भावः ॥ ४६ ॥

सत्वमात्मानं सकृत्स्तुतिकर्मणा हेतुना कथं दर्शयेयम् ? इत्यत्राह–क्लेशेति । विषयार्तानामनुकूलविषयालाभदुःखपीडितानां देहिनां क्लेशो भूरिर्येष्वल्पः सारः सुखं येषु ततः कर्मधारयः तानि कर्माणि यथा विफलानि भवन्ति तथा त्वय्यर्पितं कर्म न विफलं भवति हि ॥ ४७ ॥

कर्मकल्पोऽपि कर्माभासोप्यवमः लौकिकव्यापारोपीश्वरेत्वय्यर्पितश्चेद्विफलाय न कल्पते न विफलो भवति हि यस्मात्स एवेश्वरः पुरुषस्यात्मा अत एव दयितः प्रियः हितश्च नह्यात्मनि दयिते हिते चार्पिते कर्म निष्फलं स्यादित्यर्थः ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उपर्युत्तरोष्ठात्प्रीतिः द्युतिः कान्तिश्च पशव्यं पशुजीवनं नस्तो नासिकायाः स्पर्शेन गुणेन जातः कामः स्त्रीविषयः कालो मृत्युः ॥ ४२ ॥

द्रव्यं भूतपञ्चकं वय आयुर्लक्षणं कर्म त्रिविधं गुणाः भक्त्यादयः शुक्लादयो वा शेषं स्वभावजीवकालादयः यस्य हरेर्योगमायया स्वरूपभूतेच्छया विहता उपेक्षिताः पतन्ति प्रच्युता भवन्तीत्यन्वयः " द्रव्यं कर्म च कालश्च " इति किञ्च यद्दुर्विभाव्यमेवंविधमिति भावयितुमशक्यं स वा एष आत्मानेति किञ्च प्रबुद्धज्ञानिनां अवबोधो ज्ञानं यस्मात्तथा अनेन स्वानुग्रहेण स्वविषयज्ञानं सुशकमित्युक्तं भवति "अज्ञानां ज्ञानदो विष्णुः" यमेवैष वृणुते" इत्यादि द्रव्यादिसत्ताप्रदत्वेन ब्रह्माद्याचिन्त्यमहिमत्वेन ज्ञानदातृत्वेन परिपूर्णैश्वर्यः प्रसीदतामित्यन्वयः नवत्वसङ्ख्याविशिष्टं द्रव्यं "वयगतौ" इति धातोः वयत्यवगच्छत्यनेन नीलोत्पलमित्यादिव्यवहारं पुरुष इति वयः समवायः

उत्क्षेपणादीनि पञ्चकर्माणि शब्दस्पर्शरूपरसगन्धादिचतुर्विंशतिगुणाः सामान्यविशेषौ शेषमित्यनेनोच्यते एते यद्योगमायया विहताः अहितीकृताः पतन्ति पातयन्त्यधः पुरुषमितिशेषः नरकहेतव इत्यर्थः। विषकणठकणभक्षशङ्करो त्रिदशवलपञ्चशिखाक्षपादवादान्महदपि सुविचार्य लोकतन्त्रं भगवदुपास्ति मृतेन सिद्धिरस्तीति प्रमितेनायमुक्तार्थं इति सिद्धं कणादाक्षपादमतज्ञानान्न सिद्धिर्माभूदद्वैतज्ञानेन सा स्यादिति तत्राह–यदिति। अद्वैतमतोक्तविधया भावयितुमशक्यम् अनेनान्येऽपि दुर्वादिवादा अपि निरस्ताः इति ज्ञातव्यङ्कर्मणा पुरुषार्थसिद्धिः स्यात्तर्हीति नेत्याह, प्रबुधेति अनेन भाट्टादिमतमपि प्रत्युक्तम् ॥ ४३ ॥

उपात्तसर्वाधिकाद्विष्णोः शान्ताःआनन्दमूर्तयो यासां ताः तादृश्यः शक्तयो भार्या यस्य स तथा तस्मै "निवृत्तस्पष्टशक्तये"इति च स्वाराज्यलाभः स्वयंप्रकाशमानानन्दस्तेन परिपूरित आत्मा यस्य स तथा तस्मै नित्याविर्भूतानन्दस्वरूपायेत्यर्थः। मायया स्वाधीनप्रकृत्या रचितेषु निर्मितेषु गुणेषु विषयेषु वा प्रवर्तमानायापि तद्योग्याभिर्वृत्तिभिर्दुःखलक्षणाभिर्नसज्जमानाय निरवद्यत्वेन दुःखानुभूतिरहितायेत्यर्थः । स्वभूतये स्वयम्भुवे स्वरूपपूर्णैश्वर्यायेति वा ॥ ४४॥

अस्मत्करणगोचरोऽस्मदिन्द्रियविषयो भूत्वा ॥ ४५ ॥

भक्तानुकम्पामन्तरेण तवान्यत्कृत्यं न विद्यते इत्याशयेनाह–तैस्तैरिति । हे विभो ! यद्यदा नोऽस्माकं दुर्विषहं सोढुमशक्यं कर्म दुःखलक्षणमसुरादेः स्यादिति शेषः तदा भगवान् स्वयमसुरादेर्दुर्विषहं कर्म पराक्रमलक्षणं करोतीति वा इत्यन्वयः। कथं स्वेच्छाकृतैस्तैस्तैरूपैः "यदा यदा हि धर्मस्य" इतिस्मृतिर्हिशब्देन गृहीता ॥ ४६ ॥

ज्ञानमेव मुक्तिसाधनं न कर्म तन्मतदूषणादित्यभिप्रायो यदि तर्हि कर्मकरणं व्यर्थमित्याशङ्क्य सत्यं भगवदर्पणाख्यचिकित्साभावे सास्ति चेत्फलवदित्याशयेनाह—क्लेशेति । विषयार्तानां देहिनां कर्माणि विफलानि विरुद्धफलान्यनभीष्टफलानीत्यन्वयः कथं भूरिक्लेशानि अल्पसाराणि च ईश्वरार्पितं कर्म तथा ऽनर्पितवद्विफलं न स्यादित्यन्वयः ॥ ४७ ॥

सांगं कर्म ईश्वरार्पितं सफलमस्तु अनङ्गं कथमिति तत्राह–नेति । पुरुषस्य कर्मकल्पः कर्माभासः अङ्गसाकल्येन रहितः अतएवाधमोपि यदीश्वरार्पितः तर्हि विफलाय न कल्पते किन्तु फलवानेव स्यादित्यन्वयः तत्र किं कारणमत्राह—स इति । यत्प्रीत्यै कर्म करोति स आत्मा परमात्मा हितः प्रेक्ष्येष्टकारी दयितोऽनिमित्तबन्धुः हि यस्मात्तस्मादिति शेषः नाधर्म इति केचित्पठन्ति स्मृत्यविहितः "सर्वधर्मान्परित्यज्य"इत्युक्तेः ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अधुना अर्वाक् समन्वन्तं तत्र परिहरन्नैश्वर्यलीलयोर्माहिमानमाह—नमोऽस्त्विति । उपशान्ता निरुपद्रवा शक्तिर्यस्य स्वाराज्यस्य त्रिपाद्विभूतेः स्वधाम्नो लाभेन प्रतिपूरिता

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत्तदंशेन सम्भाविता आत्मानः स्वांशा येन नभस्वानिव विचित्रगतिर्लीला यस्य तस्मै ॥ ४४ ॥

अभीष्टमाह—स त्वमिति । अस्माकं करणान्यपि गोचराः प्रकाशानि यस्य तादृशमप्यात्मानं दर्शयस्व स्वयं प्रकाशय ॥ ४५ ॥

स्वेषां भक्तानामिच्छया भृतैः पुष्टैराविर्भावितप्रकाशैरित्यर्थः ॥ ४६—५० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

मुखं विप्रः गुह्यं ब्रह्म वेदश्च विट् वैश्यः ओजः नैपुण्यं तस्य वृत्तिश्च अङ्घ्रिः अङ्घ्रेः सकाशादवेदःवेदव्यतिरिक्ता शुश्रूषा वृत्तिः तद्वृत्तिमान् शूद्रश्च विशोऽङ्घ्रेरभवच्च शूद्र इति च पाठः ॥ ४१ ॥

उपरि उत्तरोष्ठात् नस्तो नासिकातो द्युतिः कान्तिः पशव्यः पशूनां हितः कामः स्पर्शनाभूत् ॥ ४२ ॥

द्रव्यं पृथिव्यादित्रयोविंशतितत्त्वं वयः कालः कर्म च तद्धेतुभूतान् गुणान् सत्त्वादीन् यस्य योगमाययैव विहितान् सृष्टान् वदन्ति यद्येभ्यः पृथिव्यादिभ्यो दुर्विभाव्यं विशेषं प्रपञ्चं च वदन्ति कीदृशं प्रकृष्टबुधानाम् अपवादः निषेधः प्राकृतत्वेनाग्रहणं यस्य तं प्रबुधाववोधामिति पाठे दुर्विभाव्यमपि प्रकृष्टैर्बुधैरेवाववोध्यमित्यर्थः । तेन यस्य स्वरूपशक्तिर्वृत्तेर्योगमायया विभूतिः सत्त्वादिगुणमयी माया तस्या विभूतयः कालकर्ममहदादिपृथिव्यन्तानि तत्वानि तेषां विभूतिरिदं मायिकं विश्वमेवास्माभिरवगम्यते इति व्यञ्जितम् ॥ ४३ ॥

मायातीतं स्वरूपं तु दुरवगमं केवलमस्माभिर्नमनीयमेवेत्याह—नम इति । उपशान्ताः संविदाद्याः अन्तरङ्गाः शक्तयो यस्य तस्मै तेन स्वरूपशक्त्यैव राजत इति स्वराट् तस्य भावः स्वाराज्यं तेनैव लाभेन प्रतिपूरित आत्मा मनो यस्य तस्मै ननु तर्हि कथं सृष्ट्याद्या शक्तिस्तत्राह-गुणेष्विति । वृत्तिभिर्दर्शनादिभिर्नभस्वतो वायोरिव ऊतिः सृष्ट्यादिलीला यस्य तस्मै ॥ ४४ ॥

ननु, ब्रह्मन्नभीप्सितं वरं गृहाणेत्यत आह-स त्वमिति । नोऽस्माकं प्रपन्नानाम् अस्मान् प्रपन्नान् आत्मानं स्वस्वरूपं दर्शय किं निर्विशेषं स्वरूपं सविशेषं वा ? तत्राह-अस्मत्करणगोचरं स विशेषमित्यर्थः तत्रापि सस्मितं मुखाम्बुजम् ॥ ४५ ॥

भक्तवात्सल्यं वहुशः स्मरन्नाह—स्वेच्छाभृतैः स्वभक्तेच्छापुष्टैः रूपैर्नृसिंहादिभिः यन्नोदुर्विषहं कर्म तत् स्वयमेव करोति ॥ ४६ ॥

नच वहिर्मुखानामिव त्वद्भक्तानामस्माकं त्वयार्पितानि पूर्वपुण्यानि विपरीतफलानि भवितुमर्हन्तीत्याह । क्लेशो भूरि येषु अल्पं सारं फलं येषु तानि तान्यपि यथा त्वद्विमुखानां कर्माणि वा पदार्थे विफलान्येव तथा त्वय्यर्पितं भक्तानां कर्म न ॥ ४७ ॥

त्वय्यर्पितमल्पमपि कर्म महद्भवति । अनर्पितं महदपि व्यर्थमेव भवतीत्याह—नेति । अवमः अल्पोऽपि कर्म कल्पः कर्माभासोऽपि न विफलाय । हि यस्मात् स ईश्वरः पुरुषस्यात्मा दयितो हितश्चेत्यतस्तदादरानादरावेव कर्म साफल्यवैफल्यहेतुरिति भावः ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विप्रः गुह्यं गूढाभिप्रायश्च ब्रह्म वेदश्च यस्य मुख ब्रह्मणो गूढाभिप्रायवान् वेदश्च मुखज इत्यर्थः । विट् वैश्यः ओजो नैपुण्यं वैश्यवृत्तिरित्यर्थः । अवेदो वेदव्यतिरिक्ता शुश्रूषा शूद्रश्चेत्यवेदशूद्रौ अङ्घ्रिः मङ्घ्रिजौ ॥ ४१ ॥

यस्य अधरात् लोभः उपरि उत्तरोष्ठात् प्रीतिश्च अभून्नस्तो नासातः द्युतिः छविः पशव्यः पशूनां हितः कामः स्पर्शादभूत् ॥ ४२ ॥

यस्य योगमायया युज्यते इति योगः सङ्कल्पस्तद्रूपया मायया वयुनेन विहितान् द्रव्यादीन् वदन्ति स नः प्रसीदतामित्यन्वयः तत्र द्रव्यं प्राकृततत्त्वजातं वयः कालः गुणाः सत्त्वादयः तान् यत् प्रबुधापवाधं प्रबुधानामपवाधो सर्वज्ञत्वाभिमानवाधो यस्मिन् तद्विविधविचित्रप्रदेशत्वात् प्रबुधाववोधमिति पाठान्तरं तत्र प्रकृष्टबुधानामववोधो यस्मिन् दुर्विभाव्यं विशेषं ब्रह्माण्डं च विहितं वदन्ति ॥ ४३ ॥

विराडाख्याप्राकृतशरीरिणमुपवर्ण्याथाप्रकृतं श्रीमद्विग्रहदर्शनकामस्तद्विग्रहयुक्तं प्रणमति—नम इति । उपशान्ताः शक्तयो यस्य अत एव स्वतः राजते इति स्वराट् तस्य भावः स्वाराज्यं तस्य लाभेन प्रतिपूरित आत्मा देहो यस्य मायारचितेषु दम्भादिना निवेदितेषु गुणेषु गुणवत्स्वपि पदार्थेषु सज्जमानाय नभस्वत इव ऊतिः सर्वाधारकत्वासङ्गत्वादिगुणद्योतका लीला यस्य तस्मै नमोऽस्तु ॥ ४४ ॥

स त्वं नोऽस्माकं ते मुखाम्वुजं दिदृक्षूणाम् आत्मानं स्वाराज्यलाभपारिपूरितं देहं दर्शयेति प्रार्थना ॥ ४५ ॥

वहुशो भवान् स्वभक्तानां कार्यं कर्तुं रूपाण्याविष्करोतीत्याह—तैरिति । स्वीयानां भक्तानामस्माकमिच्छाभृतैः मत्स्यादिमूर्तिभिः यन्नोदुर्विषहमशक्यं कर्म वेददानादिकं तद्वान् स्वयमेव करोति ॥ ४६ ॥

विषयार्त्तानां विषयभोगार्थं कर्मनिष्ठानां क्लेशो भूरियेंषु अल्पं सारं फलं येषु तानि वस्तुतस्तु तुच्छत्वनुपयोगित्वाद्विफलान्येव त्वयि अर्पितं कर्म तु तथा न किन्तु स्वल्पश्रमसाध्यमपि भूरिफलदं मुक्तिदं चेत्यर्थः ॥ ४७ ॥

कर्मकल्पः कर्माभासोऽपि तत्राप्यवमः ईश्वरे त्वयि अर्पितश्चेद्विफलाय विरुद्धफलाय संसाराय फलाभावाय वा न कल्पते हि यतः स एष ईश्वरः पुरुषस्य आत्मा आश्रय अत एव दयितः प्रियतमः ॥ ४८ ॥

यथाहि स्कन्धशाखानां तरोर्मूलाऽवसेचनम् ।
एवमाराधनं विष्णोः सर्वेषामात्मनश्च हि ॥ ४९ ॥
नमस्तुभ्यमनन्ताय दुर्वितर्क्यात्मकर्मणे ।
निर्गुणाय गुणेशाय सत्त्वस्थाय च साम्प्रतम् ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्याम् अष्टमस्कन्धे अमृतमथने
पञ्चमोऽध्यायः ॥ ५ ॥

भाषाटीका।

जिनके मुख से ब्राह्मण और ब्राह्मण की वृत्ति वेद ये दोनों हुए, और भुजाओं से क्षत्रिय और उसकी वृत्ति बल ऊरु से वैश्य और उसकी वृत्ति निपुणता, चरण से शूद्र और उसकी वृत्ति वैदिक कर्म व्यतिरिक्त शुश्रूषा, इस प्रकार जिनके मुखादिक वृत्तियों सहित चारों वर्ण उत्पन्न हुऐ, वह महा ऐश्वर्य वाले परमात्मा हम पर प्रसन्न होवें ॥ ४१ ॥

जिनके नीचे के ओष्ठ से लोभ उत्पन्न भया, ऊपर के ओष्ठ से प्रीति हुई, नासिका से कान्ति, स्पर्श से पशुओं का हितकारी काम, और दोनों भ्रकुटिओं [भौंहों] से यम, और जिनके निमेष [पलकों] से काल उत्पन्न हुआ वह महाविभूति शाली श्री गोविन्द हमारे ऊपर प्रसन्न हों ॥ ४२ ॥

पंचभूत, काल, कर्म, गुण, और लौकिक प्रपञ्च जिसकी योगमाया से रचित कहते हैं, और जो दुर्विभाव्य तथा प्रबुध लोगों को अवबोध जिससे होता है, वह महाविभूति शाली परमेश्वर हम पर प्रसन्न होवें ॥ ४३ ॥

उपशांत शक्ति वाले और स्वाराज्य लाभ से परिपूरित स्वरूपवाला और माया से रचित गुणों में जो वृत्ति से सक न होवै, और वायु सदृश लीला धारी, ऐसे श्रीहरि को वारंवार नमस्कार हो ॥ ४४ ॥

हे भगवन् ! वही आप अपने दिव्य मंगल विग्रह को [शरीर को] और सुन्दर स्मित युक्त मुखारविन्द को, दर्शन करने का इच्छा वाले, हम शरणागत लोगों के नेत्रों के गोचर करो अर्थात् कृपा कर दर्शन देओ ॥ ४५ ॥

हे विभो ! समय २ पर स्वयं आप अपनी इच्छा से नाना प्रकार के रूप धारण करके हमारे लोगों से अशक्य जो कर्म उनको करते हो ॥ ४६ ॥

जैसे आप से वहिर्मुख विषयार्त्त लोगों के कर्म बहुत क्लेश वाले और थोडे सारवाले—और निष्फल होते हैं, ऐसे आपके विषै कर्म समर्पण करने वालों के नहीं होते हैं ॥ ४७ ॥

अल्प कर्म वा कर्माभास ही क्यों न हो पर जो परमेश्वर को समर्पण करदे तौ कभी निष्फल नहीं होता है, क्योंकि परमेश्वर तौ जीव का भी आत्मा है; परमप्रिय है और हितकारी भी है ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अनन्तफलत्वमाह—यथाहि मूलावसेचनं स्कन्धानां शाखानां च भवति॥ ४९ ॥

एवं सत्यपि त्वदर्पितकर्मणां त्वद्भक्तानामस्माकं किं निमित्तमिदं दुःखमिति त्वमेव वेत्सीत्याशयेनाऽऽह—नम इति। दुर्वितर्क्याण्यात्मकर्माणि स्वभावचेष्टितानि यस्य तस्मै ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ईश्वरार्पितस्य स्वल्पस्यापि कर्मणोऽनल्पफलत्वमाह—यथेति। यथाहि तरोः मूलावसेचनं मूले जलावसेचनं स्कन्धानां शाखानां च भवति एवम् आत्मनः परमात्मनः विष्णोराराधनं सर्वेषां हि सर्वपुरुषार्थानां साधनं भवतीत्यर्थः ॥ ४९ ॥

स्तुतिनमस्कारादिकर्मणा विना नान्यस्त्वत्तोषहेतुरस्तीत्यभिप्रयन्नाह—नमइति। दुर्वितर्क्याणीतरसजातीयत्वेन विभावितुमशक्यान्यात्मकर्माणि स्वचेष्टितानि यस्य तस्मै अनन्ताय त्रिविधपरिच्छेदरहिताय निर्गुणाय हेयगुणरहिताय सत्त्वादिगुणानां नियन्त्रे सत्त्वस्थाय सत्त्वगुणोन्मेषनिमित्तकर्मानुगुणमधुना प्रवर्तमानाय तुभ्यं नमः सांप्रतं नमस्कार एव युज्यते ईदृशं त्वां प्रसादयितुं नम एव युज्यते नान्य एवोपाय इत्यर्थः यद्वा गुणत्रयोन्मेषनिमित्तकर्मानुगुणं प्रवर्तमानायापि सांप्रतमधुना सत्त्वस्थायेति वान्वयः ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु, यजेतेत्यादिविहितकर्म परित्यज्य भगवदेकाराधनाया-मितरदेवतातृप्त्यभावेनापुरुषार्थः स्यादिति तत्राह—यथेति । स्कन्धानां शाखानां तृप्तिं जनयतीति शेषः तेनाङ्कुरफलपुष्प-समृद्धिलक्षणपुरुषार्थो यथा भवति तथा सर्वेषामिन्द्रादीना-मात्मनः स्वस्यापि तृप्त्यानन्दानुभवलक्षणपुरुषार्थः स्यादिति भावः "मुखादिन्द्रश्चाग्निश्च" इत्यादि वाक्यं हिशब्देन दर्शयति तेने-न्द्रादीनां श्रीनारायणशाखिशाखात्वं दर्शितं भवति तथाहीति वत् यथाहीत्येकं वाक्यम् ॥ ४९ ॥

अनन्तायेत्यनेन मुखाम्बुजमिति परिच्छिन्नत्वशङ्कां निवारयति-दुर्वितर्क्येत्यादिना । न स्वरूपस्यानन्त्यमपितु तत्कर्मणामप्युच्यते निर्गुणायेत्यनेन शबलत्वं निवारयति गुणेशायेत्यनेन गुणैः प्रवर्त-मानस्यापि गुणसम्पर्कप्राप्तं दोषं निरुणद्धि सत्त्वस्थायेत्यनेन गुणैर्योगपद्यप्रतीतं निवारयति साम्प्रतमित्यनेन सत्त्वगुणयुक्तत्वं स्थितिकालं च दर्शयति यतस्त्वं सत्त्वगुणप्रवर्तकोऽधुना तस्मा-दस्मानापदः पालयेति चार्थः ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

किञ्च कर्माकरणेपि विष्णोराराधने सति सर्वाणि कर्मफलानि भवन्ति तदाराधनाभावे कृतान्यपि कर्माणि विफलान्येव भवन्ती-त्येतत्सदृष्टान्तमाह–यथाहीति ॥ ४९ ॥

अस्मदभीप्सितं पूरयिष्यसि नवेत्यन्तं न प्राप्तुम इत्याह–अन-न्ताय सर्वज्ञानामप्यस्माकं त्वयि सर्वज्ञं नास्त्येव सम्प्रतित्वत्कारि-ष्यमाणं कर्म अनुमानेनापि न विद्म इत्याह–दुर्वितर्क्येति । ननु,मत्कृ-पामेव हेतुकृत्य भक्तानामिन्द्रादीनामभीष्टसिद्धिरनुमीयताम् तत्र नेत्याह, निर्गुणाय कृपयैव गुणजन्यां सम्पत्तिमनर्थहेतुं न ददासि गुणेशायेति कृपयैव गुणजन्यां सम्पत्तिं ददास्यपीति तथैव तद्व्य-यानुमानसम्भवात् तर्ह्येवं संशये कथं स्तौषि, तत्राह सत्त्वस्थाय सत्त्वगुणस्य सम्प्रतिवृद्धिकाल इति सात्त्विकान् देवान् वर्द्ध-यितुमर्हसीति एषाञ्च शुद्धभक्तत्वभावात् विषयभोगविच्छेदङ्कर्तुंच नार्हसीति निश्चयोऽपि वर्त्तत इति भावः ॥ ५० ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
अष्टमे पञ्चमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यदाराधनेन सर्वेषां ब्रह्मादीनां स्वस्यांराधनकर्तुश्च प्रसन्नता स्यादित्याह—यथाहीति ॥ ४९ ॥

अनन्ताय त्रिविधपरिच्छेदशून्याय अत एव दुर्वितर्क्याणि आत्मा कर्माणि स्वभावचेष्टितानि यस्य तस्मै निर्गुणाय हेय-गुणरहिताय गुणेशाय कल्याणगुणनिधये सत्त्वस्थाय सत्व-प्रधानमनोनिलयाय तुभ्यं नमः ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
पञ्चमाऽध्यायार्थप्रकाशः ॥ ५ ॥

भाषा टीका ।

जैसे तरुके मूलके सींचने से उसके मोटे गुद्दे और छोटे डारे और पत्र पुष्पपर्यन्त सबही तृप्त होजाते है इसी प्रकार विष्णु का आराधन है ॥ ४९ ॥

अनन्त [देश के ओर छोर रहित] और जिन कर्मों में कोई तर्क न करसके ऐसे आश्चर्य कर्म वाले, और प्राकृत गुणों से रहित, तथा गुण त्रय के ईश और इस समय सत्त्व में स्थित होने वाले ऐसे आपको नस्कार हो ॥ ५० ॥

इति श्रीमद्भागवत अष्टम स्कन्ध में, पंचम अध्याय की
श्रीवृन्दावनस्थ भागवताचार्य कृत
भाषा टाकी समाप्त ॥ ८ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे पञ्चमोऽध्यायः ॥ ५ ॥

॥ षष्ठोऽध्यायः ॥

श्रीशुक उवाच ।

एवं स्तुतः सुरगणैर्भगवान्हरिरीश्वरः ।
तेषामाविरभूद्राजन् ! सहस्रार्कोदयद्युतिः ॥ १ ॥
तेनैव महसा सर्वे देवाः प्रतिहतेक्षणाः ।
नापश्यन्खं दिशः क्षोणीमात्मानं च कुतो विभुम् ॥ २ ॥
विरिञ्चो भगवान्दृष्ट्वा सह शर्वेण तां तनुम् ।
स्वच्छां मरकतश्यामां कञ्जगर्भारुणेक्षणाम् ॥ ३ ॥
तप्तहेमावदातेन लसत्कौशेयवाससा ।
प्रसन्नचारुसर्वाङ्गीं सुमुखीं सुन्दरभ्रुवम् ॥ ४ ॥
महामणिकिरीटेन केयूराभ्यां च भूषिताम् ।
कर्णाभरणनिर्भातकपोलश्रीमुखाम्बुजाम् ॥ ५ ॥
काञ्चीकलापवलयहारनूपुरशोभिताम् ।
कौस्तुभाभरणां लक्ष्मीं बिभ्रतीं वनमालिनीम् ॥ ६ ॥
सुदर्शनादिभिः स्वास्त्रैर्मूर्तिमद्भिरुपासिताम् ।
तुष्टाव देवप्रवरः सशर्वः पुरुषं परम् ।
सर्वामरगणैः साकं सर्वाङ्गैरवनिङ्गतैः ॥ ७ ॥

ब्रह्मोवाच ।

अजातजन्मस्थितिसंयमायागुणाय निर्वाणसुखार्णवाय ।
अणोरणिम्नेऽपरिगण्यधाम्ने महानुभावाय नमो नमस्ते ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

षष्ठे पुनः स्तुतिर्विष्णावाविर्भूते सुरैः कृता ।
तन्मन्त्रेणासुरैः साकममृतार्थे महोद्यमः ॥ ० ॥

सहस्रार्काणामुदये द्युतिरिव द्युतिर्यस्य ॥ १ ॥

महसा तेजसा प्रतिहतानीक्षणानि चक्षूंषि येषाम् ॥ २ ॥

तामाविर्भूतां तनुं विरिञ्चो दृष्ट्वा तुष्टावेति पञ्चमेनान्वयः कञ्जगर्भवदरुणे ईक्षणे यस्याः ॥ ३ ॥

तप्तहेमवदवदातेन पीतेन लसता कौशेयवाससा युक्ताम् प्रसन्नानि चारूणि सर्वावयवाङ्गानि यस्याः शोभनं मुखं यस्याः सुन्दरे भ्रुवौ यस्याः ॥ ४ ॥

महान्तो मणयो यस्मिंस्तेन किरीटेन कर्णाभरणे कुण्डले ताभ्यां निर्भातौ यौ कपोलौ ताभ्यां श्रीर्मुखाम्बुजे यस्याः ॥ ५ ॥

कौस्तुभ आभरणं कण्ठे यस्या लक्ष्मीं वक्षसि बिभ्रतीम् ॥ ६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

देवप्रवरो ब्रह्मा सर्वाङ्गैरवनिङ्गतैः साष्टाङ्गं प्रणतैः ॥ ७ ॥

अनाविराविरासे यं नाभूताऽभूरिति ब्रुवन् ।
ब्रह्माऽभिप्रैति नित्यत्वविभुत्वे भगवत्तनोः ॥ ० ॥

श्रीमूर्तेरयमाविर्भाव एव नत्वस्मदादिवज्जन्मादि तवास्तीत्याह—न जाता जन्मादयो यस्य कुतः अगुणाय अतो निर्वाणसुखस्यार्णवाय अपारमोक्षसुखरूपायेत्यर्थः । तथाप्यणोरप्यणिम्नेऽतिसूक्ष्माय दुर्ज्ञेयत्वात् वस्तुतस्त्वपरिगणयमियत्तातीतं धाम मूर्तिर्यस्य तस्मै नचैतदसम्भावितं यतो महानचिन्त्योऽनुभावो यस्य तस्मै ॥ ८ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

एवं संस्तुतो भगवानाविर्बभूवेत्याह मुनिः—एवमिति । हे राजन् इत्थं संस्तुतः सम्यक् स्तुतः हरिरीश्वरो भगवान् सहस्राणामर्काणां सूर्याणामुदये द्युतिर्यस्य सः अभूतोपमेयं तेषां ब्रह्मादीनां पुर इति शेषः आविर्बभूव प्रकटोऽभूत् ॥ १ ॥

तेन महसा तेजसा प्रतिहतानीक्षणानि येषां ते सर्वे देवाः खादीनेव नापश्यन् कुतोऽपि विभुमाविर्भूतं पश्येयुरित्यर्थः ॥२॥

भगवान्विरिञ्चो ब्रह्मा शर्वेण रुद्रेण सह तां भगवतस्तनुं दृष्ट्वा तुष्टावेति पञ्चमेनान्वयः तनुं विशिनष्टि, निर्मलामिन्द्रनीलवच्छयामां कञ्जगर्भवदरुणे ईक्षणे यस्यास्ताम् ॥ ३ ॥

तप्तहेमवदवदातेन विशुद्धेन पिशङ्गेन लसता कौशेयवाससा युक्तामिति शेषः । प्रसन्नानि चारूणि सुन्दराणि च सर्वाणि अङ्गानि यस्याः सुन्दरं मुखं यस्याः सुन्दरे भ्रुवौ यस्याम् ॥ ४ ॥

महान्तो मणयो यस्मिन्तेन किरीटेन केयूराभ्याञ्च अलङ्कृतां कर्णाभरणे कुण्डले ताभ्यां नितरां भातौ कपोलौ ताभ्यां श्रीः शोभा मुखाम्बुजे यस्यास्ताम् ॥ ५ ॥

काञ्चीकलापादिभिः शोभितां कौस्तुभ आभरणं कण्ठे यस्यास्तां लक्ष्मीं वक्षसि बिभ्रतीं वनमाला अस्यामस्तीति तथा ताम् ॥ ६ ॥

मूर्तिमद्भिः पुरुषाकृतिभिः स्वकीयैः सर्वैः सुदर्शनादिभिरस्त्रैरुपासितां सेव्यमानां सशर्वः रुद्रेण सहितः देवप्रवरो ब्रह्मा सर्वाङ्गैरवनीं भूमिङ्गतैः प्राप्तैर्युक्तैर्देवैः साष्टाङ्गप्रणतैर्देवैस्सह परं पुरुषं तुष्टाव ॥ ७ ॥

तावत्स्तोतुं प्रवृत्तः कर्माधीनजन्मादिरहितं निरस्तनिखिलदोषं ज्ञानानन्दादिकल्याणगुणोदधिं सर्वान्तरात्मानमपरिच्छिन्नस्वरूपं महाप्रभावं नमस्करोति—अजातेति । न जाता जन्मादयः कर्मायत्ता यस्य तत्र हेतुरगुणाय सत्त्वादिप्राकृतगुणावश्यत्वप्रतिभटाय निर्वाणसुखार्णवाय निर्दुःखानन्दमहोदधये अणोर्जीवादप्यणिम्ने अन्तरात्मतया तदन्तःप्रवेशयोग्याय अपरिच्छेद्यस्वरूपाय महाप्रभवाय तुभ्यं नमोनमः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ज्ञानवत् ज्ञानपूर्वकं यथा तत्त्ववस्तुभिरपि हरेः प्रीतिजननीयेतमर्थं प्रपञ्चयत्यस्मिन्नध्याये, तत्रादौ हरेराविर्भावप्रकारं वक्ति—एवमित्यादिना । ब्रह्माणं पुरस्कृत्येति शेषः ॥ १ ॥

आत्मानं स्वात् जातावेकचनं अग्रतः स्थितम् ॥ २—३ ॥

अवदातेन पीतेन "अवदातोऽरुणे पीते श्वेते श्यामे च कथ्यते" इति वाससोपलक्षितम् ॥ ४ ॥

कपोलश्रिया युक्तमुखाम्बुजम् ॥ ५ ॥

कलापो भूषणं लक्ष्म लाञ्छनं श्रीवत्सनाम ॥ ६ ॥

देवप्रवरः ब्रह्मा ॥ ७ ॥

अजाय विष्णवे "अजाविष्णुहरच्छागाः"—इत्यतोऽजशब्दस्योभयत्र वृत्तावप्यत्र विष्णुरेवोच्यते सर्वेति सर्वकारणत्वेन निर्देशात्ततो परत्वप्रतीतेः जन्म स्थितिसंयमाः जन्मादीनां तदेकाधीनत्वात्तथोक्तिर्गुणाय "विज्ञानमानन्दं ब्रह्म" इति श्रुतेरभिप्रायाद्गुणत्वोक्तिः निर्वाणसुखार्णवाय शरीराभिमानाद्युत्थसुखसमुद्राय अपरिगणयमहिम्ने ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १ ॥ २ ॥

विरिञ्च इति पञ्चकम् ॥ ३—७ ॥

अजातेति स्थितिरत्र जन्मानन्तरास्थित्वलक्षणैव न नित्यतस्याविकारित्वाभावात् निर्वाणस्तु यस्य ब्रह्मानन्दस्यार्णवायेति भगवत्त्वेनाविर्भावस्य परमवैशिष्ट्यं दर्शितम् ॥ ८—९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

आविर्भूते हरौ षष्ठे ब्रह्मा तुष्टाव तं पुनः ।
तन्मन्त्रणोनामृतार्थं बलिं देवाः प्रपेदिरे ॥

॥ १—२ ॥

विरिञ्चः तुष्टावेति पञ्चमेनान्वयः ॥ ३ ॥

तप्तहेमवदवदातेन पीतेन ॥ ४ ॥

कर्णाभरणेन निर्भातौ कपोलौ यत्र तादृशं श्रीमुखमेवाम्बुजं यत्र ताम् ॥ ५—७ ॥

न जातो जन्मस्थित्योः संयमः उपरमो यस्येति कृष्णरामाद्यवताराणां जन्मस्थित्योर्नित्यत्वं स्थितिरकर्मका जातस्य चेतनस्य न सम्भवतीति कर्मणोऽपि नित्यत्वम् अगुणाय प्राकृतगुणरहिताय हेयैर्गुणादिभिरिति समस्तकल्याणगुणात्मको हीति वैष्णवोक्तेरप्राकृतषाड्गुण्यवत्वेन भगवत्त्वमुक्तं निर्वाणसुखार्णवायेति ब्रह्मत्वम् अणोरप्यणिम्ने अतिसूक्ष्मायेति परमात्मत्वम्

रूपं तवैतत्पुरुषर्षभेज्यं श्रेयोऽर्थिभिर्वैदिकतान्त्रिकेण ।
योगेन धातः सह नस्त्रिलोकान्पश्याम्यमुष्मिन्नु ह विश्वमूर्तौ ॥ ९ ॥
त्वय्यग्र आसीत्त्वयि मध्य आसीत्त्वय्यन्त आसीदिदमात्मतन्त्रे ।
त्वमादिरन्तो जगतोऽस्य मध्यं घटस्य मृत्स्नेव परः परस्मात् ॥ १० ॥
त्वं माययाऽऽत्माश्रयया स्वयेदं निर्माय विश्वं तदनुप्रविष्टः ।
पश्यन्ति युक्ता मनसा मनीषिणो गुण(१)व्यवाये ऽप्यगुणं विपश्चितः ॥ ११ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

अपरिगणयमियतातीतं धाम मूर्तिर्यस्य तस्मै इति तन्मूर्तेः परिच्छिन्नत्वेऽप्यचिन्त्यशक्त्या विभुत्वं चोक्तम् ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आविर्भूतेन पुनः संस्तुतेन भगवता समुद्रमथने देवाः अमृतलाभाय प्रवर्तिता इति वर्णयति–एवं स्तुत इति पद्येन । सहस्राणामुदये द्युतिरिव द्युतिस्तेजो यस्य स तथा ॥ १ ॥

तेनैव तेजसा महसाऽतिनिबिडेन ॥ २ ॥

शर्वेण शिवेन सह विरिञ्चस्तां तनुं दृष्ट्वा तुष्टावेति पञ्चमेनान्वयः । कञ्जगर्भवदरुणे ईक्षणे यस्यास्ताम ॥ ३ ॥

तप्तहेमवद्वदातेन पीतेन लसता कौशेयवाससा भूषितां शोभनं मुखं यस्यास्तां सुन्दरं भ्रुवौ यस्यास्ताम् ॥ ४ ॥

महान्तो मणयो यत्र तेन किरीटेन केयूराभ्याञ्च भूषितां कर्णाभरणाभ्यां कुण्डलाभ्यां निर्भातौ कपोलौ यस्मिन् तथाभूतं श्रीमुखमेवाम्बुजं यस्यास्ताम् ॥ ५ ॥

काञ्चीकलापादिभिः शोभिताम् कौस्तुभ आभरणं कण्ठे यस्यास्ताम् लक्ष्मीं वक्षसि बिभ्रतीम् वनमाला अस्या अस्तीति तथा ताम् ॥ ६ ॥ ७ ॥

न जाता जन्मादयो यस्य तस्मै स्वेच्छया नित्यविग्रहेणाविर्भूतत्वात् अगुणाय हेयगुणवर्जिताय निर्वाणसुखार्णवाय नित्यानन्दमहोदधये "अणुर्ह्येष आत्मा" इति श्रुतिप्रतिपादिताज्जीवादप्यणिम्ने तदन्तःप्रविष्टात् "अन्तःप्रविष्टः शास्ता जनानाम्" इति श्रुतेः । अपरिगणयधाम्ने इयत्ताशून्यस्वरूपाय महान्निरतिशयः अनुभावो यस्य तस्मै नमो नमः ॥ ८ ॥

भाषा टीका।

श्रीरुक्मिणीशो जयति ॥

श्रीशुक उवाच।

श्रीशुकदेवजी बोले, कि—हेराजन् ! सुरगणों ने जब इस प्रकार स्तुतिकरी, तब भगवान् श्रीहरि उन लोगों को हजारों सूर्योदय की कान्ति को धारण कर प्रकट हुए ॥ १ ॥

उस समय उसी तेज के मारे ताडित हुए नेत्र जिनके ऐसे संपूर्ण देव लोग, आकाश, दिशायें, पृथिवी, और अपने आपको भी नहीं देख सके फिर गोविन्द को कहां से देखें ॥२॥

श्रीमहादेवजी सहित भगवान् ब्रह्माजी ने स्वच्छ मरकत मणि के सदृश श्याम और कमल के गर्भ के सदृश लाल नेत्र जिस्में ऐसे आपकी तनु [मूर्त्ति] को देखी ॥ ३ ॥

फिर वह मूर्त्ति कैसी है कि—तप्त सुवर्ण के नांई चटकील पीतांबर को पहने हुये, और प्रसन्न भृकुटिवाली ॥ ४ ॥

और बडे २ मणियों से जटित किरीट और बाजूबन्दों से विभूषित, और गोल कपोलों पर जो मकराकृति कुण्डल झोका खारहे हैं तिन से है मुखकी शोभा जिस्में ॥ ५ ॥

और कमर में कौंधनी हाथों में कंकण गले में हार चरणों में नूपुर तिन से शोभित होरही है, और वक्षस्थल में कौस्तुभमणि तथा लक्ष्मी को धारण किये, और वनमाला को भी धारण किये हुए ॥ ६ ॥

और अपने असाधारण मूर्तिमान् सुदर्शनादिशस्त्रों से उपासित ऐसी आप की श्रीमूर्त्ति को देखकर, सब देवताओं ने पृथिवी पर पडकर सर्वांगों से साष्टाङ्गकर महादेवजी सहित देव प्रवर श्रीब्रह्माजी परमपुरुष श्रीनारायण की स्तुति करने लगे ॥७॥

ब्रह्मोवाच ॥

ब्रह्माजी बोले, कि—जिनका जन्म स्थिति और प्रलय कभी न भया ऐसे, और माया के गुणों से रहित और मोक्षानंद के समुद्र। और अणु से भी अणु, अपार तेज वाले, तथा महा प्रभाव वाले ऐसे श्रीहरि को नमो नमः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

तन्मूर्तेः सनातनत्वमपरिमेयत्वञ्चोपपादयति–रूपमिति । हे पुरुषर्षभ हे धातः एतत्तव रूपं वैदिकेन तान्त्रिकेण च योगेनोपायेन श्रेयोर्थिभिः सदेज्यं पूज्यमतो नेदमिदानीमपूर्वज्ञातमिति भावः। ननु, यूयं देवाः पूज्यत्वेन प्रसिद्धाः सत्यम्; सर्वेऽप्यत्रैवान्तर्भूता इत्याह–उ अहो ह स्फुटम् अमुष्मिन् त्वयि नोऽस्मान् त्रीन् लोकांश्च सह पश्यामि तत्र हेतुः विश्वं मूर्तौ यस्य अतस्तवैतद्रूपं परिच्छिन्नमपि न भवतीति भावः ॥ ९ ॥

(१) व्यपाये इति वीर०।

यथाऽग्निमेधस्यमृतं च गोषु भुव्यन्नमम्बू[1]द्यमने च वृत्तिम् ।
योगैर्मनुष्या अधियन्ति हि त्वां गुणेषु बुद्ध्या कवयो [2]वदन्ति ॥ १२ ॥
तं त्वां वयं नाथ ! समुज्जिहानं सरोजनाभातिचिरेप्सितार्थम् ।
दृष्ट्वा गता निर्वृतिमद्य सर्वे गजा दवार्ता इव गाङ्गमम्भः ॥ १३ ॥
स त्वं विधत्स्वाखिललोकपाला वयं यदर्थास्तव पादमूलम् ।
समागतास्ते बहिरन्तरात्मन् ! किं वान्यविज्ञाप्यमशेषसाक्षिणः ॥ १४ ॥
अहं गिरित्रश्च सुरादयो ये दक्षादयो ऽग्नेरिव केतवस्ते ।
किं वा विदामेश पृथग्विभाविता विधत्स्व शं नो द्विजदेवमन्त्रम् ॥ १५ ॥

श्रीशुक उवाच ।

एवं विरिञ्चादिभिरीडितस्तद्विज्ञाय तेषां हृदयं तथैव ।
जगाद जीमूतगभीरया गिरा बद्धाञ्जलीन् संवृतसर्वकारकान् ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विश्वमूर्तित्वमेवाऽऽह—त्वयीति । घटस्य मृत्तिका यथा आदिरन्तश्च मध्यश्च तथात्वमस्य जगतः, तत्र हेतुः परस्मादप्रधानादपि परः ॥ १० ॥

मृत्तिकादृष्टान्तेन परिणामं प्राप्तं वारयति—त्वमिति । स्वया स्वाधीनया अत एव गुणानां व्यवाये परिणामे ऽप्यगुणमेव त्वां युक्ताः पश्यन्ति मनीषिणो विवेकिनः विपश्चितः शास्त्रज्ञाः ॥ ११ ॥

एतदेव सदृष्टान्तमाह—यथाऽग्निं काष्ठे मथनेन अमृतमाज्यं गोषु दोहनादिना भुव्यन्नं व्रीह्यादिकर्षणादिना अम्बु च खननेन उद्यमेन पुरुषकारेण वाणिज्यादिना वृत्तिं जीविकाम् यद्वा अम्बु उद्यमने घटीयन्त्रादिनोद्धरणे योगैरुपायैर्मनुष्या अधियन्ति प्राप्नुवन्ति तथा कवयस्त्वां बुद्ध्या गुणेष्वधियन्ति वदन्ति च ॥ १२ ॥

हे नाथ ! सरोजनाभ ! अतिचिरादीप्सितमर्थं तं योगैकप्राप्यं त्वां सम्यगुज्जिहानमाविर्भवन्तं प्रत्यक्षतो दृष्ट्वाऽद्य वयं निर्वृतिं गताः दवार्ता दावाग्निपीडिताः ॥ १३ ॥

यद्विधेयं तत्कथयेति चेत्तत्राऽऽह—हे अन्तरात्मन् ! अशेषसाक्षिणस्ते बहिः किं वाऽस्मैर्विज्ञाप्यमस्ति ॥ १४ ॥

यूयमेव किञ्चित्कुरुतेति चेत्तत्राऽऽह—अहमिति । अग्नेः केतवो विस्फुलिङ्गा इव ते त्वत्तो वयं पृथग्विभाविताः सन्त आत्मनः शं श्रेयः किं वा विद्मः अतस्त्वमेव द्विजानां देवानां च मन्त्रं विधत्स्व इदं कुरुतेत्युपादिशेत्यर्थः ॥ १५ ॥

इदयं मन्त्र उपदेष्टव्य इत्यभिप्रेतं यथा तथैव विज्ञाय जगाद संवृतानि नियमितानि सर्वाणि कारकाणीन्द्रियाणि यैस्तान् ॥ १६ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

अजातजन्मस्थितिसंयमायेत्यनेन प्रकृतस्य दर्शितरूपस्यकर्माधीनत्वं सूचितं तदेव रूपं विशिषन्स्तौति—रूपमिति । हे पुरुषर्षभ ! तवैतद्रूपं श्रेयोऽर्थिभिः कर्तृभिः वैदिकतान्त्रिकेण पञ्चरात्रादितन्त्राङ्गयामवबोधितेन योगेन साधनेन इज्यमाराधनीयं तस्मिन् रूपे विश्वं साक्षात्कृत्याह—हे धातः ! अमुष्मिन्नुह अमुष्मिन् हि रूपे सह त्रिलोकान् त्रिलोकैः सह नोऽस्मान्पश्यामि आर्षात्सहयोगेऽपि तृतीयाया अभावः त्रिलोकानित्यत्र कर्मधारयः दर्शनहेतुं वदन् रूपं विशिनष्टि, विश्वमूर्त्तौ विश्वाश्रयमूर्त्तौ, विश्वमूर्त्ते इति पाठान्तरं तदा हे विश्वमूर्ते इति सम्बोधनम् ॥ ९ ॥

विश्वमूर्त्तित्वमेव प्रपञ्चयति—त्वयीति । इदं विश्वमग्रे मध्ये अन्ते च त्वय्येवाश्रयभूतेऽन्तरात्मन्यासीदविनाभूतमासीत् अतएवाद्यावस्थं विश्वं त्वमेव यद्यद्वस्थं यदपृथक्सिद्धन्तत्ततो भिन्नमिति भावः । अनेन जगदुपादानत्वमुक्तम् उपादानोपादेययोरभेदप्रसिद्धं दृष्टान्तमाह, घटस्योपादेयस्य मृदुपादानभूता यथा न तस्माद्भिन्ना तथेत्यर्थः । उपादानत्वप्रयुक्तं विकारित्वं वारयति—परः पस्मादिति । परस्मात्स्वरूपादन्यथाभाववदचेतनात् यः परो विलक्षणो जीवः तस्मादपि स्वभावान्यथाभाववतः परो विलक्षणः स्वभावतोऽपि विकाररहित इत्यर्थः । उपादानत्वेऽपि तस्य सद्वारकत्वान्निर्विकारत्वमिति भावः ॥ १० ॥

एवं विश्वोपादानत्वात्त्वं विश्वमूर्तिरित्युक्तम् अथ विश्वस्यान्तरात्मत्वादपि त्वं विश्वमूर्तिरिति वक्तुं विश्वस्य स्रष्टृत्वं तदन्तरात्मतयानुप्रवेशञ्चाह—त्वमिति । आत्माश्रयया स्वापृथक्सिद्धया स्वया स्वनियाम्यया मायया इदं जगन्निर्माय सृष्ट्वा तदनुप्रविष्टः "तत्सृष्ट्वा तदेवानुप्राविशत्" इति श्रुत्यर्थोऽत्रानुसन्धेयः अनुप्रविष्टमप्यनुप्रवेष्टव्यगतदोषास्पृष्टं "सत्यञ्चानृतं च सत्यमभवत्" इतिश्रुत्यर्थयाथात्म्यविदः पश्यन्तीत्याह पश्यन्तीति गुणव्यपायेऽपि गुणानां व्यपायोऽन्यथा भावः

(१) उद्यमनेन । (२) धियन्ति" इति वीर० ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

परिणाम इति यावत् गुणानां परिणामेऽपि त्वां तत्राऽनुप्रविष्टं त्वामगुणं चेतनाचेतनगतहेयगुणरहितं विपश्चितः "सत्यञ्चानृतं च सत्यमभवत्" इत्यादिशास्त्रार्थयाथात्म्यविदः मनीषिणः तत्प्रतिपाद्यार्थयाथात्म्योपासनपराः युक्ताः सुसमाहितचित्ताः मनसा योगपरिशुद्धेन मनसा साधनेन पश्यन्ति साक्षात्कुर्वन्ति "सत्यञ्च" इत्यादिश्रुतेरयमर्थः परमात्मनश्चिदचित्सङ्घातरूपजगदाकारपरिणामे च परमात्मशरीरभूतचिदंशगताः सर्वएवापुरुषार्थाः तथा अचिदंशगताः सर्वे विकाराः परमात्मनि कार्यत्वं तदवस्थयोस्तयोर्नियन्तृत्वेनात्मत्वं परमात्मा च तयोः स्वशरीरभूतयोर्नियन्तृतयाऽऽत्मभूतः तद्गतापुरुषार्थैर्विकारैश्च न स्पृश्यते अपरिच्छिन्नज्ञानानन्दमयः सर्वदैकरूपएव जगत्परिवर्तनलीलयावतिष्ठते विचित्रचिदचिद्रूपेण विक्रियमाणमपि ब्रह्म सत्यमेवाभवत् निरस्तनिखिलदोषगन्धमपरिच्छिन्नज्ञानानन्दमेकरूपमेवाभवदित्यर्थः ॥ ११ ॥

मनसा साधनेन पश्यन्तीत्यत्र दृष्टान्तान्वदन्नुक्तमेवार्थमुपपादयति-यथेति। काष्ठादिष्वग्न्यादीन्यथा योगैरुपायैः तत्र यथाग्निमेधासि काष्ठे मथनेनोपायेन यथाचामृतं क्षीरं गोषु दोहनेन यथा भुव्यन्नं कृष्याद्युपायेन यथा वा दृतिं जीवनभूतमम्बु अब्रमुत्खनननेनोपायेन पश्यन्ति उद्यमनेति पाठे स एवार्थः तथा विपश्चितो मनीषिणो मनुष्याः बुद्ध्या योगविशुद्धया गुणेषु गुणपरिणामात्मकेषु सचेतनेषु पदार्थेषु त्वामाविक्रियमेकरूपमधियन्ति "इक् स्मरणे" इति धातुः विदन्ति साक्षात्कुर्वन्तीत्यर्थः ॥ १२ ॥

तद्दर्शनेनात्मनो नितरां सुखितत्वं वदन्मत्प्रयोजनं कुर्विति प्रार्थयते-तामिति द्वाभ्याम्। हे नाथ! हे सरोजनाभ! अतिचिराद्दीप्सितमर्थं पुरुषार्थस्वरूपम् उज्जीवनाविर्भवन्तं तमुक्तविधं त्वां दृष्ट्वा सर्वे वयं निर्वृतिमानन्दं गताः प्राप्ताः यथा दवार्त्ताः दावाग्निपीडिताः गजाः गाङ्गं जलं प्राप्य निर्वृतिं प्राप्नुवन्ति ॥ १३ ॥

तथा स त्वम् उक्तविधः त्वं हे अखिललोकपाल! यदर्थाः यत्प्रयोजनाः यत्कामायमाना वयं तवपादमूलं समागताः शरणं गताः तत्प्रयोजनं विधत्स्व कुरु यद्विधेयं तत्कथयेत्यत्राह-हे वहिरन्तरात्मन् वहिरन्तश्च व्यापिन् अशेषसाक्षिणः सर्वं युगपत्साक्षात्कुर्वन्तः तव सर्वज्ञस्य विज्ञाप्यं किंवास्ति न किमपीत्यर्थः ॥ १४ ॥

तर्हि यूयमेव किञ्चित्कुरुतेत्यत्राह-अहमिति। अहं ब्रह्मा गिरित्रो रुद्रः ये च सुरादयो दक्षादयश्च प्रजापतयश्च सर्वे वयमग्नेः केतवः विस्फुलिङ्गा इव ते त्वत्तः पृथग्भाविताः सन्तः आत्मनः स्वानां शं सुखं किं वा विद्मः न किमप्यात्मसुखसाधनं न विद्म इत्यर्थः अतस्त्वमेव हे ईश! द्विजानां देवानां च मन्त्रं सुखकारिणीमालोचनां विधत्स्व इदं कुरुतेत्युपायमुपदिशेत्यर्थः ॥ १५ ॥

एवं स्तुतो विज्ञापितश्च तानाह भगवानित्याह मुनिः—एवमित्थं ब्रह्मादिभिरीडितः स्तुतो भगवांस्तेषां विरिञ्चादीनां तद्धृदयमभिप्रायं यथावद्विज्ञाय मेघनिर्ह्रादवद्गभीरया गिरा बद्धा अञ्जलयो यैः संवृतानि नियमितानि कारकाणीन्द्रियाणि यैस्तान्विरञ्चादीन् जगाद ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हे पुरुषर्षभ! मोक्षादिपुरुषार्थाकांक्षिभिः वैदिकैस्तान्त्रिकैश्च यदे-

तत्तव रूपं हे धातः! अमुष्मिन् रूपे योगेन सह त्रिलोकान् पश्यामि हे विश्वमूर्ते! त्वं नः शरणं भवेत्यन्वयः। भुवीति पाठे आधार इत्यर्थः ॥ ९ ॥

(१)इव यथा घटस्यादिरन्तो मध्यं च मृत्स्ना प्रशस्ता मृदेवोत्तमकारणं सलिलाद्यवान्तरं तथा त्वमप्यस्य जगतः आद्यादिः परस्मात्परः उत्तमहेतुः अत्र मृद्वदुपादानकारणं न ब्रह्म किं तु तदधीनसत्ताकत्वाद्दृष्टान्तोपादानमित्याशयेनाह-त्वमेवेति। च शब्देन ब्रह्मोपादानकत्वे सर्वस्य चेतनत्वापत्तिप्रसङ्गं सूचयति, अयमर्थोऽत्र विवक्षितइति कुतोऽवगतामिति तत्राह-अशेषेति ॥ १० ॥

ननु, सृष्टिसंहृतिकर्तृत्वात्तदाद्यन्तत्वमस्तु मध्यत्वं कथमिति तत्राह-त्वमिति। आत्मैव आश्रयो यस्याः सा तथा तयाऽतएव स्वया स्वकीयत्वेनाभिमतया मायया प्रकृत्या इदं विश्वं निर्माय त्वं तदनुप्रविष्ट इति यस्मात्त्वां मध्यं वदन्तीति शेषः "तत्सृष्ट्वा तदेवानुप्राविशत्" इति श्रुतिः। अत्र किं मानमिति तत्राह—पश्यन्तीति। मनीषिणो बुद्धिमन्तो मनसा मननलक्षणविचारेण युक्ता एवं पश्यन्तीति यत्तद्दर्शनं मानमित्यन्वयः। नन्वेवं तर्हि गुणसम्पर्किणो गुणदोषलेपः स्यात् न स्यादत्रापीदमेव मानमित्याह-गुणेति। विपश्चितो गुणव्यवाये गुणकार्यसमूहे स्थितिमप्यगुणं गुणनिमित्तदोषरहितं त्वां पश्यन्तीति शेषः। इतोपि ब्रह्मोपादानकारणं न। किन्तु निमित्तमेवेत्याशयेनाह-त्वमिति। माययेदं विश्वं निर्माय तदनुप्रविष्ट इति मनसा युक्ता मनीषिणो गुणकार्ये जगति विषये अगुणं गुणव्यतिरिक्तं कारणं निमित्तमेव त्वां पश्यन्तीत्यन्वयः विपश्चितः पण्डिताः दर्शनपटव इत्यर्थः अनेन विद्वद्दर्शनमत्र प्रमाणमिति दर्शितम् ॥ ११ ॥

गुणकार्ये स्थितं गुणदोषरहितं पश्यन्तीत्युक्तं कथं तत्र पश्यन्तीति तत्राह-यथेति। यथा एधआदिष्वग्न्यादीनधियन्ति अधिगच्छन्ति तथा कवयो बुद्ध्या गुणेषु त्वामवयन्ति जानन्तीत्यन्वयः। उर्व्या उत्खनने सति अम्बु यथा तथाशब्दः समुच्चये अमृतं क्षीरं घृतं वा भेदस्य दोषलेपराहित्यस्य च ज्ञापनायाग्निनिदर्शनं सर्वस्मात्सारः स्वभक्तमुक्तिद इति ज्ञापनायामृतदृष्टान्तः उपजीव्यत्वज्ञापनायान्नं यथेति भूयस्त्वतापहरत्वदर्शनायाम्बु यथेति ॥ १२ ॥

यस्त्वं सर्वोत्तमत्वोपजीव्यत्वादिगुणसपन्नो वयं तं त्वां दृष्ट्वाद्य निर्वृतिं गता इत्यन्वयः। अतिचिरेण कालेन वाञ्छितार्थं समुज्जिहानं विचार्यमाणे सति सर्वोत्तमं भगवन्तम् उन्नतीकुर्वाणं दवार्त्ता वनवन्हिक्लिष्टाः गाङ्गं गङ्गासम्बन्धि ॥ १३ ॥

योऽर्थो येषां ते यदर्थाः यत्प्रयोजना अखिललोकपाला वयं तव पादमूलं समागताः स त्वं तमर्थमस्मभ्यं विधत्स्वेत्यन्वयः। तर्हि सोऽर्थः क इति तत्राह, ते वहिरिति. हे आत्मन् स्वात्मन्! बहिरन्तः साक्षिणः ते तवाद्य विज्ञाप्यं किं वास्ति न किमपीत्यन्वयः। अतोऽस्मदभीष्टं भवतः सिद्धमित्यर्थः ॥ १४ ॥

इतोऽप्यस्माभिर्विज्ञाप्यं नास्ति यतो वयं तव किङ्करा इति भावेनाह—अहमिति। यथा केतवः ज्वालाः अग्नेरुत्पद्यन्ते नभे-

(१) त्वय्यग्र आसीदिदमात्मतन्त्रे त्वमादिरन्तो जगतोऽस्यमध्यम्। घटस्य मृत्स्नेव परः परस्मात्त्वमेव चाशेषमशेषनाम्नः॥ इति मूलपाठः।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

…श्रिताः एवं मदादयः सर्वे त्वदुत्पन्नत्वात्त्वत्किङ्करा इत्यर्थः किङ्करत्वं विशदयति, किम्वेति. ईशसृष्ट्यादिकर्तृत्वेन पृथक्पृथग्विभाविताः प्रख्याता वयं किं वा विधेम कान्तवाञ्छां कुर्मः हे द्विजदेवमित्र ! नोऽस्माकं तवाज्ञाकरणां शं विधत्स्व इदं कुरुध्वमित्याज्ञापय गिरित्रः सदाशिवः ॥ १५ ॥

हृदयमभिप्रायं जीमूतो मेघः संवृतसर्वकामान् अप्रकाशितस्वाभिप्रायान् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

परस्माद्ब्रह्मणोऽपि परः ब्रह्मानुभवोत्तरभाव्यनुभवः तस्मादुत्कृष्टाविर्भावश्च । उक्तञ्च चतुर्थे "यः परं रंहसः साक्षात्" इति । विष्णुपुराणेच "स ब्रह्मपारः परपारभूतः" इति । "अक्षरात् परतः परः" इति श्रुतेः ॥ १० ॥

ननु, मृत्तिकादृष्टान्तेन परः परस्मादिति न सङ्गच्छते तत्राह—त्वं माययेति । स्वया स्वस्य वहिरङ्गांशरूपया आत्माश्रयया स्वाधीनया मायया प्रकृत्याख्ययोपादानरूपया तदुक्तं श्रीभगवता "पृथिवी वायुराकाशः" इत्यादिना । तदनुप्रविष्ट इति मूर्तेः परिच्छिन्नापरिच्छिन्नतयाचिन्त्यशक्तिमयस्थितित्वादिति भावः ॥ ११—१५ ॥

नदीडिनं विज्ञाय अवधाय यथा तेषां हृदयं तथा जगाद ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ब्रह्माभिप्रैति–नित्यत्वविभुत्वे भगवत्तनोरितिकारिका तन्मूर्त्तेः सनातनत्वमपरिमेयत्वं चोपपादयति–रूपमित्यत्रावतारिका च श्रीस्वामिपादानामत्र द्रष्टया हे पुरुषर्षभ ! एवं तवेदं रूपं वैदिकेन तान्त्रिकेण च योगेन उपायेन इज्यं सदापूज्यमतो नेदानीन्तनमिति भावः ननु, यूयं देवाः पूज्यत्वेन प्रसिद्धाः सत्यं सर्वेऽप्यत्रैवान्तर्भूता इत्याह, ऊ अहो ह स्फुटं अमुष्मिन्त्वयि नोऽस्मांस्त्रिलोकांश्च सह पश्यामि तत्र हेतुः विश्वं मूर्त्तौ यस्य अनन्तत्वेनरूपं परिच्छिन्नमप्यपरिच्छिन्नमेवेति भावः ॥ ९ ॥

विश्वमूर्त्तित्वमेवाह--त्वयीति । घटस्य मृत्तिका यथा आदिरन्तश्च मध्यं च तथा त्वमस्य जगतः मृत्तिकादृष्टान्तेन प्रसक्तं परिणामं वारयति परस्मात् प्रधानादपि परः प्रधानमेव विश्वरूपेण परिणमति ननु त्वामिति भावः ॥ १० ॥

ननु, तर्हि प्रधानस्यैव विश्वहेतुत्वमायातं ननु ममेति तत्राह--त्वमिति । मायया स्वया स्वशक्त्येति तव ततः परत्वेऽपि तस्यास्त्वच्छक्तित्वात्त्वमेवेदं विश्वं निर्माय तत्र विश्वस्मिन्ननुप्रविष्टो वर्त्तसे मायया कीदृश्या आत्मा त्वमेवाश्रयो यस्यास्तया त्वदधीनयेत्यर्थः । अतो गुणव्यवाये गुणपरिणामभूते अत्र विश्वस्मिन्नेव प्रविष्टमप्यगुणं गुणसङ्गरहितं त्वां मनसा युक्ताः समनस्का जनाः पश्यन्ति ये च पश्यन्ति त एव मनीषिणो विवेकिनः त एव विपश्चितः शास्त्रतात्पर्यविज्ञाः ये न पश्यन्ति त एवाविपश्चितोऽमनीषिणोऽमनसोंऽधाश्चेति ॥ ११ ॥

कथं मां पश्यन्तीत्यतस्तदुपायं सदृष्टान्तमाह—यथेति । मनुष्या गुणेषु गुणमये जगति निर्गुणं त्वां योगैर्भक्त्याऽहमेकया ग्राह्य इति त्वदुक्तेर्भक्तिभेदैः अधियन्ति प्राप्नुवन्ति बुद्ध्या त्वद्दत्तया वदन्ति च त्वया सहोक्तिप्रत्युक्तीकुर्वन्ति एधसि काष्ठे अग्निं मथनेन यथेति मन्थनमपि गुरूपदेशेनैव यथा जानन्ति तथैव श्रीगुरूपदिष्टया श्रवणकीर्तनादिभक्त्या मनोमन्थनेन मुहुर्मथितया त्वां पश्यन्ति "यस्य स्वरूपं कवयो विपश्चितो गुणेषु दारुष्विव जातवेदसम् । मथ्नन्ति मथ्ना मनसा दिदृक्षवः" इति पञ्चमोक्तेः साधुसङ्गास्यभूयस्त्वेत्वदुपायासेनैवेत्यत्र दृष्टान्तः गोषु अमृतं दुग्धं दोहनेन यथेति तत्समुखसंघृष्टापि न प्रस्तुतमित्यर्थः । प्राचीनभक्तिबीजसद्भावे तु भक्तिबाहुल्यप्राप्त्यैव त्वत्प्राप्तिरित्यत्र दृष्टान्तः भुवि अन्नं कर्षणादिना यथा प्राचीनसाधुसङ्गवद्भक्तिसद्भावे तु प्रतिबन्धकाभाव एव त्वत्प्राप्तिरित्यत्र दृष्टान्तः अम्बु जलं खननात्तदावरकमृत्तिकादिदूरीकरणेन यथेति लब्धभक्तीनां तु भजनमात्रेण नित्यमेव त्वत्प्राप्तिरित्यत्र दृष्टान्तः उद्यमने वृत्तिं नर्त्तकगायकादीनां प्रति स्वशिल्पोद्यमेनैव जीविकां यथेति ॥ १२ ॥

वयन्तु कृतार्था एवाभूमेत्याह—तमिति । त्वा त्वां हे सरोजनाभ ! आताचिरोप्सितम् अर्थं परमार्थवस्तुरूपम् ॥ १३ ॥

तद्विधत्स्व यदर्थाः वयं यत्प्रयोजनाः तदेव स्पष्टं विज्ञापयतेति चेत् तत्राह—हे अन्तरात्मन् ! अशेषसाक्षिणस्तव वहिः किं विज्ञाप्यम् ॥ १४ ॥

ननु, यूयं सर्वज्ञामाभूत सुबुद्ध्यश्चातुर्यवन्तश्च भवथेतिवाऽत्रोऽत्र सङ्कटे यः प्रतीकारः सम्भवति तं ब्रूत यथा युष्मद्वाक्यमपि तमहं निष्पादयामीति चेत् तत्राह—अहमिति । अग्नेः केतवो विस्फुलिङ्गा इव "केतुर्द्युतौ पताकायाम्" इति कोशात् ते त्वत्तो वयं पृथग्विभाताः सन्त आत्मानं श्रेयः किं वा विद्मः न किमपि तस्मात्त्वमेव नः शं विधत्स्व द्विजानां देवानां मन्त्रं च विधत्स्व इदं कुरुतेत्युपायमप्युपदिश अस्माकं बुद्धिचातुर्यादिकं तु रसातलं यात्विति भावः ॥ १५ ॥

तेषां देवानां यथा हृदयम् अस्माकममरावती प्राप्तो कामापि मन्त्रणां भगवानेव ददात्विति यथा मनोगतं तत्तथैवेत्यन्वयः संवृतसर्वकारकान् नियतसर्वेन्द्रियान् ॥ १६—१८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे पुरुषर्षभ ! तव रूपं श्रेयोर्थिभिः कल्याणार्थिभिः इज्यं पूज्यं योगेनोपायेन विश्वं सर्वं मूर्तौ यस्य तस्मिन् अमुष्मिन्त्वयि नोऽस्मान् त्रिलोकांश्च सह युगपत् पश्यामि ॥ ९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सर्वत्र सर्वधारकत्वम् सर्वोपादानत्वं च भगवत आह—त्वयीति । आत्मतन्त्रे अनन्यधारके घटस्य मृत्स्नेव अस्य जगतो विश्वस्य त्वमादिरन्तो मध्यं च स्वस्वरूपपरिणामाभाव माह, परस्मात् विकारार्हस्वशक्तिरूपात्प्रधानात् परो निर्विकारस्वरूप इत्यर्थः ॥ १० ॥

शक्तिपरिणाममेवाह—त्वं माययेति । सांख्यपक्षव्यावृत्त्यर्थमाह—आत्माश्रयया स्वशक्तिभूतया "देवात्मशक्तिं स्वगुणैर्निगूढाम्"इति श्रुतेः।अनेनानिर्वचनीयवादस्य निर्मूलत्वं बोध्यम् युक्ताः साधनवलयुक्ताः गुणव्यपाये आत्मनो निर्गुणत्वानुसन्धानकाले अगुणं मायया गुणविलक्षणमात्मानं परमात्मानं गुणनियन्तारं च पश्यन्ति अत एव ते विपश्चितः आत्मानात्मपरमात्मविवेकवन्तः ॥ ११ ॥

ननु, अनात्मदर्शनं जडत्वात्मप्रकाश्यत्वादिनात्मदर्शनं च ज्ञानस्वरूपत्वानात्मप्रकाशत्वादिना सम्भवति परमात्मानं कथं पश्यन्तीत्यत्राह—यथेति । कवयो वेदा ऋषयश्च त्वां वदन्ति अतस्तदनुगृहीतया बुद्ध्या मनुष्याः यथा एधआदिषु अग्न्यादीन् योगैस्तत्प्राप्त्युपायैः ऽधियन्ति तथा गुणेषु गुणकार्येषु समष्टिव्यष्टिषु देहे सर्वनियन्तारं त्वां योगैः श्रवणमननध्यानैः अधियन्ति सर्वचेतनाधिक्येन प्राप्नुवन्तीत्यर्थः ॥ १२ ॥

अतिचिरादीक्षितो वाञ्छितश्चासौ अर्थः पुरुषार्थभूतश्च तम् उज्जिहानमाविर्भवन्तं त्वां दृष्ट्वा सर्वे निर्वृतिं सुखितां गताः ॥ १३ ॥

यदर्थं यत्प्रयोजनास्तव पादमूलं समागताः तत्प्रयोजनं विधत्स्व ननु, यत्प्रयोजनं तत्स्पष्टं विज्ञापयेत्यत्राह, हे वहिरन्तरात्मन् ! अशेषसाक्षिणस्ते किं वान्यैर्विज्ञाप्यमस्ति न किमपीत्यर्थः ॥ १४ ॥

तर्हि यूयमेव स्वार्थसिद्ध्यर्थं किञ्चित्कुरुतेत्यत्राह—अहमिति । अग्नेः केतवः विस्फुलिंगा इव ते त्वत्तः पृथग्विभाविताः सन्तः आत्मनः शं सुखोपायं किं वा विदाम विद्मः ? नैव विद्मः अतः हे ईश ! त्वमेव द्विजानां देवानां च हितकरं मन्त्रं विधत्स्वोपादिश ॥ १५ ॥

हृदयमभिप्रायं यथैव यथावदेव विज्ञाय संवृतसर्वकारकान् नियमितसर्वेन्द्रियान् जीमूतगभीरया मेघनिर्ह्रादवद्विपुलया गिरा जगाद ॥ १६ ॥

भाषा टीका ।

हे पुरुषोत्तम ! हे धातः ! यह आपका रूप वैदिक और तांत्रिक उपायों से हम लोगों सहित श्रेय की कामना वाले सबों से सदा पूज्य है, इसीसे यह कुछ इस समय अपूर्व नहीं हुआ है, किन्तु इसी आप के रूपमे हम अपने सहित लोकों को देखते हैं ॥ ९ ॥

हे प्रभो ! यह जगत सृष्टि के पूर्व में आपही में रहा मध्य में भी आप ही में रहा और अन्त में भी आपही में रहा और आप परमस्वतन्त्र हो । और इस जगत् के आदि अन्त और मध्य भी आपही हो । जैसे कि घट आदि कार्यवर्ग का आदि अन्त और मध्य मट्टी है, और परात्पर भी आपही हो अर्थात् आप से कोई परतन्त्र नहीं है ॥ १० ॥

आपने अपनी स्वाधीन माया से इस विश्व को निर्माण किया और पश्चात् उस में जीवद्वारा प्रविष्ट हुए परञ्च युक्तजन बुद्धिशालीलोग, गुणों के अर्थात् प्रकृत्यंशके परिणाम होनेपर भी आप को अगुण अर्थात् परिणामी प्रकृति के गुणों से भिन्न अत एव अपरिणामी ऐसे आप को देखते हैं ॥ ११ ॥

जैसे इंधन में अग्नि को गायों में दुग्ध को भूमि में अन्न को खनने में जलको उद्यम में जीविका कों मनुष्य लोग उपायों से प्राप्त करलेते हैं, ऐसे ही कवि (ज्ञानि) जन गुणों में बुद्धि से आप को कहते हैं तात्पर्य यह कि जैसे काष्ठादि में अग्नि रहती है पर सब को मालूम नहीं होती, ऐसे ही परमात्मा का शरीर रूप प्रकृति और उसके परिणाम रूप गुणों में शरीरी होकर व्याप्त हैं तौ भी सब को ज्ञात नहीं होते हैं ॥ १२ ॥

हे नाथ ! हे पद्मनाभ ! वहुतकाल योग करने से एक प्राप्त होने वाले, और इस समय प्रकट होकर दर्शनदेने वाले, ऐसे आप को देखकर अब हम सब लोग, दावाग्नि से पीडित गज जैसे गङ्गाजलको प्राप्त होकर सुख पावें तिस प्रकार परमानन्द को प्राप्त हुए हैं ॥ १३ ॥

हे प्रभो ! तस्मात् जिस प्रयोजन को हम लोग अखिललोकपाल आपके श्रीचरणों में आये हैं आप उसी का विधान कीजिये, क्योंकि ? आप सबों के वाहर भीतर के समाचारों को जानते हैं, और सब के साक्षी है, फिर आप से और क्या ? विज्ञापनीय हैं ॥ १४ ॥

ब्रह्मांजी वोले, कि-हे प्रभो ! मैं और महादेव और देव आदिक तथा दक्ष आदिक प्रजापति ये सब लोग अग्नि के सम्बन्धि जैसे स्फुलिङ्ग (चिनगारियें) हैं, ऐसे ही आप से पृथक भान होने वाले हमलोग क्या अपना श्रेय जान सक्ते हैं ? न कदापि. तस्मात् हे ईश ! हे ब्रह्मण्यदेव ! आपहमलोगों को उत्तम मन्त्र विधान करो अर्थात् उपाय वतलाइये, कि-तुम लोग ऐसा काम करो ॥ १५ ॥

श्रीशुक उवाच ॥

श्री शुकदेवजी वोले, कि—ब्रह्मादिकों ने जब आप की इस प्रकार स्तुति करी, तब श्री हरि इन लोगोंके हृदय के अभिप्राय को जानकर, वद्धाञ्जलि और विनीतइन्द्रियवाले सब देवों से मेघ सदृश गम्भीर वाणी से वोलते हुए ॥ १६ ॥

एक एवेश्वरस्तस्मिन्सुरकार्ये सुरेश्वरः ।
विहर्तुकामस्तानाह समुद्रोन्मथनादिभिः ॥ १७ ॥

श्रीभगवानुवाच ।

हन्त ब्रह्मन्नहो शम्भो ! हे देवा ! मम भाषितम् ।
शृणुतावहितास्सर्वे श्रेयो वः स्याद्यथा सुराः ॥ १८ ॥
यात दानवदैतेयैस्तावत्सन्धिर्विधीयताम् ।
कालेनाऽनुगृहीतैस्तैर्यावद्वो भव आत्मनः ॥ १९ ॥
अरयो ऽपि हि सन्धेयाः सति कार्यार्थगौरवे ।
अहिमूषकवद्देवा अर्थस्य पदवीं गतैः ॥ २० ॥
अमृतोत्पादने यत्नः क्रियतामविलम्बितम् ।
यस्य पीतस्य वै जन्तुर्मृत्युग्रस्तोऽमरो भवेत् ॥ २१ ॥
क्षिप्त्वा क्षीरोदधौ सर्वा वीरुत्तृणलतौषधीः ।
मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिम् ॥ २२ ॥
सहायेन मया देवा निर्मन्थध्वमतन्द्रिताः ।
क्लेशभाजो भविष्यन्ति दैत्या यूयं फलग्रहाः ॥ २३ ॥
यूयं तदनुमोदध्वं यदिच्छन्त्यसुराः सुराः ।
न संरम्भेण सिद्ध्यन्ति सर्वेऽर्थाः सान्त्वया यथा ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ईश्वरस्यापि तथैवाभिप्रेतमित्याह—एक एवेश्वरः समर्थो ऽपि ॥ १७ ॥

हे सुराः हे देवाः ! अन्ये च गन्धर्वादयः ॥ १८ ॥

वः आत्मनः स्वतो यावद्भवो वृद्धिर्भवति ॥ १९ ॥

अर्थस्य प्रयोजनस्य पदवीं सिद्धिं प्राप्तैः पश्चादहिमूषकवद्वध्यघातकभावेन वर्तितव्यमिति शेषः । यद्वा पेटिकायां निरुद्धोऽहिर्यथा निर्गमद्वारविधानार्थं प्रथमं मूषकेण सन्धिं विधत्ते पश्चात्तमेव कदाचिद्भक्षयति—तथाऽर्थमार्गप्रवृत्तैः प्रथमं सन्धेया इत्यर्थः ॥ २० ॥

ततस्तैः सह यत्कार्यं तदाह—अमृतोत्पादन इति । यस्य मृतस्य पीतस्य सतः ॥ २१ ॥

नेत्रं रज्जुम् ॥ २२ ॥

ननु, तर्हि ते ऽप्यमृतपानेनामराः स्युस्तत्राऽऽह—क्लेशभाज इति ॥ २३ ॥

बलिभिः सहकारिभिः साध्या अर्थास्तदनुसरणं विना न सिध्यन्तीति कृत्वा सामादिकमुपदिशति—यूयमिति द्वाभ्याम् । हे सुराः ! संरम्भेण सम्भ्रमेण सान्त्वया साममार्गेण यथा सिध्यन्ति ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सुरेशो भगवान् स्वयमेक एव सुराणां कार्ये ईश्वरः समर्थोऽपि समुद्रोन्मथनादिभिर्विहर्तुकामः विहर्तुमिच्छुस्तानाह ॥ १७ ॥

उक्तिमेवाह–हन्तेति । हन्तेति दुर्लभस्वप्रसादलाभप्रयुक्तमा[illegible] द्योतयति,हे ब्रह्मन् ! हे शम्भो ! हे देवाः ! हे सुराः ! अवान्तरभेदा[illegible] भिप्रायेण सुरा देवाश्चेति सम्बोधनद्वयम् अन्ये गन्धर्वादय[illegible] सर्वे यूयं वो युष्माकं यथा श्रेयः स्यात्तथा मम भाषितं अवहितचित्तास्सन्तः शृणुत अमरा इति पाठान्तरं तदा श्रेयो दर्शयति—यथा अमरा मृत्युरहिताः स्युरिति ॥ १८ ॥

तावद्दानवैर्दैतेयैश्च सन्धिर्विधीयतां सख्यं क्रियतां कीदृशैः कालेनाऽनुगृहीतैः कालवशादनुकूलतां प्राप्तैः न ते सन्धिं प्राप्स्यन्तीति शङ्का न कार्येति भावः । [illegible]

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

असुरैर्वो युष्माकमात्मनः स्वन एव यावद्भवो वृद्धिः स्यात् तावत् सन्धिर्विधीयतामिति पूर्वेणान्वयः ॥ १९ ॥

"कार्यार्थिनः कुतो गर्वः" इति न्यायेनारयोऽपि सन्धेया एवेत्याह अरयोऽपीति । कर्तव्यप्रयोजनस्य गौरवे भूयस्त्वे सति तदर्थमरयः शत्रवोऽपि सन्धेया एव हि, हे देवा अर्थस्य प्रयोजनस्य पदवीं सिद्धं गतै प्राप्तैः पश्चादहिमूषकवद्वध्यघातुकभावेन वर्तितव्यम् इति शेषः यद्वा पेटिकायां निरुद्धोऽहिर्यथा निर्गमद्वारविधानार्थं मूषकेण सह सन्धि विधत्ते पश्चात्तमेव भक्षयति तथाऽर्थस्य पदवीं प्रवृत्तेः प्रथमं सन्धेया इत्यर्थः ॥ २० ॥

ततः तैः सह यत्कार्यं तदाह—अमृतेनेति । स्पष्टोऽर्थः, अमृतं विशिनष्टि, यस्याऽमृतस्य पीतस्य सतः मृत्युग्रस्तोऽप्यमरो मृत्युरहितो भवेत् यस्य पीतस्येति सम्बन्धमात्रे वा षष्ठी येन पीतेनामृतेन मृत्युग्रस्तोऽमरो भवेत् इत्यर्थः ॥ २१ ॥

अमृतोत्पादनयत्नं विवृणोति—क्षिप्त्वेति । वीरुधः गुल्मानि तृणानि लताश्चौषधयश्च इमाः सर्वाः क्षीरोदधौ क्षिप्त्वा मन्दरं पर्वतं मन्थानं मन्थन दण्डं कृत्वा वासुकिं नेत्रं रज्जुं कृत्वा ॥ २२ ॥

मया सहायेन हे देवाः ! अतन्द्रिताः यूयं निर्मन्थध्वं ननु, तेऽप्यमृतपानेनामराः स्युस्तत्राह—क्लेशभाज इति । दैत्यास्तु केवलं क्लेशभाजो भविष्यन्ति यूयमेव फलग्रहाः अमृतपायिनो भविष्यथेत्यर्थः ॥ २३ ॥

बलिभिः सहकारिभिः साध्या अर्थास्तदनुसरणं विना न सेत्स्यन्तीति सामादिकमुपदिशति—यूयमिति द्वाभ्याम् । हे सुराः ! यदसुरा इच्छन्ति तदेव यूयमनुमोदध्वं सान्त्वया साधुमार्गेण सर्वेऽर्था यथा सिध्यन्ति न तथा संरम्भेण क्रोधेन सिध्यन्तीत्यर्थः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यतो ब्रह्मादयः श्रीनारायणं शरणं प्रापुः तस्मादेक एवेश्वरः सुरकार्यविषये ईश्वरः समर्थः ॥ १७ ॥

आरम्भे यथा येन विधिना युष्माकं श्रेयः स्यात्तं विधिं यातुधानैः राक्षसैः अनुगृहीतैः ऐकमत्येन गृहीतैर्वः आत्मनो युष्मदात्मनो भवः श्रेयः वृद्धिर्वा ॥ १८—१९ ॥

हे देवाः ! कार्यार्थगौरवे कर्तव्यस्य प्रयोजनस्य गुरुत्वे सति अर्थस्य प्रयोजनस्य पदवीं गतैर्भवद्भिरसुरा अरयोऽपि सन्धेया हीत्यन्वयः कथमिव अहिमूषकयोरिव यावन्मयूरसन्त्रस्तः सर्पो मूषकवेश्मनि निलीयन्निर्भयः पश्चाद्भक्षित्वा मूषकञ्जहाति तान्त्रिकायां सन्ति कार्यार्थगौरवादिति पाठे कार्यार्थ गौरवादरयोऽपि सन्धेया इतिन्यायाः सन्तीत्यन्वयः अहिमूषकसन्धानमिव सर्पग्राहिणा सर्पमूषकौ गृहीत्वा फलकोर्ध्वद्वारखर्वमञ्जूषायां निहितौ तत्रोपोषितः सर्पोऽनुत एकमूषिकादनाद्वरमनेन संधि कृत्वैतो निर्याणमिति मूषकमभाषत हेमूषकोन्नतीभूत मत्फणाग्रे स्थित्वा त्वत्कृत फलकरन्ध्रेणावां निर्गच्छाव ततस्स्वस्थौ स्यावेति तेन तौ निर्गत्य स्थितं मार्जारभीतं मूषकं भक्षयित्वा सर्पोऽप्ययासीदिति किम्वदन्ती ॥ २० ॥

अविलम्बितं शीघ्रं यस्य शक्त्या वैशब्देन योग्यतां सूचयति ॥२१॥

नेत्रं रज्जुं "रज्जौ चक्षुषि नेत्रं स्याज्जटायामपि नेतरत्" इत्यभिधानम् ॥ २२—२३ ॥

इच्छन्ति कार्यसिद्धिमिति शेषः सन्धानं वा संरम्भेण द्वेषेण कोपेन वा सांत्वया क्रियया ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नृपेश्वर इति सस्नेहोक्तिः ॥ १७ ॥ १८ ॥ १९ ॥

अहिमूषकवदिति महाजलाप्लवादौ तयोः सख्यादर्शनात् ॥ २० ॥

यस्येति यस्मिन् पीते सतीत्यर्थः ॥ २१—२३ ॥

संरम्भेण क्रोधेन ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अभवः सम्पत्त्यभावो यावत् सम्पत्तौ तु जातायां विग्रह एव विधेय इति भावः ॥ १९ ॥

नीतिमुपदिशति—अरय इति । अहिमूषकेति दैवात् पेटिकायां निरुद्धोऽहिर्यथा निर्गमद्वारविधानार्थं प्रथमं मूषकेण समं सन्धि विधत्ते पश्चात्तमेव भुङ्क्ते एवं स्वार्थपदवीं गतैः । पश्चादेतान् वधिष्याम इति व्यवसायेनवर्तितव्यं भवद्भिः ॥ २० ॥

यस्य पीतस्य यस्मिन् पीते सति ॥ २१ ॥

क्षिप्त्वेति दुग्धयोगेन मथितवीरुधादिक्वाथपरिणाम एवामृतं भातीति भावः नेत्रं रज्जुम् ॥ २२ ॥

सहायेन मयेत्येतत्फलमाह—क्लेशभाज इति । फलग्रहाः फलममृतं यूयमेव प्राप्स्यथेत्यर्थः ॥ २३ ॥

हे सुराः ! संरम्भेण विग्रहेण सान्त्वया साम्ना यथा ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सुरकार्ये यद्यपि एक एवेश्वरः समर्थः तथापि बहुकर्तृकैः समुद्रोन्मथनादिभिर्विहर्तुकामस्तानाह ॥ १७ ॥

हे देवाः हे सुरा इति सम्बोधनद्वयं पुनः पुनरभिमुखीकरणाभिप्रायम् ॥ १८ ॥

आत्मनः कर्मफलदातुः मत्तः सकाशात् वो भवः समृद्धिर्यावद्भवेत्तावत्सन्धिर्विधीयताम् ॥ १९ ॥

न भेतव्यं कालकूटाद्विषाज्जलधिसम्भवात् ।
लोभः कार्यो न वै जातु रोषः कामस्तु वस्तुषु ॥ २५ ॥

श्रीशुक उवाच ।

इति देवान्समादिश्य भगवान् पुरुषोत्तमः ।
तेषामन्तर्दधे राजन् ! स्वच्छन्दगतिरीश्वरः ॥ २६ ॥
अथ तस्मै भगवते नमस्कृत्य पितामहः ।
भवश्च जग्मतुः स्वं स्वं धामोपेयुर्बलिं सुराः ॥ २७ ॥
दृष्ट्वाऽरीनप्यसंयत्ताञ्जात (१) क्षोभान्स्वनायकान् ।
न्यषेधद्दैत्यराट् श्लोक्यः सन्धिविग्रहकालवित् ॥ २८ ॥
ते वैरोचनिमासीनं गुप्तं चासुरयूथपैः ।
श्रिया परमया जुष्टं जिताशेषमुपागमन् ॥ २९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

कार्यार्थस्य अनुष्ठीयमानस्यार्थस्य गौरवं बहुभिर्निर्वत्यंन्ते सति अरयोपि सन्धेयाः अर्थस्य प्रयोजनस्य पदवीं सिद्धिं गतैर्भवद्भिः अहिमूषकवत् हन्तृहन्तव्यभावेन वर्तितव्यमिति शेषः ॥ २० ॥

सन्ध्यनन्तरममृतोत्पादने यत्नः अविलम्बितं शीघ्रं क्रियताम् यस्य पीतस्य जनः मृत्युग्रस्तोपि मरणार्होप्यमरो भवेत् ॥ २१ ॥

नेत्रं रज्जुम् ॥ २२ ॥ २३ ॥

हे सुराः! यथा सान्त्वया साम्ना सर्वेऽर्थाः सर्वप्रयोजनानि सिद्ध्यन्ति तथा संरम्भेण विग्रहेण न ॥ २४ ॥

भाषा टीका।

और उस समय उस देवकार्य में एकही आप समर्थ होकर भी, समुद्र मंथनादि से विहार करने की कामना वाले होकर स्वयं देवता ओं से बोले ॥ १७ ॥

॥ श्री भगवान् उवाच ॥

श्री भगवान् बोले, कि—हे ब्रह्मन् ! अहो शंभो ! हे देव लोगो ! तुम लोग सावधान होकर हमारा भाषण सुनों कि-जिससे तुमारा हित होवै ॥ १८ ॥

जब तक तुमारा वैभव ठीक २ होजावै, तब तक तुम लोग जाकर दानव और दैत्यों से सन्धि अर्थात् मेल करलो क्योंकि उन का काल अनुकूल है ॥ १९ ॥

और समय पर वैरियों के साथ भी मेल करा जाता है यदि किसी कार्य का भारी प्रयोजन आ पडे तो, और हे देवो ! जब अपना प्रयोजन सिद्ध होजावै तब सर्प और मूषक के तरह वर्त्तने लगना। जैसे पिटारी में रुका हुआ सर्प निकलने के रास्ता कराने को मूसे से मित्रता करके पीछे किसी समय उसी का भक्षण भी करलेना है इसी रीति से तुम लोग भी दैत्यों से मेल करो ॥ २० ॥

और जल्दी मेलकर अमृत के उत्पादन में यत्न करो, कि जिसके पीते मात्र ही मृत्यु ग्रस्त जंतु भी अमर होजाता है ॥ २१ ॥

जब तुम लोगों का दैत्यदानवों से मेल होजावै, तब क्षीर समुद्र में सब वीरुध तृण लता और औषधियों को डालकर मन्दर पर्वत को मथानी बनाकर वासुकी सर्पराज की नेती बनाकर ॥ २२ ॥

हे देवो, तुम लोग हमारी सहायता से जाग्रत होकर दैत्यों सहित समुद्र का मंथन करो, बस हम कहदेते हैं कि दैत्य लोगों को केवल क्लेश ही हाथ लगेगा औ फल भागी तुम लोग होंगे ॥ २३ ॥

और एक बात हम और भी सिखाते हैं, कि-असुर लोग जैसी इच्छा करें तुम लोग भी सब उसी का अनुमोदन करना क्योंकि संपूर्ण प्रयोजन जैसे शान्ति से सिद्ध होते हैं वैसे संरभ से सिद्ध नहीं होते हैं, ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

वस्तुषु मथनादुत्पन्नेषु ॥ २५ ॥ २६ ॥

सुरास्तु बलिमुपेयुरुपजग्मुः ॥ २७ ॥

(१) क्ष्वेलान् इति विजय०।

महेन्द्रः श्लक्ष्णया वाचा सान्त्वयित्वा महामतिः।
अभ्यभाषत तत्सर्वं शिक्षितं पुरुषोत्तमात् ॥ ३० ॥
(१)तदरोचत दैत्यस्य तत्रान्ये येऽसुराधिपाः।
शम्बरोऽरिष्टनेमिश्च ये च त्रिपुरवासिनः ॥ ३१ ॥
ततो देवासुराः कृत्वा संविदं कृतसौहृदाः।
उद्यमं परमं चक्रुरमृतार्थे परन्तप ! ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

असंयत्तानपि दृष्ट्वा श्लोकद्वयः कीर्त्यहैः ॥ २८ ॥

वैरोचनिं वलिं जितमशेषं त्रैलोक्यं येन तम् ॥ २९ ॥

तत्सर्वममृतोन्मथनादि ॥ ३० ॥

तत्र ये अन्ये चासुराधिपाः पौलोमकालेयादयः शम्बरादयश्च तेभ्यश्चारोचत ॥ ३१ ॥

संविदं समयम् ॥ ३२ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

किञ्च जलधिसम्भवात्कालकूटाख्याद्विषाच्च भेतव्यं नोद्वेजितव्यं यद्वो ग्रसिष्यतीति भावः। तथा वस्तुषु मथनादुत्पन्नेषु लोभः कामः जातु कदाचिदपि रोषश्च न वै कार्यः ॥ २५ ॥

इतीत्थं देवान्समादिश्याज्ञाप्य भगवान्पुरुषोत्तमः अजितः तेषां ब्रह्मादीनां पश्यतां सतामिति शेषः। हे राजन् ! अन्तर्दधे अन्तर्हितवान् यतः स्वच्छन्दगतिर्यथेच्छव्यापार ईश्वरः ॥ २६ ॥

अथ भगवदन्तर्धानानन्तरं तस्मै तिरोहिताय भगवते नमस्कृत्य पितामहो ब्रह्मा भवो रुद्रश्च स्वं स्वं स्थानं जग्मतुः सुरा इन्द्रादयस्तु वलिं वैरोचनिमुपेयुरुपजग्मुः ॥ २७ ॥

अरीन्शत्रूनप्यसंयत्तान् युद्धायानुद्यतान्देवान् दृष्ट्वा श्लोकद्वयः स्तुत्यः दैत्यराड् वलिर्जातक्षोभान्सुरान् हन्तुमुद्यतान् च स्वनायकानसुरसेनामुख्यान् न्यषेधत् न्यवारयत् यतः सः सन्धिविग्रहयोः सन्धिवैरयोः कालमुचितं वेत्ति इति तथा ॥ २८ ॥

ते देवाः असुरयूथपैर्गुप्तमासीनं परमया श्रिया सम्पदा जुष्टं युक्तं जिता अशेषा देवादयो येन तं वैरोचनिं वलिम् उपागमन् समीपमुपाविविशुः ॥ २९ ॥

तत इन्द्रो महामतिः श्लक्ष्णया मृद्व्या वाचा सान्त्वयित्वा सामोपायेन प्रसन्नं कृत्वा पुरुषोत्तमादजिताद्यच्छिक्षितं तत्सर्वममृतोत्पादनप्रयत्नरूपमकथयत् ॥ ३० ॥

तदिन्द्रोक्तं दैत्यस्य वलेर्ये च शम्बरादयोऽसुराधिपाः ये च त्रिपुरवासिनः तेषां च अरोचत रुचिकरमभूत् ॥ ३१ ॥

ततो देवाश्चासुराश्च ते सर्वे संविदं समयं सङ्केतं कृत्वा परस्परं कृतं सौहृदं यैस्ते हे परन्तप ! अमृतार्थं परममुद्यमं यत्नं चक्रुः ॥ ३२ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

वो युष्माभिः ॥ २५ ॥

तेषां पश्यताम् ॥ २६—२७ ॥

क्ष्वेलो दर्पः सिंहनादो वा स्वो नायको येषां ते तथा ॥ २८—२९—३० ॥

तेऽसुराः दैत्यस्य भृत्याः ॥ ३१ ॥

सम्विदं सन्धिलक्षणवार्ताम् ॥ ३२ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

लोभो दृष्टे वस्तुनि कामस्त्वदृष्टे वस्तुनि ॥ २५—२७ ॥

असंयत्तानप्यरीन् दृष्ट्वा स्वनायकान् दैत्यान् न्यषेधत् ! कीदृशान् जातक्षोभान् हन्तुमुद्यतानित्यर्थः ॥ २८—३६ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

तुच्छार्थे रत्नादिषु न लोभः तेष्वन्येरसुरैः नीतेषु सत्सु न रोषः। स्त्रीरत्नेषु न कामश्च कार्य इत्यर्थः। वस्तुषु मथनादुत्पन्नेषु तेषामीश्वरः ॥ २५ ॥ २६ ॥

सुरास्तु वलिमुपेयुरुपजग्मुः ॥ २७ ॥

असंयत्तान् अधृतकवचखड्गादीनपि दृष्ट्वा स्वनायकान् स्वसेनापतीन् जातक्षोभान् हन्तुमुद्यतान् श्लोकद्वयो यशस्वी ॥ २८ ॥

जिताशेषं सर्वदिग्विजयिनम् ॥ २९ ॥ ३० ॥

दैत्यस्य दैत्या येऽन्ये तेभ्यश्चेति उत्पत्स्यमानममृतं दुर्बलानिमान् तिरस्कृत्य वयमेव ग्रहीष्याम इत्यभिप्रायेणारोचत ॥ ३१ ॥

(१) तेऽन्वरोचन्त इति विज०।

ततस्ते मन्दरगिरिमोजसोत्पाट्य दुर्मदाः ।
नन्दत उदधिं निन्युः शक्ताः परिघबाहवः ॥ ३३ ॥
दूरभारोद्वहश्रान्ताः शक्रवैरोचनादयः ।
अपारयन्तस्तं वोढुं विवशा विजहुः पथि ॥ ३४ ॥
निपतन्स गिरिस्तत्र बहूनमरदानवान् ।
चूर्णयामास महता भारेण कनकाचलः ॥ ३५ ॥
तांस्तथा भग्नमनसो भग्नबाहूरुकन्धरान् ।
विज्ञाय भगवांस्तत्र बभूव गरुडध्वजः ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

संविदं सङ्केतं संवादं वा—
"संविद्युद्धे प्रतिज्ञायामाचारे नाम्नि तोषयो ।
सम्भाषयो क्रियाकारे सङ्केतज्ञानयोरपि" ॥
इत्यजयः ॥ ३२ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

वस्तुषु मथनादुत्पन्नेषु लोभः बाह्येन्द्रियव्यापारः कामः अतिरिन्द्रियव्यापारः परैः संगृहीतेषु रोषश्च जातु कदाचिदपि न कार्यः ॥ २५ ॥

तेषां देवानामीश्वरः ॥ २६ ॥

सुरास्तु बलिमुपेयुः ॥ २७ ॥

असंयत्तान् अपि दृष्ट्वा जातक्षोभान् श्लोक्यः कीर्त्यर्हः ॥ २८ ॥

ते देवा जितमशेषं त्रैलोक्यं येन तं वैरोचनिं विरोचनपुत्रं बलिमुपागमन् ॥ २९ ॥ ३० ॥

ये अन्ये तेभ्यश्चारोचत ॥ ३१ ॥

कृतमन्योन्यतः सौहृदं यैस्ते संविदं समयं कृत्वा अमृतार्थं परमयुद्यमं चक्रुः ॥ ३२ ॥

———

भाषाटीका ।

और समुद्र के मथने से प्रथम विष उत्पन्न होगा तुम लोग उस विष से भय नहीं करना तथा एक बात और भी याद रखना कि, मथने से जो वस्तु उत्पन्न हों उनमें कभी भूलके लोभ न करना और उनके निमित्त द्वेष भी नहीं करना, और उन वस्तुओं में इच्छा भी न करना ॥ २५ ॥

श्रीशुक उवाच ॥

स्वच्छन्द गति वाले ईश्वर, भगवान् श्रीपुरुषोत्तम, इस प्रकार देवताओं को सीख देकर आप अन्तर ध्यान होगये ॥ २६ ॥

अब इस अनन्तर उन भगवान् को नमस्कार कर श्री-ब्रह्माजी और श्री शंकर अपने २ धामको सिधारे, और सब देवता लोग विरोचन के पुत्र बलि असुरराज के समीप गये ॥ २७ ॥

दैत्यराज बलिने इन्द्रादिक अपने वैरियों को असज्जित देखकर, और अपने सेनापतियों को क्षुभित देखकर, लड़ाई का निषेध कर दिया क्योंकि ? बलितो बडे यशस्वी और संधि विग्रह (मेल लडाई) के समय को जानने वाले रहे ॥ २८ ॥

उन देवताओं ने भी बैठे हुए बलि को देख कि जहां बडे २ असुर यूथप लोग चारों तरफ रक्षा में जाग्रत हैं, और बलि भी बडी सम्पत्ति से सेवित होकर और त्रिलोकी को जीतकर बैठा है उसके समीप में सब देवता लोग पहुंचे ॥ २९ ॥

महामति महेन्द्र ने बडी मधुर वाणी से सान्त्वन करके जैसा कुछ पुरुषोत्तम (श्रीहरि) से सीखा था वैसाही बोलता हुआ ॥ ३० ॥

बस वहांपर जो कुछ इन्द्र ने कहा वह बलि को बहुत रुचा और भी जो यहांपर शंबर अरिष्टनेमि और त्रिपुर वासी असुराधिप लोग रहे उन्हों को भी ठीक मालूम भया ॥ ३१ ॥

तब तो देवता और असुर लोगों ने मित्रता करी फिर सलाह करके अमृत के उत्पादन करने लिये बडा उद्यम किया ॥ ३२ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

परिघा इव बाहवो येषाम् ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥

गिरिपातविनिष्पिष्टान्विलोक्यामरदानवान् ।
(१) ईक्षया जीवयामास निर्जरान्निर्व्रणान्यथा ॥ ३७ ॥
गिरिं चारोप्य गरुडे हस्तेनैकेन लीलया ।
आरुह्य प्रययावब्धिं सुरासुरगणैर्वृतः ॥ ३८ ॥
अवरोप्य गिरिं स्कन्धात्सुपर्णः पततां वरः ।
ययौ जलान्त उत्सृज्य हरिणा स विसर्जितः ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्याम् अष्टमस्कन्धे अमृतमथने मन्दराचलानयनं नाम
षष्ठोऽध्यायः ॥ ६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विसर्जितः प्रस्थापितः सुपर्णो तत्र स्थिते वासुकेरागमना-योगादिति भावः ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उद्यममेवाह—ततस्ते देवासुराः दुर्मदाः परिघा इव बाहवो येषां ते मन्दरगिरिमोजसा बलेनोत्पाट्य नदन्तः शक्त्या धारणशक्त्या क्षीरोदधिं निन्युः प्रापयितुं प्रवृत्ता बभूवुः ॥ ३३ ॥

शक्रवैरोचनिप्रभृतयः सर्वे दूरभारोद्वहनेन श्रान्ताः अत एव मन्दरगिरिं वोढुमपारयन्तोऽशक्नुवन्तः विवशाः पथि गिरिं विजहुस्तत्यजुर्न्यपतंश्च ॥ ३४ ॥

स च गिरिस्तत्र पात्यमानः बहूनमरानसुरांश्च चूर्णयामास यतः स गिरिर्महता भारेण कनकाचलः मेरुतुल्यः ॥ ३५ ॥

तदा सुरदानवान्भग्नमनसः भग्नोत्साहान् कांश्चिद्भग्ना बाहव ऊरवः कन्धराश्च येषां तान्विज्ञाय भगवान् गरुडध्वजो गरुडारूढः आविर्बभूव ॥ ३६ ॥

गिरिपातेन विनिष्पिष्टांश्चूर्णीकृतान् सुरान्दानवांश्च विलोक्य ईक्षयाऽमृतदृष्ट्या निर्जरान्देवान् निर्व्रणान्यथावज्जीवयामास असुरांस्तु आजीवयदिति भावः ॥ ३७ ॥

तत एकेनैव हस्तेन लीलया गिरिमुद्धृत्य गरुडे आरोप्य स्वयमप्यारुह्य सुरगणैर्वृतः पयोधिं प्रययौ ॥ ३८ ॥

ततः पततां पक्षिणां वरः श्रेष्ठः सुपर्णो गरुडः स्कन्धाद्गिरिमवरोप्य जलान्ते जलसमीपे उत्सृज्य निधाय हरिणानुविसर्जितः प्रस्थापितः यथावगात् सुपर्णो तत्र स्थिते वासुकेरागमनासम्भवात् तदागमनाय विसर्जितो ययाविति भावः ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दुर्मदाः दुस्सहमदाः ॥ ३३ ॥

दूरदेशंप्रति भारो भरणं यस्य स दूरभारो गिरिस्तस्योद्वहो वहनं तेन श्रान्ताः अपारयन्तः पारं गन्तुमशक्नुवन्तः ॥ ३४ ॥ ३५ ॥

नाम्ना गरुडध्वज इति रूपधारी बभूव ॥ ३६—३७—३८ ॥

सुपर्णो गरुडः जलान्ते जलमध्ये अत्र सुपर्णइति कथनेनेदं तात्पर्यमवबोद्धव्यं वैवस्वतरैवतमन्वोरन्तरयोरमृतमथनमास्ति तत्र वैवस्वतमन्वन्तरेऽनन्तनाम्ना गरुडेनोढो गिरिः सुपर्णनाम्नोढो रैवतमन्वन्तरे "अनन्तोढो मन्दरस्तु यदा वैवस्वतान्तरम् । अमुनार्थे सुपर्णोढो रैवतस्यान्तरे मनोः" इत्यनेनेति निश्चयोक्तेरिति ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यथा यथावत् । निर्जरान् निर्व्रणान् कृत्वेति शेषः ॥ ३७-३९ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
षष्ठोऽध्यायः ॥ ६ ॥

(१) कटाक्षैः इति वीर० ।

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

परिघा इव बाहवो येषाम् ॥ ३३ ॥ ३४ ॥

यतः कनकाचलः कनकमयत्वात् चलतीत्यचलः कनकस्य प्रस्तराद्यपेक्षया भाराधिक्यात् ॥ ३५ ॥

बभूव आर्विर्बभूव ॥ ३६—३८ ॥

विसर्जितः अन्यत्र प्रस्थापितः । सुपर्णो तत्र स्थिते वासुकेरागमनायोगादिति भावः ॥ ३९ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षष्ठोऽयमष्टमस्कन्धे सङ्गतः सङ्गतः सताम् ॥ ६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ते देवासुराः परिघ इव बाहवो येषां ते ओजसा बलेन ॥ ३३ ॥

दूरं भारोद्वहेन श्रान्तास्तं मन्दरं वोढुमपारयन्तो असहन्त ॥ ३४ ॥ ३५ ॥

भग्नमनसः नष्टोत्साहान् ॥ ३६ ॥

यथा यथावत् जीवयामास ॥ ३७—३९ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
षष्ठमोऽध्यायार्थप्रकाशः ॥ ६ ॥

भाषा टीका ।

तदनंतर उन सबों ने पराक्रम से मन्दर पर्वत को, उखाडकर बडे दुर्मद लोग नाद करते हुए समुद्र को लेजाने लगे रहे भी सब लोग बडे शक्तिवाले और बाहु भी उनकी परिघ [वेंडा] सदृश दृढ रहीं ॥ ३३ ॥

परंच इतने भारी भार को दूर तक ले आने से इन्द्र आदि देवता और बलि प्रभृति दैत्य लोग जब बहुत श्रान्त होगये और उस पर्वत के वहन करने [लेकर चलने] में समर्थ नहीं हुए तब विवश होकर उस पर्वत को मार्ग में छोड दिया ॥ ३४ ॥

उस समय देव और दैत्यों के ऊपर से गिरता हुआ वह कनकाचल [पर्वत] बहुत भारी बोझ से बहुत से देवता और दानवों को चकना चूर करता भया ॥ ३५ ॥

तब श्री हरि गरुडगामी ने देखा कि कितने एक देवता के बाहु भग्न होगये कोई के ऊरु [जंघा] टूट गये, किन्हीं के कंधे का चूर्ण होगया इसी से भग्न हुआ संकल्प जिन का ऐसे दैत्य और देवताओं को दुःखित जानकर आप स्वयं प्रकट हुए ॥ ३६ ॥

गिरि के पतन होने से देव दानवों को भग्न देखकर प्रभु ने अपनी अमृत वर्षिणी दृष्टि से देखकर सबों को जैसे के तैसे निर्व्रण [विना क्षत के] कर दिये ॥ ३७ ॥

और प्रभु ने लीला पूर्वक मंदराचल को एक हस्त से गरुड के ऊपर रखकर और आप स्वयं गरुडपर चढकर सुराऽसुर गणों से युक्त होकर समुद्र के तीरपर गये ॥ ३८ ॥

और उडने वालों में श्रेष्ठ गरुड जी ने अपने कन्धे से पर्वत को उतार कर जलके समीप धरदिया और भगवान की आज्ञा लेकर चले गये ॥ ३९ ॥

इति श्रीमद्भागवत महापुराण अष्टम स्कन्ध में
षष्ठम अध्याय की भागवताचार्य कृत
भाषा टीका समाप्त ॥ ६ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे षष्ठोऽध्यायः ॥ ६ ॥

॥ सप्तमोऽध्यायः ॥

श्रीशुक उवाच ।

ते नागराजमामन्त्र्य फलभागेन वासुकिम् ।
परिवीय गिरौ तस्मिन्नेत्रमब्धिं मुदान्विताः ॥ १ ॥
आरेभिरे सुसंयत्ता अमृतार्थं कुरूद्वह ! ।
हरिः पुरस्ताज्जगृहे पूर्वं देवास्ततोऽभवन् ॥ २ ॥
तन्नैच्छन्दैत्यपतयो महापुरुषचेष्टितम् ।
न गृह्णीमो वयं पुच्छमहेरङ्गममङ्गलम् ॥ ३ ॥
स्वाध्यायश्रुतसम्पन्नाः प्रख्याता जन्मकर्मभिः ।
इति तूष्णीं स्थितान्दैत्यान्विलोक्य पुरुषोत्तमः ॥ ४ ॥
स्मयमानो विसृज्याग्रं पुच्छं जग्राह सामरः ।
कृतस्थानविभागास्त एवं कश्यपनन्दनाः ॥ ५ ॥
ममन्थुः परमायत्ता अमृतार्थं पयोनिधिम् ।
मथ्यमानेऽर्णवे सोऽद्रिरनाधारो ह्यपोऽविशत् ॥ ६ ॥
ध्रियमाणोऽपि बलिभिर्गौरवात्पाण्डुनन्दन ! ।
ते सुनिर्विण्णमनसः परिम्लानमुखश्रियः ।
आसन्स्वपौरुषे नष्टे दैवेनातिबलीयसा ॥ ७ ॥
विलोक्य विघ्नेशविधिं तदेश्वरो दुरन्तवीर्योऽवितथाभिसन्धिः ।
कृत्वा वपुःकाच्छपमद्भुतं महत्प्रविश्य तोयं गिरिमुज्जहार ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सप्तमे मथनोद्भूतविषभीत्याऽखिलैर्जनैः ।
स्तुतस्सन् कृपया रुद्रः पपौ विषमितीर्यते ॥ ० ॥

फलभागेन तवाप्यमृते भागो भविष्यतीत्यामन्त्र्य संमन्त्र्य वासुकिं नेत्रं गिरौ परिवीय संवेष्ट्याब्धिं मथितुमारेभिरे ॥१॥

वासुकेर्मुखं गीर्वं दैत्यान्ग्राहयितुमेव पूर्वं हरिः पुरस्तान्मुखे जगृहे ततोऽभवन्मुखं जगृहुः ॥ २—४ ॥

कृतो धारणे स्थानविभागो यैः ॥ ५ ॥ ६ ॥

दैवेन हेतुना स्वपौरुषे नष्टे सति ॥ ७ ॥

विघ्नेशस्य विधिन्तेन रचितं विघ्नम् अवितथः सत्यो ऽभि सन्धिः सङ्कल्पो यस्य ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ते देवासुराः फलभागेन तवाप्यमृतभागो भविष्यतीत्येवम्वासुकिमामन्त्र्य संप्रार्थ्य नेत्रीभूतं गिरौ परिवीय परिवेष्ट्य मुदा युक्ताः ॥ १ ॥

अमृतार्थे अब्धि मथितुमारब्धाः हे कुरूद्वह ! वासुकेस्नीत्रं मुखं दैत्यान् ग्राहयितुमेव पूर्वं हरिः पुरस्तान्मुखं जगृहे ततो देवा अभवन् मुखं जगृहुः ॥ २ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तन्मुखग्रहणरूपं महापुरुषस्य हरेश्चेष्टितं दैत्याधिपा नैच्छन् स्वाध्यायश्रुतसंपन्नाः वेदशास्त्राध्ययनसम्पन्नाः जन्मभिः कर्मभिश्च प्रसिद्धाः वयममङ्गलं निकृष्टं महोरगपुच्छं न गृह्णीम इत्यभिप्रायेण तूष्णीं स्थितान् दैत्यान्विलोक्य भगवान्पुरुषोत्तमः ॥ ३ ॥ ४ ॥

स्मयमानो मुखं विसृज्यामरैः सहितः पुच्छञ्जग्राह एवम् इत्थं कृतो ग्रहणस्थानविभागो यैस्ते कश्यपस्य नन्दनाः देवासुराः ॥ ५ ॥

परमधिकमायत्ताः उद्यताः पयोनिधिममृतार्थं ममन्थुः अर्णवे पयोदधौ मथ्यमाने सत्यनाधारोऽद्रिर्मन्दरोऽपोऽविशदपामधोभागं प्रविष्टोऽभूत् ॥ ६ ॥

हे कुरुनन्दन ! बलिष्ठैर्देवासुरैर्घ्रियमाणोऽप्यद्रिर्गौरवाद्भारभूयस्त्वादपोऽविशदिति पूर्वेणान्वयः । ते देवासुरास्तु अतिबलीयसा दैवेन हेतुना स्वपौरुषे विनष्टे सति निर्विण्णमनसः अत एव परिम्लानमुखश्रियो बभूवुः ॥ ७ ॥

विघ्नेशस्य विघ्नाधिदैवतस्य विष्वक्सेनस्य तत्पार्षदस्य वा कस्यचिद्विरदवक्त्रादेर्विधिं चरितं तद्विघ्नमपि विलोक्य तथा सत्यसङ्कल्पः दुरन्तवीर्यः अपारबलो भगवानीश्वरोऽजितः महत् बृहदद्भुतञ्च काच्छपं वपुर्धृत्वा तोयं जलं प्रविश्य गिरिं मन्दरमुज्जहार उद्धृतवानित्यर्थः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हालाहलनाम तमोगुणजन्यमन्यथाज्ञानलक्षणं सुरानाम राजसा अज्ञानलक्षणा अमृतं नाम सात्त्विकं ज्ञानलक्षणं मुक्तिसाधनमित्याद्युत्पत्तिकथनेन महामाहात्म्यं स्पष्टयतेऽत्राध्यायद्वये तत्रादौ मथनप्रकारं शास्त्रश्रवणलक्षणं कथयति–ते नागराजेति । परिवाय वेष्टयित्वा ॥ १ ॥

देवास्ततः पूर्वमभवन्नित्यन्वयः ॥ २–३ ॥

अर्थवादेनामङ्गलत्वमुपपादयति । स्वाध्यायेति ॥ ४–५ ॥

अपोऽविशज्जलमध्यं प्रविष्टः ॥ ६—७ ॥

विघ्नेशेनाप्तो गतिर्यस्य स तथा तद्गिरिं काच्छपं कच्छपस्य विद्यमानम् ॥ ८—९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

त इति सार्द्धकम् ॥ १ ॥

ततस्तद्भिन्नमभवन् ॥ २ ॥

तन्मुखधारणरूपं महापुरुषचेष्टितं नैच्छन् तत्रैषामकुर्वन्नित्यर्थः ॥ ३ ॥ ४ ॥

कश्यपनन्दना इति यच्चसप्तमे मन्वन्तरे देवानामैक्यं बोधयति तेन तद्भेदेन इन्द्रादिभेदश्च प्रायिक एवेति ज्ञेयम् तत्तच्च पुण्याधिक्यन्यूनत्वाभ्यां समाधेयं यथात्र षष्ठमन्वन्तरादौ जातानामाकस्मिकत्रैलोक्यनाशेन प्रायोनाशात्सप्तमजातानां सप्तममन्वन्तरानुवृत्तिः यथोक्तं चतुर्थे "प्राक् सर्गे प्रलयं गते" इति । परमं यथा भवति तथा यत्ताः कृतयत्नाः अनाधार इति तत्रत्यमृत्तिकायाः कर्दमप्रायत्वात् अन्यथा प्रथममेव मग्नः स्यात् ॥ ५ ॥ ६ ॥ ७ ॥

विघ्नेशविधिशब्दस्य विघ्नवाचित्वमात्रे तात्पर्यम् । ननु विघ्नेशरचितत्वे स्थलजलरुहशब्दवत् तस्यापि देवतासंकेतत्वात् ॥ ८—१० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सप्तमे कच्छपोद्भूतिः सिन्धुमन्थो विषोद्गमः ।
जनैः स्तुत्या शिवेनैव विषपानमितीर्यते ॥ ० ॥

नागराजं वासुकिं तवाप्यमृते भागो भविष्यतीति संमन्त्र्य तं गिरौ परिवीय नेत्रं कृत्वा परिवेष्ट्य आरेभिरे मथितुमिति शेषः ॥ १ ॥

वासुकेर्मुखं तीव्रं दैत्यान् ग्राहयितुमेव पूर्वं हरिः पुरस्तान्मुखं जग्राह अभवन् तेच मुखं जगृहुरित्यर्थः ॥ २ ॥ ३ ॥

मानं गृहीत्वा विषज्वालया यूयमेव म्रियध्वमित्यभिप्रायेण स्मयमानम् ॥ ४—७ ॥

विघ्ने ईष्टे समर्थो भवतीति विघ्नेशो यो विधिस्तं विलोक्य अस्मिन् विघ्ने अयमेव प्रकारो योग्य इति विचार्य काच्छपं वपुः कृत्वा उज्जहार ऊर्द्ध्वं प्रतिनीतवान् । कच्छपजातेरेव जलाधःस्थवस्तूर्द्ध्वानयने योग्यता स्वाभाविकीति विमृश्येति भावः अवितथाभिसन्धिः सत्यसङ्कल्पः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

समुद्राज्जातं विषं प्राप्स्यामो हरोऽपिबदिति सप्तमेन वर्णयन्ति, तवाप्यमृतभागो भविष्यतीति आमंत्र्य गिरौ नेत्रं कृत्वा परिवीय आवेष्ट्य अब्धिं मथितुमारेभिरे ॥ १ ॥

वासुकेस्तीव्रं मुखम् असुरनिर्बन्धेनैवासुरान् ग्राहयितुं पूर्वं हरिः पुरस्तान्मुखं जगृहे ततस्तदनन्तरं देवा अभवन् मुखं जगृहुः ॥ २ ॥

असुरनिर्बन्धं वर्णयति—न गृह्णीम इति ॥ ३ । ४ । ५ । ६ ॥

दैवेन हेतुना पौरुषे नष्टे सति निर्विण्णमनसः अत एव परिम्लानमुखश्रियः आसन् ॥ ७ ॥

विघ्नेशस्य विधिं तद्रचितं विघ्नं विलोक्य अवितथाभिसन्धिः सत्यसङ्कल्पः दुरन्तवीर्यो ऽपारबलः गिरिमुज्जहार ॥ ८ ॥

तमुत्थितं वीक्ष्य कुलाचलं पुनः समुत्थिता निर्मथितुं सुरासुराः ।
दधार पृष्ठेन सलक्षयोजनप्रस्तारिणा द्वीप इवापरो महान् ॥ ९ ॥
सुरासुरेन्द्रैर्भुजवीर्यवेपितं परिभ्रमन्तं गिरिमङ्ग ! पृष्ठतः ।
बिभ्रत्तदावर्तनमादिकच्छपो मेनेऽङ्गकण्डूयनमप्रमेयः ॥ १० ॥
तथाऽसुरानाविशदासुरेण रूपेण तेषां बलवीर्यमीरयन् ।
उद्दीपयन्देवगणांश्च विष्णुर्दैवेन नागेन्द्रमबोधरूपः ॥ ११ ॥
उपर्यगेन्द्रं गिरिराडिवान्य आक्रम्य हस्तेन सहस्रबाहुः ।
तस्थौ दिवि ब्रह्मभवेन्द्रमुख्यैरभिष्टुवद्भिः सुमनोऽभिवृष्टः ॥ १२ ॥
उपर्यधश्चात्मनि गोत्रनेत्रयोः परेण ते प्राविशता समेधिताः ।
ममन्थुरब्धिं तरसा मदोत्कटा महाऽद्रिणा क्षोभितनक्रचक्रम् ॥ १३ ॥
अहीन्द्रसाहस्रकठोरदृङ्मुखश्वासाग्निधूमाहतवर्चसोऽसुराः ।
पौलोमकालेयबलील्वलादयो दवाग्निदग्धाः सरला इवाभवन् ॥ १४ ॥
देवांश्च तच्छ्वासशिखाहतप्रभान्धूम्राम्बरस्रग्वरकञ्चुकाननान् ।
समभ्यवर्ष(१)न्भगवद्वशा घना ववुः समुद्रोर्म्युपगूढवायवः ॥ १५ ॥
मथ्यमानात्तथा सिन्धोर्देवासुरवरूथपैः ।
यदा सुधा न जायेत निर्ममन्थाऽजितः स्वयम् ॥ १६ ॥

भाषा टीका ।

श्रीरुक्मिणीप्राणनाथाय नमः

उन देव दैत्यों ने नागराज वासुकि को अमृत के भागदेने को कह कर वासुकी को ही नेती बनाकर चारों तरफ पर्वत में लपेट कर अमृत के उत्पन्न होने के लिये समुद्र मथने का आरम्भ किया ॥ १ ॥

हे कुरूद्वह ! उस समय श्रीहरि ने प्रथम वासुकि को मुख की तरफ ग्रहणकिया, तब सब देवतालोग भी उसी तरफ होगये ॥२॥

यह भगवान् की चेष्टा को देखकर दैत्यपति लोगों ने पुच्छग्रहणकरने की इच्छा न करी, और कहने लगे, कि—हम लोग अमांगलिक सर्पकी पूँछ को न पकडें गे ॥ ३ ॥

क्यों कि ? हमलोग भी स्वाध्यायश्रुतसम्पन्न हैं अर्थात् पढे लिखे हैं, और उत्तम जन्म और कर्मों से विख्यात हैं। ऐसा कह कर चुप खडे हुए दैत्यों को भगवान ने देखकर ॥ ४ ॥

किंचित् हँसकर मुख के तरफ भाग को छोडकर देवताओं के सहित आपने पुच्छ का ग्रहण किया, तब दैत्यों ने वासुकि का मुख पकडा इस प्रकार उन कश्यपनंदन अर्थात् देव दैत्यों ने अपने २ स्थान का विभाग करलिया ॥ ५ ॥

और बडे यत्न वाले होकर अमृत के लिये समुद्र को मथने लगे, जब उनों ने मथने का आरंभ किया तब नीचे से बिना आधार का वह पर्वत मारे बोझके बडे २ बली लोगों का पकडा हुआ भी जल में डूबगया। हे पाण्डुनन्दन ! तब तौ उन लोगों के मनमें बडा निर्वेद [वैराग्य] आया और अतिबलिष्ठ दैव से जब उनके पौरुषके नाश होगया तब उन सबों के मुखकी कान्ति भी सब उतर गई ॥ ६ ॥ ७ ॥

परमात्मा ने उस समय उस दैविक विघ्न को देखकर, दुरन्तपराक्रम वाले सत्यसंकल्प प्रभु ने आप स्वयं अति अद्भुत कच्छप के रूप को धारण करके जल में प्रवेश कर पर्वत को ऊपर को उठाया ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

लक्षयोजनः प्रस्तारो विस्तारोऽस्यास्तीति तथा तेन पृष्ठेन ॥९॥
तस्य गिरेरावर्तनं भ्रमणमङ्गकण्डूयनं मेने ॥ १० ॥
आसुरेणासुराकारेण दैवेन देवाकारेण रूपेणाविशत्॥११॥१२॥

(१) मघवद्वशाः इति वीर० ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

आत्मनि देवदैत्यमध्ये गोत्रे दाढर्यरूपेण नेत्रे अभेद्यावबोधरूपेण परेण हरिणा चोभितं नक्राणां चक्रं समूहो यस्मिन् ॥ १३ ॥

दशश्च मुखानि च श्वासाश्च अहीन्द्रस्य साहस्रमपरिमिताः कठोरा ये दृगादयस्तेभ्यो निर्गताभ्यामग्निधूमाभ्यामाहतं वर्चो येषां ते सरलाः द्रुमविशेषाः ॥ १४ ॥

देवांस्तु भगवद्वशा घनाः समभ्यवर्षन् समुद्रोर्मिभिरुपगूढा वायवश्च शीतला ववुर्वान्तिरुम कथम्भूतान् तस्याहीन्द्रस्य श्वासशिखाभिर्हता प्रभा येषां धूम्राण्यम्बरादीनि येषाम् ॥ १५-१६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तमुत्थितं कुलाचलं मन्दरं वीक्ष्य सुराश्चासुराश्च पुनर्निर्मथितुं समुत्थिताः बभूवुः गिरिं बिभ्रतं कूर्मरूपिणं वर्णयन्ति, दधारेति । लक्षं योजनानि प्रस्तारो विस्तारोऽस्यास्तीति तथा तेन पृष्ठेन दधार मन्दरमिति शेषः । कथंभूतः अपरो द्वीप इव जम्ब्वादिद्वीप इव महान्विपुलदेहः ॥ ९ ॥

सुरासुरश्रेष्ठैः कर्तृभिर्भुजानां वेगेन बलेन वेपितं कम्पितं भ्रमन्तं गिरिम् अङ्ग हे राजन ! पृष्ठे बिभ्रदप्रमेयोऽपरिच्छिन्नबलशक्त्यादियुक्त आदिकच्छपरूपस्तदावर्तनं गिरिभ्रमणाम् अङ्गकण्डूयनं मेने ॥ १० ॥

एवं जले कच्छपवपुषा गिरिं बिभ्रदेव विष्णुः पुनरसुरानसुररूपेणाविशत् कथम्भूतः तेषामसुराणां बलं वीर्यञ्च ईरयन्नेधयमानः तथा दैवेन रूपेण देवगणान् बलवीर्यादिकमुद्दीपयन्नाविशत् नागेन्द्रं वासुकिमबोधरूपः निद्रारूपः चकारात् नागेन्द्ररूपश्चेत्यर्थः अशः पृथक्स्वरूप एव सर्वबलोत्साहवीर्याणि प्रावर्द्धयदितिभावः (इन्द्रादिरूपः) प्राविशत् ॥ ११ ॥

अगेन्द्रमुपरि गिरेरुपर्यपरो गिरिराडिव सहस्रबाहुरेकेन हस्तेन गिरिमाक्रम्य पुनर्दिव्यभितः स्तुवद्भिर्ब्रह्मादिभिः कर्तृभिः सुमनोभिः पुष्पैः करणैरभिवृष्टः तस्थौ ॥ १२ ॥

गिरिरुपर्यधस्तद्गोत्रनेत्रयोर्गिरिनेत्रयोरात्मनि देवासुरेषु च प्राविशता परेण परमात्मना समेधिताः समुपोद्बलिताः अत एव मदोत्कटा देवासुरास्तरसा बलेन महाद्रिणा मन्दरेण चोभितं नक्राणां चक्रं समूहो यस्मिन् । तमब्धिं ममन्थुः ॥ १३ ॥

तथा दशः नेत्राणि च मुखानि च श्वासाश्चाहीन्द्रस्य वासुकेः साहस्रमपरिमिताः कठोरा ये दृगादयः तेभ्यो निर्गताभ्यामग्निधूमाभ्यां हतं वर्चो येषां तेऽसुराः पौलोमादयः दावाग्निदग्धाः सरलाः द्रुमविशेषास्तद्वचाभवन् ॥ १४ ॥

देवांस्तु मघवद्वशा इन्द्राधीनाः घना मेघाः समभ्यवर्षन् कथम्भूतान्तस्य वासुकेर्निःश्वासस्तस्य शिखया हता प्रभा येषां धूम्राणि निश्वासधूमाक्तान्यम्बराणि वस्त्राणि स्रग्वराणि कञ्चुकान्याननानि च येषां तान् किञ्च समुद्रस्योर्मिभिस्तरङ्गैरुपगूढाः संवृता वायवः पवनाश्च ववुः प्रसस्रुः ॥ १५ ॥

यदा देवासुरैर्मथ्यमानादप्यब्धेरमृतं न जायेत तदा भगवानजितः स्वयमेव निर्ममन्थ मन्थनं चकार ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तस्य गिरेरावर्तनं परिभ्रमणं कण्डूयनं मेने इत्यन्वयः ॥१०॥

तमोगुणप्रवर्तकं रूपं यस्य स अबोधरूपः तिर्यग्रूप इति वा ॥ ११—१२ ॥

आत्मन्यन्तः ॥ १३ ॥

अहीन्द्रस्य साहस्रसङ्ख्यां गनानि करालानि च दिश इव विस्तृतानि च मुखान्यहीन्द्रसाहस्रकरालदिङ्मुखानि तेषां निःश्वासा एवाऽग्नयः निःश्वासाग्नयस्तेषां घूर्णैराहतं वर्चो येषां ते तथा ॥ १४ ॥

अम्बरं वस्त्रं कञ्चुकः कूर्पासकम् ॥ १५ ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

आसुरेण राजसेन दैवेन सात्त्विकेन शक्तिविशेषेण अबोधस्तु तामसः ॥ ११ ॥

दिवि ब्रह्मभवेन्द्रमुख्यैरित्यत्र भवस्य कैलासे दिवि च महेन्द्रादीनां क्षीरोदतीरे दिवि च कायव्यूहो ज्ञेयः ॥ १२—१३ ॥

अहीन्द्रसाहस्राः सहस्रसंख्ययैव परिवृताः न तु शक्त्यादिसङ्ख्यया ॥ १४ ॥ १५ ॥

मथ्यमान इत्यादि सटीकं पद्यद्वयं विगीतम् ॥ १६-१८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तञ्च कुलाचलं स कच्छपः पृष्ठेन दधार । महान् जलमध्यस्थो जम्बूद्वीप इवेत्यर्थः ॥ ९ ॥

पृष्ठोपरि गुरुतरपर्वतपरिभ्रमणेन च न तस्य कष्टं प्रत्युत सुखमेवाभूदित्याह सुरेति ॥ १० ॥

कतिपयक्षणानन्तरं तेषां मन्थने सामर्थ्याभावं वासुकेश्च संघर्षणपीडया प्राणात्यागमिव विलोक्य कृपया प्रभुरेवं विदधाविस्याह—तथेति । आसुरेण राजस्या शक्त्येत्यर्थः । ईरयन् प्रवर्तयन् दैवेन रूपेण सात्त्विकया शक्त्येत्यर्थः । अबोधरूपः तामसशक्तिमयस्सन्नित्यर्थः । अबोध इति मोहेन तस्य पीडाबोधो नाभूदिति भावः ॥ ११ ॥ १२ ॥

ततश्च मन्दरमूर्द्धमुच्छलन्तं वीक्ष्य यत्कृतवांस्तदाह—उपरीति । ब्रह्मादिभ्योऽपि मुख्यैर्विष्णुपार्षदैरित्यर्थः । यद्वा इन्द्रा-

मेघश्यामः कनकपरिधिः (१)कर्णविद्योतविद्युन्मूर्ध्नि भ्राजद्विलुलितकचः स्रग्धरो रक्तनेत्रः।
जैत्रैर्दोर्भिर्जगदभयदैर्दन्दशूकं गृहीत्वा मथ्नन्मथ्ना प्रतिगिरिरिवाशोभताथो धृताद्रिः ॥ १७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

दीनां क्षीरोदतीरे दिवि च कायव्यूहो ज्ञेयः तदेवम् उपरि सहस्र-बाहुरूपेण अधः कच्छपरूपेण आत्मनि दैत्यदेवसमूहे आसुर-दैवरूपेण गोत्रे दार्ढ्यरूपेण नेत्रे अबोधरूपेण प्राविशता परेण हरिणा ॥ १३ ॥

आ सम्यगेव हतवर्चसः सरला द्रुमभेदाः ॥ १४ ॥

देवांश्च दूरवर्तिनस्तत्पुच्छधारिणोऽपि क्षुधा न जायेतेति मन्थनाधिक्यादसारभागे निःसृत एव सुधोद्गमासम्भवादिति भाव. ॥ १५ ॥ १६ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

तं कुलाचलं मन्दरं वीक्ष्य सुरासुरा निर्मथितुमुत्थताः स कूर्मस्तु अपरो द्वीप इव लक्षयोजनानि प्रस्तारोऽस्यास्तीति तथा तेन पृष्ठेन दधार ॥ ९ ॥

अङ्ग हे राजन्! तदावर्त्तनं तस्य मन्दरस्य भ्रमणं अङ्गकण्डू-यनं मेने ॥ १० ॥

आसुरेण असुराकारेण दैवेन देवाकारेण नागेन्द्रमबोधरूपः पीडाभावार्थं जडाकाररूपः आविशत् ॥ ११ ॥

नागेन्द्रं हस्तेनाक्रम्य तदुपरि अन्यगिरिराडिव तस्थौ ॥१२॥

उपर्यधोगिरेरिति शेषः। गोत्रनेत्रयोः गिरिनागयोः आत्मनि देवासुरेषु च प्राविशता परेण परमेश्वरेण समेधिताः महाद्रिणा मन्दरेण क्षोभितं नक्राणां चक्रं यस्मिन् तं ममन्थुः ॥ १३ ॥

अहीन्द्रस्य साहस्रमपरिमिताः कठोराः दृशः नेत्राणि मुखानि च श्वासाश्च तेभ्यो निर्गताभ्यां धूमाग्निभ्यां आ सम्यगेव हतं वर्चो येषां ते दवाग्निदग्धाः सरला द्रुमविशेषा इवाभवन् ॥१४॥

समुद्रोर्मिभिरुपगूढाः वायवश्च ववुः ॥ १५—१६ ॥

———

भाषा टीका।

सब देव और असुरों ने फिर उठे हुए उस पर्वत को देखकर, मन्थन करने को त्यार हुए और श्रीहरि ने एक लक्ष योजन विस्तार वाला कूर्म रूप धारण कर अपने पृष्ठ पर पर्वत को धारण किया, आपका रूप ऐसा विस्तार वाला रहा जैसे एक महान् द्वीप हो ॥ ९ ॥

हे राजन्! देवदैत्यों के भुजबल से फिरते हुए उस मंदरा-चल को भगवान ने पृष्ठ पर धार कर श्री आदिकूर्म ने ऐसा माना कि जानो हमको कोई खुजला रहा है ॥ १० ॥

और उस काल में गोविन्द आसुर रूप से असुरों के और दैव रूप से देवों के मध्यमें तथा अबोध रूप से नागेन्द्र के विषै प्रवेश कर उनके बल पराक्रम को बढते हुए, उद्दीपन करते क्योंकि आयु विष्णु अर्थात् प्रवेश करने के स्वभाव वाले हैं ॥ ११ ॥

तदनन्तर सहस्रभुजा वाले प्रभुने एक दूसरे पर्वत के सदृश रूप धारण कर मन्दराचल के ऊपर हाथ से दबाकर खडे होगये ऐसी लीलों को देखकर आकाश में स्थित होकर ब्रह्म रुद्र आदि देवताओं ने स्तुति करी और गोविन्द पर पुष्पों की वर्षा करी ॥ १२ ॥

जब भगवान ने ऊपर नीचे आत्मा में पर्वत में नेती में इत्यादि सबों में अपनी शक्ति द्वारा प्रवेश किया तब वे मदो-त्कट दैत्य दानव वृद्धि को प्राप्त होकर महाद्रिं के फिरने से क्षुभित हुए मगर मच्छ जिसके ऐसे उस समुद्र को बडे वेग से मथने लगे ॥ १३ ॥

तब वासुकि के हजारों कठोर दृष्टि मुख और श्वास से निकला जो अग्नि और धुंआं उसमे असुरों की कान्ति नष्ट होगई। पौलोम कालेय बलि इल्वल इत्यादि सब दैत्य लोग कुछ तो पहिले ही काले थे फिर वासुकी के अग्नि धूम से तो वन की अग्नि से जले हुए चीड के पेड सदृश होगये ॥ १४ ॥

यद्यपि देवताओं की भी कान्ति वासुकि के श्वास की अग्नि के शिखा से नष्ट होगई और वसन भूषण माला कवच वदन आदिक सबही मलीन होगये, तथापि भगवान के आज्ञानुसारि मेघों ने उनके ऊपर वर्षा करी और समुद्र की तरंगों के ऊपर से आई हुई शीतल पवन भी चलने लगी इस कारण से देवों को उतनी व्याकुलता न हुई ॥१५॥

उस समय देव और असुरों के यूथ पतियों ने भी बडे श्रम से समुद्र को मथा पर जब अमृत नहीं निकला तब श्रीहरि ने स्वयं आपही इकलेने मथा ॥ १६ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका।

धृतोऽद्रिर्येन स धृताद्रिर्भगवान्परमपुरुषोऽन्तरमशोभतेत्य-न्वयः। कथम्भूतः कनकपरिधिः पीतवासाः कर्णयोर्विद्योतमाना विद्युत्कुण्डललक्षणा यस्य तथा मूर्ध्नि भ्राजन्तो विलुलिताः कचाः यस्य स तथा जैत्रैर्जिष्णुभिः दन्दशूकं सर्पं प्रतिगिरिः प्रति-द्वन्द्वी पर्वतः ॥ १७ ॥

(१. कण्ठविद्योतविद्युन्मूर्द्ध्नो क्रामन् वियति चालितः स्रग्धरो इति वीर० ॥

निर्मथ्यमानादुदधेरभूद्विषं महोल्बणं हालहलाह्वमग्रतः ।
सम्भ्रान्तमीनोन्मकराहिकच्छपात्तिमिद्विपग्राहतिमिङ्गिलाकुलात् ॥ १८ ॥
तदुग्रवेगं दिशिदिश्युपर्यधो विसर्पदुत्सर्पदसह्यमप्रति ।
भीताः प्रजा दुद्रुवुरङ्ग ! सेश्वरा अरक्ष्यमाणाः शरणं सदाशिवम् ॥ १९ ॥
विलोक्य तं देववरं त्रिलोक्या भवाय देव्याऽभिमतं मुनीनाम् ।
आसीनमद्रावपवर्गहेतोस्तपो जुषाणं स्तुतिभिः प्रणेमुः ॥ २० ॥

प्रजापतय ऊचुः ।

देवदेव महादेव भूतात्मन्भूतभावन ।
त्राहि नः शरणापन्नांस्त्रैलोक्यदहनाद्विषात् ॥ २१ ॥
त्वमेकः सर्वजगत ईश्वरो बन्धमोक्षयोः ।
तं त्वामर्चन्ति कुशलाः प्रपन्नार्तिहरं गुरुम् ॥ २२ ॥
गुणमय्या स्वशक्त्याऽस्य सर्गस्थित्यप्ययान् विभो ।
धत्से यदा स्वदृग्भूमन्ब्रह्मविष्णुशिवाभिधाम् ॥ २३ ॥
त्वं ब्रह्म परमं गुह्यं सदसद्भावभावनः ।
नानाशक्तिभिराभातस्त्वमात्मा जगदीश्वरः ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हालाहलमित्याह्वा नाम यस्य सम्भ्रान्ता मीना उद्वृत्ता मकरादयश्च यस्मिंस्तस्मात् तिम्यादिभिराकुलाच्च ॥ १८ ॥

तद्विषम् अप्रति अप्रतिमं प्रतिक्रियाशून्यमिति वा कुतः उग्रो वेगो यस्य तदेवाऽऽह—दिशिदिशीति । यद्वा उग्रा वेगा रोमाञ्चस्वेदादयो यस्मादत एवासह्यं विलोक्य भीता अन्येन केनाप्यरक्ष्यमाणाः सदाशिवं शरणं दुद्रुवुर्जग्मुः ॥ १९ ॥

त्रिलोक्या उद्भवाय देव्या सहाद्रौ कैलासे आसीनं तथापि मुनीनामभिमतं तेषामेवापवर्गाय तपो जुषाणम् ॥ २० ॥

निर्गुणं सगुणं चैव शिवं हरिपराक्रमैः ।
स्तुवन्तस्तु प्रजेशाना नामन्यन्तान्तरं तयोः ॥ २१ ॥ २२ ॥

नन्वेवम्भूतो विष्णुरिति प्रसिद्धं तत्राहुः—गुणमय्येति । अस्य जगतो यदा सर्गादीन्धत्से तदा हे भूमन् स्वदृक् स्वतःसिद्धज्ञानस्त्वं ब्रह्मादिसंज्ञां धत्से ॥ २३ ॥

तत्र हेतुः—त्वं ब्रह्मेति । सदसतो भावान्देवतिर्यगादिरूपान्भावयतीति तथा सृज्यं तु त्वद्व्यतिरिक्तं नास्तीत्याहुः आत्मैव त्वं नाना शक्तिभिर्जगद्रूपेणाभातस्तस्मादीश्वरः ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

मथ्नन्तमजितं वर्णयति—मेघश्याम इति । मेघ इव श्यामः "उपमानानि सामान्यवचनैः (। २ । १ । ५५") इति समासः कनकपरिधिः कनकपरिधानः पीताम्बरः कण्ठे द्योतमानविद्युन्निभाऽऽभरणः नियत्याकाशे मूर्ध्ना सकिरीटेनाक्रमन् चलितां स्रजं वनमालां बिभर्तीति तादृशः रक्ते नेत्रे यस्य सः जगतामभयप्रदैर्दोर्भिर्भुजैर्दन्दशूकं सर्पं गृहीत्वा मथ्ना गिरिणाऽब्धिं मथ्नन्नधोधृताद्रिरजितोऽपरो गिरिरिवाशोभत ॥ १७ ॥

एवं निर्मथ्यमानादुदधेः प्रथमम् उल्बणं दुस्सहं हालाहलाख्यं विषमुदभूत् कथम्भूतादुदधेः संभ्रान्ता मीना उद्वृत्ता मकरादयश्च यस्मिन् तस्मात् तिम्यादिभिर्मत्स्यविशेषैराकुलाच्च ॥ १८ ॥

विषं विशिषंस्ततो भीतानां प्रजानां सदाशिवप्रपत्तिमाह—तदिति । तद्विषमप्रति प्रतिक्रियाशून्यमप्रतिमं वा कुतः उग्रः वेगो यस्य तदेवाह दिशिदिशि प्रतिदिशम उपर्यधश्च विसर्पत् उत्सर्पत् उद्गच्छच्च एवंविधं तद्विषं दृष्ट्वेति शेषः । अङ्ग हे राजन् ! सेश्वराः सलोकपालाः प्रजाः त्रिलोकस्थाः अरक्ष्यमाणाः सदाशिवं शरणं दुद्रुवुर्जग्मुः ॥ १९ ॥

त्रिलोक्याः भवाय समृद्ध्यै देव्या भवान्या सहाद्रौ कैलासे आसीनमपवर्गहेतोस्तपो जुषाणं मुनीनामभिमतं देववरं सदाशिवं विलोक्य स्तुतिभिः प्रणेमुः तुष्टुवुः प्रणेमुश्च ॥ २० ॥

स्तुतिमेवाह—देवदेवेत्यादिना व्यक्तकर्मणा इत्यन्तेन । तत्र परमकारणभूतभगवदसाधारणधर्मैरारोपितैर्वा तैः स्तुतिः क्रियते इति सर्वमुपपन्नं रुद्रवाचिशब्दानां शास्त्रदृष्ट्या रुद्रशरीरकपरमात्म-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पर्यन्तत्वेन वा रुद्रस्य परमात्मावेशावतारूपत्वाद्वा सर्वं घटते हे देवानामपि देव, हे सर्वभूतान्तरात्मन्, हे भूतभावन ! भूतभयः शरणं गतानस्मान् त्रैलोक्यं दहतीति त्रैलोक्यदहनः कर्त्तरि ल्युः तस्मात् विषात्त्राहि पाहि ॥ २१ ॥

सर्वस्य जगतो बन्धमोक्षयोस्त्वमेक एवश्वरः तमेवंभूत प्रपन्नदुःखहरं त्वामेव कुशलाः सुधियः अर्चन्त्याराधयन्ति मोक्षेश्वरत्वम् उपायोपदेशद्वारकम् इत्यभिप्रायेण विशिनष्टि गुरुमिति ॥ २२ ॥

गुणमय्या त्रिगुणात्मिकया स्वशक्त्या स्वांशभूतया मायया अस्य जगतः यदा सर्गादीन् बिधत्से करोषि तदा हे विभो, हे स्वदृक् स्वप्रकाश, हे भूमन् ! ब्रह्मविष्णुशिवाभिधां धत्से बिभर्षि ॥ २३ ॥

गुह्यमौपनिषदं परमं सदसद्भावनं चिदचिद्रूपपदार्थभावनं परंब्रह्म त्वमेव "ब्रह्म दृष्टिरुत्कर्षात्" (४।१।५) इति न्यायेनेवं विषार्त्तीताः स्तुवन्ति अत एव ब्रह्मत्वेन स्तुतमप्यात्मानमब्रह्मभूतं ज्ञात्वा वक्ष्यति रुद्रः—

"अहो बत भवान्येतत् प्रजानां पश्य वैशसम्।
पुंसः कृपयतो भद्रे सर्वात्मा प्रीयते हरिः ॥—

प्रीते हरौ भगवति" इति आपन्नानामब्रह्मणि मयि ब्रह्मत्वेन स्तुतिं पश्येति भवान्यै दर्शयित्वा अवश्यं भूतदयया भगवान् सर्वान्तरात्मा परब्रह्मभूतः तुष्यतीति वक्ष्यति तत्तस्मात् रुद्रे परत्वभ्रमः कार्यः तस्माद्रुद्रशरीरकपरमात्मगताः सर्वे चैतत्प्रकरणोदिता धर्माः इत्यवगन्तव्यम् "भूयसां स्याद्बलीयस्त्वम्"इति न्यायेन भगवत्पारम्यस्य प्रायशोऽस्मिन्पुराणे प्रतिपादनात् नानाशक्तिभिराभातश्चिदचित्कालादिशक्तिविशिष्टतया ऽऽभातः प्रपञ्चस्त्वमेव जगदीश्वरस्तदन्तरात्मा च त्वमेव ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कनकपरिधिः कनककाञ्चीकः कर्णविद्योतविद्युदिति लुप्तोपमेयमिति कर्णशब्दप्रयोगेन कुण्डलद्वयमुपलक्ष्यते तेनैवं योजनीयं विशिष्टो द्योतो यथोस्ते विद्योते कर्णयोर्विद्योते विशिष्टदीप्तिनी विद्युद्रूपे इव कुण्डले यस्य स तथा विलुलिता विचलिता वनजवनमाला तां धारयतीति मूर्ध्नि शोभमानविलुलितवनजधरः दन्दशूकं नागेन्द्रं मथ्ना मन्दराख्येन ॥ १७ ॥

उन्मकराः उन्मुखमकराः उत्तिमयः उत्पतिततिमिमत्स्याः सम्भ्रान्तैर्मीनादिभिः आकुलाब्धेः ॥ १८ ॥

दुद्रुवुः शीघ्रं जग्मुः ॥ १९—२२ ॥

यदा सर्गादीन् धत्से तदा ब्रह्माद्यभिधां धत्से ॥२३॥

सदसद्भावा देवासुरतिर्यगादयस्तान् भावयत्युत्पादयति पोषयति वशीकरोति चेति अतः सदसद्भावभावनम् अनेन ब्रह्मशिवयोरन्तर्यामित्वेन स्थितमेव जगदुत्पत्यादि करोतीति निर-

याणि नानाशक्तिभिः आभासः आ समन्ताद्भासो भासनं यस्य स तथा ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

दिशिदिशीति शनैः शनैरेवेति ज्ञेयम्। शीघ्रत्वे झटिति सृष्टिनाशापत्तेः प्रजाश्चात्र देवासुरा एव । साधारणानां समुद्रवृन्दवङ्कनाद्यशक्तेः तत्रापि झटिति ऊर्द्ध्वस्थितत्तद्व्यूहानां तत्रस्थशिवप्रभावेनैव तथादिर्शतिशैया अधः स्थितानान्तु तस्मिन्नगमनम्। विषाग्निना झटित्यूर्द्ध्वव्याप्तेः सम्भ्रमेणा तत्तदस्फूर्तेश्च अरक्ष्यमाणाः श्रीशिवमहिमदर्शनार्थं श्रीभगवत उदासीनीभावात् ॥ १९ ॥ २० ॥

निर्गुणमित्यादिटीकापद्ये हरिपराक्रमैरित्यनेन हरेरेव मूलत्वमायातम् अत एव यत्तदन्तरमस्ति तदपि स्तुतितात्पर्याज्ञानन्यन्तेत्यायानि "स्तुतिश्च महिम्ना स्तूयमाना हि देवा वीर्येण वर्द्धन्ते" इति वैदिकन्यायेन कालकूटनाशनार्थम् । श्रीहरेर्मूलत्वन्तु स्वयं श्रीशिवेनैव वक्ष्यते "पुंसः कृपयतो भद्रे सर्वात्मा प्रीयते हरिः। प्रीते हरौ भगवति प्रीयेऽहं सचराचरः"। इति । तथा नवमे "वयं न तात ! प्रभवाम भूम्नि यस्मिन् परेऽन्येऽप्यजजीवकोशाः। भवन्ति काले न भवन्ति हीदृशाः सहस्रशो यत्र वयं भ्रमामः" इति । "एते वयं यस्य वशे महात्मनः स्थिताः शकुन्ता इव सूत्रयन्त्रिताः" इत्यादि ॥ २१—२४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

कनकपरिधिः कनकवर्णं परिधानं यस्य सः विद्युन्मकरकुण्डलं मथ्ना मथनसाधनेन गिरिणा प्रतिगिरिः कनकगिरेस्तस्य प्रतियोगी इन्द्रनीलगिरिरित्यर्थः ॥ १७ ॥

विषमभूदिति चीरुदादिषु विषस्यामृतस्य च सत्वात् मथने सति प्रथमं विषभागः पृथक्तया उत्थित इति ज्ञेयं हालाहलाख्यमिति "हालाहलं हालहलं तथैव च हलाहलम्" इति द्विरूपकोशः । संभ्रान्ताः केयं विपत्तिरागतेत्याविग्ना मीनादयो यस्मिंस्तस्मात् उन्मकर उत्कृष्टो मकरः तिमितिमिङ्गिलौ मत्स्यभेदौ ॥१८॥

दिशिदिशि विसर्पत् उपरि उत्सर्पत् अधो अवसर्पच्चेति शेषो ज्ञेयः। सर्पणं च शनैः शनैरेवेति ज्ञेयं शीघ्रत्वे झटिति सृष्टिनाशापत्तेः प्रजाश्चात्र देवासुराः एव साधारणानां झटिति समुद्रलङ्घनाद्यशक्तेः अप्रति अप्रातिमं प्रतिक्रियाशून्यमिति वा विलोक्येति शेषः । अरक्ष्यमाणा इति तदानीं भगवता तदुपेक्षणं स्वभक्तश्रेष्ठाय चन्द्रार्द्धमौलये तादृशकीर्तिप्रदानार्थमिति ज्ञेयम्॥१९॥

भवाय भूत्यै सम्पत्त्यर्थमिति यावत् अद्रौ कैलासे मुनीनामपवर्गहेतोस्तपो जुषाणम् ॥ २० ॥

हे महादेव ! त्राहि त्रायस्व ननु, महादेवो न त्रायते किंतु संहरति संहारावतारत्वात् तत्राहुः भूतात्मन् ! भूतानि चेतयसि हे भूतभावन ! भूतानि पालयस्येव ॥ २१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

ननु, भूतभावनो विष्णुरेव तं शरणं यानेति तत्राहुः त्वमेकः नहीश्वराः यद्यो भवन्त्यतस्त्वं विष्णुश्चैक एव मायागुणास्पर्शा-स्पर्शाऽभ्यामेव भेद इति भावः ॥ २२ ॥

पुरुषरूपत्वेन स्तुवन्ति-गुणमय्येति। यदा सर्गादीन् धत्से तदा ब्रह्मादिसंज्ञां धत्से ॥ २३ ॥

निर्विशेषस्वरूपत्वेन स्तुवन्ति-त्वं ब्रह्मेति। ब्रह्मत्वेन स्तुवन्ति सदसद्भावान् उत्कृष्टनिकृष्टस्वभावान् देवतिर्यगादीन् भावयसि सृजसि विष्णुत्वेन स्तुवन्ति नानेति ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

अथो अनन्तरं धृतः अद्रिर्येन सः मेघ इव श्यामः कनकवत् परिधिः परिधानं यस्य सः कर्णयोर्विद्योतमाने विद्युतौ कुण्डललक्षणे यस्य सः मूर्ध्नि भ्राजन्तो विलुलिता विकीर्णाः कचाः केशाः यस्य सः जैत्रैर्जिष्णुभिः जगतामभयदैर्दोर्भिर्दन्दशूकं सर्पं गृहीत्वा मथ्ना गिरिरूपेण मथनसाधनेन अब्धिं मथ्नन् प्रतिगिरिरिव प्रतिद्वन्द्वी पर्वत इवाशोभत ॥ १७ ॥

सम्भ्रान्ताः मीनाः उद्भ्रान्ताः मकरादयो यस्मिन् तस्मात्तिमि-आदिभिराकुलात् महोदधेः प्रथमं विषमभूत् कथम्भूतं महोल्वणं अतिदुःसहं हालहलमित्याह्वा नाम यस्य तत् "हालाहलं हालहलं तथैव च हलाहलम्" इति द्विरूपकोशः ॥ १८ ॥

अहेस्तद्विषम् अप्रति अप्रतिमं दिशि अधश्च विसर्पत् उपरि उत्सर्पञ्च दृष्ट्वा प्रजाः सदाशिवं शरणं दुद्रुवुः जग्मुः कथम्भूताः अरक्ष्यमाणाः तत्रस्थेनाप्यजितेनेति शेषः। तद्रक्षणे तु गरलपानाभावे नीलकण्ठत्वादिवैदविरोधापत्तिरिति भावः ॥ १९ ॥

ताः प्रजाः देववरं विलोक्य स्तुतिभिः तुष्टुवुः प्रणेमुश्च कथंभूतं त्रिलोक्याः भवाय समृद्ध्यै भवान्या सह अद्रौ आसीनम् मुनीनां मननशीलानां तपश्चरतां तेषामभिमतं सम्मतं तपः अपवर्गहेतोः जुषाणम् ॥ २० ॥

"सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः" "एते वयं तस्य वशे महात्मनः स्थिताः शकुन्ता इव सूत्रयन्त्रिताः" इत्यादिब्रह्मशिव-वाक्यात् "क इति ब्रह्मणो नाम ईशोऽहं सर्वदेहिनाम्। आवां तवाङ्गसम्भूतौ तस्मात्केशवनामवान्" इति हरिवंशे शिववाक्यात् "नारायणाद् ब्रह्मा जायते, नारायणाद्रुद्रो जायते" इति श्रुतेश्च शिवस्य भगवज्जन्यत्वेन भगवद्दत्तसंहारशक्तियुक्तत्वेन भगवदंशत्वेन च तदभिन्नत्वात् परमकारणभूतभगवदसाधारणैर्गुणैः स्तुतिः क्रियते-देव देव इत्यादिना। त्राहि त्रायस्व ॥ २१ ॥ २२ ॥

गुणमय्या सत्त्वादिगुणमय्या ॥ २३ ॥

सदसतः साध्वसाधून् सुरासुराभावान् भावयतीति तथा आत्मा जगदात्मा जगदीश्वरश्च ॥ २४ ॥

भाषा टीका।

जब आप इकले ही समुद्र मथने लगे उस समय की शोभा कहते हैं, कि—आप तो स्वयं मेघ के सदृश वर्ण वाले हैं और कटि के ऊपर जो आपने पीतांबर का लपेटा दिया है सो ऐसे मालूम होता है कि जैसे सजल मेघ पर सुवर्ण का लपेटा दिया हो, और मथने से कर्णों में चलायमान मकराकृतिकुंडल बिजुली सदृश चमक दमक देरहे हैं, और मस्तक पर हलते चलते हुए केश न्यारी शोभा कर रहे हैं, मालाओं को धारण किये हुए हैं और कमल सदृश लोचनों में किञ्चित् ललाई भी शोभित होरही है, इस प्रकार के श्रीहरि जगत के अभय देने वाले आपने विजयी बाहुओं से वासुकि नाग को ग्रहण कर मंदराचल रूप मथानी से समुद्र को मथते हुए दूसरे पर्वत के सदृश शोभा को प्राप्त होते हुए, और कूर्मरूप धारण करके नीचे से पर्वत को भी आपही धारण किये हुए हैं ॥ १७ ॥

इस प्रकार भगवान के मथने से उस समुद्र से हालाहल नाम जिसका ऐसा बडा तीक्ष्ण और जिसकी उपमा नहीं अथवा जिसके भक्षण पर कुछ उपाय नहीं इस प्रकार का विष उत्पन्न हुआ, उस समय समुद्र के मीनादि जंतु संभ्रांत होगये और मकर कच्छपादि जंतु बाहर निकल आये, तथा द्विप ग्राह और तिमिंगल ये सब जंतु व्याकुल होगये ॥१८॥

जब वह विष असह्य वीर्य वाला बडे वेग से ऊपर नीचे और चारों तर्फ को फैलने लगा। तब हे राजन्! प्रजापतिओं सहित प्रजालोग उसके भय से भागने लगे और जब किसी ने रक्षा न करी तब सदाशिव श्रीमहादेव जी के शरण गये ॥ १९ ॥

और उनों ने देव वर श्रीमहादेव जी को देखा, कि त्रिलोकी के कल्याण के लिये श्रीपार्वती जी के सहित कैलास पर्वत पर विराजमान हैं और मोक्षार्थ मुनि लोगों के अभिमत तप का सेवन कररहे हैं ऐसे सदाशिव को प्रजापति लोगों ने प्रणाम किया ॥ २० ॥

॥ प्रजापतय ऊचुः ॥

प्रजापति लोग बोले, कि हे देवदेव! हे महादेव! हे भूतात्मन्! हे भूतभावन! त्रैलोक्य के जलाने वाले इस विष से हमारी रक्षा करो, हम लोग आपके शरण हैं ॥ २१ ॥

अब सब प्रजापति लोग शिवके अंतर्यामि परमात्मा की बुद्धि से श्रीशिवजी की स्तुति करने लगे, और बोले, कि—हे भगवन्! संपूर्ण जगत के बन्ध मोक्ष के आपही नियंता हो, प्रपन्नों की आर्ति (दुःख) के हरण करने वाले, और अज्ञानरूप अंधकार को दूर करने वाले ऐसे आप को कुशल लोग पूजते हैं ॥ २२ ॥

हे भूमन्! हे विभो! आप अपनी त्रिगुणमयी माया शक्ति से जगत के सृष्टि स्थिति और संहार के लिये ब्रह्मा

त्वं शब्दयोनिर्जगदादिरात्मा प्राणेन्द्रियद्रव्यगुणस्स्वभावः।
कालः क्रतुः सत्यमृतञ्च धर्मस्त्वय्यक्षरं यत् त्रिवृदामनन्ति ॥ २५ ॥
अग्निर्मुखं तेऽखिलदेवतात्मा क्षितिं विदुर्लोकभवाङ्घ्रिपङ्कजम्।
कालं गतिं तेऽखिलदेवतात्मनो दिशश्च कर्णौ रसनं जलेशम् ॥ २६ ॥
नाभिर्नभस्ते श्वसनं नभस्वान् सूर्यश्च चक्षूंषि जलं स्म रेतः।
परावरात्मा[(१)]श्रयणं तवात्मा सोमो मनो द्यौर्भगवन्! शिरस्ते ॥ २७ ॥
कुक्षिः समुद्रा गिरयोऽस्थिसङ्घा रोमाणि सर्वौषधिवीरुधस्ते।
छन्दांसि साक्षात्तव सप्तधातवस्त्रयीमयात्मन्हृदयं [(२)] सर्वधर्मः ॥ २८ ॥
मुखानि [(३)] पञ्चोपनिषदस्तवेश! यैस्त्रिंशदष्टोत्तरमन्त्रवर्गः।
यत्तच्छिवाख्यं[(४)] परमार्थतत्त्वं देवः स्वयञ्ज्योतिरवस्थितिस्ते ॥ २९ ॥
छाया त्वधर्मो[(५)]र्मिषु यैर्विसर्गो नेत्रत्रयं सत्त्वरजस्तमांसि।
[(६)]साङ्ख्यात्मनः शास्त्रकृतस्तवेक्षा छन्दोमयो देव! ऋषिः पुराणः ॥ ३० ॥
न ते गिरित्राखिललोकपालविरिञ्चवैकुण्ठसुरेन्द्रगम्यम्।
ज्योतिः परं यत्र रजस्तमश्च सत्त्वं न यद्ब्रह्म निरस्तभेदम् ॥ ३१ ॥
कामाध्वरत्रिपुरकाल[(७)]गराद्यनेकभूतद्रुहः क्षपयतः स्तुतये न तत्ते।
यस्त्वन्तकाल इदमात्मकृतं स्वनेत्रवह्निस्फुलिङ्गशिखया भसितं [(८)] न वेद ॥ ३२ ॥

भाषा टीका।

विष्णु और शिव इन तीन संज्ञाओं को सदा आपही धारण करते हो ॥ २३ ॥

आपही परम ब्रह्म हो और गुह्य हो और कार्य कारण जगत् के वृद्धि करने वाले हो, आपही नाना शक्तियों से मान होने वाले आत्मा और जगदीश्वर हो ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

स्वतःसिद्धज्ञानत्वमुपपादयन्तो जगदात्मना आभानप्रकारमाहुः—त्वं शब्दस्य वेदस्य योनिरतः स्वतःसिद्धज्ञानः त्वं जगदादिर्महत्तत्त्वम् आत्मा चाहङ्कारः कथम्भूतः प्राणेन्द्रियद्रव्याणां कारणभूता गुणा यस्य राजसादित्रिविध इत्यर्थः। स्वभावाद्यश्च त्वमेव क्रतुः सङ्कल्पः सत्यमृतञ्चेति यो धर्मः स त्वं महदादिस्वरूपत्वे हेतुः त्रिवृत् त्रिगुणात्मकं यदक्षरं प्रधानं त्वदाश्रयं तदामनन्ति यद्वा परमभूते त्वयि त्रिवृदक्षरं प्रणवं प्रकाशकमाहुरित्यर्थः ॥ २५ ॥

अखिलदेवतात्मा "अग्निः सर्वा देवताः" इति श्रुतेः। सोऽग्निस्ते मुखम् हे लोकभव! क्षितीर्यांतेषु विदुरित्यस्य सम्बन्धः ॥ २६ ॥

परे अवरे च ये आत्मानो जीवास्तेषामाश्रयस्तवात्माऽहङ्कारः ॥ २७ ॥

त्रयीमयात्मन्वेदत्रयमूर्ते! ॥ २८ ॥

पञ्चोपनिषदस्तत्पुरुषाघोरसद्योजातवामदेवेशानरूपा मन्त्राः यैर्मुखैरष्टोत्तरत्रिंशत्संज्ञाणां वर्गः तेषामेव मन्त्राणां पदच्छेदेनाष्टोत्तरत्रिंशत्कलात्मका मन्त्रा इत्यर्थः। अवस्थितिरुपरतावस्था ॥ २९ ॥

अधर्मस्योर्मिषु दम्भलोभादिषु यैरूर्मिभिर्विसर्गः संहारः यद्वा यैः सत्त्वादिभिर्विविधः सर्गस्तानि नेत्रत्रयम् हे देव! छन्दोमयऋषिर्वेदः स तवेक्षा ईक्षणम् साक्षान्मनुरिति पाठे मनुर्वेदः तमेवाह, छन्दोमय इति ॥ ३० ॥

हे गिरित्र! ते परं ज्योतिरखिलानां लोकपालादीनां गम्यं न भवति कुतः यत्र रजआदि नास्ति किं तज्ज्योतिः यन्निरस्तभेदं ब्रह्म ॥ ३१ ॥

कामश्चाध्वरश्च दक्षयज्ञस्त्रिपुरादयश्च ये अनेकभूतद्रुहस्तान् क्षपयतः संहरतस्ते तत्कर्म स्तुतये न भवति अल्पत्वमेतदित्यर्थः गरलपानस्याप्यवश्यं भावित्वेन सिद्धवन्निर्देशः स्तुतयेऽलं न भवतीत्यत्र हेतुः यस्तु भवान्स्वनेत्रवह्निविस्फुलिङ्गस्य शिखयेदं जगद्भसितं भस्मसात्कृतं न वेद नालोचयत्यपि ॥ ३२ ॥

(१) द्रुहिणः इति विज० (२) सधर्मः इति वीर० विज ३) पञ्चोपनिषत्तवेश इति विज० (४ परमात्मतत्त्वं इति वि० वी० .५ स्तूर्मयः इति विज० (६) साक्ष्यात्मनः इति वीर० साक्ष्यात्मनः इति वि० (७) हरा इति विज० (८) तवेश इति विज०

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

त्वमेव शब्दयोनिश्शास्त्रप्रमाणकः जगदादिः जगत्कारणभूतः आत्मा "आत्मन आकाशस्सम्भूतः" इत्युक्तस्त्वमेव द्रव्यं भूतपञ्चकं स्वभावो विशेषणं प्राणेन्द्रियद्रव्यगुणस्वभावः प्राणादिविशेषणवानित्यर्थः । कालादिशरीरकश्च त्वमेव, तच्छरीरको यः परमात्मा स एव कालादिशरीरक इति तात्पर्यं सत्यमृतं "ऋतं सत्यं परं ब्रह्म" इत्युक्तं निर्विकारं सर्वान्तरात्मभूतं ब्रह्मत्वमेवेत्यर्थः धर्मः धर्मशरीरकस्तदाराध्यो वा त्वमेव, त्रिवृत्त्रयाणांवृद्धर्तनं यस्मिंस्तत् अकारोकारमकारात्मकमक्षरं प्रणवं त्वय्येवाऽऽमनन्ति त्वद्विषयकमेवामनन्तीत्यर्थः ॥ २५ ॥

विराड्रूपं स्तुवन्ति—अग्निरिति । अखिलदेवतात्मा "अग्निः सर्वा देवताः" इति सर्वदेवतामयत्वेन श्रुतोऽग्निस्ते तव मुखं क्षितिं पृथ्वीं हे लोकभव ! तवाङ्घ्रिपङ्कजं पादपद्मं विदुः कालं त्वखिलदेवतात्मनः तव गतिं विदुः तथा दिशस्तव कर्णौ विदुः जलेशं वरुणं तव रसनं जिह्वां विदुः ॥ २६ ॥

नभ आकाशस्तव नाभिः नभस्वान्वायुस्तव श्वसनं श्वासः सूर्यस्तव चक्षूंषि नेत्राणि जलं तव रेतः तवात्मा परेऽवरे च ये आत्मानो जीवास्तेषामाश्रयणमाश्रयः आधारः सोमः चन्द्रस्तव मनः हे भगवन् ! द्यौस्स्वर्लोकस्तव शिरः ॥ २७ ॥

समुद्रास्तव कुक्षिः गिरयः पर्वतास्त्वस्थिसमुदायाः सर्वा ओषधयो वीरुधश्च तव रोमाणि छन्दांसि गायत्र्यादीनि साक्षात्तव सप्तधातवः हे त्रयीमयात्मन्वेदप्रचुरमूर्ते स प्रसिद्धो वेदोदितो धर्मः तव हृदयम् ॥ २८ ॥

हे ईश ! पञ्चोपनिषदः तत्पुरुषाघोरसद्योजातवामदेवेशानात्मकपञ्चानुवाकाः तव मुखानि मुखव्यापारात्मका इत्यर्थः । मुखानि विशिनष्टि—यैर्मुखैस्त्रिंशदष्टोत्तरमन्त्रवर्गाः अष्टोत्तरत्रिंशन्मन्त्राणां वर्गास्तेषामेव मन्त्राणां परिच्छेदेनाष्टोत्तरत्रिंशत्कलात्मका मन्त्रा इत्यर्थः । हे देव ! यत्स्वप्रकाशं शिवाख्यं "पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम्" इति प्रसिद्धं परमात्मतत्त्वं तत् ते तवावस्थितिरवस्थानं परमात्मशरीरत्वेन तदपृथक्सिद्धत्वेनावस्थितिस्त्वमिति तात्पर्यम् ॥ २९ ॥

अधर्मस्योर्मिषु दम्भलोभादिषु तव छाया अप्रकाशः अधर्मोर्मयः तव छायाभूता इत्यर्थः । यैस्सत्त्वादिभिर्गुणैर्विसर्गः प्रपञ्चसृष्टिस्तानि सत्त्वरजस्तमांसि तव नेत्रत्रयं हे देव ! छन्दोमयः गायत्र्यादिछन्दःप्रचुरः पुरातनः ऋषिर्वेदः साक्ष्यात्मनः सर्वज्ञस्यात्मनः शास्त्रप्रणेतुस्तव ईक्षा ईक्षणं ज्ञानमित्यर्थः ॥ ३० ॥

हे गिरित्र, हे ऽखिललोकपाल ! ते तव परं ज्योतिः स्वप्रकाशं स्वरूपं विरञ्च्यादिभिर्गम्यं वैकुण्ठः उपेन्द्रः सुरेन्द्रसमभिव्याहारात्तस्याप्यगम्यत्वमतिस्तुतिः यद्वा अस्य प्रकरणस्य रुद्रशरीरकपरमात्मस्तुतिपरत्वात्परमात्मस्वरूपस्यापरिच्छिन्नत्वेन तेनापीयत्तयावगन्तुमशक्यत्वाद्वैकुण्ठेनाप्यगम्यत्वमुक्तम् ज्योतिर्विशिनष्टि—यत्र ज्योतिषि रज आदयः प्राकृतगुणाः न सन्ति यद्ब्रह्म यच्च निरस्तदेवमनुष्यादिभेदम् ॥ ३१ ॥

कामश्चाध्वरश्च दक्षश्च त्रिपुरादयश्च येऽनेकभूतद्रुहस्तान् क्षपयतः संहरतः ते तव स्तुतये तत्कामादिक्षपणात्मकं कर्म न भवति तत्कर्म त्वत्स्तुतये न भवति अत्यल्पमेतदित्यर्थः तदेव वक्तुं विशिनष्टि—यो भवांस्तु आत्मकृतं स्वसृष्टमिदं जगदन्तकाले स्वनेत्रवह्निस्फुलिङ्गस्य शिखया भसितं भस्मसाज्जातं न वेद न जानातीत्यर्थः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

शब्दयोनिर्ज्ञप्तिकारणं यस्य स तथा प्राणादिसत्ताप्रदः तत्तत्स्वभावप्रवर्तकः क्रतुः सत्यकामः संकल्पप्रवर्तको वा सत्यं सान्द्रानन्दरूपम् ऋतमेकप्रकारं धारकत्वाद्धर्मः यत्त्रिवृदकारादिवर्णत्रयात्मकं तदक्षरं प्रणवलक्षणं त्वयि त्वद्वाचकत्वेन प्रवर्तत इत्यामनन्ति "ओमित्येकाक्षरम्" इत्यादिवेदान्ताः ॥ २५ ॥

अखिलदेवतात्मा अखिलदेवताभ्यो हविर्भागदाता हे लोकभव जगत्कर्तः । अखिलदेवतान्तर्यामिणः ॥ २६ ॥

द्रुहिणस्तवात्मा सत्त्वं लक्षणं चित्तम् ॥ २७—२८ ॥

"ईशानः सर्वविद्यानाम्" इत्यादि पञ्च मन्त्राः यैर्मन्त्रैस्त्रिंशदष्टोत्तरमन्त्रवर्गः अष्टत्रिंशत्कलालक्षणाः मन्त्रसमूहः उत्पन्न इति शेषः यच्छिवाख्यं तद्वस्तु तेऽवस्थितिरवस्थानं तदनुग्रहादिति शेषः ॥ २९ ॥

यैः सत्त्वादिभिः सर्गो भवति तानि सत्त्वादीनि तव नेत्रत्रयं साक्षान्मनुः शास्त्रकृत् तवेक्षा ततो जातः देवर्षिस्तवच्छन्दोमय इच्छातो जातः ॥ ३० ॥

यत्तव परं ज्योतिः रूपं तद्विरिञ्च्यादिभिर्गम्यं न सर्वात्मनेति शेषः । निरस्तभेदम् "नेह नानास्ति किञ्चन" इति श्रुतेः ॥ ३१ ॥

कामाद्यनेकभूतहिंसकस्य क्षपयतः संहरतस्तव स्तुतये तत्क्षपणशक्तिः कुत इति तत्राह—यदिति । हे ईश ! प्रलयकाले तव स्वस्य नेत्रस्य नेत्रवह्नेः स्फुलिङ्गशिखया भसितं भक्षितमिदमात्मकृतं जगदात यत्तस्मादित्यन्वयः । अत्र हरेतिपदोपादानादियं स्तुतिः श्रीहरिविषयेति ज्ञायते "सर्वात्मा प्रीयते हरिः" इति वक्ष्यमाणवाक्याच्च—

"तत्र तत्र स्तुतिं पदैर्हरिरेव तु तद्गतः ।
स्तूयतेऽतो युक्तमेव गुणाधिक्यवचोऽपि तु"

इति वचनाच्च ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

"ऋतञ्च सूनृता वाणी सत्यञ्च समदर्शनम्" ॥ २५ ॥

गतिं चेष्टाम् ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥

अधर्मोर्मिषु ते तव छाया प्रकाशाभावः ॥ ३० ॥

न ते इति, यच्छिवस्य ज्योतिः परमात्मलक्षणं तत्र स्थितं तत्सम्यग् ज्ञाने तस्याप्यक्षमता युक्तैवेति वा व्याख्येयम् । तदुक्तम् "द्युपतय एव ते न ययुरन्तमनन्ततया त्वमपि" इति ॥ ३१ ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

सर्ववाचकवाच्यत्वेन स्तुवन्ति, त्वं निखिलशब्दानां योनिरकारादिवर्णसङ्घः प्राणाश्च इन्द्रियाणि च द्रव्याणि पृथिव्यादीनि च तैः सह गुणाः सत्त्वादिश्च त्वं त्रिवृदक्षरं यत् प्रधानसंज्ञं तत्त्वमेव आमनन्ति तच्छब्दवाचकमिति निश्चिन्वन्तीत्यर्थः॥२५॥

समष्टिरूपत्वेन स्तुवन्ति—अग्निरिति पञ्चभिः। अखिलदेवतात्मा "अग्निः सर्वा देवताः" इति श्रुतेः। हे लोकभव!॥ २६॥

परेषामवरेषामात्मनामुत्कृष्टनिकृष्टजीवानाम् आश्रयणाम् आश्रयस्तवात्मा अहङ्कारः॥ २७॥

त्रयीमयात्मन् वेदत्रयमूर्त्ते!॥ २८॥

पञ्चोपनिषदः*तत्पुरुषाघोरसद्योजातवामदेवेशानरूपा मन्त्राः यैर्मुखैरष्टोत्तरत्रिंशन्मन्त्राणां वर्गः तेषामेव मन्त्राणां पदच्छेदेन अष्टोत्तरत्रिंशत् कलात्मका मन्त्रा इत्यर्थः। यत्तत्र परमात्मत्वं परमात्मा तच्छिवाख्यं शिव एव परं स्वयं ज्योतिः स्वप्रकाशो देवो विष्णुरवस्थितिराश्रयः॥ २९॥

अधर्मस्य ऊर्मिषु ऊर्मयः दम्भाद्यास्छाया इत्यर्थः। यैः सत्त्वादिभिर्विविधः सर्गस्तानि नेत्रत्रयं हे देव! छन्दोमयः ऋषिर्वेदस्तवेक्षा ईक्षणं साक्षान्मनुरिति पाठेऽपि मनुर्वेदः॥ ३०॥

हे गिरित्र! ते तव ज्योतिर्यत् परं ब्रह्म तत् अखिललोकपालादीनां गम्यं न भवति अत्र वैकुण्ठस्य विष्णोः स्वरूपमेव यद्यपि परं ब्रह्म तदपि तस्य स्वस्वरूपस्य स्वागम्यत्वं नापकर्षः "स्वपुष्पज्ञानं सार्वज्ञ्यं न निहन्ति" इति न्यायात् यद्वा विरिञ्चादिसुरेन्द्रान्तानि सम्बोधनपदान्येव व्याख्येयानि॥ ३१॥

न च साम्प्रतिकं विषस्योपशमनं त्वया दुष्करमित्याहुः कामेति। कामादयो येऽनेकभूतद्रुहस्तान् क्षपयतः संहरतस्तव तत् विषोपशमनं कर्म्म स्तुतये न भवति अत्यल्पत्वात् अध्वरो दक्षयज्ञः कालो गरश्च दैत्यविशेष आसीत् किं वा अस्यैवाध्वरसंहारार्थत्वेन लिङ्गवाग्निर्दैशः भसितं न वेद इति कदा जगदिदम्भस्मीकृतमित्यपि न वेद नानुसन्धत्ते तस्यैतद्विषमात्रसंहारः कियानिति भावः॥ ३२॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

शब्दो वेदः योनिर्ज्ञापकः शब्दस्य वा निश्वासभूतस्य योनिः प्रवर्तकस्त्वमसि जगदादिर्महान् आत्माऽहङ्कारः प्राणस्य इन्द्रियाणां द्रव्यानां पञ्चमहाभूतानां गुणानां शब्दादीनां स्वभावः स्वतो हेतुः कालादिरूपस्त्वमेव तत्र कालः जगत्सृष्टिसंहारादिनिमित्तम् क्रतुः संसारप्रापकः प्रवृत्तिधर्मः सत्यमृतञ्च निवृत्तिधर्मः त्रिवृदक्षरं त्रिगुणं प्रधानं यदामनन्ति तत्त्वमेवासि॥ २५॥

एवं सर्वस्रष्टृत्वसर्वपूज्यत्वसर्वरूपत्वादिना स्तुत्वा विराड्रूपेण स्तुवन्ति—अग्निरित्यादिना। हे लोकभव! "अग्निः सर्वा देवताः" इति श्रुतेः अखिलदेवतात्मा अग्निस्ते मुखमस्ति किञ्च क्षितिं तवाङ्घ्रिपङ्कजं विदुः॥ २६॥

परावरयोः प्रकृत्योः आत्माश्रयणं स्वरूपाश्रयः जीवमायास्वरूपस्थितिप्रवृत्त्यादिप्रदः तवात्मा त्वत्स्वरूपमित्यर्थः॥ २७॥

हे त्रयीमयात्मन्! वेदत्रयप्रचुरमूर्ते छन्दांसि गायत्र्यादीनि॥२८॥

हे ईश! पञ्चोपनिषदः तत्पुरुषाघोरसद्योजातवामदेवेशानमन्त्राः यैर्मुखैः त्रिंशदष्टोत्तरवर्गः तेषामेव मन्त्राणां पदच्छेदेनाष्टोत्तरत्रिंशत् कलात्मकमन्त्रसमूह इत्यर्थः। यत्स्वयंज्योतिः शिवाख्यं प्रकाशरूपं कल्याणं परमार्थतत्त्वं परमकारणं तत् हे देव! ते अवस्थितिः॥ २९॥

अधर्मस्योर्मिषु दम्भलोभादिषु छायाभावप्रधानो निर्देशः अधर्मोर्मयस्तवच्छायेत्यर्थः। यैः सत्त्वादिभिर्विविधः सर्गस्तानि नेत्रत्रयम् हे देव! साक्षान्मनुः छन्दोमयः गायत्र्यादिछन्दप्रचुरः ऋषिः वेदस्तवेक्षा ईक्षणम्॥ ३०॥

हे गिरित्र! हे अखिललोकपाल, हे विरिंच्य, हे वैकुण्ठ, हे सुरेन्द्र! ते ज्योतिः गम्यं न भवति इयत्तानवच्छिन्नत्वात् तत्र हेतुमाहुः यत्र रज आदि न भवति रज आदियुक्तं तु गम्यं भवेदित्यर्थः। ननु, तत् कीदृशमित्यत्र ब्रह्मेति परमात्मेति भगवानितिशब्द्यते, "वासुदेवात्परो ब्रह्मन्नचान्यार्थोऽस्ति तत्वतः। नायं न यूयं यद्दतां गार्नि विदुर्न वामदेवः" इत्येवं सर्वशास्त्रविषयं तत्त्वमाहुः यन्निरस्तभेदं सजातीयविजातीयभेदशून्यम् ब्रह्म बृहद्गुणशक्त्याद्याश्रयं स्वगतभेदयुक्तमित्यर्थः। परं पूर्णं तत्॥ ३१॥

कामादयो येऽनेकभूतद्रुहस्तान् क्षपयतः संहरतस्ते तत् कामादिक्षपणं स्तुतये न भवति तत्र हेतुः यस्तु भवान् आत्मकृतमिदं जगत् अन्तकाले स्वनेत्रवह्निविस्फुलिङ्गस्य शिखया भसितं भस्मसाज्जातं न वेद॥ ३२॥

भाषाटीका।

और आपही वेदात्मक शब्द के प्रादुर्भाव के कारण हो जगत के आदि आत्मा आपही हो, प्राण, इन्द्रिय, द्रव्य, गुण, और स्वभावादिक भी आपही हो, कालरूप, यज्ञरूप सत्य और धर्म भी आपही, और तीनगुणवाली प्रकृति को आप के ही विषे कहते हैं॥ २५॥

अखिलदेवस्वरूप अग्नि को आप का मुख कहते हैं हे लोकपालक! पृथिवी को आपका चरण कमल कहते हैं और काल को अखिल देवतात्मक आपकी गति कहते हैं और दिशाओं को आपका कर्ण कहते हैं वरुण को आपके रसनइन्द्रियमें कहते हैं॥ २६॥

आकाश आपकी नाभि है, पवन आप का श्वास है, सूर्य चक्षु है जल रेतस् (वीर्य) है हे भगवन्! और

* तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात्॥ १॥ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यस्सर्वतस्सर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥ २॥ सद्योजातं प्रपद्यामि सद्यो जाताय वै नमः। भवे भवेनातिभवं भजस्व मां भवोद्भवाय नमः॥ ३॥ वामदेवाय नमो ज्येष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलप्रमथनाय नमस्सर्वभूतदमनाय नमो मनोन्मनाय नमः॥ ४॥ ईशानस्सर्वविद्यानामीश्वरस्सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम्॥ ५॥ इति

ये त्वात्मरामगुरुभिर्हृदिचिन्तिताङ्घ्रिद्वन्द्वं चरन्तमुमया तपसाभितप्तम् ।
कत्थन्त* उग्रपरुषं निरतं श्मशाने ते नूनमूतिमविदंस्तव हातलज्जाः ॥ ३३ ॥
तत्तस्य ते सदसतोः परतः परस्य नाञ्जः स्वरूपगमने प्रभवन्ति भूम्नः ।
ब्रह्मादयः किमुत संस्तवने वयं तु तत्सर्गसर्गविषया अपि [1] शक्तिमात्रम् ॥ ३४ ॥

एतत्परं प्रपश्यामो [2] न परं ते महेश्वर ।
मृडनाय हि लोकस्य व्यक्तिस्तेऽव्यक्तकर्मणः ॥ ३५ ॥

श्रीशुक उवाच ।

तद्वीक्ष्य व्यसनं तासां कृपया भृश [3] पीडितः ।
सर्वभूतसुहृद्देव इदमाह सतीं प्रियाम् ॥ ३६ ॥

श्रीशिव उवाच ।

अहो बत भवान्येतत्प्रजानां पश्य वैशसम् ।
क्षीरोदमथनोद्भूतात्कालकूटादुपस्थितम् ॥ ३७ ॥
आसां प्राणपरीप्सूनां विधेयमभयं हि मे ।
एतावान् हि प्रभोरर्थो यद्दीनपरिपालनम् ॥ ३८ ॥
प्राणैः स्वैः प्राणिनः पान्ति साधवः क्षणभङ्गुरैः ।
बद्धवैरेषु भूतेषु मोहितेष्वात्ममायया ॥ ३९ ॥
पुंसः कृपयतो भद्रे ! सर्वात्मा प्रीयते हरिः ।
प्रीते हरौ भगवति प्रीयेऽहं सचराचरः ॥
तस्मादिदं गरं भुञ्जे प्रजानां स्वस्तिरस्तु मे ॥ ४० ॥

भाषा टीका ।

आपका आत्मा सब जीवों का आश्रय है, चन्द्र आपका मन है, स्वर्ग आपका शिर है ॥ २७ ॥

समुद्र आपका कुक्षि है, पर्वत आप के अस्थि समूह हैं, सर्व औषधि और वृक्ष आप के रोम हैं, छन्द आप के सप्त धातु हैं । हे वेदमूर्त्ते ! सर्व धर्मआपका हृदय है ॥ २८ ॥

हे ईश ! पंच उपनिषदें आप के मुख हैं जिन से अष्टोत्तर त्रिंशत् ३८ कलारूप मन्त्र हुए और जो शिवनाम धेय परमार्थतत्त्व जो स्वयं ज्योति है वह तुमारीअवस्थिति है अर्थात् उपराम की अवस्था है ॥ २९ ॥

जिनलोभादिक षट ऊर्मियों से संहार होता है वे आप की छाया हैं, और सत्त्व रज और तम ये तीन गुण आप के तीनों नेत्र हैं और साक्षात् वेद जो है वह शास्त्र कार जो आप हैं तिनका सङ्कल्प है हे देव ! जो छन्दोमय प्राचीन ऋषि है अर्थात् ऋषि नाम धेय वाला है ॥ ३० ॥

हे गिरित्र ! आपका पर ज्योति निरस्त भेद ब्रह्म स्वरूप है॥३१॥

काम और दक्ष का यज्ञ और त्रिपुर, काल, विष, आदि जो अनेक भूतों के द्रोह करने वाले हैं उनके नाश करने वाले ऐसे आप के ये सब कर्म कुछ स्तुति के लिये नहीं है क्योंकि अन्तकाल में आप अपने नेत्र की अग्नि की शिखा से भस्महोने वाले अपने किये हुए इस जगत को भी नहीं जानते हैं ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेवं नित्यं परानुग्रहव्यग्रं त्वां ये निन्दन्ति तेऽतिमूर्खा इत्याहु· ये तु उमया सह चरन्तं तस्यां नितरां रतं कामिनं कत्थन्तो प्रव· पन्ति तथा श्मशाने चरन्तमुग्रं क्रूरं परुषं च हिंस्रं कत्थन्ते कथं· भूतम् आत्मारामाश्च ते गुरवो विश्वहितोपदेष्टारस्तैर्हृदि चिन्तित·

* उग्रवपुषमिति विज० (१) भक्ति इति विजयं० (२) नापरं ते महेश्वरम् इति वीर० (३) मीडितः इति वीर० ।

श्रीधरस्वामिकृतभावार्थदीपिका।

मङ्घ्रिद्वन्द्वं यस्य तथाभूतमपि तपसाऽभितप्तमपि ते नूनं तवोतिमविदन्निति काकुः त्वल्लीलां नैव विदुरित्यर्थः। अतो हातलज्जाः त्यक्तत्रपाः कथमात्मारामैः सेवितचरणयुगलस्य ते कामित्वं सम्भवति कथं वा तपसाऽभितप्तस्य शान्तस्योग्रत्वं परुषत्वं वा सम्भवतीत्यविचार्यप्रलापादित्यर्थः॥ ३३॥

आस्तां तावन्निन्दकानां वार्ता महान्तोपि तव तत्त्वं न जानन्तीत्याहुः—तत्तस्मात्तव स्वरूपस्य गमने ज्ञाने ब्रह्मादयोपि न समर्थाः संस्तवने तु कुतः शक्ताः स्युस्तत्र वयं कथं प्रभवेम यस्तेषां सर्गे अत्यन्तार्वाचीनाः तथापि यदेतत्तव स्तवनमेतदात्मशक्तिपरिमितमात्रमित्यर्थः॥ ३४॥

तदेवाहुः-एतत्परमिति। न परं रूपं तथाऽपि त्वद्दर्शनादेव कृतार्था वयमित्याहुः, मृडनाय हीति॥ ३५॥ ३६॥

मत्प्रभावमविचार्य विषपाने प्रवृत्तं मां कथञ्चिदियं प्रिया वारयेदिति शङ्कया तामनुज्ञापयन्नाह-अहो बतेति सार्धश्चतुर्भिः। वैशसं दुःखम्॥ ३७॥

प्राणपरीप्सूनां प्राणरक्षणेच्छूनां मे मया प्रभोः समर्थस्य अर्थः कार्यम्॥ ३८॥

किञ्च बद्धवैरेषु भूतेषु परस्परं जिघांसत्सु॥ ३९॥

कृपयतः कृपां कुर्वतः पुंसः मे मत्तः स्वस्तिः शोभना सत्ता सुखेन जीवितमस्त्वित्यर्थः॥ ४०॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

एवंभूतं त्वां ये निन्दन्ति ते मूर्खा इत्याह—ये त्विति। ये तु त्वाम् उमया भवान्या सह चरन्तं नितरां कामिनं कत्थन्ते प्रलपन्ति तथा श्मशाने चरन्तमुग्रं क्रूरं परुषं हिंस्रं च कत्थन्ते, कथंभूतम्? आत्मारामाश्च ये गुरवो विश्वहितोपदेष्टारस्तैर्हृदि चिन्तितमङ्घ्रिद्वन्द्वं यस्य तथाभूतमपि तपसाऽभितप्तं ते नूनं तव ऊतिमविन्दन्निति काकुः त्वदीहितं नैव विदुरित्यर्थः। अतस्ते हातलज्जाः गतत्रपाः यानि कानिचित्त्वन्निन्दावचनानि तेषां तद्रहितो निन्दान्यायेनेतरस्तुतौ तात्पर्यमिति भावः॥ ३३॥

एवंभूतं त्वां ब्रह्मादयो बोद्धुमेव न प्रभवः किम्पुनः स्तोतुं वयं तु न सुतरां प्रभव इत्याहुस्तदिति। तत्तस्मादुक्तविधत्वात्तव सदसतोश्चिदचितोः कार्यावस्थयोः परतः कारणावस्थयोश्च परस्य विलक्षणस्य भूम्नो व्यापकस्य ते तव स्वरूपावगमने स्वरूपावबोधने ब्रह्मादयोऽपंजसा न प्रभवन्ति किमुत संस्तवने न प्रभवन्तीति तत्र वयं कथं प्रभवेम कुतः यतस्तेषां सर्गसर्गविषयाः वयं तत्सृष्टसृष्टा वयमित्यर्थः अतो यदेतत्त्वत्स्तवमप्यस्मच्छक्तिमात्रं शक्त्यनुसारमात्रेण कृतमित्यर्थः॥ ३४॥

नन्वेते सर्वे धर्मास्त्वदुक्ताः परमात्मासाधारणाः अहं तु पुण्योपचिताधिकारविशेषभाक्कश्चिज्जीव इत्यत्राहुः-एतदिति। हे परमेश्वर! ते स्वस्तः परमुत्कृष्टमपरमधमं च तत्त्वं न पश्यामः न जानीमः किन्तु लोकस्य मृडनाय सुखापादनाय तवाव्यक्तकर्मणो व्यक्तिरित्येतत्तु जानीम इत्यर्थः। नूनं भवान् परमात्मा भवतु मा वा सर्वस्यापि चिदचिदात्मकस्य जगतस्तदात्मकत्वात्तदायत्तसत्तादिमत्त्वेन तं विना स्वनिष्ठस्वरूपस्वभावयोरभावात्तद्दृष्ट्या तद्धर्मैरेव सर्वं वस्तु स्तोतव्यमित्येव तुष्टुविमेति॥ ३५॥

एवमुक्तो देवः प्रियामाहेत्याह शुकः-तदिति। एवं भृशमधिकम् ईडितः स्वाभिमतविद्यमानैरपि परमात्मासाधारणैर्गुणैरीडितः स्तुतो देवो रुद्रस्तासां प्रजानां तत्कालकूटादुपस्थितं व्यसनं दुःखं वीक्ष्य सर्वभूतसुहृत्प्रियां सतीं भवानीम् इदं वक्ष्यमाणमाह॥ ३६॥

विषपाने प्रवृत्तं माम् इयं प्रिया वारयेदिति शङ्कया तामनुज्ञापयन्नाह-अहो इति सार्द्धैश्चतुर्भिः। हे भवानि! अहो बत महत्कष्टम् एतत्प्रजानां वैशसं दुःखं पश्य; वैशसं विशिनष्टि, क्षीराब्धेर्मथनात् यदुद्भूतं कालकूटाख्यं विषं तस्मात्समुपस्थितं सम्प्राप्तम् इत्यर्थः॥३७॥

प्राणपरीप्सूनां जिजीविषूणामासां प्रजानां मे मया अभयं विधेयं हि यस्मात्प्रभोः समर्थस्यार्थः कर्तव्यप्रयोजनमेतावानेव कियान्यद्दीनानां परिपालनम् इत्येतावानेव॥ ३८॥

तथा हि, साधवः क्षणभङ्गुरैः हेतुगर्भमिदं स्वैः स्वकीयैः प्राणैः प्राणिनः पान्ति रक्षन्ति किं प्राणिरक्षयेत्यत आह—आत्ममायया भगवन्मायया मोहितेष्वतएव परस्परं बद्धवैरेषु भूतेषु॥ ३९॥

कृपयतः कृपां कुर्वतः पुंसः हे भद्रे सर्वान्तरात्मा भगवान् प्रीयते किन्तत्प्रीत्या? अत आह-षाड्गुण्यपूर्णे हरौ प्रीते सति सचराचरोऽहमपि प्रीये नितरामानन्दयुक्तो भवामि तस्मादिदं गरं विषं भुञ्जे भोक्ष्ये मे मत्तः प्रजानां स्वस्तिरस्तु अयमन्वयः स्वस्तिशब्दः सुखार्थकः अतएव प्रयोगात् "दैवीस्वस्तिरस्तु नः" इत्यादि श्रुतिप्रयोगाच्च॥ ४०॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

ये त्वामुभयोभावा अर्थे तपसे चरन्तमत एवाभितप्तं श्मशाने निरतमत एवोग्रवपुषं घोराकारं कत्थन्ते भाषन्ते ते तव भूतभूतिपूर्णैश्वर्यम् अविदो न जानन्तो ऽतएव निर्लज्जाः॥ ३३॥

यतस्तव चर्या दुर्बोधा तत्तस्मात्सदसतोः परतः प्रकृतेः परस्य तस्य भूम्नः ते स्वरूपगमने ब्रह्मादयोऽन्तर्यामिविषये विरिञ्चादयः अन्यत्र सनकादयो नाञ्जः प्रभवन्ति वयं ब्रह्मपुत्राः स्तवने न प्रभवाम इति किमुत वयं न तन्निकटवर्तिनोऽपीत्याह, तत्सर्गेति. तस्य ब्रह्मणः सृष्टिप्रवाहे निपतिताः तर्हि क्रियमाणा केयमिति तत्राह—भक्तिमात्रमिति. अस्मत्स्तुतिर्भक्तिप्रकटनमात्रमित्यर्थः। तुशब्दोऽर्चनाद्योतकः॥ ३४॥

अव्यक्तकर्मणस्ते व्यक्तिर्लोकस्य मृडनाय पालनायेत्येतत्परं केवलं प्रपश्यामः परमन्यत्तव प्रयोजनं न पश्याम इत्यन्वयः हे महेश्वर! परं तवैतद्रूपं पश्यामः तवान्तर्यामिरूपं परं हरिं न पश्यामः एतद्रूपप्रयोजनमाह, मृडनायेति. व्यक्तिस्त्रिनेत्रादिलक्षणाकृतिः॥ ३५—३६॥

वैशसं नाशलक्षणम्॥ ३७—३८॥

पान्ति रक्षन्ति॥ ३९॥

कृपयतः कृपाङ्कुर्वतः गरं विषम्॥ ४०॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ये त्विति अयमर्थः ये त्वाम् उग्रत्वेन परुषवचनत्वेन श्मशान-निरतत्वेन च प्रतीयमानमपि हातलज्जाः त्यक्तसङ्कोचाः सन्तः कत्थन्ते श्लाघन्ते तएव ऊर्ति तेन तेन मायाछन्नेन स्वसम्वरणमयीं लीलामविदुः न ज्ञातवन्तः । "कत्थ श्लाघायाम्" "विद सम्वरणे" इति धातुद्वयमत्रोपजीव्यत इति भावः । मायापिहितदृष्टीनान्तु त्वमित्थं भासीत्यभिप्रेत्य तमन्यथा विशिंषन्ति—आत्मारामेति । भागवतपरमहंसानां गुरुत्वेन परमादराश्रयमित्यर्थः । तथा उमया तन्नाम्ना विख्याततपस्यया देव्या सह चरन्तं तथा स्वयमपि तपसा परमज्ञानप्रभावेन आभि सर्वतोभावेन तप्तमैश्वर्यं यस्य तादृशमिति । "तप ऐश्वर्ये" इति धातुरुपजीव्यः इति ॥ ३३ ॥ ३४ ॥

मृडनायेति "मृड सुखे" ॥ ३५—३७ ॥

आसामिति सार्द्धकम् ॥ ३८ –४१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तव माहात्म्यं बहिर्दर्शिभिर्दुर्गममित्याहुः—ये त्विति । उमया सह चरन्तं रममाणमपि तपसा अभितप्तं न तु कामेन व्याप्तम् अत एवात्मारामाणां गुरुभिरपि ध्याताङ्घ्रिं तथाभूतमपि त्वामुग्रं परुषं कत्थन्ते विपरीतलक्षणया श्लाघन्ते ये निन्दन्ति ते नूनं तवोतिम् अविदन्निति काकुः त्वँल्लीलां, नैव जानन्तीति कामक्रोधाद्यनाचारमयी तवेयं चेष्टा लोकोपहासिका लीलैवेत्यर्थः । हातलज्जाः त्यक्तत्रपाः स्वयं कामक्रोधादिभिश्चर्व्यमाणास्त्वामात्मारामशिखामणिध्याताङ्घ्रिं निन्दितुं लज्जामपि किं न प्राप्नुवन्तीत्यर्थः ॥ ३३ ॥

तेषां का कथा ब्रह्मादयोऽपि ते तत्त्वं न जानन्तीत्याहुः—तदिति । तस्माद्ब्रह्मतः सर्गो येषां तेषां मरीच्यादीनां सृष्टिविषयाः शक्तिमात्रं शक्त्यनुरूपमेव स्तुमः न तु यथोचितम् ॥ ३४ ॥

मृडनायेति विषं संहृत्य शीघ्रं लोकसुखं निष्पादयेति ध्वनिः ॥ ३५—३८ ॥

नन्वमीषु सांसारिकजीवेषु परस्परबद्धवैरेषु आत्मारामाणां भवादृशामुपेक्षणमेवोचितं तत्राहुः बद्धेति ॥ ३९ ॥

मे मत्तः स्वस्ति शोभना सत्ता ॥ ४०—४१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आत्मारामाश्च ते गुरवः जनहितोपदेष्टारस्तैर्हृदि विचिन्तितमङ्घ्रिद्वन्द्वं यस्य तथाभूतमपि ये मन्दा उमया सह चरन्तं स्त्रैणं तथोग्रं क्रूरं तथा परुषं हिंस्रं तथा श्मशाने निरतं कत्थन्ते प्रलपन्ति ते नूनं निश्चितं हातलज्जा गतत्रपाः तव ऊतिं लीलां किमविदन् नैव विदुरित्यर्थः ॥ ३३ ॥

किञ्च तत्तस्मात्तस्य ते स्वरूपगमने स्वरूपावबोधने ब्रह्मादयोऽपि अञ्जोऽञ्जसा न प्रभवन्ति किमु संस्तवने प्रभवन्ति कुतस्तरान्नतस्सगसर्गाविषयाः वयं तत्र प्रभवामः तथापि एतत्स्तोत्रं शक्तिमात्रम् अस्मच्छक्तिपरिमितम् कथम्भूतस्य सदसतोः स्थूलसूक्ष्मयोः देहयोः परतः जीवात् परस्य ॥ ३४ ॥

हे महेश्वर ! ते परं रूपं न पश्यामः लोकस्य मृडनाय सुखाय ते व्यक्तिरित्येतत्परं केवलं पश्यामः ॥ ३५ ॥

तासां प्रजानाम् ॥ ३६ ॥

वैशसं दुःखम् ॥ ३७ ॥ ३८ ॥

आत्मनः सर्वात्मनो हरेर्मायया बद्धवैरेषु अन्योन्यं स्पर्द्धमानेषु ॥ ३९ ॥

कृपयतः कृपां कुर्वतः ॥ ४० ॥

भाषा टीका ।

हे भगवन् ! आत्माराम और ज्ञानि लोग आपके चरणयुगल का हृदय में चिन्तमनकरते हैं और आप श्रीउमादेवी के साथ तप आचरण करते हैं फिर जो लोग आप को पार्वती के साथ निरन्तररमणकरने वाले, तथा श्मशान में निरत और उग्रपुरुष अर्थात् हिंसक कहते हैं वे निर्लज्ज आपकी लीलाओं को नहीं जानते हैं ॥ ३३ ॥

तस्मात् कार्य कारण से और पर सेभी पर भूमापुरुष ऐसे आपके स्वरूप जानने को ब्रह्मादिक भी जल्दी नहीं समर्थ होसक्ते हैं फिर स्तुति करने में क्या समर्थ होंगे, जब ब्रह्मादिकों की यह दशा तब हमलोगतो उनकी सृष्टि की सृष्टि के रचे हुए हैं तथापि यह जो हमने स्तुति करी है वह अपनी शक्ति के प्रमाण करी है ॥ ३४

हे महेश्वर ! हमलोग तो आपके केवल इसीरूपमात्र को देखते हैं, और आप के पर रूप को नहीं परञ्च इतना तो जानते हैं कि अव्यक्त कर्म वाले ऐसे आपका प्राकट्य केवल लोकरक्षार्थ ही है ॥ ३५ ॥

श्री शुक उवाच ।

श्री शुकदेवजी बोले, कि—हे राजन् ! श्री शङ्कर प्रजाओं का इस प्रकार व्यसन [दुःख] देख कृपा से अति पीडित हुए और प्राणी मात्र के सुहृद श्रीमहादेवजी अपनी प्रिया श्रीसती जी से यह बोले ॥ ३६ ॥

शिव उवाच ॥

श्रीशिवजी बोले, कि——हे भवानि ! बडे खेद की बात है, क्षीर समुद्र के मथने से उत्पन्न हुआ जो विष तिस से यह प्रजाओं की हिंसा उपस्थित भई इसको तो तुम देखो, ॥ ३७ ॥

श्रीशुक उवाच।

एवमामन्त्र्य भगवान् भवानीं विश्वभावनः।
तद्विषं जग्धुमारेभे प्रभावज्ञाऽन्वमोदत ॥ ४१ ॥
ततः करतलीकृत्य व्यापि हालाहलं विषम्।
अभक्षयन्महादेवः कृपया भूतभावनः ॥ ४२ ॥
तस्यापि दर्शयामास स्ववीर्यं (१)जलकल्मषः।
यच्चकार गले नीलं तच्च साधोर्विभूषणम् ॥ ४३ ॥
तप्यन्ते लोकतापेन साधवः प्रायशो जनाः।
परमाराधनं तद्धि पुरुषस्याऽखिलात्मनः ॥ ४४ ॥
निशम्य कर्म तच्छम्भोर्देवदेवस्य मीढुषः।
प्रजा दाक्षायणी ब्रह्मा वैकुण्ठश्च शशंसिरे ॥ ४५ ॥
प्रस्कन्नं पिबतः पाणेर्यत्किञ्चिज्जगृहुः स्म तत्।
वृश्चिकाहिविषौषध्यो दन्दशूकाश्च येऽपरे ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायाम्
वैयासिक्याम् अष्टमस्कन्धे अमृतमथनं नाम
सप्तमोऽध्यायः ॥ ७ ॥

भाषा टीका।

प्राण की रक्षा को चाहने वाले इन लोगों का मै अभय करूंगा। क्यों कि? समर्थ होने का यही तो प्रयोजन है कि—जो दीन का परिपालन करे ॥ ३८ ॥

साधुजन क्षणभंगुर अपने प्राणोंसे प्राणियों की रक्षा करते हैं, सो भी कहां की माया से मोहित इसी से वैर बांधने वाले ऐसे प्राणियों में रहकर भी ॥ ३९ ॥

हे भद्रे! हे सती जी! कृपा करने वाले पुरुष के ऊपर सर्वात्मा श्रीहरि प्रसन्न होते हैं, और जब साक्षात् भगवान् श्रीहरि प्रसन्न हो गये तब हम सब चराचर आपही प्रसन्न हो जाते है, तस्मात् इस विष का मैं भक्षण करता हूं जिस से मेरी प्रजा का मङ्गल हो ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

जग्धुमत्तुम् ॥ ४१ ॥

करतलीकृत्य करतलपरिमितमात्रं कृत्वा ॥ ४२ ॥

जलकल्मषो जलदोषो विषं यस्मात्तं गले नीलं चकार साधोः कृपालोः ॥ ४३ ॥ ४४ ॥ ४५ ॥

प्रस्कन्नं गलितम् अपरे ये सविषास्तेऽपि जगृहुः अनेन विषस्य तीव्रतोक्ता ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका।

एवमित्थं भवानीमामन्त्र्याऽनुज्ञाप्य विश्वसुखकरो भगवान् रुद्रः तद्विषं जग्धुमत्तुमारेभे तत्प्रभावज्ञा भवानी अन्वमोदताऽनुमोदितवती ॥ ४१ ॥

ततस्तदनुमोदनानन्तरं सर्वतो व्यापि हालाहलाख्यं विषं करतलीकृत्य करतलमात्रपरिमितं कृत्वा भूतसुखकरो महादेवः कृपया अभक्षयत् ॥ ४२ ॥

जलकल्मषरूपं विषं स्ववीर्यं स्वबलं तस्यापि रुद्रस्यापि दर्शयामास यस्मात्तं रुद्रं गले नीलं चकार तच्च नैल्यं साधोः रुद्रस्य विशेषेण भूषणमेवाभूत् जडकल्मष इति पाठान्तरम्, तर्हि कुम्भहं विषं कथं जरयामासेत्यत्राह—जडकल्मषः जडानामितरेषामेव कल्मषो बाधकमित्यर्थः ॥ ४३ ॥

(१) गलकल्मष इति विजय० पा०।

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

कृपालूनामियं परिपाटीत्याह—तप्यन्त इति । प्रायशः साधवः साधु कुर्वन्ति परकार्यमिति साधवः स्वार्थनिरपेक्षपरकार्यप्रसाधनस्वभावाः जनाः प्रायशो लोकतापेन स्वयमपि तप्यन्ते न तद्व्यर्थमपि त्वखिलान्तरात्मनः परमपुरुषस्याराधनं तोषहेतुः ॥४४॥

मीढुषः माश्रिताशीर्वर्षुकस्य शम्भोर्देवस्य तद्विषपानरूपं कर्म श्रुत्वा प्रजाः दाक्षायणी भवानी ब्रह्मा च वैकुण्ठो भगवांश्च शशंसिरे प्रशंसितवन्त इत्यर्थः ॥४५॥

शम्भोर्विषं पिबतस्ततो यत्किञ्चित्प्रस्कन्नं गलितं विषं तत् वृश्चिकादयः प्रायोऽजगृहुः विषौषध्यः काकतुण्डकरवीरादयः । दन्दशूकाः दंशनस्वभावाः अन्ये जन्तवः सर्पाणामुक्तत्वात् ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
सप्तमोऽध्यायः ॥७॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भवान्यास्तदात्मार्धत्वाद्विषभोजनं किं न निवारितमिति तत्राह—तत्प्रभावज्ञेति ॥ ४१ ॥

गले कण्ठे कल्मषं यस्य स तथा तस्य विषस्य स्ववीर्यं स्वरूपभूतवीर्यम् ॥ ४२ ॥

किं तद्वीर्यमिति तत्राह—यदिति । साधोर्देवस्य भूषणमभून्न दूषणमित्यर्थः ॥ ४३ ॥

लोकोपकारार्थमेव विषपानमित्याशयेनाह–तप्यन्त इति । अनेन किमस्य प्रयोजनमिति तत्राह, परमेति ॥ ४४ ॥

शशंसिरे इत्यनेन रुद्रस्य यशोर्थं हरिणा विषं न पीतमिति ज्ञायते——

"रुद्रस्य यशसोर्थाय स्वयं विष्णुर्विषं विभुः ।
न सञ्जन्हे समर्थोपि वायुश्चोचे प्रशान्तये" ॥—

इति वचनाच्च ॥ ४५ ॥

विषौषध्यः लाङ्गलीप्रभृतयः ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

व्यापि व्याप्तिशीलं विषम् ॥ ४२ ॥

तस्यापीति तत्रापीत्यर्थः । गले नीलमित्यलुक् समासः नन्विदमसम्भवं तत्राह, तच्चेति. कृपया स्वाभीष्टं तद्विभूषणत्वेन धृतवतः स्वस्यैव तादृशीच्छेति भावः ॥ ४३ ॥

लोकतापेन तप्यन्ते तत्तापमयीं कुर्वन्तीर्थः । साधवः साधारणा अपि किमुत स इत्यर्थः ॥ ४४—४६ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

व्यापि तावद्देशव्यापकमपि करतलमात्रपरिमितीकृत्य ॥ ४२ ॥

जलकल्मषो विषं तस्यापि तस्मिन्नपि ॥ ४३—४५ ॥

पिबतस्तस्य पाणेः सकाशात् यत् प्रस्कन्नं च्युतं येऽपरे श्वशृगालाद्यास्ते च जगृहुः ॥ ४६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
अष्टमे सप्तमोऽध्यायः सङ्गतस्सङ्गतस्सताम् ॥ ७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मे मत्तः ॥ ४१ ॥

व्यापि हालाहलमपि करतलीकृत्य योगबलेन करतलपरिमितं कृत्वा ॥ ४२ ॥

यद्यस्मात्तत्तं शिवं गले नीलं चकार तच्च गलनैल्यं साधोर्दयालोर्विभूषणमभूत् ॥ ४३—४५ ॥

विषं पिबतः शिवस्य पाणेः हस्तात् यत्किञ्चित्प्रस्कन्नं च्युतं तत् वृश्चिकादयः अपरे च ये सविषाः प्रसिद्धास्ते सर्वे जगृहुः ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे अष्टम स्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
सप्तमाऽध्यायार्थप्रकाशः ॥ ७ ॥

भाषा टीका ।

श्रीशुक उवाच ॥

विश्व के पालन करने वाले भगवान् श्रीशंकरने भवानी श्री सतीजी से पूंछ कर उस विष के पान करने का आरम्भ किया, और आपके प्रभाव को जानने वाली श्रीसतीजी ने भी इसका अनुमोदन किया ॥ ४१ ॥

तब तौ सर्वत्र व्याप्त होने वाले उस हालाहल विषको हाथ में लेकर श्रीमहादेवजी ने कृपाकर भक्षणकर लिया ॥४२॥

परंच उस जलके कल्मष ने अर्थात् विषने अपना पराक्रम श्रीशंकर को भी दिखाया क्योंकि गलेमें नील चिन्ह कर दिया पर वह दूषण भी शंकर सदृश साधु का भूषण होगया कि जिससे आपका नाम नीलकंठ होगया ॥ ४३ ॥

भाषा टीका ।

प्राय करके साधुजन लोक के दुःख को देखकर बड़े दुःखित होजाते हैं पर यह दुःखी को देखकर कृपा करना अखिलात्मा परम पुरुष श्रीमन्नारायण का परम आराधन [पूजन] है ॥ ४४ ॥

देवदेव मीढ्वान् श्रीशंभु के इस कर्म की सब प्रजा और दक्षपुत्री श्रीसतीजी और ब्रह्माजी और भगवान् श्रीविष्णुजी भी प्रशंसा करने लगे ॥ ४५ ॥

श्रीशंभू के पीते समय में जो कुछ थोड़ासा विष गिर गया उसको विच्छु, सर्प, दंदशूक, [यह भी एक सर्प जाति है] इन सब जन्तुओं ने ग्रहण किया, और उसी से यह विषवाली औषधियां उत्पन्न होगईं ॥ ४६ ॥

इति श्रीमद्भागवत अष्टमस्कन्धमें सप्तम अध्याय की
श्रीवृन्दावनस्थ भागवताचार्यकृत भाषाटीका
समाप्त ॥ ७ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे सप्तमोऽध्यायः ॥ ७ ॥

॥ अष्टमोऽध्यायः ॥

श्रीशुक उवाच ।

पीते गरे वृषाङ्केण प्रीतास्तेऽमरदानवाः ।
ममन्थुस्तरसा सिन्धुं हविर्धानी ततोऽभवत् ॥ १ ॥
तामग्निहोत्रीमृषयो जगृहुर्ब्रह्मवादिनः ।
यज्ञस्य देवयानस्य मेध्याय हविषे नृप ! ॥ २ ॥
तत उच्चैःश्रवा नाम हयोऽभूच्चन्द्रपाण्डुरः ।
तस्मिन्बलिः स्पृहां चक्रे नेन्द्र ईश्वरशिक्षया ॥ ३ ॥
तत ऐरावतो नाम वारणेन्द्रो विनिर्गतः ।
दन्तैश्चतुर्भिः श्वेताद्रेर्हरन्भगवतो महिम् ॥ ४ ॥
कौस्तुभाख्यमभूद्रत्नं पद्मरागो महोदधेः ।
तस्मिन्हरिः स्पृहां चक्रे वक्षोऽलङ्करणे मणौ ॥ ५ ॥
ततोऽभवत्पारिजातः सुरलोकविभूषणम् ।
पूरयत्यर्थिनो योऽर्थैः शश्वद्भुवि यथा भवान् ॥ ६ ॥
ततश्चाप्सरसो जाता निष्ककण्ठ्यः सुवाससः ।
रमण्यः स्वर्गिणां वल्गुगतिलीलाऽवलोकनैः ॥ ७ ॥
ततश्चाविरभूत्साक्षाच्छ्री रमा भगवत्परा ।
रञ्जयन्ती दिशः कान्त्या विद्युत्सौदामिनी यथा ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अष्टमे मथ्यमानेऽब्धौ लक्ष्म्या विष्णौ वृतेऽसुरैः ।
धन्वन्तरेर्हृते सोमे मोहिन्युद्भव ईर्यते ॥ ० ॥

हविर्धानी सुरभिः ॥ १ ॥

देवयानस्य ब्रह्मलोकमार्गप्रापकस्य यज्ञस्य सम्बन्धिने हविषे ॥ २ ॥

ईश्वरशिक्षया प्रागेवकृतया ॥ ३ ॥

भगवतो यः श्वेताद्रिः कैलासस्तस्य महिं महिमानं दन्तैः शिखरकल्पैर्हरन् चन्द्रवत्पाण्डुर इत्यनुषङ्गः ॥ ४—६ ॥

वल्गुभिर्गत्यादिभिः स्वर्गिणां रमण्यो रतिकर्त्र्यः ॥ ७ ॥

सुदामा पर्वतस्तत्रैकस्यां दिशि जाता सौदामनी [स्फटिकाद्रिमयगिरिशृङ्गेष्वाधिकं स्फुरन्ती विद्युदिव कान्त्या दिशो रञ्जयन्ती श्रीः सम्पत्साक्षान्मूर्तिधारिणी सती सैव भगवत्परा रमा आविरभूदित्यर्थः ॥ ८ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

इत्थं वृषाङ्केण रुद्रेण गरे विषे पीते भक्षिते सति ते सर्वे सुरदानवाश्चेन्द्रादयो वैरोचनादयश्च तरसा बलेन सिन्धुं ममन्थुः ततस्तस्मिन् सिन्धावेवं मथ्यमाने सति ततो विषादनन्तरं हविर्धानी सुरभिः कामधेनुरभवत् ॥ १ ॥

तां हविर्धानीम् अग्निहोत्रीं दधिपयोघृतादिहविःप्रधानेनाग्नि-

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका।

होत्रादिवैदिककर्मनिष्पादिनीं ब्रह्मवादिनः ऋषयो जगृहुः स्वीकृतवन्तः किमर्थम्? हे नृप! देवयानस्य देवा यान्त्यस्मिन्कर्मणा इति देवयानं तस्य यज्ञस्य सम्बन्धिने मेध्याय हविषे पय आदिहविरर्थम् ॥ २ ॥

ततो हविर्धान्युद्भवानन्तरं चन्द्रवत्पाण्डुरः शुभ्रो हय उच्चैःश्रवा इति प्रसिद्धः उदभूत् तस्मिन्नुच्चैःश्रवसि हये ईश्वरशिक्षया "लोभः कार्यो न वै जातु रोषः कामस्तु वस्तुषु" इत्याद्युक्तरीत्या शिक्षया इन्द्रः स्पृहां न चक्रे उच्चैःश्रवस्युत्पन्नामपि स्पृहामभिव्यक्तां न चक्रे किन्तु मनस्येवाधादिति भावः। बलिः स्पृहां चक्रे इत्यर्थः ॥ ३ ॥

तत उच्चैःश्रवस उदयानन्तरम् ऐरावताख्यो वारणेन्द्रो गजश्रेष्ठः विनिर्गतः कथम्भूतः भगवतो रुद्रस्य श्वेताद्रेः कैलासस्य महिं माहात्म्यं शोभां चतुर्भिर्दन्तैः शिखरतुल्यैर्हरन् चन्द्रवत् पाण्डुर इत्यनुषङ्गः ॥ ४ ॥

ततोऽष्टौ दिग्गजा अभवन् ततो हे नृप! अभ्रम्वादयोऽष्टौ करिण्योऽभवन् ततो महोदधेः कौस्तुभाख्यं रत्नमभूत् स च पद्मरागो मणिः तस्मिन् महामणौ भगवान् हरिः वक्षसोऽलङ्करणे निमित्ते स्पृहां चक्रे ॥ ५ ॥

ततः पारिजातो वृक्षः सुरलोकस्य विभूषणभूतोऽभवत् कथंभूतः यः शश्वत्सदाऽर्थिनः अर्थैः पूरयति पूरयन्नर्थान्पूरयन् भुवि भवान् यथार्थान् पूरयत्यर्थिनामर्थं तथाभूत इत्यर्थः ॥ ६ ॥

ततश्चाप्सरसः उदभूवुः कथम्भूताः? स्वर्णाभरणविशेषकण्ठाः शोभनानि वासांसि यासां ताः स्वर्गिणां स्वर्गतानां सुन्दरगतिभिर्लीलावलोकनैश्च रमण्यः प्रियाः स्वर्गिणां रतिकरा इत्यर्थः ॥ ७ ॥

ततः साक्षाच्छ्रीर्लक्ष्मीराविरभूत् कथम्भूता? भगवत्परा भगवदनन्यार्हा कान्त्या दिशो रञ्जयन्ती प्रकाशयन्ती यथा सौदामिनी विद्युत्तद्वत् सुदामा पर्वतः तत्रैकस्यां दिशि जाता सौदामिनी स्फटिकादिमयगिरिशृङ्गेष्वधिकं स्फुरन्ती विद्युदिव कान्त्या दिशो रञ्जयन्तीत्यर्थः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

॥ १ ॥

किमर्थं जगृहुरिति तत्राह—यज्ञस्येति। हविषे यज्ञस्य देवानां सोमपानस्य च मेध्याय देवानां सोमपानं यस्मिंस्तथा तस्येति ॥ २—३—४—५ ॥

सुरलोकं विभूषयतीति सुरलोकविभूषणः ॥ ६ ॥

निष्कमाभरणविशेषः रमण्यो रमणीयाः ॥ ७ ॥

रुच्या विशिष्टं द्योतयतात विद्युत्सा च सौदामनी ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

ऐरावतादयस्त्वष्ट दिग्गजा अभवंस्ततः।
अभ्रमुप्रमुखा अष्टौ करिण्यस्त्वभवन्नृप! ॥

कौस्तुभाख्यमभूद्रत्नं पद्मरागो महोदधेः।
तस्मिन् मणौ स्पृहाञ्चक्रे वक्षोऽलङ्करणे हरिः ॥

इति क्वचित् पाठः ततोऽभवत् पारिजात इति ॥ १—८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

मथनोद्भूतरत्नानां लक्ष्म्या विष्णौ वृते स्मृते।
उत्थितं ऽथ कृते दैत्यैर्मोहिन्याद्वृत्तमष्टमे ॥ ० ॥

हविर्धानी सुरभिः ॥ १ ॥

देवयानस्य ब्रह्मलोकमार्गप्रापकस्य ॥ २ ॥

ईश्वरशिक्षया दैत्यानां मनोवर्द्धनार्थं प्रागेव कृतया ॥ ३ ॥

भगवतः शम्भोर्यः श्वेताद्रिः कैलासस्तस्य महिं महिमानं दन्तैः शिखरतुल्यैर्हरन्। ४—६ ॥

गत्यादिभिः रमण्यः रमयित्र्यः ॥ ७ ॥

श्रीः सम्पत्तिः साक्षात् मूर्तिमतीत्यर्थः। रमा हरिं रमयन्ती हरेः प्रेयसी रूपा च प्रादुर्भूता कीदृशी भगवती चासौ परा पूर्वस्याः सकाशात् श्रेष्ठेति पूर्वस्या एतद्विभूतिरूपत्वमिति भावः। पूर्वा यथा विद्युत् उत्तरा यथा सौदामनी स्फटिकमयसुदामापर्वतभवत्वात् पूर्वस्याः सकाशादधिककान्तिमती कान्त्येति सम्पत्तिपक्षे कमिरिच्छार्थको धातुः अभिलाषेणेत्यर्थः। दिशस्तस्या दिग्वर्तिनो जनान् रञ्जयन्ती सम्पत्तिरस्माकं भूयादिति रागवतीः कुर्वती पक्षे दिशः पूर्वाद्याः कान्त्या स्वरोचिषा रञ्जयन्ती ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

हविर्धान्याद्यमृतान्तपदार्थोत्पत्तिं भगवती भगवत्संयोगम् अमृतहरणाद्यसुरदौरात्म्यं मोहनीरूपाविर्भावञ्च वर्णयति—पीते गरे इत्यष्टमेनाध्यायेन ॥ १ ॥

अग्निहोत्रीं घृतादिद्वाराऽग्निहोत्रादिकर्मोपकारिकाम् ऋषयो जगृहुः कस्मै प्रयोजनाय? देवयानस्य देवो विष्णुर्विवित्सोत्पादनद्वारा तत्प्रापकस्य यज्ञस्य हविषे ॥ २ ॥

ईश्वरशिक्षया "क्षोभः कार्यो न वो जातु" इत्येवम्भूतया ॥ ३ ॥

चतुर्भिर्दन्तैर्युक्त इति शेषः। भगवतो यः श्वेताद्रिस्तस्य महिं महिमानं हरन् अर्थात् श्वेतो वारणेन्द्रो विनिर्गतः ॥ ४ ॥ ५ ॥ ६ ॥

वल्गुभिर्गत्यादिभिः स्वर्गिणां रमण्यः रमयन्त्यः ॥ ७ ॥

ततस्तदनन्तरं सुदामा पर्वतस्तत्रैकस्यां दिशि जाता सौदामिनी स्फटिकादिमयगिरिशृङ्गेष्वधिकं विस्फुरन्ती विद्युत् यथा कान्त्या दिशो रञ्जयन्ती भगवत्परा साक्षाद्रमा आविरभूत् तस्या विभूतिभूता यस्यां सर्वेषां भार्याबुद्ध्या स्पृहा जाता सा श्रीः सम्पत्तिः रमाश्रया जाता भगवदुपासकान् भगवदवतारानुरूपस्वतनुप्रकाशनेन निःश्रीकान् देवान् स्वविभूतिरूपश्रीप्रकाशनेन च तोषयन्तीति प्रयोजनद्वयचिकीर्षया लक्ष्मीर्जातेति भावः। अन्यथा रमा श्रीरिति पुनरुक्तिः स्यात् "तस्यां चक्रुः स्पृहां सर्वे"

तस्यां चक्रुः स्पृहां सर्वे ससुरासुर[1] मानवाः ।
रूपौदार्यवयोवर्णमहिमाक्षिप्तचेतसः ॥ ९ ॥
तस्या आसनमानिन्ये महेन्द्रो महदद्भुतम् ।
मूर्तिमत्यः सरिच्छ्रेष्ठा हेमकुम्भैर्जलं शुचि ॥ १० ॥
आभिषेचनिका भूमिराहरत्सकलौषधीः ।
गावः पञ्च पवित्राणि वसन्तो मधु[2] माधवौ ॥ ११ ॥
ऋषयः कल्पयाञ्चक्रुरभिषेकं यथाविधि ।
जगुर्भद्राणि गन्धर्वा नट्यश्च ननृतुर्जगुः ॥ १२ ॥
मेघा मृदङ्गपणवमुरजानकगोमुखान् ।
व्यनादयन् शङ्खवेणुवीणास्तुमुलनिःस्वनान् ॥ १३ ॥
ततोऽभिषिषिचुर्देवीं श्रियं पद्मकरां सतीम् ।
दिगिभाः पूर्णकलशैः सूक्त[3] वाक्यैर्द्विजेरितैः ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

इत्यनन्तरश्लोकोक्त्या सर्वेषां दोषभागित्वमूर्खत्वप्रसङ्गश्च स्यात् तस्मात्सम्पत्तिदृष्ट्या सर्वेषां स्पृहा जाता साक्षाद्रमा तु तान् पुत्रान् ज्ञात्वा भगवन्तं शरणं गतेति सिद्धान्तः ॥ ८ ॥

———

भाषा टीका ।

श्रियै नमः ॥

रिङ्खन्भृङ्गकदम्बडम्बरपरिष्वङ्गप्रसङ्गाकुल—
मत्यूपस्फुरमाणपङ्कजवनीलीभाग्यसर्वङ्कषः ॥
दृक्कोणः स्ववशंवदीकृतजगद्रक्षैकदीक्षाधरो
लक्ष्म्याः कोऽपि नमज्जनेषु पतताच्छिष्कश्चनोज्जीवनः ॥

श्रीशुक उवाच ।

श्रीशुकदेवजी बोले, कि—जब वृषभध्वज श्रीशंकर ने विष पान कर लिया तब सब देवता और दानव बड़े प्रसन्न होकर बड़े वेग से सिंधु को मथने लगे तब उसमें से सुरभि गौ उत्पन्न भई ॥ १ ॥

हे नृप ! अग्निहोत्र का साधन रूप ऐसी उस गौ को ब्रह्म लोक के मार्ग को प्राप्त करने वाले यज्ञ के हविष के अर्थ ब्रह्मवादि ऋषि लोगों ने ग्रहण कीनी ॥ २ ॥

तिसके पीछें उच्चैःश्रवा नाम का चन्द्रमा के सदृश श्वेत घोडा उत्पन्न हुआ, उसमें बलि ने स्पृहा करी, श्रीकृष्ण की शिक्षा से इन्द्र चुप रहे ॥ ३ ॥

तदनंतर ऐरावत नाम वाला वारणेन्द्र (हस्तियों का इंद्र) चंद्र के सदृश श्वेत हाथी निकसा, जोकि, अपने श्वेत दांतों से श्रीशंकर के कैलास पर्वत की महिमा को हरने वाला हुआ, अर्थात् उसके दंत कैलास के शिखर सदृश रहे ॥ ४ ॥

फिर महोदधि से एक रत्न कौस्तुभ नामक] पद्मराग मणि उत्पन्न हुआ, उस मणि में वक्षःस्थल के अलंकार के निमित्त श्रीहरि ने स्पृहा कीनी ॥ ५ ॥

ताके पीछे सुरलोक का भूषण रूप पारिजात [कल्पवृक्ष] हुआ जो याचकों के मनोरथ को पूर्ण करता है, हे राजन्! जैसे पृथिवी में आप अर्थिओं की कामनाओं को पूर्ण करते हो॥६॥

तिसके पीछें अप्सरायें उत्पन्न हुईं, जो कंठ में पदक पहरे हैं और सुन्दर वस्त्रों को धारण करें हैं और ललित गति तथा लीला पूर्वक अवलोकन से स्वर्ग के लोगों को रमाने वाली हैं॥७॥

तदनंतर भगवत्परायणा साक्षात् श्रीमहालक्ष्मीजी प्रकट भईं, जैसे सघन घनकी बीजुली होवे तिस प्रकार अपनी कांती से सब दिशाओं को प्रकाशित करती भईं ॥ ८ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्य रूपादमाहिम्ना आक्षिप्तं चेतो येषाम् ॥ ९ ॥

भगवद्वक्षसि स्थितया श्रिया विलोकितानां सुराणां यथापूर्वं संपत्प्राप्तिमसुराणां च तद्विपर्ययं वक्तुमभिषेकादिमहोत्सवपूर्वकं ब्रह्मादिपरिहारेण भगवत्प्राप्तिप्रकारमाह——तस्या आसनमित्यादिना । अथासीद्वारुणीत्यतः प्राक्तनेन ग्रन्थेन ॥ १० ॥

(१) दानवाः इति वीर० (२) माधवमिति विजय० (३) वाक्यैरिति वीर० विजय० ।

समुद्रः पीतकौशेयवाससी समुपाहरत्।
वरुणः स्रजं वैजयन्तीं मधुना मत्तषट्पदाम् ॥ १५ ॥
भूषणानि विचित्राणि विश्वकर्मा प्रजापतिः।
हारं सरस्वती पद्ममजो नागाश्च कुण्डले ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

अभिषेचनिका अभिषेकोचिताः पञ्च पवित्राणि पञ्च गव्यानि मधुमाधवौ चैत्रवैशाखभवं फलपुष्पादि पाठान्तरेऽपि द्वन्द्वैक्ये स एवार्थः मधुमासे भवं मध्विति वा ॥ ११ ॥

अभिषेकमभिषेकोचितं विधिं नट्यो नटानां स्त्रियः ॥ १२ ॥

शङ्खवेणुवीणाश्च व्यनादयन् तुमुलो निःस्वनो येषां तान्मृदङ्गादीन् ॥ १३—१८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

तस्यां रूपादिमहिम्ना आक्षिप्तं चित्तं येषां ते सर्वे ससुरासुरदानवाः स्पृहां चक्रुः ॥ ९ ॥

भगवद्वक्षःस्थितया श्रिया विलोकितानां देवादीनां यथापूर्वं सर्वसम्पत्प्राप्तिमसुराणां तद्विपर्ययं च वक्तुं तस्या अभिषेकादि महोत्सवपूर्वकं ब्रह्मादिपरिहारेण भगवत्प्राप्तिप्रकारमाह—तस्या इत्यादिना। अथासीद्वारुणीत्यतः प्राक्तनेन ग्रन्थेन तस्या रमायाः उपवेशनार्थं महदद्भुतं महच्च सिंहासनम् इन्द्र आनीय समर्पितवान् गङ्गादयः सरिच्छ्रेष्ठाः देहयुक्ताः सत्यः हेमकुम्भैः शुद्धं जलमानिन्यिरे ॥ १० ॥

भूमिरपि मूर्तिमती सती आभिषेचनिका अभिषेकोचिता ओषधीः सकला आहरद्गानिन्ये गावस्तु पञ्चपवित्राणि पञ्च गव्यान्याजन्हुःवसन्त ऋतुः मूर्तिमान् मधुमाधवौ चैत्रवैशाखभवफलपुष्पाद्युपाहरदित्यनुषङ्गः पाठान्तरे द्वन्द्वैक्येऽपि स एवार्थः मधुमासे भवं मध्विति वा ॥ ११ ॥

तत ऋषयोऽभिषेकं यथाविधि अभिषेकोचितविधिं यथाचरकल्पयाश्चक्रुः गन्धर्वा भद्राणि मङ्गलानि जगुः नट्यः नटानां स्त्रियः ननृतुर्जगुश्च ॥ १२ ॥

मेघा मूर्तिमन्तो मृदङ्गादीन्वाद्यविशेषान् शङ्खवेणुवीणाश्च व्यनादयन् तुमुलो निस्स्वनो येषां तान्मृदङ्गादींश्च ॥ १३ ॥

ततः पद्मकरां सतीं श्रियं दिग्गजाः पूर्णकलशैः सर्वौषधीयुक्तैः सरिच्छ्रेष्ठानीतैर्द्विजेरितैः सूक्तवाक्यैराभिषेचनिकमन्त्रैस्सह अभिषिषिचुः अभिषिक्तवन्तः ॥ १४ ॥

ततः समुद्रः पीतकौशेयवाससी समर्पितवान् ततः वरुणः मधुना मधुपानेन मत्ताः षट्पदाः भृङ्गा यस्यां तां वैजयन्तीं वनमालां समुपाहरदित्यनुषङ्गः ॥ १५ ॥

विश्वकर्मा प्रजापतिः भूषणानि सरस्वती हारम् अजो ब्रह्मा पद्मं नागाश्च कुण्डले समुपाहरन् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

रूपादिमहिम्ना ॥ ९—१० ॥

अभिषेचनिकाः अभिषेकयोग्याः साधनानि पञ्च पवित्राणि गोमयादीनि माधवं स्वकालसम्भवम् ॥ ११—१२ ॥

शङ्खादीनां तुमलः निःस्वनो येषु ते तथा ॥ १३—१६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

चक्रुः स्पृहामिति सम्पदधिष्ठातृत्वज्ञानेन तदधिष्ठानान्महासम्पल्लाभः स्यादित्येवमेव मत्वा नान्यथा ते हि प्रायो महाभक्ताः अतएवाग्रे सर्वेषां निजनिजोपायनादिमयभक्तिरेव वर्णनीया। आक्षिप्तचित्तत्वं विस्मयेनैवेति ज्ञेयम् ॥ ९—१२ ॥

मेघा वसन्तवत्तदधिष्ठातृदेवाः ॥ १३ ॥

नाट्य इति नटस्येयमित्यर्थे। नट्य इति पाठश्चेन्नर्त्तक्य इत्येव व्याख्यायेत ॥ १४—१८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

तस्यां पूर्वस्यां सम्पद्रूपायामेव स्पृहां नतूत्तरस्याम् "तस्याः श्रियस्त्रिजगतो जनको जनन्याः" इति वक्ष्यमाणवाक्येन तस्या जगज्जननीत्वज्ञापनात् किञ्च तस्या अपि रूपादीनां महिना महिम्ना मा आक्षिप्तानि नैवासक्तानि चेतांसि येषां ते यतस्ते तस्याः सकाशाद्राज्यभोगादि प्रेप्सव इति भावः ॥ ९ ॥

तस्याश्चेति चकारात् हरिप्रेयसीरूपायाश्च ॥ १० ॥

आभिषेचनिका अभिषेकोचिताः पञ्च पवित्राणि पञ्च गव्यानि मधुमाधवौ चैत्रवैशाखभवपुष्पफलादि मधुमाधवमिति पाठे मधुमासोद्भवं मधु ॥ ११—१३ ॥

श्रियमिति सम्पद्रूपां देवीमिति "दिवुक्रीडायाम्" भोगैश्वर्यवितरणेन क्रीडन्तीं पद्मकरामिति हरिप्रेयसीरूपां सतीं पतिव्रताम् ॥ १४ ॥

ततः कृतस्वस्त्ययनोत्पलस्रजं नदद्द्विरेफां परिगृह्य पाणिना ।
चचाल वक्त्रं सुकपोलकुण्डलं सव्रीडहासं दधती सुशोभनम् ॥ १७ ॥
स्तनद्वयं(१) चातिकृशोदरी समं निरन्तरं चन्दनकुङ्कुमोक्षितम् ।
ततस्ततो नूपुरवल्गुशिञ्जितैर्विसर्पती हेमलतेव सा बभौ ॥ १८ ॥
विलोकयन्ती निरवद्यमात्मनः पदं ध्रुवं चाव्यभिचारि सद्गुणम् ।
गन्धर्वयक्षाऽसुरसिद्धचारणत्रैविष्टपेयादिषु नाऽन्वविन्दत ॥ १९ ॥
नूनं तपो यस्य न मन्युनिर्जयो ज्ञानं क्वचित्तच्च न सङ्गवर्जितम् ।
कश्चिन्महांस्तस्य न कामनिर्जयः स ईश्वरः किं परतो व्यपाश्रयः ॥ २० ॥
धर्मः क्वचित्तत्र न भूतसौहृदं त्यागः क्वचित्तत्र न मुक्तिकारणम् ।
वीर्यं न पुंसोऽस्त्यजवेगनिष्कृतं न हि द्वितीयो गुणसङ्गवर्जितः ॥ २१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

पीतकौशेये इति अभिषेकानन्तरं पीतवस्त्रस्यैव विहितत्वात् ॥ १५ ॥ ॥ १६ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तद्रूपादिमहिम्ना आक्षिप्तानि चेतांसि येषां ते ॥ ९ ॥ १० ॥

आभिषेचनिकाः अभिषेकार्हा पञ्चपवित्राणि पञ्चगव्यानि मधुमाधवौ चैत्रवैशाखौ मासद्वयोद्भवपुष्पादिबाहुल्यार्पणसूचनाय तौ मासावेवाहरदित्युक्तम् ॥ ११ ॥ १२ ॥

मेघास्तदधिष्ठात्र्यो देवताः तुमुलो निःस्वनो येषां तान् मृदङ्गादीन् शङ्खवेणुवीणाश्च व्यनादयन् ॥ १३—१५ ॥

अजो ब्रह्मा ॥ १६ ॥

———

भाषा टीका ।

उनके रूप, औदार्य, (उदारता) अवस्था, वर्ण, आर महिमा, से सर्वों के चित्तका आकर्षण होगया, अत एव उनं श्री जी के विषै सुर, असुर, और मनुष्य, सर्वों ने स्पृहा कीनी (केवल धन धान्यादि संपत्त्यर्थं) ॥ ९ ॥

महेन्द्र नें तौ उनको परम अद्भुत आसन लाकर विछाया और नदियों में उत्तम गंगा यमुना प्रभृति सरिताओं ने सुवर्ण के कलसों से पवित्र जल समर्पण किया ॥ १० ॥

और अभिषेक के उचित सम्पूर्ण औषधियों को पृथिवी ने समर्पण किया, गायों ने पंच गव्य, और वसन्त ऋतुने फल पुष्प अथवा मधु समर्पण किया ॥ ११ ॥

और ऋषि लोगों ने यथा विधि श्री जी का अभिषेक किया और गन्धर्व लोग मंगल गान करने लगे नटी लोग नाचने लगी ॥ १२ ॥

तथा मेघ लोग मृदंग, पणव, मुरज, आनक, गोमुख, शंख, वेणु, वीणा, इन सर्वों का जैसे तुमुल शब्द हो इस प्रकार नाद करते हुए, ॥ १३ ॥

तदनंतर पद्म जिन के हस्त में ऐसी श्रीदेवी को दिग्गजों ने ब्राह्मणों के मुख से उच्चरित सूक्त के वाक्यों सहित पूर्ण कलसों से अभिषेक किया ॥ १४ ॥

जब दिशाओं के गज अभिषेक कर चुके तब श्रीजी के पिता समुद्र ने पीतांबर युगल वस्त्र समर्पण किये, और वरुण जी ने मकरंद के मारें जामें भ्रमर गुंजार कर रहे ऐसी वैजयंती माला समर्पण करी ॥ १५ ॥

और विश्वकर्मा प्रजापति ने विचित्र भूषण, सरस्वती ने हार, ब्रह्मा जी ने कमल, और नाग लोगों ने कुंडल समर्पण किये ॥ १६ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

पदमाश्रयं ध्रुवं नित्यमव्यभिचारिणो नित्याः सन्तो गुणा यस्मिंस्तं नान्वविन्दत क्वचित्कस्यचिद्दोषस्य सद्भावात् ॥ १९ ॥

तदेवाह–नूनमिति, त्रिभिः । मन्युनिर्जयो नास्ति दुर्वासः प्रभृतिषु गुरुशुक्रादिषु सङ्गवर्जितं ज्ञानं नास्ति महत्त्वेऽपि ब्रह्मसोमादौ न कामनिर्जयः परतो व्यपाश्रयः परापेक्ष इन्द्रादिः स किमीश्वरः ॥ २० ॥

न भूतसौहृदं परशुरामादिषु न मुक्तिकारणं त्यागः शिबिप्रभृतिषु पुंसः कार्त्तवीर्यादेर्वीर्यमस्ति अजवेगनिष्कृतं कालवेगेन प…

(१) चारु इति वीर०

क्वचिच्चिरायुर्न हि शीलमङ्गलं क्वचित्तदप्यस्ति न वेद्यमायुषः।
यत्रोभयं कुत्र च सोऽप्यमङ्गलः सुमङ्गलः कश्च न कांक्षते हि माम् ॥ २२ ॥

श्रीशुक उवाच।

एवं विमृश्याव्यभिचारि(१) सद्गुणैर्वरं निजै(२)काश्रयतयाऽगुणाश्रयम्।
वव्रे वरं सर्वगुणैरपेक्षितं रमा मुकुन्दं निरपेक्षमीप्सितम् ॥ २३ ॥
तस्यांसदेश उशतीं नवकञ्जमालां माद्यन्मधुव्रतवरूथगिरोपघुष्टाम्।
तस्थौ(३) निधाय निकटे तदुरः स्वधाम सव्रीडहासविकसन्नयनेन(४) याता ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

हृतं तु न भवति गुणसङ्गवर्जितः सनकादिर्द्वितीयो मम वरो न हि समाधिनिष्ठत्वात् ॥ २१ ॥

चिरायुष्यपि मार्कण्डेयादौ शीलमङ्गलं नास्ति इन्द्रियदमनशीलत्वात् क्वचित्तदप्यस्ति हिरण्यकशिपुप्रभृतौ आयुषः स्थैर्यं न वेद्यं दुर्ज्ञानं भगवद्द्वेषेणाकस्मादेव मृत्युसम्भवात् यत्र कुत्र च श्रीरुद्रे मार्कण्डेयादिवदिन्द्रियदमनाद्यभावाच्छीलं मङ्गलं चायुर्निश्चयश्चेत्युभयमस्ति न चान्यः पूर्वोक्तः कश्चिद्दोषस्तथाऽपि सोऽप्यमंगलः श्मशानवासाद्यमङ्गलचेष्टितः श्रीमुकुन्दं लक्ष्यीकृत्याह, कश्चेति। कश्चित्सुमंगलो निरवद्यश्च स तु मां न हि कांक्षते आत्मारामत्वात् ॥ २२ ॥

एवं विमृश्य रमा निरपेक्षमपि मुकुन्दमेव वरं वव्रे तत्किम्? अव्यभिचारिभिः सद्भिर्धर्मज्ञानादिभिर्गुणैर्निजैकाश्रयतया च नैरपेक्ष्येण वरं सर्वोत्तमं तत्र हेतुः अगुणाश्रयं प्रकृतिगुणातीतम् पाठान्तरेऽप्ययमेवार्थः, अतएव स्वस्य ईप्सितं किञ्च सर्वैर्गुणैरणिमादिभिरपेक्षितं वृतम् अयं भावः यद्यपि स्वयमात्मारामत्वेनान्यनिरपेक्षस्तथाऽप्याश्रिता अणिमादिसिद्धीर्यथा नोपेक्षते तद्वन्मामपि नोपेक्षेत तावतैव तत्सेवयाऽहं कृतार्था स्यां किमन्यैः प्राकृतैरिति तमेव वृतवतीति ॥ २३ ॥

तदेवाह, तस्यांसदेशे कमनीयां नवकञ्जमालां निधाय तदनुग्रहं प्रतीक्षमाणा तूष्णीं तस्य निकटे तस्थौ कथम्भूतां मालाम्? माद्यन्तो ये मधुव्रतास्तेषां वरूथस्य गिरा उपघुष्टां नादितां कथम्भूता श्रीः सव्रीडहासेन विकसन्नयनं तेन तस्योरः स्वधाम याता सती वक्षः प्रतीक्षमाणा तस्थावित्यर्थः ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

ततः कृतस्वस्त्ययना कृतमङ्गलाश्रया श्रीर्नदन्तो द्विरेफा भ्रमराः यस्यां ताम् उत्पलस्रजं पाणिना परिगृह्य निरस्तनिखिलदोषस्य समस्तकल्याणगुणाकरस्य स्वाभिमतस्य पुंसः कण्ठे निधातुं परिगृह्येतिभावः चचाल कथम्भूता सती शोभनयोः कपोलयोः कुण्डले प्रचलती यस्मिन् सव्रीडो हासः यस्मिंस्तत्सुशोभनमतिसुन्दरं वक्त्रं दधती ॥ १७ ॥

तथा चन्दनकुङ्कुमाभ्याम् उक्षितं सिक्तं लिप्तं समं निरन्तरं च यत्स्तनद्वयं तच्च चारु सुन्दरं कृशश्चोदरं च दधती ततः सा श्रीः नूपुराणां वल्गुभिर्मधुरैः शिञ्जितैरितस्ततः विसर्पती चलन्ती हेमलतेव बभौ ॥ १८ ॥

तत आत्मनः स्वस्याः पदमाश्रयं ध्रुवं नित्यमव्यभिचारिणो नित्याः स्वाभाविकाः सन्तः कल्याणगुणाः यस्मिंस्तन्निरवद्यं निरस्तहेयगुणम् एवंभूतं पदं गन्धर्वादिमध्ये विलोकयन्ती विचारयन्ती नान्वविन्दत नापश्यत् क्वचित्कस्यचिद्दोषस्य दर्शनेन नान्वविन्दतेति भावः ॥ १९ ॥

तदेवाह—नूनमिति त्रिभिः [illegible] दुर्वासःप्रभृतेस्तपस्त्वस्ति तस्य मन्युनिग्रहस्तु नास्ति [illegible] निश्चये यस्य तु गुरुशुक्रादेर्ज्ञानमस्ति न तस्य ज्ञानं [illegible]वर्जितं किन्तु फलसङ्गादियुक्तमेव कश्चिद्ब्रह्मादिर्महांस्तथापि न तस्य कामनिर्जयोऽस्ति दुहितुरेव पत्नीत्वेन गृहीतत्वादिति भावः। यः परतो व्यपाश्रयः परपेक्षैश्वर्याश्रय इन्द्रादिः स किमीश्वरः? अनीश्वर एवेति भावः ॥ २० ॥

क्वचित्परशुरामादौ धर्मोऽस्ति तथाऽपि न भूतसौहृदमस्ति त्यागः क्वचिच्छिविप्रभृतिष्वस्ति यस्त्यागः शिव्यादिगतःस न मुक्तिकारणं न मुक्तिहेतुः पुंसः कार्त्तवीर्यादेः वीर्यमस्ति तथाऽपि तद्जवेगेन कालवेगेन निष्कृतं परिहृतन्तु न भवति द्वितीयः भगवतोऽन्यः कश्चिदपि सनकादिरपि सत्त्वादिप्राकृतगुणसङ्गवर्जितो न भवति "न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः। सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः" इत्युक्तरीत्या गुणत्रयनिर्मुक्तस्य श्रीभगवदन्यस्य कस्याऽपि जन्तोरभावादिति भावः ॥ २१ ॥

क्वचिन्मार्कण्डेयादिषु चिरायुरस्ति न तु शीलं मङ्गलञ्चास्ति इन्द्रियदमनधर्मशीलत्वादिति भावः क्वचित्तदप्यस्तिचेदायुषः स्थैर्यं न वेद्यं न निश्चेयं कुत्रचित् रुद्रादौ उभयं चिरायुष्यं शीलञ्चास्ते तथापि स रुद्रादिरमङ्गलः अमङ्गलवेषः श्रीभगवन्तं लक्ष्यीकृत्याह—यश्च कार्त्स्न्येन सद्गुणाश्रयनिरवद्यनिरतिशयमङ्गलमूर्त्तिर्भगवान् स तु मां न हि कांक्षते स्वत एव पूर्णत्वादिति भावः ॥ २२ ॥

एवमित्थं विमृश्य रमा लक्ष्मीः निरपेक्षमपि मुकुन्दमेव वरं पतिं वव्रे, तत्र हेतुं वदन्मुकुन्दं विशिनष्टि—अव्यभिचारिभिरनितरसाधारणैर्मङ्गलगुणैर्निजैः स्वकीयैर्निरुपाधिकैराश्रयतः आश्रयणाद्वरं सर्वोत्कृष्टम् अगुणाश्रयं सत्त्वादिप्राकृतगुणानाश्रयं, च निजैराश्रयतागुणाश्रयम् इतिपाठान्तरं तदा निजैरव्यभिचारि-

(१) सद्गुणं पदं निजैकाश्रयि सद्गुणाश्रयम् इति विज०। (२) राश्रयतो इति वीर०। (३) निनीय। (४) भीता इति च विज०।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सद्गुणैराश्रयतया प्राकृतगुणाश्रयं चरम उत्कृष्टमित्यर्थः । सर्वगुणैराश्रयणसौकर्याद्वैराश्रयणीयत्वेनापेक्षितम् अत एवेप्सितमाप्तुमिच्छाविषयं मुकुन्दं वरं वव्रे ॥ २३ ॥

उक्तवरणप्रकारमेवाह—तस्येति । तस्य मुकुन्दस्य अंसदेशे स्कन्धप्रदेशे कमनीयां नवकञ्जमालां निधाय तदनुग्रहं प्रतीक्षमाणा तूष्णीं तस्य निकटे तस्थौ, कथम्भूतां मालाम् ? माद्यतां मधुपानमत्तानां मधुव्रतानां भ्रमराणां वरूथस्य समुदायस्य गिरोपघुष्टां ध्वनितां; कथम्भूता लक्ष्मीः ? सव्रीडहासेन विकसत् यन्नयनं तेन तस्य भगवत उरो वक्षः स्वधाम स्वाश्रयं याता तद्वक्षः स्वाश्रयत्वेन प्रतीक्षमाणा सतीत्यर्थः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वक्रं समं स्तनद्वयञ्च दधती ॥ १७—१८ ॥

आत्मनः स्वस्य निर्दोषं गन्धर्वादिषु पदं स्थानं पतिलक्षणं स्थानं नान्वविन्दतेत्यन्वयः ॥ १९ ॥

ननु, पदमनुपलभ्य किं पुंश्चली जातेत्याशङ्कां श्लोकद्वयेन परिहरति—नूनमिति । यस्य तपोऽस्ति तस्य मन्युनिर्जयो नास्ति नूनं निश्चये "नूनं तर्केऽर्थनिश्चये" इत्यभिधानात् इति तर्कयामि वा

" विधिनोक्तेन मार्गेण कृच्छ्रचान्द्रायणादिभिः ।
शरीरशोषणं प्राहुस्तापसास्तप उत्तमम् " इति.

अनेन ऋषितया नारदादयः प्रतिषिद्धाः क्वचित्पुंसि ज्ञानमस्ति तस्य ज्ञानं सङ्गवर्जितं फलस्नेहरहितं न स्यात् नूनमित्यत्राप्यनुकृष्यते अनेन बृहस्पत्यादयो निषिद्धाः कश्चिद्ब्रह्मा तत्र महानस्ति तस्य ब्रह्मणः कामनिर्जयो नास्ति " प्रजापतिः स्वां दुहितरम् अभ्यध्यायत्" इति श्रुतेः । "कस्मै देवाय हविषा विधेम" इति च. यः परतो व्यपाश्रयः परमन्यमाश्रयत इति स ईश्वरः ।किं नैव अनेन रुद्रादिर्निवारितः ॥ २० ॥

तर्हि दण्डपाणिः स्यादिति । तत्राह—धर्मइति । क्वचित्संयमिन्यां धर्मोऽस्ति तस्य धर्मस्य भूतेषु दया नास्ति निरनुक्रोशाधिकारप्रवृत्तत्वात् क्वचित्कस्मिंश्चित्पुंसि पुण्यलक्षणो धर्मोऽस्ति तस्य प्राणिषु सौहृदं दुर्लभमिति सामान्यनिषेधो वा तच्च त्यजनं च अर्थिभ्यो देवतादिभ्यो वाऽन्यायार्जितधनादिदानं त्यागः तच्च मुक्तिकारणं न भवति भगवदर्पणबुद्ध्याऽननुष्ठितत्वात् हानोपादानाद्विलक्षणत्यागाधिकारित्वाद्वायुरपि मुक्तिकारणं न " मोक्षदस्तु जनार्दनः" इति वचनाद्वा अनेन वायुर्लक्ष्यते क्वचित्पुंसो वीर्यं तापादिदुःखनिवारकमस्ति तदजवेगनिष्कृतं न कालचक्रविजयि भवति अनेन चन्द्रो निवारितः "क्षीणः क्षीणः प्रविशति"इति वचनात् गुणसङ्गवर्जितो द्वितियो न हि हरिं विनेति शेषः ॥ २१ ॥

क्वचिद्वस्तुनि चिरायुरस्ति चेत्तस्य शीलमङ्गलं न हि चिरजीविवत् क्वचिद्वस्तुनि तच्छीलमप्यस्ति तर्ह्यायुषो न वेद्यम् आयुर्ज्ञानं दुःशकमित्यर्थः । कुत्र च क्वापि यत्र यस्मिन् पुंसि उभयमायुः शीलं च सोऽपि पुमानमङ्गलः गर्वितः सुमङ्गलः कश्चन लोकविलक्षणो मुक्तजातीयो मां कांक्षते यदि सोऽपि न भवतीति शेषः ॥ २२ ॥

एवमिन्द्रादीनपि विमृश्य दोषानुक्त्वा रमा मुकुन्दं परस्पदं वव्रे इत्यन्वयः अव्यभिचारिणो नातिव्याप्ताः सन्तः अव्याप्त्यसम्भवाख्यदोषरहिता गुणा लक्षणानि यस्य स तथा तं निजाश्चैकाश्रयिणश्चैकस्मिन्नेव वर्तमानाश्च सन्तश्च तपआदिगुणा येषां ते तथा तेषां पुंसामाश्रयं निजत्वादेकाश्रयित्वं निजमात्मीयनित्ययोरिति तत्तत्सत्ताप्रदत्वेन तदाश्रयत्वं युक्तं भक्त्यादिसर्वगुणैरपेक्षितत्वं नत्वन्यथा सौशील्यादिगुणैर्वा काचन काङ्क्षत इत्यस्यापवादमाह, निरपेक्षमिति. तर्हि न कश्चन तस्मिन्नादरं करोतीति तत्राह ईप्सितमिति—

एष ब्रह्माऽतिवृद्धस्तपति दिनपतिश्चञ्चलो मातरिश्वा—
दिग्वासा नीलकण्ठास्त्रिदशपतिरसौ गर्वितः क्षीयतेऽब्जः॥
इत्थं देव्या विचिन्त्य भ्रमरकुलकलागीतशब्दप्रफुल्ला —
दत्ता माला मुरारेः सुरतरुकुसुमालङ्कृता पातु युष्मान्॥

इति पुराणज्ञा व्याचक्षन्ते ॥ २३ ॥

तस्य हरेरंसे मालां निवीय निधाय तस्थावित्यन्वयः उशतीमिष्टसाधनीभूतां कान्तां वा व्रीडया सह वर्त्तमानः सव्रीडः स चासौ हासः सव्रीडहासः तेन विकसितनयनेन स्वस्या धाम तस्य हरेः उरः पश्यतीति शेषः भीता शरीरकंपोपेता अयं च शृङ्गारविशेषः—

"अनाद्यनन्तकालं च विष्णुमेवाश्रिता रमा।
अन्येषां ज्ञापनार्थाय दोषानुक्त्वेतरान् जहौ" ॥—

इति वचनात् अधुना हरेर्लक्ष्मीप्राप्तिर्न पूर्वमिति शङ्कापरिहर्तव्या स्वस्याः श्रियः इत्युत्तरश्लोकविशेषणसामर्थ्याच्च ॥२४॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अन्याश्रिलार्थं श्रियश्चरितमाह–विलोकयन्तीति ॥ १९ ॥

अन्येषां स्वल्पगुणत्वेऽतिदोषमिश्रतामाह—-नूनमित्यादि-श्लोकैः । अत्र तप आदिभिरपि न साम्यं विवक्षितम् । असाम्यप्रसिद्धेः । यथोक्तम् "इमे चान्ये च भगवन्नित्या यत्र"इत्यादौ प्रार्थ्यां महत्त्वमिच्छद्भिरिति किन्त्वन्यदीयतपआदिलेशानां सतामपि दोषान्तरोपरक्तत्वमित्येवमत्यन्तासाम्यमेव विवक्षितं परतो व्यपाश्रय इति गुणसाम्यमपि प्रत्याख्यातम् ॥ २० ॥

अजवेगेति यतस्तेषां तत्तद्गुणत्वमपि मायागुणकृतमेव न तु तदतीततद्गुणत्वमिति परामृशति—नहीति । हि यस्मात् द्वितीयः श्रीमुकुन्दादन्यः अनेन सनकादय आत्मारामा अपि परिहृताः तेषां शमदमादिगुणानां मायिकत्वात् तथा शिवोऽपि परिहृतः "शिवः शक्तियुतः शश्वत्त्रिलिङ्गो गुणसंवृतः" इति

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

"हरिर्हि निर्गुणः साक्षात्" इत्याद्युक्तेः यद्वा यो वा कश्चिद्गुणसङ्गवर्जितोऽस्ति सोऽपि द्वितीयो मुकुन्दस्य तुल्यगुणो न भवतीत्यर्थः ॥ २१ ॥

अथ प्रकारान्तरेण शिवं परिहर्त्तुमुपक्रमते—कचिदिति । चिरायुश्चिरजीविता शीलमङ्गलशब्देनात्र भोग उच्यते इन्द्रियदमनशीलत्वादिति टीकायां हेतुविन्यासात् अभोगिनोऽमङ्गलस्वभावत्वेन लोके नामाग्रहणादर्शनाच्च यद्वा कचित् मयदानवादौ चिरजीवितास्ति शीले स्वभावे मङ्गलं माङ्गल्यं नास्तीत्यर्थः । असुरस्वभावत्वादेवं कांचत् बलिप्रभृतौ शीलमङ्गलमप्यस्ति किन्त्वायुषो वेद्यं वेदनं नास्ति मरणानिश्चयात् यत्र शिवे मङ्गलस्वभावो नित्यत्वाच्चायुषो वेद्यत्वं चेत्युभयमप्यस्ति सोऽप्यमङ्गलः वहिःश्मशानवासाद्यमङ्गलचेष्टितः श्रीमुकुन्दं लक्ष्यीकृत्याह—यः कश्च कोपि तत्तद्गुणातिक्रमणानन्तगुणत्वात्तद्दोषहीनत्वाच्च सुमङ्गलः अतिशयेन सर्वेषां मङ्गलनिधानरूपः स तु मां स्वरूपेण परमानन्दरूपां शक्त्या च सर्वगुणसम्पत्तिदायिनीमपि न कांक्षति स एव स्वरूपगुणसम्पत्तिभिः पूर्ण इत्यर्थः । अथच प्रेमवशोऽसौ प्रेमवतीं मां कथं नाकाङ्क्षेदित्यभिप्रेत्य श्लेषेण कश्चन कोपि सुमङ्गलोऽसौ हि निश्चितं मां काङ्क्षतीत्यपि भावितम् इदमत्र तत्त्वम् परमानन्दरूपे तस्मिन् गुणादिसम्पल्लक्षणानन्तशक्तिवृत्तिकास्वरूपशक्तिर्द्विधा विराजते तदन्तरेऽनभिव्यक्तनिजमूर्त्तित्वेन तद्बहिरप्यभिव्यक्तलक्ष्म्याख्यमूर्त्तित्वेन इयञ्च मूर्त्तिमती सर्वगुणसम्पदधिष्ठात्री भवति ततः स्वास्मिन् परमानन्दत्वस्य सर्वगुणसम्पत्तेश्च स्वरूपसिद्धपरमपूर्णत्वात् उभयथापि न तां पृथग्भूय स्थितां मूर्त्तिमतीमपेक्ष्यते यथा सनन्दनः । किन्तु भक्तवशता स्वभावेन तां प्रेमवतीमपेक्ष्यत एवेति ॥ २२ ॥

प्रकरणं निगमयति—एवमिति । मुकुन्दं वरं वव्रे इत्यन्वयः तं विशिनष्टि, अव्यभिचारिभिः सद्भिर्निर्दोषैश्च गुणैर्वरं सर्वोत्तमं निजैकाश्रयतया अन्यनिरपेक्षत्वेनैव च गुणाश्रयम् । स्वरूपसिद्धतत्तद्गुणमित्यर्थः । अतएव तेषां गुणानां प्रकृतिसम्बन्धित्वमपि खण्डितं स्वतः परमानन्दघनरूपत्वात् सर्वगुणैरपेक्षितं स्वयं निरपेक्षम् अतएव निजाभीप्सितमिति । यद्वा एवं विमृश्य वव्रे विमर्शनमेवानुवदति—अव्यभिचारीति । निरपेक्षोऽप्यप्राकृताव्यभिचारसद्गुणत्वाद्भक्तवत्सलतया मामङ्गीकरिष्यत्येवेति भावः ननु योग्य एवाऽयं तस्य महतो महागुणाः भवत्यास्त्वयोग्यायास्तद्वरणं न योग्यं तत्राह, सर्वैर्गुणैः प्राकृतैरप्यपेक्षितं मायांशभूताभिस्तत्तदधिष्ठातृदेवीभिः स्वसमृद्धये समाश्रयतेऽसौ किमुत मयेत्यर्थः ॥ २३ ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

उभयरूपाया एव तस्याः श्रीभगवान्नेवाश्रय इत्याह—तत इति । कृतमनादित एव स्वास्ति सर्वकालमङ्गलं नारायणवक्ष एवायतनमास्पदं यस्याः सा स्वप्रतिच्छविरूपा गुणमयीव स्थिराः सम्पदां ब्रह्मादिभ्यो ददानापि स्वयं गुणातीता चिन्मयसंपद्रूपा लक्ष्मीः श्रीः नारायणमेकमेवाश्रित्य सदा वर्तते तथैवानादित एव कमपिगुणं नोपाधीकृत्य स्वभावत एव तस्मिन् प्रेमवती तत्सर्वेन्द्रियसुखसम्पादयित्री प्रेयसीरूपापि वर्त्तत इत्यर्थः । तदपि द्विविधैव लक्ष्मीः समुद्रं जनकीकृत्य प्रादुर्भूता पुनरेकीभूता सती स्वनित्यप्रियं श्रीनारायणं स्वयं वरीतुं चचाल ॥ १७ ॥

ततस्तदनन्तरं ततस्तत्र महासदसि विसर्पंती हेमलता जङ्गमा स्वर्णवल्लीव ॥ १८ ॥

किञ्च तयोरेकीभूतयोर्लक्ष्म्योर्मध्ये या सम्पद्रूपा सा लोके स्वप्रेयसो भगवतः सर्वत एवोत्कर्षं ख्यापयितुं तत्र नित्यनिरुपाधिप्रेमवत्यपि अन्यत्र गुणदोषविवेचनपूर्वकमन्यस्याः स्वयंवराया इव स्वस्यापि तत्रैव गुणोत्कर्षोपाधिकं स्वयंवरणं दर्शयामासेत्याह—विलोकयन्तीति । गन्धर्वादिषु आत्मनः स्वस्य पदमास्पदं जनं कमपि नान्वविन्दत कीदृशं निरवद्यं निर्दोषम् अथ च अव्यभिचारिणः सदैव स्थायिनः सन्तः कल्याणवत्त्वात् श्रेष्ठा गुणा यत्र तत् ध्रुवं नित्यम् ॥ १९ ॥

तत्रतत्र वरणव्यवसायानुद्भवे सदोषप्राकृतगुणवत्त्वमेव हेतुरिति सम्पद्रूपा लक्ष्मीः स्वगतमाह—नूनमिति त्रिभिः । तस्य दुर्वासःप्रभृतेर्मन्युनिर्जयो नेति तपसो वैयर्थ्यम् ज्ञानं कचित् बृहस्पत्यादिषु सङ्गवर्जितं नेति ज्ञानस्य वैयर्थ्यम् महान् ब्रह्मा न कामनिर्जय इति महत्त्वस्य वैयर्थ्यम् यः परतः शत्रुभ्यो हेतोर्व्यपाश्रयः व्यपगतास्पदो वारम्वारम्भवति स किमिन्द्रादिरीश्वरो भवति नैवेत्यर्थः ॥ २० ॥

कचित्कार्मिषु शुक्रादिषु धर्मः कर्मित्वादसुरपुरोहितत्वाच्च न भूतसौहृदमिति धर्मस्य वैयर्थ्यं त्यागोऽन्नादिदानं दक्षादिषु तद्दानस्य मुक्तिकारणत्वाभावाद्वैयर्थ्यं वीर्यं वलं पुंसः शुम्भनिशुम्भादेः अजवेगनिष्कृतं कालवेगपरिहृतं न भवतीति वलस्य वैफल्यं गुणसङ्गवर्जितः प्राकृताप्रकृतविषयासक्तिमात्ररहितः सनकादिर्न द्वितीयो न ईश्वरस्तत्र यदप्राकृतसौरूप्यसौरभ्यादेर्वैफल्यापत्तेः ॥ २१ ॥

कचिद्बलिप्रभृतिषु चिरमायुः किन्तु शीलमङ्गलानि न तत्र आसुरस्वभावेन शीलाभावः इन्द्रशत्रुत्वेन मङ्गलाभावश्च कचिन्मनुपुत्रपौत्रादिषु तत् शीलमङ्गलं किन्त्वायुषो न वेद्यं न ज्ञानं मनुष्यजातित्वेनाचिरायुष्टात् यत्र कुत्रचिच्च उभयं सौशील्यं विपक्षभाववत्त्वं चिरायुष्ट्वं च स च महादेवः अमङ्गलः श्मशानवासाद्यमङ्गलचेष्टितः भगवन्तं लक्ष्यीकृत्याह—शोभनानि मङ्गलान्येव यत्रेति पूर्वोक्तदोषाणां स्वरूपत एवामङ्गलत्वात् गुणानां प्राकृतानां नश्वरत्वेन कल्याणवत्त्वाभावात् ते गुणा दोषाश्च नैव सुमङ्गला इति भावः किञ्च पूर्वपूर्ववदस्मिन्नप्येको दोषोऽस्तीति व्याजस्तुत्या दोषमाह—न कांक्षते नापेक्षत इति निरपेक्षत्वलक्षणः सर्वत्र विलक्षणो ऽत्रैव दृष्ट इति भावः ॥ २२ ॥

एवं विमृश्य रमा निरपेक्षमपि मुकुन्दमेव वरं वव्रे ननु,

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

स तां नापेक्षते चेत् साऽपि तं नापेक्षतां तत्राह—मत्तैरणिमादिभिर्गुणैरपेक्षितम् अयं भावस्तस्याः यथायं स्वयं निरपेक्षोऽपि स्वमपेक्षमाणा अणिमादीन्सिद्धिर्नोपेक्षते तथा मामपि नोपेक्षिष्यते यतोऽयं निरपेक्षो यथा निरपेक्षश्रेत्यत एतस्मैनयैव कृतार्थी भूयासं किमन्यैः प्राकृतैरिति अत एवाव्यभिचारिणोऽव्यभिचारित्वादेव नित्यास्सन्तः श्रेष्ठा ये गुणा ऐश्वर्यादयस्तैर्वरं श्रेष्ठं अगुणाश्रयं प्रकृतिगुणातीतं निजस्य स्वस्य एकाश्रयतया वव्रे ॥ २३ ॥

उशतीं कमनीयां मालां निधाय तूष्णीं तस्य निकटे प्रथमं तस्थौ ततस्तदभिप्रायमभिलक्ष्य तस्य उरो वक्षः स्वयं धाम समस्तद्रष्टृलोकालक्ष्यतयैव याता प्राप्ता सती ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तदनन्तरं कृतस्वस्त्ययना सुशोभनं वक्त्रं दधती सती उत्पलस्रजं पाणिना परिगृह्य भगवत्कण्ठे निधातुमिति शेषः चचाल ॥ १७ ॥

तथा सुशोभनं स्तनद्वयं दधती नूपुराणां वल्गुभिर्मधुरैः शिञ्जितैरितस्ततो विसर्पती हेमलतेव बभौ ॥ १८ ॥

आत्मनः स्वस्याः ध्रुवं नित्यं निरवद्यं स्वभावतोऽपास्तसमस्तदोषम् अव्यभिचारिणो नित्याः सन्तो गुणाः यस्मिन् तत् पदमाश्रयं गन्धर्वादिषु विलोकयन्ती नान्वविन्दत ॥ १९ ॥

तदाह—नूनमिति त्रिभिः । यस्य दुर्वासःप्रभृतेस्तपोऽस्ति तस्य मन्युनिर्जयो नास्ति क्वचिद्बृहस्पत्यादौ ज्ञानमस्ति तत्र सङ्गवर्जितं ज्ञानं नास्ति कश्चिद् ब्रह्मसोमादिर्महान् तस्य कामनिर्जयो नास्ति । परतः असुरादिभ्यो हेतुभूतेभ्यः व्यपाश्रयः अष्टैश्वर्यः पुनः पुनर्भवति स इन्द्रादिः किमीश्वरः ॥ २० ॥

क्वचित् शुक्रादौ धर्मोऽस्ति न भूतसौहृदम् असुरयाजकत्वात् क्वचिच्छिबिप्रभृतौ त्यागोऽस्ति तत्र स मुक्तिकारणं नास्ति पुंसः कार्तवीर्यादेः वीर्यं बलमस्ति तथाऽपि त्वजवेगनिष्कृतं कालेन परिहृतं नास्ति द्वितीयः भगवदितरः सर्वोऽपि प्राकृतो लोकः गुणसङ्गवर्जितो न भवति गुणसङ्गदूषितत्वादेव इत्यर्थः ॥ २१ ॥

कश्चिन्मार्कण्डेयादिश्चिरायुरपि तत्र शीलं मङ्गलं नास्ति तपसा दुर्बलदेहेन्द्रियत्वात् क्वचिद्धिरण्यकशिपुप्रभृतौ तदप्यस्ति आयुषः स्थैर्यं न वेद्यं न निश्चेयम् क्वचिद्रुद्रादौ शीलमङ्गलमायुषः स्थैर्यं चेत्युभयमस्ति सोऽप्यमङ्गलः नरकपालादिप्रियत्वात् भगवन्तं लक्ष्यीकृत्याह—कश्चेति । कश्चित्सुमङ्गलः निरवद्यश्च स तु मां न हि कांक्षते स्वतो ऽवाप्तसमस्तकामत्वात् ॥ २२ ॥

एवं विमृश्य रमा निजैकाश्रयया स्वासाधारणानन्दरूपसम्पत्याऽन्यनिरपेक्षमपि मुकुन्दमेवेप्सितं वरं वव्रे तत्र हेतुगर्भाणि विशेषणानि अव्यभिचारिभिः स्वाभाविकैः सर्वज्ञत्वकृतज्ञत्वाभयदत्वभक्तवत्सलत्वसर्वेश्वरत्वादिभिर्गुणैर्वरं सर्वोत्तमम् अगुणाश्रयं प्राकृतगुणरहितं यद्वा अगुणानां मुक्तानामाश्रयं स... तपोदानव्रतध्यानादयो गुणा येषु तैर्ब्रह्मादिभिरपेक्षितमुपास्यत... वाञ्छितम् ॥ २३ ॥

तदेवाह—तस्येति । माद्यन्तो ये मधुव्रताः भ्रमरास्तेषां व... थस्य गिरा उपघुष्टां नादितामुशतीं कमनीयां नवकञ्जमालां त... मुकुन्दस्यांसदेशे निधाय सव्रीडहासविकसन्नयनेन तस्य मु... न्दस्य उरः स्वधाम याता साभिलाषनिरीक्षणेन तद्वक्षसि वास... भिलाषं द्योतयन्ती सती निकटे तस्थौ ॥ २४ ॥

भाषा टीका ।

तदनंतर ऋषि लोगों ने किया है स्वस्तिवाचन जिन को और जिनके सुन्दर कपोलों पर कुंडल झलक रहे, तथा लज्जा सहित मन्दहास युक्त सुन्दर मुख जिन का, ऐसी श्री लक्ष्मीजी अपने हाथ में भ्रमर गुंजार कर रहे जामें ऐसी कमलों की माला को लेकर चलीं ॥ १७ ॥

परस्परसमीपवर्ति, और समान, तथा कुंकुम से लि... ऐसे दोनों स्तनों को धारण करती हुई अति कृश कटि वाली वे श्रीजी आगे२ चलतीं हुई नूपरों के मनोहर शब्दो के झण... त्कार करतीं हुई हेमलता के नाई शोभा को प्राप्त होतीं भई॥१८॥

और चलते समय में अपना दोष रहित, निश्चल, नित्य सद्गुण वाला ऐसे आश्रय को अवलोकन करती हुई भी गन्धर्भ, यक्ष, असुर,सिद्ध,चारण,और स्वर्ग वासियों में भी किसी को ऐसा न देखा कि जिस में कुछ दोष न होवै ॥ १९ ॥

जिस में निश्चय करके तप देखा उस से क्रोध नहीं जीता गया, कितने लोगों में ज्ञान देखा पर संगवर्जित नहीं देखा, कोई महान् भी देखे (ब्रह्मा चन्द्र आदिक) परंच उन में काम की जीत न देखा, कितने एक ईश्वर भी देखे (इन्द्रादिक) पर वे पराये आधीन देखे, ॥ २० ॥

कितनों में धर्म देखा (परशुरामादिमें) पर वहां प्राणियों के साथ सुहृदता न देखी कितने जनों में त्याग देखा पर वहां मुक्ति का कारण नही, कोई पुरुषों में वीर्य देखा (सहस्राबाहुआदि में) परंच वे काल से नष्ट होने वाले देखे, और कोई लोग गुण संगवर्जित भी देखे (सनकादि) पर वे लोग समाधिनिष्ठ होने से पति नहीं हो सक्ते हैं ॥ २१ ॥

कोई लोगों में चिरायु [बडी आयु] देखी [मार्कंडेयादि में] परञ्च वहां शील और मंगल नहीं देखा कहीं पर वह भी देखा तहां आयु का ठिकाना नहीं देखा, और जहां कहीं ये दोनों वातें भी हैं वह अमङ्गल रूप है और लक्ष्मी जी बोली कि जो परम सुमंगल रूप भी है वह मेरी आकांक्षा नहीं करता है ॥ २२ ॥

श्रीलक्ष्मी जी नें इस प्रकार नित्य सद्गुणों के एक आश्रय श्रीहरि को अपने वर निश्चय करके, सर्व गुणों को भी

तस्याः श्रियस्त्रिजगतो जनको जनन्या वक्षो निवासमकरोत्परमं विभूतेः ।
श्रीः स्वाः प्रजाः सकरुणेन निरीक्षणेन यत्र स्थितैधयत साधिपतींस्त्रिलोकान् ॥ २५ ॥

शङ्खतूर्यमृदङ्गानां वादित्राणां पृथुः स्वनः ।
देवाऽनुगानां सस्त्रीणां नृत्यतां गायतामभूत् ॥ २६ ॥
ब्रह्मरुद्राङ्गिरोमुख्याः सर्वे विश्वसृजो विभुम् ।
ईडिरेऽवितथैर्मन्त्रैस्तल्लिङ्गैः पुष्पवर्षिणः ॥ २७ ॥
श्रिया विलोकिता देवाः सप्रजापतयः प्रजाः ।
शीलादिगुणसम्पन्ना लेभिरे निर्वृतिं पराम् ॥ २८ ॥
निस्सत्त्वा लोलुपा राजन्निरुद्योगा गतत्रपाः ।
यदा चोपेक्षिता लक्ष्म्या बभूवुर्दैत्यदानवाः ॥ २९ ॥
अथासीद्वारुणी देवी कन्या कमललोचना ।
असुरा जगृहुस्तां वै हरेरनुमतेन ते ॥ ३० ॥
अथोदधेर्मथ्यमानात्काश्यपैरमृतार्थिभिः ।
उदतिष्ठन्महाराज ! पुरुषः परमाद्भुतः ॥ ३१ ॥
दीर्घपीवरदोर्दण्डः कम्बुग्रीवोऽरुणेक्षणः ।
श्यामलस्तरुणः स्रग्वी सर्वाभरणभूषितः ॥ ३२ ॥

भाषा टीका ।

अपेक्षित और आप निरपेक्ष ऐसे श्रीमुकुन्द को अपने मनके इच्छित पति स्वीकार किये ॥ २३ ॥

फिर श्रीमुकुन्द भगवान् के कंठ में बडी कमनीय और मदमत्त मधुव्रतों [भ्रमरों] के समूहों की वाणी का जिसमें घोष होरहा है ऐसी नवीन कमलों की माला को धारण कराकर निकट में स्थित भई। तब गोविंद ने भी अपने वक्षःस्थल में वास दिया और श्री जी लज्जा हास और विकसित नयनों से अपने धाम श्रीहरि के वक्षस्थल में विराजमान भई ॥ २४ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

भगवानपि त्रैलोक्याभिवृद्धये स्ववक्षस्तस्याः स्थानं ददावित्याह-तस्या इति । विशिष्टा भूतयो विभवा यस्याः तस्यास्त्रिजगतो जनन्याः श्रियः परमं सुस्थिरम् ऐधयतावर्धयत् ॥ २५—२६ ॥
तल्लिङ्गैर्विष्णुप्रतिपादकैः अवितथैर्यथार्थैः ॥ २७—२९ ॥

वारुणी वरुणदैवत्यं यदन्नं तन्मयी सुरा ॥ ३० ॥ ३१ ॥

दीर्घौ पीवरौ दोर्दण्डौ यस्य कम्बुग्रीवः शङ्खनाभिरिव त्रिरेखा सुवृत्ता ग्रीवा यस्य ॥ ३२ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

त्रिजगतो जनन्यास्तस्या अखिलविभूत्याश्रयभूतायाः श्रियः त्रिजगज्जनको भगवान् स्वं वक्ष एव परं निवासस्थानमकरोत् यत्र वक्षसि स्थिता श्रीः सकरुणेन निरीक्षणेन स्वाः प्रजाः साधिपतींस्त्रिलोकांश्चैधयत अवर्द्धयत् ॥ २५ ॥

तदा शङ्खादीनां वाद्यानां सस्त्रीणां देवानुगानां गन्धर्वादीनां नृत्यतां गायतां पृथक्पृथक् महान् ध्वनिरभूत् ॥ २६ ॥

तदा ब्रह्मादयः सर्वे विश्वस्य स्रष्टारः पुष्पाणि वर्षन्तः विभुं भगवन्तं तल्लिङ्गैर्भगवद्गुणप्रतिपादकैरवितथैः सत्यैः यथावस्थितार्थप्रतिपादकैर्नत्वाऽऽरोपितगुणप्रतिपादकैरित्यर्थः । मन्त्रैरीडिरे तुष्टुवुः ॥ २७ ॥

देवाः सप्रजापतयः प्रजाश्च श्रियाऽवलोकिताः शीलादिगुणसम्पन्नाः परां निर्वृतिमानन्दं लेभिरे ॥ २८ ॥

दैत्या दानवाश्च यदा लक्ष्म्यापेक्षितास्तदैव हे राजन्! निस्सत्वाः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

निर्बलाः अत एव निरुद्योगास्त्यक्तलज्जाः लोलुपाः विमोहशीलाः बभूवुः॥ २९॥

अथ श्रिय उद्गमनानन्तरं वारुणी देवी वरुणदैवत्यं यत्तन्मयी सुराऽधिदेवता कन्या कमले इव नेत्रे लोचने यस्याः साऽऽसीदुद्बभूव तां च हरेरनुज्ञया ते असुरा जगृहुः॥ ३०॥

अथामृतार्थिभिः काश्यपैर्देवासुरैर्मथ्यमानादुदधेः हे राजन्! परमाद्भुतः पुरुषः उदतिष्ठदुद्बभूव॥ ३१॥

तं विशिनष्टि—दीर्घौ पीवरौ च दोर्दण्डौ भुजौ यस्य कम्बुवच्छङ्खवत् त्रिरेखा वृत्ता च ग्रीवा यस्य अरुणे ईक्षणे यस्य मेघ इव श्यामः तरुणो युवा स्रग्वी वनमाली सर्वैराभरणैरलङ्कृतः॥३२॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

ऐधयत अवर्धयत्॥ २५॥

"काहले गोमुखे तूर्यदुन्दुभी च प्रचक्षते" इति च॥ २६॥

तल्लिङ्गैः श्रीलक्षणोपेतैः श्रीसूक्तैरित्यर्थः॥ २६॥ २७॥ ॥ २८॥ २९॥

वारुणी सुराभिमानिनी देवता च॥ ३०॥

काश्यपैर्देवासुरैः परममुत्तममद्भुताश्चर्यमहात्म्यं यस्य स तथा॥ ३१॥

कम्बुग्रीवः रेखात्रयाङ्कितगलः॥ ३२॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

श्रीभगवानपि तादृशतद्भक्त्यनुभवेन जातानुरागस्तत्परमाश्रयं स्ववक्ष एव तस्यै स्थानमदात् सापि तं निजपरमाश्रयं प्राप्य समृद्धा सर्वान् सम्वर्द्धयामासेत्याह, तस्याः श्रिय इति॥ २५—२८॥

यदा लक्ष्म्योपेक्षितास्तदा निस्सत्त्वादयो बभूवुरित्यन्वयः॥ २९॥

वारुणी तन्नाम्न्याः सुराया अधिष्ठात्री॥ ३०॥

अथेति सार्द्धत्रिकम्॥ ३१-३५॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

द्विविधाया लक्ष्म्यास्तत्र वासं व्यवस्थयैवाह—तस्याः प्रसिद्धायाः हरिप्रेयसीरूपायाः त्रिजगतो जनन्याः वक्ष एव निवासम् अकरोत् तथैव विभूतेः संपद्रूपायाः अपि वक्षः परमं श्रेष्ठं सार्वकालिकं च निवासम् अकरोत् तेन ब्रह्मेन्द्राद्याः खलु विभूतिरूपायाः असार्वदिकाः गौणाश्च निवासाः स्युरिति ध्वनितम् अथात्र विष्णुसदाशिवयोर्निर्गुणत्वेश्वरत्वाभ्यां साम्येऽपि यथा सदाशिवांशभूतस्य रुद्रस्य गुणावतारत्वं न तु विष्णोरंशभूतस्य मत्स्यकूर्मादेस्तथा लक्ष्मीतद्विभूतिरूपलक्ष्म्योर्भगवत्प्रेयसीत्वादिना साम्येऽपि विभूतिरूपलक्ष्म्याः या विभूतिस्तस्या एव ब्रह्मादिभ्यो दत्तसंपत्ते गुणमयत्वं न लक्ष्म्याः। लक्ष्म्यास्तु नित्यसिद्धधामस्थसिद्धसकेभ्यो दत्तसम्पत्तेश्चिन्मयत्वमतस्तयोरीपद्वैलक्षण्यमिति भावः। तदेव स्पष्टयति—श्रीः सम्पद्रूपा यत्र वक्षसि स्थिता एव स्वाः प्रजाः ब्रह्मेन्द्राद्या ऐधयत अवर्द्धयतेति ब्रह्मेन्द्रादिषु सम्पद्रूपायाः विभूतयः स्थिता इति व्यञ्जितम् प्रजा एवाह—साधिपतीन् इति॥ २५—२९॥

वारुणी वरुणदैवत्यं यद्यन्नं तन्मयी सुरा॥ ३०—३५॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

मुकुन्दोऽपि तदभिलाषापूर्णार्थं स्ववक्षसि तां स्थापितवान् इत्याह—तस्या इति। त्रिजगतो जनन्याः श्रियः परमं सर्वश्रेष्ठं स्ववक्षोवासं निवासस्थानमकरोत् यत्र स्थिता सकरुणेन निरीक्षणेन स्वाः प्रजाः साधिपतींस्त्रिलोकांश्च दुर्वाससः शापेन निःश्रीकान् पुनरैधयत अवर्द्धयत सश्रीकान् चकार॥२५।२६॥

तल्लिङ्गैर्विष्णुस्वरूपगुणाद्यर्थकैः मन्त्रैः ईडिरे तुष्टुवुः अवितथैर्यथार्थैरित्यनेन सर्वज्ञत्वसर्वात्मत्वसर्वेश्वरत्वप्रतिपादकानि वाक्यानि विष्णावेवा ऽवितथानि भवन्त्यन्यत्र तु स्तुतिमात्रपराणीति द्योत्यते॥ २७—२९॥

वारुणी सुरा॥ ३०—३२॥

भाषा टीका।

इस प्रकार श्रीहरि ने विविध वैभव वाली जगज्जननी श्रीलक्ष्मी जी को अपनो वक्षःस्थल उत्कृष्ट निवास दिये जहां स्थित होकर श्री लक्ष्मी जी अपने करुणा पूरित कटाक्षों से अपनी सकल प्रजा तथा लोकपालों सहित तीनों लोकों की वृद्धि करतीं भई॥ २५॥

उस समय शंख, तूर्य, मृदंग, इत्यादि बाजों का तथा देव और उनके अनुचर और उन सबों की स्त्रियों का नाचने गाने का बडा भारी शब्द होता भया॥ २६॥

और ब्रह्मा महादेवजी और अंगिरा प्रभृति सर्व प्रजापति लोग यथार्थ मंत्रों से श्रीविष्णु के प्रतिपादक चिन्हों को कथन कर २ पुष्पों की वर्षा करते हुये प्रभु की स्तुति करते भये॥ २७॥

उस समय जब श्री लक्ष्मी जी ने देवता प्रजापतियों सहित सम्पूर्ण प्रजा को अपनी कृपा दृष्टि से देखा तब सब लोग शील गुण संयुक्त हुए और परमआनन्द को प्राप्त होते हुए॥ २८॥

पीतवासा महोरस्कः सुमृष्टमणिकुण्डलः ।
(१) स्निग्धकुञ्चितकेशान्तः सुभगः सिंहविक्रमः ॥ ३३ ॥
अमृताऽऽपूर्णकलशं बिभ्रद्वलयभूषितः ।
स वै भगवतः साक्षाद्विष्णोरंशांशसम्भवः ॥ ३४ ॥
धन्वन्तरिरिति ख्यात आयुर्वेददृगिज्यभाक् ।
तमालोक्यासुराः सर्वे कलशं चामृताभृतम् ॥ ३५ ॥
लिप्सन्तः सर्ववस्तूनि कलशं तरसाऽहरन् ।
नीयमानेऽसुरैस्तस्मिन् कलशेऽमृतभाजने ॥ ३६ ॥
विषण्णमनसो देवा हरिं शरणमाययुः ।
इति तद्दैन्यमालोक्य भगवान् भृत्यकामकृत् ।
मा खिद्यत मिथोऽर्थं वः साधयिष्ये स्वमायया ॥ ३७ ॥
मिथः कलिरभूत्तेषां तदर्थे तर्षचेतसाम् ।
अहं पूर्वमहं पूर्वं न त्वं न त्वमिति प्रभो ! ॥ ३८ ॥
देवाः स्वं भागमर्हन्ति ये तुल्यायासहेतवः ।
सत्रयाग इवैतस्मिन्नेष धर्मः सनातनः ॥ ३९ ॥
इति स्वान् प्रत्यषेधन् वै दैतेया जातमत्सराः ।
दुर्बलाः प्रबलान्राजन् ! गृहीतकलशान्मुहुः ॥ ४० ॥

भाषाटीका ।

प्रथम जब श्रीलक्ष्मी जी ने इन की उपेक्षा करी रही तब हे राजन् ! सम्पूर्ण जन पराक्रमहीन लोलुप निरुद्योग वाले निर्लज्ज दैत्य दानव होगये रहे ॥ २९ ॥

अब लक्ष्मी जी के प्रकट होने तथा श्री हरि के स्वीकार करने के पश्चात् फिर जब समुद्र मथने लगे तब वारुणी देवी [सुरा] कमल सदृश लोचनोंवाली एक कन्या उत्पन्न हुई उसको श्रीहरि की अनुमति से असुर लोगों ने ग्रहण किया ॥३०॥

तदनंतर हे महाराज ! अमृत की इच्छा वाले कश्यप के पुत्र देव दानवों ने जब फिर मंथन किया तब उस उदधि से एक परमाद्भुत पुरुष निकला ॥ ३१ ॥

जिसके बड़े लंबे और पुष्ट भुजदंड और शंख सरी की ग्रीवा अरुणारे लोचन रूप से श्याम अवस्था में तरुण माला को धारण किये सर्व आभरणों से विभूषित ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्निग्धः कुञ्चितः केशानामन्तो यस्य ॥ ३३ ॥ ३४ ॥

इज्यभाक् यज्ञभागभोक्ता अमृतेन आभृतं परिपूर्णम् । ॥ ३५ ॥ ३६ ॥

मिथो दैत्यानां परस्परं कलहोत्पादनेन योगमायया च मोहिन्या वोऽर्थं साधयिष्यास्यतो मा खिद्यतेत्याहेति शेषः ॥ ३७ ॥

तदेवाह–मिथ इति । तर्षः कामस्तद्युक्तानि चेतांसि येषाम् इत्येवं समबलानां कलिरभूत् ॥ ३८ ॥

दुर्बलानां स्वाक्रोशप्रकारमाह—देवा इति द्वाभ्याम् । ये देवाः तुल्येनायासेन हेतवः साधकाः तुल्य आयासो हेतुश्च धनादिर्येषामिति वा सत्रयागे यथा सर्वेषां समं फलं तद्वत् तथा च श्रुतिः "ऋद्धिकामाः सत्रमासीरन्" इति "ये यजमानास्ते ऋत्विजः" इति च ॥ ३९—४१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पीते वाससी यस्य बृहद्विपुलमुरो वक्षो यस्य सुमृष्टे निर्णिक्ते मणिमये कुण्डले यस्य नीलः कुञ्चितः कुटिलः केशानामन्तो

(१) नीलकुञ्चितेति विज० पाठः ।

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

ऽग्रभागो यस्य सः सुभगः सुकुमारः सर्वावयवसुन्दरो वा सिंहस्येव विक्रमः पादविन्यासो यस्य ॥ ३३ ॥

अमृतेन पूर्णं कलशं बिभ्राणः वलयैरलङ्कृतः कोसावित्यत्राह—स इति । स वै साक्षाद्भगवतो हरेरंशांशेन सम्भवो यस्य ॥ ३४ ॥

स तु धन्वन्तरिरिति प्रसिद्धः आयुर्वेदस्य द्रष्टा इज्यभाक् यागभोक्ता तममृतकलशं बिभ्रतं धन्वन्तरिमालोक्य सर्वेऽसुराः सर्ववस्तूनि मथनादुत्पन्नानि लिप्सन्तोऽमृतेन आभृतं सम्पूर्णम् कलशं तरसा बलेनाऽऽशु वा आहरन् आहृतवन्तः अमृतभाजने तस्मिन् कलशे दैत्यैर्नीयमाने हृते सति ॥ ३५—३६ ॥

देवा विषण्णमनसः खिन्नचित्ता हरिं शरणमाययुः इत्थं तेषां देवानां दैन्यमालोक्य भक्तानां काममिष्टमर्भीष्टं करोतीति तथा भगवान्मिथो दैत्यानां परस्परं कलहोत्पादनेन योगमायया मोहिन्या वो युष्माकमर्थं साधयिष्यामि अतो माखिद्यतेत्याह, इतीत्थमुक्त्वा देवान्सान्त्वयन्हरिस्तत्रैवान्तर्दधे ॥ ३७ ॥

मिथः कलहमेवाह—मिथ इति । मिथः तदर्थेऽमृतनिमित्ते तर्षः कामस्तद्युक्तानि चेतांसि येषां तेषां दैत्यानां परस्परं कलिः कलहो बभूव कलहमेवाह—अहमिति । हे प्रभो, राजन् ! अहंपूर्वमहमेव पूर्वं पास्यामि न त्वमित्यादि एवं कलिरभूदित्यर्थः ॥ ३८ ॥

तत्र दुर्बलानां दैत्यानामाक्रोशप्रकारमाह—देवा इति । देवा अपि स्वममृतभागमर्हन्ति कुतः यतो येऽपि देवास्तुल्यायासहेतवस्तुल्येनायासेन हेतवः साधकाः यथा सत्रयागे "य एव यजमानाः त एव ऋत्विजः" इति यजमानाभिन्न ऋत्विक्कर्त्तृके बहुयजमानके च सर्वेषां समं फलं तद्वदयमेव सनातनो धर्मः ॥ ३९ ॥

इतीत्थं हे राजन् ! स्वान् गृहीतकलशान् प्रबलान् दैत्यान्दुर्बला दैतेया जातमत्सरास्सन्तो मुहुर्मुहुः प्रत्यषेधन् न्यवारयन् ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नीलकुञ्चितकेशान्तः नीलकुञ्चितकेशस्वभावः "अन्तस्त्ववसिते मृत्यौ स्वभावे परमात्मनि" इति ॥ ३३ ॥

अमृतस्येति षष्ठी तृतीयार्थे अमृतेन पूर्णं कलशमित्यर्थः ॥ ३४ ॥

इज्यभाक् अमृतलक्षणमाहृतमाहारो यस्मिन्स तथा—

तेषां सत्याश्चालनार्थं हरिर्धन्वंतरिर्विभुः ।
समर्पोप्यसुराणां च स्वहस्तादमुचत्सुधाम् ॥—

इति वचनात् दैत्यैर्हरिहस्तादमृतं हृतं न त्वशक्तत्वादिति दर्शनरहस्यम् ॥ ३५—३७ ॥

तर्षचेतसां तृष्णायुक्तमनसाम् ॥ ३८ ॥

यथा सत्रयागे सर्वेषां समानं फलम् ॥ ३९—४१ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सर्ववस्तूनि लिप्सन्त इति अमृते पीते बलादिप्राप्त्या सर्वाण्येव वस्तूनि प्राप्तानि स्युरित्यभिप्रायात् ॥ ३६—४० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

इज्यभाक् यज्ञभागभोक्ता अमृतेनाभृतं पूर्णम् ॥ ३५-३७ ॥

मिथो रहः अन्यालक्षितं यथा स्यात्तथा "मिथोऽन्योन्यं रहस्यपि" इत्यमरः । तर्षचेतसां मनोरथयुक्तमनसां तत्र समबलाः परस्परमाहुः अहं पूर्वं ग्रहीष्यामि कुलीनत्वात् न त्वं रे प्राप्तुमर्हसि दुष्कुलीनत्वात् न मरेप्राप्तुमर्हासि दुष्कुल इति वीप्सया ॥ ३८ ॥

दुर्बलानां त्वाक्रोशप्रकारमाह द्वाभ्यां—ये देवाः तुल्येनायासेन मथनश्रमेण हेतवः अमृतसाधकाः सत्रयागे यथा सर्वेषां समं फलं तद्वत् तथा च श्रुतिः "ऋद्धिकामाः सत्रमासीरन्" इति "ये यजमानास्ते ऋत्विजः" इति च ॥ ३९—४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सुमृष्टैर्निर्णिक्ते मणिमये कुण्डले यस्य सः स्निग्धः कुञ्चितः केशानामन्तो यस्य सः ॥ ३३ ॥ ३४ ॥

इज्यभाक् यज्ञभागभुक् अमृतेनाभृतं परिपूर्णम् ॥ ३५ ॥ ३६ ॥

भक्तानां कामं करोतीति तथा मिथो रहोभूतया किमात्मिका कुत आगता इत्येवं दुर्ज्ञेयया स्वकीयया मोहिन्या तन्वा "मिथोऽन्योन्ये रहस्यपि" इत्यमरः । वो युष्माकमर्थं साधयिष्ये यथा मिथोऽन्योन्ययोगतः सुरासुरनिष्पादितमर्थं वः सुराणामेव साधयिष्ये इत्यर्थः । अतो मा खिद्यतेत्याद्युक्तवान् ॥ ३७ ॥

तदर्थं अमृतार्थं तर्षोऽभिलाषा चेतस्सु येषाम् ॥ ३८ ॥

दुर्बलानां चेष्टितमाह—देवा इति द्वाभ्याम् । ये एतस्मिन् समुद्रमथने तुल्येनायासेन हेतवः साधकाः ते देवा अपि सत्रयागे यथा सर्वेषां तुल्यं फलं भवति तद्वत्स्वभागमर्हन्ति एषः सनातनो धर्मः सत्रयागलक्षणमाह—

"कर्त्तारो बहवो यत्र हीज्यन्ते बहवस्तथा ।
बहुभ्यो दीयते यत्र तत्सत्रमभिधीयते" । इति स्मृतिः तन्मूलभूता श्रुतिः "ऋद्धिकामाः सत्रमासीरन्" इति "ये यजमानास्ते ऋत्विजः" इति च ॥ ३९ ॥ ४० ॥

भाषा टीका ।

पीताम्बर को धारण किये महान् दीर्घ जिसका वक्षःस्थल स्वच्छ मणियों के कुण्डलों को धारण किये, सुवि-

एतस्मिन्नन्तरे विष्णुः सर्वोपायविदीश्वरः।
योषिद्रूपमनिर्देश्यं दधार परमाद्भुतम् ॥ ४१ ॥
प्रेक्षणीयोत्पलश्यामं सर्वावयवसुन्दरम्।
समानकर्णाभरणं सुकपोलोन्नसाननम् ॥ ४२ ॥
नवयौव(१)ननिर्वृत्तस्तनभारकृशोदरम्।
मुखामोदाऽनुरक्तालिझङ्कारोद्विग्नलोचनम् ॥ ४३ ॥
बिभ्रत्स्वकेशभारेण मालामुत्फुल्लमल्लिकाम्।
सुग्रीवकण्ठाभरणं सुभुजाङ्गदभूषितम् ॥ ४४ ॥
विरजाम्बरसंवी(२)तनितम्बद्वीपशोभया।
काञ्च्या प्रविलसद्वल्गु(३)चलच्चरणनूपुरम् ॥ ४५ ॥
सव्रीडस्मितविक्षिप्तभ्रूविलासावलोकनैः।
दैत्ययूथपचेतस्सु काममुद्दीपयन्मुहुः ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां
संहितायां वैयासिक्याम् अष्टमस्कन्धे
अष्टमोऽध्यायः ॥ ८ ॥

भाषा टीका।

कण्ठ और घुंघरारे केश जाके, और सौभाग्यवान् तथा सिंह सदृशगमन वा पराक्रम वाला ॥ ३३ ॥

हाथों में कंकण पहिने हुए, और अमृत का पूर्ण कलश को लिये साक्षात् विष्णु भगवान् के अंशांश से उत्पन्न ॥ ३४ ॥

और धन्वन्तरि इस नाम से विख्यात तथा आयुर्वेद के द्रष्टा और पूजापाने वाले, इस प्रकार के उस पुरुष को असुर लोगों ने न देखा और उसके हाथ में अमृत के भरे हुए कलश को देखा ॥ ३५ ॥

यद्यपि असुर लोग सबही वस्तुओं को लेने की इच्छा वाले रहे परंच उस अमृत के भरे हुए कलशको तो बड़े वेगसे छुडा लिया, जब असुर लोगों ने वह अमृत का पात्र कलश छुडालिया ॥ ३६ ॥

तब देवता विषाद को प्राप्त होकर खिन्न मन वाले सब श्रीहरि के शरण आये—इस प्रकार की देवताओं की दीनता को देखकर अपने भृत्यों (दासों) के कार्य करने वाले श्री हरि देवताओं से बोले, कि— तुम लोग खेद न करो हम अपनी:माया से तुमारे लोगों का प्रयोजन सिद्ध करेंगे ॥ ३७ ॥

हे प्रभो! राजन्! अब उन दैत्यों में तो परस्पर में "तुम नहीं प्रथम हम लेंगे तुम नहीं प्रथम हमहीं लेंगे" इस प्रकार अमृत के अर्थ तृष्णायुक्तचित्त वालों का परस्पर बड़ा कलह होने लगा ॥ ३८ ॥

हे राजन्! तब तो दैत्यों में जो दुर्बल रहे वे लोग, मत्सर युक्त होकर जिनोंने हाथ में अमृत कलश लिया है उन प्रबल दैत्यों से वारंवार यों कहने लगे, कि—देखो सत्रयाग में जैसे सब को समान फल मिलता है इसी प्रकार इन देवता लोगों को भी अपना भाग मिलना चाहिये, क्योंकि इन लोगों ने भी परिश्रम बराबर किया है,, बस सनातन धर्म तो यही है ॥ ३९—४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

तद्रूपं वर्णयति पञ्चभिः। प्रेक्षणीयमुत्पलमिव श्यामम् सर्वेष्ववयवेषु सुन्दरम् समानयोः कर्णयोराभरणे यस्मिन् सुकपोलं च तदुत्कृष्टनासिकञ्चाननं यस्मिन् ॥ ४२ ॥

नवयौवननिर्वृत्तयोः स्तनयोर्भारेण च कृशमुदरं यस्मिन् ॥ ४३ ॥

सुष्ठु ग्रीवा यस्मिन् कण्ठे आभरणं यस्मिंस्तच्च तच्च शोभना ग्रीवा येन तत्कण्ठाभरणं यस्मिन्निति वा सुभुजयोरङ्गदाभ्यां भूषितम् ॥ ४४ ॥

(१) निष्पन्न इति विज०। (२) तं चित्रं ध्वजीय इति विज०। (३) स्फुटत् इति. विज०।

श्रीधरस्वामिकृतभावार्थदीपिका ।

विरजाम्बरेण संवीतो नितम्ब एव द्वीपो विशालत्वात्तत्र शोभा यस्यास्तया काञ्च्या प्रकर्षेण विलसत् वल्गु यथा भवत्येवं चलतोश्चरणयोर्नूपुरे यस्मिन् ॥ ४५ ॥

सव्रीडेन स्मितेन सह विक्षिप्ता कम्पिता या भ्रूस्तस्या विलासेन सह यान्यवलोकितानि तैर्दैत्ययूथपानां चेतस्सु मुहुः काममुद्दीपयत् ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
अष्टमोऽध्यायः ॥ ८ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

एतस्मिन्समये सर्वोपायविद्भगवानीश्वरो विष्णुः परमाद्भुतं केनाप्यदृष्टपूर्वमनिर्देश्यं देवादिसजातीयत्वेन निर्देष्टुमशक्यं योषिद्रूपं दधार ॥ ४१ ॥

तद्रूपं वर्णयति पञ्चभिः । प्रेक्षणीयमुत्पलवत् श्यामं सर्वेष्ववयवेषु सुन्दरं समानयोः कर्णयोराभरणे यस्मिन् सुकपोलं च तदुन्नतनासिकञ्चाननञ्च यस्मिन् ॥ ४२ ॥

नवयौवनेन निर्वृत्तयोः प्रवृत्तयोर्वर्तुलयोश्च स्तनयोर्भारेण कृशमुदरं यस्मिन् मुखस्यामोदेनानुरक्तानामलीनां झङ्कारेणोद्विग्ने चञ्चले लोचने यस्मिन् ॥ ४३ ॥

उत्फुल्लानि मल्लिकाकुसुमानि यस्यां तां मालां स्वकेशभारेण केशपाशेन बिभ्राणं शोभना ग्रीवा यस्मिन् तत् कण्ठे आभरणानि च यस्मिन् तच्च शोभनयोर्भुजयोरङ्गदाभ्यां भूषितम् ॥ ४४ ॥

विरजोम्बरेण सम्वीतः नितम्ब एव द्वीपः विशालत्वात्तद्वच्छोभा यस्यास्तया काञ्च्या प्रकर्षेण विलसद्वल्गु सुन्दरं यथाभवत्येवं चञ्चलयोश्चरणयोर्नूपुरे यस्मिन् ॥ ४५ ॥

सव्रीडस्मितेन सह विक्षिप्ता कम्पिता या भ्रूस्तस्या विलासेन सह यान्यवलोकनानि तैर्दैत्ययूथपानां चेतस्सु मुहुर्मुहुः काममुद्दीपयत् ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिकायाम्
अष्टमोऽध्यायः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सुकपोलेनोन्नतनासिकया युक्तमाननं यस्य तत्तथा ॥ ४२ ॥

नवयौवनेन निष्पन्दतोर्निश्चलतोस्स्तनयोर्भारेण कृशं तनुतरम् उदरं तत्तथा मुखपरिमलेऽनुरक्तानां निरतानाम् अलीनां भृङ्गाणां हुङ्कारेण झङ्कारेणोद्विग्ने भ्रांते लोचने यस्य तत्तथा सुष्ठु शोभना ग्रीवा यस्य तत्तथा शोभनं कण्ठाभरणं यस्य तत्तथा शोभनैर्भुजाङ्गदैर्विभूषितम् ॥ ४३ ॥ ४४ ॥

रघूनां विद्यमानानां वध्वीया तया शोभया चित्रं काञ्च्या च चित्रं प्रविलसच्छोभमानं वा यथा वल्गु कर्णरमणीयं तथा स्फुरती शब्दंकुर्वती चरणनूपुरे यस्य तत्तथा ॥ ४५ ॥

सव्रीडस्मितेन विक्षिप्तैर्भ्रूविलासैर्युक्तैरवलोकनैः उद्दीपयत् ज्वलयत् ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
अष्टमोऽध्यायः ॥ ८ ॥

[एतद्विजयध्वजीयरीत्याऽत्राध्यायसमाप्तिर्न विद्यते किन्तु श्रीधरीयरीत्याऽस्माभिरध्यायसमाप्तिरलेखि ॥]

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

एतस्मिन्निति षट्कम् । उद्दीपयन् मुहुरिति ईश्वरे इति पूर्वेणान्वयः ॥ ४१—४६ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
अष्टमोऽध्यायः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अनिर्देश्यं निर्देष्टुं वर्णयितुमशक्यम् ॥ ४१ ॥ ४२ ॥

नवयौवनेन हेतुना निःशेषेण वृत्तौ वर्तुलौ यौ स्तनौ तयोर्भारेणैव कृशमुदरं यस्य तत् ॥ ४३ ॥

स्वकेशभारेण सह ॥ ४४ ॥

विरजाम्बरसंवीते नितम्बरूपे द्वीपे शोभा यतस्तया काञ्च्या प्रविलसत् वल्गु चलतोश्चरणयोर्नूपुरे यत्र तत् ॥ ४५ ॥

सव्रीडेन स्मितेन सह विशेषतः क्षिप्ता चालिता या भ्रूस्तस्या विलासेन सह यान्यवलोकनानि तैः ॥ ४६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
अष्टमस्याष्टमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अनिर्देश्यं निर्देष्टुं साकल्येन वर्णयितुमशक्यम् ॥ ४१ ॥

तद्रूपं यथाशक्ति वर्णयति—प्रेक्षणीयोत्पलश्याममित्यादिना । प्रकर्षेणेक्षणीयमुत्पलमिव श्यामं सर्वावयवानि सुन्दराणि यस्य तत्समानयोः कर्णयोराभरणे यस्मिन् तत् सुकपोलं च तदुन्नसमाननं यस्मिन् आननस्यात्यन्तसुन्दरत्वमनेन पुनरुक्तम् ॥ ४२ ॥

नवयौवनेन निःशेषतया वृत्तयोर्वर्तुलयोः स्तनयोर्भारेण कृशमुदरं यस्य तत् ॥ ४३ ॥

स्वकेशभारेण सह मालां बिभ्रत् ॥ ४४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विरजाम्बरेण सम्वीते नितम्बरूपे द्वीपे शोभा यस्यास्तया प्रविलसत् वल्गु चलतोश्चरणयोर्नूपुरे यस्मिन् तत् ॥ ४५ ॥

सव्रीडेन लज्जासहितेन विशेषतः क्षिप्ता चालिता या भ्रूस्तस्या विलासेन सह यान्यवलोकनानि तैः दैत्ययूथपचेतस्सु मुहुः काममुद्दीपयत् ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
अष्टमोऽध्यायः ॥ ८ ॥

भाषा टीका ।

इतने ही बीच में सर्व उपायों को जानने वाले ईश्वर साक्षात् विष्णु परम अद्भुत जो कहने में न आवै ऐसा, मोहनी स्त्री का रूप धारण करते हुए ॥ ४१ ॥

नील कमल सदृश श्याम सर्व अवयवों से सुन्दर ऐसा रूप आपने धारण किया कि जाको सदा देखते ही रहिये। और समान कर्णों में आभरण पहिने हुए, सुन्दर कपोल और ऊंची नासिकावाला मुख जामें ॥ ४२ ॥

नवीन यौवन से प्राप्त हुए जो स्तन तिनके भार से कृश है उदर जामें, और मुख से श्वास के साथ जो अत्यन्त सुन्दर सुगन्ध निकसता है तिसके लोभी ऐसे भ्रमरों की झङ्कार से उद्विग्न होरहे लोचन जिसमें ॥ ४३ ॥

और चोटी के बीच में फूली भई मल्लिका की माला गूथी हुई है, और ग्रीवा में सुन्दर कंठाभरण धारण किये हैं। सुन्दर भुजाओं में बाजूबंद पहिने हैं ॥ ४४ ॥

और निर्मल अम्बर से ढके हुए नितंब (कटिपश्चाद्भागे) रूप द्वीपों के ऊपर शोभा देने वाली कांची (कोंधनी) से अति शोभित, मनोहर चलते हुए चरणों में नूपुरों को धारण किये ॥ ४५ ॥

और लज्जा सहित मन्दमुस्क्यान पूर्वक फैके जो भ्रुकुटि के विलास युक्त कटाक्ष, तिन कटाक्षों से उन दैत्य यूथप लोगों के चित्त में बारंबार काम का उद्दीपन करने वाला ऐसे सुन्दर स्वरूप को धारण करके श्री मोहनी जी प्रकट भईं ॥ ४६ ॥

इति श्री मद्भागवत अष्टम स्कन्ध में अष्टम अध्याय की
श्रीवृन्दावनस्थ भागवताचार्यकृत भाषा टीका
समाप्त ॥ ८ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे अष्टमोऽध्यायः ॥ ८ ॥

॥ नवमोऽध्यायः ॥

श्रीशुक उवाच ।

(१) तेऽन्योऽन्यतोऽसुराः पात्रं हरन्तस्त्यक्तसौहृदाः ।
क्षिपन्तो दस्यु(२)धर्माण आयान्तीं ददृशुः स्त्रियम् ॥ १ ॥
अहो रूपमहो धाम अहो अस्या नवं वयः ।
इति ते तामभिद्रुत्य पप्रच्छुर्जातहृच्छयाः ॥ २ ॥
का त्वं कञ्जपलाशाक्षि ! कुतो वा किं चिकीर्षसि ।
कस्यासि वद वामोरु ! मथ्नन्तीव मनांसि नः ॥ ३ ॥
न वयं त्वाऽमरैर्दैत्यैः सिद्धगन्धर्वचारणैः ।
(३) नास्पृष्टपूर्वां जानीमो (४) लोकेशैश्च कुतो नृभिः ॥ ४ ॥
नूनं त्वं विधिना सुभ्रूः ! प्रेषिताऽसि शरीरिणाम् ।
सर्वेन्द्रियमनःप्रीतिं विधातुं सघृणेन किम् ॥ ५ ॥
सा त्वं नः स्पर्धमानानामेकवस्तुनि मानिनि ! ।
ज्ञातीनां बद्धवैराणां शं विधत्स्व सुमध्यमे ! ॥ ६ ॥
वयं कश्यपदायादा भ्रातरः कृतपौरुषाः ।
विभजस्व यथान्यायं नैव भेदो यथा भवेत् ॥ ७ ॥
इत्युपामन्त्रितो दैत्यैर्मायायोषिद्वपुर्हरिः ।
प्रहस्य रुचिरापाङ्गैर्निरीक्षन्निदमब्रवीत् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नवमे मोहितैर्दैत्यैरर्पितेऽमृतभाजने ।
तद्वञ्चनेन देवेभ्योऽमृतन्दत्तन्तयेर्यते ॥

॥ १ ॥

अहो रूपं सौन्दर्यं धाम द्युतिरिति वदन्तः का त्वमित्यादि पप्रच्छुः ॥ २ ॥

मथ्नन्तीव क्षोभयन्तीव ॥ ३ ॥

कस्यासीत्ययुक्तमुक्तमस्माभिर्यतस्त्वं न केनचिद्भुक्तपूर्वेत्याहुः नेति द्वाभ्याम् । त्वा त्वाममरादिभिरस्पृष्टपूर्वां न जानीम इति नापि तु जानीम एव ॥ ४ ॥

आस्तामिदं त्वद्दर्शनं त्वीश्वरेणैव सम्पादितमित्याहुः-नूनमिति । सर्वेन्द्रियाणां मनसश्च प्रीतिं विधातुं सघृणेन प्रेषितासि किं वा यदृच्छयाऽऽगतासि नैवं नूनं प्रेषितैवेत्यर्थः ॥ ५ ॥ ६ ॥

भेदो विग्रहो यथा न भवेत्तथा ॥ ७ ॥ ८ ॥

(१) अन्योन्यतस्सुधापात्रम् इति वीर०विज० (२) धर्मेण इति वीर० विज० (३) स्पृष्टपूर्वां तु इति विज० (४) योगेशैः इति च वीरराघवी पाठः ।

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका।

एवंविधं रूपं बिभ्रतीमायान्तीं तां स्त्रियमन्योन्यं त्यक्तसौहृदाः अतएव क्षिपन्तः सुधापात्रं चौर्य्यधर्मेण हरन्तस्ते दैत्या ददृशुः॥१॥

दृष्ट्वा चाहो रूपं सौन्दर्य्यमहो धाम द्युतिरहो अस्या योषितो नवं वय इति वदन्तस्ते दैत्यास्तां योषितमभिद्रुत्याभिमुख्यमागत्य जातहृच्छयाः सञ्जातकामाः पप्रच्छुः॥२॥

प्रश्नप्रकारमेवाह—केति। हे कञ्जपलाशाक्षि! का त्वम्? किं जातीया? कुत आगता? त्वं किं चिकीर्षसि कर्त्तुमिच्छसि? कस्यासि कस्य सम्बन्धिन्यसि? वद हे वामोरु! नोऽस्माकं मनांसि मथ्नन्तीव क्षोभयन्तीव वर्त्तसे॥३॥

कस्यासीत्ययुक्तमुक्तमस्माभिः यतस्त्वं न केनचित्स्पृष्टपूर्वा इत्यूचुः—नेति। त्वाममरादिभिरस्पृष्टपूर्वां न जानीम इति न किन्तु जानीम एव अमरादिभिरेवास्पृष्टपूर्वा कुतो नृभिः स्पृष्टपूर्वा भवेदित्यर्थः॥४॥

आस्तामिदं त्वद्दर्शनन्तु ईश्वरेणैव कारितमित्याहुः—नूनमिति। हे सुभ्रु शरीरिणामस्माकं सर्वेन्द्रियाणां मनसश्च प्रीतिं विधातुं अनुग्रहेण सकृपेण विधिना ईश्वरेण त्वं प्रेषिता किम्? नूनं न यदृच्छया आगतासि नूनं दैवेनैव प्रेषितासि इत्यर्थः॥५॥

हे मानिनि! अत्रैकस्मिन् वस्तुन्यमृतनिमित्ते स्पर्द्धमानानां परस्परमभिभवतां बद्धवैराणां ज्ञातीनामस्माकं हे सुमध्यमे! त्वं विधत्स्व सन्धिं कुरु सम्यग्विभजस्वेति वा॥६॥

कश्यपस्य दायादाः पुत्राः भ्रातरश्चाधुना कृतं पौरुषं कलहनिमित्तं यैस्ते वयमतो यथान्यायं कलहो यथा न भवेत्तथाऽमृतं विभजस्व॥७॥

दैत्यैरित्थमुपामन्त्रितश्चोदितः प्रमोदितः श्लाघितो लब्धनामभूतो मायायोषिद्वपुरात्मीयसङ्कल्पोपात्तस्त्रीवपुर्हरिः प्रहस्य रुचिरैरपाङ्गैर्निरीक्षन्निरीक्षमाणः इदं वक्ष्यमाणमब्रवीत्॥८॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

॥ १—३ ॥
त्वा त्वाम्॥४॥
विधिना विरिञ्चेन॥५॥
शंविधत्स्व शंविधानं मनस्सन्तोषं कुरु॥६-७॥
मायया इच्छया अङ्गीकृतस्त्रीदेहः॥८॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

॥ १—४ ॥

नूनमिति तैः तत्र किम्पदस्य सन्देहवाचित्वेनाभयकोटिस्पर्शित्वादुभयत्र सम्बन्धः॥५॥

तत्र तस्याः क्रोधाविष्कारमालक्ष्य तया मोहितत्वेन विश्रब्धं प्रस्तावान्तरं लक्ष्यीकृत्याहुः—सा त्वं न इति॥६-९॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

मोहिता वञ्चिता दैत्याः पायितास्त्वमृतं सुराः।
मोहिन्या नवमे राहोश्चकेणच्छेद उच्यते॥०॥

॥ १ ॥ २ ॥

कस्यासि कस्य कन्याऽसि॥३॥

अमरादिभिरस्पृष्टपूर्वा वयं न जानीम इति न अपितु जानीम एवेति ते नन्वत्र स्वयम्बरार्थमत्रायातासीति बुद्ध्यत इति भावः॥४॥

किमस्माकं त्वदभिप्रायबुभुत्सया त्वद्दर्शनादिनैव तावद्वयं कृतार्था अभूमेत्याहुः—नूनमिति॥५॥

किञ्च त्वया स्वाभिप्रेतं पश्चाद्विधेयं संप्रत्यस्मदभिप्रायं सफलं कुर्वित्याहुः—सा त्वमिति द्वाभ्याम्॥६॥

विभजस्व अस्मभ्यमिति शेषः॥७॥८॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

मोहिन्या यत्कृतन्तद्वर्णयति नवमेन॥१॥

रूपं सौन्दर्यं धर्मः धाम शरीरं धर्मी॥२॥

हे कञ्जपलाशाक्षि! त्वं कासि? हे वामोरु! नो मनांसि मथ्नन्तीव क्षोभयन्तीव वर्त्तसे इति शेषः॥३॥

वयं त्वा त्वाम् अमरादिभिः अस्पृष्टपूर्वां न जानीम इति न किन्तु जानीम एव॥४॥

विधिना प्रेषितासि किञ्च स्वत आगतासि॥५॥

तां स्वानुकूलां कर्तुं स्वयं तदनुकूला भवन्ति—सात्वमिति द्वाभ्याम्। शं कल्याणमविरोधं विधत्स्व कुरु॥६॥

भेदो विरोधो यथा न भवेत्तथा विभजस्व अस्मभ्यं सुधामिति शेषः॥७॥

मायायोषिद्वपुः स्वसङ्कल्पेनाविष्कृतस्त्रीदेहः॥८॥

भाषा टीका।

श्रीरुक्मिणीशो जयति॥

श्रीशुक उवाच।

श्रीशुकदेवजी बोले, कि—वे असुरलोग, सुहृदपने को छोडकर डाकुओं की तरह एक दूसरे के हाथ से उस अमृत कलश को छीनते झपटते हुए एक आती हुई स्त्री को देखते हुए॥१॥

वस अति सुन्दर उस स्त्री को देखकर सब दैत्य लोग झगडना तौ भूल गये और कहने लगे, कि—अहो वडे आश्चर्य की बात है इस का रूपतौ देखो, कितने एक बोले कि—

श्रीभंगानुवाच ।

कथं कश्यपदायादाः पुंश्चल्यां मयि सङ्गताः ।
विश्वासं पण्डितो जातु कामिनीषु न याति हि ॥ ९ ॥
सालावृकाणां स्त्रीणां च स्वैरिणीनां सुरद्विषः ! ।
सख्यान्याहुरनित्यानि नूत्नं नूत्नं विचिन्वताम् ॥ १० ॥

श्रीशुक उवाच ।

इति ते क्ष्वेलितैस्तस्या आश्वस्तमनसोऽसुराः ।
जहसुर्भावगम्भीरं ददुश्चामृतभाजनम् ॥ ११ ॥
ततो गृहीत्वाऽमृतभाजनं हरिर्बभाष ईषत्स्मितशोभया गिरा ।
(१) यद्यभ्युपेत क्व च साध्वसाधु वा कृतं मया वो विभजे सुधामिमाम् ॥ १२ ॥
इत्यभिव्याहृतं तस्या आकर्ण्यासुरपुङ्गवाः ।
अप्रमाणविदस्तस्यास्तत्तथेत्यन्वमंसत ॥ १३ ॥

भाषा टीका ।

रूप क्या देखते हौ इसका तेज तौ देखौ, तब फिर कितने एक बोले, कि तुमको देखना नहीं आता अरे भाई इसकी नवीन अवस्था तौ देखो, इस प्रकार कहकर वे सब दैत्य लोग कामवश होकर श्री मोहिनी जी के समीप में जाकर पूँछने लगे ॥ २ ॥

दैत्य लोग बोले, कि–हे कमलदललोचने ! आप कोन हैं फिर कितने एक बोले, कि–आप कहां से आई हौ, फिर भी चुप रहने पर कितने एक दैत्य बोले, कि आपकी क्या करने की इच्छा है, फिर कितने एक दैत्य लोग आपुस में बोले कि तुमको पूँछना आता नहीं, ठहरो हम पूँछते हैं ऐसे कहकर पूंछने लगे, कि अजी आप कौन की हौ कहौ तौ सही, इतने पर भी जब न बोली तब दैत्य लोग बोले, कि–आप बोलो अथवा न बोलो पर आप हम लोगों के मनको तौ मथेंई डारतीं हौ ॥ ३ ॥

फिर दैत्य लोग बोले, कि–हम लोग तौ ऐसा जानते हैं कि–देव दैत्य सिद्ध गन्धर्व चारण इन लोगों ने अब तक तुम्हारा स्पर्श भी नहीं किया होगा, और कहां तक कहैं पर बडे २ लोकेशों ने भी आपका स्पर्श नहीं किया होगा फिर विचारे मनुष्य लोगों की तौ बात ही क्या कहैं ॥ ४ ॥

हे सुभ्रूः ! यह तौ हम निश्चय जानते हैं कि जब ब्रह्मा को दया हुई तब उसने देहधारियों के मन और इन्द्रियों के प्रिय करने को आपको यहां भेजा है ॥ ५ ॥

हे मानिनि ! बस हम लोग तौ आपसे और कुछ नहीं कहते हैं परंच हम सब ज्ञाति लोग परस्पर में जिसके निमित्त स्पर्धा करके वैर बांध रहे हैं । हे सुमध्यमे ! आप उस एक वस्तु का ठीक २ न्याय करके हम लोगों के कलह की शांति करदो ॥ ६ ॥

यदि आप हम लोगों को अप्रतिष्ठित जानती होवै सो हम लोग कश्यप महाराज के पुत्र लोग हैं और देव दैत्य सब भ्राता लोग हैं, और हम लोगों ने बडा पौरुष (परिश्रम) किया है, तब यह अमृत हम लोगों को प्राप्त हुआ है सो हमारा आप से इतनाही कहना है, कि–जिसमें हम लोगों में भेद न होवे इस प्रकार आप हम सबों को बांट दीजिये ॥ ७ ॥

जब दैत्यों ने इस प्रकार बहुत आग्रह करके कहा तब माया से योषित [स्त्री] रूप को धारण करने वाले श्रीहरि अपने रुचिर कटाक्षों से देखते हुए और उनपर कटाक्ष चलाते हुए हंसके इस प्रकार बोले ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सङ्गता अनुरक्ता ॥ ९ ॥

हे सुरद्विषः ! ॥ १० ॥

भावेन केनाप्यभिप्रायेण गम्भीरं यथा भवत्येवं जहसुः ॥ ११ ॥

ईषत्स्मितेन शोभा यस्यास्तया गिरा कृतं साधु वा असाधु यद्यभ्युपेताङ्गीकुरुत तर्हि विभजे ॥ १२ ॥

---

(१) यद्यभ्युपेतमिति वीर० विज० पाठः ।

अथोपोष्य कृतस्नाना हुत्वा च हविषाऽनलम्।
दत्वा गोविप्रभूतेभ्यः कृतस्वस्त्ययना द्विजैः ॥ १४ ॥
यथोपजोषं वासांसि परिधायाऽहतानि ते।
कुशेषु प्राविशन् सर्वे (१)प्रागग्रेष्वभिभूषिताः ॥ १५ ॥
प्राङ्मुखेषूपविष्टेषु सुरेषु दितिजेषु च।
धूपामोदितशालायां जुष्टायां माल्यदीपकैः ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

असुरपुङ्गवाः दैत्यश्रेष्ठाः प्रमाणमियत्तामजानन्तः ॥१३॥ १४ ॥

यथोपजोषं यथाप्रीति अहतस्य लक्षणम् "अहतं यन्त्रनिर्मुक्तमुक्तं वासः स्वयम्भुवा। शस्तं तन्माङ्गलिक्येषु तावन्मात्रेण सर्वदा" प्रागग्रेषु कुशेषु विविशुः ॥ १५ ॥

धूपैरामोदितायां सुरभीकृतायां शालायाम् ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

तदेवाह—कथमिति। हे कश्यपदायादाः! पुंश्चल्यां मयि कथं सङ्गता अनुसृताः हि यस्मात् पण्डितः कदाचिदपि कामिनीषु पंश्चलीषु विश्वासं न याति न प्राप्नोति न कुरुते इत्यर्थः ॥ ९ ॥

हे सुरद्विषः! सालावृकाणां स्वैरिणीनां स्त्रीणां च सख्यान्यनित्यान्याहुः अनित्यत्वे हेतुं वदन् सालावृकान् स्त्रीश्च विशिनष्टि, नवंनवं विचिन्वताम् अन्वेषताम् ॥ १० ॥

इतीत्थं तस्याः मोहिन्याः क्ष्वेलितैः परिहासवचनैः विश्वस्तं मनो येषां तेऽसुराः भावेन केनाप्यभिप्रायेण गम्भीरं यथाभवत्येवं जहसुः हसितवन्तोऽमृतपात्रं च ददुः ॥ ११ ॥

ततोऽमृतभाजनं गृहीत्वा योषिद्रूपो हरिरीषत्स्मितेन शोभा यस्यास्तया गिरा बभाषे, तदेवाह—यदीति। क्वचित् साध्वसाधु वा मया कृतं यद्यभ्युपेतं युष्माभिः अङ्गीकृतं स्यात्तर्हि इमां सुधां वो युष्मभ्यं विभजे ॥ १२ ॥

इतीत्थं तस्या मोहिन्या अभिव्याहृतं वाक्यमाकर्ण्यासुरश्रेष्ठास्तस्या अप्रमाणविदः प्रमाणं तद्वाक्यनिर्णयो निश्चयस्तमजानन्तस्तथेति यथेच्छं कुरु इत्यन्वमंसतानुजज्ञिरे ॥ १३ ॥

अथ तस्या अनुज्ञया उपोष्य कृतं स्नानं यैस्तेऽसुराः सुराश्च हविषा चरुणाऽनलमग्निं हुत्वा विप्रेभ्यो भूतेभ्योऽन्येभ्यश्च गाः गवादीनि यथायोग्यं दत्वा द्विजैः कृतं कारितं स्वस्त्ययनं मङ्गलाचरणं येषाम् ॥ १४ ॥

ते देवा असुराश्च यथोपजोषं यथाप्रीति आहतानि नूतनानि यन्त्रानिर्मुक्तानि वस्त्राणि परिधाय वसित्वाऽभितो भूषिताः प्राक्कूलेषु प्रागग्रेषु कुशेषु सर्वे प्राविशन् उपाविविशुः ॥ १५ ॥

ततो धूपैरामोदितायां माल्यैर्दीपैश्च जुष्टायामलङ्कृतायां दीपितायां च शालायां पूर्वाभिमुखेषु सुरासुरेषू उपविष्टेषु सत्सु ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

पुंश्चल्यां पुंश्चलीशीलगुणवत्याम् ॥ ९ ॥
नूत्नं नूतनम् ॥ १० ॥
क्ष्वेलितैः छलमिश्रवचनैः ॥ ११ ॥
अभ्युपेतम् अङ्गीकृतम् ॥ १२ ॥
प्रमाणमियत्ता ॥ १३—१६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

स्वैरिणीनां स्त्रीणाञ्चेत्यन्वयः ॥ १०—१२ ॥

प्रमाणमियत्ताचिकीर्षितपर्यवसानमित्यर्थः। तत्राविन्दन्तीत्यप्रमाणविदः ॥ १३—१९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

कश्यपस्य दायादाः पुत्रा इति पिता युष्माकमृषिर्यूयं कथमेवं कामिनोऽभूवन्निति तान् मोहयितुं परिहासो व्यञ्जितः सत्यं वयं स्त्रीजातिमात्रेणैव भावैर्वशीकर्तुमशक्याः भवत्या परमशुद्धस्वरूपया तु स्वपवित्रेणैव वयं विजिता वर्तामहे इति चेत् तत्राह-पुंश्चल्यामिति। हन्त हन्त भवत्या निष्कामत्वस्यावधिं किं स्तुवामहे यतस्त्वमाबाल्यमनाघ्रातपुरुषगन्धापि स्वं गोपयन्त्येव खल्वेवं ब्रूषे स्त्रीजातिः पुंश्चल्यपि स्वं सतीमिव प्रथयतीति स्त्रीजातिविलक्षणस्वभावायै भवत्यै निष्कपटायै सर्वस्वमपि दित्सामहे इति स्वगतोक्त्या विस्मयस्मितमितदर्शीस्तानालक्ष्याह—विश्वासमिति। भोः पण्डिताः मयि विश्वासं मा कुरुत यद्यात्मनां भद्रमिच्छतेति भावो बाह्यः आभ्यन्तरस्तु सर्वमहं विपरीतलक्षणयैव ब्रवीमीति पण्डिता भवन्तो ज्ञात्वा यदुचितं तत्कुर्वन्त्विति भावः। पूर्वत्र उत्तरत्रापि आभ्यन्तरो

(१) प्राक्कूलेषु इति वीर० ॥ सिद्धान्त० चक्रवर्ती।

तस्यां नरेन्द्र ! करभोरुरुशद्दुकूलश्रोणीतटालसगतिर्मदविह्वलाक्षी ।
सा कूजती कनकनूपुरशिञ्जितेन कुम्भस्तनी कलशपाणिरथाविवेश ॥ १७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ध्वनिरेवमेव ज्ञेयः कामिनीष्विति यद्यप्यहं युष्मदनुभवेन शुद्धैव भवामि तदपि मम यौवनवत्त्वादाभ्यन्तरः कामोऽनुमेय एव कामवत्त्वे स्त्रीत्वे च कामिनी पतिपुत्राद्यावरणाभावात् स्वैरिण्यपि कथं न भवामीत्यविश्वास्यैव सर्वथा भवद्भिरहमिति भावः ॥ ९ ॥

ततः किमितिचेत् शृणुत तत्त्वमित्याह—सालेति । "सालावृकाः कपिक्रोष्टृश्वानः" इत्यमरः ॥ १० ॥

क्ष्वेलितैर्नर्मोदितैः भावेनाभिप्रायेण गम्भीरमविदुषां दुष्प्रवेशं यथा स्यात्तथा जहसुः हे सर्वगुणमण्डिते ! किमस्मान् परीक्षसे वयमविश्वासिनोऽशुद्धान्तःकरणा नैव भवामस्तदिदममृतकलशं गृहाण अस्मभ्यं विभज्य देहि वा स्वयं पिब वा क्वचिदन्यत्र क्षिप वा यथेच्छसि तथा कुरु अस्मांस्तु स्वसादृगुणयरत्नक्रीतानात्मीयानेव जानीहीति भावः ॥ ११ ॥

मया कृतं साधु वा असाधु वा यद्यभ्युपेत अङ्गीकुरुत तदा विभजे इति स्वस्याहमनभिज्ञत्वं जानास्यतः प्रथममेव वच्मीति भावः ॥ १२ ॥ १३ ॥

अथेति अमृतपानरूपमङ्गलकृत्यार्थं प्रथममेवोपोष्य स्थितास्ते परस्परविवादमध्य एव मोहिनीदर्शनवचनप्रतिवचनाद्यनन्तरं कृतस्नानाः ॥ १४ ॥

यथोपजोषं यथाप्रीति अहतस्य लक्षणं "अहतं यन्त्रनिर्मुक्तमुक्तं वासः स्वायम्भुवा । शस्तं तन्माङ्गलिक्येषु तावन्मात्रेषु सर्वदा" इति प्राक्कूलेषु प्रागग्रकुशेषु ॥ १५ ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सङ्गताः विश्वस्ताः ॥ ९ ॥

हे सुरद्विषः ! ॥ १० ॥

भावेन तत्पारवश्यरूपेण गम्भीरम् भवति यथा तथा जहसुः ॥ ११ ॥

ईषत्स्मितेन शोभा यस्यास्तया क्व क्वचित् मया साध्वसाधु वा कृतं भवद्भिरभ्युपेतं स्वीकृतं भवेत्तर्हि विभजे ॥ १२ ॥

प्रकृष्टं मानं बुद्ध्वा परिमितं कार्यमजानन्तः तत्तथेत्यन्वमंसत कुरु इत्यनुजज्ञिरे ॥ १३ ॥ १४ ॥

"अहतं यन्त्रनिर्मुक्तमुक्तं वासः स्वयम्भुवा । शस्तं तन्माङ्गलिक्येषु तावन्मात्रेषु सर्वदा" इत्युक्तलक्षणानि वासांसि यथोपजोषं यथाप्रीति परिधाय प्राक्कूलेषु प्रागग्रेषु कुशेषु प्राविशन् ॥ १५ ॥

धूपैरामोदितायां सुरभीकृतायां माल्यैर्दीपकैश्च शुद्धायामलङ्कृतायां शालायां प्राङ्मुखेषु पूर्वाभिमुखेषूपविष्टेषु सत्सु ॥ १६ ॥

भाषा टीका ।

श्रीभगवानुवाच

मोहनी रूप धारी श्री गिरधाराजी बोले, कि—हे कश्यपपुत्र हो ! आप लोग ऐसे कुलीन होकर मेरे पुंश्चली के समीप कैसे आये ? क्यों कि पंडित पुरुष तो कदाचित् भी कामिनी का विश्वास में नहीं आते हैं ॥ ९ ॥

हे दैत्यो ! शाला वृक (कुत्ता वन्दर वा स्यार) स्त्री और स्वैरिणियों की मित्रता को लोग अनित्य कहा करते हैं, क्योंकि ये लोग नये नये को ढूंढते हैं ॥ १० ॥

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि—श्री मोहनीजी ने तो इस प्रकार उन दैत्यों से परिहास किया पर उन लोगों के मन में पूर्ण विश्वास होगया और उनोंने कुछ गंभीर अभिप्राय से हँसकर उस अमृत कलश को सौंप दिया ॥ ११ ॥

तब तो श्री मोहनी रूपधारी श्री हरि जी अमृत के कलश को लेकर किंचित् हास युक्तवाणी से बोले, कि—यदि तुम हमको मध्यस्थ करते हो तब हम जो कुछ भला बुरा करें उसको यदि तुम लोग स्वीकार करो तो हम तुमारे इस अमृत को बांट देवें ॥ १२ ॥

श्रीशुकदेवजी कहते हैं, कि—श्री मोहनी जी की ऐसी वाणी को सुनकर वे सब असुरोत्तम लोग वैसे ही मानते हुए, क्योंकि वे सब इनकी ऐसी चालाकी थोड़ी जानते रहे ॥ १३ ॥

तदनंतर श्री मोहनी जी की बताई हुई विधि पूर्वक सब देव दैत्यों ने उपवास कर स्नान कर हविष से अग्नि में हवन कर गौ ब्राह्मण और अन्य प्राणियों को भोजन दानादि देकर ब्राह्मणों के द्वारा स्वस्तिवाचन कराकर ॥ १४ ॥

यहां प्रीति पूर्वक नवीन वस्त्र पहिन कर भूषणों को धारण कर पूर्व को अग्र भाग कर कुशाओं विछाकर उन पर सब बैठे हुए ॥ १५ ॥

धूप की सुगन्धों से सुरभित ऐसी शाला में कुशाओं के ऊपर पूर्व को मुख करके जब सब देवता और दैत्य बैठे ता समय में ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अथ तस्यां शालायां हे नरेन्द्र ! सा कलशपाणिराविवेश कथंभूता "मणिबन्धादाकनिष्ठं करस्य करभो बहिः" करभसदृशौ सुवृत्ताबूरू यस्याः सा उशत्कमनीयं दुकूलं यस्मिंस्तेन श्रोणीतटेन विशालया

तां श्रीसखीं कनककुण्डलचारुकर्णनासाकपोलवदनां परदेवताख्याम् ।
संवीक्ष्य सम्मुमुहुरुत्स्मितवीक्षणेन देवासुरा विगलितस्तनपट्टिकान्ताम् ॥ १८ ॥

असुराणां सुधादानं सर्पाणामिव दुर्नयम् ।
मत्वा जातिनृशंसानां न तां व्यभजदच्युतः ॥ १९ ॥
कल्पयित्वा पृथक्पंक्तीरुभयेषां जगत्पतिः ।
तांश्चोपवेशयामास स्वेषुस्वेषु च पङ्क्तिषु ॥ २० ॥
दैत्यान् गृहीतकलशो वञ्चयन्नुपसञ्चरैः ।
दूरस्थान् पाययामास जरामृत्युहरां सुधाम् ॥ २१ ॥
ते पालयन्तः समयमसुराः स्वकृतं नृप ! ।
तूष्णीमासन् कृतस्नेहाः स्त्रीविवादजुगुप्सया ॥ २२ ॥
तस्यां कृताऽतिप्रणयाः प्रणयाऽपायकातराः ।
बहुमानेन चाबद्धा नोचुः किञ्चन विप्रियम् ॥ २३ ॥
देवलिङ्गप्रतिच्छन्नः स्वर्भानुर्देवसंसदि ।
प्रविष्टः सोममपिबच्चन्द्रार्काभ्यां च सूचितः ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

श्रोण्या अलसा मन्दा गतिर्यस्याः पाठान्तरे करभसदृशयोरूर्वोर्लसद्दुकूलं यस्याः सा चासौ श्रोणीतटेनालसा गतिश्च मदेन विह्वले अक्षिणी यस्याः ॥ १७ ॥

तां श्रियः सखीं संवीक्ष्य देवासुराः सम्मुमुहुः, कथम्भुताम् ? कनकमये कुण्डले यस्याः सा चासौ चारवः कर्णादयो यस्याः सा च ताम् विगलितः स्रस्तः स्तनपट्टिकाया अन्तो यस्याः ॥ १८ ॥

एवं तान् मोहयित्वा यत्कृतवांस्तदाह त्रिभिः—असुराणां सुधादानं सर्पाणां क्षीरदानमिव दुर्नयमन्यायं मत्वा तां सुधां तेभ्यो न व्यभजत् अयं भावः दैत्यैर्मदीयं साध्वसाधु वा सर्वमनुमतमेवातो मद्भक्तान् देवानेव सुधां पाययिष्यामि किञ्च तैर्यथान्यायं विभजस्वेत्युक्तं न चैतेभ्यो जात्यैव क्रूरेभ्यो दानं न्याय्यमतस्तेभ्यः सुधां न दद्यामिति ॥ १९ ॥

पंक्तीः पृथग्विविक्ताः कल्पयित्वा विधाय तासु पंक्तिषु स्वेषुस्वेषु तत्समजातीयेषु तांश्चासुरानपि प्रतारणार्थमेवोपवेशयामास ॥ २० ॥

उपसञ्चरैर्बहुमानप्रियवाक्यादिना तानतिक्रम्यातिक्रम्य गमनैः दूरस्थानपि देवान् ॥ २१ ॥

तथा कृतः स्नेहो येषु स्त्रिया सह विवादस्य जुगुप्सया ॥ २२ ॥

कृतोऽतिप्रणयः स्नेहो यैः प्रणयापायेन कातरा भीताः एते तावत् कृपणाः पूर्वं किञ्चित्पिबन्तु यूयं तु धीराः चरमं प्रतीक्षध्वमित्यादिबहुमानेनाबद्धा नियन्त्रिताः समयपालनादिभिः षड्भिरेतैः कारणैरप्रियं किञ्चिदपि नोचुः किन्तु तूष्णीमासन् ॥ २३ ॥

देवपङ्क्तौ चन्द्रार्कयोर्मध्ये प्रविष्टः सोममस्मृतमपिबत् ॥ २४ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

अथ तस्यां शालायां हे नरेन्द्र ! अमृतकलशः पाणौ यस्याः सा मोहिनी आविवेश । कथम्भूता ? "करस्य करभो बहिः" करभसदृशौ सुवृत्तौ ऊरू यस्याः सा उशत् कमनीयं दुकूलं यस्मिंस्तेन श्रोणीतटेन विशालया श्रोण्या अलसा मन्दा गतिर्यस्याः सा पाठान्तरे करभसदृशयोरूर्वोर्लसद्दुकूलं यस्याः सा चासौ श्रोणीतटेनालसा गतिर्यस्याः सा च मदेन विह्वले अक्षिणी यस्याः सा कनकनूपुराणां शिञ्जितेन कूजती ध्वनन्ती कुम्भाविव स्तनौ यस्याः सा ॥ १७ ॥

तां श्रीसखीं श्रियमिव स्थितां श्रीसहायिनीं वा भगवद्रूपत्वात् कनकमये कुण्डले यस्याः सा चासौ चारवः कर्णादयो यस्याः सा च तां विगलितः विस्रस्तः स्तनपट्टिकाया अन्तो यस्यास्तां परदेवताख्यां परदेवतारूपां तां संवीक्ष्य देवासुरास्तस्या उत्स्मयवीक्षणेन संमुमुहुः ॥ १८ ॥

एवं तान्मोहयित्वा यत्कृतवांस्तदाह-असुराणामिति त्रिभिः जातिनृशंसानां स्वभावतः क्रूराणामसुराणां सुधादानं सर्पाणां क्षीरमिव दुर्नयमन्याय्यं मत्वा तां सुधामसुरेभ्यो न व्यभजत् श्रीमदच्युतः ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यतो ऽस्मावाश्रितान् च्यावयतीत्यच्युतः अयं भावः, दैत्यैर्मदीयं साध्वसाधु वा सर्वमनुमतमेव अतो मामाश्रितान्देवानेव सुधां पाययिष्यामि किञ्च तैः यथान्यायं विभजस्व इति चोक्तं न तेभ्यो जात्यैव क्रूरेभ्योऽमृतपानं न्याय्यम् अतस्तेभ्यस्सुधां न दास्यामीति ॥ १९ ॥

उभयेषां पंक्तीः पृथग्विभक्ताः कल्पयित्वा तान्देवानसुरांश्च स्वासु स्वासु पंक्तिषूपवेशयामास ॥ २० ॥

गृहीतकलशः श्रीभगवान् योषिद्रूपः उपसञ्चरैः समीपगमनबहुमानेन्द्रियव्यापारादरवाक्यादिभिः दैत्यान्वञ्चयन्दूरस्थानपि देवानेव सुधां पाययामास ॥ २१ ॥

तेऽलब्धसुधा अपि दैत्याः स्वकृतं समयं साध्वसाधुवा त्वत्कृतमनुमन्यामहे इति पूर्वकृतं सङ्केतं पालयन्तः हे नृप ! कृतस्तस्यां स्नेहो यैस्तादृशाश्च स्त्रीविवादस्य जुगुप्सिततया च तूष्णीमेवासन् ॥ २२ ॥

तस्यां कृतः अतिप्रणयः अतिस्नेहो यैः ते प्रणयापायेन कातराः भीताः एते तावत्कृपणाः पूर्वं किञ्चित्पिबन्तु यूयं धीराः क्षणं प्रतीक्षध्वम् इत्यादिबहुमानेन चाबद्धाः नियन्त्रिताश्च किञ्चिदपि विप्रियं नोचुः । समयपालनादिषड्भिरेतैः कारणैरप्रियं किञ्चिदपि नोचुः किन्तु तूष्णीमासुरित्यर्थः ॥ २३ ॥

देवलिङ्गेन देवतावेषेण प्रतिच्छन्नस्तिरोधापितात्मवेषः स्वर्भानुः राहुः देवानां पङ्क्तौ प्रविष्टः सोममममृतमपिबत् चन्द्रार्काभ्यां सूचितः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कलभो गजपोतः तत्करवच्छोभमानयोरूर्वोर्लसता दुकूलेन युतं श्रोणीतटं यस्याः सा कलभो वंशाङ्कुरस्तद्वद्वर्तमानयोर्वा मलसगतिः अलसा मन्दा गतिर्यस्याः सा तथा शिञ्जितेन शब्दितेन "शिञ्जिअव्यक्ते शब्दे" इति धातुः १७ ॥

कनककुण्डलचारुकर्णाभ्यां नासाकपोलाभ्यां च युक्तं वदनं यस्याः सा तथा ताम् ॥ १८ ॥

"सुधा पयसि देवान्ने गुणपक्वपयोमृदि" इति वचनात् सर्पाणां पयोदानमिव तानुद्दिश्य ॥ १९ ॥

"आली श्रेणी श्रिया पंक्तिसमयोस्ततिरच्युते" इति ॥ २० ॥

उपसञ्चरैः समीपगमनादिनर्मव्यवहारैः ॥ २१ ॥

कृतस्नेहाः छिन्नस्नेहाः "कृञ्छेदने" इति धातुः पूर्वं सम्पन्नस्नेहा अधुना नष्टस्नेहा इत्यर्थः ॥ २२ ॥

प्रणयस्यापाय उपशमनं सम्भवतीति कातराः भीताः ॥२३॥२४॥ २५ ॥ २६ ॥ २७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

कल्पयित्वेति तांश्च देवासुरान् परस्परमभिमुखानिति ज्ञेयम् ॥ २० ॥

वञ्चयन् तलस्थं सारभागं भवद्भ्यः सर्वतः श्रेष्ठेभ्यो दास्यामीति प्रतारयन् ॥ २१ ॥

समयं प्रतिज्ञाम् ॥ २२—२४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

करभोरुरुशद्दुकूला करभोरुलसद्दुकूलेतिपाठद्वयम् "मणिबन्धादाकनिष्ठं करस्य करभो बहिः" इत्यमरः ॥ १७ ॥

श्रीसखीं श्रियो लक्ष्म्याः सखीमपि तदानीं सख्येवाभूत पुञ्जातिमध्ये यथा नारायणः सुन्दरस्तथैव स्त्रीजातिमध्ये अहमेवाऽतिसुन्दरीति माऽहङ्कृथाः स्त्रीजातावप्यहमेव परमसुन्दरीति तां ज्ञापयितुमिवेति भावः । कनककुण्डला चासौ चारुकर्णाद्या चेति ताम् ॥ १८ ॥

न तां व्यभजदिति दैत्यैर्यथान्यायं विभजस्वेत्युक्तम् अतो न्यायश्चायमेवेति भावः ॥ १९ ॥

स्वेषु स्वेषु इति पङ्क्तिषु मध्ये या याः पंक्तयो येषां येषां स्वानि धनरूपाणि स्वेषु स्युस्तेषु स्वत्वविशिष्टासु पङ्क्तिष्वित्यर्थः ॥ २०॥

उप निकटं निकट एव सञ्चरैः सञ्चरणैर्भ्रूभङ्गिनेत्रस्मितव्रीडामुखार्द्धाच्छादननूपुरादिभूषणवसनसञ्चलनपूर्वकैश्चरणसञ्चलनैः किञ्चिन्मात्रप्रदानेन दूरस्थानां देवानामुत्कण्ठां निवर्त्य सम्पूर्णानेव पाययिष्यतीति प्रत्ययनैः वञ्चयन्निति अस्माभिः श्रोत्रनेत्रमनोभिर्यदिदममृतं पीयते इतोऽधिकं सामुद्रममृतं न भविष्यति. तदलं तेन एतस्या आनुकूल्यमेवाकाङ्क्षणीयमित्यपि तेषां मनसि विचारं प्रापयामासेति भावः । दूरस्थान् देवान् ॥ २१ ॥

समयं साध्वसाधु वा यथासुखं विभजस्वेति नियमं स्त्रिया सह विवादस्य जुगुप्सया एते तावत् कृपणाः पूर्वं किञ्चित् पिबन्तु यूयं तु धीराः क्षणं प्रतीक्षध्वमित्यादिबहुमानेन चाबद्धा नियन्त्रिताः समयपालनादिभिः षड्भिरेतैः कारणैरप्रियं किञ्चिदपि नोचुः किन्तु तूष्णीमेवासन् ॥ २२ ॥ २३ ॥

तदेवं मोहिनीमूर्त्या भगवता सर्व एव दैत्या मोहयित्वा वञ्चिताः किन्तु सद्योऽप्यमृतमहिमज्ञापनार्थमेकः स्वर्भानुर्न मोहितः स च सहसैव मोहिन्यभिप्रायं ज्ञात्वा देवपङ्क्तिं प्रविष्ट इत्याह—देवलिङ्गेति । अत एव देवास्तं प्रथमं परिचेतुं न शेकुः उपविष्टे तु चन्द्रार्काभ्यां परिचितोऽपि तद्भयादितोऽन्यत्र पङ्क्तावुपविशेति वक्तुं नाशक्यतेति ज्ञेयम् । यदा यदा तु सोममममृतं प्राप्तमेवापिबत्तदाऽसुरोऽसाविति भ्रूभङ्ग्या सूचितः ॥ २४॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे नरेन्द्र ! तस्यां शालायां कलशः पाणौ यस्याः सा आविवेश कथम्भूता करभोर्वोः मणिबन्धादिकनिष्ठान्तहस्तभागसदृशयोरूर्वोर्लसद्दुकूलं यस्याः सा चासौ श्रोणितटं अलसा गतिर्यस्याः मदेन विह्वले अक्षिणी यस्याः ॥ १७ ॥

चक्रेण क्षुरधारेण जहार पिबतः शिरः ।
हरिस्तस्य कबन्धस्तु सुधयाऽप्लावितोऽपतत् ॥ २५ ॥
शिरस्त्वमरतां नीतमजो ग्रहमचीक्लृपत् ।
यस्तु पर्वणि चन्द्रार्कावभिधावति वैरधीः ॥ २६ ॥
पीतप्रायेऽमृते देवैर्भगवाँल्लोकभावनः ।
पश्यतामसुरेन्द्राणां स्वं रूपं जगृहे हरिः ॥ २७ ॥
एवं सुरासुरगणाः समदेशकालहेत्वर्थकर्ममतयोऽपि फले विकल्पाः ।
तत्रामृतं सुरगणाः फलमञ्जसाऽऽपुर्यत्पादपङ्कजरजःश्रयणान्न दैत्याः ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तां श्रियः सखीं संवीक्ष्य देवासुराः तस्याः उत्स्मयवीक्षणेन संमुमुहुः कनकमये कुण्डले यस्याः सा चासौ चारवः कर्णाद्यो यस्याः विगलितो विस्रस्तः स्तनपट्टिकायाः अन्तो यस्याः परदेवतेत्याख्यां नाम यस्यास्ताम् ॥ १८ ॥

सर्पाणामिवासुराणां सुधादानं दुर्नयमन्याय्यं मत्वा तां सुधां न व्यभजत् सुरानपाययामास ॥ १९ ॥

उभयेषां देवानां पृथक् असुराणां पृथक्पङ्क्तीः कल्पयित्वा ॥ २० ॥ २१ ॥

तासु पृथग्भूतासु यथेष्टं कुर्विति नियमं पालयन्तस्ते कृतस्नेहाः तूष्णीमासन् ॥ २२ ॥

बहुमानेन आबद्धाः परतन्त्राः ॥ २३ ॥

सोममसृतम् ॥ २४ ॥

भाषा टीका ।

हे नरेन्द्र! उसी शाला में करभ [मंणिबन्ध से कनिष्ठतक हस्त के बाहर के मांसल भाग के सदृश ऊरू (जङ्घा) वाली अथवा एतादृश ऊरु प्रदेश में शोभायमान सूक्ष्म दुकूल जिनके और श्रेणी प्रवेश अर्थात् कटि पश्चाद्भाग के गौरव से आलस्य युक्त गति वाली और मदसे मत्त हो रहे नेत्र जाके, ऐसी वे मोहनी जी सुवर्ण नूपुरों के सिंजित (शब्द) से कूजन करती हुई कलश सदृश स्तन वाली अमृत कलश हाथ में लेकर प्रवेश करती भई ॥ १७ ॥

सुन्दर कर्णों में सुवर्ण के कुण्डलों को झलकाती हुई अति सुंदर नासिका कपोल और मुख वाली पर देवता नाम जिनका ऐसी लक्ष्मी जी की सखी न सखी को देव और असुरों ने जब देखा तो आपके चलते समय स्तनपर से अञ्चल का छोर गिरता जाता है और आप वारंवार सम्हारती जाती है इतने में आपने किंचित ऊंचे को मुख कर एक वार हँसकर जो देख दिया इतने ही से सब देव और असुर मोहित होगये ॥ १८ ॥

आपने भी उस शाला में प्रवेश करके विचारा कि— असुरों को अमृत देना ऐसी दुर्नीत है कि जैसे सर्पों के विष देना, क्योंकि ये लोग तो स्वभाव ही से क्रूर हैं ऐसा मानकर भगवान ने उनको अमृत का विभाग नहीं किया ॥ १९ ॥

मोहिनी रूप वाले जगत्पति ने पृथक २ पंक्ति रचकर देव और दैत्यों को अपनी अपनी पंक्तियों में अलग अलग वैठारे ॥ २० ॥

फिर आपने कलश को हाथों में ले रखा है और दैत्यों से बडे उपचार पूर्वक वोले, कि तुम कहो तो जामें इन देवताओं की नजर न लगजावै ताके लिये इनको प्रथम थोडी सी पिवा देवै फिर तो तुम हैहीहो, इत्यादि रीति से कहकर दूर वैठे हुए देवताओं को जरा मृत्यु के हरने वाली सुधा (अमृत) को पिलाने लगे ॥ २१ ॥

हे नृप! वे असुर लोग अपनी करी हुई प्रतिज्ञा को पालन करते हुए चुप वैठे रहे, और मनमें यह भी विचारते रहे कि हमारे ऊपर तो वे वडा स्नेह करती हैं यदि हम प्रथम वोलेंगे तो हमारे ही ऊपर रूस जायगी ऐसे प्रत्येक दैत्य विचार कर वैठे रहे ॥ २२ ॥

और उन मोहिनी जी में किया है अति प्रेम जिनोंने, इसी से प्रेम न घटजावै इस वात को डरते हुए, और वडप्पन के वहुमान में वंधे हुए श्रीमोहिनी जी से अप्रिय किञ्चित् भी नहीं वोलसके ॥ २३ ॥

इतने में राहु ने देवता का रूप धारण कर देवताओं की सभा में छिपा हुआ वैठा रहा तव अमृत वाटने के वखत में इसने भी अमृत पान तो करलिया परंच चन्द्र और सूर्य के वीच में वैठा रहा इससे दोनों ने भगवान को जना दिया कि यह दैत्य है ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हरिस्तस्य शिरो जहार अप्लावितोऽसंस्पृष्टः ॥ २५ ॥

यद्युज्यतेऽसुवसुकर्मवचोमनोभिर्देहात्मजादिषु नृभिस्तदसत्पृथक्त्वात् ।
तैरेव सद्भवति यत्क्रियतेऽपृथक्त्वात्सर्वस्य तद्भवति मूलनिषेचनं यत् ॥ २९ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायाम्
वैयासिकयाम् अष्टमस्कन्धे अमृतमथने
नवमोऽध्यायः ॥ ९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ग्रहं सूर्यादिवद्ग्रहत्वाधिकारिणम् ॥ २६ ॥ २७ ॥

हरिभक्तानामेवोद्यमः फलति नान्येषामित्येवमाख्यानतात्पर्यमाह-एवमिति । समादेशादयो येषाम् हेतुर्मन्दराद्रिः अर्थः समुद्रे क्षिप्तं क्षीरुद्रादि विविधः कल्पः फलं केषाञ्चिज्जातं केषाञ्चिन्नेति वैविच्यमेषां ते फलवैषम्यवन्तो बभूवुरित्यर्थः । तदेवाह, तत्र तेषु यस्य पादपङ्कजरजःश्रयणाद्देवा अमृतं फलमापुः स एव सेव्य इत्यर्थः । यत्तदोर्नित्यसम्बन्धात् ॥ २८ ॥

एतदेवोपपादयति—यदिति । असुः प्राणः वसु धनम् प्राणादिभिर्देहात्मजादिषु नृभिर्यद्युज्यते प्रयुज्यते देहाद्यर्थं यत्क्रियत इत्यर्थः । तदसद्व्यर्थं भवति कुतः पृथक्त्वाद्भेदाश्रयत्वात् शाखानिषेचनवत् तैरेव प्राणादिभिरीश्वरोद्देशेन यत्क्रियते तत्तु सन्महाफलं भवति अपृथक्त्वादीश्वरस्य सर्वत्रानुगतत्वात् तत्र दृष्टान्तः यत्तरोर्मूलनिषेचनं तद्यथा सर्वस्य स्कन्धशाखादेरपि भवतीति यद्वा ल्यब्लोपे पञ्चम्यौ पृथक्त्वम्पर्यालोच्य भेददृष्ट्या देहाद्युद्देशेन यत्क्रियते तदसत् अपृथक्त्वं पर्यालोच्येश्वरदृष्ट्या तैरेव तेष्वेव च यत्क्रियते तत्सद्भवतीति शेषं समानम् ॥ २९ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
नवमोऽध्यायः ॥ ९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हरिः सोमं पिबतः स्वर्भानोः शिरः क्षुरस्येव धारा यस्य तेन चक्रेण जहार चिच्छेद तस्य स्वर्भानोः कबन्धः सुधयाऽप्लावितः असंस्पृष्टोऽपतत् अमृतस्य कण्ठादधो निस्सरणात्पूर्वमेवास्य शिरसः छिन्नत्वादमृतसंस्पर्शाभावात्कबन्धः पतितः ॥ २५ ॥

शिरस्तु अमृतसंस्पर्शादमरत्वं प्राप्तम् अजो ब्रह्मा ग्रहमचीक्लृपत् अकल्पयत् सूर्यादिवद्द्वारेण प्राणिनां . शुभाशुभसूचकं ग्रहं अचीकरदित्यर्थः । यस्तु ग्रहत्वं प्रापितो राहोर्मूर्द्धा वैरधीः पर्वसु चन्द्रार्कौ अभिधावति ॥ २६ ॥

देवैरमृते पीतप्राये सति प्रायग्रहणादमृतस्यावशेषः सूच्यते लोकभावनः लोकपालको भगवान्विभुरसुरेन्द्राणां पश्यतां सतां स्वरूपं स्वकीयं पौरुषं रूपं जगृहे गृहीतवान् ॥ २७ ॥

श्रीभगवन्तमेवाश्रितानामेवोद्यमफलं नान्येषामित्येवमाख्यानतात्पर्यमाह-एवमिति । एवम् इत्थं समास्तुल्या देशादयो येषां तादृशा अपि तत्र देशः क्षीरोदधितीरं कालः मथनसमयः हेतुः मन्दराद्रिणा मथनम् अर्थः अमृतरूपं प्रयोजनं कर्म मथनानुकूलं मतिः अन्योन्यमेकप्रयोजनविषयः एवंविधा अपि फले विकल्पाः फलवैषम्यवन्तो बभूवुः केषाञ्चित्फलमपरेषां नेति वैषम्यमभवदित्यर्थः । तदेवाह–तत्र देवासुराणां मध्ये देवगणा एवामृतरूपं फलमञ्जसा सुखेनापुः प्रापुः, कुतः ? यस्य भगवतः पादपङ्कजयोः रजस्सामश्रयणाद्धेतोः । तदनाश्रयणात् दैत्या न प्रापुः वैषम्यं जीवनिष्ठमेव न तु परमात्मनिष्ठमिति दिक् ॥ २८ ॥

किञ्च यदिति असुः प्राणः वसु धनं देहात्मजादिषु निमित्तेषु देहाद्यर्थं नृभिः प्राणादिभिः यद्युज्यते यत्क्रियते इत्यर्थः । तदेतदसद्व्यर्थं शाखानिषेचनवद्व्यर्थं भवति.कुतः ? पृथक्त्वात्. तस्य कर्मणोऽहम्ममतादिपृथगभिमानगर्भत्वात्तैरेव प्राणादिभिर्यत्क्रियते सर्वान्तरात्मनो भगवतः सर्वकारणस्य प्रीतये क्रियते तत्तु सन्महाफलम्भवति । कुतोऽपृथक्त्वात्. सर्वान्तरात्मतया सर्वमूलकतया च सर्वत्रानुस्यूतत्वात्. तत्र दृष्टान्तः यत्तरोर्मूले सेचनं यथा सर्वस्य शाखास्कन्धादेरपि भवति तद्वत्,यद्वा पृथक्त्वादपृथक्त्वादिति च ल्यब्लोपे पञ्चमी देहात्मजादीनां पृथक्त्वमालोच्याब्रह्मात्मकत्वं पश्यत् केवलदेहाद्यर्थं प्राणादिभिर्यत्क्रियते कर्म तद्विफलं ब्रह्मात्मकत्वमालोच्य तदाराधनबुध्या कृतं लौकिकमपि कर्म सफलमेवेत्यर्थः ॥ २९ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिकायाम्
नवमोऽध्यायः ॥ ९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

समा देशादयो येषां ते तथाऽपि विफलैर्विशिष्टफलैः विकल्पाः विकल्पयोग्याः अभूवन् कथं तत्राह—तत्रेति । तत्रापि हेतुमाह यत्पादेति । फलवैकल्ये विशेषणविशिष्टकल्पनार्हा इति ॥ २८ ॥

नन्वसुरादीनामपि शिवादिदेवार्चनादिसद्भावात्कथं नैविशिष्टफलं नावाप्तमित्याशंक्य श्रीहरिचरणारविन्दप्रणामाभावात्तेषामित्याशयेनाह–यदीति । नृभिः पुरुषैः पुरस्तादुद्यतेषु फलदानाभिमुखेषु देहात्मजादिषु यदर्चनादिकं वित्तादिभिः क्रियते

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

यदि तथापि तदसत्कर्म विशिष्टफलं न भवति कुत इति तत्राह—उपर्यतोऽभवति। उत्कृष्टफलमुद्दिश्य यत्तेषूपरतेषु विशिष्टशक्त्यभावादिति द्विरावृत्त्या योजनीयं तर्हि कथंकारं तद्भवतीति तत्राह—तैरिति। यदीत्यनुवर्तते यदि तैः पूर्वोक्तैर्वित्तादिभिरेव चास्मिन् हरौ यत्कर्म क्रियते तर्हि तत्पूर्णफलं भवति हरिभक्तिमात्रेण देवाद्युद्दिष्टद्रव्यैस्तदर्चनाभावे कथं तत्पूर्णफलं स्यात्? इति तत्राह—सर्वस्येति। यन्मूलभूतस्य हरेरर्चनलक्षणं निषेचनं तत्सर्वस्य देवतादेस्तर्पणनिषेचनफलं भवति हरिभक्तिमन्तरेण शिवाद्यर्चनेनासुराणां विशिष्टफलं नाभूत्तस्मात्तद्भक्त्या भाव्यमितीदं मुक्तिनमलोनिदर्शनायोक्तमिति ज्ञातव्यम "देहात्मजादिष्वेव महात्मनां तदभावादात्मा महनीयः" इति वचनादित्यतो वाह—*यदीति, देहात्मजादिष्विति केचित्पठन्ति तत्रैवं योजनिका पुरस्ताद्देहात्मजावासैः पूर्वमेवासन् वित्तादिश्रय एवानन्य इत्यर्थः। इति शेषममम ॥ २९ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
नवमोऽध्यायः ॥ ९ ॥
(विजय० रीत्या अष्टमोऽध्यायः)।

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

कबन्धोऽपतदिति केतुस्तुच्छायाग्रह एव न तु कबन्धरूप इत्यभिप्रायः ॥ २५—२७ ॥

हेतुः साधकतमः अर्थस्तदुपयोगिमात्रम् ॥ २८ ॥

तेषां च तेषाञ्च तत्तद्युक्तमेवेत्याह—यद्युज्यत इति। नृभिः कर्तृभिः असुप्रभृतिभिः करणैर्जायादिषु यत् युज्यते क्रियते तदसत् सर्वकालसर्ववस्तुव्यापिपोषकशक्तिकं न भवतीति नश्वरमेव भवतीत्यर्थः। कुतः पृथक्त्वात्, असुप्रभृतीनां जायादीनां च स्वतस्तादृशशक्तिर्नास्त्येव क्षुद्रशक्तित्वादित्यर्थः। असुप्रभृतिभिरेव सर्वस्य मूलनिषेचनं सन्तर्पणं यत् क्रियते तत्तु सर्वदा सर्ववस्तुपोषकं भवति. कुतः? अपृथक्त्वात्. सर्वदा सर्वस्यापि पोषकत्वादित्यर्थः। जायादीनामेव पोषकं भवतीति कियदित्यर्थः। सर्वस्य मूलं श्रीभगवानेवेति भावः ॥२९॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
नवमोऽध्यायः ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

हरिरजितरूपी शिरो जहार आ ईषत् प्लावितः ॥ २५ ॥
अमरतां नीतम् अमृतपानप्रभावान्मरणशून्यतां प्राप्तमिति अमृतप्रभावो दर्शितः। अजो ब्रह्मा ग्रहं सूर्यादिकमिव ग्रहत्वाधिकारवन्तम् ॥ २६ ॥ २७ ॥

लौकिकहेतुसाम्येऽपि फलप्राप्तिर्भक्तिमतामेव नान्येषामित्याख्यानतात्पर्यमाह—एवमिति। समा देशादयो येषां ते देशः क्षीरसिन्धुः कालस्तत्तत्क्षणसमूहः हेतुर्मथनं साधनं मन्दराद्रिः अर्थः समुद्रे क्षिप्तवीरुधादि कर्म मथनं मतिरमृतकामता फले फलप्राप्तौ विकल्पाः फलप्राप्तिर्भवेन्नवेति विकल्पवन्तः तत्र तयोर्मध्ये सुरगणाः फलमापुः यत्पदाश्रयणात्। दैत्या न आपुः यदाश्रयणाभावादितिभावः। स एव सेव्य इति प्रकरणार्थः ॥ २८ ॥

तस्मात् फलितमाह—यदिति। असवः प्राणा इन्द्रियाणि वसु धनं असुवस्वादिभिर्यद्देहादिषु युज्यते विनियुज्यते तदसत् प्राणादीनां देहाद्यर्थः यो विनियोगः सोऽसाधुरित्यर्थः। कुतः? पृथक्त्वात् शाखानिषेचनवत् मूलात् शाखा भिन्ना इति बुद्ध्या यथा मूलं विहाय शाखा निषिच्यते तथैव भगवन्तं विहाय देहाद्याः परिचर्यन्ते मूढैः तैरेव असुवस्वादिभिर्यद्भगवति क्रियते असुवस्वादीनां भगवति यो विनियोगः स साधुरित्यर्थः। अपृथक्त्वात् मूलनिषेचनवत् मूलात् शाखा न भिन्ना इतिबुद्ध्या यथा मूलमेव सिच्यते तथैव भगवानेव परिचर्य्यते तत्परिचरणं सर्वस्य ब्रह्मादिस्तम्बपर्य्यन्तस्येत्यर्थः। यद्यस्मात् तन्मूलनिषेचनम् ॥ २९ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।
अष्टमे नवमोऽध्यायः सङ्गतस्सङ्गतस्सताम् ॥ ९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

क्षुरस्येव धारा यस्य तेन कबन्धः सुधया अप्लावितोऽलंकृतः सुधायाः कण्ठादधोऽप्रवेशात् ॥ २५ ॥
अर्चीक्लृपत् अकरोत् ॥ २६ ॥ २७ ॥

कथम्भूतो हरिः यस्य पादपङ्कजरजःश्रयणात् समाः देशादयो येषां ते देशः क्षीरनिधिः कालो मन्थनसमयः हेतुः मन्थनसाधनं मन्दराद्रिः अर्थः क्षीरनिधौ अर्पितो वीरुधादिरूपः कर्म पुरुषकारः मतिः स्वार्थनैपुण्यं तत्र अमृतम् फलं सुरगणाः आपुः न तु दैत्याः, इत्येवं फले विकल्पाः भिन्नाः अलब्धफलाश्चेति भेदं प्राप्ताः ॥ २८ ॥

किं बहुना हर्युद्देशेन देहाद्यर्थमपि कृतं कर्म महाफलं भवतीत्याह—पृथक्त्वादपृथक्त्वाच्चेति ल्यब्लोपे पञ्चमी नृभिः पृथक्त्वमालोच्य प्राणधनादिभिर्यद्देहादिषु युज्यते देहाद्यर्थं यत्क्रियते तदसत् अयुक्तं भवति यदा तु "ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम्। ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना" इति भगवदुक्त्यनुसारेण सर्वस्य अपृथक्त्वमालोच्य भगवदुद्देशेन तैरेव तेषु यत्क्रियते तत्सद्भवति तत्र दृष्टान्तमाह—यत्तरोर्मूलनिषेचनं तत्सर्वस्य स्कन्धशाखादेरपि भवति तद्वत् ॥ २९ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
नवमाध्यायार्थप्रकाशः ॥ ९ ॥

---

* यद्युद्यतेषु च सुकर्म मनोवचोभिर्देहात्मजादिषु इति मूलपाठः।

भाषा टीका।

तब मोहिनीजी ने भी छुरा के नाईं तीक्ष्ण धार वाले चक्र से पीते हुए दैत्य का शिर उडादिया उसका कबन्ध भी अमृत से किंचित् भीजा हुआ गिरपडा ॥ २५ ॥

शिर भी अमर होगया ब्रह्मा जी ने उसको ग्रह बना दिया जो आज कल भी पर्व २ में अर्थात् ग्रहण काल में वैर बुद्धि कर चंद्र और सूर्य के प्रति दौडता है ॥ २६ ॥

जब देवतालोग प्रायकर अमृत पान करचुके तब सर्व लोक के पालक हरिने असुर लोगों के देखते २ अपना स्वरूप ग्रहण करलिया ॥ २७ ॥

इस प्रकार सुरगण और असुर गणों का समान देश समान काल समान हेतु समान प्रयोजन समान मति होने परभी फल में विकल्प होगया । तहां पर कारण इतना ही हुआ कि देवगणों को तो श्रीहरि के चरण कमल की रजका आश्रय लेने स अमृत रूप फल प्राप्त हुआ, और इतने के विना दैत्यों को फल प्राप्त नहीं हुआ, बस पुरुष को इतना ही मुख्य समुझना चाहिये फल से जैसे न चूके ऐसे का आश्रय ले ॥ २८ ॥

लोक में जो कुछ प्राण, धन, कर्म, मन, वाणी इत्यादि उपकरणों से पुत्र कलत्रादि के निमित्त मनुष्यों से जो कुछ किया जावे वह बुद्धि के भेद होने से असत् अर्थात् व्यर्थ होता है। और प्राण धनादि से यदि भगवदाराधन मानकर भगवत् की आराधन बुद्धि से जो कुछ कियाजाय तो वह अपृथक् होने से संपूर्ण सत् होता है पश्चात् उसका शरीर पुत्रादि मे ही विनियोग कियाजाय तो भी बुद्धिमात्र के अभेद से दूसरा प्रकार होता है, जैसे कि वृक्ष के मूल में सींचने से शाखा पत्रादिक सब हरे होते हैं इसी प्रकार श्रीहरि के आराधन के निमित्त सर्व कार्य करने से कर्म विपरीत फलप्रद नहीं होते किन्तु पूर्ण अनुकूल फल देते हैं ॥ २९ ॥

इति श्रीमद्भागवत अष्टमस्कन्धमें नवम अध्याय की श्रीवृन्दावनस्थ भागवताचार्यकृत भाषाटीका समाप्त ॥ ९ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे नवमोऽध्यायः ॥ ९ ॥

॥ दशमोऽध्यायः ॥

श्रीशुक उवाच ।

इति दानवदैतेया नाऽविदन्नमृतं नृप ! ।
युक्ताः कर्मणि (१) यत्ताश्च वासुदेवपराङ्मुखाः ॥ १ ॥
साधयित्वाऽमृतं राजन् ! पाययित्वा स्वकान् सुरान् ।
पश्यतां सर्वभूतानां ययौ गरुडवाहनः ॥ २ ॥
सपत्नानां (२) परामृद्धिं दृष्ट्वा ते दितिनन्दनाः ।
अमृष्यमाणा उत्पेतुर्देवान्प्रत्युद्यतायुधाः ॥ ३ ॥
ततः सुरगणाः सर्वे सुधया पीतयैधिताः ।
प्रतिसंयुयुधुः शस्त्रैर्नारायणपदाश्रयाः ॥ ४ ॥
तत्र देवाऽसुरो नाम रणः परमदारुणः ।
रोधस्युदन्वतो राजंस्तुमुलो रोमहर्षणः ॥ ५ ॥
तत्रान्योऽन्यं सपत्नास्ते संरब्धमनसो रणे ।
समासाद्यासिभिर्बाणैर्निजघ्नुर्विविधायुधैः ॥ ६ ॥
शङ्खतूर्यमृदङ्गानां भेरीडमरुणां महान् ।
हस्त्यश्वरथपत्तीनां नदतां निःस्वनोऽभवत् ॥ ७ ॥
रथिनो रथिभिस्तत्र पत्तिभिः सह पत्तयः ।
हया हयैरिभाश्चेभैः समसज्जन्त संयुगे ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

दशमे मत्सराद्दैत्यैरारब्धे तु मृधे सुरैः ।
दैत्यमायाविषयेषु देवेष्वाविर्बभौ हरिः ॥ १ ॥
तदेव ममतावाप्तिर्नाभक्तानामितीरितम् ।
भक्तमत्सरतः प्राणहानिः पुनरुदीर्यते ॥ २ ॥

॥ १ ॥ २ ॥ ३ ॥ ४ ॥
रणः संग्रामः उदन्वतः समुद्रस्य रोधसि तीरे बभूव ॥ ५ ॥
अन्योऽन्यं समासाद्य निजघ्नुः॥ ६——१२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

समदेशकालहेत्वर्थकर्ममतीनामपि श्रीभगवन्तमनाश्रितानां न केवलं फलाप्राप्तिरेव, प्रत्युत प्राणहानिश्चेति वक्तुममृतालाभ-प्रयुक्तसंरम्भाणां दैत्यानां आदितेयैस्सह युद्धमाहाध्यायद्वयेन । हे नृप ! इति इत्थं दानवा दैत्याश्च अमृतं नाविदन् न लब्धवन्तः तत्र हेतुं वदन् विशिनष्टि कर्मणि मथनकर्मणि युक्ता यत्ताश्चानुकूल-कर्मवन्तो यत्नवन्तोऽपि वासुदेवपराङ्मुखाः अतो नाविद-न्नित्यर्थः ॥ १ ॥

हे राजन् ! इत्थं भगवानमृतं साधयित्वा स्वकान् स्वाश्रितान् सुरान् सुधां पाययित्वा सर्वभूतानां पश्यतां सतां श्रीगरुडवाहन-स्सन् जगाम ॥ २ ॥

(१) हप्ताः (२) परां सिद्धिम् इति वीर० ।

उष्ट्रैः केचिदिभैः केचिदपरे युयुधुः खरैः ।
केचिद्गौरमृगैर्ऋक्षैर्द्वीपिभिर्हरिभिर्भटाः ॥ ९ ॥
गृध्रैः कङ्कैर्बकैरन्ये श्येनभासैस्तिमिङ्गिलैः ।
शरभैर्महिषैः खड्गैर्गोवृषैर्गवयारुणैः ॥ १० ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

ततः सपत्नानां देवानां परां सिद्धिं फलप्राप्तिं दृष्ट्वा ते दैत्याः असहमानास्सन्तः उद्यतानि उद्धृतानि आयुधानि यैस्ते देवान्प्रति उत्पेतुरभिदुद्रुवुः ॥ ३ ॥

ततः सुरगणा अपि पीतया सुधया पधिना आहितबलाः नारायणपदाश्रयाश्च शस्त्रास्त्रैः प्रतिसंयुयुधुः ॥ ४ ॥

तत्रोदन्वतः क्षीराब्धेः रोधसि तीरे देवासुर इति प्रसिद्धःपरमदारुणोऽतिभीषणस्तुमुलः सङ्कुलः पश्यतां शृण्वतां च रोमहर्षणो रोमहर्षणजनको रणः संग्रामो बभूव ॥ ५ ॥

तमेवानुवर्णयति—तत्रेति । तदा सपत्नाः ते देवासुराः संरब्धं क्रुद्धं मनो येषां ते रणे अन्योन्यं समासाद्य बाणैः विविधैरायुधैश्च निजघ्नुः ॥ ६ ॥

भेर्यादीनां शङ्खादीनां च नदतां हस्त्यश्वपदातीनां च महान् निस्स्वनो बभूव ॥ ७ ॥

तत्र रथ्यादयो रथ्यादिभिरेव द्वन्द्वसंमरे समसज्जन्त युयुत्सया सङ्गता बभूवुः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भगवत्प्रसादजातेन ज्ञानेन पापप्रणाशो भवत्येव नान्येनेत्येतन्निदर्शनाय देवासुरयुद्धं वर्णयत्यध्यायद्वयेन, तत्रादौ हरेरदर्शनप्रकारमाह, इतीति ॥ १ ॥

ययावदृश्यो ऽभूदिति ॥ २–३ ॥

पधिनाः वर्धिताः ॥ ४ ॥

उदन्वतः समुद्रस्य रोधसि तीरे ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

युक्ता योग्याः यत्ताः कृतयत्नाः ॥ १—१२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

दशमेऽन्तर्हिते विष्णौ दैत्यैर्युद्धे प्रवर्तिते ।
दैत्यमायाविभूतेषु सुरेष्वाविरभूद्धरिः ॥ १ ॥

ययौ अन्तर्दधे ॥ १—४ ॥

रणो बभूव ॥ ५—१० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

देवासुरसङ्ग्रामे असुरैर्माययाऽभिभूतान् देवान् हरिराविर्भूत्वा रक्षितवानिति वर्णयति दशमेन ॥ १—४ ॥

रोधसि तीरे ॥ ५ ॥

अन्योन्यं समासाद्य अस्यादिभिर्निजघ्नुः ॥ ६—१२ ॥

भाषा टीका ।

श्रीरुक्मिणीशो जयति ॥

श्रीशुक उवाच ।

श्री शुकदेवजीबोले, कि हे राजन् ! इस प्रकार सब दानव और दैत्य गणोंने यद्यपि समुद्र मथन मे बड़ाभारी परिश्रम किया और सावधान रहे, तथापि श्रीहरिके अभिप्र यो विमुख होनेसे अमृत को प्राप्त नही भये ॥ १ ॥

हे राजन् ! भगवान् श्री हरि इस प्रकार दैत्यों मे अमृत अपने हाथ में लेकर और शरणागत सम्पूर्ण देवता ओंको पिलाय, सब प्राणियों के देखते २ गरुड के ऊपर चढकर चले जाते भये ॥ २ ॥

तब दिति के पुत्र सब दैत्यगण अपने शत्रुओं का मनो कामना सिद्ध देखकर न सहसके और बडी भारी ईर्षा मे अपने अस्त्र शस्त्रों को सम्भाल देव गणों से युद्ध करने के लिये सावधान होगये ॥ ३ ॥

तिसके अनन्तर सब देवता श्रियः पति के चरण कमल के आश्रित होने से और अमृत के पीनेसे रिष्ट पुष्ट होकर परस्पर में अस्त्र शस्त्र लेकर युद्ध करने को खडे होजाते भये ॥ ४ ॥

हे राजन् ! उस समुद्र के किनारे में अतिघोर कठोर देवासुर नाम संग्राम होता भया, जिसके देखने वालों का रोम खडे हो जाँय ॥ ५ ॥

वहां परस्पर में देवता दैत्यदानव अतिक्रोधित होकर खड्ग बाण व नाना प्रकार के आयुधों से मारने लगे ॥ ६ ॥

उस समय में शंख, तुरही, मृदङ्ग, नगाडे, डमरू इत्या दिक नानाप्रकार के बाजाओं का शब्द, और हाथी घोडे रथ पैदल चलने वालों का वो परस्पर मे अनेक प्रकार के वातों का अति घनाघोर शब्द होता भया ॥ ७ ॥

उस रण भूमी में रथ पर चढने वालों से रथी योधा और पैदल चलने वालों से पदाती सब, और घोडों से घोडों को, हाथियों से हाथियों को परस्पर मे युद्ध होने लगा ॥ ८ ॥

शिवाभिराखुभिः केचित्कृकलासैः शशैर्नरैः ।
वस्तैरेके कृष्णसारैर्हंसैरन्ये च सूकरैः ॥ ११ ॥
अन्ये जलस्थलखगैः सत्त्वैर्विकृतविग्रहैः ।
सेनयोरुभयो राजन्! विविशुस्तेऽग्रतोऽग्रतः ॥ १२ ॥
चित्रध्वजपटै राजन्नातपत्रैः सितामलैः ।
महाधनैर्वज्रदण्डैर्व्यजनैर्बार्हचामरैः ॥ १३ ॥
वातोद्धूतोत्तरोष्णीषैरर्चिभिर्वर्मभूषणैः ।
स्फुरद्भिर्विशदैः शस्त्रैः सुतरां सूर्यरश्मिभिः ॥ १४ ॥
देवदानववीराणां ध्वजिन्यौ पाण्डुनन्दन !।
रेजतुर्वीरमालाभिर्यादसामिव सागरौ ॥ १५ ॥
वैरोचनो बलिः सङ्ख्ये सोऽसुराणां चमूपतिः।
यानं वैहायसं नाम कामगं मयनिर्मितम् ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चित्रध्वजपटादिभिश्च वीराणां मालाभिश्च राजिभिर्देवदानववीराणां ध्वजिन्यौ यादसां मालाभिः सागराविव रेजतुरिति त्रयाणामन्वयः । यादोभिरिति वा सितैरमलैरातपत्रैश्च बार्हैश्चामरैश्च व्यजनैश्च ॥ १३ ॥

वातेनोद्धतैरुत्तरीयैरुष्णीषैश्च सूर्यरश्मिभिः सुतरां स्फुरद्भिः ॥ १४—१५ ॥

असुराणां या चमूस्तस्याः पतिः स बलिर्यानमास्थितः ॥ १६ ॥ १७ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

तत्र देवेषु असुरेषु च केचित् केचिद्भटा उष्ट्रादिभिर्वाहनैरभिसंययुरभिदुद्रुवुः गौरमुखैरिति ऋक्षैरित्यस्य विशेषणं रक्तमुखैर्वानरैरित्यर्थः । हरिभिः सिंहैः तिमिङ्गिलैर्मत्स्यविशेषैः गोभिर्धेनुभिः वृषैर्बलीवर्दैश्चात्रैव गोबलीवर्दन्यायः प्रदर्शितः ॥ ९ ॥ १० ॥

शिवाः शृगालविशेषास्ताभिः बस्तैर्मेषैः ॥ ११ ॥

जले स्थले खे आकाशे गच्छन्तीति तथा तैः विकृतविग्रहैः सत्त्वैर्जन्तुभिर्वाहनभूतैरुभयोर्देवासुरसम्बन्धिन्योः सेनयोरग्रतः हे राजन् विविशुः ॥ १२ ॥

हे राजन् ! चित्रध्वजपटैः सितैः शुभ्रैरमलैर्महाधनैरनर्घैः वज्रदण्डैरातपत्रैस्तथा वज्रदण्डैः व्यजनैरनर्घैश्चामरैः ॥ १३ ॥

वातेनोद्धूतैरुत्तरीयैरुष्णीषैर्ध्वनद्भिः कवचैर्भूषणैश्च विशदैः निघर्षणेन निर्मलीकृतैः सूर्यरश्मिभिर्नितरां स्फुरद्भिः शस्त्रैश्च ॥ १४ ॥

वीराणां मालाभिश्च देवासुराणां ध्वजिन्यौ सेने रेजतुः यथा यादसां मालाभिः सागरौ समुद्रौ तद्वत् ॥ १५ ॥

असुराणां या चमूः सेना तस्याः पतिर्वैरोचनो बलिर्वैहायसाख्यं यानं विमानमास्थितः अधिष्ठितः उदये उदयगिरौ स्थितश्चन्द्र इव रेजे यानं विशिनष्टि, कामगं कामं यथेच्छं गच्छतीति तथा मयेन निर्मितम् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तेषामारोहसाधनान्याह-उष्ट्रैरित्यादिना । द्विजैः पक्षिभिः॥९॥
खड्गैर्मृगविशेषैः अरुणैर्वनसत्त्वविशेषैः ॥ १०—१२ ॥
बार्हचामरैः पिच्छविरचितचामरैः ॥ १३—१४ ॥
वीचिमालाभिः यादसां जलजन्तूनां वरूथिनी यथा ॥ १५-१६॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

चित्रध्वजैरिति त्रिकम । व्यजनादिभिः कथम्भूतैः अर्चिभिः कृत्वा स्फुरद्भिः सूर्यरश्मिभिस्तु सुतरां स्फुरद्भिरित्यन्वयः । एवमेवाभिप्रेतं तैरपि पाठस्याऽस्य दुर्गमत्वादेव पाठान्तराणि कल्पितानि लक्ष्यन्ते परस्परं विगीतानि ॥ १३-१५ ॥

असुराणां या चमूस्तस्याः पतिः स बलिर्यानमास्थितः उदये उदयगिरिशिखरे स्थितश्चन्द्र इव रेजे इति त्रयाणामन्वयः ॥१६-२४॥

सर्वसाङ्ग्रामिकोपेतं सर्वाश्चर्यमयं प्रभो ! ।
अप्रतर्क्यमनिर्देश्यं दृश्यमानमदर्शनम् ॥ १७ ॥
आस्थितस्तद्विमानाग्र्यं सर्वानीकाधिपैर्वृतः ।
वालव्यजनछत्राग्र्यै रेजे चन्द्र इवोदये ॥ १८ ॥
तस्यासन् सर्वतो यानैर्यूथानां पतयोऽसुराः ।
नमुचिः शम्बरो बाणो विप्रचित्तिरयोमुखः ॥ १९ ॥
द्विमूर्द्धा कालनाभोऽथ प्रहेतिर्हेतिरिल्वलः ।
शकुनिर्भूतसन्तापो वज्रदंष्ट्रो विरोचनः ॥ २० ॥
हयग्रीवः शङ्कुशिराः कपिलो मेघदुन्दुभिः ।
तारकश्चक्रदृक् शुम्भो निशुम्भो जम्भ उत्कलः ॥ २१ ॥
अरिष्टोऽरिष्टनेमिश्च मयश्च त्रिपुराधिपः ।
अन्ये पौलोमकालेया निवातकवचादयः ॥ २२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

वस्तैः छागैः ॥ ११ ॥ १२ ॥ १३ ॥

वातेनोद्धूतैरुत्तरीयैरुष्णीषैश्चार्चिभिः अर्चिष्मद्भिः सूर्यस्य रश्मिभिः सुतरां स्फुरद्भिः ॥ १४ ॥

ध्वजिन्यौ सेने यादसां मालाभिः सागराविव ॥ १५-२४ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

चित्रध्वजपटादिभिर्देवदानववीराणां ध्वजिन्यौ रेजतुरिति तृतीयेनान्वयः ॥ १३—१४ ॥

हे वीर ! यादसां मालाभिः सागराविव ॥ १५—२४ ॥

———

भाषा टीका ।

और कितने ही तो ऊटों पर चढ के, कितने हाथियों पर चढकर, और कितने योद्धा गधोंपर चढकर युद्ध करने लगे, और कितने तो गौर मृगों [वानर विशेषों] के ऊपर चढकर, कितने व्याघ्रों के ऊपर कितने सिंहों के ऊपर चढकर लडने लगे ॥ ९ ॥

कितने गृध्रोंपर कितने ही कंकों (गृध्रजाति विशेष) पर, कोई २ बकलाओं पर सिंगरों पर (श्येनभास) कोई कोई मछलियों पर, शरभों पर कोई कोई भैंसों पर कोई गेंडोंपर कोई बिजारों (साढो) पर, कोई २ रोझों के ऊपर चढकर युद्ध करते भये ॥ १० ॥

कोई २ शृगालों पर कोई मूसाओ पर, कोई गिरगिटोंपर कोई खरहों पर, कोई कोई मनुष्यों के ऊपर कोई बकराओं पर कोई काले मृगाओं पर, कोई हंसों पर कोई सूकरो पर चढकर परस्पर में युद्ध करते भये ॥ ११ ॥

हे राजन् ! और कितने योद्धा लोग जल मे भूमी में रहने वाले पक्षी व कुरूप जन्तुओं के ऊपर चढकर दोनों सेनाओं में आगे से आगे युद्ध करने के लिये रण भूमि में खडे होते भये ॥ १२ ॥

हे राजन् ! चित्र विचित्र के ध्वजा पताके वा निर्मल श्वेत छत्र, हीरादि अनेक प्रकार के रत्नों से जटित दण्डा लगा हुआ पंखा और चमर ॥ १३ ॥

और वायु के वेग से कम्पता हुआ डुपट्टा वा पाग जामा मटुका वा प्रकाशमान कवच वो भूषणों से, और सूर्य के किरणाओं के लगने से चमकते हुए शस्त्रों करके ॥ १४ ॥

हे पाण्डु नन्दन ! देव दानव वीरों की दोनो सेना कैसी शोभित होती भई, जैसे अनेक प्रकार के जलजन्तुओं के पंक्तियों से समुद्र शोभित हो ॥ १५ ॥

उस सेना मे असुर के सेनापति विरोचन के पुत्र स्वयं बलि मय का बनाया हुआ मनोगामी वैहायस नामक विमान के ऊपर विराजमान होते भये ॥ १६ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

उदये उदयगिरिशिखरे स्थितश्चन्द्र इव रेज इति त्रयाणामन्वयः ॥ १८—२४ ॥

अलब्धभागाः सोमस्य केवलं क्लेशभागिनः।
सर्वे एते रणमुखे बहुशो निर्जितामराः ॥ २३ ॥
सिंहनादान्विमुञ्चन्तः शङ्खान्दध्मुर्महारवान्।
दृष्ट्वा सपत्नानुत्सिक्तान् बलभित्कुपितो भृशम् ॥ २४ ॥
ऐरावतं दिक्करिणमारूढः शुशुभे स्वराट्।
यथा स्रवत्प्रस्रवणमुदयाद्रिमहर्पतिः ॥ २५ ॥
तस्यासन् सर्वतो देवा नाना वाहध्वजा युधाः।
लोकपालाः सहगणैर्वाय्वग्निवरुणादयः ॥ २६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

स्रवन्ति प्रस्रवणानि यस्मिन्निति मदधारासादृश्यम् ॥ २५ ॥ नाना वाहनादीनि येषां ते देवा असुराश्च मिथो ययुधुः ।२६।२७।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

सर्वैः संग्रामसाधनैरस्त्रशस्त्रादिभिर्युक्तं सर्वेषामप्याश्चर्यकरं महद्विपुलमप्रतर्क्यं विमानान्तरसजातीयत्वेन तर्कितुमप्यशक्यम् अनिर्देश्यमनियतप्रदेशावस्थानत्वेन क्वचिद्देशे नियमेन स्थितमिति निर्देष्टुमशक्यं क्वचिद्दृश्यमानमपि पुनरप्यदर्शनमदृश्यं द्रष्टुमशक्यं तेजस्वित्वाद्विमानस्य श्रेष्ठं यद्यानं तदा स्थित इत्यन्वयः कथम्भूतः सर्वैः सेनाधिपतिभिर्व्यजनच्छत्रचामरग्राहिभिश्च वृतः ॥१७॥ १८ ॥

तस्य बलेः समन्ताद्यूथानां पतयोऽसुराः स्वस्वयानैः सहाऽऽसन् परिवृत्य तस्थुः यूथपतीनेव कांश्चिन्निर्दिशति–नमुचिरिति ॥१९—२२ ॥

त एते सर्वे सोमस्यामृतस्यालब्धो भागो यैः ते केवलं क्लेशमात्रं प्राप्तास्सन्तः पूर्वं रणमुखे बहुशो निर्जिता अमराः यैस्ते ॥२३॥

सिंहनादं विमुञ्चन्तः कुर्वन्तः महान् रवो येषां तान् शङ्खान् दध्मुः ध्वनयामासुः एवम् उद्धतान् शत्रूनसुरान् दृष्ट्वा स्वराट् बलभिदिन्द्रः नितरां कुपितः ॥ २४ ॥

दिक्करिणमैरावतमधिरूढः वियत्याकाशे अवस्थित इतिशेषः। कमिव? स्रवन्ति प्रस्रवणानि यस्मिन् मदधारासादृश्यमनेनाभिप्रेतं तमुदयाद्रिमारूढोऽहर्पतिः सूर्यो यथा तद्वत् ॥ २५ ॥

तस्येन्द्रस्य सर्वतः परितो देवा नानाविधानि आयुधादीनि येषां ते आसन् तं परिवेष्ट्य तस्थुः स्वगणैः सहिता वाय्वादयो लोकपालाः ॥ २६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

साङ्ग्रामिकं युद्धसाधनम् ॥ १७-२२ ॥

सोमस्य अमृतस्य ॥ २३ ॥

उत्सिक्तान् बलगर्वितान् ॥ २४ ॥

स्रवत्प्रस्रवणं च्योतत्प्रस्रावणं च्योतन्मदजलम् अन्यत्र निरन्तरस्यन्दमाननिर्झरम् अहर्पतिः सूर्यः ॥ २५—३६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

स्रवन्ति प्रस्रवणानि यस्मिन्निति मदधारासादृश्यम् ॥२५-२९॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

प्रस्रवणानि दानजलानि निर्झराश्च ॥ २५-२७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

स्रवन्ति स्रवणानि निर्झरा यस्मिन् तमुदयाद्रिमहर्पतिः भास्करो यथा तथा स्रवन्ति प्रस्रवणानि मदजलानि यस्मिन् तमैरावतमारूढः स्वराडिन्द्रः शुशुभे ॥ २५—२७ ॥

भाषा टीका।

यह विमान युद्ध के सम्पूर्ण सामग्रियों से परिपूर्ण सर्व प्रकार से आश्चर्य मय, वो कोई के तर्क मे भी नहीं आसके, कोई अंगुलियों से भी नही बताय सके, और कभी तो देखने मे आवे कभी नही भी देखने में आवे इस प्रकार का मय देखने इसका रचना किया रहा ॥ १७ ॥

ऐसे विमान मे आगे, सब सेनापतियों के सहित छत्र जिनके मस्तक के ऊपर शोभित हो रहा है, चंवर जिनके दोनों बगल में दुर रहा है, ऐसे शोभासहित बलि विराजमान होते भये जैसे पूर्णिमा का चन्द्रमा उदय काल मे शोभित हो ॥ १८ ॥

तेऽन्योऽन्यमभिसंसृत्य क्षिपन्तो मर्मभिर्मिथः ।
आह्वयन्तो विशन्तोऽग्रे युयुधुर्द्वन्द्वयोधिनः ॥ २७ ॥
युयोध बलिरिन्द्रेण तारकेण गुहोऽस्यत ।
वरुणो हेतिनाऽयुध्यन्मित्रो राजन् ! प्रहेतिना ॥ २८ ॥
यमस्तु कालनाभेन विश्वकर्मा मयेन वै ।
शम्बरो युयुधे त्वष्ट्रा सवित्रा तु विरोचनः ॥ २९ ॥
अपराजितेन नमुचिरश्विनौ वृषपर्वणा ।
सूर्यो बलिसुतैर्देवो बाणज्येष्ठैः शतेन च ॥ ३० ॥
राहुणा च तथा सोमः पुलोम्ना युयुधेऽनिलः ।
निशुम्भशुम्भयोर्देवी भद्रकाली तरस्विनी ॥ ३१ ॥
वृषाकपिस्तु जम्भेन महिषेण विभावसुः ।
इल्वलः सह वातापिर्ब्रह्मपुत्रैररिन्दम ! ॥ ३२ ॥
कामदेवेन दुर्मर्ष उत्कलो मातृभिः सह ।
बृहस्पतिश्चोशनसा नरकेण शनैश्चरः ॥ ३३ ॥
मरुतो निवातकवचैः कालेयैर्वसवोऽमराः ।
विश्वेदेवास्तु पौलोमै रुद्राः क्रोधवशैः सह ॥ ३४ ॥
त एवमाजावसुराः सुरेन्द्रा द्वन्द्वेन संहत्य च युध्यमानाः ।
अन्योऽन्यमासाद्य निजघ्नुरोजसा जिगीषवस्तीक्ष्णशरासितोमरैः ॥ ३५ ॥

भाषा टीका

बलि के आस पास चारों ओर में अपने अपने विमानों में असुरन के यूथ पति शूर वीर इकट्ठे होजाते भये, नमुचि, शम्बर, बाण विप्रचिति, अयोमुख, ॥ १९ ॥

द्विमूर्धा, कालनाभ, प्रहेति, हेति, इल्वल, शकुनि, भूतसन्ताप, वज्रदंष्ट्र, विरोचन ॥ २० ॥

और यहग्रीव, शंकुशिरा, कपिल, मेघदुन्दुभि, तारक, चक्रहक्, शुम्भ, निशुम्भ, जम्भ, उत्कल, ॥ २१ ॥

अरिष्ट, अरिष्टनेमि, मय, त्रिपुराधिप, और पौलोम, कालेय, निवातकवचादिक, ॥ २२ ॥

ये सब दैत्य दानव बारम्बार देवों को जीतनेवाले अमृत को नही प्राप्तभये, केवल क्लेशही मात्र इनसबोंके हाथ आया, इससे बहुत क्रोधयुक्त होकर युद्ध की तैयारी से ॥ २३ ॥

शंख को बजाते हुये सिंह के से गर्जने लगे, ऐसे दैत्य दानवों को युद्ध मे उत्साह देखकर इन्द्रको भी बहुत क्रोध उत्पन्न हुआ ॥ २४ ॥

उस समय मद झरते ऐरावत हस्ती के ऊपर बैठेभये इन्द्र कैसे शोभित हुये, जैसे झरना झरते भये उदयाचल के ऊपर सूर्य्य शोभित होंय ॥ २५ ॥

हे राजन ! इन्द्र के आस पास चारों ओर सब देवगण नाना प्रकारके सवारियोंपर बैठकर अनेक प्रकार के हथियारों को धारण कर इकट्ठे होगये और वायु अग्नि वरुणादिक लोकपालभी अपने अपने सेनाओं को लेकर इन्द्र के पास में आयगये ॥ २६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्वंद्वान्येवाऽह–युयोधेति सप्तभिः । अस्यत आह्वयदुध्यत्यर्थः ॥ २८ ॥ २९ ॥

सूर्यो देव एक एव शतेन बलिसुतैः बाणो ज्येष्ठो येषां तैः ॥ ३० ॥

निशुम्भशुंभाभ्यां देवी ॥ ३१ । ३२ । ३३ । ३४ । ३५ । ३६ ॥

**भुशुण्डिभिश्चक्रगदर्ष्टिपट्टिशैः शक्त्युल्मुकैः प्रासपरश्वधैरपि ।
निस्त्रिंशभल्लैः परिघैः समुद्गरैः सभिन्दिपालैश्च शिरांसि चिच्छिदुः ॥ ३६ ॥**

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

अन्योन्यमभिमुखं समीपमागत्य परस्परं क्षिपन्तस्तिरस्कुर्वन्तो नामभिराह्वयन्तो विशन्तश्चाग्रे द्वन्द्वयोधिनो युयुधुः ॥ २७ ॥

द्वन्द्वान्येवाह——युयोधेत्यादिसप्तभिः । बलिर्वैरोचनिरिन्द्रेण सह तारकेण असुरेण गुहः कुमारः अस्यत अयुद्ध्यत इत्यर्थः । हे राजन् ! मित्रः प्रहेतिना अयुद्ध्यत ॥ २८ ॥

विरोचनः बलेः पिता अन्यो वाऽसुरो दैत्यः सूर्यो देव एक एव बलेः सुतैर्बाणज्येष्ठैः बाणो ज्येष्ठो येषां तैः शतसङ्ख्याकैः अयुध्यतेत्यर्थः ॥ ३० ॥

सोमश्चन्द्रः पुलोम्ना दैत्येन अनिलो वायुरयुध्यत निशुम्भशुम्भयोस्ताभ्यां तरस्विनी बलवती भद्रकाली देवी अयुध्यत ॥ ३१ ॥

वातापिसहित इल्वलः ब्रह्मपुत्रैर्मरीच्यादिभिः हे अरिन्दम ॥ ३२ ॥

मातृभिर्ब्राह्म्यादिभिः सह उत्कलोऽसुरः उशनसा शुक्रेण बृहस्पतिः नरकेण असुरेण शनैश्चरः ॥ ३३ ॥

कालेयैः कालकेयैः ॥ ३४ ॥

एवमित्थमाजौ युद्धे त एते सुरासुरश्रेष्ठा द्वन्द्वेन सङ्गीभूय नियुध्यमानाः परस्परं समीपमेत्य जेतुमिच्छवः तीक्ष्णैः शरादिभिः बलेनान्योन्यमाजघ्नुः शिरांसि चिच्छिदुश्च ॥ ३५ ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अपराजितेनेति पञ्चकम् । ब्रह्मपुत्रैः प्रजापतिमुखैः कामदेवेनेति तत् स्थाने देवेन्द्रेण कोऽप्ययं निवेशितः ननु स्वयं कामः तस्य स्कन्दजन्मनः पूर्वमेव भस्मीकृतत्वात् ॥ ३०-३५ ॥

ऋष्टयः रिष्टिः ॥ ३६—४६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अस्यत आस्यत अस्त्राणि चिक्षेप ॥ २८ ॥ २९ ॥
सूर्यो देव एक एव शतेन बलिसुतैः ॥ ३० ॥
निशुम्भशुम्भाभ्यां देवी ॥ ३१ ॥
ब्रह्मपुत्रैर्वसिष्ठाद्यैः ॥ ३२—३५ ॥
भुशुण्ड्यादयो ऽस्त्रविशेषाः ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अस्यत आयुधानि चिक्षेप ॥ २८—२९ ॥

शतेन शतसङ्ख्याकैः बाणो ज्येष्ठो येषां तैर्बलिसुतैः ॥ ३० ॥ निशुम्भशुम्भयोस्ताभ्याम् तरस्विनी बलवती ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥

भाषा टीका ।

वे देव दैत्यगण युद्ध करने के लिये परस्पर में एक दूसरे को अपना नाम सुनाय २ आगे चलकर द्वन्द्व युद्ध करने को पुकारने लगे ॥ २७ ॥

इन्द्र के सङ्ग मे बलि ने युद्ध किया, तारकासुर के सङ्ग स्वामिकार्तिक ने युद्ध किया, वरुणके सङ्ग मे हेती का संग्राम हुआ, और हे राजन! मित्रदेवके साथ प्रहेती का संग्राम होने लगा ॥ २८ ॥

और कालनाभ के साथ यमराज का, विश्वकर्मा के सङ्ग मयदैत्यका, शम्बरासुर के संग त्वष्टाका, सविता के साथ विरोचन ने युद्ध किया ॥ २९ ॥

अपराजित के संग मे नमुचि ने युद्ध किया, दोनों अश्विनीकुमार वृषपर्वा के साथ, राजा बलि के बाणासुरादिक सौ पुत्रों के संग सूर्य ने युद्ध किया ॥ ३० ॥

और राहु के साथ चन्द्रमा, पुलोमाके साथ वायु, और बडी वेग वाली भद्रकाली देवी निशुम्भ और शुम्भ के साथ युद्ध करने लगी ॥ ३१ ॥

और वृषाकपि के साथ जम्भासुर, महिषासुर के सङ्ग विभावसु (अग्नि) इल्वल वातापि के साथ ब्रह्मपुत्रों से ॥ ३२ ॥

कामदेव के साथ दुर्मर्ष, मातृगणों के साथ उत्कल, बृहस्पति के सङ्ग शुक्र, और नरकासुर के संग शनिश्चर ने युद्ध किया ॥ ३३ ॥

और मरुतों ने निवातकवचों के संग, कालेय नामक असुरों ने वसुगणों के साथ, विश्वेदेवगणों ने पौलोम असुरों के संग, और रुद्रगणों ने क्रोधवशों के साथ युद्ध किया ॥ ३४ ॥

हे राजन् ! सब देव व असुर गण परस्पर में जीतने की इच्छा से द्वन्द्वयुद्ध करते भये बाण खड्ग तोमरादि अस्त्र शस्त्रों को उठाय बडे वेग से मारने लगे ॥ ३५ ॥

और भुशुण्डी, चक्र, गदा, ऋष्टि, पट्टिश, शक्ति प्रास, फरसा, खड्ग, भाला, परिघ, मुद्गर, भिन्दपाल, इन आयुध विशेषों से अपने अपने शत्रुओं का शिर काटने लगे ॥ ३६ ॥

गजास्तुरङ्गाः सरथाः पदातयः सारोहवाहा विविधा विखण्डिताः ।
निकृत्तबाहूरुशिरोधराङ्घ्रयश्छिन्नध्वजेष्वासतनुत्रभूषणाः ॥ ३७ ॥
तेषां पदाघातरथाङ्गचूर्णितादायोधनादुल्बण उत्थितस्तदा ।
रेणुर्दिशः खं द्युमणिं च छादयन्न्यवर्ततासृक्स्रुतिभिः परिप्लुतात् ॥ ३८ ॥
शिरोभिरुद्धूतकिरीटकुण्डलैः संरम्भदृग्भिः परिदष्टदच्छदैः ।
महाभुजैः साभरणैः सहायुधैः सा प्रास्तृता भूः करभोरुभिर्बभौ ॥ ३९ ॥

कबन्धास्तत्र चोत्पेतुः पश्यन्तः स्वशिरोऽक्षिभिः ।
उद्यतायुधदोर्दण्डैराधावन्तो भटान्मृधे ॥ ४० ॥
बलिर्महेन्द्रं दशभिस्त्रिभिरैरावतं शरैः ।
चतुर्भिश्चतुरो वाहानेकेनारोहमार्च्छयत् ॥ ४१ ॥
स तानापततः शक्रस्तावद्भिः शीघ्रविक्रमः ।
चिच्छेद निशितैर्भल्लैरसम्प्राप्तान् हसन्निव ॥ ४२ ॥
तस्य कर्मोत्तमं वीक्ष्य दुर्मर्षः शक्तिमाददे ।
तां ज्वलन्तीं महोल्काभां हस्तस्थामच्छिनद्धरिः ॥ ४३ ॥
ततः शूलं ततः प्रासं ततस्तोमरमृष्टयः ।
यद्यच्छस्त्रं समादद्यात्सर्वं तदच्छिनद्विभुः ॥ ४४ ॥
ससर्जाथाऽऽसुरीं मायामन्तर्धानगतोऽसुरः ।
ततः प्रादुरभूच्छैलः सुरानीकोपरि प्रभो ! ॥ ४५ ॥
ततो निपेतुस्तरवो दह्यमाना दवाग्निना ।
शिलाः सटङ्कशिखराश्चूर्णयन्त्यो द्विषद्बलम् ॥ ४६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आरोहन्तीत्यारोहास्तैः सहिता अन्ये च वाहाः पूर्वं तु केवलं गजादय उक्ताः कथम्भूताः निकृत्ता बाह्वादयो येषाम् छिन्नानि ध्वजादीनि येषां ते ॥ ३७ ॥

तेषां देवादीनां पदाघातैः रथाङ्गैश्च चूर्णितादायोधनाद्रण-भूमेरुत्थितो रेणुर्दिशः खं द्युमणिं च सूर्यं छादयंस्तदैव खादन्य-वर्तत कथम्भूतात् असृक्स्रुतिभिः रक्तक्षरणैः परिप्लुतात्सिक्तात् यद्वा परिप्लवनाद्धेतोर्न्यवर्तन्त भावे क्तः रक्तधारायां तत्पर्यन्त-मुच्छलनादित्यर्थः । प्रथमान्तपाठे रेणोर्विशेषणम् ॥ ३८ ॥

शिरोभिर्महाभुजैश्च करभसदृशैरूरुभिश्च सा रणभूः प्रकर्षेण आस्तृता सती बभौ कथम्भूतः शिरोभिः उद्धृतान्युत्पतितानि किरीटानि कुण्डलानि च येभ्यस्तैः संरंभयुक्ता दृशो येषु तैः ॥ ३९ ॥

पतितानि यानि स्वशिरांसि तत्रस्थैरक्षिभिस्तैः पश्यन्त इत्यर्थः उद्यतान्यायुधानि यैस्तैर्दोर्दण्डैर्युक्ताः ॥ ४० ॥

वाहानैरावतपादरक्षकान् आरोहं गजयन्तारमार्च्छयद्वि-व्याध ॥ ४१ ॥ ४२ ॥

दुर्मर्षोऽसहनो बलिः ॥ ४३—४५ ॥

टङ्कवत्तीक्ष्णाग्रैः शिखरैः सहिताः ॥ ४६—४८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

गजादयः आरोहन्तीति आरोहास्तैः सहिताः अन्ये च वाहाः नानाविधाः खण्डिता निकृत्ताः नितरां छिन्ना बाह्वादयो येषां छिन्नानि ध्वजादीनि येषां ते बभूवुः तत्र इष्वासो निषङ्गः तनुत्रं कवचम् ॥ ॥ ३७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

तेषां देवादीनां पादाघातै रथाङ्गैश्च चूर्णिताद्रायोधनाद्युद्धभूमेरुत्थितो रेणुरुल्बणो निविडः दिशः खं द्युमणिं सूर्यंश्च छादयन् प्राद न्यवर्त्तत निवृत्तौ हेतुं वदन्नायोधनं विशिनष्टि, असृक्स्रुतिभिः रुधिरप्रस्रवणैः परितः प्लुतात् सिक्तात् ॥ ३८ ॥

सा युद्धभूमिः शिरोभिर्महाभुजैः करभसदृशोरुभिश्च प्रावृता सती बभूव शिरांसि विशिनष्टि, उद्धूतानि उत्क्षिप्तानि किरीटानि येभ्यः संरम्भयुक्ताः दृशो येषु परिदष्टा दच्छदा दन्तच्छदा अधरोष्ठा येषु तैः भुजान् विशिनष्टि, साभरणैः सहायुधैरिति च ॥ ३९ ॥

किञ्च कवन्धा इति, तत्र युद्धे मृधे पतितानि यानि स्वशिरांसि तत्रत्यैः अक्षिभिः पश्यन्तः कवन्धाः शिरोरहितदेहाः उत्पेतुः कथम्भूताः उद्यतानि आयुधानि यैस्तैर्भुजदण्डैर्दोर्दण्डैः सह धावन्तो भटा इवावस्थिताः महामृधे इति पाठान्तरम् ॥ ४० ॥

बलेः पराक्रममाह—बलिरिति। बलिर्दशभिः शरैरिन्द्रं त्रिभिरैरावतं चतुर्भिश्चतुरो वाहानैरावतपादरक्षकानेकेन शरेण आरोहं गजयन्तारमर्दयदपीडयत् ॥ ४१ ॥

स शक्रस्तानापततः शरानसम्प्राप्तानेव तावद्भिर्निशितैर्भल्लैः शरैः प्रहसन्निव शीघ्रविक्रमः धनुर्विद्याकुशलश्चिच्छेद ॥ ४२ ॥

तस्येन्द्रस्य तदुत्तमं धनुःकौशलं कर्म वीक्ष्य दुर्मर्षोऽसहमानो बलिः शक्तिमाददे गृहीतवान् प्रयोगं कर्त्तुमितिशेषः महोल्काया इव भा यस्यास्तां ज्वलन्तीं शक्तिं करस्थामेव हरिरिन्द्रश्चिच्छेद ॥ ४३ ॥

ततो बलिर्यद्यच्छूलादिकं शस्त्रमाददे तत्सर्वं समर्थ इन्द्रश्चिच्छेद ॥ ४४ ॥

अथासुरो बलिः स्वयं तिरोहितः आसुरीं मायां ससर्ज कीदृशीमित्यत्र तामेव दर्शयति—तत इति सार्द्धैः षड्भिः। हे प्रभो! सुरसैन्यस्योपरिष्टात् शैलोद्रिर्मायिकः प्रादुर्बभूव ॥ ४५ ॥

तस्माच्छैलात्तरवो वृक्षा निपेतुः, कथंभूताः? दवाग्निना दह्यमानास्तथा टङ्कवत् तीक्ष्णाग्रैः शिखरैः सहिताः शैलाः द्विषतां देवानां बलं चूर्णयन्तो निपेतुः ॥ ४६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

ज्यया मौर्व्या आसम आसनं यत्तद्धनुः तनुत्रं कवचम् ॥ ३७।३८ ॥
उद्वृत्तं विपर्यस्तं रहितं वा दच्छदैरोष्ठैः सम्प्रास्तृता सञ्छादिता ॥ ३९ ॥
कवन्धाः शिरोरहितदेहाः ॥ ४०-४१-४२ ॥
हरिरिन्द्रः ॥ ४३ ॥
ऋष्टयः ऋष्टीः ॥ ४४—४५ ॥
विटङ्कशिखराः उन्नतशृङ्गाः विस्तृतप्राग्रा वा ॥ ४६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

आरोहन्तीत्यारोहा वाह्याः तैः सहिता वाहा वाहनाः इष्वासो धनुः तनुत्रं कवचम् ॥ ३७ ॥

चूर्णितात् चूर्णीभूतात् योधनात्संग्रामस्थानात् उत्थितो रेणुः न्यवर्तत कीदृशात् असृक्स्रुतिभिः रक्तक्षरणैः परिप्लुतात् सिक्तात् परिप्लुत इति पाठे रेणुविशेषणं तदा च सूर्य्यपर्य्यन्तं रक्तोच्छलनं ज्ञेयम् ॥ ३८ ॥

प्रकर्षेण आस्तृता आच्छादिताः ॥ ३९ ॥

पतितानि यानि स्वशिरांसि तत्रत्यैरक्षिभिः पश्यन्तः ॥ ४० ॥

वाहान् ऐरावतपादरक्षकान् आरोहं गजयन्तारं आर्च्छयत् विव्याध ॥ ४१ ॥ ४२ ॥

दुर्मर्षः प्रसहनो बलिः ॥ ४३—४५ ॥

टंकवत्तीक्ष्णैः शिखरैः सह वर्त्तमानाः ॥ ४६—४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

आरोहन्तीत्यारोहाः वाह्यास्तैः सहिताः वाहाः उष्ट्रादयश्च निकृत्ताः वाह्यादयो येषां ते छिन्नानि ध्वजादीनि येषां ते ॥ ३७ ॥

पदाघातैः रथाङ्गैश्च चूर्णितात् आयोधनात् युद्धस्थानात् उत्थितो रेणुर्दिशः खं द्युमणिञ्च छादयन् न्यवर्त्तत निवृत्तौ हेतुमाह—असृक्स्रुतिभिः क्षतजप्रस्रवणैः परिप्लुतात् परिप्लवनात् भावे क्तः ॥ ३८ ॥

उद्धूतानि उत्पतितानि किरीटानि कुण्डलानि च येभ्यस्तैः संरम्भयुक्ताः दृशो येषु तैः परिदष्टा दच्छदा ओष्ठा येषु तैः शिरोभिः महाभुजैश्च करभतुल्यैरूरुभिश्च प्रकर्षेणास्तृता सती सा भूः बभौ ॥ ३९ ॥

उद्यतायुधैर्दोर्दण्डैर्युक्ताः कवन्धाः पतितानि स्वशिरांसि तत्रत्यैरक्षिभिः पश्यन्तः तत्र मृधे उत्पेतुः ॥ ४० ॥

वाहान् गजपादरक्षकान् आरोहं गजयन्तारम् ॥ ४१—४२ ॥

दुर्मर्षो ऽसहमानः ॥ ४३—४५ ॥

टंकवत्तीक्ष्णाग्रैः शिखरैः सह वर्त्तमानाः ॥ ४६—४८ ॥

भाषा टीका।

हाथी घोड़े रथी, पैदल सवारों के अङ्ग खण्ड खण्ड होजाते भये, उन सबों की भुजायें, जाँघें कन्धे पांव कट गये, और ध्वजा धनुष कवच, भूषणादि छिन्न भिन्न होगये ॥ ३७ ॥

सब देव दैत्य सेनाओं के पगों से और और रथके पहिया के जोरसे रणभूमि में धूर उडकर सब दिशामें व आकाश में छायगया, सूर्य ढकजाते भये, फिर वह धूर रुधिर के गिरने से गीली होकर आकाश में न उडी ॥ ३८ ॥

महोरगाः समुत्पेतुर्दन्दशूकाः सवृश्चिकाः ।
सिंहव्याघ्रवराहाश्च मर्दयन्तो महागजान् ॥ ४७ ॥
यातुधान्यश्च शतशः शूलहस्ता विवाससः ।
छिन्धि भिन्धीति वादिन्यस्तथा रक्षोगणाः प्रभो ! ॥ ४८ ॥
ततो महाघना व्योम्नि गम्भीरपरुषस्वनाः ।
अङ्गारान्मुमुचुर्वातैराहताः स्तनयित्नवः ॥ ४९ ॥
सृष्टो दैत्येन स महान् वह्निः श्वसनसारथिः ।
सांवर्तक इवात्युग्रो विबुधध्वजिनीमधाक् ॥ ५० ॥
ततः समुद्र उद्वेलः सर्वतः प्रत्यदृश्यत ।
प्रचण्डवातैरुद्धूततरङ्गावर्तभीषणः ॥ ५१ ॥
एवं दैत्यैर्महामायैरलक्ष्यगतिभीषणैः ।
सृज्यमानासु मायासु विषेदुः सुरसैनिकाः ॥ ५२ ॥
न तत्प्रतिविधिं यत्र विदुरिन्द्रादयो नृप ! ।
ध्यातः प्रादुरभूत्तत्र भगवान्विश्वभावनः ॥ ५३ ॥
ततः सुपर्णांसकृताङ्घ्रिपल्लवः पिशङ्गवासा नवकञ्जलोचनः ।
अदृश्यताष्टायुधबाहुरुल्लसच्छ्रीकौस्तुभानर्घकिरीटकुण्डलः ॥ ५४ ॥

भाषाटीका ।

और मारे क्रोधके दान्तों से होठों को दबाये हुये व लाल नेत्र व किरीट कुण्डलादिको के संयुक्त कटेहुये मस्तकों से और भूषण व हथियारों के संयुक्त बडे बडे भुजाओं से, व हाथी के शुंडो के समान जाघों से वह युद्ध भूमि ढक जाती भई ॥ ३९ ॥

उस समरभूमि में सबके देखते देखते वीरों को मारने के लिये हाथों में शस्त्रों को लिये हुये मस्तक व नेत्रों से रहित कवन्ध सव दौडने लगे ॥ ४० ॥

तिसके पीछे असुरोंके राजा बलि ने इन्द्र को दशबाण से, व ऐरावत को तीन बाणसे, व ऐरावत के चार रक्षकों को चार बाणों से, और महावत को एक बाण से वेधन करने का विचार से बडे वेग से बाणों को चलाये ॥ ४१ ॥

अपने ऊपर आते हुये देख के इन्द्रने हंसकर पहिलेही तीक्ष्ण भालों से उन सब बाणों को काट दिया ॥ ४२ ॥

इन्द्र का यह प्रशंसनीय कर्म देखकर, इर्षा के मारे राजा बलिने प्रज्वलित अग्नि कीसी प्रकाशित शक्ति उठाई, वह शक्ति जबतक बलि के हाथ से न चली उसके पहिलेही इन्द्र का[ट] दिये ॥ ४३ ॥

इसके अनन्तर शूल, प्रास, तोमर, ऋष्टि, इत्यादिक जो[ ] शस्त्रों को बलिने उठाया उन सबोंको अपनेऊपर आवने [के] पहिले ही इन्द्रने काट डाला ॥ ४४ ॥

हे प्रभो ! तिसके अनन्तर असुराधिपति राजा बलि अपने सब शस्त्रों को निष्फल देखकर अन्तर्ध्यान होगये, और आसुरी मायाकी सृष्टि करने लगे, इतने ही में सबके देखते देखते देवताओं की सेना के ऊपर एक बड़ा भारी पर्वत प्रकट हुवा ॥ ४५ ॥

उस पर्वत में से जलते हुये बडे बडे वृक्ष गिरने लगे और बडे बडे पत्थर, व पेने शिखर शत्रु के सेनाओं को चूर्ण करते हुवे धरती में आय पडे ॥ ४६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्तनयित्नवश्चांगारान्मुमुचुरित्यनुषङ्गः ॥ ४९ ॥
अधाक् आर्षः अधाक्षीदित्यर्थः ॥ ५० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

उद्धूतैस्तरङ्गैरावर्तैश्च भीषणः ॥ ५१ ॥
एवमन्यैश्च दैत्यैः सृज्यमानासु ॥ ५२ ॥
यत्र यदा तत्र तदा तैर्ध्यातः सन् ॥ ५३ ॥
अष्टावायुधयुक्ता बाहवो यस्य श्रीश्च कौस्तुभश्च अनर्घं किरीटं च कुण्डले च उल्लसन्ति श्रीकौस्तुभादीनि यास्मिन् ॥ ५४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

दंशनस्वभावाः वृश्चिकैः सहिता महोरगाश्च समुत्पेतुः सिंहादयो महागजाश्च नर्दयन्तः शब्दयन्तः समुत्पेतुरित्यनुषङ्गः ॥ ४७ ॥
विवाससः नग्नाः शूलहस्ताः शतशः सहस्रशश्च यातुधान्यः विन्धि छिन्धीति वादिन्यः समुत्पेतुः ततो रक्षोगणाश्च ॥ ४८ ॥
हे प्रभो! ततो व्योम्नि गम्भीरः परुषः कठोरश्च स्वनो येषां ते महामेघा वातैराहताः स्तनयित्नवः गर्जन्तः अङ्गारान् मुमुचुः ॥ ४९ ॥
दैत्येन बलिना सृष्टो महान्विपुलः श्वसनसारथिर्वायुसखो वह्निः साम्वर्तकः प्रलयानल इवात्युग्रो विबुधध्वजिनीं देवानां चमूम् अधाक् अदहत् ॥ ५० ॥
ततः सर्वतश्चतुर्दिक्षु समुद्रः प्रत्यदृश्यत देवैरिति शेषः कथम्भूतः? उद्वेलः मर्यादातिगः प्रचण्डैर्मारुतैरुद्धूतैस्तरङ्गैरावर्त्तैश्च भीषणः ॥ ५१ ॥
यथा बलिना एवमन्यैश्च महामायैरलक्ष्यगतिभिर्युद्धे मायासु सृज्यमानासु सतीषु सुरसैनिकाः विषेदुः दुःखिता बभूवुः ॥ ५२ ॥
हे नृप! यत्र यदा इन्द्रादयस्तत्प्रतिविधिं मायाप्रतिक्रियां न विदुस्तदा तैर्ध्यातो भगवान् विश्वभावनः प्रादुरभूत् ॥ ५३ ॥
कथम्भूतः प्रादुर्बभूवेत्यत्राह—तत इति। तत इन्द्रादेर्ध्यानानन्तरं गरुडस्यांसे स्कन्धे कृतौ निहितौ अङ्घ्रिपल्लवौ येन पिशङ्गं वासो वस्त्रं यस्य नवकञ्जे इव लोचने यस्य अष्टावायुधयुक्ता बाहवो यस्य श्रीश्च कौस्तुभश्चानर्घकिरीटं च कुण्डले च उल्लसन्ति श्रीकौस्तुभादीनि यस्मिन्नेवंभूतोऽदृश्यत इति पूर्वेणान्वयः ॥ ५४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

महोरगा अजगराः दन्दशूकाः दंशनशीलाः सर्पाः ॥ ४७-४८ ॥
स्तनयित्नवः सनिर्घाता मेघाः ॥ ४९ ॥
साम्वर्तकः प्रलयाग्निः अधाक् अदहत् ॥ ५० ॥
उद्वेलः तीरमतिक्रान्तः ॥ ५१-५२ ॥
यत्र यदा तदा ध्यातः ॥ ५३—५४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

महोरगा इति युग्मकम् ॥ ४७ ॥ ४८ ॥

स्तनयित्नवः घनविशेषाश्च ॥ ४९-५६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

स्तनयित्नवो गर्जनवन्तः ॥ ४९ ॥
अधाक् अधाक्षीत् ॥ ५०—५४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

स्तनयित्नवः गर्जनवन्तो महामेघाः अङ्गारान् मुमुचुः ॥ ४९ ॥
साम्वर्त्तकः प्रलयानल इवात्युग्रः अधाक् अधाक्षीत् ॥ ५० ॥
सर्वतः सर्वदिक्षु उद्वेलः मर्यादातिगः उद्धूतैस्तरङ्गैः आवर्त्तैश्च भीषणः ॥ ५१ ॥
एवमन्यैश्च दैत्यैः अलक्ष्यगतयश्च ते भीषणाश्च तैः मायासु आसुरीविद्यासु दम्भरूपाखित्यर्थः। "माया दम्भे कृपायां च" इति विश्वः, सृज्यमानासु सतीषु सुरसैनिकाः विषेदुः ॥ ५२ ॥
यत्र यदा तासां मायानां प्रतिविधिं प्रतिक्रियामिन्द्रादयो न विदुः तत्र तदा तैर्ध्यातो भगवान् प्रादुरभूत् ॥ ५३ ॥
पिशङ्गे वाससी वस्त्रे यस्य अष्टावायुधयुक्ता बाहवो यस्य श्रीश्च कौस्तुभश्च अनर्घं किरीटं कुण्डले च उल्लसन्ति अत्रादीनि यस्मिन् ॥ ५४ ॥

भाषा टीका।

फिर पीछे बडे बडे विषधर सर्प, दन्दशूक (सर्पों के भेद) वा अति तीक्ष्ण डंक वाले बीछू और सिंह, व्याघ्र, वराह, ये सब हाथी घोडों का मर्दन करने लगे ॥ ४७ ॥
और हे प्रभो! हाथों में शूलों को लिये भये काटो फाडो ऐसे बोलती हुई नंग धडङ्गी सैकडों राक्षसी उस पर्वत से निकलने लगीं, हे प्रभो! तिसके अनन्तर नाना प्रकार के हथियारों को लिये राक्षसों की सेना निकलपडी ॥ ४८ ॥
तिसके पीछे पवन के जोर से आकाश में अति कठोर गर्जना करते हुए बडे २ बादलों के समूह छाय गये अग्नि के अङ्गारों की वृष्टि होने लगी, ॥ ४९ ॥
फिर दैत्य ने प्रचण्ड अग्नि को अपने माया से प्रकट किया, जो कि वायु के वेग से अति उग्र प्रलयानल की नाईं होकर देव सेनाओं के भस्म करने लगा ॥ ५० ॥
इतने ही में प्रचण्ड पवन के वेग से तरङ्गों को ऊपर को उछालते हुवे चारों दिशा से समुद्र दिखाई देने लगे जिस से सब सेना भयभीत होने लगी ॥ ५१ ॥
इस प्रकार मायावी दैत्यों ने अलक्ष्य होकर जब सबको

तस्मिन्प्रविष्टेऽसुरकूटकर्मजा माया विनेशुर्महिना महीयसः ।
स्वप्नो यथा हि प्रतिबोध आगते हरिस्मृतिः सर्वविपद्विमोक्षणम् ॥ ५५ ॥
दृष्ट्वा मृधे गरुडवाह(१)मिभारिवाह आविध्य शूलमहिनोदथ कालनेमिः ।
तँल्लीलया गरुडमूर्ध्निपतद्गृहीत्वा तेनाहनन्नृप सवाहमरिं त्र्यधीशः ॥ ५६ ॥
मालीसुमाल्यतिबलौ युधि पेततुर्यच्चक्रेण कृत्तशिरसावथ माल्यवांस्तम् ।
आहत्य तिग्मगदयाऽहनदण्डजेन्द्रं तावच्छिरोऽच्छिनदरेर्नदतोऽरिणाद्यः ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां
संहितायां वैयासिक्याम् अष्टमस्कन्धे
देवासुरसंग्रामे दशमोऽध्यायः ॥ १० ॥

भाषा टीका ।

भयंकर माया की सृष्टि किया, तब देवता लोगों की सेना अति विषाद को प्राप्त हुई ॥ ५२ ॥

हे नृप ! इन्द्रादिक सब देवता जब इस माया से मोहित हुवे, और कोई की बुद्धि कुछ काम न दी, तब सब देव गण भगवान् के शरण गये, उसी समय आनादि षड्गुण संयुक्त विश्वभावन भगवान प्रकट हुवे ॥ ५३ ॥

इसके अनन्तर गरुड के कन्धे के ऊपर दोनों श्रीचरण कमल को रखे हुवे, पीताम्बर धारण किये नवीन कमल सदृश नेत्र वाले आठ भुजाओं में आठ आयुधों को धारण किये हुवे, गले में कौस्तुभ वक्षःस्थल में श्री जिनके शोभित होरहीं है, नाना प्रकार के अमूल्य मणियों से जटित मस्तक के ऊपर किरीट व कानों में कुण्डल जिनके चमक रहे हैं इस अद्भुत रूप से भक्त भयहारी श्री भगवान् सबको दर्शन दिये ॥ ५४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

असुराणां कूटकर्म मन्त्रादिप्रयोगस्तस्माज्जाताः महिना महिम्ना हरेः स्मृतिरेव सर्वासां विपदां मोक्षणरूपा किमुत हरेः प्रवेश इत्यर्थः ॥ ५५ ॥

इभारिवाहः सिंहवाहः अहिनोच्चिक्षेप लीलयैव तद्गृहीत्वा अहनदहन् हे नृप ॥ ५६ ॥

यस्य चक्रेण कृत्तशिरसौ पेततुस्तं तथाभूतमप्याहत्य सङ्कटयाण्डजेन्द्रं गरुडमहनत् तं हन्तुं गदामुत्क्षिप्य इत्यर्थः । आद्यो हरिः ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
दशमोऽध्यायः ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततः किमत आह—तस्मिन् भगवति प्रविष्टे आविर्भूते सति असुराणां कूटकर्म मन्त्रादिप्रयोगः तस्माज्जातास्सर्वा मायाः महीयसोऽनेकमायाविनाशकस्य हरेर्भगवतो महिना महिम्नैव विनेशुः विनष्टा बभूवुः यथा प्रतिबोधे आगते जागरे प्राप्ते सति स्वप्नो नश्यति तद्वदित्यर्थः । हि यतः हरेः स्मृतिरेव सर्वासां विपदां विमोक्षणमपहन्त्री, किमुत श्रीभगवत्प्रादुर्भावः आपदमपहरतीति वक्तव्यमिति भावः ॥ ५५ ॥

मृधे युद्धे गरुडवाहं श्रीभगवन्तं दृष्ट्वा इभारिवाहः सिंहवाहनः कालनेमिरसुरः शूलमाविध्य भ्रामयित्वाऽहिनोत् चिक्षेप तस्य गरुडस्य मूर्ध्न्यापतच्छूलं गृहीत्वा हे नृप ! तेनैव शूलेन त्र्यधीशः त्रिलोकेशो भगवान् सवाहम् इभारिवाहनसहितम् अरिं शत्रुं कालनेमिमहनत् हतवानित्यर्थः ॥ ५६ ॥

ततोऽतिबलौ मालिसुमालिनामकौ असुरौ यस्य भगवतश्चक्रेण कृत्तशिरसौ छिन्नशिरसौ युधि पेततुः तत्र मालिनो विक्रमं कथयन् तस्य शिरश्छेदनं श्रीभगवच्चक्रकृतमाह—अथेति । अथ कालनेमिवधानन्तरं माल्यवान् माली तं भगवदधिष्ठितमण्डजेन्द्रं गरुडं तिग्मया गदयाऽऽहत्य सङ्कट्य अहनत्ताडितवान् तावन्नदतोऽरेः माल्यवतः शिरोऽरिणा चक्रेण आद्यो भगवांश्चिच्छेद, अत्र माल्यवच्छब्दो न श्रीरामायणप्रसिद्धमाल्यवद्विषयः अपित्वसुरान्तरपरः ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
दशमोऽध्यायः ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

असुरकूटकर्मजाः असुरकपटकर्मजाताः अत्र कैमुत्यन्यायमाह- हरिस्मृतिरिति । सर्वविपद्विनाशिनी किमुत हरिरितीति ॥ ५५ ॥

(१) मिहारिवाहः इति विज० ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

आहितोद् आहितान् अमुञ्चत् अरीनसुरान् वहतीत्यरिवाहः कुम्भकारशब्दवदणप्रत्ययान्तः अरिः सिंहो वाहो यस्य स तथा इभारिवाह इति पाठे स्पष्टोऽर्थः ॥ ५६ ॥

आहत्य भ्रामयित्वाऽरुडजेन्द्रो गरुड आद्यो हरिररिणा चक्रेण नदतोऽरेः कालनेमेः शिरोऽच्छिनदित्यन्वयः। अच्छिनदिति क्रियापदशक्तेर्द्विवारं कालनेम्यादीन् हतवान्हरिरित्येषोऽर्थोऽभिविज्ञायते "छिदिर् द्वैधीभावे" इति द्वैधीभावश्रवणात् "उशना जीवयामास" इत्युत्तरवाक्याच्च द्विवारं हतिरस्ति—

"कालनेम्यादयः सर्वे हरिणा निहता अपि।

शुक्रेणोज्जीविताः सन्तः पुनस्ते वै निपातिताः"

इति वचनाच्च निश्चितोऽयमर्थ इति ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

दशमोऽध्यायः ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

हरिरिति पाठः सर्वत्र हरेरिति तु टीकायां दृश्यते ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

दशमोऽध्यायः ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

महिना महिम्ना ॥ ५५ ॥

इभारिवाहः सिंहवाहः आविध्य कम्पयित्वा पतदेव शूलं वामहस्तेन गृहीत्वा तेनैवाहनत् अहन् ॥ ५६ ॥

यच्चक्रेण यस्य चक्रेण तं हरिम् आहत्य अरुडजेन्द्रं गरुडम् अहनत् यावत् हन्तुं प्रववृते तावदेव अच्छिनत् आद्यो हरिः ॥ ५७ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।

अष्टमे दशमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

तस्मिन् भगवति प्रविष्टे आविर्भूते असुराणां कूटं कर्म मन्त्राद्दिप्रयोगस्तज्जाः मायाः महीयसो भगवतः महीना महिम्ना विनेशुः हरिस्मृतिरेव सर्वविपद्विमोक्षणं किमु तत्प्रादुर्भाव इत्यर्थः ॥ ५५ ॥

हे नृप! अथानन्तरम् इभारिवाहः सिंहवाहः शूलम् आविध्य भ्रामयित्वा आहिनोत् चिक्षेप गरुडमूर्ध्नि पतदेव शूलं लीलयैव गृहीत्वा तेनैव अहनत् हतवान् ॥ ५६ ॥

यस्य चक्रेण मालिसुमालयतिवलौ युधि कृत्तशिरसौ पेततुः भगवन्तमपि माल्यवान् गदया आहत्य अरुडजेन्द्रं याव-द्दहनत् यावद्धन्तुं गदामुद्यच्छन्ये तावदेव आद्यो विश्वपूर्वचर्तिः हरिः अरेर्माल्यवतः शिरः अरिणा चक्रेण अच्छिनत् ॥ ५७ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

दशमोऽध्यायः ॥ १० ॥

भाषा टीका।

हे राजन्! उस रणभूमी में श्रीहरि के आते ही कपट से रची हुई असुरों की सब माया आप से आप नष्ट होगई जैसे सोवता हुआ पुरुष स्वप्न में नाना प्रकार के विपत्तीयों को देखे और जागने पीछे सब दुख भाग जाय, महा प्रभाव वाले आश्रित दुख भंजक श्रीभगवान की महिमा ही इस प्रकार की है, कि जिनके नाम स्मरण मात्र से सब विपतियां दूर होजावे हैं ॥ ५५ ॥

गरुड के ऊपर विराजमान श्रीभगवान को आये हुए देखकर सिंह के ऊपर बैठा हुआ कालनेमि ने शूल घुमायकर बडे वेग से मारा, गरुड के मस्तक के ऊपर उस शूल को आता हुआ देखकर त्रिलोकी नाथ ने लीला से ही पकड लिया, और उसी शूल को फेक कर वाहन सहित कालनेमि को मार डाले ॥ ५६ ॥

तिसके पीछे अति वलिष्ट दोनों माली वा सुमाली युद्ध भूमी में आयकर भगवान के ऊपर दौडे, आवने के पहिले ही चक्र से उन दोनों का मस्तक काट लिये, इतने ही में माल्यवान बडे वेग से गदा चलाय कर गरुड को मारा, और गर्जना किया, इतने ही में श्रीहरि उस शत्रु का भी चक्र से माथा काट डाले ॥ ५७ ॥

इति श्रीमद्भागवत अष्टम स्कन्ध में, दशम अध्याय की

श्रीवृन्दावनस्थ भागवताचार्य कृत

भाषा टीका समाप्त ॥ १० ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे दशमोऽध्यायः ॥ १० ॥

॥ एकादशोऽध्यायः ॥

श्रीशुक उवाच ।

अथो सुराः प्रत्युपलब्धचेतसः परस्य पुंसः परमानुकम्पया ।
जघ्नुर्भृशं शक्रसमीरणादयस्तांस्तान्रणे यैरभिसंहताः पुरा ॥ १ ॥

वैरोचनाय संरब्धो भगवान्पाकशासनः ।
उदयच्छद्यदा वज्रं प्रजा हा हेति चुक्रुशुः ॥ २ ॥
वज्रपाणिस्तमाहेदं तिरस्कृत्य पुरः स्थितम् ।
मनस्विनं सुसम्पन्नं विचरन्तं महामृधे ॥ ३ ॥
नटवन्मूढ ! मायाभिर्मायेशान्नो जिगीषसि ।
जित्वा बालान्निबद्धाक्षान्नटो हरति तद्धनम् ॥ ४ ॥
आरुरुक्षन्ति मायाभिरुत्सिसृप्सन्ति ये दिवम् ।
तान्दस्यून्विधुनोम्यज्ञान् पूर्वस्माच्च पदादधः ॥ ५ ॥
सोऽहं दुर्मायिनस्तेऽद्य वज्रेण शतपर्वणा ।
शिरो हरिष्ये मन्दात्मन् घटस्व ज्ञातिभिः सह ॥ ६ ॥

वलिरुवाच ।

सङ्ग्रामे वर्तमानानां कालचोदितकर्मणाम् ।
कीर्तिर्जयोऽजयो मृत्युः सर्वेषां स्युरनुक्रमात् ॥ ७ ॥
तदिदं कालरशनं जनाः पश्यन्ति सूरयः ।
न हृष्यन्ति न शोचन्ति तत्र यूयमपण्डिताः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एकादशे तु देवेषु दैत्यघातिषु नारदः ।
देवानवारयच्छुक्रो मृतान्दैत्यानजीवयत् ॥ ० ॥

॥ १ ॥

उदयच्छदुद्गृहीतवान् ॥ २ ॥ ३ ॥

निबद्धान्यक्षीणि येषां तान्बालान्जित्वा नटः कपटवृत्तिर्यथा तेषां धनं हरति तथा हे मूढ ! मायेशानस्मान् जेतुमिच्छसि ॥ ४ ॥

मत्प्रभावं श्रृणिवत्याह–आरुरुक्षन्त्यारोढुमिच्छन्ति ये चोत्सिसृप्सन्त्युल्लङ्घयितुमिच्छन्ति मोक्षमिच्छन्तीत्यर्थः । अधो विधुनोमि पातयामि ॥ ५ ॥ ६ ॥ ७ ॥

कालरशनं कालयन्त्रितम् अतो न हृष्यन्ति तत्र एवं विवे... यूयमपण्डिता अनिपुणाः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथो अथ परमपुरुषस्य परमयोत्कृष्टया कृपया प्रत्युपलब्ध... मासुरीभिः मायाभिरनभिभूतं चेतो येषां ते शक्रवाय्वाद... देवा युद्धे पुरा वा पूर्वं यैर्दैत्यैर्विरोचनादिभिरभिसंहिताः इत्थं सङ्गताः योद्धुमिति शेषः तान् भृशं जघ्नुः ॥ १ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

तदेव प्रपञ्चयति—वैरोचनायेति। भगवान् पाकशासनः इन्द्रः सुसंरब्धः नितरां क्रुद्धः वैरोचनाय बलये यदा वज्रमुदयच्छदूर्ध्वं हन्तुमुद्धृतवान् तदा प्रजाः हाहाकारं कुर्वत्यश्चुक्रुशुः रुरुदुः॥ २॥

वज्रं पाणौ यस्य स इन्द्रः महायुद्धे विचरन्तं सुसंरब्धं मनस्विनं युयुत्सुं पुरतः स्थितं वैरोचनिं तिरस्कुर्वन्निदं वक्ष्यमाणमाह॥ ३॥

तावत्तिरस्कारप्रकारमाह—नटवदिति द्वाभ्याम्। तत एकेन वच आह—सोऽहमिति। हे मूढ! मायेशानोऽस्मान्नटवत् मायाभिर्जेतुमिच्छसि दृष्टान्तमेवोपपादयति—जित्वेति। निबद्धानि अक्षीणि येषां तान् बालानक्षान् जित्वा नटः कपटवृत्तिर्यथा तेषां धनमपहरति तथा॥४॥

मत्प्रभावं स्थापयति वदंस्तिरस्करोति—हे मूढ अज्ञ! पूर्वस्मात्पूर्वलक्ष्यात् अधोऽधस्तनात् पदात्स्थानात् ये आरुरुक्षन्ति आरोढुमिच्छन्ति उत्तरोत्तरं लोकमारोढुमिच्छन्ति असुरा ये च मायाभिर्दिवं स्वर्गम् उत्सिसृप्सन्ति उत्सर्पितुमिच्छन्ति तान् दस्युप्रायान् दुष्टजन्तुतुल्यान् अधुना विधुनोमि हन्मि॥ ५॥

दुर्मायिनस्तव शिरः सोऽहं शतं पर्वाणि यस्य तेन वज्रेण आयुधेन, हरिष्ये हे मन्दात्मन्! ज्ञातिभिः सह घटस्व यथाबलं विक्रमस्व॥ ६॥

इत्थं तिरस्कृत उक्तश्चाह बलिः—संग्राम इति त्रिभिः। कालेन चोदितानि सुखदुःखजयापजयादिफलदानाय प्रवर्तितानि कर्माणि येषां तेषां संग्रामे युद्धे वर्त्तमानानां कीर्त्यादयः सर्वेषामनुक्रमात् कीर्त्यादिनिमित्तकर्मपरिपाकानुक्रमात् स्युरेव भवतामपि न सर्वदा कीर्त्यादयो बभूवुः किन्तु तत्तन्निमित्तकर्मपरिपाकदशायामेवेत्यस्माकमपि तथैवेति भावः॥ ७॥

तमिममनुक्रमेण कीर्त्यादिमन्तं जनं कालरशनं कालयन्त्रितं कालोन्मिषितकर्मफलभोक्तारं सूरयः पण्डिताः पश्यन्त्यतस्ते कीर्त्तिजयमृत्युषु न हृष्यन्ति तद्विपरीतेषु न शोचन्ति च तत्रैवंविधे विवेके यूयमपण्डिताः अनिपुणाः॥ ८॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

देवासुरयुद्धमुपक्रम्य हरिणा चक्रेण कालनेमेः शिरोच्छिन्नमित्युपसंहृतम्. तत्रामरा मृता उत पलायिताः? विनष्टमरणधर्माणां तेषां विनाशायोगात्पलायनमेव ग्राह्यं भगवतानुगृहीतवतानां तदप्ययुक्तम् अतस्तैः किमकारीति तत्राह—अथेति, अनेन हरेरनुग्रहेणैव जयोऽन्यथा पराजय इत्ययमर्थः स्पष्टित इति ध्वनयति॥ १॥

तत्र बलिवासवयोः प्रसक्तं युद्धं किमभूदत्राह, वैरोचनायेति॥ २॥

तत्र शत्रुं प्रहरिष्यता योधेन स्वपौरुषं प्रकाश्य प्रहर्त्तव्यमिति न्यायमनुसन्दधानो वज्रमुद्धृत्य वज्रपाणिस्तं चक्रि—वज्रपाणिरिति॥ ३॥

स्वपौरुषप्रकटनमपि परनिभटनिन्दापूर्वकमित्यतस्तं निन्दति, जित्वेति। कश्चित्खलु इन्द्रजालादिना निबद्धाक्षान् बालान् जित्वा नभ आकाशङ्काच्छाद्य तेषां धनं यथा हरति तथा ये मायाभिः कपटमिश्रयत्नैः दिवं परलोकमारुरुक्षन्ति ततोऽप्युत्सिसृप्सन्ति ऊर्ध्वं गन्तुमिच्छन्ति अहं तान् दस्यून् पूर्वस्माच्चक्रवर्तिपदादधो विधुनोमि चशब्दात्तनस्ततो विधूयाऽधो निक्षिपामि कदाप्यूर्ध्वदर्शनरहितान् करोमीत्यर्थः। यत्र नार्थपचयवमुपचयवञ्च्छितं इत्यत्र यथोपमा लुप्ता तथा ऽत्रापि " मायाभिस्तूत्सिसृप्सन्तमिन्द्राद्यामारुरुक्षतः अवदस्यून् रघूनुषाः" इत्युक्तं प्रमाणयति॥४—७॥

रशनं रज्जुः॥ ८॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

१—३॥

हे मूढ! मायेशानस्त्वस्मान् नटतुल्योपि नटयोग्याभिर्मायाभिः किं जिगीषसीत्यर्थः। नटस्तु तावानबद्धाचान् स्वमायया ऽऽवृतनेत्रान् बालान् तद्विद्यामिथ्यात्वदर्शकविद्याऽनभिज्ञानेव जिगीषति नतु मायेशानिति, ततो मूढ इति भावः॥ ४।

उत्सिसृप्सन्तीत्यत्र मायाभिर्योगबलैः न तु भगवदाश्रयेणेति ज्ञेयम्॥ ५॥

घटस्व युद्धाय युज्यस्व॥ ६॥ ७॥

काल एव रशना रज्जुर्यस्य तत्॥ ८॥ ६॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

एकादशे सकोपोक्तिरिन्द्रो जम्भादिकानहन्॥
नारदोक्त्या युद्धभङ्गं शुक्रो दैत्यानजीवयत्॥ ०॥

॥ १-३॥

नटवदिति स्वोक्तिं विवृणोति—नटो हि बालान् निबद्धाक्षान् कृत्वा कपटेन जित्वा तद्धनं हरति तथैव किमस्मान् जिगीषसि?॥ ४॥

उत्सिसृप्सन्ति दिवमप्युल्लङ्घयितुमिच्छन्ति महर्लोकादिष्वप्यधिकर्तुमिच्छन्तीत्यर्थः। पूर्वस्मात् रसातलादप्यधः पातयामि॥ ५—६॥

जयात् कीर्त्तिरजयान्मृत्युरित्यर्थः॥ ७॥

कालरशनां कालयन्त्रितं पश्यन्त्येव नतु हर्षशोकादिकं प्राप्नुवन्ति॥ ८॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

एकादशे पराजितानप्यसुरान् हन्तुं प्रवृत्तान् सुरान् ब्रह्मप्रेषितो नारदो निवारितवानित्याद्युच्यते॥ १॥

पाकशासनः इन्द्रः संरब्धः क्रुद्धः वज्रमुदयच्छत् उज्जिग्ये॥२।३॥

रे मूढ! नोऽस्मान् नट इव मायाभिः परव्यामोहजनकाभिरासुरीविद्याभिः जेतुमिच्छसि? नटवदित्युक्तिं विवृणोति—नटो व्यामोहजनकविद्यावृत्तिः बालान् तद्विद्याहीनान् निबद्धान्यक्षीणि येषां तान् जित्वा तेषां धनं हरति॥ ४॥

मायाभिः आसुरीविद्याभिः न तु तपोव्रतयज्ञादिभिः दिवमारुरुक्षन्ति उत्सिसृप्सन्ति दिवमप्युल्लङ्घयितुमिच्छन्ति तान्

न वयं मन्यमानानामात्मानं तत्र साधनम् ।
गिरो वः साधुशोच्यानां गृह्णीमो मर्मताडनाः ॥ ९ ॥

श्रीशुक उवाच ।

इत्याक्षिप्य विभुं वीरो नाराचैः[1] वीरमर्दनः ।
आकर्णपूर्णैरहनदाक्षेपैराहतं पुनः ॥ १० ॥
एवं निराकृतो देवो वैरिणा तथ्यवादिना ।
नामृष्यत्तदधिक्षेपं तोत्राहत इव द्विपः ॥ ११ ॥
[2]प्राहरत्कुलिशं तस्मा अमोघं [3]परमर्दनः ।
सयानो[4]न्यपतद्भूमौ छिन्नपक्ष इवाचलः ॥ १२ ॥
सखायं पतितं दृष्ट्वा जम्भो बलिसखः सुहृत् ।
अभ्ययात्सौहृदं सख्युर्हतस्यापि समाचरन् ॥ १३ ॥
स सिंहवाह आसाद्य गदामुद्यम्य रंहसा ।
जत्रावताडयच्छक्रं गजं च सुमहाबलः ॥ १४ ॥
गदाप्रहारव्यथितो भृशं विह्वलितो गजः ।
जानुभ्यां धरणीं स्पृष्ट्वा कश्मलं परमं ययौ ॥ १५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

दस्यून् दुर्वृत्तान् पूर्वस्मात्तद्वासस्थानात् अपि अधो विधुनोमि पातयामि ॥ ५ ॥

किञ्चाद्य ते शिरो हरिष्ये वटस्व विक्रमस्व ॥ ६ ॥ ७ ॥

इदं विश्वं कालरशनं कालशक्तिपरमेश्वरायत्तम् अतस्ते न हृष्यन्ति न शोचन्ति तत्रोक्तार्थे यूयमपण्डिताः ॥ ८ ॥

भाषा टीका ।

श्रीरुक्मिणीप्राणजीवनो जयति ।

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि—हे राजन् ! इसके अनुचर सब देवता लोग परम पुरुष श्रीहरि के परम अनुग्रह से असुरों को बडे वेग से मारने लगे, जो कि–असुरों के अस्त्र शस्त्र से पहिले घायल हुए रहे ॥ १ ॥

जब विरोचन के पुत्र बलि के ऊपर इन्द्र ने वज्र उठाया, तब उस समय सम्पूर्ण प्रजाओं ने हा हा कार करी ॥ २ ॥

युद्ध भूमी में निःशंक होकर विचरते हुए मनस्वी राजा बलि को अपने सामने आगे में ही खडा देखकर, बहुत तिरस्कार पूर्वक इन्द्र ने वचन बोला ॥ ३ ॥

हे मूढ ! जैसे नट अपनी कपट विद्या से आंख बांधकर बालकों का सब धन हरलेता है, इसी प्रकार माया के ईश्वर हम लोगों को तू ठगने चाहता है ॥ ४ ॥

जो लोग अपने कपट विद्या से स्वर्ग को प्राप्त करने वा मोक्ष को जाना चाहते हैं, उन चोरों को निज स्थान से भी हम लोग नीचे पटक देते हैं ॥ ५ ॥

हे मन्दात्मन् ! अपने ज्ञातियों के संग तू सावधान होकर खडा रहा, देख शतधार वाला इस वज्र से अभी तेरा माथा काटता हूं ॥ ६ ॥

बलि उवाच ॥

इतना सुनकर बलि बोले, हे मूर्ख ! युद्ध में कालाधीन कर्म वाले पुरुषों को यश, जय, पराजय, वा मृत्यु ये सब भी प्राप्त होता है ७ ॥

इस कारण ज्ञानी लोग सब प्राणियों को काल रूप रस्सी से बँधे हुए देखते हैं, इससे जय होने से हर्षित नहीं होते, और पराजय से शोक को भी प्राप्त नहीं होते, इन सब ज्ञान के विचारों में तुम लोग अपण्डित हो ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्र कीर्तिजयाद्यावात्मानं साधनं मन्यमानानां वो गिरो न गृह्णीमः मर्मसु ताडनं याभिस्ताः ॥ ९ ॥

विभुमिन्द्रम वीरो बलिः ॥ १० ॥

(१) वीरमानदः (२) प्राहिणोत् (३) अरिमर्दनम् (४) नृप तद्भूगौ इति वीर० पाठाः ।

तता रथो मातलिना[1] हरिभिर्दशशतैर्वृतः ।
आनीतो द्विपमुत्सृज्य रथमारुरुहे विभुः ॥ १६ ॥
तस्य तत्पूजयन्कर्म [2] यन्तुर्दानवसत्तमः ।
शूलेन ज्वलता तं तु स्मयमानोऽहनन्मृधे ॥ १७ ॥
सेहे रुजं सुदुर्मर्षां सत्त्वमालम्ब्य मातलिः ।
इन्द्रो जम्भस्य सङ्क्रुद्धो वज्रेणापाहरच्छिरः ॥ १८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तोत्रमङ्कुशस्तेनाहत इव ॥ ११ ॥
सयानो विमानसहितः ॥ १२—१८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्र कीर्त्यादावात्मानं देहं साधनसाधकं मन्यमानानामत एव साधुभिः शोच्यानाम् अहो अज्ञा एते इत्येवं शोच्यानां वो युष्माकं मर्मताडनाः मर्मसु ताडनं याभिस्ताः गिरो वयं न गृह्णीमो न साधु मन्यामहे ॥ ९ ॥

इत्थं विभुमिन्द्रमाक्षिप्य अधिक्षिप्य वीराणां मानदो वीरो वैरोचनिराक्षेपैरधिक्षेपवाक्यैराहतं पुनराकर्णान्तमाकृष्टैः नाराचैराहनत् ॥ १० ॥

यथार्थवादिना वैरिणा बलिनैवं निराकृतः तिरस्कृतो देव इन्द्रस्तेन बलिना कृतमधिक्षेपं नामृष्यन्नासहत तोत्रमङ्कुशं तेन आहतो द्विपः गज इव ॥ ११ ॥

किन्तु तस्मै वज्रये अमोघमप्रतिहतमरीणां मर्दनं घातकं वज्रं कुलिशं प्राहरत् प्रायुङ्क्त हे नृप ! तस्मात्कुलिशप्रहाराच्छिन्नपक्षः पर्वत इव सविमानो भूमौ न्यपप्तदिति शेषः । शयानो न्यपतद्भूमाविति पाठान्तरे न शेषः । शयानो नृपेति पाठे तु शयानोऽभूदित्यर्थः । बलेः सखा सुहृच्च जम्भोऽसुरः सखायं बलिं भूमौ पतितं दृष्ट्वा हतस्यापि सख्युर्बलेः सुहृदं भावप्रधानो निर्देशः सौहार्दमाचरन्नभ्ययात् इन्द्रस्याभिमुखमगादित्यर्थः ॥ १२ ॥ १३ ॥

सिंहो वाहनं यस्य स महाबलो जम्भः समीपमागत्य रंहसा बलेन वेगेन वा गदामुद्यम्य शत्रुम् इन्द्रं जत्रौ कण्ठस्य मूलदेशे अताडयत् तथा गजञ्चाताडयत् ॥ १४ ॥

भृशं गदाप्रहारेण व्यथितः अतएव विह्वलितो गज ऐरावतो जानुभ्यामवनीं स्पृष्ट्वा परं दुःखं लेभे ॥ १५ ॥

ततो गजस्य दुःखं दृष्टवता मातलिना हरिद्भिर्दशशतैः सहस्रसंख्याकैरश्वैर्युक्तो रथ आनीतस्तमानीतं रथं विभुरिन्द्रो गजमैरावतमुत्सृज्य आरुरुहे आरूढवान् ॥ १६ ॥

तस्य यन्तुर्मातलेस्तत्कर्म रथानयनरूपं कर्मपूजयन् अहो एवं विधेन सारथिना भवितव्यमित्येवं बहुमानयन् ज्वलता प्रकाशमानेन शूलेन तं मातलिं स्मयमानो युद्धे अहनत् ॥ १७ ॥

सत्त्वं धैर्यमवलम्ब्य मातलिर्दुस्सहामपि रुजं शूलघातजां व्यथां सेहे असहत ततः संक्रुद्ध इन्द्रो वज्रेण जम्भस्य शिरोऽपाहरत् चिच्छेद ॥ १८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तत्र जयादौ आत्मानं स्वं कारणं मन्यमानानां वो गिरः साधिवति न गृह्णीमः मर्मण्येव ताडनं यासां तास्तथोक्ताः॥९—२१॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

आकर्णपूर्णैः कर्णपर्यन्तपूर्णतयाकृष्टैः ॥ १० ॥

निराकृतो नाराचैः पराहतः तदधिक्षेपं नाराचप्रयोगानन्तरं पुनरधिक्षेपं "तोत्रं वैणुकम्" इत्यमरः ॥ ११—१४ ॥

स्पृष्ट्वा कश्मलञ्च परं ययाविति पाठो बहुसम्मतः शलाका लब्धश्च ॥ १५—२२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तत्र कीर्त्तिजयादौ आत्मानं स्वं साधनम् अहङ्कारमौढ्यादेवेति भावः । साधुभिर्जीवन्तोऽपि यथा यूयं शोच्य एव तथा वयं मृता अपि न शोच्यामहे इति भावः ॥ ९-१५ ॥

हरिभिरश्वैः ॥ १६—२० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तत्र कीर्त्यादौ आत्मानं स्वं साधनं मन्यमानानां साधुभिः अहो एते कीर्त्यादौ आत्मानं साधनं मन्यन्त इत्येवं शोच्यानां वो गिरो मर्मसु ताडनं याभिस्ता न गृह्णीमः ॥ ९ ॥

विभुं विपुलप्रभावमिन्द्रम् वीरो बलिः ॥ १० ॥

तोत्रणाङ्कुशेनाहतः ॥ ११-१६ ॥

यन्तुः सारथेस्तद्रथानयनं कर्म दानवसत्तमो जम्भः ॥ १७ ॥
॥ १८ ॥

भाषा टीका ।

यद्यपि तुम हृदयको दुखाने वाला बातें बोले, तथापि, तुम्हारे

(१) हरिद्भिर्दशशतैरिति विज० (२) शत्रोः इति वीर०॥

जम्भं श्रुत्वा हतं तस्य ज्ञातयो नारदादृषेः ।
नमुचि(२)श्च बलः पाकस्तत्रोपेयुस्त्वरान्विताः ॥ १९ ॥
वचोभिः परुषैरिन्द्रमर्दयन्तोऽस्य मर्मसु ।
शरैरवाकिरन्मेघा धाराभिरिव पर्वतम् ॥ २० ॥
हरीन् दशशतान्याजौ हर्यश्वस्य बलः शरैः ।
तावद्भिरर्दयामास युगपल्लघुहस्तवान् ॥ २१ ॥
शताभ्यां मातलिं पाको रथं (२)सावयवं पृथक् ।
सकृत्सन्धानमोक्षेण तदद्भुतमभूद्रणे ॥ २२ ॥
नमुचिः पञ्चदशभिः स्वर्णपुङ्खैर्महेषुभिः ।
आहत्य व्यनदत्संख्ये सतोय इव तोयदः ॥ २३ ॥
सर्वतः शरकूटेन शक्रं सरथसारथिम् ।
छादयामासुरसुराः प्रावृट्सूर्यमिवाम्बुदाः ॥ २४ ॥
अलक्षयन्तस्तमतीवविह्वला विचुक्रुशुर्देवगणाः सहानुगाः ।
अनायकाः शत्रुबलेन निर्जिता वणिक्पथा भिन्ननवो यथाऽर्णवे ॥ २५ ॥
ततस्तुराषाडिषु(३)बद्धपञ्जराद्विनिर्गतः साश्वरथध्वजाग्रणीः ।
बभौ दिशः खं पृथिवीं च रोचयन् स्वतेजसा सूर्य इव क्षपात्यये ॥ २६ ॥

भाषा टीका ।

सरीखे शोचनीय अज्ञानियों के वातों को हम लोग नहीं ग्रहण करसक्के हैं, क्यों कि-तुमतो जय पराजयादिकों में काल रूप ईश्वर को नहीं जानकर अपने ही को कर्ता समझते हौ ॥ ९ ॥

श्रीशुक उवाच ॥

श्रीशुकदेव जी बोले, कि-हे राजन्! वीरों को मारने वाले राजा बलि इस प्रकार से वातें मारकर, पीछे तीखे २ बडे वेग वाले वाण से इन्द्र को वेधन करने लगे ॥ १० ॥

यद्यपि इस प्रकार यथार्थ कहने वाले अपने शत्रु से इन्द्र अवमानित हुए जैसे अंकुश के लगने से हाथी क्रोधित होय तैसे बलि के वातों को इन्द्र नहीं सह सके ॥ ११ ॥

और शत्रु को नाश करने के इच्छा से अमोघ वज्र बलि के ऊपर फेंके, उस वज्र के लगते ही बलि विमान सहित भूमि में जा पडे जैसे पक्षों के कटने से पर्वत गिर जावे ॥ १२ ॥

उस समय बलि का परम सुहृद मित्र जंभासुर वज्र के लगने से गिरे हुए अपने मित्र के लिये सुहृदपने का आचरण करता हुआ दौड कर आया ॥ १३ ॥

और सिंह के ऊपर बैठ कर बडे वेग से गदा घुमाकर ऐरावत सहित इन्द्र के जत्रु (हसिली) में मारा ॥ १४ ॥

उस समय महाबलिष्ठ जम्भासुर के गदा के प्रहार से ऐरावत बहुत विह्वलित होकर व्यथित होगया, और घुटने से भूमी को टेककर मूर्छित हो गया ॥ १५ ॥

ऐरावत की ऐसी दशा देखकर मातलि ने हजार घोडे लगे हुए जिसमें ऐसा रथ लाया, तब इन्द्र उस हाथी को छोडकर रथ के ऊपर बैठे ॥ १६ ॥

उस समय मातलि के कार्य को सबने प्रसन्न किया परञ्च जम्भासुरने संग्राम में हसते २ जलते हुए त्रिशूल को मातली के ऊपर चलाया ॥ १७ ॥

मातलि ने भी धीरज धरकर उसकी व्यथा सही, इतने में इन्द्र को क्रोध जो आया सो वज्र से जम्भासुर के माथे को काटकर तडाक पटक दिया ॥ १८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नमुचिर्बलः पाकश्चेति त्रय आजग्मुः ॥ १९ ॥ २० ॥
त्रयाणां पृथग्विक्रमानाह–हरीनिति त्रिभिः । हर्यश्वस्येन्द्रस्य तावद्भिर्दशभिः शतैः ॥ २१ ॥ २२ ॥
आहत्येन्द्रं विद्ध्वा ॥ २३ ॥

(१) सबलइति चक्रवर्ति (२ च तिलकः (३) पुङ्ख इति वीर०

निरीक्ष्य पृतनां देवः परैरभ्यर्दितां रणे ।
उदयच्छद्रिपुं हन्तुं वज्रं वज्रधरो रुषा ॥ २७ ॥
स तेनैवाष्टधारेण शिरसी बलपाकयोः ।
ज्ञातीनां पश्यतां राजन् जहार जनयन्भयम् ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रावृट्कालीनं सूर्यम् ॥ २४ ॥

वणिक्पथा वणिजः भिन्ना नौर्येषां ते भिन्ननाव इत्यर्थः । तुराषाडिन्द्रः अश्वादिसहितो विनिर्गतः अग्रणीः सारथिः ॥२६-२८॥

———

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

तस्य जम्भस्य ज्ञातयो नमुचिबलपाकाख्यास्त्रयो नारदाद्देर्जम्भं हतं श्रुत्वा त्वरयाऽन्विताः तत्र युद्धदेशे उपेयुराजग्मुः ॥ १९ ॥

ते परुषैर्वचोभिरिन्द्रमर्दयन्तस्ताडयन्तस्तिरस्कुर्वन्तः अस्येन्द्रस्य मर्मसु स्थानेषु मेघा जलधाराभिः पर्वतमिव शरैरवाकिरन् ॥ २० ॥

बलपाकनमुचीनां त्रयाणां विक्रमान् क्रमेणैकेकेनाह—हरिमिति । बलोऽसुर आजौ संग्रामे हर्यश्वस्येन्द्रस्य दशशतानि अश्वानामितिशेषः । हरिमिन्द्रञ्च तावद्भिरेकाधिकदशशतैः शरैर्युगपत् अर्दयामास तताड यतः असौ बलो लघुहस्तवान् शरसन्धानोपयुक्तकौशलाख्यलाघवयुक्तहस्तवान् इत्यर्थः ॥ २१ ॥

पाकोऽसुरः शताभ्यां शराणामिति शेषः । मातलिं रथञ्च पृथक् पृथगवयवशश्च युगपदेव शरसन्धानतन्मोचणयोगेन रणे अर्दयामासेत्यनुषङ्गः तत्सकृत्सन्धानमोचणं पृथगवयवशोऽर्दनात्मकं च कर्माऽद्भुतमभवत् ॥ २२ ॥

नमुचिस्तु स्वर्णमयाः पुंखाः मूलप्रान्तदेशाः येषां तैः पञ्चदशभिर्महद्भिरिपुभिरिन्द्रमाहत्य प्रताड्य सजलो मेघ इव स्वयं संख्ये युद्धे व्यनदद्ध्वान ॥ २३ ॥

ततः सर्वेऽसुराः प्रावृट्कालिकं सूर्यं मेघा इव रथसारथियुक्तम् इन्द्रं सर्वतः शरवर्षेण छादयामासुः ॥ २४ ॥

तदा तमिन्द्रमलक्षयन्तोऽपश्यन्तः सहानुगाः सर्वे देवगणाः अतीव विह्वलितचित्ता अनायका विचुक्रुशुः यथा महार्णवे भिन्ना नौर्येषां ते दीर्घाभाव आर्षः अत एव विसर्जिता वणिक्पथाः वाणिज्यवृत्तयः क्रोशन्ति तद्वत् ॥ २५ ॥

ततस्तुराषाडिन्द्रः बाणपुंखानां पञ्जरात् साश्वरथध्वजसारथिर्विनिर्गतः चपात्यये निशावसाने सूर्य इव स्वतेजसा दिशः खमाकाशं पृथिवीं च प्रकाशयन् बभौ ॥ २६ ॥

असुराणां शरैरभ्यर्दितां पीडितां स्वसेनां निरीक्ष्य देवो वज्रधरः शक्रो रणे रिपूनसुरान् हन्तुं रुषा वज्रमुदयच्छत् उद्यतवान् ॥ २७ ॥

इन्द्रोऽष्टौ धारा यस्य तेनैव वज्रेणैव बलपाकयोरसुरयोः शिरसी मूर्द्धानौ जहार चिच्छेद, किं कुर्वन् ? हे राजन् ! पश्यतां बलपाकयोः ज्ञातीनां महत् भयं जनयन् ॥ २८ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

शताभ्यां शनद्वयेन सन्धानयुक्तमोक्षेण मौर्व्यां सन्धानं ततो मोचणञ्च सकृद्युगपदिति तत्कर्मकरणमपश्यतामितिशेषः ॥ २२ ॥ ॥ २३ ॥ २४ ॥

भिन्ननवः भिन्ननावः ॥ २५ ॥

तुराषाडिन्द्रः "आखण्डलस्तुराषाट्" इति हलायुधः । २६-३०॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नमुचिरिति शोकाज्जातोऽमर्षोऽसहिष्णुता तस्माज्जाता या रुट् जिघांसा तया युक्तः ॥ २३—२९ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

हर्यश्वस्य इन्द्रस्य पीतवर्णाश्वस्य "हरिर्णो कपिले त्रिषु" इत्यमरः । तावद्भिः दशभिः शतैः शताभ्यामिति मातलिं शतेन रथञ्च शतेनेत्यर्थः ॥ २१—२४ ॥

वणिक्पथा वणिजः भिन्ननवः भिन्ननौकाः ॥ २५ ॥

तुराषाडिन्द्रः अग्रणीः सारथिः ॥ २६-२९ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

उपेतुः आजग्मुः ॥ १९ ॥ २० ॥

हर्यश्वस्येन्द्रस्य हरीन् कपिलवर्णानश्वान् "हरिर्णो कपिले त्रिषु"इत्यमरः । तावद्भिर्दशभिः शतैः ॥ २१ ॥ २२ ॥

आहत्य प्रताड्य ॥ २३ ॥ २४ ॥

भिन्ना नौर्येषां ते वणिक्पथाः वणिजो यथा क्रोशन्ति तद्वद्विचुक्रुशुः ॥ २५ ॥

इषुभिर्बद्धात्पञ्जरात्तुराषाडिन्द्रः अश्वाश्च रथश्च ध्वजश्च अग्रणीः सारथिश्च तैः सहितो विनिर्गतः ॥ २६ ॥ २७ ॥ २८ ॥

———

नमुचिस्तद्वधं दृष्ट्वा शोकामर्षरुषान्वितः ।
जिघांसुरिन्द्रं नृपते ! चकार परमोद्यमम् ॥ २९ ॥
अश्मसारमयं शूलं घण्टावद्धेमभूषणम् ।
प्रगृह्याभ्यद्रवत्क्रुद्धो (१)हतोऽसीति वितर्जयन् ।
* प्राहिणोद्देवराजाय निनदन्मृगराडिव ॥ ३० ॥
तदापतद्गगनतले महाजवं विचिच्छिदे हरिरिषुभिः सहस्रधा ।
तमाहनन्नृप कुलिशेन कन्धरे रुषाऽन्वितस्त्रिदशपतिः शिरो हरन् ॥ ३१ ॥
न तस्य हि त्वचमपि वज्र ऊर्जितो बिभेद यः सुरपतिनौजसेरितः ।
तदद्भुतं परमतिवीर्यवृत्रभित्तिरस्कृतो नमुचिशिरोधरत्वचा ॥ ३२ ॥
तस्मादिन्द्रोऽबिभेच्छत्रोर्वज्रः प्रतिहतो यतः ।
किमिदं दैवयोगेन भूतं लोकविमोहनम् ॥ ३३ ॥
येन मे पूर्वमद्रीणां पक्षच्छेदः प्रजात्यये ।
कृतो निविशतां भारैः पतत्रैः पततां भुवि ॥ ३४ ॥

भाषा टीका ।

नारदजी के मुख से जम्भ के ज्ञाति लोगोंने जम्भका मरना सुन कर, नमुचि, वल, और पाक ये सब लोग बडी जलदी उसी जगह पर आये ॥ १९ ॥

और इन्द्र को बडी कठोर बाणी के प्रहार करते हुए बाणों की वर्षाकरने लगे जैसे मेघ, धारा से पर्वत पर वर्षा करते हैं ॥ २० ॥

वलने इन्द्र के संग्राम में हजार बाणों से हजार घोडाओं को हस्त के लाघव से एक ही वार सवी मार गिराये ॥२१॥

पाकने भी एक वार सन्धान करके जो दो सौ बाण छोडे, सो रथ के तौ टुकडे२ होगये, और कुछ मातलि को भी लगे, यह वात संग्राम में अद्भुत सी हो गई ॥ २२ ॥

नमुचि ने सुवर्ण के पुंख वाले वडे२ पन्द्रह बाण इन्द्र के ऊपर छोडे और रण में ऐसा नाद किया कि जैसे सजल मेघ करें ॥ २३ ॥

चारों तरफ से सारे बाणों की वर्षा से असुरों ने सारथि और रथ सहित इन्द्र को ढांक लिया जैसे वर्षा के सूर्य को मेघ घेर लेवें ॥ २४ ॥

इन्द्र को न देखकर सब देवलोग अनुचरों सहित विह्वल होकर घवडाने लगे, विना स्वामी के होने से शत्रुओं की सैना से पराजित होकर ऐसे दुःखित हुए, कि जैसे समुद्र में नौका टूट जाने पर व्यापारी वनिये लोग दुःखित होते हैं ॥ २५ ॥

इतने में इन्द्र भी उस वँधे हुए बाणों के पिंजरे में से घोडा रथ ध्वजा और सारथि सहित वाहर निकलकर दिशायें पृथिवी और आकाश को प्रकाशित करते हुए शोभा को प्राप्त होते भये, जैसे रात्रि के अनन्तर अपने तेज से सूर्य प्रकाशित होते हैं ॥ २६ ॥

इन्द्र ने शत्रुओं से मर्द्दित अपनी सेना को देखकर बडा क्रोध कर शत्रुओं के मारने को वज्र हाथ में लेकर उठाया ही तो सही ॥ २७ ॥

वस इन्द्र ने उस अष्टधार वाले वज्र से ज्ञातियों के देखते २ वल और पाक इन दोनों के मस्तक काटकर गिराये इस से शत्रुओं को वडा भय उत्पन्न हुआ ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

शोकामर्षाभ्यां युक्तया रुषा क्रोधेनान्वित इन्द्रं हन्तुं परमोद्योगं चकार ॥ २९ ॥

घण्टावद्घण्टाभिर्युक्तम् ॥ ३० ॥ ३१ ॥
अतिवीर्यं वृत्रमभिनदिति तथा ॥ ३२ ॥ ३३ ॥
तथा पतत्रैः पक्षैः ॥ ३४ ॥

(१) नमुचिर्दानवोत्तमः ।　* तदाविद्ध्य महावीर्यो हतोऽसीति विलज्जयन् इति विज० पाठः ।

तपः सारमयं त्वाष्ट्रं वृत्रो येन विपाटितः ।
अन्ये चापि बलोपेताः सर्वास्त्रैरक्षतत्वचः ॥ ३५ ॥
सोऽयं प्रतिहतो वज्रो मया मुक्तोऽसुरेऽल्पके ।
नाहं तदाददे दण्डं ब्रह्मतेजोऽप्यकारणम् ॥ ३६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सारमयं वीर्याधिकं त्वाष्ट्रं तप एव वृत्रः स येन वज्रेण मया विपाटितः ॥ ३५ ॥

दण्डं लगुडतुल्यं कुलिशम् ब्रह्मतेजो दधीचेः सामर्थ्यम् ॥ ३६ ॥ ३७ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

ततो नमुचिस्तयोर्बलपाकयोर्वधं दृष्ट्वा शोकामर्षाभ्यां युक्तया रुषा युक्तः हे नृप ! तं शक्रं हन्तुमिच्छुः परममुद्यमं यत्नं चकार ॥ २९ ॥

उद्यममेवाह–अश्मेति। अश्मसारमयं घण्टावत् लोहमयं घण्टाभिर्युक्तं हेमभूषणं शूलं प्रगृह्य क्रुद्धोऽभ्यद्रवत्ततो हतोऽसीति विसृजन् भ्रामयन् सिंह इव विनदन् देवराजायेन्द्राय प्राहिणोत्प्रायुङ्क्त ॥३०॥

गगनतले महोल्कावदापतत्तच्छूलमिन्द्रः शरैः सहस्रधा विचिच्छिदे चिच्छेद हे नृप ! ततः रुषा युक्तः त्रिदशपतिरिन्द्रः तं नमुचिं कन्धरे कण्ठे शितेन कुलिशेन वज्रेणासमन्ताद्घनन् भिन्दंस्तस्य शिरो हर्तुमारब्धवान् ॥ ३१ ॥

यः सुरपतिनेन्द्रेणौजसा बलेनेरितः प्रयुक्तः ऊर्जितः बलवान् वज्रः सः तस्य नमुचेस्त्वचं चर्मापि न बिभेद भेत्तुं नाशक्नोदित्यर्थः । अतिवीर्यं वृत्रमभिनादिति तथाभूतो वज्रः नमुचेः शिरोधरत्वचा तिरस्कृतः इत्येतत्परमद्भुतमासीदिति शेषः ॥ ३२ ॥

तस्माच्छत्रोर्नमुचेरिन्द्रोऽविभेद्भीतोऽभवत्, कुतः ? यतो वज्रः प्रतिहतो बभूव तस्य भयनिमित्तां चिन्तां दर्शयति ; इदं वज्रप्रतिहतिरित्येतत्किन्दैवयोगेन भूतं जातम् ? किंवा लोकं विमोहयज्जातं लोकमोहनार्थं जातमित्यर्थः ॥ ३३ ॥

अन्यथा क्वाप्यप्रतिहतेन वज्रेण नैवं भवितव्यमित्याह—येनेति । मे मया कर्त्रा येन वज्रेण यच्छब्दस्य सोऽयमित्युपरिष्टात्तच्छब्देनान्वयः पूर्वमद्रीणां पक्षच्छेदः कृतः कथम्भूतानां भारैः पतत्रैः पक्षैर्भुवि पततां प्रजात्यये प्रजानाशने निमित्ते विशतां च ॥ ३४ ॥

किञ्च त्वाष्ट्रं त्वष्टुः सम्बन्धि सारमयं वीर्याधिकं यत्तपः स एव वृत्रः त्वाष्ट्रं तपएव वृत्रः स येन वज्रेण विपाटितः किञ्चान्ये चाधुना बलिजम्भपाकबलादयोऽतिबला अत एव सर्वैः वज्रेतरैरस्त्रैरक्षताः त्वचो येषां ते निपातिताः ॥ ३५ ॥

सोयमेवंविधो वज्रोमया तेनैव मया प्रयुक्तोऽल्पके तुच्छेऽसुरे नमुचौ प्रतिहतो बभूव ब्रह्मतेजः दधीचेः सामर्थ्यरूपमप्यधुना अकारणं निष्कारणं दण्डं लगुडतुल्यं जातं तं वज्रं नाददे न परिगृह्णामि ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हरिरिन्द्रः आकाशतले आपतन्महावेगं शूलमिषुभिः सहस्रधा निचिच्छिदे नितरामच्छिनत् कन्धरे कण्ठे शिरोहरंश्छिदंस्तमहनदित्यन्वयः ॥ ३१ ॥

ततः किमभूत्तत्राह—तत इति । तिरस्कृतो धिक्कृतः ॥ ३२ ॥

भूतग्रहलक्षणम् ॥ ३३ ॥

पतत्रैः पततां भारैः भुवि निविशतामद्रीणाम् ॥ ३४ ॥

तपः सारं अयमिति पदच्छेदः ॥ ३५—३७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

प्राहिणोत् ॥ ३०---३२ ॥

भूतं लोकं विमोहयदित्येव पाठः ॥ ३३ ॥

पतत्रैः पततामुत्पततां भारैर्निर्विशमानानाम् ॥ ३४ ॥ ३५ ॥

नाहमिति । नाददे नादास्ये इत्यर्थः "दद दाने" इत्यस्माल्लटि रूपम् ॥ ३६ ॥ ३७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

घण्टावत् घण्टायुक्तम् ॥ ३० ॥

शिरो हरन् हर्तुम् ॥ ३१ ॥

अतिवीर्यं वृत्रमपि अभिनत् यः सोऽपि वज्रः ॥ ३२ ॥

अविभेत् भीतोऽभूत् लोकविमोहनं लोकं विमोहयतीति च पाठः ॥ ३३ ॥

पतत्रैः पक्षैर्निविशतां निविशमानानां प्रविशतामित्यर्थः । तथा भारैः स्वीयैः भुवि पतताम् ३४ ॥

दण्डं लकुडतुल्यम् ॥ ३५-३९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

शोकेन अमर्षेणाऽसहनेन च युक्तया रुषा क्रोधेन अन्वितः ॥ २९ ॥

घण्टावत् घण्टाभिर्युक्तम् ॥ ३० ॥ ३१ ॥

इति शक्रं विषीदन्तमाह वागशरीरिणी ।
नायं शुष्कैरथो नार्द्रैर्वधमर्हति दानवः ॥ ३७ ॥
मयाऽस्मै यद्वरो दत्तो मृत्युर्नैवार्द्रशुष्कयोः ।
अतोऽन्यश्चिन्तनीयस्ते उपायो मघवन्रिपोः ॥ ३८ ॥
तां दैवीं गिरमाकर्ण्य मघवान्सुसमाहितः ।
ध्यायन्फेनमथापश्यदुपायमुभयात्मकम् ॥ ३९ ॥
न शुष्केण न चार्द्रेण जहार नमुचेः शिरः ।
तं तुष्टुवुर्मुनिगणा माल्यैश्चावाकिरन् विभुम् ॥ ४० ॥
गन्धर्वमुख्यौ जगतुर्विश्वावसुपरावसू ।
देवदुन्दुभयो नेदुर्नर्तक्यो ननृतुर्मुदा ॥ ४१ ॥
अन्येऽप्येवं प्रतिद्वन्द्वान्वाय्वग्निवरुणादयः ।
सूदयामासुरस्त्रौघैर्मृगान्केसरिणो यथा ॥ ४२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अतिवीर्य्यं वृत्रमपि योऽभिनत् तथा भूतोऽपि वज्रः तस्य त्वचं न विभेद ॥ ३२ ॥

अविभेद्भीतोऽभूत् ॥ ३३ ॥

येनेति यच्छब्दस्य सोऽयमिति तच्छब्देनान्वयः । येन वज्रेण मे मया अद्रीणां पक्षभेदः कृतः कथम्भूतानां प्रजात्यये प्रजानाशे निमित्ते भारैः स्वीयैर्भुवि पततां तथा पतत्रैः पक्षैर्निविशतां निर्विशमानानाम् ॥ ३४ ॥

त्वाष्ट्रं त्वष्टुः सम्बन्धि सारमयं वीर्य्याधिकं यत्तपस्तदेव वृत्रः स येन वज्रेण मया विपाटितः ॥ ३५ ॥

अल्पकेऽसुरे मयाऽतिबलवता मुक्तोऽपि प्रतिहतोऽस्ति अतः ब्रह्मतेजः मुनिशक्तिमयवज्ररूपं ब्रह्मसामार्थ्यमकारणं कार्यासाधकं दण्डं यष्टितुल्यं वज्रमहं नाददे न गृह्णामि ॥ ३६ ॥ ३७ ॥

भाषा टीका ।

नमुचिने दोनों का वध देख वडे शोक, अमर्ष, और रोष, युक्त होकर हे राजन् ! इन्द्र के मारने की इच्छा से वडा उद्यम किया ॥ २९ ॥

लोहे का त्रिशूल जिसमें घंटाओं का घन घनाट हो रहा सुवर्ण से विभूषित उस शूल को लेकर, वडे क्रोध कर, "मरा है" ऐसा कह कर इन्द्र के ऊपर चलाया और सिंह सरीका नादकिया ॥ ३० ॥

अपने ऊपर आते हुए वडे वेग वाले उस त्रिशूल को मारे वाणों के हजार टुकडे कर गिरा दिया । हे नृप ! और इन्द्रने वडा क्रुधित होकर उसके कन्धे पर वज्र चलाया ॥ ३१ ॥

जो सुरपति [इन्द्र] ने वज्र चलाया उस वज्र से नमुचि के कन्धे के चर्म पर खरोंट भी नही आई यह वडा ही आश्चर्य हुआ कि जिस वज्र से अतिपराक्रमी वृत्रासुर का भेदन हुआ, उस वज्र को नमुचि के गले की त्वचाने तिरस्कृत करदिया ॥ ३२ ॥

तव तौ उससे इन्द्र को भी डर हुआ क्योंकि, जव वज्र भी प्रतिहत होगया, इन्द्रने विचारा कि यह लोक को मोह करने वाला कौन प्राणी है ॥ ३३ ॥

जव प्रथमें पंखों से उड २ ग्रामों पर वैठ २ कर पर्वत लोग प्रजा का नाश करते रहे तव जिस वज्र से मैंने उन पर्वतों के पंख काटे ॥ ३४ ॥

और तप का सार मय त्वष्टा का पुत्र वृत्रा सुर जिस वज्र से मारा, और भी जो वडे वलिष्ठ लोग, कि जिनकी त्वचा सव अस्त्रों से नही चत हुई वे भी जिस वज्र से नष्ट किये ॥ ३५ ॥

वह यह वज्र मेरा चलाया हुआ अति अल्प असुर पर कुंठित होगया, जव यह दधीचि ऋषि का तेज रूप वज्र निष्फल होगया तौ तव अव मैं दंड को भी नही ग्रहण करता हूं ॥ ३६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आर्द्रशुष्काभ्यां मृत्युर्नैवेति ॥ ३८ ॥ ३९ ॥
उभयात्मकत्वमेवाह—न शुष्केण न चार्द्रेण फेनेन तथा च श्रुतिः "अपां फेनेन नमुचेः शिर इन्द्रो दवर्त्तयत्" इति ॥ ४०—४४ ॥

ब्रह्मणा प्रेषितो देवान्देवर्षिर्नारदो नृप।
वारयामास विबुधान्दृष्ट्वा दानवसंक्षयम् ॥ ४३ ॥

नारद उवाच।

भवद्भिरमृतं प्राप्तं नारायणभुजाश्रयैः।
श्रिया समेधिताः सर्व उपारमत विग्रहात् ॥ ४४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

इति विषीदन्तम इत्थं क्लिश्यन्तमिन्द्रमशरीरिणी परा देवता वागुवाच तदेवाह-नेति सार्द्धेन। अयं दानवः नमुचिः शुष्कैरथो आर्द्रैरपि वधं नार्हति ॥ ३७ ॥

कुतः यतो मयाऽस्मै नमुचये यो वरो दत्तः,कोऽसौ? आर्द्रशुष्काभ्यां मृत्युरस्य नैव भूयादित्येषः। अतो वज्रस्य शुष्कत्वान्न तेनायं हन्यते किन्तु हे मघवन् अस्य रिपोः वधार्थं त्वयाऽन्य एव उपायः चिन्तनीयः ॥ ३८ ॥

इत्येवंभूतां दैवीं गिरं श्रुत्वा मघवा इन्द्रः सुसमाहितो भूत्वा ध्यायन्नार्द्रशुष्कात्मकं वस्तु चिन्तयन् तदुभयात्मकं वस्तु फेनमपश्यत् फेनमुभयात्मकं निश्चितवान् ॥ ३९ ॥

तदेवाह—न शुष्केण न चार्द्रेण किन्तूभयात्मकेन फेनेन तदुपलिप्तेन वज्रेण नमुचेः शिरो जहारेत्यर्थः। तं नमुचेर्हन्तारमिन्द्रं मुनिगणास्तुष्टुवुः माल्यानि पुष्पाणि च अकिरन् ववृषुः ॥ ४० ॥

गन्धर्वश्रेष्ठौ विश्वावसुः परावसुश्च जगतुः गानञ्चक्रतुः देवदुन्दुभयो नेदुर्दध्वनुः नर्तक्यः स्त्रियः मुदा ननृतुः ॥ ४१ ॥

यथेन्द्रस्तथाऽन्येपि वाय्वादयः प्रतिद्वन्द्वानस्त्रौघैः सिंहाः क्षुद्रमृगानिव सूदयामासुर्जघ्नुः ॥ ४२ ॥

एवं देवैर्दानवेषु हन्यमानेषु दानवसंक्षयं दृष्ट्वा यावद्दानवसंक्षयो भविष्यतीत्यालोचितवता ब्रह्मणा चतुर्मुखेन प्रेषितो भगवान्नारदः हे नृप! विबुधर्षभानिन्द्रादीन्निवारयामास ॥ ४३ ॥

नारदकृतनिवारणप्रकारमाह—भवद्भिरिति। नारायणस्य भुज एवाश्रयो येषां तैर्हेतुगर्भमिदं भवद्भिरमृतं लब्धं पीतमिति यावत् तदा श्रिया त्रैलोक्यलक्ष्म्या च सर्वे समेधिताः अतः अधुना विग्रहात्कलहात् उपारमत ॥ ४४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

कुतो नार्हति वधमत्राह—मयेति। कोऽयं वर इति तत्राह, मृत्युरिति ॥ ३८—४४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

फेनं जले दृश्यमानम् उभयात्मकं शुष्कत्वार्द्रत्वाद्विरोधाभावद्वयात्मकं जलविकारत्वात् शुष्कत्वाभावेनानुमितेः रसानुपलम्भादार्द्रत्वाभावेन प्रत्यक्षीकृतेश्च ॥ ३८—४५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

उभयात्मकत्वमाह-नेति। तथा च श्रुतिः "अपां फेनेन नमुचेः शिर इन्द्रोऽदारयत्" इति ॥ ४०—४४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

॥ ३८ ॥ ३९ ॥

न शुष्केण न चार्द्रेण फेनेन स नमुचेः शिरो जहार तथा च श्रुतिः "अपां फेनेन नमुचेः शिर इन्द्रोऽदारयत्" इति ॥ ४० ॥ ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥

भाषा टीका।

इस प्रकार इन्द्र विषाद में रहे इतने में आकाश वाणी हुई कि- "यह दानव न सूखे से मरेगा न गीले से मरेगा" ॥ ३७ ॥

"क्योंकि, हमने इसको वर दिया है, कि शुष्क और आर्द्र से इसकी मृत्यु न होगी। हे मघवन्! इस से अब तुम और उपाय का विचार करो" ॥ ३८ ॥

तब इन्द्र ने उस आकाश वाणी को सुन कर, समाहित होकर ध्यान किया तब ध्यान में यह उपाय आया कि फेन ऐसा है कि जो न सूखा है न गीला है और दोनो प्रकारका भी है ॥३९॥

तब उस फेन से इन्द्र ने नमुचिका शिर काट डाला, और मुनि लोग भी उस समय इन्द्र की स्तुति करने लगे, और इन्द्र के ऊपर पुष्प मालाओं की वर्षा करने लगे ॥ ४० ॥

गंधर्व मुख्य लोग विश्वावसु और परावसु गाने लगे देवता दुंदुभि बजाने लगे आनन्द से नृत्य करने वाली नाचने लगीं ॥४१॥

इसी प्रकार से और भी देव लोग वायु अग्नि वरुण इत्यादिक अपनी २ जोडी के प्रतिद्वंद्वी दैत्यों को अस्त्रों के समुदायों से सूदन करने लगे, जैसे केसरी सिंह लोग मृगों को ॥ ४२ ॥

हे नृप! तब ब्रह्माजी ने देवर्षि श्रीनारदजी को भेज, नारदजी ने दानवों का विनाश देखकर देवताओं को समुझा कर निवारण किया ॥ ४३ ॥

श्रीशुक उवाच ।

संयम्य मन्युसंरम्भं मानयन्तो मुनेर्वचः ।
गीयमाना अनुचरैर्ययुः सर्वे त्रिविष्टपम् ॥ ४५ ॥
ये ऽवशिष्टा रणे तस्मिन्नारदानुमतेन ते ।
बलिं विपन्नमादाय अस्तं गिरिमुपागमन् ॥ ४६ ॥
तत्राविनष्टावयवान् विद्यमानशिरोधरान् ।
उशना जीवयामास सञ्जीविन्या स्वविद्यया ॥ ४७ ॥
बलिश्चोशनसा स्पृष्टः प्रत्यत्पन्नेन्द्रियस्मृतिः ।
पराजितोऽपि नाखिद्यल्लोकतत्त्वविचक्षणः ॥ ४८ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायाम्
वैयासिक्याम् अष्टमस्कन्धे देवासुरसङ्ग्रामे
एकादशोऽध्यायः ॥ ११ ॥

भाषा टीका ।

नारद उवाच ॥

नारदजी बोले, कि–हे देव गण हो ! तुम लोगों ने नारायण की भुजाओं के आश्रय से अमृत पाया, और सब श्री सम्पन्न होगये अब विग्रह (लडाई) से उपराम करो ॥ ४४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अनुचरैरनुगीयमाना इत्यर्थः । उपगीयमानैरनुचरैः सहेति वा ॥ ४५ ॥ ४६ ॥

अविनष्टा अवयवा येषाम् विद्यमानाः शिरोधरा येषां तान् ॥ ४७ ॥

प्रत्यापन्नानि पुनः प्राप्तानीन्द्रियाणि स्मृतिश्च येन सः ॥४८॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवंभूतं मुनेः नारदस्य वचो मानयन्तो देवा मन्युं तत्प्रयुक्तं युद्धोद्योगं चोपसंहृत्य सर्वे इन्द्रादयो देवा अनुचरैरुपगीयमानाः सन्धिरार्षः त्रिविष्टपं स्वर्गलोकं ययुः ॥ ४५ ॥

ततस्तस्मिन् रणे ये हतावशिष्टा दानवा दैत्याश्च ते सर्वे नारदस्यानुज्ञया विपन्नं वज्रप्रहारेण भूमौ शयानं बलिमादायास्ताद्रिं ययुः ॥ ४६ ॥

तत्रास्ताद्रौ उशना भार्गवः अविनष्टा अवयवाः येषां विद्यमाना शिरोधराः येषां तान् असुरान् आत्मनः स्वमस्याभिन्न्या अनेनानितरसाधारणत्वं सूचितं मृतसञ्जीविन्याख्यया विद्यया मन्त्रविद्यया जीवयामसेत्यर्थः ॥ ४७ ॥

बलिश्च उशनसा संस्पृष्टः प्रत्यापन्नानि पुनः प्राप्तानि इन्द्रियाणि स्मृतिश्च येन सः पराजितोपि नादुःखित तत्कुतः ? यतो लोकतत्त्वविचक्षणः लोकानां प्रकृतिसंसृष्टजीवानां यत्तत्त्वं कर्मयत्तज्जयापजयसुखदुःखादिफलभोक्तृत्वरूपं तत्र विचक्षणः तत्परिशीलनिपुणः ॥ ४८ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ते च अनुचरैः सङ्गीयमाना इत्यर्थः । संरम्भं क्रूपोद्रेकम् ॥ ४५—४८ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
एकादशोऽध्यायः ॥ ११ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अस्तमिति । तत्रैव तदानीं तेषां गृहाद सच तत्रत्यानां सुर्यास्तदेशो ज्ञेयः ॥ ४६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

अविनष्टावयवादीनेव जीवयामासेति तेषां मन्त्राणां प्रभावः सूचितः ॥ ४७ ॥ ४८ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

उपगीयमाना अनुचरैरिति सन्धिरार्षः ॥ ४५-४८ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।
एकादशोऽष्टमस्य सङ्गतः सङ्गतः सताम् ॥ ११ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

गीयमाना अनुचरैरिति क्वचित्पाठः उद्गीयमानानुचरैरिति पाठे तु सन्धिरार्षः ॥ ४५ ॥ ४६ ॥ ४७ ॥

प्रत्यापन्ना पुनः प्राप्ता इन्द्रियस्मृतिः बाह्याभ्यन्तरकरणगता संज्ञा येन सः ॥ ४८ ॥

इतिश्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
एकादशो ऽध्यायः ॥ ११ ॥

भाषा टीका।

श्रीशुक उवाच ॥

श्री शुकदेवजी बोले, कि-देवलोग मुनि के वाक्य को मानकर क्रोध को ठंढा कर यश गाने वाले अनुचरों सहित सब स्वर्ग को गये ॥ ४५ ॥

और जो दैत्य लोग रण में बच रहे वे लोग नारदजी की अनुमति से घायल राजा बलि को लेकर अस्ताचल को चले गये ॥ ४६ ॥

वहां पर जिनके अवयव नहीं नष्ट हुए थे और जिन २ के शिर और (अधर कबन्ध विद्यमान थे उन सबों को शुक्राचारी ने अपनी संजीवनी विद्या से जिवा दिया ॥ ४७ ॥

और जब बलि को शुक्राचारी ने स्पर्श किया तब बलि की भी सब इन्द्रियें ठीक होगईं और स्मृति भी आगई। यद्यपि इस युद्ध में बलि का पराजय हुआ तथापि लोक तत्त्व के जानने वाले बलि को कुछ खेद नहीं हुआ ॥ ४८ ॥

इति श्रीमद्भागवत महापुराण अष्टम स्कन्ध में
एकादश अध्याय की भागवताचार्य कृत
भाषा टीका समाप्त ॥ ११ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे एकादशोऽध्यायः ॥ ११ ॥

॥ द्वादशोऽध्यायः ॥

श्रीबादरायणिरुवाच ।

वृषध्वजो निशम्येदं योषिद्रूपेण दानवान् ।
मोहयित्वा सुरगणान् हरिः सोमममपाययत् ॥ १ ॥
वृषमारुह्य गिरिशः सर्वभूतगणैर्वृतः ।
सह देव्या ययौ द्रष्टुं यत्रास्ते मधुसूदनः ॥ २ ॥
सभाजितो भगवता सादरं सोमया भवः ।
सूपविष्ट उवाचेदं प्रतिपूज्य स्मयन्हरिम् ॥ ३ ॥

श्रीमहादेव उवाच ।

देवदेव जगद्व्यापिन् जगदीश जगन्मय ।
सर्वेषामपि भावानां त्वमात्मा हेतुरीश्वरः ॥ ४ ॥
(१) आद्यन्तावस्य यन्मध्यमिदमन्यदहं बहिः ।
यतोऽव्ययस्य नैतानि तत्सत्यं ब्रह्मचिद्भवान् ॥ ५ ॥
तवैव चरणाम्भोजं श्रेयस्कामा निराशिषः ।
विसृज्योभयतः सङ्गं मुनयः समुपासते ॥ ६ ॥
त्वं ब्रह्म पूर्णममृतं विगुणं विशोकमानन्दमात्रमविकारमनन्यदन्यत् ।
विश्वस्य हेतुरुदयस्थितिसंयमानामात्मेश्वरश्च तदपेक्षतयाऽनपेक्षः ॥ ७ ॥
एकस्त्वमेव सदसद्द्वयमद्वयं च स्वर्णं कृताकृतमिवेह न वस्तुभेदः ।
अज्ञानतस्त्वयि जनैर्विहितो विकल्पो यस्माद्गुणैर्व्यतिकरो निरुपाधिकस्य ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्वादशे मोहिनीरूपविभ्रमालोकनोत्सुकम् ।
भवं स मोहयामास हरिःपुनरमान्तयत ॥ १ ॥
अमुह्यन्नसुरा विष्णुमायया न तदद्भुतम् ।
इति वक्तुं महादेवमोहोऽयमुपवर्ण्यते ॥ २ ॥

हरिः सोमपाययदितीदं निशम्य स यत्रास्ते यत्र तद्रूपं द्रष्टुं ययावित्युत्तरेणान्वयः ॥ १ ॥ २ ॥

सोमया उमया सह ॥ ३ ॥

"त्वयि किञ्चिन्न चाश्चर्यं वयन्त्वाश्चार्यमानसाः" इति वक्ष्यन्महादेव स्तुष्टाव हरिमष्टभिः "त्वयि महामायाविनि परमेश्वरे न हि किञ्चि दघटितमिव वयं तु परमकौतूहलेन द्रष्टुमागता इति बहुधा मन्वा धयन् स्तौति—हे देवदेव ! कुतोऽहं देवानां देवः ? इत्यत आह— जगद्व्यापिन् ! तत्कुतः ? हे जगन्मय ! तर्हि किं प्रधानम् न हे ज दीश ! तच्च कुतस्तत्राह—सर्वेषामपि त्वं हेतुरत ईश्वरः आत्मा त्वाञ्च न जडं प्रधानं त्वमित्यर्थः ॥ ४ ॥

ननु, जगन्मयत्वोक्त्या जगत उत्पत्त्यादिनाऽसत्यत्वेन आद्य च ममापि किं तथा त्वं ब्रूषे ? नहि नहीत्याह—आद्यन्तौ म अस्य जगतो यतो ब्रह्मणो भवन्ति यस्य चाऽव्ययस्यैता

(१) विजयध्वजतीर्थ पाठेऽयं श्लोको नास्ति ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

आद्यन्तमध्यानि न सन्ति यस्य ब्रह्म इदङ्कारास्पदं दृश्यमहङ्कारास्पदं उपद्रष्टृ च बाह्याभ्यन्तरं द्रष्टृ च तत्सत्यं च चिद्रूपं च ब्रह्मैव भवानतो न तव विकारादिशङ्केत्यर्थः ॥ ५ ॥

तवैवम्भूतत्वे मुमुक्षूणामाचारः प्रमाणमित्याह—तवैवेति । उभयत इहामुत्र च सङ्गं त्यक्त्वा ॥ ६ ॥

ननु, ब्रह्मैव चेदहं तर्हि सङ्गोदासीनस्य मम चरणाम्भोजोपासनया किं तेषाम्? तत्राह—त्वमिति । ब्रह्मत्वेऽपि त्वं नात्यन्तमुदासीनः किन्तु विश्वस्य प्रपञ्चस्योदयादीनां हेतुस्तदुपाधीनामात्मनां जीवानामीश्वरश्च तत्तत्फलदाता, तर्हि किं राजादिवत्कयाप्यपेक्षया सेवकेभ्यः फलं ददामि ? नहि नहि अनपेक्ष एव त्वम्, तर्हि किमीश्वरत्वेन ? तत्राह—तैरात्मभिस्तत्फलदानार्थमपेक्ष्यत इति तदपेक्षस्तस्य भावस्तदपेक्षता तया; अनपेक्षत्वमेव दर्शयितुं तदीयं ब्रह्मत्वं विशिनष्टि पूर्णममृतं च सुखरूपम् विषयसुखवैलक्षण्यार्थमाह—अविकारं नित्यमानन्दमात्रं च. कुतः ? विशोकम्. तत्कुतः ? विगुणम् किञ्च अनन्यत् न विद्यतेऽन्यदस्मात् ब्रह्मव्यतिरिक्ताभावादपि निरपेक्षस्त्वमित्यर्थः । तर्हि सर्वात्मकत्वे तत्तद्विकारप्रसङ्गो दुर्वारस्तत्राह—अन्यत्सर्वतो व्यतिरिक्तं च कारणत्वात् न ह्येवम्भूतसुखात्मकब्रह्मस्वरूपस्य तवान्यापेक्षात्यतः केवलं भक्तानुग्रहार्थमेव तवैश्वर्यं न स्वार्थमित्यर्थः ॥ ७ ॥

अन्यत्वमनन्यत्वञ्चैकस्य कुतः ? इत्याशंक्य दृष्टान्तेनोपपादयति सदसत्कार्यकारणरूपं द्वयमद्वयं च परमकारणं त्वमेवैकः कृतं कुण्डलादिरूपं द्वयमकृतं च केवलमद्वयं स्वर्णं यथैकमेव तद्वदेवेह त्वयि वस्तुतो भेदो नास्ति, कथं तर्हि भेदप्रतीतिः ? तत्राऽऽह—अज्ञानत इति । कुतः यस्मादिन्द्रियोपाधिकस्यैव तवायं गुणव्यतिकरो भेदो न स्वतः ॥ ८ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

भगवन्मायया दैत्या मुमुहुरिति न विचित्रं यतो रुद्र एव मुमोह इति वक्तुमध्यायः प्रवर्तते—वृषध्वज इति । हरिर्योषिद्रूपेण दानवान्मोहयित्वा सुरगणान् सोमममृतं पाययदितीदं श्रुत्वा वृषध्वजो रुद्रः भवान्या सह वृषमारुह्य सर्वैर्भूतगणैः प्रमथादिभिः परिवृतो यत्र मधुसूदनो वर्तते तत्र योषिद्रूपं द्रष्टुं जगाम ॥ १-२ ॥

सोमयोमया सह सादरं यथा तथा भगवता सभाजितः सत्कृतो भवो रुद्रः सम्यगुपविष्टो हरिं प्रतिपूज्य स्मयन्निदं वक्ष्यमाणमुवाच प्रतिपूजाञ्च स्तुतिः ॥ ३ ॥

तामेवाह—देवदेवेत्यादिभिरष्टाभिः । तत्रासुरसम्मोहनाय धृतं योषिद्रूपं मह्यं दर्शयेति प्रार्थयितुकामो नर्मैव बालानसुरान् वञ्चयितुं मया धृतं कपटपुंश्चलीरूपं द्रष्टुं किमिच्छसीति माप्रत्याचक्षीत्यभिप्रयन् कृत्स्नजगदुदयविभवलयवन्धमोक्षलीलस्य अचिन्त्यविविधविचित्रशक्तेस्तव तद्योषिद्रूपं धर्मप्रतिपक्षजगदुपद्रवकृदसुरमोहनेन तद्विनाशार्थत्वाद्रामकृष्णादिरूपवल्लीलया आत्मीयसङ्कल्पेन धृतं दर्शनीयमेवान्यथा प्रकृतिपुरुषविलक्षणस्य अवाप्तसमस्तकामस्य निरतिशयानन्दमहोदधेस्तवेदं प्राकृतस्येव न घटत इति वक्तुमनितरसाधारणैर्धर्मैः सम्बोधयति—देवदेवेति । हे देवदेव देवानामस्मदादीनामपि देव! हे जगद्व्यापिन्! जगद्व्यापित्वं न वाय्वाकाशादिवत्तेषामपितु प्रशासनेनेत्यभिप्रायेण सम्बोधयति जगदीशेति । हे जगदीश जगत्प्रशासितः! जगच्छब्दः कार्यावस्थचिदचिदात्मकजगत्परः न केवलं जगदीशः अपितु तद्रूपश्चेत्यभिप्रायेण सम्बोधयति—जगन्मयेति । हे जगत्प्रचुर तत्प्रचुरत्वं च तच्छरीरकत्वेनेत्यभिप्रेत्य तत्प्रतिसम्बन्ध्यात्मा त्वमेवेत्याह—सर्वेषामपि चेतनाचेतनात्मकानां भावानां पदार्थानामात्मा त्वमेव आत्मत्वमन्तःप्रविश्य धारकत्वं न केवलमात्मैव अपितु हेतुः कारणभूतः ईश्वरः कारणावस्थचिदचिन्नियन्ता च त्वमेवेत्यर्थः ॥ ४ ॥

एवं कार्यकारणोभयावस्थचिदचिदात्मकत्वोक्तम् तत्र कारणत्वम् , ———————— उपादानत्वरूपं निमित्तत्वरूपञ्चेति द्विविधमभिप्रेतम्. तत्रतावदुपादानत्वमुपपादयन् तत्प्रयुक्तं विकारं परिहरति—आद्यन्ताविति । यत इति “ सार्वविभक्तिकस्तसिः ” ततश्च यतो यस्मिन् येन यदिति लभ्यते अस्य जगत आद्यन्तावादिसृष्टिरुत्पत्तिः यतः सूक्ष्मचिदचिद्विशिष्टात् अस्यान्तो लयो यस्मिन् अस्य मध्यं स्थितिर्येन यच्चेदं विश्वं यच्चान्यज्जगतो विलक्षणमहं प्रत्यगर्थशरीरकं बहिः पराग्र्थशरीरकञ्च यस्याव्ययस्य प्रकृतिपुरुषगतविकाररहितस्य च एतान्याद्यन्तमध्यानि न सन्ति एतेषां शरीरभूतचिदचिद्गतत्वादिति भावः । तदेवंभूतं सत्यं स्वरूपतः स्वभावतश्च विकाररहितं चिन्नित्यासङ्कुचितापरिच्छिन्नज्ञानाश्रयं तदात्मकत्वञ्च ब्रह्म स्वरूपेण गुणैश्च निरतिशयबृहत् भवानेव आद्यन्तावित्यादिना जगत्कारणत्वेनोक्तस्य स्वरूपं विशोध्यते—तत्सत्यं ब्रह्म चिदिति । यथा “सत्यं ज्ञानमनन्तं ब्रह्म” इत्यनेन जगत्कारणत्वादिवाक्योक्तं स्वरूपं विशोध्यते तद्वत् सत्यादिवाक्यार्थोऽत्रानुसन्धेयः सत्यशब्देन सत्यशब्दस्य चिद्ब्रह्मशब्दाभ्यां ज्ञानानन्तपदयोश्चात्र प्रत्यभिज्ञानात् ॥ ५ ॥

“कश्च ध्येयः कारणं तु ध्येयः” इति जगत्कारणत्वसमानियतत्वमुपास्यत्वमनितरसाधारणत्वञ्चाह-तवैवेति । यतो जगत्कारणभूतस्त्वमतस्तवैव चरणाम्भोजं निःश्रेयसकामा मुमुक्षवः उभयतः इहामुत्र च सङ्गं त्यक्त्वा निराशिषः अनन्यप्रयोजनाः मुनयः मननशीलाः भक्तास्त्वत्स्वरूपरूपगुणविभूतिमननशीला इत्यर्थः । समुपासते सम्यग्विघ्नैरनभिभूयमानाः सन्तः उपासते समीपमासते इत्यर्थः ॥ ६ ॥

अथ लीलार्थमेव योषिद्रूपमुपात्तम् अन्यथा प्रकृतिपुरुषविलक्षणस्य प्राकृतवन्न घटत इत्यभिप्रयन् प्रकृतिपुरुषयोरसम्भावितैर्धर्मैर्विशिष्टं वेदान्तवेद्यं जगन्निमित्तकारणं स्तौति—त्वमिति । त्वं ब्रह्मस्वरूपेण गुणैश्च निरतिशयबृहत् ब्रह्मशब्दवाच्यं परमात्मतत्त्वं त्वमेव, किं तद्ब्रह्म ? यत्पूर्णं सर्वव्याप्यमृतं स्वरूपतः स्वभावतश्च विकाररहितं ब्रह्मामृतशब्दाभ्यां सत्यादिवाक्योदितं प्रत्यभिज्ञापितं पूर्णपदेन “तेनेदं पूर्णं पुरुषेण सर्वम् ” इति वाक्योदितम् अत्र पूर्णशब्दः कर्तरि क्तान्तः विगुणं

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्थौल्यादिगुणरहितमनेन "अस्थूलमनण्वह्रस्वम्" इत्याद्यस्थूलादिवाक्योदितं प्रत्यभिज्ञापितं, विशोकमित्यनेन "य एष आत्माऽपहतपाप्मा" इत्यादिदहरवाक्योदितम् आनन्दमात्रमित्यनेन "विज्ञानमानन्दम्" इत्यादिवाक्योदितं मात्रचा दुःखमिश्रभेदव्युदासः अविकारमित्यनेन "निष्क्रियं निष्कलम्" इत्यादिवाक्योदितं निरवद्यत्वप्रत्यभिज्ञानादनन्यत् सर्वशरीरकत्वात्सर्वकारणत्वाच्च सर्वस्मात् प्रकृतिपुरुषात्मकाज्जगतोऽनन्यत्, अनेन "ऐतदात्म्यमिदं सर्वं तत्सत्यं, स आत्मा' अयमात्मा ब्रह्म' तत्त्वमसि' सर्वं खल्विदं ब्रह्म" इत्यादिवाक्यार्थः प्रत्यभिज्ञापितः । अन्यच्छरीराच्छरीरिणोऽभिन्नत्वादन्यत् अनेन "य आत्मनि तिष्ठन्' यः पृथिव्यां तिष्ठन्" इत्यादिश्रुत्यर्थः प्रत्यभिज्ञापितः, विश्वस्योदयस्थितिसंयमानां सृष्टिस्थितिलयानां हेतुरित्यनेन "सदेव सोम्येदमग्र आसीत्' अनेन जीवेनात्मनानुप्रविश्य सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनास्सत्प्रतिष्ठाः" इत्यादिकारणवाक्यार्थः आत्मेश्वर अनन्येश्वरः अनेन "पतिं विश्वस्यात्मेश्वरं" न तत्समश्चाभ्यधिकश्च दृश्यते' स्वे महिम्नि प्रतिष्ठितः" इत्यादिश्रुत्यर्थोऽनुसंहितः यद्वा विश्वस्य चिदचिदात्मकस्यात्मा तदुदयस्थितिसंयमानां व्यापाराणां तदपेक्षतया कर्तृभूतोक्तविधपरमात्मस्वरूपापेक्षतया तदुदयादीनामीश्वरः कर्तृभूतश्चेत्यर्थः । अनेन पूर्वमभिप्रेतं निमित्तकारणत्वमुपपादितं भवति. एवंभूतोपि त्वमनपेक्षः अपेक्षारहितः अनादरः सर्वमिदं कल्याणगुणजातमभ्यात्तोऽनादरः अनेन "सर्वमिदमभ्यात्तोऽवाक्यनादरः" इति श्रुत्यर्थोऽनुसंहितः अवाप्तसमस्तकामत्वेनापेक्षणीयत्वाभावादनादरः अतएवावाक् अजल्पाकः परिपूर्णैश्वर्यत्वात् "ब्रह्मादिस्तम्बपर्यन्तं निखिलं जगत्तृणीकृत्य जोषमासीनः" इति श्रुत्यर्थः प्रत्यभिज्ञापित इत्यर्थः ॥ ७ ॥

अनन्यदन्यदित्युक्तेऽनन्यत्वान्यत्वे उपपादयति—एक इति। सदसत् चिदचिदुभयात्मकं जगत्त्वमेक एव कार्यभूताच्चिदचिदुभयात्मकाज्जगतस्तत्कारणभूतस्त्वमभिन्न एवेत्यर्थः। कार्यकारणयोरभेदादिति भावः। ननु, कार्यकारणाभ्यां सजातीयाभ्यामेव भवितव्यम्, कार्यञ्च जगच्चिदचिदात्मकम् अहन्तु तदुभयविलक्षणत्वेन त्वयैवाभिहित इत्याशङ्कां निराचिकीर्षुर्विशिनष्टि——एकइति । एकः नामरूपविभागानर्हसूक्ष्मचिदचिच्छरीरकत्वेन एकः सदसदात्मकजगद्गतभेदस्य नामरूपविभागप्रयुक्तत्वेन तत्प्रतिसम्बन्ध्येकत्वं तदभावप्रयुक्तमत्रैकशब्दार्थः। एवञ्च सालक्षण्याद् कार्यकारणभावस्तयोरभेदश्चोपपन्न इति भावः। कार्यकारणयोरभेदे दृष्टान्तमाह—अद्वयमिति । कृताकृतं कार्यकारणावस्थं स्वर्णमद्वयमेकमेव तद्वत् इह कार्यकारणयोर्जगद्ब्रह्मणोर्न वस्तुभेदः। न वस्तुभेद इत्यनेन कार्यत्वकारणत्वावस्थयोरवस्था तद्वतोश्च भेदेऽप्यवस्थावतोर्वस्तुनोः कार्यकारणयोरभेदः कारणद्रव्यमेवावस्थान्तरापन्नं कार्यमित्युक्तम् अनेनासत्कार्यवादव्युदासः सूचितः। तमेवोपपादयति त्वयि कार्यकारणरूपे त्वयि विकल्पो भेदः जनैर्वैशेषिकादिभिरज्ञानकल्पितः बुद्धिशब्दान्तरादीनामवस्थाभेदेनाप्युपपत्तेर्वस्तुभेदोऽज्ञानकल्पित इति भावः। यतोऽयं गुणव्यतिकरः गुणपरिणामात्मकः प्रपञ्चः निरुपाधिकस्य प्रकृतिपुरुषाभ्यां निकृष्टस्वरूपस्य तव सम्बन्धी त्वच्छरीरभूतस्ततस्त्वत्स्वरूपं शरीरभूताद्गुणव्यतिकरात् द्वयं भिन्नञ्चेत्यर्थः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भगवज्ज्ञानसाधनभक्तिविधानार्थं देवोत्तमरुद्रादिसम्भाव्यमहिमा वर्ण्यतेऽस्मिन्नध्याये; तत्र विष्णुशिवयोः सम्वादप्रकारं वक्तुमाह—वृषध्वज इति । हरिः सुरगणान् सोममपाययदिति यदिदं निशम्य ॥ १ ॥ २ ॥

सः उमया "मोषामविन्दत्सखासो अग्नि मो अर्केण विबाधे तमांसि सेहमवोयमवथ यूयमिन्द्रश्च मर्त्यः" इत्यादिवत् ॥ ३ ॥

हेतुर्निमित्तकारणम् अदृष्टादिवन्नेत्याह, आत्मेति । न जीव इत्याह—ईश्वर इति ॥ ४ ॥

ईश्वरश्चेच्छिन्नः किं न तस्य ज्ञानन्ध्येयोपास्यमानत्वासम्भवात् अस्य मोक्षार्थिभिस्तथात्वादित्याह तवेति ॥ ५ ॥

उपास्यमानमपि शबलं किं न स्यादिति तत्राह—त्वं ब्रह्मेति। ब्रह्मपदार्थमाह, पूर्णमिति । अविनाशिनः पूर्णत्वं युक्तमित्याह, अमृतमिति । अमृतत्वं कुत इति तत्राह, विगुणमिति. अत एव विशोकं आनन्दमात्रमतोपि शोको नास्त्यस्य षड्विकाररहितम् एतादृशमन्यच्चास्तीत्याह, अनन्यदिति. स्वगतभेदविवर्जितं वा अन्यज्जगत इति शेषः। सर्वस्माद्भिन्नमित्यर्थः। जगत्कारणस्य तदुदासीनस्य चैकत्वप्रकटनाय पुनरुक्तमाह, विश्वस्येति. एवंविधं ब्रह्म प्रकृत्यादिकमपेक्ष्यानपेक्ष्याऽपि कर्तुं समर्थं इत्याह, तदुपेक्षतयेति ॥७॥

एतत्कथमिति तत्राह— एकइति। यथा कुण्डलाद्यात्मना कृतं प्रकृत्यात्मनाकृतं स्वर्णमेकमेवेह स्वर्णे वस्तुनो भेदो नास्ति तथा सदादिवस्तुषु स्थितत्वात्तत्स्वभावप्रवर्तकत्वेन सदादिशब्दवाच्यत्वमप्येक एव इदमपि सामर्थ्याभावे न युक्तमतो निरतिशयसामर्थ्यमस्यावगम्यत इति भावः। स्थानभेदादेकस्य परमात्मनो भेदकल्पनमज्ञानमूलमित्याह—अज्ञानत इति. जनैरज्ञानतस्त्वयि विकल्पो भेदो विहितो यस्मात्तस्मादवस्तुभूत इति शेषः। विहत इति पाठे अज्ञानतस्त्वयि विकल्प इति यस्मात्तस्माद्विहतो नष्ट इत्यर्थः, भेदकल्पनायां का प्राप्तिरिति तत्राह गुणेति. गुणानां व्यतिकरो मिथः कार्यार्थसमवायविशेषो यस्मात्सः तत्तत्कार्येषु तत्तत्प्रवर्तकत्वेन तत्स्थत्वात्तदाशङ्केति भावः। ननु, स्वतोभेदाभावेप्युपाधिभेदात्स स्यादिति तत्राह, निरुपाधिक इति. उपाधिसद्भावे तद्भेदात्सोऽस्तीति शङ्कितुं शक्यते स एव नास्ति आनन्दमात्रमिति निर्धारितत्वात्, पुनर्वचनं मन्दाशङ्कानिवारणार्थमिति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

१—३ ॥

प्रथमं भगवत्त्वं दर्शयन्नाह, देवदेवेति ॥ ४ ॥

अथ ब्रह्मत्वं दर्शयन्नाह, आद्यन्ताविति ॥ ५ ॥

अतस्तथा तथा स्फूर्त्तये त्वच्चरणाम्भोजमेव सेव्यमित्याह,

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

तवैवेति। श्रेयस्कामास्त्वद्भक्तिस्त्वदुपयोगिमङ्गलकामाः निराशिषः तदितरकामनाशून्याः ॥ ६ ॥

कथमेकस्य मम ब्रह्मत्वं भगवत्त्वञ्च तत्राह—त्वं ब्रह्मेति, आनन्दमात्रलक्षणविशेष्यांशेन त्वं ब्रह्म स्वयः विश्वहेतुशक्तिमता वैशिष्ट्येन तु त्वं भगवानित्यर्थः। तर्हि कथं सापेक्षोऽहम् ? नेत्याह—तेन विश्वेनापेक्ष्यस्त्वं यस्मात्त्वमात्मनमनपेक्ष्य एव लोकवल्लीला कैवल्येन तु तत्सृष्ट्यादौ प्रवृत्तिरिति भावः ॥ ७ ॥

एतावता त्वयि सुवर्णे इव वस्तुभेदो नास्ति स्वकार्ये स्वसुवर्णत्वाव्यभिचारवत्त्वद्रूपत्वाव्यभिचारात् तथापि सुवर्णे इव त्वयि शुद्धे जनैर्यो विकल्पो विविधकल्पना विहितो मतः स पुनरज्ञानत एव, कुतः ? यस्मात् सूर्यवन्निरुपाधिकस्यैव सतस्तव ये गुणाः रश्मिप्रतिच्छविवैचित्रीवद्बहिरङ्गशक्त्यांशाः सत्त्वादयः तेषामेव व्यतिकरो विकल्पोऽयं तथापि सूर्यं विना तदभावात् सूर्यत्वमेव तत्र परामृश्यामिति सुवर्णदृष्टान्तोऽपि सिद्ध इति भावः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

मायामौग्ध्याद्वैदग्ध्याद्दैत्यानां मोहनेन किम्।
इति मोहयितुं शम्भुमनैषीत्स्वान्तिकं हरिः ॥
द्वादशे मोहयन् शम्भुं पश्यन्त्याः शम्भुयोषितः।
मोहिन्या विभ्रमस्यासाधारण्यं तावदबूबुधत् ॥

॥ १—२ ॥

सोमया उमया सह ॥ ३ ॥

हे देवदेव ! ननु, त्वमपि देवेषु दीव्यसीति तत्राह—हे जगत्त्रयपित् ! मम जगन्मध्यवर्तित्वान्मामपि त्वं व्याप्नोषीत्यर्थः। अतो मत्सहितं जगदिदं तव ईशितव्यमेवेत्याह, हे जगदीश ! ननु विश्वेश्वरत्वेन त्वमुच्यसे लोकैस्तत्राह, हे जगन्मय। त्वं चिन्मयोपि जगन्मयः जगन्मयत्वादीशितव्योऽपीश्वरः न त्वहमीदृशः किन्तु ब्रह्मेन्द्रादिवदुपचारादेव विश्वेश्वर इति भावः। ननु तर्हि मां त्वं प्रधानस्वरूपं ब्रूषे तस्यैव जगदुपादानत्वप्रसिद्धेर्जगद्रूपत्वं तत्राह, सर्वेषां भावानां वस्तूनां त्वमात्मा चेतयिता च हेतुश्चेत्यतस्त्वमेवेश्वर इति भावः ॥ ४ ॥

ननु, जगन्मयत्वोक्त्या जगत उत्पत्त्यादिना नश्वरत्वेन जाड्येन च ममापि किं तथात्वं ब्रूषे ? नहि नहीत्याह—आद्यन्ताविति, अस्य जगतः यौ आद्यन्तौ जन्ममृत्यू यच्च मध्यं जीवनं यच्च इदं प्रत्यक्षं वस्तु अन्यत् परोक्षम् अहमहङ्कारास्पदं बहिर्ममकारास्पदं च वस्तु यतो भवति तद्ब्रह्म चिद्रूपो भवान् अव्ययस्य ब्रह्मणस्तवाद्यन्तादीनि न सन्ति ॥ ५ ॥

तवैवंभूतत्वे महतामाचारमेव प्रमाणमित्याह—तवैव ननु मम. मम तु सकामा एवेति भावः। श्रेयस्कामा भक्तीच्छवः उभयत्र इहामुत्र च यथा त्वद्भक्ता निराशिषस्तथा त्वमपि निराशीर्न त्वस्मदादिरिवैश्वर्यकामनया सेवकसापेक्षः ॥ ६ ॥

यतस्त्वं विश्वस्माद्विलक्षणस्वरूप एवेत्याह—त्वमिति। ब्रह्मचिन्मयं विश्वं त्वचित् एवं पूर्णमित्यादिविशेषणैर्विश्वमपूर्णं समूर्तकं सगुणं सशोकं सुखदुःखात्मकं सविकारं तथा न विद्यते अन्यत् यतस्तद्ब्रह्म अनन्यत् सर्वकारणत्वात् विश्वं तु अन्यत् चिद्भिन्नत्वात् तथा ब्रह्म अन्यत् मायिकजडविश्वभिन्नत्वात् विश्वं तु अन्यत् ब्रह्मकार्यत्वात् ब्रह्मकार्यत्वमेव स्पष्टयति, विश्वस्य उदयादीनां हेतुः तदुपाधीनामात्मनां जीवानामीश्वरश्च तत्फलदाता तर्हि किं राजादिवत् कयाप्यपेक्षया सेवकेभ्यः फलं ददामि ? नहि न हि तदपेक्षतया तेषाम्। अपेक्षा यत्र स तदपेक्षस्तस्य भावस्तत्ता नैव फलं ददासि न तु स्वापेक्षया तैर्जीवैरेव स्वस्वफलप्राप्त्यर्थं त्वमपेक्षस इत्यर्थः त्वं तु अनपेक्षः स्वप्रयोजनार्थं तान् नापेक्षसे ॥ ७ ॥

किञ्च जीवानां त्वदीयतटस्थशक्तिकार्यत्वात् तदुपाधेर्विश्वस्य त्वदीयमायाशक्तिकार्यत्वादिदं चिज्जडात्मकं जगदपि त्वमेवेत्याह—एकइति। सदसत् कार्यकारणात्मकं जगत्तत्र द्वयं कार्यं विराट् अद्वयं कारणं महदादि किमिव कृताकृतं स्वर्णमिव कृतं कुण्डलादि अकृतं केवलस्वर्णम् इह विराणमहदाद्योः कार्यकारणयोर्वस्तुनः परमकारणत्वात्त्वत्तो भेदो नास्ति कार्यकारणयोरभेदावगमात् विराजो महदादिकार्यत्वात् महदादेर्मायाकार्यत्वात् मायायास्त्वच्छक्तित्वेन त्वद्रूपत्वादिति भावः। अत एव तदज्ञानत एव त्वयि एकस्मिन्नेव जनैर्विकल्पः विहितः जगत्कारणं ब्रह्मेति मायेति अज्ञानमिति कर्मेति विविधा कल्पना कृता यस्मान्निरुपाधिकस्य गुणातीतस्वरूपस्य तव गुणैरेव व्यतिकरो व्यसनं विवादरूपाविपत्तिरिति यावत् यच्छक्तयो वदतां वादिनां "विवादसम्वादभुवो भवन्ति"इति हंसगुह्योक्तेः "अथ व्यतिकरः पुंसि व्यसनव्यतिषङ्गयोः"इति मेदिनी ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

मोहिनीरूपं दृष्ट्वा शिवोऽपि मोहमुपागत इति वर्णयति—वृषध्वज इति, द्वादशाध्यायेन ॥ १ ॥ २ ॥

सोमया उमया सह ॥ ३ ॥

देवदेवत्वादौ हेतूनाह, सर्वेषां चेतनाचेतनात्मकानां भावानां त्वमात्मा आश्रयः हेतुः सृष्ट्यादिकर्त्ता ईश्वरः नियन्ता ॥ ४ ॥

सर्वहेतुत्वं प्रपञ्चयति—यत् यस्मिन् प्रपञ्चे अहमहमर्थभूतं चेतनं तत्त्वं बहिः देहेन्द्रियादिरूपमचेतनं तत्त्वं तस्यास्य चिदचिदात्मकस्य प्रपञ्चस्य यतः आद्यन्तौ सृष्टिसंहारौ मध्यं पालनम् इदं स्थूलत्वमन्यत्सूक्ष्मत्वं च तत् सत्यं चिद्ज्ञानं ब्रह्मानन्दं "सत्यं ज्ञानमनन्तम्"इति श्रुतिप्रोक्तं परं तत्त्वं भवान् अविकारिस्वरूपत्वाऽजत्वाऽविनाशित्वस्वानन्दपूर्णत्वं भगवत आह, यस्याव्ययस्याविकारिस्वरूपस्य एतानि उत्पत्तिविनाशपालनानि भवन्ति स भवानित्यन्वयः ॥ ५ ॥

मुमुक्षूपास्यस्त्वमेवेत्याह—तवेति। उभयतः इहामुत्र च सङ्गमासक्तिं विसृज्य त्यक्त्वा ॥ ६ ॥

उक्तार्थदृढीकरणार्थं बृहत्वपूर्णत्वादीन् विश्वहेतुत्वादीन् सर्वभिन्नाभिन्नत्वसर्वसमत्वयत्त्वानवच्छिन्नत्वादींश्च भगवतो गुणान्

त्वां ब्रह्म केचिदवयन्त्युत धर्ममेक एके परं सदसतोः पुरुषं परेशम् ।
अन्येऽवयन्ति नवशक्तियुतं परं त्वां केचिन्महापुरुषमव्ययमात्मतन्त्रम् ॥ ९ ॥
नाहं परायुर्ऋषयो न मरीचिमुख्या जानन्ति यद्विरचितं खलु सत्त्वसर्गाः ।
यन्मायया मुषितचेतस ईश दैत्यमर्त्यादयः किमुत शश्वदभद्रवृत्ताः ॥ १० ॥
स त्वं समीहित(१)मदः स्थितिजन्मनाशं भूतेहितं च जगतो भवबन्धमोक्षौ ।
वायुर्यथा विशति खं च चराचराख्यं सर्वं तदात्मकतयाऽवगमोऽवरुन्त्से ॥ ११ ॥
अवतारा मया दृष्टा रममाणस्य ते गुणैः ।
सोऽहं तद्द्रष्टुमिच्छामि यत्ते योषिद्वपुर्धृतम् ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

श्रुतिस्मृतिसूत्रगणसिद्धान् सङ्ग्रहेण वर्णयति–त्वं ब्रह्मेति,पञ्चभिः। ब्रह्म बृहत्स्वरूपगुणशक्त्याश्रयं तत्त्वं त्वमेव पूर्णममृतं च त्वं विगुणं निखिलैर्हेयैर्गुणैर्वर्जितमत एव सर्वोपादानकारणत्वेन सर्वाऽभिन्नम् अन्यत् चिदचिच्छक्तिमयसर्वप्रपञ्चाभिन्नस्वरूपम् यतो विश्वस्य उदयादीनां हेतुः विश्वस्य आत्मान्तर्यामी च तदपेक्षतया विश्वस्थितिप्रवृत्त्यादिप्रदत्वेन ईश्वरः नियन्ता च अनपेक्षः अन्यायत्तस्थितिप्रवृत्त्याद्यपेक्षारहित इत्यर्थः ॥ ७ ॥

तार्किकाद्यभिमतस्य जगदीशयोरत्यन्तभेदस्याऽज्ञानमूलत्वं दर्शयन् पूर्वोक्तं जगद्ब्रह्मणोर्भिन्नाभिन्नं सम्बन्धं दृष्टान्तेनोपपादयति,एक इति। सदसद्द्वयं चिदचिदात्मकम् द्वयं कार्यम् अनभिव्यक्तनामरूपचिदचिच्छक्तिमत् कारणमेव "सदेव सौम्येदमग्र आसीत्" इति श्रुतेः । तच्चाद्वयम् एकः समाधिकशून्यस्त्वमेवेत्यर्थः। तत्र दृष्टान्तः कृतं कटककुण्डलादिरूपमकृतं तत्कारणं च स्वर्णमेव भवति तद्दिव दार्ष्टान्ते हेतुः यस्माद्धेतोः निरुपाधिकस्य सजातीयविजातीयपदार्थद्वयरूपोपाधिरहितस्यानन्तशक्तिमतः एकस्यैव कारणभूतस्य भवतः सम्बन्धिगुणव्यतिकरः प्रपञ्चः "तदात्मानं स्वयमकुरुत सच्च त्यच्चाऽभवत्" "एकोऽहं बहुस्याम्" इत्यादिश्रुतेः। एवं यद्यपि वस्तुनोर्जगद्ब्रह्मणोर्भेदः घटकुलालयोरिव नास्ति तथापि त्वयि निमित्तोपादानरूपे जनैः परमाणवादिकारणवादिभिः अज्ञानतः विकल्पो भेदो विहितः ईश्वरभिन्नः परमाणुमयः संसारः इति जगदीशयोः घटकुलालयोरिव भेदः कल्पित इत्यर्थः ॥ ८ ॥

भाषा टीका ।

श्रीरुक्मिणीशो जयति ॥

श्रीबादरायणिरुवाच ।

श्रीशुकदेवजी बोले कि—वृषध्वज भोलानाथ श्री शङ्करने यह सुना कि, श्रीहरिने योषित् को रूप धरकर असुरगणों- को मोहितकर देवगणोंको अमृत पान कराया ॥ १ ॥

बस इतना सुनकर शिव वृषभपर बैठ कर देवी सहित भूतगणोंको साथ लेकर जहां भगवान् विराजरहे वहां उसी रूप देखने को गये ॥ २ ॥

भगवान् ने उमा देवी सहित श्री शङ्कर की सादर पूजा करी, तब सुन्दर तरह से बैठकर श्रीहरि का प्रति पूजन करके हंसते हुए हरिसे बोले ॥ ३ ॥

श्रीमहादेवजी बोले कि—हे देव ! हे जगत में व्यापने वाले ! हे जगत के ईश ! हे जगत स्वरूप ! सर्व भावों के आप आत्मा हैं हेतु हैं और नियन्ता है ॥ ४ ॥

इस विश्व का आदि मध्य और अन्त जिनसे होते हैं और अव्यय होने से जिसका आदि मध्य और अन्त, नहीं है वह सत्य चैतन्य स्वरूप ब्रह्म आप हैं ॥ ५ ॥

परम श्रेय की कामना वाले मुनि जन ऐहिक पार लौकिक सुखों के सङ्गो को छोडकर कोई कामना नहीं करके केवल आपके चरणाम्भोज की उपासना करते हैं ॥ ६ ॥

आप पूर्ण ब्रह्म हो अमृत विगुण विशोक आनन्द मात्र अविकार अनन्य और अन्य आप ही हैं, और विश्व के उत्पत्तिस्थिति और संहार के हेतु भी आपही हैं, और जगत् के आत्मा तथा फलदेने के लिये अपेक्षित होने से नियामक भी हैं और स्वयं निरपेक्ष हैं ॥ ७ ॥

जो कुछ जगत् में कार्य कारण प्रपञ्च तथा द्वय और अद्वय है सो सब आपही हो जैसे सोनेके कुण्डलादिक दूसरे नहीं होसके किन्तु सोनाही है, इसीप्रकार कृत वा अकृत सर्व वस्तु स्वरूप आपहो, जनोंने अज्ञान से आप में विकल्पविधान किया है क्योंकि गुणों से निरुपाधिक का व्यतिकर हैं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अत एव त्वां बहुधा वर्णयन्ति तत्त्वतस्तु केपि न जानन्तीत्याह द्वाभ्याम्–त्वां ब्रह्म वेदान्तिनोऽवयन्ति मन्यन्ते त्वामेव धर्मं मीमांसका मन्यते प्रकृतिपुरुषयोः परं पुमांसं सांख्याः विमलोत्कर्षिणी ज्ञाना क्रियायोगा प्रह्वी सत्या ईशाना अनुग्रहा चेत्येवं नवशक्तियुतं परं पाञ्चरात्राः महापुरुषं पातञ्जलाः ॥ ९ ॥

(१) भवद्दिथति इति वीर० ।

येन संमोहिता दैत्याः पायिताश्चामृतं सुराः ।
तद्दिदृक्षव आयाताः परं कौतूहलं हि नः ॥ १३ ॥

श्रीशुक उवाच ।

एवमभ्यर्थितो विष्णुर्भगवाञ्छूलपाणिना ।
प्रहस्य भावगम्भीरं गिरिशं प्रत्यभाषत ॥ १४ ॥

श्रीभगवानुवाच ।

कौतूहलाय दैत्यानां योषिद्वेषो मया कृतः ।
पश्यता सुरकार्याणि गते पीयूषभाजने ॥ १५ ॥
तत्तेऽहं दर्शयिष्यामि दिदृक्षोः सुरसत्तम ।
कामिनां बहुमन्तव्यं सङ्कल्पप्रभवोदयम् ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

परायुर्ब्रह्मा सत्त्वसर्गाः सत्त्वगुणेन सृष्टा अपि येन त्वया विरचितं विश्वमपि खलु तत्वतो न जानन्ति किं पुनस्त्वाम् हे ईश अभद्रं राजसं तामसं च वृत्तमुत्पत्तिर्येषां ते न जानन्तीति किमु वक्तव्यम् ॥ १० ॥

किन्तु त्वं तत्सर्वं जानासीत्याह–स त्वं सर्वमवरुन्त्से व्याप्नोषि जानासि किं तत्सर्वम् समीहितं कृतमदः स्थितिजन्मनाशममुष्य जगतो जन्मादि भूतानामीहितं च जगतो भवबन्धमोक्षौ च व्याप्तौ दृष्टान्तः चराचराख्यं देहजातं खं च यथा वायुराविशति तथा कथमवरुन्त्से तदात्मकतया तस्य सर्वस्यात्मतयेत्यर्थः। आत्मत्वे हेतुः अवगमो ज्ञानरूप इति ॥ ११ ॥

एवं स्तुत्वा प्रस्तुतं विज्ञापयति—अवतारा इति द्वाभ्याम् ॥ १२ ॥ १३ ॥ १४ ॥

सुरकार्याणि योषिद्वेषेण भविष्यन्तीति पश्यता अयं भावः अवश्यं तावदुन्मत्तान्दैत्यान्वञ्चयित्वा देवेभ्योऽमृतं देयम् न चैवं वैषम्यं रूपान्तरेण कर्तुमुचितम् अतो वञ्चनमोहनादिसारं कामिनीरूपं मया धृतमिति ॥ १५ ॥

तद्रूपं दर्शयिष्यामि सङ्कल्पप्रभवः कामस्तस्योदयो यस्मात् ॥ १६ ॥ १७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमनन्यत्वान्यत्वे उपपादिते तदेवं प्रकृतिपुरुषविलक्षणत्वेन वेदान्तवेद्यस्त्वमेवेति स्तुतम्. किम्बहुना "सर्वेवेदा यत्पदमामनन्ति वेदैश्च सर्वैरहमेव वेद्यः वेदान्तकृद्वेदविदेव चाहम्" इत्याद्युक्तरीत्या निगमागमादिषु सर्वत्र धर्मब्रह्मादिशब्दैर्व्यवह्रियमाणस्त्वमेवेत्याह–त्वां ब्रह्मेति। केचिद्वेदोत्तरभागास्त्वां ब्रह्माऽवयन्ति मन्यन्ते ब्रह्मेति बोधयन्ति केचिद्वेदान्तिनो ब्रह्मेति व्यवहरन्तीत्यर्थः। एके मीमांसकाः धर्ममवयन्ति यद्यप्यपूर्वाख्यं क्रियाजन्यं ते धर्मं मन्यन्ते तथापि "फलमतउपपत्तेः" [३ । २ । ३७] इति शारीरकन्यायेनापूर्वस्यापि भगवत्प्रसादरूपत्वमकामेनापि तैरवश्यं वाच्यम् इति यागादिक्रियाया भगवदाराधनरूपत्वेन तत्प्रतिपादकस्य वेदपूर्वभागस्याराध्येऽलौकिकश्रेयस्साधने सिद्धधर्मरूपे तस्मिन्नेव पर्यवसानात्तत्रापि तात्पर्यवृत्त्या भगवानेव प्रतिपाद्यते इत्यभिप्रायेण धर्ममेकेऽवयन्तीत्युक्तम् तथाचोक्तम्–

"ये च वेदविदो विप्रा येचाध्यात्मविदो जनाः ।
ते वदन्ति महात्मानं कृष्णं धर्मं सनातनम् ॥"—इति

एके सेश्वरसांख्याः यौगिकाश्च तत्र वेदान्तविरुद्धतत्त्वापोहेनेतरद्ग्राह्यं निरीश्वरसांख्यस्मृतिस्तु निर्मूलैवेति भावः। सदसतोः प्रकृतिपुरुषयोः परं विलक्षणं परेशशब्दवाच्यमवयन्ति अन्ये केचित्पाञ्चरात्रास्तु नवशक्तियुतम्—

"विमलोत्कर्षिणीज्ञाना क्रिया योगा ततः परम् ।
प्रह्वा सत्या तथेशानानुग्रहा नव शक्तयः" ॥–

इत्युक्तनवशक्तियुतं परं निस्समाभ्यधिकमव्ययं निर्विकारं स्वतन्त्रं महापुरुषमवयन्ति ॥ ९ ॥

न कार्त्स्न्येन त्वद्गुणान् स्तोतुं वयं प्रभवामः यतस्त्वया सृष्टं विश्वमेव तत्त्वतो न जानीमः इत्यतआह—नेति । अहं रुद्रः परायुः ब्रह्मा मरीच्यादयः ऋषयः त एते वयं सत्ववर्गा जन्तुसमूहाः यस्य तव मायया सङ्कुचितज्ञानाः यत्त्वया विरचितं विश्वमेव तत्त्वतो न जानीमः किंपुनरनन्तत्वत्स्वरूपगुणादिकमस्मदादय एव न जानन्ति किंपुनः शश्वत्सदा अभद्रवृत्ताः ज्ञानसंकोचकाऽमङ्गलकर्मपरायणाः दैत्यमर्त्यादयो न जानन्तीति ॥ १० ॥

त्वमेक एवापरिच्छिन्नस्वरूपस्वभावः सर्वज्ञ इत्याह–स इति । स त्वमुक्तविधस्त्वं सर्वं तदात्मकतया सर्वान्तरात्मकतया व्याप्नोषीति शेषः। अवरुन्त्से जानासि कथम्भूतोऽवगमः ज्ञानस्वरूपः सर्वात्मकतया शास्त्रैकावगम्यो वा किं तत्सर्वं समीहितं स्वकृतमदोऽमुष्य जगतः स्थितिसृष्टिनाशानां समाहारस्तद्भूतानाम्

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

ईहितं च जगतो भवरूपं वन्धं मोक्षञ्चेत्येतत्सर्वम् अवभुंक्ते इति पाठान्तरं तदाऽन्तरात्मतयावगमः अवगच्छनीत्यवगमः कर्त्तरि पचाद्यञन्तः जानन्नवभुङ्क्ते लीलारसमनुभवसीत्यर्थः । व्याप्तौ दृष्टान्तः चराचरात्मकं वस्तु वायुः खमाकाशं च यथा आविशति तद्वदिति ॥ ११ ॥

एवं प्रतिपूज्य प्रस्तुतं विज्ञापयति—अवतारा इति द्वाभ्याम् । गुणैः सर्वज्ञत्वसर्वान्तरात्मत्वादिभिः कल्याणगुणैः रममाणस्य लीलारसमनुभवतस्तवावताराः वराहादयो वहवो मया दृष्टाः योषिद्रूपं तु न दृष्टं सोऽहं दृष्टवहुभवदवतारोऽहमधुना यत्त्वं त्वया धृतं योषिद्वपुस्तद्द्रष्टुमिच्छामि ॥ १२ ॥

येन योषिद्वपुषा दैत्याः संमोहिताः सुरास्त्वमृतं पायिताः तद्योषिद्वपुर्द्रष्टुमिच्छन्तो वयमागतास्तद्दर्शनेऽस्माकमधिकं कौतूहलं वर्त्तते ॥ १३ ॥

एवमुक्तो भगवान् रुद्रं प्रत्यभाषतेत्याह शुकः–एवमिति । इति इत्थं शूलपाणिना रुद्रेणाभ्यर्थितः प्रार्थितो भगवान् भावगम्भीरम् केनचिदभिप्रायेण गम्भीरं यथा तथा प्रहस्य रुद्रं प्रत्यभाषत ॥ १४ ॥

तदेवाह–कौतूहलायेति द्वाभ्याम् । पीयूषभाजने अमृतकलशे गते दैत्यैरपहृते सति सुरकार्याणि योषिद्वेषेण भविष्यन्तीति पश्यता आलोचयता मया दैत्यानां कौतूहलाय यो योषिद्वेषः धृत उपात्तः ॥ १५ ॥

तत्ते दिदृक्षोरहं दर्शयिष्यामीत्यन्वयः । पश्यतेत्यस्यायं भावः अपश्यन्तावदुन्मत्तान् दैत्यान्वञ्चयित्वा देवेभ्योऽमृतं देयं न चेदं वैषम्यं रूपान्तरेण तथाकर्त्तुमुचितमतो वंचनमोहनादिसारं कामिनीरूपं मया धृतमिति कथम्भूतं योषिद्रूपम् ? कामिनां वहुमन्तयं कामुकैर्वहुमाननीयं सङ्कल्पप्रभवः कामः तस्योदयो यस्मात्तादृशम् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एकस्य नानामतविषयत्वं न भिन्नस्येत्याह – त्वामिति । केचिद्वेदान्तिनः त्वां ब्रह्मेत्यवयन्त्यवगच्छन्ति एके स्मार्ताः धारकत्वाद्धर्मम् एके पौराणिकाः परेशं त्वां सदसतोः परं पुरुषम् अन्ये पाञ्चरात्रिकाः त्वां विमलोत्कर्षणीज्ञानेत्यादिनवशक्तियुतं परं वदन्ति केचिदेकान्तिनः त्वामव्ययमात्मतन्त्रं महापुरुषमभिवदन्तीत्यन्वयः ॥ ९ ॥

तद्विषयज्ञानसामग्र्यभावाज्ज्ञानात्वकल्पना इत्याशयेनाह–नाहमिति. सत्त्वसर्गाः सात्त्विकाः अत्रापि निमित्तमाह–यन्माययेति ॥ १० ॥

जन्मस्थित्यादीनां भिन्नकर्तृत्वेन नानात्वं किं न स्यादिति तत्राह–स त्वमिति । यो ब्रह्माद्यविज्ञातस्वरूपः स जगतः स्थितिजन्मनाशान् भूतैरीहितं च वन्धमोक्षावपि समीहासि करोषि हि यस्मात्तस्मान्नानात्मकत्वं भ्रान्तिरिति भावः । (१)मथानुकल्पनास्त्वेकविषया ततोऽन्या किं तव स्तुतिरिति तत्राह, वायुरिति यथा वायुः खञ्चराचराख्यं सर्वं प्रविशति ततो भिन्नश्च तथा सर्वस्य त्वदात्मकतया त्वद्व्याप्तत्वेनाऽवगमो ज्ञानं ते तव नुतिः स्तुतिः स्यादित्यन्वयः । अनेन धर्मादिप्रवर्तकत्वेन तत्तच्छब्दवाच्यत्वाऽवगमः स्तुतिरित्युक्तं भवति ॥ ११ ॥

तव स्तुत्या कोऽभिप्राय इति तत्राह–अवतारा इति । अस्तु हरिस्ततः किमिदानीमपेक्षितमिति तत्राह, सोहमिति ॥ १२—१५ ॥

सङ्कल्पप्रभवस्य कामस्योदयो यस्माद्वपुषस्तत्तथा तद्वपुः कामिनीनां च मन्तव्यमिति प्रयोगः "गन्तव्या ते वसतिरलुक्" इतिवत्कृद्योगे षष्ठी चशब्दादकामिनामिति ग्राह्यम् ॥ १६ ॥ १७ ॥

(१) त्वां ब्रह्मेत्यादि श्लोकाष्टकासु ।

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सर्वांशतस्तु त्वां केऽपि न जानन्तीत्याह, त्वामिति ॥ ९ ॥ १० ॥

स त्वमिति टीकायाम् अवरुन्त्से व्याप्नोषि जानासि चेत्यर्थः इत्येव व्याख्येया ॥ ११ ॥ १४ ॥

दैत्यानां कौतूहलाय तद्द्वारा वञ्चनाय ॥ १५ ॥

सङ्कल्पप्रभवोदयम् उपासनया वरयोषित् प्रदम् ॥ १६ ॥ १७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तदेवं स्वस्वमत्यनुसारेण त्वामृषयो बहुधा वर्णयन्तीत्याह, परेशं परमेश्वरं त्वां ब्रह्म वेदान्तिनोऽवयन्ति मन्यन्ते, धर्मं मीमांसकाः, प्रकृतिपुरुषयोः परं सांख्याः, अन्ये विमलोत्कर्षिणी ज्ञाना क्रियायोगे प्रह्वीसत्या ईशाना अनुग्रहा चेत्येवं नवभिश्चिच्छक्तिभिर्युतं मिश्रितं मायाशक्तेस्तु परं पाञ्चरात्राः, महापुरुषं पातञ्जलाः ॥ ९ ॥

यद्यपि सर्वमतेषु मध्ये पञ्चरात्रमतमेव भगवन्मतं "पञ्चरात्रस्य कृत्स्नस्य वक्ता तु भगवान् स्वयम्" इत्युक्तेः "तुभ्यं च नारद भृशं भगवान् विवृद्धभावेन साधु परितुष्ट उवाच योगम् । ज्ञानं च भागवतमात्मसतत्त्वदीपं यद्वासुदेवशरणा विदुरञ्जसैव" इत्युक्तेस्तदेव तत्त्वं तदेष महाभक्तस्य शम्भोरपि मतं तदपि जानीम इत्यभिमानिनो न जानन्तीत्याशयेनाह—नेति । न केवलमहं न जानामि किन्तु परायुर्द्विपरार्द्धजीवी ब्रह्मा सत्त्वगुणेन सृष्टा अपि येन त्वया विरचितं विश्वमपि खलु तत्वतो न जानन्ति किं पुनस्त्वां हे ईश अभद्रं राजसं तामसं च वृत्तं येषां ते तं त्वां न जानन्तीति किमुत वक्तव्यं तेन पूर्वोक्ताः शास्त्रकृतोऽप्यभिमानिनो न जानन्तीति भावः ॥ १० ॥

तर्हि को जानातीति चेत्तत्र त्वमेव स्वं परं च जानासीत्याह–स प्रसिद्धस्त्वं सर्वमवगमः अवगच्छन् जानन्नेव सन्नवरुन्त्से व्याप्नोषि किं तत् सर्वं समीहितं स्वकृतम् अमुष्य जगतः स्थित्यादि भूतानां प्राणिमात्राणाम् ईहितं भवबन्धं च तस्मान्मोक्षं च बन्धमोक्षप्रकारं जानासीत्यर्थः । व्याप्तिमात्रे दृष्टान्तवायुरिति खं महाकाशं स्वस्थानं चराचराख्यं देहजातं च यथा विशति तथैव त्वं निजधाम श्रीवैकुण्ठमध्यासीन एव तदात्मकतया तस्य सर्वस्यात्मतयेत्यर्थः ॥ ११ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

अभिलषितं ब्रूहीति चेत्तत्राह-अवतारेति। गुणैर्मंक्वात्सत्यादिभिः ॥ १२—१३ ॥

प्रहस्येति स्वस्य योगेश्वरत्वं लोकेषु प्रख्यापयितुं मोहिनींविहसितेचेद स्वयं ते तद सर्वं व्यक्तीभविष्यतीति भावः भावगम्भीरं महादेवेनापि दुष्प्रवेशम् ॥ १४ ॥

दैत्यानां कौतूहलायेति तादृशानामेव मोहजनकं तदातिविस्मयास्पदं योषिद्वपुः युष्माकं योगेश्वराणां तु तदाकिञ्चित्करं न हि मृगयुं मृगो हिंसितुं क्षमत इति भावः दैत्यानामिति तत्रैव स्थिताः सात्विकत्वाद्देवा अपि नैव मुमुहुरिति भावः। ननु दैत्यानां तुच्छानां कृते कोयं ते यत्नस्तत्राह-पश्यतेतिगत्यन्तराभावादिति। भावः ॥ १५ ॥

भवतु यथा तथा तदपि तवर्थमेतावद्दूरागमनं तव न मोघं भवितुमर्हतीत्याह-तदिति। दिदृक्षोरित्यन्यथा ते तत्रैव विशिष्टबुद्धिर्नापयास्यत्येवेति भावः। सङ्कल्पप्रभवः कामस्तस्योदयो यस्मात्तत्तः कामिनां बहुमन्तव्यं तव तु कामशत्रोः काम उल्लवितुं नैव शक्नोति तदपि कौतुकं चेत् पश्येति भावो वाह्यः आभ्यन्तरस्तु कामजेतुरपि महायोगीश्वरस्यापि तव तद्दिदृक्षैव कामसिन्धुमहावर्त्तनिक्षेपे हेतुरभून्मम नात्र दोष इति भावः ॥१६–१७॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

अथ यद्विज्ञानेन सर्वं विज्ञातं भवति "ब्रह्मविदाप्नोति परम्"—

"यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः।
तदा देवमविज्ञाय दुःखस्यान्तं निगच्छति" ॥

इत्यादिज्ञानबोधकं शास्त्रं "क अद्धा वेद, यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह" इत्यादिज्ञानाभावबोधकं शास्त्रं चाश्रित्य त्वां यथोपदेशं यथामति बहवो जानन्ति साकल्येन तु केऽपि जानन्तीत्याह—त्वामिति, द्वाभ्याम्। परेशं सर्वेश्वरं परं पूर्णम् अव्ययं निर्विकारम् आत्मतन्त्रं स्वाधीनं त्वां केचित् "बृहत्वाद्बृंहणत्वाच्च तस्मादुच्यते परं ब्रह्म"इति श्रुत्युक्तं ब्रह्मवदत्स्वरूपगुणशक्त्याद्याश्रयं अवयन्ति जानन्ति—

"ये च वेदविदो विप्रा ये चाध्यात्मविदो जनाः।
ते वदन्ति महात्मानं कृष्णं धर्मं सनातनम्" ॥—

इत्येवं धर्ममवयन्ति. एके "प्रधानक्षेत्रज्ञपतिर्गुणेशः" इति श्रुतेः। सदसतोः प्रधानक्षेत्रयोः परमवयन्ति. अन्ये—

"विमलोत्कर्षिणी ज्ञाना क्रियायोगा ततः परम्।
प्रह्वीसत्या तथेशानाऽनुग्रहानवशक्तयः" ॥—

इत्येवं नवशक्तियुतमवयन्ति। केचित् "पुरुष एवेदं सर्वम्"इत्येवमवयन्ति. अन्ये महापुरुषम्. अन्ये अग्निप्राणजलप्रणवनामादिरूपिणं नानाविधं नानोपासकाः यथोपदेशं यथामति त्वामवयन्ति ते धन्या इति भावः ॥ ६ ॥

कात्स्न्र्येन तु त्वद्बोधकस्य का कथा येन त्वया विरचितं विश्वमपि परायुर्ब्रह्मा न जानाति अहं शिवो न जानामि न सत्त्वसर्गाः ऋषयो जानन्ति शश्वद्भद्रवृत्ताः रजस्तमःप्रकृतयः देवमर्त्यादयः न जानन्तीति किमुत वक्तव्यम् ? ॥ १० ॥

त्वन्तु सर्वं जनासीत्याह—स उक्तप्रकारस्त्वम् अवगमः परमज्ञानस्वरूपः तदात्मकतया तदन्तर्यामित्वेन सर्वगतत्वेनेत्यर्थः। सर्वमवरुन्त्से व्याप्नोषि जानासि सर्वशब्दोक्तं विवृणोति, समीहितं स्वकृतं विश्वम् अदोऽमुष्य विश्वस्थितिजन्मनाशं च भूतानामीहितं च जगतो भवबन्धं मोक्षं च सर्वगतत्वे दृष्टान्तः वायुर्यथा चराचराख्यं देहजातं खं च भाविशति तद्वत् ॥११॥

एवं स्तुत्वा स्वेप्सितं विज्ञापयति-अवतारा इति द्वयेन। गुणैर्धर्मस्थापनाद्यर्थमाविष्कृतैः सत्यसङ्कल्पत्वसर्वज्ञत्वादिभिः रममाणस्य ॥ १२ ॥

नोऽस्माकं परं कौतूहलं तद्दर्शनेऽत्यौत्सुक्यम् ॥ १३ ॥

भावेन दुर्ज्ञेयाभिप्रायेण गम्भीरं यथा तथा प्रहस्य ॥ १४ ॥

अमृतलाभशत्रुपराजयस्थानलाभादीनि सुरकार्याणि योषिद्रूपेण भविष्यन्तीति पश्यता मया दैत्यानां कौतूहलाय योषिद्वेषः कृतः ॥ १५ ॥

सङ्कल्पप्रभवस्य कामस्योदयो यतः ॥ १६ ॥

भाषा टीका।

कोई लोग आपको ब्रह्मजानते हैं कितने एक धर्म कोई कार्य कारणसे ऊंचे परम पुरुष परेशजानते हैं कोई पर कोई एक महापुरुष और अव्ययतथा स्वतन्त्र आप को जानते हैं ॥ ६ ॥

हम ब्रह्मा मरीच्यादि ऋषि जिस के रचे हुए को कोई नहीं जान सके हैं, हे ईश! सत्व सृष्टि वाले भी जिन की माया से खण्डित चित्त वाले हैं तो फिर सदा जो खोटे आचरण वाले हैं उनकी और मनुष्यों की कौन गति है ॥ १० ॥

वो आप अपने किये हुए जगत के स्थिति जन्म नाश और प्राणिओं के चेष्टित और जगत के बन्ध मोक्ष को आप जानते हो, जैसे वायु और आकाश चराचर में व्याप्त हो रहेहैं इसी प्रकार आप भी चराचर में व्याप्त हो रहे हो ॥ ११ ॥

गुणों से रमण करने वाले ऐसे आपके बहुत अवतारों के मैंने दर्शन किये—पर आपने ये जो मोहिनी नामक योषित को रूप धारण किया इसको देखने की में बहुत इच्छा करता हूं ॥ १२ ॥

जिस रूप से आपने दैत्यों को मोहित किया और देवताओं को अमृत पिवाया बस उसी के देखने की इच्छा से हम सब आये हैं। हम लोगों को वडा कौतूहल ॥ १३ ॥

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि—जब त्रिशूल हस्त वाले महादेव जी ने श्रीविष्णु भगवान से ऐसी प्रार्थना करी तब श्री हरि भी गंभीर अभिप्राय से हँसकर शंभु से बोले ॥ १४ ॥

श्रीभगवान उवाच ॥

श्रीभगवान् बोले, कि—हे महादेवजी ! जब अमृत कलश देवताओं के हाथ से चला गया तब देव कार्य की उसी रीति से

श्रीशुक उवाच ।

इति ब्रुवाणो भगवांस्तत्रैवान्तरधीयत ।
सर्वतश्चारयंश्चक्षुर्भव आस्ते सहोमया ॥ १७ ॥
ततो ददर्शोपवने वरस्त्रियं विचित्रपुष्पारुणपल्लवद्रुमे ।
विक्रीडतीं कन्दुकलीलया लसद्दुकूलपर्यस्तनितम्बमेखलाम् ॥ १८ ॥
आवर्त्तनोद्वर्तनकम्पितस्तनप्रकृष्टहारोरुभरैः पदेपदे ।
प्रभज्यमानामिव मध्यतश्चलत्पदप्रवालं नयतीं ततस्ततः ॥ १९ ॥
दिक्षु भ्रमत्कन्दुकचापलैर्भृशं प्रोद्विग्नतारायतलोललोचनाम् ।
स्वकर्णविभ्राजितकुण्डलोल्लसत्कपोलनीलालकमण्डिताननाम् ॥ २० ॥
श्लथद्दुकूलं कवरीं च विच्युतां सन्नह्यतीं वामकरेण वल्गुना ।
विनिघ्नतीमन्यकरेण कन्दुकं विमोहयन्तीं जगदात्ममायया ॥ २१ ॥
तां वीक्ष्य देव इति कन्दुकलीलयेषद्व्रीडास्फुटस्मितविसृष्टकटाक्षमुष्टः ।
स्त्रीप्रेक्षणप्रतिसमीक्षणविह्वलात्मा नात्मानमन्तिक उमां स्वगणांश्च वेद ॥ २२ ॥
तस्याः कराग्रात्स तु कन्दुको यदा गतो विदूरं तमनुव्रजत्स्त्रियाः ।
वासः ससूत्रं लघुमारुतोऽहरद्भवस्य देवस्य किलानुपश्यतः ॥ २३ ॥
एवं तां रुचिरापाङ्गीं दर्शनीयां मनोरमाम् ।
दृष्ट्वा तस्यां मनश्चक्रे विषज्जन्त्यां भवः किल ॥ २४ ॥

भाषा टीका ।

सिद्धि देखकर हमने दैत्यों के कौतूहल के लिये योषित (स्त्री) का रूप धारण किया ॥ १५ ॥

हे सुरसत्तम ! यदि आपकी देखने इच्छा है तो हम वह रूप आपको दिखावेंगे पर वह रूप तो कामि जनों को बहुत माननीय है क्योंकि ? उसको देखकर काम का उदय अवश्य ही होता है ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विचित्राणि पुष्पाण्यरुणाः पल्लवाश्च येषां ते द्रुमा यस्मिन् लसद्दुकूलेन पर्यस्ते परिवृते नितम्बे मेखला यस्यास्ताम् ॥ १८ ॥

उत्पतत्पतत्कन्दुकलीलावशेन ये आवर्तनोद्वर्तने नमनोन्नमने ताभ्यां कम्पितयोः स्तनयोः प्रकृष्टहाराणां चोरुभारैः प्रतिपदं मध्ये प्रभज्यमानामिव चलत्पदमेव प्रवालवत्कोमलं ततस्ततो नयन्ती ॥ १९ ॥

दिक्षु भ्रमतः कन्दुकस्य चापलैश्चाञ्चल्यैर्भृशं प्रोद्विग्नतारे आयते लोले चञ्चले लोचने यस्याः स्वकर्णाभ्यां विभ्राजिते ये कुण्डले ताभ्यामुल्लसन्तौ कपोलौ ताभ्यां नीलालकैश्च मण्डितमाननं यस्याः ॥ २० ॥

सन्नह्यतीं बध्नन्तीम् जगद्विमोहयन्तीम् ॥ २१ ॥

तां वीक्ष्य देवः श्रीरुद्र आत्मानमन्तिके स्थितामुमां स्वगणांश्च न वेद कथंभूतः इति एवम्भूतया कन्दुकलीलया या ईषद्व्रीडा तयाऽस्फुटं स्मितं तेन सह विसृष्टो यः कटाक्षस्तेन मुष्टो वञ्चितः अतएव स्वयं यत् स्त्रियाः प्रेक्षणं तया च प्रतिसमीक्षणं ताभ्यां विह्वल आत्मा मनो यस्य ॥ २२ ॥

तं कन्दुकमनुव्रजन्त्याः स्त्रियाः लघु सूक्ष्मं वासः ससूत्रं काञ्चीसहितम् ॥ २३ ॥

विषज्जंत्यां कुञ्चितकटाक्षैरात्मानं निरीक्षमाणायाम् ॥ २४ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

इत्थमुक्त्वाऽन्तर्हितो भगवान् योषितं स्वनिर्मितां काञ्चिदुपवने दर्शयामासेत्याह मुनिः–इतीति । इत्थं ब्रुवाणोऽभिदधानो भगवान् तत्रैवान्तर्हितो बभूव रुद्रस्तूमया भवान्या सह सर्वतः परितः चक्षुःप्रसारयन् सर्वत्र पश्यन्नास्ते तत्रैवासाञ्चक्रे ॥ १७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततस्तत्र विचित्राणि पुष्पाण्यरुणाः पल्लवाश्च येषां ते द्रुमा यस्मिन् तस्मिन्नुपवने वरस्त्रियं श्रेष्ठां स्त्रियं ददर्श भव इति शेषः । भगवन्निर्मिता काचिदियं स्त्रीः न तु स्वयं पुरुषोत्तमएव स्त्रीरूपं जग्राहेति विज्ञायते"प्रादुद्रवत् सा पृथुश्रोणी माया देवविनिर्मिता "आत्मानं देवमायया" "जडीकृतं"यन्मे दुस्तरया स्वैरं मोहितोऽस्यङ्ग मायया" इत्यनन्तरोक्तिभिस्तथावगमात् कथंभूतां वरस्त्रियं कन्दुकस्य क्रीडया विक्रीडतीं पाकं पचतीतिवन्निर्देशः कन्दुकक्रीडाङ्कुर्वतीमित्यर्थः । यद्वा कन्दुकलीलयेति हेत्वर्थे तृतीया कन्दुकक्रीडाजन्यरसानुभवार्थं कन्दुकक्रीडां कुर्वतीमित्यर्थः । लसद्दुकूलेन पर्यस्ते परिधीते नितम्बे मेखला यस्यास्ताम् ॥ १८ ॥

उत्पतत्कन्दुकलीलावशेन ये आवर्तनोद्वर्तने नमनोन्नमने ताभ्यां कम्पितयोः स्तनयोः प्रकृष्टहाराणाञ्चोरुभरैः पदेपदे प्रतिपदं मध्ये प्रभज्यमानामिव स्थितां चलत्पदमेव प्रवालवत्कोमलं तदितस्ततः नयन्तीम् ॥ १९ ॥

दिक्षु भ्रमतः कन्दुकस्य चापलैश्चाञ्चल्यैः भृशं प्रोद्विग्ने तारे कनीनिके ययोस्ते आयते लोचने यस्यास्तां स्वकर्णाभ्यां विभ्राजिते कुण्डले ताभ्याम् उल्लसन्तौ कपोलौ ताभ्याञ्च नीलालकैश्च मण्डितमाननं यस्यास्ताम् ॥ २० ॥

श्लथद्विच्युतं दुकूलं विच्युतां कबरीं धम्मिल्लं च वल्गुना सुन्दरेण वामहस्तेन सन्नह्यतीं बध्नतीम् अन्यतरेण करेण कन्दुकं विनिघ्नन्तीमात्मनः स्वसम्बन्धिन्या मायया कपटवृत्त्या जगद्विमोहयन्तीम् ॥ २१ ॥

तां वीक्ष्य देवो रुद्रः आत्मानमन्तिकस्थिताम् उमां स्वगणांश्च न वेद कथंभूतो देवः इति या कन्दुकलीला तया ईषद्व्रीडा तया स्फुटमप्रकटं स्मितं तेन सह विसृष्टो यः कटाक्षस्तेन मुष्टो वञ्चितः अत एव स्वयं यत् स्त्रियाः प्रेक्षणं तया च प्रतिसमीक्षणं ताभ्यां विह्वलः परवश आत्मा मनो यस्य तथाभूतः ॥ २२ ॥

सः क्रीड्यमानः कन्दुकः यदा तस्याः कराग्राद्विदूरङ्गतः तदा तं कन्दुकमनुव्रजन्त्याः स्त्रियाः लघु सूक्ष्मं वासः ससूत्रं काञ्चीसहितं मारुतो देवस्य रुद्रस्य पश्यतस्सतः जहार किल ॥ २३ ॥

एवमेवम्भूतां मारुतेनापहृतवाससं नग्नामिति यावत् रुचिरः सुन्दरोऽपाङ्गो यस्याः दर्शनीयाम् अति सुन्दरीत्वादितिभावः । मनोरमां तां दृष्ट्वा रुद्रस्तस्यां विलज्जन्त्यां लज्जया कुञ्चितकटाक्षैरात्मानं निरीक्षमाणायां मनश्चक्रे किल ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

लसन्ती नितम्बे पर्यस्ता परिवृता दुकूलोपरि मेखला यस्याः सा तथा ताम् ॥ १८ ॥

आवर्तनमवाङ्नमनमुद्वर्तनमुन्नमनं ताभ्यां कम्पितयोरारब्धचलयोस्तनयोर्गुणतः प्रकृष्टहारस्य चोरुभरैः पदेपदे मध्यप्रदेशे भज्यमानामिव स्थितां ततस्ततस्तत्रतत्र चलत्पदपल्लवं नयन्तीं प्रचालयन्तीम् ॥ १९ ॥

भ्रमतः कन्दुकस्य चापलैः चलभावैः प्रोद्विग्ने चञ्चले तारे कनीनिके ययोस्ते प्रोद्विग्नतारे ते चायते च लोले च लोचने यस्याः सा तथा तां स्वकर्णयोर्विभ्राजिते च लोलकुण्डले स्वर्णविभ्राजितलोलकुण्डले ताभ्यां उल्लसद्भ्यां कपोलाभ्यामलकैश्च मण्डितमाननं यस्याः सा तथा ताम् ॥ २० ॥

सन्नह्यतीं बध्नतीम् आत्ममायया स्वरूपशोभावैचित्र्येण ॥ २१॥

व्रीडासहितेन स्मितेन स्फुटेन प्रफुल्लेन विसृष्टेन दिक्षु मुक्तेन च कटाक्षेण मूढः स्त्रीप्रेक्षणसमीक्षणाभ्यां निर्वृत आह्लादित आत्मा यस्य स तथा सः ॥ २२ ॥

स्त्री रुद्रं पश्यति रुद्रः स्त्रियं पश्यतीति भावेन तं कन्दुकमनुव्रजन्त्याः स्त्रियाः ॥ २३ ॥

विलज्जन्त्यां लज्जाभावं कुर्वन्त्याम् ॥ २४ ॥ २५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत इति चतुष्कम् ॥ १८—२५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

लसद्दुकूलेन हेतुना परि सर्वतो भावेन अस्ते अदर्शनं प्राप्ते नितम्बे मेखला यस्यास्ताम् ऊर्द्ध्वमुत्क्षिप्तं कन्दुकं गृहीतुं यत् खल्वावर्त्तनमावृत्तिस्तदनन्तरमुद्वर्त्तनमुन्मुखत्वेन वृत्तिस्तेन कम्पितयोः स्तनयोः प्रकृष्टहाराणां चोरुभारैः प्रतिपदं मध्यतः मध्यदेशे भज्यमानामिव चलत्पदमेव प्रवालवत् अरुणं ततस्ततो नयन्तीम् ॥ १८—१९ ॥

दिक्षु भ्रमतः कदाचित् चतुर्दिक्षु क्षिप्यमानस्य कन्दुकस्य चापलैश्चाञ्चल्यैर्हेतुभिः प्रोद्विग्नतारे आयते लोले लोचने यस्यास्ताम् ॥ २० ॥

सन्नह्यन्तीं बध्नतीम् आत्मनो मायया बहिरङ्गशक्त्यैव जगन्मोहयन्तीं सम्प्रति जितमायमात्मारामममपि शंभुम् आत्मस्वरूपेणैव मोहयन्तीमिति भावः ॥ २१ ॥

देवः श्रीरुद्रः इति एवंभूतया कन्दुकलीलयैव मां कश्चित् सुन्दरः पुरुषः पश्यतीति प्रत्याशितया बुद्ध्या या ईषद्व्रीडा कन्दर्पविकारद्योतकी तया कृतं यत् स्फुटस्मितं ताभ्यां सह विसृष्टो यः कटाक्षस्तेन मुष्टः चोरितयोगैश्वर्यविवेकादित्वाज्जडीभूत इत्यर्थः । स्वयं स्त्रियाः प्रेक्षणं तया च प्रतिसमीक्षणं ताभ्यां विह्वल आत्मा मनो यस्य सः ॥ २२ ॥

तं कन्दुकम् अनुव्रजन्त्याः स्त्रियाः लघु सूक्ष्मं वासः सूक्ष्मशाटिकां ससूत्रं सूत्रबद्धम् अहरत् उच्चिक्षेप ॥ २३ ॥

विलज्जन्त्यां मां पश्यति न पश्यतीति द्योतकैः कुञ्चितकटाक्षैर्महादेवे स्वासक्तिमभिनयन्त्याम् ॥ २४ ॥

तयाऽपहृतविज्ञानस्तत्कृतस्मरविह्वलः ।
भवान्या अपि पश्यन्त्या गतह्रीस्तत्पदं ययौ ॥ २५ ॥
सा तमायान्तमालोक्य विवस्त्रा व्रीडिता भृशम् ।
निलीयमाना वृक्षेषु हसन्ती नान्वतिष्ठत ॥ २६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

लसता शोभमानेन दुकूलेन पर्यन्ते संवृते नितम्बे मेखला यस्यास्तां कन्दुकलीलान्वयात् ॥ १८ ॥

आवर्त्तनोद्वर्त्तनाभ्यां नमनोन्नमनाभ्यां कंपितयोस्तनयोः प्रकृष्टानां हाराणामुरुभरैश्च पदे पदे मध्यतः प्रभज्यमानामिव चलत्पदमेव प्रवालवत्कोमलमरुणं च ततस्ततो नयन्तीम् ॥ १९ ॥

दिक्षु भ्रमतः कन्दुकस्य चापलैश्चाञ्चल्यैः भृशमत्यर्थं प्रोद्विग्ने तारे ययोस्ते आयते लोले चपले लोचने यस्यास्तां स्वकर्णयोर्विभ्राजिताभ्यां कुण्डलाभ्यामुल्लसन्तौ कपोलौ ताभ्यां च नीलैरलकैश्च मण्डितमाननं यस्यास्ताम् ॥ २० ॥

श्लथत् विस्रस्तं दुकूलं कवरीं च सव्यहस्तेन बध्नतीम् ॥ २१ ॥

देवः महादेवः इति एवम्भूतां तां मोहिनीं वीक्ष्य आत्मारामोऽपि न वेद कीदृशः कन्दुकलीलया ईषद्व्रीडया स्फुटास्मितं तेन सह विसृष्टो यः कटाक्षः तेन मुष्टो विवशः अत एव स्वयं यत्स्त्रियाः प्रेक्षणं तया च यत्प्रतिसमीक्षणं ताभ्यां विह्वलो व्याकुल आत्मा चित्तं यस्य सः ॥ २२ ॥

अनुव्रजत्स्त्रियाः अनुव्रजन्त्याः स्त्रियाः लघु सूक्ष्मम् सूत्रेण काञ्च्या सहितं वासः ॥ २३ ॥

रुचिरोऽपाङ्गो यस्यास्तां विषज्जन्त्यां प्रत्यासक्तिं लज्जया कुञ्चितकटाक्षैर्द्योतयन्त्याम् ॥ २४ ॥

भाषा टीका ।

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि—भगवान् तौ इतना कहते २ वहीं अंतर ध्यान होगये, पार्वती सहित महादेवजी चारों तरफ को नेत्र चलाते हुए बैठे रहे ॥ १७ ॥

इतने में ही श्रीशंकर को उसी बगीचे में एक अति सुन्दर स्त्री देख पड़ी, और वह क्या कर रही है ? कि—जहां विचित्र पुष्प और अरुण पल्लव वाली वृक्षावली शोभा दे रही है उसी जगह गेंद हाथ में लिये हुये क्रीडाकर रही, और बहुत महीन वस्त्र से ढकी हुई हैं नितंब के ऊपर मेखला (कौंधनी) जा की ऐसी स्त्री देखी ॥ १८ ॥

फिर वह कैसी है, कि—गेंद के ऊंचे नीचे जाने से उछलने और नमने में दोनों स्तनों पर उत्तम हार जिस के हलचल होरहे हैं. जंघाओं के भारी होने से और मध्यभाग के बहुत सूक्ष्म होने से कंदुक (गेंद) के फेंकने में रोकने में और किसी समय उठाने में महादेवजी को ऐसी शंका उत्पन्न करती हैं कि—इतने जलदी में यह पतली कमर कहीं टूट न जाय - और जहां २ वह गेंद जावै वहां २ अपने कोमल पद पल्लवों को परिश्रम से लेजा रही है ॥ १९ ॥

दिशाओं में फिरती हुई गेंद के ऊपर दृष्टि लगाने से गेंद की चपलता से अति उद्विग्न नेत्रों के तारे और नेत्र भी चंचल होरहे हैं, और दोनों कर्णों में धारण किये जो कुंडल उनसे अति शोभायमान कपोलों पर नीली अलकें जो लटकी हैं तिन से बहुत ही शोभा युक्त मुख है जिसका ॥ २० ॥

जो सूक्ष्म वस्त्र धारण किया है वह कन्दुक क्रीडा से ढीला पड़ गया है उसको और शिरसे वेणी के खुल जाने से वस्त्र को और केशों को बायें हाथ से सम्हारती बांधती जारही है, पर गेंद के खेल को नहीं छोड़ा किंतु कौतुक पूर्वक दाहिने हाथ से गेंद का ताडन करती जारही है इस प्रकार जगत को मोह करने वाली उस स्त्री को शिव ने देखी ॥ २१ ॥

इसको देखकर, उसकी ऐसी गेंद की लीला से किंचित् लज्जा सहित अप्रकट मंद हसन पूर्वक कटाक्ष से महादेवजी तो लुट गये, बस स्त्री को आप टक टकी लगाकर देख रहे हैं कंदुक क्रीडा करती हुई वह भी कभी इनको देख लेती है इतने ही में श्रीभोलानाथ ऐसे विह्वल होगये, कि—हम कौन हैं और कहां हैं और किस लिये आये, और पार्वती कहां और हमारे गण कहां हैं यह कुछ आपको खबर न रही ॥ २२ ॥

एकबार वो गेंद उस स्त्री के हाथ की चोट खाकर दूर ढुलती हुई चली गई तब वह स्त्री भी उसके पीछें वेग में दौड़ी इतने में शंभु के देखते २ उस स्त्री का वस्त्र शिथिल तो रहा ही बस आया जो पवन का झोका सोई वह हलका वस्त्र सूक्ष्म कटि सूत्रसहित, शरीर से अलग होकर उड गया ॥ २३ ॥

इस तरह रुचिर कटाक्ष वाली बहुत ही सुन्दर देखने के योग्य और मन को हरने वाली स्त्री को हरने नग्न देखी और देखकर उसके बीच आपने मन लगाया, भोलानाथ ने जानी कि यह भी हमको चाहती है तब तौ मन किया ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्पदं तस्याः समीपं ययौ ॥ २५—२६ ॥

तामन्वगच्छद्भगवान् भवः प्रमुषितेन्द्रियः ।
कामस्य च वशं नीतः करेणुमिव यूथपः ॥ २७ ॥
सोऽनुव्रज्यातिवेगेन गृहीत्वाऽनिच्छतीं स्त्रियम् ।
केशबन्ध उपानीय बाहुभ्यां परिषस्वजे ॥ २८ ॥
सोपगूढा भगवता करिणा करिणी यथा ।
इतस्ततः प्रसर्पन्ती विप्रकीर्णशिरोरुहा ॥ २९ ॥
आत्मानं मोचयित्वाङ्ग ! सुरर्षभभुजान्तरात् ।
प्राद्रवत्सा पृथुश्रोणी माया देवविनिर्मिता ॥ ३० ॥
तस्यासौ पदवीं रुद्रो विष्णोरद्भुतकर्मणः ।
प्रत्यपद्यत कामेन वैरिणेव विनिर्जितः ॥ ३१ ॥
तस्यानुधावतो रेतश्चस्कन्दामोघरेतसः ।
शुष्मिणो यूथपस्येव वाशितामनुधावतः ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अङ्ग, हे राजन् ! ॥ ३०—३३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तयाऽपहृतविवेको ऽत एव तया कृत उत्पादितः स्मरः कामस्तेन विह्वलोऽत एव गता ह्रीर्यस्य "कामातुराणां न भयं न लज्जा" इतिन्यायादेवंभूतो रुद्रः भवान्याः पश्यन्त्याः सत्या अपि तत्पदं तस्याः समीपं ययौ गतः ॥ २५ ॥

तमायान्तं रुद्रं विलोक्य सा स्त्रीः विगतवस्त्रा ऽतएव भृशं व्रीडिता वृक्षेषु निलीयमाना तिरोदधाना हसन्ती नान्वतिष्ठत कचित् स्थिरं न तस्थौ ॥ २६ ॥

तामननुतिष्ठन्तीम् भगवान् भवोऽन्वगच्छत् कथम्भूतः प्रमथितानि चोभितानीन्द्रियाणि यस्य कामवश्यतां प्राप्तः यथा यूथपो गजः करेणुम् इभीमनुगच्छति तद्वत् ॥ २७ ॥

सोऽनुगतो रुद्रोऽतिवेगेन समीपमेत्यानिच्छन्तीमपि स्त्रियं केशबन्धे गृहीत्वा स्वसमीपं प्रापय्य बाहुभ्यामालिङ्गितवान् ॥ २८ ॥

यथा "करिणा" गजेन करिणी, तथा भगता रुद्रेण उपगूढा परिष्वक्ता विप्रकीर्णाः शिरोरुहाः केशाः यस्यास्सा इतस्ततः प्रसर्पन्ती सुरर्षभस्य रुद्रस्य भुजयोरन्तरान्मध्यादात्मानं बलान्मोचयित्वा अङ्ग, हे राजन् ! देवेन भगवता विनिर्मिता सा पृथुश्रोणी मायामोहिनी भगवन्मायानिर्मिता वा सा योषित् प्राद्रवत् प्राधावत् ॥ २९ ॥ ३० ॥

वैरिणा कामेन विनिर्जित इवासौ रुद्रस्तस्याद्भुतकर्मणः विष्णोर्विष्णुनिर्मिताया योषितः पदवीमन्वगच्छत ॥ ३१ ॥

शुष्मिणः मत्तस्य यूथपस्य वाशितां पुष्पवतीं गजीमनुधावत इव तस्य तामनुधावतोऽमोघरेतसो रुद्रस्य रेतश्चस्कन्द अक्षरत् ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली म्

नान्वतिष्ठत नाऽनुकूलाऽभूत् ॥ २६ ॥ — ॥ ३० ॥
वैरिणा पुरुषार्थविरोधिना विरुद्धप्रेरणावता वा ॥ ३१ ॥
शुष्मिणो वीर्यवतः वाशितां मैथुनेच्छावतीं करिणीम् ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

विवस्त्रा स्खलदुत्तरीया ॥ २६-२८ ॥

सोपगूढेति । युग्मकम् मायेति, माययाऽऽवेशमात्रं न तु स्त्रीत्वमिति बोधितं यूथपस्य करीन्द्रस्य ऋतुमतीं करिणीम् ॥ २९-३३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तत्पदं तस्याः स्थानम् ॥ २५ ॥

विवस्त्रा स्खलदुत्तरीया नान्वतिष्ठत भवम् अनुलक्ष्यीकृत्य न स्थिवती किन्तु दुद्रावैव ॥ २६—२९ ॥

मायया येगमायया देवेन हरिणा विनिर्मिता प्रकटीकृता ॥ ३० ॥

यत्रयत्रापतन्मह्यां रेतस्तस्य महात्मनः ।
तानि रूप्यस्य हेम्नश्च क्षेत्राण्यासन्महीपते ॥ ३३ ॥
सरित्सरस्सु शैलेषु वनेषूपवनेषु च ।
यत्र क्व चासन्नृषयस्तत्र सन्निहितो हरः ॥ ३४ ॥
स्कन्ने रेतसि सोऽपश्यदात्मानं देवमायया ॥
जडीकृतं नृपश्रेष्ठ ! सन्न्यवर्तत कश्मलात् ॥ ३५ ॥
अथावगतमाहात्म्य आत्मनो जगदात्मनः ॥
अपरिज्ञेयवीर्यस्य न मेने तदुहाद्भुतम् ॥ ३६ ॥
तमविक्लवमव्रीडमालक्ष्य मधुसूदनः ॥
उवाच परमप्रीतो बिभ्रत्स्वां पौरुषीं तनुम् ॥ ३७ ॥

श्रीभगवान् उवाच ॥

दिष्ट्या त्वं विबुधश्रेष्ठ ! स्वां निष्ठामात्मनास्थितः ॥
यन्मे स्त्रीरूपया स्वैरं मोहितोऽप्यङ्ग ! मायया ॥ ३८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

इवेत्युत्प्रेक्षाद्योतकं वस्तुतस्तु भगवतैव विनिर्जित इत्यर्थः॥३१॥ शुष्मिणो मत्तस्य यूथपस्य हस्तीन्द्रस्य रेतसोऽमोघत्वम् स्वर्णत्वेन परिणामात् ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अपहृतं विज्ञानं विवेको यस्य सः तत्पदं तयाधिष्ठितं स्थलम् ॥ ॥ २५—२९ ॥

देवेन हरिणा विनिर्मिता आविःकृता माया मोहिनी-मूर्तिः ॥ ३० ॥

विष्णोर्मोहिनीरूपस्य पदवीं मार्गम् अन्वपद्यत अन्वगच्छत्॥३१॥ चस्कन्द अक्षरत् ॥ ३२ ॥ ३३ ॥

भाषा टीका ।

बस उसने आपका सब विज्ञान तौ हर लिया और उसको देखकर उत्पन्न हुआ जो काम तिससे अति विह्वल होगये और पार्वती जी देखती रही गया देखते रहे, इनके देखते २ निर्लज्ज होकर उस स्त्री के समीप महादेव जी गये ॥ २५ ॥

वह स्त्री भी शंकर को आते हुए देखकर विना वस्त्र के बहुत ही लज्जित हुई, और भोलानाथ के पकडने के डरसे उस वृक्षा वली में छुपती हुई एक जगह स्थित नहीं रही पर बीच २ हँसती भी जाती रही ॥ २६ ॥

ठगी गई इन्द्रियें जिनकी ऐसे भगवान् श्रीमहादेव जी काम के वस होकर, जैसे यूथप हाथी हथिनी के पीछे जावे तैसे उस स्त्री के पीछें जाते हुए ॥ २७ ॥

शिवजी ने बड़े वेग से दौडकर इच्छा न करने वाली उस स्त्री की चोटी के बँध को पकड कर समीप लाकर दोनों बाहुओं से आलिंगन किया ॥ २८ ॥

भगवान् श्रीमहादेव जी ने उस स्त्री का आलिंगन किया जैसे उन्मत्त हस्ती हस्तिनी का करे, पर उस स्त्री के केश तौ खुल गये और तौ भी वह इधर उधर को छूटने को तड़फड़ाती रही ॥ २९ ॥

हे राजन् ! किसी प्रकार शंकर के दोनों बाहुओं के बीच में से झटक कर अपने शरीर को छुडा कर बडे नितंब वाली मानो देव विनिर्मित साक्षात् माया हो ऐसी रूप वाली वह स्त्री भाग चली ॥ ३० ॥

श्रीशुकदेवजी कहते हैं, कि उन अद्भुतकर्मा विष्णु के पीछे रुद्र भागे, उस समय ऐसा मालूम पडा कि—जैसे वैरी कामदेव ने रुद्रको अच्छी तरह पछाड़ दिया हो ॥ ३१ ॥

उन अमोघ वीर्य वाले शंकर का पीछे २ दोडते में वीर्य पतन होता हुआ, जैसे ऋतु के समय वाली हथिनी के पीछे जाने वाले मदोन्मत्त हाथी का ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवं तामनुधावन् हरः सरित्सरस्सु शैलादिषु च संनिहितो बभूव ॥ ३४ ॥ ३५ ।

कोनु मेऽतितरेन्मायां विषक्तस्त्वहते पुमान् ॥
तांस्तान्विसृजतीं भावान्दुस्तरामकृतात्मभिः ॥ ३९ ॥
सेयं गुणमयी माया न त्वामभिभविष्यति ॥
मया समेता कालेन कालरूपेण भागशः ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदुह देवमायया जडीकरणम ॥ ३६ ॥ ३७ ॥

स्वां निष्ठां प्रकृतिम ॥ ३८ ॥ ३९ ॥

कालेन सृष्ट्यादिनिमित्तेन मया कालरूपेण भागशो रज आद्यंशेन समेता मदधीना सती ॥ ४०—४४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अमोघरेतस्त्वमेवाह—यत्रेति । मह्यां यत्रयत्र स्थले महात्मनस्तस्य रुद्रस्य रेतोऽपतत्तानि स्थलानि हे महीपते ! रौप्यस्य रजतस्य हेम्नः सुवर्णस्य च क्षेत्राण्यासन् बभूवुः ॥ ३३ ॥

किञ्च यत्र क्वचयत्र सरिदादिषु रेतोऽपतत्तत्र रुद्रः संनिहितो बभूव तत्र तदुपासका ऋषयश्च आसन् बभूवुः ॥ ३४ ॥

एवं रेतसि स्कन्ने सति देवमायया योषिता जडीकृतमात्मानं स रुद्रोऽपश्यत् ततः हे नरश्रेष्ठ ! कश्मलात्कामात्सन्न्यवर्तत ॥ ३५ ॥

अथानन्तरमपरिज्ञेयं परितो ज्ञातुमशक्यं वीर्यं चेष्टितं यस्य तस्य जगदात्मनः परमात्मनो यन्माहात्म्यं तदवगतं ज्ञातं येन स तथाभूतो रुद्रस्तदुह तद्धि योषिद्रूपं तच्चेष्टितं च महदद्भुतं अदृष्टाश्रुतपूर्वं मेनेऽमन्यत ॥ ३६ ॥

ततो भगवान् मधुसूदनः स्वां तिरोधापितां पौरुषीं तनुं बिभ्रदाविर्भावयन् स्वयमाविरभूद्देवेत्यर्थः । अविक्लवं धृष्टमव्रीडं निर्लज्जं च तं रुद्रमालक्ष्य नितरां प्रीतस्सन् जगाद ॥ ३७ ॥

तदेवाह—दिष्ट्येति त्रिभिः । हे विबुधश्रेष्ठ ! त्वं स्वां निष्ठां प्रकृतिं कामविकाररहित्यं दैवादात्मना स्वेनैवास्थितः स्थितः लब्धवान् मन्मायाया दुरत्ययत्वादिति भावः । तद्दुरत्ययत्वमेवाह—यदिति । अङ्ग हे रुद्र ! यद्यस्मात्त्वं मे मम मायया दुस्तरया स्वैरं यथेच्छं नितरामित्यर्थः । मोहितोऽसि मोहं प्रापितोसि इत्यर्थः । एवं मोहितस्य तव स्वनिष्ठालाभो दैवात्संपन्न इति भावः ॥ ३८ ॥

दुस्तरत्वमेवाह-कोन्विति । त्वां विना कोनु पुमान् मम मायां विषक्तः विषयासक्तोऽतितरेत्, विषक्तः इत्यनेन जितेन्द्रियस्तु मत्प्रपन्नोऽतितरेदेवेति सूचितम्. कथम्भूता अकृतात्मभिरजितेन्द्रियैः दुस्तरांस्तांस्तान् भावान् कामक्रोधादीन् विसृजन्तीम् ॥३९॥

एवं स्वमायाया दुस्तरत्वमभिधाय तां विशिंषंस्तया तस्याऽनभिभवमनुगृह्णाति-सेयमिति । स्वमुक्तविधा त्रिगुणात्मिका कालेन कालशरीरकेण मया सृष्ट्याद्युचितकालेन. भागशः रज आद्यंशेन समेता व्याप्ता माया त्वां नाभिभविष्यति मोहितं न करिष्यतीत्यर्थः ॥ ४० ॥

[४४]

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

(१)रुद्रस्य क्षेत्राणि हेम्नश्च क्षेत्राणि स्वर्णाकाराण्यासन् ॥ ३३ ॥

क च यत्र क च सरिदादिषु रेतः क्षेत्रेषु ऋषय आसन् तत्र भवश्च सन्निहितोऽभवत् ॥ ३४ ॥ ३५ ॥

बुद्धिभ्रंशकरं कश्मलं निवृत्तमिति यस्मादथ तस्मात्तदुदाहरन्तीं ग्राह्योक्तिम् ॥ ३६ ॥

अविक्लवं स्वस्थम् अव्रीडं कामजनकलज्जारहितम् ॥ ३७ ॥

स्वां निष्ठां भक्तिलक्षणां आत्मना मनसा कुत इति तत्राह यत इति ॥ ३८ ॥

दुरन्ते जीवराशौ कश्चिन्मायां तरेत् वैचित्र्यादिति तत्राह-ऋते त्वदिति । विषये विषक्तः "ये ये विषयपाशबन्धकास्तांस्तान् भावान् कश्चिद्धीरः प्रत्यगात्मानमैक्षत" इति श्रुतेः । मायातरणपटूनां सद्भावात्कथं कोन्वित्याक्षिप्यत इति तत्राह, दुस्तरामिति ॥ ३९ ॥

मदनुग्रहवतः सुतरेत्याह—सेयमिति । भागशः एकदेशेनापि ॥ ४० — ॥ ४५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत्र च हेमक्षेत्रात् रुद्रक्षेत्रं विविच्याह—सरिदिति । सरिदादिषु विशेषं दर्शयति, यत्र क्वचेति ॥ ३४ ॥ ३५ ॥

आत्मनः स्वीयपरमस्वरूपस्य जगतोऽपि परमस्वरूपस्य तदन्तर्यामिणश्च ॥ ३६ ॥

तद्रूपतास्फुरणादेवाविक्लवं पराभवजग्लानिरहितम् अव्रीडञ्च ॥ ३७-३६ ॥

सेयमिति पूर्वन्तु मदिच्छया तया मोहितत्वात् ॥ ४०—४२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

(१)रुद्रस्येति तानि क्षेत्राणि रुद्रदैवतानीत्यन्तस्तेभ्यो हेमलिप्सुभिः प्रथमं रुद्रः प्रसादनीय इति भावः ॥ ३३ ॥

एवं तामनुधावन् हरः सरिदादिषु सन्निहितो बभूवेति मोहिन्यास्तत्र तत्र धावनं तत्रस्थानृषीन् हरस्य योगभ्रंशं साक्षा-

(१) तानि रुद्रस्य हेम्नश्च इति मूलपाठः । विज० चक्र०

श्रीशुक उवाच ।

एवं भगवता राजञ्छ्रीवत्साङ्केन सत्कृतः ॥
आमन्त्र्य तं परिक्रम्य सगणः स्वालयं ययौ ॥ ४१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

दर्शयितुमिति ध्वनिः तेन मुनिभिर्योगारूढैरपि विजितमपि स्वमनो युवतिषु न विश्वसनीयमिति शिक्षामनुध्वनिः ॥ ३४ ॥

स्कन्नं सम्पूर्णं सतीत्यर्थः । मोहिनी प्रथमदर्शनक्षणमारभ्यैवात्मा जडीकृत एवासीत् तदानीमपश्यदिति जडीकृतत्वेनानुसन्दधावित्यर्थः । कश्मलात् मोहिन्यनुधावनात् ॥ ३५ ॥

अथ स्वविवेकोत्पत्तिक्षण एव मोहिनीमन्तर्हितामालक्ष्य अवगतं स्वमोहविवेकौ भगवदधीनाविति माहात्म्यं येन सः आत्मनो हरेः यद्वा आत्मनः स्वस्य अवगतमाहात्म्यः ज्ञातयोगैश्वर्यप्रभावः तत् जडीकरणं विवेकप्रदानं च अद्भुतं न मेने तत्र हेतुः जगदात्मनः जगन्मध्यवर्त्तिनं मामपि मोहयितुं प्रबोधयितुं च समर्थस्यैवेत्यर्थः ॥ ३६ ॥

हन्त हन्त महायोगेश्वरोऽप्यहं विषयान्ध एवाऽभूवमित्यनुतापराहित्यादविक्लवं स्वान्तर्यामिणि का लज्जेत्यव्रीडम् अयं भावः नाहमन्येन केनापि मोहयितुं शक्यो मत्प्रभुणा तु मन्मोहनं न दूषणावहं प्रत्युत भूषणावहमेव ममाऽपि मोहनं विना मत्प्रभोरात्यन्तिकं प्रभुत्वमेव कुत इति प्रभुत्वातिशयो दासस्य मे भक्त्युत्कर्षमेव पुष्यतीति ॥ ३७ ॥

स्त्रीरूपया मोहिन्याख्यस्वरूपभूतया मायया मोहितोऽपि स्वां निष्ठां भक्त्युत्थदैन्यमयीं निरहङ्कारतामित्यर्थः ॥ ३८ ॥

जगन्मोहिन्या मद्बहिरङ्गमायया तु त्वं नैव मोहितो वर्त्तस इत्याह—कोन्विति । विषक्तः मायिकविषयासक्तः सन् को मायां तरेत् त्वदृते त्वां विना त्वं तु मायायामासक्तोऽपि मायामतर इत्यर्थः । मायां विशिनष्टि—भावान् रजस्तमोमयान् कामादीन् ॥ ३९ ॥

सैव केनि चेदतः स्वाङ्गुल्या तत्समीपस्थां दुर्गां दर्शयति—सेयमिति । कालेन कारणेन मया जगत् सृजता समेता सहिता मया कीदृशेन भागशोंऽशेन कलयति ईक्षणेनाङ्गीकरोतीति कालः पुरुषो रूपं यस्य तेन ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सरिदादिषु यत्र क्वचन ऋषयस्तत्राश्रमेषु च हरः सन्निहित स्तस्याः यत्नायन्त्याः पृथगन्वगो बभूव ॥ ३४ ॥

देवस्य मायया मोहिनीमूर्त्या ॥ ३५ ॥

जगदात्मनः अवगतं माहात्म्यं येन सः आत्मनः स्वस्य तज्जडीकृतत्वमद्भुतं न मेने ॥ ३६—३७ ॥

निष्ठां प्रकृतिम् मोहिनीमूर्तिधरेण मोहितोऽपि मदनुग्रहाद्विमोहो ऽसीत्यर्थः ॥ ३८ ॥

अथ मदीयेन मोहिनीरूपेण त्वद्विधोऽपि मोहितो भवतीति का कथा मन्मायया सर्वोऽपि जनो मोहितोऽस्तीति सूचयन् अकृतात्मभिर्दुस्तरा त्रिगुणा मायापि मदनुग्रहात्त्वां नाभिभविष्यतीत्याह क इति द्वाभ्याम् ॥ ३९ ॥

कालेन कालशक्तिना मया सृष्ट्यादिकर्त्रा विभागशः रजआदिप्रवर्त्तनेन हेतुना समेता अधिष्ठाता ॥ ४०—४१ ॥

भाषा टीका ।

हे महीपते ! उन महात्माजी का पृथिवीमें जहां वीर्यगिरा वे सब सोने और चांदी (अथवा रुद्र) की खानें हो गईं ॥ ३३ ॥

नदी तलाव पर्वत वन उपवनों में जहां कहीं ऋषिलोगों के आश्रम रहे तहां तहां भगवान भागे और पीछे २ हर भी उसी जगह होकर नङ्ग धडङ्ग दौडते गये ॥ ३४ ॥

हे नृपश्रेष्ठ ! वीर्य पतन होने के पीछे महादेवजी ने अपने को देव माया से जड किया हुआ जाना तब दुःख से निवृत्त हुये ॥ ३५ ॥

तदनन्तर जगदात्मा अपरिछेय वीर्यवाले श्रीहरि का माहात्म्य जानकर शिवनेभी अपने ऊपर बीती हुई बात को कुछ अद्भुत नहीं समुझी ॥ ३६ ॥

श्रीमधुसूदन भगवान भी शङ्कर को अविकल और अलज्जित देखकर परम प्रसन्न होकर अपने पुरुष शरीर को धारण कर श्रीभगवान कहने लगे ॥ ३७ ॥

श्रीभगवानुवाच ॥

श्रीभगवान बोले, कि हे विबुधश्रेष्ठ, ! तुम धन्य हो, जो कि हमारे स्त्रीरूप मायासे मोहित भी होकर ज्ञान के बल से अपने स्वरूपसे चलायमान न हुये ॥ ३८ ॥

विषयों मे आसक्त होनेवाला कौन पुरुष तुमारे विना हमारी माया को तर सक्ता है, दिन २ मृगतृष्णा कीसी विषयों में सुख लेश दर्शाने वाली ऐसी हमारी माया अजितेन्द्रिय पुरुषों को बहुत दुस्तर है ॥ ३९ ॥

ऐसीप्रभाव वाली त्रिगुण मयी ये हमारी माया अब तुम को मोहित नहीं करेगी, क्योंकि—सृष्ट्यादिकों का कर्ता कालरूप हम हैं, और रज आदि उत्पन्न करने वाली माया भी हमारे ही आधीन है ॥ ४० ॥

आत्मांशभूतां तां मायां भवानीं भगवान् भवः ॥
शंसतामृषिमुख्यानां प्रीत्याचष्टाथ भारत ! ॥ ४२ ॥
अपि व्यपश्यस्त्वमजस्य मायां परस्य पुंसः परदेवतायाः ॥
अहं कलानामृषभो विमुह्ये यया वशोन्ये किमुतास्वतन्त्राः ॥ ४३ ॥
यं मामपृच्छस्त्वमुपेत्य योगात्समासहस्रान्त उपारतं वै ॥
स एष साक्षात्पुरुषः पुराणो न यत्र कालो विशते न वेदः ॥ ४४ ॥

श्रीशुक उवाच ।

इति तेऽभिहितस्तात ! विक्रमः शार्ङ्गधन्वनः ॥
सिंधोर्निर्मथने येन धृतः पृष्ठे महाऽचलः ॥ ४५ ॥
एतन्मुहुः कीर्त्तयतोऽनुश्रृणवतो न रिष्यते जातु समुद्यमः क्वचित् ॥
यदुत्तमश्लोकगुणानुवर्णनं समस्तसंसारपरिश्रमापहम् ॥ ४६ ॥
असदविषयमङ्घ्रिं भावगम्यं प्रपन्नानमृतममरवर्यानाशयत्सिन्धुमथ्यम् ।
कपटयुवतिवेषो मोहयन्यः सुरारींस्तमहमुपसृतानां कामपूरं नतोऽस्मि ॥४७॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्याम् अष्टमस्कन्धे शंकरमोहनंनाम
द्वादशोऽध्यायः ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अथाध्यायार्थनिगमनम् इतीति ॥ ४५ ॥

एतत्कीर्तनादौ फलमाह—एतदिति ॥ ४६ ॥

भगवता कृतं भक्तपक्षपातं स्मरन्नमस्करोति—असतामविषयम् भावो भजनं तेन गम्यमङ्घ्रिं प्रपन्नान् शरणागतान्सिन्धुमथ्यं सिन्धोर्मथनेन जातममृतं य आशयदभोजयत् ॥ ४७ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
द्वादशोऽध्यायः ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमित्थं हे राजन्! भगवता श्रीवत्साङ्केन सत्कृतोऽनुगृहीतो रुद्रस्तं श्रीवत्साङ्कमामन्त्र्यानुज्ञाप्य तेनानुज्ञातस्तं परिक्रम्य प्रणम्य च सगणः सप्रमथादिगणः स्वालयं कैलासाद्रिं जगाम ॥ ४१ ॥

अथानन्तरं हे भारत ! ऋषिमुख्यानां पश्यतां सतां भगवान् भवः आत्मनोंऽशभूतां शरीरार्द्धभूतां तां भवानीं प्रत्याचष्ट उवाच ॥ ४२ ॥

तदेवाह—अपीतिद्वाभ्याम् । परदेवताया अजस्य कर्मायत्तोत्पत्तिरहितस्य परमपुरुषस्य मायां त्वमप्यपश्यः मायामाहात्म्यम् अपश्यः किमित्यर्थः । तदेव दर्शयति, कलानां विद्यानामृषभोऽधिपतिरवशः पारवश्यरहितवानपि अहं यया मायया मुह्ये मोहितवानस्मि किंपुनरस्वतन्त्राः मर्त्यदैत्यादयो मुह्यन्तीति ॥ ४३ ॥

समासहस्रान्ते अनेकसम्वत्सरसहस्रपर्यन्तं तपस्तप्त्वा तदन्ते योगात्तपोयोगादुपारतं निवृत्तं मां त्वं यदपृच्छस्त्वदुपास्यं वस्तु किमिति पृष्टवत्यसि स मया उपासितः साक्षादेप एव पुराणः पुरुषः यत्र यस्मिन् पुराणे पुरुषे कालो न विशति यं कालो न कलयति कालापरिच्छिन्न इत्यर्थः । यश्च कालादिकं सर्वं वस्तुजातं युगपत् साक्षाद्वेद सर्वज्ञोपि वेद इत्यर्थः ॥ ४४ ॥

अथाध्यायार्थं निगमयति मुनिः - इतीते । हेतातेति वात्सल्यात्सम्बोधनं हे राजन्नित्थं शार्ङ्गधन्वनोऽजितस्य विक्रमः ते तुभ्यं मया अभिहितः कथितः कौसौ? येनाजितेन कूर्मरूपिणा सिन्धोः क्षीरोदधेः निर्मथने काले महाचलो मन्दराचलः पृष्ठे धृतः ॥ ४५ ॥

अथाध्यायस्य कीर्त्तनादिफलमाह—एतदिति । एतत्सिन्धोर्निर्मथनादिकं पुनः पुनः कीर्त्तयतः कथयतः श्रृण्वतश्च समुद्यमः प्रयत्नः क्वचिदपि देशे जातु कदाचिदपि काले न रिष्यति "रीङ् क्षते" नश्यति न नश्यति न विफलो भविष्यतीत्यर्थः । कुतः यद्यस्मादुत्तम-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

श्लोकस्य भगवतो गुणानामनुवर्णनं समस्तानां संसारभ्रमाणां त्रयाणामाध्यात्मिकादितापानामपहन्तृ ॥ ४६ ॥

भक्तपक्षपातं स्मरन्नमस्करोति - असदिति । मथो मथनं तत्र जातं मथ्यं सिन्धोर्मथने जातममृतं यः कपटयुवतिवेषः सुरारीन्दैत्यान्मोहयन् प्रपन्नानमरश्रेष्ठानाशयदपाययदसता-मजितेन्द्रियाणामविषयोऽगम्योऽङ्घ्रिर्यस्य तं भावेन भक्त्यागम्यमुप सृतानामात्मानमनुवर्तमानानां कामानिष्टार्थान् पूरयतीति तथा तं नतोऽस्मि कर्तरिक्तः नमस्कृतवानस्मीत्यर्थः ॥ ४७ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
द्वादशोऽध्यायः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भागश एकदेशेनापि उत्तमश्लोकस्य हरेर्गुणानुवर्णनं समस्तसंसारपरिभ्रमविनाशनमिति यद्यस्मात्तस्मान्निरन्तरमेतदनुशृण्वतः कीर्तयतः पुरुषस्य समुद्यमः समीचीनः प्रयत्नो जातु न रिष्यते न नश्यति "रीङ्क्षये" ॥ ४६ ॥

निरन्तरमनुस्मरणार्थं पूर्वोक्तगुणविशिष्टत्वेन तं श्रीनारायणं नमति—असदविषयमिति । यो भावेन भक्त्या गम्यं प्राप्यं चासता ममभक्तानामविषयमङ्घ्रिं प्रपन्नानमरवर्यान् सिन्धोर्मथनोद्भूतममृतमाशयदपाययत् कीदृशः कपटयुवतिवेषः सुरारीन् असुरान् मोहयन् उपसृतानां शरणं गतानां पुंसां कामपूरम् अभीष्टदं तमिमं श्रीनारायणं नतोऽस्मीत्यन्वयः । अनेनैवंविधे भगवति भक्तिः कर्तव्येति सिद्धमित्युक्तं भवति ॥ ४७ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
द्वादशोऽध्यायः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

"अयि ! व्यपश्यस्त्वमजस्य मायाम्" इत्यनेन स्वांशभूताया मायाया देव्याः सकाशादस्याः परमैश्वर्यं दर्शितम् ॥ ४३ ॥

यंमामित्यादिकं भगवत्सन्दर्भे भगवत एव परमतत्त्वरूपत्वे समुदाहार्यम् ॥ ४४—४६ ॥

असदविषय इत्यादिना वहिर्मुखनिष्कामसकामभक्ताः क्रमेण दर्शिताः ॥ ४७ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
द्वादशोऽध्यायः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

श्रीवत्साङ्केनेत्यनेन प्रणतः स उत्थाप्य वत्सा संस्पृष्ट आलिङ्गित इत्यर्थः ॥ ४१ ॥

शंसतां प्रशंसतस्तान्मुनीननादृत्य ॥ ४२—४३ ॥

न विशते इति कालः सर्वत्र प्रविशतुं विशन्नपि यत्र न विशति वेदः सर्वं जानन्नपि यत्र ज्ञातुं न विशति कालवेदयोरपि यो न गम्य इत्यर्थः ॥ ४४ ॥ ४५ ॥

न रिष्यते न नश्यति ॥ ४६ ॥

अङ्घ्रिं प्रपन्नानमरवर्यान् सिन्धुमथ्यं सिन्धुमथनोद्भूतममृतं य आशयत् अभोजयत् कपटं युवतिवेषेण यस्य सः ॥ ४७ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
अष्टमे द्वादशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ऋषिमुखेभ्यो शंसतां मोहिनीचरित्रं प्रशंसतां सताम् आत्मभूतां देहार्द्धतां प्रति हृष्टोवाच ॥ ४२—४५ ॥

नरिष्यते नैव नश्यति ॥ ४६ ॥

कपटहेतुर्युवतिवेषः कपटरूपा असुराः हेतवो यस्मिन् तद्भूतमोहिनीरूपइत्यर्थः । सुरादीन् मोहयन् असतामविषयम् भावेन भजनेन गम्यम् अङ्घ्रिं प्रपन्नान् अमरवर्यान् सिन्धुमथनजममृतं यः आशयदभोजयत् तं नतोऽस्मि ॥ ४७ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
द्वादशोऽध्यायः ॥ १२ ॥

भाषा टीका ।

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि—हेराजन् ! इस प्रकार जब श्रीवत्साङ्क भगवान ने बड़े आदर के साथ उमापति से ऐसे कहा, तब महादेवजी श्रीहरि से आज्ञा लेकर अपने गणों के सहित श्रीहरिकी परिक्रमा देकर अपने घर कोगये ॥ ४१ ॥

हे भारत ! भव के अन्तर्यामि श्रीहरि की अंशरूप माया का प्रभाव देखकर भगवान भव ने, पूछने वाले सब ऋषि मुख्यों के आगे बड़े प्रसन्न होकर भवानी से कहने लगे ॥ ४२ ॥

और भवानी से कहे कि, कर्माधीन जन्मादि विकारों से रहित भगवानकी माया का प्रभाव तुमने देखी ? जो भगवान पुरुषों में परपुरुष हैं और सब देवताओं में परदेवता हैं ऐसे महत्व वाले श्रीहरि के गौणावतारों में हम मुख्य होकर मोहित होगये और जोलोग विषयों के पराधीन हैं उन लोगों को क्या कहना चाहिये ॥ ४३ ॥

हजारहों वर्ष के योग समाधि से जब हम विराम को प्राप्त होते हैं उससमय जिस परमात्मा के विषय तुम प्रश्न करती हो, सो वह यही साक्षात् अनादि पुरुष हैं, जिनके साक्षात्

भाषा टीका।

कालभी अपने बल को नहीं दर्शा सके, और वेदभी जिनके नियमन नहीं कर सके है ॥ ४४ ॥

श्रीशुक उवाच ॥

श्रीशुकदेवजी फि-बोले, हे तात! इसप्रकार शार्ङ्गधनुष धारी श्रीहरि का चरित्र हमने तुमसे वर्णन किया, जिनने समुद्र मथन समय में इतने बड़े मन्दराचल को अपने पीठ पर से धारण किया ॥ ४५ ॥

इस कथा को जो पुरुष सदा कीर्तन करे वा सुने उसका कभी भी कोई मनोकामना नष्ट नहीं होसकी, और वारंवार श्रीभगवान के गुण कीर्त्तन करने से यह पुरुष संसार चक्र से छूटकर अन्त काल में मोक्ष को भी प्राप्त होता है ॥ ४६ ॥

अब अध्याय के अन्त में एक श्लोकसे श्रीशुकदेवजी श्रियःपति को वन्दना पूर्वक नमस्कार करते हैं॥ अभक्तों का दुर्लभ और भक्ति वालों को सुलभ ऐसेअपने शरण आये हुये देवताओं को अमृत पिलाया, और कपट से मोहिनी स्त्री का वेष धारण कर असुरों को मोहित किया, आश्रितों के मनोवांछित फल को प्राप्तकरने वाले ऐसे श्रीहरि के चरणा विन्द मे नमस्कार हो ॥ ४७ ॥

इति श्रीमद्भागवत अष्टमस्कन्ध में द्वादश अध्याय की श्रीवृन्दावनस्थ भगवताचार्यकृत भाषा टीका समाप्त ॥ १२ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे द्वादशोऽध्यायः ॥ १२ ॥

॥ त्रयोदशोऽध्यायः ॥

श्रीशुक उवाच।

मनुर्विवस्वतः पुत्रः श्राद्धदेव इति श्रुतः ।
सप्तमो वर्त्तमानो यस्तदपत्यानि मे शृणु ॥ १ ॥
इक्ष्वाकुर्नभगश्चैव धृष्टः शर्यातिरेव च ।
नरिष्यन्तोऽथ नाभागः सप्तमो दिष्ट उच्यते ॥ २ ॥
करूषश्च पृषध्रश्च दशमो वसुमान्स्मृतः ।
मनोर्वैवस्वतस्यैते दशपुत्राः परन्तप ! ॥ ३ ॥
आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः ।
अश्विनावृभवो राजन्निन्द्रस्तेषां पुरन्दरः ॥ ४ ॥
कश्यपोऽत्रिर्वसिष्ठश्च विश्वामित्रोऽथ गौतमः ।
जमदग्निर्भरद्वाज इति सप्तर्षयः स्मृताः ॥ ५ ॥
अत्रापि भगवज्जन्म कश्यपाददितेरभूत् ।
आदित्यानामवरजो विष्णुर्वामनरूपधृक् ॥ ६ ॥
संक्षेपतो मयोक्तानि सप्त मन्वन्तराणि ते ।
भविष्याण्यथ वक्ष्यामि विष्णोः शक्त्याऽन्वितानि च ॥ ७ ॥
विवस्वतश्च द्वे जाये विश्वकर्मसुते उभे ।
संज्ञाच्छाया च राजेन्द्र ! ये प्रागभिहिते तव ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्रयोदशे तु वर्ण्यन्ते सप्तमादीन्यनुक्रमात् ।
मन्वन्तराणि सर्वाणि षड्विधानि पृथक्पृथक् ॥

सप्तमादिमन्वन्तराण्याह—मनुरित्यादिना यावदध्यायसमाप्ति ॥ १—३ ॥

आदित्यादयो देवा इत्यन्वयः ॥ ४ ॥ ५ ॥

भगवतो जन्म अवतारः तमेवाह—आदित्यानाम् "विवस्वानर्यमा पूषा" इत्याद्युक्तानां मध्ये अवरं जन्म यस्य सः ॥ ६ ॥

शक्त्याऽवतारैश्चान्वितानि ॥ ७ ॥

अष्टमं मनुं वक्तुं कथामाह—विवस्वत इति त्रिभिः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवं षष्ठं चाक्षुषमन्वन्तरं सचरित्राजितावतारं निरूप्य सप्तमादिमन्वन्तराण्याह मुनिर्यावदध्यायसमाप्ति—मनुरिति । अधुना विद्यमानः सप्तमो मनुर्विवस्वतः पुत्रः श्राद्धदेव इति प्रसिद्धः तस्य श्राद्धदेवस्यापत्यानि पुत्रान् कथयतो मे मत्तः शृणु ॥ १ ॥

हे परन्तप ! इक्ष्वाकादयश्चैते दश वैवस्वतस्य मनोः पुत्राः॥२-३॥ देवानाह—आदित्या इति । आदित्यादयो देवा इत्यन्वयः । इन्द्रमाह हे राजन् ! तेषामधिपतिरिन्द्रः पुरन्दराख्यः ॥ ४ ॥

सप्तर्षीनाह—कश्यप इति ॥ ५ ॥

अवतारमाह—अत्रापीति । अत्रापि सप्तमे मन्वन्तरे कश्यपाददितेः

तृतीयां वडवामेके तासां संज्ञासुतास्त्रयः ।
यमो यमी श्राद्धदेवश्छायायाश्च सुतान् शृणु ॥ ९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अदितेर्मातुश्च भगवज्जन्माभूद्भगवानवततारेत्यर्थः । स च विष्णुः उपेन्द्राख्यो वामनरूपं धरतीति तथा आदित्यानां विवस्वानर्यमा पूषत्वादीनां षष्ठस्कन्धोक्तानां मध्ये अवरं जन्म यस्य सः आदित्यानां कनीयानित्यर्थः ॥ ६ ॥

एवं वर्त्तमानं सप्तममन्वन्तरमुक्तं षडतीतान्युक्तानि अथ भविष्याणि अष्टमादिमन्वन्तराणि विवक्षुरुक्तान्यनुवदति–सङ्क्षेपत इति। एवं सप्त मन्वन्तराणि संक्षेपतस्तुभ्यं मयोक्तान्यथ भाविष्याणि वक्तुं प्रतिजानीते–भविष्याणीति । अथ विष्णोः शक्तिभिरंशैरवतारैरिति यावत् अन्वितानि भविष्याणि मन्वन्तराण्यष्टमादीनि वक्ष्यामि विष्णोः शक्त्यन्वितानीत्यनेन तेषामवश्यश्रोतव्यत्वं सूच्यते ॥ ७ ॥

अष्टमं मन्वन्तरं वक्तुं तावत्तदुपोद्घातरूपां कथामाह—विवस्वतइति त्रिभिः–विश्वकर्मणः प्रजापतेर्दुहितरावुभे संज्ञा च्छाया नाम्न्यौ विवस्वतः द्वे भार्ये हे राजेन्द्र ! ये संज्ञाच्छाये तव तुभ्यं मया प्राक् षष्ठस्कन्धेऽभिहिते उक्ते ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रासङ्गिकं समाप्याऽवशिष्टश्राद्धदेवादिमनुकथाकथनेन हरेर्माहात्म्यमेव वर्णयति—कतिपयैरुत्तरैरध्यायैः । तत्र श्राद्धदेवः कस्य पुत्र इति तत्राह, मनुरिति ॥ १ ॥

श्राद्धदेवस्यापत्यानि तत्र देवनामानि सप्तऋषिनामानि हरेरवतारविशेषं च वक्ति, इक्ष्वाकुरित्यादिना ॥ २—६ ॥

मन्दानां प्रमेयविज्ञानार्थम् उत्तरमन्वन्तराणि प्रतिजानीते, भविष्याणीति ॥ ७—८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

१—५ ॥

अत्रापीति पद्यं स्वाम्यसम्मतं किन्तु पुस्तकेषु दृश्यते ॥ ६—१३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

मन्वन्तराणि मन्वादिषट्कवन्ति समासतः ।
सप्तमादीनि कथ्यन्ते क्रमादत्र त्रयोदश ॥
१—३ ॥

आदित्यादयो देवा इत्यन्वयः ॥ ४—१८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सप्तमादीनि मन्वन्तराणि वर्ण्यन्ते—मनुरिति त्रयोदशेन ॥ १ ॥ २ ॥ ३ ॥

देवा आदित्यादयः ॥ ४ ॥

भगवतो जन्मावतारः तमाह—आदित्यानां विवस्वदादीनां मध्ये अवरजः कनिष्ठः ॥ ६–७ ॥

विवस्वत एव पुत्रः सावर्णिरष्टमो मनुर्भविष्यतीति वक्तुं तत्पुत्रबाहुल्यमाह–विवस्वत इति त्रिभिः ॥ ८–१४ ॥

भाषाटीका ।

श्रीरुक्मिणीमधुसूदनौ जयतः ॥

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि—सात में मनु विवस्वान् [सूर्य] के पुत्र श्राद्धदेव नाम से विख्यात वैवस्वत हैं जो कि आज कल वर्त्तमान हैं अब उनकी संतान को आप हम से श्रवण करो ॥ १ ॥

इक्ष्वाकु, नभग, धृष्ट, शर्याति, नरिष्यन्त, नाभाग, और सात में दिष्ट ॥ २ ॥

करूष, पृषध्र, और दश में वसुमान् । हे परंतप ! ये दश पुत्र वैवस्वत मनु के हुए ॥ ३ ॥

और इस मन्वन्तर में आदित्य, वसु, रुद्र, विश्वेदेवा अश्विनी कुमार, और ऋभुये सब देवता हुए और हे राजन् इन सबों का इन्द्र पुरन्दर हुआ ॥ ४ ॥

कश्यप, अत्रि, वसिष्ठ, विश्वामित्र, गौतम, जमदग्नि, और भरद्वाज ये सप्त ऋषि हुए ॥ ५ ॥

इस मन्वंतर में भी भगवान का जन्म कश्यपजी से अदिति में हुआ, वे आदित्यों के अनुज विष्णु वामन रूप धारी हुए ॥ ६ ॥

संक्षेप से हमने राजन् ! तुम से सात मन्वंतर कहे । अब विष्णु शक्ति युक्त भविष्यों को कथन करेंगे ॥ ७ ॥

विवस्वान् के विश्वकर्मा की पुत्री दो पत्नी रहीं हे राजन् ! एक संज्ञा दूसरी छाया जो हमने पहिले तुम से कही रहीं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एके वडवां तृतीयामाहुः मम तु सञ्ज्ञैव वडवेति मतम् तदुक्तं षष्ठे "सैव भूत्वाथ वडवा नासत्यौ सुषुवे भुवि" इति यमश्च यमी च यमुना श्राद्धदेवश्चेति त्रयः सुताः ॥ ९ ॥

सावर्णिस्तपतीकन्या भार्या सम्वरणस्य या ।
शनैश्चरस्तृतीयोऽभूदश्विनौ वडवात्मजौ ॥ १० ॥
अष्टमेऽन्तर आयाते सावर्णिर्भविता मनुः ।
निर्मोकविरजस्काद्याः सावर्णितनया नृप ! ॥ ११ ॥
तत्र देवाः सुतपसो विरजा अमृतप्रभाः ।
तेषां विरोचनसुतो बलिरिन्द्रो भविष्यति ॥ १२ ॥
दत्त्वेमां याचमानाय विष्णवे यः पदत्रयम् ।
राद्धमिन्द्रपदं हित्वा ततस्सिद्धिमवाप्स्यति ॥ १३ ॥
योऽसौ भगवता बद्धः प्रीतेन सुतले पुनः ।
निवेशितोऽधिके स्वर्गादधुनास्ते स्वराडिव ॥ १४ ॥
गालवो दीप्तिमान्रामो द्रोणपुत्रः कृपस्तथा ।
ऋष्यशृङ्गः पिताऽस्माकं भगवान्बादरायणः ॥ १५ ॥
इमे सप्तर्षयस्तत्र भविष्यन्ति स्वयोगतः ।
इदानीमासते राजन् ! स्वे स्वे आश्रममण्डले ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सावर्णिः पुत्रः ॥ १०–१२ ॥

पदत्रयं याचमानायेमां सर्वां महीं सप्तमे मन्वन्तरे दत्वाऽष्टमे मन्वन्तरे विष्णोः प्रसादेन च राद्धं लब्धमिन्द्रपदं हित्वेत्यर्थः ॥ १३ ॥ १४ ॥

रामः परशुरामः द्रोणपुत्रोऽश्वत्थामा ॥ १५ ॥

इदानीं तु स्वयोग आसते ॥ १६–१८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वडवाख्यां विवस्वतस्तृतीयां भार्याम् एके आहुः मम तु नैवमेवमतं "सैवभूत्वाथ वडवा नासत्यौ सुषुवे भुवि" इति षष्ठस्कन्धोक्तेः तासां तिसृणां भार्याणां मध्ये संज्ञायाः सुताः त्रयः सुनाच सुनौच सुताः पुमान् स्त्रियेत्येकशेषः एका सुता द्वौ सुनौ इत्यर्थः । तदेवाह—यमश्च यमी च यमुना नदी च श्राद्धदेवश्चेति त्रयः सुता इत्यर्थः ॥ ९ ॥

अथ छायायाः सुतान् शृण्वत्रापि पूर्ववदेकशेषः । तदेवाह—सावर्णिः सुतस्तपत्याख्या कन्या सुता या तपतिः सम्वरणस्य भार्या कथिता शनैश्चरस्तृतीयः सावर्णिशनैश्चरौ द्वौ पुत्रौ तपतिरेका सुता चेत्यर्थः । अश्विनौ तु वडवायाः सुतौ ॥ १० ॥

अथाष्टममन्वन्तरषट्कमाह—अष्टम इत्यादिना । नवमो दक्षसावर्णिरित्यतः प्राक्तनेन ग्रन्थेन अष्टमे मन्वन्तरे आयाते सति सावर्णिर्विवस्वत एव पुत्रो मनुर्भविष्यति निर्मोहादयः सावर्णेर्मनोः पुत्राः भवितारः ॥ ११ ॥

तत्र मन्वन्तरे सुतप आद्याख्या देवगणाः तेषां देवगणानामधिपतिरिन्द्रो विरोचनसुतो बलिर्भविष्यति ॥ १२ ॥

तं विशिनष्टि–दत्वेति द्वाभ्याम्. यो बलिः पदत्रयं याचमानाय विष्णवे वामनायेमां पृथ्वीं दत्वा तत्प्रसादाद्राद्धं लब्धम् इन्द्रपदं हित्वा अनुभवपूर्वकं हित्वेत्यर्थः । ततः सिद्धिं मुक्तिमवाप्स्यति ॥ १३ ॥

योऽसौ बलिर्भगवता बद्धः पुनः प्रीतेन तेनैव भगवता सुतले स्वर्गादप्यधिके लोके निवेशितोऽधुना स्वराडिन्द्र इवास्ते ॥ १४ ॥

अत्र मन्वन्तरे भविष्यतः सप्तर्षीनाह—गालव इति । रामः परशुरामः द्रोणपुत्रोऽश्वत्थामा कृपः कृपाचार्यः ॥ १५ ॥

इमे गालवादयः स्वयोगतः स्वयोगप्रभावात्सप्तर्षयो भविष्यन्ति हे राजन् इदानीं त एते गालवादयः स्वकीयाश्रमेषु वर्तन्ते ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तासां सञ्ज्ञाच्छायावडवानां मध्ये सञ्ज्ञासुता एत इत्याह यम इति ॥ ९—१२ ॥

बलेरिन्द्रपदानन्तरं का सिद्धिरिति तत्राह—दत्वेमामिति । पदत्रयं याचमानाय विष्णवे इमां पृथिवीं दत्वा राद्धं सिद्धमिन्द्रपदं हित्वा यो बलिस्ततः सिद्धिं मुक्तिमवाप्स्यतीत्यन्वयः ॥ १३ ॥

देवगुह्यां सरस्वत्यां सार्वभौम इति प्रभुः ।
स्थानं पुरन्दराद्धृत्वा बलये दास्यतीश्वरः ॥ १७ ॥
नवमो दक्षसावर्णिर्मनुर्वरुणसम्भवः ।
भूतकेतुर्दीप्तिकेतुरित्याद्यास्तत्सुता नृप ! ॥ १८ ॥
पारामरीचिगर्भाद्या देवा इन्द्रोऽद्भुतः स्मृतः ।
द्युतिमत्प्रमुखास्तत्र भविष्यन्त्यृषयस्ततः ॥ १९ ॥
आयुष्मतोऽम्बुधारायामृषभो भगवत्कला ।
भविता येन संराद्धां त्रिलोकीं भोक्ष्यतेऽद्भुतः ॥ २० ॥
दशमो ब्रह्मसावर्णिरुपश्लोकसुतो महान् ।
तत्सुता भूरिषेणाद्या हविष्मत्प्रमुखा द्विजाः ॥ २१ ॥
हविष्मान्सुकृतिः सत्यो जयो मूर्तिस्तदा द्विजाः ।
सुवासनविरुद्धाद्या देवाः शम्भुः सुरेश्वरः ॥ २२ ॥
विष्वक्सेनो विषूच्यां तु शम्भोः सख्यं करिष्यति ।
जातः स्वांशेन भगवान् गृहे विश्वसृजो विभुः ॥ २३ ॥
मनुर्वै धर्मसावर्णिरेकादशम आत्मवान् ।
अनागतास्तत्सुताश्च सत्यधर्मादयो दश ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इदानीं कुत्रास्त इत्यत आह—य इति । स्वराडिव इन्द्र इव ॥ १४ ॥ १५ ॥

स्वयोगतः अच्युतनिष्ठालक्षणयोगात् इदानीं कुत्रासत इति तत्राह । इदानीमिति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

योऽसाविति पुनर्निवेशित इत्यन्वयः ॥ १४—३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

रामो जामदग्न्यः द्रोणपुत्रोऽश्वत्थामा ॥ १५—१८ ॥

भाषा टीका ।

कोई लोग तीसरी एक वडवा नाम वाली स्त्री भी विवस्वान् की कहते हैं उनमें संज्ञा से तीन पुत्र हुए, यम यमी और श्राद्ध-देव । अब छाया के पुत्रों को सुनों ॥ ९ ॥

एक सावर्णि नाम वाला पुत्र, दूसरी तपती नाम वाली कन्या, जो संवरण की भार्या हुई और तीसरा शनीचर हुआ और वडवा नाम वाली तीसरी भार्या के अश्विनी कुमार हुए ॥१०॥

अब जब आठमा मन्वंतर आवेगा तब सावर्णि, मनु होंगे और हे नृप ! सावर्णि विरजस्क आदि मनु के पुत्र होंगे ॥ ११ ॥ उस मन्वंतर में सुतपस विरज अमृतप्रभ आदि देवता होंगे ॥१२॥

जो कि याचना करने पर सप्तम मन्वंतर में विष्णु को तीन पग पृथिवी देकर अष्टम मन्वंतर में श्रीविष्णु की प्रसन्नता से से प्राप्त हुए इन्द्र पद को देकर सिद्ध को प्राप्त होजायँगे ॥१३॥ जिसको प्रथम भगवान् ने बाँधा फिर प्रसन्न होकर स्वर्ग से भी अधिक सुख वाले स्थान में स्थित कर दिया और अब भी वहां स्वराट् के सदृश विराजते हैं ॥ १४ ॥

और उस सावर्णि मन्वंतर में गालव, दीप्तिमान्, राम, द्रोणपुत्र अश्वत्थामा, कृप, ऋष्यश्रृङ्ग, और हमारे पिता भगवान् बादरायण ॥ १५ ॥

हे राजन् ! ये ही सब अपने योग से सप्तऋषि होंगे. जो कि अब अपने २ मंडलों में स्थित हैं ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अद्भुत इन्द्रः ॥ १९—२१ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हविष्मत्प्रमुखा इत्युक्तानामेव केषाञ्चिन्नामान्याह—हविष्मानिति ॥ २२ ॥

विपूच्यां जातस्सन् ॥ २३ ॥

एकादशम इत्यादिरार्षः ॥ २४-२८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अवतारं तच्चरित्रं चाह—देवगुह्यादिति । ईश्वरो भगवान् देवगुह्यात्सरस्वत्यामवतीर्णः सार्वभौम इति प्रसिद्धो विभुः समर्थोऽतएव पुरन्दरात् सप्तममन्वन्तरस्थादिन्द्रात् स्थानमिन्द्रपदं हृत्वाऽपनीय बलये दास्यति अत्रेदमनुसन्धेयं चाक्षुषाख्ये षष्ठे मन्वन्तरे यदा दुर्वासश्शापेन गतश्रीरिन्द्रोऽजितशरणवरणात्तत्सहायोऽमृतं प्राश्य बलिं विजित्य सश्रीकः सदेवगणस्त्रिलोकाधिपत्यं कृतवान् तदा बलिर्भार्गवैराहितबलः तमिन्द्रमुच्चाट्य त्रिविष्टपमधितस्थौ तदा पुनरदित्या ऽऽराधितो भगवानादित्यानामवरजो वामनोभूत्वा पदत्रययाञ्चाव्याजेन बलेस्त्रिविष्टपं गृहीत्वा इन्द्राय पुरन्दराय प्रदाय बलिमनुगृह्णन्निदमाह—

एष मे प्रापितः स्थानं दुष्प्रापममरैरपि ।

सावर्णेरन्तरस्यायं भवितेन्द्रो मदाश्रयः ॥

तावत्सुतलमध्यास्ते विश्वकर्मविनिर्मितम् । इति—

तदेवमनुगृहीतस्तत्प्रभृति सुतले अधिवसन्नायास्यत्यष्टमे मन्वन्तरे तदाऽवतरिष्यमाणेन सार्वभौमाख्येन भगवता पुरन्दरादपनीय दत्तेन्द्रपद इन्द्रो भविष्यति ततस्तदाधिपत्यावसाने सिद्धिमवाप्स्यतीति ॥ १७ ॥

नवममन्वन्तरषट्कमाह—नवम इति । वरुणसम्भवः वरुणस्य पुत्रः दक्षसावर्णिरिति प्रसिद्धो मनुर्नवमो भविता भविष्यति तस्य सुताः धृतकेत्वादयो भविष्यन्ति ॥ १८ ॥

धात्राद्या देवगणा इन्द्रस्तु श्रुतः इति प्रसिद्धो भविता द्युतिमत्प्रभृतयस्सप्तर्षयः भवितारः ॥ १९ ॥

एवं मन्वादयः पञ्चोक्ताः सचरित्रमवतारमाह—आयुष्मत इति । अम्बुधारायां भार्यायामायुष्मतः सकाशाद्भगवानवतीर्णः ऋषभ इति प्रसिद्धो भविता येन ऋषभेण संरुद्धां रक्षितां त्रिलोकीं श्रुताख्य इन्द्रो भोक्ष्यते पालयिष्यति ॥ २० ॥

दशममन्वन्तरषट्कमाह—दशम इति । उपश्लोकस्य सुतो महान् सुगुणः ब्रह्मसावर्णिरिति प्रसिद्धो दशमो मनुर्भविता तस्य ब्रह्मसावर्णेर्मनोः सुताः भूरिषेणाद्या द्विजाः सप्तर्षयस्तु हविष्मत्प्रभृतयः ॥ २१ ॥

एतानेव कांश्चिन्निर्दिशति—हविष्मानिति । सुवासनादयो देवगणाः भवितारः सुरेश्वर इन्द्रस्तु शम्भुः भविता ॥ २२ ॥

अवतारमाह—विष्वक्सेनो विभुर्भगवान् विश्वजितो गृहे तद्भार्यायां विपूच्यां स्वांशेनावतीर्णः शम्भोरिन्द्रस्य सख्यं करिष्यति ॥ २३ ॥

एकादशमन्वन्तरषट्कमाह—मनुरिति । आत्मवान् प्रशस्तमनस्को धर्मसावर्णिरिति प्रसिद्धः एकादशो मनुर्भविष्यति एकादशम इत्यार्षं तस्य धर्मसावर्णेस्सुताः दश सत्यधर्मादयोऽग्रगताः भवितारः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्थानं स्वर्गम् ॥ १७-१९ ॥

अम्बुधारायां स्त्रियां येन ऋषभेण सञ्जातोऽद्भुतो नामेन्द्रः ॥ २०—२२ ॥

शम्भोरिन्द्रस्य शान्तः शान्ताख्यः ॥ २३ ॥

अनागतो भविष्यन् ॥ २४—३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अद्भुत इन्द्रः ॥ १९—२२ ॥

विपूच्यां जातः सन् ॥ २३—२८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अद्भुत इन्द्रः ॥ १९—२१ ॥

हविष्मत्प्रमुखानेवाह—हविष्मानिति ॥ २२ ॥

विपूच्यां मातरि जातस्सन् ॥ २३ ॥

एकादशम इत्यार्षं पदम् एकादशः ॥ २४—२८ ॥

भाषा टीका ।

देवगुह्य सरस्वती में सार्व भौम पैदा प्रभु ईश्वर इन्द्र से स्थान हरण करके बलि को देवेंगे ॥ १७ ॥

नव में मनु दक्ष सावर्णि होंगे जिनका संभव वरुण से है, हे नृप ! भूरिकेतु दीप्तिकेतु इत्यादिक मनु के पुत्र होंगे ॥ १८ ॥

पारामरीचि गर्भ आदिक देवता होंगे और अद्भुत नाम वाले इन्द्र होंगे. तथा द्युतिमान् इत्यादिक सप्त ऋषि होंगे ॥ १९ ॥

आयुष्मान् से अंबुधारा में भगवान् की कला से ऋषभ होंगे। जिनकी कृपा से समृद्धि वाली त्रिलोकी को अद्भुत नाम इन्द्र भोगेगा ॥ २० ॥

हे नृप ! दशमाँ मनु उपश्लोक का पुत्र ब्रह्म सावर्णि होगा, भूरिषेण प्रभृति मनु के पुत्र होंगे इस मन्वंतर में हविष्मान्, सुकृत, सत्य, जय, मूर्ति इत्यादि सप्त ऋषि होंगे। और सुवासन विरुध, आदि देव होंगे तथा शंभु देवराज (इन्द्र) होंगे ॥ २१-२२ ॥

दशमें मन्वंतर में भगवान् विभु विश्वसृक् ब्राह्मण के घर में विषूची गर्भ में अंशांश से जन्म ग्रहण कर विष्वक्सेन नाम से प्रसिद्ध होंगे और उसी देवराज (शंभुनाम वाले इन्द्र) के साथ मित्रता होगी ॥ २३ ॥

विहङ्गमाः कामगमा निर्वाणरुचयः सुराः ।
इन्द्रश्च वैधृतस्तेषामृषयश्चारुणादयः ॥ २५ ॥
आर्यकस्य सुतस्तत्र धर्मसेतुरिति स्मृतः ।
वैधृतायां हरेरंशस्त्रिलोकीं धारयिष्यति ॥ २६ ॥
भविता रुद्रसावर्णी राजन्द्वादशमो मनुः ।
देववानुपदेवश्च देवश्रेष्ठादयः सुताः ॥ २७ ॥
ऋतधामा च तत्रेन्द्रो देवाश्च हरितादयः ।
ऋषयश्च तपोमूर्तिस्तपस्व्याग्नीध्रकादयः ॥ २८ ॥
स्वधामाख्यो हरेरंशः साधयिष्यति तन्मनोः ।
अन्तरं सत्यसहसः सूनृतायाः सुतो विभुः ॥ २९ ॥
मनुस्त्रयोदशो भाव्यो देवसावर्णिरात्मवान् ।
चित्रसेनविचित्राद्या देवसावर्णिदेहजाः ॥ ३० ॥
देवाः सुकर्मसुत्रामसंज्ञा इन्द्रो दिवस्पतिः ।
निर्मोकतत्त्वदर्शाद्या भविष्यन्त्यृषयस्तदा ॥ ३१ ॥
देवहोत्रस्य तनय उपहर्ता दिवस्पतेः ।
योगेश्वरो हरेरंशो बृहत्यां सम्भविष्यति ॥ ३२ ॥

भाषा टीका ।

ग्यारहवां मनु बड़े मनस्वी धर्म सावर्णि होगा उसके सत्य धर्मादि दश पुत्र होंगे ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्य मनोरन्तरं साधयिष्यति सत्यसहसः सूनृतायाश्च सुतः सन् ॥ २९ ॥ ३० ॥ ३१ ॥

दिवस्पतेरिन्द्रस्योपहर्ता सम्पादकः ॥ ३२ ॥ ३३ ॥ ३४ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

विहङ्गमाद्या देवगणाः तेषामधिपतिरिन्द्रस्तु ध्रुव इति प्रसिद्धो भविता सप्तर्षयस्त्वरुणादयः ॥ २५ ॥

अवतारमाह—आर्यकस्येति । आर्यकस्य भार्यायां वैधृतायां जातोऽवतीर्णः हरेरंशस्तत्र मन्वन्तरे धर्मसेतुरिति प्रसिद्धो भविता स च त्रिलोकीं धारयिष्यति रक्षिष्यति ॥ २६ ॥

हे राजन् ! द्वादशो मनुः रुद्रसावर्णिरिति प्रसिद्धो भविता तस्य सुता देवादयः ॥ २७ ॥

तत्र मन्वन्तरे ऋतधामाख्य इन्द्रः हरितादयो देवगणाः सप्तर्षयस्तु तपःप्रभृतयः ॥ २८ ॥

सुधामाख्यो हरेरंशावतारस्तस्य मनोः रुद्रसावर्णेरन्तरं साधयिष्यति स च सत्यसहस्सूनृतायाः सुतः ॥ २९ ॥

त्रयोदशो मनुर्देवसावर्णिरिति प्रसिद्धो भाव्यः भविता देवसावर्णेर्देहाज्जातास्तत्सुताः चित्रसेनादयः ॥ ३० ॥

सुकर्मादिसंज्ञकाः देवगणाः, इन्द्रस्तु दिवस्पतिरिति प्रसिद्धो भविता तथा मन्वन्तरे ऋषयः सप्त ऋषयो निर्मोकादयो भविष्यन्ति ॥ ३१ ॥

देवहोत्रस्य भार्यायां बृहत्यां हरेरम्शः संभविष्यति स च योगेश्वराख्यो देवहोत्रस्य तनयो दिवस्पतेरिन्द्रस्य उपहर्ता इष्टसम्पादको भविता ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दिवस्पतिनामा ॥ ३१—३४ ॥

मनुर्वा इन्द्रसावर्णिश्चतुर्दशम एष्यति ।
उरुगम्भीरबुद्ध्याद्या इन्द्रसावर्णिवीर्यजाः ॥ ३३ ॥
पवित्राश्चाक्षुषा देवा शुचिरिन्द्रो भविष्यति ।
अग्निर्बाहुः शुचिः शुद्धो मागधाद्यास्तपस्विनः ॥ ३४ ॥
सत्रायणस्य तनयो बृहद्भानुस्तदा हरिः ।
वितानायां महाराज ! क्रियातन्तून्विताथिता ॥ ३५ ॥
राजंश्चतुर्दशैतानि त्रिकालानुगतानि ते ।
प्रोक्तान्येभिर्मितः कल्पो युगसाहस्रपर्ययः ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायाम्
वैयासिक्याम् अष्टमस्कन्धे मन्वन्तरानुवर्णनंनाम
त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

मनोरन्तरं मन्वन्तरमित्यर्थः सहसः पितुः ॥ २९—३१ ॥
दिवस्पतेरिन्द्रस्य उपहर्त्ता उपकर्त्ता ॥ ३२—३३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सत्यसहसः सुनृतायाश्च सुतः हरेरंशोऽवतारः तस्य मनोन्तरं साधयिष्यति ॥ २९-३१ ॥

दिवस्पतेरिन्द्रस्योपहर्तोपकारकः ॥ ३२ ॥

भाषा टीका ।

इस मन्वन्तर में विहङ्गम, कामगम, निर्वाण, और रुचिप्रभृति देवता होंगे. वैधृतिनामक उनके इन्द्र होंगे और अरुणादिक आदि सप्तऋषि होंगे ॥ २५ ॥

और भगवान् हरि एक अंश से वैधृता नाम की माता में आर्यक के पुत्र होंगे धर्मसेतु इसनामसे प्रसिद्ध होकर त्रिलोकी का पालन करेंगे ॥ २६ ॥

फिर बारहवें रुद्रसावर्णि नामक मनु होंगे जिनके पुत्र देववान्, उपदेव, और देवश्रेष्ठ आदि होंगे ॥ २७ ॥

और उस मन्वन्तर में ऋतधामा नाम वाले इन्द्र होंगे, तथा हरित देवता, और तपोमूर्त्ति, तपस्वी, आग्नीध्रक आदि सप्त ऋषि होंगे ॥ २८ ॥

और उस समय हरिका अंश स्वधामा नाम वाले सत्यसहा की सूनृता भार्या में उत्पन्न होकर उस मन्वन्तर को पालन करेंगे ॥ २९ ॥

तेरहवें मनु देवसावर्णि होंगे चित्रसेन विचित्रादि उनके पुत्र होंगे ॥ ३० ॥

इस मन्वन्तर में सुकर्म, सुत्राम आदि देवता होंगे दिवस्पति इन्द्र और निर्मोक तत्त्वदर्शी आदिक सप्त ऋषि होंगे ॥ ३१ ॥

इस मन्वन्तर के समय भगवान् श्रीहरि बृहती के गर्भ से एक अंश से अवतार लेकर देवहोत्र के पुत्र होंगे। और योगेश्वर नाम से विख्यात होकर तात्कालिक दिवस्पति नाम के इन्द्र के कार्य साधन करेंगे ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

क्रियातन्तून् कर्मसन्ततीः विताथिता विस्तारयिष्यति ॥ ३५ ॥

युगसाहस्रेण पर्ययः परिवर्तो यस्य युगसहस्रप्रमाणमित्यर्थः ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीधरस्वामिकृतभावार्थदीपिकायाम् ।
त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

चतुर्दशो मनुस्त्विन्द्रसावर्णिरिति प्रसिद्धः एष्यति भविष्यति तद्वीर्यजाः तत्सुता उर्वादयः ॥ ३३ ॥

देवगणास्तु पवित्रादिसंज्ञिताः इन्द्रः शुचिरिति प्रसिद्धः भविष्यति तपस्विनः सप्तर्षयो अग्न्यादयः ॥ ३४ ॥

हरिर्भगवान् सत्रायणस्य तनयो बृहद्भानुरिति प्रसिद्धो भविष्यति, हे महाराज ! स च बृहद्भानुर्वितानायां सत्रायणस्य

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

भार्यायां जातः क्रियातन्तून् यज्ञकर्मसन्तानान् वितायिता विस्तारयिष्यति ॥ ३५ ॥

मन्वन्तरकथनमुपसंहरति—राजन्निति । हे राजन् ! त्रिकालानुगतानि भूतवर्त्तमानभविष्यत्कालानुगतानि तत्र भूतानि षट् वर्त्तमानमेकं भविष्याणि सप्त इत्येवं चतुर्दश मन्वन्तराणि ते तुभ्यं मया प्रोक्तानि एभिश्चतुर्दशभिर्मन्वन्तरैः कल्पः दैनं दिनात्मकः कल्पः स च युगसहस्रपरिमितः युगानां कृतादीनां साहस्रवारं पर्ययः परिवृत्तिर्यस्मिन् स तथाभूतः ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिकायाम्
त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

क्रियातन्तून् क्रियासमुदायान् वितायिता विस्तारं कारयिता ॥ ३५ ॥

त्रिकालानुगतानि अतीतवर्तमानभविष्यत्संज्ञांस्त्रिकालान् अनुवर्त्तमानानीति त्रिलोकानुगतानीति पाठे स्पष्टोऽर्थः ते तव मितः प्रमाणीकृतः ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तपस्विनः ऋषयः ॥ ३४-३५ ॥

युगसहस्रेण पर्य्ययोऽन्तो यस्य सः ॥ ३६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
त्रयोदशोऽष्टमस्य सङ्गतः सङ्गतः सताम् ॥ १३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

चतुर्दशमश्चतुर्दशः ॥ ३३ ॥ ३४ ॥

सत्रायणस्य तनयो विनतायां जातः क्रियातन्तून् कर्मसन्ततीः वितायिता विस्तारयिष्यति ॥ ३५ ॥

युगसाहस्रेण चतुर्युगसहस्रेण पर्यायः परिवर्तः चतुर्युगसहस्रप्रमाणः इत्यर्थः ॥ ३६ ॥

इतिश्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धातप्रदीपे
त्रयोदशाध्यायार्थप्रकाशः ॥ १३ ॥

भाषा टीका ।

चौदहवें मनु इन्द्रसावर्णि नामक होंगे । उरु, गम्भीर, बुद्धि, आदिक मनुके पुत्र होंगे ॥ ३३ ॥

और उस मन्वन्तर में पवित्र, चाक्षुष, देव होंगे तथा शुचिनामक इन्द्र होंगे. अग्निबाहु, शुचि, शुद्ध, मागध, प्रभृति सप्त ऋषि होंगे ॥ ३४ ॥

हे महाराज ! उसकाल में भगवान् विनता के गर्भ से अवतार धारणकर सत्रायण के पुत्र होंगे और बृहद्भानु नाम से प्रसिद्ध होकर क्रिया कलाप का विस्तार करेंगे ॥ ३५ ॥

हे राजन् ! ये भूत भविष्य और वर्त्तमान कालके चतुर्दश (चौदह) मनु हमने तुमारे सामनें कहे इन चतुर्दश मन्वन्तरों का एक कल्प होता है और उस कल्पका प्रमाण सहस्र युग का है ॥ ३६ ॥

इति श्रीमद्भागवत अष्टम स्कन्ध में त्रयोदश
अध्याय की श्रीवृन्दावनस्थ भागवताचार्य कृत
भाषा टीका समाप्त ॥ १३ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे त्रयोदशोऽध्यायः ॥ १३ ॥

॥ चतुर्दशोऽध्यायः ॥

राजोवाच ।

मन्वन्तरेषु भगवन्यथा मन्वादयस्त्विमे ।
यस्मिन्कर्मणि ये येन नियुक्तास्तद्वदस्व मे ॥ १ ॥

ऋषिरुवाच ।

मनवो मनुपुत्राश्च मुनयश्च महीपते ! ।
इन्द्राः सुरगणाश्चैव सर्वे पुरुषशासनाः ॥ २ ॥
यज्ञादयो याः कथिताः पौरुष्यस्तनवो नृप ! ।
मन्वादयो जगद्यात्रां नयन्त्याभिः प्रचोदिताः ॥ ३ ॥
चतुर्युगान्ते कालेन ग्रस्ताञ्छ्रुतिगणान्यथा ।
तपसा ऋषयोऽपश्यन्यतो धर्मः सनातनः ॥ ४ ॥
ततो धर्मं चतुष्पादं मनवो हरिणोदिताः ।
युक्ताः सञ्चारयन्त्यद्धा स्वे स्वे काले महीं नृपाः ॥ ५ ॥
पालयन्ति प्रजापाला यावदन्तं विभागशः ।
यज्ञभागभुजो देवा ये च तत्रान्विताश्च तैः ॥ ६ ॥
इन्द्रो भगवता दत्तां त्रैलोक्यश्रियमूर्जिताम् ।
भुञ्जानः पाति लोकांस्त्रीन् कामं लोकं प्रवर्षति ॥ ७ ॥
ज्ञानं चानुयुगं ब्रूते हरिः सिद्धस्वरूपधृक् ।
ऋषिरूपधरः कर्मयोगं योगेशरूपधृक् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चतुर्दशे तु सर्वेषां मन्वादीनां यथायथम् ॥
पृथक्कर्माणि वर्ण्यन्ते भगवद्वशवर्तिनाम् ॥

॥ १ ॥

पुरुषेणेश्वरेण यज्ञाद्यवतारैः शास्यन्ते नियुज्यन्ते इति तथा ॥ २ ॥

तदेवाऽऽह—यज्ञादय इति ॥ ३ ॥

ऋष्यादीनां कर्माण्याह—चतुर्युगान्त इति चतुर्भिः । यतः येभ्यः श्रुतिगणेभ्यः ॥ ४ ॥

उदिता उक्ताः युक्ताः संयत्ताः सन्तो महीन्धर्मं सञ्चारयन्ति मह्यां धर्मं प्रवर्तयन्तीत्यर्थः ॥ ५ ॥

प्रजापाला मनुपुत्रास्तं धर्मं पालयन्ति यावदन्तं यावन्मन्वन्तरावसानम्, विभागशः पुत्रपौत्रादिक्रमेण ये चान्ये द्यावापृथिव्यादयो यत्र कर्मणि भोक्तृत्वेनान्वितास्तैश्च सह ॥ ६-७ ॥

प्रसङ्गाद्रूपान्तरैरपि जगद्यात्राप्रवर्तनमाह—ज्ञानमिति, द्वाभ्याम् । सिद्धाः सनकादयः ऋषयो याज्ञवल्क्यादयः योगेशा दत्तात्रेयादयः तत्तद्रूपः सन् ज्ञानं कर्म च योगं च ब्रूते ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

एवं मन्वन्तरेषु कथितेषु प्रसङ्गान्मन्वादीनां कृत्यं पृच्छति राजा—मन्वन्तरेष्विति। हे भगवन्! मन्वन्तरेष्वमी उक्ता मन्वादयः आदिशब्दग्राह्यास्तत्पुत्रादयः पञ्चामी मन्वादयः येन यस्मिन् कर्मणि ये नियुक्ताः तन्नोऽस्मभ्यं वदस्व प्रत्येकं मन्वादीनां कृत्यं वदस्वेत्यर्थः ॥ १ ॥

तत्र येनेति पृष्टं नियोक्तारं तावदाह मुनिः—मनव इति। हे महीपते! मन्वादयः पञ्चैते सर्वे पुरुषेणेश्वरेण यज्ञाद्यवतारैः शास्यन्ते नियुज्यन्त इति तथा ॥ २ ॥

तदेवाह—यज्ञादय इति। हे नृप! पौरुष्यः परमपुरुषस्य संबन्धिन्यस्तनवोऽवताराः या यज्ञादयः कथिताः आभिस्तनुभिः प्रचोदिता नियुक्ताः मन्वादयः जगद्यात्रां नयन्ति जगत्पोषणं कुर्वन्तीत्यर्थः ॥ ३ ॥

एवं भगवदवतारो नियोक्ता मन्वादयो नियोज्याः जगद्यात्रानयनं तेषां कर्मेत्युक्तम् अथ कथं जगद्यात्रां नयन्तीत्यपेक्षायां तावद्दषीणां कर्माह—चतुर्युगान्ते इति। पूर्वपूर्वमन्वन्तरावसाने कालेनाध्येत्रभावयुक्तकालेन ग्रस्तान्विप्लुतान् श्रुतिगणान् पुनर्यथा ऋषयः सप्त ऋषयस्तपःप्रभावेनापश्यन् साक्षात्कृत्य प्रवर्त्तितवन्त इत्यर्थः। श्रुतिगणान्विशिनष्टि—यतो येभ्यः श्रुतिगणेभ्यः सनातनो धर्मोऽवबुध्यते इति शेषः ॥ ४ ॥

मनूनां कर्माह—तत इति। ततः ऋषिभिर्यथावच्छ्रुतिगणदर्शनानन्तरं तदवबोधितं स्वं स्वप्रवर्त्यं चतुष्पादं धर्मं हरिणा यज्ञादिरूपिणोदिता उक्ता नियुक्ता इत्यर्थः। सम्यताः सन्तो मनवोऽद्धा साक्षात् स्वेस्वे काले युगानुरूपं महीं मह्यां सञ्चारयन्त्युपदेशेन प्रवर्तयन्ति ॥ ५ ॥

मनुपुत्राणां कृत्यमाह—पालयन्तीति। प्रजापालाः मनुपुत्रास्तं धर्मं यावदन्तं यावन्मन्वन्तरावसानं विभागशः पुत्रपौत्रादिक्रमेण वर्णाश्रमविभागेन च पालयन्ति, देवानां कर्माह—यज्ञेति। ये च ऋषिपितृभूतमनुष्याः यत्र पञ्चमहायज्ञादौ कर्मण्यन्विताः भोक्तृत्वेनान्वितास्तैस्सह देवा यज्ञभागभुजः तद्भोक्तारः ॥ ६ ॥

इन्द्रस्य कर्माह—इन्द्र इति। भगवता यज्ञादिरूपिणा दत्तामत एवोर्जितां प्रभूतां त्रैलोक्यश्रियमनुभवंस्त्रीन् लोकान् पाति, कथं पातीत्यत्राह कामं यथेष्टं लोकेऽभिवर्षति वृष्ट्या पातीत्यर्थः ॥ ७ ॥

अथावतारस्य कृत्यमाह—ज्ञानमिति। चशब्देन मन्वादिनियोजनं समुच्चीयते हरिर्यज्ञाद्यवताररूपः सिद्धरूपधृक् कपिलादिरूपभृत् ज्ञानं युगानुरूपं ब्रूते उपादिशति ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

यथा कथं प्रवृत्त इति शेषः ये इमे मन्वादयो येन पुरुषेण यस्मिन्कर्मणि नियुक्ताः प्रेरिता वर्तन्ते तत्सर्वम् ॥ १—२ ॥

कोऽयं पुरुष इति तत्राह—यज्ञादय इति। मन्वादिकालमारभ्य येन यज्ञनाम्ना हरिणा प्रचोदिता मन्वादयो जगद्यात्रां जगत्स्थितिं नयन्तीत्यन्वयः, यतः श्रुतिगणेभ्यः सनातनो धर्मः सिद्धः ऋषयस्ताञ्छ्रुतिगणान् यथावत्तपसाऽपश्यन् ॥ ३ ॥ ४ ॥

ततस्तदुक्तविधिना हरिणा चोक्ता मनवस्तं चतुष्पादं धर्ममद्धा संचारयन्ति ॥ ५ ॥

प्रजापाला नृपाश्च स्वस्वकाले विभागशो यावदन्तं कर्मक्षयपर्यन्तं महीं पालयन्तीत्यन्वयः ॥ ६–७ ॥

सिद्धस्वरूपः ज्ञानमुपदिशति ऋषिरूपधरो हरिः कर्मयोगेश्वररूपधृग्योगम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

१—३ ॥

चतुर्युगान्ते इति व्यासस्तु तान् श्रुतिगणान् व्यस्यतीति भावः ॥ ४–५ ॥

यज्ञानुकीर्तिना इति पाठः प्रायः सर्वत्र यज्ञान्विताश्च तैरित्येव पाठः स्वामिसम्मतः ॥ ६—९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

मन्वादीनां तु कर्माणि यदशां यानि भवन्त्यथ।
चतुर्दशे प्रकथ्यन्ते तेषां तानि पृथक् पृथक् ॥
१ ॥

पुरुषेण यज्ञाद्यवताररूपेण शास्यन्त इति तथा ॥ २ ॥

शासनमाह—यज्ञादय इति ॥ ३ ॥

ऋष्यादीनां कर्माण्याह, चतुर्युगान्ते यतः येभ्यः ॥ ४ ॥

महीं धर्मं सञ्चारयन्ति मह्यां धर्मं प्रवर्त्तयन्तीत्यर्थः ॥ ५ ॥

प्रजापाला मनुपुत्रास्तं धर्मं पालयन्ति यावदन्तं मन्वन्तरावसानपर्यन्तं विभागशः पुत्रपौत्रादिक्रमेण ये च देवास्ते च पालयन्ति ॥ ६—७ ॥

मन्वादिरूपेण हरिरेव सर्वं करोतीति ज्ञापयन् मन्वादीनां षट्कमपि न नियतमित्युक्तानुक्तं संक्षेपेणाह—ज्ञानमिति द्वाभ्याम्। सिद्धाः सनकादयः योगेशा दत्तादयः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

मन्वादीनां कृत्यं वर्ण्यते—मन्वन्तरेष्विति चतुर्दशेन। इमे मन्वादयः येन नियोक्ता यस्मिन्कर्मणि यथा ये नियुक्ता भवन्ति तन्नो वदस्व ॥ १ ॥

पुरुषेण यज्ञाद्यवताररूपेण शास्यन्ते नियुज्यन्ते इति तथा ॥ २—३ ॥

ऋष्यादीनां कृत्यमाह—चतुर्युगान्ते इत्यादिचतुर्भिः। यथा यथावत् अपश्यन् पश्यन्ति येभ्यः श्रुतिगणेभ्यः धर्मो ज्ञायते इति शेषः ॥ ४ ॥

उदिताः उक्ताः युक्ताः धर्मानुष्ठानयुक्ताः महीं धर्मं संचारयन्ति पुत्राद्युपदेशेन मह्यां धर्मं प्रवर्त्तयन्ति ॥ ५ ॥

प्रजापालाः मनुपुत्राः तं धर्मं यावदन्तं यावन्मन्वन्तरं क्रमशः पुत्रपौत्रादिक्रमशः वर्णाश्रमशः कृतत्रेतादिक्रमशश्च पालयन्ति ये यस्मिन् यज्ञभागे भोक्तृत्वेनान्वितास्तैः सह देवाः यज्ञभागभुजो भवन्ति ॥ ६–७ ॥

सर्गे प्रजेशरूपेण दस्यून्हन्यात्स्वराड्वपुः ।
कालरूपेण सर्वेषामभावाय पृथग्गुणः ॥ ९ ॥
स्तूयमानो जनैरेभिर्मायया नामरूपया ।
विमोहितात्मभिर्नाना दर्शनैर्न च दृश्यते ॥ १० ॥
एतत्कल्पविकल्पस्य प्रमाणं परिकीर्तितम् ।
यत्र मन्वन्तराण्याहुश्चतुर्दश पुरा विदः ॥ ११ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां
संहितायां वैयासिक्याम् अष्टमस्कन्धे
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

प्रसङ्गाद्रूपान्तैररपि ज्ञानादिकं हरिर्मन्वन्तरेषु ब्रूते इत्याह, ज्ञानमिति द्वाभ्याम् । सिद्धस्वरूपधृक् सनकादिरूपधृक् ऋषिरूपधरः याज्ञवल्क्यादिरूपधरः योगेशरूपधृक् दत्तादिरूपधृक् ॥८॥

भाषा टीका ।

श्रीरुक्मिणीनायको जयति ।

राजोवाच ।

राजापरीक्षितबोले, कि—हे भगवान् ! ये मन्वादिक मन्वन्तरों में जिसकर्म में जैसे नियुक्त हुए सो आप कहिये ॥ १ ॥

ऋषिरुवाच ।

श्रीशुकदेवजीबोले, कि—हेमहीपते ! मनु मनुपुत्र, मुनि, इन्द्र, और सुरगण, ये सब श्रीहरिकी आज्ञा पालन करने वाले हैं ॥ २ ॥

क्यों कि—सब मन्वन्तरों मे यज्ञ से आदि लेकर जो अवतार कहे सो राजन् ! मनुप्रभृति सब लोग उनकी आज्ञाके अनुरूप लोक यात्राको चलावे हैं ॥ ३ ॥

जैसे कि, चतुर्युगी के अन्तके अन्तमें काल ग्रस्त श्रुतिगणों ऋषि लोग तपसे देखते हुए, जिन वेदोंसे सनातन धर्म की प्रवृत्ति है ॥ ४ ॥

तहां चतुष्पाद (चार चरण वाले) धर्म को भगवदाज्ञासे बडे सावधानहोकर मनु लोग पृथिवी सञ्चार करते हैं ॥ और राजालोगभी अपने पुत्र पौत्रादि क्रमसे जब तक मन्वन्तर का अन्तआवे तब तक अपने२ कालमें उन धर्मों का पालन करते हैं तथा यज्ञ भाग भोगने वाले देव लोग और लोग भी जिन लोगों का उस कर्म में भोगने का सम्बन्धहै सब पालन करते हैं ॥ ५-६ ॥

और इन्द्र भी भगवान् की दई हुई और बढी हुई त्रिलोकी की सम्पत्ति को भोगता हुआ पालन करता है और समय२ पर यथेष्ठ वर्ष करता है ॥ ७ ॥

और साक्षात् स्वयं हरि युग युग में सिद्धरूपधारण कर ज्ञान सिखाते हैं, और ऋषिरूपधारण कर्म और योगेशोंका रूप लेकर योगभी सिखाते हैं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रजेशा मरीच्यादयस्तेन रूपेण सर्गं करोतीति शेषः । स्वराड्वपूराजमूर्तिः सर्वेषामभावाय भवति पृथग्विधाः गुणाः शीतोष्णादयो यस्य ॥ ९ ॥

नामरूपात्मिकया मायया विमोहितात्मभिर्जनैः नानादर्शनैः शास्त्रैः स्तूयमानो निरूप्यमाणोऽपि नैव दृश्यत इत्यर्थः ॥ १० ॥

प्रासङ्गिकं निरूप्य प्रस्तुतमेवोपसंहरति—एतत्कल्पविकल्पस्यावान्तरकल्पस्य ॥ ११ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपकायाम्
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रजेशरूपेण मरीच्यादिरूपेण सर्गं करोतीति शेषः । स्वराड्वपुः राजमूर्तिस्सन् तदनुप्रवेशेनेत्यर्थः । दस्यून् दुष्टत्वात् हन्याद पुनः कालरूपेण सर्वेषामभावाय लयाय च भवति कथम्भूतः पृथग्गुणः सृष्ट्याद्युपयुक्तगुणविशिष्टः ॥ ९ ॥

नामरूपया नामरूपभाजा मायया विमोहितानि मनांसि येषां तैरत एव नानादर्शनैः ज्ञानैकाकारेष्वात्मसु देवमनुष्यादिनाना बुद्धिं कुर्वद्भिरेभिर्जनैः केवलं स्तूयमान एव शास्त्रेण निरूप्यमाण एव न तु दृश्यते इत्यर्थः ॥ १० ॥

प्रासङ्गिकं निरूप्य "मनवोऽस्मिन् व्यतीताः स्युः कल्पे स्वायंभुवादयः" इति मन्वन्तरकथनार्थतया प्रस्तुतं कल्पमेवोपसंहरति—एतदिति । कल्पविकल्पस्य कल्पभेदस्यावान्तरकल्पस्य :दै

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

दिनकल्पस्येत्यर्थः । एतच्चतुर्दशमन्वन्तरात्मकं प्रमाणं परिकीर्तितं कोऽसौ कल्पविकल्पः पुराविदः कल्पविकल्पयाथात्म्यविदः यत्र कल्पविकल्पे मन्वन्तराणि चतुर्दशाहुरूचुः ॥ ११ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रजापतिरूपेण सर्गं करोति स्वराड्वपुः चक्रवपुः दस्यून्हन्ति पृथग्गुणः अयथार्थज्ञानजनकतमोगुणप्रवर्तकः ॥ ९ ॥

एभिर्नृण्यादिभिः स्तूयमानो दृश्यते नामरूपराहितया अद्वयत्वादिस्वभावविशिष्टया मायया अव्यक्तशब्दवाच्यया मोहितात्मभिः जनैः कल्पितैर्नानादर्शनैरद्वैतादिनानाविधशास्त्रैर्न दृश्यते न ज्ञायते चशब्दाद् द्वैतज्ञानेन दृश्यत इति ग्राह्यम् "अन्यमीशस्य महिमानामिति वीतशोकः" इति श्रुतेः ॥ १० ॥

उपसंहरति—एतदिति । पुराविदो यत्र यस्मिन्कल्पे चतुर्दशमन्वन्तराण्याहुस्तस्य कल्पस्यैतत्प्रमाणमुक्तं यस्मिन्नवान्तरमन्वन्तराण्याहुस्तस्य विकल्पस्यैतत्प्रमाणं परिकीर्तितं शास्त्रान्तरे इति शेषः । इति कल्पविकल्पस्य कल्पभेदस्येति वा ॥ ११ ॥

इति श्री मद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

जनैर्नैव दृश्यत इत्यन्वयः ॥ १० ॥

एतदिति कल्पाः ब्रह्मदिनानि तेषु ये विकल्पा नानाप्रकारास्तेषामेकस्य प्रकारस्येत्यर्थः ॥ ११ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

प्रजेशा मरीच्यादयः स्वराजो मनुपुत्राः काला यौवनवार्द्धक्यादयः अभवाय नाशाय भवति पृथग्विधाः स्थौल्यकार्श्यवार्द्धिक्यपालिनादयो गुणा यतः सः ॥ ९ ॥

इच्छामात्रेणैव सर्वदा सर्वं कर्तुं समर्थस्य भगवत एतावद्भिः पृथक्पृथक् प्रयासवद्भीरूपैः किमिति चेत्तत्राह, नामरूपात्मिकया मायया विमोहितात्मभिरेभिः शास्त्रज्ञैर्जनैः स्तूयमानो निरूप्यमाणोऽपि न्यायादिनानादर्शनैर्नैव दृश्यते इत्यर्थः । तेन तस्य लीलैव कीर्त्यते विधित्सितं त्वतिदुर्गममिति भावः ॥ १० ॥

एवं यत्र चतुर्दशमन्वन्तराण्याहुः एतत् कल्पविकल्पस्य महाकल्पावान्तरकल्पस्य नैमित्तिकस्य प्रमाणम् ॥ ११ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
चतुर्दशो ऽष्टमस्यायं सङ्गतः सङ्गतः सताम् ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

प्रजेशरूपेण मरीच्यादिरूपेण सर्गं करोति स्वराड्पुर्नराधिपमूर्तिः दस्यून् हन्यात् कालरूपेण सर्वेषामभवाय प्रलयाय भवति कथंभूतः पृथग्विधा गुणाः शीतोष्णादयो यस्य सः ॥ ९ ॥

नामरूपया देवमनुष्यादिनामरूपात्मिकया मायया मोहितात्मभिर्मलिनचित्तैर्नानाकारं देहगेहादिविषयकं दर्शनं येषां तैर्वृत्तिभिः स्तूयमानोऽपि न दृश्यते ॥ १० ॥

एतत्कल्पविकल्पस्य महाकल्पावान्तरकल्पस्य दैनं दिनस्येत्यर्थः ॥ ११ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
चतुर्दशाऽध्यायार्थप्रकाशः ॥ १४ ॥

और प्रजापति रूपसे सृष्टि करते हैं राज रूपसे चोरों का नाश करते हैं, और पृथक् गुण शीत उष्ण आदि हैं जिसके ऐसे कालरूपी होकर सर्व के अभाव के अर्थ होते हैं ॥ ९ ॥

नाना प्रकार नाम रूपात्मक मायासे मोहित मति लोगों को नानादर्शनवाले शास्त्रोंके द्वारामी आप नहीं देख पडते हो ॥ १० ॥

राजन् ! यह हमने अवतार कल्पका प्रमाण कथन किया प्राचीन ज्ञाता लोग जिसमें चतुर्दश [चौदह] मन्वन्तरों को कहते हैं ॥ ११ ॥

इति श्रीमद्भागवत अष्टम स्कन्ध में, चतुर्दश अध्याय की
श्रीवृन्दावनस्थ भागवताचार्य कृत
भाषा टीका समाप्त ॥ १४ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे चतुर्दशोऽध्यायः ॥ १४ ॥

॥ पञ्चदशोऽध्यायः ॥

॥ राजोवाच ॥

बलेः पदत्रयं भूमेः कस्माद्धरिरयाचत ।
भूतेश्वरः कृपणवल्लब्धार्थोऽपि बबन्ध तम् ॥ १ ॥
एतद्वेदितुमिच्छामो महत्कौतूहलं हि नः ।
यज्ञेश्वरस्य पूर्णस्य बन्धनं चाप्यनागसः ॥ २ ॥

॥ श्रीशुक उवाच ॥

पराजितश्रीरसुभिश्च हापितो हीन्द्रेण राजन् ! भृगुभिः स जीवितः ।
सर्वात्मना तानभजद्भृगून्बलिः शिष्यो महात्माऽर्थनिवेदनेन ॥ ३ ॥
तं ब्राह्मणा भृगवः प्रीयमाणा अयाजयन्विश्वजिता त्रिणाकम् ।
जिगीषमाणं विधिनाऽभिषिच्य महाऽभिषेकेण महाऽनुभावः ॥ ४ ॥
ततो रथः काञ्चनपट्टनद्धो हयाश्च हर्य्यश्वतुरङ्गवर्णाः ।
ध्वजश्च सिंहेन विराजमानो हुताशनादास हविर्भिरिष्टात् ॥ ५ ॥
धनुश्च दिव्यं पुरटोपनद्धं तूणावरिक्तौ कवचं च दिव्यम् ।
पितामहस्तस्य ददौ च मालामम्लानपुष्पां जलजं च शुक्रः ॥ ६ ॥
एवं स विप्रार्जितयोधनार्थस्तैः कल्पितस्वस्त्ययनोऽथ विप्रान् ।
प्रदक्षिणीकृत्य कृतप्रणामः प्रह्लादमामन्त्र्य नमश्चकार ॥ ७ ॥
अथारुह्य रथं दिव्यं भृगुदत्तं महारथः ।
सुस्रग्धरोऽथ सन्नह्य धन्वी खड्गी धृतेषुधिः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

बलिं पञ्चदशे विश्वजिताऽऽचार्या अयाजयन् ॥
ततोऽसौ स्वर्गमजयद्भयाद्देवा निलिल्यिरे ॥ ० ॥
अत्रेर्यते नवाध्याय्या वामं वामनचेष्टितम् ।
निग्रहच्छलतो यत्र बलेर्भूयाननुग्रहः ॥ ० ॥

ईश्वरः स्वयं कृपणवत्कस्माद्धेतोरयाचत लब्धार्थोभूत्वाऽपि तं कस्माद्बबन्ध ॥ १—२ ॥

तत्र तावद्बलेस्त्रिलोकीमपहर्तु याञ्चादिच्छलनं कृतवानिति वक्तुं ब्राह्मणाराधनेन बलेरकाण्ड एव स्वर्गविजयक्रममाह—पराजितश्रीरित्यादिना यावदध्यायसमाप्ति। युद्धे पराजिता श्रीर्येन सः इन्द्रेणासुभिश्च त्याजितस्सन् भृगून् भृगोर्वंश्यान् शुक्रादीन् महात्मा उदारचित्तः अर्थानां निवेदनेनार्पणेन ॥ ३ ॥

त्रिणाकं स्वर्गं जेतुमिच्छन्तं विश्वजिता यागेनायाजयन् महाभिषेकेणैन्द्रेण बह्वृचब्राह्मणप्रसिद्धेन ॥ ४ ॥

हर्यश्वस्येन्द्रस्य ये तुरङ्गास्तेषामिव वर्णो हरितो येषाम् ॥ ५ ॥

पुरटं सुवर्णम् तूणाविषुधी अरिक्तावक्षयशरौ पितामहः प्रह्लादः जलजं शङ्खम् ॥ ६ ॥

विप्रैरर्जितः सम्पादितो योधनार्थो युद्धपरिकरो यस्य तैरेव

श्रीधरस्वामिकृतभावार्थदीपिका ।

कल्पितं कृतं स्वस्त्ययनं मङ्गलवाचनादि यस्य आमन्त्र्य पृष्ट्वा ॥ ७ ॥

अथारुह्य रराजेति द्वयोरन्वयः सुस्रग्धरः शोभनमालाधरः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं मन्वन्तराण्याकर्ण्य "दत्त्वेमां याचमानाय विष्णवे यः पदत्रयम्" इति संग्रहेणोक्तं हरेर्वामनस्य चरित्रं विस्तरेण शुश्रुषुः पृच्छति राजा—बलेरिति द्वाभ्याम् । हरिः स्वयमीश्वरः अवाप्तसमस्तकामोभूत्वा कृपणवत्कस्माद्धेतोः बलेः सकाशाद्भूमेः पदत्रयमयाचत लब्धार्थोऽपि याच्ञया लब्धपदत्रयोऽपि कस्माद्धेतोस्तम् बलिं बबन्ध ॥ १ ॥

एतद्याच्ञाबन्धनादिकं हरेः कर्म वेदितुमिच्छामो वयमत्रैतच्छूवणे नोऽस्माकं परमधिकं कौतूहलं वर्तते एतच्छन्दनिर्दिष्टमाह—पूर्णस्यावाप्तसमस्तकामस्य यज्ञेश्वरस्य भगवतः कर्तरि षष्ठी यज्ञेश्वरेणानागसो निरपराधिनो बलेः बन्धनं चकार याचनञ्च ॥ २ ॥

इत्येतदेवमापृष्टः सविस्तरं तच्चरित्रमाह मुनिर्नवभिरध्यायैः—तत्रतावद्बलेस्त्रिलोकीमपहर्तुमुपायान्तरमपश्यन् याच्ञां कृतवानिति वक्तुन्तावद्बलेः गुरुसेवाबलेन स्वर्गप्राप्तिक्रममाह—पराजितश्रीरित्यादिना यावदध्यायसमाप्ति । हे राजन् ! इन्द्रेण देवासुरे युद्धे पराजिता गृहीता श्रीराज्यलक्ष्मीर्यस्य सः असुभिः प्राणैश्च हापितः त्याजितः पुनर्भृगुभिर्भृग्वादिभिर्जीवितः जीवनं प्रापितो भृगूणां शिष्यो बलिर्वैरोचनिः तान् भृगूनेव सर्वात्मना करणत्रयैक्येन महात्मा उदारमना अर्थनिवेदनेन धनसमर्पणेन न केवलं शुष्कभक्त्येत्यर्थः । चाभजदाराधितवान् ॥ ३ ॥

तं भजन्तं त्रिणाकं स्वर्गं जेतुम् इच्छन्तं बलिं महानुभावाः ब्राह्मणा भृगवः प्रीयमाणास्सन्तः विश्वजिता यागेनायाजयन् किं कृत्वा ? महाभिषेकेण बहुचब्राह्मणप्रसिद्धेनाभिषिच्य ॥ ४ ॥

ततो विश्वजिद्यागे हविर्भिरिष्टाद्धुताशनाद्रथादय आसन् तत्र तावत्काञ्चनपरिकरबद्धो रथः आविर्बभूव ततो हर्यश्वस्य इन्द्रस्य तुरङ्गाणामेव वर्णो हरितो येषां ते हया उद्बभूवुस्ततः सिंहेन विराजमानो ध्वजः ॥ ५ ॥

ततः पुरटोपनद्धं काञ्चनपरिकरबद्धं धनुररिक्तावक्षयौ तूणौ इषुधी दिव्यं कवचञ्चासन् पितामहः प्रह्लादः तस्य बलेः सम्प्रदानस्य सम्बन्धविवक्षया षष्ठी तस्मै अम्लानानि पद्मानि यस्यां तां मालां ददौ शुक्रः जलजं शङ्खं ददौ इत्यनुषङ्गः ॥ ६ ॥

एवं भृगुभिर्विप्रैरर्जितः सम्पादितो योधनार्थो युद्धपरिकरो यस्य स बलिस्तैर्विप्रैः कल्पितं कृतं स्वस्त्ययनं मङ्गलवाचनादिकं यस्य तादृशोऽथ विप्रान् परिक्रम्य तेभ्यः कृतः प्रणामो येन सः प्रह्लादमामन्त्र्य पृष्ट्वा तस्मै नमश्चकार ॥ ७ ॥

अथ भृगुभिर्दत्तं दिव्यमनर्घं रथमारुह्य स बलिः रराजेत्यन्वयः । कथम्भूतः ? स्रग्धरः मालाधरः सुसन्नद्धः कवचित्वात् धन्वी धनुर्द्धरः धृत इषुधिर्येन सः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

लब्धार्थः स्वीकृतत्रैलोक्यः ॥ १ ॥

पूर्णस्य ईश्वरस्य याच्ञा अनागसो बलेर्बन्धनं यद् एतत् ॥ २ ॥

असुभिः प्राणैर्हापितो विजितः स्वार्थनिवेदनेन सर्वस्वसमर्पणेन अभीष्टार्थविज्ञापनेन वा तान् भृगून् सर्वात्मना अभजत् ॥ ३ ॥

विश्वजिता सर्वस्वदक्षिणात्मना यागेन महाभिषेकेण मन्त्रपूतस्नानविशेषेण ॥ ४ ॥

हर्यश्वस्य इन्द्रस्य तुरङ्गाणां वर्णो येषां ते तथा इन्द्राश्ववर्णसदृशवर्णा इत्यर्थः । इद्धाद्दीप्तात् ॥ ५ ॥

पुरटोपनद्धं सुवर्णबद्धम् अरिक्तौ बाणैरशून्यौ अक्षसायकावित्यर्थः जलजं शङ्खम् ॥ ६ ॥

योधनार्थो युद्धसाधनं विप्राद्भृगोः ॥ ७ ॥

स्रग्धरो मालाधरः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १—९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

बलिर्लब्धरथाश्वादिः कृताद्विश्वजितो मखात् ।
स्वर्गं गतः पुरा निन्युरिति पञ्चदशे कथा ॥

॥ १—२ ॥

युद्धे देवैः पराजिता श्रीर्यस्य सः हापितस्त्याजितः महात्मा उदारचित्तः अर्थानां समर्पणेन ॥ ३ ॥

विश्वजिता यज्ञेन ॥ ४ ॥

हर्यश्वस्येन्द्रस्य तुरङ्गाणामिव वर्णा हरितो येषां ते ॥ ५ ॥

पितामहः प्रह्लादः जलजं शङ्खम् ॥ ६ ॥

विप्रैरर्जिताः सम्पादिता योधनार्था युद्धार्थकवस्तूनि यस्य सः आमन्त्र्य पृष्ट्वा ॥ ७—९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पञ्चदशे पराजितस्यापि बलेर्गुरुप्रसादतो जयो वामनावतारचरितप्रश्नप्रसङ्गतो वर्ण्यते—ईश्वरः स्वयं कृपणवत् बलेः सकाशाद्भूमेः पदत्रयं कस्माद्धेतोरयाचत लब्धार्थोभूत्वापि तं कस्माद्बबन्ध ॥ १ ॥ २ ॥

युद्धे इन्द्रेण पराजिता श्रीर्यस्य सः असुभिश्च हापितस्त्याजितः स भृगुभिर्भृगुवंश्यैः शुक्रादिभिर्जीवितस्सन् तान् भृगून् अर्थानां निवेदनेन अभजत् ॥ ३ ॥

हेमाङ्गदलसद्बाहुः स्फुरन्मकरकुण्डलः ।
रराज रथमारूढो धिष्ण्यस्थ इव हव्यवाट् ॥ ९ ॥
तुल्यैश्वर्यबलश्रीभिः स्वयूथैर्दैत्ययूथपैः ।
पिबद्भिरिव खं दृग्भिर्दहद्भिः परिधीनिव ॥ १० ॥
वृतो विकर्षन्महतीमासुरीं ध्वजिनीं विभुः ।
ययाविन्द्रपुरीं स्वृद्धां कम्पयन्निव रोदसी ॥ ११ ॥
रम्यामुपवनोद्यानैः श्रीमद्भिर्नन्दनादिभिः ।
कूजद्विहङ्गमिथुनैर्गायन्मत्तमधुव्रतैः ॥ १२ ॥
प्रवालफलपुष्पोरुभारशाखामरद्रुमैः ।
हंससारसचक्राह्वकारण्डवकुलाकुलाः ।
नलिन्यो यत्र क्रीडन्ति प्रमदाः सुरसेविताः ॥ १३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

त्रिणाकं स्वर्गं जिगीषमाणं तं बलिं विश्वजिता यागेन अयाजयन् हर्यश्वतुरङ्गाणामिन्द्राश्वानामिव वर्णो येषां ते ॥ ४ ॥ ५ ॥

पुरटोपनद्धं स्वर्णमयवस्त्रावेष्टितम् अरिक्तावक्षयशरौ पितामहः प्रह्लादः जलजं शङ्खम् ॥ ६ ॥

विप्रैरर्जितः सम्पादितः योधनार्थः युद्धपरिकरो यस्य सः विप्रैः कल्पितं सम्पादितं स्वस्त्ययनं मङ्गलवाचनादिकं यस्य स अथ विप्रान् प्रदक्षिणीकृत्य तेभ्यः कृतः प्रणामो येन सः प्रह्लादं प्रदक्षिणीकृत्य तस्मै नमश्चकार तान् सर्वानामन्त्र्य पृष्ट्वा ॥ ७ ॥

अथ रथमारुह्य रराजेत्युत्तरेणान्वयः ॥ ८ ॥

———

भाषा टीका ।

श्रीरुक्मिणीप्राणजीवनो जयति ।

राजोवाच ।

राजा परीक्षित बोले, कि—श्रीहरि सर्वेश्वर भी होकर कृपण के तरह बलि महाराज से क्यों तीन पग पृथिवी मागते हुए ? और उस्का राज पाट सब लेकर भी उस्को क्यों बांधते हुए ॥१॥

हे महाराज ! इस बातको हम अवश्य जानने की इच्छा करते हैं, कि—सर्वेश्वर सर्व कामों से परिपूर्ण की याचना, और निरपराधी को बांधना ऐसा क्यों किया ॥ २ ॥

श्रीशुक उवाच ।

श्रीशुकदेवजी बोले, कि–हे राजन् ! इन्द्रने बलिका पराजय भी किया और प्राणों से हीन कर छोडदिया, फिर भृगुवंशी ब्राह्मणो ने उस्को जिवाया, तब हे तात ! उस उनके शिष्य महात्मा-बलिने भी भृगुवंशी ब्राह्मणों के सर्वार्थ निवेदन कर के सर्व प्रकारसे भजन किया ॥ ३ ॥

तबतौ महा प्रभाव वाले भृगुवंशी ब्राह्मण लोग, प्रसन्न होकर स्वर्ग के जिताने की इच्छा कर महाभिषेक से अभिषेक कराकर विश्वजित् यागसे यजन कराते हुए ॥ ४ ॥

तदनन्तर अग्नि मे हविषसे सजा हुआ रथ, और सूर्यके घोडाओं के सदृशरङ्गवाले घोडा, और सिंह के चिन्ह कीध्वजा, ये सब निकाले ॥ ५ ॥

और सुवर्णसे मढा हुआ दिव्य धनुष, और बाणोंसे भरे हुए दो तरकस तथा एक दिव्य कवच भी निकाला। और उस समय बलिको प्रह्लादजीने अम्लान पुष्पों की माला दीनी, और कुलाचार्य श्रीशुक्रजीने विजयशङ्ख दिया ॥ ६ ॥

इस प्रकार ब्राह्मणो दें संग्रामकी सामग्री जिस्को और ब्राह्मणोंकी दाक्षिणा देकर प्रणामकरके प्रह्लादजीसे आज्ञा लेकर नमस्कार करता हुआ ॥ ७ ॥

तिसके पीछें भृगुलोगों ने दिये हुए दिव्य रथपर बैठकर वह महारथी सुन्दर माला को धारण किये धनुष खड्ग और तरकस को लगाकर कटिबद्ध हो गया ॥ ८ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

हेमाङ्गदाभ्यां लसन्तौ बाहू यस्य धिष्ण्यस्थः भवने प्रज्वलितः कुण्डस्थ आहवनीय इवेति वा ॥ ९ ॥

तुल्यमैश्वर्यं बलं च श्रीश्च येषां तैर्दैत्ययूथपैर्वृतो ययाविति द्वयोरन्वयः परिधीन् दिशः ॥ १० ॥

स्वृद्धामतिसमृद्धाम् ॥ ११ ॥

धिक् ग्रास्यसुखं तथाविधां पुरीमकस्मादेव परित्यज्य इन्द्रादयः

आकाशगङ्गया देव्या वृतां परिखभूतया ।
प्राकारेणाग्निवर्णेन साट्टालेनोन्नतेन च ॥ १४ ॥
रुक्मपट्टकपाटैश्च द्वारैः स्फटिकगोपुरैः ।
जुष्टां विभक्तप्रपथां विश्वकर्मविनिर्मिताम् ॥ १५
सभाचत्वररथ्याढ्यां विमानैर्न्यर्बुदैर्युताम् ।
शृङ्गाटकैर्मणिमयैर्वज्रविद्रुमवेदिभिः ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिकायाम्

पलायिता इति वैराग्यार्थमिन्द्रपुरीमनुवर्णयति–रम्यामिति सार्द्धैरेकादशभिः । उपवनानि फलप्रधानानिनिकटस्थानि वा उद्यानानि पुष्पप्रधानानि दूरस्थानि वा तै रम्याम् कूजन्ति विहङ्गमिथुनानि येषु गायन्तो मत्ता मधुव्रता येषु ॥ १२ ॥

प्रवालादीनामुरुभारो यासु ताः शाखा येषां ते अमरद्रुमा येषु तैः यत्र यासु सुरसेविताः प्रमदाः क्रीडन्ति ताः हंसादिकुलैराकुलाः व्याप्ता नलिन्यः सरांसि यत्र येषु सन्ति तैरुपवनोद्यानैः रम्यामिति पूर्वेणान्वयः ॥ १३ ॥

किञ्च परिखभूतया आकाशगङ्गया वृताम् प्राकारेण सौवर्णेन च वृताम् अट्टालाः प्राकारोपरि रचितान्युन्नतानि युद्धस्थानानि तत्सहितेन ॥ १४ ॥

रुक्मपट्टानि कपाटानि येषु तैर्द्वारैरवान्तरैः स्फटिकमयैर्गोपुरैश्च पुरद्वारैर्जुष्टाम् विभक्ताः प्रपथा राजमार्गा यस्याम् ॥ १५ ॥

सभा उपवेशस्थानानि चत्वराणयङ्गणानि रथ्या उपमार्गास्तैराढ्यां सम्पन्नाम् न्यर्बुदं दशकोटयस्तैर्गणनीयैरनन्तैर्विमानैर्युताम् वज्रविद्रुममय्यो वेदयो येषु तैः श्टङ्गाटकैश्चतुष्पथैर्युताम् ॥ १६ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

हेमाङ्गदाभ्यां लसन्तौ बाहू यस्य स्फुरती मकरकुण्डले यस्य तथाभूतो रथमारूढो रराज, क इव ? धिष्ण्यस्थः वने प्रज्वलितः हव्यवाडग्निरिव कुण्डस्थ आहवनीय इवेति वा ॥ ९ ॥

दैत्ययूथपैर्वृतः स्पर्द्धामिन्द्रपुरीं ययौ इत्यन्वयः । कथम्भूतैः ? तुल्यमैश्वर्यं बलं श्रीश्च येषां तैः सयूथैः ससैन्यैः हरिभः समन्तात्खं पिबद्भिरिव परिधीन् दिशो दहद्भिरिव स्थितैः ॥ १० ॥

कथम्भूतस्सन् ? विभुस्समर्थः महतीमासुरीं ध्वजिनीं सेनां विकर्षन् प्रस्थापयन् रोदसी द्यावापृथिव्यौ कम्पयन्निव ॥ ११ ॥

समृद्धिमेव दर्शयितुमिन्द्रपुरीं वर्णयति—रम्यामिति सार्द्धैरेकादशभिः । श्रीमद्भिः फलपुष्पादिसमृद्धिमद्भिर्नन्दनादिभिरुपवनैरुद्यानवनैश्च रम्यां तत्रोपवनानि फलप्रधानानि निकटस्थानि वा उद्यानानि पुष्पप्रधानानि दूरस्थानि वा कथम्भूतैः कूजन्ति विहङ्गमिथुनानि येषु गायन्तो मधुना मत्ता मधुव्रता येषु तैः ॥ १२ ॥

प्रवालादीनाम् उरुभारो यासु ताः शाखा येषां ते अमरद्रुमा येषु तैः यत्र यासु सुरसेविताः प्रमदाः क्रीडन्ति ताः हंसादिकुलैराकुला व्याप्ताः नलिन्यः सरांसि यत्र येषु तैरुपवनोद्यानैः रम्यामिति पूर्वेणान्वयः ॥ १३ ॥

किञ्च परिखाभूतया देव्या देवस्य त्रिविक्रमस्य पादाङ्गुष्ठजया आकाशगङ्गया प्राकारेण च जुष्टामित्यन्वयः । कथंभूतेन ? अग्निरिव वर्णो यस्य तेन सुवर्णमयेनेति भावः । अट्टालाः प्रकारोपरिरचितानि युद्धस्थानानि तत्सहितेन उन्नतेन चेति ॥ १४ ॥

रुक्मपट्टानि कपाटानि येषु तैः अवान्तरद्वारैः स्फटिकमयैर्गोपुरैः पुरद्वारैश्च जुष्टां विभक्ताः प्रपथा राजमार्गाः यस्यां विश्वकर्मणा विनिर्मिताम् ॥ १५ ॥

सभादिभिराढ्यां सुन्दरां सम्पन्नां वा तत्र सभा आवेशस्थानानि चत्वराण्यङ्गणानि रथ्याः उपमार्गाः न्यर्बुदं दशकोटयः ताभिर्गणनीयैरनन्तैर्विमानैर्युतां वज्रविद्रुममय्यो वेदयो वेदिका येषु तैः श्टङ्गाटकैः चतुष्पथैर्युताम् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

धिष्ण्यस्थ आहवनीयादिस्थाने स्थितः हव्यवाडग्निः ॥९-१३॥
यत्रेन्द्रपुर्यां यत्र नलिनीषु परिखभूतया दीर्घिकावद्वर्तमानया ॥ १४ ॥
पट्टमुपरिबन्धः ॥ १५ ॥
न्यर्बुदैरित्युपलक्षणम् अनेकैरित्यर्थः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तुल्यैश्वर्य इत्यादि त्रयोदशकं तत्र नार्यं अर्चिर्भिरिति प्लुतत्वादुत्थाभावः थामिति मानिन इत्यादय ऐहिका एव ज्ञेयाः ॥ १०—३० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

दैत्ययूथपैर्वृतस्सन्निन्द्रपुरीं ययाविति द्वितियेनान्वयः परिधीन् दिशः ॥ १०—१२ ॥

यत्र नित्यवयोरूपाः श्यामा विरजवाससः ।
भ्राजन्ते रूपवन्नार्यो ह्यर्चिर्भिरिव वह्नयः ॥ १७ ॥
सुरस्त्रीकेशविभ्रष्टनवसौगन्धिकस्रजाम् ।
यत्रामोदमुपादाय मार्ग आवाति मारुतः ॥ १८ ॥
हेमजालाक्षनिर्गच्छद्धूमेनाऽगरुगन्धिना ।
पाण्डुरेण प्रतिच्छन्नमार्गे यान्ति सुरप्रियाः ॥ १९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

प्रवालादीनामुरुभारो यासु ताः शाखा येषां ते अमरद्रुमा येषु तैः यत्र नन्दनादिषु वनेषु नलिन्यः सन्ति यासु नलिनीषु प्रमदाः स्त्रियः ॥ १३ ॥

पुरीं विशिनष्टि—आकाशेत्यादि । परिखभूतया परिखारूपया ॥ १४ ॥

गोपुरं पुरद्वारं विभक्ताः प्रपथा राजमार्गा यस्यां ताम् ॥ १५ ॥

सभा उपवेशस्थानानि चत्वराण्यङ्गणानि रथ्या उपमार्गाः शृङ्गाटकैश्चतुष्पथैः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हेमाङ्गदाभ्यां लसन्तौ बाहू यस्य सः धिष्ण्यस्थः कुण्डस्थ पावक इव ॥ ९ ॥

स्वयूथैः स्वभृत्यैर्दैत्ययूथपैश्च वृतः इन्द्रपुरीं ययाविति द्वयो रन्वयः तुल्यमैश्वर्यं बलं श्रीश्च येषां तैः ॥ १० ॥

स्वृद्धां सुष्ठु ऋद्धां समृद्धाम् ॥ ११ ॥

एवं समृद्धियुतापि पुरी सुखदा नेति वैराग्यार्थं समृद्धिमेव दर्शयितुं पुरीं वर्णयति । रम्यामिति सार्द्धैरेकादशभिः कूजन्ति विहङ्गमिथुनानि येषु तैः गायन्तो मत्ता मधुव्रता भ्रमरा येषु तैः नन्दनादिभिः उपवनैर्निकटस्थैः उद्यानैर्दूरस्थैः रम्याम् ॥ १२ ॥ प्रवालादीनामुरुभारो यासु ताः शाखा येषां तेऽमरद्रुमा येषु तैः यत्र यासु सुरसेविताः सुरप्रियाः प्रमदाः क्रीडन्ति ताः हंसादि कुलैराकुलाः व्याप्ताः नलिन्यः सरस्यो यत्र येषु सन्ति तै र्नन्दनादिभिः रम्यामिति पूर्वेणैवान्वयः ॥ १३ ॥

परिखभूतया परिखाभूतया ॥ १४ ॥

रुक्मपट्टानि कपाटानि येषु तैर्द्वारैर्गृहद्वारैः स्फटिकमयैर्गोपुरैः पुरद्वारैश्च विभक्ताः प्रपथा राजमार्गा यस्यां ताम् ॥ १५ ॥

सभा उपवेशस्थानानि चत्वराण्यङ्गणानि रथ्या उपमार्गास्तैराढ्यां सम्पन्नाम् वज्रादिमया वेदयो येषु तैः शृङ्गाटकैश्चतुष्पथैर्युक्ताम् ॥ १६ ॥

भाषाटीका ।

कानों में स्फुरायमान मकराकृत कुण्डलों को पहिने हुए रथके ऊपर बैठा हुआ इस प्रकार शोभा देता हुआ कि जैसे अग्निशाला में अग्नि दहकती हो ॥ ९ ॥

तुल्य ऐश्वर्य बल और शोभावाले यूथप लोगों को तथा दृष्टिसे जानों आकाश को पीकांयय, और दिशाओं को जला देवग ऐसे भयङ्कर दैत्य यूथप लोगों को साँथ लेकर ॥ १० ॥

बडी भारी आसुरी सेना को खींचता हुआ सब सम्पत्ति से समृद्ध इन्द्रपुरी को पृथिवी आकाशको कम्पाता हुआसा गया ॥ १२ ॥

जिन बगीचाओं में नवीन फल पुष्पों के भारों से झुकी हुई शाखा वाले सुरद्रुमों से और हंस सार स चकोर कारण्डव आदि पक्षियों के समूहों से विकसित कमल वाली छोटी२ तलाई शोभा देरही है जिन में देवसे वित प्रमदा जान विहार पूर्वक क्रीडा कर रहीं हैं ॥ १३ ॥

और आकाशमें जिस इन्द्रपुरी के चारो तरफ श्रीगंगाजी परिखा (खाई) हो रही है, और अग्नि सदृश वर्ण वाला सुवर्ण का जिसके चारों तरफ प्रकार [परकोटा है ॥ १४ ॥

और उसमें जोद्वार हैं तिनमें उत्तम काम वाले सुवर्ण के विवाट जंड हैं और स्फटिक मणिके जिसमें गोपुर हैं । भीतर सुन्दर विभागवाली वीथी और राजमार्ग से शुसोभित है, और जिस पुरी को साक्षात् विश्वकर्माने निर्वाण करी है ॥ १५ ॥

और जामें सभामे चौक गौ वीथी अरतग वोभित हो रही है और न्यर्बुदों [दशकोटिका एक न्यर्बुद होता है] विमानों से विभूषित है और जिसपुरी में मणि मय चौराहे जिनमें बीच२ में हीरा और मूगाओं के चोंतरे बने हुए हैं ॥ २६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नित्यं वयस्तारुण्यं रूपं च सौकुमार्यं यासां ताः रूपवन्नार्यः स्वलङ्कृताः स्त्रियः यत्र यस्यां भ्राजन्ते ॥ १७ ॥

सुरस्त्रीणां केशेभ्यो विभ्रष्टानां नवसौगन्धिकस्रजामामोदम् ॥ १८ ॥

मुक्तावितानैर्मणिहेमकेतुभिर्नानापताकावलभीभिरावृताम् ।
शिखण्डिपारावतभृङ्गनादितां वैमानिकस्त्रीकलगीतमङ्गलाम् ॥ २० ॥
मृदङ्गशङ्खाऽऽनकदुन्दुभिस्वनैः सतालवीणामुरजर्ष्टिवेणुभिः ।
नृत्यैः सवाद्यैरुपदेवगीतकैर्मनोरमां स्वप्रभया जितप्रभाम् ॥ २१ ॥
यां न व्रजन्त्यधर्मिष्ठाः खला भूतद्रुहः शठाः ।
मानिनः कामिनो लुब्धा एभिर्हीना व्रजन्ति यत् ॥ २२ ॥
तां देवधानीं स वरूथिनीपतिर्बहिः समन्ताद्रुरुधे पृतन्यया ।
आचार्यदत्तं जलजं महास्वनं दध्मौ प्रयुञ्जन्भयमिन्द्रयोषिताम् ॥ २३ ॥
मघवांस्तमभिप्रेत्य बलेः परममुद्यमम् ।
सर्वदेवगणोपेतो गुरुमेतदुवाच ह ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हेमगवाक्षेभ्यो निर्गच्छता धूमेन सुरप्रिया अप्सरसः ॥१९॥
मुक्तामयैर्वितानैर्मणिहेममयैः केतुभिश्च ध्वजैर्नानापताका-युक्ताभिर्वलभीभिश्च विमानानां पुरो भागैरावृतां व्याप्ताम् वैमानिक-स्त्रीणां कलगीतैर्मङ्गलाम् ॥ २० ॥
उपदेवानां गन्धर्वादीनां गीतकैश्च मनोरमाम् जिता प्रभा साचाद्दीप्त्यधिष्ठात्री देवता यया ताम् अन्यैरजितप्रभामिति वा पाठान्तरे जिता ग्रहाः सूर्यादयो यया ॥ २१ ॥
यत् याम् ॥ २२ ॥
पृतन्यया सेनया ॥ २३—२४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नित्यं वयस्तारुण्यं रूपं सौकुमार्यं च यासां ताः श्यामाः यौवन मध्यस्थाश्च विरजं निर्मलं वासो यासां ताः रूपवत्यः नार्यः स्त्रियः मार्चिर्मिः शिखाभिर्वह्नय इव यत्र यस्यां राजन्ते ते त्यर्थः ॥ १७ ॥
यत्र यस्यां सुरस्त्रीणां केशेभ्यो विभ्रष्टानां नवसौगन्धिक-स्रजामामोदमुपादाय मारुतो हेमगवाक्षेभ्यो विनिर्गच्छता धूपेना-गरुसुगन्धिना सह मार्गे वहति ताम् ॥ १८ ॥
यस्यां मार्गे पाण्डुरेण पटेन प्रतिच्छन्ने मार्गे सुरस्त्रियो-ऽप्सरसः यान्ति सञ्चरन्ति ताम् ॥ १९ ॥
मुक्तामयैर्वितानैर्मणिहेममयैः केतुभिश्च नानाविधानां पता-कानामावलिभिश्च विराजितां शिखण्ड्यादिभिर्नादितां वैमानिक-स्त्रीणां मधुरगीतैर्मण्डिताम् ॥ २० ॥
मृदङ्गादीनां स्वनैः तालादिध्वनिसहितैर्नृत्तैः सवाद्यैरुप देवानां गन्धर्वादीनां गीतकैश्च मनोरमां स्वप्रभया जिता प्रभा साक्षाद्दिव्यगीताद्यधिष्ठात्री देवता यया 'तामन्यैरजितप्रभाम्' इति वा पाठान्तरे जिता ग्रहाः सूर्यादयो यया ताम् ॥ २१ ॥

यत् यां सामान्ये नपुंसकम् अधर्मिष्ठादयो न व्रजन्ति इतः प्रेत्य न प्राप्नुवन्ति खला दुरात्मानः शठाः मूर्खाः मानिनोऽहङ्कारिणः लुब्धाः वञ्चकाः ॥ २२ ॥
तामेवम्भूतां देवधानीममरावतीं बहिः समन्ताद्वरूथिन्याः सेनायाः पतिः स बलिः पृतन्यया सेनया रुरुधे तत इन्द्र-योषितां भयमुत्पादयन्नाचार्येण शुक्रेण दत्तं महास्वनं शङ्खं दध्मौ ॥ २३ ॥
मघवानिन्द्रस्तं बलेः परममधिकम् उद्योगं ज्ञात्वा सर्वैः देवानां गणैरुपेतो बृहस्पतिमित्थम् उवाच ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

शृङ्गाटकैश्चत्वरमण्डपैः वज्ररत्नविद्रुमखचितवेदिभिः श्यामाः षोडशवर्षाः ॥ १७ ॥
सौगन्धिकैः स्थलचम्पकैः रचिताः स्रजः तासामामोदं परि मलमुपादाय ॥ १८ ॥
जालाक्षं गवाक्षम् ॥ १९ ॥ २० ॥
जितसूर्यादिग्रहाम् ॥ २१ ॥
एभिरधर्मादिभिः ॥ २२ ॥
पृतन्यया पृतनया ॥ २३ ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

शीतकाले भवन्त्युष्णा उष्णकाले तु शीतलाः ।
स्तनौ सुकठिनौ यासां ताः श्यामाः परिकीर्तिताः ॥
१७—१८ ॥
हेममयेभ्यो जालाक्षेभ्यो गवाक्षेभ्यः सुरप्रिया अप्सरसः ॥१९॥
मुक्तामयैर्वितानैश्चन्द्रातपैः मणिहेममयैः केतुभिर्ध्वजैः पता-कापङ्क्तिभिर्वलीभिर्भिरट्टोपरिवर्तिगृहैः ॥ २०—२१ ॥

भगवन्नुद्यमो भूयान्बलेर्नः पूर्ववैरिणः ।
अविषह्यमिमं मन्ये केनासीत्तेजसोर्जितः ॥ २५ ॥
नैनं कश्चित्कुतो वापि प्रतिव्योढुमधीश्वरः ।
पिबन्निव मुखेनेदं लिहन्निव दिशो दश ।
दहन्निव दिशो दृग्भिः संवर्ताग्निरिवोत्थितः ॥ २६ ॥
ब्रूहि कारणमेतस्य दुर्धर्षत्वस्य मद्रिपोः ।
ओजः सहो बलं तेजो यत एतत्समुद्यमः ॥ २७ ॥

गुरुरुवाच ।

जानामि मघवन्शत्रोरुन्नतेरस्य कारणम् ।
शिष्यायोपभृतं तेजो भृगुभिर्ब्रह्मवादिभिः ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

जितप्रभा साक्षाद्दीप्त्यधिष्ठात्री देवतापि यया तां जितप्राह्वामिति पाठे जितसूर्यादिकाम् ॥ २१ ॥

एभिः खलत्वादिभिः ॥ २२ ॥

पृतन्यया सेनया ॥ २३—२४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यत्र यस्यां नित्यं स्थिरं वयस्तारुण्यं रूपं च येषां ते पुरुषाः याः श्यामास्तरुण्यः रूपवन्नार्यः रूपवत्यो नार्यस्ताभिरर्चिर्भिः शिखाभिर्वह्नय इव भ्राजन्ते इत्यन्वयः पुरुषादि पदाध्याहाराभावे रूपादि पुनरुक्तिः अर्चिर्भिरिति दृष्टान्तवैषम्यं च स्यात् ॥ १७ ॥ १८ ॥

हेममयेभ्यो जालाक्षेभ्यो निर्गच्छता धूमेन प्रतिच्छन्नमार्गं यस्यामिति शेषः सुरप्रियाः सुरैः सहिताः प्रियाः सुरभार्याः यान्ति॥१९॥

मुक्तामयैर्वितानैर्मणिहेममयैः केतुभिश्च नानापताकायुक्ताभिर्वलभीभिर्गृहपुरोभागैरावृतां व्याप्ताम् ॥ २० ॥

स्वप्रभया जिताप्रभा सूर्यादिदीप्तिर्यया ताम् ॥ २१ ॥

यत्र येभिर्हीनास्ते व्रजन्ति ॥ २२ ॥

पृतन्यया सेनया ॥ २३ ॥ २४ ॥

भाषा टीका ।

जहां पर नित्य नूतन अवस्था और स्वरूप वाली षोडश वर्ष की निर्मल वस्त्र धारण किये रूपवती स्त्रियें अग्नि की जोति के सदृश शोभती हैं ॥ १७ ॥

देवाङ्गनाओं के केशों से गिरी हुई सुगन्धित मालाओं के आमोद (अति सुगन्ध) को लेकर जहाँ मार्गों में पवन बहता है ॥ १८ ॥

और जहाँ पर सुवर्ण के गवाक्षों (गोखाओं) से निकलने वाले और सुन्दर सुगन्धवाली अगर चन्दन की धूप के पाण्डुर वर्ण के धूम से अच्छादित (ढकी हुई) सुरस्त्रियें मार्गों में सञ्चार करतीं हैं ॥ १९ ॥

फिर वह पुरी कैसी है, कि-जिस में मोतियों के जाल के चँदेवा तनें है नानाप्रकार के मणि और सुवर्ण के काम वाले अटा अटारियों पर ध्वजा पताका पहराय रही हैं ॥ २० ॥

और मृदङ्ग, शङ्ख, आनक, दुन्दुभि, करताल, वीणा, मुरज, ऋष्टि, वेणु, इत्यादि वाद्यों [वाजों] के शब्द, और नृत्य तथा उपदेव लोगों के गीत से वह पुरी बहुत ही मन को रंमान वाली है ॥ २१ ॥

जिस पुरी को अधर्मिष्ठ, खल, भूतद्रोही, शठ, मानी, कामी, लोभी ऐसे लोग नहीं जा सके हैं और इन दोषों से रहित पुरुष जिसको प्राप्त होते हैं ॥ २२ ॥

ऐसी देवताओं की राजधानी उस इन्द्र पुरी को बड़ी भारी सेना के स्वामी उस बली ने बाहर चारों तरफ से सेना से घेरलीनी और इन्द्र के रनिवास मे भय जनाने के लिये बलिने शुक्राचार्य्य के दिये हुए बडे शब्द वाले शङ्ख को बजाया ॥ २३ ॥

इन्द्र भी इस प्रकार बलिका परम उद्यम जानकर सब देवगणों को साथ ले गुरु के समीप जाकर इस वाक्य को बोलतेहुए ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

केन हेतुनैवन्तेजसोर्जित आसीत् ॥ २५ ॥

प्रतिव्योढुमपाकर्तुम् ॥ २६ ॥

यतः कारणादेतस्य ओज आदि यत ओज आदेः एतत् समुद्यमः ॥ २७ ॥

भवद्विधो भवान्वापि वर्जयित्वेश्वरं हरिम् ।
नाऽस्य शक्तः पुरः स्थातुं कृतान्तस्य यथा जनाः ॥ २९ ॥
तस्मान्निलयमुत्सृज्य यूयं सर्वे त्रिविष्टपम् ।
यात कालं प्रतीक्षन्तो यतः शत्रोर्विपर्ययः ॥ ३० ॥
एष विप्रबलोदर्कः सम्प्रत्यूर्जितविक्रमः ।
तेषामेवापमानेन साऽनुबन्धो विनङ्क्ष्यति ॥ ३१ ॥
एवं सुमन्त्रितार्थास्ते गुरुणार्थाऽनुदर्शिना ।
हित्वा त्रिविष्टपं जग्मुर्गीर्वाणाः कामरूपिणः ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

उपभृतं सञ्चितम् ॥ २८—२९ ॥

तत्रोचितं मन्त्रमाह-तस्माद्यूयं त्रिविष्टपमुत्सृज्य निलयमदर्शनं यात यतः कालात् ॥ ३० ॥

केनाऽस्य विपर्ययः स्यादित्यत आह-एष इति । विप्राणां बलेन उदर्कं उत्तरोत्तरमधिकं फलं यस्य सः ॥ ३१ ॥

सुमन्त्रितोऽर्थः कार्यं येषां ते निलयं जग्मुः ॥ ३२—३३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवाह—भगवन्निति सर्द्धैस्त्रिभिः । हे भगवन् ! पूर्ववैरिणो देवासुरे युद्धे पराजितस्य बलेरधुनाऽयं महानुद्यमः इमसुद्यमं सोढुमशक्यं मन्ये केन हेतुना अयं तेजसोर्जित आसीत् ॥ २५ ॥

एवं बलिं कोपि पुमान् केनाप्युपायेनापाकर्तुं न प्रभुः अयं मुखेनेदं जगत्पिबन्निव दश दिशो लिहन्निव उत्थितः प्रलयाग्निरिव दृग्भिर्नभो दहन्निवास्ते ॥ २६ ॥

मम शत्रोर्बलेः दुर्द्धर्षत्वस्यैतस्य कारणं ब्रूहि यतः कारणादोज आदिस्तत्प्रयुक्तः समुद्यमश्चेत्येतदासीत् तत्रौजः इन्द्रियबलं सहः उत्साहो मानसं बलं दैहिकम् ॥ २७ ॥

एवं विज्ञापित आह गुरुः-जानामीति । हे मघवन् ! अस्य त्वच्छत्रोर्बलेरौन्नत्यकारणमहं जानामि, किं तत् ? यद्ब्रह्मवादिभिः शुक्रादिभिः शिष्याय बलये उपभृतमाहितं तेज इत्येतत् ॥ २८ ॥

अतो भगवन्तं विनाऽन्यः कश्चिद्भवाद्विधः साक्षाद्भवान्वाऽस्य सम्मुखे क्षणमपि स्थातुं न शक्नोति ॥ २९ ॥

मन्त्रमाह-तस्मादिति । तस्माज्जेतुमशक्यत्वात्सर्वे यूयं त्रिविष्टपं त्यक्त्वा निलयमदर्शनं यात गच्छत, कथम्भूताः ? यतः येन कालेन शत्रोः पराजयो नौन्नत्यं वा भविष्यति तं कालं प्रतीक्षमाणाः सन्तः ॥ ३० ॥

कोसौ कालस्तत्राह-अयमधुना विप्राणां बलेनोदर्कं उत्तरोत्तरमधिकं फलं यस्य ऊर्जितः बलीभूतः विक्रमो यस्य तादृश आस्ते स पुनस्तेषां विप्राणामेवापमानेन हेतुना सानुबन्धः ससमृद्धिर्विनंक्ष्यति तं कालं प्रतीक्षन्त इत्यर्थः ॥ ३१ ॥

एवमित्यमर्थानुदर्शिना तत्तत्कालोचितकर्त्तव्यप्रयोजनाभिज्ञेन बृहस्पतिना सम्यगालोचिताः गीर्वाणाः सुरास्त्रिविष्टपं त्यक्त्वा कामरूपिणस्सन्तः जग्मुः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

असौ बलिस्तेजसा केन ब्रह्मणा समः केन केनापीति वा ॥ २५ ॥

प्रतिबोद्धुं प्रतियोद्धुं वारयितुं वा इदञ्जगद्‌दृश्यतः ॥ २६ ॥

ओज आदय एव समुद्यमश्च यतः मद्रिपोः एतस्य दुर्धर्षत्वस्य कारणं ब्रूहीत्यन्वयः ॥ २७ ॥

गुरुभिर्भृगुभिर्यतः कारणात् ॥ २८ ॥ २९ ॥

त्रीणि विष्टपानि महरादिस्थानानि यस्मिन् तत्तथा ॥ ३० ॥

एष बलिर्विप्राणां बललक्षणमुत्तरफलं यस्य स तथा कुत इति तत्राह—सम्प्रतीति ॥ ३१—३५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तेषामेवापमानेनेति । यद्यपि भगवत पक्षपातेन व्यवहारिकगुरूणां वचनातिक्रमरूपोऽवमानो न दोषावहः गुरुर्न स स्यादित्याद्युक्तेः तथाप्येवं केवलमनेन व्यवहारदृष्टयैवोक्तं तादृशतत्पक्षपातस्तु तद्विधानामयोग्यं व्यवहारसुखाभिधदुःखमञ्जसा परित्यज्य भगवद्भक्तिमयपरमसुखं दत्त्वा परमगुणायैव सम्पद्यते स्म तथैव स्वयं तेनैव विभावितं यत्तद्दर्शितं च पञ्चमस्कन्धे नूनं बतायं भगवानर्थेषु न निष्णातो यो सावन्द्रो यस्य सचिवो मन्त्राय वृतइत्यादिना यत्र भगवानपि द्वारपालायिततया परमवशो जातः कियद्वा स्वर्गराज्यं यत्रैवानुषङ्गिकतया-स्वर्गाधिकं पातालराज्यं मन्वन्तरान्तरे तदैन्द्र्यञ्चेति ॥ ३१ ॥ ३६ ॥

देवेष्वथ निलीनेषु बलिर्वैरोचनः पुरीम् ।
देवधानीमधिष्ठाय वशं निन्ये जगत्त्रयम् ॥ ३३ ॥
तं विश्वजयिनं शिष्यं भृगवः शिष्यवत्सलाः ।
शतेन हयमेधानामनुव्रतमयाजयन् ॥ ३४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

इमम् उद्यमं बलिं वा आसीत् अभूत् ॥ २५ ॥

प्रतिव्योढुं युद्धादिभिः प्रतिकर्तुं यतः पिताभिवाऽयं बलिः ॥२६॥

यतः कारणात् ओज आदि यतश्च ओज आदेरेतस्य समुद्यमः ॥ २७ ॥

शिष्याय श्रद्धाभक्त्यतिशयेन स्वसर्वस्वोपहारकाय बलये तेजः स्वीयमेव उपभृतं प्रत्युपहारत्वेन दत्तमित्यर्थः । तस्मादिदं न बलेस्तेजः किन्तु ब्रह्मतेज एवातः भवद्भिर्दुर्वारमिति भावः तेन तेभ्यो भृगुभ्यो न न्यूना वयमपि तथैव श्रद्धाभक्त्यादिना त्वया प्रसादिता यद्यभविष्याम तदा संप्रति त्वमप्यस्य तेजसा परिपूर्णो इमं बलिमजेष्य एवेत्युपालम्भोऽनुध्वनितः ॥ २८ ॥

योद्धुमनेनाधुना निर्गच्छामि न वेति चेद्तत आह—भवद्विध इति ॥ २९ ॥

एतत्समयोचितं मन्त्रं ब्रूहीति चेद्तत आह–तस्मादिति । यतः कालात् शत्रोर्विपर्ययः पराभवो भावी तं कालं प्रतीक्षमाणा इत्यर्थः ॥ ३० ॥

बलेरस्य पराभवकालः स किं भावी कदा वा भावीत्यपेक्षायां तमाश्वासयन्नाह–एष इति । विप्रबलमेव उदर्कम् उत्तरत्रफलं यस्य सः "उदर्कः फलमुत्तरम्" इत्यमरः । तेषामेवेत्यादि व्यवहारदृष्ट्यैवोक्तं वस्तुतस्तु विष्णुभक्त्यनुकूलः स विप्रावमानस्तस्य महाकीर्तिस्वर्गाधिकसुतलभोगद्वारपालीकृतविष्णुत्वभाविमन्वंतरेन्द्रत्वाद्यर्थमभूदिति ज्ञेयम् ॥ ३१—३३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

केन हेतुना तेजसा ऊर्जित आसीत् ॥ २५ ॥
प्रतिव्योढुं युद्धादिना प्रतिकर्तुम् ॥ २६ ॥
एतस्य मद्रिपोर्दुर्धर्षत्वस्य कारणं ब्रूहि यतः कारणात् एतस्य ओज आदि यतश्च ओज आदेः एतस्य समुद्यमः ॥ २७ ॥
तेजः उपभृतं दत्तमित्यर्थः ॥ २८ ॥ २९ ॥
त्रिविष्टपमुत्सृज्य निलयमदर्शनं यात ॥ ३० ॥
विप्रबलेन उदर्कमुत्तरोत्तराधिकं फलं यस्य सः ॥ ३१ ॥
सुमन्त्रितः अर्थः त्रिविष्टपत्यागादिरूपः कर्तव्यपदार्थो येषां ते जग्मुः गुर्वाज्ञानुसारेण निलीना बभूवुरित्यर्थः । यतः कामरूपिणः ॥ ३२ ॥ ३३ ॥

भाषा टीका ।

इन्द्र कहने लगे, कि—हे भगवन् ! हमारे पहिले वैरी बली का बडा भारी उद्यम है । अथ इस समय तौ इसको मैं बडा असह्य मानताहूं, परञ्च इस को इस समय किसने ऐसे तेज से बढाया है ॥ २५ ॥

इस समय मे इसको कोई भी अर्धाश्वर किसी प्रकार निराकरण करने को समर्थ नही हो सकता है । और यह इस समय कैसा दुर्धर्ष मालुम होता है, कि—मानो जगतको मुख से पान करजायगा, और मानो दशों दिशाओं को चाट जायगा, और दृष्टि से दिशाओं को जलाता सा प्रलय काल के अग्नि सदृश खडा हुआ है ॥ २६ ॥

हे गुरो ! यह हमारा वैरी क्यों इतना दुर्धर्ष हो गया इस का कारण तो आप कहो, कि— इस का यह ओज सह, बल, और तेज कहां से भया, जिससे इसने इतना उद्यम किया ॥ २७ ॥

गुरुरुवाच ।

बृहस्पति जी बोले, कि–हे मघवन्, हे इन्द्र ! मैं इस शत्रु की उन्नति का कारण जानता हूं, ब्रह्मवादि भृगुलोगों ने अपने शिष्यको ब्रह्मतेज का सञ्चय किया है ॥ २८ ॥

हे इन्द्र ! एक श्रीहरि को छोडकर तुम्हारे सदृश अथवा तुम भी इस के सन्मुख खडे होने को असमर्थ नहीं हो, जैसे काल के सन्मुख मनुष्य नही खडे हो सक्ते हैं ॥ २९ ॥

तस्मात् तुम सब लोग अपना स्थान (स्वर्ग) छोडकर चले जाओ और काल की प्रतीक्षा करो जिस काल के प्रभाव से यह शत्रु का विपर्यय है ॥ ३० ॥

और यह बलि ब्राह्मणों के बल से उदय को प्राप्त भया है और इस समय तो इसका पराक्रम बहुत ही बढा है, परंच जब इनही लोगों का अवमान करेगा तब सकुटुम्ब विनाश को प्राप्त होगा ॥ ३१ ॥

इस प्रकार अर्थ दिखाने वाले गुरुजी से सलाह लेकर सब देव लोग कामरूप धारणकर स्वर्ग को छोडकर चले गये ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवं प्राप्तमिन्द्रपदं स्थिरीकर्तुमयाजयन् अनुव्रतमनुवर्तिनम् ॥३४–३५ ॥

ततस्तदनुभावेन भुवनत्रयविश्रुताम् ।
कीर्तिं दिक्षु वितन्वानः स रेजे उडुराडिव ॥ ३५ ॥
बुभुजे च श्रियं स्वृद्धां द्विजदेवोपलम्भिताम् ।
कृतकृत्यमिवात्मानं मन्यमानो महामनाः ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्याम् अष्टमस्कन्धे बलिविजयोनाम
पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीधरस्वामिकृतभावार्थदीपिकायाम् ।

द्विजदेवैर्ब्राह्मणैरुपलम्भितां प्रापिताम् ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं देवेष्वन्तर्हितेषु सत्स्वथ वैरोचनो बलिर्देवधानीं पुरीमधिष्ठाय लोकत्रयं स्ववशमकरोत् ॥ ३३ ॥

ततस्तं विश्वजयिनं शिष्यमनुव्रतं बलिं तद्वत्सला भृगवो हयमेधानां शतेनायाजयन् प्राप्तमिन्द्रपदं स्थिरीकर्तुमयाजयन् इत्यर्थः ॥ ३४ ॥

ततो हयमेधयागशतप्रभावेन लोकत्रयव्याप्तां कीर्तिं वितन्वानः स बलिश्चन्द्र इव रराज ॥ ३५ ॥

द्विजदेवैर्ब्राह्मणैरुपलम्भितां प्रापितां सुसमृद्धिं श्रियं सम्पदं बुभुजे, कथम्भूतः ? महामनाः दीर्घसङ्कल्पः आत्मानं कृतं कृत्यं कर्त्तव्यप्रयोजनं येन तं कृतार्थमिव मन्यमानः ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्वीराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

द्विजाः भृगवस्त एवमभीष्टदातृत्वेन देवाः उपलम्भितां प्रापिताम् ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अयाजयन् तदीयेन्द्रपदस्थिरीभावार्थमिति भावः ॥ ३४ ॥ ३५ ॥

द्विजदेवाः विप्राः ॥ ३६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
अष्टमेऽसौ पञ्चदशः सङ्गतः सङ्गतः सताम् ॥ १५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अयाजयन् तत्र स्थिरीकर्तुमिति भावः ॥ ३४ ॥ ३५ ॥

स्वृद्धां सुष्ठु समृद्धां द्विजदेवैर्विप्रैरुपलम्भितां कृतकृत्यमिवात्मानं मन्यमानः बुभुजे न तु तां प्राप्यापि जनः कृतकृत्यो भवतीति भावः ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
पञ्चदशोऽध्यायार्थप्रकाशः ॥ १५ ॥

भाषा टीका ।

देव लोग इस प्रकार जब लीन होगये, तब विरोचन के पुत्र बलिने अमरावतीपुरी में स्थित होकर तीनों लोक को वश में कर लिया ॥ ३३ ॥

शिष्यके ऊपर प्रेम करने वाले भृगु लोग उस विश्व विजयी शिष्य (बलि) को अपना अनुवर्ती जानकर प्राप्त हुए

भाषा टीका ।

इन्द्रपद की स्थिरता के लिये सौ अश्व मेध यज्ञ से यजन कराते हुए ॥ ३४ ॥

तब तौ उसके प्रभाव से वह तीनों भुवन में विख्यात होने वाली अपनी कीर्त्ति का विस्तार करता हुआ चन्द्रमा के सदृश शोभा को प्राप्त होता भया ॥ ३५ ॥

और द्विज देवों की कृपा से प्राप्त हुई ऐसी समृद्ध संपत्ति को वह उदार मन वाला आपको कृत कृत्य मानकर भोगता हुआ ॥ ३६ ॥

इति श्रीमद्भागवत अष्टमस्कन्ध में पंचदश अध्याय की श्रीवृन्दावनस्थ भगवताचार्यकृत भाषा टीका समाप्त ॥ १५ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे पञ्चदशोऽध्यायः ॥ १५ ॥

॥ षोडशोऽध्यायः ॥

श्रीशुक उवाच ।

एवं पुत्रेषु नष्टेषु देवमाताऽदितिस्तदा ।
हृते त्रिविष्टपे दैत्यैः पर्यतप्यदनाथवत् ॥ १ ॥
एकदा कश्यपस्तस्या आश्रमं भगवानगात् ।
निरुत्सवं निरानन्दं समाधेर्विरतश्चिरात् ॥ २ ॥
स पत्नीं दीनवदनां कृतासनपरिग्रहः ।
सभाजितो यथान्यायमिदमाह कुरूद्वह ! ॥ ३ ॥
अप्यभद्रं न विप्राणां भद्रे ! लोकेऽधुनागतम् ।
न धर्मस्य न लोकस्य मृत्योश्छन्दानुवर्तिनः ॥ ४ ॥
अपि वा कुशलं किञ्चिद्गृहेषु गृहमेधिनि ! ।
धर्मस्याऽर्थस्य कामस्य यत्र योगो ह्ययोगिनाम् ॥ ५ ॥
अपि वाऽतिथयोऽभ्येत्य कुटुम्बासक्तया त्वया ।
गृहादपूजिता याताः प्रत्युत्थानेन वा क्वचित् ॥ ६ ॥
गृहेषु येष्वतिथयो नार्चिताः सलिलैरपि ।
यदि निर्यान्ति ते नूनं (१) फेरुराजगृहोपमाः ॥ ७ ॥
अप्यग्नयस्तु वेलायां न हुता हविषा सति ।
त्वयोद्विग्नधिया भद्रे ! प्रोषिते मयि कर्हिचित् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

षोडशे पुत्रनाशेन शोचन्त्या अदितेः पतिः ।
प्रार्थितः कश्यपः प्राह पयोव्रतमितीर्यते ॥

इदानीं श्रीवामनावतारप्रसङ्गमाह—एवमित्यादि यावत्समाप्ति, नष्टेष्वदृष्टेषु सत्सु ॥ १ ॥ २ ॥

स कश्यपः पत्नीमिदमाह—दीनवदनत्वादिकमालक्ष्य बहुधा विकल्पयन्पृच्छति—अप्यभद्रमिति सप्तभिः । हेभद्रे ! मृत्योश्छन्द-मिच्छामनुवर्तत इति तथा मृत्युवशवर्तिनो जनस्येत्यर्थः ॥ ३-४ ॥

हे गृहमेधिनि ! अपि वा किं वा गृहेषु धर्मादेः किञ्चित्कुशलमिति काका प्रश्नः यत्र येषु गृहेषु अयोगिनामपि योगः स्वधर्मादिना योगफलं भवति ॥ ५ ॥

किंवा त्वयाऽपूजिता एवाऽभ्येत्य गृहाद्याताः ॥ ६ ॥

नार्चिता अनार्चिताः सन्तो यदि निर्गच्छन्ति ते गृहाः फेरु-राजः सृगालराजस्तदीयविवरतुल्याः ॥ ७ ॥

वेलायां होमकाले कर्हिचिन्न हुताः किम् ॥ ८-९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं बलेरिन्द्राधिपत्यप्राप्तिप्रकारमभिधायाथ भगवतो वामनावतारं प्रस्तोष्यन् तदुपोद्घातरूपां कथां तावत्प्रस्तौति मुनिः—एवमिति । इत्थं पुत्रेष्विन्द्रादिषु नष्टेष्वदृश्येषु सत्सु दैत्यैस्त्रिविष्टपे हृते च सति देवमाता अदितिरनाथवदसहाया इव पर्यतप्यत ॥१॥

एवं परितप्यन्त्यामदित्यां कदाचिद्भगवान् कश्यपश्चिराद

---

(१) प्रेतराज इति विज० ।

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

समाधेर्विरतः तस्या अदितेराश्रममाजगाम, कथम्भूतम् ? निर्गत उत्सवो यस्मान्निर्गत आनन्दो यस्मात्तम् ॥ २ ॥

स कश्यपः कृत आसनपरिग्रहो येन स यथान्यायं सभाजितः सम्यक्पूजितः हे कुरूद्वह ! दीनं वदनं यस्यास्तां पत्नीम् इदं वक्ष्यमाणमाह ॥ ३ ॥

दीनवदनामालक्ष्य बहुधा विकल्पयता कश्यपेन पृष्टमाह— अपीति सप्तभिः । अपीति प्रश्नद्योतकमव्ययं हे भद्रे ! अधुना लोके विप्राणां गवां धर्मस्य लोकस्य जनस्य कथम्भूतस्य मृत्योः छन्दमिच्छामनुवर्त्तत इति तथा तस्य चाऽभद्रमकुशलं न हि ॥ ४ ॥

हे गृहमेधिनि ! अपि वा किं गृहेषु धर्मादेः किञ्चिदकुशलमिति काका प्रश्नः गृहान्विशिनष्टि, यत्र येषु गृहेष्वयोगिनामपि योगः स्वधर्मादिना योगफलं भवति यद्वा अयोगिनामेव योगः आसक्तिर्योगिनान्तु नेत्यर्थः ॥ ५ ॥

अतिथयः आगत्य कुटुम्बासक्तया त्वया प्रत्युत्थानादिना कदाचिदप्यपूजिताः सन्तो गृहात् याता गताः किं वा ॥ ६ ॥

यद्यतिथयोऽभ्येत्य येषु गृहेषु सलिलैरप्यनर्च्चितास्सन्तो निर्गच्छन्ति तर्हि ते गृहाः नूनं शृगालनाथबिलतुल्या एव ॥ ७ ॥

हे सति भद्रे ! मयि प्रोषिते प्रस्थिते सत्युद्विग्नधिया त्वया अग्नयः आहवनीयादयस्त्वदधीनाः हविषा वेलायामुदिते सूर्य्ये "प्रातर्जुहोति" इत्युक्तप्रातरादिकाले न हुताः किं वा ? ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तस्या अदित्याः ॥ २—३ ॥

आदित्यलोके विप्राणामभद्रं नागतमपि किं धर्मस्याभद्रं नागतमपि किम् अर्थस्याभद्रं नागतमपि छन्दानुवर्तिनो मृत्योः सकाशादभद्रं लोकस्य नागतं किम् अयोगिनां संसारिणां यत्र येषु धर्मादियोगोऽस्ति तेषु किञ्चिदप्यकुशलं नहीति तत्रानुकर्षः कर्तव्यः ॥ ४—६ ॥

प्रेतराजगृहोपमाः श्मशानतुल्याः ॥ ७ ॥

वेलायामिति योग्यकाले प्रोषिते गृहादन्यत्र स्थिते ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

१—३ ॥

अपि प्रश्ने विप्राणामभद्रं नागतं न प्राप्तं नवा लोकस्य लोकं विशिनष्टि मृत्योश्छन्दानुवर्त्तिनः ॥ ४—१० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

षोडशे कश्यपप्रश्नैरादितिस्तं नावेदयत् ।
स्वपुत्रदुःखं तच्छान्त्यै स प्रोवाच पयोव्रतम् ॥०॥

नष्टेषु अदृष्टेषु सत्सु ॥ १ ॥ २ ॥

स कश्यपः ॥ ३ ॥

दीनवदनत्वादेः कारणं विकल्पयन् बहुधा पृच्छति—अप्यभद्रमिति सप्तभिः । अपीति प्रश्ने विप्राणामभद्रं नागतं न प्राप्तं न वा धर्मस्य न वा लोकस्य लोकं विशिनष्टि मृत्योः छन्दमिच्छामनुवर्त्तत इति तस्य ॥ ४ ॥

अकुशलं वा धर्मादेः यत्र गृहेषु अयोगिनां कर्म्मिणामपि योगः योगफलप्राप्तिः ॥ ५ ॥

प्रत्युत्थानेनाप्यपूजिताः ॥ ६ ॥

फेरुः शृगालः ॥ ७—१० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पुत्रैश्वर्यसिद्ध्यर्थमदित्या प्रार्थितः कश्यपस्तांप्रति पयोव्रतमुक्तवानिति वर्णयति—एवमिति षोडशेन । नष्टेषु अदर्शनं गतेषु । १ ॥ २ ॥

स कश्यपः ॥ ३ ॥

दीनवदनामालक्ष्य पृच्छति–अपीति सप्तभिः । अपीति प्रश्ने हे भद्रे, विप्राणां धर्मस्य वा मृत्योः छन्दमिच्छामनुवर्तते इति तथा तस्य लोकस्य जनस्य वा अभद्रं नागतम् ।। ३ ॥

हे गृहमेधिनि ! अपि वा किंवा गृहेषु धर्मादेः किञ्चिदकुशलम् यत्र गृहेष्वयोगिनामनूदरीतिवलजार्थः मन्दसाधकानामपि योगः साधनाचरणोऽधिकार इत्यर्थः ॥ ५ ॥

किंवा त्वया प्रत्युत्थानेनाप्यपूजिताः एव अभ्येत्य गृहाद्याताः ॥ ६ ॥

फेरुराजः शृगालराजः ॥ ७ ॥

अपि किंवा वेलायां होमसमये कर्हिचिन्न हुताः ॥८।९॥

भाषा टीका ।

श्रीरुक्मिणीकृष्णाय नमः ॥

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि—जब इस प्रकार पुत्र लोग नष्ट प्राय होगये और दैत्यों ने स्वर्ग हर लिया तब देव माता अदितिजी अनाथ के तरह बडे अनुताप को प्राप्त हुईं ॥ १ ॥

एक समय कश्यप भगवान् उनके आश्रम में गये, कश्यपजी भी बहुत काल में समाधि से विराम को प्राप्त हुए रहे इन्होंने अदिति के आश्रम को निरुत्सव और निरानन्द देखा ॥ २ ॥

हे राजन् ! वहां पर अदिति के दिये हुए आसन पर बैठकर दीन वदन पत्नी को देख कर न्याय पूर्वक आप ऐसे बोले, ॥ ३ ॥

यत्पूजया कामदुघान्याति लोकान्गृहान्वितः।
ब्राह्मणोऽग्निश्च वै विष्णोः सर्वदेवात्मनो मुखम् ॥ ९ ॥
अपि सर्वे कुशलिनस्तव पुत्रा मनस्विनि।
लक्षयेऽस्वस्थमात्मानं भवत्या लक्षणैरहम् ॥ १० ॥

अदितिरुवाच।

भद्रं द्विजगवां ब्रह्मन् ! धर्मस्यास्य जनस्य च।
त्रिवर्गस्य परं क्षेत्रं गृहमेधिन्गृहा इमे ॥ ११ ॥
अग्नयोऽतिथयो भृत्या भिक्षवो ये च लिप्सवः।
सर्वं भगवतो ब्रह्मन्ननुध्यानान्न रिष्यति ॥ १२ ॥
को नु मे भगवन्कामो न सम्पद्येत मानसः।
यस्या भवान्प्रजाध्यक्ष एवं धर्मान्प्रभाषते ॥ १३ ॥
तवैव मारीच ! मनःशरीरजाः प्रजा इमाः सत्त्वरजस्तमोजुषः।
समो भवांस्तास्वसुरादिषु प्रभो ! तथाऽपि भक्तं भजते महेश्वरः ॥ १४ ॥
तस्मादीश भजन्त्या मे श्रेयश्चिन्तय सुव्रत।
हृतश्रियो हृतस्थानान्सपत्नैः पाहि नः प्रभो ॥ १५ ॥
परैर्विवासिता साऽहं मग्ना व्यसनसागरे।
ऐश्वर्यं श्रीर्यशः स्थानं हृतानि प्रबलैर्मम ॥ १६ ॥

भाषा टीका।

कश्यपजी बोले, कि—हे भद्रे ! अभी लोक में विप्रों को कुछ ऐसा तो अमंगल नहीं प्राप्त हुआ है ? और कोई धर्मकी की बाधा तो नहीं उपस्थित है, और मृत्यु के वश में रहने वाले इस लोक का भी तो ऐसा कुछ अकल्याण नहीं आया है ॥ ४ ॥

हे गृहमेधिनि ! भलाँ गृहों में तो कुशल है, जिन गृहों में अयोगियों को भी धर्म अर्थ और काम का योग [फल] प्राप्त होजाता है ॥ ५ ॥

क्या तुमारे यहां आये हुए अतिथियों को कुटुंब में आसक्त रहने वाली ऐसी तुमने प्रत्युत्थानादि से नही पूजा ? और तुमारे घर से वो लोग विमुख चले गये क्या ? ॥ ६ ॥

जिन घरों से अतिथि लोग जल मात्र से भी सत्कृत नहीं होकर चले जाते हैं वे घर स्यारों के घर सरीके हैं ॥ ७ ॥

हे सति ! तुमारे यहां समय के ऊपर हवि से अग्नि का हवन नही हुआ क्या ? क्योंकि, हम तो कहीं परदेश विचरने गये हों और तुमारी बुद्धि उद्विग्न होने से यदि हवन न किया हो ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

भवत्या आत्मानं मनः अस्वस्थमप्रकृतिस्थं लक्षणैर्मुखम्ला-न्यादिभिर्लक्षयामि ॥ १० ॥

अस्वास्थ्यकारणमन्यदस्तीति वक्तुं त्वत्पृष्टमभद्रादिकं नास्ती-त्याह–भद्रमिति द्वाभ्याम् । इमे गृहास्त्रिवर्गस्य परं क्षेत्रमुद्भवस्था-नम् त्रिवर्गोऽपि यथावद्वर्तत इत्यर्थः ॥ ११ ॥

भगवतस्तवानुध्यानं यन्मया क्रियते तस्मादग्नयोऽतिथय इत्यादि सर्वं न रिष्यति न हीयते ॥ १२ ॥

प्रस्तुतं विज्ञापयितुमाह–कोन्विति ॥ १३ ॥

सम्पाद्यं काममाह—तवैवेति चतुर्भिः ॥ १४ ॥

सपत्नैर्दैत्यैर्हृता श्रीर्येषाम् हृतं स्थानं येषामिति पुत्राभि-प्रायेण बहुवचनम् ॥ १५-१७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

किञ्चाग्नीन्विशिनष्टि, यत्पूजयेति । कामानिष्टार्थान् दोग्धीति तथा तान् तया येषामग्नीनां पूजया गृहान्वितः गृहस्थः पुमान् पुण्यलोकान् याति प्राप्नोति किञ्च ब्राह्मणोऽग्निश्च सर्व-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

देवताशरीकस्य विष्णोः मुखं वै निश्चये "ब्राह्मणोऽस्य मुखमासीत्" मुखादिन्द्रश्चाग्निश्च" इत्यादि श्रुतेरिति भावः ॥ ९ ॥

हे मनस्विनि ते सर्वे पुत्राः कुशलिनोऽपि कुशलिन एवहि ? किमालक्ष्यैवं पृच्छसीत्यत्राह, भवत्या आत्मानं मन अस्वस्थमप्रकृतिस्थं वदनदैन्यादिभिश्चिह्नैरहं लक्षये तव चित्तमस्वस्थं लक्षयित्वा ऽहं पृच्छामीति भावः ॥ १० ॥

एवं पृष्टा ऽदितिरस्वास्थ्यकारणमन्यदिति वक्तुं नत्पृष्टमभद्रादिकं नास्तीत्याह–भद्रमिति द्वाभ्याम् । हे ब्रह्मन्! द्विजादीनां भद्रमेव तथा हे गृहमेधिन् ! त्रिवर्गस्य धर्मार्थकामस्य यत्परं क्षेत्रमुद्भवस्थानं तद्गृहं गृहाश्रमश्च अग्न्यादयः पूजेप्सवश्चेत्येतत्सर्वं हे ब्रह्मन् ! भगवतस्तवानुध्यानान्मया क्रियमाणाद्धेतोर्न रिष्यति न नंक्ष्यति न हीयत इत्यर्थः ॥ ११ ॥ १२ ॥

अनुध्यानान्न रिष्यतीत्येतदेव काका दर्शयन्ति—कोन्विति । हे भगवन् ! मे मानसो मनोविषयः मनसा कांक्षितः कामः कोनु न सम्पद्येत सर्वोऽपि कामः संपत्स्यत एवेत्यर्थः । कुतः यतो भवान् प्रजाध्यक्षः प्रजानां पतिस्सन् यस्या मे त्वद्धर्मपत्न्याः एवंविधान् धर्मान् प्रभाषते उपदिशति उपदेशेनैवंविधान् धर्मान् त्वय्यनुष्ठापयति सति कोनु कामो दुर्लभ इति भावः ॥ १३ ॥

तर्हि किं तव चित्तास्वास्थ्यनिमित्तमित्यपेक्षायां तद्विज्ञापयितुं तदयं नापाकुर्यादित्याशङ्कया तावत्तं प्रसादयति—तवेति । हे मारीच ! सत्त्वादिप्रधाना इमाः सर्वाः प्रजाः देवा दैत्याश्च तवैव मनसः शरीराच्च जाताः अतो भवान् तासु असुरादिषु प्रजासु यद्यपि समः समदर्शनस्तथापि हे प्रभो ! महेश्वरो भवान् भक्तं भजते ऽनुवर्त्तते भक्तपक्षपाती भवानित्यर्थः । प्रभोरिति पाठे प्रभोस्तव भक्तं महेश्वरो भवान् भजत इत्यर्थः ॥ १४ ॥

तस्माद्भक्तानुभजनस्वभावत्त्वात्त्वं त्वां भजन्त्याः मे मम श्रेयः श्रेय उपायं चिन्तयालोचय । हे सुव्रत ! कस्तवाधुना श्रेयोविपर्ययस्तत्राह—सपत्नैर्दैत्यैर्हृता श्रीर्येषां हृतानि स्थानानि येषां तानस्मानस्मत्पुत्रान् पाहि पालयेत्यर्थः । यतः हे प्रभो ! पालनसमर्थस्त्वम् इत्यर्थः ॥ १५ ॥

सा त्वत्पत्नीत्वेनासम्भावितदुःखाऽहमधुना परैर्दैत्यैर्विवासिता स्वस्थानादुच्चाटिता पुत्रेषु स्वाभेदाभिप्रायेणाहं विवासितेत्युक्तं दुःखसागरे मग्नाऽभवमधुना प्रबलैर्दैत्यैर्ममैश्वर्यादीन्यपहृतानि तत्र ऐश्वर्यमाधिपत्यं श्रीः भोगादिसम्पत् स्थानं निवासदेशः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सर्वदेवात्मनो विष्णोर्मुखं ब्राह्मणोऽग्निश्चेति द्वयम् ॥ ९ ॥

हि यस्मात् अस्वस्थम् ॥ १०—११ ॥

इमे गृहा अग्नयश्चेत्यादिसर्वं भगवतोनुध्यानान्न रिष्यति न क्षियोति ॥ १२ ॥

यस्या मम प्रजानां कुशलाकुशलयोरध्यक्षः साक्षित्वेन द्रष्टा भवानेवंविधान् धर्मान्प्रवक्तीति यत् ॥ १३ ॥

यथाविभागं सत्त्वादिगुणानुकूल्येन अद्य दैत्यानां मनोरथं साधयतीत्यभिप्रायः ॥ १४ ॥

अस्मत् देवताभागं तव देहार्धं व्यवहारार्थं वा हृतस्थाना हृतस्वर्गस्थानाः ॥ १५ ॥

पुनरुक्तमेव विशिनष्टि–परैरिति । मम पुत्राणामिति शेषः ॥ १६—१८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

द्विजगवामिति द्विजोपलक्षणत्वाद्गावोऽपि पृष्टा इत्यभिप्रायात् ॥ ११ ॥

सर्वमित्यादौ तथापि पुत्रगतदुःखं भवत्येवापराध इति भावः ॥ १२ ॥

मारीचेति पितृक्रमागतप्रभावं सूचयति ॥ १४ ॥

ननु, ते श्रीमन्तः न तु भक्तास्तत्राह–तस्मादीशेति ॥ १५-१७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

त्रिवर्गस्य क्षेत्रम् उद्भवस्थानं त्रिवर्गोपि यथोचितं वर्तत इत्यर्थः ॥ ११ ॥

भगवतस्तव त्वत्कर्मकादनुध्यानान्न रिष्यति न हीयते ॥ १२-१३ ॥

तदपि कृपया यद्येवं पृच्छसि तर्हि मद्दुःखोपशमस्त्वत्सुकर एवेत्याह–तवैवेति चतुर्भिः । महेश्वरो भगवान् यथा सर्वत्र समोऽपि भक्तं यथा भजते तथैव त्वं पुत्रेषु मध्ये भक्तिमन्तमिन्द्रं पालयितुमर्हसीति भावः ॥ १४ ॥

नः इति पुत्रसाहित्याद्बहुवचनम् ॥ १५—१७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भवत्याः आत्मानं लक्षणैर्मुखम्लान्यादिभिरस्वस्थं लक्षये ॥ १० ॥

क्षेत्रमुदयस्थानम् त्रिवर्गोपि यथोचितं वर्तते इति भावः ॥ ११ ॥

अग्न्यादयोपि होमादिना पूजिताः सन्तीति शेषः । किं बहुना भगवतः पतिरूपिणोऽनुध्यानं यन्मया क्रियते ततः सर्वं न रिष्यति न हीयते ॥ १२ ॥

वाञ्छितं कामं विज्ञापयितुमाह—क इति । मानसः मनसा वाञ्छितः कामः को न सम्पद्येत सर्वोऽपि सम्पद्येतेत्यर्थः ॥ १३ ॥

सम्पाद्यं काममाह—तवेति चतुर्भिः । हे प्रभो ! यद्यपि भवानसुरादिषु समस्तथापि जनं भज, यथा महेश्वरः परमेश्वरः सर्वत्र समोऽपि भक्तं भजते अनुवर्तते ॥ १४ ॥

को मम भक्तः ? किमाकारं च मया तदनुवर्तनं कार्यम् तत्राह तस्मादीश भजन्त्येति । नोऽस्मान् अदित्यादित्यान् ॥ १५-१७ ॥

यथा तानि पुनः साधो ! प्रपद्येरन्ममात्मजाः ।
तथा विधेहि कल्याणं धिया कल्याणकृत्तम ! ॥ १७ ॥

श्रीशुक उवाच ।

एवमभ्यर्थितोऽदित्या कस्तामाह स्मयन्निव ।
अहो मायाबलं विष्णोः स्नेहबद्धमिदं जगत् ॥ १८ ॥
क्व देहो भौतिकोऽनात्मा क्व चाऽऽत्मा प्रकृतेः परः ।
कस्य के पतिपुत्राद्या मोह एव हि कारणम् ॥ १९ ॥
उपतिष्ठस्व पुरुषं भगवन्तं जनार्दनम् ।
सर्वभूतगुहावासं वासुदेवं जगद्गुरुम् ॥ २० ॥
स विधास्यति ते कामान् हरिर्दीनानुकम्पनः ।
अमोघा भगवद्भक्तिर्नेतरेति मतिर्मम ॥ २१ ॥

अदितिरुवाच ।

केनाऽहं विधिना ब्रह्मन्नुपस्थास्ये जगत्पतिम् ।
यथा मे सत्यसङ्कल्पो विदध्यात्स मनोरथम् ॥ २२ ॥
आदिश त्वं द्विजश्रेष्ठ ! विधिं तदुपधावनम् ।
आशु तुष्यति मे देवः सीदन्त्याः सह पुत्रकैः ॥ २३ ॥

भाषा टीका ।

गृहस्थ पुरुष जिनकी पूजा से कामों के परिपूर्ण करने वाले लोकों को जाता है, वे ब्राह्मण और अग्नि सर्व देवात्मक श्रीविष्णु के मुख रूप है ॥ ९ ॥

हे मनस्विनि हे बुद्धि वाली ! तुमारे सब पुत्र तौ कुशल हैं ? क्योंकि-इस समय लक्षणों से हम तुमारे आत्मा को अस्वस्थता देखते हैं ॥ १० ॥

अदितिरुवाच ॥

अदिति बोली, कि—हे ब्रह्मन् आपकी कृपा से गौ, ब्राह्मण, धर्म, और मेरी कुशल है, हे गृह मेधिन् ! ये आपके गृह अर्थ धर्म काम रूप त्रिवर्ग के तौ क्षेत्र हैं अर्थात् गृह से ही त्रिवर्ग की सिद्धि है ॥ ११ ॥

हे भगवान् ! अग्नि, अतिथि, भृत्य, भिक्षु, और जो चाहना वाले हैं वे सभी आपके ध्यान से कोई खाली नही जाते हैं किन्तु सबी का सतकार होता है ॥ १२ ॥

हे भगवन् ! मेरी कौनसी मनो कामना पूरी नही होसक्ती है, जिस मेरे लिये, मेरी प्रजा के अध्यक्ष आप इस प्रकार के धर्मों का भाषण करते हौ ॥ १३ ॥

हे मारीच, (हे मरीचि पुत्र !) ये सब प्रजा आपही के मनसे और शरीर से उत्पन्न है, जो कि—सत्त्व रज और तमको सेवन करने वाली है, हे प्रभो ! परंच आप उन असुरादिको में समहौ तथापि भक्त को तौ महेश्वर भी भजते हैं ॥ १४ ॥

तस्मात् हे ईश ! हे सुव्रत ! मोभजनेवाली के श्रेय की चिन्ता करौ आज हमको वैरियों ने श्री और स्थान हरण कर निकाल दिये हैं ऐसे न की आप रक्षा करौ १५ ॥

शत्रुओं की निकाली भई सो में आज व्यसन के सागर में मग्न होरही हूं और प्रबल वैरियों नें हमारे ऐश्वर्य, श्री, यश, और स्थान सब हर लिये ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कः कश्यपः प्रथमं तावत्पुत्रस्नेहं त्याजयितुं विस्मयव्याजेनैव तत्त्वमुपदिशति-अहो इति सार्धेन ॥१८-१९॥

अत्रापरितुष्यन्तीं प्रत्याह—उपतिष्ठस्वेति द्वाभ्याम् ॥ २० ॥

नन्वेवम्भूतकामप्राप्तिहेतुर्देवान्तरसेवाप्रसिद्धा तत्राह—अमोघेति ॥ २१ ॥

कश्यप उवाच ।

एतन्मे भगवान्पृष्टः प्रजाकामस्य पद्मजः ।
यदाह ते प्रवक्ष्यामि व्रतं केशवतोषणम् ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यथा च मे मनोरथं विदध्यात् ॥ २२ ॥

यथा च मे आशु तुष्यति तथा तत्सेवाप्रकारमादिश ॥२३॥

मे मया पृष्टः पद्मजो मे यद्व्रतमाह एतत्ते तव प्रवक्ष्यामीत्यन्वयः ॥ २४ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

एतानि मत्पुत्राः पुनर्यथा पूर्ववत् प्रपद्येरन् प्राप्नुयुः यथा येनोपायेन प्रपद्येरन्निति वा तथा हे साधो कल्पाणकृच्छ्रेष्ठ ! कल्याणधिया शुभालोचनया विधेहि कुरु ॥ १७ ॥

एवमित्थमदित्या प्रार्थितः कः प्रजापतिः कश्यपः स्मयन्निव तामदितिमाह ॥ १८ ॥

तदेवाह-अहोइति प्रथमं तावत्पुत्रस्नेहं त्याजयितुं विस्मयव्याजेन तत्त्वमुपदिशति-अहो इति सार्द्धेन। विष्णोर्मायाया बलं कियादिदं जगत् स्नेहबद्धं पुत्रादिषु स्नेहपाशेन बद्धमित्येतत् भौतिकः भूतपञ्चकपरिणामरूपो देहः क ? प्रकृतेः परो भिन्न आत्मा प्रत्यगात्मा क?परस्परमेवमत्यन्तविलक्षणयोर्देहात्मनोरभेदोऽत्यन्तमसम्भावित इत्यर्थः । एवमसम्भाविताभेदयोर्देहात्मनोर्मध्ये कस्येमे पुत्राद्याः ? कस्य सम्बन्धिनः किं देहस्य ? किम्वा आत्मनः ? अयं भावः तावन्नात्मनः साक्षात्पुत्रादिभिस्सम्बन्धः अपि तु देहद्वारा, देहस्य भौतिकत्वेनोपचयादिविकारित्वेन चानित्यत्वात्तत्सम्बन्धिषु स्नेहोऽज्ञानमूलक इति. तदेवाह-मोह एव हि कारणमिति। देहात्मभ्रम एवात्र स्नेहे कारणमित्यर्थः ॥ १९ ॥

एवं तत्त्वोपदेशेनापरितुष्यन्तीं प्रत्याह-उपतिष्ठस्वेति द्वाभ्याम्। वासुदेवमुपतिष्ठस्व आराधय वासुदेवाराधनस्य समीहितसाधनत्वं सूचयंस्तं विशिनष्टि,जगद्गुरुं जगत आराधकस्य लोकस्य गुरुं हितकारिणं,काधिवसन् हितं करोति?अतो विशिनष्टि, सर्वेषां भूतानां गुहासु हृदयकुहरेषु आवासो यस्य तम् अनेन वासुदेवशब्दस्य प्रवृत्तिनिमित्तं दर्शितम्. ननु, किं विशेषेण वासुदेवमेवोपतिष्ठस्वेति वदसीत्यतो विशिनष्टि, जनार्द्दनमिति।"अर्दंगतौ याचने च"इति धातुः जनैः श्रेयस्कामैरर्द्यते याच्यते इति तं स एव याचनीय इति भावः । तत्र हेतुं वदन् विशिनष्टि, भगवन्तं षाड्गुण्यपूर्णं देवतान्तरस्य दरिद्रत्वादितिभावः वदान्यत्वमाह पुरुषमिति । पुरु अधिकं षणोति ददातीति पुरुषस्तं "षणुदाने"इति धातोः 'अन्येभ्योपिदृश्यत'इतिडः'य आत्मदा बलदाः। एको बहूनां विदधाति कामान्' इत्यात्मपर्यन्तदातृत्वेन प्रसिद्ध इति भावः ॥ २० ॥

पुरुषजनार्द्दनपदाभ्यामभिप्रेतं विशदयन्नाह-स इति। स पुरुषो जनार्द्दनस्ते तव कामान्विधास्यति पूरयिष्यति अनेन उदाहृतश्रुत्यर्थोऽनुसंहितः स च पुरुषशब्दप्रवृत्तिनिमित्तभूत इति च दर्शितं न केवलं कामानां विधाता अपितु हरिराश्रितार्तिहरश्च नाहं तमाराधितुं प्रभवामीति शङ्कामपनुदन्विशिनष्टि दीनानुकम्पनः दीनेषु किञ्चिदानुकूल्ययुक्तेषु विपुलापराधेष्वपि निरातिशयकृपायुक्तः भगवतः पूर्णषाड्गुण्ययुक्तस्यावाप्तसमस्तकामस्यैव सेवा अमोघा सफला नेतरा देवतान्तरसेवेति मम मतिः मतमित्यर्थः। देवतान्तरस्य अनवाप्तसमस्तकामत्वादितिभावः ॥ २१ ॥

एवमुपदिष्टानिष्टनिरसनेष्टप्रापणसमर्थोपाया तदुपायानुष्ठानप्रकारबुभुत्सया पृच्छत्यदितिः-केनेति द्वाभ्याम्। हे भगवन् ! अहं केन विधिना जगत्पतिं भगवन्तम् उपास्ये भजेयम् ? यथा येन प्रकारेण भजमानाया मम स सत्यसङ्कल्पो भगवान्मनोरथं विदध्यात् ?॥२२॥

हे द्विजश्रेष्ठ ! पुत्रैस्सह क्लिश्यन्त्याः मम यथा च देवो भगवान् आशु तुष्यति तथा तं तद्भजनप्रकारात्मकं विधिमादिशस्व आदिश ॥ २३ ॥

एवं पुनरापृष्टो भगवान्कश्यपः पयोव्रताख्यं भगवदाराधनात्मकं कर्मोपदेक्ष्यन् तस्मिन् विस्रम्भार्थं साम्प्रदायिकत्वं वदन् तत्कथनं प्रतिजानीते-एतदिति । प्रजाः पुत्रान् कामयमानस्य मे मया पृष्टो भगवान् पद्मजो ब्रह्मा यत्पयोव्रताख्यं कर्माह तत्केशवसन्तोषकरं कर्म ते तुभ्यं प्रवक्ष्यामि ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अनात्मा जडात्मकः मोहो ऽज्ञानम् ॥ १९—२० ॥

इतरा इतरदेवादिविषया ॥ २१ ॥

सत्यसङ्कल्पो हरिः ॥ २२ ॥

तदुपधावनं तस्य हरेः सेवाविषयम् आशु तुष्यति येन स शेषः ॥ २३ ॥

यदेतद्व्रतं तद्वक्ष्यामि ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

कः कश्यपः इवेति वस्तुतो न स्मयमानः तस्या दुःखेन तद्दुःखितत्वात् ॥ १८ ॥

आत्मा जीवः प्रकृतेः प्राकृताद्देहात्परोऽन्यः ॥ १९ ॥

तदपि पुत्रस्नेहेन रुदती कृपया पुनराह—उपतिष्ठस्वेति पुरुषं वस्तुतः पतिम् अहं तु ते लौकिक एव पतिरिति भा… भगवन्तं सर्वज्ञमिति त्वत्पुत्राणां कल्याणोपायं स एव जा… तीति भावः । जननाम्नोऽसुरस्यार्द्दनं त्वत्सपत्नान् हन्तुमपि स एव समर्थ इति भावः। जनं स्वभक्तं बलिं त्रिलोकीमर्द्द…

फाल्गुनस्यामले पक्षे द्वादशाहं पयोव्रतः।
अर्चयेदरविन्दाक्षं भक्त्या परमयाऽन्वितः ॥ २५ ॥
सिनीवाल्यां मृदालिप्य स्नायात्क्रोडविदीर्णया।
यदि लभ्येत वै स्रोतस्येतं मन्त्रमुदीरयेत् ॥ २६ ॥
त्वं देव्यादिवराहेण रसायाः स्थानमिच्छता।
उद्धृताऽसि नमस्तुभ्यं पाप्मानं मे प्रणाशय ॥ २७ ॥
निर्वर्तितात्मनियमो देवमर्चेत्समाहितः।
अर्चायां स्थण्डिले सूर्ये जले वह्नौ गुरावपि ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

ष्यति इन्द्रार्थं याचिष्यते इति तमिति तु वास्तवोऽर्थः सर्वभूतेति बलेरन्तःकरणं प्रेर्य्य गुरुहेलनमपि स एव तं कारयिष्यते इति भावः। वसुदेवे शुद्धसत्त्वे आविर्भवतीति वासुदेवमिति भक्त्या स्वान्तःकरणं शुद्धीकृत्य तत्रैव तं ध्यायन्त्यां त्वयि स दयासिन्धुराविर्भवितुमपि न विलम्बिष्यते इति भावः। जगद्गुरुमिति तव मम बलेरिन्द्रस्य सर्वजगतोपि गङ्गाप्रादुर्भावादिना हितं विधास्यतीति भावः ॥ २० ॥

हरिस्तद्दुःखहर्त्ता ॥ २१ ॥

सत्यः सङ्कल्पो यस्मात् ॥ २२-२४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

कः कश्यपः ॥ १८ ॥

आत्मा नित्यश्चिन्तनीयः अनात्मभूते देहादौ पतिपुत्रादिबुद्ध्या अतिस्नेहः तदन्येषु द्रोहो न कर्तव्य इति तत्त्वज्ञानं तां प्रत्याह-आत्मा जीवः ॥ १९ ॥

उक्तार्थेऽदत्तचित्तां प्रत्याह-उपतिष्ठस्वेति द्वाभ्याम्। उपतिष्ठस्व भज ॥ २० ॥ २१ ॥

उपस्थास्ये भजेयम् ॥ २२ ॥

येन देव आशु तुष्यति तत्तम् उपधावनमाराधनरूपं विधिम् आदिश ॥ २३ ॥

मे मया पृष्टः पद्मजः प्रजाकामस्य जनस्य यद्व्रतं मे आह एतत्ते प्रवक्ष्यामीत्यन्वयः ॥ २४ ॥

भाषा टीका।

हे साधो! अब जैसे हमारे पुत्र फिर ऐश्वर्य आदि को प्राप्त हों ऐसे आप कल्याण करौ आप तौ अति कल्याण करने वाले हौ ॥ १७ ॥

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि, कि—इस प्रकार दिति ने जब प्रार्थना करी तब कश्यपजी हँसते से बोले, कि—अहो विष्णु की माया का बल अपार है, यह जगत् स्नेह से बँधा हुआ है ॥ १८ ॥

कहां पंचभूत का रचा हुआ देह? और प्रकृति से पर आत्मा कहाँ? कौन किस के पति और कौन किसके पुत्रादिक पर मोह ही तौ कारक है ॥ १९ ॥

अदितिजी तुम सर्व भूत हृदयस्थ वासुदेव जगद्गुरु परम पुरुष भगवान् श्री जनार्द्दन को उपस्थित हो (भजो) ॥ २० ॥

दीनानुकंपी वह हरि तुमारे सब मनोरथों को पूर्ण करेंगे, बस भगवान की भक्ति जैसी अमोघ है ऐसा और कुछ भी नहीं हमारा तौ यही विचार है ॥ २१ ॥

अदितिरुवाच ॥

अदितिजी बोलीं कि—हे भगवन् हम कौन विधि से भगवान को उपस्थान देवें जैसे कि—सत्य संकल्प परमात्मा हमारे मनोरथ कों पूर्ण करें ॥ २२ ॥

हे द्विजश्रेष्ठ! आप भगवत्सेवा अनुष्ठान की विधि को बताइये और छोटे २ पुत्रों सहित दुःख को प्राप्त होने वाली ऐसी मेरे ऊपर श्री हरि शीघ्रही प्रसन्न होवेंगे ॥ २३ ॥

कश्यप उवाच ॥

कश्यपजी बोले, कि—प्रजा (संतान) की कामना से यह प्रश्न मैंने श्रीब्रह्माजी से किया रहा, तब ब्रह्माजी ने श्रीकेशव के संतोष करने वाला व्रत जो कहा सो हम तुमारे से कहते हैं ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

अमले शुक्ले ॥ २५ ॥

तत्रादौ पूर्वेद्युः कृत्यमाह-सिनीवाल्यामित्यादिना ब्रह्मचार्यथ तद्द्वाभ्यामित्यन्तेन ग्रन्थेन। यदि लभ्येत तर्हि क्रोडविदीर्णया वन्यवराहोत्खातया आलिप्य ॥ २६ ॥

तत्र मन्त्रः, त्वं देवीति। हे देवि! त्वं रसाया उद्धृतासि॥ २७ ॥

निर्वर्तित आत्मनियमो नित्यनैमित्तिको येन ॥ २८ ॥

नमस्तुभ्यं भगवते पुरुषाय महीयसे ।
सर्वभूतनिवासाय वासुदेवाय साक्षिणे ॥ २९ ॥
नमोऽव्यक्ताय सूक्ष्माय प्रधानपुरुषाय च ।
चतुर्विंशद्गुणज्ञाय गुणसङ्ख्यानहेतवे ॥ ३० ॥
नमो द्विशीर्ष्णे त्रिपदे चतुःशृङ्गाय तन्तवे ।
सप्तहस्ताय यज्ञाय त्रयीविद्यात्मने नमः ॥ ३१ ॥
नमः शिवाय रुद्राय नमः शक्तिधराय च ।
सर्वविद्याधिपतये भूतानां पतये नमः ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्राऽऽवाहनादौ नव मन्त्रानाह—नमस्तुभ्यमिति । पाद्यादौ विशेषतस्तु द्वादशाक्षरं वक्ष्यति ॥ २९ ॥

चतुर्विंशतिगुणास्तत्त्वानि जानातीति तथा तस्मै गुणसङ्ख्यानस्य हेतवे साङ्ख्यप्रवर्तकाय ॥ ३० ॥

एवं सामान्यतो नत्वा गुणावतारान् प्रणमति त्रिभिः—तत्राऽऽद्यौ मन्त्रोक्तयज्ञरूपेण विष्णोः प्रणामो नम इति द्वे शीर्षे यस्य त्रयः पादाः यस्य तन्तवे फलविस्तारकाय त्रय्यां विद्यायामात्मा यस्येति त्रिधा बद्ध इत्यस्यार्थ उक्तः तथा च मन्त्रः "चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य । त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश" — इति ॥ ३१ ॥ ३२ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं प्रतिज्ञाय तदेवाह—फाल्गुनस्येत्यादिना यावदध्यायसमाप्ति। फाल्गुनस्य मासस्याऽमले शुक्ले पक्षे द्वादशाहं द्वादशाहसाध्यं पयोव्रताख्यं कर्म कर्तव्यमिति शेषः । तेन पयोव्रतेन परमया अव्यभिचरितया भक्त्या युक्तोऽरविन्दाक्षमर्चयेत् अन्वित इति पुन्निर्देशेन एतन्मे पप्रच्छ आहेत्यनेन ते प्रवक्ष्यामीत्यनेन च स्त्रीपुरुषसाधारणमेतद्व्रतानुष्ठानमिति सूचयति ॥ २५ ॥

तत्रादौ पूर्वेद्युः कृत्यमाह—सिनीवाल्यामित्यादिना ब्रह्मचार्यथ तद्भ्यामित्यन्तेन । दृष्टेन्दुकलायाममावास्यायां यदि लभ्येत तर्हि क्रोडविदीर्णयाऽरण्यवराहोत्खातया मृदा मृत्तिकया देहमालिप्य स्रोतसि नद्यामिमं मन्त्रं वक्ष्यमाणं जपन् स्नायादुदीरयेदिति तदालेपनसमये एतन्मन्त्रमुदीरयेदित्यर्थः ॥ २६ ॥

मन्त्रमेवाह—त्वमिति । "उद्धृतासि वराहेण कृष्णेन शतबाहुना" इतिमन्त्रार्थानुवादकोऽयं मन्त्रः, हे देवि हे भूदेव ते ! स्थानं तत्र यथास्थानमिच्छता वराहेण श्रीभगवता त्वं रसायाः रसातलादुद्धृतासि तुभ्यं नमः मम पापं प्रणाशयेतीमं मन्त्रमुदीरयन् मृदाऽऽलिप्य स्नायात् ॥ २७ ॥

ततो निवर्तितः सम्यगनुष्ठितः आत्मनियमः सन्ध्योपासनादिर्येन तादृशः समाहितचित्तो हरिमभ्यर्चयेत् कुत्रार्चयेदित्यत्राह—अर्चयेदिति । स्थण्डिलादिषु पञ्चस्वप्यर्चयेत् तत्र स्थण्डिलं दूर्वल्यादिभिरलङ्कृता भूमिः जलं विशुद्धं कुम्भसम्भृतम् ॥ २८ ॥

तत्रावाहने नव मन्त्रानाह—नम इति । अत्रायं विवेकः अत्र प्रधानो मन्त्रो वासुदेवद्वादशाक्षरः वासुदेवं जगद्गुरुम् उपतिष्ठेत्युक्तत्वात् "गन्धमाल्यादिभिश्चार्चेद्द्वादशाक्षरविद्यया" जुहुयान्मूलविद्यया "जपेदष्टोत्तरंशतम्" इति वक्ष्यमाणत्वाच्च नमस्तुभ्यमित्यादयस्त्वावाहनोपचारमन्त्रा इति; तत्राद्यो मन्त्रो द्वादशाक्षरार्थानुवादी भगवद्वासुदेवशब्दाभ्यां तत्प्रत्यभिज्ञानात् 'सर्वभूतनिवासाय' इत्यनेन वासुदेवशब्दप्रवृत्तिनिमित्तमुक्तं सर्वभूतनिवासाय अत एव वासुदेवशब्दवाच्यायेत्यर्थः । वसतीति वासुः वसत्यस्मिन्निति वा वासुः । "वस निवासे" इतिधातोः कर्त्रर्थेऽधिकरणे चौणादिकः आद्ये सर्वभूतेषु निवसत्यन्तरात्मतयेति सर्वभूतनिवासः तस्मै द्वितीये तु सर्वभूतानामाधेयानां वासुराधारभूतस्तथा तस्मै, साक्षिणे इत्यनेन देवशब्दार्थ उच्यते साक्षी साक्षाद्द्रष्टा सर्वं चेतनाचेतनात्मकं वस्तुजातं साक्षात्पश्यन् दृश्यधर्मैरस्पृष्टः साक्षीत्युच्यते देवशब्दस्याप्ययमेवार्थः । स्वतेजसा दीप्यमानो हि देवः महीयसे पुरुषायेत्यनेन "वेदाहमेतं पुरुषं महान्तम्" इति पुरुषसूक्तप्रत्यभिज्ञानात् तत्र चैतमित्येतच्छब्देन पूर्वोक्तजगत्कारणत्वतदुपयुक्तगुणपौष्कल्यवतः परामर्शात् तस्य जगत्कारणत्वादिगुणजातस्य मन्त्रप्रतिपाद्यवासुदेवविशेषणत्वमवगम्यते तदेवम्भूताय तुभ्यं नमः सर्वमन्त्रेषु नमःशब्दप्रयोगः स्वप्रयोक्त्रभिप्रायको ज्ञेयः ॥ २९ ॥

यदि स एवम्भूतो भगवान्सर्वभूतनिवासः सर्वसाक्षी च भवति तर्हि सर्वैः कथं न दृश्यते ? इत्यत्राह—नमोऽव्यक्तायेति । अयं मन्त्रस्तु "यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः" इत्युपनिषत्प्रतिपाद्यपरमात्मस्वरूपप्रकाशकः अव्यक्तादिशब्दैरद्रेश्यसूक्ष्मभूतयोनित्वादिप्रत्यभिज्ञानात् अव्यक्ताय व्यक्तैरिन्द्रियैश्चक्षुरादिभिर्न व्यज्यते नदृश्यत इत्यव्यक्तः तथा तस्मै अद्रेश्यायेत्यर्थः । तत्र हेतु

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सूक्ष्माय निरतिशयसूक्ष्मजीवान्तरात्मतया प्रवेशयोग्यत्वेन ततोपि सूक्ष्माय, सूक्ष्मत्वप्रयुक्तं परिच्छिन्नत्वं वारयति, प्रधानपुरुषायेति. प्रधान पुरुषाय प्रकृतिपुरुषरूपायेत्यर्थः । तावद्रूप्यमत्र प्रकृतिपुरुषसामानाधिकृतत्वं तच्च शरीरात्मभावननिबन्धनं शरीरबुद्धिशब्दानामात्मपर्यन्तत्वाभिप्रायेणाभेदनिर्देशः । एवञ्च सर्वान्तःप्रवेशयोग्यतया सूक्ष्मस्याप्याकाशस्येव प्रकृतिपुरुषान्तरात्मतयानुप्रविष्टस्य स्वरूपमपरिच्छिन्नमेवेति भावः । प्रधानपुरुषायेति कारणावस्थाचिद्रूपत्वमुक्तम् अथ कार्यावस्थतद्रूपत्वमाह—चतुर्विंशद्गुणज्ञाय गुणभूतचतुर्विंशतितत्त्वाभिज्ञाय गुणभावो विशेषणत्वं शरीरत्वमिति यावत् शरीरमपि ह्याकृतिगुणादिवदपृथक्सिद्धविशेषणमेवेत्यभिप्रायः । अपृथक्सिद्धविशेषणविषयबुद्धिशब्दयोस्तद्विशेष्यपर्यन्तत्वमाकृत्यधिकरणन्यायसिद्धं न केवलं चतुर्विंशतितत्त्वान्तरात्मतया तद्रूपत्वम्, अपि तु तत्कारणतयापीत्याह—गुणसङ्ख्यान हेतव इति । गुणानां सत्त्वादीनां चतुर्विंशतितत्त्वरूपेण कार्यावस्थानां सङ्ख्यानञ्ज्ञानं तस्य हेतवे कारणभूताय गुणानाम् चतुर्विंशतिधा गणनायास्तेषां कार्यतापत्तिमूलकत्वात्तस्य तत्कारणत्वात्तद्धेतुत्वेन सङ्ख्यानहेतुत्वमपीत्यवगन्तव्यं यद्वा सङ्ख्यानं प्रमितिः गुणसङ्ख्यानस्य सत्त्वादिगुणानां प्रमितेः चतुर्विंशतिधा परिणतानां सत्त्वादिगुणानां प्रमितेः तद्विषयकप्रमायाः हेतवे तत्प्रमाहेतुत्वञ्च तत्कारणत्वद्वारा इत्यवगन्तव्यं यद्वा गुणसङ्ख्यानयोर्हेतवे सङ्ख्यानमत्र व्यष्टिप्रत्यगात्मस्वरूपम् अहमित्येवं प्रत्यक् स्वस्मै प्रकाशमानात्वाद्गुणशब्देन गुणकार्यभूतं चतुर्विंशतितत्त्वात्मकमचेतनद्रव्यमुच्यते तयोर्हेतवे कारणभूतायेत्यर्थः ॥ ३० ॥

एवं "यद्भूतयोनिम्" इति श्रुतिस्थभूतयोनिशब्दार्थ उक्तः प्रधानपुरुषायेत्यादिपदत्रयेण कार्यकारणोभयावस्थप्रकृतिपुरुषशरीरकत्वेन तत्कारणत्वेन च रूपात्मकस्य जगतस्तद्विशेषणत्वमुक्तम् अथ नामात्मकप्रपञ्चस्य तद्बोधकत्वेन तद्विशेषणत्वमाह—नम इति । अयं मन्त्रः "चत्वारि शृङ्गास्त्रयो अस्य पादा द्वेशीर्षे सप्त हस्तासो अस्य त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्यां आविवेश" इति मन्त्रप्रकाशितशब्दात्मकप्रपञ्चविशेषणपरमात्मस्वरूपप्रकाशकस्तस्मिन् हि मन्त्रे शब्दात्मकप्रपञ्चो वृषभत्वेन रूप्यते शब्दश्च वर्णात्मको ध्वन्यात्मकश्चेति द्विविधः वर्णात्मकोपि पुनः साध्वसाधुभेदेन द्विविधः, साधुश्च वेदरूपेण तन्मूलकस्मृतीतिहासादिरूपेण च द्विविधः तत्र—

अनादिनिधना ह्येषा वागुत्सृष्टा स्वयम्भुवा ।
आदौ वेदमयी नाम्ना यतः सर्वाः प्रसूतयः ॥
वेदशब्देभ्य एवादौ देवादीनां स निर्ममे ।—

इत्याद्युक्तरीत्या कृत्स्नजगत्सृष्टेर्वेदार्थालोचनमूलकत्वाद्वेदस्य प्राधान्यात्स च तन्मूलकस्मृत्यादिश्च साधुशब्दात्मकः प्रपञ्चो वृषभत्वेनास्मिन्मन्त्रे रूप्यते तदर्थं मन्त्रार्थः महोदेवः महान्देवः शब्दात्मको देवः देवस्य परमात्मनो बोधकत्वाद्वोपचाराद्देवः मर्त्यान् नश्वरान् देवमनुष्याद्यर्थान् परमात्मशरीरभूतानाविवेश बोधयितुं प्रवृत्त इत्यर्थः । वृषभो रोरवीति प्रसिद्धद्विशृङ्गचतुष्पादेकमूर्द्धवृषभविजातीयवृषभरूपः रोरवीति शब्दङ्करोतीति शब्दात्मकतामापन्न इत्यर्थः । विजातीयवृषभत्वेन तं रूपयति-चत्वारीति । अस्य शब्दात्मनो वृषभस्य अङ्गाश्चत्वारि चत्वारःनामाख्यातनिपातोपसर्गाः त्रयो भूतभविष्यद्वर्तमानकालाः पादा अख्यातादीनां भूतादिकालोपाधिना विहितत्वाच्छब्दानां कालसाहचर्याच्च तेषां भूतादीनां पादत्वेन रूपणं द्वे शीर्षे प्रवृत्तिनिमित्तं तदाश्रयश्चेति द्वे शिरसी सप्त विभक्तयो हस्तासः हस्ताः "आज्जसेरसुक्" इत्यसुगागमः त्रिधा बद्धः उरसि कण्ठे शिरसि च बद्धः स्थानत्रय एव शब्दानामाविर्भावादितिभाव इति. प्रकृतमन्त्रार्थस्तु त्रयीविद्यात्मने त्रयीविद्या वेदविद्या तदात्मने तद्विशेषणकाय तद्विशेषणकत्वञ्च तद्बोध्यत्वरूपं विवक्षितम् रूपात्मकप्रपञ्चस्य परमात्मनोऽपृथक्सिद्धविशेषणत्वादपृथक्सिद्धविशेषणवाचिशब्दानां विशेष्यपर्यन्तबोधकत्वस्वाभाव्यान्निगमागमादिशब्दजातवाच्यायेति फलितोर्थः "काठिन्यवान्योबिभर्ति" इत्यादिवद्द्विशीर्षत्वादिकं साक्षात्त्रयीविद्याविशेषणं परमात्मनस्तु सद्वारकं विशेषणमित्यवगन्तव्यं तन्तवे तनोति यज्ञादिक्रियाकलापं विस्तारयति विस्तृत्य प्रकाशयतीति तन्तुस्तस्मै यज्ञाय यज्ञो विष्णुः "यज्ञो वै विष्णुः" इति श्रुतेः "यज्ञायाऽऽचरतः कर्म समग्रं प्रविलीयते" इति स्मृतौ यज्ञशब्दस्य विष्णौ प्रयोगाच्च यज्ञाय विष्णुप्रकाशकाय पूर्वोत्तरभागाभ्यां कर्मब्रह्मप्रतिपादकायेत्यर्थः । केचिदत्र यज्ञरूपेण विष्णुः स्तूयते इत्युक्त्वा चत्वारिशृङ्गेति वेदा वा एतदुक्तास्त्रयोऽस्यपादा इति सवनानि त्रीणि द्वेशीर्षे प्रायणीयोदयनीये सप्तहस्तासः सप्त छन्दांसि त्रिधा बद्धः त्रेधा बद्धो मन्त्रब्राह्मणकल्पैर्बद्धो वृषभो रोरवीति रोरवणं सवनक्रमेण ऋग्भिर्यजुर्भिः सामभिः "यदेनमृग्भिः शंसन्ति यजुर्भिर्यजन्ति सामभिः स्तुवन्ति" इति यास्कनिरुक्तमुदाहृत्य व्याचक्ष्यते ॥ ३१ ॥

तदेवं नामरूपात्मकजगदन्तरात्मत्वेन तत्कारणत्वेन च प्रकृतकर्माराध्यस्य वासुदेवस्य तद्विशेषणकत्वमुक्तम. ननु, जगत्सृष्ट्यादिकर्तृत्वं ब्रह्मरुद्रादिगतं न वासुदेवगतमित्याशङ्कायां यद्ब्रह्मादिगतं जगत्स्रष्टृत्वादिकं तदन्तरात्मतयाऽनुप्रविष्टस्य तच्छरीरकस्य तद्वारा तस्यैव विशेषणमित्यभिप्रायेण तद्रूपत्व—मुच्यते नमःशिवायेति. तत्र शिवत्वादिधर्माणां प्रतर्दनाधिकरणन्यायेन इन्द्रद्वारा त्वाष्ट्रहन्तृत्वादीनामिव रुद्रब्रह्मशरीरकस्य परमात्मनः भूतानीति सद्वारकविशेषणत्वमवगन्तव्यं शक्तिधराय अम्बिकापतय इत्यर्थः ॥ ३२ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पयोव्रत इति पुंल्लिङ्गप्रयोगः सर्वसाधनत्वज्ञापनार्थः मृदो विशेषमाह—क्रोडेति । वराहखातया स्रोतःस्यन्दमानं जलं तत्र स्नानं कुर्यादित्यर्थः ॥ २५ ॥

रसायाः रसातलात् स्थानमिच्छता भूतानामिति शेषः ॥ २७ ॥
निवर्तितात्मनियमः कृतसन्ध्योपासनादिकः ॥ २८ ॥ २९ ॥
गुणसंस्थानहेतवे कपिलात्मने ॥ ३० ॥
द्विशीर्षे "चत्वारिशृङ्गा" इति श्रुतेः—

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

"चत्वारिशृङ्गा वेदास्तु पादास्त्रिसवनानि च ।
प्रायणीयं शिरस्त्वेकमन्यच्चोदयनीयकम् ॥
हस्तास्तु सप्तच्छन्दांसि तैर्गृह्णाति फलान्यसौ ।
मन्त्रब्राह्मणकल्पैस्तु त्रिधा बद्ध इतीर्यते ॥
शास्त्राद्वातृस्तुतिरवै रोरवीत्यृत्विजो मुखात् ।
वृषभो महान्स्वधर्मत्वाद्देवस्तु फलभावनात्" ॥ इति

तन्तवे व्याप्ताय सन्तानिहेतवे च त्रयीविद्यानां सोमपानाम् आत्मने अन्तर्यामिणे ॥ ३१-३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

पयसा व्रतं यस्य सः पयःपायीत्यर्थः ॥ २५ ॥

तत्रादौ पूर्वेद्युः कृत्यमाह—सिनीवाल्याममावास्यायां क्रोडविदीर्णया वराहोत्खातया मृदा यदि लभ्येतैतत् काकाचिगोलकन्यायेनोभयत्रान्वितम् ॥ २६-२८ ॥

तत्रावाहनादौ नव मन्त्रानाह—नम इति ॥ २९ ॥

चतुर्विंशतिगुणान् वैशेषिकोक्तान् रूपादीन् साङ्ख्योक्तानि तत्त्वानि वा जानातीति तस्मै गुणसङ्ख्यानस्य सांख्यशास्त्रस्य हेतवे प्रवर्त्तकाय ॥ ३० ॥

गुणावतारान् प्रणमति त्रिभिः, तत्रादौ मन्त्रोक्तयज्ञरूपिणं विष्णुं प्रणमति—नम इति । तन्तवे फलविस्तारकाय त्रय्यां विद्यायामात्मा यस्येति त्रिधा बद्ध इत्यस्यार्थ उक्तः, तथा च मन्त्रः"चत्वारिश्रृङ्गास्त्रयोऽस्य पादा द्वेशीर्षे सप्त हस्तासो अस्य त्रिधा बद्धो वृषभो रोरवीति महादेवो मर्त्या आविवेश"इति. तथा च यास्कः चत्वारिशृङ्गाणीति वेदा एवोक्ताः त्रयोऽस्य पादा इति सवनानि त्रीणि द्वे शीर्षे प्रायणीयोदयनीये सप्त हस्तासः सप्त छन्दांसि त्रिधा बद्धस्त्रेधाबद्धः मन्त्रब्राह्मणकल्पैःवृषभो रोरवीति रोरवणं सवनक्रमेण ऋग्भिर्यजुर्भिः सामभिः "यदेनमृग्भिः शंसन्ति यजुर्भिर्यजन्ति सामभिः स्तुवन्ति"इति ॥ ३१- ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अमले शुक्ले पक्षे द्वादशाहं द्वादशदिनपर्यन्तं पयसा व्रतं यस्य स जनः अरविन्दाक्षमर्चयेदित्यन्वयः ॥ २५ ॥

तत्र पूर्वदिनकृत्यमाह—सिनीवाल्यामित्यादिना ब्रह्मचार्य्यथ तद्द्वाऽस्यामित्यन्तेन ग्रन्थेन । तेन सिनीवाल्यां दृष्टेन्दुकलायाममावास्यायां यदि लभ्येत तर्हि क्रोडविदीर्णया वन्यवराहोत्पाटितया मृदा आलिप्य यदि लभ्येत तर्हि स्रोतसि स्नायात् मृदालेपनवेलायामेतं वक्ष्यमाणं मन्त्रमुदीरयेत् ॥ २६ ॥ २७ ॥ २८ ॥

आवाहनादौ मन्त्रानाह—नम इति । पाद्यादौ विशेषस्तु द्वादशाक्षरो बोध्यः गन्धमाल्यादिभिश्चार्चेद्द्वादशाक्षरविद्ययेति वक्ष्यमाणत्वात् ॥ २९ ॥

चतुर्विंशद्गुणज्ञाय चतुर्विंशतितत्त्वज्ञाय गुणसंख्यानस्य चतुर्विंशतितत्त्वप्रतिपादकस्य श्रीमद्भागवतशास्त्रान्तर्गतस्य सांख्यशास्त्रस्य हेतवे प्रवर्त्तकाय ॥ ३० ॥

अथ विश्वस्थितिनिमित्तभूतयज्ञरूपिणं श्रीमद्भगवन्तं प्रणमति—नमो द्विशीर्ष्णे इति । यज्ञाय यज्ञमूर्त्तये विष्णवे नमः "यज्ञो वै विष्णुः"इति श्रुतेः । तनोति फलमिति तन्तुस्तस्मै वाञ्छितफलदाय त्रय्यां विद्यायामात्मा यस्य वेदत्रयीप्रोक्ताय द्वे प्रायणीयोदयनीये शीर्षे यस्य तस्मै त्रयः सवनत्रयरूपाः पादाः यस्य तस्मै श्रृङ्गाय चत्वारो वेदाः श्रृङ्गा यस्य तस्मै सप्त छन्दांसि हस्ता यस्य तस्मै । तथा च मन्त्रः "चत्वारि शृङ्गास्त्रयो अस्य पादा द्वे शीर्षे सप्तहस्तासोऽस्य त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्यानाविवेश"इति । तथा यास्कनिरुक्तः चत्वारि शृङ्गेति वेदा एवोक्ताः त्रयोऽस्य पादा इति सवनानि त्रीणि द्वे शीर्षे प्रायणीयोदयनीये सप्तहस्ताः सप्तच्छन्दांसि त्रिधा बद्धो मन्त्रब्राह्मणकल्पैः वृषभो रोरवीति रोरवणं सवनक्रमेण ऋग्भिर्यजुर्भिः सामभिः "यदेनमृग्भिः शंसन्ति यजुर्भिर्यजन्ति सामभिस्तुवन्ति" इति महादेवो मर्त्यानाविवेशेत्यस्य महादेवो यज्ञमूर्तिर्भगवान् मर्त्यान् यज्ञार्हान् आविवेशेत्यर्थः ॥ ३१ ॥

अथ विश्वं संहारनिमित्तभूतशिवात्मकशक्तिरूपिणं भगवन्तं प्रणमति, नमः शिवायेति ॥ ३२ ॥

भाषा टीका ।

फाल्गुन मास के शुक्ल पक्ष में द्वादश दिन का पयोव्रत धारण कर परम भक्ति युक्त होकर; कमलदललोचन श्रीहरि का अर्चन करे ॥ २५ ॥

तहां एक दिन पहिले अर्थात् अमावास्या को जंगली शूकर की विदारण करी हुई मृत्तिका का देहमें लेप करके यदि स्रोत (नदी आदि) मिल जावे तो वहां नहीं तो कूपादि पर ही इस आगे के मंत्र को बोल कर स्नान करे ॥ २६ ॥

वह मंत्र यह है, कि—"हे देवि ! स्थिति की इच्छा से तुमको श्रीआदिवराह भगवान् ने रसातल से उद्धृत कीयी हैं आपको नमस्कारहो आप हमारे पाप को नष्ट करो" ॥ २७ ॥

फिर अपने सब नियमों से निवृत्त होकर, सावधान होकर श्रीहरि का पूजन करे वह पूजा अर्चा (प्रतिमा) में, स्थंडिल [भूमि] में सूर्य, जल, वा गुरुके विषय में करे ॥ २८ ॥

महान् पुरुष रूप सर्वभूतों में निवास करने वाले, सर्व साक्षी श्रीवासुदेव भगवान् को नमस्कार हो ॥ २९ ॥

अव्यक्त सूक्ष्म प्रधान पुरुष रूप और चौबीस [२४] गुणों के ज्ञाता तथा गुण संख्यान के हेतु ऐसे आपको नमस्कार हो ॥ ३० ॥

दो शिर वाले तीन पद वाले चार श्रृंग युक्त तंतुरूप और सप्त हस्त वाले, वेदत्रय की विद्या में आत्मा जिनका ऐसे यज्ञरूप आपको नमः हो ॥ ३१ ॥

शिव और रुद्ररूप तथा शक्ति के धारण करने वाले सर्व

नमो हिरण्यगर्भाय प्राणाय जगदात्मने ।
योगैश्वर्यशरीराय नमस्ते योगहेतवे ॥ ३३ ॥
नमस्ते आदिदेवाय साक्षिभूताय ते नमः ।
नारायणाय ऋषये नराय हरये नमः ॥ ३४ ॥
नमो मरकतश्यामवपुषेऽधिगतश्रिये ।
केशवाय नमस्तुभ्यं नमस्ते पीतवाससे ॥ ३५ ॥
त्वं सर्ववरदः पुंसां वरेण्य ! वरदर्षभ ! ।
अतस्ते श्रेयसे धीराः पादरेणुमुपासते ॥ ३६ ॥
अन्ववर्तन्त यं देवाः श्रीश्च तत्पादपद्मयोः ।
स्पृहयन्त इवामोदं भगवान्मे प्रसीदताम् ॥ ३७ ॥
एतैर्मन्त्रैर्हृषीकेशमावाहनपुरस्कृतम् ।
अर्चयेच्छ्रद्धया युक्तः पाद्योपस्पर्शनादिभिः ॥ ३८ ॥
अर्चित्वा गन्धमाल्याद्यैः पयसा स्नपयेद्विभुम् ।
वस्त्रोपवीताभरणपाद्योपस्पर्शनैस्ततः ।
गन्धधूपादिभिश्चार्चेद्द्वादशाक्षरविद्यया ॥ ३९ ॥
शृतं पयसि नैवेद्यं शाल्यन्नं विभवे सति ।
ससर्पिः सगुडं दत्त्वा जुहुयान्मूलविद्यया ॥ ४० ॥

भाषा टीका ।

विद्या के पति और भूतों के पति भी आपही हो ऐसे आपको नमः ॥ ३२ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्राणाय सूत्रात्मने योगैश्वर्यं शरीरं यस्य ॥ ३३ ॥ ३४ ॥
अधिगता प्राप्ता श्रीर्येन तस्मै ॥ ३५—३६॥
तत्पादपद्मयोरामोदं स्पृहयन्त इव देवाश्च यमन्ववर्तन्त स मे प्रसीदतु ॥ ३७ ॥
आवाहने पुरस्कृतं सम्मानितम् ॥ ३८ ॥ ३९ ॥
पयसि शृतं पक्वं पायसम् मूलविद्यया द्वादशाक्षरयैव ॥ ॥ ४०—४१ ॥

———

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

हिरण्यगर्भाय चतुर्मुखरूपेणावस्थिताय प्राणयति सर्वाणि भूतानीति प्राणस्तस्मै "कोह्येवान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यात्" इति श्रुतेः प्राणशरीरकत्वाद्वा प्राणः जगदन्तरात्मने ब्रह्मादिस्तम्बपर्यन्तजगदन्तरात्मत्वमेव तत्समानाधिकृतिनिमित्तमिति भावः योगैश्वर्यशरीराय योगैश्वर्यनिर्वाहकाय तन्निर्वाहकत्वं योगस्मृतिप्रयोक्तृत्वरूपकारणत्वेनेत्याह—योगहेतवे योगस्मृतिकर्त्रे इत्यर्थः । इदं विशेषणद्वयं साक्षाच्चतुर्मुखस्य तद्द्वारातु परमात्मन इत्यवगन्तव्यम् ॥ ३३ ॥

उक्तविशेषणसामर्थ्यलब्धैरन्यैरप्यसाधारणधर्मैर्विशिंषन्नम—स्करोति, मन्त्रः नमस्त इति । आदिदेवाय ब्रह्मरुद्रादीनामप्यादिभूताय कारणभूतायेत्यर्थः । अयमुक्तसर्वकारणत्वसामर्थ्यलब्धोर्थः शब्दार्थस्त्वादिश्चासौ देवस्तस्मा इति अत एव देवानामपि देवाय अधिपतये स्वतेजसा दीप्यमानानां ब्रह्मादिदेवानामपि अन्तरात्मतया दीप्यमानायेति वा नारायणाय नाराणां प्राप्याय प्रापकाय आधाराय च नराय नित्याय ऋषये सर्वज्ञाय यद्वा नारायणाय ऋषये नराय च नरनारायणर्षिरूपेणावतीर्णाय हरये आश्रितार्त्तिहन्त्रे ३४

मरकतवदिन्द्रनीलवच्छ्यामं वपुर्यस्याधिगता नित्यसंश्लिष्टा श्रीर्महालक्ष्मीर्येन तस्मै केशवादिद्वादशमूर्त्तीनाम् उपलक्षकः केशवशब्दः केशवादिद्वादशमूर्त्तिरूपेणावस्थितायेत्यर्थः । पिशङ्गं वासो वस्त्रं यस्य तस्मै ॥ ३५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हे वरेण्य ! अनेन गायत्रीप्रतिपाद्यत्वं सूचितम्. हे वरदश्रेष्ठ ! त्वमेव यतः सर्ववरदः ततस्तवैव पादरेणुमिष्टप्राप्तये धीरा उपासते सेवन्ते ॥ ३६ ॥

श्रीर्लक्ष्मीः देवाः ब्रह्मादयश्च यत्पादपद्मयोरामोदं स्पृहयन्तः कामयमाना इव यमनुसृतवन्तः सभगवान् पूर्णषाड्गुण्यो वासुदेवो मह्यं प्रसीदताम् ॥ ३७ ॥

इत्येतैः मन्त्रैरावाहनपुरस्कृतं सन्निधापितं हृषीकेशं पाद्योपस्पर्शनं पाद्याचमनं तदादिर्येषां तैरामनार्घ्यैः आदिशब्देन ग्राह्यं पाद्यक्रमस्त्वविवक्षितः आसनार्घ्यपाद्यैरर्चयेदित्यर्थः ॥ ३८ ॥

एवमेतैरर्चित्वा गन्धमाल्यैः गन्धपुष्पैस्सह पयसा गन्धादिसहितेन क्षीरेण शुद्धजलेन च विभुं वासुदेवं स्नापयेदित्यर्थः। ततो वस्त्रादिभिरभ्यर्च्य गन्धादिभिश्चार्चेत् आदिशब्देन दीपमधुपर्काचमनानि ग्राह्याणि द्वादशाक्षरविद्ययेति पूर्वोत्तराग्वयि आसनाद्युपचाराश्चाऽनयैव कार्याः ॥ ३९ ॥

तथा तयैव विद्यया विभवे सति पयसि क्षीरे शृतं पक्वं शाल्यन्नं सर्पिः घृतेन सहितं सगुडश्च नैवेद्यं दत्वा समर्प्य उक्तद्वादशाक्षरविद्यया जुहुयात् ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हिनोति दुःखं राति सुखमिति हिरण्यं रेतो लक्षणं गर्भं यस्य स तथा तस्मै ॥ ३३—३५ ॥

यतो वरदर्षभः अतः ॥ ३६ ॥

श्रिया विनिर्जिते पद्मे ययोस्तौ तथा तयोः पादयोरामोदं स्पृहयन्तो देवा यमन्ववर्तन्त स भगवान् ॥ ३७ ॥

उपस्पर्शनमाचमनम् ॥ ३८ ॥

द्वादशाक्षरविद्यया ॐ नमो भगवते वासुदेवायेति ॥ ३९ ॥

पयसि शृतं पायसान्नम् ॥ ४०—४२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

प्राणाय सूत्रात्मने योगैश्वर्यमयं शरीरं यस्य तस्मै ॥ ३३-३६ ॥

तत्पादपद्मयोरामोदं स्पृहयन्त इव देवाश्च श्रीश्च यमन्ववर्तन्त स मे प्रसीदतु ॥ ३७ ॥

एतैर्मन्त्रैरावाहनेन पुरस्कृतं सम्मानितं स्वःपुरस्थीकृतमिति वा उपस्पर्शनमाचमनीयम् ॥ ३८ ॥

प्रथमं पाद्यादिभिरर्चित्वा स्नापयेत् स्नापयित्वा वस्त्रोपवीताभरणपरिधापनानन्तरं पुनरपि पाद्यादिभिः चकारेणान्यैरपि बहुभिरुपचारैः पाद्यादिदाने सर्वत्र मन्त्रमाह द्वादशेति ॥ ३९ ॥

पयसि शृतं पक्वं परमान्नम् ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अथ सृष्टिनिमित्तभूतचतुर्मुखात्मकांशरूपिणं प्रणमति—नमो हिरण्यगर्भायेति । अथ विश्वधारणनिमित्तभूतप्राणरूपिणं भगवन्तं प्रणमति—प्राणाय जगदात्मने इति । अथाणिमादिविभूतिरूपिणं भगवन्तं प्रणमति—योगैश्वर्याणि ध्यानयोगजाऽणिमादिसिद्धयः शरीरं यस्य तस्मै सिद्धिसाधकध्यानयोगप्रवर्तकरूपिणं भगवन्तं प्रणमति, योगहेतवे इति ॥ ३३ ॥

अथ पुरुषाद्यवताररूपं भगवन्तं प्रणमति—नमस्ते आदिदेवाय प्रकृतिप्रेरकपुरुषरूपाय ॥ ३४ ॥

साक्षाद्भगवन्तं श्रीनिवासं केशवं प्रणमति—नमो मरकतश्यामवपुषे इति । अधिगता सर्वचेतनाचेतनपदार्थेभ्य आधिक्यं प्राप्ता श्रीर्यस्मात्स्वभर्तुस्तस्मै ॥ ३५ ॥

अथ सर्ववरदत्वादिना स्तुवन् भगवान्प्रसीदत्विति प्रार्थयते—त्वमिति द्वाभ्याम् ॥ ३६ ॥

तत्पादपद्मयोः आमोदं श्रीरिव स्पृहयन्तः देवाः चकारान्मुनयः यमन्ववर्तन्त स मे मह्यं प्रसीदताम् ॥ ३७ ॥

अस्याराधनप्रकारस्य कर्ता ब्रह्मा तथान्योऽप्येवमाराधयेदित्याह—एतैरिति । एतैर्मन्त्रैः आवाहनेन पुरस्कृतं संमानितम् ॥ ३८ ॥ ३९ ॥

पयसि शृतं पक्वम् मूलविद्यया द्वादशाक्षरमन्त्रेण ॥ ४० ॥ ४२ ॥

भाषा टीका ।

हिरण्यगर्भरूप प्राणरूप और जगत के आत्मा तथा योग ऐश्वर्य शरीरजिनका ऐसे योगके हेतु आपको नमः ॥ ३३ ॥

आदिदेव साक्षिरूप ऋषिरूप नररूप ऐसे श्रीहरिरूपनारायण को नमः ॥ ३४ ॥

मरकत मणि सदृश श्यामल दिव्य विग्रह में शोभायमान श्री जिनके ऐसे भगवान को नमः हो ॥ ३५ ॥

हे वरदश्रेष्ठ ! आपही वर देनेवाले हौ तिसीसे धीरलोग कल्याण के अर्थ आपके चरण रजकी उपासना करते हैं ॥ ३६ ॥

जिनके चरणारविन्दके आमोदकी स्पृहा करके देवता लोग तथा श्रीलक्ष्मीजी अनुवर्तन करती हैं वे भगवान् हमारे ऊपर प्रसन्न होवैं ॥ ३७ ॥

श्रद्धायुक्त होकर इन मन्त्रो से श्रीहृषीकेश भगवान् को आवाहन से आदि लेकर पाद्य आचमन आदि समर्पण करके ॥ ३८ ॥

गन्ध माला इत्यादिक से अर्चन कर दुग्ध से श्रीहरिको स्नान करावै, ताके अनन्तर यज्ञोपवीन पहिरावै फिर वस्त्र धारण करावै तदनंतर आभूषण धारण कराकर पाद्य आचमन समर्पण करै और ता पीछे द्वादशाक्षर मंत्र से गंध धूप दीप इत्यादि समर्पण करै ॥ ३९ ॥

और दुग्ध में चांवलों को रांधकर वैभव होय घृत और गुण मिलाकर मूल मंत्र से हवन करै ॥ ४० ॥

निवेदितं तद्भक्ताय दद्याद्भुञ्जीत वा स्वयम् ।
दत्त्वाचमनमर्चित्वा ताम्बूलं च निवेदयेत् ॥ ४१ ॥
जपेदष्टोत्तरशतं स्तुवीत स्तुतिभिः प्रभुम् ।
कृत्वा प्रदक्षिणं भूमौ प्रणमेद्दण्डवन्मुदा ॥ ४२ ॥
कृत्वा शिरसि तच्छेषां देवमुद्वासयेत्ततः ।
द्व्यवरान्भोजयेद्विप्रान् पायसेन यथोचितम् ॥ ४३ ॥
भुञ्जीत तैरनुज्ञातः शेषं सेष्टः सभाजितैः ।
ब्रह्मचार्यथ तद्रात्र्यां श्वो भूते प्रथमेऽहनि ॥ ४४ ॥
स्नातः शुचिर्यथोक्तेन विधिना सुसमाहितः ।
पयसा स्नापयित्वार्चेद्यावद्व्रतसमापनम् ॥ ४५ ॥
पयोभक्षो व्रतमिदं चरेद्विष्ण्वर्चनादृतः ।
पूर्ववज्जुहुयादग्निं ब्राह्मणांश्चापि भोजयेत् ॥ ४६ ॥
एवं त्वहरहः कुर्याद्द्वादशाहं पयोव्रतः ।
हरेराराधनं होममर्हणं द्विजतर्पणम् ॥ ४७ ॥
प्रतिपद्दिनमारभ्य यावच्छुक्लत्रयोदशी ।
ब्रह्मचर्यमधः स्वप्नं स्नानं त्रिषवणं चरेत् ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पूर्वोक्ताभिरन्याभिश्च स्तुतिभिः ॥ ४२ ॥

तस्य शेषां निर्माल्यम् द्वाववरौ येषां तान् असम्भवे द्वावपि भोजयेदित्यर्थः ॥ ४३ ॥

सभाजितैस्तैरनुज्ञातः सन् सेष्टो बन्धुभिः सहितः तस्यां रात्र्यां ब्रह्मचारी सन् श्वोभूते प्रभाते सति ॥ ४४—४५ ॥

पय एव भक्ष आहारो यस्य ॥ ४६—४७ ॥

अधः स्वप्नं शयनम् ॥ ४८—४९ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततः यद्भगवते निवेदितमन्नं पायसं तत्सति लाभे भोक्त्रे ब्राह्मणाय दद्यात्नोचेत् स्वयं वा भुञ्जीत तत आचमनं दत्त्वा ताम्बूलं निवेदयेत् समर्पयेत् ॥ ४१ ॥

ततो द्वादशाक्षरं मन्त्रमष्टोत्तरशतं जपेत् स्तोत्रैर्वैदिकतान्त्रिकस्तुतिभिर्भगवन्तं स्तुवीत ततः प्रदक्षिणं कृत्वा दण्डवद्भूमौ मुदा हर्षेण प्रणमेत् ॥ ४२ ॥

तच्छेषां निर्माल्यं पुष्पादिकं शिरसि धृत्वा ततो भगवन्तमुद्वासयेत्. द्वाववरौ येषां तान् विप्रान्यथाविधि पायसेन भोजयेत् द्व्यवरानित्यनेनासति विभवे द्वावपि भोजयेन्न त्वेकमिति विवक्षितम् ततः सम्यक् पूजितैस्तैर्विप्रैरनुज्ञातः सेष्टः बन्धुभिः सहितः शेषं शिष्टमन्नादिकं भुञ्जीत अथ तद्रात्र्यां ब्रह्मचारी स्त्रीसङ्गरहितः शयीतेति शेषः अथ प्रथमेऽहनि श्वोभूते प्रभाते ॥ ४३ ॥ ४४ ॥

स्नातः शुचिः समाहितचित्तो यथोक्तेन विधानेन पयसा स्नापयन् भगवन्तमिति शेषः । स्नापनग्रहणमावाहनादीनामप्युपलक्षणं यावद्व्रतसमाप्ति एवमभ्यर्चेदित्यर्थः ॥ ४५ ॥

पयः क्षीरमेव भक्ष आहारो यस्य सः विष्णोरर्चने आदरयुक्त इदं व्रतं कुर्यात् पूर्ववदग्नौ जुहुयाद्विप्रांश्च भोजयेत् ॥ ४६ ॥

एवमहरहर्द्वादशदिनपर्यन्तं स्वयं पयोभक्षः हरेराराधनं द्विजभोजनं तदर्हणं ब्रह्मचर्यमधःशयनं त्रिकालस्नानं चेत्येतत्सर्वं यावच्छुक्लत्रयोदशीपर्यन्तं कुर्यात् द्वादशाहं पयोव्रतमिति पाठे द्वादशदिनसाध्यं पयोव्रताख्यं कर्म हरेराराधनादिरूपं चरेदित्यर्थः ॥ ४७ ॥ ४८ ॥

———

वर्जयेदसदालापं भोगानुच्चावचांस्तथा ।
अहिंस्रः सर्वभूतानां वासुदेवपरायणः ॥ ४९ ॥
त्रयोदश्यामथो विष्णोः स्नपनं पञ्चकैर्विभोः ।
कारयेच्छास्त्रदृष्टेन विधिना विधिकोविदैः ॥ ५० ॥
पूजां च महतीं कुर्याद्वित्तशाठ्यविवर्जितः ।
चरुं निरूप्य पयसि शिपिविष्टाय विष्णवे ॥ ५१ ॥
शृतेन तेन पुरुषं यजेत सुसमाहितः ।
नैवेद्यं चापिगुणवद्दद्यात्पुरुषतुष्टिदम् ॥ ५२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तच्छेषं पुष्पं द्रव्यमाणम् ॥ ४३ ॥

द्व्यवरानवरपक्षेपि द्वावपेक्षितौ मुख्यपक्षस्तु द्वादशेति ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

निवेदितमित्यर्द्धकम्, भुञ्जीतवेति वा शब्दः समुच्चये ॥४१-४२॥

द्वौ अवरौ कनिष्ठपक्षौ येषां द्वौ अवरसंख्यौ येषां तां इत्यर्द्धानिति वा ॥ ४३-६२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

निवेदितं सर्वमेव दद्यात् किञ्चिद्दत्वा वा भुञ्जीतेत्यर्थः ॥ ४१—४२ ॥

शेषां निर्माल्यम् उद्वासो विसर्जनम् द्वौ अवरौ येषाम् असामर्थ्ये द्वावपि भोजयेत् ॥ ४३ ॥

समाजितैः स्वकृताम्बूलादिना पूजितैस्तैर्दत्ताज्ञस्सन् सेष्टः बन्धुसहितः श्वोभूते प्रभाते सति ॥ ४४—४७ ॥

शुक्लत्रयोदशीति प्रथमान्तो द्वितीयान्तश्च काचित्कः पाठः स्वप्नं शयनम् ॥ ४८ ॥ ४९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तस्य भगवतः शेषां निर्माल्यम् द्वौ अवरौ येषां तान् अल्पधनः द्वावपि भोजयेदित्यर्थः ॥ ४३ ॥

सेष्टः बन्धुसहितः तद्रात्र्यां ब्रह्मचारी तां रात्रीमारभ्य व्रतसमाप्तिपर्यन्तं त्यक्तस्त्रीसौख्यः श्वोभूते प्रभाते ॥ ४४ ॥ ४५ ॥

पयः क्षीरं भक्ष्यं भोजनं यस्य सः ॥ ४६—४९ ॥

भाषा टीका ।

और गोविन्द के भोग लगाये हुए निवेदित अन्न को विष्णुभक्त को देवै अथवा आपही भोजन करे श्रीहरि को आचमन देकर अर्चना कर ताम्बूल को निवेदन करे ॥ ४१॥

फिर एक सौ आठ मंत्र का जाप करे और प्रभु को नाना स्तोत्रों से स्तुति करे । तथा प्रदक्षिणा करके बड़े हर्ष से भूमि में दंडवत् साष्टाङ्ग प्रणाम करे ॥ ४२ ॥

भगवान् का शेष अर्थात् प्रसादी माला पुष्पादि को को मस्तक पर धारण कर प्रभुको विसर्जन करे, तदनंतर यथोचित दो से कम न हों ऐसे ब्राह्मणों को पायस अन्न [खीर इत्यादि]का भोजन करावे ॥ ४३ ॥

तदनंतर ब्राह्मणों की आज्ञा पाकर बाकी बचे हुए को सादर इष्ट बन्धुओं के साथ भोजन करे, और उस रात्रि में ब्रह्मचर्य से [जितेन्द्रिय होकर] रहे, फिर रात्रि व्यतीत होने पर प्रथम दिन में प्रातःकाल क्या करे कि ॥ ४४ ॥

सावधान होकर यथोक्त विधि से शुचि होकर स्नान करे और श्रीहरि को दुग्ध से स्नान कराकर पूजा किया करे जब तक कि-व्रत समाप्त हो ॥ ४५ ॥

श्रीविष्णु के अर्चन में आदर युक्त होकर प्रथम सहस्र अग्नि का हवन करे और ब्राह्मणों को भोजन करावे ॥ ४६ ॥

पयोव्रत को धारण करने वाला द्वादश दिवस पर्यंत प्रतिदिन इसी प्रकार श्रीहरि का आराधन, होम, पूजा, और ब्राह्मणों को भोजन करावे ॥ ४७ ॥

इस प्रकार प्रतिपदा के दिन से आरंभ कर जब तक उसी शुक्लपक्ष की त्रयोदशी आवै तब तक द्वादश दिन बराबर ब्रह्मचर्य से रहे, और भूमि में शयन करे, तथा त्रिकाल स्नान करे ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पञ्चकैः पञ्चामृतैः ॥ ५०—५७ ॥

आचार्यं ज्ञानसम्पन्नं वस्त्राभरणधेनुभिः ।
तोषयेदृत्विजश्चैव तद्विद्ध्याराधनं हरेः ॥ ५३ ॥
भोजयेत्तान्गुणवता सदन्नेन शुचिस्मिते ! ।
अन्यांश्च ब्राह्मणान् शक्त्या ये च तत्र समागताः ॥ ५४ ॥
दक्षिणां गुरवे दद्यादृत्विग्भ्यश्च यथाऽर्हतः ।
अन्नाद्येनाऽऽश्वपाकांश्च प्रीणयेत्समुपागतान् ॥ ५५ ॥
भुक्तवत्सु च सर्वेषु दीनान्धकृपणेषु च ।
विष्णोस्तत्प्रीणनं विद्वान्भुञ्जीत सह बन्धुभिः ॥ ५६ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

अथ वर्ज्यानाह—वर्जयेदिति । नानाविधानसद्भिरालापान् वर्जयेत् यद्वा असदालापांस्तथेन्द्रियान्तरव्यापारानसतस्त्यजेदित्यर्थः तथा सर्वभूतसम्बन्धिहिंसारहितः वासुदेवानुसन्धानपरो भवेत् ॥ ४९ ॥

एवं द्वादशसु दिनेष्वतीतेष्वथ त्रयोदश्यां पञ्चभिरमृतैः साधनैश्चतुर्भिः ऋत्विग्भिराचार्येण चेति पञ्चभिर्वा शास्त्रोक्तेन विधिना तद्विद्भिः प्रयोज्यकर्तृभिर्विष्णोः स्नपनं कारयेत् ॥ ५० ॥

वित्तलोभमकुर्वाणो विष्णोर्महतीं सर्वोपचारयुक्तां पूजां कुर्यात् क्षीरे चरुं हविः शिपिविष्टविष्णुदेवताकङ्कारयित्वा शिपिविष्टो निरतिशयतेजोयुक्तः सुसमाहितचित्तः परमपुरुषं पुरुषसूक्तेन षोडशऋग्भिः यजेत होमेन तमाराधयेदित्यर्थः । ततः परमपुरुषप्रीतिकरं षड्रसोपेतं नैवेद्यं भगवते समर्पयेदित्यर्थः ॥ ५१ ॥ ५२ ॥

ततो वस्त्रादिभिर्ज्ञानसम्पन्नमाचार्यं यथावित्तं द्विजांश्च तोषयेत् हि यस्मात्तदाचार्यद्विजतोषणं विष्णोरेवाराधनं भवति तस्मात्तांस्तोषयेदित्यर्थः ॥ ५३ ॥

गुणवता षड्रसयुक्तेनान्नेन हे शुचिस्मिते ! तान्पूजितानाचार्यब्राह्मणान्ये चान्ये तत्र समागतस्तांश्च युक्तान्भोक्तुं योग्यान् भोजयेत् ॥ ५४ ॥

ततो गुरवे ऋत्विग्भ्यश्च स्ववित्तानुसारेण दक्षिणां दद्यात् श्वपाकपर्यन्तेभ्यः समागतान्सर्वानन्नादिभिस्तोषयेत् ॥ ५५ ॥

एवं दीनादिष्वपि भुक्तवत्सु तत्सत्कारं विष्णोरेव तोषकरं जानन् स्वयमपि बन्धुभिस्सह भुञ्जीत ॥ ५६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्नापकैः स्नानसाधनैः ॥ ५० ॥
शिपिषु रश्मिषु विष्टः शिपिविष्टः शिपौ गरुडे विष्टः वसौ वा ॥ ५१ ॥
मधुरादिगुणवत् ॥ ५२—५६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

पञ्चकैः पञ्चामृतैः ॥ ५०—५६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पञ्चकैः पञ्चामृतैः ॥ ५०—५६ ॥

भाषा टीका ।

तथा असत् आलापों [खोटे शब्दों] को और ऊंचे नीचे भोगों को वर्जन करे, और सर्व भूतों का अहिंसक होकर श्रीवासुदेव परायण होकर रहे ॥ ४९ ॥

फिर त्रयोदशी में विभु श्रीविष्णु का विधि जानने वाले कोविद [पंडित] जनों से शास्त्रोक्त विधि पूर्वक पंचामृत स्नान करावे ॥ ५० ॥

और द्रव्य की कृपणता को छोड़कर बड़ी भारी पूजा करे, और शिपिविष्ट नामा श्री विष्णु भगवान् को चरु [पाक] का निरूपण करे ॥ ५१ ॥

दुग्ध में सिद्ध हुए उसी अन्न से और बहुत गुण वाले परम पुरुष का संतोष कारक ऐसे नैवेद्य को निवेदन कर श्रीहरि का यजन करे ॥ ५२ ॥

और ज्ञान संपन्न आचार्य को वस्त्र आभरण धेनु देकर संतुष्ट करे और ऋत्विक् [पूजा करने वाले] लोगों को भी इसी रीति से संतुष्ट करे, बस यही श्रीहरि का आराधन जानों ॥ ५३ ॥

हे शुचिस्मिते । [हे सुन्दर मन्द हास वाली ! अदितिजी ! फिर उन ब्राह्मणों को नाना प्रकार के गुण वाले उत्तम अन्न के

नृत्यवादित्रगतैश्च स्तुतिभिः स्वस्तिवाचकैः ।
कारयेत्तत्कथाभिश्च पूजां भगवतोऽन्वहम् ॥ ५७ ॥
एतत्पयोव्रतं नाम पुरुषाराधनं परम् ।
पितामहेनाभिहितं मया ते समुदाहृतम् ॥ ५८ ॥
त्वं चानेन महाभागे ! सम्यक्चीर्णेन केशवम् ।
आत्मना शुद्धभावेन नियतात्मा भजाव्ययम् ॥ ५९ ॥
अयं वै सर्वयज्ञाख्यः सर्वव्रतमिति स्मृतम् ।
तपःसारमिदं भद्रे ! दानं चेश्वरतर्प्पणम् ॥ ६० ॥
त एव नियमाः साक्षात्त एव च यमोत्तमाः ।
तपो दानं व्रतं यज्ञो येन तुष्यत्यधोक्षजः ॥ ६१ ॥
तस्मादेतद्व्रतं भद्रे ! प्रयता श्रद्धया चर ।
भगवान्परितुष्टस्ते वरानाशु विधास्यति ॥ ६२ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्याम् अष्टमस्कन्धे कश्यपादितिसम्वादे पयोव्रतकथनं नाम
षोडशोऽध्यायः ॥ १६ ॥

भाषा टीका ।

भोजन करावै, और भी जो ब्राह्मण वहां आये हों शक्ति पूर्व उनको भी भोजन करावै ॥ ५४ ॥

गुरु और ऋत्विक् लोगों को यथा योग्य दक्षिणा देवै ॥ और आये हुए लोगों में चांडाल पर्यन्त को भी अन्नादिक सत्कार से तृप्त करै ॥ ५५ ॥

जब दीन, अंध, कृपण, तक सब भोजन कर चुकें तब इसको श्रीविष्णु की तृप्ति जानता हुआ बन्धुओं के साथ आप भी भोजन करै ॥ ५६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मया च ते समुदाहृतम् ॥ ५८—५९ ॥

सर्वयज्ञाख्योऽयं यज्ञः सर्वव्रतमिति च स्मृतमेतद्व्रतम् ॥ ६० ॥ ६१ ॥ ६२ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
षोडशोऽध्यायः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

आद्यन्तदिनद्वयं मध्ये द्वादशेत्येवं चतुर्दशस्वहस्सु नृत्यादिभिस्सह भगवतः पूजां कारयेत् ॥ ५७ ॥

तदेवं पयोव्रताख्यं कर्म उपदिश्य पुनर्विश्वासार्थं सांप्रदायिकत्वं स्मारयन्निगमयन्ननेन भगवन्तमाराधयेत्याह एतदिति । पुरुषः परमपुरुष आराध्यते येन तत्तथा परं श्रेष्ठम् एतत्पयोव्रतं नाम प्रसिद्धं मह्यं पितामहेनोपदिष्टं मम मया च तुभ्यं सम्यगभिहितम् ॥ ५८ ॥

हे महाभागे त्वमपि सम्यगनुष्ठितेनानेन पयोव्रतेन विशुद्धो भावो भक्तिर्यस्मिन् तेन आत्मना मनसा भजनीयमव्ययं केशवं भज आराधय ॥ ५९ ॥

प्रकृतं व्रतं स्तौति—अयमिति । सर्वयज्ञाख्योऽयं व्रतरूपो यज्ञः इदं व्रतं सर्वव्रतं स्मृतं सर्वयज्ञव्रततुल्यमिदं पयोव्रतमित्यर्थः । किं हे भद्रे ! सर्वतपस्सारतुल्यं तथा सर्वदानतुल्यञ्चेदं व्रतं [illegible] चशब्दो हेत्वर्थः च यतः हेतोरिदमीश्वरतर्पणम् ईश्वरः तर्प्यतेऽनेनेति तथा ईश्वरतृप्तिकरत्वेन सर्वयज्ञादिसमकक्षमित्यर्थः ॥ ६० ॥

यमनियमादयोपि ईश्वरतोषकरा एव सफलाः अन्ये तु व्यर्था एवेत्याह—त एवेति । येन नियमादिनाऽधोक्षजः तुष्यति त एव [illegible] नियमादिशब्दवाच्याः अन्ये त्वाभासरूपा व्यर्था एवेत्यर्थः ॥ ६१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यस्मात्सर्वयज्ञादिभिस्तुल्यत्वादीश्वरतोषकत्वाच्च हे भद्रे ! समाहिता त्वं श्रद्धयाएतद्व्रतमनुतिष्ठ तेन तुष्टो भगवांस्तवाशु वरान् दास्यति ॥ ६२ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
षोडशोऽध्यायः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

"तपः सन्तोष आस्तिक्यं दानमीश्वरपूजनम् ।
सिद्धान्तश्रवणञ्चैव ह्रीर्मतिश्च जपो व्रतम् ॥
एते तु नियमाः प्रोक्तास्तांश्च सर्वान्पृथक् शृणु ।
अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयार्जवम् ॥
क्षमा धृतिर्मिताहारः शौचं चैते यमाः स्मृताः" ॥
इति ॥ ६०—६२ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
षोडशोऽध्यायः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
षोडशोऽध्यायः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सर्वयज्ञाख्योऽयं यज्ञ इत्यनेनैकेनैव सर्वयज्ञाः कृता भवन्तीत्यर्थः । एवमिदं सर्वव्रतं तपःसारमिति अस्य सर्वतपस्त्वादिति भावः । तेन यज्ञसारव्रतसारदानसारशब्देनापीदं वाच्यमिति द्योतितम् ईश्वरतर्पणञ्चेति चकारादीश्वरतर्पणोऽयं यज्ञः ईश्वरतर्पणं व्रतमित्येवं च वाच्यम् ॥ ६० ॥

ईश्वरतर्पणं विना सर्वमेव विफलमिति दिग्दर्शनेनाह—त एवेति । अन्ये नियमाद्या एव न स्युः येनेति "नपुंसकमनपुंसकेन" (१।२।६९॥) इत्यादिनैकत्वम् ॥ ६१-६२ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
अष्टमे षोडशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अयं व्रतरूपो यज्ञः सर्वयज्ञाख्यः अस्मिन्कृते सर्वे यज्ञाः कृताः स्युरित्यर्थः । तथा सर्वव्रतं सर्वव्रततुल्यमिति च स्मृतमेतत् व्रतं तथा तपःसारं दानं सर्वदानतुल्यञ्च तत्र हेतुगर्भं विशेषणम् ईश्वरतर्पणमिति ॥ ६०—६२ ॥

इतिश्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
षोडशाऽध्यायार्थप्रकाशः ॥ १६ ॥

भाषा टीका ।

नृत्य, वादित्र, [बाजे] गीत, स्तुति, और स्वस्तिवाचन पूर्वक प्रति दिन श्रीहरि की कथा कीर्त्तन करा कर पूजन करावै५ ॥ ७ ॥

हे भद्रे ! ये हमने अपने पिता ब्रह्म जी से सुना है सो हमने तुमको उपदेश किया भगवान परम पुरुष का पूजन रूप इसका पयोव्रत ऐसा नाम है ॥ ५८ ॥

हे महाभागे ! तुम एकाग्र मन होकर इस उत्तम व्रत से शुद्धभाव वाला अन्तःकरण से अविनाशी केशव भगवान को भजो ॥ ५९ ॥

हे भद्रे ! यह पयोव्रत सब यज्ञ रूप है और तपका सार है दान रूप है और ईश्वर को सन्तोष का हेतु है इस व्रतका ऐसा बडा माहात्म्य है ॥ ६० ॥

साक्षात् सबसे उत्तम यम नियम वही है और तप दान व्रत यज्ञ भी वही है जिससे श्रीहरि प्रसन्न होवैं ॥ ६१ ॥

इस कारण हे भद्रे ! सावधान होकर श्रद्धा पूर्वक इस व्रतका तुम अनुष्ठान करो तुमारे भी इस व्रत से सन्तुष्ट होकर शीघ्रही भगवान् मनोकामना पूर्ण करेंगे ॥ ६२ ॥

इति श्रीमद्भागवत अष्टम स्कन्ध में षोडश अध्याय की
श्रीवृन्दावनस्थ भागवताचार्य कृत
भाषा टीका समाप्ता ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे षोडशोऽध्यायः ॥ १६ ॥

॥ सप्तदशोऽध्यायः ॥

श्रीशुक उवाच ।

इत्युक्ता साऽदिती राजन् ! स्वभर्त्रा कश्यपेन वै ।
अन्वतिष्ठद्व्रतमिदं द्वादशाहमतन्द्रिता ॥ १ ॥
चिन्तयन्त्येकया बुद्ध्या महापुरुषमीश्वरम् ।
प्रगृह्येन्द्रियदुष्टाश्वान्मनसा बुद्धिसारथिः ॥ २ ॥
मनश्चैकाग्रया बुद्ध्या भगवत्यखिलात्मनि ।
वासुदेवे समाधाय चचार ह पयोव्रतम् ॥ ३ ॥
तस्मात्प्रादुरभूत्तात ! भगवानादिपूरुषः ।
पीतवासाश्चतुर्बाहुः शङ्खचक्रगदाधरः ॥ ४ ॥
तं नेत्रगोचरं वीक्ष्य सहसोत्थाय सादरम् ।
ननाम भुवि कायेन दण्डवत्प्रीतिविह्वला ॥ ५ ॥
सोत्थाय बद्धाञ्जलिरीडितुं स्थिता नोत्सेह आनन्दजलाकुलेक्षणा ।
बभूव तूष्णीं पुलकाकुलाऽऽकृतिस्तद्दर्शनात्युत्सवगात्रवेपथुः ॥ ६ ॥
प्रीत्या शनैर्गद्गदया गिरा हरिं तुष्टाव सा देव्यदितिः कुरूद्वह ! ।
उद्वीक्षती सा पिबतीव चक्षुषा रमापतिं यज्ञपतिं जगत्पतिम् ॥ ७ ॥

अदितिरुवाच ॥

यज्ञेश ! यज्ञपुरुषाच्युत ! तीर्थपाद ! तीर्थश्रवः ! श्रवणमङ्गलनामधेय ! ।
आपन्नलोकवृजिनोपशमोदयाद्य शं नः कृधीश (१) भगवन्नसि दीननाथः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ततः सप्तदशेऽदित्या कृते तस्मिन्व्रते हरिः ।
तत्कामपूरणायादौ तत्पुत्रोऽभूदितीर्यते ॥

॥ १-५ ॥

प्रीतिविह्वलत्वादेव सा बद्धाञ्जलिः सती स्थिता केवलमीडितुं पुनर्नोत्सेहे न शशाक। अपितु तूष्णीं बभूव कथम्भूता आनन्दजलैराकुले ईक्षणे यस्याः पुलकैराकुला आकृतिर्देहो यस्याः तस्य दर्शनेन योऽत्युत्सवस्तेन गात्रे वेपथुः कम्पो यस्याः ॥ ६ ॥

तुष्टाव पिबतीवोद्वीक्षमाणेति च क्रियाभेदात्सेत्यस्य पदस्य द्विरुक्तिरदोषः ॥ ७ ॥

अयत्नतो विनिर्जित्य दैत्यानत्यूर्जितानपि भक्तान्रक्षितुमीशस्त्वमित्यस्तौददितिस्त्रिभिः । यज्ञेशेत्यादिदशभिः सम्बोधनैस्तवाशक्यं किमपि नास्तीति वदन्ती प्रार्थयते शं नः कृधि कुरु यतो दीनानां नाथोऽसि त्वम् तीर्थं श्रवः कीर्तिर्यस्य, श्रवणमेव मङ्गलं यस्य तन्नामधेयं यस्य आपन्नानां शरणागतानां वृजिनोपशमायोदयो यस्य ॥ ८ ॥

---

(१) भगवन्नवसन्नाथ इति विजय० ।

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका।

एवमुपदिष्टपयोव्रताऽदितिस्तदन्वतिष्ठदित्याह मुनिः—इतीति। इति इत्थं हे राजन्! स्वभर्त्रा कश्यपेनोक्तोपदिष्टव्रता सा अदितिरतन्द्रिता समाहिता द्वादशाहमिदं पयोव्रतमन्वतिष्ठत् ॥ १ ॥

अथानुष्ठानप्रकारमाह—चिन्तयन्तीति द्वाभ्याम्। महापुरुषमीश्वरं वासुदेवमेकयाऽनन्यविषयया बुध्या चिन्तयन्ती पयोव्रतं चचारेत्यर्थः। किं कृत्वा बुद्धिस्सारथिः मनो निग्रहोपायभूता यस्याः सा मनसेन्द्रियाण्येव दुष्टसत्वास्तान्प्रगृह्य निगृह्य ॥ २ ॥

मनश्चैकाग्रयाऽनन्यविषयया बुद्ध्या सर्वान्तरात्मनि षाड्गुण्यपूर्णे वासुदेवे समाधाय स्थिरं कृत्वा तस्यामदित्यामित्थं व्रतमनुतिष्ठन्त्यां सत्यां भगवान् वासुदेवः प्रादुरासीत् कथम्भूतः पीते पिशङ्गे वाससी यस्य चत्वारो बाहवो यस्य सः शङ्खादीन्बिभ्राणः ॥ ३—४ ॥

तं नेत्रगोचरं वासुदेवं समीक्ष्यादितिशशूत्थाय प्रीत्याविह्वला सती कायेन दण्डवद्भूमौ ननाम नमस्कृतवती ॥ ५ ॥

प्रीतिविह्वलत्वादेव सा बद्धाञ्जलिस्तूष्णीं स्थिता केवलम् ईडितुं स्तोतुं पुनर्नोत्सेहे न शशाक, कथम्भूता? आनन्दजलैराकुले ईक्षणे अक्षिणी यस्याः पुलकैराकुला आकृतिर्देहो यस्याः सा तस्य भगवतो दर्शनमेव निरतिशयोत्सवस्तेन गात्रे शरीरे वेपथुः कम्पो यस्याः सा ॥ ६ ॥

ततो हे कुरूद्वह! अदितिर्देवी शनैः गद्गदया गिरा प्रीतिपूर्वकं हरिं तुष्टाव, कथम्भूता?सा श्रिय पतिम् उद्वीक्ष्य चक्षुषा पिबन्तीव स्थिता सती तुष्टाव पिबन्तीवोद्वीक्ष्येति च क्रियाभेदात्सा इत्यस्य पदस्य द्विरुक्तिरदुष्टा इति ज्ञेयम् ॥ ७ ॥

"इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति" अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च" इत्यादि श्रुतिस्मृतिप्रसिद्धं यत् यज्ञेश्वरत्वादिकं तदधुना दर्शयन्तीव सुलभोऽल्पीयसापि भक्तेनाराधनेनाविर्भूतोऽसीत्यभिप्रायेण सम्बोधयती प्रार्थयते यज्ञेशेति। हे यज्ञेश यज्ञानां प्रभो! हे यज्ञपुरुष! यज्ञभोक्तः आश्रितान्नच्यावयतीत्यच्युतस्तस्य सम्बोधनं तीर्थं गङ्गाविरूपं पादे यस्य तीर्थे विशुद्धं श्रवः कीर्तिर्यस्य हे तीर्थश्रवः! श्रवणमेव मङ्गलं यस्य तत् नामधेयं यस्य आपन्नानां शरणागतानां लोकानां दुःखोपशमाय उदय आविर्भावो यस्य स नोऽस्माकं शं सुखं कृधि कुरु यतस्त्वं हे भगवन् षाड्गुण्यपूर्ण! दीनानां मादृशादीनां नाथोऽसि ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

अव्यक्तस्वभावोऽपि भक्त्या भजमानस्य पुंसः प्रत्यक्षो भवति भगवानित्येतमर्थं दर्शयत्यध्यायशेषेण, तत्र अदित्याः भक्त्या व्रताचरणप्रकारं वक्ति इत्युक्तेति ॥ १—३ ॥

तद्व्रताचरणफलमाह—तस्या इति ॥ ४—५ ॥

तस्याः भक्तिलक्षणं दर्शयति—सेति। पुलकेन रोमाञ्चेनाकुला व्याप्ता आकृतिस्तनुर्यस्याः सा तथा पुनस्तया किमकारीति तत्राह—तद्दर्शनेति। तद्दर्शनमेवात्युत्सवः तन्निमित्तो गात्रवेपथुर्देहकम्पो यस्याः सा तथा ॥ ६ ॥

तस्याः मुग्धभावं दर्शयति—उद्वीक्षतीति ॥ ७ ॥

स्वामीष्टोदयकरगुणविशिष्टत्वेन स्तौति—यज्ञेशेति। यज्ञपुरुष अच्युत इत्यनेन गुणान्तराणि समुच्चिनोति तानि कानीति तत्राह तीर्थपादेत्यादि तीर्थस्य शास्त्रस्य श्रवःश्रवणं याभ्यां ते तीर्थश्रवसी ते च श्रवणे चेति तीर्थश्रवः श्रवणे ते मङ्गलयतीति तीर्थश्रवः श्रवणमङ्गलं तच्च नामधेयं नाम यस्य स तथा तस्य सम्बुद्धिस्तीर्थश्रवः श्रवणमङ्गलनामधेय आपन्नस्य लोकस्य वृजिनं दुःखं तस्योपशमनार्थं परिहारार्थमुदयोऽवतारो यस्य स तथा तस्य सम्बुद्धिस्तथा कृधि कुरु भवसन्नाथ दीनजनरक्षक ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

१—६ ॥

पुनः सा चक्षुषा पिबन्तीवोद्वीक्षमाणा बभूवेत्यर्थः ॥ ७ ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

> अदितिर्व्रतिनी विष्णुं पश्यन्ती तुष्टुवे स ताम्।
> आश्वास्याभूत्सुतो ब्रह्मस्तुतः सप्तदशे प्रभुः॥
> ॥ १ ॥

मनसा प्रगृह्य प्रग्रहरूपेण मनसा वशीकृत्येत्यर्थः। मनोरश्मिर्बुद्धिसूत इति पूर्वोक्तेः एकाग्रया एकाग्रीकृतया बुद्ध्या मनश्च वशीकृतं वासुदेवे सम्यगर्पयित्वा ॥ २—६ ॥

उद्वीक्षती उत्कर्षेण तथा वीक्षमाणा यथा चक्षुषा तं पिबन्तीवोत्प्रेक्ष्यते इत्यर्थः। रमापतिं तत्पुत्रेभ्यः सर्वसम्पत्प्रदातारं यज्ञपतिं यज्ञसाराख्यव्रतादाविर्भवन्तं जगत्पतिम् अवतीर्य्य जगदुद्धर्त्तारम् ॥ ७ ॥

यज्ञेश हे व्रतयज्ञफलप्रद! यज्ञपुरुष हे मज्जन्मावधि यजनीयपुरुष अच्युत हे स्वभक्तशक्रादिच्युतिविनाशिन्! तीर्थपाद हे गङ्गोत्पादयिष्यच्चरणपद्म! तीर्थश्रवःहे जगत्पावनीभविष्यद्बलिच्छलनादिकीर्ते!,हे कर्णानन्दिभविष्यदुपेन्द्रत्रिविक्रमादिनामन्! हे विपन्नमद्विधजनदुःखप्रशमकावतारेत्येवं भाव्यर्थसूचकसम्बोधनपदान्यदित्याः मुखात्स्वयमेव निस्सृतानीति ज्ञेयम् ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

अदित्याः व्रतेन तुष्टो हरिः पुत्रोऽभूदिति सप्तदशेन वर्णयति ॥ १ ॥

मनसा इन्द्रियरूपान् दुष्टाश्वान्प्रगृह्य बुद्ध्या महापुरुषं चिन्तयन्ती मनश्च बुद्ध्या वासुदेवे समाधाय व्रतं चचारेति द्वयोरन्वयः ॥ २—५ ॥

विश्वाय विश्वभवनस्थितिसंयमाय स्वैरं गृहीतपुरुशक्तिगुणाय भूम्ने ।
स्वस्थाय शश्वदुपबृंहितपूर्णबोधव्यापादितात्मतमसे हरये नमस्ते ॥ ९ ॥
आयुः परं वपुरभीष्टमतुल्यलक्ष्मीर्द्यौभूरसाः सकलयोगगुणास्त्रिवर्गः ।
ज्ञानं च केवलमनन्त ! भवन्ति तुष्टात्त्वत्तो नृणां किमु सपत्नजयादिराशीः ॥ १० ॥

श्रीशुक उवाच ।

अदित्यैवं स्तुतो राजन् ! भगवान्पुष्करेक्षणः ।
क्षेत्रज्ञः सर्वभूतानामिति होवाच भारत ! ॥ ११ ॥

श्रीभगवानुवाच ।

देवमातर्भवत्या मे विज्ञातं चिरकाङ्क्षितम् ।
यत्सपत्नैर्हृतश्रीणां च्यावितानां स्वधामतः ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

बद्धाञ्जलिः स्थिता केवलम् ईडितुं तु नोत्सेहे न शशाक ॥६॥ ईडितुं पूर्वं या नोत्सेहे सा पुनः शनैर्हरिं तुष्टाव यदुक्तं बभूव तुष्णीमिति तत् सिंहावलोकन्यायेन विवृणोति सा च उद्वीक्षती उत्कर्षेण वीक्षमाणा रमापतिं चक्षुषा पिबतीवासीत् ॥ ७ ॥

शं सुखं कृधि कुरु यतो दीननाथोसि दीनसुखदत्त्वयोग्यतां भगवतो बहुभिः सम्बोधनैर्वर्णयति—हे यज्ञेश ! हे यज्ञपुरुष ! हे अच्युत ! तीर्थानि पादयोर्यस्य हे तीर्थपाद ! तीर्थं श्रवो यशो यस्य हे तीर्थश्रवः ! श्रवणमङ्गलानि श्रवणमात्रेणापि मङ्गलदानि नामधेयानि यस्य हे श्रवणमङ्गलनामधेय ! आपन्नानां प्रपन्नानां लोकानां वृजिनोपशमाय उदयो यस्य स हे तथाभूत ! ॥ ८ ॥

भाषा टीका ।

श्रीरुक्मिणीशो जयति ।

श्रीशुक उवाच ।

श्रीशुकदेवजी बोले, कि—हे राजन् ! अपने पति कश्यप का उपदेश सुनकर बडे श्रद्धा से सर्व आलस छोडकर इस द्वादशाह व्रत को देवमाता अदिति अनुष्ठान करने लगीं ॥ १ ॥

अनन्यबुद्धि से सबके अन्तर्यामि श्री हरि में चित्त लगाई और बुद्धि है सारथि जिस्का ऐसे इन्द्रियरूप दुष्ट घोडाओं को मनसे वश करती भई ॥ २ ॥

और एकाग्र बुद्धिसे सबजडचैतनके अन्तर्यामि स्वराट् देव श्री भगवान में मनलगाकर बडे हर्ष से पयोव्रत का अनुष्ठान करने लगीं ॥ ३ ॥

हे तात ! इस पयोव्रत के अनुष्ठान से प्रसन्नहोकर चार भुजाओं में शङ्खचक्र गदादिकों को वा पीताम्बर को धारण किये अति अद्भुत रूपसे आदि पुरुष श्री भगवान प्रकट होते भये ॥ ४ ॥ ऐसे आश्रित वत्सल श्रीहरि को नेत्रों के गोचर देखकर अदिति शीघ्रही उठखडी हुई, और प्रेम में विह्वल होकर बडे आदर से भूमामि में गिरकर लम्बी साष्टांग करीं ॥ ५ ॥

फिर खडी होकर स्तुति करने की इच्छाकरी, परन्तु भगवद्दर्शनके आनन्दसे नेत्रों में जल भरआया, और सब अङ्गों मे रोमाञ्च होने लगे, शरीर में कम्प भी होने लगा इस कारण चुपसे ही खडी रह गई ॥ ६ ॥

हे कुरूद्वह ! इसके अन्तर अदितिदेवी बडीप्रसन्नतापूर्वक गद्गद वचनो से साक्षात् श्री लक्ष्मी जी के पति सर्व यज्ञों के पति और जगत् के पति श्रीभगवान के अङ्ग प्रत्यङ्गों का अपने अतृप्त नेत्रों से दर्शनकरतीहुई उस सौन्दर्यामृत को पान करती हुई मन्द २ श्रीहरि की स्तुति करने लगीं ॥ ७ ॥

अदिति रुवाच ॥

हे यज्ञेश, हे यज्ञपुरुष, हे अच्युत, हे तीर्थपाद, हे तीर्थश्रव, हे श्रवणमङ्गलनामधेय, हे आपन्नलोकवृजिनोपशमोदय ! (आश्रितों के दुःख निवारक) हे ईश, हे भगवान् ! बडीभारी विपत्ति में प्राप्त हम लोगों को सुखी करो क्योंकि आप दीननाथ हैं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

भूम्ने महते नमः महत्त्वे हेतवः विश्वाय विश्वस्य भवनस्थितिसंयमार्थं स्वैरं गृहीताः पुरुशक्तेर्मायाया गुणा येन तस्मै तथाऽपि स्वस्थायाप्रच्युतस्वरूपाय कुतः, शश्वदुपबृंहितो नित्योर्जितो यः पूर्णबोधस्तेन व्यापादितं नित्यनिरस्तमात्मनि तमो मायालक्षणं येन तस्मै ॥ ९ ॥

तान्विनिर्जित्य समरे दुर्मदानसुरर्षभान् ।
प्रतिलब्धजयश्रीभिः पुत्रैरिच्छस्युपासितुम् ॥ १३ ॥
इन्द्रज्येष्ठैः स्वतनयैर्हतानां युधि विद्विषाम् ।
स्त्रियो रुदन्तीरासाद्य द्रष्टुमिच्छसि दुःखिताः ॥ १४ ॥
आत्मजान्सुसमृद्धांस्त्वं प्रत्याहृतयशःश्रियः ।
नाकपृष्ठमधिष्ठाय क्रीडतो द्रष्टुमिच्छसि ॥ १५ ॥
प्रायोऽधुना तेऽसुरयूथनाथा अपारणीया इति देवि ! मे मतिः ।
यत्तेऽनुकूलेश्वरविप्रगुप्ता न विक्रमस्तत्र सुखं ददाति ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अस्मदीयमनोरथपूरणमीषत्करमेव तवेति कैमुत्यन्यायेनाह, आयुः परं ब्रह्मायुः पुनरपि द्यौश्च भूश्च रसातलं च द्योभूरसाः द्यौरिति पृथक्पाठे भूश्च रसाश्च बिलस्वर्गौ इति विग्रहः रसेति पाठे त्रीणि पदानि सकला योगगुणा अणिमादयः ॥१०॥

क्षेत्रज्ञोऽन्तर्यामी ॥ ११ ॥

सपत्नैर्हृता श्रीर्येषां स्वधामतश्च्यावितानां च पुत्राणां सम्बन्धि यत्तद्भवत्याश्चिरमाकाङ्क्षितं मया विज्ञातम् ॥ १२ ॥

काङ्क्षितमेवाह—तानिति त्रिभिः । प्रतिलब्धो जयश्च श्रीश्च यैस्तैः पुत्रैः सहोपासितुमेकत्र स्थातुमिच्छसि ॥ १३-१४ ॥

प्रत्याहृतं यशश्च श्रीश्च यैस्तान् ॥ १५ ॥

अपारणीया अनतिक्रमणीयाः यद्यस्मात् अनुकूल ईश्वरः कालो येषां तैर्विप्रैर्गुप्ता रक्षिताः अनुकूलैरीश्वरैः समर्थैर्विप्रैर्गुप्ता इति वा ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्च विश्वाय विश्वरूपाय अनन्यात्मानिर्भूतोऽस्मीति भावः हरये तुभ्यं नमः विश्वरूपत्वे हेतुः, विश्वेति । विश्वभवनस्थितिसंयमाय विश्वस्य सृष्ट्यादिकारणाय विश्वस्योपादानकारणत्वादन्तरात्मतया पालकत्वाच्च तद्रूपायेत्यर्थः। कारणत्वमन्तरात्मत्वञ्च समानाधिकृतौ निबन्धनामिति भावः । निर्विकारस्य मम कथं विश्वकारणत्वम् ? अत आह—स्वैरं यथातथा गृहीताः उरुशक्तेर्विविधविचित्रपरिणामशक्तेः मायाया गुणाः सत्त्वरजस्तमांसि येन स्वैरमित्यनेन जीवस्येव न गुणाश्रयत्वमित्युक्तं गृहीतेत्यादिना प्रकृतिपुरुषशरीरकस्य तव विश्वकारणत्वं न स्वरूपेणेत्यतस्तेन निर्विकारत्वमेवेति सूचितं कारणत्वोपयुक्तं सार्वज्ञसर्वशक्तित्वादिकल्याणगुणयोगमाह—भूम्न इति । कल्याणगुणैर्भूम्ने महते यद्वा स्वैरं गृहीतेति प्रकृतिवैशिष्ट्यमुक्तम्. भूम्न इत्यनेन पुरुषवैशिष्ट्यमुच्यते भूमा व्यापकः जीवेष्वप्यन्तरात्मतया व्यापी तस्मा इत्यर्थः एवं प्रकृतिपुरुषवैशिष्ट्येऽपि तद्गतदोषास्पर्शमाह—स्वस्थायेति । स्वरूपेण गुणैश्च यथावस्थिताय नत्वन्यथाभावमापद्यमानाय; तत्र हेतुं वदन् विशिनष्टि शश्वदिति । शश्वत् सदा उपबृंहितमाविर्भूतं पूर्णं कल्याणगुणपरिपूर्णमपरिच्छिन्नज्ञानन्दात्मकं यत्स्वरूपं तस्य बोधेन याथात्म्यदर्शनेन व्यापादितम् निरस्तम् आत्मतमः आत्मनां जीवानामाच्छादकं तमोऽज्ञानं येन तस्मै जीवानां स्वपरयाथात्म्यज्ञानाभावप्रयुक्ताज्ञानेन स्वभावान्यथात्वम् अचेतनस्य तु परिणामस्वभावत्वात्स्वरूपान्यथात्वम् परमात्मनस्तु तव नित्यासङ्कुचितापरिच्छिन्नज्ञानानन्दस्वरूपयाथात्म्यानुभवेन तदुभयं दूरतोनिरस्तमिति भावः ॥ ९ ॥

अस्मदीयमनोरथपूरणमीषत्करमेव त्वयेति कैमुत्यन्यायेनाह—आयुरिति । हे अनन्त! तुष्टात्प्रसन्नात्त्वत्तो नृणामायुरादय एव सुलभा भवन्ति । किमुत शत्रुविजयादिसम्पत्तिस्सुलभा भवतीत्यर्थः। नत्रायुः परं ब्रह्मायुरप्यतुल्यं निरुपमं वपुः शरीरं बलपराक्रमसौन्दर्यादियुक्तं शरीरमिति भावः । अभीष्टलक्ष्मीः भोग्यभोगोपकरणादिसम्पत् द्यौश्च भूश्च रसातलञ्च द्योभूरसाः द्यौरिति पृथक्पाठे भूश्च रसाश्च बिलस्वर्गौ इति विग्रहः सकला योगगुणा अणिमादयः त्रिवर्गो धर्मार्थकामाः केवलं निःसंशयं ज्ञानम् ॥ १० ॥

हे राजन् ! इत्थमदित्या संस्तुतो भगवान् पुष्करेक्षणः सर्वभूतानां क्षेत्रज्ञः क्षेत्रान्तर्भूतमनोवृत्तिज्ञः जीवशरीरको वा इति वक्ष्यमाणप्रकारेण उवाच हेति हर्षे विस्मये वा हे भारत ! ॥ ११ ॥

उक्तिमेवाह नवभिः—स्वस्य क्षेत्रज्ञत्वमेव दर्शयन्नित्यादिनेहार्हृदंगाविष्कर्तुं प्रतिजानीते—देवमातरित्यर्द्धेन । हे देवमातः भवत्या चिरकांक्षितम् तत् मे मया विज्ञातमेव किन्तदित्यत्र तदाविष्करोति, यदिति सार्द्धैस्त्रिभिः। सपत्नैर्दैत्यैर्हृता श्रीर्येषां स्वस्थानाच्च्यावितानां विवासितानां स्वपुत्राणां सम्बन्धि यदैश्वर्यं तत्त्वया चिरकांक्षितं तन्मया ज्ञातमित्यन्वयः ॥ १२ ॥

किञ्च तान्सपत्नान् दुष्टो मदो येषां तानसुरर्षभान् युद्धे विनिर्जित्य प्रतिलब्धो जयः श्रीश्च यैस्तैः पुत्रैः सह उपासितुम् एकत्र स्थातुम् इच्छसि ॥ १३ ॥

इन्द्रो ज्येष्ठो येषां तैः स्वतनयैर्युधि हतानां शत्रूणां स्त्रियो भर्तृसमीपमासाद्य रुदन्तीर्दुःखिताश्च द्रष्टुमिच्छसि ॥ १४ ॥

प्रत्याहृतम्प्रत्यानीतं यशः श्रीश्च यैस्तान् सुसमृद्धान्नाकपृष्ठं

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्वर्गमाधिष्ठाय क्रीडतः आत्मजान् द्रष्टुमिच्छसीत्येतत्सर्वं त्वत्कांक्षितम् इत्यर्थः ॥ १५ ॥

एवं तदभिप्रेतमाविष्कृत्य तत्र यत् "तान्विनिर्जित्य समरे" इत्यभिप्रेतं तदधुना मयापि कर्तुं न शक्यम् इति वदन्समरादन्य एव उपायश्चिन्तनीय इत्याह-प्राय इति द्वाभ्याम् । हे देव्यधुना ते दैत्याः प्रायशः यद्यप्यवारणीया अजेया इत्येव मे मतिरवारणीया इत्यहमध्यवस्या मीत्यर्थः । कुतः यद्यस्मात्ते दैत्या अधुना अनुकूल ईश्वरः कालरूपो येषां तैर्विप्रैर्गुप्ताः अतोऽस्मदादिभिस्तेषु कृतो विक्रमः पराक्रमः सुखं न दास्यति सुखहेतुर्न भविष्यति ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विश्वाय विश्वनाम्ने विश्वस्य भवनान्स्थितिसंहारा यस्मात्सः तथा तस्मै स्वैरं स्वेच्छया गुणाः सत्त्वादयः व्यापादितात्म तमसे विनाशिताज्ञानाय ॥ ९ ॥

परमायुर्द्विपरार्द्धावसानलक्षणं च यच्च तदादयो नृणां तुष्टात्वत्तो भवन्ति यत्तस्मादुपसन्नजनाधिनाशः किं शरणागतजनमनोदुःखनाशो भवतीति किंवक्तव्यं योगगुणोऽणिमादिः ॥ १० ॥ ११ ॥

भवत्याः सपत्नैः स्वर्गाद्वाधितानां उच्चाटितानाम् हृतश्रीणाम् आकृष्टसम्पदां पुत्राणामर्थे यच्चिरं कांक्षितं तन्मया विज्ञातमित्यन्वयः ॥ १२ ॥

किन्तदिति तत्राह—तान्विनिर्जित्येति । उपासितुं मामिति शेषः ॥ १३ ॥

इदञ्चाकांक्षितमित्याह—इन्द्रेति । इन्द्रः ज्येष्ठो येषां ते तथा तैः ॥ १४ ॥ १५ ॥

नैतत् क्षिप्रसाध्यमित्याह—प्राय इति । कुतोऽत्राह-यत्त इति अनुकूलैरीश्वरैर्विप्रैर्गुप्ता रक्षिता इति यत्तस्मात्तत्र तेषु ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

विश्वाय कार्यस्य कारणाव्यतिरेकेण व्यतिरेकात्तद्रूपत्वेन व्यपदिष्टाय स्वतन्तु विश्वस्य भवनादयो यस्मात्तत् न स्वरूपाय केवलमेतावत्तच्छक्तित्वं किन्तु स्वैरममर्यादं यथास्यात्तथा गृहीता धृताः पुरवः शक्तयः साक्षाच्छ्रीप्रभृतयस्तद्वृत्तिभूता गुणा ऐश्वर्याद्याश्च येन तस्मै अतः स्वरूपतो विभूम्ने परिपूर्णतमाय अत एव स्वस्थाय नित्यैकरूपाय अत एव शश्वदुपबृंहितो भक्तानां हृदि नित्यमेव वर्द्धितो यः पूर्णबोधः स्वानुभवः तेन व्यापादितं नाशितं आत्मतम आत्मविषयस्तदज्ञानांशो येन तस्मै हरये सर्वदुःखहरत्वेन सर्वमनोहरत्वेन तन्नाम्ने नमः ॥ ९—१६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तवैश्वर्यमपारं ज्ञात्वैवाहं त्वामेव प्रपद्ये इत्याह—विश्वायेति । स्वेषु भक्तेषु तिष्ठतीति तस्मै शश्वदुपबृंहितो यः पूर्णो बोधकस्तेन व्यापादितं नित्यनिरस्तम् आत्मनि तमो मायालक्षणं येन तस्मै ॥ ९ ॥

मद्वाञ्छितं तु त्वं पूरयिष्यस्येवेति कैमुत्यन्यायेनाह—आयुरिति । द्यौभूरसा इति समासेनासमासेन च पाठद्वयं योगगुणाः अणिमाद्याः ॥ १० ॥

क्षेत्रज्ञोऽन्तर्यामी ॥ ११ ॥

तस्याः भक्तेः सकामत्वं व्यञ्जयन्नाह-यत्सपत्नैरिति । सपत्नैश्च्यावितानां देवानां यच्चिरकांक्षितं तदेव भवत्याश्चिरकांक्षितं मया ज्ञातम् ॥ १२ ॥

पुत्रैः सह उप आधिक्येन आसितुं स्वराज्ये उपवेष्टुमिच्छसि यद्वा तैस्सहैव आसितुं न त्वेकाकिनीत्यर्थः ॥ १३ ॥

आसाद्य स्वस्थानं प्राप्य ॥ १४—१५ ॥

अनुकूलैरीश्वरैः समर्थैश्च विप्रै रक्षिताः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विश्वाय विश्वरूपाय यतो विश्वस्य जन्मादीनि यस्मात् तस्मै स्वैरं यथा गृहीताः पुरुशक्तेः विपुलायाः प्रकृतेर्गुणाः येन तस्मै भूम्ने अनन्तशक्तिमते स्वस्थाय स्वाश्रयाय शश्वदुपबृंहितेन निरन्तरसमेधितेन "ददामि बुद्धियोगं तं येन मामुपयान्ति ते" इति निजोक्तेनात एव पूर्णबोधेन बुद्धियोगेन व्यापादित आत्मनाम् "ज्ञानीत्वात्मैव मे मतम्" इति श्रीमुखोक्तानां ज्ञानसम्पन्नानां स्वभक्तानां तमः संसारो येन तस्मै ॥ ९ ॥

अस्मदादीनामर्थार्थिभक्तानामर्थं सम्पादनमीषत्करं तवेति कैमुतिकन्यायेनाह-आयुरिति । हे अनन्त ! तुष्टात्त्वत्तो नृणामायुरादयः सुलभा भवन्ति किमुत सपत्नजयादिरूपा आशीः सम्पत् सुलभा भवतीत्यन्वयः । परमायुश्चतुर्मुखायुः भूरसाः भूश्च रसा विलस्वर्गाश्च योगगुणा अणिमादयः ॥ १० ॥ ११ ॥

हे देवमातः ! सपत्नैरसुरैः हृता श्रीर्येषां स्वधामतश्च्यावितानां देवानां सम्बन्धि यद्भवत्याः चिरकाङ्क्षितं तन्मे मया विज्ञातम् ॥ १२ ॥

चिरकाङ्क्षितमेवाह—तानिति त्रिभिः । समरे संग्रामे तान् सपत्नान् विनिर्जित्य लब्धो जयः श्रीश्च यैस्तैः सह उपासितुम् उपाधिक्येन आसितुं स्थातुमिच्छसि ॥ १३ ॥

आसाद्य तन्निकटं प्राप्य ॥ १४ ॥

प्रत्याहृतं प्रत्यानीतं यशः श्रीश्च यैस्तान् नाकपृष्ठं स्वर्गम् ॥ १५ ॥

यतस्ते अनुकूलः ईश्वरः तपोव्रतादिफलदो येषां तैर्विप्रैः रक्षिताः अत एव अपारणीयाः अनतिक्रमणीयाः तत्र तेषु विक्रमः सुखं न ददाति ॥ १६ ॥

अथाप्युपायो मम देवि ! चिन्त्यः सन्तोषितस्य व्रतचर्यया ते।
ममार्चनं नार्हति गन्तुमन्यथा श्रद्धानुरूपं फलहेतुकत्वात् ॥ १७ ॥
त्वयार्चितश्चाहमपत्यगुप्तये पयोव्रतेनाऽनुगुणं समीडितः।
स्वांशेन पुत्रत्वमुपेत्य ते सुतान् गोप्तास्मि मारीचतपस्यधिष्ठितः ॥ १८ ॥
उपधाव पतिं भद्रे ! प्रजापतिमकल्मषम्।
मां च भावयती पत्यावेवं रूपमवस्थितम् ॥ १९ ॥
नैतत्परस्म आख्येयं पृष्टयाऽपि कथञ्चन।
सर्वं सम्पद्यते देवि ! देवगुह्यं सुसंवृतम् ॥ २० ॥

श्रीशुक उवाच।

एतावदुक्त्वा भगवांस्तत्रैवान्तरधीयत।
अदितिर्दुर्लभं लब्ध्वा हरेर्जन्मात्मनि प्रभोः ॥ २१ ॥
उपाधावत्पतिं भक्त्या परया कृतकृत्यवत्।
स वै समाधियोगेन कश्यपस्तदबुध्यत ॥ २२ ॥

भाषा टीका।

विश्वरूप आपको नमस्कार होय, विश्व के सृष्टि पालन संहार करने वाले, तथा अपने इच्छा से बहुत शक्ति वाली माया के गुणों को ग्रहण करने वाले, वा महत्व के कारण रूप, तथा निरवच्छिन्न स्वरूप वाले, वा सर्व काल में निरवच्छिन्न ज्ञानानन्द अपने परमात्म स्वरूप से माया रूप अन्धकार को दूर करते वाले ऐसे श्रीहरि आपको नमस्कार होय ॥ ९ ॥

हे अनन्त ! ब्रह्मा की आयु तथा उत्तम शरीर, मनो वांछित फल वा अव्याहत ऐश्वर्य्य, तथा स्वर्ग पृथिवि रसातलादिकों का सुख और, सम्पूर्ण योगों से अणिमादि सिद्धियों की प्राप्ति, वा अर्थ धर्म काम तथा मोक्ष प्रापक ज्ञान ये सब कोई भी पदार्थ आपके प्रसन्नता से जीवों को दुर्लभ नहीं है, फिर हम लोगों के शत्रुओं का जयरूप मनोरथ तो कितनी है ॥ १० ॥

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले कि—हे राजन् ! जब अदिति ने कमल सदृश नेत्र वाले भगवान् की इस प्रकार स्तुति करी, तब सब प्राणियों के अंतः करण के अभिप्राय को जानने वाले श्रीहरि बोले ॥ ११ ॥

श्रीभगवान् उवाच।

श्री भगवान बोले हे देवमातः ! शत्रुओं के बल बढने से नए स्थान वो नष्ट ऐश्वर्य वाले अपने पुत्रों का दुःख दूर करने के विषे बहुत दिन से तुम्हारी मनो कामना है सो मैं जानता हूं १२

उन दुरभिमानी असुरों को युद्ध से जीतकर यश ऐश्वर्य सहित अपने पुत्रों के साथ सुखी होकर रहना चाहती हौ सो हमको ज्ञात है ॥ १३ ॥

और युद्ध में इन्द्रादि अपने पुत्रों के शस्त्रों से मरे हुए शत्रुओं की स्त्रियां अनाथ होकर रोती हुई फिरें सो तुम देखना चाहती हौ ॥ १४ ॥

और यश ऐश्वर्य सहित अपने पुत्रों को अपने २ स्त्रियों के साथ विहार करते भये देखना चाहती हौ ॥ १५ ॥

हे देवि ! प्राय करके तो इस समय तुम से असुर यूथों के नाथ ऐसे बलि प्रभृति दैत्यों का अति क्रमण नहीं होसका है, यह मेरा निश्चय है। क्योंकि ? वे लोग आज कल ईश्वर और ब्राह्मणों से रक्षित हैं और उनका काल भी अनुकूल है इस समय उनके विषै किया हुआ विक्रम सुखदाई नहीं होसका है ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

मम मया चिन्त्य एव तत्र हेतुः सन्तोषितस्येत्यादि श्रद्धाऽनुरूपमिच्छानुसारेण फलहेतुत्वात् ॥ १७ ॥

मारीचस्य तपस्यधिष्ठाय स्थितस्सन् गोप्ताऽस्मि पालयिष्यामि ॥ १८ ॥

अतः पतिमुपधाव भजस्व ॥ १९ ॥

देवानां गुह्यं रहस्यं सर्वं सुसंवृतं सुगुप्तं सत् सम्पद्यते सिध्यति ॥ २० ॥

प्रभोर्हरेरात्मनि जन्म लब्ध्वा ॥ २१ ॥ २२ ॥

प्रविष्टमात्मनि हरेरंशं ह्यवितथेक्षणः ।
सोऽदित्यां वीर्यमाधत्त तपसा चिरसम्भृतम् ।
समाहितमना राजन् ! दारुण्यग्निं यथाऽनिलः ॥ २३ ॥
अदितेर्धिष्ठितं गर्भं भगवन्तं सनातनम् ।
हिरण्यगर्भो विज्ञाय समीडे गुह्यनामभिः ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अवितथमीक्षणं दृष्टिर्यस्य सः अनिलो यथा सर्वत्र समोऽपि दारुणि सङ्घर्षेण वनदाहकमग्निमाधत्ते एवं स्वयं पुत्रेषु समोऽपि दैत्यक्षपणं वीर्यमाधत्तेत्यर्थः ॥ २३ ॥

धिष्ठितमधिष्ठाय स्थितम् समीडे तुष्टावेत्यर्थः ॥ २४–२५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यद्यप्येवमथापि हे देवि ! तव व्रतचर्यया तोषितस्य मे मया कश्चिदुपायश्चिन्तनीय एव कुतः यतो मदाराधनमन्यथागन्तुं विफलीभवितुं नार्हति, तत्कुतः? मदाराधनस्य कर्तुः श्रद्धानुसारमिच्छानुसारेण फलहेतुकत्वात्. फलहेतुकत्वादिति पाठे फलहेतुं करोतीति फलहेतुकृत्तस्य भावस्तत्त्वं तस्मादाद्यादिकारणत्वादित्यर्थः । ॥ १७ ॥

चिन्त्यमुपायं दर्शयति–त्वयेति पुत्ररक्षणाय त्वया पयोव्रतेनाहमनुगुणं यथार्हं सम्यगर्चितः स्तुतश्चातोऽहं मारीचतपस्यवस्थितः कश्यपतपःफलप्रदानेऽवस्थितः स्वांशेन तव पुत्रत्वम् उपेत्य तव सुतान् गोप्तास्मि गोपायिष्यामि स्वाङ्गेनेति पाठे स्वेनाजहत्स्वभावस्वरूपेणाहं तव पुत्रत्वमुपेत्य स्वान् त्वत्सम्बन्धिनः पुत्रान् गोप्तास्मीत्यर्थः ॥ १८ ॥

अतो हे भद्रे ! पतिमकल्मषं प्रजापतिं कश्यपमुपधावानुवर्तस्व भर्त्रा निमित्तेन मां गर्भे धारयिष्यसि, कथम्भूतम् ? रूपं वामनं रूपमवस्थितं स्वसङ्कल्पेनाददानं देवं स्वतेजसा देदीप्यमानं वा ॥ १९ ॥

अन्येन पृष्टयापि त्वयैतन्मदुक्तं कथञ्चिदपि नान्यस्मै कथनीयं हे देवि ! देवरहस्यं सर्वं गुप्तं सदेव सम्पत्स्यते फलवं भविष्यति ॥ २० ॥

एतावदभिधाय तत्रैव भगवानन्तर्दधे, अथादितिः स्वस्यां भगवतोऽवतारं दुर्लभं प्राप्य कृतार्थेव श्रद्धायुक्तया भक्त्या परयेति पाठे अनन्यया पतिमन्ववर्तत तदनुवर्तनं स्वस्मिन् प्रविष्टं हरेरंशञ्च कश्यपः समाधियोगेन योगदृष्ट्याऽन्वबुध्यत ज्ञातवान् यतोऽय मवितथेक्षणः अवितथमीक्षणं दृष्टिर्यस्य सः ॥ २१ ॥ २२ ॥

ततः स कश्यपः तपसा हेतुना चिरं सम्भृतं धृतं वीर्यं तस्याम् अदित्यामाधत्त निहितवान् कश्यपं प्रविष्टस्य भगवतो येनकेनापि रूपेणादित्युदरप्रवेशव्याजमात्रकथनमिदं न तु जीवस्येव वीर्यसंश्लेषकथनपरमित्यवगन्तव्यम्, कथमाधत्तेत्यत्राह–हे राजन् ! सर्वत्र समोपि वायुर्दारुणि सङ्घर्षेण यथा वनदाहकमग्निमाधत्ते, एवं स्वयं पुत्रेषु समोपि दैत्यक्षपणं वीर्यमाधत्तेत्यर्थः ॥ २३ ॥

ततोऽदितेर्गर्भेऽधिष्ठितं प्रविष्टं सनातनं भगवन्तं ज्ञात्वा हिरण्यगर्भो चतुर्मुखः भगवदसाधारणगुणप्रतिपादनैर्नामभिः समीडे समीपे तुष्टाव ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तर्ह्युपायाभावादुपरम एव श्रेयानिति तत्राह–अथेति मम सकाशान्मम व्रतचर्यया वा श्रद्धानुरूपमिति क्रियाविशेषणं ममार्चनमन्यथा फलराहित्येन गन्तुं नार्हति यथा श्रद्धा तथा फलहेतुकत्वात् पुरुषार्थलक्षणफलस्य निमित्तत्वात्कपालस्य स्वार्थमतिस्साधयति ॥ १७ ॥ १८ ॥

उपधाव उपास्व अपत्यम् अपत्यत्वेन ॥ १९ ॥

परस्मै शत्रवे ॥ २०—२२ ॥

किमवबुद्धमिति तत्राह–प्रविष्टमिति ॥ २३–२५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ममार्चनं कर्तृश्रद्धाऽनुरूपं गन्तुमर्हसि यद्यत्फलदातृत्वेन प्रतीतिविषयः स्यात् तत्तत्सर्वमेव संगृहीतुं योग्यं भवति नात्रान्यथा कुतः ? तत्राह, फलहेतुकत्वात् फलमव्यभिचारिभक्तिरूपकारणकत्वादित्यर्थः ॥ १७ ॥

नन्वेवं सति समरे शत्रुनिर्जयादिरूपोऽपि मम मनोरथोऽयममोघभजनात् त्वत्त एव सिद्ध्येत,तत्राह—त्वयार्चित इति अपत्यगुप्तय इति तामेव सङ्कल्पयन्तीत्यर्थः । सम्प्रति मत्प्राप्त्यैव तु मनोरथान्तराण्यपि जातानीति भावः । पयोव्रतेनार्चितः तस्यैवानुगुणमनुरूपं यथास्यात्तथा समीडितश्चाहमित्यन्वयः ॥ १८—२२ ॥

वीर्यं भगवद्रूपं तेजः ॥ २३ ॥

गुह्येति नाममात्रस्य रहस्यत्वोक्तिर्नत्वेनावतामेव "प्रायेण वेद तदिदं न महाजनोयम्" इत्याद्युक्तेः ॥ २४—२८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

गन्तुं भवितुं फलस्य हेतुकत्वादुत्तमकारणत्वात् ॥ १७ ॥

मारीचस्य कश्यपस्य तपस्सु अधिष्ठाय स्थितस्सन् ॥ १८-२१ ॥

कृतकृत्यवत् कृतार्थेव ॥ २२ ॥

ब्रह्मोवाच।

जयोरुगाय ! भगवन्नुरुक्रम ! नमोऽस्तु ते।
नमो ब्रह्मण्यदेवाय त्रिगुणाय नमो नमः ॥ २५ ॥
नमस्ते पृश्निगर्भाय वेदगर्भाय वेधसे ।
त्रिनाभाय त्रिपृष्ठाय शिपिविष्टाय विष्णवे ॥ २६ ॥
त्वमादिरन्तो भुवनस्य मध्यमनन्तशक्तिं पुरुषं यमाहुः ।
कालो भवानाक्षिपतीश ! विश्वं स्रोतो यथाऽन्तः पतितं गभीरम् ॥ २७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

अवितथेक्षणः अव्यर्थज्ञानः वीर्यं भगवद्रूपं तेजः समाहितमनाः भगवत्स्वरूपैकाग्रचित्तः अनिलो यथा सङ्घर्षेण दारुस्थमग्निमेव मूर्तं दारुगर्भं प्रकटीकरोति तथैव कश्यपोऽन्तःकरणस्थं भगवन्तमेव स्वदेहसङ्गेन तदीयगर्भेऽस्थिरीचकारेत्यर्थः। यथैवाग्निरनिलदार्वंशो न भवति तथैव भगवद्देहोऽपि कश्यपादित्यंशो न भवतीति शुक्रशोणित सम्बन्धो निरस्तः ॥ २३ ॥

धिष्ठितमधिष्ठितं गुह्यनामभिः समीडे इति स्तुतिमिषेण भक्तिवश्यस्य भगवतो नामसङ्कीर्त्तनलक्षणां भक्तिमेव चकारेत्यर्थः ॥ २४—२५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

तव व्रतचर्यया तोषितस्य मम मया उपायश्चिन्तनीयः यतो ममार्चनं अन्यथा गन्तुं विफलीभवितुं नार्हति यतो ममार्चनस्य श्रद्धानुरूपम् अर्चकश्रद्धानुसारेण फलहेतुकत्वात् फलजनकत्वात् ॥ १७—१९ ॥

कथञ्चन पृष्टयापि एतन्मद्वचनादिकं नाख्येयं न कथनीयं यतः देवानां गुह्यं रहस्यं सुसङ्गुप्तं सत् सम्पद्यते फलितं स्यात् ॥ २०—२२ ॥

अवितथमबाधितमीक्षणं ज्ञानं यस्य सः तपसा चिरसम्भृतं तपसा बहुकालतः हृदि धारितं वीर्यम् अनादिसिद्धं महापराक्रमं भगवद्रूपम् अदित्यामाधत्त अनादिसिद्धत्वं भगवद्रूपस्य दृष्टान्तेनाह अनिलो यथा दारुणि सङ्घर्षेण पूर्वसिद्धमेवाग्निमाधत्ते तद्वत् ॥ २३ ॥

गर्भे उदरेऽधिष्ठितं प्रविष्टम् ॥ २४ ॥

भाषा टीका।

हे देवि ! तथापि तुमारी व्रत चर्या से संतुष्ट होकर हमने उपाय का चिंतमन किया है, क्योंकि ? फल हेतुक होने से श्रद्धा के अनुरूप हमारी अर्चना अन्यथा होने के योग्य नहीं है ॥ १७ ॥

तुमने संतान की रचा के लिये पयोव्रत नामक व्रत्त से हमको प्रसन्न किये, इस कारण से कश्यपजी के तप में स्थित होकर अपने अंश से तुमारे पुत्र होकर तुमारे पुत्रों की रक्षा करेंगे ॥ १८ ॥

हे भद्रे ! अब तुम हमारे इसी रूपको सदा ध्यान में रखकर निष्पाप श्रीकश्यप प्रजापति को भजो ॥ १९ ॥

हे देवि ! यदि कदाचित् कोई पूंछे तब भी इस बात को किसी से नहीं कहना और सब तुमारा मनोरथ सिद्ध होगा क्यों कि ? देवताओं का रहस्य गूढ ही रहना चाहिये ॥ २० ॥

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि—भगवान् श्रीहरि इतना कहकर वहीं अन्तर ध्यान होगये और अदितिजी अति दुर्लभ ऐसा प्रभु श्रीहरिका जन्म अपने में सुनकर परम हर्षित हुई ॥ २१ ॥

और कृतकृत्य के नाईं परम भक्ति से पति का भजन करती हुई इस बात को समाधि योग से कश्यपजी जान गये ॥ २२ ॥

क्योंकि ! यथार्थ ज्ञाता हैं अत एव अपने में प्रविष्ट श्रीहरि के अंश को जानकर बहुत काल से तप से धारण किये हुए वीर्य को समाहित मन से अदिति में धारण करने हुए, अनिल, काष्ठ में जैसा अग्नि को धारण करता है ॥ २३ ॥

अदिति के धारण किये हुए गर्भ को सनातन भगवत्स्वरूप जानकर ब्रह्माजी गुप्त नामों से आकर स्तुति करने लगे ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

अदितेरेव पूर्वस्मिन् जन्मनि पृश्निरिति नाम तस्या गर्भाय अर्भकाय वेदा गर्भे यस्य यद्वा वेदानां गर्भाय वेदेषु प्रकाशमानायेत्यर्थः। त्रयो लोका नाभौ यस्य स त्रिनाभस्तस्मै त्रयाणां लोकानां पृष्ठे उपरि स्थिताय। शिपिशब्देन पशवो जीवास्तेष्वन्तर्यामितया प्रविष्टाय "यज्ञो वै विष्णुः, पशवः शिपिर्यज्ञ एव पशुषु प्रतितिष्ठति" इति श्रुतेः। यद्वा शिपयो रश्मयस्तैर्वेष्टितायेत्यर्थः। तथापि विष्णवे व्यापिने ॥ २६ ॥

अन्तः पतितं तृणादि यथा गभीरं स्रोत आक्षिपत्याकर्षति तथा कालात्मा भवान्विश्वमाक्षिपति ॥ २७ ॥

त्वं वै प्रजानां स्थिरजङ्गमानां प्रजापतीनामसि सम्भविष्णुः ।
दिवौकसां देव दिवश्च्युतानां परायणं नौरिव मज्जतोऽप्सु ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां
संहितायां वैयासिक्यामष्टमस्कन्धे भगवदवतारः
सप्तदशोऽध्यायः ॥ १७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रजापतीनां च त्वमेव सम्भविष्णुरुत्पादनशीलोऽसि । अयं भावः न ह्येवम्भूतस्य तव जन्मादिसम्भवः किन्तु देवानां प्रजापतीनां प्रजानां च परमाश्रयत्वेन तत्कार्यसाधनायावतारोऽयमतस्तान्स्वर्गच्युतान्पुनः स्वर्गे स्थापयेति ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायां
सप्तदशोऽध्यायः ॥ १७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

गुणनामभिर्हिरण्यगर्भकृतां स्तुतिमाह–जयेत्यादिना यावत्समाप्ति । हे षाड्गुण्यपूर्ण ! हे उरुक्रम उरवः क्रमाः पादविन्यासाः करिष्यमाणाः यस्य तथाभूता इत्यर्थः । जय सर्वोत्कृष्टतां प्राप्नुहि ते तुभ्यं नमोऽस्तु ब्रह्मकुले साधवो ब्रह्मण्यास्तेषां देवाय तस्मै देवायेति वा त्रिगुणाय सृष्ट्याद्युपयुक्ताय रजआदिगुणत्रयनियन्त्रे इत्यर्थः ॥२५॥

अदितेरेव पूर्वजन्मनि पृश्निरिति नाम तस्या गर्भाय वेदो गर्भे यस्य वेदानां गर्भायेति वा वेधसे विधात्रे त्रयो लोका नाभ्यां यस्य त्रयाणां लोकानां पृष्ठे उपरि परमव्योम्नि स्थिताय शिपयो जीवास्तेष्वन्तर्यामितया प्रविष्टाय "यज्ञो वै विष्णुः' 'पशवः शिपिर्यज्ञ एव पशुषु प्रतितिष्ठति" इति श्रुतेः । यद्वा शिपयो रश्मयस्तैर्वेष्टितायेत्यर्थः । विष्णवे व्यापिने ॥ २६ ॥

भुवनस्य विश्वस्य त्वमेवादिमध्यान्तकारणभूतः यमपरिमितशक्तिं परमपुरुषमाहुः "पराऽस्य शक्तिर्विविधैव श्रूयते' 'स्वाभाविकी ज्ञानबलक्रिया च" इत्यादयो वेदान्ताः स त्वमेव कालशरीरको भवानेव विश्वमाक्षिपति प्रवर्तयति यथान्तःपतितं तृणादिकं स्रोतः प्रवाहः आक्षिपति तद्वत् ॥ २७ ॥

प्रजानामस्मदादीनां प्रजापतीनां च त्वमेव सम्भविष्णुः उत्पादनशीलोऽसि अयं भावः नह्येवम्भूतस्य तव जीवस्येव कर्मणा जन्मादिसम्भवः किन्तु देवानां परमाश्रयत्वेन तत्कार्यसाधनायावतारोऽयं अतस्तान्स्वर्गच्युतान् पुनःस्वर्गे स्थापयेति आश्रयत्वे दृष्टान्तः अप्सु मज्जतः पुंसो नौर्यथा तद्वत् सुराणामाश्रयभूत इत्यर्थः ॥२८॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
सप्तदशोऽध्यायः ॥ १७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पृश्न्यां गर्भो यस्य स तथा तस्मै वेदगर्भाय सद्यो जन्मशक्तये त्रीणि पृष्ठानि वैकुण्ठादीनि यस्य स तथा तस्मै ॥२६॥ गभीरं स्रोतो नदी आक्षिपति तीरं प्रति नयति ॥ २७ ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
सप्तदशोऽध्यायः ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
सप्तदशोऽध्यायः ॥ १७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

त्रयो लोका नाभौ यस्य तस्मै त्रयाणामूर्द्ध्वाधोमध्यवर्त्तिलोकानां पृष्ठरूपवैकुण्ठस्थितत्वात्त्रिपृष्ठाय शिपिशब्देन पशवो जीवास्तेष्वन्तर्यामित्वेन प्रविष्टाय ॥ २६ ॥

गभीरं नद्यादिस्रोतःकर्तृ यथा स्वान्तः पतितं तृणादिकमाकर्षति ॥ २७ ॥

सम्भविष्णुः आविर्भविष्णुस्सन् प्रजादीनां परायणं परमाश्रयः ॥ २८ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
अष्टमेऽयंसप्तदशः सङ्गतः सङ्गतः सताम् ॥१७॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे उरुगाय जय स्वोत्कर्षमाविष्कुरु स्वरूपगुणाः शान्त्यादयः विग्रहगुणाः कान्त्यादयः शक्तिगुणाः सत्त्वादयः एवं त्रिप्रकारा गुणा यस्य तस्मै नमो नमः ॥ २५ ॥

अदितिरेव पूर्वजन्मनि पृश्निस्तस्याः गर्भाय तद्गर्भकाय वेदानां गर्भो विषय ते वा गर्भे यस्य तस्मै वेधसे विधात्रे त्रयो लोका नाभ्यां यस्य तस्मै त्रयाणां लोकानां पृष्ठे उपरि वैकुण्ठे स्थिताय शिपयः पशवो जीवास्तेषु अन्तर्यामितया प्रविष्टाय "यज्ञो वै विष्णुः" पशवः शिपिर्यज्ञे एव पशुषु प्रतितिष्ठति" इति श्रुतेः । विष्णवे व्यापिने ॥ २६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

स्रोतः सरित् अन्तःपतितं तृणादिकमाक्षिपति आकर्षयति यथा तथा कालशक्तिः ॥ २७ ॥

हे देव! त्वं संभविष्णुः आविर्भावङ्करिष्णुस्सन् प्रजानां प्रजापतीनां दिवश्च्युतानां दिवौकसां च परायणं परमाश्रयः ॥ २८ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
सप्तदशोऽध्यायार्थप्रकाशः ॥ १७ ॥

भाषा टीका।

ब्रह्मोवाच ॥

श्रीब्रह्माजी बोले, कि—हे उरुगाय! हे भगवन्! आपकी जय हो। हे उरुक्रम! आपको नमस्कार हो ब्रह्मण्य देव त्रिगुणात्मक आपको नमोनमः ॥ २५ ॥

पृश्नि गर्भ वेद गर्भ वेधा और त्रिनाभ अर्थात् तीनों लोक नाभि में जिन के ऐसे, तथा तीनों लोक के ऊपर स्थित होने वाले और अनन्त किरणों वाले ऐसे श्रीविष्णु को नमस्कार हो ॥ २६ ॥

आपही भुवनके आदि अन्त और मध्यहो और हे ईश! जिसको पुरुष कहते हैं वे अनन्तशक्ति वाले आपही हो। तथा कालरूप भी आपही हो जो काल, इस विश्वको खींचता जाता है जैसे गम्भीर स्रोतका प्रवाह अपने गिरे हुए पत्र आदि को खींचता है ॥ २७ ॥

स्थावर जङ्गमात्मक प्रजाके और प्रजापतियों के उत्पन्नकरने वाले आपही हो। हे देव! तथा स्वर्गसे च्युत देवताओं केभी परम आश्रय आपही हो, जैसे कि—डूबते हुए पुरुषको नौका ॥ २८ ॥

इति श्रीमद्भागवत अष्टम स्कन्ध में, सप्तदश अध्याय की
श्रीवृन्दावनस्थ भागवताचार्य कृत
भाषाटीका समाप्त ॥ १७ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे सप्तदशोऽध्यायः ॥ १७ ॥

॥ अष्टादशोऽध्यायः ॥

श्रीशुक उवाच।

इत्थं विरिञ्चस्तुतकर्मवीर्यः प्रादुर्बभूवामृतभूरदित्याम् ।
चतुर्भुजः शङ्खगदाब्जचक्रः पिशङ्गवासा नलिनायतेक्षणः ॥ १ ॥
श्यामावदातोझषराजकुण्डलत्विषोल्लसच्छ्रीवदनाम्बुजः पुमान् ।
श्रीवत्सवक्षा वलयाङ्गदोल्लसत्किरीटकाञ्चीगुणचारुनूपुरः ॥ २ ॥
मधुव्रतव्रातविघुष्टया स्वया विराजितश्रीवनमालया हरिः ।
प्रजापतेर्वेश्मतमः स्वरोचिषा विनाशयन्कण्ठनिविष्टकौस्तुभः ॥ ३ ॥
दिशः प्रसेदुः सलिलाशयास्तदा प्रजाः प्रहृष्टा ऋतवो गुणान्विताः ।
द्यौरन्तरिक्षं क्षितिरग्निजिह्वा गावो द्विजाः संजहृषुर्नगाश्च ॥ ४ ॥
श्रोणायां श्रवणद्वादश्यां मुहूर्तेऽभिजिति प्रभुः ।
सर्वे नक्षत्रताराद्याश्चक्रुस्तज्जन्मदक्षिणम् ॥ ५ ॥
द्वादश्यां सविता तिष्ठन्मध्यं दिनगतो नृप ।
विजया नाम सा प्रोक्ता यस्यां जन्म विदुर्हरेः ॥ ६ ॥
शङ्खदुन्दुभयो नेदुर्मृदङ्गपणवानकाः ।
चित्रवादित्रतूर्याणां निर्घोषस्तुमुलोऽभवत् ॥ ७ ॥
प्रीताश्चाप्सरसोऽनृत्यन्गन्धर्वप्रवरा जगुः ।
तुष्टुवुर्मुनयो देवा मनवः पितरोऽग्नयः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ततस्त्वष्टादशे भूत्वा वामनः सत्कृतोऽखिलैः ।
यज्ञं गतस्ततस्तेन सत्कृत्योक्तो वरान् वृणु ॥

इत्थं विरिञ्चेन स्तुतं कर्म देवकार्यलक्षणं वीर्यं च प्रभावो यस्य स हरिरदित्यां प्रादुर्बभूवेति त्रयाणामन्वयः अमृतभूर्मृत्युजन्मशून्यः शङ्खगदाब्जचक्राण्यस्य सन्तीति तथा अर्श आदित्वेन मत्वर्थीयोऽच्प्रत्ययः अविसर्गपाठे स चासौ पिशङ्गवासाश्च ॥ १ ॥

झषराजो मकरस्तदाकारयोः कुण्डलयोस्त्विषा उल्लसन्ती श्रीर्वदनाम्बुजे यस्य श्रीवत्सो वक्षसि यस्य वलयैरङ्गदैश्च सहोल्लसन्ति किरीटादीनि यस्य ॥ २ ॥

श्रीमत्या वनमालया विराजितः वेश्मगतं तमः ॥ ३ ॥

अग्निजिह्वा देवाः नगाः पर्वताः ॥ ४ ॥

तत्प्रादुर्भावसमयमाह–श्रोणायामिति । भाद्रपदशुक्लद्वादशी श्रवणद्वादशीति प्रसिद्धा तस्याम् तत्रापि श्रोणायां श्रवणे चन्द्र इत्यर्थः । तत्रापि श्रवणस्य प्रथमांशेऽभिजिति नक्षत्रे तच्च श्रुत्या दर्शितम् "अभिजिन्नामनक्षत्रमुपरिष्टादाषाढानामधस्ताच्छ्रोणायाः" इति. एवं विशिष्टे मुहूर्ते प्रभुः प्रादुर्बभूवेत्यर्थः । किंच नक्षत्राण्यश्विन्यादीनि ताराशब्देन ग्रहा गुरुशुक्रादयस्ते आद्या येषां ते सूर्यादयोऽपि सर्वे तस्य जन्मदक्षिणमुदारं चक्रुः अभिजिन्मुहूर्ते गुणा बहवो बभूवुरित्यर्थः ॥ ५ ॥

विशेषान्तरमाह–यस्यां द्वादश्यां हरेर्जन्म तत्तस्यामहत्त्वं

श्रीधरस्वामिकृतभावार्थदीपिका ।

विदुः तदा च मध्यन्दिनगतः सविताऽतिष्ठत् सा च द्वादशी विजया नाम प्रोक्तेत्यन्वयः ॥ ६ ॥

शङ्खादयो ये तेषामन्येषां च चित्रतूर्याणां निर्घोषोऽभवत् ॥ ७ ॥

देवा मनव इत्यादीनां कुसुमैः समवाकिरन्निति तृतीयेनान्वयः ॥ ८—११ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं ब्रह्मणा सभाजितो भगवानवततारेत्याह मुनिः—इत्थमिति । इत्थं विरिञ्चेन स्तुतं कर्म देवकार्यलक्षणं वीर्यम् उरुक्रमत्वादिप्रभावश्च यस्य सोऽमृतभूः कर्मायत्तमरणोत्पत्तिरहितः मोक्षप्रदो वा भगवान् अदित्यामाविर्बभूव, कथम्भूतः? चत्वारो भुजा यस्य शङ्खादयो ऽस्य सन्तीति तथा भूतः आदित्वान्मत्वर्थीयोऽच् पिशङ्गे वाससी यस्य नलिनवत् सुन्दरे आयते चक्षुषी नेत्रे यस्य ॥ १ ॥

श्यामश्चासाववदातो निर्मलः झषराजो मकरस्तदाकारयोः कुण्डलयोः त्विषा उल्लसन्ती श्रीर्वदनाम्बुजे यस्य श्रीवत्सो वक्षसि यस्य वलयैरङ्गदैश्च सहोल्लसन्ति किरीटादीनि यस्य ॥ २ ॥

मधुव्रतानां भृङ्गाणां समूहेन विघुष्टया स्वया ऽसाधारणया श्रीमत्या वनमालया विराजितः विभुः सर्वज्ञः प्रजापतेः कश्यपस्य वेश्मगतं तमः स्वकान्त्या विनाशयन्नपनुदन् कण्ठ निविष्टः धृतः कौस्तुभो यस्य सः आविर्बभूवेति पूर्वेणान्वयः ॥ ३ ॥

तदा दिशः सलिलानि जनानामन्तःकरणानि च प्रसेदुः प्रसन्ना बभूवुः प्रजाः प्रसन्नाः ऋतवः प्रावृडादयः गुणान्विताः स्वस्वगुणयुक्ता बभूवुः तथा द्युप्रभृतयो नगाः पर्वताश्च यथानुरूपं प्रसेदुः संजहृषुः हर्षयुक्ता बभूवुः तत्राग्निजिह्वा देवाः अग्नेर्जिह्वा शिखा वा ॥ ४ ॥

प्रादुर्भावकालमाह—श्रोणायामिति । श्रवणद्वादशी भाद्रपदशुक्लद्वादशीतिप्रसिद्धा तस्यामपि श्रोणायां श्रवणसंस्थे सति चन्द्र इत्यर्थः । तत्रापि श्रवणप्रथमांशेऽभिजिन्नामके मुहूर्ते मध्यन्दिने तच्च श्रुत्या दर्शितम् "अभिजिन्नामनक्षत्रमुपरिष्टादषाढानामधस्ताच्छ्रोणायाः" इति एवंविशिष्टमुहूर्ते भगवान् प्रादुर्बभूवेति पूर्वेणान्वयः । किञ्च नक्षत्राण्यश्विन्यादीनि ताराः गुरुशुक्रादयः आदिशब्देन चन्द्रसूर्यादयः सर्वे तस्य भगवतो जन्म प्रदक्षिणमुदारं चक्रुः ॥ ५ ॥

द्वादश्यां तस्यां तिथौ अहनि सूर्यो मध्यन्दिनगतो बभूव सा च द्वादशी विजयेतिप्रसिद्धाऽभूत्, का? यस्यां द्वादश्यां हरेर्जन्म विदुरिति ॥ ६ ॥

तदा शङ्खादयो मृदङ्गादयश्च नेदुः दध्वनुः तथा विचित्रवादित्राणां तुमुलो निर्घोषश्चाऽभवत् ॥ ७ ॥

अप्सरसः प्रीता ननृतुः गन्धर्वश्रेष्ठाः जगुः मुनिप्रभृतयो यथायोग्यं तुष्टुवुर्जगुर्ननृतुः प्रशशंसुः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अमृतभूः मुक्ताश्रयो विष्णुः ॥ १ ॥

झषराजो मत्स्यश्रेष्ठः मकरस्तदाकारकुण्डलत्विषा ॥ २ ॥

वेश्मतमः गृहान्धकारः ॥ ३ ॥

सलिलाशयाः ह्रदाः अग्निजिह्वा देवाः ॥ ४ ॥

श्रोणायां श्रावणे मासि अभिजिति मध्यन्दिने ॥ ५ ॥

श्रवणद्वादश्यामतिष्ठत्तदा सा द्वादशी विजया नाम अनेन सज्ञान्तरं विधीयते ॥ ६ ॥

शङ्खादयो नेदुरिति शेषः ॥ ७ ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इत्थमिति त्रिकम् ॥ १—४ ॥

श्रोणायामभिजिति नक्षत्रे मुहूर्त्ते चाभिजितीत्यन्वयः ॥ २५—२६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अष्टादशे हरिर्भूत्वा वामनो ब्रह्मसूत्रभृत् ।
बलेर्यज्ञं गतस्तेन वरान् वृणिवति भाषितः ॥

अमृतभूः प्राकृतानामिव न मृता न नाशवती भूरुत्पत्तिर्यस्य सः "जन्मकर्म च मे दिव्यम्" इत्युक्तेः । शङ्खगदाब्जचक्र इत्यत्र आद्यजन्तम् अविसर्गपाठे स चासौ पिशङ्गवासाश्च ॥ १ ॥

श्यामश्चासाववदातश्चिन्मयत्वेन शुद्धश्चेति सः झषराजो मकरः वलयैरङ्गदैश्च सह उल्लसन्ति किरीटादीनि यस्य सः श्रीमत्या वनमालया विराजितः ॥ २—३ ॥

अग्निजिह्वा देवाः नगाः पर्वताः ॥ ४ ॥

तत्प्रादुर्भावसमयमाह—श्रोणायामिति । भाद्रशुक्लद्वादशी श्रवणद्वादशीति प्रसिद्धा तस्यां तत्रापि श्रोणायां श्रवणस्थे चन्द्रे इत्यर्थः । तत्रापि श्रवणस्य प्रथमांशेऽभिजिति नक्षत्रे तच्च श्रुत्यादर्शितम् "अभिजिन्नाम नक्षत्रम् उपरिष्टादाषाढायाः श्रवणाया अधस्तात्" इति ज्योतिषेण च "उत्तराषाढाशेषार्द्धात् श्रवणादौ लिप्तिका चतुष्के च ॥ अभिजित्तत्स्थे खचरे विज्ञेया रोहिणीविद्धा" इति मुहूर्ते स्वजन्मोचितशुभमुहूर्ते इत्यर्थः । यद्वा अभि सर्वतो भावेन जित् जयो यतस्तस्मिन् मुहूर्ते परमशुभलग्न इत्यर्थः जयलक्षणमेवाह—सर्वे इति । नक्षत्राण्यश्विन्यादीनि ताराशब्देन ताराः ग्रहाः गुरुशुक्रादयः ते आद्या येषां ते सूर्यादयोपि सर्वे तज्जन्मदक्षिणमुदारं चक्रुरिति श्रीस्वामिचरणाः ॥ ५ ॥

अहनि मध्यन्दिनगतःसविता यदाऽभूत्तदा जन्मेति शेषः । यस्यां द्वादश्यां जन्म विदुः सा विजया प्रोक्ता ॥ ६ ॥

शङ्खादयो नेदुरिति शेषः ॥ ७ ॥

देवा मनव इत्यादीनां कुसुमैः समवाकिरन्निति तृतीयेनान्वयः ॥ ८—११ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अष्टादशे वामनरूपेणाविर्भूतो हरिः प्राप्तोपनयनो बलियज्ञं गतो बलिना वरान् वृणिवत्युक्तोऽभूदिति वर्णयति—इत्थं

सिद्धविद्याधरगणाः सकिंपुरुषकिन्नराः ।
चारणा यक्षरक्षांसि सुपर्णा भुजगोत्तमाः ॥ ९ ॥
गायन्तोऽतिप्रशंसन्तो नृत्यन्तो विबुधानुगाः ।
अदित्या आश्रमपदं कुसुमैः समवाकिरन् ॥ १० ॥
दृष्ट्वाऽदितिस्तं निजगर्भसम्भवं परं पुमांसं मुदमाप विस्मिता ।
गृहीतदेहं निजयोगमायया प्रजापतिश्चाह जयेति विस्मितः ॥ ११ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विरिञ्चेन स्तुतं कर्म देवकार्यलक्षणं वीर्यं प्रभावश्च यस्य सः हरिः प्रजापतेः वेश्मतमः स्वरोचिषा विनाशयन्नदित्यां प्रादुर्बभूवेति अयाणामन्वयः। अमृतभूः अमृतेन नित्यसिद्धेन मृत्युजन्मरहित-विग्रहेण भवतीति तथा नित्यविग्रहेणैवाविर्भूतत्वात् शङ्खगदा-ब्जचक्राणयस्य सन्तीति तथा अर्शआदित्वेन मत्वर्थीयोऽच् प्रत्ययः ॥ १ ॥

श्यामश्चासाववदातः उज्वलः झषराजनिभयोः कुण्डलयो-स्त्विषा कान्त्या उल्लसन्ती श्रीर्वदनाम्बुजे यस्य सः श्रीवत्सो वक्षसि यस्य स तथा वलयैरङ्गदैश्च सह उल्लसन्ति किरीटादीनि यस्य स तथा ॥ २ ॥

मधुव्रतव्रातेन भ्रमरसमूहेन विघुष्टया श्रीमत्या वनमालया विराजितः कण्ठनिविष्टः कौस्तुभो यस्य स तथा ॥ ३ ॥

तदा प्रादुर्भावसमये प्रसेदुः प्रसन्ना बभूवुः अग्निजिह्वा देवाः ॥ ४ ॥

प्रादुर्भावसमयमाह—श्रोणायामिति । श्रवणद्वादश्यां श्रवण-युक्तायां भाद्रपदशुक्लद्वादश्यामित्यर्थः। तत्रापि श्रोणायां श्रवणस्थे चन्द्रे इत्यर्थः । तत्रापि श्रवणप्रथमांशेऽभिजिति नक्षत्रे तच्च श्रुत्या दर्शितम् "अभिजिन्नामनक्षत्रमुपरिष्टादाषाढानामधस्ताच्छ्रोणायाः" इति एवं विशिष्टे मुहूर्त्ते प्रभुः प्रादुर्बभूवेत्यर्थः। किञ्च नक्षत्राण्यश्वि-न्यादीनि तारा गुरुशुक्रादयस्तदाद्यास्सूर्यादयः ते सर्वे तस्य भगवतो जन्म दक्षिणमुदारं चक्रुः ॥ ५ ॥

यस्यां द्वादश्याम् अहनि हरेर्जन्म विदुः तदा च सविता मध्यं-दिनगतोऽतिष्ठत सा च द्वादशी विजया नाम प्रोक्ता ॥ ६ । ८ ॥

भाषा टीका ।

श्रीरुक्मिणीजानये नमः ॥

श्रीशुक उवाच ।

श्रीशुकदेवजी बोले, कि—जब इस प्रकार ब्रह्माजीने आप-के पराक्रम और वीर्यगान कर स्तुति करी तब अमृतभू अर्थात् मृत्युजन्मशून्य अथवा अमृत वैकुण्ठ लोक है भूमिजिनकी ऐसे श्रीहरि अदितिजी में प्रकट हुए, तब चारों भुजाओं में शङ्खचक्रगदापद्म को धारण किये पीताम्बर पहिने और कमल दल सदृश विशाल लोचन हैं जिन के ऐसे दर्शन दिये ॥ १ ॥

और आपका वर्ण कैसा है कि—श्याम और अवदात नाम शुक्ल अर्थात् विचित्र ही वर्ण हैं जो श्याम और शुक्ल दोनों प्रकार का मालूम हो, तथा मकराकृत कुण्डलों की कान्ति से जिनके मुखकमल की शो भा होरही है। वक्षः स्थल में श्रीवत्स को धारण किये । हाथों में कङ्कण भुजाओंमें बाजूबन्द माथेपर किरीट कटि में कांचीगुण (कोंधनी) चरणों में नूपुर धारण किये हैं ॥ २ ॥

और भ्रमरों के समूह की गुञ्जार से शोभित सुन्दर माला से अति सुशोभित कण्ठ में कौस्तुभमणि कोधारण-किये श्रीहरि अपने दिव्यमङ्गल विग्रह की कांति से प्रजा-पति श्रीकश्यप जी के घर के अँधेरे को दूरकरते हुए प्रकट हुए ॥ ३ ॥

श्री हरि के जन्म काल में सम्पूर्णदिशायें और जलाशय प्रसन्न होगये और प्रजा सम्पूर्ण बड़े हर्ष को प्राप्त हुई। और ऋतु अपने २ गुणों को धारण करती हुई, तथा स्वर्ग,अन्त-रिक्ष, पृथिवी, देवतालोग, गायें, ब्राह्मणलोग, और पर्वत ये सब परम हर्ष को प्राप्त हुए ॥ ४ ॥

भाद्रपद मास की शुक्ल द्वादशी में श्रवण नक्षत्र पर चन्द्र जब स्थित रहा उस समय अभिजित मुहुर्त्तमें प्रभु प्रकट हुए, और श्रीहरिके जन्म को सब नक्षत्र और तारों ने दक्षिण किया ॥ ५ ॥

हे राजन् ! जब श्रीहरि का जन्म भया तब सूर्य भी मध्यान्ह में स्थित रहे, और जिसमें हरि का जन्म भया उस तिथिको विजिया करके कहते हैं ॥ ६ ॥

जन्म समय में शङ्ख दुन्दुभि, मृदङ्ग, पणव, आनक तथा और बहुत से बाजे और तुर्यों का तुमल शब्द होता-भया ॥ ७ ॥

प्रसन्न होकर अप्सरायें नृत्य करने लगीं, गन्धर्व प्रवर गाने लगे, मुनि, देव मनु, पितर अग्नि ये सब ही स्तुति करते लगे ॥ ८ ॥

यत्तद्वपुर्भाति विभूषणायुधैरव्यक्तचिद्व्यक्तमधारयद्धरिः ।
बभूव तेनैव स वामनो वटुः सम्पश्यतोर्दिव्यगतिर्यथा नटः ॥ १२ ॥

तं वटुं वामनं दृष्ट्वा मोदमाना महर्षयः ।
कर्माणि कारयामासुः पुरस्कृत्य प्रजापतिम् ॥ १३ ॥

तस्योपनीयमानस्य सावित्रीं सविताऽब्रवीत् ।
बृहस्पतिर्ब्रह्मसूत्रं मेखलां कश्यपोऽददात् ॥ १४ ॥

ददौ कृष्णाजिनं भूमिर्दण्डं सोमो वनस्पतिः ।
कौपीनाच्छादनं माता द्यौश्छत्रं जगतः पतेः ॥ १५ ॥

कमण्डलुं वेदगर्भः कुशान् सप्तर्षयो ददुः ।
अक्षमालां महाराज ! सरस्वत्यव्ययात्मनः ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विस्मयान्तरमाह—यत्तदिति । यत्तद्वपुर्हरिरधारयत्प्रकटितवांस्तेनैव वपुषा मातापित्रोः सम्पश्यतोरेव वामनो वटुर्बभूव दिव्यगतिरद्भुतचेष्टितः स्वयं कथम्भूतः अव्यक्तचिद्रूपः कथमधारयत् भातिर्दीप्तिर्विभूषणानि चाऽऽयुधानि च तैर्व्यक्तं यथा भवति तथा ॥ १२ ॥

कर्माणि जातकर्मादीनि ॥ १३-१४ ॥

वनस्पतिर्वनानां पतिः सोमः ॥ १५—१६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अदित्याश्रमं कुसुमैरवाकिरंश्च ॥ ९ ॥ १० ॥

तं परमपुरुषं निजगर्भसम्भूतं दृष्ट्वाऽदितिर्विस्मिता सती नितरां मुदमवाप तथा प्रजापतिः कश्यपश्च निजयोगमायया सहजशक्तियोगयुक्तसङ्कल्परूपज्ञानेन यद्वा योग एव माया तया आश्चर्यरूपशक्तियोगेनेत्यर्थः । गृहीतो देहो दिव्यविग्रहो येन तं दृष्ट्वा प्रजापतिर्ब्रह्मा जयेत्याह ॥ ११ ॥

विस्मयान्तरमाह—यत्तदिति । विभूषणैः कौस्तुभादिभिरायुधैः शङ्खचक्रादिभिश्च युक्तमितिशेषः । एवम्भूतं यद्वपुः स्वासाधारणत्वेन प्रकाशते नित्यविभूत्यादौ, तद्वपुरादावव्यक्तचिद्रूपः प्रकृतिपुरुषशरीरको भगवान् अधारयदाविश्चकार ततस्तेनैव वपुषा पित्रोः संपश्यतोः सतोः स भगवान् दिव्यगतिरनितरसाधारणचेष्टो वामनो वटुर्बभूव वटुसंनिवेशाद्वामनशब्दवाच्यो बभूव यथा नटः पूर्वपूर्ववेषं विहाय वेषान्तरमुपादत्ते तद्वदित्यर्थः ॥ १२ ॥

तं भगवन्तं वामनशब्दवाच्यं वटुसंनिवेशं दृष्ट्वा महर्षय संहृष्टास्सन्तः प्रजापतिं कश्यपं पुरस्कृत्य कर्माणि जातकर्मादीनि कारयामासुः ॥ १३ ॥

तस्य वामनस्योपनीयमानस्य उपनयनेन संस्क्रियमाणस्य सविता सावित्रीमुपदिष्टवान् बृहस्पत्यादयो ब्रह्मसूत्रादीनि ददुः ॥ १४ ॥

तत्र भूमिर्भूम्यधिष्ठात्री देवता वनस्पतिः सोमश्चंद्रः द्यौस्तदभिमानीदेवता ॥ १५ ॥

हे महाराज ! अव्ययात्मनः अपक्षयादिरहितस्वरूपस्य सरस्वती अक्षमालामदात् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सुपर्णः भुजगोत्तमाश्च ॥ ९-११ ॥

यत्स्वभावतो व्यक्तवदव्यक्तमेव तद्वपुरनुकम्पया विभूषणायुधैर्व्यक्तं भाति हरिस्तादृशं वपुरधारयत् यद्वपुरव्यक्तवद्भाति हरिस्तद्वपुर्विभूषणायुधैर्व्यक्तमधारयदिति वा स एव दिव्यगतिरनभिभूतज्ञानो हरिस्तेन विभूषणायुधविशिष्टेन रूपेण पित्रोः सम्पश्यतोः सतोर्वामनो वटुर्बभूवेत्यन्वयः । मूलरूपावतारूपयोरभेदज्ञापनायैवमुच्यते यथा नट इति तदभिप्रायेण ॥ १२—१६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

विभूषणायुधैः सह यद्वपुर्भाति वर्तमाननिर्देशेन वपुषो नित्यत्वं व्यञ्जितं किञ्च यत् अव्यक्तं च चित्स्वरुपत्वं तदेव व्यक्तं कृपयैव व्यक्तीकृतम् अधारयत् नत्वभूतचरमेव तज्जग्राहेत्यर्थः । पित्रोः सुखार्थमिति भावः, तेनैव नतु मायिकेन केनचिदित्यर्थः दिव्या दुर्गमाः या गतयश्चेष्टा यस्य तथाभूतो महायोगेश्वरो नटः सहि स्वस्वरूपतः पृथग्भूतं स्वरूपं कुर्वन्नप्यपृथग्भूतमेव करोति तथैव हरिस्तेन चिन्मयवपुषैव वामनो वामनवपुर्बभूवेत्यर्थः ॥ १२ ॥

तस्मा इत्युपनीताय यक्षराट् पात्रिकामदात् ।
भिक्षां भगवती साक्षादुमाऽदादम्बिका सती ॥ १७ ॥
स ब्रह्मवर्चसेनैवं सभां सम्भावितो वटुः ।
ब्रह्मर्षिगणसञ्जुष्टामत्यरोचत मारिषः ॥ १८ ॥
समिद्धमाहितं वह्निं कृत्वा परिसमूहनम् ।
परिस्तीर्य समभ्यर्च्य समिद्भिरजुहोद्द्विजः ॥ १९ ॥
श्रुत्वाऽश्वमेधैर्यजमानमूर्जितं बलिं भृगूणामुपकल्पितैस्ततः ।
जगाम तत्राखिलसारसम्भृतो भारेण गां सन्नमयन् पदेपदे ॥ २० ॥
तं नर्मदायास्तट उत्तरे बलेर्य ऋत्विजस्ते [(१)]भृगुकच्छसंज्ञके ।
प्रवर्त्तयन्तो भृगवः क्रतूत्तमं व्यचक्षताऽऽरादुदितं यथा रविम् ॥ २१ ॥
त ऋत्विजो यजमानः सदस्या हतत्विषो वामनतेजसा नृप ।
सूर्यः किलायात्युत वा विभावसुः सनत्कुमारोऽथ दिदृक्षया क्रतोः ॥ २२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

कर्माणि चूडोपनयनादीनि ॥ १३—१६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

गृहीतदेहमाविष्कृतविग्रहम् ॥ ९—११ ॥

दिव्या देवयानरूपाः गतिर्यस्य सः अर्चिरादिमार्गगम्य इत्यर्थः अव्यक्तचित् दुर्दर्शचित्स्वरूपो हरिः भातिर्दीप्तिः विभूषणानि कौस्तुभादीनि आयुधानि चक्रादीनि तैरुपलक्षितं यत् व्यक्तं स्फुटं शास्त्रप्रसिद्धमित्यर्थः तद्वपुरधारयत् प्रकटितवान् तेनैव वपुषा अदितिकश्यपयोः सम्पश्यतोः वामनो वटुः बभूव यथा नटः स्वेनैव रूपेण रूपान्तरं प्रकटयाति तद्वदित्यर्थः । यद्वपुर्विभूषणायुधैरुपलक्षितं भाति शास्त्रे इति शेषः तद्व्यक्तं स्फुटमधारयदिति वान्वयः अन्यत्समानम् ॥ १२ ॥

प्रजापतिं कश्यपं कर्माणि जातकर्मादीनि ॥ १३ ॥ १४ ॥

वनानां पतिः वनस्पतिः सोमः ॥ १५ ॥ १६ ॥

भाषा टीका ।

सिद्ध विद्याधरों के गण, किंपुरुष, किन्नर, चारण, यक्ष, राक्षस, सुपर्ण, भुजगोत्तम, ॥ ९ ॥

ये सब लोग गाते हुए प्रशंसा करने लगे, नाचने लगे विबुधों के अनुचर और आदित्य अर्थात् और आदिति पत्र उस आश्रम में पुष्पों की वर्षा करने लगे ॥ १० ॥

अदितिजीभी आज उस परम पुरुष को निजगर्भ से उत्पन्न देखकर विस्मित होकर परम हर्ष को प्राप्त हुए आप की निज योगमाया से देह को ग्रहण किया है ऐसा जान कर विस्मित होकर जय२ शब्द करने लगे ॥ ११ ॥

जो शरीर आप को अव्यक्त है और जो भूषण आयुध सहित आपने व्यक्त धारण किया, बस आप उसी शरीर से उन दोनों के देखते२ अति छोटे वामन वटु होगये, जैसे नट-क्योंकि ? आप की दिव्यगति है ॥ १२ ॥

बस उस छोटे वामन वटु को देखकर ऋषि लोग बडे प्रसन्न हुए, और कश्यप जी आगे करके सर्व कर्म कराते हुए ॥ १३ ॥

जब आप का उपनयन होने लगा तब सूर्य ने सावित्री का उपदेश किया बृहस्पतिजी ने यज्ञोपवीतादियो और कश्यजीने मेखला दीनी ॥ १४ ॥

और भूमिने कृष्णावर्णा का मृग चर्म दिया, वन के पति चन्द्रने दण्डदिया, और कोपीन आच्छादन माता श्री अदितिजीने दिया, और जगत्पति को छत्र स्वर्गने दिया ॥ १५ ॥

ब्रह्माजीने कमण्डलुदिया, सप्त ऋषिओंने कुशदिये, हे महाराज ! और अव्ययात्माभगवान को अक्ष की माला श्री सरस्वतीजीने दीनी यहां अक्ष माया से विष्णु के प्रकरण में पद्माक्ष माला ही जानना चाहिये क्योंकि द्वादशस्कन्ध के अष्टमअध्याय में श्रीनरनारायण के रूप वर्णन में भी "पद्माक्षमालामुतजन्तुमार्जनम्" ऐसा स्पष्ट कहा है ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पात्रिकां भिक्षापात्रीम् ॥ १७ ॥

(१) भृगुवत्स इति विज० ।

इत्थं सशिष्येषु भृगुष्वनेकधा वितर्क्यमाणो भगवान्स वामनः।
छत्रं सदण्डं सजलं कमण्डलुं विवेश बिभ्रद्धयमेधवाटम् ॥ २३ ॥
मौञ्ज्या मेखलया वीतमुपवीताजिनोत्तरम्।
जटिलं वामनं विप्रं मायामाणवकं हरिम् ॥ २४ ॥
प्रविष्टं वीक्ष्य भृगवः सशिष्यास्ते सहाग्निभिः।
प्रत्यगृह्णन्समुत्थाय सङ्कुचितास्तस्य तेजसा ॥ २५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

स एवं सम्भावितो मारिषः श्रेष्ठो वटुर्ब्रह्मवर्चसेन ब्रह्मर्षिगणसञ्जुष्टां तां सभामतिक्रम्यारोचत ॥ १८ ॥ १९ ॥

यदर्थं वटुर्बभूव तदाह—श्रुत्वेत्यादि यावत्समाप्ति। यजमानं यजन्तम् भृगूणां भृगुभिः उपकल्पितैः प्रवर्तितैः अखिलेन सारेण बलेन सम्भृतः सम्पूर्णः ॥ २० ॥

नर्मदाया उत्तरे तटे भृगुकच्छसंज्ञके क्षेत्रे क्रतूत्तमं प्रवर्तयन्तो ये बलेर्ऋत्विजो भृगवस्ते तं व्यचक्षतापश्यन् आरात्समीपे एवोदितं रविमिव ॥ २१ ॥

त ऋत्विगादयः सूर्यः किमेत्येवमादि व्यतर्कयन्निति शेषः॥२२॥

हयमेधवाटमश्वमेधमण्डपं विवेश ॥ २३ ॥

उपवीताजिनमुपवीतवद्धृतमजिनमेवोत्तरमुत्तरीयं यस्य तम् ॥ ॥ २४ ॥

सङ्कुचिता अभिभूताः सन्तः ॥ २५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

इत्थमुपनीयमानाय वामनाय यक्षराट् वैश्रवणः पात्रिकां भिक्षापात्रमदात्। भवानी भिक्षामदात् ॥ १७ ॥

स एवं सम्भावितो मारिषः श्रेष्ठः पूज्यः वटुर्ब्रह्मवर्चसेन युक्तः ब्रह्मर्षिगणेन संघुष्टां सभामत्यतिक्रम्य सभाया निर्गतो व्यरोचतेत्यर्थः। यद्वा रुचिरत्वपर्यर्थगर्भः सभामतीवव्यरोचयदित्यर्थः ॥१८॥

विभुः कश्यपः समिद्धं ज्वलन्तं श्रेष्ठं तमुपनयाग्निं परिसमूहनम् ऋजुं कृत्वा परिस्तीर्य सम्यगभ्यर्च्य च समिद्भिर्हुतवान् ॥ १९ ॥

ततो भगवान्वामनो भृगूणां तैरुपकल्पितैः कारितैरश्वमेधैर्यजन्तमूर्जितं वैरोचनिं श्रुत्वा तत्र जगाम, कथम्भूतः? अखिलेन सारेण बलेन संभृतः पूर्णः अतएव भारेण गां भूमिं प्रतिपदं संनमयन्निम्नाङ्कुर्वन् ॥ २० ॥

नर्मदाया उत्तरे तटे भृगुकच्छाख्ये क्षेत्रे क्रतूत्तमं प्रवर्त्तयन्तो बलेर्ऋत्विजो भृगवस्तं वामनं दूरात् व्यचक्षतापश्यन्, कथम्भूतम्? उदितं सूर्यमिव स्थितम् आरात्समीप एवोदितं रविमिवेति वा ॥२१॥

हे नृप! वामनस्य तेजसा अपहृततेजस्का यजमानो बलिः सभ्या ऋत्विजश्च भृग्वादयः सूर्यः किमायातीत्येवमादि व्यतर्कयन्निति शेषः। किंवा विभावसुरग्निरायातीति। उत क्रतोर्दिदृक्षया सनत्कुमार आयातीति ॥ २२ ॥

इतीत्थं सशिष्येषु सयजमानेषु भृगुषु वितर्कमाणेषु स भगवान् वामनः स दण्डं छत्रं जलपूर्णं कमण्डलुञ्च बिभ्रद्धयमेधवाटमश्वमेधवाटिकां विवेश ॥ २३ ॥

मौञ्ज्या मेखलया वीतं बद्धकटिमुपरिधृतोपवीताजिनमुपवीतोपरिधृतमजिनमुत्तरीयं यस्येति वा जटिलं सशिखं वामनाख्यमात्मीयसंकल्पोपात्तमाणवकसन्निवेशं हरिं प्रपन्नार्त्तिहरं वामनं दृष्ट्वेत्युत्तरेणान्वयः ॥ २४ ॥

एतं प्रविष्टं दृष्ट्वा सयजमाना भृगवोऽग्निभिः सह वामनस्य तेजसा संक्षिप्ताः सङ्कुचितप्रकाशास्सन्तः समुत्थाय प्रत्यगृह्णन् सत्कृतवन्तः ॥ २५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

पात्रिकां भिक्षापात्रम् उमा उमेति यस्यविशेषव्यावृत्त्यर्थं अम्बिकेति ॥ १७ ॥

सभां प्राप्यात्यरोचत सभामराचयदिति वा मारिषः पूज्यः ॥ १८ ॥ १९ ॥

भृगूणामुपकल्पितैः अश्वमेधैः यजमानं यष्टारं बलिं श्रुत्वा तत्र जगाम अखिलसारैर्गुणैः सम्भृतः पूर्णः भारेण गरिम्णा ॥२०॥

भृगुवत्सेति संज्ञा यस्य स तथा तस्मिन् ॥ २१ ॥ २२ ॥

वाटं शालाम् ॥ २२ ॥

आवीतं परिवृतम् ॥ २४—३० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

पात्रिकां भिक्षापात्रम् ॥ १७ ॥

ब्रह्मवर्चसेन ब्रह्मतेजसा सम्भाविताः कारितसम्भावनः ब्रह्मचारित्वेन प्रत्यायित इत्यर्थः। अतिक्रम्यारोचत मारिषः श्रेष्ठः ॥ १८—१९ ॥

भृगूणामुपकल्पितैः भृगुभिः सम्पादितैः अखिलैः सारैः

यजमानः प्रमुदितो दर्शनीयं मनोरमम्।
रूपानुरूपावयवं तस्मा आसनमाहरत् ॥ २६ ॥
स्वागतेनाभिनन्द्याथ पादौ भगवतो बलिः।
अवनिज्यार्चयामास मुक्तसङ्गं मनोरमम् ॥ २७
तत्पादशौचं जनकल्मषापहं स धर्मविन्मूर्ध्न्यदधात्सुमङ्गलम्।
यद्देवदेवो गिरिशश्चन्द्रमौलिर्दधार मूर्ध्ना परया च भक्त्या ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

विवेकधैर्यपाण्डित्यादिभिः सम्भृतः पूर्णः भारेण रूपैश्वर्यादिगरिम्णा गां पृथ्वीं सम्यङ्नमस्कारं कारयन् ॥ २० ॥

तम् ऋत्विगादय एवं व्यतर्कयन्निति शेषः ॥ २१—२२ ॥

इत्थमिति यथा ऋत्विजादयो व्यतर्कयन् इत्थं भृगुषु भृगुभिरपि वितर्क्यमाणः हयमेधवाटम् अश्वमेधमण्डपम् ॥ २३ ॥

वीतं युक्तम् उपवीतवद्धृतमजिनमेवोत्तरमुत्तरीयं यस्य तं मायया स्वरूपेणैव माणवकं बालं स्वरूपभूतया "नित्यशक्त्या मायाख्यया युतः" इति श्रुतेः। प्रत्यगृह्णन् यथाविधिनातिविनयाद्पाद्यार्घ्यादिदानेन सम्मानयामासुः "प्रतिग्रहः स्वीकरणे सैन्यपृष्ठे पतद्ग्रहे द्विजेभ्यो विधिवद्देवे" इति मेदिनी ॥ २४—२६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

पात्रिकां भिक्षापात्रं यक्षराट् कुवेरः ॥ १७ ॥

स वटुः एवं सम्भावितो मारिषः सर्वश्रेष्ठः ब्रह्मर्षिगणैर्जुष्टां युक्तां सभां ब्रह्मवर्चसेन अत्यरोचत ॥ १८ ॥ १९ ॥

भृगूणां भृगुभिः कल्पितैः प्रवर्तितैः अश्वमेधैर्यजमानं यजन्तं बलिं श्रुत्वा अखिलेन सारेण बलेन सम्भृतः पूर्णः ॥ २० ॥

भृगुकच्छसंज्ञके क्षेत्रे व्यचक्षत अपश्यन् ॥ २१ ॥

ते ऋत्विगादयो वामनतेजसा हतत्विषः सन्तः किल किं सूर्यः उत विभावसुः अथवा सनत्कुमार आयातीति वितर्कयाञ्चक्रुरिति शेषः ॥ २२ ॥

हयमेधस्य वाटं मण्डपम् ॥ २३ ॥

मेखलया वीतं युक्तम् उपवीतवद्धृतमजिनमेवोत्तरमुत्तरीयं यस्य स तथा मायया अदित्यादिविषयकया कृपया माणवकं बालम् ॥ २४ ॥

संक्षिप्ताः अभिभूताः सन्तः समुत्थाय प्रत्यगृह्णन् स्तुवन्तः ॥ २५ ॥

भाषा टीका।

इस प्रकार उपनयन के अनन्तर उनश्री वामन जी को कुवेरजी ने भिक्षा का पात्र दिया, अम्बिका जी उमादेवीने भिक्षादीनी ॥ १७ ॥

वह वटु इस प्रकार ब्रह्म तेज से जगमता हुआ सम्भावित ब्रह्म चारी, ब्रह्मर्षि लोगों की सभा में सब से अधिक तेजस्वी होकर प्रकाशित होता भया ॥ १८ ॥

फिर विप्र वटुने आधानकरी हुई दीप्त अग्नि का परिसमूहन परिस्तरण करके अग्नि का आर्चना कर समिधों से हवन किया ॥ १९ ॥

वहुत· भृगु लोगों के उपकल्पित अश्वमेधों से यजन करने वाले बडे भारी यजमान वलि को सुनकर वहां जाते हुए और जाते समय में अखिलसार से भरे होने से मारे वोझ के पग २ पर पृथिवी को नवाते हुए गये ॥ २० ॥

नर्मदा के उत्तर तट में भृगु कच्छ नामक स्थल में वलि के ऋत्विक् भृगु लोग यज्ञकी प्रवृत्ति में लगे हुए थोडी दूर से श्री वामनजी को देखते हुए जैसे कोई दूसरा सूर्य का उदय भया हो ॥ २१ ॥

वे सव ऋत्विग् लोग तथा यजमान और सभा के सव वामन जी के तेज से नष्ट कांति वाले होगये और कहने लगे कि यह सूर्य आते हैं अथवा अग्नि किंवा यज्ञ देखने को सनत्कुमारजी तो नहीं आते हैं ? ॥ २२ ॥

इस प्रकार शिष्यों सहित भृगु लोग अनेक प्रकार तर्क करते रहे इतने में भगवान् श्रीवामनजी महाराज, दंड, छत्र, और सजल कमंडलु को धारण करते हुए यज्ञ की वाट में प्रवेश करते हुए ॥ २३ ॥

और मूंज की मेखला को धारण किये, तथा यज्ञोपवीत और यज्ञोपवीत के नाईं मृगचर्म को भी धारण किये हैं और छोटी २ लटूरिओं को धारण किये हुए ऐसे ब्राह्मण ब्रह्मचारी रूप श्री हरि को ॥ यज्ञ के विषैं प्रविष्ट देखकर शिष्यों सहित भृगु लोग और कुंडों के अग्नि सव ही उनके तेज से आक्षिप्त होकर उठकर श्रीवामनजी को अभ्युत्थान देते हुए ॥ २४—२५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

रूपस्यानुरूपा अवयवा यस्य तम् ददाविति शेषः ॥ २६ ॥ २७ ॥

बलिरुवाच ।

स्वागतं ते नमस्तुभ्यं ब्रह्मन् ! किङ्करवाम ते ।
ब्रह्मर्षीणां तपः साक्षान्मन्ये त्वाऽऽर्यवपुर्धरम् ॥ २९ ॥
अद्य नः पितरस्तृप्ता अद्य नः पावितं कुलम् ।
अद्य स्विष्टः क्रतुरयं यद्भवानागतो गृहान् ॥ ३० ॥
अद्याग्नयो मे सुहुता यथाविधि द्विजात्मज ! त्वच्चरणावनेजनैः ।
हतांहसो वार्भिरियं च भूरहो तथा पुनीता तनुभिः पदैस्तव ॥ ३१ ॥
यद्यद्वटो ! वाञ्छसि तत्प्रतीच्छ मे त्वामर्थिनं विप्रसुतानुतर्कये ।
गां काञ्चनं गुणवद्धाममृष्टं तथाऽन्नपेयमुत वा विप्रकन्याम् ।
ग्रामान्समृद्धांस्तुरगान्गजान्वा(१) रथांस्तथाऽर्हत्तम सम्प्रतीच्छ ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिकयाम् अष्टमस्कन्धे बलिवामनसम्वादे
अष्टादशोऽध्यायः ॥ १८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चन्द्रमौलिश्चेत्यन्वयःअप्यर्थे चकारः चन्द्रमौलिरपि गङ्गारूपं तन्मूर्ध्ना दधारेत्यर्थः ॥ २८ ॥

हे आर्य ! त्वां साक्षात्प्रत्यक्षं ब्रह्मर्षीणां तप एव मन्ये कथम्भूतं ? वपुर्धरं मूर्तिधारि ॥ २९ ॥ ३० ॥

त्वच्चरणावनेजनैर्वार्भिर्हतमंहो यस्य तस्य मे पुनीता पवित्री कृता ॥ ३१ ॥

मे मत्तः प्रतीच्छ गृहाण हे अर्हत्तम पूज्यतम ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
अष्टादशोऽध्यायः ॥ १८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवाह–यजमान इति । रूपस्यानुरूपा अवयवा यस्य तमतएव मनोरमं हृद्यमतएव दर्शनीयं वामनं दृष्ट्वेति शेषः । यजमानो बलिस्तस्मै आसनं समर्पितवान् ॥ २६ ॥

अथ बलिस्तं स्वागतेनाभिनन्द्य स्वागतं पृष्ट्वा तस्य भगवतः पादाववनिज्य प्रक्षाल्य मुक्तसङ्गानां योगिनां मनस्सु क्रीडन्तं भगवन्तम् तमर्चयामास ॥ २७ ॥

ततः स्वधर्मवित् स्वानुरूपधर्मज्ञो बलिः कलिकल्मषस्यापहन्तृ अतएव सुमङ्गलं तस्य भगवतः पादाववनिज्य पादयोः सम्बन्धि शौचं पवित्रं प्रक्षालनोदकं मूर्ध्न्यधात् पादशौचं विशिनष्टि, देवदेवो ब्रह्मा चन्द्रमौलिः गिरिशो रुद्रश्च परया उत्कृष्टया भक्त्या मूर्ध्ना यत्पादशौचं गङ्गारूपं दधार ततस्तमुवाचेति शेषः ॥ २८ ॥

तदेवाह—स्वागतमिति सार्द्धैश्चतुर्भिः । हे ब्रह्मन् ! ते त्वया स्वागतं तुभ्यं नमः, किं ते करवाम ? किङ्करा वयमित्यर्थः आर्यवपुर्द्धरं श्रेष्ठदेहधरं त्वा साक्षात्प्रत्यक्षं ब्रह्मर्षीणां तपो मन्ये तप एव मूर्तिभूतं मन्ये ॥ २९ ॥

यत् यस्माद्भवानस्माकं गृहानागतस्ततोऽस्माकं पितरस्तृप्ता बभूवुः कुलं च पवित्रमभूत् अयं क्रतुश्च यथावदनुष्ठितो बभूव ॥ ३० ॥

अद्य मे अग्नयश्च यथाविधि सुहुता बभूवुः हे द्विजात्मज ! त्वच्चरणावनेजनैर्वार्भिर्जलैर्हतमंहः पापं यस्य तस्य मम सम्बन्धिनी इयं भूर्भूमिस्तनुभिरस्मच्छरीरैस्सह पदैः पादन्यासैः पुनीता पवीत्रीकृतासीत् ॥ ३१ ॥

हे विप्रसुत ! त्वामर्थिनं याचितारमनुतर्कये आलक्षये अतो हे वटो वामन ! यद्यद्वाञ्छसि कामयसे तत्तन्मे मत्तः प्रतीच्छ प्रतिगृहाणेत्यर्थः ॥ ३२ ॥

यद्यदिति । यद्वाञ्छसीति यच्छब्दाभिप्रेतानेव कांश्चिद्दर्शयति गामिति । भूमिं धेनुं वा गुणवद्भोग्यभोगोपकरणादिसमृद्धिमद्धाम

(१) रथोत्तमानर्हत्तमप्रतीच्छ इति वीर० ।

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

गृहं तथा मृष्टमन्नं वा हे विप्र उत वाथवा हे अर्हतम गवादिभ्यो-न्यद्वा यत्किञ्चित् कामयसे तन्मत्तः प्रतिगृह्याण ॥ ३३ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिकायाम्
अष्टादशोऽध्यायः ॥ १८ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तनुभिः रेणुभिः कोमलैर्वा ॥ ३१ ॥
प्रतीच्छ गृहाण ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
अष्टादशोऽध्यायः ॥ १८ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मुक्तसङ्गानामपि मनोरमं यथा स्यात् ॥ २७ ॥

देवदेव ! सर्वाराध्याराध्योऽपि गिरौ शेते गिरिशः परमानास-क्तोऽपि चन्द्रमौलिः स्वभावत एवामृतसारसिक्ततनुरपि ॥२८॥२९॥ ३० ॥ ३१ ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
अष्टादशोऽध्यायः ॥ १८ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

मुक्तसङ्गानामात्मारामाणां मनोरमयतीति तम् ॥ २७ ॥

चन्द्रमौलिर्ललाटे धृतचन्द्रोऽपि मूर्ध्नां चन्द्रस्याप्युपरि दधा-रेति भावः ॥ २८ ॥

त्वा त्वां वपुर्धरं मूर्तिमत्तप एव मन्ये साक्षान्मत्प्रत्यक्षी-भूतम् ॥ २९ ॥

त्वच्चरणावनेजनैर्वार्भिः पदैश्चरणचिह्नैरियं भूः पुनीता पवित्रीकृता आर्षप्रयोगः ॥ ३०—३२ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
अष्टमेऽष्टादशोऽध्यायस्सङ्गतः सङ्गतः सताम् ॥१८॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यजमानो वलिः रूपस्यानुरूपा अवयवा यस्य तं दृष्ट्वा तस्मै आसनमाहरत् समर्पयत् ॥ २६—२८ ॥

हे आर्य ! वपुर्धरं मूर्तिमत्तपः त्वा त्वां मन्ये ॥ २९ ॥ ३० ॥

मे मम अग्नयो यथाविधि सुहुताः कथम्भूतस्य त्वच्चरणा-वनेजनैर्वार्भिः हतमंहो यस्य तत्तथा तस्य किञ्च तनुभिः पदैः इयं यज्ञभूमिः पुनीता पवित्रीकृता ॥ ३१ ॥

प्रतीच्छ गृहाण ॥ ३२ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
अष्टादशाऽध्यायार्थप्रकाशः ॥ १८ ॥

———

भाषा टीका ।

उस समय पर यजमान राजा वलि, रूप के अनुरूप संपूर्ण अवयव वाले अति दर्शनीय मनोहर रूप को देखकर वडे हर्षित हुए, और अपने हाथ से श्रीवामनजी को आसन लाकर समर्पण किया ॥ २६ ॥

तदनंतर वलि महाराज ने स्वागत पूंछकर श्रीभगवान के चरण प्रक्षालन करके मुक्त समस्त संग और मनोरम ऐसे श्रीवामनजी की पूजा करी ॥ २७ ॥

फिर धर्म वेत्ता ऐसे राजा वलि ने समस्तजनों के पापों के हरने वाले परम मंगल आपके चरणारविन्द के प्रक्षालन किये हुए जल को माथे से धारण किया, जिस चरण शौच जल को साक्षात् देवों के देव कैलास वासी चन्द्र ललाम श्रीशंकर ने परम भक्ति से अपने मस्तक पर धारण किया रहा ॥ २८ ॥

वलिरुवाच ॥

राजा वलि वोले, कि—हे ब्रह्मन् आप का वडा सुन्दर आग-मन हुआ आपको नमस्कार है, अव हम आपकी कौनसी परि-चर्या करें, हे आर्य ! हम तौ ऐसे जानते हैं कि-मानो कोई वडे वडे ब्रह्मर्षि लोगों के तपने ही साक्षात् यह वपु धारण कर लिया है ॥ २९ ॥

वस अव हमारे पितर तृप्त हुए और अव हमारा कुल पवित्र हुआ और इस यज्ञ का भी इसी समय सुन्दर यजन भया है कि—जो आप हमारे घरों में आये ॥ ३० ॥

हे द्विज पुत्र ! और आज हमारी अग्नि भी विधि पूर्वक सुन्दर हवन करीं गईं । तथा आपके चरण प्रक्षालित जलों से नष्ट हुए पाप जिसका ऐसे हमारे यज्ञों सहित यह पृथिवी आपके चरणों से पवित्र होगई ॥ ३१ ॥

हे विप्र सुत ! अव तौ मेरी यही प्रार्थना है, कि—जो जो आप चाहते हो सो सो सव मुझ से लेने की इच्छा करौ, क्योंकि इस समय पर मैं तुमको अर्थीसा देखता हूं इस लिये गौ कांचन

भाषा टीका ।

और बड़े गुण वाले धाम [स्थान] अथवा मिष्ट अन्न वा मिष्ट पेय [पीने के योग्य पदार्थ] जो चाहो सो लीजिये, यदि आप की विवाह की इच्छा हो तो कोई आपके योग्य छोटी सी विप्र कन्या ढूंढें। यदि सम्पन्न ग्राम चाहो तो अथवा हे अति पूज-नीय विप्र ! आपको घोड़ा हाथी रथ जो कुछ चाहिये सोई लीजिये ॥ ३२ ॥

इति श्रीमद्भागवत अष्टम स्कन्ध में अष्टादश अध्याय की
श्रीवृन्दावनस्थ भागवताचार्य कृत
भाषा टीका समाप्ता ॥ १८ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे अष्टादशोऽध्यायः ॥ १८ ॥

॥ एकोनविंशोऽध्यायः ॥

श्रीशुक उवाच ।

इति वैरोचनेर्वाक्यं धर्मयुक्तं ससूनृतम् ।
निशम्य भगवान्प्रीतः प्रतिनन्द्येदमब्रवीत् ॥ १ ॥

श्रीभगवानुवाच ।

वचस्तवैतज्जनदेव ! सूनृतं कुलोचितं धर्मयुतं यशस्करम् ।
यस्य प्रमाणं भृगवः साम्पराये पितामहः कुलवृद्धः प्रशान्तः ॥ २ ॥

न ह्येतस्मिन्कुले कश्चिन्निःसत्त्वः कृपणः पुमान् ।
प्रत्याख्याता प्रतिश्रुत्य यो वाऽदाता द्विजातये ॥ ३ ॥

न सन्ति तीर्थे युधि चार्थिनार्थिताः पराङ्मुखा ये त्वमनस्विनो नृपाः ।
युष्मत्कुले यद्यशसाऽमलेन प्रह्लाद उद्भाति यथोडुपः खे ॥ ४ ॥

यतो जातो हिरण्याक्षश्चरन्नेक इमां महीम् ।
प्रतिवीरं दिग्विजये नाविन्दत गदायुधः ॥ ५ ॥

यं विनिर्जित्य कृच्छ्रेण विष्णुः क्ष्मोद्धार आगतम् ।
(१)नात्मानं जयिनं मेने तद्वीर्यं भूर्यनुस्मरन् ॥ ६ ॥

निशम्य तद्वधं भ्राता हिरण्यकशिपुः पुरा ।
हन्तुं भ्रातृहणं क्रुद्धो जगाम निलयं हरेः ॥ ७ ॥

तमायान्तं समालोक्य शूलपाणिं कृतान्तवत् ।
चिन्तयामास कालज्ञो विष्णुर्मायाविनां वरः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ऊनविंशे तु हरिणा याचिते च पदत्रये ।
प्रतिश्रुते च बलिना जानन्भृगुरवारयत् ॥ १ ॥

॥ १ ॥

"दातुः स्तुतिः स्वयं तुष्टिः" इत्यादिप्रस्तुतोचितम् वक्तव्यमिति बिभ्रत्स्तु चित्तयन्नाह वामनः—वचस्तवैतदिति षोडशभिः । हे जनदेव ! साम्पराये पारलौकिके धर्मे पितामहश्च प्रह्लादः प्रमाणम् ॥ २ ॥

निस्सत्त्वस्य लक्षणं यो द्विजातये याचकाय प्रत्याख्याता न ददामीति वक्ता कृपणस्य लक्षणं प्रथमं प्रतिश्रुत्य यो वा न ददाति ॥ ३ ॥

तीर्थे- दानावसरे यद्यस्मिन्युष्मत्कुले ॥ ४ ॥

यतो यस्मिञ्जातः ॥ ५ ॥

क्ष्मोद्धारे भूम्या उद्धरणे ॥ ६—८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवं याञ्चायै चोदितो भगवान् स्वपदत्रयपरिमितां भूमिं

---

(१) आत्मानमिति वीर० ।

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका।

वियाचिषुस्तदप्रत्याख्यानाय प्रतिश्रुतं दृढीकर्तुं वलिं प्रशंसन्नाहेत्याह,मुनिः-इत्युक्तविधं धर्मयुक्तं सूनृतं सत्यं मधुरं च वलेर्वचः श्रुत्वा प्रीतस्तं प्रतिनन्द्येदं वक्ष्यमाणमुवाच ॥ १ ॥

तदेवाह-वच इत्यादिना यावदर्थपरिग्रहइत्यन्तेन। हे जनदेव ! तव वचः सूनृतत्वादियुक्तं युक्तञ्चैतत्कुतः यतः यस्य भगवतः साम्पराये परलोकसाधनधर्मनिर्णये तव पितामहः कुलवृद्धः प्रशान्तश्च प्रह्लाद एव प्रमाणं तद्वृत्त्यैव तत्सन्तानरूपाणां भवतामपि वृत्तिस्तादृश्यैवेत्यनुमीयत इति भावः ॥ २ ॥

तदेवविशदयति-नहीति। अस्मित्त्वदीये कुले कश्चिदपि पुमान् निःसत्त्वः कृपणश्च न हि न जातः न जनिष्यते नाधुना वर्तते च. तत्र निःसत्वस्य लक्षणं यो द्विजातये याचकाय प्रत्याख्याता न ददामीति वक्तेति, कृपणस्य लक्षणं प्रथमं प्रतिश्रुत्य यो वाऽदातेति ॥ ३ ॥

हे नृप ! तीर्थे दानावसरे सति अर्थिना याचकेन अर्थिता याचितास्तथा युद्धे पराङ्मुखा ये चाऽमनस्विनोऽस्वतन्त्राः अस्मिन् कुले। त्रिपुरुषं न सन्त्येव तीर्थं याञ्चां विनापि ददतीत्यर्थः। यद्यस्मिन्कुले खे आकाशे चन्द्र इवामलेन यशसा प्रह्लादः उद्भाति नितराम्प्रकाशित ॥ ४ ॥

युधि पराङ्मुखा न सन्तीत्येतदुपपादयति-यतइत्यादिना। यतो यस्मिन्कुले जातो हिरण्याक्ष एकोऽसहायो दिग्विजये निमित्ते इमां कृत्स्नां महीं चरन् गदैवायुधं यस्य तादृशः प्रतिपक्षं वीरं न लेभे ॥ ५ ॥

क्ष्मोद्धारे भूम्युद्धरणे, विष्णुर्वराहरूपो यं हिरण्याक्षं कृच्छ्रेणाऽतिप्रयासेन निर्जित्य हत्वा जयिनमात्मानममन्यत अतस्तस्य हिरण्याक्षस्य वीर्यं भूर्यनवधिकम् इत्यनुस्मर अभिजानीहि ॥ ६ ॥

तथा तस्य हिरण्याक्षस्य वधं श्रुत्वा तस्य भ्राता हिरण्यकशिपुः पुरा क्रुद्धो भ्रातुर्हन्तारं विष्णुं हन्तुं हरेर्निलयं स्थानं जगाम ॥ ७ ॥

शूलपाणिं मृत्युवदापतन्तं तं हिरण्यकशिपुं विज्ञाय दुर्जयं ज्ञात्वा मायाविनां श्रेष्ठः तत्तत्कालप्रयोजनकर्तव्याभिज्ञो विष्णुरित्थं चिन्तयामास ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

अनेनाध्यायद्वयेन वलेर्भक्तिविशेषं दर्शयति—इतीति। इति शब्देन हरेर्माहात्म्यसूचकं वाक्यमुक्तमिति सूचयति ॥ १ ॥

जनदेव नृप ! सांपराये पितामहः प्रमाणम् ॥ २ ॥

सर्वे स्तुतिप्रसङ्गा एवाभीष्टं कुर्वन्तीत्यतस्तत्सिद्धिप्रकारं वचनं वक्ति—नहीति। यः पुमानिति प्रत्येकमभिसम्बद्ध्यते प्रत्याख्याता नास्तीति वक्ता अदाता ॥ ३ ॥

तीर्थे पात्रे अर्थिना धनं युद्धं चार्थ्यमानेन पराङ्मुखा अमनस्विन इत्येतद्विशेषणद्वयं यथायोग्यं सम्बन्धितव्यम् अमनस्विनो हीनमनस्का यद्यस्मात् उद्भाति उत्कृष्टतया द्योतते उडुप चन्द्रः ॥ ४ ॥ ५ ॥

कृच्छ्रेणेति मोहवचनं कृतः कृतिनस्तान् श्रयते यस्तेन पराक्रमेणेत्यर्थ इति वा, क्ष्मायाः भूमेः उद्धारे उद्धरणकाले कृच्छ्रेण गते प्राप्ते सति भूरि तस्य वीर्यं पराक्रममनुस्मरन्नपि आत्मानं जयिनं तदानीमेवात्मजयं न मेने किन्तु नित्यजयिनं मेन इत्यर्थः। यद्वा क्ष्माया उद्धारो येन स तथा स विष्णुर्नापरमपुरुषोयं विनिर्जित्य तत्स्वकीयं वीर्यं तद्भूर्यनन्तमनुस्मरन्नात्मानं जयिनं जयशीलोपेतं मेन इति ॥ ६ ॥ ७ ॥

मायाविनां ज्ञानिनां वरः मोक्षादिवरदाता ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

॥ १—१० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

पदत्रयमितां भूमिं विष्णुना प्रार्थितं वलिम्।
दित्सन्तमस्मै शुक्रस्तु न्यषेत्सीदूनविंशके॥
॥ १ ॥

दातुः स्तुतिं स्वल्पयाञ्चां सन्तोषव्यञ्जनां धृतिं भिक्षून् वहुतरं लिप्सून् शिक्षयन्नाह वामनः—वचइति षोडशभिः। यस्य तव ऐहिके धर्मे भृगवः प्रमाणं; साम्पराये पारलौकिके पितामहः प्रह्लादः ॥ २ ॥

निस्सत्वस्य लक्षणं प्रत्याख्यता निस्सत्त्वविशेषस्य कृपणस्य लक्षणं प्रतिश्रुत्य योऽदाता वा शब्दात् प्रत्याख्याता च ॥ ३ ॥

तीर्थे दानावसरे अर्थिना ब्राह्मणयाचकेनार्थिता नृपा दानपराङ्मुखा युधि युद्धावसरे अर्थिना क्षत्रियादिना अर्थिता युद्धपराङ्मुखास्ते ये अमनस्विनः अनुदारचित्ता नृपा अनुत्साहचित्तास्ते युष्मत्कुले न सन्तीत्यर्थः येषां यशसा ॥ ४ ॥

यतो यत्र कुले ॥ ५—८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

हरये पदत्रयपरिमितां महीं दित्सन्तं बलिं शुक्रोऽवारयदित्येकोनविंशे वर्णयति—इतीति। सूनृतं सत्यं प्रियं च ॥ १ ॥

साम्पराये पारलौकिके धर्मे भृगवः पितामहः प्रह्लादश्च प्रमाणं प्रवर्तकाः ॥ २ ॥

निस्सत्त्वलक्षणं प्रत्याख्यातेति कृपणलक्षणं प्रतिश्रुत्याऽदातेति ॥ ३ ॥

तीर्थे दानावसरे पात्रे सतीति वा ॥ ४ ॥

यतः यस्मिन् युष्मत्कुले ॥ ५ ॥

क्ष्मोद्धारे भूम्युद्धरणे ये विनिर्जित्य आत्मानं जीवमात्रं जयिनं तज्जेतारं न मेने ॥ ६ ॥ ७ ॥

मायाविनः आश्चर्यशक्तिधरास्तेषां मध्ये वरः श्रेष्ठः ॥ ८ ॥

यतो यतोऽहं तत्रासौ मृत्युः प्राणभृतामिव ।
अतोऽहमस्य हृदयं प्रवेक्ष्यामि पराग्दृशः ॥ ९ ॥
एवं स निश्चित्य रिपोः शरीरमाधावतो निर्विविशेऽसुरेन्द्र ।
श्वासानिलान्तर्हितसूक्ष्मदेहस्तत्प्राणरन्ध्रेण विविग्नचेताः ॥ १० ॥
स तन्निकेतं परिमृश्य शून्यमपश्यमानः कुपितो ननाद ।
क्ष्मां द्यां दिशः खं विवरान्समुद्रान्विष्णुं विचिन्वन्न ददर्श वीरः ॥ ११ ॥
अपश्यन्निति होवाच मयाऽन्विष्टमिदं जगत् ।
भ्रातृहा मे गतो नूनं यतो नावर्त्तते पुमान् ॥ १२ ॥
वैरानुबन्ध एतावानामृत्योरिह देहिनाम् ।
अज्ञानप्रभवो मन्युरहंमानोपबृंहितः ॥ १३ ॥
पिता प्रह्लादपुत्रस्ते तद्विद्वान्द्विजवत्सलः ।
स्वमायुर्द्विजलिङ्गेभ्यो देवेभ्योऽदात्स याचितः ॥ १४ ॥

भाषा टीका ।

श्रीरुक्मिणीप्रियवल्लभो जयति ॥

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि—वैरोचनि राजा बलि के धर्म युक्त मधुर वाक्य को सुनकर बडे प्रसन्न हुए, और श्लाघा करके यह वचन बोले ॥ १ ॥

श्रीभगवान उवाच ॥

श्रीभगवान् बोले कि—हे नर देव ! यह आपकी वाणी बहुत सुन्दर और कुलके उचित धर्मयुक्त तथा यश करने वाली है, जिसके पारलौकिक धर्म में भृगुवंशी ये ब्राह्मण लोग ही प्रमाण हैं तथा कुल वृद्ध और प्रशान्त तुमारे पितामह प्रह्लाद भी प्रमाण हैं ॥ २ ॥

बस इस कुल में आज तक कोई इस कुल में ऐसा नही हुआ जो पराक्रम शाली न भया हो, अथवा कृपण भया हो, और ऐसा तो कोई भया ही नहीं, कि—जो ब्राह्मण को देने की प्रतिज्ञा करके फिर पल जावै ॥ ॥ ३ ॥

और आप के कुल में ऐसे अनुत्साही भी कोई नहीं हुए, कि जो दान के अवसर में किसी याचक की याचना करने पर देने से विमुख होजावैं-अथवा संग्राम के समय पर वैरी के युद्ध मांगने पर विमुख होजावें । क्योंकि ? जिनके कुल में अमल यश वाले प्रल्हाद शोभा देरहे हैं, जैसे आकाश के तारागणों में चन्द्रमा ॥ ४ ॥

जिस तुमारे वंश में हिरण्याक्ष ऐसे प्रतापी भये, कि-हाथ में गदा लेकर दिग्विजय करने को जब इकले ही निकले तब उन को समग्र पृथिवी पर उनके साथ युद्ध करने वाला कोई दूसरा वीर नहीं मिला ॥ ५ ॥

जिन हिरण्यशयजी को रसातल से पृथिवी के लाने के समय में विष्णु ने जैसे तैसे बडे कष्ट से किसी तरह जीता पर जीतकर भी हिरण्याशयजी के पराक्रम का स्मरण करने पर अपने लिये विजयी नहीं माना ॥ ६ ॥

तदनंतर पहिले उनके भ्राता हिरण्यकश्यपजी उनके वधको सुनकर भ्राता के मारने वाले विष्णु को मारने के लिये विष्णु के घर गये ॥ ७ ॥

विष्णु ने भी दूर से त्रिशूल हाथ में लिये बडे विकराल काल सदृश हिरण्यकश्यपजी को आते देखकर बडा विचार किया। क्योंकि—विष्णुभी तो समय को जानने वाला है और बडा मायावी ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पराग्दृशो बहिर्दृष्टेः ॥ ९ ॥
अतो हृदये स्थितं मां न ज्ञास्यतीत्येवं निश्चित्य श्वासानिलेऽन्तर्हितः सूक्ष्मो देहो यस्य सः विविग्नमतिकम्पितं चेतो यस्य अनुकम्पित-चित्त इति वास्तवोऽर्थः ॥ १० ॥
न ददर्श अन्तः प्रविष्टत्वात् ॥ ११ ॥
पुमान्यतः सकाशान्नावर्तते तद्ब्रह्मैव नूनं गतो नित्ययुक्तत्वादिति वास्तवोऽर्थः ॥ १२ ॥
कथं नामाऽसौ शूरशिरोमणिर्जीवन्नेव कातरवद्वैरमुपेक्षितवान्-स्याशङ्क्याऽऽह, वैरानुबन्ध एतावानामृत्योर्भवति देहिनां ...

भवानाचरितान्धर्मानास्थितो गृहमेधिभिः।
ब्राह्मणैः पूर्वजैः शूरैरन्यैश्चोद्दामकीर्तिभिः ॥ १५ ॥
तस्मात्त्वत्तो महीमीषद्वृणेऽहं वरदर्षभात्।
पदानि त्रीणि दैत्येन्द्र ! सम्मितानि पदा मम ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

गूनीढाभिमानवतां शूराणां तथाऽहम्मानेनोपबृंहितो मन्युश्च भवत्येव यतोऽज्ञानप्रभवः अज्ञाननिवृत्तेः प्राक् पौरुषत्यागो मान्द्यमेवेत्यर्थः ॥ १३ ॥

तदेवं पूर्वजान्स्तुत्वा तत्पितरं स्तौति-पितेति। द्विजवेषधारिणो मद्वैरिणो देवा एते न तु द्विजा इति तद्विद्वानपि स याचितः सन् स्वीयमायुर्देवेभ्यो ददौ ॥ १४ ॥ १५ ॥

मम पदा सम्मितानीति त्रिविक्रमपदाभिप्रायेण न चानृतवादः तत्राऽपि स्वपदत्वाऽनपगमात् ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

तत्कृतां चिन्तामेव दर्शयति-यत्रयत्राहं गमिष्यामि तत्रतत्र सर्वत्राऽसौ हिरण्यकशिपुः प्राणभृतां मृत्युरिवावतिष्ठतेऽतोऽधुना पराग्दृशः बहिर्दृश्यमानोऽहमस्य दैत्यस्य। हृदयमेव प्रवेक्ष्यामि ॥ ९ ॥

इतीत्थं स विष्णुर्विनिश्चित्य। हे असुरेन्द्र ! आधावतः तदर्थं तत्र सञ्चरतो रिपोर्हिरण्यकशिपोःशरीरं निर्विविशे प्रविवेश तत्रापि हृदये प्रविष्टं मां ज्ञास्यतीति एवं निश्चित्य श्वासानिलेऽन्तर्हितः सूक्ष्मदेहो यस्य तस्य घ्राणरन्ध्रेण विविग्नमतिकम्पितं चेतो यस्य तादृशो बभूव तत्रापि प्रविष्टं ज्ञास्यतीति विनिश्चित्य घ्राणरन्ध्रसञ्चारिश्वसना वायुना सह चञ्चलस्तदविभक्तो बभूवेत्यर्थः ॥ १० ॥

ततः स दैत्यस्तन्निलयं शून्यं परितोऽन्विष्य तमपश्यमानःकुपिते ननाद जितं मयेति सिंहनादं कृतवान् ततःपुनः क्ष्मां पृथिवीं गां दिव दिशः खमन्तरिक्षं त्रिवरमतलादिकं समुद्रांश्च विचिन्वन्वीरो दैत्यो विष्णुं न ददर्श ॥ ११ ॥

अपश्यन्नित्थमुवाच, तदेवाह-इदं कृत्स्नं जगत् मयान्विष्टमन्वेषितं मम भ्रातृहन्ता तु क्वापि न दृश्यते स तु यतः यं प्राप्य न पुनरावर्तते तत्र नूनं गतः तस्याभिप्रायेण तु मृतोऽभवदिति भावः ॥ १२ ॥

अधुना न मद्विषयवैरानुबन्धस्तस्यास्तीत्याहेत्याह, वैरानुबन्ध इति। इह लोके देहिनां वैरानुबन्ध एतावानेव, कियान् ? यत आमृत्योः मरणपर्यन्तम् इत्येतावानेव, कुतः ? यतो मन्युःक्रोधोऽज्ञानप्रभवःदेहविलक्षणात्मस्वरूपाज्ञानजः स देहात्माभिमानेषु उपबृंहितः प्रकटीकृतोभवति देहे विनष्टे सति मन्युरपि प्रशाम्यतीति मृत्युपर्यन्त एव वैरानुबन्धस्ततः स उपेक्षणीय इति भावः ॥ १३ ॥

एवं पितामहप्रपितामहयोस्तीर्थादावर्थितत्वापराङ्मुखत्वादिगुणयोगमभिधायाथ पितुर्गुणानाह—पितेति। प्रह्लादस्य पुत्रस्तव पिता विरोचनस्तु तद्विद्वान् पितृपितामहयोर्वृत्तिं विद्वांस्तद्वृत्त्यभिज्ञः किं च द्विजवत्सलःद्विजरूपधारिषु देवेषु वत्सलः अत एव द्विजलिङ्गेभ्यः द्विजवेषधारिभ्यो देवेभ्यो याचकेभ्यः स्वकीयमायुः समाहितो ददौ यद्वा द्विजरूपधारिणो देवा एते न तु द्विजा इति तद्विद्वानपि स याचितः सन् स्वीयमायुर्देवेभ्यो ददौ इत्यन्वयः ॥ १४ ॥

एवं पित्रादीन् स्तुत्वाथ तं प्रशंसति-भवानिति गृहमेधिभिर्ब्राह्मणैर्भृगुप्रभृतिभिस्तथापूर्वजैर्विरोचनादिभिर्विपुलकीर्तिभिः शूरैश्चाचरितानानुष्ठितान् धर्मान् भवनास्थितः ॥ १५ ॥

तदेवं प्रतिश्रुताऽप्रत्याख्यानाय पित्रादिभिस्सह तं स्तुत्वाथ याचते, तस्मादिति। तस्मात्त्वत्तैतादृशकुलप्रसूतत्वादुक्तगुणाद्वरदश्रेष्ठात्ते त्वत्तोहम् ईषन्महीं पृथ्वीं वृणे याचे कियतीमित्यत्राह,पदानि त्रीणि त्रिपदपरिमितामित्यर्थः। कस्य त्रिपदपरिमिताम् ? इत्यत्राह—हे दैत्येन्द्र ! मम पदा पादेन संमितानि परिच्छिन्नानि इति,इदं त्रिविक्रमपदाभिप्रायेण नचायमनृतवादः, तत्रापि स्वपदत्वाऽनपायात् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

पराग्दृशः बाह्यदृष्टेः "पराञ्चि खानि व्यतृणोत्"इति श्रुतेः। परं दूरमञ्चतीति पराग्दूरस्थं वस्तु पश्यति इति पराग्दृक्तस्य दूरस्थवस्तुदर्शिन इत्यर्थ इति वा ॥ ९ ॥

तद्घ्राणरन्ध्रेण तस्य घ्राणद्वारेण ॥ १० ॥

निकेतं जगतामिति शेषः। तस्य हरेर्वैकुण्ठं परिमृश्येति वा ॥ ११ ॥

यतो गतस्ततः ॥ १२ ॥

क्रोधहेतुको वैराऽनुबन्ध इत्याह—अज्ञानेति ॥ १३ ॥

प्रह्लादस्य यः पुत्रः स तव पिता विरोचनः तान् द्विजरूपिणो देवान्विद्वान्द्विजानां लिङ्गं वेषो येषां ते तथा तेभ्यो देवेभ्यः स्वमायुरदादित्यन्वयः ॥ १४ ॥

किञ्च यद्ब्राह्मणैरनुष्ठितं तन्ममाभीष्टमिति प्रकटनाय भवानप्याचरतीत्याह—भवानिति। आचरिता ऽनुष्ठाता अन्यै राजादिभिः ॥ १५ ॥

यस्मात्त्वं पुण्यवतां कुले जातो धर्मकर्त्ता तस्मात्. पदानीनि बहुवचनोक्त्या भीतिर्माभूदित्याह—त्रीणीति। तेषां च महत्त्वेन भयशङ्का तद्वचस्येति तत्राह, सम्मितानीति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

तस्य निकेतं स्वर्गस्थं स्थानविशेषम् ॥ ११ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यतः प्रपञ्चातीतात् महावैकुण्ठात् ॥ १२—१७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

यत्रयत्राहं यास्यामि तत्रैवासौ मां न त्यक्ष्यतीत्यर्थः । पराग्दृशः परान् शत्रून् अञ्चन्त्यः प्राप्नुवत्यो दृशो दृष्टयो यस्य तस्य पक्षे बहिर्दर्शिनः ॥ ९ ॥

श्वासानिलेऽन्तर्हितः अन्तर्धाय स्थितः सूक्ष्मः सूक्ष्मीभूतो देहो यस्य सः विविग्नचेताः भीतचित्तः अत्र "नाहं भक्षितवानस्मि सर्वे मिथ्याभिशंसिनः" इतिवद्भगवतो मृषोक्तेरपि वास्तवत्वात् ध्यानादिभिस्तत्पदप्राप्तिसाधनत्वादात्मारामैरप्याखाद्यमानत्वात् वास्तवार्थव्याचिख्या सा नेष्टा मिथ्याभयलोभकामक्रोधादयो दोषा हि जीव एव, भगवति तु भक्तवात्सल्यादिरसपुष्ट्यर्थं महागुणायन्त इत्यतः ॥ १० । ११ ॥

यतो नावर्त्तते पुमानिति मद्भयादेव मृत इत्यर्थः । वौद्धानां मते मरणस्यैव मुक्तित्वं तदेव तस्य मतम् । वस्तुतस्तु यतः पुमांस्तत्त्वज्ञो नावर्त्तते तत् स्वीयं धामगत इत्यर्थः । वैरानुबन्धः खल्वेतावानेव यावान् हिरण्यकशिपोः आमृत्योः मृत्युपर्यन्तो विष्णुपर्यन्तश्च महाशौर्योत्साहहेतुक इति भावः । इह संसारे देहिनामन्येषान्तु मन्युरेव नतु वैरानुबन्धः यतः स मन्युरज्ञानप्रभवो मोहहेतुकः क्रोधविशेष एव तथा अहम्मानः अहं शूर इति मानोऽभिमानमात्रं शौर्याभावेप्यात्मनि शौर्यमननं तेन उपबृंहितः विस्मारितः वैरानुबन्धस्त्वेकस्य हिरण्यकशिपोरेवात्र जगति दृष्ट इति भावः ॥ १२—१३ ॥

तव पिता विरोचनस्तु प्रह्लादस्य पुत्रः तद्विद्वान् वैरानुबन्धं जानन्नपि द्विजलिङ्गेभ्यो द्विजवेषधारिभ्यो देवेभ्यः स्वमायुरदात् यतो द्विजवत्सलः तेषां वैरित्वज्ञानेपि द्विजवेषधारित्व एव प्रीतिमान् ॥ १४-१५ ॥

पदानि त्रीणीति त्रिभिः क्रमैरित्युपरिष्टाद्युक्तेस्त्रीन् पादविक्षेपान् व्याप्य या मही तामियन्मात्रीमिति तावत्येव मह्यां मम पर्णशाला भविष्यति वृत्तिस्त्वाजगरी मम भूयस्यैवेति भावो बलिं बोधयितुमिष्टः मम पदा सम्मितानीति त्रिविक्रमपदाभिप्रायेण नचानृतवादस्तत्रापि स्वपदानपगमात् ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पराक् बहिर्दृग्यस्य ॥ ९ ॥

हे असुरेन्द्र ! स एवं निश्चित्य श्वासानिलेऽन्तर्हितः सूक्ष्मो देहो यस्य सः प्राणरन्ध्रेण रिपोः शरीरं निर्विविशे तत्र विविग्नचेताः विविग्नं गतकम्पं स्वस्थं चेतो यस्य तथाभूतो जात इत्यर्थः ॥ १० ॥ ११ ॥

अपश्यन् इति ह स्फुटमुवाच तदेवाह—पादोनाभ्यां द्वाभ्याम्, इदं जगत् मया अन्विष्टम् अन्वेषितं मे भ्रातृहा तु नूनं निश्चितं यतः पुमान् नावर्तते तत्र गतः मृत्युं प्राप्तः इत्यर्थः ॥ १२ ॥

अतस्तथाभूते विष्णौ मया मन्युर्वैरानुबन्धश्च न कार्य इत्याह—इह संसारे देहिनाम् अहम्मानोपबृंहितः अज्ञानप्रभवः मन्युस्तन्मूलो वैरानुबन्धश्च एतावानेव; कियान् ? आमृत्योराशत्रुमृतिपर्यन्तमित्यर्थः । अत्यद्भुतं तस्य बलमिति भावः ॥ १३ ॥

एकदा देवैर्द्विजलिङ्गैः स्वमायुर्देहीति ते पिता याचितः स द्विजवत्सलः तद्विद्वान् तान् जानन्नपि तेभ्यः स्वमायुः अदात् अत्यद्भुतं तस्य द्विजवत्सलत्वमिति भावः ॥ १४ ॥

उद्दामकीर्तिभिर्विपुलकीर्तिभिः पूर्वजैः स्वपितृपितामहादिभिश्च ॥ १५ ॥

मम ईषत्पदा मदीयेन किञ्चित्प्रसारितेन पादेन परिमितानि त्रीणि पदानि महीम् । हे दैत्येन्द्र ! त्वत्तः वृणे याचे इत्यन्वयः । अनेन भमिग्रहणसमये त्रिविक्रमेण किञ्चिदेव पादप्रसारणं कृतं भूमिस्तु सकला गृहीता ॥ १६ ॥

भाषा टीका ।

विष्णु ने विचार किया, कि—जहां २ मैं जाऊंगा तहां २ यह प्राणिओं की मृत्यु की तरह पहुंचेगा इस कारण मैं इस बाह्यदृष्टि वाले के हृदय में प्रवेश करजाऊं तब ठीक हो ॥ ९ ॥

हे असुरेन्द्र ! विष्णुने ऐसा निश्चय कर दौडते हुए वैरी के शरीर में श्वास वायु के भीतर होकर सूक्ष्म देह धारणकर प्रवेश किया, पर वहां भी प्राण वायु के संचार मार्ग में कंपित चित्त होकर रहा ॥ १० ॥

हिरण्यकश्य जी ने भी विष्णु के घर में विष्णु को न देखकर बडा कोप करके नाद किया, फिर तौ पृथिवी, स्वर्ग, दिशाएं, आकश, पाताल, आदिक विल, और समुद्र में भी वीर ने विष्णु को ढूंढा पर कहीं नहीं देखा ॥ ११ ॥

सब जगह न देखकर हिरण्यकश्यपजी यों बोले, कि—मैंने यह सब जगत् ढूंढा पर हमारे भ्राता के मारने वाला न मिला तो अब निश्चय भया कि—वह वहीं गया कि जहां का गया पुरुष फिर नहीं आता है ॥ १२ ॥

बस वैर का सम्बन्ध भी प्राणियों का मृत्यु पर्यंत ही है। क्योंकि ? क्रोध तौ अज्ञान से होता है और अहंकार से बढता है ॥ १३ ॥

और प्रल्हाद के पुत्र तुमारे पिता विरोचनजी भी ऐसे ब्रह्मण्य रहे कि—जान भी गये कि "ब्राह्मणों का वेष बनाकर ये देव लोग हमारी आयु माँगते हैं, तौ भी ब्राह्मणों का रूप लिया है क्या चिंता है" एसा विचार कर अपनी आयु देवताओं को देते हुए ॥ १४ ॥

राजन् ! आपकी तौ कहैं क्या आप तौ बडे २ सदाचार संपन्न गृहस्थ ब्राह्मणों के तथा शूर वीर अपने पुरखाओं के तथा अन्य बडे २ यशस्वी लोगों के आचरित धर्म में स्थित हौ ॥ १५ ॥

तस्मात् तुमारे सदृश श्रेष्ठ दानी हमको भी कोई दूसरे न मिलेंगे इस लिये कुछ थोडी सी भूमि हम भी आपसे मागते हैं

नान्यत्ते कामये राजन् ! वदान्याज्जगदीश्वरात् ।
नैनः प्राप्नोति वै विद्वान्यावदर्थपरिग्रहः ॥ १७ ॥

बलिरुवाच ।

अहो ब्राह्मणदायाद ! वाचस्ते वृद्धसम्मताः ।
त्वं बालो बालिशमतिः स्वार्थं प्रत्यबुधो यथा ॥ १८ ॥
मां वचोभिः समाराध्य लोकानामेकमीश्वरम् ।
पदत्रयं वृणीते योऽबुद्धिमान्द्वीपदाशुषम् ॥ १९ ॥
न पुमान्मामुपव्रज्य भूयो याचितुमर्हति ।
तस्माद्वृत्तिकरीं भूमिं वटो ! कामं प्रतीच्छ मे ॥ २० ॥

श्रीभगवानुवाच ।

यावन्तो विषयाः प्रेष्ठास्त्रिलोक्यामजितेन्द्रियम् ।
न शक्नुवन्ति ते सर्वे प्रतिपूरयितुं नृप ! ॥ २१ ॥
त्रिभिः क्रमैरसन्तुष्टो द्वीपेनापि न पूर्यते ।
नववर्षसमेतेन सप्तद्वीपवरेच्छया ॥ २२ ॥
सप्तद्वीपाऽधिपतयो नृपा वैन्यगयादयः ।
अर्थैः कामैर्गता नान्तं तृष्णाया इति नः श्रुतम् ॥ २३ ॥
यदृच्छयोपपन्नेन सन्तुष्टो वर्तते सुखम् ।
नासन्तुष्टस्त्रिभिर्लोकैरजितात्मोपसादितैः ॥ २४ ॥

भाषा टीका ।

परंच हे दैत्येन्द्र ! वह भी हमारे पगों से तीन पग अधिक नहीं ॥ १९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यावदर्थमेव परिग्रहो यस्य सः ॥ १७ ॥

ईश्वरस्यापि याच्ञाप्रकारं चोक्त्वा बलेर्बन्धनप्रश्नोत्तरत्वेन तस्य गर्वातिरेकेणाधिक्षेपप्रकारमाह-अहो इति त्रिभिः । ते वाचो वृद्धानां सम्मतास्त्वं तु बालो बालिशमतिश्च बालिशानामज्ञानामिव मतिर्यस्य अत एव स्वार्थंप्रति यथावदबुधः वस्तुतस्तु बाल इवाऽबालिशमतिश्चेतिच्छेदः । स्वार्थं प्रत्यबुध इति च भक्तानामेवार्थं बुध्यसे न स्वार्थम् परिपूर्णस्य तव तद्व्यतिरेकेण स्वार्थाभावादित्यर्थः ॥ १८ ॥

अबुधत्वमेवाऽह-मामिति । द्वीपस्य दाशुषं दातारम् अबुद्धिमान् वस्तुतस्तु बुद्धिमानित्येवच्छेदः ॥ १९ ॥

कामं यथेच्छं सम्यक् पादप्रसारणेनेत्यर्थः । अत एव तथा करिष्यतीति ॥ २० ॥

पुनरपि निःस्पृहत्वमेवाविष्कुर्वन्नाह-यावन्त इति सप्तभिः ॥२१॥
नवर्षसमेतेन द्वीपेनाऽपि सप्तानां द्वीपवराणामिच्छया ॥ २२ ॥
तृष्णाया अन्तं गता इत्यस्माभिः श्रुतम् ॥ २३ ॥
असन्तुष्टस्तु प्राप्तैस्त्रिभिर्लोकैरपि न सुखं वर्तते ॥ २४—२५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एतदेव नान्यद्वृणे इत्याह-नान्यादिति। हे राजन् ! जगदीश्वराद‌पि तत्रापि वदान्यादपि त्वत्त एतावदेव वृणे, नान्यत्कामये. यावदर्थस्यैवापेक्षितार्थस्यैव उपयुक्तार्थस्यैव प्रतिग्रहो यस्य परिग्रह इति पाठेऽपि स एवार्थः । विद्वानेनः पापं न प्राप्नोति अधिकार्थलिप्सुस्तु पापी भवतीति भावः ॥ १७ ॥

एवं याचितस्तदभिप्रायानभिज्ञ आह बलिः-अहो इति त्रिभिः । हे ब्राह्मणदायाद, ब्राह्मणसुत ! तव वाचस्तु वृद्धानां सम्मता अथापि

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

त्वं बालः हेतुगर्भमिदम् अत एव बालिशमतिः बालिशानामज्ञानामिव मतिः यस्य सः अत एव स्वार्थंप्रति यथावदबुधः ॥ १८ ॥

अबुधत्वमेवाह–मामिति । लोकानामेकमद्वितीयम् ईश्वरं मां वचोभिर्वृद्धसम्मतैराराध्य प्रसाद्य यो भवान्पदत्रयमत्यल्पस्वकीयपदत्रयपरिमितं भूभागं वृणीते द्वीपस्य जम्ब्वादेर्दाशुषं दातारं मामविद्वान् अतो बालिशमतिर्भवानित्यर्थः ॥ १९ ॥

मामुपव्रज्य मां याचित्वा पुमान्कश्चिद्भूयोऽन्यं याचितुं नार्हति तस्मात् हे वटो ! कामं यथेच्छं वृत्तिकरीं विपुलां भूमिं मे मत्तः प्रतीच्छ प्रतिगृहाण ॥ २० ॥

पुनर्याचिताधिकानिःस्पृहत्वमेवाविष्कुर्वन्नाह वामनः—यावन्त इति सप्तभिः । हे नृप ! त्रिलोक्यां यावन्तो विषया देशास्ते सर्वेऽपि प्रतिगृह्यमाणाः सन्तोऽजितेन्द्रियान्पूरयितुं नालम् अजितेन्द्रियमतः कर्त्तुं न शक्नुवन्ति ॥ २१ ॥

यदुक्तं द्वीपदाशुषमविद्वानित्यत्राह, त्रिभिः क्रमैः पादैरसन्तुष्टः पुमान्नवखण्डयुक्तेन जम्बूद्वीपेनापि न पूर्यते. अपूर्त्तौ हेतुमाह, सप्तद्वीपवरेच्छया सप्तानां द्वीपवराणामिच्छया हेतुना द्वीपेनापि न पूर्यते ॥ २२ ॥

तर्हि सप्तद्वीपां महीं दास्ये प्रतीच्छेत्यत्राह–सप्तेति । वैन्यः पृथुः गयश्चादिर्येषां ते नृपाः सप्तानां द्वीपानामधिपतयोऽप्यर्थैः कामैश्च तृष्णाया अन्तं न गताः अर्थकामतृष्णाया अन्तमवधिं न प्राप्ताः इति नोऽस्माभिः श्रुतम् उत्तरोत्तरमसन्तुष्टस्यार्थकामतृष्णाया अनुवृत्तेरिति भावः ॥ २३ ॥

एवमसन्तुष्टस्य सुखञ्च नास्तीति वक्तुं तावत्संतुष्टस्य सुखमस्तीत्याह, यदृच्छयेति । दैवाल्लब्धेन सन्तुष्टस्तु सुखं यथातथाऽऽस्ते अजितात्मा ऽजितेन्द्रिय अत एवोपसादितैः प्राप्तैस्त्रिभिर्लोकैरसन्तुष्टस्तु न सुखं वर्त्तते ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इतोऽपि महत्तरं कामं वदस्व दास्यामीति तत्राह–नेति, वदान्याद्दानशीलात् । राजप्रतिग्रहात्तव दोषो न स्यात्किम् ? नेत्याह,नेति । यावता प्रतिग्रहेण स्वप्रयोजनं सिद्ध्यति तावतः प्रतिग्रहात् आदानात् "अजीविष्यात्रिमाग्नजादन्" इति श्रुतेः । विद्वान्प्रतिग्रहदोषदहनपटुज्ञानवान् ॥ १७ ॥

अवृद्धसम्मताः कुतोऽत्राह–त्वमिति । बुद्धिवैगुण्ये बालत्वमप्रयोजकमत्राह–बालिशेति । जडमतिः स्वप्रयोजनं ज्ञातुं न शक्यत इत्यर्थः ॥ १८ ॥

कथमेतदवगतमत्राह–मां वचोभिरिति । अबुद्धिमान् दाशुषं दानशीलं बुद्धिमानिति व्यतिरेको वा ॥ १९ ॥

कुतो मामपहससीति तत्राह–न पुमानिति ॥ २० ॥

यदुक्तं वृत्तिकरीं भूमिं प्रतिग्रहाणेति तदजितेन्द्रियं प्रति व्यर्थमित्याशयेनाह–श्रीभगवानिति । अजितेन्द्रियमलम्बुद्धिरहितं पुरुषमितिशेषः ॥ २१ ॥

एतदेवोपपादयति–त्रिभिरिति । न नदी द्वीपोऽत्र कथ्यत इत्याह,नवेति. कुतोत्राह, सप्तेति ॥ २२ ॥

नैतावतापि पूर्तिरित्याह–सप्तेति । अन्तमवसानम् अर्थैः कामैः अर्थसम्पादितकामैर्वा ॥ २३ ॥

सन्तोषशब्दाभिप्रायं वदन्नलम्बुद्धिरेव सुखसाधनमित्याह, यदृच्छयेति । व्यतिरेकमाह, नासन्तुष्टइति. उपसादितैरवाप्तैः सुखं न वर्त्तत इति पूर्वेणान्वयः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अहो ब्राह्मणदायाद ! इत्यादिकं तस्येदृक् वक्तुर्बन्धनं लोकस्य व्यवहारोपि नासमञ्जसमिति बोधनार्थं परमार्थतस्तु कुपैव कृतेति तत्रतत्र स्फुटमेवेति भावः ॥ १८—१९ ॥

कामं यथेष्टमिति यावत्या वृत्तिः सिद्ध्यति तावतीमित्यर्थः ॥ २०—४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यावता अर्थः प्रयोजनं तावत एव प्रतिग्रहो यस्य सः तावत एवेति पदद्वयस्य वृत्तावन्तर्भावः । पक्षे, यावन्तस्तवार्थास्तेषां सर्वेषामेव प्रतिग्रहो यस्य स मल्लक्षणोऽयं विद्वान् न एनः कथं प्राप्नोति ॥ १७ ॥

ब्राह्मणदायाद हे विप्रसूनो ! ब्रह्मण्यत्वाद्ब्राह्मणेभ्यो दायं मा सम्यक् तथा ददातीतिवस्त्वर्थः सरस्वती प्रयुक्तः किन्तु त्वं बालः यथान्यो बालिशमतिस्तथैव स्वार्थंप्रति त्वम् अबुधः वस्तुतो महाबुधो भवन्नपीति भावः । वस्त्वर्थस्तु त्वं भक्तवत्सलत्वाद्भक्तार्थमेव बुद्ध्यसे स्वार्थं प्रतितु न बुद्ध्यसे इत्येत्यबुधः परिपूर्णस्य तव भक्तप्रयोजन व्यतिरेकेण स्वप्रयोजनाभावादिति ॥ १८ ॥

यो भवानिति शेषः । बुद्धिमान् सन्नपि द्वीपदायिनम् ॥ १९॥२०॥

सन्तुष्टं मामेतावतैव दानेन पूरय नह्यसन्तुष्टं त्वमपि पूरयितुं समर्थोसीत्याह–यावन्त इति ॥ २१ ॥

नववर्षसमेतेनापि द्वीपेन सप्तानां द्वीपवराणाम् इच्छया । २२ ॥ २३ ॥

अजितात्मा अजितेन्द्रियः उपसादितैः प्राप्तैः ॥ २४ ॥ २५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यावदर्थं यावत्प्रयोजनं प्रतिग्रहो यस्य स एनः पापं न प्राप्नोति ॥ १७ ॥

ईश्वरस्याप्यदित्यादिमनोरथपूरणार्थं याच्ञाकारणं याच्ञाप्रकारं चोक्त्वा बलेर्बन्धनप्रश्नस्योत्तरत्वेन बलेर्गुर्वतिरेकेणाधिक्षेपप्रकारं गुर्वाज्ञातिवर्तित्वं वीरमानित्वं चाह—अहो ब्राह्मणदायाद ! इत्यादिना, शयीत निहतो मयेत्यन्तेन ग्रन्थेन । बाल एव केवलं वृद्धानां सम्मताः त्वन्तु बालः बालिशमतिश्च बालिशानामज्ञानामिव मतिर्यस्य अत एव स्वार्थंप्रति यथावदबुधः ॥ १८ ॥

द्वीपदाशुषं द्वीपस्य जम्ब्वादेर्दायिनम् ॥ १९ ॥

पुंसोऽयं संसृतेर्हेतुरसन्तोषोऽर्थकामयोः।
यदृच्छयोपपन्नेन सन्तोषो मुक्तये स्मृतः ॥ २५ ॥
यदृच्छालाभतुष्टस्य तेजो विप्रस्य वर्धते।
तत्प्रशाम्यत्यसन्तोषादम्भसेवाऽऽशुशुक्षणिः ॥ २६ ॥
तस्मात्त्रीणि पदान्येव वृणे त्वद्वरदर्षभात्।
एतावतैव सिद्धोऽहं वित्तं यावत्प्रयोजनम् ॥ २७ ॥
श्रीशुक उवाच।
इत्युक्तः स हसन्नाह वाञ्छातः प्रतिगृह्यताम्।
वामनाय महीं दातुं जग्राह जलभाजनम् ॥ २८ ॥
विष्णवे क्ष्मां प्रदास्यन्तमुशना असुरेश्वरम्।
जानंश्चिकीर्षितं विष्णोः शिष्यं प्राह विदांवरः ॥ २९ ॥
शुक्राचार्य उवाच।
एष वैरोचने ! साक्षाद्भगवान्विष्णुरव्ययः।
कश्यपाददितेर्जातो देवानां कार्यसाधकः ॥ ३० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

भगवतोक्तं किञ्चित् प्रसारितेन पादेन परिमितानि त्रीणि पदानि महीं याचे बलिरप्याह—कामं यथेष्टं प्रतीच्छ ॥२०॥२१॥

द्वीपेनापि न पूर्य्यते पूरयार्थो न भवति तत्र हेतुः सप्तद्वीपवरेच्छयेति ॥ २२ ॥ २३ ॥

उपसादितैरुपलब्धैः ॥ २४ ॥ २५ ॥

भाषा टीका।

हे राजन् ! आप बडे वदान्यहो और जगत् के एक ईश्वरहो तौ भी हम आपसे और कुछ नहीं चाहते हैं क्योंकि ? विद्वान् पुरुष जितना प्रयोजन होवे उतने मात्रके परिग्रह करने में अपराधको नहीं प्राप्त होता है ॥ १७ ॥

बलिरुवाच।

राजा बलि बोले, कि—अहो ब्राह्मणपुत्र ! तुमारीवातें तौ वृद्ध सम्मत हैं परञ्च तुमतौ बालक हौ। जैसे कोई मूर्ख बुद्धि अपने स्वार्थ में न समुझता हौ ऐसे ही तुमभी नहीं समुझते हौ ॥ १८ ॥

देखो मैं सबलोकों का एक ईश्वर और मेरे लिये तुमने बातों से प्रसन्न करके और ऐसे बुद्धिमान् होकरभी द्वीपपर्य्यन्तदेनेयोग्य ऐसे हमसे तीन पग पृथिवी मांगते हौ ॥ १९ ॥

पुरुष मेरे समीप आकर फिर किसीसे याचना करने के योग्य नहीं रहता है तस्मात् हे बेटा ! यथेष्ट जीविका के लायक भूमि मांगलो ॥ २० ॥

श्रीभगवान् उवाच।

श्रीभगवान् बोले, कि,—हे नृप ! त्रिलोकी में जितने प्रिय विषय हैं। वे सब भी अजितेन्द्रिय असन्तोषी को कभी पूर्ण नहीं कर सके हैं ॥ २१ ॥

यदि तीन पगों से सन्तोष न भया तौ नव खण्ड समेत द्वीप से भी पूरा न पडेगा, फिर उसके ऊपर भी सप्त द्वीप की चाहना बढेगी ॥ २२ ॥

और हमने यह भी सुना है कि- सप्त द्वीप के अधिपति वैन्य गय आदिक नृप लोग, अर्थ और कामों से तृष्णा के अन्त को नहीं पहुचे हैं ॥ २३ ॥

यदृच्छा से प्राप्त वस्तु में सन्तोष करने वाला सुख से रहता है और अजितेन्द्रिय तथा असन्तुष्ट पुरुष तीनों लोक के प्राप्त होनेपर भी सुख को नहीं प्राप्त होता है ॥२४॥

श्रीधरस्वामिकृतभावार्थदीपिका।

आशुशुक्षणिरग्निः ॥ २६ ॥

सिद्धोऽहं कृतार्थः एतावतैव सर्वस्वापहारासिद्धेरिति गूढोऽभिप्रायः तदेवाऽऽह–वित्तं हि यावत्प्रयोजनमेव सुखम् अधिकस्य क्लेशावहत्वादित्यर्थः ॥ २७—३० ॥

प्रतिश्रुतं त्वयैतस्मै यदनर्थमजानता ।
न साधु मन्ये दैत्यानां महानुपगतोऽनयः ॥ ३१ ॥
एष ते स्थानमैश्वर्यं श्रियं तेजो यशः श्रुतम् ।
दास्यत्याच्छिद्य शक्राय मायामाणवको हरिः ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अनयोऽन्यायः ॥ ३१ ॥
अन्यायमेवाऽह, एष इति ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सन्तोषासन्तोषौ न केवलं सुखदुःखमात्रहेत्वपितु संसृतिमुक्त्योरपीत्याह—पुंस इति । अर्थकामयोर्विषययोर्योऽसन्तोषः स पुंसः संसारस्य हेतुः यश्च दैवाल्लब्धेन सन्तोषः स मुक्तये स्मृतः हेतुः इत्यर्थः ॥ २५ ॥

किञ्च दैवाल्लब्धेन तुष्टस्य विप्रस्य तेजो वर्द्धते असन्तोषात्तु तत्तेजः प्रशाम्यति नश्यति यथा जलेन आशुशुक्षणिरग्निः तद्वत् ॥ २६ ॥

तस्मात्सन्तोषस्यैव श्रेयस्करत्वात् । हे नृपोत्तम ! त्रीण्येव पदानि त्वां वृणे याचे एतावतैवाहं सिद्धःकृतार्थः । वित्तं हि यावत्प्रयोजनमेव सुखदम् इतिशेषः । अधिकं तु दुःखदमिति भावः ॥ २७ ॥

इति इत्थमुक्तो बलिः प्रहसंस्तर्हि प्रतिगृह्यतामित्याह—एवमुक्त्वा वामनाय भूमिं दातुं जलपात्रं गृहीतवान् ॥ २८ ॥

तदा वामनाय पृथिवीं दास्यन्तं दातुमुद्युक्तमसुरेश्वरं शिष्यं बलिं विष्णोः चिकीर्षितं कर्तुमिच्छुं जानन् उशनाः शुक्रः विदां कालत्रयविदां श्रेष्ठ उवाच ॥ २९ ॥

तदेवाह—यावदध्यायसमाप्ति, एष इति । हे वैरोचने एष वामनः साक्षाद्भगवानव्ययो विष्णुरेव देवानां कार्यसाधकः कार्यं साधितुमित्यर्थः । कश्यपात्प्रजापतेरदितेरवतीर्णः पदत्रयव्याजेन लोकत्रयं प्रतिगृह्य देवेभ्यो दातुमवतीर्ण इति भावः ॥ ३० ॥

एवंविधाय तस्मै स्वानर्थमजानता त्वया यत्प्रतिश्रुतं तत्साधु न मन्ये, कुतः ? यतो दैत्यानां महाननयोऽन्याय उपगतः उपस्थितः ॥ ३१ ॥

अन्यायमेवाह—एषइति । एषमायामाणवक आत्मसङ्कल्पोपात्तमाणवकसंनिवेशो हरिर्वामनस्तव स्थानादिकं विपुलं यच्चश्वाच्छिद्याऽपनीय इन्द्राय दास्यति ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इतोऽपि सन्तोष एवापाद्यः सुखहेतुत्वादन्यस्यानर्थहेतुत्वाच्चेत्याह—पुंस इति । अर्थकामयोरसन्तोषः ॥ २५ ॥

तेजो बलादिकम्—

"तेजो बले प्रभावे च ज्योतिष्यर्चिषि रेतसि ।
नवनीतेऽनले धर्मे दाने हस्तिमदे पि च" ॥

इति. तत्तेजः आशुशुक्षणिः अग्निः "आशुशुक्षणिरर्केऽग्नौ यज्ञेऽप्याशुतीवले" इति ॥ २६ ॥

यतः सन्तुष्टोऽहं तस्माद्यावत्प्रयोजनं वित्तं स्वीकुर्यामिति शेषः ॥ २७—२८ ॥

उशना विदुषा गुरुणा शिष्याय हितोपदेशः कर्तव्य इति शिक्षयन्नाह, विष्णुव इति ॥ २९—३० ॥

बन्धनाद्यनर्थमजानता त्वया एतस्मै वामनाय प्रतिश्रुतं यत्तत्साधु न मन्य इत्यन्वयः । कुतोऽत्राह—दैत्यानामिति । अनयो दुःखहेतुरनीतिः ॥ ३१ ॥

तदुपपादयति—एष इति । विश्वकायः ॥ ३२ ॥ ३३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

आशुशुक्षणिः अग्निः ॥ २६ ॥

सिद्धोऽहं कृतार्थ इत्येतावतैव सर्वस्वापहारसिद्धेरिति गूढाभिप्रायः यावत् यत् प्रमाणकं वित्तं प्रयोजनकं भवेत्तावदेव ग्राह्यमित्यर्थः ॥ २७ ॥ २८ ॥

विदांवरः इति वामनमपरोक्षं प्राहेत्यर्थः ॥ २९ ॥ ३० ॥

उपगतः प्राप्तः ॥ ३१ ॥

हरिः सर्वस्वं हरिष्यतीत्यर्थः । मनः पर्यन्तञ्च इति वास्तवम् ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अम्भसा जलेनाऽऽशुशुक्षणिरग्निरिव ॥ २६ ॥

त्रीणि पदान्येव वृणे याचे एतावतैव अहं सिद्धः कृतार्थः वित्तः वित्तं यावत्प्रयोजनमेव सुखदमिति शेषः ॥ २७—३० ॥

अनयोऽन्याय उपगतः प्राप्तः ॥ ३१ ॥

मायया स्वयुनेन सङ्कल्पेन माणवको बालः ॥ ३२ ॥

भाषा टीका ।

बस यह अर्थ और कामों के विषय में पुरुष का सन्तोष नहीं होता है यही संसार का हेतु है, और दैव से प्राप्त वस्तु से सन्तोष ही मुक्ति के लिये कहा गया किया है ॥ २५ ॥

त्रिभिः क्रमैरिमाँल्लोकान्विश्वकायः क्रमिष्यति ।
सर्वस्वं विष्णवे दत्त्वा मूढ ! वर्तिष्यसे कथम् ? ॥ ३३ ॥
क्रमतो गां पदैकेन द्वितीयेन दिवं विभोः ।
खं च कायेन महता तार्तीयस्य कुतो गतिः ? ॥ ३४ ॥
निष्ठां ते नरके मन्ये ह्यप्रदातुः प्रतिश्रुतम् ।
प्रतिश्रुतस्य योऽनीशः प्रतिपादयितुं भवान् ॥ ३५ ॥
न तद्दानं प्रशंसन्ति येन वृत्तिर्विपद्यते ।
दानं यज्ञस्तपः कर्म्म लोके वृत्तिमतो यतः ॥ ३६ ॥
धर्माय यशसेऽर्थाय कामाय स्वजनाय च ।
पञ्चधा विभजन्वित्तमिहामुत्र च मोदते ॥ ३७ ॥
अत्रापि बह्वृचैर्गीतं शृणु मेऽसुरसत्तम ! ।
सत्यमोमिति यत्प्रोक्तं यन्नेत्याहानृतं हि तत् ॥ ३८ ॥
सत्यं पुष्पफलं विद्यादात्मवृक्षस्य गीयते ।
वृक्षेऽजीवति तन्न स्यादनृतं मूलमात्मनः ॥ ३९ ॥
तद्यथा वृक्ष उन्मूलः शुष्यत्युद्वर्ततेऽचिरात् ।
एवं नष्टाऽनृतः सद्य आत्मा शुष्येन्न संशयः ॥ ४० ॥

भाषा टीका ।

और यदृच्छा लाभ से सन्तुष्ट ब्राह्मण का तेज वृद्धि को प्राप्त होता है फिर वही विप्रतेज असन्तोष से शान्त होजाता है जैसे, कि—जल से अग्नि ॥ २६ ॥

तौ फिर हम बडे उदार के समीप पहुंचकर अपना स्वभाव क्यों विगाडें ? तस्मात् आप बडे दानी लोगों में श्रेष्ठ हैं तौ भी हम आप से तीन ही पग पृथिवी मांगते हैं बस इतने ही में हम कृतार्थ हैं क्योंकि ? जितना प्रयोजन पडे उतना ही वित्त चाहिये ॥ २७ ॥

श्रीशुक उवाच ॥

श्रीशुकदेव जी बोले, कि—जब भगवान् ने ऐसा कहा तब बलिराजा बोले, कि—जितनी इच्छा हो उतनाही ग्रहण करो इतना कहकर बलिने वामन जी को भूमि देने के लिये जल का पात्र ग्रहण किया ॥ २८ ॥

बस जब राजा बलि विष्णु के लिये पृथिवी देने को उद्यत हुए, तब दीर्घ दर्शी शुक्राचार्य जी विष्णु के चिकीर्षित [इच्छित] कर्म को जानकर अपने शिष्य असुरेश्वर [बलि] से कहने लगे ॥ २९ ॥

शुक्राचार्य उवाच ॥

शुक्राचारीजी बोले, कि हे वैरोचने ! हे राजन् ! यह साक्षात् भगवान् विष्णु हैं । और देवो के कार्य साधने के लिये कश्यप से अदिति में उत्पन्न हुए हैं ॥ ३० ॥

और जो तुमने अनर्थ नही जानकर इन को पृथिवी देने की प्रतिज्ञा करी है । उसको हम अच्छा नही समझते हैं, यही दैत्यों को बडा अन्याय प्राप्त हुआ ॥ ३१ ॥

वह तुमारे स्थान, ऐश्वर्य, श्री, तेज, यश, श्रुत, इन सबों को छुडाकर इन्द्र को देदेवेगा और इस का नाम हरि है अर्थात् यह सब हरण करने वाला है, पर कपट से ब्रह्मचारी बना है ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, मया पदत्रयमेव प्रतिश्रुतं नाधिकं तत्राऽह–त्रिभिरिति, क्रमतामिति चेत्तत्राऽह, सर्वस्वमिति ॥ ३३ ॥

तथाऽपि प्रतिश्रुतं सम्पादनीयमेवेति चेत्तत्राह–क्रमत इति द्वाभ्याम् । एकेन पदा पादन्यासेन भूमिं क्रममाणस्येत्यर्थः । तार्तीयस्य तृतीयपादन्यासस्य ॥ ३४—३५ ॥

तथाऽपि सर्वस्वदानात्कीर्त्तिस्तावद्भविष्यतीति चेत्तत्राऽह, न तद्दानमिति । तपश्चित्तैकाग्र्यम् कर्म पूर्त्तम् ॥ ३६—३७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, तर्हि प्रतिश्रुत्य नेति कथमनृतं वाच्यम् ? तत्राऽऽह-अत्रापीति सार्धैः षड्भिः। अत्रापि सत्यानृतव्यवस्थायाम् बह्वृचश्रुत्या हि प्रथममोमिति सत्यं नेत्यनृतमित्यादिना सत्यानृतयोर्लक्षणपूर्वकं स्तुतिनिन्दाभ्यां सत्यं विहितमनृतं च निषिद्धम् अनन्तरञ्च "पराग्वा एतद्रिक्तमक्षरम"इत्यादिना सत्ये दोषाननृते च गुणानुक्त्वा "तस्मात्काल एव दद्यात्काले न दद्यात्तत्सत्यानृते मिथुनीकरोति"इत्युपसंहारेण वृत्तिसङ्कटादिष्वनृतमप्यनुज्ञातम् तमिमं श्रुत्यर्थं दर्शयन्नाह-ओमित्यङ्गीकारेण यत्प्रोक्तं तत्सत्यम् । नेति यदाह तदेवानृतम् ॥ ३८ ॥

तत्तु सत्यमीषदनृतं विना न सिध्यतीत्याशयेनाऽऽह, सत्यं पुष्पफलं विद्याज्जानीयात् आत्मवृक्षस्य देहरूपस्य वृक्षस्य कुतः गीयते श्रुत्योच्यते इत्यर्थः। पाठान्तरं तु सुगमम्। यद्यपि श्रुत्या"वाचः सत्यं पुष्पफलं च"इत्युक्तं तथापि वाचो देहनिर्वाहाधीनत्वादात्मवृक्षस्येति प्रस्तुतानुसारेणोक्तम् भवतु पुष्पफलस्थानीयं सत्यं ततः किमत आह-वृक्षे देहेऽजीवति तत्पुष्पफलं न स्यात् सा न स्यादितिपाठे श्रुत्युक्ताया वाचः परामर्शः देहश्चानृतेन रक्षणीय इत्याह, अनृतं त्वात्मनो देहस्य मूलम् ॥ ३९ ॥

एतदेव दृष्टान्तेन स्पष्टयति, तद्यथा वृक्ष उत्पाटितमूलः शुष्यत्यचिरादेवोद्वर्त्तते पतति च. एवं नष्टमनृतं यस्य सः आत्मा देहः शुष्येत् यद्यपि च श्रुत्या 'एवमेवानृतं वदन्नात्मानमाविर्मूलं करोति' इत्येवं निन्दयानृतं निषिद्धं तथाप्युपसंहारानुसारेण तत्केवलानृतविषयमित्यभिप्रेत्यैवं व्याख्यातम् "दयेतत्वेतेन"इति च तथैवोक्तेः तथा च श्रुतिः"ओमिति सत्यं नेत्यनृतं तदेतत्पुष्पं फलं वाचो यत्सत्यं सहेश्वरो यशस्वी कल्याणकीर्तिर्भविता पुष्पं हि फलं वाचः सत्यं वदत्यथैतन्मूलं वाचो यदनृतं तद्यथा वृक्ष आविर्मूलः शुष्यति स उद्वर्तत एवमेवानृतं वदन्नाविर्मूलमात्मानं करोति स शुष्यति स उद्वर्तते तस्मादनृतं न वदेद्दयेतत्वेतेन"इति एतेनानेन त्वनृतेन दयेत सङ्कटेष्वात्मानं रक्षेदिति श्रुत्यर्थः ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु, मया पदत्रयमेव प्रतिश्रुतं नाधिकं तत्राह—त्रिभिरिति। विश्वकायो विश्वरूपोभूत्वेत्यर्थः। त्रिभिः पादविन्यासैरिमांस्त्रीन् लोकान् क्रमिष्यते परिच्छिद्य गृहीष्यतीत्यर्थः। क्रमतामितिचेत्तत्राह—सर्वस्वमिति । हे मूढ ! सर्वस्वं विष्णवे वामनरूपायास्मै दत्वा कथं वर्तिष्यसे ? तव स्थितिरपि दुर्लभेतिभावः ॥ ३३ ॥

तथापि प्रतिश्रुतं संपादनीयमेवेत्यत्राह—क्रमत इति द्वाभ्याम्। एकेन पदा पादविन्यासेन गां भूमिं द्वितीयेन दिवं हे विभो ! महता कायेन खमन्तरिक्षञ्च क्रमतः क्रममाणस्य भगवतस्तृतीयपादविन्यासस्य का गतिः ? तृतीयपादस्यास्पदाभावात्तथापि प्रतिश्रुतं न संपादितमेव स्यादित्यर्थः ॥ ३४ ॥

अतएव प्रतिश्रुतमप्रदातुः तव नरके निष्ठामवस्थितिं मन्ये, कुतः ? यो भवान् प्रतिश्रुतस्य प्रतिश्रुतं पूरयितुमसमर्थः ॥ ३५ ॥

तथापि सर्वस्वदानात्कीर्त्तिस्तावद्भविष्यतीत्यत्राह-नेति । येन दानेन वृत्तिर्जीविका विपद्यते विप्लुता भवति तद्दानं न प्रशंसन्ति आर्याः, कुतः ? यतो लोके वृत्तिमतः जीविकावत एव पुंसः सम्बन्धीन्येव दानादीनि धर्मादिहेतवः जीविकाविपत्तिकरदानादिभिर्धर्मादयः प्रत्युत नश्यंतीत्यर्थः ॥ ३६ ॥

तत्र स्वजनाय स्वस्वजनतुष्टये अतो विद्वान्वित्तं पञ्चधा धर्मादिपञ्चकार्थंतथा विभजन्निहामुत्र च लोके मोदते ॥ ३७ ॥

ननु, तर्हि प्रतिश्रुत्य नेति कथमनृतम् वाच्यम् ? तत्राह-सार्धैः षड्भिः । अत्रापि सत्यानृतव्यवस्थायां बह्वृचैर्गीतं यत्तत्कथयतो मत्तः शृणु बह्वृचश्रुत्या हि प्रथमम्"ओमिति सत्यं नेत्यनृतं तदेतत्पुष्पं फलं वाचो यत्सत्यं सहीश्वरो यशस्वी कल्याणकीर्तिर्भवतारीश्वरः" इत्यादिना सत्यानृतयोर्लक्षणपूर्वकं स्तुतिनिन्दाभ्यां सत्यं विहितम् अनृतञ्च निषिद्धम्. अनन्तरं "पराग्वा एतद्रिक्तमक्षरम" इत्यादिना सत्ये दोषाननृते च गुणानुक्त्वा "तस्मात्काल एव दद्यात्कालेन दद्यात्सत्यानृते मिथुनीकरोति" इत्युपसंहारेण वृत्तिसङ्कटादिष्वनृतमप्यनुज्ञातम्. तमिमं श्रुत्यर्थं दर्शयन्नाह—सत्यमिति । ओमित्यङ्गीकारेण यत्प्रोक्तं तत्सत्यं नेति यदाह तदेवानृतम् ॥ ३८ ॥

तत्सत्यमीषदनृतं विना न सिद्ध्यतीत्याशयेनाह-सत्यं पुष्पफलं विद्याज्जानीयात् आत्मवृक्षस्य देहरूपस्य वृक्षस्य कुतः गीयते श्रुत्योच्यते इत्यर्थः। जीवत इति पाठान्तरं तु सुगमं यद्यपि श्रुत्या "वाचः सत्यं पुष्पंफलञ्च" इत्युक्तम् तथापि वाचो देहनिर्वाहाधीनत्वादात्मवृक्षस्येति प्रस्तुतानुसारेणोक्तं भवति पुष्पफलस्थानीये सत्यं, ततः किमत आह-वृक्षे देहे अजीवति तत्पुष्पफलं न स्यात् सानस्यादिति पाठे श्रुत्युक्ताया वाचः परामर्शः देहश्चानृतेन रक्षणीय इत्याह, अनृतं त्वात्मनो देहस्य मूलं तथा च श्रुतिः "दयेतत्वेनेन" इति एतेन त्वनृतेन दयेत सङ्कटेष्वात्मानं रक्षेदित्यर्थः ॥ ३९ ॥

एतदेव दृष्टान्ततः स्फुटयति-तद्यथा वृक्ष उत्खातमूलः शुष्यत्यचिरादेव उद्वर्तते पतति च एवं नष्टमनृतं यस्य स आत्मा देहः शुष्येत्सर्वस्वदाने देहः शुष्येदिति भावः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

त्रिपदक्रमणप्रकारं स्पष्टयति—क्रमत इति । तार्तीयस्य तृतीयपदस्य ॥ ३४ ॥

प्रतिश्रुतमदातुः निष्ठान्तं प्रतिश्रुतदानपर्यन्तं नरकं दुःखं मन्ये नरकमेवोपपादयति-प्रतिश्रुतस्येति ॥ ३५ ॥

तस्य तव दानं कुतो न प्रशंसन्तीति तत्राह—येनेति। "सम्यग्वृत्तिर्जीवनं विपद्यते नश्यतीति येन तस्मादिति शेषः । "सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते" इति स्मृतेर्वृत्तिर्जीवनसाधनं वा नष्टं स्यात् तत्रार्थ किञ्चिन्नम् ? अत्राह, दानमिति ॥ ३६ ॥

अर्थाय कोशवृद्धयें क्रियादिव्यवहाराय वा ॥ ३७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

किमन्यस्त्वदुक्तेः प्रमाणमित्याशङ्क्य बह्वृचां वाक्यं प्रमाणमित्याह—अत्रापीति । बह्वृचैः ऋग्वेदिभिः किन्तद्गीतमित्यर्थतः प्रतीकयति—सत्यमिति । ओमिति यत्प्रोक्तम् अर्थिनं प्रति तत्सत्यं तथेति संवेदनीयमित्यर्थः । नेति यदाह अर्थिनं प्रति तदनृतं हिशब्द उभयोर्विरोधमाह, ॥ ३८ ॥

कुतोत्राह—सत्यमिति । पुष्पमेव फलं यस्य तत्पुष्पफलं जीवतः प्राणधारकस्यात्माख्यवृक्षस्य सत्यं पुष्पफलं विन्द्यात् पुष्पञ्च फलञ्च पुष्पफलमिति वा यथाऽशुष्कस्य वृक्षस्य पुष्पफले स्यातां तथात्मनः सत्यलक्षणे पुष्पफले विन्द्यादित्यर्थः तदुक्तं "पुष्पं हि फलं वाचः सत्यं वदति"इति आत्मवृक्षेऽजीवति शुष्कलक्षणमरणे सति तत्सत्यलक्षणं पुष्पफलं न स्यात् आत्मनः आत्मवृक्षस्य अनृतं सर्वस्वादानलक्षणं मूलं स्थितिकारणं "अथैतन्मूलं वाचो यदनृतम्"इति च ॥ ३९ ॥

विपक्षे बाधकमाह—तद्यथेति । तद्यथा तथोदाहरिष्यामः उन्मूलः उत्खातशिफः वृक्षः शुष्यति अचिरादुद्वर्त्तते नश्यति च एवं नष्टानृतः नष्टमूलः सद्यस्तत्क्षणमेव शुष्येत् शुष्यति नश्यति तद्यथावृक्ष आविर्मूलः शुष्यति स उद्वर्तत एवमेवानृतं वदन्नाविर्मूलमात्मानं करोति स शुष्यति "स उद्वर्तते तस्मादनृतं न वदेत्"इति च ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु, मया पदत्रयमेव प्रतिश्रुतं नाधिकं तत्राह—त्रिभिरिति । क्रमैः पादविन्यासैः क्रमतामिति चेत्तत्राह सर्वस्वमिति ॥ ३३ ॥

प्रतिश्रुतं कथं न सम्पादनीयमिति चेत्तत्र सर्वस्वे दत्तेपि तवेवं प्रतिश्रुतं न सम्पत्स्यते इत्याह द्वाभ्यां, क्रमतः क्रममाणस्य तार्त्तीयस्य तृतीयस्य यद्वा तार्त्तीयस्य तृतीयसम्बन्धिनः तृतीयपदक्रमस्य वस्तुनः कुतो हेतोर्गतिः प्राप्तिस्ते भविष्यतीत्यर्थः ॥ ३४ ॥

निष्ठां नितरां स्थितिं प्रतिपादयितुं प्रतिपादने इत्यर्थः । तेन सर्वस्वदानेपि नरकस्यावश्यकत्वञ्चेद्वरं सर्वस्वदानमेव भद्रम् ऐहिकभोगासिद्ध्यर्थमिति भावः ॥ ३५ ॥

तदपि यथाशक्ति प्रतिश्रुतं कथं न दास्यामीति चेत्तत्राह नेति तपश्चित्तैकाग्र्यम् ॥ ३६ ॥

दानादावपि शास्त्रीया व्यवस्था वर्त्तते इत्याह—धर्मायेति ॥३७॥

ननु, देयद्रव्यसत्वेप्यन्यस्मै नास्मीत्यनृतवचनं विना मम कथमदानमुपपद्यतां तत्राह—सार्द्धैः षड्भिः । अत्रापि सत्यानृतव्यवस्थायां ओमित्यङ्गीकारेण यत् प्रोक्तं तत्सत्यं नेति यदाह तदेवानृतम् "ओमिति सत्यं नेत्यनृतम्"इति श्रुतेः ॥ ३८ ॥

तत्तस्मादीषदनृतं विना न सिद्ध्यतीत्याशयेनाह—सत्यमिति । आत्मवृक्षस्य देहरूपवृक्षस्य सत्यं पुष्पफलं विद्यात् गीयते इति श्रुतिकर्तृकं गानमित्यर्थः । तत्पुष्पफलं वृक्षेऽजीवति न स्यात्तस्माद्वृक्षो येन जीवति तत्र प्रयतनीयमिति भावः तदेवाह—अनृतं मूलं तेन सर्वथैवानृताभावे देहो न जीवतीत्यर्थः ॥ ३९ ॥

तत्तस्माद्यथा वृक्ष उत्पाटितमूलः शुष्यति अचिरादुद्वर्तते वर्तनादुद्गच्छति नष्टो भवति च एवमेव नष्टानृतः सर्वथैव अनृतरहितो देहः शुष्येदित्यर्थः । तथा च श्रुतिः "ओमिति सत्यं नेत्यनृतं तदेतत् पुष्पं फलं वाचो यत्सत्यं सहेश्वरो यशस्वी कल्याणकीर्तिर्भविता पुष्पं हि फलं वाचः सत्यं वदत्यथैतन्मूलं वाचो यदनृतं तद्यथा वृक्ष आविर्मूलः शुष्यति स उद्वर्तत एवमेवानृतं वदन्नाविर्मूलमात्मानं करोति स उद्वर्तते तस्मादनृतं न वदेद्दयेतत्वेतेन" इति । वाच इति वागुपलक्षितस्य देहस्येत्यर्थः । अनृतं वदन्निति प्रकटीकृत्येति शेषः मूलं यथा आविष्कृतमेव शुष्यति नतु गुप्तं तस्मादिति तस्माद्धेतोरपि अनृतं न वदेत् किन्तु दयेत त्वेतेन अनृतेन दयेत सङ्कटेष्वात्मानं रक्षेदिति श्रुत्यर्थः ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विश्वकायो विश्वरूपः ॥ ३३ ॥

तार्तीयस्य तृतीयपादन्यासस्य कुतो गतिः सिद्धिः ॥ ३४-३५ ॥

येन वृत्तिर्जीविका विपद्यते उच्छिद्यते तद्दानं न प्रशंसन्ति यतः वृत्तिमत एव दानं तप आदिकं च लोके प्रशस्यते इति शेषः ॥ ३६—३७ ॥

अत्रापि इहामुत्र प्रमोदार्थचित्तविभागे बह्वृचैर्गीतं वर्णितं यत्सत्यानृतादिकं तन्मे मत्तः शृणु बह्वृचश्रुत्या प्रथमं "ओमिति सत्यं नेत्यनृतम्"इत्यादिना सत्यानृतयोर्लक्षणपूर्वकं स्तुतिनिन्दाभ्यां सत्यं विहितमनृतं च निषिद्धम् अनन्तरं च पराग्वा एतद्रिक्तमक्षरमित्यादिना सत्ये दोषान् अनृते गुणानुक्त्वा "तस्मात्काल एव दद्यात् काले न दद्यात् तत्सत्यानृते मिथुनीकरोति" इत्युपसंहारेण वृत्तिसङ्कटादिषु अनृतमप्यनुज्ञातं तमिमं श्रुत्यर्थं दर्शयन्नाह—सत्यमिति । ओमित्यङ्गीकारेण यत्प्रोक्तं तत् सत्यं नेति यदाह तदेवानृतम् ओमिति सत्यं नेत्यनृतमिति श्रुतेः ॥ ३८ ॥

तत्सत्यं किञ्चदनृतं विना न सिद्ध्यतीत्याशयेनाह—सत्यमिति आत्मवृक्षस्य देहरूपद्रुमस्य सत्यपुष्पफलं विद्यात् यतः गीयते तदेतत् पुष्पफलं वाचो यत्सत्यमिति श्रुत्योच्यते वाचः वाग्द्वारा शरीरस्यापीति मूलग्रन्थानुरूपा श्रुतिव्याख्या वृक्षे देहे अजीवति तत्पुष्पं फलं न स्यात् आत्मनः सपुष्पफलदेहद्रुमस्य अनृतं मूलम् तथा च श्रुतिः अथैतन्मूलं वाचो यदनृतमिति वाचः वागुपलक्षितस्य देहस्येत्यर्थः । ईषदनृतेन देहरक्षां कुर्यादिति भावः । तथा च श्रुतिः "दयेन त्वेतेन"इति एतेन त्वनृतेन दयेत सङ्कटेष्वात्मानं रक्षेदित्यर्थः ॥ ३९ ॥

एतदेव दृष्टान्तेन स्पष्टयति तस्मात् यथा वृक्ष उन्मूलः उत्पाटितमूलः शुष्यति अचिरात् शीघ्रमेवोद्वर्त्तते पतति च एवं नष्टमनृतं यस्य स आत्मा देहः शुष्येत् तथा च श्रुतिस्तद्यथा" वृक्षआविर्मूलः शुष्यत्युद्वर्त्ततेएवमेवानृतं वदन् आविर्मूलमात्मानं करोति" इति यद्यपि च श्रुत्या एवमेवानृतंवदन् आविर्मूलमात्मानं करो-

पराग्रिक्तमपूर्णं वा अक्षरं यत्तदोमिति ।
(१)यत्किञ्चिदोमिति ब्रूयात्तेन रिच्येत वै पुमान् ।
भिक्षवे सर्वमोङ्कुर्वन्नालं कामेन चात्मने ॥ ४१ ॥
अथैतत्पूर्णमभ्यात्मं यच्च नेत्यनृतं वचः ।
सर्वं नेत्यनृतं ब्रूयात्स दुष्कीर्तिः श्वसन्मृतः ॥ ४२ ॥
स्त्रीषु नर्मविवाहे च वृत्त्यर्थे प्राणसङ्कटे ।
गोब्राह्मणार्थे हिंसायां नाऽनृतं स्याज्जुगुप्सितम् ॥ ४३ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्याम् अष्टमस्कन्धे वामनप्रादुर्भावे
एकोनविंशोऽध्यायः ॥ १९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तीत्येवं निन्दयाऽनृतं निषिद्धं तथापि तत्केवलानृतविषयमित्याभिप्रेत्यैवं व्याख्यातम् "दत्तेत त्वेनेन" इत्युक्तेः ॥ ४० ॥

भाषा टीका ।

और यह विश्वरूप को धारण कर तीनों लोकों को तीन पगों में नापलेगा तब हे मूढ ! सर्वज्ञ विष्णु को देकर तू कहां रहेगा ? ॥ ३३ ॥

और विभु व्यापक विष्णु, एक पग से पृथिवी को नांप लेगा दूसरे पगसे स्वर्ग को, और आकाश को बडे शरीर से नापलेगा, तब तीसरे पग पृथिवी देने की कहां से गति होगी ॥ ३४ ॥

फिर कहे हुए को जब तू न दे सकेगा तब तेरी नरक में स्थिति होगी । क्योंकि ? प्रतिज्ञा करी हुई वस्तु को तू संपादन नहीं करसकेगा ॥ ३५ ॥

जिससे अपनी जीविका नष्ट हो जावै, लोग उस दान की प्रशंसा नहीं कियाकरते हैं, क्योंकि ! लोक में वृत्ति वाले ही के दान, यज्ञ, तप, और सब कर्म है ॥ ३६ ॥

पुरुष धनके पांच विभाग करने से सुखी होता है, जैसे कि एक भाग धर्म में लगावै, दूसरा भाग यश में लगावै. अर्थात् कुछ कीर्ति करले, तीसरा भाग अर्थ में लगावै, चौथे भाग से काम भोगै, और पांचवा भाग स्वजनों में लगावै, इस प्रकार पांच विभाग करै ॥ ३७ ॥

हे असुर सत्तम ! इसमें भी बहुत लोगों ने जो गाया है सो तुम हमसे सुनों ॥ बहुचोंने कहा है, कि—" ओम् " अर्थात् मान लेने को सत्य कहते हैं । और " न " अर्थात् नहीं मानने को अनृत कहते हैं ॥ ३८ ॥

तहां आत्मारूप वृक्ष का सत्य तो पुष्प और फल जानों-और अनृत को मूल जानों, जब वृक्ष नहीं रहेगा तो पुष्प फलकहा से होंगे ॥ ३९ ॥

तस्मात् जैसे वृक्ष उन्मूल होकर अर्थात् मूल नष्ट होने पर थोडे काल म सूखकर उखड जाता है । इसी प्रकार आत्मा के नृमत (झूंठ) नष्ट होने पर आत्मा भी शुष्क होजाता हैं इसमें संशय नहीं है ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सर्वथा सत्यवचनेन देहो न निर्वहेदिति स्फुटीकर्तुं सत्यस्य दोषाननृतस्य गुणानाह-परागिति द्वाभ्याम् । यदोमित्यक्षरं तत्पराक् दूरेऽर्थं गृहीत्वाऽञ्चतीति पराक् रिक्तमिति श्रुतिपदस्य व्याख्यानमपूर्णं वै इति तत्तस्मादर्थिने यत्किञ्चिदोमिति दास्यामीति ब्रूयाच्चेत् रिच्येत न्यूनो भवेत् । किञ्च भिक्षवे सर्वमोङ्कुर्वन्दास्यामीत्यङ्गीकुर्वन्नात्मने कामेन नालं पर्याप्तो न भवति तस्य भोगो न सिध्यतीत्यर्थः । तथा च श्रुतिः "पराग्वा एतद्रिक्तमक्षरं यदेतदोमिति तद्यत्किञ्चोमित्याहात्रैवास्मै तद्रिच्यते स यत्स सर्वमोंकुर्याद्रिच्यादात्मानं सकामेभ्यो नालं स्यात्" इति ॥ ४१ ॥

नेति यदनृतं वच एतत्पूर्णमर्थव्ययाभावात् अभ्यात्मञ्चेति चकारान्वयः । आत्मनोऽभिमुखमन्यस्यार्थमाकर्षतीत्यभ्यात्मम् योहि नित्यं मम किञ्चिदपि नास्ति सीदामीति ब्रूते स हि तेनानृतेन परेषामर्थानाकर्षतीति प्रसिद्धम् । ननु, तर्हीदमनृतमेव सर्वदा सेव्यं स्यान्नेत्याह, सर्वमिति. तथाच श्रुतिः "अथैतत्पूर्णमभ्यात्मं यन्नेति स यत्सर्वं नेति ब्रूयात्पापिकाऽस्य कीर्तिर्जायेत सैनं तत्रैव हन्याद्" इति ॥ ४२ ॥

अतो वृत्तिसङ्कटादिष्वनृतं न दोषायेत्युपसंहरति-स्त्रीषु प्रोत्साहनेन वशीकरणे नर्मणि परिहासे विवाहे च वरादिस्तुतौ गवां ब्राह्मणानाञ्च हितार्थे हिंसायां च कस्यचित्प्राणत्राणाय तथा च

(१) तद्वत् किञ्च इति क्रमसन्दर्भः । चक्र० । पाठः ।

श्रीधरस्वामिकृतभावार्थदीपिकायाम्

याज्ञवल्क्यः "वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेत्" इति. तथा च श्रुतिः "तस्मात्काल एव दद्यात्काले न दद्यात्तत्सत्यानृते मिथुनीकरोति" इति ॥ ४३ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
एकोनविंशोऽध्यायः ॥ १९ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका।

सर्वदा सत्यं वदतो देहो न निर्वहेदिति स्फुटीकर्त्तुं सत्यस्य दोषाननृतस्य गुणांश्चाह–परागिति द्वाभ्याम्। यदोमित्यक्षरं सर्वस्वं दास्यामीत्यङ्गीकारार्थकमक्षरं तत्पराक् पराक्शब्दव्याख्यानं रिक्तमिति तस्यापि व्याख्यानमपूर्णमिति तथा च श्रुतिः "पराग्वा एतद्रिक्तमक्षरं यदेतदोम्" इति सर्वस्वदाने कृते वृत्त्यभावेन देहस्यापि विनाशाद्दातुर्विपत्त्या दानसाद्गुण्याभावादोमित्यक्षरसाद्गुण्यवद्दानप्रतिज्ञापरत्वेनापरिपूर्णं स्यादित्यर्थः। किञ्चिदोमितिब्रूयात् किञ्चिद्दास्यामीति यद्वाक्यं तेन वाक्येन पुमान् दाता रिच्येतावशिष्येतेत्यर्थः। दत्तावशिष्टेनात्मनो वृत्तिं कल्पयन् जीवेत् अतस्तद्वाक्यं साद्गुण्यवद्दानप्रतिश्रुतिपरत्वेन परिपूर्णं स्यादिति भावः। तथा च श्रुतिः "न यत्सर्वमोङ्कुर्य्याद्रिक्तं चात्मानं सकामेभ्यो नालं स्यात्" इति यत्सर्वमोङ्कुर्यात्स आत्मानं रिक्तं कुर्यादित्यर्थः। सकामेभ्यो नालं स्यादित्यस्य अर्थमाह—भिक्षव इति। भिक्षवे याचकाय सर्वमोङ्कुर्वन्दास्यामीति प्रतिशृण्वन् पुमानात्मने कामेन काम्यत इति कामो जीवनम् अध्ययनेन वसतीतिवत् हेत्वर्थे तृतीया। तस्मै नालं न समर्थः स्यादित्यर्थः। अतः किञ्चिदेव देयमिति भावः "अथैतत्पूर्णमभ्यात्मं यन्नेति यत्सर्वं नेति ब्रूयाद्वा पापिकाऽस्य कीर्तिर्जायेत स्वेनं तत्रैव हन्यात्" इति श्रुत्यर्थमाह—अथेति। नेति यदनृतं वचः एतत्पूर्णम् अर्थव्ययाभावात् अभ्यात्मश्चेति चकारस्यान्वयः। आत्मनोऽभिमुखमन्यस्यार्थमाकर्षतीत्यभ्यात्मं यो हि नित्यं मम किञ्चिदपि नास्ति सीदामीति ब्रूते स हि तेनानृतेन परेषामर्थानाकर्षतीति प्रसिद्धं तर्हि इदमनृतमनृतमिव सर्वदा सेव्यं स्यादत आह–सर्वमिति। सर्वं नेति यो ब्रूयात्स दुष्कीर्तिः अतः किञ्चिद्देयमित्यर्थः। यद्वा, किञ्चिद्दास्यामीति प्रतिश्रवणादपि किञ्चिदपि न दास्यामीत्येतदेव तर्हि ज्यायः सुतरामर्थव्ययाभावादिति परिचोद्य तत्प्रतिक्षिपति—अथैतदिति। अथ अभ्यात्मं याचकाभिमुखं यन्नेति किञ्चिदपि नेत्यनृतं यद्वचस्तदेतत्पूर्णं सति वित्तेनेति वचसो मिथ्यार्थपरत्वादनृतमित्युक्तमनूद्य प्रतिक्षिपति—यदिति। यत्सर्वं नेति किञ्चिदपि नेति ब्रूयात्स दुष्टा कीर्त्तिर्यस्य तादृशः स्यात् श्रुतौ वाशब्दः पक्षविपरिवृत्त्यर्थकः। भवत्वित्यत्राह–श्वसन् मृतः स जीवद्दशायामेव मृतप्राय इत्यर्थः। अनेन "सैनं तत्रैव हन्यात्" इति वाक्यविशेषो व्याख्यातः सा दुष्टा कीर्त्तिरेनं सति वित्ते किञ्चिदपि नेति याचकं प्रतिवक्तारं तत्रैव जीवद्दशायामेव हन्यादिति तदर्थः ॥ ४१ ॥ ४२ ॥

अतो वृत्तिसङ्कटादिष्वनृतं न दोषायेत्युपसंहरति–स्त्रीष्विति। स्त्रीषु प्रोत्साहनेन वशीकारे नर्मकर्मणि परिहासे विवाहे वरादिस्तुतौ वृत्त्यर्थे जीविकार्थे गवां ब्राह्मणानाञ्च हितार्थं हिंसायां कस्यचित्प्राप्तायामनृतं न निन्दितं भवेदित्यर्थः। तथा च याज्ञवल्क्यः "वर्णानां हि वधो यत्र तत्र साक्ष्यनृतं वदेत्" इति तथा च श्रुतिः "तस्मात्काल एव दद्यात् सत्यानृते मिथुनीकरोति" ॥ ४३ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिकायाम्
एकोनविंशोऽध्यायः ॥ १९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

यत्तदोमित्यक्षरमेतदपूर्णं सर्वस्वं पराक्परविषयं रिक्तं पृथक्कृतम् अर्थिने सर्वस्वं दत्तमित्यर्थस्य वाचकं वदेदित्यर्थः। "पराग्वा एतद्रिक्तमक्षरं यदेतदोम्" इति च फलितमाह—तदिति। तत्तस्मात्पुमान्यत्किञ्च स्वजीवनातिरिक्तं धनम् ओन्दास्यामीति ब्रूयात् ब्रवीति स न रिच्येत वै न नश्यतीत्यन्वयः। यद्यत्किञ्चोमित्याहात्रैवास्मै तद्रिच्यत इति रिच्यते सम्पन्नो भवतीत्यर्थः। तात्पर्यमुक्तं वाचकान्तरेण द्रढयति, भिक्षव इति। भिक्षवे याचमानाय सर्वमोङ्कुर्वन् सर्वस्वं ददन् कामेभ्यो विषयार्थां दत्तत्वादात्मने नालम् आत्मनो भोज्याभावेन पर्याप्तो न भवति नष्टो भवतीत्यर्थः ॥ ४१ ॥

अथ तस्मान्नेत्यनृतं यद्वच एतदभ्यात्मम् आत्मानं प्रति पूर्णं सर्वस्वादाने स्वजीवनं सम्पन्नं भवतीत्यर्थः। अतिथिं प्रति सर्वं न दास्यामीति ब्रूयात्तर्हि आत्मानं पूर्णं सर्वस्वं जीवनं समृद्धं भवतीति पूर्वेण सम्बन्धः पूर्णं सम्पन्नम् किञ्च नेत्यतिथिं प्रति ब्रूयादिति योगविभागः कर्तव्यः तथाहि अतिथिं प्रति किञ्चन न दास्यामीति ब्रूयात्तर्हि सदुष्कीर्तिश्च सन्मृतो जीवन्मृतश्च भवति एतदुक्तं भवति याचकाय सर्वस्वदाने स्वजीवनाशः किञ्चिदप्यदाने च महद्विरोधेन दुष्कीर्त्या जीवन्मृतत्वं स्यात्तस्मात्यावद्विहितं कर्तव्यमिति। "सयत्सर्वमोङ्कुर्याद्रिच्यादात्मानं सकामेभ्यो नालं स्यादथैतत्पूर्णमभ्यात्मं यन्नेतिब्रूयात्पापिकास्य कीर्तिर्जायेत सैनं तत्रैव हन्यात्तस्मात्काल एव दद्यात्तत्सत्यानृते मिथुनीकरोति तयोर्मिथुनात्प्रजायते भूयान्भवति यो वै तां वाचं वेद" इति आत्मानं रिच्यात् शून्यं कुर्यात् ॥ ४२ ॥

ननु प्रतिश्रुताऽप्रदाने महान्दोषः स्यादित्याशङ्क्यैष न स्यादित्याह—स्त्रीष्विति। नर्मे नर्मणि हिंसायां त्रैवर्णिकविषयायाम् "न स्त्रीषु राजन्न विवाहकाले प्राणात्यये सर्वधनापहारे" इत्यादि सिद्धमेतत् ॥ ४३ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
एकोनविंशोऽध्यायः ॥ १९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

श्रुतिपदार्थमाह—परागिति । श्रुतितात्पर्यार्थमाह तद्यदिति ॥ ४१ ॥ सर्वमित्यर्द्धकम् ॥ ४२ ॥

तदेवमङ्गीकारानङ्गीकारलक्षणे पारिभाषिके सत्यानृते आम्नातां प्रसिद्धेऽपि ते क्वचित् क्वचिद्विपरीतफलदे इत्याह, स्त्रीष्विति । अत्र स्त्र्यादिषु चतुर्ष्वेन धर्मतः प्राप्तेष्विति गम्यं प्राणसङ्कटे स्वीये सतीति गम्यते गोब्राह्मणार्थंतत्सजातिमात्र-वृत्त्यादिलोपे प्राप्त इत्यर्थः । तदेतदेव वैष्णवानामप्युपलक्षणं गम्यं हिंसायामपि हि ते प्राणिमात्रघातेऽपीत्यर्थः "नानृतं स्याज्जुगुप्सितम्" इति किन्तु क्वचित्तद्धातकं सत्यमेव जुगुप्सितम् इत्यर्थः ॥ ४३ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
एकोनविंशोऽध्यायः ॥ १९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सर्वथा सत्यवचने देहो न निर्वहेदिति स्फुटीकर्तुं सत्यस्य दोषान् अनृतस्य गुणानाह—परागिति द्वाभ्याम् । यदोमित्यक्षरं तत् पराक् दूरे अर्थं गृहीत्वा अञ्चतीति पराक् रिक्तमिति श्रुति-पदस्य व्याख्यानम् अपूर्णं वै इति तत्तस्मादर्थिने यत् किञ्चि-दोमिति दास्यामीति ब्रूयात्तेनैव रिच्येत नतु सर्वेणैव वित्तेन न्यूनो भवेत् भिक्षवे सर्वमोङ्कुर्वन् दास्यामीत्यङ्गीकुर्वन् आत्मने आत्मार्थं कामेन भोगेन नालं न पर्याप्तो भवति तस्य भोगो न सिद्ध्यतीत्यर्थः । तथा च श्रुतिः "पराग्वा एतद्रिक्तमक्षरं यदेतदोमिति तद्यत् किञ्चिदोमित्याहात्रैवास्मै तद्रिच्यते स यत् सर्वमोङ्कुर्यात् रिच्यादात्मानं स कामेभ्यो नालं स्यात्" इति ॥ ४१ ॥

नेति यदनृतं वचः एतत् पूर्णम् अर्थव्ययाभावात् अभ्यात्म्यं च आत्मनोभिमुखमन्यस्यार्थम् आनयतीत्यभ्यात्मं योहि नित्यं मम किञ्चिदपि नास्ति सीदामीति ब्रूते स हि तेनानृतेन परेषामर्थानाकर्षतीति प्रसिद्धं ननु, तर्हीदमनृतममृतमिवाऽतिशयेन सेव्यमस्तु नेत्याह—सर्वमिति । तथा च श्रुतिः "अथैतत् पूर्णमभ्यात्मं यन्नेति यत्सर्वं नेति ब्रूयात् पापिकास्य कीर्त्तिर्जायेत सैनं तत्रैव हन्यात्" इति ॥ ४२ ॥

अतो वृत्तिसङ्कटादिष्वनृतं न दोषायेत्युपसंहरति—स्त्रीषु प्रोत्साहनेन वशीकारे नर्मणि यत्र क्वापि परिहासे विवाहे वरादिस्तुतौ गवां ब्राह्मणानां च हितार्थे हिंसायां च कस्यचित् प्राणायां तथा च याज्ञवल्क्यः "वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेत्" इति. तथा च श्रुतिः "तस्मात् काल एव दद्यात् काले न दद्यात् तत् सत्यानृते मिथुनीकरोति" इति ॥ ४३ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
ऊनविंशोऽष्टमेऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अथ सर्वदा सत्यं वदतो देहो न निर्वहेदिति स्फुटीकर्तुं सत्यस्य दोषाननृतस्य गुणांश्चाह—परागिति द्वाभ्याम् । यदोमित्यक्षरं तत् दूरेऽर्थं गृहीत्वाञ्चतीति पराक् रिक्तमिति श्रौत-पदव्याख्यानमपूर्णं वै इति तत्तस्मात् अर्थिने यत्किञ्चित् वित्तं ओमिति दास्यामीति ब्रूयात् तेन वित्तेन पुमान् दाता रिच्येत न्यूनवित्तो भवेत् भिक्षवे सर्वमोंकुर्वन् सर्वस्वं दास्यामीत्यङ्गीकुर्वन् आत्मने आत्मार्थं कामेन भोगेन नालं पर्याप्तो न भवति तस्य भोगो न सिद्ध्यतीत्यर्थः । तथा च श्रुतिः "पराग्वा एतदक्षरं यदेतदोमिति यद्यत् किञ्चदोमित्याह—नैवास्मै तद्रिच्यते यत्सर्वमोंकुर्याद्रिच्यादात्मानं स कामेभ्यो नालं स्यात्" इति. अतः यत्किञ्चिद्देयमिति भावः ॥ ४१ ॥

सर्वस्वं प्रति गृहे यतमानं भिक्षुं प्रति नेति यदनृतं वचः एतद्वचनं पूर्णम् अर्थरक्षकम् अत एव अभ्यात्मम् आत्मनो वक्तुरभिमुखमनुकूलम् तथा च श्रुतिः "अथैतत्पूर्णमभ्यात्मं यन्नेति" इति. ननु, तर्हि अनृतमेव सर्वदाऽऽश्रयणीयं स्यान्नेत्याह—सर्वमिति । यः सर्वं नेत्यनृतं ब्रूयात् किञ्चिदपि न दास्यामीति सम्पूर्णमनृतं वदेत्स दुष्कीर्तिः तथा च श्रुतिः "यत्सर्वं नेति ब्रूयात् पापिकाऽस्य कीर्तिर्जायेत सैनं तत्रैव हन्यात्" इति ॥ ४२ ॥

अतः क्वचिदनृतं नातिदुष्टमित्युपसंहरति—स्त्रीषु प्रोत्साहने वशीकारे नर्मणि परिहासे विवाहे च वरादिस्तुतौ गवां ब्राह्मणानां च हितार्थं हिंसायां च निराक्रियमाणायाम् अनृतं जुगुप्सितं न स्यात् किञ्चिदनृतेनाऽपि ऐहिकसुखार्थं धनं रक्षेत् परलोकार्थं च तीर्थे दद्यादित्यर्थः । तथा च श्रुतिः "तस्मात्काल एव दद्यात्काले न दद्यात् तत्सत्यानृते मिथुनीकरोति" इति ॥ ४३ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
एकोनविंशोऽध्यायार्थप्रकाशः ॥ १९ ॥

भाषा टीका ।

"ओम्" यह जो अक्षर है अर्थात् हामी भरलेना जो है यह द्रव्य को दूर खिचांना है इसीसे अपूर्ण अर्थात् खाली है। क्यों कि ? पुरुष किसी से थोडी भी हामी भर लेवे तो उससे खाली होजाता। और यदि भिक्षु के लिये सब ही की हां करले तब तो फिर अपने लिये किसी कामना से पूर्ण नहीं होता है ॥ ४१ ॥

और जो "न" यह अनृत वचन है वही पूर्ण है और कुछ अपने तरफ को खींचने वाला है परंच सब ही बात के विषय में "न" ऐसा अनृत बोलना अर्थात् नहीं करना यह भी अच्छा नहीं जो सर्वथा नहीं करता है वह दुष्कीर्ति तो ऐसा है कि जैसे मृतक श्वास लेता है ॥ ४२ ॥

भाषा टीका ।

तस्मात् हे राजन् ! तूं नाहीं करदे । क्योंकि ? स्त्री के साथ परिहास में, विवाह के विषय में, जीविका के अर्थ, प्राणों के संकट आने पर, और गौ ब्राह्मण के निमित्त तथा किसी की हिंसा का प्रसंग आपड़ा हो तहां पर, बस इतने जगह अनृत (झूंठ बोलना) निंदित नहीं है ॥ ४३ ॥

इति श्रीमद्भागवत अष्टम स्कन्ध में, एकोनविंश अध्याय की श्रीवृन्दावनस्थ भागवताचार्य कृत भाषाटीका समाप्ता ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे एकोनविंशोऽध्यायः ॥ १९ ॥

॥ विंशोऽध्यायः ॥

श्रीशुक उवाच ।

बलिरेवं गृहपतिः कुलाचार्येण भाषितः ।
तूष्णीं भूत्वा क्षणं राजन्नुवाचावहितो गुरुम् ॥ १ ॥

बलिरुवाच ।

सत्यं भगवता प्रोक्तं धर्मोऽयं गृहमेधिनाम् ।
अर्थं कामं यशो वृत्तिं यो न बाधेत कर्हिचित् ॥ २ ॥
स चाहं वित्तलोभेन प्रत्याचक्षे कथं द्विजम् ।
प्रतिश्रुत्य ददामीति प्राह्लादिः कितवो यथा ॥ ३ ॥
न ह्यसत्यात्परोऽधर्म इति होवाच भूरियम् ।
सर्वं सोढुमलं मन्ये ऋतेऽलीकपरं नरम् ॥ ४ ॥
नाहं बिभेमि निरयान्नाधन्यादसुखार्णवात् ।
न स्थानच्यवनान्मृत्योर्यथा विप्रप्रलम्भनात् ॥ ५ ॥
यद्यद्धास्यति लोकेऽस्मिन् सम्परेतं (१)धनादिकम् ।
तस्य त्यागे निमित्तं किं (२)विप्रस्तुष्येन्न तेन चेत् ॥ ६ ॥
श्रेयः कुर्वन्ति भूतानां साधवो दुस्त्यजासुभिः ।
दध्यङ्शिबिप्रभृतयः को विकल्पो धरादिषु ॥ ७ ॥
यैरियं बुभुजे ब्रह्मन् ! दैत्येन्द्रैरनिवर्तिभिः ।
तेषां कालोऽग्रसील्लोकान्न यशोऽधिगतं भुवि ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विंशे त्वनृतभीतोऽसौ ज्ञात्वाऽपि कपटं हरेः ।
ददावेव ततो विष्णुः सहसा वर्धताद्भुतम् ॥ १ ॥

॥ १ ॥

भगवता त्वया प्रोक्तं सत्यम्, किं तत्? योऽर्थकामादिकं न बाधेत स हि गृहमेधिनां धर्म इति ॥ २ ॥

कथं प्रत्याचक्षे? निराकरोमि ॥ ३—४ ॥

नन्वप्रत्याख्याने दोषा उक्तास्तत्राह—नाहमिति । अधन्याद्दारिद्र्यान्मृत्योरपि ॥ ५ ॥

यद्यद्धनादिकं तत्सर्वं सम्परेतं मृतं पुरुषं हास्यति त्यक्ष्यत्येव तत्किमिति जीवतैव स्वयं न देयमिति भावः । तथाऽपि तावद्वृत्तिसङ्कटपरिहारार्थमर्द्धं दीयतामिति चेत्तत्राह—तस्येति । विप्रश्चेत्तेनार्धेन दत्तेनापि न तुष्येत्तर्हि तस्यार्थस्य त्यागे दाने किं निमित्तम्? न किञ्चिदत्. याचितादल्पस्य दाने विप्रस्यासन्तोषेण दानं व्यर्थमेव स्यादतस्तद्याचितं सर्वं देयं न किञ्चिदिति भावः ॥ ६ ॥

तर्हि न देयमेवेति चेत्तत्राह—श्रेय इति । दुस्त्यजैरसुभिरपि को विकल्पो विचारः ॥ ७ ॥

यैर्दैत्येन्द्रैर्युद्धेऽनिवर्तिभिरियं भूर्बुभुजे उपभुक्ता तेषामिह लोकान्

---

(१) धरादिकम् (२) विप्रस्तुष्येत्व—इति च विज०।

श्रीधरस्वामिकृतभावार्थदीपिका ।

परलोकांश्च भोगानिति वा कालोऽग्रसीत्संहृतवान्नतु भुवि तैराधिगतं प्राप्तं यशोऽग्रसीत् अतः कीर्तिरेव साध्या नान्यदिति भावः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमुशनसोक्तो बलिस्तमुवाचेत्याह मुनिः—बलिरिति । कुलाचार्येण शुक्रेणेत्थमुक्तो गृहपतिः यजमानो बलिः क्षणं तूष्णीमवस्थाय हे राजन् ! अवहितः प्रकृतमध्यवस्यन् गुरुमुशनसमाह ॥ १ ॥

तदेवाह—सत्यमिति । भगवता त्वया यदुक्तं तत् सत्यं सोऽयं गृहस्थानां धर्मः यस्त्वदुक्तो धर्मः कर्हिचिदपि गृहमेधिनामर्थादीन् न बाधेत न विहन्ति अतः सत्यं गृहमेधिनां धर्मः ॥ २ ॥

तथापि गृहस्थोऽप्यहं वित्तलोभेन प्रह्लादपौत्रः धूर्त्तवद्ददामीति प्रतिश्रुत्य अधुना द्विजं कथं निराकरोमि? ॥ ३ ॥

नन्वप्रत्याख्याने दोषा उक्तास्तत्राह—न हीति । असत्यात्परोऽन्योऽधर्मो नास्तीति इयं भूमिराह हि, किं तथाविधं भूमेर्वचस्त्वयोपलब्धम् ? इत्यत्राह—सर्वमिति । यत इयं भूरलीकपरमनृतवादिनमृते विना सर्वं मेरुमन्दरादिकमपि वोढुं धर्त्तुं समर्थमात्मानं मेने अमन्यत साक्षात्तस्यास्तथाविधोक्त्यभावेऽप्यलीकपरो नरस्तस्या दुर्भरत्वेनानुमत इति भावः । मन्ये इति पाठे अलीकपरं नरं विनाऽहं सर्वं वोढुमलं मन्ये अलीकपरन्तु न सहे कथमहं तत्सहे इत्यर्थः । सोढुमितिपाठः सुगमः ॥ ४ ॥

किञ्च यथा विप्रप्रलम्भनाद्विप्रविषयेऽनृतवदनाद्यथाहं बिभेमि तथा निरयादिभ्यो न बिभेमि तस्मादधन्यं दारिद्र्यम् ॥ ५ ॥

किञ्च यद्यद्धनादिकं तत्सर्वं सम्परेतं मृतं पुरुषमस्मिँल्लोके हास्यति त्यक्ष्यति तत्किमिति जीवितैव देयमिति भावः । तथापि तावद्वृत्तिसङ्कटपरिहारार्थं किञ्चिद्दीयतामित्यत्राह—तस्येति । येनार्थेन दत्तेनापि न तुष्येद्विप्रस्तर्हि तस्यार्थस्य त्यागे दाने किं निमित्तं न किंचित्. याचितादन्यस्य दाने विप्रस्यासन्तोषात्तद्दानं व्यर्थमेव स्यादतस्तद्याचितं सर्वं देयं न किंचिदिति भावः ॥ ६ ॥

ननु, यदि किञ्चिद्दत्तेन न तुष्येद्विप्रस्तर्हि न देयमेवेत्यत्राह—श्रेय इति । साधवः परोपकारसाधनस्वभावाः दध्याङ्ङादयः दुस्त्यजैरसुभिः प्राणैरपि भूतानां श्रेयः अकुर्वन्ति धरादिषु को विकल्पः को विचारः ? ॥ ७ ॥

सर्वथा कीर्त्तिरेव संपादनीयेत्यभिप्रायेणाह—यैरिति । हे ब्रह्मन् यैर्दैत्येन्द्रैरस्मत्प्रपितामहादिभिः युद्धेष्वनिवर्त्तिभिरियं भूमिर्बुभुजे उपभुक्ता तेषां लोकान् भोगान् कालोऽग्रसीत्संहृतवान् तैर्भुव्यधिगतं लब्धं यशः कीर्त्तिन्तु नाग्रसीत् सात्वधुनाप्यनुवर्त्तत इतिभावः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भक्तिविधानार्थं त्रिविक्रमावतारमाहात्म्यं वक्त्यस्मिन्नध्याये, तत्रादौ बलेः सत्यसन्धनिश्चयमाह—बलिरिति ॥ १ ॥

यो दानादिधर्मोऽर्थादिकं स्वजीवनसाधनं न बाधेत न नश्यति सोऽयं गृहस्थानां धर्म इति यदुक्तं तत्सत्यम् अबाधितमित्यन्वयः ॥ २ ॥

तथैवानुष्ठेयो धर्म इति नेत्याह—स इति । यो ददामीति प्रतिज्ञाय स्थितः सोऽहं प्रत्याचक्षे न दास्यामीति निषेधं करोमीति कुतः प्राह्लादिः कितवो धूर्तः ॥ ३—५ ॥

ननु, वित्तलोभाभावे स्वजीवनहानिः स्यादित्याशङ्क्य दानेन विप्रालंबुद्धिरेव प्रयोजिका नान्येत्याशयेनाह—तस्येति । यत्प्रतिश्रुतं तेन वित्तेन विप्रो यदि तुष्येत तर्हि तस्य वित्तस्यात्यागे अदाने निमित्तं कारणं किं न किमपि ॥ ६ ॥

स्वजीवनं कारणान्नेत्याह—श्रेयइति । के ते साधव इति तत्राह—दध्यङिति । दध्यङाथर्वणो देवेभ्यः स्वदेहं शिबिः कपोताय ततः प्रकृते किन्तत्राह—को विकल्प इति । दित्सितेषु धरादिषु विकल्पः दास्यामि न चेति संशयः कः ? न कोऽपीत्यर्थः ॥ ७ ॥

सति विभवेऽर्थिनि च प्राप्ते लोभाददातॄणामैहिकामुष्मिकसुखं न सेत्स्यतीत्याशयेनाह—यैरियमिति । अनिवर्तिभिः युद्ध इति शेषः । कालो यमः स्वर्गादिलोकानग्रसीत् ग्रस्तवान् "ये लोका दानशीलानां स तानाप्नोति पुष्कलान्" इति स्मृतिसिद्धलोका न सन्तीत्यर्थः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

१—८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

विप्रे ज्ञात्वार्थिनं विष्णुमवज्ञाय गुरोर्वचः ।
ददौ हर्षाद्बलिः सोऽपि प्राप्त्या हर्षाद्विवैधत ॥

क्षणं तूष्णीमिति भवदिच्छाप्रातिकूल्ये कुतो गुरोर्गुरुत्वमतोऽस्याज्ञालङ्घने न दोष इति निश्चिकायेति भावः ॥ १ ॥

अर्थादिकं न बाधेतेति तेन विप्रस्यैतादृशप्रलम्भाद्धर्मं बाधेतैव भक्तिं तु भजनीयस्य भगवतो ज्ञातस्यापि प्रलम्भनाद्बाधेत मामिति भावः ॥ २ ॥

प्राह्लादिरिति प्रह्लादपौत्रस्य मम भगवदानुकूल्यमेव स्वधर्म इति गूढोऽभिप्रायः तेन प्रह्लादेनाऽस्यान्तःकरणे कृपया भक्तिबीजं पूर्वमुप्तमेव सम्प्रतितु श्रीवामनदेवकृपया प्राप्तेन प्रेम्णा सिद्ध एवाभूत् यदुक्तं "कृपासिद्धा यज्ञपत्नीवैरोचनिशुकादयः" इति ॥ ३—४ ॥

अधन्यात् दारिद्र्यात् ॥ ५ ॥

यद्यद्धनादिकं कर्तृसम्परेतं मृतं हास्यति त्यक्ष्यत्येव तेन त्वदाज्ञया किञ्चिन्मात्रेण दत्तेन विप्रश्चेन्न तुष्यति तर्हि तस्य तावन्मात्रस्य त्यागे किं निमित्तं किं फलम् अतः सर्वमेव वित्तमेतत्प्रीत्यर्थं मया दास्यत एवेति भावः । अत्र स्पष्टदेवं विष्णुं ज्ञात्वापि प्रवृद्धभक्त्युत्थसम्भ्रमप्रयातिस्तुत्याद्यकरणं शुक्राचार्यस्यासुराणां च दुःखाभावार्थमेव ज्ञेयम् अत एव विप्रशब्दप्रयोगो भावगोपनार्थ एव ज्ञेयः ॥ ६ ॥

त्वं सर्वस्वमेव दित्ससीत्यत्रार्थे पूर्वाचारः प्रदर्श्यतामिति चेत्तत्राह—श्रेय इति । भूतानामपि श्रेयः किमुत स्वगृहमागतस्य विष्णोः

सुलभा युधि विप्रर्षे ! ह्यनिवृत्तास्तनुत्यजः ।
न तथा तीर्थ आयाते श्रद्धया ये धनत्यजः ॥ ९ ॥
मनस्विनः कारुणिकस्य शोभनं यदर्थिकामोपनयेन दुर्गतिः ।
कुतः पुनर्ब्रह्मविदां भवादृशां ततो वटोरस्य ददामि वाञ्छितम् ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

असुभिरहन्तास्पदैरपि धरादिषु ममतास्पदेषु को विकल्पः दास्ये न वा दास्ये इत्यात्मकः अपि तु नैव विकल्पः किन्तु दास्याम्येवेति निश्चय एवेति भावः ॥ ७ ॥

स्वकीर्त्यादिकमनपेक्ष्य नश्वरभोगार्थमेव न दातव्यमिति मतं तु नास्माकमभिमतमित्याह—यैरिति । युद्धेऽनिवर्तिभिः इयं भूः तेषां लोकान् ऐहिकान् पारत्रिकांश्च कालोऽग्रसीत् नाग्रयाञ्चकार लोकान् लोकोत्थभोगानिति वा ननु भुवि तैरधिगतं प्राप्तं यशोऽग्रसीत् अतः कीर्तिरेव साध्या नान्यदिति भावोऽपि शुक्राद्यगुरोर्येनैव ज्ञापितः । वस्तुतस्तु तस्य कीर्त्याद्यपेक्षाच मनसि नास्ति शुद्धभक्तत्वादिति भावः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

वटुरूपेण विष्णुमागतं बुध्वा बलिर्गुरुवाक्यमतिलङ्घ्य तस्मै दृष्टांत्रिपदपरिमितां भूमिं ददौ विष्णुरप्यवर्द्धतेति वर्णयपति-बलिरेवामिति त्रिंशेन ॥ १ ॥

योऽर्थकामादिकं न बाधेत स गृहमेधिनां धर्म इति भगवता त्वया प्रोक्तं सत्यम् ॥ २ ॥

स्वस्य गृहमेधित्वेऽपि किञ्चिद्विशेषमाह—योऽहं प्राह्लादिः प्रह्लादस्य पौत्रः स कितवो धूर्तो यथा निराकरोति तद्वत् ददामीति प्रतिश्रुत्य द्विजं कथं प्रत्याचक्षे निराकरोमि ॥ ३ ॥

अलीकपरमसत्यवादिनमृते सर्वं गिरिवनसमुद्रादिकं वोढुं धर्तुमलं मन्ये इति इयं भूरुवाच ॥ ४—५ ॥

अस्मिन् लोके जने सत्यपि यद्धनादिकं हास्यति स्वामिनं त्यक्ष्यति यच्च सम्परेतं हास्यति तस्योभयविधस्य त्यागे किं निमित्तं फलम् ? न किञ्चिदपीत्यर्थः । तेन विप्रस्तुष्येच्चेत् तस्य निमित्तं फलं किं न भवति ? अपि तु भवत्येवेत्यर्थः । अतः सर्वस्वं विजानता पात्रे देयमेव ॥ ६ ॥

एतदेव कैमुतिकन्यायेनोपपादयति—श्रेय इति । को विकल्पः संशयः ॥ ७ ॥

ननु, दानाद्भोगो वर इत्यत आह—यैरिति । युद्धे अनिवर्तिभिरियं भूः बुभुजे भुक्ता न तु दत्ता तेषां लोकयन्ते कर्मफलानि भुञ्जन्ते यैस्ते लोका देहास्तान् कालः अग्रसीत् संहृतवान् अत एव भुवि यशोऽपि न अधिगतं न प्रवृत्तं धिक् तान् दधरस्भरादीनिति भावः ॥ ८ ॥

भाषा टीका ।

श्रीरुक्मिणीजानये नमः ॥

श्रीशुक उवाच ।

श्रीशुकदेवजी बोले, कि—जब कुलाचार्य अर्थात् श्रीशुक्राचारीजी ने बलि को इस प्रकार समुझाये तब हे राजन् ! बलि क्षण भर चुप होकर गुरुजी से सावधान होकर बोला ॥ १ ॥

बलिरुवाच ॥

राजा बलि बोले, कि—अपने गृहस्थियों का धर्म बहुत ही सत्य कहा जो धर्म अर्थ कामयश और जीविका का कभी भी बाधा नहीं करता है ॥ २ ॥

परंच मैं अब धन के लोभ से ब्राह्मण को कैसे ना करूं "अवश्य देवेंगे" ऐसी प्रतिज्ञा करके और प्रह्लाद के घराने में उत्पन्न होकर कपटी के तरह कैसे वचन को पलटूं ॥ ३ ॥

असत्य बोलने से आगे और कोई बडा अधर्म नहीं है। ऐसा इस भूमि ने भी कहा है, कि—मैं सब के भार सहन करने को समर्थ हूं परंच एक झूंट बोलने वाले के बिना ॥ ४ ॥

महाराज ! मैं नरक से नहीं डरता हूं और अधन्य दुःख सागर से नहीं डरता हूँ न अपने स्थान से च्युत होने से डरता हूं ॥ ५ ॥

जो धनादिक मरे हुए पुरुषों को आपही छोड देते हैं उसका त्याग देना कौनसी बडी बात है ? यदि उससे ब्राह्मण का संतोष होता हो तो ॥ ६ ॥

महज्जन प्राणियों का श्रेय अपने दुस्त्यज प्राणों से करते हैं जैसे दधीचि शिवि प्रभृति लोगों ने पराये अर्थ अपने प्राण भी देदिये फिर भूमि आदिक ऊपर के पदार्थों में क्या संकल्प विकल्प है ? ॥ ७ ॥

हे ब्रह्मन् जिन दैत्य राजाओं ने इस पृथिवी को भोगी वे फिर आज तक लोटकर नहीं आये, और काल ने उनको ग्रस लिये और उनको पृथिवी में यश भी नहीं मिला ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

देहत्यागादपि, धनत्यागे कीर्तिर्भवतीत्याह—सुलभा इति । ये त्यजन्तीति तनुत्यजः तीर्थे पात्रे अतोऽतिदुष्करो धनत्याग एव कार्य इति भावः ॥ ९ ॥

तर्हि निर्धनत्वेन दैन्यं स्यादिति चेत्तत्राह-मनस्विन इति । कारु...

यजन्ति यज्ञक्रतुभिर्यमादृता भवन्त आम्नायविधानकोविदाः ।
स एव विष्णुर्वरदोऽस्तु वा परो दास्याम्यमुष्मै क्षितिमीप्सितां मुने ! ॥ ११ ॥
यद्यप्यसावधर्मेण मां बध्नीयादनागसम् ।
तथाऽप्येनं न हिंसिष्ये भीतं ब्रह्मतनुं रिपुम् ॥ १२ ॥
एष वा उत्तमश्लोको न जिहासति यद्यशः ।
हत्वा मैनां हरेद्युद्धे शयीत निहतो मया ॥ १३ ॥

श्रीशुक उवाच ।

एवमश्रद्धितं शिष्यमनादेशकरं गुरुः ।
शशाप दैवप्रहितः सत्यसन्धं मनस्विनम् ॥ १४ ॥
दृढं पण्डितमान्यज्ञः स्तब्धोऽस्यस्मदुपेक्षया ।
मच्छासनाऽतिगो यस्त्वमचिराद्भ्रश्यसे श्रियः ॥ १५ ॥
एवं शप्तः स्वगुरुणा सत्यान्न चलितो महान् ।
वामनाय ददावेनामर्चित्वोदकपूर्वकम् ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिकायाम् ।

तादृशानामप्यर्थिनां कामोपनयेन कामपूरणेन दुर्गतिर्दैन्यमिति यत्तच्छोभनं भद्रमेव भवादृशानां तु कामोपनयेन दुर्गतिः शोभनमिति किं पुनर्वक्तव्यमित्यर्थः ॥१० ॥

ननु, नायं वटुः किन्तु विष्णुस्तव शत्रुरित्युक्तं तर्हि सुतरामेव दास्यामीत्याह--यजन्तीति । परः शत्रुर्वास्तु ॥ ११—१२ ॥

यद्यदि यशो न जिहासति तर्हि युद्धेऽयं मां हत्वैनां भूमिं हरेत् शयीत वा समयग्ज्ञातः सन् मम चित्ते शयीतेति वास्तवोऽर्थः ॥१३॥

अश्रद्धितमजातश्रद्धम् ॥ १४—१६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

देहादपि प्रियस्य धनस्य त्यागादेव कीर्त्तिर्भवतीत्याह—सुलभा इति । हे विप्रर्षे । युद्धे तनुं देहं त्यजन्तीति तथा तादृशाः सुलभाः बहवः अनुवृत्ताः जाता बभूवुरित्यर्थः । तथा तीर्थे सत्पात्रे श्रद्धया ये सर्वस्वं त्यजन्ति ते नाऽनुवृत्ताः अतोऽतिदुष्करो धनत्याग एव मया कार्य इति भावः । अतिवृत्ता इत्यपि पाठः ॥ ९ ॥

तर्हि निर्द्धनत्वेन दैन्यं स्यादित्यत्राह—मनस्विन इति । अर्थिनां कामपूरणेन दुर्गतिर्दैन्यमिति यत्तन्मनस्विनो विवेकिनः कारुणिकस्य शोभनं भद्रमेव किंपुनर्भवादृशां ब्रह्मविदां तद्भद्रमेवेति वक्तव्यं ततोऽस्य वटोर्वाञ्छितं ददामि ॥ १० ॥

ननु, नायं वटुः किन्तु विष्णुस्तव शत्रुस्तर्हि तु सुतरामेव दास्यामीत्याह—यजन्तीति । वेदोक्तयज्ञाद्यनुष्ठानकुशलाः भवन्तः आदृतास्सन्तः क्रतुभिर्यज्ञैश्च ससोमकैरसोमकैश्च यागैर्यं विष्णुं यजन्ति आराधयन्ति स एव वटुवेषो विष्णुरधुना मम वरदो वा परः शत्रुर्वाऽस्तु सर्वथाऽस्मै भूमिमीप्सितां हे मुने ! दास्याम्येव ॥ ११ ॥

तर्हि तृतीयपादस्यास्पदाभावेन हेतुना त्वां बध्नीयादसावत आह—यदिति । अनागसं सर्वस्वसमर्पणेन निरपराधिनं मामसावधर्मेण यदि बध्नीयात्तथाप्येनं धृतब्राह्मणशरीरं न हिंसिष्ये न हनिष्यामि बन्धनमप्यनुमन्ये नाहं बिभेमीति पूर्वमेवोक्तत्वादिति भावः ॥ १२ ॥

किञ्चैष यद्युत्तमश्लोकः विष्णुस्तर्हि यशः कीर्त्तिं न जिहासति त्यक्तुं नेच्छति सर्वस्वं प्रतिगृह्य मां बध्वा स्वकीयं विपुलं यशः न विहन्तीति भावः । किन्तु मां युद्धे हत्वा एनां भूमिं हरेत् मां हन्तुमसमर्थश्चेत् मया निहतो युद्धे शयीत वा इति तु नार्थः । किंतु शयीत इति तु काकुः किं शयीत एवेति दिक् ॥ १३ ॥

इत्थमश्रद्धितं श्रद्धाऽस्य न सञ्जातेत्यश्रद्धितस्तं स्वस्याज्ञामस्वीकुर्वाणं शिष्यं बलिं शुक्रो दैवचोदितः शशाप शापानर्हत्वं सूचयन्विशिनष्टि—सत्ये सन्धा अभिसन्धिः यस्य तं प्रशस्तमनस्कम् ॥१४॥

शापमेव दर्शयति—दृढमिति । त्वं दृढं नूनं पण्डितमात्मानं मन्यसे इति तथा वस्तुतस्त्वज्ञः अत एव स्तब्धः सर्वस्वनाशप्रसक्तावप्यलं पटुरस्मीति गर्वयुक्तस्त्वं मच्छासनमतिक्रान्तवान् अतस्त्वं मम गुरोरुपेक्षयाऽचिरादेव श्रियस्त्रैलोक्याधिपत्याद्भ्रश्यासि ॥ १५ ॥

इति इत्थं गुरुणा शप्तोऽपि सत्यान्न चलितो महान् दृढसङ्कल्पो बलिर्वामनायार्चित्वोदकपूर्विकामेनां भूमिं ददौ ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

पात्राभावान्न दास्यन्ति तस्मिन् सति दातारः सुलभा इति तत्राह—युधीति। यथा युधि युद्धादनिवृत्तास्तनुत्यजः शरीरत्यागिनः सुलभास्तथा तीर्थे पात्रे प्राप्ते श्रद्धया धनत्यजः धनदातारो न सुलभा इत्यन्वयः।—

"तीर्थं मन्त्राद्युपाध्याये शास्त्रेष्वम्भसि पावने।
पात्रोपायावतारेषु स्त्रीपुष्पे योनियज्ञयोः" ॥

इति यादवः "पराचिच्छीर्षावनृज्रुस्त इन्द्रा यज्वानो यज्वभिः स्पर्धमानाः" इति ॥ ९ ॥

ननु, सर्वस्वदाने स्वजीवनहानिलक्षणक्लेशः स्यादिति यदुक्तं तत्राह—मनस्विन इति। अर्थकामाय याचमानाय कामितार्थदानेनोपनयो गृहम्प्रति प्रस्थापनं यत्तेन दुर्गतिर्दारिद्र्यलक्षणनाशो भवतीति यत्तत्कारुणिकस्य मनस्विनं उदारस्य शोभनमिहामुत्र सुखसाधनं स्यात् भवादृशां ब्रह्मविदां सर्वस्वदानात् क्लेशः सुखहेतुरिति किम्पुनः किमु वक्तव्यं फलितमाह—तत इति ॥ १० ॥

अयं वटुरपि यः कश्चन न भवतीति दर्शयन् स्वस्य हरिविषयं ज्ञानं सूचयन्नाह—यजन्तीति। क्रतुभिः सङ्कल्पैः सप्ततन्तुसंज्ञैर्वा ॥ ११ ॥

ब्रह्मतनुं ब्राह्मणं वटुम् ॥ १२ ॥

जिहासति त्यक्तुमिच्छति मा मां एनां गाम् ॥ १३ ॥

अश्रद्धितं अश्रद्धयोपेतं प्रहितः प्रेरितः सत्यसन्धं सत्यप्रतिज्ञम् ॥ १४—१६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

तर्हि युद्धेनैव प्राणास्त्यज्यतां तत्राह-सुलभेति। यद्यपि धनाद्यपेक्षया प्राणा अन्तरङ्गास्तथापि मोहात् सर्व एव धनादेरेवान्तरङ्गत्वं मन्यन्त इति भावः ॥ ९—११ ॥

शुक्रमनुज्ञापनार्थमेव सन्तोषयन्नाह-यदीति द्वाभ्याम्। वास्तवार्थस्तु तैर्दर्शितः शिरसि पदार्पणप्रार्थनान्तरमेव हि तादृशी भक्तिर्जातेति भक्तिरसाभासत्वे समाधानञ्च ॥ १२ ॥

भीतत्वमेव दर्शयति एष इति ॥ १३—२० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

किञ्च युद्धे निवृत्तिरहितेभ्योऽपि दाने निवृत्तिरहिताः अधिकयशस्विन इत्याह-सुलभा इति। तीर्थे सम्प्रदाने अतस्तनुत्यागादपि धनत्यागो दुष्करः स एव मया कर्तव्य इति भावः ॥ ९ ॥

ननु, तर्हि तव दारिद्र्यं भविष्यतीति तत्राह-मनस्विनो दानवीरस्य शोभनमेतदेव यत् अर्थिनां याचकानां यादृशानामपि कामोपनयेन कामपूरणेन दुर्गतिः दारिद्र्यं "दरिद्रादुर्गतौ" इति दुर्गतिदारिद्र्ययोस्तुल्यार्थत्वात् भवादृशानां तु कामोपनयेन दुर्गतिः शोभनमिति किं पुनर्वक्तव्यमित्यर्थः ॥ १० ॥

ननु, नायं वटुः किन्तु विष्णुस्तत्र शत्रुरित्युक्तं तर्हि सुतरामेव दास्यामीत्याह—यजन्तीति। परः शत्रुर्वास्तु ॥ ११ ॥

भीतमिति विष्णुत्वेऽपि ब्राह्मणतनुत्वहेतुकम्। भयमस्यावश्यम्भावीति भावः ॥ १२ ॥

एष वै निश्चितमुत्तमश्लोक एव यद्यस्मात् स्वयशो न जिहासति मतो भूमिर्न दातव्येति मयोक्ते याच्ञाभङ्गपराभवमसहमानेनानेन तर्हि युद्धं देहीति प्रार्थिते मयि चोमित्युक्तवति सति युद्धे मां हत्वा एनां भूमिं हरेदेव. ननु, महावीरास्त्वत्तो यस्य पराभवोऽपि सम्भवेदिति चेत्तत्राह-शयीतेति। मया निहतो युद्धे शयीतेति काकुः नैव शयीत विष्णोरवध्यत्वादिति भावः। यद्वा मेत्यस्यावृत्त्या अस्मदर्थे निषेधार्थे च वर्तमानाद्विनापि काका सङ्गतिः ॥ १३ ॥

अश्रद्धा सञ्जाताऽस्येत्यश्रद्धितं दैवेन भगवत्प्रेमसुखप्रतिकूलप्राचीनापराधोत्थेनाभाग्येन प्रेरितबुद्धिः सत्यप्रतिज्ञम् उत्तममनस्कम् ॥ १४ ॥

पण्डितमानी पण्डितानां माननीयः न विद्यते ज्ञो यस्मात्सः अस्मदुपेक्षया अस्मत्कर्तृकया उपेक्षयापि स्तब्धः भयाभावादनम्रः मच्छासनमतिक्रम्य गच्छसि विष्णुमिति भावः। तस्मात् न चिरादपि श्रियो भ्रश्यते भगवद्दत्तां नित्यां सम्पदं प्राप्स्यसीत्येवं वास्तवोर्थः ॥ १५ ॥

एनां भूमिं उदकदानपूर्वकम् ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

युद्धशूरान् स्वार्थपरान्निन्दयित्वा दानशूरान् प्रशंसति-सुलभा इति। तीर्थे पात्रे ॥ ९ ॥

ननु, सर्वस्वदाने निर्धनस्य दुर्गतिर्भविष्यतीति आह—मनस्विन इति। यादृशतादृशामपि अर्थिनां कामोपनये कामपूरे कारुणिकस्य कामपूरकस्य दुर्गतिर्न भवति किन्तु शोभनं भवति "नहि कल्याणकृत्कश्चिद् दुर्गतिं तात गच्छति" इति श्रीमुखवचनात् ॥ १० ॥

यज्ञैः क्रतुभिश्च असोमैः ससोमैर्यागैः ॥ ११ ॥ १२ ॥

यदि एष प्रसिद्धः लौकिको जनस्तर्हि मया निहतः शयीतः यदि भवेत्प्रोक्तो वै निश्चितम् उत्तमश्लोकस्तर्हि सर्वेश्वरत्वेन सर्वजयित्वकीर्तिरूपं यशो न जिहासति त्यक्तुं नेच्छति पराजयं नार्हतीत्यर्थः। अतो दानं विनापि मा मां हत्वा एनाम् भुवं हरेत् अतः कुतो दास्यामीति भावः ॥ १३ ॥

श्रद्धा संजाताऽस्येति श्रद्धितस्तद्विपरीतं दानप्रतिज्ञात्यागेऽजातश्रद्धमित्यर्थः। अत एवानादेशकरम् ॥ १४ ॥ १५ ॥ १६ ॥

भाषा टीका।

हे विप्रर्षे युद्ध में शरीर त्याग करने वाले चाहे। बहुत से मिल सकें पर पात्र के आने पर धन त्याग करने वाले दुर्लभ हैं ॥ ९ ॥

विन्ध्यावलिस्तदागत्य पत्नी जालकमालिनी ।
आनिन्ये कलशं हैममवनेजन्यपां भृतम् ॥ १७ ॥
यजमानः स्वयं तस्य श्रीमत्पादयुगं मुदा ।
अवनिज्यावहन्मूर्ध्नि तदपो विश्वपावनीः ॥ १८ ॥
तदाऽसुरेन्द्रं दिवि देवतागणा गन्धर्वविद्याधरसिद्धचारणाः ।
तत्कर्म सर्वेऽपि गृणन्त आर्जवं प्रसूनवर्षैर्ववृषुर्मुदाऽन्विताः ॥ १९ ॥
नेदुर्मुहुर्दुन्दुभयः सहस्रशो गन्धर्वकिम्पूरुषकिन्नरा जगुः ।
मनस्विनाऽनेन कृतं सुदुष्करं विद्वानदाद्यद्रिपवे जगत्त्रयम् ॥ २० ॥
तद्वामनं रूपमवर्धताऽद्भुतं हरेरनन्तस्य गुणत्रयात्मकम् ।
भूः खं दिशो द्यौर्विवराः पयोधयस्तिर्यङ्नृदेवा ऋषयो यदासत ॥ २१ ॥
काये बलिस्तस्य महाविभूतेः सहर्त्विगाचार्यसदस्य एतत् ।
ददर्श विश्वं त्रिगुणं गुणात्मके भूतेन्द्रियार्थाशयजीवयुक्तम् ॥ २२ ॥
रसामचष्टाङ्घ्रितलेऽथ पादयोर्महीं महीध्रान्पुरुषस्य जङ्घयोः ।
पतत्त्रिणो जानुनि विश्वमूर्तेरूर्वोर्गणं मारुतमिन्द्रसेनः ॥ २३ ॥
सन्ध्यां विभोर्वाससि गुह्य ऐक्षत्प्रजापतीञ्जघने आत्ममुख्यान् ।
नाभ्यां नभः कुक्षिषु सप्तसिन्धूनुरुक्रमस्योरसि चर्क्षमालाम् ॥ २४ ॥

भाषा टीका।

कार्पण्यक मनस्वी की यदि किसी भिक्षु की कामना पूरी करने में दुर्गति भी हो, तो वह भी शोभा ही है। और फिर आप सदृश वेद वेत्ताओं के लिये दुर्गति हो तो क्या ही कहना? तस्मात् इस वटुको जो वांछित होगा वह अवश्य ही दूंगा ॥ १० ॥

हे मुने! आम्नाय के विधान में को विद आपलोग जिस को बडे आदर पूर्वक यज्ञों से यजन करते हैं वह सम्पूर्ण वांछित देने वाले यदि विष्णुही हों अथवा और कोई दूसरा ब्राह्मण हो अब तो मैं इसको इच्छित भूमि दूंगा ही ॥ ११ ॥

यद्यपि यह पश्चात् निरपराधी मेरे को भलेंही बांधे तौ भी मैं इस भय भीत को पीडा नहीं दूंगा। क्योंकि? वैरी भी हो तौ भी ब्राह्मण ही का शरीर तौ है ॥ १२ ॥

और यदि यह उत्तम श्लोक अर्थात् विष्णु भगवान् हैं और अपने यश को चाहेंगे तव हमको मारकर भी पृथिवी को छुडा लेंगे। और जो विष्णु नहीं है और अन्याय करेगा तौ मेरे से निहत होकर पृथिवी में शयन करेगा ॥ १३ ॥

श्रीशुक उवाच ॥

श्रीशुकदेवजी वोले, कि—इस प्रकार गुरु वाक्य में नहीं श्रद्धा करने वाले और आज्ञा नहीं करने वाले शिष्य को प्रारब्ध के वश होकर शुक्राचारी ने शाप देदिया, पर शिष्य तौ सत्य प्रतिज्ञा वाला और मनस्वी रहा कुछ न वोला ॥ १४ ॥

शुक्राचारीजी ने कहा कि—हे अज्ञ! तू निश्चय आपको पंडित मानने वाला है और हमारी उपेक्षा से स्तब्ध है, जव तू ने हमारी आज्ञा का उल्लंघन कर दिया तौ अव तूं थोडे ही काल में श्री से भृष्ट होजायगा ॥ १५ ॥

गुरुजी ने इस प्रकार शाप दिया तौ भी राजा सत्य से चलायमान नही हुआ, क्योंकि? महान् है, वस फिर वामन जी को पूजन करके जल से सकल्प पूर्वक इस पृथिवी को दिया ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

जालकं मुक्ताभरणविशेषस्तन्मालावती अवनेजनीनामपां कलशं भृतं पूर्णम् ॥ १७—२० ॥

अवर्धत वाञ्छातः प्रतिगृह्यतामिति बलिना पूर्वमुक्तत्वात् गुणत्रयमात्मनि यस्य तत् अत एव भूः खमित्यादयो यद्यस्मिन्नासत स्थितवन्तः ॥ २१ ॥

ऋत्विगादिसहितो बलिस्तस्य हरेः काये एतद्विश्वं ददर्श॥२२॥
तदेव प्रपञ्चयति—रसामिति पादोनैः सप्तभिः। मारुतं गणं वायु-

श्रीधरस्वामिकृतभावार्थदीपिका ।

सङ्घम् इन्द्रस्य सेनेव सेना यस्य सः इन्द्रपदे स्थितत्वात् अचष्ट पैक्षत ॥ २३ ॥

आत्मा स्वयं बलिर्मुख्यो येषां तानसुरान् ऋक्षमालां नक्षत्रपंक्तिम् ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेव प्रपञ्चयति–विंध्यावलिरिति । बलेः पत्नी विन्ध्यावलिरिति प्रसीद्धा सा जालकमालिनी जालकं मुक्ताभरणविशेषः तन्मालिनी तदा आगत्यावनेजनीनां पादप्रक्षालनार्थानामपामद्भिःभृतं पूर्णं हैमं कलशमानिन्ये आनीतवती ॥ १७ ॥

ततो यजमानो बलिः तस्य भगवतो वामनस्य श्रीमत्पादद्वन्द्वं मुदा प्रक्षाल्य तदपः प्रक्षालनीः अपः विश्वपावनीर्मूर्ध्न्यवहत् ॥ १८ ॥

तदा दिवि स्थिता देवगणाः गन्धर्वादयश्च निर्भयास्सन्तः सर्वे तस्य बलेर्दानरूपं कर्माभितः प्रशंसन्तः आदरादसुरेन्द्रं प्रसूनवर्षैर्मुदा युक्तास्सन्तो ववृषुः ॥ १९ ॥

दुन्दुभयः सहस्रशो नेदुः गन्धर्वादयो जगुः गानप्रकारमेव दर्शयति । मनस्विनाऽनेन बलिना कृतमितरैर्दुष्करं हि यतोऽयं विद्वान् त्रिपदे पादत्रयाय त्रिविक्रमाय वा जगत्त्रयमदात् ॥ २० ॥

इत्येवं सर्वेष्वभिगृणत्सु सत्सु तद्धरेरनन्तस्य वामनं रूपं तदद्भुतं यथातथा अवर्द्धत वाञ्छितं प्रतिगृह्यताम् इति बलिना पूर्वमुक्तत्वाल्लोकत्रयमपि वाञ्छितं प्रतिगृहीतुमवर्द्धतेति भावः । तदेधितं रूपं विशिनष्टि, गुणत्रयं गुणत्रयात्मकं जगदात्मनि स्वस्मिन्यस्य तत् अत एव भूः खमित्यादयो यस्मिन्नासत स्थिताः ॥ २१ ॥

तदा ऋत्विगादिसहितो बलिर्महाविभूतेस्तस्य भगवतः काये गुणत्रयपरिणात्मकजगदाश्रयभूते भूतपञ्चकादियुक्तमेतत्कृत्स्नं विश्वं ददर्श ॥ २२ ॥

तदेव प्रपञ्चयति–रसामिति पादोनैः सप्तभिः । पादतले रसां रसातलमधोलोकमचष्टापश्यत तथा पादयोः महीं पुरुषस्य भगवतो जङ्घयोर्महीध्रान् पर्वतान् जानुनि पतत्रिणः पक्षिणः विश्वमूर्तेर्भगवत ऊर्वोर्मारुतं गणं वायुसङ्घमिन्द्रसेनो बलिः इन्द्रस्य सेनेव सेना यस्य स इन्द्रपुरे स्थितत्वादाचष्टेत्यनुषङ्गः । पैक्षदित्यपकर्षो वा ॥ २३ ॥

विभोर्वासिस वस्त्रे सन्ध्यां जघने आत्मा स्वयं बलिर्मुख्यो येषां तान् प्रजापतीनसुरान् नाभ्यां नभोन्तरिक्षं कुक्षिषु सप्तसिन्धून् समुद्रान् उरुक्रमस्य भगवत उरसि नक्षत्रपङ्क्तिम् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

जालकैः कुड्मलैः कृता मालाऽस्या अस्तीति जालकमालिनी "जालकं कोरकं कलिकाकुड्मलमुकुलानि तुल्यानि" इति हलायुधः अपां भृतं पूर्णजलं अवनेजनी प्रक्षालनमिच्छन्ती ॥ १७ ॥ १८ ॥

आर्यं ज्ञानिनम् असुरेन्द्रम् ॥ १९ ॥

विद्वान्दानफलं शत्रुरिति वा स्वजानिरिपवे वामनाय जगत्त्रयमदादिति यत्तस्मादनेन मनस्विना बलिना सुदुष्करं कृतमित्युक्त्वा जगुः ॥ २० ॥

भूखादयो यस्मिन् रूपे आसन् सावकाशं स्थिताः तद्वामनमणुतरं रूपमवर्धतेत्यन्वयः । गुणत्रयस्यात्माकृतिर्येन तत्तथा तत्—

> "आत्मा जीवे कृतौ देहे स्वभावे परमात्मनि !
> यत्नेऽर्केऽग्नौ मतौ वातेऽप्याखुः सूकरमूषकौ" ॥

इति यादवः ॥ २१ ॥

अर्थाः शब्दादयः आशयो बुद्धिर्वा ॥ २२ ॥

महीध्रान् पर्वतान् इन्द्रसेनो बलिः ॥ २३ ॥

स्वात्ममुख्यं भृत्येषु मुख्यम् ऋक्षमालां नक्षत्रपंक्तिम् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

गुणत्रययुक्त आत्मा यत्र यदिति गुणत्रयसम्वलितं यथा स्यात्तथाऽवर्द्धत इत्यर्थः ॥ २१ ॥

गुणा ऐश्वर्यादयः षट् तदात्मकैः ॥ २२ ॥

इन्द्रसेन इति नूनं बलेर्नामैव स इन्द्रसेनो भगवत् पदाम्बुजं इति श्रीदशमात् ॥ २३ ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

परमलज्जावत्यसूर्य्यं पश्यापि राज्ञी भर्त्तुर्भक्तिनिष्ठामवगम्यानन्दाश्रुस्तिमिता हर्षोत्थं चापल्यं निन्होतुमशक्नुवती दासीरप्यनपेक्षमाणा कलशं वहन्ती वहिर्निश्चक्रामेत्याह–विन्ध्यावलिरिति । जालकं मल्लिकाद्यपककोरक इति केचित् सपुष्पातिकोमलफलमित्यन्ये"क्षारको जालकं क्लीवे"इत्यमरः । जालकं मुक्ताभरणविशेष इति स्वामिचरणाः अवनेजनीनामपां कलशं भृतं पूर्णम् ॥ १७—१८ ॥

तत् तस्य कर्म आर्जवमकौटिल्यं च गृणन्तः स्तुवन्तः ॥ १९-२० ॥

अवर्द्धत वाञ्छातः प्रतिगृह्यतामिति बलिना पूर्वमुक्तत्वात् गुणत्रयं मया तत्कार्य्यं च आत्मनि सर्वाधिष्ठानत्वात् स्वस्मिन्नेव यस्य तत् अत एव भूः खमित्यादयो यद्यस्मिन् आसन् स्थितवन्तः ॥ २१ ॥

गुणानाम् आत्मके उत्तमाधिष्ठातरि भूतानि च इन्द्रियाणि च अर्थाः शब्दादयश्च आशयोऽन्तःकरणानि च जीवांश्च तैर्युक्तम् ॥ २२ ॥

तदेव प्रपञ्चयति–रसामिति पादोनैः सप्तभिः । रसां भूतलं महीं भूतलो परिस्थान् नगरगृहाट्टवृक्षादीनित्यर्थः । महीध्रान् तदुपरिगतान् पर्वतानित्यर्थः । पतत्रिणस्तदुपरिचरान् पक्षिणः मारुतं गणं वायुसङ्घम् इन्द्रस्य सेनेव सेना यस्य सः ॥ २३ ॥

आत्ममुख्यान् बलिप्रधानानसुरान् भूतलस्थितोऽपि बलिः स्वेषां तज्जघनाधिष्ठानत्वाज्जघन एवैक्षत इत्यर्थः । एवमग्रेपि ज्ञेयम् ॥ २४ ॥

हृत्यङ्ग ! धर्मं स्तनयोर्मुरारे ऋतं च सत्यं च मनस्यथेन्दुम् ।
श्रियं च वक्षस्यरविन्दहस्तां कण्ठे च सामानि समस्तरेफान् ॥ २५ ॥
इन्द्रप्रधानानमरान्भुजेषु तत्कर्णयोः ककुभो द्यौश्च मूर्ध्नि ।
केशेषु मेघाञ्छ्वसनं नासिकायामक्ष्णोश्च सूर्यं वदने च वह्निम् ॥ २६ ॥
वाण्यां च छन्दांसि रसे जलेशं भ्रुवोर्निषेधं च विधिं च पक्ष्मसु ।
अहश्च रात्रिं च परस्य पुंसो मन्युं ललाटेऽधर एव लोभम् ॥ २७ ॥
स्पर्शे च कामं नृप ! रेतसांऽभः पृष्ठे त्वधर्मं क्रमणेषु यज्ञम् ।
छायासु मृत्युं हसिते च मायां तनूरुहेष्वोषधिजातयश्च ॥ २८ ॥
नदीश्च नाडीषु शिला नखेषु बुद्धावजं देवगणानृषींश्च ।
प्राणेषु गात्रे स्थिरजङ्गमानि सर्वाणि भूतानि ददर्श वीरः ॥ २९ ॥
सर्वात्मनीदं भुवनं निरीक्ष्य सर्वेऽसुराः कश्मलमापुरङ्ग ! ।
सुदर्शनं चक्रमसह्यतेजो धनुश्च शार्ङ्गं स्तनयित्नुघोषम् ॥ ३० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

जावकं मुक्ताभरणविशेषस्तन्मयमालावती अवनेजनीनां चरणप्रक्षालनार्थानामपामद्भिः भृतं पूर्णम् ॥ १७—२० ॥

तद्वामनं रूपम् अत्यद्भुतं यथा भवति तथा अवर्द्धत मम ईपत्पदा सम्मितामित्युक्तवाद्वाञ्छातः प्रतिगृह्यतामिति विपुलाप्युक्तत्वात् लोकत्रयं गृहीतुं किञ्चिदेवावर्द्धत तद्देह-महत्त्वं तु "क्वेदृग्विधाविगणिताण्डपराणुचर्यावाताध्वरोमविवरस्य च ते महित्वम्" इत्यादौ द्रष्टव्यम् गुणत्रयं प्रधानमात्मनि यस्य तत् अत एव भ्वादयः यद्यत्र आसत स्थितवन्तः ॥ २१ ॥

गुणात्मके स्वासाधारणगुणाश्रये तस्य कायेन ऋत्विगादि-सहितो बलिः एतद्विश्वं ददर्श ॥ २२ ॥

तदेव वर्णयति—रसामिति, पादोनैः सप्तभिः। रसां भूविवरात्मिकां महीं भुवि उपरि भागं तदुपरि गतान् महीध्रान् तदुपरिचरान् पतत्रिणः मारुतगणं वायुसङ्घश्च पादतलादिषु यथाक्रमम् इन्द्रस्य सेनेव सेना यस्य स बलिः अचष्ट अपश्यत् ॥ २३ ॥

आत्मा स्वयं बलिस्तत्प्रधानात् ॥ २४ ॥

भाषा टीका।

उस समय पर रानी विंध्यावलि जी मुक्ताओं के आभरणों की माला पहिरे हुये श्रीवामनजी के चरण धोने के लिये जल के भरे हुये सोने के कलश को ले आई ॥ १७ ॥

और यजमान राजा बलि श्रीवामनजी के छोटे२ श्रीमच्चरणार विन्दों को आनन्द से प्रक्षालन कर उस भुवन पवित्र करने वाले जल को मस्तक पर धारण करते हुए ॥ १८ ॥

उस समय आकाश में देव गण, गंधर्व, विद्याधर, सिद्ध, चारण, ये सब ही बलि के इस आर्जव कर्म को गाते हुए बडे हर्षित होकर बलि के ऊपर पुष्पों की वर्षा करते हुए ॥ १९ ॥

और बारंबार दुंदुभी बाजने लगी, तथा हजार हों गंधर्व किं-पुरुष, किन्नर लोग गाने लगे, कि—इस मनस्वीने बडाही दुष्कर किया, क्योंकि ? जानकर भी वैरी को तीनों जगत दे दिये॥ २० ॥

वस फिर तौ वह अनंत हरि का अद्भुत वामन रूप गुणत्रया-त्मक बढने लगा कि—जिसमें पृथिवी, आकाश, दिशायें, स्वर्ग, पताल, पयोधि, मनुष्य, देव, ऋषि, इत्यादि ये सब स्थित हैं ॥२१॥

उस समय पर राजा बलि ने महाविभूति श्रीहरि के गुणा-त्मक शरीर में ऋत्विक आचार्य और सभासदों के सहित त्रिगुणात्मक सम्पूर्ण भूत, इन्द्रिय, अर्थ, आशय, जीव, युक्त विश्व को देखा ॥ २२ ॥

रसातल को पुरुष के चरणतल में देखा, और चरणों में पृथिवी को देखा, और विश्वमूर्ति के जानुदेश में पक्षियों को, ऊरू अर्थात् जाँधों में मारुतसमूह को इन्द्रसेन ने देखा ॥ २३ ॥

तथा विभु के वस्त्रों में संध्या को देखा, गुह्यस्थल में प्रजा-पतियों को और जघन में अपने से आदि लेकर सब दैत्यों को देखा, तथा नाभि में नभ, कुक्षि में सातों समुद्रों को, और उरु-क्रम के वक्षस्थल में नक्षत्र माला को देखा ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिकायाम्

अङ्ग, हेराजन् ! समस्तान् रेफांश्च शब्दान् ॥ २५ ॥
द्यौश्च द्यां च ॥ २६ ॥
रसे रसने ॥ २७ ॥

पर्जन्यघोषो जलजः पाञ्चजन्यः कौमोदकी विष्णुगदा तरस्विनी ।
विद्याधरोऽसिः शतचन्द्रयुक्तस्तूणोत्तमावक्षयसायकौ च ॥ ३१ ॥
सुनन्दमुख्या उपतस्थुरीशं(१) पार्षदमुख्याः सह लोकपालाः ।
स्फुरत्किरीटाङ्गदमीनकुण्डलः श्रीवत्सरत्नोत्तममेखलाम्बरैः ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

रेतसा रेतसि क्रमणेषु पादन्यासेषु ओषधिजातय ओषधिजातीः ॥ २८ ॥

प्राणेष्विन्द्रियेषु ॥ २९ ॥

सर्वात्मनीत्यादिवाक्यान्तरम् । सुदर्शनमित्यादीनामीशमुपतस्थुरित्युत्तरेणाऽन्वयः ॥ ३० ॥

विद्याधरसंज्ञोऽसिः ॥ ३१ ॥

मीनकुण्डले मकरकुण्डले स्फुरन्ति किरीटादीनि यस्य सः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

अङ्ग हे राजन् ! हृदि धर्मं मुरारेः स्तनयोः ऋतं च शब्दसत्यमर्थसत्यं च सत्यं च तदभिमानिदेवतामित्यर्थः । अथ मनसि चन्द्रमसं वक्षस्यरविन्दं च हस्ते यस्यास्तां श्रियं लक्ष्मीं कण्ठे सामानि समस्तान् रेफांश्च शब्दादीन् ॥ २५ ॥

भुजेषु इन्द्रः प्रधानो मुख्यो येषां तान् सुरान् तस्य भगवतः कर्णयोःककुभः दिशः मूर्द्धि द्यौः द्यां च केशेषु मेघान् नासिकायां श्वसनं श्वासात्मकं वायुं वाह्यवायोरुक्तत्वादक्ष्णोर्नेत्रयोः सूर्यं वदने मुखे वह्निम् ॥ २६ ॥

वाण्यान्तु छन्दांसि वेदान् रसने रसनेन्द्रिये जलेशं वरुणं भ्रुवोर्निषेधं निवृत्त्यात्मकं शास्त्रार्थं विधिं प्रवृत्त्यात्मकं शास्त्रार्थं पक्ष्मसु अहश्च रात्रिश्च परमपुरुषस्य ललाटे मन्युमधरोष्ठे लोभम् ॥ २७ ॥

स्पर्शे त्वगिन्द्रिये कामं रेतसा जलं पृष्ठे त्वधर्मं क्रमणेषु पादन्यासेषु यज्ञं छायासु मृत्युमन्तकं हसिते मायां तनूरुहेषु लोमसु औषधिजातीः ॥ २८ ॥

नाडीषु नदीः नखेषु शिलाः बुद्धौ अजं ब्रह्माणं देवगणानृषींश्च प्राणेषु इन्द्रियेषु गात्रे चराचरात्मकानि भूतानि सर्वाणि परस्परविलक्षणान्यपश्यत् ॥ २९ ॥

इत्थं सर्वात्मनि कृत्स्नजगदाश्रयभूते भगवतीदं भुवनं विश्वं निरीक्ष्य अङ्ग हे राजन् ! सर्वेऽसुराः कश्मलं किमेतदित्याश्चर्यं दुःखं वा प्रापुः सुदर्शनञ्चक्रमित्यादीनामीशं भगवन्तम् उपतस्थुरित्युत्तरेणान्वयः । चक्रं विशिनष्टि, सुदर्शनाभिधमसह्यं तेजो यस्य. धनुर्विशिनष्टि, शार्ङ्गाभिधं स्तनयित्नोरिव घोषो यस्य तत् ॥ ३० ॥

जलजं शङ्खं विशिनष्टि, पाञ्चजन्याभिधः पर्जन्यस्येव घोषो यस्य. गदां विशिनष्टि, कौमोदक्यभिधा तरस्विनी बलवती असिं खड्गं विशिनष्टि, विद्याधरोऽभिधो वा विद्याया आधारः तस्यैव नंदक इति नामान्तरञ्च तं चन्द्राकाराणि मंडलानि यस्य तेन चर्मणा खेटाख्येन युक्तः तूणोत्तमौ तूणश्रेष्ठौ विशिनष्टि अक्षयसायकाभिधौ इदमन्वर्थं नाम ॥ ३१ ॥

(१)सुनन्दनः मुख्यः आदिर्येषां ते हरेः पार्षदाश्च लोकपालैः सहिता ईशमुपतस्थुः ईशस्य समीपे स्वस्वस्थानेषु स्थितवन्त इत्यर्थः । तदा हे राजन् उरुक्रमो भगवान् स्फुरद्भिः किरीटादिभिः मधुव्रतानां स्रक् पंक्तिर्यस्यां तया वनमालया चावृतो व्याप्तो ऽलङ्कृत इति यावत् रराज तत्र मीनाकारे कुण्डले रत्नोत्तमः कौस्तुभः कुण्डले इत्यन्तस्य पृथक्पदत्वे स्फुरन्ति किरीटादीनि यस्य सः श्रीवत्सादिभिर्वनमालया चावृतो रराजेत्यर्थः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

समस्तरेफान् सर्वशब्दान् ॥ २५ ॥ २६ ॥
रसे रसनायां मन्युं क्रोधाभिमानिनं देवम् ॥ २७ ॥
रेतस उद्भूतम् ॥ २८—३० ॥
वैद्याधरो विद्याधरसम्बन्धी ॥ ३१ ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

हृद्यमिति पञ्चकम् । तत्र अधर एवेत्यस्मादेवकारः सर्वत्र योज्यः अधरप्रकाशाप्रकाशयोर्लोभालोभावगमात्तस्मिन् लोभत्वं छायासु तत्प्रकाशप्रतिकूलेषु भावेषु हासिते कौतुकविशेषे तदाभिव्यक्तेति भावः ॥ २५—३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ऋतं प्रियवाक्यं समस्तान् रेफान् रेफोपलक्षितानकारादिसर्ववर्णान् ॥ २५ ॥

द्यौश्च द्याम् ॥ २६ ॥

रसे रसने पक्ष्मसु पक्ष्मोन्मीलननिमीलनयोः ॥ २७ ॥

रेतसा रेतसि क्रमणेषु पादविन्यासेषु ओषधिजातीश्च ॥ २८ ॥

प्राणेष्विन्द्रियेषु ॥ २९—३० ॥

तदेव प्रत्यक्षीभूय सुदर्शनादयः ईशमुपतस्थुरिति द्वाभ्यामन्वयः । विद्याधरसंज्ञोऽसिः शतचन्द्रं फलकं तद्युक्तः ॥ ३१ ॥

पार्षदेषु मुख्याः सुनन्दमुख्या इति तेष्वपि सुनन्दो मुख्य इत्यर्थः । कुण्डलं इत्यन्तं पृथक् पदम् ॥ ३२ ॥

(१) स्वपार्षदमुख्याः इति वीर० ।

(१) अत्र (३२—३३) श्लोकयोर्व्याख्या एकान्वयेन द्रष्टव्या सुधीभिः ।

मधुव्रतस्रग्वनमालया वृतो रराज राजन् ! भगवानुरुक्रमः ।
क्षितिं पदैकेन बलेर्विचक्रमे नभः शरीरेण दिशश्च बाहुभिः ॥ ३३ ॥
पदं द्वितीयं क्रमतस्त्रिविष्टपं न वै तृतीयाय तदीयमण्वपि ।
उरुक्रमस्याङ्घ्रिरुपर्युपर्यथो महर्जनाभ्यां तपसः परं गतः ॥ ३४ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्याम् अष्टमस्कन्धे विश्वरूपदर्शनं नाम
विंशोऽध्यायः ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मङ्क्षु हे परीक्षित् ! ऋतं प्रियवाक्यं सत्यं च समस्तरेफान् शब्दान् ॥ २५ ॥

द्योयाम् ॥ २६ ॥

रसे रसने ॥ २७ ॥

स्पर्शे त्वगिन्द्रिये रेतसा रेतसि क्रमणेषु पादन्यासेषु मायाम् अत्याश्चर्यरूपं विश्वमोहिनीचेष्टाविशेषम् ओषधिजातयः ओषधिजातीः ॥ २८ ॥

प्राणेषु इन्द्रियेषु किं बहुना गात्रे देहे सर्वाणि भूतानि ददर्श ॥ २९ ॥

सर्वात्मनि सर्वाश्रये इदं भुवनं निरीक्ष्य असुरा कश्मलमापुः सुदर्शनमित्यादीनामीशमुपतस्थुरित्यनेनान्वयः ॥ ३१ ॥

सुनन्दनमुख्याः पार्षदाः मुख्याः अग्रतः स्थिता येषां ते ऋषयः केचित् लोकपालैः सहिताः ईशमुपतस्थुः स्फुरन्ति किरीटादीनि यस्य सः श्रीवत्सादिभिः ॥ ३२ ॥

भाषा टीका ।

हे राजन् ! मुरारि के हृदय में धर्म को, स्तनों में ऋत और सत्य को, मन में चन्द्रमा को, वक्षस्थल में कमलहस्ता लक्ष्मी जी को, और कण्ठ में साम वेद और समस्त शब्दों को देखा॥२५॥

और हरि के भुजाओं में इन्द्रादिक देव, कर्णों में दिशायें, मस्तक में स्वर्ग केशोंमे मेघ, नासिका में पवन नेत्रों में सूर्य, मुख में अग्नि को देखा ॥ २६ ॥

और परम पुरुष की वाणी में छन्दों को जिह्वामें वरुण को, भृकुटि में विधि निषेध, पलकों में दिनरात, ललाट में मृत्युः अधर (नीचे के होठ) में लोभ को देखा ॥ २७ ॥

तथा स्पर्शमें काम, वीर्य में जल, पीठ में अधर्म, चाल में यज्ञ, छाया में मृत्यु, हसन में माया, रोमों में ओषधियों की जाति ॥ २८ ॥

नाडियों में नदी, नखों में शिला, बुद्धि में ब्रह्मा, प्राणोंमें देवगण और ऋषि लोगोंको, गात्र में स्थावर जङ्गम सर्व भूत प्राणियों को वीर राजा बलि ने देखा ॥ २९ ॥

इस प्रकार। हे राजन् ! सर्वात्मा श्रीहरि में इस भुवन को देखकर सब असुर लोग घवडाये और इतने में ही असह्य तेजवाला सुदर्शन चक्र, और मेघगम्भीर घोषवाला शार्ङ्गधनुष, ॥ ३० ॥

मेघ की गर्जना के सदृश घोषवाला पांचजन्य शङ्ख तथा बडे वेग वालीविष्णुकी गदा कौमोदकी, शतचन्द्र नामक ढाल सहित विद्याधरखड्ग और अक्षय बाणों से भरे हुए दोनों तरकस इत्यादिक सब प्रभु के अस्त्र शस्त्र ॥ ३१ ॥

और सुनन्द से आदि कर जो पार्षद हैं वे सब तथा समस्तलोकपाल, ये सब ही प्रभु को उपस्थित हुए, और उस समय भगवान् भी स्फुरायमाणकिरीट, बाजूबन्द, मकरकुण्डल, श्रीवत्स, और बहुत से रत्न तथा मेखला [कोंधनी] और वस्त्रों से ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मधुव्रतानां स्रजो यस्यां तया वनमालया श्रीवत्सादिभिश्चावृतो व्याप्तः उरुक्रमत्वमेवाऽऽह–क्षितिमिति ॥ ३३ ॥

द्वितीयं पदं क्रमतो विक्षिपतस्त्रिविष्टपं तदीयं किञ्चिन्मात्रं जातं तृतीयाय तु न किञ्चिदपि तत्र हेतुः उरुक्रमस्याङ्घ्रिस्त्रिविष्टपादुपर्युपरि गच्छन्महर्जनाभ्यां तपसश्च परं गतः सत्यलोकं गत इति॥३४॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
विंशोऽध्यायः ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उरुक्रमत्वमेवाह–बलेः सम्बन्धिनीं क्षितिम् एकेन पदा शरीरेण नभोऽन्तरिक्षं बाहुभिर्दिशः विचक्रमे आक्रान्तवान् ॥३३॥

एवमाक्रस्य द्वितीयं पदं त्रिविष्टपं क्रमतः हरेस्तृतीयाय पादाय तदीयं बलेः सम्बन्ध्यण्वपि वस्तु नासीत्. तत्र हेतुस्त्रिविक्रमस्य

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

अङ्घ्रिस्त्रिविष्टपादुपर्युपरि गच्छन्महर्जनाभ्यां तपसश्च परं सत्यलोकं गतः इति ॥ ३४ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
विंशोऽध्यायः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

कियत्पर्यन्तमवर्धतेति तत्राह, क्षितिमिति ॥ ३३ ॥ ३४ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
विंशोऽध्यायः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

एकेन दक्षिणेन पदा विक्षिप्यमाणचरणेन ॥ ३३ ॥

द्वितीयं वामचरणं विक्षिपतस्तस्य त्रिविष्टपं तदीयं तत्पद-सम्बन्धि सत् अणु यत् किञ्चिदेव जातं तृतीयाय पुनर्विक्षिप्यमाण-वामचरणायतु अण्वपि नावशिष्टमित्यर्थः। शरीरादिभिर्नभ आदि-व्याप्तिश्च मिलितत्रिपदमात्रभूमेरपि तस्य नाऽन्याप्ता तावद्-भूमावूर्द्ध्वावस्थितैरप्यवेक्षितत्वात् ॥ ३४ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
विंशोऽध्यायः ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

मधुव्रतानां स्रक् मालाकारसमूहो यत्र तथाभूतया वन-मालया वृतो व्याप्तः उरुक्रमत्वमेवाह—क्षितिमिति। द्वितीयं वामपदं क्रममाणस्य तस्य त्रिविष्टपं तदीयं प्राप्तमेवाभूदिति शेषः। तृतीयाय तृतीयपदन्यासार्थम् अण्वपि अणुमात्रमपि नाव-शिष्टमित्यर्थः। अत्र त्रिपदमात्रभूमेः प्रतिगृहीतत्वेऽपि भुजाद्यङ्गैर्नभ आदिव्याप्तिश्च नाऽन्याप्ता तावद्भूमावूर्द्ध्वावस्थितैरप्यपेक्षितत्वा-दिति सन्दर्भः। नभ आदीनामपि पदद्वयान्तर्भूतत्वात् पदद्वयेनैव व्याप्तिरुक्तेत इत्यपरे ॥ ३३ ॥

द्वितीयं पदं कियत्प्रवृद्धमभूदित्यपेक्षायामाह—महर्जनाभ्यां सकाशात् तपसश्च सकाशात् परं सत्यलोकं गतः तदीयो नखस्तु कटाहं बिभेदेति केचित् अष्टावावरणानि भित्त्वा विर-जाजले प्रविष्ट इत्यन्ये ॥ ३४ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।
विंशोऽध्यायोऽष्टमे स्कन्धे सङ्गतः सङ्गतः सताम् ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

मधुव्रतानां स्रजो यस्याः तया वनमालया च आवृतोऽसौ विरराज बलेः क्षितिम् एकेन पदा शरीरेण नभः बाहुभिर्दिशश्च विचक्रमे आक्रान्तवान् ॥ ३३ ॥

एकेन पदा क्षितिमाक्रम्य तस्यां द्वितीयपादप्रसारणावकाशा-भावात् द्वितीयं पदं तदीयं त्रिविष्टपं प्रतिक्रमतः विक्षिपतः उरुक्रमस्य अङ्घ्रिः त्रिविष्टपात्तदीयात् उपरि उपरि गच्छन्महर्जना-भ्यां तपसश्च परं सत्यलोकं गतः लोकत्रयं तदीयं पादद्वय-परिमितमपि नासीत् अथो तृतीयपादन्यासार्थं तदीयमण्वपि अणुमात्रमपि नावशिष्टम् ॥ ३४ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
विंशोऽध्यायार्थप्रकाशः ॥ २० ॥

भाषा टीका।

और हे राजन्! मत्त भ्रमर युत माला और वनमालों से भी भगवान् उरुक्रम बडी शोभा को प्राप्त होते हुए॥ और उस समय बलि राजा की पृथिवी को एक पग से नापली और आकाश को शरीर से, दिशों को बाहुओं से माप लिये ॥ ३३ ॥

और दुसरा पग उठाकर स्वर्ग भी नाप लिये, अब तीसरे पग के लिये बलि का कुछ अणुमात्र भी बाकी नहीं रहा। और उरु-क्रम भगवान् का श्रीचरण तो ऊपर २ बढताही गया, फिर महर्जन और तप से भी परे चले गये ॥ ३४ ॥

इति श्रीमद्भागवत अष्टमस्कन्ध में विंश अध्याय की
श्रीवृन्दावनस्थ भगवताचार्यकृत
भाषा टीका समाप्ता ॥ २० ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे विंशोऽध्यायः ॥ २० ॥

॥ एकविंशोऽध्यायः ॥

श्रीशुक उवाच ।

सत्यं समीक्ष्याब्जभवो नखेन्दुभिर्हतस्वधामद्युतिरावृतोऽभ्यगात् ।
मरीचिमिश्रा ऋषयो बृहद्व्रताः सनन्दनाद्या नरदेव ! योगिनः ॥ १ ॥
वेदोपवेदा(१) नियमान्विता यमास्तर्केतिहासाङ्गपुराणसंहिताः ।
ये चापरे योगसमीरदीपितज्ञानाग्निना रन्धितकर्मकल्मषाः ॥ २ ॥
ववन्दिरे यत्स्मरणानुभावतः स्वायम्भुवं धाम गता अकर्मकम् ।
अथाङ्घ्रये प्रोन्नमिताय विष्णोरुपाहरत्पद्मभवोऽर्हणोदकम् ।
समर्च्य भक्त्याऽभ्यगृणाच्छुचिश्रवा यन्नाभिपङ्केरुहसम्भवः स्वयम् ॥ ३ ॥
धातुः कमण्डलुजलं तदुरुक्रमस्य पादावनेजनपवित्रतया नरेन्द्र ! ।
स्वर्धुन्यभून्नभसि सा पतती निमार्ष्टि लोकत्रयं भगवतो विशदेव कीर्तिः ॥ ४ ॥

ब्रह्मादयो लोकनाथाः स्वनाथाय समादृताः ।
सानुगा बलिमाजह्रुः संक्षिप्तात्मविभूतये ॥ ५ ॥
तोयैः समर्हणैः स्रग्भिर्दिव्यगन्धाऽनुलेपनैः ।
धूपैर्दीपैः सुरभिभिर्लाजाक्षतफलाङ्कुरैः ॥ ६ ॥
स्तवनैर्जयशब्दैश्च तद्वीर्यमहिमाङ्कितैः ।
नृत्यवादित्रगीतैश्च शङ्खदुन्दुभिनिःस्वनैः ॥ ७ ॥
जाम्बवानृक्षराजस्तु भेरीशब्दैर्मनोजवः ।
विजयं दिक्षु सर्वासु महोत्सवमघोषयत् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एकविंशे पदापूर्त्तिमिषेण बलिबन्धनम् ।
विष्णुना कृतमुत्कर्षं तस्य ख्यापयितुं जने ॥

उरुक्रमस्याङ्घ्रिस्तपसः परं गत इत्युक्तं ततः किं वृत्तं तदाह—सत्यं सत्यलोकं प्राप्तं तमङ्घ्रिं समीक्ष्याऽब्जभवोऽभ्यगात् तथा मरीचिमिश्रा ऋषयश्चेति द्वयोरन्वयः। कथम्भूतोऽब्जभवः हरेरङ्घ्रेर्नखा एवेन्दवस्तैर्हता स्वधाम्नो द्युतिर्यस्य सः स्वयं च तैरावृतश्छन्नः ; हे नरदेव ! बृहद्व्रता योगिनश्च ॥ १ ॥

अङ्गानि शिक्षादीनि पुराणानि तत्संहिताश्च योग एव समीरस्तेन दीपितं ज्ञानमेवाग्निस्तेन रन्धितं दग्धं कर्मकल्मषं कर्ममलं येषाम् ॥ २ ॥

ते च सर्वे तमङ्घ्रिं ववन्दिरे यस्याङ्घ्रेः स्मरणाऽनुभावतः अकर्मकं कर्मभिरप्राप्यम् विष्णोरङ्घ्रये स्वयं यस्य नाभिपङ्केरुहसम्भवस्तस्य विष्णोरङ्घ्रिं समर्च्य ॥ ३ ॥

लोकत्रयं निमार्ष्टि पवित्रयति ॥ ४ ॥

संक्षिप्ता उपसंहृताऽऽत्मविभूतिः स्वविस्तारो येन तस्मै यथापूर्वं वामनरूपेण स्थितायेत्यर्थः ॥ ५—८ ॥

---

(१) नियमानयान्विताः । इति वीर० ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

त्रिविक्रमस्याङ्घ्रिस्तपसः परङ्गत इत्युक्तम् ततः किं वृत्तं तदाह—सत्यमित्यादिना। सत्यं सत्यलोकं गतवन्तमङ्घ्रिं समीक्ष्याब्जभवो ब्रह्मा तदङ्घ्रेर्नखेन्दुभिर्हता स्वधाम्नो द्युतिर्यस्य तादृशः आदरयुक्तोऽभ्यगात् तथा मरीच्यादय ऋषयः हे नरदेव ! ब्रह्मनिष्ठाः सनन्दनादयो योगिनश्च ॥ १ ॥

वेदादयस्तदाभिमानिदेवताः अन्ये च तल्लोकवासिनः योग एव समीरो वायुस्तेन दीपितेन ज्ञानाग्निना रन्धितं दग्धं कर्म पुण्यपापरूपं कर्म तदेव कल्मषं येषां ते तत्र नयान्विताः मीमांसान्यायोपेताः वेदोपवेदरूपा निगमाः तत्र ऋगादयो वेदाः आयुर्वेदादयः उपवेदाः अङ्गानि शिक्षादीनि पुराणानि ब्रह्मादीनि संहिताः पञ्चरात्रादयः त एते तत्तदभिमानिनो देवगणाः मरीच्यादयश्च ये चाकर्मकं ज्ञानयोगप्रचुरं स्वायम्भुवं धाम सत्य लोकंगताः तत्रोषितवन्तः ते सर्वे ववन्दिरे, तमङ्घ्रिमितिशेषः। यत्स्मरणप्रभावतः यस्यभगवदङ्घ्रेस्स्मरणप्रभावात् स्वायंभुवं धाम गताः इत्यनेन विच्छिन्नभगवद्भक्तियोगानां केषाञ्चित्तन्निष्पत्तये प्राक्तनारब्धयोगप्रभावाच्चतुर्मुखलोकप्राप्तिरित्यभिप्रेतम्. नत्विदं क्रममुक्त्यभिप्रायकं, तस्या अप्रामाणिकत्वादिति भावः । अथ शुचिश्रवाः विमलकीर्त्तिः पद्मभवो ब्रह्मा स्वयं यस्य नाभिकमलादुत्पत्तिस्तस्य विष्णोरङ्घ्रये प्रोन्नमिताय प्रकृष्टमूर्ध्वं प्रसृताघार्हणादिकमर्घ्यादिकम् उपाहरत् समर्पितवान् एवं सम्यगभ्यर्च्य भक्त्याऽभ्यगृणादस्तौत् ॥ २ । ३ ॥

तदा हे नरेन्द्र ! धातुः पद्मजस्य कमण्डलुजलं तदुरुगायत्पादयोः प्रक्षालनार्थं निक्षिप्तं उरुक्रमस्य पादयोरवनेजनेन प्रक्षालनेन निमित्तेन पवित्रतया स्वर्धुनी धुनद्यभूत् सा स्वर्धुनी भगवतः कीर्त्तिरिव विशदा निर्मला नभसि भुवमण्डले पतती नभसांधः स्रवन्ती लोकत्रयं निमार्ष्टि पवित्रीकरोति ॥ ४ ॥

ततः संक्षिप्तोपसंहृता आत्मविभूतिः स्वदेहविस्तारो येन तस्मै यथापूर्वं वामनरूपेण स्थिताय स्वनाथाय भगवते लोकानां नाथाः सानुगाः ब्रह्मादयः बलिं पूजां तोयादिभिः समाजह्रुः कृतवन्तः ॥ ५ ॥

तत्र समर्हणैः तोयैरर्घ्यादिजलैः सुरभिभिरिति स्रगादीनां विशेषणम् उत्कराः अङ्कुरास्तैः ॥ ६ ॥

स्तवनैः स्तोत्रैः भगवद्वीर्यमहिमाङ्कितैः ॥ ७ ॥

ऋक्षाणामधिपतिर्जाम्बवान् मनोवेगः आगत्य भेरीशब्दैः सर्वासु दिक्षु विजयसूचकं महोत्सवरूपं घोषं कारयामास ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सर्वस्वापहरणेपि भगवद्भक्तस्याण्वपि मनोदुःखं न स्यादिति दर्शयितुमुत्तराध्यायारम्भः, तत्रादौ ब्रह्मणोऽतिथेरागमने पादार्चनादिगार्हस्थ्यधर्मप्रदर्शनप्रकारं वक्ति—सत्यमिति । हता स्वधाम्नः सत्यधाम्नो द्युतिर्यस्य स तथा नखेन्दुभिर्हरेरिति शेषः । आवृतः परिवारैरिति शेषः । अभ्यगात्पाददेशमिति शेषः ॥ १—२ ॥

यस्य हरेः स्मरणाऽनुभावः निरन्तरोपास्तिप्रभावस्तस्मात् "अनुभावः प्रभावेस्यान्निश्चये भावसूचके" इति यादवः । स्वायम्भुवं स्वयं भुवो ब्रह्मणो विद्यमानं धाम गृहं सत्यलोकं गताः मरीचिप्रधानास्तस्य अकर्मणा ज्ञानेन प्राप्यं यत्तत्पदं ववन्दिरे इत्यन्वयः । यस्य हरेस्तस्य विष्णोस्तत्कमण्डलुजलं स्वर्धुनी स्वर्गङ्गा नदी अभूत् निमार्ष्टि शुद्धं करोति ॥ ३—४ ॥

असंक्षिप्ता सङ्कोचरहिता अपरिमितात्मभूतिः स्वरूपश्रीर्येन स तथा तस्मै "भूतिः श्रीर्जन्म भस्मनि" इति च ॥ ५—६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सत्यमिति सार्द्धयुग्मकम् । संहिताः ब्रह्मसंहिताद्याः अकर्मकं कर्मबन्धरहितं यथास्यात्तथा गताः अनन्तरं ब्रह्मणा सह मोक्षात् ॥ १ ॥ २ ॥ ३ ॥

धातुरिति पञ्चमस्कन्धे तु वामपादाङ्गुष्ठनखनिर्भिन्नोर्ध्वाण्डकटाहवहिस्थ जलनिर्झर एव गङ्गेयं जाता सा च सहस्रयुगक्रमेणैव सुमेरुपृष्ठमवततारेत्युक्तं तत्रेदं प्रतिपद्यामहे यथाधुना गङ्गाविर्भवति तथाऽन्यदापीति श्रूयते वर्ण्यतेहि पुराणान्तरे वास्कलिस्थे वलियज्ञवत् श्रीवामनागमनादिकम् एवमेव धुन्धुच्छलनं तस्मात् पूर्वं तथा व्यवहारः सम्प्रतिरप्येवमेवेति स्थिते सतीदेहत्यागानन्तरं कैलासे गङ्गावर्णनं सम्भवतीति निष्पक्षा शुभ्रा ॥ ४ ॥

ब्रह्मादय इति त्रिकम् ॥ ५—१५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

आनर्च चरणं ब्रह्मा दैत्यान् युद्धान्न्यवारयत् ।
बलिस्तं गरुडो बध्नादेकविंशेऽर्थकोविदः ॥

अङ्घ्रिः सत्यलोकं गत इत्युक्तं ततः किं वृत्तमित्यत आह सत्यमिति । नखा एव इन्दवस्तैः सह सत्यं सत्यलोकं समीक्ष्याब्जभवो ब्रह्मा अभ्यगात् मारीच्यादयश्चाभ्यगुः ववन्दिरे अब्जभवश्च ववन्दे इत्युभयेषामुभयोरुभयक्रियान्वयः । कीदृशः ? नखेन्दुभिर्हतास्तिरस्कृताः स्वधामद्युतयो यस्य सः स्वयं च तैरावृत इत्यन्वयः । तर्को न्यायशास्त्रम् इतिहासो भारतादिः अङ्गानि शिक्षादीनि. पुराणानि ब्राह्मादीनि संहिता ब्रह्मसंहिताद्याः ॥ १ ॥ २ ॥

अकर्मकं न विद्यन्ते कर्माणि निकृष्टकर्माणि साधनत्वेन यस्य तम् अभ्यगृणात् तुष्टाव ॥ ३ ॥

कमण्डलुजलं पादावनेजनेन पवित्रंभूत्वा गङ्गाऽभूत् पञ्चमस्कंधे तु सुमेरुवर्णने वामपादाङ्गुष्ठनखनिर्भिन्नोर्ध्वाण्डकटाहबहिर्जलधारैव गङ्गा क्वचित्तु साक्षान्नारायण एव द्रवरूपेण गङ्गेत्यतो जलत्रितयमेव मिलितं गंगाऽभूदिति ज्ञेयं पतन्ती निमार्ष्टि पवित्रयति ॥ ४ ॥

सङ्क्षिप्तात्मविभूतये त्रिविक्रमस्वरूपमन्तर्धाप्य वामनस्वरूपेणैव स्थितायेत्यर्थः । तदैव ब्रह्मादयस्तत्रैवागत्य तोयादिभिः पाद्यादिभिर्बलिं पूजाम् आजह्रुरुपकल्पयामासुः ॥ ५ ॥ १० ॥

महीं सर्वां हृतां दृष्ट्वा त्रिपदव्याजयाच्ञया।
ऊचुः स्वभर्तुरसुरा दीक्षितस्यात्यमर्षिताः॥ ९ ॥
दैत्या ऊचुः।
न वा अयं ब्रह्मबन्धुर्विष्णुर्मायाविनां वरः।
द्विजरूपप्रतिच्छन्नो देवकार्यं चिकीर्षति ॥ १० ॥
अनेन याचमानेन शत्रुणा वटुरूपिणा।
सर्वस्वं नो हृतं भर्तुर्न्यस्तदण्डस्य बर्हिषि ॥ ११ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

ब्रह्मादिभिः भगवच्चरणाब्जपूजनं नन्दादिभिरसुरनिवारणं भगवता बलिबन्धनं च कृतमिति वर्णयति—सत्यमित्येकविंशेन। उरुक्रमस्याङ्घ्रिः तपसः परं गतः इत्युक्तं तमेवाङ्घ्रिम् अब्जभवः स्वं समीक्ष्य यथार्थमालोच्य अगात्तत्समीपं गतः कथम्भूतः अङ्घ्रिनखेन्दुभिः हृता स्वधामद्युतिर्यस्य सः ये मरीचिमिश्राः सनन्दनादयश्च वेदादयश्च तैरावृत इति द्वयोरन्वयः ॥ १ ॥

वेदाः मूलभूताः श्रुतयः उपवेदाः आयुर्वेदादयः नियमान्विताः निवृत्तरहस्यसहितानि प्रवृत्तरहस्यानि तर्काः पूर्वपक्षशास्त्राणि इतिहासपुराणसंहिताः वेदार्थभूतानि सिद्धान्तशास्त्राणि अङ्गानि शिक्षादीनि ये चान्ये योगसमीरदीपितेन ज्ञानाग्निना रन्धितं कर्मकश्मलं येषां तत्रत्या जनाः ॥२॥

पद्मभवादयो न विद्यन्ते कर्मणाणि क्षुद्रकर्माणि यत्र तस्स्वायम्भुवं धाम यत्स्मरणाऽनुभावतो गतास्तमङ्घ्रिं ववन्दिरे शुचिश्रवाः शुद्धकीर्तिः ब्रह्मा स्वयं यस्य नाभिपङ्केरुहसम्भवः तस्य विष्णोः अङ्घ्रये अर्हणोदकम् उपाहरत् तेन समभ्यर्च्य प्रगृणावस्तौषीत् ॥ ३ ॥

धातुः कमण्डलुजलं पञ्चमस्कन्धोक्तपादाङ्गुष्ठनखनिर्भिन्नोर्ध्वाण्डकटाहवहिर्जलधारासहितं उरुक्रमस्य पादावनेजनपवित्रतया स्वर्धुन्यभूत् भगवतः विशदा कीर्तिरिव लोकत्रयं निमार्ष्टि पुनाति ॥ ४ ॥

सङ्क्षिप्ता आत्मविभूतिः देहविस्तारो येन तस्मै वामनत्वेन स्थिताय ॥ ५ ॥

लाजाश्च अक्षतानि अखण्डितानि फलानि अङ्कुराश्च तैः ॥ ६-८ ॥

भाषा टीका।

श्रीरुक्मिणीप्राणजीवनो जयति ॥
श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि-जब उरुक्रम का चरण तप लोक से आगे सत्य लोक में पहुंचा, तब तो उस चरण के नख चन्द्रों से अपने धाम को प्रकाशित देखकर कमल से उत्पन्न होने वाले ब्रह्माजी और मरीचि प्रभृति बडे २ व्रतधारी लोग तथा हे नरदेव ! सनंदनादिक योगीलोग तत्काल चरण के समीप आये ॥ १ ॥

और हे राजन् ! वेद, उपवेद, नियम, यम, तर्क, इतिहास, पुराण, संहितायें। और योग रूप पवन से प्रदीप्त होने वाले ज्ञान रूप अग्नि से पक किये हैं कर्मों के कल्मष जिन्होंने ऐसे सब लोग ॥ २ ॥

जिस चरण के स्मरण के प्रभाव से, कर्मों से नहीं प्राप्त होने वाले ऐसे स्वायं भुव धाम को प्राप्त हुए हैं उसी श्रीचरण को वन्दन करते हुऐ ॥ तदनंतर प्रकृष्ट उन्नमित श्रीविष्णु के चरण के लिये ब्रह्माजी अर्हणोदक (पूजनार्थं जल) ले आये, और जिनके नाभि कमल से आप उत्पन्न हुए हैं उन श्रीविष्णु के चरण का वडी भक्ति से पूजन कर स्तुति करते हुए ॥ ३ ॥

हे नरेन्द्र ! ब्रह्माजी के कमंडलु का वह जल ही श्रीउरुक्रम के चरणारविन्द के प्रक्षालन करने से पवित्र होकर, स्वर्धुनी अर्थात् श्रीगंगाजी होगया, जो कि आकाश में गिरती हुई तीनों लोकों को पवित्र करती है। जैसे कि भगवान की विशद कीर्त्ति ॥ ४ ॥

जब भगवान त्रिविक्रम रूप होकर दो पगों में पृथिवी और स्वर्गादि लोकों को मापचुके, तब फिर जैसे के तैसे वामन रूप धारण करने पर वडे २ लोकों के नाथ ब्रह्मादिक। अपने अनुचरों सहित वडे आदर पूर्वक, अपने स्वामी श्रीहरि को बलि भेंट ले कर समर्पण करते हुए ॥ ५ ॥

और जल माला, दिव्य गंध वाले चन्दन, सुगंध धूप, दीप, लाजा [धान की खीलें] अक्षत, फल, अंकुर, ॥ ६ ॥

और भगवान् के वीर्य और महिमा के प्रतिपादक स्तोत्र, और जयशब्द, बाजे, गीत, शंख, दुंदुभि के शब्द इत्यादिक उपचारों से सब लोग भगवान की पूजा करते हुए ॥ ७ ॥

इतने बीच में मनके तुल्य वेग वाला जांववान् नाम वाला ऋक्षराज, भेरी के शब्द करके सर्व दिशाओं में महोत्सव और भगवान् के विजय की घोषणा करता हुआ ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

त्रिपदविषया या व्याजयाच्ञा कपटयाच्ञा तया स्वभर्तुर्बलेर्महीं हृतां दृष्ट्वाऽत्यमर्षिताः सन्तः ऊचुः ॥ ९ ॥

किमूचुस्तदाह-न वै इति सार्द्धैस्त्रिभिः ॥ १० । १२ ॥

सत्यव्रतस्य सततं दीक्षितस्य विशेषतः ।
नानृतं भाषितुं शक्यं ब्रह्मण्यस्य दयावतः ॥ १२ ॥
तस्मादस्य वधो धर्मो भर्तुः शुश्रूषणं च नः ।
इत्यायुधानि जगृहुर्बलेरनुचराऽसुराः ॥ १३ ॥
ते सर्वे वामनं हन्तुं शूलपट्टिशपाणयः ।
(१)अनिच्छतो बलेराजन्! प्राद्रवञ्जातमन्यवः ॥ १४ ॥
तानभिद्रवतो दृष्ट्वा दितिजानीकपान्नृप ! ।
प्रहस्यानुचरा विष्णोः प्रत्यषेधन्नुदायुधाः ॥ १५ ॥
नन्दः सुनन्दोऽथ जयो विजयः प्रबलो बलः ।
कुमुदः कुमुदाक्षश्च विष्वक्सेनः पतत्रिराट् ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अनुचराश्च ते असुराश्च ॥ १३—१८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

त्रिपदविषया व्याजयाच्ञा कपटयाच्ञा तया हृतामपहृतां सर्वां भूमिं दृष्ट्वा सर्वे दैत्या दीक्षितस्य स्वभर्तुरत्र इति शेषः । ऊचुः स्वभर्त्तुर्महीं हृतां दृष्ट्वेति वान्वयः ॥ ९ ॥

तेषामुक्तिमाह—नवाइति सार्द्धैस्त्रिभिः । अयं वामनो ब्रह्मबन्धुर्द्विजो न भवति किन्तु मायाविनां श्रेष्ठो विष्णुरेव द्विजरूपेण तिरोधापितस्वरूपस्सन् देवानां कार्यं कर्त्तुमिच्छति ॥ १० ॥

याचमानेन वटुरूपिणाऽनेन विष्णुना बर्हिषि यज्ञे निमित्ते न्यस्तः त्यक्तो दण्डो दुरात्मविषयो येन तस्य नोऽस्माकं भर्त्तुः सर्वस्वमपहृतम् ॥ ११ ॥

नेदमस्मद्भर्तुरनुचितं कृत्यं किन्तु वामनस्यैवेत्यभिप्रायेणाहुः सततं सत्यव्रतस्य तत्रापि विशेषतो दीक्षितस्य यज्ञदीक्षायां स्थितस्य ब्रह्मण्यस्य दयावतश्च भर्तुस्तेनानृतं भाषितुं न शक्यम् ॥ १२ ॥

तस्मादस्य वामनस्यैवानुचितकारित्वादस्य वध एव न्याय्यस्तदेवास्मद्भर्तुः परमधिकं शुश्रूषणम् इतीत्थं वदन्तो बलेर्भृत्याः दैत्या आयुधानि गृहीतवन्तः ॥ १३ ॥

सर्वे तेऽसुराः शूलादयः पाणिषु येषां ते बलेः आज्ञामप्यनिच्छन्तो जात उत्पन्नो मन्युर्येषां ते वामनं हन्तुं प्राद्रवन् प्रदुद्रुवुः ॥ १४ ॥

हे नृप ! तान्वामनस्याभिमुखमागच्छतः दैत्यान् दृष्ट्वा नन्दादयो विष्णोः पार्षदाः उत् उद्यतानि आयुधानि यैस्ते प्रहस्याहोऽस्मै पराक्रमं कर्त्तुमिच्छन्तीति परिहासं कृत्वेत्यर्थः । प्रत्यषेधन्निवारयामासुः ॥ १५ ॥

सर्वे चैते नन्दादयो गजायुतबलाः नागायुतप्राणाः इति बलस्य न्यूनतानिवृत्तौ तात्पर्यम् अतिशयबला इतिभावः नन्दादयः विष्णुपार्षदाः आसुरीश्चमूः समाजघ्नुर्हतवन्तः नागायुतप्राणा इति चमूविशेषणं वा ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अयं ब्रह्मबन्धुर्न वै किंस्विद्विष्णुः ॥ १०—१६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नन्द इत्यादि युग्मकम् । एषामकस्मादाविर्भावेन नित्यभगवत्पार्श्ववर्त्तित्वं बोधयति गुप्ततया व्यवस्थानात् जयविजयाविमौ वैकुण्ठान्तरसम्बन्धिनौ नागा अत्र वैकुण्ठस्था एव ज्ञेयाः अनुस्मरन् अनुस्मारयन् ॥ १६—१८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

बर्हिषि यज्ञे ॥ ११—१५ ॥

जयविजय इति भगवतो ब्रह्मण्यत्वस्य भक्तानामपराधविभीषिकायाश्च प्रदर्शनार्थमेवानयोः प्रकाशानेव वैकुण्ठादधःपेततुरिति तृतीये वैकुण्ठवर्णन एव व्याख्यातं नागा हस्तिनस्ते च लोकालोकोपरिवर्तिनो भगवद्विभूतिरूपा वैकुण्ठवर्तिनो वा ज्ञेयाः ॥ १६—२१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स्वभर्तुर्बलेः ॥ ९—१२ ॥
अनुचराश्च तेऽसुराश्च ॥ १३—१५ ॥

(१) अनिच्छन्तो बलेराज्ञामिति वीर० ।

जयन्तः श्रुतदेवश्च पुष्पदन्तोऽथ सात्वतः ।
सर्वे नागायुतप्राणाश्चमूं ते जघ्नुरासुरीम् ॥ १७ ॥
हन्यमानान्स्वकान्दृष्ट्वा पुरुषानुचरैर्बलिः ।
वारयामास संरब्धान् काव्यशापमनुस्मरन् ॥ १८ ॥
हे विप्रचित्ते ! हे राहो ! हे नेमे ! श्रूयतां वचः ।
मायुध्यत निवर्तध्वं न नः कालोऽयमर्थकृत ॥ १९ ॥
यः प्रभुः सर्वभूतानां सुखदुःखोपपत्तये ।
तं नाऽतिवर्तितुं दैत्याः पौरुषैरीश्वरः पुमान् ॥ २० ॥
यो नो भवाय प्रागासीदभवाय दिवौकसाम् ।
स एव भगवानद्य वर्तते तद्विपर्ययम् ॥ २१ ॥
बलेन सचिवैर्बुद्ध्या दुर्गैर्मन्त्रौषधादिभिः ।
सामादिभिरुपायैश्च कालं नात्येति वै जनः ॥ २२ ॥
भवद्भिर्निर्जिता ह्येते बहुशोऽनुचरा हरेः ।
दैवेनर्द्धैस्त एवाद्य युधि जित्वा नदन्ति नः ॥ २३ ॥
एतान्वयं विजेष्यामो यदि दैवं प्रसीदति ।
तस्मात्कालं प्रतीक्षध्वं यो नोऽर्थत्वाय कल्पते ॥ २४ ॥

भाषा टीका ।

अब तौ सम्पूर्ण पृथिवी को तीन पग के मागने के छल से हरी हुई देखकर अपने भर्त्ता दीक्षित राजा बलि के किंकर लोग अति असहन कर बोले ॥ ९ ॥

बलि के दैत्य लोग बोले, कि- भाई हो ! यह निश्चय कर ब्राह्मणाधम नहीं हैं किंतु मायावियों में श्रेष्ठ यह विष्णु है, परंच द्विज रूप से प्रतिच्छन्न होकर देवताओं के कार्य करने की इच्छा करता है ॥ १० ॥

इस याचना करने वाले बटुरूपधारी ने, यज्ञ में त्यक्त दंड ऐसे हमारे भर्ता का सर्वस्व हरण कर लिया ॥ ११ ॥

बलि महाराज तौ सदा सत्यव्रत हैं तिसमें इस काल में विशेष करके यज्ञ की दीक्षा लिये हुए हैं और तिस पर भी दयावान् हैं ब्रह्मण्य हैं वह कभी झूठ बोल ही नहीं सक्ते हैं ॥ १२ ॥

तस्मात् इसका इस समय पर बध करना ही धर्म है, और इसमें हमारे भर्त्ता की शुश्रूषा भी है, ऐसा कहकर बलि के अनुचर लोगों ने अपने आयुध लिये ही तौ सही ॥ १३ ॥

हे राजन् ! वे सब राजा बलि की विना इच्छा के भी बडे क्रोधित होकर शूल और पट्टिश हाथों में लेकर वामनजी को मारने को दौडे ॥ १४ ॥

हे नृप ! विष्णुके अनुचरोंने उन दैत्य सैनापतियों को सन्मुख दौडे हुए आते देखकर हँसकर ऊँचे को आयुध उठाकर निषेध किया ॥ १५ ॥

नंद, सुनन्द, जय, विजय, बल, प्रबल, कुमुद, कुमुदाक्ष, विष्वक्सेन, गरुड, ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अर्थकृदनुकूलः ॥ १९ ॥

पौरुषैस्तं कालमतिवर्तितुं पुमानीश्वरः समर्थो न भवति ॥ २०--२२ ॥

हरेरनुचरा देवाः दैवेन ऋद्धैः समृद्धैर्भवद्भिः ॥ २३ ॥
अर्थत्वायाऽऽनुकूल्याय ॥ २४ ॥ २५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

परमपुरुषपार्षदैर्हन्यमानान् स्वकीयान्दैत्यान् दृष्ट्वा बलिः शुक्रस्य शापमचिराद्भ्रश्यसे श्रियः इत्युक्तविधमनुस्मरन्नतीव क्रुद्धानपि वारयामास ॥ १८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वारणप्रकारमेवाह षड्भिः । हे विप्रचित्त्यादयः ! मद्वचः श्रूयतां युष्माभिरिति शेषः । किंतद्युद्धं न कुरुत किन्तु ततो निवर्तध्वं नोऽस्माकम् अयं कालोऽर्थकृदनुकूलो न भवति ॥ १९ ॥

हे दैत्याः ! यः कालरूपो भगवान् सर्वभूतानां प्रभुः यदा दुःखदस्तदा तदुपत्तये आनुकूल्याय सुखाय निमित्ताय चेति यावत् । पुमान् कालवश्यः पौरुषैः स्वकीयबलपराक्रमादिभिरतिवर्तितुं नेश्वरो न समर्थः ॥ २० ॥

यः कालरूपो भगवान् पूर्वमस्माकं भवाय सुखायासीत् । स एवाधुना तद्विपर्ययमस्माकं दुःखदोभूत्वा दिवौकसां देवानां भवाय वर्त्तते ॥ २१ ॥

अतो जनो बलादिभिरुपायैः कालात्मकम् ईश्वरं नात्येति नातिक्रामति स्पर्द्धिवा मन्त्रिणस्तत्कर्माभिरिति भावः ॥ २२ ॥

कालप्रभावं पश्यतेत्याह—भवद्भिरिति । दैवेनोन्नद्धैर्भवद्भिरेते हरेर्भगवत इन्द्रस्य वाऽनुचराः देवाः प्रायशो निर्जिताः त एवाधुना नोऽस्मान् युद्धे जित्वा नदन्ति सिंहनादान्कुर्वन्ति नन्दन्ति वा धातूनामनेकार्थत्वात् ॥ २३ ॥

यदि दैवमस्माकमनुकूलं भवति तर्हि तान्वयं विजेष्यामस्तस्मात्कालं प्रतीक्षध्वं, कं ? यः कालो नोऽस्माकमर्थत्वायानुकूल्याय भवति तं कालं प्रतीक्षध्वम् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्वांस्वां स्वस्य प्राप्ताम् असुरसेनाम् ॥ १७—१९ ॥
पौरुषैः पुरुषकारैः ॥ २०—२४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

हे विप्रचित्ते ! इत्यादिवाक्यान्यपि तत्सान्त्वनतात्पर्याण्येव नतु परमार्थविचारतात्पर्याणि अतएवैतान् विजेष्याम इत्युक्तम् ॥ १९ ॥ २० ॥

तद्विपर्ययं यथास्यात्तथा ॥ २१ ॥ २२ ॥

दैवेन दैवात्मकेन कालेन ॥ २३—३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

कालं कालरूपिणं प्रभुम् ॥ २२ ॥

एवं तत्त्वोपदेशमगृह्णन्तः तमोग्रस्तानसुरानालक्ष्य प्रोत्साहनेन दैत्यानुकूलमन्त्रोपदेशेन निवर्तयितुमाह—भवद्भिरिति । दैवेन ऋद्धैः समृद्धैर्भवद्भिः ॥ २३ ॥

अर्थत्वाय अर्थसाधकत्वाय ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

जयविजयौ असुरभावङ्गताभ्यां जयविजयाभ्यामन्यौ ॥ १६ ॥ ॥ १७ ॥ १८ ॥ १९ ॥

तं प्रभुम् अतिवर्तितुं पौरुषैः पुमानीश्वरो न स्यात् ॥ २० ॥ ॥ २१ ॥ २२ ॥

दैवेन ऋद्धैः समृद्धैः हरेरनुचरा इन्द्रादयः ॥ २३ ॥

अर्थत्वाय आनुकूल्याय ॥ २४ ॥ २५ ॥

भाषा टीका ।

जयन्त, श्रुतदेव, पुष्पदन्त, सात्वत, ये सब पार्षद लोग दश दश हजार हाथी के तुल्य बलवाले, अपने ऊपर टूटकर आने वाली उस असुरी सेना के ऊपर प्रहार करने लगे [यद्यपि विष्णुपार्षद अपरिमित बल वाले हैं, तथापि जहां जितनी आवश्यकता वहां उतने ही लिखने की रीति है] ॥ १७ ॥

उस समय पर अपने दैत्यों को परम पुरुष के अनुचरों से हन्यमान (ताडित) देखकर, शुक्राचारी के शाप का स्मरण कर बलि ने अपने अनुचरों को युद्ध निवारण किया ॥ १८ ॥

और बलि कहने लगे, कि–हे विप्रचित्ते ! हे राहो ! हे नेमे ! तुम लोग हमारा वचन तो सुनो–अभी यह काल अपना प्रयोजन सिद्ध करने वाला नहीं है, किन्तु विपरीत है इसी से युद्ध न करो निवृत्त होजाओ ॥ १९ ॥

हे दैत्यो ! जो सर्व प्राणियों के सुख दुःख की सिद्धि करने को समर्थ है उस काल के पलटाने को पुरुष किसी प्रकार भी समर्थ नहीं ॥ २० ॥

जो काल प्रथम हम लोगों का अनुकूल रहा, और देवताओं का प्रतिकूल रहा, वही भगवान् कालरूप इस समय हमारा विपरीत हो रहा है ॥ २१ ॥

पुरुषको जानना चाहिये कि–बलसे मन्त्रियोंसे दुर्ग अर्थात् किला कोट आदि सामग्रीसे तथा मन्त्र औषधादि से वा सामादिक उपायोंसे काल का अतिक्रमण कोई भी नहीं कर सका है ॥ २२ ॥

प्रथमकाल मे इन हरि (इन्द्र) के अनुचर अर्थात् देव लोगों को परम समृद्ध तुम लोगों ने जीते थे आज वही लोग तुमको जीत कर गर्जते हैं ॥ २३ ॥

यदि फिर हम पर दैव प्रसन्न होगा तो हम लोग भी इनको जीतेंगे । तस्मात् समय की प्रतीक्षा करो कि समय हमारा अनुकूल आवै ॥ २४ ॥

श्रीशुक उवाच ।

पत्युर्निगदितं श्रुत्वा दैत्यदानवयूथपाः ।
रसां निर्विविशू राजन्! विष्णुपार्षदताडिताः ॥ २५ ॥
अथ तार्क्ष्यसुतो ज्ञात्वा विराट् प्रभुचिकीर्षितम् ।
बबन्ध वारुणैः पाशैर्बलिं सौत्येऽहनि क्रतोः ॥ २६ ॥
हाहाकारो महानासीद्रोदस्योः सर्वतो दिशम् ।
गृह्यमाणेऽसुरपतौ विष्णुना प्रभविष्णुना ॥ २७ ॥
तं बद्धं वारुणैः पाशैर्भगवानाह वामनः ।
नष्टश्रियं स्थिरप्रज्ञमुदारयशसं नृप ! ॥ २८ ॥
पदानि त्रीणि दत्तानि भूमेर्मह्यं त्वयाऽसुर ! ।
द्वाभ्यां क्रान्ता मही सर्वा तृतीयमुपकल्पय ॥ २९ ॥
यावत्तपत्यसौ गोभिर्यावदिन्दुः सहोडुभिः ।
(१)यावद्वर्षति पर्जन्यस्तावती भूरियं तव ॥ ३० ॥
पदैकेन मया क्रान्तो भूर्लोकः खं दिशस्तनोः ।
स्वर्लोकस्तु द्वितीयेन पश्यतस्ते स्वमात्मना ॥ ३१ ॥
प्रतिश्रुतमदातुस्ते निरये वास इष्यते ।
विश त्वं निरयं तस्माद्गुरुणा चानुमोदितः ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विष्णु पार्षदेषु राजत इति विराट् प्रभोश्चिकीर्षितं ज्ञात्वा अयमर्थः अस्य सर्वस्वाऽपहारेण ममेत्यभिमानं सन्त्याज्येदानीं देहस्वीकारेणाहङ्कारमपि त्याजयित्वा परमाऽनुग्रहं कर्तुमिच्छति नचानेन तुल्योऽन्यः कोऽपि सत्यसन्धो धीरो वाऽस्तीति तद्यशः-प्रख्यापनार्थं किञ्चित्पातयितुमपीच्छतीति प्रभोरभिप्रायं ज्ञात्वा तं बबन्धेति. सौत्येऽहनि सोमाभिषवदिने ॥ २६ ॥

रोदस्योर्द्यावापृथिव्योः ॥ २७—२९ ॥

असौ सूर्यः ॥ ३० ॥

मया आत्मनेत्यन्वयः व्यापिनेत्यर्थः । खं च दिशश्च तनोः तन्वा ते स्वं त्वदीयं सर्वस्वम् ॥ ३१ ॥

गुरुणा शुक्रेणानुमोदितस्सन् ॥ ३२ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

एवं प्रत्युर्बलेर्निगदितं श्रुत्वा विष्णुपार्षदैः पीडिताः दैत्या हे राजन् ! रसां रसातलं निर्विविशुः ॥ २५ ॥

अथ विभोर्वामनस्य चिकीर्षितं ज्ञात्वा विराट् विशेषेण राजत इति तथा तार्क्ष्यसुतो गरुडः सौत्येऽहनि सोमाभिषवदिने वारुणैः पाशैर्बलिं बबन्ध विभोश्चिकीर्षितं ज्ञात्वेत्यस्यायमर्थः । अस्य सर्वस्वापहारेण ममेत्यभिमानं संत्याज्येदानीं देहस्वीकारेणाहङ्कारमपि त्याजयित्वा परमानुग्रहं कर्तुमिच्छति न चानेन तुल्योऽन्यः कोपि सत्यसन्धो धीरो वास्तीति तद्यशःप्रख्यापनाय किञ्चिद्यातयितुमपीच्छतीति प्रभोरभिप्रायं ज्ञात्वा तं बबन्धेति ॥ २६ ॥

प्रभविष्णुना सर्वशक्तिना विष्णुना दैत्यानां पत्यौ बलौ निगृह्यमाणे बध्यमाने सति रोदस्योर्द्यावापृथिव्योः सर्वदिक्षु महान् हाहाकार आसीत् ॥ २७ ॥

अथ भगवान्वामनस्तं वारुणैः पाशैर्बद्धमित्युवाच, कथम्भूतम् ? नष्टा श्रीर्यस्य तं स्थिरचित्तं प्राज्ञं विवेकिनमुदारं विपुलं यशो यस्य तम् ॥ २८ ॥

उक्तिमेवाह—पदानीति यावदध्यायसमाप्ति । हे असुर ! त्वया भूमेस्त्रीणि पदानि मह्यं दत्तानि दास्यामीति प्रतिश्रुतानि तत्र द्वाभ्यां पदाभ्यां सर्वा द्युलोकादिसहिता भूमिः क्रान्ता परिच्छिद्य परिगृहीता अधुना तृतीयं पदम् उपकल्पय देहि ॥ २९ ॥

यावदसौ सूर्यः किरणैस्तपति तथेन्दुर्यावदुडुभिर्नक्षत्रैः सह प्रकाशते तथा पर्जन्यो मेघो यावद्वर्षति तावत्येव हि त्वसम्बन्धनीयं भूमिः ॥ ३० ॥

---

(१) यावद्भिरस्सपर्जन्यः इति वीर०

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

सोयङ्कृत्स्नो भूर्लोकः समया आत्मनैकेनैव पदेन क्रान्तः खं दिशश्च तनोः तन्वा क्रान्ताः तथा ते तव पश्यतस्तत एव स्वः स्वकीयः स्वर्लोकस्तु द्वितीयेन पदेन क्रान्तः ॥ ३१ ॥

प्रतिश्रुतं तृतीयं पदमदातुस्तव नरके एव निवास इष्यते तस्मात्प्रतिश्रुताऽदानाद्गुरुणा शुक्रेणाऽनुमोदितश्च चशब्दो हेत्वर्थः गुरुणा शप्तत्वाच्चेत्यर्थः । नरकं प्रविश ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

रसां रसातलम् ॥ २५ ॥

विराट् पक्षिराट् क्रतोस्सौत्येऽहनि क्रतोः सोमपान दिवसे ॥ २६—२९ ॥

पदत्रयमितं भूरमिताऽतः कथं तृतीयमुपकल्पय ? इत्युच्यते इति तत्राह, यावदिति ॥ ३० ॥

अस्तु भूमेरियत्ता तथापि चत्वाशास्त्रलक्षितपदस्याणुत्वेन तन्मितत्वेन किमनुपपन्नमित्याशङ्क्येदं पदमलौकिकमित्याशये-नापूर्तिमाह-पदेति ॥ ३१ ॥

आत्मना प्रतिश्रुतं स्ववित्तमदातुस्तव यतो नष्टप्रतिश्रस्त-स्मात् ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

खमिति भूर्लोकादौ सर्वत्र योज्यम् ॥ ३१—३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

रसां रसातलम् ॥ २५ ॥

विपु पक्षिषु राजन इति विराट् प्रभोश्चिकीर्षितं ज्ञात्वेति अस्य ममतास्पदं सर्वमङ्गीकृत्य अहन्तास्पदमप्यङ्गीकर्तुमिच्छति मत्प्रभुः प्रतिदानसामर्थ्यमभिवोत्स्याऽस्य ऋणी भवन् द्वारपालो बुभूषति स्वस्य भक्ताधीनत्वं भक्तस्य च सर्वोत्कर्षं लोकेषु ख्यापयितु-मतो दण्डेनाप्यनश्वरमस्य धैर्यं दर्शयामि सर्वलोकानिति ववन्ध सौत्येऽहनि सोमाभिषवदिने ॥ २६ ॥ २७ ॥

रोदस्योर्द्यावापृथिव्योः भ्रष्टाश्रियं विगतसम्पत्कं तदपि स्थिरप्रज्ञम् अक्षुब्धधियं यत उदारयशसं सम्पत्तेरपचयेपि यश-सोऽप्युपचयं प्राप्तुमित्यर्थः ॥ २८ ॥

महीन्तरस्वामिकं स्थानम् ॥ २९ ॥

असौ सूर्यः तनोस्तन्वा स्वं त्वदीयं धनम् आत्मना स्वरू-पेणैव नच त्रिविक्रमत्वमन्यदीयं स्वरूपमिति भावः । पदैकेन मया क्रान्त इति पूर्वतोलोकालोकः एकेनैव पदा मया क्रान्त-इत्यर्थः ॥ ३० ॥ ३१ ॥

तर्हि मया किं कर्त्तव्यमिति चेत् निरये वासः क्रियता-मिति तस्य धीरत्वं निरुपाधिभक्तिनिष्ठां च लोके ख्यापयितुं प्रकटमाह-प्रतीति । निरये नरके गुरुणा अनुमोदित इति कि-महं युक्तं प्रब्रवीम्ययुक्तं वेति त्वं स्वगुरुं विद्वांसं शुक्राचार्य्यमेव पृच्छेति भावः । वस्तुतस्तु भक्ताभासस्यापि नरकासम्भवात् प्रतिश्रुतमदातुरपि ते निरये रत्नयोरैक्यात् निलये मदीये वैकुण्ठे वास इष्यते उचितो भवति । यद्यपि तदपि संप्रति निलयं मया दीयमानं वैकुण्ठाख्यं मदीयस्थानविशेषं विश त्वदधिकारान्ते एव वैकुण्ठे त्वां वासयिष्यामीति भावः । गुरुणा शुक्रेणेति यद्यपि त्वं स्वगुरुं तं मद्विमुखं ज्ञात्वा संप्रत्यवमन्यसे तदपि स त्वद्विषयकस्नेहभरेणैव लुप्तविवेको ममातिप्रिय एव मयाभ्यागतः अतस्तेन सहैव विशेत्यर्थः ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विराट् पक्षिराट् तार्क्ष्यसुतः कश्यपपुत्रः पदद्वयेनास्य सर्वस्वं मया गृहीतमथ तृतीयपदपूर्त्यर्थमात्मानमपि गृहीत्वा प्रति-श्रुतस्यादानेन शुक्रोक्तनरकार्हत्वशङ्कां निराकरिष्यामि बन्धन-लीलयैव शूरशिरोमणेरस्य निर्विकारत्वं स्वानन्यभक्तत्वं च ख्याप-यिष्यामीति विभुचिकीर्षितं ज्ञात्वा क्रतोः सौत्येऽहनि सोमाभि-षवदिने वारुणैः पाशैर्बबन्ध ॥ २६ ॥

निगृह्यमाने बध्यमाने सति रोदस्योः द्यावापृथिव्योः सर्वतो दिशं सर्वासु दिक्षु ॥ २७—२९ ॥

असौ सूर्यः ॥ ३० ॥

मया आत्मना ते पश्यतः खं त्वदीयं सर्वं क्रान्तः तत्र पदैकेन भूर्लोकः क्रान्तः खं दिशश्च तन्वा क्रान्ताः द्वितीयेन पदेन स्वर्लोकः क्रान्तः ॥ ३१ ॥

गुरुणा शुक्रेण ॥ ३२ ॥

भाषा टीका ।

॥ श्रीशुक उवाच ॥

दैत्य दानव और यूथप लोगों ने अपने स्वामी का वाक्य सुनकर हे राजन् ! विष्णु पार्षदों से ताडित होकर भी रसा तल में प्रवेश किया ॥ २५ ॥

तदनन्तर प्रभु का अभिप्राय जानकर गरुड जी ने यज्ञ के सोमपान के दिवस में ही, बलिको वरुण के फांस में बांध लिया ॥ २६ ॥

जबकि प्रभविष्णु विष्णुने बलिको इस प्रकार निगृहीत किया तबतौ पृथिवी आकाश और सर्वादिशाओं में बडा हाहाकार मचगया ॥ २७ ॥

हे नृप ! श्री के नष्ट होने परभी स्थिर प्रज्ञावाले और उदार यश वाले राजा बलिको इसप्रकार वरुण के पाशों से बंधे हुए पर भगवान बोले ॥ २८ ॥

वृथा मनोरथस्तस्य दूरे स्वर्गः पतत्यधः ।
प्रतिश्रुतस्यादानेन योऽर्थिनं विप्रलम्भते ॥ ३३ ॥
विप्रलब्धो ददामीति त्वयाहं चाऽऽढ्यमानिना ।
तद्व्यलीकफलं भुङ्क्ष्व निरयं कतिचित्समाः ॥ ॥ ३४ ॥
इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्याम् अष्टमस्कन्धे बलिनिग्रहो नाम
एकविंशोऽध्यायः ॥ १७॥

भाषा टीका ।

हे असुर ! तूने हमको तीन पग भूमि देने को कही रही तिसमें हमने दो पगोंमे सब भूमिको आक्रमण करली अब तीसरे पगको और भी सम्पादन करौ ॥ २९ ॥

और तुमारि तौ इतनी ही भूमि है ना ? कि जहां तक सूर्य किरणों से तपता है, और जहां तक तारों सहित चन्द्र प्रकाश करता है, और जहां तक मेघ वर्षते हैं ॥ ३० ॥

देखो एक पग से तौ हमने भू लोक माप लिया और आकाश तथा दिशाओं को शरीर से माप लिया और तेरा सर्वस्व जो स्वर्ग रहा सो तेरे देखते २ हमने दूसरे पग से माप लिया ॥ ३१ ॥

अब प्रतिज्ञा पूर्वक दिये हुए को जो तू नहीं देगा तब तेरा नरक में वास होगा तस्मात् तुम अब गुरुजी से अनुमोदित होकर नरक में प्रवेश करौ ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवमुक्तेऽपि निरयपरिहारार्थं स्वर्गभ्रंशपरिहारार्थं च मनोरथं कुर्वन्तं प्रत्याह—वृथेति । यः प्रतिश्रुतस्यादानेन याचकं विप्रलम्भते तस्य मनोरथो वृथैव; स्वर्गश्च तस्य दूर एव स चाधः पतत्येव ॥ ३३ ॥

त्वया चाहं विप्रलब्धस्तस्माद्व्यलीकस्यानृतस्य फलं निरयं भुङ्क्ष्वेत्यर्थः ॥ ३४ ॥

इतिश्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
एकविंशोऽध्यायः ॥ २१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमुक्तेपि निरयपरिहारार्थं स्वर्गाद्भ्रंशपरिहारार्थञ्च मनोरथकुर्वन्तं प्रत्याह—वृथेति । यः पुमान् प्रतिश्रुत्य तदर्पितं प्रतिश्रुतं नार्पयते न ददाति तस्य मनोरथः प्रायशो व्यर्थ एव स्वर्गश्च तस्य दूर एव स चाधःपतत्येव ॥ ३३ ॥

त्वया च आढ्यमात्मानं मन्यत इति तादृशस्तेनाधुना ददामीत्येवं प्रतिश्रुतवताहं विप्रलब्धो वञ्चितः तस्माद्व्यलीकफलमनृतफलरूपं नरकं कतिचित्समाः संवत्सरान् भुङ्क्ष्व ॥ ३४ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
एकविंशोऽध्यायः ॥ २१ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

किञ्च यः प्रतिश्रुतं न पूरयति तस्य स्वर्गमाप्नुयामीति मनोरथो मृषा भवति प्रतिश्रुतैकदेशदानेनापि मनोरथः स्यादिति चेत्सत्यं तत्फलं स्वर्गं प्राप्नोषि पुनस्ततोऽदानदोषेण निकृष्टां तिरश्चां योनिमाप्नोतीत्याह—दूरमिति । अधः पतित्वा दूरं यातीत्यर्थः ॥ ३३ ॥

प्रतिश्रुतैकदेशदानात्फलप्राप्तिः स्यादित्यभ्युपगम्य चेदमुक्तं तत्र तदपि न स्यात्किन्तु निरयनिवास एव विप्रलम्भदोषादित्याह—विप्रलब्ध इति । तत्तस्माद्व्यलीकफलमनृतफलम् ॥ ३४ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
एकविंशोऽध्यायः ॥ २१ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

निरये पाताल इत्यर्थः । अधोगमनसाम्यात् पूर्वोक्तमेव सामान्यनिरूपणेन द्रढयति—वृथेति युग्मकेन । तत्र "प्रतिश्रुतस्यादानेन योऽर्थिनं विप्रलम्भते" इति पद्यार्द्धं क्वचिन्नास्ति किन्तु स्वामिसम्मतमिति लक्ष्यतेच इत्यर्थः इत्यस्य वैयर्थ्यात् ॥ ३३—३४ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
एकविंशोऽध्यायः ॥ २१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

वृथेति प्रकटार्थः स्पष्टः अग्रिमभगवद्वाक्यतःफलहृष्ट्या वस्त्वर्थश्चैवं व्याख्यायते तस्य प्रासिद्धमङ्गलकस्य भवतः इन्द्रपद-

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

मद्युपासमिति मनोरथो वृथैव यतस्त्वत्तो वैकुण्ठस्थात् सकाशात् दूरः स्वर्गोऽधः पतति संप्रत्यपि भवान् सुतलं प्रस्थाप्यमानोपि स्वर्गादूर्ध्वमधिरोहसि सुतललभ्यभोगस्य स्वर्गेप्यविद्यमानत्वादिति भावः । यो भवान् स्वदेहात्मसर्वस्वसमर्पणात् प्रतिश्रुतस्य मा सम्यक्प्रकारतो दानेन मामर्थिनं पुरुषार्थचतुष्टयवन्तमपि विशेषतः प्रकर्षेण लम्भते त्वदीयद्वारपालो भूत्वा स्थास्यामीति भावः ॥ ३३ ॥

ततः किमितिचेत् ? श्रूयतामित्याह–विप्रलब्ध इति । प्रकटार्थस्तु स्पष्टः वस्तुतस्तु आढ्येभ्यः शक्रादिभ्योपि मानिना लोकैर्दीयमानसम्मानवत्ता त्वयाहं यतो विशेषतः प्रकर्षेण लब्धः तस्मात् इति ददामि व्यलीकं विगतालीकं मया दीयमानत्वात् परमसत्यं फलं यत्र तत् निलयं सुतलसम्बन्धिसम्पदं कतिचित्समाः सम्वत्सरान् व्याप्य भुंक्ष्व ततोऽष्टमे मन्वन्तरे त्वामिन्द्रपदं प्रापय्य स्वधाम वैकुण्ठमेव नेष्ये इति भावः ॥ ३४ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
एकविंशोऽष्टमस्कन्धे सङ्गतःसङ्गतःसताम् ॥२१॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यः प्रतिश्रुतस्य अदानेन अर्थिनं विप्रलम्भते तस्य मनोरथो वृथैव तस्य स्वर्गः दूरे एव स च अधः पतत्येव ॥३३॥३४॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
एकविंशोऽध्यायार्थकाशः ॥ २१ ॥

भाषा टीका ।

जो कहे हुए पदार्थ को नहीं देता है और विचारे याचकों को व्यर्थ ठगता है उसका मनोरथ वृथा है और उसको स्वर्ग दूर है और वह पुरुष फिर नीचे पडता है ॥ ३३ ॥

ऐसे ही तूने भी अपने को बडा धनी मानकर "यथेच्छ पृथिवी ग्रहण करो" ऐसा कहकर हमको ठगा है । सो अब इस झूंठ का फल कित एक वर्षों तक नरक भोगो ॥ ३४ ॥

इति श्रीमद्भागवत अष्टम स्कन्ध में एकविंश अध्याय
की, श्रीवृन्दावनस्थ भागवताचार्यकृत
भाषाटीका समाप्ता ॥२१॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे एकविंशोऽध्यायः ॥ २१ ॥

॥ द्वाविंशोऽध्यायः ॥

श्रीशुक उवाच ।

एवं विप्रकृतो राजन् ! बलिर्भगवताऽसुरः ।
भिद्यमानोऽप्यभिन्नात्मा प्रत्याहाविक्लवं वचः ॥ १ ॥

बलिरुवाच ।

यद्युत्तमश्लोक ! भवान्ममेरितं वचो व्यलीकं सुरवर्य ! मन्यते ।
करोम्यृतं तन्न भवेत्प्रलम्भनं पदं तृतीयं कुरु शीर्ष्णि मे निजम् ॥ २ ॥
बिभेमि नाहं निरयात्पदच्युतो न पाशबन्धाद्व्यसनाद्दुरत्ययात् ।
नैवार्थकृच्छ्राद्भवतो विनिग्रहादसाधुवादाद्भृशमुद्विजे यथा ॥ ३ ॥

पुंसां श्लाघ्यतमं मन्ये दण्डमर्हत्तमार्पितम् ।
यं न माता पिता भ्राता सुहृदश्चादिशन्ति हि ॥ ४ ॥
त्वं नूनमसुराणां नः पारोक्ष्यः परमो गुरुः ।
यो नोऽनेकमदान्धानां विभ्रंशं चक्षुरादिशत् ॥ ५ ॥
यस्मिन्वैरानुबन्धेन रूढेन विबुधेतराः ।
बहवो लेभिरे सिद्धिं यामु हैकान्तयोगिनः ॥ ६ ॥
तेनाहं निगृहीतोऽस्मि भवता भूरिकर्मणा ।
बद्धश्च वारुणैः पाशैर्नातिव्रीडे न च व्यथे ॥ ७ ॥

पितामहो मे भवदीयसम्मतः प्रह्लाद आविष्कृतसाधुवादः ।
भवद्विपक्षेण विचित्रवैशसं सम्प्रापितस्त्वत्परमः स्वपित्रा ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्वाविंशे तु प्रसन्नः सन् प्रस्थाप्य सुतलं बलिम् ।
दत्त्वा वरान्हरिर्न्यूनं मत्वा तद्द्वारपोऽभवत् ॥१॥
समर्पिततनूवित्तनिर्मलाचलभाषितः ।
छलितो बलिना चित्रं स्वमेवार्पयदच्युतः ॥ २ ॥

विप्रकृतोऽपकृतः भिद्यमानः सत्त्वाच्चाल्यमानः ॥ १ ॥

हे उत्तमश्लोकेति कटाक्षः मम वच ईरितं प्रतिश्रुतं न तावद्व्यलीकम् त्वया कपटेन वामनतया भिक्षित्वा रूपान्तरस्वाविष्कृतत्वात् एवमपि यदि भवान् व्यलीकं मन्यते तथाऽपि ऋतमेवाहं करोमि मदुक्तं विप्रलम्भनं न भवतु मे शीर्ष्णि निजं तृतीयं पदं कुरु न च द्वाभ्यां विश्वं क्रान्तवतो मे तव शिरः पादपर्याप्तं न भवतीति मन्येथाः वित्तेन चेत्पदद्वयं जातं तर्हीदमधिकमेव स्यात् वित्तादपि वित्तवतोऽधिकत्वादिति भावः ॥ २ ॥

ननु, च "आपदर्थे धनं रक्षेद्दारान् रक्षेद्धनैरपि । आत्मानं सततं रक्षेद्दारैरपि धनैरपि" इत्यादि वचनादात्मभयपरिहाराय सर्वस्वं त्यज्यते त्वं तु कुतो भीतः सन्नात्मानमर्पयसि? अत आह; बिभेमीति असाधुवादादपकीर्तेर्यथाऽहं भृशमुद्विजे निरयादिभ्यो न तथा बिभेमि ॥ ३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, मया निगृहीतत्वात्तवापकीर्तिर्जातैव नैवेत्याह—पुंसामिति । अर्हत्तमैरर्पितम् यं दण्डं मात्रादयोऽपि न ह्यादिशन्ति नैवार्पयन्ति हितैषिणा त्वया निगृहीतोऽहं श्लाघ्य एवाऽस्मीति भावः ॥ ४ ॥

नन्वहं देवानां हितैषी नाऽसुराणां तत्राऽऽह—त्वं नूनमिति, परोक्षः शत्रुच्छलेन वर्त्तमानः ॥ ५ ॥

शत्रुत्वं पुनरेकान्तिवास्मानत्रुग्रहीतुमेवेत्याह—यस्मिन्निति । उ अहो ह प्रसिद्धम् ॥ ६ ॥

अतो नात्र मम लज्जा नापि दुःखमित्याह, तेन गुरुणा भवता ॥ ७ ॥

किंच योऽयं दंडरूपो ममानुग्रहस्त्वया कृतः सतु त्वद्भक्तपौत्रत्वेन न त्वहमनुग्रहस्य पात्रमित्याशयेनाऽऽह—पितामह इति । भवदीयानां संमतः यत आविष्कृतः साधुवादो यस्य त्वमेव परमः आश्रयो यस्य सः अतो भवतो विपक्षेण द्विषा हिरण्यकशिपुना विचित्रवैशसं हिंसां संप्रापितोऽपि देहादीनामसारतां निश्चित्याकुतोभयं ध्रुवं च भवतः पादपद्ममेव प्रपेदे अथ तस्मादहमपि दैवेन तस्यैव भाग्येन तवान्तिकं नीत इति चतुर्णामन्वयः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं भगवतोपालब्धो बलिस्तमुवाचेत्याह मुनिः—एवमिति । हे राजन्! इत्थं भगवता विप्रकृतः विप्रलब्धः भिद्यमानः सत्याच्चाल्यमानोऽपि बलिरभिरमचलितं मनो यस्य सोऽविक्लवमदीनं गम्भीरं वचो भगवन्तं प्रत्याह ॥ १

वच एवाह—यद्युत्तमश्लोकेत्यादिभिः दशभिः । हे उत्तमश्लोक ! मे मयोक्तं वचो यदि यद्यपि भवान् व्यलीकमनृतं मन्यते तथापि हे सुरर्षभ ! तत्सत्यमेवाहं करोमि तदुक्तं प्रलंभनं न भवतु मम शीर्ष्णि तृतीयं निजं पदं निधेहि ॥ २ ॥

सर्वतो रक्षणीयमात्मानं मह्यं समर्पयन्न बिभेमि किमित्यत आह, बिभेमीति । निरयाद्भिभ्यो नाहं तथा बिभेमि, कथम् यथा अमाधुवादादनृतवदगादपकीर्तेर्वा भृशमुद्विजे तत्र पदच्युतिः स्थानभ्रंशः दुरत्ययादनतिक्रमणीयात् व्यसनाद्दुःखादर्थकृच्छ्रादर्थव्ययात् ॥ ३ ॥

ननु,मया निगृहीतस्य तवाकीर्तिरेव नेत्याह—पुंसामिति । योग्यतमेनार्पितं कारितं दण्डमहं पुंसां श्लाघ्यतमं यशस्करमेव मन्ये हि यस्मात्तं दण्डं मात्रादयोऽपि मयि नैवार्पयन्ति ॥ ४ ॥

किञ्च त्वमस्माकमनुग्रहीतैवेत्याह—नूनमितिः त्वमस्माकं परोक्षो गुरुरसमक्षं हितकारी, कथमेतद् ज्ञातम् ? इत्यत आह, यो भवाननेकैः शौर्यवीर्यादिप्रयुक्तैर्मदैरन्धानामस्माकं विभ्रंशं तन्मदापनोदकं चक्षुरिवादिशत् ॥ ५ ॥

किञ्च यस्मिन् त्वयि वैरानुबन्धेन बहवो दैत्याः सिद्धिं लेभिरे कां सिद्धिम् ? यां हि सिद्धिमेकान्तयोगिनोऽनन्यप्रयोजनत्वद्भक्तयोगिनस्ताललभन्ते ॥ ६ ॥

तेनैवम्भूतेन भूरिकर्मणा अचिन्त्यविविधविचित्रचेष्टितेन भवता निगृहीतो वारुणैः पाशैर्बद्धश्चाप्यहं न व्रीडे नातिलज्जामि न दुःख्यामि च त्वत्कृतनिग्रहबन्धनयोर्नितरां मम यशस्करत्वादिति भावः ॥ ७ ॥

किञ्चास्मत्पितामहः प्रह्लादः सद्गुणाश्रयः शरीरतद्नुबन्धादिषु हेयतां निश्चित्य परमपुरुषार्थरूपं त्वत्पादारविन्दं शरणं गतः तथाऽहमपि दैवात्त्वत्समीपं नीतः त्वां प्रपद्य इत्याह—पितामह इत्यादिभिश्चतुर्भिः । मे पितामहः प्रह्लादः भवदीयानां भागवतानां सम्मतः अतएवाविष्कृतः साधुवादः कीर्तिर्यस्य सः स्वपित्रा भवतो विपक्षेण शत्रुणा हिरण्यकशिपुना विचित्रवैशसं नानाविधं दुःखं सम्प्रापितोऽपि त्वमेव परमः सर्वविधबन्धुर्निरतिशयपुरुषार्थश्च यस्य तादृशः इत्यर्थः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

बलिः स्वात्मनोऽलीकं प्रकारान्तरेण परिहर्तुमाह—एवमिति ॥ १ ॥

प्रलम्भनं वञ्चकफलं । विप्रलम्भनं कथं न भवेदिति तत्राह, पदमिति ॥ २ ॥

स्वात्मनो ह्रीलक्षणसामग्रीमाह—बिभेमीति ॥ ३ ॥

अभिज्ञातमत्वं दर्शयति, पुंसामिति ॥ ४ ॥

पारोक्ष्यं साक्षात्कारमन्तरेण तस्य मदस्य भ्रंशो येन तत्तथा ॥ ५ ॥

ततो वैरानुबन्धेन वैरयुतस्नेहेन ॥ ६—७ ॥

ननु, कुतो भयाद्भयमाव इत्याशङ्क्य श्रुतप्रह्लादमाहात्म्यानुस्मरणादित्याशयेनाह—पितामह इति । साधुरिति वादः साधुवादः स्तुतिलक्षणः विचित्रवैशसं नानाहिंसनं त्वमेव परमो यस्य स तथा ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १—३ ॥

पुंसामिति नादिशन्ति न कुर्वन्ति मात्रादयो हि केवलमैहिकस्नेहा इति भावः यद्वा शिरश्चालने नञ् नादिशन्ति दिशन्त्येवेत्यर्थः ॥ ४—७ ॥

पितामह इति चातुष्कम् ॥ ८—९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

बलिप्रह्लादयोर्विन्ध्यावलिपद्मजयोरपि ।
सूक्तिवैरानदादस्मै द्वाविंशे करुणाम्बुधिः ॥
ववन्ध कपटी यस्माद्बलिं निरघर्माध्वरः ।
अतस्तद्द्वारि तत्प्रेमपाशैर्बद्धः सदाऽभवत् ॥

एवमनेन प्रकारेण विप्रकृतो लोकदृष्ट्याऽपकृतः भिद्यमानः सत्याच्चाल्यमानः ॥ १ ॥

उत्तमश्लोकेति स्वप्रभो भगवोक्तिः स्वस्य वामनस्य त्रिभिः पदैः परिमितां भूमिं मित्वा स्वरूपान्तरस्य त्रिविक्रमस्य

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

त्रिभिः पदैः प्रतिगृहीतुं प्रयतमानस्य निर्लोभस्य विप्रवटोस्तव निष्पृहत्वं व्यक्तीभूतमित्येतां कीर्तिसुधामेव निरपायं पायं पायमेव भक्ता वयमानन्दमत्ता भवाम यदहो लक्ष्मीकान्तोपि मां तावदतिरङ्कमपि भूमिं भिक्षसे तत्रापि छलेनाधिकजिघृक्षा तत्रापि बटुवशत्वेन बटुजनानां कपटमर्थस्पृहामशान्तिमप्राप्त्या कोपं दातरि दण्डं च स्वाभाविकं धर्ममभिव्यज्य तेषां विडम्बनं शास्त्राभिज्ञानां मद्गुरूणामपि बुद्धिलोपः स्वकृपापरमाणुमात्रस्पृष्टेष्विन्द्रादिषु स्वपक्षत्वव्यञ्जना स्वकृपामृतमहादधिमध्यमाञ्जते मयि विपक्षत्वव्यञ्जनेत्येवमादय एव तवोत्तमाः श्लोकाः कविभिः श्लोकैर्गास्यन्त इति भावः । यदि भवान् मद्वचो व्यलीकं मिथ्या मन्यते इति स्वभक्तमन्यायेनापि जिगीषुणा त्वया तत्स्वभक्तवचो मिथ्याकर्तुमशक्यमेवेति भावः । हे सुरवर्य सुरैर्वरणीय ! त्रैलोक्यं भिक्षित्वा बलेः सकाशादानीय अस्मभ्यं भागार्थं देहीति सुरैर्मन्ये वरं प्रार्थितो भवानभूदिति भावः । तद्वच ऋतं सत्यं करोमि मदुक्तं हि प्रलम्भनं न भवेत् यथा स्वचरणप्रेमामृतमददानस्य सुरैः स्तुतस्य तव स्वर्गस्वर्गमात्रप्रदायकत्वात्सुरप्रलम्भकामिति भावः मे शीर्ष्णि निजं तृतीयं पदं कुरु तव क्राणां विश्वं क्रान्तवतो मम तव शिरः पादपर्याप्तं न भवतीति मन्येथाः वित्तेन चेत् पदद्वयं जातं तर्हीदमधिकमेव स्यात् वित्तादपि वित्तस्वामिनोऽधिकत्वादिति भावः ॥ २ ॥

ननु, किं वारुणपाशबन्धभयात् नरकभयाद्वा आत्मानं दातुमिच्छसीति, तत्राह–बिभेमीति । अर्थकृच्छ्रात् द्रव्योपार्जनकष्टात् असाधुवादात् भगवद्भक्ताब्राह्मणवञ्चका भवन्ति यथा बलिरिति वैष्णवलोकदुष्कीर्तिवादात् ॥ ३ ॥

ननु, मया निग्रहात्तव दुष्कीर्तिर्जायते नेति तत्राह–पुंसामिति । हितैषित्वाद्दण्डयन्तोपि मात्रादयो यं दण्डम् आ मरणकप्रकारेण न दिशन्ति न ददति मात्रादयो हि ऐहिकहितैषिणः अर्हत्तमास्तु पारलौकिकहितैषिणो मातृकोटिभ्योऽप्यतिवत्सला इति भावः ॥ ४ ॥

नन्वहं देवानां हितैषी प्रसिद्धो नासुराणां तत्राह–त्वमिति । गुरुर्हितकारी परोक्षः शत्रुच्छद्मेन वर्तमानत्वादिति भावः प्रत्यक्षहितकारित्वादपि परोक्षहितकारित्वं प्रीत्यधिकसूचकमत एव परमः देवानां त्वपरमः तत्कामितैश्वर्यप्रदत्वेन वास्तवहितैषित्वाभावादिति भावः । अस्माकं तु त्वं वास्तवहितकृदेवेत्याह–य इति । चक्षुरितिदेवानां त्वांध्यमिति भावः । आदिशादिति प्रथमपुरुष आर्षः ॥ ५ ॥

मादृशानां त्वदेकान्तभक्तानां खलु का वार्ता ये पुनरसुरास्त्वयि वैरमनुबध्नन्ति तेष्वपि तव तावदलौकिकश्वेवा दयेत्याह—यस्मिन्निति ॥ ६ ॥

तेन गुरुणा भूरिकर्मयोगानि मन्निग्रहस्ते बहुकार्यार्थं नथाहि देवलोकैश्वर्यप्रापणार्थः भाविभक्तानामपि श्रवणकीर्तनाद्यर्थः तव च प्रेमवश्यत्वादिगुणाविष्कारार्थं इति नाति व्रीडे इति ये यं किं चिन्मात्री मे व्रीडा उत्पद्यते सा खलु मे चित्तशुद्धयभावादेवेति भावः ॥ ७ ॥

अस्मत्कुलदैवतत्वेनैव त्वद्गणो ममायश्यः सद्म एव त्वमपि मद्भक्तपौत्रोयमिति बुद्ध्यैव मयि स्निह्यसीत्याह । पितामह इति । भवाद्रूपत्वेण हिरण्यकशिपुना विचित्रं विपत्तिं प्रापितः प्रापितोपि ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

द्वाविंशे बलिना तृतीयं पदं मे शीर्ष्णि कुर्वित्यादि बलिवाक्यं प्रह्लादादिवाक्यं च श्रुत्वा प्रसन्नो भगवान् वरान् दत्वा बलिं सुतलं प्रस्थाप्य तद्द्वारपोऽभवदिति वर्णयतिवि—प्रकृतः अपकृत इव कृतौ भगवता भिद्यमानः सत्याच्चाल्यमानः शुकेर्योति शेषः ॥ १ ॥

हे उत्तमश्लोक ! ममेरितं यत् वचः पदत्रयभूदानविषयकं वाञ्छातः प्रतिगृह्यतामिति वाक्यं व्यलीकमपि पदद्वयेनैव त्वया मदीयस्य सर्वस्य गृहीतत्वात् तदृतं करोमीति यदि भवान् मन्यते तदेवाह—हे सुरवर्य ! मे शीर्ष्णि निजं तृतीयं पदं कुरु एवं सति मदुक्तं विप्रलम्भनं न भवेदित्यन्वयः ॥ २ ॥

एवं सति च ममापकीर्तिरपि न भविष्यतीत्याह—बिभेमीति–पदच्युतेः स्थानत्यागात् ॥ ३ ॥

त्वत्कृतेनास्मन्निग्रहेणापि मम कीर्तिरेव भविष्यतीत्याह–पुंसामिति ॥ ४ ॥

पारोक्ष्यः गूढः गुरुः हितकारी विभ्रंशं मदनाशं चक्षुरिव चक्षुर्गादिशत् ॥ ५ ॥

ननु, असुरवैरिणो ममासुरगुरुत्वं कथं घटेतेत्यत्र असुरा एव त्वयि वैरानुबन्धं कुर्वन्ति तेनैव वैरानुबन्धेनैकान्तिपुरुषोचितां सिद्धिं लभन्ते इत्याह यस्मिन्निति ॥ ६ ॥

तेन पारोक्ष्यगुरुणा ॥ ७ ॥

मम पितामहस्त्वत्पादपद्मं शरणं बहुगुणयोगेन गतस्तथाहमपि दैवेन तवान्तिकं नीतस्त्वां शरणं व्रजामीत्याह—चतुर्भिः । भवदीयानां श्रीनारदादीनां सम्मत आविष्कृतः साधुवादो यस्य सः ॥ ८ ॥

भाषा टीका ।

श्रीरुक्मिणी मधुसूदनो जयति ॥

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि—हे राजन् भगवान ने बलि का असुर जानि होने पर इतना अपकारसा किया और धैर्य से चलायमान भी किया तौ भी धैर्य रखकर बलि इस प्रकार अविक्लव वचन बोले, ॥ १ ॥

बलिरुवाच ॥

बलि बोले, कि—हे उत्तम श्लोक ! हे सुरवर्य ! यदि आप

किमात्मनाऽनेन जहाति योऽन्ततः किं रिक्थहारैः स्वजनाख्यदस्युभिः।
किं जायया संसृतिहेतुभूतया मर्त्यस्य गेहैः किमिहायुषो व्ययः ॥ ९ ॥
इत्थं स निश्चित्य पितामहो महानगाधबोधो भवतः पादपद्मम्।
ध्रुवं प्रपेदे ह्यकुतोभयं जनाद्भीतः स्वपक्षक्षपणस्य सत्तमः॥ ॥ १० ॥
अथाहमप्यात्मरिपोस्तवान्तिकं दैवेन नीतः प्रसभं त्याजितश्रीः।
इदं कृतान्तान्तिकवर्तिजीवितं ययाऽध्रुवं स्तब्धमतिर्न बुध्यते ॥ ११ ॥

श्रीशुक उवाच।

तस्येत्थं भाषमाणस्य प्रह्लादो भगवत्प्रियः।
आजगाम कुरुश्रेष्ठ! राकापतिरिवोत्थितः॥ १२ ॥

तमिन्द्रसेनः स्वपितामहं श्रिया विराजमानं नलिनायतेक्षणम्।
प्रांशुं पिशङ्गाम्बरमञ्जनत्विषं प्रलम्बबाहुं सुभगं समैक्षत ॥ १३ ॥
तस्मै बलिर्वारुणपाशयन्त्रितः समर्हणं नोपजहार पूर्ववत्।
ननाम मूर्ध्नाश्रुविलोललोचनः सव्रीडनीचीनमुखो बभूव ह ॥ १४ ॥
स तत्र हासीनमुदीक्ष्य सत्पतिं सुनन्दनन्दाद्यनुगैरुपासितम्।
उपेत्य भूमौ शिरसा महामना ननाम मूर्ध्ना पुलकाश्रुविक्लवः ॥ १५ ॥

भाषा टीका।

मेरे कहे हुए वचन को सत्यमानते होवे, तब मैं जिस प्रकार वंचना न हो तैसे सत्य करता हूं बस आप मेरे मस्तक पर अपना तीसरा पग रखकर माप लीजिये यहां पर यदि ऐसी शंका हो, परमात्मा सर्व चेतनों के हित परायण हैं बलि का सर्व स्वहर कर भी फिर उसको वरुण पाश मे क्यों बंधवाया? तो उसका यह समाधन है, कि आपका बलि को अहंता ममता छुडाकर अपने परमैकांतिक भक्त बनाने का अभिप्राय है सो सर्वस्व लेकर ममतावलंबि कुछ न रहने दिया, परंच जब तक मैं बना हूं तब तक मेरा बहुतसा होसका है इस लिये अहंतावलंबि पदार्थ जो मैं है सो भी जैसे अपना होजाय अर्थात् मैं और मेरा ये दोनों श्रीहरि के होजाय इसी से यह यत्न किया सो बलि के शरीर मापने की प्रार्थना करने पर सफल हुआ ॥ २ ॥

हे प्रभो! मैं पद से भ्रष्ट होकर नरक से नहीं डरता हूं और न वरुण के फांस में बांधने से डरता हूं और न कोई बडे भारी व्यसन [दुःख] से डरता हूं और न धन के दुःख से न आपके दंड देने से जैसा, कि—अपकीर्त्ति से अत्यन्त डरता हूँ ॥ ३ ॥

हे पूज्यतम! पुरुषों को दिये हुए दंड को मैं अच्छा मानता हूं, क्योंकि? जो न माता न पिता न भ्राता और न सुहृद कोई भी नहीं देता है ॥ ४ ॥

आप हम असुर लोगों के परोक्ष होकर परम गुरु हैं जो आप अनेक मदों से अंध होने वाले हम लोगों को विभ्रंश रूप चक्षु देते हो ॥ ५ ॥

जिस आपके विषे रुढ वैरानुबन्ध से बहुत से असुर लोग उस सिद्ध को प्राप्त हुए, कि—जिस सिद्धि को एकांत योगिजन प्राप्त होते हैं ॥ ६ ॥

तिन परम गुरु आपने मेरा निग्रह किया है और वरुण के पाशों से बांधा भी है पर इससे मेरे को न कुछ लज्जा और न कुछ व्यथा ॥ ७ ॥

हमारे पितामह प्रल्हादजी आपके भक्तों को संमत हैं जिनों ने बडा साधुवाद प्रकट किया, और आपके विपक्षी उनके पिता ने उनको बहुत ही पीडित किये परंच वह सदा आपही के परायण रहे ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

अन्तत आयुषोऽन्ते रिक्थहारैः पुत्रैः इह गेहेषु केवलमायुषो व्यय एव नतु सुखं किञ्चित् ॥ ९ ॥

स प्रसिद्धो महान् स्वपक्षं दैत्यकुलं क्षपयतीति तथा तस्यापि॥१०॥

प्रसभं बलात्त्याजिता श्रीर्यस्य यया श्रिया स्तब्धमतिः ह

प्रह्लाद उवाच।

त्वयैव दत्तं पदमैन्द्रमूर्जितं हृतं तदेवाद्य तथैव शोभनम्।
मन्ये महानस्य कृतो ह्यनुग्रहो विभ्रंशितो यच्छ्रिय आत्ममोहनात् ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

पुमानिदं जीवितमद्ध्रुवं न बुध्यते कथंभूतम् कृतान्तस्यान्तिकवर्ति मृत्योः सन्निहितम् ॥ ११ ॥

राकापतिः पूर्णेन्दुः ॥ १२ ॥

अञ्जनत्विषं श्यामम् ॥ १३ ॥

स्वकृताहङ्कारादिरूपापराधस्मरणेन सव्रीडं नीचीनमधोमुखं यस्य सः ॥ १४ ॥

शिरसा नमन्नेवोपेत्य मूर्ध्ना ननाम बलेस्तत्कृतमनुग्रहं दृष्ट्वा पुलकैरश्रुभिश्च विक्लवो विह्वल. ॥ १५ ॥

त्वयैवेति नह्यैन्द्रं पदमेतदीयं त्वयापहृतं किन्तु स्वीयमेव पुनः स्वीकृतं तच्च शोभनमेव कृतं नत्र हेतुः, मन्य इति. यद्यस्माच्छ्रीरेव यदात्ममोहनं तस्माद्विभ्रंशितः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

मरणशीलस्य पुंसः आत्मादिभिर्देहादिभिः किम् ? न किमपि न कोऽपि पुरुषार्थः। किन्तु केवलमायुषो व्यय एवेति निश्चितवानिति शेषः अन्यथा पुनः पितामह इत्यस्यानन्वयापत्तेः यः अन्ततो जहाति देहिनं तेनानेनाऽऽत्मना देहेन किमित्यन्वयः। रिक्थहारैर्दायादैः स्वजन इत्याख्या व्यवहारो येषान्तैर्दस्युभिर्दस्युतुल्यैः स्वजनैरित्यर्थः। संसृतेर्हेतुभूतया भार्यया किम् ? ॥ ९ ॥

सोऽस्मत्पितामहो महान् सद्गुणाश्रयोऽगाधबोधः अपरिमितज्ञानसम्पन्नः सत्तमो भागवतश्रेष्ठः प्रह्लादः संसारिजनसङ्गाद्भीतः सन् स्वपक्षं दैत्यकुलं क्षपयतीति तथा तस्यापि भवतः नास्ति कुतोऽपि भयं यस्मात्तत्पादपद्मं ध्रुवं नित्यपुरुषार्थरूपं प्रपेदे शरणं जगाम ॥ १० ॥

तथा अहमपि दैवात्प्रसभं बलात्त्वयाजिता श्रीर्यस्य तादृशः आत्मनो मम रिपोस्तवान्तिकं समीपं नीतस्त्वत्पादपद्मं प्रपद्य इतिशेषः। श्रियं विशिनष्टि, यया श्रिया स्तब्धमतिरपहृतज्ञानः पुमान् कृतान्तस्य मृत्योः सन्निधानवत्यरीदं जीवितमध्रुवमस्थिरं न बुध्यते न मन्यते ॥ ११ ॥

तस्य बलेरित्थं भाषमाणस्य सतः हे कुरुश्रेष्ठ! उदितो राकापतिश्चन्द्र इव प्रकाशमानो भगवत्प्रियः प्रह्लादस्तत्राजगाम ॥ १२ ॥

तथागतं स्वपितामहं प्रह्लादम् इन्द्रसेनो बलिः सम्यगैक्षताऽपश्यत् कथम्भूतम् ? श्रिया कान्त्या विराजमानं कमलवदायते ईक्षणे यस्य प्रांशुं निर्मलमञ्जनत्विषं श्यामलं प्रलम्बावाजानुलम्बौ बाहू यस्य सुभगं सुन्दरम् ॥ १३ ॥

तस्मै महादाय पूर्ववदर्घ्यादिपूर्वकमर्हणां न चक्रे तत्र हेतुः वारुणैः पाशैर्यन्त्रितः बद्धः किन्तु केवलं मूर्ध्ना ननाम नमस्कृतवान् ततोऽश्रुभिर्विलोले लोचने यस्य सः सव्रीडं नीचीनमधःकृतं मुखं तस्य तादृशो बभूव ॥ १४ ॥

ततः स महामनाः प्रह्लादः सतां भागवतानां पतिं सुनन्दनन्दादिभिः पार्षदैस्सेव्यमानं तत्रोपविष्टं हरिं वामनं निरीक्ष्य पुलकैरश्रुभिश्च विक्लवो विह्वलस्सन् उपेत्य शिरसा भूमौ नमस्कृतवान् उवाचेति शेषः ॥ १५ ॥

तदेवाह–त्वयैवेति द्वाभ्याम्। ऐन्द्रं पदं त्वयैवास्मै दत्तं, कुतः ? यतस्त्वं तत्प्राप्तिसाधनेन विश्वजिता यागेनार्चितःआराधितः यद्दत्तं तदिदानीमपहृतं तच्च शोभनमेव कृतं, शोभनत्वमेव व्यनक्ति–मन्य इति। यद्यस्मात् श्रीरेवात्ममोहनं तस्मादयं विभ्रंशितः इति यत्सोऽयमस्य महाननुग्रह एवं त्वया कृत इति मन्ये अन्यथाऽयं श्रीमदात्स्वपरयाथात्म्यज्ञानरहितो विनश्येदिति भावः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

श्रीप्रह्लादः कया चर्यया अतिप्रियदेहादिकमुत्सृज्य श्रीहरिचरणैकशरणमापेति तत्राह–किमिति। यो येनात्मना देहेन मुदं जहाति तद्विश्लेषलक्षणमरणेनेति शेषः। तस्य पुंसः तेन देहेन किम् ? न किमपि प्रयोजनमित्यर्थः। रिक्थहारैः पितृधनस्वीकारयोग्यैरेभिरायुषो व्ययो नाश इति यत्तस्माद्दुर्जनसङ्गाद्भीतः स्वपक्षोऽसुरजनः तस्य नाशकस्य ॥ ९–१० ॥

ममाप्ययमेव निश्चय इति भावेनाह–अथेति। असुरजातित्वात् मम शत्रुभूतस्य त्वया त्याजितराज्यश्रीः बुभूषुणेयं श्रीर्बलादपि त्याज्या अन्यथा अनर्थ योग एवेति भावेनाह–इदमिति। यया श्रिया स्तब्धमतिः कृतान्तान्तिकवर्तीदं जीवितं न जानातीत्यन्वयः ॥ ११ ॥

शुकः प्रह्लादस्य भक्त्यतिशयं दर्शयितुं बलेः स्तवनेन भगवद्भक्तिविशेषमाज्ञायागमनमिति तदागमनमाह–शुक इति ॥ १२ ॥

प्रांशुमुन्नतम् ॥ १३ ॥

सव्रीडत्वेन नीचीनमर्वाचीनं मुखं यस्य स तथा ॥ १४–१५ ॥

आत्मनो मोहहेतुभूतया श्रिया विभ्रंशितो विगलित इति यदयं महानुग्रहोऽस्यकृत इति मन्ये तत्तस्मात्कः पुमानात्मनो गतिं यथावदभिचष्टे न कोऽपि यथात्मनः स्वस्य गतिं सर्वत्र ख्यातन्त्र्यलक्षणामभिचष्टे तथा कः परमात्मनो गतिं स्थितिं स्वातन्त्र्यलक्षणाम् पश्यति श्रीमदान्धत्वान्न पश्यतीति वा ॥ १६–१९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

जनात् दैत्यादिदुर्जनसङ्गाद्भीतः आत्मरिपोः आत्मरिपुत्वेन भ्रान्त्या प्रतीयमानस्यापीत्यर्थः । दैवेन श्रीप्रह्लादपौत्रत्वप्रापकत्वेन भाग्येन ॥ १० – १३ ॥

सव्रीडेति महद्दर्शने सति तदज्ञातस्यापि निजकुवृत्तस्य मनसि सङ्कोचानहत्वात् ॥ १४ ॥

स तत्र हासीनमिति वामनरूपेण पुनरवशिष्टतत्सङ्कल्पप्राप्तये न्याये प्रवृत्तत्वात् ॥ १५ ॥

त्वयैवेति यद्यस्मान्महानुग्रहादात्मना सुभगरूपगुणयुक्तेन स्वेन यत्मोहनं वशीकारः तस्मादेव हेतोः श्रियो विभ्रंशितः नतु बलात् नच दोषमयश्रीनिर्हरणपूर्वककर्मणेत्यर्थः ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु, सोपि पितरमनपेक्ष्य किमिति मां प्रपेदे, तत्राह-किमिति, द्वाभ्याम् । आत्मना देहेन रिक्थं स्वत्वेनार्थकमपि धनं हरन्तीति तैः ॥ ९ ॥

स्वपक्षं दैत्यकुलं क्षपयतीति तस्य ॥ १० ॥

आत्मरिपोरिति व्याजस्तुत्यैवोक्तिर्वस्तुतस्तु आत्मनः परमप्रियसुहृदः यद्वा आत्मनस्स्थूलसूक्ष्मदेहद्वयस्य रिपोर्नाशकस्य मोक्षप्रदस्येत्यर्थः । यद्वा आत्मनो मदहङ्कारस्य शत्रोस्त्वयाद्य मम त्रिभुवनाधीशत्वाहङ्कारमहारोगः साधु नाशित इत्यर्थः । दैवेन प्रह्लादपौत्रत्वप्रापकेन भाग्येन यया श्रिया ध्वस्तबुद्धिरयं मल्लक्षणो जनः इदं जीवितम् अद्रुध्रुवं न बुध्यत इत्यतो धन्वन्तरिमिव मत्सर्वरोगचिकित्सकं त्वामहं भाग्येन प्राप्त इति भावः ॥ ११–१२ ॥

सुभगर्षभं सर्वलोकप्रियम् ॥ १३ ॥

अपराधं विना कथं बन्धनमित्यपराधलक्षणस्य बन्धनस्य प्रह्लाददृष्टत्वात् सव्रीडं यद्वा प्रह्लादात्सदैव शिक्षितस्य निरभिमानत्वलक्षणस्य धर्मस्य भूमिदानप्रस्तावे सहसा विस्मरणात् तद्दर्शने सति सव्रीडं सव्रीडत्वादेव नीचीनं मुखं यस्य सः ॥ १४—१५ ॥

त्वयैवेति न ह्यैन्द्रं पदमेतदीयं त्वया हृतं किन्तु स्वीयमेव पुनः स्वीकृतं तच्च शोभनमेव कृतं यतः संयतोपि जनस्तत् तस्यां सम्पदि मत्त्यां क आत्मनो गतिः तत्त्वं यथावाञ्छितचेष्ट न कोपीत्यर्थः । न चात्र तव दत्तापहारलक्षणो दोषोपि स्नेहेन पुत्रहस्ते दत्तस्यापि मोदकादेरहिनाशङ्कया पुनराच्छिद्य नीतवतः पितुर्यथा तथेत्यर्थः ॥ ॥ १६—१७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आत्मना देहेन रिक्थहारैर्दायादैः इह गेहेषु आयुषो व्यय एव नतु सत् ॥ ९ ॥

स्वपक्षं दैत्यकुलं क्षपयतीति तथा तस्य प्रपेदे शरणम् गतः ॥ १० ॥

अथाहमपि आत्मनामसुराणां रिपोस्तवान्तिकं दैवेन नीतः अर्थात्त्वां शरणं गतोस्मि, कथम्भूतः ? प्रसभं बलात्याजिता, श्रीर्येन स: यया स्तब्धमतिर्जनः कृतान्तस्य मृत्योरन्तिकवर्ति निकटगम् एवंभूतमिदमध्रुवं जीवितं न बुध्यते ॥ ११ ॥

राकापतिः पूर्णचन्द्रः ॥ १२ ॥ १३ ॥

सव्रीडं नीचीनं नतं च मुखं यस्य सः ॥ १४ ॥

पुलकैरश्रुभिश्च निह्वलः ॥ १५ ॥

यत् यस्मात् श्रियः सम्पदः आत्ममोहनात् अहमेवेन्द्रस्त्रिजेतृत्वादिगुणवान् इत्यहङ्काराच्च ॥ १६ ॥

भाषा टीका ।

इस शरीर से कौनसा प्रयोजन है जो अंत में छोडही जायगा, ऐसे ही हिस्सा बटाने वाले स्वजन नाम वाले इन चोरों से क्या प्रयोजन है, और ससार की हेत रूप जाया से भी कौन कार्य है, और जब एक दिन मरने ही वाला है यह तब इसको गृहों से क्या प्रयोजन है क्यों कि ? जिन गृहों में लगकर व्यर्थ ही आयु चली जाती है ॥ ९ ॥

इस प्रकार अगाध बोध हमारे पितामह प्रल्हादजी ने अंत मे भगकर निर्भय और ध्रुव ऐसे आपके चरणारविन्दों की शरण ली यद्यपि आप दैत्य कुल के नाशक रहे तो भी और की शरण नहीं ली ॥ १० ॥

अब इसी प्रकार अपने वैरी ऐसे आपके समीप में आ पहुंचा हूं और बलात्कार से मेरी संपत् भी दूर करदीनी हैं जिस संपत् के कारण पुरुष जड मति होकर सदा सन्निहित मृत्यु को नहीं जानता है ॥ ११ ॥

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि—हे कुरु श्रेष्ठ ! राजा बलि जब तक ऐसे बोलते रहे तब तक जैसे चन्द्र का उदय भया हो इस प्रकार भगवत्प्रिय प्रल्हाद आये ॥ १२ ॥

वैष्णव श्री से देदीप्यमान कमल सदृश लोचन वाले, और बडे उन्नत तथा अञ्जन सदृश कांति वाले, दीर्घ बाहु और परम सुभग ऐसे अपने पिता मह प्रल्हाद को बलिने देखा ॥ १३ ॥

उन प्रल्हादजी को वरुण के पाशों से बंधे हुए बलि ने पूर्ववत् सत्कार नहीं कर पाया किंतु मस्तक से नमस्कार मात्र किया और नेत्रों में अश्रुपात भर आये और लज्जा से नीचे को मुख कर लिया ॥ १४ ॥

प्रल्हादजी ने नन्द सुनन्द आदिक पार्षदों से उपासित श्रीपति को देखा और समीप जाकर आनन्दाश्रुओं से विह्वल और पुलकित होकर भूमि में मस्तक से प्रमाण किया ॥ १५ ॥

प्रह्लाद उवाच

प्रह्लादजी बोले, कि—हे प्रभो आपने ही इसको यह इन्द्र का समृद्ध पद दिया और उसको फिर आपने लेलिया यह बहुत अच्छा भया, और मैं तो यह जानता हूं कि—जो अपने को मोहित करने वाली से आपने इसका वियोग किया यह परम अनुग्रह किया है ॥ १६ ॥

यया हि विद्वानपि मुह्यते यतस्तत्को विचष्टे गतिमात्मनो यथा ।
तस्मै नमस्ते जगदीश्वराय वै नारायणायाऽखिललोकसाक्षिणे ॥ १७ ॥

श्रीशुक उवाच ।

तस्याऽनुशृण्वतो राजन् ! प्रह्लादस्य कृताञ्जलेः ।
हिरण्यगर्भो भगवानुवाच मधुसूदनम् ॥ १८ ॥
बद्धं वीक्ष्य पतिं साध्वी तत्पत्नी भयविह्वला ।
प्राञ्जलिः प्रणतोपेन्द्रं बभाषेऽवाङ्मुखी नृप ! ॥ १९ ॥

विन्ध्यावलिरुवाच ।

क्रीडार्थमात्मन इदं त्रिजगत्कृतं ते स्वाम्यं तु तत्र कुधियोऽपर ईश ! कुर्युः ।
कर्तुः प्रभोस्तव किमस्यत आवहन्ति त्यक्तह्रियस्त्वदवरोपितकर्तृवादाः ॥ २० ॥

ब्रह्मोवाच ।

भूतभावन ! भूतेश ! देवदेव ! जगन्मय ! ।
मुञ्चैनं हृतसर्वस्वं नायमर्हति निग्रहम् ॥ २१ ॥
कृत्स्ना तेऽनेन दत्ता भूर्लोकाः कर्मार्जिताश्च ये ।
निवेदितं च सर्वस्वमात्माऽविक्लवया धिया ॥ २२ ॥

यत्पादयोरशठधीः सलिलं प्रदाय दूर्वाङ्कुरैरपि विधाय सतीं सपर्याम् ।
अप्युत्तमां गतिमसौ भजते त्रिलोकीं दाश्वानविक्लवमनाः कथमार्तिमृच्छेत् ॥ २३ ॥

श्रीभगवानुवाच ।

ब्रह्मन् ! यमनुगृह्णामि तद्विशो विधुनोम्यहम् ।
यन्मदः पुरुषः स्तब्धो लोकं मां चाऽवमन्यते ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मोहनत्वमेवाह—यया श्रिया विद्वानपि यतः संयतोऽपि मुह्यति तस्यां सत्यां कोऽन्यः पुमानात्मनो गतिं तत्त्वं यथावद्विचष्टे पश्यति तस्मै महाकारुणिकाय ॥ १७ ॥

तस्य प्रह्लादस्याऽनुशृण्वत उवाचेति किञ्चिद्वक्तुं प्रवृत्त इत्यर्थः ॥ १८ ॥

तदैव विन्ध्यावलिरपि वक्तुं प्रवृत्ता । तां च संमानयन् हिरण्यगर्भः स्वयं तूष्णीं स्थितोऽतस्तस्या एव वाक्यं प्रथममवतारयति, बद्धं वीक्ष्येति ॥ १९ ॥

त्रिजगतः कर्तुः प्रभोः पालकस्याऽस्यतः संहर्तुश्चेश्वरस्य तवाऽग्रे किमावहन्ति किं समर्पयन्ति त्वयाऽवरोपितः कर्तृवादः कर्तारः स्वतन्त्रा वयमिति वादमात्रमपि येषां ते । अयं भावः लोकत्रयं मयाऽर्पितं तृतीयपादाय देहं समर्प्य प्रतिश्रुतमूनं करोमीति देहादिषु स्वाम्याविष्कारेण त्वत्र्ययं कुबुद्धिर्निर्लज्जश्च यतस्त्वमेव सर्वस्यापि स्वाम्यतो मन्दबुद्धिमेनं केवलं कृपया विमुच्य पालयेति ॥२०॥

तदेवं प्रह्लादस्य विन्ध्यावल्याश्च परमार्थोक्त्या प्रसन्नो हरिः ब्रह्मा तु लोकदृष्ट्यैव विज्ञापयति भूतभावनेति त्रिभिः ॥ २१ ॥

निग्रहानर्हत्वे हेतुः कृत्स्नेति सर्वस्वमेवाह—आत्मेति ॥२२॥

तदेव कैमुत्यन्यायेनाह—यस्य तव पादयोः सलिलमात्रमपि प्रदाय सर्वोऽपि जन उत्तमां गतिं प्राप्नोति. तस्मै तुभ्यमसौ बलिस्त्रिलोकीं दाश्वान्दत्तवान् स आर्तिं कथं प्राप्नुयात्२३

तस्य विशोऽर्थान् तन्वर्थापहारः कोऽयमनुग्रहस्तत्राह, यन्मदः यैरर्थैर्मदो यस्य सः अत एव स्तब्धोऽनम्रः सन् मदस्तम्भहेतूनामर्थानामपहार एवानुग्रह इत्यर्थः ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्च यया भिया विद्वानपि यतः स्वयतोऽपि मुह्येत् ततस्तस्यां सत्यां कः पुमान् आत्मनो गतिं स्वरूपं यथावद्विचष्टे पश्यति ? कथमिति शेषः । कथंचिच्चष्टे न कथञ्चिदपि पश्यतीत्यर्थः । तस्मै महोपकर्त्रे जगतामीश्वराय सर्वज्ञाय नारायणाय तुभ्यं नमः केवलं नमस्कर्त्तुं शक्नुमः नत्वेवं कुर्वेवं न कुर्वीति विधातुं शक्नुम इति भावः ॥ १७ ॥

प्रह्लादस्याभिप्रेतमाविष्कर्तुं हिरण्यगर्भस्तमुवाचेत्याह मुनिः—तस्येति । बद्धाञ्जलेः प्रह्लादस्य शृण्वतस्ततो भगवान्हिरण्यगर्भो मधुसूदनमुवाच किञ्चिद्वक्तुमुद्यत इत्यर्थः । तथैव विन्ध्यावलिरपि किञ्चिद्विज्ञापयितुं प्रवृत्ता ताञ्च सम्मानयन्ब्रह्मा हिरण्यगर्भः स्वयं तूष्णीमवस्थितोऽतस्तस्या एव वचः प्रथममवतारयति बद्धामिति श्लोकः स्पष्टार्थः ॥१८—१९ ॥

तदेवाह—क्रीडार्थमिति । ते त्वया स्वस्य क्रीडार्थमिदं कृत्स्नं जगत्कृतं सृष्टं तत्र तस्मिन् त्वत्क्रीडोपकरणभूते त्वत्सृष्टे जगत्यपि केचित्कुबुद्धयः स्वाम्यन्तु तत्र स्वत्वबुद्धिं कुर्युः अस्य स्वत्वबुद्धिं कुर्वन्तः अपत्रपत्यक्ता ह्रीर्लज्जा यैस्ते अन्तरात्मना त्वया अवरोपिता आरोपिताः कर्तृवादा वयं स्वतन्त्रा इति वादा येषां ते वादमात्रेणापि स्वस्वामित्वरहिता इत्यर्थः । एवंविधास्ते कर्त्तुः स्रष्टुः प्रभोः पालकस्य अस्यतः संहर्तुश्च तव किमावहन्ति किं समर्पयन्ति किञ्चित्स्वमस्ति चेत्समर्पयेयुः तदभावात् किं समर्पयन्तीति भावः । कां हानिं कुर्वन्ति? न तव कदाचिदपि हानिरपीति चार्थः । अयमभावः लोकत्रयं मयार्पितं तृतीयपादाय देहं समर्प्य प्रतिश्रुतमृतं करोमीति देहादिषु स्वाम्याविष्कारेण पुनरयं कुबुद्धिर्निर्लज्जश्च. त्वमेव सर्वस्य स्वाम्यतो मन्दबुद्धिमेनं विमुच्य पालयेति, अयमेव प्रह्लादस्याऽप्यभिप्रायः ॥ २० ॥

इममेवाभिप्रायमाविष्कर्तुं सम्बोधयन् स्पष्टमाह, ब्रह्मा—भूतभावनेति । हे भूतभावन ! भूतस्रष्टः ! भूतेश ! भूतान्तरात्मन् ! अन्तरात्मतया पालकेत्यर्थः । हे देवदेव ! देवानां । जगत्संहर्तॄणां रुद्रादीनामपि देव ! जगच्छरीरक ! इतं सर्वस्वं यस्मात्तमेनं बलिं मुञ्चायं निग्रहं प्राप्तुं नार्हतीति ॥२१॥

निग्रहाऽनर्हत्वमेवाह—कृत्स्नेति । कृत्स्नाभूमिर्यं च कर्मणा संपादिता इन्द्रादिलोकास्ते चेत्येतत्सर्वस्वं तथाऽविक्लवया अदीनया बुद्ध्याऽऽत्मा देहश्च अनेन बलिना ते तुभ्यं दत्ताः अतोऽयमनिग्राह्य इति भावः ॥ २२ ॥

एतदेव कैमुत्यन्यायेनाह—यत्पादयोरिति । अशठधीरमूर्खधीर्यस्य तव पादयोः सलिलं विधायाऽर्घ्यजलं समर्प्य दूर्वाङ्कुरैरपि पूजां विधाय उत्तमां गतिमपि भजते प्राप्नोति अयं तु बलिरविक्लवमनाः स्थिरचित्तः सन् त्रिलोकीं दाश्वान् दत्तवानतः कथमयमार्ति प्राप्नुयात् ? तस्मादेनं विमुञ्चेत्यर्थः ॥ २३ ॥

एवं विज्ञापितो भगवानिममनुग्रहीतुमेवेत्थं मया कृतमित्याह, यावदध्यायसमाप्ति ब्रह्मन्निति । हे ब्रह्मन् ! अहं तावद्यमनुग्रहीतुमिच्छामि तस्य विशोऽर्थान् विधुनोम्यपहरामि तावदनर्थहेत्वर्थापहार एव प्रथमो मदनुग्रह इत्यर्थः । अर्थस्यानर्थहेतुत्वमाह—यन्मदः यस्य धनस्य सम्बन्धी मदो यस्य तादृशः अत एव स्तब्धो विवेकरहितः अनम्रो ना पुरुषो लोकं मदन्तरात्मकं जगत् मां तदन्तर्वर्तिनं माञ्चाऽवमन्यते तिरस्करोतीत्यर्थः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्वभर्तृगर्वोद्रेकं कटाक्षीकृत्य भगवन्तं समीडे क्रीडार्थमिति ते त्वयेदं त्रिजगदात्मनः क्रीडार्थं कृतमिति सङ्गिरन्ते केचित् "क्रीडार्थं सृष्टिरित्येके" इतिश्रुतेः । हे ईश ! तत्रापरे कुधियोऽसुरप्रकृतयः आत्मनः स्वाम्यं कुर्युः वयमस्य स्वामिन इति जल्पन्ति जल्पं कुर्वन्ति. तत्रापि तुशब्दो महाविशेषं प्रकाशयति तेन तव स्वाम्यस्य न कामपि हानिमापादयन्ति इत्याह—कर्तुरिति, त्वयाऽवरोपितो निवारितोऽहङ्कारोऽस्मीति विवादो येषां ते तथा अत एव त्यक्तलज्जास्ते कुधियोऽस्य जगतः कर्त्तुः प्रभोरधिपतेस्तव किमावहन्ति न किमपि हानिं कुर्वन्तीत्यर्थः । समर्थेऽधिपतौ प्रभुरिति च ॥२०—२२ ॥

बन्धनादिकमासुरजन्मदोषापहरणाय त्वया कृ[तं] न तु द्वेषादन्यथा तव वैषम्यनैर्घृण्ये स्यातां न तद्युक्तमित्याशयेनाह—यत्पादयोरिति । न विक्लवमनाः सर्वस्वदानादप्यहीनमनाः ॥ २३ ॥

यद्यपि ब्रह्मा भगवदभिप्रायं वेत्ति तथापीतरेषां तज्ज्ञापनाय स्वाभिप्रायं वक्ति—ब्रह्मन्निति । ब्रह्मन् प्रजापते ! यन्मदः यद्वित्तनिमित्तमदः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

आत्मीयत्वेन श्रीप्रह्लादविन्ध्यावल्यौ तावत्तदवज्ञागर्भमेव निवेदितवत्यौ श्रीब्रह्मा तु तद्भक्तपक्षपातेन बलिपक्षमेव गृहीत्वा सविनोदं निवेदयति, भूतेति ॥ २१—२५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

उवाचेति किञ्चिद्वक्तुं प्रवृत्त इत्यर्थः ॥ १८ ॥

तथैव विन्ध्यावलिरपि वक्तुं प्रवृत्ता तां च सम्मानयन् हिरण्यगर्भः क्षणं तूष्णीं स्थितः अतस्तस्या एव वाक्यमवतारयति, बद्धं वीक्ष्येति । भयविह्वला भगवत्पराभवभयव्यग्रा अवाङ्मुखी स्त्रीस्वभावात्प्रतीचीनवदना ॥ १९ ॥

ते त्वया कुधियो बलिप्रभृतयः कर्तुः स्रष्टुः प्रभोः पालयितुः अस्यतः संहर्तुश्च तवेति चतुर्थ्यर्थे षष्ठ्यर्थः एवंभूताय तुभ्यं किं वस्तु आवहन्ति ददाति अहन्तास्पदममतास्पदवस्तूनां मध्ये कस्मिन् वस्तुनि स्वाम्यं वर्त्तते यत् तृतीयपादाय प्रतिश्रुतमुद्धं करोमीत्युक्त्वा स्वदेहं दातुमिच्छन्ति त्यक्ता ह्रीः यैः त्रिभुवनस्य देहस्य च त्वत्सृष्टत्वात्त्वदीयमेवेदं सर्वं तुभ्यं दत्वा स्वकीर्तिं चिकीर्षवो लज्जामपि किं त्यक्तवन्त इत्यर्थः । अत एवैते महोन्मादरोगग्रस्तास्त्वया सद्वैद्येन कृपया साधु चिकित्सिता इत्याह—अवरोपितः अल्पबुद्धिमायेन मिथ्या हयत्नापि सहसैवावरोहितः त्रिभुवनपालनकर्तारो वयमिति मिथ्या

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ऽहंकारमूलकः कर्तृवादो येषां ते तस्मादपराधिनोऽस्य वन्धनमुचितमेवेति भावः ॥ २० ॥

तदेवं प्रह्लादस्य विन्ध्यावलेश्च परमार्थोक्त्या प्रसादितमेव भगवन्तं ब्रह्मा लोकतत्त्वदृष्ट्या प्रसादयति, भूतेति ॥ २१ ॥

ते तुभ्यम् आत्मा स्वदेहश्च निवेदितः ॥ २२ ॥

निग्रहाऽनर्हत्वं कैमुत्येनाह—यदिति । असौ सर्वोऽपि जनः उत्तमां गतिं वैकुण्ठप्राप्तिं भजति वलिस्तु त्रिलोकीं दाश्वान् दत्तवान् कथमार्तिम् प्राप्नुयात् ॥ २३ ॥

तस्यविशो धनानि ननु, धनापहारः कोऽयमनुग्रहस्तत्राह—यन्मदः यैरर्थैरेव मदो यस्य सः ॥ २४ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यया श्रिया यतो येनाहङ्कारेण च विद्वानपि मुह्यते तत् तयोः सतोः यथा यथावदात्मनः गतिं को विचष्टे पश्यति न-कोऽपीत्यर्थः । सम्पदहङ्कारौ उपास्योपासकस्वरूपज्ञानविरोधिनाविति भावः ॥ १७ ॥

हिरण्यगर्भो ब्रह्मा उवाच ॥ १८ ॥

ततोऽपि पूर्वं तत्पत्नी वलिभार्या वभाषे ॥ १९ ॥

ते त्वयां आत्मनः क्रीडार्थम् इदं त्रिजगत् त्रिगुणात्मकं जगत् कृतं तत्र स्वाम्यं स्वामिभावं ममेदमिति मतिं कुधियः कुर्युः तत्र हेतुः त्वदवरोपितः कर्तृवादो येषां ते तथा त्वत्प्रवर्तितमायया देहेन्द्रियादिभूतया स्वातन्त्र्येण वयमेव कर्तार इति वादो येषां ते त्वन्मायया मोहिता इत्यर्थः । अत एव त्यक्तह्रियः ते तथाभूताः जगतः कर्तुः प्रभोः रक्षतुः अस्यतः संहर्तुः किमावहन्ति किं समर्पयन्ति न किमपीत्यर्थः । त्वयैव दत्तमित्याद्यार्येणोक्तं सत्यमेवेति ॥ २० ॥ २१ ॥

अनेन ते कृत्स्ना भूः दत्ता कर्मार्जिता लोकाः दत्ताः एवं सर्वस्वं निवेदितं पदं तृतीयं कुरु शीर्ष्णि मे निजमिति वदता आत्मा च निवेदितः ॥ २२ ॥

यस्य तव पादयोः सलिलमात्रमपि प्रदाय दूर्वाङ्कुरैरपि सपर्यां विधाय जनः उत्तमां गतिं भजते प्राप्नोति असौ वलिः तस्मै तुभ्यं त्रिलोकीं दाश्वान् दत्तवानतोऽयं कथमार्तिम् ऋच्छेत् प्राप्नुयात् ॥ २३ ॥

विशः अर्थात् विधुनोमि अपहरामि ॥ २४—२६ ॥

———

भाषा टीका ।

जिस संपत् के वश होकर विद्वान् भी मोह को प्राप्त होता है उस संपत के रहने पर कौन ऐसा पुरुष है जो अपने आत्मतत्त्व का विचार करसके उस परमश्रेय के प्रतिबंधकरूप संपत् के विध्वंश करने वाले परम कारुणिक जगत् के ईश अखिललोक के साक्षि ऐसे आप नारायण को नमस्कार हो ॥ १७ ॥

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि—हे राजन् ! इतने में कृताञ्जलि प्रह्लाद के सुनते २ बडे ज्ञानवान् ब्रह्माजी ने श्रीमधुसूदन देव से बोलने की इच्छा करी ॥ १८ ॥

हे नृप ! इतने में अपने पति को बंधे हुए देखकर अति भय भीत वलि की पत्नी हाथ जोडकर नीचे को मुखकर प्रणत होकर उपेन्द्र [श्रीहरि] से वोली ॥ १९ ॥

विन्ध्यावलिरुवाच ॥

विन्ध्या वलिजी वोलीं, कि—हे ईश ! इस जगत् को आपने अपने क्रीडा के निमित्त किया है और उस जगत में शरीरादिक यावत्पदार्थ आपके रचे हैं परंच उस शरीरादिक के और भुवन के कुबुद्धि जन अपने आपही स्वामी वन जाते हैं । जगत् के उत्पत्ति कर्त्ता पालन कर्त्ता और संहार कर्त्ता तो आप हैं आपने उनके ऊपर स्वामी पने का आरोपण कर दिया है, वे फिर आप ही स्वामी वन वैठे, । जब सब पदार्थ आपही का है तब वे निर्लज्ज लोग आपको क्या समर्पण करते हैं सो मैं नहीं जानती हूं । अर्थात् मेरे पति को यह अभिमान है कि—तीनो लोक मैंने समर्पण किये अब तीसरे पग में मैं अपने शरीर को समर्पण करके प्रतिज्ञा को सत्य करता हूं सो देह गेहादिक पहिले ही आपका है फिर ये समर्पण करने वाला कौन है तस्मात् मेरा पति निर्बुद्धि और निर्लज्ज है इसको आप अपनी निर्हेतुक केवल कृपा से छुडा कर पालन करो ॥ २० ॥

ब्रह्मोवाच ॥

ब्रह्माजी वोले, कि—हे भूत भावन ! हे भूतेश ! हे देवदेव ! हे जगत्पते ! इसका सर्वस्वहरा गया अब इसको छोड दीजिये यह दंड देने योग्य नहीं है ॥ २१ ॥

हे प्रभो ! इसने समग्र भूमि आपको दीनी, और कर्म से जीते हुए सब लोक दिये, और स्थिर बुद्धि से सर्वस्व आपको निवेदन किया ॥ २२ ॥

जिसके चरणों में सौम्य होकर जल मात्र देकर, और दूर्वा के अंकुर मात्र से पूजा कर कर पुरुष उत्तम गति को प्राप्त होता है फिर इसने तो स्थिर मन से आपको त्रिलोकी समर्पण करी है यह कैसे दुःख पासका है ॥ २३ ॥

श्रीभगवान उवाच ॥

श्रीभगवान् वोले, कि ब्रह्मन् हम जिस पर अनुग्रह करते हैं उसका धन हर लेते हैं, जिसके मदसे मत्त होकर पुरुष सब लोक का और मेरा अव मान करता है ॥ २४ ॥

———

श्रीभगवानुवाच।

यदा कदाचिज्जीवात्मा संसरन्निजकर्मभिः।
नानायोनिष्वनीशोऽयं पौरुषीं गतिमाव्रजेत् ॥ २५ ॥
जन्मकर्मवयोरूपविद्यैश्वर्यधनादिभिः।
यद्यस्य न भवेत्स्तम्भस्तत्रायं मदनुग्रहः ॥ २६ ॥
मानस्तम्भनिमित्तानां जन्मादीनां समन्ततः।
सर्वश्रेयः प्रतीपानां हन्त मुह्येन्न मत्परः ॥ २७ ॥
एष दानवदैत्यानामग्रणीः कीर्त्तिवर्धनः।
अजैषीदजयां मायां सीदन्नपि न मुह्यति ॥ २८ ॥
क्षीणरिक्थश्च्युतः स्थानात्क्षिप्तो बद्धश्च शत्रुभिः।
ज्ञातिभिश्च परित्यक्तो यातनामनुयापितः ॥ २९ ॥
गुरुणा भर्त्सितः शप्तो जहौ सत्यं न सुव्रतः।
छलैरुक्तो मया धर्मो नायं त्यजति सत्यवाक् ॥ ३० ॥
एष मे प्रापितः स्थानं दुष्प्रापममरैरपि।
सावर्णेरन्तरस्यायं भवितेन्द्रो मदाश्रयः ॥ ३१ ॥
तावत्सुतलमध्यास्तां विश्वकर्मविनिर्मितम्।
यत्राधयो व्याधयश्च क्लमस्तन्द्रा पराभवः।
नोपसर्गा निवसतां सम्भवन्ति ममेक्षया ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

दुर्लभं पुरुषजन्म कथंचिल्लब्धवतो जीवस्य जन्मादिनिमित्तो गर्वो महाहानिकरस्तस्य च नाशो मदनुग्रहादेवेत्याह—यदेति द्वाभ्याम्। अनीशः परतन्त्रः सन्निजैः कर्मभिर्नानायोनिषु कृमिकीटकादिषु संसरन् ॥ २५ ॥

तत्र पौरुष्यां गतौ जन्मादिभिरपि यस्य यदि स्तम्भो न भवेत्तर्ह्ययं मदनुग्रह एव ॥ २६ ॥

कथं तर्हि ध्रुवादिभ्योऽर्थसम्पदो ददासीति चेत्तत्राह—मान एव स्तम्भो नम्रता तस्य निमित्तभूतानां समन्ततः सर्वेभ्यः सर्वश्रेयः प्रतिकूलानां जन्मादीनां सत्त्वेऽपि जन्मादिभिरिति वा हन्तेति खेदे हे ब्रह्मन्! मत्परो न मुह्येदतो भक्तस्येच्छया सम्पदोऽपि ददामि अभक्तस्तु मुह्येदिति तदपहाररूपमेव तस्यानुग्रहं करोमीति भावः ॥ २७ ॥

अस्य चेदानीं मत्परत्वादन्यैर्दुष्प्रापमपि दास्यामीति वक्तुं तस्य मोहाभावमाह—एष इति त्रिभिः ॥ २८ ॥ २९ ॥

"न ह्येतस्मिन्कुले कश्चिन्निःसत्त्वः कृपणः पुमान्" इत्यादिना छलैरेव मया धर्म उक्तस्तथापि तं धर्ममयं न त्यजत्यतः सत्यवाक् ॥ ३० ॥

मे मया अहमेवाश्रयः पालको यस्य सः ॥ ३१ ॥

स्थानं प्रापित इति यदुक्तं तदेव स्थानमाह—तावत्सावर्णिमन्वन्तरपर्यन्तं सुतलमध्यास्तामधिवसत्वित्यर्थः। यत्राधिवसतामाध्यादयो ममेच्छया न सम्भवन्ति ॥ ३२ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

एवमवमानेनान्यैश्च कर्मभिरिह लोके नानायोनिषु संसरन् तिर्यक्स्थावरादिषु जन्म प्राप्नुवन्नयं जीवात्मा कर्मवश्यः यदा कदाचित् याहच्छिकसुकृतविशेषात्पौरुषीं गतिं पुरुषजन्म प्राप्नुयात् ॥ २५ ॥

तत्रापि जन्मादिभिर्यस्य पुरुषस्य स्तम्भो मदः अनम्रता वा न भवेत्तत्र तद्विषये अयं स्तम्भाभाव एव मदनुग्रहो ज्ञेयः। तत्र जन्म-

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका

सत्कुले. कर्म भगवत्परिचर्यादि वयो यौवनादि । विद्या श्रौतस्मार्तादिः बुद्धिर्विवेकात्मिका धनं वित्तम् ॥ २६ ॥

कथं तर्हि ध्रुवादिभ्यः सम्पदो ददासि ? इत्यत्राह–मानेति । मानो गर्वः स्तंभोऽनम्रता ऽविवेको वा तयोर्निमित्तानां जन्मादीनां पूर्वग्रन्थपरिगणितानां समन्ततः सर्वश्रेयःप्रतिकूलानां सद्भावेऽपीति शेषः । मत्परस्तेषु न मुह्येदित्यर्थः । हन्त हे ब्रह्मन्! ॥ २७ ॥

अस्य चेदानीं मत्परत्वादन्यैर्दुष्प्रापमपि दास्यामीति वक्तुं तस्य मोहाभावमनुगृह्णाति–एष इति त्रिभिः । एष बलिः दानवानां दैत्यानांच आधिपतिः कीर्त्तिवर्द्धनश्च अजयां दुर्जयाम् मम मायामजैषीज्जये-दित्यर्थः ॥ २८ ॥

कीर्तिवर्द्धनत्वमेव प्रपञ्चयानि —क्षीणं रिक्थं धनं यस्य सोऽपि स्थानाच्च्युतोऽप्याधिपत्याद्भ्रष्टोऽपि शत्रुभिरधिक्षिप्तोऽपि बद्धोऽपि ज्ञातिभिः परित्यक्तोऽपि यातनां प्रापितोऽपि ॥ २९ ॥

गुरुणा उशनसा भर्त्सितोपि शप्तोऽपि सुव्रतः दृढसङ्कल्पः सत्यं न तत्याज तथा मया छलैरेव धर्म उक्तः तथाऽप्ययं सत्यवाक् तं धर्मं न त्यजति ॥ ३० ॥

अस्य मोक्षप्रदानं सङ्कल्पयति–एष इति । अमरैरपि प्राप्तुमशक्यं स्थानं मल्लोकं प्रापितः प्रापयिष्यत इत्यर्थः । देहावसाने मुक्तो भविष्यतीति भावः । जीवद्दशायाम् इन्द्राधिपत्यं भविष्यदनुगृह्णाति, सावर्णेरिति । सावर्णेर्मनोरन्तरस्य सम्बन्धीन्द्रोऽयं बलिरहमेवाश्रयो यस्य स भविता भविष्यति सावर्णिमन्वन्तरेऽयमिन्द्रो भविष्यतीत्यर्थः ॥ ३१ ॥

आधुनिकं सुतललोकाधिपत्यमनुगृह्णाति, तावदधुना विश्वकर्मणा विनिर्मितं सुतलं लोकमध्यास्तम् तत्राधिपतिर्भूत्वाधिवसत्वित्यर्थः । सुतलं विशिनष्टि—यत्र सुतले निवसताम् आध्यादयो मत्कटाक्षेण हेतुना न सम्भवन्ति तत्राधयो मनःपीडाः व्याधयो दैहिकाः क्लमः ग्लानिः तन्द्री अनवधानता पराभवः शीतोष्णादिभिरभिभवः उपसर्गोऽन्योऽप्युपद्रवः ॥ ३२॥

सत्यत्यागनिमित्तक्षीणत्वादिकं प्राप्तोऽपि सत्यं न त्यक्तवानित्यन्वयः ॥ ३० ॥

भवतास्मै किमनुग्रह्यते त्वद्भक्तायेति तत्राह–एवमिति । किं तत्स्थानमत्राह, सावर्णेरिति ॥ ३१ ॥

तर्हि तावत्पर्यन्तमाशयोद्रेकवदेवंविधं क्लेशमनुभूय स्थेयं किम् ? तत्राह–तावत्सुतलमिति । तत्रान्येषामपि क्लेशानुभवो नास्ति किम्पुनरस्येति भावेन वक्ति, यत्राधय इति । उपसर्गा उपद्रवाः ॥ ३२॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नानायोनिभ्य उत्तमत्वेन मदोद्रेकहेतोरपि पुरुषयोनेर्यदृच्छया प्राप्तौ मदनुगृहीतस्य पुंसो मदो नैवोत्पद्यत इत्याह–यदा कदाचिदिति । अयं जीवात्मा निजकर्मभिर्नानायोनिषु संसरन् कदाचिद्दैववशात् पौरुषीं गतिमाव्रजेत् ॥ २५ ॥

तत्र पौरुषगतौ यद्यस्य जीवात्मनो मदर्चनादौ स्तम्भस्तन्द्रीलक्षणो नभवेत्तर्ह्ययं मदनुग्रहः मत्कटाक्षपातलक्षण इति ज्ञातव्यम् ॥ २६ ॥

स्वभक्तलक्षणमाह–मानस्तम्भेति पञ्चम्यर्थे जन्मादीनामिति षष्ठी ॥ २७ ॥

एतल्लक्षणदर्शनाय दवीयान्मार्गो न गन्तव्यः किन्त्वत्रैवेति भावेनाह–एष दानवेति । अजयाम् अजेयां न जयो यस्याः सा अजयेति ॥ २८ ॥

यातनाम् तीव्रवेदनाम् ॥ २९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

श्रीप्राप्तिर्द्विधा कर्मादिना भगवदनुग्रहेण च तत्र ब्रह्मान्नित्यादिना कर्मप्राप्तायाः एव श्रियो दोषो वर्णितः मद्दत्तायास्तु नास्त्येव स इत्याह–जन्मेति । अतः सुतलाधिपत्येन पुनः स्वर्गाधिपत्येन च न मदो भवितेति भावः ॥ २६—३१ ॥

तन्द्रीति काचित् उणादावी प्रत्ययोऽयम् ॥ ३२—३६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

नच सर्वस्यैवाऽनुग्राह्यजीवस्य धनानि हरामि कस्यचिन्न हरामि च कस्मैचित् अतिशयेन ददामि च मदनुग्रहस्य लोकैरतर्क्यत्वाद्विविधजातीयत्वादतो जीवेषु मदनुग्रहलक्षणं शृणिवत्याह–यदेति । नानायोनिषु कृमिकीटादिष्वपि अनीशः परतन्त्रः संसरन्नेव यदा कदाचिदेव पौरुषीं गतिं मनुष्यजन्म प्राप्नुयात् ॥ २५ ॥

तत्र पौरुष्यां गतौ जन्मादिभिर्यदि भ्रंशोऽवहेलनादिर्हेतुर्गर्वो नभवेत्तदा तत्र पुंसि मदनुग्रहः अयं पूर्वोक्तात् धनहरणलक्षणादन्यः अनुमेय इत्यर्थः । तस्य धनादिकं नापहरामि अपकारकत्वाभावादिति भावः ॥ २६ ॥

किं च मानो गर्वस्तद्विशेषः स्तम्भोऽनम्रता तयोर्निमित्तभूतानां जन्मादीनां न मुह्येत "नाग्निस्तृप्यति काष्ठानाम्" इति वत् षष्ठी तैर्जन्मादिभिर्न मुह्येदित्यर्थः । समन्ततः सर्वथैव हन्त आश्चर्यमेतदिति पदद्वयप्रयोगात् पूर्ववत् यदि शब्दाप्रयोगाच्च कदाचिदपि न मुह्येदिति सच मत्परो मदेकान्तभक्त एवात्यान्तिकमदनुग्रहवानेव पूर्वोक्तादपि विशिष्यत एव तादृशेभ्यो ध्रुवादिभक्तेभ्यः सम्पदो ददाम्येवेति भावः । कर्मजन्मा हि सम्पदनर्थकारिणी तामेव प्रथमानुकम्प्यभक्तस्य भगवान् हरति नतु स्वदत्तामिति केचित् स्वभक्तप्रेमवर्द्धनचतुरस्य हरेर्नायमपि नियमः पाण्डवादावपि सम्पदपहारदर्शनादित्यपरे ॥ २७ ॥

नन्वास्तामेतत् प्रस्तुतो बलिरयं तव कीदृशानुग्रहवान् भक्तो यस्य सम्पदो हरसीति तत्राह, एष इति । अजैषीत् नतु जेष्यति जयतीति वा प्रयुक्तं तेन पूर्वमेव मायां जितवतोऽस्य स्तम्भादयो मायिकाः कुतः सम्भवेयुर्यन्निवर्तनार्थं मया धनैश्वर्य्यहरणं कार्य्यमितिद्योतितं सीदन्नपि न मुह्यतीति सम्पद्भिरमुह्यन्नपि जनो विपत्प्राप्तिक्षणे वैक्लव्यान्मुह्यन्नेव दृष्ट इति भावः ॥ २८ ॥

अयं तु मयापि विपत्सिन्धुमध्ये निक्षिप्तोऽपि न मुह्यतीति किं वक्तव्य स्वानष्ठालग्ग्नापि न त्यजतीत्याह–क्षीणेति ॥ २९ ॥

इन्द्रसेन महाराज ! याहि भो भद्रमस्तु ते ।
सुतलं स्वर्गिभिः प्रार्थ्यं ज्ञातिभिः परिवारितः ॥ ३३ ॥
न त्वामभिभविष्यन्ति लोकेशाः किमुतापरे ।
त्वच्छासनातिगान्दैत्यांश्चक्रं मे सूदयिष्यति ॥ ३४ ॥
रक्षिष्ये सर्वतोऽहं त्वां सानुगं सपरिच्छदम् ।
सदा सन्निहितं वीर ! तत्र मां द्रक्ष्यते भवान् ॥ ३५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

"न ह्येतस्मिन् कुले कश्चिन्निःसत्त्वः कृपणः पुमान्" इत्यादिना मया प्रथमतश्छलेनैवं प्रायेणाधर्मोऽपि धर्म उक्तः तथैवानन्तरम् "विप्रलब्धो ददामीति त्वयाहं चाढ्यमानिना । तद्व्यलीकफलं भुङ्क्ष्व निरयं कतिचित्समाः" इत्यनेन धर्मोऽप्यधर्म उक्तः तदप्ययं सत्यवाक् सत्यं न त्यजति अन्यस्त्वेवं विधेऽर्थे "शठे शाठ्यं प्रकुर्वीत" इति नीत्या शाठ्यमेव कुर्य्यात् तस्मान्मया भक्तवत्सलेनापि कृतमेतस्यैतादृशकदर्थनं स्वभक्तिनिष्ठानिःसीमधैर्यादिगुणप्रख्यापनार्थमेवेति भावः न चाऽस्य मत्पदो हरणीति त्वया ज्ञेयमित्याह—एष इति । अमरैर्दुष्प्रापमिति इन्द्रपदात्स्वर्गादपि सुतलस्याधिक्यं तदानीमेवाद्भुतं श्रीकृष्णादत्तश्रीदामाश्रमवदिति ज्ञेयम् ॥ ३० ॥

नत्वैन्द्रं पदं तस्य न तावदिति मन्तव्यमित्याह—सावर्णेरिति । न च तदापि तत्रापि देवा इमं कदर्थयिष्यन्तीति वाच्यं मदाश्रयः अहमस्य द्वारपालको भूत्वा जाग्रदेवास्या स्यामीति भावः विश्वकर्मणो विशेषेण स्वर्गीयामरावतीपुरादतिवैशिष्ट्येन निर्मितामिति भगवदभिप्रायेण तत्तुल्यादेव तत्ततोऽधिकं जातमिति भावः ॥ ३१ ॥

यत् यत्र ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मानो आग्रहः पूज्यत्वं स्तम्भः पूज्याऽपूजकत्वम् ॥२७॥२८॥
यातनां पीडां यापितः प्रापितः ॥ २९ ॥

"न ह्येतस्मिन् कुले कश्चिन्निःसत्त्वः कृपणः पुमान्" इत्यादिना छलैर्देवद्विजसङ्घे उत्साहजनकैर्वाक्यैर्मया अयं बलिरुक्तः प्रोत्साहितोऽपि सत्यं न जहौ यतः सत्यवाक् यतः धर्मं न त्यजति ॥ ३० ॥

मे मया ॥ ३१ ॥

अध्यास्तामधिवसतु यत यस्मिन् निवसतां ममेच्छया आध्यादयो न सम्भवन्ति तत्र क्लमः ग्लानिः तन्द्रा अनवधानता उपसर्गाः अन्य उपद्रवाः ॥ ३२ ॥

भाषा टीका।

इस संसार में पड़ा हुआ जीवात्मा अपने कर्मों के परवश होकर नाना योनियों में भटकता हुआ किसी समय पर मनुष्य-योनि को भी प्राप्त होता है ॥ २५ ॥

जन्म, कर्म, वय, रूप, विद्या, ऐश्वर्य, और धन आदिक से यदि इस मनुष्य जन्म में गर्व न होवे, तो वह हमारा अनुग्रह जानों ॥ २६ ॥

मान अनम्रता से होने वाले सर्व श्रेय कार्य के प्रतिकूल जन्म कर्मादिकों के मद से मत्परायण जन कभी मोह को प्राप्त नहीं होता है ॥ २७ ॥

और यह बलि तौ दैत्य दानवोंकी कीर्त्ति का बढाने वाला है और इसने माया को भी जीत लिया है कि—जो यह इतना दुःख पाकर भी मोह को नहीं प्राप्त होता है ॥ २८ ॥

क्योंकि ? इसको द्रव्य के भाग से हीन कर दिया स्थान से च्युत होगया, शत्रुओं ने बांधा और फटकारा, और जाति के लोगों ने त्याग दिया और बहुत सी इसको यातनादी ॥ २९ ॥

और गुरुजी ने भी बहुतसा धमकाया और शाप भी दी तौ भी इस सुव्रत ने सत्य नही छोडा, और हमने भी इससे छल की बातें करी पर यह सत्य वक्ता धर्म को नहीं छोडता है ॥ ३० ॥

और हे ब्रह्मन् ! अब हमने इसको देवताओं को दुष्प्राप्यस्थान दिया, और हमारा आश्रय लेने वाला यह सावर्णि मन्वन्तर का इन्द्र होगा ॥ ३१ ॥

तब तक तौ यह सुतल में विश्वकर्मा के रचे हुए स्थान में निवास करें जहां रहने वालों को आधि, व्याधि, ग्लानि, तंद्रा, सुख, दुःख इत्यादिक उपसर्ग हमारी इच्छा से नहीं होते हैं ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवं ब्रह्माणं प्रत्युक्त्वा करुणापरवशः साक्षाद्बलिं प्रत्याह, इन्द्रसेनेति, चतुर्भिः ॥ ३३ ॥

त्वच्छासनमतिगच्छन्त्यतिवर्तन्त इति तथा तान् ॥ ३४ ॥

तथाऽपि भवद्वियोगात्तदनिच्छन्तं प्रत्याह, सदेति ॥ ३५ ॥

तत्र दानवदैत्यानां सङ्गात्ते भाव आसुरः ।
दृष्ट्वा मदनुभावं वै सद्यः कुण्ठो विनंक्ष्यति ॥ ३६ ॥
इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्याम् अष्टमस्कन्ध बलिमोक्षणं नाम
द्वाविंशोऽध्यायः ॥ २२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सङ्गाद्य आसुरो भावः स विनङ्क्ष्यति ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
द्वाविंशोऽध्यायः ॥ २२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं ब्रह्माणमुक्त्वाऽथ बलिमुवाच. हे इन्द्रसेन महाराज !! ज्ञातिभिः परिवृतस्त्वं सुतलं स्वर्गिभिरपि प्रार्थ्यं लोकं याहि गच्छ तत्र तत्र भद्रमेव मेऽनुग्रहादस्तु ॥ ३३ ॥

तत्र वसन्तं त्वां लोकेशा इन्द्रादयोऽपि नाभिभविष्यन्ति किमु वक्तव्यमपरे नाभिभविष्यन्तीति, ये च तत्र त्वदाज्ञातिलङ्घिनो दैत्यास्तान् मम चक्रं सुदर्शनं सूदयिष्यति हनिष्यति ॥ ३४ ॥

सर्वेभ्योऽप्युपद्रवेभ्यस्त्वां सानुगं सपरिच्छदं सोपकरणमहं रक्षिष्ये, किञ्च हे वीर ! तत्र सुतले सदा सन्निहितं त्वद्‌द्वारि वसन्तं मां भवान् द्रक्ष्यते ॥ ३५ ॥

किंच दैत्यानां सङ्गाद्धेतोस्तव य आसुरो भावः स तत्र मम अनुभावं दृष्ट्वा सद्यः कुण्ठः प्रतिहतो विनङ्क्ष्यति । मदनुभावाज्ञानासुरं भावं त्यक्ष्यतीत्यर्थः ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
द्वाविंशोऽध्यायः ॥ २२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भवदाज्ञामन्तरेणेमं कथं गमिष्यामीति शङ्कामाभूदित्याह, इन्द्रसेनेति । मृतवदेकः कथङ्गमिष्यामीत्यत उक्तं ज्ञातिभिरिति ॥ ३३ ॥

स्वर्गस्थैरर्थ्यं चेत्स्पर्द्धया लोकेशा मामुपद्रविष्यन्तीति तत्राह, न त्वामिति । राज्यं त्यक्त्वा गतस्य तव शासने वयं न तिष्ठाम इति तिष्ठतां दण्डमाह-त्वच्छासनेति ॥ ३४ ॥

किं बहुनोक्तेन सर्वतो भद्रञ्चावज्ञं तथास्तीत्याह-सर्वत इति, न केवलं सन्निधानविशेषाद्रक्ष्यामि किन्तु प्रत्यक्षत एवेत्यत उक्तं तत्र मामिति ॥ ३५ ॥

तथाप्ययमनर्थस्तदवस्थ एव दानवादीनां संसर्गादिति च शङ्का माभूदित्याह-तत्र दानवेति । सद्यः कुण्ठ इत्येकं पदं सद्यः कुण्ठः छेदो यस्य स तथा अवनंक्ष्यतीति विनङ्क्ष्यतीति पाठे निर्मूलो भविष्यतीत्यर्थः ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
द्वाविंशोऽध्यायः ॥ २२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
द्वाविंशोऽध्यायः ॥ २२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

एवं ब्रह्माणं प्रत्युक्त्वा सत्याद्बलिमाह-इन्द्रसेनेति । महाराजेति तव महाराजत्वं नापयाति यतः स्वर्गिभिः प्रार्थ्यमेव न तु लभ्यम् ॥ ३३ ॥

सूदयिष्यति खण्डयिष्यति ॥ ३४ ॥

नच मद्विरहदुःखमित्याह-सदासन्निहितमिति ॥ ३५ ॥

दुःसङ्गाच्च माभैषीरित्याह-तत्रेति । त्वादृशभक्तसङ्गाद्दुष्टा अपि शिष्टा भवन्तीति भावः ॥ ३६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
द्वाविंशश्चाष्टमस्कन्धे सङ्गतः सङ्गतः सताम् ॥ २२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

इत्थं ब्रह्माणं प्रत्युक्त्वाऽथ साक्षाद्बलिं प्रत्याह—इन्द्रसेनेति, चतुर्भिः । भो इन्द्रसेन ! ते भद्रं भवतु भो महाराज ! सुतलं याहि ॥ ३३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स्वच्छासनमतिगच्छन्ति अतिक्रामन्तीति तथा तान् ॥३४-३६॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
द्वाविंशाऽध्यायार्थ प्रकाशः ॥ २२ ॥

भाषा टीका ।

फिर बलि से भगवान् बोले, कि—हे इन्द्रसेन ! हे महाराज ! तुमारा मंगल हो तुम अपने ज्ञाति परिकर सहित स्वर्ग वासियों से प्रार्थित सुतल को जाओ ॥ ३३ ॥

और बडे २ लोकेश लोग भी तुमारा अभिभव (तिरस्कार नहीं करसकेंगे और विचारों की तौ बात ही क्या, दैत्यों में भी जो तुमारी आज्ञा को उल्लंघन करेंगे उन दैत्यों को हमारा चक्र नष्ट करदेवेगा ॥ ३४ ॥

तुमारे अनुग और परिकर परिच्छद सहित तुमारी हम रक्षा करेंगे ॥ हे वीर ! तुम हमको अपने यहां सदाही सन्निहित देखोगे ॥ ३५ ॥

और वहां भी दैत्यदानवों के संग से जो तुमारा आसुर भाव है वह हमारा प्रभाव देखकर तत्काल कुंठित होकर नष्ट होजायगा ॥ ३६ ॥

इति श्रीमद्भागवत अष्टमस्कन्ध में द्वाविंश अध्याय की
श्रीवृन्दावनस्थ भगवताचार्यकृत
भाषा टीका समाप्ता ॥ २२ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे द्वाविंशोऽध्यायः ॥ २२ ॥

॥ त्रयोविंशोऽध्यायः ॥

श्रीशुक उवाच।

इत्युक्तवन्तं पुरुषं पुरातनं महानुभावोऽखिलसाधुसम्मतः।
बद्धाञ्जलिर्बाष्पकलाकुलेक्षणो भक्त्युत्कलो गद्गदया गिराऽब्रवीत् ॥ १ ॥

बलिरुवाच।

अहो प्रणामाय कृतः समुद्यमः प्रपन्नभक्तार्थविधौ समाहितः।
यल्लोकपालैस्त्वदनुग्रहोऽमरैरलब्धपूर्वोऽपसदेऽसुरेऽर्पितः ॥ २ ॥

श्रीशुक उवाच।

इत्युक्त्वा हरिमानम्य ब्रह्माणं सभवं ततः।
विवेश सुतलं प्रीतो बलिर्मुक्तः सहासुरैः ॥ ३ ॥
एवमिन्द्राय भगवान् प्रत्यानीय त्रिविष्टपम्।
पूरयित्वाऽदितेः काममशासत्सकलं जगत् ॥ ४ ॥
लब्धप्रसादं निर्मुक्तं पौत्रं वंशधरं बलिम्।
निशाम्य भक्तिप्रवणः प्रह्लाद इदमब्रवीत् ॥ ५ ॥

प्रह्लाद उवाच।

नेमं विरिञ्चो लभते प्रसादं न श्रीर्न शर्वः किमुताऽपरे ते।
यन्नोऽसुराणामसि दुर्गपालो विश्वाभिवन्द्यैरपि वन्दिताङ्घ्रिः ॥ ६ ॥
यत्पादपद्ममकरन्दनिषेवणेन ब्रह्मादयः शरणदाश्नुवते विभूतीः।
कस्माद्वयं कुसृतयः खलयोनयस्ते दाक्षिण्यदृष्टिपदवीं भवतः प्रणीताः ॥ ७ ॥
चित्रं तवेहितमहोऽमितयोगमायालीलाविसृष्टभुवनस्य विशारदस्य।
सर्वात्मनः समदृशो विषमः स्वभावो भक्तप्रियो यदसि कल्पतरुस्वभावः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

त्रयोविंशे बलौ याते सुतलं सपितामहे।
उपेन्द्रेण दिवं गत्वा पूर्ववन्मोदितो हरिः ॥

बाष्पस्य कलाभिर्बिन्दुभिराकुले ईक्षणे यस्य भक्त्या उद्गत उत्कण्ठः ॥ १ ॥

अहो त्वत्प्रणाममहिमा यदर्थं कृतः समुद्यम एव प्रपन्नानां भक्तानां योऽर्थस्तस्य विधावभक्तेऽपि तस्य सम्पादने समाहितो ऽप्रमत्तः स्थितः कुतः ? यद्येनोद्यमेन लोकपालैरमरैः सत्त्वप्रधानै-रप्यलब्धपूर्वस्त्वदनुग्रहोऽपसदे नीचे राजसे मय्यर्पितः अयं भावः परमेश्वराय तुभ्यमहं वराकस्त्रिलोकीं दत्तवानित्येतदा-स्ताम् प्रणामोपि न सम्यक् कृतः किन्तु तदर्थमुद्यममात्रं कृतं तेन च कर्मतपोदानादिकोटिभिरप्यलभ्यस्त्वदनुग्रहः सम्पादितः अहो त्वत्प्रणामप्रभावाश्चर्यमिति ॥ २ ॥ ३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मशासदुपेन्द्रः सन् पालयामास ॥ ४ ॥ ५ ॥

दुर्गपालोऽसि "रक्षिष्ये सर्वतोऽहं त्वाम्" इत्युक्तत्वात् ॥ ६ ॥ हे शरणद आश्रयप्रद ! ये कुसृतयो दुर्वृत्ताः खलयोनय उग्रजातयश्च ते वयं तस्य भवतो दाक्षिण्यदृष्टेः पदवीं कस्माद्धेतोः प्रणीताः बहुमानेन चित्तानुवर्त्तनं दाक्षिण्यं तेन या दृष्टिस्तद्विषयतां प्रापिताः ॥ ७ ॥

भक्तप्रियत्वादिति चेत्तर्ह्येवं तवेहितमहो चित्रम् किन्तत् ? सर्वात्मनः समदृशश्च स्वभावो विषम इति यत् सर्वात्मत्वे चित्रचरितत्वे हेतुः अमिताऽचिन्त्या योगमाया तस्या या लीला तया विसृष्टानि विरचितानि भुवनानि येन तस्य अहो इत्यत्र सन्धिरार्षः समदृक्त्वे हेतुः विशारदस्य सर्वज्ञस्य अथवा भक्तप्रियत्वेऽपि तव वैषम्यं नास्त्येव. यतः कल्पतरुस्वभावः सन् भक्तप्रियोऽसि नहि कल्पतरुराश्रितानामेव कामान्पूरयन्नपि विषमो भवतीत्यर्थः ॥ ८ ॥ ९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमनुगृहीतो बलिर्भगवन्तं तमाहेत्याह मुनिः—इतीति । इतीत्थमुक्तवन्तं पुराणपुरुषं भगवन्तं गद्गदया गिरा अब्रवीत् कथम्भूतः ? भक्त्योद्गलः उत्कण्ठः हर्षबाष्पबिन्दुभिराकुले ईक्षणे यस्य सः अखिलानां साधूनां सम्मतः महानुभावः उक्तविधो यस्य सः ॥१॥

तदेवाह—अहो इति । अहो त्वत्प्रणामस्य प्रभाव इत्याह, प्रणामाय प्रणामार्थं कृतः समुद्यम एव प्रपन्नानां भक्तानां योऽर्थोऽभिमतस्तस्य विधौ सम्पादने समाहितोऽप्रमत्तः स्थितः, कुतः? यत् येनोद्यमेन लोकपालैरमरैः सत्त्वप्रधानैरप्यलब्धपूर्वस्त्वदनुग्रहोऽपसदे नीचे असुरे मयि समर्पितः ॥ २ ॥

इत्थं हरिमुक्त्वा प्रणम्य ततो ब्रह्माणं रुद्रञ्च प्रानम्य मुक्तः पाशेभ्य इति शेषः । प्रीतो बलिरनुगैस्सह सुतलं लोकं विवेश प्रवेष्टुमुद्युक्तो बभूवेत्यर्थः ॥ ३ ॥

नतः इत्थं बलेर्गृहीतं त्रिविष्टपं भगवानिन्द्राय प्रत्यादिष्ट प्रददौ एवमदितेः काममिष्टं पूरयित्वा सकलं जगदशासदुपेन्द्रः सन् पालयामास ॥ ४ ॥

ततो लब्धो भगवत्प्रसादो येन तं पाशेभ्यो निर्मुक्तं पौत्रं वंशवर्द्धनं बलिं निशाम्य दृष्ट्वा प्रह्लादः भक्तितत्परो भक्तिप्रेमसुधारससमुद्रे परिप्लुत इत्यर्थः । वक्ष्यमाणमुवाच ॥ ५ ॥

तदेवाह-नेति त्रिभिः । अहो तवेदं दुर्लभानुग्रहस्यापि सौलभ्यं परत्वं चानितरसाधारणमिति विस्मयपूर्वकं विज्ञापयति, नेति । इममस्मद्विषयं तवानुग्रहं चतुर्मुखलक्ष्मीरुद्रा अपि न लेभिरे येऽपरे इन्द्रादयो न लेभिरे इति किमुवक्तव्यम् । एवं तत्प्रसादस्य दौर्लभ्यं कचिद्विषयविशेषे सौलभ्यञ्चोक्तम्. कुतः? एतद्विपरीतमित्यत आह—यद्यस्मादसुराणां क्रूरस्वभावानामपि नोऽस्माकं दुर्गपालः दुःखात्त्राता भवासि अथ परत्वमाह—विश्वाभिवन्द्यैः सकलजगत्पूज्यैर्ब्रह्मादिभिरप्यभिवन्दिताबङ्घ्री यस्य सः त्वम् असुराणां नो दुर्गपालोऽसीत्यनेन नास्मद्गुणदर्शनेनास्मासु तव प्रसादप्रवृत्तिः किंतु केवलं कृपयैवेति सूचितम् ॥ ६ ॥

तदेव व्यञ्जयन्नाह—यदिति । हे शरणद श्रेयःसाधनप्रद ! अनेन स्वहितमपि वयं न विद्म इति सूचितम् ! ब्रह्मादयो यस्य तव पादपद्मयोर्यो मकरन्दः तस्य सेवया विभूतिमैश्वर्यं सृष्ट्याद्यधिकारमश्नुवते प्राप्नुवन्त्यनेन परत्वं स्पष्टीकृतम् । ते एवम्भूतस्य तव दाक्षिण्यदृष्टिपदवीमनतिक्रमणीय तादृतुक पाहष्टिविषयतां कस्माद्धेतोर्वयं कुसृतयः कुमतयः खलयोनय उग्रजातयश्च प्रणीताः प्रापिताः किंवयं कृपयैवेति भावः । पूर्वं विरिञ्च्यादयोपीत्थं प्रसादं न लेभिरे इत्यनेन तत्सेवया विना तत्प्रसादाविषयत्वमुक्तमत्र तु तत्सेवया तद्विषयत्वमित्यतो न विरोधः ॥ ७ ॥

एवं तर्हि प्राकृतवत्कञ्चिदनुगृह्णन् कञ्चिच्च निगृह्णन् अहमपि विषमस्वभाव एवेति किं मां प्रशंसतीत्यत्राह——चित्रमिति । तव ईहितं निग्रहानुग्रहादिरूपमहो विचित्रं न तु कर्मवश्यप्राकृतेहितसजातीयमित्यर्थः । वैचित्र्ये हेतुं वदन्नकर्मवश्यतां व्यञ्जयन् विशिनष्टि——अमितेति । अमितशक्तियुक्तसङ्कल्पज्ञानेन निर्मितनानाभ्यासस्पृष्टभुवनस्येत्यर्थः । विशारदस्य सृष्ट्युपयुक्तसार्वज्ञादिकल्याणगुणगणयुक्तस्य कृत्स्नचिदचिदन्तरात्मनः अत एव समदृशः वैषम्यनैर्घृण्यादिरहितस्यैव तव भक्तप्रियो भवसीति यदयमविषम एव स्वभावः न तु विषमः तत्र दृष्टान्तं वदन्विशिनष्टि, कल्पतरोः स्वभाव इव स्वभावो यस्य स त्वम् इति न हि कल्पतरोराश्रितार्थापूरणे न वैषम्यापादनं युक्तमिति भावः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भगवति भक्तिमतः पुरुषस्य किमपि दुःसाध्यं नास्ति इत्येतत्प्रपञ्चतेऽस्मिन्नध्याये, तत्र बलेर्हर्यादाकर्णम् वक्तुमाह, इत्युक्तवन्तमिति । भक्तेरुत्कल उद्रेको यस्य स तथा ॥ १ ॥

समुद्यतः ऊर्ध्वं वर्धमानस्याऽस्य तव प्रसादो अहो कुतो विस्मय इत्यत उक्तं, कृत इति. स्वेनेति शेषः । इतोपि विस्मय इत्याह, प्रपन्न इति. समाहितः एकाग्रीकृतोन्यत्रानवसरत्वस इत्यर्थः । त्वमपि तेष्वेकः किं न स्यादित्यत आत्मानं धिक्करोति, यल्लोकेनि. असुरजातावप्यपसदे अधमे अलब्धपूर्वं इति यथायोग्यमिति ज्ञातव्यम् ॥ २—४ ॥

लब्धप्रसादश्च निर्मुक्तश्च तम् ॥ ५ ॥

विश्वाभिवन्द्यैर्ब्रह्मादिभिरभिवन्दिताङ्घ्रिः श्रीकान्तोऽसुराणामपि नो दुर्गपालो द्वारपाल आसीदिति यदिमं प्रसादं विरञ्चादिभिर्न लभ्यते इत्यन्वयः ॥ ६ ॥

कुसृतयः कुत्सितमार्गास्तत्र हेतुमाह, खलयोनय इति. तस्य ते तव कस्माद्धेतोर्दाक्षिण्यदृष्टिपदवीं प्रणीताः भक्तानुकम्पित्वमन्तरेणेति शेषः । "यमेवैष वृणुते तेन लभ्यः" इति श्रुतेः ॥७॥

भगवत्स्वरूपत्वाद्दाहिनमपि लोकाविलक्षणमिति भावेनाह "अहो हीह चित्रमिति । तव चित्रं नानाविधमीहितं चेष्टितमहो "अहो विस्मये" इति यादवः । तत्कथमिति तत्राह—विषमेति । विषमस्वभावोसि भक्तप्रियोऽसि कल्पतरुस्वभावोऽसि यत्तस्माद्विस्मय

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

समदृशो विषमस्वभावत्वं सर्वात्मनो भक्तप्रियत्वेन कल्पतरुस्वभावत्वं च विस्मयहेतुरित्यर्थः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

बद्धाञ्जलित्वानन्तरं "पदं तृतीयं कुरु शीर्ष्णि मे निजम्" इति प्राचीनतात्त्विवेदनाऽनुसारेण तच्छीर्ष्णि पदे कृते परमानन्देन निवेदयति—अहो इति। अत एव श्रुतौ "इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्" इति येन केनचित् प्रणामाय कृतः समुद्यमोऽपि प्रपन्नानां परमानन्दयुक्तानां भजतां यः पुरुषार्थस्तस्य विधाने निमित्ते समाहितः साऽवधानो भवति तदैव क्रमात् पर्यवसाययतीत्यर्थः ॥ १ ॥

तदेतदहो आश्चर्यं इदन्तु ततोऽप्याश्चर्यमित्याह—यद्यस्त्वदनुग्रहस्तत् त्वया मय्यपसदे स्वयशोऽखिलस्या तादृशप्रतिज्ञादिधार्ष्ट्यादिति नीचे जात्याऽप्यसुरेऽर्पितः स खल्वमरैर्मुञ्जयुमतिक्रान्तैर्जीवन्मुक्तैरप्यलब्धपूर्व इत्यर्थः। यदित्यत्र तदिति च "सुपांसुलुक्" ७।१।३९" इत्यादिना सुब्लुक् छान्दसः ॥ २—५ ॥

अथान्येऽपि मादृशे योऽयं प्रसादस्य कारणं नाम भवतः करुणामयत्वमेव नान्यदिति वक्तुं तस्य परमत्वं दर्शयति, तत्र यथा कश्चिन्निजेश्वरं प्रति वदति पुत्रादपि मयि तव वात्सल्यमिति तथैवं परमभक्तानप्युल्लिख्य निवेदयति, नेममिति. इममर्थं स्पष्टयति, यन्नं इति. अत एव परमभक्तिमत्त्वं निरूप्यमाणेन श्रीशुकदेवेन नेमं विरिञ्च इत्यादिकं यद्वक्ष्यते तत्तुल्यता नात्र मन्तव्या योऽयं भगवानत्र बन्धकः सतु तत्र स्वयमेव बद्ध इति हि तद्वशीकारे महानेव भेदः ॥ ६ ॥

अथ कारणान्तराभावं दर्शयति—यत्पादेति। विभूतीः प्राधान्येन ता एव न त्वेषां तादृशं प्रसादम् ॥ ७ ॥

न केवलं मादृशभक्तएव तवैतादृशत्वं युक्तयनीतं किन्तु भक्तजने तथैवेति तदेव स्थापयति—चित्रमिति। यस्त्वं भक्तप्रियोऽसि सोऽपि समदृशस्तव स्वभाव अविषमः विषमो न भवति तत्र हेतुगर्भं विशेषणं कल्पतरुस्वभाव इति तस्माद्विषमस्वभावतया प्रतीतोऽपि त्वय्यवैषम्यमित्यतीव चित्रमिति यद्वा परत्रापि कल्पवृक्षादिलक्षणे समान एवाश्रयणीये वस्तुनि भक्तपक्षपातरूपवैषम्यदर्शनात् तद्वैषम्यमपि समस्यैव स्वभाव इति लब्धे तदपरिहार्यमेवेति सिद्धान्तयितव्यं ततश्च विषमस्वभाव इत्येव व्याख्येयं तथा पूर्वत्रापि ननस्येत्यादौ भक्तान् भजत इति वैषम्य एव योजनीयम् इति वस्तुतस्तु श्रीभगवत्यचिन्त्यैश्वर्यमेव सुखपस्तव निरोधे हेतुः यदुक्तं "नमो नमस्ते स्त्वृषभाय सात्वताम्" इत्यादौ द्वितीयस्य चतुर्थे टीकायां तदेवं वैषम्यप्रतीतावप्यदोषत्वायाचिन्त्यैश्वर्यमाहेति, तदुक्तं श्रीष्मेण "सर्वात्मनः समदृशो ह्यद्वयस्यानहङ्कृतेः। तत्कृतं मतिवैषम्यं निरवद्यस्य न क्वचित् ॥ तथाऽप्येकान्तभक्तेषु पश्य भूपानुकम्पितम्" इत्यादि. स्वयं श्रीभगवता च "समोऽहं सर्वभूतेषु" इत्यादि. अथवा समदृशस्तव विषमस्वभावो यस्तदहो चित्रम् अतीवाश्चर्यमित्यर्थः। वैषम्यमेवाह—भक्तप्रियोयदसीति समदृक्त्वे हेतुत्वेन त्रिधा पूर्णत्वं वदन् क्रियाशक्तौ तावदाह अमिता अनन्ता या योगमाया स्वरूपशक्तिस्तस्या या लीला यादृच्छिकक्रियावृत्तिस्तादृशवृत्त्याभासरूपा मायाशक्तिस्तया विशेषेण सृष्टानि भुवनानि अनन्तानि ब्रह्माण्डानि येन तस्य ज्ञानशक्तावाह—विशारदस्येति स्वरूपेऽप्याह—सर्वात्मन इति। सर्वमूलस्वरूपस्य नन्वेवं स्वभावः कल्पतरुरपि दृश्यते तत्राह—कल्पतरोरपि स्वभावो यस्मात् तथाविध इत्याहो चित्रमेवेत्यर्थः ॥ ८ ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

प्रवेशितस्य सुतलं द्वारपालोऽभवद्बलेः।
त्रयोविंशे विधीन्द्रं चोपेन्द्रः सन् पर्यपालयत् ॥

तदेवाह त्वन्मूर्ध्नि तृतीयं पदं विन्यस्य त्रिभुवनेन सह त्वामपि प्रतिगृह्णामि सर्व एते लोकास्त्वां दत्तप्रतिश्रुतं जानन्त्वित्युक्तवन्तम् अत एव श्रुतिरपि "इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्" इति उद्गलः उद्बाष्पो गलो यस्य सः ॥ १ ॥

प्रणामार्थं कृतसमुद्यमोऽपि प्रपन्नभक्तानां वाञ्छितपूरणे समाहितः समर्थो भवेदित्यद्यैवावगतं त्वत्सर्वस्वमपहर्तुं विष्णुरयमागत इति गुरोर्मुखात् यदैव त्वामहमज्ञासिषं तदैव त्वत्प्रणामार्थमुद्यम एव कृतः किन्तु असुराणां तस्य च गुरोर्भयादेव प्रणामो न कृतः हन्त हन्त स एवोद्यम इदं फलं फलति स्म किमित्याह—यद्यस्माल्लोकपालैरमरैः सत्त्वप्रधानैरपि अलब्धपूर्वस्त्वदनुग्रहः मूर्ध्नि चरणार्पणलक्षणः अपसदे नीचे राजसे मय्यर्पितः ॥ २ ॥

मुक्तो नागपाशात् ॥ ३ ॥ ४ ॥

समासेन बलिशक्रयोः सुतलस्वर्गप्रवेशमुक्त्वा व्यासेनाह, लब्धेति बन्धनान्मुक्तम् ॥ ५ ॥

दुर्गपालोऽस्मि "रक्षिष्ये सर्वतोहम्" इत्युक्तेः ॥ ६ ॥

हे शरणप्रद आश्रयप्रद! विभूताः! सम्पदः एव नत्वेतावन्तं प्रसादं कुसृतयः दुर्वृत्ताः बहुमानेन चित्तानुवर्तनं दाक्षिण्यं तेन या दृष्टिस्तद्विषयतां प्रापिता जात्यैव ते प्रसिद्धा वयं निग्राह्याः कथमेतावदनुग्रहभाजनान्यभूमेत्यर्थः ॥ ७ ॥

न केवलं मादृशभक्तेष्वेव तवैतावाननुग्रहः किन्तु भक्तमात्रेषु येषु केष्वपीत्याह—चित्रमिति। हे अमितयोग अपरिमितयोगैश्वर्य तवेहितं चरित्रमहो चित्रमत्याश्चर्यं युक्त्यनीतमित्यर्थः। किन्तच्चित्रं समदृशोऽपि तव विषमः स्वभावः इति यत् किं मे समदृक्त्वलक्षणं तत्राह मायायाः स्वीयमायाशक्तेर्लीलया विसृष्टानि भुवनानि येन तस्य सर्वस्रष्टुरित्यर्थः। विशारदस्य सर्वाभिज्ञस्य सर्वात्मनः सर्वेषां चेतयितुः तेन सर्वेषां तव सृज्यत्वात् अभिज्ञेयत्वात् चेतयितव्यत्वाच्च सर्वेषु तेषु तव समदृक्त्वमेव दृष्टमित्यर्थः। किं मे वैषम्यं दृष्टं तत्राह भक्तप्रियो यदसीति तेषु सृष्टेषु मध्ये ये भक्तास्तेष्वेव प्रीणासि नान्येष्विति यत् एतदेव वैषम्यमित्यर्थः। तर्हि किं ममैष दोष एव स्थाप्यते? नहि नहि किन्तु महागुण एवेत्याह—कल्पतरुस्वभाव इति। कल्पतरुर्यथा आश्रितानामेव कामं पूरयति न त्वनाश्रितानां

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तथैव त्वं भक्तेष्वेव प्रीणासि नत्वभक्तेष्विति भजनवत्त्वमात्र एव तत्र प्रीतिरिति वस्तुतस्ते साम्यमेवायातं यदुक्तं त्वयैव "समोहं सर्वभूतेषु नमेद्वेष्योऽस्ति न प्रियः । ये भजन्ति च मां भक्त्या मयि ते तेषुचाप्यहम्"इति ॥ ८ ॥ ९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

बल्यादीनां तत्तत्स्थानगमनं यज्ञसमाप्तिं च वर्णयति—इत्युक्तवन्तमिति, त्रयोविंशेन । उद्गलः उत्कण्ठः ॥ १ ॥

पूर्वोक्तप्रह्लादादिवाक्यश्रवणेन भगवदनुग्रहेण च सर्वं भगवदीयमिति ज्ञात्वा मया किमपि भगवते न दत्तमिति च ज्ञात्वा मया तु प्रणामोऽपि न कृतः किन्तु नत्समुद्यमः कृतस्तेनैव कृतार्थोऽस्मि तत्प्रणामार्चनादेर्महिमा तु किं वर्ण्यते इत्याह—अहो इत्यव्ययम् अत्र कैमुत्तिकन्यायद्योतकः प्रणामाय प्रणामार्थं कृतः समुद्यम एव प्रपन्नानां भक्तानां योऽर्थस्तस्य विधौ सम्पादने समाहितः अप्रमत्तः स्थितः अहो किमुत प्रणामस्तत्र समाहितः किमुततराम् अर्चनध्यानादिस्तत्र समाहित इति वक्तव्यम्. ननु, कुत एतत्त्वयावगम्यते इत्यत्राह—यत् येन समुद्यमेन लोकपालैरमरैः सत्त्वप्रधानैरपि अलब्धपूर्वः त्वदनुग्रहः "सदासन्निहितं वीर तत्र मां द्रक्ष्यते भवान्"इति पूर्वोक्तः अपसदे नीचे राजन्ये मयि अर्पितः ॥ २ ॥

मुक्तः पाशेभ्यः ॥ ३ ॥

प्रत्यानीय प्रत्यर्प्य अशासत् उपेन्द्रः सन् पालयामास ॥ ४ ॥

भक्तिप्रवणः भक्तितत्परः निर्मुक्तं पाशेभ्यो विमुक्तं निशाम्य ज्ञात्वा ॥ ५ ॥

विश्वाभिवन्द्यैर्विरिञ्चादिभिः दुर्गपालोऽसि "रक्षिष्येसर्वतोऽहं त्वाम्"इत्युक्तेः ॥ ६ ॥

हे शरणद आश्रयप्रद ! ब्रह्मादयः बहुगुणयुक्ताः यस्य तव पादपद्मयोर्यो मकरन्दः कीर्तिः तन्निषेवया विभूतीः ऐश्वर्याणि अश्नुवते प्राप्नुवन्ति तथाभूतस्य ते दाक्षिण्यदृष्टेः कृपावलोकस्य पदवीं विषयतां कुसृतयः कुत्सिता सृतिरासुरो मार्गो येषां ते खलयोनय उग्रजातयो वयं कस्माद्धेतोः प्रणीताः प्रापिताः ॥ ७ ॥

तं हेतुं स्वयं वदन् अत्यद्भुतचेष्टितं तथेति स्तौति-चित्रमिति । यत् यस्त्वं भक्तप्रियोऽपि भक्तपक्षपात्यपि अविषमस्वभावोसि तस्य तवेहितं चेष्टितम् अहो चित्रमत्यद्भुतमित्यन्वयः । भक्तपक्षपातित्वेपि अविषमस्वभावत्वम् स्फुटीकर्तुं विशिनष्टि—कल्पतरुस्वभाव इति । कल्पतरुस्वभाववत्स्वभावो यस्य सः यथा कल्पतरुः आश्रितजनानामेव सुखदोऽप्यविषमो भवति तथा त्वमसीत्यर्थः । कथम्भूतस्य मितः स्वल्पोऽपि यो युज्यते इति योगः सङ्कल्पः "एकोहं बहुस्याम्" इत्यादिश्रुतिप्रसिद्धः तस्य वशवर्तिनी माया तया सह या लीला तया विसृष्टानि विरचितानि भुवनानि येन तस्य ॥ ८—९ ॥

भाषा टीका ।

श्रीरुक्मिणीदेवीसमेतश्रीदेवकीनन्दनाय नमः ।

श्रीशुक उवाच ।

श्रीशुकदेवजीबोले, कि—पुरातन पुरुष के पूर्वोक्तवचनों को सुनकर अखिल साधुजनों के संमत महाप्रभाववाले और आंसुओं से व्याकुल नेत्र जिन का तथा भक्तिमे उत्कण्ठित होकर राजा बलि हाथ जोडकर गद्गद्वाणी से बोले ॥ १ ॥

बलिरुवाच ।

बलि बोले, कि—प्रभो ! आपको प्रणाम करने की महिमा ता किससे कहीजाय परञ्च प्रणाम के लिये किये हुए उद्यम का यह प्रभाव है, कि— वह उद्यम ही अभक्तों को भी शरणागतभक्तजनों का जो अर्थ है उसके सम्पादन में सदा जागरूक रहता है क्योंकि ? जो आपका अनुग्रहवडे २ लोकपालों कों भी नही प्राप्त हुआ सो अनुग्रह मेरे सदृश नीच असुर पर आपने किया ॥ २ ॥

श्रीशुक उवाच ।

श्रीशुकदेवजीबोले, कि— राजाबलि, इतना कहकर श्रीहरि को नमस्कार कर तथा महादेवजी सहित ब्रह्माजी को नमस्कार कर वरुणपाश से छूटकर असुरों से सहित प्रसन्न होकर सुतल में प्रवेश करते हुए ॥ ३ ॥

हे राजन् ! भगवान् इस प्रकार इन्द्रको स्वर्ग देकर अदिति के मनोरथको पूर्णकर सकलजगत् का अच्छा तरह शासन करते हुए ॥ ४ ॥

भगवत्प्रसाद को प्राप्त होने वाले वरुण के पाश से विनिर्मुक्त हुए अपने पुत्रवंश को धारण करने वाले बलिको देखकर भक्तिप्रवण प्रह्लादजी भगवान से यह बोले ॥ ५ ॥

प्रह्लाद उवाच ।

प्रल्हादजी बोले, कि—हे भगवन् ! ऐसी कृपा आप की ब्रह्माजी के ऊपर भी नही हुई, तथा महादेवजी को भी यह प्रसाद नही मिला, जो कि— विश्ववन्दनीयों से अभिवन्दितचरणकमल जिन के ऐसे आप साक्षात् हमारे असुरों के द्वारपाल हुए ॥ ६ ॥

हे शरणदायक ! जिन आपके चरणकमल के मकरन्द की सेवा से ब्रह्मादिक अपनी २ विभूति को प्राप्त होते हैं फिर हे प्रभो ! कुत्सित मार्गवाले खलयोनि हम असुर लोग आप की कृपा कटाक्ष के पात्र कैसे हुए ? ॥ ७ ॥

आप अपनी अमित योगमाया से जब लीला करते हैं तब अनेक भुवनों की सृष्टि होजाती है इस प्रकार की तो परम विचित्र ऐसे आपकी चेष्टा है परंच सर्वात्मक और समदर्शी होकर भी आपका स्वभाव है, कि—भक्तों पर प्रीति करते हो उसका भी कारण यही है, कि आपका स्वभाव कल्प वृक्ष सदृश है । जैसे कल्प वृक्ष के आश्रय लेने वालों की कामनाओं को ही पूर्ण करता है तो भी उसका विषम स्वभाव नहीं कहा जाता ॥ ८ ॥

श्रीभगवानुवाच ।

वत्स ! प्रह्लाद ! भद्रं ते प्रयाहि सुतलाऽऽलयम् ।
मोदमानः स्वपौत्रेण ज्ञातीनां सुखमावह ॥ ९ ॥
नित्यं द्रष्टासि मां तत्र गदापाणिमवस्थितम् ।
मद्दर्शनमहाह्लादध्वस्तकर्मनिबन्धनः ॥ १० ॥

श्रीशुक उवाच ।

आज्ञां भगवतो राजन् प्रह्लादो बलिना सह ।
बाढमित्यमलप्रज्ञो मूर्ध्न्याधाय कृताञ्जलिः ॥ ११ ॥
परिक्रम्यादिपुरुषं सर्वासुरचमूपतिः ।
प्रणतस्तदनुज्ञातः प्रविवेश महाबिलम् ॥ १२ ॥
अथाहोशनसं राजन् ! हरिर्नारायणोऽन्तिके ।
आसीनमृत्विजां मध्ये सदसि ब्रह्मवादिनाम् ॥ १३ ॥
ब्रह्मन् सन्तनु शिष्यस्य कर्मच्छिद्रं वितन्वतः ।
यत्तत्कर्मसु वैषम्यं ब्रह्मदृष्टं समं भवेत् ॥ १४ ॥

शुक्र उवाच ।

कुतस्तत्कर्मवैषम्यं यस्य कर्मेश्वरो भवान् ।
यज्ञेशो यज्ञपुरुषः सर्वभावेन पूजितः ॥ १५ ॥
मन्त्रतस्तन्त्रतश्छिद्रं देशकालार्हवस्तुतः ।
सर्वं करोति निश्छिद्रमनुसङ्कीर्तनं तव ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

मद्दर्शनेन यो महाह्लादस्तेन ध्वस्तं कर्मनिबन्धनमज्ञानं यस्य ॥ १०-१३ ॥

कर्मवितन्वतः शिष्यस्य यच्छिद्रमन्तरं न्यूनं जातं तत्सन्तनु विस्तारय सन्धत्स्व यजमानं विना कथं सन्धातव्यमिति न वाच्यमित्याह—यत्तदिति। ब्रह्मदृष्टं ब्राह्मणैर्दृष्टमेव समं भवेत् किम्पुनरनुष्ठितमित्यर्थः ॥ १४ ॥

भवान् यस्य सर्वेणाऽपि भावेन वस्तुमात्रेण पूजितस्तस्य कर्मसु कुतो वैषम्यम् कथम्भूतः कर्मणामीश्वरः प्रवर्तकः यज्ञेशो यज्ञफलदः यज्ञमयश्च पुरुषः ॥ १५ ॥

आस्तान्तावत् पूजा यस्मान्मन्त्रतः स्वरादिभ्रंशेन तन्त्रतो व्युत्क्रमादिना देशतः कालतश्च अर्हतः पात्रतः वस्तुतश्च दक्षिणादिना यच्छिद्रं न्यूनं तत्सर्वं तव नामाऽनुकीर्तनमात्रमेव निश्छिद्रं करोतीति ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

एवं विज्ञापितस्तं भगवानुवाच—वत्सेति। हे प्रह्लाद ! तत्र भद्रमस्तु सुतलाख्यं बिलस्थानं प्रयाहि गच्छ तत्र स्वपौत्रेण बलिना सह मोदमानः ज्ञातीनां मुदं हर्षम् प्रापय ॥ ९ ॥

तत्र सुतले नित्यं सदा अवस्थितं सन्निहितं गदा पाणौ यस्य तं मां द्रष्टासि द्रक्ष्यसि नित्यं द्रष्टासि इति वा मदर्शनः नित्यं मद्दर्शनेन यो महान् ह्लाद आनन्दस्तेन ध्वस्तं कर्मरूपं निबन्धनं संसृतिहेतुर्यस्य तादृशो भविष्यसीति ॥ १० ॥

एवंविधां भगवत आज्ञां शिरसा वाढमित्याधायाभ्युपेत्य

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हे राजन् ! अमला प्रज्ञा स्वात्मपरमात्मयाथात्म्यविषया यस्य सः प्रह्लादो बलिना सह बद्धाञ्जलिः सन् ॥ ११ ॥

आदिपुरुषं प्रदक्षिणीकृत्य प्रणतः कृतप्रणामः सर्वेषामसुराणां चम्वाः सेनायाः अधिपतिर्भूत्वा तेन भगवता अनुज्ञातो महाबिलं सुतलं विवेश ॥ १२ ॥

अथ तत्प्रवेशानन्तरं हे राजन् ! भगवान्नारायणः समीपे सभायां ब्रह्मवादिनामृत्विजाम्मध्ये आसीनमुपविष्टम् उशनसं शुक्रमुवाच ॥ १३ ॥

तदेवाह—ब्रह्मन्निति । हे ब्रह्मन् ! वितन्वतो यजमानस्य शिष्यस्य बलेः यत् यज्ञस्य छिद्रं कर्मसु वैषम्यं वैगुण्यरूपं तद्ब्रह्मदृष्टं वेदबोधितं समं वैषम्यरहितमविगुणं यथाभवेत् तथा सन्तनु कुरु ॥ १४ ॥

एवमुक्तः शुक्रस्तावत्प्रकृतकर्मणि वैगुण्यमेव नास्तीति विज्ञापयति—कुत इति द्वाभ्याम् । तस्य बलेः कर्मणो वैगुण्यं कुतः ? न कस्मादपीत्यर्थः । वैषम्याभावे हेतुमाह—यस्य येन बलिना कर्तरि षष्ठी सर्वभावेन करणत्रयेण सर्वकर्मणामीश्वरः यज्ञेशः यज्ञपुरुषश्च भगवान् यतः पूजितो ऽतो न वैषम्यमित्यर्थः । कर्मेश्वरः इति सर्वकर्मप्रवर्तकत्वमुक्तं, यज्ञेश्वर इति यज्ञफलप्रदत्वं, यज्ञपुरुष इति यज्ञ शरीरकत्वं, तद्भोक्तृत्वंचेत्यपौनरुक्त्यम् ॥१५॥

किं वक्तव्यम् एतत् यत्तव पूजनम् अवैषम्यावहमिति यतस्त्वन्नामकीर्तनमेव तदावहमित्याह—मन्त्रत इति । मन्त्रतन्त्रदेशकालयोग्यवस्तुभ्यो यच्छिद्रं मन्त्रादीनां यद्वैगुण्यमित्यर्थः तत्सर्वं तव नामसङ्कीर्तनमेव निश्छिद्रं करोति ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

बलिप्रह्लादयोर्भगवद्भक्तत्वेपि बलेर्बन्धनादिदुःखमभूत्तत्किन्निमित्तमिति शङ्का—

"बलिरप्यसुरावेशात् स्तुवन्नपि जनार्दनम् ।
आक्षिपत्यन्तरा क्वापि प्रह्लादो नित्यभक्तिमान्" ॥

इत्यनेन परिहर्तव्या । आक्षेपफलं दुःखमित्यर्थः ॥ ९—१३ ॥

कर्म वितन्वतोऽस्य यत्तद्ब्रह्मभिर्ब्राह्मणैर्दृष्टं निरूपितं कर्मसु वैषम्यमन्तरायोऽपहातिः यथासमं विहितफलप्रदत्वेन समर्थं भवेत्तथा तव शिष्यस्य बलेः कर्मणो वैषम्यलक्षणमपराधं सन्तनु परिहृतं कुरु कर्मरन्ध्रं समुन्नतं कुरु वा "छिद्रं रन्ध्रापराधयोः" इत्यभिधानं ब्रह्मणा दृष्टं वा ॥ १४ ॥

सति छिद्रे तत्परिहारस्तदेव नास्ति अस्ति चेदपि तव नामसङ्कीर्तनं निश्छिद्रं करोतीति वक्तुमुशनेत्याह—शुक्र इति, यज्ञपुरुषो भवान्यस्य बलेः कर्मेश्वरः कुतः यज्ञेश इति अनेन सर्वयज्ञस्वामित्वं तव विद्यते किमुतैतद्यज्ञस्वामित्वं बलेस्त्वद्भक्तत्वादिति सूचितम् । तस्य बलेः कर्मवैषम्यं कुतो हेतोः स्यादित्यन्वयः । सर्वभावेन सर्वदानेन पूजित इत्यस्माच्च ॥ १५ ॥

तवानुसङ्कीर्तनम् मन्त्रतस्तन्त्रतश्छिद्रं सर्वं देशकालोचितवस्तुतो यथा तथा निश्छिद्रं पूर्णं करोतीत्यन्वयः ॥ १६—२३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पूर्वमेव मद्दर्शनेत्यादि स्वरूपसत्त्वम् इतरत्तु तत्र नित्यमेव मां द्रष्टासीत्यर्थः ॥ १०-३१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

कर्मबन्धलक्षणः संसारस्तु मत्प्रथमदर्शनाह्लादातिशयलक्षणः एव पूर्वमेव ध्वस्त इत्याह, मद्दर्शनेति ॥ १०—१२ ॥

हरिः बलिसम्बन्धेन तस्यापराधदोषं हरतीति हरिः ॥ १४ ॥

कर्मवितन्वतः शिष्यस्य यत् छिद्रमन्तरं न्यूनं जातं तत्सन्तनु विस्तारय सन्धत्स्व यजमानं विना कथं सन्धातव्यमिति न वाच्यमित्याह—यच्चादिति । ब्रह्मदृष्टं ब्राह्मणैर्दृष्टमेव समं भवेत् किंपुनरनुष्ठितमित्यर्थः ॥ १४—१७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मद्दर्शनमहाह्लादेन ध्वस्ताः कर्मनिबन्धनाः मदितरपदार्थविषयकाः रागादयो दोषा यस्य सः ॥ १०—१३ ॥

यत् कर्मसु वैषम्यं तत् यद्यपि ब्रह्मदृष्टं ब्राह्मणैर्दृष्टं सम भवेत्तथापि हे ब्रह्मन् ! कर्म वितन्वतः शिष्यस्य छिद्रं कर्मन्यूनत्वं सन्तनु पूरय ॥ १४ ॥

सर्वेण सम्पूर्णेन भावेन भक्त्या पूजितो भवान् यस्य कर्मेश्वरः कर्मणामीश्वरः कारयिता भोक्ता फलदाता च तस्य कर्मसु वैषम्यं कुतः ? न कुतोऽपीत्यर्थः ॥ १५ ॥

किंबहुना मन्त्रतः स्वरादिभ्रंशेन तन्त्रतो व्युत्क्रमादिना देशतः कालतश्च अर्हतः पात्रतश्च वस्तुतो दक्षिणादितश्च यच्छिद्रं वैषम्यं तत्सर्वं तव नामसङ्कीर्तनमेव निश्छिद्रं करोति ॥ १६ ॥ १७ ॥

भाषा टीका ।

श्रीभगवान् उवाच ॥

श्रीभगवान बोले, कि—हे वत्स ! हे प्रल्हाद ! तुमारा मंगल हो तुम भी सुतल को जाओ और वहां अपने पौत्र के सहित ज्ञाती लोगों को सुख प्राप्त करो ॥ ९ ॥

और वहां पर अपने दरवाजे पर हमको गदा हाथ में लिये हुए देखोगे, और हमारे दर्शन के आह्लाद से तुमारे सर्व कर्म बन्धन छूटते जाँयगे ॥ १० ॥

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि—हे राजन् ! राजा बलि के सहित सर्व असुरों की सेना के पति अमल बुद्धि श्री प्रल्हादजी भगवान की आज्ञा को शिर पर धारण कर हाथ जोडकर आदि पुरुष की परिक्रमा देकर श्रीहरि की आज्ञा पाकर प्रणाम हुए २ महाबिल (सुतल) में प्रवेश करते हुए ॥ ११—१२ ॥

हे राजन् ! तद नंतर श्रीहरि ब्रह्म वादियों की सभा में ऋत्विज लोगों के समीप बैठे हुए शुक्राचारीजी से बोले, कि—॥१३॥

तथाऽपि वदतो भूमन् ! करिष्याम्यनुशासनम् ।
एतच्छ्रेयः परं पुंसां यत्तवाज्ञाऽनुपालनम् ॥ १७ ॥

श्रीशुक उवाच ।

अभिनन्द्य हरेराज्ञामुशना भगवानिति ।
यज्ञच्छिद्रं समाधत्त बलेर्विप्रर्षिभिः सह ॥ १८ ॥
एवं बलेर्महीं राजन् ! भिक्षित्वा वामनो हरिः ।
ददौ भ्रात्रे महेन्द्राय त्रिदिवं यत्परैर्हृतम् ॥ १९ ॥
प्रजापतिपतिर्ब्रह्मा देवर्षिपितृभूमिपैः ।
दक्षभृग्वङ्गिरोमुख्यैः कुमारेण भवेन च ॥ २० ॥
कश्यपस्याऽदितेः प्रीत्यै सर्वभूतभवाय च ।
लोकानां लोकपालानामकरोद्वामनं पतिम् ॥ २१ ॥
वेदानां सर्वदेवानां धर्मस्य यशसः श्रियः ।
मङ्गलानां व्रतानां च कल्पं स्वर्गापवर्गयोः ॥ २२ ॥
उपेन्द्रं कल्पयाञ्चक्रे पतिं सर्वविभूतये ।
तदा सर्वाणि भूतानि भृशं मुमुदिरे नृप ! ॥ २३ ॥
ततस्त्विन्द्रः पुरस्कृत्य देवयानेन वामनम् ।
लोकपालैर्दिवं निन्ये ब्रह्मणा चाऽनुमोदितः ॥ २४ ॥

भाषा टीका ।

हे ब्रह्मन् ! यज्ञरूप कर्म के विस्तार करने वाले अपने शिष्य के यज्ञ में जो कुछ छिद्र रहा हो उसको पूरा करो. क्योंकि ? जो कुछ कर्म के विषय में विषमता होवै तौ वह ब्राह्मण के देखने से ही सम होजाती है ॥ १४ ॥

शुक उवाच ॥

शुकाचारीजी बोले, कि—हे प्रभो ! उसके कर्म में विषमता कैसी होसक्ती है, जिसके कर्म के आप स्वामी है और जिसने यज्ञेश यज्ञ पुरुष, ऐसे आपकी सर्व प्रकार पूजा करी है ॥ १५ ॥

मंत्र, तंत्र, देश, काल, पात्र, और वस्तुओं से जो कर्म में छिद्र (न्यूनता) भया हो तौ केवल आपका नाम संकीर्त्तन हीं सब को निश्छिद्र कर देता है ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हेरराज्ञां प्रतिनन्द्य बलेर्यज्ञाच्छिद्रं समाधत्त सन्धदे पाठान्तरे सम्पाद्य तदाज्ञां सम्पादितवानिति शेषः ॥ १८-१९ ॥

देवाश्च ऋषयश्च भूमिपाश्च मनवस्तैः सहितः ॥ २०-२१ ॥

ननु, लोकादीनां पतिरिन्द्रोऽस्त्येव सत्यम् तथाऽपि वेदादीनां कल्पं पालने दक्षं वामनमुपेन्द्रं कल्पयाञ्चक्रे ॥ २२-२३ ॥

देवयानेन मार्गेण विमानेनेति वा ॥ २४—२७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यद्यप्येवं नास्त्येव वैषम्यं तथापि हे भूमन् ! गदतस्तव अनुशासनं करिष्याम्येव यतस्तव आज्ञानुपालनमिति यदेतत्पुंसां परमं श्रेयः ॥ १७ ॥

इतीत्थं हरेराज्ञां प्रतिनन्द्य भगवानुशनाः शुक्रः बलेर्यज्ञस्य छिद्रमृषभिः सह समाधत्त समादधे ॥ १८ ॥

इत्थमुपवर्णितं भगवतो वामनस्य चरित्रमुपसंहरति—एवमिति । हे महराज ! यत्परैरपहृतं तत्त्रिदिवमित्थं बलेः सकाशाद्याचित्वा वामनरूपो हरिः भ्रात्रे महेन्द्राय ददौ ॥ १९ ॥

तदा प्रजापतिर्ब्रह्मा चतुर्मुखः देवैः ऋषिभिः पितृभिर्भूमिपैर्मनुतत्पुत्रैर्दक्षादिभिश्च सह कश्यपस्य अदितेश्च प्रीत्यै सर्व-

प्राप्य त्रिभुवनं चेन्द्र उपेन्द्रभुजपालितः ।
श्रिया परमया जुष्टो मुमुदे गतसाध्वसः ॥ २५ ॥
ब्रह्मा शर्वः कुमारश्च भृग्वाद्या मुनयो नृप ! ।
पितरः सर्वभूतानि सिद्धा वैमानिकाश्च ये ॥ २६ ॥
सुमहत्कर्म तद्विष्णोर्गायन्तः परमाऽद्भुतम् ।
धिष्ण्यानि स्वानि ते जग्मुरदितिं च शशंसिरे ॥ २७ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

भूतानां भवाय विभवाय योगक्षेमार्थं च लोकानां तत्पालकानां च पतिं वामनमकरोत् ॥ २० ॥ २१ ॥

वेदादीनां कल्पं समर्थं पालन इति शेषः । उपेन्द्रं सर्वभूतानां विभूतये पतिं कल्पयाञ्चक्रेऽकरोत् ॥ २२ ॥

तदा सर्वाणि भूतानि नितरां मुमुदिरे "मुद हर्षे" इति धातुः ॥ २३ ॥

ततो ब्रह्मणाऽनुमोदित इन्द्रो लोकपालैः सह वामनं भगवन्तं देवयानेन देववाह्ययानेन दिवं प्रतिनिन्ये प्रापयामास॥२४॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

ततः वलियज्ञशालायाः ॥ २४—२८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

समाधत्त सन्दधे समाधायेति पाठे तामाज्ञां सम्पादितवानिति शेषः ॥ १८ ॥ १९ ॥

भूमिपा मनवः ॥ २० ॥ २१ ॥

कल्पं पालने समर्थम् ॥ २२ ॥ २३ ॥

पुरस्कृत्वा अनर्घवस्त्रालङ्कारादिभिः सन्मान्य देवयानेन विमानेन देवमार्गेण वा ॥ २४—२८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

इतीत्थं हरेराज्ञामभिनन्द्य वलेर्यज्ञच्छिद्रं समाधत्त सन्दधे॥१८॥

मह्यीं यत् त्रिदिवं परैर्हृतं तच्च वलेः सकाशाद्भिक्षित्वा महेन्द्राय ददौ ॥ १९ ॥

ब्रह्मा देवादिभिः सह कश्यपस्य अदितेश्च प्रीत्यै सर्वभूतभवाय च लोकानां लोकपालानां च वामनं पतिमकरोदिति द्वयोरन्वयः । भूमिपाः मनवस्तत्पुत्राश्च ॥ २२ ॥ २१ ॥

किञ्च वेदादीनां कल्पं पालने दक्षं सर्वविभूतये पतिं तमेव वामनमुपेन्द्रं कल्पयाञ्चक्रे अकरोत् इति सार्द्धश्लोकान्वयः । मह्यीं त्रिदिवं च महेन्द्राय ददावित्युक्तत्वात् "प्राप्य त्रिभुवनं चेन्द्र उपेन्द्रभुजपालितः" इति वक्ष्यमाणत्वाच्च श्रीवामनेन त्रिभुवनपतिरिन्द्रः कृत इन्द्रस्योपरि इन्द्र उपेन्द्रः श्रीवामनः ब्रह्मणा कृत इत्यर्थः ॥ २२ ॥ २३ ॥

इन्द्रो वामनं पुरस्कृत्य कनिष्ठभ्रातृत्वेनाग्रे आरोप्य देवस्वस्य यानेन रथेन गजेन वा दिवं निन्ये प्रापयामास ॥ २४ २१।

भाषा टीका ।

हे भूमन् ! तथापि आपकी आज्ञा अवश्य करूंगा क्यों कि! पुरुषों को आपकी आज्ञा परि पालन करना यही बडा श्रेयः कारी है ॥ १७ ॥

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि परमज्ञानी श्रीशुक्राचारी जी भगवान की आज्ञा का इस प्रकार अभिनन्दन कर विप्रर्षियोंके सहित बलि के यज्ञ के छिद्र का संधान करते हुए ॥ १८ ॥

हे राजन् ! श्रीहरि ने वामन रूप धारण कर इस प्रकार से राजा बलि से पृथिवी को मागकर जो शत्रुओं ने स्वर्ग छुड़ा लिया रहा उसको फिर अपने भ्राता महेन्द्र को देदिया ॥ १९ ॥

तब मरीच्यादि प्रजापतिओं के पति श्रीब्रह्मा जी ने, देवर्षि पितृलोग और दक्ष आदिक राजा लोग तथा भृगु अंगिरा सनत्कुमार अथवा स्वामि कार्त्तिक और महादेवजी ॥ २० ॥

इन सब को साथ लेकर कश्यप और अदितिजी की प्रसन्नता के लिये तथा सम्पूर्ण प्राणियों के मंगल के लिये श्रीवामनजी को लोक और लोकपालों के पति करदिये ॥ २१ ॥

वेद, सम्पूर्ण देवता, धर्म, यश, श्री, कल्याण, व्रत, स्वर्ग, अपवर्ग [मोक्ष] इन सबों के पालन करने में चतुर ॥ २२ ॥

ऐसे श्रीवामनजी को सर्व समृद्धि के लिये उपेन्द्र बनाये हे राजन् ! तब सब प्राणियों को बड़ा आनन्द प्राप्त हुआ ॥ २३ ॥

तब तो इन्द्र श्रीवामनजी को विमान में बैठाकर ब्रह्माजी के अनुमोदन से लोक पालों सहित स्वर्ग में ले गये ॥ २४ ॥

श्रीभरस्वामिकृतभावार्थदीपिका ।

सर्वाद्भुतमेतच्चरितमाख्यातमिति विशेषोक्त्याऽन्यान्यपि कर्म ॥ २८ ॥

सर्वमेतन्मयाऽऽख्यातं भवतः कुलनन्दन ! ।
उरुक्रमस्य चरितं श्रोतॄणामघमोचनम् ॥ २८ ॥
पारम्महिम्न उरुविक्रमतो गृणानो यः पार्थिवानि विममे स रजांसि मर्त्यः ।
किञ्जायमान उत जात उपैति मर्त्य इत्याह मन्त्रदृगृषिः पुरुषस्य यस्य ॥ २९ ॥
य इदं देवदेवस्य हरेरद्भुतकर्मणः ।
अवताराऽनुचरितं शृण्वन्याति परां गतिम् ॥ ३० ॥
क्रियमाणे कर्मणीदं दैवे पित्र्येऽथ मानुषे ।
यत्र यत्राऽनुकीर्त्येत तत्तेषां सुकृतं विदुः ॥ ३१ ॥
इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्याम् अष्टमस्कन्धे वामनावतारचरिते
त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तानि तर्हि निःशेषाणि वर्णनीयानीत्यपेक्षायामाह—पारमिति । उरु बहुधा विक्रमतो विष्णोर्महिम्नः पारं यो गृणानो भवति स मर्त्यः पार्थिवानि रजांस्यपि विममे गणितवान् यथा पार्थिव परमाणुगणनमशक्यं तथा विष्णोर्गुणगणनमप्यशक्यमित्यर्थः तथा च मन्त्रः "विष्णोर्नुकम्वीर्याणि" इति एतदेव मन्त्रान्तरार्थं सूचयन्नाह—यस्य पुरुषस्य पूर्णमहिम्नः पारं मन्त्रदृगृषिर्वसिष्ठ इति एवमाह, कथम् किञ्जायमानो जातो वा उपैति न कोऽपीति वदन्ननन्तत्वेनैवाऽऽहेत्यर्थः । तथा च मन्त्रः "न ते विष्णो ! जायमानो न जातो देवमहिम्नः परमं तमाप" इति ॥ २९ ॥

य इदं शृण्वन् भवति स पराङ्गतिं याति ॥ ३० ॥

सुकृतं यथावत्कृतं विदुः ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत उपेन्द्रस्य भगवतः भुजशालिनं त्रिभुवनं प्राप्य त्रिभुवनाधिपतिर्भूत्वा इन्द्रः निर्भयः परमया श्रिया सम्पदा जुष्टो मुमुदे ॥२५॥

ततो हे नृप ! सर्वे ब्रह्मादयो वैमानिका विमानारूढाश्च तद्विष्णोर्वामनस्य सुमहदनितरसाधारणमत एव परमाद्भुतं कर्म चरित्रं गायन्तः स्वस्वस्थानानि जग्मुः अदितिश्च शशंसिरे तुष्टुवुश्च ॥ २६ ॥ २७ ॥

हे कुरुनन्दन ! श्रोतॄणां शृण्वतां दुरितहरं सर्वमस्मद्बुद्धिगोचरमेतदुरुक्रमस्य चरितं भवतो मया कथितं सर्वं मयाऽऽख्यातमित्यनेन स्वमतिविषयं सर्वमाख्यातमित्यभिप्रेतं नतु उरुक्रममहिम्नः परिच्छिन्नत्वमित्यर्थः ॥ २८ ॥

तदेव व्यञ्जयितुं तन्महिम्नोऽनवच्छिन्नत्वमाह—पारमिति । यो मर्त्यः पुमानुरुक्रमस्य महिम्नः पारमवधिं गृणानो भवति स मर्त्यः पृथिव्या इमानि पार्थिवानि रजांसि विममे गणयेत् यथा पार्थिवानां रजसां गणना कर्तुमशक्या तथोरुक्रमस्य गुणानामपीत्यर्थः । पार्थिवानि रजांसि वा बुद्धिमान् महता कालेन गणयेत् नतु उरुक्रमस्य गुणानिति वार्थः । तथा च श्रूयते "विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि" इति तथा हि यस्य पुरुषस्योरुक्रमस्य महिम्नः पारं जातः जायमानो जनिष्यमाणो वा मर्त्यः उपैति किं नोपैत्येवेति*मन्त्रद्रष्टा ऋषिः वसिष्ठादिराह ॥ २९ ॥

प्रकृतावतारचरित्रश्रवणादिफलमाह—य इति । यः कश्चिदेतदद्भुतकर्मणो देवानां ब्रह्मादीनामपि देवस्य वामनस्यावतारानुचरितं शृण्वन् परां गतिं मुक्तिरूपां याति प्राप्नोति ॥ ३० ॥

यत्रयत्र देवमनुष्यपित्रादिसम्बन्धीनि क्रियमाणे कर्मणि इदमवतारानुचरितं कीर्त्येत तत्तत्तेषां सम्बन्धि कर्म सुकृतं सुष्ठु अविगुणं यथा भवति तथा कृतं विदुस्तद्दृष्टा इति शेषः । श्रौतस्मार्त्त सर्वकर्मसाद्गुण्यापादकम् एतच्चरित्रश्रवणादिकमित्यर्थः ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
त्रयोविंशोऽध्यायः ॥ २३ ॥

* न ते विष्णो जातो जायमानो देव महिम्नः परमन्तमाप इति मन्त्रोऽनुसन्धेयः ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ब्रह्मादिमहिमातिरिक्तमहिमत्वे मुरारेश्चरितस्य संसाराख्यात्र-मक्षानांचघातकत्वं घटनामपि तत्कथमित्याशङ्क्य, प्रमाणा-पूर्वकं नदाह-पारं महिम्न इति। "विष्णोर्नु कम् वीर्याणि प्रवोचम्" "न ते विष्णो जायमानो न जातः"इति मन्त्रद्वयं वेदद्रष्टा ऋषि-रित्याह यस्य पुरुषस्य यो मर्त्यः पार्थिवानि रजांसि पार्थिवपरमा-णून् इमानि मानङ्कुं तांचापि कृन्द स"वपत्रयो बहुलम्(३।१।८५।७७)"इति वचनाल्लुङर्थे लिट् जातो जायमानः उत जनिष्यमाणो वा समर्थः महिम्नः पारं नमामिम उपैति किम्? नैवोपैतीत्यन्वयः। पुरुषः क इति तत्राह-मुरारेरिति । स यदुतिलक इति नेत्याह, उरुविक्रमतइति. उरु महद्यथा भवति तथेति क्रियाविशेषणं कविरत्यतिक्रान्त-वद्ग्रीति वा ॥ २९ ॥

यत्नरूपाद्भुतकर्मणो देवदेवस्य हरेरवताराऽनुचरितं शृण्वन् वर्तते स पराङ्गतिं वैकुण्ठाख्यां यातीत्यन्वयः ॥ ३० ॥

अन्यविषयकर्मसमयेऽपि कीर्त्यमानमिदं भगवत्कर्म पूर्णफलप्रदं करोतीत्याह-क्रियमाण इति । अथ मङ्गले दैवप्रभृतिकर्मणि क्रियमाणे सतीदमवताराऽनुचरितं यत्र यत्र कर्मणि कीर्त्येत तेषां पुंसां तत्तत्कर्म सुकृतं पूर्णफलदानसमर्थं विदुर्ज्ञानिन इति शेषः ॥३१॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इतिश्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
त्रयोविंशोऽध्यायः ॥२३॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

एतत् उरुक्रमस्य चरितं सर्वं मया आ ईषदेव आख्यातं सर्वं-स्यैवाद्यन्तमध्यभागस्याल्पमल्पमुक्तमित्यर्थः । नन्वेतत् कथामृतं निःशेषमेव वर्णयितुमर्हसीत्यत आह-पारमिति। उरुक्रमत उरुक्रमस्य महिम्नः पारम्गृणानो भवति स मर्त्यः पार्थिवानि रजांसि विममे यथैव पार्थिवपरमाणुगणनमशक्यं तथैव विष्णोर्गुणगणनमपीत्यर्थः । यस्य पुरुषस्य पूर्णस्य महिम्नां पारं किं जायमानो मर्त्य उत जातो वा उपैति न कोपीत्यर्थः। इति मन्त्रद्रष्टवसिष्ठः ऋषिराह-तथा च मन्त्रः"विष्णोर्नुकं वीर्याणि प्रवोचम्"इत्यादि. मन्त्रान्तरं च"न ते विष्णो जायमानो नजातो देवमहिम्नः परमं तमाप"इति ॥ २९ ॥

य इदं शृण्वन् भवति स परां गतिं याति ॥ ३०—३१ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
अष्टमस्य त्रयोविंशः सङ्गतः सङ्गतः सताम् ॥ २३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ब्रह्मादयो विष्णोः सुमहत्कर्म गायन्तः स्वानि धिष्ण्यानि स्थानानि जग्मुरदितिं च शशंसिरे इति द्वयोरन्वयः ॥२६।२७॥

यथामति सर्वं श्रीवामनचरितं मया तुभ्यं वर्णितं कार्त्स्न्येन तु कोऽपि न वक्तुं शक्त इत्याह-सर्वमिति द्वाभ्याम् ॥ २८ ॥

उरु बहुधा विक्रमतो विष्णोः महिम्नः पारम् अवधिं यो मर्त्यः गृणानो भवति स मर्त्यः पार्थिवानि रजांस्यपि विममे गणितवान् यथा पार्थिवरजोगणनमशक्यं तथा विष्णुगुण-गणनमशक्यमित्यर्थः। मर्त्य इत्यनेन मरणधर्मः कालपरिच्छेद्यः ब्रह्मादिभिरपि त्रिविधपरिच्छेदशून्यस्य विष्णोः स्वरूपगुणादिकं साकल्येन वक्तुं नैव शक्नुयादिति सूच्यते तथा च मन्त्रः "विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि"इति एतदेव मन्त्रान्तरार्थं सूचयन्नाह—यस्य पुरुषस्य महिम्नः पारं जायमानः उत अथवा जातो मर्त्यः उपैति किम् ? नैवोपैति इति मन्त्रदृक् ऋषिर्वसिष्ठादिराह—तथा च मन्त्रः "न ते विष्णो जायमानो न जातो देवस्य महिम्नः परमं तमाप"इति ॥ २९ ॥

इदमवतारानुचरितं यः शृण्वन् भवति स परां गतिं याति ॥ ३० ॥

सुकृतं सुष्ठु कृतं विदुः ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
त्रयोविंशाऽध्यायार्थप्रकाशः ॥ २३ ॥

भाषा टीका ।

उस समय इन्द्र त्रिभुवन को प्राप्त होकर श्री उपेन्द्र की भुजाओं के बल से पालित हुआ सर्व भय को छोड़कर परम श्री अर्थात् बड़ी भारी सम्पत्ति से मोद को प्राप्त होता भया ॥ २५ ॥

हे नृप! तब श्री ब्रह्माजी, श्री महादेवजी, कुमार, भृगु आदिक मुनि, पितृगण, विमानों से संचार करने वाले सिद्ध लोग तथा और सर्व प्रजा ॥ २६ ॥

श्रीविष्णु के परमाद्भुत उस त्रिविक्रमावतार के महान् कर्म को गाते हुए अपने २ गृहों को गये और अदिति की भी बहुत प्रशंसा

हे कुल नन्दन! यह उरुक्रम [लंबी पगों वाले] का चरित्र हमने तुमसे कहा यह चरित्र श्रोताओं को पाप से छुड़ाने वाला है ॥ २८ ॥

जो अनन्त पराक्रम वाले श्रीहरि की महिमा के पार को कथन करता है उसमनुष्य ने जानों कि पृथिवी के रजों की गणना कर लीनी । मंत्र द्रष्टा ऋषि वसिष्ठ जी ने भी ऐसा कहा है, कि उत्पन्न हुआ और उत्पन्न होने वाला मनुष्य परम पुरुष की महिमा का पार पा सका है क्या ? ॥ २९ ॥

भाषा टीका ।

जो पुरुष देवदेव अद्भुत कर्म्मा श्रीहरि के अवतार के चरितों को सुनता है वह सुनतेर पर गति को प्राप्त होता है ॥३०॥ देव सम्बन्धि पितृ सम्बन्धि अथवा मनुष्य सम्बन्धि कर्म करते समय पर जहाँ२ इस चरित्र का कीर्त्तन किया जाय वहाँ पर उस कर्म को विधि पूर्वक किया हुआ महात्मा जन जानते हैं ॥ ३१ ॥

इति श्रीमद्भागवत अष्टम स्कन्ध में, त्रयोविंशतितम अध्याय की श्रीवृन्दावनस्थ भागवताचार्य कृत भाषा टीका समाप्ता ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे त्रयोविंशोऽध्यायः ॥ २३ ॥

॥ चतुर्विंशोऽध्यायः ॥

—०:०:०—

राजोवाच ।

भगवञ्छ्रोतुमिच्छामि हरेरद्भुतकर्मणः ।
अवतारकथामाद्यां मायामत्स्यविडम्बनम् ॥ १ ॥
यदर्थमदधाद्रूपं मात्स्यं लोकजुगुप्सितम् ।
तमःप्रकृतिदुर्मर्षं कर्मग्रस्त इवेश्वरः ॥ २ ॥
एतन्नो भगवन् ! सर्वं यथावद्वक्तुमर्हसि ।
उत्तमश्लोकचरितं सर्वलोकसुखावहम् ॥ ३ ॥

सूत उवाच ।

इत्युक्तो विष्णुरातेन भगवान्बादरायणिः ।
उवाच चरितं विष्णोर्मत्स्यरूपेण यत्कृतम् ॥ ४ ॥

श्रीशुक उवाच ।

गोविप्रसुरसाधूनां छन्दसामपि चेश्वरः ।
रक्षामिच्छंस्तनूर्धत्ते धर्मस्यार्थस्य चैव हि ॥ ५ ॥
उच्चावचेषु भूतेषु चरन्वायुरिवेश्वरः ।
नोच्चावचत्वं भजते निर्गुणत्वाद्धियो गुणैः ॥ ६ ॥
आसीदतीतकल्पान्ते ब्राह्मो नैमित्तिको लयः ।
समुद्रोपप्लुतास्तत्र लोका भूरादयो नृप ॥ ७ ॥
कालेनागतनिद्रस्य धातुः शिशयिषोर्बली ।
मुखतो निस्सृतान्वेदान्हयग्रीवोऽन्तिकेऽहरत् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चतुर्विंशे प्रसङ्गेन मत्स्यरूपस्य शार्ङ्गिणः ।
लीलोच्यते यतः सत्यव्रतरक्षा महार्णवे ॥ १ ॥
तत्तु तत्तु विदर्शयाविौ निजैश्वर्यनिदर्शनात् ।
मत्स्यं पृच्छति पृथ्वीशो लीलया वामनोपमम् ॥ २ ॥

मायया मत्स्यविडम्बनं मत्स्यरूपानुकरणं यस्यां निरूप्यते ताम् ॥ १ ॥

ननु, कस्मादकस्मादेव मत्स्यावतारभवणेच्छा ? श्रीवामनसादृश्यादित्याह–यदर्थमिति द्वाभ्याम् । दुर्मर्षं दुस्सहम् ॥ २ ॥ बलेरनुग्रहाय जुगुप्सितमपि याचकरूपं धृतवानिति युक्तम्; यदर्थं तु लोकजुगुप्सितं मात्स्यं रूपमधारयदेतन्नो यथावद्वक्तुमर्हसीत्यर्थः ॥ ३—४ ॥

सामान्येनावतारप्रयोजनमाह—गोविप्रेति ॥ ५ ॥ जुगुप्सितत्वं परिहरति–धियो गुणैर्यान्युच्चावचानि भूतानि

श्रीधरस्वामिकृतभावार्थदीपिका।

तेषु नियन्तृत्वेन चरन्नपीश्वरो नोच्चावचत्वं भजते निर्गुणत्वात् कुतः पुनः शुद्धसत्त्वमयैर्मत्स्याद्याकारैरुच्चावचत्वशङ्केति भावः॥६॥

विशेषतो मत्स्यावतारप्रयोजनमाह—आसीदिति त्रिभिः। ब्रह्मणो निद्रायां भवो ब्राह्मस्तेनैव निमित्तेन जातो नैमित्तिकः समुद्रं उपप्लुता निमग्ना ॥७॥

अन्तिके निःसृतान् ॥८॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

तदेवं श्रुतवामनावतारतच्चरित्रो ऽवतारप्रसङ्गान्मात्स्यमवतारं शुश्रूषुः पृच्छति राजा–भगवन्निति त्रिभिः। हे भगवन् मुने! अद्भुत कर्मणो हरेराद्यावतारकथां श्रोतुमिच्छामि, कथम्भूताम्? माया-मत्स्यविडम्बनामद्भुतमत्स्यसजातीयचेष्टानुकारो यस्यां प्रतिपाद्य-स्तां कथाया आद्यत्वं तदवतारप्राथम्यप्रयुक्तमित्यवगन्तव्यम् ॥१॥

स्वयमीश्वरोपि कर्मग्रस्तः कर्मवश्य इव जीववत्तमःस्वभावं दुर्मर्षं क्रोधयतएव लोकैर्जुगुप्सितं निन्दितं मात्स्यं रूपं यदर्थं यस्मै प्रयोजनाय अधात् धृतवान् ॥२॥

हे भगवन् मुने! एतत् सप्रयोजनं सर्वं मत्स्यावतारचरित्रं यथावद्वक्तुमर्हसि श्रोतव्यत्ववक्तव्यत्वयोर्हेतुं वदंश्चरित्रं विशिनष्टि-सर्वेषां लोकानां शृण्वतां वदतां च मलमघम् अपहन्तीति तथा तत् ॥३॥

इत्थमापृष्टमत्स्यावतारचरित्रो भगवान् बादरायणिर्यथावद्वर्णयामासेत्याह सूतः–इतीति। विष्णुरातेन परीक्षितेत्थमुक्तः पृष्टो भगवान् बादरायणिः श्रीशुको विष्णोश्चरितम् उवाच किन्तत् यन्मत्स्यरूपेण कृतम् ॥४॥

तदेवाह–यावत्समाप्ति। यदर्थमधाद्रूपम् इति विशेषतः पृष्टमत्स्यावतारप्रयोजनं वक्ष्यंस्तावत्सर्वावतारसाधारणं प्रयोजनमाह-गोविप्रेति। गवां विप्राणां सुराणां साधूनां छन्दसां वेदानां तदुदितधर्ममर्यादानां च रक्षामिच्छन् धर्मार्थादिपुरुषार्थचतुष्टय-प्रदानार्थं च तनूर्मत्स्यादिमूर्तीरीश्वरो धत्ते बिभर्ति ॥५॥

यदा शङ्कितं लोकजुगुप्सितं तमःप्रकृतिदुर्मर्षमिति सावद्यत्वं तत्परिहरति-उच्चेति। उत्कृष्टेष्वपकृष्टेषु च देवमनुष्यतिर्यगादिभूतेषु चरन् तत्सजातीयजन्मकर्मादिकं कुर्वन्नपि ईश्वर उच्चावचत्वं कर्मायत्तदेवमनुष्यादितारतम्यं न भजते यथा वायुः सर्वत्र व्याप्नुवन्नपि न व्याप्यगतधर्मैः स्पृश्यते तद्वत् अत्र हेतुं वदन्विशिनष्टि, य ईश्वरो गुणैर्हेयगुणप्रतिभटैः कल्याणगुणैर्निर्गुणत्वात्सत्त्वादि-प्राकृतगुणरहितत्वाद्धि नोच्चा वचत्वं भजत इति—

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः।
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः॥

इत्युक्तरीत्या कर्ममूलकसत्त्वादिगुणत्रयसम्बन्धनिमित्तदेवमनुष्याद्युच्चावचत्वं सर्वजीवसाधारणं, भगवतस्तु गवादिरक्षार्थं स्वेच्छोपात्ताप्राकृतदेवमनुष्यादिसजातीयदिव्यतनोः स्वस्वभावमजहतः कर्मायत्तदेहसम्बन्धतत्प्रयुक्तावद्यत्वं नास्तीत्यर्थः। यद्वा धिय इति छेदः धीशब्देन प्रकृतिर्लक्ष्यते तद्गुणैः सत्त्वादिभिर्हेतुभूतैः उच्चावचत्वं न भजते, कुतः? निर्गुणत्वात् सत्त्वादिप्राकृतगुणरहितत्वात्. निर्गुणत्वादित्यनेन जीववत्सत्त्वादिगुणपारवश्यं निषिद्ध्यते न तु गुणनियन्तृत्वमपि तथासति "प्रधानक्षेत्रज्ञपतिर्गुणेशः" इति गुणेशत्वश्रवणविरोधापत्तेः ॥६॥

एवं सामान्यतोऽवतारप्रयोजनं तद्याथात्म्यञ्चाभिधाय विशेषतो मत्स्यावतारप्रयोजनमवतारकालं चाह—असीदिति त्रिभिः। अतीतस्यातिक्रान्तस्य कल्पस्यान्ते ऽवसाने ब्राह्मो नाम नैमित्तिको लय आसीत् ब्रह्मणो निद्रायां भवो ब्राह्मः तेनैव निमित्तेन जातो नैमित्तिकः तत्र तदा प्रलयकाले भूरादयः त्रयो लोकाः समुद्रे उपप्लुता निमग्ना आसन् ॥७॥

कालेन दिनावसानरूपकालेन निमित्तेनाऽऽगतनिद्रस्य संप्राप्तनिद्रस्याऽत एव शिशयिषोः शयितुमिच्छोर्धातुर्ब्रह्मणो मुखान्निस्सृतान् गलितान्वेदानन्तिके समीपवर्त्ती हयग्रीवाख्यो दानवेन्द्रोऽपहृतवान् अन्तिके निस्सृतानिति वा सम्बन्धः ॥८॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

अंशिज्ञानवदंशज्ञानमपि मुक्तिसाधनं गुणाद्यविशेषादिति दर्शनाय मत्स्यावतारचरितमनुवर्णयत्यस्मिन्नध्याये, तत्र श्रुतवामनावतारचरितसुधापानाद्वितृष्णा इव पुनरपि राजा दशावताराणामादित्वेन मत्स्यावतारमाहात्म्यं श्रोतुं पृच्छति–राजेति, मायामत्स्यस्यविडम्बनं यस्यां सा तथा ॥१॥

कथं जुगुप्सितमभूदिति तत्राह–तमःप्रकृतीति। तमः स्वभावो यस्य स तथा दुर्मर्षं सोढुमशक्यं कर्मग्रस्तो जीवः ॥२॥

लोकजुगुप्सितं चेष्टितमिति वक्तव्यमत्राह–उत्तमेति ॥३-५॥

ननूच्चावचेषु सुरनरादिसंज्ञेषु भोगायतनशरीरेषु वर्तमानस्य हरेरिन्द्रियगुणैरवलेपोऽपि सम्भाव्यते देवदत्तवदिति तत्राह, उच्चावचेष्विति। धीशब्देनेन्द्रियाण्युपलक्षयति ॥६॥

आदित एव वक्तुमुपक्रमते–आसीदिति। समुद्रैरुपप्लुता आलीनाः ॥७॥

अन्तिके विदूरतः ॥८—१०॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

भगवन्निति। तैः तत्र निरूप्यन इत्यध्याहारेणैव व्याख्येयं नतु विग्रहेण निरूप्यत इत्यभिकोक्तेः सापेक्षत्वाद्बहुव्रीह्यसम्भवः ॥१॥

यदर्थमिति युग्मकम् कर्मग्रस्त इव तमःप्रकृतीव दुर्मर्ष इवेत्यन्वयः। अत एव लोकैः साधारणैर्जुगुप्सितं तादृशवपुर्धारणन्तु न युक्तमित्याह–यत उत्तमश्लोकचरितं सर्वेषामपि लोकानां सुखावहमेव भवितुमर्हतीति ॥२—५॥

उच्चावचेषु देवमनुष्यतिर्यगादिषु भूतेषु चरन् अवतीर्य विहरन्नपि धियः साधारणबुद्धेः गुणैरुच्चावचत्वस्फुरणैरुच्चावचत्वं न भजते, तत्र हेतुः निर्गुणत्वात् सत्त्वाद्यतीतसच्चिदानन्दविग्रहत्वादिति ॥६॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत्र श्रीवराहदेववदयमपि वारद्वयमवतीर्णवानिति दर्शयितुमाह—आसीदिति । अतीतकल्पस्य गतब्रह्मदिनस्य ब्राह्मो ब्रह्मशयननिबन्धनः अत एव नैमित्तिकः ॥ ७ ॥

मुखतो निःसृतान् शयनसमये आवर्त्यमानान् अन्तिके स्थित्वा योगबलेनाहरत् कल्पान्तरादौ पुनर्वेदोपदेश लीलार्थमीश्वरेच्छा तु मूलमितिज्ञेयम् ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

चतुर्विंशे मत्स्यरूपी प्राह सत्यव्रतं हरिः ।
खेलन्महार्णवे तेन स्तुतस्तस्योपदेशकः ॥
वामनस्य वियद्व्यापि वृद्धिश्रवणतः स्मृतिम् ।
आरूढां मत्स्यरूपी स पृच्छ्यते भूभृता हरिः ॥
लीलाचक्रे लीलया यां कर्मख्यातिजुगुप्सिताम् ।
तथा मात्स्यं वपुर्दध्रे जातिख्याति जुगुप्सितम् ॥
अतः प्रासङ्गिकी मत्स्यावतारस्य कथा यथा ।
तथैवाग्रतनी सत्यव्रतस्यैव प्रसङ्गतः ॥

मायामत्स्यस्य मायिकमत्स्यस्य विडम्बनम् अनुकरणं यस्यां तां स तु स्वयममायिको मत्स्य एवेत्यर्थः । स्वस्यालौकिकैः प्रभावैर्मायिकमत्स्यस्यतिरस्कारो वा ॥ १ ॥

तमःप्रकृतीव दुर्मर्षे दुःसहमित्युभयत्रापीवशब्दस्यान्वयः जुगुप्सितमपि वामनरूपं भक्तस्य बलेरनुग्रहाय धृतवानिति युक्तमुक्तं, मत्स्यरूपं तु कस्य भक्तस्यानुग्रहायेति मे जिज्ञासेति भावः उत्तमश्लोकस्य चरित्रं तु श्रवणकीर्त्तनाद्यर्हत्वेन सर्वलोकसुखावहं भवत्येव मत्स्यवपुर्धारणं तु कस्य भक्तस्य सुखार्थं तद्वदेति भावः ॥ २—४ ॥

सामान्येनावतारप्रयोजनमाह—गोविप्रेति ॥५॥

जुगुप्सितत्वं सामान्यतः परिहरति । धियोगुणैर्यान्युच्चावचानि रूपाणि तेषु नियन्तृत्वेन चरन्नपीश्वरो नोच्चावचत्वं भजते निर्गुणत्वात् कुतः पुनः शुद्धसत्त्वमयैर्मत्स्याद्याकारैरुच्चावचत्वशङ्केति भावः इति श्रीस्वामिचरणाः ॥ ६ ॥

श्रीवराहदेववदयमपि वारद्वयमवतीर्णवानिति दर्शयितुमाह आसीदिति । ब्राह्मो ब्रह्मशयननिबन्धनः अत एव नैमित्तिकः ॥ ७ ॥

मुखतो निस्सृतान् शयनसमये आवर्त्यमानान् समीपे स्थित्वा योगबलेनाहरत् ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मत्स्यावतारचरित्रं वर्ण्यते भगवच्चिति चतुर्विंशेन । मायया भक्तविप्रलिप्सया कृपया मत्स्यविडम्बनं मत्स्यरूपानुकरणं यस्यां ताम् ॥ १ ॥

ईश्वरः कर्मग्रस्त इव जीव इव तमःप्रकृति तमःस्वभावं दुर्मर्षं क्रोधयुक्तम् अत एव लोकजुगुप्सितं मात्स्यं रूपं यदर्थं यत्प्रयोजनार्थमदधात् धृतवान् ॥ २ ॥ ३ ॥ ४ ॥

समान्यतोऽवतारप्रयोजनमाह—गोविप्रेति ॥ ५ ॥

लोकजुगुप्सितत्वं नेत्याह—हि निश्चितं यः त्वत्प्रश्नविषयः ईश्वरः सः गुणैर्हेतुभूतैरुच्चावचेषु भूतेषु सत्त्वादिगुणत्वात् गुणकार्येषु हृत्स्थः चरन् उच्चावचत्वं न भजते निर्गुणत्वाद्गुणकार्यरूपेभ्यो भूतेभ्यः विलक्षणत्वात् प्राकृतगुणरहितेन स्वासाधारणदेहेनैव देवमनुष्यतिर्य्यगाद्यनुकरणमात्रं करोति, न तु प्राकृतगुणमयदेवादिरूपो भवतीति फलितार्थः । यथा वायुरुच्चावचभूतपरिमितप्राणाकारः स्वेनैव रूपेण भवति नतूच्चावचत्वं भजते तद्वत् अतः सः स्वासाधारणविग्रहेणैव मत्स्यः नतु तमःप्रकृति दुर्मर्षं लोकजुगुप्सितं प्राकृतं रूपं कृतवानिति निष्कर्षः ॥ ६ ॥

विशेषतो मत्स्यावतारप्रयोजनं वेदसत्यव्रतादिरक्षणज्ञानोपदेशादिकमाह—आसीदित्यादिना । ब्रह्मणो निद्रायां भवो ब्राह्मः तेनैव निमित्तेन भवो नैमित्तिकः तत्र नैमित्तिके प्रलये समुद्रे उपप्लुता निमग्नाः ॥ ७ ॥

शिशयिषोः शयनं कर्तुमिच्छोः अन्तिके निस्सृतान् मूर्तिमत्तया निर्गलितान् ॥ ८ ॥

भाषा टीका ।

श्रीरुक्मिणीवासुदेवौ विजयेताम् ॥

राजोवाच ॥

राजा परीक्षित बोले, कि—हे भगवन् ! मैं अद्भुतकर्मा श्रीहरि के आद्य अवतार की कथा श्रवण की इच्छा करता हूं जैसे आपने मत्स्यरूप धारण कर मत्स्य का अनुकरण किया ॥ १ ॥

और लोक निन्दित मत्स्यरूप जिस प्रयोजन के लिये आपने धारण किया, साक्षात् ईश्वर होकर कर्म ग्रस्त जीव जैसे दुःसह तमोगुणी रूप को धारण करें ॥ २ ॥

हे भगवन् ! यह सब उत्तम श्लोक का सर्व लोक सुखकारी सर्व चरित्र आप यथावत् कहने के योग्य है ॥ ३॥

सूत उवाच ॥

सूतजी बोले, कि—इस प्रकार परीक्षित ने जब पूंछा तब भगवान् बादरायणि श्रीशुकदेवजी, हरि ने मत्स्य रूप धारण कर जो चरित्र किया सो कहने लगे ॥ ४ ॥

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि—ईश्वर श्रीहरि, गौ ब्राह्मण सुरगण साधुजन वेद और धर्म के रक्षा करने के लिये अपने इच्छा से देव मनुष्यादि शरीरों को धारण करते हैं ॥ ५ ॥

यद्यपि छोटे बडे सब प्राणियों में ईश्वर वायु के सदृश सर्वत्र व्यापक होकर सबको नियमन करते हैं तथापि उन्हीं के सत्व गुण से न्यारे रहते हैं क्योंकि ? निर्गुण हैं इससे प्राणियों के नीचत्व उच्चत्व के संग से आप नीचत्व उच्चत्व को प्राप्त नहीं होते हैं ॥ ६ ॥

ज्ञात्वा तद्दानवेन्द्रस्य हयग्रीवस्य चेष्टितम् ।
दधार शफरीरूपं भगवान् हरिरीश्वरः ॥ ९ ॥
तत्र राजऋषिः कश्चिन्नाम्ना सत्यव्रतो महान् ।
नारायणपरोऽतप्यत्तपः स सलिलाशनः ॥ १० ॥
योऽसावस्मिन्महाकल्पे तनयः स विवस्वतः ।
श्राद्धदेव इति ख्यातो मनुत्वे हरिणाऽर्पितः ॥ ११ ॥
एकदा कृतमालायां कुर्वतो जलतर्पणम् ।
तस्याञ्जल्युदके काचिच्छफर्येकाऽभ्यपद्यत ॥ १२ ॥
सत्यव्रतोऽञ्जलिगतां सह तोयेन भारत ।
उत्ससर्ज नदीतोये शफरीं द्रविडेश्वरः ॥ १३ ॥
तमाह साऽतिकरुणं महाकारुणिकं नृपम् ।
यादोभ्यो ज्ञातिघातिभ्यो दीनां मां दीनवत्सल ! ।
कथं विसृजसे राजन् ! भीतामस्मिन्सरिज्जले ॥ १४ ॥
तमात्मनोऽनुग्रहार्थं प्रीत्या मत्स्यवपुर्धरम् ।
अजानन्रक्षणार्थाय शफर्याः स मनो दधे ॥ १५ ॥
तस्या दीनतरं वाक्यमाश्रुत्य स महीपतिः ।
कलशाप्सु निधायैनां दयालुर्निन्य आश्रमम् ॥ १६ ॥

भाषा टीका ।

हे राजन् ! अब नैमित्तिकलय में तुमसे कहता हूं सो सुनो, बीते हुए कल्प के अन्त में ब्रह्माजी के निद्रा के निमित्त से लय प्राप्त हुआ, जिसमें चारों दिशाओं के समुद्र ने भूर्लोकादिकों को डुबालिया ॥ ७ ॥

जब समय के प्राप्त होने से ब्रह्माजी को निद्रा आई तब समीप में रहने वाला महान् बली हयग्रीव दैत्य ने मुख से निकले हुए वेदों को हरण कर लिया ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

शफरीरूपं मत्स्यरूपम् ॥ ९ ॥

प्रयोजनान्तरं लीलाप्रकारं चाऽऽह-तत्र राजऋषिरित्यादि-यावत्समाप्ति ॥ १० ॥

स एव श्राद्धदेव इति ख्यातः ॥ ११ ॥

कृतमालायां नद्याम् ॥ १२—१७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदा दानवश्रेष्ठस्य हयग्रीवस्य तच्चेष्टितं ज्ञात्वेश्वरो हरिर्भगवान् शफरीरूपं मात्स्यं रूपं दधार हयग्रीवाख्यं दानवं निहत्य वेदान् ब्रह्मणे प्रत्यर्पयितुं मत्स्यरूपेणावततारेति विशेषतः प्रयोजनमुक्तम् शफरीति स्त्रीत्वमविवक्षितं मात्स्यरूपेणावतीर्ण इत्यर्थः ॥ ९ ॥

एवं सामान्यतो विशेषतश्चावतारप्रयोजनमभिधायाथावतरणप्रकारं वक्तुमितिहासं प्रस्तौति-तत्रेति । तत्र तस्मिन्नेवातीते कल्पे कश्चित्सत्यव्रताख्यो राजर्षिर्महान् अक्रोधाद्यात्मगुणयुक्तः नारायणः परः प्राप्यो यस्य तादृशो बभूव स च सलिलमेवाशनं यस्य तादृशस्तपो ऽतप्यच्चचार ॥ १० ॥

सत्यव्रतं विशिनष्टि-य इति । यो ऽतीतकल्पे सत्यव्रताख्यो राजर्षिः स एवास्मिन्महाकल्पे विवस्वतस्तनयः श्राद्धदेव इति प्रसिद्धः मनुत्वे मनोरधिकारत्वे हरिणा भगवता अर्पितः निहितः मनुः कारित इत्यर्थः ॥ ११ ॥

एकदा कृतमालायां नद्यां जलतर्पणं कुर्वतस्तस्य सत्यव्रतस्य अञ्जल्युदके काचिदेका अल्पकाया शफरी अभ्यपद्यत अदृश्यत प्राप्तवती वा स्त्रीत्वमविवक्षितम् "इत्युक्तः सोऽनयन्मत्स्यं समुद्रे प्राक्षिपज्झषम् । क्षिप्यमाणस्तेनवदता तमाह" इत्यादिषु पुंस्त्वनिर्देशस्य बहुलमुपलभ्यमानत्वात् ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततो हे भारत ! द्रविडदेशाधिपः सत्यव्रतः तां शफरीमञ्जलिगतां तोयेनाञ्जलिस्थेन सह नदीतोये तत्याज ॥ १३ ॥

तं त्यक्तवन्तं महाकारुणिकं नृपं सत्यव्रतं सा शफरी अतिकरुणं यथा भवति तथोवाच. तदेवाह–यादोभ्य इति । हे राजन् ! ज्ञातीनस्मान् घातयन्तीति तथा तेभ्यः ज्ञातयश्च ते घातिनश्च तेभ्य इति वा यादोभ्यो जलचरेभ्यो भीतामतएव दीनां मां हे दीनवत्सल ! कथमस्मिन्सरिज्जले बहुजलचराक्रान्ते विसृजसे त्यजासि ॥ १४ ॥

इत्येवमुक्तः स राजा सत्यव्रतः आत्मनः स्वस्यानुग्रहार्थं प्रीत्या मत्स्यमूर्तिं बिभ्राणं साक्षाद्भगवन्तमजानन् शफरीरक्षणार्थं मनो दधे मनश्चक्रे ॥ १५ ॥

ततस्तस्याः शफर्याः दीनतरमुक्तं वाक्यमाकर्ण्य स महीपतिः सत्यव्रतः दयालुरेनां शफरीं कलशाप्सु कमण्डलुजले निधाय स्वाश्रमंप्रति निन्ये प्रापयामास ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कोऽसौ सत्यव्रत इति तत्राह, योसाविति ॥ ११—१२ ॥

अञ्जलितोयेन ॥ १३—१४ ॥

सः मनुः शफर्याः रक्षणार्थाय ॥ १५—१६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

शफरीरूपं दधारेति । तत्त प्रलयान्ते तत्त प्रकटितवानित्यर्थः अतीतप्रलयापाय इत्यादि वक्ष्यमाणात् ॥ ९ ॥

तदेवमतीतकल्पस्य वृत्तान्तमुक्त्वा साम्प्रतकल्पस्य वृत्तमाह—तत्रेति । तत्र तस्मिन् वृत्तान्ते सतीत्यर्थः ॥ १० ॥

महाकल्प इत्यनेनास्य ब्रह्मदिनरूपस्य कल्पस्यादरविशेषो दर्शितः तच्च मनोरस्य स्तुत्यर्थमिति ज्ञेयम् ॥ ११-२२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

शफरीरूपं दधारेति तेनैव रूपेण हयग्रीवं हत्वा स्वायम्भुवमन्वन्तरारम्भे वेदानाहरदित्यग्रिमोक्तेर्ज्ञेयं तेन मत्स्यरूपं विना वेदाहरणासम्भवात् ब्रह्माविस्मृतभक्ताहितार्थं मत्स्यरूपं दधारेति प्रथमो मत्स्यावतार उक्तः ॥ ९ ॥

पुनरपि मत्स्यः सत्यव्रताभिधनिजभक्तानुग्रहार्थमवतीर्ण इत्याह–तत्र मत्स्यस्वरूपे स्वप्रदेवे भक्तिमानिति शेषः ॥ १० ॥

महाकल्पः इति दैनं दिनकल्पोऽप्ययं महाकल्पशब्देनोक्तस्तदाविकसत्यव्रतमनोरादरविशेषार्थं इति सन्दर्भः एतन्महाकल्पान्तर्गत एव ब्रह्मदिने स विवस्वत्तनयो मनुर्नान्यत्रेत्यन्वे ॥ १०—१४ ॥

तं प्रसिद्धं स्वप्रदेवं विष्णुमेव मत्स्यवपुर्धरमजानन् ॥ १५-१६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

शफरीरूपं मात्स्यं रूपं दधार धृतवान् ॥ ९ ॥

नारायणः परः उपास्यो यस्य सः ॥ १० ॥

हरिणोपास्येन अर्पितो निहितः ॥ ११ ॥

कृतमालायां नद्याम् ॥ १२ ॥ ॥ १३ ॥ ॥ १४ ॥

मत्स्यवपुर्द्धरं हरिमिति शेषः ॥ १५ ॥

कलशाप्सु कमण्डलुजलेषु ॥ १६ ॥ ॥ १७ ॥

भाषा टीका ।

उस हयग्रीव नामक दानवेन्द्र की चेष्टा को जानकर भगवान् श्रीहरि ने शफरी [मत्स्य] के रूपको धारण किया ॥ ९ ॥

उस समय कोई एक नारायणपरायण सत्यव्रत नामक महान् राजर्षि जलमात्र पानकर तप करते रहे ॥ १० ॥

वह राजर्षि कौन रहे कि–जो विवस्वान् के पुत्र श्राद्धदेव नाम से प्रसिद्ध इस महाकल्प में श्रीहरि ने मनु बनाये ॥ ११ ॥

वह सत्य व्रत राजर्षि एक समय कृतमाला नदी में जल से तर्पण करते रहे, उस काल में उनके अंजली में एक छोटी सी शफरी [मछली] आगई ॥ १२ ॥

हे भारत ! द्रविडेश्वर राजा सत्यव्रत ने उसको जलके सहित नदी के जल में छोड दीनी ॥ १३ ॥

वह मछली परम कारुणिक राजा से बडे करुणा पूर्वक बोली, कि–हे दीन वत्सल ! जातिघातक जल जन्तुओं से डरी हुई ऐसी दीन मुझको हे राजन् इस नदी के जल में क्यों छोडते हो ? ॥ १४ ॥

अपनी रक्षा और अनुग्रह के लिये प्रीति से मीन का धारण करने वारे श्री हरिको न जानकर राजा ने उस मीनके रक्षा करने में चित्त लगाया १५ ॥

उन महीपति ने उस मछली का अति दीन वाक्य सुनकर परम दयालु राजा सत्यव्रत कलश के जलमें उसको डालकर अपने आश्रम में ले आये ॥ १६ ॥

सा तु तत्रैकरात्रेण वर्द्धमाना कमण्डलौ ।
अलब्ध्वात्मावकाशं वा इदमाह महीपतिम् ॥ १७ ॥
नाहं कमण्डलावस्मिन्कृच्छ्रं वस्तुमिहोत्सहे ।
कल्पयौकः सुविपुलं यत्राहं निवसे सुखम् ॥ १८ ॥
स एनां तत आदाय न्यधादौदञ्चनोदके ।
तत्र क्षिप्ता मुहूर्त्तेन हस्तत्रयमवर्द्धत ॥ १९ ॥
न म एतदलं राजन् ! सुखं वस्तुमुदञ्चनम् ।
पृथु देहि पदं मह्यं यत्त्वाऽहं शरणं गता ॥ २० ॥
तत आदाय सा राज्ञा क्षिप्ता राजन् ! सरोवरे ।
तदावृत्यात्मना तोयं महामीनोऽन्ववर्द्धत ॥ २१ ॥
नैतन्मे स्वस्तये राजन्नुदकं सलिलौकसः ।
निधेहि रक्षायोगेन ह्रदे मामविदासिनि ॥ २२ ॥
इत्युक्तः सोऽनयन्मत्स्यं तत्र तत्राविदासिनि ।
जलाशये सम्मितं तं समुद्रे प्राक्षिपज्झषम् ॥ २२ ॥
क्षिप्यमाणस्तमाहेदमिह मां मकरादयः ।
अदन्त्यतिबला वीर ! मां नेहोत्स्रष्टुमर्हसि ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यत्राहं सुखं निवसामि तदोकः स्थानं कल्पय ॥ १८ ॥

औदञ्चनोदके मणिकस्थे जले ॥ १९—२१ ॥

रक्षायोगेन रक्षाया योगेनोपायेन यथा महाह्रदप्राप्तेरर्वाक् जलं विना न शुष्येयं तेनोपायेन निधेहि अविदासिनि अनुपक्षये ॥ २२ ॥

सम्मितं तत्तज्जलाशयपरिमितम् ॥ २३—२५ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततः सा शफरी तत्र कमण्डलावेकरात्रेण वर्द्धमाना सती कमण्डलोरात्मनाऽपूर्णत्वादलब्ध आत्मनः अवकाशो यया सा च महीपतिं सत्यव्रतं प्रतीदं वक्ष्यमाणमुवाच ॥ १७ ॥

तदेवाह—नेति । अस्मिन् कमण्डलावहं कृच्छ्रं सङ्कटं यथा भवति तथा वस्तुं वासं कर्त्तुं नोत्सहे अतः सुविपुलमोकः स्थानं कल्पय यत्राहं सुखं निवसामि तादृशमोकः कल्पयेत्यर्थः ॥ १८ ॥

एवमुक्तः स सत्यव्रतः ततः कमण्डलोरेनां शफरीमादायौदञ्चनोदके विपुलकटाहोदके मणिकोदके वा न्यधात्निहितवान् तत्रौदञ्चनोदके क्षिप्ता सा शफरी मुहूर्त्तेन कालेन हस्तत्रयमवर्द्धत ॥ १९ ॥

तथा वर्द्धमाना पुनरप्याह—हे राजन् ! मे मम सुखं वस्तुम् एतदुदञ्चनं नालं न पर्याप्तं ततो मह्यं पृथु विपुलं पदं स्थानं देहि कल्पय यतः त्वामहं शरणङ्गता ॥ २० ॥

इत्युक्तेन सत्यव्रतेन तत उदञ्चनादादाय सरोवरे क्षिप्ता सती हे राजन् ! तत्सरोवरमावृत्य कृत्स्नमभिव्याप्य महामीनरूपेणाऽन्ववर्द्धत ॥ २१ ॥

पुनस्तथा वर्द्धमान उवाच—हे राजन् ! सलिलमेवौकः स्थानं यस्य तस्य मम स्वस्तये सुखाय सुखं वस्तुमेतत्सारसं जलं नालं सलिलौकसः सरसः सम्बन्ध्येतदुदकं मम स्वस्तये न भवतीति वान्वयः । अतो रक्षाय योगेनोपायेनाऽविदासिनि अनुपक्षयजले महाह्रदे रक्षां विधेहीति ॥ २२ ॥

इत्युक्तः स सत्यव्रतः तं मत्स्यमुत्तरोत्तरविपुले तत्र तत्र जलाशये अनयत्पुनस्तत्तज्जलाशयेन संमितं परिमितं तं मत्स्यं समुद्रे प्राक्षिपत् ॥ २३ ॥

समुद्रे च क्षिप्यमाणो झषः तं सत्यव्रतमिदमाह—हे वीर ! इह समुद्रे मकरादयोऽतिबलाः जलचरा मामदन्ति भक्षयन्ति अतो मामिह समुद्रे त्वं त्यक्तुं नार्हसीति ॥ २४ ॥

———

एवं विमोहितस्तेन वदता वल्गुभारतीम् ।
तमाह को भवानस्मान्मत्स्यरूपेण मोहयन् ॥ २५ ॥
नैवं वीर्यो जलचरो दृष्टोऽस्माभिः श्रुतोऽपि च ।
यो भवान्योजनशतमह्नाऽभिव्यानशे सरः ॥ २६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अलब्धात्मावकाशमिति क्रियाविशेषणम् ॥ १७--१८ ॥

उदञ्चनं मणिकयं हस्तत्रयं व्यामत्रयम् ॥ १९ ॥

पदं स्थानम् ॥ २० ॥

तत्सरोवरं आत्मना शरीरेणावृत्य व्याप्य ॥ २१ ॥

अविदासिनि अगाधे असिञ्चसेतौ वा ॥ २२ ॥

अनन्तरं किमकरोदिति तत्राह-इत्युक्त इति जलाशये हृदे असम्मितमसमानं सम्मितं समानं वा ॥ २३—२५ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तमिति तस्या मनुष्यवद्वाक्यमाधुर्याऽपि मत्स्यत्वज्ञानं तन्मायया विमोहितत्वात् ॥ २३-३३ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

औदञ्चनोदके कूपजले ॥ १९ ॥ २० ॥

तत् सरोवरं आत्मना देहेन आवृत्य ॥ २१ ॥

रक्षायोगेन जलं विना यथा न म्रियेत तथोपायेनेत्यर्थः, अविदासिनि उपक्षयशून्ये ॥ २२ ॥

तत्र जलाशयेऽप्यसम्मितममान्तमित्यर्थः ॥ २३-२५ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कृच्छ्रं कष्टं यथास्यात्तथाऽस्मिन्कमण्डलौ वस्तुं नोत्सहे अतः इहास्मिन्काले यत्राहं सुखं निवसे निवसामि तदोकः स्थानं कल्पय ॥ १८ ॥

औदञ्चनोदके मणिकस्थे जले ॥ १९ ॥

नालं न पर्याप्तं पृथु विपुलं पदं स्थानम् ॥ २० ॥

तत्सरोवरमात्मना देहेनावृत्य सर्वमभिव्याप्य महामीनरूपेणावर्द्धत ॥ २१ ॥

एतदुदकं मे स्वरुतये शान्त्यै नालम्, अतः रक्षायाः योगेनोपायेन मां अविदासिनि मनुपक्षये निधेहि ॥ २२ ॥

तस्मिन्नस्मिन् जलाशये अनयत् पुनरस्मिन्तं तत्तज्जलाशयपरिमाणातीतं समुद्रं प्राक्षिपत् ॥ २३ ॥ २४ ॥ २५ ॥

———

भाषा टीका ।

वह मछली तो एक रात में बढती हुई उस कमंडल में अवकाश को न प्राप्त होकर राजासे इस प्रकार बोलती हुई ॥ १७ ॥

मछली बोली, कि—मैं इस कमंडलु में दुःख पूर्वक बसना नहीं चाहती हूँ मेरे लिये बडे निवास की कल्पना करो जहां कि सुख पूर्वक रहूं ॥ १८ ॥

तब राजा ने भी कमंडलु से निकालकर उसको [मणिक] माठ के विषे जल में छोडदी वहां छोडने पर भी एक मुहूर्त में तीन हाथ बढ गई ॥ १९ ॥

और फिर राजा से बोली, कि—हे राजन् ! यह माठ मेरे लिये सुख पूर्वक रहने के लायक नहीं है तस्मात् मेरे लिये बडा ठिकाना बताओ क्योंकि ? मैं तुमारे शरण आई हूं ॥ २० ॥

हे राजन् ! फिर राजा सत्यव्रत ने उस पात्र में से निकाल कर सरोवर में छोडी तब उस समय पर सब जल को घेरकर बडा भारी मत्स्य बढ गया ॥ २१ ॥

और राजा से बोला, कि—हे राजन् ! जलमें रहने वाले ऐसे मेरे सुख पूर्वक रहने के योग्य यह जल नहीं है जिसमें मेरी अच्छी रक्षा होसके और जो कभी नहीं क्षीण हो ऐसे बडे हद में मुझको छोडो ॥ २२ ॥

जब राजा से इस प्रकार कहा तब वह सत्यव्रत एक से एक बडे बडे जलाशय में लेजाकर छोडने लगे, तब वह जलाशय परिमिति ही होता गया कोई भी जलाशय अधिक न हुआ तब राजा ने उस मत्स्य [मच्छ] को समुद्र में लेजाकर छोडा ॥ २३ ॥

समुद्र में छोडने लगे तब वह मत्स्य फिर राजा से बोला, कि हे वीर ! इसमें बडे २ मकर आदिक जंतु मेरा भक्षण करेंगे आप मेरे को इसमें छोडने को योग्य नहीं हो ॥ २४ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

अभिव्यानशेऽभितो व्याप्तवान् ॥ २६—२७ ॥

नूनं त्वं भगवान् साक्षाद्धरिर्नारायणोऽव्ययः ।
अनुग्रहाय भूतानां धत्से रूपं जलौकसाम् ॥ २७ ॥
नमस्ते पुरुषश्रेष्ठ ! स्थित्युत्पत्त्यप्ययेश्वर ! ।
भक्तानां नः प्रपन्नानां मुख्यो ह्यात्मगतिर्विभो ! ॥ २८ ॥
सर्वे लीलावतारास्ते भूतानां भूतिहेतवः ।
ज्ञातुमिच्छाम्यदो रूपं यदर्थं भवता धृतम् ॥ २९ ॥
न तेऽरविन्दाक्ष ! पदोपसर्पणं मृषा भवेत्सर्वसुहृत्प्रियात्मनः ।
यथेतरेषां पृथगात्मनां सतामदीदृशो यद्वपुरद्भुतं हि नः ॥ ३० ॥

श्रीशुक उवाच ।

इति ब्रुवाणं नृपतिं जगत्पतिः सत्यव्रतं मत्स्यवपुर्युगक्षये ।
विहर्तुकामः प्रलयार्णवेऽब्रवी(१)च्चिकीर्षुरेकान्तजनप्रियः प्रियम् ॥ ३१ ॥

श्रीभगवानुवाच ।

सप्तमेऽद्यतनादूर्ध्वमहन्यतदरिन्दम ! ।
निमंक्ष्यत्यप्ययाम्भोधौ त्रैलोक्यं भूर्भुवादिकम् ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मुख्यः सत्य आत्मा च गतिश्चाऽश्रयः ॥ २८—२९ ॥

हे अरविन्दाक्ष ! पृथगात्मनां देहाद्यभिमानिनां सतामितरेषां पदोपसर्पणं यथा मृषा भवेत्तथा सर्वसुहृत्प्रियात्मनस्तव पदोपसर्पणं मृषा न भवेत्, यद्यस्मान्नो भक्तानामद्भुतं वपुरदीदृशो दर्शितवानासि पाठान्तरे पृथगात्मनो भेददर्शिनः पुंसः असतां परिच्छिन्नानां पदोपसर्पणं यथा मृषेत्यर्थः ॥ ३० ॥

एकान्तजना भक्ताः प्रियाः यस्य ॥ ३१ ॥

अप्ययाम्भोधौ प्रलयार्णवे भूर्भुव आदिकमित्यर्थः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्येवं वल्गुभारतीं सुन्दरवाचं वदता तेन मत्स्यरूपिणा भगवता विमोहितः सत्यव्रतस्तं मत्स्यमाह—को भवानित्यादिना इति ब्रुवाणमित्यन्तः प्राक्तनेन ग्रन्थेन । अस्मान्मत्स्यरूपेण मोहयन् भवान् क इति प्रश्नः ॥ २५ ॥

कश्चिन्मत्स्यविशेष एवाहमिति चेन्नेत्याह—नेति । एवंविधप्रभाववान् कश्चिदपि जलचरोऽस्माभिर्न दृष्टः नापि श्रुतश्च एवं वीर्यं इत्युक्तं वीर्यं दर्शयन् विशिनष्टि—य इति । यः भवान् अह्ना कालेन योजनशतमभिव्यानशे अभितो व्याप्तवान् ॥ २६ ॥

अतस्त्वं न केवलं मत्स्यः किन्त्वमरो देवः तत्रापि न ब्रह्मादिष्वमरेषु कश्चिदपि तु साक्षादव्ययः निर्विकारो भगवान् हरिर्नारायणस्त्वं नूनं निश्चितमेतदित्यर्थः । तर्हि नारायणस्य मम नैवंविध आकारः किन्तु चतुर्भुजत्वाद्याकारः इत्यत आह—अनुग्रहायेति । भूतानामनुग्रहाय देवमनुष्यादिभूतान्यनुग्रहीतुं जलौकसां मत्स्यानां रूपं धत्से मात्स्यं रूपं बिभर्षीत्यर्थः ॥ २७ ॥

कोऽसौ नारायणः ? इत्यपेक्षायां तं लक्षयन्नमस्करोति—नम इति । हे पुरुषोत्तम ! हे जगदुत्पत्तिस्थितिलयकारणभूत ! हे विभो ! भक्तानां प्रपन्नानां चास्माकं मुख्यः नायकोऽन्तरात्मा गतिः स्वप्राप्त्युपायभूतः "स तत्र पर्येति' स उत्तमः पुरुषः, यतो वा इमानि भूतानि जायन्ते, स कारणं करणाधिपाधिपः, य आत्मनि तिष्ठन्, अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा, अमृतस्यैष सेतुः, नित्यं विभुं सर्वगतं सुसूक्ष्मम्" इत्यादि वेदान्तवेद्यो निखिलजगदुदयविभवलयलील आत्मेश्वरः सर्वान्तर्गतः सिद्धोपायभूतः पुरुषोत्तमो यः स नारायणः स एवाधुना मत्स्यरूपेणावतीर्णः इति भावः । एवम्भूताय ते तुभ्यं नमः भक्तानां प्रपन्नानाम् इति प्रपत्त्युपकृतभक्तियोगनिष्ठानामित्युक्तम् ॥ २८ ॥

अनितरसाधारणप्रभावेन त्वं नारायण एवेति निश्चिनोमि तथा अवतारा अपि सर्वे लोकहितार्था एवेति वेद्मि चैव किन्त्वेतदवतारप्रयोजनं विशेषतो ज्ञातुमिच्छामीत्याह—सर्वे इति । ते तव सर्वे लीलावताराः लीलयोपात्ता अवताराः लीलावताराः लीलापदेनावता-

(१) चिकीर्षितं कान्तजनप्रियः प्रभुः । इति वीर० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

दाणामकर्ममूलत्वमुक्तं भूतानां देवादीनां भूतिर्विभवस्तद्धेत्व इति सामान्यतोऽवतारप्रयोजनं जानाम्येवेति भावः । किन्तु यदर्थं यस्मै प्रयोजनविशेषाय अत एतन्मात्स्यं रूपं भगवता धृतं तत्प्रयोजनं ज्ञातुमिच्छामि ॥ २९ ॥

अनीश्वरभजनवन्मद्भजनं न मुधेति दर्शयितुमिदं मात्स्यं रूपं प्रदर्शि भवतेति जानामीत्यभिप्रायेणाह–नेति । हे अरविन्दाक्ष ! तव पादोपसर्पणं श्रीपादारविन्दभजनं पृथगात्मनामब्रह्मात्मकस्वतन्त्रात्माभिमानिनां सताम् इतरेषां पदोपसर्पणमिव न मृषा भवेत् न व्यर्थं भवेत्. अवैयर्थ्ये हेतुं वदन् विशिनष्टि-सर्वसुहृत्प्रियात्मनः सर्वेषां सुहृदः प्रियस्यान्तरात्मनश्च,यद्वा,सतां सर्वसुहृत्प्रियात्मन इति चान्वयः तत्पक्षे सतां साधूनां सर्वप्रकारेण सुहृद प्रियश्च आत्मा स्वरूपं यस्य चोचेति दिक् एतद्विपरीतत्वात् इतरेषां पादोपसर्पणं मृषेतिभावः कुत एतद्विपरीतं न मृषेत्यत आह–हि यस्माद्यदिदमद्भुतं मात्स्यं वपुर्नोऽस्माकं भजतामदीदृशः दर्शितवान् ॥ ३० ॥

इतीत्थं भाषमाणं सत्यव्रतं प्रति मत्स्यवपुर्जगदीश्वरो भगवांश्चिकीर्षितमब्रवीत् कथम्भूतः ? प्रलयार्णवे विहर्तुकामः विहारप्रयोजनं दर्शयन्विशिनष्टि कान्तजनप्रियः कान्तजनानां भक्तजनानां प्रियः प्रभुश्च भक्तजनानां प्रीतिं कर्तुमवतीर्णो इति भावः ॥ ३१ ॥

एवं पृष्टावतारप्रयोजनविशेषो मत्स्यमूर्तिर्भगवांस्तत्प्रयोजनविशेषमाह—सप्तम इति नवभिः । हे अरिन्दम ! अद्यतनाद्दह्नः यस्मिन्नहनि मदवतारः तस्मादह्न आरभ्य सप्तमेऽहनीदं भूर्भुवादिकं त्रैलोक्यमप्ययांमोधौ प्रलयोदधौ विनङ्क्ष्यति मग्नं भविष्यति ॥३२॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एवम्विधं वीर्यं यस्य सः एवं वीर्यः अह्ना झटिति व्यानशे व्याप्तः ॥ २६ ॥

विशेषसम्बन्धित्वाक्षारं ज्ञानं तदयनं यस्य स तथा ज्ञानाश्रयः कश्चिच्चेतन एव नारायणः किं न स्यादित्यतः साक्षाद्धरिरिति तुरीयमूर्तिः ॥ २७—२८ ॥

यदर्थं यत्प्रयोजनाय भवता आदौ मत्स्यरूपं धृतं तत्प्रयोजनपूर्वकं ज्ञातुमिच्छामीत्यन्वयः ॥ २९ ॥

अहं त्वत्स्वरूपज्ञाने योग्य इत्याह–नत इति । हे अरविन्दाक्ष ! यथा पृथगात्मनां भिन्नविषयबुद्धीनाम् इतरेषां ते तव पदोपसर्पणं मुधा वृथा भवेत्तदप्यनेनवस्विन्महत्पुण्यं कर्म करोति "तद्यास्यां ततः चीयते,,इति श्रुतिरतएव पृथगित्युक्तं सतां तथा न स्यात्तत्र हेतुमाह—अदीदृश इति. तवाद्भुतं नोऽस्माकम् इतरमत्स्यविलक्षणत्वादाश्चर्यं यद्वपुः "डुवप् बीजसन्ताने,, इति धातोः जगदुत्पादनसमर्थं रूपम् अदीदृशः दर्शितवानिति हि यस्मात्सन्त एतद्रूपज्ञाने योग्या इत्यर्थः । तव विषमस्वभावत्वाच्चयात्वमिति नेत्याह, सर्वेति ॥ ३० ॥

विषयसुखप्रेरकत्वात्प्रियः "तदेतत्प्रेयम्"इति श्रुतेः ॥ ३१ ॥

अद्यतनादह्न ऊर्ध्वं सप्तमेऽहनि निमङ्क्ष्यति निमग्नं भविष्यति अप्ययाम्भोधौ प्रलयसमुद्रे ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अह्ना एकेनैव व्यानशे व्याप्तवान् ॥ २६–२८ ॥

आत्मनां गतिर्यस्मात् स मुख्यप्रभुरित्यर्थः ॥ २९ ॥

इतरेषां देवेन्द्रादीनां पृथगात्मनाम् आत्मनः पृथग्देह एव आत्मा येषां तेषां देहाध्यासवतामित्यर्थः । नव तु नास्ति देहाध्यासः देहात्मनोः पार्थक्याभावादिति भावः यद्यस्मान्नोऽस्माकं सतां त्वद्भक्तानां निस्तारार्थम् अद्भुतमदिदृशं वपुरदीदृशः दर्शितवान् पृथगात्मनोऽसतामिति पाठे पृथगात्मनः पुंसः असतां पदोपसर्पणं यथा मृषेत्यर्थः ३०—३३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यो भवान् अह्ना अल्पेन कालेन सरः समुद्रं योजनशतम् अभिव्यानशे अभिव्याप्तवान् ॥ २६ ॥ २७ ॥

मुख्यः आत्मा आश्रयः अंशभूतस्यात्मनोऽंशित्वेन स्थितिप्रवृत्त्यादि इत्यर्थः । गतिः पुरुषार्थप्रदश्च ॥ २८ ॥ २९ ॥

हेअरविन्दाक्ष ! पृथग्भूते त्वद्भिन्ने उपास्ये आत्मा मनो येषां तेषामितरेषामसतां यथा पदोपसर्पणं त्वद्भिन्नतत्तद्देवचरणोपासनं मृषा भवति परमपुरुषार्थदत्वाभावादिति भावः तथा सतां साधूनां पदोपसर्पणं तव चरणोपासनं मृषा न भवेत् यद्यस्मात् नोऽस्माकमुपासकानाम् अद्भुतं वपुः अदीदृशः दर्शितवानसि फलमस्माकं त्वच्चरणोपासनं त्वद्वपुर्दर्शनमात्रेणैवेति भावः ॥ ३० ॥

एकान्तजनाः प्रिया यस्य सः प्रियं कर्तुमिच्छुः नृपतिं प्रत्यब्रवीत् ॥ ३१ ॥

अद्यतनात् सप्तमेऽह्नि अप्ययाम्भोधौ नैमित्तिकप्रलयार्णवे निमङ्क्ष्यति निमग्नं भविष्यति ॥ ३२ ॥

भाषा टीका ।

इस प्रकार मधुरवाणी बोलने वाले उस मत्स्य ने राजा को मोहित कर दिया, तब राजा मत्स्य से बोले, कि- आप मत्स्य रूप धरकर मुझको मोह कराने वाले कौन हैं ? ॥ २५ ॥

ऐसी रीति का जलचर जंतु तो आज तक हमने न कभी देखा और न कभी सुना, जो कि–आपने सौयोजन का सरोवर एक दिन में अपने शरीर से बढकर ढँक लिया ॥ २६ ॥

यह निश्चय है कि आप साक्षात् अव्यय हरि नाम से प्रसिद्ध नारायणही हैं । प्राणियों के अनुग्रह के निमित्त आप जल जंतुओं का रूप धारण किये हुए हैं ॥ २७ ॥

त्रिलोक्यां लीयमानायां सम्वर्ताम्भसि वै तदा ।
उपस्थास्यति नौः काचिद्विशाला त्वां मयेरिता ॥ ३३ ॥
त्वं तावदोषधीः सर्वा बीजान्युच्चावचानि च ।
सप्तर्षिभिः परिवृतः सर्वसत्त्वोपबृंहितः ॥ ३४ ॥
आरुह्य बृहतीं नावं विचरिष्यस्यविक्लवः ।
एकार्णवे निरालोके ऋषीणामेव वर्चसा ॥ ३५ ॥
दोधूयमानां तां नावं समीरेण बलीयसा ।
उपस्थितस्य मे शृङ्गे निबध्नीहि महाऽहिना ॥ ३६ ॥
अहं त्वामृषिभिः साकं सह नावमुदन्वति ।
विकर्षन्विचरिष्यामि यावद्ब्राह्मी निशा प्रभो ! ॥ ३७ ॥
मदीयं महिमानं च परं ब्रह्मेति शब्दितम् ।
वेत्स्यस्यनुगृहीतं मे सम्प्रश्नैर्विवृतं हृदि ॥ ३८ ॥
इत्थमादिश्य राजानं हरिरन्तरधीयत ।
सोऽन्ववैक्षत तं कालं यं हृषीकेश आदिशत् ॥ ३९ ॥
आस्तीर्य दर्भान्प्राक्कूलान्राजर्षिः प्रागुदङ्मुखः ।
निषसाद हरेः पादौ चिन्तयन्मत्स्यरूपिणः ॥ ४० ॥

भाषा टीका ।

हे पुरुषश्रेष्ठ ! हे जगत् के उत्पत्ति पालन नाश करने वाले ईश्वर ! हे विभो ! हमारे सदृश प्रपन्न भक्तजनों के आत्मा और मुख्य गति आप ही हो ॥ २८ ॥

सर्व आपके लीलावतार, प्राणियों के वृद्धि के हेतु हैं । पर मैं यह जानने की इच्छा करता हूं कि-यह रूप आपने कौन प्रयोजन के लिये धारण किया है ॥ २९ ॥

हे अरविन्दाक्ष ! सर्व लोगों के सुहृत प्रिय और आत्मा ऐसे आपके चरणों के शरण में आना व्यर्थ नहीं होता है । जैसा कि इतर पृथक् देहात्माभिमानी बहिर्मुख जनों का व्यर्थ होता है क्यों कि-आपने तो मुझको अति अद्भुत रूप से दर्शन दिया है ॥ ३० ॥

श्रीशुक उवाच ।

श्रीशुकदेव जी बोले, कि—उस युग के क्षय काल में ऐसे कहने वाले सत्यव्रत राजा को मत्स्य रूपधारी श्रीहरि बोले, कैसे आप, हैं, कि उस प्रलय काल के समुद्र में विहार की कामना वाले, और परमैकान्ती जनों के प्रिय हैं इसी से अपने भक्त के प्रिय करने की इच्छा वाले हैं ॥ ३१ ॥

श्रीभगवान् उवाच ।

श्रीभगवान् बोले, कि-हे अरिन्दम ! आज से सातवें दिन में प्रलय के समुद्र में भूः भुव आदिक त्रिलोकी डूब जायगी ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सम्वर्ताम्भसि प्रलयोदके त्वामुपस्थास्यति प्राप्स्यति ॥ ३३ ॥ ओषधीः आदायेति शेषः ॥ ३४ ॥

ऋषीणामेवालोकेन विचरिष्यसि ॥ ३५ ॥

महाहिना वासुकिना ॥ ३६—३७ ॥

मे मयाऽनुगृहीतं प्रसादीकृतं हृदि अपरोक्षं वेत्स्यसि त्वया कृतैः सम्प्रश्नैर्मया विवृतं प्रकाशितं सन्तम् ॥ ३८—४४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

संवर्ताम्भसि प्रलयोदके त्रिलोक्यां लीयमानायां सत्यां तदा काचिन्मयेरिता प्रेरिता उपकल्पिता विशाला विपुला नौः नौका त्वामुपस्थास्यति त्वत्समीपे स्थास्यतीत्यर्थः ॥ ३३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदा त्वं सर्वा ओषधीर्बीजानि च नानाविधानि नाव्यारोप्येतिशेषः । सप्तर्षिभिः सहितः सर्वैः सत्त्वैर्जन्तुभिरुपबृंहितः उपश्लिष्टः ॥ ३४ ॥

बृहतीं विपुलां नावमारुह्याविक्लवः दैन्यरहितः विचरिष्यसि निरालोके सूर्याद्यालोकरहिते एकार्णवे ऋषीणां वर्चसैवोपलक्षिताम् ॥ ३५ ॥

घर्षीयसा प्रचण्डेन समीरेण प्रलयवायुना दोधूयमानां नितरां कम्पमानां तां महतीं नावमुपस्थितस्य सन्निहितस्य मम शृङ्गे वासुकिना सर्पेण उपस्थितेनेति शेषः । तेन बन्धनेन साधनेन निबध्नीहि ॥ ३६ ॥

तदाऽहमुदन्वति प्रलयार्णवे ऋषिसहितां महतीं नावं विकर्षन् यावद्ब्रह्मणश्चतुर्मुखस्येयं ब्राह्मी निशा रात्रिः प्रवर्तेत तावद्विचरिष्यामि ॥ ३७ ॥

परं ब्रह्मेति शब्दितं परब्रह्मशब्दाऽभिहितं मदीयं महिमानं च वेत्स्यसि महिम्नः ब्रह्मशब्दवाच्यत्वं तस्य ब्रह्मशब्दप्रवृत्तिनिमित्ताश्रयत्वेन निरतिशयबृहत्त्वं हि ब्रह्मशब्दार्थः, कथम्भूतम् ? मयानुगृहीतं मयोपदिष्टमित्यर्थः । संप्रश्नैस्त्वत्कृतैर्हृदि विवृतम् । अत्र केचिदूव्याचक्षते, (अत्रोक्तः प्रलयः किं महाप्रलयः ? उत दैनन्दिनो वेति ? तत्र तावद्ब्रह्मलोकलय इति " यो सावस्मिन्महाकल्पे" इति चोक्तेर्महाप्रलय इति तावत्प्राप्तं नेति ब्रूमः महाप्रलये पृथिव्यादीनामवशेषासंभवात् यावद्ब्राह्मी निशेत्याद्युक्तिविरोधाच्चातो दैनं दिन इति युक्तं नचैतदपि सङ्गच्छते सांवर्तकैरनावृष्ट्यादिभिर्विनाऽकस्मादेव सप्तमेऽहनि त्रैलोक्यं निमङ्क्ष्यतीति मत्स्योक्तेरनुपपत्तेः यच्चोक्तं प्रथमस्कन्धे—

"रूपं स जगृहे मात्स्यं चाक्षुषान्तरसम्प्लवे ।
नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुम्" ॥

इति तदपि तदा दुर्घटं नहि प्रलयद्वयेऽपि महीमय्यां नाव्यारोहः सम्भवति न च चाक्षुषमन्वन्तरे प्रलयोऽस्ति तथा च सति सप्तमो मनुर्वैवस्वत इत्यपि दुर्घटं स्यात् "त्वं तावदोषधीः सर्वाः" इत्यादि निर्देशोऽपि न सङ्गच्छते न हि तदा ओषध्यादीनां सत्त्वानां चावशेषः संभवति तस्मादन्यथा वर्ण्यते नैवायं वास्तवः कोपि प्रलयः किन्तु सत्यव्रतस्य ज्ञानोपदेशायाविर्भूतो भगवान्वैराग्यार्थमकस्मात्प्रलयमिव दर्शयामास यथा अस्मिन्नेव वैवस्वतमन्वन्तरे मार्कण्डेयाय दर्शितवान् तदपेक्षयैव च महाकल्पेऽस्मिन्निति विशेषणं सङ्गच्छते तथा च "ततः समुद्र उद्वेलः सर्वतः समदृश्यत" इति तस्यैव तथा दर्शनमुक्तमित्येषा दिगिति.) अत्रेदं वक्तव्यं यदि वैराग्यजननद्वारा ज्ञानोपदेशार्थमाविर्भूतो भगवान् वैराग्यार्थं सत्यव्रतायैवाकस्मात्प्रलयदर्शनं तर्हि "आसीदतीतकल्पान्ते ब्राह्मो नैमित्तिको लयः" इत्यादेः "कालेनागतनिद्रस्य धातोः शिशयिषोर्बली मुखतो निःसृतान्वेदान्" इत्यादेश्च अवतारकालप्रदर्शनपरस्यावतारप्रयोजनप्रदर्शनपरस्य चोपक्रमस्य ग्रन्थस्यासाङ्गत्यापत्तेः तत्र "कालेनागतनिद्रस्य धातुः शिशयिषोः" इति स्वरसतः सुव्यक्तं दैनन्दिनप्रलयावगमात्सत्यव्रतस्यैव प्रलयप्रदर्शने हयग्रीवाख्यासुरेण वेदापहारस्य कथनानुपपत्तेश्च तत्र राजर्षिः कश्चिदित्यादिनातीतकल्पे सत्यव्रतस्य सतः पुनरस्मिन्कल्पे "योसावस्मिन्महाकल्पे" इत्यादिना वैवस्वतमनुत्वकरणकथनानुपपत्तेश्च न हि चाक्षुषप्रथममन्वन्तरं सत्यव्रतत्वेनावस्थितस्य तस्मिन्नेव मन्वन्तरे वैवस्वतमनुत्वेन अवस्थानकथनमुपपन्नम् नहि सत्यव्रतस्याऽकस्मात् प्रलयप्रदर्शनमात्रेण धातुश्शिशयिषोर्मुखतो वेदानां निस्सृतिरसुरेण तदपहृतिश्च सम्भवति तस्मादतीतदैनन्दिनकल्पाऽवसानिक एव प्रलयोऽत्र विवक्षितः न च श्रीमत्स्योक्तिविरोधः सांवर्तकानाम् अनावृष्ट्यादीनां शब्दतोऽनुपात्तानामप्यर्थतोऽत्र विवक्षितत्वात्माभूद्वा कल्पविशेषावसाने अनावृष्टिः पृष्टिस्तु "वर्धमानो महामेघैर्वर्षद्भिः समदृश्यत" इत्युक्तैव न च प्रथमस्कन्धवचनस्य दौर्घट्यं दैनं दिनकल्पविशेषाऽवसाने महीमय्यां नाव्योषध्यादीनामारोपसंभवात् चाक्षुषान्तरशब्देन चाक्षुषमन्वन्तरयुक्तो वर्तमानो दैनन्दिनकल्पो लक्ष्यते तस्मात्पाक्तनो यः संप्लवः अतीतकल्पाऽवसानिकस्तस्मिन्नाव्यारोप्येत्यर्थः । न चौषधादीनामवशेषासम्भवः तदविशेषणे तत् ग्रन्थादेवावगमात्कल्पविशेष तदवशेषोपपत्तेश्चेति ॥ ३८ ॥

एवं राजानं सत्यव्रतमादिश्य हरिर्मत्स्यरूपस्तत्रैवान्तर्हितवान् ततः सत्यव्रतो यं कालं हृषीकेशो मत्स्यमूर्तिरादिशत् "सप्तमेद्यतनादूर्ध्वमहन्येतदरिन्दम!" इति निर्दिष्टवान् तमेव कालम् अन्ववैक्षत प्रतीक्षितवान् ॥ ३९ ॥

राजर्षिः सत्यव्रतः दर्भान्प्रागग्रानास्तीर्य तेषु प्रागुदङ्मुखः ईशान्याभिमुखो निषसाद उपविष्टवान् कथम्भूतस्सन् श्रीमत्स्यरूपिणो हरेर्भगवतः श्रीपादौ चिन्तयन्, ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सम्प्लवताम्भसि प्रलयजले. उपस्थास्यति समीपमागमिष्यति ॥ ३३ ॥

सर्वैः सत्त्वैः प्राणिभिः उपबृंहितः पूरितः ॥ ३४ ॥

निरालोके. तमःप्राये ऋषीणां वर्चसा प्रकाशेनैव नाऽन्येन ॥ ३५ ॥

दोधूयमानाम् इतस्ततोऽत्यन्तं कम्प्यमानां निबध्नीहि निबन्धय महाऽहिना पाशेन ॥ ३६ ॥

ब्राह्मी ब्रह्मसम्बन्धिनी ॥ ३७ ॥

तव सम्यक् प्रश्नैः हृदि विवृतं स्पष्टीकृतं मयाऽनुगृहीतं मदीयं ब्रह्मेति शब्दितं महिमानं ज्ञास्यसि ॥ ३८ ॥

अन्ववैक्षत प्रतीक्ष्याऽऽस्थितः ॥ ३९—४२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

त्वमिति युग्मकम् सर्वसत्त्वैश्चान्यैः सूक्ष्मापेक्षितैरुपबृंहितः ॥ ३४–४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ओषधीरादायेति शेषः । सर्वैस्मत्स्वैर्मुख्यमुख्यप्राणिभिः सपरिकरमनुकर्षयपादिभिरुपबृंहितः वर्द्धितमहत्त्वस्सन् ऋषीणां वर्चसा तेजसैव विचरिष्यसि ॥ ३४—३५ ॥

मे मत्स्यरूपस्येत्यर्थः । महाऽहिना वासुकिना ॥ ३६ ॥

ब्राह्मी निशेति यद्यप्ययं ब्रह्मदिनगतचाक्षुषमन्वन्तरमध्य एव भगवदिच्छयैवाकस्मिकप्रलयोऽभूत् तदपि त्रैलोक्यमज्जनात् दैनं दिनप्रलयसाम्यदृष्ट्या भगवत्क्रीडेच्छामनुस्मृत्य निर्व्याकुलो ब्रह्मापि कञ्चित् कालं सुष्वाप तदनुसारेणैव गौण्या वृत्त्या ब्राह्मी निशेत्युक्तमिति भागवतामृतव्याख्यानुसारी सन्दर्भः । तत्र भागवतामृतं यथा "मध्ये मन्वन्तरस्यैव मुनेः शापान्मनुं प्रति । प्रलयोऽसौ बभूवेति पुराणे क्वचिदीर्यते ॥ अयमाकस्मिको जातश्चाक्षुषस्यान्तरे मनोः । प्रलयः पद्मनाभस्य लीलयैवेति कुत्रचित्" इति किञ्च दक्षस्य मानसकायिकप्रजासृष्टान्यथाऽनुपपत्तेरेव प्रलयोऽयमवश्यंमन्तव्य एव यदुक्तं चतुर्थे—

"चाक्षुषे त्वन्तरे प्राप्ते प्राक्सर्गे कालविप्लुते ।
यः ससर्ज प्रजा इष्टाः स दक्षः कालचोदितः" ॥

इति प्रलयस्य चातुर्विध्यमपि नाऽनुपपन्नम् अस्य क्षुद्रप्रलयस्य नैमित्तिक एवान्तर्भावात् अत एव पृथिव्युद्धरणहिरण्याक्षवधावपि श्रीवराहदेवेन चाक्षुषप्रलयान्त एव स्वायम्भुवमन्वन्तरारम्भे पृथिव्युद्धरणे हिरण्याक्षसम्भवाभावात् । यदुक्तं तत्रैव "उत्तानपादवंश्यानां तनयेऽस्य प्रचेतसां। दक्षस्यैव दितिःपुत्री हिरण्याक्षो दितेः सुतः ॥ कल्पारम्भे तदा नास्ति सुतोत्पत्ति मनोरपि । क्वासौ प्राचेतसो दक्षः क्व दितिः क्व दितेःसुतः॥ अतः कालद्वयोद्भूतं श्रीवराहस्य चेष्टितम् एकत्रैवाह मैत्रेयः वक्तुः प्रश्नानुसारतः" इति एवमिहापि कालद्वयोद्भूतं मत्स्यचेष्टितं स्पष्टमविविच्य खल्वेकीकृत्यैवाह—श्रीमन्मुनीन्द्रः वस्तुतस्तु "आसीदतीतकल्पान्ते" इत्यादिनोक्ता या शफरी वेदानयनार्था सा ऽन्या सत्यव्रताञ्जलिगता तु चाक्षुषमन्वन्तरीया अन्यैवेति ज्ञेयं. श्रीसूतस्तु चाक्षुषीयमत्स्यमेवावतारगणमध्ये गणितवान् तथाहि "रूपं स जगृहे मात्स्यं चाक्षुषोदधिसंप्लवे ॥ नाव्यारोप्य महीमय्या मपाद्वैवस्वतं मनुम्" इति श्रीस्वामिचरणास्तु अत्रेदं चिन्त्यमित्युक्त्वा ब्राह्मो लय इति योसावस्मिन्महाकल्प इति चोक्तेरयं महाप्रलयश्चेन्महाप्रलये पृथिव्यादीनामवशेषासम्भवात् यावद्ब्राह्मी निशेत्युक्तेरयं दैनन्दिन एवेतिचेन्न सांवर्त्तकैरनावृष्ट्यादिभिर्विनाकस्मादेव सप्तमेऽहनि त्रैलोक्यं निमङ्क्ष्यतीति मत्स्योक्तेरनुपपत्तेः तस्मात् सत्यव्रतस्य ज्ञानाद्युपदेशार्थमाविर्भूतो भगवान् वैराग्यार्थं माययैव मार्कण्डेयमिव तं प्रलयं दर्शयामासेत्याहुः ॥ ३७ ॥

अथ प्रकृतमनुसरामः किञ्चात्मारामगणसङ्गिनस्तव हृदि ब्रह्माऽनुबुभूषा जागर्ति सापि मत्कृपयैव सफला भविष्यतीत्याह, मदीयमिति शब्दितं ब्रह्मशब्दसङ्केतितं मदीयं महिमानं महतो मम यो महिमा एको धर्मस्तं ममैव व्यापकं निर्विशेषस्वरूपं वेत्स्यसि अनुभविष्यसि मे मया अनुगृहीतं तुभ्यं प्रसादीकृत्य दत्तमित्यर्थः । ब्रह्मस्वरूपस्य मदीयत्वेन मया दातुं शक्यत्वादेव तदर्थं तव पृथक् ज्ञानादि प्रयासेनालमिति भावः । केन प्रकारेणानुगृहीष्यसीत्यत आह—सम्प्रश्नैस्त्वया कृतैस्त्वत्प्रत्युत्तरत्वेन तव हृदि हृदये विवृतं विवृतीकृत्य मयैवानिर्देश्यमपि तद्दृश्यत्वात् आहितमित्यर्थः विषयग्रहणार्थं जीवेभ्यो यथा बुद्धीन्द्रियादिसृष्ट्वा दत्तवानस्मि तथैव ब्रह्मस्वरूपग्रहणार्थमपि किमपि स्वसामर्थ्यं तुभ्यं कृपया दास्यामीति भावः ॥ ३८ ॥ ३९ ॥

प्रागुत्तरयोरन्तराले मुखं यस्य सः ॥ ४०—४४ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सम्वर्त्ताम्भसि नैमित्तिकप्रलयजले मयेरिता मया प्रवर्त्तिता त्वामुपस्थास्यति प्राप्स्यति ॥ ३३ ॥

ओषधीर्बीजानि चादायेति शेषः ॥ ३४ ॥

निरालोके कथं विचरिष्यामीत्यत्राह—ऋषीणामेव वर्चसेति ॥ ३५ ॥

दोधूयमानां कम्पमानाम् ॥ ३६ ॥

ब्राह्मी ब्रह्मणश्चतुराननस्येयं ब्राह्मी यावद्ब्रह्मणः सहस्रचतुर्युगपरिमिता निशा तावदृषिभिः साकं सह नावं त्वां विकर्षन् उदन्वति विचरिष्यामि पूर्वकल्पान्ते सत्यव्रतौषधिबीजमहर्षिरक्षार्थं हयग्रीवापनीतवेदानयनाद्यर्थं च मत्स्यावतारो जातस्तदनन्तरं नैमित्तिकः प्रलयोऽभूदित्यर्थः "आसीदतीतकल्पान्ते ब्राह्मो नैमित्तिको लयः" इत्यारभ्य यावद्ब्राह्मी निशेत्यन्तेन ग्रन्थेनोक्तमर्थमनादृत्य मायावादिना यदुक्तं नचायं वास्तवः कोपि प्रलयः किन्तु सत्यव्रतस्य ज्ञानोपदेशाय आविर्भूतो भगवान् वैराग्यार्थमकस्मात्प्रलयमिव दर्शयामासेति तदसत्, निर्मूलत्वात् नच सांवर्त्तकानामनावृष्ट्यादीनामभावात्कथं नैमित्तिकः प्रलय इति वाच्यम् "सप्तमेऽद्यतनादूर्ध्वमहन्येतदरिन्दम । निमङ्क्ष्यत्यप्ययाम्भोधौ" इत्यादेरेकदेशकथनमात्रेण सर्वस्याऽनावृष्ट्यादेः सूचितत्वात् नच "रूपं स जगृहे मात्स्यं चाक्षुषान्तरसम्प्लवे । नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुम्" इति प्रथमस्कन्धोक्तं दुर्घटम् स भगवान् मात्स्यं रूपं जगृहे अतीतकल्पान्ते इति शेषः अन्यथा "आसीदतीतकल्पान्ते" इत्याद्यष्टमेन "योऽसौ सत्यव्रतो नामराजर्षिर्द्रविडेश्वरः। ज्ञानं ह्यतीतकल्पान्ते लेभे पुरुषसेवया" इति नवमेन च स्कन्धेन विरोधः स्यात् चाक्षुषान्तरस्य षष्ठस्य समाप्तित्वेऽस्मिन् सति जायमानं वैवस्वतं मनुं पूर्वमेव नाव्यारोप्य प्रलयोदयादित्यन्वयात् चाक्षुषोदधिसम्प्लवे इति प्रथमस्कन्धे पाठः ॥ ३७ ॥

मदीयं महिमा परम्ब्रह्मेति शब्दितं सम्प्रश्नैस्त्वत्कृतैः सम्यक् प्रश्नैः मया विवृतं प्रकाशितं न केवलं त्वत्प्रश्नानुरोधेनैव प्रकाशितं किन्तु मे मयापि अनुगृहीतम् अनुग्रहार्थमुपदिष्टम् मन्वन्तरस्य सम्प्लवं त्वं वेत्स्यसि । ननु, ब्रह्मशब्दस्य भगवद्वाचकस्य तन्महिमापरत्वं कुतः ? इत्यत्रेदं वक्तव्यम् यथा महदाद्यपेक्षया प्रकृतौ बृहत्तमायां भगवच्छक्तिभूतायां ब्रह्मशब्दप्रयोगः भगवद्गीतायां श्रीमिद्धः "ममयोनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम्" इति तथा सर्वलोकापेक्षया बृहत्तमे भगवल्लोके

ततः समुद्र उद्वेलः सर्वतः प्लावयन्महीम् ।
वर्द्धमानो महामेघैर्वर्षद्भिः समदृश्यत ॥ ४१ ॥
ध्यायन्भगवदादेशं ददृशे नावमागताम् ।
तामारुरोह विप्रेन्द्रैरादायौषधिवीरुधः ॥ ४२ ॥
तमूचुर्मुनयः प्रीता राजन् ! ध्यायस्व केशवम् ।
स वै नः सङ्कटादस्मादविता शं विधास्यति ॥ ४३ ॥
सोऽनुध्यातस्ततो राज्ञा प्रादुरासीन्महार्णवे ।
एकशृङ्गधरो मत्स्यो हैमो नियुतयोजनः ॥ ४४ ॥
निबध्य नावं तच्छृङ्गे यथोक्तो हरिणा पुरा ।
वरत्रेणाऽहिना तुष्टस्तुष्टाव मधुसूदनम् ॥ ४५ ॥

राजोवाच ।

अनाद्यविद्योपहतात्मसम्विदस्तन्मूलसंसारपरिश्रमातुराः ।
यदृच्छयेहोपसृता यमाप्नुयुर्विमुक्तिदो नः परमो गुरुर्भवान् ॥ ४६ ॥
जनोऽबुधोऽयं निजकर्मबन्धनः सुखेच्छया कर्म समीहतेऽसुखम् ।
यत्सेवया तां विधुनोत्यसन्मतिं ग्रन्थिं स भिन्द्याद्धृदयं स नो गुरुः ॥ ४७ ॥
यत्सेवयाऽग्नेरिव रुद्ररोदनं पुमान्विजह्यान्मलमात्मनस्तमः ।
भजेत वर्णं निजमेष सोऽव्ययो भूयात्स ईशः परमो गुरोर्गुरुः ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ब्रह्मशब्दप्रयोगो वनपर्वणि प्रसिद्धः "ब्रह्मणः सदनादूर्द्धं तद्विष्णोः परमं पदम् । शुद्धं सनातनं ज्योतिः परं ब्रह्मेति यद्विदुः" इति एवं चतुर्मुखादौ ब्रह्मशब्दप्रवृत्तिः तथा भगवदीयमहिम्नो निरतिशयबृहत्तमत्वेन ब्रह्मशब्दत्वमिति ॥ ३८—४४ ॥

भाषा टीका ।

प्रलय के जल में त्रिलोकी डूबने के समय हमारी प्रेरणा से तुम को एक बडी भारी नौका उपस्थित होगी ॥ ३३ ॥

तब तुम सर्व औषधि और ऊँचे नीचे सर्व बीजों को लेकर सप्त ऋषियों के साथ और सर्व जन्तुओं सहित ॥ ३४ ॥

उस बडी भारी नौका पर बैठ कर अविक्लव होकर आनन्द से विचरोगे। जब सब जगत् एकार्णव होजायगा और अन्धकार से व्याप्त होजायगा तब तुमारी नौका में बैठे हुए जो सप्त ऋषि हैं उनके प्रकाशसे ही विचरोगे ॥ ३५ ॥

और उस समय बडे बलवान् पवन से अत्यन्त ही हलचल होने वाली उस नौका को जब मैं तुम्हारे समीप आकर उपस्थित होजाऊँ तब वासुकी सर्प से मेरे शृङ्ग में बांध देना ॥ ३६ ॥

हे प्रभो ! राजन् ! ऋषियों सहित और तुमारे सहित उस नौका को हम समुद्र में खींचते हुए जब तक ब्रह्मा की रात्रि रहेगी तब तक विचरेंगे ॥ ३७ ॥

और जो परब्रह्म शब्द से कही जाय उस हमारी महिमा को तुम प्रश्नों से अपने हृदय में हमारे अनुग्रह से जानोगे ॥ ३८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वरत्रेण दोरकरूपेण ॥ ४५ ॥

सागरं तारयिष्यन्तं तरिष्यन्निव सागरम् ।
सत्यव्रतो गुरुत्वेन तुष्टाव हरिमष्टभिः ॥

अत्रेदं चिन्त्यम् किमयं महाप्रलयो दैनं दिनो वेति तत्र [illegible] ब्राह्मो लय इति योऽसावस्मिन्महाकल्पे इति चोक्तेर्महाप्रलय इति प्राप्तम्, नेति ब्रूमः महाप्रलये पृथिव्यादीनामवस्थानासम्भवात् [illegible] यावद्ब्राह्मीनिशेत्याद्युक्तिविरोधाच्च अतो दैनं दिन इति [illegible]

श्रीधरस्वामिकृतभावार्थदीपिका।

न चैतदपि सङ्गच्छते सांवर्तकैरनावृष्ट्यादिभिर्विना अकस्मादेव सप्तमेऽहनि त्रैलोक्यं निमङ्क्ष्यतीति मत्स्योक्तेरनुपपत्तेः यच्चोक्तं प्रथमस्कन्धे—

रूपं स जगृहे मात्स्यं चाक्षुषां उदधिसम्प्लवे।
नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुम्' ॥

इति तदपि तदा दुर्घटम् नहि प्रलयद्वयेऽपि महीमय्यां नाव्यारोहः सम्भवति नच चाक्षुषमन्वन्तरे प्रलयोऽस्ति तथा च सति सप्तमो मनुर्वैवस्वत इत्यपि दुर्घटं स्यात् त्वं तावदोषधीः सर्वा इत्यादिनिर्देशोऽपि न सङ्गच्छते नहि तदा ओषध्यादीनां सत्त्वानाञ्चावशेषः सम्भवति तस्मादन्यथा वर्ण्यते नैवायं वास्तवः कोऽपि प्रलयः किन्तु सत्यव्रतस्य ज्ञानोपदेशाय आविर्भूतो भगवान्वैराग्यार्थमकस्मात्प्रलयमिव दर्शयामास यथा ऽस्मिन्नेव वैवस्वतमन्वन्तरे मार्कण्डेयाय दर्शितवान् तदपेक्षयैव महाकल्पेऽस्मिन्निति विशेषणं सङ्गच्छते तथा च “ततः समुद्र उद्वेलः सर्वतः समदृश्यत” इति तस्यैव तथा दर्शनमुक्तमित्येषा दिक्. प्रस्तुतं स्तोत्रं व्याख्यास्यामः तत्र नानायोनिषु संसरतः स्वस्य भगवत्कृपयैव तत्प्राप्तिं दृष्ट्वा मुक्तये तमेव प्रार्थयते—अनादीति अनादिर्याऽविद्या तयोपहता आवृताऽऽत्मनः संवित्प्रकाशो येषां ते अत एवाविद्यामूलः संसारपरिश्रमैरातुरा इह संसारे यदृच्छया यदनुग्रहादेवोपसृता आश्रिताः सन्तो यमाप्नुयुः प्राप्नुवन्ति स भवानेव साक्षान्नो गुरुः सन् ग्रन्थिं भिन्द्यादित्युत्तरेणान्वयः ॥ ४६ ॥

ननु, वैराग्यं विना कुतो मुक्तिः ? तर्हि तस्य त्वत्सेवैकफलत्वात्सेवामादिशेत्याशयेनाह—जन इति । अबुधोऽयं जन असुखं यथा भवति तथा कर्म समीहते तां सुखेच्छाम् नो हृदयरूपं ग्रन्थिं स भिन्द्यात् यतः स एव परमो गुरुः ॥ ४७ ॥

ननु, यज्ञदानादिभिः सत्त्वशुद्धिं विना कथं ग्रन्थिभेदः स्यात् ? तत्राह—यत्सेवयेति । यस्य सेवयैव पुमानात्मनो मनसो मलं तमो विजह्यात् एष हीनमलो निजं वर्णं च स्वरूपं भजेत स ईशो नो गुरुर्भूयात् यतः स एव गुरोरपि परमो गुरुः मलहीने दृष्टान्तः रुद्ररोदनं रुद्रस्य रोदनं रजतम् 'यद्रोदीत्तद्रुद्रस्य रुद्रत्वं यदश्रवसियत्तद्रजतं हिरण्यमभवत्” इतिश्रुतेः तद्यथाग्नेः सम्पर्कान्मलं जहाति स्वं वर्णं भजते ननु क्षालनादिभिस्तथा न यज्ञादिभिर्मलत्यागः किन्तु त्वत्सेवयैव तेषान्तु सेवाङ्गत्वमिति भावः ॥ ४८ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका।

ततस्तत्रैवं सत्यव्रते चिन्तयति सति वर्षद्भिर्महामेघैर्वर्द्धमानः समुद्रः उद्वेलः मर्यादातिगः सर्वतो महीं प्लावयन् निमज्जयन् समदृश्यत सत्यव्रतेनेति शेषः ॥ ४१ ॥

तदा सत्यव्रतः श्रीभगवतो मत्स्यरूपिण आदेशं ध्यायन् सन्निहितां नावं दृष्टवान् तत ओषधीर्वीरुधः बीजानि चादाय विप्रेन्द्रैः सप्तर्षिभिः सह सत्यव्रतः तां सन्निहितां नावमारुरोह ॥ ४२ ॥

ततस्तं सत्यव्रतं मुनयः सप्तर्षय ऊचुः हे राजन् ! केशवं ध्यायस्व स केशवः नोऽस्मात्सङ्कटादुद्धरिष्यति शं सुखं विधास्यति करिष्यतीति ॥ ४३ ॥

एवमुक्तेन राज्ञा सत्यव्रतेनानुध्यातो भगवान् प्रादुर्बभूव कथम्भूतः ? एकशृङ्गं धरतीति तथा हैमः स्वर्णाभः नियुतयोजनः लक्षयोजनपरिमितकायः ॥ ४४ ॥

ततो हरिणा पूर्वं यथोक्तः तथैव वरत्रेण दोरकरूपेण अहिना महासर्पेण वासुकिना नावं तस्य मत्स्यरूपिणो भगवतः शृङ्गे निबध्य शृङ्खलितां कृत्वेत्यर्थः । सन्तुष्टचित्तो मधुसूदनं हरिं तुष्टाव स्तुतिञ्चकारेत्यर्थः ॥ ४५ ॥

स्तोत्रमेवाह—अनाद्यविद्येत्यादिना, इत्युक्तवन्त इत्यतः प्राक्तनेन ग्रन्थेन । “वेत्स्यस्यनुगृहीतं मे संप्रश्नैर्विवृतं हृदि” इति श्रीभगवतैव तत्त्वप्रश्नाय सञ्चोदितः सत्यव्रतः तावत्तत्त्वजिज्ञासुरनादिदेहात्मभ्रान्तिस्वतन्त्रात्मभ्रान्तिरूपाज्ञानमूलकर्मवासनाभिः संसरतां जीवानाम् “ईश्वरस्य च सौहार्दं यदृच्छासुकृतं तथा विष्णोः कटाक्षः”इत्युक्तरीत्या केवलं प्रथमापेक्षकर्तृश्रीभगवत्कृपयैव सदाचार्यसम्बन्धो नान्यथेत्यनुबोधयितुं त्वत्कृपयैव परमगुरोस्तव प्राप्यस्य सान्निध्यं गत इत्यभिप्रयन् स्तौति——अनादीति । अनाद्यविद्यया देहात्माभिमानादिरूपेणानाद्यज्ञानेन उपहता तिरोहिता आत्मसंवित् स्वात्मपरमात्मयाथात्म्यज्ञानं येषां ते अतएव तन्मूलेनानाद्यविद्योपहतात्मज्ञाननिमित्तेन संसारपरिश्रमेण तापत्रयेणातुराः दुःखिताः जना इति शेषः । इह संसारे यदृच्छया याद‍ृच्छिकसुकृतमूलया त्वत्कृपयेत्यर्थः । उपसृताः सदाचार्यद्वारा संश्रितास्सन्तो यं प्राप्नुयुः स भवानेव विमुक्तिदः मुक्त्युपायभूतः यं प्राप्नुयुरित्यनेन प्राप्यत्वमुक्तं विमुक्तिद इत्यनेन प्रापकत्वमुक्तम्. नोऽस्माकं परमो गुरुश्चाभूत् परमः नितरां प्राप्यः गुरुस्तत्त्वप्रश्नप्रेरणया हितोपदेष्टृत्वेनाज्ञाननिवर्तनेन चोपायभूतश्चासीदित्यर्थः ॥ ४६ ॥

जनस्य अनाद्यविद्ययोपहतात्मसंवित्त्वं तन्मूलकदेहसुखार्थप्रवृत्तिं पुनर्भगवत्सेवया अविद्यानिवृत्तिकथनेन तस्य गुरुशब्दप्रवृत्तिनिमित्ताश्रयत्वञ्च वदन् स्वाविद्यानिवृत्तये तं प्रार्थयते, जन इति । जनः जन्ममरणादिभाग्जीववर्गः अबुधः देहात्माद्यभिमानवान् निजकर्मबन्धनः पुण्यपापात्मकानादिकर्मवश्यः सुखेच्छया शब्दादिवैषयिकसुखसम्पादनेच्छया असुखं दुःखं यथा तथा कर्म समीहते चेष्टते करोतीति यावत् पुनर्यस्य तव सेवया तामसन्मतिं देहात्माभिमानस्वतन्त्रात्माभिमानादिरूपामसतीं मतिं विधुनोति निरस्यति स गुरुर्हितोपदेष्टा अज्ञाननिवर्तकश्च भवान्नोऽस्माकं ग्रन्थिमसन्मतिरूपां भिन्द्यादपनुद्यात् ॥ ४४ ॥

न केवलं भगवत्सेवा असन्मतिमेव निरस्यत्यपितु तन्मूलभूतं कर्म पुण्यपापात्मकमात्मस्वरूपतिरोधायकमपीति वदन् तं स्वहितोपदेशाज्ञाननिवर्त्तनार्थं प्रार्थयते—यदिति । पुमान् मुमुक्षुर्यस्य तव सेवया आत्मनस्तमः तमोवत्तिरोधायकं मलं पुण्यापुण्यकर्मात्मकं पापं जह्यात्यजेत् तत्र दृष्टान्तः रुद्ररोदनं रजतपिण्डः सुवर्णपिण्डो वा “यदरोदीत्तद्रुद्रस्य रुद्रत्वं यदश्रवसियत्तद्रजतं हिरण्यमभवत्”इति श्रौतप्रसिद्धेः स तु यथाग्नेः सेवया

श्रीमद्वीरराघवाचार्यकृतचन्द्रचन्द्रिका ।

ननु क्षालनादिना मलं जह्यान्निजवर्णं स्वासाधारणं वर्णं भजेत च तद्वदिति रुद्ररोदनमलस्याग्निसम्पर्कान्योपायानपनोद्यत्वदृष्टान्तकथनेनात्मनो मलस्यापि भगवत्सेवेतरानपनोद्यत्वमभिप्रेतं स ईश्वरो नोऽस्माकं गुरुर्भूयादतः स एव गुरोरपि परमो गुरुरर्वाचीनगुरूणामपि "आचार्यं मां विजानीयात्" इति तद्वात्मकत्वस्मरणात्तद्व्यतिरिक्तो न कश्चिद्गुरुरस्तीति भावः ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अविनाशं विनाशविरोधिजीविनां शं सुखम् अविनाशं सुखयुक्तं पदं विधास्यतीति वा ॥ ४३-४४ ॥

वरत्रेण पाशेन मधुवन्मधु संसारं सूदितवानिति मधुसूदनः तम् ॥ ४५ ॥

अनाद्यविद्योपहतात्मसंवित्परमात्मज्ञानं येषां ते तथा सा विद्या मूलं कारणं यस्य स तन्मूलः स च संसारस्तन्मूलसंसारस्तस्मिन् परिश्रमस्ततो आतुराः क्लिष्टाः यदृच्छया पूर्वजन्मार्जितपुण्याभिमुखीभूतदैवेच्छया इह लोके विशिष्टजन्मोपसृताः पुरुषाः यमाप्नुयुः स परमो गुरुर्भवान्नो विमुक्तिदोऽस्त्वित्यन्वयः ॥ ४६ ॥

कर्मनिर्मूलनं भगवत्सेवनमेवेत्याह—जन इति । आत्मीयकर्मणा बन्धनं यस्य स तथा अयमबुधो जनः सुखमाप्नुवानीतीच्छया कर्म समीहते ततो सुखं दुःखमाप्नोति इति यस्ततो बुधो जनो यस्येश्वरस्य सेवया कर्मविपाकमसन्मार्तिं विधुनोति अतः कर्मनिर्मूलनं चाप्नोति गुरुर्ज्ञानोपदेष्टा स नो हृदये स्थितां ग्रन्थिं कर्मपाशकृतां भिद्यादित्यन्वयः ॥ ४७ ॥

एष पुमान्यत्सेवया आत्मनस्तमोलक्षणं मलं विजह्याज्जहाति निजं वर्णं परमात्मगतिम् आनन्दस्वरूपं च भजेत भजेत, कथमिव ? अग्निदाहलक्षणसेवया रुद्ररोदनं हिरण्यं स्वमलं दशविधं जहाति निजवर्णं शास्त्रसिद्धं स्वरूपं भजति यथा तथेत्यर्थः । किञ्च स जीवः पुनरव्ययोऽसम्वृतः आवरणरहितो भवति "व्येञ् सम्वरणे" इति धातोः गुरोर्गुरुः स परमो नो मुक्तिदो भूयादित्यन्वयः । ईशः मुक्तिदानसमर्थः ईर्लक्ष्मीः तस्याः शं यस्मात्स इति वा "जातरूपं श्रीमुकटं हिरण्यं रुद्ररोदनम्" इत्यभिधानं. स भवानव्यय इति वा ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मदीयमिति महिमानमैश्वर्यं विभूतिनिर्विशेषमिति यावत् ममैव सम्यक् प्रकाशत्वात् अत एव मे मया अनुग्रहीतम् अनुग्रहेण प्रकाशितं यद्यपि मदनुभवान्तर्भूत एव ब्रह्मानुभव इत्यतो नास्ति मत्तः पृथगनुभवापेक्षा तथापि भक्तिप्रकाशितसाक्षान्मदनुभवे तन्मात्राऽनुभवो न स्फुटो भवति यदि तदीय स्फुटतायां तवेच्छा कथञ्चिद्वर्त्तते तदा साऽपि भवेदिति भावः । प्रसङ्गमिदमेकादशे विशिष्य दर्शयिष्यति ॥ ३९ ॥

प्राक्कूलान् प्राचीनाग्रान् ॥ ४० ॥

ततः समुद्रेति, चाक्षुषमन्वन्तरान्ते च खल्वाकस्मिकप्रलयोऽयं यथोक्तं "रूपं स जगृहे मात्स्यं चाक्षुषान्तरसम्प्लवे" इति प्रतिमन्वन्तरान्तमपि तच्छ्रवणात् अत्र प्रमाणानि तत्रैव दर्शितानि किन्त्वस्य प्रलयस्य दैवेन षष्ठमन्वन्तरमध्य एव निर्भरजातत्वात् न तदन्ते पृथक् जातत्वमित्येव विशेषः स चाऽयं मन्वन्तरप्रलयो नैमित्तिकविशेष एवेति. न च प्रलयस्य चतुर्विधत्वहानिः तदेव मन्वन्तरप्रलये त्रैलोक्यमज्जनादैनन्दिनसाम्येन ब्रह्मापि किञ्चित् कालं सुष्वाप तदनुसारेण गौण्या वृत्त्या ब्राह्मी निशेत्युक्तामिति सति पुराणान्तरेणोपचिते श्रीभागवतमते कल्पनान्तरं न कृतम् ॥ ४१-४५ ॥

अत्राविद्या तन्माया ॥ ४६—४७ ॥

गुरोरपि परमो गुरुरिति साक्षात्त्वत्प्राप्तौ नाऽन्योऽन्वेष्य इति भावः ॥ ४८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

वरत्रेण दोरकरूपेण ॥ ४५ ॥

अनादिर्या अविद्या तया उपहृता आवृता आत्मसंवित् येषां ते अत एवाऽविद्यामूलसंसारपरिश्रमैरातुराः इह संसारे भ्रमन्त एव यदृच्छया याहच्छिक्या भक्तकृपयेत्यर्थः । उपसृता आश्रिताः यं प्राप्नुयुः स भवान् ग्रन्थिं भिन्द्यादित्युत्तरेणान्वयः । परमो गुरुरिति मद्विषयकयादृच्छिककृपावन्तो भक्त्युपदेशकाः सप्तर्षयो मे गुरवस्तेषामपि भक्त्युपदेशकस्त्वं मत्परमगुरुरित्यर्थः । यद्वा त्वमवतीर्य कदाचित्केषाञ्चिद्गुरुः केषाञ्चित्परमगुरुश्च भवसीति कश्चिदवतार एव सूचितः प्रतिश्लोकमेव गुरुपदप्रयोगादवसीयते ॥ ४६ ॥

न च त्वां विना प्रकारान्तरेण निस्तार इत्याह, जनो जीवः न विद्यते वस्तुतः सुखं यतस्तत् तां सुखेच्छां हृदयं हृदयस्थं ग्रन्थिमज्ञानं भिन्द्यात् ॥ ४७ ॥

न च ज्ञानेनैवाज्ञानं नश्येदिति वाच्यमित्याह—यस्य सेवयैव पुमान् जीवः आत्मनः स्वस्य तमोऽज्ञानरूपं मलं विजह्यात् यथा रुद्ररोदनं रजतं स्वर्णं च "यद्रोदीत्तद्रुद्रस्य रुद्रत्वं यदश्रु अशीर्यत तद्रजतं हिरण्यमभवत्" इति श्रुतेः । तत् खल्वग्नेः सम्पर्कादेव मलं जहाति स्वस्वरूपञ्च भजेत् नतु क्षालनादिभिर्ज्ञानादिभिस्तथाज्ञानादिभिर्मलत्याग इत्यर्थः ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

वरत्रेण दोरकरूपेण अहिना महाहिना नावं निबध्य मधुसूदनं तुष्टाव स्तोत्रं चकार ॥ ४५ ॥

स्तोत्रमेवाह—अनाद्यविद्येत्यष्टाभिः । भगवता स्वानुग्रहेणैव प्रत्यक्षीभूय प्रलयाब्धिमोचितोऽस्मीत्यवधार्य संसारादपि विमुक्तं तमेव प्रार्थयते अनादिर्या अविद्या अज्ञानं तया उपहृता तिरोहिता आत्मसम्वित् जीवात्मपरमात्मविषयकं ज्ञानं येषां ते अत एवाविद्यामूले संसारे यः परिश्रमस्तेनातुराः व्याकुलाः

न यत्प्रसादायुतभागलेशमन्ये च देवा गुरवो जनास्स्वयम् ।
कर्तुं समेताः प्रभवन्ति पुंसस्तमीश्वरं त्वां शरणं प्रपद्ये ॥ ४९ ॥
अचक्षुरन्धस्य यथाऽग्रणीः कृतस्तथा जनस्याऽविदुषो बुधो गुरुः ।
त्वमर्कदृक्सर्वदृशां समीक्षणो वृतो गुरुर्नः स्वगतिं बुभुत्सताम् ॥ ५० ॥
जनो जनस्यादिशतेऽसतीं मतिं यया प्रपद्येत दुरत्ययं तमः ।
त्वं त्वव्ययं ज्ञानममोघमञ्जसा प्रपद्यते येन जनो निजं पदम् ॥ ५१ ॥
त्वं सर्वलोकस्य सुहृत्प्रियेश्वरो ह्यात्मा गुरुर्ज्ञानमभीष्टसिद्धिः ।
तथाऽपि लोको न भवन्तमन्धधीर्जानाति सन्तं हृदि बद्धकामः ॥ ५२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

इह संसारे यदृच्छया यदनुग्रहाद्देशोपप्लुताः शरणं गताः सन्तः यं प्राप्नुयुः स विमुक्तिदो भवानेव साक्षाच्चो गुरुः सन् ग्रन्थिं भिन्द्यादित्युत्तरेणाऽन्वयः ॥ ४६ ॥

ननु, वैराग्याभावे कुतो विमुक्तिरित्यत्र तदपि त्वदनुग्रहेणैव भवतीत्याह—जन इति । अबुधो जनो निजकर्मबन्धनः अत एव सुखेच्छया नास्ति सुखं यतस्तदसुखं दुःखोदर्कं कर्म समीहते करोतीत्यर्थः । पुनर्यस्य तव सेवया तामसतीं मतिं सुखेच्छां हृदयं हृदयगतवासनारूपां ग्रन्थिम् अयं जनस्तदा विधुनोति यत् यदा स भवानेव भिन्द्यात् अपनुदात् यतः सोऽबुधानां स एव परो गुरुः इत्यन्वयः ॥ ४७ ॥

ननु, यज्ञदानादिभिरन्तःकरणशुद्धिं विना कुतो ग्रन्थिभेदो मुक्तिश्च स्यादित्यत्र यज्ञदानादिकिञ्चित् कस्यचिदेव अन्तःकरणशोधकं सर्वाशुद्धिमूलभूतकर्मनिर्नाशिन्या भवत्सेवया निःशेषेणान्तःकरणं शुद्धं स्यादित्याह—यदिति । यस्य तव सेवया आराधनेन पुमान् आत्मनस्तमः "अविद्याकर्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते । यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप ! सर्वगा" इति स्मृतिप्रसिद्धम् अविद्यानामकं कर्म तदेव मलं विजह्यात् त्यजेत् एष एव कर्मबन्धरहितो निजं वर्णं स्वरूपं भजेत "निरञ्जनः परमंसाम्यमुपैति" इति श्रुतेः । स ईशः गुरोर्गुरुः नः परमः सेव्यो भूयात् तत्र दृष्टान्तः रुद्ररोदनं रजतं यथाग्नेः सम्पर्कात् मलं जहाति स्ववर्णम् भजते च रजतस्य रुद्ररोदनत्वं तु "यदरोदीत्तद्रुद्रस्य रुद्रत्वं यदश्रवत्तद्रजतं हिरण्यं चाभवत्" इति श्रुत्योक्तम् ॥ ४८ ॥

भाषा टीका ।

श्रीहरि राजा को ऐसी आज्ञा देकर अंतरध्यान होगये राजा भी समय की प्रतीक्षा करते रहे जो भगवान् बतलाय गये रहे ॥ ३९ ॥

राजर्षि पूर्व मुखदर्भों को पृथिवी पर बिछाकर, मत्स्यरूप धारण करने वाले श्रीहरि के चरणों का ध्यान करते हुए ईशान्य दिशा को मुखकर बैठते हुए ॥ ४० ॥

तब तौ सप्तम दिवस में अपनी मर्यादा को छोडकर सर्व पृथिवी को डुबावता हुआ बडे भारी मेघों की वर्षा से वृद्धि को प्राप्त होने वाला ऐसा समुद्र देख कर पडा ॥ ४१ ॥

और राजा भगवान् की आज्ञा का ध्यान करते रहे इतनेमें आई हुई नौका देख पडी । बस औषधी बीज वृक्ष सब उसमें धरकर ऋषियों सहित उस नौका में बैठ गये ॥ ४२ ॥

बडे प्रसन्न होकर मुनि लोग राजा से बोले, कि—हे राजन् ! अब केशव का ध्यान करो वही इस संकट से हम लोगों की रक्षा कर मंगल का विधान करेंगे ॥ ४३ ॥

बस ऋषियों के आज्ञा के अनुगुण ध्यान करने पर उस महार्णव में एक शृंग वाला नियुत (लक्ष) योजन के मत्स्य का रूप धारण कर आप प्रकट हुए ॥ ४४ ॥

तब जैसे पहिले हरि की आज्ञा रही उसी प्रकार उनके शृंग में वासुकी सर्प से नौका को बांधकर प्रसन्न होकर श्रीमधुसूदन की स्तुति करने लगे ॥ ४५ ॥

राजा बोले, कि—अनादि कर्म प्रवाह रूप अविद्या से नष्ट आत्मस्वरूप ज्ञान वाले, और अविद्या मूलक संसार के परिश्रम से आतुर, इस संसार में जिन आप के अनुग्रह से आपके शरण प्राप्त होकर जिन आपको प्राप्त होते हैं सो आप हमारे मुक्ति देने वाले परम गुरु हैं ॥ ४६ ॥

अपने कर्मों से बँधा हुआ यह अबुधजन सुखकी इच्छा से असुख कर्मों मे प्रवृत्त होरहा है, वह जन जिसकी सेवा से खोटी मति को नष्ट करता है अपनी हमारा परम गुरु हमारे हृदय की ग्रन्थि का भेदन करो ॥ ४७ ॥

अग्नि के संयोग से जैसे सुवर्ण मलको त्याग देता हैं और स्वर्ण के तुल्य निजवर्ण को प्राप्त होजाते हैं वह भगवान् ईश्वर परम गुरुके गुरु होवें ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

परमेश्वरत्वं परमगुरुत्वं च प्रपञ्चयन्नाह—नेति । यत्प्रसा-

तं त्वामहं देववरं वरेण्यं प्रपद्य ईशं प्रतिबोधनाय ।
छिन्ध्यर्थदीपैर्भगवन्वचोभिर्ग्रन्थीन् हृदय्यान्विवृणु स्वमोकः ॥ ५३ ॥

श्रीशुक उवाच ।

इत्युक्तवन्तं नृपतिं भगवानादिपूरुषः ।
मत्स्यरूपी महाम्भोधौ विहरंस्तत्त्वमब्रवीत् ॥ ५४ ॥
पुराणसंहितां दिव्यां सांख्ययोगक्रियावतीम् ।
सत्यव्रतस्य राजर्षेरात्मगुह्यमशेषतः ॥ ५५ ॥
अश्रौषीदृषिभिः साकमात्मतत्त्वमसंशयम् ।
नाव्यासीनो भगवता प्रोक्तं ब्रह्मसनातनम् ॥ ५६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दस्यायुतभागस्तस्य लेशमात्रमप्यन्ये देवादयः सर्वे समेता अपि स्वयं तन्निरपेक्षाः सन्तः कर्तुं न प्रभवन्ति ॥ ४९ ॥

तदेव दृष्टान्तेन स्पष्टयन्नाह-अचक्षुरिति। अविदुषो जनस्याबुधो ऽविद्वान् गुरुस्तथैव अर्कप्रकाशवत्स्वत एव दृक् ज्ञानं यस्य सोऽर्कदृक् अतः सर्वदृशां सर्वेन्द्रियाणां समीक्षणः प्रकाशकः अत एव सुगतिं बोद्धुमिच्छद्भिर्नोऽस्माभिर्गुरुर्वृतोऽसि ॥ ५० ॥

किञ्च प्राकृतो गुरुरनर्थहेतुरित्याह-जन इति । आदिशते उपदिशति असतीं मतिमर्थकामादिमतिम् तमः संसारम् ॥ ५१ ॥

ननु, तर्हि सर्वोऽपि लोको मामेव किं नोपसरति ? अज्ञानादित्याह-त्वमिति । प्रियश्चासावीश्वरश्च ॥ ५२ ॥

अहं तु त्वामेव शरणं यामीत्याह-तं त्वामिति । प्रतिबोधनायोपदेशाय अर्थदीपैः परमार्थप्रकाशकैः हृदये भवान् ग्रन्थीन-हङ्कारादीन् स्वमोकः स्वं रूपं विवृणु प्रकाशय ॥ ५३ ॥

नृपतिंप्रति ॥ ५४ ॥

पुराणसंहिता मत्स्यपुराणमशेषतोऽब्रवीदित्यनुषङ्गः ॥ ५५ ॥ ॥५६॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यत्सेवया आत्मनो मलं विजह्यादित्यनेन मुक्तिविरोधिपापकर्मनिवर्तकत्वकथनेन तस्यैव मोक्षप्रदत्वमुक्तं, तदेव व्यतिरेकमुखेनापि वदन् देवतान्तराणाममुक्तिदत्वं च वदंस्तमेव शरणं व्रजतेति। पुंसः भगवत्सेवाविधुरस्य पुंसः अन्ये देवाः सर्वे समेता अपि स्वयं निरपेक्षास्सन्तो गुरवोऽपि सन्तः यत्प्रसादायुतभागलेशं यस्य भगवतः तव प्रसादस्यायुतभागः अयुतसङ्ख्याकानां भागानां मध्ये य एको भागस्तस्य लेशं कर्तुं न प्रभवन्ति मोक्षप्रदानासमर्था इत्यर्थः । तं मुक्तिदम् ईश्वरं सर्वान्तरात्मानं त्वां शरणं प्रपद्ये मुक्त्युपायत्वेनाध्यवस्यामि ॥ ४९ ॥

देवतान्तराणां तत्प्रसादायुतभागलेशकरणासमर्थत्वे कर्मवश्यत्वतन्मूलकासर्वज्ञत्वादिकमेव हेतुरित्यभिप्रयन्नशलोकस्य ब्रह्मादिस्तम्बपर्यन्तस्याज्ञाननिवर्तनोपयुक्तसार्वज्ञादिगुणयुक्तं त्वामेव गुरुं वृणोमीत्याह——सचक्षुरिति । अन्धस्य चक्षुरिन्द्रियरहितस्य पुंसो यथा सचक्षुः पुमानग्रणीः पुरतो नेता कृतः वृतः तथा विदुषः स्वात्मरक्षणोपयुक्तज्ञानेनापि विरहितस्य जनस्य जन्ममरणादिभाजां ब्रह्मप्रभृतिजीववर्गस्य त्वमर्कदृक् अर्कप्रकाशवत् स्वत एव दृग्ज्ञानं यस्य सः अर्क एव दृग्यस्येति वा "चक्षुषोस्सूर्योऽजायत" "अग्निर्मूर्द्धा चक्षुषी चन्द्रसूर्यौ" इत्यादि श्रुतेः" अनेन सर्वज्ञत्वमुक्तं सर्वदृशां समीक्षणः प्रकाशकस्यापि प्रकाशकत्वशक्तिप्रदः "तमेव भान्तमनुभाति सर्वं तस्यभासा सर्वमिदं विभाति" इति श्रुतेः । अनेन ज्ञानप्रदत्वमुक्तम. एवम्भूतस्त्वं सुगतिं समीचीनतत्त्वप्राप्त्युपायं बुभुत्सतां बोद्धुमिच्छतामस्माकं गुरुर्वृतः कर्तरि षष्ठी बोद्धुमिच्छद्भिः गुरुत्वेन वृत इत्यर्थः ॥ ५० ॥

युक्तं चैतदितरेषां गुरुमन्यानामनर्थहेतुत्वाद्भवतस्तु निरतिशयपुरुषार्थहेतुत्वादित्याह—जनइति । जनः जन्ममरणादिभाक् संसारी जीवः गुरुत्वाभिमानवान् जनस्य संसारिणो जीवस्यासतीं गतिमर्थकामाद्युपायमादिशते आज्ञापयति बोधयतीत्यर्थः । तदादिष्टगतेरसत्त्वन्दर्शयन्विशिनष्टि-ययेति । यया संसारिणोपदिष्टया गत्या अन्ततो दुरत्ययमनतिक्रमणीयं तमः स्वपरस्वरूपतिरोधायकं संसृतिरूपं प्रपद्यते प्राप्नोति त्वन्तु अव्ययमक्षय्यफलप्रदं केवलानन्दैकहेतुममोघं फलाविनाभाविज्ञानं स्वपरयाथात्म्यगोचरज्ञानमादिशत इत्यनुषङ्गः तुशब्देन निरस्तानिखिलदोषत्वसमस्तकल्याणगुणत्वादिना जगद्वैलक्षण्यमभिप्रेतम् तदादिष्टज्ञानस्य निरातिशयपुरुषार्थहेतुं वदन्विशिनष्टि—अञ्जसेत्यादिना । येन त्वदादिष्टेन ज्ञानेन जनोऽञ्जसा सुखेनैव विष्णोर्वैष्णवं पदं स्थानं प्रपद्यते निजमित्यनेन यथा तुशब्देन भगवतो निरस्तनिखिलदोषत्वेन समस्तकल्याणगुणात्मकत्वेन च जनाद्वैलक्षण्यमभिप्रेतं तथा तत्पदस्य निरस्तनिखिलदुःखमिश्रत्वातिक्षुद्रत्वादिदोषत्वेन निरतिशयकेवलानन्दादिमत्वेन च

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वैलक्षण्यमभिप्रेतम्. अज्ञसत्त्वेन जनोपदिष्टयाऽसत्यापि गत्या तत्फलभूतार्थकामादेरपि दुःखप्राप्यत्वमभिप्रेतम् ॥ ५१ ॥

ननु, जनविलक्षणो निरतिशयपुरुषार्थप्रदश्चेदहमेव सर्वैरपि किं न समाश्रयते ? इत्यत्राह–त्वमिति । सर्वलोकस्याचालोचित-विशेषाशेषलोकस्य त्वं सुहृद्धितैषी प्रियः प्रीतिविषयश्चासावीश्वरोऽन्तःप्रविश्य नियन्ता आत्मा धारकः गुरुर्हितोपदेष्टा ज्ञानसंज्ञान-प्रवर्तको ऽभीष्टसिद्धिकरश्च अथापि यद्यप्युक्तविधस्त्वं तथापि हृदयकमल एव वसन्तं भवन्तम् उक्तविधं न सर्वो लोको जानाति, अज्ञाने हेतुं वदन् लोकं विशिनष्टि–अन्धधीर्हृदि बद्धकाम इति । अन्धधीः देहतदनुबन्धिनश्चोग्यार्थकामादिषु पुरुषार्थदृष्टिः न तु देहविलक्षणात्मपरमात्मयाथात्म्यधीः अतएव बद्धकामः शब्दादिविषयलिप्सुः ॥ ५२ ॥

अथोक्तविधं भगवन्तं प्रपद्य ज्ञानोपदेशार्थं प्रार्थयते तं त्वामिति । तमुक्तविधं देववरं "तं देवतानां परमं च दैवतम्" इति श्रुत्युक्तरीत्या निस्समाभ्यधिकदैवतम् अत एव वरेण्यं वरणीयम् ईशञ्च त्वामहं प्रतिबोधनाय स्वात्मपरमात्मयाथात्म्यज्ञानाय तदुपदेशार्थमिति भावः । प्रपद्ये शरणं व्रजामि अतो हे भगवन् ! अर्थदीपैः परमपुरुषार्थभूतपरमात्मस्वरूपप्रकाशकैर्वचोभिः हृदय्यान् मद्धृदयगतान् ग्रन्थीन् ग्रन्थिवद्दुर्निर्मोच्यान् देहात्माभिमानादीन् छिन्धि अपाकुरु स्वं स्वकीयम् ओकः स्वरूपं स्थानं वा विवृणु प्रकाशय ॥ ५३ ॥

इतीत्थं प्रार्थ्यमानं नृपतिमुद्दिश्य भगवानादिपुरुषो मत्स्यरूपी महाम्भोधौ प्रलयार्णवे विहरंस्तत्त्वं तत्त्वप्रतिपादकं पुण्यम् अब्रवीत् तत्त्वप्रतिपादकं पुराणमुपदिदेशेत्यर्थः ॥ ५४ ॥

तदेवाह–पुराणेति । दिव्यां देवस्य स्वस्य सम्बन्धिनीं प्रतिपादिकां देवेन स्वेनैव प्रणीतां वा साङ्ख्यं प्रकृतिविलक्षणात्मकस्वरूपयाथात्म्यज्ञानं योगो भगवद्भक्तियोगः क्रिया नित्यनैमित्तिकादिक्रियायोगः त एते प्रतिपाद्यत्वेनास्यां सन्तीति तथा तां पुराणसंहितां मात्स्यपुराणरूपां संहितां तथात्मनो गुह्यं रहस्यं चाशेषतः कार्त्स्न्येन सत्यव्रतस्याब्रवीदित्यनुषङ्गः ॥ ५५ ॥

तदेतद्भगवता उपदिष्टमात्मनः प्रत्यगात्मनः तत्त्वं याथात्म्यं सनातनं ब्रह्म तद्याथात्म्यञ्च ऋषिभिस्सह नाव्युपदिष्टसत्यव्रतो निस्संशयं यथा भवति तथा शुश्राव ॥ ५६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अन्ये देवाः अन्ये गुरवो जनाश्च स्वयं समेता मिलिताः पुंसः यस्य हरेः प्रसादायुतभागलेशं कर्तुं न प्रभवन्ति तदनुग्रहमन्तरेणेतिशेषः । अहं तं त्वामीश्वरं शरणं यामीत्यन्वयः ॥ ४९ ॥

यथाऽन्धस्य पुंसः स चक्षुर्दृष्टिमानग्रणीः अग्रतो गन्ता कृतः यथा चाऽविदुषो जनस्य बुधो जनो गुरुः कृतः शास्त्रविशारदैरिति शेषः । तथा सुगतिं बुभुत्सतां बोद्धुमिच्छतां नोऽर्थदृक् पुरुषार्थद्रष्टा सर्वदृशां सर्वेन्द्रियाणां समीक्षणः साक्षी त्वं गुरुर्वृतः ज्ञानोपदेशकत्वेनेतिशेषः । अचक्षुरितिपाठे अयमर्थः त्वामन्तरेणेतरेषां गुरुत्वं पुरुषार्थानुपयोगिसम्यग्ज्ञानहीनत्वादित्याह–अचक्षुरिति । यथाऽन्धस्याऽचक्षुरेवान्धोऽग्रणीः कृतो भवति तथा ऽविदुषां जनस्याबुध एव गुरुर्भवति अन्धेनैव नीयमाना यथान्धाः "उभावप्यश्रुतग्रन्थौ उभावपि जडात्मकौ" इत्यादिश्रुतिस्मृतिभ्यः त्वञ्चार्थदृक् शिष्यस्यापेक्षितपुरुषार्थदर्शी, कुतः ? दर्शनसाधनत्वेन दृशोपीन्द्रियाणि तेषां साक्षित्वादस्माकं गुरुत्वेन वृत इति ॥ ५० ॥

एतदेव विवृणोति–जनइति । जनो जननाद्यभिमानी तादृशस्य जनस्या सतीं गतिम् इहामुत्र चोरुफलदं ज्ञानमादिशति । यथा येन ज्ञानेन दुरत्ययं तमः नित्यदुःखात्मकमन्धं तमः प्राप्नोति तादृशमिति शेषः । यदीति पाठे यथोपदिष्टेन दुरत्ययं तमः प्राप्येत तथोपादिशति, नमन्नासन्नसदमविद्याद्याकारेणेत्यर्थः । "अन्धतमः प्रविशन्ति" इतिश्रुतेः ज्ञानस्य सत्त्वे द्वैतभङ्ग इति तत्राह–त्वमिति । जनो येन ज्ञानेन निजं पदं निर्दोषत्वेन त्वद्रूपसदृशं सच्चिदानन्दलक्षणमञ्जसा अव्यवधानेन प्रपद्यते यच्चाव्ययमक्षयं यच्चामोघमव्यभिचारितया फलसमर्पकं त्वं तदेव ज्ञानमादिशसीत्यन्वयः ॥ ५१ ॥

इतोपि त्वदुपदिष्टज्ञानमेवापेक्षितपुरुषार्थसाधनं नान्यत् अनिमित्तबन्धुत्वादिगुणपूर्णत्वेन सिद्धत्वेन वञ्चनाशङ्कानास्पदत्वादित्याशयेनाह–त्वमिति । सुहृत्प्रत्युपकारशून्यः प्रियश्चेश्वरश्च विषयसुखस्यापीश्वर इति वा आत्मा पूर्णानन्दः गुरुर्ज्ञानोपदेष्टा जानातीति ज्ञानम् अभीष्टसिद्धिरपेक्षितपुरुषार्थसाधकः लोकः सुहृत्त्वादिगुणवन्तं कुतो न जानातीति तत्राह—तथापीति । यद्यप्यनिमित्तबन्धुस्तथाऽपि लोको भवन्तं न जानाति, कुतः ? अन्धधीः नष्टज्ञानत्वात् ज्ञाननाशः कस्मादित्यत उक्तं हृदीति दूरस्थत्वान्न तज्ज्ञानमित्यत उक्तं सन्तमिति हृदीत्येतदुभयत्र योज्यम् ॥ ५२ ॥

इदानीं स्वार्थं प्रकाशयति–तं त्वामिति । प्रतिबोधनायत्वत्स्वरूपविषयज्ञानायाहं यो ज्ञानोपदेष्टृत्वादिगुणोपेतस्तं त्वां शरणं प्रपद्य इत्यन्वयः—देवोत्तमत्वादयमेव शरण्य इति भावेनोक्तं देववरमिति सौन्दर्यादिगुणभावेन त्वद्भक्तिरुदेतीति भावेनोक्तं वरेण्यमिति उक्तगुणा अन्यत्र व्यभिचारिणो नेत्याह, ईशमिति अन्यथेश्वरत्वाऽनुपपत्तिः हृदय्याम् अहङ्कारसम्भूतां ग्रन्थिमर्थस्य दीपकैः प्रकाशकैः "मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु" इत्यादिलक्षणवचोभिः किञ्च स्वमोकः स्वस्वरूपं स्वाश्रमं वैकुण्ठं वा विवृणु प्रकाशयेत्यन्वयः "ओकसी मन्दिराश्रयौ" इति च ॥ ५३—५४ ॥

सांख्ययोगक्रियावर्गी ज्ञानभक्तिकर्मयोगवर्ती पुराणसंहितामब्रवीत् इदं श्रद्धेयमिति भावेनोक्तमात्मगुह्यमिति आचार्यस्तु ते गतिं वक्तेतिवदुपदिष्टेन शिष्टं नास्तीत्यत उक्तमशेषत इति ॥ ५५ ॥

नावि जलयाने ॥ ५६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अन्येतु स्वतन्त्रमन्यास्त्वतीवाकिञ्चित्करा इत्याह—न यदिति ॥ ४९ ॥

प्रागुजन्मनि गुरुप्राप्तभक्तस्तस्य चिनीशितुः संस्काराद्भूतः श्रीशस्तुवतः सोऽयमाशयः स्वयंचाविश्य कश्चिद्वा भवानेव गुरुर्भवेत् अतो भगवन्तमासाद्य भवन्तं गुरुमर्थये तत्र त्वमर्कदृक् त्वदभिज्ञानां सर्वेषामपि श्रेष्ठ इत्यर्थः ॥ ५०—५६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अतस्त्वां विहाय झटिति प्रसादा अपि देवादयो नैव सेव्या इत्याह—नेति । यत्प्रसादस्यायुतभागस्तस्य लेशमात्रमप्यन्यं देवाः गुरवः पित्रादयः जनाः सुखदित्सवो नृपादयश्च सर्वे समेता अपि स्वयं तन्निरपेक्षाः सन्तः कर्तुं न प्रभवन्ति ॥ ४९ ॥

यतस्त्वत्सेवया विना पुमान् न मलं विजह्यादित्युक्तमतस्त्वत्सेवानुपदेष्टा गुरुरपि न सेव्य इत्याह—अचक्षुरिति । अविदुषो जनस्याबुधोऽपण्डितः पण्डितो बन्धमोक्षविदिति "मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते" इति त्वदुक्तभक्त्युपदेष्टैव बुधः स एवगुरुरन्यस्त्वनर्थहेतुरित्यर्थः । अत एव नाऽस्माकं सुगतिं भक्तिं बुभुत्सतां गुरुर्वृतो यः स तु त्वमेव साक्षादित्यर्थः । अर्कदृक् अर्कइव दृश्य इत्यर्थः । सर्वदृशां सर्वनेत्राणां सर्वेन्द्रियाणां सर्वज्ञानां च समीक्षणः प्रकाशक इति पचत्रये द्रष्टव्यम् ॥ ५० ॥

दृष्टान्तव्यञ्जितमर्थं स्पष्टमाह—जन इति । आदिश्यते उपदिशति अतः प्राकृतगुरुरनर्थहेतुर्दूरे परिहरणीय इत्यर्थः । त्वन्तु गुरुरूप एवावतीर्णः अव्ययं ज्ञानं भक्त्युत्थं ज्ञानमेव उपादिशसि नतु केवलं विद्यामयं यत् फलमुत्पाद्य वेतीत्यर्थः । निजं पदं त्वच्चरणारविन्दं वैकुण्ठं वा ॥ ५१ ॥

नन्वेवं गुरुभूतं मां किमिति सर्वे न प्रपद्यन्ते दुर्बुद्धित्वादित्याह त्वामिति । सुहृदादिरूप इत्यन्ये सुहृदादयो वस्तुतः सुहृदादयो नैव भवन्तीत्यर्थः । यदा सुहृत् स प्रियः कान्तभावविषयः ईश्वरः दास्य भाव विषयः आत्मा शान्तभावविषयः गुरुर्दास्यविशेषविषयः यद्वा अगुरुः सुतादिरिति वात्सल्यभावविषयः ज्ञानं भावशून्यानां केवलमोक्षप्रदः अभीष्टसिद्धिः सकामानां सर्वकामप्रद इति सन्तं साधुरूपं त्वाम् अन्धधीरसाधुर्यतो हृदि निवद्धदुर्वासनः ॥ ५२ ॥

अहं तु त्वद्भक्तकृपासिद्धाञ्जनविगतान्ध्यस्त्वामेव गतिं पश्यामीत्याह—तमिति । प्रतिबोधनाय संसारशय्यायां निद्राणं मां कृपया प्रतिबोधयेत्यर्थः । अर्थदीपैः परमार्थप्रकाशकैः हृदयभवान् ग्रन्थीन् स्वमोको वैकुण्ठं विवृणु तत्प्रापकवर्त्म ब्रूहि ॥ ५३ ॥ ५४ ॥

पुराणसंहितां मत्स्यपुराणम् ॥ ५५ ॥ ५६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स एव भगवान् सेवार्हो नान्ये इत्याह—न यदिति । यत्प्रसादस्य अयुतभागस्तस्य लेशमात्रमपि अन्ये देवादयः सर्वे समेताः सङ्घीभूता अपि स्वयं तन्निरपेक्षाः सन्तः कर्तुं न प्रभवन्ति दातुं न शक्नुवन्ति तं त्वां शरणं प्रपद्ये ॥ ४९ ॥

गुरोर्गुरुरित्यनेन त्वदनुवर्त्तितत्त्वज्ञो मुक्तिदाता गुरुरादरणीय एव तत्त्वानभिज्ञस्त्वत्तो बहिर्मुखो गुरुस्तु अन्धमन्धो यथा गर्ते पातयति तथा संसारे पातयत्यतस्तमनादृत्याऽस्माभिस्त्वं गुरुर्वृतः इत्याह—अचक्षुरिति । अर्कदृक् अर्कवत् अन्यप्रकाशानिरपेक्षा दृक् दृष्टिर्यस्य सः सर्वदृशां सर्वदृष्टीनां समीक्षणः प्रकाशकः ततः स्वगतिं बोद्धुमिच्छाद्भिर्नोऽस्माभिस्त्वं गुरुर्वृतोसि ॥ ५ ॥

एवमतत्त्वज्ञो हरिविमुखो गुरुः संसारे साशिष्यः पततीत्यंधदृष्टान्तेनोक्तमथ सर्वथापि त्वदृज्ञानभक्तिबहिष्कृतेन प्राकृतजनेनोपदिष्टा मतिः सुतरां संसारे पातयति अतस्त्वदुपदिष्टेन ज्ञानेन त्वत्पदलाभो भवेदित्याह—जन इति । असतीं अर्थकामादिविषयाम् तमः संसारं त्वंतु अमोघज्ञानमादिशसे ॥ ५१ ॥

अथ भगवतः सर्वसुहृत्त्वादिगुणान् नित्यबद्धस्य जीवस्य स्वभावं च वर्णयन् स्वयं मुमुक्षुर्भगवन्तं शरणं व्रजति त्वामिति द्वाभ्याम् । प्रियश्चासावीश्वरश्च ॥ ५२ ॥

प्रपद्ये शरणं व्रजामि. प्रतिबोधनाय त्वदुपदिष्टतत्त्वबोधाय अर्थदीपैः आत्मानात्मपरमात्मपदार्थप्रकाशकैः हृदय्यान् हृदये भवान् अहङ्कारादीन् स्वं स्वकीयमोकः वासस्थानं विवृणु वर्णय ॥ ५३ ॥

नृपतिं प्रति तत्त्वं तत्त्वप्रकाशकं पुराणम् अब्रवीत् ॥ ५४ ॥

एतदेवाह—दिव्यां देवस्य भगवतः सम्बन्धिनीं तत्प्रोक्तां तद्विषयां साङ्ख्यम् आत्मानात्मपरमात्मज्ञानं योगः परमात्मभक्तिः क्रियाज्ञानभक्तिसाधनं कर्म साङ्ख्ययोग क्रियाः सन्त्यस्यां सा तथा ताम् पुराणसंहितां मत्स्यपुराणरूपं संहिताम् आत्मगुह्यं स्वरहस्यं च सत्यव्रतस्य सत्यव्रतंप्रति अब्रवीदित्यनुषङ्गः ॥ ५५ ॥ ॥ ५६ ॥

भाषा टीका ।

अन्य सम्पूर्ण देव लोग गुरु लोग तथा पुरुष आप भी ये सब मिलकर भी जिन आपके प्रसाद का अयुत भाग [दश हजार में हिस्से] का लेश मात्र भी पुरुष के ऊपर नहीं करसक्ते हैं तिन आप ईश्वर के मैं शरण को प्राप्त हूं ४९

जैसे अंधे का अग्रगण्य अन्धा होवे, और अज्ञ का गुरु भी अज्ञ होवे, इसी प्रकार आपसे व्यतिरिक्त अन्य देवादिक स्वयं अपूर्ण हैं फिर और के ऊपर प्रसन्न होकर भी क्या आप सदृश उपकार करसक्ते हैं ? कभ नहीं ॥ और आप सूर्य के तुल्य सर्व इन्द्रियों के प्रकाश हौ अत एव अपनी उत्तम गति जानने की इच्छा वाले एसे हम लोगों ने आप ही को गुरु स्वीकार किये हैं ॥ ५० ॥

प्राकृत गुरु, शिष्य को एसी खोटी बुद्धि अर्थात् अर्थ कामादि विषयक मति का उपदेश करते हैं, कि—जिससे फिर

अतीतप्रलयापाय उत्थिताय स वेधसे।
हत्वाऽसुरं हयग्रीवं वेदान्प्रत्याहरद्धरिः॥ ५७॥
स तु सत्यव्रतो राजा ज्ञानविज्ञानसंयुतः।
विष्णोः प्रसादात्कल्पेऽस्मिन्नासीद्वैवस्वतो मनुः॥ ५८॥
सत्यव्रतस्य राजर्षेर्मायामत्स्यस्य शार्ङ्गिणः।
सम्वादं महदाख्यानं श्रुत्वा मुच्येत किल्बिषात्॥ ५९॥
अवतारो हरेर्योऽयं कीर्तयेदन्वहं नरः।
सङ्कल्पास्तस्य सिद्ध्यन्ति स याति परमां गतिम्॥ ६०॥
प्रलयपयसि धातुः सुप्तशक्तेर्मुखेभ्यः श्रुतिगणमपनीतं प्रत्युपादत्त हत्वा।
दितिजमकथयद्यो ब्रह्मसत्यव्रतानां तमहमखिलहेतुं जिह्ममीनं नतोऽस्मि॥ ६१॥

इति श्रीमद्भागवते महापुराणे अष्टादशसाहस्त्र्यां संहितायां वैयासिक्याम्
अष्टमस्कन्धे मत्स्यावतारचरितानुवर्णनं नाम
चतुर्विंशोऽध्यायः॥ २४॥

समाप्तोऽयमष्टमस्कन्धः॥ ८॥

॥ श्रीकृष्णार्पणमस्तु॥

भाषा टीका।

भी दुस्तरतम को प्राप्त होवै, और आप तो अमोघ और अव्यय ज्ञान को देते हो कि जिससे पुरुष निजपद को प्राप्त होजाता है॥ ५१॥

हे भगवान्! आप संपूर्ण लोक के सुहृत हो, और प्रिय ईश्वर हो, आत्मा हो, गुरु हो, ज्ञान हो, और अभीष्ट सिद्धि भी आपही हो अर्थात् पुरुष को परम प्राप्य आपही हो। तथापि कामों से बंधा हुआ अंध बुद्धि यह लोक हृदय में रहने वाले भी आपको नहीं जानता है॥ ५२॥

देवों में श्रेष्ठ प्रिय तम होने से भी वरणीय ऐसे आप ईश का अपने ज्ञान के लिये मैं आश्रय लेता हूं, हे भगवान् अर्थ के प्रकाशक ऐसे अपने वचनों से हृदय को ग्रंथियों का अर्थात् अहंकारादिकों का छेदन करो॥ ५३॥

श्रीशुक उवाच॥

श्रीशुकदेवजी बोले, कि—इस प्रकार राजा सत्य व्रत जब स्तुति करचुके तब भगवान् आदि पुरुष मत्स्य रूपधारी प्रलय समुद्र में विहरते हुए राजा को तत्त्व आपने क्या कहा? सो कहते हैं, कि—सांख्य योग, और क्रिया (कर्म) का प्रतिपादन जिसमें ऐसी दिव्य पुराण संहिता अर्थात् मत्स्य पुराण, और जो आपको गुप्त ज्ञान रहो सो भी सत्य व्रत राजर्षि को कहते भये॥ ५५॥

ऋषियों के सहित निःसंदेह होकर नौका में बैठा हुआ आत्म तत्त्व ज्ञान और जो भगवान ने सनातन ब्रह्म को उपदेश किया सो राजा ने सब श्रवण किया॥ ५६॥

श्रीधरस्वामिकृतभावार्थदीपिका।

अतीतः पूर्वो यः प्रलयस्तस्यापायेऽवसाने॥ ५७—५९॥
योऽयं हरेरवतारस्तं यः प्रकीर्तयेत्॥ ६०॥
सत्यव्रतानां सत्यव्रतस्य ऋषीणां च छत्रिणो गच्छन्तीतिवल्लिङ्गसमवायाद्बहुवचनम् जिह्ममीनं मायामत्स्यम्॥ ६१॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायां
चतुर्विंशोऽध्यायः॥ २४।

समाप्तोयमष्टमस्कन्धः॥ ८॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततो हरिरतीतः पूर्वो यः प्रलयः तस्यापाये अवसाने उत्थिताय शयनादिति शेषः । वेधसे चतुर्मुखाय वेदान् हयग्रीवेणापहृतान् तमसुरं हत्वा प्रत्याहृत्य आदिशद्ददौ ॥ ५७ ॥

ततः स तु स एव सत्यव्रतो राजा ज्ञानविज्ञानाभ्यां संयुतः आगमोत्थविवेकोत्थज्ञानाभ्यां संयुतः विष्णोः प्रसादादनुग्रहादेव अस्मिन्कल्पे वैवस्वतो मनुरभूत् ॥ ५८ ॥

एवमुपवर्णितमत्स्यावतारचरित्रो मुनिस्तदाख्यानश्रवणफलमाह—सत्यव्रतस्येति । मायामत्स्यस्याद्भुतमत्स्यरूपिणः स्वसङ्कल्पोपात्तमत्स्यरूपिणो वा शार्ङ्गिणः हरेः सत्यव्रतस्य राजर्षेः मनोश्च सम्वादरूपमिदमाख्यानं श्रुत्वा पुमान् किल्बिषात् स्वर्गापवर्गश्रेयोविरोधिनः पापात् मुक्तो भवेत् ॥ ५९ ॥

यो नरो हरेरमुमवतारं तच्चरित्रमन्वहमहरहः कीर्तयेत् तस्य नरस्य सर्वे सङ्कल्पाः मनोरथाः सिध्यन्ति जीवद्दशायामिति शेषः । देहावसाने तु स नरः परमां गतिं मुक्तिं यातीत्यर्थः ॥६०॥

मत्स्यावतारचरित्रकथनान्ते सुखप्रतिपत्तये तदवतारप्रयोजनानि सङ्गृह्णन्नमस्करोति मुनिः—प्रलयेति । यः प्रलयपयसि प्रलयार्णवजले विहरन्निति शेषः । सुप्ता अप्रबुद्धा शक्तिः सृष्टिशक्तिर्यस्य तस्य निद्राभिभूतत्वादिति भावः । अत एव तस्य धातुः ब्रह्मणो मुखेभ्यः अपनीतं निस्सृतं श्रुतिगणं हयग्रीवेणासुरेणापहृतं तं दितिजमसुरं हत्वा प्रत्युपादत्त प्रत्याहृत्य धात्रे ददावित्यर्थः तथा सत्यव्रतानां सत्यव्रतस्य ऋषीणां च छत्रिणो गच्छन्तीतिवल्लिङ्गसमवायात् बहुवचनं ब्रह्म तद्याथात्म्यप्रतिपादकं पुराणमकथयत्तमखिलहेतुं सर्वकारणकारणभूतं जिह्ममीनं कपटमीनं हरिमहं नतोऽस्मि नत इति कर्त्तरिक्तः नमस्कृतवानस्मीत्यर्थः ॥६१॥

इति श्रीवत्सान्वयपयःपारावारराकासुधाकरस्य सर्वविद्यानिधेः
श्रीशैलगुरोः सुतेन तच्चरणकमलपरिचर्याप्रसन्नतत्सूक्तिसम-
धिगतश्रीमद्भागवतार्थहृदयेन श्रीवैष्णवदासेन श्रीवात्स्य-
वीरराघवार्यविदुषा विलिखितायां श्रीमद्भागवतच-
न्द्रचन्द्रिकाख्यायां श्रीमद्भागवतव्याख्यायाम-
ष्टमस्कन्धे चतुर्विंशोध्यायः ॥ २४ ॥
समाप्तोऽयम् अष्टमस्कन्धः ॥ ८ ॥

श्रीमते रामानुजाय नमः ॥

अस्मिन् स्कन्धे मूलग्रन्थसंख्या (१०३८)
टीका सङ्ख्या (३६००) समग्रसङ्ख्या (४६३८)

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रलयानामपाये अतीते सति ततः उत्थिताय वेधसे ब्रह्मणे प्रत्याहरत् दैत्याहृतांस्तान् ज्ञात्वा प्रत्याहृत्य दत्तवानित्यर्थः ॥ ५७-५९ ॥

सम्वादस्य पापहरत्वे अवतारकथाकीर्त्तनेन किं प्रयोजनमत्राह–अवतारमिति । अस्तु श्रवणफलं कीर्त्तनेन किम्फलमित्यतो वाह–अवतारमिति ॥ ६० ॥

बुद्धिसंग्रहार्थमवतारकथां सङ्कलय्य कथयति–प्रलयेति. सुप्तशक्तेर्विषयोपरतेन्द्रियशक्तेः कार्यानभिमुखीभूतप्रकृतिशक्तेर्वा अपनीतं निस्सृतं दैत्येन नीतं जिह्ममीनं मायामत्स्यम् ।—

"अनन्तशक्तिर्भगवान्मत्स्यरूपी जनार्दनः ।
क्रीडार्थं याचयामास स्वयं सत्यव्रतं नृपम्" ॥

इत्यनेन नमाह सातिकरुणं महाकारुणिकमित्यादिना विक्रीडितामिति ज्ञातव्यम् ॥ ६१ ॥

पदरत्नावलिर्नाम अष्टमस्कन्धसङ्गता ।
प्रीत्यै मत्स्यात्मनो विष्णोरस्तु निर्दोषवर्णगा: ॥
इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
चतुर्विंशोऽध्यायः ॥ २४ ॥
* विजयध्वजतीर्थपाठरीत्या त्रयोविंशोध्यायः (२३)
समाप्तोऽयम् अष्टमस्कन्धः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

श्रीमत्स्यदेवस्य द्वयेऽवतारं पुनर्दर्शयति—अतीतेति । द्वाभ्याम् ॥ ५७ ॥

षष्ठे मन्वन्तरे विष्णोः प्रसादं लब्ध्वा सप्तमे वैवस्वतो मनुरासीदित्यर्थः ॥ ५८ ॥

माया कृपा ॥ ५९—६० ॥

जिह्मेषु कुटिलहृदयेषु सामान्यमीनतया प्रकाशमानं नाहं प्रकाशः सर्वस्येत्यादेः विराडविदुषामित्यादेश्च ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
चतुर्विंशोऽध्यायः समाप्तः ॥ २४ ॥
समाप्तोऽयम् अष्टमस्कन्धः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

मत्स्यावतारद्वयस्य समयद्वयं प्रयोजनद्वयं चाह–अतीतप्रलयस्य अपाये स्वायम्भुवमन्वन्तरारम्भे इत्यर्थः ॥ ५७ ॥

तु भिन्नोपक्रमे सत्यव्रतस्तु चाक्षुषमन्वन्तरमध्य इति शेषो बोध्यः चाक्षुषोदधिसम्प्लवे अपाद्वैवस्वतं मनुमिति वाक्यानुरोधात् विष्णोर्मत्स्यरूपस्य प्रसादात् ज्ञानविज्ञानसंयुत.इति चाक्षुषीयमत्स्यावतारस्य प्रयोजनमुक्तम् ॥ ५८—६० ॥

समासेन प्रयोजनद्वयं पुनः स्पष्टमाह—प्रलये दितिजं हत्वा सत्यव्रतानामिति गौरवेण बहुवचनं जिह्ममीनं कुटिलाकारं मीनं यस्य शृङ्गे नौर्निबद्धा स तु मीनः कुटिलाकार आडिसंज्ञः प्रसिद्ध एव लोके इति तथोक्तम् ॥ ६१ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
चतुर्विंशोऽष्टमस्कन्धे सङ्गतःसङ्गतःसताम् ॥ २४ ॥
समाप्तोऽयम् अष्टमस्कन्धः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अतीतप्रलयस्यापाये समाप्तौ ॥ ५७ ॥ ५८ ॥

मायया स्वभक्तविषयिन्या कृपया आविर्भूतो यो मत्स्य- स्तस्य ॥ ५९ ॥

योऽयमवतारस्तमन्वहं प्रतिदिनं यः कीर्तयेत् ॥ ६० ॥

सत्यव्रतानां सत्यव्रतसहितानामृषीणां छन्दिसो यान्तीति वदूबहुवचनम् जिह्मो दैत्यवधार्थं गूढरूपो विष्णुः स चासौ मीनश्च तम् ॥ ६१ ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे ।
चतुर्विंशोऽध्यायार्थप्रकाशः ॥ २३ ॥
समाप्तोऽयमष्टमस्कन्धः ॥ ८ ॥

भाषा टीका ।

पूर्व प्रलय के व्यतीत होने के अंत में वेद के चुराने वाले हय-ग्रीव असुर का वध करके सोके उठे हुये ब्रह्माजी को श्रीहरि ने वेद लाकर दिये ॥ ५७ ॥

ज्ञान विज्ञान संयुत वही सत्यव्रत राजा इस कल्प में श्री-विष्णु के प्रसाद से वैवस्वत मनु हुए ॥ ५८ ॥

सत्यव्रत राजर्षि और कृपा से मीन रूपधारी श्री मुरारी का यह संवाद रूप आख्यान जो श्रवण करे वह किल्विष से मुक्त होय ॥ ५९ ॥

जो मनुष्य श्रीहरि के इस अवतार का प्रति दिन कीर्तन करे उसके सम्पूर्ण संकल्प सिद्ध होते हैं और वह परमगति को प्राप्त होता है ॥ ६० ॥

प्रलय जल में सोये हुए ब्रह्माजी के मुखों से वेदों को जिस दैत्यने चुराये उसको मारकर, जिनने ऋषि लोग और सत्य व्रत राजा को ब्रह्म ज्ञान का उपदेश दिया ऐसे कृपा से मीन रूपधारी श्रीहरी को मैं नमस्कार करता हूं ॥ ६१ ॥

लय जल बिच धाता सो रहे—के मुखों से ।
श्रुति गण हरते ही दैत्य को मारके जो ॥
दिये वह, कहदीना ज्ञान सत्यव्रतों को ।
अखिल निमित मायी मीन को वन्दता हूं ॥
श्रीमद्भागवतेऽयं रुचिरकथो ह्यष्टमस्कन्धः ॥
भागवतार्यं विनिर्मितभाषाटीकासमन्वितो जयति ॥

इति श्रीमद्भागवत अष्टम स्कन्ध में, चतुर्विंशोऽध्याय की श्रीवृन्दावनस्थ, श्रीसुदर्शनाचार्यान्तेवासि, श्रीबलराम स्वामि चरणाश्रित भागवताचार्य कृत भाषाटीका समाप्ता ॥ २४ ॥ अष्टमस्कन्धभी समाप्त हुआ ॥ ८ ॥

श्रीरुक्मिणीरमणो जयति ॥

इति श्रीमद्भागवते महापुराणे अष्टमस्कन्धे चतुर्विंशोऽध्यायः ॥ २४ ॥

समाप्तोयमष्टमस्कन्धः ॥

संशोधकौ चास्य ग्रन्थरत्नस्य काञ्चीमण्डलान्तर्वर्ति 'कान्दूर' श्रीरङ्गाचार्य—'श्रीवृन्दावनस्थ' भागवताचार्यौ ॥



॥ श्रीः ॥

विज्ञापन ।

परपक्षगिरिवज्रः ।

अयि विचक्षणाः ! अद्याऽतिप्रहर्षसमयो वरीवर्त्ति अहं तत्रभवद्भ्यो भवद्भ्योऽद्भुतग्रन्थं निवेदयामि यद्ग्रन्थान्वेषणं सहस्राणि विद्वांसोऽकार्षुः चातकास्स्वातिबिन्दूनिव, तथा ऽपि तद्ग्रन्थदर्शनमपि दुर्लभमभूत् तत्पाठनविचारणादि तु दूरापास्तमेवासीत् तमेव ग्रन्थमत्यानन्देन समस्तभारतवासिनां श्रीमतां सेवायां निवेदयामि यं ग्रन्थं 'शारीरकहार्दसंचयनामकं' कथयन्ति, केचित्तु परपक्षगिरिवज्राख्यम् अध्यासगिरिवज्राख्यमपि ब्रुवन्ति, एष ग्रन्थो वेदान्तिनां शिरोधार्य्यो ऽस्ति, किञ्च सर्वमनीषिणामेतत्सुविदितमस्ति, निगमकल्पतरोरसमयफलं वेदान्तशास्त्रमेवास्ति, यद्यपि वेदान्तशास्त्रस्य स्वस्वसिद्धान्तानामनुकूला अनेके ग्रन्था मुद्रितास्सन्ति, तथापीदृशः को ऽपि ग्रन्थोऽद्यावधि न मुद्रितो ऽस्ति, यद्ग्रन्थावलोकनेनैव सर्वं सिद्धान्तज्ञानं भवति, एतस्मिन् ग्रन्थेऽद्भुतचमत्कारोऽस्ति एतदवलोकनेनैव ग्रन्थस्यावलोकनावश्यकता ऽपि न भवति, सर्वेषां विपश्चितामेतद्ग्रन्थसर्वशास्त्रसिद्धान्तज्ञानपूर्वकसत्यासत्यविचारो भवति, अन्यवेदान्तग्रन्थस्यावलोकनावश्यकता ऽपि न भवति, सर्वेषां विपश्चितामेतद्ग्रन्थावलोकनेन पूर्णानन्दावाप्तिर्भवति, एष च ग्रन्थो विदुषां पठनपाठनादिषु प्रचारणीयो ऽस्ति, किम्बहुलेखनेनैतद्ग्रन्थावलोकयितॄणां ब्रह्मानन्दास्वादसमुद्रस्तरङ्गितइव भवति, एतद्ग्रन्थावलोकनेन विद्वन्मण्डल्यां वाग्विलासे सङ्कोचः कदा ऽपि न भवति, एष च ग्रन्थो निम्नलिखितप्रकरणैर्विभूषितो ऽस्ति, एतस्मिन् ग्रन्थे चत्वारो ऽध्यायास्सन्ति, तत्र प्रथमे ऽध्याये विषयसम्बन्धगिरिनिपातप्रयोजनाधिकारिगिरिनिपात अध्यासगिर्यधिष्ठानगिरिनिपातादीनि महाविस्तीर्णानि त्रयोविंशतिः प्रकरणानि सन्ति. द्वितीये चाध्याये जिज्ञास्योपपत्तिगिरिनिपातादीनि दश प्रकरणानि सन्ति तृतीयेऽध्याये साङ्ख्यगिरिनिपातादीनि दश प्रकरणानि सन्ति चतुर्थेऽध्याये जीवन्मुक्तिगिरिनिपातो ऽस्ति, एवं चत्वारिंशत्प्रकरणैर्विभूषितो ऽष्टसहस्रश्लोकसंख्यापरिमितो ग्रन्थोऽस्तीति विज्ञेयं मनीषिभिरितिशम् मूल्यम् रौप्यकत्रयम् ।

पूज्यपादश्रीविश्वनाथचक्रवर्तिविरचितम्

श्रीकृष्णभावनामृतम् ।

श्रीकृष्णभावनामृतम् श्रीकृष्णचंद्राष्टकालिकसेवानिरूपणपरम् क्रीडानिकुंजस्थ किंकरीशुकशारिकादीनां परस्परसेवानिरूपणपरंसुस्पष्टपद्यात्मकं महाकाव्यम् तदनुगुणमिताक्षरसंस्कृतटीकयालंकृतम्, मूल्यम् रौप्यकत्रयम् ।

श्रीमद्भागवत संबन्धीय नियमावली ।

इतने बड़े परिश्रम और अध्यवसाय पर भी सर्व साधारण के सुलभ संग्रह के अर्थ पूर्ण ग्रंथ का मूल्य केवल ५०) रुपया अग्रिम रखा गया है राजा महाराजा और संमान्य मनष्यों के सन्मान रक्षाके लिये उनसे केवल १००) रु० मात्र लिया जायगा डाक महसूल २४) रु० अलग पडेगा ।

असमर्थ ग्राहकों से चार किस्तों में रुपया लिया जायगा—प्रथम किस्त १२) रु० पञ्चमस्कन्ध तक, द्वितिय किस्त १२) षष्ठस्कन्ध तक, तृतिय किस्त १२) सप्तमस्कन्ध तक, चतुर्थ किस्त १४) दशमस्कन्ध तक और डाक महसूल २४) द्वादशस्कन्ध तक लियाजायगा।

श्रीजगन्नाथवल्लभनाटकम् ।

इह खलु जगति विद्यास्थानेष्वनेकेषु पठनीयेषु सत्स्वपि शास्त्रांतराणां सहिष्णुवेद्यत्वेन सूक्ष्ममतिवेद्यत्वेन च तेष्वल्पजनादरणीयेषु जातेषु इदानीं स्थलमतिवेद्यत्वेनसुकुमारवेद्यत्वेचकाव्यनाटकादीन्येव मनुष्याणांसमययापनयोग्यानि तानिच भगवद्विषयकाणिचेद्भुक्तिमुक्तिप्रदानीति विचार्येदानींजगन्नाथवल्लभनाटकं सर्वजनसौकर्यायप्रकाशितम् इदंचनाटकं श्रीराधाकृष्णरहस्यक्रीडा विषये प्रतापरुद्रनृपतिनिदेशाद्रामानंदराय कविनानिर्मितम्. अत्रचपंचांकाः संति तत्रप्रथमेंके नटनटीसूत्रधाराणांसंवादपूर्वकप्रस्तावनानंतरं श्रीराधाकृष्णमदनिका विदूषकाणां वृत्तांतैः पूर्वरागनिरूपणम् १ द्वितीयेचभावपरीक्षादिनिरूपणम् २ तृतीयेभावप्रकाशादिनिरूपणम् ३ चतुर्थे श्रीराधिकायाः अभिसरण क्रियानिरूपणम् ४ पंचमे श्रीराधाकृष्णयोः संगमनिरूपणम् अस्मिन् ग्रन्थे मध्ये मध्ये गीतगोविंदवद्रागपद्यान्यपिविद्यंते मूल्यम् द्वादश आणकाः ॥।)

वेदान्तसारम् ।

भो भो वेदवेदान्तसकलशास्त्रपारावारपारङ्गताः !

विदितमेव भवतां श्रीमद्वैय्यासिकसूत्रार्थयाथात्म्यप्रतिपादकं बालानामपि वेदान्तार्थसंशयनिवारणकरं वेदान्तसारनाम ग्रन्थरत्नम्. तदिदमिदानीं सुललितैर्नागराक्षरैरपूर्वतया मुद्रितं सत् जाज्वलीति. अतस्सर्वेप्येतद्ग्रन्थरत्नं केवलेन रूप्यत्रयमूल्येन प्रहीत्वा मनोनयनानन्दं प्राप्नुवन्तु भवन्तः ॥ अस्य मूल्यं रूप्यत्रयम्.

श्रीमद्भागवत कार्यालय—श्रीदेवकीनन्द प्रेस
भ्रमरघाट श्रीवृन्दावन—जिला मथुरा । } विद्वज्जनकृपाकांक्षी—श्रीनित्यस्वरूप ब्रह्मचारी ॥

श्री १०८ श्रीराधारमणो जयति ।

नवमस्कन्धः

महर्षिप्रवरश्रीकृष्णद्वैपायनप्रणीतम्

श्रीमद्भागवतम् ।

श्रीश्रीपादश्रीधरस्वामिकृतभावार्थदीपिका, श्रीराधारमणदासगोस्वामिविरचितदीपिन्याख्यतट्टिप्पनी श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका, श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली, श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी, श्रीगौडीयवैष्णवाचार्य्यप्रवरश्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भाख्यटीका, श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी, श्रीनिम्बार्कसम्प्रदायिश्रीमच्छुकदेवकृतसिद्धान्तप्रदीपाख्यटीका इत्यष्टभिर्व्याख्याभिर्भाषानुवादेनच समलङ्कृतम् ।

इदम्

परमहंसपरिव्राजकाचार्य्यश्रीमत्स्वामिप्रकाशानन्दसरस्वतीपूज्यपादशिष्य

श्रीनित्यस्वरूपब्रह्मचारिणा

सम्पादितम्;

वङ्गदेशान्तर्गत ताड़ास भूपति श्रीराधाविनोद प्रेम सेवा परायण राजर्षि राय

"श्रीवनमालिराय वहादुरस्य"

सम्पूर्णसाहाय्येन

प्रकाशितञ्च ।

तच्च

काञ्चीमण्डलान्तर्वर्ति 'कान्दूर्' पं० श्रीरङ्गाचार्यद्वारा संशोध्य

श्रीवृन्दावनधामनि

स्वकीये "श्रीदेवकीनन्दन" यन्त्रालये

मुद्रितम् ।

सम्वत् १९६१

श्रीमद्भागवतम् ।

नवमस्कन्धः ।

प्रथमोऽध्यायः ।

ओं नमो भगवते वासुदेवाय ।

राजोवाच ।

मन्वन्तराणि सर्वाणि त्वयोक्तानि श्रुतानि मे ।
वीर्याण्यनन्तवीर्यस्य हरेस्तत्र कृतानि च ॥ १ ॥
यो ऽसौ सत्यव्रतो नाम राजर्षिर्द्रविडेश्वरः ।
ज्ञानं यो ऽतीतकल्पान्ते लेभे पुरुषसेवया ॥ २ ॥
स वै विवस्वतः पुत्रो मनुरासीदिति श्रुतम् ।
त्वत्तस्तस्य सुताश्चोक्ता इक्ष्वाकुप्रमुखा नृपाः ॥ ३ ॥
तेषां वंशं पृथक् ब्रह्मन् ! वंश्याऽनुचरितानि च ।
कीर्तयस्व महाभाग ! नित्यं शुश्रूषतां हि नः ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

॥ श्रीगणेशाय नमः ॥

गुणा यं गुणताऽवाप्त्यै वृणुते करुणानिधिम् ।
तमहं शरणं यामि परमानन्दमाधवम् ॥ १ ॥
त्रिगुणाष्टभिरध्यायैर्वैवस्वतसुतान्वयः ।
नवमे कृष्णसत्कीर्तिप्रसङ्गाय वितन्यते ॥ २ ॥
एवमुक्तो ऽष्टमस्कन्धे सद्धर्मः सत्त्वशोधकः ।
कर्तृपालकवक्त्रादिमन्वादीनां निरूपणैः ॥ ३ ॥
सद्धर्मशुद्धसत्त्वानामन्तरङ्गेशसत्कथा ।
सूर्यसोमान्वयाख्यानैरधुना सङ्गतोच्यते ॥ ४ ॥

तत्र च—

त्रयोदशभिरध्यायैः सूर्यवंशो ऽनुवर्ण्यते ।
एकादशभिरध्यायैः सोमवंशस्ततः परैः ॥ ५ ॥
तत्र तु प्रथमेऽध्याये वैवस्वतसुताऽन्वये ।
सोमवंशप्रवेशोक्त्यै सुद्युम्नस्त्रीत्वमुच्यते ॥ ६ ॥

उक्तानुवादपूर्वकं वैवस्वतमनोर्वंशं पृच्छति, मन्वन्तराणीति पञ्चभिः ॥ १—७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

श्रीमते रामानुजाय नमः ।

पूर्वस्कन्धान्ते—

"सतु सत्यव्रतो राजा ज्ञानविज्ञानसंयुतः ।
विष्णोः प्रसादात्कल्पेऽस्मिन्नासीद्वैवस्वतो मनुः" ॥

इति प्रकृतस्य भगवत्पूर्णानुग्रहाविषयस्य महाभागवतस्य वर्त्तमानस्य सप्तमस्य वैवस्वतमनोर्वंशं "सप्तमो वर्त्तमानो यस्तदपत्यानि मे शृणु इक्ष्वाकुश्च नृगश्चैव" इत्यादिना सङ्ग्रहेणोक्तं विस्तरतो बुभुत्सुरुक्तानुवादपूर्वकं पृच्छति राजा—मन्वन्तराणीत्यादिभिः पञ्चभिः। यान्यष्टमादौ मया पृष्टानि मन्वन्तराणि तेष्ववतीर्णेन भगवता कृतानि वीर्याणि च तानि सर्वाणि त्वया वर्णितानि मे मया श्रुतानि च ॥ १ ॥

तथा योऽसावतीतकल्पे द्रविडदेशाधिपस्सत्यव्रताख्यो राजर्षिरतीतकल्पावसाने परमपुरुषस्य सेवया हेतुभूतया स्वपरयाथात्म्यज्ञानं लेभे प्राप्तवान् ॥ २ ॥

स एव सत्यव्रतोऽस्मिन् विवस्वतः पुत्रो भूत्वा मनुर्वैवस्वताख्यः सप्तमो मनुरासीदिति च त्वत्तो मया श्रुतमित्युक्तानुवादः अथ पृष्टव्यं पृच्छति— तस्य वैवस्वतस्य मनोर्ये सुता इक्ष्वाकुप्रभृतयः त्वया कथिताः ॥ ३ ॥

मया श्रुताश्च तेषामिक्ष्वाकादीनां पृथक् पृथक् वंशं तद्वंशजानां चरितानि चाधुना हे ब्रह्मन् ! महाभाग सर्वज्ञ ! श्रोतुमिच्छतां नोऽस्माकं कथय ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

श्री वेदव्यासाय नमः ॥

कमलाकान्तं कमलाक्षं विमलानन्दं प्रणम्य च ॥
नृपवंशस्कन्धविलासं नवमस्कन्धं विवृणोमि ॥०॥

अस्मिन्स्कन्धे राजवंशवर्णनेन श्रीनारायणे भक्तिविधानार्थं भगवन्माहात्म्यमेव प्रपञ्च्यते, तत्रवृत्तवर्तिष्यमाणस्कन्धयोः सङ्गतिप्रदर्शनाय वृत्तानुवादपूर्वकं वैवस्वतमनोः पुत्राणां तद्वंश्यानामनुवंशं तच्चरितानि च राजा शुकं पृच्छति, मन्वन्तराणीत्यादिना वद विक्रमानित्यन्तेन ॥ १—२—३—४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ओंनमः श्रीकृष्णाय ॥

अथ नवमस्कन्धस्य क्रमसन्दर्भः ॥

नवमक्रमसन्दर्भे सन्दर्भाणां समाहृतिः ।
क्रियते यन्निदेशेन स मेऽनन्यगतेर्गतिः ॥

॥ १ ॥

योऽसाविति त्रिकम् ॥ २–३० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

प्रणम्य श्रीगुरुं भूयः श्रीकृष्णं करुणार्णवम् ।
लोकनाथं जगच्चक्षुः श्रीशुकं तमुपाश्रये ॥
गोपरामाजनप्राणप्रेयसेऽतिप्रभुष्णवे ।
तदीयप्रियदास्याय मां मदीयमहं ददे ।
उक्त्वा सद्धर्ममीशानुवर्त्तिनां कथ्यते कथा ॥
नवमे भक्तिविज्ञानवैराग्यस्याभिधित्सया ।
अम्बरीषादिभिरिव भाव्यं भक्तैर्विचक्षणैः ॥
विषयाभिनिविष्टोपि विरक्तः स्याद्ययातिवत् ।
इत्येवमर्थमुक्तास्ते सूर्यसोमान्वयान्विताः ॥
स्वनाम्नैव पुनस्तोऽपि स्वाचारैर्लोकशिक्षकाः ।
अत्र त्रयोदशाध्यायाः सूर्यवंशनिरूपकाः ॥
एकाधिकादशस्युस्ते सोमवंशाभिधायकाः !
तदेवं नवमस्कन्धो राजते त्रिगुणाष्टभिः ॥
अध्यायैर्विविधैश्चर्यकथः कृष्णकथारथः ।
तत्र तु प्रथमेऽध्याये सुद्युम्नो मृगयां गतः ॥
स्त्रीभूत्वाऽथ बुधात्पुत्रं पुरूरवसमाप्तवान् ।

मत्स्यदेवप्रसादात् सत्यव्रतस्य भक्तश्रेष्ठस्य मनुत्वं श्रुत्वा तद्वंश्यानामपि वैष्णवत्वमभिप्रेत्य तत्कथासु जातश्रद्धः पृच्छति-योसाविति चतुर्भिः । अतीतकल्पान्ते अतीतमन्वन्तरान्ते ॥ १—७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

॥ श्रीकृष्णाय नमः ॥

श्रीकृष्णं नियमानन्दं श्रीनिवासादिकान् गुरून् ।
प्रणम्य नवमे स्वल्पः प्रदीपोऽयं विरच्यते ॥
त्रिगुणाष्टभिरध्यायैर्निबद्धे नवमे स्फुटाम् ।
क्रमादीशकथामाह—भगवान्बादरायणिः ॥

तत्र वैवस्वतपुत्राणामुत्पत्ति यस्य वैवस्वतपुत्रस्य चन्द्रवंशप्रवर्त्तकः पुरूरवाः पुत्रोऽभूत्तस्य सुद्युम्नस्य स्त्रीत्वं च निरूप्यते प्रथमाध्याये तत्रादावष्टमस्कन्धोक्तस्य सत्यव्रतस्य राजर्षेर्वैवस्वत मनुभावं गतस्य पुत्राणां पृथक् पृथक् वंशानुक्त्वाऽनुवादपूर्वकं पृच्छति-मन्वन्तराणीति पञ्चभिः ॥ १-६ ॥

भाषा टीका ।

श्रीमतेरामानुजाय नमः ।

श्रीरुक्मिणीकृष्णाय नमः ।

नत्वा श्रीरुक्मिणीकान्तं स्वान्तं विन्यस्य तत्पदे ।
पूर्वाचार्यान्नमस्कृत्य वेदवेदान्तपारगान् ॥ १ ॥
भाषां भागवताचार्यः श्रीमद्भागवतस्य वै ।
नवमस्कन्धभावार्थबोधनीं वितनोति हि ॥ २ ॥

राजोवाच ।

राजा परीक्षित बोले, कि—हे श्रीशुकदेवजी महाराज ! आपने जो सम्पूर्ण मन्वन्तरों की कथा कही सो मैंने श्रवण करी, और अनन्त पराक्रम वाले श्री हरि के जो जो उनमन्वन्तरो में आपने चरित्र कहे सो भी मैंने श्रवण किये ॥ १ ॥

परञ्च जो आपने कहा कि द्रविड देश का स्वामी सत्यव्रत नामक राजऋषि कि जिनने व्यतीत कल्पके अन्त में महापुरुष श्रीहरि की सेवा से ज्ञान प्राप्त किया ॥ २ ॥

ये भूता ये भविष्याश्च भवन्त्यद्यतनाश्च ये ।
तेषां नः पुण्यकीर्तीनां सर्वेषां वद विक्रमान् ॥ ५ ॥

सूत उवाच ।

एवं परीक्षिता राज्ञा सदसि ब्रह्मवादिनाम् ।
पृष्टः प्रोवाच भगवाञ्छुकः परमधर्मवित् ॥ ६ ॥

श्रीशुक उवाच ।

श्रूयतां मानवो वंशः प्राचुर्येण परन्तप ! ।
न शक्यते विस्तरतो वक्तुं वर्षशतैरपि ॥ ७ ॥
परावरेषां भूतानामात्मा यः पुरुषः परः ।
स एवासीदिदं विश्वं कल्पान्तेऽन्यन्न किञ्चन ॥ ८ ॥
तस्य नाभेः समभवत्पद्मकोशो हिरण्मयः ।
तस्मिन् जज्ञे महाराज ! स्वयम्भूश्चतुराननः ॥ ९ ॥
मरीचिर्मनसस्तस्य जज्ञे तस्याऽपि कश्यपः ।
दाक्षायण्यां ततोऽदित्यां विवस्वानभवत्सुतः ॥ १० ॥
ततो मनुः श्राद्धदेवः सञ्ज्ञायामास भारत ! ।
श्रद्धायां जनयामास दश पुत्रान्स आत्मवान् ॥ ११ ॥
इक्ष्वाकुनृगशर्यातिदिष्टधृष्टकरूषकान् ।
नरिष्यन्तं पृषध्रं च नभगं च कविं विभुः ॥ १२ ॥

भाषा टीका ।

वही फिर सूर्य के पुत्र वैवस्वत मनु हुए ऐसा हमने आप से श्रवण किया, और यह भी सुना कि, उनके पुत्र इक्ष्वाकु प्रभृति राजा हुए ॥ ३ ॥

सो अब हे ब्रह्मन् ! हे महाभाग ! उन सबों का पृथक् वंश और वंश के राजाओं के चरित्रों को आप कथन करिये हम लोगों को इस विषय की श्रवण करने की बडी इच्छा है ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अनुक्तं वंशं वक्तुं पूर्वोक्तमेव तावद्वंशं तत्प्रवर्तकं श्रीनारायणमारभ्यानुस्मारयति–परावरेषामिति पञ्चभिः ॥ ८—११ ॥ नाभागं चेति पाठे ऽपि नभग एव नाभागः ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तस्यैव वैवस्वतस्य मनोर्वंशे ये भूता अतीता ये च भविष्या भाविनो ये चाद्यतना वर्त्तमानाश्च भवन्ति तेषां सर्वेषां पुण्या पुण्यावहा कीर्तिर्येषां पूर्वेषां सर्वेषां विक्रमान् वद चरित्राणि कथय पुण्यकीर्तीनामित्यनेन तद्विक्रमाणामश्रोतव्यत्वशङ्का निरस्ता ॥ ५ ॥

एवं राज्ञा पृष्टो भगवान् बादरायणिः वैवस्वतः मनुवंशं तद्वंश्यचरित्राणि च यथावद्वक्तुमुपचक्रम इत्याह सूतः—एवमिति । इत्थं ब्रह्मवादिनामृषीणां सदसि राज्ञा परीक्षिता पृष्टः परमधर्मवित् भागवतगुणवर्णस्योत्कृष्टधर्मत्वाभिज्ञो भगवान् शुकः प्रोवाच ॥ ६ ॥

तदेवाह–श्रूयतामित्यादिना तावद्वैवस्वतमनुवंशमाचिख्यासुस्तद्वंश्यानां तच्चरित्राणां चानन्त्यात्कारस्न्येन वक्तुं श्रोतुञ्चाशक्यत्वात्प्राधान्येन काश्चित्तद्वंशपरम्पराः कथयामीत्यभिप्रयन्नाह--श्रूयतामित्यादिना । हे परन्तप ! मानवः मनोर्वैवस्वतमनोः सम्बन्धी

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वंशः प्राचुर्येण कथयतो मत्तः श्रूयतां प्राचुर्येणेत्यनेन साकल्येन वक्तुं श्रोतुं चाशक्य इत्यभिप्रेतं तदेवाह न शक्यत इति स्फुटार्थः ॥ ७ ॥

मनोर्वाचीनां तद्वंशपरम्परां विवक्षुस्तावत्ततः पूर्वपरम्परामाह—परावरेषामिति चतुर्भिः । इदं परिदृश्यमानं स्थूलचिदचिदात्मकं ब्रह्मादिस्तम्बपर्यन्तं कृत्स्नं जगत् अतीतकल्पान्ते स एवासीत्. कोसौ ? यदात्मकं जगदासीदित्यत्राह—यः परावरेषामुच्चावचानां भूतानामात्मा अन्तः प्रविश्य धारकः परमपुरुषः स्थूलचिदचिच्छरीरकः परमात्मा प्रलयदशायां नामरूपविभागानर्हसूक्ष्मचिदचिच्छरीरकत्वेन कारणतयाऽवस्थितो बभूवेत्यर्थः । अन्यत्स्वसमानं कारणं वस्तु नासीदित्यर्थः "स एवासीदिदं विश्वं कल्पान्ते" इत्यनेन "सदेव सौम्येदमग्र आसीत्" इति श्रुत्यर्थः प्रत्यभिज्ञापितः अन्यन्न किञ्चनेत्यनेन "एकमेवाद्वितीयम्" इत्यस्यार्थः । मनोः वंशस्य पूर्वावधिद्योतनाय पञ्चपुरुषान्तरितत्वेपि साक्षाद्भगवद्वंशप्रसूतत्वख्यापनाय च परावरेषामित्यादिश्लोकत्रयं प्रवृत्तम् ॥ ८ ॥

तस्य प्रलयदशायां सूक्ष्मचिदचिच्छरीरकत्वेनावस्थितस्य कारणभूतस्य "बहुस्यां प्रजायेय" इत्युक्तविधसिसृक्षानन्तरं महदादिपृथिव्यन्ततत्त्वोत्पत्तिद्वारा तैरारब्धे ब्रह्माण्डे गर्भोदकेषु शयानस्यानिरुद्धरूपिणो भगवतो नाभेः हिरण्मयः प्रकाशवद्बहुलः पद्मकोशः त्रिभुवनात्मकः पद्मकोशः समभवदित्यर्थः । हे महाराज ! तस्मिन्नाभिपद्मे चतुर्मुखो ब्रह्मा बभूव ॥ ९ ॥

तस्य चतुर्मुखस्य मनसः मरीचिर्जज्ञे मानस इति पाठे तस्य मरीचिर्मानसः पुत्रो जज्ञे इत्यर्थः । तस्यापि मरीचेः कश्यपः पुत्रः सम्बभूव तस्य कश्यपस्य भार्यायां दक्षदुहितरि अदित्यां विवस्वान् सुतः समभवत् ॥ १० ॥

ततस्तस्य विवस्वतः संज्ञाख्यायां भार्यायां श्राद्धदेवो मनुर्वैवस्वतः समभवत् स च प्रशस्तमनस्को वैवस्वतो मनुः श्रद्धायां भार्यायां दश पुत्रान् जनयामास ॥ ११ ॥
तानाह—इक्ष्वाक्विति । इक्ष्वाकादीन् दशपुत्रान् जनयामासेति पूर्वेणान्वयः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विक्रमान् वंशे जातानां पुरुषाणां चरितानि ॥ ५ ॥

राज्ञाभिषिक्तानां प्रजापालनादिलक्षणः परमो धर्मस्तं वेत्तीति ॥ ६-७ ॥

आत्माप्यन्तर्यामी इदं विश्वं स एवासीत्तदधीनमेवाभूत्न तु स्वतन्त्रं किञ्चन प्रधानादिकमपि "तस्माद्धान्यं न परः किं च नास" इति श्रुतेः ॥ ८ ॥

उदस्तात्तुदभूत् स्वयंभूरित्यस्य विष्णावपि च वृत्तेरित्यत-श्चतुरानन इत्युक्तं "विष्णुः स्वयंभूरण्यभुक् स्वभूर्विश्वपतिः पतिः" इत्यभिधानम् ॥ ९ ॥

मानसो मनोजातः ततः कश्यपात् ॥ १० ॥

ततो विवस्वतो मनोः पुत्रानाह—श्रद्धायामित्यादिना । आत्मवान् वशीकृतमनाः ॥ ११-१२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

कथासौष्ठवार्थं तं च मानवं वंशं सृष्टिमारभ्यैव प्रवृत्तया पूर्वमुक्तयैव कथया सह गुम्फन्नाह—परावरेषामिति पञ्चभिः ॥८-१२॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

प्राचुर्येण प्राधान्येन श्रूयताम् ॥ ७ ॥

परावरेषामुच्चावचानाम् आत्माऽऽश्रयः इदं विश्वमासीत् कारणाभिन्नमासीदित्यर्थः । "सदेव सौम्येदमग्र आसीत्" इति श्रुतेः ॥ ८ ॥

यस्य पुरुषस्य ॥ ९ ॥

तस्य चतुराननस्य मनसः सकाशात् तस्य मरीचेः कश्यपः सुतः ततः कश्यपात् विवस्वान् अभवत् ॥ १० ॥

स श्राद्धदेवः श्रद्धायां भार्यायाम् ॥ ११ ॥ १२ ॥

भाषा टीका ।

इन के वंश में जो हो चुके और जो होवेंगे तथा आज कल जो हैं, उन पुण्यकीर्ति लोगों के सबके चरित्र आप कहिये ॥ ५ ॥

सूत उवाच ।

सूतजी बोले, कि—इस प्रकार ब्रह्मवादि लोगों की सभा में राजा परीक्षित ने जब प्रश्न किया, तब परम धर्म को जानने वाले भगवान् श्रीव्यासनन्दन बोले ॥ ६ ॥

श्रीशुक उवाच ।

श्रीशुकदेवजी बोले, कि—हे परन्तप ! वैवस्वत मनु महाराज के वंश को आप प्राचुर्य से श्रवण करो, और विस्तार से तो यह वंश सैकडों वर्ष में भी वर्णन नहीं होसकता है ॥ ७ ॥

जो पर और अवर भूत प्राणियों का आत्मा और जो परम पुरुष हैं, सृष्टि के आदि में यह देख पडने वाला विश्व वही परमात्मा रहा और कुछ भी नहीं रहा ॥ ८ ॥

उस परमात्मा के नाभि से एक हिरण्मय (सुवर्णका) कमल मुकुल उत्पन्न हुआ, हे महाराज ! उसमें स्वयंभू चतुरानन श्रीब्रह्माजी हुए ॥ ९ ॥

ब्रह्मा के मनसे मरीचि उत्पन्न हुए, उनके कश्यप और कश्यप के दक्ष की पुत्री अदिति से विवस्वान् पुत्र भये ॥ १० ॥

और विवस्वान् के श्राद्धदेव मनु संज्ञा नाम की पुत्री से उत्पन्न हुए उन श्राद्ध देव मनु की श्रद्धा भार्या से दश पुत्र भये ॥ ११ ॥

अप्रजस्य मनोः पूर्वं वसिष्ठो भगवान् किल ।
मित्रावरुणयोरिष्टिं प्रजार्थमकरोत्प्रभुः ॥ १३ ॥
तत्र श्रद्धा मनोः पत्नी होतारं समयाचत ।
दुहित्रर्थमुपागम्य प्रणिपत्य पयोव्रता ॥ १४ ॥
प्रेषितोऽध्वर्युणा होता ध्यायंस्तत्सुसमाहितः ।
हविषि व्यचरत्तेन वषट्कारं गृणन् द्विजः ॥ १५ ॥
होतुस्तद्व्यभिचारेण कन्येला नाम साऽभवत् ।
तां विलोक्य मनुः प्राह नाऽतिहृष्टमना गुरुम् ॥ १६ ॥
भगवन् ! किमिदं जातं ? कर्म वो ब्रह्मवादिनाम् ।
विपर्ययमहो कष्टं मैवं स्याद्ब्रह्मविक्रिया ॥ १७ ॥
यूयं मन्त्रविदो युक्तास्तपसा दग्धकिल्बिषाः ।
कुतः सङ्कल्पवैषम्यमनृतं विबुधेष्विव ॥ १८ ॥
तन्निशम्य वचस्तस्य भगवान्प्रपितामहः ।
होतुर्व्यतिक्रमं ज्ञात्वा बभाषे रविनन्दनम् ॥ १९ ॥
एतत्सङ्कल्पवैषम्यं होतुस्ते व्यभिचारतः ।
तथापि साधयिष्ये ते सुप्रजास्त्वं स्वतेजसा ॥ २० ॥

भाषा टीका।

प्रथम इक्ष्वाकु, नृग, शर्याति, दिष्ट, धृष्ट, करूषक, नरिष्यन्त पृषध्र, नभग, कवि ये दश पुत्र हुए ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

सूर्यपौत्रस्य सुद्युम्नस्य स्त्रीत्वे सति बुधात्पुरूरवःप्रभृति सोमवंशसञ्चारं वक्तुं सप्रस्तावमिलोपाख्यानमाह-अप्रजस्य मनोः पूर्वमित्यादिना यावदध्यायसमाप्ति । पूर्वमिक्ष्वाकुप्रभृतीनामुत्पत्तेः प्राक् ॥ १३ ॥

दुहित्रर्थं मम कन्या यथा भवेत्तथा यजेति होतारं समयाचत पय एव व्रतमाहारो नियतो यस्याः ॥ १४ ॥

अध्वर्युणा होतर्यजेति प्रेषितो होता तेन गृहीते हविषि सति तत्तया प्रार्थितं ध्यायन् व्यचरदयजत् पाठान्तरे तत् प्राध्यायत् वाचा वषट्कारं गृणन् वषडित्युच्चारयन् ॥ १५ ॥ १६ ॥

ब्रह्मविक्रिया मन्त्राऽन्यथात्वम् ॥ १७ ॥ १८ ॥

प्रपितामहो वसिष्ठः ॥ १९–२८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सूर्यपौत्रस्य सुद्युम्नस्य स्त्रीत्वे सति बुधात्पुरूरवःप्रभृतिसोमवंशप्रवृत्तिं वक्तुं सप्रस्तावमिलोपाख्यानमाह-अप्रजस्येति । पूर्वमिक्ष्वाकुप्रभृतीनामुत्पत्तेः प्राक् अपुत्रस्य मनोः प्रजार्थं पुत्रार्थं मित्रावरुणदेवताकामिष्टिं मनोराचार्यो भगवान् वसिष्ठः अकरोत् अयाजयदित्यर्थः ॥ १३ ॥

ततस्तत्र यागे क्रियमाणे सति मनोः पत्नी श्रद्धा पयोव्रता पयः क्षीरमेव व्रतमाहारो नियमो यस्याः सा होतारमुपागम्य होतुः समीपमागत्य प्रणिपत्य नमस्कृत्य च दुहित्रर्थमयाचत कन्या मम यथाभवेत्तथा यजेति प्रार्थितवतीत्यर्थः ॥ १४ ॥

ततोऽध्वर्युणा प्रेषितः होतर्यजेतिप्रेषितो होता सुष्ठु समाहितचित्तः तत्तया प्रार्थितं ध्यायन् वाचा वषट्कारं गृणन् वषडित्युच्चरन् गृहीतेन तेन हविषा अयजदितिशेषः ॥ १५ ॥

ततो होतुस्तद्व्यभिचारेण यजमानसङ्कल्पविपरीतसङ्कल्परूपेण व्यभिचारेण इलेति प्रसिद्धा सा कन्या बभूव या श्रद्धया याचिता सैव कन्या संबभूव न तु मनुना याचितः पुत्र इत्यर्थः। तां सम्भूतां कन्यां विलोक्य नातीव हृष्टं मनो यस्य तादृशः गुरुं वसिष्ठमाह॥१६॥

उक्तिमेवाह--भगवन्निति द्वाभ्याम् । हे भगवन् !ब्रह्मवादिनां वो युष्माकमिदं कर्म युष्माभिरनुष्ठितमिदं कर्म विपरीतं जातं किम्

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका

सङ्कल्पितफलविपरीतफलदं खल्वित्यर्थः। अस्तु को दोषः? इत्यत्राह-अहो कष्टमिति। किं तत्कष्टम्? तत्राह मैवामिति। ब्रह्मणिक्रिया मन्त्रविकारः मन्त्रशक्तिविपर्यासः मैवं स्यात् एवं भवितुं नार्हतीत्यर्थः। मन्त्रशक्तिविपर्यय एव महत्कष्टमित्यर्थः ॥ १७ ॥

ब्रह्मवादिनां व इत्यनेनाभिप्रेतं विवृणोति—यूयमिति । यूयं मन्त्रविदः मन्त्रस्वरूपतद्विनियोगतदर्थविदः युक्ताः समाहितचित्ताः तपसा दग्धं किल्बिषं चिन्तितविपरीतफलदं येषां ते तदेवम्भूतानां युष्माकं कुतः कस्माद्धेतोस्सङ्कल्पवैषम्यं चिन्तित वैषम्यमभूत् तत्र विबुधेष्वनृतमिवेति दृष्टान्तः । यथा विबुधेष्वनृतं भवितुं, नार्हति तथा भवत्सु भवितुमनर्हं सङ्कल्पवैषम्यं कस्माद्धेतोर्बभूवेत्यर्थः ॥ १८ ॥

एवमुक्तस्तमाह वसिष्ठ इत्याह मुनिः—तदेवमुक्तं मनोर्वचो निशम्य श्रुत्वा नोऽस्माकं पितामहः अस्य प्रेत्यादिः प्रपितामहः भगवान्वसिष्ठः होतुर्व्यतिक्रमं सङ्कल्पविपर्यासं ज्ञात्वा रविनन्दनं मनुं बभाषे उवाच ॥ १९ ॥

तदेवाह-एतादिति। होतुर्व्यभिचाराद्विपरीतसङ्कल्परूपाद्धेतोः तवैतत्सङ्कल्पवैषम्यं चिन्तितवैषम्यं यद्यप्यभूत् तथाप्यहं स्वतेजसा स्वतपोबलेन सुप्रजास्त्वं साधयिष्ये कन्याया एव पुंस्त्वं साधयिष्य इत्यर्थः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अप्रजस्य अपुत्रस्य 'इक्ष्वाकुप्रभृतिपुत्रोत्पत्तेः पूर्वं मित्रावरुणयोरिष्टिं मित्रावरुणदेवत्याम् ॥ १३-१४ ॥

सुसमाहितः एकाग्रचित्तः तच्छ्रद्धयोक्तं दध्यौ वषट्कारं मन्त्रविशेषं वा गृणन् स्वकर्माकरोदिति शेषः ॥ १५ ॥

तस्य कर्मणो व्यभिचारेण विपक्षवर्तिना हेतुनाऽहैं वाङ्‌निमित्तत्वादिला " वाणी सरस्वती भाषा वागिडेला प्रकीर्तिता" इति ॥ १६ ॥

इदं जातं किमिति तत्राह—कर्मेति । ब्रह्मवादिनां वः कर्म विपरीतं पुत्रार्थिनः कन्याफलमभूत्तः किमिदमिति कुतूहलयामि अत्रैवम्भूतेऽप्यन्यत्र माभूदित्याह मैवमिति ब्रह्मविदां वः क्रिया मैवम्भूदित्यर्थः ॥ १७ ॥

क्वचित् स्खलनेऽन्यत्रापि नियमो न स्यादित्याशङ्क्य क्वचिदप्यन्यथात्वं न युक्तं युष्माकमित्याह—यूयमिति । "मैत्रावरुणीमिष्टिं कुर्यात्पुत्रकामः" इत्यादिमन्त्रहृदयज्ञाः यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायन्वषट् करिष्यामीति वचनान्मनोयोगयुक्ताः न च दोषादन्यथात्वं मनस इत्याह—तपसेति । यूयमेवम्विधास्तेषु युष्मासु सङ्कल्पवैषम्यं चिन्तितस्यान्यथात्वं कुतो न कुतोपि सम्भाव्यते कुत इति तत्राह अनृतमिति न हि देवेष्वनृतं "तस्मादनृतं न वदेत्" इति श्रुतेः ॥ १८ ॥ १९ ॥

होतुर्व्यभिचारतः ध्यानस्यान्यथात्वलक्षणात् ॥ २०—२२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

पूर्वम् इक्ष्वाकुप्रभृतिपुत्रोत्पत्तेः प्राक् ॥ १३ ॥

दुहित्रर्थं मम कन्या यथा भवेत्तथा यजेति ॥ १४ ॥

अध्वर्य्युणा हे होतः ! यजेति प्रेषितः होता हविषि गृहीते सति तत् राज्ञीप्रार्थितं ध्यायन् व्यचरत् अयजत वषट्कारं गृणन् वषाडित्युच्चारयन् अध्यायत्त्वादिति वाचेति पाठे वाचा वषट् कारं गृणन् तद्राज्ञीप्रार्थितम् अध्यायत् ॥ १५ ॥

इलेति राज्ञैव हर्षेण तत्क्षण एव नामकृतमित्यवसीयते नातीत्यप्रजस्त्वापगमात् सामान्यतो हर्षोत्पत्तेः ॥ १६ ॥

ब्रह्मविक्रिया मन्त्रान्यथात्वम् ॥ १७ ॥ १८ ॥

प्रपितामहो वसिष्ठः ॥ १९—२८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

इक्ष्वाकाद्युत्पत्तेः पूर्वम् मित्रावरुणयोः मित्रावरुणदेवताकामिष्टिमकरोत् ॥ १३ ॥

पयोव्रता पयः क्षीरमेव व्रतं नियताहारो यस्याः सा मम दुहिता यथा भवेत्तथा यजेति दुहित्रर्थं होतारं समयगयाचत ॥१४॥

होतः ! यजेति अध्वर्युणा प्रेषितो होता तेन गृहीते हविषि सति तत् ध्यायन् श्रद्धया प्रार्थितं चिन्तयन् वाचा वषट्कारं गृणन् व्यचरत् अयजत् ॥ १५ ॥

व्यभिचारेण यजमानसङ्कल्पविपरीतध्यानेन ॥ १६ ॥

ब्रह्मणो मन्त्रस्य विक्रिया अन्यथाऽर्थोत्पादकता ॥ १७ ॥१८॥

शुकस्य पितृप्रपितामहत्वेन मनोर्मरीचिभ्रातृत्वेन च प्रपितामहो वसिष्ठः ॥ १९-२५ ॥

भाषा टीका ।

प्रथम में मनु को पुत्र रहित देखकर वशिष्ट भगवान मित्रावरुण का यज्ञ किया ॥ १३ ॥

जब यज्ञ होने लगा उस समय केवल दुग्ध के आहार करके रहने वाली मनु की भार्या श्रद्धा ने पुत्री के निमित्त होता से याचना करी ॥ १४ ॥

होम करने के लिये होता को अध्वर्यु ने जब भेजा, तब होता ने श्रद्धा के बातों को स्मरण करके हविष लेकर वषट्कार उच्चारण करते में पुत्री का ही सङ्कल्प किया ॥ १५ ॥

इस प्रकार होता के व्यभिचार से इला नाम वाली पुत्री उत्पन्न हुई उसको देखकर मनु प्रसन्न नहीं हुये, और अपने गुरु से वचन बोले कि ॥ १६ ॥

हे भगवन् ! आप लोग ब्रह्मवादियों के सङ्कल्प में विपरीतता क्यों हुई, ये बडी कष्ट की बात है, वेद का मन्त्र कभी अन्यथा नहीं होसक्ता है ॥ १७ ॥

तप के प्रभाव से आप लोगों का सब कल्मष दूर गया है, और आप सम्पूर्ण मन्त्रों के जानने वालों में मुख्य हैं, जैसे देवता लोग असत्य बोलें इस प्रकार आप लोगों का सङ्कल्प अन्यथा क्यों हुआ ? ॥ १८ ॥

एवं व्यवसितो राजन् ! भगवान् स महायशाः ।
अस्तौषीदादिपुरुषमिलायाः पुंस्त्वकाम्यया ॥ २१ ॥
तस्मै कामवरं तुष्टो भगवान् हरिरीश्वरः ।
ददाविलाऽभवत्तेन सुद्युम्नः पुरुषर्षभः ॥ २२ ॥
स एकदा महाराज ! विचरन् मृगयां वने ।
वृतः कतिपयामात्यैरश्वमारुह्य सैन्धवम् ॥ २३ ॥
प्रगृह्य रुचिरं चापं शरांश्च परमाद्भुतान् ।
दंशितोऽनुमृगं वीरो जगाम दिशमुत्तराम् ॥ २४ ॥
स कुमारो वनं मेरोरधस्तात्प्रविवेश ह ।
यत्रास्ते भगवान् रुद्रो रममाणः सहोमया ॥ २५ ॥
तस्मिन्प्रविष्ट एवासौ सुद्युम्नः परवीरहा ।
अपश्यत्स्त्रियमात्मानमश्वं च वडवां नृप ! ॥ २६ ॥
तथा तदनुगाः सर्वे आत्मलिङ्गविपर्ययम् ।
दृष्ट्वा विमनसोऽभूवन् वीक्षमाणाः परस्परम् ॥ २७ ॥

राजोवाच ।

कथमेवङ्गुणो देशः केन वा भगवन् ! कृतः ।
प्रश्नमेनं समाचक्ष्व परं कौतूहलं हि नः ॥ २८ ॥

भाषाटीका ।

इन सब बातों को सुनकर हमारे प्रपितामह वसिष्ठ जी होता के व्यभिचार को जानकर सूर्य के पुत्र मनु से बोले ॥ १९ ॥

वसिष्ठजी बोले, कि–यह तुमारे होता की गडबड से सङ्कल्प की विषमता हुई है, तौभी हम अपने तेजसे उस को पुत्र होने का उपाय करेंगे ॥ २० ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं प्रतिज्ञाय भगवान् वसिष्ठः तथैव साधितवानित्याह मुनिः, एवमिति । हे राजन् ! इत्थं व्यवसितः निश्चययुक्तः स महायशाः एवं विपुलकीर्त्तिः भगवान् वसिष्ठः आदिपुरुषं भगवन्तम् इलायाः कन्यायाः पुंस्त्वकाम्यया पुंस्त्वसम्पादनेच्छया अस्तौषीत् ॥ २१ ॥

तत ईश्वरो भगवान् हरिस्तत्कृतेन स्तोत्रेण तुष्टः प्रसन्नस्तस्मै वसिष्ठाय कामं वरमिष्टमिलायाः पुंस्त्वरूपं वरं ददौ ततस्तेन वरेण हेतुना सा इला सुद्युम्नाख्यः पुरुषश्रेष्ठः बभूव ॥ २२ ॥

स वीरः सुद्युम्नः कदाचित् हे महाराज ! वने मृगयां चरन् मृगयां कुर्वन्नित्यर्थः । कतिपयैरमात्यैर्मन्त्रिभिः परिवृतः सैन्धवं सिन्धुदेशोद्भवमश्वमारुह्य रुचिरं सुन्दरं दृढं च चापं धनुस्तथाद्भुतान्निशितान् शरांश्च प्रगृह्य दंशितः कवचितः उत्तरां दिशं प्रत्यनुमृगं प्रतिमृगं जगाम विचचार ॥ २३ ॥ २४ ॥

एवं विचरन् स कुमारः सुद्युम्नो मेरोः पर्वतस्याधस्तात्स्थितं वनं प्रविवेश हेत्याश्चर्ये खेदे च तत्प्रदेशस्य पुनः स्त्रीत्वापत्तिहेतुत्वात् खेदः पराक्रमातिशयादाश्चर्यं च. वनं विशिनष्टि–यत्रेति । यत्र वने भगवान् शर्वो रुद्रः उमया सह रममाण आस्ते तद्वनम्प्रविवेश इलावृतवर्षस्थवनं प्राविवेशेत्यर्थः ॥ २५ ॥

परान् शत्रून् वीरान् हन्तीति तथा असौ सुद्युम्नस्तत्र वने प्रविष्ट एव प्रवेशमात्रेणैवेत्यर्थः । हे नृप ! आत्मानं स्त्रियमश्वं वडवां चापश्यत् ॥ २६ ॥

तदा तस्य सुद्युम्नस्यानुगास्सर्वे आत्मलिङ्गं पुंस्त्वं तद्विपर्ययं स्त्रीत्वमित्यर्थः । तद्दृष्ट्वा परस्परं वीक्षमाणाः विमनस अहो किमेतदस्माकं प्राप्तमिति खिन्नचित्ता बभूवुः ॥ २७ ॥

पञ्चमस्कन्धे यत्प्रविष्टस्य स्त्रीभाव आपद्यते तन्निमित्तं पश्चाद्वक्ष्ये इति प्रतिज्ञातस्य स्त्रीत्वापत्तिनिमित्तोपपादनस्यावसरप्राप्ततामालोक्य तद्विस्तरतो बुभुत्सुः पृच्छति राजा–कथमेवमिति । हे

श्रीशुक उवाच ।

एकदा गिरिशं द्रष्टुमृषयस्तत्र सुव्रताः ।
दिशो वितिमिराभासाः कुर्वन्तः समुपागमन् ॥ २९ ॥
तान्विलोक्याम्बिका देवी विवासा व्रीडिता भृशम् ।
भर्त्तुरङ्कात्समुत्थाय नीवीमाश्वथ पर्यधात् ॥ ३० ॥
ऋषयोऽपि तयोर्वीक्ष्य प्रसङ्गं रममाणयोः ।
निवृत्ताः प्रययुस्तस्मान्नरनारायणाश्रमम् ॥ ३१ ॥
तदिदं भगवानाह प्रियायाः प्रियकाम्यया ।
स्थानं यः प्रविशेदेतत्स वै योषिद्भवेदिति ॥ ३२ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

भगवन्! एवम्विधो देशः स्वस्मिन् प्रवेशमात्रेण स्त्रीत्वापत्तिनिमित्तभूतो देशः कथमेवम्विधं देशं न सम्भावयामीति भावः यदि कथञ्चित्सं-म्भवेत्तर्हि केनैवंविधः कृतः इति प्रश्नप्रकारः एवं मया कृतं प्रश्नं समाचक्ष्व प्रश्नशब्दः उपचाराच्चदुत्तरे वर्त्तते प्रश्नस्योत्तरं वदेत्यर्थः । यद्वा, प्रश्नशब्देन तन्निमित्तमुक्तदेशनिष्ठं स्त्रीत्वापादकत्वं लक्ष्यते तदुपपादयेत्यर्थः ऽतच्छ्रवणेऽस्माकमतीव कौतूहलमुत्साहो वर्त्तते अतः समाचक्ष्वेति भावः ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तेन वरेण हेतुना सैन्धवं सिन्धुदेशजातम् ॥ २३ ॥ २४ ॥
नाम्ना सुकुमारवनम् अधस्तात्स्थितम् ॥ २५ ॥
वडवामश्वस्त्रियम् आत्मनो देहस्य लिङ्गविपर्ययं पुरुष-चिह्नविपरीतं स्त्रीचिह्नम् ॥ २६ ॥ २७ ॥ *
एवङ्गुणः पुरुषस्य स्त्रीत्वापवादकगुणयुक्तः ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

वडवाम् अश्विनीम् ॥ २६ ॥ २७ ॥
यत्र प्रवेशमात्रेण पुंसः स्त्रीत्वापत्तिः एवङ्गुणः स देशः कथम् ॥ २८ ॥

भाषाटीका ।

हे राजन्! भगवान् वसिष्ठ ने इस प्रकार निश्चयकर इला कन्या के पुत्र होने के लिये आदिपुरुष श्रीमन्नारायण की स्तुति करी ॥ २१ ॥

श्रीहरि ने वसिष्ठजी के ऊपर प्रसन्न होकर यथेष्ट वर दिया उस से इला कन्या ही पुरुषों में श्रेष्ठ सुद्युम्न पुत्र होगया ॥ २२ ॥

हे महाराज! एक समय वह सुद्युम्न कितने एक मन्त्रियों के साथ घोडे पर बैठकर शिकार खेलने को वनमें विचरने लगा ॥ २३ ॥

सुन्दर धनुष और अद्भुत-बाणों को हाथ में लेकर कवच पहिन कर वह वीर मृगों के पीछे दौडा हुआ उत्तर दिशा को चलागया ॥ २४ ॥

वह कुमार मेरु पर्वत के नीचे वनमें गया, जहां कि भगवान् श्रीरुद्र उमा देवी के साथ रमण करते हुए विराजते हैं ॥ २५ ॥

हे नृप! पराये वीर को हनन करने वाले उस सुद्युम्न को उस वनमें प्रवेश करते मात्र यह आश्चर्य हुआ कि सुद्युम्न राजकुमार स्त्री होगया और उसका घोडा भी स्त्री होगया और ऐसाही उसने आपको और घोडों को देखा ॥ २६ ॥

ऐसे ही उसके नोकर चाकर सब स्त्री होगये और परस्पर में एक दूसरे को देखकर दुखित हुए ॥ २७ ॥

राजोवाच ।

राजा बोले, कि-हे भगवन्! वह देश ऐसे गुणवाला क्यों रहा? और किसने ऐसा किया, इस प्रश्न को आप कहिये हम लोगों को बडा कौतुक है ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विगतं तिमिरमाभासः प्रकाशश्चान्धस्य यासु तथाभूता दिशः कुर्वन्तः ॥ २९-३० ॥

---

* अत्राध्यायसमाप्तिः क्रियते एतद्रीत्या ॥

तत ऊर्ध्वं वनं तद्वै पुरुषा वर्जयन्ति हि ।
सा चानुचरसंयुक्ता विचचार वनाद्वनम् ॥ ३३ ॥
अथ तामाश्रमाभ्यासे चरन्तीं प्रमदोत्तमाम् ।
स्त्रीभिः परिवृतां वीक्ष्य चकमे भगवान् बुधः ॥ ३४ ॥
सा ऽपि तं चकमे सुभ्रूः सोमराजसुतं पतिम् ।
स तस्यां जनयामास पुरूरवसमात्मजम् ॥ ३५ ॥
एवं स्त्रीत्वमनुप्राप्तः सुद्युम्नो मानवो नृपः ।
सस्मार स्वकुलाचार्यं वसिष्ठमिति शुश्रुम ॥ ३६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रसङ्गं रत्यभिनिवेशं स्त्रीप्रसङ्गदर्शनकलुषितमनसः सन्तस्तत्प्रसङ्गशून्यं नरनारायणाश्रमं ययुः ॥ ३१ ॥ ३२ ॥

प्रासङ्गिकमुक्त्वा प्रस्तुतमनुवर्णयति—अनुचरीसंयुक्तेति च वक्तव्ये भूतपूर्वगत्या पुंस्त्वनिर्देशः ॥ ३३–३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमापृष्टो यथावदुपपादयितुं तत्प्रस्तावमाह मुनिः—एकदेति त्रिभिः । कदाचिदृषयस्तपोनिष्ठाः हरं रुद्रं द्रष्टुं तत्रैवावृतस्थे वने समुपागमन् जग्मुः, कथम्भूताः सन्तः ? भासा स्वदीप्त्या दिशो वितिमिराः कुर्वन्तस्सन्तः विगतं तिमिरम् आ समन्तात् भासः प्रकाशश्च यासु तथाभूताः कुर्वन्त इति वा ॥ २९ ॥

अथ तान् तत्र समुपागतानृषीन्विलोक्याम्बिका देवी विवस्त्रा नग्ना सती अत एव नितरां लज्जिता भर्तुः शर्वस्य अङ्कादाशु समुत्थाय नीवीं नीवीयुक्तं वस्त्रं पर्यधात् धृतवती ॥ ३० ॥

तथा ऋषयोपि रममाणयोस्तयोर्भवभवान्योः प्रसङ्गं रत्यभिनिवेशप्रसङ्गं वीक्ष्यालोच्य तस्माद्वनान्निवृत्तास्तत्प्रसङ्गरहितं नरनारायणाश्रमं जग्मुः ॥ ३१ ॥

तदा भगवान् रुद्रः प्रियाया अम्बिकायाः प्रियं कर्तुमिच्छया एतदाह कथं यः कश्चित्पुमान् एतत्स्थानं प्रविशेत् स योषिद्भवेदिति ॥ ३२ ॥

ततो रुद्रशापानन्तरं तत्स्थानं सर्वे पुरुषा वर्जयन्ति तत्र न प्रविशन्तीत्यर्थः । हीति प्रसिद्धिं द्योतयति एवं तद्देशस्य स्त्रीत्वापादकत्वनिमित्तमभिधायाथ सुद्युम्नस्य स्त्रीत्वापत्त्यनन्तरं वृत्तान्तमाह–साचेति । सा च पूर्वमपि योषित् मध्ये पुंस्त्वप्राप्तापि पुनः स्त्रीत्वमापन्ना योषित् अनुचरसंयुक्ता अनुचरीभिः संयुक्ता अनुचरी संयुक्तेति वक्तव्ये भूतपूर्वगत्या पुंस्त्वनिर्देशः वनाद्वनं वनान्तरात्पुनःपुनर्वनान्तरं विचचार ॥ ३३ ॥

ततः स्वाश्रमसमीपे चरन्तीं तां स्त्रीभिः परिवृतां प्रमदोत्तमामवलोक्य भगवान् बुधः सोमपुत्रः चकमे ॥ ३४ ॥

तथा सा च सुभ्रूः सोमराजसुतम्प्रति चकमे परस्परकामतया मिथुनीबभूवतुः स बुधस्तस्यां योषिति पुरूरवस्संज्ञकमात्मजमुत्पादयामास ॥ ३५ ॥

एवं स्त्रीत्वमापन्नो मनोः पुत्रो नृपः सुद्युम्नः स्वकुलाचार्यं वसिष्ठं सस्मार दध्यौ इति शुश्रुम इत्यनेनोक्तवृत्तान्तस्यासत्यत्वशङ्कां निवारयति संस्मृतो वसिष्ठस्तस्य दशामवस्थान्तराप्तिं दृष्ट्वा कृपया नितरां पीडितः पुनः सुद्युम्नस्य पुंस्त्वमाशासन् इच्छन् अर्दयन्निति पाठान्तरं तदाप्ययमेवार्थः शङ्करमुपाधावत अस्तौषीदित्यर्थः ॥ ३६ ॥ ३७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भाभ्या स्वतेजसा वितिमिराः निरस्तान्धकाराः ॥ २९ ॥

नीवीं वस्त्रं पर्यधाद्वेष्टितं कृतवती ॥ ३० ॥ ३१ ॥

भगवानाहेत्यन्वयः । कथम् ? य एतत्स्थानं प्रविशेत्स योषिद्भवेदिति वा इत्यनेनात्मवर्जमिति सूचयति ॥ ३२ ॥

तद्वै तदेव नान्यत् हि शब्दो हेतौ यतः स्त्रीत्वं स्यादत इति ॥ ३३ ॥ ३४ ॥

स बुधस्तस्यां स्त्रीत्वमापन्नायां सुद्युम्नाख्यायाम् ॥ ३५—३६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ऋषयोऽपीति तत्र लज्जितमनसोऽन्यत्रापि तदाशङ्क्य नितरां तत्प्रसङ्गशून्यं नरनारायणाश्रमं ययुः ॥ ३१–४२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

विगताश्तिमिरस्याभासः प्रत्ययोऽपि यासु ताः ॥ २९—३२ ॥

प्रासङ्गिकमुक्त्वा प्रस्तुतमाह—साचेति । अनुचरी संयुक्तेति वक्तव्ये भूतपूर्वं गत्या पुंस्त्वनिर्देशः ॥ ३३–३६ ॥

स तस्य तां दशां दृष्ट्वा कृपया भृशपीडितः ।
सुद्युम्नस्याशयन्पुंस्त्वमुपाधावत शङ्करम् ॥ ३७ ॥
तुष्टस्तस्मै स भगवानृषये प्रियमावहन् ।
स्वां च वाचमृतां कुर्वन्निदमाह विशाम्पते ! ॥ ३८ ॥
मासं पुमान्स भविता मासं स्त्री तव गोत्रजः ।
इत्थं व्यवस्थया कामं सुद्युम्नोऽवतु मेदिनीम् ॥ ३९ ॥
आचार्याऽनुग्रहात्कामं लब्ध्वा पुंस्त्वं व्यवस्थया ।
पालयामास जगतीं नाऽभ्यनन्दन् स्म तं प्रजाः ॥ ४० ॥
तस्योत्कलो गयो राजन् ! विमलश्च सुतास्त्रयः ।
दक्षिणापथराजानो बभूवुर्धर्मवत्सलाः ॥ ४१ ॥
ततः परिणते काले प्रतिष्ठानपतिः प्रभुः ।
पुरूरवस उत्सृज्य गां पुत्राय गतो वनम् ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां नवमस्कन्धे इलोपाख्याने
प्रथमोऽध्यायः ॥ १ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

गिरिशं शिवम् तत्र देशे द्रष्टुं शोभनानि व्रतानि येषां ते वितिमिराः निवृत्तं तिमिरम् आभासः इतरप्रकाशश्च यासु तथा भूताः कुर्वन्तः सन्तः समुपागमन् जग्मुः ॥ २९—३१ ॥

पूर्वं येऽनुचराः पुमांसः तैः स्त्रीरूपैः संयुक्ता ॥३२—३४॥

श्रीशुकउवाच ।

श्रीशुकदेवजी बोले, कि-एकसमय सनकादिक बडे व्रतधारी ऋषि लोग अपने तेज से दिशाओं में उजेला करते हुए महादेव जी को देखने को वहां चले गये ॥ २९ ॥

वहांपर उमादेवी क्रीडाके समय में अपने भर्त्ता के गोदमें विना वस्त्र के बैठी रहीं ऋषियों को देखकर बहुत लज्जित हुई और वहां से उठकर जल्दी वस्त्र धारण किये ॥ ३० ॥

ऋषिलोग भी उन्हों के रमण का प्रसङ्ग देखकर लौट और वहां से नर नारायण के आश्रम (बद्रीनारायण) को चलगये ॥ ३१ ॥

उस समय पर भगवान् श्रीशङ्करने अपनी प्यारी के प्रिय करने की इच्छासे ऐसा कह दिया कि-जो इस स्थानमें प्रवेश करेगा वह स्त्री होजावेगा ॥ ३२ ॥

उस समय से उस बनको पुरुष लोग वर्जन करते हैं फिर वह स्त्री अनुचरों सहित वन वन में विचरती हुई ॥ ३३ ॥

अब एक समय अपने आश्रम के समीप अन्य स्त्रियों के सहित विचरती हुई उस उत्तम स्त्री को देखकर श्रीमान् बुध ने उसके ऊपर इच्छा चलाई ॥ ३४ ॥

सुन्दर भृकुटी वाली उस स्त्री ने भी चन्द्र के पुत्र बुध की चाहना करी तब उसमें बुध ने पुरूरवा नामक एक पुत्र उत्पन्न किया ॥ ३५ ॥

इस प्रकार मनुवंशी सुद्युम्न राजा स्त्री भाव को प्राप्त होगये फिर कुछ दिन में अपने कुलाचार्य वसिष्ठ जी को याद किया हे राजन् ! ऐसा हमने सुना है ॥ ३६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आशयन्निच्छन् ॥ ३७-३९ ॥

नाऽभ्यनन्दन् स्त्रीत्वे लज्जया मासं मासं निलीयावस्थानात् ॥ ४०-४२ ॥

इतिश्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायां
प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

स भगवान् शङ्करस्तदुपधावनेन तुष्टस्तस्मै वसिष्ठाय प्रीतिमावहन् कुर्वन् स्वां स्वकीयां वाचं "स्थानं यः प्रविशेदेतत्स वै योषिद्भवेत्" इत्युक्तां वाचमृतां सत्यां च कुर्वन् हे विशाम्पते इदं वक्ष्यमाणमाह तव तपसा तपःप्रभावेनाऽयं सुद्युम्नो मासं पुमान् भविष्यति, मद्वाचा तु मासं योषिद्भविष्यति एवं सत्यावयोर्नं तपोवचसोरसत्यतेति भावः ॥ ३८ ॥

इत्येवंविधया व्यवस्थयाऽयं सुद्युम्नः कामं यथेच्छं मेदिनीं पालयतु इति ॥ ३९ ॥

तत एवमाचार्यस्य वसिष्ठस्यानुग्रहात् काममिष्टं पुंस्त्वं व्यवस्थया एकैकमासान्तरितत्वरूपया व्यवस्थया लब्ध्वा जगतीं पालयामास तथापि तं सुद्युम्नं प्रजा नाऽभ्यनन्दन् स्म नाभिनन्दितवन्त्यः खलु, मासम्मासं स्त्रीत्वेन लज्जया संलीयावस्थानादिति भावः ॥ ४० ॥

तस्य राज्ञः सुद्युम्नस्य उत्कलादयस्त्रयः सुता बभूवुः ते च दक्षिणापथराजानः दाक्षिणदेशाधीश्वराः समासान्तविधेरनित्यत्वाद्राजान इति टजभावः धर्मवत्सलाः धर्मानुकूलवात्सल्ययुक्ताश्च बभूवुः ॥ ४१ ॥

ततः काले परिणते सति कालवशाज्जरायां प्राप्तायामित्यर्थः । प्रतिष्ठानपतिः प्रतीतिष्ठत्यस्मिन्निति प्रतिष्ठानं भूमण्डलम्, अधिकरणे ल्युट् तस्याधिपतिः सुद्युम्नः यद्वा प्रतिष्ठानं प्रयागनगरं तस्याधिपतिः प्रभुर्जितेन्द्रियोभूत्वा पुरूरवसे बुधादुत्पन्नाय स्वपुत्राय गां पृथ्वीमुत्सृज्य दत्वा वनङ्गतः तपःकर्तुमिति शेषः ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिकायाम्
प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दशां स्त्रीत्वलक्षणाम् आशयन् कामयन् उपाधावतासेवत ।३७।३८।

मासमिति द्वितीया त्रिंशद्दिनेष्वप्येकस्मिन् दिनेऽप्यनन्यथात्वं सूचयति "कालाध्वनोरत्यन्तसंयोगे (२।३।५।) इति सूत्रात् ॥३९॥

पुंस्त्वलक्षणां कामम् जगतीं राजप्रधानभूमिम् ॥ ४० ॥

दक्षिणापथस्य देशस्य राजानः ॥ ४१ ॥

परिणतः वृद्धः प्रतिष्ठानाख्यपुरपतिः गां भूमिम् ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां
प्रथमोऽध्यायः ॥ १ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इतिश्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

आशयन् इच्छन् ॥ ३७ ॥

प्रियमावहन् प्रीतिं ददानः ॥ ३८ ॥ ३९ ॥

नाऽभ्यनन्दन् स्त्रीत्वे सति मासं निलीयावस्थानात् ॥ ४० ॥

तस्य सुद्युम्नस्य ॥ ४१ ॥

प्रतिष्ठानस्य पतिरिति तत्रैव तस्य राजधानी गामुत्सृज्य पृथ्वीं दत्वा ॥ ४२ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
नवमे प्रथमोध्यायः सङ्गतः सङ्गतः सताम् ॥ १ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आशयन् इच्छन् ॥ ३७–३८ ॥

तव गोत्रजः गोभिर्वेदवाणीभिस्त्रायते इति गोत्रं मित्रावरुणोरिष्टिरूपं कर्म तज्जः तव कर्मज इत्यर्थः ॥ ३९—४० ॥

दक्षिणापथराजानः दक्षिणापथदेशविशेषाधिपाः ॥ ४१ ॥

प्रतिष्ठानं भूमण्डलं तत्पतिः ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
प्रथमाऽध्यायार्थप्रकाशः ॥ १ ॥

भाषा टीका ।

वसिष्ठजी ने अपने यजमान के पुत्र की उस दशा स्त्री होने) को देखकर कृपा से बहुत पीडित हुए और सुद्युम्न के पुरुष होने की इच्छा से अब की बार भोलानाथ श्री शंकर से प्रार्थना करी ।। ३७ ॥

हे राजन् ! वे भगवान् शिवजी वसिष्ठ जी का प्रिय करने के लिये और अपनी वाणी सत्य करने के लिये यों बोले ॥ ३८ ॥

महादेवजी बोले, कि-तुमारे गोत्र में उत्पन्न होने वाला यह सुद्युम्न, एक मास तक पुरुष रहेगा और एक मास स्त्री होकर रहा करेगा बस इस व्यवस्था से सुद्युम्न पृथिवी का पालन करै ॥ ३९ ॥

वसिष्ठ जी के अनुग्रह से इस व्यवस्था से पुरुषपने को प्राप्त होकर वह सुद्युम्न पृथिवी का पालन करता रहा परंच राजा को मास भर स्त्री होना पडता रहा इस कारण से प्रजा को आनन्द नहीं हुआ ॥ ४० ॥

भाषा टीका ।

हे राजन् ! उस सुद्युम्न के उत्कल, गय, और विमल ये तीन पुत्र हुए, वे तीनों दक्षिणापथ के राजा हुए और बड़े धर्मात्मा हुए ॥ ४१ ॥

तब कुछ काल के परिणाम होनेपर परम समर्थ प्रतिष्ठान का पति पुरूरवस के ऊपर पृथिवी को छोडकर वन को चलागया ॥ ४२ ॥

इति श्रीमद्भागवत नवम स्कन्ध में प्रथम अध्याय की, श्रीवृन्दावनस्थ भागवताचार्यकृत भाषाटीका समाप्ता ॥ १ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे प्रथमोऽध्यायः ॥ १ ॥

॥ द्वितीयोऽध्यायः ॥

श्रीशुक उवाच ।

एवं गतेऽथ सुद्युम्ने मनुर्वैवस्वतः सुते ।
पुत्रकामस्तपस्तेपे यमुनायां शतं समाः ॥ १ ॥
ततोऽयजन्मनुर्देवमपत्यार्थं हरिं प्रभुम् ।
इक्ष्वाकुपूर्वजान् पुत्राँल्लेभे स्वसदृशान्दश ॥ २ ॥
पृषध्रस्तु मनोः पुत्रो गोपालो गुरुणा कृतः ।
पालयामास गा यत्तो रात्र्यां वीरासनव्रतः ॥ ३ ॥
एकदा प्राविशद्गोष्ठं शार्दूलो निशि वर्षति ।
शयाना गाव उत्थाय भीतास्ता बभ्रमुर्व्रजे ॥ ४ ॥
एकां जग्राह बलवान्सा चुक्रोश भयातुरा ।
तस्यास्तत्क्रन्दितं श्रुत्वा पृषध्रोऽभिससार ह ॥ ५ ॥
खड्गमादाय तरसा प्रलीनोडुगणे निशि ।
अजानन्नहनद्बभ्रोः शिरः शार्दूलशङ्कया ॥ ६ ॥
व्याघ्रोऽपि वृक्णश्रवणो निस्त्रिंशाग्राहतस्ततः ।
निश्चक्राम भृशं भीतो रक्तं पथि समुत्सृजन् ॥ ७ ॥
मन्यमानो हतं व्याघ्रं पृषध्रः परवीरहा ।
अद्राक्षीत्स्वहतां बभ्रुं व्युष्टायां निशि दुःखितः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्वितीये मनुपुत्राणां द्वावपुत्रौ विरागतः ।
करूषकादिपञ्चानां वंशानाह लघुक्रमात् ॥१॥

वैवस्वतो मनुः श्राद्धदेवः ॥ १ ॥

इक्ष्वाकुः पूर्वजो येषां तान्दश पुत्रान्लेभे ॥ २ ॥

तत्र पृषध्रस्य वंशो नाभवादिति सहेतुकमाह-पृषध्रस्त्वित्या-दिना कविः कनीयानित्यतः प्राक्तनेन ग्रन्थेन, खड्गपाणिः सततस्थितो जागरणं वीरासनं तदेव व्रतं यस्य यत्तोऽवहितः सन् गाः पालयामास ॥ ३ ॥

शार्दूलो व्याघ्रः ॥ ४ ॥ ५ ॥

प्रलीना उडुगणा यस्मिंस्तस्मिन् समये बभ्रोः कपिलायाः गोः ॥ ६ ॥

गां कामतो नज घानेति ख्यापयितुं वृक्णश्रवण इत्याद्युक्तम् ॥ ७ ॥

व्युष्टायां प्रभातायाम् ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं सोमवंशप्रवृत्तिमभिधायाथ सुद्युम्ने वनं प्रविष्टे सति पुनर्मनोः पुत्रार्थं तपश्चर्यां भगवदाराधनं तत इक्ष्वाक्वादिपुत्रलाभं तत्पुत्रपौत्रादिपरम्परा तच्चरित्राणि चाह-एवमिति । इत्थं सुते सुद्युम्ने वनं

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

गतेसत्यथ मनुर्वैवस्वतः पुत्रान् कामयमानः यमुनायां नद्यां तत्तटे शतं समास्तपस्तेपे चकार ॥ १ ॥

ततोऽपत्यार्थे पुत्रार्थं देवं हरिं प्रभुं स्वतन्त्रं भगवन्तमयजत् आराधितवान् तस्य भगवतः प्रसादात्स्वतुल्यानिक्ष्वाकुप्रभृतीन् दश पुत्रान् प्राप इक्ष्वाकादयः पूर्वमेव निर्दिष्टाः ॥ २ ॥

तत्र पृषध्रकव्योस्सन्तत्यभावज्ञापनाय तच्चरित्रं तावदाह—पृषध्रस्त्वित्यादिना करूषान्मानवादित्यतःप्राक्तनेन ग्रन्थेन । मनोर्वैवस्वतस्य पुत्रः पृषध्रस्तु तुशब्दोऽन्येक्ष्वाकादिभ्यः सन्तत्यभावकृतवैलक्षण्यद्योतनार्थः गुरुणा वसिष्ठेन पित्रा वा गोपालः कृतः गाः पालयेति नियुक्तः यत्तः अवहितस्सन् वीरासनमेव व्रतं यस्य तथाभूतो रात्र्यां खड्गपाणिः गाः पालयामास व्याघ्रादिभ्यो ररक्ष ॥ ३ ॥

एवं सत्येकदा निशि रात्र्यां वर्षति सति पर्जन्ये शार्दूलो व्याघ्रः गोष्ठं प्राविशत् तदा तं दृष्ट्वा ताः शयाना गावो भीता उत्थाय व्रजे गोष्ठे बभ्रमुः ॥ ४ ॥

तदा बलवान् शार्दूल एकां गां जग्राह सा गृहीता गौः आतुरा सती चुक्रोश आक्रन्दितवती तस्या गोस्तत्क्रन्दितं निशम्य पृषध्रः समीपमभियाय ॥ ५ ॥

निशि प्रलीना उडुगणा नक्षत्रगणा यस्मिंस्तस्मिन्समये मेघावृतत्वादम्बरस्य नक्षत्रप्रकाशेनापि वर्जिते समयेऽतएवाजानन् शार्दूलशङ्कया बभ्रोः कपिलायाः शिरः खड्गमादाय तरसा बलेन अच्छिनत् चिच्छेद ॥ ६ ॥

तदा निस्त्रिंशः खड्गस्तस्याग्रतः प्रहरणवेगात् समीपस्थो व्याघ्रः छिन्नकर्णोभूत्वा नितरां भीतः पथि रक्तं समुत्सृजन् ततो गोष्ठाद् निष्क्रान्तः ॥ ७ ॥

ततः परवीरहा पृषध्रो व्याघ्रं हतं मन्यमानो निशि व्युष्टायामतीतायां सत्यां प्रभाते स्वेन हतां बभ्रुमद्राक्षीत् ततो नितरां दुःखितो बभूव ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सुद्युम्ने सुने वैवस्वतः श्राद्धदेवो मनुः ॥ १ ॥

इक्ष्वाकुः पूर्वजो ज्येष्ठो येषां ते तथा तान् ॥ २ ॥

मनोः पुत्राणामष्टमः पुत्रो वृषध्रः गाः पालयामास, कीदृशः ? गुरुणा वसिष्ठेन गोपालः कृतः तुशब्देन वृषान् धारयितुं योग्य इति निरुक्त्येति सूचयति, गोरक्षैकनिष्ठया नेत्रे उन्मील्य जाग्रदेव गोसन्निधाने प्रतिष्ठानाद्वीरासनव्रतः ॥ ३ ॥

निशि मेघे वर्षति सति ॥ ४ ॥

सा गौः ॥ ५ ॥

बभ्रोर्गोः शिरोऽहनत् "बभ्रुर्गौः सौरमेयी च माहेयी गोमतल्लिका" इति । गोः शिरश्छेदने को हेतुः? इति तत्राह–निशीति । निश्यपि नक्षत्रादिप्रकाशनेन विवेकज्ञानं सुलभमित्यत्राह–प्रलीनेति । मेघच्छायाच्छादितनक्षत्रादिप्रकाशे च सति ॥ ६ ॥

विवृक्णश्रवणः छिन्नकर्णमूलः निस्त्रिंशस्य खड्गस्याग्रेण हतः प्रहतः ॥ ७ ॥

निशि व्युष्टायां प्रभातायाम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तेनात्यन्तसम्भ्रमत्वादेव सहसा तत्त्वं निर्णेतुं न शक्त इत्याह–व्याघ्रोऽपीति ॥ ७ ॥

तस्य चानुतापो जात इत्याह–मन्यमान इति ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

पृषध्रो गुरुणा त्यक्तोऽप्याप पारं तमस्त्यजन् ।
लघुक्रमान्मनोर्वंशवर्णनं च द्वितीयतः ॥

तत्र पृषध्रस्य वंशो नाऽभूदिति सहेतुकमाह–पृषध्र इत्यादिना, खड्गपाणिः सततस्तिष्ठतो जागरणं वीरासनं तदेव व्रतं यस्य सः यत्तः सावधानः ॥ ३—५ ॥

निशि रात्रौ तत्रापि मेघावृतत्वात् प्रलीने नक्षत्रगणे सति अत एवाजानन् व्याघ्रशङ्कया बभ्रोः कपिलाया गोः ॥ ६ ॥

वृक्णश्रवणः छिन्नकर्णो यतो निस्त्रिंशस्याग्रेण आहतः ॥ ७ ॥

व्युष्टायां प्रभातायां निशि ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मनुपुत्राणामिक्ष्वाकुप्रभृतीनां मध्ये पृषध्रस्य कवेश्चानपत्यत्वस्यैव हरिभजनेन मुक्तिं करूषादीनां पञ्चानां वंशांश्चाह—द्वितीयेनाध्यायेन ॥ १ ॥

इक्ष्वाकुः पूर्वजो येषां तानिति तद्गुणसंविज्ञानबहुव्रीहिः ॥ २ ॥

गुरुणा वसिष्ठेन वीरस्य आसनं गृहीतायुधस्य सावधानतयावस्थानविशेषः तदेव व्रतं यस्य सः ॥ ३ ॥

पर्जन्ये वर्षति सति शार्दूलो व्याघ्रः ॥ ४ ॥ ५ ॥

प्रलीना मेघैराच्छन्ना उडुगणा यस्मिन् तस्मिन् समये अत एवाजानन् बभ्रोः कपिलायाः गोः शिरः अहनत् ॥ ६ ॥

निस्त्रिंशस्य खड्गस्याग्रेण आहतः ईषत्ताडितः अत एव वृक्णश्रवणः छिन्नकर्णस्ततो निश्चक्राम ॥ ७ ॥

व्युष्टायां प्रभातायां स्वहतां बभ्रुम् अद्राक्षीत् ततो दुःखितोऽभूत् ॥ ८ ॥

भाषा टीका ।

श्रीवैदर्भीवासुदेवाभ्यां नमः ।

श्रीशुक उवाच ।

श्रीशुकदेवजी बोले कि–अपने सुत सुद्युम्न के इस प्रकार

तं शशाप कुलाचार्यः कृतागसमकामतः।
न क्षत्रबन्धुः शूद्रस्त्वं कर्मणा भवितासुना ॥ ९ ॥
एवं शप्तस्तु गुरुणा प्रत्यगृह्णात्कृताञ्जलिः।
अधारयद्व्रतं वीर ऊर्ध्वरेता मुनिप्रियम् ॥ १० ॥
वासुदेवे भगवति सर्वात्मनि परेऽमले।
एकान्तित्वं गतो भक्त्या सर्वभूतसुहृत्समः ॥ ११ ॥
विमुक्तसङ्गः शान्तात्मा संयताक्षोऽपरिग्रहः।
यदृच्छयोपपन्नेन कल्पयन्वृत्तिमात्मनः ॥ १२ ॥
आत्मन्यात्मानमाधाय ज्ञानतृप्तः समाहितः।
विचचार महीमेतां जडान्धबधिराकृतिः ॥ १३ ॥
एवं वृत्तो वनं गत्वा दृष्ट्वा दावाग्निमुत्थितम्।
तेनोपयुक्तकरणो ब्रह्म प्राप परं मुनिः ॥ १४ ॥
कविः कनीयान्विषयेषु निःस्पृहो विसृज्य राज्यं सह बन्धुभिर्वनम्।
निवेश्य चित्ते पुरुषं स्वरोचिषं विवेश कैशोरवयाः परं गतः ॥ १५ ॥
करूषान्मानवादासन् कारूषाः क्षत्रजातयः।
उत्तरापथगोप्तारो ब्रह्मण्या धर्मवत्सलाः ॥ १६ ॥

भाषाटीका।

से जानेपर वैवस्वत मनु पुत्र की कामना से यमुनाजी में सौ वर्ष तक तपकरते हुए ॥ १ ॥

तदनंतर मनुजीने सन्तान के अर्थ प्रभु श्रीहरि को भजन किया तब अपने सदृश इक्ष्वाकु से आदि लेकर दश पुत्र हुए ॥ २ ॥

पृषध्र नामक मनु पुत्र को वसिष्ठजी ने गायों की रक्षा में नियुक्त किया रहा वह भी रात्रि में वीरासन के व्रत से जागरूक होकर गौओं का पालन करता रहा ॥ ३ ॥

एक समय रात्रि में जल वर्षता रहा इतने में गोष्ठ में व्याघ्रने प्रवेश किया तबतौ सोती हुई गायें उठ भयभीत होकर उस व्रज (गौओं के वाडे) में इधर उधर भागने लगीं ॥ ४ ॥

फिर उन गायों में से उस बली व्याघ्र ने एक गाय पकडी और वह रम्भाने लगी, तब उसका शब्द सुनकर पृषध्र दौडा ॥ ५ ॥

मेघ से तारे भी लीन होरहे जिस्में ऐसी अन्धेरी रात में हाथ में खड्ग लेकर अनजान में व्याघ्रके धोखे में गौ का शिर हनन करदिया ॥ ६ ॥

उस खड्ग के अग्रभाग से व्याघ्र का भी कान कटगया और वह डर कर मार्ग में रुधिर गिराता हुआ भागा ॥ ७ ॥

शत्रुओं के वीर को मारने वाले पृषध्रने जाना के व्याघ्र मर गया, अपरञ्च प्रातः काल में आप से मरी हुई कपिला गौ को देखकर अति दुःखित हुआ ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

क्षत्रबन्धुरपि त्वं न भविताऽपि तु शूद्रो भवितेति ९–१३ उपयुक्तकरणो दग्धदेहः ॥ १४ ॥
कवेरपि वंशो नाभवदित्याह—कविरिति। बन्धुभिः सहराज्यं विसृज्य ॥ १५ ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

तमकामतः प्रमादात् कृतागसमपि पृषध्रं कुलाचार्यो वसिष्ठः शशाप, शापमेवाह–नेति। त्वं क्षत्रबन्धुरपि न भवितासि किन्तु अमुना पापेन कर्मणा केवलं शूद्रो भवेति ॥ ९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्थं स्वगुरुणा वसिष्ठेन शप्तः पृषध्रः कृताञ्जलिः शापं प्रत्यगृह्णात् प्रतिजग्राह ततो वीरः पृषध्रो जितेन्द्रियोभूत्वा मुनीनां प्रियं व्रतं भगवदुपासनात्मकमधारयत् भगवन्तमुपासांचक्र इत्यर्थः ॥ १० ॥

ततः कतिपयैर्दिनैः सर्वभूतान्तरात्मनि निरस्तनिखिलदोषे परस्मिन् ब्रह्मणि एकान्तित्वं "प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः, ज्ञानी त्वात्मैव मे मतम्"इत्यादिस्थानोक्तानन्यप्रयोजनसाक्षात्कारपर्यन्तभक्त्यात्मकज्ञाननिष्ठत्वं प्राप्तः सर्वभूतसुहृत् समः सुखदुःखयोरिति शेषः ॥ ११ ॥

विमुक्त ऐहिकेषु आमुष्मिकेषु च भोगेषु सङ्गो येन सः शान्तः रागादिभिरकलुषित आत्मा मनो यस्य संयतानि नियमितानि अक्षाणि इन्द्रियाणि येन न विद्यते परिग्रहः देहातिरिक्तदनुबन्धी यस्य सः यदृच्छयोपपन्नेन दैवाल्लब्धेनान्नादिना आत्मनो देहस्य वृत्तिं कल्पयन् धारणां कुर्वन् ॥ १२ ॥

आत्मनि परमात्मनि आत्मानं मन आधाय निवेश्य यद्वा आत्मानं प्रत्यगात्मानमाधाय "ओमित्यात्मानं युञ्जीत"इति श्रुत्युक्तप्रकारेण तच्छेषतया तदायत्तसत्तादिमत्वेन चानुसन्धायेत्यर्थः । ज्ञानतृप्तः निरतिशयानन्दरूपभगवदुपासनात्मकज्ञानेनैव तृप्तः तदन्यविषयानिस्पृहः समाहितः अप्रकम्प्यः भगवद्भक्तियोगनिष्ठः जडान्धीनामाकृतिरिवाकृतिराकारो यस्य सः एतां महीं विचचार ॥ १३ ॥

यावत्प्रारब्धमेवंविधं वृत्तं वृत्तिर्यस्य स तदवसाने कदाचिद्वनं प्रविश्य तत्रोत्थितं दावाग्निं दृष्ट्वा तं प्रविश्य तेन दवाग्निनोपभुक्तानि दग्धानि करणानि करचरणादीनि यस्य तादृशो मुनिः पृषध्रः परं ब्रह्म प्राप प्राप्तवान् ॥ १४ ॥

अथ कवेर्वृत्तमाह—कविरित्येकेन । कनीयानिक्ष्वाकादीनां सर्वेषामवरजः कविर्विषयेषु शब्दादिषु, निस्पृहः अत एव राज्यं बन्धुभिः सह गृहांश्च त्यक्त्वा स्वरोचिषं स्वाभाविकदीप्तियुक्तम्"आदित्यवर्णं तमसः परस्तात्" इति हि श्रुतिः । यद्वा स्वप्रकाशं ज्ञानस्वरूपं पुरुषं परमपुरुषं स्वचित्ते निवेश्य चित्तं तस्मिन् स्थिरीकृत्येत्यर्थः । कैशोरवयस्क एव परां गतिमवाप ॥ १५ ॥

अथ करूषस्य वंशमाह—करूषादिति । कारूषसंज्ञास्त्रयः क्षत्रियाः उत्तरदेशस्य गोप्तारः ब्रह्मण्याः ब्राह्मणेषु साधवः धर्मात्तु कुलवात्सल्ययुक्ताश्चाऽभवन् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अकामतः प्रभुहननेच्छाभावतोऽपि कृतागसं कृतापराधम् अमुना क्रूरकर्मणा शूद्रो भविता न क्षत्रबन्धुरिति शशापेत्यन्वयः ॥ ९ ॥

तुशब्देन गुरावननुसूयावानित्याह——कुतोऽवगतमेतदित्यत उक्तं—प्रत्यगृह्णादिति । भयात्प्रतिग्रहः किं न स्यादित्यत उक्तं कृताञ्जलिरिति मुनिप्रियमूर्ध्वरेतस्त्वम् ॥ १० ॥

किं तन्मुनिप्रियं व्रतम् ? इत्यत आह—वासुदेव इति । एकान्तत्वादिकं व्रतम् ॥ ११ ॥

संयताक्षः नियमितेन्द्रियः यदृच्छया ऽसम्प्रार्थितागतेन ॥ १२ ॥ १३ ॥

तेन दवाग्निना उपयुक्तकरणः स्वीकृतदेहः दग्धदेह इत्यर्थः करणं साधकतमं शरीरेन्द्रिययोरपीति ॥ १४ ॥

उक्तमेव विवृणोति—कविरिति । यदा शापं प्राप तदा विषयेषु निःस्पृहः कविर्ज्ञानी अयं पृषध्रः बन्धुभिस्सह सङ्गं विसृज्य वनं विवेश स्वरोचिषं स्वयंप्रकाशं पुरुषं चित्ते निवेश्य कैशोरवया अल्पवयाः तत्प्रसादेन परङ्गत इत्यन्वयः ॥ १५ ॥

मानवात् मनुपुत्रात्करूषात् कारूषा इत्येवं प्रसिद्धा आसन्नित्यन्वयः । क्षत्रजातय इत्यनेन गोपालत्वादिजात्यन्तरं नाप्ताः किन्तु तज्जातय एव इति सूचयति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ततश्च तस्य स्वल्पप्रायश्चित्तार्हस्यापि पातित्ये गोवधमात्रगुरोः शाप एव कारणमित्याह—तमिति त्रिकम् ॥ ९ ॥

तथापि तस्य सौशील्यमेवानुवृत्तमित्याह—एवमिति ॥ १०—१३ ॥

वासुदेवभक्तत्वाच्छूद्रत्वेपि मुक्तिमाह—एवं वृत्त इति ॥ १४—३६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अकामतो अनिच्छातोपि कृतापराधन्तं शशाप न तु कृपया प्रायश्चित्तमुपदिदेश अतिकोपेन विचारापगमादिति भावः । यतः कुलाचार्यः कुलपौरोहित्यस्य तमोबहुलत्वात् "कथं विगर्ह्यं नु करोम्यधीश्वराः पौरोधसं हृष्यति येन दुर्मतिः" इति विश्वरूपोक्तेः । शापमाह, क्षत्रबन्धुरपि त्वं न भविता अपि तु शूद्र एव ॥ ९ ॥

कृताञ्जलिः सन् शापं महाप्रसादमिव प्रत्यगृह्णादिति गुरुभक्तिलक्षणं न तु त्वमपरामृश्य मह्यं किमिति वृथा शपसि इति प्रत्युवाचेति भावः । तेन परित्यक्तोऽपि गुरौ भक्तिमान् निष्प्रत्यूहं निस्तरतीति प्राकरणिकः सिद्धान्तो द्योतितः मुनिप्रियव्रतं ब्रह्मचर्यम् ॥ १०—१२ ॥

आत्मनि मनसि आत्मानं भगवन्तं ज्ञाने तृप्तः किन्तु भक्त्यवितृप्त इति भावः ॥ १३ ॥

उपयुक्तकरणो दग्धदेहः परं ब्रह्म श्रीकृष्णम् ॥ १४ ॥

कवेरपि वंशो नाभवदित्याह—कविरिति । बन्धुभिस्सहितमेव राज्यं विसृज्य वनं विवेश ॥ १५ ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अकामतः सङ्कल्पतोऽज्ञानात् कृतागसमपि त्वममुना पापेन क्षत्रबन्धुर्न भविता किन्तु शूद्रो भविता भविष्यतीति शशाप ॥ ९ ॥

धृष्टाद्धार्ष्टमभूत्क्षत्रं ब्रह्मभूयं गतं क्षितौ ।
(१)नृगस्य वंशः सुमतिर्भूतज्योतिस्ततो वसुः ॥ १७ ॥
वसोः प्रतीकस्तत्पुत्र ओघवानोघवत्पिता ।
कन्या चोघवती नाम सुदर्शन उवाह ताम् ॥ १८ ॥
चित्रसेनो नरिष्यन्ताद्दक्षस्तस्य सुतोऽभवत् ।
तस्य मीढ्वांस्ततः कूर्च इन्द्रसेनस्तु तत्सुतः ॥ १९ ॥
वीतिहोत्रस्त्विन्द्रसेनात्तस्य सत्यश्रवा अभूत् ।
उरुश्रवाः सुतस्तस्य देवदत्तस्ततोऽभवत् ॥ २० ॥
ततोऽग्निवेश्यो भगवानग्निः स्वयमभूत्सुतः ।
कानीन इति विख्यातो जातूकर्ण्यो महानृषिः ॥ २१ ॥
ततो ब्रह्मकुलं जातमाग्निवेश्यायनं नृप ! ।
नरिष्यन्तान्वयः प्रोक्तो दिष्टवंशमतःशृणु ॥ २२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मोक्षस्य गुरुणा शूद्रतां नीतस्यापि हरिभक्त्या मुक्तिमाह-एवमिति पञ्चभिः ॥ १०—१३ ॥

तेनोऽप्युक्तं मचितं दग्धमित्यर्थः । करणं शरीरं यस्य सः परं ब्रह्म वासुदेवं भगवन्तं प्राप ॥ १४ ॥

बन्धुभिः सह राज्यं विसृज्य स्वरोचिषं स्वप्रकाशं पुरुषं चित्ते निवेश्य वनं विवेश तत्र पुरुषाराधनेन परं पुरुषमेव गतः प्राप्तः ॥ १५ ॥

उत्तरापथगोप्तार उत्तरापथदेशपालकाः ॥ १६ ॥

भाषा टीका ।

अनजान में अपराध होने वाले पृषध्र को कुलाचार्य वशिष्ठजी ने शाप दिया कि-तू क्षत्रियाधम भी नहीं किंतु शूद्र होजा ॥ ९ ॥

गुरूने ऐसा जब शाप दिया तब हाथ जोड़कर ग्रहण किया और फिर वीरने ऊर्ध्वरेता होकर मुनिजनों के प्रिय ब्रह्मचर्यव्रत को धारण किया ॥ १० ॥

वह सर्व भूतों का अतिसुहृद होकर परात्पर अमल सर्वात्मा भगवान् श्रीवासुदेव के विषय में भक्ति करके एकान्तभाव को प्राप्त होगया ॥ ११ ॥

सर्वसङ्गोंका परित्यागकर, शान्तचित्तवाला जितेन्द्रिय होकर सर्व परिग्रहको छोडकर हरि की इच्छासे प्राप्तपदार्थों से अपनी वृत्ति को चलाता हुआ ॥ १२ ॥

परमात्मामें मनको लगा कर ज्ञानसे तृप्त और समाहित होकर जड़ अन्ध बधिर सरीका इस पृथिवीपर विचरता हुआ ॥ १३ ॥

इस प्रकार की वृत्तिवाला पृषध्र एकवार वनमें गया और वहां लगीहुई दवाग्नि को देखकर उसी से देहको दग्धकर वह मननशील ब्रह्मको प्राप्त होगया ॥ १४ ॥

कनिष्ठ भ्राता कवि ने भी विषयों से स्पृहा को हटा कर बन्धुओं सहितराज्य को छोडकर अपने चित्तमे स्वयं ज्योति परम पुरुष को धारण कर किशोर अवस्था हीमें वन में प्रवेश किया और पर ब्रह्म को प्राप्तहो गया ॥ १५ ॥

और मनुजी के करूष पुत्र से कारूष नामक क्षत्रिय जाति वाले, उत्तरा पथके राजा लोग बडे ब्रह्मण्य और धर्मवत्सल हुए ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ब्रह्मभूयं ब्राह्मणत्वं नृगस्य वंशः पुत्रः सुमतिस्ततो भूतज्योतिस्ततो वसुः ॥ १७ ॥

ओघवतः पिता तत्पुत्रोऽप्योघवानेवेत्यर्थः ॥ १८ ॥

तदेवं त्रिभिः श्लोकैः करूषधृष्टनृगाणां वंशा उक्ताः, नरिष्यन्तस्य वंशमाह—चित्रसेन इति सार्द्धैस्त्रिभिः । तत इत्यादेर्यत्राधिक्यं स्यात्तत्रानन्तर्ये तत इत्यादि पदं व्याख्येयम् । यत्र तु न्यूनत्वं तत्र पूर्वस्य परस्य वा ऽनुषङ्गादिभिर्व्याख्येयम् ॥ १९—२० ॥

(१) नभपुत्रोऽभिवलवान् स्वातिमूलोऽभवद्वसुः ॥ इति विज० ॥

नाभागो दिष्टपुत्रोऽन्यः कर्मणा वैश्यतां गतः।
(१)भलन्दनः सुतस्तस्य वत्सप्रीतिर्भलन्दनात् ॥ २३ ॥
वत्सप्रीतेः सुतः प्रांशुस्तत्सुतं प्रमतिं विदुः।
खनित्रः प्रमतेस्तस्माच्चाक्षुषोऽथ विविंशतिः ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

अग्निवेश्य एव कानीन इति जातूकर्ण्य इति च विख्यातः ॥ २१ ॥ २२ ॥

दिष्टस्य पुत्रो नाभागो वक्ष्यमाणनाभागादन्य इति भ्रान्तिव्युदासार्थमनुवादमात्रम् ॥ २३—२५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

अथ धृष्टस्य वंशं तद्वृत्तं चाह–धृष्टादित्यर्द्धेन। धृष्टान्मानवात् धार्ष्टसंज्ञं क्षत्रं क्षत्रजात्याश्रयाणि कानिचिदपत्यानि अभूवन्नित्यर्थः। तच्च क्षत्रं क्षितौ ब्रह्मभूयं गतं ब्रह्मणो भावो ब्रह्मभूयमपहतपाप्मत्वादिगुणाष्टकसम्पत्तिः"ब्राह्मेण जैमिनिरुपन्यासादिभ्यः"(४।४।५) इति हि शारीरकं सूत्रं तद्गतमस्मिन् लोके परब्रह्मोपासनया तद्भावं प्रापेत्यर्थः अथ नृगस्य वंशमाह–नृगस्येति। नृगस्य मानवस्य वंश्यः वंशे भवस्तावत्सुमतिस्ततः सुमतेः भूतज्योतिस्ततश्च वसुः ॥ १७ ॥

वसोः प्रतीकस्तस्य प्रतीकस्य पुत्र ओघवान् ओघवान् पिता यस्य सोऽप्योघवानेव ओघवतः कन्या दुहिता ओघवतीति प्रसिद्धा तामोघवतीं सुदर्शन उवाह उपयेमे ॥ १८ ॥

अथ नरिष्यन्तस्य वंशमाह–चित्रसेन इति। नरिष्यन्तान्मानवाच्च चित्रसेनस्तस्य चित्रसेनस्य ऋक्षसंज्ञः सुतोऽभवत् तस्य ऋक्षस्य मीढ्वान् ततो मीढुषः कूर्चस्तत्सुतः कूर्चस्य सुतः इन्द्रसेनः ॥ १९ ॥

इन्द्रसेनात् वीतिहोत्रोऽभवत् तस्य वीतिहोत्रस्य सुतः सत्यश्रवाः अभवत् तस्य सत्यश्रवसः सुतः उरुश्रवाः ततः उरुश्रवसो देवदत्तस्सुतोऽभवत् ॥ २० ॥

देवदत्तस्य तु भगवानग्निः स्वयमेव पुत्रतां प्राप्तः सच कानीन इति प्रसिद्धः महानृषिरभूत् तस्यैव नामान्तरं जातूकर्ण्य इति अग्निवेश्य इति च ॥ २१ ॥

ततोऽग्निवेश्यजातूकर्ण्यापरनामधेयात् कानीनात् हे नृप! आग्निवेश्यायनमाग्निवेश्यगोत्रम् एतत्कुलमित्येवंविधव्यवहारविषयं ब्राह्मणकुलं जातं वृत्तानुवादपूर्वकं वर्तिष्यमाणकथनं प्रति जानीते, एवं नरिष्यन्त आदिर्येषां तत्पुत्रादीनां ते प्रोक्ताः अथ दिष्टस्य मानवस्य वंशं शृणु कथयतो मत्त इति शेषः ॥ २२ ॥

दिष्टस्य पुत्रो नाभागः स चायं नाभागः कर्मणा कृषिगोरक्षवाणिज्यादिकर्मणा वैश्यतां प्राप्तः, कर्मणा वैश्यतां गत इत्यनेन पूर्वकाले शमदमादिकर्मणैव विप्रत्वादिजात्याश्रयत्वमिति सूचितम्. मनुपौत्रान्नाभागादयमन्यो नाभागस्तस्य वंशश्चतुर्थे अध्याये वक्ष्यते तस्य नाभागस्य सुतो हलन्दनः हलन्दनाद्वत्सप्रीतिः सुतोऽभवत् ॥ २३ ॥

वत्सप्रीतेः सुतः प्रांशुः तत्सुतः प्रांशोः सुतः प्रमितिः हे विभो! प्रमितेः खमित्रः तस्मात्खमित्राच्चाक्षुषः अथ चाक्षुषाद्विविंशतिरभूत् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

धृष्टान्मनुपुत्रात् नाम्ना धार्ष्टं क्षत्रमभूत् तद्वृत्तमाह—ब्रह्मभूयमिति। ब्रह्मत्वं श्रोत्रियत्वं गतमित्यर्थः। नभस्य मनुपुत्रस्य पुत्रः ख्यातिमूलः तस्य पुत्रः नाम्ना वसुरभवत् ॥ १७ ॥

तत्पुत्रः प्रतीकपुत्रः ओघवान् ओघवतस्तस्य सहोदर्योघवती कन्या चाभवत् सुदर्शनो नाम राजा ॥ १८ ॥

नरिष्यन्तान्मनुपुत्राच्चित्रसेननामा सुतोऽभूत्तस्य चित्रसेनस्य दक्षः ॥ १९–२० ॥

अग्नेर्जातूकर्ण्य इति नाम ॥ २१ ॥

ततो जातूकर्ण्याद्ब्रह्मकुलं जातं तदेवाग्निवेश्यायनमिति नामान्तरेण प्रसिद्धं इक्ष्वाकुप्रभृतीनां चतुर्थं दिष्टवंशम् ॥ २२ ॥

अन्यः अन्यजातीयः कथं वाणिज्यादिकर्मणा वैश्यत्वं गतः दिष्टपुत्रो य इति केचित्पठन्ति वक्ष्यमाणादन्य इति वा ॥ २३–२४–२५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

ब्रह्मभूयं ब्राह्मणत्वं वंश्यः पुत्रः नृगस्य वंश्यः पुत्रः सुमतिः ततो भूतज्योतिस्ततो वसुः ॥ १७ ॥

ओघवतः पितेति तत्पुत्रोऽप्योघवानित्यर्थः ॥ १८ ॥ २० ॥

अग्निवेश्य एव कानीन इति जातूकर्ण्य इति च ख्यातः ॥ २१ ॥ २२ ॥

अन्य इति भ्रान्तिवारणार्थं वक्ष्यमाणान्नाभागाद्भिन्न इत्यर्थः ॥ २३ ॥ २६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

ब्रह्मभूयं ब्राह्मणत्वं गतं प्राप्तं वंश्यः पुत्रः सुमतिः ततः सुमतेः भूतज्योतिर्जातस्ततो वसुः ॥ १७ ॥

(१) हलनन्दन इति वीर०। (२) खमित्र इति वीर०।

विविंशतिसुतो(१) रम्भः खनिनेत्रो ऽस्य धार्मिकः ।
करन्धमो महाराज ! तस्यासीदात्मजो नृप ! ॥ २५ ॥
तस्यावीक्षित्सुतो यस्य मरुत्तश्चक्रवर्त्यभूत् ।
संवर्त्तो ऽयाजयद्यं वै महायोग्यङ्गिरः सुतः ॥ २६ ॥
मरुत्तस्य यथा यज्ञो न तथाऽन्यस्य कश्चन ।
सर्वं हिरण्मयं त्वासीद्यत्किञ्चिच्चाऽस्य शोभनम् ॥ २७ ॥
अमाद्यदिन्द्रः सोमेन दक्षिणाभिर्द्विजातयः ।
मरुतः परिवेष्टारो विश्वेदेवाः सभासदः ॥ २८ ॥
मरुत्तस्य दमः पुत्रस्तस्यासीद्राज्यवर्द्धनः ।
सुधृतिस्तत्सुतो जज्ञे सौधृतेयो नरः सुतः ॥ २९ ॥
तत्सुतः केवलस्तस्माद्बन्धुमान्वेगवांस्ततः ।
बन्धुस्तस्याभवद्यस्य तृणबिन्दुर्महीपतिः ॥ ३० ॥
तं भेजेऽलम्बुषा देवी भजनीयगुणालयम् ।
वराप्सरा यतः पुत्राः कन्या चेडविडाऽभवत् ॥ ३१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ओघवत्पिता ओघवतः पुत्रोऽप्योघवान् ॥ १८ ॥

त्रिभिः श्लोकैर्मनुपुत्राणां करूषधृष्टनृगाणां वंशानुक्त्वाऽथ-नरिष्यन्तस्य दिष्टस्य च मनुपुत्रस्य वंशमाह—चित्रसेन इत्यादिना ॥ १९—२० ॥

ततस्तस्य देवदत्तस्य स्वयमग्निर्भगवान् अग्निवेश्यसंज्ञः सुतो ऽभूत् स अग्निवेश्य एव महानृषिः कानीन इति जातूकर्ण्य इति च विख्यातः ॥ २१ २२ ॥

दिष्टपुत्रो नाभागो ऽभूत् स च वक्ष्यमाणान्नाभागादन्यः कर्मणा कृषिवाणिज्यादिना ॥ २३-२५ ॥

भाषाटीका

धृष्टसे धार्ष्ट नामक क्षत्रिय वंश भया जोकि पृथिवी में ब्रह्मभाव को प्राप्त होगया। और नृग का पुत्र सुमति के भूतज्योति उन के वसु हुए ॥ १७ ॥

वसु के प्रतीक उनके ओघवान् और ओघवान् के पुत्र फिर ओघवान् हुए और कन्या ओघवती हुई जिसको सुदर्शन ने व्याही ॥ १८ ॥

अब नरिष्यन्त का वंश कहते हैं, कि-मनु पुत्र नरिष्यन्त के चित्रसेन हुए उनके दक्ष पुत्र हुए उनके मीढ्वान् उनके कूर्च उनके पुत्र इन्द्रसेन हुए ॥ १९ ॥

इन्द्रसेन के वीतिहोत्र हुए उनके सत्यश्रवा उनके उरुश्रवा उनके देवदत्त हुए ॥ २० ॥

तिन देवदत्तसे भगवान् अग्नि आप ही स्वयं अग्निवेश्य नाम से प्रसिद्ध पुत्र हुए, और वही कानीन इस नाम से और जातूकर्ण्य इस नाम से भी विख्यात एक महान् ऋषि हुए ॥ २१ ॥

हे नृप ! तिन से आग्निवेश्यायन नाम से प्रसिद्ध ब्रह्म-वंश हुआ, यह हमने नरिष्यन्त का वंश कहा। अब दिष्ट का वंश सुनो ॥ २२ ॥

दिष्ट के पुत्र नाभाग हुए ये दूसरे नाभाग हैं ये कर्म से वैश्य होगये, उनके पुत्र भलन्दन भये भलन्दन के वत्स-प्रीति भये ॥ २३ ॥

वत्सप्रीति के पुत्र प्रांशु उनके प्रमति उनके चाक्षुष उनके विविंशति हुए। २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आङ्गिरसः सुतो महायोगी संवर्तो यमयाजयत्स मरुत्तः ॥२६॥

अस्य यत्किञ्चित्पात्रादिकमस्ति तत्तु सर्वं हिरण्मयं शोभनमासीत् ॥ २७ ॥

अमाद्यदहृष्यत् ॥ २८-३० ॥

(१) दम्भः । इति वीर०

यस्यामुत्पादयामास विश्रवा धनदं सुतम् ।
प्रादाय विद्यां परमामृषिर्योगेश्वरात्पितुः ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यतो यस्यां तृणबिन्दोः पुत्रा अभवन् ॥ ३१–३२ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

विविंशतेः पुत्रो दम्भः अस्य दम्भस्य पुत्रः खनिनेत्रः स च धार्मिकः तस्य दम्भः तस्य दम्भस्यात्मजः करन्धमाख्यो महाराज आसीत् हे नृप ! ॥ २५ ॥

तस्य करन्धमस्य सुतोऽविक्षित् तत्पुत्रं वदन् तं विशिनष्टि–यस्याविक्षितः पुत्रो मरुत्ताख्यः चक्रवर्त्ती कृत्स्नभूमण्डलरूपं चक्रं यस्य वशे वर्त्तते स चक्रवर्त्ती तादृशो बभूव मरुत्तं विशिंषन् संग्रहेण तद्वृत्तमाह–सम्वर्त्त इति । यं मरुत्तमङ्गिरसः सुतो महायोगी संवर्त्तः अयाजयत् ॥ २६ ॥

मरुत्तस्य यज्ञो यथा यादृशः तथा तादृशः कश्चिदप्यन्यो यज्ञो भुवि न—केनचित्कृत इत्यर्थः । मरुत्तस्य यज्ञमेव विशिनष्टि, यत्किञ्चिद्यज्ञोपकरणादिकं तत्सर्वं तत्कृतयज्ञे हि शोभनं हिरण्मयं सुवर्णमयमेवासीत् ॥ २७ ॥

तथा तस्मिन्यज्ञे इन्द्रः सोमेन रसेनाऽमाद्यत् अहृष्यत् तथा द्विजातयो ब्राह्मणाश्च दक्षिणाभिरमाद्यन् किञ्च तत्र यज्ञे मरुतः परिवेष्टारः भोजनपात्रेष्वन्नादीनां प्रदातारः सभायां सीदन्त्युपविशन्तीति सभासदः सभ्याः विश्वेदेवाः ॥ २८ ॥

मरुत्तस्य पुत्रो दमः तस्य पुत्रो राजवर्द्धनाख्यः समभवत् तस्य राजवर्द्धनस्य सुतः सुधृतिः जज्ञे बभूव तस्य नर इति प्रसिद्धः सुतः तस्यैव नामान्तरं सौधृतेय इति तत्सुतः सौधृतेयसुतः केवलः तस्मात्केवलाद्बिन्दुमान् जज्ञे इत्यनुषङ्गः ततो बिन्दुमतो वेगवान् तस्य वेगवतः बिन्दुः पुत्रोऽभवत् तत्पुत्रं दर्शयन् तं विशिनष्टि, यस्य बिन्दोस्तृणबिन्दुरिति प्रसिद्धो महीपतिः पुत्रो बभूव ॥ २९ ॥ ३० ॥

भजनीयाः समाश्रयणोपयुक्ता गुणा यस्य तं तृणबिन्दुम् अप्सरःश्रेष्ठा देवस्येन्द्रस्य सम्बन्धिनी अलम्बुषा भेजे अन्ववर्त्तत यतः यस्यामलम्बुषायां तृणबिन्दोः पुत्रा अभवन् इलविलाख्या कन्या चाऽभवत् ॥ ३१ ॥

कन्यां विशिंषन् तस्याः सुतमाह–यस्यामिलविलायां विश्रवाः धनदं कुबेरं सुतमुत्पादयामास स धनदस्तृणबिन्दुर्वा विश्रवसो बिन्दोर्वा ऋषेः सकाशात्परमां योगेश्वरात्पितुर्विश्रवसो बिन्दोर्वा ऋषेः सकाशात्परमां विद्यामवाप अन्तर्द्धानविद्यां ब्रह्मविद्यां वावापेत्यर्थः ॥ ३२ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तस्य करन्धमस्य पुत्र अवीक्षित् यस्यावीक्षितो मरुत्तः सुतः मरुत्तं विशिनष्टि–संवर्त इति । कोऽसौ संवर्त्तः ? इति तत्राह–महायोगीति ॥ २६ ॥

संवर्तो नामऋषिः कीदृशं यज्ञमकारयत् ? येन महायोगित्वं सम्भाव्यत इत्यतस्तं यज्ञं विशिनष्टि–मरुत्तस्येति । अनेन मरुत्तस्यापि महायोगित्वं श्रीनारायणानुग्रहपात्रत्वं सूचितम् ॥ २७ ॥

द्विजातयो दक्षिणाभिरमाद्यन् संहृष्टा इत्यन्वयः मरुतो देवाः "ऋभवोऽमराश्च मरुतो वृन्दारकाविनिर्जराः" इत्यभिधानं विश्वेदेवा इति विशेषणाद्वायवो वा. परिवेष्टारः भोक्तॄणामपेक्षितान्धसादिनिक्षेप्तारः सभायां सीदन्त्युपसंविशन्तीति सभासदः प्रत्यक्षं सभायामुपविश्य सर्वं विचारयन्त इत्यर्थः ॥ २८–३० ॥

अलम्बुषानाम वराप्सरास्तं तृणबिन्दुं भेजे ॥ ३१ ॥

कीदृशी इलिविलेति तां विशिनष्टि, यस्यामिति । योगेश्वरो विश्रवा ऋषिश्च इलविलायाः पितुस्तृणबिन्दोः परमां विद्यां प्रदाय तामुद्वाह्य यस्यामिलविलायां धनाधिपं वैश्रवणमुत्पादयामासेत्यन्वयः ॥ ३२—३४ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अस्य यत् किञ्च किञ्चित् पात्राऽदिकमस्ति आसीत् तत् सर्वं हिरण्मयं शोभनमासीत् ॥ २७ ॥

द्विजातयो विप्रा अपि अमाद्यन् अहृष्यन् ॥ २८–३० ॥

यतः यस्यां तृणबिन्दोः पुत्रा विशालाद्याः ॥ ३१ ॥

पितुः सकाशात् विद्यां प्रादाय प्राप्य ॥ ३२ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यं मरुत्तम् ॥ २६ ॥

मरुत्तस्य यथा यज्ञस्तथा तादृशः कश्चन अपि यज्ञः अन्यस्य यजमानस्य नासीत् अस्य यज्ञस्य सम्बन्धि यत्किञ्चिदपि पात्रादिकं तत्तु सर्वं हिरण्मयं शोभनमासीत् ॥ २७ ॥

इन्द्रः सोमेन अमाद्यत् अहृष्यत् द्विजातयो विप्राः दक्षिणाभिः अमाद्यन् परिवेष्टारः भोजनादिदातारः सभासदः सभ्याः ॥ २८ । ३० ॥

तं तृणबिन्दुम् अलम्बुषा भेजे अभजत् यतो यस्यां तृणबिन्दोः पुत्रा विशालादयस्त्रयो वक्ष्यमाणाः अभवन् इडविडा कन्या चाऽभवत् ॥ ३१ ॥

स धनदः ऋषेः विश्रवसः सकाशाद्विद्यामवाप ॥ ३२ ॥

विशालः शून्यबन्धुश्च धूम्रकेतुश्च तत्सुताः।
विशालो वंशकृद्राजा वैशालीं निर्ममे पुरीम् ॥ ३३ ॥
हेमचन्द्रः सुतस्तस्य धूम्राक्षस्तस्य चात्मजः।
तत्पुत्रात्संयमादासीत्कृशाश्वः सहदेवजः ॥ ३४ ॥
कृशाश्वात्सोमदत्तोभूद्योऽश्वमेधैरिडस्पतिम्।
इष्ट्वा पुरुषमापाग्र्यां गतिं योगेश्वराश्रितः ॥ ३५ ॥
सौमदत्तिस्तु सुमतिस्तत्सुतो जनमेजयः।
एते वैशालभूपालास्तृणविन्दोर्यशोधराः ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां
संहितायां वैयासिक्यां नवमस्कन्धे
द्वितीयोऽध्यायः ॥ २ ॥

भाषा टीका।

विविंशति के सुत रम्भ हुए जिनके बड़े धार्मिक खनिनेत्र हुए हे महाराज! उन खनिनेत्र के करन्धम राजा पुत्र हुए ॥ २५ ॥

तिन करन्धम के वीक्षित पुत्र हुए उनके मरुत्त भये जिन को महा योगी अङ्गिर के पुत्र सम्वर्त्त ने यज्ञ कराया ॥ २६ ॥

राजा मरुत्त का जैसा यज्ञ भया ऐसा किसी का नहीं भया, क्योंकि? इनके यज्ञमें जो कुछ पात्रादिक रहे सो सब सुवर्ण के हुए और बड़े शोभा वाले हुए ॥ २७ ॥

उस यज्ञ में इन्द्र सोमपान से मत्त होगये, और द्विजाति लोग दक्षिणों से सन्तुष्ट भये, तथा मरुत देवता, परोसने वाले, विश्वेदेवा, और सभासद, ये सबही हर्ष को प्राप्त हुए ॥ २८ ॥

मरुत्त के पुत्र दम हुए, उनके राज्यवर्द्धन हुए, उनके सुधृति हुए, और सुधृति के पुत्र नरनाम से प्रसिद्ध हुए ॥ २९ ॥

नर के पुत्र केवल, उनके बन्धुमान् उनके वेगमान् उन के बन्धु हुए, जिन बन्धु के तृणविन्दु महीपति उत्पन्न हुए, ॥ ३० ॥

बड़ी कान्ति वाली अलम्बुषा नामक अप्सरा ने पत्नी होकर उन तृणविन्दु का सेवन किया, जिस अलम्बुषा में पुत्र भी हुए, और एक इडविडा नाम की कन्या भी हुई ॥ ३१ ॥

उस इडविडा में विश्रवा ऋषिने अपने पिता योगेश्वर से परम विद्या को ग्रहण कर कुबेर को उत्पन्न किया ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

तानेवाऽऽह—विशाल इति। तस्य तृणविन्दोः सुताः ॥ ३३ ॥

सहदेवजः देवजेन सहितः पाठान्तरे नामान्यत्वमात्रमर्थस्तु स एव ॥ ३४-३५ ॥

वैशालभूपाला विशालस्याऽन्वये जाताः ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
द्वितीयोऽध्यायः ॥ २ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

तृणविन्दोः सुतान्निर्दिशति। विशाल इति। तत्र विशालाख्यो राजा वंशवर्द्धनो वैशालीं पुरीं निर्ममे ॥ ३३ ॥

तस्यविशालस्य सुतो हेमचन्द्रः तस्य हेमचन्द्रस्यात्मजो धूम्राक्षः तत्सुतो धूम्राक्षस्य सुतस्तु सहदेवः सहदेवस्य पुत्रस्तु कृशाश्वः ॥ ३४ ॥

कृशाश्वात्सोमदत्तः पुत्रोऽभवत् तस्य वृत्तमाह—यः सोमदत्तोऽश्वमेधैरिडस्पतिम् इडाहोमाराध्यं परमपुरुषम् इडा पृथिवी तदुपलक्षितजगत्पतिमिति वा पारस्करादित्वात्साधुः आराध्य योगेश्वरैः प्रार्थनीयां गतिमवाप मुक्तोऽभवदित्यर्थः ॥ ३५ ॥

सोमदत्तात्सुमतिः उद्भूत तत्सुतः सुमतिसुतो जनमेजयः य एते उक्ता वैशालभूपाला विशालान्वये जाताः तृणविन्दोः कूटस्थस्य यशोधराः कीर्तिवर्द्धनाः एते वैशालभूपाला इत्यनेन तद्वंशजा अन्येपि अगण्याः सन्तीत्यभिप्रेतम् ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
द्वितीयोऽध्यायः ॥ २ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इडस्पतिम् अन्नपतिम् वाक्पतिं वा ॥ ३५ ॥
वैशालभूपालाः विशालवंशे जाता भूपालाः ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
विजयध्वजतीर्थकृतपदरत्नावल्याम्
द्वितीयोऽध्यायः ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
द्वितीयोऽध्यायः ॥ २ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तस्य तृणविन्दोः सुतः ॥ ३३—३६ ॥
इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
द्वितीयो नवमस्यामूत् सङ्गतः सङ्गतः सताम् ॥ २ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तस्य विशालस्य हेमचन्द्रः सुतः तस्य हेमचन्द्रस्य आत्मजः धूम्राक्षः तत्पुत्रात् धूम्राक्षपुत्रात्संयमात् देवजेन भ्रात्रा सहितः कृशाश्वः आसीत् ॥ ३४ ॥

यः सोमदत्तः इडस्पतिं पुरुषमिष्ट्वा अग्र्यां गतिं मुक्तिमाप ॥ ३५ ॥
वैशालभूपालाः विशालवंशजाः भूमिपाः ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
द्वितीयाऽध्यायार्थप्रकाशः ॥ २ ॥

भाषा टीका ।

हाँ अलम्बुषा में तृणविन्दु के तीन पुत्र हुए विशाल, शून्यवन्धु, और धूमकेतु । इनमें से वंश चलाने वाले वैशाल ने वैशाली पुरी निर्माण करी, ॥ ३३ ॥

उन वैशाल के हेमचन्द्र हुए तिनके, धूम्राक्ष हुए, तिन के पुत्र संयम हुए तिन से कृशाश्व हुए और सहदेवज हुए ॥ ३४ ॥

कृशाश्व से सोमदत्त हुए जोकि-अश्वमेधों से इडस्पति पुरुष का यजन करके, योगेश्वर का आश्रित होकर उत्तम गति को प्राप्त हुआ ॥ ३५ ॥

सोमदत्त के सुमति हुए, तिनके जनमेजय हुए ये तृणविन्दु के यश को धारण करने वाले विशाल वंशी भूपाल हुए ॥ ३६ ॥

इति श्रीमद्भागवत नवमस्कन्ध में द्वितीय अध्याय की
श्रीवृन्दावनस्थ पं० भागवताचार्यकृत
भाषा टीका समाप्त ॥ २ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे द्वितीयोऽध्यायः ॥ २ ॥

॥ तृतीयोऽध्यायः ॥

श्रीशुक उवाच ।

शर्यातिर्मानवो राजा ब्रह्मिष्ठः स बभूव ह ।
यो वा अङ्गिरसां सत्रे द्वितीयमह ऊचिवान् ॥ १ ॥
सुकन्या नाम तस्यासीत्कन्या कमललोचना ।
तया सार्द्धं वनगतो ह्यगमच्च्यवनाश्रमम् ॥ २ ॥
सा सखीभिः परिवृता विचिन्वत्यङ्घ्रिपान्वने ।
वल्मीकरन्ध्रे ददृशे खद्योते इव ज्योतिषी ॥ ३ ॥
ते दैवचोदिता बाला ज्योतिषी कण्टकेन वै ।
अविद्ध्यन्मुग्धभावेन सुस्रावासृक्ततो बहु ॥ ४ ॥
शकृन्मूत्रनिरोधोऽभूत्सैनिकानां च तत्क्षणात् ।
राजर्षिस्तमुपालक्ष्य पुरुषान्विस्मितोऽब्रवीत् ॥ ५ ॥
अप्यभद्रं न युष्माभिर्भार्गवस्य विचेष्टितम् ।
व्यक्तं केनापि नस्तस्य कृतमाश्रमदूषणम् ॥ ६ ॥
सुकन्या प्राह पितरं भीता किञ्चित्कृतं मया ।
द्वे ज्योतिषी अजानन्त्या निर्भिन्ने कण्टकेन वै ॥ ७ ॥
दुहितुस्तद्वचः श्रुत्वा शर्यातिर्जातसाध्वसः ।
मुनिं प्रसादयामास वल्मीकान्तर्हितं शनैः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तृतीये मनुपुत्रस्य शर्यातेः कीर्त्यते ऽन्वयः ॥
यत्र सौकन्यमाख्यानं रैवतं च महाऽद्भुतम् ॥ १ ॥

ब्रह्मिष्ठो वेदार्थतत्त्वज्ञः तदेवाऽऽह-यो वा इति । द्वितीयमहो द्वितीयेऽह्नि क्रियमाणं कर्म ऊचिवानुवाच तस्य वंशम् "उत्तानबर्हिरानर्तः" इत्यादिना वक्ष्यति ॥ १ ॥

आदौ तावत्तत्कन्यावृत्तान्तमाह—सुकन्या नामेत्यादिना ॥ २—३—४—५ ॥

भार्गवस्य च्यवनस्य अभद्रमपराधः ॥ ६—७—८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

दिष्टवंशस्यातिविपुलत्वात्साकल्येन वक्तुमशक्यतामभिप्रेत्याथ शर्यातेर्मानवस्य चरित्रं वंशञ्चाह तृतीयेन—मनोः पुत्रः शर्यातिसंज्ञको राजा ब्रह्मिष्ठः वेदार्थनिष्ठो बभूव तदेवाह, यो वै शर्यातिरङ्गिरसां सत्रे आङ्गिरसकर्त्तृके द्वितीयेऽह्नि क्रियमाणं कर्मोचिवान् श्रौतेऽतीव कुशल इति भावः ॥ १ ॥

तस्य शर्यातेः कमले इव लोचने यस्याः कन्या सुकन्येति प्रसिद्धा संबभूव उत्तानबर्हिरादयः पुत्रा वक्ष्यन्ते तावत्कन्यावृत्तान्तमाह-स कदाचित्तया सह वनङ्गतः तत्र च्यवनस्य ऋषेराश्रममगमत् ॥ २ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

सा कन्या सखीभिः परिवृता वने अङ्घ्रिपान् द्रुमान् विचिन्वन्ती वल्मीकबिले खद्योते इव स्थिते ज्योतिषी ददर्श ॥ ३ ॥

बाला सुकन्या चोदिता सखीभिरिति शेषः। मुग्धभावेन मौग्ध्येन च ते ज्योतिषी कण्टकेनाविध्यद्ताडयत् ततो वल्मीकबिलयोः सकाशात् बहु रुधिरं सुस्राव ॥ ४ ॥

तस्मिन्नेव क्षणे सैनिकानाम् मलमूत्रयोर्निरोधो बभूव तदा तान् निरुद्धशकृन्मूत्रान् सैनिकानालक्ष्य ज्ञात्वा राजर्षिः शर्यातिः विस्मितः स्वपुरुषान् अब्रवीत ॥ ५ ॥

उक्तिमेवाह—अपीति। युष्माभिर्भार्गवस्य च्यवनस्यामद्रमपराधः विचेष्टितमपि अपिशब्दः प्रश्नद्योतकः अपराधः कृतः किमित्यर्थः। नो ऽस्माकं सम्बन्धिना केनापि प्राणिना आश्रमदूषणं व्यक्तं कृतं नूनं कृतमन्यथैवमुपद्रवो न स्यादिति भावः ॥ ६ ॥

एवं शर्यातौ पृच्छति सति भीता सती सुकन्या पितरं प्राह-किञ्चित् मयाऽभद्रं कृतमिति। किं तदभद्रम्? इत्यत आह, द्वे इति। ते वल्मीकरन्ध्रयोर्दृष्टे द्वे ज्योतिषी अजानन्त्या इमे वल्मीकान्तर्हितस्य ऋषेः शरीरैकभूते इत्येवम् अजानन्त्या मया कन्यया कण्टकेन करणेन निर्भिन्ने ॥७॥

इतीदं दुहितुर्वचः श्रुत्वा शर्यातिः जातं साध्वसं भयं यस्य स वल्मीकान्तर्हितं मुनिं च्यवनं शनैः प्रसादयामास स्तोत्रादिभिः प्रसन्नमकरोत् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

ब्रह्मिष्ठः ब्राह्मणनिष्ठः वेदनिष्ठो वा तत्फलमाह—यो वा इति। द्वितीयेऽह्नि यो मन्त्रोऽध्येतव्यः सत्रकल्पोक्तफलसिद्धये तं मन्त्रमध्यगादित्ययमर्थो द्वितीयमहरध्यगादित्युच्यते ॥१॥

तस्य शर्यातेः ॥ २ ॥

विचिन्वन्ती मृगयन्ती वल्मीकरन्ध्रे वल्मीकबिले खद्योते खद्योतरूपे ख एव द्योतत इति खद्योतः ॥ ३ ॥

सा सुकन्या मुग्धभावेन अज्ञानवस्तुस्वरूपतया बालभावत्वेन वा कण्टकेन कण्टकाग्रेण ज्योतिषी ज्योतिराश्रयं द्रव्यं चक्षुषी इति यावत्, असृक् रुधिरं ततः विद्धचक्षुषोः ॥ ४ ॥

सैनिकानां राजसेवकानां निरोधः स्तम्भनम् ॥ ५ ॥

युष्माभिर्भार्गवस्याभद्रममङ्गलं विचेष्टितं किमपि कृतमेव न तत्र संशय इत्याह—व्यक्तमिति। नो मध्ये केनापि पुरुषेण तस्य भार्गवस्याश्रमदूषणं व्यक्तं कृतमत इदं सेनाशकृन्मूत्रस्तम्भनं भार्गवस्य विचेष्टितमिति व्यक्तमभूदिति पुनरावृत्त्या योजनीयम् ॥ ६ ॥

ते द्वे ज्योतिषी तत्त्वमजानन्त्या मया कण्टकेन निर्भिन्ने इत्यन्वयः ॥ ७—८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

॥ १—४ ॥

शकृन्मूत्रस्यैव निरोधोऽभूत्तत्तूपप्लवान्तरमित्यत्र कारणं प्राङ् निजाश्रममालिन्यहानेच्छा या जाता तामनुसृत्यैव कन्येच्छाया मुनिकृतः क्षुद्रोपद्रवविशेष इति ज्ञेयम् ॥ ५—२६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

शर्यातेर्मनुपुत्रस्य सुकन्या च्यवनं पतिम्।
लेभे तृतीये शर्यातिवंश्या श्रीरेवती बलम् ॥

ब्रह्मिष्ठः वेदार्थतत्त्वज्ञः तदेवाह—य इति। द्वितीयमहः द्वितीयेऽह्नि क्रियमाणं कर्म ऊचिवान् तत्र व्यवस्थामुवाच ॥ १-५ ॥

विचेष्टितं कृतं नोऽस्माकं मध्ये केनापि वा न कृतम् ॥ ६—८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

मनुपुत्रस्य शर्यातेर्दुहितुः सुकन्यायाः आख्यानम् उत्तानबर्हिःप्रभृतीन्पुत्रांश्चाह—शर्यातिरिति तृतीयेन। ब्रह्मिष्ठः वेदार्थज्ञस्तत्रापि कर्मकाण्डे ऽतिनिपुण इति सूचयति, यः शर्यातिः अङ्गिरसां सत्रे द्वितीयमहः द्वितीयेऽह्नि क्रियमाणं कर्म ऊचिवान् उवाचेति ॥ १ ॥ २ ॥ ३ ॥

वने अङ्घ्रिपान् विचिन्वन्ति द्रुमान् विलोकयन्तीत्यर्थः ॥४-५॥

भार्गवस्य भृगुपुत्रस्य च्यवनस्य अभद्रम् अपराधः युष्माभिः न विचेष्टितं न कृतम्? नोऽस्माकं मध्ये केनापि तस्याश्रमदूषणं व्यक्तं निश्चितं कृतमेव ॥ ६।७ ॥

जातसाध्वसः उत्पन्नभयः ॥ ८ ॥

भाषा टीका।

श्रीरुक्मिणीरामानुजौ जयतः।

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि—मनुके पुत्र शर्याति राजा वडे वेदके अर्थ को जानने वाले हुए, जिनने आङ्गिरस ब्राह्मणों के यज्ञमें द्वितीय दिवस के करने के कर्म को वतलाया ॥ १ ॥

एक सुकन्या नाम वाली कमल नयनी उनकी कन्या रही उस कन्याको साथ लेकर एक समय वनमें गये वहां भी च्यवन ऋषिके आश्रम में जाते हुए ॥ २ ॥

वह कन्या भी सखियों सहित वनमें नानाप्रकार के वृक्षोंको देखती हुई एक वल्मीक में दो छिद्र देखी और उन दोनों छिद्रों में खद्योत की नाईं दो ज्योती भी देखी ॥३॥

तदभिप्रायमाज्ञाय प्रादाद्दुहितरं मुनेः।
कृच्छ्रान्मुक्तस्तमामन्त्र्य पुरं प्रायात्समाहितः॥ ९॥
सुकन्या च्यवनं प्राप्य पतिं परमकोपनम्।
प्रीणयामास चित्तज्ञा अप्रमत्ताऽनुवृत्तिभिः॥ १०॥
कस्यचित्त्वथ कालस्य नासत्यावाश्रमागतौ।
तौ पूजयित्वा प्रोवाच वयो मे दत्तमीश्वरौ॥ ११॥
ग्रहं ग्रहीष्ये सोमस्य यज्ञे वामप्यसोमपोः।
क्रियतां मे वयो रूपं प्रमदानां यदीप्सितम्॥ १२॥
बाढमित्यूचतुर्विप्रमभिनन्द्य भिषक्तमौ।
निमज्जतां भवानस्मिन् ह्रदे सिद्धविनिर्मिते॥ १३॥
इत्युक्तो जरया ग्रस्तदेहो धमनिसन्ततः।
ह्रदं प्रवेशितोऽश्विभ्यां वलीपलितविप्रियः॥ १४॥
पुरुषास्त्रय उत्तस्थुरपीच्या वनिताप्रियाः।
पद्मस्रजः कुण्डलिनस्तुल्यरूपाः सुवाससः॥ १५॥
तान्निरीक्ष्य वरारोहा सरूपान् सूर्यवर्चसः।
अजानती पतिं साध्वी अश्विनौ शरणं ययौ॥ १६॥

भाषा टीका।

उस राजपुत्री ने दैव की प्रेरणासे भोलापनसे उन दोनों जोतियों को कांटेसे वेध दिया, तब उनमें से बहुत रुधिर बह निकला॥ ४॥

बस तत्काल में सबराजा की सेना वालों के मलमूत्र का निरोध होगया, और पेटफूलने लगे, राजा शर्याति यह चरित्र देखकर बड़ा विस्मित हुआ और पुरुषों से बोला कि-॥ ५॥

तुमलोग यहतो कहो कि—तुमलोगों ने महाराज भार्गव श्रीच्यवन ऋषिजी का कुछ अपराध तो नहीं किया। स्पष्ट कहो कि किसीने उनके आश्रम कामी कोई दूषण तो नहीं किया॥ ६॥

इतने में राजपुत्री सुकन्या पिता से बोली, पिताजी मो अज्ञान से कुछ होगया है॥ ७॥

बस राजा शर्याति पुत्री के वचन सुनकर बड़ा कम्पित होकर वल्मीक के भीतर में स्थित ऐसे च्यवन मुनिको धीरे २ प्रसन्न करने लगे॥ ८॥

———

श्रीधरस्वामिकृतभावार्थदीपिका।

मुग्धेयं मम कन्या चन्तव्यं त्वयेत्युच्यमाने कतिवर्षायस्याः? विवाहः कृतो न वा? इत्यादिवाक्यैस्तदभिप्रायं ज्ञात्वा तस्मै तां दुहितरं प्रादात्॥ ९-१०॥

हे ईश्वरौ! समर्थौ युवां मह्यं वयस्तारुण्यं दत्तं संपादयतम्॥ ११॥

असोमपोः सोमपानरहितयोरपि वां युवयोः सोमस्य ग्रहं सोमपूर्णं पात्रं ग्रहीष्ये दास्यामीति युवां सोमेन यक्ष्य इत्यर्थः। "ऐन्द्रवायवं गृह्णाति" इत्यादिषु द्रव्यदेवतासम्बन्धाऽनुपपत्त्या गृह्णातेर्यागपर्यवसायित्वात्॥ १२॥

बाढमित्यभिनन्द्य भवानस्मिन्निमज्जतामित्यूचतुः॥ १३॥

ह्रदं प्रवेशितः तावपि तमपि वृद्धं गृहीत्वा प्रविष्टावित्यर्थः॥ १४-१५॥

अश्विनौ शरणं ययौ युवां पृथक् स्थित्वा मत्पतिं दर्शयतमिति प्रार्थयामासेत्यर्थः॥ १६-१७-१८-१९॥ २०॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

ततस्तस्य च्यवनस्याभिप्रायं मुग्धेयं कन्या त्वया क्षन्तव्यमित्युक्ते सति कतिवर्षाण्यस्याः? विवाहः कृतो नवा? इत्यादि तद्वाक्यैस्तदभिप्रायं ज्ञात्वा दुहितरं मुनेश्च्यवनस्य प्रादात् ततः कृच्छ्रात् भविष्यद्दुहितृविश्लेषनिमित्तात् क्लेशान्मुक्तः "अर्थो हि कन्या परकीय एव" इत्यादिन्यायानुसन्धानेन मुक्तः तं च्यवनमामन्त्र्य पृष्ट्वा सानुगः पुरीं ययौ ॥ ९ ॥

ततः सुकन्या परमाधिकं कुप्यतीति परमकोपनस्तं नन्धादित्वात्कर्त्तरि ल्युः च्यवनं पतिं प्राप्य तदभिप्रायज्ञा सावधानचित्ता सती अनुवृत्तिभिः प्रीणयामास प्रीतमकरोत् ॥ १० ॥

अथ ततः कस्यचित्कालस्य कस्मिंश्चित्काले नासत्यावश्विनौ स्वाश्रमं प्रति गतौ सम्यक्पूजयित्वा च्यवनः प्राह, तदेवाह—वय इत्यादिना बाढमित्यतः प्राक्तनेन ग्रन्थेन। हे ईश्वरौ! युवां मे जरया ग्रस्ताय मह्यं वयस्तारुण्यं दत्तं यच्छतं "डुदाञ् दाने" इत्यस्य लोण्मध्यमपुरुषद्विवचनं यच्छादेशस्तु ण्यत एव तद्विधौ दाणितिणितो निर्देशात् ॥ ११ ॥

तव वयःप्रदानेनावयोः कस्त्वत्कृत उपकारः? इत्याशङ्कां निराकुर्वन्नाह-ग्रहमिति। यज्ञे असोमपोः सोमपानरहितयोरनेन "अश्विनौ वै देवानामसोमपावास्ताम्" इतिश्रुत्यर्थं उक्तः। वां युवयोः सोमस्य ग्रहं ग्रहीष्ये सोमपूर्णं पात्रं दास्यामि युवां सोमेन यक्ष्यामीत्यर्थः। ऐन्द्रवायव्यग्रहानगृह्णाति"इत्यादिषु द्रव्यदेवतासम्बन्धानुपपत्त्या गृहतेर्योगपर्यवसायित्वात् अतो मम वयस्तारुण्यं स्त्रीणां यदीप्सितं तादृशं रूपं सौन्दर्यञ्च क्रियतां युवाभ्यां सम्पाद्यताम् ॥ १२ ॥

इत्थं तद्वच आकर्ण्य स्ववर्यावश्विनौ अभिनन्द्य विप्रं च्यवनं बाढमित्यूचतुः अङ्गीकृत्योचतुरित्यर्थः। उक्तिमेवाह-निमज्जतामिति। सिद्धैर्विनिर्मितेऽस्मिन् ह्रदे भवान् निमज्जतां निमग्नो भवतु ॥ १३ ॥

इतीत्थमुक्तश्च्यवनो जरया ग्रस्तदेहः अत एव धमनीसन्ततः धमनीभिर्नाडीभिर्देहोपरि दृश्यमानाभिः व्याप्तः वलिभिः पलितेन च उपलक्ष्यमाणो देहो यस्य सः अश्विभ्यां ह्रदे प्रवेशितः तावपि तमतिवृद्धं गृहीत्वा प्रविष्टावित्यर्थः ॥ १४ ॥

ततस्ततो ह्रदात् त्रयः पुरुषाः अपीच्याः कमनीयाः प्रमदानां स्त्रीणां प्रियाः पद्मानां स्रक् येषां कुण्डलानि येषां सन्तीति तथा शोभनानि वासांसि येषां ते समानरूपाः परस्परमविभजनीयरूपाः उत्तस्थुः ॥ १५ ॥

सूर्यस्येव वर्चो येषां तान् समानरूपान् उत्थितान् त्रीन् पुरुषानवलोक्य तेषां मध्ये स्वपतिमजानती सुकन्या साध्वी हेतुगर्भमिदं पतिव्रतात्वादित्यर्थः। अश्विनौ शरणं ययौ युवां पृथक्स्थित्वा मम पतिं दर्शयतमिति प्रार्थयामासेत्यर्थः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तस्य मुनेः सुकन्या दानलक्षणमभिप्रायं ज्ञात्वा कृच्छ्रान्मुक्तः सुकन्यामुनिभ्यामिति शेषः ॥ ९ ॥

परमकोपनम् अत्यन्तकोपशीलं भोजनसमयमन्तरेणान्यसमयं वृथा नभुञ्जतीत्यभिप्रायेण चित्तज्ञा अप्रमत्तेति सन्ध्यमाव इति ज्ञायते ॥ १० ॥

कस्यचित्कालस्य समागमे दत्तं युवामिति शेषः ॥ ११ ॥

तव वयोदानेनावयोः किं फलमिति तत्राह—ग्रहमिति। ग्रहमाहुतिविशेषभागमसोमपोः सोमपानशून्ययोरपि ॥ १२ ॥

भिषक्तमौ वैद्यश्रेष्ठौ ॥ १३ ॥

धमनीभिः सिराभिर्व्याप्तो देह इति शेषः स्वयमश्विनौ च ॥ १४ ॥

अपीच्याः षोडशवर्षप्रायाः ॥ १५ ॥

वरारोहा योषित् सरूपान् योग्यरूपान् ॥ १६—१७-१८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी

मुग्धेयं मम कन्या क्षम्यतामित्युच्यमाने, कीदृशी ते कन्या! तस्या विवाहोऽभून्नवा? इति वक्तुस्तस्याभिप्रायं ज्ञात्वा तस्मै मुनये दुहितरं प्रादात् ॥ ९ ॥ १० ॥

कस्यचित् कस्मिंश्चित् प्रोवाच च्यवनः हे ईश्वरौ! यौवनदाने समर्थौ ॥ ११ ॥

सोमस्य ग्रहं सोमपूर्णपात्रं ग्रहीष्ये युवां सोमेन यक्ष्ये इत्यर्थः ॥ १२ ॥ १३ ॥

अश्विभ्यां प्रवेशित इति तमतिवृद्धं गृहीत्वा तावपि प्रविष्टावित्यर्थः ॥ १४ ॥

अपीच्या अतिसुन्दराः ॥ १५ ॥

अस्मासु मध्ये स्वपतिं परिचित्य गृहाणेति तैरुक्ते युष्मासु मध्ये यावश्विनौ तौ मां कृपयतां मत्पतिं ज्ञापयतामित्यश्विनौ शरणं ययौ ॥ १६-१९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तस्य मुनेरभिप्रायं पाणिग्रहणेच्छामाज्ञाय ज्ञात्वा तस्मै तां दुहितरं प्रादात् ॥ ९—१० ॥

आश्रमागतौ आश्रमप्राप्तौ तौ पूजयित्वा वयो मे इत्यादि प्रोवाच हे ईश्वरौ! स्वैद्यौ मे मह्यं वयस्तारुण्यं दत्तं सम्पादयतम् ॥ ११ ॥

असोमपोः "अश्विनौ वै देवानामसोमपौ" इति श्रुतेः। सोमपानरहितयोरपि वां युवयोः सोमस्य ग्रहं सोमपूर्णपात्रं गृहीष्ये युवां सोमेन यक्ष्य इत्यर्थः। "ऐन्द्रवायवं गृह्णाति"इत्यादिषु द्रव्यदेवतासम्बन्धानुपपत्त्या गृह्णातेर्योगपर्यवसायित्वात् तस्मात्स्त्रीणां यदीप्सितं वयस्तारुण्यं रूपं च मे युवाभ्यां क्रियतां सम्पाद्यताम् ॥ १२ ॥

बाढमित्यङ्गीकारेण विप्रमभिनन्द्य आनन्दितं कृत्वा भवानस्मिन् ह्रदे मज्जतामित्यूचतुः ॥ १३ ॥

दर्शयित्वा पतिं तस्यै पातिव्रत्येन तोषितौ ।
ऋषिमामन्त्र्य ययतुर्विमानेन त्रिविष्टपम् ॥ १७ ॥
यक्ष्यमाणोऽथ शर्यातिश्च्यवनस्याश्रमं गतः ।
ददर्श दुहितुः पार्श्वे पुरुषं सूर्यवर्चसम् ॥ १८ ॥
राजा दुहितरं प्राह कृतपादाभिवन्दनाम् ।
आशिषश्चाऽप्रयुञ्जानो नातिप्रीतमना इव ॥ १९ ॥
चिकीर्षितं ते किमिदं पतिस्त्वया प्रलम्भितो लोकनमस्कृतो मुनिः ।
यत्त्वं जराग्रस्तमसत्यसम्मतं विहाय जारं भजसे ऽमुमध्वगम् ॥ २० ॥
कथं (१) मतिस्ते ऽवगता ऽन्यथा सतां (२) कुलप्रसूते ! कुलदूषणं त्विदम् ।
बिभर्षि जारं यदपत्रपा कुलं पितुश्च भर्तुश्च नयस्यधस्तमः ॥ २१ ॥
एवं ब्रुवाणं पितरं स्मयमाना शुचिस्मिता ।
उवाच तात ! जामाता तवैष भृगुनन्दनः ॥ २२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

धमनिसन्ततः धमनीभिः सर्वतो व्याप्तः वलीभिः पलितेन चोपलक्ष्यमाणो विग्रहो देहो यस्य सः अश्विभ्यां ह्रदं प्रवेशित इत्यनेन तावपि तर्मातिवृद्धं गृहीत्वा ह्रदे प्रविष्टाविति सूच्यते ॥ १४ ॥

अत एव ह्रदात् त्रयः पुरुषाः अपीच्याः कमनीयाः उत्तस्थुः ॥ १५ ॥

स्वपतिज्ञानार्थमश्विनौ शरणं ययौ ॥ १६-१९ ॥

———

भाषा टीका ।

तब मुनिका उसी पुत्री के लिये अभिप्राय देखकर राजाने पुत्री को मुनीके लिये समर्पण करदी और बडे भारी दुःखसे छूटकर मुनिसे आज्ञा मागकर अपने पुरको सावधानहो कर गये ॥ ९ ॥

राज पुत्री सुकन्या भी परम क्रोधी च्यवन मुनि रूप पति को प्राप्तहोकर, बडे सावधान होकर चित्तके जानने वाली नाना प्रकार के अनुवर्त्तन करने से मुनिको प्रसन्न करती हुई ॥ १० ॥

कितने एक समयके बीते पर कभी अपने आश्रममें स्वर्ग के वैद्य अश्विनी कुमार आये ऋषिनेभी उनकी पूजा करी और बोले, कि-आपदोनों समर्थ हो हमको युवा अवस्था दीजिये ॥११॥

और बोले, कि—यदि हमारे रूप और वयस् को ऐसा करदो कि—जैसा प्रमदाजन (स्त्री लोग) चाहती हैं। तौ यज्ञ में जो तुमको सोमका भाग नही मिलता है उस्को हम दिलावेंगे ॥ १२ ॥

दोनों वैद्यों ने इनके वचन को सुनकर और "आप बहुत अच्छा कहते हैं" इस प्रकार ऋषिके वचन का अभिनन्दन कर दोनों वैद्य ऋषिसेबोले, कि—आप इस सिद्ध निर्मित तटाक में गोता लगाओ ॥ १३ ॥

इतना कहकर दोनों अश्विनीकुमारों ने जरा ग्रस्त और नसों से व्याप्त देहवाले, तथा त्वचा की सलवटें और सफेत केश अत एव निरूप उस ऋषिका तटाक में प्रवेश किया और साथमें आपभी प्रविष्ट हुए, ॥ १४ ॥

तदनन्तर उस कुण्डसे बडे सुन्दर स्वरूप वाले, स्त्रीजनों के प्रिय कमलों की माला पहिने कुण्डलधारणकिये तुल्यरूप और सुन्दर वस्त्रवाले तीन पुरुष निकले ॥ १५ ॥

श्रेष्ठ आरोह (जघन) वाली राजपुत्री ने कुण्डसे निकले हुए सूर्य सदृश कान्ती वाले, तीनो पुरुषों को समान देख कर अपने पति को न पहचान कर विचारी साध्वी अश्विनीकुमारों के शरण हुई अर्थात् हाथ जोड कर बोली, कि-हे वैद्यो आप तीनों में मेरे पति कौन हैं सो कृपा करके आप दोनों अलग कर दीजिये ॥ १६ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रलम्भितो वञ्चितः हे असति ! असम्मतमनभीष्टम् ॥ २०॥

(१) मतिस्तेऽवगता इति विज० । (२) मार्गन्त्विदं अत्कुलदूषणम् ।

शशंस पित्रे तत्सर्वं वयोरूपाभिलम्भनम् ।
विस्मितः परमप्रीतस्तनयां परिषस्वजे ॥ २३ ॥
सोमेन याजयन्वीरं ग्रहं सोमस्य चाग्रहीत् ।
असोमपोरप्यश्विनोश्च्यवनः स्वेन तेजसा ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हे सतां कुलप्रसूते ! तव मतिरन्यथा तद्विपर्ययेण कथमवगताऽवसन्नाऽध्यवसितेति वा तदेवाऽऽह—कुलदूषणं त्विदमित्यादि ॥ २१-२२-२३-२४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततोऽश्विनौ तत्पातिव्रत्येन तोषितौ तस्यै सुकन्यायै पतिं दर्शयित्वा ऋषिमापृच्छ्य तेन स्तूयमानौ त्रिविष्टपं दिवं ययतुः ॥१७॥

अथ ततः कदाचित् यक्ष्यमाणो यागं करिष्यमाणः शर्यातिः च्यवनस्य जामातुराश्रमं गतः तत्र दुहितुः पार्श्वे सूर्यवर्चसं पुरुषं ददर्श ॥ १८ ॥

तदा कृतं पादयोरभिवन्दनं यया तां दुहितरं राजा शर्यातिः प्राह, कथम्भूतः ? आशिषः अकुर्वन्नेव नातिप्रीतं मनो यस्य तादृशः तदवस्थितः ॥ १९ ॥

उक्तिमेवाह—चिकीर्षितमित्यादिना । ते त्वया किमिदं चिकीर्षितं किमिदं कृतमित्यर्थः । सत्यर्थस्त्वविवक्षितः न किं चिद्व्यक्तव्यं मया कृतमित्यत आह—लोकनमस्कृतो मुनिश्च्यवनस्तव पतिस्त्वया प्रलम्भितः वञ्चितः इदमेवाकृत्यं कृतमितिभावः । प्रलोभनं कथं ज्ञातमित्यत्राह—हे असति ! या त्वं जराग्रस्तमतएवासम्मतमनभीष्टं पतिं विहाय कञ्चिदमुं पार्श्ववर्तिनमध्वगं पान्थं जारं भजसे असौ न तव भर्ता जराग्रस्तस्यैव त्वद्भर्तुर्मया दृष्टत्वादिति भावः ॥ २० ॥

हे सतां कुलप्रसूते ! ते तव मतिरन्यथा तद्विपर्ययेण कथमवगता अवसन्ना अध्यवसितेति वा तदेवाह, कुलदूषणं त्विदमित्यादि । अपत्रपा निर्लज्जा सती जारं बिभर्षि अनुवर्तसे इति इदं कुलदूषणं कृतम् किञ्च पितुः पत्युः भर्तुश्च कुलमधस्तमो नयासि अधस्तनंतमः प्रायं नरकं नयसि ॥ २१ ॥

इत्येवं ब्रुवाणं पितरं शुचिस्मिता सुकन्या स्मयमाना सत्युवाच-उक्तिमेवाह-हे तात ! एषः मत्पार्श्ववर्त्ती तव जामाता भृगुनन्दनश्च्यवन एव ॥ २२ ॥

कथं तर्हि तेन प्रवयस्केन एवं विधवयोरूपादिकं प्राप्तमिति पृच्छते पित्रे तद्वयोरूपादि प्राप्त्यादिकं सर्वं शशंस कथयामास ततो विस्मितः शर्यातिर्नितरां प्रीतस्तनयां परिषस्वजे ॥ २३ ॥

ततश्च्यवनो वीरं शर्यातिं सोमेन द्रव्येणायाजयत् सोमयागं कारितवानित्यर्थः । तस्मिन्यागे च्यवनः स्वतेजसा स्वतपो बलेन सोमपानरहितयोरप्यश्विनोः सोमस्य ग्रहमग्रहीत्सोमग्रहेणाश्विनौ राजा याजयामासेत्यर्थः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हे असति, दुर्वृत्ते ! जरया ग्रस्तत्वादसम्मतम् अध्वगं पान्थम् ॥२०॥

अंव पुत्रिके ! इयं मतिरन्यथा गता अन्यथोक्तं विवृणोति असतामिति असतां मार्गं गतेत्यर्थः । इदं त्वत्कर्म मत्कुलदूषणं त्वेव किं तत्कर्मेति तत्राह—बिभर्षीति । निर्लज्जाभूत्वा जारं जरयत्युभयकुलमित्युपपत्तिं बिभर्षि यस्तस्मात् तदेव स्पष्टयति, कुलमिति । नयसि प्रापयसि ॥ २१-२३ ॥

सोमेन हविषा असोमपोः सोमपानरहितयोः ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

प्रलम्भितो वञ्चितः यत् त्वं जराग्रस्तं पतिं विहाय असत्यसम्मतम् अमुं जारं भजसे ॥ २० ॥

हे सतां कुलप्रसूते ! कथं तव मतिरन्यथा भूता सती अवगता अधः पतिता अपत्रपा अतिनिर्लज्जा तमो नरकम् ॥ २१ ॥

स्मयेन साध्वीत्वगर्वेण मानश्चिरसमुन्नतिर्यस्याः सा॥२२-२३॥

सोमेन सोमसञ्ज्ञकेन यज्ञेन वीरं शर्यातिम् ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

त्वया पतिः प्रलम्भितो वञ्चितः यत् यतस्त्वं जराग्रस्तं तं विहाय असम्मतम् अयुक्तं यथा भवति तथा जारं भजसे अनुवर्तसे हे असति ! इदं ते किञ्चिकीर्षितं भवति कर्तुमिष्टं भवति नैवेत्यर्थः ॥ २० ॥

हे सतां कुलप्रसूते ! ते मतिः अन्यथा असत्कुलप्रसूताया इव कथमवगता अध्यवसिता यतः अपत्रपा निर्लज्जा सती जारं बिभर्षि इदं कुलदूषणं जातम् किञ्च पितुर्भर्तुश्च कुलमधस्तमो नरकं नयसि ॥ २१ ॥ २२ ॥ २३ ॥

वीरं शर्यातिं सोमेन अयाजयत् सोमयागं तेन कारितवान् तस्मिन् यागे असोमपोरप्यश्विनोः सोमस्य ग्रहं सोमपूर्णं पात्रञ्च अग्रहीत् ॥ २४ ॥

हन्तुं तमाददे वज्रं सद्योमन्युरमर्षितः ।
स वज्रं स्तम्भयामास भुजमिन्द्रस्य भार्गवः ॥ २५ ॥
अन्वजानंस्ततः सर्वे ग्रहं सोमस्य चाश्विनोः ।
भिषजाविति यत्पूर्वं सोमाहुत्या बहिष्कृतौ ॥ २६ ॥
उत्तानबर्हिरानर्त्तो भूरिषेण इति त्रयः ।
शर्यातेरभवन् पुत्रा आनर्त्ताद्रेवतोऽभवत् ॥ २७ ॥
सोऽन्तःसमुद्रे नगरीं विनिर्माय कुशस्थलीम् ।
आस्थितोऽभुङ्क्त विषयानानर्त्तादीनरिन्दम ! ॥ २८ ॥
तस्य पुत्रशतं जज्ञे ककुद्मिज्येष्ठमुत्तमम् ।
ककुद्मी रेवतीं कन्यां स्वामादाय विभुं गतः ॥ २९ ॥
कन्यावरं परिप्रष्टुं ब्रह्मलोकमपावृतम् ।
आवर्तमाने गान्धर्वे स्थितोऽलब्धक्षणः क्षणम् ॥ ३० ॥
तदन्त आद्यमानम्य स्वाभिप्रायं न्यवेदयत् ।
तच्छ्रुत्वा भगवान् ब्रह्मा प्रहस्य तमुवाच ह ॥ ३१ ॥
अहो राजन्निरुद्धास्ते कालेन हृदि ये कृताः ।
तत्पुत्रपौत्रनप्तॄणां गोत्राणि च न शृण्महे ॥ ३२ ॥

भाषाटीका ।

तब तौ सुकन्या के पतिव्रत पने से सन्तुष्ट होकर पति को बतलाकर दोनों स्वर्ग के वैद्य ऋषि से आज्ञालेकर विमान पर बैठ स्वर्ग को गये ॥ १७ ॥

फिर एक समय राजा शर्याति, यज्ञ करने की इच्छा करके च्यवन ऋषि के आश्रम को गये, और वहां अपनी पुत्री के समीप एक सूर्य समान कान्ति वाले पुरुष को देखते हुए ॥ १८ ॥

पुत्रीने भी पिता को देखकर समीप आकर चरणों में दण्डवत् करी परञ्च राज ने तौ दूसरे पुरुष की शङ्का करके पुत्री को आशीर्वाद भी नहीं दिया और न मनसे प्रसन्न होकर बोले, ॥ १९ ॥

राजा शर्याति बोले, कि-यह तूने क्या किया? जोकि लोकनमस्कृत च्यवन सदृश पति को तूँने ठगा। हे दुष्टे! जरा ग्रस्त होने से उनको तूने अपने इष्ट नहीं समुझे तबही तौ इस रस्ता चलते जार पुरुष की सेवा करती है ॥ २० ॥

हे सत्कुल में उत्पन्न होने वाली! तेरी मति कैसी अन्यथा फिर गई। अरी यह तो बड़ा कुलका दूषण है जोकि-जार पुरुष को तूने स्वीकार किया है और इसी से तू पिता और भर्त्ता के कुल को नरक में गिरावेगी ॥ २१ ॥

पिताजी तौ इस प्रकार कहते ही रहे पर सुन्दर स्मित वाली वह सुकन्या हंसती २ पिताजी से बोली, कि-हे पिता जी! यही तो आप के जामाता भृगुनन्दन (च्यवन) हैं ॥ २२ ॥

सुकन्या ने पिता से इतना कह कर जैसे अपने पति को सुन्दर रूप और नवीन अवस्था प्राप्त हुई सो सब समाचार सुनाय, पिताभी सुन कर बड़े विस्मय को प्राप्त हुए और पुत्री पर परम प्रसन्न होकर उस्का आलिङ्गन करते हुए ॥ २३ ॥

बस फिर च्यवन ऋषि ने राजा को यज्ञ करवाया और उस यज्ञ में सोमके भाग को नहीं पानेवाले ऐसे अश्विनी कुमारों को अपने तेजसे सोमका भाग ग्रहण करवाया ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सद्यस्तत्क्षणमेव मन्युर्यस्य स इन्द्रः ॥ २५-२६-२७ ॥

विषयान्देशानानर्त्तादीनभुङ्क्ताऽपालयत् ॥ २८ ॥

ककुद्मी ज्येष्ठो यस्मिंस्तत् विभुं ब्रह्माणम् ॥ २९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

न लब्धः क्षणो ऽवसरो येन ॥ ३० ॥
आद्यं ब्रह्माणम् ॥ ३१ ॥
ते त्वया हृदये ये कृतास्ते सर्वे कालेन निरुद्धाः संहृताः ॥३२॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तं सोमेनाश्विनौ यजन्तं शर्यातिं हन्तुममर्षितः क्रुद्धः शतमन्युरिन्द्रो वज्रमाददे तथा भार्गवश्च्यवनः सवज्रं वज्रेण सहितमिन्द्रस्य भुजं स्तम्भयामास प्रतिबबन्ध ॥ २५ ॥

यावश्विनौ भिषजाविति बुद्ध्या पूर्वं सोमाहुत्यां बहिष्कृतौ सर्वैर्यष्टृभिस्तयोरश्विनोः सोमस्य ग्रहं ततःप्रभृति सर्वे अन्वजानन् अनुज्ञातवन्तः ॥ २६ ॥

एवं शर्यातेः कन्याया वृत्तान्तमभिधायाथ पुत्रपौत्रादिपरम्परां तद्वृत्तान्तञ्चाह—उत्तानबर्हिरित्यादिना । उत्तानबर्हिरादयः त्रयः शर्यातेः पुत्राः संबभूवुः तत्रानर्ताद्रैवतः संबभूव ॥ २७ ॥

स च समुद्रमध्ये कुशस्थलीसंज्ञां नगरीं निर्माय तस्या एवाधुना द्वारवतीति व्यवहारः तस्यामधिवसन् आनर्तादीन् विषयान् देशान् अभुंक्त पालयामास अरिन्दमः विरोधिनो निरस्याभुङ्क्तेत्यर्थः ॥ २८ ॥

कुकुद्मीति प्रसिद्धो ज्येष्ठो यस्य तत्पुत्राणां शतं तस्य रैवतस्य समभूव एका कन्या च जज्ञे इत्यर्थतो द्रष्टव्यं स रैवतो रेवत्याख्यां स्वां कन्यामादाय पुत्र्याः वरं भर्तारं परिप्रष्टुं दिवं ययौ किमिन्द्रलोकं गतः ? नेत्याह, ब्रह्मलोकमपावृतं स्वस्य गतिप्रतिबन्धकरहितं सत्यलोकं ययावित्यर्थः ॥ २९ ॥

तत्र ब्रह्मणः सन्निधौ गान्धर्वे गाने आवर्त्तमाने समन्तात्प्रवर्त्तमाने सति अलब्धः न प्राप्तः प्रश्नावसरो येन स रैवतः क्षणमात्रं तूष्णीं स्थितः तदन्ते गानावसाने आद्यं ब्रह्माणमानम्य स्वाभिप्रायं कोवाऽस्याः पतिरित्येवं रूपं न्यवेदयत् व्यजिज्ञिपत तद्रैवतस्य वचः श्रुत्वा प्रहस्य तं रैवतं ब्रह्मोवाच ॥ ३० ॥ ३१ ॥

तदेवाह—अहो इत्यादिना इत्यादिष्ट इत्यतः प्राक्तनेन ग्रन्थेन । अहो इति प्रश्नानुपपत्तिकृतविस्मयद्योतकः आगमनवेलायां त्वया ये जनाः हृदि कृताः हृदये कृताः दृष्टाः मनसा चिन्तिताश्च ते सर्वे कालेन चिरं निरुद्धाः उपसंहृताः तदुपसंहरानन्तरमपि महान्कालो व्यतीत इत्यर्थः । तेषां त्वया हृदि कृतानां ये पुत्रादयस्तेषां गोत्राणि वंशाश्चाधुना न श्रूयमहे मम क्षणमात्रकालेन तत्र महान्कालो व्यतीतः इति भावः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तं च्यवनं सद्यो मन्युस्तदानीं जातक्रोधः सवज्रं भुजम ॥२५॥

अन्वजानन् अनुज्ञातवन्तः पूर्वं सोमग्रहाभावः कथं स्यात् ? इति तत्राह, भिषजाविति ॥ २६-२७ ॥

कुशस्थलीं द्वारवतीम् ॥ २८ ॥

विभुं ब्रह्माणम् ॥ २९ ॥

अपावृतं प्रकाशितं गान्धर्वे गाने अलब्धक्षणाः अलब्धावसरः ॥ ३० ॥

तदन्ते गीतावसाने ॥ ३१ ॥

ये हृदि कृतास्ते पुरुषः कालेन निरुद्धाः मृताः, न केवलं त एव न सन्ति तत्पुत्रादयोऽपि न सन्तीत्याह—तत्पुत्रेति । न श्रूयमहे न शृणुमः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

आवर्त्तत्यत्र क्षणमिति तस्य पश्चादेव तस्य तत्र गमनात् ॥ ३०— ३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सद्योमन्युरविचारात्तत्क्षणजातकोपः ॥ २५—२८ ॥

विभुं ब्रह्माणम् ॥ २९ ॥

अपावृतं रजस्तमोगुणावरणशून्यं न लब्धः क्षणोऽवसरो येन सः ॥ ३० ॥

तदन्ते गान्धर्वसमाप्तौ आद्यं ब्रह्माणम् हृदि ये कृताः जामात्रर्थं मनसि विचारिताः निरुद्धाः संहृताः ॥ ३१—३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सद्योमन्युः सद्यस्तत्क्षणमेव मन्युर्यस्य सः तं च्यवनं हन्तुं वज्रमाददे ॥ २५-२७ ॥

स रेवतः अन्तःसमुद्रेः समुद्रमध्ये नगरीं निर्माय तस्याम् आस्थितः आनर्तादीन् विषयान् देशान् अभुङ्क्त पालयामास ॥२८॥

ककुद्मीज्येष्ठो यस्मिन् तत्पुत्राणां शतं जज्ञे ककुद्मी तु रेवतीं कन्यमादाय विपुलगुणां ब्रह्माणं गतः ॥ २९ ॥

प्रयोजनमाह—कन्यावरमिति । अपावृतं तादृशानां प्रवेशे प्रतिबन्धरहितम् ब्रह्मलोकं सत्यलोकं गत इत्यनुषङ्गः । न लब्धः क्षणः प्रश्नावसरो येन सः क्षणं तूष्णीं स्थितः ॥ ३० ॥

तदन्ते गान्धर्वावसाने आद्यं ब्रह्माणम् ॥ ३१ ॥

के अहो राजन् ये त्वया हृदि कृतास्ते सर्वे कालेन निरुद्धा उपसंहृताः ॥ ३२ ॥

भाषाटीका ।

इस बात को देखकर तत्काल में इन्द्रने क्रोधित होकर उनके मारने को वज्र लिया, भृगुनन्दन च्यवन मुनि ने भी इन्द्र के वज्र को भुजा सहित स्तम्भन करदिया ॥ २५ ॥

तब तो अश्विनी कुमारों को वैद्य होने के कारण जो सोमाहुती से बहिष्कृत किये रहे, सो सब लोग उनके भाग देने को अनुज्ञा देते हुए ॥ २६ ॥

*(मुहूर्तं शृण्वतोऽश्राव्यं प्रतियातस्य तेऽनघ ।)
कालोऽभियातस्त्रिणवचतुर्युगविकल्पितः ।
तद्गच्छ देवदेवांशो बलदेवो महाबलः ॥ ३३ ॥
कन्यारत्नमिदं राजन्नररत्नाय देहि भो ।
भुवो भारावताराय भगवान् भूतभावनः ॥ ३४ ॥
अवतीर्णो निजांशेन पुण्यश्रवणकीर्तनः ।
इत्यादिष्टोऽभिवन्द्याजं नृपः स्वपुरमागतः ॥ ३५ ॥
त्यक्तं पुण्यजनत्रासाद्भ्रातृभिर्दिक्ष्ववस्थितैः ।
सुतां दत्वाऽनवद्याङ्गीं बलाय बलशालिने ॥
बदर्याख्यं गतो राजा तप्तुं नारायणाश्रमम् ॥ ३६॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां नवमस्कन्धे
तृतीयोऽध्यायः ॥ ३ ॥

भाषा टीका।

उत्तानवर्हि आनर्त्त और भूरिषेण ये तीन पुत्र शर्याति के हुए, और आनर्त्त से रेवत हुए ॥ २७ ॥

हे अरिन्दम ! उस आनर्त्त ने समुद्र के भीतर एक कुशस्थली (द्वारका) नगरी का निर्माण कराकर उस में स्थित होकर आनर्त्त देशों को भोगा ॥ २८ ॥

उन राजा आनर्त्त के सौ पुत्र हुए, उन सबों में ज्येष्ठ होने के कारण ककुद्मी बडे रहे, जब ककुद्मी राजा के कन्या हुई तब अपनी कन्या रेवती को लेकर ब्रह्मलोक चलेगये ॥ २९ ॥

क्यों गये कहे तौ-ब्रह्माजी से अपनी कन्या के वरको पूछने के लिये गये पर उस अपावृत ब्रह्म लोकमें ब्रह्माजी की सभा में कोई गन्धर्व गान कररहाथा तब अवकाश न मिलने पर राजा क्षण भर वहां बैठ गये ॥ ३० ॥

उस गान के अन्त में ब्रह्माजी को नमस्कार कर राजा ने अपना अभिप्राय निवेदन किया उस बात को सुनकर ब्रह्माजी भी हंस कर राजा से बोलते भये ॥ ३१ ॥

ब्रह्माजी बोले, कि-अहो राजन् ! आपने अपने हृदय में जिन को देने का विचार किया रहा उन सबों का कालने संहार कर दिया सो उनही का नहीं उनके पुत्र पौत्र नाती पानातियों के गोत्र भी सुनने में नहीं आते हैं ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्रिणवसप्तविंशतिचतुर्युगानि तैर्विकल्पितो विभक्तः यो देवदेवस्यांशोऽस्ति तस्मै नररत्नाय देहि ॥ ३३ ॥

तदेवाऽऽह भुव इति ॥ ३४—३५ ॥

पुण्यजनत्रासाद्यक्षभयात्पूर्वमेव चिरं पुरं तद्भ्रातृभिस्त्यक्तम् ॥३६॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
तृतीयोऽध्यायः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्र कीयान्कालो व्यतीत इत्यत्राह-काल इति चतुर्युगविकल्पितः चतुर्युगभेदभिन्नकालस्त्रिनवः व्यतीयात् चतुर्युगानि सप्तविंशति वारमावृत्तानीत्यर्थः । तर्ह्यधुना कस्मै देयेत्यत आह-तदिति । तत्तस्मात्त्वया दृष्टानां जनानामधुना अभावादिदानीं देवदेवस्य विष्णोः योंऽशोऽनन्तो महाबलः स एव बलदेवः बलरामरूपेण यदुष्ववतीर्णो वर्त्तते ॥ ३३ ॥

तस्मै नरदेवायेदं कन्यारत्नं हे राजन् ! देहि, ननु, भगवतो निवासशय्यासनादिसर्वविधशेषतैकरसोऽनन्तः तां विहाय कस्माद्यदुष्ववतीर्ण इत्याशङ्कायां भगवानपि भुवो भारापहरणाय तेन सहावतीर्ण इत्याह-भुव इति । भगवान् षाड्गुण्यपूर्णो

* श्लोकार्द्धोऽयमधिकः पठ्यते विज०

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

नारायणोऽपि भुवो भारापहराय प्रयोजनाय स्वांशेन स्वापृथक्सिद्धविशेषणभूतज्ञानबलैश्वर्यवीर्यतेजोगुणजातेन ज्ञानादिगुणजातमजहदेवेत्यर्थः । अवतीर्णः नन्वेवंविधस्य सङ्कल्पमात्रेणापि भूभारापनोदनसंभवात्किमवतारेण ? इतिशङ्कां निराकुर्वन् विशिनष्टि भूतभावनः पुण्यश्रवणकीर्त्तन इति च भूतानि साधुभूतानि भावयति त्रायत इति भूतभावनः साधुपरित्राणायावतीर्ण इति भावः।पुण्ये श्रवणकीर्त्तने यस्य सः तथा चेप्सितं शृण्वतां कीर्त्तयतां च पुण्यसम्पादनेनानन्तस्थिरफलरूपब्रह्मानन्दसाम्राज्यप्रदानार्थश्चावतीर्ण इत्यर्थः । इत्थमादिष्टो नियुक्तो नृपो रैवतोऽजं ब्रह्माणं प्रणम्य स्वपुरं कुशस्थलीं ययौ ॥ ३४ ॥ ३५ ॥

पुण्यजनत्रासात् यत्त्वभयात् हेतोः दिक्षववस्थितैस्तत्रस्तत्रावस्थितैर्भ्रातृभिः पूर्वमेव त्यक्तां स्वां कन्यां रेवतीमनवद्याङ्गीं शोभनाङ्गीं बलशालिने बलरामाय दत्वा हे राजन् ! रैवतस्तपस्तप्तुं तदा बदर्याख्यं नरनारायणाश्रमं ययौ ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्वीरराघवाचार्य्यकृत भागवतचन्द्रचन्द्रिकायाम्
तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रतियातस्यागतस्य ते तवाश्राव्यं नरस्य श्रोतुमयोग्यं गानं मुहूर्तं मत्वा शृण्वतः कालो यातः अतिक्रान्त इत्यन्वयः! कियानिति तत्राह, त्रिनवेति।त्रिनवभिः चतुर्युगैः विशिष्टत्वेन कल्पितः सप्तविंशतिचतुर्युगभेदभिन्न इत्यर्थः । तर्हि किं करोमि कन्या चावश्यं दातव्याऽत इमां कस्मै दास्यामीति तत्राह तदिति ॥ ३३-३४ ॥

पुण्यजनत्रासाद्राक्षसभयाद्दिक्ष्ववस्थितैर्भ्रातृभिस्त्यक्तं स्वपुरं निजपुरीमागतः ॥ ३५ ॥

ककुद्मीत्वनवद्याङ्गीं शोभनावयवां सुतां बाहुशालिने बलाय दत्वा तपस्तप्तुं बदर्याख्यं नारायणाश्रमं ययावित्यन्वयः ॥३६॥

इति श्रीमद्भागवे महापुराणे नवमस्कन्धे
श्रीमद्विजध्वजतीर्थकृतपदरत्नावल्याम्
तृतीयोऽध्यायः ॥ ३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

त्रिणवसप्तविंशतिचतुर्युगानि तैर्विशेषतः कल्पितो गणितः ॥ ३३—३५ ॥

त्यक्तमित्यादिप्राक्तनवृत्तान्तः ॥ ३६ ॥

इतिसारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
तृतीयो नवमस्यायं सङ्गतः सङ्गतः सताम् ॥ ३॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

त्रिनवचतुर्युगैः सप्तविंशतिचतुर्युगैर्विकल्पितो विभक्तः ॥३३॥३४॥

निजांशेन बलदेवेन सह अवतीर्णः ॥ ३५ ॥

पुण्यजना यक्षास्तत्त्रासात् ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमच्छुकदेवकृतसिन्द्धान्तप्रदीपे
तृतीयोऽध्यायप्रकाशः ॥ ३ ॥

भाषा टीका ।

हे राजन् ! इतने में ही सप्तविंशति २७ चतुर्युगी परिमित काल व्यतीत होगया, तस्मात् अब तुम जल्दी जाओ और जो देवदेव आदि पुरुष के अंश से महा बली श्रीबलदेवजी हैं ॥ ३३ ॥

हे राजन् ! नरों में रत्न रूप उन बलदेवजी का तुम अपना कन्या रूप रत्न देदो । और वे तो सचात् भूतभावन भगवान् ही पुण्य रूप हैं श्रवण और कीर्त्तन जिनका ऐसे स्वयम् निज अंश से भूमि के भार उतारने के लिये अवतार लेकर प्रकट हुए हैं जब ब्रह्माजी ने राजा को इस प्रकार आज्ञादी तब राजाभी ब्रह्माजी को नमस्कार कर के अपने पुर में आये ॥ ३४—३५ ॥

उस पुर को तौ बहुत काल से यक्षों के भय से इनके भ्राता लोग छोडकर दिशाओं में जाय के रहे, राजा ककुद्मीने भी अपनी सुन्दर कन्या को बलशाली श्रीबलदेवजी को समर्पण करदी और आप तप करने के लिये बदरीनारायण आश्रम को जाते हुए ॥ ३६ ॥

इति श्रीमद्भागवत नवम स्कन्ध में प्रथम अध्याय
की, श्रीवृन्दावनस्थ भागवताचार्यकृत
भाषाटीका समाप्ता ॥ ३ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥

॥ चतुर्थोऽध्यायः ॥

—०:०:०—

श्रीशुक उवाच ।

नाभागो नभगापत्यं यं ततं भ्रातरः कविम् ।
यविष्ठं व्यभजन् दायं ब्रह्मचारिणमागतम् ॥ १ ॥
भ्रातरोऽभाङ्क्त किं मह्यं(१) भजाम पितरं तव ।
* (नाभागस्तु पिता पुत्रं प्राह तं ब्रह्मचारिणम् ।)
(२) त्वां ममार्यास्तताभाक्षुर्मा पुत्रक ! तदादृथाः ॥ २ ॥
इमे अङ्गिरसः सत्रमासतेऽद्य सुमेधसः ।
षष्ठं षष्ठमुपेत्याहः कवे मुह्यन्ति कर्मणि ॥ ३ ॥
तांस्त्वं शंसय सूक्ते द्वे वैश्वदेवे महात्मनः ।
ते स्वर्यन्तो धनं सत्रपरिशेषितमात्मनः ॥ ४ ॥
दास्यन्त्यथ ततो गच्छ तथा स कृतवान्यथा ।
तस्मै दत्त्वा ययुः स्वर्गं ते सत्रपरिशेषितम् ॥ ५ ॥
तं कश्चित्स्वीकरिष्यन्तं पुरुषः कृष्णदर्शनः ।
उवाचोत्तरतोऽभ्येत्य ममेदं वास्तुकं वसु ॥ ६ ॥
ममेदमृषिभिर्दत्तमिति तर्हि स्म मानवः ।
स्यान्नौ ते पितरि प्रश्नः पृष्टवान् पितरं तथा ॥ ७ ॥
यज्ञवास्तुगतं सर्वमुच्छिष्टमृषयः क्वचित् ।
चक्रुर्विभागं रुद्राय स देवः सर्वमर्हति ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चतुर्थे मनुपुत्रस्य नभगस्य कथोच्यते ।
तत्सूनोश्चाम्बरीषस्य कृत्या प्रतिहता यतः ॥

नभगस्य वंशमाह—नभगस्यापत्यं नाभागः नाभागदम्बरीषो महाभागवतोऽभूदिति वक्ष्यंस्तद्धेतुत्वेन वंशप्रवर्त्तकस्य नभगस्य निष्कपटं चरितं तेन तु श्रीरुद्रप्रसादमाह—यं ततमित्यादिना । ब्रह्मचारिणं बहुकालं गुरुकुले वसन्तं नैष्ठिकोऽसाविति मत्वा विभागसमये तस्मै भागमप्रकल्प्यैव भ्रातरः सर्वं दायं विभज्य गृहीत्वा पश्चाद्गुरुकुलादागतं यं भागार्थिनं कविं विद्वांसं यविष्ठं प्रति ततं तातं पितरं दायं व्यभजन्नित्यर्थः ॥ १ ॥

एतदेव प्रश्नोत्तराभ्यां दर्शयति—तत्र नाभागः पृच्छति, हे भ्रातरो मह्यं किमभांक्त व्यभजन्त कं भागं मदर्थं यूयं प्रकल्पितवन्तः ? भ्रातर आहुः तदा विस्मृतमस्माभिरिदानीं तु तव पितरं विभजाम त्वं पितरं गृहाणेत्यर्थः । स च पितरं गत्वाऽऽह तत हे तात ! आर्याः ज्येष्ठाः मे मम त्वामभाक्षुर्भागश्चक्रुः मदीयोभाग-

* श्लोकार्द्धोयमधिकः पठ्यते वीरराघ० (१) भजानेति विज० (२) ममत्वार्या इति पाठान्तरं वीररा० ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्त्वमित्यर्थः । पाठान्तरे हे तात ! किमिदं ममाभाक्षुः भजाम पितरं तवेत्युक्तवन्त आर्यास्त्वां मह्यं किमर्थं ददुरित्यर्थः । पिताऽऽह हे पुत्रक ! तत्तैरुक्तं माद्दथाः प्रतारणामात्रं तैः कृतं तस्मिन्नादरं माकार्षीः न ह्यहं दाय इव भोगसाधनमित्यर्थः ॥ २ ॥

तथाऽपि तैर्भागत्वेन दत्तोऽहं तव जीवनोपायमुपदेक्ष्यामीत्याह—इमइति सपादाभ्यां द्वाभ्याम् । अभिप्लवः षडहो भवति पृष्ठ्यः षडहो भवतीति विहितेषु षडहेष्वावर्त्यमानेषु षष्ठं षष्ठमहः कर्मोपेत्य प्राप्य कर्मणि तदनुष्ठाने सुमेधसोऽपि ते सूक्तविशेषाज्ञानेन मुह्यन्ति कवे हे विद्वन् ! ॥ ३ ॥

तान्महात्मनोऽपि त्वम् "इदमित्थारौद्रम्" इति च "ये यज्ञेन दक्षिणया" इति च वैश्वदेवे द्वे सूक्ते शंसय पाठय ततः कर्मणि समाप्ते सति ते स्वर्यन्तः स्वर्गं गच्छन्तः स्वसत्रे परिशेषितमवशिष्टमात्मनो धनं तुभ्यं दास्यन्ति अथ तस्मात्तानाच्छ गच्छेति तथेत्यादि शुकवाक्यम् यथावत्कृतवान् सत्रपरिशेषितं सत्रावशिष्टं धनम् ॥ ४—५ ॥

पुरुषः श्रीरुद्रः दृश्यत इति दर्शनं शरीरं कृष्णं दर्शनं यस्य सः वास्तुकं यज्ञभूमिगतं वसु धनं ममेत्युवाच ॥ ६ ॥

तर्हि स्म तदेव ममेदमिति मानवो नाभाग उवाच, पुनश्च रुद्र उवाच नौ आवयोरस्मिन्विवादेति ते पितरि प्रश्नः स्यादिति पृष्टवानिति शुकोक्तिः ॥ ७ ॥

पृष्टस्य मनोर्वाक्यं यज्ञवास्तुगतमिति उच्छिष्टमुर्वरितम् कचिदिति दक्षाध्वरे "उच्छेषणभागो वै रुद्रः" इति श्रुतेश्च किं च स देव ईश्वरः सर्वमप्यर्हति किम्पुनर्यज्ञावशिष्टमित्यर्थः ॥ ८ ॥ ९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ नभगस्य मानवस्य वंशं तद्वृत्तान्तं चाह—नाभाग इति । नभगस्य मानवस्यापत्यं नाभागः अनुशतिकादित्वादुभयपदवृद्धिः शिवादित्वादण् उभयोराकृतिगणत्वादार्षत्वाद्वा अन्यान्यपत्यानि नभगस्य बभूवुरित्यर्थस्तो द्रष्टव्यं भ्रातरो दायं व्यभजन् इत्युत्तरग्रन्थानुगुणयाद् नाभागस्य वृत्तान्तं वदन् तं विशिनष्टि—यमित्यादिना । यं नाभागं यविष्ठं कनीयांसं भ्रातरस्तज्ज्येष्ठभ्रातरः बहुकालं गुरुकुले वसन्तं पश्चादागतमपि ब्रह्मचारिणं कविं ज्ञानिनं मत्वा दायं व्यभजन्, विभागकाले तस्मै भागमप्रकल्प्यैव स्वं स्वं पित्र्यं वस्तु विभागं कृतवन्त इत्यर्थः ॥ १ ॥

ततो भ्रातॄन्प्रति नाभाग आह—हे भ्रातरः ! मह्यं किमभाङ्क्त व्यभजत मदर्थं कं भागं यूयं प्रकल्पितवन्तः इति । ततस्तं भ्रातरः आहुः भजाम पितरं तवेति तदा विस्मृतस्माभिरिदानीं न वयं विभागे प्रभवः, यदि तवापेक्षा तर्हि तव पितरं "जीवन्पुत्रेभ्यो दायं विभजेत्" इत्युक्तविधं विभाजकं भजाम प्राप्नुयाम तत्सन्निधिं गच्छामेत्यर्थः । यदि पिता भागं प्रयच्छेति वदति तर्हि दास्याम इति भावः भ्रजाम इति पाठान्तरमप्यस्ति तथा भजायेमेत्यपि पाठान्तरम् अस्मिन्पाठे भजाय भाजय पितरमेव भागत्वेन गृहाणेत्यर्थः । ह्रस्वदीर्घयोर्व्यत्ययस्य आर्षः निवृत्तप्रेषणात् भजेर्णौचि लोयमध्यमैकवचनम् ततो नाभागः पितुस्सकाशमेत्य तमुवाच मम त्वार्या तदा भांक्षुरिति । हे तत तात पितः ! मदार्याः ज्येष्ठभ्रातरः अभांक्षुः विभक्तवन्तः मां त्विनेति शेषः । मम त्वामेव भागं चक्रुरित्यर्थः । किं म आर्यास्तता भाङ्क्षुरिति पाठान्तरं तदा आर्याः ज्येष्ठभ्रातरः किं मे भागं विभक्तवन्तः इत्यर्थः । किं ममार्यास्तता भाङ्क्षुरिति पाठेप्ययमेवार्थः ततस्तं पिता नभग आह—मा पुत्रक तदादृथा इति । हे पुत्रक ! तस्मिन् दाये आदरं माकृथा इत्यर्थः ॥ २ ॥

कथं तर्हि मम जीविकेति पुत्रेण पृष्टः पितोवाच—इम इति । भजाम पितरं तवेति पाठपक्षे मा पुत्रकेत्यादेरयमर्थः हे पुत्रक ! तत्तैरुक्तं माद्दथाः प्रतारणामात्रं तैः कृतं तस्मिन्नादरं मा कार्षीः नह्यहं दाय इव भोगसाधनमित्यर्थः । तथापि तैर्भागत्वेन कल्पितोऽहं तव जीवनोपायमुपवक्ष्यामीत्याह—इमे इति । इमे सन्निकृष्टा आङ्गिरसः सुमेधसः सुबुद्धयोऽधुना सत्रमासते द्वादशाहाख्यं सत्रमनुतिष्ठन्ति तत्र द्वादशाहे सत्रे षष्ठं षष्ठमहः कर्मप्राप्य तेऽङ्गिरसो मुह्यन्ति प्रयोगस्य दुरवबोधत्वात्सूक्तविशेषाज्ञानाच्च मुह्यन्ति इत्यर्थः । षष्ठं षष्ठमुपेत्याह इति द्विर्वचनेन षडहस्य पुनः पुनः प्रयोगोपि वैध इति प्रतीयते अतएव हि पूर्वतन्त्रे "अभ्यासे च तदभ्यासः कर्मणः पुनः प्रयोगात् आवृत्तिस्तु व्यवाये कालभेदात् स्यात्" इत्यधिकरणद्वये षडहस्य पुनः पुनः प्रयोगमास्थाय मध्वशनस्यावृत्तिः कर्तव्या न वेत्याशंक्य कर्मान्तराव्यवहितषडहावृत्तौ न कर्तव्या गवामयनादावभिप्लवादिभिर्व्यवहितावृत्तौ तु कर्तव्येत्युक्तं तत्र कर्मणि वैश्वदेवे कर्मणि विश्वदेवताप्रकाशके "इदमित्था रौद्रम्" इति च "ये यज्ञेन दक्षिणया" इति च द्वे सूक्ते तैरङ्गिरोभिरपरिज्ञाते वर्तेते ॥ ३ ॥

ते सूक्ते त्वं महात्मनोपि तान्प्रति शंसय स्तुयाहि ततः कर्मणि समाप्ते सति स्वर्यन्तः स्वर्गं गच्छन्तोऽङ्गिरसस्स्वसत्रपरिशेषितमवशिष्टमात्मनो धनं तुभ्यं दास्यन्ति अतोद्य तान् गच्छेति, ततः स नाभागो यथा स्वपित्रोक्तं तथैव कृतवान् तनन्तरमङ्गिरसः सत्रपरिशेषितं धनं तस्मै नाभागाय दत्त्वा स्वर्गं ययुः ॥ ४ ॥ ५ ॥

ततस्तद्धनं स्वीकरिष्यन्तं तं नाभागं कश्चित्पुरुष आगत्य उत्तरतो दिश आगत्योवाच, पुरुषोऽत्र रुद्रः उत्तरग्रन्थानुगुण्यात् तं विशिनष्टि—कृष्णदर्शनः दृश्यते इति दर्शनं शरीरं कृष्णं दर्शनं यस्य स कृष्णदर्शनः उक्तिमेवाह—ममेदं वास्तुकं वास्त्वति वास्तुकं यज्ञभूमिगतं यज्ञावशेषितं वसु धनं मम मदीयम् ॥ ६ ॥

इत्येवं रुद्रेणोक्ते सति तर्हि स्म तदेव मानवो नाभागः ऋषिभिरङ्गिरोभिर्ममैवेदं धनं दत्तमित्युवाच ततः पुना रुद्र उवाच स्यान्नौ ते पितरि प्रश्न इति नौ आवयोस्तस्मिन् विवादविषये ते तव पितरि प्रश्नः स्यात् तव पितैव तस्मिन् विवादमद्ये प्रष्टव्य इत्यर्थः । ततो नाभागः पितरमेत्य तथा पृष्टवान् ॥ ७ ॥

पृष्टः पिता तमाह—यज्ञेति । यज्ञभूमिगतमुच्छिष्टं यज्ञावशेषितं सर्वं वसु ऋषयः कचिद्दक्षाध्वरे रुद्राय भागं चक्रुः ततः स एव देवो रुद्रः सर्वं वास्तुकं वस्तु अर्हति तदीयमेव तत्सर्वमित्यर्थः "उच्छेषणभागो वै रुद्रः" इति श्रुतेरिति भावः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

बह्वृचब्राह्मणप्रसिद्धो नाभागो मनुपुत्र उच्यते नतस्तस्माद्दिष्टपुत्रादन्यः कथान्तरसूचको वा वेदविद्वत्त्वाद्यशसा ततो व्याप्तो वा नाभानेदिष्ट इत्यन्यः। ततोऽन्यनाम्ना ख्यातः वेद इति शेषः वा नाभानेदिष्टं शंसतीत्यादौ प्राज्ञो मेधावी ज्येष्ठभ्रातरो ब्रह्मचारिणं विवाहानभिमुखं यविष्ठं कनिष्ठं यं नाभागं कविम् आत्मज्ञानित्वेनातिक्रान्तदर्शिनं मत्वा दायं कुलपारम्पर्येण प्राप्तविभागयोग्यं द्रव्यं व्यभजन्यदा कवेर्भागमदत्त्वा तदा स कविर्नाभागोऽवगम्यैत्य भ्रातॄनाह ॥ १ ॥

हे भ्रातरो मह्यं किमभांक्तेति नाभानेदिष्टं वै मानवं ब्रह्मचर्यं वसन्तं भ्रातरो निरभजन् सोऽब्रवीदेत्य किं मह्यमभांक्तेति ब्राह्मणवाक्यसूचनायाभांक्तेति पदप्रयोगः मम भागं किमर्थं विभक्तवन्तः? मम भागः को वा कल्पित इति वा प्राक्षीदिति त एतमब्रुवन् भजान पितरं तवेति तव पितरं भज अन गच्छ "अनचेष्टायाम्" इति धातुः यदि तव विभागापेक्षा तर्हि गत्वा तं प्रसाद्य विचारय वयं चागत्य पृच्छाम इत्यर्थः। एतमव निष्ठावन्तं वदितारमित्यब्रुवन् तस्माद्धाप्येतर्हि पितरं पुत्रा दिष्टावो-वदितेत्येवाचक्षत इति च निष्ठावन्तं व्यवस्थागमकं व्यवस्थापकम्, अत एवागस्य वदितारं पितरमब्रुवन्नित्यर्थः। यतो नाभागादयो निश्चयार्थं पितरं गत्वा ब्रुवंस्तस्मादेतर्हि अद्यापि पुत्राः पितरं निर्णीय व्यवस्थापक इत्याहुरित्यर्थः। स नाभागो गत्वा भ्रातृभिस्सह पितरमपृच्छत्, किमिति? तत्राह—किं म इति। हे तत तात पितः! मे आर्या ज्येष्ठास्तद्वस्तु अभांक्षुः किमिति पृच्छामि त्वां यदाहं प्रोषितस्तदार्यास्त्वां व्यवस्थाप्य मे भागमदत्त्वा किमर्थमभांक्षुरिति वा त्वामन्तरेणाभांक्षुरिति त्वां हवाव मह्यं तताभांक्षुरिति स पिता प्रत्याह—मेति। हे पुत्रक! तन्मादृथाः तस्मिन् दायविभागे आदरं मा कार्षीरिति तं पिताऽब्रवीन्मा पुत्रक तदादृथा इति ॥ २ ॥

तर्हि मम जीवनोपायः कः? इति नाभागेन पृष्टः पिता प्रत्याह—इमइति। अद्य इमे सुमेधसः शोभनप्रज्ञा आङ्गिरसः सत्रमासते बहुकर्तृके चिरकालीने यज्ञे दीक्षितास्तिष्ठन्ति हे कवे! ते ऋषयः षष्ठं षष्ठमहरुपेत्य तस्मिन्नहनि कर्तव्ये वैश्वदेवे विश्वदैवत्ये कर्मणि मुह्यन्ति त्वं महात्मनः तान्प्रति ज्ञातव्ये द्वे सूक्ते शंसय ब्रूहि ते आङ्गिरसः स्वः स्वर्गं यन्तो गच्छन्त आत्मनः सत्रपरिशेषितं स्वसत्रे परिशिष्टं तुष्टिसाधनं द्रव्यं ते तुभ्यं दास्यन्ते, अथ कालक्षेपमन्तरेण त्वं तान् ऋषीन् गच्छ स नाभाग आत्मने पित्रा यथोक्तं तथा कृतवानित्यर्थः। "अङ्गिरसो वा इमे स्वर्गाय लोकाय सत्रमासते षष्ठं षष्ठमेवाहरागत्य मुह्यन्ति तानेते सूक्ते षष्ठेऽहनि शंसय तेषां यत्सहस्रं सत्रपरिवेषणं तत्ते स्वर्यन्तो दास्यन्तीति तथेति तानुपैत् प्रतिगृभ्णीत मानवं सुमेधस इति तमब्रुवन् किं कामो वदसीतदिमेव वः षष्ठमहः प्रज्ञापयानीत्यब्रवीदथ यद्व एतत्सहस्रं सत्रपरिवेषणं तन्मे स्वर्यन्तो दत्तेति तथेति तानेते सूक्ते षष्ठेऽहन्यशंसयत्, ततो वैते प्रयज्ञमजानन् विप्रः स्वर्गं लोकं तद्यदेते सूक्ते षष्ठेऽहनि शंसति यज्ञस्य प्रज्ञात्यै स्वर्गस्य लोकस्यानुख्यात्या इति" हे सुमेधसः! मानवं मां प्रतिगृभ्णीत स्वीकुरुतेति मन्त्रमुक्त्वा कस्मिन्कार्ये विद्यायामथास्मदपेक्षिते विद्योपदेशकामो यस्य स त्वं किं कामः युष्मदभिकविद्यावत्त्वात् द्वितीयेऽधुना नाभिमत इति तृतीय काम इत्याह—इदमेवेति। प्रथमविकल्पकामोऽपि भवामीत्याशयेनाह. अथयदिति। सर्वयज्ञोपयोगमाह. तद्यइति। अनुख्यातिः प्रकाशः ते अङ्गिरसः सत्रपरिवेषणं धनं तस्मै नाभागाय दत्त्वा स्वर्गं ययुरित्यन्वयः। "ते स्वर्यन्तोऽब्रुवन्नेतत्ते ब्राह्मण सहस्रमितीति" हे ब्राह्मण! वेदविद्याविशारद ॥ ३-४-५ ॥

कृष्णदर्शनः कृष्णवर्णतया प्रतीयमानः कश्चिल्लोकविलक्षणः पुरुषः रुद्रः यज्ञशालाया उत्तरदिग्भागादभ्येत्य सत्रपरिवेषणं स्वीकरिष्यन्तं नाभागमुवाच कथम् इदं वास्तवं यज्ञशालालक्षणवास्तुभवं वसु वस्तु ममेति तदेनं समीकुर्वाणं पुरुषः कृष्णवस्त्रास्युत्तरत उपोत्थायाब्रवीत् मम वा इदं ममैवास्तुहमिति इति समीकुर्वाणं राशीकृत्य स्वीकुर्वाणं कृष्णशरीरवाससी वास्तुहवास्तवं मूलभद्रभाषायां हकारवकारयोः पर्यायत्वाङ्गीकारात् ॥ ६ ॥

मानव इति तर्हि यदि ममेदमिति वदसि ऋषिभिरिदं मम दत्तमित्याह—सोऽब्रवीन्मह्यं वा इदमदुरिति तर्हि स्म मानवेत्युत्तरत्रापि सम्बध्यते हे मानव! यदि त्वया प्रतिगृहीतमित्युच्यते तर्हि नौ आवयोस्ते पितरि प्रश्नः स्याद्गत्वा तं पृष्ट्वा निश्चित्य मां ब्रूहीत्युक्तः स नाभागः पितरं गतः तथा पृष्टवान् भो पितरङ्गिरोभिर्दक्षिणार्थं वास्तवं मह्यं दत्तं तद्ग्रहणसमये कश्चित्पुरुष आगत्य मदीयमिदं वास्तवम् ऋषिभिर्मह्यं दत्तमिति न त्वया स्वीकर्तव्यमित्याह अतो यथार्थं वदेति ॥ ७ ॥

नाभागेन पृष्टः पिता प्राह—यज्ञेति। कचिद्दक्षशापप्रसङ्गे ऋषयः यज्ञवास्तुगतं सर्वमुच्छिष्टमवशिष्टं रुद्राय भागं चक्रुर्हि यस्मात् स देवः सर्वमर्हति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

॥ १—१७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

चतुर्थे नभागाख्यानमम्बरीपकथा तथा।
दुर्वाससो जटोत्क्षेपस्तापश्च क्लेशा चोच्यते ॥

मनुपुत्रस्य नभगस्यापत्यं नाभागः यं गुरुकुलादधीत्य आगतं कविं विद्वांसं यविष्ठमनुजं भागार्थिनं प्रति ततं तातमेव दायं व्यभजन् वस्तुतस्तु पैतृकं किमपि धनं तदागमनात् पूर्वमेव स नैष्ठिकोऽभूत्नागमिष्यतीति मत्वा सर्वधनस्य स्वैर्विभज्य गृहीतत्वादित्यर्थः ॥ १ ॥

तत्कथामेव प्रश्नोत्तराभ्यामाह—तत्र नाभागः पृच्छति, हे भ्रातरः! मह्यं किम् अभांक्त व्यभजत कं भागं मदर्थं यूयं प्रकल्पितवन्तः? भ्रातर आहुः तदानीं तव वैराग्यं श्रुत्वा भागो न प्रकल्पितः इदानीं तु तव पितरमेव भजामः त्वद्भागत्वेन पितरं प्रकल्पयामः त्वं सर्वधनोपार्जकं पितरं गृहाणेत्यर्थः। ततश्च स पितरमागत्याह, हे तत तात! आर्या ज्येष्ठाः मम भागं त्वाम्

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

अभाङ्क्षुः मदीयो भागस्त्वमभूरित्यर्थः। किं ममार्य्यास्तताभाङ्क्षुरिति पाठे हे तात! किमिदं ममाभांक्षुः भजाम पितरं तवेत्युक्तवन्तः आर्य्यास्त्वां मह्यं किमर्थं ददुरित्यर्थः। पिताचाह, हे पुत्रक मदनुकम्प्यसूनो! तैरुक्तं तत् मा आद्दथाः नह्यहं दाय इव भोगसाधनमित्यर्थः ॥ २ ॥

सरलबुद्धिना मया न पुनस्तेषां पार्श्वे गन्तव्यमिति चेत् तर्हि स्नेहेन तव जीवनोपायमहमेवोपदेक्ष्यामीत्याह—इमे इति सपादाभ्यां द्वाभ्याम्। अभिल्पवः षडहो भवतीति विहितेषु षडहेषु आवर्त्यमानेषु षष्ठं षष्ठमहः कर्मोपेत्य प्राप्य कर्मणि तदनुष्ठाने सुमेधसोऽपि सूक्तविशेषाज्ञानेन मुह्यन्ति हे कवे विद्वन् ॥ ३ ॥

तान् महात्मनोपि "इदमित्थारौद्रम्"इति च "ये यज्ञेन दक्षिणाया"इति च त्वं वैश्वदेवे द्वे सूक्ते शंसय पाठय ततश्च ते स्वर्यन्तः स्वर्गं गच्छन्तः तथेति शुकवाक्यम् ॥ ४।५॥

पुरुषः श्रीरुद्रः कृष्णदर्शनः श्यामवर्णः यद्वा स्फूर्तिप्राप्तं कृष्णां सदा पश्यन्तीति सः वास्तुकं यज्ञवास्तुगतम् ॥ ६ ॥

तर्हि तदैव ममेदमिति मानवो नाभाग उवाच पुनश्च रुद्र उवाच नौ अवयोरस्मिन् विवादे ते पितरि प्रश्नः स्यात् पृष्टवानिति शुकोक्तिः ॥ ७ ॥

पिता उवाच—यज्ञेति। क्वचिदिति दक्षाध्वरे "उच्छेषणा भागो वै रुद्रः" इति श्रुतेश्च किञ्च स देव ईश्वरः सर्वमप्यर्हति किम्पुनर्यज्ञावशिष्टमित्यर्थः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

मनुपुत्रस्य नभगस्य नाभागो निष्कपटः पुत्रो जातस्तस्य अम्बरीषो महाभागवतः पुत्रोऽभूदिति नाभाग इति चतुर्थेन वर्णयति—नभगस्य बहवः पुत्रा जाताः तेभ्यः पश्चान्नाभागोऽपत्यमभूदित्याह—नाभागो नभगापत्यमित्यादिना—यं नाभागं ब्रह्मचारिणं बहुकालं विद्यालाभार्थं गुरुसमीपे वसन्तं नैष्ठिकोऽयमिति मत्वा भ्रातरः पितृवित्तं सर्वं विभज्य गृहीत्वा पश्चात्कविं प्राप्तविद्यं गुरुसमीपादागतं भागार्थं यविष्ठं कनीयांसं प्रति ततं पितरं नभगं दायं भागं व्यभजन् ॥ १ ॥

एतदेव प्रश्नप्रतिवचनाभ्यां प्रपञ्चयति, भ्रातर इति। तत्र नाभाग आह—हे भ्रातरः! मह्यं किमभाङ्क्त व्यभजत ते आहुः तदा विस्मृतोऽस्माभिस्तव भागोऽधुना तव पितरं भजाम विभजाम, स पितरमाह—हे तत! हे पितः! आर्याः त्वां मम अभाङ्क्षुः मम भागं चक्रुः पिताऽऽह तत् तैरुक्तं हे पुत्रक! मा आद्दथाः न हि अहं वित्तविभागवत् तव भोग इत्यर्थः ॥ २ ॥

एवमुक्त्वापि तस्य जीविकोपायमाह—इमे इति सपादद्वयेन। हे कवे विद्वन्! इमे समीपगाः आङ्गिरसः सत्रम् आसते अनुतिष्ठन्ति तत्र अभिप्लवः षडहोभवति पृष्ठ्यः षडहो भवतीति विहितेषु षडहेष्वावर्त्यमानेषु षष्ठं षष्ठमहः कर्मोपेत्य प्राप्य कर्मणि तदनुष्ठाने सुमेधसः सुबुद्धयोपि ते सूक्तविशेषापरिज्ञानान्मुह्यन्ति ॥ ३ ॥

महात्मनोपि तान्प्रति "इदमित्थारौद्रम्"इति च"ये यज्ञेन दक्षिणाया" इति च वैश्वदेवे द्वे सूक्ते शंसय ब्रूहि ततः कर्मणि समाप्ते सति ते स्वर्यन्तः स्वर्गं गच्छन्तः सत्रपरिशेषितं स्वसत्रावशिष्टम् आत्मनो धनम् ॥ ४ ॥

दास्यन्ति तुभ्यमिति शेषः अथ तस्मात् गच्छ स नाभागः तथा पितृवाक्यानुसारेण यथावत्कृतवान् ते आङ्गिरसोऽपि सत्रपरिशेषितं धनं तस्मै दत्त्वा स्वर्गं ययुः ॥ ५ ॥

तं नाभागं कृष्णमञ्जनप्रभं दृश्यते इति दर्शनं शरीरं यस्य सः श्रीरुद्रः वास्तुकं यज्ञभूमिगतं वसु धनं ममेत्युवाच ॥ ६ ॥

नाभाग आह—मयेदमृषिभिर्दत्तमिति, रुद्र आह हे मानव! तर्हि इम स्याऔ ते पितरि प्रश्न इति नाभागोऽपि तथा पितरं पृष्टवान् ॥ ७ ॥

तत्पिता आह—ऋषयः क्वचिद्दक्षाध्वरे यज्ञवास्तुगतं यज्ञभूमिगतम् उच्छिष्टमुर्वरितं रुद्राय भागं चक्रुः अतः स देवः सर्वमर्हति "उच्छेषणभागो वै रुद्रः"इति श्रुतेः ॥ ८—९ ॥

भाषा टीका।

श्रीरुक्मिणीरामानुजौ जयतः

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि–नभग के पुत्र नाभाग हुए जि नाभाग को बहुत काल पर्यन्त ब्रह्मचर्य से गुरुकुल में वास करने से नैष्ठिक ब्रह्मचारी जानकर भ्राता लोगों ने धन के विभाग करते समय उनका भाग नहीं लगाया, जब कुछ दिन पीछे गुरु कुल से आये और भ्राताओं से अपना भाग मांगा तब सब भाइयों ने इनको छोटे जानकर इनके हिस्से में पिता को देदिये ॥ १ ॥

उस समय नाभाग ने भाइयों से पूँछा, कि–हे भ्राताओं! आपने हमको हिस्से में क्या दिया, तब भ्राता बोले, कि–हमलोगों ने तुमको तुमारे भाग में पिताजी कोदिये। तब नाभाग पिता के पास जाकर बोले, कि–हे पिता जी! बडे भाइयों ने हमारे हिस्से में तुमको दिये हैं पिता बोले, कि–हे पुत्र! उनके उस खोटे कहने पर आदर न करौ उन्हों ने तौ केवल प्रतारणा (ठगाई) करी है क्योंकि? मैं कुछ धनादि के सदृश भाग का वस्तु नहीं हूं ॥ २ ॥

हे पुत्र! तौभी कुछ चिन्ता नहीं, तुम देखो आंगिरस ब्राह्मण लोग अवही यहां यज्ञ करते हैं और हे कवे! लोग बडे बुद्धि वाले हैं तौभी छै दिनका जो अभिप्लव है उस में छटवें दिन का सूक्त भूलजाने से जब २ छटवें दिन का कर्म उपस्थित होता है तब २ वे लोग उस कर्म में मोहित होते हैं ॥ ३ ॥

वहां जाकर उस समय पर जो वे लोग दोसूक्त विश्वेदेव सम्बन्धि भूलें उनको तुम बोलदेना तब वे लोग स्वर्ग के जाने वाले अपने यज्ञ में बचे हुये धनको तुमको दे जांयगे ॥ ४ ॥

नाभागस्तं प्रणम्याह तवेश ! किल वास्तुकम् ।
इत्याह मे पिता ब्रह्मन् ! शिरसा त्वां प्रसादये ॥ ९ ॥
यत्ते पिताऽवदद्धर्मं त्वं तु सत्यं प्रभाषसे।
ददामि ते मन्त्रदृशे ज्ञानं ब्रह्मसनातनम् ॥ १० ॥
❋ (तस्मादसत्यं न ब्रूयात् परसं चापदि क्वचित्।
सत्येन परिसन्तुष्टो भवामीष्टस्स मे भवेत्) ॥ ० ॥
गृहाण द्रविणं दत्तं मत्सत्रे परिशेषितम् ।
इत्युक्त्वाऽन्तर्हितो रुद्रो भगवान् सत्यवत्सलः ॥ ११ ॥
य एतत्संस्मरेत्प्रातः सायं च सुसमाहितः ।
कविर्भवति मन्त्रज्ञो गतिं चैव तथात्मनः ॥ १२ ॥
नाभागादम्बरीषोऽभून्महाभागवतः कृती ।
नास्पृशद्ब्रह्मशापोऽपि यं न प्रतिहतः क्वचित् ॥ १३ ॥

राजोवाच ।

भगवञ्छ्रोतुमिच्छामि राजर्षेस्तस्य धीमतः ।
न प्राभूद्यत्र निर्मुक्तो ब्रह्मदण्डो दुरत्ययः ॥ १४ ॥

श्रीशुक उवाच ।

अम्बरीषोमहाभागः सप्तद्वीपवतीं महीम् ।
अव्ययां च श्रियं लब्ध्वा विभवं चातुलं भुवि ॥ १५ ॥
मेनेऽतिदुर्लभं पुंसां सर्वं तत्स्वप्नसंस्तुतम् ।
विद्वान्विभवनिर्वाणं तमो विशति यत्पुमान् ॥ १६ ॥

भाषा टीका ।

इतना कह कर पिता ने कहा कि–तौ अब तुम वहां जाओ। बस इतना सुनकर नाभाग ने भी वहां जाकर जैसा पिता ने सिखाया रहा वैसाही किया, वे आंगिरस ब्राह्मण लोगभी यज्ञ के अन्त में यज्ञ में बचे हुए धनको नाभाग के लिये दे कर स्वर्ग को चले गये ॥ ५ ॥

यज्ञावशिष्ट उस धनको नाभाग के स्वीकार करते समय उत्तर दिशा से एक काले वर्ण का पुरुष आकर बोला, कि यह यज्ञा वशिष्ट वास्तुक द्रव्य तौ हमारा है ॥ ६ ॥

तब उस पुरुष से नाभाग बोला, कि हमको यह ऋषियों ने दिया है। तब वह पुरुष नाभाग से बोला, कि–अच्छा तौ हमारे तुमारे इस विवाद में तुमोर पिताही से तुम पूछौ तब नाभागने भी पिता के समीप जाकर प्रश्न किया ॥ ७ ॥

पिताने कहा कि पाहिले ऋषि लोगों ने दक्ष के यज्ञ में, यज्ञवास्तुगत यज्ञ का उच्छिष्ट जो कुछ है उसका भाग श्रीरुद्र के लिये किया है इस लिये वही श्रीरुद्रदेव यज्ञ का उच्छिष्ट सर्व वस्तु लेने के योग्य हैं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

श्रीरुद्र आह यत्त इति ॥ १० ॥
इदमाख्यानं श्रुतिप्रसिद्धम् तथाहि वह्वृचब्राह्मणम् "नाभाने-

❋ श्लोकोऽयमधिकः पठ्यते वीर० रीत्या ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दिष्टं शंसति नाभानेदिष्टं वै मानवं ब्रह्मचर्यं वसन्तं भ्रातरो निरभजन्सोऽब्रवीत्" इत्यादि ॥ ११ ॥

अस्याख्यानस्य स्मरणे फलमाह–य एतदिति । आत्मनो गतिं च प्राप्नोतीति शेषः ॥ १२ ॥

क्वचिदपि न प्रतिहतो ब्रह्मशापोऽपि ब्राह्मणेन दुर्वाससा निर्मितः कृत्यानलोऽपि यं नास्पृशत् अतोऽसौ महाभागवतोऽतएव कृती पुण्यवान् ॥ १३ ॥

तस्य श्रोतुमिच्छामि चरितमिति शेषः । ब्रह्मदण्डः कृत्यानलो न प्राभूत्र समर्थो बभूव ॥ १४ ॥

श्रियं सम्पदम् विभवमैश्वर्यम् अतुलं निरुपमम् ॥ १५ ॥

पुंसामतिदुर्लभमपि तत्सर्वं स्वप्नवत्संस्तुतं निरूपितमनुपादेयं मेने. तत्र हेतुः, विभवस्य निर्वाणं नाशं विद्वान् यद्येन विभवेन तन्नाशेन वा पुमांस्तमो विशति मोहे निमज्जति ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततो नाभागः पितुर्वच आकर्ण्य वास्तुकं वसुग्रहणार्थमुपायान्तरमपश्यत्, रुद्रं प्रणम्येदमाह–किं हे ईश! यद्यपि मे पिता वास्तुकं वसु तवैव त्वत्सम्बन्ध्येवेत्याह–तथापि; हे ब्रह्मन्! शिरसा त्वां प्रार्थये प्रणतेन शिरसा त्वां वास्तुकवसुप्रदानाय प्रसन्नकुर्यामिति वदन् प्रणतो बभूव ॥ ९ ॥

ततो रुद्र आह—यदिति । यद्यस्मात्ते तव पिता धर्ममेवाह तथा त्वमपि सत्यमेव प्रभाषसे तत्तस्मान्मन्त्रदृशे वैश्वदेवमन्त्रद्रष्ट्रे ते तुभ्यं सनातनं ब्रह्म ब्रह्मविषयकं ज्ञानं ददामि ॥ १० ॥

तथा यद्यज्ञपरिशेषितं द्रविणं मया दत्तं गृहाण द्वादशाहस्य सत्रत्वाद्यागत्वाच्च यज्ञवास्तुगतं यत्सत्रपरिशेषितमिति यज्ञसत्रपदयोः प्रयोगः इतीत्यमुक्त्वा भगवान् सत्यवत्सलः सत्यभाषणनिमित्तवात्सल्ययुक्तो रुद्रः तत्रैवान्तर्दधे ॥ ११ ॥

एतदाख्यानसंस्मरणफलमाह–यः पुमानेतदाख्यानं प्रातः सायञ्च समाहितचित्तः संस्मरेत्स कविः शास्त्रजन्यज्ञानी भवति मन्त्रज्ञश्च भवति तथा आत्मनः स्वस्य परस्य च गतिं याथात्म्यं च वेदेति शेषः ॥ १२ ॥

एवं नाभागवृत्तान्तमभिधायाथ तत्पुत्रं तच्चरित्रं चाह–नाभागादम्बरीष इत्यादिना यावत्पञ्चमाध्यायसमाप्ति । नाभागादम्बरीषः संबभूव स च महाभागवतः कृती स्वापराधेष्वप्युपकारकरणशीलः विशेषेण तच्चरित्रप्रश्नावसरप्रदानाय सङ्ग्रहेण तद्वृत्तं वदन् तं विशिनष्टि, नास्पृशदित्यर्द्धेन । क्वचिदपि न प्रतिहतः प्रतिहतिशून्यो विप्रशापोपि यमम्बरीषं नास्पृशत् यद्यपि दुर्वासा न तस्मै शापं ददौ नाप्युत्कृत्य जटोत्पादितकृत्यायाः शापरूपत्वं तथापि शापवत्कृत्यायास्तन्निग्रहार्थत्वात्कृत्यायां शापशब्द औपचारिको द्रष्टव्यः ॥ १३ ॥

एवमुक्ते लब्धप्रश्नावसरः पृच्छति राजा–भगवन्निति । हे भगवन्! राजर्षेर्धीमतस्तस्याम्बरीषस्य श्रोतुमिच्छामि चरित्रमिति शेषः । यत्राम्बरीषे विनिर्मुक्तः प्रयुक्तो दुरत्ययोऽपि ब्रह्मदण्डः कृत्यारूपो न प्राभूत् न समर्थो बभूव तं बाधितुमिति शेषः ॥ १४ ॥

एवमापृष्टो ब्रह्मदण्डस्याप्रभुत्वमाचिख्यासुस्तावत्तस्य महाभागवतः कृतीत्युक्तं महाभागवतत्वं प्रपञ्चयति–अम्बरीष इत्यादिना आरिराधयिषुरित्यतः प्राक्तनेन ग्रन्थेन । अम्बरीषो महाभागः धीमानतएव सप्तद्वीपयुक्तां महीमव्ययां निरुपद्रवां श्रियं सम्पदम् अतुलमसमानमनितरसाधारणं विभवं भोग्यभोगोपकरणादिसमृद्धिमैश्वर्यं वेत्येतत्सर्वमितरेषां दुःखेनापि लब्धुमशक्यं लब्ध्वापि विभवनिर्वाणं विभवस्य निर्वाणमवसानं नाशं विद्वान् तत्सर्वं स्वप्नसम्मितं स्वाप्नवस्तुतुल्यं मेने हेयममन्यतेत्यर्थः । तत्र हेतुः यस्मात् विभवसङ्गात् पुमान् तमो नरकं विशति ॥ १५ ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मया त्वविचार्योक्तमित्युक्तो नाभागो गत्वा तं रुद्रं प्रणम्याह–हे ईश! वास्तुगतं तव किलेति मे पिता प्राह, तस्मादहं शिरसा त्वां प्रसादये क्षमस्वेति वाचा स नाभागः प्रत्याह ॥ ९ ॥

स पुरुषो नाभागं प्रत्याह—यत्त इति । ते पिता सत्यलक्षणं धर्ममवदत् त्वं च सत्यं यथा तथ्यं वदसीति यत्तस्मान्मन्त्रदृशः वैश्वदेवसूक्तं दृष्टवतः ते तव सनातनं सदातनं वेदप्रमाणकं वा ब्रह्मनिरपेक्षम् अन्योपदेशाकांक्षारहितं ब्रह्मविषयं वा ज्ञानं ददामि ॥ १० ॥

किञ्च यत्सत्रपरिशेषितं द्रविणं तच्च ददामि गृहाण नमब्रवीत् तद्वै नौ तवैव पितरि प्रश्न इति स पितरमेतं पिता अब्रवीन्ननु ते पुत्रकात्तुरित्यत्तुरेवम इत्यब्रवीत्तत्तु मे पुरुषः "कृष्णशवास्युपारत उपोदतिष्ठन्मम वा इदं ममैवास्तुहमित्यादितीति तं पिताऽब्रवीत्तस्यैव पुत्रक तत्तु स तुभ्यं दास्यतीति स पुनरेत्याब्रवीत् तव ह वाव किल भगव इदमिति मे पिताह पुनरेत्याब्रवीत् ... सत्यवादीः" इति । ... "तिसोऽब्रवीत्तदहं तुभ्यमेव ददामि य एवं सत्यमवादीः" इति । तस्मादेवं विदुषां सत्यमेव वेदितव्यमिति हे पुत्रक! तेङ्गिरसस्सत्रमासते स नाभागः स मदुरेव वास्तुनेतु दत्तवन्त एव किमिति पृष्टे स नाभागः स मदुरेव न तत्र सन्देह इत्यब्रवीत् तर्हि किमत्र बाधकमिति तत्राह तन्मम इति सत्रपरिशेषितं यद्धनं तदिदं ममैवेत्युक्त्वा पिता दत्तवान् स्वीकृतवानित्यर्थः । इत्युक्ते पिता नाभागं प्रत्याह पितेति ॥ ११ ॥

फलमाह—य एतदिति । कविस्तत्त्वविज्ञानी मन्त्रज्ञः अर्थवेत्तात्पर्यार्थज्ञानी आत्मनः स्वपरलक्षणस्य वस्तुनो गतिं स्थितिं ज्ञानं वा प्राप्नोतीति शेषः "स एव सहस्रसनिर्मन्त्रोयं नाभानेदिष्टमुपैनं सहस्रं नमति प्रषष्ठेनाह्ना स्वर्गं लोकं जानाति य एवं वेद" इत्यनेनापि फलश्रुतेरर्थः सूचित इति । यद्वा नाभानेदिष्टः सहस्रान्नितः "वनपणा सम्भक्तौ" इति धातोः सहस्रेत्युपलक्षणमनेकजनाय धनदाता "सन दाने" इतिधातोर्वा

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विषयज्ञानलाभोपेतः मन्त्रो मन्त्रज्ञानी पुरुषः एवमुक्तमितिहासार्थं वेद एनं पुरुषमुद्दिश्य सहस्रम् उपनमति षष्ठेनाह्ना षष्ठदिनापेक्षितसूक्तपूर्वककृतकर्मणां स्वर्गं सुखं ज्ञानात्मकं लोकं सर्वाधारं हरिं प्रजानातीति भावः ॥ १२ ॥

कृतं पूर्णं ब्रह्मास्यास्तीति कृती सुकृती वा चक्रेण सुदर्शननाम्ना प्रतिहतो निरस्तः ॥ १३ ॥ १४ ॥

प्रथमतस्तस्य विरक्तिमाह—अम्बरीष इति । मह्यादिकं तत्सर्वं स्वप्नसंमितं स्वप्नवदनित्यं मेन इत्यन्वयः । अव्ययां दीर्घकालीनां विभवं हिरण्यादिलक्षणम् अनेनाम्बरीषशब्दार्थोऽपि सूचितः स आविष्करिष्यते अम्बरादिकं रीषं नश्वरमिति ज्ञानमस्यास्तीत्यम्बरीषः "रुषरिषहिंसायाम्" मत्वर्थे अच्प्रत्ययः अम्बरवदीषा इच्छा यस्य स तथा आकाशवद्बहुलज्ञान इत्यर्थः व्यत्यासश्छान्दसः अं ब्रह्म तस्य वरिवस्यां तत्रेच्छा यस्य स तथा ॥ १५ ॥

एतदेव स्पष्टयति विद्वानिति । विभवनिर्वाणं हिरण्यादिसम्पदां नाशं क्षणिकं विद्वान् पुमान्यद्यस्माद्विभवान्मुग्धस्तमो विशति ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

शिरसा प्रणम्य ॥ ९ ॥

रुद्र उवाच-यत्ते इति । इदं चाख्यानं श्रुतिप्रसिद्धं तथाच बह्वृचब्राह्मणं "नाभानेदिष्टं शंसतीत्यादि ॥ १०-११ ॥

गतिं च प्राप्नोतीति शेषः ॥ १२ ॥

यो ब्रह्मशापः क्वचिदपि न प्रतिहतः अमोघत्वात् सोऽत्र त्वामसौ दहत्विति वाग्वज्रसहितकृत्यानलप्रक्षेपरूपे ज्ञेयः ॥ १३ ॥

श्रोतुं चरितमिति शेषः ॥ १४ ॥

पुंसामतिदुर्लभं विभवं च लब्ध्वा तत्सर्वं स्वप्ने संस्तुतमिव मेने यतो विभवस्य निर्वाणं नाशं विद्वान् यत् यतो विभवासक्तेः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

रुद्र आह-यदिति । मन्त्रदृशे मन्त्रद्रष्ट्रे ते तुभ्यं ब्रह्म बृहत् सनातनं वेदसिद्धं ज्ञानं ददामि ॥ १० ॥ ११ ॥

आत्मनो गतिम् आत्मविद्यामित्यर्थः । प्राप्नोतीति शेषः ॥ १२ ॥

कृती पुण्यवान् क्वचिदपि न प्रतिहतो न निराकृतः ब्रह्मशापो ब्राह्मणनिर्मितः कृत्यानलरूपः शापः यं नास्पृशत् ॥१३॥

यत्राम्बरीषे निर्मुक्तः ब्राह्मणप्रयुक्तो दण्डः कृत्यानलः न प्राभूत् न समर्थो बभूव तस्य श्रोतुमिच्छामि चरित्रमिति शेषः ॥ १४ ॥

सप्तद्वीपवतीं महीं श्रियं सम्पदं विभवमैश्वर्यम् अतुलम् अनुपमम् ॥ १५ ॥

पुंसां दुर्लभमपि तथापि यतः पुमान् तमो विशति तत् सर्वं स्वप्नवदनित्यतया संस्तुतं निरूपितं मेने यतो भवनिर्वाणम् ऐश्वर्यं नाशं विद्वान् यद्वा विगतो भवः संसारो यतः स विभवो वासुदेवस्तस्माद्भजनीयान्निर्वाणं मोक्षं विद्वान् ॥ १६ ॥

भाषाटीका ।

नाभाग इतना पिता का वचन सुनकर फिर श्रीरुद्र के समीप जाकर प्रणाम कर बोला, कि हे ईश ! हमारे पिताने कहा है यज्ञ शेष वस्तु सब आपहीका है तस्मात् हे ब्रह्मन् ! आपको मैं शिर से प्रणाम कर प्रसन्न करता हूं कि आप मेरा अपराध क्षमा करें ॥ ९ ॥

तब श्रीरुद्र बोले, कि–जो तुमारे पिता ने धर्महीं कथन किया और तुम भी सत्य बोलते हो इसी कारण मंत्र दृष्टा ऐसे तुमारे लिये अब हम सनातन ब्रह्म विषयक ज्ञान देते हैं ॥ १० ॥

और यज्ञ में बचा हुआ यह जो हमारा द्रव्य है इसको भी तुम ग्रहण करो । सत्य वत्सल भगवान् श्रीरुद्र इतना कहकर अन्तर्ध्यान होगये ॥ ११ ॥

जो पुरुष इस आख्यान को सावधान होकर प्रातःकाल सायंकाल स्मरण करता है वह कवि (ज्ञानी) होता है और मंत्रज्ञ होता है और अपने आत्मा की गति को भी प्राप्त होता है ॥ १२ ॥

उसनाभाग से अंबरीष महाराज हुए जो बडे सुकृती और महा भागवत हुए । जिनको ब्रह्म शापने भी स्पर्श नहीं किया, जो कि—ब्रह्म शाप कहीं भी प्रति हत (व्यर्थ) नहीं भया ॥१३॥

राजोवाच ॥

राजापरीक्षित बोले, कि—हे भगवान् ! परमज्ञानी उन राजर्षि श्रीअंबरीष के चरित्र के श्रवण करने की इच्छा करता हूं-कि जिसके ऊपर दुरत्यय ब्रह्मदंड का भी प्रभाव न चला ॥ १४ ॥

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि–हे राजन् ! महाभाग अंबरीष सप्तद्वीपवती पृथिवी अचल श्री और अतुलविभव को प्राप्त होकर भी उस सबको स्वप्न सदृश मानते हुए, जो वैभव पुरुष को अति दुर्लभ है, क्योंकि वैभव के परिणाम को जानते रहे, कि–जिसके कारण से पुरुष नरकादि में प्रवेश करता है ॥ १५—१६ ॥

वासुदेवे भगवति तद्भक्तेषु च साधुषु ।
प्राप्तो भावं परं विश्वं येनेदं लोष्ट्रवत्स्मृतम् ॥ १७ ॥
स वै मनः कृष्णपदारविन्दयोर्वचांसि वैकुण्ठगुणानुवर्णने ।
करौ हरेर्मन्दिरमार्जनादिषु श्रुतिं चकाराच्युतसत्कथोदये ॥ १८ ॥
मुकुन्दलिङ्गालयदर्शने दृशौ तद्भृत्यगात्रस्पर्शेऽङ्गसङ्गमम् ।
घ्राणं च तत्पादसरोजसौरभे श्रीमत्तुलस्या रसनां तदर्पिते ॥ १९ ॥
पादौ हरेः क्षेत्रपदानुसर्पणे शिरो हृषीकेशपदाभिवन्दने ।
कामं च दास्ये न तु कामकाम्यया यथोत्तमश्लोकजनाश्रया रतिः ॥ २० ॥
एवं सदा कर्मकलापमात्मनः परेऽधियज्ञे भगवत्यधोक्षजे ।
सर्वात्मभावं विदधन्महीमिमां तन्निष्ठविप्राभिहितः शशास ह ॥ २१ ॥
ईजेऽश्वमेधैरधियज्ञमीश्वरं महाविभूत्योपचिताङ्गदक्षिणैः ।
ततैर्वसिष्ठासितगौतमादिभिर्धन्वन्यभिस्रोतमसौ सरस्वतीम् ॥ २२ ॥
यस्य क्रतुषु गीर्वाणैः सदस्या ऋत्विजो जनाः ।
तुल्यरूपाश्चानिमिषा व्यदृश्यन्त सुवाससः ॥ २३ ॥
स्वर्गो न प्रार्थितो यस्य मनुजैरमरप्रियः ।
शृण्वद्भिरुपगायद्भिरुत्तमश्लोकचेष्टितम् ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नन्वेवं जानन्तोऽपि विभवैषिणो दृश्यन्ते, तत्राह–वासुदेवइति । भावं भक्तिं प्राप्तः येन भावेनेदं विश्वं लोष्टवदति तुच्छं स्मृतम् ॥ १७ ॥

भक्तिमेव सर्वेन्द्रियाणां भगवत्परत्वकथनेन प्रपञ्चयति–सवा-इति त्रिभिः। श्रुतिं श्रोत्रमच्युतस्य सत्कथानामुदये श्रवणे चकारेत्यस्य सर्वत्रान्वयः ॥ १८ ॥

मुकुन्दस्य लिङ्गानामालयानि स्थानानि तेषां दर्शने दृशौ नेत्रे श्रीमत्यास्तुलस्यास्तत्पादसरोजेन यत्सौरभं तस्मिन् तदर्पिते तस्मै निवेदितान्नादौ ॥ १९ ॥

कामं स्रक्चन्दनादिसेवां दास्ये निमित्ते तत्प्रसादस्वीकाराय न तु कामकाम्यया विषयेच्छया, कथं चकार ? उत्तमश्लोकजनाश्रया रतिर्यथा भवेत्तथा, अनेन तद्भक्तेषु च परम्भावं प्राप्त इत्येतत्स्फुटीकृतम् ॥ २० ॥

सर्वत्राऽऽत्मेति भावो भावना यस्मिंस्तमात्मनः स्वस्य कर्मणां कलापं समूहं भगवति विदधत्समर्पयंस्तन्निष्ठैर्भागवतैर्विप्रैरभिहितः शिक्षितस्सन् महीं शशास पालयामास अनेनाधिकृतो धर्मोऽपि यथावद्दर्शितः ॥ २१ ॥

किं च यज्ञाधिष्ठातारमीश्वरमश्वमेधैरीजे आराधयामास महाविभूत्योपचितान्यङ्गानि दक्षिणाश्च येषु तैः वसिष्ठादिभिर्हेतुभूतैस्ततैर्विस्तृतैः धन्वनि धन्वदेशे निरुदके सरस्वतीमभिस्रोतम् तस्याः प्रतिलोमामित्यर्थः ॥ २२ ॥

किं च यस्य क्रतुषु सदस्यादयो गीर्वाणैः सह भूषणादिभिस्तुल्यरूपा व्यदृश्यन्त स इत्थमिति चतुर्थेनान्वयः न च देवानां निमेषाभावाद्विलक्षणयं यतोऽनिमिषाश्च व्यदृश्यन्त न निमिषन्तीति तथा आश्चर्यदर्शनौत्सुक्येन तेषां निमेषोपरमादिति भावः ॥ २३ ॥

यस्य यदीयैर्मनुजैरपि स्वर्गो न प्रार्थितस्तस्य तु का वार्ता ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

न केवलं विरक्तो बभूव अपितु भगवति वासुदेवे तद्भक्तेषु साधुषु लक्षणलक्षितेषु च परम्भावं भक्त्यात्मकमभिप्रायं गतः प्राप्तः,भावं विशिनष्टि,येन भावेनेदं विश्वं लोष्ठवदनुपादेयममन्यतेत्यर्थः ॥ १७ ॥

वासुदेवे परं भावं गत इत्येतदेव प्रपञ्चयति–सवा इति । तावन्मनुष्यदेहस्य सर्वविधभगवत्सेवोपयुक्ततामावेद्य तथैव कृतवान्

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्याह-सवा इति त्रिभिः । स वै अम्बरीषः वै शब्दः प्रसिद्धिद्योतकः मनः कृष्णाख्य भगवतः पदारविन्दयोश्चकार तच्चिन्तनप्रवणमकरोदित्यर्थः । वैकुण्ठस्य गुणानामनुवर्णने वचांस्यकरोत् गुणावर्णनप्रवणान्येवाकरोदित्यर्थः । एवमुत्तरत्रापि द्रष्टव्यं भगवन्मन्दिरमार्जनादिषु व्यापारेषु हस्तावकरोत् आदिशब्दाद्दाराधनादीनां सङ्ग्रहः अच्युतानां सत्कथानां पुण्यावहानां भगवत्कथानां पुण्यप्रदानामुदये श्रवणे श्रुतिं श्रोत्रेन्द्रियं चकार ॥ १८ ॥

मुकुन्दस्य लिङ्गानि विग्रहा आलयाः स्थानानि च तेषां दर्शने दृशौ नेत्रे चकार तस्य मुकुन्दस्य ये भृत्यास्तेषां गात्राणां स्पर्शने निमित्ते अङ्गसङ्गं स्वाङ्गस्य यत्किञ्चिद्वस्तुसंस्पर्शं मुकुन्दभक्तगात्रं चेत् पस्पर्श नेतरादित्यर्थः । श्रीमत्याः तुलस्याः मुकुन्दपादसरोजेन यत्सौरभं तत्पादसरोजसम्बन्धेन यत्सौरभं तस्मिन् घ्राणेन्द्रियं चकार तदर्पिते मुकुन्दाय निवेदितेऽन्नादौ रसनाम् ॥ १९ ॥

हरेः क्षेत्राणि वेङ्कटाद्र्यादीनि तेषां पन्थानो मार्गाः क्षेत्रपथाः "ऋक्पूरब्धूः" इतिसमासान्तोऽप्रत्ययः तेष्वनुसर्पणे गमने पादौ हृषीकेशपदयोरभिवन्दने शिरो मूर्धानं कामं तदर्पितस्रक्चन्दनादिभिः सेवां दास्ये निमित्ते चकार तत्प्रसादस्वीकारस्तद्दास्यार्थमेव न तु कामकाम्यया विषयेच्छया कृत इत्यर्थः । सर्वमेतत्कथं चकार? उत्तमश्लोकजना भगवद्भक्तास्तदाश्रया रतिः तत्पर्यन्ता रतिर्भक्तिर्यथा भवेत् तथा चकारेत्यर्थः । तथेति पाठे उत्तमश्लोकजनाविषया रतिश्च तस्याभवदित्यर्थः । अनेन तद्भक्तेषु च परमभावकृत इत्येतत्प्रपञ्चितम् अतो न पौनरुक्त्यम् ॥ २० ॥

एवं सर्वात्मभावं सर्वात्मना करणत्रयेण भावो भावना यस्मिन् तं कर्मकलापमधियज्ञे यज्ञनिर्वाहके भगवति विदधत्समर्पयन् कर्मसमूहस्य भगवदाराधनरूपतामनुसन्दधादित्यर्थः । यद्वा, एवंविधं कर्मकलापं भगवति सर्वात्मभावं सर्वस्यान्तरात्मत्वानुसन्धानं च विदधत् कुर्वन् भगवन्निष्ठैर्विप्रैर्वसिष्ठादिभिरभिहितः एवं कुर्वंश्च माकार्षीरित्येवमुक्त इमां महीं सप्तद्वीपवतीं शशास पालयामास ॥ २१ ॥

एवं महाविभूत्या उपचितानि बहूकृतानि अङ्गानि दक्षिणाश्च येषु तैरश्वमेधैर्वसिष्ठादिभिर्हेतुभूतैस्ततैर्विस्तृतैराराधयामास धन्वन् धन्वनि निरुदके देशे विभक्तिलोप आर्षः निरुदकात्तस्माद्देशादभिस्रोतं प्रवाहाभिमुखं यथा भवति तथा यष्टुं सरस्वतीं नदीमगादित्यर्थः ॥ २२ ॥

तेनानुष्ठितानश्वमेधान् विशिनष्टि-यस्येति । यस्याम्बरीषस्य क्रतुषु अश्वमेधेषु सभ्या ऋत्विजश्च जना गीर्वाणैर्देवैः सह भूषणादिभिस्तुल्यरूपिणो व्यदृश्यन्त तथा अनिमिषा इन्द्रादयो देवाः सुवाससः शोभनवस्त्राभरणादियुक्ता व्यदृश्यन्त अलक्ष्यन्त यच्छब्दानां स इत्यमिति चतुर्थेनान्वयः ॥ २३ ॥

न केवलं तदीयजनानां वस्त्रभूषणादिभिरमरतौल्यमेवापि तु स्वर्गिभ्योऽप्यतिशयितसुखत्वञ्चेत्याह-स्वर्ग इति । उत्तमश्लोकस्य भगवतः चेष्टितमनुगायद्भिः शृण्वद्भिश्च यस्याम्बरीषस्य सम्बन्धिभिर्जनैरमराणां प्रियः स्वर्गोऽपि न प्रार्थितः स्वर्गादप्यतिशयितमुत्तमश्लोकचेष्टितश्रवणगानजं सुखरसमनुभवद्भिः स्वर्गोऽप्युपेक्षित इति भावः तदीयैरेव जनैः स्वर्ग उपेक्षितस्तेनोपेक्षित इति किमु वक्तव्यमिति भावः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

परमभावमुत्कृष्टां भक्तिं येनाम्बरीषेण इदं विश्वं लोष्टवत् पांसुपिण्डवत् स्मृतं येन भावेन वा ॥ १७ ॥

उत्कृष्टभक्तिमतः प्रवृत्तिं दर्शयति-सवा इति ॥ १८ ॥

मुकुन्दस्य लिङ्गं प्रतिमालक्षणं तेन युक्तस्याऽऽलयस्य पादसरोजसौरभेण युक्तायाम् ॥ १९ ॥

कामकाम्यया विषयतृष्णया उत्तमश्लोकस्य हरेः जनानाश्रयतीति जनाश्रया ताम् ॥ २० ॥

तस्मिन् हरौ निष्ठा मनोयोगलक्षणा येषां ते तथा तादृशैर्विप्रैरभिहितः कर्मकलापं कर्मसमूहं सर्वात्मभावं भक्तिं चोदितं स्वयं भगवति विदधत् ॥ २१ ॥

सरस्वतीमभिस्रोतं सरस्वत्याः स्रोतो जलप्रवाहः स यथाऽभिमुखो भवति तथा सरस्वतीजलमुद्दिश्येत्यर्थः । उपचिता संवर्द्धिता यज्ञस्याऽङ्गभूता दक्षिणा येषां ते तथा तैः तत्तद्विद्यासु निपुणैर्वसिष्ठश्चासितश्च गौतमश्चादिर्येषान्ते तथा तैः ॥ २२ ॥

तुल्यरूपाः रूपयौवनवस्त्राभरणादिभिः समानवेषाः अनिमिषाः उन्मीलितलोचनाः ॥ २३ ॥

यस्याम्बरीषस्य मनुजैरमरप्रियः स्वर्गोऽपि न प्रार्थित इत्यन्वयः । तत्र किङ्कारणमिति तत्राह-शृण्वद्भिरिति । अनेन मुकुन्दचरितश्रवणगायनाभ्यामधिकं स्वर्गसुखं न भवत्यतः स्वर्गो न प्रार्थित इत्युक्तम् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सवै इति त्रिकम् । दास्ये निमित्ते साक्षात्तद्दासभावप्राप्त्यर्थमेव काममभिलाषं चकार न तु तद्व्यतिरेकेण तेनैव वा कामकाम्यया विषयभोगेच्छया चकारेत्यर्थः । कथं तत्राह-येनैव प्रकारेण उत्तमश्लोकजना ये प्रह्लादादयस्तदाश्रया तदाधारा या भगवद्विषया रतिः सा भवेत् ॥ १८—२० ॥

एवं पूर्वोक्तप्रकारेणात्मकर्तृककर्मकलापं परे भगवति विदधत् कीदृशन्तम्? सर्वात्मना भावो भक्तिर्यत्र तादृशम् ॥ २१ ॥

ननु, कथं सवै मन इत्यादौ सति यज्ञक्रियास्यादेकान्तत्वादित्याशङ्क्याह-वसिष्ठादिभिस्तैरिति । वसिष्ठादिद्वारा कृतैरित्यर्थः । सरस्वतीमिति कर्ममार्गे तस्यामादरो दर्शितः अभिस्रोतमिति क्रमात्तत्तीर्थक्रमेणेति भावः । धन्वनीति धन्वदेशान्तर्गतेष्वपि तत्तीर्थेष्वित्यर्थः । एतेन तत्रापि पुण्यत्वं ज्ञापितम् ॥ २२—२३ ॥

समर्द्धयन्तीत्यत्र स्वाराज्यमिन्द्रपदतुल्यता ॥ २४—२५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

येन परमभावेन प्रेम्णा इदं विश्वं लोष्टवत्स्मृतं परामृष्टं भवेत् ॥ १७ ॥

तस्य प्रेम्णः साधनं भक्तियोगमाह—सवा इति त्रिभिः । मन आदीनां चकारेत्यनेनान्वयः, राज्ये स्वपुरुषानिव मन आदीनि यान्यपि स यत्रयत्र न्ययुङ्क्त तत्रतत्रैव तानि तदाज्ञां शिरसा निधायैवासन्नित्यसाधारण्यं तस्य राज्ञः साम्राज्यमिति भावः । श्रुतिं श्रोत्रं अच्युतस्य विष्णोः सतां तद्भक्तानां कथोदये च कथोत्कर्षे न तु ज्ञानकर्माद्युत्कर्षे इत्यर्थः । मुकुन्दस्य लिङ्गानां प्रतिमानां च आलयानां मन्दिराणां च मथुरादिनित्यसिद्धधाम्नां च वैष्णवानां च दर्शने श्रीमत्यास्तुलस्यास्तत्पादसरोजसम्पर्केण यत्सौरभं तस्मिन् भगवच्चरणार्पिततुलसीगन्ध इत्यर्थः । तदर्पिते महाप्रसादाऽन्ने रसनां जिह्वां हरेः क्षेत्रं मथुरादिपदमन्यत्रापि तन्मन्दिरादि तदनुसर्पणे तत्र तत्र पुनःपुनर्गमने हृषीकेशस्य पदयोश्चरणयोः पदानां भक्तानां चापि वन्दने काममभिलाषं दास्ये हरेरहं दासो भूयासमित्येवं न तु कथं कामकाम्यया विषयभोगेच्छायां सप्तम्यर्थे तृतीया, कथं चकार ? उत्तमश्लोकजनाः प्रह्लादादय आश्रयो यस्यास्तथाभूता निष्कामैव रतिर्यथा येन प्रकारेण स्याद्भवद्वा तथा चकारेत्येतत् स वै मन इत्यादिषु सर्वत्रैवान्वितं ज्ञेयम् ॥ १८-२० ॥

तस्य तादृशसाम्राज्यसम्पत्तावपि भक्तावावस्थस्यप्राति निष्पर्शाश्च नाभूदित्याह—एवमिति । सदा प्रतिदिनमेव आत्मनः स्वस्य एवं कर्मकलापं स्मरणकीर्तनमन्दिरमार्जनादिकं विदधत्स्वयमेव कुर्वन् महीं, शशास, कर्मकलापं कीदृशम् ? अधोक्षजे कृष्णे सर्वेण श्रोत्रादीन्द्रियवृत्तिसहितेनैवात्मना मनसा भावो रतिर्यतस्तम् अधियज्ञे तपोज्ञानादिक्योऽव्यभिको यज्ञः पूजा यस्य तस्मिन् हरिभक्तिनिष्ठब्राह्मणेन अभिहितः त्वमष्टावेव यामान् निर्विक्षेपमेव सर्वात्मना हरिं भज राज्यकर्मणि स्वनियुक्तैर्योग्यपुरुषैरेव महीं शाधि चेति शिक्षितस्सन्नित्यर्थः ॥ २१ ॥

तथैव राज्याधिकारोचिताश्वमेधादियज्ञकरणं च आदिभरतवशिरभिलानस्य तत्र प्रतिनिधिद्वारैवेत्याह—ईजे इति । महासम्पत्त्यैव हेतुना उपचितानि सम्यगेव निर्व्यूढानि अङ्गानि दक्षिणाश्च येषु तैः वसिष्ठादिभिःस्वप्रतिनिधिभिस्ततैर्विस्तृतैः धन्वनि धन्वदेशे सरस्वतीं सरस्वत्याम् अभिस्रोतं स्रोतोऽभिमुखमभिलक्ष्यते न स्वयन्तु ततो विदूरे स्वराजधान्यां निर्विक्षेपं परिचर्यां कुर्वन्नेवाऽतिष्ठदिति व्यञ्जितम् ॥२२॥

गीर्वाणैः सह तुल्यरूपाः नचानिमिषत्वेन देवानां वैलक्षण्यं वाच्यं यतो मनुष्या अपि अद्भुतयज्ञदर्शनादनिमिषा व्यदृश्यन्त दृष्टाः ॥ २३ ॥

यस्य मनुजैः धत्पाल्यमानलोकैः स्वर्गो न प्रार्थितः किं स्वर्गीयभोगादधिकभोगप्राप्त्या ? नेत्याह—शृण्वद्भिरित्यादि ॥ २४॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भावं भक्तिं परफलाभिसन्धिरहितं येन भावेन ॥ १७ ॥

तस्य वासुदेवे भक्तिमेव निरूपयति—स इति त्रिभिः । अच्युतसत्कथानामुदये श्रवणे श्रुतिं श्रवणं चकार ॥ १८ ॥

मुकुन्दस्य लिङ्गानां विग्रहाणां यानि आलयानि तेषां स्थानानां दर्शने दृशौ नेत्रे तद्भक्तानां गात्राणि चरणादीनि तत्स्पर्शने अङ्गसङ्गं मस्तकादिसङ्गमम् श्रीमत्यास्तुलस्याः तत्पादसरोजेन यत्सौरभं तस्मिन् घ्राणम् तदर्पिते तस्मै निवेदितेऽन्नादौ रसनां रसनेन्द्रियं चकार ॥ १९ ॥

हरेः क्षेत्राणि श्रीमथुरादीनि तीर्थानि तदर्थं यत्पदानुसर्पणं शिविकादियानं विहाय पद्भ्यामेव गमनं तत्र पादौ चकार हृषीकेशपादयोरभिवन्दने शिरः कामं सङ्कल्पं दास्ये चकार न तु कामकाम्यया विषयेच्छया किं बहुना उत्तमश्लोकस्य विष्णोर्ये जनाः पूर्वे भागवताः तदाश्रया तत्कर्तृका यथा रतिस्तथा तस्येति शेषः ॥ २० ॥

तन्निष्ठैर्भागवतैर्विप्रैरभिहित उपदिष्टः एवमुक्तप्रकारेण सर्वं संपूर्णम् आत्मभावं परमात्मभक्तिम् आत्मनः कर्मकलापं नित्यनैमित्तिकक्रियासमूहं च भगवति सदा विदधत् महीं शशास पालयामास ॥ २१ ॥

किञ्च असौ अम्बरीषः महाविभूत्या उपचितानि अङ्गानि दक्षिणाश्च येषु तैः ततैर्विततैः अश्वमेधैरधियज्ञं यज्ञाधिष्ठातारं वसिष्ठादिभिर्हेतुभूतैरीजे आराधयामास धन्वनि निरुदके देशे सरस्वतीमभिस्रोतं स्वरस्वत्याः प्रतिलोमम् ॥ २२ ॥

किञ्च यस्य क्रतुषु सदस्यादयः अद्भुतदर्शनवशान्निमिषोपरमादनिमिषाः गीर्वाणैर्देवैः तुल्यरूपा व्यदृश्यन्त स इत्थं भक्तियोगेन हरिं प्रीणन् सङ्गान् जहाविति चतुर्थेनान्वयः ॥ २३ ॥

तस्य निष्कामहरिभक्तत्वं कैमुतिकन्यायेनाह—स्वर्गं इति द्वाभ्याम् ॥ २४ ॥

भाषा टीका ।

वह अंबरीष भगवान् श्रीवासुदेव के विषय तथा उनभक्त साधुजनों के विषय परमभाव को प्राप्त होगये । जिस भाव के प्राप्त होने पर यह विश्व लोष्ठ सदृश जान पडता है ॥ १७ ॥

तब तौ—

वाने हरी चरण में मन को लगायौ ।
वाणी हु ते हरि हि के गुण को जु गायौ ॥
हाथों हु से सदन की करते बुहारी ।
कानों सु नित्य सुनते हरि कीर्ति भारी ॥ १८ ॥

और इसी प्रकार श्रीमुकुन्द के मूर्त्ति और मंदिरों के दर्शन में नेत्रों को लगाया, और अपने अंग के संगम को भगवान के भक्तों के गात्रस्पर्श में लगाया, और इन्द्रियों को श्रीहरिके चरणकमल के सौरभ में अर्थात् चरणाब्ज में समर्पित तुलसी के गंध में लगाई इसी प्रकार रसना इन्द्रिय को आपके निवेदित प्रसाद अन्नादिकों में लगाई ॥ १९ ॥

और अपने पगों को श्रीहरि के क्षेत्र गमन में, शिरको हृषीकेश के पदाभिवन्दन में, और अपनी चाहना को आपके दास्य रस की चाहना में लगाई विषयों की इच्छा में नहीं लगाई, जिसमें उत्तम श्लोक [श्रीकृष्ण] के जनों में प्रीति हो ॥ २०॥

(१)समर्द्धयन्ति तान्कामाः स्वाराज्यपरिभाविताः ।
दुर्लभा नापि सिद्धानां मुकुन्दं हृदि पश्यतः ॥ २५ ॥
स इत्थं भक्तियोगेन तपोयुक्तेन पार्थिवः ।
स्वधर्मेण हरिं प्रीणन् सङ्गान् सर्वान् शनैर्जहौ ॥ २६ ॥
गृहेषु दारेषु सुतेषु बन्धुषु द्विपोत्तमस्यन्दनवाजिपत्तिषु ।
अक्षय्यरत्नाभरणायुधादिष्वनन्तकोशेष्वकरोदसन्मतिम् ॥ २७ ॥
तस्मा अदाद्धरिश्चक्रं प्रत्यनीकभयावहम् ।
एकान्तभक्तिभावेन प्रीतो भृत्याभिरक्षणम् ॥ २८ ॥
आरिराधयिषुः कृष्णं महिष्या तुल्यशीलया ।
युक्तः साम्वत्सरं वीरो दधार द्वादशीव्रतम् ॥ २९ ॥
व्रतान्ते कार्त्तिके मासि त्रिरात्रं समुपोषितः ।
स्नातः कदाचित्कालिन्द्यां हरिं मधुवनेऽर्चयत् ॥ ३० ॥
महाऽभिषेकविधिना सर्वोपस्करसम्पदा ।
(२)अभिषिच्याम्बराकल्पैर्गन्धमाल्यार्हणादिभिः ॥ ३१ ॥
तद्गतान्तरभावेन पूजयामास केशवम् ।
ब्राह्मणांश्च महाभागान् सिद्धार्थानपि भक्तितः ॥ ३२ ॥

भाषा टीका ।

इस प्रकार राजा अंबरीष अपने सर्व कर्म कलापों को अधियज्ञ भगवान अधोक्षज परब्रह्म के विषय सर्वात्मभाव से समर्पण करता हुआ ब्राह्मणों के कहने से इस पृथिवीको भगवन्निष्ठ होकर पालन करते रहे ॥ २१ ॥

और धन्वदेश में सरस्वती जल का उद्देश्य करके बडी विभूति से वृद्धि को प्राप्त हुए, अंग और दक्षिणादिकों से और वसिष्ठ असित गौतमादिकों के विध विधान द्वारा विस्तारित ऐसे उत्तम आश्रम में अश्वमेध यज्ञों से यज्ञपति ईश्वर श्रीगोविन्द का यजन करते हुए ॥ २२ ॥

जिन अम्बरीष महाराज के यज्ञों में सुन्दर वस्त्र पहिने हुए सभासद और ऋत्विक् जन देवताओं के साथ में तुल्य रूप वाले देख पडते हुए यदि कहो कि देव लोग तो अनिमिष रहे ? तो ये सब लोग भी आश्चर्य से दर्शन में उत्सुक होने से निर्निमेष रहे ॥ २३ ॥

जिन अम्बरीष महाराज के राज्य में मनुष्यों को भी स्वर्ग की इच्छा नहीं होती रही क्योंकि वे लोग सदा उत्तम श्लोक श्रीहरि के चरित्रों को सुनते रहे और गान करते रहे ॥२४॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आस्तां स्वर्गप्रार्थनशङ्काऽपि यद्यतः मुकुन्दं हृदि पश्यतस्तान् जनान्कामा विषया न समर्द्धयन्ति न हर्षयन्ति, कथम्भूताः स्वाराज्येन स्वरूपसुखेन परिभाविता अतिशायिताः अतएव सिद्धानामपि दुर्लभाः यानिति पाठे यान्मनुजान् स्वाराज्येत्यत्रापि द्वितीयान्तपाठे मनुजानां विशेषणम् यमिति पाठे यमम्बरीषं पश्यतामिति पाठे सिद्धानां विशेषणम् ॥ २५ ॥

एवं भगवदाराधनपरस्य कामाद्युपेक्षा नैव चित्रमित्युपसंहरति स इत्थमिति द्वाभ्याम् ॥ २६ ॥२७ ॥

नन्वेवम्भूतोऽसौ कथं प्रतिपक्षान् जयेत्तत्राह–तस्मा इति ॥ २८॥

तदेवं तस्य वैराग्यादिकं हरिभक्तिं चोक्त्वा ब्रह्मदण्डो यत्र न प्राभूदिति यदुक्तं तदेव द्वादशीव्रतनिष्ठां कथयन्नाह–आरिराधयिषुरित्यादिना यावदध्यायसमाप्ति ॥ २९ ॥

अर्चयत् आडागमाभाव आर्षः ॥ ३० ॥ ३१ ॥

ब्राह्मणांश्च पूजयामास सिद्धार्थानाप्तकामान्पूजानपेक्षानपि ॥ ३२ ॥

(१) नवर्द्धयन्ति यान् कामाः इति वीर० । (२) अभिषिच्य वराकल्पैः इति विज० पाठः ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

आस्तांतावत्स्वर्गप्रार्थनाशङ्कापि सिद्धानां योगीश्वराणामपि दुर्लभाः कामाः काम्यन्त इति कामाः अणिमादयः स्वाराज्यपरिभाविताः स्वाराज्येनाकर्मवश्यत्वावहब्रह्मात्मकस्वात्मानुभवेन परिभाविताः प्रापिताः मुकुन्दं हृदि पश्यतः उपासीनान् यान् यदीयान् जनान्नवर्द्धयन्ति न हर्षयन्ति अणिमादयोपि न हर्षयन्ति किमुत न स्वर्गो हर्षयतीति भावः । यमिति पाठे यमम्बरीषं पश्यतामिति पाठे तत्सिद्धानां विशेषणम् ॥ २५ ॥

यस्य सम्बन्धिनो जना एवंविधाः स पार्थिवोऽम्बरीषः तपोयुक्तेन तपः शब्दोत्रात्मयाथात्म्यज्ञानयोगपरः "तप आलोचने" इति ज्ञानार्थात्तपधातोर्निष्पन्नत्वात् तद्युक्तेन स्वधर्मेण स्ववर्णाश्रमोचितासङ्गकर्मानुष्ठानेन भक्तियोगेन ज्ञानकर्मानुगृहीतभगवद्भक्तियोगेनेत्यर्थः । हरिं स्वाश्रितानां संसृतिबन्धहरं भगवन्तं प्रीणयन् शनैः सर्वान् सङ्गान् हृद्गतान् देहतदनुबन्धिविषयान् ऐहिकानामुष्मिकांश्च जहौ तत्याज ॥ २६ ॥

सङ्गान् जहावित्येतदेव प्रपञ्चयति—गृहेष्विति । गृहादिषु गजोत्तमरथाश्वादिवस्तुषु अक्षय्येषु वस्त्रादिषु अनर्घिकेषु कोशेषु धनभाण्डागारेषु असन्मतिमपुरुषार्थत्वबुद्धिमनित्यत्वबुद्धिं हेयत्वबुद्धिं वा अकरोत् ॥ २७ ॥

एवंभूतोऽसौ कथं प्रतिपक्षान् जितवान् ? तत्राह—तस्मा इति । एकान्तभक्तियोगेनानन्यप्रयोजनभक्तियोगेन प्रीतो हरिस्तस्मै अम्बरीषाय भीतानभिरक्षतीति तथा नन्द्यादिरत्वात्कर्त्तरि ल्युः प्रत्यनीकाः समाश्रितानां विपक्षास्तेषां भयमावहतीति तथा तच्चक्रं सुदर्शनमदात् ॥ २८ ॥

को वैवंविधस्यास्य प्रतिपक्षो बभूव ? यस्य भयावहं हरिश्चक्रमदादित्यपेक्षायां तदुपपादयितुं तावत्प्रस्तावमाह—आरिराधयिषुरित्यादिना । प्रादिष्टमित्यतः प्राक्तनेन ग्रन्थेन भगवन्तमाराधयितुमिच्छुर्वीरोऽम्बरीषस्तुल्यशीलया स्वतुल्यस्वभावसद्वृत्तिमत्या भार्यया सह युक्तः सम्वत्सरपर्यन्तं द्वादशीव्रतं दधार चकार ॥२९॥

व्रतान्ते सम्वत्सरमनुष्ठितव्रतान्ते कार्त्तिके मासि अनेन व्रतोपक्रमोपि कार्त्तिकशुक्लद्वादश्यामिति फलितं त्रिरात्रं नवमीदशम्येकादशीषु सम्यगुपोषितः दशम्यामेकभुक्तं द्वादश्यामेकभुक्तमेकादश्यामुपवास इत्युपवासत्रयमिति कश्चित्सम्प्रदायः कदाचिद्द्वादश्यामित्यर्थः । कालिन्द्यां यमुनायां स्नात्वा मधुवनाख्ये वने सर्वेषामुपकरणानामाराधनोपकरणानां गन्धपुष्पधूपदीपादीनां सम्पत्समृद्धिर्यस्य तेन महाभिषेकविधिना सहस्रकलशस्नापनविधिना हरिमभिषिच्यार्चयत् अडभाव आर्षः ॥ ३० ॥ ३१ ॥

आर्चयदित्येव प्रपञ्चयति—वरैः श्रेष्ठैराकल्पैराभरणैर्गन्धैः माल्यैः कुसुमैरर्हणैः अर्घ्योदकैरादिशब्दात्पाद्यादिभिर्धूपदीपनैवेद्यादिभिश्च केशवं तद्गतान्तर्भावेन केशवनिविष्टान्तःकरणव्यापारेण पूजयामास तथा महाभागान् विदुषः अत एव सिद्धार्थान् सिद्धः प्राप्तः प्रहर्षार्थः आनन्दो येषां तान् नित्यसन्तुष्टान् पूजानपेक्षानिति यावत् तादृशानपि ब्राह्मणांश्च पूजयामास भागवतानभ्यर्चयदित्यर्थः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यस्य काम्यन्त इति कामा विषयभोगा नो अल्पत्वान्नवाञ्छिता इति नेत्याह—समृद्धा इति । भोगच्छन्नामलं बुद्धिविषया भवन्तीत्यर्थः, समृद्धौ निमित्तमाह स्वाराज्येति स्वराज्येन स्वरूपभूतैश्वर्येण परिभाविताः प्रचोदिताः अत एवास्य सुलभत्वेऽप्यन्येषां दुर्लभा इत्याह—दुर्लभा इति । अत्रापीदमेव निमित्तमाह मुकुन्दमिति ॥ २५ ॥

अपरोक्षज्ञानफलमाह—स इति । स्वधर्मेण प्रजापालनलक्षणेन ॥२६॥

कथं जहावित्यत्राह—गृहेष्विति । असन्त्यमङ्गलानि अनर्थकरणानीति मतिं बुद्धिं चकार ॥ २७ ॥

अपरोक्षज्ञानित्वेपि यावद्देहं मोक्षासम्भवादुद्रिक्तभक्तिभास्करात्फुल्लहृदयाम्बुजस्य हरेरम्बरीषेऽनुग्रहविशेषं दर्शयितुमाह, तस्मा इति ॥ २८ ॥

लोकशिक्षाप्रकटनार्थं साम्वत्सरमित्युक्तं न त्वन्यकालनिषेधार्थम् अन्यथा भक्तिलोपः प्रसज्येत ॥ २९—३० ॥

सम्वत्सरव्रतान्तसर्वसाधनसम्पदा महाभिषेकविधिः साम्राज्याभिषेकप्रकारः वराकल्पैरुत्तमाभरणैः ॥ ३१ ॥

तद्व्रतान्तरभावेन श्रीहरिनिष्ठामनस्कत्वेन सिद्धार्थान् कृतकृत्यान् ॥ ३२ ॥ ३३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तपोऽत्र द्वादशीव्रतादिगृहादिषु भगवत्सेवानुपयोगिष्विति ज्ञेयम् ॥ २६—२८ ॥

द्वादशीव्रतम् अभीष्टविशेषसिद्ध्यर्थं तद्विशेषम् ॥ २९—५३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

किञ्च स्वर्गीयभोगादधिके भोगे स्वतःसिद्धेऽपि यदीया मनुजास्तत्र नाऽसज्जन्तेत्याह—समर्द्धयन्तीति । यान् मनुजान् कामा भोगाः समर्द्धयन्ति न हर्षेण वर्द्धयन्ति "ऋभुवृद्धौ" कीदृशाः स्वाराज्यमिन्द्रपदतुल्यं सुखं तेन परिसर्वतोभावेन वासिताः यद्वा स्वाराज्येन स्वरूपसुखेन मुक्त्यानन्देन वासिता युक्ता अत एव सिद्धानामपि दुर्लभाः तत्र हेतुगर्भं मनुजान् विशिनष्टि—मुकुन्दमित्यादिना । अम्बरीषप्रसङ्गादिति भावः । यानिति पाठे यद्यस्मान्मुकुन्दं हृदि पश्यतः परिभावितानिति पाठे मनुजविशेषणं यमिति पाठे यमम्बरीषम् ॥ २५ ॥

मन्दिरमार्जनजलकलशवहनवैष्णवशुश्रूषणादिना शरीरकष्टं भोगत्यागश्च तपस्तद्युक्तेन स्वधर्मेणेति भक्तियोगेनेत्यस्य विशेषणं चकाराभावादम्बरीषस्य शुद्धभक्तत्वाच्च एकान्तभक्तिभावेनेत्यग्रिमोक्तेश्च ॥ २६ ॥ २७ ॥

नन्वेवम्भूतोऽसौ कथं प्रतिपक्षान् जयेत्? तत्राह—तस्मा इति । प्रीत इति तस्यैकान्तिकभक्तौ विक्षेपाभावार्थमित्यर्थः ॥ २८ ॥

गवां रुक्मविषाणीनां रूप्याङ्घ्रीणां सुवाससाम्।
पयःशीलवयोरूपवत्सोपस्करसम्पदाम्॥ ३३॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

तस्यैकादशीव्रतनिष्ठया दर्शितयैव सर्वभक्तिनिष्ठां ज्ञापयन्नाह, आरिराधयिषुरित्यादि॥ २९॥

तस्य स्वायुःपर्यन्तमेकादशीव्रतनिष्ठत्वेपि संवत्सरमात्रन्तु मथुरायामेकादशीव्रतं कर्त्तव्यमित्यभिलाष आसीदतस्तत्पूर्त्तौ सत्यां व्रतान्त इति। दशमीद्वादश्योर्विहितेतरभोजनाभावेन एकादश्यां निराहारत्वेन त्रिरात्रमुपोषितः॥ ३०॥

सर्वेषामुपस्कराणां सर्वौषध्यादीनां सम्पद्यत्र तेन माकल्पैर्विभूषणैः॥ ३१॥

तद्गतान्तरभावेन तदेकमनस्त्वेन॥ ३२ ३३॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

आस्तां स्वर्गप्रार्थनशङ्कापि यतः तान् अम्बरीषमनुजान् स्वाराज्यं क्षेत्रज्ञस्वरूपप्राप्तिलक्षणो मोक्षस्तेन भाविता अतिशायिताः अत एव सिद्धानामपि दुर्लभाः काम्यन्त इति कामाः सर्वक्लेशविनिर्मुक्तत्वकालादिभयशून्यत्वस्वरूपानन्दत्वसत्वादयो गुणाः न समर्द्धयन्ति, तत्र हेतुः मुकुन्दं हृदि पश्यतः अनेन संसारिभ्यः सिद्धानां सिद्धेभ्यः क्षेत्रज्ञस्वरूपप्राप्तिलक्षणमोक्षवतां तेभ्यो मुकुन्दध्याननिष्ठानामधिकं सुखं ततोपि मुकुन्दध्यानफलभूततद्भावापत्तिलक्षणमोक्षवतां निरतिशयं सुखमिति द्योत्यते॥ २५—२८॥

महिष्या तुल्यशीलया सह कृष्णमारिराधयिषुः साम्वत्सरं व्रतं षष्ठस्कन्धप्रसिद्धं दधार, तथा—

"सम्पूर्णैकादशी यत्र द्वादशी च तथा भवेत्।
त्रयोदश्यां मुहूर्त्तार्द्धं वञ्जुली सा हरिप्रिया॥
शुक्ले वा यदि वा कृष्णे यदा भवति वञ्जुली।
एकादशीदिने भुक्ता द्वादश्यां कारयेद्व्रतम्॥
पारणं द्वादशीमध्ये त्रयोदश्यां न कारयेत्"।

इति पाद्मोक्तं द्वादशीव्रतं च युक्तं साम्वत्सरव्रतान्ते कालगत्या योजितं दधार चकारेत्यर्थः॥ २९॥

तदेवाह-व्रतान्ते इत्यादिना। कार्तिके मासि व्रतस्य साम्वत्सरव्रतस्य योऽन्तः समाप्तिः कार्त्तिकशुक्लत्रयोदशीगतायां द्वादश्यामित्यर्थः, त्रिरात्रं समुपोषितः दशम्यां मध्यान्हे समये एकभुक्तः यद्यपि "एकादशीदिने भुक्ता द्वादश्यां कारयेद्व्रतम्" इति पाद्मोक्तिस्तथाप्यशक्तविषयमेतद्वाक्यमिति मत्वा श्रद्धातिशयेन एकादश्यां द्वादश्यां च व्रतोपवास एवं त्रिरात्रं सम्यगुपोषितः कृतोपवासः कालिन्द्यां स्नातः क्वचित् कस्मिंश्चित्स्थाने मधुवने हरिमर्चयदित्यन्वयः॥ ३०—३१॥

सिद्धार्थान् अवाप्तकामांश्च पूजयामास॥ ३२॥

भाषा टीका।

स्वर्ग तो क्याही वस्तु है परञ्च जो लोग अपने हृदय में मुकुन्द को देखने वाले है ऐसे लोगों को तो, बडे २ सिद्धों को दुर्लभ जो विषय भोग हैं वेभी नहीं हर्षजनक होते हैं क्योंकि? वे सब विषय सुख स्वरूप सुख से तिरस्कृत हो गये हैं॥ २५॥

वह पार्थिव राजा अम्बरीष इस प्रकार तपयुक्त भक्तियोग से और अपने धर्म से श्रीहरि को प्रसन्न करता हुआ धीरे २ सर्व सङ्गों को छोडता भया॥ २६॥

गृह, दारा, सुत, बन्धु, उत्तम हाथी, रथ, अश्व, और पदाति इत्यादिक सेनामें, तथा अक्षय रत्न, आभरण, आयुधों में और अटूट खजानों में से भी राजा अपनी खोटी बुद्धि अर्थात् ममता को छोडता भया॥ २७॥

राजा अम्बरीष के भक्ति एकान्त भाव से प्रसन्न होकर श्रीहरि ने शत्रुओं की सेना को भय प्राप्त करने वाला अपना सुदर्शन चक्र अपने दास की रक्षा के लिये दिया॥ २८॥

एक समय राजा अपने सदृश स्वभाव वाली रानी सहित श्रीकृष्ण के आराधन की इच्छा से सावधान होकर एक वर्ष तक द्वादशी का व्रत धारण करते हुए॥ २९॥

कार्तिक मास में व्रत के अन्त में तीन रात्रि पर्यन्त उपवास किया और श्रीयमुनाजी में स्नान करके मधुवन में हरि पूजन करते रहे॥ ३०॥

सर्व सामग्री और सम्पत्तियों से महा अभिषेक की विधि से श्रीकृष्ण को अभिषेक कराया और उत्तमोत्तम वस्त्र पहनाये गन्ध धूप दीप मालाओं से पूजा करी॥ ३१॥

और परमात्मा में आन्तरिक भाव से श्रीकेशव का पूजन किया। और समृद्ध ब्राह्मणों को भी फिर अपनी भक्ति से पूजन करते हुए॥ ३२॥

श्रीधरस्वामिकृतभावार्थदीपिका।

रूप्याङ्घ्रीणां रूप्यखुराणाम् पयःशीलादिसम्पदो यासां तासाम्॥ ३३॥

प्रादाद्गोत्साधुविप्रेभ्यो गृहेषु न्यर्बुदानि षट् ।
भोजयित्वा द्विजानग्रे स्वाद्वन्नं गुणवत्तमम् ॥ ३४ ॥
लब्धकामैरनुज्ञातः पारणायोपचक्रमे ।
तस्य तर्ह्यतिथिः साक्षाद्दुर्वासा भगवानभूत् ॥ ३५ ॥
तमानर्चातिथिं भूपः प्रत्युत्थानासनार्हणैः ।
ययाचेऽभ्यवहाराय पादमूलमुपागतः ॥ ३६ ॥
प्रतिनन्द्य स तद्याच्ञां कर्त्तुमावश्यकं गतः ।
निममज्ज बृहद्ध्यायन् कालिन्दीसलिले शुभे ॥ ३७ ॥
मुहूर्त्तार्द्धावशिष्टायां द्वादश्यां पारणं प्रति ।
चिन्तयामास धर्मज्ञो द्विजैस्तद्धर्मसङ्कटे ॥ ३८ ॥
ब्राह्मणातिक्रमे दोषो द्वादश्यां यदपारणे ।
यत्कृत्वा साधु मे भूयादधर्मो वा न मां स्पृशेत् ॥ ३९ ॥
अम्भसा केवलेनाऽथ करिष्ये व्रतपारणम् ।
प्राहुरब्भक्षणं विप्रा ह्यशितं नाशितं च तत् ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

न्यर्बुदानि षट् षष्टिकोटीः ॥ ३४ ॥

तर्हि तदैव दुर्वासा अतिथिः साक्षात्प्रत्यक्षोऽभूत् ॥ ३५ ॥

आनर्चार्चितवान् अभ्यवहाराय भोजनाय ॥ ३६ ॥

आवश्यकं नैयमिकं माध्याह्निकं कर्म कर्तुं गतः बृहद्ब्रह्म ॥ ३७–३८ ॥

धर्मसङ्कटमेवाह—यद्यतो ब्राह्मणातिक्रमे दोषो धर्मः द्वादश्यामपारणेपि दोषो व्रतवैगुण्यं यत्कृत्वा यस्मिन्कृते ॥ ३९ ॥

एवं द्विजैस्सह विचार्य निश्चिनोति—अम्भसेति । व्रतस्य पारणं समाप्तिं तदशितमाहुरशितं नेति चाहुः श्रुतिश्च "अपोऽश्नाति तन्नैवाशितं नैवानशितम्"इति ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततः षड्गवां न्यर्बुदानि षष्टिकोटिं साधु यथा तथा विप्रेभ्यः प्राहिणोत्प्रददौ कथम्भूतानाम् गवां रुक्मविषाणीनां स्वर्णकवचितविषाणयुक्तानां राजतालङ्कृतपादानां शोभनानि वासांसि यासां पयः क्षीरं च शीलं सुस्वभावश्च वय अपूर्वप्रसवत्वं च रूपं लाङ्गूलखुरविषाणादिसौष्ठवं च वत्साश्च उपस्कराः दोहनपात्रादीनि च तेषां सम्पत्समृद्धिर्यासां तासां ततः स्वादु मृष्टं गुणवत्तरं षड्रसोपेतमन्नमग्रे ब्राह्मणान् भोजयित्वा ॥ ३३—३४ ॥

लब्धाः कामाः दक्षिणादयो यैस्तैर्द्विजैरनुज्ञातः पारणायोपचक्रमे, तर्हि तदैव भगवान् दुर्वासास्तस्याम्बरीषस्यातिथिः साक्षादभूत्प्रत्यक्षो बभूव ॥ ३५ ॥

तमागतमतिथिं सम्यक्प्रत्युत्थानादिभिरभ्यर्च्य तस्य पादयोर्मूलमुपागतः प्रणतोऽभ्यवहाराय भोजनाय ययाचे भवताऽन्नं भोक्तव्यमिति प्रार्थयामासेत्यर्थः ॥ ३६ ॥

ततः स दुर्वासाः तस्याम्बरीषस्य याच्ञां प्रतिनन्द्यावश्यकं नैयमिकं माध्याह्निकं कर्तुं गतः शुचौ शुद्धे कालिन्द्याः यमुनाया जले बृहत् ब्रह्म ध्यायन् निममज्ज सस्नावित्यर्थः ॥ ३७ ॥

तदा धर्मज्ञोऽम्बरीषो द्वादश्यां मुहूर्त्तार्द्धेन घटिकामात्रेणाव-शिष्टायां सत्यां पारणांप्रति सङ्कटं पारणाविषयकं सङ्कटं द्विजैः सह चिन्तयामास ॥ ३८ ॥

सङ्कटमेवाह—ब्राह्मणातिक्रम इति । ब्राह्मणातिक्रमे ब्राह्मणस्यातिथेरतिक्रमे दोषः अतिथिं निमन्त्र्य तमनादृत्यैव भोजने महान्प्रत्यवायस्तथा द्वादश्यामपारणे च दोषः व्रतवैगुण्यादित्येवंविधं सङ्कटं प्राप्तं तत्र यत्कृत्वा साधु मे भूयात् यत्कृत्वेत्यध्यवसनुवायो यथाचेरयर्थः । यथा च मे साधु भूयादित्यर्थः यथा चाधर्मो मां न स्पृशेत् तथा ब्रूतेति शेषः ॥ ३९ ॥

एवं द्विजैर्विचार्य निश्चिनोति—अम्भसेति । केवलेनाम्भसा व्रतस्याङ्गभूतपारणं करिष्ये एवं चेत्पारणस्य कृतत्वान्न व्रतवैगुण्यं नाप्यतिथ्यतिक्रमणदोषः अनशनादित्याह-प्राहुरिति । हे

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

विप्राः ! यदपां भक्षणं तदाशितं नाऽशितंचाहुः श्रुतय इति तथा च श्रुतयः "अपोऽश्नाति तन्नैवमाशितं तन्नैवप्राशितम्" इत्याद्याः ॥४०॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

शतकोटिसङ्ख्यान्यर्बुदम् ॥ ३४ ॥ ३५ ॥

अभ्यवहाराय भोजनाय ॥ ३६ ॥

आवश्यकं नित्यकर्म बृहत् ब्रह्म बृहतेर्णनोढंक् प्रत्ययः ॥ ३७ ॥

धर्मसङ्कटे धर्मापदि प्रमायां सत्याम् ॥ ३८ ॥

आमन्त्रितब्राह्मणातिक्रमे दोषोऽस्ति द्वादश्यामपारणे श्रीहरिप्रियद्वादशीभोजनाकरणे च दोषोऽस्ति यत्समाधत्कृत्वा मे साधु भूयादुभयदोषपरिहारेण श्रेयः स्यात् उभयोरेकातिक्रमलक्षणो अधर्मो वा मां न स्पृशेदिति तद्विजैः सह चिन्तयामास ॥ ३९ ॥

एवं सञ्चिन्त्य द्विजानां हार्दं स्वहार्दं चैकमेवेत्याशयेनाह—अम्भसेति । केवलेन व्रीह्यन्नरहितेन; तत्र किं प्रमाणम् ? इति तत्राह—आहुरिति । हे विप्राः अम्भक्षणं अम्भसां पारणम् अशितं भुक्तं पूर्वव्रतधारणार्थं भुक्तं भवति उत्तरकर्मार्थम् अनशितमभुक्तं भवतीत्याहुर्वेदाः इति हि यत्तदिदं युष्माकं च सिद्धं तस्मात्तेनैव व्रतपारणां करिष्ये इत्यन्वयः ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

षट् न्यर्बुदानि षष्टिकोटीः ॥ ३४—३६ ॥

बृहत् ब्रह्म ॥ ३७ ३८ ॥

यद्यस्मात् ब्राह्मणातिक्रमे द्वादश्यामपारणे च दोषः तस्मादत्र धर्मसङ्कटे यत् कृत्वेत्यादिभूयात् भवेत् ॥ ३९ ॥

ततश्च विप्रांस्तूष्णीं स्थितान् समाधातुमशक्नुवतो ऽभिलक्ष्य स्वयमेव विचार्य्य स निश्चयमाह—अम्भसेति । हेविप्राः तत् अशितमिति द्वादश्या अनतिक्रमः नाशितमिति ब्राह्मणस्याप्यनतिक्रम इति अत्र श्रुतिश्च "अपोऽश्नाति तन्नैवाशितं नैवानशितमिति ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पयःशीलादिसम्पदो यासाम् ॥ ३३ ॥

न्यर्बुदं दशकोटयः—

"एकदशशतसहस्रायुतलक्षप्रयुतकोटयः क्रमशः ।
न्यर्बुदमब्दं खर्वनिखर्वमहापद्मशङ्कवस्तस्मात् ॥
जलधिश्चान्त्यं मध्यपरार्द्धमिति दशगुणोत्तरासंज्ञा ।
संख्यायाः किल लोके व्यवहारार्थं यथा कृता पूर्वैः ॥

इति वाक्यात् ॥ ३४ ॥

तस्य पारणाय प्रवृत्तस्य तर्हि तदैव दुर्वासा अतिथिः साक्षात्स्वयमेवो ऽभूत् ॥ ३५ ॥

बहून् सम्पूज्य व्रतपारणाय प्रवृत्तोपि भूयः तमानर्च अर्चितवान् अभ्यवहाराय भोजनाय च यथा प्रार्थयामास ॥ ३६ ॥

आवश्यकमवश्यं करणीयं कर्म कर्तुं गतः बृहद्ब्रह्म ॥ ३७ ॥

एवमल्पां द्वादशीं दृष्ट्वा शीघ्रमुत्थाय आमध्याह्नाः क्रियाः समाप्यापि पारणार्थं प्रवृत्तः दुर्वाससि अनागते पारणां प्रति मुहूर्तार्द्धावशिष्टायां द्वादश्यां सत्यां तस्मिन्धर्मसङ्कटे द्विजैः सह चिन्तयामास ॥ ३८ ॥

धर्मसङ्कटे चिन्तामेवाह—ब्राह्मणातिक्रमे दोषः निमन्त्रितविप्रोपेक्षणे प्रत्यवायरूपो दोषः द्वादश्यामपारणेऽपि व्रतवैगुण्यरूपो दोषः अस्मिन्सङ्कटे यत्कृत्वा मे साधु भूयात् अधर्मो वा मां न स्पृशेत् तच्चिन्त्यताम् ॥ ३९ ॥

एवं द्विजैः सह विचार्य निश्चिनोति—अम्भसेति । व्रतस्य पारणां समाप्तिं केवलेनाम्भसा करिष्ये तत्केवलाम्भक्षणं हे विप्राः ! अशितमाहुः अशितं नेति चाहुः शिष्टाः शिष्टव्यवहारमूला श्रुतिः "अपोऽश्नाति तन्नैव प्राशितं तन्नैवाप्राशितम्" इति ॥ ४० ॥

भाषाटीका ।

और गायों के सुवर्ण से सींग मँढाकर चांदी से खुर मंढाकर ऊपर सुन्दर रेसमी झूल उढाकर बहुत दुग्ध वाली सीधी थोडी अवस्थाकी बछुडा और ऊपरके उपकरण सहित ॥ ३३ ॥

ऐसी २ साठ कोटि गायें, ब्राह्मण और साधुओं को स्वादु और गुणवत् अन्नभोजन कराकर उनके घर पहुँचादीनी ॥ ३४ ॥

ब्राह्मणों ने भोजन कर दक्षिणालेकर राजा को भोजन की आज्ञा दीनी । इतने हीमें साक्षात् दुर्वासा भगवान् अतिथी पधारे ॥ ३५ ॥

राजा ने उनको उठकर आसन देकर पूजा करी और दण्डवत् प्रणाम कर भोजन के लिये प्रार्थना करी ॥ ३६ ॥

दुर्वासाने भी राजाकी याचना को स्वीकार कर श्री यमुनाजी में अपना आवश्यक कर्म करने को गये और वहां पर स्वच्छ कालिन्दी के जल में गोता लगाकर ब्रह्म ध्यान करने लगे ॥ ३७ ॥

जब द्वादशी अर्द्ध महूर्त्त अवशिष्ट रही राजा धर्म सङ्कट में होकर ब्राह्मणों को बुलाकर विचार करने लगे ॥ ३८ ॥

राजा ब्राह्मणों से बोले, कि-निमन्त्रित ब्राह्मण के अतिक्रमण का दोष जैसे न हो और द्वादशी में नहीं पारण कामी जो दोष है वहभी नहीं हो, हे ब्राह्मणों ! ऐसा उपाय करो कि-जिसमें मेरेलिये दोष न हो और पारण भी होजावै ॥ ३९ ॥

इत्यपः प्राश्य राजर्षिश्चिन्तयन्मनसाऽच्युतम् ।
प्रत्याचष्ट कुरुश्रेष्ठ ! द्विजागमनमेव सः ॥ ४१ ॥
दुर्वासा यमुनाकूलात्कृतावश्यक आगतः ।
राज्ञाभिनन्दितस्तस्य बुबुधे चेष्टितं धिया ॥ ४२ ॥
मन्युना प्रचलद्गात्रो भ्रुकुटीकुटिलाननः ।
बुभुक्षितश्च सुतरां कृताञ्जलिमभाषत ॥ ४३ ॥
अहो अस्य नृशंसस्य श्रियोन्मत्तस्य पश्यत ।
धर्मव्यतिक्रमं विष्णोरभक्तस्येशमानिनः ॥ ४४ ॥
यो मामतिथिमायातमातिथ्येन निमन्त्र्य च ।
अदत्त्वा भुक्तवांस्तस्य सद्यस्ते दर्शये फलम् ॥ ४५ ॥
एवं ब्रुवाण उत्कृत्य जटां रोषविदीपितः ।
तया स निर्ममे तस्मै कृत्यां कालानलोपमाम् ॥ ४६ ॥
तामापतन्तीं ज्वलतीमसिहस्तां पदा भुवम् ।
वेपयन्तीं समुद्वीक्ष्य न चचाल पदान्नृपः ॥ ४७ ॥
प्राग्दिष्टं भृत्यरक्षायां पुरुषेण महात्मना ।
ददाह कृत्यां तां चक्रं क्रुद्धाहिमिव पावकः ॥ ४८ ॥

भाषा टीका ।

ऐसा कहकर बोला, कि-अथवा केवल जल मात्र से व्रत का पारण करूंगा हे विप्रो ! जल भक्षण भोजन किया सा भी है और नहीं किया सा भी है ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रत्याचष्ट प्रत्यैक्षत ॥ ४१-४२ ॥

प्रचलत्कम्पमानं गात्रं यस्य भ्रुकुटिभ्यां कुटिलमाननं यस्य ॥ ४३—४७ ॥

क्रुद्धमहिं पावको दावाग्निरिव ॥ ४८ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

इतीत्थं विनिश्चित्येति शेषः । स राजर्षिरम्बरीषोऽच्युतं मनसा चिन्तयन् धर्मस्य सुसूक्ष्मत्वात् तदज्ञाननिमित्तबाधकपरिहारायाच्युतं चिन्तयन्निति भावः अपः प्राश्य हे कुरुश्रेष्ठ ! द्विजस्य दुर्वाससः आगमनमेव प्रत्याचष्ट प्रत्यैक्षत ॥ ४१ ॥

ततः कृतमावश्यकं माध्याह्निकं येन स दुर्वासाः यमुनायाः कूलात्तीरादागतः राज्ञाऽम्बरीषेणाभिनन्दितोपि ऋषित्वाद्धिया सूक्ष्मया दृष्ट्या तस्य राज्ञः चेष्टितमशनरूपं बुबुधे विज्ञातवान् ॥ ४२ ॥

ततो मन्युना हेतुना प्रचलद्गात्रं शरीरं यस्य भ्रुकुटिभ्यां कुटिलमाननं यस्य सः सुतरां भृशं बुभुक्षितश्चेति क्रोधातिशयद्योतनार्थमुक्तं कृताञ्जलिं बद्धाञ्जलिमम्बरीषं प्रत्यभाषत ॥ ४३ ॥

अहो जनाः ! अस्य क्षत्रबन्धोर्धर्मव्यतिक्रमं पश्यत कथंभूतस्य ? क्रूरस्वभावस्य श्रिया सम्पदा गर्वितस्य विष्णोरभक्तस्यापि तस्येष्टं भक्तमात्मानं मन्यमानस्य ॥ ४४ ॥

कोसौ धर्मव्यतिक्रमः? इत्यत्राह-य इति । योऽयं क्षत्रबन्धुरागतं मामातिथ्येन आतिथ्यार्थमध्ययनेन वसतीतिवत् तृतीया निमन्त्र्यातिथये मह्यमदत्त्वैव भुक्तवानयमेव धर्मव्यतिक्रमः अतस्तस्य धर्मव्यतिक्रमस्य फलं सद्यं तव दर्शये दर्शयामि ॥ ४५ ॥

इत्येवं ब्रुवाणः रोषेण विदीपितां प्रज्वलितां जटामुत्कृत्य उच्छिद्योद्धास्येत्यर्थः । स दुर्वासास्तया जटया तस्मा अम्बरीषाय तं हन्तुमित्यर्थः । कालाग्नितुल्यां कृत्यां निर्ममे मारिकां शक्तिं निर्मितवानित्यर्थः ॥ ४६ ॥

ततोऽसिः खड्गो हस्ते यस्याः पदा भुवं वेपयन्तीं कम्पयमानां तामभिमुखमागच्छन्तीं ज्वलितां दीप्तां सम्यगुद्वीक्ष्य नृपोऽम्बरीषः किञ्चिदपि न चचाल ॥ ४७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

तदा भृत्यरक्षायां निमित्ते सप्तमी भृत्यस्याम्बरीषस्य रक्षार्थमित्यर्थः। महात्मना "प्रयातरक्षायां विसृज्यमसहमिव सदा पश्चायुधी बिभ्रत्" इत्युक्तविधेन महात्मना परमपुरुषेण चक्रं सुदर्शनं प्रागेव आज्ञापितं सदागत्य तां कृत्यां ददाह यथा कुद्धमहिं सर्पं पावको दवाग्निस्तद्वत् यथा दवाग्निरुपयुर्यहिः क्रोधो निष्फलस्तथाकृत्या निष्फला बभूवेति दृष्टान्ताभिप्रेतार्थः ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

ततः किङ्कृतमिति तत्राह—इतीति । प्रत्याचष्ट प्रत्यैक्षत ॥ ४१ ॥ ४२ ॥

भ्रुकुट्या कुटिलं वक्रमाननं यस्य स तथा ॥ ४३ ॥

विष्णोरिष्टमानिनः ॥ ४४ ॥

अदत्त्वा अन्नमिति शेषः ॥ ४५ ॥

जटामुत्कृत्य स्वशिरसीति शेषः । तस्मै अम्बरीषाय ॥ ४६ ॥

वेपयन्तीं कम्पयन्तीम् ॥ ४७ ॥ ४८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

प्रत्याचष्ट प्रत्यैक्षत ॥ ४१ ४३ ॥

वस्त्वर्थश्च नृभिः सर्वलोकैः शंसः स्तुतिर्यस्य श्रियाऽपि उन्मत्तस्य मत्तं मदस्तस्मादुत्तीर्णस्य न विद्यते भक्तो यस्मात्तस्य ईशे स्वेष्टदेवे मानिनः द्वादश्यनतिक्रमादादरवतः ईशैरिन्द्राद्यैरपि माननीयस्येति वा धर्मस्य व्यतिक्रमं विष्णवर्थेऽनतिक्रमं पश्यत ॥ ४४ ॥

अत्तीति अदः "पचाद्यच्" अदत्त्वेन भुक्तवत्त्वेनापि न भुक्तवान् तस्य द्वादशीब्राह्मणयोरनतिक्रमस्य फलं मदमोघजटानलस्य वैयर्थ्यं महातेजीयसोऽपि मम चक्रानलदह्यमानत्वं त्वदन्यतः कुतोऽप्यनिस्तारं ब्रह्मण्येनापि भगवता ब्रह्मवादिनोऽपि मम तिरस्कारादिकं दर्शयामि ॥ ४५ ॥

तस्मै तं हन्तुम् ॥ ४६ ॥

पदान्न चचालेति ब्रह्मतेजसः प्रतिकर्तुमनर्हत्वं सर्वथा सहनार्हत्वं च विभाव्येति भावः ॥ ४७ ॥

चक्रं कर्तृकृत्यां ददाह । ननु, किं राज्ञा स्वरक्षार्थं निवेदितं सद्दाह ? न हि न हि. प्राक् अम्बरीषस्य भजनप्रारम्भदशामारभ्यैव क्वापि स्वापकारिलोकेऽप्यनपकरणस्वभावं तस्यालक्ष्य पुरुषेण भक्तवत्सलेनैव भगवतादिष्टं हे चक्र ! यदास्य प्राणसङ्कटमापतति तदा त्वमेव स्वयमेवास्याभिहन्तारं जहीत्यादिष्टं पावको दवाग्निः ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः!

द्विजागमनं दुर्वाससः प्रात्यागमनं प्रत्याचष्टप्रत्यैक्षत ॥४१-४२॥

प्रचलत् प्रकम्पमानं गात्रं शरीरं यस्य सः भ्रुकुटिभ्यां कुटिलमाननं यस्य सः सुतरामत्यर्थं बुभुक्षितश्च कृताञ्जलिं बद्धाञ्जलिं राजानमभाषत ॥ ४३ ॥

नृशंसस्य निर्दयस्य ॥ ४४ ॥

तस्य व्यतिक्रमस्य फलं सद्यस्ते दर्शये ॥ ४५ ॥

कालानलोपमां कालाग्नितुल्याम् ॥ ४६—४८ ।

भाषा टीका ।

हे कुरुश्रेष्ठ! राजा अम्बरीष इस प्रकार ब्राह्मणों की सम्मति लेकर थोडा सा जल मात्र पान करके मनसे गोविन्द का चिंतवन करते हुए दुर्वासा जी की वाट देखते रहे ॥ ४१ ॥

इतने में दुर्वासा ऋषि भी आवश्यक कृत्य करके यमुनाकूल से आये और आने पर राजा ने उनका अभिनन्दन भी किया पर दुर्वासा ने अपनी बुद्धि से राजा की जल पान की चेष्टा को जान लिया ॥ ४२ ॥

वस फिर तो क्रोध से गात्र काँपने लगा और भृकुटी से कुटिल वदन हो गया और भूखे भी अत्यन्त ही रहे, राजा तो हाथ जोडता रहा परंतु उसपर रुष्ट होकर बोले ॥ ४३ ॥

दुर्वासा कहने लगे, कि—अहो सम्पत्त से उन्मत्त इस निर्दय का धर्म का व्यतिक्रम तो देखो, यह विष्णु का भक्त नहीं है और आप को वडा ईश मानी है ॥ ४४ ॥

जो कि मो आए हुए अतिथि को भोजन के लिये निमन्त्रण देकर भोजन नहीं कराकर जो तु ने भोजन कर लिया उसका फल अवही तेरे लिये दिखाता हूं ॥ ४५ ॥

इतना कह कर रोष से जलते हुए दुर्वासा ने माथे से जटा उखाड कर उस जटा से प्रलय काल की अग्नि के सदृश एक कृत्या उत्पन्न करी ॥ ४६ ॥

वह कृत्या हाथ में खड्ग लिये हुए पग से भूमि को कम्पाती हुई राजा के ऊपर दौडी परञ्च राजा उस को देख कर एक पग भी पिछाडी को नहीं हटे ॥ ४७ ॥

परंच श्रीहरि ने पहिले अपने भृत्य अम्बरीष की रक्षा में जिस चक्रराज को नियुक्त किया रहा उस चक्र ने ही कृत्या को जलादी जैसे कि क्रोधित सर्प को अग्नि जला देवे ॥ ४८ ॥

तदभिद्रवदुद्वीक्ष्य स्वप्रयासं च निष्फलम् ।
दुर्वासा दुद्रुवे भीतो दिक्षु प्राणपरीप्सया ॥ ४९ ॥
तमन्वधावद्भगवद्रथाङ्गं दावाग्निरुद्धूतशिखो यथाऽहिम् ।
तथाऽनुषक्तं मुनिरीक्षमाणो गुहां विविक्षुः प्रससार मेरोः ॥ ५० ॥
दिशो नभः क्ष्मां विवरान् समुद्रान् लोकान् सपालांस्त्रिदिवं गतः सः ।
यतोयतो धावति तत्र तत्र सुदर्शनं दुष्प्रसहं ददर्श ॥ ५१ ॥
अलब्धनाथः स यदा कुतश्चित्सन्त्रस्तचित्तोऽरणमेषमाणः ।
देवं विरिञ्चं समगाद्विधातस्त्राह्यात्मयोने ! ऽजिततेजसो माम् ॥ ५२ ॥

ब्रह्मोवाच ।

स्थानं मदीयं सह विश्वमेतत्क्रीडावसाने द्विपरार्द्धसंज्ञे ।
भ्रूभङ्गमात्रेण हि सन्दिधक्षोः कालात्मनो यस्य तिरोभविष्यति ॥ ५३ ॥
अहं भवो दक्षभृगुप्रधानाः प्रजेशभूतेशसुरेशमुख्याः ।
सर्वे वयं यन्नियमं प्रपन्ना मूर्ध्न्यर्पितं लोकहितं वहामः ॥ ५४ ॥
प्रत्याख्यातो विरिञ्चेन विष्णुचक्रोपतापितः ।
दुर्वासाः शरणं यातः शर्वं कैलासवासिनम् ॥ ५५ ॥

श्रीरुद्र उवाच ।

वयं न तात ! प्रभवाम भूम्नि यस्मिन्परेऽन्येऽप्यजजीवकोशाः ।
भवन्ति काले न भवन्ति हीदृशाः सहस्रशो यत्र वयं भ्रमामः ॥ ५६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

निष्फलमुद्वीक्ष्य ॥ ४९ ॥

अनुषक्तं पृष्ठतः संसक्तम् मेरोर्गुहां विविक्षुरधावत् ॥ ५० ॥ ५१ ॥

अरणमेषमाणः शरणमिच्छन् अजिततेजसो हरेश्चक्रात् ॥ ५२ ॥

एतत्सर्वं यस्य भ्रूभङ्गमात्रेण तिरोभविष्यति कदा क्रीडाया अवसाने तदपि कदा द्विपरार्द्धसंज्ञे काले ॥ ५३ ॥

अतो वयं सर्वे यस्य नियममाज्ञां प्रपन्नाः प्राप्तास्सन्तो लोकहितं यथा भवत्येवं तन्नियमं मूर्ध्न्यर्पितं वहामः अतस्तद्भक्तद्रोहिणं त्वां रक्षितुं न समर्थोऽहमिति शेषः । यत्तदोर्नित्यसम्बन्धात् ॥ ५४—५५ ॥

श्रीरुद्रोऽपि प्रत्याचष्टे—वयमिति चतुर्भिः । भूम्नि महति महत्त्वमेवाह यस्मिन्परमेश्वरे अजा ब्रह्माण एव जीवास्तेषां कोशा उपाधिभूता ब्रह्माण्डविग्रहा ईदृशा दृश्यमानब्रह्माण्डप्रमाणा अन्येऽपि भवन्ति जायन्ते नश्यन्ति च यत्र येषु ब्रह्माण्डेषु लोकेशाभिमानिनो वयं भ्रमामः ॥ ५६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततोऽभिमुखं द्रवद्गच्छच्चक्रं निष्फलं स्वप्रयासञ्च समुद्वीक्ष्य दुर्वासाः भीतः प्राणपरीप्सया प्राणान्प्राप्तुमिच्छया जीवनेच्छयेतिभावः । दिक्षु दुद्रुवे पलायितवान् ॥ ४९ ॥

तं धावन्तं दुर्वाससं भगवतो रथाङ्गं चक्रमन्वधावत् पृष्ठतोऽनुसृत्य दुद्रुवे यथा उद्धूता ऊर्ध्वं वेपमानाः शिखाः यस्य स दावाग्निरहिमनुधावति तद्वत् तदा अनुषक्तं पृष्ठतः संसक्तं चक्रमीक्षमाणो मुनिः दुर्वासाः मेरोः पर्वतस्य गुहां विविक्षुः प्रवेष्टुमिच्छुः प्रससार प्रदुद्राव ॥ ५० ॥

तदा दिशो नभोऽन्तरिक्षं क्ष्माश्विवरान् अतलादिलोकान् समुद्रान् लोकपालैः सहितांल्लोकांश्च ससार त्वनुषङ्गः । तत्रत्रिदिवं

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

गतः प्रदुद्राव एवं यत्रयत्र मेरुगुहादिष्वधावन्मुनिर्दुर्वासास्तत्रतत्र दुष्प्रसहं दुःखेनापि सोढुमशक्यं सुदर्शनं ददर्श ॥ ५१ ॥

ततः स दुर्वासाः यदा कुतश्चित्कुत्रचिदपि अलब्धो नाथो रक्षिता येन सः तदा सन्त्रस्तं भीतं चित्तं यस्य सः शरणं शरणं रक्षकमेषमाणा इच्छुर्देवं विरिञ्चं कमलासनं समगात् तत्र गत्वा हे विधातः! हे आत्मयोने! अजितस्य भगवतस्तेजसश्चक्ररूपान्मां त्राहि पालयेति विज्ञापयामासेति शेषः ॥ ५२ ॥

तदाकर्ण्य मदन्तरात्मभूतभगवत्प्रसादलब्धसृष्ट्याद्यधिकारपारमेष्ठ्यस्थानस्तन्नियोज्योऽहं तच्चक्रादनतिक्रमणीयात्पातुमसमर्थः इत्याह ब्रह्मा—स्थानमिति । हे द्विज! एतन्मदीयं स्थानमिदं जगच्च स्थानस्य जगदन्तर्भूतत्वेऽपि तन्निष्ठत्वबुद्धिनिरासाय पृथगुक्तिः यद्यपि तदनित्यत्वोक्त्यैव तदधिपसृष्टविश्वस्यापि भगवता संहार्यत्वं प्रतीयते इति विश्वस्य पृथक्संहार्यत्वं न वक्तव्यं तथापि यथा विश्वं तत्संहार्यं तथैतन्मदीयं स्थानमपीति दृष्टान्तार्थमुक्तं तदेतत्सर्वं सन्दिधक्षोः सन्दग्धुमिच्छोः संजिहीर्षोः यस्य कालशरीरकस्य भगवतो भ्रूविक्षेपमात्रेण तिरोभविष्यति क्षयमेष्यति तस्य तेजसस्त्रातुमहं न प्रभुरिति शेषः । यद्वा तमेव शरणं व्रजेति शेषः । एवमुत्तरत्रापि कदा सन्दिधक्षोः क्रीडावसाने जगद्व्यापाररूपक्रीडाया अवसाने तदपि कदा द्विपरार्धसंज्ञे द्विपरार्धाख्यपरिमाणपरिच्छिन्नकालावसान इत्यर्थः ॥ ५३ ॥

न केवलमहमेव त्वां त्रातुं प्रभुरपितु रुद्रादयोऽपीत्याह—अहमिति । यथाहं न प्रभुस्तथा भवादय इति दृष्टान्तार्थं पुनरहमित्युक्तं भवो रुद्रः दक्षभृगुप्रधानाः दक्षभृगू प्रधानौ मुख्यौ येषां ते तान् विशिंषन्बहुव्रीह्यर्थभूतान्यपदार्थानाह—प्रजेशेति । प्रजेशाः प्रजापतयो मरीचिप्रभृतयः भूतेशाः भूतपतयः एकादश रुद्रप्रभृतयः सुरेशाः सुरपतय इन्द्राद्या एते मुख्या येषां ते अत्रापि तन्नियोज्या अन्येऽन्यपदार्थतया विवक्षिताः यद्वा दक्षभृगुप्रधाना इति तद्गुणसंविज्ञानबहुव्रीहिणा दक्षभृगुसन्तानजा अन्यपदार्थत्वेन ग्राह्याः प्रजेशशब्देनेतरेषां सतानां मरीच्यादीनां सङ्ग्रहः भूतेशशब्देन रुद्रप्रभवानां सुरेश इन्द्र एते मुख्या येषां ते तत्सन्तानप्रभवास्तन्नियोज्याश्चेत्यर्थः । एते सर्वे वयं त्वां त्रातुं न प्रभव इत्यत्रापि शेषः तत्र हेतुमाह—यस्य भगवतो नियममशेषनियमनं प्रपन्नाः प्राप्तास्सन्तो लोकहितं यथा भवत्येवं मूर्ध्न्यर्पितं तन्नियममाज्ञां वहामः कुर्मः ॥ ५४ ॥

एवं विरिञ्चेन प्रत्याख्यातो भगवच्चक्रेणोपतापितश्च दुर्वासाः कैलासगिरिवासिनं शर्वं शरणं गतः शर्वं त्वमविता भवेति प्रार्थितवानित्यर्थः ॥ ५५ ॥

एवं प्रार्थितः शर्वस्ततो हरिचक्रात्त्रातुमसामर्थ्यं वक्तुं चतुर्मुखप्रभृतीनां भगवन्महिमार्णवविप्रुट्त्वं तत्सृज्यत्वं तत्संहार्यत्वं तन्मायामोहितत्वेन तच्चिकीर्षितानभिज्ञत्वं चाह—वयमिति । हे तात! वयं न प्रभवामः भगवतश्चक्रात्त्रातुमिति शेषः । कुतः? हि यस्माद्भूरेयये अस्माभिरपि वरणीये यस्मिन्भगवति यस्मिन् ब्रह्माण्डे वयं लोकेशाभिमानिनो भ्रमामः "क्षुद्रा रुद्रपितामह प्रभृतयः कीटाः समस्ताः सुराः" इत्युक्तरीत्या कीटवद्भ्रमामः ईदृशा एतद्ब्रह्माण्डसदृशा अजा ब्रह्माणस्त एव जीवास्तेषां कोशाः ब्रह्माण्डरूपाः सहस्रशः काले "बहुस्याम्" इत्युक्तविधसिसृक्षाकाले भवन्ति उत्पद्यन्ते पुनः सञ्जिहीर्षाकाले न भवन्ति तस्मिन् लयं यान्ति ॥ ५६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कस्यां दग्ध्वात्मानम् अभिद्रवत् तच्चक्रं स्वप्रयासं स्वप्रयत्नं प्राणपरीप्सया स्वजीवनरक्षणेच्छया ॥ ४९ ॥

तं दुर्वाससं विविक्षुः प्रवेष्टुमिच्छुः ॥ ५० ॥

चक्रानुयातो दुर्वासा एतानि स्थानानि यत्रागमेत्याह—दिश इत्यादिना ॥ ५१ ॥

अलब्धो नाथो पालनसमर्थो येन स तथा शरणं शरणं एषमाणः अन्वेषमाणः अजिततेजसः हरेस्तेजोरूपाच्चक्रात् त्राहि रक्ष ॥ ५२ ॥

ब्रह्मा किमवादीति तत्राह—स्थानमिति । द्विपरार्धसंज्ञे ममायुःपूर्तिलक्षणे हरिक्रीडावसाने आसन्नप्रलय इति यावत् । सह विश्वं चराचरलक्षणप्रपञ्चेन सहितमेतन्मदीयं स्थानं भ्रूभङ्गमात्रेण सन्दिधक्षोः सन्दग्धुमिच्छोः कालात्मनः कालरूपस्य हरेर्यज्ञविध्यत्कर्म को वा पुरुषस्तत्पश्यति, अपरोक्षीकर्तुं समर्थः न कोपीत्यन्वयः । त्वामुपलक्षीकृत्य मदादिकं सर्वं संहरिष्यतीति ज्ञातुं न शक्यत इति भावः ॥ ५३ ॥

अतो मदादीनां तदनुमतमेवानुकर्तुं प्रयतनं न त्वन्यदित्याशयेनाह—अहमिति । यन्नियमं यस्याज्ञालक्षणां प्रेरणां तस्येति पूर्वेणान्वयः अर्पितं तेनैवेति शेषः ॥ ५४ ॥

यद्यप्यनेन शङ्करोऽपि प्रत्याख्यातस्तथापि मन्दजनशङ्कानिरासाय दुर्वाससः शङ्करशरणप्राप्तिमाह—प्रत्याख्यात इति । "सर्वः शर्वः शिवः स्थाणुः शर्वः संरोनधाद्धरिः" इत्यतो विष्णुशङ्कानिरासायाह—कैलासेति ॥ ५५ ॥

शङ्करोऽपि स्वाशक्तिमेव वक्तीत्याह—वयमिति । हे तात! वयं न प्रभवाम त्वां रक्षितुं न समर्थाः स्यामः आद्यन्तवत्त्वादित्याह—भूम्न इति । ईदृशा मादृशा भूम्नः पूर्णानन्दाद्धरेः सृष्टिकाले भवन्ति संहारकाले न भवन्ति हि यस्मात्तस्मात् यदा चेतनस्य भगवदधीनत्वं स्पष्टं तदा किं वक्तव्यमचेतनस्य? इत्याशयेनाह—यस्मिन्निति । यत्र येषु अजजीवकोशेषु वयं बभ्राम ते अन्ये अचेतना अपि सहस्रशः जीवकोशाः अजो ब्रह्मा स एव जीवः तस्य कोशाः शरीरस्थानीयाः ब्रह्माण्डकोटयो यस्मिन्परे सन्ति स ईशानः स्वदापदः परिहर्तास्याज्ञ वर्तामिति वाक्यशेषः ॥ ५६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सर्वे वयमिति स्वस्य गुणावतारत्वेऽप्यावेशावतारत्वमेव मन्यते ॥ ५४—५५ ॥

वयमिति चतुष्कम् तस्येत्यादि पूर्ववत् ॥ ५६—६१ ॥

अहं सनत्कुमारश्च नारदो भगवानजः ।
कपिलोऽपान्तरतमो देवलो धर्म आसुरिः ॥ ५७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तच्चक्रं कृत्यां दग्ध्वापि अभि अभिमुखं स्वमपि दग्धुं द्रवत् धावत् वीक्ष्य ॥ ४९ ॥

अनुषक्तं पृष्ठतः सँल्लग्नमित्येत्यर्थः ॥ ५० ॥ ५१ ॥

अरणं शरणं परमाणा अन्विष्यन् ॥ ५२ ॥

द्विपरार्द्धसंज्ञे काले यस्य कालात्मनः कालरूपं यत्स्वरूपं तस्मात् ॥ ५३ ॥

प्रपन्ना वयं लोकहितं यथा स्यात्तथा यन्नियमं यदाज्ञां वहामः अतस्तद्भक्तद्रोहिणं त्वां रक्षितुं नसमर्थोऽहमिति शेषः । यत्त दोर्नित्यसम्बन्धात् ॥ ५४-५५ ॥

यस्मिन् परमेश्वरे अजा ब्रह्माण एव जीवास्तेषाङ्कोशा उपाधि-भूताः ब्रह्माण्डानि अन्यंपि वयं भवन्ति जायन्ते नश्यन्ति च यत्र. येषु ब्रह्माण्डेषु लोकेशाभिमानिनो वयं भ्रामामः ॥ ५६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तच्चक्रमभिद्रवदुद्वीक्ष्य स्वप्रयासं च निष्फलं ज्ञात्वा दिक्षु दुद्रुवे पलायितवान् ॥ ४९ ॥

अनुषक्तं पृष्ठतः संसक्तं चक्रं निरीक्ष्यमाणः मेरोर्गुहां विविक्षुः प्रवेष्टुमिच्छुः प्रससार दुद्रुवे ॥ ५० ॥

तदनन्तरं दिगादिकं गतः सः यतो यतो मेरुगुहादिषु धावति अधावत् तत्रतत्र दुष्प्रसहं सुदर्शनं ददर्श ॥ ५१ ॥

अरणं शरणम् परमाणः अन्वेषमाणः विरिञ्चं समगात् तत्र हे विधातः! आत्मा परमात्मा योनिर्जनको यस्य सः तथा हे आत्मयोने! अजितस्य विष्णोस्तेजस्तच्चक्रात् मां पाहि पालयेत्यु-वाच ॥ ५२ ॥

कालात्मनः कालशक्तेस्सह विश्वम् एतत्सत्यलोकाख्यं मदीयं स्थानं सन्दिधक्षोः दग्धुमिच्छोः यस्य भ्रूभङ्गमात्रेण तिरोभवि-ष्यति लयमेष्यति कदा क्रीडायाः जगद्व्यापाररूपाया अवसाने तदपि कदा द्विपरार्द्धसंज्ञे प्रलयकाले ॥ ५३ ॥

प्रजेशभूतेशसुरेशमुख्यानेव नामत आह—अहं भवः दक्षभृगु-प्रधानाश्च एतदादिनामकाः सर्वे वयं यस्य लोकहितं लोका-नामस्माकमेव सुखकरं नियमभाज्ञां प्रपन्नास्सन्तः मूर्द्धर्यर्पितं वहामः कुर्मः अतः तद्भक्तद्रोहिणं त्वां रक्षितुं नाहं प्रभवामी-त्यर्थः ॥ ५४ । ५५ ॥

हे तात ! वयं न प्रभवाम त्वद्रक्षां कर्तुं न शक्नुमः यतः यत्र भूम्नि व्यापके परे सर्वोत्कृष्टे वयं ब्रह्मशिवादयः प्रत्येकं सहस्रशः भ्रमामः एतदेवाह—एतद्ब्रह्माण्डस्थात् अजात् अन्ये अजाः चतुर्मुखाः त एव जीवाः तेषां कोशाः ब्रह्माण्डात्मका-देहाः ईदृशा एतद्ब्रह्माण्डतुल्याः सहस्रशः यस्मिन् काले सृष्टिकाले भवन्ति जायन्ते प्रलयकाले न भवन्ति प्रलीयन्ते अतस्तमेव शरणं याहीति चतुर्थेनान्वयः ॥ ५६ ॥ ५७ ॥

भाषा टीका ।

दुर्वासाने प्रयास को निष्फल देखकर और चक्र को अपने ऊपर दौडते देखकर दुर्वासा प्राण बचाने की इच्छा से दिशाओं में भागे ॥ ४९ ॥

भगवान् का चक्र उसके पीछे कैसे दौडा कि—जैसे जलती हुई लपटों वाली दवाग्नि सर्प के पीछे दौडे, दुर्वासा भी पीछे को देखैं तो चक्र भी सन्नाटे से चला आरहा है ऐसा देखकर दुर्वासा मेरुकी गुहा में घुस जाने की इच्छा कर दौडा ॥ ५० ॥

दुर्वासा दौडते २ दिशायें आकाश, पृथिवी सप्तपाताल, समुद्र, लोकपालों सहित लोकों में तथा स्वर्ग में गया परंच जहां २ दौडा गया तहां २ दुःसह सुदर्शन चक्र को देखता हुआ ॥ ५१ ॥

जब दौडते २ कोई दुर्वासा को रक्षक नहीं मिला तब बडा संत्रस्त चित्त होकर शरण की इच्छा से श्रीब्रह्माजी के निकट गया और बोला कि—हे विधातः! हे आत्मयोने ! अजित [श्रीकृष्ण] के तेज से मेरी रक्षा करो ॥ ५२ ॥

ब्रह्मोवाच ॥

ब्रह्माजी बोले कि—क्रीडा के अन्त में द्विपरार्द्ध पूरे होने पर संहार की इच्छा वाला कालात्मा ऐसे जिसके भ्रूभंग मात्र से मेरा स्थान अर्थात् सत्यलोक सहित यह विश्व क्षण में नष्ट हो-जायगा ॥ ५३ ॥

और ब्रह्माजी कहने लगे, कि—मैं, महादेव, दक्षभृगु इत्या-दिक प्रजापति, तथा प्रजेश भूतेश सुरेशों में मुख्य ये सबही लोग जिसके नियम में बंधे हुए अपने माथे परसौंपे हुए लोक हित को चला रहे हैं अर्थात् हमसे तुमारी रक्षा न होगी ॥ ५४ ॥

इस प्रकार ब्रह्माजी निराश होकर विष्णुचक्र से तपा हुआ दुर्वासा कैलासवासी श्रीसदाशिव की शरण गया ॥ ५५ ॥

श्रीरुद्र उवाच ॥

श्रीरुद्र बोले, कि—हे तात ! उस भूमा पुरुष के ऊपर हम प्रभु नहीं हैं, जिस परमेश्वर में अन्य बहुत से चतुर्मुख रूप जीवों के विग्रह अर्थात् अनन्त कोटि ब्रह्माण्ड काल २ में होते हैं और लीन भी होजाते हैं और जिसमें हम लोग हजारहों भ्रम रहे हैं ॥ ५६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, सर्वज्ञस्य तव भ्रमः कुतस्तत्राह—अहमिति ॥ ५७॥

मरीचिप्रमुखाश्चान्ये सिद्धेशाः पारदर्शनाः ।
विदाम न वयं सर्वे यन्मायां माययाऽऽवृताः ॥ ५८ ॥
तस्य विश्वेश्वरस्येदं शस्त्रं दुर्विषहं हि नः ।
तमेव शरणं याहि हरिस्ते शं विधास्यति ॥ ५९ ॥
ततो निराशो दुर्वासाः पदं भगवतो ययौ ।
वैकुण्ठाख्यं यदध्यास्ते श्रीनिवासः श्रिया सह ॥ ६० ॥
सन्दह्यमानोऽजितशस्त्रवह्निना तत्पादमूले पतितः सवेपथुः ।
आहाच्युतानन्त ! सदीप्सित ! प्रभो ! कृतागसं माऽव हि विश्वभावन ! ॥ ६१ ॥
अजानता ते परमानुभावं कृतं मयाऽघं भवतः प्रियाणाम् ।
विधेहि तस्यापचितिं विधातर्मुच्येत यन्नाम्न्युदिते नारकोऽपि ॥ ६२ ॥
श्रीभगवानुवाच ।
अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज ! ।
साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रियः ॥ ६३ ॥
नाहमात्मानमाशासे मद्भक्तैः साधुभिर्विना ।
श्रियं चात्यन्तिकीं ब्रह्मन् ! येषां गतिरहं परा ॥ ६४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पारदर्शनाः सर्वज्ञा अपि यस्य मायां न विद्मः ॥ ५८—६० ॥

हे सतामीप्सित ! मा मामव पाहि ॥ ६१ ॥

अपराधं निवेदयन् प्रार्थयते-अजानतेति। अघं दुःखम् अपचितिं निष्कृतिम् मद्भक्तद्रोहे निष्कृतिं न पश्यामीति चेत्तत्राऽऽह, यस्य तव नाम्नि कीर्तिते नरकस्थोऽपि मुच्यते तस्य तव किमशक्यमिति भावः ॥ ६२ ॥ ६३ ॥

न आशासे न स्पृहयामि ॥ ६४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अहं शर्वः अस्मदादयः सर्वे तथान्ये पारदर्शिनः सर्वज्ञाः सिद्धेशाश्च यस्य भगवतो मायां सङ्कल्पं चिकीर्षितमिति यावत् न विदामः न जानीमः तत्र हेतुर्माययावृताः ॥५८॥

तस्यैवंविधमहिमशालिनो विश्वेश्वरस्य भगवत इदं शस्त्रं नोऽस्माकमपि दुर्विषहं वयं तत्सोढुमेव न प्रभवः कुतस्तन्निग्रह इति भावः । अतस्तमेवाचिन्त्यविविधविचित्रानन्तमहिमशालिनं शरणागतरक्षादीक्षितं भगवन्तं शरणं याहि स हरिः शरणागतार्त्तिहरो भगवांस्ते शं सुखं विधास्यति करिष्यति ॥ ५९ ॥

इत्युक्तो दुर्वासाः निराशस्सन् ततः कैलासाद्भगवतो वैकुण्ठाख्यं पदम् अण्डान्तर्गतं श्रीविष्णुलोकं ययौ, पदं विशिनष्टि-यत्पदं स्थानं श्रिया लक्ष्म्या सह श्रीनिवास अध्यास्ते श्रीनिवास इत्यनेन भगवतो लक्ष्म्यनपायित्वमुक्तम्. श्रिया सहाध्यास्त इत्यनेन पुरुषकारभूतया लक्ष्म्या सह तस्मिँल्लोके ऽवस्थानमुक्तम्. यद्यपि श्रीनिवासोऽध्यास्त इत्येतावतैवालं श्रीशब्दप्रवृत्तिनिमित्तस्य पुरुषकारत्वस्य निवासशब्दाभिप्रेतस्य तदनपायित्वस्य च लाभात् तथापि श्रीनिवास इत्येतावत्युक्ते रामकृष्णाद्यवतारेषु वैदेह्यादिविवाहात्प्रागमूर्त्तिमत्या इतरैरलक्ष्यमाणया वा लक्ष्म्या सहावस्थानेनानपायित्ववदत्रापि तदुपपत्तेस्तत्र साक्षात्परिदृश्यमानपुरुषकारसान्निध्याभावशङ्कानिमित्तशरणवरणादुश्शकत्वशङ्कापनोदनार्थं श्रिया सहाध्यास्त इत्युक्तम्. तावत्युक्ते कादाचित्कसाहित्यशङ्कानिमित्तशरणवरण समयासान्निध्यशङ्कानिमित्ततद्दुश्शकत्वशङ्का स्यादिति तदपनोदनाय श्रीनिवास इत्युक्तम् ॥ ६० ॥

एवं शर्वेणाभिहितोऽजितस्य भगवतो शस्त्रवह्निना चक्रज्वालया सन्दह्यमानो दुर्वासास्तत्र गत्वा तस्याजितस्य पादयोर्मूले पतितः भयात्प्रचलद्गात्र आह-किम् ? हे अच्युत आश्रितान्न च्यावयतीति तथाभूत ! हे अनन्त अपारमाहिमशालिन् ! हे सदीप्सित सतां भक्तानां निरतिशयेष्ट ! हे प्रभो आश्रितार्त्तिहरणसमर्थ ! हे विश्वभावन विश्वं शरणागतवर्गमपराधानवेक्षणेन भावयति सुखयतीति तथाभूत ! यद्वा, विश्वं चिद-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

चिदात्मकं भावयति उत्पादयति जगत्कारणभूतेत्यर्थः । इत्येवं समाश्रयणीयत्वोपयुक्तगुणविशिष्टत्वेन सम्बोध्य स्वकार्पण्यं निवेदयन् स्वरक्षां प्रार्थयते, कृतमागोऽपराध एव न तु रक्षणोपयुक्तगुणलेशो येन तं मामेवंविधमित्युक्तम् अव रक्ष "अवरक्षणे" इतिधातोः "लोट्च" इति प्रार्थनायां लोट् ॥ ६१ ॥

कृतागसमित्युक्तं किं तत्त्वया कृतमागः ? इत्यपेक्षायां तद्विज्ञापयन्नेवंविधं कृतागसमपि मां त्रातुं समर्थस्त्वमिति सूचयितुं तन्नाम्नः प्रभावमाह–अजानतेति । ते तव परमं निरतिशयमनुभावं प्रभावमजानता मया भवतः प्रियाणामघं कृतं त्वद्भक्तविषये अपराधः कृत इत्यर्थः । हे विधातः ! तस्याघस्यापचितिं निष्कृतिं विधेहि कुरु अपराधं सोढ्वा पाहीत्यर्थः । युक्तं च तदेतत् यतो यस्य तव नाम्न्यपि उदिते उच्चारितमात्रेऽपि नारकोऽपि मुच्येत नरकप्राप्तिनिमित्तानां पापानां श्रुतिस्मृत्याद्यात्मकत्वदाज्ञातिलङ्घनरूपत्वेन त्वदपराधरूपत्वात् तत्कर्तुर्विमोचने त्वन्नामोच्चारणमेव समर्थं दृष्टम् अतः साक्षात्तव सामर्थ्यं कैमुत्तिकन्यायसिद्धमिति भावः ॥ ६२ ॥

एवं प्राणरक्षायै शरणङ्गतं द्विजमवलोक्याह भगवान्–अहमित्यादिना यावदध्यायसमाप्ति । तत्र स्वन्यमुक्तं "मुच्येत यन्नाम्न्युदितेऽपि नारकः" इति इदन्तु दुरुक्तं भवतः प्रियाणामघं मया कृतमतस्तस्यापचितिं विधेहीति साक्षान्मद्विषयापराधस्य केनचिदानुकूल्येन मया सोढव्यत्वेपि मद्भक्तविषयापराधो मया सोढः क्वचिद्विद्वन्मन्येन "एवमुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः" इत्यधिकरणन्यायानभिज्ञेन दृष्टः श्रुतो वेत्यभिप्रयन् भक्तविषये स्वस्य पारतन्त्र्यं पारतन्त्र्यहेतून् तन्निमित्तं तद्विषयापराधासह्यत्वञ्चाह–उपायमित्यतः प्राक्तनेन ग्रन्थेन । हे द्विज ! अस्वतन्त्र इव राजभृत्य इवाहं भक्तपराधीनः मद्भक्तपरतन्त्रोहमित्यर्थः । ननु, राजभृत्यादेः कर्मवश्यत्वाज्जीवत्वाद्धेयार्हत्वात् तन्निमित्तं कदाचित्कं स्वस्वामिराजादिपारतन्त्र्यं युक्तं तव तु निरस्तनिखिलदोषस्य समस्तकल्याणगुणाकरस्यानन्याधिपतेः स्वभृत्यपारतन्त्र्यं हेयतरमनुचितमित्याशङ्कायाः परिहारं समाश्रितवात्सल्यविवशस्य भक्तपारतन्त्र्यं न हेयत्वावहम्. अपितु कल्याणगुण एव समाश्रयणीयत्वोपयुक्तनिरतिशयवात्सल्यगुणप्रपञ्चरूपत्वादित्यभिप्रयन् तावद्भक्तपारतन्त्र्यहेतून् वक्तुमात्मानं भक्तांश्च विशिनष्टि–साधुभिरिति । साध्नुवन्ति एवैः कार्याणि परमुपकुर्वन्तीति साधवस्तैर्भक्तैर्ग्रस्तं स्ववशीकृतं हृदयं मनो यस्य सोऽहं लोके ह्यात्मचित्तवृत्त्यनुसारित्वात्पुरुषस्य मच्चित्तस्य च साधुभिर्वशीकृतत्वात् साधुचित्तवृत्त्यनुव्याप्रियमाणात्मचित्तवृत्त्यनुसारितद्विषयव्यापारवानहमित्यभिप्रायः । ननु, नहि लोकेऽन्यचित्तवृत्त्यनुसारिस्वचित्तवृत्तिः पुमान् कश्चिद्दृष्ट इत्याशङ्कायां निरतिशयप्रीतिविषयस्त्रीपतिस्तथैव लोके दृष्ट इति वक्ष्यमाणदृष्टान्तमभिप्रेत्य स्वभक्तयोर्मिथो निरतिशयप्रीतिविषयत्वं वदन्नात्मानं विशिनष्टि—भक्तजनप्रिय इति अत्र तन्त्रेण बहुव्रीहिषष्ठीतत्पुरुषौ द्वावपि विवक्षितौ भक्तजनाः प्रिया यस्य भक्तजनस्य प्रियेति च तत्राद्यं भक्तजनस्य निरतिशयस्वप्रीतिविषयत्वमुक्तं द्वितीयेन स्वस्य निरतिशयभक्तजनप्रीतिविषयत्वं निरतिशयप्रीतिविषयत्वाद्भक्तजनस्य तदधीनं मद्धृदयं जातमिति भावः ॥ ६३ ॥

किञ्च लोकः स्वचित्तं निरतिशयप्रियवस्त्वधीनं कुर्वन्न तूष्णीमास्ते किन्तु तद्विश्लेषं देहतदनुबन्ध्यादिपरित्यागेनापि परिहरन् दृष्टस्तथाहमपीत्याह–नेति । हे ब्रह्मन् ! अहं भक्तजनप्रियोऽहं साधुभिर्मद्भक्तैर्विना आत्मानमिमं चतुर्भुजादिविशिष्टं दिव्यविग्रहमात्यन्तिकीं श्रियं निरतिशयां विभूतिं, यद्वा, आत्यन्तिकीमत्यन्तमाश्रितामनन्यार्हशेषभूतां लक्ष्मीं च नाशासे न स्पृहयामि यद्यपि लोके प्रियतमवस्तुविश्लेषनिमित्तदेहतदनुबन्ध्यादित्यागः क्वचिद्दृष्टचरः परमात्मनि तु भक्तजनविश्लेषसन्निमित्तशरीरादित्यागश्च न दृष्टस्तथापि सम्भावनामात्राभिप्रायेण भगवतैवमुक्तमिति द्रष्टव्यं तथाचोक्तं भगवता दाशरथिना—

> अप्यहं जीवितं जह्यां त्वां वा सीते ! सलक्ष्मणाम् ।
> न तु प्रतिज्ञां संश्रुत्य ब्राह्मणेभ्यो विशेषतः ॥

इति "मित्रभावेन संप्राप्तं नत्यजेयं कथञ्चन" इति च यद्यपि लक्ष्म्या अपि भक्तवत्प्रीतिविषयत्वात् श्रियमपि नाशास इत्युक्तिरयुक्ता तथापि लक्ष्म्यपेक्षयापि भक्तानां स्वनिरतिशयप्रीतिविषयत्वमभिप्रेत्य भगवतैवमुक्तमित्यवगन्तव्यम्. साधूनामत्यर्थप्रियत्वहेतुं वदन् तान्विशिनष्टि—येषां साधूनामहमहमेव अभक्ष इति-वत्सावधारणं परा उत्कृष्टा गतिः उज्जीवनोपायः उज्जीवनोपायोहि प्रियतमः अतो निरतिशयप्रियोज्जीवनोपायत्वेन मामाश्रितत्वात्तेपि मम निरतिशयप्रिया इति युक्तमेवैतदिति भावः ॥ ६४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अन्यतोप्यवनाशां निवारयति–अहमिति । अहं सनत्कुमारादयः इति सर्वे वयं यस्य हरेर्मायामिच्छां किं विषयामिति न विदाम इत्यन्वयः ॥ ५७ ॥ ५८ ॥

दुर्विषहं सोढुमशक्यं तद्यहं किं करोमीति तत्राह—तमेवेति ॥ ५९ ॥ ६० ॥

अव रक्ष विश्वभावन सर्ववशीकरणसमर्थ ! ॥ ६१ ॥

तस्याघस्यापचितिं प्रायश्चित्तम् अघपरिहारसामर्थ्यं तदेवेत्याह–मुच्येतेति । नारको नरकस्थो यन्नाम्न्युदिते अवान्मुच्येतेत्यन्वयः ॥ ६२ ॥

आत्मरक्षार्थं दुर्वाससा प्रार्थितो भगवान् लोकसंग्रहार्थमात्ममायां प्रकटयति–अहमिति । अतोऽस्वतन्त्र इव न त्वस्वतन्त्रः स्वतन्त्रस्यास्वातन्त्र्यवचनं कथं सङ्गच्छते ? इति तत्राह साधुभिरिति ॥ ६३ ॥

ग्रस्तहृदयत्वं नाम किमित्यतस्तद्विवृणोति–नाहमिति । साधुभिर्मद्भक्तैर्विनाऽहमात्मानं स्वरूपं नाशासे नेच्छामि तदप्रिये प्राप्ते मज्जीवनेन किं प्रयोजनमिति, कृत्वेति शेषः । यद्वा स्वात्मानमपि नाशासे तदाऽनन्यशरणां श्रियं नाशास इति किं वक्तव्यमित्याह, श्रियञ्चेति । भक्ताश्चापीदृशा इत्याह येषमिति ॥ ६४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

नारको नरकस्थोपि किं पुनस्तवाग्रत एव शरणागत इत्यर्थः। यथोक्तं नारसिंहे "यथा यथा हरेर्नाम कीर्त्तयन्ति स्म नारकाः। तथा तथा हरौ भक्तिमुद्वहन्तो दिवं ययुः" इति ॥ ६२ ॥

आत्मनः सर्वथा भक्तवशत्वं स्थापयति षड्भिः—तत्र तत्प्रतिजानीते—अहमिति। साधुभिः प्रोज्झितकैतवः मोक्षपर्यन्तकामनारहितैरित्यर्थः। भक्तानां ये जनास्तेपि प्रिया यस्य तमिति कैमुत्यं दर्शितम् ॥ ६३ ॥

तदेव स्थापयति पञ्चभिः—तत्र स्वानुभवमेव प्रमाणयन् स्वरूपानन्दानुभवस्य भक्तभावनानन्दानुभवाद्धीनत्वं दर्शयति तेन च भक्तभावस्य ह्लादिनीसारत्वमभिप्रैति—नाहमिति ॥ ६४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

ननु, सर्वज्ञस्य तव कुतो भ्रमस्तत्राह—अहमिति। पारदर्शिनः सर्वज्ञा अपि यस्य मायां न विद्मः ॥ ५७-५८ ॥

निराश इति। शिवशिव मदूब्रह्मतेजस्वित्वाभिमानो रसातलं गतः अन्येनापि ब्रह्मादिना केनाप्यहं न त्रातः मदिष्टदेवः शम्भुर्मां रक्षिष्यतीत्याशा आसीत् सापि व्यर्था बभूव सम्प्रति यस्य भक्तेन एतां दुरवस्थामहं प्रापितस्तस्यैव विष्णोः सन्निधिर्मम स्वप्राणरक्षार्थं गन्तव्यो बभूव धिङ् मे लज्जां प्राणांश्चेति निर्वेदो ध्वनितः॥६०॥

मा माम् अव पाहि॥ ६१ ॥

अघमपराधः अपचित्तिं निष्कृतिम् ॥ ६२ ॥

यथा मदधीनत्वेनाख्यातत्वाद्ब्रह्मरुद्रादयस्त्वां त्रातुं नाशक्नुवन् तथैवाहमपि पराधीनस्त्वां त्रातुं न शक्नोमीत्याह—अहमिति। ननु, त्वं स्वयमेव भक्तपराधीनीभवसि ननु भक्तैस्त्वं पराधीनीकर्त्तुमिष्टोऽतस्त्वं स्वतन्त्र एवासीत् सत्यं स्वतन्त्रोप्यहं स्वेच्छयैव भक्तपरतन्त्री भवामीति स्वस्वभावस्य प्रायो दुस्त्यजत्वादिव शब्दः एतादृशमद्दुःखदर्शनेपि तव करुणा नोदयते इतिचेत् सत्यं करुणा खलु यस्य धर्मस्तन्मन एव मम नास्तीत्याह—साधुभिर्मोक्षपर्य्यन्तकामनाशून्यत्वादुत्तमैर्भक्तैर्ग्रस्तमात्मवशीकृतं हृदयं यस्य सः विदितं मोक्षादिकं तेषामरोचकत्वादयोग्यमलक्ष्य मया स्वहृदयमेव बलाद्दत्तं तैरपि तद्गृहीत्वा स्वहृदयेनैकीकृत्य सादरं स्थापितमिति ध्वनिः। अत एव तेषामनुरूप्ये एव ममानुकम्पेति भक्तकृपानुगामिनी भगवत्कृपेति सर्वलोकप्रसिद्धिस्त्वया ज्ञायत एवेत्यनुध्वनिः। भक्तानां जना अपि प्रिया यस्य किमुत ते इति हे द्विज विप्रवटो इदमपि न किमपि परामृशसीति भावः ॥ ६३ ॥

भक्तास्ते कियत्प्रीतिविषया इति चेत् शृणु तत्वमित्याह नाहमिति। यत्र आत्मनि रमणादहमात्मारामं इति प्रसिद्धस्तमात्मानमपि भक्तैर्विना नाशासे नाकाङ्क्षे इति मत्स्वरूपभूतानन्दादपि मद्भक्तस्वरूपानन्दोऽतिस्पृहणीय इति द्वयोरपि चिद्रूपत्वेपि भक्तवर्त्तिन्या भक्तेरनुग्रहाख्यचिद्वृत्तिविपाकरूपायाः सर्वाचित्सारभूतत्वान्ममानन्दस्वरूपस्याप्यानन्दकत्वाद्वाकर्षकत्वाच्च श्रियं षडैश्वर्य्यसम्पत्तिम् आत्यन्तिकीं नित्यामपि यैर्विना वन्ध्यामिव वेद्मीति भावः। येषां भक्तानामहमेव गतिरेक उपादेय इत्यर्थः ॥ ६४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

पारदर्शिनः लोकदृष्ट्या बहुज्ञा अपि यस्य मायामपि न विदाम न विद्मः यं न विद्म इति का कथा तत्र हेतुः यस्य मायया आवृताः ॥ ५८-६० ॥

अच्युतेत्यादिषड्भिः पदैः सम्बोध्य हि निश्चये कृतागसं मा माम् अव रक्ष इत्याह ॥ ६१ ॥

अघमपराधः तस्य अघस्य अपचित्तिं निष्कृतिं नारको नरकस्थोपि ॥ ६२ ॥ ६३ ॥

भक्तजनाः प्रियाः यस्य सोऽहम् आत्यन्तिकीम् अत्यन्ततः समाश्रितां श्रियं रमाम् आत्मानं श्रीविग्रहं च मद्भक्तैर्विना नाशासे न स्पृहयामि भक्तहितायैव श्रिया सह श्रीविग्रहेणाविर्भवामीत्यर्थः ॥ ६४ ॥ ६५ ॥

भाषा टीका।

फिर शंकर कहने लगे, कि-मैं, सनत्कुमार, नारद, और भगवान् ब्रह्माजी, कपिल, अपांतरतम, देवल, धर्म, और आसुरि ॥ ५७ ॥

और मरीचि से आदि लेकर अन्यपार दर्शन वाले सिद्धेश्वर ये सबही जिसकी माया से घिरे हुए उसकी माया को नहीं जान सके हैं ॥ ५८ ॥

उन विश्वेश्वर का यह शस्त्र हम लोगों को भी दुर्विषह है इससे उनही श्रीहरि के तुम शरण जाओ वे तुम्हारा कल्याण करेंगे ॥ ५९ ॥

तब तो वहां से भी निराश होकर दुर्वासा श्रीहरि के वैकुंठ में लोकालोक पर्वत पर गये जहां श्रीजी सहित श्रीनिवास विराजे हैं ॥ ६० ॥

दुर्वासा श्रीहरि शस्त्र के तेज से जलाजाता रहा ऐसा कंपित होकर भगवान के चरण के संनिधि में पड़ गया और बोला, कि हे अच्युत! हे अनंत! हे सज्जनों के इच्छा के विषय! हे प्रभो! हे विश्व भावन! मो अपराधी की रक्षा करो ॥ ६१ ॥

हे भगवन्! मैंने आपका परम प्रभाव को नहीं जानकर आपके प्रिय भक्त का अपराध किया है सो हे विधातः! उस अपराध का निस्तार आप करो। क्योंकि? आपके नामोच्चारण से नारकी पुरुष भी नरक से मुक्त होजाता है ॥ ६२ ॥

श्रीभगवानुवाच ॥

श्रीभगवान् बोले, कि-हे द्विज! मैं भक्तों के पराधीन रहता और इसी से परतन्त्र सा हूं भक्त साधुजनों ने मेरे हृदय को

ये दारागारपुत्राप्तान् प्राणान्वित्तमिमं परम् ।
हित्वा मां शरणं याताः कथं तांस्त्यक्तुमुत्सहे ॥ ६५ ॥
मयि निर्बद्धहृदयाः साधवः समदर्शनाः ।
वशे कुर्वन्ति मां भक्त्या सत्स्त्रियः सत्पतिं यथा ॥ ६६ ॥
मत्सेवया प्रतीतं च सालोक्यादिचतुष्टयम् ।
नेच्छन्ति सेवया पूर्णाः कुतोऽन्यत्कालविद्रुतम् ॥ ६७ ॥
साधवो हृदयं मह्यं साधूनां हृदयं त्वहम् ।
मदन्यत्ते न जानन्ति नाहं तेभ्यो मनागपि ॥ ६८ ॥
उपायं कथयिष्यामि तव विप्र ! शृणुष्व तत् ।
अयं ह्यात्माभिचारस्ते यतस्तं यातु वै भवान् ।
साधुषु प्रहितं तेजः प्रहर्तुः कुरुते ऽशिवम् ॥ ६९ ॥
तपो विद्या च विप्राणां निःश्रेयसकरे उभे ।
त एव दुर्विनीतस्य कल्पेते कर्तुरन्यथा ॥ ७० ॥
ब्रह्मंस्तद्गच्छ भद्रं ते नाभागतनयं नृपम् ।
क्षमापय महाभागं ततः शान्तिर्भविष्यति ॥ ७१ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां नवमस्कन्धे ऽम्बरीषचरिते
चतुर्थोऽध्यायः ॥ ४ ॥

भाषा टीका ।

पकड रखा है और मेरे लिये स्वयं भी भक्तजन बहुत ही प्रिय हैं ॥ ६३ ॥

मैं अपने भक्त और साधुजनों के बिना तो अपने आपको भी नहीं चाहता हूं, और उनके बिना मेरी आत्यंतिक श्री को भी चाहना नहीं करता हूं क्योंकि ! उनकी तो परम गति मैं ही हूँ ॥ ६४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इमं परं च लोकं हित्वा ॥ ६५ ॥ ६६ ॥

प्रतीतं प्राप्तमपि ॥ ६७ ॥ ६८ ॥

आत्मनस्तवैवाभिचारो हिंसा यतोभूत्तमेव यातु मद्विवमनर्थम् ॥ ६९ ॥

तपोविद्यासम्पन्नस्य मम कथमनर्थः समजनि? इति मास्म विस्मयं कार्षीरित्याह—तप इति ॥ ७० ॥ ७१ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायां
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

येषां गतिरहं परेति स्वस्यैव तत्परगतित्वमुक्तं व्यञ्जयन् स्वस्य तन्निमित्तां तत्त्यागानर्हतामाह—य इति । ये साधवः प्राणान् प्राणयन्ति जीवयन्ति इति प्राणास्तान् जीवनहेतून् प्राणान् तदनुबन्धिदारादींश्च हित्वा संसृतिहेतव एवैतेन तूज्जीवनहेतव इति विमर्शनेनोज्जीवनोपायताबुद्धिं परित्यज्य मां शरणमुज्जीवनोपायं गताः तत्वेनाध्यवसितवन्त इत्यर्थः । अतस्तान् कथं त्यक्तुमुत्सहे शक्नोमि ?

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

न हि कृतज्ञस्य विश्वस्तत्यागउचित इति भावः । यद्यपि भक्तजनत्यागाय न दुर्वासाः शरणं गतोऽपि तु स्वप्राणरक्षायै अतस्तंप्रति कथं तांस्त्यक्तुमुत्सह इत्युक्तिरसंगता तथापि निरतिशयप्रियवस्तुविश्लेषपरिहाराय देहतदनुबन्ध्यादिपरित्यागस्य प्राक् प्रस्तुतत्वात् देहादिपरित्यागेनाप्यविनाभाव्यान् साधून् कथं विनाभूय वर्त्तेयमित्येतदभिप्रायेण कथं तांस्त्यक्तुमुत्सह इत्युक्तम्. यद्वा, भक्तजनप्रतिपक्षत्वद्रूक्षणे कृते आश्रितविपक्षपक्षपाती भगवानिति बुद्ध्वा मां त्यजेयुर्भक्ताः अतस्तान् सर्वभावेन भजतः कथं त्यक्तुमुत्सह इत्यभिप्रायेणोक्तम् ॥ ६५ ॥

एवमात्मानं विशिष्याथ भक्तान् विशिनष्टि–मयीति । मयि निरतिशयप्रीतिविषये निर्बद्धमनन्यविषयत्वेन स्थिरीकृतं हृदयं यैस्ते अत एव समदर्शिनः सर्वस्य मदात्मकत्वदर्शिनः साधवः भक्त्या परस्परप्रीत्यावहया स्वयमपि प्रीतिरूपया अनन्यप्रयोजनया भक्त्या मां वशे कुर्वन्ति यथा सत्स्त्रियः पतिव्रताः सत्पतिं परदारपराङ्मुखमन्यार्हशेषत्ववत्स्त्रीपराङ्मुखं वा वशे कुर्वन्ति तद्वत् ॥ ६६ ॥

अनन्यप्रयोजनभक्तिनिष्ठत्वमेव व्यनक्ति—मत्सेवयेति । ते साधवः मत्सेवया मद्भक्ताः प्रतीतं सालोक्यमादिर्यस्य तत् चतुष्टयं चतुर्विधं सालोक्यसामीप्यसायुज्यसार्ष्टिरूपां मुक्तिमेव नेच्छन्ति कुतोऽन्यत् कालेन विप्लवो नाशो यस्य तदिन्द्रादैश्वर्यमिच्छेयुः तत्र हेतुः सेवया मच्छेषत्वैकरसानन्दानुभवरूपया भक्त्या पूर्णा निर्वृतान्तःकरणाः ॥ ६७ ॥

किं बहुना साधवो मह्यं मम हृदयं मद्धृदयानुवर्त्तिहृदयाः साधव इत्यर्थः । तथाऽहं साधूनां हृदयं साधुहृदयानुवर्तिहृदयोऽहं ते साधवः मन्मत्तः अन्यत्प्रियं वस्तु न जानन्ति वथाहऽमपि तेभ्यः साधुभ्योऽन्यन्मनागपि ईषदपि प्रियं न जानामि एवं परस्परहृदयानुवर्तिहृदयत्वात्परस्परप्रियत्वाच्च भक्तपारतन्त्र्यं मम युक्तमिति न तद्विषयापराधो मया सोढुं शक्य इति भावः ॥ ६८ ॥

एवं स्वभक्तविषयापराधस्य स्वेनासह्यत्वं सहेतुकमुपपाद्य स्वसन्निधौ तत्कृतप्राणरक्षणार्थशरणागतेर्वैफल्यपरिहारायोपायमाह–उपायमिति । हेविप्र ! तव प्राणरक्षणोपायं तत्साधनं कथयिष्यामि तच्छृणुष्व, कोसौ ? तत्राह–ते तवायमात्मापचारः स्वयं कृतापराधःस यतो यद्विषये जातस्तमेवाम्बरीषम्प्रति भवान् गच्छत्विति आत्माभिचार इति पाठान्तरं तत्रान्यहिंसार्थं कृतोऽप्युद्यमः आत्मन एवाभिचारः स्वहिंसार्थमेवाभूदित्यर्थः । तथा हि, लोके साधुषु मद्भक्तेषु प्रहितं प्रयुक्तं तेजः सामर्थ्यं कर्तुः प्रहर्त्तुरेवाशिवमनर्थं कुरुते ॥ ६९ ॥

तपोविद्यादिसम्पन्नस्य मम कथमनर्थः समजनि ? इति माविस्मयं कार्षीरित्याह—तप इति । तपोविद्या च एते उभे विप्राणां विनीतानां निःश्रेयसकरे निरतिशयपुरुषार्थसाधने दुर्विनीतस्य कर्त्तुर्निरपराधेष्वपराधकर्त्तुर्विप्रस्य तु त एव तपोविद्ये एवान्यथा कल्पेते अनर्थाय भवेतामित्यर्थः ॥ ७० ॥

तत्तस्मात् हे ब्रह्मन् ! नाभागतनयमम्बरीषं प्रत्येव गच्छ तमेव महाभागमपराधानामविज्ञातारं क्षमापय ततः शान्तिर्भद्रं तव भविष्यतीति ॥ ७१ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इदं भूस्थानं परं स्वर्गादिकम् ॥ ६५ ॥

तदत्यागे भक्त्या वशीकरणमेव कारणं नान्यदित्याह—मयीति ॥ ६६ ॥

इदञ्चात्यागे कारणमित्याह–मत्सेवयेति ॥ ६७ ॥

इतोपि मदन्यापेक्षा तेषां नास्तीत्याशयेनाह–साधव इति । मह्यं मम हृदयं प्रियं तुशब्दो हेतौ साधवो मम हृदयम अहं साधूनां हृदयमिति यस्मात्ते मदन्यं प्रियं न जानन्ति अहमपि तेभ्यः साधुभ्यो मनागत्यल्पमपि प्रियमन्यन्न जानामीत्यन्वयः ॥ ६८ ॥

प्रकृते किमनेनायातमिति तत्राह–भयमिति । आत्मना त्वया कृतोभिचारः कृत्याप्रयोगः यतः यस्मै तस्मै प्रयुक्तमात्मानं कथ बाधते ? इति तत्राह—साधुष्विति । प्रहितं प्रयुक्तं क्षुद्रोपद्रवलक्षणं तेजोर्चिः“ तेजो बले प्रभावेऽग्नौ ज्योतिष्यर्चिषि रेतसि” इत्यभिधानं प्रहर्तुः प्रयोक्तुरपि भयं कुरुते ॥ ६९ ॥

* विनयशून्यस्य तव विद्यातपसी अनर्थकरे एवाभूतामिति भावेनाह—तप इति । अन्यथा अनर्थकरे ॥ ७० ॥ ७१ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तेषु कारुण्येपि कारणं दर्शयन् अन्यथा स्वस्मिन् कृतघ्नत्वापातं योजयति–ये दारेति । परं सालोक्यादिप्राप्तिपर्यन्तं तदुभयं दृष्टान्तेन च स्थापयति मयीति यतो मयि निर्बद्धहृदयाः अतः साधवः प्रोज्झितकैतवाः अत एव समदर्शनाः अन्यत्र रागद्वेषरहिताश्च ॥ ६५ ॥ ६६ ॥

तदेवातिशयेन दर्शयति-मत्सेवयेति। कुतोऽन्यदिति सालोक्यादीनां कालेनाविप्लुतत्वं दर्शितम् ॥ ६७ ॥

---

* अत्र न समाप्यते ऽध्याय एतद्रीत्या ।

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तदेवं परस्परहृदयस्य तादात्म्यमाह–साधव इति ॥६८—७१॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

भो ब्रह्मण्यदेव ! ब्राह्मणं मां नोपेक्षस्वेतिचेत्सत्यं तर्हि किं भक्तानुपेक्षे ? भक्तापकारकस्य तव रक्षणेन क्षत एव भक्तास्त्यक्ता भवेयुस्तत्तु नोपपद्यत एवेत्याह-ये इति । भक्ताः खलु ते मदर्थं परमप्रेमास्पदमप्युत्यजन्दाराद्यासक्तिमत्यजन् ब्राह्मणस्त्वं मदर्थं किमत्यजस्तद् ब्रूहीति भावः । न चाम्बरीषेण किमपि त्यक्तामिति वक्तव्यं यदा त्वयाऽम्बरीषवधार्थं कृत्या विनियुक्ता तदा तेन स्वदेहरक्षापेक्षया पदमात्रमपि नाभिद्रुतं त्वयात्मारामेण महाविरक्तेन स्वदेहरक्षार्थं जगदेव परिक्रामयता ब्रह्मरुद्रादयोऽपि प्रार्थिताः एतेनैव स्वस्य तस्य च मूल्यं जानीहि किमधिकं त्वमबोधो बोधयितव्य इति ॥ ६५ ॥

युष्माभिर्ब्रह्मादिभिरप्यहं दुर्वास एव तैस्तु वशीकृत एवाहमस्मीत्याह–मयीति । मय्येव हृदयस्य निबद्धत्वात् साधवः निष्कामाः समदर्शनाः स्वस्य परेषां च दुःखादिकं समं पश्यन्तः ॥ ६६ ॥

तेषां निष्कामस्य परमकाष्ठामाह–मत्सेवयेति । प्रतीतं स्वतः प्राप्तमपि कुतोऽन्यदिति सालोक्यादीनां कालेनाविप्लुतत्वं दर्शयति कालविप्लुतत्वं पारमेष्ठ्यादि ॥ ६७ ॥

किञ्च मां सन्तापयते तुभ्यं समुचितं फलं दित्सन्नपि यन्न ददामि एतामेव मे परां ब्रह्मण्यतामवेहीत्याह—साधव इति । मह्यं मम अम्बरीषं ज्वालयितुमिच्छंस्त्वं मद्धृदयमेव ज्वालयितुं प्रवृत्तोऽभूरित्यर्थः । तर्हि त्वदपराध एवायं चेत्त्वच्चरणे पतामि प्रसीदेत्यत आह, साधूनां हृदयस्त्वहं साधुनां हृदयप्रसादे सत्येव मत्प्रसाद इत्यतो याहि तमम्बरीषमेव प्रसादयेति भावः । नन्वम्बरीषो मां निमन्त्र्याभोजयित्वैव भुक्तवानतस्तद्दोषमपि किं न पश्यसीति तत्राह–मदन्यत्ते न जानन्तीति मच्चिकीर्षितमेवाम्बरीषेण कृतमिति भावः । तर्हि त्वामेवाहं पृच्छामि ब्रूहि ब्राह्मणद्वादश्योर्मध्ये कस्यादरो धर्म इति चेत् याहि तमम्बरीषमेव पृच्छ स एव त्वां धर्मशास्त्रतत्त्वानभिज्ञं बोधयिष्यति मात्र लज्जां कामपि कार्षीस्तादृशो नाहमपि विद्म इत्याह–नाहं तेभ्यः सकाशात् मनागपि अधिकं जानामीत्यर्थः ! तेन श्रुतौ पानीयस्याशितत्वानशितत्वयोस्तुल्यदर्शनात् द्वादशीब्राह्मणयोस्तुल्य एवादरः कृतो मद्भक्तेनाम्बरीषेण त्वन्त्वनभिज्ञस्तन्नाज्ञासीरिति ध्वनिः दुर्वासास्तु फलदर्शनेन द्वादश्या एव भक्तित्वात् सर्वधर्माधिक्यं निर्द्धारयन्नम्बरीषं किमपि न पृष्टवानित्यनुध्वनिः ॥ ६८ ॥

किञ्च तदपि तव निस्तारोपायं स्पष्टमेव ब्रवीमि शृण्वित्याह—अयामीति । यस्य वधार्थं त्वया अभिचारः कृतः तमम्बरीषमेव याहि स एव कृपालुस्त्वां त्रास्यते नान्य इति भावः नचाम्बरीषं त्वं स्वदुःखदं मन्येथा इत्याह साधुष्विति ॥ ६९ ॥

तपोविद्यासम्पन्नस्य मम कुतस्तरामम्बरीषात् क्षत्रियात् परित्राणं युज्यते ? इति चेदपात्रस्य तव तपोविद्ये नैव स्तः प्रत्युत ते विपरीते एवेत्याह–तप इति । दुर्विनीतस्य कर्त्तुस्तदाश्रयस्य अन्यथा कल्पेते विपरीतफले भवतः ॥ ७० ॥ ७१ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
नवमस्य चतुर्थोऽयं सङ्गतः सङ्गतः सताम् ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मयि निर्बद्धं स्थिरीकृतं हृदयमन्तःकरणं यैस्तैः ॥ ६६ ॥

प्रतीतं प्राप्तमपि नेच्छन्ति कालविद्रुतम् ऐहिकामुष्मिकं प्राकृतं पदार्थं नेच्छन्तीति किमुत वक्तव्यं सालोक्यादीनां व्याख्या तृतीयस्कन्धव्याख्याने द्रष्टव्या ॥ ६७ ॥ ६८ ॥

मां शरणागतस्य तव सन्तापहरमुपायं कथयिष्यामि हि यस्मात् आत्माभिचारः आत्मना त्वया कृतोऽभिचारः हिंसा यतो निमित्तभूतादभूत्तमम्बरीषं याहि गच्छ अशिवमभद्रम् ॥ ६९ ॥ ७० ॥ ७१ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
चतुर्थोऽध्यायार्थप्रकाशः ॥ ४ ॥

भाषा टीका

जो लोग अपने दारा, अगार, [गृह] पुत्र, बन्धु, प्राण, वित्त, और परलोक को भी छोडकर मेरे शरण आये हैं भला मैं उनको कैसे छोडने का उत्साह करूं ॥ ६५ ॥

समदर्शनसाधुजनों का हृदय मेरे विषय में बन्धा रहता है और वे लोग भक्ति से मेरे लिये वश में कर लेते हैं जैसे साध्वी स्त्री अपने सत्पति को वश में कर लेती है ॥ ६६ ॥

और मेरी सेवासे प्राप्त होने वाले सालोक्यादि चतुर्विध मोक्ष को भी नहीं चाहते हैं, केवल मेरी सेवामात्र से पूर्ण रहते हैं फिर और काल कृत परिणाम वाले पदार्थ की क्यों ! चाहना करेंगे ॥ ६७ ॥

साधुजन मेरे हृदय हैं और मैं साधुजनों का हृदय हूं मेरे से औरको वो लोग नहीं जानते हैं, उनलोगों से और को मै भी किञ्चित् भी नहीं जानता हूं ॥ ६८ ॥

हे विप्र ! मैं उपायबताऊं सो तुम सुनो ये तुमारी हिंसा जहां से है वहीं तुम जाओ ॥ और एक बात का ध्यानरखो कि—साधुजनों पर चलाया हुआ तेज चलाने वाले काही अमङ्गल करता है ॥ ६९ ॥

भाषाटीका।

तप और विद्या ये दोनो ब्राह्मणों के नितरां श्रेय कारक हैं पर दुर्विनीत के येही दोनो कर्त्ता को अन्यथा फल दायक होजाते हैं ॥ ७० ॥

हे ब्रह्मन्! तस्मात् अब तुम नाभागतनय (अंबरीष) के समीप जाओ। और महाभाग से अपने अपराध को क्षमा करा ओ तब शांति होगी ॥ ७१ ॥

इति श्रीमद्भागवत नवमस्कन्ध में चतुर्थ अध्याय की श्रीवृन्दावनस्थ पं० भागवताचार्यकृत-भाषा टीका समाप्ता ॥ ४ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे चतुर्थोऽध्यायः ॥ ४ ॥

॥ पञ्चमोऽध्यायः ॥

श्रीशुक उवाच ।

एवं भगवताऽऽदिष्टो दुर्वासाश्चक्रतापितः ।
अम्बरीषमुपावृत्य तत्पादौ दुःखितोऽग्रहीत् ॥ १ ॥
तस्य सोद्यमनं वीक्ष्य पादस्पर्शविलज्जितः ।
अस्तावीत्तद्धरेरस्त्रं कृपया पीडितो भृशम् ॥ २ ॥

अम्बरीष उवाच ।

त्वमग्निर्भगवान् सूर्यस्त्वं सोमो ज्योतिषां पतिः ।
त्वमापस्त्वं क्षितिर्व्योम वायुर्मात्रेन्द्रियाणि च ॥ ३ ॥
सुदर्शन ! नमस्तुभ्यं सहस्राराच्युतप्रिय ।
सर्वास्त्रघातिन् ! विप्राय स्वस्ति भूया इडस्पते ॥ ४ ॥
त्वं धर्मस्त्वमृतं सत्यं त्वं यज्ञोऽखिलयज्ञभुक् ।
त्वं लोकपालः सर्वात्मा त्वं तेजः पौरुषं परम् ॥ ५ ॥
नमः सुनाभाखिलधर्मसेतवे ह्यधर्मशीलासुरधूमकेतवे ।
त्रैलोक्यगोपाय विशुद्धवर्चसे मनोजवायाद्भुतकर्मणे गृणे ॥ ६ ॥
त्वत्तेजसा धर्ममयेन संहृतं तमः प्रकाशश्च धृतो महात्मनाम् ।
दुरत्ययस्ते महिमा गिरां पते त्वद्रूपमेतत्सदसत्परावरम् ॥ ७ ॥
यदा विसृष्टस्त्वमनञ्जनेन वै बलं प्रविष्टोऽजितदैत्यदानवम् ।
बाहूदरोर्वङ्घ्रिशिरोधराणि वृक्णन्नजस्रं प्रधने विराजसे ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पञ्चमे विष्णुचक्रं तु प्रसाद्य प्राणसङ्कटात् ।
दुर्वासा रक्षितस्तेन तथा तद्भूरमीर्यते ॥ ० ॥

॥ १ ॥

स उद्यममिति छेदः सुलोपः पादपूरणार्थः ॥ २ ॥

ज्योतिषां नक्षत्राणां पतिः सोमस्त्वम् मात्राणीन्द्रियाणि च त्वच्छक्त्यैवाऽन्वाद्यः स्वं स्वं कार्यं कुर्वन्तीत्यर्थः ॥ ३ ॥

सहस्रम् अरा यस्य हे सहस्रार ! स्वस्ति क्षरणं भूयाः इडस्पते पृथ्वीपते ॥ ४ ॥

ब्राह्मणरक्षणं तव युक्तमेवेत्याह–त्वं धर्म इति । न च तवेयमतिस्तुतिरित्याह–पौरुषं पुरुषस्येश्वरस्य परं तेजः सामर्थ्यं त्वम् अयं भावः "स ऐक्षत" इत्यादिश्रुतिप्रसिद्धं भगवतः शोभनं दर्शनं सुदर्शनं तत एव च सर्वं जातमतस्त्वमेव सर्वात्मेति ॥ ५ ॥

हे सुनाभ ! अद्भुतकर्माणं त्वां कः स्तोतुं समर्थोऽतस्तुभ्यं केवलं नमो गृणे इत्यन्वयः अद्भुतकर्मत्वमेवाऽऽह–अखिलानां धर्माणां सेतवे मर्यादारूपाय अतएवाधर्मशीलानामसुराणां धूमकेतवे दाहकाय त्रैलोक्यं गोपायतीति तथा तस्मै विशुद्धमत्युज्ज्वलं वर्चस्तेजो यस्य तस्मै ॥ ६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेव प्रपञ्चयति–त्वत्तेजसेति द्वाभ्याम् । सूर्यादीनां प्रकाशश्च त्वयैव रूप्यते प्रकाश्यत इति त्वद्रूपम् ॥ ७ ॥

हे अजित ! अनञ्जनेन श्रीहरिणा यदा विसृष्टस्त्वं तदा दैत्यदानवानां बलं प्रविष्टः संस्तेषां बाह्वादीन्भिन्दन्विराजसे पाठान्तरे ऊर्जिता दैत्यदानवा यस्मिन् तद्बलं पूर्वपदेन सन्धिरार्षः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्थं भगवतोपदिष्टोपायश्चक्रतापितो दुर्वासा अम्बरीषमुपेत्य दुःखितस्तस्याम्बरीषस्य पादावग्रहीत् ॥ १ ॥

तस्य दुर्वाससस्तथाविधं व्यसनं समीक्ष्य पादस्पर्शविलज्जितोऽम्बरीषः कृपया नितरां तापितस्तद्द्विजस्य पृष्ठतोऽनुपकं हरेश्चक्रमस्तौषीत्तुष्टाव ॥ २ ॥

स्तुतिमेवाह–त्वमग्निरित्यादिना सत्त्वमित्यतः प्राक्तनेन । तावत् सुदर्शनं प्रसादयितुं सर्वतेजःकारणभूतस्य सर्वात्मकस्य तव तेजसोऽयं द्विजस्त्वदात्मा विषयो न भवतीति सूचनाय च सर्वतेजःकारणत्वेन सर्वात्मकत्वेन च स्तौति–त्वमग्निरिति । यद्यपि "एतदात्म्यमिदं सर्वं "सर्वं खल्विदं ब्रह्म"इत्यादिभिः"नतत्रसूर्यो भाति न चन्द्रतारकम्" इत्यादिभिश्च ब्रह्मण एव सर्वात्मकत्वं सर्वतेजसामाच्छादकत्वं सर्वतेजःकारणत्वं सर्वतेजसामनुग्राहकत्वमित्यादयो धर्माःश्रुताः ननु ब्रह्मनियाम्यस्य सुदर्शनस्य क्वापि श्रुतास्तथापि तस्मिन् "शास्त्रदृष्ट्यातूपदेशो वामदेववत्"(१।१।३५) इति शारीरकन्यायेन "अहमेवासमहमेव वर्तामि भविष्यामि च तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चाहं कक्षीवानृषिरस्मि विप्रः"इत्यादौ ब्रह्मात्मकत्वेन ब्रह्मविशेष्यकत्वाद्विशेषणबुद्धिशब्दादीनां विशेष्यपर्यन्तस्याकृतिनयसिद्धत्वाद्विशेष्यपर्यन्तसाक्षात्कारनिमित्ततत्तादात्म्यव्यवहारवद्ब्रह्मविशेषणभूतसुदर्शनविषयबुद्धिशब्दानां ब्रह्मपर्यन्तानिमित्ततत्तादात्म्यव्यपदेशाद्वा सौदर्शनस्य पुरुषस्य परमात्माभिन्नत्वाद्वा तस्य सर्वात्मकत्वादिभिर्धर्मैः प्रवृत्तेयं स्तुतिरित्यदोषः । त्वमेवाग्न्यादितेजसामनुग्राहकस्तत्कारणभूतश्चेत्यर्थः । ज्योतिषां नक्षत्राणां पतिर्यः सोमश्चन्द्रः स त्वमेवेत्यर्थः । अप्पृथिव्याकाशवायुगन्धादितन्मात्रोभयेन्द्रियात्मा त्वमेवेत्यर्थः । त्वमग्निरिति तेज आत्मकत्वं पुर्वमुक्तमित्यधाविभिन्नं तस्य सह पाठः ॥ ३ ॥

हे सुदर्शनसहस्रारेत्यसाधारणनामाभ्यां सम्बोधनं हे अच्युतप्रिय! भक्तानामिष्टमेवाच्युतस्येष्टं तदिष्टमेव तथापि प्रियमतो मादृष्टद्विजप्राणरक्षणं तवापीष्टमेवेति प्रसन्नो भवेत्यच्युतप्रियेतिसम्बोधनाभिप्रायः! हे सर्वारिघातिन्! न तु शरणागतघातिन्नित्यभिप्रायः। हे इडस्पते! पृथिवीपते हे जगत्पालक ! जगत्पालकस्य तव शरणागतद्विजरक्षणं युक्तमेवेति भावः। विप्राय स्वस्ति भूयाः मङ्गलरूपो भव प्रसन्नो भवेत्यर्थः ॥ ४ ॥

किञ्च सर्वधर्मरक्षकस्य तव शरणागतद्विजरक्षणं युक्तमेवेति सूचयितुं धर्मादिनिर्वाहकत्वेन तदात्मकतया स्तौति–त्वं धर्म इति। ऋतिर्वैर्य जित्या धृतिः त्वमेव यज्ञो यज्ञनिर्वाहको यज्ञाराध्यश्च त्वमेव हे सर्वात्मन् ! पौरुषं परमपुरुषसम्बन्धि तेजस्त्वमेव पौरुषं परमपुरुषसम्बन्धियच्छत्रुसञ्जिहीर्षात्मकसङ्कल्परूपमीक्षणापरपर्यायं सामर्थ्यंन्त्वमेवेत्यर्थः। तथाचाभियुक्तोक्तिः—

> वाणी पौराणिकीयं प्रथयति महिनं प्रेक्षणं कैटभारेः–
> शक्तिर्यस्येषुदंष्ट्रानखपरशुमुखव्यापिनी तद्विभूयाम् ॥

इति ॥ ५ ॥

हे सुनाभ ! शोभना नाभिर्यस्य तथाभूतः ते तुभ्यं केवलं नमःनतु त्वां स्तोतुमहं समर्थः अतः केवलं नमस्करोमि इति भावः। कथम्भूताय? ते अखिलानां धर्माणां सेतवे मर्यादापालकाय अधर्मशीला ये असुरास्तेषां धूमकेतवे धूमकेतुवदनर्थहेतवे त्रैलोक्यपालकाय विशुद्धं वर्चोयस्य मनोजवाय मनस इव वेगो यस्य अद्भुतं कर्म यस्य ॥ ६ ॥

अद्भुतवर्चस्कत्वमेव प्रपञ्चयन् स्तौति–त्वत्तेजसेति । धर्मनिर्वाहकत्वेन तत्प्रचुरत्वात्तन्मयेन तव तेजसा महात्मनां साधूनां दृशो ज्ञानस्यावारकन्तमोऽज्ञानं संहृतं निरस्तं प्रकाशः सूर्यादिप्रकाशश्च त्वद्रूपं त्वयैव रूप्यते प्रकाश्यते इति तद्रूपं तथा परावरं उच्चावचं चिदचिदात्मकमेतज्जगच्च त्वद्रूपं त्वच्छरीरकं हे गिरांपते ! एवंभूतस्य तव महिमा दुरत्ययः यद्वा महात्मनां दृश आच्छादकं तमस्त्वत्तेजसा संहृतं तथादृशः प्रकाशः प्रसरश्च कृत इति शेषः। सदसदात्मकं जगत् त्वच्छरीरभूतमेवेत्यर्थः ॥ ७ ॥

महिम्नो दुरत्ययत्वमेव दर्शयन् स्तौति—यदेति । यदावेत्यर्थः। यदातु त्वमनञ्जनेन निरञ्जनेनाविद्यारूपाञ्जनरहितेन परमपुरुषेण विसृष्ट आदिष्टस्तदा ऊर्जिताः सञ्जातबला दैत्याः दानवाश्च यस्मिन् तत्तद्बलं प्रविश्याजस्रं बाह्वादीन् वृक्णान् छिन्दन् प्रधने युद्धे विशेषेण राजसे ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

॥ १–२ ॥

मात्राः शब्दादयः ॥ ३ ॥

सहस्राणि अराणि दलानि यस्य स तथा हे सहस्रार ! विप्राय दुर्वाससे इडस्पते अन्नपते ॥ ४—६ ॥

सुनाभ सुदर्शन धूमकेतुरग्निः ॥ ६ ॥

त्वत्तेजसा तमः संहृतं महात्मनां दृशोः प्रकाशश्च संहृतःस्तम्भितः एतत्परावरं सदसत्त्वद्रूपं त्वत्प्रतिमा ॥ ७ ॥

अनञ्जनेन निर्लेपेन ऊर्जितदैत्यदानवं बलं बाह्वादीन् वृक्णान् छिन्दन् प्रधने युद्धे ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥१॥

तस्येति तैः तत्र सुलोपः पादपूरण इत्यस्य भावः"सोचि लोपेचेत् पादपूरणम्"(६।१।२३४) इति षष्ठाध्यायप्रथमपादगतसूत्रेणेत्यर्थः अन्यथा"लोपः शाकल्यस्य"(८।३।१९)इति तत् स्थानीयस्य यस्य लोपे त्रिपादीगतत्वात् "पूर्वत्रासिद्धम्"(८।२।१) इति न्यायेन सन्धिर्नस्यात्॥ २—६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

धर्ममयेन तत्तेजसा ऽऽस्ततमः संहतं महात्मनां सूर्यादीनां प्रकाशश्च त्वत्तेजसैव भवति अत एव ते तव महिमा दुरत्ययः यत एतत् सदपि त्वद्रूपं त्वत् प्रकाश्यमेव ॥ ७८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

पादौ स्पृशन् मुनिश्चक्रं प्रसाद्यैवार्चितः स्तुवन्।
भोजितश्चाम्बरीषेण पञ्चमेऽन्ते वनं गतः ॥ ० ॥

॥ १ ॥

तस्य दुर्वाससोऽम्बरीषः उद्यमनं स्तवार्थमुद्यमं "सोचिलोपेचेत् पादपूरणम् ।६।१।२३४। इति सलोपे सन्धिः ॥ २ ॥ ३ ॥

हे सहस्रधार ! हे इडस्पते ! पृथ्वीपते ॥ ४ ॥

"ऋतं च सूनृता वाणी सत्यं च समदर्शनम्" पौरुषं वैष्णवं तेजः ॥ ५ ॥

तर्हि भक्तिधर्मसेतुपालाय तुभ्यं ब्रह्मघ्नमेनमधार्मिकं विप्रमवश्यमहं तापयामीत्यत आह—अधर्मशीला ये असुरास्तेषां धूमकेतवे इति धर्मशीला असुरा अधर्मशीला विप्राश्च व्यावृत्ताः हे सुनाभ ! तुभ्यं नमो गृणे स्तोतुं सामर्थ्याभावादिति भावः ॥ ६॥

ननु, तेजस्विमानिनोऽस्य विप्रस्य चिकित्सा अवश्यकर्तव्येत्यत आह—त्वत्तेजसा त्वत्तेजो विभूतिरूपेण सूर्यादिना दृशः सर्वचक्षुष्पतया महात्मनां दृशो ज्ञानस्य च प्रकाशस्त्वत्तेजसैव भवति त्वद्रूपमेतत् तवैव परमेश्वरत्वाद्यदीश्वरः स्वतेजो ऽन्यस्मिन् तेजस्विनि दर्शयेदिति भावः ॥ ७ ॥

ननु, तदप्यनेन सह विहर्तुकामोऽस्मीति चेन्मैवं तवासुरसङ्ग्राम एव विहाररङ्गभूमिरित्याह–यदेति। अनङ्गेनेन श्रीहरिणा हे अजित ! प्रविष्टोर्जितदैत्यदानवमिति——पाठे ऊर्जिता दैत्यदानवा यत्र तद्बलं सन्धिरार्षः ! वृक्णान् छिन्दन् प्रधने सङ्ग्रामे ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

अम्बरीषस्य महाभागवतस्य प्रकुपितभगवदस्त्रशान्तिकरत्वविप्रद्रोपादर्शित्वविप्रमकत्वादीन् गुणान् वर्णयति–एवं भगवतादिष्ट इति पञ्चमेन ॥ १ ॥

स उद्यमनमिति छन्दः "सोचिलोपेचेत्पादपूरणम्" (६।१।२३४) इत्यनेन सलोपः पादपूरणार्थः तस्य दुर्वाससः स अम्बरीषः उद्यमनं हरिचक्रात्प्राणरक्षार्थमुद्यमं वीक्ष्य पादस्पर्शेन विशेषतो लज्जितः कृपया भृशमत्यन्तं पीडितः अस्तावीत् तुष्टाव ॥ २ ॥

सर्वस्य विश्वस्य भगवतो भिन्नस्यापि तदात्मकत्वात्तदभिन्नत्वं "एतदात्म्यमिदं सर्वं, सर्वं खल्विदं ब्रह्म" "तदनन्यत्वमारम्भणशब्दादिभ्यः"(२।१।१५) इत्यादिश्रुतिसूत्रप्रसिद्धम् भगवच्चक्रं तु सुतरां भगवदभिन्नमिति सिद्धान्तविद्राजर्षिः भगवच्चक्रं भगवत्तया भगवत्प्रियायुधतया च स्तौति—त्वमित्यादिना। त्वं भगवानेव अतः अग्न्यादिश्च मात्राणि च इन्द्रियाणि च त्वमेव ॥ ३॥

शोभनं दर्शनं यस्य हे सुदर्शन! सहस्रम् आरा यस्य हे सहस्रार ! हे इडस्पते भूमिपते विप्राय स्वस्ति शरणं भूयाः भव ॥ ४ ॥

त्वं धर्मः त्वमृतं सूनृतवाक्यं त्वं सत्यं त्वं यज्ञः क्रियारूपः यज्ञभुक् त्वमेव लोकपालः। ननु, एतत्सर्वं मयि कथं घटेत? इत्यत आह त्वं सर्वात्मा सर्वाश्रयभूतः परमात्मा ननु, परमात्मनोऽस्त्रमात्रे मयि परमात्मत्वं कथं घटेत ? इत्यत आह परं सर्वोत्कृष्टं पौरुषं पुरुषसम्बन्धि पुरुषात्मकमित्यर्थः। तेजस्त्वं यद्यदात्मकं तत्तदभिन्नं यथा सूर्यात्मकं प्रभारूपं तेजः सूर्याभिन्नमिति भावः ॥ ५ ॥

हे सुनाभ ! अद्भुतकर्मणे तुभ्यं नमो गृणे अखिलानां धर्माणां सेतवे विधारकाय अत एव अधर्मे शीलं येषां तेषामसुराणां धूमकेतवे दाहकाय त्रैलोक्यं गोपायति रक्षतीति तथा तस्मै विशुद्धं वर्चस्तेजो यस्य तस्मै ॥ ६ ॥

महात्मनां मुमुक्षूणां दृशः दृष्टेः तमः अज्ञानं धर्ममयेन मुमुक्षुकर्तृकत्वद्भक्तिलक्षणधर्मजातेन त्वत्तेजसा त्वदनुग्रहेण अपहृतं भवति प्रकाशश्च भवतीत्यर्थः। सदसत् कार्यकारणं परावरं चिदचिदात्मकं त्वद्रूपम्। हे गिरांपते ! एवंभूतस्य ते महिमा दुरत्ययः अनवगाह्यः ॥ ७ ॥

अनङ्गेनेन अजयते इत्यजनं दोषः क्षमावतोऽपास्तसमस्तदोषेण हरिणा वृक्णान् भिन्दन् ॥ ८ ॥

भाषा टीका।

श्रीरुक्मिणीवसुदेवनन्दनो जयतः

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि—जब भगवान ने भी दुर्वासा को ऐसी आज्ञा दीनी तब वह भी चक्र से तापित होने वाला, अंबरीष के शरणजाकर चरण पकडलिये ॥ १ ॥

अंबरीष ने उनका यह उद्यम देखकर अपने पग के स्पर्श करने से अति लज्जित होकर और कृपा से भी अति पीडित होकर श्रीहरि के अस्त्र की स्तुति करने लगे ॥

अंबरीष उवाच ॥

राजा अंबरीष जी बोले, कि— हे चक्रराज ! आप अग्नि हौ भगवान् हौ सूर्य हौ और आप चन्द्र हौ । ज्योतियों के पति हौ आप जल हौ आप क्षिति हौ आकाश हौ वायु हौ तन्मात्रा हौ इन्द्रियें हौ ॥ ३ ॥

हे सुदर्शन ! हे सहस्रार ! हे अच्युत के प्यारे ! आपको नमस्कार हो। हे सर्वास्त्रों के नाशक ! हे इडस्पते ! आप विप्र के लिये कल्याण कारक होवो ॥ ४ ॥

आप धर्म हौ ऋत सत्य आप हौ आप यज्ञ हौ और यज्ञ भोक्ता भी आपही हौ लोक के पालने वाले और सर्व के आत्मा भी आप ही हौ तथा पुरुष संबन्धि पर तेज आप ही हौ ॥ ५ ॥

हे सुनाभ ! अखिल धर्म के सेतु ऐसे आपको नमस्कार हो

स त्वं जगत्त्राण ! खलप्रहाणाये निरूपितः सर्वसहो गदाभृता ।
विप्रस्य चास्मत्कुलदैवहेतवे विधेहि भद्रं तदनुग्रहो हि नः ॥ ९ ॥
यद्यस्ति दत्तमिष्टं वा स्वधर्मो वा स्वनुष्ठितः ।
कुलं नो विप्रदैवं चेद्द्विजो भवतु विज्वरः ॥ १० ॥
यदि नो भगवान् प्रीत एकः सर्वगुणाश्रयः ।
सर्वभूतात्मभावेन द्विजो भवतु विज्वरः ॥ ११ ॥

श्रीशुक उवाच ।

इति संस्तुवतो राज्ञो विष्णुचक्रं सुदर्शनम् ।
अशाम्यत्सर्वतो विप्रं [1]प्रदहद्राजयाच्ञया ॥ १२ ॥
स मुक्तोऽस्त्राग्नितापेन दुर्वासाः स्वस्तिमांस्ततः ।
प्रशशंस तमुर्वीशं युञ्जानः परमाशिषः ॥ १३ ॥

दुर्वासा उवाच ।

अहो अनन्तदासानां महत्त्वं दृष्टमद्य मे ।
कृतागसोऽपि यद्राजन्मङ्गलानि समीहसे ॥ १४ ॥
दुष्करः कोनु साधूनां दुस्त्यजो वा महात्मनाम् ।
यैः सङ्गृहीतो भगवान् सात्वतामृषभो हरिः ॥ १५ ॥
यन्नामश्रुतिमात्रेण पुमान्भवति निर्मलः ।
तस्य तीर्थपदः किं वा दासानामवशिष्यते ॥ १६ ॥

भाषा टीका ।

आप अधर्म स्वभाव वाले असुरों के जलाने को अग्नि हो त्रिलोक की रक्षा करने वाले ! विशुद्ध तेजस्वी मनके तुल्य वेग वाले और अद्भुत कर्म वाले आप हैं ॥ ६ ॥

आपके धर्म मय तेज से तमका संहार होगया और महात्माओं को प्रकाश प्राप्त हुआ है वाणी के पति, हे प्रभो ! आपकी महिमा बडी दुरत्यय है, और यह जो कार्य कारण पर अक्षर है यह आपही का रूप है ॥ ७ ॥

हे अजित ! जिस समय निरंजन हरि तुमको छोडते हैं तब दैत्य दानवों की सेना में प्रविष्ट होकर उनके बाहूं, उदर, ऊरु, चरण, शिर, धड, इन सबों को काटते हुए संग्राम में आप शुद्धे विराजते हो ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किञ्च त्वया भगवन्नियुक्तेन खलानामेव दण्डः कार्यः साधवस्तु रक्षणीया अतो विप्रस्य रक्षणेनास्माननुगृहाणेत्याह—स त्वमिति । हे जगत्त्राण ! स एवम्भूतस्त्वं खलानामेव प्रहारार्थं निरूपितो नियुक्तः अतोऽस्मत्कुलस्य दैवहेतवे भाग्यलाभाय विप्रस्य भद्रं विधेहि तदेव नोऽनुग्रहः ॥ ९ ॥

सर्वसुकृतार्पणेन विप्ररक्षां प्रार्थयते—यद्यस्तीति द्वाभ्याम् । विप्रो दैवं देवता यस्मिंस्तत् ॥ १० ॥ ११ ॥

राज्ञस्तस्यैव याच्ञया ॥ १२ ॥ १७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

रु एवंविधदुरत्ययमहिमा त्वं साधुलोकपरित्राणदुष्कृद्विनाशनयोर्निमित्तयोः गदाभृता भगवता निरूपितः नियुक्तः सर्वसहः शरणागतानां सर्वविधापराधसहः अस्मत्कुलस्य दैवहेतवे भाग्य-

(१) अजहादिति वीर० ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका

हेतवे अन्यथा विप्रहिंसयाऽस्मत्कुलं विनश्येदिति भावः । अस्य विप्रस्य भद्रं मङ्गलं प्राणरक्षणारूपं विधेहि कुरु तद्विप्रभद्रविधानमेवाऽस्माकमस्मद्विषये त्वत्कृतो महाननुग्रहः ॥ ९ ॥

सर्वसुकृतार्पणेन विप्ररक्षां प्रार्थयते-यद्यस्तीति द्वाभ्याम्, दत्तं दानमिदं स्मार्त्तस्य कर्मणा उपलक्षणम् इष्टं यागादिकमिदं श्रौतस्य स्वनुष्ठितः स्वधर्मः स्ववर्णाश्रमोचितधर्मश्च यदि नोऽस्माकमस्ति यदि वा ऽस्माकं कुलं विप्रा एव दैवं यस्य तथाभूतं चेत्ततो द्विजो विज्वरो भवतु अस्मदीयदत्तादिभिः प्रसन्नो भगवान् सुदर्शनः द्विजं निर्दुःखं कुर्यादिति भावः ॥१०॥

एकः निस्समाऽभ्यधिकः सर्वेषां कल्याणगुणानामाश्रयो भगवान्नोऽस्माकं यदि सर्वभूतात्मभावेन सर्वात्मकब्रह्मोपासनेन प्रीतोऽस्ति ततो द्विजो विज्वरो भवतु ॥ ११ ॥

इतीत्थं राज्ञो ऽम्बरीषस्य सम्यक् स्तुवतस्ततस्तद्विष्णोश्चक्रं सुदर्शनाभिधं सर्वतो ऽशाम्यत् प्रशान्तमभूत् राज्ञो ऽम्बरीषस्य याच्ञया विप्रं दुर्वाससमजहात् तत्याज ॥ १२ ॥

शस्त्राग्नेः सुदर्शनाग्नेः तापेन मुक्तः स दुर्वासाः स्वस्तिमान् विज्वरः तमुर्वीशमम्बरीषं परमा आशिषो युञ्जानः कुर्वन् प्रशशंस तुष्टाव ॥ १३ ॥

प्रशंसामेवाह--अहो इत्यादिना राजन्नित्यतः प्राक्तनेन। अहो अत्याश्चर्यमेतत् अनन्तस्य दासानां महत्त्वमधुना मया दृष्टं किं तत् ? यत्कृतापराधस्याऽपि मम। हे राजन् ! अम्बरीष ! मङ्गलानि समीहसे इच्छसीति तत् ॥ १४ ॥

साधूनां भगवद्भक्तानां दुष्करं कर्तुमशक्यं किं न्वस्ति निग्रहाऽनुग्रहादिकं सर्वं सुकरमेवेतिभावः। यद्यस्ति दत्तमित्यादिश्लोकद्वयोक्तप्रार्थनामालक्ष्याह——महात्मनां साधूनां दुस्त्यजं किन्वस्ति सर्वं सुत्यजमेवेति भावः। तत्र हेतुं वदन् तान् विशिनष्टि-यैः साधुभिः महात्मभिः सात्वतां भक्तानामृषभः प्रियो हरिराश्रितार्तिहा भगवान् संगृहीतो वशीकृतः वशीकृतनिरतिशयानन्दरूपभगवतां भागवतानां न किञ्चिद्दुष्करं दुस्त्यजं वाऽस्तीति भावः ॥ १५ ॥

तथा अलभ्यमपि तेषां नास्तीत्याह-यन्नामेति। यस्य हरेर्नाम्न श्रवणमात्रेण पुमान् निर्मलो निष्पापो भवति तस्य तीर्थपदः गङ्गादिपुण्यतीर्थाश्रयपादारविन्दस्य भगवतो दासानां किं वा लभ्यमवशिष्यते सर्वं सम्पन्नमेवेतिभावः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

साधुजनत्राणाय खलप्रहाणाये दुष्टनिग्रहाय च अस्मत्कुलस्य दैवहेतवे देवताभक्त्युत्पत्तिनिदानाय ॥ ९—१३ ॥

महित्वं महिमा ॥ १४—१८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

प्रहाणाये प्रकृष्टहान्यर्थम् ॥ ९ १० ॥

तत्र भगवत्प्रीतिमात्रार्थं यद्यत् कृतं तत्तद्बुद्धिं परीक्षते-द्विज इति । द्विजस्य विज्वरीभावं कुर्वीथा इत्यर्थः। अन्यथाऽयं महानत्ययः स्यादिति भावः ॥ ११—२१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

नन्वहं त्वद्विद्वेषिसंहाराय भगवता नियुक्तस्तत्र न केवलमेतदेवेत्याह-हे जगत्त्राण खलानां प्रहाणाये संहाराय सर्वसहः सर्वबलस्वरूपः यद्वा वात्सल्यात् सर्वमप्यपराधमस्माकं सहस इति सर्वसहः अस्य विप्रस्यापराधः क्षम्यतामिति भावः। न चाऽस्य मद्विद्वेषित्वमित्याह-अस्मत्कुलस्य दैवहेतवे भाग्यलाभाय विप्रस्य भद्रं विधेहि ॥ ९ ॥

तदपि विप्रमत्यजच्चक्रमालक्ष्य शपथं कुर्वन्नाह-यद्यस्तीति, विप्रदैवं विप्रदेवताकम् ॥ १० ॥

तं शपथममानयच्चक्रमालोक्यासाधारणं शपथमाह-यदीति, सर्वेषु भूतेषु आत्मन इव यो भावस्तेन यदि प्रीतः ॥ ११ ॥

विप्रं सर्वतः प्रदहद्प्यशाम्यत् ॥ १२ ॥ १३ ॥

कृतागसोपि त्वदमङ्गलमीहमानस्यापीत्यर्थः ॥ १४ ॥

दुष्करोऽनुग्रहः दुस्त्यजोऽपराधः सङ्गृहीत इति यथान्यैर्धनानि सङ्गृह्यन्ते तथेत्यर्थः। हरिः सङ्गृहीतोऽपि तदीयं चेतश्चोरयतीत्यर्थः ॥ १५—१८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सर्वसहः शरणागतानां सर्वापराधसहः हे जगत्त्राण ! स त्वं गदाभृता खलप्रहाणाये अस्मच्छत्रुनाशाय निरूपितः अर्थादनुग्रहार्थं नियुक्तः अतः अस्मत्कुलस्य दैवहेतवे भाग्यलाभाय विप्रस्य भद्रं विधेहि कुरु तदेव नोऽनुग्रहः ॥ ९ ॥

सर्वभूतात्मनि तस्मिन्नेव यो भावो भक्तिस्तेन ॥ ११ ॥

राजयाच्ञया अशाम्यत् शान्तमभूत् ॥ १२—१९ ॥

भाषाटीका ।

हे जगत् की रक्षा करने वाले ! श्रीहरिने आपको सर्व बल रूप समुझकर खलों के नाश करने को नियुक्त किये हैं । इसी से आप हमारे कुल को बडभागी बनाने के लिये इस ब्राह्मण का कल्याण करो बस हमारे ऊपर यही बडा अनुग्रह है ॥ ९ ॥

और जो हमने दान किया हो जो यजन किया हो और जो सुन्दर धर्म का अनुष्ठान किया हो और यदि हमारे कुल में ब्राह्मण ही देवता माने जाते हों तो यह द्विज विगत ज्वर वाला होजावै ॥ १० ॥

राजन्ननुगृहीतोऽहं त्वयाऽतिकरुणात्मना ।
मदघं पृष्ठतः कृत्वा प्राणा यन्मेऽभिरक्षिताः १७ ॥
राजा तमकृताहारः प्रत्यागमनकाङ्क्षया ।
चरणावुपसङ्गृह्य प्रसाद्य समभोजयत् ॥ १८ ॥
सोऽशित्वाऽऽदृतमानीतमातिथ्यं सार्वकामिकम् ।
तृप्तात्मा नृपतिं प्राह भुज्यतामिति सादरम् ॥ १९ ॥
प्रीतोऽस्म्यनुगृहीतोऽस्मि तव भागवतस्य वै ।
दर्शनस्पर्शनालापैरातिथ्येनाऽऽत्ममेधसा ॥ २० ॥
कर्मावदातमेतत्ते गायन्ति स्वःस्त्रियो मुहुः ।
कीर्तिं परमपुण्यां च कीर्त्तयिष्यति भूरियम् ॥ २१ ॥

श्रीशुक उवाच ।

एवं सङ्कीर्त्य राजानं दुर्वासाः परितोषितः ।
ययौ विहायसाऽऽमन्त्र्य ब्रह्मलोकमहैतुकम् ॥ २२ ॥
संवत्सरोऽत्यगात्तावद्यावता नागतो गतः ।
मुनिस्तद्दर्शनाकाङ्क्षो राजाऽब्भक्षो बभूव ह ॥२३ ॥
गते च दुर्वाससि सोऽम्बरीषो द्विजोपयोगातिपवित्रमाहरत् ।
ऋषेर्विमोक्षं व्यसनं च बुद्ध्वा मेने स्ववीर्यं च पराऽनुभावम् ॥ २४ ॥

भाषा टीका ।

जो भगवान् सर्व गुणाश्रय एक श्री हरि मेरे ऊपर सर्व भूतात्मभाव से प्रसन्न हों तो यह द्विज विगत ज्वरवाला होजावे ॥ ११ ॥

श्रीशुक उवाच ॥

श्रीशुकदेवजी, बोले, कि–राजा के इस प्रकार स्तुति करते करते विष्णु का सुदर्शन चक्र राजा की प्रार्थना से शांत होगया जो कि–सर्व जगत् को जलाये देता रहा ॥ १२ ॥

वह दुर्वासा सुदर्शनचक्र के ताप से मुक्त होकर स्वस्ति-मान् हुआ, तब तो राजा को आशीर्वाद देते हुए राजा की प्रशंसा करने लगे ॥ १३ ॥

दुर्वासा उवाच ॥

दुर्वासाजी बोले, कि–अहो ! अनंत के दासों का अब मैंने महत्त्व देखा, कि हे राजन् ! मैंने तुमारा अपराध भी किया तौ भी आप मेरे कल्याणों की चेष्टा करते हो ॥ १४ ॥

ठीक ही है साधु लोगों को क्या दुष्कर है ? और महात्माओं को क्या दुस्त्यज है ? क्योंकि जिनने सात्वतों के पति श्रीहरि को सम्यक् ग्रहण किया है ॥ १५ ॥

जिनके नाम श्रवण मात्र से पुरुष निर्मल होजाता है उन तीर्थ पाद श्रीहरि के दासों को क्या अवशिष्ट रहता है ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

राजेत्यादिश्लोकद्वयं शुकोक्तिः ॥ १८ ॥ १९ ॥

प्रीतोऽस्मीति श्लोकद्वयं पुनश्च विप्रोक्तिः आत्मनि मेधा येन तेनातिथ्येन ॥ २० ॥

भूरियं तत्रस्थो जनः कीर्तयिष्यति ॥ २१ ॥ २२ ॥

तस्य धैर्यातिशयमाह–गतो मुनिर्यावता नागतस्तावत्संवत्सरोऽतिक्रान्त इति ॥ २३ ॥

द्विजस्योपयोगेन भोजनेनातिपवित्रमाहरद्बुभुजे स्ववीर्यं न धैर्यादिलक्षणं परानुभावं भगवतः प्रभावं मेने ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं प्रशस्य स्वस्य कृतज्ञतासूचनाय तत्कृतमुपकारमावेदयति, राजन्निति । हे राजन् ! निरतिशयकरुणानुकम्पाचित्तेन त्वयाऽहमनुगृहीतः, कोऽसौ मत्कृतोऽनुग्रहः?तत्राह ममाघमपराधं पृष्ठतः कृत्वा विस्मृत्येत्यर्थः । मे प्राणा अभिरक्षिता इति यदेष एव महाननुग्रहः ॥ १७ ॥

राजा तमित्यादिश्लोकद्वयं शुकोक्तिः । द्विजस्य प्रत्यागमनप्रतीक्षया अकृत आहारो भोजनं येन स राजा अम्बरीषः तं दुर्वाससं चरणावुपसङ्गृह्य प्रसाद्य प्रसन्नं कृत्वा तं द्विजमभोजयत् भोजयामास ॥ १८ ॥

सर्वे कामाः काम्यन्ते इति कामाः षड्रसाः यस्मिन् तदाहृतं सादरं यथा भवति तथा आनीतम् आतिथ्यं समर्पितमातिथ्यं भुक्त्वा तुष्टात्मा सन्तुष्टचित्तः स दुर्वासाः नृपमम्बरीषं भुज्यतां भुज्यतामित्युवाच ॥ १९॥

प्रीतोऽस्मीत्यादिश्लोकद्वयं दुर्वाससः उक्तिः । आत्मनि परमात्मन्येव मेधा बुद्धिर्यस्य अनल्पमेधसेति पाठे विपुलबुद्धेस्तवातिथ्येनाहं नितरां प्रीतः सन्तुष्टोऽस्मि तथा तव भागवतस्य दर्शनादिभिरनुगृहीतश्चास्मि ॥ २० ॥

तवैतदवदातं निर्मलं कर्म स्वःस्वर्गे लोके स्त्रियो मुहुर्मुहुर्गायन्ति गास्यन्ति तथा तव परमपुण्यां कीर्तिमियं भूर्भूलोकस्थो जनः कीर्तयिष्यति ॥ २१ ॥

इत्येवं राजानं प्रस्तुत्य राजानमम्बरीषमामन्त्र्य पृष्ट्वा परितोषितो,राजेति शेषः । दुर्वासा विहायसा मार्गेणाहैतुकं दैन्यं विनयादिभिरनिवर्त्यं द्विपरार्द्धावस्थायिनमित्यर्थः । ब्रह्मलोकं चतुर्मुखलोकं ययौ तत्राम्बरीषस्य गुणान् स्तोतुमिति शेषः ॥ २२ ॥

अम्बरीषस्य धैर्यं दृढसङ्कल्पं चाह-संवत्सरेति । आगतो मुनिर्दुर्वासाः यावता कालेन पुनः दिक्षु भ्रमन्नागतस्तावत्संवत्सरात्मकः कालोऽत्यगात् व्यतीयाय प्रथमागमनादारभ्य पुनरागमनपर्यन्तः कालः संवत्सरो बभूवेत्यर्थः । तावन्तं च कालं राजाम्बरीषः तस्य मुनेर्दर्शनमेवाकाङ्क्षमाणोऽप एव भक्षयन् बभूव तस्थौ ॥ २३ ॥

दुर्वाससि गते सत्यथाम्बरीषः द्विजोपयोगातिपवित्रं द्विजोपयोगेन द्विजभुक्तावशेषणाद्धेतोः परमं पवित्रमन्नमाहारत् बुभुजे ततः ऋषेर्दुर्वाससो व्यसनं चक्रजं तस्माद्विमोक्षणं स्वस्य वीर्यं धैर्यादिलक्षणं चेत्येतत्सर्वं परस्य परमात्मनः प्रभावं प्रभावकृतमेव मेने अमन्यत ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आतिथ्यम् अतिथिप्रियम् अन्नं सार्वकामिकम् अपेक्षिताखिलभोजनम् ॥ १९ ॥

आत्ममेधसा आत्मज्ञानेन ॥ २० ॥ २२ ॥

इतो गतो मुनिर्यावत्तं नृपं नागतः तावत्संवत्सरोऽत्यगात् मुनिदर्शनाकाङ्क्षो राजा च तावदब्भक्षोऽभूत् ॥ २३ ॥

सोऽम्बरीषो बुद्ध्वा मुनेर्व्यसनान्मोक्षं स्ववीर्यं च परमात्मनोऽनुभावः प्रभावः सामर्थ्यं यस्मिंस्तत्तथा भगवन्महिमोपेतं मेन इत्यर्थः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अहैतुकमिति । न विद्यन्ते हैतुकाः शुष्कतर्कनिष्ठवेदबहिर्मुखा यत्र तमित्यर्थः ॥ २२ ॥

अब्भक्षः पूर्वमब्मात्रं भक्षितवान् राजा तद्दर्शनाकाङ्क्ष एव बभूव नतु तावन्मात्रमपि भक्षितवानित्यर्थः । द्विजोपयोगादिति पवित्रमिति द्विजानां भगवत्प्रधानानामुपयोगेन श्रीभगवतः प्रीत्यतिशयात् ॥ २३—२५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

स दुर्वासाः आहृतं यथा स्यात्तथा अभीतमातिथ्यमतिथ्यर्हं सार्वकामिकम् ॥ १९ ॥

तव दर्शनादिभिः कर्तृभिरनुगृहीतः अत एव प्रीतः अस्मीति वर्तमाननिर्देशात् पूर्वं तु त्वद्दर्शनादिभिर्नैवाऽनुगृहीतोऽहमप्रीत एवाभूवं यतस्त्वां निरागसमपि ध्वंसयितुं महाक्रोधान्धः कृत्यामसृजं तेन भक्तकर्मकास्वेव तद्विषयकभगवत्तुल्यान्येव दर्शनादीनि यदि स्युस्तदैव तानि तपस्विशानिविप्राननुगृह्णन्ति नान्यथेत्यत्राऽहमेव दृष्टान्त इति सिद्धान्तो ध्वनितः तथा आत्ममेधसा आत्मनो मम मेधसा ईदृश्या बुद्ध्या यद्यम्बरीषचरणग्रहणं प्रति पावनीयं मे बुद्धिर्नाभविष्यत्तदा कथमतरिष्यं तेन चक्रदत्तमहातापोपि मम परमोपकारकः संसारतारकभक्तिमार्गज्ञापकोऽभूदिति भावः ॥ २० ॥

अवदातं शुद्धम् ॥ २१ ॥

ब्रह्मलोकमिति तत्रत्य ब्रह्मानुभाविनः स्वबन्धून् प्रति स्वीयस्वास्थ्यं हरेर्भक्तवश्यतां भक्तानां भक्तेश्च महाप्रभावं वक्तुमिति भावः न विद्यन्ते हैतुकाः शुष्कतर्कनिष्ठा यत्र तम् ॥ २२ ॥

गतो मुनिर्यावता कालेन नागतः तावत् तावता सम्वत्सरमत्यगात् निष्क्रान्तः ॥ २३ ॥

द्विजस्य उपयोगेन भोजनेन अतिपवित्रम् आहरत् आहारं कृतवान् स्ववीर्यं च धैर्यादिलक्षणं परस्य भगवत एवानुभावं प्रभावं नतु स्वस्य ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आत्मनि परमात्मनि मेधा बुद्धिर्यस्य तेन भगवता अहमनुगृहीतः चक्राद्रक्षितत्वात् तवातिथ्येन दर्शनादिना च प्रीतः प्रसन्नोऽस्मि ॥ २०—२३ ॥

द्विजस्य उपयोगेन भोजनेनातिपवित्रम् आहरत् बुभुजे स्ववीर्यं धैर्यादिकं परानुभावं भगवदनुग्रहकृतम् ॥ २४ ॥

एवं विधानेकगुणः स राजा परात्मनि ब्रह्मणि वासुदेवे ।
क्रियाकलापैः समुवाह भक्तिं(१) ययाऽऽविरिञ्च्यान्निरयांश्चकार ॥ २५ ॥
अथाम्बरीषस्तनयेषु राज्यं समानशीलेषु विसृज्य धीरः ।
वनं विवेशात्मनि वासुदेवे मनोदधद्ध्वस्तगुणप्रवाहः ॥ २६ ॥
इत्येतत्पुण्यमाख्यानमम्बरीषस्य भूपतेः ।
सङ्कीर्तयन्ननुध्यायन्भक्तो भगवतो भवेत् ॥ २७ ॥
* (अम्बरीषस्य चरितं ये शृण्वन्ति महात्मनः ।
मुक्तिं प्रयान्ति ते सर्वे भक्त्या विष्णोः प्रसादतः ॥ ० ॥)

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां नवमस्कन्धे अम्बरीषचरितं नाम
पञ्चमोऽध्यायः ॥ ५ ॥

भाषा टीका ।

हे राजन् ! अति करुणा वाले आपने मेरे ऊपर बडा अनुग्रह किया क्योंकि ? मेरे अपराध को भूल कर आपने मेरे प्राणों की रक्षा करी ॥ १७ ॥

राजाने भी ऋषि के प्रत्यागमन की आकांक्षा करके आहार भी नहीं किया और आने पीछे चक्रराज के ताप से निर्मुक्त कराकर दुर्वासा को दोनों चरण पकडके प्रसन्न कर अच्छे प्रकार भोजन कराये ॥ १८ ॥

दुर्वासा भी आदर से लाये हुए अतिथि के सत्कार योग्य गुणवत् अन्नका भोजन कर तृप्तहोकर बडे आदर से राजा से बोले, कि–हे राजन् ! तुम भी भोजन करो ॥ १९ ॥

हे राजन् ! परमभागवत ऐसे आपके दर्शन, स्पर्शन, आलाप, और भगवत् बुद्धि से किया जो आतिथ्य इस से हम बहुत ही प्रसन्न हैं और आपने हमारे ऊपर बडा अनुग्रह किया ॥ २० ॥

इस तुमारे उज्वल कर्मको स्वर्गकी स्त्रियें वारम्वार गान करेंगी और तुमारी परमपुण्य कीर्ति का यह पृथिवी कीर्त्तन करेगी ॥ २१ ॥

श्रीशुक उवाच ॥

श्रीशुकदेवजीबोले, कि–दुर्वासा राजा अम्बरीष की इस प्रकार बड़ाई कर बडाही सन्तुष्ट होकर राजासे पूछकर आकाश मार्गसे अहैतुक ब्रह्मलोकको गये ॥ २२ ॥

हे राजन् ! जब तक दुर्वासा भागकर फिर नहीं आया उतने में एक संवत्सर व्यतीत होगया पर राजा दुर्वासा के फिर भी दर्शना की आकांक्षा से वहीं जल पान किये हुए प्रतीक्षा करते रहे ॥ २३ ॥

दुर्वासा के जाने पर वह अंबरीष द्विज के उप योग में लगने से बचा जो अति पवित्र अन्न उससे आहार करते भये और ऋषि के दुःख को और दुःख की निवृत्ति को भी देखकर राजा अंबरीष इतने बड़े अपने धैर्य को परमात्मा का ही प्रभाव जानते हुए कि कितने बडे भारी मेरे धीर्यादिक होने का कारण श्रीहरि का अनुग्रह ही है ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवंविधा अनेके गुणा यस्य सः आविरिञ्चाद्विरिञ्च्यपदसहितान्भोगान्निरयप्रायानपश्यदित्यर्थः ॥ २५—२७ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उक्तविधा अनेके गुणा यस्य स राजाऽम्बरीषः परात्मनि परेब्रह्मणि वासुदेवे क्रियाकलापैः सह स्ववर्णाश्रमोचितक्रियासमुदायसहकृतामनन्यप्रयोजनां भक्तिं समुवाह चकारेत्यर्थः । भक्तिं विशिनष्टि, यया अनन्यप्रयोजनया वासुदेवभक्त्या आविरिञ्च्यात् विरिञ्चपर्यन्तभोगान्निरयान्निरयप्रायांश्चकार अमन्यत तथा च स्मर्यते"एते वै निरयास्तात स्थानस्य परमात्मनः" इति "वासुदेवे मनो यस्य जपहोमार्चनादिषु । तस्यान्तरायो मैत्रेय देवेन्द्रत्वादिकं फलम्" इति च ॥ २५ ॥

---

(१) यया विंहस्पादिमधश्चकार इति विज० पाठ०

* श्लोकोयमधिकः पठ्यतेविश्व० सारार्थदर्शिनी—पाठेन ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततोऽम्बरीषः स्वतुल्यशीलेषु तनयेषु राज्यं विसृज्य निधाय धीरो जितेन्द्रियो वनं विवेश तत्रान्तरात्मभूते भगवति वासुदेवे मनोदध्ये एकाग्रचित्तो बभूव ततो ध्वस्तःगुणप्रवाहः संसारो यस्य तादृशः मुक्तो बभूवेत्यर्थः ॥ २६ ॥

एवमुपवर्णिताम्बरीषोपाख्यानकीर्तनादिजं फलमाह-इतीति । इतीत्थमम्बरीषस्य राज्ञ एतद्वर्णितं पुण्यमाख्यानं भक्त्या सङ्कीर्तयन्ननुध्यायंश्च पुमान्भागवतो भवेत् ॥ २७ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां

पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विरिञ्चिः आदिः कारणं यस्य स विरिञ्चादिस्तं प्रपञ्चं यथायोग्यम् अभ्रमकार न तु सर्वं तथात्वे—

"ब्रह्मादिभक्तिकोट्यंशांशो नैवाम्बरीषके ।
नैवास्त्यन्यस्य कस्यापि तथापि हरिरीश्वरः ॥
तात्कालिकोपचेयत्वात्तेषां यशस आदिराट्" ।

इति नन्वम्बरीष एव स्तुतिं कृत्वा चक्रनिवर्तनं कृतवान् न ब्रह्मादय इत्यत आह-

"ब्रह्मादयश्च तत्कीर्तिं व्यञ्जयामासुरुत्तमाम् ।
मोहनाय च दैत्यानां ब्रह्मादेर्निन्दनाय च" ॥

अन्यार्थं चेति निन्दनाय असुरकृतायेति शेषः । अन्यार्थं अर्थवादार्थं किञ्च फलानिच्छुत्वज्ञापनाय च विष्णवादिभिश्चक्रं न निवर्तितमित्याह-स्वयं विष्णुर्ब्रह्माद्याश्च निराशिष इति अम्बरीषस्य मनुष्याधिकारिषु भक्त्यादिगुणैरुत्तमत्वज्ञापनार्थमपि मानुषेषूत्तमत्वाच्चेति ब्रह्मादीनां भक्त्यादिगुणाधिक्यप्रकटनाय च तेषां भक्त्यादिभिर्गुणैरिरिति अन्यच्च प्रयोजनं । ब्रह्मादेर्विष्णवधीनज्ञापनाय च केवलमिति तर्हि दुर्वासाः क इति चेद्रुद्रावतारः "दुर्वासाश्च स्वयं रुद्रः" इति तथापि रुद्रत्वेऽपि असुरावेशादन्याय्यवचनं तथाप्यन्यायमुक्तवानिति स्वाज्ञाकारित्वेन तस्मिन्ननुग्रहविशेषाय भक्तजनमदविनाशनाय च विष्णुर्निबर्हणं नाकारि "तस्याप्यनुग्रहार्थाय दर्पनाशार्थमेव च" इति शास्त्रविरोधः स्यादतो भक्तिविधानार्थं तद्यशोर्थं दुष्टजनमोहनार्थं चेति ज्ञातव्यम् ॥ २५ ॥ २६ ॥

आख्यानफलमाह-इतीति ॥ २७ ॥

इति श्रीमद्भागवे महापुराणे नवमस्कन्धे

श्रीमद्विजध्वजतीर्थकृतपदरत्नावल्याम्

पञ्चमोऽध्यायः ॥ ५ ॥

विजयध्वजमतेन षष्ठः ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तादृशोपद्रवान्तरमाशङ्क्य पुत्रस्य योग्यतां दृष्ट्वा च तत्र स्थितिं विहाय वने मानससेवायामेव मनश्चकारेत्याह—अथेति ॥ २६ ॥ २७ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

परात्मनीति परमात्मा ब्रह्म भगवानिखिलकतत्त्वो यो वासुदेवस्तस्मिन् क्रियाकलापैर्मन्दिरमार्जनाद्यैर्यया भक्त्या आविरञ्च्यात् भोगात् नरकतुल्यात् ॥ २५ ॥

मनोदधत् मनोधातुं वनं विवेश ॥ २६ ॥

ननु,"स वै मनः कृष्णपदारविन्दयोः"इत्युक्तेर्गार्हस्थ्येऽपि तस्य पूर्णम् मनो भगवत्यासीदेव. सत्यम् ? भक्तावनुरागिणः खलु महाधनपृष्ठिष्ठवणिज इव स्वभावो भवेत् कोटीश्वरोपि वाणिगात्मान मल्पधनं मन्यमानो धनमुपार्जयितुं यथा समुद्रान्तमपि गच्छति तथैव भक्तोपि भक्तिमुपार्जयितुमिति ॥ २७ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
पञ्चमो नवमस्यायं सङ्गतः सङ्गतः सताम् ॥ ५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवंविधाः अनेके गुणा यस्य सः क्रियाकलापैः तपोव्रतादिकर्मसमूहैः सह भक्तिं वासुदेवे उवाह यया भक्त्या आविरिञ्च्यात् विरिञ्चिपदसहितात् निरयात् चकार निरयतुल्यात् अमन्यत ॥ २५ ॥

राज्यं विसृज्य वनं विवेश तत्र आत्मनि परमात्मनि मनो दधत् ततः ध्वस्तः गुणप्रवाहः संसारो यस्य सः मुक्तो बभूवेत्यर्थः ॥ २६-२७ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

पञ्चमाऽध्यायार्थप्रकाशः ॥ ५ ॥

भाषा टीका।

इस प्रकार के अनेक गुण वाला वह राजा निखिल क्रिया कलापों से परमात्मा पर ब्रह्म श्री वासुदेव के विषै भक्ति योग को धारण करता हुआ जिस भक्ति योग से ब्रह्माजी के वैभव तक को नरक सदृश समुझता हुआ ॥ २५ ॥

तदनंतर बडे धैर्य युक्त राजा अम्बरीष ने अपने समान स्वभाव वाले पुत्रों के ऊपर राज्य छोडकर अपने आत्मा ऐसे भगवान् वासुदेव के विषै मनको धारण करते हुए। इसी से उनके प्राकृत गुणों का प्रवाह सब नष्ट होगया ॥ २६ ॥

यह अंबरीष भूपति का बडा पुण्य आख्यान है इसको जो पुरुष कीर्त्तन करै और ध्यान करै वह भगवान् का भक्त होता है ॥ २७ ॥

इति श्रीमद्भागवत नवम स्कन्ध में पंचम अध्याय की,
श्रीवृन्दावनस्थ पं भागवताचार्यकृत
भाषाटीका समाप्ता ॥ ५ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे पञ्चमोऽध्यायः ॥ ५ ॥

॥ षष्ठोऽध्यायः ॥

श्रीशुक उवाच ।

विरूपः केतुमान् शम्भुरम्बरीषसुतास्त्रयः ।
विरूपात्पृषदश्वोऽभूत्तत्पुत्रस्तु रथीतरः ॥ १ ॥
रथीतरस्याप्रजस्य भार्यायां तन्तवेऽर्थितः ।
अङ्गिरा जनयामास ब्रह्मवर्चस्विनः सुतान् ॥ २ ॥
एते क्षेत्रे प्रसूता वै पुनस्त्वाङ्गिरसाः स्मृताः ।
रथीतराणां प्रवराः क्षत्रोपेता द्विजातयः ॥ ३ ॥
क्षुवतस्तु मनोर्जज्ञे इक्ष्वाकुर्घ्राणतः सुतः ।
तस्य पुत्रशतज्येष्ठा विकुक्षिनिमिदण्डकाः ॥ ४ ॥
तेषां पुरस्तादभवन्नार्यावर्ते नृपा नृप ! ।
पञ्चविंशति पश्चाच्च त्रयो मध्ये परेऽन्यतः ॥ ५ ॥
स एकदाऽष्टकाश्राद्ध इक्ष्वाकुः सुतमादिशत् ।
मांसमानीयतां मेध्यं विकुक्षे ! गच्छ मा चिरम् ॥ ६ ॥
तथेति स वनं गत्वा मृगान् हत्वा क्रियार्हणान् ।
श्रान्तो बुभुक्षितो वीरः शशं चाददपस्मृतिः ॥ ७ ॥
शेषं निवेदयामास पित्रे तेन च तद्गुरुः ।
चोदितः प्रोक्षणायाह दुष्टमेतदकर्मकम् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

षष्ठारम्भेऽम्बरीषस्य वंशमुक्त्वा ततः परम् ।
षष्ठाद्यष्टभिरध्यायैरिक्ष्वाकोर्वंश उच्यते ॥
तत्र षष्ठे शशादादिर्मान्धात्रन्तो निरूप्यते ।
प्रसङ्गात्सौभरेराख्या मान्धातृतनयापतेः ॥

॥ १ ॥

तन्तवे सन्तानार्थम् ॥ २ ॥

ये अङ्गिरसा जनिता एते रथीतरस्य क्षेत्रे प्रसूतत्वेन रथीतरगोत्राः सन्त अङ्गिरसो वीर्येण प्रसूतत्वादाङ्गिरसाश्च पुनरपि रथीतराणामन्येषां जातानां प्रवराः मुख्याः स्मृताः यतः क्षत्रोपेता ब्राह्मणा इत्यर्थः ॥ ३ ॥

तदेवं मनोर्दशसु पुत्रेषु पृषध्रश्च कविश्च विरक्तत्वान्न वंशप्रवर्तकौ करूषादीनां च सप्तानां वंशास्तारतम्यक्रमेणोक्ताः इदानीमतिविततमिक्ष्वाकोर्वंशमाह—क्षुवतस्त्वित्यादिना यावत्सोमवंशप्रस्तावः । क्षुतं कुर्वतो मनोर्घ्राणतो जज्ञे "श्रद्धायां जनयामास दश पुत्रान्" इति पूर्वोक्तं बाहुल्याभिप्रायेणेति द्रष्टव्यम् पुत्राणां शते ज्येष्ठाः ॥ ४ ॥

"आर्यावर्तः पुण्यभूमिर्मध्यं विन्ध्यहिमागयोः" तस्मिन्पुरस्तात् समुद्रपर्यन्तं मण्डलविभागेन पञ्चविंशतिर्नृपा अभवन्, हे नृप ! तथैव पश्चाच्च पञ्चविंशतिः मध्ये तु ज्येष्ठास्त्रयः अपरे त्वन्यतो दक्षिणोत्तरादिषु ॥ ५ ॥

विकुक्षिरेव शशाद इति विश्रुत इति वक्ष्यति तत्र हेतुमाह—स एकदेति चतुर्भिः ॥ ६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

क्रियाऽर्हणान् श्राद्धार्हान् अदद्भचयत् ॥ ७ ॥

तद्गुरुर्वसिष्ठः प्रोक्षणाय श्राद्धोचितसंस्काराय ॥ ८ ॥

इत्यादिष्टस्य इक्ष्वाकोर्गुरुर्वसिष्ठ आह-एतन्मांसं दुष्टमुच्छेषणादोषदुष्टमतोऽकर्मकं श्राद्धानर्हमित्याह ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तनयेषु राज्यं विसृज्य वनं विवेशेत्युक्तम्, के ते तनयाः ? इत्यत आह मुनिः-विरूपइति । विरूपादयस्त्रयोऽम्बरीषस्य सुताः तत्र विरूपात्पृषदश्वः सम्बभूव पृषदश्वस्य सुतस्तु रथीतरः ॥ १ ॥

तस्य रथीतरस्याप्रजस्य सन्तानरहितस्य सतस्तद्भार्यायां तन्तवे सन्तानार्थमङ्गिरा ऋषिर्ब्रह्मणो ब्राह्मणस्य वर्चः ब्रह्मवर्चसं ब्रह्महस्तिभ्यां वर्चस इति समासान्तोऽच्प्रत्ययः तदेषामस्तीति ब्रह्मवर्चस्विनः सुतान् जनयामास ॥ २ ॥

एते रथीतरस्य क्षेत्रप्रसूतत्वेन रथीतरगोत्राःसन्तः आङ्गिरसो बीजेन प्रसूतत्वात् आङ्गिरसाश्च अतो रथीतराणां रथीतरपुत्राणां तत्सन्तानप्रसूतानां च प्रवराः क्षत्रोपेता द्विजातयः क्षत्रगोत्रान्वयिनो ब्राह्मणप्रवराः क्षत्रब्रह्मोभयगोत्रान्विताः बभूवुरित्यर्थः ॥ ३ ॥

तदेवं मनोर्दशसु पुत्रेषु पृषध्रकवी विरक्तत्वात् न वंशप्रवर्तकौ करूषादीनां च सप्तानां वंशास्तारतम्यक्रमेणोक्ताः इदानीमतिविततमिक्ष्वाकोर्वंशमाह—क्षुवतस्त्वित्यादिना यावत्सोमवंशप्रस्तावम् । क्षुवतः क्षुतं कुर्वतो मनोः वैवस्वतस्य घ्राणादिक्ष्वाकुरिति प्रसिद्धः सुतो जज्ञे "श्रद्धायां जनयामास दश पुत्रान्"इति पूर्वं बाहुल्याभिप्रायेणोक्तमतो नानेन विरोधः तस्येक्ष्वाकोः पुत्रशतं बभूव तत्र ज्येष्ठा विकुक्ष्यादयस्त्रयः ॥ ४ ॥

एवं स्थिते तेषां शतपुत्राणां मध्ये पञ्चविंशतिसङ्ख्याकाः पुत्राः पुरस्तात् पूर्वस्यां दिशि य आर्यावर्तः विन्ध्यहिमपर्वतयोर्मध्यदेशः तस्य नृपा राजानो बभूवुः आर्यावर्तपुरस्तात्समुद्रपर्यन्तं मण्डलविभागेनाधिपतयो बभूवुरित्यर्थः । हे नृप ! तथैव पश्चादार्यावर्ते नृपाः पञ्चविंशतिसङ्ख्याकाः बभूवुः आर्यावर्तमध्ये तु त्रयो ज्येष्ठा विकुक्ष्यादयोऽधिपतयो बभूवुः अपरेऽवशिष्टास्तु अन्यतः दक्षिणोत्तरादिषु नृपा अभवन् ॥ ५ ॥

विकुक्षेरेव शशाद इति नामान्तरं वक्ष्यते तत्र हेतुमाह—सपकदेति चतुर्भिः । कदाचिदिक्ष्वाकुरष्टकाश्राद्धे निमित्ते मांसमानीयतां हे विकुक्षे ! शीघ्रं गच्छ विलम्बं माकार्षीरिति सुतमादिशत् आदिष्टवान् ॥ ६ ॥

ततः स विकुक्षिस्तथैवानेष्यामीत्युक्त्वा वनं प्रति गत्वा क्रियार्हणान् श्राद्धार्हान् मृगान् हत्वा श्रान्तो बुभुक्षितश्चापगतास्मृतिः श्राद्धार्थे हता इमे मृगा न मया भक्षितुं योग्या इति स्मृतिः ज्ञानं यस्य स वीरो विकुक्षिः शशं मृगमादद्भचयत् "अदः सर्वेषाम्"इत्यपृक्तहलः आडागमः ॥ ७ ॥

शेषं स्वभुक्तावशिष्टं मांसं स्वपित्रे निवेदयामास स ततस्तेन पित्रा इक्ष्वाकुणा चोदितः प्रोक्षणाय प्रोक्षणेन मांसं संकुरु

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

१ ॥

तन्तवे सन्तानाय अङ्गिरस उत्पत्तिनिमित्तत्वान्नाम्ना अङ्गिरसः २ रथीतराणां रथीतरसन्ततिजातानाम् ॥ ३ ॥

एकवंशं समाप्यान्यवंशं वक्तुं प्रारभते—क्षुवत इति । क्षुतकुर्वतः घ्राणतः घ्राणोद्गीर्णशब्दात् ॥ ४ ॥

"आसमुद्रात्पुरस्तात्तु आसमुद्राच्च पश्चिमात् ।
तयोरेवान्तरङ्गिर्योरार्यावर्तं प्रचक्षते" ॥

इत्येवंविध आर्यावर्ते पुरस्तात् पूर्वदिक्पालास्तेषां विकुक्ष्यादीनां मध्ये पञ्चविंशतिनृपाः पश्चात्पश्चिमदिक्पालाः पञ्चविंशतिनृपाः अभूवन् मध्ये विन्ध्यहिमवत्पर्वतयोर्मध्ये तेषां मध्ये त्रयः पालकाः अपरे च ये त्रिपञ्चाशदवशिष्टाः सप्तचत्वारिंशन्नृपाः ते अन्यतः दक्षिणत उत्तरतः पालका अभूवन्नित्यन्वयः ॥ ५ ॥ ६ ॥

अपस्मृतिः विवेकरहितः ॥ ७ ॥

अकर्मकं कर्मायोग्यम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १—९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

षष्ठे शशादेन्द्रवाहयुवनाश्वकथोच्यते ।
मान्धातुश्च चरित्रान्तः सौभर्याख्यानमद्भुतम् ॥ ० ॥

॥ १ ॥

तन्तवे सन्तानार्थम् ॥ २ ॥

रथीतरस्य क्षेत्रे भार्यायां प्रसूतत्वादङ्गिरसो वीर्यजातत्वात् एते रथीतरप्रवरपुत्रत्वेन प्रसिद्धाः क्षत्रोपेताः द्विजातयो विप्राः द्वे जाती येषां ते इत्यन्वर्थसंज्ञाः ॥ ३ ॥

मनोर्ज्येष्ठपुत्रस्यातिविततामिक्ष्वाकोर्वंशमाह—क्षुवतस्त्वित्यादिना । क्षुतं कुर्वतो मनोर्घ्राणतो जज्ञे "श्रद्धायां जनयामास दशपुत्रान्" इति बाहुल्याभिप्रायेणेति स्वामिचरणाः ॥ ४ ॥

"आर्य्यावर्त्तः पुण्यभूमिर्मध्यं विन्ध्यहिमालयोः"तस्मिन् पुरस्तात् समुद्रपर्यन्तं पृथक्पृथङ्मण्डलेषु पञ्चविंशतिर्नृपा अभवन् पश्चाच्च तथैव पञ्चविंशतिः मध्ये ज्येष्ठास्त्रयः अपरे तु अन्यतः अन्यत्र दक्षिणोत्तरादिषु ॥ ५ ॥

विकुक्षिः शशादसंज्ञोऽभूत्तत्र हेतुमाह-स इति चतुर्भिः ॥६॥७॥

तद्गुरुर्वसिष्ठो दुष्टमित्यग्रभागस्यविकुक्षिणा भुक्तत्वात् ॥८॥९॥

ज्ञात्वा पुत्रस्य तत्कर्म गुरुणाऽभिहितं नृपः ।
देशान्निस्सारयामास सुतं त्यक्तविधिं रुषा ॥ ९ ॥
स तु विप्रेण संवादं जापकेन समाचरन् ।
त्यक्त्वा कलेवरं योगी स तेनावाप यत्परम् ॥ १० ॥
पितर्युपरतेऽभ्येत्य विकुक्षिः पृथिवीमिमाम् ।
शासदीजे हरिं यज्ञैः शशाद इति विश्रुतः ॥ ११ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

अम्बरीषसन्ततिं तदनन्तरामिक्ष्वाकुवंशजान् शशादिमान्धात्रन्तनृपतीन् प्रसङ्गात्सौभर्य्युपाख्यानं चाह—विरूप इति षड्भिः ॥ १ ॥

तन्तवे सन्तत्यर्थम् ॥ २ ॥

एते पूर्वोक्ताः क्षेत्रे रथीतरक्षेत्रे प्रसूताः अर्थात् रथीतरगोत्रास्सन्तः अङ्गिरसो वीर्येणोत्पन्नत्वादाङ्गिरसाः पुनरपि रथीतराणामन्येषां जातानां प्रवराः मुख्याः स्मृताः यतः क्षत्रोपेताः द्विजातयः ब्राह्मणाः ॥ ३ ॥

क्षुवतः क्षुतं कुर्वतः घ्राणतो जज्ञे "श्रद्धायां जनयामास दश पुत्रान्" इति तु बाहुल्याभिप्रायेणोक्तं तस्येक्ष्वाकोः पुत्रशते ज्येष्ठाः पूर्वजाः विकुक्ष्यादयस्त्रयः ॥ ४ ॥

हे नृप ! तेषां शतसङ्ख्याकानां मध्ये आर्यावर्ते विन्ध्यहिमाचलयोर्मध्ये पुरस्तात् पूर्वस्यां दिशि समुद्रपर्यन्तं मण्डलविभागेन पञ्चविंशतिनृपा अभवन् तथैव पश्चाच्च पञ्चविंशतिमध्ये तु त्रयो ज्येष्ठा अन्यतो दक्षिणत उत्तरतश्च ॥ ५ ॥

विकुक्षेः शशाद इति नामान्तरं वक्तुमाह—स एकदेत्यादि । आदिशत् आदिष्टवान् ॥ ६ ॥

स विकुक्षिः क्रियार्हेषान् श्राद्धयोग्यान् हत्वा अपगता श्राद्धार्थं हता न भक्षणार्यमिति स्मृतिर्यस्य सः श्रादत् अभक्षयत् ॥ ७ ॥

तस्य गुरुर्वसिष्ठः प्रोक्षणाय श्राद्धोचितसंस्काराय चोदित आह—एतद्दुष्टं भुक्तशेषभूतम् अत एव अकर्मकं श्राद्धानर्हम् ॥ ८ ॥

भाषाटीका ।

श्रीरुक्मिणीवासुदेवाभ्यां नमः ।

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि-विरूप केतुमान् और शंभु ये तीन पुत्र अम्बरीष के हुए विरूप से पृषदश्व हुये और उनके पुत्र रथीतर हुए ॥ १ ॥

रथीतर के जब संतान नहीं हुई तब उनकी भार्या में प्रार्थना करने से नियुक्त होकर अंगिरामहर्षि ने ब्रह्मवर्चस्वी पुत्र उत्पन्न किये ॥ २ ॥

वे सब रथीतर के क्षेत्र [भार्या] में अंगिरा से उत्पन्न होने से और रथीतरों में श्रेष्ठ तथा आंगिरस कहाने लगे, क्योंकि ? ये तो क्षात्र धर्म युक्त ब्राह्मण हुए ॥ ३ ॥

(यहां तक मनु के पृषध्र आदिक सात पुत्रों का वंश कहा अब बड़े विस्तार वाला इक्ष्वाकु का वंश कहते हैं) वैवस्वत मनु-महाराज के छींक आने पर नासिका से एक इक्ष्वाकु नामक पुत्र हुआ उन इक्ष्वाकु के सौ पुत्र हुए तिनमें विकुक्षि, निमि, और दंडक ये तीन जेष्ठ पुत्र हुए ॥ ४ ॥

हे नृप ! तिनमें से पंचविंशति (२५) तौ आर्यावर्त्त मे समुद्र पर्यंत पूर्वदेश के राजा हुए और पंचविंशति (२५) पश्चिम के राजा हुए, और ज्येष्ठ तीनों मध्य देश के राजा हुए और जो बचे सैंतालीस (४७) सो उत्तर दक्षिण के राजा होते हुए ॥ ५ ॥

इक्ष्वाकु महाराज ने एक समय इष्टका श्राद्ध में अपने ज्येष्ठ पुत्र विकुक्षि को आज्ञा दीनी, कि-हे विकुक्षे ! देर मत करो शीघ्र जाओ और श्राद्ध के अर्थ पवित्र मांस ले आओ ॥ ६ ॥

"बहुत अच्छा" इतना कहकर विकुक्षि वन को गया और वहां क्रिया योग्य बहुत से मृगों को मारा परंच परिश्रम से थका हुआ रहा और क्षुधार्त्त भी रहा इसी से स्मृति के न रहने से उस वीरने एक शशे को खा लिया ॥ ७ ॥

अब शिष्ट (बाकी) जो बचा सो आकार पिता को सौंप दिया इक्ष्वाकुने पक कराकर श्राद्ध के लिये गुरुजी से श्राद्ध की प्रार्थना करी, श्रीवसिष्ठजी जब उस मास से श्राद्ध करने को बैठे तब प्रोक्षण करते समय बोले, कि यह मांस दूषित है यह श्राद्धकर्म के योग्य नहीं है ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्यक्तो विधिः सदाचारो येन तम् ॥ ९ ॥

स त्विक्ष्वाकुः जापकेन वसिष्ठेन राज्यभोगेन विरक्तो योगीसन् तेन योगेन कलेवरं त्यक्त्वा स यत्परं तत्त्वं तदवाप ॥ १० ॥

शासत्पालयन् हरिमीजे ॥ ११ ॥

पुरञ्जयस्तस्य सुत इन्द्रवाह इतीरितः ।
ककुत्स्थ इति चाप्युक्तः शृणु नामानि कर्मभिः ॥ १२ ॥
कृतान्त आसीत्समरो देवानां सह दानवैः ।
पार्ष्णिग्राहो वृतो वीरो देवैर्दैत्यपराजितैः ॥ १३ ॥
वचनाद्देवदेवस्य विष्णोर्विश्वात्मनः प्रभोः ।
वाहनत्वे वृतस्तस्य बभूवेन्द्रो महावृषः ॥ १४ ॥
स सन्नद्धो धनुर्दिव्यमादाय विशिखाञ्छितान् ।
स्तूयमानः समारुह्य युयुत्सुः ककुदि स्थितः ॥ १५ ॥
तेजसाप्यायितो विष्णोः पुरुषस्य परात्मनः ।
प्रतीच्यां दिशि दैत्यानां न्यरुणत्त्रिदशैः पुरम् ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दैत्यपुरस्य जयात्पुरञ्जयः इन्द्रो वाहो यस्येतीन्द्रवाहः ककुदि स्थितत्वात्ककुत्स्थ इति च यस्मादस्य तस्य त्रीणि नामानि तस्य कर्मनिमित्तानि ॥ १२ ॥

तान्येव व्याचक्षाण आह-कृतान्त इति सप्तभिः । कृतं विश्वमन्तयतीति तथा पार्ष्णिग्राहः सहायः ॥ १३ ॥

इन्द्रो यदि मम वाहनं स्यात्तर्हि दैत्यान् हनिष्यामीति तेन वाहनत्वेन वृतः सन्निन्द्रो लज्जया तदनङ्गीकुर्वन्विष्णोर्वचनात्तस्य वाहनत्वाय महान् वृषो बभूवेत्यर्थः ॥ १४—१६ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततो गुरुणाऽभिहितं पुत्रस्य विकुक्षेस्तत्कर्म ज्ञात्वा नृप इक्ष्वाकुस्त्यक्तो विधिः शास्त्रीयनियमरूपो येन तं सुतं रुषा देशान्निःसारयामास ॥ ९ ॥

ततस्तु स इक्ष्वाकुर्जापकेन तपसा सह सम्वादं भगवद्गुणसम्वादं विप्रेण सह समाचरन् तपश्चर्यासहकृतं भगवद्गुणानुवादं गुरुणा सहाकरोदित्यर्थः । ततः स इक्ष्वाकुस्तेन जापकसहकृतेन सम्वादेन योगी राज्यभोगेषु विरक्तः प्रारब्धावसाने कलेवरं त्यक्त्वा यत्परं ब्रह्म तदवाप ॥ १० ॥

एवं पितरीक्ष्वाकौ उपरते मृते सत्यथ विकुक्षिरेत्यागत्येमां पृथिवीं शासत्पालयन् यज्ञैर्हरिमीजे आराधितवान् ततः श्राद्धार्थशशभक्षणनिमित्तात् शशाद इति प्रसिद्धो बभूव ॥११॥

तस्य विकुक्षेः सुतः पुरञ्जयः स एव इन्द्रवाहः ककुत्स्थ इति च ईरितः व्यवहृतः कुत एतन्नामत्रयं प्राप्तमित्यत आह—कर्मभिः क्रियाविशेषैः प्राप्तानि नामानि शृणु कथयतो मत्त इति शेषः । नामानीति बहुवचनेन पुरञ्जयनामापि कर्मनिमित्तमेवेत्युक्तम् ॥ १२ ॥

पुरञ्जयादिनामनिमित्तानि कर्माणि वक्तुमितिहासमाह—कृतान्त इत्यादिना त्रिभिः श्लोकैः प्राक्तनेन । दानवैः सह देवानां कृतान्तः समरः संग्राम आसीत् तस्य विश्वस्यान्तः कृतान्तः प्रलयः तत्कल्पः समर आसीदित्यर्थः । तदा वीरः पुरञ्जयः दैत्यैः पराजितैः देवैर्विश्वेश्वरस्य प्रभोर्विष्णोर्वचनात् पार्ष्णिग्राहः सहायः तत्वेन वृतः कृतः पुरञ्जयेनेन्द्रो वाहनत्वेन वृतो महान् वृषभ आसीत् ॥ १३ ॥ १४ ॥

ततस्तं महान्तं वृषभमारुह्य ककुदि स्थितः उपविष्टः देवैः स्तूयमानो योद्धुमिच्छुः सन्नद्धः कवचितः स पुरञ्जयो दिव्यं धनुर्निशितान् बाणांश्चादाय ॥ १५ ॥

महात्मनः परमपुरुषस्य विष्णोस्तेजसा आप्यायितः उपबृंहितः त्रिदशैर्देवैः सह प्रतीच्यां दिशि दैत्यानां पुरं न्यरुणत् निरुद्धवान् ॥ १६ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

त्यक्तविधिम् आचारशून्यम् ॥ ९ ॥

नाम्ना जापकेन विप्रेण सम्वादं तत्त्वविषयं समाचरन् तेन सम्वादजनितेन ज्ञानेन योगी ज्ञानी स इक्ष्वाकुः यत्परं ब्रह्म तदवाप सदेह आप किम् ? नेत्याह त्यक्तेति ॥ १० ॥

पुनर्विकुक्षिणा किमकारीति तत्राह—पितरीति । अशासदीजे स हरिं यज्ञैः पुष्कलदक्षिणैरिति केचित्पठन्ति शासदीजे हरिं यज्ञैः शशाद इति विश्रुत इत्यत्र शशमत्तीति शशादः पुष्कलदक्षिणैः पूर्णदक्षिणैः ॥ ११ ॥

तस्य विकुक्षेः इन्द्रो वाहो वाहनं यस्य स तथा कर्मभिर्विक्रमलक्षणैः अवाप्तानि ॥ १२—१४ ॥

इन्द्रात्मकवृषभककुदि स्थितः ॥ १५-१७ ॥

———

तैस्तस्य चाभूत्प्रधनं तुमुलं लोमहर्षणम् ।
यमाय भल्लैरनयद्दैत्यान् येऽभिययुर्मृधे ॥ १७ ॥
तस्येषुपाताभिमुखं युगान्ताग्निमिवोल्बणम् ।
विसृज्य दुद्रुवुर्दैत्या हन्यमानाः स्वमालयम् ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

समाचरन्, बभूवेति शेषः । समाचरदिति पाठेतु द्वितीयं स इति एवं सार्थकमेव क्वचिच्च टीकापाठः स यत् परं तत्त्वं तदवापेति ॥ १० ॥

ईजे हरिमिति यजनप्रभावेनैव पितृत्यागदोषं चातिक्रान्तवानिति ज्ञेयम् ॥ ११—२३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

स तु इक्ष्वाकुः ज्ञापकेन ज्ञानदायिना वसिष्ठेन ॥ १० ॥

शासत् पालयन् सन् ॥ ११ ॥

दैत्यपुरस्य जयात् पुरञ्जय इन्द्रो वाहोऽस्येति इन्द्रवाहः ककुदि स्थितत्वात् ककुत्स्थ इति कर्मभिरिति यैः कर्मभिस्त्रीणि नामानि श्रृणिवत्यर्थः ॥ १२ ॥

कृतस्य विश्वस्य अन्तो नाशो यस्मात्सादृशः समर असीत् तत्र देवैः पार्ष्णिग्राहो वृतः ॥ १३ ॥

इन्द्रो यदि मम वाहनं स्यात्तदा दैत्यान् हनिष्यामीति तेन वाहत्वेन वृतः सन्निन्द्रो लज्जया तदनङ्गीकुर्वन् विष्णोर्वचनात् तस्य वाहनं महावृषो बभूवेत्यर्थः ॥ १४ ॥

स पुरञ्जयः वृषं समारुह्येतीन्द्रवाहः ककुदि स्थित इति ककुत्स्थश्चाभूत् ॥ १५ ॥

त्रिदशैः सहितः पुरं न्यरुणत् ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

त्यक्तो विधिः शास्त्रीयमार्गो येन तम् ॥ ९ ॥

स इक्ष्वाकुः ज्ञापकेन वासिष्ठेन सम्वादं भगवद्ध्यानसम्वादं समाचरन् योगी भगवति लब्धचित्तैकाग्रचः सन् कलेवरं त्यक्त्वा परं भगवन्तमवाप ॥ ११ । १२ ॥

कृतानि सुरासुरशरीराण्यन्तयतीति कृतोऽन्योन्यतोन्तोनाशो यस्मिन्निति वा कृतान्तः समरः सङ्ग्रामः आसीत्तदा वीरः शशादसुतः देवैः पार्ष्णिग्राहः सहायः वृतः ॥ १३ ॥

तदा च शशादसुतेनेन्द्रो वाहनत्वेन वृतो विष्णोर्वचनान्महावृषो बभूव ॥ १४ ॥

स पुरञ्जयः सन्नद्धो धृतकवचः ॥ १५ ॥

आप्यायितः उपबृंहितः ॥ १६ ॥

भाषा टीका ।

गुरु के कहे हुए अपने पुत्र के कर्म को सुनकर राजा इक्ष्वाकु ने मारे रोष के विधि को परित्याग करने वाले अपने पुत्र विकुक्षिको देश से निकाल दिया ॥ ९ ॥

तदनन्तर वे इक्ष्वाकु महाराज वसिष्ठजी के साथ संवाद करते २ सर्व विषयों से विरक्त होकर योगी होकर उस योग बल से कलेवर को छोडकर परम तत्त्व श्रीहरि को प्राप्त हुए ॥१०॥

पिता के परलोक होने पर विकुक्षि ने आकर इस पृथिवी का पालन किया और यज्ञों से हरि का यजन किया तथा शशाद इस नाम से विख्यात हुए ॥ ११ ॥

विकुक्षि के पुत्र पुरंजय हुए उनका नाम इन्द्रवाह और ककुत्स्थ भी रहा अब जैसे कर्म से उनके नाम हुए सो सुनो ॥ १२ ॥

कृत युग के अंत में देवताओं का दानवों के साथ में बडा समर हुआ उस समय दैत्यों से पराजित ऐसे देवताओं ने इन पुरंजय महाराज को अपने सहायक बनाये ॥ १३ ॥

परंच पुरंजय ने कहा कि यदि इन्द्र हमारा वाहन होगा तौ हम शत्रुओं को मारेंगे इतना सुनकर इन्द्र लज्जित हुआ तब फिर विश्वात्मा प्रभु श्रीविष्णु के समुझाने से वाहन होने को स्वीकार कर इन्द्र बडे भारी बैल बन गये ॥ १४ ॥

तब राजा भी सन्नद्ध होकर दिव्य धनुष और तीक्ष्णबाण हाथ में लेकर युद्ध की इच्छा से उस वृषभ के ककुद [कन्धे] पर आरोहणकर के स्थित हुए उस समय सब लोगों ने बडी स्तुति करी ॥ १५ ॥

और उस समय परमपुरुष श्रीविष्णुके तेज से आप्यायित होकर देवताओं को साथ लेकर पश्चिम दिशा में जाकर दैत्यों के पुरों को रोकलिया ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

येऽभिमुखं ययुस्तान् यमं दर्शयितुं सदेहानेव भल्लैरनयदित्यर्थः ॥ १७ ॥

तस्य दृष्ट्वाऽन्ये दुद्रुवुः स्वमालयं पातालम् ॥ १८ ॥

जित्वा पुरं धनं सर्वं सश्रीकं वज्रपाणये ।
प्रत्ययच्छत्स राजर्षिरिति नामभिराहृतः ॥ १९ ॥
पुरञ्जयस्य पुत्रोऽभूदनेनास्तत्सुतः पृथुः ।
विश्वरन्धिस्ततश्चन्द्रो युवनाश्वश्च तत्सुतः ॥ २० ॥
शावस्तस्तत्सुतो येन शावस्ती निर्ममे पुरी ।
बृहदश्वस्तु शावस्तिस्ततः कुवलयाश्वकः ॥ २१ ॥
यः प्रियार्थमुतङ्कस्य धुन्धुनामासुरं बली ।
सुतानामेकविंशत्या सहस्रैरहनद्वृतः ॥ २२ ॥
धुन्धुमार इति ख्यातस्तत्सुतास्ते च जज्वलुः ।
धुन्धोर्मुखाग्निना सर्वे त्रय एवावशेषिताः ॥ २३ ॥
दृढाश्वः कपिलाश्वश्च भद्राश्व इति भारत ।
दृढाश्वपुत्रो हर्यश्वो निकुम्भस्तत्सुतः स्मृतः ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इति एतैः कर्मभिः पुरञ्जयादिनामभिः आहूतो व्याहृतः पाठान्तरे आहूत इत्यर्थः ॥ १९ ॥ २० ॥

शावस्तिः शावस्तस्य पुत्रः कुवलयाश्वक एव धुन्धुमार इति ख्यातः ॥ २१ ॥

तत्र कारणमाह—य इति । सुतानामेकविंशत्या सहस्रैर्वृतः सन् हतवान् ॥ २२ ॥

धुन्धुमार इति चेति चकारस्यान्वयः ॥ २३ ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तैर्दैत्यैः पुरवासिभिः सह तस्य पुरञ्जयस्य तुमुलं रोमहर्षणं रोम्णां शृण्वतां पश्यतां च लोम्नां हर्षणमुद्गमनं यस्मात्तथाविधं प्रधनं युद्धमासीत् तत्र भल्लैरिषुभिः पुरञ्जयो दैत्यान् यमायानयत् हतवानित्यर्थः । कान् दैत्यान् ? येऽभिमुखमाययुः ॥ १७ ॥

ततोऽन्ये हतावशिष्टा दैत्यास्तस्य पुरञ्जयस्येषूणां घातस्याभिमुखमागत्येति शेषः । तं युगान्ताग्निमिवोल्बणं दुःसहं दृष्ट्वा तेन हन्यमानाः स्वकीयमालयं पातालं प्रति दुद्रुवुः ॥ १८ ॥

ततः स राजर्षिः पुरञ्जयो दैत्यान् जित्वा तेषां पुरं धनं सर्वं प्रीत्या वज्रपाणये इन्द्राय प्रयच्छत् वदौ इति शब्दो हेत्वर्थकः यतः पुरं जितवान् वृषभस्य ककुदि स्थितः इन्द्रमेव वाहनत्वेन परिगृहीतवान् ततो हेतोर्नामभिः पुरञ्जयादिनामभिः पुरञ्जयादिकर्मप्रवृत्तिनिमित्तकैरुवाहृतो व्यवहृतः ॥ १९ ॥

पुरञ्जयस्यानेना इति प्रसिद्धः पुत्रो बभूव तस्यानेनसः सुतः पृथुः ततः पृथोर्विश्वगन्धः पुत्रो बभूव विश्वगन्धात् चन्द्रः तस्य सुतो युवनाश्वः ॥ २० ॥

तस्य युवनाश्वस्य सुतः शावस्तिः तं विशिनष्टि—येन शावस्तिना शावस्तीरिति प्रसिद्धा पुरी निर्मिता शावस्तेस्सुतो बृहदश्वः ततो बृहदश्वात्कुवलयाश्वकः पुत्रः संबभूव ॥ २१ ॥

कुवलयाश्वस्यैव धुन्धुमारेति नामान्तरं नाम्नः प्रवृत्तिनिमित्तं कर्माऽऽह—य इति । यः कुवलयाश्वकः बली बलवान् उतङ्कस्य ऋषेः प्रियार्थं प्रियं कर्तुं सुतानामेकविंशत्या सहस्रैरेकविंशतिसहस्रसंख्याकैः सुतैर्वृत इत्यर्थः । युद्धे धुन्धुं नामासुरमहनत् ॥ २२ ॥

अतः धुन्धुमार इति प्रसिद्धो बभूव तस्य कुवलयाश्वकस्य सुतास्ते सर्वे धुन्धुमारस्य मुखाग्निना जज्वलुः दग्धा बभूवुरित्यर्थः । तेषां मध्ये त्रय एव सुता अवशेषिताः ॥ २३ ॥

ते च सुताः हे भारत ! दृढाश्वादिनामानः तत्र दृढाश्वस्य पुत्रो हर्यश्वस्तस्य हर्यश्वस्य निकुम्भः सुतोऽभवत् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तस्य पुरञ्जयस्य इषोः शरस्य पातस्याभिमुखं प्रत्यवस्थानं स्वमालयं स्वगृहं च हित्वा दैत्याः दुद्रुवुरित्यन्वयः ॥ १८ ॥

स राजा पुरं जित्वा सर्वं पुरधनमयच्छद्दाप्नोत् पुनश्च तत्पुरधनं वज्रपाणये प्रत्ययच्छत् दत्तवान् स राजर्षिर्दैत्यपुरजयात्पुरञ्जय इति नाम्नाऽऽहूतः वृषभरूपेन्द्रस्यास्य वाहनत्वात् इन्द्रवाह इति नाम्नाऽऽहूतः वृषभककुदि स्थितत्वात्ककुत्स्थ इति नाम्नाऽऽहूतः ॥ १९-२६ ॥

बर्हणाश्वो निकुम्भस्य कृशाश्वोऽथास्य सेनजित् ।
युवनाश्वोऽभवत्तस्य सोऽनपत्यो वनं गतः ॥ २५ ॥
भार्याशतेन निर्विण्ण ऋषयोऽस्य कृपालवः ।
इष्टिं स्म वर्तयाञ्चक्रुरैन्द्रीं ते सुसमाहिताः ॥ २६ ॥
राजा तद्यज्ञसदनं प्रविष्टो निशि तर्षितः ।
दृष्ट्वा शयानान्विप्रांस्तान्पपौ मन्त्रजलं स्वयम् ॥ २७ ॥
उत्थितास्ते निशाम्याथ व्युदकं कलशं प्रभो ! ।
पप्रच्छुः कस्य कर्मेदं पीतं पुंसवनं जलम् ॥ २८ ॥
राज्ञा पीतं विदित्वाऽथ ईश्वरप्रहितेन ते ।
ईश्वराय नमश्चक्रुरहो दैवबलं बलम् ॥ २९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

दृढाश्व इति निकुम्भस्य बर्हणाश्वः कृशाश्वश्चेत्यर्थः ॥ २४—५० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यमाय अनयत् यमस्मृत्युं प्रापयामास गत्यर्थकर्मणीति चतुर्थी ॥ १७ ॥

दैत्या अवशिष्टाः आलयं पातालम् ॥ १८ ॥

जित्वा पुरमिति पुरञ्जनः स वज्रपाणिः प्रत्ययच्छत् पुनस्तस्य राजर्षे राजर्षये ददौ अत एव स राजर्षिः नामभिः पुरञ्जयादिभिराहृतः व्याहृतः आहूत इति पाठे आहूत इत्यर्थः ॥ १९२१ ॥

सुतानामेकविंशत्या सहस्रैर्युक्तः समहनत् ॥ २२—२६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

येऽभिमुखं ययुस्तान् ॥ १७ १८ ॥

इत्येतैः कर्म्मभिः पुरञ्जयादिनामभिराहृतः उदाहृतः ॥ १९-२२ ॥

धुन्धुमार इति च ख्यातः ॥ २३—२५ ॥

भाषा टीका ।

उन दैत्यों के साथ राजा का लोमहर्षण बड़ा तुमुल संग्राम हुआ उस समय जो दैत्य लोग भी पुरञ्जय महाराज के सन्मुख स्थित हुए उनों को भाल वाले बाणों से यमराज के दिखाने के लिये देह सहित यमलोक को पहुंचादिये ॥ १७ ॥

पुरंजय के बाणों के सन्मुख खड़े होने को उन दैत्यों का सामर्थ्य नहीं हुआ तब जैसे प्रलय काल के उल्वण अग्नि के सन्मुख न ठहर सकें इसी प्रकार सब दैत्य लोग अपने २ घर को छोड़कर भाग चले ॥ १८ ॥

राजा ने भी दैत्यों के पुर, धन, और लक्ष्मी को जीतकर इंद्र को दिया इसी से उन राजर्षि की पुरंजय इत्यादि नाम से प्रसिद्धि हुई ॥ १९ ॥

पुरंजय के पुत्र अनेनास् हुए उनके सुत पृथु हुए पृथु से विश्वरंधि तिनसे चन्द्र. तिनके सुत युवनाश्व हुए ॥ २० ॥

युवनाश्व के सुत शाव हुए जिनने शावस्ती पुरी का निर्माण किया, शावस्त के पुत्र बृहदश्व हुए तिन से कुवलयाश्व हुए ॥ २१ ॥

जिनने उतंक के प्रिय करने को एक विंशति [२१] हजार पुत्रों को साथ लेकर धुंधु नामक राक्षस को मारा ॥ २२ ॥

इसी से इन कुवलयाऽश्व का नाम धुंधमार भी हुआ मारते समय धुन्धु असुर के मुख से निकले हुए अग्नि से वे सब पुत्र जल उठे उनमें से तीन अवशिष्ट रहे ॥ २३ ॥

हे भारत ! उनका नाम दृढाश्व, कपिलाश्व, और भद्राश्व, है दृढाश्व के पुत्र हर्यश्व हुए निकुंभ उनके पुत्र हुए ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अथ तस्मान्निकुम्भात्कृशाश्वः ॥ २५ ॥

भार्याणां शतेन सह अस्य पुत्रार्थमिन्द्रदेवत्यामिष्टिं वर्तयामासुः इमेत्याश्चर्यं ॥ २६ ॥

तदेवाऽऽह-राजेति षड्भिः । तर्षितस्तृषितः सन् जलार्थं प्रविष्टो मन्त्राभिमन्त्रितं जलं पत्न्यै देयं स्वयं पपौ ॥ २७ ॥

व्युदकं निरुदकम् पुंसवनं पुत्रोत्पत्तिकारणम् ॥ २८ ॥

ततः काल उपावृत्ते कुक्षिं निर्भिद्य दक्षिणाम् ।
युवनाश्वस्य तनयश्चक्रवर्ती जजान ह ॥ ३० ॥
कं धास्यति कुमारोऽयं स्तन्यं रोरूयते भृशम् ।
मान्धाता वत्स ! मा रोदीरितीन्द्रो देशिनीमदात् ॥ ३१ ॥
न ममार पिता तस्य विप्रदेवप्रसादतः ।
युवनाश्वोऽथ तत्रैव तपसा सिद्धिमन्वगात् ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अहो ! दैवबलमेव मुख्यं बलं पुरुषबलं तु न किञ्चिदिति वदन्त ईश्वराय नमस्कारं चक्रुः ॥ २९ ॥ ३० ॥

अयं कं धास्यति पास्यतीति दुःखितैर्विप्रैरुक्ते सति तस्यामिष्ट्यामाराधित इन्द्रो मान्धाता पाता हे वत्स ! मारोदीरिति ब्रुवन् देशिनीं तर्जनीमदादित्यर्थः ॥ ३१ ॥

तस्य पिता युवनाश्वो भिन्नकुक्षिरपि न ममार किन्तु कालान्तरे तपसा सिद्धिमन्वगात् ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

निकुम्भस्य सुतो बर्हणाश्वः तस्य सुतः कृशाश्वः अस्य कृशाश्वस्य सुतः सेनजित् तस्य सेनजितः युवनाश्वस्सुतः समभवत् युवनाश्ववृत्तान्तमाह—स इत्यादिना । युवनाश्वोऽनपत्यः सन्तानरहितोऽत एव निर्विण्णो निर्वेदमापन्नो भार्याशतेन सह वनं प्रति गतः ॥२५॥

तत्र मुनयः अस्य कृपालवः तद्विषयकृपायुक्ता बभूवुः ते ऋषयः सुसमाहितास्सन्तः ऐन्द्रीम् इन्द्रदेवताकामिष्टिं पुत्रकामेष्टिं प्रवर्तयाञ्चक्रुः ॥ २६ ॥

तदा राजा युवनाश्वः तर्षितः निशि रात्रौ पिपासुः तद्यज्ञसदनं प्रविष्टः शयानान् तान् विप्रान् दृष्ट्वा मन्त्रजलं मन्त्राभिमन्त्रितं जलं पत्न्यै देयं स्वयं पपौ पीतवान् ॥ २७ ॥

तत उत्थितास्ते विप्रा निरुदकं कलशं निशाम्य दृष्ट्वा हे प्रभो ! कस्येदं कर्म ? केनेदं पुंसवनं पुत्रोत्पत्तिकारणं जलं पीतम् ? इति पप्रच्छुः ॥ २८ ॥

तत ईश्वरचोदितेन राज्ञा युवनाश्वेन पीतमिदं जलमिति विदित्वा ते ऋषयः अहो ! दैवबलमेव मुख्यं बलं पुरुषबलं तु न किञ्चिदिति वदन्त ईश्वराय नमश्चक्रुः ॥ २९ ॥

ततः काले पुत्रोत्पत्तिकाले सन्निहिते सति युवनाश्वस्य दक्षिणां कुक्षिं निर्भिद्य तनयश्चक्रवर्ती सप्तद्वीपाधिपतिः संबभूव ॥ ३० ॥

अयं कुमारः स्तन्याभावेन नितरां रोरूयते रोदिति अतोऽयं कं धास्यति ? "धेट्पाने" कं पास्यतीत्येवं दुःखितैर्विप्रैरुक्ते सति तस्यामिष्ट्यामाराधित इन्द्रो मामयं कुमारो धास्यति पास्यतीत्युक्त्वा हे वत्स ! मारोदीरिति वदन् देशिनीं तर्जनीमङ्गुल-

स्याविर्णाम् अदात् कुमारस्य वक्त्रे निहितवान् इन्द्रेणायं मान्धातेत्युक्तत्वात् मान्धातेति प्रसिद्धो बभूव ॥ ३१ ॥

तस्य कुमारस्य पिता च युवनाश्वो विप्राणां दैवस्य चानुग्रहान्न ममार न मृतः ततः स तत्रैव वने तपसाऽनुष्ठितेन सिद्धिं मुक्तिमन्वगात् प्राप ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तर्षितः उदन्यया युतः मन्त्रपूतं जलम् ॥ २७ ॥

व्युदकं जलरहितं पुंसवनं पुत्रोत्पत्त्यर्थमभिमन्त्रितम् ॥ २८ ॥

ईश्वरप्रहितेन दैवप्रेरितेन ॥ २९ ॥ ३० ॥

स्तन्यः स्तनपानेच्छुरयं बालो भृशं रोरूयते पुनःपुनरत्यन्तं रोदनं करोति कं धास्यति कस्य स्त्रीजनस्य स्तनं धास्यतीति मत्वा इन्द्रो हे वत्स ! मारोदीः रोदनं माकार्षीरित्युक्त्वा देशिनीमङ्गुष्ठानन्तरामङ्गुलीमदादतो मान्धातेति नाम ॥ ३१ ॥

तस्य मान्धातुः पिता युवनाश्वः ॥ ३२–३४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तर्षितः तृषार्तः मन्त्रादिभिर्मन्त्रितं पत्न्यै देयं पपौ ॥ २७।२८॥

दैवबलमेव बलमिति वदन्तः ॥ २९।३० ॥

अयं कं धास्यति पास्यतीति विप्रैरुक्ते सति तस्यामिष्ट्यामाराधितः इन्द्रो मां धाता पाता हे वत्स ! मा रोदीरिति ब्रुवन् देशिनीं तर्जनीमदात् ॥ ३१—३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स युवनाश्वः अनपत्यः अत एव निर्विण्णः भार्याशतेन वनं गतः ऐन्द्रीम् इन्द्रदेवताकाम् इष्टिम् अपत्यार्थं कर्म प्रवर्त्तयाञ्चक्रुः स्मेत्याश्चर्यं ॥ २६ ॥

आश्चर्यमेवाह—राजेत्यादिना । मन्त्रजलं मन्त्राभिमन्त्रितं जलं पत्न्यै देयं स्वयं पपौ पीतवान् ॥ २७ ॥

त्रसद्दस्युरितीन्द्रोऽङ्ग ! विदधे नाम तस्य वै ।
यस्मात् त्रसन्ति ह्युद्विग्ना दस्यवो रावणादयः ॥ ३३ ॥
यौवनाश्वोऽथ मान्धाता चक्रवर्त्यवनीं प्रभुः ।
सप्तद्वीपवतीमेकः शशासाच्युततेजसा ॥ ३४ ॥
ईजे च यज्ञं क्रतुभिरात्मविद्भूरिदक्षिणैः ।
सर्वदेवमयं देवं सर्वात्मकमतीन्द्रियम् ॥ ३५
द्रव्यं मन्त्रो विधिर्यज्ञो यजमानस्तथर्त्विजः ।
धर्मो देशश्च कालश्च सर्वमेतद्यदात्मकम् ॥ ३६ ॥
यावत्सूर्य उदेति स्म यावच्च प्रतितिष्ठति ।
सर्वं तद्यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते ॥ ३७ ॥
शशबिन्दोर्दुहितरि बिन्दुमत्यामधान्नृपः ।
पुरुकुत्समम्बरीषं मुचुकुन्दं च योगिनम् ॥ ३८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः !

पुंसवनं पुत्रोत्पादकम् ॥ २८ ॥

अहो दैवबलमेव बलमिति वदन्तः ईश्वराय नमश्चक्रुः ॥ २९ ॥

काले पुत्रजन्मसमये उपावृत्ते आसन्ने ॥ ३० ॥

अयं स्तन्यं प्रति भृशं रोरूयते रोदीति अतोऽयं कं धास्यति "धेट्पाने"पास्यतीत्यर्थः । इति ऋषिभिरुक्ते सति तस्यामिष्ट्या· माराधित इन्द्रः अयं मां धाता धास्यति वत्स ! मा रोदीरिति ब्रुवन् देशिनीं तर्जनीमदात्तन्मुखे इति शेषः ॥ ३१-३२ ॥

भाषा टीका ।

त्रिकुंभ के पुत्र बर्हणाश्व हुए, जिनके कृशाश्व हुए तिनके सेनजित हुए तिनके युवनाश्व हुए यह युवनाश्व पुत्र न होने से वन को गये ॥ २५ ॥

वनमें सौ(१००)भार्याओं सहित इनको अति दुःखित देखकर परम कृपालु ऋषि लोगों ने सावधान होकर इन्द्र देवता की इष्टि [याग] कराई ॥ २६ ॥

राजा रात्रि में तृषित रहा उठकर जलके लिये यज्ञ शाला में गया वहां पर ब्राह्मणों को सोये हुये देखकर, जो मंत्रित जल पत्नी के लिये भरा रहा उसको आप स्वयं पीगया ॥ २७ ॥

हे प्रभो ? राजन् ! उन ऋषियों ने उठ कर पात्र में जल न देखकर पूंछा, कि–यह किसका काम है ? यह पुंसवन का जल किसने पिया ? ॥ २८ ॥

तदनन्तर ईश्वर की इच्छा से राजा ने पिया है ऐसा जान कर वो ऋषि लोग ईश्वर को नमस्कार करते हुए और कहने लगे, कि—अहो ! दैव का बल ही बल है ॥ २९ ॥

तब तौ समय पूरे होने पर राजा युवनाश्व की दक्षिण कुक्षि का भेदन कर चक्रवर्ती पुत्र हुआ ॥ ३० ॥

उस कुमार के जन्म होने पर ऋषि लोग बोले, बिना माता का यह पुत्र किसको धायगा [किसके स्तन को पियेगा] तब इन्द्र बोला, कि " मुझे धायगा " इतना कहकर इन्द्र बोला, कि " हे वत्स ! मतरोओ" इस तरह उसे पुचकार कर उसके मुख में अपनी अमृत की वर्षा करने वाली तर्जनी अंगुली देदीनी ॥ ३१ ॥

और उसका पिता भी ब्राह्मण और देव के प्रसाद से नहीं मरा, फिर उसी जगह पर तप से सिद्धि को प्राप्त हुआ ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मान्धातुर्महिमानमाह–त्रसद्दस्युरिति षड्भिः । अङ्ग हे राजन् ! यस्मान्मान्धातुर्दस्यव उद्विग्नाः कम्पिताः सन्तस्त्रसन्त्यत इन्द्रो यत् त्रसद्दस्युरिति नाम विदधे स मान्धाता ऽवनीमेकः शशासेत्युत्तरेणान्वयः ॥ ३३ ॥

अच्युतस्य तेजसा अप्रच्युततेजसेति वा ॥ ३४ ॥

आत्मविदपि सः यज्ञं विष्णुमीजे; तमेव विशिनष्टि-सर्वदेवमयमिति सार्द्धेन ॥ ३५ ॥ ३६ ॥

प्रतितिष्ठत्यस्तङ्गच्छति ॥ ३७ ॥

प्रसङ्गात्सौभरेश्चरितमाह—तेषामिति यावत्समाप्ति । तं स्वसारो मान्धातुः कन्याः ॥ ३८ ॥

तेषां स्वसारः पञ्चाशत्सौभरिं वव्रिरे पतिम् ।
यमुनान्तर्जले मग्नस्तप्यमानः परन्तपः ॥ ३९ ॥
निर्वृतिं मीनराजस्य वीक्ष्य मैथुनधर्मिणः ।
जातस्पृहो नृपं विप्रः कन्यामेकामयाचत ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, महातापसस्य कुतो विवाहप्रसङ्गः ? कथं वा जराजर्जरं तं राजकन्या वव्रिरे ? तदाह—यमुनान्तर्जल इति षड्भिः ॥ ३९॥

नृपं मान्धातारम् ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अङ्ग हे राजन् ! अस्य कुमारस्य त्रसद्दस्युरिति नामधेयमिन्द्रश्चकार, तत्प्रवृत्तिनिमित्तमाह—यस्मात् यौवनाश्वात्कुमाराद्रावणाद्यो दस्यवो दुष्टाः उद्विग्नाश्चलन्तस्त्रसन्ति बिभ्यति अतस्सोयं त्रसद्दस्युरिति प्रसिद्धो भवितेति वदन् नाम विदधत इति पूर्वेणान्वयः ॥ ३३ ॥

मान्धातुश्चरित्रमाह—यौवनाश्व इत्यादिना । शतबिन्दोरित्यतः प्राक्तनेन । युवनाश्वस्यापत्यं पुमान् यौवनाश्वः मान्धाता प्रभुस्समर्थः सप्तद्वीपात्मकं भूचक्रं यस्य वशे वर्त्तेत इति तथाभूत एक एवाच्युतस्य भगवतस्तेजसा अप्रच्युतेन तेजसेति वा सप्तद्वीपवतीमवनिं भूमिं शशास ॥ ३४ ॥

आत्मवित् देहविलक्षणात्मयाथात्म्यदर्शी सन् भूरयः बह्वयः दक्षिणाः येषु तैः क्रतुभिर्यज्ञं विष्णुं "यज्ञो वै विष्णुः" इति श्रुतेः । ईजे इयाज यज्ञमेव किं विशेषेणाराधितवानित्यतस्तं विशिनष्टि—सर्वदेवमयमिति सार्द्धेन ॥ सर्वदेवताप्रचुरं तत्प्राचुर्यं च तच्छरीरकत्वेन तथा च श्रूयते "स आत्मा अङ्गान्यन्या देवताः" इति देवं स्वतेजसा दीप्यमानं सर्वान्तरात्मानं प्राकृतेन्द्रियागम्यम् ॥ ३५ ॥

द्रव्यादिकमेतत्सर्वं यदात्मकं यद्यज्ञात्मकं तं यज्ञमीजे इति पूर्वेणान्वयः । द्रव्यादिभिः सह पठितो यज्ञशब्दः क्रतुपरः द्रव्यं चरुपुरोडाशादिकं मन्त्रो द्रव्यदेवताप्रकाशको वेदभागः विधिश्चोदनात्मको वेदभागः यजमानः कर्ता धर्मः अपूर्वाख्यो देवताप्रसादरूपो वा देशः "समे यजेत" इत्याद्युक्तः कालो वसन्तादिः ॥ ३६ ॥

यावद्भूमण्डलं सूर्य उदेति उदेत्य प्रकाशयति यद्वा, यावद्यत्र उदेति यत्र च प्रतितिष्ठति अस्तमेति तदवधीकृत्य सर्वमेतद्भूमण्डलं यौवनाश्वस्य मान्धातुः क्षेत्रं पालितं क्षेत्रमिति कथयन्त इत्यर्थः । आचक्रवालमाधिपत्यं कृतवानिति यावत् ॥ ३७ ॥

नृपः मान्धाता नृपेति पाठे हे नृप ! शशबिन्दोर्दुहितरि बिन्दुमत्याख्यायां भार्यायां पुरुकुत्सादींस्त्रीन्पुत्रानुत्पादयामासेति शेषः । नृपेति पाठे मान्धातेति कर्तृपदमध्याहर्त्तव्यम् ॥ ३८ ॥

तेषां पुरुकुत्सादीनां स्वसारः भगिन्यः पञ्चाशत्सङ्ख्याकाः सौभरिमृषिं पतिं वव्रिरे परिजगृहुः । कथं वा तमृषिं वव्रिरे ? इत्यपेक्षायां प्रसङ्गात्सौभरेश्चरित्रमाह—यावदध्यायसमाप्ति । परमुत्कृष्टं तपो यस्य स परन्तपः सौभरिः परन्तपेति पाठे हे परन्तप ! यमुनायामन्तर्जले जलमध्ये निमग्नस्तप्यमानः परन्तप इत्यपि पाठान्तरं तत्र परन्तपः तप्यमानः कुर्वाणः पाकं पचतीतिवन्निर्देशः ॥ ३९ ॥

कदाचित् मैथुनमेव धर्मो यस्य तस्य मत्स्यश्रेष्ठस्य निर्वृतिं मैथुनसुखं दृष्ट्वा विप्रः सौभरिः जाता समुत्पन्ना स्पृहा मैथुनेच्छा यस्य सः नृपं मान्धातारमागत्यैकां कन्यामयाचत स मान्धाताप्यस्य वैरूप्यमालक्ष्यैवमाह—हे ब्रह्मन् ! स्वयम्बरे कामं यथेच्छं कन्या गृह्यतामिति । या कन्या स्वयं त्वां वृणीते सा परिगृह्यतामित्याहेत्यर्थः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यज्ञं श्रीहरिं सर्वदेवप्रधानं सर्वात्मकं मन्त्रतन्त्रद्रव्यादिसर्वव्यापिनम् ॥ ३५ ॥

एतदेव रूपयति—द्रव्यमिति । य आत्मा व्यापी यस्य तद्यदात्मकम् ॥ ३६–३९ ॥

निर्वृतिमानन्दम् ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

प्रतितिष्ठति अस्तं गच्छति ॥ ३७ ३८ ॥

ननु, महातपस्विना सौभरिणा कथं ता व्यूढाः कथं वा जराजर्जरितं ता राजकन्या वव्रिरे तत्राह—यमुनेति ॥ ३९ ॥

ततो जलादुत्थाय मथुरामागत्य नृपं मान्धातारम् ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अङ्ग हे राजन् ! अतः तस्येन्द्रः त्रसद्दस्युरिति नाम विदधे चकार ॥ ३३ । ३४ ॥

उपास्योपासकभेदादुभयविधमात्मानं वेत्तीत्यात्मवित् यतो यज्ञं विष्णुम् ईजे यज्ञं विशिनष्टि—सर्वदेवमयमिति सार्द्धेन ॥ ३५।३६।

सोऽप्याह गृह्यतां ब्रह्मन् ! कामं कन्या स्वयम्वरे ।
स विचिन्त्याप्रियं स्त्रीणां जरठोऽयमसम्मतः ।
वली पलित एजत्क इत्यहं प्रत्युदाहृतः ॥ ४१ ॥
साधयिष्ये तथात्मानं सुरस्त्रीणामपीप्सितम् ।
किं पुनर्मनुजेन्द्राणामिति व्यवसितः प्रभुः ॥ ४२ ॥
मुनिः प्रवेशितः क्षत्त्रा कन्याऽन्तःपुरमृद्धिमत् ।
वृतश्च राजकन्याभिरेकः पञ्चाशता वरः ॥ ४३ ॥
तासां कलिरभूद्भूयांस्तदर्थेऽपोह्य सौहृदम् ।
ममानुरूपो नायं व इति तद्गतचेतसाम् ॥ ४४ ॥
स बह्वृचस्ताभिरपारणीयतपःश्रियाऽनर्घ्यपरिच्छदेषु ।
गृहेषु नानोपवनामलाम्भःसरस्सु सौगन्धिककाननेषु ॥ ४५ ॥
महार्हशय्यासनवस्त्रभूषणस्नानानुलेपाभ्यवहारमाल्यकैः ।
स्वलङ्कृतस्त्रीपुरुषेषु नित्यदा रेमेऽनुगायद्द्विजभृङ्गवन्दिषु ॥ ४६ ॥
यद्गार्हस्थ्यं तु संवीक्ष्य सप्तद्वीपवतीपतिः ।
विस्मितः स्तम्भमजहात्सार्वभौमश्रियान्वितः ॥ ४७ ॥
एवं गृहेष्वभिरतो विषयान्विविधैः सुखैः ।
सेवमानो न चातुष्यदाज्यस्तोकैरिवानलः ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यावत् उदेति यावच्च प्रतितिष्ठति अस्तं गच्छति तावत्सर्वं मान्धातुः क्षेत्रमुच्यते ॥ ३७ ॥

अधात् उत्पादितवान् ॥ ३८ ॥ ३९ ॥

निर्वृतिं मैथुनसुखं नृपं मान्धातारं सोपि मान्धाताऽपि स्वयंवरे कन्यां कामं यथेच्छं गृह्यतामित्याह ॥ ४० ॥

भाषाटीका ।

तदनन्तर इन्द्र ने उस पुत्र का नाम त्रसद्दस्यु ऐसा धरदिया क्योंकि ? जिससे रावणादिक दस्यु (शत्रु) लोग उद्विग्न हो कर त्रास पाते रहे ॥ ३३ ॥

युवनाश्व के पुत्र मांधाता चक्रवर्ती हुए, और अच्युत के तेज से सप्तद्वीप वाली पृथिवी का आप एक ही शासन (पालन) करते रहे ॥ ३४ ॥

और वह आत्मवेत्ता बडी दक्षिणा वाले यज्ञों से सर्व देव मय और सर्वात्मक अतीन्द्रिय यज्ञ पुरुष श्रीहरि का यजन करते हुए ॥ ३५ ॥

द्रव्य, मन्त्र, विधि, यज्ञ, यजमान, ऋत्विज, धर्म, देश, और काल, ये सब यदात्मक हैं जिन परमेश्वर के शरीरभूत हैं ॥३६॥

जहां से सूर्य उदय होते हैं और जहाँतक अस्त को प्राप्त होते हैं वह सब युवनाश्व के पुत्र मान्धाता का क्षेत्र कहाजाता है ॥३७॥

शशविन्दु की पुत्री बिन्दुमती नामवाली अपनी रानी में मांधाता महाराज के पुरुकुत्स, अंबरीष, और योगी मुचुकुंद ये तीन पुत्र हुए ॥ ३८ ॥

इनों की पचास बहिनों ने सौभरि ऋषि को वर लिया वह ऋषि यमुना जी में मग्न होकर परम तप करते रहे ॥ ३९ ॥

मैथुन धर्म वाले मत्स्य के मैथुन सुखको देखकर सौभरि को भी स्पृहा उत्पन्न हुई तब सौभरि मांधाता नृपति के समीप जाकर एक कन्या की याचना करते हुए ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सोऽपि मान्धाता स्वयंवरे कामं गृह्यतामित्याह—स विप्रः स्त्रीणामप्रियं मां विचिन्त्यानेनाहं प्रत्युक्तोऽत आत्मानं तथा साधयिष्यामीति व्यवसितो निश्चितवानिति द्वयोरन्वयः । अप्रियत्वे हेतुः

श्रीधरस्वामिकृतभावार्थदीपिका ।

जरठो वृद्धः वलीभिर्युक्तः पलितश्च एजत्कः कम्पमानशिराः तापसत्वादिना वा असम्मतोऽहमिति कृत्वा ॥ ४१ ॥

तथेत्यस्य प्रपञ्चः सुरस्त्रीणामपीप्सितं किंपुनर्मनुजेन्द्राणां याः स्त्रियस्तासामिति ॥ ४२ ॥

ततः किं वृत्तं तदाह—मुनिरिति द्वाभ्याम् । क्षत्रा प्रतीहारेण पञ्चाशताऽपि राजन्याभिः स एक एव वरो वृतः ॥ ४३ ॥ ४४ ॥

तस्य गार्हस्थ्यं वर्णयति—स इति चतुर्भिः । बह्वृच इति मन्त्रसामर्थ्यमुक्तम्. ताभिः सह रेम इत्युत्तरेणान्वयः । क रेमे अपारणीयं दुरन्तं यत्तपस्तस्य श्रिया समृद्ध्या ऽनर्घ्याः परिच्छदा येषु तेषु गृहेषु तथा नानाविधेषूपवनेषु च अमलान्यम्भांसि येषां तेषु सरस्सु च कथम्भूतेषु सौगन्धिकानां कह्लाराणां च काननानि स्तोमा येषु ॥ ४५ ॥

कथम्भूतेषु गृहादिषु स्वलङ्कृताः स्त्रियः पुरुषाश्च येषु अनुगायन्तो द्विजाश्च पक्षिणो भृङ्गाश्च वन्दिनश्च येषु कथम्भूतः महार्हशय्यादिभिरुपलक्षितः सन् ॥ ४६ ॥

स्तम्भं गर्वम् ॥ ४७ ॥

आज्यस्तोकैर्घृतविन्दुभिः ॥ ४८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स विप्रः सौभरिः स्त्रीणामप्रियं मां विचिन्त्य अनेनाहं प्रत्युक्तः अत आत्मानं सुरस्त्रीणामप्यभीप्सितं साधयिष्यामि इति व्यवसितः निश्चितवान् इति द्वयोरन्वयः स्वस्य स्त्रीणामप्रियत्वे हेतुः जरठो वृद्धः वलिभिर्युक्तः पलितश्च एजत्कः कम्पमानशिराः एवम्भूतोऽयमिति बुद्ध्या राज्ञाऽहं प्रत्युक्त इत्यन्वयः ॥ ४१ ॥

अत आत्मानं सुरस्त्रीणामप्यभीप्सितं योगप्रभावेन साधयिष्ये किम्पुनर्मनुजेन्द्राणां मनुजेन्द्रस्त्रीणामभीप्सितं साधयिष्य इति किमन्वेतत् इत्यर्थः । इत्थं व्यवसितः व्यवसाययुक्तः प्रभुः समर्थो योगित्वादिति भावः ॥ ४२ ॥

मुनिः सौभरिः क्षत्रा सूतेन प्रयोज्यकर्त्रा राज्ञा प्रयोजकेन ऋद्धिमत् सर्वसमृद्धिमदन्तःपुरं प्रवेशितः पञ्चाशता पञ्चाशत्संख्याभिः राजकन्याभिस्सर्वाभिरेक एव वरस्सन् वृतः ॥ ४३ ॥

तदा तासां कन्यानां तदर्थे वरनिमित्तमहमेवैनं वृणे ममैवायमनुरूपः पतिर्न तवेत्येवं सोहृदं सौन्दर्यत्वप्रयुक्तं सौहृदमपोह्य तस्मिन् नितरां सुन्दरे वरे गतं निहितं चेतो यासां तासां महान् कलिः कलह आसीत् योगमाहात्म्येन तादृशसुन्दररूपं धृतवानिति भावः ॥ ४४ ॥

तस्य गार्हस्थ्यं वर्णयति—स इति चतुर्भिः । स बह्वृचः आश्वलायनः सौभरिः यद्वा बह्वृच इति मन्त्रसामर्थ्यमुक्तं ताभिः स्त्रीभिस्सह रेम इत्युत्तरेणान्वयः । अपारणीयं दुरन्तं यत्तपः तस्य श्रिया समृद्ध्या हेतुभूतया अनर्घाः परिच्छदा उपकरणानि येषु तेषु गृहेषु उपकल्पितेषु तथा नानाविधेषु उपवनेषु अमलान्यम्भांसि येषु तेषु सरस्सु च, कथम्भूतेषु ? सौगन्धिकानां कह्लारादीनां काननानि स्तोमा येषु ॥ ४५ ॥

कथम्भूतेषु ? गृहादिषु स्वलङ्कृताः स्त्रियः पुरुषाश्च येषु अनुगायन्तो द्विजाः पक्षिणो भृङ्गाश्च वन्दिनश्च येषु कथम्भूतः महार्हशय्यादिभिरुपलक्षितस्सन् ॥ ४६ ॥

यस्य सौभरेर्गार्हस्थ्यं सम्यगवलोक्य विस्मितः सार्वभौमसम्पदा युक्तः सप्तद्वीपसहिताया भूमेरधिपतिर्मान्धाता स्तम्भं गर्वं जहौ तत्याज किमेतन्मदीयमैश्वर्यमित्यमन्यतेत्यर्थः । यद्वा दुहितॄणां सत्कारवैकल्यचिन्तां जहौ ॥ ४७ ॥

इत्थं गृहेष्वासक्तः सौभरिः नानासुखैर्बहुसुखैर्बहुभिरिन्द्रियैरित्यर्थः । अनेनानेकशरीरपरिग्रहः प्रतिशरीरमिन्द्रियभेदश्च सूच्यते विषयान् शब्दादीन् सेवमानो ऽनुभवन्नपि न तुतोष नाह्यममन्यत यथाज्यस्तोकैर्घृतबिन्दुभिरग्निर्न तुष्यति तद्वत् ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स सौभरिरयं मुनिः स्त्रीणामसम्मतो जरठः एजत्कम्पमानं कं शिरो यस्य स तथा वलीपलित अत एवाप्रिय इति मत्वा अहं राज्ञा प्रत्युदाहृतः स्वयंवरे वृह्यतामिति प्रोक्तः । इत्थं विचिन्त्यात्मानं मां तथा साधयिष्ये यथा सुरस्त्रीणामभीष्टमिति व्यवसितः ॥ ४१ ॥ ४२ ॥

यत्रा कन्यान्तःपुरं प्रवेशितः एकः पञ्चाशता राजकन्याभिर्वृतश्चाभूदिति शेषः ॥ ४३ ॥

कलिः कलहः तदर्थे सौभरिपतिपरिणयनार्थे सौहृदं सुहृद्भावम् अपोह्य परित्यज्य तस्मिन्वरे आसक्तचेतसाम् ॥ ४४ ॥

बह्वृचः सौभरिः गृहेषु ताभिः कन्याभिः रेमे इत्यन्वयः । कीदृशेषु गृहेषु अपारणीयश्रिया अप्रतिघातलक्ष्म्या विराजन्ति शोभमानानि च परिच्छदैरुपकरणैः सहितानि च विराजत्सपरिच्छदानि तेषु श्रिया अपारणीयः अनिर्वार्यः तथापि वरणयोग्य इत्यर्थः इति वा । अमलान्यम्भांस्यमलांभांसि प्रसूनानां सौगन्धिकानि सौरभ्ययुतानि नानाविधोपवनानि च अमलाम्भोभिर्युतानि च प्रसूनसौगन्धिकानि च काननानि येषु तानि तथा तेषु अनुगायन्ति द्विजवृन्दानि अनुगायद्द्विजवृन्दानि द्विजानां पक्षिणां वृन्दानि द्विजवृन्दानि तान्येव वन्दिनो येषु तानि तथा तेषु ॥ ४५ ॥ ४६ ॥

एतावदेवानुवर्णयितुं शक्यं नातोऽधिकमित्याशयेनाह—यदिति । स्तम्भमहङ्कारनिमित्तं कर्तव्याकरणलक्षणम् ॥ ४७ ॥

आज्यस्तोकैः घृतबिन्दुभिः ॥ ४८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

एजत्कः कम्पमानशिराः प्रत्युदाहृतः प्रत्याख्यातः इति व्यवसितः निश्चितवान् ॥ ४१—४४ ॥

स कदाचिदुपासीन आत्मापह्नवमात्मनः।
ददर्श बह्वृचाचार्यो मीनसङ्गसमुत्थितम् ॥ ४९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

बह्वृच इत्येतादृशसम्पत्तिसृष्टौ मन्त्रसामर्थ्यमेव कारणमिति भावः। अपारणीयमन्यैरशक्यं यत्तपस्तस्य श्रिया समृद्ध्या सुष्ठेषु गृहेषु गृहोपलक्षितेषु विविधपुरेषु महार्हशय्यादिभिरुपलक्षितो रेमे ॥ ४५ ४६ ॥

स्तम्भं गर्वम् ॥ ४७ ॥

आज्यस्य स्तोकैर्बिन्दुभिः ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

स सौभरिः स्त्रीणामप्रियं मां विचिन्त्य मान्धात्राऽहं प्रत्युदाहृतः अतोऽहम् आत्मानं स्वदेहं सुरस्त्रीणामपीप्सितं साधयिष्ये इति व्यवसितो निश्चित इति द्वयोरन्वयः। अप्रियत्वे हेतुः, जरठो वृद्धः वलीभिर्युक्तः पलितश्च एजत्कम्पमानः कं देहलक्षणा आत्मा यस्य सः "को ब्रह्मणि समीरात्मकामग्रन्थिषु" इति मेदिनीकारकोशात् ॥ ४१ ॥ ४२ ॥

तत्रा प्रतिहारेण पञ्चाशताऽपि राजकन्याभिः एक एव मुनिर्वृतः पतित्वेन स्वीकृतः ॥ ४३ ॥ ४४ ॥

तद्गार्हस्थ्यं संक्षेपतो वर्णयति—स इति चतुर्भिः। स बह्वृचः मन्त्रसामर्थ्यः युक्तः महार्हशय्यादिभिरुपलक्षितो गृहादिसुताभिः सह रेमे इत्युत्तरेणान्वयः कीदृशेषु अपारणीयं दुरन्तफलं यत्तपस्तस्य श्रिया समृद्ध्या हेतुभूतया अनर्घ्याः परिच्छदाः भोगोपकरणानि येषु तथा नानाविधेषूपवनेषु च अमलाम्भस्सु सरस्सु च कथम्भूतेषु सौगन्धिकानां कल्हारादीनां काननानि शोभा येषु ॥ ४५ ॥

कीदृशेषु गृहादिषु सुष्ठु अलङ्कृताः स्त्रियः पुरुषाश्च येषु अनुगायन्तो द्विजाः पक्षिणश्च वन्दिनश्च येषु ॥ ४६ ॥

स्तम्भमजहात् गर्वं तत्याज ॥ ४७ ॥ ४८ ॥

भाषाटीका।

तब मांधाताने भी सौभरि को कहा, कि—हे ब्रह्मन्! आप स्वयंवर में कन्याओं यथेष्ट ग्रहण करो अर्थात् जो कन्या तुमारे ऊपर प्रसन्न होंगी उनको देंगे इतना सुनकर सौभरि ने विचारा कि-राजा ने मुझको स्त्रियों के अप्रिय असंमत और जरठ तथा मेरे शरीर में वली [सलवटें] देखकर केशों को सफेद और शिर को हिलता हुआ देखकर एक बहाना बनाया है, कि न इस पर कोई प्रसन्न होगी न मैं किसी पुत्री को दूंगा ऐसा विचारा है ॥ ४१ ॥

इसलिये मैं भी अपने रूप को ऐसा बनाऊं कि जिसमें मेरा रूप देवताओं की स्त्रियों को भी इच्छित होवै। और राजकन्याओं की तो बात ही क्या है? ऐसा सौभरि ने अपने मनमें व्यवसाय किया और समर्थ तो रहेहं वैसे ही बन भी गये ॥ ४२ ॥

राजा की आज्ञा से द्वारी ने कन्याओंके निवास स्थान में ऋषि का प्रवेश कराया तब तो पचास हू राजकन्याओं ने एक ही ऋषि को वर लिया ॥ ४३ ॥

और उनकन्याओं का ऋषि के लिये अपना सुहृत्पने को छोडकर भारी कलह हुआ. सब ही कन्याओं का चित्त ऋषि मे लग गया और परस्पर में सभी बोलने लगी, कि—यह तो हमारे अनुरूप है तेरे योग्य नहीं है ॥ ४४ ॥

वो बह्वृच (बहुतऋचाजाननेवाला) सौभरि ऋषि, अपार तपकी समृद्धि से अनर्घ्य (बहुमोल्य) उपकरण वाले गृहों में और नानाप्रकार के कमलों के समूह वाले और अमल जलवाले सरोवर जिनमें ऐसे उपवनों में उन पचास राजकन्याओं के साथ रमण करते हुए ॥ ४५ ॥

कैसे सौभरि के विहार स्थल हैं कि—जिनमें उत्तमोत्तम सेज, आसन, वस्त्र, भूषण, स्नान, उबटन, भोजन, और मालाओं से स्त्री और पुरुष सुन्दर अलंकृत होरहे हैं और नानाप्रकार के पक्षिगण और भ्रमर तथा वन्दीजन जहां गान कर रहे हैं। ऐसे उत्तम विभूति वाले गृहों में सौभरि नित्य रमण करते रहे ॥ ४६ ॥

और तो क्या कहे जिन सौभरि ऋषि की गृहस्थीको देखकर सप्तद्वीपवाली पृथिवी के पति और सार्वभौम सम्पत्ति युक्त मांधता ने भी गर्व छोड दिया ॥ ४७ ॥

इस प्रकार गृह में रत होकर विविध सुखों से विषयों को भोगते हुए भी सन्तोष को प्राप्त न हुए जैसे घृत के बिन्दुओं से अग्नि नहीं शान्त होती है ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

इदानीं तस्यानुतापपूर्वकं वानप्रस्थाश्रममाह-स कदाचिदिति सप्तभिः। आत्मनो मनसो हेतोरात्मनोऽपह्नवं तपोहानिं ददर्श ॥ ४९ ॥

अहो इमं पश्यत मे विनाशं तपस्विनः सच्चरितव्रतस्य ।
अन्तर्जले वारिचरप्रसङ्गात्प्रच्यावितं ब्रह्म चिरं धृतं यत् ॥ ५० ॥
सङ्गं त्यजेत मिथुनव्रतिनां मुमुक्षुः सर्वात्मना न विसृजेद्बहिरिन्द्रियाणि ।
एकश्चरन्रहसि चित्तमनन्त ईशे युञ्जीत तद्व्रतिषु साधुषु चेत्प्रसङ्गः ॥ ५१ ॥
एकस्तपस्व्यहमथाम्भसि मत्स्यसङ्गात्पञ्चाशदासमुत पञ्चसहस्रसर्गः ।
नान्तं व्रजाम्युभयकृत्यमनोरथानां मायागुणैर्हृतमतिर्विषयेऽर्थभावः ॥ ५२ ॥
एवं वसन् गृहे कालं विरक्तो न्यासमास्थितः ।
वनं जगामानुययुस्तत्पत्न्यः पतिदेवताः ॥ ५३ ॥
तत्र तप्त्वा तपस्तीक्ष्णमात्मकर्षणमात्मवान् ।
सहैवाग्निभिरात्मानं युयोज परमात्मनि ॥ ५४ ॥
ताः स्वपत्युर्महाराज ! निरीक्ष्याध्यात्मिकीं गतिम् ।
अन्वीयुस्तत्प्रभावेन अग्निं शान्तमिवार्चिषः ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां नवमस्कन्धे सौभर्याख्याने
षष्ठोऽध्यायः ॥ ६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

संन्यासौ चरितव्रतस्य योऽहं तस्य ब्रह्म तपः ॥ ५० ॥

मिथुनव्रतिनां दाम्पत्यधर्मवतां चेद्यदिप्रसङ्गस्तर्हि तद्व्रतिषु ईश्वराराधनधर्मपरेष्वेव कार्य इति शेषः ॥ ५१ ॥

सङ्गाज्जातं दोषं प्रपञ्चयति—एक इति । पञ्चाशता भार्याभिः सस्वन्धात्पञ्चाशदासमभूवमित्यर्थः । ततश्च सुतैः पञ्चसहस्रसर्ग आसम् प्रत्येकं तासु पुत्रशतरूपेणोत्पत्तेः उभयकृत्यान्यैहिकपारत्रिकाणि कर्माणि तद्विषयाणां मनोरथानाम् अर्थभावः । पुरुषार्थबुद्धिमान् ॥ ५२ ॥

न्यासोऽत्र सङ्गत्याग एव वानप्रस्थधर्म इत्यर्थः ॥ ५३ ॥ ५४ ॥

आध्यात्मिकीं गतिं ब्रह्मणि लयम् ॥ ५५ ॥

इतिश्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायां
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इदानीं तस्यानुतापपूर्वकं वानप्रस्थाश्रममाह; तावदनुतापमाह—स इत्यादिना एवं वसन्नित्यतः प्राक्तनेन । बह्वृचानामाचार्यः स सौभरिः कदाचिदुपासीन उपविष्टः आत्मना मनसा मीनस्य सङ्गाद्धेतोः समुत्थितमात्मापह्नवं स्वरूपानुसन्धानविरोधिनं विषयचापलं ददर्श आलोकितवान् ॥ ४९ ॥

दर्शनमेव प्रपञ्चयति—अहो इति । अहो हे लोकाः ! तपोनिष्ठस्य संन्यासौ चरितव्रतस्य योऽहं तस्य ममेमं विनाशं पश्यत, कोऽसौ विनाशः ? तत्राह—अन्तर्जले यो वारिचरो मीनस्तस्य प्रकृष्टात्सङ्गाद्धेतोश्चिरं धृतं ध्यातं ब्रह्मविद्याविनं विस्मृतमिति यदेष एव विनाशः ब्रह्मविस्मरणमात्मनो विनाशप्रायमेवेति मत्वा विनाशं पश्यतेत्युक्तं तथा च श्रूयते "असन्नेव स भवति असद्ब्रह्मेति वेद चेत्" इति ॥ ५० ॥

अत एवं वर्तितव्यं मयेत्यभिप्रायेण मुमुक्षोर्वृत्तिमाह—सङ्गमिति । मुमुक्षुः सर्वात्मना करणत्रयेण मिथुनव्रतिनां दाम्पत्यधर्मवतां सङ्गं त्यजेत् बहिः शब्दादिविषयेषु इन्द्रियाणि न विसृजेत् न प्रवर्तयेत् एकोऽसहाय एव चरेत् रहसि एकान्ते चित्तमनन्ते अपरिच्छिन्ने ईशे भगवति युञ्जीत कचिदपि सङ्गो न कार्य एव कचित्सङ्गश्चेत् प्रसङ्गस्तर्हि तस्मिन्ननन्त एव रतिर्येषां तेषु साधुष्वेव विधेयः ॥ ५१ ॥

स्वावस्थां प्रपञ्चयति—एक इति । प्रथममेकोऽसहाय एव

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अहमासमथ ततोऽम्भसि यो मत्स्यस्तस्य सङ्गात् पञ्चाशद्दासं पञ्चाशता भार्याभिरेकदा सम्बन्धाय पञ्चाशच्छरीरविशिष्टोऽभवं ततश्च पुत्ररूपेण पञ्चसहस्रवर्गं आसमेवमप्यन्तं विषयानुभवजां तृप्तिमन्तस्य तृप्त्यवधित्वान्न व्रजामि,कथम्भूतः? उभयकृत्यं स्त्रीपुंसकृत्यं तस्मिन्नेव मनोरथो यषां तेषां मायागुणैर्मोहादिभिर्हृता मतिर्यस्य विषयेषु शब्दादिष्वेवार्थभावः पुरुषार्थबुद्धिर्यस्य तथाभूतः ॥ ५२ ॥

एवमित्यादिशुकोक्तिः—इत्थं महान्तं कालं गृहे वसन् ततो विरक्तो न्यासं काम्यकर्मत्यागमाश्रितो वनं जगाम तपसा इति शेषः तं गच्छन्तं सौभरिं पतिरेव देवता यासां ताः पत्न्यश्चानुसृत्य जग्मुः ॥ ५३ ॥

तत्र वने आत्मवित् आत्मयाथात्म्यानुसन्धानपरः सौभरिरात्मकर्शनं शरीरकार्श्यावहमत एव तीक्ष्णमुग्रं तपस्तप्त्वा कृत्वा अग्निभिराहवनीयादिभिः सहवात्मान परमात्मनि युयोज लीनमनुसन्दध इत्यर्थः ॥ ५४ ॥

ततो हे महाराज ! पत्युः सौभरेराध्यात्मिकीं गतिं परमात्मसम्बन्धिनीमग्निभिः सह प्रत्यगात्मनः परमात्मनि लयानुसन्धानपूर्विकां तत्प्राप्तिरूपां गतिमवलोक्य ताः पतिमनुगताः पत्न्यश्च तस्य पत्युः प्रभावेन परमात्मोपासनप्रभावेन अन्वीयुरनुसृत्य जग्मुर्मुक्ता बभूवुरिति यावत् तद्यथा शान्तं निरिन्धनमग्निमार्चिषः शिखा अनुलीना भवन्ति तद्वत् ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आत्मापह्नवं स्वरूपापहारणं तपसास्तिरस्कारं वा ॥ ४९ ॥

यथिरन्धृतं ब्रह्म तपः तत्प्रच्यावितं च्युतं नष्टमित्यर्थः । "ब्रह्म वदस्तपस्तत्त्वम्" इत्यभिधानम् तद्यमनारोपितं रूपं पुंसो ज्ञातमेव तत्स्नुतं प्रतिबद्धमिति वा ॥ ५० ॥

"लोकसङ्ग्रहमेवापि सम्पश्यन् कर्तुमर्हसि" इति वाक्यार्थमनुसन्धान आह-सङ्गमिति । मिथुनव्रजिनात् स्त्रीपुरुषसङ्गोद्भूतपापात् मुमुक्षुः सङ्गं स्नेहलक्षणं त्यजेत. इन्द्रियाणि बहिः शब्दादिविषयेषु न विसृजेत् न प्रयुञ्जीत एकाकी चरन् रहसि एकान्ते अनन्ते ईशे चित्तं युञ्जीत प्रसङ्गश्चेद्यदि प्रसङ्गोऽपेक्षितस्तर्हि तस्मिन् हरौ रतिर्येषां ते तद्व्रतवन्तेषु साधुषु निर्मत्सरजनेषु प्रसङ्गः स्यान्नान्यत्रेत्यन्वयः ॥ ५१ ॥

अहमेक एव तपस्वी अथाम्भसि मज्जज्जले मत्स्यसङ्गात् मत्स्यानां मिथः स्नेहं दृष्ट्वा अथानन्तरं पञ्चाशता स्त्रीभिः सह सुरतप्रसङ्गेन सुतपञ्चसहस्रसङ्ग आसम्, अयोभयकृत्यं पुत्राणां विवाहादिः कन्यकानां प्रदानादिरित्युभयं कर्तव्यं तत्र ये मनोरथाः मनःसङ्कल्पविशेषास्तेषाम् उभयेन स्त्रीपुरुषद्वयेन यत्कृत्यं तत्र विद्यमानानां मनोरथानां वा उभयविमन् इह लोके परलोके च यत्कृत्यं तद्विषयमनोरथानां वा अन्तमवसानं न प्रजाम तत्रेदं निमित्तमाह—मायेति । शब्दादिविषये प्रयोजनबुद्धिः "मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ" इत्यमरः ॥ ५२ ॥

एवं विरज्य किमकाषीत्तत्राह—एवमिति । न्यासं वित्तगृहादित्यागलक्षणाम् ॥ ५३ ॥

आत्मकर्शनं देहस्य कृशत्वापादकम् अग्निभिः सहात्मान देहं दग्ध्वा परमात्मनि युयोज सायुज्यलक्षणां मोक्षमाप्तवानित्यर्थः ॥ ५४ ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां
षष्ठोऽध्यायः ॥ ६ ॥
(एतन्मतेनाध्यायोऽत्र न समाप्यते ॥)

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

कदा तादृशस्त्वम् चित्तं युञ्जीत ? तत्राह—एकूवतिष्ठेति ॥ ५१ ॥ ५२ ॥ ५३ ॥

सहैवाग्निभिरिति आत्मात्मीयं सर्वमेव तदनुगतत्वेन विमान्योत्क्रान्तवानित्यर्थः ॥ ५४ ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

एवं तस्य गरुडापराधस्य गृहावेशप्रापकस्य भोगान्ते पुनर्विवेकोदयमाह-अ इति सप्तभिः । आत्मनः स्वस्माद्देव हेतो रात्मग आत्मानन्दस्य अपह्नवं पञ्चनं मीनसङ्गसमुत्थितमिति मीनसङ्गस्य कारणं तु मीनरक्षार्थं गरुडनिवारणरूपोऽपराध एव ज्ञेयः ॥४९॥

ब्रह्म तपः ॥ ५० ॥

तस्मादन्यो मादृशो मा भवत्विति सनिर्वेदमाह—सङ्गमिति द्वाभ्याम् । बहिरिन्द्रियाणि न विसृजेदिति विधातुमशक्तेः अशक्यानुष्ठानकस्य विधेरप्रामाण्यादिति भावः । तद्व्रतिषु अनन्तभक्तिनिष्ठेषु साधुषु यदि प्रकृष्टः सङ्गः स्यादिति मम तु तदभावादेव गरुडे दोषदर्शनजनितो मिथुनव्रतिनो मीनस्य सङ्गोऽभूदिति भावः । चेत् प्रसङ्ग इत्यत्र नञ् अध्याहार्यः तस्मात् यदि साधुषु प्रकृष्टः सङ्गः स्यात् तदा असाधुसङ्गं न कुर्यादिति मेकशरीरत्यादि ॥ ५१ ॥

सङ्गाज्जातं दोषं प्रपञ्चयति—एक इति । पञ्चाशता भार्याभिः सम्बन्धात् पञ्चाशद्दासं ततश्च सुतैः पञ्चसहस्रसंग आसमिति प्रत्येकं ताश्च पुत्रशतरूपेणोत्पत्तेः उभयकृत्यानि ऐहिकपारत्रिकाणि कर्माणि तद्विषयाणां मनोरथानाम् अर्थभावः पुरुषार्थबुद्धिः ॥ ५२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

न्यासं सङ्गत्यागरूपं वानप्रस्थधर्ममित्यर्थः ॥ ५३ ॥
सहैवाग्निभिरित्यग्निभिः सहैव देहं त्यक्त्वैवेति शेषः ॥ ५४ ॥
अन्वीयुरनुसृताः ॥ ५५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।
षष्ठोऽयं नवमेऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

अधुना तस्यानुतापपूर्वकं वानप्रस्थधर्ममाह—स इति सप्तभिः। आत्मनः स्वस्य आत्मापह्नवम् आत्मनो बुद्धेः अपह्नवं हानिलाघवं ददर्श ॥ ४९ ॥

बुद्धिलाघवमेवाह—अहो इति। यत् येन आत्मापह्नवेन सच्चामौ चरितव्रतश्च तस्य मे इमं विनाशं पश्यत, तदेवाह—चिरं धृतं बहुकालतो बुद्ध्या ध्यातं ब्रह्म प्रत्यावितं विस्मारितम् ॥ ५० ॥

मिथुनव्रतिनाम् औपस्थ्यसुखासक्तानां सङ्गं त्यजेत् बहिर्विषयेषु इन्द्रियाणि न विसृजेत् एकश्चरन् ईशे चित्तं युञ्जीत उक्तार्थे साधनमाह, तद्व्रतिषु ईश्वराराधनवृत्तिधारिषु प्रकृष्टः सङ्गश्चेत् ॥ ५१ ॥

सङ्गदोषं प्रपञ्चयति—एक इति। अम्भसि तपस्वी अहम् एक आसं पुनर्मत्स्यसङ्गात् पञ्चाशदासम् अभूवं पञ्चाशता भार्याभिः सम्बन्धात् पुनः पञ्चसहस्रसर्गः आसं तासु प्रत्येकं पुत्रशतरूपेणोत्पत्तेः एवं मायागुणैः रूपादिविषयकरागादिभिर्हृतमतिः अत एव विषये स्त्रीपुत्रादिदर्शनसंस्पर्शादौ अर्थभावः अर्थबुद्धिः अहम् उभयकृत्यमनोरथानाम् ऐहिकामुष्मिकसुखसाधनवासनानां अन्तं न व्रजामि ॥ ५२ ॥

एवं सङ्गदोषदर्शनेन विषयेभ्यो विरक्तः न्यासं भगवति आत्मभरन्यासमास्थितः ॥ ५३ ॥

अग्निभिराहवनीयादिभिः सह आत्मानं परमात्मनि युयोज लीनं चिन्तितवान् ॥ ५४ ॥

आध्यात्मिकीं गतिं परमात्मप्राप्तिम् ॥ ५५ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
षष्ठोऽध्यायार्थप्रकाशः ॥ ६ ॥

भाषा टीका।

यह बहुत सी ऋचाओंके आचार्य सौभरि ऋषि एक समय पर बैठे हुए मीन के संग से होने वाली अपनी बडी तपकी हानि को देखते हुए ॥ ४९ ॥

और सौभरि बोले, कि—अहो! बडा सुन्दर चरित्र वाला व्रतधारी ऐसे मोतपस्वी के तप के नाश को तो देखो? कि—मैंने जल के भीतर जलचर [मीन] के प्रसंग को देखकर बहुत काल से जो तप धारण किया था उसे मैंने नष्ट कर दिया ॥ ५० ॥

मुमुक्षु पुरुष मिथुन व्रती लोगों का संग छोडे और इन्द्रियों को किसी तरह भी बाहर विषयों में न छोडे। एकाकी विचरता हुआ एकांत में स्थित होकर ईश्वर में चित्त लगावै अथवा उस श्रीहरि में जिनकी वृत्ति लगी हुई है ऐसे साधुजनों का प्रसंग करै यदि मिलै तो ॥ ५१ ॥

देखो मै एकही तपस्वी जल में तप करता हुआ मीन के प्रसंग को देखकर पचास स्त्रियों के संग से पचास रूप वाला होगया और अपने पुत्र रूप से पंच सहस्र शरीर वाला भी होगया तो भी अब मैं दोनों मनोरथों के अर्थात् ऐहिलौकिक और पारलौकिक मनोरथों के अन्त को नहीं पहुचता हूं क्योंकि? माया के गुणों ने मेरी मति को हरण कर लिया है इसी से विषयों में मेरी अर्थ बुद्धि होरही है ॥ ५२ ॥

सौभरि ने इतना विचार किया और गृह में बसते २ ही विषयों से फिर विरक्त होगये तदनंतर सन्यास लेकर वन में चले गये। उनकी पचासों पत्नी भी पति ही में देवता बुद्धि वाली रही सब उनके साथ वन को गई ॥ ५३ ॥

वहां पर शरीर को कृश करने वाला ऐसा बडा तीक्ष्ण तप करके अग्नियों के सहित अपने आत्माको परमात्मा में युक्त करते हुए ॥ ५४ ॥

तब तो हे महाराज! वे पत्नी लोग भी अपने पति की इस प्रकार की आध्यात्मिक गति को देखकर उनके प्रभाव से अनुगमन करती हुई। जैसे अग्नि के शांत होने पर अर्चि (अग्नि की ज्वाला) आपही शांत होजाती है ॥ ५५ ॥

इति श्रीमद्भागवत नवमस्कन्ध में षष्ठ अध्याय की
श्रीवृन्दावनस्थ पं० भागवताचार्यकृत-
भाषा टीका समाप्ता ॥ ६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे षष्ठोऽध्यायः ॥ ६ ॥

॥ सप्तमोऽध्यायः ॥

श्रीशुक उवाच ।

मान्धातुः पुत्रप्रवरो योऽम्बरीषः प्रकीर्तितः ।
पितामहेन प्रवृतो यौवनाश्वश्च तत्सुतः ।
हारीतस्तस्य पुत्रोऽभून्मान्धातृप्रवरा इमे ॥ १ ॥
नर्मदा भ्रातृभिर्दत्ता पुरुकुत्साय योरगैः ।
तया रसातलं नीतो भुजगेन्द्रप्रयुक्तया ॥ २ ॥
गन्धर्वानवधीत्तत्र वध्यान्वै विष्णुशक्तिधृक् ।
नागाल्लब्धवरः सर्पादभयं स्मरतामिदम् ॥ ३ ॥
त्रसद्दस्युः पौरुकुत्सो योऽनरण्यस्य देहकृत् ।
हर्यश्वस्तत्सुतस्तस्मादरुणोऽथ(१) निबन्धनः ॥ ४ ॥
तस्य सत्यव्रतः पुत्रस्त्रिशङ्कुरिति विश्रुतः ।
प्राप्तश्चण्डालतां शापाद्गुरोः कौशिकतेजसा ॥ ५ ॥
सशरीरो गतः स्वर्गमद्यापि दिवि दृश्यते ।
पातितोऽवाक्शिरा देवैस्तेनैव स्तम्भितो बलात् ॥ ६ ॥
त्रैशङ्कवो हरिश्चन्द्रो विश्वामित्रवसिष्ठयोः ।
यन्निमित्तमभूद्युद्धं पक्षिणोर्बहु वार्षिकम् ॥ ७ ॥
सोऽनपत्यो विषण्णात्मा नारदस्योपदेशतः ।
वरुणं शरणं यातः पुत्रो मे जायतां प्रभो ! ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मान्धातुरन्वयः प्रोक्तः सप्तमे यत्र गीयते ।
पुरुकुत्सस्य चाख्यानं हरिश्चन्द्रस्य चोत्तमम् ॥

पुत्रप्रवरः पुत्रश्रेष्ठः स पितामहेन युवनाश्वेन प्रवृतः पुत्रत्वेन स्वीकृतः अत एवाऽस्य मान्धातृप्रवर्गत्वं तत्सुतोऽम्बरीषस्य सुतः इमे यौवनाश्वाम्बरीषहारीता मान्धातृगोत्रस्य प्रवरा अवान्तरविशेषप्रवर्तकाः यद्वा यौवनाश्वविशेषणम् पितामहेन मान्धात्रा सह आर्षेयवरणे प्रवृत्तः मान्धाता प्रवरो येषां ते इमे अम्बरीष यौवनाश्वहारीताः यथाऽहाश्वलायनः "हरितकुत्सपिङ्गदर्भभैमगवानामाङ्गिरसाम्बरीषयौवनाश्वेति मान्धातारं हैके ब्रुवते अतीत्याङ्गिरसं मान्धात्रम्बरीषयौवनाश्वेति" इति ॥ १ ॥

पुरुकुत्सस्य वंशं कथयिष्यन्नादौ तावत्तस्य विवाहं प्रभावं चाह—उरगैर्भ्रातृभिर्या दत्ता नर्मदा तया ॥ २ ॥

वध्यान्वधार्हान् स च पुरुकुत्सो नागाल्लब्धवरोऽभूत् वरम् आह, इदं नर्मदया रसातलानयनादिकं स्मरतां सर्पादभयम् इति ॥ ३ ॥

देहकृत्पिता त्रसद्दस्योः सुतोऽनरण्य इत्यर्थः ॥ ४ ॥

---

(१) त्रिबन्धुर इति वीर० विज० ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्रयः शङ्कव इव दुःखहेतवो दोषा यस्यासौ त्रिशङ्कुः तदुक्तं हरिवंशे—

"पितुश्चापरितोषेण गुरोर्दोग्ध्रीवधेन च ।
अप्रोक्षितोपयोगाच्च त्रिविधस्ते व्यतिक्रमः" ॥

इति परिणीयमानविप्रकन्याऽपहरणात्क्रुद्धस्य गुरोः पितुः शापात् कौशिकस्य विश्वामित्रस्य तेजसा प्रभावेन ॥ ५ ॥

तेनैव कौशिकेन ॥ ६ ॥

पक्षिणोराडीबकयोः विश्वामित्रो राजसूयदक्षिणाच्छलेन हरिश्चन्द्रसर्वस्वमपहृत्य यातयामास तच्छ्रुत्वा कुपितो वसिष्ठोऽपि विश्वामित्रं त्वमाडीभवेति शशाप सोऽपि त्वं बकोभवेति वसिष्ठं शशाप तयोश्च युद्धमभूदिति प्रसिद्धम् ॥ ७ ॥

"हरिश्चन्द्रो ह वैधस ऐक्ष्वाको राजा पुत्र आस" इत्यादि श्रुतिप्रसिद्धं हरिश्चन्द्रस्य चरितमाह—सोऽनपत्य इत्यादि यावत्समाप्ति, कथं शरणं यातः? तदाह, पुत्रो मे जायताम् ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रासङ्गिकस्सौभरेर्वृत्तान्तोऽनुवर्णितः अथ प्रस्तुतं मान्धातुर्वंशपरम्परां तद्वृत्तान्तं चाह—मान्धातृपुत्रप्रवर इति ! मान्धातुः पुत्राणां पुरुकुत्सादीनां मध्ये श्रेष्ठो योऽम्बरीष इति प्रसिद्धः पुत्रः स पितामहेन युवनाश्वेन प्रवृतः पुत्रत्वेन स्वीकृतः अत एव तत्सुतः अम्बरीषस्य सुतः युवनाश्वनामाऽभवत् पितामहस्य नाम दध्रे इत्यर्थः । यौवनाश्वस्तु तत्सुत इति पाठान्तरं तदा मान्धातृपुत्रश्रेष्ठोप्यम्बरीषः पितामहेन वृतत्वात् तत्पुत्र अम्बरीषयादिशब्दाभिधेयतां विहाय यौवनाश्वशब्दाभिधेयो बभूव इत्यर्थः । युवनाश्वस्यानन्तरापत्यं यौवनाश्विरम्बरीषः "अतइञ्" तस्यापत्यं यौवनाश्वः तस्यापत्यमित्यौत्सर्गिकोऽण् प्रत्ययः तस्य यौवनाश्वस्य सुतो हरित इति प्रसिद्धो बभूव इमे अम्बरीषयौवनाश्वहरिताः मान्धातृप्रवराः मान्धातृसन्तानभूता इत्यर्थः । एवं मान्धातृसुतस्याम्बरीषस्य वंश उक्तः ॥ १ ॥

अथपुरुकुत्ससन्तानं वक्ष्यन् तावत्तद्वृत्तान्तमाह—नर्मदेति । भ्रातृभिरुरगैर्नागैर्या नर्मदाख्या नागकन्यका पुरुकुत्साय दत्ता तया भुजगेन्द्रैर्भ्रातृभिः प्रचोदितया नर्मदया रसातलं नीतो यः पुरुकुत्सः सः विष्णुशक्तिधृत् भगवदाहितबलः अत एवावध्यानपि गन्धर्वानवधीत् हतवान्, ततो नागात् भुजगेन्द्राल्लब्धः प्राप्तो वरो येन तादृशो बभूव. वरस्वरूपं दर्शयति, सर्पादभयं स्मरतामिममिति. इमं नर्मदया रसातलनयनादिवृत्तान्तं स्मरतां जनानां सर्पाद्भयं मयाभाव इति मद्वृत्तान्तं स्मरतां सर्पाद्भयं माभूदित्येवंविधं वरं वृतवानस्तं लब्धवानित्यर्थः ॥ २ ॥ ३ ॥

पुरुकुत्सस्यापत्यं पौरुकुत्सस्त्रसदस्युस्तं विशिंषन् तत्पुत्रमाह—यस्त्रसदस्युरनरण्यस्य देहकृत् अनरण्यमुत्पादितवानित्यर्थः । तस्य अनरण्यस्य सुतो हर्यश्वस्तस्मात् हर्यश्वात् अरुणो जज्ञे इति शेषः अथ अरुणात्त्रिबन्धुरः ॥ ४ ॥

तस्य पुत्रः सत्यव्रतः स एव त्रिशङ्कुरिति विख्यातः स च गुरोर्वसिष्ठस्य शापाच्चण्डालतां गतः प्राप्तः पश्चात्कौशिकस्य विश्वामित्रस्य तेजसा तपःप्रभावेन सशरीर एव स्वर्गं गतः अधुनापि दिवि नक्षत्ररूपेण दृश्यते, कथं चण्डालस्य स्वर्लोके अवस्थानम्? इत्यत्राह—पातित इति । कौशिकतेजसा स्वर्गं प्रापितस्तत्रत्यैर्देवैरवाक्छिराः पातितः पात्यमानः पुनस्तेनैव कौशिकतेजसैव बलात् स्तम्भितः स्वर्गान्तरनिर्माणपूर्वकं कौशिकतेजसा दिव्येव स्थापित इत्यर्थः ॥ ५ ॥ ६ ॥

त्रैशङ्कवः त्रिशङ्कोः पुत्रो हरिश्चन्द्रः, तद्वृत्तान्तमाह—यन्निमित्तं यो हरिश्चन्द्रो निमित्तं कारणं यस्य तद्बहुवार्षिकं युद्धं पक्षिणोः पक्षित्वं प्राप्तयोः विश्वामित्रवसिष्ठयोः बभूव विश्वामित्रो राजसूयदक्षिणाच्छलेन सर्वस्वापहारेण हरिश्चन्द्रं यातयामास तच्छ्रुत्वा कुपितो हरिश्चन्द्रगुरुर्वसिष्ठः विश्वामित्रं त्वमाडिर्भवेति शशाप आडिर्बलाका "शरारिराडिरातिश्च बलाका विसकण्ठिका" इति कोशात्. विश्वामित्रोऽपि वसिष्ठं त्वं भासो भवेति शशाप तयोश्च युद्धमभूदिति श्रुतिप्रसिद्धम् ॥ ७ ॥

हरिश्चन्द्रस्यैव चरित्रान्तरमाह—स इत्यादिना यावदध्यायसमाप्ति । स हरिश्चन्द्रोऽनपत्यः अपुत्रः सन्नत एव विपण्णः दुःखितः आत्मा मनो यस्य स नारदस्योपदेशात् वरुणं शरणं गतः, कथं शरणं यातः? तत्राह—पुत्र इत्यादिना यजाइत्यन्तेन । वरुणं शरणमुपगम्य हे प्रभो ! मम पुत्रो जायतां तथा अनुग्रहाण ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मातामहेन मातुः पित्रा शशबिन्दुना तस्याम्बरीषस्य सुतः मान्धाता प्रवरो येषां ते तथा ॥ १ ॥

भ्रातृभिः उरगैः पुरुकुत्साय मान्धातृज्येष्ठपुत्राय दत्ता भुजगेन्द्रप्रेरितया तया नर्मदया रसातलं नीतः ॥ २ ॥

सः पुरुकुत्सः तत्र रसातले वध्याश्वान् गन्धर्वानवधीदित्यन्वयः । वधार्हा अश्वा येषां ते तथा तन्वा नागाः किमस्मै ददुरिति तत्राह—सर्पादिति । इमं गन्धर्ववधलक्षणं पुरुकुत्सविक्रमं स्मरतां पुंसां सर्पाद्भयलक्षणं लब्धवर इत्यर्थः ॥ ३ ॥

पुरुकुत्सस्यापत्यं पौरुकुत्सः यस्त्रसदस्युरनरण्यस्य देहकृत् पिता अनरण्यस्त्रसदस्युसुत इत्यर्थः ॥ ४ ॥

तस्य त्रिबन्धुरस्य सुतः सत्यव्रतः त्रिशङ्कुरिति नामद्वयन विश्रुत इत्यर्थः । गुरोर्वसिष्ठस्य शापात् कौशिकस्य विश्वामित्रस्य तेजसा प्रभावेण ॥ ५ ॥

सशरीरः मानुषशरीरसहितः स्वर्गं गतः अद्यापि दिवि व्योम्नि दृश्यते मनुजैरिति शेषः । स्वर्गं गतः कथं मानवैर्दृश्यत इति तत्राह—पातित इति । तेन विश्वामित्रेण बलात्तपः शक्तेः ॥ ६ ॥

त्रैशङ्कवः त्रिशङ्कोरपत्यं हरिश्चन्द्रो यो हरिश्चद्रो निमित्तं यस्य तद्यन्निमित्तं पक्षिणोः सहायिनोः—"पक्षः पार्श्वगरुत्साध्यसहायबलभित्तिषु" इति यादवः ॥ ७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

"नापुत्रस्य लोकोऽस्ति" इति शब्दार्थज्ञानाद्विषण्णमना अनपत्यः स हरिश्चन्द्रो नारदोपदेशात् हे प्रभो ! मे पुत्रो जायतामिति निवेद्य वरुणं शरणं गत इत्यन्वयः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मान्धातुरिति सार्द्धकम् । पितामहेन प्रवृतो यौवनाश्वस्तु तत्सुत इत्येव पाठः दृश्यते चायं गौडविदेहेषु अर्थस्तु तस्याम्बरीषस्य सुतो यौवनाश्वः अयमपि मान्धातृसनामेत्यर्थः । विष्णुपुराणे तु युवनाश्व इति नाम यथा गर्भश्च युवनाश्वस्योदरेऽभवत् ततो मान्धाता ऽभवत् इति पूर्वमुक्त्वा तत्रैव ग्रन्थान्तरेणाह, अम्बरीषमान्धातृतनयस्य युवनाश्वः पुत्रोऽभूत् तस्माद्धरितः यतोऽङ्गिरसो हारीत इति टीकायामर्थान्तरे आर्षेयप्रवरेण प्रवृत इति ऋषिभिः स्वगोत्रत्वेन वृत इत्यर्थः । तेन सह तस्याम्बरीषस्य सुतो हारीतः युवनाश्वेन प्रवृत इति ॥ १—३ ॥

त्रसदस्युरिति अयमपि मान्धातृसनामेत्यर्थः ॥ ४—७ ॥

श्रीभगवद्वैभवतस्य श्रीभागवत एव समञ्जसत्वं वै कथयितुं हरिश्चन्द्रस्य चरितमाह—सोऽनपत्य इत्यादिना । एवमन्यत्रापि ज्ञेयं तत्र स इति युग्मकम् ॥ ८—२३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सप्तमे तु हरिश्चन्द्रो मान्धात्रन्वयसम्भवः ।
वरुणं वञ्चयन् पुत्रसंग्रहादीञ्जं नृमेधतः ॥

पितामहेन युवनाश्वेन प्रवृतः पुत्रत्वेन स्वीकृतः तत्सुतः अम्बरीषपुत्रो यौवनाश्वः इमे अम्बरीषयौवनाश्वहारीताः मान्धातृप्रवराः मान्धातैव प्रवरो येषां ते ॥ १ ॥

मान्धातृपुत्रस्य पुरुकुत्सस्य वंशं वदन् प्रथमं तस्य विवाहमाह—नर्मदा खलु या उरगैर्दत्ता तया स पुरुकुत्सो रसातलं नीतः ॥ २ ॥

यथार्हान् अवधीत् इदं रसातलनयनादिकं स्मरतां जनानां सर्पादभयं स्यात् ॥ ३ ॥

देहकृत् पिता त्रसदस्युसुतोऽनरण्य इत्यर्थः ॥ ४ ॥

त्रयः शङ्कव इति दुःखहेतवो दोषा यस्य स त्रिशङ्कुः तदुक्तं हरिवंशे "पितुश्चापरितोषेण गुरोर्दोग्ध्रीवधेन च । अप्रोक्षितोपयोगाच्च त्रिविधस्ते व्यतिक्रमः" इति परिणीयमानविप्रकन्याहरणात् क्रुद्धस्य गुरोः पितुः शापात् कौशिकस्य विश्वामित्रस्य तेजसा ॥ ५ ॥

तेनैव विश्वामित्रेणैव स्तम्भितो नाऽधःपपात ॥ ६ ॥

पद्मिणोरिति विश्वामित्रो राजसूयदक्षिणाच्छलेन हरिश्चन्द्रस्य सर्वस्वमपजहार याजयामास तच्छ्रुत्वा कुपितो वसिष्ठः विश्वामित्रं त्वमाडिर्भवेति शशाप सोऽपि त्वं बको भवेति शशाप तत्तत्तयोर्युद्धमभूत् ॥ ७ ॥

स हरिश्चन्द्रः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मान्धातृवंशं तत्र पुरुकुत्सस्य हरिश्चन्द्रस्य चाख्यानं चाह, मान्धातुरिति सप्तमेन । योऽम्बरीषः प्रकीर्तितः पूर्वत्र स मान्धातुः पुत्रप्रवरः पुत्रेषु पुरुकुत्सादिषु मध्ये श्रेष्ठः स च पितामहेन युवनाश्वेन प्रवृतः पुत्रतया स्वीकृतः तत्सुतः तस्याम्बरीषस्य सुतः यौवनाश्वः तस्य यौवनाश्वस्य हारीतः पुत्रोऽभूत् इमे यौवनाश्वाम्बरीषहारीताः मान्धातृप्रवराः मान्धातृगोत्रस्य प्रवराः अवान्तरविशेषप्रवर्त्तकाः ॥ १ ॥

मान्धातुः पुत्रस्याम्बरीषस्य वंशमुक्त्वा अथ पुरुकुत्सस्य मान्धातुः पुत्रस्य वंशाद्वर्णयिष्यन् आदौ तद्विवाहमाह—नर्मदेति । नर्मदाख्या उरगभगिनी भ्रातृभिरुरगैः पुरुकुत्साय या दत्ता तया भुजगेन्द्रप्रयुक्तया पुरुकुत्सः रसातलं नीतः ॥ २ ॥

वध्यान् वधार्हान् अवधीत् स च पुरुकुत्सः इदमाख्यानं स्मरतां सर्पाज्ज्ञातविकवचनं सर्पेभ्योऽभयं भवतु इत्येवं नागात् लब्धवरोऽभूत् ॥ ३ ॥

पौरकुत्सः पुरुकुत्सपुत्रः त्रसदस्युः स च अनरण्यस्य देहकृत् पिता त्रसदस्योः पुत्रो ऽनरण्य इत्यर्थः ॥ ४ ॥

तस्य त्रिबन्धनस्य सत्यव्रतः पुत्रः स च सत्यव्रतः त्रिशङ्कुरिति विख्यातः त्रयः शङ्कव इव दुःखहेतवो दोषाः यस्याऽसौ त्रिशङ्कुः हरिवंशे वसिष्ठवाक्यं "पितुश्चापरितोषेण गुरोर्दोग्ध्रीवधेन च । अप्रोक्षितोपयोगाच्च त्रिविधस्ते व्यतिक्रमः" इति गुरोः शापादिति "येन भार्या हृता पूर्वं कृतोद्वाहा परस्य वै । बालयात्काभाच्च मोहाच्च प्रहर्षाच्चापलेन च ॥ जहार कन्यां कामात्सः कस्यचित्पुरवासिनः" इत्येवं कृतापराधः पितात्वेनमथोवाच श्वपाकैः वर्तयेति गुरोः शापात् चण्डालतां प्राप्त इत्यर्थः । तदनन्तरं तु सत्यव्रतः विश्वामित्रकलत्रादिरक्षां दुर्भिक्षे कृतवान् तदनन्तरं विश्वामित्रेण वरं वरयेत्युक्तः सशरीरो व्रजे स्वर्गमिति वरं वव्रे विश्वामित्रस्तं याजयित्वा सशरीरं दिवमारोपयामास देवैः सः स्वर्गात्पातितः पुनर्विश्वामित्रेण स्तम्भित इत्याह—कौशिकतेजसेत्यादिना ॥ ५ ॥ ६ ॥

त्रैशङ्कवः त्रिशङ्कुपुत्रः यो निमित्तं हेतुर्यस्य तत् यन्निमित्तं बहुवार्षिकं युद्धं पक्षिणोरन्योन्यशापवशात् आडीबकरूपयोरभूत् विश्वामित्रो राजसूयदक्षिणाच्छलेन हरिश्चन्द्रं सर्वस्वापहारेण यापयामास तच्छ्रुत्वा कुपितो वसिष्ठो विश्वामित्रं त्वमाडी भवेति शशाप विश्वामित्रोऽपि त्वं बको भवेति वसिष्ठं शशापेत्यन्यत्र प्रसिद्धम् ॥ ७ ॥

वरुणं पुत्रो मे जायतामित्येवं शरणं यातः ॥ ८ ॥

भाषाटीका ।

श्रीरुक्मिणीदेवीसमेतश्रीकृष्णाय नमः ।

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि– मांधाता का पुत्र श्रेष्ठ जो अंबरीष कथित हुआ उसको पितामह ने अर्थात् युवनाश्व ने गोद लेलिया

यदि वीरो महाराज ! तेनैव त्वां यजे इति ।
तथेति वरुणेनास्य पुत्रो जातस्तु रोहितः ॥ ९ ॥
जातः सुतो ह्यनेनाङ्ग ! मां यजस्वेति सोऽब्रवीत् ।
यदा पशुर्निर्दशः स्यादथ मेध्यो भवेदिति ॥ १० ॥
निर्दशे च स आगत्य यजस्वेत्याह सोऽब्रवीत् ।
दन्ताः पशोर्यज्जायेरन्नथ मेध्यो भवेदिति ॥ ११ ॥
जाता दन्ता यजस्वेति स प्रत्याहाथ सोऽब्रवीत् ।
यदा पतन्त्यस्य दन्ता अथ मेध्यो भवेदिति ॥ १२ ॥
पशोर्निपतिता दन्ता यजस्वेत्याह सोऽब्रवीत् ।
यदा पशोः पुनर्दन्ता जायन्तेऽथ पशुः शुचिः ॥ १३ ॥
पुनर्जातो यजस्वेति स प्रत्याहाऽथ सोऽब्रवीत् ।
सान्नाहिको यदा राजन् ! राजन्योऽथ पशुः शुचिः ॥ १४ ॥
इति पुत्रानुरागेण स्नेहयन्त्रितचेतसा ।
कालं वञ्चयता तन्तमुक्तो देवस्तमैक्षत ॥ १५ ॥
रोहितस्तदभिज्ञाय पितुः कर्म चिकीर्षितम् ।
प्राणप्रेप्सुर्धनुष्पाणिररण्यं प्रत्यपद्यत ॥ १६ ॥

भाषा टीका

और उस अंबरीष का पुत्र यौवनाश्व हुआ ॥ तिनका पुत्र हारीत भया ये तीनों मांधाता के गोत्र में श्रेष्ठ हुए ॥ १ ॥

नर्मदा को उसके भाई लोग सर्पों ने पुरुकुत्स को दीनी, तब वह इनको भुजगेन्द्रकी प्रेरणा से रसातल को लेगई ॥ २ ॥

विष्णु शक्ति को धारण करने वाला पुरुकुत्स भी वहां पर वधके योग्य गंधर्वों को मारते हुए, तब नागलोगों ने उनको वर दिया, कि—जो तुमारे इस नर्मदा के द्वारा आनयन [आगमन] आदि को स्मरण करेगा उसको सर्पों से भय नहीं होगा ॥ ३ ॥

उन पुरुकुत्स के पुत्र त्रसदस्यु हुए तिनके पुत्र अनरण्य हुए तिनके हर्यश्व तिनसे निबन्धन हुए ॥ ४ ॥

निबन्धन के सत्यव्रत हुए जिनका त्रिशंकु ऐसा नाम विख्यात हुआ। जो गुरू वशिष्ठजी के शाप से चंडालपने को प्राप्त हुआ परंच विश्वामित्र के तेज से शरीर सहित स्वर्ग को गया जो अब तक भी आकाश में देख पडता है स्वर्ग में जाने पर देवों ने बलात्कार (बरजोरी) से वहां ही वैसा ही स्तंभित कर दिया ॥ ५—६ ॥

त्रिशंकुका पुत्र हरिश्चन्द्र हुआ जिसके निमित्त विश्वामित्र और वशिष्ट का पक्षि रूप से बहुत वर्षों तक युद्ध हुआ ॥ ७ ॥

वह संतान के विना दुःखित होकर नारदजी के उपदेश से वरुण देवता के शरण गया और बोला, कि हे प्रभो ! मेरे पुत्र उत्पन्न होवै ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

यदि वीरः पुत्रो मे जायेत तर्हि तेनैव पुरुषपशुना त्वां यजे यजामीति भाषया तथेत्युक्तवता वरुणेन निमित्तेनास्य रोहितो नाम पुत्रो जातः ॥ ९ ॥

जाते पुत्रे स वरुणो जातः सुतो मामनेन यजस्वेत्यब्रवीत् यदा पशुर्निर्दशो निर्गतदशदिवसः स्यादित्यत्र स राजाऽब्रवीदित्यनुषङ्गः ॥ १०—१३ ॥

राजन् हे वरुण ! राजन्यः पशुर्यदा सान्नाहिकः कवचसम्बन्धार्हः सङ्ग्रामसमर्थः अथ तदा शुचिः ॥ १४ ॥

इत्येवं तं तं कालं वञ्चयता राज्ञोक्तः प्रार्थितो देवो वरुणस्तं तं कालं प्रत्यैक्षतेत्यर्थः ॥ १५ ॥

चिकीर्षितमात्मना पशुना वरुणयजनम् ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हे महाराज वरुण ! यदि वीरः मम पुत्रो जायेत तर्हि तेनैव पुरुषपशुना त्वां यजे यजानीति भाषाबन्धनेन शरणं गतः ततस्तथैवास्त्वित्युक्तवता वरुणेन निमित्तेनानेन हेतुनास्य हरिश्चन्द्रस्य पुत्रो जातः स च रोहित इति प्रसिद्धः ॥ ९ ॥

ततो वरुणस्तव पुत्रस्तु जातस्तेन पुत्रेण पुरुषपशुना मां यजस्वेत्यब्रवीत् एवमुक्तवन्तं वरुणं हरिश्चन्द्र आह—यदा पशुर्निर्दशः निर्गतदशादिनस्तदा मेध्यो भवेत् यागयोग्यो भवेदिति ॥ १० ॥

ततो वरुणस्तथैवास्त्वित्युक्त्वा निर्दशे दशस्वहस्सु व्यतीतेष्वागत्य यजस्वेत्याह—ततो हरिश्चन्द्रोऽस्य पुरुषस्य पशोर्दन्ता यदि जायेरन् तदा मेध्यो भवेदित्यब्रवीत् ॥ ११ ॥

ततो वरुणस्तथैवास्त्वित्युक्त्वा जातेषु दन्तेषु पुनरेत्य दन्ता अस्य जाताः यजस्वेत्युवाच, ततः स हरिश्चन्द्रो यदास्य पुरुषपशोर्दन्ताः पतन्ति तदाऽयं मेध्यो भवेदित्यब्रवीत् ॥ १२ ॥

ततस्तथैवेत्युक्त्वा वरुणःपतितदन्तं कुमारमवलोक्याऽस्य दन्तास्तु पतिताः मां यजस्वेत्याह—अथ हरिश्चन्द्रः पुनः पशोर्यदा दन्ता जायेरन् तदा पशुः शुचिर्मेध्यो भवेदित्याह ॥ १३ ॥

ततः पुनर्जातदन्तमवलोक्यास्यदन्तास्तु जाता यजस्वेत्याह वरुणः—ततः स हरिश्चन्द्रो हे राजन् वरुण ! अयं राजन्यः अत एव पुरुषपशुर्यदा सान्नाहिकः सान्नाहयोग्यः आयुधग्रहणयोग्यः युद्धयोग्य इति यावत् तदा शुचिर्मेध्यो भवेदिति ॥ १४ ॥

इति इत्थं पुत्रे अनुरागो यस्य पुत्रे यः स्नेहस्तेन यन्त्रितं वशीकृतं चेतो यस्यात एव तं तं निर्देशादिरूपं कालं वञ्चयता हरिश्चन्द्रेणोक्तो देवो वरुणस्तदस्य सन्नाहयोग्यत्वमैक्षत प्रत्यवेक्ष्यमाणो बभूव ॥ १५ ॥

एवं स्थिते तदा रोहितः पितुस्तच्चिकीर्षितमात्मपशुना वरुणयजनमभिज्ञाय प्राणप्रेप्सुर्जिजीविषुर्धनुः पाणौ यस्य तथाभूतोऽरण्यं जगाम ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एतदेव विवृणोति—यदीति । हे महाराज ! यदि वीरः पुत्रो जायेत तर्हि तेन पुत्रेण त्वां यजे पुरुषपशुना त्वां यक्ष्ये इति हरिश्चन्द्रेणोक्ते वरुणेनापि तथास्त्वित्युक्ते नाम्ना रोहितः पुत्रो जात इत्यन्वयः । "अथैनमुवाच वरुणं राजानमुपधाव पुत्रो मे जायतां तेन त्वां यजा इति तथेति स वरुणं राजानमुपससार पुत्रो मे जायतां तेन त्वायजा इति तथेति तस्य ह पुत्रो जज्ञे रोहितोनामा" इति ब्राह्मणं च इममेवार्थमनुवदति ॥ ९ ॥

अथ वरुण आगत्य हरिश्चन्द्रमवादीदित्याह—जात इति । अङ्ग ! ते सुतो जातोऽनेन पुत्रेण मां यजस्वेति । स हरिश्चन्द्रो वक्ष्यमाणमब्रवीदिति "तं होवाचाजनि वै ते पुत्रो यजस्व मानेनेति स होवाच यदा वै पशुर्निर्दशो भवत्यथ स मेध्यो भवति निर्दशोन्वस्त्वथ त्वा यजा इति ॥ १० ॥

तथेति इति निर्दशः दशाहातिक्रान्तः निर्दशो जाते "स ह निर्दश आस तं ह होवाच निर्दशोन्वभूद्यजस्व मानेनेतीति यद्यदा पशोर्दन्ता जायेरन् अथ तदा पशुः शुचिः स्यादनन्तरं त्वां यक्ष्य इत्यब्रवीत् हरिश्चन्द्रः स होवाचः यदा वै पशोर्दन्ता जायन्ते अथ स मेध्यो भवति दन्तास्त्वस्य जायन्तामथ त्वायजा इति तथेति' इति स वरुण एत्याह हरिश्चन्द्रं अस्य दन्ता जाता अथ मां यजस्वेति तस्य ह दन्ता जज्ञिरे तं होवाचाज्ञतवा अस्य दन्ता यजस्व मानेनेति अज्ञत अजायन्त यदास्य पुत्रस्य दन्ताः पतन्त्यथ स शुद्धो भवेदित्यब्रवीत् ॥ ११ ॥ १२॥

"स होवाच यदा वै पशोर्दन्ताः पद्यन्ते अथ स मेध्यो भवति दन्तान्वस्य पद्यन्तामथ त्वा निपतितश्चः अथ मां यजस्वेति वरुण आह तं होवाचापत्स्वतवा अस्य दन्ता यजस्वेति मानेनेतीति यदा पशोर्दन्ताः पुनर्जायन्ते अनन्तरं पशुः शुद्धः स्यादिति स हरिश्चन्द्रोऽब्रवीत्स होवाच यदा वै पशोर्दन्ताः॥१३॥

पुनर्जायन्ते थ स मेध्यो भवति दन्तान्वस्य पुनर्जायन्तामथ त्वा यजा इति तथेति तस्य दन्ताः पुनर्जज्ञिरे इति अस्य दन्ताः पुनर्जाताः अथ मां यजस्वेति स वरुणो हरिश्चन्द्रमेत्याह तं होवाचाज्ञतवा अस्य पुनर्दन्ता यजस्व मानेनेति"। यदा राजन्यः क्षत्रियः सान्नाहुकः सन्नाहयोग्यः शस्त्रास्त्रग्रहणयोग्यः कवचवान्वाथ राजपशुः शुचिरिति स हरिश्चन्द्रोऽब्रवीत् ॥ १४ ॥

स होवाच यदा वै क्षत्रियः सान्नाहुको भवत्यथ स मेध्यो भवति, सन्नाहं तु प्राप्नोथ त्वा यजा इति तथेति स ह सन्नाहं प्राप तं होवाच सन्नाहं तु प्राप्तो यजस्व मानेनेति" इति. ननु, हरिश्चन्द्रः किमर्थं कालमक्षिपदिति तत्राह—इतीति । स्नेहपाशबद्धचेतसा दशाहादिलक्षणं तं तं कालं वञ्चयता हरिश्चन्द्रेणोक्तो वरुणो देवः तमैक्षत प्रत्याह—चेत्यन्वयः । तथात्म यागकालमैक्षतेति वा ॥ १५ ॥

स तथेत्युक्त्वा पुत्रमामन्त्रयामास ततायं वै मह्यं त्वामददादहन्त त्वयाहमिमं यजा इति स ह नेत्युक्त्वा धनुरादायारण्यमुपातस्थौ स संवत्सरमरण्ये चचार इति ब्राह्मणप्रसिद्धं पितुश्चिकीर्षितं वरुणमुद्दिश्यात्मयजनं कर्तुमिष्टं तत्कर्माभिज्ञाय प्राणेप्सुरात्मजीवनेच्छुः रोहितो धनुरादाय वनं प्राप ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तथेति वरं दत्वा वरुणेन हेतुना ॥ ९ ॥

ततश्च स वरुणः जात इत्यादि अब्रवीत् ततश्च राजा पुत्रस्नेहात्तं वञ्चयन् यदेत्यादि अब्रवीत् निर्दशः निर्गतदशदिवसः स्यात् ॥ १०—१३ ॥

राजन् ! हे वरुण ! राजन्यः पशुः सान्नाहिकः कवचबन्धार्हः स्यात्तदा शुचिः ॥ १४ ॥

तं तं कालं वञ्चयता उक्तः प्रार्थितो वरुणस्तं तं कालं प्रतैक्षतेत्यन्वयः ॥ १५ ॥ १७ ॥

पितरं वरुणग्रस्तं श्रुत्वा जातमहोदरम्।
रोहितो ग्राममेयाय तमिन्द्रः प्रत्यषेधत ॥ १७ ॥
भूमेः पर्यटनं पुण्यं तीर्थक्षेत्रनिषेवणैः।
रोहितायादिशच्छक्रः सोऽप्यरण्ये वसत्समाम् ॥ १८ ॥
एवं द्वितीये तृतीये चतुर्थे पञ्चमे तथा।
अभ्येत्याभ्येत्य स्थविरो विप्रोभूत्वाऽऽह वृत्रहा ॥ १९ ॥
षष्ठं संवत्सरं तत्र चरित्वा रोहितः पुरीम्।
उपव्रजन्नजीगर्तादक्रीणान्मध्यमं सुतम् ॥ २० ॥
शुनःशेपं पशुं पित्रे प्रदाय समवन्दत।
ततः पुरुषमेधेन हरिश्चन्द्रो महायशाः ॥ २१ ॥
मुक्तोदरोऽयजद्देवान् वरुणादीन्महत्कथः।
विश्वामित्रोऽभवत्तस्मिन् होता चाध्वर्युरात्मवान् ॥ २२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

हे महाराज। यदि वीरः पुत्रः स्यात् तेनैव पुरुषपशुना त्वां यजे इति हरिश्चन्द्रेणोक्ते तथेति वरुण आह, तदनन्तरमस्य हरिश्चन्द्रस्य रोहितः पत्रो जातः ॥ ९ ॥

अङ्ग हे हरिश्चन्द्र! पुत्रो जातः अनेन मां यजस्वेति स वरुणो ऽब्रवीत् यदा पशुः निर्दशो निर्गतदशदिवसः स्यादथ तदा मेध्यो भवेदिति हरिश्चन्द्रो ऽब्रवीत् ॥ १०–१३ ॥

हे राजन् वरुण! सान्नाहिकः कवचसम्बन्धार्हः ॥ १४ ॥

तं तं कालं वञ्चयता स हरिश्चन्द्रेणोक्तो देवस्तं कालं प्रत्यैक्षत ॥ १५ ॥

रोहितः पितुश्चिकीर्षितं तत्कर्म पुत्रेण पशुना वरुणयजनरूपम् अभिज्ञाय अरण्यं प्रत्यपद्यत ॥ १६ ॥

भाषा टीका।

हे महाराज! यदि मेरे वीर पुत्र उत्पन्न होवे तौ मैं तुमारा उसीसे यजन करूं। तब वरुण ने भी कहा कि तथाऽस्तु तव इसके रोहित नाम वाला पुत्र उत्पन्न हुआ ॥ ९ ॥

तब वरुण देवता बोला, कि—हे हरिश्चन्द्र! पुत्र तौ उत्पन्न हुआ अब इससे मेरा यजन कर, तब हरिश्चन्द्र बोला, कि–जब पशु [पुत्र] निर्दश होजावै अर्थात् दश दिवस के ऊपर होजावै तव यजनके योग्य पवित्र होगा ॥ १० ॥

दश दिन होने पर देव आकार बोला, कि-अब यजन करो तव हरिश्चन्द्र बोला, कि—जब इस पशु के दंत उत्पन्न होजांयगे तव पवित्र होगा ॥ ११ ॥

दंत जामने पर देव आकार बोला, कि-दंत जामग से अब यजन कर, हरिश्चन्द्र बोला, कि–जव इसके दंत गिर जावें तव पवित्र होवै ॥ १२ ॥

दंत गिरने पर देव बोला, कि—दांतों का पतन हुआ अब यजन कर, तब हरिश्चन्द्र बोला, कि–जब पशु के फिर दंत जामें तव पशु शुचि होवै ॥ १३ ॥

फिर दंत जामने पर देव बोला, कि—दंत फिर जाम गये अब यजन कर तव फिर हरिश्चन्द्र बोला, कि–हे वरुण जब यह कवच पहिर ने के योग्य होजावैगा तव पशु शुचि होजावैगा ॥ १४ ॥

इस प्रकार स्नेह से बंधा हुआ चित्त जिसका ऐसा राजा हरिश्चन्द्र अपने पुत्रके अनुराग से तिस २ काल को वचाता जाता रहा और वरुणदेव भी उस २ काल की प्रतीक्षा करते रहे ॥ १५ ॥

रोहित ने अपने पिता के उस चिकीर्षित अभिप्राय को जानकर कि मैं घर रहूंगा तौ कभी न कभी वरुण की बलि में जाऊंगा इस प्रकार विचारकर अपने प्राण बचाने की इच्छा से धनुष हाथ में लेकर वन की शरण लीनी ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

ततश्च कुपितेन वरुणेन ग्रस्तमत एव जातं महदुदरं यस्य तं पितरं श्रुत्वा ॥ १७ ॥

समां वर्षम् ॥ १८ ॥

द्वितीये च वर्षे वृत्रहा अभ्येत्याभ्येत्य तथैव तं प्रतिषेधन् किञ्चित्किञ्चिदाह ॥ १९—२१ ॥

जमदग्निरभूद्ब्रह्मा वसिष्ठोऽयास्यसामगः ।
तस्मै तुष्टो ददाविन्द्रः शातकौम्भमयं रथम् ॥ २३ ॥
शुनःशेपस्य माहात्म्यमुपरिष्टात्प्रचक्ष्यते ।
सत्यसारां धृतिं दृष्ट्वा सभार्यस्य च भूपतेः ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वरुणेन मुक्तमुदरं यस्य सः महत्सु कथा यस्य सः आत्मवान् जमदग्निरध्वर्युरभूत् ॥ २२ ॥

अयास्यो मुनिः सामग उद्गाता अभूदित्यर्थः ॥ २३ ॥

उपरिष्टाद्विश्वामित्रसुताख्यानप्रसङ्गेन ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततः कुपितेन वरुणेन ग्रस्तं ग्रासस्वरूपमेवाह—जातमहोदरमिति । क्रुद्धेन वरुणेनोत्पादितमहोदरमित्यर्थः । एवम्भूतं पितरं वरुणग्रस्तं श्रुत्वा रोहितः ग्राममेयायागन्तुमुद्यतः तमिन्द्रः प्रत्यषेधत मागा इत्युक्तवान् ॥ १७ ॥

एवमुक्त्वा शक्रः पुण्यानां तीर्थानां क्षेत्राणां च निषेवणैः भूमेः पर्यटनं रोहितायादिशत् ग्रामम्मागाः किन्तु भूमण्डलपर्यटनेनोपायेनानृतदोषजं पितुर्महोदरं निवर्तयेत्याहेत्यर्थः । सोपि रोहितः शक्रेण यथोक्तं तथैवारण्ये पुण्यतीर्थक्षेत्रेषु कतिचिद्वत्सरान् अचरत् ॥ १८ ॥

एवं द्वितीये तृतीये चतुर्थे पञ्चमे चेत्येवं प्रतिवर्षं वृत्रहा इन्द्रः स्थविरो वृद्धो विप्रोभूत्वा अभ्येत्याभ्येत्य प्रत्यषेधत ग्रामं मागाः किन्तु भूमण्डलं पर्यटेत्युक्तवानित्यर्थः ॥ १९ ॥

ततो रोहितः षष्ठं संवत्सरं चरित्वा पुरीमुपगच्छन् अजीगर्ताद्भार्गववंशजात्तन्मध्यमसुतं शुनःशेपमक्रीणात् ॥ २० ॥

तत्र पित्रे हरिश्चन्द्राय प्रदाय स्वप्रतिनिधितया यागार्थं दत्त्वा समविन्दत ग्रामं प्राप्य सुखं स्थितो बभूव इत्यर्थः । ततो महायशाः महारथो हरिश्चन्द्रः पुरुषमेधेन क्रतुना ॥ २१ ॥

वरुणादीन् देवानयजत् मुक्तोदरः मुक्तमुपगतमुदरं महोदरं यस्य तथाभूतश्च बभूवेत्यर्थः । तत्र पुरुषमेधे विश्वामित्रो होता बभूव भृगुवंशज आत्मवान् ॥ २२ ॥

जमदग्निरध्वर्युरभवत् वसिष्ठो ब्रह्मा बभूव अगस्त्यो मुनिः सामगः उद्गाता बभूव एवं महर्षिभिः कारितेन पुरुषमेधनेनाऽऽराधित इन्द्रस्तुष्टस्तस्मै हरिश्चन्द्राय शातकुम्भमयं स्वर्णमयं रथमदात्, कथं शुनःशेफः पित्रा प्रचोदितोप्यात्मवधमन्वमन्यत ? कथन्तरां विश्वामित्रादयो ब्रह्मर्षयः ब्रह्मर्षिसुतं शुनःशेफमालब्धवन्तः ? इत्यपेक्षायामाह—शुनःशेफस्येति । उपरिष्टात् षोडशेऽध्याये शुनःशेफस्य माहात्म्यं स्वप्राणरक्षणाय विश्वामित्रशरणवरणं तेन संस्तुतानां वरुणादीनां देवतानामनुग्रहादनालम्भनमित्यादिकं सर्वं वक्ष्यते इत्यर्थः । ततः सभार्यस्य भूपतेः हरिश्चन्द्रस्य सत्यमनृतमेव सारो बलं यस्यां तां धृतिं दृष्ट्वा ॥ २३ ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तदनन्तरं पितरं वरुणग्रस्तमित्यारभ्य प्रदाय समवन्दतेत्य तेन अन्थेनाथ ऐक्ष्वाकं वरुणोजग्राह तस्योदरं जज्ञे इत्यादिब्राह्मणप्रसिद्धोर्थोऽनूद्यते एयाय आजगाम प्रशंसायां रूपप्प्रत्ययविधानात् प्रशस्तपुरुषरूपः विप्र इति यावत् इन्द्रो वृद्धविप्रोभूत्वा तं रोहितमेत्य पर्युवाच अपरीवर्जन इति सुत्राभिषेधवचनं कृतवान्नगन्तव्यमित्युक्तवानित्यर्थः ॥ १७ ॥

तत्र युक्तिमाह—भो रोहित ! नानाश्रान्ताय पुण्यतीर्थक्षेत्रनिषेवणेन नानाविधेन श्रान्तस्य जनस्य श्रीरैहिकामुष्मिकसम्पदस्तीति नृषद्वरः अनुक्तकारीगुर्वादिवचनमशृण्वन् स्तम्भविघ्नन् चर्मकारो वा जनः पापः इति शुश्रुमः तर्हि सञ्चरमाणस्य एकाकिनश्चोरादिभयं स्यादिति नाशङ्कनीयं चरतः पुंसः इन्द्रः एव सखा भवतीत्यतः चरैव त्वं भ्रमणं कुरुष्वेवं कश्चिद्ब्राह्मणोऽयमवोचत्कथञ्चरैवेति नृषद्वरोनुक्तकारी चर्मकृच्च प्रकीर्तित इति इन्द्रेणोपदिष्टो रोहितः किं चकारेति तत्राह सोपीति समा वत्सरान् ॥ १८ ॥

एवं कतिवत्सरान् अरण्ये चचारेति तत्राह—एवमिति । द्वितीयं सम्वत्सरमरण्ये चचारेति आदिब्राह्मणं चास्मिन्नर्थे मानं पुष्पिण्यौ जङ्घे चरतः पुष्पिणी गर्भिणी जङ्घयोर्धावरति अटति नैकआस्ते यथाभूष्णुर्बुभूषुः पुरुषः आत्मा सततं पर्यटनफलग्राहिः फलङ्गृह्णाति यथा किन्तत्फलमाप्नोतीति तत्राह शेरइति । प्रपथे महामार्गे तीर्थयात्राश्रमेण हता अस्य पुंसः सर्वे पाप्मानः शेरे शीर्णा भवन्तीति एतत्त्वमपि चरन् फलं लभस्वेत्यर्थः । चरैवेत्युक्तार्थं आसीनस्य निर्व्यापारस्य भगो भाग्यमप्यास्त आसीनं भवति समृद्धं न भवति तिष्ठत उत्थानं कुर्वतो भग ऊर्ध्वस्तिष्ठति उत्थानं करोति पुरुषच्छायेव निपद्यमानस्य निकृष्टं गच्छतो भगः शेते निद्रां करोति निकृष्टो भवतीत्यर्थः । चरतः पुण्येन यथा सञ्चरमाणस्य पुंस भगश्चरति चरति प्राप्नोति तमिति शेषः "भगो योन्यां भगो यत्ने यशोवीर्यार्कभूतिषु" इति" कलिः शयान इत्यादिना कारणगुणाः कार्यपरो योजनीयः तथाहि कलौ जातः शयानः तामसत्वेन शुभप्रवृत्तिशून्यो भवति द्वापरे जातः सञ्जिहानः संशयानः इदं वा अदो वेति तत्त्वं न निश्चिनोति सम्यग्भिषुणो दायादौ

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

द्वापरौ युगसंशयाविति त्रेतायां जात उत्तिष्ठन् धर्मार्थकामलक्षणकार्योद्योगी भवति, कृतयुगे जातः कृतंविहितं चरन् सम्पद्यते ज्ञानसम्पन्नो भवतीत्यतस्त्वं चरको भवेत्यर्थः। "युगेक्ष्यपातेपर्यन्ते कृतं क्लीबे हितेऽर्थवत्" इति भूमौ चरन् पर्यटन् मधुसुखं विन्दति वै अशनक्लेशोपि नास्तीत्याह—स्वादिष्टमुदुम्बरं फलविशेषं चरन् भक्षयन् भूमिपर्यटनं कुर्वतः इत्थं भावमाह-चरन्निति। अवगमननाड्यां स्वादुपुनःपुनः सेवावृद्धिजनकम् उदुम्बरम् अत्युत्तमं वरं वरणीयं सर्वगुणाभिरामं हरिंचरन् शरणं गच्छन् मत्वेति वा नित्यमटन्कोऽस्तीति तत्राह-सूर्यस्येति अश्वरत्नविरतमटन् न तन्द्रयते आलस्यं न करोति तस्य सूर्यस्य श्रेमणं अभ्याहतगमनशिक्षां पश्य। तथाप्येवमरण्ये चरतः जीवनक्षेमस्स्यादिति वृत्रहा रोहितम् अभिहितवानित्यन्वयः॥ १९॥

एवं शिक्षितस्तत्रारण्ये षष्ठं संवत्सरं चरित्वा पुरीमुपगच्छन् रोहितोऽजीगर्तान्मध्यमं सुतं शुनःशेपमक्रीणात् गवां शतं दत्वा स्वीकृतवान्॥ २०॥

स्वीकृत्य शुनःशेपाख्यं पशुं हरिश्चन्द्राय पित्रे प्रदाय पितरं समवन्दतेत्यन्वयः षष्ठं संवत्सरमरण्ये चचार सोऽजीगर्तं सौयवसिमृषिमशनयापरीतमरण्यमुपेयाय तस्य ह त्रयः पुत्रा आसुः शुनः पुच्छः शुनः शेपः शुनो लांगूल इति तं होवाच ऋषेऽहं ते शतं ददाम्यहमेषामेकेनात्मानं निष्क्रीणा इति स ज्येष्ठं पुत्रं निगृह्णात उवाच नन्विममिति नो एवेममिति कनिष्ठं माता तौह मध्यमे सम्पादयाञ्चक्रतुः शुनःशेपे तस्य ह्यतं दत्वा स तमादाय सोऽरण्याद्ग्राममेयाय स पितरमेत्योवाच तत हन्ताहमनेनात्मानं निष्क्रीणा इति स वरुणं राजानमुपससारानेन त्वा यजा इति तथेति भूयान्वै ब्राह्मणः क्षत्रियादिति वरुण उवाचेति ततः पुरुषपशुप्राप्तयनन्तरं महायशा हरिश्चन्द्रः पुरुषमेधेन पुरुषपशुहिंसालक्षणयज्ञेन॥२१॥

वरुणादीन् यजंस्ततः स राजा मुक्तोदरो जलोदररोगरहितोऽभवदित्यन्वयः। तस्मा एतं राजसूयं यज्ञक्रतुं प्रोवाच तमेतमभिषेचनीये पुरुषं पशुमालभे इति सोभिषेचनीय इति तादर्थ्ये सप्तमी वरुणमुद्दिश्येति आलभे आलम्भनम् उपक्रान्तवान् तस्य ह विश्वामित्रो होतासीज्जमदग्निरध्वर्युर्वसिष्ठो ब्रह्माऽयास्य उद्गातेति ब्राह्मणार्थत्वेनास्मिन् यज्ञे होत्रादीनाह विश्वामित्र इति॥ २२॥

*अयास्य एव सामगः अयास्यसामगः साम गायतीति सामग उद्गातेत्यर्थः। आत्मा परमात्मास्यास्तीति आत्मवान् तस्मै शुनःशेपाय॥ २३॥

उपरिष्टाच्चतुर्दशेऽध्याये भूपतेर्भार्यया सहितस्य सत्यसारं सज्जनहितकरं वाक्यं धृतिं लौकिकमार्गादचलनं दृष्ट्वा॥ २४॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

तादृशस्य चात्यन्तवैदिककर्मपरत्वं चेत् कथं चिद्ब्रह्म कैवल्यमेव स्यात्. ननु, भगवत्सम्बन्धं इत्याह—सत्यसारमित्यादि॥ २४—२७॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

समां वर्षम्॥ १८॥

एवं द्वितीयेपि वर्षे पुनः क्रमेणैवागतः तं वृत्रहा पुनः प्रत्यषेधत् तथैवाह॥ १९॥ २१॥

महत्सु कथा यस्य सः॥ २२॥

अयास्यो मुनिः सामग उद्गाताऽभूदित्यर्थः॥ २३॥

उपरिष्टात् विश्वामित्रसुताख्यानप्रसङ्गे॥ २४॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

कुपितेन वरुणेन ग्रस्तमत एव जातं महदुदरं यस्य तथाभूतं पितरं श्रुत्वा ग्राममेयाय गन्तुमुद्यतः तमिन्द्रः प्रत्यषेधत॥ १७॥

प्रतिषेधप्रकारमाह-भूमेरिति। समां संवत्सरम्॥ १८॥

एवं द्वितीयादिषु संवत्सरेषु वृत्रहा आह॥ १९-२१॥

वरुणेन मुक्तमुदरं यस्य महत्सु कथा यस्य स तथा॥२२—२३॥

उपरिष्टादग्रे दक्षिणाच्छलेनाऽपहृतसर्वस्वस्यापि सत्यसारां धृतिं वीक्ष्य॥ २४॥

भाषा टीका।

रोहित ने वन में सुना कि-हमारे पिता को वरुण ने कोपकर ग्रस लिया इसी से उदर की वृद्धि होगई है ऐसा सुन कर रोहित ग्राम को आने लगा तब इन्द्र ने आकर उसको रोक दिया॥ १७॥

और इन्द्र ने रोहित से कहा, कि—तीर्थ और क्षेत्रों की सेवा करते हुए भूमि के पर्यटन करने से बडा पुण्य है इतना सुनकर फिर रोहित एक वर्ष वन में रह गया, द्वितीय वर्ष लगने पर जब ग्राम में जाने की त्यारी करी तब फिर इन्द्रने आकर समुझाया॥ १८॥

इसी प्रकार तीसरे चौथे पांचमें वर्ष में वृद्ध ब्राह्मण का रूप लेकर वर्ष पूरे होने पर आय आय कर इन्द्र निषेध कर जाता रहा॥ १९॥

इस प्रकार रोहित छै(६) संवत्सर तक वन में विचर कर घर को आते समय में अजीगर्त्त से मध्यम (बीच का) पुत्र को मोल लिया॥ २०॥

उस पुत्र का नाम शुनःशेप रहा उसी को बलिका पशु बना कर पिता के भेटकर दंडवत करी, तब महायश वाले हरिश्चन्द्र ने पुरुषमेध योग से वरुणादि देवों का यजन किया और व्याधि से छूटा उस यज्ञ में बडी जिनकी कथा ऐसे विश्वामित्र जी होता अर्थात् (हवन करने वाले) हुए॥ २१-२२॥

(१) शुनिः।

विश्वामित्रो भृशं प्रीतो ददावविहताङ्कतिम् ।
मनः पृथिव्यां तामद्भिस्तेजसापोऽनिलेन तत् ॥ २५ ॥
खे वायुं धारयंस्तच्च भूतादौ तं महात्मनि ।
तस्मिन् ज्ञानकलां ध्यात्वा तयाऽज्ञानं विनिर्दहन् ॥ २६ ॥
हित्वा तां स्वेन भावेन निर्वाणसुखसंविदा ।
अनिर्देश्याऽप्रतर्क्येण तस्थौ विध्वस्तबन्धनः ॥ २७ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां नवमस्कन्धे हरिश्चन्द्रोपाख्यानं नाम
सप्तमोऽध्यायः ॥ ७ ॥

भाषा टीका ।

और बड़े मनस्वी जमदग्नि अध्वर्यु होते भये, वसिष्ठजी ब्रह्मा हुए, और अयास्य ऋषि सामगान वाले अर्थात् उद्गाता हुए, उस समय इन्द्र बड़े प्रसन्न हुए और प्रसन्न होकर उनको सुवर्ण मय रथ देते हुए ॥ २३ ॥

शुनःशेप का महात्म्य आगे कहेंगे। सत्यसार वाले भार्या सहित राजा हरिश्चन्द्र के धीरताको देखकर ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अविहताङ्कतिं ज्ञानम् तामेव गतिमाह—सार्द्धाभ्याम् । मनः-पृथिव्यां धारयन् ज्ञानकलां ध्यात्वा तयाऽज्ञानं विनिर्दहंस्तां च हित्वा मुक्ता मुक्तबन्धनस्तस्थावित्यन्वयः । मनोमूलो हि संसारः मनश्चान्नमयम् "अन्नमयं हि सौम्य ! मनः" इति श्रुतेः । अतोऽन्न-शब्दवाच्यायां पृथिव्यां मनोधारयन्नेकीकुर्वंस्तां पृथिवीमद्भि-रेकीकुर्वन्नपस्तेजसा तत्तेजोऽनिलेन ॥ २५ ॥

तच्च खे आकाशे तच्च भूतादावहङ्कारे तञ्च भूतादिमहङ्कारं महात्मनि महत्तत्त्वे तस्मिन्विषयाकारं व्यावर्त्य ज्ञानकलां ज्ञानांश-मात्मत्वेन ध्यात्वा तया ध्यानवृत्तिरूपयाऽऽत्मावरकमज्ञानं विनिर्दहन् ॥ २६ ॥

निर्वाणसुखसंविदा तां च हित्वा मुक्तबन्धः सन्ननिर्देश्ये-नाऽप्रतर्क्येण स्वेन भावेन स्वस्वरूपेण तस्थौ ॥ २७ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायां
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

विश्वामित्रो नितरां प्रीतस्तस्मै अवहितां गतिं सावधानां गति-मात्मज्ञानरूपां ददौ स्वात्मपरमात्मयाथात्म्यज्ञानयोगमुपदिश्य तन्निष्ठमचीकरदित्यर्थः । अत्र सभार्यस्य सत्यसारां धृतिं दृष्ट्वेत्यनेन ब्रह्मसुतालम्भनप्रवृत्तहरिश्चन्द्रविषयककोपेन तद्यज्ञे आर्त्विज्यं प्राप्य दक्षिणाच्छलेन सर्वस्वमपहृत्य पीड्यमानस्यापि तस्य सत्यानुवर्तित्वं दृष्ट्वा प्रीत इतीतिहासार्थोऽभिप्रेतः । अवहितां गतिमेवाह--मन इति, सार्द्धाभ्याम् । हरिश्चन्द्रो विश्वामित्रोपदिष्टज्ञानयोगनिष्ठाप्रभावेन मन आदीन् पूर्वपूर्वानुत्तरोत्तरेषु पृथिव्यादिषु धारयन् ध्यायन् तया ज्ञानकलया अज्ञानं विनिर्दहन् निःशेषं दहन् ॥ २५ ॥ २६ ॥

तां ज्ञानकलां हित्वा निर्वाणसुखसंविदा अनिर्देश्याप्रतर्क्येण स्वेन भावेन ध्वस्तबन्धनस्तस्थावित्यन्वयः । मनःपृथिव्यामित्यादेरयमर्थः । "अन्नमयं हि सोम्य!मनः" इति प्रकारेण मनसोऽन्नशब्दवाच्यपृथिव्या-प्यायितस्यैव व्यापारक्षमत्वान्मनोव्यापारः पृथिव्यायत्त इति मनोनि-यमनार्थं पृथिव्यां तत्संश्लिष्टमनुसन्दधे अथाप्ययक्रमानुसन्धानमाह तामिति । तां पृथिवीमद्भिः सह संश्लिष्टामापस्तेजसा तत्तेजोऽनिलेन वायुना तञ्च खे आकाशे संश्लिष्टं तच्च खं भूतादौ तामसाहङ्कारे तमह-ङ्कारं महात्मनि महत्तत्त्वस्यात्मनि तद्व्यापके प्रधाने कार्यं हि कारण-त्वव्याप्यं महत्तत्त्वद्वारा तत्कारणे लयमनुसन्दधान इत्यर्थः । तस्मिन् प्रधाने स्थितां ज्ञानकलां ज्ञानशब्दवाच्यस्य जीवस्य कलां विद्यां ध्यात्वा उपासनात्मकविद्याविशिष्टं प्रत्यगात्मानमनुसन्धायेत्यर्थः । तया विद्यया अज्ञानं देहात्माभिमानस्वतन्त्रात्माभिमानरूपं विनिर्द-हन् अपनयन् तां हित्वा उपासनरूपकलां हित्वा स्मृतिसन्ततिरूपो-पासनविशिष्टवेषस्य स्वाभाविकत्वाभावादुपायभूतकलाविशिष्टत्वं न स्वरूपान्तर्भूतमिति मत्वेत्यर्थः । ध्वस्तं पुण्यपापात्मकं बन्धनं यस्मात्तथाभूतः निर्वाणसुखसंविदा निर्दुःखसुखरूपज्ञानात्मनेना-निर्देश्येन दृष्टवस्तुसजातीयतया निर्देष्टुमशक्येनाप्रतर्क्येण देवोयं मनुष्योयमिति तर्कितुमशक्येनानेन पदद्वयेन प्राकृतनामरूपाभ्या-

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

अनिर्देश्यत्वमुक्तम् स्वेन भावेन भावशब्दस्तद्भुत्परः अपहतपाप्मत्वादिस्वभावविशिष्टेन स्वरूपेणेत्यर्थः । तस्थौ मुक्तो बभूव ॥ २७ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिकायाम्
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अविहतां अप्रतिषिद्धां गतिं ज्ञानलक्षणां विद्यां भार्यायाः पतद्वचमप्यस्तीति प्रकाशनाय सभार्यस्येत्युक्तम् उपासनाकाले मन आदितत्त्वाना जडानां स्वस्वकारणे विलयस्तदभिमानिदेवतानां भिन्नानां भिन्नेषु प्रवेशलक्षणो विलयः स्वरूपाणां स्वस्वरूपैक्येकीभावलक्षणश्चिन्तनीय इत्यतस्तं प्रकारमाह–मनः पृथिव्यामिति "अन्नमयं हि सौम्य! मनः आपोमयः प्राणस्तेजोमयी वाक्"इति श्रुतेः अन्नं पृथिवीत्यतः पार्थिवमनः पृथिव्यां विलीयतेति चतनं मनो धारयत्तां पृथिवीमद्भिरप्सु अम्भस्तेजसा संहियते तत्तेजोऽनिलेन ग्रस्यते तं वायुं खे आकाशे लीनं तच्च खं शब्दादावहङ्कारे तमहङ्कारं महात्मनि महत्तत्त्वे तदभिमानिनं तदभिमानिन्यात्मनि चतुर्मुखे ब्रह्माणि प्रविष्टम् ॥ २५ ॥

तस्मिन्महत्तत्त्वे ज्ञानकलां बुद्धितत्त्वं लीयते तदभिमानिनी सरस्वती तत्सायुज्येन स्थीयते इति ध्यात्वा तया बुद्धिकलया ज्ञानस्वरूपचैतन्यं निर्दहन् ॥ २६ ॥

तामबुद्धिमस्वरूपाविषयां हित्वा विध्वस्तं बन्धनं येन स तथा हरिश्चन्द्रः स्वभावेन स्वमहिम्ना निर्वाणे शरीररहिते सुखसंविदौ यस्य स तथा तेन सच्चिदानन्देन अनिर्देश्यं चाप्रतर्क्यं च तत्तथा तेन ब्रह्मणा सह तस्थौ "सहब्रह्मणा विपश्चितेति" इति श्रुतिः "आत्मन आकाशस्सम्भूतः" इति च श्रुतेः । शब्दादौ शब्दकारणे महति आत्मनि हरौ ज्ञानकलां ज्ञानलक्षणा कामधेनुं ज्ञानपूर्णां इति ध्यात्वा तया तया ध्यातया अज्ञानं तन्निमित्तसंसारं भस्मीकुर्वन् तां संसृतिं हित्वा परित्यज्य निर्वाणसुखसंविदा अशरीरानन्दज्ञानलक्षणेन माहशैरानिर्देश्याप्रतर्क्येण स्वेन स्वभावेन स्वरूपभूतैश्वर्येण तस्थाविति वा ॥ २७ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

गतिं ज्ञानम् ॥ २५ ॥

गतिमेवाह–मन इति । "अन्नमयं हि सौम्य ! मनः" इति श्रुतेः । मनसो ऽन्नवर्तित्वादन्नशब्दवाच्यायां पृथिव्यां धारयन् तां पृथिवीम् अद्भिरप्सु धारयन् ता अपस्तेजसा तेजसि तत्तेजः अनिलेन अनिले तं वायुं खे तच्च खं भूतादावहङ्कारे तं चाहङ्कारं महात्मनि महत्तत्त्वे तस्मिंस्तच्च महान्तं ज्ञानकलायां विद्यायां ध्यात्वा तयैव विद्यया अज्ञानमविद्यां विनिर्दहन् तां विद्यां च हित्वा स्वेन भावेन स्वस्वरूपेण तस्थौ कीदृशेन निर्वाणसुखस्य सम्पच्च तेन ॥ २६ ॥ २७ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
नवमे सप्तमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अविहतां गतिमात्मविद्यां ददौ तया स मुक्तो ऽभूदित्याह–मन इति सार्द्धाभ्याम् । "अन्नमयं हि सौम्य ! मनः" इति श्रुतेः । पृथिवीविकारभूताऽन्नभोजने मनोऽतिचपलं भवति अतः मनसोऽन्नमयत्वं तच्चापल्यविघातार्थं पृथिव्यां मनो धारयन् मनश्चापल्यसंयुतं अन्नमयं देहं पृथिव्यां कारणभूतायामभिन्नतया ध्यायन्नित्यर्थः तामद्भिरेकीकुर्वन् अपस्तेजसा तत्तेजोऽनिलेन ॥ २५ ॥

तं च खे तच्च भूतादावहङ्कारे तं च महात्मनि महतीति वक्तव्ये आत्मशब्दग्रहणं महान्तं तस्य आत्मनि कारणे प्रधाने इति द्योतयति ज्ञानकला बुद्धिः सा जडरूपाऽपि ज्ञानस्य ज्ञानस्वरूपस्य जीवस्य कलया ज्ञातृस्वरूपया अन्वितया ज्ञानकलेत्युच्यते तां ध्यात्वा ध्यातृध्येयविभागेन स्वप्रकाशस्वरूपात् जीवात्मनः सकाशात्पृथक् चिन्तयित्वा तयैव करणभूतया अज्ञानम् अनात्मसु देहेन्द्रियमनोबुद्ध्यादिषु आत्मभ्रान्तिं विनिर्दहन् ॥ २६ ॥

तामपि बुद्धिम् अनात्मभूतां तस्मिन् महात्मनि हित्वा निर्वाणसुखसंविदा निरुपद्रवसुखात्मकज्ञानेन भावेन स्वस्वरूपेण निर्देश्यं कार्यरूपं प्रधानं तद्भिन्नेनाऽप्रतर्क्यं कारणरूपं प्रधानं तद्भिन्नेन कार्यकारणप्रकृतिविलक्षणेनेत्यर्थः । मुक्तबन्धनस्तस्थौ मुक्तोऽभूदित्यर्थः ॥ २७ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
सप्तमाऽध्यायार्थप्रकाशः ॥ ७ ॥

भाषाटीका ।

विश्वामित्रजी बहुत ही प्रसन्न हुए, और अविघात वाली गती को देते हुए ॥ तदनंतर मनको पृथिवी में लगाया पृथिवी को जलोंके साथ एकीभाव किया, जलोंको तेजके साथ मिलाया, तेजको पवन के साथ, मिलाया ॥ २५ ॥

भाषा टीका।

पवनको आकाशमें, आकाश को तामस अहंकारमें उसको महतत्त्व में उसको प्रधान में भावना करके उसी महत्तत्व मे ज्ञानकी कालका ध्यानकरता हुआ उस ध्यानकी वृत्तिसे अज्ञान को दूर करता भया ॥ २६ ॥

फिर उस ध्यानकी वृत्तिको मोक्षसुखरूप निज ज्ञान से, छोडकर मुक्तवन्धन होकर अनिर्देश्य (जो जनाने में न आवे) तथा अप्रतर्क्य (जो तर्क करने में न आवे) ऐसे अपने स्वरूपसे स्थित होता भया ॥ २७ ॥

इति श्रीमद्भागवत नवम स्कन्ध में सप्तम अध्याय की, श्रीवृन्दावनस्थ पं भागवताचार्यकृत भाषाटीका समाप्ता ॥ ७ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे सप्तमोऽध्यायः ॥ ७ ॥

॥ अष्टमोऽध्यायः ॥

श्रीशुक उवाच ।

हरितो रोहितसुतश्चम्पस्तस्माद्विनिर्मिता ।
चम्पापुरी सुदेवोऽतो विजयो यस्य चाऽऽत्मजः ॥ १ ॥
(१) भरुकस्तत्सुतस्तस्माद्वृकस्तस्यापि बाहुकः ।
सोऽरिभिर्हृतभूराजा सभार्यो वनमाविशत् ॥ २ ॥
वृद्धं तं पञ्चतां प्राप्तं महिष्यनुमरिष्यती ।
और्वेण जानताऽऽत्मानं प्रजावन्तं निवारिता ॥ ३ ॥
आज्ञायास्यै सपत्नीभिर्गरो दत्तोऽन्धसा सह ।
सह तेनैव सञ्जातः सगराख्यो महायशाः ॥ ४ ॥
सगरश्चक्रवर्त्यासीत्सागरो यत्सुतैः कृतः ।
यस्तालजङ्घान्यवनान् शकान् हैहयबर्बरान् ॥ ५ ॥
नावधीद्गुरुवाक्येन चक्रे विकृतवेषिणः ।
मुण्डान् श्मश्रुधरान्कांश्चिन्मुक्तकेशार्द्धमुण्डितान् ॥ ६ ॥
अनन्तर्वाससः कांश्चिदबहिर्वाससोपरान् ।
सोऽश्वमेधैरयजत सर्ववेदसुरात्मकम् ॥ ७ ॥
और्वोपदिष्टयोगेन हरिमात्मानमीश्वरम् ।
तस्योत्सृष्टं पशुं यज्ञे जहाराश्वं पुरन्दरः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अष्टमे रोहितस्योक्तो वंशो यत्राभवन्नृपः ।
सागरः कपिलाक्षेपान्निर्दग्धा यस्य सूनवः ॥

चम्पस्तस्मादभूत् येन चम्पापुरी निर्मिता अतश्चम्पात्सुदेवः ॥१॥ हृता भूर्यस्य ॥ २ ॥ और्वेण ऋषिणा आत्मानं देहम् प्रजावन्तं सगर्भम् ॥ ३ ॥ गरो विषम् तेन गरेण सहैव जातः ॥ ४—५ ॥ गुरुवाक्येनौर्ववचनेन कांश्चिद्हत्वैव विकृतवेषिणश्चक्रे तदेवाऽऽह–मुण्डानिति, मुक्तकेशानर्द्धमुण्डितांश्च ॥ ६—७ ॥ और्वेणोपदिष्टो योग उपायस्तेन ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

रोहितस्य सुतो हरितः तस्माच्चम्पो, जज्ञे इति शेषः । तं विशिनष्टि–चम्पापुरी विनिर्मितेति चम्पेनेति शेषः। अथ चम्पात्सुदेवो जज्ञे तस्य सुतं वदन् तं विशिनष्टि–यस्य सुदेवस्यात्मजो विजयः॥ १ ॥ तस्य विजयस्य सुतो भरुकः तस्माद्भरुकाद्वृकः तस्यापि वृकस्यापि बाहुकः पुत्रस्तस्य वृत्तान्तमाह–स बाहुकः शत्रुभिर्हृतभूर्हृतराज्यश्च सभार्यो वनं प्राविशत् ॥ २ ॥

(१) भेरुक इति वीर० ।

[२५]

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्रैव वृद्धं स्थविरं पञ्चतां मरणं प्राप्तं बाहुकं तत्पत्नी अनुमरिष्यन्ती अनुमरणं कर्तुमुद्युक्ता सती आत्मानं स्वदेहं प्रजावन्तं सगर्भं जानता और्वेण ऋषिणा निवारिता ॥ ३ ॥

ततस्तामन्तर्वत्नीमाज्ञाय प्रत्यभिज्ञाय अस्यै सपत्नीभिर्गरो विषमन्धसा अन्नेन सह दत्तः ततस्तेन गरेण सहैव सञ्जातः सगराख्यः पुत्रः गरेण सह जातत्वात्सगर इति प्रसिद्धः स च महायशो यस्य तथाभूतः ॥ ४ ॥

चक्रवर्ती सप्तद्वीपाधिपतिरासीत् तं विशिंषन् तद्वृत्तान्तमाह—यस्य सगरस्य सुतैः सागरः समुद्रः कृतः करणमत्रखननं ननु निर्माणं प्रियव्रतरथचरणनेमिकृतत्वस्य पञ्चमे कथितत्वात् सागरैः कृतत्वात् समुद्रोऽपि सागराख्यो बभूव किञ्च यः सगरस्तालजङ्घादिसंज्ञान् यवनान् म्लेच्छान् गुरुवाक्येन गुरोरौर्वस्य वचनगौरवेणेत्यर्थः। नावधीत् न हतवान् किन्तु विकृतवेषिणः विरूपिणः चक्रे,तदेवाह–मुण्डानिति। कांश्चिन्मुण्डान् कांश्चित् श्मश्रुमात्रधरान् कांश्चिच्च मुक्तकेशान् अर्धमुण्डितान् ॥ ५ ॥ ६ ॥

कांश्चिच्च न विद्यतेऽन्तर्वासोऽन्तरीयवस्त्रं येषां तान् कांश्चिन्न विद्यते बहिर्वासो बहिःपरिधानीयं वासो येषां तथाभूतांश्चक्रे इति पूर्वेणान्वयः ॥ ७ ॥

किञ्च स सगरः और्वेणोपदिष्टो योग उपायस्तेनाश्वमेधैः सर्ववेदात्मकं सर्वदेवतात्मकं सर्वान्तरात्मानं सर्वस्य नियन्तारञ्च हरिमयजत आराधितवान् तस्य सगरस्य यज्ञे शततमे उत्सृष्टं पशुमश्वमिन्द्रो जहार हृतवान् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तस्माद्धरितात्चम्पः । तस्माच्चम्पान्निर्मिता पुरी चम्पा नाम अतश्चम्पात् यस्य सुदेवस्य ॥ १ ॥

स बाहुकः ॥ २ ॥

अनुमरिष्यती अनुमरणं कर्तुमिच्छन्ती प्रजावन्तं पुत्रवन्तं तस्या आत्मानं देहं जानता इयमन्तर्वत्नीति विदुषेत्यर्थः ॥ ३ ॥

सहसा हन्तीति साहसो गरोऽत्र गर्भे पुत्रमाज्ञाय सपत्नीभिरस्यै बाहुकपत्न्यै दत्त इत्यन्वयः । तेन गरेण विषेण सह वर्तत इति सगरः ॥ ४ ॥

"यस्य स्यादाज्ञया पृथ्वी चक्रवर्ती स ईर्यते" इति सगरपुत्राः सागरास्तैः कृतत्वात्सागरः समुद्रः तालजङ्घादयो द्वीपान्तरवासिनो निर्देश्याः ॥ ५ ॥

पामरान् नावधीरिति गुरोर्वाक्येन उत्सृष्टं गन्त्रयिरवेति शेषः उपाकृतमित्यर्थः ॥ ६ ॥ ७ ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

१—४ ॥

सगर इति सार्द्धयुग्मकम् ॥ ५ ॥

अवधीदित्यत्र नावधीदिति पाठस्तु स्वामिसम्मतः ॥ ६ ॥

कांश्चिदहन्नवेति व्याख्यानात् । नच श्रीपराशरस्य तथाहि तद्वधं प्रावकाश्च हैहयं जघानेत्यादि गुरुवाक्येन वसिष्ठवचसेत्येव विष्णुपुराणमतम् ॥ ७—९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अष्टमे सगरः सम्राट् तत्पुत्राः कपिलागसा ।
दग्धास्तत्तु प्रमाणाश्वमंशुमानानयत् पुरीम् ॥

विनिर्मिता चम्पापुरी येनेति शेषः अतश्चम्पात्सुदेवः ॥ १ ॥ २ ॥

और्वेण ऋषिणा आत्मानं महिष्या देहं प्रजावन्तं सगर्भम् ॥ ३ ॥

अन्धसा अन्नेन सह ॥ ४ ॥

तालजंघाद्या जातिविशेषाः ॥ ५ ॥

गुरोरौर्वस्य वाक्येन विकृतवेषिणः पवाह मुण्डनिस्यादि ॥ ६—८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

रोहितवंशे उत्पन्नस्य सगरस्य वृत्तान्तं तस्य पुत्राणां कृतकपिलापराधानां नाशं पौत्रस्यांशुमतो लब्धकपिलप्रसादत्वं च वर्णयति–हरित इत्यष्टमेन । तस्माद्धरिताच्च यः येन चंपापुरी विनिर्मिता ॥ १ ॥

हृता भूर्यस्य स तथा ॥ २ ॥

पञ्चतां मरणं प्राप्तं तन्महिषी अनुमरिष्यन्ती अनुमरणं कर्तुमुद्यता तदा आत्मानं तद्देहं प्रजावन्तं सगर्भं जानता और्वेण निवारिता ॥ ३ ॥

अन्धसा अन्नेन सह गरो विषं दत्तः तेनैव गरेण सहजातः ॥ ४ ॥ ५ ॥

गुरुवाक्येन और्ववाक्येन ॥ ६ ॥ ७ ॥

और्वोपदिष्टेन योगेन उपायेन ॥ ८ ॥ ९ ॥

भाषा टीका ।

श्रीरुक्मिणीदेवीसमेतश्रीदेवकीनन्दनाय नमः ।

॥ श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि–रोहित के पुत्र हरित हुए तिनके चंप हुए जिनने चंपा पुरी बसाई चंप से सुदेव हुए तिनके विजय पुत्र हुए ॥ १ ॥

विजय के भरुक, तिनके वृक, तिनके बाहुक, जब शत्रुओं ने भूमि छुडाली तब भार्या सहित राजा बाहुक वन में प्रवेश करते हुए ॥ २ ॥

राजा वृद्ध होकर पंचता (देहके अन्त) को प्राप्त हुए

सुमत्यास्तनया दृप्ताः पितुरादेशकारिणः ।
हयमन्वेषमाणास्ते समन्तान्न्यखनन्महीम् ॥ ९ ॥
प्रागुदीच्यां दिशि हयं ददृशुः कपिलान्तिके ।
एष वाजिहरश्चौर आस्ते मीलितलोचनः ॥ १० ॥
हन्यतां हन्यतां पाप इति षष्टिसहस्रिणः ।
उदायुधा अभिययुरुन्मिमेष तदा मुनिः ॥ ११ ॥
स्वशरीराग्निना तावन्महेन्द्रहृतचेतसः ।
महद्व्यतिक्रमहता भस्मसादभवन् क्षणात् ॥ १२ ॥
न साधु वादो मुनिकोपभर्जिता नृपेन्द्रपुत्रा इति सत्त्वधामनि ।
कथं तमो रोषमयं विभाव्यते जगत्पवित्रात्मनि खे रजो भुवः ॥ १३ ॥
यस्येरिता साङ्ख्यमयी दृढेह नौर्यया मुमुक्षुस्तरते दुरत्ययम् ।
भवार्णवं मृत्युपथं विपश्चितः परात्मभूतस्य कथं पृथङ्मतिः ॥ १४ ॥
योऽसमञ्जस इत्युक्तः स केशिन्या नृपात्मजः ।
तस्य पुत्रोंऽशुमान्नाम पितामहहिते रतः ॥ १५ ॥
असमञ्जस आत्मानं दर्शयन्नसमञ्जसम् ।
जातिस्मरः पुरा सङ्गाद्योगी योगाद्विचालितः ॥ १६ ॥

भाषा टीका।

उनके पीछे रानी भी मरने लगी तव औवं ऋषि नें रानी को गर्भवती जानकर अनुमरण से वर्ज दिया ॥ ३ ॥

और ऋषि यह भी जानगये कि–इसकी सपत्नियों ने इस रानी को गर (जहर) दिया है सो भी अन्न के साथ दिया है तब तौ उस रानी के जो बालक उत्पन्न हुआ वह भी गर (विष) सहित ही उत्पन्न हुआ इसी से उस महा यशस्वी का नाम सगर हुआ ॥ ४ ॥

सगर महाराज चक्रवर्ती हुए जिनके पुत्रों ने सागर को खनडाला और जिन सगर ने तालजंघ, यवन, शश, हैहय, और बर्बरों को ॥ ५ ॥

गुरू जी अर्थात् और्व ऋषि के वाक्य से नहीं मारा किन्तु उनका धिक्कृत वेष करदिया, किसी २ का मूड तौ मूड दिया और डाढी रहने दी कितने एक लोगों के केश छोडदिये किसी २ को अर्द्धमुंडित करादिये ॥ ६ ॥

और कोई लोगों को विना भीतर के वस्त्र वाले कर-दिये फिर उन सगर ने अश्वमेध यागों से सर्व वेदात्मक और सुरात्मक देसे ॥ ७ ॥

तथा अपने आत्मा और नियन्ता ऐसे भी हरि का और्व ऋषि के उपदेश किये हुए योग से यजन किया । परञ्च उस समय पर उनके जो यज्ञ में पशु (घोडा) छोडा उस घोडा को इन्द्र ने चुरा लिया ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्य द्वे भार्ये सुमतिः केशिनी च तत्र सुमत्याः पुत्राणां प्रभावं मृत्युं चाऽऽह—सुमत्या इति षड्भिः ॥ ९—१० ॥

एष वाजिहर इति ब्रुवन्तोऽभिययुः षष्टिसहस्राणि परि-च्छेदकतया सन्ति येषाम् उन्मिमेष लोचनोन्मीलनं चकार ॥ ११ ॥ १२ ॥

केचित्तु कपिलस्य कोपाग्निना दग्धा इति वर्णयन्ति, तान्निराकरोति । नेति । कुत इत्यत आह–सत्त्वधामनि शुद्धसत्त्व-मूर्तौ जगतः पवित्रः शुद्धिकर आत्मा यस्य तस्मिन् कथं विभाव्यते सम्भाव्यते असम्भावनायां दृष्टान्तः भुवो रजः खे कथं सम्भाव्यते इति ॥ १३ ॥

किञ्च यस्य येनेरिता प्रवर्तिता तस्य विपश्चितः सर्व-ज्ञस्य कथं पृथङ्मतिररिमित्रादिभेददृष्टिः ॥ १४ ॥

यदेवं सुमत्याः पुत्रेषु मृतेषु केशिन्याः पौत्रेणाश्वः

श्रीधरस्वामिकृतभावार्थदीपिका ।

समानीतः पितृव्योद्धरणप्रयत्नश्च कृत इति दर्शयितुमाह— योऽसमञ्जस इत्युक्तः केवलमज्ञैर्वस्तुतस्तु समञ्जस एव स तु केशिन्याः सुतः क्षेत्रजत्वमिव प्रतीतं धारयति तस्यैव नृपस्यात्मनो देहाज्जातः ॥ १५ ॥

तस्य कथामाह—चतुर्भिः । असमञ्जसः पुरा पूर्वजन्मनि योगी सन् सङ्गाद्धेतोर्योगाद्विचालितोऽत इदानीं जातिस्मरः सन् सङ्गपरिहाराय जनमुद्वेजयन् लोके गर्हितं ज्ञातीनां च विप्रियं कर्माचरन् क्रीडतो बालान्सरय्वां प्रास्यत्प्राक्षिपदिति द्वयोरन्वयः ॥ १६ ॥ १७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सगरस्य द्वे भार्ये सुमतिः केशिनी च तत्र सुमत्याः पुत्राणां षष्टिसहस्रसंख्यानां प्रभावं मृत्युञ्चाह—सुमत्या इति षड्भिः । सुमत्यास्तनया दृप्ता बलेन गर्विताः ते च पितुराज्ञाकारिणो यज्ञियमश्वमन्वेषमाणाः समन्ततो महीं न्यखनन् ॥ ९ ॥

एवं खनन्तः प्रागुदीच्याम् ऐशान्यां दिशि, रसातलस्थस्य कपिलस्यान्तिके इन्द्रेण स्थापितमिति शेषः चरतं हयमश्वं ददृशुः ततो ऽयमेवास्य हर्ता चोरः सन्नपि मीलिते लोचने यस्य तादृश आस्ते ॥ १० ॥

अतोऽयं पापात्मा हन्यतां हन्यतामित्येवं वदन्तः षष्टिसहस्रिणः सगरात्मजा उद्यतायुधाः सन्तो ऽभिमुखमाययुः तदा मुनिः कपिल उन्मिमेष लोचनोन्मीलनं चकार ॥ ११ ॥

महेन्द्रेण हृतं चेतो येषां ते महति कपिले व्यतिक्रमेणापराधेन हतांश्चातः स्वशरीरेभ्य एवोत्पन्नेनाग्निना क्षणाद्भस्मसादभवन् भस्मीभूता बभूवुः ॥ १२ ॥

केचित्तु कपिलस्य कोपाग्निना दग्धा इति वर्णयन्ति; तान्निराकरोति—नेति द्वाभ्याम् । नृपेन्द्रस्य सगरस्य पुत्राः मुनेः कपिलस्य कोपाग्निना भर्जिता दग्धा इति न साधुवादः अपि तु स्वापराधात्स्वतः इत्येव वादः साधुरित्यभिप्रायः, कुतः ? इत्यत आह सत्त्वधामनि केवलशुद्धसत्त्वाश्रये जगतः पवित्रः शुद्धिकर आत्मा देहो यस्य तस्मिन् कपिले रोषात्मकं तमः कथं विभाव्यते सम्भाव्यते ? असम्भावनायां दृष्टान्तः, रजः, भुव इति शेषः । भुवः सम्बन्धि रजः खे आकाशे यथा न सम्भाव्यते तद्वत्; नहि रजः आश्रयं खमपितु पादाहत्यादिवशादुत्थितं सत् खमिवाभाति तथा सागराणामपराध एव मुनिस्थतया प्रतीतः नतु तस्मिन् दोषस्य प्रसक्तिरिति दृष्टान्ताभिप्रायः ॥ १३ ॥

किञ्च यस्य येन कपिलेनेह लोके ईरिता प्रवर्तिता सांख्यात्मिका नौर्नौका साङ्ख्यस्य भवार्णवतारणोपायत्वान्नौकात्वेन निरूपणं यस्याऽस्यत इति पाठान्तरं तदा यस्याऽऽस्यतो मुखात्प्रादुर्भूता सांख्यात्मिका दृढा नौरित्यर्थः । नावं विशिनष्टि, यया नावा मुमुक्षवः संसारबन्धान्मोक्तुमिच्छवो जनाः दुरतिक्रमणीयं मृत्योः सकाशाद्भयं यस्मिन् तं भवार्णवं तरन्ति तस्यैवम्भूतस्य विपश्चितः सर्वज्ञस्य परात्मनः परानुग्रहैकमनसः परमात्मभूतस्य वा कथं पृथक् मतिः शत्रुमित्रादिर्बुद्धिर्विभाव्यते इत्यनुषङ्गः ॥ १४ ॥

तदेवं सुमत्याः पुत्रेषु मृतेषु केशिन्याः पौत्रेणाश्वः समानीतः पितृणामुद्धरणोद्योगश्च कृत इति दर्शयितुमाह—य इत्यादिना यावदध्यायसमाप्ति । योऽसमञ्जस इत्युक्तः केवलमज्ञैः वस्तुतस्तु समञ्जसः, सतु केशिन्याः सुतः क्षेत्रजत्वप्रतीतिं धारयति—तस्यैव नृपस्य सगरस्यात्मनो देहाज्जातः तस्यासमञ्जसस्य पुत्रोऽशुमानिति प्रसिद्धः पितामहस्य सगरस्य हिते रतः अंशुमतः पितामहहिते रतत्वकथनेनासमञ्जसस्य तत्प्रतिकूलत्वं सूचितम् ॥ १५ ॥

तदेव दर्शयन् तद्वृत्तान्तमाह—असमञ्जस इति चतुर्भिः । असमञ्जसः पुरा पूर्वजन्मनि योगी सन् सङ्गाद्धेतोः योगाद्विचालितः अत इदानीं पौर्वदैहिकयोगप्रभावेन जातिस्मरः स्वजन्म स्मरन् पुनः सङ्गपरिहाराय समञ्जसमप्यात्मानमसमञ्जसमिव लोकस्य दर्शयन् ॥१६॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सगरस्य सुमतिः केशिनीति द्वे भार्ये तत्र सुमतिर्गरुडस्य स्वसा तस्याः पुत्राः ॥ ९ ॥ १० ॥

षष्टिसहस्रसंख्या येषामस्तीति षष्टिसहस्रिणः उन्मिमेष नेत्रविकासं कृतवान् ॥ ११ ॥

महेन्द्रेण हृतं चेतो येषां ते तथा मुग्धा इत्यर्थः । महतो व्यतिक्रमेण हताः चोरो हन्यतामित्यादिवचनलक्षणापराधेनैव स्वकृतदोषहताः नृपपुत्राः न तु मुनिकोपदग्धाः ॥ १२ ॥

शारदजलवत्स्वच्छप्रसन्नमूर्तौ हरौ तमोगुणकारणस्य क्रोधस्य प्रवेशदुष्प्रदत्वात्क्रोधसम्भूतपापाटवीदहनत्वाद्वेत्याह—न साधुवाद इति । नृपेन्द्रपुत्रा मुनिकोपभर्जिता इत्ययं साधुवादो नास्ति असम्भवात्कथमिति तत्राह, सत्त्वधामनीति । शुद्धस्फटिकविशदज्ञानमूर्तौ श्रीकपिलदेवे रोषमयं तमः कथञ्चिभाव्यते उत्पत्तुमवकाशं लभते ? न कथमपि. किञ्च जगत्पवित्रीकरणसमर्थस्वभावे "आत्मा जीवे धृतौ देहे स्वभावे परमात्मनि" इति यादवः । कथमिव भुवो रजः पार्थिवो धूलिः खे यथेत्ययं लुप्तोपमः वेदे दृष्टत्वात् ॥ १३ ॥

इतोपि तमोगुणकार्यस्य कोपस्य हरावनवसरः इत्याशयेनाह यस्येति । इह जगति सदनुग्रहाय यस्य येनेरिता ग्रन्थरूपेण कथिता दृढा अपेक्षितफलदानाय समर्थाऽन्यत्र नूतनत्वेन वाक्षिष्टा सांख्यमयी सम्यग्ज्ञानमयी नौस्तरी यया ज्ञाननावा मुमुक्षुर्मुक्तियोग्यः पुरुषः मृत्युपथं मृत्योर्मार्गं दुरत्ययं ज्ञाननावमन्तरेणात्येतुमशक्यं भवार्णवं तरते तादृशी येन सन्दृष्टेत्यर्थः । तस्य परात्मभूतस्य साक्षान्नारायणावतारस्य विपश्चितः शुद्धज्ञानवतः श्री कपिलस्य पृथङ्मतिः रोषकषिता मतिः कथं सम्भाव्यते इत्यन्वयः ॥ १४ ॥

योसमञ्जस इत्युक्तः हे नृप ! स केशिन्याः सगरभार्यायाम् आत्मजः पितामहः सगरः ॥ १५ ॥

पुरा पूर्वजन्मनि योगी योगाभ्यासनिपुणो समञ्जसः

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सङ्गाद्धेतोः योगादीश्वरोपासनालक्षणाद्विचलितो हि यस्मात्तस्मात् पूर्वजातिं स्मरतीति जातिस्मरः आत्मानमसमञ्जसम् असमञ्चतः सङ्गतमनतिरमणीयं दर्शयन् सङ्गं जहाविति शेषः १६॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

प्रागुदीचीमित्यर्द्धकम् । तद्देशदर्शिनस्य समुद्ररेखाया गङ्गासागरदेशे परिवृत्त्या युज्यते, श्रीकपिलपरिव्रज्यायाश्चैवमेव वा समाधेयम् ॥ १०—३१ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तस्य द्वे भार्ये सुमतिः केशिनी च तत्र सुमत्याः पुत्राणां प्रभावं मृत्युं चाह षड्भिः ॥ ९—११ ॥

स्वशरीरेष्वेव योऽग्निस्तृतीयं महाभूतं तेनैव महदपराधाद्वति वर्द्धमानेन दग्धाः महेन्द्रेणेन्द्रेणैव एष चौर इति विज्ञापनात् ॥ १२ ॥

अत्र कपिलस्य कोपं वदन्तोऽज्ञा एवेत्याहुः—नेति । मुनिकोपभर्जिता इति न साधूनां वादः किन्त्वसाधूनामज्ञानादेवेत्यर्थः यतः सत्त्वधामनि शुद्धसत्त्वमूर्त्तौ जगदपि पवित्रं दर्शनादिना यतस्तथाभूत आत्मा देहो यस्य तस्मिन् तमः कथं विभाव्यते सम्भाव्यते असंभावनायां दृष्टान्तःभुवोरजःखे कथं सम्भाव्यते खमिदं रजस्वलमिव मुनिरयं कोपीत्यज्ञानामेवोक्तिरित्यर्थः ॥ १३ ॥

यस्य ईरिता येन प्रवर्त्तिता तस्य विपश्चितः सर्वज्ञस्य पृथङ्मतिः प्राकृती मतिः परमात्मनो हि मतिः परमात्मरूपैव स्यादित्यर्थः ॥ १४ ॥

नृपस्य सगरस्यात्मनो योऽन्यो ऽसमञ्जस इत्युक्तः स केशिन्याः पुत्रः ॥ १५ ॥

पुरा पूर्वजन्मनि ॥ १६ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एष वाजिहर इत्यादिवदन्तो ऽभिययुरित्युत्तरेणान्वयः ॥ १० ॥

षष्टिसहस्राणि परिच्छेदकतया सन्ति येषां ते उद्यताऽऽयुधाः सन्तः अभिमुनेरभिमुखं ययुः आजग्मुः तदा मुनिः उन्निमेष नेत्रोन्मीलनं कृतवान् ॥ ११ ॥

महद्व्यतिक्रमेण स्वकृतेन हताः ॥ १२ ॥

मुनिकोपभर्जिता इति न साधुवादः खे भुवो रजो यथा न सम्भाव्यते तथा सत्त्वधामनि अप्राकृतसत्त्वाश्रये जगतां पवित्रः शुद्धिकरः आत्मा देहो यस्य तस्मिन् रोषमयन्तमः कथं विभाव्यते ? ॥ १३ ॥

यस्य येन ईरिता प्रवर्त्तिता मृत्योः पन्था नानावासनारूपो यस्मिन् तं तस्य विपश्चितः सर्वज्ञस्य पृथङ्मतिः अरिमित्रादिभेददृष्टिः कथं घटेत ? इति शेषः ॥ १४॥१५॥

असमञ्जसः पुरा पूर्वजन्मनि योगी भगवद्ध्यानयोगवान् सङ्गात् दुस्सङ्गाद्धेतोः योगात् भगवद्ध्याननिष्ठातो विचालितः अत एव इदानीं जातिस्मरः पूर्वजन्मस्मृतिमान् सन् सङ्गपरिहाराय आत्मानं असमञ्जसमप्रशस्तमिव लोकस्य दर्शयन् ज्ञातीनां च विप्रियं कर्माचरन् जनमुद्वेजयन् क्रीडतो बालानादाय सरय्वां प्रास्यत् प्राक्षिपदित्युभयान्वयः ॥ १६॥१७॥

———

भाषा टीका ।

(सगरकी दोभार्या सुमति और केशिनी) तहां सुमति के पुत्र बड़े दर्पवाले और पिता के आज्ञाकारी रहे, उनो ने अश्व के ढूढते से में चारों तरफसे पृथिवी खोद डाली ॥ ९ ॥

पृथिवी को खोदते२ ईशान कोणमें श्रीकपिल देव के समीप अपना घोडा देखा तब सगर तनय बोले, कि–बस यही हमारे घोडाको चुराने वाला चोरहै देखो कैसा आंख मूंदकर ध्यान लगाकर बैठा है ॥ १० ॥

मारौ मारौ इसपापी को, इस प्रकार साठ हजार सगर पुत्र अपने२ आयुध लेकर श्रीकपिल देवजी के सन्मुख आए इतने में मुनि श्रीकपिलदेव जी ने भी नेत्र खोले ॥ ११ ॥

तवगौ महेन्द्रने कपट से हराचित्त जिनका ऐसे वो सब महत्पुरुष के व्यतिक्रम (अपराध) से हत होकर, अपने शरीर से निकली हुई अग्नि से तत्क्षण में भस्म होगये ॥ १२ ॥

यदि किसीको यह भ्रम भया हो कि मुनिके कोपसे राजपुत्र दग्ध हुए सो नहीं जानना चाहिये, यह कुछ श्रीकपिलदेवकी बडाई नहीं है, क्योंकि ? वे तौ सत्वके धाम हैं उनके विषै रोष भय तम की किस प्रकार भावना करी जावै ? वो तो जगत् के पवित्र करने वाले और आत्मा है जैसे आकाश में पृथिवी के रज का सम्बन्ध नहीं इसी भांत भगवान में तम नहीं ॥ १३ ॥

जिन श्रीकपिलदेव की कथन करी हुई सांख्य शास्त्रमयी दृढ नौका बनी है जिससे मुमुक्षु जन मृत्यु का पंथ ऐसे संसार रूप समुद्र को तर जाते हैं । उन ज्ञान की सीमा वाले परमात्मास्वरूप कपिल भगवान् की पृथक् मति कैसे हो सकै ? ॥ १४ ॥

जो असमञ्जस इस प्रकार कहा जाता वह राजपुत्र केशिनी रानी का पुत्र रहा, उनके पुत्र अंशुमान हुए वे अपने पितामह के बडे हित में निरत हुए ॥ १५ ॥

और असमंजस तौ अपने को ऊपर से असमञ्जस सरीका दिखाते रहे परंचये जातिस्मर अर्थात् पूर्वजन्मकी जाति के स्मरणकरते रहे पूर्व जन्म में योगी रहे किसी सङ्ग से योगसे विचालित हो गये ॥ १६ ॥ १७ ॥

———

आचरन् गर्हितं लोके ज्ञातीनां कर्म विप्रियम् ।
सरय्वां क्रीडतो बालान् प्रास्यदुद्वेजयन् जनम् ॥ १७ ॥
एवं वृत्तः परित्यक्तः पित्रा स्नेहमपोह्य वै ।
योगैश्वर्येण बालांस्तान्दर्शयित्वा ततो ययौ ॥ १८ ॥
अयोध्यावासिनः सर्वे बालकान्पुनरागतान् ।
दृष्ट्वा विसिस्मिरे राजन् ! राजा चाप्यन्वतप्यत ॥ १९ ॥
अंशुमांश्चोदितो राज्ञा तुरङ्गान्वेषणो ययौ ।
पितृव्यखाताऽनुपथं भस्मान्ति ददृशे हयम् ॥ २० ॥
तत्रासीनं मुनिं वीक्ष्य कपिलाख्यमधोऽक्षजम् ।
अस्तौत्समाहितमनाः प्राञ्जलिः प्रणतो महान् ॥ २१ ॥

अंशुमानुवाच ।

न पश्यति त्वां परमात्मनोऽजनो न बुद्ध्यतेऽद्यापि समाधियुक्तिभिः ।
कुतोऽपरे तस्य मनःशरीरधीविसर्गसृष्टा वयमप्रकाशाः ॥ २२ ॥
ये देहभाजस्त्रिगुणप्रधाना गुणान्विपश्यन्त्युत वा तमश्च ।
यन्मायया मोहितचेतसस्ते विदुः स्वसंस्थं न बहिः प्रकाशाः ॥ २३ ॥
तं त्वामहं ज्ञानघनं स्वभावप्रध्वस्तमायागुणभेदमोहैः ।
सनन्दनाद्यैर्मुनिभिर्विभाव्यं कथं हि मूढः परिभावयामि ? ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवंविधं वृत्तं कर्म यस्य सः ॥ १८-१९ ॥

पितृव्यखातमनु यः पन्थास्तं ययौ भस्मान्ति भस्मसमीपे ॥ २० ॥ २१ ॥

"अजानन्तोऽप्यजानन्तोऽप्यनुकम्पया वयान्विताः । तुष्टाव षड्भिरीशानमंशुमानेवमाशयः ॥ अजनो ब्रह्माऽपि त्वामद्यापि न पश्यति न च बुध्यते कथम्भूतम् आत्मनः स्वस्मात्परं परमेश्वरम्, कैर्हेतुभिः ? समाधियुक्तिभिः समाधिनाऽप्यपरोक्षं न पश्यति युक्तिभिः परोक्षमपि सम्यङ्न बुध्यत इत्यर्थः । अपरेऽर्वाचीनास्तु कुतस्त्वां पश्येयुः अर्वाचीनत्वे हेतुः तस्य ब्रह्मणो मनश्च शरीरं च धीश्च सत्त्वतमोरजःकार्याणि ताभिर्यै त्रिविधा देवतिर्यङ्नराणां सर्गास्ते सृष्टास्तत्रापि वयमप्रकाशा अज्ञाः कुतः पश्यामेत्यर्थः ॥ २२ ॥

अपरे तर्हि किं पश्यन्ति तदाह—ये देहभाजस्ते स्वस्मिन्नवस्थितमपि त्वां न विदुः किं तु गुणानेव विपश्यन्ति अथवा न गुणान् अपितु तम एव पश्यन्ति यतस्त्रिगुणा बुद्धिरेव प्रधानं येषामतो बहिरेव प्रकाशो ज्ञानं येषाम् बुद्धिपरतन्त्रतया जाग्रत्स्वप्नयोर्विषयान् पश्यन्ति सुषुप्तौ तम एव केवलं न तु निर्गुणं त्वां सर्वत्र हेतुः यद्वतः यस्य तव माययेति वा मोहितं चेतो येषां ते ॥ २३ ॥

तथाऽप्यहं विचारेण ज्ञास्यामीति चेत्तत्राऽऽह, तं त्वामहं विमूढः कथं परिभावयामि विचारयामि, कथम्भूतम् ? ज्ञानघनं शुद्धज्ञानमूर्त्तिं स्वत एव प्रध्वस्तौ मायागुणनिमित्तौ भेदमोहौ येषां तैर्विभाव्यं विचिन्त्यम् । अयं भावः ज्ञानघनत्वान्नात्मज्ञानविषयत्वम् विचारविषयत्वेऽपि मायागुणैरभिभूतोऽहं न विचारे समर्थ इति ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

लोके गर्हितं ज्ञातीनाञ्च विप्रियं कर्माऽऽचरन् कुर्वन् जनमुद्वेजयन् भीषयन् क्रीडतो बालानादाय सरय्वां नद्यां प्रास्यत् प्राक्षिपत् ॥ १७ ॥

एवंविधवृत्तोऽत एव पित्रा पुत्रस्नेहमपोह्य परित्यक्तः निर्यापितः पुनर्योगप्रभावेन तान् प्रक्षिप्तान् बालान् दर्शयित्वा ययौ ॥ १८ ॥

तदा पुनरागतान् बालान् दृष्ट्वा अयोध्यावासिनः सर्वे जनाः विसिस्मिरे विस्मयं गतवन्तः, हे राजन् ! राजा सगरः अन्वतप्यत

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अहो ! ! बत तत्प्रभावमजानता मया स निर्यापित इत्यनुतप्तवान् ॥ १९ ॥

अथांशुमतः कथामाह–राज्ञा सगरेण तुरगान्वेषणे निमित्ते चोदितो आदिष्टोंऽशुमान् पितृव्याणां सम्बन्धी यः खातस्तमनु यः पन्थास्तं ययौ तत्र भस्मान्ते भस्मसमीपे हयमश्वं ददर्श ॥ २० ॥

तत्रोपविष्टमधोक्षजावतारभूतं कपिलाख्यं मुनिमवलोक्य महात्मा अंशुमान् प्रणतः कृतप्रणामः प्राञ्जलिः समाहितमनाः तुष्टाव ॥ २१ ॥

स्तुतिमेवाह, नेत्यादिभिष्षड्भिः । नावरत्वत्प्रभावमजानन्तोपि वयं त्वयाऽनुकम्प्या इत्याभिप्रयन् दुर्ज्ञेयत्वेन स्तौति, यस्य परमात्मनस्तव तत्त्वं याथात्म्यं जनः समाध्यादिभिरुपायैरद्धा स्फुटं न वुध्यते न जानाति यतो योगिजन एव न वुध्यते कुतः कथमपरेऽन्येऽयोगिनो वयं तस्य तव मन आदिभिर्विशेषेण सृज्यन्ते इति मनःशरीरधीविसर्गाः हिरण्यगर्भादयः तैः सृष्टा अप्रकाशा देहावयवमात्रगोचरज्ञानवन्तः वुध्यन्ते तत्र शरीरं प्रधानं धीः सङ्कल्पविशेषः अजन॰ इतिपाठान्तरं तत्र अजनोऽजो ब्रह्मा समाध्युपायैस्त्वामद्यापि न जानाति कुतस्तस्याजनस्य मनश्च शरीरं च धीश्च ताभिर्यैः विविधाः देवतिर्यङ्नरादीनां सर्गास्तेषु सृष्टाः तत्रापि वयमज्ञा न जानीम इत्यर्थः ॥ २२ ॥

अपरे तर्हि किं वुध्यन्ते इत्यत्राह–य इति । ये देहभाजस्ते त्रिगुणप्रधानाः गुणत्रयपरवशाः गुणान् शब्दादीन् पश्यन्ति विषयानेवानुध्यायन्तीत्यर्थः । उत वा अपि च तमःशब्दः प्रधानपरः प्रधानकार्यं शरीरं च पश्यन्ति न तु स्वसंस्थं स्वात्मनि स्थितं त्वां विदुः तत्र हेतुं वदन् देहभाजो विशिनष्टि–यस्य तव मायया मोहितं चेतो येषां ते अत एव वहिःप्रकाशाः परागर्थज्ञानिनः गुणत्रयपरवशत्वाद्भगवन्मायामोहितत्वेन परागर्थैकज्ञानित्वाच्च न त्वां विदुरपितु देहं तदुपभोग्यान् विषयांश्च विदुरित्यर्थः ॥ २३ ॥

एवं सामान्यतो लोकस्य परमात्मयाथात्म्यावेदित्वमुक्तं स्वस्मिन्नुपसंहरन् उक्तानुक्तगुणैर्विशिषन्स्तौति–तमिति । तमुक्तविधं ज्ञानघनमानन्दात्मकज्ञानैकरसं स्वभावत उत्पत्तेरारभ्य प्रध्वस्तः मायामयभेदेषु प्रकृतिकार्यशरीरभेदेषु मोहभ्रान्तिज्ञानम् आत्माभिमान इति यावत् स येषां तैः सनन्दनाद्यैर्मुनिभिरपि केवलविभाव्यं चिन्तनीयं नतु दृष्टमित्याभिप्रायः त्वामहं मूढः कथं परिभावयामि मनसा विचारयामि ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

असमञ्जसत्वं दर्शयति–आचरन्निति । किं तज्ज्ञातीनां विप्रियकर्मेति तत्राह—सरय्वामिति । जनमुद्वेजयन् कम्पयन् तीरे क्रीडतो बालान् सरय्वां नद्यां प्रास्यत् प्राक्षिपदित्यन्वयः १७ ॥

ततः किमभूदिति तत्राह—एवमिति । योगैश्वर्येण युष्मद्बाला एते इति तान्नदीजलमग्नान् बालान् दर्शयित्वा ततः स्थानादयासीदित्यन्वयः ॥ १८ ॥

विसिस्मिरे विस्मयं चक्रुः अथासमञ्जसे गते राजा चान्वतप्यत पश्चात्तापं प्राप्त इत्यन्वयः ॥ १९ ॥

पितरि गतेंऽशुमता किमकारीति तत्राह—अंशुमानिति । पितृव्या असमञ्जससहोदराः तेषामनुमार्गे पितृव्याणां शरीरभस्म हयमपि ददर्श इत्यन्वयः । भस्मान्तेतिपाठे भस्मसमीपे हयं दृष्टवानित्यर्थः ॥ २० ॥

अस्तौत् स्तुतवान् ॥ २१ ॥

स्तुतिर्द्वेधा; विद्यमानगुणविषयाऽविद्यमानगुणविषया च, तत्र द्वितीयापि विद्वदविद्वद्विषयभेदेन द्विविधा; उभयस्या अपि स्तुतिफलं न लभ्यते विदुष आत्मन्यविद्यमानगुणकथनेन ह्रिया स्तोतरि द्वेषसम्भवादविदुषोऽज्ञानेन मुखविकासादिसम्भवेऽपि स्तोतुः स्तुतिफलप्रदानशक्तिसामर्थ्याभावादतः प्रथमैव श्रेयसीति भावेन स्तौति—न पश्यतीति । अजनोऽजो विरिञ्चः यस्य परमात्मनोंशं त्वां न पश्यति अनन्तत्वेन साक्षादपरोक्षीकर्तुं न शक्नोति तर्हि परोक्षतो जानाति किं नेत्याह—नेति । समाधियुक्तिभिरेकाग्रीकृतचित्तयोगैरद्यापि न वुध्यते सम्यक् न जानातीत्यन्वयः । “पश्यन्तोपि न पश्यन्ति मेरोरूपं विपश्चितः” इतिवत् न यस्य तत्त्वमिति पाठे परमात्मनो यस्य तव तत्त्वं न वुध्यत इति न किन्तु वुध्यते तथापि सम्यक् न जानातीत्यर्थः “कश्छन्दसां योगमावेद धीरः कोधिष्ण्यांप्रतिवाचं पपाद” इति श्रुतेः । न पश्यतीति रूपस्य नानोपायविशारदज्ञानस्य परमात्मनस्तत्त्वं न वुध्यते इति वा एकस्याभावेऽप्यन्यस्य सम्भवः किं न स्यात्तथा दृष्टत्वादित्याशङ्क्येतरविषयोऽयं न्यायो न परमात्मविषय इति भावेनाह—कुत इति । अपरे विरिञ्चादितरे समाधियुक्तिरहिताः कुतो हेतोः पश्यन्ति ? जानन्ति दर्शनादिसङ्गावेन किमपि लिङ्गमित्यर्थः । अनेन चोद्यं कथं परिहृतमिति तत्राह, तस्येति तस्य विरिञ्चस्य मनसः शरीराच्च विसर्गः विशिष्टा सृष्टिर्येषां मरीच्यादीनां ते मनःशरीरविसर्गाः तैः सृष्टेषु शरीरावयवेषु श्रोत्रादिषु प्रकाशो अभिमानित्वेन स्थितिलक्षणो येषां दिक्सूर्यादीनां ते मनःशरीरविसर्गसृष्टावयवप्रकाशाः इन्द्रादयो मरीच्याश्च्य उभयेपि प्रत्युक्ताः अत्र जनो न पश्यति न वुध्यते इत्यङ्गीकारे कुतोऽपरेइत्येतद्गतार्थत्वेनासङ्गतं स्यादिति बहुवचनमेवावशिष्यते इति पदच्छेदेन विरिञ्च एव ग्राह्यः ॥ २२ ॥

ये देहभाजः शरीरिणस्ते त्रिगुणप्रधानाः सत्त्वप्रधाना रजःप्रधानास्तमःप्रधाना इति त्रिविधाः । तत्र रजःप्रधानाः राजसा मानुषाः त्रिगुणप्रधानाः धर्मार्थकामपरायणाः गुणान् सर्गादीनेव पश्यन्ति न मोक्षं तमःप्रधानास्तामसाः असुराः यस्य हरेर्मायया वन्धशक्त्या मोहितचेतसः अन्यथा ज्ञानपूर्णवुद्धयः तमो वा अन्धतम एव विशिष्टं पश्यन्ति अनुभवन्ति अत्र निमित्तमाह—न इति । ते स्वसंस्थं स्वहृदि स्थितं विष्णुं न विदुरिति यत्तस्मादिति शेषः । नष्टचेतनाः किं ते ? इति । नेत्याह—बहिरिति । बहिर्द्वारत्वेन प्रकाशो येषां ते तथा अनात्मज्ञानिन इत्यर्थः । “आत्मैवमहैव” इति श्रुतेः । ज्ञानाश्रयत्वेन चेतनत्वेपि यथार्थज्ञानं नास्तीति भावः ॥ २३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ये सत्त्वप्रधानाः सात्त्विकप्रकृतयः तैः सनन्दनाद्यैर्मुनिभिर्विभाव्यम् उपास्यन्तं तत्तद्योग्येभ्यस्तत्फलदातारं त्वामहं कथं परिभावयामि चिन्तयामि चिन्तने काऽनुपपत्तिरिति तत्राह—विमूढ इति । सामान्यज्ञाते वस्तुनि विशेषजिज्ञासा सञ्जाघटीति मम तु तदेव नास्त्यतस्त्वद्विषयज्ञानाभाव एवानुपपत्तिरित्यर्थः । सनन्दनादीनामपि देहभाक्त्वाविशेषात्तत्परिभावना कथं स्यादिति तत्राह–प्रध्वस्तेति । प्रध्वस्तो मायामयः प्रकृतिहेतुकः भेदमोहः अनात्मन्यात्मत्वमोहो यैस्ते तथा तैः निरस्तमिथ्याज्ञानैरित्यर्थः । अनेन देहभाक्त्वेऽपि विशेषोस्तीति दर्शितम्. "कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः" इति स्मृतिः ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

गर्हितम् आचरन्निति सङ्गपरिहारायेत्यर्थः ॥ १७ ॥

असमञ्जसपुत्रोंऽशुमान् पितृव्यखातमनु यः पन्थास्तं अभ्ति अन्तिके ॥ १८-२१ ॥

त्वदज्ञानादपराधिनः पूर्वं दग्धा इति नादूभुतमित्याह—नेति आत्मनो जीवात् परं त्वाम् अजनो ब्रह्मापि न पश्यति नापि बुद्ध्यते अपरे अर्वांचीना वयं कुतो बुद्ध्यामहे मन आदिभिर्ये विसर्गा देवादिसर्गास्तेषु सृष्टा अप्रकाशा अज्ञाः ॥ २२ ॥

गुणान् जागरस्वप्नयोर्विषयान् पश्यन्ति सुषुप्तौ तु तम एव केवलं नतु निर्गुणं त्वां स्वस्मिन्नेव सम्यक् तिष्ठतीति स्वसंस्थं बहिःप्रकाशाः बहिर्ज्ञानवन्तः ॥ २३ ॥

स्वभावत एव नतु साधनैः प्रध्वस्तौ मायागुणनिमित्तौ भेदमोहौ यैस्तैः ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवम्भूतं वृत्तं चेष्टितं यस्य सः ॥ १८—२१ ॥

अजनो ब्रह्मा आत्मनः स्वस्मात् परं पूर्ववर्तिनं स्वजनकं त्वाम् अद्यापि समाधियुक्तिभिर्न पश्यति न च बुद्ध्यते तत्पुत्रः दीर्घकालतः समाधिभिर्युक्तिभिश्च अपरोक्षतया वा कार्त्स्न्येन त्वां न जानाति अपरे तत्पुत्रपौत्राः तेभ्यो ऽप्यतिनिकृष्टाः तस्याजनस्य मनश्च शरीरं च धीश्च ताभिर्ये विविधाः ये देवतिर्यङ्नरादीनां सर्गास्तेषु सृष्टाः अप्रकाशाः अज्ञा वयं कुतस्त्वां जानीमेत्यन्वयः ॥ २२ ॥

ननु, मां न जानन्ति चेत्तर्हि ते कुत्रासक्ता इत्यत आह—ये इति । ये देहभाजः बद्धजीवाः त्रिगुणाः शब्दादयो विषयाः प्रधाना इष्टा येषां ते गुणान् विषयानेव पश्यन्ति उत वा तमो नरकं यद्वा तमः सर्वतः पृथिव्यादिरूपेण प्रसृतेः प्रधानं सर्वविषयमूलभूतां त्वन्मायां च पश्यन्ति एवं त्वन्मायया माहितचेतसः बहिःप्रकाशाः बहिर्वृत्तयः ते स्वसंस्थं त्वां न पश्यन्तीत्यन्वयः ॥ २३ ॥

स्वभावत एव प्रध्वस्तो मायामयेषुभेदेषु ऐहिकामुष्मिकपदार्थेषु मोहो येषां तैः सर्वज्ञैः सनन्दनाद्यमुनिभिर्विभाव्यं विचिन्त्यम् अहं विमूढः ज्ञानघनं त्वां कथं विभावयामि विचारयामि गरुडयोग्ये कार्ये मत्कुणस्येव महर्षिचिन्तनार्हे त्वयि मम का विचारशक्तिरित्यर्थः ॥ २४ ॥

भाषाटीका ।

वही असमंजस हुए लोक में ज्ञानी लोगों को जो विप्रिय और गर्हित हो ऐसा कर्म करने लगे । जनों को उद्वेग करने के लिये खेलते हुए बालकों को सरजूजी में फेंकने लगे ॥ १७ ॥

इस प्रकार के ढंग देखकर स्नेह छोडकर पिताने असमंजस का परित्याग करदिया असमंजस भी अपने योगबल से सरयूमें गिराये हुए बालकों को सर्वत्र देकर चल दिये ॥ १८ ॥

अयोध्यावासी सब लोग अपने २ बालकों को फिर आये हुए देख कर बडे विस्मय को प्राप्त हुए ॥ हे राजन् ! और राजा सगर को भी बडा अनुताप हुआ ॥ १९ ॥

राजा ने अंशुमान् को आज्ञा करी तब अश्व के अन्वेषण करने को वह गया और अपने पितृव्य (काका) लोग पृथिवी खोदते हुए जिस मार्ग होकर गये थे उसी मार्ग में जाते २ भस्म की ढेरी के समीप में घोडा देखा ॥ २० ॥

और वहां पर बैठे हुए अधोक्षज श्री कपिलमुनि को देख कर प्रणाम कर मनको समाहित कर हाथ जोडकर अंशुमान् स्तुति करने लगे, क्योंकि ? आखिर तो महान् हैं ॥ २१ ॥

अंशुमानुवाच ॥

अंशुमान् बोले, कि—हे भगवन् यह जन, आत्मा से पर ऐसे आपको नहीं देखते हैं, और समाधि योग से भी आप अब तक नहीं जाने गये, तब फिर हम लोग तो उनके मन बुद्धि और शरीर से जो सृष्टि हुई उस सृष्टि से रचे हुए अर्वाचीन अज्ञजन कैसे आपको जानें ॥ २२ ॥

जो देहधारी सत्व रज आदि त्रिगुण प्रधान हैं वे लोग गुणों को देखते हैं अथवा तम (अज्ञान) को देखते हैं और अपने में स्थित ऐसे आपको नहीं देखते हैं, क्योंकि ? आपके माया से उन का चित्त मोहित होरहा है अत एव बहिर्दृष्टि वाले हैं ॥ २३ ॥

स्वभाव से अत्यन्त नष्ट हुआ है माया के गुणों से क्रिया हुआ भेद मोह जिन का ऐसे सनंदनादिक मुनियों के भावना करने के योग्य ज्ञानघन ऐसे आपको मैं मूढ किस प्रकार विचार सक्ता हूं ॥ २४ ॥

प्रशान्तमायागुणकर्मलिङ्गमनामरूपं सदसद्विमुक्तम् ।
ज्ञानोपदेशाय गृहीतदेहं नमामहे त्वां पुरुषं पुराणम् ॥ २५ ॥
त्वन्मायारचिते लोके वस्तुबुद्ध्या गृहादिषु ।
भ्रमन्ति कामलोभेर्ष्यामोहविभ्रान्तचेतसः ॥ २६ ॥
अद्य नः सर्वभूतात्मन् ! कामकर्मेन्द्रियाशयः ।
मोहपाशो दृढश्छिन्नो भगवंस्तव दर्शनात् ॥ २७ ॥

श्रीशुक उवाच ।

इत्थं गीताऽनुभावस्तं भगवान् कपिलो मुनिः ।
अंशुमन्तमुवाचेदमनुगृह्य धिया नृप ! ॥ २८ ॥

श्रीभगवानुवाच ।

अश्वोऽयं नीयतां वत्स ! पितामहपशुस्तव ।
इमे च पितरो दग्धा गङ्गाम्भोऽर्हन्ति नेतरत् ॥ २९ ॥
तं परिक्रम्य शिरसा प्रसाद्य हयमानयत् ।
सगरस्तेन पशुना क्रतुशेषं समापयत् ॥ ३० ॥
राज्यमंशुमति न्यस्य निःस्पृहो मुक्तबन्धनः ।
और्वोपदिष्टमार्गेण लेभे गतिमनुत्तमाम् ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां नवमस्कन्धे सगरोपाख्याने
अष्टमोऽध्यायः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हे प्रशान्त ! तस्मात्त्वां पुरुषं पुराणं केवलं नमामेत्यन्वयः पुराणपुरुषत्वे हेतुः मायायाः गुणाः कर्माणि च विश्वसृष्ट्यादीनि लिङ्गानि च ब्रह्मादिरूपाणि यस्य तम् प्रशान्तत्वे हेतुः सदसद्भ्यां कार्यकारणाभ्यां पुण्यपापाभ्यां वा विमुक्तम् अतोऽनामरूपं तत्तत्कृत-नामरूपशून्यं किं तु ज्ञानोपदेशाय गृहीतः प्रकटितो देहः शुद्धसत्त्व-मूर्तिर्येन तम्, यद्वा हे प्रशान्तमायेति हे अगुणेति च सम्बोध्य कर्मभिः सृष्ट्यादिकार्यैर्लिङ्गानि यस्येति योज्यम्, यद्वा प्रशान्ता मायागुणादयो यस्मिन्निल्येकमेव पदम् ॥ २५ ॥

स्वभाग्यं श्लाघते—त्वन्मायेति द्वाभ्याम् । कामादिभिर्विभ्रान्तानि चेतांसि येषां ते इमे सर्वे गृहादिषु भ्रमन्ति ॥ २६ ॥

हे सर्वभूतात्मन् ! नोऽस्माकं त्वत्कृपयैव घटितात्त्वद्दर्शनादति-दृढोऽपि मोहमयः पाशश्छिन्नः कथम्भूतः कामादीनामाशय आश्रयः त्वत्प्रसादेन कृतार्थोऽस्मीत्यर्थः ॥ २७ ॥ २८ ॥

अश्वं लब्ध्वाऽपि साकाङ्क्षं प्रत्याह इमे चेति ॥ २९ ॥

तं परिक्रम्येति शुकोक्तिः ॥ ३० ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
अष्टमोऽध्यायः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यतोऽहं भावयितुमप्यनर्हस्ततस्त्वां केवलं नमस्करोमीत्याह—प्रशान्तेति । मायागुणाः प्रकृतिगुणाः सत्त्वादयः कर्मलिङ्गं कर्म

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कृतदेहक्लेश्यैते यस्य प्रशान्ता न विद्यन्ते स प्रशान्तमायागुणकर्मलिङ्गः तमनामरूपं जात्यादिभिस्तत्प्रयुक्तदेवादिनामाभिश्च वर्जितं सदसद्भ्यांविमुक्तं शुभाशुभफलमुक्तं चेतनाचेतनधर्म्मैरस्पृष्टं वा ज्ञानोपदेशाय नतु सुखदुःखानुभावाय गृहीतं स्वेच्छोपात्तं लिङ्गशरीरं येन तं पुराणं पुरुषं त्वां नमामहे ॥ २५ ॥

यन्मायेति यस्य मायारचितेषु गृहादिषु वस्तुबुद्धया भोगस्थानादिबुध्या भ्रमन्ति तं त्वां नमामहे इति पूर्वेणान्वयः । भ्रमणे हेतुं वदन् तत्कर्तृन् विशिनष्टि—कामादिभिर्विभ्रान्तं चेतो येषां ते इति तत्र कामो रागः लोभोऽनलंबुद्धिः ईर्ष्या कामोपभोगविरोधिष्व क्षमः मोहश्चित्तविकारः ॥ २६ ॥

तद्दर्शनात्स्वस्य कृतार्थतामाविष्करोति—अद्येति । हे सर्वभूतात्मन् ! हे भगवन् ! तव दर्शनादद्याऽधुना नोऽस्माकं कामाः काम्यन्त इति कामाः शब्दादयो विषया विषयस्पृहा वा कामः कर्माणि पुण्यापुण्यात्मकानि तत्करणानीन्द्रियाणि तेषामाश्रयो मूलभूतो मोहः देहात्मभ्रान्त्यादिरूपो दृढो निर्मोचयः छिन्नः आशय इति पाठान्तरं तदा कर्मेन्द्रियाणि ज्ञानेन्द्रियाणि श्रोत्रादीनि तेषां शब्दादिकामानां ग्राहकत्वात् कर्मेन्द्रियाणि वागादीनि तेषां तत्प्रभावत्वात् तान्येवाशयमाश्रयो यस्य स मोहात्मकः पाशः मोहस्यात्मगतत्वेप्युभयेन्द्रियप्रवृत्तिमूलकत्वेनोभयेन्द्रियाश्रयत्वमुक्तम् ॥ २७ ॥

हे नृप ! इत्थं गीतःसङ्कीतः संस्तुतोऽनुभावः प्रभावो यस्य स भगवान् कपिलो मुनिस्तमंशुमन्तं मनसाऽनुगृह्येदं वक्ष्यमाणमुवाच॥ २८ ॥

तदेवाह-अश्व इति । हे वत्स ! अंशुमन् ! अयमश्वस्तव पितामहस्य सगरस्य यज्ञीयः पशुर्नीयतां भस्मराशीन् दर्शयित्वा इमे च तव पितरः पितृव्याः दग्धास्तेच गङ्गाम्भ एवार्हन्ति नेतरच्चाम्भः गङ्गाम्भसैवैषां क्रियाः कार्याः नेतरेण अनेनैषामुत्तारणामित्यर्थः॥२९॥

एवमुक्तवन्तं कपिलं प्रदक्षिणीकृत्य शिरसा प्रसाद्य प्रणिपत्यांशुमान् हयमानीतवान् तेन पशुना हेतुना क्रतुशेषं सगरस्समापयत् ॥ ३० ॥

ततो राज्यमंशुमति न्यस्य निधाय निस्स्पृहः देहतदनुबन्धिषु स्पृहारहितः मुक्तं बन्धनं बन्धकमहम्ममत्वादिकं येन तादृशः और्वेणोपदिष्टो मार्गः स्वात्मपरमात्मयाथात्म्यज्ञानरूपः तेन न विद्यते उत्तमा यस्यास्तां गतिं मुक्तिं लेभे लब्धवान् ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
अष्टमोऽध्यायः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

त्वां न मामह इत्यन्वयः । त्वामिति क इति तत्राह-पुरुषमिति । तर्हि देवदत्तवत्परिच्छिन्नः कश्चिदयं स्यादिति नेत्याह, अनामरूपमिति । प्राकृतनामादिरहितं तत्कुत इति तत्राह—प्रशान्तेति । प्रशान्तानि उपरतानि मायागुणाः सत्त्वादयः कर्माणि तन्निमित्तव्यापाराः लिङ्गं शरीरं यस्य सः तथा तत्कारणत्वेन मृद्धटाभिन्नत्वम्, एतत्कथं घटते ? इति तत्राह-सदिति सतो ब्रह्मणा असतः परमाणवादेः "विमुक्तं भिन्नं रुक्मवर्णम्" इति श्रुतेः । शरीरत्वेन नामरूपदर्शनात्तदभावकथनं कथमिति तत्राह, ज्ञानेति. लोकानुग्रहार्थं शरीरग्रहणं न तु कर्मनिमित्तम् अत एव नित्यदुःखाभावः ॥ २५ ॥

त्रिविधानां जीवानां स्वभावाभिभवो नास्तीति दर्शनाय मानुषस्वभावमाह-यन्मायेति । यस्य हरेर्मायया प्रकृत्या इच्छया वा रचिते निर्मिते लोके भूम्यादौ रचितगृहादिषु वस्तुबुद्ध्याऽनश्वराणीति मनसा भ्रमन्ति परिवर्तन्ते के मानुषा इति शेषः । निमित्तमाह-कामेति । कामो विषयाभिलाषः लोभो धर्मादिविषयार्थत्यागानिच्छा ईर्ष्या अक्षमा मोहो वैचित्यम् एतैर्विभ्रान्तं चेतो येषां ते तथा अनेनान्यद्द्वयं व्याख्यातम् ॥ २६ ॥

उपसंहरति अद्येति अद्य नोऽस्माकं पुत्रादिषु दृढो मोहपाशः अज्ञानहेतुकः स्नेहपाशश्छिन्न इत्यर्थः । कामाकर्मेन्द्रियेष्वा क्षेत इति कामकर्मेन्द्रियाशयः ॥ २७ ॥ १८ ॥

अर्हति अपेक्षते ॥ २९—३१ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
अष्टमोऽध्यायः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
अष्टमोऽध्यायः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

प्रशान्तानि मायासम्बन्धीनि गुणकर्मलिङ्गानि यतः तं तथैव अनामरूपं मायिकनामरूपरहितम् । २५ ॥ २६ ॥

कामादीनामाशयः आश्रयः ॥ २७—२८ ॥

नेतरादिति नान्यथा निस्तार इत्यर्थः ॥ २९-३१ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
नवमस्याष्टमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ८॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तस्मात् त्वां केवलं नमामः कथम्भूतं प्रशान्ताः स्वप्रभावं कर्तुमशक्ताः माया प्रकृतिः गुणाः सत्त्वादयः कर्मलिङ्गाः सुरासुरादयो यस्मिन् तम् "नामरूपे व्याकरवाणि" इति श्रुत्युक्तं नामरूपात्मकं जगत् तद्भिन्नमनामरूपं प्राकृतनामरूपरहितमित्यर्थः । सदसद्भ्यांविमुक्तं शुभाशुभफलास्पृष्टम् तथापि ज्ञानोपदेशाय गृहीतः आविष्कृतो देहो येन तम् ॥ २५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अनादितो मायामोहिताः जीवाः संसारे भ्रमन्ति तत्र त्वत्कृपया त्वद्दर्शनं वयं प्राप्य कृतार्था इत्याह-त्वन्मायेति द्वाभ्याम् । कामादिभिर्विभ्रान्तानि चेतांसि येषां ते सर्वे इमे गृहादिषु वस्तुबुद्धया उपादेयबुद्धया लोके भ्रमन्ति ॥ २६ ॥

कामो वासनात्मकः सङ्कल्पः कर्माणि च इन्द्रियाणि च तेषामाशयः आश्रयो यो ऽस्माकं मोह आत्मानात्मपरमात्मस्वरूपाज्ञानं स एव पाशः तव दर्शनात् अद्य अधुना छिन्नः तव दर्शनात् वयं कृतार्था इत्यर्थः ॥ २७—३० ॥

अनुत्तमां निरतिशयाम् ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
अष्टमाऽध्यायार्थप्रकाशः ॥ ८ ॥

भाषाटीका ।

हे प्रशांत ! माया के सत्वादि गुणों से जो कर्म सृष्ट्यादिक है वही आपका परत्व सूचक लिङ्ग (लक्षण) है तथा प्राकृत नाम रूप से रहित हैं और कार्य कारण से विमुक्त जिनका स्वरूप और ज्ञान के उपदेश करने के लिये ग्रहण किया देह जिनने ऐसे पुराण पुरुष आपको नमस्कार हो ॥ २५ ॥

आप को माया से रचित इस लोक में गृहादि वस्तुओं में परमार्थ बुद्धि करके चेतन, भ्रम को प्राप्त होते हैं, कारण कि-काम लोभ, ईर्षा, मोह, इनसे विभ्रांत चित्त वाले हैं ॥ २६ ॥

हे सर्व भूतात्मन् ! अब मेरा काम, कर्म, इन्द्रिय और अन्तःकरण में पड़ा रहा जो मोह रूप दृढ पाश [फांस] सो हे भगवान् ! वह आपके दर्शन से छिन्न होगया ॥ २७ ॥

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि—हे नृप ! जब अंशुमान ने श्री कपिल देवजी का इस प्रकार प्रभाव गाया तब भगवान् श्री कपिल देव जी बुद्धि से अनुग्रह करके अंशुमान से बोले ॥ २८ ॥

श्री भगवान उवाच ॥

भगवान् श्रीकपिल देवजी बोले, कि-हेवत्स ! तुमारे पितामहके यज्ञ का पशु यह अश्व तुम लेजाओ और यह तुमारे पितर (काका) लोग दग्ध हुए भये श्रीगंगाजी के जल को चाहते हैं अन्य कुछ नहीं ॥ २९ ॥

तब अंशुमान् श्री भगवान की परिक्रमा देकर शिरसे प्रणाम करके प्रसन्न कर अश्व को घर ले आये । सगर ने भी उस पशु से अवशिष्ट यज्ञ को समाप्त किया ॥ ३० ॥

और राजा सगर अंशुमान पर राज्य छोडकर निःस्पृह और मुक्तबन्धन होकर और्वऋषि के उपदिष्ट मार्ग से सर्वोत्तम गति को प्राप्त हुए ॥ ३१ ॥

इति श्रीमद्भागवत नवम स्कन्ध में अष्टम अध्याय की
वृन्दावनस्थ पं० भगवताचार्यकृत
भाषा टीका समाप्ता ॥ ८ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे अष्टमोऽध्यायः ॥ ८ ॥

॥ नवमोऽध्यायः ॥

श्रीशुक उवाच ।

अंशुमांश्च तपस्तेपे गङ्गानयनकाम्यया ।
कालं महान्तं नाशक्नोत्ततः कालेन संस्थितः ॥ १ ॥
दिलीपस्तत्सुतस्तद्वदशक्तः कालमेयिवान् ।
भगीरथस्तस्य पुत्रस्तेपे स सुमहत्तपः ॥ २ ॥
दर्शयामास तं देवी प्रसन्ना वरदाऽस्मि ते ।
इत्युक्तः स्वमभिप्रायं शशंसावनतो नृपः ॥ ३ ॥
कोऽपि धारयिता वेगं पतन्त्या मे महीतले ।
अन्यथा भूतलं भित्त्वा नृप ! यास्ये रसातलम् ॥ ४ ॥
किं चाहं न भुवं यास्ये नरा मय्यामृजन्त्यघम् ।
मृजामि तदघं कुत्र राजंस्तत्र विचिन्त्यताम् ॥ ५ ॥

भगीरथ उवाच ।

साधवो न्यासिनः शान्ता ब्रह्मिष्ठा लोकपावनाः ।
हरन्त्यघं तेऽङ्गसङ्गात्तेष्वास्ते ह्यघभिद्धरिः ॥ ६ ॥
धारयिष्यति ते वेगं रुद्रस्त्वात्मा शरीरिणाम् ।
यस्मिन्नोतमिदं प्रोतं विश्वं शाटीव तन्तुषु ॥ ७ ॥
इत्युक्त्वा स नृपो देवं तपसा तोषयच्छिवम् ।
कालेनाल्पीयसा राजंस्तस्येशः समतुष्यत ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नवमेंऽशुमतो वंशः खट्वाङ्गावधिवर्ण्यते ।
गङ्गा भूतलमानिन्ये यस्य पौत्रो भगीरथः ॥ ० ॥

यथा सगरः पौत्राय राज्यं दत्त्वा तपस्तेपे तथांऽशुमांश्च स्वपुत्राय राज्यं दत्त्वा महान्तं कालं तपस्तेपे इति चकारस्यार्थः नाशक्नोत् गङ्गामानेतुमिति शेषः संस्थितो मृतः ॥ १ ॥

कालं मृत्युमेयिवान् प्राप्तः ॥ २ ॥

तं प्रत्यात्मानं दर्शयामास ते वरदास्मीति गङ्गयोक्तः सन् स्वमभिप्रायं पूर्वजोद्धरणं शशंस कथयामास ॥ ३ ॥

आह गङ्गा कोऽपि गगनात्पतन्त्या मे वेगं धारयिता धारयिष्यति ॥ ४ ॥

किञ्च आमृजन्ति क्षालयिष्यन्ति तत्रोपायो विचिन्त्यताम् ॥ ५ ॥

अघं हरन्ति हरिष्यन्ति अघं भिनत्तीत्यघभित् ॥ ६ ॥

आत्मा कथम्भूतः? यस्मिन्निदं विश्वमोतं ग्रथितमूर्ध्वतन्तुषु शाटीव पटइव प्रोतं च तिर्यक्तन्तुषु पट इव असौ सर्वाधारस्त्वद्वेगं धारयिष्यतीत्यर्थः ॥ ७ ॥

इत्यत्र गङ्गामुक्त्वा तच्छ्रुत्वेतिपाठे आवयित्वेत्यर्थः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

एवमानीताश्वः पितामहदत्तराज्योऽंशुमान् पितॄणां समुत्तरणार्थं गङ्गामानेतुमिच्छया महान्तं कालं तपस्तेपे चक्रे नाशक्नोत् गङ्गामानेतुं न प्रबभूव किन्तु कालेनोपसंहृतो मृतो बभूव ॥ १ ॥

अथ तस्यांशुमतः सुतो दिलीपोऽपि तद्वत् पितृवत्तपः कुर्वन् गङ्गामानेतुमशक्त एव कालं मृत्युमेयिवान् प्राप्तवान् अथ तस्य दिलीपस्य सुतो भगीरथः स सुमहत्तपश्चक्रे ॥ २ ॥

ततस्तेन तपसा प्रसन्ना गङ्गा दर्शयामास, आत्मानमिति शेषः। ते तुभ्यं वरदाऽस्मीति तं भगीरथमुवाचेति शेषः। इत्थं गङ्गयोक्तो नृपो भगीरथः प्रणतः स्वकीयमभिप्रायं शशंस उक्तवान् ॥ ३ ॥

पुनस्तं गङ्गोवाच—कोन्विति द्वाभ्याम्। महीतले पतन्त्या मम वेगं कोनु धारयिता? कोपीति पाठे अपि शब्दः सम्भावनायां कोवा धारयितेत्यर्थः। न चेद्धारयिता कोपि न विद्यते चेत् तर्हि हे नृप! भूमितलं भित्वा रसातलं यास्ये गमिष्यामि ॥ ४ ॥

भूमितल एव किं न प्रवहसीत्यत्राह—किञ्चेति। किञ्चाहं भुवं यास्ये भूमौ न प्रवहामीत्यर्थः। तत्र हेतुः, नरा भूमिष्ठाः अघं पापं मय्यामृजन्ति शोधयन्ति प्रक्षिपन्ति तन्नरैस्त्यक्तमघमहं क मृजामि प्रक्षिपामि? हे राजन्! तत्र विचिन्त्यतामुपाय इति शेषः ॥ ५ ॥

ततो भगीरथ आह—साधव इति द्वाभ्याम्। न्यासिनः काम्यकर्मत्यागिनः शान्ता जितेन्द्रियाः ब्रह्मिष्ठाः ब्राह्मणश्रेष्ठाः ब्रह्म अतिशयितं ब्रह्म ब्रह्मिष्ठं तेन तदुपासका लक्ष्यन्ते ब्रह्मविदग्रेसरा इत्यर्थः। अतएव लोकपावनाः साधवस्तवाघं नरैस्त्यक्तमङ्गसङ्गात् स्नानरूपाद्धरन्ति तर्हि ते क मृजन्तीत्यत्राह—तेष्वास्ते ह्यघभिद्धरिरिति। तेषु साधुषु अघभिद्धरिरास्तेहि तर्हि हरिरपि क मृजतीत्याशङ्काऽघभिदित्यनेन परिहृता अघं भिनत्ति निरस्यति नाशयतीति यावत् नत्वघमादायान्यत्र प्रक्षिपतीति अभिप्रायः ॥ ६ ॥

एवं किञ्चाहमित्यादेरुत्तरमुक्तमथ कोन्वित्यादेरुत्तरमाह-धारयिष्यतीति। रुद्रो रुद्रशरीरकः परमात्मा तव वेगं धारयिष्यति तस्य धारणायामसामर्थ्यशङ्कां वारयन्विशिनष्टि—शरीरिणां ब्रह्मादिस्थावरान्तानामात्मा अन्तःप्रविश्य प्रशासनेन धारकः किंबहुना यस्मिन् परमात्मनि इदं विश्वं प्रोतं शरीरतया समवेतं यथा तन्तुषु शाटी तद्धरकृत्स्नविश्वधारकस्याकलितभ्रम एव विभर्त्यंसानित्युक्तविधस्य त्वद्वेगधारणायां सामर्थ्यं कैमुत्यन्यायसिद्धमिति भावः ॥ ७ ॥

इत्येवंविधं तस्य भगीरथस्य वच आकर्ण्य तं भगीरथं पुनर्गङ्गोवाच, तर्हि मद्रभसां धारणार्थं महेशानं रुद्रशरीरकं परमात्मानं प्रसादय प्रसन्नं कुर्विति तद्गङ्गावचः श्रुत्वा स नृपो भगीरथस्तपसा शिवमतोषयत्, हे राजन्! अल्पीयसैव कालेन तस्य भगीरथस्य ईशानो रुद्रः प्रसन्नो बभूव ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

महदपराधपङ्कप्रक्षालनेनात्मजनोद्धाराय महान्तं कालं तपस्तेप इत्यन्वयः। संस्थितो मृतः ॥ १ ॥

कालमेयिवान् मरणं प्राप्तः ॥ २ ॥

प्रसन्ना देवी ते वरदाऽस्मीति निगद्य स्वात्मानं तमुद्दिश्य प्रदर्शयामास ॥ ३ ॥ ४ ॥

किञ्च रसातलप्रवेशलक्षणानर्थं एव न, अन्योऽप्यस्तीत्याशयेनाह—किञ्चेति। कुतो नरकप्राप्तिरिति तत्राह—नरा इति। पापिनो नराः स्नानादिना मय्यघमामृजन्ति शोधयन्ति पापं निक्षिप्य स्वयं शुद्धा भवन्ति। हे राजन्! तदघं मृजामि शोधयामि केति शेषः। क निक्षिप्य शुद्धा भवामि अत्रास्मिन्नर्थे विविच्यतां नराणामघसंहर्त्र्यहं मदघसंहर्ता क इति विवेकः क्रियतामित्यन्वयः ॥ ५ ॥

उत्तरमाह—साधव इति। शमदमादिलक्षणसम्पन्नाः साधवोऽत एव निराशिषः स्वर्गादिसुखलक्षणाशारहिताः कुत इति तत्राह—ब्रह्मिष्ठा इति। इष्ठन् प्रत्ययान्तं चैतच्च ब्रह्मणि पूर्णा भगवद्भक्त्येति शेषः। अमी अतिशयेन ब्रह्मपूर्णाः ब्रह्मिष्ठाः ब्रह्मण्येव स्थिता इत्ययं छान्दसः तथात्वे ब्रह्मस्था इति स्यात्तस्मादयमिष्ठन्नतस्तमनुसृत्यैवं कृतं लोकपावना एवंविधाः ये स्वहृदि हरिं प्राप्तास्ते अङ्गसङ्गात्पादप्रक्षालनादिना हस्ताद्यङ्गसम्बन्धात्पापिनामघं हरन्तीति शेषः। तेषां स्वहृदि स्थितहरिसान्निध्यात्पापं नास्त्येव तव किं वक्तव्यमनवरतपद्मनाभपादसरोजनिजवासाया इत्यर्थः ॥ ६ ॥

द्वितीयं प्रश्नं परिहृत्य प्रथमं परिहरति—धारयिष्यतीति। शरीरिणामात्मा ऽहङ्काररूपेण स्वरूपभूत इव शाटी कन्थागुणितद्विपुटिका वा ॥ ७ ॥

तथाल्पीयसा कालेन शिव आशु अतुष्यतेति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

१—४ ॥

किञ्चेति मया निमित्तभूतया अघं पापं मृजन्ति नाशयन्ति तदघं तत्सङ्गानभिरुचेर्जातं मनसो दुःखमित्यर्थः। गङ्गाप्रसङ्गे पापात्यन्तनाशस्य कोटिशा पुराणादिप्रसिद्धेः अंहोदुःखव्यसनेष्वघमित्यमरकोशात् ॥ ५ ॥

साधवः स्वाधिकारप्राप्तशास्त्रीयाचारनिरताः न्यासिनः कर्म तत्फलाऽनासक्ताः शान्ताः शुद्धान्तःकरणाः ब्रह्मिष्ठा वेदविचारदक्षाः स तेष्वास्त इति अघानि अघ आदीनि भिनत्तीति तथा सदा साधूनां सङ्गात् तत्सङ्गात् तत्स्फूर्तेस्तद्दुःखं न भवितेति भावः ॥ ६—१८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

भगीरथोऽनयद्गङ्गां सौदासो राक्षसोऽभवत्।
हरिं मुहूर्तात् खट्वाङ्गः प्रापेति नवमे कथा ॥ ० ॥

तथेति राज्ञाऽभिहितं सर्वलोकहितः शिवः ।
दधारावहितो गङ्गां पादपूतजलां हरेः ॥ ९ ॥
भगीरथः स राजर्षिर्निन्ये भुवनपावनीम् ।
यत्र स्वपितॄणां देहा भस्मीभूताः स्म शेरते ॥ १० ॥
रथेन वायुवेगेन प्रयान्तमनुधावती ।
देशान्पुनन्ती निर्दग्धानासिञ्चत्सगरात्मजान् ॥ ११ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

यथा सगरः पौत्रे राज्यं न्यस्य तपस्तेपे तथैवांशुमांश्च दिलीपे स्वपुत्रे राज्यं न्यस्य तपस्तेपे इत्यर्थं चकारः ॥ १ ॥

यथांशुमान् तद्वत् ॥ २ ॥

देवी गङ्गा स्वमभिप्रायं पूर्वजोद्धरणं कोऽपीति गङ्गोक्तिः मामृजन्ति क्षालयिष्यन्ति तत्रोपायो विचिन्त्यताम् ॥ ३—५ ॥

अङ्गसङ्गात् स्नानात् हरन्ति हरिष्यन्ति तेषां तदघं को हरिष्यतीति चेत् हरिरेव अघभित् तेन हरिं विना तीर्थतपः प्रायश्चित्तादिभिः पापं वस्तुतो न नश्यतीत्यजामिलोपाख्यानोक्तः सिद्धान्तो दृढीकृतः ॥ ६ ॥

रुद्र इत्यधुनापि त्वं यस्य शिरसि तिष्ठस्येवेति भावः यस्मिन्निदं विश्वमोतं ग्रथितम् ऊर्ध्वतन्तुषु शाटीव प्रोतं च तीर्यक्कृतन्तुषु शाटीवेति तस्येश्वरत्वं दर्शितम् ॥ ७—८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

श्रीगङ्गावतरणं अंशुमतो वंशं च खट्वाङ्गावधिवर्णयति, अंशुमानिति नवमेन । महान्तं कालं तपस्तेपे तथापि न शक्नो-द्गङ्गामानेतुमिति शेषः ॥ १ ॥

कालमन्तकालम् ॥ २ ॥

देवी गङ्गा तं प्रत्यात्मानं दर्शयामास नृपोऽपि अवनतस्सन् स्वमभिप्रायं पूर्वजोद्धरणं शशंस ॥ ३ ॥

गङ्गाप्याह-क इत्यादि ॥ ४ ॥

मामृजन्ति क्षालयिष्यन्ति ॥ ५ ॥ ६ ॥

ते वेगं रुद्रो धारयिष्यति तत्रापि आत्मा परमात्मा हरि-रास्ते यस्मिन् आत्मनि इदं विश्वमोतं ग्रथितमूर्द्ध्वतन्तुषु शाटीव पट इव प्रोतं च तिर्यक्तन्तुषु पट इव ॥ ७।८ ॥

भाषाटीका ।

श्रीरुक्मिणीशचरणौ शरणं प्रपद्ये ॥

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि-गंगाजी के आने की कामना से राजा अंशुमान ने बडा तप किया तप करते २ महान् काल व्यतीत होगया गंगाजी के ले आने को समर्थ नहीं हुए इतने में काल पूरे होने से देहान्त को प्राप्त हुए ॥ १ ॥

उनके पुत्र दिलीप महाराज भी अंशुमान् के तरह गंगा लाने में समर्थ न होकर परलोक गये ॥ दिलीप के पुत्र भगी-रथ ने महान् तप किया ॥ २ ॥

तब श्री गंगा देवी दर्शन देकर बोलीं, कि मैं तेरे ऊपर प्रसन्न हूं तूं वर मांगले इस प्रकार गंगाजी ने जब भगीरथ को कहा तब राजा भी प्रणत होकर अपना सब अभिप्राय कहता हुआ ॥ ३ ॥

तब फिर श्री गंगाजी बोली, कि— हे नृप ! जब मैं महीतल में ऊपर से पडूंगी तब मेरा कोई भी वेग को धारण तो करेगा ? नहीं तो मैं भूतल को भेदन कर रसातल को चली जाऊंगी ॥ ४ ॥

हे राजन् ! अथवा मैं पृथिवी पर नहीं जाऊंगी क्यों कि ? मनुष्य अपना पाप मेरे विषै धोवेंगे, फिर उस पापको मैं कहां धोऊंगी आप यह तो विचार करो ॥ ५ ॥

भगीरथ उवाच ॥

राजा भागीरथ बोले, कि-साधुजन, सन्यासी, शांत ब्रह्मनिष्ठ लोक को पवित्र करने वाले महात्माजन अपने अंग के संग से तुमारे अघों को हर लेंगे, क्योंकि-उनके विषै अघ हरन करन वाले श्रीहरि विराजते हैं ॥ ६ ॥

और आपके वेग को श्रीरुद्र धारण करेंगे जो रुद्र जीवों को आत्मा के सदृश प्रिय हैं और जिन रुद्र अंतर्यामी में यह विश्व ओत प्रोत होरहा है जैसे कि-तंतुओं में वस्त्र ॥ ७ ॥

इतना कह कर राजा भगीरथ ने तप से शिवजी को प्रसन्न किये, हे राजन् शिवजी भी थोडे ही काल में राजा पर प्रसन्न होगये ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

राज्ञाऽभिहितं तथेत्यङ्गीकृत्य हरेः पादेन पूतं जलं यस्याः ॥ ९—११ ॥

यज्जलस्पर्शमात्रेण ब्रह्मदण्डहता अपि ।
सगरात्मजा दिवं जग्मुः केवलं देहभस्मभिः ॥ १२ ॥
भस्मीभूताङ्गसङ्गेन स्वर्याताः सगरात्मजाः ।
किंपुनः श्रद्धया देवीं ये सेवन्ते धृतव्रताः ॥ १३ ॥
न ह्येतत्परमाश्चर्यं स्वर्धुन्या यदिहोदितम् ।
अनन्तचरणाम्भोजप्रसूताया भवच्छिदः ॥ १४ ॥
सन्निवेश्य मनो यस्मिंश्छ्रद्धया मुनयोऽमलाः ।
त्रैगुण्यं दुस्त्यजं हित्वा सद्यो यातास्तदात्मताम् ॥ १५ ॥
श्रुतो भगीरथाज्जज्ञे तस्य नाभोऽपरोऽभवत् ।
सिन्धुद्वीपस्ततस्तस्मादयुतायुस्ततोऽभवत् ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रसङ्गाद्गङ्गामाहात्म्यमाह-चतुर्भिः । यत् यस्या जलस्पर्शमात्रेण तत्र केवलं देहभस्मभिरेव न साक्षात् ब्रह्मणि स्वकृतेन दण्डेन हता अपि ॥ १२ ॥

तां श्रद्धया ये सेवन्ते इति शेषः तत्प्रपञ्चयति भस्मीभूतेनाङ्गेन यः सङ्गस्तेन ॥ १३ ॥ १४ ॥

अनन्तस्य विशेषणं सन्निवेश्येति त्रैगुण्यं देहसम्बन्धम् ॥ १५—१६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततो राज्ञा भगीरथेनाऽभिहितः गङ्गाया वेगं धारयेति विज्ञापितः सर्वस्य लोकस्य हितकरः शिवस्तथेति विभर्म्यहमित्युक्त्वा अवहितः सावधानः हरेः पादावनेजनेन पूतं जलं यस्यास्तां गङ्गां दधार अत्र शिवशब्दः शिवमात्रपरो न तु विशेष्यभूतपरमात्मपर्यन्तः गङ्गाया हरिपादपूतजलत्वविशेषणसामर्थ्यात् यद्वा पूर्वत्रापि रुद्रेशानादिशब्दाः विशेषणभूतरुद्रमात्रगोचराः आत्मा शारीरिणामित्यादि तु अष्टमूर्तित्वाभिप्रायेणोक्तम् ॥ ९ ॥

ततो राजर्षिर्भगीरथो यत्र पितॄणां देहाः भस्मीभूताः शेरते आसते तत्र भुवनपावनीं गङ्गां निन्ये स्म आनयत् ॥ १० ॥

वायोरिव वेगो यस्य तेन रथेन प्रयान्तं भगीरथम् अनुधावत्यनुगच्छन्ती गङ्गा देशान् मार्गस्थानपि पुनन्ती निर्दग्धान् सगरात्मजानसिञ्चत् ॥ ११ ॥

ब्रह्मदण्डेन ब्रह्मभूते ब्रह्म हर्षौ वा कपिले यो दण्डः स्वकृतापराधरूपस्तेन हता दग्धा अपि सगरात्मजाः यस्या गङ्गाया जलस्पर्शमात्रेण हेतुना केवलं देहभस्मभिरेव निमित्तभूतैः यज्जलस्पृष्टदेहभस्मभिर्हेतुभूतैर्दिवं जग्मुः ब्रह्मदण्डहता अपीत्यनेन—

न ब्रह्मदण्डदग्धस्य न भूतभयदस्य च ।
नारकाश्चानुगृह्णन्ति यां यां योनिमसौ गतः ॥

इति तार्तीयवचनोक्तरीत्या ब्रह्मदण्डहतानां नारकैरपि निन्द्यत्वं तेषामप्युत्तारकत्वेन गङ्गाजलस्य निरतिशयपावनत्वञ्चोक्तम् ॥१२॥

एतदेव किंपुनर्न्यायेन दर्शयति-भस्मेति । भस्मभूतानामङ्गानां यः सङ्गो गाङ्गाम्भःसङ्गः तेनैव हेतुना सगरात्मजाः स्वः स्वर्गं याताः ये धृतं व्रतं गङ्गाम्भःस्नानरूपं यैः ते श्रद्धया देवीं गङ्गां सेवन्ते ते दिवं यान्ति इति किंपुनर्वक्तव्यमित्यर्थः ॥ १३ ॥

सकलाघापहारणमुक्तिहेतुभूतजलस्पर्शाया गङ्गायाः स्वर्गप्राप्तिमात्रहेतुत्वं नाश्चर्यं कार्यमित्याह-नहीति । अनन्तस्य भगवतः चरणाम्भोजात्प्रसूताया अतएव भवच्छिदः पापनिवर्त्तनसम्यग्ज्ञानप्रवर्तनद्वारा भवं संसारं भिनत्तीति तथाभूतायाः स्वर्धुन्याः स्वर्नद्याः गङ्गाया यन्माहात्म्यमुदितमुक्तं तदेतत्परमाश्चर्यं नहीति उक्तविधं माहात्म्यमनन्तचरणाम्भोजप्रसूतत्वप्रयुक्तमित्युक्तम् ॥ १४ ॥

अथानन्तचरणाम्भोजमाहात्म्यं दर्शयितुं तद्विशिनष्टि-यस्मिन्निति । अमलाः निर्मलान्तःकरणाः मुनयो यस्मिन्ननन्तचरणाम्भोजे श्रद्धया मनो निवेश्य दुस्त्यजं त्रैगुण्यं त्रयो गुणा यत्र त्रैगुण्यं त्रिगुणान् हित्वा प्रकृतिसम्बन्धं हित्वेति यावत् सद्यस्तदैव तदात्मतामनन्ततुल्यस्वभावतां मुक्तिमित्यर्थः याताः प्राप्नुवन्तीत्यर्थः ॥ १५ ॥

भगीरथात् श्रुताख्यः पुत्रो जज्ञे तस्य श्रुतस्य नाभाख्यः पुत्रोऽभूत् ततो नाभावरात् सिन्धुद्वीपस्तस्मात् सिन्धुद्वीपात् अयुतायुः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

राज्ञाभिहितः शिवः ॥ ९ ॥ १० ॥

ऋतुपर्णो नलसखो योऽश्वविद्यामयान्नलात् ।
दत्वाऽक्षहृदयं चास्मै सर्वकामस्तु तत्सुतः ॥ १७ ॥
ततः सुदासस्तत्पुत्रो मदयन्तीपतिर्नृपः ।
आहुर्मित्रसहं यं वै कल्माषाङ्घ्रिमुत क्वचित् ।
वसिष्ठशापाद्रक्षोऽभूदनपत्यः स्वकर्मणा ॥ १८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यान्तं भगीरथम् मनुधावती पृष्ठतः आयान्ती ॥ ११ ॥

देहभस्मभिः साकम् ॥ १२ ॥

भस्मीकृताङ्गस्य स्वर्धुन्याः सङ्गेन ॥ १३ ॥

श्रीनारायणचरणसङ्गलब्धमेवास्या माहात्म्यं नान्यतोऽतो नैतच्चित्रमित्याह–नहीति । इह सगरात्मजकथाप्रसङ्गे गङ्गा-माहात्म्यमुदितमतएव भवच्छिदः संसारच्छेदाः जन्मच्छेत्र्या ना "भवो भद्रे हरे प्राप्तौ सत्तासंसारजन्मसु" इति ॥ १४ ॥

संसारच्छेदनमाहात्म्यं श्रीहरिनिष्ठं गङ्गाया उपचार इत्या-शयवानाह–सन्निवेश्येति । तदात्मतां तत्सायुज्यलक्षणां मुक्तिं तत्स्वामिकतां वा ॥ १५ ॥

एवं भगीरथस्य गङ्गानयनादिमाहात्म्यमुक्त्वा तत्सन्ततिं कथयति–श्रुत इति । तस्य श्रुतस्य नाभस्य वरः सुतः ततः अयुतायोः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तथेति यत्रयत्र गङ्गा यास्यति तत्तलेऽहमेवेति मच्छिरस्येव सा सुखेन यात्वित्यर्थः ॥ ९—१३ ॥

इह यदुदितं सगरात्मजोद्धरणं परमस्याश्चर्यं न भवति॥१४॥

यस्मिन्ननन्ते ॥ १५—१६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हरेः पादेन पूतं जलं यस्यास्ताम् ॥ ९–११ ॥

ब्रह्मणः एव वाजिहरश्चौर इत्याद्यवज्ञारूपः स्वकृतो यो दण्डस्तेन हता अपि केवलं देहभस्मभिरेव न साक्षात् यस्या जलस्य स्पर्शमात्रं तेन दिवं याताः ॥ १२ ॥

स्वः स्वर्गं याताः ॥ १३ ॥ १४ ॥

यस्मिन् अनन्ते त्रैगुण्यं प्राकृतमण्डलम् ॥ १५ ॥ १६ ॥

भाषा टीका ।

भगीरथ ने जो आप से प्रार्थना करी सर्वलोक के हित परायण श्री शिवजी ने भी राजासे तथास्तु कहकर सावधान होकर श्रीहरि के चरण से पवित्र जलवाली श्रीगंगाजी को शीशपर धारण करी ॥ ९ ॥

तब वह राजर्षि भगीरथ भी भुवन पावनी श्रीगंगाजी को जहां अपने पितरों के देह भस्म होकर पडे रहे तहां पर लेगये ॥ १० ॥

वायु सदृश वेग वाले रथ पर बैठकर आगे चलने वाले भगीरथ के पीछे दौडती हुई अपने दिव्य विमल जलों से देशों को पवित्र करती हुई जले हुए सगर पुत्रों को सींचती भई ॥ ११ ॥

जिनके जलके स्पर्श मात्र से ब्रह्म रूप श्री कपिलदेव के विषे अपने किये हुए अपराध से नष्ट हुए भी सगरपुत्र स्वर्ग को गये तिसमें भी केवल देह के भस्म मात्र से जल स्पर्श हुआ देह से भी नहीं ॥ १२ ॥

भस्मी भूत अंग के संग से सगरात्मज स्वर्ग को चले गये तौ फिर जीवते हुए जो पुरुष धृतव्रत होकर श्रद्धा से श्रीगंगाजी का सेवन करते हैं उनका वैभव क्या कहैं ॥ १३ ॥

स्वर्धुनी (श्रीगंगा) का यह कुछ बडा आश्चर्य नहीं है जो यहां कहा है क्योंकि वह तौ साक्षात् अनंत के चरण कमल से उत्पन्न हुई है और इसीसे संसार के बन्धन को काटने वाली है ॥ १४ ॥

जिन श्रीहरि में श्रद्धा से मन को लगाकर निर्मल मुनिजन दुस्त्यज त्रिगुणमय संसार को छोडकर तत्काल में तदात्मत्व (हरि के भाव) को प्राप्त होगये ॥ १५ ॥

हां फिर भगीरथ महाराज के पुत्र श्रुत हुए तिनके नाभ हुए तिनसे सिंधुद्वीप भये तिनके पुत्र अयुतायु भये ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नलस्य सखा भयात्प्राप्तः तत्सुतः ऋतुपर्णस्य सुतः ॥ १७ ॥
तत्पुत्रः सौदासः ॥ १८ ॥

राजोवाच ।

किन्निमित्तो गुरोः शापः सौदासस्य महात्मनः ।
एतद्वेदितुमिच्छामः कथ्यतां न रहो यदि ॥ १९ ॥

श्रीशुक उवाच ।

सौदासो मृगयां कञ्चिच्चरन्रक्षो जघान ह ।
मुमोच भ्रातरं सोऽथ गतः प्रतिचिकीर्षया ॥ २० ॥
स चिन्तयन्नघं राज्ञः सूदरूपधरो गृहे ।
गुरवे भोक्तुकामाय पक्त्वा निन्ये नरामिषम् ॥ २१ ॥
परिवेक्ष्यमाणं भगवान्विलोक्याभक्ष्यमञ्जसा ।
राजानमशपत्क्रुद्धो रक्षो ह्येवं भविष्यसि ॥ २२ ॥
रक्षःकृतं तद्विदित्वा चक्रे द्वादशवार्षिकम् ।
सोऽप्यपोऽञ्जलिनादाय गुरुं शप्तुं समुद्यतः ॥ २३ ॥
वारितो मदयन्त्याऽपो रुशतीः पादयोर्जहौ ।
दिशः खमवनीं सर्वं पश्यन् जीवमयं नृपः ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

न रहो न रहस्यम् ॥ १९ ॥

मृगयां चरन् कञ्चिद्राक्षसं जघान तस्य भ्रातरं मुमोच स भ्राता पलाय्य गतः ॥ २० ॥

अघमनिष्टं सूदः पाचकस्तद्रूपधरः सन् राज्ञो गृहे वर्त्तमानः ॥ २१ ॥

अभक्ष्यमञ्जसा विलोक्य एवं नरमांसव्यवहारेण ॥ २२ ॥
वसिष्ठ एव तं शापं द्वादशवार्षिकं चक्रे ॥ २३ ॥

रुशतीः तीक्ष्णाः अपः स्वपादयोर्जहौ नान्यत्र तत्र हेतुः दिश इति एवमनेन मित्रसहत्वमपि दर्शितम् मित्रस्य कलत्रस्य वाचः सहनात् ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततोऽयुतायुषः ऋतुपर्णः संबभूव, तं विशिनष्टि-यः ऋतुपर्णो नलस्य सखा, तयोः परस्परोपकर्तृत्वरूपं सखित्वं दर्शयति-नलादश्वविद्यामश्वशिक्षाप्रतिपादिकां विद्यामगात् प्राप्तवान्, किंकृत्वा ? तस्मै नलायाऽक्षहृदयं द्यूतशास्त्ररहस्यं दत्वा तस्य ऋतुपर्णस्य सुतः सर्वकामः ॥ १७ ॥

ततः सर्वकामात्सुदासो जज्ञे इति शेषः । तत्पुत्रः सुदासस्य पुत्रो मदयन्त्याः पतिः हे नृप ! यं मदयन्तीपतिं मित्रसहमाहुः तमेव कल्माषाङ्घ्रिश्चाहुः स एव काचित्कदाचित् वसिष्ठस्य शापाद्रक्षो बभूव स्वकर्मणा अनपत्यः औरसरहितश्च बभूव क्षेत्रजस्य वक्ष्यमाणत्वात् ॥ १८ ॥

मद्ध्रुद्देशोक्तं तद्वृत्तान्तं विस्तरेण बुभुत्सया परिपृच्छति राजा-यन्निमित्त इति । महात्मनः सौदासस्य गुरुशापः यदेव निमित्तं यस्य तादृशो बभूव तदेतच्छापस्य निमित्तं वेदितुमिच्छामि तद्यदि न रहस्यं कथयितुं योग्यं चेत्कथ्यताम् ॥ १९ ॥

एवं पृष्ट आह मुनिः-सौदास इत्यादिना वसिष्ठस्तदनुज्ञात इत्यतः प्राक्तनेन । मृगयैव शीलं यस्य सः सौदासो मित्रसहः चरन् रक्षो हतवान् रक्षसो भ्रातरन्तु न जघान किन्तु मुमोच ततः स रक्षसो भ्राता गतस्सन् राज्ञः सौदासस्याघं भ्रातृहननरूपमपराधं चिन्तयन् प्रतिचिकीर्षया अपकर्तुमिच्छया राज्ञो गृहे यः सूदः पाचकः तद्रूपधरो भोक्तुमिच्छवे गुरवे वसिष्ठाय पक्वं नरामिषं निन्ये ॥ २० ॥ २१ ॥

ततो भगवान् वसिष्ठः परिवेक्ष्यमाणं भोजनपात्रे निक्षिप्यमाणं नरामिषमत एवाभक्ष्यमञ्जसा आशु विलोक्य ज्ञात्वा क्रुद्धो राजानं मित्रसहमशपत् किमिति एवम् एवङ्कारयंस्त्वं रक्षो भविष्यसीति ॥ २२ ॥

ततस्तन्नरामिषं परिवेक्ष्यमाणं सूदरूपधरेण रक्षसा कृतं नतु राज्ञा कारितमिति विदित्वा स्ववाक्यानृतत्वपरिहाराय शापं द्वादशवर्षावधिकं चक्रे ततः सोऽपि सौदासोऽप्यञ्जलिना अपः जलमादाय गुरुं वसिष्ठं शप्तुं समुद्युक्तः मदयन्त्या निवारितः रुशतीस्तीक्ष्णाः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नाः कमनीया अपः स्वपादयोर्जहौ तत्याज, तत्र हेतुः दिशः खमाकाशं सर्वामवनिं भूमिञ्च जीवप्रचुरं जगत्पश्यन्नेव तत्त्वयाप एव स्वपादयोर्जहावितिभावः । नृपः सौदासः ॥ २३ ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ऋतुपर्णः अयात्प्राप्तवान् तत्सुतः ऋतुपर्णसुतः ॥ १७ ॥

यं सुदासपुत्रम ॥ १८ ॥ १९ ॥

रक्षो राक्षसं मृतं भ्रातरं प्रतिचिकीर्षया भ्रातृहन्तृहननलक्षणप्रतिकारेच्छया ॥ २० ॥

सूदरूपधरः पाचकवेषधरः नरामिषं नरमांसम ॥ २१ ॥

एवंविधः ॥ २२ ॥

रक्षःकृतं राक्षसकृतम् ॥ २३ ॥

रुषतीः क्रूराः मन्त्रितत्वात् "रुषरिष हिंसायाम्" हिंसयन्तीर्वा "रुग् शब्दे" इतं चिकीर्षाम इति शब्दयन्तीर्वा साधमासे रटन्त्याप इति वचनात् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

न रहो यदीति श्रीमद्वसिष्ठस्यैव तत्र दोषवत् प्रतीतिश्चेत्तदा नोद्धाटनीयमित्यर्थः ॥ १९—२० ॥

सूदरूपधरः तमाविष्टः सन्नित्यर्थः । अपरिचितस्य पाकानधिकारात् ॥ २१—४३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अयात् "या प्रापणे" प्राप्त इत्यर्थः । अक्षहृदयं द्यूतविचाररहस्यं अस्मै नलाय ॥ १७—१९ ॥

कश्चिद्रक्षः कञ्चिद्राक्षसं जघान तस्य भ्रातरं मुमोच स भ्राता ॥ २० ॥

राज्ञो यः सूदः पाचकस्तद्रूपधरः ॥ २१ ॥

अभक्ष्यं नरमांसम ॥ २२ ॥

सर्वज्ञतया रक्षसैव कृतं न तु राज्ञेति विमृश्य तत् शापनं द्वादशवार्षिकं चक्रे सोऽपि सौदासोऽपि ॥ २३ ॥

रुषतीः क्रोधाग्निरूपाः स्वपादयोरेव नान्यत्र दिगादीनां दाहप्रसङ्गात् एतेन कल्माषपादत्वं मित्रसहत्वं च दर्शितं मित्रस्य कलत्रस्य वाचः सहनात् ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नलस्य सखा नलसखः तस्मै नलाय अक्षहृदयं अक्षविद्यां दत्वा अश्वविद्याम् अयात् प्राप्तः ॥ १७ ॥

तत्पुत्रः ऋतुपर्णपुत्रः सुदासः ॥ १८ ॥

रहः रहस्यं न चेत्तर्हि कथ्यताम् ॥ १९ ॥

अथ सौदासस्य मित्रसहत्वं कल्माषाङ्घ्रित्वं वसिष्ठशापात राक्षसत्वं स्वकर्मणा ऽनपत्यत्वं च वर्णयति—सौदास इत्यादिना, भ्रातरं रक्षसः मुमोच न जघान स रक्षोभ्राता प्रतिचिकीर्षया सुदासवधाय गतः सुदासगृहे प्रविष्टः ॥ २० ॥

सूदः पाचकस्तद्रूपधरः गुरवे वसिष्ठाय ॥ २१ ॥

परिवेक्ष्यमाणं भोजनपात्रे निक्षिप्यमाणम् अभक्ष्यमञ्जसा विलोक्य ॥ २२ ॥

सोऽपि सुदासोऽपि अपो जलमञ्जलिनाऽऽदाय गुरुं शप्तुमुद्यतः ॥ २३ ॥

तदा मदयन्त्या वारितः रुषतीः तीक्ष्णा अपः स्वपादयोर्जहौ पदयोर्जहावित्यत्र हेतुः दिश इत्यादि, अनेन मित्रसहत्वमपि दर्शितम मित्रस्य कलत्रस्य क्रोधवेलायामपि वचनसहनात् ॥ २४ ॥

भाषा टीका ।

तिन से ऋतुपर्ण भये जो नलके सखा होकर उनको अक्ष विद्याका रहस्य बतलाकर नल से अश्वविद्या को प्राप्त हुए उन ऋतुपर्ण का पुत्र सर्वकाम हुआ ॥ १७ ॥

सर्वकामके पुत्र सुदास हुए तिनके पुत्र मदयंती रानी के पति राजा सौदास भये जिनको मित्रसह भी कहते हैं और किसी कारण से कल्माषांघ्रि भी कहते हैं वो वसिष्ठ जी के शाप से राक्षस हुए और अपने कर्म से निपुत्री भी हुए ॥ १८ ॥

राजोवाच ॥

राजा परीक्षित बोले, कि—महात्मा सौदास को किस निमित्त से गुरूजी का शाप हुआ यह मैं जानने की इच्छा करता हूं यदि गोप्य न हो तो ॥ १९ ॥

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि—किसी समय सौदास ने सिकार खेलते समय किसी राक्षस को मारा और उसके भ्राता को छोड दिया वह राक्षस का भ्राता राजा से भाई के बदले लेने की इच्छा कर चला गया ॥ २० ॥

वह राजा का अनिष्ट विचारता हुआ राजा के घर में रसोइया का रूप धर कर भोजन की कामना वाले गुरुजी को मनुष्य का मांस पक करके देता हुआ ॥ २१ ॥

भगवान् वसिष्ठ ने परोसे हुए उस अभक्ष्यको देखकर क्रोध कर राजाको शाप दे दिया कि—जा इसी तरह तू भी राक्षस हो जा ॥ २२ ॥

तदनन्तर वसिष्ट जीने उस कर्म को राक्षस का किया भया जान कर शापकी अवधि द्वादशवर्षकी करदीनी, राजा भी निरपराधी होने से क्रुद्ध होकर अञ्जली में जल लेकर गुरुजी को शाप देने को उद्यत हो गया ॥ २३ ॥

तब तो रानी मदयन्ती ने समझा कर बर्ज दिया परन्तु वह

राक्षसं भावमापन्नः पादे कल्माषतां गतः ।
व्यवायकाले ददृश वनौकोदम्पती द्विजौ ॥ २५ ॥
क्षुधार्तो जगृहे विप्रं तत्पत्न्याऽऽहाकृतार्थवत् ।
न भवान्राक्षसः साक्षादिक्ष्वाकूणां महारथः ॥ २६ ॥
मदयन्त्याः पतिर्वीर ! नाधर्मं कर्तुमर्हसि ।
देहि मेऽपत्यकामाया अकृतार्थं पतिं द्विजम् ॥ २७ ॥
देहोऽयं मानुषो राजन् ! पुरुषस्याखिलार्थदः ।
तस्मादस्य वधो वीर ! सर्वार्थवध उच्यते ॥ २८ ॥
एष हि ब्राह्मणो विद्वांस्तपःशीलगुणान्वितः ।
आरिराधयिषुर्ब्रह्म महापुरुषसंज्ञितम् ।
सर्वभूतात्मभावेन भूतेष्वन्तर्हितं गुणैः ॥ २९ ॥
सोऽयं ब्रह्मर्षिवर्यस्ते राजर्षिप्रवराद्विभो ! ।
कथमर्हति धर्मज्ञ ! वधं पितुरिवात्मजः ॥ ३० ॥
तस्य साधोरपापस्य भ्रूणस्य ब्रह्मवादिनः ।
कथं वधं यथा बभ्रोर्मन्यते सम्मतो भवान् ॥ ३१ ॥
यद्ययं क्रियते भक्षस्तर्हि मां खाद पूर्वतः ।
न जीविष्ये विना येन क्षणं च मृतकं यथा ॥ ३२ ॥

भाषा टीका ।

तीक्ष्ण जो अंजली में जल रहा राजा ने उसको अपने पगके ऊपर डालदिया । क्योंकि ? दिशायें, आकाश, और पृथिवी इन सबों को राजा ने जीवमय देखा ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेवं राक्षसत्वे कल्माषांघ्रित्वे च कारणमुक्त्वा स्वकर्मणा अनपत्य इति यदुक्तं तत्प्रपञ्चयति—व्यवायकाल इत्यादिना, कर्मणा अप्रज इत्यन्तेन । वनमोको निवासो ययोस्तौ वनौकसौ च तौ दम्पती च पृथक् पदत्वे सकारलोप आर्षः ॥ २५ ॥

अकृतार्थवद्दीनवत् ॥ २६ ॥

अकृतार्थमसमाप्तरतिम् ॥ २७ ॥

सर्वभूतानामात्मेति भावनयाऽऽराधयितुमिच्छुः यद्वा सर्वभूतानामात्मभावेन भूतेषु स्थितमपि गुणैरन्तर्हितं ब्रह्मेति सम्बन्धः पाठान्तरे अन्तर्हितः सोऽयमित्युत्तरेणान्वयः ॥ २८—३० ॥

भ्रूणस्य श्रोत्रियस्य गर्भस्य सत इति वा बभ्रोर्गोः सतां मतो भवान् वधं कथं साधु मन्यत इत्यर्थः ॥ ३१ ॥

क्षणमपि येन विना न जीविष्यामि सोऽयं यदि भक्षः क्रियते तर्हि मृतकं यथा मृतप्रायां मां पूर्वं भक्षय ॥ ३२ ॥ ३३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

राक्षसं भाव रूपमापन्नः प्राप्तः गुरुशापाद्धेतोरिति शेषः । पादे कल्माषतां नैल्यं विकारं च गतः शापार्थजलप्रक्षेपाद्धेतोरिति शेषः । ततः कदाचिद्वनमेवौकः स्थानं ययोः तौ दम्पती भार्यापती द्विजौ मैथुनकाले ददर्श ॥ २५ ॥

तदा क्षुधा अशनायया पीडितः राक्षसरूपः सौदासो मिथुनीभूतं द्विजं जगृहे, भक्षितुमिति शेषः । तदा तस्य द्विजस्य पत्नी अकृतार्थमसमाप्तरतितृष्णं पतिं वेत्तीति तथाभूता सत्युवाच,तदेवाह—नेत्यादिना । एवं करुणभाषियया इत्यतः प्राक्तनेन । भवान्न राक्षसः किन्तु साक्षादिक्ष्वाकूणां महारथः श्रेष्ठः ॥ २६ ॥

मदयन्त्याः पतिः अतो हे वीर ! अधर्मं विप्रहननरूपं कर्तुं नार्हति अपत्यकामायै मे मह्यं पतिं तत्रापि द्विजं तत्राप्यकृतार्थं देहि ॥ २७ ॥

हे राजन् ! अयं मानुषो देहः पुरुषस्य जीवस्याखिलानां पुरुषार्थानां साधनभूतः यत एवं तस्मादस्याखिलार्थदस्य मानुषदेहस्य वधो, हे वीर ! सर्वार्थानां वध इत्युच्यते ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्चैष त्वया गृहीतो मत्पतिर्ब्राह्मणस्तत्रापि विद्वान् वेदशास्त्रार्थवित् न केवलं विद्वान् अपितु तपः शीलाभ्यामन्यैश्चाक्रोधादिभिर्गुणैरन्वितः सर्वभूतानामात्मभावेन अन्तरात्मतया गुणैः सर्वज्ञत्वादिभिः सहैव भूतेषु देवमनुष्यादिषु अन्तर्हितं हृदयकुहरे निविष्टं महापुरुषादिशब्दवाच्यं ब्रह्माराधयितुमिच्छुरुपासीन इत्यर्थः । सन्नन्तनिर्देशस्तु उपासनदशायामपि ब्रह्मज्ञानस्यैष्टतमत्वज्ञापनाय ॥ २६ ॥

सोयमेवम्भूतो ब्रह्मर्षिवर्यो राजर्षिश्रेष्ठात् तत्रापि पित्रोराधिकृतराज्यात्ते त्वत्तः कथं वधमर्हति सर्वथा नार्हत्येवेत्यर्थः । यथा पितुः सकाशादात्मजो वधं नार्हति तद्वत् ॥ ३० ॥

तस्योक्तविधस्य पापस्य भ्रूणस्य सूत्रप्रवचनाध्यायिनः "वेदानां किञ्चिदधीत्य ब्राह्मण एकां शाखामधीत्य श्रोत्रीयोऽङ्गाध्याय्यनूचानः कल्पाध्यायी ऋषिः कल्पसूत्रप्रवचनाध्यायी भ्रूणः" इत्यादिप्रयोगात् ब्रह्मवादिनः ब्रह्मोपदेष्टुः वेदाध्यापकस्य वा वधं साधूनां सम्मतो भवान् कथं मन्यते सम्मतमितिशेषः । यथा बभ्रोर्धेनोर्वधं भवान्न सम्मतं मन्यते तथा अस्यापि वधं न सम्मतं मन्यस्वेत्यर्थः ॥ ३१ ॥

यदि सर्वथा अयं ब्राह्मणस्त्वया भक्षः क्रियते भक्ष्यते इत्यर्थः । तर्हि पूर्वतः तद्भक्षणात् प्रागेव मां खाद अद्धि अनेन विनाऽहं क्षणमपि न जीविष्ये यथा मृतकं कुणपं जीवेन विना तद्वदहमप्यनेन विनेत्यर्थः । ततश्च यथा मृतकं शवस्तथाहं भविष्यामि इत्यर्थः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कल्मापतां वनमापवर्णोवस्तां व्यवायकाले सुरतसमये ॥२५॥

द्विजपत्नी राक्षसस्य कृपाजननायाऽवध्यत्वे चानेकानि कारणान्याह—न भवानित्यादिना ॥ २६–३० ॥

भ्रूणस्य स्वस्य स्वयमेव पुत्रस्य ब्रह्मवादिनः ब्रह्मज्ञानिनः षडङ्गवेदाध्यायिनो वा बभ्राः सौरभेय्याः "माहेयी सौरभेयी च बभ्रुः स्यादृषकांक्षिणी" इत्याभिधानम् ॥ ३१ ॥

येन पत्या मृतकं प्राणरहितशरीरं प्राणमन्तरेण ॥ ३२ ॥ ॥ ३३ ॥ ३४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

वनौकसौ च तौ दम्पती चेति तौ पृथक् पदपाठे सलोप आर्षः २५—२६ ॥

अकृतार्थम् असमाप्तरतिम् ॥ २७ ॥ २८ ॥

गुणैर्द्रष्टृनिष्ठैः सत्त्वादिभिर्हेतुभिः अन्तर्हितमदृश्यम् ॥ २९ ॥

ते त्वत्तः ॥ ३० ॥

ब्रह्मवादिनो भ्रूणस्य पुत्रस्य अस्य पिताऽपि ब्रह्मवादीत्यर्थः "भ्रूणोऽर्भके बालगर्भे" इत्यमरः बभ्रोर्गोः ॥ ३१ ॥

तदप्यनिवृत्तं दृष्ट्वा पुनः प्राह—यद्ययमिति । येन प्राणेनैव विनेत्यर्थः । ततश्च यथा मृतकं शवस्तथाहं भविष्यामि इत्यर्थः ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

वनमेवौकः स्थानं ययोस्तौ वनौकसा च दम्पती वनौकोदम्पती ॥ २५ ॥ २६ ॥

अकृतार्थम् अकृतगर्भाधानम् ॥ २७ ॥ २८ ॥

सर्वभूतात्मभावेन गुणैः सर्वप्रेरकत्वादिभिर्भवछातर्हि तं ब्रह्म आराधयितुमिच्छुः योऽसै कथं वधमर्हतीत्युत्तरेणान्वयः ॥२९॥३०॥

यथा भ्रूणस्य गर्भस्य यथा बभ्रोर्गोः तथा तस्योक्तविधस्य अपापस्य साधोः वधं सम्मतः सतां सम्मतो भवान् कथं साधु मन्यते भ्रूणस्येति ब्रह्मवादिनो विशेषणं वा तदा भ्रूणस्य सूत्रप्रवचनाध्यायिन इत्यर्थः । "वेदानां किञ्चिदधीत्य ब्राह्मण एकां शाखामधीत्य श्रोत्रियः साङ्गाध्याय्यनूचानः कल्पाध्यायी ऋषिः कल्पसूत्रप्रवचनाध्यायी भ्रूणः" इति प्रयोगात् ॥ ३१ ॥

यदि अयं भक्ष्यः क्रियते तर्हि मृतकं यथा मां मृतकतुल्यं पूर्वतः प्रथमं भक्षय ॥ ३२ ॥ ३३ ॥

भाषाटीका ।

वस उसीसमय से राजा राक्षस भाव को प्राप्त होकर पाद में कल्मषको प्राप्त हुआ इसी से राजा का नाम कल्माषपाद हुआ राक्षसपने में राजा वन में विचरता रहा वन में रहने वाले ब्राह्मण ब्राह्मणी को रति समय में राजाने देखा ॥ २५ ॥

तबतौ क्षुधार्त्त रहाई उन दोनों में से ब्राह्मणको पकड़ लिया तब अकृतार्थ के नांई ब्राह्मणी बोली, कि आप राक्षस नहीं हौ आपतौ इक्ष्वाकुवंशियों में महारथी हौ ॥ २६ ॥

हे वीर ! आप रानी मदयन्ती के पति हौ आप अधर्म करने के योग्य नहीं हौ । मैं पुत्र की कामना वाली हूं और मेरा पति भी अभी विषयों से कृतार्थ नही भया ऐसे मेरे पति ब्राह्मण को मों ब्राह्मणी के लिये दीजिये ॥ २७ ॥

हे राजन् ! यह मनुष्य का देह पुरुष को सर्व अर्थ देने वाला है तस्मात् हे वीर ! इसका वध करना सर्व अर्थ के नाश करने के बराबर है ॥ २८ ॥

तिसमें यह ब्राह्मण है और विद्वान् है तप शील गुण युक्त है और महापुरुष संज्ञक ब्रह्म की आराधना की इच्छा वाला है जो ब्रह्म सबभूतो के आत्मभाव से गुणों के द्वारा सर्व भूतों के अंतर्हित है ॥ २९ ॥

हे धर्मज्ञ ! वह यह ब्रह्मर्षि वर्य आप सदृश राजर्षि प्रवर से किस प्रकार वध योग्य है ? जैसे पिता से पुत्र कभी भी वध को नहीं प्राप्त होसका है ॥ ३० ॥

ऐसे निष्पाप साधुका, और उदरस्थ गर्भ का और ब्रह्मवादी का वध आप सदृश संमत पुरुष कैसे मान सके हौ जैसे कि गौ के वध को योग्य नहीं मानते हैं ॥ ३१ ॥

एवं करुणभाषिण्या विलपन्त्या अनाथवत् ।
व्याघ्रः पशुमिवाखादत् सौदासः शापमोहितः ॥ ३३ ॥
ब्राह्मणी वीक्ष्य दिधिषुं पुरुषादेन भक्षितम् ।
शोचन्त्यात्मानमुर्वीशमशपत्कुपिता सती ॥ ३४ ॥
यस्मान्मे भक्षितः पाप ! कामार्त्तायाः पतिस्त्वया ।
तवापि मृत्युराधानादकृतप्रज्ञ ! दर्शितः ॥ ३५ ॥
एवं मित्रसहं शप्त्वा पतिलोकपरायणा ।
तदस्थीनि समिद्धेऽग्नौ प्रास्य भर्तुर्गतिं गता ॥ ३६ ॥
विशापो द्वादशाब्दान्ते मैथुनाय समुद्यतः ।
विज्ञाय ब्राह्मणीशापं महिष्या स निवारितः ॥ ३७ ॥
ततः ऊर्ध्वं स तत्याज स्त्रीसुखं कर्मणाऽप्रजाः ।
वसिष्ठस्तदनुज्ञातो मदयन्त्यां प्रजामधात् ॥ ३८ ॥
सा वै सप्त समा गर्भमबिभ्रन्न व्यजायत ।
जघ्नेऽश्मनोदरं तस्याः सोऽश्मकस्तेन कथ्यते ॥ ३९ ॥
अश्मकान्मूलको जज्ञे यः स्त्रीभिः परिरक्षितः ।
नारीकवच इत्युक्तो निःक्षत्रे मूलको भवत् ॥ ४० ॥

भाषा टीका ।

और यदि तुम इसका भक्षण करते हौ तौ प्रथम मोकों क्यों न खालो क्योंकि ? फिर मै तौ मृत सदृश ही हूं ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दिधिषुं गर्भाधानकर्त्तारम् ॥ ३३—३४ ॥

आधानान्मैथुनात् । हे अकृतप्रज्ञ ! मृत्युर्मया दर्शितः ॥३५—३७॥

तदेवं कर्मणा अप्रजाः ॥ ३८ ॥

अबिभ्रदधारेत्यर्थः । न, व्यजायत न प्रासूत अतो वसिष्ठ एव तस्या उदरमश्मना जघान स उत्पन्नः सुतोऽश्मकः ॥ ३९ ॥

स्त्रीभिः संवेष्ट्य परशुरामात्परिरक्षितोऽतो नारीकवच इत्युक्तः निःक्षत्रे सति क्षत्रवंशस्य मूलमभवदतो मूलक इति प्रोक्तः ॥ ४०—४१ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

एवं तस्याः करुणभाषिण्याः अनाथवद्विलपन्त्याः सत्याः शापेन मोहितः सौदासो द्विजं व्याघ्रः पशुमिवाखादत् भक्षितवान् ॥३३॥

ततः पुरुषादेन रक्षसा सौदासेन भक्षितं दिधिषुं गर्भाधानकर्त्तारं पतिं वीक्ष्य ब्राह्मणी आत्मानंप्रति शोचन्ती कुपिता सती उर्वीशं सौदासमशपत् ॥ ३४ ॥

किमिति ? यस्मात्कामार्त्ताया मम पतिरपापो निरपराधस्त्वया भक्षितस्तस्मात् हे अकृतप्रज्ञ विवेकशून्य ! तवाप्याधानान्मृत्युर्दर्शित इति, यदा गर्भाधानं कर्तुमुद्युक्तोऽसि तदा मरणं प्राप्स्यसीति ॥३५॥

एवं मित्रसहं सौदासं शप्त्वा ब्राह्मणी पतिलोकपरायणा पतिलोकं कामयमानेत्यर्थः । तस्य पत्युरस्थीनि समिद्धे प्रज्वलितेऽग्नौ प्रास्य पतित्वा भर्त्तुर्गतिं प्राप्ता ॥ ३६ ॥

ततो द्वादशवत्सरान्ते विगतशापः स सौदासो मैथुनायोद्यतः ब्राह्मणीशापं विज्ञाप्य प्रत्यभिज्ञाप्य महिष्या मदयन्त्या सम्यङ्निवारितः ॥ ३७ ॥

तत आरभ्य स सौदासः स्त्रीसुखं तत्याज मृत्युभयादिति शेषः अतएवोक्तेन कर्मणा अप्रजाः औरसरहितो बभूव एवंस्थिते तेन सौदासेनानुज्ञातो वसिष्ठो मदयन्त्यां प्रजामधात् गर्भाधानमकरोत् ॥ ३८ ॥

ततः सा वै मदयन्ती सप्त समाः वत्सरान् गर्भमबिभ्रत् तदापि न व्यजायत अपत्यमिति शेषः । तदा सौदासः तस्या मदयन्त्याः

ततो दशरथस्तस्मात्पुत्र ऐडविडस्ततः ।
राजा विश्वसहो यस्य खट्वाङ्गश्चक्रवर्त्यभूत् ॥ ४१ ॥
यो देवैरर्थितो दैत्यानवधीद्युधि दुर्जयः ।
मुहूर्त्तमायुर्ज्ञात्वैत्य स्वपुरं सन्दधे मनः ॥ ४२ ॥
न मे ब्रह्मकुलात्प्राणाः कुलदैवान्न चात्मजाः ।
न श्रियो न मही राज्यं न दाराश्चाऽतिवल्लभाः ॥ ४३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उदरमश्मना पाषाणेन जघ्ने स उदरान्निर्गतस्तेनाश्मघातेन निमित्तेनाश्मक इति कथ्यते व्यवह्रीयते ॥ ३९ ॥

अश्मकान्मूलको जज्ञे. तस्यैव नारीकवच इति नामान्तरं नामद्वयनिमित्ते दर्शयति । योऽश्मकस्य पुत्रः निःक्षत्रे भार्गवेण रामेण क्षत्रोत्पाटने क्रियमाणे स्त्रीभिः परिरक्षितः अतो नारीकवच इत्युक्तः पुनः क्षत्रकुलस्य मूलत्वान्मूलकनामाचाभवादित्युक्तः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हे अकृतप्रज्ञ ! अशिक्षितबुद्धे ! तव मृत्युरेवं गर्भाधानसमये दर्शितो भवेदापातादतर्कितात्कालादिति शेषः ॥ ३५ ॥

प्रास्य निक्षिप्य ॥ ३६ ॥

ब्राह्मण्याः शापं विज्ञाय स मित्रसहः स्त्रीसुखं स्त्रियं दूरीकृत्य कर्मणा मैथुनलक्षणेन प्रजां सन्ततिं तत्याज, तर्ह्यस्य केन विधिना पुत्रो जातः ? इति तत्राह–वसिष्ठ इति । तेन सौदासेन अनुज्ञातः मद्भार्यायां पुत्रमुत्पादयेति ॥ ३७ ॥ ३८ ॥

समाः संवत्सरान् ॥ ३९ ॥

निःक्षत्रे परशुरामेण दुष्टक्षत्रियसंहारे कृते सति ॥४०॥४१॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

करुणभाषिणीमनादृत्य ॥ ३३ ॥

दिधिषुं गर्भाधानकर्त्तारम् ॥ ३४ ॥

आधानात् मैथुनात् मृत्युर्मया दर्शितो भविष्यति ॥ ३५–३८ ॥

अबिभ्रद्धार न व्यजायत न प्रासूत वसिष्ठ एव तस्या उदरमश्मना जघान ततः स सुतः ॥ ३९ ॥

स्त्रीभिरावृत्य परशुरामात् रक्षितः पुनः क्षत्रवंशस्य मूलत्वात् मूलकः ॥ ४०—४१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

दिधिषुं गर्भाधानकर्तारम् ॥ ३४ ॥

आधानात् मैथुनात् प्रदर्शितो मयेति शेषः ॥ ३५—३८ ॥

सप्त समाः संवत्सरान् अबिभ्रत् दधार न व्यजायत न प्रासूत अश्मना पाषाणेन जघान वसिष्ठ एवेति ज्ञेयम् ॥ ३९ ॥

स्त्रीभिः परिरक्षितः परशुरामात् ॥ ४० ॥ ४१ ॥

भाषा टीका ।

वह विचारी ब्राह्मणी इस प्रकार करुणा पूर्वक अनाथ के तरह विलाप करती रही पर जैसे व्याघ्र पशु को खा जावै इसी प्रकार शाप मोहित होकर वह सौदास ब्राह्मण को खा गया ॥३३॥

ब्राह्मणी ने अपने गर्भ धारण करने वाले पति को पुरुषाद [मनुष्य खाने वाले] से भक्षित देखकर अपने शरीर का शोच करती हुई कुपित होकर राजा को शाप देती हुई ॥ ३४ ॥

कि—हे पापी ! जिससे तू ने मो कामार्त्त ब्राह्मणी के पति को भक्षण कर लिया इसी से हे निर्बुद्धे ! तेरी मृत्यु भी गर्भाधान करने से मैंने दिखाई अर्थात् मैथुन करेगा तो तूँ मरेगा ॥ ३५ ॥

इस प्रकार राजा को शाप देकर पति लोक परायण वह ब्राह्मणी पति के अस्थियों को जलती हुई अग्नि में छोड़कर आप भी उसी में जलकर भर्त्ता की गति को गई ॥ ३६ ॥

बारह वर्षके पीछे शाप दूर होने पर राजा मैथुन को जब उद्यत हुआ तब रानी ने ब्राह्मणी के शाप का स्मरण कर राजा को निवारण किया ॥ ३७ ॥

तिसके पीछे राजा ने स्त्री सुख छोड़ दिया और अपने कर्म ही से निपुत्री हुए तब प्रार्थना कर वसिष्ठ जी के द्वारा नियोग से संतान उत्पन्न कराई ॥ ३८ ॥

रानी ने सप्त वर्ष तक गर्भ धारण किया जब प्रसव नहीं भया तब वसिष्ठजी ने रानी के उदर को अश्म (पाषाण) से कूटा तब बालक उत्पन्न हुआ इसी से उसका नाम अश्मक हुआ ॥ ३९ ॥

अश्मक से मूलक हुए जब परशुराम जी पृथिवी को निःक्षत्र करने लगे तब इनकी रक्षा स्त्री लोगों ने कीनी इसी से इन का नारी कवच भी नाम हैं भूतल के निःक्षत्र होने पर क्षत्रियों के मूल भी ये ही हुए इससे इनका नाम मूलक हुआ ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रसन्नैर्देवैर्वरं वृणीष्वेत्युक्ते खट्वाङ्गेनोक्तं; प्रथमं तावन्ममायुः कथ्यताम्? इति, देवैश्चोक्तं मुहूर्तमात्रमिति. तज्ज्ञात्वा देवैर्दत्तेन विमानेन शीघ्रं स्वपुरमेत्य मनः परमेश्वरे सन्दधे ॥ ४२ ॥

न बाल्येऽपि मतिर्मह्यमधर्मे रमते क्वचित् ।
न पश्याम्युत्तमश्लोकादन्यत्किञ्चन वस्त्वहम् ॥ ४४ ॥
देवैः कामवरो दत्तो मह्यं त्रिभुवनेश्वरैः ।
न वृणे तमहं कामं भूतभावनभावनः ॥ ४५ ॥
ये विक्षिप्तेन्द्रियधियो देवास्ते स्वहृदि स्थितम् ।
न विन्दन्ति प्रियं शश्वदात्मानं किमुतापरे ॥ ४६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एतदेव स्वसाधुवृत्तानुस्मरणपूर्वकं तत्कृतेन निश्चयेन दर्शयति–नेति सप्तभिः । कुलदैवात् ब्रह्मकुलात्सकाशान्मे प्राणादयो नातिवल्लभाः नातिप्रियाः ॥ ४३ ॥

मह्यं मम ॥ ४४ ॥

भूतभावनो हरिस्तस्मिन्नेव भावना यस्य सोऽहं तं कामं न वृणे ॥ ४५ ॥

तत्र हेतुः—य इति । विक्षिप्तानीन्द्रियाणि धीश्च येषां ते देवा अपि ॥ ४६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततो मूलकाद्दशरथः, तस्माद्दशरथात् ऐलविलः पुत्रः तत ऐलविलाद्विश्वसहाख्यो राजा जज्ञे तत्पुत्रं वदन् तं विशिनष्टि—यस्य विश्वसहस्य खट्वांगाख्यश्चक्रवर्ती संबभूव ॥ ४१ ॥

अथ खट्वाङ्गं विशिंषन् तद्वृत्तान्तमाह—य इत्यादिना यावदध्यायसमाप्ति । यो खट्वांगो युधि युद्धे दुर्जयः जेतुमशक्यः अतएव देवैरर्थितः सहायत्वेन प्रार्थितः दैत्यानवधीत् ततो देवैर्वराय चोदितः स्वस्यायुः मुहूर्त्तमात्रावशिष्टं ज्ञात्वा स्वपुरमागत्य मनःसन्दधे मनसा आलोच्य निश्चितवानित्यर्थः ॥ ४२ ॥

तस्य मनःसन्धानप्रकारमेव दर्शयति–नेत्यादिना इति व्यवसित इत्यतः प्राक्तनेन । ब्रह्मकुलान्मम प्राणा नातिवल्लभा इत्यन्वयः ब्रह्मकुलमेव मम प्राणेभ्योऽपि प्रियमित्यर्थः । एवमुत्तरत्रापि द्रष्टव्यं कुलदैवाद्भगवतः आत्मजादयो न वल्लभाः ॥ ४३ ॥

मह्यं मम मतिर्बाल्येऽपि क्वचिदापद्यपि अधर्मे न रमते नारमत इह लोके किञ्चिदपि वस्तूत्तमश्लोकाद्भगवतोऽन्यत्पृथग्भूतं नापश्यं तत्सर्वं वस्तु भगवदात्मकमेव दृष्टवानस्मीत्यर्थः । नावश्यमिति पाठान्तरं तदा किञ्चिदपि वस्तूत्तमश्लोकाद्भगवतोऽन्यन्नापश्यं नोपादेयमित्यर्थः ॥ ४४ ॥

यद्यपि त्रिभुवनेश्वरैः देवैर्मह्यं कामानुगुणो वरो दत्तस्तथाप्यहं तं कामं वरं न वृणे न वृणुयां तत्र हेतुं वदन् आत्मानं विशिनष्टि, भूतभावनभावनः भूतानि देवादीनि भावयति सत्तादिमन्ति करोतीति भूतभावनो भगवान् तं भावयति भजतीति तथाभतोऽहमित्यर्थः—

वासुदेवं मनो यस्य जपहोमार्चनादिषु ।
तस्यान्तरायो मैत्रेय ! देवेन्द्रत्वादिकं फलम् ॥

इत्युक्तरीत्या देवैर्दीयमानो वरो मम भगवत्प्रीतिविरोधीति भावः ॥ ४५ ॥

तर्हि देवादयः स्वर्गादिकमेवोत्कृष्टं किमिति मन्यन्ते ? इत्याशङ्क्याह–य इति । य इमे देवास्ते विक्षिप्तेन्द्रियधियः देहात्माभिमानिनः अतस्ते शश्वत्सदा स्वहृदि स्थितमप्यन्तरात्मानं निरतिशयप्रियं न विन्दन्ति किन्तु वैषयिकमेव सुखं परं मन्यन्त इति भावः । देवा एव न जानन्ति किमुतापरे न विन्दन्तीति॥४६॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

खट्वाङ्गो दैत्यान् निहत्य स्वपुरं गत्वाऽऽयुर्मुहूर्तावधिकं ज्ञात्वैवं मनः सन्दधे ॥ ४२ ॥

कथं तदिति तत्राह–न म इति । कुलदैवात् ब्राह्मणकुलात् मे प्राणादयो नातिवल्लभा इत्यन्वयः ॥ ४३ ॥

मह्य मम मतिः वस्त्वप्रतिहतम् ॥ ४४ ॥

भूतभावनस्य हरेर्भावनात् उपासनादन्यदपरं कामं मोक्षसाधनत्वेन न वृणे ॥ ४५ ॥

अविक्षिप्तेन्द्रियधियः आत्मानं हरिम् ॥ ४६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नापश्यमुत्तमश्लोकादन्यदेवेत्येवार्थः न चिन्तयामीति सुरनरपालनविक्षेपस्य पूर्वं स्थितत्वात् ॥ ४४—४७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

प्रसन्नैर्देवैर्वरं वृणुष्वेत्युक्ते खट्वाङ्ग उवाच प्रथमं तावत् ममायुर्ब्रूत ? इति; देवैश्चोक्तं मुहूर्तमात्रमिति, तज्ज्ञात्वा देवैर्दत्तेन विमानेन शीघ्रं स्वपुरमेत्य मनः परमेश्वरं सन्दधे ॥ ४२ ॥

मुहूर्तमध्य एव प्रथमं खट्वाङ्गः स्वगतमाह—नेति पञ्चभिः । ब्रह्मकुलात् कीदृशात् कुलस्य मदायस्य दैवात् ॥ ४३ ॥

मह्यं मम वस्तु स्वस्योपादेयमित्यर्थः ॥ ४४ ॥

अथेशमायारचितेषु सङ्गं गुणेषु गन्धर्वपुरोपमेषु ।
रूढं प्रकृत्यात्मनि विश्वकर्तुर्भावेन हित्वा तमहं प्रपद्ये ॥ ४७ ॥
इति व्यवसितो बुद्ध्या नारायणगृहीतया ।
हित्वाऽन्यभावमज्ञानं ततः स्वं भावमाश्रितः ॥ ४८ ॥
यत्तद्ब्रह्म परं सूक्ष्ममशून्यं शून्यकल्पितम् ।
भगवान् वासुदेवेति यं गृणन्ति हि सात्वताः ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां नवमस्कन्धे खट्वाङ्गचरितं नाम
नवमोऽध्यायः ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

यतो भूतभावने हरावेव भावना यस्य सः ॥ ४५ ॥
अत्रस्ये हेतुमाह—य इति ॥ ४६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

प्रसन्नैर्देवैर्वरं वरय इत्युक्ते खट्वाङ्गेनोक्तं प्रथमं मे आयुः कथ्यतामिति, देवैरुक्तं मुहूर्त्तमिति, तज्ज्ञात्वा देवैर्दत्तेन विमानेन शीघ्रं स्वपुरमेत्य मनः परमेश्वरे सन्दधे ॥ ४२ ॥

कुलदैवात् ब्रह्मकुलात् सकाशात् मे प्राणादयो नातिवल्लभाः प्रियाः ॥ ४३ ॥

महां मम अन्यत् अतदात्मकम् ॥ ४४ ॥

भूतानि भावयति उत्पादयतीति सर्वकर्त्ता हरिः तस्मिन् भावना भक्तिः यस्य सोऽहं तं कामं वरं न वृणे न वृणुयाम् ॥ ४५ ॥

देवानामपि परमेश्वरे भक्तिर्दुर्लभा किमुतेतरेषां सा मम तत्प्रसादाज्जाताऽतः तं प्रपद्ये इत्याह ये इति द्वाभ्याम् ॥ ४६ ॥

भाषा टीका।

मूलक के दशरथ हुए तिनके ऐडविड हुए तिन से राजा विश्वसह हुए जिनके पुत्र खट्वांग महाराज चक्रवर्त्ती हुए ॥ ४१ ॥

जिनने देवों की प्रार्थना से बहुत काल तक युद्ध में दैत्यों को मारा और आप दुर्जयरहे देवों के शत्रु नष्ट होने पर उनोंने कहा कि वर मांगो तब राजा ने कहा कि हमारी आयु कितनी है तब देव बोले, कि—दो घड़ी है, बस इतना जानकर कुछ वर नहीं लिया और देवों के दिये हुए विमान में बैठकर अपने पुर को आये मन को परमेश्वर के अनुसन्धान में लगाया ॥ ४२ ॥

और राजा ने यह निश्चय किया, कि—हमारे कुल के देवत अर्थात् परम पूजनीय ऐसे ब्रह्मकुल से अधिक हमको अपने प्राण, पुत्र, संपत्, मही, राज्य, स्त्रीयें, ये कोई भी प्रिय नहीं है ॥ ४३ ॥

बाल्य अवस्था में भी हमारी मति कभी अधर्म में नहीं रमती रही और अब भी उत्तमश्लोक श्रीहरि से अन्य किसी वस्तु को नहीं देखता हूं ॥ ४४ ॥

त्रिभुवन के ईश्वर ऐसे देवों ने मेरे लिये यथेष्टवर दिये, मैं उन वरों को नहीं चाहता हूं क्योंकि ? भूत भावन श्रीहरि मात्र में मेरी भावना हैं ॥ ४५ ॥

जो विक्षिप्त इन्द्रिय बुद्धि वाले देवलोग भी अपने हृदय में सदास्थित और अपने परम प्रिय ऐसे अपने आत्मा जो साक्षात् परमात्मा तिनको नहीं प्राप्त होते हैं। तो फिर और लोग विचारे कहां से प्राप्त होसके हैं ॥ ४६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

अथ तस्मात्प्रकृत्या स्वभावेनाऽऽत्मनि रूढं गुणेषु सङ्गं विश्वकर्तुर्भावेन हित्वा तमेवाहं प्रपद्ये ॥ ४७ ॥

अन्यभावं देहाद्यभिमानरूपमज्ञानं हित्वा ॥ ४८ ॥

स्वभावमेवाऽऽह—यत्तदिति। शून्यवत्कल्पितम् वागाद्यविषयत्वात् वासुदेव इति यं गृणन्ति ब्रह्मण एव भक्तानुग्रहार्थमाविष्कृततनोर्वासुदेवत्वात् ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायां
नवमोऽध्यायः ॥ ९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ तस्मादहमिह लोके भगवान्मायया रचितेषु गन्धर्वनगरतुल्येष्वनित्येषु गुणेषु शब्दादिविषयेषु प्रकृत्यात्मनि प्रकृत्यात्मके प्रकृतिपरिणामात्मके शरीरे च रूढं सङ्गं त्यक्त्वा विश्वभर्तुर्भगवतः भावेन भक्त्या तं विश्वभर्त्तारं प्रपद्ये प्राप्स्यामीति ॥ ४७ ॥

इत्यम्बुद्ध्या नारायणे गृहीतया तद्विषयया बुद्ध्येत्यर्थः । व्यवसितः निश्चितवान् अन्यभावम् अन्यत्र देहादौ भावो येन स्यात्तदन्यथाभावम् अज्ञानं हित्वा देहं त्यक्त्वेत्यर्थः । ततस्स्वं भावनाश्रित आविर्भूतगुणाष्टकस्वभावः ॥ ४८ ॥

अशून्यम् इयत्ताप्रमाणशून्यम् ननु शून्यमितिविक् प्रमाणेन सिद्धं न तु शशविषाणादिवत् तुच्छमित्यर्थः । यद्वा, शून्यं रहितं निर्गुणं न भवतीत्यशून्यमनन्तकल्याणगुणाकरमित्यर्थः । शून्यकल्पितं कल्पितं कल्पना भावेक्षः विभूतिगतजात्यादिकल्पना यस्मिन् शून्या तत्तथोक्तम् अनेन हेयगुणराहित्यमुक्तं यत्तद्ब्रह्ममयं भगवान् वासुदेव इति गृह्णन्ति सात्वतास्तदाश्रिता इत्यनुषङ्गः स्वं भावमाश्रित इति प्रत्यगात्मनः शुद्धस्वभावाविर्भाव उक्तः एवं मुक्तोऽभूदित्यर्थः ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
नवमोऽध्यायः ॥ ९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

किमनेन बहुनोक्तेनाप्येवं मम सिद्धान्त इति सन्दधाति-अथेति । अथाऽहं तं श्रीहरिं प्रपद्य इत्यन्वयः । किं कृत्वा ? ईशस्य हरेर्मायया विकृतैः पृथिव्यादिपञ्चभूतैः रचितेषु गुणेषु देहेन्द्रियादिषु गन्धर्वपुरोपमेषु नश्वरेषु आत्मनि मनसि प्रकृत्या स्वतएव रूढं सङ्गं स्नेहलक्षणं पाशं हित्वा, त्यागे साधनमाह विश्वभर्तुरिति भावेन भक्त्या ॥ ४७ ॥

सर्वस्मादन्यस्य हरेर्भावत्वमेकत्वविषयमज्ञानं हित्वा स्वं भावं स्वतन्त्रं भावं स्थितः ॥ ४८ ॥

भावशब्दस्य लीलाद्यनेकार्थेषु वृत्तेरत्र विवक्षितः कः ? इति तत्राह—यत्तदिति । उत्तरलिङ्गविवक्षया यत्तदिति वेदान्तिनो यं भावं परं ब्रह्मेति गृणन्ति योगिनः सूक्ष्ममिन्द्रियागोचरमाकाशवदिति संकिरन्ते, केचिद्वैदिकाः शून्यनाम्ना कल्पितं जल्पन्ति न तत्सत्वमित्याह-अशून्यमिति । सात्वताः पाञ्चरात्रिकाः यं भगवन्तं वासुदेव इति नाम्ना गृणन्ति तं भावमास्थित इत्यन्वयः "ब्रह्मविदाप्नोति परं तस्यान्ते सुषिरं सूक्ष्मम्" "ब्रह्मेति परमात्मेति भगवानिति शब्द्यते" इत्यादेः शून्यं तत्त्वमयामिति च ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
नवमोऽध्यायः ॥ ९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नारायणगृहीतयेति नारायणविषयेत्यर्थः । अत एव मुहूर्त्तेन ब्रह्मलोकं खट्वाङ्गः समसाजर्यादित्युक्तम् ॥ ४८—४९ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
नवमोऽध्यायः ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अस्थिरत्वेन गन्धर्वपुरतुल्येषु रूढं सङ्गं हित्वा प्रकृत्या स्वभावेनैव आत्मनि मन्मनसि विश्वकर्त्तुर्भगवतो यो भावो भक्तिस्तेनैव तं प्रपद्ये ॥ ४७ ॥

नारायणेनैव कर्त्रा गृहीतया यत्र बुद्धौ नान्यस्याधिकार इत्यर्थः, तथा बुद्ध्यैव ततोऽज्ञानत्यागानन्तरं स्वं भावं पूर्वस्लोकनिश्चितं प्रपत्तिरूपं दास्यमीत्यर्थः ॥ ४८ ॥

स एव को यस्मिन् दास्यमित्यपेक्षायामाह—यत्तद्ब्रह्मेति । यस्य तत्प्रसिद्धं ब्रह्म परमातिशयेन सूक्ष्मं निर्विशेषं स्वरूपमित्यर्थः । शून्यवत् कल्पितं वागाद्यविषयत्वात् यं च वासुदेव इति गृणन्ति तस्मिन्नित्यर्थः । देहं त्यक्त्वा तं प्रापेति ज्ञेयं "खट्वाङ्गो नाम राजर्षिर्ज्ञात्वेयत्तामिहायुषः । मुहूर्त्तात् सर्वमुत्सृज्य गतवानभयं हरिम्" इति पूर्वोक्तेः ॥ ४९ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
नवमे नवमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

गन्धर्वपुरोपमेषु क्षणभङ्गुरेषु गुणेषु विषयेषु प्रकृत्या स्वभावेन रूढं सङ्गं हित्वा विश्वभर्तुः भावेन भक्त्या तं विश्वभर्त्तारं भगवन्तं प्रपद्ये प्राप्स्यामीत्यन्वयः ॥ ४७ ॥

नारायणगृहीतया नारायणादेव प्राप्तया बुद्ध्या अन्यद्भावं विषयाभिनिवेशरूपं अज्ञानम् आत्मानात्मपरमात्मादिकं च हित्वा स्वं भावं निजजीवात्मभावे आश्रितः देहेन्द्रियमनोबुद्धिप्राणादिविलक्षणं निजरूपमाश्रित इत्यर्थः ॥ ४८ ॥

तदनन्तरं यत्परं ब्रह्म तदाश्रित इत्यनुषंगः "निरञ्जनः परमं साम्यमुपैति" "मत्साधर्म्यमागताः" इत्यादिश्रुतिस्मृतिप्रसिद्धं भगवत्साम्यं प्राप्त इत्यर्थः । कीदृशं परं ब्रह्म ? अशून्यम् अनन्तकल्याणगुणसंयुतम् शून्यकल्पितं शून्ये रागद्वेषादिरहिते हृदि भजनकाले कल्पितं समर्थितं ध्यातमित्यर्थः । अत एव मुक्तिकाले प्राप्तमिति भावः ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
नवमोऽध्यायार्थप्रकाशः ॥ ९ ॥

भाषा टीका ।

तस्मात् ईश्वर की माया से रचित गन्धर्व पुरोपम इन विषयो में स्वभाव से लगी हुई इस आसक्ति को विश्वके भरण पोषण करने वाले के भाव से छोडकर उसी श्रीहरि की मैं शरण जाता हूं ॥ ४७ ॥

इस प्रकार व्यवसाय युक्त बुद्धि को नारायण में लगा कर अन्य भाव को छोडकर अर्थात् सकल वसुधा पतित्व आदि की वासना को छोडकर, अपने स्वभाव का आश्रय लिया अर्थात् अपना जीवका ब्रह्माधारत्व जो दास्य भाव उसमें स्थित होते हुए ॥ ४८ ॥

जो ब्रह्म पर है और सूक्ष्म है और जो अशून्य होकर अर्थात् सर्व गुणाकर सर्व गुण सम्पन्न होकर भी असक्तों के लिये शून्य वत् कल्पित हुए हैं और जिनको सात्वत [पंचरात्र शास्त्र निष्ठ भक्त] जन, भगवान् [षड्गुण सम्पन्न] वासुदेव अर्थात् सब के हृदय में बसने वाले ऐसे पर तत्व कहते हैं ॥ ४९ ॥

इति श्रीमद्भागवत नवम स्कन्ध में नवम अध्याय की,
श्रीवृन्दावनस्थ पं भागवताचार्यकृत
भाषाटीका समाप्ता ॥ ९ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे नवमोऽध्यायः ॥ ९ ॥

॥ दशमोऽध्यायः ॥

श्रीशुक उवाच ।

खट्वाङ्गाद्दीर्घबाहुश्च रघुस्तस्मात्पृथुश्रवाः ।
अजस्ततो महाराजस्तस्माद्दशरथोऽभवत् ॥ १ ॥
तस्यापि भगवानेष साक्षाद्ब्रह्ममयो हरिः ।
अंशांशेन चतुर्धाऽगात्पुत्रत्वं प्रार्थितः सुरैः ॥ २ ॥
रामलक्ष्मणभरतशत्रुघ्ना इति सञ्ज्ञया ।
तस्याऽनुचरितं राजन्नृषिभिस्तत्त्वदर्शिभिः ।
श्रुतं हि वर्णितं भूरि त्वया सीतापतेर्मुहुः ॥ ३ ॥
गुर्वर्थे त्यक्तराज्यो व्यचरदनुवनं पद्मपद्भ्यां प्रियायाः—
पाणिस्पर्शाक्षमाभ्यां मृजितपथरुजो यो हरीन्द्रानुजाभ्याम् ।
वैरूप्याच्छूर्पणख्याः प्रियविरहरुषाऽऽरोपितभ्रूविजृम्भ—
त्रस्ताब्धिर्बद्धसेतुः खलदवदहनः कोसलेन्द्रोऽवतान्नः ॥ ४ ॥
विश्वामित्राध्वरे येन मारीचाद्या निशाचराः ।
पश्यतो लक्ष्मणस्यैव हता नैर्ऋतपुङ्गवाः ॥ ५ ॥
यो लोकवीरसमितौ धनुरैशमुग्रं सीतास्वयंवरगृहे त्रिशतोपनीतम् ।
आदाय बालगजलील इवेक्षुयष्टिं सज्जीकृतं नृप ! विकृष्य बभञ्ज मध्ये ॥ ६ ॥
जित्वाऽनुरूपगुणशीलवयोऽङ्गरूपां सीताऽभिधां श्रियमुरस्यभिलब्धमानाम् ।
मार्गे व्रजन् भृगुपतेर्व्यनयत् प्ररूढं दर्पं महीमकृत यस्त्रिरराजबीजाम् ॥ ७ ॥
यः सत्यपाशपरिवीतपितुर्निदेशं स्त्रैणस्य चापि शिरसा जगृहे सभार्यः ।
राज्यं श्रियं प्रणयिनः सुहृदो निवासं त्यक्त्वा ययौ वनमसूनिव मुक्तसङ्गः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दशमे प्राह खट्वाङ्गवंशे श्रीरामसम्भवम् ।
तच्चरित्रं च लङ्केशं हत्वाऽयोध्यागमावधि ॥ १ ॥

खट्वाङ्गाच्च दीर्घबाहुः ॥ १ ॥ २ ॥
ऋषिभिर्वाल्मीकिमुख्यैर्भूरि वर्णितं त्वया मुहुः श्रुतं तथापि संक्षेपतः कथ्यमानं शृणु ॥ ३ ॥

ग्रन्थकोटिभिराकीर्णमद्भुतं रामविक्रमम् ।
अध्यायद्वयतो वक्ष्यन्नेकश्लोके समस्यति ॥

स कोसलेन्द्रः श्रीरामो नोऽस्मानवतात्पातु, कथम्भूतः ? यो गुर्वर्थे पितुः सत्यस्य पालनार्थं त्यक्तराज्यः सन् पद्मवदतिसुकुमाराभ्यां पद्भ्यां; तदेवाह—प्रियायाः पाणिनाऽपि स्पर्शो नास्ति क्षमा ययोस्ताभ्यां प्रतिवनं व्यचरत् हरीन्द्रो हनुमान्

श्रीधरस्वामिकृतभावार्थदीपिका ।

सुग्रीवो वाऽनुजो लक्ष्मणस्ताभ्यां मृजिताऽपनीता पथरुजा मार्गश्रमो यस्य शूर्पणखया वैरूप्यात्कर्णनासिकाच्छेदाद्धेतोः तया प्रलोभितेन रावणेनापहारात्प्रियेण कलत्रेण यो विरहस्तेन या रुट् तयाऽऽरोपितयोर्भ्रुवोर्विजृम्भेणैव त्रस्तोऽब्धिर्यस्मात् ततस्तद्विज्ञापनेन बद्धः सेतुर्येन ततः खलाः रावणादय एव दवो वनं तस्य दहनः ॥ ४ ॥

संक्षेपतो वर्णितं रामचरितमादित आरभ्य विस्तरेणाह—विश्वामित्राध्वर इत्यादिना यावदुत्तराध्यायसमाप्ति । पश्यत एव लक्ष्मणस्य तमप्यनपेक्ष्यैव हता इत्यर्थः । यच्छब्दानां स कोसलेन्द्रोऽवतादित्यनेनैवान्वयः ॥ ५ ॥

लोके ये वीरास्तेषां समितौ समाजे येशं त्र्यम्बकं धनुरिक्षुयष्टिमिव लीलयैवाऽऽदाय सज्जीकृतमारोपितं विकृष्य मध्ये बभञ्ज, हे नृप ! उग्रं कठिनं गरिष्ठम् तदाह वाहकानां त्रिभिः शतैरुपनीतम् बालगजस्य लीलेव लीला यस्य सः ॥ ६ ॥

अनुरूपाणि स्वयोग्यानि गुणशीलादीनि यस्यास्तां सीतासंज्ञां पूर्वमुरस्यभिलब्धो मानो यया तां श्रियं जित्वा धनुर्भङ्गमहानादश्रवणक्षुभितस्य भृगुपतेर्दर्पं व्यनयदपनीतवान् कथम्भूतस्य ? त्रिःसप्तकृत्वो ऽराजबीजशून्यां महीं योऽकरोत्तस्य ॥ ७ ॥

इदानीं गुर्वर्थे इति श्लोकं विवृण्वन्नाह—य इति । कदाचित् कैकेय्यास्तुष्टेन राज्ञा त्वदपेक्षितं दास्यामीति प्रतिश्रुतम् ततः श्रीरामस्य यौवराज्याभिषेकसमये तया भरतस्य राज्यं रामस्य च वने वासः प्रार्थितस्तदा सत्यपाशेन परिवीतस्य पितुर्निर्देशमाज्ञां शिरसा जगृहे ततो राज्यादिकं त्यक्त्वा सभार्यो वनं ययौ दुस्त्यजस्यापि सहर्षत्यागे दृष्टान्तः मुक्तसङ्गो योगी असून् प्राणानिवेति ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां

खट्वाङ्गाद्दीर्घबाहुर्जज्ञे तस्माद्दीर्घबाहोः रघुः स च पृथु विपुलं भवो यशो यस्य तथाभूतः तस्माद्रघोरजः महाराजो जज्ञे तस्मादजाद्दशरथः संबभूव ॥ १ ॥

तस्यापि दशरथस्यापि साक्षात्परब्रह्माभिन्नो भगवान् हरिः सुरैः प्रार्थितोऽशांशेन सह चतुर्द्धा पुत्रतां प्राप्तः "भगवान् ब्रह्ममयो हरिः पुत्रतां प्राप्तः" इत्यनेन श्रीरामस्य षाड्गुण्यपूर्णत्वमुक्तम्. अशांशेन सह पुत्रतां प्राप्त इत्यनेन भरतादीनां तदंशावतारत्वमुक्तम्. एवञ्च भरतादीनामपि स्वांशावतारत्वाच्चैस्तह चतुर्द्धा पुत्रतां प्राप्त इत्यर्थः ॥ २ ॥

चातुर्विध्यमेव दर्शयन्नवताराणां नामान्याह—रामेति । रामादिसंज्ञया चतुर्द्धा पुत्रतामगादिति पूर्वेणान्वयः । तस्य श्रीरामस्य सीतापतेरनुचरितं हे राजन् तत्त्वदर्शिभिरवतारयाथात्म्यविद्भिः ऋषिभिः वाल्मीक्यादिभिर्भूरि बहुलं यथा भवति तथा वर्णितं त्वया तन्मुहुः श्रुतम् अतस्तत्र विस्तरतः कथयामः तथापि संग्रहेण कथ्यमानं शृण्वित्यभिप्रायः ॥ ३ ॥

इतोऽध्यायद्वयेन श्रीरामचरितं विवर्णयिषुस्तावदेकेन श्लोकेन संगृह्णन् तत्कर्तृकामात्मरक्षां प्रार्थयते--गुर्वर्थे इति । यः श्रीरामः गुर्वर्थे गुरोः पितुरर्थे वचस्सत्यतापालनार्थं त्यक्तं राज्यं येन सः पद्मवदतिसुकुमाराभ्यां पद्भ्यां; तदेवाह—प्रियायाः सीतायाः पाणेः स्पर्शं नासित क्षमा ययोस्ताभ्यां प्रतिवनमचरत् हरीन्द्रानुजाभ्यां सुग्रीवलक्ष्मणाभ्यां मृजिता अपनीता पथरुजा मार्गश्रमो यस्य शूर्पणख्याः वैरूप्यात् कर्णनासिकाच्छेदाद्धेतोस्तया प्रलोभितेन रावणेनापहारात् प्रियेण कलत्रेण यो विरहः विश्लेषस्तेन या रुट्तया आरोपितायाः कुटिलीकृताया भ्रुवो विजृम्भेणैव त्रस्तो भीतोऽब्धिः समुद्रो यस्मात् ततस्तद्विज्ञापनेन बद्धः सेतुर्येन ततः खलाः दुरात्मानः रावणादय एव दवो वनं तस्य दहनः स एवम्भूतः कोसलेन्द्रो नोऽस्मानवतात् पातु ॥ ४ ॥

एवं सङ्गृहीतं श्रीरामचरितमादित आरभ्य वर्णयति—विश्वामित्रेत्यादिना यावदुत्तराध्यायसमाप्ति । विश्वामित्रस्याध्वरे यज्ञे मारीचाद्याः निशाचराः नैर्ऋतपुङ्गवाः राक्षसश्रेष्ठाः लक्ष्मणस्य पश्यत एव तमप्यनपेक्ष्यैव येन श्रीरामेण हताः यच्छब्दानां स कौसलेन्द्रोऽवतात् इति पूर्वेणैवान्वयः ॥ ५ ॥

य इति । हे नृप ! लोके ये वीरास्तेषां समितौ समाजे यः श्रीरामः सीतायाः स्वयम्वरगृहे उग्रं कठिनं गरिष्ठं वा तदेवाह—त्रिशतोपनीतं किङ्कराणां शतत्रयेणानीतमैशं रौद्रं धनुरादाय सज्जीकृतमारोपितं विकृष्य बालगजस्येव लीला यस्य सः इक्षुदण्डमिव मध्ये बभञ्ज भग्नमकरोत् ॥ ६ ॥

आत्मनः स्वस्य यानि रूपादीनि तेषामनुरूपाणि रूपादीनि यस्यास्तां सीतासंज्ञां पूर्वमुरसि आधिलब्धो मानो यया तां श्रियं जित्वा धनुर्भङ्गेन स्वाधीनाङ्कृत्वा धनुर्भङ्गमहानादश्रवणक्षुभितस्य भृगुपतेर्भार्गवस्य रामस्य प्ररूढं दर्पं मार्गे व्यनयदपनीतवान् कथंभूतस्य यो भृगुपतिः त्रिरित्युपलक्षणं त्रिःसप्तकृत्वः अराजबीजां राजबीजशून्यां महीमकरोत् तस्य ॥ ७ ॥

इदानीं गुर्वर्थे इति श्लोकं विवृण्वन्नाह—य इति । कदाचित् कैकेय्यास्तुष्टेन दशरथेन तदपेक्षितं वरद्वयं दास्यामीति प्रतिश्रुतं तत्र श्रीरामस्य यौवराज्याभिषेकसमये तया भरतस्य राज्यं रामस्य वनवासश्चेति वरद्वयं प्रार्थितं तदा सत्यरूपेण पाशेन परिवीतस्य परिवृतस्य पितुर्दशरथस्य स्त्रैणस्य स्त्रीवश्यस्यापि निर्देशमाज्ञां शिरसा जगृहे ततः सभार्यस्सानुजश्च राज्यादीन् त्यक्त्वा वनं ययौ दुस्त्यजानामपि राज्यादीनां सहर्षत्यागे दृष्टान्तः मुक्तसङ्गो योगी असून् प्राणानिवेदीति ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

॥१॥

ब्रह्ममयः वेदमुख्यार्थभूतः स्वयमंशेन लक्ष्मणादिषु अशांशेन ॥ २ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तत्त्वदर्शिभिः ऋषिभिः वर्णितं तस्य सीतापतेर्भूरिफलतो महत्तरमनुचरितम् ॥ ३ ॥

त्वया पुनःपुनः श्रुतमपि शृणुष्व इत्याशयेनाह-गुर्वर्थ इति । गुर्वर्थे पित्रर्थे पद्मपद्भ्यां पद्मोपमचरणाभ्यां मृजितपथिरुजः मार्जितमार्गक्लेशः हरीन्द्रानुजाभ्यां सुग्रीवलक्ष्मणाभ्यां वैरूप्या-च्छासिकाच्छेदलक्षणात्प्रियायाः सीतायाः विरहोद्भूतरुषा आरोपितभ्रूविजृम्भः उन्नमितभ्रूभङ्गः लङ्कायां हनुमतः आविर्भावं श्रुत्वा खला एव दवः खलदवः तस्य खलदवस्य दाहे दहनेऽग्निः "दवो दावो वनारण्यवह्न्योः" इति यादवः । एवंविधो भगवान् कोसलेन्द्रनाम्ना *भुव्यवतीर्ण इत्यन्वयः । अवताद्म इति केचित्पठन्ति ॥ ४ ॥

एकपद्येन सूत्रवत्सङ्क्षिप्तरामचरितमादित एव किञ्चित्प्रपञ्चयति-विश्वामित्रेति । येनैव ॥ ५ ॥

लोके ये वीरास्तेषां समितौ सभायाम् ईशस्य शिवस्य विद्यमानं त्रिशतैरनेकैः पुरुषैः उपनेयं समीपम् आनेतुं योग्यं सज्जीकृतं ज्यया सहितं कृतम् ॥ ६ ॥

उरसि अभिलब्धमानां प्राप्तमानां आत्मनः स्वस्य रूपादिभिरनुरूपा या सीताभिधा श्रीलक्ष्मीस्तां जित्वा प्राप्य स्वार्जित *इतिवत् मार्गे व्रजन् रामो हतराजबीजां निर्मूलितक्षत्रसन्ततिं महीं कृतवतो भृगुपतेः परशुरामस्य प्ररूढं दर्पम् उन्नतमदं व्यनयदपनीतवानित्यन्वयः ॥ ७ ॥

यो रामः स्वरयाख्यपाशेन परिशीतस्य परिवेष्टितस्य पितुर्निदेशमाज्ञां शिरसा पितृसम्भावनार्थं जगृह इत्यन्वयः, "अपि-जुगुप्सितार्थौ वा जुगुप्सायाम्" किं निमित्तमित्यत उक्तं, स्त्रैणस्येति स्त्रीजितस्य सभार्य इत्यनेन तस्या अपि बहुमानातिशयं । सूचयति-असूनिवेत्यनेन । राज्यलक्ष्म्यादीनाम् अशक्यत्याज्यतां दर्शयति, मुक्तसङ्ग इत्यनेन । "असङ्गो ह्ययं पुरुषः" इति श्रुतिसिद्धनित्यासङ्गतां दर्शयति, अधिवासम् अयोध्याम् ॥ ८॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १—३ ॥

पथरुज इत्यनेन पथशब्दोऽकारान्तो ऽप्यस्तीति लक्ष्यते ॥ ४—१० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

दशमे रघुनाथस्य जन्मकर्मयशोऽमृतम् ।
सर्वं नृन्पाययामास संक्षेपेण महामुनिः ॥ १ ॥

॥१॥

एष त्वया स्वमातृगर्भे दृष्ट इत्यर्थः । अंशांशेन अंशश्च आंशं अंशसमूहश्च अंशांशं तेन अंशांशेन तस्यापि यथा वासुदेवस्येत्यर्थः ॥ २ ॥ ३ ॥

"कार्त्स्न्यान्न वक्तुं लिखितुं शक्या शेषगणेशयोः ।
या रामलीलाऽध्यायाभ्यां सा श्लोकेनाऽपि कीर्त्यते ॥

गुरोः पितुः सत्यपालनार्थं त्यक्तराज्यस्सन् पद्मवदतिसुकुमाराभ्यां पद्भ्याम् अनुवनं वने वने व्यचरत् अतिसौकुमार्यमेवाह, प्रियायाः पाण्योः परमसुकुमारयोरपि स्पर्शं न क्षमेते इति ताभ्यां हरीन्द्रो हनुमान् सुग्रीवो वा अनुजो लक्ष्मणस्ताभ्यां मृजिताऽपनीता पथरुजो मार्गश्रमो यस्य सः शूर्पणखया वैरूप्यात् कर्णनासाच्छेदनाद्धेतोः रावणेनापहारात् प्रियेण कलत्रेण यो विरहस्तेन या रुट् आत्मनः समुद्रेणाप्रदानात् कोपस्तया आरोपितयोः भ्रुवोः विजृम्भणेनैव त्रस्तोऽब्धिर्यस्मात् स खला रावणादयः एव दवो वनं तस्य दहनः ॥ ४ ॥

अतिसंक्षेपेण वर्णितं रामचरितमादितः आरभ्य किञ्चित् विस्तरेणाह-विश्वामित्रेत्यादिना अध्यायद्वयेन । निशा मायया चरन्तीति ते नैर्ऋतपुङ्गवाः राक्षसश्रेष्ठाः ॥ ५ ॥

लोके ये वीरास्तेषां समितौ समाजे पैशं माहेशं धनुः इक्षुयष्टिमिव लीलयैवादाय सज्जीकृतं सत् विकृष्य मध्ये बभञ्ज कीदृशं वाहकानां त्रिभिः शतैरुपनीतम् ॥ ६ ॥

जित्वा प्राप्य उरसि अभिलब्धो मान आदरः पूर्वमेव यया तां भृगुपतेः परशुरामस्य दर्पं व्यनयत् विगतीचक्रे त्रिः त्रिस्सप्तकृत्वो महीं राजबीजशून्यां चक्रे ॥ ७ ॥

य इति कदाचित् पूर्वं कैकेय्यां तुष्टेन राज्ञा त्वदपेक्षितं दास्यामीति प्रतिश्रुतं ततः श्रीरामस्य यौवराज्याभिषेकसमये तया भरतस्य राज्यं रामस्य च वने वासः प्रार्थितः अतः सत्यपाशेन परिवीतस्य पितुः स्त्रैणस्य स्त्रियै कैकेय्यै सत्याऽनुरोधवशात् हि तस्य निदेशं सभार्योऽपि जग्राह दुस्त्यजस्यापि सहर्षत्यागे दृष्टान्तः मुक्तसङ्गो योगी असून् प्राणानिवेति ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अथ खट्वाङ्गवंशेऽवतीर्णस्य श्रीमद्रामचन्द्रस्य भगवतश्चरित्रं वर्णयति-खट्वाङ्गादित्यध्यायद्वयेन ॥ १ ॥

तस्य दशरथस्यापि एष अत्र वर्णितः साक्षात् भगवान् षाड्गुण्यपूर्णः ब्रह्ममयः वेदैकवेद्यः अंशांशेन भरतादिरूपेण सह चतुर्धा पुत्रत्वमगादित्यन्वयः ॥ २ ॥

ऋषिभिर्वाल्मीकिमुख्यैर्भूरि वर्णितं तस्य श्रीरामस्यानुचरितं त्वया मुहुः श्रुतं तथापि सङ्क्षेपतो मया कथ्यमानं शृणुयेति भावः ॥ ३ ॥

बहुविस्तृतं रामायणं समाहृत्याध्यायद्वयेन वक्ष्यन् प्रथममेकेन श्लोकेन समस्यति—गुर्वर्थ इति । यः श्रीरामः गुर्वर्थे पितुः सत्यवादित्वपालनार्थं त्यक्तराज्यः पद्मवदतिसुकुमाराभ्यां पद्भ्यां प्रियायाः श्रीसीतायाः पाणिस्पर्शं नास्ति क्षमा ययोस्ताभ्याम् अनुवनं प्रतिवनं व्यचरत् हरीन्द्रानुजाभ्यां कपीन्द्रलक्ष्मणाभ्यां मृजिता

*अवतीर्णे इतिपाठः । *स्वार्जितइत्यत्र जितइत्यस्य प्राप्तइत्यर्थः तद्वत् जित्वेत्यस्य प्राप्येति

रक्षःस्वसुर्व्यकृत रूपमशुद्धबुद्धेस्तस्याः खरत्रिशिरदूषणमुख्यबन्धून् ।
जघ्ने चतुर्दशसहस्रमपारणीयकोदण्डपाणिरटमान उवास कृच्छ्रम् ॥ ६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अपनीता पथि रुक् मार्गश्रमो यस्य शूर्पणखया: वैरूप्यारकर्णनासिकाच्छेदाद्धेतोः प्रियविरहेण शूर्पणखीप्रलोभितरावणकृतेन कलत्रवियोगेन या रुट् तया आरोपितयोः कुटिलीकृतयोर्भ्रुवोर्विजृम्भेणैव अस्तो जातभयो ऽब्धिर्यस्मात् तत्प्रार्थनया तदुपरि बद्धः सेतुर्येन ततः खलाः दुर्वृत्ताः रावणादय एव दवो वनं तद्दहनः स कोसलेन्द्रो नो ऽस्मान् अवतात् रक्षतु ॥ ४ ॥

अथादित आरभ्य विस्तरेणाह–विश्वामित्राध्वर इत्यादिना यावदध्यायद्वयसमाप्ति। पश्यत एव लक्ष्मणस्य तमप्यनपेक्ष्यैव हताः येनेत्यादीनां स कोशलेन्द्रो नो ऽवतादिति पूर्वेणैव सम्बन्धः ॥ ५ ॥

हे नृप ! बालगजस्येव लीला यस्य स तथाविधो यः लोके तदानीन्तना ये वीरास्तेषां समितौ समाजे ऐशं शैवम् उग्रं कठिनं सीतास्वयम्बरगृहे त्रिशतैर्वाहकैः उपनीतं धनुरादाय सज्जीकृतं विकृष्येक्षुदण्डमिव मध्ये बभञ्ज ॥ ६ ॥

यस्यानुरूपाणि स्वगुणशीलाद्यनुरूपाणि गुणशीलादीनि यस्याः उरसि अभिलब्धो मानो यया तां श्रियं सीताभिधां जित्वा त्रिरित्युपलक्षणं त्रिःसप्तकृत्वः अराजबीजां महीमकृताऽकरोद्यस्तस्य भृगुपतेर्जामदग्न्यस्य धनुर्भङ्गरवश्रवणाविवृद्धमन्योः प्ररूढं दर्पं व्यपनयत् अपनीतवान् ॥ ७ ॥

संग्रामे जलार्थिनं दशरथं प्रति कैकेय्या मन्थराख्यया दास्या सहितया पृष्ठतो गत्वा जलमर्पितं तदा च राज्ञोक्तं वरं वरयेति तयोक्तं कल्पान्तरे सति प्रयोजने ऽपेक्षितं वरं स्वीकरिष्यामीति तदनन्तरं श्रीरामस्य यौवराज्याभिषेकसमये मन्थराप्रबोधितया भरतस्य राज्यं रामश्चतुर्दशवर्षाणि वने वसत्विति प्रार्थितम्, तदा सत्यपाशपरिवीतस्य पितुर्निदेशमाज्ञां शिरसा जगृहे तदा राज्यं श्रियं सम्पदं प्रणयिनः प्रीतिसम्बद्धान् सुहृदश्च असून् प्राणवत् प्रियतमान् त्यक्त्वा सभार्यः वनं ययौ मुक्तसङ्ग इव यथा मुक्तसङ्गस्यैव दुःखदत्वं दर्शितं स तु मुक्तसङ्ग इत्यर्थः ॥ ८ ॥

———

भाषा टीका

श्रीसाकेतविहारिणे नमः ॥

पराऽभ्रादुत्तिष्ठन्तदमाधिवसन्दुग्धजलधेः—
स्फुरत्सीताविद्युद्विलसितवपुर्नीलरुचिमान् ।
कृपाधारां मुञ्चन् भवदवविदग्धाखिलमनो—
हृदाकाशे नित्यं मम निवसतात्कोऽपि जलदः ॥ ० ॥

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि—खट्वांग महाराज से दीर्घबाहु हुए, तिन से बडे भारी यशस्वी रघुमहाराज हुए, तिन अज हुए अज के पुत्र महाराज दशरथ हुए ॥ १ ॥

तिन दशरथ महाराज के साक्षात् परब्रह्म श्री हरि देवता लोगों की प्रार्थना से पुत्रपने को प्राप्त हुए और अपने अंशांश से चार रूप को धारण करते हुए ॥ २ ॥

राम, लक्ष्मण, भरत, और शत्रुहन इन संज्ञाओं से प्रकट हुए, हे राजन् । तिन सीता पति का चरित्र तत्त्वदर्शी बहुत से ऋषि लोगों के मुख से वर्णन किया हुआ तुमने बहुतवार सुना है ॥ ३ ॥

(अब एक श्लोक में श्रीशुकदेवजी सब रामायण कथा कथन पूर्वक आशीस मांगते हैं) जिनने पिता की सत्य की प्रतिज्ञा पालन करने के लिये राज्य को छोडकर श्रीजानकीजी के कर कमलों के स्पर्श को न सहने वाले अति मृदुल चरण कमलों से वन २ के प्रति विचरना स्वीकार किया और दंडकारण्य में आकर जिनके पंथ के श्रम को मारुति और लक्ष्मण ने दूर किया, और शूर्पणखा के नाक कान के छेदन के कारण से हुआ जो प्रिया (श्रीजानकीजी) का विरह तासे जो उत्पन्नभया जो रोष तिससे जब आपने भ्रुकुटि चढाई तब समुद्र त्रास को प्राप्त हुआ तदनंतर सेतु बांधकर खलों (राक्षसों) के नाश करने को जो दावाग्नि हुए वे कोसलेन्द्र श्रीराघवेन्द्र हम सब लोगों की रक्षा करो ॥ ४ ॥

(उसी राम चरित को श्रीशुकदेवजी अब कुछ थोडे विस्तार से वर्णन करते हैं) कि–विश्वामित्र के यज्ञ में जिनोंने राक्षसों में बडे बली मारीच आदिक निशाचरों को लक्ष्मणजी के देखते देखते मार दिये ॥ ५ ॥

हे नृप ! लोक प्रसिद्ध बडे २ वीरों के समाज में सीताजी के स्वयंवर की जगह जिस धनुष को (काष्ट की मंजूषा में धरे हुए को) तीन सौ मनुष्य खैंचकर लाये उस धनुष को जिन श्रीराघवेन्द्र ने उठाकर चढाकर खींचकर बीच से तोड़ दिया जैसे हाथी का छौना विलास पूर्वक ईख को उठाकर तोड देवे ॥ ६ ॥

अपने अनुरूप गुण, शील, अवस्था, अंग, रूप, वाली और पूर्व काल में वक्षस्थल में प्राप्त हुई प्रतिष्ठा जिनको एसी सीता नाम वाली लक्ष्मी जी को जीतकर अयोध्या के मार्ग में जाते हुए जो श्रीराम, इक्कीसवार पृथिवी को निःक्षत्र करने वाले परशुरामजी के अति कर बढे हुए दर्प को दूर करते हुए वे हमारी रक्षा करें ॥ ७ ॥

सत्य की फांसी में फंसे हुए अपने त्रैण (स्त्री लोलुप) पिता की भी आज्ञा को भार्या सहित जो श्रीराम शिर से धारण करते हुए, तथा राज्य लक्ष्मी और प्यारे सुहृद और निवास को त्यागकर वन को गये जैसे कि मुक्त समस्त संग यागाजन अपने प्राणों को भी छोड जाते हैं ॥ ८ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

रक्षसो रावणस्य स्वसुः शूर्पणखाया अशुद्धबुद्धेः सीता-

सीताकथाश्रवणदीपितहृच्छयेन सृष्टं विलोक्य नृपते ! दशकन्धरेण ।
जघ्नेऽद्भुतैणवपुषाऽऽश्रमतोऽपकृष्टो मारीचमाशु विशिखेन यथा कमुग्रः ॥ १० ॥
रक्षोऽधमेन वृकवद्विपिनेऽसमक्षं वैदेहराजदुहितर्यपयापितायाम् ।
भ्रात्रा वने कृपणवत्प्रियया वियुक्तः स्त्रीसङ्गिनां गतिमिति प्रथयंश्चचार ॥ ११ ॥
दग्ध्वाऽऽत्मकृत्यहतकृत्यमहन् कबन्धं सख्यं विधाय कपिभिर्दयितागतिं तैः ।
बुद्ध्वाऽथ वालिनि हते प्लवगेन्द्रसैन्यैर्वेलामगात्स मनुजोऽजभवार्चिताङ्घ्रिः ॥ १२ ॥
यद्रोषविभ्रमविवृत्तकटाक्षपातसम्भ्रान्तनक्रमकरो भयगीर्णघोषः ।
सिन्धुः शिरस्यर्हणं परिगृह्य रूपी पादारविन्दमुपगम्य बभाष एतत् ॥ १३ ॥
न त्वां वयं जडधियोऽनुविदाम भूमन् ! कूटस्थमादिपुरुषं जगतामधीशम् ।
यत्सत्त्वतः सुरगणा रजसः प्रजेशा मन्योश्च भूतपतयः स भवान् गुणेशः ॥ १४ ॥
कामं प्रयाहि जहि विश्रवसोऽवमेहं त्रैलोक्यरावणमवाप्नुहि वीरपत्नीम् ।
बध्नीहि सेतुमिह ते यशसो वितत्यै गायन्ति दिग्विजयिनो यमुपेत्य भूपाः ॥ १५ ॥
बद्ध्वोदधौ रघुपतिर्विविधाद्रिकूटैः सेतुं कपीन्द्रकरकम्पितभूरुहाङ्गैः ।
सुग्रीवनीलहनुमत्प्रमुखैरनीकैर्लङ्कां विभीषणदृशाऽविशदग्रदग्धाम् ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

जिघृक्षोः कामातुराया इति वा रूपं व्यकृत विकारमनयत् तस्याः खरत्रिशिरदूषणमुख्या बन्धवो येषु तांश्चतुर्दशसहस्रं जघान अपारणीयमलङ्घ्यमसह्यं कोदण्डं पाणौ यस्य सः ॥ ९ ॥

सीतायाः कथाश्रवणेन दीपितो हृच्छयो यस्य तेन सीतां हरिष्यता खस्माद्रीतेन स्वाश्रमादपकर्षणार्थं सृष्टं निसृष्टं मारीचं विलोक्य जघान, कथम्भूतम् ? अद्भुतैणवपुषा स्वर्णहरिणदेहेनोपलक्षितम् अत एव प्रलोभनेनाश्रमस्तेनापकृष्टस्सन् कं दक्षं यथा उग्रः श्रीरुद्रः ॥ १० ॥

ततश्च रक्षोऽधमेन रावणेनासमक्षमपनीतायाम् प्रियया वियुक्तो भ्रात्रा लक्ष्मणेन सह कृपणवद्वने चचार, किमभिप्रायस्सन् ? इत्यनेन प्रकारेण स्त्रीसङ्गिनां दुःखोदर्कां गतिं प्रख्यापयन् ॥ ११ ॥

आत्मार्थेन कृत्येन कर्मणा रावणेन सह युद्धेन हतं कृत्यं शास्त्रीयं दहनादिकं यस्य तं जटायुषं पुत्र इव दग्ध्वा कबन्धं स्वग्रहणाय प्रसारितबाहुं राक्षसमहन् अथ वालिनि हते तैः कपिभिर्दयिताया गतिं बुद्ध्वा अजभवाभ्यामर्चिताङ्घ्री यस्य स मनुजो वेलां समुद्रतीरमगात् ॥ १२ ॥

तत्र त्रिरात्रमुपवासेन प्रतीक्षितोऽपि सिन्धुर्यदा नोपस्थितस्तदा यस्य रोषविभ्रमेण क्रोधलीलया विवृत्तो यः कटाक्षस्तस्य पातेन सम्भ्रान्ता नक्रा मकराश्च यस्मिन् भयेन गीर्णः ग्रस्तः स्तम्भितो घोषो येन सः सिन्धुरेतद्वक्ष्यमाणं बभाषे अर्हणमुपहारादिकं रूपी मूर्तिमान् ॥ १३ ॥

भाषणमेवाऽऽह—न त्वामिति द्वाभ्याम् । एतावत्पर्यन्तं नु निश्चितं त्वां न विदाम न जानीम इत्यर्थः । इदानीं तु ज्ञातोऽसीत्याह—यदिति पृथक्पदम् यस्येत्यर्थः यद्गुणेभ्यः सत्त्वादिभ्यः सुरगणादयो भवन्ति स भवानिति ॥ १४ ॥

कामं यथेच्छं जलमाक्रम्यापि प्रयाहि अवमेहं पुरीषप्रायम् त्रैलोक्यं रावयत्याक्रन्दयतीति तथा तं जहि हे वीर ! यद्यपि तव जलं प्रतिबन्धकं न भवति तथापीह सेतुं बध्नीहि तर्हि किमर्थं ? ते यशसो विस्ताराय; तदेवाऽऽह—यं सेतुमुपेत्य दुष्करं कर्मावेक्ष्य त्वद्यशो गास्यन्ति भूपास्तम् ॥ १५ ॥

तद्वाक्यमभिनन्द्य यत्कृतं तदाह—बद्ध्वेति । विविधैरद्रीणां कूटैः शृङ्गैः सेतुं बद्ध्वाऽग्रे सीतान्वेषणे हनुमतैव दग्धां लङ्कामाविशत्, कथम्भूतैः ? शृङ्गैः कपीन्द्राणां करैः कम्पितानि भूरुहाणामङ्गानि शाखादीनि येषु तैः विभीषणस्य दृशा बुद्ध्या; कैः सहाऽऽविशत् ? सुग्रीवादयः प्रमुखा येषां तैरनीकैः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

रक्ष इति । रक्षसो रावणस्य स्वसुर्भगिन्याः शूर्पणखायाः अशुद्धबुद्धेः सीताजिघृक्षोः कामातुराया वा रूपं व्यकृत विकृतमकरोत् तस्याः शूर्पणखायाः खरादिप्रमुखाः बन्धवो येषु तान् चतुर्दश-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सहस्रं सहस्राणि बन्धूनित्यत्र लिङ्गव्यत्ययः । सहस्रमित्यत्र वचनव्यत्ययश्चार्षः जघान हतवान् आर्षत्वात् सापेक्षस्यापि बन्धुशब्दस्य वृत्तिः नित्यसापेक्षत्वाद्वा तथाचोक्तं हरिणा "सम्बन्धिशब्दः सापेक्षो नित्यं सर्वः समस्यते" इति. कथम्भूतः? अवारणीयमलङ्घ्यमसह्यं कोदण्डं धनुः पाणौ यस्य तथाभूतः तत इतस्ततो वनं सञ्चरन् कृच्छ्रमुवास वनवासस्य दुःखरूपत्वप्रदर्शनाय कृच्छ्रमिवोवासेत्युक्तिः नित्यानन्दरूपस्य तस्य दुःखाभावात् ॥ ९ ॥

सीतेति । सीतायाः कथाश्रवणेन दीपितः हृच्छयः कामो यस्य तेन दशकन्धरेण रावणेन सीतां जिघृक्षुणा स्वयं तत्र गन्तुं भीतेन सृष्टं प्रेषितं मारीचं विलोक्य हे नृपते ! अद्भुतमेणस्यैव वपुर्यस्य तेन सीतया क्रीडार्थमपेक्षितेन मारीचेनाश्रमतः स्वाश्रमादपकृष्टः प्रलोभनपूर्वकमाश्रमतोऽपकृष्टः सन् आशु विशिखेन बाणेन तं मारीचं जघ्ने हतवान् यथा कं दक्षसुप्तो रुद्रस्तद्वत्॥१०॥

रक्ष इति । तदा रक्षोऽधमेन रावणेनासमक्षं रामलक्ष्मणयोरिति शेषः । मृगानयनार्थं रामस्य तद्वृत्तान्तज्ञानार्थं लक्ष्मणस्य च प्रेषितत्वात् तयोरसान्निध्ये सति वने वृकवत् वृकेनेव वैदेहराजदुहितरि सीतायामपयापितायामपहृत्य लङ्कां प्रति प्रापितायां सत्यां प्रियया वियुक्तो भ्रात्रा लक्ष्मणेन सह कृपयावत् दुःखीव वने चचार, किङ्कुर्वन् ? इति अनेन प्रकारेण स्त्रीसङ्गिनां दुःखोदर्कां गतिं प्रथयन् प्रख्यापयन् ॥ ११ ॥

दग्ध्वेति । आत्मनः श्रीरामस्य यत्कृत्यं प्रयोजनं सीतान्वेषणरूपं तेन निमित्तेन हतं रावणेन सह युद्धं हतं गृध्रं जटायुषं दग्ध्वा कबन्धम अहन् जघान ततः कपिभिर्वानरैः सह सख्यं विधाय कृत्वा अथ वालिनि हते सति तैः कपिभिर्दर्शितायास्सीताया गतिं बुद्ध्वा अजभवाभ्यां ब्रह्मरुद्राभ्यामर्चिताङ्घ्री यस्य तथाभूतोऽपि स श्रीरामः मनुजावतारूपत्वात् प्लवगेन्द्राणां कपीन्द्राणां सैन्यैः सह वेलां तीरं समुद्रस्येति शेषः अगाव जगाम ॥ १२ ॥

यद्दिति तत्र त्रिरात्रमुपवासेनापि प्रतीक्षितः सिन्धुर्यदा नोपस्थितस्तदा यस्य रोषविभ्रमेण क्रोधलीलया विवृत्तो यः कटाक्षस्तस्य पातेन सम्भ्रान्ताः नक्रा मकराश्च यस्मिन् भयेन गीर्णस्तनिभितो घोषो येन स सिन्धुरर्हणामर्ध्यादिद्रव्यं शिरसि परिगृह्य निधाय रूपी मूर्तिमान् पादारविन्दमुपगम्य शरणं गत्वा एतद्वक्ष्यमाणं बभाषे ॥ १३ ॥

भाषणमेवाह—न त्वामिति द्वाभ्याम् । हे भूमन् ! तं प्रायोपविष्टं त्वामेतावत्पर्य्यन्तं जडधियो वयं कूटस्थं निर्विकारं जगतामधीशमादिपुरुषं न विदामः न जानीमः । इदानीं तु ज्ञातोसीत्याह,यदिति । यदिति पृथक्पदं लुप्तषष्ठ्यन्तं यस्य तव निश्वास्यात्सत्त्वतः सत्त्वगुणात्सुरगणा इतिशेषः । रजसो गुणात्प्रजेशाः प्रजापतयः मन्योस्तमसः भूतपतयो रुद्रादयः स भगवान् गुणेशः सत्वादिगुणानां नियन्तेत्यधुनाऽहं मन्ये इत्यर्थः ॥ १४ ॥

काममिति । कामं यथेच्छं जलमाक्रम्यापि प्रयाहि गच्छ विश्रवसः प्रजापतेरवमेहं पुरीषप्रायं त्रैलोक्यं रावयत्याक्रन्दयतीति तथा तं दशकन्धरं जहि हे वीर ! पत्नीं सीतामवाप्नुहि यद्यपि तव मदीयं जलं न प्रतिबन्धकं भवति तथापि सेतुं बधीहि किमर्थमित्यत्राह—ते तव यशसो विभूत्यै विस्ताराय तथाहि दिग्विजयिनो भूपाः यं सेतुमुपेत्य दुष्करं त्वत्कर्मावेक्ष्य त्वद्यशो गास्यन्ति ॥ १५॥

तद्वाक्यमभिनन्द्य यत्कृतं तदाह—बध्वेति । कपीन्द्राणां करैः कम्पितानि भूरुहाणामङ्गानि शाखादीनि येषु तैर्विविधानामद्रीणां कूटैः शिखरैरब्धौ सेतुं बध्वा रघुपतिः सुग्रीवादयः प्रमुखा येषां तैरनीकैः कपिभिः सह अनीकैरिति पाठे सैन्यैः सहेत्यर्थः । अग्रे सीतान्वेषणसमये हनुमतैव दग्धां लङ्कां विभीषणदृशा बुद्धा तत्प्रदर्शितमार्गेणातिभावः आविवेश ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

रक्षस्स्वसुः शूर्पणखायाः रूपं व्यकृत कर्णनासिकाच्छेदनलक्षणविकारं कारितवान् अटमानः वन इति शेषः ॥ ९ ॥

शूर्पणखीमुखात्सीतायाः सौन्दर्यादिविषयकथायाः श्रवणेन दीपितः प्रज्वलितो हृच्छयः कामो यस्य स तथा तेन दशकन्धरेण रावणेन सृष्टं प्रतिपाद्य प्रेषितम् "उत्सर्जनविसर्जनेन विश्राणनं वितरणं स्पर्शनं प्रतिपादनम्" इत्यभिधानं । कृतैणवपुषा विरचितमृगाकारेणाश्रमतः समीपे विचरन्तं विलोक्य सीतया प्रकृष्टः उल्लिखितो मोदितो वशीकृत इति यावत् आश्रमतोऽपकृष्टः दूरं नीतो रामो विशिखेन मारीचम् आशु जघ्न इत्यन्वयः । उग्रो नरसिंहो हिरण्यकशिपुनामानम् अरिं "उग्रो जज्ञे वीर्याय स्वधावान्" इति श्रुतिः । रुद्रोन्धकाख्यं रिपुं वा "उग्रः कपर्दी श्रीकण्ठः शितिकण्ठः कपालभृत्" इत्यभिधानम् ॥ १० ॥

निर्ऋत्याविराक्षसविवक्षया रक्षोधमेन रावणेन विपिने वृकवात्स्थितेन वृणोत्यावृणोत्यात्मानमिति वेषान्तरेण स्थितेनेत्यर्थः । असमक्षमप्रत्यक्षं रामस्येति शेषः । वैदेहराजदुहितरि सीतायामपयापितायामपनीतायाम् अवने नियुक्तेन भ्रात्रा लक्ष्मणेन रहितायामिति शेषः । प्रियया सीतया वियुक्तः लोकदृष्ट्येति शेषः स्त्रीसङ्गिनां रतिमितीत्थं प्रथयन् प्रख्यापयन् चचार अनेन विटजनशिक्षणार्थमेवं दर्शितमिति ज्ञायते प्रथयन्नित्युक्तेः । किमर्थमेवं कल्पना ? तत्स्वभावानुभवादिति न स्यादिति चेन्न ।—

"नित्यपूर्णसुखज्ञानस्वरूपोऽसौ यतो विभुः ।
ततोऽस्य राम इत्याख्या तस्य दुःखं कुतोऽण्वपि ॥
तथापि लोकशिक्षार्थमदुःखो दुःखवर्तिवत् ।
अन्तर्हितां लोकदृष्ट्या सीतामासीत्स्मरन्निव" ॥

इति स्मृतिविरोधात् प्रियया वियुक्तत्वदर्शनमपि लोकदृष्ट्यपेक्षयेति ज्ञातव्यं । तत्कुतोवगतमिति चेत्—

"ज्ञानार्थं पुनर्नित्यसम्बन्धः स्वात्मनः श्रिया ।
अयोध्याया विनिर्गच्छन् सर्वलोकस्य चेश्वरः ॥
प्रत्यक्षं तु श्रिया सार्धं जगामानादिरव्ययः" ॥

इति स्मृत्या ज्ञातव्यम् । एवमन्यत्रापि प्रमाणसामर्थ्यात्सर्वत्राप्यनुसन्धेयोऽन्यार्थ इति विशदं समस्तम् ॥ ११ ॥ १२ ॥

इतोपि श्रीरामः साक्षान्नारायणावतार एव. न देवदत्ताद्यन्यतमः तस्य प्रियावियोगादिना दुःखप्रकटनमसुरजनमोहनाय

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

मानुषावतारदेवताजनशिक्षणाय चेत्येतदन्त्यैः श्लोकैरेव ज्ञातुं सुशकमित्याशयेन तन्माहात्म्यं प्रकटयति--यद्रोषेति । यस्य रामस्य रोषेण तीव्रश्च परिवृत्तश्च कटाक्षः यद्रोषतीव्रपरिवृत्त-कटाक्षस्तस्य पातेन लक्षवेधवद्विषयीकरणेन सम्भ्रान्ता इतस्त-तोऽनवस्थिता नक्राश्च मकराश्च यस्मिन् स तथा भयेन गीर्णो नष्टो घोषो यस्मिन् स तथा अत एव तूष्णीं स्थित इत्यर्थः। अर्हणमर्घ्यपाद्यादिपूजासाधनम् रूपी करचरणादिविशिष्टावय-वोपेतः ॥ १३ ॥

जडवदचेतनवद्धीर्येषां ते तथा ज्ञानपूर्वप्रवृत्तिशून्या इत्यर्थः जडाधारा इत्यर्थोऽपि ग्राह्यः अनेन तावदेवास्मत्तः प्रयोजन-मिति सूचयति---वेदान्ते जगत्कारणस्य ब्रह्मत्वं निरणायि रामस्य तदभावात्तत्त्वं कथमिति चेत्तदस्यास्त्यस्तीत्याह--त्वमिति। यस्त्वं सत्त्वगुणात्सुरगणान् अस्राक्षीः रजोगुणात् प्रजेशान् मनुष्यानसृजः मन्योस्तमोगुणाच्च भूतपतयः भूतपतीन् ब्रह्म-राक्षसादिलक्षणयासुरान् उदभावयः स परमाणवादिमहत्तत्त्वांत-जगतः कर्ता भवाञ्चान्यः गुणैः प्रवर्त्तमानस्य गुणनिमित्ता-भिभवो नाशङ्कनीयः गुणानां तदधीनत्वादित्याशयेनाह---गुणेश इति क्रोधस्य तमःकार्यत्वात्तेन तल्लक्षयति ॥ १४ ॥

यथाऽवमेहो विष्ठा शरीरान्निर्गता शुनामुपभोगाय भवति तथा ऽयमपि विश्रवसो देहान्निर्गतत्वेनावमेहस्थानीयस्त्वच्छरनिर्भिन्न-हृदयः शुनामशनाय स्यादित्यतो विश्रवसोऽवमेहमित्युक्तं त्रैलोक्यस्य रोदनकरणत्वात् त्रैलोक्यरावणम् हे वीर! इह मयि वितत्यै विस्ताराय यं सेतुम् ॥ १५ ॥

विविधाद्रिकूटैर्नानाविधपर्वतशृङ्गैः कपीन्द्राणां करैः कम्पि-तानि भूरुहाणां वृक्षाणाम् अङ्गानि शाखोपशाखालक्षणानि येषु तानि तथा तैः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

इति अनेन प्रकारेण परमभक्तानुकम्पोद्दीपनप्रकारेण स्त्रीसङ्गिनां या गतिश्चेष्टा विलापाद्या तामेव प्रथयन् विस्ता-रयन् चचार इतस्ततो वभ्राम इदमेवोक्तं प्रियेति वक्ष्यते च दयितेत्यादि ॥ ११ ॥

सङ्गतोऽनुजः श्रीलक्ष्मणो यत्र तादृशः ॥ १२-२९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

रक्षसो रावणस्य स्वसुः शूर्पणखायाः रूपं व्यकृत कर्ण-नासाच्छेदेन विकारमनयत् जघ्ने जघान अपारणीयम् अन्यैरसह्यं कोदण्डं पाणौ यस्य सः ततश्च अटमानः वने भ्रमन् कृच्छ्रं सकष्टमुवास ॥ ९ ॥

ततश्च शूर्पणखामुखात् श्रुत्वा सीतां हरिष्यता रावणेन स्वस्मा-त्प्रीतेन स्वस्याश्रमादपकर्षणार्थं सृष्टं विसृष्टं प्रेषितं मारीचं विलोक्य जघान, कथम्भूतम् ? अद्भुतैणवपुषा स्वर्णहरिणशरीरेणोपलक्षितं स्वयं कथम्भूतः ? आश्रमतोऽपकृष्टः दूरं गतः कं दक्षं यथा उग्रः श्रीरुद्रः ॥ १० ॥

रक्षोऽधमेन रावणेन वृकवत् वृकेणेव असमक्षं परोक्षत एवाप-यापिताथाम् अपहृतायां सत्यां प्रियया प्रेमवत्या सीतया वियुक्तः विप्र-लम्भशृङ्गाररसाश्रयलम्बनीभूतः। प्रेमाणमेव विप्रलम्भरसमयीभूत-मास्वादयन् तदनुभावसात्त्विकसञ्चार्यादिकं विलापमूर्च्छोन्मादा-दिकं प्रकटयन्नेव चचार कथम्भूतः? इतीत्यनेनैव प्रकारेण स्त्री-सङ्गिनां गतिं विलापादिदुःखोदर्कां प्रथयन् बहिर्दर्शिनो जनान् प्रख्यापयन् अन्तर्दर्शिनस्तु गतिं प्रख्यापयन् इति प्रथामात्रमेतन्न तु वस्तुत इत्यर्थः, "चिन्मयेऽस्मिन् महाविष्णौ जाते दशरथे हरौ" इति रामतापनीश्रुत्यादिप्रमाणेन चिदानन्दमयमनोबुद्धीन्द्रियशरीरस्य परब्रह्मणस्तस्य दुःखसम्भावनापि शास्त्रयुक्तिप्रतिकूलेति पञ्चम-स्कन्धीयकिंपुरुषवर्षरामप्रसङ्गव्याख्यानयुक्त्या जानन्त्येव ॥ ११ ॥

आत्मार्थेन कृत्येन कर्मणा रावणेन सह युद्धेन हतं कृत्यं शास्त्रीयं दहनादिकं यस्य जटायुषं पुत्र इव दग्ध्वा कबन्धं स्व-ग्रहणाय प्रसारितबाहुं राक्षसमहन् अथ वालिनि हते सति तैः कपिभिर्दयितागतिं बुद्ध्वा वेलां समुद्रतीरं मनुजो रामः ॥ १२ ॥

तत्र त्रिरात्रोपवासेन प्रतीक्षितोऽपि सिन्धुर्यदा नोपतस्थे तदा स्वैश्वर्य्यं सस्मारेत्याह—यस्य रोषविभ्रमेण क्रोधविलासेन विवृत्तो विकटो यः कटाक्षपातस्तेन सम्भ्रान्ता विपन्ना नक्रा मकराश्च यस्य सः भयेन गीर्णः ग्रस्तः स्तम्भितो घोषो येन सः अर्हणमर्घ्यादिपूजोपहारम् ॥ १३ ॥

जडधियो जलधित्वादज्ञाः स्वशास्तिमप्राप्य त्वां न विद्मः। पशवो हि लकुडप्रहारमनवाप्य मनुष्यं यथा न गणयन्ति तथेति भावः। नन्वधुना परिचितोऽस्मि न वा तत्राह—यदिति। पृथक्पदं यस्येत्यर्थः। मन्योस्तमसः तस्य गुणस्य गुणरूपप्रधानस्य ईशः नियन्ता ॥ १४ ॥

विश्रवसोऽवमेहं मूत्रतुल्यं त्रैलोक्यं रावयति क्रन्दयतीति तथा तं यं सेतुमुपेत्य गायन्ति त्वद्यशो गास्यन्ति ॥ १५ ॥

अद्रिशृङ्गैः कीदृशैः कपीन्द्राणां करैः कम्पितानि भूरुहाणा-मङ्गानि शाखादीनि येषु तैः विभीषणस्य दृशा बुद्ध्या ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

रक्षसः रावणस्य स्वसुः अशुद्धबुद्धेः भगवत्प्रियां जिघृक्षोः रूपं व्यकृत विकारमनयत् तस्याः खरत्रिशिरोदूषणमुख्या ये बन्धवस्तान् चतुर्दशसहस्रं जघ्ने जघान हतवान् अपारणीयम् असह्यं कोदण्डं धनुः पाणौ यस्य तथाभूतः अटमानः सञ्चरन् कृच्छ्रं यथा तथा उवास संसारिणां दुःखदत्वं द्योतयितुं कृच्छ्र-मुवासेत्युक्तं परमेश्वरस्य दुःखाभावात् ॥ ९ ॥

हे नृपते! सीताकथाश्रवणेन दीपितो हृच्छयो यस्य तेन सृष्टं नियुक्तम् अद्भुतैणवपुषोपलक्षितं मारीचं तेनैवाऽऽश्रमतोऽप-कृष्टः विलोक्य आशु जघ्ने जघान यथा कं दक्षम् उग्रो वीर-भद्रः ॥ १० ॥

तदा रक्षोऽधमेन रावणेन वृकवत् वृकेणेव असमक्षं चौर्येण

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

वैदेहराजदुहितरि अपयापितायाम एवं प्रियया वियुक्तः भ्रात्रा सह वने चचार, किं कुर्वन्? इति अनेन प्रकारेण स्त्रीसङ्गिनां दुःखादर्कां गतिं प्रथयन् प्रख्यापयन् ॥ ११ ॥

आत्मार्थेन श्रीरामार्थेन कृतेन सीताविमोचनप्रयत्नेन हतानि कृत्यानि संसारप्रापकानि कर्माणि यस्य तं जटायुषं तच्छरीरं दग्ध्वेत्यर्थः । जटायुर्मुक्तोऽभूदिति भावः । कबन्धं राक्षसं च अहन् जघान ततः कपिभिः सुग्रीवादिभिः सह सख्यं विधाय अथ वालिनि सुग्रीवविरोधिभूते हते तैः कपिभिः दयितागतिं बुध्वा अजभवाङ्घ्र्यमर्चिताचङ्घ्री यस्य तथाभूतः सः श्रीरामः मनुजः मनुवंशे आविर्भूतः प्लवगेन्द्रसैन्यैः सह वेलां समुद्रतीरमगात् ॥ १२ ॥

लङ्कां जिगमिषुः श्रीरामः समुद्रतीरे त्रिरात्रमुपवासं कृतवान् तदाप्यनागतं समुद्रं प्रति रोषं चकार तदा यस्य श्रीरामस्य रोषविभ्रमेण क्रोधलीलया विवृत्तस्य प्रस्फुरितस्य कटाक्षस्य पातेन सम्भ्रान्ताः नक्रा मकराश्च यस्मिन् भयेन गलितस्तम्भितो घोषो येन सः सिन्धुः रूपी मूर्तिमान् सन् अर्हणाम् अर्घ्यादिकं शिरसि परिगृह्य पादारविन्दमुपगम्य एतद्वक्ष्यमाणं बभाषे ॥ १३ ॥

हे भूमन्! जडधियः वयम् अत एव त्रिरात्रमिह वसन्तं कूटस्थं निर्विकारमादिपुरुषं जगतामधीशं तु निश्चितं न विदाम इदानीं तु जानीमः यदिति पृथक्पदं यस्य सत्त्वादितः सुरगणादयः सगुणेशत्वादिगुणनियन्ता भवानिति ॥ १४ ॥

कामं यथेष्टं सेतुं विनैव जलमाक्रम्यापि प्रयाहि विश्रवसः अवमेहं पुत्रापसदं त्रैलोक्यं रावयत्याक्रन्दयतीति तथा तं दशकन्धरं जहि हे वीर! तथापि दिग्विजयिनो भूपाः समुपेत्य तव यशो गायन्ति गास्यन्ति तम् इह मयि ते यशसो वितत्यै बधान ॥ १५ ॥

एवं समुद्रेणोक्तो रघुपतिः कपीन्द्राणां करैः कम्पितानि भूरुहाणां द्रुमानामग्राणि येषु तैर्विविधाद्रिकूटैः उदधौ सेतुं बद्ध्वा अग्रे हनुमता दग्धां लङ्कां विभीषणदृशा विभीषणानुमत्या सुग्रीवादिभिः सह अविशत् ॥ १६ ॥

भाषाटीका ।

दुष्ट बुद्धि वाली राक्षस की बहिन ऐसी सूपनखा की नांक कान काटकर उसको कुरूप बनाकर उसके खर, त्रिशिरा, दूषण जो मुख्य बंधु लोग तिनको और चौदह हजार बडे २ राक्षसों को जिनने मारा, और शत्रुओं को असह्य कोदंड [धनुष] को हस्त में लेकर दुःख से भी वन में पर्यटन करते हुए वास करते भये ॥ ९ ॥

हे नृपते! सीता जी के सौभाग्य को सुनकर कामी होने वाले रावण के रचे हुए कपट मृगको देखकर उस को लीला रस में अद्भुत मृग अर्थात् सुवर्ण का मृग जानकर आश्रम से पीछे २ दौडकर उस मरीच को तत्काल में बाण से मारते हुऐ जैसे ब्रह्मा के पीछे दौड कर महादेव ने ब्रह्मा को मारा ॥१०॥

इतने बीच में राक्षसाधम रावण के उस विपनमें वृक जन्तु के तरह जनकराज पुत्री के हरण करने पर आप प्रियतमा से वियोग को प्राप्त हुए, और भ्राता लक्ष्मण के साथ दीन सदृश स्त्रीसङ्गी लोगों की दुःख परिणाम वाली गति को जनाते हुए विचरते भये ॥ ११ ॥

तदनंतर अपने कार्य के अर्थ रावण के साथ युद्ध करने वाले ऐसे जटायुजी का शास्त्रीय दहनादि रूप कृत्य करके आगे चल कर कवन्ध को मारते हुए तत्पश्चात् आगे चलने से सुग्रीवादि वानरों के साथ मित्रता कर बाली को मार वानरोंके द्वारा अपनी प्रिया श्रीजानकी की खबर मंगाकर ऋच्छ वानरों की अपार सेना को साथ लेकर अनुज सहित वह मनुज सागर के तट पर गया, कि—जिसके चरण को भव काज तज शंकर और अज (ब्रह्मा) सर्वदा ही भजते हैं और अर्चन भी करते हैं ॥ १२ ॥

समुद्र के तटपर तीन दिन रह कर उपवास करने पर भी जब समुद्र नहीं उपस्थित हुआ त आपने रोष की लीला से नेत्र उघाड कर जब समुद्र पर कटाक्ष फैंका बस इतने में ही जितने भीतर जलजन्तु रहने वाले नाके मगर आदिक रहे वे सब ही खरवल बखल होगये समुद्र ने मारे डरके घोष (शब्द) करना छोड दिया और मूर्त्तिमान होकर मस्तकपर पूजा की सामग्री धर कर चरणों के समीप आकर इस प्रकार बोलता हुआ ॥ १३ ॥

समुद्र बोला, कि—हे भूमन्! जड बुद्धि ऐसे हमने अब तक आपको नहीं जाना रहा कि कूटस्थ आदि पुरुष सब जगत के अधीश्वर आपही हैं, हे भगवन्! जिन आपके सत्त्व गुण से सुरगण हुए रजोगुण से प्रजेश [मरीची आदिक] हुए और क्रोध से रुद्र हुए वो आप साक्षात् तीनों गुणों के नियन्ता हो ॥ १४ ॥

हे महाराज! आप इच्छा पूर्वक पधारो और विश्रवा की खोटी संतान, तथा तीनों लोक को रोदन कराने वाला, ऐसे रावण को मारो—और आपके यश के विस्तार करने के लिये सेतु भी बांधिये, जिस सेतु तक आकर दिग्विजयी भूपति लोग आपके यश को गाया करेंगे ॥ १५ ॥

तब इतना सुनकर श्रीरामचन्द्रजी बडे २ कपीन्द्रों के करों से कंपित हुई शाखायें जिनकी ऐसे वृक्षों वाले अनेक पर्वतों के शिखरों से समुद्र में सेतु बांधकर, सुग्रीव, नील, हनुमान इत्यादि जोधाओं के अनीकों [सेनाओं] सहित विभीषण की सलाह से हनुमान् जी जलाई हुई लंका में प्रवेश करते हुए ॥ १६ ॥

सा वानरेन्द्रबलरुद्धविहारकोष्ठश्रीद्वारगोपुरसदोवलभीविटङ्का ।
निर्भज्यमानधिषणध्वजहेमकुम्भशृङ्गाटका गजकुलैर्ह्रदिनीव घूर्णा ॥ १७ ॥
रक्षःपतिस्तदवलोक्य निकुम्भकुम्भधूम्राक्षदुर्मुखसुरान्तनरान्तकादीन् ।
पुत्रं प्रहस्तमतिकायमकम्पनादीन् सर्वानुगान् समहिनोदथ कुम्भकर्णम् ॥ १८ ॥
तां यातुधानपृतनामसिशूलचापप्रासर्ष्टिशक्तिशरतोमरखड्गदुर्गाम् ।
सुग्रीवलक्ष्मणमरुत्सुतगन्धमादनीलाङ्गदर्क्षपनसादिभिरन्वितोऽगात् ॥ १९ ॥
तेऽनीकपा रघुपतेरभिपत्य सर्वे द्वन्द्वं वरूथमिभपत्तिरथाश्वयोधैः ।
जघ्नुर्द्रुमैर्गिरिगदेषुभिरङ्गदाद्याः सीताऽभिमर्शहतमङ्गलरावणेशान् ॥ २० ॥
रक्षःपतिः स्वबलनष्टिमवेक्ष्य रुष्ट आरुह्य यानकमथाभिससार रामम् ।
स्वःस्यन्दने द्युमति मातलिनोपनीते विभ्राजमानमहनन्निशितैः क्षुरप्रैः ॥ २१ ॥
रामस्तमाह पुरुषादपुरीष ! यन्नः कान्ताऽसमक्षमसताऽपहृता श्ववत्ते ।
त्यक्तत्रपस्य फलमद्य जुगुप्सितस्य यच्छामि काल इव कर्तुरलङ्घ्यवीर्यः ॥ २२ ॥
एवं क्षिपन् धनुषि सन्धितमुत्ससर्ज बाणं सवज्रमिव तद्धृदयं बिभेद ।
सोऽसृग्वमन्दशमुखैर्न्यपतद्विमानाद्धाहेति जल्पति जने सुकृतीव रिक्तः ॥ २३ ॥
ततो निष्क्रम्य लङ्काया यातुधान्यः सहस्रशः ।
मन्दोदर्या समं तस्मिन् प्ररुदन्त्य उपाद्रवन् ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ततश्च सा लङ्का घूर्णा प्रचलिता बभूव, कथंभूता, ? वानरेन्द्राणां बलैरुद्धा विहारादयो यस्याम् निर्भज्यमाना धिषणादयो यस्यां सा तत्र विहारः क्रीडास्थानं कोष्ठं धान्यागारादि श्रीः कोशः द्वारं गृहादीनाम्, गोपुरं पुरद्वारम् सदः सभा वलभी प्रासादादिपुरोभागच्छादिनी विटङ्कः कपोतपालिका धिषणं वेदिकादि शृङ्गाटकं चतुष्पथम् ॥ १७ ॥

रक्षःपती रावणः पुत्रमिन्द्रजितं प्रहस्तादींश्च समहिनोत् प्रायुङ्क्त ॥ १८ ॥

असिशूलादिभिर्दुर्गमां तां यातुधानपृतनां सुग्रीवादिभिरन्वितः श्रीरामोऽभ्यगात् मरुत्सुतो हनुमान् ऋक्षो जाम्बवान् ॥ १९ ॥

ते रघुपतेरनीकपाः अङ्गदाद्याः सर्वे रावणस्येभादिभिर्युक्तं वरूथं सैन्यं तत्र द्वन्द्वं यथा भवति तथा अभिपत्य सङ्गम्य द्रुमादिभिर्जघ्नुः, कान् ? सीताया अभिमर्शेन हतं मङ्गलं यस्य स रावण ईशो येषां तान् ॥ २० ॥

स्वबलस्य नष्टिं नाशमवेक्ष्य रुष्टः क्रुद्धः सन् यानकं पुष्पकं विमानं रथं वाऽऽरुह्य श्रीराममभिससार अथ तं स्वःस्यन्दने स्वर्गस्थे इन्द्रस्य रथे मातलिनेन्द्रसारथिनोपनीते द्युमति दीप्तियुक्ते विभ्राजमानमहनदहन् ॥ २१ ॥

हे पुरुषादपुरीष ! राक्षसपुरीषप्राय यद्यस्मादपहृता श्ववत् श्वा यथाऽसमक्षं गृहं प्रविश्य किमपि हरति तद्वत् तस्मात् जुगुप्सितस्य कर्मणः कर्तुस्तेऽद्य काल इवालङ्घ्यवीर्योऽहं फलं यच्छामि अधर्मकर्तुः पुंसः कालो यथा यच्छतीति वा ॥ २२ ॥

रिक्तः क्षीणपुण्यः सुकृती विमानादिव विमानात्पुष्पकात् न्यपतदिति वा ॥ २३ ॥

राक्षसस्त्रीणां विलापमाह—तत इति पञ्चभिः । मन्दं स्वल्पमुदरं यस्यास्तया रावणभार्यया सह ॥ २४ ॥ २५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सेति । सा श्रीरामेण सकपिसैन्येन प्रविष्टा लङ्का गजकुलैः ह्रादिनी यथा घूर्णा भवति तद्वत् घूर्णा बभूव, कथम्भूता ? वानरेन्द्राणां बलैरुद्धा विहारादयो यस्यां निर्भज्यमाना धिषणादयो यस्यां सा तत्र विहारः क्रीडास्थानं कोष्ठं धान्यागारादि श्रीःकोशः द्वारं गृहादीनां, गोपुरं पुरद्वारं सदः सभाः वलभी प्रासादादिपुरो-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

मागच्छादिनी विटङ्कः कपोतपालिका धिषण्यां वेदिकादि ध्वज-हेमकुम्भौ प्रसिद्धौ शृङ्गाटकश्चतुष्पथः ॥ १७ ॥

रक्ष इति । रक्षःपती रावणः नद्धिघूर्णनं दृष्ट्वा निकुम्भादीन् प्रत्येकशः स्वस्वबलसहितान् पुत्रमिन्द्रजितं प्रहस्तादींश्च सर्वाननुगान् भृत्यान् समहिनोत् प्रायुंक्त अथ कुम्भकर्णं च समहिनोत् ॥ १८ ॥

तामिति । तामसिशूलादिभिर्दुर्गमां यातुधानानां पृतनां सेनां सुग्रीवादिभिरन्वितः श्रीरामोऽभ्यगात् तत्र मरुत्सुतो हनुमान् ऋक्षो जाम्बवान् ॥ १९ ॥

त इति । ते रघुपतेरनीकपाः सर्वे अङ्गदाद्याः रावणस्येभादीनां गजादीनां यूथैर्यद्वरूथं सैन्यं तद्द्वन्द्वं यथाभवति तथा अभिपद्य सङ्गम्य द्रुमैर्गिरिभिर्गदादिभिरिषुभिश्च सीताया अभिमर्शनेन हतं मङ्गलं यस्य स रावण ईशो येषां तान् निकुम्भादीन् जघ्निरे ॥ २० ॥

रक्ष इति । अथ रक्षःपती रावणः स्वबलस्य नाशं नाशमवेक्ष्य रुष्टः क्रुद्धस्सन् यानकं विमानमारुह्य श्रीराममभ्यपतत् अथ स्वस्स्यन्दने इन्द्रस्य रथे मातलिना इन्द्रसारथिना उपनीते समानीते द्युमति दीप्तियुक्ते विभ्राजमानं श्रीरामं क्षुरप्रैः क्षुरधारातुल्याग्रैर्विशिखैर्बाणैरहनत् तताड तनादित्वादेव सिद्धे क्त्वग्रहणेन गणकार्यस्यानित्यत्वादार्षत्वाद्वा शपोलुक् अभावः ॥ २१ ॥

तमेवं ताडयन्तं रावणं श्रीराम आह—किमिति । हे पुरुषाद-पुरीष ! राक्षसेषु तेषां वा पुरीषप्राय यस्मान्नोऽस्माकमसमक्षं कान्ता असता दुरात्मना त्वया शुनेवापहृता शुना यथा असमक्षं गृहं प्रविष्टेन किमपि वस्त्वपह्रियते तद्वदिति दृष्टान्तार्थः, तस्मात् जुगुप्सितस्य, कर्मणः इतिशेषः । कर्तुस्ते निर्लज्जस्य तवाद्य कालो मृत्युरिवालंघ्यवीर्योऽहं फलं यच्छामीति ॥ २२ ॥

एवमित्थमधिक्षिपन् धनुषि सन्धितं बाणमुत्ससर्ज प्रायुंक्त स बाणो वज्रमिव तस्य रावणस्य हृदयं बिभेद स रक्षो रावणः दशभिर्मुखैरसृक् रुधिरं वमन् जने पश्यति जने हाहेति वादिनि सति विमानात् पुष्पकादपतत् यथा सुकृती क्षीणपुण्यः स्वर्लोकात् पतति तद्वत् ॥ २३ ॥

ततइति । ततो यातुधान्यः राक्षस्यो मन्दोदर्या सह लङ्कायाः विष्क्रम्य प्ररुदन्त्यस्तत्र रावणसमीपे उपाद्रवन् आजग्मुः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यदा सा लङ्का रामेणाविष्टा तदा गजकुलैर्घूर्णा ह्रदिनीव घूर्णाऽभूदिति शेषः । विहरन्त्यस्मिन्निति विहारं क्रीडास्थानं कोष्ठमन्तर्गृहं सद्द्वारं सभाद्वारं प्रशस्तसाधारणद्वारं वा गोपुरं पुरद्वारं सदः सभास्थानं वलभी गृहाच्छादनान्तर्नाली दारुभिः परितो निर्मिता गोपानसीति कीर्त्यते विटङ्कः पक्षिपट्टिका वानरेन्द्राणां बलेन सेनया रुद्धा आवारिताः विहारादयो यस्याः सा तथा

"आच्छादनं स्याद्वलभीगृहाणां गोपानसी दारुषु वक्रसंस्था ।
निम्रं वलीकं पटलान्तमाहुः कपोतपाली च विटङ्कसंज्ञाम्" ॥

इति हलायुधः—

"गोपानसी तु वलभीच्छादने वक्रदारुणि ।
कपोतपालिकायान्तु विटङ्कं पुन्नपुंसकम्" ॥

इत्यमरः । निर्भज्यमाना वानरेन्द्रबलेन निर्भिद्यमाना धिषण्यध्वजाः गृहालङ्कारहेतवः हेमकुम्भाः सुवर्णकलशाः शृङ्गाटकाः गृहमुखाग्रतोऽन्तर्निशूलाङ्कुशग्रहैकदेशाः यस्यां सा तथा ध्वजोपरिस्थहेमकुम्भैर्युक्ताः शृङ्गाटकाः चतुष्पथा वा ॥ १७ ॥

तद्वानरेन्द्रबलकृतं कर्म समहिनोदपातयत् ॥ १८ ॥

या रावणेन प्रेरिता तां यातुधानपृतनां राक्षससेनाम् ॥१९॥

रघुपतेस्ते अनीकपाः सेनानायकाः वरूथं रथगुप्तिमभिपत्य प्राप्य इभाश्च पत्तयश्च रथाश्चाश्वाश्च योधाश्च यस्मिन् तदिभपत्तिरथाश्वयोधं द्वन्द्वं द्वाभ्याम् द्वाभ्याम् इभादिभ्यां क्रियमाणं युद्धम् अभ्युपगम्य राक्षसबलं जघ्नुरित्यन्वयः "रथगुप्तिर्वरूथो ना कूबरो ना युगन्धरः" इति यादवः । कीदृशं बलं सीताभिमर्शेन सीतापरामर्शेन सीताया अपहारेणेत्यर्थः । हतं नष्टं मङ्गलं पुण्यं यस्य स तथा स चासौ रावणः सीताभिमर्शहतमङ्गलपुण्यं रावणः स प्रवेशो यस्य तत्तथा तत् ॥ २० ॥

द्युमति तेजोवति स्वः स्वर्गादवतीर्णे स्यन्दने रथे विभ्राजमानं क्षुरप्रैरर्धचन्द्रैः "अर्द्धचन्द्रः क्षुरप्रः स्यात्" इति । प्रासः कुन्तः ऋष्टिः प्रसिद्धा शक्तिः शतमारणी तोमरः लोहमयद्विफलः निस्त्रिंशः खड्गः पट्टिशः लोहदण्ड इत्यर्थः । शतघ्नी चतुस्ताला लोहकण्टकसंचिता केचित् शतघ्नीमयःकण्टकसंरूढां महाशिलां वदन्ति भुशुण्डी वृत्तायःफलसञ्चिता दारुमयी हस्तिवरो गजत्रासहेतुरष्टमुनयः देवदण्डोऽश्वत्रासकरो ऽरत्निमात्रः द्रुघणो मुद्गरः तत्र शक्त्याद्यस्त्रं हस्तमुक्तं शरादिकं यन्त्रमुक्तं शरादिकं यन्त्रमुक्तं मुक्तामुक्तं नागपाशादिकम् अमुक्तं छुरिकादिकमिति चतुर्विधमायुधं प्रसङ्गात्कथितम् ॥ २१ ॥

हे पुरुषादपुरीष ! राक्षसाधम ! "अपस्करं पुरीषं स्याद्विष्ठवर्चस्कमप्युत" इति असता अप्रशस्तकर्मणा त्वया कान्ता सीता नः अस्माकमसमक्षम् अस्मान्वञ्चयित्वाऽपहृतेति यत्तस्मादद्य त्यक्तत्रपस्य निर्लज्जस्य रक्षस्त्वेन जुगुप्सितस्य ते तव तस्य कर्मणः फलं कर्तुमनेकार्थत्वाद्धातूनां दातुमिच्छामि तवाधुना तल्लङ्घनमशक्यमित्याशयेनाह—काल इति । कालोऽन्तकः "कालो मृत्यौ यमे" इति यादवः "वीर्यं पराक्रमे रेतस्युत्तमाहात्म्ययोरपि" इति रावणः ॥ २२ ॥

सुकृती भुक्तपुण्यः स्वर्गादिव ॥ २३ ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

वानरेन्द्राणां बलैरुद्धा विहारादयो यस्या विहारः क्रीडास्थानं कोष्ठं धान्यागारादि श्रीः कोशः द्वारं गृहद्वारं गोपुरं पुरद्वारं सदः सभा वलभी प्रासादोर्द्ध्वशिखरगृहं विटङ्कः कपोतपालिका ततश्च निर्भज्यमाना धिषण्याद्या यस्यां धिषण्यं वेदिकादि शृङ्गाटकं चतुष्पथं घूर्णा घूर्णिता ॥ १७ ॥

श्रीमद्विश्वनाथचक्रवर्तीसारार्थदर्शिनी ।

पुत्रमिन्द्रजितं समहिनोत् युद्धार्थं प्रायुङ्क्त ॥ १८ ॥ अन्वितः श्रीरामः ॥ १९ ॥

ते रघुपतेरनीकपा अङ्गदाद्याः सर्वे रावणस्य इभादिभिर्यद्वरूथं सैन्यं तत्र द्वंद्वं यथा भवति तथाऽभिपत्य सङ्गम्य द्रुमादिभिर्जघ्नुः कान् ? सीताया अभिमर्शेन हरणेन हतं मङ्गलं यस्य तथाभूता रावण एव ईशो येषां तान् ॥ २० ॥

यानकं पुष्पकं विमानं रथं वा स्वस्स्यन्दने स्वर्गीयरथे दीप्तिमति मातलिना इन्द्रसारथिना उपनीते भ्राजमानं रामम् अहनत् अहन् क्षुरपैः शरैः ॥ २१ ॥

हे पुरुषादपुरीष ! राक्षसानां पुरीषतुल्य ! यद्यस्मादपहृता श्ववत् शुना यथा असमक्षमेव गृहं प्रविश्य घृतमपह्रियते तद्वत् अद्य जुगुप्सितस्य कर्मणः कर्तुः कालो यम इव अहं ते फलं यच्छामि ॥ २२ ॥

स बाणः तस्य रावणस्य स रावणः रिक्तः क्षीणपुण्यः सुकृती विमानादिव न्यपतत् ॥ २३ ॥

मन्दोदर्य्यां रावणभार्य्यया ॥ २४—२७ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यां श्रीरामः अविशत् सा लङ्का गजकुलैः ह्रदिनीव घूर्णा धर्षिता वानरैरिति शेषः एतदेवाह वानरेन्द्रबलैः रुद्धा विहारादयो यस्यां सा तत्र विहाराः क्रीडाभूमयः कोष्ठानि धान्यादीनाम् श्रियः नानाविभूतयः द्वाराणि गृहादीनाम् यद्वा श्रीयुक्तानि द्वाराणि गोपुराणि पुरद्वाराणि सदःशब्देन सभाः वलभ्यः प्रसादादिपुरोभागाच्छादिन्यः विटङ्काः कपोतपालिकाः पुनः कथंभूता निर्भज्यमानाः धिषणादयो यस्याः सा तत्र धिषणानि वेदिकादीनि ध्वजाः हेममयाः कुम्भाः शृङ्गाटकाः चतुष्पथाः ॥ १७ ॥

रक्षःपतिः रावणः तत् लङ्कायाः धर्षणं दृष्ट्वा निकुम्भादीन् पुत्रमवलोक्य इन्द्रजितं प्रहस्तादींश्च समहिनोत् प्रायुङ्क्त ॥ १८ ॥

सुग्रीवादिभिरन्वितः श्रीरामः असयादिभिर्दुर्गां तां यातुधानपृतनामगात् ॥ १९ ॥

तदा ये अङ्गदाद्याः रघुपतेः अनीकपाः ते सर्वे रावणस्येभादिभिर्यद्वरूथं सैन्यं तद्द्वन्द्वं यथा भवति तथाऽभिपत्य सङ्गम्य सीतायाः अभिमर्शेन हतं मङ्गलं यस्य स रावण ईशो येषां तान् द्रुमादिभिर्जघ्नुः ॥ २० ॥

स्वबलनष्टिं स्वकीयसैन्यनाशम् अवेक्ष्य यानकं पुष्पकमारुह्य रामम् अभिससार अभ्यपतत् अथ द्युमति सप्रभे स्वःस्यन्दने स्वर्गस्यन्दने इन्द्ररथे मातलिना इन्द्रसारथिनोपनीते विभ्राजमानं क्षुरप्रैः क्षुरधारातुल्याग्रैः निशितैरुज्ज्वलितैर्बाणैः अहनत् अहन् ॥ २१ ॥

हे पुरुषादपुरीष रक्षःपुरीषप्राय ! यद्यस्मात् श्वा यथा कस्यचित् किञ्चिदसमक्षमपहरति तथा ते त्वया नः कान्ता अपहृता तस्मात् अलङ्घ्यवीर्यः अनतिक्रमणीयप्रभावोऽहम् कालः जुगुप्सितस्य कर्मणः कर्तुर्यथा फलं प्रयच्छति तद्वत् जुगुप्सितस्य अद्य यच्छामि ॥ २२ ॥

विमानात् पुष्पकात् सः न्यपतत् यथा रिक्तः क्षीणपुण्य. सुकृती न्यपतति तद्वत् ॥ २३ ॥

मन्दोदर्यां समं सह ॥ २४—२७ ॥

———

भाषाटीका ।

तब उस लंका की क्या दशा हुई सो कहते हैं; कि–वानरेन्द्रों की सेना ने जब लंकामें प्रवेश किया तब उसने विहार स्थल, धान्य के कोठे, संपत्तिये, [खजाने] द्वार, गोपुर, सभायें, और अटा अटारी ये तथा कपोतों के बैठने की जगें इत्यादि सबीस्थलों रोक लिये, और अब कोई वीर लोग बडे २ धिषणों [महलों] को ढहाने लगे कितने एक ध्वजाओं को तोड कर गिराने लगे कितने एक सोनें के कलशों को चौंतरे चौराहे इन सबों को तोड फोड कर गिराने लगे, उस समय लंका ऐसी जान पडी कि जानों गजों के यूथों ने तलाई को मचाई हो ॥ १७ ॥

राक्षसों का पति रावण भी यह चरित्र देखकर निकुंभ, कुंभ, धूम्राक्ष, दुर्मुख, सुरांतक नरांतक, इत्यादिक जोधाओं को और अपने पुत्र प्रहस्त को और भी अतिकाय विकंपनादिकों को भी सेनाओं के सहित युद्ध के निमित्त भेजता हुआ तदनंतर कुंभकर्ण को भी भेजता हुआ ॥ १८ ॥

जब वह सेना बाहर निकलने लगी तब उस यातु धानों के सेना को असि, शूल, चाप, प्रास, ऋष्टि, शक्ति, शर, तोमर, खड्ग, इत्यादिक शस्त्रों से बडी दुर्गम और भयानक देखकर, आप भी सुग्रीव, लक्ष्मण, मरुत्पुत्र, (हनुमान्) गन्धमादन, नील, अंगद, ऋक्ष, पनस, इत्यादि वीरों को लेकर उस सेना के ऊपर जाते हुए ॥ १९ ॥

रावण की सेना के समीप पहुंचकर वे श्रीरघुपति के सेनापति लोग अपने.२ समान युद्धके योग्य राक्षसों को देख द्वन्द्व युद्ध के लायक जोडीके राक्षसों से भिडकर समस्त अंगदादिक वीर वृक्षों से, और पर्वत, गदा, बाण, आदिकों से राक्षसों को मारने लगे, कैसे हैं वे राक्षस लोग कि—श्रीसीताजी के स्पर्श मात्र से, नष्ट मंगल होगया रावण रूप ईश (स्वामी) जिन का ॥ २० ॥

जब राम दलने मारते २ बहुत से राक्षसों को नष्ट कर दिये तब राक्षसेश्वर रावण ने अपनी सेना का नाश देखकर, बडा रोष किया और रथमें बैठकर श्रीरामके ऊपर चढाई करके चला, इतने में इन्द्र के सारथि मातलि के लाये हुए स्वर्ग के बडी कांति वाले स्यन्दन पर श्रीराघवेन्द्र भी अच्छी प्रकार विराजमान होकर स्थित हुए और आपके ऊपर रावण तीक्ष्ण बाण चलाने लगा ठीक है वीर लोग प्रथम हाथ नहीं छोडते हैं ॥ २१ ॥

अपने ऊपर बाण चलाते हुए को देखकर, श्रीराघवेन्द्र रावण से बोले, कि—हे राक्षसों के मैल ! जैसे स्वामी के न रहने पर श्वान घर में घुसकर कुछ वस्तु लेजावे इसी भांत जो तू हमारी कांता को हमारे शून्य काल में हरण कर लाया है सो अब

स्वान्स्वान्बन्धून्परिष्वज्य लक्ष्मणेषुभिरर्दितान् ।
रुरुदुः सुस्वरं दीना घ्नन्त्य आत्मानमात्मना ॥ २५ ॥
हा हताः स्म वयं नाथ ! लोकरावण ! रावण ! ।
कं यायाच्छरणं लङ्का त्वद्विहीना परार्दिता ॥ २६ ॥
नैवं वेद महाभाग ! भवान् कामवशङ्गतः ।
तेजोऽनुभावं सीताया येन नीतो दशामिमाम् ॥ २७ ॥
कृतैषा विधवा लङ्का वयं च कुलनन्दन ! ।
देहः कृतोऽन्नं गृध्राणामात्मा नरकहेतवे ॥ २८ ॥

श्रीशुक उवाच ।

स्वानां विभीषणश्चक्रे कोसलेन्द्रानुमोदितः ।
पितृमेधविधानेन यदुक्तं साम्परायिकम् ॥ २९ ॥
ततो ददर्श भगवानशोकवनिकाश्रमे ।
क्षामां स्वविरहव्याधिं शिंशुपामूलमास्थिताम् ॥ ३० ॥
रामः प्रियतमां भार्यां दीनां वीक्ष्यान्वकम्पत ।
आत्मसन्दर्शनाह्लादविकसन्मुखपङ्कजाम् ॥ ३१ ॥
आरोप्यारुरुहे यानं भ्रातृभ्यां हनुमद्युतः ।
विभीषणाय भगवान् दत्वा रक्षोगणेशताम् ॥ ३२ ॥

भाषा टीका ।

अलंघ्य वीर्य वाला मैं निर्लज्ज ऐसे तोकों काल के सदृश तेरे निन्दित कर्म का फल अवही देता हूँ ॥ २२ ॥

इस प्रकार अभिक्षेप करते हुए, धनुषके ऊपर बाणका सन्धान कर छोड दिये, श्रीराघव का वह अमोघबाण वज्र के तरह रावण के हृदय को भेदन करता हुआ, तबतौ रावण भी दशों मुख से रुधिरका वमन करता हुआ रथ पर से नीचे गिरपडा जैसे क्षीणपुण्य वाला सुकृती विमान से गिरे बस रावण के गिरने पर राक्षसों ने सब जगह हाहाकार करने लगे ॥ २३ ॥

तदनन्तर लङ्का में से मन्दोदरी के साथ हजारों राक्षसी निकल कर सब रावण के समीप को दौडती आई ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

परैरर्दिता पीडिता ॥ २६ ॥ २७ ॥

गृध्राणामन्नं भक्ष्यः नरकहेतवे नरकभोगाय ॥ २८ ॥

साम्परायिकमौर्ध्वदेहिकम् ॥ २९ ॥ ३० ॥

आत्मनः स्वस्य सन्दर्शनेन य आह्लादस्तेन विकसन्मुखपङ्कजं यस्यास्ताम् ॥ ३१ ॥

यानं पुष्पकम् भ्रातृभ्यां लक्ष्मणसुग्रीवाभ्याम् ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नत्रेति । तत्र लक्ष्मणस्य बाणैरर्दितान् हतान् स्वान् स्वान् बन्धून् परिष्वज्य आत्मना आत्मानं घ्नन्त्यः दीनाः दुःखिताः सुस्वरं रुरुदुः ॥ २५ ॥

रोदनप्रकारमेवाह--हाहेति त्रिभिः । हेति खेदद्योतकमव्ययं हे नाथ ! हे लोकरावण ! वयं हताः स्म हतप्राया बभूविम अधुना परैः शत्रुभिरर्दिता पीडिता त्वया हीना रहिता लङ्का लङ्कास्थो जनः कं शरणं यायात् ॥ २६ ॥

नवाहेति । हे महाभाग ! भवान् कामवशङ्गतः सीतायास्तेजसः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

प्रभावं, तेजोरूपं वा प्रभावं न वै वेद न ज्ञातवान् येन तेजोऽनुभावेनेमां दशां नीतः प्राप्तवानसि ॥ २७ ॥

कृतेति। हे कुलनन्दन! वयमेषा लङ्का च विधवा कृता येनेत्यनुषङ्गः अयं शयानः त्वद्देहः गृध्राणां कृतः, भक्ष्य इति शेषः। आत्मा तु नरकहेतवे नरकभोगाय कृतः ॥ २८ ॥

स्वस्तीति। ततः कोसलेन्द्रेण श्रीरामेणानुमोदितो विभीषणः पितृमेधविधानेन पितृमेधविधिना यदुक्तं विहितं तत्साम्परायिकं प्रेतकर्म स्वानां रावणादीनां चक्रे ॥ २९ ॥

तत इति। ततो भगवान् श्रीरामः अशोकवने च आश्रमस्तस्मिन् शिंशुपाया मूलमाश्रितां मूले स्थितां स्वस्य विश्लेष एव व्याधिर्यस्यास्तामत एव क्षामां कृशाम् ॥ ३० ॥

प्रियतमां भार्यामवलोक्यानुकम्पितवान् आत्मनः स्वस्य सन्दर्शनेन च आह्लादस्तेन विकसन्मुखं पङ्कजमिव यस्यास्तां सीताम् ॥ ३१ ॥

यानं पुष्पकमारोप्य भ्रातृभ्यां वालिरावणभ्रातृभ्यां सुग्रीवविभीषणाभ्यां सह हनुमता युक्तो यानमारुरोह रक्षोगणाधिपत्यम् आकल्पान्तमायुर्लङ्कां च विभीषणाय दत्वा ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

अर्दितान् हिंसितान् "अर्द हिंसायाम्" आत्मानं देहम् उदरमिति यावत् आत्मना देहेन हस्तेन ॥ २५ ॥ २६ ॥

नीतो येन तं नैव वेद ॥ २७ ॥

वयं च विधवाः कृताः देहः गृध्राणाम्, आत्मा जीवो जीवनाय कृतः गृध्रप्राणरक्षणेनापि पुण्यं स्यादिति तत्राह-नरकहेतव इति, नरकदुःखानुभवार्थं भवति ॥ २८ ॥

पितृमेधविधानेन शवदाहादिविधिना साम्परायिकं परलोकसुखसाधनम् ॥ २९ ॥

क्षामामित्यादिकमसुरमोहनार्थम् ॥ ३० ॥ ३१ ॥

भ्रातृभ्यां लक्ष्मणविभीषणाभ्यां विभीषणस्य भ्रातृत्वमुपचारः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

ततो ददर्श सीतामिति शेषः ॥ ३०—४२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

अङ्गं भक्ष्यं नरकहेतवे नरकभोगाय ॥ २८ ॥

साम्परायिकमौर्द्ध्वदैहिकम् ॥ २९—३१ ॥

सीताम् आरोप्य भ्रातृभ्यां सुग्रीवलक्ष्मणाभ्याम् आरुरुहे यानं पुष्पकं हनुमद्युतः हनुमता सह युत साहित्यं प्राप्य "युभिश्रणे" माधविकवन्ताल्ल्यब्लोपे पञ्चमी ॥ ३२ ॥ ३३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

नरकहेतवे नरकभोगाय कृतः ॥ २८ ॥

साम्परायिकम् और्द्ध्वदैहिकं स्वानां रावणादीनां चक्रे ॥ २९ ॥

स्वस्य विरहेन वियोगेन व्याधिर्यस्याः अत एव क्षामां कृशाम् ॥ ३० ॥

दीनां वीक्ष्य अन्वकम्पत तदनन्तरम् आत्मसन्दर्शनेन च आह्लादस्तेन विकसत् प्रमुदितं मुखपङ्कजम् यस्यास्ताम् ॥ ३१ ॥

यानं पुष्पकम् आरोप्य पश्चात्स्वयं हनुमद्युतः भ्रातृभ्यां लक्ष्मणसुग्रीवाभ्यां सह आरुरुहे सुग्रीवस्य श्रीरामभ्रातृत्वं सख्यविधाय कपिभिरित्यनेनोक्तं रक्षोगणेशतामाकल्पमायुः लङ्कां च विभीषणाय दत्वा विभीषणेन सहैव पुरीं ययौ पादुके भरतोऽगृह्णात् चामरव्यजनोत्तमे विभीषणः स सुग्रीव इति वक्ष्यमाणात् कथंभूतः चीर्णव्रतः तीर्णवनवासलक्षणं व्रतं येन सः ॥ ३२ ३३ ॥

भाषा टीका।

संग्राम में लक्ष्मणजी के बाणों से मरे हुए अपने २ पतियों को आलिङ्गन करके बहुत दीन होकर छाती कूट कूट कर सुन्दर स्वरसे रोने लगीं ॥ २५ ॥

हा नाथ! हे लोकके रुलाने वाले! हे रावण महाराज! हमसब आप के बिना हतहुईं और अब यह लङ्का शत्रुओं से पीडित होकर किस के शरण जावै ॥ २६ ॥

हे महाभाग! आप काम के वश होकर सीता का ऐसा तेज और प्रभाव नहीं जानते रहे इसी से इस दशा को प्राप्त हुए ॥ २७ ॥

हे कुलनन्दन! इस लङ्का को और हमको आपने दोनों को विधवाकर दीनी और अपने देह को गृध्रों का भोजन करदिया और आत्मा नरकके लिये तयार किया ॥ २८ ॥

श्रीशुक उवाच।

श्रीशुकदेवजी बोले, कि-उस समय कोसलेन्द्र राजाधिराज श्रीरामचन्द्रजी के अनुमोदन [समुझाने]से अपने बन्धुओं का पितृमेध विधान से जो शास्त्रोक्त अन्तकाल का कृत्य है उसको विभीषणजी करते हुए ॥ २९ ॥

तदनंतर भगवान् श्रीरामचन्द्रजी अशोक वाटिका के विषै, अतिकृश, मानो मूर्त्तिमती विरह की व्याधि होवे, इस प्रकार की शिंशुपा वृक्ष के मूलके समीप बैठी हुई अति दीन अपनी प्रियतमा भार्या श्रीसीता को देखकर बड़ी अनुकंपा करते हुए और उसी समय अपने दर्शन से भया जो आल्हाद उससे विकास को प्राप्त हुआ मुखपंकज जिनका ऐसी श्री जानकीजी को देखते हुए ॥ ॥ ३०-३१ ॥

तदनंतर विभीषणजी को लंका का राज देकर राक्षस गणों के ईश बनाकर श्री सीताजी को पुष्पक विमान पर चढाकर भ्रातासे भी अधिक मित्र सुग्रीव और भ्राता लक्ष्मणजी के सहित तथा हनुमानजी के सहित भगवान् भी विमान पर बैठते हुए ॥ ३२ ॥

लङ्कामायुश्च कल्पान्तं ययौ चीर्णव्रतः पुरीम् ।
अवकीर्यमाणः कुसुमैर्लोकपालार्पितैः पथि ॥ ३३ ॥
उपगीयमानचरितः शतधृत्यादिभिर्मुदा ।
गोमूत्रयावकं श्रुत्वा भ्रातरं वल्कलाम्बरम् ॥ ३४ ॥
महाकारुणिकोऽतप्यज्जटिलं स्थण्डिले शयम् ।
भरतः प्राप्तमाकर्ण्य पौरामात्यपुरोहितैः ॥ ३५ ॥
पादुके शिरसि न्यस्य रामं प्रत्युद्यतोऽग्रजम् ।
नन्दिग्रामात्स्वशिबिराद्गीतवादित्रनिःस्वनैः ॥ ३६ ॥
ब्रह्मघोषेण च मुहुः पठद्भिर्ब्रह्मवादिभिः ।
स्वर्णकक्षपताकाभिर्हैमैश्चित्रध्वजै रथैः ॥ ३७ ॥
सदश्वैरुक्मसन्नाहैर्भटैः पुरटवर्मभिः ।
श्रेणीभिर्वारमुख्याभिर्भृत्यैश्चैव पदानुगैः ॥ ३८ ॥
पारमेष्ठ्यान्युपादाय पण्यान्युच्चावचानि च ।
पादयोर्न्यपतत्प्रेम्णा प्रक्लिन्नहृदयेक्षणः ॥ ३९ ॥
पादुके न्यस्य पुरतः प्राञ्जलिर्बाष्पलोचनः ।
तमाश्लिष्य चिरं दोर्भ्यां स्नापयन्नेत्रजैर्जलैः ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आयुश्च दत्त्वा तेनापि सहैव ययौ ॥ ३३ ॥

गोमूत्रपक्वयवान्नभोजनं भ्रातरं भरतम् ॥ ३४ ॥ ३५ ॥

स्वशिविराद्ग्रामं विना अयोध्यामप्रविशन् स्वस्य वासं यत्र निर्मितवांस्तस्मात्सकाशाद्गीतादिभिर्युक्तो रामं प्रत्युद्यतोऽभिमुखं ययौ ॥ ३६ ॥

ब्रह्मघोषेण महता घोषेण पठद्भिः स्वर्णरसाक्ताः कक्षाः प्रान्ता यासां ताभिः पताकाभिर्हैमैरिति चत्वारि रथविशेषणानि ॥ ३७—३८ ॥

पारमेष्ठ्यानि राजार्हाणि छत्रचामरादीनि प्रेम्णा प्रक्लिन्नं हृदयमीक्षणे नेत्रे च यस्य ॥ ३९ ॥

नेत्रजैर्जलैः स्नापयन्नाश्लिष्य ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

चीर्णमनुष्ठितं व्रतं पितुरनुशासनरूपं येन स भगवान् श्रीरामः पुरीमयोध्यां विभीषणेन सहैव ययौ, कथम्भूतः ? पथि लोकपालैरिन्द्रादिभिरर्पितानि यानि कुसुमानि तैरवकीर्यमाणः ॥ ३३ ॥

शतधृत्यादिभिर्ब्रह्मादिभिः मुदा हर्षेण उपगीयमानं चरितं यस्य तथाभूतः पुरीं ययावित्यन्वयः। गोमूत्रपक्वयवान्नभोजनं वल्कलमम्बरं यस्य जटा अस्य सन्तीति तथा स्थण्डिले दर्भैरास्तीर्णे भूप्रदेशे शेत इति तथाभूतं भ्रातरं भरतं श्रुत्वा महाकारुणिको भगवान् अतप्यत परितताप भरतः प्राप्तं पुरीमागच्छन्तं तं श्रीराममाकर्ण्य पादुके स्वशिरसि निधाय पौरैरमात्यैः पुरोहितैः गीतैः वाद्यानां निस्वनैः ॥ ३४—३६ ॥

ब्रह्म वेदं मुहुर्मुहुः घोषेण उच्चैस्स्वरेण पठद्भिः ब्रह्मवादिभिः स्वर्णासक्ताः कक्ष्याः प्रान्ताः यासां ताभिः पताकाभिः रथैः स्वर्णकवचधारिभिर्भटैः श्रेणीभिस्ताम्बूलिकैः वाराङ्गनाश्रेष्ठाभिरुपायनोद्वहैरुपायनधारिभिर्भृत्यैश्च सहाग्रजं श्रीरामं स्वशिबिरान्नन्दिग्रामात् प्रत्युद्यतः अभिमुखं ययावित्यन्वयः। रामं विनाऽयोध्यामप्रविशन् भरतो नन्दिग्रामे स्वस्य वासं निर्मितवान् तस्मात् शिबिरात् ययावित्यर्थः। कथम्भुतैः रथैर्हैमैः स्वर्णमयैः चित्रा ध्वजा येषु सन्तः समीचीना अश्वाः येषां रुक्ममयाः सन्नाहाः बन्धना येषु तैः ॥ ३७ ॥ ३८ ॥

पारमेष्ठ्यानि महाराजार्हाणि नानाविधानि छत्रचामरादीनि उपादाय प्रत्युद्यत इति पूर्वेणान्वयः। प्रेम्णा प्रक्लिन्नमार्द्रीभूतं हृदयमीक्षणे च यस्य सः ॥ ३९ ॥

प्रीत्या पादुके पुरतो निधाय पादयोरपतत् ततः प्राञ्जलिः

रामो लक्ष्मणसीताभ्यां विप्रेभ्यो येऽर्हसत्तमाः ।
तेभ्यः स्वयं नमश्चक्रे प्रजाभिश्च नमस्कृतः ॥ ४१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

बाष्पलोचनस्तस्थाविति शेषः ततः श्रीरामः तं भरतं दृढं गाढं यथा तथा दोर्भ्यामालिङ्गय नेत्रजैर्हर्षाम्बुबिन्दुभिः स्नापयन् ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

चीर्णव्रतः पूर्णवनवासव्रतः ॥ ३३ ॥

ब्रतधृत्यादिभिः ब्रह्मादिभिः गोमूत्रेण सह पक्वयावकाहारं भ्रातरं भरतम् ॥ ३४—३६ ॥

स्वर्णकक्ष्यैः सुवर्णमयीः कक्ष्याः उदरबन्धो येषां ते तथा तैर्हैमैर्हेमालङ्कृतैश्चित्रा नानावर्णा ध्वजाः येषां तैः ॥ ३७ ॥

रुक्मसन्नाहैः स्वर्णनिर्मिताः सन्नाहाः कवचानि येषां तैः पुरटं सुवर्णं श्रेणीभिरङ्गरक्षकैर्भृत्यैर्दासैः पारमेष्ठ्यान्यनर्घत्वेन प्रशस्तानि भाण्डानि अश्वाभरणानि पिठराद्युपकरणानि च ॥ ३८ ॥ ३९ ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

गोमूत्रयावकं गोमूत्रपक्वयवान्नभोजिनम् ॥ ३४ ॥ ३५ ॥

स्वशिबिरात् स्वीयसैन्यस्थानात् गीतादिभिर्युक्तः पठतां ब्रह्मवादिनां वेदघोषेण च स्वर्णरसाक्ताः कक्षाः प्रान्ता यासां ताभिः पताकाभिः पुरटवर्मभिः स्वर्णकवचयुक्तैः पारमेष्ठ्यानि छत्रचामरादिराजचिह्नानि पण्यानि बहुमूल्यानि रत्नादीनि च ॥ ३६-४१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

गोमूत्रपक्वयवान्नभोजिनं वल्कलमम्बरं यस्य तम् ॥ ३४ ॥

जटाः अस्य सन्तीति जटिलस्तं भ्रातरं तं श्रुत्वा अतप्यत् ॥ ३५ ॥

भरतः अग्रजं प्राप्तमाकर्ण्य पादुके शिरसि न्यस्य गीतादिभिस्सह नन्दिग्रामात् प्रत्युद्ययौ अभिमुखं ययाविन्वयः रामं विना अयोध्यामप्रविशन् स्वस्य वासं यत्र निर्मितवान् तस्मात् स्वशिबिरात् गीतैर्वाद्यानां निस्वनैश्च ॥ ३६ ॥

ब्रह्मघोषेण महता घोषेण पठद्भिर्ब्रह्मवादिभिश्च सह स्वर्णमयाः कक्षाः प्रान्ताः यासां ताभिः पताकाभिः हैमैरिति चत्वारि रथविशेषणानि हैमैः स्वर्णमयैः चित्रा ध्वजा येषु ॥ ३७ ॥

सन् अश्वा येषां रुक्ममयाः सन्नाहा येषु तैः ॥ ३८ ॥

पारमेष्ठ्यानि राजार्हाणि छत्रचामरादीनि प्राक्लिन्नं हृदयम् ईक्षणे नयने च यस्य सः ॥ ३९ ॥

पादुके पुरतो न्यस्य पादयोर्निपतत् रामोऽपि तं भरतं नेत्रजैर्जलैः स्नापयन् आश्लिष्य ॥ ४० ॥

भाषा टीका ।

और विभीषण जी को लंका और कल्पांत आयु को देकर व्रताचरण करने वाले श्रीकोसलेश मार्ग में लोकपालों के वर्षाये हुए पुष्पों से सुशोभित होते हुए ॥ ३३ ॥

और विमान के चढने के पूर्व में बडे आनन्द से ब्रह्मादिक देवताओं ने श्रीराम के चरित गान किये और स्तुतिकरी ॥ जब विमान पर विराजमान होकर विमान को चलाया और नंदिग्राम के समीप जब विमान पहुंचा तब वहां पर अपने भ्राता भरतजी की ऐसी चर्या सुनी कि एक मुष्टिजवों के गोमूत्र में रांधकर भोजन करते हैं और वल्कलों को पहिनते हैं ॥ ३४ ॥

तब तो महाकारुणिक श्रीराघव बडा अनुताप करते हुए, और पुरवासी लोगों से मंत्रियों से तथा पुरोहितों से भ्राता भरत के जटा धारण के तथा पृथिवी में सोने के समाचार सुन कर श्रीरामचन्द्र को और भी दुःख भया ॥ ३५ ॥

भरतजी ने भी श्रीराम के आगमन के समाचार सुनकर बडे हर्ष में डूबकर प्रभु की पादुकाओं को अपने माथे पर धर कर अपने निवास नंदिग्राम से गाजे बाजे के कोलाहल से अपने बडे भ्राता श्रीरामचन्द्रजी के सन्मुख चले, ॥ ३६ ॥

और वेद वेदांग जानने वाले ब्राह्मणों के झुंड के झुंड वेद पाठ करते हुए आगे चले, और सोने की ध्वजायें जिनों में शोभा देती हैं ऐसे सुनहरी साज के रथों के सहित ॥ ३७ ॥

तथा सुनहरी साज के सजे हुए उत्तम घोडाओं सहित सुनहरी कवच वाले जोधाओं सहित सेठ साहूकारों सहित, वारमुखी, और पैदल भृत्य लोगों सहित ॥ ३८ ॥

राजाओं के योग्य छत्र चामरादि चिन्हों को और छोटी मोटी बाजार की वस्तुओं को लेकर सब लोगों सहित भरतजी आपके चरणों में भेटकर आर्द्र हृदय और आर्द्र नेत्र वाले होकर चरणों में गिर पडे ॥ ३९ ॥

प्रभु के सन्मुख पादुका धरदीनी और हाथ जोडकर नेत्रों में आंसु भर लाये ॥ तब तो भरतजी को दोनों हाथों से बहुत काल पर्यंत आलिंगन कर श्रीराघव भरत को नेत्रों के जलों से स्नान कराते हुए ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

येऽर्हसत्तमाः कुलवृद्धास्तेभ्योऽपि नमनं चक्रे ॥ ४१—४२ ॥

धुन्वन्त उत्तरासङ्गान् पतिं वीक्ष्य चिरागतम् ।
उत्तराः कोसला माल्यैः किरन्तो ननृतुर्मुदा ॥ ४२ ॥
पादुके भरतो ऽगृह्णाच्चामरव्यजनोत्तमे ।
विभीषणः ससुग्रीवः श्वेतच्छत्रं मरुत्सुतः ॥ ४३ ॥
धनुर्निषङ्गाञ्छत्रुघ्नः सीता तीर्थकमण्डलुम् ।
अबिभ्रदङ्गदः खड्गं हैमं चर्मर्क्षराण्नृप ! ॥ ४४ ॥
पुष्पकस्थोऽन्वितः स्त्रीभिः स्तूयमानश्च वन्दिभिः ।
विरेजे भगवान्राजन् ग्रहैश्चन्द्र इवोदितः ॥ ४५ ॥
भ्रातृभिर्नन्दितः सोऽपि सोत्सवां प्राविशत्पुरीम् ।
प्रविश्य राजभवनं गुरुपत्नीः स्वमातरम् ॥ ४६ ॥
गुरून्वयस्यावरजान् पूजितः प्रत्यपूजयत् ।
वैदेही लक्ष्मणश्चैव यथावत्समुपेयतुः ॥ ४७ ॥
पुत्रान् स्वमातरस्तास्तु प्राणांस्तन्व इवोत्थिताः ।
आरोप्याङ्केऽभिषिञ्चन्त्यो वाष्पौघैर्विजहुः शुचः ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अयोध्याप्रवेशप्रकारमाह—पादुके इति सार्द्धैस्त्रिभिः ॥ ४३ ॥

धनुश्च निषङ्गौ च तान् ऋक्षराट् जाम्बवान् ॥ ४४—४५ ॥

गुरुपत्नीः कैकेय्याद्याः ॥ ४६ ॥

वयस्यानवरजांश्च यथावदनुक्रमेण समुपेयतुः ॥ ४७ ॥

वाष्पौघैरभिषिञ्चन्त्यः शुचः शोकान् विजहुः शेषं स्पष्टम्॥४८ ५६।

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

लक्ष्मणसीताभ्यां सह विप्रेभ्यो ये चार्हत्तमाः नमस्कार्याः कुलवृद्धास्तेभ्यश्च स्वयं नमश्चक्रे प्रजाभिर्नमस्कृतश्च ॥ ४१ ॥

उत्तराः कोसला उत्तरकोसलदेशस्था जनाः चिरागतं पतिं श्रीराममवलोक्य माल्यैः पुष्पैः किरन्तः उत्तरासङ्गानुत्तरीयान् विधुन्वन्तश्चालयन्तो ननृतुः ॥ ४२ ॥

अयोध्याप्रवेशप्रकारमाह–त्रिभिः सार्द्धैः । भरतः पादुके अगृह्णात् विभीषणः सुग्रीवश्च व्यजनोत्तमे अगृह्णतां मरुत्सुतो हनुमान् श्वेतातपत्रम् ॥ ४३ ॥

धनुश्च निषङ्गौ च तान् शत्रुघ्नः अगृह्णादित्यनुषङ्गः । सीता तीर्थकमण्डलुमबिभ्रत्, हे नृप ! अङ्गदः खड्गं हैमं स्वर्णखचितं चर्म खेटम् ऋक्षराट् जाम्बवान् अबिभ्रत् ॥ ४४ ॥

हे राजन् ! भगवान् श्रीरामः पुष्पकस्थः स्त्रीभिः परिवृतः वन्दिभिः स्तूयमानश्च यथोदितश्चन्द्रो ग्रहैर्गुरुशुक्रादिभिर्विराजते तथा विरेजे बभ्राजे ॥ ४५ ॥

भ्रातृभिर्भरतादिभिः नन्दितो ऽनुमोदितः उत्सवेन सहितश्च स भगवान् पुरीमयोध्यां प्राविशत् ततो राजभवनं प्रविश्य गुरुपत्नीः कैकेय्याद्याः स्वमातरं कौसल्याम् ॥ ४६ ॥

गुरून् वसिष्ठादीन् वयस्यान् वयस्यधिकान् अवरजांश्च कुलीनान् यथायोग्यं तैः पूजितः प्रत्यपूजयत् तथा वैदेही लक्ष्मणश्च यथावत् यथायोग्यं पूजयन्तौ पूजितौ च सम्यगुपेयतुः राजभवनमित्यनुषङ्गः ॥ ४७ ॥

मातरः कौसल्यादयः सुतान् प्राप्य स्वाः स्वकीयाः तन्वः देहाः प्राणान् प्राप्य यथोत्थिता भवन्ति तद्वदुत्थिताः सत्यः अङ्के आरोप्य हर्षजैर्बाष्पबिन्दुसङ्घैः सिञ्चन्त्यः शुचः शोकान् विजहुः ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ततस्तत्र ये विप्रा अभवंस्तेभ्यः ॥ ४१ ॥
उत्तरासङ्गम् उत्तरीयवस्त्रं धुन्वन्तः कम्पयन्तः ॥ ४२ ॥ ४३ ॥
निषङ्गं तूणीरम् ऋक्षराट् जाम्बवान् ॥ ४४—४७ ॥
गत्वा गतान् प्राणानवाप्य तन्वः तनवः यथोत्थिता भवन्ति तथा विरहशुचः ॥ ४८ ॥

जटा निर्मुच्य विधिवत्कुलवृद्धैः समं गुरुः ।
अभ्यषिञ्चद्यथैवेन्द्रं चतुःसिन्धुजलादिभिः ॥ ४९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पादुकेत्यर्द्धकं बाष्पलोचनोऽभूदिति शेषः ॥ ४३-५६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

उत्तराः कोसलाः अयोध्यावासिनः उत्तरासङ्गान् उत्तरीयान् धुन्वन्तः कम्पयन्तो ननृतुः ॥ ४२ ॥

अयोध्याप्रवेशप्रकारमाह-पादुके अगृह्णात् भरतोऽग्रवर्ती विभीषणसुग्रीवौ पार्श्वद्वयवर्त्तिनौ चामरव्यजनहस्तौ श्वेतच्छत्रधारी हनुमान् पृष्ठवर्ती ॥ ४३-४५ ॥

गुरुपत्नीः कैकेय्याद्याः स्वमातरं कौसल्याञ्च ॥ ४६ ॥

गुरूनन्यांश्च गुरुलोकान् वन्दित्वा वयस्यानवरजांश्च प्रत्यपूजयत् तैः पूजितस्सन् यथावत् यथोचितं वन्दनादिभिः सम्युपेयतुः ॥ ४७—५६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

लक्ष्मणसीताभ्यां सह विप्रेभ्यो येऽर्हत्तमास्तेभ्यश्च नमश्चक्रे कथम्भूतः ? प्रजाभिर्नमस्कृतः ॥ ४१ ॥

पतिं श्रीरामं वीक्ष्य उत्तराः कोसला उत्तरकोसलदेशवासिनः उत्तरासङ्गान् उत्तरीयान् धुन्वन्तो भ्रामयन्तः माल्यैः किरन्तः ननृतुः ॥ ४२ ॥

पुरीप्रवेशोत्सवं वर्णयति-पादुक इत्यादिना। चामरव्यजनोत्तमे सुग्रीवसहितो विभीषणः अगृह्णात् उभे उभौ अगृह्णताम् ॥ ४३ ॥

धनुर्निषङ्गौ च तान् शत्रुघ्नः ऋक्षराट् जाम्बवान् ॥४४॥ ४५ ॥

गुरुपत्नीः कैकेय्याद्याः मातरं कौसल्याम् ॥ ४६ ॥

गुरून् वसिष्ठादीन् वयस्यान् अवरजांश्च वैदेही लक्ष्मणश्च यथावत् यथोचितं पूजयन्तौ पूजितौ च समुपेयतुः राजभवनमित्यनुषङ्गः ॥ ४७ ॥

पुत्रान् श्रीरामादीन् मातरः श्रीकौसल्याद्याः वाष्पौघैरानन्दाश्रुप्रवाहैरभिषिञ्चन्त्यः शुचः शोकान् जहुः ॥ ४८—५६ ॥

भाषा टीका ।

और जो पूजनीय कुल वृद्ध वसिष्ठ आदिक ब्राह्मण लोग आये उन सबों को लक्ष्मण और सीताजी समेत स्वयं आप श्रीराघव नमस्कार करते हुए, और प्रजा लोग सब आपको नमस्कार करते हुए ॥ ४१ ॥

उत्तर कोसल देश वासी जन बहुत काल में आए हुए अपने पति को देखकर अपनी २ ओढने की पिछोरियों को फिर फिरा कर आनंद से नाचने लगे और अपने प्रभु के ऊपर मालाओं की वर्षा करने लगे ॥ ४२ ॥

उस समय में भरतजी ने पादुका उठा लीनी, विभीषण ने चौर लिया सुग्रीव ने उत्तम व्यजन ग्रहण किया और हनुमान जी श्वेत छत्र को धारण करते हुए ॥ ४३ ॥

धनुष और बाणों से भरे हुये दोनों तरकसों को शत्रुहनजी ने लिये सीताजी तीर्थों के कमंडलु के लेती हुई हे नृप ! अंगदने खड्ग लिया और जांबवानने सुवर्णमय ढाल ग्रहण कीनी ॥४४॥

फिर नंदिग्राम से पुष्पक विमान में सब लोग चढकर जब चले तब हे राजन् ! पुरवासिजन और स्त्रीजन और परिजन सहित भगवान् श्रीराघव कैसी शोभा को प्राप्त हुए कि जैसे तारागणों में चन्द्र मा उदय हो। उस समय वंदीजन भी आपकी स्तुति करने लगे ॥ ४५ ॥

श्रीरामचन्द्रजी भी अयोध्यामे पहुँचकर भ्राता लोगों से अभिनंदित होकर नानाप्रकार के उत्सव वाली पुरी में प्रवेश करते हुए तदनन्तर राज भवन में प्रवेश कर जितनी दशरथ महाराज की केकयी प्रभृति रानी रही उनको तथा अरुन्धती प्रभृति विप्र पत्नियों को और अपनी माताको भी नमस्कार कर पूजा करते हुए ॥ ४६ ॥

तथा गुरुजनों की पूजा करते हुए तथा अपने सखा लोग और छोटे भ्राताओं से आप पूजित होकर उनकाभी प्रति पूजन करते हुए तथा वैदेही और लक्ष्मणजीभी सबों को यथा योग्य मिलते भेटते हुए ॥ ४७ ॥

दशरथ महाराज की साडे तीन सौ रानी श्रीरामचन्द्रजीकी मातायें अपने पुत्रों को आए हुए देखकर जैसेप्राणों के आने पर शरीर सचेत होजाते हैं इसी प्रकार सचेत होकर अपने पुत्रों को गोदमे बैठा कर नेत्र जलों से अभिषेक कराती हुई अपने शोकको त्यागकरती भई ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इतिश्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
दशमोऽध्यायः ॥ १० ॥

एवं कृतशिरस्स्नानः सुवासाः स्रग्व्यलङ्कृतः ।
स्वलङ्कृतैः सुवासोभिर्भ्रातृभिर्भार्यया बभौ ॥ ५० ॥
अग्रहीदासनं भ्रात्रा प्रणिपत्य प्रसादितः ।
प्रजाः स्वधर्मनिरता वर्णाश्रमगुणान्विताः ।
जुगोप पितृवद्रामो मेनिरे पितरं च तम् ॥ ५१ ॥
त्रेतायां वर्तमानायां कालः कृतसमोऽभवत् ।
रामे राजनि धर्मज्ञे सर्वभूतसुखावहे ॥ ५२ ॥
वनानि नद्यो गिरयो वर्षाणि द्वीपसिन्धवः ।
सर्वे कामदुघा आसन् प्रजानां भरतर्षभ ! ॥ ५३ ॥
नाधिव्याधिजराग्लानिदुःखशोकभयक्लमाः ।
मृत्युश्चानिच्छतां नासीद्रामे राजन्यधोक्षजे ॥ ५४ ॥
एकपत्नीव्रतधरो राजर्षिचरितः शुचिः ।
स्वधर्मं गृहमेधीयं शिक्षयन् स्वयमाचरन् ॥ ५५ ॥
प्रेम्णाऽनुवृत्त्या शीलेन प्रश्रयावनता सती ।
धिया ह्रिया च भावज्ञा भर्तुः सीताऽहरन्मनः ॥ ५६ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां नवमस्कन्धे रामचरिते
दशमोऽध्यायः ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततो गुरुर्वसिष्ठः कुलवृद्धैः समं सह विधिवत् जटाः निर्मुच्य चतुस्सिन्धुजलादिभिः आदिशब्दाद्गङ्गायमुनाजलादिभिश्च श्रीरामम् इन्द्रमिवाभ्यषिञ्चत् ॥ ४९ ॥

एवं कृतं शिरःस्नानं येन शोभने वाससी यस्य सः सुष्ठु यथा तथा अलङ्कृतः श्रीरामः स्वलङ्कृतैः सुवासोभिः भ्रातृभिः भार्यया च तथाभूतया बभौ ॥ ५० ॥

ततो भ्रात्रा भरतेन प्रणिपत्य प्रसादितः प्रार्थितः सिंहासनमग्रहीत् तदा विषयवासिन्यः प्रजाः स्वधर्मनिरताः, तदेवाह वर्णानामाश्रमाणां च ये गुणधर्माः पञ्चमहायज्ञादयः तैरन्विताः बभूवुः पिता यथा पाति तद्वद्रामः प्रजाः जुगोप ताश्च तं रामं पितरं मेनिरे अमन्यत ॥ ५१ ॥

तदा त्रेतायां वर्त्तमानायां त्रिपाद्धर्मयुक्ते त्रेतायुगे प्रवर्त्तमानेऽपि चतुष्पाद्धर्मयुक्तकृतयुगतुल्यः कालो बभूव भूतानां सुखकरे श्रीरामे धर्मज्ञे राजनि सति ॥ ५२ ॥

तदा वनादयः सर्वे प्रजानां कामदुघाः काम्यमानफलादिप्रदाः आसन् तत्र वर्षाणि रम्यकादीनि द्वीपाः सिंहलादयः सिन्धवः समुद्राः हे भरतर्षभ ॥ ५३ ॥

तदा अधोक्षजे श्रीरामे राजनि सति तदा आध्यादयः अनिच्छतां मृत्युश्च नासन् तत्र आधिर्मनःपीडा व्याधिः शरीरजा दुःखमतीतपुत्रमरणस्मृत्यात्मकं प्रतिकूलं ज्ञानं शोकः वर्त्तमानेष्टवस्तुविश्लेषजः भयमागाम्यनिष्टदर्शनजं यद्यप्याधिनिषेधेनैवैतत्त्रयं निषिद्धं तथापि तत्प्रपञ्चार्थमिदं क्लमो ग्लानिः॥५४॥

एकपत्नीव्रतधरः स्त्र्यन्तरपरिग्रहरहितः राजर्षेरिव चरितं यस्य सः शुचिः रागादिप्राकृतगुणरहितः गृहस्थस्य विहितान् स्ववर्णाश्रमानुकूलांश्च धर्मान् लोकस्य शिक्षयन् स्वयमाचरन् लोकसङ्ग्रहार्थमाचरदित्यर्थः ॥ ५५ ॥

प्रश्रयेण विनयेनावनता नम्रा भावज्ञा अभिप्रायज्ञा सती सीता प्रेमादिभिर्भर्तुः श्रीरामस्य मनो जहार तत्र प्रेम प्रीतिः अनुवृत्तिः परिचर्या शीलं सुस्वभावः सद्वृत्तिश्च धीर्मतिः ह्रीर्लज्जा ॥ ५६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
दशमोऽध्यायः ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

गुरुर्वसिष्ठः ॥ ४९—५० ॥

सिंहासनपदमासनम् । ग्रहणे हेतुमाह, भ्रात्रेति. भ्रात्रा भरतेन ॥ ५१—५३ ॥

अनिच्छतां मरणमिति शेषः ॥ ५४ ॥ ५५ ॥

अनुवृत्त्या शुश्रूषया शीलेनानुकूलस्वभावेन प्रश्रयेण विनयेन अवनता ॥ ५६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्विजध्वजतीर्थकृतपदरत्नावल्याम्
दशमोऽध्यायः ॥१० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
दशमोऽध्यायः ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
नवमे दशमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
दशमाऽध्यायार्थप्रकाशः ॥ १० ॥

भाषा टीका ।

भरत जी सहित श्रीराम के जटाओंके उतारने के पीछे कुलवृद्धों के सहित कुलगुरु श्रीवसिष्ठजी ने चारों समुद्रों के जलों से इन्द्र के नाईं श्रीराघव का अभिषेक किया ॥ ४९ ॥

इस प्रकार सुन्दर माथे से स्नानकर सुन्दर वस्त्र माला अलङ्कारों को भार्यासहित धारणकर वस्त्र भूषणों से अलंकृत अपने भ्राताओं सहित श्रीरामचन्द्रजी परमशोभा को प्राप्त होते हुए ॥ ५० ॥

भ्राता भरत ने बहुत प्रणाम करके श्रीरामको जब प्रसन्न किये तब श्रीराघवने राजासन को ग्रहण किया उस समय पर प्रजा लोग अपने २ धर्म में निरत और वर्णाश्रम के गुणों से युक्त होकर वर्त्तते रहे । ऐसी प्रजाका श्रीरामचन्द्रजी पिता के सदृश पालन करते हुए और सकल प्रजा भी श्रीराम को पिता सदृश मानती रही ॥ ५१ ॥

सर्वप्राणियों के सुख देने वाले धर्मज्ञ श्रीरामचन्द्र के राज्यहोने पर त्रेताके वर्त्तमान होने पर भी कृतयुग सदृश काल होता भया ॥ ५२ ॥

हे भरतश्रेष्ठ ! उस समय पर वन, नदियें, गिरि, और भारतादिक वर्ष, जम्बू इत्यादि द्वीप और समुद्र ये सबही प्रजाओं के कामना पूर्ण करने वाले होते हुए ॥ ५३ ॥

अधोक्षज श्रीरामको राजा होने पर जनों को आधि, (मनको ताप) व्याधि, जरा, ग्लानि, दुःख, शोक, भय, क्लम ये सब नहीं होते हुए । तथा नहीं इच्छा करने वालों की मृत्युभी रामराज्यमें नहीं हुई [अर्थात् सब प्रजा साथही में साकेत धाम गये] ॥ ५४ ॥

श्रीराघव भी एकपत्नी व्रत धारण कर राज ऋषियों के चरित वाले परम शुचि होकर अपने गृहमेधीय धर्म की शिक्षा करते हुए आप भी आचरण करते हुए ॥ ५५ ॥

और परम सती श्रीसीता जी भी प्रेमसे, अनुवर्तन से, शील से, बुद्धि से, लज्जा से, सदा नम्र होकर अपने प्रभु के अभिप्राय को जानती हुई भर्त्ता के मनको हरन करती भई ॥ ५६ ॥

इति श्रीमद्भागवत नवमस्कन्ध में दशम अध्याय की
श्रीवृन्दावनस्थ पं० भागवताचार्यकृत-
भाषा टीका समाप्ता ॥ १० ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे दशमोऽध्यायः ॥ १० ॥

॥ एकादशोऽध्यायः ॥

—○:○:○—

श्रीशुक उवाच ।

भगवानात्मनाऽऽत्मानं राम उत्तमकल्पकैः ।
सर्वदेवमयं देवमीजे आचार्यवान्मखैः ॥ १ ॥
होत्रेऽददाद्दिशं प्राचीं ब्रह्मणे दक्षिणां प्रभुः ।
अध्वर्यवे प्रतीचीं च उदीचीं सामगाय सः ॥ २ ॥
आचार्याय ददौ शेषां यावती भूस्तदन्तरा ।
मन्यमान इदं कृत्स्नं ब्राह्मणोऽर्हति निःस्पृहः ॥ ३ ॥
इत्ययं तदलङ्कारवासोभ्यामवशेषितः ।
तथा राज्ञ्यपि वैदेही सौमङ्गल्यावशेषिता ॥ ४ ॥
ते तु ब्रह्मण्यदेवस्य वात्सल्यं वीक्ष्य संस्तुतम् ।
प्रीताः क्लिन्नधियस्तस्मै प्रत्यर्प्येदं बभाषिरे ॥ ५ ॥
अप्रत्तं नस्त्वया किं नु भगवन्! भुवनेश्वर! ।
यन्नोऽन्तर्हृदयं विश्य तमो हंसि स्वरोचिषा ॥ ६ ॥
नमो ब्रह्मण्यदेवाय रामायाकुण्ठमेधसे ।
उत्तमश्लोकधुर्याय न्यस्तदण्डार्पिताङ्घ्रये ॥ ७ ॥
कदाचिल्लोकजिज्ञासुर्गूढो रात्र्यामलक्षितः ।
चरन्वाचोऽशृणोद्रामो भार्यामुद्दिश्य कस्य चित् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ततश्चैकादशे योध्यामावसन्ननुजैः सह ।
यज्ञादि यज्ञकारेशो रामस्तदनुवर्ण्यते ॥

॥ १—२ ॥

तदन्तरा तासां दिशां मध्ये यावती भूस्तां ब्राह्मण एवार्हतीति मन्यमानः ॥ ३ ॥

अयं श्रीरामः तत्तदा सौमङ्गल्यमाभरणादिकं तावन्मात्रमवशेषितं यस्याः तद्व्यतिरिक्तं हिरण्यादिसर्वं ददावित्यर्थः ॥४-५॥

किमप्रत्तं किमदत्तम्? सर्वं दत्तमित्यर्थः। विश्य प्रविश्य ॥६॥

न्यस्तदण्डैर्मुनिभिरर्पितौ चित्ते न्यस्तावङ्घ्री यस्य तस्मै तेष्व-र्पितावङ्घ्री येनेति वा ॥ ७—९ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ भगवान् श्रीरामः उत्तमैर्वसिष्ठादिभिः कल्पितैः कारितैः मखैः क्रतुभिः सर्वदेवमयं स्वमात्मानमेवात्मनैवाचार्यवान् सन् ईजे इयाज ॥ १ ॥

होत्र इति। तत्र होत्रे प्राचीं दिशं दक्षिणामदात् ब्रह्मणे तु दक्षिणां दिशम् अध्वर्यवे प्रतीचीं सामगायिने उद्गात्रे तूदीचीम् दिशम् ॥ २ ॥

तदन्तरं तासां दिशामन्तरा मध्ये यावती भूमिरवशिष्टा तां

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सर्वामाचार्याय ददौ, कथम्भूतः ? इदं कृत्स्नं भूमण्डलं ब्राह्मणोऽर्हति प्रतिग्रहीतुमिति शेषः । इतीत्थं मन्यमानः निस्स्पृहश्चेति तथा समीचीनानलङ्कारांश्चादात् एवं सर्वं दत्वा केवलं वासोभ्यां परिधानीयोत्तरीयाभ्यामवशेषितः, तथा राज्ञी वैदेही सीतापि भर्तुरभिप्रायज्ञा सर्वानलङ्कारान् प्रदाय केवलं सौमङ्गल्यमात्रेणावशेषिता बभूव ॥ ३ ॥ ४ ॥

ते होत्रादयो ब्राह्मणा ब्राह्मणा एव दैवतं यस्य तस्य श्रीरामस्य सत्सु तद्ब्रह्मान्यत्वयुक्तं वात्सल्यमवलोक्य प्रीताः क्लिन्नधियः आर्द्रचित्तास्सन्तः तस्मै रामाय प्रत्यर्प्य प्राच्यादिदिश इतिशेषः दिशः प्रतिग्रहीतुं वयं नार्हा इति विज्ञाप्येत्यर्थः । ननु प्रतिगृह्य प्रत्यर्पयेत्यर्थः । दत्तद्रव्यप्रत्यादानदोषापाक्षनात् एवञ्च दिशद्दाविल्या देरपि प्रतिग्रहीतुं होत्रादीन् प्रार्थितवानित्यर्थः । इदं वक्ष्यमाणं बभाषिरे ॥ हे भगवन् त्वया नोऽस्माभ्यमप्रत्तमप्रदत्तं किन्तु सर्वमपि प्रदातुमुद्युक्तोऽसीत्यर्थः । तत्र हेतुं वदन्तो विशिंषन्ति परमेश्वरः परो मा यस्मात्स परमश्चासावीश्वरश्च स्वतएवाऽवाप्तसमस्तकामस्य तव किमेतैरितिभावः । किञ्च निरतिशयपुरुषार्थरूपमोक्षप्रदानाय तत्साधनस्वरूपज्ञानविरोध्यज्ञानमस्माकमन्तर्हृदये प्रविश्य हंसि निरस्यसि, केन ? स्वरोचिषा स्वप्रकाशेन तस्यैवम्भूतस्य आत्मपर्यन्तदातुस्तव कियदेतत्प्राच्यादिदिक्प्रदानमिति भावः ॥५।६॥

त्वद्गुणान्वर्णयितुं न शक्नुम इत्यभिप्रायेण कैश्चिद्गुणैर्विशिंषन्तो नमस्कुर्वन्ति—नम इति । ब्रह्मणि ब्रह्मकुले साधुर्ब्रह्मण्यः "तत्र साधुः"इति यत्प्रत्यये "येचाभावकर्मणोः"इति प्रकृतिभावः स चासौ देवः स्वतेजसा दीप्यमानः ब्रह्मण्यानां देवः श्रेष्ठो वा अकुण्ठमेधसे नित्यासङ्कुचितापरिच्छिन्नज्ञानाय उत्तमश्लोकानां धुर्योऽग्र्यः मुख्यः न्यस्तदण्डैर्भूतद्रोहरहितैः सर्वभूतसुहृद्भिर्मुनिभिरर्पितो चित्ते निहिताङ्घ्री यस्य न्यस्तदण्डेष्वर्पिता वङ्घ्री येनेति वा तस्मै श्रीरामाय तुभ्यं नमः इति ॥ ७ ॥

एवं सीतया सह दशवर्षसहस्राणि राज्यमुपास्य श्रीरामः कदाचिल्लोकजिज्ञासुः किंवदन्तीं ज्ञातुमिच्छुः गूढः प्रच्छन्नवेष इतरैरलक्षितो रात्र्यां तत्रतत्र धुर्यां चरन् कस्यचित्पुरुषस्य वचो भार्यामुद्दिश्योच्यमानमशृणोत् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आचार्यवानित्यनेन गुरुकुलवासित्वं शिक्षितत्वं च सूचयति, "आचार्यवान् पुरुषो वेद"इति श्रुतेः ॥ १—३ ॥

सौमङ्गल्यं मङ्गलसूत्रमेवावशेषितं यस्याः सा तथा ॥ ४ ॥

ब्राह्मणा देवाः पूज्या इति भावो यस्य स तथा तस्य वात्सल्यं स्नेहपारवश्यं भक्तिक्लिन्नधियः द्रवञ्चिताः प्रत्यर्प्य दत्तं पुनर्देयम् ॥ ५ ॥

ननु, दत्तं नालमिति मत्वा प्रत्यर्पितम् ? इतोऽधिकं प्रियमस्मद्योग्यमेव दत्तमनोन्यच्चापेक्षितमिति मत्वा वा ? न प्रथमः, यदृच्छालाभसन्तुष्टिमतामस्माकम् अनलम्बुद्धिदोषो नास्ति यतोऽतो द्वितीय एवाभिमत इत्याशयेनाह—अप्रत्तमिति । हे भगवन् ! त्वम् अस्मद्भक्त्यान्तर्हृदि संविश्य यथा निद्रा सुखसाधनं तथा स्थित्वा स्वरोचिषा ज्ञानलक्षणप्रकाशेनाज्ञानलक्षणं तमो हंसि नाशयसि यतो ऽतस्त्वया नोऽप्रत्तमदत्तं किन्तु न किमपि इत्यतोऽधिकं भूदानादिकं न भवति ज्ञानधनस्यानश्वरत्वादहार्यत्वाच्च भूपालत्वात्तत्कर्म तवैव योग्यं तस्मिन्कर्मण्यनधिकारिणो वयं तस्मादयोग्यत्वात्प्रत्यर्पणेन स्वीकारेणापहारदोषपङ्कलेपो नास्ति भवत इति स्वीकृत्य तद्रक्षणं कर्तव्यमधिकृतत्वादिति भावः ॥६॥

त्वमस्मभ्यमनश्वरं धनं दत्तवान् वयं तत्प्रतिकर्तुं न शक्नुमः किन्तु तुभ्यं नमनलक्षणं धनं दास्याम इत्येतावदेवेत्याशयेनाह—नम इति । न्यस्ततत्त्वाय स्वकेषु निक्षिप्तस्वरूपाय अर्पिताङ्घ्रये स्वकेष्विति शेषः । न्यस्तदण्डार्पिताङ्घ्रये इति पाठे न्यस्तमनोवाक्कायदण्डाः सन्यासिनः तेष्वर्पितोऽङ्घ्रिर्ज्ञानलक्षणा गतिर्येन स तथा तस्मै "अघि लघि गत्यर्थौ" इति धातुः उत्तमश्लोकस्य हरेः धुरं वहतीति उत्तमश्लोकधुर्यस्तस्मै ॥ ७ ॥

कस्यचित्पुंसो वचः ॥ ८ ॥ ९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

भगवानात्मनात्मानमयीज इति लोकसंग्रहार्थमित्यर्थः ॥ १-७ ॥

अथ वैराग्यलीलाव्यञ्जकं मर्त्यलोकपरित्यागलीलारम्भं कर्तुं लक्ष्यमाह—कदाचिदिति । कस्यचिदिति कस्यचित् कुतश्चित् कस्मादागतस्य तत्र वसतोऽसरलसत्त्वस्य ॥ ८ ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

मखांश्चकार तत्याज सीतां सा विवरं गता ।
भ्रातॄन् दिग्विजयेऽयुङ्क्त राम एकादशे प्रभुः ॥

आत्मनात्मानमिति यज्ञसाधनस्य यजनीयस्य च स्वाभिन्नत्वाभावात् ॥ १ ॥ २ ॥

तदन्तरा तासान्दिशां मध्ये यावती भूस्तां शेषभूतां ब्राह्मणजातिमेव यद्दानपात्रीकरोति तत्र हेतुः इदं कृत्स्नमेव भूतलं ब्राह्मण एवार्हति यतो निस्पृह इति मन्यमानः ॥ ३ ॥

तदलङ्कारेति देहस्यालङ्कारवस्त्रव्यतिरिक्तानामन्येषामलङ्कारादीनामपि दत्तत्वात् सीता तु देहादप्युत्ताण्यालङ्कारादिकं ददाविल्याह—सौमङ्गल्यं नासाभरणचूडादिमात्रमवशेषितं यस्याः सा ॥ ४ ॥ ५ ॥

किम् अप्रत्तम् अपितु सर्वमेव प्रदत्तं यद्यस्मात्संविश्य प्रविश्य अतोऽनेनपृथ्वीराज्येनालमिति भावः ॥ ६ ॥

न्यस्तदण्डेभ्यो निर्वैरभक्तेभ्योऽर्पिताङ्घ्री येन तस्मै ॥७—९॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यज्ञानुष्ठानादिरामचरितं वर्णयति—भगवानित्येकादशेन । उत्तमानि कल्पकानि उपकरणानि येषु तैः ॥ १ ॥ २ ॥

शेषामवशिष्टां तदन्तरा तासां मध्ये यावती भूस्तां ब्राह्मण एवार्हतीति मन्यमानैः आचार्याय ददौ ॥ ३ ॥

माहं बिभर्मि त्वां दुष्टामसतीं परवेश्मगाम् ।
स्त्रीलोभी विभृयात्सीतां रामो नाहं भजे पुनः ॥ ९ ॥
इति लोकाद्बहुमुखाद्दुराराध्यादसम्विदः ।
पत्या भीतेन सा त्यक्ता प्राप्ता प्राचेतसाश्रमम् ॥ १० ॥
अन्तर्वत्न्यागते काले यमौ सा सुषुवे सुतौ ।
कुशो लव इति ख्यातौ तयोश्चक्रे क्रिया मुनिः ॥ ११ ॥
अङ्गदश्चित्रकेतुश्च लक्ष्मणस्यात्मजौ स्मृतौ ।
तक्षः पुष्कल इत्यास्तां भरतस्य महीपते ॥ १२ ॥
सुबाहुः श्रुतसेनश्च शत्रुघ्नस्य बभूवतुः ।
गन्धर्वान्कोटिशोजघ्ने भरतो विजये दिशाम् ॥ १३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

इत्येवं अयम् श्रीरामः तत्तदा अलङ्कारवासोऽमात्रावशेषितः तथा वैदेही अपि सौमङ्गल्येन आमरणाद्विकेन अवशेषिता ॥ ४ ॥

संस्तुतं श्लाघनीयं वात्सल्यं विप्रवरलत्वम् ॥ ५ ॥

नोऽन्तर्हृदयं विश्य प्रविश्य तमोऽज्ञानं हंसि एवम्भूतेन त्वया नोऽस्मभ्यमप्रत्तमदत्तं किं न किमपीत्यर्थः ॥ ६ ॥

न्यस्ताः वाग्देहचेतःसुप्रयोजिताः मौनानीहातितापारूपाः दण्डा यैस्तैः अर्पितौ चित्ते संस्थापितौ अङ्घ्री यस्य तस्मै नमः ॥ ७—९ ॥

———

भाषाटीका ।

श्रीसीतादेवी समेताय श्रीराघवेन्द्राय नमः ।

श्रीशुकउवाच ।

श्री शुकदेवजी बोले, कि-भगवान् श्रीरामचन्द्रने सर्वदेवमय देव ऐसे अपने आत्माको आचार्यवान् होकर उत्तमकल्प वाले यज्ञों से यजन करते हुए, ॥ १ ॥

प्रभु श्रीरामचन्द्रजीने होताके लिये पूर्वदिशादीनी, और जो यज्ञमें ब्रह्मा हुए उनकोदक्षिणदिशादीनी ऐसे ही अध्वर्यु को प्रतीची [पश्चिमदिशा] और साम गान वाले को उदीची [उत्तरदिशा] देते हुए ॥ २ ॥

और इस के मध्य में जो भूमिरही वह सब आचार्य को देदी और आपने यही निश्चयकिया कि निस्पृह विद्वान ब्राह्मण इस सब वैभव को योग्य होसकाहै ॥ ३ ॥

यज्ञों के अनन्तर श्रीराघवेन्द्र के समीप ब्राह्मणों के देने से पहिने हुए वस्त्र और आभूषण मात्र शेष रहे तथा रानी श्रीसीता देवी के भी विग्रह परभी उतनेही केवल सौभाग्य के सूचन करने वाले परिमित वसन भूषण अवसिष्ट रहे और बाकीके श्रीजीने भी सब दान करदिये ॥ ४ ॥

परन्तु वह सब ब्राह्मण लोग तौ ब्रह्मण्यदेव श्रीराघवेन्द्रजू के स्तुती करने योग्य वात्सल्य को देखकर अत्यन्तही प्रसन्न हुए, और आर्द्र चित्त होकर फिर प्रभु को सब वैभव प्रत्यर्पण [भेट] कर इसप्रकार बोलते हुए ॥ ५ ॥

हे भगवान् ! हे भुवनेश्वर ! आपने हम लोगों को क्या नहीं दिया जो आपने हमारे अंतर हृदय में प्रवेश कर हमारे अज्ञान रूप तमको अपने ज्ञान रूप प्रकाश से दूर कर दिया ॥ ६ ॥

ब्रह्मण्यदेव अकुंठित बुद्धि वाले उत्तम कीर्ति वालों के धुरंधर और न्यस्तदंड अर्थात् परम कारुणिक जो अपराध होने पर भी क्षुभित होकर किसी को दंड न देवें ऐसे महात्माओं के हृदय में अपने चरण कमल को अर्पण करने वाले ऐसे श्रीराघव को नमः हो ॥ ७ ॥

इत्यादिक स्तुतिकर विप्र लोग अपने २ गृह को गये तब एक समय प्रभुने लोक चरित जानने की इच्छा से रात्रि में गुप्त अलक्षित होकर विचरते २ अपनी भार्या को उद्देश कर कहने वाले किसी पुरुष की ऐसी वाणी सुनी, कि ॥ ८ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

असम्विदोऽज्ञात् प्राचेतसो वाल्मीकिस्तस्याऽऽश्रमं प्राप्ता॥१०॥

अन्तर्वत्नी गर्भिणी क्रियाः जातकर्माद्याः ॥ ११—१५ ॥

तदीयं धनमानीय सर्वं राज्ञे न्यवेदयत् ।
शत्रुघ्नश्च मधोः पुत्रं लवणं नाम राक्षसम् ।
हत्वा मधुवने चक्रे मथुरां नाम वै पुरीम् ॥ १४ ॥
मुनौ निक्षिप्य तनयौ सीता भर्त्रा विवासिता ।
ध्यायन्ती रामचरणौ विवरं प्रविवेश ह ॥ १५ ॥
तच्छ्रुत्वा भगवान्रामो रुन्धन्नपि धिया शुचः ।
स्मरंस्तस्या गुणांस्तांस्तान्नाशक्नोद्रोद्धुमीश्वरः ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ईश्वरोऽपि शुचो रोद्धुं नाशक्नोत् ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तद्वचो दर्शयति—नेति । परस्य पुरुषान्तरस्य वेश्म गच्छति पुनःपुनरिति तथा अतएव दुष्टामसतीं व्यभिचारिणीं त्वामहं न बिभर्मि, परवेश्मगामपि सीतां रामो ऽबिभ्रत् तत्करं किं श्रेष्ठः ? इति वदन्तीं प्रत्याह—स्त्रैण इति । हि यस्माद्रामः स्त्रैणः अतः सीतां बिभृयात् अहं तु पुनः स्त्रीपारवश्यरहितः त्वां न भजामीति ॥ ९ ॥

इतीत्थम् असंविदः तत्त्वानभिज्ञात् अतएव बहुमुखान्नाना-विधवादिनो दुराराध्यात् लोकाद्भीतेन पत्या श्रीरामेण त्यक्ता सीता प्राचेतसस्य वाल्मीकेराश्रमं प्राप्ता ययौ, कथम्भूता ? अन्त-र्वत्नी गर्भिण्येव सीता गतेत्यन्वयः ॥ १० ॥

ततः काले प्रसवकाले सा सीता यमौ सुतौ सुषुवे तौ च कुशो लव इति ख्यातौ तयोः कुशलवयोर्मुनिः प्राचेतसः जातकर्मादिक्रियाः चक्रे ॥ ११ ॥

तथाङ्गदादयो द्वौ द्वौ पुत्रौ लक्ष्मणादीनां सम्बभूवतुः ॥१२॥

दिशां विजये दिग्विजयकाले कोटिशो गन्धर्वान् भरतो हतवान् तदीयं गन्धर्वाणां सम्बन्धि सर्वं धनमादाय राज्ञे श्रीरामायार्पयामास तथा शत्रुघ्नश्च मधोरसुरस्य पुत्रं लव-णाख्यं राक्षसं हत्वा मधुवने मथुरानाम पुरीं निर्ममे ॥१३॥१४॥

मुनौ वाल्मीकौ तनयौ कुशलवौ निक्षिप्य मुन्यधीनौ कृत्वा भर्त्रा श्रीरामेण विवासिता निर्वापिता सीता श्रीरामस्य चरणौ ध्यायन्ती विवरं भुव इति शेषः । प्रविवेश ॥ १५ ॥

तद्विवरप्रवेशमाकर्ण्य भगवान् श्रीरामस्तस्याः सीतायाः तांस्तान् गुणान् स्मरन् धिया शुचं शोकं रुन्धन्नपीश्वरोपि रोद्धुं नाशक्नोत् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

बहुमुखादन्योन्यशिक्षानियतत्वेनानेकशब्देन प्रधानादत एव दुराराध्याद्दुःसाध्यात् कार्यनिष्पत्तिरहितादित्यर्थः । अतएवासंविदः अन्यसंवादशून्यात् अर्थादानरहिताद्वा लोकाच्छ्रुत्वा लोकापवाद-भीतेन रामेण त्यक्ता सा सीता प्राचेतसः प्रचेतसो वरुणस्यापत्यं वाल्मीकिः तस्याश्रमं प्राप्ता ॥ १० ॥

अन्तर्वत्नी गर्भिणी यमौ यमलौ क्रियाः क्षत्रयोग्याः जात-कादिकाः ॥ ११—१४ ॥

मुनौ वाल्मीकौ विवरं भूविलम् ॥ १५—१७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

लोकात् राष्ट्रान्तरस्थात् भीतेन शङ्कमानेन ॥ १०-१५ ॥

स्त्रीसङ्गिनां गतिमित्यादि पूर्वमुक्तं यथार्थत्वे दृढयंस्तदीय-मन्तःकरणं दर्शयति—तच्छ्रुत्वेति । ईश्वरोपीत्यपरत्राप्यन्वयः अहो तस्या भक्तिगुणानां महिमेति भावः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

असंविदः ज्ञानशून्यात् प्राचेतसो वाल्मीकिः ॥ १० ॥

अन्तर्वत्नी गर्भवती ॥ ११-१४ ॥

भर्तुर्विच्छेददुःखमसहिष्णुः भुवो विवरं प्राविशत् ॥ १५ ॥

ईश्वरोपि रोद्धुं नाशक्नोदिति तस्य प्रेमवश्यत्वस्वभावादिति भावः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

लोकात् प्राकृतजनात् बहुमुखात् बहुषु मायिकेषु देहगेहा-दिषु मुखं मुखोपलक्षितं भाषणादिचेष्टितं यस्य तस्मात् श्रीराम-

स्त्रीपुम्प्रसङ्ग एतादृक्सर्वत्र त्रासमावहः ।
अपीश्वराणां किमुत ग्राम्यस्य गृहचेतसः ॥ १७ ॥
तत ऊर्ध्वं ब्रह्मचर्यं धारयन्नजुहोत्प्रभुः ।
त्रयोदशाब्दसाहस्रमग्निहोत्रमखण्डितम् ॥ १८ ॥
स्मरतां हृदि विन्यस्य विद्धं दण्डककण्टकैः ।
स्वपादपल्लवं राम आत्मज्योतिरगात्ततः ॥ १९ ॥
नेदं यशो रघुपतेः सुरयाच्ञयाऽऽत्तलीलातनोरधिकसाम्यविमुक्तधाम्नः ।
रक्षोवधो जलधिबन्धनमस्त्रपूगैः किं तस्य शत्रुहनने कपयः सहायाः ॥ २० ॥
यस्यामलं नृपसदस्सु यशोऽधुनाऽपि गायन्त्यघघ्नमृषयो दिगिभेन्द्रपट्टम् ।
तन्नाकपालवसुपालकिरीटजुष्टपादाम्बुजं रघुपतिं शरणं प्रपद्ये ॥ २१ ॥
स यैः स्पृष्टोऽभिदृष्टो वा संविष्टोऽनुगतोऽपि वा ।
कोसलास्ते ययुः स्थानं यत्र गच्छन्ति योगिनः ॥ २२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पदाम्भोजपराङ्मुखादित्यर्थः । अत एव असंविदः अतत्त्वज्ञात् दुराराध्याद्दुष्कीर्तिकरादित्यर्थः । भीतेन स्वकीर्तिरक्षाऽशिष्टमार्गे संस्थापनार्हात् परेरोत्यर्थः । प्राचेतसो वाल्मीकेः श्रीजानकीराम-स्वरूपगुणाद्यभिज्ञस्य आश्रमं प्राप्ता ॥ १० ॥

काले प्रसवकाले क्रियाः जातकर्माद्याः ॥ ११—१४ ॥

विवरं प्रविवेश भूमिद्वारेव वैकुण्ठादागता तद्विवरद्वारेण वैकुण्ठं गतेत्यर्थः ॥ १५ ॥

शुचा शोकाश्रूणि रुन्धन्नपि रोद्धुं नाशक्नोत् ईश्वरः सर्वदा निःशोकः स्वेच्छयैव लोकगतिं तथाभूतया चेष्टया दर्शयामासेति भावः ॥ १६ ॥

भाषाटीका ।

पराये गृह में रहने वाली खोटी दुष्टनी ऐसी तो कूं मैं नहीं रखसक्ता हूं स्त्री के लोभी राम भलाई सीता को राखैं मैं तो कदापि तेरे को नहीं ग्रहण करूंगा ॥ ९ ॥

इस प्रकार के वहु मुख और दुराराध्य अज्ञानी लोक से भय भीत होकर पति ने (श्रीरामने) सीताजी का परित्याग कर दिया तब सीताजी लक्ष्मण के द्वारा वाल्मीक महर्षि के आश्रम को प्राप्त हुई ॥ १० ॥

गर्भवती सीताजी ने समय पूरे होने पर यम (युगल) पुत्र उत्पन्न किये तिन में एक का नाम कुश एक का लव रहा उन दोनों की अखिल क्रिया और संस्कार महर्षि वाल्मीकजी करते हुए ॥ ११ ॥

जैसे श्रीराम के दो पुत्र हुए इसी रीति लक्ष्मणजी के भी दो पुत्र हुए एक अंगद दूसरे चित्र केतु । हे महीपते ! इसी भांत तक्ष और पुष्कल दो पुत्र भरतजी के हुए ॥ १२ ॥

सुबाहु और श्रुतसेन ये दो पुत्र शत्रुहनजी के हुए । भरतजी ने दिग्विजय के समय पर किरोड़न गंधर्वों को मारे ॥ १३ ॥

और उनका धन लाकर सब राजा (श्रीराम) को समर्पण किया, शत्रुहनजीने भी मधु के पुत्र लवणासुर राक्षस को मार कर मधुवन के विषै मथुरा नामक पुरी बसाई ॥ १४ ॥

सीताजी ने अपने भर्त्ता से प्रवास पाकर दोनों पुत्रों को मुनि को सौंपकर रामके चरणों का ध्यान करती २ पृथिवी के विवर में प्रवेश करती हुई ॥ १५ ॥

ऐसा सुनकर भगवान् रामचन्द्र भी अपनी बुद्धि से शोक को थांमते हुए, तो भी सीताजी के भिन २ गुणों को स्मरण करते २ ईश्वर होकर भी शोक रोकने को समर्थ नहीं होते भये ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

न चातिचित्रमेतत् स्त्रीपुंसोः प्रसङ्ग आसक्तिः त्रासमावहतीति तथा विभक्तेरलुगार्षः पाठान्तरं सुगमम्. किमुतेति प्रासंगिकोक्तिः ॥ १७ ॥

अग्निहोत्रमजुहोत् प्रभुः रामः ॥ १८ ॥

आत्मज्योतिर्निजं धाम ॥ १९ ॥

जलधिबन्धनमस्त्रपूगैश्च रक्षसां वध इतीदं कविभिराश्चर्यमिव वर्णितमपि यशः स्तुतिर्न भवति तत्र हेतुः अधिकसाम्याभ्यां

पुरुषो रामचरितं श्रवणैरुपधारयन् ।
आनृशंस्यपरो राजन्! कर्मबन्धैर्विमुच्यते ॥ २३ ॥

राजोवाच ॥

कथं स भगवान्रामो भ्रातॄन्वा स्वयमात्मनः ।
तस्मिन्वा तेऽन्ववर्त्तन्त प्रजाः पौराश्च ईश्वरे ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विमुक्तं धाम प्रभावो यस्य तस्य किं कपयः सहायाः अतः सुग्रीवाद्याश्रयणं यथा लीलामात्रं तथैवेदमपि युक्तं चैतदित्याह, सुराणां याच्ञयाऽऽत्ता स्वीकृता लीलार्था तनुर्येन तस्य ॥ २० ॥

एवंविधलीलाप्रयोजनं दर्शयन्प्रणमति—यस्य यशो नृपाणां युधिष्ठिरादीनां सदस्सु ऋषयो मार्कण्डेयादयो गायन्ति दिगिभेन्द्राणां पट्टवदाभरणरूपं तत्पर्यन्तं व्याप्तमित्यर्थः । नाकपालाः देवाः वसुपाला वसुधापालाश्च तेषां किरीटैर्जुष्टं पादाम्बुजं यस्य तं रघुपतिम्, पाठान्तरे तत्तस्य रघुपतेर्नाकपालादिभिर्जुष्टं पादाम्बुजं प्रपद्य इत्यर्थः ॥ २१ ॥

स रामः संविष्ट उपवेशितोऽनुगतो वा यैस्ते कोसलदेशवासिनः सर्वेऽपि यत्र योगिनो गच्छन्ति तत्स्थानं ययुः ॥ २२ ॥

आनृशंस्यपर उपशमनिष्ठस्सन् विमुच्यते ॥ २३ ॥

स रामः स्वयं कथमवर्तत ? भ्रातॄन्प्रति वा कथमवर्तत ? कथंभूतान् आत्मन आत्मांशभूतान् तस्मिन्वा ईश्वरे ते भ्रात्रादयोऽनु अनन्तरं कथमवर्तन्त ? इति प्रश्नत्रयम् ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

न चातिचित्रमेतदित्याह–ईश्वराणामपि स्त्रीपुंसयोः प्रसङ्गः एतावान् एतादृक्, कीदृक् ? सर्वत्रैवं भयावहः भयशब्दः शोकोपलक्षकः ईश्वराणामपि भयावहः किमुत ग्राम्यस्य गृह एव चेतो यस्य तस्य ॥ १७ ॥

तत ऊर्ध्वं विवरप्रवेशश्रवणानन्तरं ब्रह्मचर्यं धारयन् स्त्र्यन्तरपरिग्रहं वर्जयन् प्रभुः श्रीरामः त्रयोदशाब्दानां सहस्राणि अग्निहोत्रमविच्छिन्नं यथातथा अजुहोत् जुहाव । ननु,श्रीरामायणे"दशवर्षसहस्राणि दशवर्षशतानि च । रामो राज्यमुपासित्वा"इत्येकादशवर्षसहस्राणि श्रीरामावतारावस्थानमुक्तम्; अत्र तु त्रयोदशाब्दसाहस्रमिति तेन विरोधः, मैवं तत्र हि दशवर्षसहस्राणि इत्यनेन तावन्तं कालं सीतया सहावस्थितिरुच्यते दशवर्षशतानीत्यनेन तु तावन्तं कालं तया विनाऽवस्थानमुच्यते अत एव हि कोटिद्वयोक्तिः सीतया विना रामस्य एकैकवर्षशतस्य वर्षसहस्रतुल्यताख्यापनाय सहस्रमिति चोक्तम् एवंस्थिते च तत्र दशग्रहणं त्रिगुणितानां दशानामुपलक्षणमित्यभिप्रेत्य कार्त्स्न्येनावतारसहचरितकालोऽत्र गणितः ॥ १८ ॥

ततो वनवासदशायां दण्डकारण्यकण्टकैर्विद्धं स्वपादपल्लवं स्मरतां जनानां हृदि विन्यस्य निधाय स्मर्त्तव्यं कृत्वेत्यर्थः । श्रीरामः आत्मज्योतिः स्वयंप्रकाशं ज्योतिर्मयं स्थानं परमपदाख्यमगात् ॥ १९ ॥

अस्त्रपाणेः कोदण्डपाणेः रघुपतेः श्रीरामस्य रक्षोवधो जलधिबन्धनश्चेतीदं यशः स्तुतिर्न भवति, तत्र हेतुः, अधिकसाम्याभ्यां विमुक्तं धाम प्रभावो यस्य निस्समाभ्यधिकप्रभावस्येत्यर्थः । तस्य किं कपयो वानराः सहायाः अतः सुग्रीवाद्याश्रयणं यथा लीलामात्रं तदेदमपि युक्तं चैतदित्यभिप्रायेण विशिनष्टि, सुराणां याच्ञया आत्ता उपात्ता लीलार्था तनुर्येन तस्य ॥ २० ॥

एवंविधलीलाप्रयोजनं दर्शयन् शरणं व्रजति—यस्यामलमघघ्नं पापहरं पादाम्बुजमाहात्म्यमिति विशेष्यमध्याहार्यं नृपाणां युधिष्ठिरादीनां सदस्सु यश एव धनं येषां ते तथाभूता अपि ऋषयो मार्कण्डेयादयः यशोधनापीति सन्धिरार्षः गायन्ति यन्माहात्म्यं दिगिभेन्द्राणां पट्टवदाभरणरूपं तत्पर्यन्तं व्याप्तमित्यर्थः । नाकपाला देवाः वसुपालाः वसुधापालकाः वैश्रवणादयो वा तेषां किरीटैर्जुष्टं पदाम्बुजं यस्य तं रघुपतिं शरणं प्रपद्ये पाठान्तरे तत्तस्य रघुपतेः जुष्टं पदाम्बुजं शरणं प्रपद्ये इत्यर्थः ॥ २१ ॥

यर्जनैः श्रीरामः संस्पृष्टः सन्दृष्टः संविष्टः उपसेवितः स्वचीत इतिपाठेपि स एवार्थः अनुगतो वा ते सर्वे कोसलदेशवासिनः यत्र यत्स्थानं योगिनो गच्छन्ति तत्स्थानं ययुः मुक्ता बभूवुरित्यर्थः ॥२२॥

श्रीरामचरित्रश्रवणफलमाह–पुरुष इति । हे राजन्! आनृशंस्यपरः उपशमनिष्ठः पुरुषो रामचरितं श्रवणैरुपधारयन् श्रोत्रेन्द्रियवृत्तिभिः परिच्छिन्दन् कर्मबन्धैः पुण्यापुण्यात्मककर्मरूपबन्धनैः संसृतिहेतुभिः प्रमुच्यते मुक्तो भवति ॥ २३ ॥

यद्यपि"अग्रहीदासनं भ्रात्रा प्रणिपत्य प्रसादितः"इत्यनेन भ्रातॄणां रामस्य च परस्परच्छन्दानुवर्त्तनम् एकपत्नीव्रतधर इत्यादिना राज्यपरिपालनदशायां तत्कालावस्थानप्रकारश्चेत्यादिकं सर्वमुक्तमेव तथापि तदेव पुनर्विस्तरेण बुभुत्सुः पृच्छति राजा–कथमिति ? स रामः कथम् अवर्ततेतिशेषः । भ्रातॄन् आत्मनः जानपदान् देशवासिनो जनांश्च कथमादिशत् ? भ्रातॄन् जनांश्च कथमन्ववर्ततेत्यर्थः । ते जनाः भ्रातरश्च पौराः प्रजाश्च तस्मिन्नीश्वरे श्रीरामं विषये कथमन्ववर्तन्त ? इति त्रयः प्रश्नाः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अपिपदेन लोकशिक्षार्थं सम्भावित एव नत्वनुभूत इत्याह—तत इति। अस्या भूमेर्निर्देशानन्तरम् अखण्डितम् अग्निहोत्रमजुहोत् पूर्वं कचित् खण्डितमित्यर्थो नैव किन्तु ततः पूर्वं च ब्रह्मचर्यं धारयन्नित्यस्याप्यूर्ध्वं रेतस्त्वं नार्थः । किन्तु ब्रह्मणा लक्ष्म्या सीतया सहचर्यं चरणावर्तनं धारयन् कुर्वन्नेव "मम योनिर्महद्ब्रह्म" इति वचनात् अन्यथा त्रयोदशसहस्रमित्युक्तिरसंगता स्यात् सर्वात्मना राज्यकरणस्य तावत्त्वात्तस्मात्क्षितिमण्डलं त्रयोदशसहस्रमब्दं ब्रह्मलोकसमं कृत्वा—

"नक्षत्रमासगणितं त्रयोदशसहस्रकम् ।
ब्रह्मलोकसमं चक्रे समस्तं क्षितिमण्डलम्" ॥

इति वचनाच्चेत्यर्थः। ऊर्ध्वाधः शब्दयोश्च वैयर्थ्याच्च ॥ १८ ॥

ततोऽयोध्याया अगाद्वैकुण्ठमिति शेषः। अंशुकैः सूर्यकिरणैः बुद्धं विकासितं पद्ममिव शोभमानं स्वपादपल्लवं स्मरतां पुंसां हृदि विन्यस्य निधिवन्निधाय आत्मज्योतिः स्वभावप्रकाशः ॥ १९ ॥

रघुपतेरिदं यशो वक्ष्यमाणलक्षणं न किं तन्निषेध्यमिति तत्राह–रघु इति। राक्षसवधो यः यच्च जलधिबन्धनं इदमिति रघुपतिः कामाविति तत्राह–विश्वेति. किम्प्रयोजनमुद्दिश्य रघुपतिनामरूपग्रहणमित्याशङ्क्य न किमपि प्रयोजनमुद्दिश्येत्याशयेनाह–लीलेति. शरीरग्रहणेन किमपि दुःखादिकमस्यास्तीत्याशयेनाह–अधिकेति. सर्वस्मादधिकं शान्तमानन्दपूर्णं नित्यमुक्तं धाम स्वरूपं यस्य स तथा तस्य यत एतादृग्विधमाहात्म्यां रघुपतिरतोऽस्त्रपाणेर्धनुष्पाणेस्तस्य कपयः शत्रुहनने सहायाः बलभूताः किन्नेत्यर्थः ॥ २० ॥

न केवलं नृपसभासु गायन्ति अपितु दिगिभेन्द्रपाते दिग्गजानां पातः सञ्चारो यस्मिन् लोकालोकप्रदेशेपीत्यनेन सर्वत्रेत्याह, नाकपाला इन्द्रादयः वसुपालाः कुबेरादयः ॥ २१ ॥

यैः स्पृष्टः नमनादिना दृष्टो वा चक्षुरादिना श्रुतो वा श्रोत्रादिना संविष्टः सम्यक् ज्ञातो वा वा अनुगतो पृष्ठतो यातो वा कोसलाः अयोध्यावासिन इत्युपलक्षणं सर्वेऽपीति ग्राह्यं यत्र योगिनो भक्तिज्ञानयोगवन्तो गच्छन्ति तत्स्थानं ययुरित्यन्वयः ॥ २२ ॥

पुरुषमात्रस्य श्रुतिमात्रेणापि रामनाम्नः कर्मबन्धमोक्षः स्यादित्याशयेनाह–पुरुष इति। आनृशंस्यपरो हिंसाकर्मपरोऽपि अनेन—

"रामो रामो राम इति सर्वेषामभवत्तदा ।
सर्वो राममयो लोको यदा रामस्त्वपालयत्" ॥

इति वाक्यमसूचि ॥ २३ ॥

तत्रैवं राजा पृच्छति–कथमिति । स भगवान् आत्मादिषु कथं केन योगेन रामो रमयितृत्वेनावर्तत ? औरसवद्यथौरसः स्वदेहोत्पन्नः पुत्रः पित्रादौ फलभापणादिना रतिप्रदत्वेन जिह्वासुखनाममयत्वेन प्रवर्तते, तथायमपि केन प्रकारेण रामो रतिप्रदः प्रजास्ववर्तत ? किञ्च, रामो बालवत्क्रीडावान् कथं केन भावेनेश्वरोऽयमिति सर्वजनबुद्धाववर्तत ? इतीदं प्रश्नत्रयं परिहर्तव्यमिति शेषेणान्वयः ॥ २४ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नन्वन्यत्रापि स्त्रीपुंसयोर्मिथः प्रसङ्गे तादृशत्वं दृश्यते, तत्राह–स्त्रीति । एतादृक् किन्तु नेति काक्वर्थः कुतः स हि ईश्वराणां कर्मयोगादिमिद्धानामपि सर्वत्र परत्र चेह च त्रासं संसारभयमावहति ग्राम्यस्य तु सुतरामेवेत्यर्थः ! तयोस्त्वेष भावः। सर्वपुरुषार्थाधिकप्रेमसारमय एवेति भावः । यद्वा काकुं विनैवायमर्थः एतादृक् एतत्तुल्यत्वेन सम्भाव्यमानो यः स्त्रीपुंप्रसङ्गः स तु सर्वत्र त्रासमावह इति अत्र स्त्रीपुमिति समासान्तकार्याभाव आर्षः त्रासमिति पुंभावश्चानुकूलमुद्वहतीतिवत् अलुक्तु कृद्योगे षष्ठ्येव स्यादिति साप्यार्षीयकल्पा ॥ १७ ॥

श्रीरामस्यानुरागं बाहरीहयापि दर्शयति। तत ऊर्द्ध्वमिति तत ऊर्द्ध्वमखण्डितब्रह्मचर्यं धारयन्नजुहोत् तां विना निर्वेदादितिभावः । त्रयोदशसाहस्रन्तु अग्निहोत्रमखण्डितमजुहोत् ॥ १८ ॥

तदनन्तरञ्च तद्वियोगहेतुलोकप्रवादमयं नरलोकं त्यक्त्वा नित्यतत्संयोगमयं निजलोकमारूढवानित्याह—ये लोकस्वेच्छया केचिदव्यक्तास्तेषाञ्च सन्ततं स्वयमेवासौ महाप्रस्थाने स्फुरति स्मेतिचाह स्मरतामिति निद्धं विद्धत्वेन प्रेम्णैव प्रतीतमित्यर्थः। शिवतृणाङ्कुरैः सीदतीति नः कलिवतां मनः कान्तं गच्छतीतिवत् इति पित्राज्ञापालनमर्यादास्मरणम् आत्मनो ज्योतीरूपं स्ववैकुण्ठम् ॥ १९ ॥ २० ॥

तदेवमुत्तरोत्तरं गुणविशेषं स्मरति चतुर्भिः । तथापि तस्य लौकिकलीलामाधुर्यावेशमनुस्मृत्य जीवन्मुक्ताद्या अपि परमसुखावेशाद्गायन्तीत्याह—यस्येति । तथाच वक्ष्यते श्रीकृष्णलीलायां "स्थित्युद्भवान्त" इत्यादौ तथापि मर्यादानुविधस्य वर्ण्यत इति ॥ २१ ॥

अथ श्रीसीतादीनां पुनस्तन्मिलनं कैमुत्येनाह—स यैरिति कोसला इत्युपलक्षणमेव योगिनस्तद्भक्तिसिद्धाः ॥ २२-३६ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अन्ये कामासक्ताः स्त्रियं स्मरन्तस्तु संसार एव मज्जन्तीत्याह, स्त्रीपुंसयोः प्रसङ्गः समासान्ताभाव आर्षः ईश्वराणां ब्रह्मादीनामपि सर्वत्र इह लोके परलोके च त्रासं संसारमावहतीति सः षष्ठ्यभाव आर्षः प्रसङ्गस्य प्राकृतत्वात् काममूलकत्वाच्चेति भावः । एतदेवाह—एतादृक् एतयो रामसीतयोरिव दृष्टः केनचिदंशेन व्यावहारिकेणैव न तु तात्त्विकेन सर्वतश्चेऽपीत्यर्थः। प्रसङ्गस्याप्राकृतत्वात् प्रेममूलकत्वाच्चेति भावः । अत एवेश्वराणामिति न त्वीश्वरस्यापीत्युक्तम् ॥ १७ ॥

ततश्च तदागीततनान् स्वपुरस्थान् श्रीवैकुण्ठलोकान्लीलां चकार ॥ १८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

किन्त्वन्यदेशस्थितानामनुरागिभक्तानां हृदि दण्डककण्टकैर्विद्धं पादमिति ते कण्टकास्तेषां हृद्येव सहस्रगुणां लपन्तस्तान् मूर्च्छितान् कुर्वन्त्विति बुद्ध्यैवेति तेषु रामस्य दया नाभूदिति व्याजस्तुतिः आत्मन एव न तु मायया ज्योतिर्यत्र तत् परं प्रपञ्चागोचरं स्वधाम्नः प्रकाशमगादित्यर्थः ॥ १९ ॥

नरलीलत्वेनैव चमत्कारकं तस्य यशोमाधुर्य्यमास्वाद्यते नत्वैश्वर्यदृष्ट्येत्याह—नेदमिति। आ सम्यगेव आत्ततनोर्नित्यगृहीतलीलाविग्रहस्य रक्षसो रावणस्य वध इतीदं यशः स्तुतिर्न भवति तत्र हेतुः अधिकसाम्याभ्यां विमुक्तं धाम प्रभावो यस्य तस्य किं कपयः सहायाः? तेन नरलीलत्वमाधुर्य्येणैव सर्वमेतदुपपद्यते इति भावः ॥ २० ॥

रामं प्रपद्यमानस्य सर्वोत्कर्षमाह—यस्य निर्मलं यशः नृपाणां युधिष्ठिरादीनां सदस्सु ऋषयो मार्कण्डेयादयो गायन्ति दिगिभेन्द्रपट्टं पट्टशब्दस्यासनवाचित्वात् दिग्गजेन्द्रारूढमित्यर्थः। तेन यशसः सर्वदिग्विजयित्वेनातीत्वमुक्तं नाकपालाः देवेन्द्राद्याः वसुपालाः नरेन्द्राश्च तेषां किरीटैर्जुष्टं पादाम्बुजं यस्य तं जुष्टमिति रघुपतेरिति पाठे तत्तस्येत्यर्थः ॥ २१ ॥

संविष्टः सख्यात् यैः सहोपविष्टः शयितो वा ते कोसलदेशवासिनः योगिनो भक्तियोगवन्तः स्थानं वैकुण्ठम् ॥ २२ ॥

आनृशंस्यपरः क्रौर्य्यशून्योऽमत्सर इत्यर्थः ॥ २३ ॥

अत्मनो भ्रातॄन् प्रति कथमवर्त्तत ? स्वयं वा कथमवर्त्तत ? तस्मिन् ते भ्रात्रादयः कथमवर्त्तन्त ? इति प्रश्नत्रयम् ॥ २४ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

लोकगतिमेव दर्शयति—स्त्रीति । ईश्वराणां समर्थानां देवादीनामपि स्त्रीपुंप्रसङ्गः स्त्रीपुंसोः प्रकृष्टः सङ्गः सर्वं त्रासवर्द्धनः किमुत ग्राम्यस्य ॥ १७ ॥

अग्निहोत्रमजुहाव प्रभुः कर्मसाध्यानन्दनिरपेक्षः लोकसङ्ग्रहार्थं तथा कृतवानित्यर्थः ॥ १८ ॥

आत्मज्योतिः स्वप्रकाशरूपं स्थानं वैकुण्ठम् अगात् ॥ १९ ॥

आत्ता आविष्कृता लीलार्था तनुर्येन तस्य रघुपतेः अस्त्रपूगैः रक्षोवधो जलधिबन्धनं चेदं कविभिराश्चर्यमिव वर्णितं यशः स्तुतिर्न भवति तत्र हेतुगर्भं विशेषणम् अधिकसाम्याभ्यां विमुक्तं धाम यस्य तस्य किं कपयः सहकारिणः? अयमर्थः यथा कपीनां सुग्रीवादीनामाश्रयणं समर्थानामपि कार्यं पराश्रयणेन सिद्ध्यतीति लोकशिक्षा तथेदं सर्वं लोकशिक्षार्थं लीलामात्रमिति ॥ २० ॥

एवं विधं रामचरितं जनकल्याणार्थमिति वदन् श्रीरामपदाम्बुजशरणं व्रजति—यस्येति । यस्य यश अघघ्नं श्रावयितॄणां श्रोतॄणाञ्च दुरितघ्नं दिगिभेन्द्राणां पट्टवदाभरणरूपं दिगिभेन्द्रपर्यन्तं व्याप्तम् अमलं यशः नृपाणां सदस्सु ऋषयोऽद्यनापि गायन्ति तत् तस्य रघुपतेः पादाम्बुजं, शरणं व्रजामि कथम्भूतम् नाकस्य(?) दुःखं यस्मिन् स नाकः सत्यलोकस्तत्पालो ब्रह्मा वसुशब्देन धनभूतापशवस्तथा च पशुपालः पशुपतिः शिवः तयोः किरीटाभ्यां जुष्टं सेवितम् ॥ २१ ॥

यैः श्रीरामः सन्दृष्टोऽभिदृष्टो वा संविष्टः उपवेशितः अनुगतश्च ते कोसलाः यत्र योगिनः श्रीरामध्यानयोगनिष्ठाः गच्छन्ति तत्र ययुः ॥ २२—२३ ॥

स रामः स्वयं कथमवर्त्तत ? आत्मनः भ्रातॄन्प्रति वा कथमवर्त्तत ? चकारात्पौरेषु प्रजासु श्रीरामः कथमवर्त्तत ? तस्मिन् श्रीरामे ईश्वरे सर्वस्वामिनि नानाभावाः ते भ्रातरः प्रजाः पौराः कथमवर्तन्त ? ॥ २४ ॥

———

भाषा टीका

श्री अवधूत वेष शुक मुनि कहने लगे, कि—स्त्री पुरुष का प्रसंग इस प्रकार का सर्वत्र ईश्वरों को भी त्रास देने वाला है, तो फिर रात दिन घर में चित्त वाले ग्रामीण पुरुषों का तो क्या कहना ॥ १७ ॥

तापीछे प्रभुने तेरह हजार वर्ष तक अखंडित ब्रह्मचर्य धारण कर अग्निहोत्र हवन किया ॥ १८ ॥

आपके स्मरण करने वाले अनुरक्त भक्तों के हृदय में दंडकारण्य के कण्टक जिनमें चुवे हुए ऐसे कोमल अपने चरण पल्लवों को विन्यास [धर कर] तदनंतर अपने नित्यधाम को पधारते हुए ॥ १९ ॥

मुनि बोले, कि—देवताओं की याचना से लीला विग्रह को धारण करने वाले, श्रीरघुपति का यह कुछ यश नहीं है जो कि अस्त्र समूहों से राक्षसों का वध करना, और समुद्र को बांधना क्योंकि जिनके न कोई सम और न अधिक ऐसे तेजस्वी आप हैं फिर क्या उनके शत्रुओं के नाश करने में कुछ कपी लोग सहाय होसके हैं ? न कदापि ॥ अथवा राक्षस वध सेतु बंधन आपका यश नहीं, तो फिर उनका क्या यश है ? तहां शुक मुनि कहते हैं यही सर्वोत्कृष्ट यश है कि सर्वतंत्रस्वतंत्र सर्वकार्यसमर्थ होकर भी वानर जाति से भी सहाय लेना दिखाकर उनको बडे बनाये फिर मनुष्यों की क्या कहैं इतना आपका सौलभ्य का यश है ॥२०॥

जिन का पापनाशक यश आज दिन भी राजसभाओं में ऋषि लोग गाते हैं, कैसा आपका यश है कि—दिग्गजों का पट्ट वस्त्र के तरह आभरणरूप होरहा है । अर्थात् दिशाओं के अन्त तक गया जाता है, ऐसे स्वर्गपाल वसुपाल आदि सकललोकपालों के किरीट से सेवित जिनके चरणकमल ऐसे रघुपति के मैं शरण हूं ॥ २१ ॥

जिन लोगोंने श्रीराम का स्पर्श किया जिनों ने एक बार दर्शन किया, और जो कभी साथ बैठ गये अथवा जिनने एकवार विराजमान कराये जो एकबार भी पीछे २ चले वे कोसल देशवासी उस स्थान को गये जहां बडे २ योगी जन जाते हैं ॥ २२ ॥

श्रीशुक उवाच ॥

अथादिशद्दिग्विजये भ्रातॄं(१)स्त्रिभुवनेश्वरः ॥
आत्मानं दर्शयन्स्वानां पुरीमैक्षत सानुगः ॥ २५ ॥
आसिक्तमार्गां गन्धोदैः करिणां मदशीकरैः ॥
स्वामिनं प्राप्तमालोक्य मत्तां वा सुतरामिव ॥ २६ ॥
प्रासादगोपुरसभाचैत्यदेवगृहादिषु ॥
विन्यस्तहेमकलशैः पताकाभिश्च मण्डिताम् ॥ २७ ॥
पूगैः सवृन्दै(२)रम्भाभिः पट्टिकाभिः सुवाससाम् ॥
आदर्शैरंशुकैः स्रग्भिः कृतकौतुकतोरणाम् ॥ २८ ॥
तमुपेयुस्तत्र तत्र पौरा अर्हणपाणयः ॥
आशिषो युयुजुर्देव ! पाहीमां प्राक् त्वयोद्धृताम् ॥ २९ ॥
ततः प्रजा वीक्ष्य पतिं चिरागतं दिदृक्षयोत्सृष्टगृहाः स्त्रियो नराः ॥
आरुह्य हर्म्याण्यरविन्दलोचनं ह्यतृप्तनेत्राः कुसुमैरवाकिरन् ॥ ३० ॥
अथ प्रविष्टः स्वगृहं जुष्टं स्वैः पूर्वराजभिः ॥
अनन्ताऽखिलकोशाढ्यमनर्घ्योरुपरिच्छदम् ॥ ३१ ॥
विद्रुमोदुम्बरद्वारैर्वैदूर्यस्तम्भपङ्क्तिभिः ॥
स्थलैर्मारकतैः स्वच्छैर्भ्राजत् स्फटिकभित्तिभिः ॥ ३२ ॥

भाषा टीका ।

हे राजन् ! राम चरित का वह प्रभाव है कि पुरुष रामचरित को श्रवणों से धारण करता हुआ ही शान्ति परायण होकर कर्मबन्धनों से छूटजाता है ॥ २३ ॥

राजोवाच ॥

राजा परीक्षित पूंछने लगे, कि—हे मुने ! भगवान् श्रीरघूत्तम अपने भ्राताओं से कैसे वर्त्तते रहे ? और आप स्वयं कैसे वर्त्तते रहे ? और श्रीराघवेन्द्र के विषयमें भ्राता लोग पुरवासी तथा प्रजा लोग कैसे वर्त्तते रहे ? ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्र श्रीरामस्य भ्रात्रादिषु प्रवृत्तिप्रकारमाह—अथेति । अननेवै भ्रातृणामपि तदाज्ञाऽनुसारितया प्रवृत्तिरुक्ता अथ सिंहासनस्वीकारानन्तरम् ॥ २५ ॥

पुरीं वर्णयति—त्रिभिः । गन्धोदकैर्मदबिन्दुभिश्चाऽऽसिक्ता मार्गा यस्यां सुतरां मत्तामिव समृद्धां वा इति वितर्के पाठान्तरे वासितां कामोन्मत्तां गामिवेत्यर्थः ॥ २६–२७–२८ ॥

पौराणां तस्मिन्वृत्तिमाह—तमुपेयुरिति । वराहरूपेण त्वयोद्धृतामिमां पृथ्वीं पाहीति ॥ २९ ॥

प्रजानां तस्मिन्वृत्तिमाह—ततः प्रजा इति ॥ ३० ॥

स्वयं कथमवर्ततेत्यस्योत्तरमाह—अथेति यावत्समाप्ति । स्वगृहं प्रविष्टः संस्तस्मिन् रेम इति पञ्चमेनान्वयः । गृहं वर्णयति, सार्द्धैस्त्रिभिः । अनन्ता येऽखिलानां रत्नादीनां कोशास्तैराढ्यम् अनर्घ्याः उरवः परिच्छदा यस्मिन् ॥ ३१ ॥

विद्रुममया उदुम्बरा देहल्यो येषु तैर्द्वारैः स्वच्छैः स्थलैः तृतीयान्तानां मण्डितामिति तृतीयेनान्वयः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्र श्रीरामस्य भ्रात्रादिषु वृत्तिप्रकारमाह—अथेति । अथ सिंहासनोपवेशनानन्तरं त्रिभुवनेश्वरः श्रीरामो दिग्जये दिक्पालने निमित्ते भ्रातॄनादिशत् अनेनैव भ्रातृणामपि तदाज्ञानुवृत्तिरुक्ता ततः स्वानां कौसल्यादीनाम् आत्मानं दर्शयन् सानुगः पुरीमयोध्यामैक्षत ॥ २५ ॥

(१) त्रिदशेश्वर इति विज० । (२) संवृतेति वीर० ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पौराणां तस्मिन् अनुवृत्तिञ्ज्ञापयितुं तैरलङ्कृतां पुरीं वर्णयति, आसिक्तमार्गामिति त्रिभिः । गन्धोदकैः चन्दनोदकादिभिः स्वामिनं प्राप्तं प्राप्तराज्यमालोक्य सुतरां मत्तानामिव स्थितानां करिणां मदोदकशीकरैश्चासिक्ताः मार्गाः यस्यां मत्तां वेति पाठान्तरं तत्र सुतरां मत्तामिवेति पुरीविशेषणं वाशब्दो वितर्के ॥ २६ ॥

प्रासादादिषु विन्यस्तैः स्वर्णकुम्भैः; पताकाभिश्च मण्डिताम् ॥ २७ ॥

पूगैस्संवृताः या रम्भाः कदल्यस्ताभिः नित्यसापेक्षत्वात् संवृतशब्दस्य समासः यद्वा, पूगैश्च पत्रफलपुष्पादिसंवृताभिः रम्भाभिश्च वाससां पट्टिकाभिश्च मण्डितामिति पूर्वेणान्वयः । आदर्शैर्दर्पणैरंशुकैः स्रग्भिश्च कृतानि कौतुकानि मङ्गलार्थानि तोरणानि यस्यां तां पुरीमैक्षतेत्यन्वयः ॥ २८ ॥

पौराणां तस्मिन् वृत्तिमाह—ततश्चार्हणानि पूजासाधनानि पाणिषु येषां तैः पौरास्तत्र तत्र तं श्रीराममुपेयुरुपजग्मुः देव ! प्राक् वराहावतारे त्वयोद्धृतां पृथिवीं पाहीति प्रार्थयमानाः आशिषो युयुजुः प्रयुक्तवन्तः ॥ २९ ॥

तस्मिन् प्रजानामनुवृत्तिमाह—तमिति । चिरादागतं पतिं श्रीरामं वीक्ष्याकर्ण्य स्त्रियो नराश्च प्रजाः दिदृक्षया उत्सृष्टा गृहा याभिस्ताः हर्म्याण्यारुह्य अतृप्तानि नेत्राणि यासां ताः अरविन्दलोचनं श्रीरामं कुसुमैरवाकिरन् यद्वा चिरागतं पतिं द्रष्टुमिच्छया उत्सृष्टगृहाः स्त्रियो नराश्च प्रजा हर्म्याण्यारुह्य वीक्ष्याऽतृप्तनेत्राः कुसुमैरवाकिरन्नित्यन्वयः ॥ ३० ॥

स्वयं कथमवर्त्ततेत्यस्योत्तरमाह-अथेति, यावदध्यायसमाप्ति । स्वगृहं प्रविष्टः तस्मिन् भगवान् स्वाराममीराणामात्मारामस्तुनिजनश्रेष्ठानामृषभो अभिनायकः रामः प्रिया चेष्टा यस्यास्तया स्निग्धया निरतिशयानुरागवत्या सीतया सह रेम इति पञ्चमेनान्वयः । गृहं वर्णयति-पूर्वराजभिरिक्ष्वाकुप्रभृतिभिर्जुष्टं सेवितं प्रीतिविषयीकृतं वा अनन्ता निरवधिका ये अखिला रत्नादीनां कोशास्तैराढ्यं समृद्धम् अनर्घ्या उरवः परिच्छदा यस्मिन् विद्रुममया उदुम्बरा देहल्यो येषु तैर्द्वारैः तृतीयान्तानां मण्डितमिति तृतीयेनान्वयः । वैदूर्यमणिमयस्तम्भानां पंक्तिभिः स्वच्छैरिन्द्रनीलमणिमयैः स्थलैः प्रदेशैः दान्ताः घर्षणेन निर्मलीकृता स्फटिकाः तन्मयीभिर्भित्तिभिः ॥ ३१—३२ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रथमतृतीयप्रश्नौ परिहरति-अथेति । अथ राज्याभिषेकानन्तरं भ्रात्रादौ स्वाज्ञाकारित्वेनाऽवर्तत त्रिदशेश्वर इत्यनेन मानवेश्वरत्वं किंवक्तव्यमित्यसूचि तेन लोकाऽनुकरणायेयं क्रीडेति कथितमित्यर्थः । द्वितीयं परिहरति-आत्मानमिति । स्वात्मसन्दर्शनेन जनस्यानन्दजनकत्वेन राम इति बुद्धिं जनयामासेत्यर्थः पुरीनिरीक्षणं च स्वभक्तानुकम्पित्वप्रदर्शनाय ॥ २५ ॥

गन्धोदैः चन्दनादिगन्धद्रव्यमिश्रजलैः लङ्काशः नाथं रावणं निहत्य प्राप्तं स्वामिनमालोक्य सुतरां हर्षेण मत्तामिव करिणीं मदशीकरैः मदजलबिन्दुभिर्वा मत्तामिव स्थिताम् ॥२६॥

चैत्यं पाषाणादिभिर्बद्धं वृक्षमूलस्थलं यज्ञशालास्थलं वा ॥ २७ ॥

संवृतैः फलस्तबकसहितैः पूगैः क्रमुकैः रम्भाभिः कदलीस्तम्भैः आदर्शैः दर्पणैरंशुकैर्वस्त्रैः स्रग्भिः मालाभिश्च कृतकौतुकानि रचितमङ्गलानि च तोरणानि यस्यां सा तथा ताम् ॥ २८ ॥

प्राक् वराहाऽवतारे त्वया पातालादुद्धृतां भुवमिति शेषः ॥ २९—३१ ॥

विद्रुमैरुदुम्बरैस्ताम्रैः कृतद्वारैः "ताम्रं शुल्वं मर्कटास्यं रक्तं कांस्यमुदुम्बरम्" इति ॥ ३२ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

भ्रातॄन् दिग्विजये प्रादिशदिति भ्रातॄणां तद्दर्शनरूपं स्वसुखमपि परिहाय तदाज्ञापालनरूपा तस्मिन्ननुवृत्तिरुक्ता रामस्यापि तेषु स्नेहात्तद्दिगधिकारदानरूपा वृत्तिरुक्ता, स्वानां स्वाः प्रजाः पौराश्चेति प्रजासु पौरेषु च स्वदर्शनकृपावलोकादिदानरूपा तस्य वृत्तिरुक्ता । पुरीमैक्षतेति स्वयं कथमवर्त्ततेत्यस्योत्तरम् अतस्तस्येक्षणीयां पुरीं वर्णयति-आसिक्तेत्यादि । सुतरां मत्तामिव समृद्धां, वेति वितर्के वासितां गामिवेति पाठे । वासितां कामोन्मत्तां गामिवेत्यर्थः । समासान्ताभाव आर्षः ॥ २५-२८ ॥

पौराणां तस्मिन्ननुवृत्तिमाह—तमिति । इमां पृथ्वीं प्राक् वराहरूपेण ॥ २९ ॥

प्रजानां तस्मिन् वृत्तिमाह—तत इति । चिरागतमिति वनवासादागमनसमयभवदर्शनमिदं ज्ञेयम् ॥ ३० ॥

स्वयं कथमवर्त्ततेत्यस्योत्तरं विस्तरेण पुनराह-अथेत्यादिना॥३१॥

विद्रुममया उदुम्बरा देहल्यो येषु तैर्द्वारैः तृतीयान्तानां मण्डितमिति तृतीयेनाऽन्वयः ॥ ३२ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

उत्तरमाह-अथेति । अथ सिंहासनस्वीकारानन्तरं त्रिभुवनेश्वरः भ्रातॄन् दिग्विजय आदिशत् अनेन श्रीरामस्य भ्रातॄन् प्रति दिग्गतधर्मादिरक्षणे आज्ञाप्रदत्वेन वृत्तिरुक्ता तेषां तदाज्ञापालकत्वेन तस्मिन् वृत्तिरुक्ता अस्य श्रीरामस्य पौरादिषु तस्मिन् पौरादीनां च वृत्तिम् आत्मानमित्यादिना कुसुमैरवाकिरन्नित्यन्तेनाह ॥ २५ ॥

गन्धोदैः करिणां मदशीकरैर्मदबिन्दुभिश्च आसिक्ता मार्गा यस्यां तां स्वामिनं प्राप्तमालोक्य सुतरां मत्तामिव ॥ २६—२८ ॥

इमां पृथिवीं त्वया वराहमूर्तिना ॥ २९ ॥ ३० ॥

स्वयं कथमवर्ततेत्यस्योत्तरमाह—अथेत्यध्यायशेषेण । स्वगृहं प्रविष्टः रेमे इति पञ्चमेनान्वयः ॥ ३१ ॥

चित्रस्रग्भिः पट्टिकाभिर्वासोमणिगणांशुकैः ॥
मुक्ताफलैश्चिदुल्लासैः कान्तकामोपपत्तिभिः ॥ ३३ ॥
धूपदीपैः सुरभिभिर्मण्डितं पुष्पमण्डितैः ॥
स्त्रीपुम्भिः सुरसङ्काशैर्जुष्टं भूषणभूषणैः ॥ ३४ ॥
तस्मिन् स भगवान्रामः स्निग्धया प्रिययेष्टया ।
रेमे स्वारामधीराणामृषभः सीतया किल ॥ ३५ ॥
बुभुजे च यथा कालं कामान्धर्ममपीडयन् ।
वर्षपूगान्बहून्नृणामभिध्याताङ्घ्रिपल्लवः ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां नवमस्कन्धे श्रीरामोपाख्याने
एकादशोऽध्यायः ॥ ११ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विद्रुममणिमयाः उदुम्बरा देहल्यो येषु तैर्द्वारैः तृतीयान्तानां मण्डितमिति तृतीयेनाऽन्वयः ॥ ३२ ॥

भाषा टीका ।

श्रीशुक उवाच ॥

श्रीशुकदेव जी बोले, कि त्रिभुवनके ईश्वर श्रीराघव ने राजगादी के कछु दिनपीछे दिग्विजय के लिये भ्राता लोगों को पठाये, और आपभी एक समैं अनुचरों सहित अपने पुरवासियों के लिये अपने दिव्यसौन्दर्य के अनुभव देने को पुरी के देखने को सिधारे ॥ २५ ॥

पुरी में भी वीथी और राजमार्ग सब चन्दन के जलों से और हाथियो के मद से सींचे गये हैं, पुरी भी कैसी जान पडती कि मानो अपने स्वामी को आते हुए देख कर अत्यन्त मत्त हो गई-हां ॥ २६ ॥

प्रासाद, गोपुर, सभा, चैत्य, और देव गृहों में कलश मङ्गल के लिये धरे हैं जामें और पताका ओं से मंडितहो रही है ॥ २७ ॥

फिर वह पुरी, पूग (सुपारी) और कदली (केलों) के फल सहित वृक्षोंसे और सुन्दर वस्त्रों की पट्टिकाओं (पड़दाओं) से और देखने योग्य वस्त्रों से सुशोभित हो रही है और नाना प्रकार के माला और तोरण बाँधकर जिस में कौतुक किया गया है ॥ २८ ॥

इसप्रकार की सजी बजी उस अयोध्या पुरी में जब प्रभु पधारे तब जिस २ मार्ग में आपका शुभागमन हुआ तहां २ पुरवासी जन पूजा और भेटों को हाथ में लेकर आशिषों को देते हुए, कि–हे देव ! जिसका पूर्व समय में आप ने रसातल से उद्धार किया अब आप उसी पृथिवी की रक्षा कीजिये ॥ २९ ॥

तबतो प्रजाओं ने अपने पति को बहुत दिनों में आये हुए देख कर निरन्तर देखने की इच्छा से पुरुष और स्त्रियें सब अपने घरों को छोडकर दर्शन के लिये साथ हो लिये और कितने नर नारी अटा अटारीन पै चढगये और कमललोचन श्रीराघवेन्द्र के दर्शन कर नेत्रों की तृप्तिको नहीं पाकर पुष्पों की वर्षा करते भए ॥ ३० ॥

तदनन्तर नगर पर्यटन कर प्रभूने अपने महलों में प्रवेश किया जो आपका श्रीगृह अपने पूर्व राजाओं से सेवित रहा और अनंत अनेक तरह के खजानों सें भरा हुआ बहुमोल्य बहुत भोग के उपकरणों से पूरित होरहा है ॥ ३१ ॥

फिर वह अपना महल कैसा है कि जिसमें मूंगा की देहली वाले दरवाजे बने हैं, वैडूर्य मणि के खंभों की पंक्तियें शोभा देरही हैं, मरकत मणि के स्थल और स्फटिक मणि की भित्तियों से भी महल शोभित हो रहा है ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वाससां मणिगणानां चांशुकैर्दीप्तिभिः चिद चैतन्यं तदु-दुल्लासैरुज्ज्वलैः यद्वा चिदिति कचित् वैडूर्यस्तम्भादिषु यथा शोभमुज्ज्वलैर्मुक्ताफलैर्मण्डितमित्यर्थः । कान्ताः कमनीयाः कामोपपत्तयो भोगसाधनानि ताभिः ॥ ३३ ॥

भूषणानां भूषणभूतैः ॥ ३४—३५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

नृणां मध्ये यद्वा नृणां नृभिरभिध्यातमङ्घ्रिपल्लवं यस्येति ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

विचित्राभिः स्रग्भिः पताकाभिश्च वाससां मणिगणानामंशुकैः पङ्क्तिभिः चिच्चैतन्यं तद्वदुल्लासैरुज्ज्वलैर्मुक्ताफलैः यद्वा चिदिति पृथक्पदमव्ययम् क्वचिद्वैदूर्यस्तम्भादिषु यथाशोभमुज्ज्वलैर्मुक्ताफलैर्मण्डितमित्यर्थः। कान्ताः कमनीयाः कामोपपत्तयो भोगसाधनानि ताभिः सुरभिभिर्धूपैर्दीपैश्च मण्डितं पुष्पाणि मण्डनमलङ्कारो येषां भूषणैर्भूषितास्तैः सुरसङ्काशैः देवतुल्यैः स्त्रीपुम्भिः समासान्ताभावस्तस्यानित्यत्वात् आर्षत्वाद्वा जुष्टं सेवितं कामान् यथाकालमुचितकालमनतिक्रम्य बहून् वर्षगणान् बुभुजे कथम्भूतस्सन् ? स्वधर्मं वर्णाश्रमोचितमपीडयन् अनुपरुन्धन् अत्यजन्नित्यर्थः। नृणामिति निर्धारणे षष्ठी नृभिरभिध्यातमङ्घ्रिपल्लवं यस्य तथाभूतस्सन् ॥ ३३—३६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

कान्तं शोभितं पट्टिकाभिर्वितानैः ॥ ३३ ॥

भूषणानामपि भूषणैः ॥ ३४ ॥

स्वारामाः शोभनोद्यानानि तत्र चारो येषां ते स्वारामचारास्तेषामृषभः निरन्तरं चारुतरोद्यानेषु सञ्चरताम् ईश्वर इत्यनेनातीव सौख्यं सूचयति–अनेनापि सीतावियोगो नास्तीत्युक्तं भवति। किञ्च सीतया नित्यरमणात्स्वयं सुखरूपत्वात्प्रजानां सुखहेतुत्वात्सर्वजनचित्तविलयत्वेन राम इति भावः ॥ ३५–३६ ॥

इतिश्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
एकादशोऽध्यायः ॥ ११ ॥
(विजयध्वजरीत्या नवमः।)

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

वाससां मणिगणानां चांशुकैः चितश्चिच्छक्तेरुल्लासैर्विलासैश्चिन्मयैरिति सर्वेषां विशेषणमिदं पुर्याः अप्राकृतत्वात् कान्ता कामनीया भोगानां उपपत्तिः सिद्धिर्यतस्तैरित्यपि सर्वेषां विशेषणम् ॥ ३३ ॥ ३४ ॥

तस्मिन् स्वगृहे ॥ ३५ ॥

नृणां नृभिः ॥ ३६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।
एकादशोऽयं नवमे सङ्गतः सङ्गतः सताम् ॥ ११ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

वाससां मणिगणानां चांशुकैः दीप्तिभिः चिच्चैतन्यं तद्वदुल्लासैरुज्ज्वलैर्मुक्ताफलैः यद्वा चिदुल्लासैश्चिच्चेतनमात्रस्योल्लास आनन्दविशेषो येभ्यस्तैः कान्ताः कमनीयाः कामोपपत्तयो भोगोपकरणविभूतयस्ताभिः ॥ ३३ ॥

पुष्पाणि एव मण्डनानि अलङ्कारास्तैश्च मण्डितं भूषणानामपि भूषणभूतैः स्त्रीपुम्भिर्जुष्टम् ॥ ३४—३५ ॥

नृणां नृभिः अभिध्याताङ्घ्रिपल्लवस्सन् सीतया सह रेमे ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे.
एकादशाऽध्यायार्थप्रकाशः ॥ ११ ॥

भाषाटीका।

चित्र विचित्र मालायें उत्तमोत्तम परदे, बहुमोल्य वस्त्र, इन से और नाना प्रकार के मणिगणों की दीप्ति से और चैतन्य सदृश उज्ज्वल मुक्तामणियों से और नाना प्रकार के भोगसामग्रियों से मण्डित होरहा है ॥ ३३ ॥

और सुगन्धित धूप दीपों से मण्डित है। तथा पुष्पों से अलङ्कृत देवता सदृश नर नारियों से सेवित है जो नर नारी भूषणों के भी भूषण है अर्थात् भूषणों की शोभा भी उनके शरीर में धारण करने से ही होती है ॥ ३४ ॥

ऐसे पुरुष और स्त्रियों से शोभित उस उत्तम महल के विषैं आत्माराम और धीरों में श्रेष्ठ रघुकुलोत्तंस श्रीचक्रवर्त्ति कुमार जगत के रमाने वाले श्रीरामचन्द्र प्रिय चेष्टा वाली भोरी भारी अथवा अति सुन्दर ऐसी श्रीजानकी जी के साथ रमण करते हुए ॥ ३५ ॥

और जिस प्रकार को पीडा न हो तिसी रीत से वर्षों के समूहों तक अर्थात् बहुत वर्षों तक समयर पर भोगों को भोगते हुए और मनुष्य उनके सदा चरण कमलों का ध्यान धरते रहे ॥ ३६ ॥

इति श्रीमद्भागवत नवम स्कन्ध में एकादश अध्याय की वृन्दावनस्थ पं० भगवताचार्यकृत भाषा टीका समाप्ता ॥ ११ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे एकादशोऽध्यायः ॥ ११ ॥

॥ द्वादशोऽध्यायः ॥

श्रीशुक उवाच ॥

कुशस्य चातिथिस्तस्मान्निषधस्तत्सुतो नभः ॥
पुण्डरीकोऽथ तत्पुत्रः क्षेमधन्वा ऽभवत्ततः ॥ १ ॥
देवानीकस्ततोऽनीहः पारियात्रोऽथ तत्सुतः ।
ततो बलस्थलस्तस्माद्वज्रनाभोऽर्कसम्भवः ॥ २ ॥
खगणस्तत्सुतस्तस्माद्विधृतिश्चाभवत्सुतः ॥
ततो हिरण्यनाभोऽभूद्योगाचार्यस्तु जैमिनेः ॥ ३ ॥
शिष्यः कौसल्य आध्यात्मं याज्ञवल्क्योऽध्यगाद्यतः ॥
योगं महोदयमृषिर्हृदयग्रन्थिभेदकम् ॥ ४ ॥
पुष्यो हिरण्यनाभस्य ध्रुवसन्धिस्ततोऽभवत् ॥
सुदर्शनोऽथाऽग्निवर्णः शीघ्रस्तस्य मरुः सुतः ॥ ५ ॥
योऽसावास्ते योगसिद्धः कलापग्राममाश्रितः ॥
कलेरन्ते सूर्यवंशं नष्टं भावयिता पुनः ॥ ६ ॥
तस्मात्प्रसुश्रुतस्तस्य सन्धिस्तस्याप्यमर्षणः ॥
महस्वांस्तत्सुतस्तस्माद्विश्वसाह्वोऽन्वजायत ॥ ७ ॥
ततः प्रसेनजित्तस्मात्तक्षको भविता पुनः ॥
ततो बृहद्बलो यस्तु पित्रा ते समरे हतः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्वादशे रामपुत्रस्य कुशस्यान्वय उच्यते ॥
एवमिक्ष्वाकुपुत्रस्य शशादस्येरितोन्वयः ॥ १ ॥

कुशस्य रामपुत्रस्यातिथिः सुतोऽभवत् तत्सुतः तस्य सुतः ॥१॥ अर्कसम्भवोऽर्कस्यांशात्सम्भूतः ॥ २ ॥

ततो विधृतेर्हिरण्यनाभः कथम्भूतः जैमिनेः शिष्यो योगाचार्यः ॥ ३ ॥

तदाह,यतः सकाशात् कौसल्यो याज्ञवल्क्य ऋषिराध्यात्मं योगमध्यगात् महान्त उदयाः सिद्धयो यस्मिंस्तं हृदयग्रन्थेर्भेदकञ्च ॥ ४ ॥ ५ ॥

मरुं विशिनष्टि–योऽसाविति। पुनर्भावयिता भावयिष्यति॥६॥७॥ पित्राऽभिमन्युना ॥ ८—११ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कुशस्य श्रीरामसुतस्यातिथिः सुतोऽभवत्तस्मादतिथेः निषधाख्यः तत्सुतः निषधसुतः नभः अथ नभात्पुण्डरीकः तत्पुत्रः पुण्डरीकपुत्रः क्षेमधन्वा ॥ १ ॥

ततः क्षेमधन्वनः देवानीको ऽभवत्ततो देवानीकात् हीनः अथ तत्सुतो हीनसुतः पारियात्रः ततः पारियात्राद्बलस्तस्माद्बलाच्छलः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तस्माद् वज्रनाभः स चार्कस्यांशात्सम्भूतः ॥ २ ॥

तत्सुतो वज्रनाभसुतः खगणस्तस्मात्खगणाद्विधृतिः सुतोऽभवत् ततो विधृतेर्हिरण्यनाभः समभवत् स च योगाचार्यस्य जैमिनेः शिष्यः ॥ ३ ॥

यतो हिरण्यनाभादध्यात्मशास्त्रं कौसल्यो याज्ञवल्क्य ऋषिरधिगतवान्, अध्यात्मं विशिनष्टि, योगं योगाख्यं महोदयं महानुदयोऽभ्युदयो यस्मात् हृदयग्रन्थिमज्ञानं भिनत्तीति तथाभूतम् ॥ ४ ॥

हिरण्यनाभस्य पुष्यः सुतस्ततः पुष्याद् ध्रुवसन्धिरभवत् अथ ध्रुवसन्धेः सुदर्शनस्तस्मादग्निवर्णस्तस्य सुतः शीघ्रः तस्यापि सुतो मरुत् ॥ ५ ॥

मरुतं विशिनष्टि—योऽसाविति । योऽसौ मरुत् योगेन सिद्धः जितकायः कलापग्रामाख्यं ग्राममाश्रितोऽधुनाऽप्यास्ते किमर्थमित्यत्राह—कलेर्युगस्यान्तेऽवसाने नष्टं सूर्यवंशं पुनर्भावयिता भावयिष्यति पुत्रपौत्रादि परंपरया प्रवर्त्तयिष्यति तदर्थं तत्रास्ते इति भावः ॥ ६ ॥

तस्मान्मरुतः प्रसुः तस्य सुतस्सन्धिः तस्यापि मर्षणस्सुतः तत्सुतो सुमहान् तस्मात् सुमहतो विश्वसाह्वो जज्ञे ॥ ७ ॥

ततो विश्वसाह्वात् बृहद्बलः जज्ञ इत्यनुषङ्गः, तं विशिनष्टि, यस्तु बृहद्बलः समरे सङ्ग्रामे ते पित्रा हतः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अथ श्रीरामपुत्रस्य कुशस्य सन्ततिमनुक्रामति—कुशस्य चेति । चशब्दः सन्ततेरविच्छेदं सूचयति ॥ १–३ ॥

अध्यात्मं परमात्मविषयं महानुदयो मोक्षलक्षणो यस्मात्स तथा एतदेव विशिनष्टि—हृदयेति । ऋषिर्ज्ञानी ॥ ४ ॥

तस्याग्निवर्णस्य शीघ्रनामा सुतः मरुन्नामा सुतो यस्य स मरुत्सुतः तस्य शीघ्रस्य मरुत्सुतोऽभूदिति वा ॥ ५–६ ॥

तस्मान्मरुतः ॥ ७ ॥

समरे ते तव पित्रा अभिमन्युना हतः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अस्मिन्नध्याये न विद्यते ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

द्वादशे कुशवंशस्य सुमित्रान्तस्य कीर्तनम् ।
समाप्तश्चेक्ष्वाकुसूनोर्विकुक्षेरयमन्वयः ॥
॥ १ ॥

अर्कस्सम्भवः अर्कस्यांशात् सम्भूतः ॥ २ ॥

हिरण्यनाभस्तु जैमिनेः शिष्यस्सन् योगाचार्योऽभूदित्यन्वयः यतो हिरण्यनाभात् कौसल्यो याज्ञवल्क्यः ऋषिः अध्यात्मं योगम् अध्यगात् ॥ ३—५ ॥

यो मरुः प्रसुश्रुतं पुत्रमुत्पाद्य कलापग्राममाश्रितोऽद्याप्यास्ते भावयिता पुनः पुत्रमुत्पाद्य प्रवर्तयिष्यते इत्यर्थः ॥ ६ ॥

तस्मान्मरोः ॥ ७—८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

श्रीरामपुत्रस्य कुशस्य वंशं वर्णयति—कुशस्येति द्वादशेनाध्यायेन ॥ १ ॥

अर्कसम्भवः अर्कस्य अंशादुत्पन्नः ॥ २ ॥

हिरण्यनाभो जैमिनेः शिष्यो योगाचार्यः ॥ ३ ॥

यतो हिरण्यनाभात् महान्त उदयाः सिद्धयो यस्मिन् तत् हृदयग्रन्थेर्भेदकम् आध्यात्म्यं योगं कौसल्यो याज्ञवल्क्य ऋषिरध्यगात् ॥ ४ ॥ ५ ॥

यः मरुः भावयिता भावयिष्यति ॥ ६ ॥ ७ ॥

पित्राऽभिमन्युना ॥ ८—१४ ॥

भाषाटीका ।

श्रीरघुकुलोत्तंसाय पुंसे नमः ।

श्रीशुक उवाच ।

श्रीशुकदेव जी बोले, कि—श्रीरामके पुत्र राजा कुशके अतिथि पुत्र हुए, तिनके निषध, तिनके सुत नभ हुए, नभके पुत्र पुंडरीक हुए तिनके पुत्र क्षेमधन्वा होते भये ॥ १ ॥

क्षेमधन्वा के पुत्र देवानीक हुए, तिनसे अनीह तिनके पुत्र पारियात्र हुए, तिनसे बल तिनसे स्थल तिनसे सूर्य के अंश से उत्पन्न होने वाले वज्र नाभ हुए ॥ २ ॥

उनके सुत खगण हुए, तिनसे विधृति तिन से हिरण्य नाभ हुए, जो कि जैमिनि ऋषि के शिष्य होकर योगाचार्य हुए ॥३॥

जिन हिरण्य नाभ से कौशल्य याज्ञवल्क्य ऋषि ने अध्यात्म योग का अध्ययन किया, कि जिस योग से बड़ी २ सिद्धियें प्राप्त होवें। और जो योग हृदय की ग्रंथियों को भली भाँत भेदन कर सके ॥ ४ ॥

और हिरण्यनाभ के पुष्य हुए पुष्य के पुत्र ध्रुवसन्धि हुए उनके पुत्र सुदर्शन और अग्निवर्ण हुए उनके शीघ्र उनके मुरुत पुत्र हुए ॥ ५ ॥

जो मरुत योग से सिद्ध होकर कलाप ग्राम में बैठे हुए हैं, कलि के अन्त में फिर उच्छिन्नहुए सूर्य वंश की वृद्धि करेंगे ॥ ६ ॥

उन मरुत के प्रसुश्रुत पुत्र हुए, उन के संधि और संधि के अमर्षण हुए, उन के पुत्र महस्वान् और महस्वान के विश्वसाह्व पुत्र उत्पन्न हुए ॥ ७ ॥

एते हीक्ष्वाकुभूपाला अतीताः शृणवनागतान् ।
बृहद्बलस्य भविता पुत्रो नाम बृहद्रणः ॥ ९ ॥
(१)उरुक्रियस्ततस्तस्य वत्सवृद्धो भविष्यति ।
प्रतिव्योमस्ततो भानु(२)र्दिवाको वाहिनीपतिः ॥ १० ॥
सहदेवस्ततो वीरो बृहदश्वोऽथ भानुमान् ।
प्रतीकाश्वो भानुमतः सुप्रतीकोऽथ तत्सुतः ॥ ११ ॥
भविता मरुदेवोऽथ सुनक्षत्रोऽथ पुष्करः ।
तस्यान्तरिक्षस्तत्पुत्रः सुतपास्तदमित्रजित् ॥ १२ ॥
बृहद्राजस्तु तस्यापि बर्हिस्तस्मात्कृतञ्जयः ।
रणञ्जयस्तस्य सुतः सञ्जयो भविता ततः ॥ १३ ॥
तस्माच्छाक्योऽथ शुद्धोदो लाङ्गलस्तत्सुतः स्मृतः ।
ततः प्रसेनजित्तस्मात् क्षुद्रको भविता ततः ॥ १४ ॥
रणको भविता तस्मात्सुरथस्तनयस्ततः ।
सुमित्रो नाम निष्ठान्त एते बार्हद्बलान्वयाः ॥ १५ ॥
इक्ष्वाकूणामयं वंशः सुमित्रान्तो भविष्यति ।
यतस्तं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे पारमहंस्यां
संहितायां वैयासिक्याम् इक्ष्वाकुवंशवर्णनंनाम
द्वादशोऽध्यायः ॥ १२ ॥

भाषा टीका ।

विश्वसाह्व के प्रसेनजित् उनके तक्षक पुत्र हुए उनके बृहद्बल पुत्र हुए जिनको तुम्हारे पिता अभिमन्यु ने युद्ध में मारडाला ॥ ८ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्तस्मादमित्रजित् ॥ १२—१४ ॥
निष्ठा वंशस्य स्थितिस्तस्या अन्तः ॥ १५ ॥
तदेवाह, इक्ष्वाकूणामिति ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायां
द्वादशोऽध्यायः ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एते कथिताः इक्ष्वाकुवंशजा भूपाला अतीता अतिक्रान्ताः, अथानागतान् भाविनः इक्ष्वाकुभूपालान् मया कथयिष्यमाणान् शृणु बृहद्बलस्य सुतो नाम्ना बृहद्रण इति प्रसिद्धस्तस्य बृहद्रणस्योरुक्षतस्तस्योरुक्षतस्य वत्सप्रीतः सुतो भविष्यति ततो वत्सप्रीतात् प्रतिव्योमः ततः प्रतिव्योमात् भानुः तस्माद्देवाकः स च वाहिन्याः सेनायाः पतिः ॥ ९ ॥ १० ॥

ततो देवाकात्सहदेवः ततः बृहदश्वः स च वीरः अथ बृहदश्वात् भानुमान् भानुमतः प्रतीकाश्वः तत्सुतः प्रतीकाश्वसुतः सुप्रतीकः ॥ ११ ॥

अथ सुप्रतीकान्मरुदेवः सुतो भविता तस्मात्सुनक्षत्रः तस्मात्पुष्करः तस्य पुष्करस्यान्तरिक्षः तत्पुत्रोऽन्तरिक्षपुत्रः सुतपाः ततस्तस्मात्सुतपसादमित्रजित् भविता ॥ १२ ॥

(१) उरुक्षत इति । (२) देवाकः इति च वीर० ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

तस्यामित्रजितो बृहद्राजस्तस्माद्बृहद्राजाद्बर्हिषः तस्माद्बर्हिषो धनञ्जयः तस्य धनञ्जयस्य सुतो रणञ्जयस्ततो रणञ्जयात् सृञ्जयस्सुता भविता ॥ १३ ॥

तस्मात्सृञ्जयाच्छाक्यः तस्माच्छाक्यात् शुद्धोदः अथ तत्सुतः लाङ्गलः स्मृतः ततो लाङ्गलात् प्रसेनजित् तस्मात् प्रसेनजितः क्षुद्रकः भविष्यति ततः ॥ १४ ॥

क्षुद्रकात्कुणको भविता तस्मात्कुणकात्सुरथस्तनयो भविष्यति तस्मात्सुमित्र इति प्रसिद्धः सुतो भविता स तु निष्ठान्तः निष्ठा वंशस्य स्थितिः तस्या अन्तः अन्तिमावधिभूतः एते बृहद्बलस्य भवितेत्यादिनोक्ताः बार्हद्बलाद्बृहद्बलगोत्रजा भाविनो नृपाः ॥१५॥

सुमित्रस्य निष्ठान्तत्वमेवाह, अयमिक्ष्वाकूणां वंशः सुमित्रोऽन्तोऽन्तावधिर्यस्य तथाभूतो भविष्यति, कुतः ? यतस्तं सुमित्रं राजानं प्राप्य कलौ युगे संस्थाम्नुच्छेदं प्राप्स्यति वंश इत्यनुषङ्गः ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां
द्वादशोऽध्यायः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अनागतानुत्पत्स्यमानान् तस्येत्येतत्पूर्वोत्तरत्र सम्बन्धयितव्यम् ॥ ९-११ ॥

तस्य सुतपसः सुतोऽमित्रजित् ॥ १२—१४ ॥

सुमित्रो नाम राजा निष्ठायाः वंशावलेरन्तो ऽवधिभूतः तत्र समाप्त इत्यर्थः ॥ १५ ॥

एतदेव विशदयति-इक्ष्वाकूणामिति। सुमित्रोऽन्तोऽवसानं यस्य स तथा संस्थां नाशं समाप्तिं वा "संस्था व्यवस्था प्रणिधिः समाप्त्याचारमन्त्रिषु" इति ॥१६॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
द्वादशोऽध्यायः ॥ १२ ॥
विजयध्वजटीका दशमः ।

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

पित्रा अभिमन्युना ॥ ९—१४ ॥

नामनिष्ठयोर्वाचकवाच्ययोरन्तो नाशो यस्मात् सः तस्मादन्यो न भविष्यतीत्यर्थः । यद्वा नाम्नैव न तु कयाचन कीर्त्या नितरां तिष्ठन्तीति नामनिष्ठां बृहद्बलसुतादयस्तेषामपि अन्तः प्रवाहसमाप्तिर्यस्मात् सः ॥ १५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
नवमे द्वादशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

निष्ठायाः वंशस्थितेरन्ते ॥ १५ ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
द्वादशाऽध्यायार्थप्रकाशः ॥१२ ॥

भाषा टीका ।

ये सब इक्ष्वाकु वंशी भूपाल व्यतीत होगये अब आगे जो होने वाले हैं उनको सुनो । बृहद्बल के पुत्र बृहद्रण ऐसे प्रसिद्ध नाम वाले होंगे ॥ ९ ॥

बृहद्रण के उरुक्रिय होंगे तिनके वत्सवृद्ध होंगे, तिनके प्रतिव्योम तिनसे भानु तिनसे दिवाक वाहिनीपति होंगे ॥ १० ॥

तिनसे सहदेव तिनसे बड़े वीर बृहदश्व तिनसे भानुमान् भानुमान् के प्रतीकाश्व तिनके पुत्र सुप्रतीक होंगे ॥ ११ ॥

तिनसे मरुदेव तिनसे सुनक्षत्र तिनसे पुष्कर तिनके अन्तरिक्ष, तिनके सुतपा, तिनके अमित्रजित होंगे ॥ १२ ॥

तिनके भी बृहद्राज होंगे तिनसे वर्हि तिनसे कृतञ्जय तिनसे रणञ्जय तिनके पुत्र संजय होंगे ॥ १३ ॥

तिनसे शाक्य तिनसे शुद्धोद तिनसे लाङ्गल होंगे तिनसे प्रसेनजित तिनसे क्षुद्रक होंगे ॥ १४ ॥

तिनसे रणक होंगे तिनसे सुरथ तनय होंगे तिनसे सुमित्र नाम वाले राजा होंगे बस इनहीं तक वंश की स्थिति रहेगी ये जो कहे सो सब राजा बार्हद्बल के वंश के हुए ॥ १५ ॥

बस यह इक्ष्वाकुओं का वंश सुमित्र राजा तक ही होगा क्योंकि ? इस राजा को प्राप्त होकर कलियुग में यह वंश संस्था (नाश) को प्राप्त होगा ॥ १६ ॥

इति श्रीमद्भागवत नवम स्कन्ध में द्वादश अध्याय की,
श्रीवृन्दावनस्थ पं भागवताचार्यकृत
भाषाटीका समाप्ता ॥ १२ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे द्वादशोऽध्यायः ॥ १२ ॥

॥ त्रयोदशोऽध्यायः ॥

॥ श्रीशुक उवाच ॥

निमिरिक्ष्वाकुतनयो वसिष्ठमवृतर्त्विजम् ।
आरभ्य सत्रं सोऽप्याह शक्रेण प्रागवृतोऽस्मि भोः! ॥ १ ॥
तं निर्वर्त्यागमिष्यामि तावन्मां प्रतिपालय ।
तूष्णीमासीद्गृहपतिः सोऽपीन्द्रस्याकरोन्मखम् ॥ २ ॥
(१)निमिश्चलमिदं विद्वान् सत्रमारभतात्मवान् ।
ऋत्विग्भिरपरैस्ताव(२)न्नागमद्यावता गुरुः ॥ ३ ॥
शिष्यव्यतिक्रमं वीक्ष्य निर्वर्त्य गुरुरागतः ।
अशपत्पतताद्देहो निमेः पण्डितमानिनः ॥ ४ ॥
निमिः प्रतिददौ शापं गुरवेऽधर्मवर्तिने ।
तवापि पतताद्देहो लोभाद्धर्ममजानतः ॥ ५ ॥
इत्युत्ससर्ज स्वं देहं निमिरध्यात्मकोविदः ।
मित्रावरुणयोर्जज्ञे उर्वश्यां प्रपितामहः ॥ ६ ॥
गन्धवस्तुषु तद्देहं निधाय मुनिसत्तमाः ।
समाप्ते सत्रयागेऽथ देवानूचुः समागतान् ॥ ७ ॥
राज्ञो जीवतु देहोऽयं प्रसन्नाः प्रभवो यदि ।
तथेत्युक्ते निमिः प्राह माभून्मे देहबन्धनम् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इक्ष्वाकोरेव पुत्रस्य निमेर्वंशस्त्रयोदशे ।
वर्ण्यते जज्ञिरे यत्र ब्रह्मज्ञा जनकादयः ॥ ० ॥

निमेरौरसः पुत्रो नाभूदिति दर्शयन् कथामाह, निमिरित्येकादशभिः । सत्रमारभ्य वसिष्ठमृत्विजमवृत वव्रे ॥ १ ॥

तं शक्रस्य मखं निर्वर्त्य, प्रतिपालय प्रतीक्षस्वेति गृहपतिः निमिः ॥ २ ॥

इदं जीवितं चलमस्थिरं विद्वान् ॥ ३ ॥

इन्द्रस्य मखं निर्वर्त्यागतो गुरुः शिष्यस्य व्यतिक्रममन्यायं वीक्ष्य निमेर्देहः पतत्वित्यशपत् ॥ ४ ॥ ५ ॥

उर्वशीदर्शनात्स्कन्नं रेतस्ताभ्यां कुम्भे निषिक्तं तस्मात्प्रपितामहो वसिष्ठो जज्ञे तदाह, मित्रावरुणयोरिति । तथाच श्रुतिः "कुम्भे रेतः सिषिचतुः समानम्" इति ॥ ६ ॥ ७ ॥

यदि प्रसन्नाः प्रभवः समर्थाश्च तर्हि जीवत्वित्यूचुः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं—

"क्षुवतस्तु मनोर्जज्ञे इक्ष्वाकुर्घ्राणतः सुतः ।
तस्य पुत्रशतज्येष्ठविकुक्षिनिमिदण्डकाः ॥"—

(१) निमिस्सत्रविदाम् इति । (२) यावत्तन्नागमद्गुरुः इति च विज० ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्युपक्रान्तानामिक्ष्वाकुसुतानां विकुक्षेर्वंशः कथितः अथ निमेर्वंशं विवक्षुस्तावन्निमेरौरसः पुत्रो नाभूदिति दर्शयितुं तत्कथामाह—निमिरित्यादिना अराजकमयमित्यतः प्राक्तनेन । इक्ष्वाकोस्तनयो निमिः कदाचित्सत्रमारभ्य वसिष्ठमृत्विजम् अवृत त्वमृत्विक् भवेति वसिष्ठमुवाचेत्यर्थः । ततः स वसिष्ठः भो हे निमे ! प्राक् त्वद्वरणात्प्रागेवाहं शक्रेण वृतोऽस्मि ॥ १ ॥

अतस्तं शक्रस्य मखं निर्वर्त्य निष्पाद्य कारयित्वेत्यर्थः आगमिष्यामि तावत्पर्यन्तं त्वं प्रतिपालय प्रतीक्षस्वेत्याह—ततो गृहपतिः निमिः तूष्णीमासीत्किञ्चिदप्यवदंस्तस्थौ ततः स वसिष्ठः शक्रस्य मखमकरोत् ॥ २ ॥

तदा निमिरात्मवान् प्रकृतिपुरुषेश्वरयाथात्म्यविदत एवेदं जीवितं चलमानित्यं जानन् छलमितिपाठे इदं गुरोर्वचः आर्त्विज्याकरणे मिथ्याहेतुं जानन्नित्यर्थः । यावद्गुरुर्वसिष्ठो नागतः तावदन्यैः ऋत्विग्भिः सत्रमारब्धवान् ॥ ३ ॥

शिष्य इति । ततो गुरुर्वसिष्ठः शक्रस्य मखं निर्वर्त्यागतः शिष्यस्य निमेर्व्यतिक्रमं गुरुवाक्यातिक्रमं वीक्ष्याऽशपत्, किमिति ? पण्डितमात्मानं मन्यत इति तथा तस्य निमेर्देहः पततां वियुज्यतामिति. निमे इति पाठे, हे निमे ! पण्डितमानिनस्तव देहः पततामित्यर्थः ॥४॥

निमिरिति । तदाकर्ण्य निमिरपि धर्मोऽनुवर्तिने गुरुवे वसिष्ठाय प्रतिशापं ददौ, किमिति ? वित्तलोभाद्धर्ममजानतस्तवापि देहः पततामिति ॥ ५ ॥

इतीति । इतीत्थं वदन् निमिरध्यात्मकोविदः स्वं देहं तत्याज तथा अस्मत्प्रपितामहः वसिष्ठोऽपि त्यक्तदेहः पुनर्मित्रावरुणयोरुर्वशीदर्शनात्स्कन्नवीर्ययोस्तस्यां जज्ञे अत्रोर्वशीदर्शनान्मित्रावरुणयोः स्कन्नं रेतः ताभ्यां तत्कुम्भे निषिक्तं तस्माज्जज्ञे अस्मत्प्रपितामह इतीतिहासोऽनुसन्धेय इतिभावः ॥ ६ ॥

अथ तं त्यक्तं निमेर्देहं सुगन्धिवस्तुषु परिमलद्रव्येषु गन्धतैलेषु निधाय मुनिसत्तमा ऋत्विजः सत्रे यागे सति । अथानन्तरं तत्र समागतान् देवानूचुः ॥ ७ ॥

किमिति ? यदि यूयं प्रभवः जीवयितुं समर्थाः प्रसन्नाश्च तर्हि राज्ञो निमेरयं देहो जीवत्विति. ततो देवैस्तथेति जीवत्वयं देह इत्युक्ते सति निमिः प्राह, तदेवाह—माभूदित्यादिना विदेह उष्यतामित्यतः प्राक्तनेन । देहबन्धनं देहयोगः पुनर्मम माभूत ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अवृत वव्रे स वसिष्ठोपि तं शक्रस्य यागं निर्वर्त्य समाप्य प्रतिपालय प्रतीक्षस्व गृहपतिर्निमिः ॥ १—२ ॥

सन्त्रायत इति सत्त्र त्रायति वा सत्रं ब्रह्म तद्विदां मध्ये विद्वांस्तेषां संशयच्छेत्ता अपरैर्वसिष्ठव्यतिरिक्तैः तावन्नागमदित्यादिना गुर्वपेक्षायाः नियतत्वदर्शनात्तत्प्रतिसन्धानमगणय्य शिष्याय शापदानमधर्म इतिकृत्वाऽधर्मवर्तिन इत्युक्तम् ॥ ३—४ ॥

लोभात् पौरोहित्यविषयात् ॥ ५ ॥

ततः किमभूदिति तत्राह—मित्रावरुणयोरिति । यो मित्रावरुणयोरुर्वश्यां जज्ञे सः मम प्रपितामहो वसिष्ठः ॥ ६ ॥

तद्देहं तस्य निमेर्देहं गन्धवस्तुषु गन्धवासिततैलेषु हरिद्रादिद्रव्यविशेषेषु निधाय सत्रनामयागे ॥ ७ ॥

देहलक्षणस्वन्धनम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १—७ ॥

अथ त्रयोदशे निमिः प्राहेति योगबलेन लिङ्गशरीरमवलम्ब्यैवेति ज्ञेयम् ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

निमेरिक्ष्वाकुपुत्रस्य वंशमुक्त्वा त्रयोदशे ।
समापितः सूर्यवंशो विष्णुवैष्णवसत्कथः ॥
॥ १ ॥

प्रतिपालय प्रतीक्षस्व गृहपतिर्निमिः ॥ २ ॥

इदं जीवितं च चलमस्थिरं विद्वान् यत आत्मवान् सुबुद्धिः ॥ ३ ॥

निर्वर्त्य शक्रस्य मखं निष्पाद्य आगतः शिष्यस्य निमेर्व्यतिक्रमं स्वस्याऽनपेक्षाम् ॥ ४ ॥

अधर्मवर्तिने लोभात् इन्द्रतो मत्तोऽपि दक्षिणाकांक्षारूपात् ॥ ५ ॥

प्रपितामहो वसिष्ठः देहं त्यक्त्वा मित्रावरुणयोर्जज्ञे इति उर्वशीदर्शनतस्तदीयरेतः कुम्भे निहिताविल्यर्थः । तथा च श्रुतिः "कुम्भे रेतः सिषिचतुः समानम्" इति ॥ ६ ॥

तद्देहं निमिशरीरम् ॥ ७ ॥

यदि प्रसन्नाः प्रभवः समर्थाश्च तर्हि जीवत्वित्यूचुः तथेति देवैरुक्ते सति ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

इक्ष्वाकुपुत्रस्य निमेर्वंशमाह—निमिरितित्रयोदशेन । निमिः सत्रमारभ्य वसिष्ठम् ऋत्विजम् अवृत वव्रे ॥ १ ॥

तं शक्रमखं निर्वर्त्य निष्पाद्य तावन्मां प्रतिपालय प्रतीक्षस्व गृहपतिः निमिः ॥ २ ॥

इदं जीवितम् ॥ ३ ॥

निर्वर्त्य शक्रमखमिति शेषः ॥ ४–५ ॥

इति अनेन गुरुशापेन निमिः स्वं देहम् उत्ससर्ज तथाऽस्मत्प्रपितामहः वसिष्ठस्त्यक्तदेह उर्वश्यामुर्वशीदर्शनात् कुम्भे निक्षिप्तवीर्ययोर्मित्रावरुणयोः पुत्रः तथा अगस्त्यसहितो जज्ञे तथा च श्रुतिः "कुम्भे रेतः सिषिचतुः समानम्"इति ॥ ६ ॥

तस्य निमेर्देहम् ॥ ७ ॥

हे प्रभवः ! यदि प्रसन्नाः यूयं तर्हि जीवतु ॥ ८–६–१० ॥

यस्य योगं न वाञ्छन्ति वियोगभयकातराः ।
भजन्ति चरणाम्भोजं मुनयो हरिमेधसः ॥ ९ ॥
देहं नावरुरुत्सेऽहं दुःख(१)शोकभयावहम् ।
सर्वत्रास्य यतो मृत्युर्मत्स्यानामुदके यथा ॥ १० ॥
देवा ऊचुः ॥
विदेह ! उष्यतां कामं लोचनेषु शरीरिणाम् ।
उन्मेषणनिमेषाभ्यां लक्षितोऽध्यात्मसंस्थितः ॥ ११ ॥
अराजकभयं नृणां मन्यमाना महर्षयः ।
देहं ममन्थुः स्म निमेः कुमारः समजायत ॥ १२ ॥
जन्मना जनकः सोऽभूद्वैदेहस्तु विदेहजः ।
मिथिलो मथनाज्जातो मिथिला येन निर्मिता ॥ १३ ॥
तस्मादुदावसुस्तस्य पुत्रोऽभून्नन्दिवर्द्धनः ।
ततः (२)सुकेतुस्तस्यापि देवरातो महीपते ! ॥ १४ ॥

भाषा टीका ।

श्रीरुक्मिणीरमणो जयति ।

अब इस तेरहवें अध्याय में इक्ष्वाकु के पुत्र निमि का वंश कहते हैं कि जिस वंश में बडे २ ब्रह्मज्ञानी जनक प्रभृति राजा लोग हुए।

श्रीशुक उवाच ।

श्रीशुकदेवजी बोले, कि-इक्ष्वाकु के पुत्र निमिने यज्ञ का आरंभ करके वसिष्ठ महाराज को ऋत्विज स्वीकार किये, तब वसिष्ठजी ने कहा कि—हेनिमे ! पहिले इन्द्रने अपने यज्ञके लिये हम को वरण कर लिया है ॥ १ ॥

इस लिये उस यज्ञको संपूर्ण करके जब तक हम आवैं तब तक हमारी प्रतीक्षा करो, इतना सुनकर राजा भी चुप चाप रहा वसिष्ठजी भी इन्द्र का यज्ञ करते भये ॥ २ ॥

जब तक गुरुजी इन्द्र के यहां से नहीं आये तब तक राजा निमिने इस शरीर को चल जानकर और ही ऋत्विजों से यज्ञ का आरंभ करते हुए क्योंकि ! आत्मज्ञानी रहें ॥ ३ ॥

वसिष्ठजी भी इन्द्र के यज्ञ से निवृत्त होकर आये और आकर अपने शिष्य के व्यतिक्रम को देखकर अपने शिष्य निमि को यह शाप देते हुए कि पंडितमानी निमि का देह पतन होजाओ ॥ ४ ॥

तब निमि ने भी अधर्मवर्ती गुरुको शाप देदिया कि-" लोभ से धर्म को नहीं जानने वाले ऐसे तुमारे देह का भी पतन होजाओ ॥ ५ ॥

इस प्रकार शाप देकर निमि भी वसिष्ठ के शाप से देह को त्याग करते हुए क्योंकि अध्यात्म कोविद जो रहे। और वसिष्ठ जी भी उर्वशी में मित्रावरुण देव से उत्पन्न हुए । अर्थात् यज्ञ समय में उर्वशी के देखने से मित्र और वरुण के वीर्य पतन होने पर एक कुंभ में निषेक कर दिया तिससे फिर वसिष्ठ हुए इसी से मैत्रावरुणि कहाये ॥ ६ ॥

जब राजा निमि ने देह छोड दिया तब मुनि लोगों ने गंध वाली वस्तुओं में राजाके देह को धरवा दिया और यज्ञके समाप्त होने पर आये हुए देवों से ब्राह्मण लोग बोले, कि ॥ ७ ॥

हे देव लोगो ! यदि आप समर्थ लोग प्रसन्न हुए हों तो यह राजा का देह जी जावै देवों ने कहा कि " तथास्तु " [ऐसाई होवे] तब राजा निमि बोले, कि-नहीं मेरे लिये देह का बंधन मत होवे ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यस्य देहस्य योगं न वाञ्छन्त्यपितु मोक्षायैव भजन्ति ॥९॥१०॥

निमिर्विदेह एव सन्नुष्यतां वसतु कामं यथेच्छम् एवं सति युष्माभिः प्रार्थितं जीवितमस्य भविष्यति न च देहबन्ध इति भावः सचाध्यात्मसंस्थितो लोचनयोः स्थितः सन्नुन्मेषणनिमेषाभ्यां तत्प्रवर्त्तकत्वेन लक्षितोऽवर्त्तत इति शेषः ॥ ११ ॥

तदेवं मृतादपि निमेर्देहाद्वंशप्रवृत्तिं दर्शयति—अराजकभयमिति ॥ १२ ॥

(१) मोहभयाश्रयम् । (२) सुकेशः इति च वीर० पाठः ।

तस्माद्‌बृहद्रथस्तस्य महावीर्यः(१) सुधृतिपिता ।
सुधृतेर्धृष्टकेतुर्वै हर्यश्वोऽथ मरुस्ततः ॥ १५ ॥
मरोः प्रतीपकस्तस्माज्जातः कृतिरथो यतः ।
देवमीढस्तस्य सुतो (२)विश्रुतोऽथ महाधृतिः ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्यान्वर्थानि त्रीणि नामान्याह, जन्मनाऽसाधारणेन जन एव जनकः यद्वा स्वदेहद्वारा जनकत्वात्स निमिर्जनकोऽभूदित्यर्थः । मिथिला येन निर्मिता इत्यनेन व्युत्पत्त्यन्तरमर्थादुक्तम् ॥ १३ ॥ १४॥

सुधृत् सुधृतिस्तस्य पिता ॥ १५—२० ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्र हेतुं वदन्नाह-यस्येति।मुनयो वियोगभयकातराः देहयोगे सति पुनर्वियोगः स्यात् अतो वियोगभयदुःखोदर्कत्वात् पूर्वं यस्य देहस्य योगं न वाञ्छन्तीत्यर्थः।किन्तु हरिमेधसो भगवतः चरणाम्भोजमेव भजन्ते हरिराश्रितानां संसृतिबन्धं हरतीति तथा स चासौ मेधास्तेषाम् इष्टप्रापणानिष्टपरिहारोपयुक्तज्ञानवान् तस्य ॥ ९ ॥

देहमिति । अतोऽहं दुःखादिनिमित्तभूतं देहं नावरुरुत्से अवरोद्धुं गृहीतुं नेच्छामि यतो देहस्यावरोधादस्य देहिनः सर्वदा पुनः पुनरिति भावः।मृत्युरनुवर्त्तत इति शेषः । यथोदके वसतां मत्स्यादीनां मृत्युः पौनःपुन्येन तद्वदित्यर्थः ॥ १० ॥

इत्युक्ता देवा ऊचुः, तदेवाह—निमिर्विदेह एव सन् अध्यात्मसंस्थितः सूक्ष्मदेहस्थितिमान् कामं यथेच्छं शरीरिणां लोचनेषून्मेषनिमेषाभ्यां लक्षितस्तत्प्रवर्त्तकत्वेन सूचित उष्यतां स्थीयताम् एवञ्च युष्माभिः प्रार्थितमस्य जीवितमपि भविष्यति न च स्थूलदेहसम्बन्ध इति भावः ॥ ११ ॥

तदेवं मृतादपि निमेर्देहाद्वंशप्रवृत्तिं दर्शयति—अराजकभयमिति। नृणामराजकत्वनिमित्तं भयं मन्यमानाः सम्भावयन्तो ये महर्षयो निमेर्देहं ममन्थुः मथितवन्तः ततः कुमारः समजायत ॥ १२ ॥

तस्यान्वर्थानि त्रीणि नामान्याह—जननादिति । जननादितरसाधारणजन्मनो निमित्ताज्जनकपदाभिधेयो बभूव यद्वा स्वदेहद्वारा जनयितृत्वाज्जनकः विदेहः जीवविमुक्ताद्देहाज्जातत्वाद्विदेहाख्यः मन्थनाज्जातत्वान्मिथिलः येन मिथिलशब्दाभिधेयेन निर्मितत्वात्पुर्यपि मिथिलाख्या बभूवेत्यर्थः ॥१३॥

तस्मादिति । तस्मान्मिथिलादुदावसुर्व्यजायतेत्यनुषङ्गः । तस्योदावसोर्नन्दिवर्द्धनः पुत्रो बभूव ततो नन्दिवर्द्धनात् सुकेतुस्तस्यापि देवरातः पुत्रः हे महीपते ! ॥ १४ ॥

तस्माद्देवरातात् बृहद्रथः तस्य बृहद्रथस्य महावीर्यः तत्पुत्रं वदन् तं विशिनष्टि—सुधृतिपितेति । सुधृतस्य पुत्रस्य पितेत्यर्थः । सुधृतः पुत्रो धृष्टकेतुः अथ धृष्टकेतोर्हर्यश्वः ततो हर्यश्वान्मरुः ॥ १५ ॥

मरोः पुत्रः प्रतीपकः तस्मात्प्रतीपकात्कृतरथो जातः तं विशिनष्टि तत्पुत्रमाह—यतः कृतरथाद्देवमीढो जात इत्यनुषङ्गः तस्य देवमीढस्य सुतो विश्रुतः अथ विश्रुतान्महाधृतिः ॥ १६ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

किमिति देहबन्धो माभूदिति तत्राह—यस्येति । यस्य देहस्य योगं सम्बन्धम् यस्य वियोगभयेन कातराः व्यग्रचित्ताः हरिः भक्तजनतापहरणशीला मेधा धारणावती धीः "धीर्धारणावती मेधा" इत्यमरः । बुद्धिर्यस्य स तथा तस्य हरिवत्सूर्यवत्प्रकाशमाना मेधा यस्येति वा तस्य विष्णोः मुनयो वाचंयमाः ॥ ९ ॥

तं देहं नावरुरुत्से स्वीकर्तुं नेच्छामि दुःखं तीव्रवेदना शोकः मन्युः "मन्युशोकौ तु शुक् स्त्रियाम्" इत्यमरः । भयं सञ्चलनम् ततोऽपि देहग्रहणेच्छा नेत्याह—सर्वत्रेति ॥ १० ॥

अदेहस्याऽस्य वासः कथङ्घटते ? अधिष्ठानाद्यभावादिति तत्राह—लोचनेष्विति । लोचनेष्वस्य सद्भावः कथञ्ज्ञायते ? इति तत्राह—उन्मेषणेति । किमस्य कर्म ? इति तत्राह—अध्यात्मेति । परमात्मोपासना युक्तः ॥ ११-१२ ॥

नामनिर्वचनपूर्वकं जनकस्य वंशं कथयति—जननादित्यादिना । मथनेन जननमस्येत्यस्मिन्नर्थे मिथिलेति निपातनं शवानां शयनमस्मिन्निति श्मशानमितिवत् मिथिला पुरी ॥ १३ ॥ १४ ॥

सुधृतिपिता सुधृतो जनकः ॥ १५-१७ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ ९ ॥

अस्य वियोगो भविष्यतीति भयेन कातरा विक्लवात्मानः सन्तो यस्य योगमात्रं किमुत तत्सम्बन्धिनानाजन्म नानाजातीयसुखं न वाञ्छन्ति किन्तु भजन्ति केवलम् । ननु, चरणाम्भोजं भजन्तीति सेवा सुखेच्छा दर्शिता सेवा च देहं विना न सम्भवति, तर्हि कथं तदुपयुक्तं देहमपि न वाञ्छति ? नेत्याह, देहमिति । दुःखाद्यहमेव न कामये तदीयपरमसेवोपयुक्तदेहस्तु पार्षदरूप एव स च नित्यसुखात्मक एवेति भावः । आश्रयादिति पाठेऽपि स एवार्थः ॥ १० ॥

देवा ऊचुरिति देवास्तु यत्किञ्चिदेव समादधत् ऊचुरित्यर्थः । राज्ञो जीवतु देहोऽयामिति गुरुप्रार्थितस्य राज्ञा तन्निषेधस्य च करणेऽसङ्कटत्वापातात् तदीयपरमाभीष्टस्य च दातुं शक्यत्वादिति भावः ॥ ११ ॥

(१) सुधृतिपिता । (२) विधृतः इति च वीर० पाठः ।

कृतिरातस्ततस्तस्मान्महारोमाऽथ तत्सुतः।
स्वर्णरोमा सुतस्तस्य ह्रस्वरोमा व्यजायत ॥ १७ ॥
ततः सीरध्वजो जज्ञे यज्ञार्थं कर्षतो महीम्।
सीता सीराग्रतो जाता तस्मात्सीरध्वजः स्मृतः ॥ १८ ॥
कुशध्वजस्तस्य पुत्रस्ततो धर्मध्वजो नृपः।
धर्मध्वजस्य द्वौ पुत्रौ कृतध्वजमितध्वजौ ॥ १९ ॥
कृतध्वजात्केशिध्वजः खाण्डिक्यस्तु मितध्वजात्।
कृतध्वजसुतो राजन्नात्मविद्याविशारदः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

अराजक इति ततः स्ववाक्यं चात्यर्थं ते चक्रुरिति भावः ॥ १२-२७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

भजन्तीति देहाभावे चरणाम्भोजभजनासम्भवान्मम भगवत्पार्षददेहोऽस्त्विति प्रार्थनारूपो गूढो ध्वनिः ॥ ९ ॥

नावरुरुत्से न धर्तुमिच्छामि उदके उदकेऽपि जलचरादन्यस्मादन्यत्र स्थले स्वभावाच्च मृत्युरित्यर्थः देवा ऊचुरिति देहो जीवत्विति मुनीनां प्रार्थितं न जीवत्विति राज्ञः पार्षददेहो भवत्विति तृतीयप्रार्थितस्य दातुमशक्यत्वादुभयमेव दित्सन्त ऊचुरित्यर्थः ॥ १० ॥

निमिर्विदेह एव उष्यतां वसतु लक्षितो ज्ञातः सन् लोचनेषु अध्यात्मसंस्थित इत्याभ्यां जीवितं देहबन्धाभावश्चेत्युभयथा प्रार्थितं सेत्स्यतीति भावः ॥ ११—१२ ॥

जन्मना असाधारणेन जायत इति जनकः ॥ १३—१४ ॥

सुधृतेः पिता सुधृत्पिता ॥ १५-१७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

निमिर्विदेहः स्थूलदेहरहित एव अध्यात्मसंस्थितः सूक्ष्मदेहसंस्थितः शरीरिणां लोचनेषु उन्मेषणनिमेषाभ्यां स्वप्रयोज्याभ्यां प्रयोजकतया लक्षितः सूचितः कामं यथासुखम् उष्यतां स्थीयताम् एवं सति युष्मत्प्रार्थितमस्य जीवितं भवत्विति भावः ॥ ११ ॥

निर्जीवनिमिदेहात्तज्जन्माह-अराजकभयमित्यादिना ॥ १२ ॥

स च कुमारः अलौकिकेन जन्मना जन एव जनकसंज्ञः विगतः जीवसम्बन्धरहितो देहो यस्य स निमिर्विदेहः तज्जोऽपि विदेह उपचारात्तत्कुमारोऽपि विदेह इत्युच्यते मथनाज्जातो मिथिल संज्ञोऽभूत् ॥ १३—१४ ॥

सुधृतिपिता सुधृतेः पिता ॥ १५—२० ॥

भाषा टीका।

क्योंकि ? मुनिजन वियोग के भय से कातर होकर जिस देह के योग की इच्छा नहीं करते और श्रीहरि में बुद्धि को लगाकर श्रीहरि के चरण कंज को भजते हैं ॥ ९ ॥

इस कारण से मैं देह को नहीं स्वीकार करूंगा क्योंकि यह देह दुःख शोक और भय को देने वाला है और सब जगे इसकी मृत्यु है जैसे मत्स्य लोगों को जल में सर्वत्र मृत्यु है ॥ १० ॥

इतना वचन निमि का सुनकर—

देवाऊचुः ॥

देव लोग बोले कि—हे निमि महाराज ! तुम देह धारियों के लोचनों में वास करो और अध्यात्म संस्थित होकर निमिष उन्मेष द्वारा मालूम हुआ करो ॥ ११ ॥

तब महर्षि लोगों ने मनुष्यों को अराजक भय मानकर निमि के देह का मंथन किया तब निमि के शरीर से पुत्र उत्पन्न हुआ ॥ १२ ॥

जन्म लेने से वह जनक कहाया विना देह वाले से उत्पन्न हुआ इसीसे विदेहज कहाया और मथन से हुआ इसकारण मिथिल भी कहाया, जिनने मिथिलापुरी का निर्माण किया ॥१३॥

हे महीपते ! तिन से उदावसु हुए, तिनके पुत्र नंदिवर्द्धन हुए तिन से सुकेतु हुए तिनके भी देवरात हुए, ॥ १४ ॥

तिनसे बृहद्रथ हुए, तिनके महावीर्य, तिनसे सुधृति, सुधृति के धृष्टकेतु तिनसे हर्यश्व और मरु सुत हुए ॥ १५ ॥

मरु से प्रतीपक हुए तिनसे कृतिरथ उत्पन्न हुए, तिनसे देवमीढ तिनसे विश्रुत तिनके महाधृति ॥ १६ ॥

खाण्डिक्यः कर्मतत्त्वज्ञो भीतः केशिध्वजाद्द्रुतः ।
भानुमांस्तस्य पुत्रोऽभूच्छतद्युम्नस्तु तत्सुतः ॥ २१ ॥
शुचिस्तत्तनयस्तस्मात्सनद्वाजस्ततोऽभवत् ।
ऊर्ध्वकेतुः सनद्वाजादजोऽथ पुरुजित्सुतः ॥ २२ ॥
अरिष्टनेमिस्तस्यापि श्रुतायुस्तत्सुपार्श्वकः ।
ततश्चित्ररथो यस्य क्षेमधिर्मिथिलाधिपः ॥ २३ ॥
तस्मा (१) त्समरथस्तस्य सुतः (२) सत्यरथस्ततः ।
आसीदुपगुरुस्तस्मादुपगुप्तोऽग्निसम्भवः ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्य केशिध्वजस्य भानुमान् ॥ २१ ॥ २२ ॥
तत्तस्मात्सुपार्श्वकः ॥ २३ ॥
अग्निसम्भवोऽग्नेरंशात्सम्भूतः ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततो महाधृतेः कृतिरातः तस्मात्कृतिरातान्महारोमा जातः तत्सुतो महारोम्णस्सुतः स्वर्णरोमा तस्य स्वर्णरोम्णः ह्रस्वरोमा व्यजायत ॥ १७ ॥

ततो ह्रस्वरोम्णः सीरध्वजो जज्ञे तस्मिन् सीरध्वजशब्दप्रवृत्तौ निमित्तमाह—यतो ह्रस्वरोमस्य यज्ञार्थं महीं भुवं कर्षतः कर्षणतस्ततः सीराल्लाङ्गलाग्रात्सीता दाशरथेर्भार्या पूर्वं भूमिष्ठा सती जाता प्रादुर्भूता तस्मान्निमित्ताद्ध्रास्वरोमस्सीरध्वजशब्दाभिधेयो बभूव सीर एव ध्वजवत् ख्यातिहेतुर्यस्य स सीरध्वजः॥१८॥

तस्य सीरध्वजस्य पुत्रः कुशध्वजः ततः कुशध्वजात् धर्मध्वजः पुत्रः । हे नृप ! धर्मध्वजस्य द्वौ पुत्रौ, तौ च कृतध्वजमितध्वजाख्यौ ॥ १९ ॥

तत्र कृतध्वजात्केशिध्वजो बभूव मितध्वजात् खाण्डिक्यो जातः हे राजन् ! कृतध्वजसुतः केशीध्वजो ब्रह्मविद्यायां प्रवीणः ॥ २०॥

खाण्डिक्यस्तु कर्मयोगयाथात्म्यवित् स च केशिध्वजात् भीतो गतः तस्य केशिध्वजस्य सुतो भानुमान् पुत्रो बभूव तत्सुतो भानुमत्सुतः शतद्युम्नः ॥ २१ ॥

तस्मात् शतद्युम्नात् शुचिस्तनयो ऽभूत् ततः शुचेः सनद्वाजो ऽभवत् सनद्वाजादूर्ध्वकेतुः अथोर्ध्वकेतोरजः स च पुरुजित्सुतो यस्य तथाभूतः ॥ २२ ॥

तस्यापि पुरुजितोऽपि सुतो ऽरिष्टनेमिः तस्य श्रुतायुस्तस्य पार्श्वगः ततः पार्श्वगाच्चित्ररथः तस्य चित्ररथस्य क्षेमाद्रिः स च मिथिलाधिपः इदं पूर्वेषामपि विशेषणम् ॥ २३ ॥

तस्मात् क्षेमाद्रेः हेमरथस्सुतः तस्मात् कृत्यरथः तस्मादुपगुरुरासीत् तस्मादुपगुरोरुपगुप्तः स चाऽग्निसम्भवः अग्नेरंशात्सम्भूतः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सीता जननहेतुत्वेन सीरं ध्वजं गमकं ज्ञापकं यस्य स सीरध्वजः "ध्वज गतौ" इति धातुः ॥ १८-२६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

कर्षतो यस्य सीता रामपत्नी सीराग्रतो लाङ्गलाग्रतो जाता तस्मादेव हेतोः सीरमेवध्वजः कीर्तिव्यञ्जको यस्य सः ॥१८-२०॥
द्रुतः पलायितः ॥ २१ ॥
तस्य केशिध्वजस्य भानुमान् ॥ २२ ॥
तत् तस्य ॥ २३—२४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

केशिध्वजादात्मविद्याविशारदात् भीतः सन् द्रुतः अन्यत्र गतः तस्य केशिध्वजस्य भानुमान् ॥ २१-२२ ॥
तत्तस्मात् ॥ २३ ॥
अग्निसम्भवः अग्न्यंशादुत्पन्नः ॥ २४ ॥

भाषाटीका ।

तिनके कृतिरात तिनसे महारोमा तिनसे स्वर्णरोमा, तिनसे ह्रस्वरोम उत्पन्न हुए ॥ १७ ॥

तिनसे सीरध्वज उत्पन्न हुए यज्ञ के अर्थ पृथिवी का कर्षण करते रहे इतने में सीर [हल] के अग्र से सीता जो उत्पन्न हुई इस्से सीरध्वज कहावे ॥ १८ ॥

---

(१) हेमरथः ॥ (२) कृत्यरथः इति च वीर० पाठः ।

वस्वनन्तो ऽथ तत्पुत्रो युयुधो यत्सुभाषणः।
श्रुतस्ततो जयस्तस्माद्विजयोऽस्माहतः सुतः॥ २५॥
शुनकस्तत्सुतो जज्ञे वीतिहव्यो धृतिस्ततः।
बहुलाश्वो धृतेस्तस्य कृतिरस्य महावशी॥ २६॥
एते वै मैथिला राजन्नात्मविद्याविशारदाः।
योगेश्वरप्रसादेन द्वन्द्वैर्मुक्ता गृहेष्वपि॥ २७॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां नवमस्कन्धे निमिवंशानुवर्णनं नाम त्रयोदशोऽध्यायः॥ १३॥

भाषा टीका।

तिनके पुत्र कुशध्वज हुए, तिनसे धर्मध्वज नृप हुए, धर्मध्वज के दो पुत्र हुए कृतध्वज और मितध्वज॥ १९॥

कृतध्वज से केशिध्वज हुए, मितध्वज से खांडिक्य हुए, हे राजन्! कृतध्वज के पुत्र केशिध्वज ब्रह्मविद्या विशारद हुए, ॥२०॥

और खांडिक्य कर्म के तत्व को जानने वाले हुए पर केशिध्वज से भयभीत होकर भाग गये फिर केशिध्वज के पुत्र भानुमान् हुए तिन के पुत्र शतद्युम्न हुए, ॥ २१॥

तिनके तनय शुचि हुए तिन से सनद्वाज हुए, सनद्वाज से ऊर्द्धकेतु हुए तिनसे अज तिन से पुरुजित पुत्र हुए॥ २२॥

तिनके भी अरिष्ट नेमि हुए तिनके श्रुतायु हुए, तिनके पार्श्वक हुए तिन से चित्ररथ उत्पन्न हुए जिनके पुत्र क्षेमधि मिथिला के पति हुए॥ २३॥

तिन से समरथ हुए, तिनके सुत सत्यरथ हुए, तिनसे उपगुरु के अग्नि के अंश से होने वाले उपगुप्त हुए॥ २४॥

श्रीधरस्वामिकृतभावार्थदीपिका।

यद्यस्मात्सुभाषणः॥ २५॥ २६॥
योगेश्वरा याज्ञवल्क्यादयस्तेषां प्रसादेन॥ २७॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे श्रीधरस्वामिकृतभावार्थदीपिकायाम् त्रयोदशोऽध्यायः॥१३॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

तत उपगुप्ताच्छ्वसनः पुत्रोऽभवत् ततः सुवर्चाः यत् यस्मात् सुभाषणो जज्ञे ततः सुभाषणाच्छ्रुतो जज्ञे तस्माच्छ्रुतात् जयः तस्माज्जयाद्विजयः अस्य विजयस्य सुतो धृतः, ऋतः इति पाठान्तरम्॥ २५॥

तत्सुतो ऋतसुतः शुनकः अनघ इति पाठान्तरं ततो वीतिहव्यः ततश्च धृतिः धृतेर्विपुलाश्वः तस्य कृतिः तस्य कृतेः महावशी जज्ञे॥ २६॥

हे राजन्! एते कथिता मैथिलाः मिथिलवंशजाः आत्मविद्यायां विशारदाः योगीश्वरप्रसादेन भगवत्प्रसादेन गृहेषु सन्तोऽपि द्वन्द्वैः सुखदुःखादिभिर्विमुक्ता बभूवुः॥ २७॥

इतिश्रीमद्भागवते महापुराणे नवमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम् त्रयोदशोऽध्यायः॥ १३॥

श्रीमद्विजध्वजतीर्थकृतपदरत्नावली।

गृहेषु स्थिता अपि योगेश्वरस्य याज्ञवल्क्यस्य प्रसादेन जनकादयो द्वन्द्वैः शीतोष्णादिभावैः मुक्ता आत्मारामा इत्यर्थः॥२७॥

इतिश्रीमद्भागवते महापुराणे नवमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् त्रयोदशोऽध्यायः॥ १३॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे त्रयोदशोऽध्यायः॥ १३॥

श्रीमद्विश्वनाथचक्रवर्तीसारार्थदर्शिनी।

अग्निसम्भवः अग्न्यंशसम्भूतः यत् यस्य॥ २५—२७॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।
त्रयोदशोऽयं नवमे सङ्गतः सङ्गतः सताम्॥ १३॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

यद् यस्मात् ॥ २५-२७ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे त्रयोदशाऽध्यायार्थप्रकाशः ॥ १३ ॥

भाषा टीका।

तिन के पुत्र वज्रनंत हुए, तिनके पुत्र युयुधान तिनसे सुभाषण तिनसे श्रुत तिनसे जय तिनसे विजय तिन से ऋत पुत्र हुए, ॥ २५ ॥

तिनके शुनक हुए, तिनसे वीतिहव्य तिनसे धृति धृति से बहुलाश्व, तिनके कृति तिनके महावशी ॥ २६ ॥

हे राजन्! ये सब मैथिल राजा लोग आत्म विद्या में विशारद हुए और याज्ञवल्क्यादि योगेश्वरों के प्रसाद से सभी राजा लोग गृह में रहकर भी सुख दुःखादिद्वंद्वों से मुक्त हुए ॥ २७ ॥

इति श्रीमद्भागवत नवमस्कन्ध में त्रयोदशअध्याय की श्रीवृन्दावनस्थ पं० भागवताचार्यकृत-भाषा टीका समाप्ता ॥ १३ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे त्रयोदशोऽध्यायः ॥ १३ ॥

॥ चतुर्दशोऽध्यायः ॥

—०:*:०—

श्रीशुक उवाच ।

अथातः श्रूयतां राजन् ! वंशः सोमस्य पावनः ।
यस्मिन्नैलादयो भूपाः कीर्त्यन्ते पुण्यकीर्त्तयः ॥ १ ॥
सहस्रशिरसः पुंसो नाभिहृदसरोरुहात् ।
जातस्यासीत्सुतो धातुरत्रिः पितृसमो गुणैः ॥ २ ॥
तस्य दृग्भ्योऽभवत्पुत्रः सोमोऽमृतमयः किल ।
(१)विप्रौषध्युडुगणानां ब्रह्मणा कल्पितः पतिः ॥ ३ ॥
सोऽयजद्राजसूयेन विजित्य भुवनत्रयम् ।
पत्नीं बृहस्पतेर्दर्पात्तारां नामाहरद्बलात् ॥ ४ ॥
यदा स देवगुरुणा याचितोऽभीक्ष्णशो मदात् ।
नात्यजत्तत्कृते जज्ञे सुरदानवविग्रहः ॥ ५ ॥
शुक्रो बृहस्पतेर्द्वेषादग्रहीत्सासुरोडुपम् ।
हरो गुरुसुतं स्नेहात्सर्वभूतगणावृतः ॥ ६ ॥
सर्वदेवगणोपेतो महेन्द्रो गुरुमन्वयात् ।
सुरासुरविनाशोऽभूत्समरस्तारकामयः ॥ ७ ॥
निवेदितोऽथाङ्गिरसा सोमं निर्भर्त्स्य विश्वकृत् ।
तारां स्वभर्त्रे प्रायच्छदन्तर्वत्नीमवैत्पतिः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चतुर्दशादिभिः सोमवंशमाह समासितः ।
यस्मिन्नैलादयो भूपाः कीर्त्यन्ते पुण्यकीर्त्तयः ॥१॥
चतुर्दशे गुरोः पत्न्यां तारायां सोमजाद्बुधात् ।
जाताश्चैलाः षड्वंश्यामायुमुख्यानजीजनत् ॥ २ ॥
॥ १ ॥ २ ॥

दृग्भ्य आनन्दाश्रुभ्यः अत एवाऽमृतमयः किलेत्याश्चर्ये पाठान्तरे दृशो नेत्रात् वक्ष्यमाणदर्पकारणमाह विप्रेति ॥ ३ ॥

सोमस्य पुत्रो बुध इति कथाद्वारेणाह—पत्नीमिति सार्द्धैर्नवभिः ॥ ४ ॥

तत्कृतेन तन्निमित्तम् ॥ ५ ॥

सुराणां दानवानां च विग्रहे कारणमाह—शुक्र इति । असुरैः सहितः उडुपमग्रहीदित्यर्थः। सन्धिरार्षः गुरोः सुतं बृहस्पतिमग्रहीत् आङ्गिरसः सकाशात्प्राप्तविद्यो हर इति प्रसिद्धिः ॥ ६ ॥ ७ ॥

निवेदितो विज्ञापितः विश्वकृद्ब्रह्मा अवैदबुध्यत ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवं सूर्यवंशमनुवर्ण्याथ सोमवंशमनुवर्णयितुं प्रतिजानन् राज्ञः शुश्रूषामुत्पादयति मुनिः—अथेति । हे राजन् ! अथ सूर्यवंशवर्णनानन्तरं मया कथ्यमानः सोमवंशः श्रूयतां,त्वयेति शेषः। श्रोतव्यताख्यापनाय वंशं विशिनष्टि—पावन इति । तत्र हेतुमाह,

(१) विप्रौषध्यप्सुगर्भाणाम् इति विज० वीर० ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यस्मिन्निति । कीर्त्यत इति कीर्तनं यशः पुण्यं कीर्तनं येषां ते ऐला-दयः पुरूरवादयो नृपाः यस्मिन् सोमवंशे कीर्त्यन्ते ॥ १ ॥

तत्र वंशस्य पूर्वावधिं वक्तुं सोमोत्पत्तिं कथनारम्भ सहस्रशिरस इति । सहस्रं शिरांसि यस्य तस्य पुंसः अनिरुद्धरूपिणः परम-पुरुषस्य गर्भोदकेषु शयानस्य नाभिरेव ह्रदः तस्मिन् यदुत्पन्नं सरोरुहं जगत्पद्मं तस्माज्जातस्य धातुः चतुर्मुखस्य सुतोऽत्रि-रासीत् स चात्रिः गुणैः पितृसमः चतुर्मुखतुल्यः ॥ २ ॥

तस्मादत्रेः दृग्भ्यः आनन्दाश्रुभ्यः सोमश्चन्द्रः पुत्रोऽभवत् अत एवामृतमयः किलेत्याश्चर्ये पाठान्तरे दृशो नेत्रात्; न चैवं "चन्द्रमा मनसो जातः" इति श्रुतिविरोधः; तस्यैवात्र जन्मान्तर-कथनात्; वक्ष्यमाणदर्पस्य कारणं वदन् सोमं विशिनष्टि-विप्रेति, ब्रह्मणा सोमो विप्रादीनां पतिः कल्पितः कृतः पतित्वेन कृत इत्यर्थः अम्बुगर्भाः कुमुदादयः ॥ ३ ॥

यस्सोमो भुवनत्रयं विजित्य राजसूयेनायजत् सोमस्य पुत्रो बुध इति कथाद्वारेणाह—सार्द्धैर्नवभिः पत्नीमिति । बृहस्पतेः पत्नीं तारां नाम तारेतिप्रसिद्धां दर्पादुद्भवात्प्रसह्य हृतवान् ॥ ४ ॥

स सोमो यदा देवानां गुरुणा बृहस्पतिना पुनःपुनर्याचितोऽपि मदाद्दर्पात् नात्यजत्, तारामिति शेषः । तदा तत्कृते तन्निमित्तं देवानां दानवानां च विग्रहो द्वेषः जज्ञे ॥ ५ ॥

सुरासुराणां विग्रहजन्मप्रकारमाह—शुक्र इति । बृहस्पते-र्द्वेषात् शुक्रः सासुरः असुरैः सहितः उडुपम् उडूनि नक्षत्राणि पातीति तथा तं सोममग्रहीत् स्वपक्षपातिनमकरोदित्यर्थः । सन्धि-रार्षः तथा हरो रुद्रः सर्वैर्भूतगणैर्वृतः गुरोरङ्गिरसः सुतं बृह-स्पतिं स्नेहादग्रहीत् अङ्गिरसः सकाशात् प्राप्तविद्यो हर इति हि प्रसिद्धिः अतो गुरुसुतमित्युक्तम् ॥ ६ ॥

तदा सर्वैर्देवगणैरुपेतो महेन्द्रो गुरुं बृहस्पतिमन्वगात् अनु-ससार एवं स्थिते तदा सुराणामसुराणां च विनाशो यस्मात्समरः सङ्ग्रामः तारकामयः तारका तारा तस्याः निमित्तभूतायाः आगत-स्तारकामयः ततः आगत इत्यधिकारे मयट्चेति मयट् अभूत् बभूव ॥ ७ ॥

अथ सोमं निर्भर्त्स्य अङ्गिरसा विश्वसृट् ब्रह्मा विज्ञापितो बभूव ततस्तद्भयात्सोमस्तारां भर्त्रे बृहस्पतये प्रायच्छत् अदात् तदा पतिर्बृहस्पतिर्भार्यामन्तर्वर्त्नीं गर्भिणीमवैदबुध्यत आह चेति शेषः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अथ सूर्यवंशकथनानन्तरं यतो वंशज्ञानं पुरुषार्थसाधनमत इति हेत्वर्थः गुणविशिष्टपुरुषज्ञानमन्तरेण वंशज्ञानेन कथं पुरुषार्थः स्यात् ? इत्यतः क्षिप्रप्रवृत्त्यर्थं तद्वंश्यान् संक्षिप्याह-यस्मि-न्निति ॥ १ ॥ २ ॥

इयमेव वार्ता सर्वत्र नान्या सर्वैः सम्भाविता स सोम इति वा किलेत्युक्तम् "वार्ता सम्भाव्ययोः किल" इत्यमरः । यो देवो विप्राणामोषधीनाम् अम्बुगर्भाणां कुमुदादीनां पतिः पोषकः ॥ ३ ॥ ४ ॥

तत्कृते तारार्थम् ॥ ५ ॥

असुरैः सह वर्तमानः सासुर उडूनां नक्षत्राणां पतिः उडुपः शुक्रविशेषणं सासुर इति सन्धिश्छान्दसः बृहस्पतेर्द्वेषात् बृहस्प-तिविषयद्वेषात् हरः गुरुरङ्गिरास्तस्य सुतो बृहस्पतिस्तत्स्ने-हात् ॥ ६ ॥

सुरासुराणां विनाशो यस्मिन्स तथा तारकामयः तार-कार्थं विद्यमानः ॥ ७ ॥

अजो ब्रह्मा बृहस्पतिस्तारामाहेति शेषः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अथात इति । श्रुतपूर्वमीमांसान् प्रति "अथातो ब्रह्म जिज्ञासा" इति वत् स्वयं भगवदाविर्भावास्पदवंशकथनारम्भे माङ्गल्यायानन्तर्य-हेतुविशेषयोर्बोधनाय च सोमस्य तद्वंशधरस्यापि पावनो वंशः यद्वा सोमस्य उमासहचरस्य शिवस्यापि "यत्पादनिस्सृत-सरित्प्रवरोदकेन तीर्थेन मूर्द्ध्न्यधिकृतेन शिवः शिवोऽभूत्" इति वत् स्वयं भगवदाविर्भावात् अस्तु तावत्तत्सम्बन्धेन ताद-शत्वं स्वतोऽप्यन्तः प्रशस्तमित्याह यस्मिन्निति ॥ १ ॥

तदेतत् परमानन्दविलसितं तथैव मुहुर्घोषितमपि श्रीनारा-यणमारभ्य संहितुमारभते सहस्रेति ॥ २—६ ॥

सुरासुरयोर्विनाशो यस्मात्तादृशः तारकामयस्तारकाकारण इत्यर्थः ॥ ७—८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तारायां स्वगुरोः पत्न्यामिन्दुना जनिताद्बुधात् ।
जात ऐलः षड्वंश्यां पुत्रान् प्राप चतुर्दशे ॥
॥ १—२ ॥

दृग्भ्य आनन्दाश्रुभ्यः अत एवामृतमयः दृश इति च पाठः "अत्रेः पत्न्यनसूया त्रीन् जज्ञे सुयशसः सुतान् । सोमं दुर्वाससं दत्तमात्मेशब्रह्मसम्भवान्" इति चतुर्थोक्तेः । सा पुनस्तं स्वगर्भे दधारेति केचित् सङ्गकाले आनन्दाश्रूण्यपि तस्या-माधत्तेत्यन्ये पत्युः पुत्रत्वेन तस्या एव सुत इत्यपरे ॥ ३—५ ॥

सासुरः असुरैः सहितः उडुपं चन्द्रमग्रहीत् तस्यैव पक्षे बभूव सन्धिरार्षः गुरुसुतमिति अङ्गिरसः सकाशात् प्राप्तविद्यो हर इति प्रसिद्धिरिति श्रीस्वामिचरणाः ॥ ६—७ ॥

अजो ब्रह्मा सोमं निर्भर्त्स्य तस्मात् सकाशात् तारां निष्कास्य स्वभर्त्रे बृहस्पतये स च पतिः ताम् अन्तर्वर्त्नीं गर्भ-वतीम् अवैत् ज्ञातवान् ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अथ सोमवंशमेकादशभिरध्यायैर्वर्णयति तत्र नारायणब्रह्मादि-क्रमेण पुरूरवसो जन्म चरित्रं पुत्रांश्चाह—अथात इति चतुर्दशेन ॥ १—२ ॥

दृग्भ्यः आनन्दाश्रुभ्यः सोमः पुत्रोऽभूत् अत एवामृतमयः ॥३॥

(१) त्यज त्यजाशु दुष्प्रज्ञे ! मत्क्षेत्रादाहितं परैः ।
नाहं त्वां भस्मसात्कुर्यां स्त्रियं (२) सान्तानिकः सति ॥ ९ ॥
तत्याज व्रीडिता तारा कुमारं कनकप्रभम् ।
* तस्यां जज्ञे दस्युहन्ता कुमारः कनकप्रभः ॥ ० ॥)
स्पृहामाङ्गिरसश्चक्रे कुमारे सोम एव च ॥ १० ॥
ममायं न तवेत्युच्चैस्तस्मिन्विवदमानयोः ।
पप्रच्छुर्ऋषयो देवा नैवोचे व्रीडिता तु सा ॥ ११ ॥
कुमारो मातरं प्राह कुपितोऽलीकलज्जया ।
किन्न वोचस्यसद्वृत्ते ! आत्मावद्यं वदाशु मे ॥ १२ ॥
* (न त्वां तु भस्मसात्कुर्यामात्मावद्यविगूहनीम् ॥ ० ॥)
ब्रह्मा तन्तु विनिर्भत्स्य क्षेप्तारं मातुरन्तिके ।
तामाहूय समप्राक्षीद्रह एव तु सान्त्वया ॥ ०)
ब्रह्मा तां रह आहूय समप्राक्षीच्च सान्त्वयन् ।
सोमस्येत्याह शनकैः सोमस्तं तावदग्रहीत् ॥ १३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सोमस्य सुतो बुधोऽभूदिति कथाद्वारेणाह–सोऽयजादिति,सार्द्धैर्नवभिः ॥ ४ ॥

तत्कृते तन्निमित्ते सुरदानवविग्रहो जज्ञेऽभूत् ॥ ५ ॥

सासुरः शुक्रः उडुपं चन्द्रमग्रहीत् सासुरोडुपमित्यत्र सन्धिरार्षः हरः गुरोः अङ्गिरसः सुतं बृहस्पतिमग्रहीत् ॥ ६ ॥

तारका तारा एव आमयः नाशहेतुर्यस्मिन् सः ॥ ७ ॥

अजो ब्रह्मा अङ्गिरसा निवेदितो विज्ञापितः पतिः बृहस्पतिः अन्तर्वत्नीम् गर्भवतीम् अबुध्यत ॥ ८ ॥

भाषा टीका ।

श्रीरुक्मिणीरमणो जयति ।

श्रीशुक उवाच ॥

श्रीशुकदेवजी, बोले, कि—हे राजन् ! अब यहां से आगे चन्द्र का पवित्र वंश सुनो, जिसमें पुण्य कीर्ति ऐल आदिक भूप कीर्त्तन किये जाते हैं ॥ १ ॥

सहस्रशीर्षा पुरुष के नाभि रूप सरोवर से कमल हुआ, तिस से उत्पन्न होने वाले ब्रह्माजी से अत्रि महर्षि हुए गुणों से पिता के समान हुए ॥ २ ॥

उन अत्रि ऋषि के नेत्रों से अमृतमय चन्द्रमा पुत्र उत्पन्न हुए ब्रह्माजी ने ब्राह्मणों का सम्पूर्ण औषधियों का और तारागणों का उनको पति बनाया ॥ ३ ॥

चन्द्रमा ने राजसूय यज्ञ करके त्रिलोकी को जीतकर गर्व से बृहस्पति के पत्नी तारा को बलात्कार हरण कर लिया ॥ ४ ॥

जब सब देवों के गुरू बृहस्पति ने बारम्बार चन्द्रमा से अपनी भार्या की याचना भी करी तौ भी मद के जोर से उसने नहीं दीनी इसी कारण देव और दानवों में बडा भारी विरोध भया ॥ ५ ॥

शुक्राचार्य बृहस्पति के द्वेष से असुरों के सहित चन्द्रमा के सहायता के लिये खडे हुए, और हर भी अपने गुरु अंगिरा के पुत्र बृहस्पति के स्नेह से सब भूतगणों को संग लेकर इन के पक्ष पर खडे हुए ॥ ६ ॥

सम्पूर्ण देवताओं को संग लेकर महेन्द्र अपने गुरु के संग हुए उस समय तारका मय संग्राम बडा भारी हुआ जिसमें बहुत देव दानवों का विनाश भया ॥ ७ ॥

जब बृहस्पति ने ब्रह्माजी से इन सब वातों को निवेदन किया तब ब्रह्माजी ने चन्द्रमा को बहुत धमकाये, फिर चन्द्रमा ने तारा को बृहस्पति के लिये दीनी तारा के पति बृहस्पति जी उसको गर्भवती जान गये ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

बृहस्पतिराह–त्यज त्यजेति । परैराहितं गर्भं; गर्भे त्यक्ते भस्मीकरिष्यतीति बिभ्यतीं प्रत्याह—नाहमिति । सान्तानिकः सन्तानार्थी सान्तानिकेति पाठे हे सत्पुत्रे इत्यर्थः ॥ ९-१२ ॥

(१) गर्भं त्यजाशु इति वीर० पाठः । (२) सान्तानिकेऽसति इति वीर० विजय० * इमे श्लोका विजयध्वजतीर्थ पाठाः ।

तस्यात्मयोनिरकृत बुध इत्यभिधां नृप ! ।
बुद्ध्या गम्भीरया येन पुत्रेणापोडुराण्मुदम् ॥ १४ ॥
ततः पुरूरवा जज्ञे इलायां य उदाहृतः ।
तस्य रूपगुणौदार्यशीलद्रविणविक्रमान् ॥ १५ ॥
श्रुत्वोर्वशीन्द्रभवने गीयमानान् सुरर्षिणा ।
तदन्तिकमुपेयाय देवी स्मरशरार्दिता ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

रहः एकान्ते ॥ १३ ॥

पुरूरवस उर्वश्यामायुप्रमुखाः षट् पुत्रा जाता इति वक्तुं कथामाह–तस्येत्यादिना यावत्समाप्ति ॥ १४–१६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवाह–गर्भमिति । हे दुष्प्रज्ञे ! मत्क्षेत्रभूतायां त्वयि परैराहितं हेतुगर्भमिदं परैराहितत्वादाशु गर्भं त्यज; गर्भे त्यक्ते भस्मीकरिष्यतीति बिभ्यतीं प्रत्याह–नाहमिति । सान्तानिके सन्तत्याध्यायके पुत्रे असति अविद्यमाने सति अहं स्त्रियं त्वां न भस्मसात्कुर्यां न भस्मीकरोमीति ॥ ९ ॥

ततो व्रीडिता लज्जिता तारा जनकस्य चन्द्रस्येव प्रभा यस्य तं कुमारं तत्याज प्रसूतवती ततः तस्मिन् कुमारे अङ्गिरसो बृहस्पतिः सोमश्च स्पृहाञ्चक्रे क्षेत्रत्वाद्वीर्यजत्वाच्चेत्युभयत्र हेतुद्वयं बोध्यम् ॥ १० ॥

एवं स्पृहया ममैवायं सुतो न तवेत्येवं तस्मिन् पुत्रनिमित्तमुच्चैरङ्गिरससोमयोर्विवदमानयोः ऋषयो देवाश्च पप्रच्छुस्तामिति शेषः । तदा व्रीडिता सा तारापि नैवोचे नोवाच ॥ ११ ॥

ततो मातरं तारां कुमारः क्रुद्धः प्राह–किमिति ? हे असद्वृत्ते ! त्वं व्यर्थया लज्जया मिथ्या लज्जया वा किं नावोचः नोक्तवती अधुना कस्यापत्यं पुत्रः,अहमिति शेषः । तन्मे मह्यं वदेति । अत्र "न त्वान्तु भस्मसात्कुर्यामात्मावद्यविगूहिनीम्" इति क्वचित्पठ्यते आत्मावद्यमात्मदोषं विगूहन्त्याच्छादयन्ती तथा तां शेषं स्पष्टम् ॥ १२ ॥

एवं मातुः समीपे निर्भर्त्स्यांधिक्षेप्तारं तं कुमारं वीक्ष्य ब्रह्मा चतुर्मुखः रह एकान्ते तां ताराम् आहूय सान्त्वयन् अनुनयन् समप्राक्षीत् कस्याऽयं सुत इति पृष्टवान्, पृष्टा च सा शनकैः लज्जया शनैः सोमस्येत्याह–चन्द्रस्य सुत इत्युवाच ततः सोमः तं सुतमग्रहीत् ब्रह्मणा अनुज्ञातोऽगृह्णात् ॥ १३ ॥

हे नृप ! आत्मयोनिः ब्रह्मा तस्य कुमारस्य बुध इत्यभिधां नामधेयं चक्रे, तस्य प्रवृत्तौ निमित्तमाह–बुद्ध्येति । उडुराट् चन्द्रः येन यतो गम्भीरया बुद्ध्या पुत्रेण हेतुना मुदं हर्षमाप प्राप्तवान् ततोऽयं बुध इति ॥ १४ ॥

ततो बुधात्पुरूरवाः जातः, कोऽसौ? य इलायां सुद्युम्नः स्त्रीरूपे उक्तः जात इत्युक्तः प्रथमाध्याये सोऽयमित्यर्थः । पुरूरवस ऊर्वश्यामायुःप्रमुखाः पुत्रा जज्ञिरे इति वक्तुं कथामाह–तस्येत्यादिना यावदध्यायसमाप्ति । तस्य पुरूरवसो रूपादीन् इन्द्रभवने सुरर्षिणा नारदेन गीयमानान् श्रुत्वा उर्वशी देवी स्मरशरार्दिता कामार्त्ता तस्य पुरूरवसः समीपमुपेयाय आजगाम तत्र रूपं सौन्दर्यम् औदार्यं वदान्यता शीलं सुस्वभावः सद्वृत्तिश्च द्रविणं धनं विक्रमः पराक्रमः गुणशब्देन गाम्भीर्यधैर्यादिसङ्ग्रहः ॥ १५ ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मत्क्षेत्रात्सद्गर्भं त्यज कुत इति तत्राह–आहितमिति । सान्तानिके पुत्रे तस्मिन् कुमारे ॥ ९–११ ॥

अश्लीकलज्जयाऽनृतनिमित्तलज्जया न वोचसि न कथयसि असद्वृत्ते दुराचारे ! अमङ्गलस्वरूपे ! वा "वृत्तं स्वरूपे चरिते वृत्तं छन्दो विधासु च" इति. किं वक्ष्यामि ? इति तत्राह–पितरमिति । आत्माऽवद्यविगूहनीमित्यनेन भस्मीकरणायोग्यत्वे सूचितेऽपि मातृशब्दवाच्यार्हत्वात् भस्मसान्न कुर्यामिति वक्ति ॥ १२ ॥

सान्त्वया वाचा तारा जनकं वक्तीत्याह–सोमस्येति ॥१३॥

तं कुमारम् आत्मा परमात्मा योनिर्जनको यस्य स तथा नामकरणे निमित्तमाह, बुद्ध्येति ॥ १४ ॥

उदाहृतः पूर्वमिति शेषः ॥ १५ ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

त्यज त्यजेति गृहागमनानन्तरं गुरुवचनम् ॥ ९ ॥ १० ॥

ममायं न तवेति तु पुनः समागमने द्वयोर्विवादः तस्मिन् पुनर्जाते सदसि ॥ ११–१७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

बृहस्पतिरुवाच–त्यज त्यजेति । परैराहितं गर्भं मत्क्षेत्रादस्मात्यज दूरीकुरु । गर्भे त्यक्ते मां भस्मीकरिष्यतीति बिभ्यतीमाश्वासयन्नाह–नाहमिति । सान्तानिकः सन्तानार्थी त्वयि सन्तानमुत्पादयितुमना अस्मि इत्यर्थः । सान्तानिके इति पाठे सम्बोधनम् ॥ ९–११ ॥

आत्मनोऽवद्यं दोषं किं न वदसि ॥ १२ ॥

रह एकान्ते ॥ १३—१६ ॥

मित्रावरुणयोः शापादापन्ना नरलोकताम् ।
निशाम्य पुरुषश्रेष्ठं कन्दर्पमिव रूपिणम् ॥ १७ ॥
धृतिं विष्टभ्य ललना उपतस्थे तदन्तिके ।
स तां विलोक्य नृपतिर्हर्षेणोत्फुल्ललोचनः ।
उवाच श्लक्ष्णया वाचा देवीं हृष्टतनूरुहः ॥ १८ ॥

राजोवाच ।

स्वागतं ते वरारोहे ! आस्यतां करवाम किम् ।
संरमस्व मया साकं रतिर्नौ शाश्वतीः समाः ॥ १९ ॥

उर्वश्युवाच ।

कस्यास्त्वयि न सज्जेत मनो दृष्टिश्च सुन्दर ! ।
यदङ्गान्तरमासाद्य च्यवते ह रिरंसया ॥ २० ॥
एतावुरणकौ राजन् ! न्यासौ रक्षस्व मानद ! ।
संरंस्ये भवता साकं श्लाघ्यः स्त्रीणां वरः स्मृतः ॥ २१ ॥
घृतं मे वीर ! भक्ष्यं स्यान्नेक्षे त्वाऽन्यत्र मैथुनात् ।
विवाससं तत्तथेति प्रतिपेदे महामनाः ॥ २२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

बृहस्पतिराह-हे दुष्प्रज्ञे ! परैराहितं गर्भं त्यज त्यज सान्तानिकः सन्तानार्थी ॥ ९ ॥ ११ ॥

हे असद्वृत्ते ! आत्मावद्यम् अलीकलज्जया वृथा लज्जया। किं नावोचसि ॥ १२ ॥

रहः एकान्ते ॥ १३—१७ ॥

भाषा टीका ।

तब बृहस्पति ने कहा कि हे दुष्प्रज्ञे ! [हे दुष्ट बुद्धि वाली !] दूसरे का निक्षिप्त गर्भ को हमारे क्षेत्र से शीघ्र ही त्याग कर, नहीं तो तेरे को मैं अपने क्रोधाग्नि से भस्म करूंगा जिससे मैं संतानार्थी नही हूं ॥ ९ ॥

लज्जित होकर तारा ने कनकसदृश कांति वाला पुत्र अपने गर्भ से त्याग किया उस कुमार में बृहस्पति और चंद्रमा दोनों स्पृहा किये ॥ १० ॥

यह पुत्र हमारा है तुमारा नही है ऐसे बडे जोर से कह २ कर दोनों परस्पर में विवाद किये, तब सब ऋषि और देवता तारा से पूछे कि यह कुमार किसका है तब लज्जा से उनने नही बतलाया ॥ ११ ॥

फिर कुमार ने कोप सहित माता से पूछा कि हे असद्वृत्ते ! अपने किये हुए दोष को तू क्यों नहीं कहती हमसे शीघ्र बताओ ॥ १२ ॥

इसके अनंतर ब्रह्माजी ने एकांत में बोलाकर बहुत सांत्वन पूर्वक उससे पूछा तब उनने चन्द्रमा का है इस प्रकार धीरे से कहा, उस कुमार को चन्द्रमा ने ग्रहण किया ॥ १३ ॥

हे राजन् ! आत्मयोनि ब्रह्माजी ने उनका बुध ऐसा नाम करण किये जिनके बुद्धि वा गंभीरता देखकर पुत्रको प्राप्त होकर चंद्रमा बडे प्रसन्न हुए ॥ १४ ॥

उनसे इलामें पुरूरवा उत्पन्न हुए जिनको कहि आये, उनके रूप गुण उदारता शील द्रव्य पराक्रमों को ॥ १५ ॥

इंद्रके भवन में नारदजी से सुनकर उर्वशी काम के बाणों से विद्ध होकर उनके पास में आई ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, देवी कुतो मनुष्यान्तिकमुपागच्छेत्तत्राऽऽह—मित्रावरुणयोः शापान्नरलोकतां मनुष्यभावमापन्ना सती ॥ १७ ॥ १८ ॥

नौ आवयोः रतिरस्त्विति ॥ १९ ॥

यस्य तवाङ्गान्तरं वक्ष आसाद्य रिरंसया रन्तुमिच्छया ह स्फुटं न च्यवते नापयाति अकस्मादपि वा ॥ २० ॥

अहो रूपमहो भावो नरलोकविमोहनम् ।
को न सेवेत मनुजो देवीं त्वां स्वयमागताम् ॥ २३ ॥
तया स पुरुषश्रेष्ठो रमयन्त्या यथार्हतः ।
रेमे सुरविहारेषु कामं चैत्ररथादिषु ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

शापावसाने भाषाभङ्गमिषेण जिगमिषोस्तस्या भाषाबन्धमाह-एताविति, द्वाभ्याम् । उरणकौ मेषौ न्यासौ निक्षेपरूपौ रक्षस्व यः श्लाघ्यः स एव स्त्रीणां वरः स्मृतः अतो विजातीयत्वं न दोष इति भावः ॥ २१ ॥

हे वीर ! घृतं मे भक्ष्यं स्यात् "अमृतं वा आज्यम्" इति श्रुतेः । देवानां चामृताशित्वात् मैथुनादन्यत्र विवाससं त्वां नेक्षिष्ये इति प्रतिपेदेऽङ्गीकृतवान् ॥ २२ ॥

तदेवाह-अहो इति ॥ २३ ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु, देवी कुतो मनुष्यान्तिकमुपगच्छेत् ? तत्राह-मित्रावरुणयोरिति । मित्रावरुणयोः शापात् नरलोकतां मनुष्यभावमापन्ना प्राप्ता सती नरलोकवासित्वं वा प्राप्ता इत्यर्थः । सा च ललना ऊर्वशी कन्दर्पमिव रूपिणं सुन्दरं पुरुषश्रेष्ठं पुरूरवसं निशाम्य दृष्ट्वा धृतिं धैर्यं विष्टभ्यावलम्ब्य तस्य पुरूरवस अन्तिके समीपे उपतस्थे स्थितवती ततः स नृपतिः पुरूरवास्तां ललनां विलोक्य हर्षेणोत्फुल्ले विकसिते लोचने यस्य हृष्टानि उदञ्चितानि तनूरुहाणि रोमाणि यस्य तथाभूतः श्लक्ष्णया मृद्व्या वाचा देवीमूर्वशीमुवाच ॥१७ ॥ १८ ॥

तदेवाह-स्वागतमिति । हे वरारोहे ! ते त्वया स्वागतं हि? आस्यताम् उपविश्यतां किङ्करवाम त्वच्छिष्येण वयमित्यर्थः । मया सह मङ्गच्छस्व सङ्गता भव नौ आवयोः शाश्वतीः समाः रतिरस्तु इति ॥ १९ ॥

एवमुक्तोर्वश्याह-कस्या इति । हे सुन्दर ! त्वयि कस्याः स्त्रियः मनो दृष्टिश्च न सज्जेत सर्वस्या अपि मनो दृष्टिश्च सज्जेतैवेत्यर्थः । आपन्नौ हेतुं वदन् विशिनष्टि—यस्य तवाङ्गान्तरं वक्षो रिरंसया रन्तुमिच्छया आसाद्य प्राप्य नारी न च्यवते नापयाति यद्यस्मादिति वा यदङ्गान्तरमासाद्येति पाठान्तर तदा रमाः श्रीः सौन्दर्यलक्ष्मीरिति यावत् सा रन्तुमिच्छयेह त्वच्छरीरे आसाद्य यत् यस्य तवाङ्गात् पुनः न च्यवते नापयातीत्यर्थः ॥ २० ॥

मित्रावरुणशापावसानं भाषाभङ्गमिषेण जिगमिषोस्तस्या भाषाबन्धमाह—एताविति द्वाभ्याम् । हे राजन् ! एतावुरणकौ मेषौ न्यासौ निक्षेपरूपौ न्यस्ताविति पाठे मयेति शेषः । मया त्वदन्तिके निहिताविल्यर्थः । मम पुत्रतुल्याविमावित्यभिप्रायः । पुत्रयोर्नीयमानयोर्हतापत्या चेति च वक्ष्यमाणत्वात् तौ रक्षस्व पालय तद्रक्षणमेवास्मत्सम्माननमित्यभिप्रायेण सम्बोधयति—हे मानदेति । भवता सहाऽहं रंस्ये यावदिमौ भवान् रक्षिता तावदिति शेषः । यः श्लाघ्यः स एव स्त्रीणां वरः स्मृतः ॥ २१ ॥

हे वीर ! घृतममृतं मम भक्ष्यं स्यात् "अमृतं वा आज्यम्" इति श्रुतेः । मैथुनात् मैथुनकालादन्यत्र काले त्वां विवाससं नग्नं नेक्षे यदा त्वं विवाससमात्मानं मैथुनादन्यत्र दर्शयिष्यसि तदा गमिष्यामीतिभावः । एवं कृतं तया भाषाबन्धनं तथैवास्त्विति महामनाः पुरूरवाः प्रतिपेदे अङ्गीचकार ॥ २२ ॥

तदेवाह—अहो इति । अहो अत्याश्चर्यं तवेदं रूपं सौन्दर्यं भावोऽभिप्रायविशेषश्च नरलोकविमोहनं नरलोकं विमोहयति तथा तदुभयमिति शेषः । अतस्त्वां स्वयमागतां देवीं को नु मनुजो न सेवेत सर्वोऽपि मनुजः सेवेतैवेत्यर्थः ॥ २३ ॥

तयेति ततस्तया यथायोग्यं रमयन्त्या क्रीडयन्त्या ऊर्वश्या सह पुरुषश्रेष्ठः पुरूरवाः सुरा विहरन्त्येषु इति तथा तेषु चैत्ररथप्रभृतिषु आदिशब्देन नन्दनपारिभद्रादिसङ्ग्रहः कामं यथेष्टं रेमे ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आगमने कारणान्तरमाह—मित्रेति ॥ १७ ॥ १८ ॥

नौ आवयोः शाश्वतीः समाः बहून् संवत्सरान् रतिः ग्राम्यविषया क्रीडाऽस्तु ॥ १९ ॥

मनोहरत्वे निमित्तमाह—यदङ्गादिति । रमा यस्य हरेरङ्गात् याति न च्यवते नित्यश्रितवक्षःस्थलत्वात् स हरिस्तवाश्रयो दृष्ट इत्यन्वयः । लक्ष्मीकान्तस्य सन्निधिपात्रत्वादित्यर्थः ॥ २० ॥

उरणकौ मेषौ न्यस्तौ निक्षेपकल्पनया स्थापितौ तस्माद्रक्षस्व संरंस्ये सम्यक् त्वया सह रतिं करिष्ये अस्माकमियमेव व्रतक्लृप्तिरित्याह—श्लाघ्य इति । यः श्लाघ्यः कमनीयः स एव स्त्रीणां वरः पतिरित्यन्वयः ॥ २१ ॥

समयं बध्नाति—नेक्ष इति । मैथुनादन्यत्र सुरतसमयमन्तरेण त्वां विवाससं नग्नं नेक्षे न पश्याम्यन्यथेतो गमिष्यामीति शेषः । पुरूरवा उत्तरमाह—तथेतीति । एवमुक्तं तथेति प्रतिपेदे अभ्युपगतवान् ॥ २२ ॥

तस्येङ्गितं हर्षोल्लासं दर्शयति—अहो इति । भावं शृङ्गारादिकं न रीयन्त इति नरा अमरास्तेषां लोकः समूहः तमपि विमोहयतीति नरलोकविमोहनम् एवंविधां त्वाम् ॥ २३ ॥

सुराणां विहारो येषु ते तथा तेषु ॥ २४ ॥ २५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

धृतिं विष्टभ्य तद्दर्शनेन जातस्तम्भादिविकारस्तम्भनाय धैर्यमवलम्ब्य ॥ १८ ॥ १९ ॥

रममाणस्तया देव्या पद्मकिञ्जल्कगन्धया ।
तन्मुखामोदमुषितो मुमुदेऽहर्गणान् बहून् ॥ २५ ॥
अपश्यन्नुर्वशीमिन्द्रो गन्धर्वान् समचोदयत् ।
उर्वशीरहितं मह्यमास्थानं नातिशोभते ॥ २६ ॥
त उपेत्य महारात्रे तमसि प्रत्युपस्थिते ।
उर्वश्या उरणौ जह्रुर्न्यस्तौ राजनि जायया ॥ २७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मनो हृष्टिश्च न च्यवत इति पूर्वेणैवान्वयः ॥ २०-२७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

मित्रावरुणयोस्तद्दर्शनजनितकामविकारयोः ऊर्वशि! त्वं मानुषीव मनुष्यभुक्ता भवेत्यभिशापात् नरलोकतां नरलोकम् ॥ १७-१८ ॥

नौ रतिरस्तु ॥ १९ ॥

यद्यस्मात् अङ्ग हे राजन्! अन्तरं रहसि अवकाशम् आसाद्य प्राप्य रिरंसया मनश्च्यवते विकृतीभवति ॥ २० ॥

शापाऽवसानमिषेण स्वर्गं जिगमिषोस्तस्या भाषावन्धमाह, एताविति द्वाभ्याम् । उरणकौ मेषौ न्यासौ निक्षेपरूपौ रक्ष, यः श्लाघ्यः स एव स्त्रीणां वरः स्मृत इति विजातीयत्वं स्त्रीणामस्माकं न दोष इति भावः ॥ २१ ॥

घृतं मे भक्ष्यमिति "अमृतं वा आज्यम्" इति श्रुतेर्देवानां चामृताशित्वात् त्वा त्वां तत्तस्या वचनं तथास्त्विति प्रतिपेदे अङ्गीकृतवान् ॥ २२ ॥

भावो भावग्राहादिः ॥ २३—२५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विष्टभ्य आलम्ब्य ॥ १८ ॥

नौ आवयोः रतिर्भवतु ॥ १९ ॥

त्वयि मनो दृष्टिश्च कस्याः स्त्रियः न सज्जेत अपि तु सर्वासां सज्जेतैव यस्य तव अङ्गान्तरं वक्षः आसाद्य रिरंसया रन्तुमिच्छया मनो दृष्टिश्च ह स्फुटं न च्यवते नापयाति ॥ २० ॥

मित्रावरुणशापावसाने भाषाबन्धमिषेण पुनः स्वर्लोकं गन्तुकामायाः भाषाबन्धमाह—एताविति द्वयेन । उरणकौ मेषौ निक्षेपरूपौ रक्ष पालय भवता सह संरंस्ये यावदिमौ भवान् रक्षितेति शेषः ॥ २१ ॥

घृतं मे भक्ष्यं स्यात् "अमृतं वा आज्यम्" इति घृतस्यामृतत्वश्रवणात् मैथुनान्मैथुनकालादन्यत्र त्वा विवासस नेक्षे न निरीक्षिष्ये यदा मैथुनकालादन्यत्र विवाससमात्मानं त्वं दर्शयिष्यसि तदा गमिष्यामीति भावः तद्भाषाबन्धवाक्यं तथेति तथाऽस्त्विति प्रतिपेदे स्वीकृतवान् ॥ २२ ॥

तदेवाह—अहो इति ॥ २३ ॥ २४ ॥

भाषा टीका ।

मित्रा वरुण के शाप से मनुष्य लोक को प्राप्त हुई, कंदर्प समान रूपवान पुरुषश्रेष्ठ पुरूरवा को देखकर मोहित होगई ॥ १७ ॥

धैर्य को धारण कर वह ललना उनके पास आई उसको देख कर बडे हर्ष के मारे राजा के नेत्र विकसित होगये और शरीर में रोमाञ्च होगये और बडे प्रेम पूर्वक उस देवी से वचन बोले ॥ १८ ॥

राजोवाच ॥

राजा बोले, कि–हे वरारोहे! तुमारा आवना बहुत अच्छा हुआ, आवो तुमारे लिये हम क्या करें। हमारे सहित बहुत काल पर्यन्त रमण करो ॥ १९ ॥

उर्वशीबोली, कि– हे सुन्दर! कौन ऐसी कामिनी होगी जिसका चित्त आपमें आसक्त नहो आपके वक्षस्थल को प्राप्त होकर कौनका मन विहार करने से हट सके ॥ २० ॥

परन्तु हेराजन्! हे मानद! हमारा धरोहर इन दोनो भेडाओं को आप रक्षा करो, स्त्रियों के सदा प्रिय होकर रहने वाले आपके सङ्ग में रमण करूंगी ॥ २१ ॥

हे वीर! हमारा भक्ष्य केवल घृत है और मैथुन के समयको छोडकर अन्य समय मे तुमको नग्न नहीं देखसकी हूं इनतीन वचनों को सुनकर राजा ने अङ्गीकार करलिया ॥ २२ ॥

और पुरूरवा उर्वशी के रूप को देखकर आश्चर्य पूर्वक बोले, कि–हे देवि! मनुष्य लोक को अति मोहोत्पादक तुम्हारा रूप वा भाव आश्चर्यमय है, अपने से ही आई हुई तुम्हे कौन मनुज नहीं सेवन करेगा? ॥ २३ ॥

इस प्रकार पुरुषश्रेष्ठ पुरूरवा ने देवों के चैत्ररथादि विहार भूमियों में यथेच्छ रमण कराने वाली उर्वशी के सङ्ग रमण करने लगे ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पद्मकिञ्जल्कस्य गन्ध इव गन्धो यस्यास्तस्या मुखामोदेन मुषितः प्रलोभितस्सन् ॥ २५ ॥

निशम्याऽऽक्रन्दितं देवी पुत्रयोर्नीयमानयोः ।
हताऽस्म्यहं कुनाथेन नपुंसा वीरमानिना ॥ २८ ॥
यद्विश्रम्भादहं नष्टा हृतापत्या च दस्युभिः ।
यः शेते निशि सन्त्रस्तो यथा नारी दिवा पुमान् ॥ २९ ॥
(मुञ्च मुञ्चाश्वपसर बाहू मद्गात्रवेष्टितौ ।
अतीव कातरो हातुं मामयं याति लम्पटः ॥ ० ॥)
इति वाक्सायकैर्विद्धः प्रतोत्रैरिव कुञ्जरः ।
निशि निस्त्रिंशमादाय विवस्त्रोऽभ्यद्रवद्रुषा ॥ ३० ॥
ते विसृज्योरणौ तत्र व्यद्योतन्त स्म विद्युतः ।
आदाय मेषावायान्तं नग्नमैक्षत सा पतिम् ॥ ३१ ॥
ऐलोऽपि शयने जायामपश्यन् विमना इव ।
तच्चित्तो विह्वलः शोचन् बभ्रामोन्मत्तवन्महीम् ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मह्यं मम ॥ २६ ॥

महारात्रे मध्यरात्रे "महानिशा द्वे घटिके रात्रौ मध्यमयामयोः" इति स्मृतेः ॥ २७ ॥

जिगमिषोस्तस्याः परुषोक्तिमाह—हतास्मीति सार्द्धेन । नपुंसा नपुंसकेन ॥ २८ ॥

यथा नारी तथा सन्त्रस्तः शेते ॥ २९ ॥ ३० ॥

विद्युतो विशिष्टद्युतिमन्तो व्यद्योतन्त दीप्तिमकुर्वन्त यद्वा तदैव तडितः प्रकाशन्ते इत्यर्थः । नग्नमैक्षत अतो भाषाभङ्गान्निर्जगामेति ज्ञेयम् ॥ ३१ ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

रममाण इति । पद्मकिञ्जल्कस्य गन्ध इव देहगन्धो यस्यास्तया ऊर्वश्या सह नित्यं रममाणः तस्याः मुखामोदेन मुषितः प्रलोभितस्सन् बहूनब्दगणान् मुमुदे ॥ २५ ॥

आनेतुमिति । ततः कदाचिदिन्द्रः ऊर्वश्या रहितं मह्यं ममास्थानं नातीव शोभते इति विचार्येति शेषः । ऊर्वशीमानेतुं गन्धर्वान् समचोदयत् प्रेषयामास ॥ २६ ॥

त इति । ततस्ते गन्धर्वाः महारात्रे मध्यरात्रे "महानिशा द्वे घटिके रात्रौ मध्यमयामयोः" इति स्मृतिः । तमसि अन्धकारे निद्रायां वा प्रत्युपस्थिते सम्प्राप्ते सति राजनि पुरूरवसि न्यस्तौ पाल्यत्वेन निहितौ ऊर्वश्या उरणकौ मेषौ मायया जहुरपहृतवन्तः ॥ २७ ॥

निशम्येति । तदा नीयमानयोः पुत्रयोरुरणयोराक्रन्दितं रोदनं निशम्य आकर्ण्याऽऽहेतिशेषः जिगमिषोस्तस्याः परुषोक्तिमाह. हतास्मीति सार्द्धेन । कुत्सितनाथेन नपुंसा नपुंसकेन अवीरमात्मानं वीरं मन्यत इति वीरमानी तेनानेनाहं हतास्मि ॥ २८ ॥

यस्याऽस्य कुनाथस्य विश्रम्भात् विश्वासादहं दस्युभिर्हृते अपत्ये पुत्रौ यस्याः सा नष्टप्राया अभवं यथा नारी दिवा अह्नि सन्त्रस्ता सती शेते तथा योऽयं पुमानपि शेते ॥ २९ ॥

अत्रान्तरा क्वचित्पुस्तकेषु—

"मुञ्च मुञ्चाश्वपसर बाहू मद्गात्रवेष्टितौ ।
अतीव कातरो हातुं मामयं याति लम्पटः" ॥

इत्यधिकः श्लोकः पठ्यते । तत्रायमपि तस्याः परुषोक्तिरूप एव मद्गात्रे वेष्टितौ बाहू मुञ्च मुञ्च अपगच्छ अयं मां हातुं कातरो भीतः लम्पटश्च यातीति निन्दा ॥ ० ॥

इतीदृशैर्वाग्रूपैः सायकैरिषुभिः प्रतोदैरङ्कुशैः कुञ्जर इव विद्धः पुरूरवा निस्त्रिंशं खड्गमादाय विवस्त्रो नग्नः रुषा निशि रात्रौ अभ्यद्रवत् ॥ ३० ॥

तदा ते गन्धर्वाः उरणौ तत्र विसृज्य विद्युतः विद्युत इव विद्योतन्ते स्म यद्वा विसृज्य जग्मुरिति शेषः तदा विद्युतस्तडितोऽपि विद्योतन्ते स्म इत्यर्थः । तदा मेषावादायागच्छन्तं नग्नं पतिं सा ऊर्वशी ददर्श ततो भाषाभङ्गान्निर्जगामेति च ज्ञेयम् ॥ ३१ ॥

ततः ऐलः पुरूरवाः शय्यायां जायामपश्यन् दुःखितमनास्तस्यामेव चित्तं यस्य सः विक्लवः अधृष्टः शोचन् उन्मत्तवन्महीं बभ्राम ॥ ३२ ॥

स तां वीक्ष्य कुरुक्षेत्रे सरस्वत्यां च तत्सखीः ।
पञ्च प्रहृष्टवदनाः प्राह सूक्तं पुरूरवाः ॥ ३३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मह्यं क्लृप्तं ममास्थानं सभा एवं मत्वा गन्धर्वान् समचोदयत् ॥ २६ ॥

जाययोर्वश्या ॥ २७ ॥

नपुंसा नपुंसकेन निर्वीर्येणेत्यर्थः ॥ २८ ॥

हृतापत्या हृतपुत्रा यो निशि नारी यथा सन्त्रस्ता शेते दिवा पुमान् पुरुषशक्तिमती तथा संत्रस्तः शेते अहि पुरुषः ॥२९॥

इत्येवं वाक्सायकैः वचनबाणैर्विद्धस्ताडितः प्रतोदैरङ्कुशैः कुम्भेषु रन्तुं शीलमस्येति कुञ्जरः ॥ ३० ॥

तत्र तस्मिन् समये ते गन्धर्वाः स्वविद्युता प्रद्योतन्त (१)प्रकाशन्त आलोकविषया आसन्नित्यर्थः ॥ ३१ ॥

बभ्राम "भ्रमु अनवस्थाने" इति धातुः । पर्यटनं कृतवान् ॥३२॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

निशम्येति त्रिकम् । देवी आहेति शेषः । यद्वा निशम्योवाचेति शेषः । यद्वा देवीत्यत्र छान्दसस्तृतीयायां लुक् तेन देव्या इति वाक्सायकैर्विद्ध इति तृतीयेनान्वयः । यो दिवा दिवसे पुमान् पुंभावज्ञापकोऽपि निशि रात्रौ तु नारीव सन्त्रस्तः केवलं शेते गृहान्तर्द्वारं पिधाय स्वपिति न चेतस्ततो रक्षार्थं भ्रमति चेत्यर्थः ॥ २८-३१ ॥

तच्चित्तो विक्लव इति पाठे सम्बन्धोक्तिमतः विक्लवो विह्वल इति व्याख्यानात् ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

मह्यमास्थानं मम सभा ॥ २६ ॥

महारात्रे मध्यरात्रे "महानिशा द्वे घटिके रात्रौ मध्यमयामयोः" इति स्मृतेः ॥ २७ ॥

पुत्रयोर्मेषयोः नपुंसा नपुंसकेन यत्र विस्रम्भात् वीरोऽयमिति विश्वासात् ॥ २८ ॥

निशि नारी यथा तथा शेते सन्त्रस्तः चोरान्मेषावानेतुमसमर्थः तस्माद्दिवैव यः पुमान् ॥ २९ ॥

निस्त्रिंशं खड्गम् ॥ ३० ॥

विद्युतः विशिष्टद्युतिमन्तः व्यद्योतन्त दीप्तिमकुर्वन्त तदैव नग्नमैक्षतेति भाषाभङ्गान्निर्जगामेति ज्ञेयम् ॥ ३१—३३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पद्मकिञ्जल्कगन्धवद्गन्धो यस्यास्तया ॥ २५ ॥

मह्यं मम ॥ २६ ॥

ते महारात्रे "महानिशा द्वे घटिके रात्रौ मध्यमयामयोः" इत्येवं बच्चयो तत्रापि तमसि अन्धकारे उपस्थिते उरणौ जह्नुः अपहृतवन्तः ॥ २७ ॥

आक्रान्दितं रोदनं नपुंसा नपुंसकेन ॥ २८ ॥

यथा नारी तथा सन्त्रस्तः दिवा अह्नि निशि च पुमान् सन् शेते अयं निद्राभिभूतः स्त्रीवत्सर्वतो भीतश्चातस्त्यक्तुं योग्य इति भावः ॥ २९ ॥ ३० ॥

ते उरणौ विसृज्य विद्युतः विशिष्टद्युतिमन्तः व्यद्योतन्त दीप्तिमकुर्वन्त तडित्प्रकाशं कृत्वा गता इत्यर्थः । तदा सा मेषावादाय आयान्तं पतिं नग्नम् ऐक्षत अतो भाषाभङ्गात् स्वर्लोकं गतेति ज्ञेयम् ॥ ३१ ॥ ३२ ॥

भाषाटीका ।

पद्मसदृश गन्धवाली उस देवी के मुखके गन्ध से मोहित होकर बहुत काल पर्यन्त रमण करते हुए बड़े हर्ष को प्राप्त भये ॥ २५ ॥

जब इन्द्र ने स्वर्गमें उर्वशी को नहीं देखा तब गन्धर्वों से कहा कि उर्वशी बिना हमारा स्थान अति शोभित नही होताहै ॥ २६ ॥

ऐसा इन्द्र का वचन सुनकर गन्धर्वों ने अत्यंत अँधेरी रात्री मे आकर उर्वशी के दोनो मेढाओं को हरण करलिया जिन मेढों को उर्वशीने प्रथम राजा के इहां धरोहर रखी थी ॥ २७ ॥

तदनंतर जब गन्धर्व उर्वशीके दोनों पुत्रों का हरण कर ले चले, तब उन दोनो का आक्रन्दन (शब्द) सुनकर उर्वशी बोली' कि—वृथा वीरमानी इस नपुंसक कुनाथ के विश्वास से मै मारी गई ॥ २८ ॥

हमारे पुत्रों को चोरों ने चुरा लिये मै केवल इस के विश्वास से नष्ट भई, यह रात्रि मे डरता हुआ स्त्री की नाई सोता है दिन मात्र में मे पुरुष होकर रहता है ॥ २९ ॥

इस प्रकार पुरूरवा राजा उर्वशी के वाक्य रूप बाणों से विद्ध हुए जैसे हाथी अकुंश से व्यथित हो । बस रात्रि में उसी समय खड्ग हाथमे लेकर नग्नही बडे क्रोधित होकर उन चोरोंके पीछे दौडे ॥ ३० ॥

फिर उन गन्धर्वों ने दोनो मेषों को छोडकर बिजली चमका दी तब तक रजा दोनो मेषों को लेकर चले इतने मे उर्वशी ने अपने पति (राजा) को नग्न देख लिया ॥ ३१ ॥

राजा पुरूरवा अपने शय्या के पास आये और अपनी कान्ता को नही देखकर बहुत उदास से हुये, और बहुत विह्वल होकर शोच करते हुए उन्मत्त होकर पृथ्वी में विचरने लगे, उस उर्वशी में फँसे हुए चित्त को नही निवृत्त कर सके ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्या सखीश्च पञ्च वीक्ष्य सूक्तं शोभनं वचनम् अये जाये" इत्यादि ॥ ३३ ॥

(१) दीप्तिमकुर्वन्त ।

(१)अहो जाये तिष्ठ तिष्ठ घोरे न त्यक्तुमर्हसि ।
(२)मां त्वमद्याप्यनिर्वृत्य वचांसि कृणवावहै ॥ ३४ ॥
(३)सुदेहोऽयं पतत्यत्र देवि ! दूरं हृतस्त्वया ।
खादन्त्येनं वृका गृध्रास्त्वत्प्रसादस्य नास्पदम् ॥ ३५ ॥

उर्वश्युवाच ।

मा मृथा पुरुषोऽसि त्वं मा स्म त्वाद्युर्वृका इमे ।
क्वापि सख्यं न वै स्त्रीणां वृकाणां हृदयं यथा ॥ ३६ ॥
स्त्रियो ह्यकरुणाः क्रूरा दुर्मर्षाः प्रियसाहसाः ।
घ्नन्त्यल्पार्थेऽपि विस्रब्धं पतिं भ्रातरमप्युत ॥ ३७ ॥
विधायालीकविश्रम्भमज्ञेषु त्यक्तसौहृदाः ।
नवन्नवमभीप्सन्त्यः पुंश्चल्यः स्वैरवृत्तयः ॥ ३८ ॥
संवत्सरान्ते हि भवानेकरात्रं मयेश्वरः ।
वत्स्यत्यपत्यानि च ते भविष्यन्त्यपराणि भोः ॥ ३९ ॥
अन्तर्वत्नीमुपालक्ष्य देवीं स प्रययौ पुरम् ।
पुनस्तत्र गतोऽब्दान्ते उर्वशीं वीरमातरम् ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेवार्थंत आह-अहो इति द्वाभ्याम् । अनिर्वृत्य मत्कृतां निर्वृतिमप्राप्य पाठान्तरे मां निर्वृतिमगमयित्वा मन्त्रानुक्त्वेति वा वचांसि कृणवावहै गोष्ठीः करवावहै ॥ ३४ ॥

सुदेहोऽतिकमनीयोऽयं मम देहः ॥ ३५ ॥

पुरूरवो मा मृथा इत्यादि तस्याः सूक्तं तदप्यर्थत आह, मा मृथा इति चतुर्भिः । माम्रियस्व पुरुषोऽसि अतो धैर्यमार्हसीति भावः । इमे वृकाः प्रसिद्धा इन्द्रियाणि वा त्वा इति त्वां मास्म अद्युर्भक्षयेयुः इन्द्रियवशो मा भवेत्यर्थः ॥ ३६ ॥

प्रिये निमित्ते साहसं यासाम् ॥ ३७ ॥ ३८ ॥

तं सान्त्वयति—संवत्सरान्त इति ॥ ३९ ॥

अपराणीतिवचनादन्तर्वत्नीमुपालक्ष्य ज्ञात्वा ॥ ४० ॥ ४१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं पृथ्वीमटन् स पुरूरवाः कुरुक्षेत्रे सरस्वत्यास्तीरे तामूर्वशीं तत्सखीश्च पञ्च पश्यन् प्रहृष्टं वदनं यस्य सः सूक्तं शोभनं वचः प्राह ॥ ३३ ॥

तदेवाह—अयीति द्वाभ्याम् । अयीत्यव्ययम् सम्बोधनार्थकम् अयि जाये हे भार्ये ! तिष्ठ तिष्ठ घोरे दुःखे त्यक्तुं पातयितुं, मामिति शेषः नार्हसि अद्यापि मन्त्राः रहःसल्लापाः अनिर्वृत्ताः असमाप्ताः वचांसि कृणवावहै गोष्ठीं करवावहै कृपणवादसहितसल्लापविशेषमावाङ्कुरवावेत्यर्थः ॥ ३४ ॥

हे देवि ! त्वया हेतुभूतया दूरं हृतः नीतः सुदेहः कमनीयो देहः ममेति शेषः । अत्र पतति एवं सति तं देहं वृकाः गृध्राश्च खादन्ति खादिष्यन्ति एवञ्च त्वत्प्रसादस्यास्पदं विषयो न भविष्यति इदं तत्प्रसादं पुनः स्मरमाश्रयतो राज्ञो वचः सुदेवोऽयमिति पाठान्तरं तदा अयमर्थः, पुरूरवाः स्वयमेवात्मानमपरोक्षवन्निर्दिशति, सुदेवः पुरूरवश्शरीरस्थश्चेतनो लक्षितः वृकाः इन्द्रियाणि बाधकत्वात् गृध्राः "गृधू अभिकांक्षायाम्" लोलुपा इत्यर्थः । तच्छब्द ऊर्वशीविषयः ॥ ३५ ॥

अथोर्वशी प्राह-मामृथेति।त्वं मृषापुरुषः मिथ्याप्रतिज्ञः पुरुषो मासीः माभूः धीरो भवेत्यर्थः। मा मृथा इतिपाठे मा म्रियस्वेत्यर्थः। एवञ्चेमे वृकास्त्वां माऽस्माद्युः मा खादिषुः न खादिष्यन्तीत्यर्थः । क्वापि स्त्रीणां सख्यं न स्थिरं यथा वृकाणां तद्वत् स्त्रीणामपि हृदयम् ॥ ३६ ॥

तदेव प्रपञ्चयति-अकरुणाः कृपारहिताः क्रूरस्वभावाश्च दुर्मृष्टाः क्षमारहिताः प्रिये निमित्ते साहसं यासां ताश्च हि यस्मादल्पाऽर्थेऽल्पप्रयोजने निमित्ते विस्रब्धं विश्वस्तं पतिं भ्रातरं वा घ्नन्ति ॥ ३७ ॥

विधायेति । मिथ्यालीकविस्रम्भं कपटविश्वासमज्ञेषु स्वाभिप्रायानभिज्ञेषु विधाय त्यक्तं सौहृदं याभिस्तथाभूताः नवन्नवं कान्तमभीप्सन्त्यः कामयमानाः पुंश्चल्यः व्यभिचारिण्यः स्वैरा स्वच्छन्दा वृत्तिर्यासां ताश्च भवन्ति अतो मत्सख्यं त्यजेति भावः ॥ ३८ ॥

(१) अयि । (२) मन्त्रा अद्याप्यनिर्वृत्ताः इति च वीर० विज० पाठः । (३) सुदेव इति विज० ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

संवत्सरेति। हे ईश्वर भर्त्तः! भवान् संवत्सरान्ते एकस्यां रात्र्यां मया सह वसतु तथा सति अपराण्यपि अपत्यानि नौ आवयोर्भविष्यन्ति अपराणीति वचनात् स्वस्या अन्तर्वत्नीत्वमावेदितम् ॥३९॥

अन्तर्वत्नीमिति। तद्वचनात्तां देवीमन्तर्वत्नीं गर्भिणीमुपालक्ष्य स पुरूरवाः स्वां पुरीं ययौ. ततः पुनः संवत्सरान्ते तत्र, राज्ञः समीपमागता बभूव ततस्तामुर्वशीं वीरस्य पुत्रस्य मातरं पुत्रेण सहागतामिति भावः। ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

तस्या उर्वश्याः पञ्च सखीः पुरूरवाः उर्वशीं दृष्ट्वा किं चकारेति तत्राह—प्राहेति। किं तत्सूक्तमित्यर्थतस्तत्प्रतिगृह्णाति, अहो जाये तिष्ठेति। "हये जाये मनसा" इत्यारभ्य "हविषा यजाति, स्वर्ग उत्वमपि मादयासे" इत्यन्तमुत्तरप्रत्युत्तरात्मकं सूक्तमुर्वशीवशीकरणाभिप्रायेण प्राहेत्यर्थः। हये अहो जाये मनसा तिष्ठ मनःपूर्वकं पूर्ववत्तिष्ठ मां त्यक्तुं नार्हसीति शेषः। हे घोरे! सुरतशौण्डे! ये परतरे अहन् अहनि उत्तरोत्तरत्र दिवसे मयः सुखंकरंश्च न कुर्वन्त्येव एते नौ आवयोः सुरतमन्त्राः करुणोक्तिपूर्वकाः नु अद्याप्यनुदितासः अनिवृत्ता अपरिसमाप्ताः इति यस्मादतो नैतदुचितमतो मिश्राणि सल्लापलक्षणानि वचांसि कृणवावहै करवावहै ॥ ३३ ॥ ३४ ॥

सारसंग्रहाभिप्रायेण मध्ये काञ्चनर्चौ विहाय "सुदेवो ऽद्य प्रपतेत्" इत्येतामृचमर्थत उदाहरति, सुदेव इति। हे देवि! योऽहं परावतं परवन्तं दीर्घश्छांदसः। दूरं देशं इतः त्वया सह परमां रतिं गन्तवै उगन्तुमेव तस्य मे अयं सुदेवः गतिलक्षणज्ञानसाधनं शरीरम् अत्र कुरुक्षेत्रे अस्यामवस्थायां वा प्रपतेत् प्रपतिष्यति कुतः अनावृत् आधार रहितः। अथ पतनानन्तरं निर्ऋतेर्भूमेरुपस्थे पृष्ठे शयीत पतेत्। अथ निर्जीवमेनं शरीरं भासस: भक्षणसंभ्रमाकुलाः वृकाः अद्युः खादन्ति पतित्वा शयित्वापि कथं चिरसप्राणं चेद्वृका इन्द्रियाणि खादन्ति इति "सुदेवो अद्य प्रपतेदनावृत् परावतं परमां गन्त वा उ अथा शयीत निर्ऋतेरुपस्थेऽ धैनं वृकारभसासो अद्युः" इति हये जायेत्यस्या उत्तरं किमेतानाचेति तवैतया वाचा किं कृणवै किं कुर्वः आवयोः पूर्ववत्सङ्गमानुपपत्तेः किं निमित्तं तत्राह–अहमिति। अहमुषसामग्र्येव प्रक्रमिषं यथा प्रथमोषसः अतिक्रान्तत्वात्पश्चात्तनानामुषसां योगो न घटते तथाऽऽवयोरपीत्यर्थः ॥ ३५ ॥

तर्ह्यहं किं करोमीति तत्राह-पुरूरव इति।हे पुरूरवः!पुनः पश्चादस्तं गृहं परेहि गच्छ इदानीमेव कर्तव्यं त्वयेत्यर्थः। "अस्तमेयायेति" श्रुतेः। किमर्थं पश्चाद्गमनमिति तत्राह—दुरापनेति। यथा वातो वायुर्गृहीतुमशक्यः तथा ऽहमपि दुरापना दुर्ग्रहेत्यर्थः। इति मृदुवचनोत्तरेणायं गृहं न यातीत्यभिसन्धाय कठिनोत्तरेण निवर्तयिष्यामीति मत्वा "पुरूरवो मा मृथा मा प्रपत्वो मा त्वा वृकाणो अशिवास उक्षन्" न वै स्त्रैणानि सख्यानि सन्ति सालावृकाणां हृदयान्येतेत्येतदर्थम् उत्तरत्वेनोर्वशी वक्ति–मा मृथा इति। हे पुरूरवः! त्वं मा मृथाः मरणं न प्राप्नुहि मूढा चेमं करोति पुरुष इति पुल्लिङ्गशांक्तमरत्वेन बालिष्ठत्वात् कामनिमित्तमरणं तव न युक्तम् अबलायाश्चेद्बलत्वेन कथञ्चित्सम्भावितं स्यादित्यर्थः। अनेनार्थतः मा प्रपप्त इत्येतद्विवृणं भवति प्रपत्व इति पतमेर्यङ्लुङन्तं रूपं कामपारवश्येन भृशं पतितो माभूः अभ्यासस्य दीर्घाभावश्छान्दसः। इमे अशिवासः अशिवाः अशुद्धिहेतवो वृका वृकासो त्वा त्वां मोचन् उक्षतिरत्र भक्षणार्थः मास्माद्युर्न लालाजलेन प्रोक्षयित्वा भक्षयेयुरित्यर्थः। स्त्रैणानि स्त्रीसम्बन्धीनि सख्यानि—

"ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति।
भुङ्क्ते भोजयते चैव षड्विधं स्नेहलक्षणम्" ॥

इति स्नेहलक्षणानि न सन्ति सदातनानि न भवन्ति वै क्वापि यथेत्यनेन सालावृकाणामिति लुप्तोपममिति सूचयति, हृदयमिति जातावेकवचनं यथा सालावृकाणां हृदयानि एता एतान्यपि स्त्रीणां हृदयानि तथेत्यर्थः ॥ ३६ ॥

एते इत्युक्तमेव विवृणोति-स्त्रिय इति। "किं क्रूरं स्त्रीहृदयं पुनरपि किं क्रूरमङ्गनाहृदयम्" इत्येताद्विशब्देन दर्शितं प्रिये प्रेष्ठेऽपि साहसं बलात्कारलक्षणं कर्म यासां तास्तथा एतदेव विविच्य दर्शयति, घ्नन्तीति विस्रब्धम् विश्वस्तम् ॥ ३७ ॥

अलीकविस्रंभं कपटविश्वासम् अज्ञेषु पुरुषेषु अत्यन्तसौख्यदाः तत्तत्कालोपभोग्यसुखप्रदानत्वादात्यन्तिकसुखदाः पुंश्चल्य इत्यस्य विवरणं स्वैरवृत्तय इति इष्टजनशिक्षामनुपाकरणं स्वेच्छानियतमद्यपानादिवृत्तयः ॥ ३८ ॥

मया सहैकरात्रं वत्स्यति सुरतलीलामनुभविष्यतीत्यर्थः ॥ ३९ ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

सुक्तं वेदस्थं यत् सूक्ताख्यं तदीयं वचनं तदेव प्राह ॥ ३३–३५ ॥

कुत इति तत्राह—वृकाणां हृदयं यथा तथैव स्त्रीणामित्यर्थः ॥ ३६ ॥

स्त्रिय इति युग्मकम्। प्रिये निजाभिरुचिते साहसं यासां ताः ॥ ३७–४२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

अद्यापि अनिर्वृत्य न निर्वृताभूत्वा मद्दत्तां निर्वृतिमप्राप्य मां त्यक्तुं नार्हसि अनिर्वर्त्येति पाठे मां निःशेषेण अवर्त्तयित्वा अजीवयित्वेत्यर्थः। यदि वा त्यक्ष्यसि तदपि क्षणं तावद्वचांसि कृणवावहै गोष्ठीं करवावहै ॥ ३४ ॥

पश्यन्त्यास्तस्या दयामुत्पादयति—सुदेह इति ॥ ३५ ॥

मा मृथाः न म्रियस्व पुरुषोऽसीति नपुंसकलक्षणमधैर्यं त्यजेति भावः। इमे वृका इति वृकाः खलु न वृकाः किन्त्विन्द्रियाण्येव

उपलभ्य मुदा युक्तः समुवास तया निशाम् ।
अथैनमुर्वशी प्राह कृपणं विरहातुरम् ॥ ४१ ॥
गन्धर्वानुपधावेमांस्तुभ्यं दास्यन्ति मामिति ।
तस्य संस्तुवतस्तुष्टा अग्निस्थालीं ददुर्नृप ! ।
उर्वशीं मन्यमानस्तां सोऽबुध्यत चरन्वने ॥ ४२ ॥
स्थालीं न्यस्य वने गत्वा गृहांस्तां ध्यायतो निशि ।
त्रेतायां सम्प्रवृत्तायां मनसि त्रय्यवर्त्तत ॥ ४३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

वृका दुर्वारास्त्वां मास्म अद्युः भक्षयेयुः अजितेन्द्रियो माभूरित्यर्थः ॥ ३६ ॥

यत्र त्वं विस्रम्भ्य दुर्लभं मानुष्यं विफलयसि तासामस्माकं स्त्रीजातीनां स्वभावं शृण्वित्याह-स्त्रिय इति द्वाभ्याम्। दुर्मर्षा अपराधाऽसहिष्णवः प्रियार्थमधर्मादावपि साहसं यासां ताः ॥ ३७—३८ ॥

प्रबोधयितुमशक्यं पुनः सान्त्वयति-सम्वत्सरान्त इति ॥३९॥

अन्तर्वत्नीमुपालक्ष्येति तस्या अपराधीति वचनात् ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सूक्तं शोभनं वाक्यं वेदप्रसिद्धम् "अहो जाये" इत्यादि ॥३३॥

तदेवार्थतः आह--अहो इति द्वाभ्याम् । अहो जाये! भार्ये तिष्ठ तिष्ठ हे घोरे! त्वं माम् अनिर्वृत्य त्वद्गतां निर्वृतिं सुखमगमयित्वा त्यक्तुं नार्हसि अद्य अपि निश्चितं वचांसि कृणावावहै गोष्ठीं करवावहै ॥ ३४ ॥

सुदेहः शोभनो ऽयं मम देहः पतति एनं वृकाः इन्द्रियलक्षणाः गृध्राः आकाङ्क्षावन्तः खादन्ति पूर्वं तव प्रसादोदयो यस्मिन् तस्येदानीमास्पदमाश्रयो नास्ति ॥ ३५ ॥

"पुरोरवो मामृथा" इत्यादि तस्याः सूक्तं तदप्यर्थत आह—मा मृथा इत्यादिचतुर्भिः । मा मृथा मा म्रियस्व इमे वृकाः इन्द्रियलक्षणाः त्वा त्वां मास्म अद्युः भक्षयेयुःयतः पुरुषोसि इन्द्रियसंयमनं कर्तुं योग्योऽसि ॥ ३६ ॥

अकरुणाः निर्दयाः क्रूराः कुटिलाः दुर्मर्षाः क्षान्तिशून्याः प्रिये इन्द्रियार्थे साहसं चापल्यं यासां ताः प्रियं साहसं हठाचरणं यासां ता इति वा ॥ ३७ ॥

अभीप्सन्त्यः कामयमानाः स्वैरं यथेच्छं वृत्तिर्यासां ताः ॥ ३८ ॥

हे ईश्वर भर्तः ! अपराधीत्यनेन स्वस्याः अन्तर्वत्नीत्वं सूचितम् ॥ ३९—४१ ॥

भाषा टीका ।

कोई काल में कुरुक्षेत्र के विषय सरस्वती मे स्नान करती हुई प्रसन्न मुख कमल वाली पांच सखियों के सङ्ग उर्वशी को देखकर राजा पुरूरवा सुन्दर उक्तिं से बोले ॥ ३३ ॥

अहो जाये ! अहोघोरे ! खडी रहो खडी रहो अवभी तुमहम को सुखसे तृप्त नहीं करके वीच मे छोडने योग्यनहीं हो आओ भला हमतुम कुछ बातें तो करें ॥ ३४ ॥

हे देवि ! यह सुन्दर शरीर तुम्हारे कृपाका पात्र नहीं है दूरसे तुम ने इस को त्याग दिया है इस्से यह शरीर यहां ही गिर जायगा इसको वृकजन्तु खांयगे ॥ ३५ ॥

उर्वश्युवाच ॥

इतना सुन कर उर्वशी बोली, कि—हे राजन् ! तुम पुरुष हो मरो मत, तुमको वृक (बघेरे) न भक्षण करैं परंच स्त्रियों की प्रीति कहीं नहीं होती है जैसे वृकों का हृदय ॥ ३६ ॥

स्त्रियां प्रायकरके निर्दय कठोर हृदय वाली होती हैं थोड़ेही कारण से बडा भारी क्रोध करती हैं अति साहस वाली होती हैं अपने मे विश्वास करके रहने वाले पति को भी थोडेही प्रयोजन के कारण मार डालती हैं ॥ ३७ ॥

अज्ञानी विषयी पुरुषों को पहिले दृढ विश्वास कराकर फिर सुहृदता त्याग कर देती हैं और पुंश्चली स्वेच्छासञ्चार करने वाली स्त्रियां नये नये पुरुषों से प्रीत जोड़ती हैं ॥ ३८ ॥

इतना कहकर उर्वशी फिर बोली, कि—हे ईश्वर ! एकवर्ष पीछे आपके समीप में एक रात्री रहूंगी और भी तुम्हारे तव पुत्र होंगे ॥ ३९ ॥

पुरूरवा उर्वशी को गर्भवती जानकर पुर को चला गया, फिर उस जगह एक वर्ष के अन्त में वीर पुत्र की माता ऐसी उर्वशी को प्राप्त हुआ ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अनेनाग्निना कर्म कृत्वा तद्द्वारोर्वशीं प्राप्स्यतीत्यभिप्रायेणाग्निस्थालीं ददुः स तु तां स्थालीमेवोर्वशीं मन्यमानस्तया सहितो वने विचरन्नयमुर्वशी किन्त्वग्निस्थालीत्यबुद्ध्यत ॥ ४२ ॥

ततश्च तां स्थालीं वने स्थापयित्वा गृहान् गत्वा निशि नित्यं

स्थालीस्थानं गतोऽश्वत्थं शमीगर्भं विलक्ष्य सः ।
तेन द्वे अरणी कृत्वा उर्वशीलोककाम्यया ॥ ४४ ॥
उर्वशीं मन्त्रतो ध्यायन्नधरारणिमुत्तराम् ।
आत्मानमुभयोर्मध्ये यत्तत्प्रजननं प्रभुः ॥ ४५ ॥
तस्य निर्मन्थनाज्जातो जातवेदा विभावसुः ।
त्रय्या स विद्यया राज्ञा पुत्रत्वे कल्पितस्त्रिवृत् ॥ ४६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तामेव ध्यायतस्तस्य मनसि त्रेतायां त्रयी अवर्तत कर्मबोधकं वेदत्रयं प्रादुरभूत् ॥ ४३ ॥

ततः स्थालीस्थानं प्राप्तस्सन् शम्यागर्भं जातमश्वत्थं विलक्ष्य अस्मिन्नसावग्निरस्तीति विशेषेण लक्षयित्वा तेनाऽश्वत्थेन द्वे अरणी कृत्वाऽग्निं ममन्थेति शेषः "शमीगर्भादग्निं मन्थ" इति श्रुतिः ॥४४॥

मथनप्रकारमाह——अधरारणिमुर्वशीं ध्यायन्नुत्तराऽरणिमात्मानन्ध्यायन्नुभयोर्मध्ये यत् काष्ठं तत्प्रजननं पुत्रं ध्यायन् तथा च मन्त्रः "उर्वश्यस्यायुरसि पुरूरवाः" इति ॥ ४५ ॥

तस्य तेन कृताग्निर्मथनाद्विभावसुरग्निर्जातः, कथम्भूतः ? जातं वेदो धनं भोग्यं यस्मात् स च त्रय्या विद्यया विहितेनाधानसंस्कारेण त्रिवृदाहवनीयादिरूपस्सन् राज्ञा पुरूरवसा पुत्रत्वे कल्पितः पुण्यलोकप्रापकत्वात् ॥ ४६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उपलभ्य दृष्ट्वा यद्वा पुत्रवतीं प्रत्यभिज्ञाय हर्षेण युक्तो राजा तया सह तां निशाम् उवास अथैनं विरहातुरं विश्लेषासहिष्णुं पुरूरवसम् ऊर्वशी प्राह ॥ ४१ ॥

किमिति ? त्वमिमान् गन्धर्वानुपधाव स्तुत्या प्रीतान् कुरु ते च तुभ्यं मां दास्यन्ति मल्लोकप्राप्तिसाधनं दर्शयिष्यन्तीति ततो हे नृप ! तस्य पुरूरवसः संस्तुवतः सतः गन्धर्वाः प्रीतास्सन्तः तस्मै अग्निस्थालीम् अग्न्याधानार्थं पात्रविशेषं ददुः ततस्तामग्निस्थालीमूर्वशीप्राप्तिसाधनभूतां मन्यमानः स पुरूरवाः वने विचरन् अबुध्य आज्ञात्वेत्यर्थः ॥ ४२ ॥

स्थालीं वन एव न्यस्य निधाय गृहान् गत्वा निशि रात्रौ तत्रोवास अथ त्रेतायां सम्प्रवृत्तायां त्रेतायुगारम्भे प्रवृत्ते सति पुरूरवसो मनसि त्रयी वेदः प्रवर्तत प्रादुरभूत् ॥ ४३ ॥

ततः स पुरूरवाः स्थालीस्थानं गतस्सन् शम्या गर्भे जातमश्वत्थं विलक्ष्य स्वमनसि परिवर्त्तमानया "शमीगर्भादग्निं मन्थति" इति श्रुत्या शमीगर्भस्याश्वत्थस्याग्निमथनसाधनतामवबुध्येत्यपि ज्ञेयं तेनाश्वत्थेन द्वे अरणी मन्थनकाष्ठे कृत्वा ऊर्वशीलोकेच्छया॥४४॥

मन्त्रतः मथनप्रकाशकमन्त्रप्रयोगपूर्वकमधरारणिमूर्वशीम् उत्तरारणिं स्वात्मानम् उभयोररण्योर्मध्ये यत्काष्ठं विदुः तत्प्रजननं पुत्रं ध्यायन् ममन्थेति शेषः ॥ ४५ ॥

तस्य तेन कृताग्निर्मथनाद्विभावसुरग्निर्जातः, कथम्भूतः? जातं वेदो धनं भोग्यं यस्मात्तथाभूतः स विभावसुस्त्रय्या विद्यया तद्विहितेन आधानसंस्कारेण त्रिवृदाहवनीयादिरूपस्सन् राज्ञा पुरूरवसा पुत्रत्वे कल्पितः पुण्यलोकप्रापकत्वात् ॥ ४६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

समुवास सम्भोगलक्षणं सुरतमनुभूतवान् स्त्रियो ह्यकरुणा इत्यारभ्य तया ऽनिशामित्यन्तोनोक्तमिति ज्ञातव्यम् ॥ ४१ ॥

उपधाव शरणं गच्छ "धावुगतिशुद्ध्योः" त्रिकरणशुद्ध्या स्तुतिं कुर्वित्यर्थः । "इति त्वा देवा इम आहुरैल ! यथेम तद्भवसि मृत्युबन्धुः प्रजात देवान् हविषा यजाति स्वर्ग उ त्वमपि मादयास" इति अग्निस्थालीम् अग्निस्थापनयोग्यपात्रम् उर्वशीं मन्यमानो वने चरन् तामुर्वशीं नाबुध्यत नेयमुर्वशी किन्त्वियमग्निस्थालीति ज्ञातवानित्यर्थः ॥ ४२ ॥

स पुरूरवाः अग्निस्थालीं वने न्यस्य निक्षिप्य निशि गृहान् गत्वा तां निशामध्युषितोऽभूत् अथ परस्मिन् दिवसे त्रेतायां संप्रवृत्तायां त्रेतायुगारम्भसमये जाते सत्युर्वशीं चिन्तयतस्तस्य राज्ञो मनसि अग्न्याधानादि साङ्गयज्ञप्रकाशवेदत्रयं प्रकाशितमभूदित्यर्थः ॥ ४३ ॥

तदर्थं विचार्याग्निस्थालीप्रदानाभिप्रायं ज्ञात्वा अग्निस्थालीस्थानं गतः तत्र पुरूरवाः शमीगर्भं शमीवृक्षेणाधिष्ठितम् अश्वत्थं विलक्ष्य विशेषतो दृष्ट्वा स्थालीशमीजाताग्निस्त्वश्वत्थो जात इति विज्ञाय शमीगर्भमश्वत्थं छित्वा तेन शमीगर्भाश्वत्थेन द्वे अरणी कृत्वा उत्तराधरारणिभेदेन निधाय उर्वशीलोकप्राप्तीच्छया ॥ ४४ ॥

फलविशेषार्थं जगिष्ठो "अपोनर्यः सुजातः प्रोर्वशीतिरतदीर्घ मायुः" इति मन्त्रार्थत्वेनोर्वशीं ध्यायन् उर्वशीमधरारणिम् आत्मानं पुरूरवश्शब्दोपलक्षितमुत्तरारणिं च चिन्तयन् उभयोररण्योर्मध्ये यत्प्रजननसाधनं तच्च मनसा ध्यायन्नरणीं निर्ममन्थेति शेषः । प्रभुरित्यनेन सर्वध्यानादिसामर्थ्यं दर्शयति ॥ ४५ ॥

मथितमाह–तस्येति । तस्य राज्ञो निर्मथनाज्जातवेदा जात इति तत्प्रभृति जातवेदानामाग्नेरिति सूचितं स विभावसुरग्निस्त्रय्या विद्यया वेदत्रयसंज्ञया प्रतिपाद्यो राज्ञा पुत्रत्वे कल्पित इत्यन्वयः। त्रिभिराहवनीयादिरूपैर्वर्तत इति त्रिवृत् अध्यात्मविवक्षायाम् अकारोकारमकारसमाहारोङ्काररूपेण वर्तत इति त्रिवृत् ॥ ४६ ॥

तेनाऽयजत यज्ञेशं भगवन्तमधोक्षजम् ।
उर्वशीलोकमन्विच्छन् सर्वदेवमयं हरिम् ॥ ४७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

स्थाल्यामुर्वशीमननं तत्प्राप्त्या तत्प्राप्तिरेव ज्ञातेति मननावेशात् बोधश्चाति परिचये सतीति ज्ञेयम् ॥ ४३-४७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तस्य तस्मिन् गन्धर्वान् स्तुवति सति तुष्टा गन्धर्वा अनेनाग्निना कर्म कृत्वा तद्वशादुर्वशीं प्राप्स्यसीत्यभिप्रायेणाग्निस्थालीं ददुः स तु उर्वश्यामत्यावेशात् कामान्धस्तां स्थालीमेवोर्वशीं मन्यमानस्तया सहितो वने विचरन् सङ्गसमये नेयमुर्वशी किन्त्वग्निस्थालीत्यबुध्यत ॥ ४१—४२ ॥

निशि आ सम्यक् तामुर्वशीमेव ध्यायतस्तस्य त्रेतारम्भे त्रयी प्रवर्तन कर्मबोधकं वेदत्रयं प्रादुरभूदिति कामिन एव कर्म कार्यमित्यभिव्यञ्जितम् ॥ ४३ ॥

ततश्च स्थाली यत्र न्यस्ता तत्स्थानं गतस्सन् शम्या गर्भे जातमश्वत्थं विलक्ष्य तेनैवाश्वत्थेन द्वे अरणी कृत्वा अग्निं ममन्थेति शेषः । "शमीगर्भादग्निं मन्थति" इति श्रुतेः ॥ ४४ ॥

मथनप्रकारमाह—अधरारणिमुर्वशीम् ध्यायन्नुत्तरारणिं चात्मानं ध्यायन् उभययोर्मध्ये यत् काष्ठं तत् प्रजननं पुत्रं ध्यायन् तथा च मन्त्रः "उर्वश्यायुरसि पुरूरवाः" इति ॥ ४५ ॥

तस्य तत्कर्तृकाग्निमथनात् विभावसुरग्निर्जातः जातं वेदो धनं भोग्यं यस्मात् स च त्रय्या विद्यया संस्कृतो राज्ञा पुत्रत्वे कल्पितः पुण्यलोकप्रापकत्वात् त्रिवृत् आहवनीयादिरूपः ॥ ४६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

उर्वशीप्रापकं कर्मानेनाग्निना कृत्वा तां प्राप्स्यतीत्याशयेनाग्निस्थालीम् अग्निपात्रं ददुः स पुरूरवाः तामग्निस्थालीमेवोर्वशीं मन्यमानो वने चरन् नेयमुर्वशीत्यबुद्ध्यत ॥ ४२ ॥

ततो वने स्थालीं न्यस्य गृहान् गत्वा निशि आध्यायतः आ-समन्ततः पूर्ववृत्तान्तं चिन्तयतः त्रेतायां सम्प्रवृत्तायां मनसि त्रयी कर्मबोधकं वेदत्रयम् अवर्तत प्रादुरभूत् ॥ ४३ ॥

तत्र पुरूरवाः स्थालीस्थानं गतः शम्यागर्भे अश्वत्थमुत्पन्नं विलक्ष्य अग्निस्थालीप्रभावजमश्वत्थमवधाय तेनाश्वत्थेन द्वे अरणी कृत्वा उर्वशीलोककाम्यया अग्निं ममन्थेति शेषः । "शमीगर्भादग्निं ममन्थ" इति श्रुतेः ॥ ४४ ॥

किं कुर्वन् अग्निं ममन्थेत्यत्राह-मन्त्रतो मथनमन्त्रप्रयोगतः प्रभुः मन्त्रप्रयोगपूर्वकाग्न्युत्पादनकुशलः अधरारणिमुर्वशीमुत्तरारणिमात्मानमुभयोर्मध्ये यत्काष्ठं तत्प्रजननं पुत्रं च ध्यायन् ॥ ४५ ॥

उत्तरस्य पुरूरवसः निर्मथनात् विभावसुर्जातः, कीदृशः ? जातं वेदो धनं भोग्यं वस्तु यस्मात्सः स च विभावसुः त्रय्या विद्यया तद्विहितेनाधानसंस्कारेण त्रिवृत् आहवनीयादिरूपः सन् राज्ञा पुरूरवसा पुत्रत्वेन कल्पितः पुण्यलोकप्रापकत्वात् ॥ ४६ ॥

भाषाटीका ।

उर्वशी को प्राप्त होकर आनन्द से युक्त होकर रातभर उर्वशी के साथ वास करता हुआ । तदनन्तर प्रातःकाल में उर्वशी, दीन विरहातुर ऐसे पुरूरवा से बोली कि- ॥ ४१ ॥

तूं इन गन्धर्वों को प्रसन्न करले ये लोग मेरे को तेरे लिये देदेवेंगे । हे नृप ! तब राजा बहुत गन्धर्वों की स्तुति करने लगा तब प्रसन्न होकर गन्धर्वों ने एक अग्नि की स्थाली दीनी पुरूरवा उस स्थाली (टोकनी) को उर्वशी जानकर उसे साथ लेकर वनमें विचरता रहा एक समय विचरते २ जानता हुआ कि यह उर्वशी नहीं है किन्तु अग्नि की स्थाली है ॥ ४२ ॥

तब स्थाली जानकर वनमें एक स्थल में धर कर गृह को गया सदा रात्रि में उसी का ध्यान करता रहा इसी प्रकार रहते २ त्रेता युग का जब प्रारंभ हुआ तब पुरूरवा के हृदय में वेदत्रयी की प्रवृत्ति हुई ॥ ४३ ॥

तब तौ वन में स्थाली के स्थानपर जाकर शमी वृच्छ के गर्भ में उत्पन्न होने वाले अश्वत्थ को देखकर उर्वशी के लोक की कामना से उस अश्वत्थ से दो अरणी बना कर ॥ ४४ ॥

मंत्र से अधराऽरणि (नीचे की समिध) को उर्वशी और उत्तर अरणि (ऊपर की समिध) को अपने आत्मा का ध्यान करता हुआ और दोनों अरणियों के मध्य में जो काष्ठ उसको पुत्र का ध्यान करता हुआ ॥ ४५ ॥

इस प्रकार ध्यान कर मंथन करने से जात वेदा अग्नि प्रकट भया तब राजा पुरूरवा ने वेदत्रयी विद्या के आधान संस्कार से त्रिवृत् आहवनीय आदि रूप से तीन भेद को प्राप्त होनेवाले अग्नि को अपना पुत्र कल्पन किया, तिससे यज्ञेश भगवान् अधोक्षज सर्व देव मय श्रीहरि का उर्वशी के लोक की कामना से यजन करता हुआ ॥ ४६ ॥ ४७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदाह—तेनेति ॥ ४७ ॥

एक एव पुरा वेदः प्रणवः सर्ववाङ्मयः ।
देवो नारायणो नान्य एकोऽग्निर्वर्ण एव च ॥ ४८ ॥
पुरूरवस एवासीत्त्रयी त्रेतामुखे नृप ।
अग्निना प्रजया राजा लोकं गान्धर्वमेयिवान् ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां नवमस्कन्धे ऐलोपाख्याने
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नन्वनादिवेदत्रयबोधितो ब्राह्मणादीनामिन्द्राद्यनेकदेवयजनेन स्वर्गप्राप्तिहेतुः कर्ममार्गः कथंसादिरिव वर्ण्यते तत्राह—एक एवेति द्वाभ्याम् । पुरा कृतयुगे सर्ववाङ्मयः सर्वासां वाचां बीजभूतः प्रणव एक एव वेदः । देवश्च नारायण एक एव अग्निश्चैक एव लौकिकः वर्णश्चैक एव हंसो नाम ॥ ४८ ॥

वेदत्रयी तु पुरूरवसः सकाशादासीत् एयिवान् प्राप अयं भावः कृतयुगे सत्त्वप्रधानाः प्रायशः सर्वेऽपि ध्याननिष्ठाः रजः प्रधाने तु त्रेतायुगे वेदादिविभागेन कर्ममार्गः प्रकटो बभूवेत्यर्थः ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदाह—तेनेति । तेन विभावसुना यज्ञफलदं सर्वदेवताशरीरकम् आश्रितार्तिहरं भगवन्तमधोक्षजमुर्वशीलोककामयमानः पुरूरवा अयजत आराधितवान् ॥ ४७ ॥

नन्वनादिवेदबोधितो ब्राह्मणादीनामिन्द्राद्यनेकदेवतायजनेन स्वर्गप्राप्तिहेतुः कर्ममार्गः कथमाधुनिकः स्यादिति वर्ण्यते? तत्राह, एक एवेति द्वाभ्याम् । पुरा कृतयुगे सर्वासां वाचां बीजभूतः प्रणव एक एव वेदः देवश्च नारायण एक एव नान्यः अग्निश्चैक एव लौकिकः वर्णश्चैक एव हंसाख्यः ॥ ४८ ॥

हे नृप ! त्रयी वेदत्रयं तु त्रेतामुखे पुरूरवसः सकाशादेवासीत् अयम्भावः कृतयुगे सत्त्वप्रधानाः प्रायशः सर्वेऽध्यात्मनिष्ठाः, रजःप्रधाने तु त्रेतायुगे वेदादिविभागेन कर्ममार्गः पुरूरवसः सकाशात्प्रकटो बभूवेति, ततो राजा पुरूरवाः अग्निरूपया प्रजया पुत्रेण हेतुभूतेन गन्धर्वलोकमेयिवान् प्राप ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तेन त्रिवृताऽग्निना उर्वशीसालोक्यं सर्वदेवमयं सर्वदेवोत्तमम् ॥ ४७ ॥

पुराकृतैः "अकारो वै सर्वा वाक्"इति सर्ववाङ्मयः प्रणवोप्येकः ॥ ४८ ॥

त्रयी त्रिप्रकारा अग्निना प्रजया पुत्रत्वेन कल्पितेनाग्निना ॥४९॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पुरा ब्राह्मकल्पस्य प्रथमसत्ययुग इत्येवार्थः । स्वायम्भुवमारभ्य वेदादिवर्णानां भेदव्यवहारश्रवणात् ॥ ४८ ॥

पुरूरवस एवेति तु तद्व्यवहारारम्भस्य तत्र त्रेतामुखे तस्मादेव तत्तत्प्रवर्धनं तद्वत् पूर्वपूर्वमन्यतोऽन्यत इत्यभिप्रायात् अत एव पुरुषार्थचतुष्टयोत्पत्तिश्च किञ्चित् काल व्यवधानतो ज्ञेया ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तेनाऽग्निना ॥ ४७ ॥

ननु, वेदत्रयबोधितः कर्ममार्गः प्राङ्नासीत् सत्यं प्रकटो नासीदेवेत्याह—एक एवेति, द्वाभ्याम् । पुरा कृतयुगे सर्ववाङ्मयः सर्वासां वाचां बीजभूतः प्रणव एक एव वेदः देवश्च नारायण एक एव अग्निश्चैक एव लौकिकः वर्णश्चैको हंसो नाम यतः कृतयुगे सत्त्वप्रधानाः प्रायशः सर्वेऽपि ध्याननिष्ठा एवेति ॥४८॥

त्रेतामुखे त्रेतारम्भे पुरूरवसः सकाशादेव कर्ममार्गप्रादुर्भावः । एवं स्वायम्भुवमन्वन्तरादावपि बहुचतुर्युगव्यापकराजत्व-

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

वह्नयः प्रियव्रतादिभ्य एव तत्र तत्र त्रेतारम्भे कर्मप्रादुर्भाव इत्यपि ज्ञेयम् ॥ ४९ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
चतुर्दशोऽयं नवमे सङ्गतः सङ्गतः सताम् ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तेन विभावसुना ॥ ४७ ॥

अग्निरेक एव लौकिकः वर्णो हंसः ॥ ४८ ॥

प्रजया पुत्रभूतेन ॥ ४९ ॥

इतिश्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
चतुर्दशाध्यायार्थप्रकाशः ॥ १४ ॥

भाषा टीका ।

पूर्वकाल में एकही वेद प्रणव (ॐकार) वाङ्मय रहा और देव भी नारायण ही एक रहे, और कोई अन्य नहीं रहा, ऐसे ही अग्नि भी एक और वर्णो भी एक ही रहा ॥ २८ ॥

हे नृप ! त्रेता युग में पुरूरवा के मुख से वेदत्रयी हुई राजा पुरूरवा भी अग्नि रूप प्रजा से गन्धर्व लोक को प्राप्त हुआ ॥ ४९ ॥

इति श्रीमद्भागवत नवमस्कन्ध में चतुर्दश अध्याय
की, श्रीवृन्दावनस्थ पं०भागवताचार्यकृत
भाषा टीका समाप्ता ॥ १४ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे चतुर्दशोऽध्यायः ॥ १४ ॥

॥ पञ्चदशोऽध्यायः ॥

श्रीशुक उवाच।

ऐलस्य चोर्वशीगर्भात्षडासन्नात्मजा नृप !।
आयुः श्रुतायुः सत्यायुरथोऽथ विजयो जयः ॥ १ ॥
श्रुतायोर्वसुमान् पुत्रः सत्यायोश्च श्रुतञ्जयः।
रयस्य सुत एकश्च जयस्य तनयोऽमितः ॥ २ ॥
भीमस्तु विजयस्याथ काञ्चनो होत्रकस्ततः।
तस्य जन्हुः सुतो गङ्गां गण्डूषीकृत्य योऽपिबत्।
जह्नोस्तु पूरुस्तत्पुत्रो बलाकश्चात्मजोऽजकः ॥ ३ ॥
ततः कुशः कुशस्यापि कुशाम्बुर्मूर्तयो वसुः।
कुशनाभश्च चत्वारो गाधिरासीत्कुशाम्बुजः ॥ ४ ॥
तस्य सत्यवतीं कन्यामृचीकोऽयाचत द्विजः।
वरं विसदृशं मत्वा गाधिर्भार्गवमब्रवीत् ॥ ५ ॥
एकतः श्यामकर्णानां हयानां चन्द्रवर्चसाम्।
सहस्रं दीयतां शुल्कं कन्यायाः कुशिका वयम् ॥ ६ ॥
इत्युक्तस्तन्मतं ज्ञात्वा गतः स वरुणान्तिकम्।
आनीय दत्त्वा तानश्वानुपयेमे वराननाम् ॥ ७ ॥
स ऋषिः प्रार्थितः पत्न्या श्वश्र्वा चापत्यकाम्यया।
श्रपयित्वोभयैर्मन्त्रैश्चरुं स्नातुं गतो मुनिः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

ततः पञ्चदशेगाधिरैलपुत्रान्वयेऽजनि ॥
यद्दौहित्रसुतो रामः कार्तवीर्यमहन् रुषा ॥ १ ॥
॥ १ ॥

सुग्रहत्वायाल्पादिक्रमेण श्रुतायुप्रभृतिषण्णां वंशानाह—श्रुतायोरित्यादिना। एकः एकसंज्ञः अमितस्तत्संज्ञः ॥ २ ॥

जह्नोः पूरुस्तस्य बलाकस्तस्याजकः ॥ ३—४ ॥

गाधेः पुत्रो विश्वामित्रो ब्रह्मर्षिरभूदित्युत्तराध्यायान्ते वक्ष्यति "गाधेरभून्महातेजाः" इत्यादिना तत्र तावत्तदुपोद्घातत्वेन भृगुवंशसम्भवस्य ऋचीकस्य चरितं प्रसक्तानुप्रसक्तेन च परशुरामावतारचरितमाह-तस्य सत्यवतीमित्यादिना। विसदृशमननुरूपं भार्गवमृचीकम् ॥ ५ ॥

दक्षिणवामयोरेकतः श्यामः कर्णौ येषां सर्वस्मिन्नङ्गे चन्द्रस्येव वर्चो येषां न चेदणपि पर्याप्तमस्मत्कन्यायाः यतः कुशिकाः कौशिका वयम् ॥ ६-७ ॥

उभयैर्मन्त्रैः पत्न्यै ब्राह्मैर्मन्त्रैः श्वश्र्वै तु क्षात्रैरित्यर्थः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

ऐलस्य पुरूरवसः ऊर्वशीगर्भात् संवत्सरान्ते सकृद्रात्रौ सङ्-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ताया ऊर्वश्या उदरात्, हे नृप ! षडात्मजा आसन् ते चायवादि-संज्ञाः ॥ १ ॥

श्रुतायोरिति । तत्र श्रुतायुप्रभृतीनां षण्णां वंशानल्पादि-क्रमेणाह—श्रुतायोः पुत्रो वसुमान् सत्यायोः पुत्रस्तु धनञ्जयः श्रुतञ्जयेतिपाठान्तरं एकसंज्ञश्चेति द्वौ पुत्रौ जयस्य तु तनयो विभुः अमितेति पाठान्तरं तदा तत्संज्ञः ॥ २ ॥

विजयस्य तु भीमः पुत्रः तस्य तु काञ्चनः आयोस्तु पुत्राः सप्तदश वक्ष्यन्ते ततः काञ्चनात् वसुमतो वा होत्रको जज्ञ इति शेषः। तस्य होत्रकस्य सुतो जन्हुः तं विशिनष्टि-यो जन्हुः गण्डूषी-कृत्य गङ्गामपिबत् जह्नास्तु पुत्रः पूरुः तत्पुत्रः पूरुपुत्रो वलाकः तस्यात्मजस्त्वजकः ततोऽजकात् कुशः कुशस्य तु कुशाम्बादय-श्चत्वारः पुत्राः तत्र कुशाम्बाद्गाधिरासीत् जज्ञे ॥ ३–४ ॥

गाधेः पुत्रोऽपि विश्वामित्रो ब्रह्मर्षिरभूत् इत्युत्तराध्यायान्ते वक्ष्यति"गाधेरासीन्महान्तेजा" इत्यादिना तत्र तावदुपोद्घातत्वेन भृगुवंशभवस्य ऋचीकस्य चरितं प्रसक्तानुप्रसक्त्या परशुरामा-वतारतच्चरित्रादिकञ्चाह-तस्य सत्यवतीमित्यादिना। तस्य गाधेः कन्यां दुहितरं सत्यवत्याख्यामृचीकाख्यो द्विजो भार्गवोऽयाचत ततो गाधिर्वरं विसदृशं कन्याया अननुरूपं दृष्ट्वा भार्गवमृचीकमुवाच॥५॥

किमिति ? एकत इति. दक्षिणवामयोरेकतः एकस्मिन्पार्श्वे श्यामः कर्णो येषां चन्द्रस्येव वर्चो येषां तेषां हयानामश्वानां सहस्रं कन्यायाः शुल्कं दीयतां न चेदमपि पर्याप्तमस्मत्कन्यायाः यतः कुशिकाः कौशिका वयमिति ॥ ६ ॥

इतीत्थमुक्तस्तस्य गाधेर्मतिं ज्ञात्वा मामननुरूपं दृष्टवतोऽस्येयं मतिरभूदिति ज्ञात्वा वरुणस्यान्तिकं गतः तत आनीय याच्ञया, प्रतिगृह्येत्यादिः तान् तदुक्तविधानश्वान् दत्वा वराननां सत्यवतीमुपयेमे ॥ ७ ॥

स इति । ततः कदाचित्स ऋषिः ऋचीकः पुत्रकाम्यया आत्मनः पुत्रेच्छया पत्न्या श्वश्र्वा पत्नीमात्रा च प्रार्थितः उभयैः ब्राह्मैः क्षात्रैश्च मन्त्रैश्चरुं श्रपयित्वा पत्न्याः पुत्रार्थं ब्राह्ममन्त्राभि-मन्त्रितमेकं चरुं श्वश्र्वास्तु पुत्रार्थं क्षात्रमन्त्राभिमन्त्रितमपरं चरुं पाचयित्वेत्यर्थः । मुनिः ऋचीकः स्नातुं गतः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ब्रह्मणोऽत्रिरत्रेः सोमः सोमाद्बुधः बुधात्पुरूरवाः तस्य पुत्रा नाह—ऐलस्य चेति ॥ १–३ ॥

कुशाम्बुजो गाधिरित्येकस्य नामद्वयम् ॥ ४ ॥

भार्गवमृचीकम् ॥ ५ ॥

कुशिकानामन्वयो यस्य स तथा कुशिकान्वयः समय इति वा ॥ ६ ॥ ७ ॥

श्वश्र्वा भार्यामात्रा उभयैः सात्विकराजसभेदाभिन्नैर्मन्त्रैः चरुं श्रपयित्वा प्रपच्याभिमंत्र्य तवेदं तव मातुरिदमिति निगद्य संस्थाप्य स्नातुं गतः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १–२ ॥

जह्नोरिति सार्द्धकम् । जह्नोस्तु पूरुस्तस्याथ बालकश्चात्मजो-जक इत्येव पाठः सर्वत्र पाठान्तरं तु कुत्रापि न दृश्यते टीका तु निर्गलितार्थत्वेन सङ्गच्छते ॥ ३–४१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ऐलवंशभुवो गाधेर्दौहित्रात्मज ईश्वरः ।
अर्जुनं धेनुहर्त्तारं रामः पञ्चदशेऽवधीत् ॥
॥ १ ॥

आयोर्वंशं विस्तृतमुपरिष्टाद्वक्ष्यन् प्रथमं श्रुतायुप्रभृतीनां षण्णां वंशान् संक्षिपन्नाह-श्रुतायोरिति । एकश्चेत्येकसंज्ञः ॥ २–३॥

तनयः तत्संज्ञः ॥ ४ ॥

गाधेः पुत्रो विश्वामित्रो ब्रह्मर्षिरभूदित्युत्तराध्याये वक्ष्यते ।तस्य कन्यावंशप्रसङ्गेनैव परशुरामावतारं वक्ष्यन् प्रथमं ऋचीक ऋषि-चरितमाह-तस्येति । कुशिका इति कुशस्य वंश्या वयं क्षत्रिया अपि सर्वतोऽपि कुलीना इति भावः । दक्षिणवामयोर्मध्ये एकतः श्यामः कर्णो येषां तेषाम् ॥ ५–७ ॥

उभयैर्मन्त्रैर्ब्राह्मैर्मन्त्रैः पत्न्यै चरुं दत्वा श्वश्र्वै तु क्षात्रैर्मन्त्रै-रित्यर्थः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ज्येष्ठस्यैलपुत्रस्य आयोर्वंशे स्वयं भगवानाविर्भूतः सर्वशो विततोऽतः सूचीकटाहन्यायेन पश्चात्तद्वर्णनं भविष्यत्येवं ज्येष्ठेषु नहुषययातिप्रभृतिष्वपि ज्ञेयमत आयुव्यतिरिक्तानामैलपुत्राणां वंशान् तत्र जातायाः सत्यवत्याः पौत्रस्य परशुरामस्य जन्म श्रीपरशुरामकृतं कार्तवीर्यवधं च वर्णयति-ऐलस्येति पञ्चदशेन ॥ १ ॥

एक एकाख्यः ॥ २ ॥

जन्होः पुरुस्तत्पुत्रो वलाकः वलाकस्यात्मजश्च अजकः ॥ ३ ॥ ४ ॥

विसदृशमननुरूपं मत्वा भार्गवमृचीकमब्रवीत् ॥ ५ ॥

एकतः उभयोः कर्णयोः प्रत्येकमेकभागतः श्यामौ कर्णौ येषां सर्वस्मिन् अङ्गे चन्द्रवद्वर्णौ येषां तेषां सहस्रं कन्या-शुल्कं दीयतां यतो वयं कुशिकाः कुशिकानां कन्याऽल्पव्ययेन प्राप्तुं न शक्येति भावः ॥ ६ ॥ ७ ॥

उभयैर्मन्त्रैः ब्राह्मैः क्षात्रैश्च ॥ ८ ॥

भाषाटीका ।

श्रीरुक्मिणीशचरणौ हृदि भावयामि ।

श्रीशुक उवाच ।

श्रीशुकदेवजी बोले, कि-हेनृप ! ऐल (पुरूरवा) महाराज के

तावत्सत्यवती मात्रा स्वचरुं याचिता सती ।
श्रेष्ठं [1]मत्वा तयाऽयच्छन्मात्रे मातुरदत्स्वयम् ॥ ९ ॥
तद्विज्ञाय मुनिः प्राह पत्नीं कष्टमकारषीः ।
घोरो दण्डधरः पुत्रो भ्राता ते ब्रह्मवित्तमः ॥ १० ॥
प्रसादितः सत्यवत्या मैवम्भूदिति भार्गवः ।
अथ तर्हि भवेत्पौत्रो जमदग्निस्ततोऽभवत् ॥ ११ ॥
सा चाभूत्सुमहत्पुण्या कौशिकी लोकपावनी ।
रेणोः सुतां रेणुकां वै जमदग्निरुवाह याम् ॥ १२ ॥
तस्यां हि भार्गवऋषेः सुता वसुमदादयः ।
यवीयान् जज्ञ एतेषां राम इत्यभिविश्रुतः ॥ १३ ॥
यमाहुर्वासुदेवांशं हैहयानां कुलान्तकम् ।
त्रिःसप्तकृत्वो य इमां चक्रे निःक्षत्रियां महीम् ॥ १४ ॥
[2]दुष्टं क्षत्रं भुवो भारमब्रह्मण्य [3]मनीनशत् ।
रजस्तमोवृतमहन्फल्गुन्यपि कृतेंऽहसि ॥ १५ ॥

राजोवाच ।

किं तदंहो भगवतो राजन्यैरजितात्मभिः ।
कृतं येन कुलं नष्टं क्षत्रियाणामभीक्ष्णशः ॥ १६ ॥

भाषा टीका ।

उर्वशी के गर्भ से छै पुत्रहुए, आयु, श्रुतायु, सत्यायु, रय, विजय, और जय, ॥ १ ॥

श्रुतायु के पुत्र वसुमान् हुए, रय के सुत एक हुए, जय के तनय मित हुए ॥ २ ॥

विजय के पुत्र भीम हुए तिनके काञ्चन तिनके होत्रक तिन से जन्हु पुत्र हुए जो गङ्गाजी को कुल्ला कर गये। जन्हु के पुरु तिन के पुत्र बलाक तिनके पुत्र अजक हुए ॥ ३ ॥

तिन से कुश और कुश के भी कुशाम्बु, तनय, वसु, और कुश नाभ, ये चार पुत्र हुए और गाधि कशांबुज अर्थात् कशाम्बुके पुत्र हुए ॥ ४ ॥

तिनकी सत्यवती कन्याकी ऋचीक ऋषि ने याचना करी, गाधिने कन्या के असदृश वर को जान कर भार्गव (ऋचीक) ब्राह्मणसे गाधिराजा बोले, कि ॥ ५ ॥

एक एक कर्ण श्याम जिन का हो ऐसे चन्द्र सदृश कान्ति वाले एकसहस्र अश्व कन्याका शुल्क (मूल्य) दीजिये, क्यों कि हमलोग तौ कौशिक है हमारे लोगों की कन्या अल्प शुल्क से नहीं मिल सक्ती है ॥ ६ ॥

ऐसा जब कहा तब ऋचीक इनकी इस प्रकार की संमति को जानकर वरुण के समीप गये, और वैसे ही अश्व-लाकर राजा को देकर उन की वरानना कन्या ऋचीक ने व्याहली ॥ ७ ॥

उन ऋचीक ऋषिसे पुत्र की कामना से उनकी पत्नी ने तथा सासु ने भी प्रार्थना करी, मुनीने भी दो प्रकार के मन्त्रो से चरु को सिद्ध कर स्नान करने को गये ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यावत्स्नात्वा मुनिर्नागतस्तावद्भार्यायां भर्तृस्नेहाधिक्यात्पुत्र्याः सत्यवत्याश्चरुं श्रेष्ठं मत्वा तया मात्रा सत्यवती याचिता सती ब्राह्ममन्त्राऽभिमन्त्रितं स्वचरुं मात्रे प्रयच्छत्प्रादात् मातुश्चरुं क्षात्रमन्त्राऽभिमन्त्रितं स्वयमददात् ॥ ९ ॥

कष्टं जुगुप्सितं तदेवाऽह—ते पुत्रो घोरो भविष्यति भ्राता तु ब्रह्मवित्तमो भविष्यतीति ॥ १० ॥

एवं माभूदिति प्रसादितो भार्गव आह—अथ तर्हि पौत्रो घोरो भविष्यति जमदग्निः पुत्रोऽभवदित्यर्थः ॥ ११ ॥

(१) मन्वानया । (२) हतं । (३) अधार्मिकम् । इति च वीर० पाठः ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

सा च सत्यवती कौशिकी नद्यभूत् ॥ १२ ॥

भार्गवऋचीकेर्जमदग्नेः सुताः ॥ १३—१४ ॥

अनीनशन्नाशयामास, तदेवाह—रजस्तमोवृतमिति । पाठान्तरे सुगमम् ॥ १५—१६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तावदिति । तावत् यावत्स्नात्वा मुनिर्नागतस्तावद्भार्यायां भर्तुः स्नेहाऽधिक्यात्पुत्र्याः सत्यवत्याश्चरुं श्रेष्ठं मन्वानया मात्रा याचिता सत्यवती स्वञ्चरुं ब्राह्ममन्त्राऽभिमन्त्रितं स्वमात्रे प्रायच्छत् प्रादात् मातुस्तु चरुं क्षात्रमन्त्राभिमन्त्रितं स्वयमदात् आदत् भक्षितवती दीर्घव्यत्ययश्चार्षः ॥ ९ ॥

तत आगतः मुनिः ऋचीकः तच्चरुविनिमयरूपं कर्म विज्ञाय पत्नीं प्राह, किमिति ? त्वं कष्टं जुगुप्सितमकार्षीः अतस्तव पुत्रो दण्डधरो घोरो भविता तव भ्राता तु ब्रह्मवित्तमो भवितेति ॥ १० ॥

प्रसादित इति । ततः सत्यवत्या मैवंभूदेवं न निगृहाणेति प्रार्थितो भार्गवः आह—किमिति ? "अथ तर्हि भवेत्पौत्रः" इति. तर्हि पौत्रो घोरो भविता पुत्रस्तु शान्त एवेत्यर्थः । तत सत्यवत्याः जमदग्निः जज्ञे ॥ ११ ॥

सा चेति । सा च सत्यवती कौशिकी सुमहापुण्या लोकपावनी नदी बभूव कौशकीरूपेण सस्यन्देत्यर्थः । अथ जमदग्निर्या रेणोः सुतां रेणुकाख्याम् उवाह उपयेमे ॥ १२ ॥

तस्यां हीति । तस्यां हि रेणुकायां भार्गवऋषेर्जमदग्नेर्वसुमदादयः सुता जज्ञिरे इति शेषः । तेषां वसुमदादीनां यवीयान् कनीयान् राम इत्यभितः प्रख्यातस्तं विशिनष्टि—यमिति । यं रामं वासुदेवांशं वासुदेवांशावेशावतारम् आहुः तदवतारयाथात्म्यवेदिन इति शेषः । कथंभूतम् ? हैहयानां कार्तवीर्याऽऽदीनां कुलस्याऽन्तं नाशं करोतीत्यन्तकः नाशकः । यो राम इमां महीं त्रिस्सप्तकृत्वः एकविंशतिवारं निःक्षत्रियां क्षत्रबीजरहितां चक्रे ॥ १३ ॥ १४ ॥

दृप्तमिति । फल्गुन्यल्पे अंहस्यपराधे कृतेऽपि क्षत्रं क्षत्रकुलमहन् हतवान्, कथंभूतम् ? दृप्तं गर्वितं पृथिव्याः भारं भारावहम् अब्रह्मण्यं ब्राह्मणेष्वसाधु रजस्तमोभ्यां वृतम् ॥ १५ ॥

तत्र फल्गुन्यपि कृते अंहसि क्षत्रमहन्नित्युक्त्या लब्धप्रश्नावसरः पृच्छति राजा—किमिति ? अकृतात्मभिः दुरात्मभिः राजन्यैः कृतं तदंहः किं किं स्वरूपं कीदृशं च येनांहसा हेतुना पौनःपुन्येन क्षत्रियाणां कुलं नष्टम् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तावद्यदा आत्मीयचरुं श्रेष्ठं मत्वा तया स्वमात्रा याचिता सत्यवती स्वचरुं मात्रे ददौ मातुश्चरुं स्वयमदत्स्वीकृतवती ॥ ९ ॥

तव पुत्रो घोरो दण्डधरः ते भ्राता ब्रह्मवित्तमः ॥ १०-१२ ॥

सा कौशिकी सत्यवती नदी बभूवेति शेषः ॥ १३ ॥

भार्गवऋषेर्जमदग्नेर्यवीयान् कनिष्ठः ॥ १४ ॥

क्षत्रवधे मुख्यं कारणमाह—दृप्तमिति । अहन् हतवान् फल्गुन्यल्पे अंहस्यपराधे ॥ १५ ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

यावत् स्नात्वा मुनिर्नाऽऽगतस्तावदेव सत्यवत्यां भर्तृस्नेहाधिक्यात् तस्याश्चरुं श्रेष्ठं मत्वा अनया मात्रा याचिता सत्यवती मात्रे स्वचरुं ब्रह्ममन्त्राऽभिमन्त्रितम् प्रयच्छत् । मातुश्चरुं क्षत्रमन्त्राभिमन्त्रितं स्वयमदत् भक्षितवती ॥ ९ ॥

कष्टं जुगुप्सितं दण्डधरः क्षत्रियो भविष्यति ब्रह्मवित्तमो ब्राह्मणः स च विश्वामित्र उत्तराऽध्याये वक्ष्यते ॥ १० ॥

एवं माभूदिति प्रसादित ऋचीक उवाच—अथेति । तर्हि पौत्रो दण्डधरो भविष्यति. स च परशुराम एव. ततो हेतोः पुत्रो जमदग्निर्मुनिरभूत् ॥ ११ ॥

सा च सत्यवती कौशिकी नद्यभूत् ॥ १२—१४ ॥

अनीनशद्भुवो भारमब्रह्मण्यमधार्मिकमिति । हतक्षत्रं भुवो भारमब्रह्मण्यमनीनशदिति च पाठद्वयम् ॥ १५—२० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सत्यवती स्वचरुं ब्राह्ममन्त्राऽभिमन्त्रितं तया मात्रा श्रेष्ठं मत्वा याचिता सती मात्रे अयच्छत् मातुश्चरुं क्षात्रमन्त्राऽभिमन्त्रितं स्वयम् आदत् ॥ ९ ॥

कष्टमयुक्तम् ॥ १० ॥

एवं माभूदिति सत्यवत्या प्रार्थितो भार्गव आह—तर्हि पौत्रो घोरो भवेद्भविष्यति । अथ ततो भार्गवात् जमदग्निरभवत् ॥ ११ ॥

सा सत्यवती कौशिकी नदी अभूत् ॥ १२ ॥ १३ ॥

त्रिःसप्तकृत्वः एकविंशतिवारम् ॥ १४ ॥

भुवो भारमनीनशत् नाशयामास । तदेवाह—अब्रह्मण्यं रजस्तमोवृत्तम् अहन् ॥ १५ ॥

अभीक्ष्णशः पुनःपुनः ॥ १६ ॥

भाषा टीका ।

जब तक ऋषि स्नान कर नहीं आने पाये तब तक सत्यवती से माता ने अपना चरु मांगा सत्यवतीने भी अपने ऊपर अपने पति की अधिक प्रीति समुझ कर अपने चरु को उत्तम मान कर अपनी माता को देदिया जोकि ब्रह्म मन्त्र से अभिमन्त्रित रहा और क्षत्रिय मन्त्र से अभिमन्त्रित माता का जो चरु रहा उसको आपने भक्षण किया ॥ ९ ॥

स्नान से आकर मुनि इस समाचार को जान कर पत्नी से बोले, कि—तूने यह बडा कष्ट किया, तेरा पुत्र बडा घोर दण्डधारी उग्र होगा और भ्राता अतिकर ब्रह्मवेत्ता होगा ॥ १० ॥

श्रीशुक उवाच ।

हैहयानामधिपतिरर्जुनः क्षत्रियर्षभः ।
दत्तं (१)नारायणस्यांशमाराध्य परिकर्मभिः ॥ १७ ॥
बाहून्दशशतं लेभे दुर्द्धर्षत्वमरातिषु ।
अव्याहतेन्द्रियौ (२)जः श्रीतेजोवीर्ययशोबलम् ॥ १८ ॥
योगेश्वरत्वमैश्वर्यं गुणा यत्राणिमादयः ।
चचाराव्याहतगतिर्लोकेषु पवनो यथा ॥ १९ ॥
स्त्रीरत्नैरावृतः क्रीडन्रेवाम्भसि मदोत्कटः ।
वैजयन्तीं स्रजं बिभ्रद्रुरोध सरितं भुजैः ॥ २० ॥
विप्लावितं स्वशिबिरं प्रतिस्रोतःसरिज्जलैः ।
नामृष्यत्तस्य तद्वीर्यं वीरमानी दशाननः ॥ २१ ॥
गृहीतो लीलया स्त्रीणां समक्षं कृतकिल्बिषः ।
माहिष्मत्यां सन्निरुद्धो मुक्तो येन कपिर्यथा ॥ २२ ॥
स एकदा तु मृगयां विचरन्विजने वने ।
यदृच्छयाऽऽश्रमपदं जमदग्नेरुपाविशत् ॥ २३ ॥
तस्मै स नरदेवाय मुनिरर्हणमाहरत् ।
ससैन्यामात्यवाहाय हविष्मत्या तपोधनः ॥ २४ ॥

भाषाटीका ।

तबतौ सत्यवती ने अपने पति भार्गव (ऋचीक) को प्रसन्न किये और कहा,कि – महाराज ! ऐसा न होवे ऐसी कृपाकरौ । तब ऋषि बोले, अच्छा तौ ऐसे गुणवाला पौत्र होगा तब जमदग्नि शांत पुत्र हुए ॥ ११ ॥

और वह सत्यवती तौ महापुण्यवाली लोकपावनी कौशिकी नदी होगई ॥ जो रेणु की पुत्री रही रेणुका उसको जमदग्नि ने विवाह लीनी ॥ १२ ॥

तिस्के विषैं भार्गव ऋषि से वसुमान् आदि पुत्र उत्पन्न हुए तिन पुत्रों के मध्य में छोटे परशुराम इस नाम से विख्यात राम हुए ॥ १३ ॥

जिनको बुधजन वासुदेव का अंश कहते हैं और हैहय राजाओं के कुलांतक भी कहते हैं । जिनने इस पृथिवी को इक्कीस वार विना क्षत्रियों की कर दीनी ॥ १४ ॥

जो अब्रह्मण्य दुष्टक्षत्रिय पृथिवी के भाररूप रहे उन लोगों का नाश करते हुए । और जो लोग रजोगुण तमोगुण की वृत्ति वाले रहे उनको थोडे अपराध करने पर भी मारते हुए ॥ १५ ॥

राजो वाच ॥

राजा परीक्षित बोले, कि–ऐसा भगवान् श्रीपरशुरामजी का अभागे अजित मनस्क क्षत्रियों ने क्या अपराध किया रहा कि जिससे वारंवार क्षत्रियों का कुल नष्ट हुआ ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कार्तवीर्यार्जुनेन कृतमपराधं वक्तुं तस्य दर्पहेतुमैश्वर्यादिकमाह-हैहयानामिति षड्भिः । परिकर्मभिः परिचर्यादिभिर्दत्तं दत्तात्रेयमाराध्य ॥ १७ ॥

अव्याहतमिन्द्रियादिकं च लेभे ॥ १८ ॥

यत्र यस्मिन्नैश्वर्येऽणिमादयो गुणाः ॥ १९ ॥

रेवाम्भसि नर्मदाजले सरितं नर्मदाम् ॥ २० ॥

रावणो दिग्विजये माहिष्मत्याः समीपे नर्मदायां देवपूजां कुर्वंस्तेन प्रवाहस्यावरोधात्प्रतिस्रोतसः सत्यास्तस्याः सरितो जलैर्विप्लावितं स्वशिबिरमालक्ष्य तस्य तद्वीर्यं न सेहे ॥ २१ ॥

ततश्च कृतकिल्बिषः क्रीडन्तमभिभवितुं प्रवृत्तस्सन् गृहीतः

(१) नारायणांशांशम् इति वीर० (२) अज इति विज० ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

माहिष्मत्यां स्वपुर्यां कपिरिव सन्निरुद्धश्च पुनश्चाऽवज्ञया येन मुक्तः ॥ २२ ॥

इदानीं तत्कृतमपराधं दर्शयन्नाह–स एकदेत्यादिना ॥ २३ ॥

अर्हणमातिथ्यादि हविष्मत्या कामधेन्वा ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं पृष्टो मुनिः कार्त्तवीर्यार्जुनेन कृतमपराधं वक्तुं तस्य हेतुमैश्वर्यादिकमाह–हैहयानामितिषड्भिः । हैहयानां जनपदानाम् अधिपतिः पुरुषर्षभोऽर्जुनः कार्तवीर्यः परिकर्मभिः परिचर्याभिः नारायणांशांशावतारभूतं दत्तं दत्तात्रेयम् आराध्य ॥ १७ ॥

दशशतं सहस्रं बाहून् अरातिषु शत्रुषु दुर्धर्षत्वं दुःसहत्वम् अव्याहतामिन्द्रियादिकं योगेश्वरत्वमैश्वर्यं च क्षेमे लब्धवान् इन्द्रियादीनां समाहारद्वन्द्वस्ततोऽव्याहतशब्देन कर्मधारयः तत्र ओजो बुद्धिबलं तेजः शरीरकान्तिः वीर्यमिन्द्रियबलं यशः कीर्तिः बलं शरीरबलम् ऐश्वर्यं विशिनष्टि यत्र यस्मिन्नैश्वर्येऽणिमादयो गुणाः एवं लब्धसहस्रबाह्वादिरर्जुनः पवनो यथा तद्वत् लोकेष्वव्याहतगतिर्विचचार ॥ १८–१९ ॥

स्त्रीभिरिति । स कदाचित्स्त्रिय एव रत्नानि तैरावृतः वैजयन्तीस्रजं बिभ्राणः रेवाम्भसि नर्मदाया जले क्रीडन् मदोद्रिक्तः सरितं रेवां भुजैः रुरोध ॥ २० ॥

विप्लावितमिति । तदा दशाननो रावणो दिग्विजयाय माहिष्मत्या अर्जुनपुर्याः समीपे नर्मदायां शिबिरे देवपूजां कुर्वन् तेन प्रवाहस्यावरोधात्प्रतिस्रोतसः प्रत्युद्गतप्रवाहायाः सरितो नर्मदाया जलैराप्लावितं स्वशिबिरमालक्ष्य तस्मादपि वीरमात्मानं मन्यमानः तस्य कार्त्तवीर्यस्य तद्वीर्यं नामृष्यत् न ममर्ष किन्तु तमभ्यद्रवदिति शेषः ॥ २१ ॥

गृहीतइति । ततः कृतकिल्बिषः क्रीडन्तमभिभवितुं प्रवृत्तो दशाननः स्त्रीणां समक्षं येनार्जुनेन लीलया गृहीतः माहिष्मत्यां पुर्यां संनिरुद्धः पश्चान्मुक्तश्च यथा कपिर्गृहीतो मुच्यते तद्वत् अनेन रावणादप्यातिशयितवीर्यैश्वर्यवत्त्वमुक्तम् ॥ २२ ॥

इदानीं तत्कृतमपराधं दर्शयन्नाह—स एकदेत्यादिना । सोऽर्जुन कदाचिद्विपिने सुचिरं मृगयां विचरन् कुर्वन् यदृच्छया जमदग्नेराश्रमस्थानमुपागमत् ॥ २३ ॥

तस्मा इति । तस्मै आगताय नरदेवायार्जुनाय सैन्यामात्यवाहनसहिताय स मुनिर्जमदग्निस्तपोधनो हविष्मत्या कामधेन्वा अर्हणमातिथ्यमाहरच्चक्रे ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दत्तं दत्तात्रेयं परिकर्मभिः परिचर्याभिराराध्य ॥ १७ ॥

अरातिषु दुर्धर्षत्वं वरम् अजश्रीरौत्पत्तिकी श्रीर्यत्र तेज आदयो ऽणिमादयश्च गुणाः सन्ति अव्याहतगतिश्चचार इत्यन्वयः ॥ १८ ॥ १९ ॥

रेवायाः नर्मदायाः अम्भसि रुरोध प्रवाहस्तम्भनं कृतवान् ॥ २० ॥

स्वशिबिरं रावणस्य सेनाविमोचनस्थानं प्रतिस्रोतः सरिज्जलैः प्रतीपगमनं स्रोतः प्रवाहो येषां तानि तथा प्रतिस्रोतांसि च सरिज्जलानि प्रतिस्रोतस्सरिज्जलानि तैर्विप्लावितं प्रवाहवेगेन नीतं वीक्ष्येति शेषः । "स्रोतोऽम्बुनिर्गमद्वारे इन्द्रियेषु जलस्रुतौ" इति च ॥ २१ ॥

यथा केनचित्कपिर्मुक्तः पुनर्बद्धो भवति तथाऽयं दशमुखो येनार्जुनेन माहिष्मत्यां सन्निरुद्धोऽभूदित्यन्वयः ॥ २२ ॥ २३ ॥

हविर्धान्या कामधेन्वा ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

रावणो दिग्विजये माहिष्मत्याः समीपे देवपूजां कुर्वन् तेन प्रवाहस्याऽवरोधात् हेतोः प्रतिस्रोताः प्रतिकूलप्रवाहिनी सरिद्रेवा तस्या जलैः प्लावितं स्वशिबिरमालक्ष्य तस्य तद्वीर्यं न सेहे तेन साकं योद्धुमगमदित्यर्थः ॥ २१ ॥

ततश्च स रावणस्तेन पराजित्य गृहीतः ॥ २२ ॥

एवंवीर्योऽपि सोऽर्जुनः परशुरामेण हत इति वक्तुं तत्कृतमपराधं दर्शयति, स इति ॥ २३ ॥

हविष्मत्या कामधेन्वा ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

दुर्धर्षेणार्जुनेन कृतमपराधं वक्तुं तस्य दर्पमूलमाह–हैहयानामित्यादिना । परिकर्मभिः परिचर्यादिभिः ॥ १७ ॥ १८ ॥

यत्राणिमादयो गुणाः तदैश्वर्यं च क्षेमे ॥ १९ ॥

रेवाम्भसि नर्मदाजले ॥ २० ॥

तदा दिग्विजये प्रवृत्तो वीरमानी दशाननस्तत्रागतः शिबिरस्थः देवपूजनपरः प्रतिस्रोतःसरिज्जलैः प्रतिलोमस्रोतसः सत्याः सरितो जलैः स्वशिबिरं विप्लावितं वीक्ष्येति शेषः । तस्यार्जुनस्य तादृशं वीर्यं नामृष्यत न सेहे ॥ २१ ॥

तदैव कृतकिल्बिषः क्रीडायां युद्धारम्भेन कृतविघ्नो दशाननो येनार्जुनेन लीलयैव कपिवदवज्ञया गृहीतः सन्निरुद्धो मुक्तश्च ॥ २२ ॥

तं महत्कृतमपराधमाह–स इत्यादिना ॥ २३ ॥

अर्हणमातिथ्यादिकम् हविष्मत्या होमधेन्वा आहरत् सम्पादितवान् ॥ २४ ॥

भाषा टीका ।

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि-हैहय वंशियों का अधिपति क्षत्रियों में श्रेष्ठ अर्जुन नाम से प्रसिद्ध रहा, उसने श्रीनारायण के अंश भगवान् दत्तात्रेयजी को परिचर्याओं से प्रसन्न किये ॥ १७ ॥

और प्रसन्न कर दश सैकड़ा (एक सहस्र) बाहुओं को प्राप्त हुआ, और शत्रुओं में दुर्धर्षता को तथा अव्याहत(प्रतिघात शून्य) इन्द्रियें, ओज, तेज, वीर्य, यश, और बलको भी प्राप्त हुआ ॥ १८ ॥

स वीरस्तत्र तद्दृष्ट्वा आत्मैश्वर्यातिशायनम्।
तन्नाद्रियताऽग्निहोत्र्यां साभिलाषः सहैहयः ॥ २५ ॥
हविर्धानीमृषेर्दर्पान्नरान् हर्तुमचोदयत।
ते च माहिष्मतीं निन्युः सवत्सां क्रन्दतीं बलात् ॥ २६ ॥
अथ राजनि निर्याते राम आश्रम आगतः।
श्रुत्वा तत्तस्य दौरात्म्यं चुक्रोधाऽहिरिवाऽऽहतः ॥ २७ ॥
(१)घोरमादाय परशुं सतूणं चर्म कार्मुकम्।
अन्वधावत दुर्द्धर्षो मृगेन्द्र इव यूथपम् ॥ २८ ॥
तमापतन्तं भृगुवर्यमोजसा धनुर्धरं बाणपरश्वधायुधम्।
ऐणेयचर्माम्बरमर्कधामभिर्युतं जटाभिर्ददृशे पुरीं विशन् ॥ २९ ॥
अचोदयद्धस्तिरथाश्वपत्तिभिर्गदासिबाणर्ष्टिशतघ्निशक्तिभिः।
अक्षौहिणीः सप्तदशातिभीषणास्ता राम एको भगवानसूदयत् ॥ ३० ॥
यतो यतोऽसौ प्रहरत्परश्वधो मनोऽनिलौजाः परचक्रसूदनः।
ततस्ततश्छिन्नभुजोरुकन्धरा निपेतुरुर्व्यां हतसूतवाहनाः ॥ ३१ ॥
दृष्ट्वा स्वसैन्यं रुधिरौघकर्दमे रणाजिरे रामकुठारसायकैः।
विवृक्णचर्मध्वजचापविग्रहं निपातितं हैहय आपतद्रुषा ॥ ३२ ॥

भाषा टीका।

और जिसमें योगेश्वरत्व ऐश्वर्य और अणिमादिक गुण रहे, अनिषिद्ध गमन वाला लोकों में पवन के सदृश विचरता रहा ॥ १९ ॥

बहुत सी अति उत्तम, स्त्रियों के सहित नर्मदा के जल में मदोत्कट होकर क्रीडा करता रहा, वैजयंती माला को धारण किये हुए अपनी भुजाओं से नर्मदा को रोकता भया ॥ २० ॥

(इतने में ऊपर की तरफ कहीं रावण नर्मदा के तट पर अपना तंबू लगाकर कुछ महादेव की पूजा पत्री करता रहा जब नर्मदा का जल सहस्र बाहु के बाहुओं से रुककर ऊपर को बढा तब) स्रोत के सन्मुख चलते हुए नर्मदा के जल से रावण का शिविर और सब सामग्री डूबने लगी तब वीरमानी दशानन उस के उस वीर्य को नहीं सहता हुआ ॥ २१ ॥

और उसके समीप जाकर उसके कुछ पराभव करने में जब प्रवृत्त हुआ) तब स्त्रियों के समक्ष कृतापराध उस रावण को अर्जुन ने पकड लिया और माहिष्मती अपनी पुरी में कारागार में बंदरके नाईं बंदकर दिया फिर कभी कपी के तरह छोड भी दिया ॥ २२ ॥

वह राजा सहस्रार्जुन एक समय विपिन में विचरता हुआ वनही में जमदग्नी के आश्रम में प्रवेश करते हुए ॥ २३ ॥

उस हविष्मती के नरदेव के लिये तपोधन मुनि ने पूजा भेट दीनी और सेना मंत्री वाहनों सहित राजा का निमंत्रण किया और यथेष्ट भोजनादि सत्कार किया ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

तदर्हणां नाद्रियत तस्मिन्नातुष्यत् यतोऽग्निहोत्र्यां होमधेनौ साभिलाषः सहैहयो हैहयैः सह वर्त्तमानः ॥ २५ ॥

दर्पाद्धेतोः ऋषेर्हविर्द्धानीमग्निहोत्रधेनुं हर्त्तुं नरानचोदयत् प्रेरितवान् ॥ २६ ॥

तद्दौरात्म्यं हविष्मत्या हरणं क्रोधयुक्तोऽहिरिव चुक्रोध ॥ २७॥
सतूणं कार्मुकं चर्म चादाय ॥ २८ ॥
ऐणेयं चर्म कृष्णाजिनमम्बरं यस्य ॥ २९—३० ॥

प्रहरन् परश्वधो यस्य मनश्चानिलश्च तयोरिवौजो वीर्यं यस्य परेषां चक्रं सैन्यं सूदयतीति तथा छिन्ना भुजा ऊरवः कन्धराश्च येषाम् हताः सूता वाहनानि च येषां ते वीरा निपेतुः ॥ ३१ ॥

विवृक्णाश्चर्मादयो यस्य ॥ ३२ ॥

(१) परशुं योजयामास इति विजय०।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स इति । तदा सोऽर्जुन आत्मन ऐश्वर्यादप्यतिशयितमद्भुतं वीर्यं सामर्थ्यं दृष्ट्वा तदर्हणां नाद्रियत नाहतवान् किन्तु स हैहयोऽर्जुनः अग्निहोत्र्यां होमधेनौ साभिलाषो भटान् दृष्ट्वा क्रूरैर्हविर्धानीं धेनुं हर्तुमचूचुदत् ते चोदिता नराः सवत्सां क्रन्दतीं क्रोशन्तीं हविर्धानीं बलात्प्रसह्य माहिष्मतीं पुरीं निन्युः ॥ २५ ॥ २६ ॥

अथेति । अथ राजन्यर्जुने निर्याते निर्गते सति पूर्वं कचिद्गतो रामः पितुराश्रममागतः तस्यार्जुनस्य तद्दौरात्म्यं श्रुत्वा आहतस्ताडितः अहिः सर्प इव चुक्रोध क्रुद्धो बभूव ॥ २७ ॥

घोरमिति । ततो घोरं भीषणं परशुं सतूणं कार्मुकं वर्म कवचं चादाय मृगेन्द्रः सिंहो यूथपं गजं प्रतीव दुराधर्षोऽन्वधावत् अर्जुनं पृष्ठतोऽनुसृत्याधावत् ॥ २८ ॥

तामिति । ततस्तमापतन्तं भृगुवर्यं रामं पुरीं विशन्नर्जुनो ददर्श, कथम्भूतम् ? ओजसा उपलक्षितमितिशेषः । ओजसा आपतन्तमिति वा बाणपरश्वधौ बाणपरशू आयुधे यस्य तम् ऐणेयं चर्म कृष्णाजिनमम्बरं यस्य तम् अर्कस्येव धाम तेजो यासां ताभिर्जटाभिर्युतम् ॥ २९ ॥

अचोदयदिति । ततोऽर्जुनः हस्त्यादिभिः गदाभिश्चातिभीषणाः सप्तदशाक्षौहिणीः सेनाः अचूचुदत् ऋष्टिशतघ्निशक्तयः आयुधविशेषाः ताश्चाक्षौहिणीर्भगवान् रामो भार्गव एकोऽसहाय एव असूदयत् जघान हस्तिनो गजाः पत्तयः पदातयः रथानामेकविंशतिसहस्राणि अष्टौ शतानि सप्ततिश्चैका एवं गजानामपि नराणां तु शतसहस्राणि नव सहस्राणि च पञ्चाशदधिकानि त्रीणि शतानि च अश्वानां तु सहस्राणि षट् षष्टिःषट्चेति सङ्ख्ययैका ऽक्षौहिणी ज्ञेया तथाचोक्तं महाभारते आदिपर्वणि द्वितीयेऽध्याये-

"एको रथो गजश्चैकः नराः पञ्च पदातयः ।
त्रयश्च तुरगास्तज्ज्ञैःपत्तिरित्यभिधीयते ॥
पत्तिं तु त्रिगुणामेतां विदुः सेनामुखं बुधाः ।
त्रीणि सेनामुखान्येको गुल्म इत्यभिधीयते ॥
त्रयो गुल्मा गणो नाम वाहिनी तु गणास्त्रयः ।
स्मृतास्तिस्रस्तु वाहिन्यः पृतनेति विचक्षणैः ॥
चमूस्तु पृतनास्तिस्रश्चम्वस्तिस्रस्त्वनीकिनी ।
अनिकीनीन्दशगुणामाहुरक्षौहिणीं बुधाः ॥
अक्षौहिण्यस्तु संख्याता रथानां द्विजसत्तमाः ।
संख्यागणिततत्त्वज्ञैः सहस्राण्येकविंशतिः ॥
शतान्युपरि चाष्टौ च तथाभूयश्च सप्ततिः ।
गजानां तु परीमाणं तावदेवात्र निर्दिशेत् ॥
ज्ञेयं शतसहस्रं तु सहस्राणि तथा नव ।
नराणामधि पञ्चाशच्छतानि त्रीणि चानघाः ॥
पञ्चषष्टिसहस्राणि तथाऽश्वानां शतानि च ।
दशोत्तराणि षट्चाहुर्यथावदभिसंख्यया ॥
एतामक्षौहिणीं प्राहुः संख्यातत्त्वविदो जनाः ।

इति ॥ ३० ॥

यतो यत इति । प्रहरन् परश्वधो यस्य अनलस्येव ओजस्तेजो यस्यासौ रामः परेषां चक्रं सैन्यमण्डलं सूदयतीति तथाभूतो यत्र यतो यत्र यत्र सैन्यैः निचक्रमेति शेषः । ततस्ततस्तत्र तत्र छिन्ना भुजा ऊरवःकन्धराश्च येषां हताः सूता वाहनानि च येषां ते वीरा निपेतुः ॥ ३१ ॥

ततो रामस्य कुठारेण सायकैश्च विवृक्णा छिन्ना वर्मादयो यस्य तत्स्वसैन्यं रुधिरौघेण कर्दमो यस्मिन् तस्मिन् रणाजिरे युद्धाङ्गणे निपातितं दृष्ट्वा हैहयो ऽर्जुनो रुषा आपतत् तत्र विग्रहो देहः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आत्मनः स्वस्य ऐश्वर्यमतिशायिनं अतीत्य वर्तमानं तदैश्वर्यं नाद्रियन्नादरं कुर्वन् अग्निहोत्रीं धेनुं प्रति साभिलाषः इच्छां कुर्वन् ॥ २५ ॥

हविर्धानीं धेनुं नरान् पुरुषान् हर्तुं नेतुम् अयोजयान्नियुक्तवान् ॥ २६ ॥ २७ ॥

योजयामास उत्तेजितं कृतवान् कार्मुकं गृहीत्वेति शेषः । रथे योजयामासेति वा ॥ २८ ॥

ऐणेयं चर्म कृष्णाजिनं तदेवाम्बरं यस्य स तथा तम् आत्मनः स्वस्य धाम तेजो यासां ताः तथा ताभिर्जटाभिर्युक्तं तं पुरीमापतन्तम् ॥ २९ ॥

अर्जुनो या अक्षौहिणीरचोदयद्रामस्ता असूदयदित्यर्थः ॥ ३० ॥

मनोवदनिलवदोजो वेगो यस्य स तथा मनोवेग अनिलवद्वष्टम्भ इति वा "ओजोवष्टम्भ बलयोः" इति यादवः ॥ ३१ ॥

विग्रहो देहः ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तत् अर्हणसाधनमैश्वर्यं दृष्ट्वा तत् अर्हणां नाद्रियत् यतोऽग्निहोत्र्यां कामधेनौ ॥ २५ ॥

हविर्द्धानीं कामधेनुं हर्त्तुम् ॥ २६—२८ ॥

पुरीं प्रविशन्नेवार्जुनो ददर्श ॥ २९ ॥

हस्त्यादिभिर्गदादिभिश्च भीषणा अक्षौहिणीरचोदयत् प्रेषयामास ॥ ३० ॥

प्रहरन् परश्वधो यस्य सः मनोऽनिलयोरिवौजो वेगो यस्य सः प्रथमं सैन्यस्याऽतिबाहुल्ये दृष्टे मनस इवात्मनो वेगः कृतः तस्मिन्नष्टप्राये सति किञ्चिद्भ्रमणार्थमनिलस्येवेत्यर्थः । तत्र तत्र वीरा निपेतुः ॥ ३१ ॥

हैहयोऽर्जुनः ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सहैहयः हैहयैः सहवर्त्तमानः सोऽर्जुनः आत्मवीर्यातिशायिनं तद्वीर्यं दृष्ट्वा तदर्हणां नाद्रियत् नादृतवान् यतो अग्निहोत्र्यां होमधेनौ साभिलाषः ॥ २५ ॥

अथार्जुनः पञ्चशतेषु बाहुभिर्धनुष्षु बाणान्युगपत्स सन्दधे।
रामाय रामोऽस्त्रभृतां समग्रणीस्तान्येकधन्वेषुभिराच्छिनत्समम् ॥ ३३ ॥
पुनः स्वहस्तैरचलान् मृधेऽङ्घ्रिपानुत्क्षिप्य वेगादभिधावतो युधि।
भुजान् कुठारेण कठोरनेमिना चिच्छेद रामः प्रसभं त्वहेरिव ॥ ३४ ॥
कृत्तबाहोः शिरस्तस्य गिरेः शृङ्गमिवाहरत्।
हते पितरि तत्पुत्रा अयुतं दुद्रुवुर्भयात् ॥ ३५ ॥
अग्निहोत्रीमुपावर्त्य सवत्सां परवीरहा।
समुपेत्याश्रमं पित्रे परिक्लिष्टां समर्पयत् ॥ ३६ ॥
स्वकर्म तत्कृतं रामः पित्रे भ्रातृभ्य एव च।
वर्णयामास तच्छ्रुत्वा जमदग्निरभाषत ॥ ३७ ॥

श्रीमच्छुकदेवकृतसिन्द्धान्तप्रदीपः।

हविर्धानीमग्निहोत्रधेनुम् ॥ २६—२७ ॥

सतूणं कार्मुकं धनुः चर्म ऐणेयं चादाय ॥ २८ ॥

पुरीं विशन्नर्जुनः ऐणेयं चर्म कृष्णाजिनम् अम्बरं यस्य तम् अर्कस्येव धाम द्युतिर्यासां ताभिर्जटाभिर्युतं भृगुवर्यं ददर्श ॥२९॥३०॥

मनोऽनिलयोरिवौजो वीर्यं यस्य परचक्रं शत्रुसैन्यं सूदयतीति तथा एवंभूतोऽसौ परशुरामः यतो यतो यत्र यत्र प्रहरत्परश्वधो निक्षिप्तपरश्वधो जातः ततस्ततः छिन्ना भुजा ऊरवः कन्धराश्च येषां हताः सूता वाहनानि च येषां ते शत्रवो निपेतुः ॥ ३१ ॥

विवृक्णाश्छिन्नाश्चर्मादयो यस्य तथाभूतं सैन्यं दृष्ट्वा हैहयोऽर्जुनो रणाजिरे आपतत् ॥ ३२ ॥

भाषा टीका।

तब तौ उस वीर राजा हैहय ने इस प्रकार ऋषि का वैभव देखा फिर-अपने ऐश्वर्य को भी उल्लंघन करने वाला ऋषि का ऐश्वर्य है ऐसा विचार कर ऋषि के सत्कार का तौ आदर न किया पर अग्नि होत्र की साधन रूप ऋषि की धेनु में अभिलाषा करता हुआ ॥ २५ ॥

और दर्प से ऋषि की हविर्धानी (धेनु) को हरण के लिये मनुष्यों को आज्ञा देता हुआ, तब राजा के किंकर लोग भी बछरा सहित उस धेनु को बलात्कार (जोरी) से माहिष्मती-पुरी को लेचले ॥ २६ ॥

राजा के गये पीछे परशुरामजी आश्रम में आये और उस राजा के दुरात्मापने को सुनकर ताडित सर्प के नाईं क्रोध करते हुए ॥ २७ ॥

और घोर परशु को हाथ में लेकर तथा तूण (भाते) सहित धनुष, और चर्म (ढाल) को लेकर दुर्धर्ष मृगेन्द्र हाथियों के यूथ पति पर जैसे दौडे तिस प्रकार राजा के पीछे दौडते हुए ॥ २८ ॥

राजा ने भी पुरी के प्रवेश के समय पर धनुषबाण को धारण किये परशु हाथ में लिये मृगचर्म का वस्त्र लपेटें तथा कर्म तेज और जटाओं से देदीप्यमान, और अपने ऊपर दौडकर आते वाले भृगुवर्य (परशुराम) को देखा ॥ २९ ॥

तब तौ राजा ने, गदा, असि, बाण, ऋष्टि, शतघ्नि, शक्ति, इत्यादिक आयुधों के सहित अत्यंत भयानक गज रथ तुरग पदाति इस प्रकार की चतुरंगणी सेना सप्तदश (१७) अक्षौहिणी परशुरामजी पर भेजी। परंच भगवान् राम ने उस सेना को एकले ने ही समाप्त करदी ॥ ३० ॥

जहां २ पर शत्रुओं के सेना के नाश करने वाले मन पवन सदृश वेग वाले परशुरामजी अपने परशु का प्रहार करते जाते तहां २ सूत वाहनों सहित बडे २ वीरों के भुजा ऊरू और कंधरा कट कट कर पडते जाते ॥ ३१ ॥

तब राजा अपनी सेना को, राम के कुठार और बाणों से कटे हुए हैं ढाल, ध्वजा, चाप, और विग्रह, जिसका ऐसी, और रणभूमि में रुधिर के प्रवाह की कीच में पडी हुई देख कर संग्राम में आपही आकूँदा ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

पञ्चशतेषु धनुष्षु सोऽर्जुनो रामाय सन्दधे एकमेव धनुर्यस्य सः पाठान्तरे एक एव बन्धः सन्धानं येषां तैरिषुभिः तानि धनूंषि समं सह तत्क्षणमेवाच्छिनत् ॥ ३३ ॥

राम राम ! महाबाहो ! भवान् पापमकारषीत् ।
अवधीन्नरदेवं यत्सर्वदेवमयं वृथा ॥ ३८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मृधे साधनभूतानचलानङ्घ्रिपांश्चोत्क्षिप्याभिधावतस्तस्य भुजांश्चिच्छेद अहेः फणा इवेत्यर्थः ॥ ३४-३५ ॥

समर्पयत समार्पयत् ॥ ३६-३८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथेति । अथ पञ्चशतेषु धनुष्षद्वंबाहुभिर्बाणान् युगपत् सोऽर्जुनो रामाय सन्दधे अथास्त्रभृतामग्रणीः राम एकधन्वी तान् बाणान् इषुभिः सममेकदा समच्छिनत् सञ्चिच्छेद ॥ ३३ ॥

पुनरिति । पुनः स्वहस्तैरचलानङ्घ्रिपांश्चोत्क्षिप्य युधि संग्रामे वेगादभिधावतोऽर्जुनस्य भुजान् कठोरनेमिना कुठारेण रामः प्रहसन्निव प्रसभं बलाच्चिच्छेद । ३४ ॥

कृत्तेति । कृत्ता छिन्ना बाहवो यस्य तस्यार्जुनस्य शिरः गिरेः सकाशात् शृङ्गमिव जहार एवं पितर्यर्जुने हते सति तस्यार्जुनस्य पुत्रा अयुतसङ्ख्याकाः भयाद्भग्निहोत्रीं होमधेनुं सवत्साम् उपाहृत्य समीपमानीय रामाय समर्प्येत्यर्थः । दुद्रुवुः पलायाञ्चक्रिरे ततो राम आश्रममुपेत्य परिक्लिष्टां धेनुं पित्रे जमदग्नये समर्पयत् ॥ ३५—३६ ॥

तत्स्वेन कृतं कर्म पित्रे भ्रातृभ्यश्च शुश्राव वर्णयामास तद्रामोपवर्णितं कर्म श्रुत्वा जमदग्निरब्रवीत् ॥ ३७ ॥

तदेवाह—रामरामेति यावत्समाप्ति । हे राम, राम, महाबाहो,! भवान् पापं कृतवान्, किन्तत् ? यत्सर्वदेवमयं नरदेवमर्जुनं वृथा हतवानसीति ॥ ३८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अथागत्यार्जुनः पञ्चशतेषु धनुष्षु बाहुभिः बाणान्युगपदेकप्रयत्नेन सन्दधे । अस्त्रभृतां सम्यगग्रणी रामः समं युगपदेकस्मिन् धनुषि बद्धेषुभिः सन्धितशरैस्तान् पञ्चशतशरान् अच्छिनदित्यन्वयः ॥ ३३ ॥

पुनः रामः स्वहस्तैरचलान् गिरीन् अङ्घ्रिपान् वृक्षान् मृधे उत्क्षिप्य प्रहृत्य युधि वेगादभिधावतोऽर्जुनस्य भुजान् कठोरनेमिना शितधारेण चिच्छेदेत्यन्वयः ॥ ३४ ॥ ३५ ॥

उपावर्त्य निवर्त्य इतस्तत आकर्षणादिना परिक्लिष्टां क्लेशोपेताम् ॥ ३६-३९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

रामाय रामं हन्तुं रामस्तु तानि धनूंषि समं बाणैः सहितान्येव अच्छिनत् ॥ ३३ ॥

अचलान् पर्वतान् अभिधावतस्तस्य अहेः फणा इवेत्यर्थः ॥ ३४—३८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सोऽर्जुनो बाणान् युगपत् रामाय पञ्चशतेषु धनुष्षु सन्दधे रामः एकधन्वा एकमेव धनुर्यस्य सः इषुभिः समं तत्क्षणमेव तान् अच्छिनत् ॥ ३३ ॥ ॥

अहेः फणा इवेत्यर्थः ॥ ३४—३८ ॥

भाषा टीका ।

तत्पश्चात् सहस्रार्जुनने राम के लिये पांचसौ धनुषोंके विषै हजार बाहुओं से एक वार पांचसौ बाणों का सन्धान किया, परन्तु अस्त्र धारियों में श्रेष्ठ और अग्रणी ऐसे राम (परशुराम) जीने एक ही धनुष से मारे बाणों के गतिलाघव से एक ही बार अर्जुन पांच सौ धनुष काटकर गिरा दिये ॥ ३३ ॥

फिर अपने हाथों से अचल बड़े २ वृक्षों को उखाड़कर वेगसे दौड़ने वाले सहस्रार्जुन के ऊपर फेंकते हुए और युद्ध के विषै रामने सहस्रार्जुन की भुजाओं को कठोर धार वाले कुठार से वरजोरी काटते हुए जैसे सर्प के फणोंको काटते होवैं ॥ ३४ ॥

हजारों हाथों के कटने पर उसके माथे को पर्वतकी शिखरके नाईं गिरादिया, पिता के मरनेपर उसके दश हजार पुत्र मारे भय के भाग गये ॥ ३५ ॥

पराये वीर को मारने वाले परशुराम जी बछड़ा सहित अग्निहोत्रकी साधन भूत धेनुको लौटा लाये और आश्रम में आकर राजा के लेजाने से दुःखपाने वाली धेनुको पिता के लिये समर्पण करते हुए ॥ ३६ ॥

और परशुराम जी ने माहिष्मती पुरी में जाकर जो अपना पराक्रम किया सो भी पिता और भ्राताओं से कहते हुए, तिस को सुनकर परशुरामजी के पिता जमदग्नि कहने लगे ॥ ३७ ॥

जमदग्नि बोले कि—हे राम! हे राम ! हे महाबाहो! तुमने बड़ा पाप किया, क्योंकि ? तुमने सब देवमय नरदेव राजा को वृथा मारडाला ॥ ३८ ॥

वयं हि ब्राह्मणास्तात ! क्षमयाऽर्हणतां गताः ।
यया लोकगुरुर्देवः पारमेष्ठ्यमगात्पदम् ॥ ३९ ॥
क्षमया रोचते लक्ष्मीर्ब्राह्मी सौरी यथा प्रभा ।
क्षमिणामाशु भगवांस्तुष्यते हरिरीश्वरः ॥ ४० ॥
राज्ञो मूर्द्धाभिषिक्तस्य वधो ब्रह्मवधाद्गुरुः ।
तीर्थसंसेवया चांहो जह्यङ्गाऽच्युतचेतनः ॥ ४१ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
पारमहंस्यां संहितायां वैयासिक्याम्
पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अर्हणतां पूज्यताम् ॥ ३९ ॥
सौरी सूर्यस्य प्रभेव ॥ ४० ॥
तीर्थसंसेवया चकाराद्यमनियमैश्च अच्युते चेतना चित्तं यस्य सः ॥ ४१ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कृतागसो हननं न पापमित्याशयाह–वयमिति । वयं ब्राह्मणा हि "घातुं न घातुको विप्रः" इत्युक्तविधाहीति भावः । क्षमया हेतुभूतयाऽर्हणतां पूज्यतां गताः प्राप्ताः, क्षमां प्रस्तौति–ययेति । लोकगुरुर्देवो ब्रह्मा यया क्षमया पारमेष्ठ्यं परमेष्ठियोग्यं पदं स्थानम् अगात् प्राप्तवान् ॥ ३९ ॥

क्षमयेति । क्षमयैव ब्राह्मी लक्ष्मीः ब्रह्मकुलसम्बन्धिनी शमदमादिसंपत् यथा सौरी सूर्यप्रभा तथा रोचते प्रकाशते. भगवान् हरिरीश्वरोऽपि क्षमिणां क्षमावतामेवाऽऽशु तुष्यते प्रसन्नो भवतीति भावः ॥ ४० ॥

राज्ञ इति । किञ्च मूर्द्धाभिषिक्तस्य सार्वभौमस्येत्यर्थः । तस्य राज्ञो वधो ब्रह्मवधाद्विप्रवधादपि गुरुर्नितरां पापरूपः अतस्त्वं मुच्यसे भगवति न्यस्ता चेतना ज्ञानं यस्य तथाभूतस्तीर्थानां गङ्गादीनां संसेवया अंहस्त्वत्पापं जहि अपाकुरु ॥ ४१ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिकायाम्
पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यथा सौरी सूर्यसम्बन्धिनी प्रभा रोचते तथा ब्राह्मी ब्राह्मणसम्बन्धिनी लक्ष्मीः क्षमा प्रकाशते ॥ ४० ॥
मूर्द्धावसिक्तस्य चक्रवर्तिनः ब्रह्मवधात् ब्राह्मणहननादच्युते श्रीनारायणे बुद्धिर्यस्य स तथा ॥ ४१ ॥

इतिश्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
पञ्चदशोऽध्यायः ॥ १५ ॥
(विजयध्वजरीत्या त्रयोदशः ।)

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमद्विश्वनाथचक्रवर्तीसारार्थदर्शिनी ।

अर्हणतां पूज्यत्वम् ॥ ३९ ॥
ब्राह्मी ब्राह्मणसम्बन्धिनी लक्ष्मीः शोभा क्षमयैव रोचते द्योतते सौरी सूर्य्यस्य प्रभेव ॥ ४० ॥
चकाराद्यमनियमादिभिश्च श्लेषेण न च्युता चेतना चिच्छक्तिर्यस्य तथाभूत ईश्वरोऽपि लोकसंग्रहार्थमित्यर्थः ॥ ४१ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
नवमेऽयं पञ्चदशः सङ्गतः सङ्गतः सताम् ॥ १५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अर्हणतां पूज्यतां गताः प्राप्ताः लोकगुरुर्ब्रह्मा पदं स्थानम् ॥ ३९ ॥
ब्राह्मी ब्रह्मविद्यारूपा लक्ष्मीः श्रीः सौरी सूर्यस्य प्रभेव रोचते प्रकाशते ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ब्रह्मवधादपि गुरुर्गरीयान् ॥ ४१ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

पञ्चदशाऽध्यायार्थप्रकाशः ॥ १५ ॥

भाषा टीका

हे तात ! हम ब्राह्मणलोग तो क्षमा से ही पूज्यता को प्राप्त हुए हैं जिस क्षमा से लोकगुरु देव ब्रह्मा परमेष्ठी पद को पहुचे हैं ॥ ३९ ॥

क्षमासे ब्राह्मणों की लक्ष्मी दीप्ति को प्राप्त होती है, जैसे सूर्य की प्रभा । और क्षमावान् लोगों पर भगवान् श्रीहरि ईश्वर शीघ्र ही प्रसन्न होजाते हैं ॥ ४० ॥

मूर्धाभिषिक्त राजा का वध ब्राह्मण के वध से भी अधिक होता है, इसलिये हे राम ! तुम अच्युत में चित्त लगा कर तीर्थ सेवन करने से पापों को त्यागकरो ॥ ४१ ॥

इति श्रीमद्भागवत नवम स्कन्ध में पञ्चदश अध्याय की,

श्रीवृन्दावनस्थ पं भागवताचार्यकृत

भाषाटीका समाप्ता ॥ १५ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे पञ्चदशोऽध्यायः ॥ १५ ॥

॥ षोडशोऽध्यायः ॥

॥ श्रीशुक उवाच ॥

पित्रोपशिक्षितो रामस्तथेति कुरुनन्दन ! ।
संवत्सरं तीर्थयात्रां चरित्वाऽऽश्रममाव्रजत् ॥ १ ॥
कदाचिद्रेणुका याता गङ्गायां पद्ममालिनम् ।
गन्धर्वराजं क्रीडन्तमप्सरोभिरपश्यत ॥ २ ॥
विलोकयन्ती क्रीडन्तमुदकार्थं नदीं गता ।
होमवेलां न सस्मार किञ्चिच्चित्ररथस्पृहा ॥ ३ ॥
कालात्ययं तं विलोक्य मुनेः शापविशङ्किता ।
आगत्य कलशं तस्थौ पुरोधाय कृताञ्जलिः ॥ ४ ॥
व्यभिचारं मुनिर्ज्ञात्वा पत्न्याः प्रकुपितोऽब्रवीत् ।
घ्नतैनां पुत्रकाः पापामित्युक्तास्ते न चक्रिरे ॥ ५ ॥
रामः सञ्चोदितः पित्रा भ्रातॄन्मात्रा सहाऽवधीत् ।
प्रभावज्ञो मुनेः सम्यक्समाधेस्तपसश्च सः ॥ ६ ॥
वरेण च्छन्दयामास प्रीतः सत्यवतीसुतः ।
वव्रे हतानां रामोऽपि जीवितं चाऽस्मृतिं वधे ॥ ७ ॥
उत्तस्थुस्ते कुशलिनो निद्रापाय इवाञ्जसा ।
पितुर्विद्वांस्तपो वीर्यं रामश्चक्रे सुहृद्वधम् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

षोडशेऽथार्जुनसुतैर्जमदग्नौ हते मुहुः ।
रामात्क्षत्रवधः प्रोक्तो विश्वामित्रस्य चान्वयः ॥ ० ॥

॥ १ ॥ २ ॥

किञ्चिदीषच्चित्ररथे गन्धर्वराजे स्पृहा यस्याः सा किञ्चिन्न सस्मारेति वा ॥ ३ ॥

कलशं पुरोधायाऽग्रे निधाय ॥ ४ ॥

व्यभिचारं मानसं ज्ञात्वा ॥ ॥ ५ ॥

आज्ञाऽतिलङ्घिनां भ्रातॄणां मातुश्च वधे सञ्चोदितः सन् मुनेर्यः समाधिस्तपश्च तयोः प्रभावज्ञः यदि न हन्यां तर्हि मामपि शप्तुं समर्थः यदि तु हन्यान्तर्हि मयि सन्तुष्टः संस्तानपि जीवयितुं समर्थः इति जानन्नित्यर्थः ॥ ६ ॥ ७ ॥

नन्वतिनिन्दितं तत्कथं कृतवांस्तत्राह—पितुर्विद्वानिति पूर्वोक्त एवाभिप्रायः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं पित्रोपशिक्षित आदिष्टो रामस्तथेत्यङ्गीकृत्य हे कुरुनन्दन ! सम्वत्सरं तीर्थचर्यां चरित्वा कृत्वा पुनराश्रममाययौ ॥ १ ॥

कदाचिदिति । एवं स्थिते कदाचिद्रेणुका गङ्गां प्रति गता तस्यां कञ्चित् अप्सरोभिः सह क्रीडन्तं पद्ममालिनं चित्ररथाख्यं गन्धर्वराजमपश्यत् ॥ २ ॥

उदकार्थं जलाहरणार्थं नदीं गङ्गां गता रेणुका क्रीडन्तं

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

विलोकयन्ती सती किञ्चिदीषद् चित्ररथे स्पृहा यस्यास्तथाभूता होमवेलां पत्युरग्निहोत्रहोमसमयं न सस्मार विस्मृतवती ॥ ३ ॥

कालात्यय इति । ततः कथञ्चित् तं कालातिक्रमं विलोक्य विदित्वा मुनेः पत्युः सकाशादात्मनः शापमाशङ्कमाना रेणुका त्वरया गत्वा कलशं पुरः पत्युरग्रे निधाय कृताञ्जलिस्तस्थौ ॥४॥

व्यभिचारमिति । ततो मुनिः जमदग्निः पत्न्याः व्यभिचारं ज्ञात्वा प्रकुपितः पुत्रानब्रवीत्, किमिति ? हे पुत्रकाः ! पापामेनां हनत मारयतेति. एवमुक्तास्ते पुत्रा न चक्रिरे मातृवधमिति शेषः ॥ ५ ॥

ततः पित्रा सञ्चोदितः आज्ञातिलङ्घिनां भ्रातृणां मातुश्च वधे परिचोदितः स रामः मात्रा सह भ्रातृनवधीत्, कथमेवमकृत्यं कृतवानिति शङ्कां निराकुर्वन् रामं विशिनष्टि—मुनेः पितुर्यः समाधिस्तस्य तपसश्च सम्यक् प्रभावं जानातीति तथाभूतः यदि न हन्यां मामपि शप्तुं प्रभुः यदि वा हन्यां तर्हि पुनः प्रसादितः पिता मृतान् जीवयितुं समर्थ इति जानन्निति भावः ॥ ६ ॥

ततः प्रीतः सत्यवत्याः सुतो जमदग्निः वरेण छन्दयामास अध्ययनेन वसतीतिवद्वरेणेति हेत्वर्थे तृतीया वरार्थं चोदयामासेत्यर्थः । राममिति शेषः । ततः पित्रा वराय चोदितः रामः हतानां पुनर्जीवनं तेषामात्मवधे अस्मृतिं विस्मृतिं च वव्रे ॥ ७ ॥

ततस्ते भ्रातरः समातृकाः निद्रान्त इवाञ्जसा कुशलिनो जीवन्त उत्तस्थुः, नन्वनुचितं कथं कृतवान् ? तत्राह—पितुरिति । पूर्वोक्त एवाभिप्रायः शब्दार्थः स्फुटः ॥ ८ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

चरित्वा कृत्वा ॥ १ ॥

याता गङ्गामिति शेषः ॥ २ ॥

किञ्चिच्चित्ररथस्पृहा, ईषच्चित्ररथे स्पृहावती जाता ॥ ३ ॥

कलशं भर्तुः पुरो निधाय तत्रैव कृताञ्जलिस्तस्थौ ॥ ४ ॥

हनत हताङ्कुरुत तां हतिम् ॥ ५ ॥

मुनेः समाधेः तपसश्च सम्यक् प्रभावज्ञः प्रतापमाहात्म्ययोः प्रभावः स्यादिति ॥ ६ ॥

छन्दयामास वशीचकार "वशाभिप्राययोः छन्दः" इति च वधेः अस्मृतिं वयं रामेण हता इति स्मृतिशून्यत्वलक्षणं वरं च ॥ ७ ॥

रामेण एते वसुमदादयो जीवन्ति चेज्जीवन्तु नो चेन्म्रियन्तामिति मत्वा सुहृद्वधो नाकारि किन्तु स्वसार्वज्ञमीश्वरत्वेन दोषाभावं च प्रकटयितुमिति भावेनेत्याह—पितुरिति । "वीर्यं पराक्रमे रेतस्यन्नमाहात्म्ययोरपि" इत्यभिधानात्. पितुस्तपो माहात्म्यं जानता कृतमिति भावः । साक्षान्नारायणावतारस्य निरवद्यस्य सकलगुणाकरस्य भार्गवरामस्य क्षत्रहत्यादिदोषमार्जनाय तीर्थसेवा मातृभ्रातृवधात् स्वाज्ञाकारित्वेन प्रसन्नात् पितुर्वरदानमित्यादिकं कथं घटत इतीत्थं शङ्का—

"जामदग्न्यो वरं वव्रेऽनन्तशक्तिरपि स्वयम् ।
पितुर्मान्यत्व सिद्ध्यर्थं लोके लोकेश्वरः प्रभुः" ॥

(१) इत्यादिवाक्येन परिहर्तव्या इति ज्ञातव्यम् ॥ ८ ॥ ९ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

१ ॥

कदाचिदिति कार्त्तवीर्यवधात् पूर्वत्रेत्यर्थः । रेणुकावधानन्तरं कोपे त्यक्ते च तस्य कामधेनुहरणमिति स्कान्दे प्रसिद्धः ॥ २ ॥

किञ्चित् काचित् कौतुकमय्येव न तु काममयी चित्ररथे स्पृहा यस्याः अत्र ब्रह्माण्डपुराणं द्रष्टव्यम् ॥ ३ ॥

अतः पतिपरिचरणव्यत्यय एवात्र व्यभिचारो ज्ञेयः ॥ ४—१४ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

जमदग्निर्हतो यैस्तान् रामोऽर्जुनसुतानहन् ।
निःक्षत्रकृत् षोडशेऽत्र विश्वामित्रकथा ततः ॥
॥ १—२ ॥

किञ्चिदिति न सस्मारेत्यस्य विशेषणं होमवेलायाः किञ्चिन्मात्रं विस्मरणमभूदित्यर्थः । तत्र हेतुः चित्रमये गन्धर्वराजस्य रथे दर्शनकौतुकार्थं स्पृहा यस्याः सा ॥ ३ ॥

शापविशङ्किता हन्त हन्त किञ्चिन्मात्रविस्मरणात् एव मे होमवेलापीयतीव्यतीतेति भयविह्वला ॥ ४ ॥

होमवेलायाः प्रागेव जलमानेष्यामीति तस्या वचनस्य व्यभिचारं ज्ञात्वा स्वनित्यकर्मासिद्ध्या च प्रकर्षेण कुपितः हे पुत्रकाः ! एनां घ्नतेत्युक्तास्ते पुत्रा न चक्रिरे तस्या हननमिति शेषः ॥ ५ ॥

आज्ञालंघिनां भ्रातॄणां मातुश्च वधे नियुक्तोऽवधीत् नन्वेवमाज्ञापालनमपि जुगुप्सितं तत्राह—प्रभावज्ञः अस्य वधस्योदर्कं एवं भविष्यतीति सर्वज्ञत्वेन जानन्नित्यर्थः ॥ ६ ॥

वरेणेति वरं वृणीष्वेत्युक्तवानित्यर्थः । वव्रे इति मृता इमे जीवन्तु मत्कर्तृकं वधं च न स्मरन्त्वित्यहं वृणे इत्युक्तवान् ॥ ७—८

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

रामस्य तीर्थयात्रां पित्राज्ञानुवर्त्तित्वम् अर्जुनपुत्रैर्जमदग्निवधे कृते क्रुद्धेन श्रीपरशुरामेण त्रिस्सप्तकृत्वः कृतं क्षत्रवधं च पित्रोः पश्चिन्ति इति षोडशेन वर्णयति ॥ १ ॥ २ ॥

किञ्चित् चित्ररथे स्पृहा यस्याः अत एव तं विलोकयन्ती होमवेलां अग्निहोत्रसमयं न सस्मार ॥ ३ ॥

कलशं निधाय पुरो भर्तुरग्रे तस्थौ ॥ ४ ॥

व्यभिचारं स्पृहापूर्वकं परनिरीक्षणं योगबलेन ज्ञात्वा ॥ ५—१० ॥

(१) आपापमपि देवेशं पितरस्संनिवर्त्तयन् । अजानन्तोऽस्य महात्म्यं मोहितास्तस्य मायया ॥ मोहयन्मायया लोकं चक्रे चापचितिं वधे । पुण्यपापादिनिर्मातुः कुतः पापादिसङ्गतिः इति शेषतात्पर्यम् ।

येऽर्जुनस्य सुता राजन् ! स्मरन्तः स्वपितुर्वधम् ।
रामवीर्यपराभूता लेभिरे शर्म न क्वचित् ॥ ९ ॥
एकदाऽऽश्रमतो रामे सभ्रातरि वनं गते ।
वैरं सिसाधयिषवो लब्धच्छिद्रा उपागमन् ॥ १० ॥
दृष्ट्वाऽग्न्यगार आसीनमावेशितधियं मुनिम् ।
भगवत्युत्तमश्लोके जघ्नुस्ते पापनिश्चयाः ॥ ११ ॥
याच्यमानाः कृपणया राममात्राऽतिदारुणाः ।
प्रसह्य शिर उत्कृत्य निन्युस्ते क्षत्रबन्धवः ॥ १२ ॥
रेणुका दुःखशोकार्त्ता निघ्नन्त्यात्मानमात्मना ।
रामरामेहि तातेति विचुक्रोशोच्चकैः सती ॥ १३ ॥
तदुपश्रुत्य दूरस्थो हा रामेत्यार्त्तवत्स्वनम् ।
त्वरयाऽऽश्रममासाद्य ददृशे पितरं हतम् ॥ १४ ॥
तद्दुःखरोषामर्षार्तिशोकवेगविमोहितः ।
हा तात ! साधो ! धर्मिष्ठ ! त्यक्त्वाऽस्मान् स्वर्गतो भवान् ॥ १५ ॥
विलप्यैवं पितुर्देहं निधाय भ्रातृषु स्वयम् ।
प्रगृह्य परशुं रामः क्षत्रान्ताय मनोदधे ॥ १६ ॥

भाषा टीका ।

श्रीरुक्मिणीशमनिशं हृदि चिन्तयामि ॥

श्रीशुक उवाच

श्रीशुकदेवजी बोले, कि—हे कुरुनन्दन ! पिता ने जब राम को इस प्रकार शिक्षा दीनी तब राम भी उसी प्रकार अंगीकार कर एक संवत्सर पर्यन्त तीर्थ यात्रा करके फिर आश्रम को आते हुए ॥ १ ॥

किसी समय जमदग्नि की पत्नी रेणुका गंगाजी में गई वहां पर कमलों की माला वाले गंधर्व राज को अप्सराओं के साथ क्रीडा करते हुए देखती हुई ॥ २ ॥

रेणुका तौ जल लेने को नदी में गई रही पर अप्सरों के साथ क्रीडा करने वाले गंधर्वराज को देखने लगी, और होम की वेला को स्मरण न रहा और देखने से किंचित् चित्ररथ गंधर्वराज में स्पृहा भी होगई ॥ ३ ॥

फिर तौ इतने में काल का बहुत अति क्रम देखकर मुनि के शाप से शंकित होकर शीघ्र आकर कलश को मुनि आगे में धरकर हाथ जोडकर खड़ी होगई ॥ ४ ॥

मुनि ने भी अपनी पत्नी का मानसिक व्यभिचार जान कर कुपित होकर अपने पुत्रों से बोले, कि–हे पुत्र हौ ! तुम लोग इस पापिनी तुमारी माता को मारडालो इतना सुनकर पुत्रों ने कुछ न किया ॥ ५ ॥

तब पिता ने परशुरामजी से कही, कि—बेटा ! तुम भाइयों सहित माता को मारडालो बस पिता की आज्ञा सुनते मात्र पिता के तप और समाधि के प्रभाव को जानने वाले परशुरामजी ने परशु हाथ में लेकर तडाक २ उन सबों के माथे काट डाले ॥ ६ ॥

तब सत्यवती के पुत्र जमदग्नि महाराज ने प्रसन्न हो कर कहा, कि–पुत्र ! वरमांगले ॥ तब परशुरामजी ने भी यही वर मागा, कि—ये मरे हुए सब जी जावैं और इनकों "परशुराम ने हमको मारा" ऐसा स्मरण भी न होवै ॥ ७ ॥

तब तौ वे सब ही निद्रा लेकर पीछे जैसे जाग पड़ें इस प्रकार सब उठ खडे हुए ॥ यदि कहो कि परशुरामजी ने ऐसा अनुचित कर्म क्यों किया ? तहां शुकदेवजी कहते हैं, कि—परशुरामजी ने पिता के तपोबल को जानकर सुहृदों का बध किया कुछ उनके मारने ही की बुद्धि से नहीं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सर्वक्षत्रियवधे कारणं वक्तुमाह—येऽर्जुनस्य सुता इत्यादिना ॥ ९ ॥ १० ॥

भगवत्यावेशिता धीर्येन तम् ॥ ११—१४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दुःखादीनां वेगेन विमोहितः ॥ १५ ॥ १६ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

सर्वक्षत्रियवधे कारणं वक्तुमाह–येऽर्जुनस्य सुता इत्यादिना । हे राजन् ! अर्जुनस्य ये सुता रामवीर्येण पलायितास्ते स्वपितुर्वधं रामस्य कृतं स्मरन्तः क्वचिदपि शर्म सुखं न लेभिरे ॥ ९ ॥

एकदेति । कदाचित् सभ्रातरि रामे स्वाश्रमाद्वनं गते सति वैरं सिसाधयिषवः प्रतिचिकीर्षवः लब्धच्छिद्राः लब्धावसरा उपागमन् अर्जुनसुता इत्यनुषङ्गः ॥ १० ॥

तत्राश्रमे अग्न्यगारे अग्निहोत्रशालायामासीनं भगवत्यावेशितधियं समाहितमनसं मुनिं जमदग्निं दृष्ट्वा पाप एव निश्चयो येषां ते ऽर्जुनसुताः जघ्नुः हतवन्तः ॥ ११ ॥

याच्यमाना इति । कृपणया राममात्रा रेणुकया याच्यमानाः एनं न मारयतेति शेषः अतिदारुणाः नितरां क्रूराः बलाच्छिर उत्कृत्य छित्वा ते क्षत्रबन्धवः निन्युः नीतवन्तः ॥ १२ ॥

रेणुकेति । तदा रेणुका दुःखशोकार्ता दुःखं मानसिकः क्लेशः शोको बाह्यस्ताभ्यामार्ता पीडिता आत्मना आत्मानं घ्नन्ती ताडयन्ती सती रामरामेत्येवमुच्चैरुच्चुक्रोश आजुहाव ॥ १३ ॥

हा रामेत्यार्तस्वरं दूरस्थाः सुताः श्रुत्वा त्वरया आश्रममासाद्य हतं पितरं ददृशुः ॥ १४ ॥

त इति । ते जमदग्निसुताः दुःखादीनां वेगेन विमोहिता बभूवुरिति शेषः तत्र दुःखं मानसिक उपतापः रोषः क्रोधः अमर्षो ऽक्षमा आर्तिर्दैन्यं शोको रोदनं ततो रामः हा तातेत्यादिरूपेण विलप्य पितुर्देहं भ्रातृषु निधाय पितुर्देहं रक्षतेति भ्रातृनादिश्येत्यर्थः । स्वयं परशुं प्रगृह्य क्षत्रान्ताय क्षत्रकुलनाशाय मनोदधे सङ्कल्पञ्चकार ॥ १५ ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

लब्धच्छिद्राः लब्धावसराः ॥ १० ॥

विषयादाहृत्य भगवत्येव निवेशितबुद्धिम् ॥ ११ ॥ १२ ॥

आत्मना यत्नेनात्मानं देहैकदेशमुदरं "यत्नेऽर्केऽग्नौ मतौ वाते" इति यादवः । आत्मशब्दः पूर्वार्धे ॥ १३ ॥

दूरस्थाः स्वभिन्नदेशङ्गताः ॥ १४ ॥ १५ ॥

क्षत्रान्ताया ऽविशेषेण क्षत्रियकुलनाशाय ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ते दुःखेत्यर्द्धकम् । अत्र तद्दुःखेति पाठः स्वाम्यसम्मतः तच्छब्दस्य समस्तत्वेप्यनुपादानात् ते सरामा जमदग्निपुत्रा इति सम्बन्धोक्तौ च ॥ १५—१६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

निरपराधायाः पतिव्रताशिरोमण्याः रेणुकाया वधमादिष्टवतो जमदग्नेरपि वधरूपं तदपराधफलन्दर्शयन्नाह–येऽर्जुनस्येति ॥ ९ ॥

स्वभर्तुः प्राणान् याच्यमानाः ॥ १०—१२ ॥

तस्तदा आर्त्तवत् ॥ १३ ॥

अन्यस्या आर्त्ताया इव तस्या मातुः स्वरं उपश्रुत्य दृष्टे ददर्श ते भ्रातरः विमूर्च्छिता बभूवुः ॥ १४—१६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भगवति ध्येये आवेशिता धीर्येन तम् ॥ ११ ॥ १२ ॥

दुःखादीनां वेगेनोद्रेकेन विमोहितः ॥ १३—१६ ॥

भाषा टीका ।

हे राजन् ! जो अर्जुन के पुत्र लोग रहे वे सब अपने पिता के वध का स्मरण करते हुए भी राम के पराक्रम से पराभव को प्राप्त होकर कहीं भी सुख को प्राप्त नहीं होते भये ॥ ९ ॥

एक समय पर अपने भ्राताओं के सहित समिधा, कुश, फल आदिक लेने को राम तौ वन में गये रहे । इतने में सहस्रार्जुन के पुत्र बैर साधने की इच्छा से आग्रत होकर आश्रम में आ पहुचे ॥ १० ॥

और वहां पर अग्नि शाला में कुंड के समीप में विराजे हुए, भगवान् उत्तमश्लोक श्रीहरि में चित्त लगाये हुए जमदग्नि ऋषि को देखकर उन पाप के निश्चय वाले अर्जुन के पुत्रों ने ऋषी मारने का आरंभ किया ॥ ११ ॥

दीन विचारी राम की माता रेणुका बहुत याचनाभी करती पर क्षत्रियों में नीच पेले वे अति दारुण दुष्ट, जमदग्नि ऋषि का माथा काटकर लेगये ॥ १२ ॥

रेणुका सती विचारी दुःख शोक से दीन आर्त्त होकर अपनी छाती कूटती हुई पुकारी, हे राम ! हे राम ! हे तात ! कहां गये जल्दी आओ इस प्रकार ऊंचे स्वर से चिल्लाने लगी ॥ १३ ॥

परशुरामजी दूर से ही "हा राम" इस तरह का आर्त्त शब्द सुनकर बडे शीघ्र आश्रम में आकर पिता को मरा हुआ देखते भये ॥ १४ ॥

पिता के मरण से भया जो दुःख रोष, अमर्ष, आर्त्ति, और शोक, तिस्के वेग से अत्यंत मोहित होकर । हा तात ! हा साधो ! हे धर्मिष्ठ ! आप हमको छोडकर स्वर्ग चले गये ॥ १५ ॥

परशुरामजी इस प्रकार बहुत विलाप कर पिता के देह को भ्राताओं के समीप धर कर स्वयं आप हाथ में परशु लेकर क्षत्रियों के नाश का संकल्प करते हुए ॥ १६ ॥

गत्वा माहिष्मतीं रामो ब्रह्मघ्नविहतश्रियम् ।
तेषां स शीर्षभी राजन् ! मध्ये चक्रे महागिरिम् ॥ १७ ॥
तद्रक्तेन नदीं घोरामब्रह्मण्यभयावहाम् ।
हेतुं कृत्वा पितृवधं क्षत्रेऽमङ्गलकारिणि ॥ १८ ॥
त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां प्रभुः ।
स्यमन्तपञ्चके चक्रे शोणितोदान् (१)ह्रदान्नव ॥ १९ ॥
पितुः कायेन सन्धाय शिर आदाय बर्हिषि ।
सर्वदेवमयं देवमात्मानमयजन्मखैः ॥ २० ॥
ददौ प्राचीं दिशं होत्रे ब्रह्मणे दक्षिणां दिशम् ।
अध्वर्यवे प्रतीचीं वै उद्गात्रे उत्तरां दिशम् ॥ २१ ॥
अन्येभ्योऽवान्तरदिशः कश्यपाय च मध्यतः ।
आर्यावर्त्तमुपद्रष्ट्रे सदस्येभ्यस्ततः परम् ॥ २२ ॥
ततश्चावभृथस्नानविधूताशेषकिल्बिषः ।
सरस्वत्यां ब्रह्मनद्यां रेजे व्यभ्र इवांशुमान् ॥ २३ ॥
स्वदेहं जमदग्निस्तु लब्ध्वा संज्ञानलक्षणाम् ।
ऋषीणां मण्डले सोऽभूत्सप्तमो रामपूजितः ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ब्रह्मघ्नैर्विहता श्रीर्यस्यास्ताम् हे राजन् ! स रामस्तेषां शीर्षभिर्माहिष्मत्या मध्ये महान्तं गिरिं चक्रे ॥ १७ ॥

तेषां रक्तेनाब्राह्मण्यानां भयावहां घोरां नदीं चक्रे, तथाऽपि सर्वक्षत्रियवधे किं कारणं ? तदाह–हेतुं कृत्वेति सार्द्धेन । अमंगलकारिण्यन्यायवर्तिनि सति ॥ १८ ॥

त्रिःसप्तकृत्वो रेणुकया दुःखावेशादुरस्ताडनं कृतं ततो राम एतावत्कृत्वः क्षत्रमुत्सादितिवानिति प्रसिद्धः ॥ १९—२३ ॥

संज्ञानं स्मृतिस्तदेव लक्षणं चिन्हं यस्य तं स्वदेहं लब्ध्वा स ऋषीणां मण्डले सप्तम ऋषिरभूत् ॥ २४ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

गत्वेति । ततः स रामः ब्रह्मघ्नैर्विहता श्रीर्यस्यास्तां माहिष्मतीं गत्वा तस्याः पुर्याः मध्ये हैहयानां शिरोभिः महागिरिं चक्रे चकार ॥ १७ ॥

तद्रक्तेनेति । तेषां रक्तेन अब्रह्मण्यानां भयावहां घोरां नदीं च चक्रे,तथापि सर्वक्षत्रवधे किं कारणम्? तत्राह–हेतुं कृत्वेति सार्द्धेन । क्षत्रे अमङ्गलकारिणि अन्यायवर्तिनि सति पितृवधं हेतुं निमित्तं कृत्वा प्रभू रामः त्रिःसप्तकृत्वः एकविंशतिवारं पृथ्वीं निःक्षत्रियां क्षत्रबीजरहितां कृत्वा स्यमन्तपञ्चकाख्ये देशे शोणितोदकान् ह्रदान् पञ्चेतिशेषः चक्रे हे नृप ! अत्र शोणितोदान् ह्रदान् नृपेतिपाठस्तु साम्प्रदायिकः ह्रदान्नवेति त्वपपाठः तद्देशे स्यमन्तपञ्चकशब्दप्रवृत्तौ शोणितोदकह्रदपञ्चकसमीपवर्तित्वस्यैव निमित्तत्वात्. नवेति पाठे स्यमन्तनवकशब्दप्रयोगापत्तेः । तथा चोक्तं महाभारते आदिपर्वणि द्वितीयेऽध्याये–

"स्यमन्तपञ्चकमिति यदुक्तं सूतनन्दन ।
एतत्सर्वं यथान्यायं श्रोतुमिच्छामहे वयम् ।

इति पृष्टो मुनिः सूत आह–

त्रेताद्वापरयोस्सन्ध्यो रामः प्रहरतां वरः ।
असकृत्पार्थिवं क्षत्रं जघानामर्षचोदितः ॥
स सर्वं क्षत्रमुत्साद्य स्ववीर्येणानलद्युतिः ।
स्यमन्तपञ्चके पञ्च चकार रुधिरह्रदान् ॥
स तेषु रुधिरांभस्सु ह्रदेषु क्रोधमूर्च्छितः ।
पितॄन् सन्तर्पयामास रुधिरेणेति नः श्रुतम् ॥
अथर्चीकादयोऽभ्येत्य पितरो ब्राह्मणर्षभम् ।
तं क्षमस्वेति निषिधुस्ततः स विरराम ह ॥
तेषां समीपे यो देशो ह्रदानां रुधिराम्भसाम् ।
स्यमन्तपञ्चकमिति तत्पुण्यं परिकीर्त्यते ॥
येन लिङ्गेन यो देशो युक्तः समुपलक्ष्यते ।
तेनैव नाम्ना तं देशं वाच्यमाहुर्मनीषिणः ॥" इति ॥

(१) ह्रदान्नृप इति वीर० ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अत्र तेषां समीपे यो देश इति समीपशब्देन शमन्तशब्दार्थ उक्तः शमन्तः समनन्तरः समीपदेशः परितो दश इतियावत् तेषां रुधिराम्भसामित्यनेन पञ्चकशब्दार्थः षष्ठीसमासश्च प्रदर्शितः शमन्तशब्दस्य पूर्वनिपातस्तु आर्षः येन लिङ्गेनेत्यनेन तदेव तच्छब्दप्रवृत्तिनिमित्तमित्युक्तं अतो नृपेत्येव पाठः साधुः अन्यथोदाहृतभारतविरोधापत्तेः । ननु, रुधिरोदकह्रदपञ्चकनिर्माणानन्तरभाविनद्देशस्य तन्नामधेयं,तत्कथं "शमन्तपञ्चके पञ्च चकार रुधिरह्रदान्" इति भारतवचनं प्रकृतं श्रीभागवतवचनञ्चोपपद्यते इति चेन्न सूत्रशाटिकादिसंज्ञावद्भाविसंज्ञाविज्ञानादुपपत्तेः त्रिस्सप्तकृत्वो रेणुकया दुःखावेशादुदरताडनं कृतं ततो रामास्तावत्कृत्वः क्षत्रमुत्सादितवानिति प्रसिद्धिमवेक्ष्य तत्र तत्र त्रिस्सप्तकृत्व इत्युच्यते ॥ १८ ॥ १९ ॥

पितुरिति । ततः पितुश्शिर आदाय तद्बर्हिषि यज्ञे पितुः कायेन सह संयोज्य मखैः क्रतुभिः सर्वदेवमयं देवं परमात्मानमयजत ॥ २० ॥

तदाविति । ततः प्राचीं दिशं होत्रे दक्षिणां तु दिशं ब्रह्मणे प्रतीच्याशां प्रतीचीं दिशम् अध्वर्यवे उत्तरां दिशमुद्गात्रे अवान्तरदिशः आग्नेयादिदिशः अन्येभ्यः ऋत्विग्भ्यः मध्यमां दिशं काश्यपाय तत्राप्यार्यावर्तं विन्ध्यहिमवत्पर्वतमध्यमदेशं उपद्रष्ट्रे तत आर्यावर्तात्परं परितस्थं देशं विभज्येतिशेषः सदस्येभ्यो ददौ ॥ २१ ॥ २२ ॥

तत इति । ततश्चावभृथस्नातः क्रतवसानिके अवभृथाख्ये कर्मणि स्नातः विधूतान्यशेषाणि किल्बिषाणि येन तथाभूतः विगताभ्रः सूर्य इव सरस्वत्याख्यायां ब्रह्मनद्यां रेजे ॥ २३ ॥

स जमदग्निस्तु संज्ञानं स्मृतिस्तदेव लक्षणं चिह्नं यस्य तं स्वदेहं लब्ध्वा रामेण पूजितः सप्तर्षीणां मण्डले सप्तमः ऋषिरभूत् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ब्रह्मघ्नैर्ब्राह्मणहन्तृभिः विहता नष्टा श्रीर्यस्याः सा तथा तां शीर्षभिः तस्यां प्रविश्य मध्ये माहिष्मतीमध्ये ॥ १७ ॥

अब्रह्मण्यानां ब्राह्मणद्वेषिणां भयङ्करां नदीं चक्र इति गतेनान्वयः । निमित्तमाह–हेतुमिति । अमङ्गलकारिणि सति ॥ १८ ॥

स्यमन्तपञ्चके कुरुक्षेत्रे शोणितान्येवोदकानि येषु ते तथा तान् ह्रदान् जलैरगाधप्रदेशान् ॥ १९ ॥

शिरः कायेन सन्धाय बर्हिषि यज्ञे आधाय दर्भवन्धनविशेषे वा सर्वदेवमयं सर्वदेवोत्तमम् ॥ २० ॥ २१ ॥

उपद्रष्ट्रे न्यूनातिरिक्तकर्मसाक्षिणे परम् अवशिष्टम् ॥ २२ ॥

विधूताशेषकिल्बिषत्वमौपचारिकं लोकशिक्षार्थत्वात् नाम्ना सरस्वत्यां ब्रह्मनद्यां वेदमय्यां नद्यां व्यभ्रः मेघच्छायानिर्मुक्तः अंशुमानादित्यः जनेति पदाध्याहारेणावभृथस्नानविधूताऽशेषकिल्बिषजन इति वा अवभृथस्नानेन विधूतमशेषं किल्बिषं यस्य स तथा अवभृथस्नानाविधूताऽशेषकिल्बिषो जनो यस्य स तथा अनेनावभृथस्नानेन जनस्याऽशेषतः किल्बिषं विध्वस्तं भवतीति दर्शनाय रामेणाऽवभृथस्नानमकारीति सूचितं भवति ॥ २३ ॥

जमदग्निस्तु संज्ञानलक्षणं ज्योतिर्मयलक्षणं स्वयोग्यं देहमाकारविशेषं लब्ध्वा सप्तर्षीणां मण्डले सप्तमो ऋषिरिति शेषः अभूत् ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

गतेनेत्यर्द्धकम् । घोरां भयानकां स्वतः विशेषतस्त्वब्रह्मण्यानां भयावहामित्यर्थः ॥ १७—२७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ब्रह्मघ्नैर्हेतुभिः विहता श्रीर्यस्यास्तां स रामः महागिरिं नदीं च चक्रे ॥ १७ ॥

अमङ्गलकारिणि अन्यायवर्तिनि सति पितृवधमेव निमित्तीकृत्य त्रिस्सप्तकृत्व इति रेणुकायास्तावत्कृत्व एवोदरताडनादिति भावः ॥ १८—२२ ॥

अवभृथस्नानेन विधूतमशेषं किल्बिषं यस्मात् स इति सरस्वत्या एव निरघत्वं गङ्गाया इव जातमिति भावः ॥ २३ ॥

संज्ञानं स्मृतिस्तदेव लक्षणं यस्य तादृशं देहं लब्ध्वा ऋषीणां मण्डले—

"कश्यपोऽत्रिर्वसिष्ठश्च विश्वामित्रोऽथ गौतमः ।
जमदग्निर्भरद्वाज इति सप्तर्षयः स्मृताः" इति ॥

तत्र जमदग्निरेव सप्तम ऋषिरभूत् ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ब्रह्मघ्नैर्विहता श्रीर्यस्यास्ताम् तेषां ब्रह्मघ्नानां मध्ये माहिष्मत्या इति शेषः ॥ १७ ॥

तद्रक्तेन नदीं च चक्रे पितृवधहेतुं कृत्वा क्षत्रेऽमङ्गलकारिणि सति त्रिःसप्तकृत्वः पृथिवीं निःक्षत्रियां कृत्वा शोणितोदान् चक्रे इति सार्द्धद्वयान्वयः ॥ १८—२३ ॥

जमदग्निस्तु संज्ञानं स्मरणं भगवद्ध्यानं तस्माल्लक्षणं स्वरूपं यस्य तं भगवद्ध्यानेन निष्पन्नं स्वदेहं लब्ध्वा सप्तर्षीणां मण्डले सप्तमऋषिरभूत् ॥ २४ ॥

भाषाटीका ।

तदनंतर ब्रह्मघातियों से नष्ट हुई शोभा जिसकी इस प्रकार की माहिष्मती पुरी को परशुरामजी गये, और हे राजन् ! और वहां जाकर अपने पिता के द्रोहियों के माथे काट काट कर बीच में एक बडा भारी पर्वत करते हुए ॥ १७ ॥

और अब्रह्मण्य लोगों को भय प्राप्त होने वाली, उन लोग के रुधिर से घोर नदी वहां दी । और अपने पिता के वध को केवल व्याज (मीष) मात्र कर अन्याय से वर्त्तने वाले क्षत्रियों के समूह को राम ने मार ॥ १८ ॥

जामदग्न्योऽपि भगवान्रामः कमललोचनः ।
आगामिन्यन्तरे राजन् ! वर्तयिष्यति वै बृहत् ॥ २५ ॥
आस्तेऽद्यापि महेन्द्राद्रौ न्यस्तदण्डः प्रशान्तधीः ।
उपगीयमानचरितः सिद्धगन्धर्वचारणैः ॥ २६ ॥
एवं भृगुषु विश्वात्मा भगवान् हरिरीश्वरः ।
अवतीर्य परं भारं भुवोऽहन् बहुशो नृपान् ॥ २७ ॥
गाधेरभून्महातेजाः समिद्ध इव पावकः ।
तपसा क्षात्रमुत्सृज्य यो लेभे ब्रह्मवर्चसम् ॥ २८ ॥
विश्वामित्रस्य चैवासन्पुत्रा एकशतं नृप ! ।
मध्यमस्तु मधुच्छन्दा मधुच्छन्दस एव ते ॥ २९ ॥
पुत्रङ्कृत्वा शुनश्शेपं देवरातं च भार्गवम् ।
आजीगर्त्तं सुतानाह ज्येष्ठ एष प्रकल्प्यताम् ॥ ३० ॥
यो वै हरिश्चन्द्रमखे विक्रीतः पुरुषः पशुः ।
स्तुत्वा देवान्प्रजेशादीन्मुमुचे पाशबन्धनात् ॥ ३१ ॥
यो रातो देवयजने देवैर्गाधिषु तापसः ।
देवरात इति ख्यातः शुनश्शेपः स भार्गवः ॥ ३२ ॥

भाषाटीका ।

बडे समर्थ परशुरामजी ने इक्कीसवार पृथिवी को निःक्षत्रिय (विना क्षत्रियों की) करके क्षत्रियों के रुधिर से गिनती में नौ हृद (कुंड) बनाये ॥ यहां ऐसी प्रसिद्धि है कि- जब २ राम की माता रेणुका को अत्यंत पति के वियोग का दुःख होता और जब २ वह अपनी छाती पीटने लग जाती, तब २ परशुरामजी से माता का दुःख नहीं सहा जाता, तब आप परशु उठाकर पृथिवी के क्षत्रियों को काट जाया करते इस प्रकार इक्कीसवार भया ॥ १९ ॥

क्षत्रियों के वध के अनंतर परशुरामजी पिता के शिरको काय (धड) के साथ संयुक कर सर्वदेवमय परमात्मा को अग्नि के विषै यज्ञों से यजन करते हुए ॥ २० ॥

उस यज्ञ में परशुरामजी ने प्राची दिशा होता को दीनी दक्षिण दिशा ब्रह्मा को दीनी, अध्वर्यु को पश्चिम दिशा, और उद्गाता को उत्तर दिशा दीनी ॥ २१ ॥

और ऋत्विन को अवान्तर दिशायें दीनी, कश्यपजी को मध्य दिशायें दीनी, उपद्रष्टा को आर्यावर्त्त दिया, और उस से आगे की भूमि सभासद ब्राह्मणों को दीनी ॥ २२ ॥

तिस पीछे ब्रह्म नदी सरस्वती में यज्ञान्त स्नान से अशेष कल्मषों को दूरकर विना मेघ के सूर्य के नाई परशुराम जी बडी दीप्ति को प्राप्त होते भये ॥ २३ ॥

यज्ञ के अन्त में परशुरामजी के पिता जमदग्नि ऋषि स्मृति चिन्ह वाले अपने देह को प्राप्त होकर परशुराम जी से पूजित होकर सप्त ऋषियों के मण्डल में एक ये भी सप्तम ऋषि होते भये ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

बृहद्ब्रह्म वेदम् वेदप्रवर्त्तकेषु सप्तर्षिष्वेकतमो भविष्यतीत्यर्थः ॥ २५ ॥ २६ ॥

भुवो भारमहन् भारमेवाऽऽह—नृपानिति ॥ २७ ॥

तदेवं प्रसक्तानुप्रसक्तं समाप्य प्रस्तुतमाह—गाधेरिति। महातेजा विश्वामित्रः ॥ २८ ॥

ते सर्वे लिङ्गसमवायन्यायेन "प्राणभृत उपदधाति" इतिवत् मधुच्छन्दस एवोच्यन्ते तथा च श्रुतिः "तस्य ह विश्वामित्रस्यैकशतं पुत्रा आसुः पञ्चाशदेव ज्यायांसो मधुच्छन्दसः पञ्चाशत्कनीयांसः" इत्यादिः तत्र च विश्वामित्रपुत्रेषु भार्गवस्याऽऽजीगर्तस्य देवरातस्य ज्येष्ठत्वमवगम्यते तथा आश्वलायनबोधायनादिभिः कौशिकानां देवरातप्रवरत्वमुक्तम् प्रवरश्च तस्मिन्नेव वंशेऽवान्तरभेदो न तु वंशान्तरम् तथा च स्मृतिः—

श्रीधरस्वामिकृतभावार्थदीपिका ।

"एक एव ऋषिर्यावत्प्रवरेष्वनुवर्त्तते ।
तावत्समानगोत्रत्वं विना भृग्वङ्गिरोगणात्" ॥

इति ॥ २९ ॥

तत्कुतो भृगुवंशसंभवस्य देवरातस्य कौशिकप्रवरत्वमित्याशंक्य तदुपपादयन्नाह-पुत्रं कृत्वेत्यादि यावत्समाप्ति । पूर्वमजीगर्तसुतत्वे मध्यमत्वेन पितृभ्यां ममतां विहाय विक्रीतत्वात्तस्य कृपया सुतानाह-ज्येष्ठ एव प्रकल्प्यतामिति ॥ ३० ॥

एतदेव स्पष्टयितुं विशिनष्टि-य इति द्वाभ्याम् । मुमुचे अमुच्यत ॥ ३१ ॥

भार्गवोऽपि गाधिषु गाधेर्वंशजेषु देवरात इति ख्यातः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

जमदग्न्येति । भगवान् जामदग्न्यः कमललोचनो रामोऽपि हे राजन् ! आगामिन्यन्तरे वृहद्वेदं प्रवर्तयिष्यति सप्तर्षिष्वेकतमो भविष्यतीत्यर्थः ॥ २५ ॥

अधुना तु महेन्द्राख्ये अद्रौ पर्वते आस्ते, कथम्भूतः ? न्यस्तः त्यक्तः दण्डः क्षत्रवधादिरूपो येन प्रशान्ता धीर्यस्य सिद्धादिभिरुपगीयमानं चरितं यस्य तथाभूतः ॥ २६ ॥

रामचरित्रं निगमयन्ति-एवमिति । हे नृप ! इत्थं भगवान् विश्वात्मा हरिरीश्वरो भृगुष्ववतीर्य भुवः पृथ्व्याः परं भारमधिकं भाररूपं क्षत्रं बहुशो हतवान् नृपानिति पाठे भारमेवाह-नृपानिति । बहुश इत्यनेन कश्चिदवशेषितः स्यादिति सूच्यते तदेवोक्तं पुरस्तात्-

"अश्मकान्मूलको जज्ञे यः स्त्रीभिः परिरक्षितः ।
नारीकवच इत्युक्तो निःक्षत्रे मूलकोऽभवत् ॥"

इति ॥ २७ ॥

तदेवं प्रसक्तानुप्रसक्तं परशुरामचरित्रमुपवर्णितमुपसंहृत्य प्रस्तुतं गाधेर्वंशमाह-गाधेरिति । गाधेरभूद्विश्वामित्राख्यः पुत्र इति शेषः । तं विशिनष्टि, महत्तेजो यस्य, क इव ? समिद्धो ज्वलितोऽग्निरिव यो विश्वामित्रस्तपसा हेतुभूतेन क्षत्रं क्षत्रजातिं त्यक्त्वा ब्रह्मवर्चसं लेभे ब्रह्मर्षितां प्राप्त इत्यर्थः । तस्य ब्रह्मवर्चसावहतपश्चर्यायां हेतुः ब्रह्ममन्त्राभिमन्त्रितचरुप्रभाव इति भावः ॥ २८ ॥

विश्वामित्रस्येति । हे नृप ! विश्वामित्रस्य च पुत्रा एकशतं सम्बभूवुः तत्र मध्यमो मधुच्छन्दः तत्सम्बन्धादन्येऽपि सर्वे तद्भ्रातरो लिङ्गसमवायन्यायेन "प्राणभृत उपदधाति" इति वन्मधुच्छन्दोनामान एव बभूवुः तथा श्रुतिः "विश्वामित्रस्यैक शतं पुत्रा आसुः पञ्चाशदेव ज्यायांसो मधुच्छन्दसः पञ्चाशत्कनीयांसः" इत्यादि ॥ २९ ॥

यत्प्रतिज्ञातं "शुनःशेपस्य माहात्म्यमुपरिष्टात् प्रवक्ष्यते" इति तदवसरप्राप्तं वक्तुं विश्वामित्रस्य कञ्चिद्वृत्तान्तमाह—पुत्रमिति । स विश्वामित्रः आजीगर्त्तिम् अजीगर्तस्य सुतं भार्गवगोत्रजं देवैर्दत्तप्रायत्वाद्देवरातापरनामधेयं शुनःशेप पुत्रं कृत्वा पुत्रत्वेन परिगृह्य स्वसुतानेकशतसंख्याकानाह—किमिति ? एष शुनश्शेपः ज्येष्ठः प्रकल्प्यतां युष्माभिर्ज्येष्ठभ्रातृत्वेनाभ्युपगम्यतामिति । अत्रेदं कथाशरीरमनुसन्धेयं शुनःशेपो भृगुकुलप्रसूतत्वात् भार्गवः स एव देवरातः देवैर्दत्तप्रायत्वात् स एवाजीगर्त्तिः आजीगर्तस्य मध्यमः पुत्रः मध्यमत्वादेव पितृभ्यां ममतां विहाय विक्रीतो हरिश्चन्द्रपुत्रेण रोहितेनानीतो यज्ञीयपशुत्वेन हरिश्चन्द्राय समर्पितः तेन यूपे बद्धः प्राणरक्षणार्थं विश्वामित्रमेव शरणं गतः तदुपदिष्टमन्त्रस्तुतवरुणादिभिर्दत्तप्राणो बभूव तञ्च विश्वामित्रः कृपया पुत्रत्वेन परिगृह्य मध्यमस्य मधुच्छन्दसो ज्येष्ठान् स्वपुत्रान् इमं ज्येष्ठं कुरुतेत्युक्तवान् ततस्तैः प्रत्याख्यातस्तान् म्लेच्छा भवतेति शप्ताः, कनिष्ठानाह—ततस्तथेत्यङ्गीकृत्य पञ्चाशता कनिष्ठैस्सह मधुच्छन्दास्तं ज्येष्ठत्वेन परिजग्राह—तदेतदत्रोच्यते, पुत्रं कृत्वेत्यादिना यावत्समाप्ति । तदेवं शुनश्शेपस्य विश्वामित्रपुत्रेषु ज्येष्ठत्वमवगम्यते तथा आश्वलायनबोधायनादिभिः कौशिकानां देवरातप्रवरत्वमुक्तं प्रवरश्च तस्मिन्नेव वंशेऽवान्तरभेदः न तु वंशान्तरं तथा च स्मृतिः—

एक एव ऋषिर्यावत्प्रवरेष्वनुवर्त्तते ।
तावत्समानगोत्रत्वं विना भृग्वङ्गिरोगणात् ॥

इति ॥ ३० ॥

तत्र कथं भृगुवंशजस्य देवरातस्य कौशिकप्रवरत्वमित्याशङ्क्य तदुपपादनाय प्रवृत्तोऽयं पुत्रं कृत्वेति श्लोकः स च व्याख्यातः यदुक्तं ज्येष्ठ एष प्रकल्प्यतामिति तदेव स्फुटयितुं शुनश्शेपं विशिनष्टि-य इति द्वाभ्याम् । यो वै शुनश्शेपः विक्रीतः पितृभ्यामिति शेषः । हरिश्चन्द्रकर्तृके मखे पुरुषपशुर्बभूव यश्च जलेशादीन् वरुणादीन् स्तुत्वा विश्वामित्रोपदिष्टमन्त्रैरिति शेषः शुनश्शेपः पाशबन्धनान्मुमुचे अमुच्यत ॥ ३१ ॥

यश्च देवयजने वरुणदेवताराधनात्मके हरिश्चन्द्रमखे देवैर्वरुणादिभिः रातो दत्तो दत्तप्राय इति यावत् गाधिषु गाधिवंशजेषु देवरातेति ख्यातः स शुनश्शेपो भार्गवः भृगुवंशजः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आगामिन्यन्तरे भविष्यन्मन्वन्तरे बृहद्ब्रह्म वेदलक्षणं वर्तयिष्यति वेदप्रवर्तको भविष्यतीत्यर्थः ॥ २५ ॥ २६ ॥

भुवः परं भारं केवलं भारभूतान् नृपानहन् संहृतवान् ॥ २७ ॥

महातेजा विश्वामित्रः ॥ २८ ॥

तस्य विश्वामित्रस्यैकशतं पुत्रा आसन् तेषामेकोत्तरशतपुत्राणां मध्ये यो मध्यमः स तु मधुच्छन्दो नाम तेन मधुच्छन्दसा संयुक्ता ये पञ्चाशत्पुत्राः ते मधुच्छन्दसनामानो भवन्ति नान्ये "तस्य ह विश्वामित्रस्यैकशतं पुत्रा आसुः" इत्यादिब्राह्मणं चेममेवार्थं वक्ति ॥ २९ ॥

"शुनःशेपस्य माहात्म्यम् उपरिष्टात्प्रवक्ष्यते" इत्युक्तं प्रपञ्चयितुमाह-पुत्रं कृत्वेति । अत्र काचिदैतिह्यवदन्ती, मम पुत्रो भवेति विश्वामित्रेणोक्तो यमाजीगर्तः शुनःशेपोऽहं त्वत्पुत्राणां ज्येष्ठश्चेत्तव पुत्रः स्यां तत्रापि मध्यमो न स्यां नापि कनिष्ठ इति

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विश्वामित्रमाह-तद्वैवमस्त्विति विश्वामित्रः शुनःशेपं पुत्रं कृत्वाऽन्यानौरसान् पुत्रानब्रवीत् एष शुनःशेपो युष्माकं ज्येष्ठः प्रकल्प्यतां भवद्भिरिति शेषः । इति शुनःशेपशब्दं शृण्वतां शुनीजातीयोऽयं किम्? इत्यन्यथा प्रतीतिं निवारयति-भार्गवमिति । भृगुवंशोद्भवः, अनेनापि सा कथं निवारिता स्यात्? इत्यत आह-आजीगर्तमिति । अजीगर्तस्य मुनेरपत्यं तर्हि विश्वामित्रस्य पुत्रत्वे का सङ्गतिरित्यतो देवरातमिति विश्वामित्राय देवैः रातं दत्तं विश्वामित्रस्य दत्तपुत्रत्वेन सम्बन्ध इत्यर्थः ॥ ३० ॥

अनेन विशेषणत्रयेण ज्येष्ठत्वकल्पनायां वैशिष्ट्यमुक्त्वा वैशिष्ट्यान्तरं चाह-य इति । यः शुनःशेपः हरिश्चन्द्रयज्ञे अजीगर्तेन पित्रा रोहिताय विक्रीतः पुरुषाख्यः पशुरभूत् यश्च ब्रह्मादिदेवांस्तुत्वा तत्प्रसादात्पाशबन्धनात्संसाराख्यपाशबन्धनात् यूपसम्बन्धिरज्जुबन्धनात् आत्मानं मुमुचे मोचयामास कर्म-कर्तरिप्रयोगः "कस्य नूनं कतमस्यामृतानां मनामहे चारुदेवस्य नाम" इत्यारभ्य "अस्मेरयिनिधापये" इत्यन्तवेदवाक्येन स्तुत्वा ऋग्भाष्ये एतासामृचामर्थं आचार्यैरेव विस्तारेणोक्त इति नास्माभिः प्रपञ्च्यते ॥ ३१ ॥

देवरातशब्दनिर्वचनेन विश्वामित्रस्य तत् सम्बन्धमाह—य इति । यः देवयजने यज्ञे यद्देवै रातो रक्षितस्तैरेव गाधिसुताय विश्वामित्राय रातो दत्तः तस्मात्स देवरात इति ख्यातः प्रसिद्धः इत्यतोऽयं भार्गवः ॥ ३२ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तदेवं मध्ये मध्येऽपि निजनिजाभीष्टां भगवदवतारकथां गीत्वा झटिति निजाभीष्टतमभगवदाविर्भावास्पदयदुवंश-वर्णनाय प्रसक्तवंशं समापयितुमाह—गाधेरिति ॥ २८ ॥

एकशतं एकाधिकशतम् टीकायां प्राणभृत इति तत्र प्राणभृत्पदप्रसिद्धमन्त्रेण संस्कृतैकैकैवेष्टिका प्राणभृदुच्यते तत्प्रधान्येनान्या अपि तथोच्यन्त इति गन्तव्यम् ॥ २९—३७ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

वृहत् ब्रह्म वेदप्रवर्तकेषु सप्तर्षिष्वेकतमो भविष्यतीत्यर्थः ॥ २५—२७ ॥

प्रासङ्गिकीं कथां समाप्य प्रस्तुतमाह-गाधेरिति ॥ २८ ॥

एकशतं एकाधिकं शतं तथा च श्रुतिः "तस्य ह विश्वामित्रस्यैकशतं पुत्रा आसुः पञ्चाशदेव ज्यायांसो मधुच्छन्दसः पञ्चाशत्कनीयांसः" इति ते सर्वे लिङ्गसमवायन्यायेन "प्राणभृत उपदधाति" इति वत् मधुच्छन्दस एवोच्यन्ते इष्टकाचयने यागे प्राणभृत्प्रसिद्धमन्त्रेण संस्कृता एकैवेष्टका प्राणभृदुच्यते तत्र पुनस्तत्प्राधान्येनान्या अपीष्टका यथा प्राणभृत उच्यन्ते तथैवेत्यर्थः ॥ २९ ॥

स च विश्वामित्रः भार्गवं भृगुवंशोद्भवम् अजीगर्तसुतं शुनःशेपं कृपयैव पुत्रं कृत्वा सुतानौरसान् प्रत्याह-ज्येष्ठ इत्यादि ॥३०॥

ननु, शुनःशेप एव कस्तत्राह— य इति । हरिश्चन्द्रस्य मखे पुत्रमेधे कर्तव्ये पुत्रेण रोहितेनैव यः पुरुषपशुरानीतः कनिष्ठज्येष्ठयोः स्नेहबद्धाभ्यां पितृभ्यां शुनःशेपनामा मध्यमः पुत्रो विक्रीतः स च प्रजेशादीन् देवांस्तुत्वा पशुपाशबन्धनात् मुमुचे मुक्तः ॥ ३१ ॥

अतो भार्गवोऽपि पंचाशता कनिष्ठैः विश्वामित्रकृपापात्रीभवन् गाधिषु गाधेर्वंशेषु देवरात इति ख्यातस्तापसोऽभूत् ॥ ३२ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

वृहद्वेदं प्रवर्तयिष्यति सप्तर्षिष्वेकतमो भविष्यति ॥२५॥२६॥
परं केवलं भुवो भारं नृपान् अहन् ॥ २७ ॥

गाधिकन्यान्वयमुक्त्वाऽथ गाधिसन्ततिमाह-महातेजा विश्वामित्रः गाधेः पुत्रोऽभूत् यः क्षात्रं क्षत्रजातिमुत्सृज्य ब्रह्मर्षित्वं लेभे ॥ २८ ॥

विश्वामित्रस्य एकशतं पुत्रा आसन् तत्र मध्यमो मधुच्छन्दाः तत्सम्बन्धात् ते सर्वे लिङ्गसमवायन्यायेन "प्राणभृत उपदधाति" इति वत् मधुच्छन्दसः नामतो बभूवुः तथा च श्रुतिः "विश्वामित्रस्यैकशतं पुत्रा आसुः पञ्चाशदेव ज्यायाꣳसो मधुच्छन्दसः पञ्चाशत्कनीयाꣳसः" इत्यादि ॥ २९ ॥

"शुनःशेपस्य माहात्म्यमुपरिष्टात्प्रचक्ष्यते" इति यदुक्तं तद्दर्शयन् अजीगर्तपुत्रं शुनःशेपमपि विश्वामित्रः पुत्रत्वेन स्वीकृतवानित्याह-पुत्रं कृत्वेत्यादिना । भार्गवं भृगुवंशजम् आजीगर्तम् अजीगर्तपुत्रं देवरातं अजीगर्तस्य त्रयः पुत्राः तत्र ज्येष्ठं पितुः कनिष्ठं मातुश्च स्नेहाधिक्यान्मध्यमः शुनःशेपः मातृपितृभ्यां धनं गृहीत्वा हरिश्चन्द्राय दत्तः स हरिश्चन्द्रेण वित्तं दत्वा पुरुषपशुत्वेन यदा यज्ञार्थं नीतः तदा मार्गे विश्वामित्रपादयोः मृत्युभयात् रुदन्निपतितस्तेन करुणया देवप्रसादप्रकारं तस्मै उपदिश्य प्रसन्नेभ्यो देवेभ्यस्त्वया यज्ञसमाप्तिरात्मजीवनं च वरो ग्राह्य इत्युक्तस्तथैव देवैः रातत्वात् देवरातसंज्ञं पुत्रं कृत्वा विश्वामित्रः एष ज्येष्ठः युष्माभिः प्रकल्प्यतामिति सुतानाह ॥ ३० ॥

तस्य देवरातत्वमुपपादयति—य इति द्वाभ्याम् । मुमुचे अमुच्यत ॥ ३१ ॥

यः शुनःशेपो भार्गवः स गाधिवंशजेषु देवरातस्तापस इति ख्यातः ॥ ३२ ॥

———

भाषा टीका ।

हे राजन्! कमल लोचन भगवान् जामदग्न्य (परशुराम) जी भी भविष्य मन्वन्तर में वेद प्रवर्तक सप्त ऋषियों में एक ऋषि होवेंगे ॥ २५ ॥

वे परशुरामजी आज दिन भी दक्षिण समुद्र के तीर पर महेन्द्र पर्वत के विषैं न्यस्त दण्ड और प्रशान्त बुद्धि वाले होकर विराजते हैं। और उनके चरित्रों को अब भी सिद्ध गन्धर्व चारण लोग गान करते हैं ॥ २६ ॥

ये मधुच्छन्दसो ज्येष्ठाः कुशलम्मेनिरे न तत्।
अशपत्तान्मुनिः क्रुद्धो म्लेच्छा भवत दुर्जनाः! ॥ ३३ ॥
स होवाच मधुच्छन्दाः सार्द्धं पञ्चशता ततः।
यन्नो भवान् सञ्जानीते तस्मिंस्तिष्ठामहे वयम् ॥ ३४ ॥
ज्येष्ठं मन्त्रदृशं चक्रुस्त्वामन्वञ्चो वयं स्म हि।
विश्वामित्रः सुतानाह वीरवन्तो भविष्यथ।
ये मानं मेऽनुगृह्णन्तो वीरवन्तमकर्त्त माम् ॥ ३५ ॥
एष वः कुशिका! वीरो देवरातस्तमन्वित।
अन्ये चाष्टकहारीतजयक्रतुमदादयः ॥ ३६ ॥
एवं कौशिकगोत्रं तु विश्वामित्रैः पृथग्विधम्।
प्रवरान्तरमापन्नं तद्धि चैवं प्रकल्पितम् ॥ ३७ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां
संहितायां वैयासिकयां नवमस्कन्धे
षोडशोऽध्यायः ॥ १६ ॥

भाषा टीका।

इस प्रकार विश्वात्मा भगवान् हरि ईश्वर भृगुवंश में अवतार लेकर पृथिवी के बडे भार रूप बहुत राजाओं को मारते हुए ॥ २७ ॥

गाधि महाराज के पुत्र प्रदीप्त अग्नि के सदृश बडे तेजस्वी विश्वामित्रजी हुए, जो कि तप के बल से क्षत्रियपने को त्याग कर ब्रह्मवर्चस् (ब्राह्मणत्व) को प्राप्त हुए ॥ २८ ॥

हे राजन्! उन विश्वामित्रजी के एक सौ एक पुत्र हुए, उन में बीच का (५१ की संख्या का) जो पुत्र रहा उसका नाम मधुच्छंदा रहा, इसी से पचास ज्येष्ठ और पचास कनिष्ठ उन सबों का नाम मधुच्छदा ही होगया ॥ २९ ॥

भृगुवंश में उत्पन्न होने वाले अजीगर्त्त के पुत्र देवरात शुनःशेप को विश्वामित्रजी ने अपना पुत्र स्वीकार करके फिर अपने एक सौ एक पुत्रों से बोले, कि—इसको तुम लोग अपने सबोंके मध्य में जेष्ठ बना लो ॥ ३० ॥

यह शुनःशेप वही रहा कि जिसकी इसी स्कंध में पहिले सात में अध्याय में कथा आचुकी है कि-जिसको वन में चलते समय रोहित ने अजीगर्त (पिता) से मोल लेकर वरुण की बलि के लिये अपने पिता हरिश्चन्द्र के यज्ञ में अपनी प्रति निधि में पुरुष पशु करके दिया पर उसने प्रजेशादि देवताओं की स्तुति कर उनको प्रसन्न कर पाश के बंधन से (यज्ञ में मारने से) छूट गया ॥ ३१ ॥

जिसकी यज्ञ में देवताओं ने रक्षा करी इसी से गाधि वंश में विश्वामित्र के गोद आकर उसका देवरात नाम भया वह वही भृगुवंशी अजीगर्त्त का पुत्र शुनःशेप है ॥ इसी को ज्येष्ठ बनाने को विश्वामित्रजी ने अपने पुत्रों को आज्ञा दीनी ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

तत्तस्य ज्येष्ठत्वं कुशलं न मेनिरे मध्यमस्यानर्थावहत्वं दृष्ट्वा नाङ्गीकृतवन्तः मुनिर्विश्वामित्रः ॥ ३३ ॥

पञ्चाशता कनिष्ठैः साकं समध्यमो मधुच्छन्दा उवाच नोऽस्माकं यज्ज्येष्ठत्वं कनिष्ठत्वं वा भवान्पिता सञ्जानीते मन्यते तस्मिन्वयं तिष्ठामेति ॥ ३४ ॥

एवमुक्त्वा मन्त्रदृशं "कस्य नूनं कतमस्यामृतानाम्" इत्यादिमन्त्राणां द्रष्टारं शुनःशेपं ज्येष्ठं चक्रुः तदाह—वयं सर्वे त्वामन्वञ्चः स्म हि अनुगन्तारः कनिष्ठाः स्म इत्यर्थः। ततः प्रसन्नो विश्वामित्रस्तान् सुतानाह—वीरवन्तः पुत्रवन्तो भविष्यथ ये यूयं मे मानं पूज्यत्वमनुगृह्णन्तोऽनुवर्त्तमानाः सन्तो मां वीरवन्तं पुत्रवन्तमकर्त्त कृतवन्त इत्यर्थः ॥ ३५ ॥

हे कुशिकाः! एष देवरातो वो युष्मदीयः कौशिक एव यतो वीरो मत्पुत्रस्तमेनमन्वितानुगच्छत अन्ये चाष्टकादयः तस्य सुता आसन् ॥ ३६ ॥

उपसंहरति—एवमिति। एके शप्ता एकेऽनुगृहीताः अन्यस्तु पुत्रत्वेन स्वीकृतः इत्येवं कौशिकगोत्रं पृथग्विधं नानाप्रकारं जातं तच्च प्रवरान्तरमापन्नं प्राप्तम् हि यस्मादेवं देवरातज्येष्ठत्वेन तत्प्रकल्पितम् ॥ ३७ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
षोडशोऽध्यायः ॥ १६ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

पित्रा ज्येष्ठ एष प्रकल्प्यतामित्युक्ता ये मधुच्छन्दसस्तेषु ये ज्येष्ठाः पञ्चाशत्ते पित्रोक्तं कुशलं न मेनिरे नाङ्गीकृतवन्तः ततः क्रुद्धो मुनिर्विश्वामित्रस्तान् हे दुर्जनाः ! म्लेच्छा भवत इति अशपत् ॥ ३३ ॥

ततः स मधुच्छन्दा मध्यमः पञ्चाशता कनिष्ठैर्भ्रातृभिः सह पितरमाह—किमिति ? यद्भवान् नोऽस्मान् विजानीत आदिशति तस्मिन्नादेशे वयं तिष्ठामहे आज्ञां करवामेति ॥ ३४ ॥

एवमुक्त्वा ततस्तं देवरातं मन्त्रदृशं "कस्य नूनं करमस्यामृतानाम्"इत्यादिमन्त्राणां द्रष्टारं ज्येष्ठं चक्रुः,करणप्रकारं दर्शयति; त्वामन्वञ्चो वयं स्महीति, वयं सर्वे त्वामन्वञ्चः स्म हि अनुगन्तारः स्म भवाम तव कनिष्ठा भवामेत्यर्थः । ततो विश्वामित्रः प्रीतः तान् सुतान् यूयं वीरवन्तो भविष्यथ पुत्रवन्तो भविष्यथेत्यनुजग्राह कोऽस्मासु तवेदृशोऽनुग्रहहेतुरित्यत्राह-य इति। ये यूयं मानं पूज्यतामनुगृह्णतः अनुवर्त्तमानास्सन्तः यद्वा मानं प्रमाणं मम निश्चयमनुगृह्णन्तः अनुपालयन्तः मां वीरवन्तं पुत्रवन्तमकर्त्त कृतवन्तः मन्मानप्रत्याख्याने यूयमपि शप्येध्वं देवरातश्च हीयेत अतो ऽहमवीरवान् स्यां तथा तु न कृतं युष्माभिरितीमङ्गुणं पश्यन् अनुगृहीतवानस्मीति भावः । हे कुशिकाः ! एष देवरातः वः युष्मदीयः कौशिक एव, कुतो यतो वीरः मत्पुत्रः तमेनमन्वित अनुगच्छत ततो ऽन्ये चाष्टकादयस्तस्य विश्वामित्रस्य पुत्राः सम्बभूवुरित्यर्थः ॥ ३५ ॥ ३६ ॥

उपसंहरति—एवमिति । एके शप्ता एकेऽनुगृहीताः अन्यस्तु पुत्रत्वेन स्वीकृत इत्येवं तत् कौशिकगोत्रं विश्वामित्रैः पृथग्विधं नानाप्रकारं जातं ततश्च प्रवरान्तरमापन्नं कुतः हि यस्मादेवं देवरातज्येष्ठत्वेन तत्प्रकल्पितम् ॥ ३७ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिकायाम्
षोडशोऽध्यायः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

शुनःशेपो ज्येष्ठत्वेन कल्प्यतामिति विश्वामित्रेणोक्ताः ये पञ्चाशत्पुत्रा मधुच्छन्दसो जन्मना ज्येष्ठास्ते शुनःशेपस्य ज्येष्ठत्वं स्वात्मानः कनिष्ठत्वं यत्तत् कुशलं साधु न मेनिरे ततः किमभूदिति तत्राह अशपदिति ॥ ३३ ॥

तेषां म्लेच्छभावेन शुनःशेपस्य किमायातमिति तत्राह सहेति । हेत्यनेन ब्राह्मणमनुकरोति स विश्वामित्रः पञ्चाशता सार्धं मधुच्छन्दसमुवाच ह अयं शुनःशेपो वः ज्येष्ठो भवत्विति विश्वामित्रेणोक्तस्येदमेव वाक्यमुत्तरं, स मधुच्छन्दाः पञ्चाशता सार्धं पितरमुवाच ह ततस्तातः पिता भवान्नोऽस्माकं यद्विजानीते आज्ञापयति तस्मिन्नाज्ञप्ते शुनःशेपस्य ज्यैष्ठ्ये अस्माकं कानिष्ठ्ये सर्वेषमविचारेण तिष्ठामहे"प्रकाशनस्थेयाख्ययोश्च" इति सूत्रात् निश्चितं स्थिरीकृतं चेदं कार्यमिति भावः ॥ ३४ ॥

तर्हि तथा कुर्वन्त्विति पित्रा उदितास्ते पुत्राः कस्य नूनमित्यादिमन्त्रदृशम् ऋग्वेदद्रष्टारं शुनःशेपं ज्येष्ठं चक्रुः कथं चक्रुरिति तत्राह-त्वामिति । भो देवरात ! वयं त्वामन्वञ्च अनुवर्तमानाः कनिष्ठाः स्म भवाम हि प्रसिद्धे हेतौ वा यस्माद्वयं त्वत्कनिष्ठा अभूम तस्मात्ते ज्येष्ठत्वे संशयो माभूदिति अथवा हे पितः वयं त्वा त्वामन्वञ्च अनुवर्तमानाः स्म त्वदाज्ञाकारिण इत्यर्थ इति सन्तुष्टः पिता कं वरं प्रायच्छदिति तत्राह-विश्वामित्र इति । वीरवन्तः पुत्रवन्तः कर्तव्ये विशिष्टप्रेरणावन्तो वा कुतोऽयं वरो दत्त इति तत्राह-य इति । ये भवन्तो मे मानमनुगृह्णन्तः परिपालनलक्षणानुग्रहं-कुर्वन्तः मा मां वीरवन्तम् अकर्त कृतवन्त इति यस्मात्तस्माद्यूयं वीरवन्तो भविष्यथेति वीरवन्तमकर्तमेति ब्राह्मणवाक्यानुकरणं वेदतुल्यमिति प्रकाशयति अकर्त मम वाक्यमकुर्वत "जीवतो वाक्यकरणात्क्षयाहसंशोधनेन च । गयायां पिण्डदानाच्च त्रिभिः पुत्रस्य पुत्रता" इति स्मृतेः । हे कौशिकाः कौशिकगोत्राः एष देवरातो मम वीरः पुत्रो युष्माकं ज्येष्ठः यूयं तमन्वित अनुवर्तध्वम् अन्येचाष्टकादयोऽनुवर्तन्तामिति शेषः ॥ ३५-३६ ॥

उपसंहरति—एवमिति । यत्कौशिकगोत्रं तद्वैश्वामित्रैः पृथग्विधमभूत्, कथं तदिति तत्राह, प्रवरान्तरमिति प्रवरान्तरमापन्नं हि यस्मात्तस्मादेव पृथग्विधं कल्पितं हि प्रसिद्धमिति भावः ॥ ३७ ॥

इतिश्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
षोडशोऽध्यायः ॥ १६ ॥
(विजयध्वजतीर्थमतेनात्राध्यायो न समाप्यते)

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
षोडशोऽध्यायः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ये ज्येष्ठाः पञ्चाशत् तत् शुनःशेपस्य ज्येष्ठत्वं कुशलं भद्रं न मेनिरे मुनिर्विश्वामित्रः ॥ ३३ ॥

पञ्चाशता कनिष्ठैः साकं स मध्यमो मधुच्छन्दाः ह स्पष्टमुवाच नोऽस्माकं पिता भवान् यत् ज्येष्ठत्वं कनिष्ठत्वं वा सञ्जानीते मन्यते तस्मिन्नेव वयं तिष्ठामेति ॥ ३४ ॥

ततश्च शुनःशेपं ज्येष्ठं चक्रुः मन्त्रदृशं "कस्य नूनं कतमस्यामृतानाम्" इत्यादि मन्त्राणां द्रष्टारं तदाह-वयं सर्वे त्वामन्वञ्चः अनुगन्तारः कनिष्ठाः स्मेत्यूचुरित्यर्थः । ततः प्रसन्नो विश्वामित्रस्तान् सुतानाह उवाच वीरवन्तः पुत्रवन्तो भविष्यथ ये यूयं मे मानं पूज्यत्वम् अनु मदाज्ञानन्तरं गृह्णन्तः अङ्गीकुर्वन्तः सन्तः मां वीरवन्तम् अकर्त कृतवन्तः अन्यथा युष्मास्वपि मच्छापात् म्लेच्छीभूतेषु अपुत्रक इव एवाभविष्यमिति भावः ॥ ३५ ॥

हे कुशिकाः ! वो युष्मदीयः कौशिक एष यतो वीरः सत्पुत्रः तमेनमन्वित अनुगच्छत अन्ये चाष्टकादयस्तस्य सुता आसन् ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

उपसंहरति—एवमिति । एके शप्ताः एके अनुगृहीताः अन्यस्तु पुत्रत्वेन गृहीतः इत्येवं कौशिकगोत्रं विश्वामित्रैः विश्वामित्रेण हेतुना पृथग्विधं नानाप्रकारं जातं तच्च प्रवरान्तरमापन्नं हि यस्मादेवं देवरातज्येष्ठत्वेन तत् देवरातप्रवरं प्रकल्पितम् ॥ ३७ ॥

इति सारार्थदर्शिन्यां हर्षण्यां भक्तचेतसाम् ।
नवमे षोडशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तत् देवरातस्य ज्येष्ठत्वं कुशलं न मेनिरे नाङ्गीचक्रुः तान् मुनिः विश्वामित्रः हे दुर्जनाः ! म्लेच्छा भवतेत्यशपत् ॥ ३३ ॥

ततस्तदनन्तरं पञ्चाशताकनिष्ठैः सह स मध्यमो मधुच्छन्दा ह स्फुटमुवाच नोऽस्माकं हे पितः ! यत्कनिष्ठत्वं अन्यद्वा भवान् सञ्जानीते मन्यते तस्मिन्वयं तिष्ठामेति ॥ ३४ ॥

तदनन्तरं ते मन्त्रदृशम् "कस्य नूनं कतमस्यामृतानाम्" इत्यादि मन्त्राणां द्रष्टारं शुनःशेपं ज्येष्ठं चक्रुः, तदेव दर्शयति वयं सर्वे त्वाम् अन्वञ्चः अनुगन्तारः स्म तव कनिष्ठा भवाम इत्यर्थः । विश्वामित्र आह—वीरवन्तः पुत्रवन्तः भविष्यथ ये यूयं मे मानं मदाज्ञापालनम् अनुगृह्णन्तः अनुवहन्तः सन्तः मां वीरवन्तं पुत्रवन्तम् अकर्त कृतवन्तः आज्ञानुवर्तिपुत्रैरेव पिता पुत्रवान्भवतीति भावः ॥ ३५ ॥

हे कुशिकाः पुत्राः ! एष देवरातः वो युष्मदीयः युष्मद्भ्रातैव यतो वीरः मत्पुत्रः तमेनमन्विताः अनुगच्छत विश्वामित्रस्य अन्ये चाष्टकादयः पुत्रा बभूवुः ॥ ३६ ॥

केचिच्छप्ताः केचिदाशीर्भिः संयोजिताः भार्गवः तज्ज्येष्ठत्वेन स्थापितः तेभ्योऽष्टकहारीतादयोऽन्ये ऽन्यप्रकारा एवं कौशिकगोत्रं पृथग्विधं नानाविधमभवत् तच्च प्रवरान्तरमापन्नं प्राप्तं हि यत एवं देवरातज्येष्ठत्वेन तत्प्रकल्पितम् ॥ ३७ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
षोडशाऽध्यायार्थप्रकाशः ॥ १६ ॥

भाषा टीका ।

तब उन पुत्रों में जो पंचास जेष्ठ मधुच्छंदा रहे उनोंने इस बात को नहीं मानी । तब विश्वामित्रजी ने उन पर क्रोध कर शाप देदिया, कि—रे दुर्जन हो ! तुम लोग म्लेच्छ होजावो ॥ ३३ ॥

तब तौ पचास कनिष्ठों सहित जो एक मधुच्छंदा रहा, वह बोला, कि—जो आप आज्ञा करें हम लोग उसी में स्थित हैं ॥ ३४ ॥

इतना कहकर शुनः शेप को ज्येष्ठ बनाकर बोले, कि—हे भ्राता ! हम लोग तुमारे अनुचर हैं अर्थात् कनिष्ठ हैं । तब इतना सुनकर विश्वामित्र प्रसन्न होकर पुत्रों से बोले, कि—जो तुमने हमारे वचन को मानकर हमको वीर पुत्र वाले किये, इसी से तुम भी वीरवंत होवो अर्थात् आज्ञाकारी पुत्र वाले होवो तात्पर्य यह कि—पिता की आज्ञा न मानने वाले हजार पुत्र भी होवैं तौ भी पिता निपुत्री सा ही है) ॥ ३५ ॥

फिर विश्वामित्रजी अपने पुत्रों से कहने लगे, कि—हे कुशिक हो ! इस देवरात को भी तुम अपने कुशिक गोत्र का ही समझो और इसका अनुगमन करो । शुकमुनि बोले, कि—ऐसे और भी विश्वामित्रजी के अष्टक, हारीत, जय, क्रतुमद आदिक पुत्र होते भये ॥ ३६ ॥

इस प्रकार कौशिक गोत्र विश्वामित्रके पुत्रों से भिन्न प्रकार का होगया और प्रवरांतर को प्राप्त होगया क्योंकि ? वह देवरात को ज्येष्ठ बनाकर कल्पित हुआ है ॥ ३७ ॥

इति श्रीमद्भागवत नवम स्कन्ध में षोडश अध्याय की
वृन्दावनस्थ पं० भगवताचार्यकृत
भाषा टीका समाप्ता ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे षोडशोऽध्यायः ॥ १६ ॥

॥ सप्तदशोऽध्यायः ॥

—:※:—

श्रीशुक उवाच ।

यः पुरूरवसः पुत्र आयुस्तस्याभवन् सुताः ।
नहुषः क्षत्रवृद्धश्च रजी रम्भश्च वीर्यवान् ॥ १ ॥
अनेना इति राजेन्द्र ! शृणु क्षत्रवृधोऽन्वयम् ।
क्षत्रवृद्धसुतस्यासन् सुहोत्रस्यात्मजास्त्रयः ॥ २ ॥
काश्यः कुशो गृत्समद इति गृत्समदादभूत् ।
शुनकः शौनको यस्य बह्वृचप्रवरो मुनिः ॥ ३ ॥
काश्यस्य काशिस्तत्पुत्रो राष्ट्रो दीर्घतमः पिता ।
धन्वन्तरिर्दैर्घतम आयुर्वेदप्रवर्त्तकः ॥ ४ ॥
यज्ञभुग्वासुदेवांशः स्मृतमात्रार्तिनाशनः ।
तत्पुत्रः केतुमानस्य जज्ञे भीमरथस्ततः ॥ ५ ॥
दिवोदासो द्युमांस्तस्मात्प्रतर्दन इति स्मृतः ।
स एव शत्रुजिद्वत्स ऋतध्वज इतीरितः ।
तथा कुवलयाश्वेति प्रोक्तोऽलर्कादयस्ततः ॥ ६ ॥
षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च ।
नालर्कादपरो राजन् ! मेदिनीं बुभुजे युवा ॥ ७ ॥
अलर्कात्सन्ततिस्तस्मात्सुनीथोऽथ सुकेतनः ।
धर्मकेतुः सुतस्तस्मात्सत्यकेतुरजायत ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आयोः सप्तदशे त्वैलज्येष्ठपुत्रस्य पञ्चसु ।
सुतेषु क्षत्रवृद्धादिचतुर्णां वंशवर्णनम् ॥ १ ॥

इह श्रीकृष्णावतारप्रस्तावाय वंशानुक्रमणमैलादिक्रमेण प्रक्रान्तमिति यस्य वंशे कृष्णावतारस्तस्य वंशोऽति विततत्वादन्ते निरूप्यते अतः पुरूरवसः पुत्राणां पञ्चानां कनिष्ठानां वंशानुक्त्वेदानीं प्रथमस्य वंशमाह—य इति । एवं नहुषययातियदुप्रभृतिष्वपि द्रष्टव्यम् ॥ १ ॥

क्षत्रवृधः क्षत्रवृद्धस्य ॥ २ ॥ ३ ॥

दीर्घतमसः पिता ॥ ४ ॥

स्मृतमात्र एवार्त्तिं रोगदुःखं नाशयतीति तथा ॥ ५ ॥

ततः प्रतर्दनादिशब्दवाच्याद् द्युमतःसकाशादलर्कादयः ॥६॥७॥

अलर्कात्सन्ततिसंज्ञः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवं पुरूरवसः पुत्राणां पञ्चानां कनिष्ठानां वंशाननुवर्ण्येदानीं प्रथमस्यायोर्वंशमाह—य इति । यः पुरूरवसः पुत्रः आयुरुक्तः तस्य नहुषादयः पञ्च सुता अभवन् तत्र हे राजेन्द्र ! तावत् क्षत्रवृद्धस्यान्वयं वंशं शृणु क्षत्रवृद्धस्य यः सुतः सुहोत्रस्तस्य त्रयः पुत्रा आत्मजा आसन् ॥ १ ॥ २ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तान्निर्दिशति—काश्य इति । काश्यः कुशो गृत्समद इति तत्र गृत्समदात् शुनकः समभवत् यस्माच्छुनकात् शौनको जातः स च बह्वृचश्रेष्ठः मुनिः ॥ ३ ॥

काश्यस्येति । काश्यस्य तु पुत्रः काशिराजः ततो राज्ञः काशीराजात् दीर्घतपा जातः दीर्घतपसस्तु धन्वन्तरिः सचायुर्वेदस्य प्रवर्तकः ॥ ४ ॥

यज्ञभुक् यज्ञभागभुक् वासुदेवस्य भगवतोंशभूतः स्मृतमात्र एवार्त्ति रोगं नाशयतीति तथाभूतः, अयं धन्वन्तरिः समुद्रमथनजातात् धन्वन्तरेरन्यो भगवदंशावतारभूत एव तत्पुत्रो धन्वन्तरिपुत्रः केतुमान् ततो केतुमतो भीमरथो जज्ञे ॥ ५ ॥

तस्मात्केतुमतः द्युमान् जज्ञे इत्यनुषङ्गः स च दिवोदासाद्यपरनामधेयः ततो दिवोदासादिशब्दवाच्यादलर्कादयो जज्ञिरे तत्रालर्कः विंशतिषष्ठि-षष्ठिरिति । षट् सहस्राधिकषष्ठिसहस्रवर्षाणि अलर्क एव युवा सन् मेदिनीं बुभुजे अनुबभूव अलर्कादन्यस्तु न बुभुजे इत्यर्थः ॥ ६ ॥

इहोपभोगो भुजेरर्थः न तु पालनं तत्र "भुजोनवन" इत्यात्मनेपदनिषेधप्रसङ्गात् ॥ ७ ॥

अलर्कात्सन्ततिः तस्मात्सन्नतेः सुकेतः अथ सुकेतात् सुकेतनः सुनीतोऽथ सुदर्शन इति पाठान्तरं तस्माद्धर्मकेतुस्तस्माच्च सत्यकेतुरजायत ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

श्रुतायोः सन्तातिं विस्तृत्य पुरूरवसः पुत्रस्य प्रथमस्यायोर्वंशं वर्णयति बादरायणिः—य इति । नहुषान्वयस्यैव राज्यार्हत्वात् क्षत्रवृद्धाद्यन्वयस्य तदनर्हत्वात् सूचीकटाहन्यायमनुसन्दधानः क्षत्रवृद्धाद्यन्वयं वक्ति क्षत्रवृद्धान्वयमिति ॥ १—६ ॥

अलर्कादपरो राजा युवा तथा न बुभुजे ॥ ७—६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

(अस्मिन्नध्याये न विद्यते ॥)

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

आयोरैलसुतस्यात्र प्रोक्ताः सप्तदशे सुताः ।
क्षत्रवृद्धादयः ख्याता अलर्काद्या यदन्वये ॥
॥ १ ॥

क्षत्रवृधः क्षत्रवृद्धस्य ॥ २—५ ॥

प्रतर्दनादिशब्दवाच्यात् द्युमतः सकाशादलर्कादयः ॥ ६—७॥

सन्ततिसंज्ञः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ऐलपुत्रस्यायोर्वंशमाह—य इति सप्तदशेन । वीर्यवानिति सर्वेषां विशेषणम् ॥ १ ॥

क्षत्रवृधः क्षत्रवृद्धस्य ॥ २ ॥

शुनकशौनकौ भार्गवौ अस्मिन् वंशे अवतीर्णाविति ज्ञेयम् अत एव वैष्णवे गृत्समदस्य शौनकश्चातुर्वर्ण्यप्रवर्त्तयिताभूदित्युक्तम् ॥ ३ ॥

कथम्भूतः राष्ट्रः दीर्घतमः पिता दीर्घतमा राष्ट्रास्य पुत्र इत्यर्थः सामुद्रश्चन्द्रवंशे धन्वन्तरिरवतीर्ण इति ज्ञेयं-तथाह भगवान् पराशरः भगवता नारायणेन चातीतसम्भूतायस्मै वरो दत्तः काशिराजगोत्रेऽवतीर्य त्वमष्टधा सम्यगायुर्वेदं करिष्यतीति अस्यार्थः अतीतसम्भूतौ क्षीराब्धेर्जन्मनि नारायणेन वरो दत्तः त्वं काशिराजगोत्रेऽवतीर्णः रोगस्तद्धेतुश्चारोग्यं तेषां लक्षणानीत्यष्टाङ्गमायुर्वेदं करिष्यतीति ॥ ४ ॥

तत्पुत्रः धन्वन्तरिपुत्रः केतुमान् अस्य केतुमतः भीमरथः सुतो जज्ञे ततो भीमरथात् ॥ ५ ॥

दिवोदासः तस्माद्दिवोदासात् द्युमान् प्रतर्दनाद्यनेकनामधेयः ततो द्युमतः अलर्कादयो जाताः ॥ ६—७ ॥

अलर्कात्सन्ततिसंज्ञः ॥ ८ ॥

भाषा टीका ।

श्रीरुक्मिणीरमणो जयति ॥

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि-पुरूरवा के पुत्र जो आयु हुए उनके नहुष, क्षत्रवृद्ध, रजी, और वीर्यवान् रंभ तथा अनेना ये पुत्र हुए, हे राजेन्द्र ! अब तुम क्षत्रवृद्ध का वंश सुनो, क्षत्रवृद्ध के सुत सुहोत्र हुए तिनके तीन पुत्र हुए ॥ १—२ ॥

काश्य, कुश, और गृत्समद, गृत्समद के पुत्र शुनक हुए, तिनके बह्वृच प्रवर मुनि शौनक हुए ॥ ३ ॥

काश्य के पुत्र काशि हुए, तिनके पुत्र राष्ट्र हुए, तिनके दीर्घतमा हुए, दीर्घतमा के पुत्र आयुर्वेद के प्रवर्त्तक धन्वन्तरि हुए, ॥ ४ ॥

वे धन्वन्तरि, यज्ञभोक्ता वासुदेव के अंश और स्मरण मात्र से आर्त्ति (पीडा) के नाश करने वाले हुए, तिनके पुत्र केतुमान् हुए, तिनसे भीमरथ हुए ॥ ५ ॥

तिन भीमरथ से दिवोदास और प्रतर्दन इन नामों से भी ख्यात होने वाले द्युमान् हुए, तथा ये राजा सत्यजित्, वत्स, कृत ध्वज, और कुवलयाश्व, इन नामों से भी विख्यात हुए, इनके अलर्कादिक पुत्र हुए ॥ ६ ॥

हे राजन् ! साठ हजार और साठ सौ वर्ष तक अलर्क से और किसी दूसरे युवा राजा ने पृथिवी का राज्य नहीं किया ॥७॥

अलर्क से संतति हुए, तिनसे सुनीथ तिनसे सुकेतन तिन के पुत्र धर्मकेतु भये, तिनसे सत्यकेतु उत्पन्न होते भये ॥ ८ ॥

धृष्टकेतुः सुतस्तस्मात्सुकुमारः क्षितीश्वरः ।
वीतिहोत्रस्य भर्गोऽतो भार्गभूमिरभून्नृपः ॥ ९ ॥
इतीमे काशयो भूपाः क्षत्रवृद्धान्वयायिनः ।
रम्भस्य रभसः पुत्रो गम्भीरश्चाक्रियस्ततः ॥ १० ॥
तस्य क्षेत्रे ब्रह्म जज्ञे शृणु वंशमनेनसः ।
शुद्धस्ततः शुचिस्तस्मात्त्रिककुद्धर्मसारथिः ॥ ११ ॥
ततः शान्तरयो जज्ञे कृतकृत्यः स आत्मवान् ।
रजेः पञ्चशतान्यासन्पुत्राणाममितौजसाम् ॥ १२ ॥
देवैरभ्यर्थितो दैत्यान् हत्वेन्द्रायाददाद्दिवम् ।
इन्द्रस्तस्मै पुनर्दत्वा गृहीत्वा चरणौ रजेः ॥ १३ ॥
आत्मानमर्पयामास प्रह्लादाद्यरिशङ्कितः ।
पितर्युपरते पुत्रा याचमानाय नो ददुः ॥ १४ ॥
त्रिविष्टपं महेन्द्राय यज्ञभागान् समाददुः ।
गुरुणा हूयमानेऽग्नौ बलभित्तनयान्रजेः ॥ १५ ॥
अवधीद्भ्रंशितान्मार्गान्न कश्चिदवशेषितः ।
कुशात्प्रतिः क्षात्रवृद्धात्सञ्जयस्तत्सुतो जयः ॥ १६ ॥
ततः कृतः कृतस्यापि जज्ञे हर्यवनो नृपः ।
सहदेवस्ततो हीनो जयसेनस्तु तत्सुतः ॥ १७ ॥
सङ्कृतिस्तस्य च जयः क्षत्रधर्मा महारथः ।
क्षत्रवृद्धान्वया भूपाः शृणु वंशं च नाहुषात् ॥ १८ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां नवमस्कन्धे आयुवंशवर्णनं नाम
सप्तदशोऽध्यायः ॥ १७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सत्यकेतोर्धृष्टकेतुस्तस्मात्सुकुमारस्तस्माद्वीतिहोत्रस्तस्य भर्गः अतो भर्गाद्भार्गभूमिः ॥ ९ ॥

काशयः काशेर्वंश्याः काशेः प्रपितामहस्य क्षत्रवृद्धस्यान्वयमयन्ते यान्तीति तथा ॥ १० ॥

ततोऽनेनसः शुद्धो जज्ञे ॥ ११ ॥

कृतकृत्यः स यत आत्मवान् ज्ञानी अतः पुत्रोत्पादनं न कृतवानित्यर्थः ॥ १२–१४ ॥

तेषां मतिभ्रंशाय गुरुणा बृहस्पतिनाऽभिचारविधानेनाग्नौ हूयमाने सति ॥ १५ ॥

सिंहावलोकनेनाऽऽह—क्षात्रवृद्धात्क्षत्रवृद्धपौत्रात्कुशात्प्रतिः प्रतेः सञ्जयः ॥ १६ ॥ १७ ॥ १८ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
सप्तदशोऽध्यायः ॥ १७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सत्यकेतोः धृष्टकेतुः तत्तस्मात्सुकुमाराख्यः सुतः क्षितीश्वरो जज्ञे सुकुमाराद्वीतिहोत्रः तस्य भर्गः ततो भर्गाद् भार्गभूमिरभूत् ॥ ९ ॥

हे नृप ! इतीत्थमिमे उक्ताः काशयः काश्यस्य वंशजाः नृपाः क्षत्रवृद्धस्य काश्यप्रपितामहस्यान्वयम् अयन्ते यान्तीति तथा एवं क्षत्रवृद्धान्वय उक्तः अथ रम्भस्यान्वयमाह—रम्भस्य पुत्रो रभसः गम्भीरश्च ततो रभसात् क्रतुः ॥ १० ॥

तस्य क्रतोः क्षेत्रे फलत्रे ब्रह्म ब्राह्मणकुलं जज्ञे अथा ऽनेनसः आयोः पुत्रस्य कनीयसो वंशं शृणु ततोऽनेनसः शुद्धः ततः शुद्धात् शुचिः तस्मात् त्रिककुप् स एव धर्मसारथ्यपरनामधेयः ॥ ११ ॥

ततस्त्रिककुपः शान्तरयो जज्ञे स च कृतमनुष्ठितं कृत्यं मुक्तिसाधनं येन तथाभूतः आत्मवान् ज्ञानयोगनिष्ठश्च अतः पुत्रोत्पादनं न कृतवानिति भावः । अथ रजेरायुःपुत्रस्य वंशमाह—रजेरिति । रजेः पुत्राः पञ्चशतसंख्याका अनवधिकतेजसः संबभूवुरित्यर्थः ॥ १२ ॥

रजेश्चरित्रमाह—देवैरभ्यर्थितो रजिर्दैत्यान् हत्वा दिवं त्रिविष्टपं दैत्यैरपहृतमिन्द्राय ददौ इन्द्रस्तु पुनः प्रह्लादादतीव शङ्कितो दिवं तस्मै रजये दत्वा रजेश्चरणौ गृहीत्वा आत्मानमर्पयामास स्वरक्षाभरं तस्मिन्निहितवानित्यर्थः । तत्पुत्रचरितमाह—पितरीति । अथ पितरि रजावुपरते मृते सति तस्य पुत्राः पञ्चशतं याचमाना येन्द्राय त्रिविष्टपं न ददुः ॥ १३ ॥ १४ ॥

किञ्च यज्ञभागान् समाददुः स्वीकृतवन्तः अथ गुरुणा बृहस्पतिना अभिचारविधिना तेषां मतिभ्रंशायाऽग्नौ हूयमाने सति मार्गादिन्द्राधिपत्यानुकूलबुद्धिरूपाद्भ्रंशितान् रजेः पुत्रान् सर्वान् वलभिदिन्द्रो ऽवधीत् जघान कश्चिदेकोऽपि नावशेपितः पूर्वं क्षत्रवृद्धपौत्राणां काश्यकुशगृत्समदानां मध्ये काश्यगृत्समदयोर्वंशावुक्तौ, गृत्समदादभूदित्यादिना । ततः कुशस्य वंशमाह—कुशादित्यादिना यावत्समाप्ति । क्षात्रवृद्धात् क्षत्रवृद्धपौत्रात् कुशात्प्रीतिर्जज्ञे तत्सुतः प्रीतिसुतः सञ्जयः ततः सञ्जयाज्जयो जज्ञे ॥ १५ ॥ १६ ॥

ततो जयात्कृतः हे नृप ! कृतस्य हर्यंश्वकः पुत्रो जज्ञे ततो हर्यंश्वकात् सहदेवस्ततो भीमस्ततो भीमसुतो जयसेन स्तस्य तनयः संकृतिःस च क्षत्रधर्मा महाशूरः महारथश्च क्षत्रवृद्धान्वयं निगमयन् नहुषान्वयं वक्तुं तच्छ्रवणाय राजानमादिशति क्षत्रवृद्धान्वये जाता इति शेषः इमे उक्ता भूपाला: अथ नहुषान्नहुषवंशजान् शृणु ॥ १७ ॥ १८ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां
सप्तदशोऽध्यायः ॥ १७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इतीमे काश्यजाः काश्यस्य संतानजा भूपाः ॥ १०-१५ ॥
पुनरपि क्षत्रवृद्धात्प्रतिवंशोऽभूत् ॥ १६-१८ ॥

इतिश्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
सप्तदशोऽध्यायः ॥ १७ ॥
(विजयध्वजतीर्थमतेन चतुर्दशः)

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सुकुमाराद्वीतिहोत्रः तस्य भर्गः अतो भर्गात् ॥ ९ ॥
काश्यः काशेर्वंश्याः क्षत्रवृद्धस्यान्वयम् अनु अयन्ते प्राप्नुवन्तीति ते तथा ॥ १०—१३ ॥
प्रह्लादादयरीत्यतद्गुणसंविज्ञानोऽयं बहुव्रीहिः पितरि रजौ कालेन उपरते मृते सति पुत्रा रजिसुताः ॥ १४ ॥
अस्मत्पैतृकं त्रिविष्टपमिति न्यायेन न ददुः अभिचारविधानेनाग्नौ हूयमाने सति वलभिदिन्द्रः रजेस्तनयानवधीत् क्षत्रवृद्धपौत्रात् कुशात् प्रतिः ॥ १५—१८ ॥
इति सारार्थदर्शिन्याम् हर्षिण्याम् भक्तचेतसाम् ।
नवमेऽसौ सप्तदशः ऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सत्यकेतोः धृष्टकेतुः सुतः तस्मात्सुकुमारः अस्य सुकुमारस्य वीतिहोत्रः तस्य भर्गः अतो भर्गात् भार्गभूमिः ॥ ९ ॥
इतीमे पूर्वोक्ताः काशयः क्षत्रवृद्धपौत्रस्य काशेर्वंश्याः अतः क्षत्रवृद्धस्यान्वयम् अयन्ते यान्तीति तथा ॥ १०—११ ॥
स च शान्तरयाः कृतकृत्यः यत आत्मवान् आत्मा परमात्मा विद्यते उपास्यतया यस्य स तथा ॥ १२—१४ ॥
गुरुणा बृहस्पतिना तेषां मतिभ्रंशायाभिचारविधानेनाग्नौ हूयमाने सति मार्गात्स्वधर्माद् भ्रंशितान् वलभिदिन्द्रः अवधीत्, सिंहावलोकनन्यायेनाह । क्षात्रवृद्धात् क्षत्रवृद्धपौत्राद् कुशात्प्रतिः प्रतेः सञ्जयस्तस्य सुतो जयः ॥ १५—१८ ॥

इतिश्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
सप्तदशाध्यायार्थप्रकाशः ॥ १७ ॥

भाषाटीका ।

तिनसे धृष्टकेतु हुए तिन के पुत्र कुमार क्षितीश्वर हुए, तिन से वीति होत्र तिनके भर्ग तिनके पुत्र भार्गभूमि राजा हुए ॥ ९ ॥

यहां तक ये काशि के वंश के भूप हुए और ये सब पुरूरवा के पुत्र जो क्षत्रवृद्ध हुए हैं तिनके वंश वाले हैं ॥ पुरूरवा के चतुर्थ पुत्र जो रंभ हुए, तिनके रभस पुत्र हुए, तिनके गंभीर हुए, तिनके अक्रिय हुए ॥ १० ॥

भाषा टीका।

उन अक्रिय के क्षेत्र (भार्या) में ब्रह्म उत्पन्न हुआ ॥ अब तुम अनेन के वंश का श्रवण करो । अनेन के पुत्र शुद्ध हुए, तिनसे शुचि हुए, तिनसे त्रिककुद् धर्मसारथि हुए ॥ ११ ॥

तिन से शांतरय हुए, तिनसे कृतकृत्य हुए वो बडे जित मनस्क हुए रजी के अमित पराक्रम वाले पांच सौ पुत्र हुए ॥ १२ ॥

वो रजी ऐसे प्रतापी हुए, कि—जो देवताओं की प्रार्थना करने से दैत्यों को मारकर इन्द्र को स्वर्ग देते हुए इन्द्रने फिर भी रजी महाराज के चरण गह कर फिर स्वर्ग उनहीं को समर्पण किया ॥ १३ ॥

और अपने आत्मा को इन्द्र ने राजा के ही अर्पण कर दिया, क्योंकि ? इन्द्र प्रह्लादादिक शत्रुओं से सशंकित रहते रहे पिता के देहान्त होने पर रजी के पुत्र लोगों ने इन्द्र के याचना करने पर भी इन्द्र को स्वर्ग नहीं दिया ॥ १४ ॥

और यज्ञभाग भी महेन्द्र को न देवें आपही सब खाजावें, तब बृहस्पतिजी के अग्नि के हवन करने पर इन्द्र ने रजी के पुत्रों को अभिचार से मार डाला ॥ १५ ॥

क्योंकि—वे पुत्र अपने मार्ग से भ्रष्ट होगये अतएव उनमें से कोई भी अवशिष्ट नहीं रहा, क्षत्रवृद्ध के वंश में होने वाले कुश से प्रति हुए, उनके पुत्र संजय हुए, तिनके सुत जय हुए ॥ १६ ॥

तिन से कृत हुए, कृत के भी पुत्र राजा हर्यवन हुए, तिनसे सहदेव, तिन से हीन तिनके सुत जयसेन हुए ॥ १७ ॥

जयसेनके संकृति पुत्र, हुए, तिनके जगहुये वे क्षत्रधर्मा महारथी होते हुए, ये सब क्षत्र वृद्ध के वंश के भूपाल हुए, अब नहुष से जो वंश हुआ उसको श्रवण करो ॥ १८ ॥

इति श्रीमद्भागवत नवमस्कन्ध में सप्तदशअध्याये की
श्रीवृन्दावनस्थ पं० भागवताचार्यकृत-
भाषा टीका समाप्ता ॥ १७ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे सप्तदशोऽध्यायः ॥ १७ ॥

॥ अष्टादशोऽध्यायः ॥

श्रीशुक उवाच ।

यतिर्ययातिः संयातिरायतिर्वियतिः कृतिः ।
षडिमे नहुषस्यासन्निन्द्रियाणीव देहिनः ॥ १ ॥
राज्यं नैच्छद्यतिः पित्रा दत्तं तत्परिणामवित् ।
यत्र प्रविष्टः पुरुष आत्मानं नावबुद्ध्यते ॥ २ ॥
पितरि भ्रंशिते स्थानादिन्द्राण्या धर्षणाद्विजैः ।
प्रापितेऽजगरत्वं वै ययातिरभवन्नृपः ॥ ३ ॥
चतसृष्वादिशद्दिक्षु भ्रातॄन्भ्राता यवीयसः ।
कृतदारो जुगोपोर्वीं काव्यस्य वृषपर्वणः ॥ ४ ॥

राजोवाच ।

ब्रह्मर्षिर्भगवान् काव्यः क्षत्रबन्धुश्च नाहुषः ।
राजन्यविप्रयोः कस्माद्विवाहः प्रतिलोमकः ॥ ५ ॥

श्रीशुक उवाच ।

एकदा दानवेन्द्रस्य शर्मिष्ठा नाम कन्यका ।
सखीसहस्रसंयुक्ता गुरुपुत्र्या च भामिनी ॥ ६ ॥
देवयान्या पुरोद्याने पुष्पितद्रुमसङ्कुले ।
व्यचरत्कलगीतालिनलिनीपुलिनेऽबला ॥ ७ ॥
ता जलाशयमासाद्य कन्याः कमललोचनाः ।
तीरे न्यस्य दुकूलानि विजह्रुः सिञ्चतीर्मिथः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अष्टादशे ययातेस्तु नाहुषस्य कथोच्यते ।
यस्य पञ्चसु पुत्रेषु कनीयानग्रहीज्जराम् ॥ १ ॥

॥ १ ॥

तस्य राज्यस्य परिणाममनर्थावहत्वं वेत्तीति तथा तत्र हेतुः यत्रेति ॥ २ ॥

स्थानात्स्वर्गाद् द्विजैरगस्त्यादिभिः ॥ ३ ॥

यवीयसो भ्रातॄनादिशत् काव्यस्य शुक्रस्य वृषपर्वणश्च कन्याभ्यां कृतदारः सन् ॥ ४ ॥ ५ ॥

नात्र प्रतिलोमतादोष ईश्वरघटनादिति दर्शयन्कथामाह—एकदेत्यादिना प्रतिजग्राह तद्वच इत्यन्तेन । गुरोः शुक्रस्य पुत्र्या देवयान्या च व्यचरदिति द्वयोरन्वयः ॥ ६ ॥

कलगीता अलयो येषु तानि नलिनीपुलिनानि यस्मिंस्तस्मिन्पुरोद्याने अबला शर्मिष्ठा ॥ ७ ॥

सिञ्चतीः सिञ्चन्त्यः ॥ ८ ॥ ॥ ९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यतिरिति । देहिनः इन्द्रियाणीव नहुषस्य यतिप्रभृतयः षट् आत्मजा आसन् ॥ १ ॥

राज्यमिति । तत्र यतिर्ज्येष्ठः पित्रा नहुषेण दत्तमपि राज्यं नैच्छत, कथम्भूतः ? तत्परिणामवित् राज्यस्य दुःखोदर्कत्वं जानातीत्यर्थः । तत्र हेतुमाह, यत्र राज्ये प्रविष्टः अधिकुर्वन् पुमान् आत्मानं नावबुध्यते ॥ २ ॥

पितरीति । इन्द्राण्या प्राप्तेन्द्राधिपत्येन नहुषेण मां भजस्वेत्युक्तया शच्या विज्ञापितैर्द्विजैर्नहुषेण स्ववाहनं वोढुं विनियुक्तैर्वाहनस्थेन तेन पादाङ्गुष्ठेन ताडनपूर्वकं सर्प सर्पेत्युक्तैरगस्त्यादिभिः कृतिभिः धर्षणात् सर्पो भवेत्येवमुक्तिपूर्वकं वाहनयातरूपाद्धर्षणात् पितरि नहुषे स्थानात् त्रिविष्टपात् भ्रंशिते अजगरत्वं च प्रापिते सति ययातिर्नृपः अधिकृतराज्यो बभूव ॥३॥

चतसृष्विति । स च कनिष्ठान् चतुरो भ्रातॄन् संयातिप्रभृतीन् चतसृषु दिक्षु आदिशत्,पालनार्थमिति शेषः । स्वयन्तु काव्यस्य वृषपर्वणो दानवस्य च कन्याभ्यामिति शेषः । कृतदारस्सन् पृथ्वीं जुगोप ॥ ४ ॥

काव्यस्य कृतदार इत्युक्त्वा लब्धप्रश्नावसरः पृच्छति राजा—ब्रह्मर्षिरिति । भगवान् काव्यो ब्रह्मर्षिः नाहुषो ययातिस्तु क्षत्रबन्धुः क्षत्रियावरः अतस्तयोः राजन्यविप्रयोः कस्माद्धेतोः प्रातिलोमिको विवाहः कृतः ? श्वशुरजामातृभावरूपः सम्बन्धः आसीदिति प्रश्नः ॥ ५ ॥

न प्रतिलोमतादोषः ईश्वरघटनादिति दर्शयन् कथामाह—एकदेत्यादिना प्रतिजज्ञाह तद्वच इत्यन्तेन । दानवेन्द्रस्य वृषपर्वणः कन्यका शर्मिष्ठा नाम भामिनी अबला कदाचित् सखीनां सहस्रेण गुरोः काव्यस्य पुत्र्या देवयान्या च संयुक्ता सती ॥ ६ ॥

पुष्पितैः द्रुमैः सङ्कुले कलमव्यक्तमधुरं गीतं येषां ते अलयो भृङ्गा येषु तानि नवानि पुलिनानि यस्मिन् तस्मिन् पुरोद्याने व्यचरत् ॥ ७ ॥

ता इति । ताः शर्मिष्ठाप्रभृतयः कमललोचनाः कन्याः जलाशयमासाद्य तत्तीरे दुकूलानि निधाय तस्मिन्मिथः सिञ्चतीः सिञ्चत्यः विजह्रुः विहारं चक्रुः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अथ नहुषस्य सन्ततिमनुक्रामति—यतिरित्यादिना ॥ १ ॥

तस्य राज्यस्य परिणामवित्फलपरिपाकपटुतां जानातीति यत्र राज्ये ॥२ ॥

इन्द्राण्या धर्षणात् शच्याः संस्पर्शनिमित्तात् पितरि नहुषे स्वर्गस्थानात् द्विजैः भ्रंशिते त्याजितेऽजगरत्वं महासर्पत्वं प्रापिते सति ॥ ३ ॥

यवीयसः कनिष्ठान् संयातिपूर्वान् काव्यस्य शुक्रस्य पुत्र्या देवयान्या वृषपर्वणो दैत्यस्य पुत्र्या शर्मिष्ठया कृतदारः ॥ ४ ॥

प्रातिलोम्येन विवाहः कथं घटत इति पृच्छति-ब्रह्मर्षिरिति ॥ ५ ॥

दैववशादिदं पाणिग्रहणं प्राप्तं न तु मानुषवादिति प्रकाशयितुमाख्यायिकां कथयति—एकदेति ॥ ६ ॥ ७ ॥

सिञ्चतीः अन्योन्यजलप्रक्षेपं कुर्वन्त्यः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १—२० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अष्टादशे देवयानीशर्मिष्ठाकलहादिषु ।
कथा यत्र जरां पूरुर्ययातेरग्रहीत् पितुः ॥
॥ १—२ ॥

स्थानात् स्वर्गात् द्विजैरगस्त्यादिभिः ॥ ३ ॥

काव्यस्य शुक्रस्य कन्या वृषपर्वणश्च कन्यया कृतदारः ॥ ४ ॥

ब्राह्मणकन्याग्रहणश्रवणात् ययातिः क्षत्रबन्धुपदेन निर्दिष्टो राज्ञा अज्ञातचरत्वेनैवेति ज्ञेयम् ॥ ५ ॥

दानवेन्द्रस्य वृषपर्वणः कलगीता अलयो येषु तथाविधानि नलिनीपुलिनानि यस्मिंस्तत्र ॥ ६—७ ॥

सिञ्चतीः सिञ्चन्त्यः ॥ ८—९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नहुषतत्पुत्रान्तरवृत्तान्तकथनपूर्वकं नहुषपुत्रस्य ययातेश्चरितमाह—यतिरित्यध्यायद्वयेन ॥ १—२ ॥

इन्द्राण्या मां भजेति वादिनं नहुषं प्रति क्रुद्धया ऋषियानेन मम समीपे आगच्छेति प्रोक्तेन नहुषेण शिबिकायां योजितैर्द्विजैरगस्त्यादिभिः सर्प सर्पेति शीघ्रगमनाय प्रेरितैः धर्षणात् सर्पो भवेति शापात् हेतोः स्थानाद्देवलोकात् भ्रंशिते सति ॥ ३ ॥

काव्यस्य शुक्रस्य वृषपर्वणो दैत्यदानवेन्द्रस्य कन्यां कृतदारः सन् पृथिवीं जुगोप ॥ ४ ॥

नाहुषो ययातिः राजन्यः काव्यो ब्रह्मर्षिः तत्कन्या विप्रा तयोः राजन्यविप्रयोः क्षत्रियविप्रकन्ययोर्वरवध्वोः प्रतिलोमकः विवाहः कस्माद्धेतोरित्यर्थः ॥ ५ ॥

गुरुपुत्र्या शुक्रकन्यया सह व्यचरदिति द्वयोरन्वयः ॥ ६ ॥

कलगीताः मधुरस्वनाः अलयो येषु तानि नलिनीपुलिनानि यस्मिन् अबला शर्मिष्ठा ॥ ७ ॥

मिथोऽन्योन्यं सिञ्चतीः सिञ्चन्त्यो विजह्रुः ॥ ८—९ ॥

भाषा टीका ।
श्रीवैदर्भीपतिर्जयति ॥
श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि—यति, ययाति, संयाति, आयति, वियति, और कृति, ये छै पुत्र नहुष के हुए, जैसे देहियों के शरीरों में छै इन्द्रियें हैं ॥ १ ॥

तिनमें से यति ने पिता के दिये हुए राज्य की इच्छा नहीं

वीक्ष्य व्रजन्तं गिरिशं सह देव्या वृषस्थितम् ।
सहसोत्तीर्य वासांसि पर्यधुर्व्रीडिताः स्त्रियः ॥ ९ ॥
शर्मिष्ठाऽजानती वासो गुरुपुत्र्याः समव्ययत् ।
स्वीयं मत्वा प्रकुपिता देवयानीदमब्रवीत् ॥ १० ॥
अहो निरीक्ष्यतामस्या दास्याः कर्म ह्यसाम्प्रतम् ।
अस्मद्धार्यं धृतवती शुनीव हविरध्वरे ॥ ११ ॥
यैरिदं तपसा सृष्टं मुखं पुंसः परस्य ये ।
धार्यते यैरिह ज्योतिः शिवः पन्थाश्च दर्शितः ॥ १२ ॥
यान्वन्दन्त्युपतिष्ठन्ते लोकनाथाः सुरेश्वराः ।
भगवानपि विश्वात्मा पावनः श्रीनिकेतनः ॥ १३ ॥
वयं तत्रापि भृगवः शिष्योऽस्या नः पिताऽसुरः ।
अस्मद्धार्यं धृतवती शूद्रो वेदमिवासती ॥ १४ ॥
एवं शपन्तीं शर्मिष्ठा गुरुपुत्रीमभाषत ।
रुषा श्वसन्त्युरङ्गीव धर्षिता दष्टदच्छदा ॥ १५ ॥
आत्मवृत्तमविज्ञाय कत्थसे बहु भिक्षुकि ! ।
किं न प्रतीक्षसेऽस्माकं गृहान्बलिभुजो यथा ॥ १६ ॥

भाषा टीका ।

करी, क्योंकि ? वह राज्य के परिणाम को जानता रहा, कि जिस राज्य में प्रविष्ट हुआ पुरुष फिर आत्मा को नहीं जान सका है ॥ २ ॥

पिताको इन्द्राणी ने ब्राह्मणों की धर्षणा द्वारा जब स्थान से भ्रष्ट करा दिया और पिता (नहुष) को जब अजगरपना प्राप्त हुआ तब ययाति राजा हुए ॥ ३ ॥

तब अपने छोटे चारों भ्राताओं को चारों दिशाओं के रक्षा पर आज्ञा देकर शुक्राचार्य और वृषपर्वा की पुत्रियों के साथ विवाह कर पृथिवी का पालन करते हुए ॥ ४ ॥

राजोवाच ॥

राजा बोले, कि—भगवान् शुक्राचार्य ब्राह्मण रहे और ययाति क्षत्रिय रहे, राजन्य और ब्राह्मण का प्रतिलोम विवाह कैसे हुआ ॥ ५ ॥

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि—एक समय वृषपर्वा दानवेन्द्र की कन्या शर्मिष्ठा बड़ी कांतिवाली, एक हजार सखियों के साथ तथा अपने गुरुकी पुत्री देवयानी को साथ में लेकर पुष्पित द्रुमों से व्याप्त भ्रमरों से झंकारित पुर के उद्यान बगीचे में पुष्करिणी (तलाई) के तट में विचरती रही ॥ ६—७ ॥

वे कमललोचनी सब कन्या यें जलाशय को प्राप्त होकर तीरऊपर अपने २ वस्त्रों को धरकर परस्पर में सींचती हुई जल में विहार करने लगीं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अजानती स्वीयं मत्वा गुरुपुत्र्या वासः समव्ययत्पर्यधात् ॥ १० ॥ असांप्रतमन्याय्यम् ॥ ११ ॥

अन्यायमेव ब्राह्मणोत्कर्षवर्णनेन व्यनक्ति—यैरिति त्रिभिः । ये ब्राह्मणाः परस्य पुंसो मुखं मुखादुत्पन्नत्वेन तृप्तिद्वारत्वेन श्रेष्ठा इत्यर्थः । ज्योतिर्ब्रह्मपन्थाः वेदमार्गः ॥ १२ ॥ १३ ॥

तदेवं ब्राह्मणमात्रमेव तावत्पूज्यं तत्रापि भृगवः अस्याश्च पिता नः शिष्यः एवं सत्यप्यस्माभिर्धार्यं वास इयमसती धृतवती ॥ १४—२० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वीक्ष्येति । तदा ताः स्त्रियः देव्योमया सह वृषे स्थितं व्रजन्तं गिरिशं रुद्रमवलोक्य व्रीडिताः आशु उत्तीर्य तीरमारुह्य वासांसि पर्यधुः धृतवत्यः ॥ ९ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

शर्मिष्ठेति । तदा शर्मिष्ठा अजानती गुरुपुत्र्याः देवयान्याः वासः पर्य्यधात् ततो देवयानी शर्मिष्ठया परिधृतं वासः स्वकीयं मत्वा प्रकुपिता सतीदं वक्ष्यमाणमब्रवीत् ॥ १० ॥

तदेवाह–अहो इत्यादिना क्षिपन्तीमित्यतः प्राक्तनेन । अहो अस्या दास्या असांप्रतमयुक्तं कर्म निरीक्ष्यतां, किं तत् ? यदस्मद्धार्यं वासो धृतवतीत्येतत्. असांप्रतत्वं स्फुटीकर्तुन्दृष्टान्तमाह– शुनी यथा अध्वरे यज्ञे हविर्ग्रहीतुमनर्हा तद्वदस्मद्धार्यं वस्त्रमियं परिधातुमनर्हेत्यर्थः ॥ ११ ॥

असांप्रतत्वमेव ब्राह्मणोत्कर्षवर्णनेन व्यनक्ति–यैरिति । यैर्ब्राह्मणैः भृग्वादिभिस्तपसा परमपुरुषस्य मुखं मुखस्थानीयमिदं ब्राह्मणकुलं सृष्टं यैश्चेदं परं ज्योतिः स्वरूपं परं ब्रह्म धार्य्यते उपास्यते यैश्च शिवः क्षेमकरः पन्थाः वैदिकमार्गश्च प्रदर्शितः॥१२॥

यानीति । यान् ब्राह्मणान् सुरेश्वरा लोकनाथाः किमुत परमपावनः श्रीनिवासो विश्वात्मा भगवानपि प्रणमन्ति उपतिष्ठन्ते प्रत्युद्गच्छन्ति ॥ १३ ॥

तत्रेति । तत्रापि उक्तैर्धर्मैः श्रेष्ठेषु तेषु ब्राह्मणेष्वपि वयं भृगवः भृगुवंशजाः अस्याः शर्मिष्ठायाः पिता असुरो वृषपर्वा नोऽस्माकं शिष्यश्च एवं स्थिते इयमसती अनर्हा अस्मद्धार्यं वस्त्रं धृतवती यथा अनर्हः शूद्रो वेदं तद्वत् ॥ १४ ॥

एवमिति । एवम् इत्थं क्षिपन्तीं तिरस्कुर्वन्तीं गुरुपुत्रीं देवयानीं शर्मिष्ठोवाच, कथंभूता ? धर्षिता निष्ठुरवाक्यैरिति शेषः । रुषोरगी पन्नगीव श्वसन्ती श्वासं मुञ्चती दष्टो दच्छदो ऽधरोष्ठो यया तथाभूता ॥ १५ ॥

भाषणमेवाह–आत्मवृत्तमिति । हे भिक्षुकि ! त्वमात्मवृत्तमविज्ञाय बहुधा कत्थसे आत्मानं श्लाघसे वृत्तिमेव दर्शयन्त्याह–किमिति ? यथा बलिभुजो वायसाः श्वानो वा तथा त्वमस्माकं गृहान्न प्रतीक्षसे किम् ? जीवनार्थं न प्रतीक्षितवत्यसि किम् ॥१६॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पर्यंधुराच्छादितवन्त्यः ॥ ९ ॥

अजानती शर्मिष्ठा गुरुपुत्र्या वासः स्वीयं मत्वा समव्ययत् सम्वीतवती "व्ययसम्वरणे" इति धातुः तदा प्रकुपिता प्रारब्धकोपा देवयानीदं वाक्यमुवाचेत्यन्वयः ॥ १० ॥

मह्यं मम असाम्प्रतमयुक्तम् ॥ ११ ॥

स्वकुलप्रशंसार्थं ब्राह्मणानां माहात्म्यं कथयति–यैरिदमित्यादिना । इदं विश्वं यैर्ब्राह्मणैस्तपसा सृष्टं ये परमस्य पुंसः मुखं यैरिदं परं ज्योतिर्ब्रह्माख्यं धार्यते यैश्च शिवः पन्थाः वेदमार्गो दर्शितः ॥ १२ ॥

ये लोकनाथाः सुरेश्वरास्तेपीदं ब्राह्मणकुलमुपतिष्ठन्ते अग्निमुखेन हविरादातुं प्रतीक्षन्ते विश्वात्मा भगवानपि ब्राह्मणप्रियस्तिष्ठतीति शेषः ॥ १३ ॥

वयं तत्र ब्राह्मणेषु भृगवः भृगुकुलजाः अत एव श्रेष्ठा इति शेषः अस्याः पिता वृषपर्वाऽसुरो नोऽस्माकं शिष्यः अस्मत्पितृशिष्यत्वादहमपि तत्पुत्रीत्वान्मान्येति यस्मात्तस्मादस्मद्धार्यं वस्त्रमिदं धृतवती यथा वेदग्रहणायोग्यो वृषलो वेदं धारयति तथेति ॥ १४ ॥

धर्षिता अप्रगल्भीकृता तुच्छीकृतेत्यर्थः ॥ १५ ॥

बहु कत्थसे व्यर्थवचनं वदसि भिक्षुकीत्वं स्पष्टमित्याह–किमेति । बलिभुजः श्वानः काको वा ॥ १६–१८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अजानती स्वीयं मत्वा गुरुपुत्र्याः वासः समव्ययत् पर्य्यधात् ॥ १० ॥

असाम्प्रतमनुचितं ब्राह्मणैर्धार्य्यं हविः शुनीव ॥ ११ ॥

अनौचित्यमेवाह–त्रिभिः । यैरिदंत्वादिभिः ज्योतिर्ब्रह्म ॥ १२–१३ ॥

तदेवं ब्राह्मणमात्रमेव तावत् पूज्यं तत्रापि वयं भृगवः तत्राप्यस्याः पिता नः शिष्यः ॥ १४—१५ ॥

बलिभुजः काकाः ॥ १६—१९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

समव्ययत् पर्यधात् ॥ १० ॥

असाम्प्रतमन्यायात् ॥ ११ ॥

इदं जगत् ये परस्य परमेश्वरस्य मुखम् ज्योतिः परं ब्रह्म शिवः पन्थाः कल्याणप्रदो वेदमार्गः ॥ १२—१३ ॥

असती अकल्याणी ॥ १४ —२० ॥

भाषा टीका ।

इतने में ही देवी सहित श्रीशिवजी को वृषभ के ऊपर बैठकर जाते हुए देखकर सब कन्यायें लज्जित होकर एकाएकी बडी जल्दी उस तटाक से बाहर निकलकर अपने २ वस्त्रों को पहिरती भईं ॥ ९ ॥

शर्मिष्ठा ने जल्दी के मारें भूल में अपने जानकर गुरु पुत्री देवयानी के वस्त्र पहिन लिये, वस इतनी वात पर देवयानी वडी कुपित होकर इस प्रकार वोली ॥ १० ॥

देवयानी वोली, कि—अहो ! देखो तौ इस दासी का अयोग्य कर्म, जो कि—हमारे पहिनवे के वस्त्रों को इसने धारण कर लिये, कि—जैसे यज्ञ के हवि को कुतिया खा लेवे ॥ ११ ॥

जिन ब्राह्मणों ने इस जगत् को तप से रचा है, और जो पर ब्रह्म के मुखरूप हैं, और जो वेद को धारण करते हैं और जिनोंने मंगल रूप पंथ दिखाया है ॥ १२ ॥

और जिनको लोकनाथ सुरेश्वर अच्छा कहते हैं और उपस्थान देते हैं और परम पावन श्रीनिकेतन विश्वात्मा भगवान भी जिनको मानते हैं ब्राह्मण वो वस्तु हैं ॥ १३ ॥

तिसमें भी हम भृगुवंशी तहां भी इसका पिता हमारा शिष्य, फिर भी इस शर्मिष्ठा दुष्टनी ने हमारे पहरने के वस्त्र पहिन लिये जैसे शूद्र वेद को धारण कर लेवे ॥ १४ ॥

इस प्रकार आक्रोश (गिल्ला) करने वाली गुरुपुत्री को मारे

एवंविधैः सुपरुषैः क्षिप्त्वाऽऽचार्यसुतां सतीम् ।
शर्मिष्ठा प्राक्षिपत्कूपे वास आदाय मन्युना ॥ १७ ॥
तस्यां गतायां स्वगृहं ययातिर्मृगयां चरन् ।
प्राप्तो यदृच्छया कूपे जलार्थी तां ददर्श ह ॥ १८ ॥
दत्त्वा स्वमुत्तरं वासस्तस्यै राजा विवाससे ।
गृहीत्वा पाणिना पाणिमुज्जहार दयापरः ॥ १९ ॥
तं वीरमाहौशनसी प्रेमनिर्भरया गिरा ।
राजंस्त्वया गृहीतो मे पाणिः परपुरञ्जय ! ॥ २० ॥
हस्तग्राहोऽपरो मा भूद्गृहीतायास्त्वया हि मे ।
एष ईशकृतो वीर ! सम्बन्धो नौ न पौरुषः ॥ २१ ॥
यदिदं कूपलग्नाया भवतो दर्शनं मम ।
न ब्राह्मणो मे भविता हस्तग्राहो महाभुज ! ।
कचस्य बार्हस्पत्यस्य शापाद्यमशपं पुरा ॥ २२ ॥
ययातिरनभिप्रेतं दैवोपहृतमात्मनः ।
मनस्तु तद्गतं बुध्वा प्रतिजग्राह तद्वचः ॥ २३ ॥
गते राजनि सा वीरे तत्र स्म रुदती पितुः ।
न्यवेदयत्ततः सर्वमुक्तं शर्मिष्ठया कृतम् ॥ २४ ॥

भाषा टीका ।

रोप के वडे २ श्वास लेती हुई सर्पिणी के तरह शर्मिष्ठा दांत काटकर बोली ॥ १५ ॥

शर्मिष्ठा बोली, कि—अरी भिक्षुकी । अपना समाचार नहीं जानकर वहुत क्यों वकती है । क्या तूं हमारे घरो की नित्य प्रतीक्षा नही करती है जैसे समय पर वलि भोजन करने वाले कौवे कुत्ते ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

निषिद्धोऽयम्प्रतिलोमसम्बन्ध इतिचेत्तत्राह-एष इति ॥ २१ ॥

ब्राह्मणमेव त्वं वृणीहि किमनेनाग्रहेणेति चेत्तत्राह-न ब्राह्मण इति । वृहस्पतेः सुतः कचः शुक्रान्मृतसञ्जीवनीं विद्यामध्यगात् तदा च देवयानी तं पतिं चकमे स च गुरुपुत्री मम पूज्येति न तामुदवहत् ततश्च कुपिता सती तवेयं विद्या निष्फला भवत्विति तं शशाप स च तव ब्राह्मणः पतिर्मे भवेदिति तां शशाप तदेतदाह यमहमशपं तस्य शापात् ॥ २२ ॥

अशास्त्रीयत्वादनभिप्रेतमपि दैवेनोपहृतं प्रापितं बुद्ध्वा तद्गतं तस्यां सकामं स्वस्य मनश्च बुद्ध्वा नह्यधर्मे मदीयं मनः प्रविशेदिति तस्या वचः प्रतिजग्राहाऽङ्गीकृतवान् ॥ २३ ॥

शर्मिष्ठासम्बन्धोऽपि दैववशादेवाभवदिति दर्शयन्नाह-गते राजनीति नवभिः । उक्तं भिक्षुकीत्यादि, कृतं कूपे प्रक्षेपादि ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं विधैरिति । एवं विधैरन्यैरपि परुषैर्वचोभिराचार्यस्य गुरोः सुतां क्षिप्त्वा उपालभ्य सती शर्मिष्ठा मन्युना वासो वस्त्रमादाय तामाचार्यसुतां कूपे प्राक्षिपत् पातयामास ॥ १७ ॥

तस्यामिति । अथ तस्यां शर्मिष्ठायां स्वगृहं प्रति यातायां गतायां सत्यां ययातिर्मृगयां चरन् यदृच्छया जलार्थी तत्र कूपसमीपं प्राप्तः गतः तत्र तां कन्यां देवयानीं नग्नां ददर्श ॥ १८ ॥

दत्त्वेति । ततो विवाससे नग्नायै तस्यै देवयान्यै स्वकीयमुत्तरीयं वस्त्रं दत्त्वा राजा ययातिः दयापरः पाणिना तस्याः पाणिं गृहीत्वा तां वहिरुद्धृतवान् ॥ १९ ॥

तमिति । तमुद्धृतवन्तं वीरं ययातिम् औशनसी काव्यसुता प्रेमपूर्णया गिरा उवाच, तदेवाह-राजन्निति त्रिभिः । हे राजन् ! परेषां पुराणि जयतीति तथाभूतः मम पाणिः त्वया गृहीतः ॥ २० ॥

अतस्त्वया गृहीताया मम परो हस्तग्राहः अन्यदीयपाणिना

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

मत्पाणिग्रहो माभूत् मामुद्वहस्वेत्यर्थः । ननु, त्वं ब्राह्मणी अहन्तु राजन्यः कथमावयोः प्रातिलोमिको विवाहस्स्यादित्यत्राह—एष इति । हे वीर ! नौ आवयोरेष भर्तृभार्याभावरूपः सम्बन्धः ईश्वरकृत इति न तु पौरुषः मनुष्यकृतः अतोऽत्र न दोष इति भावः ॥ २१ ॥

नन्विमं सम्बन्धं कुर्वन्नीश्वरोऽत्र न दृश्यत इत्यत्राह—यदिति । यत् यस्मात् कूपलग्नाया ममेदमसम्भवाचितं भवतो दर्शनमभूत् यथेदं दर्शनमीश्वरकारितम् अनुमीयते तथा सम्बन्धश्चेति भावः । किञ्च मम राजन्य एव पतिर्भविता न ब्राह्मण इत्याह–नेति । हे महाबाहो ! मे मम हस्तग्राहः पाणिग्राहको मर्त्येति यावत् ब्राह्मणो न भविता न भविष्यति, कुतः ? बार्हस्पत्यस्य बृहस्पतिसुतस्य कचस्य शापात्. कोऽसौ कचः ? तत्राह, यं कचमहं पुरा प्रथममशपं तस्य शापादित्यर्थः । बृहस्पतेः सुतः कचः शुक्रान्मृतसञ्जीवनीं विद्यामध्यगात् तदा देवयानी तं पतिं चकमे स च गुरुपुत्री त्वं मम पूज्या इत्युक्त्वा न तामुपयेमे ततः सा कुपिता सती तवेयं विद्या निष्फला भवत्विति शशाप स च तव पतिर्ब्राह्मणो न भविष्यतीति शशापेति कथा ऽत्रानुसन्धेया ॥ २२ ॥

ततो ययातिरशास्त्रीयत्वादनभिप्रेतमपि दैवेनोपहृतं प्रापितं बुध्वा तद्वृत्तं तस्यामासक्तं मनश्च बुध्वा न ह्यधर्मे मदीयं मनः प्रविशेदिति तस्याः वचः प्रतिजग्राह—अङ्गीकृतवान् ॥ २३ ॥

शर्मिष्ठासम्बन्धोऽपि दैववशादेवाभवदिति दर्शयन्नाह—गते राजनीति, नवभिः । वीरे राजनि ययातौ गते सति सा देवयानी तत्र गता रुदती पितुः समीपमेत्येति शेषः । शर्मिष्ठया कृतमुक्तं च तत्सर्वं न्यवेदयत् ॥ २४ ॥

अनन्तरं ययातिना किं कृतमित्यत्राह-ययातिरिति । यदनभिप्रेतं प्रातिलोम्येनोद्वहनं तदेवात्मनः दैवेन श्रीनारायणेन उपहृतमर्पितमात्मनो मनश्च तस्यां गतमनुरक्तं बुद्ध्वा तस्याः देवयान्याः वचः प्रतिगृहीतवानित्यन्वयः ॥ २३ ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

एष ईशकृत इति तद्वाक्यद्वारा श्रीशुकदेवेन सिद्धान्तितम् ॥ २१ ॥ २२ ॥

तत्राशङ्कते नन्वीश्वरघटना सर्वत्रैवेति तस्यां सिद्धान्तितायां न कस्यापि पापं स्यात् कचशापश्च नाधर्मनिवारणे कारणे विरोधाभावात् प्रत्युतानर्थबीजस्य तस्य तत्र साहाय्यावगमात् ततो नाऽधर्मो वा कथं जातः ? कथं वा तस्य तत्र प्रवृत्तिरभूत् ? इत्याशंक्य तादृशानामीश्वराश्रयधर्माणामत एव तत्र विशेषावबोधकमित्यभिप्रेत्य, तदेव दर्शयति—ययातिरिति । दैवमीश्वरः तस्यायमभिप्रायः मम ययातेस्तावददृष्टफले कर्मणि कर्त्तव्यबुद्धिर्न जायेत तदेकाश्रयस्य ममचेश्वरोपि न तद्घटयेत् मनश्च न तत्र प्रवेशयेदित्यौत्पत्तिकाऽनुभवेन मुहुः निर्णीतवानस्मि तथापि यदेवं दत्तदापतितं तत्तु "न कर्म बन्धनं जन्म वैष्णवानाञ्च विद्यते " इति पाद्मकार्तिकमाहात्म्यवचनवदीश्वरस्यैव स्वैरलीलानुसारिणी काप्रीयमिच्छा गुणायैव कल्पते तदतिक्रमस्तु दोषाय "जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं नच मे निवृत्तिः । केनापि देवेन हृदिस्थितेन यथा नियुक्तोऽस्मि तथा करोमि" इति गौतमीयवचनवद् मद्विधस्य निष्ठितत्वात् ततो नान्येषामिव तत्र तस्य दोष इति भावः ॥ २३–२५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

किञ्जातिस्त्वमित्युक्ता सा राजन्नौशनसी भवामीति प्रोवाचेति ज्ञेयम् ॥ २०—२१ ॥

यमशपं पुरेति बृहस्पतेः पुत्रः कचः शुक्रान्मृतसञ्जीवनीं विद्यामध्यगात् तदा च देवयानी तं पतिं चकमे स च गुरुपत्री मम पूज्येति न तामुदवहत् ततश्च कुपिता सती तवेयं विद्या निष्फला भवत्विति तं शशाप स च तव ब्राह्मणः पतिर्न भवेदिति तां शशापेति ॥ २२ ॥

ब्राह्मणकन्यापरिणयस्याऽधर्मसाधनत्वादनभिप्रेतं दैवेन परमेश्वरेणैव आत्मने उपहृतमित्यत्र हेतुं तद्गतं स्वमनश्च बुद्ध्वा बाल्यमारभ्य मदीयं मनः क्वचिदपि नाऽधर्मेऽरमत नाऽपि मत्प्रभुस्तच्चरणैकशरणस्य मम मनो ह्यधर्मे रमयेदिति "धर्मस्य सूक्ष्मा गतिः" इत्यतो नायमधर्मो भविष्यतीति निश्चित्य तस्या वचः प्रतिजग्राह ॥ २३—२४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ईशकृतः कर्मसापेक्षेण परमेश्वरेण कृतः ॥ २१ ॥

मृतसञ्जीवनीं विद्यां शुक्रादानयेति देवैः प्रेषितः कचः

श्रीमद्विजध्वजतीर्थकृतपदरत्नावली ।

उत्तरमुत्तरीयं उज्जहार कूपादिति शेषः ॥ १९ ॥

प्रेमनिर्भरया स्नेहपूर्णया हस्तं गृह्णातीति हस्तग्राहः पाणिग्रहणकर्ता अपरोऽन्यो न स्यात् हस्ताग्राह इति पाठे हस्ते ग्राहो ग्रहणं यस्य स तथा कुम्भकारवदण्प्रत्ययान्तो वा कूपमग्नायाः मम भवतो यदिदं दर्शनम् । एषः सम्बन्धः ईशकृतः श्रीनारायणविहितः न पौरुषः पुरुषाकाररचितो न भवति ॥ २०—२१ ॥

ब्राह्मणपुत्र्यास्तव ब्राह्मण एव भर्ता युक्तो न क्षत्रियः प्रतिलोमप्रवेशप्रसङ्गादिति शङ्कां परिहरति–न ब्राह्मण इति । हेमहाभुज ! मे ब्राह्मणो हस्तग्राहो न भविता न भविष्यति. कुत इति तत्राह–कचस्येति । बार्हस्पत्यस्य बृहस्पतेरपत्यस्य नाम्ना कचस्य शापात् मृतसञ्जीवनीविद्यार्थी कचस्तत्प्रतिग्रहाय बहुतिथं गुरुपरिचर्यां विधाय तत्प्रसादमापाद्य तद्विद्यामादाय गुरोरनुज्ञया गन्तुकामं कचमुपलक्ष्य सर्वप्रकारेण कचस्य हितमाचरन्त्या मया भो कच ! त्वं मम भर्त्ता भवेत्युक्तो मामुवाच हे देवयानि ! त्वया नैवं वक्तव्यं यद्भ्राताहमिति. तदा कुपिताऽहं तमशपं मत्पितुरवाप्ताविद्या न फलत्विति यमाख्यायिकाऽनेनोच्यते यमशपं पुरेति अहं पुरा यं कचमशपं शप्तवती तस्य शापादिति ॥ २२ ॥

दुर्मना भगवान् काव्यः पौरोहित्यं विगर्हयन् ।
स्तुवन्वृत्तिं च कापोतीं दुहित्रा स ययौ पुरात् ॥ २५ ॥
वृषपर्वा तमाज्ञाय प्रत्यनीकविवक्षितम् ।
गुरुं प्रसादयन्मूर्ध्ना पादयोः पतितः पथि ॥ २६ ॥
क्षणार्द्धमन्युर्भगवान् शिष्यं व्याचष्ट भार्गवः ।
कामोऽस्याः क्रियतां राजन्नैनां त्यक्तुमिहोत्सहे ॥ २७ ॥
तथेत्यवस्थिते प्राह देवयानी मनोगतम् ।
पित्रा दत्ता यतो यास्ये सानुगा यातु मामनु ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

शुक्रशिष्योभूत्वा तद्गृहे ऽवसत् तदा दानवैः भस्मीकृतः शुक्रभोज्ये निक्षिप्य तदुदरे प्रवेशितः तदा तु कचं विना न जीविष्ये इत्येवं वादिन्या देवयान्या प्रार्थितेन शुक्रेण कन्यावत्सलेन मृतसञ्जीविन्या स्वोदरे पुनः स उत्पादितः तन्निर्गमने स्वनाशमालोचयता स्वजीवनार्थं तस्मै मृतसञ्जीविनी विद्योपदिष्टा तदनन्तरं शत्रुपक्षीयोऽप्यतिधार्मिकत्वाद्गुरुदेहान्निर्गम्य स्वगुरुं मृतं तया विद्ययोत्थापयामास तदा स्वगृहं गन्तुकामं तं पात्रभूतं स्वानुरूपं पतिं चकमे स च शुक्रशिष्यः तदुदरप्रवेशात्तत्पुत्रभूतश्च न तां भार्यात्वेन स्वीकृतवान् तदा चातिक्रुद्धा देवयानी तवेयं विद्या निष्फला भवत्विति तं शशाप सोऽपि ब्रह्मर्षिसुतो निरपराधः तव ब्राह्मणपतिर्न भवेदिति तां शशाप तदेतदाह "न ब्राह्मणो मे भविता हस्तग्राहो महाभुज ! कचस्य बार्हस्पत्यस्य शापाद्यमशपं पुरा"इति ॥ २२ ॥

ययातिस्तु लोकविरुद्धत्वादनभिप्रेतमपि दैवेनोपहृतं प्रापितं बुध्वा आत्मनो मनस्तद्गतं च बुध्वा न ह्यधर्मे मन्मनो विशेदिति तद्वचः प्रतिजग्राह ॥ २३ ॥

उक्तं भिक्षुकीत्यादि, कृतं कूपप्रक्षेपादि ॥ २४—२५ ॥

भाषा टीका

इस प्रकार के वडे कडे वाक्यों से सती आचार्य सुता को शर्मिष्ठा ने फटकार कर वस्त्र छीनकर क्रोध से कूप में गिरादीनी ॥ १७ ॥

और शर्मिष्ठा तौ गृह को चली गई, इतने ही में ययाति महाराज शिकार खेलते हुए हरीच्छा से जलके लिये उसी कूप पर आ पहुंचे और उस कूप में देवयानी को देखते हुए ॥ १८ ॥

तव नग्न उस देवयानी को राजा ने अपना उत्तरीय वस्त्र (चादर) देकर दयाकर के हाथ से हाथ पकडकर वाहर निकाल लीनी ॥ १९ ॥

तव शुक्राचारी की पुत्री प्रेमयुक्त वाणी स उस वीर ययाति से वोली, कि-हे राजन् ! हे शत्रुओं के पुरके जीतने वाले ! आपने हमारा पाणिग्रहण किया है ॥ २० ॥

जव आप मेरा पाणिग्रहण करचुके तौ अब मेरा फिर दूसरा पाणिग्राहक न होवै,हे वीर ! यह हमारा तुमारा संबंध ईश्वर का जोडा हुआ है किसी पुरुष का किया हुआ नहीं है ॥ २१ ॥

क्योंकि ? जो कूप में गिरी हुई मेरे लिये आपका दर्शन हुआ, और हे महाभुज ! ब्राह्मण मेरा हस्त नहीं ग्रहण करैगा क्योंकि ? बृहस्पति के पुत्र कचने मेरे लिये शाप दिया. है जिसको मैंने प्रथम शाप दीनी रही । (इहां ऐसी कथा है कि—बृहस्पति का पुत्र कच, शुक्राचारी के समीप मृत संजीविनी विद्या पढता रहा शुक्राचारी की पुत्री देवयानी ने उसको पति वनाने की इच्छा करी, कचने विचारी कि-यह तौ गुरुकी पुत्री मेरी पूज्या है इसीसे उसको न व्याही । परंच देवयानी ने तौ क्रोध करके शाप देदिया कि—तेरी विद्या निष्फल होजाय, तव कचने भी शाप दिया कि—तेरे लिये ब्राह्मण पति न मिले,) ॥ २२ ॥

क्षत्रिय होकर ब्राह्मण की कन्या के पाणि ग्रहण को अशास्त्रीय समुझकर राजा का अभिप्राय तौ नहीं हुआ पर क्या करैं दैव संयोग से यह योग प्राप्त हुआ ऐसा समुझकर और अपने मनको भी उसमें लग्न देखकर उस्का वचन राजा ने ठीक मान लिया ॥ (राजा ने विचारा यदि इसका पाणि ग्रहण अधर्म होता तौ इसमें हमारा मन नहीं लगता, क्यों कि संदेह स्थान वाली वस्तुओं में सज्जनों की अंतःकरण की वृत्तियें ही प्रमाण हैं) ॥ २३ ॥

राजा तौ उसके वचन को अंगीकार कर चले गये, वह देवयानी रोती हुई अपने पिता के समीप सव वृत्तांत निवेदन करती हुई जो कि अपने साथ शर्मिष्ठा ने कहा और करा ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कापोतीमुञ्छवृत्तिम् ॥ २५ ॥

प्रत्यनीका द्वेष्टारस्ते विवक्षिता जयं प्रापणीया इत्यभिप्रेतं यस्य तथाभूतं ज्ञात्वा प्रत्यनीकानां विवक्षितमिति वा ॥ २६ ॥ २७ ॥

* (पित्रा दत्ता देवयान्यै शर्मिष्ठा सानुगा तदा ।)
स्वानां तत्सङ्कटं वीक्ष्य तदर्थस्य च गौरवम् ।
देवयानीं पर्यचरत्स्त्रीसहस्रेण दासवत् ॥ २९ ॥
नाहुषाय सुतां दत्त्वा सह शर्मिष्ठयोशना ।
तमाह राजञ्छर्मिष्ठां माऽधास्तल्पे न कर्हिचित् ॥ ३० ॥
विलोक्यौशनसीं राजन् ! शर्मिष्ठा सुप्रजां क्वचित् ।
तमेव वव्रे रहसि सख्याः पतिमृतौ सती ॥ ३१ ॥
राजपुत्र्या ऽर्थितोऽपत्ये धर्मञ्चावेक्ष्य धर्मवित् ।
स्मरन् शुक्रवचः काले दिष्टमेवाभ्यपद्यत ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सानुगा सखीसहिता शर्मिष्ठा मामनुयात्विति ॥ २८ ॥

तत्तस्मान्निर्गताच्छुक्रात्सङ्कटं वीक्ष्य तत्तस्मादवस्थितादर्थस्य प्रयोजनस्य गौरवं च वीक्ष्य ॥ २९ ॥

तल्पे माधाः नोपगच्छेरित्यर्थः ॥ ३० ॥ ३१ ॥

अपत्यार्थमृतुकाले प्रार्थनात्तस्याः कामपूरणं धर्ममवेक्ष्य शुक्रस्य वचश्च स्मरन् दिष्टं दैवप्रापितमेव तत्सङ्गमभ्यपद्यत न तु कामत इत्यर्थः ॥ ३२ ॥ ३३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

दुर्मना इति । तदाकर्ण्य स भगवान् काव्यो दुर्मनाः विमनाः पौरोहित्यं विगर्हयन् कापोतीं वृत्तिमुञ्छवृत्तिं स्तुवंश्च दुहित्रा सह वृषपर्वणः पुराद्यथौ निश्चक्राम ॥ २५ ॥

वृषपर्वेति । ततो वृषपर्वा प्रत्यनीका देवास्ते विवक्षिताः जयं प्रापणीया इत्यभिप्रेता यस्य तथाभूतं तं गुरुं ज्ञात्वा पथि पादयोः पतितो गुरुं प्रसादयामास प्रार्थयाञ्चक्रे ॥ २६ ॥

क्षणार्द्धेति । क्षणार्द्धमेव मन्युः क्रोधो यस्य स भगवान् भार्गवः काव्यः शिष्यं वृषपर्वाणमाचष्ट अब्रवीत्, हे राजन् ! अस्या देवयान्याः काममिष्टं क्रियतां यदि यमिच्छसि तत् क्रियताम् एनां देवयानीं त्यक्तुमहं नोत्सहे न प्रभवामि स्नेहादिति शेषः ॥ २७ ॥

तथेत्येति । तथैवास्त्वित्यङ्गीकृत्य वृषपर्वणि स्थिते सति देवयानी स्वमनोगतं प्राह-किमिति ? पित्रा दत्ता सत्यहं यतो यास्ये गमिष्यामि तत्रेयं शर्मिष्ठा सानुगा ससखी मामनुयातु अनुगच्छतु महास्यं कर्तुमिति भावः इति ॥ २८ ॥

स्वानामिति । ततः शर्मिष्ठा तत्तस्मात् शुक्रात् स्वानां पित्रादीनां सङ्कटं निरीक्ष्य तत्तस्मादवस्थितादर्थस्य प्रयोजनस्य च गौरवं च वीक्ष्य स्त्रीसहस्रेण सह दासीवद्देवयानीं पर्य्यचरत् ॥ २९ ॥

नाहुषेति । ततः उशना काव्यः शर्मिष्ठया सह सुतां देवयानीं नाहुषाय ययातये दत्त्वा तं नाहुषमाह—किमिति ? हे राजन् ! तल्पे शय्यायां शर्मिष्ठां कर्हिचिदपि नाधाः न विन्यस्येरिति ॥ ३० ॥

विलोक्येति । ततः कदाचित् शर्मिष्ठा राज्ञो ययातेः स्त्रियमौशनसीं देवयानीं सुप्रजां शोभनापत्यवतीं विलोक्य स्वयमपि ऋतौ वर्त्तमाना सख्याः देवयान्याः पतिं तमेव ययातिमेव वव्रे ॥ ३१ ॥

राजपुत्र्येति । तदा अपत्यार्थं राजपुत्र्या शर्मिष्ठया अर्थितः धर्मवित् ययातिः धर्ममवेक्ष्यापत्यार्थम् ऋतुकाले प्रार्थयमानायाः कामपूरणं धर्म एवेति विचार्य भृगुवचः शर्मिष्ठांमाधास्तल्पे न कर्हिचिदिति वचः स्मरन्नपि काले दिष्टं दैवप्रापितमेवाभ्यपद्यत दैवप्रापितमेव तत्सङ्गमभ्यपद्यत न तु कामत इत्यर्थः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कापोतीं कपोतसम्बन्धिनीं वृत्तिं स्तुवन् ग्रन्थाधिक्यभयान्न कापोती वृत्तिर्विव्रियते देवयान्या दुहित्रा सह ॥ २५ ॥

प्रत्यनीकानामसुरद्वेषिणां देवानां वक्तुमिष्टं कार्यम् ॥ २६ ॥

अस्याः देवयान्याः कामोपेक्षाविशेषः स्वाभीष्टसाधनाय यात्वियं शर्मिष्ठा भवानस्मत्प्रियायाऽऽस्तामिति तन्नाह-नैनामिति ॥ २७ ॥

यदभीष्टं तत्तथा करिष्ये इत्येवमुक्त्वा वृषपर्वण्यवस्थिते सति वृषपर्वणा तव किं कर्तव्यमिति पृष्टा देवयानी मनोगतं स्वमनसि स्थितं कार्यं प्राह-किं तदाह पित्रेति । अहं पित्रा दत्ता यास्ये यतोऽतो मामियं शर्मिष्ठा सानुगा दासीसहस्रेण सहिताऽनुयातु अन्वागच्छतु इति ॥ २८ ॥

शर्मिष्ठा तत्सर्वं श्रुत्वा यद्यहं नानुगमिष्यामि तदा गुरुद्रोहान्मत्कुलं सर्वं नष्टं भवतीति यत्स्वानां सङ्कटं तद्वीक्ष्य तदर्थस्य तदनुगमनलक्षणप्रयोजनस्य गौरवं गुरुप्रसादेन स्वकुलाभिवृद्धिलक्षणमस्तीति मनसा निश्चित्य स्त्रीसहस्रेण परिवृता तथा करिष्यामीति पितरमुक्त्वा देवयानीं दासीवत् पर्यचरत् ॥ २९ ॥

* इत्यधिकः पठ्यते विश्व० चक्रवर्तीपाठेन ।

यदुं च तुर्वसुञ्चैव देवयानी व्यजायत ।
द्रुह्युं चानुञ्च पूरुञ्च शर्मिष्ठा वार्षपर्वणी ॥ ३३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उशना सुतां देवयानीं नाहुषाय नहुषपुत्राय ययातये शर्मिष्ठया सह दत्वा तं राजानमाह-किमाह,क्वचिदपि शर्मिष्ठां तल्पे शयनीयस्थाने माधाः धृतास्माकार्षीः मिथुनीभावं न कुर्वित्यर्थः ॥ ३० ॥

औशनसीं देवयानीं कार्यमालोच्य रहस्येकान्ते सख्याः पतिं तमेव ययातिमिव्र ऋतुकाले वव्रे ॥ ३१ ॥

अपत्ये सन्तानार्थे राजपुत्र्या शर्मिष्ठया प्रार्थितो धर्मविद्धर्मज्ञः "न काञ्चन परिहरेत्तद्व्रतम्"इति श्रुतेः । स्वयमागतां परिहर्तुमशक्यं चेति धर्मं चावेक्ष्य शुक्रवचः स्मरन्नपि काले दिष्टमेव दैवमेवात्र कारणमिति निश्चित्याभ्यपद्यत तामितिशेषः ॥ ३२—३३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

प्रत्यनीकं प्रतिकूलं शापमयं विवक्षितं यस्य तादृशम् ॥ २६—३१ ॥

दिष्टमीश्वरेणादिष्टं प्रेरितमेवाभ्यपद्यत विचारितवान् ॥३२—३६॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

कापोतीमुञ्छवृत्तिम् ॥ २५ ॥

प्रत्यनीकेषु देवेषु विवक्षितम् असुरान् परित्यज्य युष्मानेव जयं प्रापयामीत्यादिकं वक्तुमिष्टं यस्य तथाभूतं तम् आज्ञाय ॥ २६-२७॥

तथेति देवयान्याः पादयोः पतित्वा वृषपर्वण्यवस्थिते सति मनोगतमेव प्राह-प्रकटमुवाच सानुगा सखीसहिता शर्मिष्ठा मामनुयात्विति ॥ २८ ॥

ततः शुक्रात् कुपितात् स्वानामसुराणां सङ्कटं वीक्ष्य तथैव ततः प्रसन्नात् अर्थस्य स्वप्रयोजनस्य गौरवं च वीक्ष्य दासवत् दास इव वृषपर्वा पर्य्यचरत् ॥ २९ ॥

कर्हिचिदपि तल्पे न अधाः न धेहि न धास्यसीत्यर्थः ॥ ३०-३१ ॥

धर्मविदिति अपत्यार्थमृतुकाले प्रार्थ्यमानायास्तस्याः कामपूरणं धर्म एवेति जानन् शुक्रवचश्च शर्मिष्ठासङ्गप्रतिषेधकं स्मरन् दोलायमानचित्तोऽपि दिष्टं दैवप्रापितं सङ्गमेव प्राप ॥३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

प्रत्यनीके जघन्ये काले विवक्षितम् आपद्गणाद्रक्षकमित्यर्थः ॥ २६ ॥

यथार्थे मन्युर्यस्य सः व्याचष्ट अब्रवीत् ॥ २७ ॥

तथेत्यवस्थिते तथास्तु इति निश्चिते प्रतिज्ञाते सति देवयानी मनोगतमाह—पित्रा दत्ता यतो यत्र यास्ये तत्र सानुगा शर्मिष्ठा मामनुयात्विति ॥ २८ ॥

तस्तस्मिन् शुक्रवियोगे स्वानां सङ्कटं वीक्ष्य तस्तस्मिन् शुक्रे सती स्वानामर्थस्य गौरवं च वीक्ष्य स्त्रीसहस्रेण दासवत् पर्यचरत् ॥ २९ ॥

हे राजन् ! शर्मिष्ठां तल्पे शय्यायां न अधाः त्वयैषा नोपगन्तव्येत्यर्थः ॥ ३०—३१ ॥

काले ऋतुकाले अपत्यार्थं राजपुत्र्याऽर्थितः तस्याः कामपूरणं धर्ममवेक्ष्य शुक्रवचश्च स्मरन् दिष्टं दैवं चावेक्ष्य अत्र दैवं हेतुरिति विचार्य अभ्यपद्यत तामुपजगाम ॥ ३२ ॥

भाषाटीका ।

वृत्तांत सुनकर भगवान् शुक्राचार्य पुरोहितपेन की निन्दाकर कापोती (उंछ) वृत्ति की बडाई करते हुए मन में दुःख पाकर पुत्री सहित पुर से चल दिये ॥ २५ ॥

वृषपर्वा ने समझा कि यदि गुरुजी चले जांयगे, तो हमारे शत्रुओं (देवताओं) की जीत कराने का अभिप्राय मन में रक्खेंगे इस लिये मार्ग ही में जाकर चरणों में गिर पडा और चरणों में माथा धरकर गुरुजी को प्रसन्न करने लगा ॥ २६ ॥

तब भृगुवंशी भगवान् शुक्राचारी जी अर्द्धक्षण कोप करने वाले रहे शीघ्र प्रसन्न होकर शिष्य से बोले, कि—हे राजन् इस हमारी पुत्री को प्रसन्न करलो हम इसको नहीं छोड सक्ते हैं ॥ २७ ॥

वृषपर्वा ने जब इस बात को स्वीकार करी और पूंछी तब देवयानी अपने मन में जो बात रही सो बोली, कि—पिता की दी हुई जहाँ मैं जाऊँ तहाँ सखियों सहित शर्मिष्ठा मेरे पीछे (बांदी होकर) जावै ॥ २८ ॥

वृषपर्वा ने शुक्राचारीजी के जाने में अपने लोगों में सङ्कट देखा और उनके रहने में अर्थ का गौरव देखा, तब शर्मिष्ठा हजार सखियों सहित दासी की तरह देवयानी की परिचर्या करने लगी ॥ २९ ॥

तब शुक्राचारीजी नहुष के पुत्र ययाति राजा को शर्मिष्ठा सहित अपनी पुत्री को देकर बोले, कि—हे राजन् ! शर्मिष्ठा को कभी शय्या पर नहीं लेना, अर्थात् उसके साथ कभी गमन नहीं करना ॥ ३० ॥

शुक्र मुनि बोले, कि—हे राजन् ! किसी समय शर्मिष्ठा ने शुक्र पुत्री देवयानी को पुत्रवती देखकर अपने ऋतु होनेपर सखी के पति से एकांत में कहकर प्रार्थना करी ॥ ३१ ॥

जब अपत्य (सन्तान) के निमित्त राजपुत्री ने राजा से प्रार्थना करी तब धर्मवित् राजा ययाति शुक्राचारी के वचन को स्मरण कर के भी धर्म देखकर प्रारब्ध से उस शर्मिष्ठा के साथ सङ्गम को प्राप्त हुए ॥ ३२ ॥

गर्भसम्भवमासुर्या भर्तुर्विज्ञाय मानिनी ।
देवयानी पितुर्गेहं ययौ क्रोधविमूर्च्छिता ॥ ३४ ॥
प्रियामनुगतः कामी वचोभिरुपमन्त्रयन् ।
न प्रसादयितुं शेके पादसंवाहनादिभिः ॥ ३५ ॥
शुक्रस्तमाह कुपितः स्त्रीकामाऽनृतपूरुष ! ।
त्वां जरा विशतां मन्द ! विरूपकरणी नृणाम् ॥ ३६ ॥

ययातिरुवाच ।

अतृप्तोऽस्म्यद्य कामानां ब्रह्मन्! दुहितरि स्म ते ।
व्यत्यस्यतां यथाकामं वयसा योऽभिधास्यति ॥ ३७ ॥
इति लब्धव्यवस्थानः पुत्रं ज्येष्ठमवोचत ।
यदो ! तात ! प्रतीच्छेमां जरां देहि निजं वयः ॥ ३८ ॥
मातामहकृतां वत्स ! न तृप्तो विषयेष्वहम् ।
वयसा भवदीयेन रंस्ये कतिपयाः समाः ॥ ३९ ॥

यदुरुवाच ।

नोत्सहे जरसा स्थातुमन्तराप्राप्तया तव ।
अविदित्वा सुखं ग्राम्यं वैतृष्ण्यं नैति पूरुषः ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आसुर्याः शर्मिष्ठायाः भर्तुः सकाशात् ॥ ३४ ॥
उपमन्त्रयन्प्रसादयन् ॥ ३५ ॥
विकृतं रूपं करोतीति तथा ॥ ३६ ॥

ते दुहितरि कामैरद्याप्यतृप्तोऽस्मि कामानां भोगैरिति वा शुक्र आह तर्हि योऽभिधास्यत्यमितो शारयिष्यति तस्य वयसा यथाकामं व्यत्यस्यतां यथेच्छं जराव्यत्ययं यातु व्यत्ययं नीयतामिति वा यद्वा व्यत्यस्येति छेदः तां जरां व्यत्यस्य व्यत्यासङ्गमय्येत्यर्थः ॥ ३७ ॥

इति लब्धं व्यवस्थानं जराया व्यवस्थितिर्येन सः ॥३८-४०॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यदुमिति । तत्र देवयानी यदुन्तुर्वसुं च द्वौ पुत्रौ व्यजायत सुषुवे वार्षपर्वणी वृषपर्वणो दुहिता शर्मिष्ठा तु द्रुह्युमनुं पूरुं चेति त्रीन् सुतान् व्यजायत ॥ ३३ ॥

गर्भसम्भवमिति । ततो मानिनी देवयानी भर्तुस्सकाशादेव आसुर्याः शर्मिष्ठाया गर्भसम्भवं विज्ञाय क्रोधमूर्च्छिता पितुः काव्यस्य गेहं जगाम ॥ ३४ ॥

प्रियामिति । प्रियां देवयानीमनुगतः कामी ययातिः तां पादसंवाहनादिभिः पादग्रहणादिभिः सांत्ववचनैश्चोपमन्त्रयन् प्रार्थयमानोपि तां प्रसादयितुं न शेके न बभूव ॥ ३५ ॥

शुक्र इति । तदा तं ययातिं कुपितः शुक्र आह—किमिति ? हे स्त्रीकाम! हे अनृतपूरुष ! पुरुषा कृत्यापन्नानृतरूप, हे मन्द दुर्बुद्धे ! नृणां विरूपं विकृतरूपं करोतीति तथा सा जरा त्वां विशताम् आविशतु इति ॥ ३६ ॥

अतृप्त इति । एवं शप्तो ययातिराह—अतृप्तोऽस्मीति, हे ब्रह्मन् ! ते तव दुहितरि कामानां कामैरहमद्याप्यतृप्तोऽस्मि कामानां भोगैरिति शेषो वा, ततः शुक्र आह । व्यत्यस्यतामिति. योऽभिधास्यति जरामहं ग्रहीष्यामीत्यभिधास्यति तस्मिन् वयसा तस्य वयसा यथाकामं यावत्कामं व्यत्यस्यतां जरेति शेषः । जरां तस्मै दत्वा तद्वयो गृहाणेत्यर्थः ॥ ३७ ॥

इतीत्थं लब्धं व्यवस्थानं जराव्यवस्थितिर्येन स ययातिर्ज्येष्ठं पुत्रं यदुमवोचत, किमिति ? हे यदो हे तात ! इमां तव मातामहेन कृतां गर्हितां जरां प्रतीच्छ प्रतिगृहाण निजं त्वदीयं वयो देहि विषयेष्वहं न तृप्तोस्मि अतो भवदीयेन त्वद्दत्तेन वयसाऽहं कतिचिद्वर्षाणि रंस्ये इति ॥ ३८-३९ ॥

यदुराह—नोत्सह इति । तवान्तरावयोर्मध्ये प्राप्तया जरसा जरया

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका।

स्थातुमहं नोत्सहे, अनुत्साहे हेतुमाह-ग्राम्यं सुखमविदित्वा अननुभूय पुमान् शान्तिं वैराग्यं नोपैति अननुभूतग्राम्यसुखस्त्वमेव शान्तिं नोपैषि अहं त्वनासादितग्राम्यसुखः कथं शान्तिमुपेयामित्यर्थः॥ ४०॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

आहुयोः शर्मिष्ठायाः॥ ३४॥ ३५॥

हे स्त्रीकाम! अनृतपुरुष! असत्यवादिपुरुष ज्ञानी पुरुषो नेति वा त्वां जरा विशत इति लट् लोडर्थे जरा त्वामाविशतामिति शापमदादित्यर्थः॥ ३६॥

ते तव दुहितरि कामानां शब्दादिविषयाणां स्मरणे नातृप्तोऽस्मि अलम्बुद्धिं न प्राप्तोऽस्मि"स्मृतौ वृत्ते निषेधे स्म स्वः स्वर्गपरलोकयोः" इति अत एवमनुग्रहः कर्तव्य इत्याह-व्यत्यस्येति। यो मह्यं वयोऽभिदास्यति तस्मिन्नेतां जरां व्यत्यस्य संक्रमय्य तद्वयसा यथाकामं भुङ्क्ष्व इति॥ ३७॥

तर्हि तथास्त्विति लब्धव्यवस्थानो ययातिर्ज्येष्ठं पुत्रमुवाच प्रतीच्छ गृहाण॥ ३८॥

मानामहेन शुक्रेण कृतां रंस्ये सुरतमनुभवामि॥ ३९॥

कुतो नोत्सह इति तत्राह-अविदित्वेति। अविदित्वा अननुभूय वैतृष्ण्यं वैराग्यम्॥ ४०॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

कामानामिति तृप्त्यर्थानां करणे षष्ठी चेति वार्त्तिकात्॥३७॥

इतीति युग्मकम्॥ ३८—४२॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

व्यजायत व्यजनयत्॥ ३३॥

भर्त्तुः सकाशाद्गर्भसम्भवमाज्ञायेति पूर्वंपूर्वमप्यस्माद्ब्राह्मणादिकादेव जातमासीदिति भावः॥ ३४॥

उपमन्त्रयन् सान्त्वयन्॥ ३५—३६॥

कामानामिति "नाग्निस्तृप्यति काष्ठानाम्" इतिवत् षष्ठी ते दुहितरीति भङ्ग्या त्वच्छापोऽयं तव दुहितर्य्यपि फलित इति व्यञ्जितं शुक्रोऽपि विमृश्य प्रसीदन्नुवाच ययेष्टं जरा वयसा यौवनेन व्यत्यस्यतां विनिमीयताम्; ननु, जरां गृहीत्वा विनिमयेन यौवनं कः खलु दास्यति? तत्राह—योऽभिधास्यति यः पुत्रादिकस्त्वयि स्नेहेनाभितो धास्यति जरां धारयिष्यति. यद्वा त्वमेवं विनिमयं सर्वान् ज्ञापय तेषु मध्ये योऽभिधास्यति यौवनं दत्वा जरामेषोऽहं गृह्णामीति वदिष्यतीत्यर्थः॥ ३७—३९॥

अन्तरा यौवनमध्ये एव कुतः अविदित्वेत्यादि अयमस्याशयः मम विधित्सितभगवद्भक्त्यानुकूलं विषयवैतृष्ण्यमपेक्षितं वर्तते तच्च भोगबाहुल्यं विना प्रायो न भवेत् तत्र यद्यपि कालविलम्बे सति त्वं स्वीयां जरां गृहीत्वा मद्यौवनं दास्यसीति जानामि तदपि निरन्तरायहरिभजनसोत्कण्ठस्य मम कालविलम्बस्यासह्यत्वात् पितुरपि तवैमामाज्ञां न पालयाम्यत्र यद्भवेत्तद्भवत्विति अत एव यदोश्च धर्मशीलस्येति राज्ञा दशमे वक्ष्यते परमधर्मापेक्षया पितुराज्ञापालनलक्षणधर्मस्य प्राकृतस्य सनकादिभिरिव तेन त्यागात् अत एव सन्तुष्यंस्तद्वंशे भगवान् स्वयमवततार "यदोः प्रियस्यान्ववाये" इति कुन्तीस्तुतिश्च यातूलरश्लोके मधुमञ्ज इति शुकोक्तिः सा तु तुर्वस्वादीन् प्रत्येवेति ज्ञेयम्॥ ४०—४२॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

व्यजायत सुषुवे॥ ३३—३४॥

उपमन्त्रयन् प्रसादयन्॥ ३५—३६॥

ययातिराह-हे ब्रह्मन्! तव दुहितरि कामानां कामैरद्याप्यतृप्तोऽस्मि शुक्र आह तर्हि योऽभितो धास्यति जरां धारयिष्यति तस्य वयसा तारुण्येन कामं यथेच्छं व्यत्यस्यतां व्यत्ययं नीयतां जरेति शेषः॥ ३७॥

इत्येव लब्धं व्यवस्थानं तारुण्यार्थमालम्बनं येन सः॥३८-३९॥

अन्तरावयोः मध्ये वैतृष्ण्यं वैराग्यं मुक्तिसाधनमित्यर्थः॥४०॥

भाषा टीका।

देवयानी, यदु और तुर्वसु इन दो पुत्रों को उत्पन्न करती हुई। और वृषपर्वा की पुत्री शर्मिष्ठा ने द्रुह्यु अनु और पुरु ये तीन पुत्र उत्पन्न किये॥ ३३॥

मानवती देवयानी शर्मिष्ठा के विषै अपने भर्त्तासे गर्भ का सम्भव जानकर बड़े क्रोधसे मूर्च्छित होकर पिता के घर को आती भई॥ ३४॥

कामी ययाति प्रियाके पीछे गया और बहुत प्रकार की बातों से समुझाई परञ्च पादसंवाहनादि से भी राजा देवयानीको प्रसन्न करने को समर्थ न ही होते हुए॥ ३५॥

शुक्रने इस वृत्तान्तको सुनकर कुपित होकर ययाति को शाप दिया कि—हे स्त्रीकाम! हे अनृत पुरुष! अर्थात् झूठ बोलने वाले पुरुष हे मन्द! तेरे शरीर में जरा अवस्था प्रवेश करौ, जो मनुष्यों को विरूप करने वाली है॥ ३६॥

इतना सुनकर ययाति बोले, कि—हे ब्रह्मन्! मैं आपकी पुत्री में विषयभोगों से अभी तृप्त नहीं भया हूं। तब शुक्राचार्य बोले, कि जो जरा अवस्था को धारण कर सके उसकी अवस्था से अपनी अवस्था का भले ही बदला करलेना॥ ३७॥

राजा ययाति इस प्रकार की अवस्था की व्यवस्था को प्राप्त होकर ज्येष्ठ पुत्र यदुसे बोले, कि—हे यदो! हे तात! इस जरा अवस्था को तुम लेलो और तुम अपनी निज युवा अवस्था हम को देदो॥ ३८॥

तुर्वसुश्चोदितः पित्रा द्रुह्युश्चानुश्च भारत ! ।
प्रत्याचख्युरधर्मज्ञा ह्यनित्ये नित्यबुद्धयः ॥ ४१ ॥
अपृच्छत्तनयं पूरुं वयसोनं गुणाधिकम् ।
न त्वमग्रजवद्वत्स ! मां प्रत्याख्यातुमर्हसि ॥ ४२ ॥

पूरुरुवाच ।

को नु लोके मनुष्येन्द्र ! पितुरात्मकृतः पुमान् ।
प्रतिकर्तुं क्षमो यस्य प्रसादाद्विन्दते परम् ॥ ४३ ॥
उत्तमश्चिन्तितं कुर्यात्प्रोक्तकारी तु मध्यमः ।
अधमोऽश्रद्धया कुर्यादकर्तोच्चरितं पितुः ॥ ४४ ॥
इति प्रमुदितः पूरुः प्रत्यगृह्णाज्जरां पितुः ।
सोऽपि तद्वयसा कामान् यथावज्जुजुषे नृप ! ॥ ४५ ॥
सप्तद्वीपपतिः सम्यक्पितृवत्पालयन्प्रजाः ।
यथोपजोषं विषयान् जुजुषेऽव्याहतेन्द्रियः ॥ ४६ ॥
देवयान्यप्यनुदिनं मनोवाग्देहवस्तुभिः ।
प्रेयसः परमां प्रीतिमुवाह प्रेयसी रहः ॥ ४७ ॥
अयजद्यज्ञपुरुषं क्रतुभिर्भूरिदक्षिणैः ।
सर्वदेवमयं देवं सर्ववेदमयं हरिम् ॥ ४८ ॥

भाषाटीका ।

हे वत्स! यह हमारी जरा अवस्था तुमारे मातामह (ननाजी) की करी हुई है, और अभी मैं विषयों से तृप्त नहीं भया हूं तुमारी अवस्था से कितने एक वर्षों तक रमण करूंगा ॥ ३९ ॥

यदुरुवाच ॥

यदु बोला, कि—बीच में प्राप्त होने वाली इस तुमारी जरा अवस्था को लेकर बैठने को मैं नहीं चाहता हुं। क्योंकि ? ग्राम्य सुखों के विना अनु भव किये पुरुष तृष्णा के अन्त को नहीं प्राप्त होता है ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यतो न धर्मज्ञाः अनित्ये च यौवने नित्यबुद्धयः ॥ ४१ ॥

त्वं जरां किं ग्रहीष्यसीत्यपृच्छत् प्रत्याख्यानं मा कृथा इत्याह न त्वमिति ॥ ४२ ॥

आत्मकृतः स्वदेहकर्तुः प्रत्युपकारं कर्तुं को नु क्षमः ॥ ४३ ॥ तथापि पितुर्यच्चिन्तितं कुर्यात्स उत्तमः यस्तु प्रोक्तकारी स मध्यमः यस्त्वश्रद्धया कुर्यात्सोऽधमः अकर्त्ता पितुरुच्चरितं पुरीषप्रायः ॥ ४४ ॥

जुजुषे सेवितवान् ॥ ४५ ॥

यथोपजोषं यथाप्रीति जुजुषे ॥ ४६—४८ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

तत इत्थमेव पित्रा ययातिना चोदितः तुर्वसुरनुश्च हे भारत ! यदुवद्द्रुह्युरिति शेषः । एवं त्रयः पुत्राः अनित्ये देहे नित्यबुद्धियेषां तथाभूता अतएवाधर्मज्ञाः प्रत्याचख्युः ॥ ४१ ॥

अपृच्छदिति । ततो ययातिः पुत्रत्रयादपि वयसा ऊनं गुणैरधिकं तनयं पूरुमपृच्छत्, किमिति ? हे वत्स ! त्वमग्रजवज्ज्येष्ठवन्मां प्रत्याख्यातुं नार्हसीति. ॥ ४२ ॥

एवमुक्तः पूरुराह, कोन्विति द्वाभ्याम् । हे मनुष्येन्द्र ! आत्मकृतः पितृदेहेनोत्पादितः कोनु पुमान् लोके पितुः प्रतिकर्तुं प्रत्युपकर्तुं क्षमः प्रभुः, असामर्थ्यं हेतुं वदन् पितरं विशिनष्टि—यो यस्य पितुरनुग्रहात्परमभिकमैहिकमामुष्मिकं च श्रेयो विन्दते लभते ॥ ४३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यद्यपि कोप्युत्तमः तथा पितुश्चिन्तितमभिप्रेतं यः कुर्यात्स उत्तमः यथोक्तकारी तु मध्यमः अश्रद्धया यः कुर्यात् सोऽधमः अश्रद्धया ऽप्यकर्ता तु पितुरुच्चरितं पुरीषप्रायः ॥ ४४ ॥

इतीत्थं भाषमाणः पूरुः प्रीतः पितुर्जरां प्रत्यगृह्णात् क्षीणं वयो दत्त्वेति शेषः । ततः सोपि ययातिरपि नृपः तद्वयसा पुत्रदत्तेन वयसा कामान् यथावत् जुजुषे सेवितवान् ॥ ४५ ॥

तदेव प्रपञ्चयति– सप्तद्वीपेति । सप्तद्वीपाधिपतिस्सन् प्रजाः पितृवत्पालयन् यथोपजोषं यथाप्रीति विषयान् जुजुषे, कथम्भूतः? अव्याहतानि दृढानीन्द्रियाणि यस्य तथाभूतः ॥ ४६ ॥

देवयानीति । प्रेयसी देवयानी प्रेयसो भर्तुः रहः एकान्ते परमां प्रीतिमुवाह नितरां प्रीतिविषया बभूवेत्यर्थः ॥ ४७ ॥

अयजदिति । तथा ययातिः भूरि दक्षिणा येषु तैः क्रतुभिः सर्वदेवताशरीरकमाराधकार्तिहरं सर्वयज्ञाराध्यं तत्फलदं तदाकारं भगवन्तमयजत् आराधितवान् ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रत्याचख्युः निराकृतवन्तः अनित्ये क्षणभङ्गुरे ॥ ४१ ॥

वयसोनं कनिष्ठं ममाज्ञाम् ॥ ४२ ॥

आत्मकृतः शरीरोत्पादनकर्तुः परं लोकम् ॥ ४३ ॥

उच्चरितं गुदनिर्गतं मलम् ॥ ४४ ॥

जुजुषे बुभुजे ॥ ४५ ॥

यथोपजोषं यथासुखम् ॥ ४६ ॥

प्रेयसः भर्तुः ॥ ४७ ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यस्य प्रसादात् प्रसादेन प्राप्तात् मनुष्यदेहात् परं परमेश्वरमपि विन्दते लभते पुण्डरीकवद्यस्य प्रसादादेव वा ॥४३—४७॥

अयजदिति सर्वे वेदाः सर्वे देवाश्च स्वस्वकारणे शक्तिरूपेण प्रचुरतया यत्र तमित्यर्थः ॥ ४८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

आत्मकृतः देहोत्पादयितुः परं स्वर्गादिम् ॥ ४३ ॥

तदपि तवाज्ञां पालयन्नप्यहमुत्तमः पुत्रो न किन्तु मध्यम एवेत्याह—उत्तम इति पाठे । उच्चरितं मूत्रमलसदृश इति ॥ ४४ ॥ ४५ ॥

सप्तद्वीपपतिः भारतवर्षवर्तिनो ये नव द्वीपास्तेषामादिमान्तिमौ द्वीपौ विना ये सप्तसङ्ख्याद्वीपास्तेषां पतिरित्येव व्याख्येयमग्रिमग्रन्थव्याख्यानुरोधात् यथोपजोषं यथाप्रीति ॥ ४६-४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यदुस्तु हरिभक्तिद्वारा मुक्तिसाधनं तारुण्यमलपस्वर्गादिसाधने पितृवचनेन नियोजयामास अतः परमधर्मज्ञः ते तु अनित्ये अनात्मनि देहे नित्यबुद्धयः आत्मत्वमतयः पारलौकिकसुखप्रदं पित्राज्ञापालनं परित्यज्य पितरं प्रत्याचख्युरतोऽधर्मज्ञा इत्यर्थः ॥ ४१ ॥

तदनन्तरं ययातिः त्वं जरां गृहीत्वसीत्यपृच्छत्, हे वत्स ! अग्रजा इव मां प्रत्याख्यातुं त्वं नार्हसीत्युक्तवांश्च ॥ ४२ ॥

आत्मकृतो देहकृतः ॥ ४३ ॥

चिन्तितं पित्रा विचारितं यः कुर्यात्स उत्तमः अकर्त्ता तु पितुरुच्चरितं पुरीषप्रायः ॥ ४४ ॥

स चेत्येवमात्मनो धर्मज्ञतां ख्यापयित्वा प्रमुदितः पितुर्जरां प्रत्यगृह्णात् ॥ ४५ ॥

यथोपजोषं यथाप्रीतिधर्माविरोधेनेत्यर्थः । विषयान् जुजुषे ॥ ४६—४८ ॥

भाषा टीका ।

इसी प्रकार पिताने तुर्वसु, द्रुह्य, और अनु से भी पूंछा, परन्तु हे राजन् ! अनित्य में नित्यबुद्धि वाले धर्म के नहीं जानने वाले उन पुत्रों नें पिता को जवाब दे दिया ॥ ४१ ॥

तब राजा ने अवस्था में छोटा और गुणों में बड़ा ऐसे पुरुसे पूंछा । कि हे वत्स ! तुम अपने बडे भ्राताओं के नाईं हमारी आज्ञा के अखण्डन करने योग्य नहीं हो ॥ ४२ ॥

पुरु रुवाच ॥

पुरू बोले, कि—हे मनुष्येन्द्र ! इस लोक अपने शरीर के देने वाले पिता के प्रत्युपकार करने को कौन पुरुष समर्थ होसका है, जिस पिता की प्रसन्नता से पर ब्रह्मको पुरुष प्राप्त होता है ॥४३॥

उत्तम पुत्र तौ बिना कहे पिता के चिन्तमन करके कार्य कर देता, और जो पिता के कहे हुए को करै वह मध्यम है, और बिना श्रद्धा के भी जो करदेवे वह अधम है और जो पिता के कहने पर भी कार्य न करे वह पिताका पुरीष प्राय (मल सदृश) है क्योंकि वह भी तौ पिता ही के अंग से उत्पन्न है ॥ ४४ ॥

इस प्रकार बडे प्रमुदित होकर पुरुने पिता की जरा अवस्था को ग्रहण करी, हे नृप ! ययाति ने भी पुत्र पुरुकी अवस्था से यथेष्ट भोग भोगे ॥ ४५ ॥

सप्त द्वीप के पतिय याति महाराज विधि पूर्वक प्रजा पालन करते हुए, अखंडित इन्द्रियों से यथा प्राप्त विषयों का सेवन करते हुए ॥ ४६ ॥

देवयानी भी दिन दिन प्रति मन, वाणी, देह, और वस्तुओं से एकांत में अपने प्रिय की प्रीति वाली होकर सदा प्रीय आचरण करने लगी ॥ ४७ ॥

राजा भी बहु दक्षिणा वाले यज्ञों से सर्व देव मय और सब वेद मय हरि का भजन करते हुए ॥ ४८ ॥

यस्मिन्निदं विरचितं व्योम्नीव जलदावलिः ।
नानेव भाति नाभाति स्वप्नमायामनोरथः ॥ ४९ ॥
तमेव हृदि विन्यस्य वासुदेवं गुहाशयम् ।
नारायणमणीयांसं निराशीरयजत्प्रभुम् ॥ ५० ॥
एवं वर्षसहस्राणि मनःषष्ठैर्मनःसुखम् ।
विदधानोऽपि नातृप्यत्सार्वभौमः कदिन्द्रियैः ॥ ५१ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
पारमहंस्यां संहितायां वैयासिक्याम्
अष्टादशोऽध्यायः ॥ १८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नानेव भाति यावदिन्द्रियप्रवृत्तिः तदुपरमे नाभाति स्वप्नमायाभ्यां सहितो मनोरथ इवेत्यर्थः ॥ ४९—५० ॥

मनःसुखं कामभोगम् कदिन्द्रियैः कुत्सितैः, पराङ्मुखैरिन्द्रियैः ॥ ५१ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
अष्टादशोऽध्यायः ॥ १८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यजनप्रकारमेवाह—यस्मिन्निति द्वाभ्याम् ! यस्मिन्नित्यस्य तमित्युत्तरेणान्वयः । यस्मिन्वासुदेवे इदं कृत्स्नं चिदचिदात्मकं जगद्विरचितं सद्व्योम्नि अब्दपङ्क्तिरिव नानेव भाति नाभाति च पाल्यते संह्रियते चेत्यर्थः । यस्मिन्निति धारकत्वदोषास्पर्शित्वे विरचिते विरचितमित्यस्य येनेति शेषः । अनेन स्रष्टृत्वमुक्तं, नानाभाति इत्यनेन पालनदशायां देवमनुष्यादिनामरूपभेदेन बहुधा प्रतीतिरुक्ता, इव शब्देन वस्तुतः स्थूलचिदचिच्छरीरकं ब्रह्मैकमेव विश्वरूपेणावस्थितमिति सूच्यते. अनेनैव सूक्ष्मचिदचिच्छरीरकस्य ब्रह्मणो जगदुपादानत्वमपि छद्धं कारणस्यैव वस्तुनः कार्यात्मनावभासमानत्वात् यस्मिन्नानाभाति इत्यनेन लयाधिकरणत्वोक्त्या च तल्लभ्यते लयाधिकरणस्यैव लीयमानोपादानत्वदर्शनात् यस्मिन् धारके नानाभातीत्यनेनान्तःप्रविश्य धारकत्वेन प्रशासनमेव पालनमिति सूचितम्. प्रपञ्चं विशिनष्टि—स्वप्नमायामनोरथ इति । स्वप्नमायामनोरथतुल्य इत्यर्थः । अत्र स्वप्नदृष्टान्तत्वेनाश्चर्यत्वं मनोरथदृष्टान्तेन मनोऽनुकूलत्वं च दार्ष्टान्तिकेऽभिप्रेतम्. अतएव दृष्टान्तत्रयमन्यथा वैयर्थ्यप्रसङ्गात् एकेनैव विवक्षितसाधर्म्यलाभात् ॥ ४९ ॥

तमिति । तमेवम्भूतं वासुदेवशब्दप्रवृत्तिनिमित्त पोष्कल्याश्रयं गुहाशयं हृदयकुहरे वसन्तमणीयांसमणोर्जीवादप्यणुं तदन्तःप्रवेशयोग्यतया ततोऽपि सूक्ष्ममितिभावः । नारायणं जीवसमूहानां प्राप्यं प्रापकमाधारं च हृदि विन्यस्य ध्यानेन सन्निहितं कृत्वा इत्यर्थः । निराशीः फलाभिसन्धिरहितः प्रभुर्ययातिरयजत् ॥५०॥

एवमित्थं मनः षष्ठं येषां तैः कुत्सितैरिन्द्रियैर्वर्षसहस्राणि मनःसुखं कामभोगं विदधानः कुर्वन्नपि सार्वभौमो ययातिर्नातृप्यत् ॥ ५१ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
अष्टादशोऽध्यायः ॥ १८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्वप्नमायामनोरथवदनित्यफलमस्वतन्त्रञ्च ॥ ४९ ॥
निराशीः कृच्छ्रचान्द्रायणादितपोऽभिलाषरहितः ॥ ५० ॥
कदिन्द्रियैः दुष्टेन्द्रियैः ॥ ५१ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् ।
अष्टादशोऽध्यायः ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इदं जगत् यस्मिन्नेव सर्वाश्रये विरचितं येनैव सृष्टं स्थितौ नानेव भाति न तु नानैव कारणरूपेणैक्यात् प्रलये तु तत्रैव कारणरूपेण प्रविष्टत्वात् नाभाति बहिर्न व्यक्तं भवति यथा जगत् तथैव स्वप्नो मायामनोरथश्चेत्यर्थः । सर्वस्यैव तदाश्रयत्वात् तत्र सर्वोऽपि द्वन्द्वो विभाषयैकवद्भवतीत्येकवचनं समाहारत्वेनाविवक्षितत्वात् न क्लीबत्वञ्च "ऊकालोऽज्झ्रस्वदीर्घप्लुतः" (१ । २ । २७ ।) इति वत् ॥ ४९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

वासुदेवं सर्वावासम् एवमपि गुहाशयं सर्वज्ञानागोचरं किञ्च नारायणं सर्वजीवप्रवर्त्तकं तथाऽप्यणीयांसं दुर्ज्ञेयं तथाभूतमपि भक्त्या हृदि विन्यस्य मनस्याविर्भाव्यायजत् प्रभुस्तादृशोपासनया क्रमात् सामर्थ्यं प्राप्तः तादृशत्वे हेतुमाह—निराशीः निष्काम इति । एवमपि झटिति वैराग्योत्पत्तौ प्रतिबन्धकमाह एवमिति ॥ ५०—५१ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
अष्टादशोऽध्यायः ॥ १८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

यस्मिन्नधिष्ठाने इदं जगन्नानेव कारणरूपेण तेनैवैक्यान्न तु वस्तुतो नानेत्यर्थः । अत एव प्रलये तत्र प्रविष्टत्वान्नाभाति न बहिर्व्यक्तीभवति स्वप्नमायामनोरथ इत्यस्यैव दृष्टान्तत्रयं सर्वो द्वन्द्वो विभाषैकवद्भवतीत्येकवचनम् ॥ ४९ ॥

वासुदेवमिति सर्वत्रैवासौ वसतीत्यतः प्रयासाभावः यतो गुहायामन्तःकरणे शेते न चान्यः शयान इव नारं जीवसमूहम् अयते जानाति न च जीवसमूहस्तं जानातीत्याह, अणीयांसं दुर्ज्ञेयं स च बहिर्विषयलम्पटोऽपि ययातिर्न मनसा विषयलम्पट इत्याह—निराशीःप्रभुमिति दास्यभावाकांक्षी ॥ ५० ॥

विषयलाम्पट्यात् कदिन्द्रियैः ॥ ५१ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
नवमेऽष्टादशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

निरचितं स्वोपादानकं स्वकृतम् इदं विश्वं "तदात्मानᳬ स्वयमकुरुत" "तदैक्षत बहु स्याम्" इत्यादिश्रुतेः यस्मिन्नधिकरणे व्योम्नि जलदावलिरिव यथाऽवकाशं अविरोधितयाऽस्ति तच्च एकात्मकतया तन्निरपेक्षसत्ताकञ्च भवति कार्यस्य कारणनिरपेक्ष्य सत्तावत्त्वाभावात् तथाप्येतत्सत्त्वं दृष्ट्या नानेव वासुदेवे पृथक् नाना सत्तायुक्तवदाभाति प्रलयवेलायां तु द्रष्टृदृश्ययत्वान्नाभाति अत एवानित्यत्वात् स्वप्नमायामनोरथ इव ॥ ४९ ॥

क्षेमेण सर्वात्मानं सर्वाधारं सर्वदोषास्पृष्टं नित्यानन्तानन्दरूपम् अयजत् ॥ ५० ॥

अनःसुखं मनोग्राह्यं परिच्छिन्नं कामभोगं कदिन्द्रियैः कुत्सितैरिन्द्रियैः विदधानः कुर्वन्नपि नातृप्यत् ॥ ५१ ॥

इतिश्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
अष्टादशाऽध्यायार्थप्रकाशः ॥ १८ ॥

भाषा टीका ।

जिसमें यह विश्व ऐसे रचा गया है कि—जैसे गगन में मेघों की पंक्ति और स्वप्न माया मनोरथ के सदृश नाना प्रकार का भान भी होता है और नहीं भी भान होता है ॥ ४९ ॥

इस प्रकार के उन परमात्मा अंतर्यामी वासुदेव को हृदय में धरकर, अणुसे भी अणु ऐसे उनही अपने प्रभु श्री नारायण को निष्काम होकर यजन करते हुए ॥ ५० ॥

इस प्रकार हजारहों वर्ष तक वह सार्वभौम राजा ययाति मन छटवां जिन में ऐसी दुष्ट इन्द्रियों से मन को सुख रूप ऐसे काम भोगों को भोगते हुए भी तृप्ति को नहीं प्राप्त होते हुए ॥५१॥

इति श्रीमद्भागवत नवम स्कन्ध में अष्टादश अध्याय की,
श्रीवृन्दावनस्थ पं० भागवताचार्यकृत
भाषाटीका समाप्ता ॥ १८ ॥

इतिश्री मद्भागवते महापुराणे नवमस्कन्धे अष्टादशोऽध्यायः ॥ १८ ॥

॥ एकोनविंशोऽध्यायः ॥

—०:०:०—

॥ श्रीशुक उवाच ॥

स इत्थमाचरन् कामान् स्त्रैणोऽपह्नवमात्मनः ।
बुद्ध्वा प्रियायै निर्विण्णो गाथामेतामगायत ॥ १ ॥
शृणु भार्गव्यमूं गाथां मद्विधाचरितां भुवि ।
धीरा यस्यानुशोचन्ति वने ग्रामनिवासिनः ॥ २ ॥
बस्त एको वने कश्चिद्विचिन्वन्प्रियमात्मनः ।
ददर्श कूपे पतितां स्वकर्मवशगामजाम् ॥ ३ ॥
तस्या उद्धरणोपायं बस्तः कामी विचिन्तयन् ।
व्यधत्त तीर्थमुद्धृत्य विषाणाग्रेण रोधसि ॥ ४ ॥
सोत्तीर्य कूपात्सुश्रोणी तमेव चकमे किल ।
तस्या वृतं समुद्वीक्ष्य बह्व्योऽजाः कान्तकामिनीः ॥ ५ ॥
पीवानं श्मश्रुलं प्रेष्ठं मीढ्वांसं याभकोविदम् ।
स एकोऽजवृषस्तासां बह्वीनां रतिवर्द्धनः ।
रेमे कामग्रहग्रस्त आत्मानं नावबुध्यत ॥ ६ ॥
तमेव प्रेष्ठतमया रममाणमजाऽन्यया ।
विलोक्य (१)कूपसंविग्ना नामृष्यद्बस्तकर्म तत् ॥ ७ ॥
तं दुर्हृदं सुहृद्रूपं कामिनं क्षणसौहृदम् ।
इन्द्रियाराममुत्सृज्य स्वामिनं दुःखिता ययौ ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ऊनविंशे ययातिः स्वं चेष्टितं नन्वजोपमम् ।
देवयानीं समाश्राव्य विरक्तो मुक्तिमाप्तवान् ॥ १ ॥
मुक्तभोगामजां ह्यस्यस्त्वजवद्वृत्तमात्मनः ।
विडम्बयन्प्रियामाह निर्विद्यितुमात्मवान् ॥ २ ॥

कामानाचरन्नुपभुञ्जानः गाथामितिहासम् ॥ १ ॥

मद्विधेन मत्सदृशेनाचरितामनुष्ठिताम् मद्विधस्याचरितं यस्यामिति वा यस्य ग्रामनिवासिनः कामिनो मद्विधस्याऽऽचरितं वने स्थिता धीराः शोचन्ति तस्य गाथां शृणु ॥ २ ॥

आत्मानमनुलक्ष्याह—बस्त इति । प्रियामनुलक्ष्याऽऽह—अजामिति वने संसारे प्रियं विषयम् ॥ ३ ॥

रोधसि तटे विषाणाग्रेण मृदादिकमुद्धृत्य तीर्थं निर्गमाय मार्गं व्यधत्त ॥ ४ ॥

बह्व्य इति शर्मिष्ठाप्रमुखाः कामयामासुः कान्तं प्रति कामिनीः कामवत्यः ॥ ५ ॥

पीवानं पुष्टम् श्मश्रुलं श्मश्रुबहुलम् रतिसमर्थमित्यर्थः । मीढ्वांसं रेतःसेक्तारम् याभे कोविदमभिज्ञमत एव प्रेष्ठम् नावबुध्यत नान्वबुध्यत ॥ ६ ॥ ७ ॥

---

(१) रूपसंविग्ना इति वीर० विज० ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्वामिनमिति शुकाभिप्रायेणाऽऽह ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स इति । सययातिरित्थं स्त्रैणः स्त्रीवश्यः कामान् चरन् भुञ्जन् अनुभवन्निति भावः । कदाचिदात्मनोऽपह्नवमपहारं बुध्वा "योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते" इत्युक्तविधमपह्नवं ज्ञात्वा निर्विषयाः निर्वेदं प्राप्तः प्रियायै देवयान्यै इमां वक्ष्यमाणां गाथामात्मवृत्तान्तप्राख्यापिकां कथामगायत कथयामास ॥ १ ॥

तामेवाह-श्रृणुवित्यति । हे भार्गवि ! भुवि मद्विधेन मादृशेनाचरितां मद्विधस्याचरितं यस्यामिति वा ताममुं मया वक्ष्यमाणां गाथामितिहासं श्रृणु यस्य मद्विधस्य ग्रामवासिनो गृहस्थस्याचरितं वने स्थिता धीराः जितेन्द्रियाः कृपया शोचन्ति ॥ २ ॥

वस्त इति । अन्यापदेशेनात्मवृत्तिप्रतिपादनार्थं प्रवृत्तोऽयमितिहासः एकोऽसहायः कश्चिद्बस्तो मेषो वने आत्मनः स्वस्य प्रियं विचिन्वन् कूपपतितां कर्मवशगां काञ्चिदजां ददर्श, वस्त इत्यनेनात्मा विवक्षितः, वन इत्यनेन संसारः, प्रियमित्यनेन शब्दादिविषयः, अजामित्यनेन देवयानी एवं यथा सम्भवमुत्तरत्राप्यूह्यम् ॥ ३ ॥

तस्या अजायाः स वस्तः उद्धरणोपायं व्यचिन्तयत् श्रोत्रीवादिप्रदानेनोद्धरणोपायं चिन्तितवानिति भावः । उपायमेव दर्शयन्नाह-रोधसि तटे विषाणाग्रेण मृदादिकमुद्धृत्य तीर्थं निर्गममार्गमुत्तरणमार्गमिति यावत् व्यधत्त कृतवान् विषाणाग्रेणेत्यनेन खनित्रादिकं विवक्षितम् ॥ ४ ॥

ततः सा सुश्रोणी अजा कूपादुत्तीर्य तमेव वस्तं पतिं चकमे किलेत्यात्मवृत्तान्तप्रत्यभिज्ञापकः ततस्तया अजया वृतं वस्तं समुद्वीक्ष्य बह्व्योऽन्या अजाः कान्तं प्रति कामिनीः कामवत्यो बभूवुः बह्व्योऽजा इति शर्मिष्ठाप्रमुखा विवक्षिताः कथंभूतं पीवानं परिपुष्टसर्वावयवं श्मश्रुलं रतिसमर्थमित्यर्थः । मीढ्वांसं रेतस्सेक्तारं याभे मैथुने कोविदमभिज्ञम् अजाभिर्वृतः स एक एव वस्तस्तासां बह्वीनामजानां रतिवर्द्धनः काम एव ग्रहः पिशाचः तेन ग्रस्तः केवलं रेमे न त्वात्मानमबुध्यत देहविलक्षणमात्मस्वरूपं नानुसंहितवान् इति भावः । मेषपक्षे छागाद्यनर्थाश्रयं नावबुध्यतेत्यर्थः ॥ ५ ॥ ६ ॥

तमिति । एवमन्यया प्रेष्ठतमया अन्यया अजया सह रममाणं तं वस्तं विलोक्य तेन पूर्वं कूपादुद्धृता अजा रूपसंविन्ना मत्तो रूपवती मन्यामजां परिगृह्य मां त्यजत्ययमिति भीता सती वस्तस्य तत्कर्म अजान्तरपरिग्रहरूपं नामृष्यत् नासहत ॥ ७ ॥

तं वस्तं दुर्हृदं वल्गुन इति शेषः । सुहृद्रूपं सुहृदाभासम् अत एव स्वयं सौहृदं यस्य कामिनमत एवेन्द्रियारामं ननु धर्मेष्ठं शार्दूलेतिशेषः स्वामिनं पतिं त्यक्त्वा दुःखिता ययौ ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अन्यापदेशेन स्ववृत्तान्तं शिक्षाकरणत्वेन स्वभार्यायै कथयति स इत्यमिति । स्त्रैणः स्त्रीजितः स ययातिरित्थम् आत्मज्ञानलाभहेतून् कामान् विषयान् आचरन् भुञ्जानः आत्मनोऽपन्हवं नित्यसुखहानिलक्षणनाशं विज्ञाय निर्विण्णो विरक्त एतां वक्ष्यमाणत्वेन बुद्धिसन्निहितां गाथां स्वकीयवृत्तान्तरूपामगायतेत्यन्वयः ॥ १ ॥

भार्गवि ! भृगुकुलजाते ! मद्विधैः मादृशैः स्त्रीजितैः पुरुषैः आचरितां वने धीराः निवृत्तिमार्गलक्षणे स्थिताः मुक्तसङ्गाः ज्ञानिनो यस्य ग्रामवासिनो गृहस्थस्याचरणमनुशोचन्ति अहो लोकस्य मौढ्यमिति परिखिन्ना भवन्तीत्यर्थः । तच्च मम सदृशैराचरितामित्यर्थः ॥ २ ॥

वस्तोऽजः प्रियं स्त्रीजनं कूपे संसारलक्षणे अजाजशब्देन प्रकृतिपुरुषावुपलक्ष्येते ॥ ३ ॥

तीर्थं कूपजले अवतारस्थले वा निर्वर्त्य किञ्चिदवतीर्य विषाणाग्रेणोद्धृत्य रोधसि कूपतीरे व्यधत्त तामिति शेषः—

"तीर्थं मन्त्राद्युपाध्याये शास्त्रेष्वम्भसि पावने ।
पात्रोपायावतारेषु स्त्रीपुष्पे योनिमन्त्रयोः" ॥

इति यादवः । उपायं वा निर्वर्त्य उद्धरणोपायं चक्रेत्यर्थः ॥ ४ ॥

कान्तविषयः कामो यासामस्तीति कान्तकामिन्यः ॥ ५ ॥

श्मश्रुलं बहुलश्मश्रुयुक्तं मीढ्वांसं रेतःसेकसमर्थं यावकोपितं यावान्नभक्षणपाटवोपेतं यावः यावकः कुल्माषः तद्भक्षणे शक्त इति वा "यावः केवलकुल्माषे बलक्तोपवर्णिके" इति याभकोविदमिति पठित्वा मैथुनकुशलमिति व्याख्यानं मीढांसमित्यनेन गतार्थत्वात् पुनरुक्तता असम्प्रदायज्ञता चात्र प्रसज्येत. मेजं मेषमित्यपि तद्वदजशब्दस्य मेषवाचित्वाभवणात् मीढ्वांसमिति पदं विवृण्वन्नाह-स एक इति ॥ ६ ॥

रूपसंपन्ना रूपगुणसम्पन्ना कुलसंपन्नेति पाठे कुलभरसम्मतमध्या प्रज्यतमया प्राप्तुं योग्यतमया अन्यवाऽजया एवं रममाणं तं विलोक्य वस्तस्य मम तत्कर्म अन्यासक्तिलक्षणं नामृष्यदित्यन्वयः ॥ ७ ॥

अनेनात्मकटाक्षीकारेण स्वामिनं शुकमिषेणोऽर्थः सूच्यते अन्यत्राश्रम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

स इति सार्द्धकम् ॥ १—५ ॥
याभे मैथुने कोविदम् ॥ ६—११ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ऊनविंशे च्छागगाथा वर्णितस्वस्वरूपकः ।
विरज्य प्राप कृष्णं स देवयान्यपि सा तथा ॥
कामान् आचरन् उपभुञ्जानः अपन्हवं वञ्चनम् ॥ १ ॥

मद्विधस्याचरितमिवाचरितं यस्यां तां यस्य ग्रामनिवासिनो मद्विधस्य चरितं वने स्थिता धीरा अनुशोचन्तीति समासे गुणीभूताभ्यामपि पदाभ्यामन्वय आर्षत्वात् ॥ २ ॥

वस्तश्छागः अतिशयोक्त्या ययातिः वने संसारे प्रियं विषयसुखम् अजां देवयानीम् ॥ ३ ॥

सोऽपि चानुगतः स्त्रैणः कृपणस्तां प्रसादितुम् ।
कुर्वन्निडविडाकारं नाशक्नोत्पथि सन्धितुम् ॥ ९ ॥
तस्यास्तत्र द्विजः कश्चिदजास्वाम्यच्छिनद्रुषा ।
लम्बन्तं वृषणं भूयः सन्दधेऽर्थाय योगवित् ॥ १० ॥
सम्बद्धवृषणः सोऽपि ह्यजया कूपलब्धया ।
कालं बहुतिथं भद्रे ! कामैर्नाद्यापि तुष्यति ॥ ११ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

रोधसि तटे विषाणाग्रेण मृदादिकमुद्धृत्य तीर्थनिर्गममार्गं व्यधत्त ॥ ४ ॥

अजाः शर्मिष्ठाद्याः कान्तं कामयितुं शीलं यासां ताः कान्ता कामिन्यः तमेव कामयामासुः ॥ ५ ॥

मीढ्वांसं रेतःसेक्तारं याभे मैथुने कोविदं पण्डितम् ॥ ६ ॥

अन्यथा अजयेत्याहिताग्न्यादित्वात् परनिपातः कूपसंविग्ना देवयानी ॥ ७ ॥

स्वामिनमिति शुक्राभिप्रायेणोक्तौ विरुद्धमितिच्छद्दोष आर्षत्वात् सोढव्यः "स्वामिन्नैश्वर्ये"(५।२।१२६।) इति पाणिनिस्मरणात् स्वामिशब्दोऽपि न केवलं पतिपर्यायो दृष्टः यद्वा स्वामिनं तं ययातिमुत्सृज्य ययौ ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

ययातेः सर्वतो विरक्तस्य भगवद्भजनेन भगवत्प्राप्तिमाह स इत्थमित्यूनविंशेन। स्त्रैणः स्त्रीवश्यः कामान् आचरन् उपभुञ्जानः अपह्नवं हानिम् गाथामितिहासम् ॥ १ ॥

यस्य ग्रामनिवासिनः विषयासक्तस्य गाथां वने धीराः पशुवद्वयमायुर्व्यर्थं करोतीत्येवं शोचन्ति तस्य मद्विधेनाचरितामनुष्ठितामसूं गाथां शृणु ॥ २ ॥

प्रियं हितम् ॥ ३ ॥

कामी तां कामयमानः तस्याः उद्धरणोपायं विचिन्तयन् रोधसि कूपतटे विषाणाग्रेणोद्धृत्य उद्धिदार्थं तीर्थं निर्गममार्गं व्यधत्त कृतवान् ॥ ४—५ ॥

सा च पीवानं पुष्टं श्मश्रुलं तरुणमित्यर्थः । अत एव मीढ्वांसं रेतःसेक्तारं याभे मैथुने कोविदं तमेव चकमे तदनन्तरं कान्तं प्रति कमिनीः कामयत्यः बह्वयः कामयामासुः ॥ ६—८ ॥

भाषा टीका।

श्रीरुक्मिणीकुचकुङ्कुमाङ्कितवक्षसे नमः ॥

श्रीशुक उवाच ॥

श्रीशुकदेवजी बोले, कि—वे ययाति राजा इस प्रकार कामों का आचरण करते हुए स्त्री संबंधि विषयों से अपने आत्मा की ठगाई को जानकर निर्वेद (वैराग्य) को प्राप्त होकर अपनी प्रिया से इस गाथा (कहानी) को कहते हुए ॥ १ ॥

राजा ययाति बोले, कि—हे भार्गवि ! पृथिवी में हम सदृशों से वर्त्ती हुई इस कहानी को तुम सुनो। जिस जिस हमारे सदृश ग्राम वासी के आचरण को वनवासी धीर लोग शोचा करते हैं ॥ २ ॥

हे प्रिये ! वन में कोई एक बकरा अपने प्रिय विषय को ढूंढता हुआ किसी समय में अपने कर्मवश कुएं में गिरी हुई एक अजा (बकरी) को देखता हुआ ॥ ३ ॥

वह कामी बकरा उसके निकालने का उपाय चिंतमन करता भया और उसने अपने सींग के अग्रभाग से उस कूएँ के किनारे को फोडकर मार्ग बना लिया ॥ ४ ॥

जब वह सुश्रोणी अजा कूएँ से निकली तब उसने उसी बकरे में ही अपने पति की कामना करी, उसकी कामना देख कर और भी बहुतसी कामनी अजा उसी में कांत की कामना करती भई ॥ ५ ॥

उस बकरा को रिष्ट पुष्ट डाढी मूंछ वाला और अति प्रिय वीर्य प्रदाता और मैथुन कुशल सब प्रकार से अपना अभीष्ट पूरक देखकर सब अजायें उसको पसंद करलीनी उन सब कामिनियों के बीच में एक वह बकरा रति वर्द्धक होकर काम रूप ग्रह से ग्रसित वह अपने आत्मा को नही स्मरण करता हुआ ॥ ६ ॥

किसी समय में परम प्रिया कोई अजा के संग रमण करते हुए उस बकरा को देखकर वह कूपे में गिरने वाली अजा उस सुख को न देख सकी ॥ ७ ॥

अपने सुहृद्रूप से वर्त्तने वाला दुर्हृद वा कामी चण सौहृद इंद्रियारामी उस बकरा को छोडकर वह अजा क्रोध से अपने स्वामी के पास दुःखी होकर गई ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

इडविडाकारं बस्तजातिशब्दम् सन्धितुं प्रसादयितुम् ॥ ९ ॥

वृषणमच्छिनज्जरया सम्भोगासमर्थमकरोत् अर्थाय स्वपुत्र्याः कामोपभोगाय योगवित्तुपायज्ञः जराव्यसनेन रतिशक्तिं ददाविलयं ॥ १० ॥

तथाऽहं कृपणः सुभ्रु ! भवत्याः प्रेमयन्त्रितः ।
आत्मानं नाभिजानामि मोहितस्तव मायया ॥ १२ ॥
यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः ।
न दुह्यन्ति मनःप्रीतिं पुंसः कामहतस्य ते ॥ १३ ॥
न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाऽभिवर्द्धते ॥ १४ ॥
यदा न कुरुते भावं सर्वभूतेष्वमङ्गलम् ।
समदृष्टेस्तदा पुंसः सर्वाः सुखमया दिशः ॥ १५ ॥
या दुस्त्यजा दुर्मतिभिर्जीर्यतो या न जीर्यते ।
तां तृष्णां दुःखनिवहां शर्मकामो द्रुतं त्यजेत् ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कूपलब्धया सह कामैः सेव्यमानैर्न तुष्यति ॥ ११ ॥ १२ ॥

ननु, तर्हि पुनरपि बहवो विषयाः सेव्यन्तां ततो मनसि प्रीते सति कामोपशान्त्या मोहो निवर्त्स्यतीति चेत्तत्राऽऽह-यदिति द्वाभ्याम्, न दुह्यन्ति न पूरयन्ति ॥ १३ ॥

हविषा घृतेन कृष्णवर्त्माऽग्निरिव ॥ १४ ॥

तर्हि कदा केनोपायेन वा मनसः सम्पूर्णा प्रीतिः स्यात् यया कामोपशमः स्यादित्यत आह-यदेति षड्भिः । अमङ्गलं भावं रागद्वेषादिवैषम्यम् ॥ १५ ॥

दुःखानि नितरां वहतीति तथा ताम् ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततः सोपि बस्तोपि स्त्रैणः हेतुगर्भमिदं स्त्रैणत्वात्तां यान्तीमजां प्रसादयितुं कृपणस्सन्ननुगतः विडी विडाकारं विडीं मार्जारीमनुगतस्य विडस्य य आकारः सान्त्वशब्दमुखरमुखत्वरूपस्तङ्कुर्वन् पथि मार्गे सन्धितुं प्रसादयितुं नाशक्नोत् ॥ ९ ॥

तत्र तस्य बस्तस्य लम्बन्तं वृषणं कश्चिद्द्विजः रुषा अच्छिनत् कश्चिद्द्विजोऽज इति शुक्रो विवक्षितः अण्डशब्देन वयो विवक्षितं जरापादनेन वयोपहारेण च सम्भोगासमर्थमकरोदितिभावः। ततो भूयः पुनः अर्थाय प्रयोजनाय स्वपुत्र्याः कामभोगायेति भावः। योगविदुपायज्ञः लम्बन्तं वृषणं सन्दधे जराव्यत्यासेन रतिसमर्थमकरोदिति भावः ॥ १० ॥

ततः स लब्धवृषण उपात्तयुवतया इति भावः। स बस्तोऽपि कूपलब्धया अजया सह बहुविधं काममनुभवन्नपीति शेषः बहुतिथमितिपाठे बहुकालमित्यर्थः। हे भद्रे ! अधुनापि न परितुष्यति ॥ ११ ॥

एवमन्यापदेशेनोपवर्णितमितिहासमात्मनि सङ्गमयति-तथेति ।

हे सुभ्रु ! तथा बस्तवदहमपि भवत्यास्तव प्रेम्णा यन्त्रितः वशीकृतः तव मायया विभ्रमादिरूपया मोहितोऽधुनापि आत्मानं नाभिजानामि ॥ १२ ॥

ननु, तर्हि पुनरपि बहवो विषयाः सेव्यन्तां ततो मनसि प्रीते सति कामोपशान्त्या मोहो निवर्त्स्यतीत्यत्राह—यदिति द्वाभ्याम्। यत् ये पृथिव्यां व्रीह्यादयस्ते सर्वे कामहतस्य कामासक्तस्य पुंसो मनःप्रीतिं न दुहन्ति न पूरयन्ति ॥ १३ ॥

जातु कदाचिदपि कामानामुपभोगेन कामो विषयतृष्णा न शाम्यति किन्तु हविषा घृतेन कृष्णवर्त्मेवाग्निरिव भूयोऽभिवर्द्धत एव ॥ १४ ॥

तर्हि कथं केनोपायेन मनसः पूर्णप्रीतिः स्यात् ? यया कामोपशमः स्यादित्यत आह—यदेति षड्भिः । यदा भूतेष्वमङ्गलं भावं रागद्वेषादिवैषम्यरूपं भावं न कुरुते तदा समदृष्टेः स्वात्मसमदृष्टेः पुंसः सर्वा दिशः सुखमयाः क्वापि गतस्याप्यस्य सुखमेवेत्यर्थः ॥ १५ ॥

अतो दुर्मतिभिः दुस्त्यजा विषयतृष्णा, कथंभूता ? या जीर्यतः ततोपि पुंसो न जीर्यते न जीर्णतां प्राप्नोति तां दुःखनिवहां दुःखानि नितरां वहत्यावहति प्रापयतीति तथा तां तृष्णां शर्मकामः दुःखासंभिन्नं सुखं कामयमानः ध्रुवं नूनं त्यजेत् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सोऽपि बस्तोऽपि ययातिशब्दवाच्योऽपि विडिविडाकारं मैथुनानुकरणलक्षणं तिर्यक् कण्ठोच्चरितशब्दविशेषं अन्यत्सीत्कारादिशब्दं च कुर्वन्सन्धितुं सन्धानं कर्तुं "तिर्यक् विडिविडाकारो मैथुनानुकृतोरसः" इत्यभिधानम् ॥ ९ ॥

अजस्वामी शुक्रः अन्यत्र प्रसिद्धः लम्बन्तं वृषणम् उपभोगसमर्थम् अच्छिनत् चकर्तेति शेषः।अन्यत्र जराकरणेन पुत्रेषु जरावरणादि

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नोपायेन सन्दधे भोगसामर्थ्यमापादितवान् योगविस्रब्धानोपायज्ञः अन्यत्र जरव्यत्यसनोपायकरणेन अर्थाय मैथुनलक्षणप्रयोजनाय ॥ १० ॥

अजया रममाणा इमि शेषः ॥ ११ ॥

आत्मानं परमात्मानं स्वरूपं मायया विभ्रमलक्षणया सुरतवैव्यात्यलक्षणया वा ॥ १२ ॥

काममोहनास्त्रविद्धस्य पुंसः नैतच्चित्रमित्याह—यत्पृथिव्यामिति, व्रीहियवम् इत्येकवद्भावः व्रीह्यादयः मनःप्रीतिं न पूरयन्ति न दुह्यति "दुह प्रपूरणे" इति प्रपूरणं नामौभसोरिक्तीकरणं भाण्डलक्षणपात्रस्य पूर्णीकरणमित्यतः स्त्रीपुंसयोरपि कामभोगादिनाऽलम्बुद्धिर्नास्तीति भावः ॥ १३ ॥

ननु, प्रावृडुपरमे नदीजलह्रासवत्कामानामुपभोगेन शान्तिः स्यादिति तत्राह—नेति । कामः तृष्णा कामानां विषयाणां हविषाज्येन "हविर्गव्ये घृते तोये हेम्नि काञ्चनचतेन" इति कृष्णवर्त्माऽग्निः ॥ १४ ॥

नन्वेवं चेत्साधनाभावेन कदापि मुक्तिर्न स्यादिति तत्राह—यदेति, यदा सर्वभूतेषु अमङ्गलं पापसाधनं हिंसालक्षणं भावं स्वभावं न कुरुते यस्तदा तस्य समदृष्टेः सर्वस्य ब्रह्माधीनत्वेन तत्तद्योग्यताविशिष्टवस्तुदर्शिनः पुंसः सर्वाः दिशः सुखमयन्ते प्रापयन्तीति सुखमयाः सुखप्रधाना वा एकस्यामपि दिश्यणुमात्रं दुःखं नास्तीत्यर्थः । "भावः पदार्थे सत्तायामात्मयोनिस्वभावयोः" इति यादवः ॥ १५ ॥

ननु, स्थाविर्ये निराहारत्वे वा विषयतृष्णात्यागेन मुक्तिः किं न स्यादिति तत्राह—येति । सत्त्वं तृष्णात्यागे मुक्तिः स्यात् स एव नास्ति तस्मात् ज्ञानेन तत्सुत्यागोऽतस्तदेवापाद्यमित्यर्थः शर्मकामः सुखार्थी वयसा अनशनेन वा जीर्यतो जराभाप्नुवतः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मायया मोहनशक्त्या ॥ १२–२५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

इडविडाकारं वस्तजातिशब्दं सन्धितुं प्रसादयितुम् ॥ ९ ॥

द्विजः शुक्राचार्यः अजा शुक्रस्य स्त्री तस्याः स्वामी स एव वृषणमच्छिनत् जरया सम्भोगासमर्थमकरोत् भूयः प्रसन्नस्तदर्थाय स्वपुत्री कामभोगाय सन्दधे वृषणं यथास्थितमकरोत् जराव्यत्ययेन यौवनयुक्तं चकार योगवित् उपायज्ञः ॥ १० ॥

कूपलब्धया कामलुब्धयेति पाठद्वयं बहुनिथं कालं व्याप्यापि सेव्यमानैरद्यापि न तुष्यति न तृप्यति ॥ ११ ॥

मोहितस्तत्र माययेति मम जीवस्य त्वमेव मूर्तिमत्यविद्येति भावः ॥ १२ ॥

ननु, त्वं सम्राट् पूर्णकामोऽसि विषयानन्देनात्मानं रमयतस्तव कथमेतावद्दैन्यं सम्भवेत्तत्राह—यदिति । न दुह्यन्ति न पूरयन्ति कामहतस्येति कामहतत्वमेवापूर्णकामत्वे कारणमिति भावः ॥ १३ ॥

ननु, यावांस्ते कामस्तावानेव ततोऽप्यधिकप्रमाणो वा विषय उपभुज्यतां महासम्पन्नस्य तव स्रक्चन्दनवनितादिविषयाणां किमलभ्यत्वमित्यत आह—न जात्विति । कृष्णवर्त्मा अग्निः तस्मादशान्तकामस्य सदा दुःखमेवेत्यतः शान्तकाम एव सुखीति भावः ॥ १४ ॥

शान्तकामस्यासधारणं लक्षणमाह—यदेति । सर्वभूतेषु स्वद्वेष्टृष्वपि अमङ्गलं द्वेषं न कुरुत इति स्वसम्मानादिकामसत्त्वे एवावमानादिकर्तरि द्वेषः सम्भवेदिति भावः । समदृष्टेः व्यावहारिकनिन्दास्तुत्यादिषु तुल्यकामबुद्धेः सुखमयाः सुखमय्यः ॥ १५ ॥

सर्वसंहर्ता कालोपि कामनायाः संहारेण हेतुरित्याह, येति । यद्वा दुरुपशमाया अपि कामनाया उपशमे साधनमाह, येति । जीर्यतः जरां प्राप्नुवतोपि शर्मकामः स्वशत्रूणामपि मङ्गलं कामयते सः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

इडविडाकारं वस्तस्वभावानुरूपं रवं संधितुमनुकूलयितुम् ॥ ९ ॥

अजायाः स्वामी वृषणमच्छिनत् वृषणं तुच्छं भोगसामर्थ्यं जराशनेनापनीतवान् भूयोऽर्थाय स्वपुत्र्याः प्रयोजनाय जराव्यत्ययेन वृषणं सन्दधे भोगसामर्थ्यं ददौ ॥ १०—१२ ॥

विषयसेवनेन तृप्तिर्न भवति प्रत्युत बहुदुःखोदर्का विषयेषु तृष्णा जायेत इत्याह—यदिति द्वाभ्याम् । न दुह्यन्ति न पूरयन्ति ॥ १३ ॥

काम्यन्ते इति कामाः विषयास्तेषामुपभोगेन कामः सङ्कल्पः विषयतृष्णा इत्यर्थः । न शाम्यति किन्तु हविषा घृतेन कृष्णवर्त्मा अग्निरिव भूयोऽभितो वर्द्धते ॥ १४ ॥

तस्मात्सर्वान्तरात्मभूतवासुदेवध्यानपरो भूत्वा विषयतृष्णां त्यजेदित्याह—यदेति द्वाभ्याम् । अमङ्गलं भावं पारक्यभावं सर्वभूतानां भगवदात्मकत्वात् स मे मया सहिते श्रीनिवासे सर्वभूतात्मनि दृष्टिर्यस्य तस्य भगवद्ध्याननिष्ठस्य ॥ १५ ॥

दुर्मतिभिर्नित्यवर्द्धैर्या दुस्त्यजा. दुःखानि आध्यात्मकादीनि नितरामावहति प्रापयति तथा तां शर्मकामः सुखकामः ॥ १६ ॥

भाषा टीका ।

वह भी स्त्री लंपट अपने बकरेपने के जाति के शब्द से उसको प्रसन्न करने के लिये दीन होकर पीछे पीछे दौडता हुआ गया तथापि उसको कोई प्रकार से मार्ग में प्रसन्न नहीं करसका ॥ ९ ॥

उसको स्वामी किसी द्विजने उस बकरे के वृषण को काट डाला फिर उपाय को जानने वाले स्वामी ने ही उसको वृषण को जोड दिया ॥ १० ॥

मात्रा स्वस्रा दुहित्रा वा नाऽविविक्तासनो भवेत् ।
बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥ १७ ॥
पूर्णं वर्षसहस्रं मे विषयान् सेवतोऽसकृत् ।
तथाऽपि चाऽनुसवनं तृष्णा तेषूपजायते ॥ १८ ॥
तस्मादेतामहं त्यक्त्वा ब्रह्मण्याधाय मानसम् ।
निर्द्वन्द्वो निरहङ्कारश्चरिष्यामि मृगैः सह ॥ १९ ॥
दृष्टं श्रुतमसद्बुध्वा नानुध्यायेन्न संविशेत् ।
संसृतिं चात्मनाशं च तत्र विद्वान् स आत्मदृक् ॥ २० ॥
इत्युक्त्वा नाहुषो जायां तदीयं पूरवे वयः ।
दत्त्वा स्वां जरसं तस्मादाददे विगतस्पृहः ॥ २१ ॥
दिशि दक्षिणपूर्वस्यां द्रुह्युं दक्षिणतो यदुम् ।
प्रतीच्यां तुर्वसुं चक्र उदीच्यामनुमीश्वरम् ॥ २२ ॥
भूमण्डलस्य सर्वस्य पूरुमर्हत्तमं विशाम् ।
अभिषिच्याग्रजांस्तस्य वशे स्थाप्य वनं ययौ ॥ २३ ॥
आसेवितं वर्षपूगान्षड्वर्गं विषयेषु सः ।
क्षणेन मुमुचे नीडं जातपक्ष इव द्विजः ॥ २४ ॥

भाषाटीका ।

हे भद्रे ! फिर भी उस कृपण विषयी ने कूप से प्राप्त होने वाली उस कामिनी के संग बहुत काल पर्यंत रमण किया परंतु अब तक भी विषयों से संतुष्ट नहीं हुआ ॥ ११ ॥

हे सुभ्रु ! तैसे ही हम भी तुम्हारे स्नेह में बद्ध होकर अपने आत्मा को नहीं जानते हैं केवल तुम्हारी माया से मूढ होरहे हैं ॥ १२ ॥

पृथिवी में जितने यव गोधूमादिक अन्न सुवर्णादि धन हाथी घोडे वा स्त्रियां वे सब भी काम से हत पुरुषों के मन को तृप्त नहीं कर सके हैं ॥ १३ ॥

काम के भोग से काम कदाचित् भी शमन नहीं होसकता है जैसे घृत हविष से; अग्नि प्रज्वलित ही होता है शांत नहीं होसक्ता है ॥ १४ ॥

जिस समय सर्वभूत प्राणियों के विषै अमंगल भव नहीं करता है उस समय में उस समदृष्टि वाले पुरुष को संपूर्ण दिशायें सुख मय ही हैं ॥ १५ ॥

जो तृष्णा दुर्मतिवाले लोगों से दुस्त्यज है और शरीर के जीर्ण होने पर भी जो जीर्ण नहीं होती है, दुःख के समूहों को प्राप्त करने वाली उस तृष्णा को सुख की कामना वाला शीघ्र ही छोडदे ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिकायां

स्त्रीसन्निधानं तु सर्वथा त्याज्यमित्याह–मात्रेति । अविविक्तं सङ्कीर्णमासनं यस्य सः कर्षत्याकर्षति ॥ १७ ॥ १८ ॥ १९ ॥

ननु, तृष्णात्यागस्यातिदुष्करत्वात्कथं मनस आधानं स्यात्त-त्राऽऽह—दृष्टमिति । योऽनानुध्यायेन्न संविशेन्न चोपभुञ्जति तत्र दृष्ट-श्रुतयोरनुध्यानादौ स आत्मदृक् भवति ॥ २०—२२ ॥

तस्य पूरोर्वशे स्थापयित्वा ॥ २३ ॥

विषयेषु शब्दादिष्वासेवितं षड्वर्गं षडिन्द्रियसुखं मुमुचे तत्याज यद्वा विषयेष्वासेवितं सेवां कारितं षण्णामिन्द्रियाणां वर्गं मुमुचे उपेक्षितेत्यर्थः ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्त्रीसन्निधानं तु सर्वथा त्याज्यमित्याह—मात्रेति । मात्रादीना-मन्यतमया वाऽपि विविक्तं सङ्कीर्णमासनं यस्य तथाभूतो न

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

भवेत् अन्यथा बलवान् प्रमाथी इन्द्रियसमूहः विद्वांसमप्यपकर्षति आकर्षेत्संलयेदित्यर्थः ॥ १७ ॥

जीर्यतोपि न जीर्य्यत इत्येतदेव स्वदृष्टान्तेनोपपादयति-पूर्णमिति। असकृत् वारंवारं विषयाननुभवतो मम वर्षसहस्रं पूर्णमभूत् तथाप्यद्यापि अनुसवनं तत्तद्विषयानुभवसमयमनतिक्रम्यातिमात्रं तृष्णा उपजायते न तु शाम्यति ॥ १८ ॥

तस्मात् कामानामुपभोगेन कामाशान्तेरहमेतां विषयतृष्णां त्यक्त्वा ब्रह्मणि मानसमाधाय शीतोष्णादिद्वन्द्वैरनभिभूतो देहात्मभ्रमरहितश्च मृगैस्सह चरिष्यामि वनं प्रविशामीत्यर्थः ॥ १९ ॥

ननु, तृष्णाया दुस्त्यजत्वात्कथं सहसा तव मनसो ब्रह्मण्यवधानं स्यात् ? तत्राह——दृष्टमिति । दृष्टमैहिकविषयजातं श्रुतमामुष्मिकं तदुभयमसत्पुरुषार्थरूपं विद्वान् पुमान् नानुध्यायेत् न संविशेत् नानुध्यायति नोपभुङ्क्ते च, कथम्भूतः ? तत्रानुध्यानसम्वेशनयोः सतोः संसृतिमात्मनाशमन्ततः स्थावरताप्राप्तिञ्च विद्वान् अननुध्यानासंवेशनयोर्हेतुं वदन् विद्वांसं विशिनष्टि-सः इष्टादीनामसद्रूपत्वादिकं विद्वान् पुमान् आत्मदृक् दृष्टश्रुताद्यपेक्षया निरतिशयानन्दरूपस्त्वात्मपरमात्मयाथात्म्यं पश्यति तथा निरतिशयानन्दरूपयाथात्म्यानुभवनिष्ठस्यार्थादेव तृष्णा निवर्तत इति भावः ॥ २० ॥

इतीत्थं जायां देवयानीमुक्त्वा नाहुषो ययातिः पूरवे पुत्राय तदीयं वयो दत्वा निगतविषयतृष्णस्तस्मात् पूरोस्सकाशात् स्वकीयां जरामादवे जग्राह ॥ २१ ॥

ततो दक्षिणपूर्वस्यामग्नेयां दिशि द्रुह्युमीश्वरमधिपतिं चक्रे दक्षिणतो दक्षिणस्यां दिशि यदुं प्रतीच्यां दिशि तुर्वसुमुदीच्यामनुमीश्वरं चक्रे ॥ २२ ॥

दिशां मध्यवर्तिन इति शेषः। सर्वस्य भूमण्डलस्य ईश्वरमधिपतिमर्हत्तमं वसुमत्तत्त्वं पूरुमभिषिच्याग्रजान् यदुप्रभृतीन् तस्य पूरोर्वशे स्थाप्य स्थापयित्वा असमासेपि ल्यबार्षः तदधीनान् कृत्वेत्यर्थः । स्वयं वनं ययौ, ॥ २३ ॥

स ययातिः वर्षपूगान् विषयेषु शब्दादिष्वस्वर्जितं षड्वर्गं षडिन्द्रियसुखं क्षणेन मुमुचे तत्याज यथा जातो पक्षो यस्य स द्विजो विहङ्गः नीडं त्यजति तद्वत् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अविविक्तासनः एकशय्यासनः ॥ १७ ॥

स्वतो विषयतृष्णा न शाम्यतीत्यत्र स्वानुभवमाह——पूर्णमिति ॥ १८ ॥

अतः किं फलितमिति तत्राह-तस्मादिति । मृगयन्ते तत्त्वमिति मृगाः ज्ञानिनस्तैः सह अरण्यचरैः हरिणादिभिर्वा तपश्चरिष्यामीत्यर्थः ॥ १९ ॥

दृष्टश्रुतत्यागेनादृष्टाश्रुतसुखाय कः कुशलः प्रयतते अरण्ये कायक्लेशं विद्वानिति तत्राह-दृष्टमिति । दृष्टं राज्यादिविभवं श्रुतं स्वर्गादिमङ्गलमितसुमयमसत् क्षणभङ्गुरं विद्वान् तन्नानुध्यायेत् तद्विषयचिन्ता न कार्या न संविशेत् भोगलक्षणप्रवेशो न कर्तव्य इत्यन्वयः। कुत इति तत्राह-संसृतिमिति । तत्रानुध्यानसंवेशयोः सतोः संसारम् आत्मनाशं स्वरूपज्ञाननाशं विद्वान् यः स आत्मदृगात्मज्ञानीत्युच्यत इत्यन्वयः।"ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते" इत्यादेः । अनेन दृष्टश्रुतसुखस्य सदातनत्वं विद्वान् बालिशो यतोऽस्य दुःखोदर्कत्वज्ञानी पश्यतीति ज्ञायते ॥ २० ॥

तदीयं पूरोर्विद्यमानम् ॥ २१ ॥

दक्षिणपूर्वस्याम् आग्नेय्याम् ईश्वरं राजानम् ॥ २२ ॥

विशां प्रजानामर्हत्तमं पूज्यतमं स्थापयित्वा ॥ २३ ॥

शब्दादिविषयेषु आम्रेडितमभ्यस्तं षडिन्द्रियवर्गं मुमुचे विषयादाहृत्य भगवद्विषयं चकारेत्यर्थः ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

किञ्च स्त्रीविषयः कामस्तु सदाचारेणैव शाम्यतीति सदाचारं दर्शयति-मात्रेति । अविविक्तं अपृथग्भूतमासनं यस्य स विद्वांसमप्याकर्षति ॥ १७ ॥

विषयाभिनिवेशस्य कालदुर्जरत्वे ऽहमेव दृष्टान्त इत्याह, पूर्णमिति ॥ १८ ॥

ननु, तर्हि कस्मात्तस्या उपशमस्तत्र भगवद्रूपगुणादौ मनो निधानादित्याह-मानसमाधायेति । निराकारस्य ध्यानं न सम्भवतीति सकारे ब्रह्मणीत्यर्थः। भागवतीं गतिं लेभे इत्यग्रेतनोक्तेश्च मृगैः सहेति एतावन्तं कालं भवत्याः क्रीडामृगः सन् गृहाङ्गणे नृत्यमकरवम् अतःपरं तु वने मृगैः कृष्णसारैः सहैव कृष्णलीलामग्नो नर्तिष्यामीति भावः ॥ १९ ॥

तत्त्वविचारेणापि विषयध्यानं त्यक्तुं भगवज्ज्ञानपरिपाके सत्येव शक्नुयादित्याह-दृष्टमिति । य आत्मदृक् ध्यानेन आत्मानं भगवन्तं पश्यति स एव दृष्टं श्रुतं च विषयसुखम् असत् असाधुत्वादरोचकं बुद्ध्वा न पुनः पुनर्ध्यायेत् न चोपभुञ्जीत किञ्च तत्र दृष्टश्रुतध्याने एव संसृतिम् आत्मनाशमात्मघातं च विद्वान् जानन् ॥ २०—२२ ॥

विशां सर्वभूमण्डलसम्बन्धिधनानाम् अर्हत्तमम् अतिशयेन अर्हतीति तम् ॥ २३ ॥

वर्षपूगानपि व्याप्य विषयेषु या सम्यक् सेवितमासक्तिर्यस्य तथाभूतमपि षडिन्द्रियवर्गं क्षणेनैव मुमुचे उपैक्षत इन्द्रियाधीनो न बभूवेत्यर्थः। नीडं मुमुचे नीडाधीनो यथा न भवतीत्यर्थः ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अविविक्तं सङ्कीर्णमासनं यस्य स तथाभूतो न भवेत् कर्षति आकर्षेत् ॥ १७—१८ ॥

ब्रह्मणि भगवति मानसमाधाय तद्ध्यानपरो भूत्वा मृगैः मृगवन्निरभिमानिभिः महानुभावैः सह ॥ १९ ॥

दृष्टमैहिकं विषयजातं श्रुतं पारलौकिकम् असदसाधु अनित्यत्वसातिशयत्वादिदोषग्रस्तं बुध्वा यो नानुध्यायेत् न संविशेत् नोपभुञ्जीत तत्र दृष्टश्रुतयोरनुध्यानादौ संसृतिम् आत्मनो नाशं विस्मृतिञ्च यो विद्वान् स आत्मदृक् भवति ॥२०-२३॥

स तत्र निर्मुक्तसमस्तसङ्ग आत्मानुभूत्या विधुतत्रिलिङ्गः ।
परेऽमले ब्रह्मणि वासुदेवे लेभे गतिं भागवतीं प्रतीतः ॥ २५ ॥
श्रुत्वा गाथां देवयानी मेने प्रस्तोभमात्मनः ।
स्त्रीपुंसोः स्नेहवैक्लव्यात्परिहासमिवेरितम् ॥ २६ ॥
सा सन्निवासं सुहृदां प्रपायामिव गच्छताम् ।
विज्ञायेश्वरतन्त्राणां मायाविरचितं प्रभोः ॥ २७ ॥
सर्वत्र सङ्गमुत्सृज्य स्वप्नौपम्येन भार्गवी ।
कृष्णे मनः समावेश्य व्यधुनोल्लिङ्गमात्मनः ॥ २८ ॥
नमस्तुभ्यम्भगवते वासुदेवाय वेधसे ।
सर्वभूताधिवासाय शान्ताय बृहते नमः ॥ २९ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां
संहितायां वैयासिक्यां नवमस्कन्धे
एकोनत्रिंशोऽध्यायः ॥ १९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स ययातिः विषयेषु शब्दादिषु वर्षपूगान् आसेवितं षड्वर्गं षडिन्द्रियसुखं क्षणेन मुमुचे तत्याज ॥ २४ ॥

भाषाटीका ।

पुरुष को उचित है कि-माता के साथ वा बहिन के साथ अथवा अपनी लडकी के साथ भी कभी एकांत में आसन पर अविवेक पूर्वक समीप न बैठे, क्योंकि—इन्द्रिय ग्राम बलवान् है विद्वान को भी खैंच लेता है ॥ १७ ॥

मेरे लिये निरंतर विषयों का सेवन करते २ एक सहस्र वर्ष पूरे होगये, तौ भी प्रतिदिन उन विषयों में मेरी तृष्णा अधिक से अधिक बढती जाती है ॥ १८ ॥

तस्मात् अब मैं इस तृष्णा को छोडकर पर ब्रह्म के बीच में चित्त लगाकर निर्द्वन्द्व निरहंकार होकर मृगों के साथ विचरूंगा ॥ १९ ॥

पुरुष देखे सुने हुए विषयों का ध्यान न करै और न भोगे उन विषयों के ध्यान में जो संसार के बंधन को जानता है और विषयों के भोगने में जो अपने आत्मा के नाश को जानता है वही आत्मद्रष्टा है ॥ २० ॥

इस प्रकार कहकर नहुष महाराज के पुत्र राजा ययाति, अपने पुत्र पुरुष की युवा अवस्था को पुरूको देकर और उस में अपनी जरा अवस्था को लेकर सर्व स्पृहा को छोड देते हुए ॥ २१ ॥

और अग्नि कोण के ईश्वर द्रुह्यु को बनाकर, दक्षिण दिशा के स्वामी यदुको और पश्चिम के तुर्वसु को तथा उत्तर दिशा के पति अनुको बनाकर ॥ २२ ॥

ययाति सर्व भूमण्डलका और सर्व राजों का पूजनीय-पति पुरूको अभिषेककर बनाये, और पुरूके बडे भाइयों को पुरूके वंश में स्थापन कर ययाति महाराज वन को गये ॥ २३ ॥

विषयों के मध्य में षट इन्द्रियों के भोगों को ययाति ने हजारहों वर्षोंतक भोगेपर छोडने के समय सर्व विषयों को क्षण मात्र में त्याग किये, जैसे पंख जामने पर पक्षी अपने नीड घोंसले को छोड देवै ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विधुतं निरस्तम् त्रिगुणात्मकं लिङ्गं येन प्रतीतः प्रख्यातः ॥ २५ ॥

प्रस्तोभमेवाऽऽह—परिहासमिवेति । यद्वा प्रस्तोभं निवृत्तिमार्गे प्रोत्साहनं मेने ॥ २६—२८ ॥

कथं समावेश्य ? तदाह--नम इति । नमनादिभिः समावेश्येत्यर्थः शुको वा नमस्करोति ॥ २९ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
एकोनविंशोऽध्यायः ॥ १९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रतीतः प्रख्यातः स ययातिस्तत्र वने निर्मुक्तः समस्तो देहतदनुबन्ध्यादिसङ्गो येन सः आत्मानुभूत्या ब्रह्मोपासनया विधुतत्रिलिङ्गः निर्मुक्तगुणत्रयकार्यः परं प्राप्यं परस्मिन् ब्रह्मणि वासुदेवाख्ये भागवतीं गतिं लेभे आसन्नमोक्षो बभूवेत्यर्थः । अन्यथा भारतविरोधात् तत्र तस्य स्वर्गादिप्राप्तेरेव कथनादिति तत्रैव विस्तरतो द्रष्टव्यम् ॥ २५ ॥

देवयानी तु भर्त्रा कथितां कथामात्मनः प्रस्तोभं मेने तावत् परिहासरूपाममन्यत प्रस्तोभतामेव व्यनक्ति, स्त्रीपुंसोरिति समासान्ताभाव आर्षः । तदनित्यत्वाद्वा स्त्रीपुंसयोः यः परस्परं स्नेहस्तत्कृतं यद्वैक्लव्यमधाप्रवेन्तस्माद्धेतोः परिहासमिवेरितं कथितमितिहासं प्रस्तोभं मेन इत्यन्वयः । ईरितामिति पाठे गाथाविशेषणम् ईहितामिति पाठे आत्मनोऽप्येतं कथारूपेणोपवर्णितं परिहासमिव मेने ॥ २६ ॥

सेति । ततः सा देवयानी ईश्वरतन्त्राणां सुहृदां पतिपुत्रादीनां संनिवासं, सुहृद्भिः सहवासमित्यर्थः । गच्छतां पान्थानां प्रपायाम्पानशालायामिवानित्यं प्रभोरीश्वरस्य मायया विरचितं च विज्ञाय स्वप्नदृष्टान्तेन सर्वत्र देहतदनुबन्ध्यादिषु सङ्गमुत्सृज्य स्वप्नवत्सर्वैः सम्बन्धोऽनित्य इति निश्चित्येत्यर्थः ॥ २७ ॥

भार्गवी देवयानी स्वमनः कृष्णे भगवति निधाय कृष्णं ध्यात्वेत्यर्थः । आत्मनो लिङ्गं शरीरं व्यधुनोत् तत्याज ॥ २८ ॥

प्रसक्तानुप्रसक्तं भगवन्तं नमस्करोति शुकः सूतो वा—नम इति । वेधसे जगत्स्रष्ट्रे सर्वभूतानामाधारभूताय शान्ताय अशनायाद्यूर्मिषट्करहिताय बृहते ब्रह्मणे वासुदेवाख्याय तुभ्यं नमः ॥ २९ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
एकोनविंशोऽध्यायः ॥ १९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आत्मानुभूत्या परमात्मापरोक्षज्ञानेन विधुतं त्रिभिः सत्त्वादिकैर्गुणैर्निर्मितं लिङ्गमभिमानलक्षणं यस्य स तथा । विध्वस्ताध्यात्मिकाधिभौतिकाधिदैविकलिङ्गो वा भागवतीं भागवतधर्मलभ्यां गतिं मुक्तावस्थां प्रतीतः कोविदः ॥ २५ ॥

प्रस्तोभं वञ्चनम् ॥ २६ ॥ २७ ॥

लिङ्गं शरीरं व्यधुनोदमुञ्चत् ॥ २८ ॥

नमस्तुभ्यमिति जपित्वेति शेषः ॥ २९ ॥

इतिश्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
एकोनविंशोऽध्यायः ॥ १९ ॥
(विजयध्वजरीत्या षोडशः)

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

श्रुत्वेति तैः तत्र प्रथमपक्षे परिहासमिवेरितमप्यात्मनः प्रस्तोभमुपालम्भमेव मेने तत्र हेतुः स्त्रीपुंसयोर्वत् स्नेहस्तत्र यद्वैक्लव्यं ग्लानिस्तद्भावनयेत्यर्थः । द्वितीये पक्षेऽप्येवमेव इति ॥ २६ ॥ २९ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
एकोनविंशोऽध्यायः ॥ १९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

विधुतं त्रिगुणात्मकं लिङ्गं येन सः भागवतीं भगवद्दासित्वप्रेमवत् पार्षदत्वं प्रतीतः ख्यातः ॥ २५ ॥

गाथां छागेतिहासम् आत्मनः स्वस्य प्रस्तोभमुपालम्भमेव वस्तुतो मेने स्नेहवैक्लव्यादेव हेतोः स्त्रीपुंसयोः परिहासतुल्यमुक्तं तेन हे देवयानि ! मया यत्त्वं कृपया पानीयकूपादुद्धृताऽभूः तत्परिशोधनं त्वया सम्यक्कृतं यदहमेतावन्तं कालं विषयमहान्धकूपे निपातित इति मत्पतिर्ययातिर्मामवोचदिति देवयानी जानाति स्मेति ॥ २६ ॥

प्रभोर्हरेः ॥ २७ ॥ २८ ॥

केन साधनेन कृष्णे मन आवेशितमिति चेन्नमस्कारध्यानकीर्तनादिभिरित्याह—नम इति । अत्र यदा अम्बरीषः सप्तद्वीपाधिपतिश्चक्रवर्ती बभूव तदैव ययातिस्तन्मण्डलाध्यक्षः प्रायो जम्बूद्वीपभूपतिरित्यवसीयते ब्रह्ममरीचिकश्यपविवस्वच्छ्राद्धदेवनभगनाभागाम्बरीषास्तथा ब्रह्मात्रिचन्द्रबुधपुरूरवआयुनहुषययातय इति ब्रह्मातस्तयोरष्टमपुरुषत्वात् अतएवाम्बरीषसङ्गप्रभावादेव तादृशविषयलम्पटस्याऽपि ययातेस्तादृशी भक्तिर्ययातेश्च सङ्गाद्देवयान्याश्च, किञ्चैवमेव सूर्यवंशचन्द्रवंशयोर्युगपत्प्रवृत्तयोर्यदा सूर्यवंश्यः सप्तद्वीपाधिपतिश्चक्रवर्ती स्यात्तदा चन्द्रवंश्यस्तन्मण्डलाध्यक्षो राजा यदा चन्द्रवंश्यश्चक्रवर्ती तदा सूर्यवंश्यो राजेत्युभयवंश्यानां व्यवस्थया चक्रवर्तित्वराजत्वे ज्ञेये ॥ २९ ॥

इतिसारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
एकोनविंशो नवमे सङ्गतः सङ्गतः सताम् ॥ १९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

प्रतीतः प्रख्यातः विधुतत्रिलिङ्गः विगतत्रिगुणदेहः वासुदेवे भागवतीं गतिं लेभे ॥ २५ ॥

परिहासं यथा केनापीरितं भवति तथा भर्त्रा स्त्रीपुंसोः स्नेहवैक्लव्यादपीरितां गाथां श्रुत्वा आत्मनः प्रस्तोभं निवृत्तिमार्गे प्रोत्साहनं मेने ॥ २६-२७ ॥

आत्मनो लिङ्गं विधुनोत् लिङ्गदेहं त्यक्त्वा भागवतीं गतिं प्रापेत्यर्थः ॥ २८ ॥

मुक्तगम्यं वासुदेवं श्रीशुको नमस्करोति— नमदिति ॥ २९ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपेन
एकोनविंशोऽध्यायार्थप्रकाशः ॥ १९ ॥

भाषा टीका ।

वह ययाति वन में जाकर समस्त सङ्गों को छोडकर परमात्मा के अनुभव करने से त्रिगुण विशिष्ट प्रकृति को अर्थात् प्राकृतभोगोंको तुच्छ समुझकर, पर अमल ब्रह्म जो श्री वासुदेव तिन क विष भागवती गति अर्थात् भक्ति को प्राप्त होकर प्रख्यात होते भये ॥ २५ ॥

देवयानी ने भी उस कहानी को सुनकर अपनी परिहास, अथवा अपने लिये निवृत्ति मार्ग में प्रोत्साहन करना समुझा क्याकि स्त्री पुरुषों की ऐसी ही स्नेह की विकलता है और कहा भी ययाति ने परिहास ही के सदृश ॥ २६ ॥

देवयानी भी वृत्तान्त को सच्चा जानकर सुहृदों के निवास को प्याऊ क विषै इकट्ठे होने वाले पुरुषों के सङ्ग के तुच्छ जानती भई क्योंकि ये सब ईश्वर परतन्त्र हैं और इनका सङ्ग प्रभु की माया से रचित है ॥ २७ ॥

तब तौ देवयानीने भी इस संसार को स्वप्न सदृश देखकर सब जगं से सङ्ग छोडकर श्रीकृष्ण में मन लगाकर प्रति बन्ध को दूरकिया ॥ २८ ॥

षडगुण सम्पन्न वेधा ऐसे श्री वासुदेव को नमस्कार होय तथा सर्वभूतों को अन्तर्यामि होकर रहने वाले शांत और निरतिशय बृहत् अर्थात् सब से बडे ऐसे भगवान को नमस्कार हो इस प्रकार देवयानी भी नमनादि भक्ति से श्री हरि के विषै मन को लगाती भई ॥ २९ ॥

इति श्रीमद्भागवत नवम स्कन्ध में एकोनविंशअध्यायकी
वृन्दावनस्थ पं० भगवताचार्यकृत
भाषा टीका समाप्ता ॥ १९॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे एकोनविंशोऽध्यायः॥ १९ ॥

॥ विंशोऽध्यायः ॥

श्रीबादरायणिरुवाच ।

पूरोर्वंशं प्रवक्ष्यामि यत्र जातोऽसि भारत ! ।
यत्र राजर्षयो वंश्या ब्रह्मवंश्याश्च जज्ञिरे ॥ १ ॥
(१)जन्मेजयो ह्यभूत्पूरोः प्रचिन्वांस्तत्सुतस्ततः ।
प्रवीरोऽथ नमस्युर्वै तस्माच्चारुपदोऽभवत् ॥ २ ॥
तस्य सुद्युरभूत्पुत्रस्तस्माद्बहुगवस्ततः ।
संयातिस्तस्याहंयाती रौद्राश्वस्तत्सुतः स्मृतः ॥ ३ ॥
ऋतेयुस्तस्य कुक्षेयुः स्थण्डिलेयुः कृतेयुकः ।
जलेयुः सन्ततेयुश्च धर्मसत्यव्रतेयवः ॥ ४ ॥
दशैतेऽप्सरसः पुत्रा वनेयुश्चावमः स्मृतः ।
घृताच्यामिन्द्रियाणीव मुख्यस्य जगदात्मनः ॥ ५ ॥
ऋतेयोरन्तिनारोऽभूत्त्रयस्तस्यात्मजा नृप ! ।
सुमतिर्ध्रुवोऽप्रतिरथः कण्वोऽप्रतिरथात्मजः ॥ ६ ॥
तस्य मेधातिथिस्तस्मात्प्रस्कण्वाद्या द्विजातयः ।
पुत्रोऽभूत्सुमते रैभ्यो दुष्यन्तस्तत्सुतो मतः ॥ ७ ॥
दुष्यन्तो मृगयां यातः कण्वाश्रमपदं गतः ।
तत्रासीनां स्वप्रभया मण्डयन्तीं रमामिव ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विंशे पितृप्रसादाप्तराजासनमहोन्नतेः ।
पूरोर्वंशो हि दौष्यन्तेर्भरतस्येर्यते यशः ॥
॥ १—२ ॥
तत्सुतः अहंयातेः सुतः ॥ ३ ॥
धर्मेयुश्च सत्येयुश्च व्रतेयुश्च धर्मसत्यव्रतेयवः ॥ ४ ॥
वनेयुश्चावमः स्मृतः एवं दशैते ऋतेयुप्रमुखास्तस्य रौद्राश्वस्य घृताच्यामप्सरसि पुत्रा जाताः अप्सरस इति षष्ठी सप्तम्यर्थे वशवर्तित्वे दृष्टान्तः जगदात्मनो जगत आत्मभूतस्य मुख्यप्राणस्येन्द्रियाणीव ॥ ५—७ ॥
दुष्यन्तस्य शाकुन्तलायां भरतः पुत्रोऽभवदिति कथाद्वारेणाऽऽह— दुष्यतो मृगयामिति, पञ्चदशभिः । तामाश्रमं मण्डयन्तीम् ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं ययातेश्चरित्रमुपवर्ण्येदानीं तत्सुतस्य पूरोर्वंशकथनं प्रतिजानन् राज्ञस्तत्र शुश्रूषामुत्पादयति–पूरोरिति । हे भारत ! यत्र यस्मिन् वंशे त्वं जातोऽसि यत्र राजर्षयो वंश्याः ब्रह्मवंश्याः ब्राह्मणाश्च वंश्या जज्ञिरे तं पूरोर्वंशं प्रवक्ष्यामि वंशे साधवो वंश्या वंशवर्द्धनाः राजर्षयो ब्राह्मणाश्च यत्र जज्ञिर इत्यर्थः ॥१॥
जनमेजय इति । पूरोस्तावज्जनमेजयः सुतः समभूत्तत्पुत्रो

(१) जनमेजयोऽभवत् इति वीर० ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

जनमेजयस्य सुतः प्रचन्वान् प्रचिन्वानिति पाठान्तरं तस्मात् प्रवि-रोधः तस्मान्नमस्युस्ततस्तस्मान्नमस्योश्चारुरिति प्रसिद्धः सुतः समभवत् ॥ २ ॥

तस्य चारोः सुद्युः पुत्रोऽभवत् तस्मात् सुद्योर्बहुगवः समभवत् तस्य बहुगवस्य शर्यातिसंयातिरिति पाठान्तरं तस्याहं यातिस्तत्सुतोऽहंयातिसुतो रौद्राति: रौद्राश्व इति पाठान्तरम् ॥ ३ ॥

तस्य रौद्राश्वस्य ऋतेयुप्रभृतयो दश पुत्राः घृताच्याः अप्सरसः अप्सरसि जाताः ॥ ४ ॥

यथा जगदात्मनो भगवतो दशेन्द्रियाणि जातानि तद्वत् तेषां दशानामवमः कनीयान् वनेयुः जलेयुरिति कुक्षेयुरिति च पाठान्तरम् धर्मेति ईयुशब्दस्य धर्मादिभिः प्रत्येकं सम्बन्धः द्वन्द्वान्ते श्रुतत्वात् ततश्च धर्मेयुः सत्येयुः व्रतेयुश्चेति फलितम् ॥ ५ ॥

तत्र ऋतेयोः सुतः रन्तिनारो बभूव हे नृप ! तस्य रन्तिनारस्य त्रयः सुताः ताञ्जिर्दिशति स्मृतिर्द्रुवोऽप्रतिरथश्चेति सुमतिरितिपाठान्तरं तत्राप्रतिरथस्यात्मजः कण्वः ॥ ६ ॥

तस्येति । तस्य कण्वस्य मेधातिथिः तस्मान्मेधातिथेः पुत्राः प्रस्कण्वप्रभृतयः ब्राह्मणा जज्ञिरे सुमतेरन्तिनारसुतस्य पुत्रो रैभ्यः तत्सुतो रैभ्यसुतः दुष्यन्तो मतः प्रख्यातः ॥ ७ ॥

दुष्यन्तस्य शकुन्तलायां भरतो ऽभवत् इति वक्तुं तद्वृत्तान्त-माह—दुष्यत इत्यादिना पितर्युपरत इत्यतः प्राक्तनेन । कदाचित् दुष्यन्तो मृगयाञ्चरन् यदृच्छया कण्वस्य ऋषेराश्रमस्थानं गतः तत्राश्रमे आसीनामुपविष्टां रमामिव लक्ष्मीमिव स्वप्रभया मण्डयन्तीमात्मानमिति शेषः । तमाश्रममिति पाठान्तरं तदा तं मण्डयन्तीम् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यत्र पूरोर्वंशे जज्ञिरे तेषु केचन राजर्षयो भवन्ति राजवंश्याः केचन ब्रह्मवंश्याश्च भवन्ति वंशे भवाः वंश्याः ॥ १—३ ॥

तस्य रौद्राश्वस्य ऋतेय्वादयो दश पुत्राः ॥ ४ ॥

जगदात्मनः जगद्व्याप्य तिष्ठतो मुख्यस्य प्राणस्य ॥ ५ ॥ ६ ॥

कण्वाद्याः राजवंश्याः प्रस्कण्वाद्याः ब्रह्मवंश्याः ॥ ७—१० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १—११ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

पुरुवंशेऽत्र दौष्यन्तेर्भरतस्य कथान्वितम् ।
शाकुन्तलमुपाख्यानं विंशेऽध्यायेऽत्र वर्ण्यते ॥
ब्रह्मवंश्याश्च ब्राह्मणवंशोद्भूताश्च ॥ १—२ ॥

तस्य रौद्राश्वस्य ऋतेयुप्रभृतयो दश पुत्राः धर्मसत्यव्रते-यवः धर्मेयुः सत्येयुः व्रतेयुः अवमः कनिष्ठो दशम इत्यर्थः ॥ ३—४ ॥

अप्सरस इति सप्तम्यर्थे षष्ठी जीवस्य दशेन्द्रियाणीव ॥ ५-११ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पूरुवंशे दुष्यन्तस्य भरतस्य च चरितमाह—पूरोर्वंशमिति त्रिभिः ॥ १ ॥ २ ॥ ३ ॥

तस्य रौद्राश्वस्य धर्मेयुश्च सत्येयुश्च धर्मसत्यव्रतेयवः ॥ ४ ॥

अप्सरसः अप्सरसि वशवर्त्तित्वे दृष्टान्तः जगदात्मनः देहे-न्द्रियादिरूपजगद्धारकस्य सर्वेन्द्रियेषु मुख्यस्य प्राणस्येन्द्रिया-णीव ॥ ५ ॥ ६ ॥ ७ ॥

कण्वस्य मुनेः आश्रमपदमाश्रमस्थानम् ॥ ८—११ ॥

भाषा टीका ।

श्रीरुक्मिणीपादपङ्कजमाश्रयामि ।

श्रीशुक उवाच ।

श्रीशुकदेवजी बोले कि—हे भारत ! अब हम उन पूरु ही का वंश कहते हैं कि जिसमें तुम उत्पन्न हुए हो और जिस वंश में राजऋषियों के वंशवाले तथा ब्रह्मर्षियों के वंशवाले पुरुष उत्पन्न हुए हैं ॥ १ ॥

राजा पूरू के पुत्र जनमेजय हुए, तिनके पुत्र प्रचिन्वान् हुए, तिनसे प्रवीर हुए, तिनसे नमस्यु हुए, तिनसे चारुपद हुए ॥ २ ॥

तिनके सद्युपुत्र हुए, तिनसे बहुगव हुए, तिनसे संयाति, तिनसे अहंयाति, तिनसे रौद्राश्व नाम से ख्यात पुत्र हुए ॥ ३ ॥

ऋतेयु, कुक्षेयु, स्थंडिलेयु कृतेयु, जलेयु, संततेयु, धर्मेयु, सत्येयु व्रतेयु और वनेयु इन सबों में छोटा भया इसप्रकार ये दश पुत्र रौद्राश्व के घृताची अप्सरा से उत्पन्न हुए जैसे जगत् का आत्मभूत जो मुख्य प्राण हैं उसके दश इन्द्रियें होवें है ॥ ४ ॥ ५ ॥

हे नृप ! ऋतेयु के पुत्र रंतिनार हुए तिनके तीन पुत्र हुए सुमति, ध्रुव और प्रतिरथ, प्रतिरथ के कण्व पुत्र हुए ॥ ६ ॥

तिनके मेधातिथि तिनतें धातिथि से प्रस्कण्व आदिक द्विजाति हुए सुमति के पुत्र रैभ्य हुए तिनके सुत दुष्यंत महाराज हुए ॥ ७ ॥

एक समय दुष्यंत शिकार खेलने को गये, सो कण्व महर्षि के आश्रम में पहुंचे वहांपर बैठी हुई अपनी प्रभा से आश्रम को विभूषित करनेवाली मानों दूसरी लक्ष्मी होवै ॥ ८ ॥

विलोक्य सद्यो मुमुहे देवमायामिव स्त्रियम् ।
बभाषे तां वरारोहां भटैः कतिपयैर्वृतः ॥ ९ ॥
तद्दर्शनप्रमुदितः सन्निवृत्तपरिश्रमः ।
पप्रच्छ कामसन्तप्तः प्रहसन् श्लक्ष्णया गिरा ॥ १० ॥
का त्वं कमलपत्राक्षि ! कस्यासि हृदयङ्गमे ! ।
किं वा चिकीर्षितं त्वत्र भवत्या निर्जने वने ॥ ११ ॥
व्यक्तं राजन्यतनयां वेद्म्यहं त्वां सुमध्यमे ! ।
न हि चेतः पौरवाणामधर्मे रमते क्वचित् ॥ १२ ॥

शकुन्तलोवाच ।

विश्वामित्रात्मजैवाहं त्यक्ता मेनकया वने ।
वेदैतद्भगवान् कण्वो वीर ! किं करवाम ते ॥ १३ ॥
आस्यतां ह्यरविन्दाक्ष ! गृह्यतामर्हणं च नः ।
भुज्यतां सन्ति नीवारा उष्यतां यदि रोचते ॥ १४ ॥

दुष्यन्त उवाच ।

उपपन्नमिदं सुभ्रु ! जातायाः कुशिकान्वये ।
स्वयं हि वृणुते राज्ञां कन्यकाः सदृशं वरम् ॥ १५ ॥
ओमित्युक्ते यथा धर्ममुपयेमे शकुन्तलाम् ।
गान्धर्वविधिना राजा देशकालविभागवित् ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्त्रियं विलोक्य मुमुहेऽमुह्यत् ॥ ९ ॥

तस्या दर्शनेन प्रमुदितोऽत एव सन्निवृत्तः परिश्रमो यस्य ॥ १० ॥ ११ ॥

पौरवाणां चेतो न ह्यधर्मे रमते अतो मच्चेतस्त्वयि रमणादेवाहं त्वां राजन्यतनयां वेद्मि ॥ १२ ॥

विश्वामित्रस्याऽऽत्मजाऽहं मेनकायां जाता तया च स्वर्गं गच्छन्त्या अत्र त्यक्ता अतो राजकन्यैवाहमित्यर्थः ॥ १३ ॥ १४ ॥

किङ्करवामेत्यादिवाक्यात्तदभिप्रायं ज्ञात्वाऽऽह—उपपन्नमिति ॥ १५ ॥

गान्धर्वविधिना मिथः समयपूर्वकेण ॥ १६ ॥ १७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

देवमायां मोहिनीमिव स्थितां शकुन्तलाख्याम् स्त्रियं विलोक्य सद्यस्तदैव मुमुहे मोहं प्राप्तः तस्या दर्शनेन नितरां मुदितः हृष्टः अत एव सन्निवृत्तः परिश्रमः मृगयायासः यस्मात् सः कतिपयैर्भटैर्वृतः कामेन सन्तप्तो दुष्यन्तः प्रहसन् मधुरया गिरा तां वरारोहां बभाषे ॥ ९ ॥ १० ॥

तदेवाह—कात्वमिति । हे कमलगर्भाभे ! हे हृदयङ्गमे ! मनोज्ञे ! त्वं का ? इति जातिप्रश्नः, कस्यासि कस्य सम्बन्धिन्यसि ? निर्जने अस्मिन् वने भवत्या त्वया किञ्चिकीर्षितं कर्तुमिष्टम ॥ ११ ॥

व्यक्तमिति । हे सुमध्यमे ! त्वामहं राजन्यतनयां व्यक्तं नूनं वेद्मि, अन्यथा मच्चेतस्त्वयि न सक्तं स्यादित्याह—न हीति । पौरवाणां पूरोर्वंशजानां चेतः कदाचिदप्यधर्मे न रमते ॥ १२ ॥

एवमुक्ता शकुन्तलाऽऽह—विश्वामित्रात्मजेति । विश्वामित्रस्यैव तनया मेनकया मात्रा स्वर्गं गच्छन्त्या अस्मिन् वने त्यक्ता अहं राजन्यकन्यैवेत्यर्थः । तत्र मानमाह—वेदेति । एतच्च भगवान् कण्वः वेद जानाति, हे वीर ! ते तव किं करवाम ॥ १३ ॥

हे अरविन्दाक्ष ! आस्यतां स्थीयतां त्वयेति शेषः । नोऽस्माकमर्हणं गृह्यताम् अस्मत्कृतमर्हणं गृह्यताम् अत्र नीवारा आरण्यव्रीहयः सन्ति ते भुज्यन्तां यदि रोचते तर्हि उष्यताम् ॥ १४ ॥

अमोघवीर्यो राजर्षिर्महिष्यां वीर्यमादधे।
श्वोभूते स्वपुरं यातः कालेनासूत सा सुतम्॥ १७॥
कण्वः कुमारस्य वने चक्रे समुदिताः क्रियाः।
बध्वा मृगेन्द्रांस्तरसा क्रीडति स्म स बालकः॥ १८॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

किङ्करवामेति वाक्यात्तदभिप्रायं ज्ञात्वा ऽऽह दुष्यन्तः–उपपन्नमिति। हे सुभ्रु! कुशिकान्वये जातायास्तवेदं किङ्करवामेति वच उपपन्नं युक्तमेव यथा हि राज्ञां कन्यकाः स्वयमेव सदृशं वरं पतिं वृणवते॥ १५॥

ततस्तया दुष्यन्ताके ऽङ्गीकृते स राजा दुष्यन्तो देशकालविधानज्ञो गान्धर्वविधिना मिथः समयपूर्वकेन यथा धर्मं शकुन्तलामुपयेमे॥ १६॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

कमलगर्भाभे पद्मोदरप्रभे! हृदयङ्गमे! सुन्दरि!॥११—१३॥

अर्हणाम् अर्घ्यादिपूजां नीवाराः देवव्रीहयः तैरापादितमन्नमिति शेषः॥ १४॥ १५॥

ब्राह्मो राक्षसो गान्धर्वं इत्यादयो बहवो विवाहविधयः सन्ति तेषु गान्धर्वविधिना स्वयंवरलक्षणेन॥ १६॥॥ १७॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

विश्वामित्रस्य क्षत्रियत्वावस्थायामात्मजेत्यर्थः॥ १२—२५॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

वेद्मीति त्वयि मच्चेतसः सलोभत्वान्यथानुपपत्त्येति भावः॥ १२॥

वेदेति कण्वस्य मुखान्मयेदं श्रुतम् अहं तु मातापितरौ न परिचिनोमीति भावः॥ १३—१४॥

किङ्करवामेत्यादिवाक्यैस्तस्या अपि मनः स्वस्मिन्नभिरतं ज्ञात्वाऽऽह उपपन्नमिति॥ १५॥

ओमिति शकुन्तलया मौनेनैवोक्के सतीत्यर्थः॥ १६—१९॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

मेनकया मात्रा विश्वामित्रतपोनाशाय स्वर्गादागतया मज्जन्मानन्तरं स्वर्गं गच्छन्त्या त्यक्ता अतो विश्वामित्रात्मजा राजन्यकन्यैवाहमित्यर्थः॥ १२॥

नीवारा आरण्यव्रीहयः॥ १३॥

वीर! किङ्करवाम ते इति शकुन्तलावचनाल्लब्धतदाशय आह उपपन्नमिति॥ १४॥

गन्धर्वविधिर्वरवध्वोः परस्परेण विवाहरुचिस्तेन॥ १५॥ १६॥ १७॥

भाषाटीका।

देवमाया के सदृश मूर्त्तिमती शोभा जैसे होवै इस प्रकार की एक कन्या को देखकर राजा तत्काल में मोहित होगया, कितने एक सेनापति भटलोग साथ रहे, उनसे एकांत होकर राजा उस वरारोहा कन्या से भाषण करते हुए॥ ९॥

राजा के भी उस कन्या के दर्शनमात्र से बडा ही प्रमोद हुआ और सर्व परिश्रम दूर होगया, और काम से संतप्त होकर राजा हंसता हुआ मधुर वाणी से पूंछता भया॥ १०॥

राजा दुष्यंत बोले, कि—हे कमलपत्राक्षि! तुम कौन हो।? और हे हृदयंगमे! तुम कौन की हो? और इस निर्जन वनमें तुम क्या करने की इच्छा से हो॥ ११॥

हे सुमध्यमे! हम तुमको भलीभांति से क्षत्रिय की पुत्री जानते हैं क्योंकि पूरु वंशी लोगों का चित्त अधर्म में कहीं भी नहीं रमता है॥ १२॥

शकुन्तलोवाच।

शकुन्तला बोली, कि–हे राजन्! मैं सत्यही विश्वामित्र की पुत्री हूं. मेनका अप्सरा मेरे लिये वन में परित्याग कर गई, यह सब वृत्तान्त हमारे पोषक पिता भगवान कण्व ऋषि जानते हैं। हे वीर! अब हम आपका क्या सत्कार करें॥ १३॥

हे कमललोचन! आप विराजिये, और हमारे सत्कार को ग्रहण कीजिये, और हम लोगतो वनवासी है हमारे यहां नीवार (वनकाधान्य) हैं, आप भोजन कीजिये, और आप को यदि रुचै तौ निवास कीजिये॥ १४॥

दुष्यन्तउवाच।

राजा दुष्यन्त बोले, कि–हे सुन्दर भृकुटि वाली! हे कुशिक वंश में उत्पन्न होने वाली! तुमको तौ यह सब बात उचित ही है क्योंकि? राजाओं में कन्या अपने सदृश वर को आप ही स्वयम्वर लेती हैं॥ १५॥

तब शकुन्तला ने अङ्गीकार सूचक "ओम्" यह शब्द बोला, तब देशकाल के जानने वाले राजा! दुष्यन्त ने भी धर्मपूर्वक गान्धर्व विवाह की विधी से शकुन्तला को व्याह लीनी॥ १६॥

तं दुरत्ययविक्रान्तमादाय प्रमदोत्तमा ।
हरेरंशांशसम्भूतं भर्तुरन्तिकमागमत् ॥ १९ ॥
यदा न जगृहे राजा भार्यापुत्रावनिन्दितौ ।
शृण्वतां सर्वभूतानां खे वागाहाशरीरिणी ॥ २० ॥
माता भस्त्रा पितुः पुत्रो येन जातः स एव सः ।
भरस्व पुत्रं दुष्यन्त ! मावमंस्थाः शकुन्तलाम् ॥ २१ ॥
रेतोधाः (१) पुत्रो नयति नरदेव ! यमक्षयात् ।
त्वं चास्य धाता गर्भस्य सत्यमाह शकुन्तला ॥ २२ ॥
(२) (भरस्व पुत्रं भरतं वासुदेवांशसम्भवम् ।
ब्रह्मण्यं सत्यसन्धश्च गुणज्ञं कीर्तिवर्द्धनम् ॥ ० ॥
महोत्साहं स्थूललक्षं कृतज्ञं वृद्धसेवकम् ।
अशरीरवचः श्रुत्वा स्वीचकार तदाऽऽत्मजम् ॥ ० ॥)
पितर्युपरते सोऽपि चक्रवर्ती महायशाः ।
महिमा गीयते तस्य हरेरंशभुवो भुवि ॥ २३ ॥
चक्रं दक्षिणहस्तेऽस्य पद्मकोशोऽस्य पादयोः ।
ईजे महाऽभिषेकेण सोऽभिषिक्तोऽधिराड्विभुः ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दुरत्ययं विक्रान्तं विक्रमणं यस्य ॥ १९ ॥ २० ॥

भस्त्रा चर्मपात्रं तद्वन्माता आधारमात्रम, पितुरेव तु पुत्रः तत्र हेतुः येनेति "आत्मा वै पुत्रतामासि" इति श्रुतेः भरस्व पुषाण अनेन भरतनाम निरुक्तम् ॥ २१ ॥

किञ्च रेतोधाः रेतःसेक्ता वंशकृत्पुत्रो यमक्षयात्पितरं नयति तारयति तथा च स्मृतिः-

"पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः ।
तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवा" ॥ इति—

पाठान्तरे मातापित्रोः पुत्रं प्रति विवादे यमक्षयाद्धर्मनिर्णेतुर्यमस्य सभायाः सकाशाद्रेतोधा रेतःसेक्ता पितैव धर्मेण विजित्य पुत्रं नयति न तु मातेत्यर्थः । ततश्च भार्यापुत्रौ स्वीकृतवानिति ज्ञेयम् ॥ २२ ॥

चक्रवर्ती बभूवेति शेषः । तस्य महिमा गीयते तत् "अप्येते श्लोका अभिगीताः" इत्यादिबहुचश्रुत्या हरेरंशभुवोंऽशाज्जातस्य ॥ २३ ॥

तत्र चिह्नमाह चक्रमिति ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अमोघेति । अमोघमवितथं वीर्यं यस्य स राजर्षिर्दुष्यन्तो महिष्यां शकुन्तलायां वीर्यं रेत आदधे निहितवान् ततः श्वोभूते प्रभाते स्वपुरं गतः ततः कालेन प्राप्तकालेन सा शकुन्तला सुतं पुत्रमसूत सुषुवे ॥ १७ ॥

कण्वेति । तस्य कुमारस्य समुचिताः क्रियाः जातकर्मादिक्रियाः कण्वो वन एव चक्रे स च बालस्तरसा बलेन मृगेन्द्रं सिंहं बध्वा तेन क्रीडति स्म बाल्यादारभ्यापरिमितबलशौर्यादिगुणसंपन्न इत्यर्थः ॥ १८ ॥

तमिति । तमपारविक्रमं भगवतोंऽशांशेन सम्भूतं कुमारमादाय शकुन्तला भर्तुः दुष्यन्तस्यान्तिकम् आगमत् ययौ ॥ १९ ॥

यदेति । तावागतावनिन्दितौ निर्दुष्टौ भार्यापुत्रौ राजा दुष्यन्तो यदा न जगृहे ममैतेमौ भार्यापुत्राविति न स्वीकृतवान् तदा सर्वभूतानां शृण्वतां सतां खे आकाशे अशरीरिणी वागाह अश्रूयतेत्यर्थः ॥ २० ॥

तामेव दर्शयति—मातेति । भस्त्रा चर्ममयं पात्रं तद्वत् माता आधारमात्रं पितुरेव पुत्रः तत्र हेतुः, येनेति. येन पित्रा जातः उत्पादितः स पुत्रः स एव पितैव "आत्मा वै पुत्रनामा" इति श्रुतेः । अतः पुत्रं दौष्यन्ति दुष्यन्तस्य तवैवापत्यमनेन चेत्र-

(१) पितरं पुत्रो नयत्येव इति वीर० । (२) इमौ श्लोकौ व्याख्यामन्तराऽधिकौ पठ्येते वीरराघवीयेन० ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

जत्वशङ्का परिहृता भरस्व पोषय शकुन्तलां मावमंस्थाः मावमानं कुरु भरस्वेत्युक्त्या भरतं नाम निरुक्तम् ॥ २१ ॥

किञ्च रेतोधाः रेतःसेक्ता वंशकृत्पुत्रः हे नरदेव ! यमक्षयात् यमसदनात्पितरं स्वर्नयति पुत्रमिति द्वितीयान्तपाठः प्रामाणिकस्तत्र यमक्षयाद्भिनेति शेषः। पुत्रं रेतोधाः पिता नयति मृतपुत्रं विनान्यं कापि स्थितं पुत्रं पिता स्वीकरोतीत्यर्थः । यमक्षयमिति पाठान्तरं तदा तद्वाक्यान्तरं यं रेतोधातारं पुत्रः अक्षयं स्थानं नयति स रेतोधाः पुत्रं नयति स्वीकरोतीत्यर्थः। पूर्वपाठे एवं वान्वयः हे नरदेव ! अधा इति छेदः रेतो निहितवानसि शकुन्तलायामिति विभक्तिपरिणामेनानुषङ्गः अतोऽयं तव पुत्रस्त्वां यमक्षयान्नयति नेष्यति स्वर्गमिति शेषः। अतः स्वीकुर्विति भावः। शकुन्तलोक्तं नानृतमित्याह—त्वमिति । अस्य गर्भस्यापत्यस्य धाता विधाता उत्पादकस्त्वमेवेति यच्छकुन्तला आह तत्सत्यमेव नानृतमित्यर्थः । ततश्च स भार्यापुत्रौ स्वीकृतवानिति ज्ञेयम् ॥ २२ ॥

ततः पितरि दुष्यन्ते उपरते मृते सति सोऽपि भरतोऽपि चक्रवर्ती सप्तद्वीपाऽधिपतिः महायशाः बभूव तं विशिंषन् तद्वृत्तान्तमाह--महिमेत्यादिना । भुवि हरेर्भगवतोंऽशेन जातस्य यस्य भरतस्य महिमा गीयते तत् "अप्येते श्लोका अभिगीताः" इत्यादिबहुवचश्रुत्येति शेषः ॥ २३ ॥

हरेरंशभवत्वे लिङ्गं वदन् विशिनष्टि—चक्रमिति । अस्य भरतस्य दक्षिणे हस्ते चक्रश्चक्राकारो रेखा पादयोस्तु पद्मकोशाकारा अवर्तत इति शेषः स च भरतो महाभिषेकविधिनाऽभिषिक्तो ऽधिराट् सार्वभौमो विभुर्भूत्वा ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

समुदिताः- विधियुक्ताः ॥ १८ ॥

तं कुमारं प्रमदोत्तमा शकुन्तला ॥ १९ ॥

अशरीरिणी वाक् दैवी वाणी आह—गुह्यभाषया राजानमिति शेषः।"त्रिभाषां यो न जानाति रीतीनां शतमेव च" इत्युक्तेः।पुराणेषु भाषात्रयस्य न्यायप्राप्तत्वात् ॥ २० ॥

यथा कारुशाला चुल्लीस्थिताग्निशक्त्युद्दीपकत्वेनाग्नेराधारमात्रं भस्रा "भसभत्सनदीप्त्योः" इति धातोः तथा माता भर्त्राऽऽहितं वीर्यमादाय करचरणाद्यवयवविशिष्टदेहाकारेणपरिणामप्राप्तस्य वीर्यस्य प्रथमाधारभूतत्वात् मातुः पुत्रत्वमौपचारिकं तर्हि कस्य मुख्यपुत्रत्वमिति तत्राह-पितुरेवपुत्र इति, मुख्यपुत्रत्वं पितुरेव कुत इत्यत्राह-यस्मादिति । स पितैव पुत्रो-जातः इति यस्मात्तस्मात्स पुत्रः पितुरेवेत्यर्थः । "आत्मा वै पुत्रनामासि" इति श्रुतेः "तज्जाया जाया भवति यदस्यां जायते पुनः" इति च पुत्रदेहस्याऽपि पितृदेहैकदेशस्योपादानत्वद्योतनाय पितुरित्युक्तम् अन्यथा पिता पुत्र इति प्रयोगस्यापि सम्भवात् प्रकृते किमपेक्षितमिति तत्राह-भरस्वेति भरस्व, अन्यपुत्रं कथं स्वीकरोमीत्यत उक्तं दौष्यन्तिमिति औरसं पुत्रमित्यर्थः। अतः शकुन्तला स्वैरिणीति माऽवमंस्थाः अवज्ञातां न कुरु ॥ २१ ॥

ननु, पुत्रेण मम किं प्रयोजनं स्याद्येन भार्या स्यादिति तत्राह-पुत्रं पुत्रः रेतोधाः रेतोधातारं पितरं यमक्षयं योऽक्षयोऽनन्तो लोकस्तं वैकुण्ठादिकं नयति प्रापयति "यस्मात्पुत्रमनुशिष्टं लोकमाहुस्तस्मादेनमनुशासति" इति हि श्रुतिः। नरदेव दुष्यन्त ! दौष्यन्तिं पुत्रं स्वीकुर्विति शेषः।मयाऽनाहितगर्भजातं पुत्रं कथं दौष्यन्तिमिति वदतीति तत्राह-त्वं चेति । चशब्द एवार्थे त्वमेवास्य गर्भस्य धाता आधानकर्ता क आहेति तत्राह-सत्यमिति । शकुन्तला सत्यं यथार्थमेव नाऽनृतमाह यः पुत्रः स रेतोधातारमक्षयं नयतीति वा "सुप्तिङुपग्रहलिङ्गनराणाम्" इति सूत्राद्व्यत्ययो युक्तः अथवा स्वीकारेणानर्थमाह-रेतोधा इति रेतोधा भवान्पुत्रं यमक्षयं मृत्युलोकं नयति मृतप्रायं करोति अस्वीकारात् तेन सत्पुत्रहत्या दोषप्राप्तिस्तव स्यादतस्तद्भयादपि स्वीकुर्वित्यर्थः। ननु,नाहं रेतोधा इति, नेत्याह-त्वं चेति. अथवा तदुक्तं श्रुत्वा अस्वीकरोमि इत्यतस्तल्लक्षणमाह—रेतोधा इति । यमयति शिक्षयति शिष्यमिति यमो गुरुः "क्षि निवासगत्योः" इति क्षयो निवासः रेतोधाः पुत्रं गुरुनिवासं नयतीति न्यायात् भवानपि पुत्रं स्वीकृत्य गुरुकुलवासं प्राप्य नयति न्यायशास्त्रादिविशारदं करोतीत्यर्थः। त्वत्पुत्रत्वसंशयो माभूदित्याह-त्वञ्चेति। अथवा रेतोधाः अक्षयगमतिमनन्याधारं यं पुत्रं नयति स्वाश्रयं करोति स पुत्रः तं रेतोधातारम् अक्षयं लोकं नयति अनन्याधारत्वे हेतुगर्भविशेषणमाह—त्वञ्चेति। अस्य सर्वस्य प्रमाणं शकुन्तलावचनमित्याह, सत्यमिति।। द्वितीया च प्रथमेत्यनुवर्तते द्वितीयाविभक्तिः सप्तसु वर्तेत इति द्वितीयायाः प्रथमात्वसम्भवात्पुत्रमित्यादेः प्रथमात्वं सप्रामाणिकं रेतोधा इत्यस्य द्वितीयात्वं चेत्यर्थः। माता भस्त्रेति लुप्तोपमं हिरण्यधान्यादिग्राहिणी पात्रीभस्त्रानाम यथा तथा भर्तुराहितवीर्यधारणी माता पुत्रस्य कारणात्रं पितृवीर्यात्मकत्वात्पितुरेव पुत्र इति वा योजना, शेषः पूर्ववत् ॥ २२ ॥

पितरि दुष्यन्ते उपरते मृते सति स दुष्यन्तपुत्रः भरस्वेत्युक्तत्वात् भरतो भरेण हरिणा ततत्वाद्वा भूमेर्भरं भरणं तनोतीति वा शुभे स्ततत्वाच्च गुरुत्वलक्षणभारेण ततत्वाद्वा चक्रवर्ती आज्ञयैव धर्माधर्मशास्ताऽभूदित्यन्वयः ॥ २३ ॥

नाम्ना महाभिषेकेणाऽभिषिक्त इति वा ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

न जगृहे लोकप्रवादभयाच्च जग्राह ॥ २० ॥

भस्त्रा चर्मपात्रं तद्वदेव माता आधारपात्रं पितुरेव पुत्रः "आत्मा वै पुत्रनामासि" इति श्रुतेः। भरस्व अङ्गीकुरु अनेनैव भरतनामनिरुक्तिः ॥ २१ ॥

रेतोधाः रेतस्सेक्ता वंशकृदित्यर्थः। यद्वा पितूरेतः स्वदेहोपादानत्वेन धत्ते इत्यौरसः पुत्र इत्यर्थः। यमक्षयात् यमालयात् पितरं नयति तारयति तथा च स्मृतिः "पुन्नाम्नो नरकात् यस्मात् पितरं त्रायते सुतः। तस्मात् पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवा"इति पुत्रमिति द्वितीयान्तपाठे पुत्रप्राप्त्यर्थं मातापित्रोर्विवादे यमक्षयात् धर्मनिर्णेतुर्यमस्य स्थानात् रेतोधा रेतः

पञ्चपञ्चाशता मेध्यैर्गङ्गायामनु वाजिभिः ।
(१)मामतेयं पुरोधाय यमुनायामनु प्रभुः ॥ २५ ॥
अष्टसप्ततिमेध्याश्वान् बबन्ध प्रददद्वसु ।
भरतस्य हि दौष्यन्तेरग्निः साचीगुणे चितः ।
सहस्रं बद्वशो यस्मिन् ब्राह्मणा गा विभेजिरे ॥ २६ ॥
त्रयस्त्रिंशच्छतं ह्यश्वान् बद्ध्वा विस्मापयन्नृपान् ।
दौष्यन्तिरत्यगान्मायां देवानां (२)गुरुमाययौ ॥ २७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सेक्ता पितैव धर्मेण विजित्य पुत्रं नयति न तु मातेत्यर्थः । ततश्च भार्य्यापुत्रौ स्वीकृतवान् इति ज्ञेयम् ॥ २२ ॥

चक्रवर्त्ती बभूव ॥ २३—२४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

दुरत्ययमलङ्घ्यं विक्रान्तं विक्रमणं यस्य तम् ॥ १८ ॥ १९ ॥

भस्त्रा चर्मयन्त्रे तद्वदाधारमात्रं माता भवति पुत्रस्तु पितुरेव न केवलं तत्सम्बन्धी किन्तु येन जातः स एव जनयिता स पुत्राकारो भवति "आत्मा वै पुत्रनामासि" इति श्रुतेः । हे दुष्यन्त ! पुत्रं भरस्व पोषय शकुन्तलामपि माऽवमंस्थाः धर्मपत्नीमिमां स्वीकुर्वित्यर्थः ॥ २० ॥

हे नरदेव ! रेतोधाः रेतस्सेक्ता वंशप्रवर्त्तकः पितरं यमस्य क्षयात् स्थानात् नरकादपि नयति पुण्यलोकान् गमयति "पुंनाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः । तस्मात् पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवा ॥ पुत्रेण जयते लोकान्" इत्यादिवाक्येभ्यः त्वं च अस्य गर्भस्य धातोत्पादकः शकुन्तलापि सपुत्रोपस्थिता सत्यमेवाह—एवमुक्तः भार्य्यापुत्रौ स्वीकृतवानिति बोध्यम् ॥ २१ ॥

पितरि उपरते राज्याभिवृत्ते सः चक्रवर्त्ती बभूवेति शेषः । हरेः अंशभुव अंशाज्जातस्य तस्य महिमा तत् "अप्येते श्लोका अभिगीताः" इत्यादि बह्वृचश्रुत्या गीयते ॥ २२ ॥ २३ ॥

कथमीजे इत्यत्राह—गङ्गायामनुलोमं गङ्गासागरसङ्गमादारभ्य भरतखण्डमर्यादापर्यन्तं पञ्चपञ्चाशता वाजिभिः वसु धनं प्रकर्षेण ददत् ईजे तथा यमुनायामनु प्रायागादारभ्य भरतखण्डमर्यादापर्यन्तम् अष्टाधिकसप्तति मेध्याश्वान् बबन्ध तावत्सङ्ख्याकैरश्वैरीज इत्यर्थः ॥ २४ ॥

भाषा टीका ।

और अमोघ वीर्य वाले राजर्षि ने अपनी महिषी (रानी-शकुन्तला) के विषे वीर्यधारण किया और प्रातःकाल में अपने पुर को चलेगये, समय प्राप्त होने पर शकुन्तला ने सुत उत्पन्न किया ॥ १७ ॥

कण्व ऋषि ने शकुन्तला के कुमार की शास्त्रोक्त सब क्रिया करी वह कुमार भी संस्कार संपन्न होकर सिंहोंको बान्धकर खेलता हुआ ॥ १८ ॥

उस दुरत्यय पराक्रम वाले और हरी के अंशांश से उत्पन्न होने वाले अपने पुत्र को लेकर वह प्रमदोत्तमा (नारियों में श्रेष्ठ) शकुन्तला अपने भर्ता के समीप जाती भई ॥ १९ ॥

जब राजाने अनिन्दित दोनों भार्या पुत्रों को नहीं ग्रहण किया तब सर्वभूत प्राणियों के सुनते २ आकाश वाणी होती भई ॥ २० ॥

कि "माता तौ भस्त्रा अर्थात् चर्मपात्र के तरह पुत्र का आधार पात्र रूप है और पुत्र तौ पिता हीका होता है क्योंकि जो जिस से उत्पन्न भया वह भी वही है । तस्मात् तूं इस पुत्र का पोषण कर और शकुन्तला का अपमान मत करौ ॥ २१ ॥

हे नरदेव ! वंश वृद्धिकरने वाला पुत्र यमलोक से अपने पिता को ला सक्ता है और इस के गर्भ का धारण करने वाला तूं ही है शकुन्तला सत्य बोलती है इस प्रकार की आकाश वाणी को सुनकर राजाने अपनी शकुन्तलारानी और राज कुमार दोनों को स्वीकार किया ॥ २२ ॥

समय पाकर पिता (दुष्यंत) के देहान्त होने पर वे भरत महाराज भी चक्रवर्त्ती और बडे यश वाले होते हुए, हरि के अंश से उत्पन्न होने वाले ऐसे जिन भरत महाराज की महिमा पृथ्वी पर गाई जाती है ॥ २३ ॥

जिन दाहिने हस्त में चक्र रहा और चरणों में कमल के मुकुल (कली) का चिन्ह रहा वे भरत महाराज राज्याभिषेक को प्राप्त होकर परम समर्थ अधिराट् होकर महाभिषेक से श्रीहरि का यजन करते हुए ॥ २४ ॥

श्रीभरस्वामिकृतभावार्थदीपिका ।

गङ्गायामनुलोमं पञ्चपञ्चाशता वाजिभिरीजे पुरोधाय पुरोहितं कृत्वा यमुनायामनु यमुनायाश्चानुलोमम् ॥ २५ ॥

(१) दीर्घतमसमिति वीर० विज० । (२) गुरुमायिनामिति श्री० ।

मृगान् शुक्लदतः कृष्णान् हिरण्येन परीवृतान् ।
अदात्कर्मणि [1] मष्णारे नियुतानि चतुर्दश ॥ २८ ॥
भरतस्य महत्कर्म न पूर्वे नापरे नृपाः ।
नैवापुर्नैव प्राप्स्यन्ति बाहुभ्यां त्रिदिवं यथा ॥ २९ ॥
किरातहूणान्यवनानन्ध्रान्कङ्कान्खशान् शकान् ।
अब्रह्मण्यान्नृपांश्चाहन्म्लेच्छान् दिग्विजयेऽखिलान् ॥ ३० ॥
जित्वा पुराऽसुरा देवान्ये रसौकांसि भेजिरे ।
देवस्त्रियो रसां नीताः प्राणिभिः पुनराहरत् ॥ ३१ ॥
सर्वकामान्दुदुहतुः प्रजानां तस्य रोदसी ।
समास्त्रिणवसाहस्रीर्दिक्षु चक्रमवर्त्तयत् ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अष्टाधिकसप्ततिमेध्यानश्वान्बबन्ध किङ्कुर्वन् वसु धनं प्रकर्षेण ददत् साचीगुणे प्रकृष्टगुणवति देशेऽग्निश्चितोऽभूत् यस्मिन्नाग्निचयने देशे वा सहस्रम्ब्राह्मणाः भरतेन भूरिदानेन दत्ताः गाः बद्धशः प्रत्येकं बद्धं विभेजिरे विभज्य जगृहुः चतुरशीत्यधिकैस्त्रयोदशसहस्रैरेकं बद्धं भवति तथाहि "हिरण्येन परीवृतान्कृष्णान् शुक्लदतो मृगान् मष्णारेऽभरतो ददाच्छतनवबद्धानि सप्त च" इति श्रुत्युक्तानि सप्ताधिकशतं बद्धानि श्रीशुकेनोत्तरश्लोके चतुर्दशलक्षत्वेन सङ्गृहीतानि "अदात्कर्मणि मष्णारे नियुतानि चतुर्दश" इति एवं चतुर्दशलक्षाणां सप्ताधिकशतभागो बद्धमित्युक्तम् इयं च बद्धसङ्ख्या श्लोकेन सङ्गृह्यते ।

"चतुर्दशानां लक्षाणां सप्ताधिकशतांशकः ।
बद्धं चतुरशीत्यग्रसहस्राणि त्रयोदश" ॥ २६ ॥

देवानामपि मायां वैभवमत्यगात् अत्येत यतः गुरुं पूज्यं हरिमाययौ प्राप्तः तदंशभवत्वात् मायवत्तर इति पाठे तुल्यः श्रुत्यनुसारेण मायावतां श्रेष्ठो हरिरेवाऽऽपेत्यर्थः ॥ २७ ॥

मृगान् श्रेष्ठगजान् भद्रमन्द्रमृगादयो गजजातिभेदाः मष्णारे इत्यस्य श्रुतिपदस्य व्याख्यानं कर्मणीति कस्मिंश्चित्कर्मविशेषे केचित्तु मष्णारेतीर्थं इति व्याचक्षते ॥ २८—३० ॥

पुरा देवान् जित्वा येऽसुरा रसौकांसि रसातलादिस्थानानि भेजिरे तैः प्राणिभिर्बलिभिर्देवस्त्रियो रसातलं नीताः सतीः पुनराहरदानिन्ये प्राणिभिरन्यैर्मनुष्यादिभिः सह नीता इति वा पणिभिरिति पाठे पणयोऽसुरास्तैर्नीताः सतीः यद्वा पणयो दूतास्तैर्दूतान्प्रस्थाप्याहरदित्यर्थः ॥ ३१ ॥

त्रिणवसाहस्रीः समाः सप्तविंशतिसहस्रं वत्सरान् चक्रं सेना आज्ञा वा ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

गङ्गायामनु गङ्गातीरे गङ्गाया अनुलोमं वा गङ्गासागरसङ्गमादारभ्य यावच्चतुत्पत्ति तावदित्यर्थः । पञ्चपञ्चाशता पञ्चाशदधिकशतद्वयसङ्ख्याकैः वाजिभिरश्वैर्भगवन्तमीजे उक्तसंख्याकैरश्वमेधैस्तत्र भगवन्तमाराधितवानित्यर्थः । तदा दीर्घतमसम् ऋषिं पुरोधाय पुरोहितङ्कृत्वा प्रभुर्भरतः यमुनायामनु पूर्ववदर्थः ॥ २५ ॥

अष्टसप्तति अष्टाधिकसप्ततिमेध्याश्वान् उक्तसंख्याकान् मेध्यान्निर्दुष्टानश्वान् बबन्ध तावतामश्वानां बन्धनपूर्वकैर्मेधैरीज इत्यर्थः । कथम्भूतः ? वसु धनं प्रददत् प्रयच्छन् दौष्यन्तेर्दुष्यन्तसुतस्य भरतस्याग्निः साचिगुणे प्रकृष्टगुणवति देशे चितः यस्मिन्नाग्निचयने तद्देशे वा सहस्रं ब्राह्मणाः भरतेन भूरिदानेन दत्ताः गाः बद्धशः प्रत्येकं बद्धा बध्वा विभेजिरे विभिज्य जगृहुः सहस्रशब्दो बहूनामुपलक्षकः ॥ २६ ॥

तथा मष्कारे तीर्थविशेषे कर्मणि यज्ञकर्मणि मष्काराख्ये कर्मणि वा त्रयस्त्रिंशच्छतसंख्याकानश्वान् बध्वा नृपान् पार्थिवान् विस्मापयन् पुरु बह्व्यःमायाः एषां सन्तीति तथा तेषां देवानां मायामश्वहरणादिरूपां दौष्यन्तिर्भरतोऽत्यगात् देवैर्नृपैश्च चिकीर्षितं यज्ञविघ्नमपाकृत्यायाजतेत्यर्थः ॥ २७ ॥

शुक्लदतः शुक्लदन्तान् हिरण्येन परिवृतान् चतुर्दशनियुतसंख्याकान् मृगान् भद्रमृगादिसंज्ञकान् गजानदात् प्रायच्छत् ॥ २८ ॥

किञ्च भरतस्य महदद्भुतं कर्म पूर्वे ऽपरेऽर्वाचीनाश्च नृपाः नैवापुर्नैव कृतवन्तः नापि प्राप्स्यन्ते नापि करिष्यन्ति यथा जनाः बाहुभ्यां गमनसाधनाभ्यां त्रिविष्टपं नैव प्रापुः नापि प्राप्नुवन्ति प्राप्स्यन्ति च तद्वत् ॥ २९ ॥

महत्कर्मैव दर्शयति—किरातहूणानिति । अब्रह्मण्यान् ब्राह्मणेष्वसाधून् किरातादीन् हीनजातीन् नृपान् च म्लेच्छांश्च सर्वान् दिग्विजयेऽहन् हतवान् ॥ ३० ॥

किञ्च ये असुरा राक्षसाः पुरा पूर्वकाले देवान् जित्वा रसौकांसि रसातलस्थानानि भेजिरे प्राप्ताः तैः प्राणिभिर्बलिभिर्या देवस्त्रियो रसां रसातलं प्रति नीताः प्रापिताः ताः पुनराहरत् आनयत् प्राणिभिरन्यैर्मनुष्यादिभिः सह नीता इति वा पणिभि-

(१) मष्कारे

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

रिति पाठे पणयो ऽसुरास्तैर्नीताः यद्वा, पणयो दूताः दूतान् प्रस्थाप्याहरदित्यर्थः ॥ ३१ ॥

किञ्च भरते राजनि सति रोदसी द्यावापृथिव्यौ तस्य प्रजानां तद्विषयस्थानां सर्वान् कामान् दुदुहतुः पूरयामासतुः एवं त्रिणवसाहस्रीः समाः सप्तविंशतिसहस्रसंवत्सरान् दिक्षु चक्रम् आज्ञामवर्तयत् ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

को महाभिषेको नाम यज्ञः ? इत्यतस्तत्स्वरूपमाह-पञ्चेति। गङ्गायामनु समीपतीरे पञ्चपञ्चाशतैः पञ्चभिः पञ्चाशता च दीर्घतमसं पुरोधाय पुरोहितं कृत्वा प्रभुरुत्तमकल्पेन यष्टुं समर्थः पुनर्यमुनायाम् अनुतीरे अष्टसप्ततिं मेध्याश्वान् ववन्ध तदा दक्षिणां वसु रत्नराशिमेव प्रददौ भरतस्येदं च सामर्थ्यमाह भरतस्येति । कैकेयीपुत्रव्यावृत्त्यर्थं दौष्यन्तेरिति । भरतस्य यज्ञे अग्निरग्रभागे नेतृत्वादग्निनामा साचीगुणे चितः सचिवगुणे कृतः साचिव्यंकृतवानित्यर्थः ॥ २५ ॥

यस्मिन् यज्ञे ब्राह्मणा ब्रन्दशः सहस्रं द्विसाहस्रं गाः विभेजिरे विभज्य स्वीकृतवन्तः दौष्यन्तिः नृपस्तस्मिन्यज्ञे त्रयस्त्रिंशच्छतमश्वान् वध्वा नृपान् विस्मापयन् विस्मितकुर्वन् उरुमायया महता महिम्ना देवानां मायां निजभोगेच्छामत्यगात् काङ्क्षितादप्यधिकं दत्तवानित्यर्थः । यज्ञे विघ्नकरीमतिक्रान्तवानिति वा ॥ २६ ॥ २७ ॥

शुक्लदतः शुक्लदन्तान् कृष्णान् मृगान् कृष्णमृगान् गजान् वा "भद्रो गजो मृगश्चेति" हलः । मष्णारे व्रतविशेषसमाप्तिलक्षणे कर्मणि क्रियमाण इति शेषः । तीर्थविशेषे वा ॥ २८ ॥

पूर्वे नृपा न उदायुः प्रापुः अपरे पश्चात्तना न प्राप्स्यन्ति इदानीन्तना नाप्नुवन्तीति किमु वक्तव्यं, तत्र दृष्टान्तमाह-बाहुभ्यामिति । अग्निष्टोमादिसाधनमन्तरेण केवलं बाहुभ्यां स्वर्गं यथा तथा "आकाशं त्रिदिवे व्योम्नि दिव्यपि" इति यादवः ॥ २९ ॥

स किरातादीन् म्लेच्छानब्रह्मण्यान् ब्राह्मणविरोधिनो नृपानहन् ॥ ३० ॥

असुरांश्च जित्वा येन भरतेन देवाः स्वौकांसि स्वस्थानानि भेजिरे सः नाम्ना पणिभिरसुरैः रसातलं नीता देवस्त्रियः पुनराहरत् आनीतवान् ॥ ३१ ॥

त्रिणवसाहस्रीः समाः सप्तविंशत्सहस्रपरिमितान् वर्षान् चक्रमाज्ञां "चक्रं सैन्यं जलावर्तः" इत्यादि "चक्रमाज्ञा रथाङ्गयोः" इति ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अश्वान् ववन्ध यज्ञार्थमिति शेषः ॥ २६—२९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

वाजिभिरश्वमेधैः ममतायाः पुत्रं पुरोधाय पुरोहितं कृत्वा अश्वान् ववंन्ध यज्ञार्थमित्यर्थः ॥ २५ ॥

साचीगुणे प्रकृष्टगुणवति देशे अग्निश्चितोऽभवत् यस्मिन् अग्निचयने कर्मणि सहस्रसङ्ख्या ब्राह्मणाः प्रत्येकं बद्धं बद्धं चतुरशीत्यधिकत्रयोदशसहस्राणि गा विभेजिरे प्रापुः बद्धं चतुरशीत्यग्रसहस्राणि त्रयोदश ॥ २६ ॥

देवानामपि मायां वैभवम् अत्यगात् अत्यशेत यतः गुरुं जगद्गुरुं हरिं च ययौ प्राप्तः । मायाचत्तर इति पाठे मायावैभवं तद्वतां श्रेष्ठः हरेरंशत्वात् ॥ २७ ॥

मृगान् श्रेष्ठगजान् भद्रमन्द्रमृगादयो गजजातिभेदा उच्यन्ते मष्णारे कस्मिंश्चित् कर्मविशेषे तीर्थविशेषे इति केचिदाहुः। चतुर्दशलक्षाणि अदात् । तथा च स्मृतिः "हिरण्येन परिवृतान् कृष्णान् शुक्लदतो मृगान् । मष्णारे भरतोऽददाच्छतं बद्धानि सप्त च" इति तेन सप्ताधिकशतबद्धान्येव चतुर्दशलक्षाणि भवन्तीति श्रीशुकदेवविवरणात् चतुर्दशलक्षाणां सप्ताधिकशतभागो यश्चतुरशीत्यधिकत्रयोदशसहस्रप्रमाणः स एव बद्धं भवतीत्यवसीयते. अत एव बद्धसंख्या श्लोकेनोक्ता "चतुर्दशानां लक्षाणां सप्ताधिकशतांशकः। बद्धं चतुरशीत्यग्रसहस्राणि त्रयोदश" इति ॥ २८ ॥ २९ ॥ ३० ॥

ये असुराः पुरा देवान् जित्वा रसौकांसि रसातलादिस्थानानि भेजिरे प्राप्ताः अत एव देवस्त्रियः रसातलं नीता नीतवन्तः तेभ्य एवासुरेभ्यः सकाशात् ताः स्त्रियः वलिभिः प्राणिभिः स्वप्रेष्यजनैः पुनः आहरत् आनिनाय आनीय च दिवि देवान् प्रापयामासेति भावः । पणिभिरिति पाठे पणिभिरसुरैर्द्वारभूतैःस्त्रियो नीताः ॥ ३१ ॥

त्रिणवसाहस्रीः सप्तविंशतिसहस्रं वत्सरान् व्याप्य चक्रं सेनाम् ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

॥ २५ ॥

साचिगुणे प्रकृष्टगुणयुक्ते देशे चितः यत्र अग्निचयने देशे वा भरतेन दत्ताः गाः सहस्रं ब्राह्मणाः बद्धशः चतुरशीत्यधिकैस्त्रयोदशसहस्रैरेकं बद्धं भवति प्रत्येकं बद्धं विभज्य जगृहुः ॥ २६ ॥

त्रयस्त्रिंशच्छतमश्वान्वध्वा नृपान् विस्मापयन् देवानामपि मायां प्रभुत्वशक्तिमत्यगात् गुरुं पूज्यं भगवन्तमाययौ जगाम ॥ २७ ॥

"हिरण्येन परिधृतान् कृष्णान् शुक्लदतो मृगान् । मष्णारे भरतो ददाच्छतं बद्धानिसप्त च" इतिश्रुत्युक्तान् सप्ताधिकशतं बद्धसङ्ख्याकान् मृगान् कर्मणि दत्तवान् तानेव चतुर्दशलक्षसङ्ख्याकत्वेन विवृत्य दर्शयति-मृगानिति । मृगान् गजान् भद्रमन्द्रमृगादयो गजजाति भेदाः मष्णारे इति श्रुतिपदं व्याचष्टे कर्मणीति ॥ २८ ॥

भरतस्य महत् श्रेष्ठं कर्म पूर्वे नृपाः नैवापुः नैव कृतवन्तः अपरे नैव प्राप्स्यन्ति नैव करिष्यन्ति यथा बाहुभ्यां त्रिदिवं नैवापुर्नैव प्राप्स्यन्ति ते अथवा जना इति शेषः ॥ २९ ॥

स सम्राट् लोकपालाख्यमैश्वर्यमधिराट् श्रियम्।
चक्रं (१)चास्खलितं प्राणान् मृषेत्युपरराम ह ॥ ३३ ॥
तस्यासन्नृप ! वैदर्भ्यः पत्न्यस्तिस्रः सुसम्मताः।
जघ्नुस्त्यागभयात्पुत्रान्नानुरूपा इतीरिते ॥ ३४ ॥
तस्यैवं वितथे वंशे तदर्थं यजतः सुतम्।
मरुत्स्तोमेन मरुतो भरद्वाजमुपाददुः ॥ ३५ ॥
अन्तर्वत्न्यां भ्रातृपत्न्यां मैथुनाय बृहस्पतिः।
प्रवृत्तो वारितो गर्भं शप्त्वा वीर्यमवासृजत् ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

म्लेच्छान् अब्रह्मण्यान् नृपांश्चाहन् हतवान् किञ्च पुरा असुराः देवान् जित्वा रसौकांसि रसातलानि भेजिरे प्राप्ताः तदा प्राणिभिर्वलिभिरसुरैर्देवस्त्रियो रसौकांसि नीता यास्ताः पुनराहरत् आनीतवान् ॥ ३० ॥ ३१ ॥

तस्य राज्ञः प्रजानां सर्वान् कामान् रोदसी द्यावापृथिव्यौ दुदुहतुः पूरयामासतुः त्रिणवसाहस्रीः समाः सप्तविंशति-सहस्रसम्वत्सरान् चक्रमाज्ञामवर्तयत् ॥ ३२ ॥

भाषा टीका।

और सोमतेय को पुरोहित बना कर श्रीगङ्गाजी के तट पर पचपन (५५) वाजि मेध यज्ञ करते हुए, तथा यमुना तटपर भी करते हुए ॥ २५ ॥

और अठहत्तर पवित्र अश्वों कों अर्थात् यज्ञोपयोगि अश्वों को धन देकर बांध लिये। दुष्यन्त के पुत्र भरत महाराज के अग्नि का चयन (स्थापन) बड़े गुण वाले देश में भया कि-जिस देश में सहस्र ब्राह्मणों को एक एक बद्व गायें प्राप्त हुईं। बद्व नाम (१३०८४) इतनी सङ्ख्या का है ॥ २६ ॥

भरत चक्रवर्ति ने एक सौ तेतीस (१३३) अश्वों को यज्ञ के निमित्त बांध कर अन्य राजाओं को विस्मय कराते हुए, दुष्यन्त के पुत्र राजा भरत महाराज देवों की माया को जीत गये क्योंकि साक्षात् श्रीहरि को प्राप्त हुए हैं ॥ २७ ॥

मृगनामक श्रेष्ठ जाति वाले शुक्ल दांतों वाले हस्तियों सुवर्ण के भूषणों से अलंकृत कर के मष्णार नामक कर्म के विषै चौदह नियुत दान किये। नियुत नाम एक लक्ष का है ॥ २८ ॥

चक्रवर्त्ती भरत महाराज के कर्म को न आज तक कोइ राजा लोग प्राप्त हुए और न आगे ऐसे कोई भी राजा लोग प्राप्त होंगे, जैसे हाथों से किसी को स्वर्ग नहीं प्राप्त हुआ, फिर वर्त्तमान समय में तो उनके यश को कौन प्राप्त हो सका है ॥ २९ ॥

और राजा भरत दिग्विजय में, किरात, हूण, यवन, अन्ध्र, कङ्क, कश, शक, और म्लेच्छ, इत्यादि जो २ अब्रह्मण्य राजा लोग रहे तिन सबों को मार डाले ॥ ३० ॥

पहिले समय में असुर लोग जो देवताओं को जीतकर देवताओं की स्त्रियों को और प्राणियों सहित रसातल को लेगये भरतजी उनको जीत कर फिर लाते हुए ॥ ३१ ॥

भरतजी के राजा होने पर पृथिवी और आकाश प्रजाओं के सब कामों को पूर्ण करते हुए, इस प्रकार सत्ताईस (२७) सहस्र वर्ष पर्यंत भरतजी की दिशाओं में आज्ञा फिरती भई ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

तस्य वैराग्येण मोक्षप्रकारमाह—स इति। मृषेति विचार्येति-शेषः ॥ ३३ ॥

नाऽनुरूपा मत्सदृशा न भवन्तीति भर्त्रा ईरिते सति व्यभिचार-शङ्कयाऽस्मान् त्यक्ष्यतीति भयात्पुत्रान् जघ्नुः पुनः पुत्राणां दर्शनेन वैसादृश्याऽनुसन्धानेन त्यजेन्नान्यथेत्याशयेन हतवत्यः ॥ ३४ ॥

वितथे व्यर्थे सति तदर्थं पुत्रार्थं मरुत्सोमेन यागेन यजतः तस्य प्रसन्नास्सन्तो मरुतो भरद्वाजं नाम पुत्रमुपाददुः समर्पया-मासुः ॥ ३५ ॥

मरुतां भरद्वाजागमप्रकारं प्रदर्शयन्नाह—अन्तर्वत्न्यामिति चतुर्भिः। अन्तर्वत्न्यां गर्भिण्यां भ्रातुरुतथ्यस्य पत्न्यां ममतायां चौर्येण मैथुनाय कदाचित्प्रवृत्तो बृहस्पतिस्तदा द्वितीयगर्भस्यावकाशाभावादाक्रोश-पूर्वकं गर्भस्थेन वारितस्ततः क्रुद्धो बृहस्पतिरन्धो भवेति तं गर्भं शप्त्वा बलाद्वीर्यं न्यषिञ्चत्ततो बृहस्पतेः शापाद्गर्भस्थो दीर्घतमाः

(१) जायास्सुतान् प्राणान् इति० वीर०

तं त्यक्तुकामां ममतां भर्तृत्यागविशङ्किताम् ।
नामनिर्वचनं तस्य श्लोकमेनं सुरा जगुः ॥ ३७ ॥
मूढे ! भरद्वाजमिमं भर द्वाजं बृहस्पते ! ।
यातौ यदुक्त्वा पितरौ भरद्वाजस्ततस्त्वयम् ॥ ३८ ॥
चोद्यमाना सुरैरेवं मत्वा वितथमात्मजम् ।
व्यसृजन्मरुतोऽबिभ्रन् दत्तोऽयं वितथेऽन्वये ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
पारमहंस्यां संहितायां वैयासिक्याम् पूरुवंशकीर्तने
विंशोऽध्यायः ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अन्धो बभूव तेन च तद्वीर्यं पार्ष्णिप्रहारेण योनेर्बहिर्निस्सारितं भूमौ पतितं सद्य एव कुमारोऽभवत् ॥ ३६ ॥

तं च परवीर्यजं भर्तुस्त्यागाद्विशङ्कितां सतीं त्यक्तुकामां ममतां प्रति सुरा एनं बृहस्पतेर्ममतायाश्च विवादरूपं श्लोकं जगुः किमर्थं जगुरत आह—तस्य नामनिरुच्यते येन तत् तन्नामनिर्वचनेनैव भर्तुस्त्यागशङ्कामपाकर्तुमित्यर्थः ॥ ३७ ॥

तत्र पुत्रं त्यक्त्वा यान्तीं ममतां बृहस्पतिराह, हे मूढे ! इमं पुत्रं भर पुषाण, भर्तुर्बिभेमीति चेत्तत्राऽऽह—द्वाजमेकस्य क्षेत्रेऽन्यस्य बीजादित्येवं द्वाभ्यां जातमतस्तस्मात्त्वयं पुत्र इति न तस्माद्भयशङ्केत्यर्थः । एवमुक्ता सती तं प्रत्याह—हे बृहस्पते ! त्वमिमं भर यतो द्वाजं द्वाभ्यामावाभ्यामन्यायतो जातम् अतो नाहमेकाकिनी भरामीत्यर्थः । यद्यस्मादेवमुक्त्वा पितरौ ममताबृहस्पती विवदमानौ पुत्रं परित्यज्य यातौ ततो हेतोरयं भरद्वाज इति । पाठान्तरे यस्य त्यागदुःखात् पितरौ यातावित्यर्थः ॥ ३८ ॥

वितथं व्यभिचारसम्भवात्तमात्मजं वितथं निरर्थकं मत्वा ममता व्यसृजत्तत्याज पाठान्तरे आद्विजं प्रथमजं भर्तुर्वीर्याज्जातमेव मुख्यमात्मजं मत्वा बृहस्पतेर्जातं तत्याजेत्यर्थः । एवं तया त्यक्तं मरुतोऽबिभ्रन्बिभरुः तदेवं मरुद्भिः प्राप्तोऽयं भरतस्यान्वये वितथे सति दत्तः ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
विंशोऽध्यायः ॥ २० ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं वर्तयन् स सम्राट् सार्वभौमो भरतः लोकपालानामैश्वर्यमतुलां स्वां श्रियम् अव्याहतमाज्ञाचक्रं प्राणांश्च मृषेत्यनित्या इति निश्चित्य उपरराम विरक्तो ऽभवत् ॥ ३३ ॥

हे नृप ! तस्य भरतस्य सुस्मताविस्रः पत्न्यः विदर्भस्य सुताः आसन् ताश्चैकैकं जातान् पुत्रान् मम नानुरूपाः सदृशा इमे पुत्रा न भवन्तीति भर्त्रा ऽभिहिते सति व्यभिचारशङ्कयाऽस्मान् त्यक्ष्यतीति भयार्ता जघ्नुः ॥ ३४ ॥

एवं तस्य भरतस्य वंशे वितथे व्यर्थे सति तदर्थं पुत्रार्थं मरुत्सोमाख्येन यागेन यजत आराधयतः तस्य प्रसन्नाः मरुतः भरद्वाजाख्यं सुतमुपादतुः समर्पयामासुः ॥ ३५ ॥

तस्य भारद्वाजनाम निर्वक्तुं कथामाह—अन्तर्वत्न्यामिति । कदाचित् बृहस्पतिः भ्रातुरुचथ्यस्य भार्यायामन्तर्वत्न्यां गर्भिण्यां ममताख्यायां मैथुनार्थं प्रवृत्तस्तदा द्वितीयगर्भावकाशाभावात् आक्रोशपूर्वकं गर्भस्थेन वारितस्ततः क्रुद्धो बृहस्पतिः दीर्घं तमः प्रवेक्ष्यसि अन्धश्च भविष्यतीति तं गर्भं शप्त्वा बलाद्वीर्यं न्यषिञ्चत् ॥३६॥

अतो बृहस्पतेः शापात् गर्भस्थो दीर्घतमा बभूव तेन च तद्वीर्यं पार्ष्णिप्रहारेण योनेर्बहिर्निस्सारितं भूमौ पतितम् सद्य एव कुमारो ऽभवत् तं च परवीर्यजं भर्तुस्त्यागाद्विशङ्कितां सतीं त्यक्तुकामां ममतां प्रति सुरा बृहस्पतेश्च ममतायाश्च विवादरूपं श्लोकमेतं "मूढे" इति वक्ष्यमाणं श्लोकं जगुः, किमर्थं जगुः ? इत्यत आह नामनिर्वचनं तस्येति नाम निरुच्यते येन प्रवृत्तिनिमित्तेन तन्नामनिर्वचनं तत्प्रतिपादकं श्लोकं जगुरित्यन्वयः यद्वा नाम निरुच्यते येन श्लोकेन तं जगुरित्यन्वयः तस्य नामनिर्वचनेनैव भर्तृत्यागशङ्कामपाकर्तुं जगुरित्यर्थः ॥ ३७ ॥

श्लोकमाह—मूढे इति । तत्र पुत्रं त्यक्त्वा यान्तीं ममतां बृहस्पतिराह—हे मूढे ! इमं पुत्रं भर पुषाण भर्तुर्बिभेमीति चेत् तत्राह द्वाजम् एकस्य क्षेत्रे अन्यस्य वीर्यादित्येवं द्वाभ्यां जातमतस्तस्यात्त्वयं पुत्र इति न तस्मादूभयशङ्केत्यर्थः । एवमुक्ता सती तं प्रत्याह, हे बृहस्पते ! त्वमेवेमं द्वाजं द्वाभ्यामावाभ्यामन्यायेन जातं भर नाहमेनं भरामीत्यर्थः । यत् यस्मादेवमुक्त्वा पितरौ ममताबृहस्पती विवदमानौ पुत्रं परित्यज्य यातौ ततो हेतोरयं भरद्वाजसंज्ञक इति ॥ ३८ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

एवं सुरैश्चोद्यमाना श्लोकगानपूर्वकं परिशङ्क्यमाना ममता तमात्मजं वितथं व्यभिचारजत्वान्निरर्थकं मत्वा व्यसृजत् मत्वाऽऽदितरमात्मजमिति पाठान्तरं तदा आदितरं प्रथमजं भर्तुर्वीर्य्याज्जातमेव मुख्यमात्मजं मत्वा वृहस्पतेर्जातन्तत्याजे-त्यर्थः । एवं तया त्यक्तं मरुतो बिभ्रन् आविभरुः तदेवं मरुद्भिः प्राप्तोयं भरतस्यान्वये वितथे सति दत्तः एवं च वितथा-ख्योपि बभूवेति भावः ॥ ३९ ॥

इतिश्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिकायाम्
विंशोऽध्यायः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भरतस्य वैराग्यप्रकारमाह—स इति । चक्रं राष्ट्रं प्राणा-निन्द्रियाणि लोकपालानामैश्वर्यं स्वराज्यादिकं च मृषा नाश-शिरस्कमिति मत्वा उपरराम उपरतव्यापारोऽभूत् "आब्रह्मस्तम्ब-पर्यन्तमसारञ्चाप्यनित्यकम्"इत्यादिवाक्यप्रसिद्धं सूचयति हेत्य-नेन ग्रन्थान्तरेतिहासं वा ॥ ३३ ॥

इदानीं तस्य सन्तानप्रकारं कथयति—तस्येति । वैदर्भ्यः विदर्भराजपुत्र्यः ते पुत्राः अनुरूपा अनुकूला न भवन्ति इति राज्ञा ईरिते कथिते ताः पत्न्यस्त्यागभयात्पुत्रांस्तान् जघ्नु-रित्यन्वयः ॥ ३४ ॥

नन्वेवं चेद्भरतस्य पुत्राभावेन परलोकक्षेमाभावः प्रसक्त इति तत्राह—तस्येति । तस्य वंशे एवं वितथे उत्सन्ने सति अनुरूपवंशवर्धनेन पुत्रेण भाव्यमिति तदर्थं पुत्रार्थं नाम्ना मरुत्स्तोमेन मरुद्धिपययज्ञेन यजतस्तस्य भरतस्य मरुतो नाम-देवाः गुणनिमित्तेन नाम्ना भरद्वाजं सुतमुपाददुः पुत्रत्वेन दत्तवन्तः ॥ ३५ ॥

कस्मादस्य भरद्वाजाख्यं येन तन्नामयुक्तः स्यादतस्तज्ज्ञापनाय तदुत्पत्तिप्रकारमाह—अन्तर्वत्न्येति । वृहस्पतेर्भ्रातुरुतथ्यस्य पत्न्या अन्तर्वत्न्या उतथ्याहितशुक्रं दधानया नाम्ना ममतया अन्त-र्गर्भिणीति वारितोपि मैथुनाय प्रवृत्तो वृहस्पतिरन्धो भवेदिति गर्भे शप्त्वा धिक्कृत्य स्ववीर्यं तस्यां ममतायामसृजत् अथादि-त्यन्वयः ॥ ३६ ॥

ततः किमभूदिति तत्राह—तमिति । तं वृहस्पतिगर्भं त्यक्तुं कामं, किमर्थम् ? उचथ्याख्यभर्तृत्यागशङ्किताम् ममताम्प्रति तस्य सुतस्य नाम्नो निर्वचनं येन ज्ञायते स तथा तं श्लोकं सुरा जगुरित्यन्वयः॥ ३७॥

भो मूढे इमं द्वाजं भर "भृभरणे" इति धातुः न त्यज उचथ्यस्य क्षेत्रजं वृहस्पतेर्जातमिति द्वयोः उचथ्यक्षेत्रवृहस्पत्यो र्जातत्वात् द्वाजमिति भरद्वाजनामानं क्रियापदस्य सुवन्तपद-सायुज्येन नामत्वं स्कन्दधर इत्यादौ द्रष्टव्यं धरस्कन्धेत्य-र्थोपपत्तेः "पुरीमवस्कन्द लुनीहि नन्दनं मुषाण रत्नानि हरामराङ्गनाः" इति दर्शनात् "स्कन्दगतिशोषणयोः" इति धातोः तदुक्तम् (१) द्वाजामिमं भर उचथ्यस्य क्षेत्रजो वृहस्पतेर्जात इति द्वयोर्जातत्वात् द्वाजः इति यद्वा वृहस्पतेर्वाजं प्रजार्थं सन्तातिं भरद्भरणशीलश्च इति वा वृहस्पतेर्निमित्ताद्भरद्वाजं प्रजासन्ततिं भरन् भरंश्चासौ वृहस्पतेर्वाजश्चेति विग्रहः भरतेः शविकरणत्वादभ्यासाभावः पितरौ दुःखात् भरत् भर्ता त्राता वृहस्पतेर्वाजतो वाजः वा शब्दस्य पूर्वनिपातो ज्ञातव्यः यथा वृहस्ततेर्जातः तथोचथ्यादपीत्यर्थः । ततः पितृभर्तृत्वात् वृहस्पतेर्वाजत्वादयं भरद्वाज इति । तदुक्तम् (२) वृहस्पतेर्वाजः प्रजासन्ततिर्येन भृता स वृहस्पेतभरद्वाज इति ॥ ३८ ॥

सा ममता सुरैरेवं चोद्यमाना भरेति प्रेर्यमाणापि तमा-त्मजं देवं वृहस्पतिं पुत्रात्मना जातं मत्वा भर्तृत्यागशङ्कया तमा-त्मजं व्यसृजत् ततो देवाः द्वाजं किमकुर्वन्निति तत्राह—मरुतइति । मरुतो देवास्तं द्वाजं गर्भमविभ्रन् भृतवन्तं इति भरद्वाजः तदुक्तम् "भरद्वाजो मरुद्भिश्च भृतो जातो द्वयोर्यतः" इति ममतायां वाजं गतं सृतं गर्भं मरुतोऽभरन्नित्यतो वा भरद्वाज इत्येषोऽर्थोऽप्यव-बोद्धव्यः, भृत्वा किं कृतं तैः ? इति तत्राह—दत्तइति । भरतस्या-न्वये वितथे सति मरुद्भिरयं भरताय दत्तः पुत्रत्वेनेति शेषः अस्य भरतपुत्रत्वानन्तरं वितथेति नामान्तरमपि ज्ञातव्यं "वित-थस्य सुतान्मन्योः" इत्युत्तरवचनाच्चेति ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
विंशोऽध्यायः ॥ २० ॥
(विजयध्वजरीत्या सप्तदशः ।)

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
विंशोऽध्यायः ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

लोकपालेभ्योप्यासम्यक् ख्यातिर्यत्र तथाभूतमैश्वर्य्यं प्राणात् बलहेतुकात् शौर्यात् अस्खलितं चक्रमाज्ञां च मृषा मिथ्याभूतं विचार्य्येति शेषः । उपररामेति सर्वं त्यक्त्वा वनं गत्वा भक्त्या भगवन्तमवापेत्यर्थः ॥ ३३ ॥

नानुरूपा न मत्सदृशा इमे इति भर्त्रा ईरिते सति व्यभिचारशङ्कया अस्मांस्त्यक्ष्यतीति भयात् पुत्रान् जघ्नुः ॥३४॥

तदर्थं वंशार्थं मरुत्सोमेन यज्ञेन यजतः यजते तस्मै मरुतो भारद्वाजं नाम पुत्रं उपाददुः निकटमानीय ददुः ॥ ३५ ॥

---

(१) तात्पर्ये (२) इदमपितात्पर्योक्तम् ।

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

भरद्वाज एव क इत्यपेक्षायामाह—अन्तर्वत्न्यामित्यादि । भ्रातुरुतथ्यस्य पत्न्यां ममतायां तदा द्वितीयगर्भस्यावकाशाभावाद्वाक्रोशपूर्वकं गर्भस्थेन वारितः ततः क्रुद्धो बृहस्पतिरन्धो भवेति तं गर्भस्थं शप्त्वा बलाद्वीर्यमादधौ ॥ ३६ ॥

ततो बृहस्पतेः शापाद्गर्भस्थो दीर्घतमा अन्धो बभूव तेन तद्वीर्यं पार्ष्णिप्रहारेण योनेर्बहिर्निस्सारितं भूमौ पतितं सद्य एव कुमारोऽभवत् तं तु परवीर्यजं त्यक्तुकामां भर्तुस्त्यागाद्विशंकितां ममतां प्रति सुरा बृहस्पतेर्ममतायाश्च संवादरूपं श्लोकं जगुः कीदृशं तस्य सुतस्य नाम निरुच्यते येन तम् ॥ ३७ ॥

पुत्रं त्यक्तुं यान्तीं ममतां बृहस्पतिराह—हे मूढे ! इमं पुत्रं भर पालय भर्तुर्बिभेमीति चेत्तत्राह—द्वाजम् एकस्य क्षेत्रे अन्यस्य बीजादित्येवं द्वाभ्यां जातम् अतस्तस्याप्ययं पुत्र इति न तस्माद्भयशङ्केत्यर्थः । ममता प्राह—हे बृहस्पते ! त्वमिमं भर यतो द्वाजं द्वाभ्यामावाभ्यामन्यायतो जातं तत्रापि मय्यकामायां ते तव बलात्कारात्त्वैवायं पुत्रो न मम वस्तुत इत्युक्त्वा पितरौ ममताबृहस्पती यतो यातौ गतौ ततो हेतोरयं तु भरद्वाज इति बद्धुःखादिति पाठे यस्य पुत्रस्य त्यागदुःखात् पितरौ यातौ ॥ ३८ ॥

सुरैरेवं चोद्यमाना हे ममते ! त्वं बृहस्पतेरुपपतेरात्मां पालयेति सोपहासमुक्त्वा तमात्मजं वितथं व्यर्थं मत्वा ममता लज्जया व्यसृजत् तत्याज आदिजमिति पाठे प्रथमजं बृहस्पतिजातमित्यर्थः । एवं तया त्यक्तं मरुतोऽबिभ्रन् अविभरुः भूत्वा च भरतस्यान्वये वितथे सति दत्तः ॥ ३९ ॥

इतिसारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
नवमे विंशतितमः सङ्गतः सङ्गतः सताम् ॥ २० ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स भरतः लोकपालाख्यमिन्द्राद्यैश्वर्यं मृषाऽनित्यं मत्वा प्राणान् प्राणवत्प्रियान् पुत्रादींश्च मृषाऽनित्यान् मत्वोपरराम लोकपालाख्यैश्वर्यात्कर्मफलात् अभिराट् श्रीप्रभृतिभ्यश्च वर्तमानेभ्यो विरक्तोऽभूदित्यर्थः । सर्वतो विरक्तः सन् भगवद्भजनेन मुक्तोऽभूदिति भावः ॥ ३३ ॥

कश्चित् कस्यचित्पुत्रान् प्रतिभरतेन एते अनुरूपा न भवन्ति तन्मात्रा सहिता त्यक्तुं योग्या इतीरिते सति त्यागभयात् पुत्रान् जघ्नुः उपायेन बन्ध्या बभूवुरित्यर्थः यतः सुसम्मताः सम्भाविताः ॥ ३४ ॥

तदर्थं पुत्रार्थं मरुत्सोमेन यागेन यजतो भरतस्य प्रसन्ना मरुतः भरद्वाजं सुतमुपाददुः ॥ ३५ ॥

यदा दैवात् काममोहितो बृहस्पतिः अन्तर्वत्न्यां गर्भिण्यां भ्रातुरुतथ्यस्य पत्न्यां ममतायां मैथुनाय प्रवृत्तः गर्भस्थेन वारितोऽपि त्वमन्धो भवेति गर्भे गर्भस्थं शप्त्वा बलाद्वीर्यमवासृजत् ततो गर्भस्थो दीर्घतमा अन्धो बभूव तेन तद्वीर्यं पार्ष्णिप्रहारेण योनेर्बहिर्निःसारितं सत् सद्यः कुमारोऽभवत् ॥ ३६ ॥

भर्तृत्यागविशङ्कितां परवीर्यजं त्यक्तुकामां ममतां प्रति तस्य बालस्य ममतानिर्दोषत्वद्योतकनाम निरुच्यते येन तमेतं ममताबृहस्पतिविवादरूपं श्लोकं भर्तृत्यागशङ्कानिवृत्त्यर्थं सुरा जगुः ॥ ३७ ॥

बालं त्यक्तुं यान्तीं ममतां बृहस्पतिराह—हे मूढे ! द्वाभ्यामावाभ्यां जातमिमं क्षेत्रजं स्वभर्तुः पुत्रं भर पुपाण नायं ममेति भावः ममताऽऽह, हे बृहस्पते ! द्वाजम् अहमन्तर्वत्नीत्वेन गर्मान्तरनिरपेक्षा त्वं च विषयसापेक्षः एवं निरपेक्षसापेक्षाभ्यां द्वाभ्यामावाभ्यां जातं भर न ममायं केनापि हेतुनेत्यर्थः । इत्थमुक्त्वा यतः पितरौ यातौ तस्मादयं भरद्वाजः ॥ ३८ ॥

एवं सुरैः चोद्यमाना उभयवाक्यगर्भितश्लोकगानेन निर्दोषायास्तव त्यागं नैवोतथ्यः करिष्यतीति प्रतिबोध्यमानेत्यर्थः । आदितः प्रथमं गर्भगतम् आत्मजं स्वपुत्रं मत्वा तं सद्यो जातं व्यसृजत्तत्याज एवं तया त्यक्तं मरुतोऽबिभ्रन् अविभरुः प्राप्तोयं भरतस्य अन्वये वितथे सति दत्तः अतो वितथसंज्ञोऽप्ययम् ॥ ३९ ॥

इतिश्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
विंशाऽध्यायार्थप्रकाशः ॥ २० ॥

———

भाषा टीका ।

वे सम्राट् अधिराज लोकपालाख्य अपने ऐश्वर्य को तथा श्री (सम्पति) को और सब दिशाओं में अप्रतिहत अपनी आज्ञा को तथा प्राणों को भी अनित्य समझ कर इन सब से उपराम को प्राप्त होते हुए ॥ ३३ ॥

हे नृप ! महाराज भरत की विदर्भ देश की तीन रानियें रहीं और राजा को बड़ी सम्मत भी रहीं । पर भर्त्ता ने जब उनों से कहा कि ये तुमारे पुत्र हमारे सदृश नहीं हैं तब उन रानियों ने "व्यभिचार की शङ्का से राजा हमारा त्याग कर देगा" इस भय से अपने पुत्र को मार डालीं ॥ ३४ ॥

इस प्रकार जब भरत का वंश वितथ (उच्छिन्न) हो चुका तब राजा ने पुत्र के अर्थ मरुत्सोम नामक याग से मरुतों का यजन किया तब मरुतों ने राजा को भरद्वाज पुत्र समर्पण किया ॥ ३५ ॥

वह भरद्वाज पुत्र कौन रहा सो कहते हैं, कि–एक समय देवताओं के गुरू श्रीबृहस्पतिजी महाराज, अपने भ्राता उतथ्य की ममता नामक गर्भवती भार्या से चोरी से मैथुन करने को प्रवृत्त हुए तब भीतर गर्भ में जो बालक रहा उसने निवारण किये, तब गुरुजी उसको "तू अन्धा होजा" ऐसा शाप देकर वीर्य भीतरमें छोड दिया, गर्भस्थ बालक अन्धा होगया पर उसने अपनी एडी की ठोकर से बृहस्पति के वीर्य को बाहर गिरा दिया भूमि में गिरतेही वह बालक होगया ॥ ३६ ॥

तब अपने पती के त्याग की शङ्का से उसपुत्रको छोडने की इच्छा वाली ममता के प्रति देवलोग इस एक श्लोक को बोलते हुए कि जिनमें उस पुत्रका नाम का निर्वचन निश्चय पूर्वक कथन होजावे ॥ ३७ ॥

देवताओं के कहे हुए श्लोक का यही अर्थ है कि "बृह-

भाषा टीका ।

स्पति ने कहा कि हे मूढे ! इस द्वाज "दोनों से उत्पन्न होनेवाले" को तू भर पोषण कर तब ममता भी बोली कि हे वृहस्पते ! हमारे और तुमारे दो के अन्याय से उत्पन्न होने वाले इस पुत्र को तुम पोषण करो ऐसा कह कर दोनो चले गये इसी बात से इसका नाम भरद्वाज भया ॥ ३८ ॥

इस प्रकार जब देव लोगों ने कही, तब ममता ने अपने पुत्र को वितथ अर्थात् निरर्थक मानकर परित्याग कर दिया तब उस पुत्रका मरुतों ने पोषण किया मरुत्स्तोमयाग से प्रसन्न होकर भरत के वंश को वितथ छिन्न होनेपर उस पुत्रको भरत को दिया इसी से उस पुत्रका नाम भी वितथ हुआ ॥ ३९ ॥

इति श्रीमद्भागवत नवमस्कन्ध में विंशोऽध्याय की श्रीवृन्दावनस्थ पं० भागवताचार्यकृत-भाषा टीका समाप्ता ॥ २० ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे विंशोऽध्यायः ॥ २० ॥

॥ एकविंशोऽध्यायः ॥

श्रीशुक उवाच ।

वितथस्य सुतो मन्युर्बृहत्क्षत्रो जयस्ततः ।
महावीर्यो नरो गर्गः सङ्कृतिस्तु नरात्मजः ॥ १ ॥
गुरुश्च रन्तिदेवश्च सङ्कृतेः पाण्डुनन्दन ! ।
रन्तिदेवस्य हि यश इहामुत्र च गीयते ॥ २ ॥
वियद्वित्तस्य ददतो लब्धं लब्धं बुभुक्षतः ।
निष्किञ्चनस्य धीरस्य सकुटुम्बस्य सीदतः ॥ ३ ॥
व्यतीयुरष्टचत्वारिंशदहान्यपिबतः किल ।
घृतपायससंयावं तोयं प्रातरुपस्थितम् ॥ ४ ॥
कृच्छ्रप्राप्तकुटुम्बस्य क्षुत्तृड्भ्यां जातवेपथोः ।
अतिथिर्ब्राह्मणः काले भोक्तुकामस्य चागमत् ॥ ५ ॥
तस्मै संव्यभजत्सोऽन्नमादृत्य श्रद्धयाऽन्वितः ।
हरिं सर्वत्र सम्पश्यन् स भुक्त्वा प्रययौ द्विजः ॥ ६ ॥
अथान्यो भोक्ष्यमाणस्य विभक्तस्य महीपते ! ।
विभक्तं व्यभजत्तस्मै वृषलाय हरिं स्मरन् ॥ ७ ॥
याते शूद्रे तमन्योऽगादतिथिः श्वभिरावृतः ।
राजन् ! मे दीयतामन्नं सगणाय बुभुक्षते ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एकविंशे तु दौष्यन्तेः सुतस्याऽन्वय उच्यते ।
रन्तिदेवाजमीढाद्यैर्यत्र कीर्तिः प्रतन्यते ॥ १ ॥

भरतस्यान्वये वितथे सति दत्तत्वाद्वितथसंज्ञो भरद्वाजः स च ब्राह्मणोऽपि भरतस्य दत्तः पुत्रो जात इति तद्वंशोऽनुक्रम्यते वितथस्य सुतो मन्युस्तस्माद्बृहत्क्षत्रजयमहावीर्यनरगर्गाः पञ्च पुत्रा बभूवुः ॥ १—२ ॥

वियद्वित्तस्य वियतो गगनादिवोद्यमं विना दैवादुपस्थितमेव वित्तं भोग्यं यस्य यद्वा वियद्व्ययं प्राप्नुवद्वित्तं भोग्यं यस्य तदेवाऽऽह, बुभुक्षतोऽपि सतो लब्धं लब्धं ददतः तत्प्रपञ्चयति, निष्किञ्चनस्येत्यादि सार्द्धैः पञ्चदशभिः ॥ ३ ॥

अपिबतो जलपानमप्यकुर्वतः घृतादित्रयाणां द्वन्द्वैक्यं तोयं च ॥ ४ ॥ ५ ॥ ६ ॥

अथान्यो वृषलोऽतिथिरागमत् विभक्तस्य कुटुम्बार्थमन्नादिकं विभक्तवतः ॥ ७ ॥

सगणाय श्वयूथसहिताय ॥ ८—९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

भरतस्य यो दत्तपुत्रस्तस्य वितथस्य यस्सुतो मन्युः तस्मात् मन्योर्बृहत्क्षत्रादयः गर्गान्तः पञ्च जज्ञिरे ततो जयः बृहत्क्षत्रानुजो जय

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्यर्थः । भारद्वाजस्य ब्राह्मणत्वेपि भरतस्यान्वये वितथे सति दत्तत्वाद्वितथसंज्ञस्सन् भरतस्य दत्तपुत्रोभूत्वा तद्वंशकरो जात इत्यभिप्रायेण मन्युप्रभृतीनां भारतत्वमत्रोच्यते तत्र नरस्यात्मजः सङ्कृतिः ॥ १ ॥

हे पाण्डुनन्दन ! संकृतेस्तु गर्गो रन्तिदेवश्चेति द्वौ सुतौ रन्तिदेवस्य कीर्त्तिस्तु इहाऽमुत्र च लोके गीयते ॥ २ ॥

कीदृशं तद्यशः ? इत्यपेक्षायां सङ्क्षेपेण तद्वृत्तान्तमाह—वियद्वित्तस्येति । वियतो गगनादिवोद्यमं विनैव दैवादुपस्थितमेव चित्तं भोग्यं यस्य यद्वा वियत् व्ययं प्राप्नुवद्वित्तं यस्य तदेवाह—बुभुक्षतः सम्प्रदानस्य शेषत्वविवक्षया षष्ठी भोक्तुमिच्छते लब्धं लब्धं यत् दैवाल्लब्धं तद्ददतः प्रयच्छतः अतएव निष्किञ्चनस्य सायन्तनश्वस्तनादिपरिग्रहराहितस्य सकुटुम्बस्य सीदतः कृशस्याथापि धीरस्य जितेन्द्रियस्य कदाचिदपिवन् जलपानमप्यकुर्वतः अष्टचत्वारिंशदहानि व्यतीयुः अतिक्रान्तानि बभूवुः कृच्छ्रं क्लेशं प्राप्तः कुटुम्बो यस्य क्षुत्तृड्भ्यां जातः वेपथुर्व्यथा यस्य तस्य दैवात् प्रातरुपस्थितं घृतादीनां द्वन्द्वैक्यं घृतादित्रयं तोयञ्च भोक्तुकामस्य सतः काले भोजनकाले कश्चिद्ब्राह्मणोऽतिथिरागमत् ॥ ३ ॥ ४ ॥ ५ ॥

स रन्तिदेव आदृतः आदरयुक्तः श्रद्धया चान्वितः सर्वत्र भूतेषु हरिं सम्पश्यन् सर्वं भूतजातं भगवदात्मकमनुसन्दधत् अन्नं घृतपायससंयावं तस्मै अतिथये संव्यभजत् विभज्य ददौ तदन्नं भुक्त्वा स द्विजो ययौ ॥ ६ ॥

अथ विभक्तस्य कुटुम्बार्थं तद्द्विजभुक्तावशिष्टमन्नादिकं विभक्तवतो भोक्ष्यमाणस्य सतः हे महीपते ! अन्यः कश्चिद्वृषलोऽतिथिरागमत् अथान्य इति पाठे दानायानर्हः तस्मै वृषलायातिथये विभक्तं कुटुंबार्थं विभक्तं पुनः व्यभजत् विभज्य ददौ ॥ ७ ॥

शूद्रे वृषले गते सति कश्चित् श्वभिरावृतः परिवृतोऽतिथिरागतः तं रन्तिदेवमाह—किमिति ? हे राजन् ! बुभुक्षते क्षुधार्दिताय सगणाय श्वयूथसहिताय मह्यमन्नं दीयतामिति अभ्यागादिति पाठे एवं वदन्नभ्यागच्छदित्यन्वयः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पूरोः सप्तदशमो दौष्यन्तिः तस्यान्वयः कथ्यते वितथस्येत्यादिना ॥ १ ॥

भरताद्दशमो रन्तिदेवः तस्य माहात्म्यम्भगवन्महिमोपचितत्वात्कथयति—रन्तिदेवस्येत्यादिना । च शब्दो दौष्यन्तिमहिम्ना समुच्चीयते ॥ २ ॥

कीदृशं यशः अनुत्तिजत्वाल्लुब्धमुतास्मीदिति संशयं निवारयति—वीतवित्तस्येति ! नितान्तवित्तस्य वस्तुशून्यस्य दरिद्रस्येत्यर्थः धनाभावे दानं [illegible] इति तत्राह लब्धमिति स्वय बुभुक्षाभावाद्ददाति न तु कर्त्तव्यत्वेनेति तत्राह बुभुक्षत इति भोगेच्छुक्षेत्रस्य: अन्यथा तदसम्भवादिति तत्राह निष्किञ्चनस्येति तर्हि भिक्षुवत् कृपण इत्यतो वाऽऽह निष्किञ्चनस्येति अकृपणस्य कथमवगतं तादिति तत्राह धीरस्येति अमद्विषयचिन्ता नास्तीत्यतोवाह—धीरस्येति । धिया सह रमते न तु स्त्रियेति धीरकृतस्य एकाकिनः का चिन्ता इति तत्राह सकुटुम्बस्येति अत एव सीदतः विश्यतः शीर्णस्य वा ॥ ३ ॥

शीर्णत्वे निमित्तमाह—अपिबन इति । घृतं च पायसं च गोधूमान्नं च घृतपायससंयावं प्रातरुपस्थितं प्राप्तमेतद्भोक्तुकामस्य काले भोजनसमये ॥ ४ ॥ ५ ॥

आहृत्य आनीय सर्वत्र व्याप्तं ब्राह्मणाय विभक्तस्यान्नस्य शेषं भोक्ष्यमाणस्य भोक्तुकामस्य महीपतेरन्योऽतिथिरागमत् पूर्वविभक्तमन्नं सगणाय गणसहिताय नमश्चक्रे हरये इतिशेषः ॥ ६—९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १—३ ॥

घृतेतिसार्द्धकम् । तदनन्तरं घृतादिकमुपस्थितं भोक्तुकामस्य ॥ ४—५ ॥

अन्नं पूर्वोक्तं घृतादिकमेव ॥ ६ ॥

पूर्वं हरिं सर्वत्र सम्पश्यन्नित्युक्तम् अधुना च तस्य तां करुणावाचमित्युच्यते तत्र सर्वत्रैव हरिमन्तर्यामितया सम्पश्यन्निति चेत् जीवदृष्ट्याभावेन करुणेयं तेषु विरुध्यते तस्मात्तं सर्वत्र परमकारुणिकतयैव सम्पश्यंस्तद्भावेन स्पृश्यमानः करुणायत इति लभ्यते अत एव ब्रह्मशिवाभ्यां तादृशगुणभक्ताभ्यां सह तदाविर्भावानन्तरं तद्भक्तिरेव फलिता वक्ष्यते "वासुदेवे भगवति भक्त्या चक्रे मनः परम्" इति केवलजीवकारुण्यं खलु विघ्नाय भवति भरतवत् तस्मान्न कामय इत्यादिना यो मोक्षानादरः सोपि तत्कारुण्यविभावनमयभक्तिकृत एवेति नायुक्तः स्यादिति ज्ञेयम् ॥ ७—१३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

एकविंशे पुरुवंश्यरन्तिदेवकथोच्यते ।

यस्य त्वौदार्यधैर्याभ्यां ह्यधीशास्तोषमाययुः ॥

वितथो भरद्वाजः स च ब्राह्मणोपि भरतस्य पुत्रस्तस्मात् मन्युः ॥ १—२ ॥

वियतो गगनादिव उद्यमं विना दैवादुपस्थितमेव वित्तं भोग्यं यस्य तत्रापि लब्धं ददतः बुभुक्षमाणस्यापि ॥ ३—६ ॥

विभक्तस्य विभक्तवतोमहीपतेरन्योऽतिथिरागतः ततश्च कुटुम्बाद्यर्थं विभक्तमेवान्नं तस्मै व्यभजत् विभज्य ददौ ॥ ७—९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एकविंशे भरतस्य रन्तिदेवादिकीर्तिर्निरूप्यते इति वितथस्य

स(१) आदृत्यावशिष्टं यद्बहुमानपुरस्कृतम्।
तच्च दत्वा नमश्चक्रे श्वभ्यः श्वपतये विभुः ॥ ९ ॥
पानीयमात्रमुच्छेषं तच्चैकपरितर्पणम्।
पास्यतः पुल्कसोऽभ्यागादपो देह्यशुभस्य मे ॥ १० ॥
तस्य तां करुणां वाचं निशम्य विपुलश्रमाम्।
कृपया भृशसन्तप्त इदमाहामृतं वचः ॥ ११ ॥
न कामयेऽहं गतिमीश्वरात्परामष्टर्द्धियुक्तामपुनर्भवं वा।
आर्तिं प्रपद्येऽखिलदेहभाजामन्तःस्थितो येन भवन्त्यदुःखाः ॥ १२ ॥
क्षुत्तृट् श्रमो गात्रपरिश्रमश्च दैन्यं क्लमः शोकविषादमोहाः।
सर्वे निवृत्ताः कृपणस्य जन्तोर्जिजीविषोर्जीवजलार्पणान्मे ॥ १३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

भरद्वाजस्य सुतो मन्युः तस्माद् बृहत्क्षत्रो जयो महावीर्यो नरो गर्गश्च जातः नरात्मजः सङ्कृतिः ॥ १ ॥ २ ॥

वियत् व्ययं प्राप्नुवत् वित्तं यस्य तस्य यतो लब्धं ददतः केनापि योगेन जलपानमप्यकुर्वतः ॥ ३ ॥

घृताश्विनां समाहारे द्वन्द्वः तोयं चोपस्थितं केनचिदानीय दत्तम् ॥ ४ ॥

कृच्छ्रं क्लेशं प्राप्तः कुटुम्बो यस्य ॥ ५ ॥ ६ ॥

अथ द्विजगमनानन्तरं विभक्तस्य कुटुम्बार्थमन्नादिकं विभक्तवतो भोक्ष्यमाणस्य भोक्तुमुद्दितस्य सतः अन्यो वृषलोऽतिथिरागमत् ॥ ७—११ ॥

भाषा टीका।

श्रीरुक्मिणीरमणनिशं हृदि चिन्तयामि ॥

श्रीशुक उवाच

श्रीशुकदेवजी वोले, कि उन भरत महाराज के पुत्र वितथ के सुत मन्यु हुए, तिनके पुत्रबृहत्क्षत्र जय, महावीर्य, नर और गर्ग, ऐसे पांच पुत्र हुए नरके संकृति हुए ॥ १ ॥

हे पाण्डुनन्दन ! संकृति के दो पुत्र गुरु रंतिदेव महाराज हुए कि जिनका यश इस लोक और परलोक में गाया जाता है ॥ २ ॥

वे रन्तिदेवराजा आकाशीवृत्ति से रहते रहे और जो मिलता जाय उसे२ देते जाते और सदा भूख से भोजन के इच्छा वाले रहते रहे वडे निष्किञ्चन तथा वडे धैर्य वाले रहे और कुटुम्ब सहित सदा दुःख पाते रहे ॥ ३ ॥

एक समय में उन राजा को अडतालीस (४८) दिवस व्यतीत हो चुके विना जलपान किये, अनन्तर प्रातः काल में घी दूध थूली वा मोहनभोग और जल, यह उपस्थित हुआ ॥ ४ ॥

कष्ठ को प्राप्त होरहा कुटुम्ब जिनका और क्षुधा तृषा से शरीर मे कम्प जिन के होती ऐसे रन्तिदेव के उसी दिवस भोजन करने की इच्छाकरी और अतिथी ब्राह्मण आया ॥ ५ ॥

रन्तिदेव महाराज ने आदर कर श्रद्धा. युक्त होकर यह अन्न उस ब्राह्मण को विभक्त कर दिया, और सो भी सर्व जीवमात्र में हरि को जान कर दिया वह ब्राह्मण भी भोजन कर चलागया ॥ ६ ॥

हे महीपते ! जो विभाग किये हुए में से अपने भाग में आया उसको भी जव भोजन करने को उद्युक्तहुए तव एक वृषल (शूद्र) आ गया तव अपने भाग को उस शूद्र में हरि वुद्धि कर उसको देदेते हुए ॥ ७ ॥

शूद्र के जानेपर कुत्तों को साथ लिये एक अतिथि भी राजा के समीप आया और वोला कि-हे राजन् ! मैं समूह सहित भूखा हूं आप मेरे अर्थ अन्न दीजिये ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

उच्छेषमुर्वरितम् एकमेव तर्पयतीति तथा ॥ १०—११ ॥

परदुःखासहिष्णुतया सर्वेषां दुःखं स्वयं भोक्तुमाशास्ते—नेति। अणिमाद्यष्टसमृद्धियुक्तां गतिमपि मोक्षमपि चाहं न कामये, तर्हि किं कामयसे ? तदाह—अखिलदेहभाजामार्तिं दुःखं तत्तद्भोक्तृरूपेणान्तःस्थितः सन्नहं प्रपद्ये प्राप्नुयामित्येवं कामये येन तद्दुःखभोक्त्रा मया हेतुभूतेन ते सर्वेऽदुःखा भवन्ति ॥ १२ ॥

ननु, दुःखं किमिति प्रार्थयसे परदुःखनिवृत्त्यैव मम सर्वदुःखनिवृत्तिरित्याह—क्षुत्तृडिति। कृपणस्य जन्तोर्जीवनहेतोर्जलस्यार्पणान्मे सर्वे क्षुत्तृडादयो निवृत्ताः ॥ १३ ॥

(१) आतिथ्यावशिष्टम् इति वीर० विज० ॥

इति प्रभाष्य पानीयं म्रियमाणः पिपासया ।
पुल्कसायाददाद्धीरो निसर्गकरुणो नृपः ॥ १४ ॥
तस्य त्रिभुवनाधीशाः फलदाः फलमिच्छताम् ।
आत्मानं दर्शयाञ्चक्रु (१) र्माया विष्णुविनिर्मिताः ॥ १५ ॥
स वै तेभ्यो नमस्कृत्य निस्सङ्गो विगतस्पृहः ।
वासुदेवे भगवति भक्त्या चक्रे मनः परम् ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इत्येवं प्रभाष्य ॥ १४ ॥

त्रिभुवनाधीशा ब्रह्मादयः मायास्तदीयधैर्यपरीक्षार्थं प्रथमं मायया वृषलादिरूपेण प्रतीताः सन्त इत्यर्थः ॥ १५ ॥

परं केवलं वासुदेवे भक्त्या मनश्चक्रे न तु तान् किमपि याचितवान् ॥ १६ ॥

———

श्रीमद्वीरराघवचार्यकृतभागवतचन्द्रचन्द्रिका ।

स विभू रन्तिदेवो यदाऽतिथ्यावशिष्टमन्नं तत् वहुमानपुरस्कृतं यथा तथा दत्त्वा श्वभ्यः शुनां पत्ये च तस्मै नमश्चक्रे भगवद्भावेनेति शेषः ॥ ९ ॥

अथोच्छेषमवशिष्टं पानीयमात्रं तदप्येकपरितर्पणं एकपुरुषमात्रतृप्तिकरं पास्यतस्ततः कश्चित्पुल्कस अशुभाय नीचाय मह्यमपः पानीयं जलं देहीति वदन्नभ्यागच्छत् ॥ १० ॥

तस्यापि पुल्कसस्यापि कृपणाः दीनाः विपुलः श्रमो याभ्यो ऽवगम्यते ता वाचः आकर्ण्य कृपया नितरां सन्तप्तो रन्तिदेव इदं वक्ष्यमाणममृततुल्यं वच आह ॥ ११ ॥

तदेव दर्शयति—न कामय इति द्वाभ्याम्। अष्टर्द्धियुक्ताम् अणिमाद्यष्टैश्वर्य्ययुक्ताम् ईश्वराणां ब्रह्मादीनां गतिं प्राप्तिम् अहं न कामये नेच्छामि नाप्यपुनर्भवं मोक्षं वा कामये किन्त्वखिलानां देहभाजां देहिनां क्षुत्पिपासार्दितानां अन्तःस्थितामार्तिं दुःखं प्रपत्स्ये प्राप्नुयामिति कामये सर्वेषां दुःखमहमेक एवानुभवेय—मित्याशास इत्यर्थः। किमेवं विधकामनयेत्यत आह—येन भवन्त्यदुःखा इति। येन दुःखभोक्त्रा मया हेतुभूतेन सर्वे देहभाजो निर्दुःखा भवन्ति येनास्मदनुभवेनेति वा ॥ १२ ॥

ननु, दुःखमिति प्रार्थयसे परदुःखनिवृत्त्यैव मम सर्वदुःखनिवृत्तेरित्याह—क्षुत्तृडिति। कृपणस्य दीनस्य जीवितमिच्छोः जन्तोर्जीवस्य जलार्पणेन जीवनहेतोर्जलस्यार्पणेनैव सर्वे क्षुत्तृडादयो निवृत्ता भवेयुरिति शेषः। जीवकलार्पणेनेतिपाठे ऽयमर्थः। जिजीविषोर्जन्तोर्मे जीवकलार्पणेनास्मत्प्राणदानेन क्षुधादयो निवृत्ताः स्युः मम प्राणानपि दद्यामित्यर्थः ॥ १३ ॥

स्वयं पिपासया म्रियमाणोऽपि एवमभाष्य धीरो निसर्गकरुणः निरुपाधिककृपावान् नृपो रन्तिदेवः पुल्कसाय तदेकपरितर्पणं पानीयं ददौ ॥ १४ ॥

फलमर्थकामादिरूपमिच्छतां कामयमानानां जनानां फलदास्त्रिभुवनस्याधीशाः ब्रह्मादयस्तस्य रन्तिदेवस्यात्मानं दर्शयाञ्चक्रुः प्रसन्ना बभूवुः विष्णुना विनिर्मितां मायां च दर्शयाञ्चक्रुः माया प्रकृतिः विष्णुविनिर्मितामित्युक्तत्वात् कार्यरूपा प्रकृतिः विवक्षिता, प्रकृत्यात्मविवेकज्ञानं ददुरित्यर्थः। यद्वा, तन्मनः परीक्षार्थं वृषलादिमायारूपमात्मानं दर्शयाञ्चक्रुरित्यर्थः ॥ १५ ॥

ततः स वै रन्तिदेवः तेभ्यः त्रिभुवनाधीशेभ्यो मायारूपेभ्यो वा नमस्कृत्य निस्सङ्गः देहतदनुबन्धिषु अहम्ममतारहितः विगतैहिकामुष्मिकफललिप्सुः परं केवलं वासुदेवे मनश्चक्रे॥ १६ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

घृतादिकं दत्त्वा पानीयमात्रमुच्छेषमवशिष्टं तदपि एकपरितर्पणम् एकस्य तृप्तिकरं न तु बहूनां पास्यतः पातुकामस्य पुल्कसो गोमांसभक्षकः ॥ १० ॥ ११ ॥

महर्द्धियुक्ताम् अगणितसमृद्धिस्वरूपकां योगेश्वराणां गतिमणिमादिलक्षणां महरादिलोकं वा न कामये न वाञ्छामि अपुनर्भवं मोक्षं वा, तर्हि कस्मिन् काङ्क्षा? इति तत्राह—आर्तिमिति। येन देहभाजो मयार्पितजलपानादिना क्षुधादिनिमित्तदुःखरहिता भवन्ति ये तेन तेषामन्तस्स्थितामार्तिमहं प्रपद्ये इत्यन्वयः। येन जलेनाऽदुःखाः तत्तेभ्यो दत्त्वा तदार्तिमद्याऽहं प्रपद्य इति वा ॥ १२ ॥

एवं भाषणमात्रेण किं फलमिति तत्राह—क्षुत्तृडिति। कृपणस्य जन्तोर्जीवस्य जलार्पणेन जीवनप्रदजलदानेन सर्वेषां सुखं स्यात् तदार्तिर्ममास्त्विति जिजीविषोर्जीवितुमिच्छतः पुंसः क्षुत्तृडादयो निवृत्ता भवन्तीत्यन्वयः। अनेन क्षुदादिमतः पुंसो जलादिदानेन दातुरपि तन्निवृत्तिस्तददाने तदनिवृत्तिरित्यन्वयव्यतिरेकौ द्रष्टव्यौ ॥ १३ ॥

पिपासया म्रियमाणः ॥ १४ ॥

आत्मानं मायां महिमोपेतं महिमापि भगवदनुग्रहविजृम्भित इत्याह विध्यवति ॥ १५ ॥ १६ ॥

(१) मायां विष्णुविनिर्मिताम् इति वीर० विज०

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

निसर्गकरुणा इति च निसर्गेण श्रीभगवत्करुणास्फूर्त्ति-मयस्वभावेन करुणः ॥ १४ ॥

यत एव तस्येति यतः सामान्यतः फलमिच्छतां फलदाः यत एवात्मप्रभूनयो विष्णुना भगवता स्वयमेव मायाः मायिकवृषलादिरूपेण निर्मिताः प्रत्यायिता इत्यर्थः । अतस्ते पुनरात्मानं यथार्थरूपं दर्शयाञ्चक्रुः । स वै स तु निःसङ्गः तद्दर्शनं विना फलान्तरभोगहरितः तत्र विगतस्पृहश्च भवान् तद्भक्तेषु च समपूज्यत्वदृष्ट्या नमस्कारमविशेषेणैव चक्रे तथापि परं श्रेष्ठं यथास्यात्तथा वासुदेवे भगवति मनश्चक्रे तत्र हेतुः भक्त्या तयोरपि तत्र सप्रेम महाभक्तिदृष्ट्येत्यर्थः ॥ १५—१६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

उच्छेषमुर्वरितम् एकमेव तृप्तीकरोति न तु द्वाविति स्वार्थं विभागाऽनर्हमिति भावः ॥ १० ॥

अमृतं वच इति तस्य केवलं वचो येन सश्रद्धं कर्णाभ्यां पीयते सोऽपि न म्रियते तेन देहेनैव सिद्ध्यति किं पुनस्तत्कर्मोऽनुतिष्ठासुरिति भावः ॥ ११ ॥

अन्तस्स्थितः सन् आर्त्तिं प्रपद्ये तैर्भोक्तव्यं दुःखमहमेव भुञ्जेय सर्वजीवानामपि समुदितं दुःखमहमेक एव भोक्तुमलमिति तद्दुःखं सह्यं परदुःखदर्शनं त्वसह्यमिति भावः ॥ १२ ॥

नन्वतिपिपासार्तोऽसि किञ्चिदवशिष्टं जलं स्वयं च पिबेत्यत आह—क्षुत्तृडिति । कृपणस्याऽस्य जन्तोर्जीवनहेतोर्जलस्यार्पणान्मम क्षुत्तृडादयो निवृत्ता एव ॥ १३—१४ ॥

त्रिभुवनाधीशा विष्णुब्रह्मरुद्राः तस्य धैर्य्यपरीक्षार्थं प्रथमं माया ब्राह्मणवृषलश्वपतीन् तत आत्मानं स्वस्वरूपं च ॥ १५ ॥

मनः परं श्रेष्ठं भगवद्रूपगुणादिध्यायित्वात् ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अष्टर्द्धियुक्तामणिमाद्यष्टैश्वर्य्ययुक्ताम् अपुनर्भवं चेत्त्रज्ञस्वरूपप्राप्तिं किम्बहुना परां परब्रह्मभावापत्तिलक्षणामपि अहं न कामये अखिलदेहभाजामार्त्तिं दुःखं अन्तःस्थितो ज्ञानव्याप्त्या तेषामन्तः प्रविष्टः प्रपद्ये प्राप्नुयामिति कामये येन सर्वार्तिभोक्त्रा हेतुभूतेन मया अखिलदेहभाजः अदुःखा भवन्ति ॥ १२ ॥

किञ्चिन्मात्रपरदुःखनिराकरणेन मम विविधदुःखनिवृत्तिर्भवतीत्याह–क्षुदिति । जीवजलार्पणात् जीवनार्थजलदानात् ॥ १३ । १४ ॥

त्रिभुवनाधीशाः ब्रह्मादयः तस्य रन्तिदेवस्य आत्मानं दर्शयाञ्चक्रुः दर्शयामासुः माया च यया अनादितो जीवो बद्धः सा विष्णुना विनिर्मिता प्रवर्तिता बहुवचनपाठे मायाया महदादिरूपेण बहुत्वात् ब्रह्मादिजीवान् वासुदेवं सर्वजीवमोहिनीं मायां च स ददर्शेत्यर्थः ॥ १५ ॥

सदृष्टतत्त्वत्रयो मायिकपदार्थेषु निस्स्पृहो ब्रह्मादीन्नमस्कृत्य वासुदेवे चित्तं नियोजितवान् तस्यानादितो बन्धनभूता माया निवृत्ताऽभूदित्याह—स इति द्वाभ्याम् ॥ १६ ॥

भाषा टीका ।

बडे समर्थ राजा रन्तिदेव ने बडे बहुमान पूर्वक देकर श्री हरि की भावनासे उनश्वानों को और स्वामी के पति को नमस्कार किया ॥ ९ ॥

अब केवल पीने को जल अवशिष्ट बाकी रहगया सो भी एक ही के तृप्ति लायक रहा, जब उसको पीने लगे इतने ही में एक पुल्कस (नीचजाति का कोईमनुष्य अभ्यागत चलागया और बोला कि मो अशुभ को जलदो ॥ १० ॥

रन्तिदेवजी ने उस की बडे श्रम युक्त और अति दीन ऐसी वाणी को सुनकर कृपा से अति तृप्त होकर इस अमृत वाणी को बोलते हुए ॥ ११ ॥

रन्तिदेव महाराज बोले कि मैं ईश्वर से अपनी अष्ट ऋद्धियों से युक्त उत्कृष्ट गति को नहीं चाहता हूं और अपुनर्भव जो मोक्ष है उस को भी नहीं चाहता हूं और किन्तु हे ईश्वर ? सब देहधारियों के भीतर स्थित होकर सबों की पीडा को मै ही प्राप्त होऊं कि जिस में सर्व प्राणिमात्र निर्दुःखहो जांय ॥ १२ ॥

यदि कहो कि दुःख क्यों मांगते हो ? इस समय इस जीने की इच्छा वाले दीन प्राणी के जल देने से मेरे क्षुधा, तृषा, श्रम, गात्र का परिश्रम, दीनता, ग्लानि, शोक विषाद, और मोह ये सब ही दुःख निवृत होगये ॥ १३ ॥

इस प्रकार वचन बोलकर, आप स्वयं पिपासा से मर रहे हैं तो भी उस पुलकस को परम धैर्य स्वाभाविक करुणा से रन्तिदेव महाराज ने जलदिया ॥ १४ ॥

शुक मुनि कहते हैं कि राजा रन्तिदेव की पहिले तो वृषलादि रूप अपनी माया से धैर्य की परीक्षा करी पश्चात् वे ही फल की इच्छावालों को फल देने वाले त्रिभुवन के अधीश विष्णु के विनिर्मित माया ब्रह्मादिक अपना दर्शन देते हुए ॥ १५ ॥

रन्तिदेव महाराज ने उनको नमस्कार कर लिया और सर्व सङ्गों को तथा स्पृहाओं को छोडकर केवल एक भगवान् वासुदेव के विषै भक्ती से मन को लगाते हुए॥ १६॥

ईश्वरालम्बनं चित्तं कुर्वतोऽनन्यराधसः ।
माया गुणमयी राजन् ! स्वप्नवत्प्रत्यलीयत ॥ १७ ॥
तत्प्रसङ्गानुभावेन रन्तिदेवानुवर्त्तिनः ।
अभवन् योगिनः सर्वे नारायणपरायणाः ॥ १८ ॥
गर्गाच्छिनिस्ततो गार्ग्यः क्षत्राद्ब्रह्म ह्यवर्तत ।
दुरितक्षयो महावीर्यात्तस्य त्रय्यारुणिः कविः १९ ॥
पुष्करारुणिरित्यत्र ये ब्राह्मणगतिं गताः ।
(१)बृहत्क्षत्रस्य पुत्रोऽभूद्धस्ती यद्धस्तिनापुरम् ॥ २० ॥
अजमीढो द्विमीढश्च पुरुमीढश्च हस्तिनः ।
अजमीढस्य वंश्याः स्युः प्रियमेधादयो द्विजाः ॥ २१ ॥
अजमीढाद्बृहदिषुस्तस्य पुत्रो बृहद्धनुः ।
बृहत्कायस्ततस्तस्य पुत्र आसीज्जयद्रथः ॥ २२ ॥
तत्सुतो विशदस्तस्य सेनजित्समजायत ।
रुचिराश्वो दृढहनुः काश्यो वत्सश्च तत्सुताः ॥ २३ ॥
रुचिराश्वसुतः पारः पृथुसेनस्तदात्मजः ।
पारस्य तनयो नीपस्तस्य पुत्रशतं त्वभूत् ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अनन्यराधस ईश्वराऽतिरिक्तफलान्तरानपेक्षस्य प्रत्यलीयताऽऽत्मन्येव लीना बभूव ॥ १७—१८ ॥

मन्युसुतस्य नरस्य वंशमुक्त्वा तत्सुतस्यैव गर्गस्य वंशमाह, गर्गादिति । महावीर्यस्य वंशमाह—दुरितक्षयस्तस्य त्रय्यारुणिः कविः पुष्करारुणिश्चेति त्रयः पुत्राः ॥ १९ ॥

कथम्भूताः ये अत्र क्षत्रवंशे ब्राह्मणगतिं ब्राह्मणरूपतां गतास्ते. मन्युपुत्राणां पञ्चानां ज्येष्ठस्य वंशमाह—बृहत्क्षत्रस्येति यत् येन हस्तिनापुरं कृतमित्यर्थः ॥ २० ॥

अजमीढादयस्त्रयो हस्तिनः पुत्राः ॥ २१ ॥

अजमीढादेवान्यः पुत्रो बृहदिषुर्नामाऽभवत् ॥ २२—२३ ॥

पारस्य तनयो नीपः नीपस्य पुत्रशतम् ॥ २४ ॥

श्रीमद्वीरराघवचार्यकृतभागवतचन्द्रचन्द्रिका।

ईश्वरेति । अनन्यराधसा अनन्यप्रयोजनेन भावेन चित्तमीशालम्बनं वासुदेवनिष्ठं कुर्वतस्तस्य रन्तिदेवस्य हे राजन् ! त्रिगुणात्मिका माया स्वप्नवत्प्रलीयत न्यवर्त्तत स प्रकृतिसम्बन्धान्मुक्तो बभूवेत्यर्थः ॥ १७ ॥

किमुत तस्य रन्तिदेवस्य यः प्रसङ्गस्तस्यानुभावेन प्रभावेन हेतुना रन्तिदेवमनुवर्तमानाः सर्वेऽपि योगिनः, योगित्वमेवाह, नारायणपरायणा बभूवुः ॥ १८ ॥

एवं नरस्य वंश उपवर्णितः, अथ गर्गस्य वंशमाह—गर्गादिति। गर्गाच्छिलो जज्ञे शिनिरिति पाठान्तरं तस्मात्तु गार्ग्यः तत्र ततो गार्ग्याद्ब्रह्म ब्रह्मकुलमवर्तत पुत्रादिपरम्परया प्रावर्ततेत्यर्थः । अथ महावीर्यस्यान्वयमाह—महावीर्यात् दुरितक्षयो जज्ञे तस्य दुरितक्षयस्य त्रय्यारुणिः कविः ॥ १९ ॥

पुष्करारुणिश्चेति त्रयः पुत्राः, कथम्भूताः ? येऽत्र क्षत्रवंशे ब्राह्मणगतिं ब्राह्मणरूपतां गताः प्राप्ताः अथ ज्येष्ठस्य बृहत्क्षत्रस्य वंशमाह—बृहत्क्षत्रस्य पुत्रोऽभूदित्यादिना । बृहत्क्षत्रस्य पुत्रो हस्ती बभूव यत् येन हास्तिनं पुरं कृतमितिशेषः । स हस्ती बभूवेत्यर्थः ॥ २० ॥

हस्तिनस्सुता अजमीढादयः त्रयः पुत्राः तत्र अजमीढस्य वंश्याः वंशजाः प्रियमेधादयो द्विजा बभूवुः ॥ २१ ॥

अजमीढादेवान्यः पुत्रो बृहदिषुर्नामाभवत् तस्य बृहदिषोः सुतो बृहद्धनुः तस्य सुतो बृहत्कायः तस्य बृहद्रथः पुत्र आसीत् ॥ २२ ॥

तत्सुतो बृहद्रथसुतः विशदः तस्य विशदस्य तस्मादिति पाठे विशदात्फेनजित् समजायत तत्सुताः फेनजित्सुताः रुचिराश्वादयश्चत्वारः ॥ २३ ॥

(१) बृहत्क्षत्रात्सुहोत्र इति विज० वीर० ॥

स कृत्व्यां शुककन्यायां ब्रह्मदत्तमजीजनत् ।
(१)स योगी गवि भार्यायां विष्वक्सेनमधात्सुतम् ॥ २५ ॥
जैगीषव्योपदेशेन योगतन्त्रं चकार ह ।
उदक्स्वनस्ततस्तस्माद्भल्लादो बार्हदीषवाः ॥ २६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्र रुचिराश्वस्य सुतः प्राज्ञः तदात्मजः प्राज्ञसुतः पृथुसेनः तदात्मजः पृथुसेनतनयः पारः तत्तनयः पारतनयः नीपस्तस्य नीपस्य पुत्रशतमभूत् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ईश्वरालम्बनं श्रीनारायणविषयम् अनन्यराधसः भगवत्सिद्धिमन्तरेणान्यसिद्धिशून्यस्य तदेकनिष्ठस्येत्यर्थः । अन्यस्माद्राधः सिद्धिर्मुक्तिः तया रहितस्य भगवत् एवापेक्षिताऽशेषपुरुषार्थवतः प्रत्यलीयत नष्टाऽभूत् माया संसाराख्या ॥ १७ ॥

तस्य रन्तिदेवस्य प्रसङ्गः कथालक्षणः तस्यानुभावेन भावसूचकेन "अनुभावः प्रभावे स्यान्निश्चये भावसूचके" इति यादवः ॥ १८ ॥

ब्रह्म ब्राह्मणकुलं नाम्ना दुरितक्षयः तस्य त्रैय्यारुणिः कविः पुष्करारुणिश्चेति त्रयः पुत्रा ये ते अत्र क्षत्रवंशे ब्राह्मणगतिं ब्राह्मणरूपतां गताः भरतप्रपौत्रस्य बृहत्क्षत्रस्य वंशान्तरमाह, बृहत्क्षत्रस्येति । नाम्ना हस्ती यत् येन हस्तिनापुरं कृतमिति शेषः ॥ १९—२७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अनन्यराधस इति "आर्ति प्रपद्येऽखिलदेहभाजाम्" इति च मिथः पूर्वमुक्तत्वैन सङ्गच्छते प्रत्यलीयत ततोऽन्तर्हितवती "ऋतेऽर्थं यत् प्रतीयेत" इति न्यायेन ॥ १७ ॥

तादृशीं भगवद्भक्तिं कैमुत्येन प्रशंसति तत् प्रसङ्गेति ॥१८–२४॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तदेवाऽऽह–ईश्वरेति । अनन्यराधसः अन्यदेवाद्याराधनशून्यस्य स्वप्नवत् स्वप्नो यथा स्वत एव लीयते तथैवेत्यर्थः ॥ १७ ॥ १८ ॥

मन्युसुतस्य नरस्य वंशमुक्त्वा तद्भ्रातृणां गर्गादीनां वंशमाह–गर्गादिति ॥ १९—२४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स्वप्नवत् स्वत एव माया प्रत्यलीयत स मुक्तो बभूवेत्यर्थः अहो अत्यद्भुतं सर्वत्र हरिदर्शनमाहात्म्यमिति प्रकरणार्थः ॥ १७ ॥ १८ ॥

गर्गान्मन्युपुत्रात् क्षत्रान्मन्युपुत्रात् महावीर्यान्मन्युपुत्रात् ॥१९॥ बृहत्क्षत्रस्य मन्युपुत्रस्य ॥ २०—२४ ॥

भाषा टीका ।

हे राजन् ! श्री हरि के अतिरिक्त और फल की इच्छा नहीं करने वाले, और सदा ईश्वर में चित्त लगाने वाले, रन्तिदेव जी को त्रिगुणमयी माया स्वप्न सरी की लीन हो गई ॥ १७ ॥

और उन रन्तिदेव के प्रसङ्ग के प्रभाव से रन्तिदेव के अनुवर्ति लोग सब योगी और नारायण परायण हो गये ॥१८॥

अब, मन्यु के पुत्र गर्ग का वंश कहते हैं । गर्ग से शिनि हुए, तिन से गार्ग्य हुए, क्षत्र से ब्रह्म कुल वर्तता हुआ और मन्यु के पुत्र महावीर्य के दुरितक्षय हुए तिन के त्रय्यारुणि, कवि, पुष्करारुणि, ये तीन पुत्र हुए, जो कि–तीन पुत्र इस क्षत्रिय वंश में ब्राह्मण रूपता को प्राप्त होते हुए, और मन्यु के ज्येष्ठ पुत्र बृहत्क्षत्र हुए तिन के पुत्र हस्ती होते भये जिन ने हस्तिना पुर बसाया ॥ १९ ॥ २० ॥

राजा हस्ती के पुत्र अजमीढ, द्विमीढ और पुरुमीढ हुए, अजमीढ के वंश में प्रियमेधादिक द्विज हुए ॥२१॥

अजमीढ से बृहदिषु हुए, तिन के पुत्र बृहद्धनु हुए, तिन से बृहत्काय पुत्र हुए, तिन के पुत्र जयद्रथ होते हुए ॥२२॥

जयद्रथ के सुत विशद हुए तिन के सेनजित्पुत्र उत्पन्न हुए, सेनजित के रुचिराश्व, दृढधनु, काश्य, और वत्स, ये पुत्र हुए ॥ २३ ॥

रुचिराश्व के सुत पार हुए, तिन के आत्मज पृथुसेन हुए, और पार के पुत्र नीप हुए तिन के सौ (१००) पुत्र होते भये ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स एव कृत्व्यां कृत्वीसंज्ञायां शुककन्यायां ब्रह्मदत्तं जनयामास, तदुक्तं हरिवंशादिषु—

"पराशरकुलोत्पन्नः शुको नाम महायशाः ।
व्यासादरण्यां सम्भूतो विधूमोऽग्निरिवोज्ज्वलन् ॥
स तस्यां पितृकन्ययां वीरिण्यां जनयिष्यति ।
कृष्णं गौरप्रभं शम्भुं तथा भूरिश्रुतं जयम् ॥
कन्यां कीर्तिमतीं षष्ठीं योगिनीं योगमातरम् ।

(१) योगीशो गवि इति वीर० विज० ।

यवीनरो द्विमीढस्य कृतिमांस्तत्सुतः स्मृतः ।
नाम्ना सत्यधृतिर्यस्य दृढनेमिः सुपार्श्वकृत् ॥ २७ ॥
सुपार्श्वात्सुमतिस्तस्य पुत्रः सन्नतिमांस्ततः ।
कृती हिरण्यनाभाद्यो योगं प्राप्य जगौ स्म षट् ॥ २८ ॥
संहिताः (१) प्राच्यसाम्नां वै नीपो ह्युग्रायुधस्ततः ।
तस्य क्षेम्यः सुवीरोऽथ सुवीरस्य रिपुञ्जयः ॥ २९ ॥
ततो बहुरथो नाम पुरुमीढोऽप्रजोऽभवत् ।
नलिन्यामजमीढस्य नीलः शान्तिः सुतस्ततः ॥ ३० ॥
शान्तेः सुशान्तिस्तत्पुत्रः पुरुजोऽर्कस्ततोऽभवत् ।
भर्म्याश्वस्तनयस्तस्य पञ्चासन् मुद्गलादयः ॥ ३१ ॥
यवीनरो बृहदिषुः काम्पिल्यः सञ्जयः सुताः ।
भर्म्याश्वः प्राह पुत्रा मे पञ्चानां रक्षणाय हि ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ब्रह्मदत्तस्य जननीं महिषीमणुहस्य च" ॥ इति

यद्यपि शुक उत्पत्त्यैव विमुक्तसङ्गो निर्गतस्तथाऽपि विरहातुरं व्यासमनुयान्तं दृष्ट्वा छायाशुकं निर्माय गतवांस्तदभिप्रायेणैव गार्हस्थ्यादिव्यवहार इत्यविरोधः स ब्रह्मदत्तो योगी गवि वाचि सरस्वत्याम् ॥ २५ ॥

स एव योगतन्त्रं चकार बार्हदीषवा बृहदिषोर्वंश्या इमे दीर्घत्वमार्षम् ॥ २६ ॥

सुपार्श्वकृत्सुपार्श्वस्य पिता ॥ २७ ॥

प्राच्यसाम्नां षट् संहिता जगौ विभज्याध्यापितवान् ॥२८-२९॥

अजमीढस्य वंश्याः प्रियमेधादयः केचिद् ब्राह्मणा बभूवुर्बृहदिषुप्रभृतयः क्षत्रियाश्चेति वंशद्वयमुक्तम् । तस्यैव वंशान्तरमाह, नलिन्यामिति यावत्समाप्ति ॥ ३०—३१ ॥

मुद्गल एको यवीनरादयश्चत्वार इत्येवं पञ्च ॥ ३२—३३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स नीप एव शुककन्यायां श्रीशुकस्य कन्यायां दुहितरि कृतिसंज्ञायांब्रह्मदत्ताख्यं सुतमजीजनत् जनयामास अत्र तस्य पुत्रशतमभूदित्यस्यानन्तरं क्वचित् "अणुहो नाम यस्तेषां ज्येष्ठः सत्यरथो नृप" इति पठ्यते, तत्र हे नृप! तेषां पुत्राणां शते यो ज्येष्ठः सोऽणुहः स एव सत्यरथापरनामधेय इत्यर्थः । शुककन्यायामित्यनेन शुकस्याप्यत्र सन्तान उक्तः । तथा चोक्तं हरिवंशादिष्वपि—

"पाराशरसुतोत्पन्नः शुको नाम महायशाः ।
व्यासादरण्यां सम्भूतो विधूमाग्निरिव ज्वलन् ॥
स तस्यां पितृकन्यायामिरिण्यां जनयिष्यति ।
कृष्णं गौरं प्रभुं शम्भुं तथाभूतश्रुतं जयम् ॥
कन्यां कीर्तिमतीं षष्ठीं योगिनीं योगमातरम् ।
ब्रह्मदत्तस्य जननीं मानुषीम्" इत्यादि—

यद्यपि शुक उत्पत्तेरारभ्य विमुक्तसङ्गो निर्गतस्तथापि विरहातुरं व्यासम् अनुयान्तं दृष्ट्वा छायाशुकं निर्माय गतवान् तदभिप्रायेणैवायं गार्हस्थ्यादिव्यवहार इत्यविरोध इत्याचक्षते स च ब्रह्मदत्तः गवि सरस्वत्यां भार्यायां विष्वक्सेनाख्यं सुतमगात् प्राप्तवान् अजीजनदिति यावत् ॥ २५ ॥

स एव जैगीषव्यस्योपदेशेन योगतन्त्रं योगशास्त्रं चकार ततो विष्वक्सेनादुदक्स्वेनस्तस्मादुदक्स्वेनात् भल्लाटः बार्हदीषवः इमे उक्तास्सर्वे बृहदिषोरजमीढसुतस्य वंशजा इत्यर्थः । दीर्घत्वमार्षम् ॥ २६ ॥

अथ द्विमीढस्य वंशमाह—द्विमीढस्य सुतो यवीनरः तत्सुतो यवीनरसुतः धृतिमान् ततो धृतिमतः सत्यधृतिस्तस्मात्सत्यधृतेः दृढनेमिः स च सुपार्श्वकृत् सुपार्श्वस्य पितेत्यर्थः। तत्पुत्रः सुपार्श्व इति यावत् ॥ २७ ॥

सुपार्श्वात् सुमतिः तस्य सुमतेः पुत्रः सन्नतिमान् ततः सन्नतिमतः कृतिः, तं विशिनष्टि—यः कृतिर्हिरण्यनाभात् योगं साम्नां षट् संहिताश्च प्राप्य जगौ अध्यापितवान् तस्य कृतेः सुत उग्रायुधः तस्योग्रायुधस्य सुतः क्षेम्यः अथ क्षेम्यात्सुवीरस्तस्य सुतो रिपुञ्जयः ॥ २८ ॥ २९ ॥

ततो रिपुञ्जयात् बहुरथो नाम जज्ञे एवमजमीढद्विमीढयोर्वंशावभिधाय पुरुमीढस्त्वपुत्रोऽभवदित्याह—पुरुमीढो ऽप्रजो ऽभवदिति। अजमीढस्य वंश्याः प्रियमेधादयः केचिद्ब्राह्मणा बभूवुः बृहदिषुप्रभृतयः क्षत्रियाश्चेति वंशद्वयमुक्तं तस्यैवेदानीं वंशान्तर-

(१) प्राप्य इति वीर०

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

माह—नलिन्यामिति यावत्समाप्ति । अजमीढस्य नलिन्यां भार्यायां नीलः तत्सुतो नीलसुतस्तु ॥ ३० ॥

शान्तपुत्रः सुशान्तिः तत्पुत्रः पुरुजः पुरुजात्तर्कः तत्सुतोऽर्क-सुतो भर्म्याश्वः तस्य भर्म्याश्वस्य पुत्रः मुद्गल एकः ॥ ३१ ॥

यवीनरादयश्चत्वारश्चेति पञ्चाऽऽसन् जज्ञिरे तेषां पञ्चाल-संज्ञितत्वं वक्तुं तन्निमित्तं पितृवचोरूपमाह—भर्म्याश्व इति । भर्म्याश्वः प्राह पुत्रानितिशेषः । किमिति ? हे पुत्राः ! मे मम पञ्चानां विषयाणां शब्दादीनां देशानां वा रक्षणाय इमे यूयमलं प्रभव इति. यत एवं पित्रोक्ता अतस्ते पञ्चालसंज्ञिताः पञ्चालेति संज्ञा एषां सञ्जातेति तथा तारकादित्वादितच् तत्र मुद्गलात् ब्रह्मगोत्रं ब्राह्मण-कुलं निर्वृत्तमुत्पन्नं तद्विशिनष्टि मौद्गल्यसंज्ञितमिति ॥३२॥३३॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्राच्यसाम्नां द्वादशसंहिताः जगौ ॥ २९—३६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नीपस्यैव बहुकालव्यवधानेन व्यूढायां शुककन्यायां वंशा-न्तरमाह—स कृत्व्यामिति । शुककन्यायामित्यत्र न तु मम कन्या-यामित्युक्तमिति स्वस्मादन्योऽसौ शुक इति बोधयति—तच्च युक्तं ब्रह्मवैवर्त्तवर्णितस्वयंश्रीभगवन्महानुग्रहपात्रत्वात्तत एव विष्णुरातवत्पराक्तातिपरब्रह्मणा दत्तत्वेन तद्ब्रह्मरातत्व-सम्भवात्तस्यैव श्रीभागवतवक्तृत्वं सम्भवति नाऽन्यस्य कल्प-भेदव्यवस्थया भारतादिवर्णितस्याऽरणिसम्भवस्य किमुत छायाशुककल्पितस्येति । अत्र ब्रह्मवैवर्तेतिहासोऽयं किञ्चित् किञ्चित् प्रोच्यते—

"प्राप्ते कलियुगे व्यासश्चक्रे यो जगतः कृते ।
महाभारतमाख्यानं सर्ववेदार्थसंग्रहम्" ॥

इत्यादि. तथा—

"ब्रह्मचर्यं परिभ्रंशे मातृवाक्यादुपस्थिते ।
स्वयं पितृऋणालानं छिपवत् सोढुमक्षमः ॥
विचिन्त्य मनसा चक्रे भार्यां जाबालिकन्यकाम् ।
वीटिकाख्यां ददौ तस्मै सोऽपि वैखानसाश्रमी ॥
चक्रे तया सह तप ऋतुगामी तदेच्छया ।
अथ गर्भोऽभवत्तस्मात्तस्यां स ववृधे शनैः ॥
कलाभिः शुक्लपक्षे वै हिमद्युतिरिव द्विज ! ।
द्वादशाब्दानि जातानि न प्रसूतेस्म सा तदा ॥
कृष्णद्वैपायनप्रोक्तं वेदवेदार्थसंग्रहम् ।
पुराणं भारतं धर्मशास्त्रं तदश्रृणोद्द्विज ॥
तत् सर्वं प्रज्ञया गर्भश्चक्रे हृदि पपाठ च ॥
गर्भसंस्थोऽपि कुरुते न तु निष्क्रमणे मतिम् ।
साचगर्भभराक्रान्ता" ॥

इत्यादि—

"अथ द्वादशमे वर्षे कृष्णद्वैपायनो मुनिः ।
उपविश्य कृतस्नानो गर्भमामन्त्र्य सामभिः ॥
सम्बोधयामास तदा वचोभिर्युक्तिभावितैः ।

॥ व्यास उवाच ॥

यत् त्वं मदीयगृहिणीमधुनाऽतिकाल—
माविश्य पीडयसि गर्भतया यथार्थम् ।
तद्ब्रूहि निष्क्रमसि नाम कथं न ? मूढ ! ।
किं मारयिष्यति विरुद्धकरस्त्वमेताम् ॥

गर्भ उवाच ॥

रत्नोऽहमस्मि सुरपक्षेत्यादि—

भ्रान्तोऽहं तेषु सर्वेषु कोऽहं त्वाञ्च ब्रवीमि किम् ।
साम्प्रन्त मानुषो भूत्वा जठरेऽस्या अवस्थितः ॥
तद्व्यास ! न करिष्यामि गर्भान्निष्क्रमणं बहिः ।
नात्मानं चेष्टयिष्यामि दीनचित्तो ऽजमायया ।

इत्यादि;

॥ व्यास उवाच ॥

यद्येव मस्त्यभिमतं तव तर्हि निग्धात्-
निष्क्रम्य तुल्यनरकादिह गर्भवासात् ॥
सम्यक् समाश्रय महोदयहेतुमेकं—
श्रीप्राणनाथमुभयोः कुरु वा विवेकम् ॥

॥ गर्भ उवाच ॥

ज्ञानं विवेकमभवमस्ति च तावदेव-
वैराग्यमन्यभवसंस्मरणञ्च तावत् ॥
यावन्न निष्क्रमति जन्तुरितो निबद्धो-
देवस्य चित्तनिलयस्य न मायया स्यात् ॥

इत्यादि;

॥ व्यास उवाच ॥

माया भविष्यति न ते पुरुषोत्तमस्य ।
वक्त्रं प्रदर्शय निजं मम वत्स ! शीघ्रम् ॥

इत्यादि;

॥ गर्भ उवाच ॥

यद्येत्य मे स भविता प्रति भूर्मुरारि—
र्मायामहार्णविषये यदुवंशनाथः ॥
गर्भं विहाय तदहं बहिरद्य भावी ।
नैवान्यथा कथमपीति विनिश्चयो मे ॥

इत्यादि;

॥ सूत उवाच ॥

इत्थं तदीय वचनं द्विज शुश्रुवान् सः-
व्यासोऽति दुःखितमना प्रययौ तदानीम् ॥
नारायणं व्रजवासिनो हृदि तस्य हेतो—
रानेतुमीप्सदनिवृत्तमतिर्भवाब्धेः ॥
तत्र त्रिलोकमहितेन कृतप्रणामः—
कृष्णेन विश्वसुहृदा द्विजदैवतेन ॥
प्राप्तार्हणो निखिलमात्मह्रदिस्थमस्मै—
व्यासो न्यवेदयदसावपि तत् प्रपेदे ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

कर्त्तव्यमेतदिह नाम कियन्मदीयं—
गेहं पवित्रयितुमद्य तवागतस्य ॥
तीर्थस्य जङ्गमगतिं दधतोत्तरङ्ग-
जंबालशोधनपटोरिति चाह वाचम् ॥
नारायणापचितिभाजनमेवमेष—
भूत्वा ययौ द्विजवरः सह कृष्णयुक्तः ॥
प्राह प्रविश्य पुनरेव स कान्दिशीकः—
किञ्चित् परानुभवधिष्ठितगर्भशङ्की ॥

व्यास उवाच ॥

अयमस्त्यागतो गर्भ ! द्वारवत्या गदाधरः ।
गृहीत्वैनं प्रतिभुवं निष्क्रयं कुरु पुत्रक ! ।

गर्भ उवाच ॥

त्वं ब्रूहि माधव ! जगन्निगडोपमेय—
मायाऽखिलस्य न विलङ्घ्यतमा त्वदीया ॥
बध्नाति मां न यदि गर्भमिमं विहाय—
यास्यामि सम्प्रति बहिः प्रतिभूस्त्वमत्र ॥
आब्रह्म विश्वमखिलं तव माययैव—
बद्धं त्वयैव भवदुःखहरस्त्वमेव ॥

इत्यादि ;

॥ सूत उवाच ॥

इत्थं तदीय वचसा भगवान् प्रतीतः—
प्राह प्रहस्य शनकैरिति वाचमीशः ॥
मन्मायया न भविता तव सम्प्रयोगो—
योगावृताङ्ग ! कुरु निष्क्रमणं विशङ्कम् ॥
गन्तासि मोक्षमधुनैव मम प्रसादात्—
जीवन्नवाप्स्यति महोदयसौख्यमङ्ग ॥
यं तं वदन्ति मुनयो बहु दुःख योग—
बुद्धिर्वियोगमवियोगकरं मया यत् ॥
वाक्यावसान मनुविश्य ततस्तु गर्भा—
त्तस्या झटित्यथ विनिर्गत एव योगी ॥
स द्वादशाब्दमितवेषवयाः प्रणम्य—
व्यासं हरिं स्वजननीमथ सम्प्रतस्थे ॥

ततश्च पितापुत्रसम्वादानन्तरम्—

॥ श्रीभगवानुवाच ॥

व्यास ! त्वदीयतनयः शुकवन्मनोज्ञं ब्रूते—
वचो भवतु तच्छुक एव नाम्ना ॥
हर्म्येव वत्स्यति तथापि न माययायं—
स्पृष्टो यतो मम कथा हृदि मास्य शोकम् ।
यामो गृहं वयमपि प्रकुरुष्व वाक्यं—
यत् त्वामयं परमभागवतोऽभ्युवाच ॥ इति.
इत्थं जगत्त्रयगुरुः पुरुषोत्तमस्तं—
सम्बोध्यबोधनिधिमाशुरथाधिरूढः ।
आमन्त्र्य भारत ! कार्वि द्विजवर्यमुच्चै-
स्तां द्वारकां सुरपुरीं द्रुतमाजगाम ॥

इति ॥ २५ ॥ २६ ॥ २७ ॥
योगं प्राप्स्येति तत्प्रभावादेव जगौ ॥ २८ ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

स एव नीपः पुनरपि कृत्वीसंज्ञायां शुककन्यायामिति शुकोऽयं व्यासादरण्यां सम्भूतोऽन्य एव । तदुक्तं हरिवंशादिषु

"पराशरकुलोत्पन्नः शुको नाममहायशाः ।
व्यासादरण्यां सम्भूतो विधूमोऽग्निरिव ज्वलन् ॥
स तस्यां पितृकन्यायां वीरिण्यां जनयिष्यति ।
कृष्णं गौरं प्रभुं शम्भुं तथा भूरिश्रुतं जयम् ॥
कन्यां कीर्तिमतीं षष्ठीं योगिनीं योगमातरम् ।
ब्रह्मदत्तस्य जननीं महिषीमणुहस्य च" ॥ इति ।

श्रीभागवतवक्ता शुकस्तु व्यासस्य प्रथमः पुत्रोऽरणिसम्भूतादन्यः । यदुक्तं ब्रह्मवैवर्ते—

"प्राप्ते कलियुगे व्यासश्चक्रे यो जगतः कृते" ।

महाभागवतम्—

इत्याद्यनन्तरम्

"ब्रह्मचर्यपरिभ्रंशे मातृवाक्यादुपस्थिते ।
स्वयं पितृऋणालानं द्विपवत् सोढुमक्षमः ॥
विचिन्त्य मनसा चक्रे भार्यां जाबालिकन्यकाम् ।
वीटिकाख्यां ददौ तस्मै सोऽपि वैखानसाश्रमी ॥

ततश्च व्यासस्तया सह बहुकालं तपस्तेपे तदन्ते तस्यां वीर्य-माधत्त साच गर्भवती एकादशसु वर्षेषु व्यतीतेष्वपि न प्रसूतेस्म । अथ द्वादशे वर्षे व्यासः कदाचिद्गर्भस्थं पुत्रमाह—भोः पुत्र ! किं स्वमातरं पीडयसि गर्भान्निःसरेति । सचाह, गर्भान्निःसृतं मायामामभिभविष्यति तस्मादत्रैव भगवन्तं ध्यायामीति व्यास आह, माया न त्वामभिभविष्यतीति. मद्वचनमेव प्रमाणीकृत्य गर्भान्निःसर स्वमुखं मां दर्शय मत्पत्नीं मा पीडयेति. स आह, पत्नीपुत्राद्यासक्तत्वेन त्वामपि मायाभिभूतं जानाम्यतस्त्वद्वचनं न प्रमाणीकरोमि । व्यास आह, तर्हि कस्य वाक्यं प्रमाणी कुरुषे । स आह—यस्य मायेति । व्यास आह-तर्हि तमत्रैवाऽऽनयामीत्युक्त्वा द्वारकां गत्वा निवेदितसर्ववृत्तान्तं भगवन्तं स्वपर्णशालाभ्यन्तरमानीय व्यासः पुनराह-भोःपुत्र ! आयातोऽयं भगवानिति, ततः स आह—

"त्वं ब्रूहि माधव ! जगन्निगडोपमा सा—
मायाऽखिलस्य न विलङ्घ्यतमा त्वदीया ॥
बध्नाति मां न यदि गर्भमिमं विहाय—
यास्यामि सम्प्रति बहिः प्रतिभूस्त्वमत्र " ॥

इति भगवानाह—

"मन्मा यया न भविता तव सम्प्रयोगो—
गन्तासि मोक्षमधुनैव मम प्रसादात् " ॥ इति ।

ततो गर्भान्निस्सृत्य प्रणम्य बहुस्तुवानन्तं दृष्ट्वा भगवानाह-

व्यास ! त्वदीयतनयः शुकवन्मनोज्ञं—
ब्रूते वचो भवतु तच्छुक एव नाम्ना ॥

इति व्यासमामन्त्र्य रथमारुह्य द्वारकां प्रतस्थे— शुकोऽपि प्रवव्राज व्यासस्तमनुजगामेति । श्रीस्वामिचरणास्तु अरणीसम्भूतः शुक एव विरहातुरं पितरमनुव्रजन्तमालक्ष्य छायाशुकं निर्माय प्रवव्राज छायाशुकस्यैव गार्हस्थ्यव्यवहार इत्याहुः । स ब्रह्मदत्तो गवि सरस्वत्याम् ॥ २५ ॥

विषयाणामलमिमे इति पञ्चालसंज्ञिताः ।
मुद्गलाद्ब्रह्मनिर्वृत्तं गोत्रं मौद्गल्यसंज्ञितम् ॥ ३३ ॥
मिथुनं मुद्गलाद्भार्म्याद्दिवोदासः पुमानभूत् ।
अहल्या कन्यका यस्यां शतानन्दस्तु गौतमात् ॥ ३४ ॥
तस्य सत्यधृतिः पुत्रो धनुर्वेदविशारदः ।
शरद्वांस्तत्सुतो यस्मादुर्वशीदर्शनात्किल ॥ ३५ ॥
शरस्तम्बे ऽपतद्रेतो मिथुनं तदभूच्छुभम् ।
तद् दृष्ट्वा कृपयाऽगृह्णाच्छन्तनुर्मृगयां चरन् ।
कृपः कुमारः कन्या च द्रोणपत्न्यभवत्कृपी ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां
संहितायां वैयासिक्यां नवमस्कन्धे
एकविंशोऽध्यायः ॥ २१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

स एव योगतन्त्रं चकार इमे बार्हदीषवा बृहदिषोर्वंश्याः दीर्घत्वमार्षम् ॥ २६ ॥

सुपार्श्वकृत् सुपार्श्वजनकः ॥ २७—२९ ॥

अजमीढस्य वंशान्तरमाह—नलिन्यामिति ॥ ३०—३३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

शुककन्यायां छायाशुकस्य दुहितरि स ब्रह्मदत्तः गवि भार्यायां विष्वक्सेनं सुतमध्यगात् प्राप्तवान् ॥ २५ ॥

स एव योगतन्त्रं चकार ततो विष्वक्सेनात् बार्हदीषवा बृहदिषोरजमीढसुतस्य वंश्याः दीर्घत्वमार्षम् ॥ २६ ॥

हस्तिपुत्रस्य द्विमीढस्य वंशमाह—यवीनर इत्यादिना । सुपार्श्वकृत् तस्य पुत्रः सुपार्श्व इत्यर्थः ॥ २७ ॥

प्राच्यसाम्नां षट्संहिताः जगौ विभज्याध्यापयामास ॥ २८ ॥ २९ ॥

पुरुमीढो हास्तिपुत्रोऽप्रजोऽभवत् हस्तिपुत्रस्याजमीढस्य वंश्याः प्रियमेधादयः केचित् द्विजाः बभूवुः तेऽप्योऽन्ये बृहदिषुवंश्याश्चेति वंशद्वयमुक्तम् तस्यैव सिंहावलोकन न्यायेन वंशान्तरमाह—नलिन्यामित्यादिना ॥ ३० ॥

अर्कतनयो भार्म्याश्वः तस्य मुद्गलादयः पञ्च ॥ ३१—३३ ॥

भाषा टीका ।

कालान्तर में वही राजा नीप, कृत्वी ऐसे नामवाली शुक की कन्या में ब्रह्मदत्त (शुक) को उत्पन्न करते हुए, वह शुक (छायाशुक) योगी गौ (सरस्वती) नामक भार्या के विषें विष्वक्सेन पुत्रको धारण करते हुए ॥ २५ ॥

और जैगीषव्य के उपदेश निमित्त योगतन्त्र को करते हुए, तदनन्तर उनसे उदक्स्वन पुत्र हुए, तिन से भल्लाद हुए, ये सब बृहदिषु के वंश के हुए ॥ २६ ॥

द्विमीढ के पुत्र यवीनर हुए, तिन के सुत कृतिमान् कहाये तिन के पुत्र नाम से सत्यधृति हुए, तिनके पुत्र दृढनेमि हुए, और दृढनेमि से सुपार्श्व हुए ॥ २७ ॥

सुपार्श्व से सुमति हुए, तिन के पुत्र संगतिमान् होते हुए, तिनसे कृती जो हिरण्यनाम से योग को प्राप्त होकर प्राच्य साम की षट् संहिताओं को पढाते हुए, तिन से नीप हुए तिन के क्षेम्य हुए, तिनसे सुवीर हुए सुवीर- के पुत्र रिपुंजय हुए ॥ २८ ॥ २९ ॥

तिनसे बहुरथ हुए, पुरुमीढ के सन्तान नहीं भई । अब अजमीढ का वंशान्तर कहते हैं, अजमीढ के नलिनी भार्या में नील पुत्र हुए, तिन से शान्ति हुए ॥ ३० ॥

शान्ति के सुशान्ति हुए, तिनके पुत्र पुरुज हुए, तिनके अर्क हुए, तिनके तनय भर्म्याश्व हुए, तिनके मुद्गलादिक पांच पुत्र होते हुए ॥ ३१ ॥

मुद्गल, यवीनर, बृहदिषु, काम्पिल्य, और सञ्जय ये पांच पुत्र हुए, अपने पुत्रों को देखकर सन्तुष्ट होकर एक समय भर्म्याश्व बोलते हुए, कि— ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

भार्म्याद्भर्म्याश्वपुत्रात् मिथुनं चाभूत् तदेवाऽऽह—दिवोदासः पुमानहल्या च कन्यकेति ॥ ३४—३६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
एकविंशोऽध्यायः ॥ २१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेव सङ्क्षेपेण दर्शयति—मिथुनमिति । भार्म्यात् भर्म्याश्वसुतात् मुद्गलात् मिथुनं स्त्रीपुंसमभूत् तत्र पुमान् दिवोदासः कन्यकात्वहल्या, तां विशिनष्टि । यस्यामहल्यायां गौतमात् भर्त्तुः शतानन्दो जज्ञे ॥ ३४ ॥

तस्य शतानन्दस्य पुत्रः सत्यधृतिः स च धनुर्वेदविशारदः तत्सुतः सत्यधृतिसुतः शरद्वान् तं विशिंषन् तन्नामनिमित्तं तद्वंशश्चाह—यस्मादित्यादिना यावत्समाप्ति । उर्वश्या अप्सरसो दर्शनात् हेतोर्यस्मात् शरद्वतो रेतः शरस्तम्बे शरवालस्तम्बे न्यपतत् अतः स शरद्वान्नामा बभूवेति भावः । तच्च पतितं रेतः शिवं शुभाचारं मिथुनं स्त्रीपुंसमभूत् शन्तनुः राजा यदृच्छया मृगयां चरन् तन्मिथुनं दृष्ट्वा कृपया अगृह्णात् गृहीत्वा ररक्षेत्यर्थः । तत्र मिथुने कुमारः कृपः कृपाचार्यः कन्या तु कृपी सा च द्रोणाचार्यस्य पत्नी ॥ ३५ ॥ ३६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
एकविंशोऽध्यायः ॥ २१ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम् ।
एकविंशोऽध्यायः ॥ २१ ॥
(विजयध्वजरीत्या अष्टादशः ।)

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
एकविंशोऽध्यायः ॥ २१ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

भार्म्यात् भार्म्याश्वपुत्रान्मुद्गलात् ॥ ३४—३५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
नवमस्यैकविंशोऽयं सङ्गतः सङ्गतः सताम् ॥ २१ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भार्म्यात् भर्म्याश्वपुत्रात् ॥ ३४—३६ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
एकविंशाऽध्यायार्थप्रकाशः ॥ २१ ॥

———

भाषाटीका ।

हमारे पांचों पुत्र पांचों देशों की रक्षा करने को अलं (समर्थ) हैं । इसी कारण से उनके देश का नाम पांचाल पड़ गया । मुद्गल से ब्राह्मणों का मौद्गलसंज्ञक गोत्र चल पड़ा ॥ ३३ ॥

भर्म्याश्वके पुत्र मुद्‌गल से मिथुन (स्त्रीपुरुष) उत्पन्न भया, तिस में दिवोदास पुरुष हुए, और अहिल्या कन्या भई जिसमें गौतम से शतानन्द हुए ॥ ३४ ॥

तिन दिवोदास के धनुर्वेद विशारद शतधृति नामक पुत्र हुए तिनके पुत्र शरद्वान् हुए, जिन से उर्वशी अप्सरा के दर्शन से शरस्तम्ब (मुंज के पुंज) में बहुत सुन्दर मिथुन (स्त्री पुरुष का युगल) उत्पन्न हुआ, शन्तनु महाराज सिकार खेलने गये रहे, उस पुत्र और कन्या को देखकर कृपाकर घरले आये उनमें जो कुमार रहा सो कृपाचार्य हुए, और कन्या जो रही सो द्रोणाचार्य की पत्नी कृपी भई ॥ ३५ ॥ ३६ ॥

इति श्री मद्भागवत नवमस्कन्ध में एकविंश अध्यायकी
श्री वृन्दावनस्थ पं० भागवताचार्य कृत
भाषा टीका समाप्त ॥ २१ ॥

———

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे एकविंशोऽध्यायः ॥ २१ ॥

॥ द्वाविंशोऽध्यायः ॥

श्रीशुक उवाच ।

मित्रायुश्च दिवोदासाच्च्यवनस्तत्सुतो नृप ! ।
सुदासः सहदेवोऽथ सोमको जन्तुजन्मकृत् ॥ १ ॥
तस्य पुत्रशतं तेषां यवीयान्पृषतः सुतः ।
द्रुपदो द्रौपदी तस्य धृष्टद्युम्नादयः सुताः ॥ २ ॥
धृष्टद्युम्नाद्धृष्टकेतुर्भार्म्यार्ः पञ्चालका इमे ।
योऽजमीढसुतो ह्यन्य ऋक्षः संवरणस्ततः ॥ ३ ॥
तपत्यां सूर्यकन्यायां कुरुक्षेत्रपतिः कुरुः ।
परिक्षित्सुधनुर्जन्हुर्निषधाश्वः कुरोः सुताः ॥ ४ ॥
सुहोत्रोऽभूत्सुधनुषश्च्यवनोऽथ ततः कृती ।
वसुस्तस्योपरिचरो बृहद्रथमुखास्ततः ॥ ५ ॥
(१)कुशाम्बमत्स्यप्रत्यग्रचेदिपाद्याश्च चेदिपाः ।
बृहद्रथात्कुशाग्रोऽभूदृषभस्तस्य तत्सुतः ॥ ६ ॥
जज्ञे सत्यहितोऽपत्यं पुष्पवांस्तत्सुतो जहुः ।
अन्यस्यां चापि भार्यायां शकले द्वे बृहद्रथात् ॥ ७ ॥
ते मात्रा बहिरुत्सृष्टे जरया चाभिसन्धिते ।
जीव जीवेति क्रीडन्त्या जरासन्धोऽभवत्सुतः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्वाविंशे तु दिवोदासवंशमुक्ताऽथ वर्णिताः ।
ऋक्षवंशे जरासन्धपार्थदुर्योधनादयः ॥
॥ १ ॥

तस्य सोमकस्य पुत्राणां शतं बभूव तेषां जन्तुर्ज्येष्ठो यवीयान् पृषतः ॥ २ ॥

अजमीढस्यैव वंशान्तरमाह—य इति । ततः संवरणात्कुरुः ॥ ॥ ३—४ ॥

तस्य कृतिनः उपरिचरो वसुः ततो वसोः बृहद्रथो मुखमादिर्येषां ॥ ५ ॥

तानेवाह—कुशाम्बेति । तत्सुतः पुष्पवान् जज्ञे तस्यापत्यं सत्यहित इति योज्यम् ॥ ६—७ ॥

जरया राक्षस्या ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं मुद्गलस्य दुहितृसन्तानमभिधायाथ पुत्रसन्तानमाह—मित्रायुश्चेति । दिवोदासात् मौद्गल्यात् मित्रायुर्जज्ञे तत्सुता मित्रायुसुताः हे नृप ! च्यवनादयश्चत्वारः तत्र सोमकः कनीयान् स च जन्तोः जन्म कृतवानिति तथा सोमकस्य सुतो जन्तुरित्यर्थः ॥ १ ॥

(१) कसुम्भमत्स्य इति वीर०

श्रीमद्वीरराघवचार्यकृतभागवतचन्द्रचन्द्रिका ।

न केवलं जन्तुरेव तस्य पुत्रः अपि तु जन्तुज्येष्ठं शतमित्याह–तस्येति । तस्य सोमकस्य पुत्रशतमभूत् तेषां पृषदः कनीयान् जन्तुस्तु ज्येष्ठ इति शेषः । पृषदात्तु द्रुपदः यस्य द्रुपदस्य सुताः धृष्टद्युम्नादयः ॥ २ ॥

इमे धृष्टद्युम्नादयः पञ्चालकाः पञ्चालसंज्ञिकमुद्गलवंशप्रसूतत्वात्पाञ्चालकाः अजमीढस्य पुनर्वंशान्तरमाह–य इति । अजमीढस्याऽन्यो यः सुतः ऋक्षाख्यस्ततः ऋक्षात्सम्वरणः ॥ ३ ॥

सम्वरणाच्च तपत्याख्यायां सूर्यकन्यायां कुरुर्जज्ञे स च कुरुक्षेत्रस्य पतिः कुरोः सुतास्तु परीक्षिदादयः ॥ ४ ॥

तत्र सुधनुषः सुतः सुहोत्रोऽभूत् अथ सुहोत्राच्च्यवनः ततः च्यवनात्कृतिः तस्य कृतेरुपरिचरो वसुः उपरिचरवसुः कृतीति पाठान्तरं तदा तस्य कृतिनः ततः उपरिचरवसोः बृहद्रथो मुखमादिर्येषां ते जज्ञिरे ॥ ५ ॥

तानाह–कुसम्भेति । एते चेदिपाः चेदिजनपदाधिपाः तत्र बृहद्रथात् कुशाश्वो बभूव कुशङ्गोऽभूदिति पाठान्तरं तत्सुतः कुशङ्गसुतः ऋषभः स्मृतः प्रसिद्धः तत्सुतः ऋषभसुतः प्रष्पवान् तस्य हितः हिताख्यः अपत्यं पुत्रो जह्नु इत्यन्वयः । तत्सुतो हितसुतः जह्नुः जगुरिति पाठान्तरम् एवं बृहद्रथस्यैको वंश उक्तः अथान्यस्यामपि भार्यायां बृहद्रथात् द्वे शकले जज्ञाते ॥ ६ ॥ ७ ॥

ते च मात्रा बहिरुत्सृष्टे त्यक्ते तत्र क्रीडन्त्या जरया राक्षस्या जीव जीवेति भाषमाणया अभिसन्धिते जरया सन्धितत्वाज्जरासन्धः सुतो ऽभवत् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अहल्यासन्ततिं प्रोच्य दिवोदाससन्ततिं कथयति–मित्रायुरिति ॥ १ ॥ २ ॥

अजमीढसुतो योऽन्यो वृहद्विषोरिति शेषः । अन्यस्यां भार्यां यां जातः नाम्ना ऋक्षः ऋक्षाज्जातः संवरणो नाम ॥ ३ ॥ ४ ॥ ॥ ५ ॥ ६ ॥ ७ ॥

जरया राक्षस्या ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

१––१४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

द्वाविंशे ऽभूद्दिवोदासवंशे द्रौपद्यथाऽ भवत् ।
ऋक्षवंशे जरासन्धार्जुनदुर्योधनादयः ॥

॥ १ ॥

तस्य सोमकस्य शतं पुत्रास्तेषां जन्तुर्ज्येष्ठः कनिष्ठः पृषतः मध्यतो द्रुपदः ॥ २—५ ॥

बृहद्रथमुखानेवाऽऽह–कुशाम्बेत्यादि ॥ ६—७ ॥

जरया राक्षस्या ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

दिवोदासवंशम् अजमीढपुत्रान्तरस्य ऋक्षस्य वंशञ्चाह, मित्रायुरिति द्वाविंशेन । कथम्भूतः ? सोमकः जन्तुजन्मकृत् जन्तुपिता ॥ १ ॥

तस्य सोमकस्य पुत्रशतं तत्र जन्तुर्ज्येष्ठः पृच्छतोपवीवान् पृषतस्य द्रुपदस्तस्य द्रौपदी कृपात् धृष्टद्युम्नादयः सुताश्च तथाह श्रीपराशरः "दिवोदासस्य मित्रायुर्मित्रायोश्च्यवनो नाम राजा च्यवनात्सुदासस्तस्य सहदेवस्तस्यापि सोमकस्ततो जन्तुः शतपुत्रज्येष्ठोऽभवत् तेषां यवीयान् पृषतः पृषतात् द्रुपदः ततो धृष्टद्युम्न इति यद्यपि श्रीमद्भागवते अजमीढस्ततः नीलस्ततः शान्तिस्ततः सुशान्तिस्ततः पुरुजस्ततोऽर्कस्ततो भर्म्याश्वस्ततो मुद्गलस्ततो दिवोदासादिक्रमेण धृष्टद्युम्नोत्पत्तिस्तथापि अजमीढात्तु नलिन्यां शुसान्तिरूपपद्यत" इत्युक्त्वा तदनन्तरं सुशान्तितः पुरुजातिस्ततो भार्म्यश्वस्ततः सृञ्जयस्ततः पञ्चजनस्ततः सोमदत्तस्ततः सहदेवस्तत सोमकस्ततः पृषतस्ततो द्रुपदः तस्य पुत्रो धृष्टद्युम्नः" इति हरिवंशोक्तक्रमाभिप्रायेण "तदा मृधे कौरवसृञ्जयानां वीरेष्वथो वीरगतिं गतेषु" इत्यत्र धृष्टद्युम्नस्य सृञ्जयवंश्यत्वं स्वीकृतमिति बोध्यम् ॥ २—४ ॥

बृहद्रथो मुखम् आदिर्येषाम् ॥ ५ ॥

तानेवाह–कुशाम्बेति । बृहद्रथात्कुशाग्रः तस्य ऋषभः तत्सुतः ऋषभसुतः पुष्पवान् जज्ञे तस्य अपत्यं सत्यहितः तत्सुतो जह्नुरित्यन्वयः ॥ ६ ॥ ७ ॥

जरया राक्षस्या ॥ ८ ॥

भाषा टीका ।

हेनृप ! दिवोदास के पुत्र मित्रेयु उनके च्यवन हुए, तिनके सुदास हुए, तिनके सहदेव हुए, तिन के सोमक हुए, तिनसे जंतु नामक पुत्र होते भये ॥ १ ॥

उनके सौ पुत्र हुए उन सवों में पृषत छोटे हुए, पृषत के दुपद पुत्र हुए, तिनसे द्रौपदी पुत्री और धृष्टद्युम्न आदिक पुत्र उत्पन्न भये ॥ २ ॥

धृष्टद्युम्न के पुत्र धृष्टकेतु हुए, ये सब राजा भार्म्यवंशी पंचाल देश के अधिष्ठाता हुए । और जो अजमीढ के अन्य पुत्र ऋक्ष हुए उनके संवरण हुए ॥ ३ ॥

और सवरण सं सूर्य की कन्या तपती में कुरुक्षेत्र के पति कुरु महाराज उत्पन्न हुए, और उनके परिक्षित, सुधनु, जह्नु, निषध, अश्व, इतने पुत्र उत्पन्न भये ॥ ४ ॥

सुधनुष के पुत्र सुहोत्र भये, उनके च्यवन, उनके कृती, उनके उपरिचर वसु, और वसु के बृहद्रथादिक पुत्र उत्पन्न हुए ॥ ५ ॥

अर्थात् बृहद्रथ, कुशांब मत्स्य प्रत्यग्र चेदिपादिक भये, ये सब चंदेरी के राजा हुए, बृहद्रथ के कुशाग्र उनके ऋषभ हुए ॥ ६ ॥

ततश्च सहदेवोऽभूत्सोमापिर्यच्छ्रुतश्रवाः ।
परीक्षिदनपत्योऽभूत्सुरथो नाम जाह्नवः ॥ ९ ॥
ततो विदूरथस्तस्मात्सार्वभौमस्ततोऽभवत् ।
जयसेनस्तत्तनयो राधिकोतोऽयुतो ह्यभूत् ॥ १० ॥
ततश्च क्रोधनस्तस्माद्देवातिथिरमुष्य च ।
ऋष्यस्तस्य दिलीपोऽभूत्प्रतीपस्तस्य चात्मजः ॥ ११ ॥
देवापिः शन्तनुस्तस्य बाह्लीक इति चात्मजाः ।
पितृराज्यं परित्यज्य देवापिस्तु वनं गतः ॥ १२ ॥
अभवच्छन्तनू राजा प्राङ्महाभिषसंज्ञितः ।
यं यं कराभ्यां स्पृशति जीर्णं यौवनमेति सः ॥ १३ ॥
शान्तिमाप्नोति चैवाग्र्यां कर्मणा तेन शन्तनुः ।
समा द्वादश तद्राज्ये न ववर्ष यदा विभुः ॥ १४ ॥
शन्तनुर्ब्राह्मणैरुक्तः परिवेत्ता त्वमग्रभुक् ।
राज्यं देह्यग्रजायाशु पुरराष्ट्रविवृद्धये ॥ १५ ॥
एवमुक्तो द्विजैर्ज्येष्ठं छन्दयामास सोऽब्रवीत् ।
तन्मन्त्रिप्रहितैर्विप्रैर्वेदाद्विभ्रंशितो गिरा ॥ १६ ॥

भाषा टीका ।

उन ऋषभ के पुष्पवान् तिनसे सत्यहित पुत्र उत्पन्न हुए और बृहद्रथ की अन्यभार्या से पुत्र के दो खंड उत्पन्न भये ॥ ७ ॥

उन दोनों टुकडों को माता ने बाहर पटक दिये फिर जरा नामक राक्षसी ने उन दोनो आधे २ टुकडों को उठाकर जोडकर जीव २ ऐसे बोलकर खेलती हुई ने जोड दिये तब वह जी उठा इसी से उसका जरासंध नाम हुआ ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यद्यस्मात्सोमापेः श्रुतश्रवाः कुरोः पुत्रः परीक्षिदनपत्यः जाह्नवो जह्नोः पुत्रः ॥ ९ ॥

अतो राधिकादयुतोऽभूदित्यर्थः ॥ १०—११ ॥

तस्य प्रतीपस्य देवापिशन्तनुबाह्लीकाः ॥ १२ ॥

प्राक् पूर्वजन्मनि महाभिष इति संज्ञा यस्य सः ॥ १३ ॥

यदा देवो न ववर्ष तदा शन्तनुस्तत्र कारणं ब्राह्मणान् पप्रच्छ ॥ १४ ॥

ब्राह्मणैश्चैवमुक्तः "दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते । परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः" इति स्मृतेर्योऽग्रभुक् भुवमग्रतो भुनक्ति अयं त्वादृशोऽपि परिवेत्तैव भवति अतः तद्दोषपरिहाराय राज्यमग्रजाय देहि ततो वृष्टिर्भविष्यतीत्येवमुक्तः शन्तनुर्वनङ्गत्वा ज्येष्ठं छन्दयामास राज्ञः प्रजापालनादिः परो धर्मोऽतस्त्वं राज्यं स्वीकुर्विति प्रार्थितवान् । ततः पूर्वमेव तस्य मन्त्रिणा अश्मरातसंज्ञेन देवापिं पाषण्डीकृत्य राज्यानर्हं कर्तुं ये प्रहिता विप्रास्तैः पाषण्डमताश्रयया गिरा वेदाद्विभ्रंशितः सन् वेदवादस्यातिवादान्निन्दावचनानि सोऽब्रवीत् ततस्तस्य पातित्येन राज्याऽनर्हत्वे जाते शन्तनोर्दोषाभावाद्देवो ववर्षेत्यर्थः । ॥ १५—१७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततो जरासन्धात् सहदेवः यत् यस्मात्सहदेवात् सोमापिः श्रुतश्रवाश्च जातौ स सहदेव इत्यन्वयः । कुरोः पुत्रः परीक्षिदनपत्यः अथ जन्होः कुरुसुतस्य सुतो जाह्नवः स च नाम्ना सुरथ इति प्रसिद्धः ॥ ९ ॥

ततः सुरथाद्विदूरथस्तस्मात्सार्वभौमः ततो जयसेनस्तत्तनयो जयसेनतनयः राधिकः अतो राधिकात् द्युमानभूत् अतोऽयुतो ऽभवत् इति पाठान्तरम् ॥ १० ॥

ततश्च द्युमतः क्रोधनः तस्मात् क्रोधनात् देवातिथिः अमुष्य देवातिथेः ऋचस्तस्माद्दृचाद्दिलीपः तस्य दिलीपस्यात्मजः प्रतीपः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

"ऋक्षोऽस्य भीमसेनोऽभूत् प्रतीपस्तस्य चात्मजः, इति पाठान्तरम् ॥ ११ ॥

तस्य प्रतीपस्य देवापिः शन्तनुर्बाह्लीकश्चेति त्रयः सुताः तत्र देवापिः पितृराज्यं त्यक्त्वा वनं गतः अधुना अपुत्रश्चेति भावः ॥ १२ ॥

शन्तनुस्तु राजा ऽधिकृतराज्यासनः प्राक् पूर्वजन्मनि महाभिषसंज्ञितः महाभिष इति संज्ञाऽस्य सञ्जातेति तथाभूतः तस्य तस्मिन् जन्मनि शन्तनुनामप्रवृत्तौ निमित्तमाह—यं यमिति । सोऽस्मिन् जन्मनि कराभ्यां यं यं जीर्णं जरठं स्पृशति स सर्वोऽपि यौवनमेति प्राप्नोति अग्र्यां मुख्यां शान्तिं चाप्नोति यतस्ततोऽनेन कर्मणा यौवनशान्त्यापादनरूपेण कर्मणा निमित्तेन शन्तनुरिति प्रसिद्धिः शं सुखं तनुते यौवनशान्त्योरापादनेनेति शन्तनुरिति निरुक्तिरभिप्रेता तस्य शन्तनोः राष्ट्रे यदा द्वादश समाः वर्षाणि विभुः पर्जन्यो न ववर्ष ॥ १३ ॥ १४ ॥

तदा शन्तनुः तत्र निमित्तं ब्राह्मणान् पप्रच्छ ब्राह्मणैस्त्वेवमुक्तः—

"दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते ।
परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः ॥ इतिस्मृतेः

योऽग्रभुक् भुवमग्रतो भुनक्त्ययं त्वादृशोऽपि परिवेत्तैव भवति अतस्तद्दोषपरिहाराय राज्यमग्रजाय देहि ततो वृष्टिर्भविष्यतीत्येवमुक्तः पुरराष्ट्रयोर्विवृद्धिर्यस्मात् वर्षात्तस्मै वर्षार्थमित्यर्थः ॥ १५ ॥

ततः शन्तनुर्वनं गत्वा ज्येष्ठं छन्दयामास राज्ञः प्रजापरिपालनादिः परमो धर्मस्ततस्त्वं राज्यं स्वीकुर्विति प्रार्थयाञ्चक्रे ततःपूर्वमेव तस्य मन्त्रिणा अश्मारातसंज्ञकेन देवापिं पाषण्डीकृत्य राज्यानर्हं कर्तुं ये प्रहिताः विप्रास्तैः पाषण्डमताश्रयया गिरा वेदाद्विभ्रंशितस्ततः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

जाह्नवः जन्होः पुत्रः ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥

अप्यच्चरसाऽर्यात्रिर्भूयान्न वा एकेनाक्षरेण छन्दांसि वियन्तीत्यतः शन्तनुशब्दं निरुक्ति—यंयमिति । यस्य संस्पर्शो तनोति कराभ्यामितिशेषः । शन्तनुं सुतनुं युवानं नयतीति शन्तनुं शन्तं शान्तं नयति प्रापयतीति वा ॥ १३ ॥ १४ ॥

दाराग्निहोत्रादियोगं यः कुरुतेऽग्रजे स्थिते सति स परिवेत्ता । तदुक्तं "दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते । परिवेत्ता स इत्युक्तः परिवित्तिस्तु पूर्वजः" इति. अयं शन्तनुरग्रभुक् अग्रजस्य देवापेरग्रतो राज्यं भुंक्ते इति दोषेणावर्षणमिति विज्ञायाग्रजायाशु राज्यं देहीत्युक्तम् ॥ १५ ॥

छन्दयामास प्रसादयामास शन्तनोः कश्चिन्मन्त्री अश्मकः विप्रान् न्ययुंक्त अयं देवापिर्यथा वेदमार्गाद्विभ्रंशितो भवति तथा कर्तव्यमिति तन्मन्त्रिप्रहितैर्विप्रैर्वेदाद्विभ्रंशितैः स देवापिः वेदवादातिवादान् वेदार्थनिन्दालक्षणान् दोषान् गिराऽब्रवीदित्यन्वयः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

दाराग्निहोत्रसंयोगमित्यस्य प्रथमानधिकारित्वतात्पर्यमित्यभिप्रेत्याह—अग्रभुगिति ॥ १५ ॥

एवमिति सार्द्धकम् । तन्मान्त्रिभिरित्यत्र ततो निष्कुर्यादिति ज्ञेयम् ॥ १६—२२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यत् यस्य सोमापेः परीक्षिः कुरुपुत्रः जान्हवः कुरुपुत्रस्य जन्होः पुत्रः सुरथः ॥ ९ ॥

अतो राधिकादयुतायुरभूत् ॥ १०—१२ ॥

प्राक् पूर्वजन्मनि यं जीर्णं वृद्धं स जीर्णः यौवनम् एति प्राप्नोति ॥ १३ ॥

विभुरिन्द्रः "दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते । परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः" इति स्मृतेः त्वमग्रजे देवापौ वर्तमानेऽपि अग्रभुक् कृतदारो राज्यभोक्ता परिवेत्तैवेति दोषादिन्द्रो न ववर्ष तस्मद्राज्यमित्यादि ॥ १४ ॥ १५ ॥

छन्दयामास त्वं राज्यं कुर्विति प्रार्थितवान् ततः स वेदवादान् वेदस्यातिवादान् वेदनिन्दावाक्यानि अब्रवीत् तत्र हेतुः तस्य शन्तनोर्मन्त्रिणा अश्मसारसंज्ञेन शन्तनुप्रार्थनात् पूर्वमेव देवापिं पाषण्डीकृत्य राज्यानर्हं कर्तुं शन्तनुप्रभृत्यलक्षितं ये प्रहिता विप्रास्तैः पाषण्डमताऽऽश्रयया गिरा वेदाद्विभ्रंशितः ततश्च तस्य पातित्येनैव तस्य राज्यानर्हत्वे जाते शन्तनो दोषाभावात् देवो ववर्षेत्यर्थः ॥ १६—१९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यद्यतः सोमापिः श्रुतश्रवाः पुत्रः परीक्षित्तु कुरुपुत्रोऽनपत्योऽभूत् जान्हवः जन्होः पुत्रः ॥ ९ ॥

अतो राधिकादयुतः ॥ १०—१२ ॥

प्राक् पूर्वजन्मनि महाभिष इति संज्ञा सञ्जाताऽस्येति तथा सः ॥ १३ ॥

तस्य राज्ये विभुः पर्जन्यः द्वादश समाः सम्वत्सरान् यदा न ववर्ष ॥ १४ ॥

तदा पुरराष्ट्रयोर्विवृद्धिर्यस्मात्तस्मै वर्षार्थम् ब्राह्मणैः शन्तनुः योऽग्रभुक् भुवमग्रे भुनक्त्येवं त्वादृशोऽपि परिवेत्तैव भवति तस्मात्तद्दोषनिवृत्तये राज्यमग्रजाय देहि ततो वृष्टिर्भविष्यतीत्युक्तः परिवेत्तृलक्षणं स्मृत्योक्तम् "दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे सति । परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः" इति ॥ १५ ॥

एवं द्विजैरुक्तः शन्तनुः वनं गत्वा राज्ञः प्रजापालनादिः परो धर्मोऽतस्त्वं राज्यं स्वीकुर्विति ज्येष्ठं छन्दयामास ततः

वेदवादातिवादान्वै तदा देवो ववर्ष ह ।
देवापिर्योगमास्थाय कलापग्राममाश्रितः ॥ १७ ॥
सोमवंशे कलौ नष्टे कृतादौ स्थापयिष्यति ।
बाह्लीकात्सोमदत्तोऽभूद्भूरिर्भूरिश्रवास्ततः ॥ १८ ॥
शलश्च शन्तनोरासीद्गङ्गायां भीष्म आत्मवान् ।
सर्वधर्मविदां श्रेष्ठो महाभागवतः कविः ॥ १९ ॥
वीरयूथाग्रणीर्येन रामोऽपि युधि तोषितः ।
शन्तनोर्दाशकन्यायां जज्ञे चित्राङ्गदः सुतः ॥ २० ॥
विचित्रवीर्यश्चावरजो नाम्ना चित्राङ्गदो हतः ।
यस्यां पराशरात्साक्षादवतीर्णो हरेः कला ॥ २१ ॥
वेदगुप्तो मुनिः कृष्णो यतोऽहमिदमध्यगाम् ।
हित्वा स्वशिष्यान् पैलादीन् भगवान् बादरायणः ॥ २२ ॥
मह्यं पुत्राय शान्ताय परं गुह्यमिदं जगौ ।
विचित्रवीर्योऽथोवाह काशिराजसुते बलात् ॥ २३ ॥
स्वयंवरादुपानीते अम्बिकाम्बालिके उभे ।
तयोरासक्तहृदयो गृहीतो यक्ष्मणा मृतः ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पूर्वमेव तन्मन्त्रिणा अश्मरातारव्येन देवापिं पाषण्डीकृत्य प्रजापालनादिधर्मानर्हं कर्तुं प्रहितैः प्रेषितैर्विप्रैः पाषण्डमताश्रयया गिरा वेदाद्विभ्रंशितस्सन् ॥ १६ ॥

भाषा टीका ।

जरासंध के पुत्र सहदेव उनके सोमापि और उनके श्रुतश्रवा पुत्र हुए, और परीक्षित अनपत्य हुए, सुरथ जन्हु के पुत्र हुए ॥ ९ ॥

उनके विदूरथ उनसे सार्वभौम पुत्र हुए, सार्वभौम के जयसेन उनके राधिक और राधिक के अयुत पुत्र होते भये ॥ १० ॥

उनसे क्रोधन, और क्रोधन के देवातिथि, उनके पुत्र ऋष्य हुए, तिनके दिलीप, उन के पुत्र प्रतीप हुए ॥ ११ ॥

और प्रतीप के देवापि शंतनु वाल्हीक इतने पुत्र हुए, पिता के राज्य को छोडकर देवापि वन में गये ॥ १२ ॥

उनके पीछे शंतनु राजा हुए, पूर्व जन्म में महाभिष इनका नाम रहा, इनका ऐसा प्रभाव रहा कि जिसके २ शरीर पर हाथ रखें वह वृद्ध जीर्ण शरीर वाला भी होय तौ भी युवा हो जावै ॥ १३ ॥

और उनके हाथ के स्पर्श होने से उत्तम शांति प्राप्त होती रही इस्से उनका नाम शंतनु हुआ, जिस समय इनके राज्य में बारह वर्ष वर्षा (वृष्टि) नहीं हुई ॥ १४ ॥

तब शंतनु ने ब्राह्मणों से पूंछा कि हमारे राज्य में वृष्टि क्यों नहीं होती है? तब ब्राह्मणों ने कहा कि-तुम परिवेत्ता (बडे भाइ के रहते विवाह और राज्य करते) हौ इस्से तुम अपने राज्य वृद्धि के लिये बडे भाई को राज्य दो ॥ १५ ॥

जब ब्राह्मणों ने ऐसा कहा तब शंतनु ने देवापि के पास वन में जाकर प्रार्थना करी इसके पहिले ही इनके अश्मरात्र नामक मंत्रि ने देवापि को पाखंडी बनाकर राज्य के अयोग्य करने के लिये ब्राह्मणों को भेजा रहा उन लोगों ने पाखंड मताश्रय वाक्यों से देवापि को वेद से भ्रष्ट कर दिया ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ततः सोमदत्ताद्भूरिर्भूरिश्रवाः शलश्चेति त्रयः ॥ १८ ॥ १९ ॥

रामो जामदग्न्यः दाशकन्यायामिति उपरिचरस्य वसोर्वीर्येण मत्स्यगर्भादुत्पन्ना दाशैः कैवर्तैः पालिताऽतो दाशकन्येति प्रसिद्धायां सत्यवत्याम् ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नाम्ना तत्समाननाम्ना चित्राङ्गदेन गन्धर्वेण युद्धे हतः यस्यां सत्यवत्यां शन्तनुपरिग्रहात्पूर्वमेव ॥ २१ ॥

वेदा गुप्ता येन यतोऽहं जात इदं भागवतं चाध्यगामधिगतवानस्मि ॥ २२ ॥ २३ ॥

स्वयम्वराद्भीष्मेण बलादुपानीते ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वेदवादस्यातिवादान् निन्दावचनानि स देवापिरब्रवीत् ततस्तस्य पातित्येन राज्यानर्हत्वे जाते शन्तनोः दोषाभावात् देवो ववर्ष देवापिर्योगमाश्रित्य कलापग्राममाश्रितस्सन् ॥ १७ ॥

कलौ सोमवंशे नष्टे सति पुनः कृतयुगस्यादौ स्थापयिष्यति सोमवंशं प्रतिवर्त्तयिष्यति वाह्लीकात् प्रतीपात्मजात् सोमदत्तो जज्ञे ततः सोमदत्तात् भूरिः भूरिश्रवाश्शलश्चेति त्रयः सुताः जज्ञिरे शन्तनोस्तु ब्रह्मशापान्मानुषीत्वं प्राप्य स्वयंवरेणागतायां गङ्गायां भार्यायां भीष्मो जातस्तं विशिनष्टि आत्मवान् ब्रह्मवित् सर्वेषां धर्मविदां श्रेष्ठः महाभागवतः कविर्विद्वान् ॥ १८ ॥ १९ ॥

वीराणां सैन्यस्य नायकः येन भीष्मेण रामो जामदग्न्योऽपि युधि संग्रामे तोषितः ततो गङ्गायामन्तर्हितायां शन्तनोर्दाशकन्यायां दाशैः कैवर्त्तैः पालितायामुपरिचरवसोर्वीर्ये भक्षितवत्या मत्स्याः उदराद्दाशैरुद्धृतायान्तैः पालितायां मत्स्यगन्धियोजनगन्धिसत्यवत्याद्याख्यायामित्यर्थः। चित्राङ्गदः सुतस्तस्य कनीयान् विचित्रवीर्यश्चेति द्वौ सुतौ जज्ञाते इत्यर्थः। तत्र चित्राङ्गदो नाम्ना तत्सनाम्ना चित्राङ्गदाख्येन गन्धर्वेण युद्धे हतः दाशकन्यां विशिनष्टि—यस्यामिति। यस्यां दाशकन्यायां शन्तनोः परिग्रहात्पूर्वमेव पराशराद्भगवतः कला अवतारः श्रीव्यासरूपेणेति शेषः। तस्यां दाशकन्यायां शन्तनोः चित्राङ्गदो जज्ञे इति पूर्वेणान्वयः ॥२०॥२१॥

हरेः कलावतारं विशिनष्टि—वेदगुप्त इति। वेदा गुप्ता येन स वेदगुप्तः कृष्णः कृष्णद्वैपायनाख्यो मुनिः यस्मादहं शुको जातस्तस्मिन्निदं श्रीभागवतमध्यगाम् अहमेव इदं श्रीभागवतं तस्मादधीतवानस्मीत्यर्थः। तदेवोपपादयति—हित्वेति। भगवान् वादरायणः पाराशर्यः सत्यवतीसुतः पैलादीन् स्वशिष्यान् हित्वा तेभ्य अनुपदिश्येत्यर्थः ॥ २२ ॥

प्रशान्तायेति हेतुगर्भं प्रशान्तत्वात् मह्यमेवेदं परं गुह्यं पुराणं श्रीभागवतं जगावुपदिदेशेत्यर्थः। विचित्रवीर्य्यः शान्तनवः काशिराजस्य सुते बलाद्भीष्मेण स्वयंवरादुपनीते अम्बिकाऽम्बालिकाख्ये द्वे उवाह उपयेमे ततस्तयोरम्बिकाम्बालिकयोरासक्तं हृदयं यस्य स विचित्रवीर्यः यक्ष्मणा क्षयरोगेण मृतः ॥ २३ ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ततः देवापौ विरुद्धे सति अनन्तरमिन्द्रदेवो वृष्टवान् योगं भगवद्ध्यानम् ॥ १७—१९॥

रामः परशुरामः दाशकन्यायां सत्यवत्याम् ॥ २० ॥

नाम्ना निमित्तेन हतः गन्धर्वेणेति शेषः। यस्यां दाशकन्यायाम् ॥ २१ ॥

कृष्णो व्यासः यतः कृष्णादिदं श्रीभागवतं अध्यगामधीतवानस्मि श्रीभागवतं स्तौति हित्वेति ॥ २२ ॥

काशिराजसुते ते अम्बिकाम्बालिके बलाद्भीष्मेणानीते ॥२३॥

यक्ष्मणा क्षयरोगेण अग्रजस्य भ्रातुर्विचित्रवीर्यस्य विदुरं भुजिष्यायां जनयामास ॥ ॥ २४—२६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

शान्ताय ब्रह्मनिष्ठाय ॥ २२—४० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

दाशकन्यायामिति उपरिचरवसोर्वीर्य्येण मत्स्यगर्भोद्भुत्पन्ना कन्या दाशैः कैवर्तैः पालिता अतो दाशकन्येति प्रसिद्धायां सत्यवत्याम् ॥ २० ॥

नाम्ना तत्समाननाम्ना चित्राङ्गदेन गन्धर्वेण युद्धे हतः यस्यां सत्यवत्यां शन्तनुपरिग्रहात् पूर्वमेव हरेःकला व्यासः ॥२१॥

वेदा गुप्ता येन सः ॥ २२ ॥

इदं श्रीभागवतम् स्वयम्वराद्भीष्मेण बलादुपानीते ॥२३॥२४॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

वेदवादस्य अतिवादान् स देवापिः अब्रवीत् ततस्तस्य पतितत्वेन प्रजापालनादिधर्मानर्हतायां जातायां शन्तनोर्दोषाभावाद्देवो ववर्ष इत्यर्थः ॥ १७ ॥

कृतादौ स्थापयिष्यती सोमवंशमिति शेषः। ततः सोमदत्तात् भूरिप्रभृतयस्त्रयः ॥ १८ ॥ १९ ॥

रामः परशुरामः दाशकन्यायां दाशैः कैवर्तैः पालितायां वासव्याम् ॥ २० ॥

चित्राङ्गदः नाम्ना स्वसमाननाम्ना चित्राङ्गदेन युद्धे हतः यस्यां वासव्याम ॥ २१ ॥

वेदा गुप्ता रक्षिता येन सः इदं श्रीमद्भागवतं अध्यगाम् अधीतवानस्मि श्रीमद्भागवतस्यात्युत्तमत्वं दर्शयन् तदेवाह—स्वशिष्यान् पैलादीन् ऋग्वेदाद्याचार्यानपि हित्वा यतः परः सर्ववेदेतिहासादिसारत्वात्सर्वशास्त्रेभ्य उत्कृष्टम् एव गुह्यं मह्य जगौ उपदिदेशेत्यर्थः ॥ २२—२४ ॥

भाषा टीका ।

जब उनने वेद की निंदा की तब शंतनु के राज्य में देव ने वर्षा करी और देवापि योग सिद्ध होकर कलाप ग्राम में स्थित हैं ॥ १७ ॥

कलियुग के नष्ट होने पर कृत युग के आदि में चन्द्र-

क्षेत्रेऽप्रजस्य वै भ्रातुर्मात्रोक्तो बादरायणः ।
धृतराष्ट्रं च पाण्डुं च विदुरं चाप्यजीजनत् ॥ २५ ॥
गान्धार्यां धृतराष्ट्रस्य जज्ञे पुत्रशतं नृप ! ।
तत्र दुर्योधनो ज्येष्ठो दुःशला चापि कन्यका ॥ २६ ॥
शापान्मैथुनरुद्धस्य पाण्डोः कुन्त्यां महारथाः ।
जाता धर्मानिलेन्द्रेभ्यो युधिष्ठिरमुखास्त्रयः ॥ २७ ॥
नकुलः सहदेवश्च माद्र्यां नासत्यदस्रयोः ।
द्रौपद्यां पञ्च पञ्चभ्यः पुत्रास्ते ऽपितरोऽभवन् ॥ २८ ॥
युधिष्ठिरात्प्रतिविन्ध्यः श्रुतसेनो वृकोदरात् ।
अर्जुनाच्छ्रुतकीर्त्तिस्तु शतानीकस्तु नाकुलिः ॥ २९ ॥
सहदेवसुतो राजन् ! श्रुतकर्मा तथाऽपरे ।
युधिष्ठिरात्तु पौरव्यां देवकोऽथ घटोत्कचः ॥ ३० ॥
भीमसेनाद्धिडिम्बायां काल्यां सर्वगतस्ततः ।
सहदेवात्सुहोत्रं तु विजयाऽसूत पार्वती ॥ ३१ ॥
करेणुमत्यां नकुलो निरमित्रं तथाऽर्जुनः ।
इरावन्तमुलूप्यां वै सुतायां बभ्रुवाहनम् ।
(१)मणिपूरपतेः सोऽपि तत्पुत्रः पुत्रिकासुतः ॥ ३२ ॥

भाषा टीका ।

वंश की स्थापना करेंगे वाल्हीक से सोमदत्त पुत्र हुए उनसे भूरि, भूरिश्रवा, ॥ १८ ॥

और शल, ये तीन पुत्र हुए। शंतनु से गंगा में बडे प्रतापी ज्ञानी भीष्म उत्पन्न हुए, सर्वधर्मों के जानने वालों में श्रेष्ठ और महा भागवत विद्वान् कवि हुए ॥ १९ ॥

वीरों के यूथों में अग्रगण्य हुए जिन भीष्म ने परशुराम को भी युद्ध मे संतुष्ट कर दिया, शंतनु से दाश कन्या में (उपरिचरवसु के वीर्य से मत्स्यी के गर्भ से उत्पन्न हुई कैवर्तों ने पाली इससे दाश कन्या ऐसी प्रसिद्ध हुई) तिस सत्यवती में चित्रांगद नाम से पुत्र उत्पन्न हुए ॥ २० ॥

विचित्र वीर्य छोटे पुत्र हुए चित्रांगद को चित्रांगद-गन्धर्व ने युद्ध मे मारडाला, यह वही सत्यवती है, कि--जिसमें पराशर से साक्षात् श्री हरि के कला व्यासजी उत्पन्न हुए ॥ २१ ॥

श्री शुकदेवजी कहनेलगे, कि--उन का वेदगुप्त और कृष्णमुनि ये भी नाम हुआ, जिन से मैं यह श्रीमद्भागवत पढाहूं। पैलादिक सब शिष्यों को छोडकर हमारे पिता भगवान बादरायण नें ॥ २२ ॥

इमें शान्त पुत्र देखकर यह अति गोपनीय श्रीमद्भागवत इमें पढाई। विचित्र वीर्यने काशिराज के दो पुत्रियों से विवाह किया ॥ २३ ॥

अम्बिका और अम्बालिका दोनों स्त्रियों को स्वयम्वर से बलात्कार भीष्म सब वीरोंको जीतकर ले आये, उन दोनों में आसक्त हृदय होने से यक्ष्म रोग से ग्रसित होकर चित्रांगद मरगया ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मात्रा सत्यवत्योक्त इति निषेधाभावमाह "अपतिरपत्यलिप्सुर्देवराद्गुरुप्रयुक्ताश्च तु ऋतुमतीयात्" इत्यादिवचनात् ॥ २५ ॥

दुःशला नाम कन्या च यज्ञे ॥ २६ ॥

अरण्ये मृगशापान्मैथुनेन रुद्धस्य प्रतिबद्धस्य ॥ २७ ॥

नासत्यदस्राभ्यामश्विनीकुमाराभ्याम् पञ्चभ्यो युधिष्ठिरादिभ्यः पञ्चाऽभवन् ॥ २८ ॥ २९ ॥

तथाऽपरे भार्यान्तरेषु ॥ ३० ॥

काली चाम्या भीमस्य भार्या तस्यां ततो भीमसेनात्सर्वगतोनाम पुत्रोऽभवदित्यर्थः ॥ ३१ ॥

(१) मणलूरपतेः इति वीर०

श्रीधरस्वामिकृतभावार्थदीपिका ।

उलूप्यां नागकन्यायाम् मणिपूरपतेः सुतायां पुत्रिकाधर्मेण दत्तायां बभ्रुवाहनमसुत अतस्तत्पुत्रः सन्नपि स पुत्रिकासुतः मातामहसुत इत्यर्थः ॥ ३२-३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततो मात्रा सत्यवत्या उक्त आदिष्टो भगवान् बादरायणः अग्रजस्याऽपुत्रस्य भ्रातुर्विचित्रवीर्यस्य क्षेत्रे अम्बिकाम्बालिकारूपे कलत्रद्वये तद्दास्याञ्च धृतराष्ट्रं ज्येष्ठं तस्य कनीयांसं पाण्डुं विदुरञ्चाजीजनत् जनयामास तत्राम्बिकायां धृतराष्ट्रम् अम्बालिकायां पाण्डुं दास्यां तु विदुरमिति विवेकः ॥ २५ ॥

तत्र धृतराष्ट्रस्य गान्धार्यां पुत्रशतं जज्ञे । हे नृप ! तेषां शतसङ्ख्याकानां धार्तराष्ट्राणां दुर्योधनो ज्येष्ठः दुःशला नाम कन्या च धृतराष्ट्राद्गान्धार्यां जज्ञे इत्यर्थः ॥ २६ ॥

अरण्ये मृगरूपिणोरमभाणयोः ऋष्योः शापाद्धेतोर्मैथुने कर्मणि प्रतिरुद्धस्य पाण्डोर्भार्यायां कुन्त्यां धर्मानिलेन्द्रेभ्यो युधिष्ठिरः मुखमादिर्येषां ते युधिष्ठिरभीमार्ज्जुनाः त्रयो जाताः ॥ २७ ॥

तथाऽन्यस्यां पाण्डोर्भार्यायां माद्र्यां नासत्यदस्रयोरश्विनोः सकाशात् नकुलः सहदेवश्चेति द्वौ सुतौ जातौ. पञ्चभ्यो युधिष्ठिरादिभ्यो द्रौपद्यामेकभार्यायां पञ्च पुत्रा अभवन् ते च अपितरः न केषाञ्चित्पितरः अपुत्रा एव सन्तो द्रौणिना हता इत्यर्थः ॥ २८ ॥

अथ युधिष्ठिरात्प्रातिविन्ध्यभार्यायां प्रतिविन्ध्यो जातः वृकोदरात् भीमात् श्रुतसेनः अर्ज्जुनात्तु श्रुतकीर्तिः नाकुलिः नकुलसुतस्तु शतानीकः ॥ २९ ॥

हे राजन् ! सहदेवसुतः श्रुतकर्मा तथा अपरे च भार्यान्तरे युधिष्ठिरादिभ्यो जाता इत्यर्थः । तानेव दर्शयति; युधिष्ठिरात्तु पौरव्यां देवको जातः भीमसेनात्तु हिडिम्बायां घटोत्कचो जातः काली चान्या भीमस्य भार्या तस्यां ततो भीमात् सर्वगतो नाम पुत्रो ऽभवत् । पार्वती पर्वतस्य पुत्री विजया नाम सहदेवात् सुहोत्रमसूत । ३० ॥ ३१ ॥

नकुलः करेणुमत्यां वीरमित्रं जनयामास ।निरमित्रमिति पाठान्तरम् तथा ऽर्ज्जुनोपि इरावत्यामिरावन्तं मणलूरपतेः सुतायामुलूप्याम्

"अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलङ्कृताम् ।
अस्यां यो जायते पुत्रः स मे पुत्रो भविष्यति" ॥—

इत्युक्तविश्रभावबन्धनरूपपुत्रिकाधर्मेण दत्तायां बभ्रुवाहनं चासूत अतस्तत्पुत्रोऽर्ज्जुनपुत्रस्सन्नपि स बभ्रुवाहनः पुत्रिकासुतः मातामहसुत इत्यर्थः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मुनिशापान्मैथुनरुद्धस्य मैथुने मरणलक्षणविघ्नवतः ॥ २७ ॥
पञ्च पुत्राः पूर्वजन्मानि पितरः ॥ २८ ॥
विविच्याह—युधिष्ठिरादिति । नाकुलिर्नकुलपुत्रः ॥ २९–३० ॥
शर्वगतं शर्वत्रातम् ॥ ३१ ॥
मणिपूरपतेः सुतायां सोपि बभ्रुवाहनोऽपि पुत्रिकासुतास्तस्य मणिपूरपतेः पुत्रोऽभूदिति शेषः ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अग्रजस्य विचित्रवीर्यस्य मात्रा सत्यवत्या उक्त इति "अपतिरपत्यलिप्सुर्देवराद्गुरुप्रयुक्ताग तु ऋतुमतीयात्"इति वचनबलात् ॥ २५—२६ ॥

अरण्ये मृगशापान्मैथुने रुद्धस्य नासत्यदस्राभ्याम् अश्विभ्याम् ॥ २७—३० ॥

काळीचान्या भीमस्य भार्या तस्यां सर्वगतः पार्वती पर्वतकन्या ॥ ३१ ॥

उलूप्यां नागकन्यायां मणिपूरपूरपतेः सुतायां पुत्रिकाधर्मेण दत्तायां बभ्रुवाहनमसूत अतस्तत्पुत्रस्सन्नपि पुत्रिकासुतः मातामहसुत इत्यर्थः ॥ ३२—३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मात्रा वासव्या ॥ २५ ॥

दुःशला कन्यका च जज्ञे अपि शब्दात् वैश्यायां युयुत्सुर्जज्ञे इति ज्ञेयम् ॥ २६ ॥

अरण्ये मृगरूपब्राह्मणीब्राह्मणयोः रममाणयोर्मध्ये शरेण ब्राह्मणं हतवतः पाण्डोः एवं मैथुने तवापि मृत्युर्भविष्यतीति ब्राह्मणीशापात् मैथुने रुद्धस्येत्यर्थः ॥ २७ ॥ २८ ॥

तथा ऽपरे भार्यान्तरेषु च जाता इति शेषः । तानेवाह, युधिष्ठिरादित्यादिना ॥ २९—३० ॥

काल्यां ततो भीमादेव सर्वगतः पुत्रोऽभूत् ॥ ३१ ॥

नकुलः करेणुमत्यां निरमित्रं जनयामास उलूप्यां नागकन्यायां इरावन्तम् अर्जुनो जनयामास "अभ्रातृकां प्रदस्यामि तुभ्य कन्यामलंकृताम् ।अस्यां यो जायते पुत्रः स मे पुत्रो भविष्यति"इति पुत्रिकाधर्मेण दत्तायां मणिपूरपतेः सुतायां चित्राङ्गदायां बभ्रुवाहनं च अर्जुनो जनयामास अतस्तत्पुत्रस्सन्नपि सः पुत्रिकासुतः मातामहसुत इत्यर्थः ॥ ३२ ॥ ३६ ॥

भाषा टीका ।

संतान रहित चित्रांगद के मरने पर माता सत्यवती ने उनके भाई बादरायण से संतान वृद्धि के लिये जब कही तब धृतराष्ट्र वा पांडु और माता के नियोग से दृष्टि मात्र से उत्पन्न किये ॥ २५ ॥

धृतराष्ट्र से गांधारी से सौ पुत्र उत्पन्न हुए, हे राजन् ! उन सब पुत्रों में जेष्ठ दुर्योधन हुआ और दुःशला एक पुत्री उत्पन्न हुई ॥ २६ ॥

इहां ऐसी कथा है कि वन में मृगा मृगी दोनो के मैथुन के समय पांडुने उन दोनो में एक को मार डाला तब मृगा ने शाप दिया कि तुम मैथुन करोगे तो मरजावोगे इस कारण

तव तातः सुभद्रायामभिमन्युरजायत ।
सर्वातिरथजिद्वीर उत्तरायां ततो भवान् ॥ ३३ ॥
परिक्षीणेषु कुरुषु द्रौणेर्ब्रह्मास्त्रतेजसा ।
त्वं च कृष्णानुभावेन सजीवो मोचितोऽन्तकात् ॥ ३४ ॥
तवेमे तनयास्तात ! जनमेजयपूर्वकाः ।
श्रुतसेनो भीमसेन उग्रसेनश्च वीर्यवान् ॥ ३५ ॥
जनमेजयस्त्वां विदित्वा तक्षकान्निधनं गतम् ।
सर्पान्वै सर्पयागाग्नौ स होष्यति रुषान्वितः ॥ ३६ ॥
कावषेयं पुरोधाय तुरं तुरगमेधयाट् ।
समन्तात्पृथिवीं सर्वां जित्वा यक्ष्यति चाध्वरैः ॥ ३७ ॥
तस्य पुत्रः शतानीको याज्ञवल्क्यात्त्रयीं पठन् ।
अस्त्रज्ञानं (१)क्रियाज्ञानं शौनकात्परमेष्यति ॥ ३८ ॥
सहस्रानीकस्तत्पुत्रस्ततश्चैवाश्वमेधजः ।
असीमकृष्णस्तस्यापि (२) निमिचक्रस्तु तत्सुतः ॥ ३९ ॥
गजाह्वये हृते नद्या कौशाम्ब्यां साधु वत्स्यति ।
उक्तस्ततश्चित्ररथस्तस्मा(३)त्कविरथः सुतः ॥ ४० ॥

भाषा टीका ।

पांडु महाराज मैथुन से रुक गये तब कुंती ने धर्म, वायु, और इन्द्र के तेज से तीन पुत्र-बडे बडे महारथी उत्पन्न किये ॥२७॥

नकुल सहदेव माद्री में अश्विनी कुमार से दो पुत्र उत्पन्न हुए। और हे राजन् ! द्रौपदी में पांच पतियों से पांच पुत्र तुम्हारे पितृ लोग सब उत्पन्न हुये ॥ २८ ॥

युधिष्ठिर से प्रतिविंध्य भीम से श्रुतसेन अर्जुन से श्रुतकीर्ति और नकुल से शतानीक ॥ २९ ॥

सहदेव के श्रुतकर्मा अन्य भार्याओं से और भी पुत्र हुए युधिष्टिर से पौरवी भार्या में देवक पुत्र हुआ भीमसेन से हिडम्बा में घटोत्कच हुआ और अन्य भार्या काली में सर्वगत पुत्र उत्पन्न भया सहदेव से विजया मे सुहोत्र पुत्र उत्पन्न भया ॥ ३०—३१ ॥

और नकुल से करेणु मति में निरामित्र पुत्र भया अर्जुन से नाग कन्या उलूपी में इरावंत पुत्र उत्पन्न हुआ मणिपूरपति की सुता चित्रांगदा पुत्रिका धर्म से दी गई उसमें अर्जुन से बभ्रुवाहन पुत्र उत्पन्न हुआ इससे पुत्रिका सुत भया अर्थात् नाना का पुत्र हुआ ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तुरसंज्ञं पुरोहितं कृत्वा ॥ ३७ ॥

भविष्यानाह—तस्य पुत्र इति यावत्समाप्ति। याज्ञवल्क्यात् क्रियाज्ञानं परं चात्मानं शौनकात्प्राप्स्यत्यस्त्रज्ञानं च कृपाचार्यादिति द्रष्टव्यम् याज्ञवल्क्यात्त्रयीमधीत्य कृपादस्त्राण्यवाप्येति वैष्णवोक्तेः। क्वचित्तु अस्त्रज्ञानं कृपाचार्यादित्येव पाठः ॥ ३८—४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तव परीक्षितः तातः पिता अभिमन्युरर्जुनात्सुभद्रायामजायतेति राजानं प्रति शुकोक्तिस्तात्तवेत्युक्तम्, अभिमन्युं विशिनष्टि सर्वानतिरथान् जितवानिति तथा वीरः ततः अभिमन्योरुत्तरायां भवान् त्वं जातोऽसि ॥ ३३ ॥

कुरुषु दुर्योधनादिषु विनष्टेषु सत्सु क्रुद्धस्य द्रौणेरश्वत्थाम्नो ब्रह्मास्त्रतेजसा तत्प्रयुक्तब्रह्मास्त्रतेजसा दग्धोऽपीति शेषः। त्वं कृष्णस्य भगवतोऽनुभावेन सजीवः सप्राणोऽन्तकान्मृत्योर्मोचितोऽसि ॥ ३४ ॥

हे तात राजन् ! तव तनयास्तु इमे जनमेजयः पूर्वो ज्येष्ठो येषां ते श्रुतसेनो भीमसेनो उग्रसेनश्चेति चत्वारः ॥३५॥

(१) परं ज्ञानम् इति वीर० । (२) निम्नङ्कुः इति च । (३) च्छुचिरथ इति । वीर० विज० ।

तस्माच्च वृष्टिमांस्तस्य सुषेणोऽथ महीपतिः ।
सुनीथस्तस्य भविता नृचक्षुर्यत्सुखी नलः ॥ ४१ ॥
परिप्लवः सुतस्तस्मान्मेधावी सुनयात्मजः ।
नृपञ्जयस्ततो (१) दूर्वस्तिमिस्तस्माज्जनिष्यति ॥ ४२ ॥

श्रीमद्वीरराघवचार्यकृतभागवतचन्द्रचन्द्रिका।

तत्र जनमेजयादीनां भाविनं वृत्तान्तं वंशञ्चाह—जनमेजयस्त्वित्यादिना यावत्समाप्ति । त्वां तक्षकाज्जिधनं प्राप्तं विदित्वा स त्वत्पुत्रो जनमेजयः रुषा युक्तः सर्पयागसम्बन्धिनि अग्नौ सर्पान् होष्यति ॥ ३६ ॥

किङ्कृत्वा ? कावषेयन्तुरन्तुरसंज्ञं पुरोधाय पुरोहितं कृत्वा तु तथा तुरगमेधैरश्वमेधैः यक्ष्यतीति तथा भविता, कथं यष्टा ? इत्यत्राह—सर्वतः पृथिवीं सर्वान् नृपान् जित्वा ऽश्वमेधैर्यक्ष्यति ॥ ३७ ॥

तस्य जनमेजयस्य पुत्रः शतानीको भविता स च याज्ञवल्क्यात् त्रयीं वेदान् पठन् अधीयानः कृपात् कृपाचार्यात् अस्त्रज्ञानं शौनकात्तु परं ज्ञानम् आत्मपरमात्मज्ञानम् एष्यति प्राप्स्यति क्रियाज्ञानमितिपाठे शौनकादस्त्रज्ञानादित्रयं लप्स्यत इत्यर्थः । तत्र क्रियाज्ञानं, यज्ञादिकर्मानुष्ठानोपयुक्तं ज्ञानम् ॥ ३८ ॥

तत्पुत्रः शतानीकपुत्रः सहस्रानीकः तस्मात्तु अश्वमेधजः तस्याप्यश्वमेधजस्यापि असीमकृष्णो भविता तत्सुतः असीमकृष्णसुतः निम्नकुः ॥ ३९ ॥

तस्य तत्रास्ति निमित्तमाह—गजाह्वये हस्तिनापुरे नद्या गङ्गया हृते नाशिते सति ततो निष्क्रम्य कौशाम्ब्यां साधु यथा तथा वत्स्यति वासं करिष्यति ततो निम्नकोरुक्तः तत उक्ताच्चित्ररथः तस्माच्छुचिरथः 'उक्तस्ततो रथस्तस्माच्चस्माच्चित्ररथः सुतः' इति पाठान्तरम् ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तव तातः तव पिता ॥ ३३—३५ ॥

निधनं मरणाख्यत्वं सर्पयागविषयाग्नौ होष्यति होमङ्करिष्यति ॥ ३६ ॥

तुरगमेधया अश्वमेधया अश्वमेधयज्ञेन ॥ ३७ ॥

परं पूर्णम् ॥ ३८—३९ ॥

कौशाम्ब्यां पुर्यां वत्स्यति वासं करिष्यति ॥ ४०—४४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तुरं तुरसंज्ञम् ॥ ३७—४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कावषेयं तुरं तुरसंज्ञं पुरोधाय पुरोहितं कृत्वा ॥ ३७ ॥

तस्य जनमेजयस्य पुत्रः शतानीको भविष्यति स च याज्ञवल्क्यात्त्रयीं वेदत्रयीं पठन् कृपादस्त्रज्ञानं परं परब्रह्मज्ञानं शौनकाच्च एष्यति प्राप्स्यति ॥ ३८—४१ ॥

भाषा टीका ।

हे राजन् ! सर्व अति रथियों को जीतने वाले वीर तुम्हारे पिता अभिमन्यु सुभद्रा से उत्पन्न भये तिन से उत्तरा के गर्भ में तुम उत्पन्न भये ॥ ३३ ॥

सब कुरुवंशियों के क्षय होने पर अश्वत्थामा के ब्रह्मास्त्र के तेज से तुम भी दग्ध होगये परन्तु श्रीकृष्ण भगवान की कृपा वा महिमा से उस काल दंड से तुमारा प्राण बचा ॥३४॥

हेतात ! जनमेजयादिक श्रुतसेन भीमसेन उग्रसेन पराक्रमी ये सब तुमारे पुत्र हैं ॥ ३५ ॥

तुमको तक्षक से मृत्यु प्राप्त सुनकर जनमेजय क्रोधित होकर सर्पयाग से सबसर्पों को अग्नि में जरावेंगे ॥ ३६ ॥

कावषेय तुर नाम के ऋषि को पुरोधा (पुरोहित) बनाकर अश्वमेध यज्ञ करके सम्पूर्ण पृथिवी को जीतकर यज्ञों से परमात्मा को यजन करेंगे ॥ ३७ ॥

उनके पुत्र शतानीक याज्ञवल्क्य ऋषि से वेदत्रयी को पढ कर क्रिया ज्ञान, और कृपाचार्य से अस्त्रज्ञान, और शौनक से आत्म ज्ञान प्राप्त करेंगे ॥ ३८ ॥

शतानीक के पुत्र सहस्रानीक उनसे अश्वमेधज और उनके असीमकृष्ण पुत्र होगा असीमकृष्ण के पुत्र निमिचक्र होगा ॥ ३९ ॥

हस्तिनापुर को नदी जब डुबा देगी तब कौशाम्बी में जाकर बसेगा उससे चित्ररथ और चित्ररथ के कविरथ पुत्र होगा ॥४०॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यद्यस्मात्सुखीनलः पुत्रः ॥ ४१ ॥

तस्मात्परिप्लवात्सुनयस्तस्याऽऽत्मजो मेधावीत्यर्थः ॥ ४२ ॥

तस्मात्सुदासस्ततः शतानीक इत्यर्थः ॥ ४३-४५ ॥

(१) दूर्वो निमित्तस्माद् इति वीर०

निमेर्बृहद्रथस्तस्माच्छतानीकः सुदासजः ।
शतानीकाद्दुर्दमनस्तस्यापत्यं वहीनरः ॥ ४३ ॥
दण्डपाणिर्निमिस्तस्य क्षेमको भविता नृपः ।
ब्रह्मक्षत्रस्य वै प्रोक्तो वंशो देवर्षिसत्कृतः ॥ ४४ ॥
क्षेमकं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ ।
अथ मागधराजानो भवितारो वदामि ते ॥ ४५ ॥
भविता सहदेवस्य मार्जारिर्यच्छ्रुतश्रवाः ।
ततोऽयुतायुस्तस्यापि निरमित्रोऽथ तत्सुतः ॥ ४६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

बृहद्रथस्य जरासन्धस्तस्य सहदेवस्तस्य मार्जारिः यस्मात् मार्जारेः श्रुतश्रवाः ॥ ४६-४८ ॥

श्रीमद्वीरराघवचार्यकृतभागवतचन्द्रचन्द्रिका ।

तस्माच्चित्ररथात् दृष्टिमान् तस्मात् दृष्टिमतः सुषेणो महाः पतिः सुतो भविता तस्य सुषेणस्य सुनीथो भविता तस्य च नृचक्षुः यत् यस्मान्नृचक्षोः सुखीनलो भविता ॥ ४१ ॥

स च पारिप्लवः सुतो यस्य तथाभूतः तस्मात्पारिप्लवात् मेधावी स च सुनय आत्मजो यस्य तथाभूतः । यद्वा, पारिप्लवात्सुनयः तस्यात्मजो मेधावीत्यर्थः । तस्मान्नृपञ्जयः तस्माच्च दूर्वस्ततश्च निमिर्जनिष्यति ॥ ४२ ॥

निमेर्बृहद्रथः तस्मात् बृहद्रथात् शतानीकः सुदासजः बृहद्रथात्सुदासस्तस्मात् शतानीको जनिष्यत इत्यर्थः । शतानीकात् दुर्दमनस्तस्य दुर्दमनस्यापत्यं पुत्रस्तु विहीनरः ॥ ४३ ॥

तस्य दण्डपाणिस्तस्य तु निमिः तस्य निमेः क्षेमको नृपो भविता तदेवं ब्रह्मक्षत्रस्य ब्रह्मक्षत्रकुलयोर्योनिः कारणभूतो वंशः सोमवंशः देवैः ऋषिभिश्च सत्कृतः अनुगृहीतः ॥ ४४ ॥

कलौ युगे क्षेमकं राजानं प्राप्य क्षेमकपर्यन्तमनुप्रवृत्त इत्यर्थः ततः संस्थां समाप्तिं प्राप्स्यति अजमीढपौत्रस्य सम्वरणस्य सुतः कुरुः तस्य परीक्षिदादयः चत्वारः तत्र परीक्षिदनपत्य उक्तः सुधनुर्जह्नुर्वंशावुक्तौ निषधस्य त्वनुक्त एव तत्रैव सुधनुर्वंश्यस्य बृहद्रथस्यैको वंशो जगुरन्त उक्तः अन्यस्तु श्रुतश्रवपर्यन्तः इदानीं श्रुतश्रवः पितामहात् सहदेवात् मगधाधिपतेर्भविष्यतो वंशान् वक्तुं प्रतिजानीते-अथेति । मगधराजानः मगधदेशाधिपतीन् भाविनस्ते तुभ्यं वदामि ॥ ४५ ॥

सहदेवस्य जरासन्धसुतस्य मार्जालेयः भविता भविष्यति ततो मार्जालेयाच्छ्रुतश्रवाः ततः श्रुतश्रवसः अयुतायुस्तस्यापि निरमित्रः तत्सुतः निरामित्रसुतः सुनक्षत्रः ततः सुनक्षत्रात्तु बृहत्सेनो भविता अथ बृहत्सेनात्कर्मजित् ततः कर्मजितः श्रुतञ्जयः तस्य शुचिर्नाम विप्रो भविष्यति ॥४६—४७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

संस्थामवसानम् ॥ ४५—४८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नृचक्षुर्यत्सुखीवल इति । नृचक्षुस्तस्यापि सुखीवलः ततः परिप्लवः तस्माच्च सुनयः तस्यापि मेधावीति विष्णुपुराणगद्यम् ॥ ४१—४३ ॥

देवर्षिसत्कृत इति देवैः ऋषिभिश्च सत्कृतः ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यद्यतः सुखीनलनामा ॥ ४१ ॥

तस्मात् परिप्लवः तस्य सुनयः तस्यात्मजो मेधावीत्यर्थः ॥ ४२ ॥

तस्मात्सुदासः ततः शतानीक इत्यर्थः ॥ ४३ ॥

देवैर्ऋषिभिश्च सत्कृतः ॥ ४४ ॥ ४५ ॥

सहदेवस्य जरासन्धपुत्रस्य ॥ ४६—४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तस्मात्परिप्लवात्सुनयात्मजः सुनयपुत्रद्वारा जातो मेधावी पौत्रः ॥ ४२ ॥

तस्माद्बृहद्रथात् सुदासजः सुदासात् पुत्राज्जातः शतानीकः पौत्रः ॥ ४३ ॥ ४४ ॥

अथ भविष्यान् मगधाधिपान् वक्तुं प्रतिजानीते—अथेति ॥ ४५ ॥

बृहद्रथस्य जरासन्धस्तस्य सहदेवस्तस्य मार्जारिः यद्यस्मान्मार्जारेः श्रुतश्रवाः ॥ ४६—४८ ॥

सुनक्षत्रः सुनक्षत्राद्बृहत्सेनोऽथ कर्मजित् ।
ततः सृतञ्जयाद्विप्रः शुचिस्तस्य भविष्यति ॥ ४७ ॥
क्षेमोऽथ सुव्रतस्तस्माद्धर्मसूत्रः शमस्ततः ।
द्युमत्सेनोऽथ सुमतिः सुबलो जनिता ततः ॥ ४८ ॥
सुनीथः सत्यजिदथ विश्वजिद्यद्रिपुञ्जयः ।
बार्हद्रथाश्च भूपाला भाव्याः साहस्रवत्सरम् ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
पारमहंस्यां संहितायां वैयासिक्याम् शान्तनुवंशकीर्तनं नाम
द्वाविंशोऽध्यायः ॥ २२ ॥

भाषा टीका ।

रुचिरथ के पुत्र दृढ़िमान् उनके सुषेण पृथ्वी के पति होंगे उनके पुत्र सुनीथ उनसे नृचक्षु तिनसे सुखीनल पुत्र होंगे ॥ ४१ ॥

और सुखीनल के परिप्लव उनसे सुनय उनसे मेधावी पुत्र होंगे उनसे नृपंजय, तिनसे दूर्व, और दूर्व से तिमि राजा पुत्र होंगे ॥ ४२ ॥

तिमि के बृहद्रथ, तिनके सुदास, तिनके शतानीक, शतानीक से दुर्दमन तिनसे महीनर पुत्र उत्पन्न होगा ॥ ४३ ॥

तिससे दंडधारी निमि पुत्र होगा उससे क्षेमक राजा होगें। हे राजन्! देवता ऋषियों से सत्कृत ब्राह्मण क्षत्रिय दोनों का वंश मैंने तुमसे कहा ॥ ४४ ॥

कलि में क्षेमक राजा तक यह वंश चलेगा पीछे नष्ट होजायगा। हे राजन्! अब मगध देश के राजाओंकी सन्तति मैं तुमसे कहता हूं सो सुनो ॥ ४५ ॥

सहदेव के मार्जारि पुत्र होगा तिससे श्रुतश्रवा और श्रुतश्रवा का अयुतायु तिससे निरमित्र पुत्र होगा ॥ ४६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सहस्रसम्वत्सरमेते भाव्या भूपालास्ततःपरं भाव्यान् द्वादशस्कन्धे वक्ष्यति ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
द्वाविंशोऽध्यायः ॥ २२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तस्य शुचेः क्षेमो नाम राजन्यः अथ क्षेमात्सुव्रतः तस्मात् सुव्रताद्धर्मनेत्रः श्रुतः प्रख्यातः तस्मो धर्मनेत्रात् दृढसेनः अथ दृढसेनात्सुमतिस्ततस्सुमतेः सुबलो जनिता जनिष्यते ॥ ४८ ॥

ततः सुनीथः अथ सुनीथात् सत्यजित् तस्माद्विश्वजित् तस्माच्च पुरञ्जयः त एते सर्वे बार्हद्रथाः बृहद्रथवंश्याः सहस्रवत्सरान्तं भाव्या भाविनः ततः पश्चाद्बार्हद्रथो वंशः संस्थामेष्यतीति भावः ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
द्वाविंशोऽध्यायः ॥ २२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यद्यस्माद्रिपुञ्जयो भविता ॥ ४९ ॥

इतिश्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
द्वाविंशोऽध्यायः ॥ २२ ॥
(विजयध्वजटीका एकोऽनविंशः)

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
द्वाविंशोऽध्यायः ॥ २२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

जरासन्धात्सहस्रवत्सरपर्य्यन्तं भविष्यन्तः ततः परन्तु भाव्यान् द्वादशस्कन्धे वक्ष्यति ॥ ४९ ॥

इति सारार्थदर्शिन्यां हर्षिण्याम् भक्तचेतसाम् ।
द्वाविंशो नवमस्यायं सङ्गतः सङ्गतः सताम् ॥ २२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सहस्रवत्सरमेते बार्हद्रथाः भूपाला भाव्यास्ततःपरं भविष्याद्‌ द्वादशे स्कन्धे वक्ष्यति ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
द्वाविंशोऽध्यायः ॥ २२ ॥

भाषाटीका ।

उससे सुनक्षत्र, तिससे बृहत्सेन, और बृहत्सेन के कर्मजित, तिससे श्रुतंजय, तिससे विप्र, तिसका पुत्र शुचि होगा ॥ ४७ ॥

तिससे क्षेम उससे सुव्रत, तिसके धर्मसूत्र, तिससे शम तिससे द्युमत्सेन, तिससे सुमति, और सुमति का सुबल पुत्र होगा ॥ ४८ ॥

उससे सुनीथ, तिससे सत्यजित, तिससे विश्वजित, उसके रिपुञ्जय पुत्र होगा । हे राजन् ! बृहद्रथ के वंश में इतने राजा हजार वर्ष तक कलि में होंगे ॥ ४९ ॥

इति श्रीमद्भागवत नवम स्कन्ध में द्वाविंश अध्याय की
श्रीवृन्दावनस्थ पं० भगवताचार्यकृत
भाषा टीका समाप्ता ॥ २२ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे द्वाविंशोऽध्यायः ॥ २२ ॥

॥ त्रयोविंशोऽध्यायः ॥

श्रीशुक उवाच ।

अनोः सभानरश्चक्षुः परोक्षश्च सुतास्त्रयः ।
सभानरात्कालनरः सृञ्जयस्तत्सुतस्ततः ॥ १ ॥
जनमेजयस्तस्य पुत्रो महाशीलो महामनाः ।
उशीनरस्तितिक्षुश्च महामनस आत्मजौ ॥ २ ॥
शिबिर्वनः शमिर्दक्षश्चत्वारोशीनरात्मजाः ।
वृषादर्भः सुवीरश्च मद्रः कैकेय आत्मजाः ॥ ३ ॥
शिबेश्चत्वार एवासंस्तितिक्षोश्च रुशद्रथः ।
ततो हेमोऽथ सुतपा बलिः सुतपसोऽभवत् ॥ ४ ।
अङ्गवङ्गकलिङ्गाद्याः सिंहपुण्ड्रान्ध्रसंज्ञिताः ।
जज्ञिरे दीर्घतमसो बलेः क्षेत्रे महीक्षितः ॥ ५ ॥
चक्रुः स्वनाम्ना विषयान् षडिमान् प्राच्यकांश्च ते ।
खलपानोऽङ्गतो जज्ञे तस्माद्दिविरथस्ततः ॥ ६ ॥
सुतो धर्मरथो यस्य जज्ञे चित्ररथोऽप्रजाः ।
रोमपाद इति ख्यातस्तस्मै दशरथः सखा ॥ ७ ॥
शान्तां स्वकन्यां प्रायच्छदृष्यशृङ्ग उवाह ताम् ।
देवे वर्षति यं रामा आनिन्युर्हरिणीसुतम् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्रयोविंशे त्वनोर्द्रुह्योस्तुर्वसोश्चान्वयः क्रमात् ।
यदोश्च वंशोऽनुक्रान्तो यावज्ज्यामघसम्भवः ॥ १ ॥

तदेवं ययातेः पुत्राणां पञ्चमस्य पूरोर्वंशोऽनुक्रान्तः, इदानीं चतुर्थस्य वंशमनुक्रामति—अनोरिति कर्थास्य जगतीपतेरित्यन्तेन ॥ १ ॥

तस्य जनमेजयस्य महाशीलः महामनाः ॥ २ ॥
चत्वार उशीनरात्मजाः सन्धिरार्षः ॥ ३-१७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवं ययातेः पुत्राणां पञ्चमस्य पुरोर्वंशोऽध्यायत्रयेणानुक्रान्तः इदानीं चतुर्थस्य वंशमनुक्रामति—अनोरिति कर्थास्य जगतीपतेरित्यन्तेन । अनोर्ययातिपुत्रस्य चतुर्थस्य सभानराद्यः त्रयः सुता जज्ञिरे तत्र सभानरात्कालनामः तत्सुतः कालनामसुतः सृञ्जयस्ततः ॥ १ ॥

जनमेजयः तत्पुत्रो जनमेजस्य पुत्रो महाशीलः तस्य महामनाः तस्य तु उशीनरस्तितिक्षुश्चेति द्वावात्मजौ ॥ २ ॥

तत्रोशीनरस्यात्मजाः शिबिप्रभृतयः चत्वारः तत्र शिबेः वृषदर्भादयः चत्वारः एवात्मजा बभूवुः ॥ ३ ॥

तितिक्षोरुशीनरस्यानुजस्य तु वृषद्रथः ततो वृषद्रथाद्धेमः अथ हेमात्सुतपाः सुतपसस्तु बलिः ॥ ४ ॥

तस्य बलेः क्षेत्रे कलत्रे दीर्घतपसा हेतुना अङ्गादिसंज्ञकाः सिंहादिसंज्ञकाश्च महीक्षितो भूपा जज्ञिरे ॥ ५ ॥

तत्राङ्गतः अङ्गात्खनपानो जज्ञे तस्माद्दिविरथः ॥ ६ ॥

नाट्यसङ्गीतवादित्रैर्विभ्रमालिङ्गनार्हणैः।
स तु राज्ञोऽनपत्यस्य निरूप्येष्टिं मरुत्वतः ॥ ९ ॥
प्रजामदाद्दशरथो येन लेभेऽप्रजाः प्रजाः।
चतुरङ्गो रोमपादात्पृथुलाक्षस्तु तत्सुतः ॥ १० ॥
बृहद्रथो बृहत्कर्मा बृहद्भानुश्च तत्सुताः।
आद्याद्बृहन्मनास्तस्माज्जयद्रथ उदाहृतः ॥ ११ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

तस्य सुतो धर्मरतो जज्ञे यस्य धर्मरतस्य चित्ररथो जातः स चाप्रजोऽनपत्यः स एव चित्ररथो रोमपाद इति ख्यातः प्रसिद्धः तस्मै रोमपादायाप्रजाय तस्य सखा दशरथः शान्तां नाम स्वस्य कन्यां प्रायच्छत ददौ। तां च कन्यामृश्यशृङ्ग उवाह उपयेमे, कोसावृश्यशृङ्गः? इत्यपेक्षायां तं विशिनष्टि-यं हरिण्याः सुतं विभाण्डकादुत्पन्नं देवे पर्जन्ये न वर्षति सति वृष्ट्यर्थं रामा गणिकाः नाट्यादिभिरुपायैरानिन्युः स ऋश्यशृङ्ग इत्यर्थः ॥ ७ ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

ययातिपुत्रस्यानोर्वंशं विशिनष्टि—अनोरिति ॥ १—४ ॥

अङ्गादयो बलेः पुत्राः अङ्गादिविषयसमाना इति ज्ञायन्ते क्षेत्रे भार्यायां महीक्षित इत्यनेन ब्राह्मणकुलं व्यावर्तयति ॥ ५ ॥

प्राच्यकान् प्राचीविषयान् इह भुवि खनपानो नाम ॥६।७॥

अवर्षति सति यमृष्यशृङ्गं हरिणीसुतमिति अनेन ऋष्यस्य सारङ्गस्य शृंगमिव शृङ्गं यस्य स तथा तमिति विग्रहं सूचयति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

१—१४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

अनोर्द्रुह्योस्तुर्वसोश्च यदोर्वंशोऽपि कीर्त्यते।
ज्यामघान्तस्त्रयोविंशे कार्त्तवीर्योऽत्र कीर्तिमान् ॥

ययातेः पञ्चमस्य पुत्रस्य पूरोर्वंशमुक्त्वा चतुर्थादीनां पुत्राणां वंशमाह—अनोरिति ॥ १ ॥ २ ॥

चत्वार उशीनरात्मजाः ॥ ३ ॥ ४ ॥

बलेः क्षेत्रे भार्यायां दीर्घतमस उतथ्यपुत्रात्सकाशात् अङ्गादयो जज्ञिरे ॥ ५ ॥

विषयान् देशान् प्राच्यकान् भारतवर्षस्य पूर्वदिग्वर्त्तिनः ॥६।९।१०॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

एवं ययातेः पुत्रस्य पूरोर्वंश उक्तः अथानोर्द्रुह्योस्तुर्वसोश्च वंशं यदुवंशश्च ज्यामघपर्यन्तमाह— अनोरिति त्रयोविंशेन ॥ १ ॥

तस्य जनमेजयस्य महाशीलः तस्य महामनाः ॥ २ ॥

चत्वार इत्यत्रगुण आर्षः ॥ ३—१९ ॥

भाषा टीका।

बाईस के अध्याय तक पांचवें पुत्र पुरु के वंश का वर्णन कर चुके, अब चौथे अनु के वंश का वर्णन करते हैं ॥ अनु के सभानर, चक्षु, परोक्ष, ये तीन पुत्र उत्पन्न हुए, सभानर से कालनर तिससे सृंजय ॥ १ ॥

तिनसे जनमेजय तिससे महाशील तिनसे महामना पुत्र हुए महामना के उशीनर और तितिक्षु दो पुत्र हुए ॥ २ ॥

और शिवि, वन, शमि, दक्ष, ये चार पुत्र उशीनर के हुए वृषदर्भ, सुवीर, मद्र, ये कैकेय के पुत्र हुए ॥ ३ ॥

शिवि के चार पुत्र भये तितिक्षु से रुशद्रथ उत्पन्न हुए तिससे हेम, उससे सुतपा और सुतपा के पुत्र बलि उत्पन्न भये ॥ ४ ॥

और बलि के क्षेत्र में दीर्घतम से अंग, वंग, कलिंगादिक और सिंह पुंड्र अंध्र नाम वाले ये सब पुत्र उत्पन्न हुए ॥ ५ ॥

इन सब छवों राजाओं ने अपने अपने नाम से छवों देशों का नाम रखा, अंग के पुत्र खनपान हुए, तिन से दिविरथ भये ॥ ६ ॥

उनके पुत्र धर्मरथ तिनसे चित्ररथ पुत्र संतान रहित हुए इनका नाम रोमपाद भी प्रसिद्ध रहा, जिनके मित्र दशरथ महाराज हुए और शांता नामक अपनी कन्या को रोमपाद को पुत्री करके देते हुये उस शांता को ऋष्यशृंग ने विवाही जब इनके राज्य में देव ने वृष्टि नहीं करी, तब दुर्भिक्ष के दुःख से हरिणी पुत्र ऋष्यशृंग को लाने के लिये वरांगनाओं से राजा ने कहा तब वे सब वन में जाकर इनको लुभाकर ले आईं ॥ ७—८ ॥

विजयस्तस्य सम्भूत्यां ततो धृतिरजायत ।
ततो धृतव्रतस्तस्य सत्कर्माऽधिरथस्ततः ॥ १२ ॥
योऽसौ गङ्गातटे क्रीडन् मञ्जूषान्तर्गतं शिशुम् ।
कुन्त्याऽपविद्धं कानीनमनपत्योऽकरोत्सुतम् ॥ १३ ॥
वृषसेनः सुतस्तस्य कर्णस्य जगतीपतेः ।
द्रुह्योश्च तनयो बभ्रुः सेतुस्तस्यात्मजस्ततः ॥ १४ ॥
आरब्धस्तस्य गान्धारस्तस्य धर्मसुतो धृतः ।
धृतस्य दुर्मनास्तस्मात्प्रचेताः प्राचेतसं शतम् ॥ १५ ॥
म्लेच्छाधिपतयोऽभूवन्नुदीचीं दिशमाश्रिताः ।
तुर्वसोश्च सुतो वह्निर्वह्नेर्भर्गोऽथ भानुमान् ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कथं दशरथः स्वकन्यामदादित्यत्राह—सखेति । स तु दशरथः मरुत्वतः इष्टिं मरुत्वद्देवताकामिष्टिं निरूप्यानपत्यस्य राज्ञो रोमपादस्य सख्याद्धेतोः स्वां कन्यां शान्ताख्यामदात् येन दशरथदत्तेन शान्तारूपेणापत्येन अप्रजोऽपि रोमपादः प्रजां लेभे सुप्रजा बभूवेत्यर्थः । रोमपादात्तु चतुरङ्गः तत्सुतश्चतुरङ्गसुतः पृथुलाक्षः ॥ ९-१० ॥

तत्सुताः पृथुलाक्षसुताः बृहद्रथादयस्त्रयः तत्राद्यात् बृहद्रथात् बृहन्मनाः तस्मात् बृहन्मनसः जयद्रथ उदाहृतः ॥ ११ ॥

तस्य जयद्रथस्य संभूत्यां भार्यायां विजयः ततो विजयात् धृतिः अजायत ततो धृतेर्धृतव्रतः तस्य धृतव्रतस्य सत्यकर्मा ततः सत्यकर्मणो रथः ॥ १२ ॥

तं विशिनष्टि-योऽसौ रथः कुन्त्या पाण्डोर्भार्यया कानीनं कन्यावस्थावस्थितायाः स्वस्याः जातमपविद्धं त्यक्तं मञ्जूषायां निक्षिप्येति शेषः । शिशुं मञ्जूषान्तर्गतं पेटिकायां स्थितं कर्णाख्यं गङ्गातटे क्रीडन् अनपत्यस्सन् सुतमकरोत्स रथ इत्यर्थः ॥ १३ ॥

तस्य रथेन स्वीकृतस्य कर्णाख्यस्य जगतीपतेर्भूपालस्य सुतो वृषसेनः । अथ ययातेस्तृतीयस्य सुतस्य द्रुह्योर्वंशमनुक्रामति, द्रुह्योश्चेति द्वाभ्याम् । द्रुह्योर्बभ्रुः तस्य बभ्रोरात्मजः सेतुः ॥ १४ ॥

ततः सेतोरारब्धः तस्य तु गान्धारस्तस्य गान्धारस्य धर्मः सुतः ततो धर्मात् धृतो जज्ञे धृतस्य सुतो दुर्मदस्तस्माद्दुर्मदात् प्रचेताः जज्ञे प्रचेतस्सुतास्तु शतं ते चोदीचीं दिशमाश्रितास्सन्तो म्लेच्छानामधिपतयो बभूवुः । अथ ययातिसुतस्य द्वितीयस्यान्वयमनुक्रामति-तुर्वसोश्चेति द्वाभ्याम् । तुर्वसोः सुतो वह्निः वह्नेस्तु भर्गः अथ भर्गाद्भानुमान् ॥ १५ ॥ १६ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

निरूप्य विचिन्त्य मरुत्वतः इष्टिं इन्द्रविषयामिष्टिम् ॥ ९ ॥
येन इष्टिविशेषेण ॥ १०—१२ ॥
अपविद्धम् अज्ञातवद्विसृष्टं कानीनं कन्यायां जातम् ॥ १३ ॥
ययातिपुत्रस्य द्रुह्योर्वंशं निरूपयति—द्रुह्योश्चेति ॥ १४ ॥ १५ ॥
ययातिपुत्रस्य तुर्वसोर्वंशं कथयति—तुर्वसोरिति ॥ १६ ॥१७॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

प्राचेत इत्यत्र प्रचेतस इति वाच्यम् ॥ १५—२८ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

आद्याद् बृहद्रथात् ॥ ११—१२ ॥
अपविद्धं लज्जया त्यक्तम् ॥ १३ ॥
द्रुह्योर्ययातिपुत्रस्य ॥ १४—१५ ॥
तुर्वसोर्ययातिपुत्रस्य ॥ १६ ॥

———

भाषा टीका ।

नाट्य सुंदरगीत और अनेक प्रकार के बाजाओं को बजाकर भृकुटियों के चेष्टाओं से आलिंगन और पूजाओं से अनेक प्रकार के चेष्टाओं से वे सब लुभाकर लाई ऋष्यशृंग ने भी राजा को पुत्रवान् करने के लिये मरुतों की इष्टि करी ॥ ९ ॥

और इष्टि करके राजा दशरथ को संतान दीनी जिस से निपुत्री दशरथ संतान को प्राप्त हुए ॥ हां राजा रोम पाद से चतुरंग हुए तिनकें पुत्र पृथुलाक्ष हुए ॥ १० ॥

पृथुलाक्ष के बृहद्रथ, बृहत्कर्मा, और बृहद्भानु ये पुत्र भये, बृहद्रथ के पुत्र बृहन्मना हुए, तिनसे जयद्रथ हुए, ॥ ११ ॥

त्रिभानुस्तत्सुतोऽस्यापि करन्धम उदारधीः ।
मरुतस्तत्सुतोऽपुत्रः पुत्रं पौरवमन्वभूत् ॥ १७ ॥
दुष्मन्तः स पुनर्भेजे स्वं वंशं राज्यकामुकः ।
ययातेर्ज्येष्ठपुत्रस्य यदोर्वंशं नरर्षभ ! ॥ १८ ॥
वर्णयामि महापुण्यं सर्वपापहरं नृणाम् ।
यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते ॥ १९ ॥
यत्रावतीर्णो भगवान् परमात्मा नराकृतिः ।
यदोः सहस्रजित्क्रोष्टा नलो रिपुरिति श्रुताः ॥ २० ॥
चत्वारः सूनवस्तत्र शतजित्प्रथमात्मजः ।
महाहयो वेणुहयो हैहयश्चेति तत्सुताः ॥ २१ ॥
धर्मस्तु हैहयसुतो नेत्रः कुन्तेः पिता ततः ।
सोहञ्जिरभवत्कुन्तेर्महिष्मान् भद्रसेनकः ॥ २२ ॥
दुर्मदो भद्रसेनस्य धनकः कृतवीर्यसूः ।
कृताग्निः कृतवर्मा च कृतौजा धनकात्मजाः ॥ २३ ॥
अर्जुनः कृतवीर्यस्य सप्तद्वीपेश्वरोऽभवत् ।
दत्तात्रेयाद्धरेरंशात्प्राप्तयोगमहागुणः ॥ २४ ॥

भाषा टीका ।

तिनके विजय हुए, तिनसे संभूति भार्या में धृति हुए, तिनसे धृतव्रत, तिनसे सत्कर्मा, तिनसे अधिरथ हुए ॥ १२ ॥

उन अधिरथ ने गंगा तट पर खेलते में एक संदूक के भीतर बालक पाया, जिसको कुंती ने कन्या पने में होने के कारण त्याग किया रहा। राजा अधिरथ के पुत्र न रहा इस से उसी को पुत्र स्वीकार कर लिया ॥ १३ ॥

वही कर्ण दानी हुए, उन राजा कर्ण के वृषसेन पुत्र हुए, ॥ द्रुह्यु के पुत्र बभ्रु हुए, और उनके पुत्र सेतु हुए ॥ १४ ॥

तिन से आरब्ध तिनके गांधार, तिनसे धर्म, तिनसे धृत हुए, धृत के दुर्मना, तिनके प्रचेता, प्रचेता के सौ पुत्र भये ॥१५॥

वे सब उत्तर दिशा में म्लेच्छों के राजा होते हुए । तुर्वसु के पुत्र वह्नि हुए, तिनके भर्ग हुए, तिनसे राजा भानुमान् पुत्र हुए,॥१६॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स दुष्यन्तः स्वं वंशं पौरवं वंशम् ॥ १८-२० ॥

प्रथमस्य सहस्रजित आत्मजः ॥ २१ ॥

कुन्तेः सोहञ्जिः सोहञ्जेर्महिष्मान् महिष्मतो भद्रसेनकः ॥२२॥

भद्रसेनस्य दुर्मदो धनकश्चेति द्वौ पुत्रौ कृतवीर्यस्य जनकः कृतवीर्यादयश्चत्वारो धनकस्यात्मजा इत्यर्थः २३—२५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्सुतो वह्निस्तत्सुतः सुभानुः अस्यापि सुभानोरपि करन्धमः स च उदारा धीर्यस्य तथाभूतः तत्सुतः करन्धमसुतः मरुत्तः स चापुत्रस्सन् पौरवं पूरोर्वंशे जातं दुष्यन्तं पुत्रमन्वभूत् प्राप्तवान् तं स्वीकृतवान् इत्यर्थः ॥ १७ ॥

स च दुष्यन्तः राज्यकामुकस्सन् स्ववंशं जनकवंशमेव भेजेऽन्ववर्तत । अथ यदोर्वंशं वक्तुं प्रतिजानन् तत्र शुश्रूषामुत्पादयति—ययातेरिति द्वाभ्याम् । हे नरर्षभ ! ययातेर्यो ज्येष्ठः पुत्रस्तस्य यदोर्वंशं वर्णयामि अनुक्रमिष्यामि, कथम्भूतम् ? महापुण्यं वदतां शृण्वताञ्च नृणां पुण्यावहं पापहरञ्च तस्य पापहरत्वमेव सहेतुकमुपपादयति, यदोर्वंशं श्रुत्वा नरः सर्वैः पापैः प्रमुच्यते निर्मुक्तो भवति यत्र यदोर्वंशे भगवान् षाड्गुण्य पूर्णः परमात्मा नरस्याकृतिरिवाऽऽकृतिराकारो यस्य तथाभूतोऽवतीर्णः श्रीकृष्णरूपेणेति भावः । यदोः सूनवः सुताः सहस्रजिदादयश्चत्वारः श्रुताः विश्रुताः ॥१८-२०॥

तत्र चतुर्णां मध्ये प्रथमात्मजः प्रथमस्य सहस्रजितः आत्मजः शतजित् तत्सुताः शतजित्सुताः महाहयादयः त्रयः तत्र हैहयस्य सुतो धर्मः ततो धर्मान्नेत्रो जज्ञे स च कुन्तेः पिता सोऽपि कुन्तिरिति प्रसिद्ध इति भावः । कुन्तेर्नेत्रापरनामधेयात् सोऽहञ्जिरभूत् ततो माहिष्मान् ततश्च भद्रसेनकः ॥ २१ ॥ २२ ॥

न नूनं कार्तवीर्यस्य गतिं यास्यन्ति पार्थिवाः ।
यज्ञदानतपोयोगश्रुतवीर्यजयादिभिः ॥ २५ ॥
पञ्चाशीतिसहस्राणि ह्यव्याहतबलः समाः ।
अनष्टवित्तस्मरणो बुभुजे ऽक्षय्यषड्वसु ॥ २६ ॥
तस्य पुत्रसहस्रेषु पञ्चैवोर्वरिता मृधे ।
जयध्वजः शूरसेनो वृषभो मधुरूर्जितः ॥ २७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

भद्रसेनकस्य तु दुर्मदो धनकश्चेति द्वौ पुत्रौ, तत्र धनकः कृतवीर्यसूः कृतवीर्यं सुषुवे इति तथा कृतवीर्यस्य पितेत्यर्थः । न केवलं कृतवीर्यसूरेव, किन्तु कृतग्न्यादयोऽपि त्रयस्तदात्मजाः धनकस्यात्मजाः कृतवीर्यादयश्चत्वारो धनकस्यात्मजा इत्यर्थः । तत्र कृतवीर्यसुतो ऽर्जुनः कार्त्तवीर्य इति प्रसिद्धः स च सप्तानां द्वीपानामीश्वरोऽधिपतिर्बभूव, तं विशिनष्टि-हरेरंशावतारूपाद्दत्तात्रेयात्प्राप्तो योगः गुणा अणिमादयश्च येन सः॥ २३—२४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सूचीकटाहन्यायेन द्रुह्यादीनां पुत्राणां वंशं कथयित्वा बहुलत्वाद्विशेषपुण्यहेतुत्वाच्च ज्येष्ठपुत्रस्य यदोर्वंशं कथयति-ययातेरिति ॥ १८-२५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अपुत्रः अत एव पौरवं पुरुवंश्यं दुष्मन्तमेव पुत्रम् अन्वभूद अमन्यत ॥ १७ ॥

स च दुष्यन्तःस्ववंशं पौरववंशमेव भेजे नतु तुर्वसुवंशं यतो राज्यकामुकः पुरुवंश्यानामेव नृपासनाधिकारात् ॥ १८-१९ ॥

नराकृतिर्नरस्वरूपो नरजातिर्वेत्याकृतिशब्दस्य स्वरूपवाचित्वे जातिवाचित्वे वा परमात्मनो नरत्वस्य न तादर्थ्यं किन्तु स्वरूपत्वमेवेति ज्ञापितम् "गूढं परम्ब्रह्म मनुष्यलिङ्गम्" इत्यनेन ज्ञापितम् अग्रेऽपि ज्ञापयिष्यते सोहञ्जेर्महिष्मान् महिष्मतो भद्रसेनकः ॥ २०—२२ ॥

भद्रसेनस्य दुर्मदो धनकश्चेति द्वौ पुत्रौ तत्र धनकः कृतवीर्यसूरिति धनकस्य कृतवीर्यः पुत्रः तथा कृताग्न्यादयस्त्रयश्चेति चत्वारः पुत्राः ॥ २३ ॥

ननु, ययातिशापात् स यदुवंशः कथं सप्तद्वीपेश्वरस्तत्राह, दत्तेति ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पौरवं पुरुवंश्यं दुष्यन्तं पुत्रमन्वभूत् स्वीकृतवान् स दुष्यन्तः राज्यकामुकः स्ववंशं पौरवं वंशं पुनर्भेजे ॥ १७—१९ ॥

प्रथमस्य सहस्रजितः आत्मजः ॥ २०—२१ ॥

कुन्तेः सोहञ्जिरभवत् सोहञ्जेर्महिष्मान् महिष्मतो भद्रसेनकः ॥ २२ ॥

भद्रसेनस्य दुर्मदो धनकश्चेति पुत्रद्वयम्, कथम्भूतो धनकः ? कृतवीर्यसूः कृतवीर्यं सुषुवे इति स तथा धनकस्य कृतवीर्यादयश्चत्वारः पुत्रा इत्यर्थः ॥ २३—२५ ॥

भाषा टीका ।

श्रीशुक उवाच

तिनके भी त्रिभानु हुए, त्रिभानु के भी करंधम बडे उदार बुद्धि हुए, तिनके पुत्र मरुत हुए, वे मरुत निपुत्री हुए, और उनोंने पुरुवंशी दुष्यंत को पुत्र मान लिया ॥ १७ ॥

राज्य की कामना वाले दुष्यंत ने मरुत का राज्य ग्रह कर फिर भी अपने पुरुवंश में होगये ॥ हे नरश्रेष्ठ ! अब हम ययाति के ज्येष्ठ पुत्र यदु के बडे पुण्य रूप वंश को वर्णन करते हैं । जो कि-मनुष्यों के सर्व पापों को दूर करने वाला है । यदु के वंश को मनुष्य सुनकर सर्व पापों से छूट जाता है ॥ १८-१९ ॥

क्योंकि-जिस वंशमें परात् पर परमात्मा साक्षात् भगवान् नराकृति हो अवतार लेते हुए । यदु के सहस्रजित, क्रोष्टा, नल, रिपु, ये चार हुए ॥ २० ॥

तिन में सहस्रजित् के पुत्र शतजित् हुए, और शतजित के महाहय, वेणुहय, हैहय, ये तीन पुत्र हुए, ॥ २१ ॥

हैहय के पुत्र धर्म हुए, तिनके नेत्र, तिनके कुन्ति, तिन के सोहञ्जि, तिनके महिष्मान, तिनके भद्रसेनक, हुए ॥ २२ ॥

भद्रसेन के दो पुत्र हुए, दुर्मद और धनिक, धनक के कृतवीर्य, कृताग्नि, कृतवर्मा, और कृतौजा, ये चार आत्मज हुए ॥ २३ ॥

कृतवीर्य के पुत्र कार्त्तवीर्य अर्जुन सप्त द्वीपों के पति हुए, जिनने हरि के अंश श्रीदत्तात्रेय से महा योग रूप गुण प्राप्त किया ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अनष्टमविनाशं वित्तं येन तथाविधं स्मरणं यस्य सः अक्षय्यं षड्वसु षडिन्द्रियविषयं बुभुजे ॥ २६ ॥ २७ ॥

जयध्वजात्तालजङ्घस्तस्य पुत्रशतं त्वभूत् ।
क्षत्रं यत्तालजङ्घाख्यमौर्वतेजोपसंहृतम् ॥ २८ ॥
तेषां ज्येष्ठो वीतिहोत्रो वृष्णिः पुत्रो मधोः स्मृतः ।
तस्य पुत्रशतं त्वासीद्वृष्णिज्येष्ठं यतः कुलम् ॥ २९ ॥
माधवा वृष्णयो राजन् ! यादवाश्चेति संज्ञिताः ।
यदुपुत्रस्य च क्रोष्टोः पुत्रो वृजिनवांस्ततः ॥ ३० ॥
श्वाहिस्ततो रुशेकुर्वै तस्य चित्ररथस्ततः ।
शशबिन्दुर्महायोगी महाभोजो महानभूत् ॥ ३१ ॥
चतुर्दशमहारत्नश्चक्रवर्त्यपराजितः ।
तस्य पत्नीसहस्राणां दशानां सुमहायशाः ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

और्वस्य तेजसा सगरेणोपसंहृतमित्यर्थः ॥ २८ ॥

तेषां तालजङ्घपुत्राणां ज्येष्ठः तस्य मधोः पुत्रशतम् वृष्णिज्येष्ठो यस्मिन् यतो मधोर्वृष्णेर्यदोश्च हेतोरिदं कुलम् ॥ २९-३१ ॥

चतुर्दशमहारत्नानि तत्तज्जातिश्रेष्ठानि यस्य सः तानि च मार्कण्डेयपुराणे वर्णितानि—

"गजवाजिरथस्त्रीषु निधिमाल्याम्बरद्रुमाः ।
शक्तिपाशमणिच्छत्रविमानानि चतुर्दश" ॥ इति

दशानां पत्नीसहस्राणां भार्यायुतस्य प्रत्येकं लक्षं लक्षामेवं तासु पुत्राणां दशलक्षसहस्राणि जनयामास ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किं बहुना सर्वे पार्थिवाः संभूयापि यज्ञादिभिः श्रुतादिभिश्च कार्त्तवीर्यस्य गतिं प्रकारं साम्यं नूनं ध्रुवं न यास्यन्ति किञ्चाऽव्याहतं बलं यस्य सोऽर्जुनः पञ्चाशीतिसहस्राणि समाः वर्षाणि राज्यमकरोत्, कथंभूतः ? हरिं दत्तात्रेयमनुस्मरन् किञ्च अनष्टमविनाशं वित्तं येन तथाविधं स्मरणं यस्य तथा यस्य स्मरणाद्विनष्टमपि वित्तं पुनर्लभ्यते तथाभूत इत्यर्थः । अक्षय्यं षड्वसु षडिन्द्रियविषयसुखम् ॥ २५—२६ ॥

तस्य कार्त्तवीर्यस्य यत्पुत्राणां सहस्रं तस्य तत्र जयध्वजादयः पञ्चैवोर्वरिता मृधे युधि अवशेषिताः इतरे तु भार्गवरामेण हता इत्यर्थः । तत्र जयध्वजात्तालजङ्घः तस्य तालजङ्घस्य तु पुत्रशतमभूत् यच्छतसंख्याकं तालजङ्घाख्यं क्षत्रं क्षत्रियाः और्वस्य ऋषेस्तेजसोपबृंहितेन सगरेणेत्यर्थः । उपसंहृतं विनाशितम् ॥ २७ ॥ २८ ॥

तेषां तालजङ्घपुत्राणां ज्येष्ठो वीतिहोत्रस्तस्य सुतो मधुः स्मृतः प्रख्यातः मधोस्सुतस्तु वृष्णिः प्रख्यातः न केवलं वृष्णेरेवाऽपि तु वृष्णिर्ज्येष्ठो यस्मिन् तत्पुत्राणां शतं तस्य मधोः आसीदित्यर्थः । वृष्णिः पुत्रो मधोः स्मृतः इति पाठान्तरं तदा तेषां तालजङ्घपुत्राणां ज्येष्ठः सुतो वीतिहोत्रः तस्य तु मधुस्तस्य च वृष्णिरित्यन्वयः । इतरत्पूर्ववत् यतो मधोः कुलं माधवाख्यं यत्रकुलं प्रवृत्तं यस्य मधोर्वृष्णिज्येष्ठं त्रशतमभूदित्यर्थः वृष्णिज्येष्ठमित्यनेन पुत्रशतस्यापि वृष्ण्याख्यत्वमभिप्रेतं यदुवंशजत्वाद्यादवाख्यत्वञ्च ॥ २९ ॥

तदेवाह—माधवा इति । मधोः पुत्राः सर्वे माधवाः माधवनामानः मधोः प्रसूतत्वादिति भावः । वृष्णयः वृष्णिज्येष्ठत्वादिति भावः हे राजन् ! यादवाश्च यदुवंशजत्वादिति भावः । एवं यदोर्ज्येष्ठपुत्रस्य वंश उक्तः । अथ द्वितीयस्य वंशमनुक्रामति—यदुपुत्रस्येत्यादिना । यदुपुत्रस्य क्रोष्टोः पुत्रो वृजिनवान् ततः ॥ ३० ॥

वृजिनवतः श्वाहितः अतः श्वाहितात् उरुशङ्कुः अभिभूस्तत्कुशेकुर्वा इति पाठान्तरं तदा तत्तस्मादभिभुवः कुशेकुरित्यर्थः । तस्य तु चित्ररथः ततश्चित्ररथात् शशिबिन्दुरभूत् तं विशिनष्टि, महायोगी महान् भागो यस्य सः महान् गुणैरिति शेषः ॥ ३१ ॥

चतुर्दशमहारत्नानि तत्तज्जातिश्रेष्ठानि यस्य सः तानि च मार्कण्डेयपुराणे दर्शितानि—

"गजवाजिरथास्त्रेषुनिधिमालाम्बरद्रुमाः ।
शक्तिपाशमणिच्छत्रविमानानि चतुर्दश" इति.

चक्रवर्ती सप्तद्वीपाधिपतिः अपराजितः जयी तस्य शशिबिन्दोः सम्बन्धिनां पत्नीसहस्राणां दशानां भार्यायुतस्येत्यर्थः तेषां प्रत्येकं लक्षलक्षमित्येवं तासु महायशाः शशिबिन्दुः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अनष्टम् अविच्छिन्नं विष्णुस्मरणं यस्य स तथा सन्ततविष्णुस्मरणोपेतः षष्ठांश वसु षड्वसु षड्भ्यो गुणेभ्यो लब्धं यद्वसु तत् षड्वसु वा ॥ २६—२८ ॥

और्वमुनेः तेजसोपसंहृतम् ॥ २९-३५ ॥

दशलक्षसहस्राणि पुत्राणां तास्वजीजनत् ।
तेषां तु षट्प्रधानानां पृथुश्रवस आत्मजः ॥ ३३ ॥
धर्मो नामोशनास्तस्य हयमेधशतस्य याट् ।
तत्सुतो रुचकस्तस्य पञ्चासन्नात्मजाः शृणु ॥ ३४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तेषामिति सार्द्धकम् । ते च माधवा इत्यादि संज्ञिता इत्यर्थः । ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

॥ २५ ॥

न नष्टं भवति वित्तं स्मरणाद्यस्य सः अक्षय्यं षड्वसु षडिन्द्रियविषयं बुभुजे ॥ २६ ॥

मृधे परशुरामयुद्धे और्वस्य तेजसा सगरेणोपसंहृतमित्यर्थः ॥ २७–२८ ॥

तेषां तालजङ्घपुत्राणां ज्येष्ठः मधोरर्जुनपुत्रस्य तस्य मधोः पुत्रशतं वृष्णिर्ज्येष्ठो यस्मिन् यतो मधोः वृष्णेर्यदोश्च हेतोरिदं कुलम् । माधवा इति यदुमधुवृष्ण्याय एते त्रयः कुलप्रवर्त्तकाः यदुवंशो मधुवंशो वृष्णिवंश इति प्रसिद्धेः ॥ ३० ॥ ३१ ॥

चतुर्दशमहारत्नानि तत्तज्जातिश्रेष्ठानि यस्य सः तानि च
"गजवाजिरथस्त्रीपुनिधिमाल्याम्बरद्रुमाः ।
शक्तिपाशमणिच्छत्रविमानानि चतुर्दश" ॥
इति मार्कण्डेयोक्तानि ज्ञेयानि ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अव्याहतं बलं यस्य पञ्चाशीतिसहस्राणि समाः वर्षाणि अक्षय्यं षड्वसु अव्ययं षडिन्द्रियविषयं बुभुजे, कथम्भूतः ? अनष्टं नष्टमपि पुनर्लब्धं वित्तं येन तथाविधं स्मरणं यस्य सः तथोक्तं "हैयानां महाराजः कार्तवीर्येति विश्रुतः । यस्य स्मरणमात्रेण हृतं नष्टं च लभ्यते" ॥ २६—२७ ॥

और्वतेजोपसंहृतम् और्वतेजसा सगरेण विनाशितम् ॥ २८ ॥

तेषां तालजङ्घपुत्राणां ज्येष्ठो वीतिहोत्रः मधोः पुत्रो वृष्णिः स्मृतः तस्य मधोः वृष्णिः ज्येष्ठो यस्मिन् तत् पुत्रशतमासीत् अत्रेदं बोध्यं तालजङ्घसुतो भरतो भरतस्य वृषो वृषस्य मधुस्तस्य वृष्णिप्रमुखं पुत्रशतमित्यर्थः । तथाह भगवान् पराशरः तालजङ्घस्य तालजङ्घाख्यं पुत्रशतमासीत् येषां ज्येष्ठो वीतिहोत्रस्तथान्यो भरतो भरताद्वृषस्तुजातो मधुरभवत् तस्यापि वृष्णिप्रमुखं पुत्रशतमासीदिति यतो मधोर्वृष्णेर्यदोश्चेदं कुलम् ॥ २९–३० ॥

महान् भोजो भोगो यस्य सः ॥ ३१ ॥

चतुर्दशमहारत्नानि तत्तज्जातिश्रेष्ठानि यस्य सः तानि मार्कण्डेयपुराणे दर्शितानि–
"गजवाजिरथस्त्रीषु निधिमाल्याम्बरद्रुमाः ।
शक्तिपाशमणिच्छत्रविमानानि चतुर्दश" ॥ इति
तस्य शशबिन्दोः पत्नीसहस्राणां दशानां भार्यासुनस्त्वेत्यर्थः प्रत्येकं लक्षं लक्षमित्येवं तासु महायशाः शशबिन्दुः पुत्राणां दशलक्षसहस्राणि अजीजनत् पृथुश्रवाः पृथुकीर्तिः पृथुयशाः इत्यादयः षट् प्रधानाः मुख्याः येषां षट्प्रधानानां मध्ये पृथुश्रवसः आत्मजः ॥ ३३ ॥

भाषा टीका ।

अन्यराजा लोग यज्ञ, दान, तप, योग, श्रुत, वीर्य और जय, आदि गुणों से निश्चय कर कार्त्तवीर्य के महत्त्व को नहीं प्राप्त हो सकेंगे ॥ २५ ॥

क्योंकि-जिसने पचाशी (८५) हजार वर्षों तक अव्याहत (अनष्ट) पौरुष और अनष्ट वित्त स्मरण वाला होकर अक्षय षट् इन्द्रियों के भोगों को भोगे ॥ २६ ॥

तिन के हजारहों पुत्रों में से संग्राम में पांच ही अवशिष्ट रहे, जयध्वज, शूरसेन, वृषभ, मधु, और ऊर्जित ॥ २७ ॥

जयध्वज से तालजंघ हुए, तिनके सौ पुत्र हुए, तालजंघ क्षत्रियकुल को सगर राजा ने अपने गुरू और्व ऋषि के तेज से नष्ट कर दिया ॥ २८ ॥

तिनके विषे ज्येष्ठ वीतिहोत्र रहे, । और मधु के पुत्र वृष्णि हुए तिन मधु के सौ (१००) पुत्र हुए तिनमें बडे यही वृष्णि हुए, जिनों से यह कुल चला ॥ २९ ॥

हे राजन् ! मधु, वृष्णि, और यदु, से यह कुल बढा इसी से इस कुल के राजा लोग माधव (मधुवंशी) वृष्णिवंशी, और यादव (यदुवंशी) ऐसे नाम से प्रसिद्ध हुए । और यदु के पुत्र क्रोष्टा के वृजिनवान् पुत्र हुए, ॥ ३० ॥

तिन से स्वाहि, तिन से रुशेकु, तिनके चित्ररथ, तिन से महायोगी शशविन्दु हुए, तिनके महाभोज हुए ये; बडे प्रतापी हुए ॥ ३१ ॥

इन महाभोज के समीप चतुर्दश महारत्न रहे, और ये चक्रवर्ती हुए, । कोई भी इनको जीत नहीं सका रहा और इनके दश हजार रानियें रहीं ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पृथुश्रवाः प्रथुकीर्तिः पृथुयशा इत्यादयः षट् प्रधानाः श्रेष्ठा येषां तेषां मध्ये ॥ ३३ ॥

पञ्च आत्मजा आसंस्तान् शृणु ॥ ३४ ॥

पुरुजिद्रुक्मरुक्मेषुपृथुज्या (१)मघसंज्ञिताः ।
ज्यामघस्त्वप्रजोऽप्यन्यां भार्यां शैब्यापतिर्भयात् ॥ ३५ ॥
नाविन्दच्छत्रुभवनाद्भोज्यां कन्यामहारषीत् ।
रथस्थां तां निरीक्ष्याऽऽह शैब्या पतिममर्षिता ॥ ३६ ॥
केयं कुहक ! मत्स्थानं(२) रथमारोपितेति वै ।
स्नुषा तवेत्यभिहिते स्मयन्ती पतिमब्रवीत् ॥ ३७ ॥
अहं वन्ध्याऽसपत्नी च स्नुषा मे युज्यते कथम् ।
जनयिष्यसि यं राज्ञि ! तस्ययमुपयुज्यते ॥ ३८ ॥
अन्वमोदन्त तद्विश्वेदेवाः पितर एव च ।
शैब्या गर्भमधात्काले कुमारं सुषुवे शुभम् ।
स विदर्भ इति प्रोक्त उपयेमे स्नुषां सतीम् ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां
संहितायां वैयासिक्यां नवमस्कन्धे
त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तानेवाह—पुरुजिदिति । भार्याभयादेवैकभार्यस्य वन्ध्यापतेर्ज्यामघस्यापुत्रस्य तद्भयमेव पुत्रप्रदमभवदिति दर्शयन्नाह-ज्यामघस्त्विति ॥ ३५ ॥ ३६ ॥ ३७ ॥

यदि मे सपत्नी स्यात्तर्हि स्नुषेयं युज्येताऽपि न त्वेतदस्तीत्याह—असपत्नीचेति । अतिभयव्याकुल आह—जनयिष्यसीति ॥ ३८ ॥

भार्याभयप्रकम्पमानविवशसर्वाङ्गस्य राज्ञः प्राणसङ्कटमालोक्यानुकम्पितास्तेन पूर्वं बहुकालमाराधिताश्च विश्वेदेवाः पितरश्च तथेत्यन्वमोदन्त. ततश्च देवताप्रसादेन जनयिष्यसीति प्रतिवचनमुहूर्तगुणेन च निवृत्तरजस्काऽपि शैब्या गर्भमधात् तस्य च महिमा पराशरादिभिरुक्तः । यथोक्तम्—

"भार्यावश्यास्तु ये के चिद्भविष्यन्त्यथ वा मृताः ।
तेषां तु ज्यामघः श्रेष्ठः शैब्यापतिरभून्नृपः" ॥

इति ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
त्रयविंशोऽध्यायः ॥ २३ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पुत्राणां दशलक्षसहस्राणि जनयामास पृथुश्रवाः पृथुकीर्तिः पृथुयशा इत्यादयः षट् प्रधानाः श्रेष्ठाः येषां तेषां मध्ये यो धर्मो नाम तस्य धर्मस्य उशना सुतः स च हयमेधशतस्य याट् यष्टा तत्सुनः उशनस्सुतो रुचकस्तस्य पञ्चात्मजा आसन् तान् शृणु ॥ ३३ ॥ ३४ ॥

तानेवाह—पुरुजिच्च रुक्मश्च रुक्मेषुश्च पृथुश्च ज्यामखश्चेति संज्ञिनः तत्र ज्यामखः शैब्यायाः पतिः अप्रजः अपुत्रस्सन् भर्याभयात् अन्यां भार्याम् ॥ ३५ ॥

नाविन्दत् न लेभे एवं स्थिते स कदाचिच्छत्रून् विजित्य तेषां भवनात्काञ्चित् कन्यां भोज्यां भुजिष्यामुपभार्यार्थमिति यावत् अहर्षीदानिन्ये तां रथे स्थितां कन्यामालोक्य शैब्या ऽमर्षिता सती पतिं ज्यामखमाह-किमिति ? हे कुहक वञ्चक ! मत्स्थानं मदुपशयोग्यं स्थानमियं कथमारोपिता? इति. ततस्तस्या भयाज्ज्यामखः तव स्नुषेयमानीतेत्युक्ते सति पतिं स्मयन्ती सती शैब्योवाच ॥ ३६ ॥ ३७ ॥

किमिति ? अहं वन्ध्या असपत्नी अविद्यमाना सपत्नी यस्यास्तथाभूता च अतो मे मम स्नुषा कथं युज्येत उपपद्येत; इति. ततस्तां ज्यामख आह, हे राज्ञि ! त्वं यं पुत्रं जनयिष्यसि तस्येयं भार्या सती उपपत्स्यते तव स्नुषा भविष्यतीति. ततः सा शैब्या अन्वमोदत तथैवेत्यङ्गीचकार तदा भार्याभयप्रकम्पमान-

(१) मखः । (२) कथम् इति च वीर०

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

खिन्नसर्वाङ्गस्य राज्ञः प्राणसङ्कटमालोक्यानुकम्पितास्तेन पूर्वं बहुकालमाराधिताः विश्वेदेवाः पितरश्च तथास्त्वित्यन्वमोदन्त ततश्च देवताप्रसादेन जनयिष्यसीति वचनमुहूर्त्तगुणेन निवृत्तरजस्कापि शैब्या गर्भमधात् धृतवती ततः सा प्राप्तकाले शुभलक्षणं कुमारं सुषुवे स च कुमारो विदर्भ इति प्रोक्तः प्रख्यातः ततः शैब्या स्नुषाम् उपयेमे उपयमयामास ज्यामघस्य महिमा तु पराशरादिभिरुक्तः यथोक्तं—

"भार्यावश्यास्तु ये केचिद्भविष्यन्ति तथा मृताः ।
तेषां वै ज्यामघश्रेष्ठः शैब्यापतिरभून्नृपः"

इति ॥ ३८ ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

युद्धे अग्राम् ॥ ३६ । ३७ ॥
असपत्नी सपत्नीरहिता ॥ ३८ ॥
स्नुषाम् पूर्वं स्नुषेत्यभिहिताम् ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
त्रयोविंशोऽध्यायः ॥ २३ ॥
(विजयध्वजरीत्या विंशः ।)

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

षट् प्रधानानि येषां "क्लीबे प्रधानम्" इत्यमरः ॥ ३३—३९ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

दशलक्षसहस्राणीति तासु प्रत्येकमेकैकलक्षपुत्रोद्भवात् ॥३३॥
तस्य धर्मस्य उशनाः ॥ ३४—३७ ॥

असपत्नी मम काचित् सपत्न्यपि नास्ति अतिभयव्याकुल आह—जनयिष्यसीति । भार्याभयप्रकम्पितखिन्नसर्वाङ्गस्य यस्य राज्ञः प्राणसङ्कटमालक्ष्य तदेव वचनं कृपया अन्वमोदन्त सत्यं चक्रुः विश्वेदेवाः पूर्वं तेन बहुश आराधिता इति भावः निवृत्तरजस्कापि शैब्या तेषां कृपया गर्भमधात्

"भार्यावश्यास्तु ये केचिद्भविष्यन्त्यथवा मृताः ।
तेषां तु ज्यामघः श्रेष्ठः शैब्यापतिरभून्नृपः" इति

पराशराद्य आहुः ॥ ३८—३९ ॥

इति सारार्थदर्शिण्यां हर्षिण्याम् भक्तचेतसाम् ।
नवमस्य त्रयोविंशः सङ्गतः सङ्गतः सताम् ॥ २३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

धर्मो नाम तस्योशना हयमेधशतस्य याट् यष्टा तस्य सुतो रुचकस्तस्य आत्मजाः पञ्च आसन् ॥ ३४ ॥

तानाह—पुरुजिदिति । शैब्याख्यायाः वन्ध्यायाः पतिः तस्या एव भयात् ॥ ३५ ॥

अन्यां भार्यां नाविन्दत् स कचित् शत्रोर्युद्धे पराजितस्य भवनात् भोज्यां कन्याम् अहार्षीत् आनीतवान् ॥ ३६—३७ ॥

अहं वन्ध्या असपत्नी च अतः पुत्राभावात् इयं स्नुषा कथं युज्यते ? भार्याभयात् व्याकुल आह——जनयिष्यसीति ॥ ३८ ॥

तदा विश्वेदेवाः पितरश्च तथेत्यन्वमोदन्त ततो देवपितृप्रसादतः शैब्या गर्भमधात् ॥ ३९ ॥

इतिश्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
त्रयोविंशाऽध्यायार्थप्रकाशः ॥ २३ ॥

भाषा टीका ।

उन रानियों में महायशस्वी ने दश लाख हजार पुत्र उत्पन्न किये तिनमें छै पुत्र प्रधान हुए, तिनमें पृथुश्रवा के धर्म नामक पुत्र हुए, तिन धर्म के उशना पुत्र हुए, जिनोंने सौ अश्वमेध यज्ञ किये, तिनके सुत रुचक हुए, तिनके आत्मज पांच हुए तिन कों श्रवण करो ॥ ३३—३४ ॥

पुरुजित, रुक्म, रुक्मेषु, पृथु, और ज्यामघ, ऐसे नाम वाले हुए। शैब्या रानी के पति ज्यामघ, राजा के जब संतान न हुई तब उनों को रानी शैब्या के डर से दूसरी भार्या तौ न मिली ॥ ३५ ॥

परन्तु शत्रु के भवन से एक भोज्या नामक कन्या को हरण कर लाये, रथ में बैठी हुई उस कन्या को शैब्या रानी ने देखकर असहन होकर पति से कहा कि— ॥ ३६ ॥

हे कपटी ! यह कौन है जिसको तूंने मेरी जगह पर रथ में बैठाई है,तब राजा डर कर बोला, कि-यह तुमारी बेटा की बहू है, तब फिर रानी हंस कर पति से बोली, कि— ३७ ॥

मैं वंध्या (वांझ) हूं और दूसरी कोई मेरी सपत्नी (सौत) है नहीं, फिर यह मेरी बेटाकी बहू कैसे हुई ? तब राजा बोला,कि-हे रानी जू ! जिस पुत्र को तुम उत्पन्न करोगी यह कन्या उसके उपयोग में आवैगी ॥ ३८ ॥

भाषा टीका ।

इस राजा की बात को विश्वे देवताओं ने और पितृ लोगों ने सुनकर अनुमोदन किया, तब तो शैव्या ने गर्भ धारण किया, और समय पर शुभ पुत्र को उत्पन्न किया, उस का नाम विदर्भ भया, उसने उस सती । स्नुषा (बहू) को व्याही ॥ पराशर ऋषि ने इस विषय में एक श्लोक उदाहरण दिया है कि- जितने आजतक इस पृथवी में अपनी भार्या के वश में रहने वाले मनुष्य आगे होवैंगे और पश्चात् (पीछे) होचुके हैं, उनसबों के मध्य में शैव्या रानी के पति राजा ज्यामघ सब से श्रेष्ठ हुए, इन के बराबर इसजगत में स्त्री से डरने वाला कोई हुआ न होगा —ऐसी इनकी बडाई ऋषिने करीहै ॥३९॥

इति श्री मद्भागवत नवमस्कन्ध में त्रयोविंश अध्यायकी
श्री वृन्दावनस्थ पं० भागवताचार्य कृत
भाषा टीका समाप्ता ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे त्रयोविंशोऽध्यायः ॥ २३ ॥

॥ चतुर्विंशोऽध्यायः ॥

श्रीशुक उवाच ।

तस्यां विदर्भोऽजनयत्पुत्रौ नाम्ना कुशक्रथौ ।
तृतीयं रोमपादञ्च विदर्भकुलनन्दनम् ॥ १ ॥
रोमपादसुतो बभ्रुर्बभ्रोः (१)कृतिरजायत ।
उशिकस्तत्सुतस्तस्माच्चेदिश्चैद्यादयो नृप ! ॥ २ ॥
क्रथस्य कुन्तिः पुत्रोऽभू(२)द्वृष्टिस्तस्याऽथ निर्वृतिः ।
ततो दशार्हो नाम्नाऽभूत्तस्य व्योमः सुतस्ततः ॥ ३ ॥
जीमूतो विकृतिस्तस्य यस्य भीमरथः सुतः ।
ततो नवरथः पुत्रो जातो दशरथस्ततः ॥ ४ ॥
करम्भिः शकुनेः पुत्रो देवरातस्तदात्मजः ।
देवक्षत्रस्ततस्तस्य मधुः(३) कुरुवशादनुः ॥ ५ ॥
पुरुहोत्रस्त्वनोः पुत्रस्तस्यायुः सात्वतस्ततः ।
भजमानो भजिर्दिव्यो वृष्णिर्देवावृधोऽन्धकः ॥ ६ ॥
सात्वतस्य सुताः सप्त महाभोजश्च मारिष ! ।
भजमानस्य निम्लोचिः किङ्किणो धृष्टिरेव च ॥ ७ ॥
एकस्यामात्मजाः पत्न्यामन्यस्यां च त्रयः सुताः ।
शताजिच्च सहस्राजिदयुताजिदिति प्रभो ! ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चतुर्विंशे विदर्भस्य पुत्रत्रयसमुद्भवाः ।
वंशा नानामुखाः प्रोक्ता रामकृष्णोद्भवाऽवधि ॥ १ ॥

॥ १ ॥
चैद्यादयो दमघोषादयः ॥ २ ॥ ३ ॥
ततो दशरथाच्छकुनिः पुराणान्तरादेवमादिविशेषो- द्रष्टव्यः ॥४॥
ततः कुरुवंशादनुः अनोः पुत्रः पुरुहोत्रः ॥ ५ ॥ ६ ॥
महाभोजश्चेत्येवं सप्त मारिष ! हे आर्य ! ॥ ७-९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तस्यां शैब्यया विवाहितायां कन्यायां विदर्भो नाम्ना कुशः क्रथश्चेति द्वौ पुत्रावजनयत् ततस्तृतीयं रोमपादाख्यञ्च तस्यामेवाजनयत्, कथम्भूतम् ? वैदर्भकुलं नन्दयतीति तथाभूतम् ॥ १ ॥

रोमपादस्य सुतो बभ्रुः तस्मात्तु क्रतुरजायत तत्सुतः कुशिकः तस्मात्कुशिकाच्चेदिः ततश्चेदेः चैद्यादयः दमघोषादयो नृपा जज्ञिरे ॥ २ ॥

क्रथस्य विदर्भसुतस्य तु पुत्रः कुन्तिरभूत्तस्य कुन्तेर्वृष्णिः अथ तस्मान्निर्वृतिः विधृतिरिति पाठान्तरं ततो निर्वृतेर्दशार्हाख्यः तस्य दशार्हस्य तु सुतो व्योमः ततो व्योमाज्जीमूतः तस्य जीमूतस्य विकृतिः यस्य विकृतेस्सुतस्तीव्ररथः ततस्तीव्ररथात् नवरथः पुत्रो जातः ततो नवरथाद्दशरथः ॥ ३ ॥ ४ ॥

ततो दशरथात् शकुनिः ततः करम्भ इत्यर्थः । तदात्मजः करम्भात्मजः देवरातः तस्य देवरातस्य सुतो देवक्षत्रः ततो मधुः ततश्च कुकुरकः ॥ ५ ॥

ततः कुकुरकात् पुरुहोत्रः तस्य सात्वतः पुत्रो बभूव

---

(१) क्रतुः इति । (२) वृष्णिः । कुकुरकस्ततः ।

बभ्रुर्देवावृधसुतस्तयोः श्लोकौ पठन्त्यमू ।
यथैव शृणुमो दूरात्सम्पश्यामस्तथाऽन्तिकात् ॥ ९ ॥
बभ्रुः श्रेष्ठो मनुष्याणां (१) देवदेवावृधः समः ।
पुरुषाः पञ्चषष्टिश्च षट्सहस्राणि चाष्ट च ॥ १० ॥
येऽमृतत्वमनुप्राप्ता बभ्रोर्देवावृधादपि ।
महाभोजोऽपि धर्मात्मा भोजा आसन् तदन्वये ॥ ११ ॥
वृष्णेः सुमित्रः पुत्रोऽभूद्युधाजिच्च परन्तप ! ।
शिनिस्तस्यानमित्रश्च निम्नोऽभूदनमित्रतः ॥ १२ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

सात्वतस्य तु भजमानश्च भजिश्च दीप्तश्च वृष्णिश्च देवावृधश्च अन्धकश्च महाभोजश्चेति सप्त सुताः, हे मारिष ! परीक्षित एव मारिष इति नामान्तरं तत्र भजमानस्यैकस्याश्च पत्न्यां निम्लोचयादयस्त्रयः अन्यस्याश्च पत्न्यां शतजिदादयस्त्रय एव सुताः हे प्रभो ! ॥ ६—८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

॥ १ ॥
यतश्चेदेः ॥ २—१३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १—१० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

चतुर्विंशे प्रकीर्त्यन्ते वंशे नानामुखे यदोः ।
देवकीवसुदेवाद्याः पितरो रामकृष्णयोः ॥
॥ १ ॥
चैद्यादयः दमघोषादयः ॥ २ ॥
क्रथस्य विदर्भपुत्रस्य ॥ ३ ॥ ४ ॥
तस्य मधुः कुरुवंशश्च तत्र कुरुवंशादनुः ॥ ५—८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

चतुर्विंशे विदर्भवंशं तत्र भगवदाविर्भावं च वर्णयति ॥ १ ॥
चैद्यादयो दमघोषादयः ॥ २—३ ॥
ततो दशरथात् ॥ ४ ॥
शकुनिः शकुनेः करम्भिः पुत्रः तदात्मजो देवरातः ततः देवक्षत्रः तस्य कुरुवशः कुरुवशात् अनुः ॥ ५ ॥ ६ ॥
हे मारिष ! आर्य ॥ ७—१० ॥

भाषा टीका
श्रीरुक्मिणीशपदपङ्कजमाश्रयामि ।
श्रीशुक उवाच ।

श्रीशुकदेवजी बोले कि रानी शैव्या के पुत्र ज्यामघनन्दन जो विदर्भ हुए तिनने उसी भोज्याकन्या के विषें नाम से कुश और क्रथ ये दोपुत्र उत्पन्न किये और विदर्भकुल के आनन्द दायक ऐसे रोमपाद को भी उत्पन्न किये, ॥ १ ॥

रोमपाद के सुत बभ्रु हुए, तिन बभ्रु के कृति उत्पन्न हुए, तिन से उशिक इस नाम के सुत हुए, तिनसे चेदि तिन से चैद्य (दमघोष) इत्यादिक चंदेरी के राजा हुए ॥ २ ॥

क्रथ के पुत्र कुन्ति हुए, तिन के धृष्टि, तिन के निर्वृति, तिने दशार्ह पुत्र हुए, तिन के व्योम होते हुए ॥ ३ ॥

व्योम से जीमूत पुत्र हुए, तिनसे विकृति, तिनके भीमरथ पुत्र हुए, तिनके नवरथ पुत्र हुए, तिनके दशरथ पुत्र होते हुए ॥ ४ ॥

तिनके शकुन, तिन के करम्भि पुत्र हुए, तिन के आत्मज देवरात हुए, तिन के पुत्र देवक्षत्र हुए, तिनके मधु हुए, तिन से कुरुवश हुए, तिनके अनु हुए ॥ ५ ॥

अनु के पुत्र पुरुहोत्र हुए, तिनके आयु, तिन से सात्वत हुए, सात्वत के भजमान, भजि, दिव्य, वृष्णि, देवावृध, अन्धक, और महाभोज, ये सात पुत्र हुए, हे राजन् ! भजमान के भी एक भार्या में निम्लोचि, किंकण, और वृष्णि, ये तीन पुत्र हुए, और हे प्रभो ! दूसरी भार्या में शताजित् सहस्राजित्, और अयुताजित् ये तीन पुत्र होते भये ॥ ६—८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ततस्तदुपदेशेन ये पञ्चषष्ट्यादिसङ्ख्याः पुरुषास्तेऽमृतत्वं मोक्षं प्राप्ताः ॥ १० ॥ ११ ॥

(१) देवैर्देवावृधः इति वीर० ।

सत्राजितः प्रसेनश्च निम्नस्याप्यासतुः सुतौ ।
अनमित्रसुतो योऽन्यः शिनिस्तस्याऽथ सत्यकः ॥ १३ ॥
युयुधानः सात्यकिर्वै जयस्तस्य कुणिस्ततः ।
युगन्धरोऽनमित्रस्य (१)वृष्णिः पुत्रोऽपरस्ततः ॥ १४ ॥
श्वफल्कश्चित्ररथश्च गान्दिन्यां च श्वफल्कतः ।
अक्रूरप्रमुखा आसन् पुत्रा द्वादश विश्रुताः ॥ १५ ॥
आसङ्गः सारमेयश्च मृदुरो मृदुविद्गिरिः ।
(२)धर्मवृद्धः सकर्मा च क्षेत्रोपेक्षोऽरिमर्दनः १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्य युधाजितः शिनिरनमित्रश्च तस्य सत्यकः ॥ १२ ॥ १३ ॥
सात्यकिः सत्यकस्य पुत्रो युयुधानस्तस्य जयस्तस्य कुणिस्ततः कुणेर्युगन्धरः अनमित्रस्यैवापरो वृष्णिर्नाम पुत्रः ॥ १४ ॥
अक्रूरः प्रमुखो येषामित्यतद्गुणसंविज्ञानो बहुव्रीहिः ॥ १५ ॥
अतोऽक्रूरातिरिक्तान् द्वादश दर्शयति-आसङ्ग इति ॥ १६ ॥१७॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

देवावृधस्य सात्वतेः सुतस्तु बभ्रुः तयोः पितृपुत्रयोः देवावृधबभ्रोः श्लोकौ माहात्म्यसूचकौ इमौ श्लोकौ पठन्त्यार्याः इति शेषः श्लोकावेव दर्शयति, यथैवेति. यथैव दूरात् शृणुमः बादृशश्लोकावेव दर्शयति, गुणविशिष्टौ देवावृधबभ्रू दूरात् शृणुमः श्रुतवन्तो वयमन्तिकात्समीपेऽपि तादृशावेव तौ पश्याम इत्यार्याणामुक्तिः ॥ ९ ॥

कीदृशावित्याहुः-बभ्रुरिति । मनुष्याणां मध्ये बभ्रुः श्रेष्ठः देवावृधस्तु देवैस्तुल्यः, श्रेष्ठ्यमेव दर्शयन्ति, पुरुषा इति. बभ्रोर्देवावृधाद्प्यनु पश्चाद्ये तद्वंशजाः पुरुषाः पञ्चषष्ट्यधिकचतुर्दशसहस्रसङ्ख्याकास्ते सर्वे तयोः प्रभावादमृतत्वं मुक्तिं प्राप्ता इत्यर्थः । महाभोजः सात्वतिस्तु अतिधर्मात्मा तस्य महाभोजस्यान्वये वंशे भोजा भोजाख्या नृपाः आसन् जज्ञिरे॥१०॥११॥

वृष्णेस्तु पुत्रः सुमित्रोऽभूत् युधाजिच्च वृष्णेः पुत्रो बभूव हे परन्तप ! तस्य युधाजितः शिनिः अनमित्रश्चेति द्वौ पुत्रौ जातौ तत्रानमित्रात् निघ्नोऽभवत् ॥ १२ ॥

अथ निघ्नस्य सत्राजितः प्रसेनश्चेति द्वौ सुतावासतुः सम्बभूवतुः तथाऽन्यस्यां भार्यायाम् अनमित्रस्यैव योऽन्यः सुतः शिनिर्नाम तस्य सुतः सत्यकः ॥ १३ ॥

सात्यकिः सत्यकसुतस्तु युयुधानः तस्य युयुधानस्य जयः ततो जयात्कुणिः ततो युगन्धरः तथा अनमित्रस्यैवान्यस्यां पुत्रः पृश्निः वृंजिनवानिति पाठान्तरम् ततः पृश्नेः गान्दिन्यां भार्यायां श्वफल्कश्चित्रकश्चेति द्वौ सुतौ तत्रः श्वफल्कात् गान्धिन्यां भार्यायां द्वादश सुताः अक्रूरादयो विश्रुताः प्रख्याताः बभूवुः अक्रूरः प्रमुखा येषामिति अतद्गुणसंविज्ञानबहुव्रीहिः ॥ १४ ॥ १५ ॥

ततोऽक्रूरातिरिक्ता द्वादश, तान् दर्शयति-आसङ्ग इति ॥१६॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नाम्ना युयुधानः सात्यकिरिति गुणनाम ॥ १४—२३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

बभ्रोरित्यर्द्धकं श्लोकं पठन्त्यमुमिति कश्चित् एतन्मतेतूत्तरश्लोकः श्रीशुकवाक्यमेव ॥ ११—२९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सात्वतपुत्रस्य देवावृधस्य सुतो बभ्रुः तयोः पितापुत्रयोः ॥९-१०॥
अमृतत्वं मोक्षं च बभ्रोरिति बभ्रुदेवावृधयोः सङ्गप्रभावादित्यर्थः ॥ ११ ॥
वृष्णेः सात्वतपुत्रस्य ॥ १२—१३ ॥
सात्यकिः सत्यकस्य पुत्रो युयुधानः अनमित्रस्यैवाऽपरो वृष्णिर्नामपुत्रः अक्रूरप्रमुखो येषामासङ्गादीनामित्यतद्गुणसंविज्ञानो बहुव्रीहिः ॥ १४—१७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अमृतत्वं मोक्षम् ॥ ११ ॥
वृष्णेः सुमित्रो युधाजिच्च तस्य युधाजितः शिनिरनमित्रश्च ॥ १२ ॥ १३ ॥
सात्यकिः सत्यकस्य पुत्रः युयुधानः तस्य जयस्तस्य कुणिस्ततः कुणेर्युगन्धरः ॥ १४ ॥
अक्रूरः प्रमुखो येषामिति दृष्टसागरमानयेतिवदतद्गुणसंविज्ञानो बहुव्रीहिः अत एकः अक्रूरः आसङ्गादयो द्वादश ॥ १५ ॥ १६ ॥ १७ ॥

(१) पृश्निः ॥ वर्मदक् धृष्टवर्मश्च इति वीर० ।

शत्रुघ्नो गन्धमादश्च प्रतिबाहुश्च द्वादश ।
तेषां स्वसा सुचीराख्या द्वावक्रूरसुतावपि ॥ १७ ॥
देववानुपदेवश्च तथा चित्ररथात्मजाः ।
पृथुर्विदूरथाद्याश्च बहवो वृष्णिनन्दनाः ॥ १८ ॥
कुकुरो भजमानश्च शुचिः कम्बलबर्हिषः ।
कुकुरस्य सुतो वह्निर्विलोमा तनयस्ततः ॥ १९ ॥
कपोतरोमा तस्यानुः सखा यस्य च तुम्बुरुः ।
अन्धको दुन्दुभिस्तस्मादरिद्योतः पुनर्वसुः ॥ २० ॥
तस्याहुकश्चाहुकी च कन्या चैवाहुकात्मजौ ।
देवकश्चोग्रसेनश्च चत्वारो देवकात्मजाः ॥ २१ ॥
देववानुपदेवश्च सुदेवो देववर्द्धनः ।
तेषां स्वसारः सप्ताऽऽसन् धृतदेवादयो नृप ! ॥ २२ ॥
शान्तिदेवोपदेवा च श्रीदेवा देवरक्षिता ॥
सहदेवा देवकी च वसुदेव उवाह ताः ॥ २३ ॥
कंसः सुनामा न्यग्रोधः कङ्कः शङ्कुः सुहूस्तथा ।
राष्ट्रपालोऽथ सृष्टिश्च तुष्टिमानौग्रसेनयः ॥ २४ ॥

भाषा टीका ।

देवावृध के पुत्र बभ्रु हुए, इन दोनो पिता पुत्रों की कीर्त्ति के दो श्लोक गाये जाते हैं, कि—जैसे दूर से सुनते रहे देवावृध और बभ्रु को निकट में वैसे ही देखे ॥ यह बात भी बहुत भारी है, कि-जैसा सुनाजाय वैसाही देखने में आवे इसी बात की दुर्लभता में लोग कहा करते हैं, कि—"दूरस्था भूधरारम्याः" "दूर के ढोल सुहावने" एसे ये राजा नहीं रहे ॥ ९ ॥

बभ्रु मनुष्यों में श्रेष्ठ हैं और देवावृध देवताओं के समान हैं। बभ्रु और देवावृध से छै हजार और तिहत्तर पुरुषों को अमृतत्व (मोक्ष) प्राप्त हुआ ॥ सात्वत के सातवें पुत्र महाभोज वडे धर्मात्मा हुए, जिनके वंश में भोज नामक कुल चला ॥ १०—११ ॥

वृष्णि के पुत्र सुमित्र हुए, तिनके युधाजित हुए, हे परंतप ! तिनके शिनि हुए, तिनके अनिमित्र हुए, और अनिमित्र से निम्न हुए ॥ १२ ॥

निम्न के सत्राजित और प्रसेन दो पुत्र हुए, और अनिमित्र का दूसरा पुत्र शिनि हुआ, तिनका सत्यक पुत्र हुआ ॥ १३ ॥

सत्यक के पुत्र युयुधान हुए, तिनके जय, तिनके कुणि, तिनके युगंधर हुए, अनमित्र के एक और पुत्र वृष्णि हुए ॥ १४ ॥

तिनसे श्वफल्क चित्ररथ हुए, और श्वफल्क से गंधनी के विषै अक्रूर प्रभृति द्वादश विख्यात पुत्र हुए ॥ १५ ॥

उन ये नाम हैं—आसंग, सारमेय, मृदुर, मृदुविद्, गिरि, धर्मवृद्ध, सुकर्मा, मोत्तोपेच, और अरिमर्दन ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पृथुरेकः विदूरथाद्या अन्ये च बहवः विपृथुधामाद्या इति पाठे आद्यशब्देन विदूरथोऽप्युक्तस्ततश्च शूरो विदूरथादासीदिति वक्ष्यमाणनिर्देशोपपत्तिः ॥ १८ ॥

कुकुरादयश्चत्वारोऽन्धकस्य सुता इति ज्ञेयम् । तथा च पराशरः "कुकुरभजमानशुचिकम्बलबर्हिषाख्यास्तथान्धकस्य पुत्राः" इति ॥ १९ ॥

अनोरन्धकोऽन्धकात् दुन्दुभिरित्यपि तद्वचनादेव ज्ञेयम् ॥२०-२१॥

धृतदेवा आदिर्यासां शान्तिदेवादीनां षण्णाम् ताः सप्त॥ २२॥

ताः सप्त ॥ २३ ॥

औग्रसेनय उग्रसेनस्य सुताः ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तेषामासङ्गादीनां स्वसा भगिनी सुसारेत्याख्या यस्याः सा तत्राक्रूरस्य पुत्रौ देववानुपदेवश्चेति द्वावेव एवं चित्ररथस्य शशिबिन्दोरारभ्यैकोऽन्वय उक्तः । अथान्वयान्तरमाह-तथा चित्र-

कंसा कंसवती कङ्का शूरभू राष्ट्रपालिका ।
उग्रसेनदुहितरो वसुदेवानुजास्त्रियः ॥ २५ ॥
शूरो विदूरथादासीद्भजमानः सुतस्ततः ।
शिनिस्तस्मात्स्वयंभोजो हृदीकस्तत्सुतो मतः ॥ २६ ॥

श्रीमद्वीरराघवचार्यकृतभागवतचन्द्रचन्द्रिका।

रथात्मजा इति । यथा शशिबिन्दुश्चित्ररथस्यात्मजस्तथाऽन्येऽपि चित्ररथस्यात्मजाः पृथुश्च विदूरथ आद्यो येषां ते च बहवो बभूवुः सात्वतसुतस्य वृष्णोर्वंशमनुक्रामति—वृष्णिनन्दना इत्यादि ॥ १७ ॥ १८ ॥

कुकुरादयो वृष्णिनन्दनाः तत्र वृष्णेः सुतस्येति शेषः कुकुरस्य तनयो विलोमा ॥ १९ ॥

ततो विलोम्नः कपोतरोमा अभूत् यस्य च कपोतरोम्णा-स्तुम्बुरुः सखा बभूव स कपोतरोमा ऽभवदित्यर्थः । अथान्धकस्य सात्वतसुतस्यान्वयमाह—अन्धकाद्दु-न्दुभिः अन्धका इति प्रथमान्तपाठस्तूचितः तत्र तथा चित्ररथात्मजा इत्यस्य शशिबिन्दोराख्यैते उक्ताः सर्वे चित्ररथवंशजा इत्यर्थः। पृथ्वादयस्तु वृष्णिनन्दनाः तत्र पृथुर्विपृथुधन्याद्या इति पाठे आदि-शब्देन विदूरथोऽप्युक्तः अत एव ततः शूरो विदूरथादिति वक्ष्यमाण-निर्देशोपपत्तिः कुकुरादयश्चत्वारः सान्वया अन्धकसुता इत्यर्थः । तथाचाह पराशरः "कुकुरभजमानशुचिकम्बलबर्हिषाद्यास्तथा न्धकस्य पुत्राः" इति. तस्य कपोतरोम्णो दुन्दुभिरित्यर्थः। तस्य दरिद्योतः तस्मात्पुनर्वसुः तस्य पुनर्वसोराहुकः आहुकी नाम कन्या च आहुकस्यात्मजौ तु देवकश्चोग्रसेनश्चेति द्वौ तत्र देवकस्यात्मजाः ॥ २० ॥ २१ ॥

देववदादयश्चत्वारः तेषां चतुर्णां स्वसारो भगिन्यः धृतदेवा आदिर्यासां ताः शान्तिदेवादयः धृतदेवया सह सप्त बभूवुः ताश्च कन्याः वसुदेव उपयेमे ॥ २२ ॥ २३ ॥

औग्रसेनयः उग्रसेनस्य सुताः कंसादयो नव ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

औग्रसेनयः उग्रसेनपुत्राः ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

चित्ररथस्यसफल्कभ्रातुरात्मजाः ॥ १८ ॥

वृष्णेरनमित्रपुत्रस्य नन्दनाः कुकुराद्याः विष्णुपुराणे त्वन्धक-पुत्राः कुकुराद्यां दृष्टाः अन्धकात् सात्वतपुत्रात् ॥ १९—२३ ॥

औग्रसेनयः उग्रसेनस्य पुत्राः कंसादयः ॥ २४—२५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

चित्ररथस्य तु आत्मजाः पृथुसहिताः विदूरथाद्याः बहवः॥१८॥

सात्वतपुत्रस्यान्धकस्य वंशमाह—कुकुर इत्यादिना । "कुकुर-भजमानशुचिकम्बलबर्हास्तथान्धकस्य पुत्राः" इति श्रीपराशर-वचनात् ॥ १९ ॥

कथम्भूतः ? अनुः यस्य सखा तुम्बुरुः तस्यानोरन्धकस्तस्य दुन्दुभिः ॥ २०—२५ ॥

भाषा टीका ।

तथा शत्रुघ्न, गंधमाद, प्रतिबाहु, ये सब द्वादश हुए, इन सबों की बहिन सुचीरा नाम वाली हुई, और अक्रूर के दो पुत्र भी हुए, ॥ १७ ॥ और चित्र-रथ के आत्मज पृथु, विदूरथ, इत्यादिक बहुत वृष्णि कुल-नन्दन हुए ॥ १८ ॥

तिनका नाम देववान् और उपदेव हुआ, ॥ और कुकुर, भजमान, शुचि, कंबलबर्हिष, ये चार पुत्र अंधक के जानना, । कुकुर के पुत्र वन्हि हुए, तिनका पुत्र विलोमा हुआ ॥ १९ ॥

तिनके कपोतरोमा हुए, तिनके अनु हुए, जिन अनुका सखा तुम्बुरु गन्धर्व हुआ, तिन अनुके अंधक हुए, तिनसे दुंदुभि, तिनसे अरिद्योत, तिनसे पुनर्वसु हुए ॥ २० ॥

तिनके आहुक पुत्र और आहुकी कन्या हुई। आहुक के पुत्र देवक, और उग्रसेन हुए, देवक के पुत्र चार हुए ॥ २१ ॥

देववान् उपदेव, सुदेव और देववर्द्धन, हे राजन् ! इनकी सात बहिनें धृतदेवा से आदि लेकर हुई ॥ २२ ॥

धृतदेवा, शांतिदेवा, उपदेवा, श्रीदेवा, देवरक्षिता, सहदेवा, और देवकी, इन सातों को वसुदेवजी ने व्याहीं ॥ २३ ॥

और कंस, सुनामा, न्यग्रोध, कंक, शंकु, सुहुं, राष्ट्रपाल, सृष्टि, और तुष्टिमान् ये उग्रसेन के पुत्र हुए ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वसुदेवस्य ये अनुजा देवभागादयस्तेषां स्त्रियो भार्याः ॥ २५ ॥

अन्धकसुतानां चतुर्णां प्रथमस्य कुकुरस्य वंश उक्तः, द्वि-तीयस्य भजमानस्य वंशमाह—शूरो विदूरथादिति । "भजमानाच्च विदूरथः पुत्रोऽभूद्विदूरथाच्च शूरः" इति पराशरादिवचनात् यद्वा, पृथुर्विदूरथाद्याश्चेति पूर्वोक्तचित्ररथात्मजाद्विदूरथात् ॥२६॥

देवबाहुः शतधनुः कृतवर्मेतितत्सुताः ।
देवमीढस्य शूरस्य मारिषा नाम पत्न्यभूत् ॥ २७ ॥
तस्यां स जनयामास दशपुत्रानकल्मषान् ।
वसुदेवं देवभागं देवश्रवसमानकम् ॥ २८ ॥
सृञ्जयं श्यामकं कङ्कं शमीकं वत्सकं वृकम् ।
देवदुन्दुभयो नेदुरानका यस्य जन्मनि ॥ २९ ॥
वसुदेवं हरेः स्थानं वदन्त्यानकदुन्दुभिम् ।
पृथा च श्रुतदेवा च श्रुतकीर्तिः श्रुतश्रवाः ॥ ३० ॥
राजाधिदेवी चैतेषां भगिन्यः पञ्च कन्यकाः ।
कुन्तेः सख्युः पिता शूरो ह्यपुत्रस्य पृथामदात् ॥ ३१ ॥
साऽऽप दुर्वाससो विद्यां देवहूतीं प्रतोषितात् ।
तस्या वीर्यपरीक्षार्थमाजुहाव रविं[1] शुचिम् ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

देवमीढस्य यः शूरो नाम पुत्रस्तस्य देवमीढो हृदीकस्यैव सुतः, यथाह—पराशरः "तस्यापि कृतवर्मशतधनुर्देवमीढु-षाद्याः पुत्रा बभूवुः देवमीढुषस्य शूरस्यापि मारिषा नाम पत्न्यभवत्तस्याञ्चासौ दश पुत्रानजनयद्वसुदेवपूर्वान्" इति॥२७॥२८॥

आनकाश्च नेदुः ॥ २९ ॥

हरेः प्रादुर्भावस्य स्थानम् ॥ ३० ॥

पृथायाः कन्यकावस्थायां कर्णोत्पत्तिप्रकारमाह—कुन्तेरिति पञ्चभिः ॥ ३१ ॥

कदाचिद्गृहमागतं दुर्वाससं पृथा परिचर्यादिना तोषयामास ततश्च सा तस्माद्देवहूतीं देवाह्वानहेतुं विद्यामवाप तदाह, साऽऽपेति ॥ ३२ ॥

श्रीमद्वीरराघवचार्यकृतभागवतचन्द्रचन्द्रिका ।

कंसप्रभृतयश्चतस्रश्च औग्रसेनाः उग्रसेनाज्जाताः दुहितरः ताश्च वसुदेवानुजानां देवभागादीनां वक्ष्यमाणानां स्त्रियो भार्याः ॥२५॥

विदूरथाच्चित्ररथात्मजाद् वृष्णिसुताद्वा विदूरथात् शूरो जज्ञे तत्सुतः शूरसुतस्तु भजमानः ततो भजमानाद् शिमिस्तस्माद् शिमेः स्वयम्भोजः तत्सुतः स्वयम्भोजसुतः हृदीकस्तत्सुताः हृदीकसुताः देवबाह्वादयः त्रयः अयमेकः शूरस्यान्वय उक्तः । अथ वंशान्तरमाह– देवमीढस्येति । देवमीढसुतस्य शूरस्य मारिषा नाम पत्नी बभूव अत्र देवमीढस्येति विशेषणवशाद् शूरो विदूरथादासीदिति प्राक्तनग्रन्थे विदूरथाद्देवमीढस्तस्मात् शूरो जात इति क्रमोऽवगन्तव्यः "कृतवर्मेति तत्सुता" इत्यनन्तरग्रन्थे इति शब्दः प्रभृत्यर्थकः ततश्च तत्र देवमीढस्यापि संग्रहः तस्य देवमीढस्य देवमीढसुतस्य शूरस्येत्यर्थः । अयञ्च शूरो विदूरथधर्मजादन्यः, तथा चाह भगवान् पराशरः "तस्यापि कृतवर्मा शतधनुर्देवमीढाद्याः पुत्रा बभूवुः देवमीढस्य शूरस्शूरस्यापि मारिषानाम पत्न्यभूत् तस्यां चासौ दश पुत्रानजनयत् वसुदेवपूर्वान्" इति अत्र तस्यापीति वैष्णववचनस्य हृदीकस्यापीत्यर्थः ॥ २६ ॥ २७ ॥

तस्यां मारिषायां देवमीढश्शूरोऽकल्मषान् विशुद्धान् वसुदेवादीन् पुत्रानजनयत् वसुदेवस्यानकदुन्दुभिनाम निर्वक्तुं निमित्तमाह–यतः देवदुन्दुभयः आनकाश्च यस्य वसुदेवस्य जन्मनि प्रादुर्भावकाले नेदुः दध्वनुः ततस्तं वसुदेवमानकदुन्दुभिरिति वदन्ति ॥ २८ ॥ २९ ॥

आनकादीनां नादे हेतुं वदन् तं विशिनष्टि–हरेः श्रीकृष्णस्यावतरिष्यमाणस्य स्थानमवतरणस्थानभूतं, पृथेति । एतेषां वसुदेवादीनां पृथाप्रभृतयः पञ्च कन्यका भगिन्यः स्वसारः तत्र पृथायाः कन्यावस्थायां कर्णोत्पत्तिप्रकारमाह–कुन्तेरिति पञ्चभिः । अत्रायमितिहासः कदाचिद्गृहमागतं दुर्वाससं पृथा परिचर्यादिना तोषयामास ततश्च सा तस्माद्विद्यां देवाह्वानसमर्थामवाप्य परीक्षार्थं रविमाजुहाव ततश्चागतं रविमालोक्य विस्मितायां तस्यां गर्भमाधाय रविर्ययौ ततस्तस्याः कर्णो जज्ञे इति सोऽयमत्रोच्यते पिता वसुदेवपृथादीनां पिता शूरः पृथां दुहितरं सख्युरपुत्रस्य कुन्तेः कुन्तिभोजस्यादात् दुहितृत्वेन ददौ सख्युरपुत्रस्येति विशेषणद्वयं दानहेतुपरं यतः कुन्तिभोजाय दत्ताऽत एव पृथा कुन्तीति नामान्तरं लेभे ॥ ३० ॥ ३१ ॥

ततः सा पृथा कदाचित् प्रतोषिताद्दुर्वाससः देवहूतिं देव आहूयतेऽनयेति तथा तां विद्यामापेति शेषः । तस्या विद्यायाः वीर्यपरीक्षार्थं सामर्थ्यपरीक्षार्थं रविं सूर्यं शुच्याजुहाव ॥ ३२ ॥

[1] शुचिः इति विज० ।

तद्देवोपागतं देवं वीक्ष्य विस्मितमानसा ।
प्रत्ययार्थं प्रयुक्ता मे याहि देव! क्षमस्व मे ॥ ३३ ॥
अमोघं दर्शनं देवि ! आधत्से त्वयि चात्मजम् ।
योनिर्यथा न दुष्येत कर्ताऽहं ते सुमध्यमे ! ॥ ३४ ॥
इति तस्यां स आधाय गर्भं सूर्यो दिवं गतः ।
सद्यः कुमारः सञ्जज्ञे द्वितीय इव भास्करः ॥ ३५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वसुदेवस्याऽनुजानां देवभागादीनां स्त्रियो भार्याः ॥२५॥२६॥

तस्य हृदिकस्य सुताः ॥ २७ ॥ २८ ॥

यस्य वसुदेवस्य जननसमये दुन्दुभ्यानकवाद्यनदनाद्वसुदेवस्य नामान्तरमस्तीत्याह–वसुदेवमिति । स्थानमवतारस्य ॥ २९ ॥ ३० ॥

एतेषां वसुदेवादीनां शूरस्य सख्युः पुत्रस्य कुन्तेः ॥ ३१ ॥

देवहूतां देवा हूयन्तेऽनयेति देवहूती देवाह्वानकरीत्यर्थः । तां विद्यां दुर्वाससः अलभतेति शेषः । तस्याः विद्यायाः शुचिः ऋतुस्नाता ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

वसुदेवं हरेः स्थानमिति "सत्त्वं विशुद्धं वसुदेवशब्दितं यदीयते तत्र पुमानपावृतः" इति श्रीशिवोक्तदिशा विशुद्धसत्त्वमेव वसुदेवाख्यं ततस्तदवतारमेवैतमानकदुन्दुभिं वदन्तीत्यर्थः । अत्र विशेषजिज्ञासायां भगवत्सन्दर्भे दृश्यः ॥ ३० ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

विदूरथाच्चित्ररथपुत्रात् ॥ २६ ॥

हृदीकस्य सुतो देवमीढस्तस्य शूरस्तस्य मारिषा ॥ २७–२९ ॥

हरेः स्थानं हरिर्यत्र प्रादुर्भवतीत्यर्थः ॥ ३० ॥

तासु मध्ये पृथां शूरस्तत्पितैव तवैषा कन्या भवत्विति कुन्तेः कुन्तये अदात् ॥ ३१ ॥

सा च पृथा कदाचिद्गृहमागतात्परिचर्य्यया प्रतोषितात् दुर्वाससः सकाशात् देवहूतीं देवाह्वानहेतुविद्याम् आप ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विदूरथात्पूर्वोक्तात् चित्ररथपुत्रात् ॥ २६ ॥

तस्य हृदीकस्य सुताः देवबाहुः शतधनुः कृतवर्मा देवमीढाद्याश्च ज्ञेयाः "तस्यापि कृतवर्मशतधनुर्देवमीढाद्याः पुत्रा बभूवुः" इति श्रीपराशरवचनात्. देवमीढस्य शूरस्तस्य मारिषा नाम पत्न्यभूत् ॥ २७ ॥

स तस्यां दश पुत्रान् जनयामास, तानाह—वसुदेवमिति ॥२८॥

यस्य जन्मनि जन्मसमये देवदुन्दुभयः आनकाश्च नेदुः ॥२९॥

अतो हरेः प्रादुर्भावस्य स्थानं वसुदेवम् आनकदुन्दुभिं च वदन्ति ॥ ३० ॥

वसुदेवभगिनीनां पुत्रानाह—कुन्तेरित्यादिना । शूरः स्वसख्युः कुन्तेः कुन्तिभोजाय चतुर्थ्यर्थे षष्ठी पृथामदात् अतः कुन्तिपुत्रिकात्वेन पृथा कुन्तीति विख्याता । तथोक्तं हरिवंशे "शूरः पूज्याय वृद्धाय कुन्तिभोजाय तां ददौ । तस्मात्कुन्तीति विख्याता कुन्तीभोजात्मजा पृथा" इति ॥ ३१ ॥

तत्र कुन्तिभोजगृहे तपसा श्यामो भगवान् दुर्वासाः कंचित्कालं वासं कृतवान् अश्वनदीसमीपगदेशे इति ज्ञेयं । तदा तेन राज्ञा स्वकन्या पृथा तदाराधने नियुक्ता सती प्रतोषितात् दुर्वाससः सकाशाद्देवहूतीं विद्यामवापेत्यर्थः ॥ ३२—३८ ॥

भाषा टीका ।

कंसा, कंसवती, कंका, सुरभू, राष्ट्रपालिका, ये उग्रसेन की बेटी सब वसुदेव जी के छोटे भ्राताओं की पत्नी होती भई ॥ २५ ॥

भजमान के विदूरथ हुए, तिन विदूरथ के शूर हुए, तिन के शिन हुए, तिनके स्वयंभोज, तिनके हृदीक हुए ॥ २६ ॥

हृदीक के देवबाहु शतधनु, कृतवर्मा, और देवमीढ ये पुत्र हुए, देवमीढ के शूर हुए तिनकी मारिषा नाम वाली पत्नी हुई ॥ २७ ॥

तिन पत्नी में शूर ने पाप रहित दश पुत्र उत्पन्न किये वसुदेव, देवभाग, देवश्रवस, आनक, ॥ २८ ॥

सृंजय, श्यामक, कंक, शमीक, वत्सक, और वृक, जिन के जन्मकाल में देवताओं की दुंदुभि और आनक बजते हुए, ॥२९॥

हरि के स्थान उन वसुदेव का आनक दुंदुभि ऐसा भी नाम कहते हैं ॥ पृथा, श्रुतदेवा, श्रुतकीर्त्ति, श्रुतश्रवा ॥ ३० ॥

और राजाधिदेवी, ये पांच वसुदेवादिकों की बहिने हुईं, इनके पिता शूर ने अपुत्री अपने कुंति नामक सखा को पृथा कन्या देदी ॥ ३१ ॥

उस पृथा ने दुर्वासा ऋषि को प्रसन्न कर देवताओं के बुलाने की विद्या प्राप्त करी, और उस विद्या के प्रभाव की परीक्षा के लिये एक दिन सूर्य को बुलाती हुई ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

देवमुपागतं वीक्ष्य सा प्राह—प्रत्ययार्थं परीक्षार्थं मया विद्या प्रयुक्ता न तु त्वया किञ्चित्कार्यमित्यभिसन्धिनाऽतो याहीति॥ ३३॥

तं सा त्यजन्नदीतोये कृच्छ्राल्लोकस्य विभ्यती ।
प्रपितामहस्तामुवाह पाण्डुर्वै सत्यविक्रमः ॥ ३६ ॥
श्रुतदेवां तु कारूषो वृद्धशर्मा समग्रहीत् ।
यस्यामभूद्दन्तवक्त्र ऋषिशप्तो दितेः सुतः ॥ ३७ ॥
कैकेयो धृष्टकेतुश्च श्रुतकीर्तिमविन्दत ।
सन्तर्दनादयस्तस्यां पञ्चाऽऽसन् कैकयाः सुताः ॥ ३८ ॥
राजाधिदेव्यामावन्त्यौ जयसेनोऽजनिष्ट ह ।
दमघोषश्चेदिराजः श्रुतश्रवसमग्रहीत् ॥ ३९ ॥
शिशुपालः सुतस्तस्याः कथितस्तस्य सम्भवः ।
देवभागस्य कंसायां चित्रकेतुबृहद्बलौ ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवमुक्तो रविरुवाच—अमोघं दर्शनमिति । कन्याऽहमिति चेत्तत्राऽऽह—यथा योनिर्न दुष्येत तथाऽहं कर्त्ता करिष्यामि ॥ ३४—३८ ॥

आवन्त्यौ विन्दानुविन्दौ ॥ ३९ ॥

तदेवं वसुदेवस्य भगिनीनाम्पतीन् पुत्रांश्चोक्त्वा तद्भ्रातृणां नवानां पत्नीः पुत्रांश्चाऽऽह—देवभागस्येति नवभिः श्लोकार्धैः ॥ ४०—४४ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदैवोपगतमागतं देवं रविं वीक्ष्य विस्मितं मानसं यस्याः सा, सूर्यमाह—किमिति ? हे देव ! मे मया प्रत्ययार्थं प्रत्यभिज्ञानार्थं वीर्यपरीक्षार्थमिति यावत् इयं विद्या प्रयुक्ता अतस्त्वं याहि मां क्षमस्व मदपराधं क्षमस्वेति ॥ ३३ ॥

ततो रविराह—देवसन्दर्शं देवतुल्यम् अमोघमात्मजं त्वयि आधित्से उत्पादयितुमिच्छामि आधत्स इति त्वपपाठः रूपाऽसिद्धेः यद्वा देवसन्दर्शं देवस्य मम दर्शनं क्लीवत्वमार्षममोघं फलाविनाभूतमतस्त्वय्यात्मजमाधित्स इत्यर्थः । कन्याऽहमित्यत्राह—तव योनिर्यथा न दुष्येत तथाऽहं हे सुमध्यमे कर्ता करिष्यामि इति ॥ ३४ ॥

इतीत्थमुक्त्वा तस्यां पृथायां गर्भं समाधाय सूर्यो दिवं गतः ततः सद्य एव कुमारो जज्ञे स च द्वितीय इव भास्करः भास्करतुल्यः ॥ ३५ ॥

सा पृथा लोकस्य लोकाद्बिभ्यती सती कृच्छ्रात् दुःखान्नदीतोये तं कुमारमत्यजत् तां पृथां तव प्रपितामहः सत्यविक्रमः पाण्डुरुवाह उपयेमे ॥ ३६ ॥

श्रुतदेवां पृथानुजां करूषजो दृढवर्मा समग्रहीदुपयेमे । वृद्धशर्मेति पाठान्तरं श्रुतकीर्तिंतु दितेः सुतः विप्रचितः कैकयश्च धृष्टकेतुश्च अविन्दत दूषिताङ्कुतवन्तः चौर्येण सञ्जग्मुरित्यर्थः प्रत्येकाभिप्रायमेकवचनं तस्यानिन्दितायाः श्रुतकीर्तेः सन्तर्दनादयः पञ्च सुताः कैकयाज्जाता बभूवुः ॥ ३७ ॥ ३८ ॥

राजाधिदेव्यां तु आवन्त्यः अवन्तेः सुतः तस्मादवन्तेः सकाशादित्यर्थः । जयसेनाख्यः सुतोऽजनिष्ट जज्ञे श्रुतश्रवसं तु चेदिराजो दमघोषाख्यः समग्रहीत् उपयेमे इत्यर्थः ॥ ३९ ॥

तस्याः श्रुतश्रवसः सुतः शिशुपालः तस्य शिशुपालस्य सम्भवः उत्पत्तिप्रकारः कथितः सप्तमस्कन्ध इति शेषः तदेवं वसुदेवस्य भगिनीनां पतीन् पुत्रांश्चोक्त्वा तद्भ्रातृणां नवानां पत्नीः पुत्रांश्चाह—देवभागस्येति नवभिः श्लोकार्द्धैः । देवभागस्य कंसायां भार्यायां चित्रकेतुश्च बृहद्बलश्चेत्येतौ सुतौ जातौ तथा देवश्रवसः कङ्कवत्यां भार्यायां सुवीर इषुमांश्चेति द्वौ सुतौ जज्ञाते कङ्कात्तु तद्भार्यायां कङ्कायां बकः सत्यजित् पुरुजित् त्रयो जाताः ॥ ४० ॥ ४१ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रत्ययार्थं विश्वासार्थं प्रयुक्ताया विद्याया माहात्म्यं च । भो देव ! क्षमस्व याहीति ॥ ३३ ॥

कुन्त्याभिहितो रविः कुन्तीमाह—अमोघमिति । देवसन्दर्शनममोघं सफलं जानीहीति शेषः । स्वकर्तव्यमाह-आधास्य इति । मैथुनयोग्यतारूपयादर्शनाच्छिन्नयोनिर्दुष्टा स्यादिति पृथाया मनोगतशङ्कापरिहारार्थमाह-योनिरिति । तथा कर्ता लोकस्याऽपवादादिति शेषः ॥ ३४ ॥ ३५ ॥

तव प्रपितामहः पाण्डुः ॥ ३६ ॥

वसुदेवभगिनीनां श्रुतदेव्यादीनां विवाहं कथयति—श्रुतदेवीमित्यादिना । इतिशब्दो दितेः सुतः पूर्वंदितेः सुत इति शब्दो यस्य विजयस्य स दितेः सुत इतिशब्दः सनकादिभिरेवं शप्तो विजयः प्रागदितेः सुतोऽभूत् पश्चाद्धिरण्यक इति स एवाऽधुना दन्तवक्त्र इति जात इति भावः ॥ ३७ ॥

कंसवत्यां देवश्रवसः सुवीर इषुमांस्तथा ।
(१) कङ्कायामानकाज्जातः सत्यजित् पुरुजित्तथा ॥ ४१ ॥
सृञ्जयो राष्ट्रपाल्यां च वृषदुर्मर्षणादिकान् ।
हरिकेशहिरण्याक्षौ शूरभूम्याश्च श्यामकः ॥ ४२ ॥
मिश्रकेश्यामप्सरसि (२) वृकादीन् वत्सकस्तथा ।
तक्षपुष्कर (३) शालादीन् दुर्वाक्ष्यां वृक आदधे ॥ ४३ ॥
सुमित्रार्जुनपालादीन् शमीकात्तु सुदामिनी ।
(४) कङ्कश्च कर्णिकायां वै ऋतधामजयावपि ॥ ४४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नाम्ना धृष्टकेतुः केकयविषयाधिपतित्वात् केकयशब्दश्च शब्दः पूर्वेण समुच्चीयते ॥ ३८ ॥

आवन्त्यौ विन्दाऽनुविन्दौ अजनिष्ट जनयामास ॥ ३९ ॥

वसुदेवभ्रातृणां वंशं कथयति--देवभागस्येत्यादिना ॥ ४०-४५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ऋषिशप्त इत्यत्र इतिशब्दः इति पाठः स्वस्वन्धोक्तौ स पूर्वजन्मनि दितेः सुत आसीद् इतिशब्दः किंवदन्तीति व्याख्यानात् ॥ ३७—५४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

देवं सूर्यं प्रत्ययार्थं परीक्षार्थं मया विद्या प्रयुक्ताऽनः क्षमस्व सप्रत्यहं कन्याऽस्मि त्वया न किमपि कार्यं याहि ॥ ३३ ॥

सूर्यं उवाच-अमोघमित्यादि । ननु, तर्हि योनिदुष्टां कन्यां मां कः परिणयेदिति चेत्तत्राह—योनिरिति । कर्ता करिष्यामि ॥ ३४—३८ ॥

आवन्त्यौ विन्दाऽनुविन्दौ ॥ ३९ ॥

वसुदेवस्य भगिनीनां पतीन् पुत्रांश्चोक्त्वा तद्भ्रातृणां नवानां पत्नीः पुत्रांश्चाह-देवभागस्येति, नवभिःश्लोकार्द्धैः । कौशल्या भद्रा ॥ ४०—५४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आवन्त्यौ विन्दाऽनुविन्दसंज्ञौ ॥ ३९ ॥

वसुदेवभ्रातृणां पुत्रानाह—देवभागस्येत्यादिना ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ ४४ ॥

भाषा टीका ।

आये हुए सूर्य को देखकर मन में विस्मय कर कुंती बोली, कि—हे देव ! मैंने ! विद्या की प्रतीति के लिये परीक्षा लीनी है, आप पधारो और मेरा अपराध क्षमा करो ॥ ३३ ॥

तब सूर्य बोले, कि-हे देवि ! हमारे देव लोगों के दर्शन अमोघ होते हैं, इस कारण हम तुमारे विषैं पुत्र उत्पन्न करेंगे, और हे सुमध्यमे ! यदि तुम कहो, कि- मैं कन्या हूं तो जिस प्रकार तुमारी योनि दूषित न होवे तैसें हम करेंगे ॥ ३४ ॥

इस प्रकार सूर्य कह कर उस पृथा कन्या के विषे गर्भ धारण कर आकाश को गये, बस उसी समय दूसरे सूर्य सदृश एक कुमार उत्पन्न हुआ ॥ ३५ ॥

उस पुत्र को पृथा ने लोक के अपवाद के डर से नदी के जल में डाल दिया । हेराजन् ! उसपृथाको तुमारे प्रपितामह (परदादे) सत्यपराक्रम वाले पाण्डु महाराज ने व्याही ॥ ३६ ॥

करूप देश का राजा वृद्धशर्मा, श्रुतदेवा को व्याहता हुआ, जिसके विषैं सनकादिकों के शाप से प्रथम जन्म में जो दिति का पुत्र भया सो दन्तवक्र नाम से हुआ ॥ ३७ ॥

केकय देश के धृतकेतु राजाने श्रुतकीर्त्तिको व्याही । जिसके विषै सन्तर्दन आदिक पांच केकय के पुत्र हुए, ॥ ३८ ॥

अवन्ती (उज्जैन) के राजा जयसेन ने राजाधिदेवी को व्याह के उसमें विन्द, और अनुविन्द, दो पुत्र उत्पन्न किये और चेदि (चन्देरी) के राजा दमघोष ने श्रुतश्रवा को व्याही ॥ ३९ ॥

तिसका पुत्र शिशुपाल भया जिसकी उत्पत्ति पहिले कह चुके वसुदेवजी की वहिनें और उनके पुत्रों का वर्णन कर चुके ॥ अब वसुदेव जी के नौ (९) भ्राताओं की पत्नी और पुत्रों को कहते हैं, । देवभाग की कंसा भार्या में चित्रकेतु और बृहद्बल पुत्र हुए, ॥ ४० ॥

(१) बकः कङ्कात्तुकङ्कायाम् । (२) वकादीन् । (३) साक्षादीन् । (४) आनकः इति च वीर० पाठः ।

पौरवी रोहिणी भद्रा मदिरा रोचना इला ।
देवकीप्रमुखा आसन् पत्न्य आनकदुन्दुभेः ॥ ४५ ॥
बलङ्गदं सारणं च दुर्मदं विपुलं ध्रुवम् ।
वसुदेवस्तु रोहिण्यां कृतादीनुदपादयत् ॥ ४६ ॥
सुभद्रो भद्रबाहुश्च दुर्मदो भद्र एव च ।
पौरव्यास्तनया ह्येते भूताद्या द्वादशाऽभवन् ॥ ४७ ॥
नन्दोपनन्दकृतकशूराद्या मदिरात्मजाः ।
कौशल्या केशिनं त्वेकमसूत कुलनन्दनम् ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वसुदेवस्य पत्नीः पुत्रांश्चाऽऽह—पौरवीत्येकादशभिः ॥ ४५ ॥ ४६ ॥ ४७ ॥

कौशल्या भद्रा ॥ ४८—५४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

राष्ट्रपाल्यां भार्यायां सृञ्जयो वृषादीन् जनयामास. श्यामकस्तु शूरभूम्यां भार्यायां शूरभूम्यामिति पाठान्तरं हरिकेशहिरण्याक्षौ जनयामास ॥ ४२ ॥

तथा वत्सकोऽपि मिश्रकेश्यामप्सरसि वृकादीन् सुतान् नवाजीजनत् वृकस्तु दुर्वाक्ष्यां भार्यायां पुष्करसालादीन् सुतानादृधे उत्पादयामास ॥ ४३ ॥

शमीकस्तु सुधामनि भार्यायां सुमित्रादीन् सुतानादधे आनकस्तु कर्णिकायां पत्न्याम् ऋतधामजयौ सुतवादधे ॥ ४४ ॥

अथ वसुदेवस्य पत्नीः पुत्रांश्चाह—पौरवीत्येकादशभिः । देवकी प्रमुखं प्रधानं यासां ताः पूर्वोक्ताः पौरव्यादयश्च आनकदुन्दुभेः वसुदेवस्य पत्न्यः आसन् बभूवुः ॥ ४५ ॥

तत्र रोहिण्यां पत्न्यां बलादीन् कृपादीन् सुतानुदपादयत् जनयामास तत्र बलो बलरामः कृप आदिर्येषां तान् बलादीनित्यर्थः । बलादीन् कृपादींश्चेति वा आदिशब्देनानुक्ता अन्ये ग्राह्याः एवमग्रेपि ॥ ४६ ॥

भूत आदिर्येषां त एते सुभद्रादयो द्वादश पौरव्यादयस्तनयाः आदिशब्दग्राह्यैरुक्तसङ्ख्यापूर्त्तिः ॥ ४७ ॥

तथा शूराद्यानन्दादयो मदिराया आत्मजाः कौसल्या भद्रा तु केशिनमेकमेव सुतमसूत, कथम्भूतम् ? कुलं नन्दयतीति तथा ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उदपादयत् उत्पादयामास ॥ ४६-५६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

श्रीवसुदेवस्य पत्नीः पुत्रांश्चाह—पौरवीत्यादिना ॥ ४५-४७ ॥

कौशल्या कोशलदेशजा भद्रा ॥ ४८—५४ ॥

भाषा टीका ।

कंसवती में देवश्रवा से सुवीर और इषुमान् हुए, कङ्कामें आनक से सत्यजित् और पुरुजित् पुत्र हुए ॥ ४१ ॥

सृञ्जय ने राष्ट्रपाली में वृष दुर्मर्षणादिकन को उत्पन्न किये और श्यामक ने शूरभूमि के विषें हरिकेश और हिरण्याक्ष को उत्पन्न किये ॥ ४२ ॥

वत्सक ने मिश्रकेशी अप्सराके विषें वृकादिकन को उत्पन्न किये, और वृक ने दुर्वाक्षी के विषें तक्ष, पुष्कर, शाल, आदिकन को पैदा किये ॥ ४३ ॥

और शमीक से सुदामनीजी सुमित्र, अर्जुन, पाल, आदिकन को उत्पन्न करती भई, और कङ्कसे कर्णिकामें ऋतधाम, और जय, हुए ॥ ४४ ॥

पौरवी, रोहिणी, भद्रा, मदिरा, रोचना, इला, और देवकी से आदि लेकर वसुदेव जी की पत्नी होतीं हुईं ॥ ४५ ॥

वसुदेवजी ने रोहिणी में बल, गद, सारण, दुर्मद, विपुल, ध्रुव, और कृतादिक पुत्रों को उत्पन्न किये ॥ ४६ ॥

सुभद्र, भद्रबाहु, दुर्मद, भद्र और भूतादिक ये द्वादश पुत्र पौरवी के उत्पन्न हुए, ॥ ४७ ॥

नन्द, उपनन्द कृतक और शूरादिक मदिरा के आत्मज हुए, और कौशल्या ने तौ कुलनन्दक एक केशी को ही उत्पन्न किया ॥ ४८ ॥

रोचनायामतो जाता हस्तहेमाङ्गदादयः ।
इलायामुरुवल्कादीन् यदुमुख्यानजीजनत् ॥ ४६ ॥
(१)विपृष्ठो घृतदेवायामेक आनकदुन्दुभेः ।
शान्तिदेवात्मजा राजन् ! श्रमप्रतिश्रुतादयः ॥ ५० ॥
राजानः कल्पवर्षाद्या उपदेवासुता दश ।
वसुहंस(२)सुवंशाद्याः श्रीदेवायास्तु षट् सुताः ॥ ५१ ॥
देवरक्षितया लब्धा नव चात्र गदादयः ।
वसुदेवः सुतानष्टावादधे सह देवया ॥ ५२ ॥
पुरुविश्रुतमुख्यांस्तु साक्षाद्धर्मो वसूनिव ।
वसुदेवस्तु देवक्यामष्ट पुत्रानजीजनत् ॥ ५३ ॥
कीर्तिमन्तं सुषेणं च भद्रसेनमुदारधीः ।
ऋजुं सम्मर्दनं भद्रं सङ्कर्षणमहीश्वरम् ॥ ५४ ॥
अष्टमस्तु तयोरासीत्स्वयमेव हरिः किल ।
सुभद्रा च महाभागा तव राजन् ! पितामही ॥ ५५ ॥
यदा यदा हि धर्मस्य क्षयो वृद्धिश्च पाप्मनः ।
तदा तु भगवानीश आत्मानं सृजते हरिः ॥ ५६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अष्टमस्तु स्वयमेवाऽऽसीन्न तु कर्मादिना हेतुना ताभ्यां जनितो वा यतोऽसौ हरिः ॥ ५५ ॥

तदेवोपपादयति—यदेति त्रिभिः ॥ ५६ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

ततो वसुदेवाद्रोचनायां हस्तहेमाङ्गदादयो जाताः इलायान्तु उरुवल्कादीन् यदुमुख्यान् यादवश्रेष्ठान् सुतानजीजनत् । वसुदेव इति शेषः ॥ ४६ ॥

देवकीप्रमुखा आसन् पत्न्य इत्यनेनोक्ताभ्यः अन्या अपि पत्न्यः आनकदुन्दुभेरासन्निति सूचितम् । देवकोग्रसेनयोः स्वसॄर्वसुदेव उपयेमे इति चोक्तम् पुरस्तात्. इदानीं तास्तत्पुत्रांश्चाह—त्रिपृष्ठ इत्यादिना । आनकदुन्दुभेर्वसुदेवस्य धृतदेवायां भार्यायां त्रिपृष्ठ एक एव जज्ञे प्रश्रमप्रश्रितादयस्तु शान्तिदेवाया आत्मजाः ॥५०॥

कल्पवर्ष आदिर्येषान्ते राजानस्तु दश उपदेवायाः सुताः वसुर्हंसश्च सुधन्वायाः सुतौ श्रीदेवायाः सुतास्तु षट् देवरक्षितया वसुदेवस्य भार्यया गदादयो नव सुता लब्धाः प्रसूता इत्यर्थः । वसुदेवः सहदेवया भार्यया साधनभूतया अष्टौ सुतान् पौरवः श्रुतश्च मुख्यौ येषां तानादधे अजीजनत् धर्मो यथा साक्षाद्वसूनष्टावादधे तद्वत् देवक्यामपि वसुदेवोऽष्टौ कीर्तिमदादीन् पुत्रान् अजीजनत् ॥ ५१ ॥ ५२ ॥ ५३ ॥

महीश्वरं नागेन्द्रमिति संकर्षणविशेषणम्, उदारधीरिति वसुदेवविशेषणम् एवञ्चैते कीर्तिमदादयः सप्त ॥ ५४ ॥

अष्टमं सुतमाह—अष्टमस्तु इति । तयोर्वसुदेवदेवक्योरष्टमः सुतस्तु स्वयं हरिरेव श्रीकृष्णरूपेणाऽऽसीत् अवततार तथा सुभद्रा नामैका कन्या तयोर्जज्ञे सा च महाभागा महाभाग्यशालिनी हे राजन् ! तव पितामही पितामहस्यार्जुनस्य भार्या ॥ ५५ ॥

अष्टमस्तु सुतो हरिरेवासीदित्युक्तम्. तत्र कोवा हरेरवतारकालः ? किं तस्य जन्मनिमित्तम् ? किंवाऽस्य जन्मप्रयोजनम् ? इत्यादि प्रश्नान् परिहरन् संग्रहेण तच्चरित्रञ्चाह—यदेत्यादिना यावत्समाप्ति । यदा हि यस्मिन् काले हि धर्मस्य क्षयः पाप्मनोऽधर्मस्याभ्युत्थानमिति शेषः । भवति तदा तु तस्मिन् काले तु भगवानीशो हरिरात्मानं सृजते अवतारयति तदा हीत्यादिना यदात्रित्यन्तेन अवतारकालः उक्तः । हरिरित्यनेन आश्रितार्तिहरत्वमुक्तं तदेवावतारस्य मुख्यं प्रयोजनमिति सूचितं भगवानात्मानं सृजत इत्यनेनावतारदशायामपि षाड्गुण्यपूर्तिरुक्ता ईश इत्यनेनाकर्मवश्यत्वरूपं स्वातन्त्र्यमुक्तम् ॥ ५६ ॥

---

(१) त्रिपृष्ठः इति विज० वीर० । (२) सुधन्वाद्याः इति विज० वीर० ।

न ह्यस्य जन्मनो हेतुः कर्मणो वा महीपते ! ।
आत्ममायां विनेशस्य परस्य द्रष्टुरात्मनः ॥ ५७ ॥
यन्मायाचेष्टितं पुंसः स्थित्युत्पत्त्यप्ययाय हि ।
अनुग्रहस्तन्निवृत्तेरात्मलाभाय चेष्यते ॥ ५८ ॥
अक्षौहिणीनां पतिभिरसुरैर्नृपलाञ्छनैः ।
भुव आक्रम्यमाणाया अभाराय कृतोद्यमः ॥ ५९ ॥
कर्माण्यपरिमेयानि मनसाऽपि सुरेश्वरैः ।
सह सङ्कर्षणश्चक्रे भगवान् मधुसूदनः ॥ ६० ॥
कलौ जनिष्यमाणानां दुःखशोकतमोनुदम् ।
अनुग्रहाय भक्तानां (१)सुपुण्यं व्यतनोद्यशः ॥ ६१ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अष्टमस्त्विवति । हरति आकर्षति वशीकरोति सर्वमिति हरिः पूर्णभगवान् स एव स्वयमासीत् नत्वाविर्भावान्तरेण किन्तेति "एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्" इति प्रसिद्धं निश्चिनोति ॥ ५५ ॥

तत्र भगवदवतारमात्रस्य सामान्यतः कारणमाह—यदेति । श्रीगीतासु चैवं'यदा यदा हि धर्मस्य ग्लानिर्भवति भारत'इत्यादि॥५६॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

स्वयमेव न त्वंशेन ॥ ५५ ॥

तत्र, भगवदवतारमात्रस्य सामान्यतः कारणमाह—यदेति ॥५६॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तयोः देवकीवसुदेवयोः पुत्रः स्वयं हरिः आसीत् सुभद्रा कन्या च तयोरासीत् इयं पुराणान्तरे कथाऽस्ति काचिद्देवकन्या मुनिशापाद्रोहिण्यां जाता पुनर्निःशापा सती भगवल्लीलानुभवार्थं श्रीदेवक्यां जातेति हरिवंशेपि "चित्रां नाम कुमारीं च रोहिणीतनया दशा" इति रोहिण्याः पुत्रान् कन्यां चोक्त्वा चित्रा सुभद्रेति पुनर्विख्याता हे कुरुनन्दन ! वसुदेवाच्च देवक्यां जज्ञे इत्युक्तम् ॥ ५५ ॥

आविर्भावप्रयोजनमाह—यदेति । सृजते आविष्करोति ॥ ५६ ॥

भाषा टीका ।

और रोचना के विषै वसुदेवजी से हस्त हेमाङ्गद, से आदि लेकर पुत्र हुए, और इला के विषै, यदुलोगों में मुख्य ऐसे उरुवल्कादिकों को उत्पन्न किये ॥ ४९ ॥

धृतदेवा के विषै आनकदुन्दुभि (वसुदेव) के एक विपृष्ट उत्पन्न भया ! हे राजन् ! शन्तिदेव के पुत्र श्रम, प्रतिश्रुतादिक हुए ॥ ५० ॥

उपदेव के पुत्र कल्प, वर्ष, आदिक दश राजा हुए, और श्रीदेवा के वसुहंस सुवंश आदिक छै पुत्र हुए ॥५१॥

देवरक्षिता के गदादिक नौ पुत्र हुए और वसुदेवजी ने पुरुविश्रुत, प्रभृति आठ पुत्रों को सहदेवा नामक पत्नी में उत्पन्न किये, धर्म ने साक्षात् वसु लोगों को जैसे उत्पन्न किये ॥५२॥५३॥

कीर्त्तिमान्, सुषेण, उदार बुद्धिवाले भद्रसेन, ऋजु, सम्मर्दन, भद्र, और साक्षात् अहीश्वर शेष जी श्री सङ्कर्षण, ये अष्ट पुत्र हुए ॥ ५४ ॥

और आठमें गर्भ में तो स्वयं साक्षात् श्रीहरि ही होते हुए, हे राजन् ! और एक कन्या बड़ी भाग्यवती तुमारी पितामही (दादी) उत्तरा भई ॥ ५५ ॥

इस लोक में जिस २ समय में धर्म का क्षय और पाप की वृद्धि होती है, उसी २ समय भगवान् ईश श्रीहरि अवतार को धारण करते हैं ॥ ५६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ईशस्य मायानियन्तुः परस्याऽसङ्गस्य : द्रष्टुः साक्षिणः आत्मनः सर्वगस्य न ह्येवम्भूतस्य मायाविनोदं विना जन्मनः कर्मणो वा हेतुः सम्भवतीत्यर्थः ॥ ५७ ॥

किञ्च यस्य मायाचेष्टितं पुंसो जीवस्याऽनुग्रहस्तस्य जीवाऽनुग्राहकस्य कुतः कर्मादिपारतन्त्र्येण जन्मादिसम्भवः ? अनुग्रहमेवाऽऽह—हि यस्मात्तदेव स्थित्यादये इष्यते प्रलये लीनोपाधेर्जीवस्य धर्माद्यसम्भवादुपाधिसृष्ट्यादिना धर्मादिसम्पादनेनानुग्रहः तथाऽऽत्मलाभाय मोक्षाय चेष्यते तत्र हेतुः तेनैव श्रूयमाणेन तस्य स्थित्यादेर्निवृत्तेः ॥ ५८ ॥

(१) स्वं पुण्यम् इति वीर० ।

यस्मिन् सत्कर्णपीयूषे यशस्तीर्थवरे सकृत् ।
श्रोत्राञ्जलिरुपस्पृश्य धुनुते कर्मवासनाम् ॥ ६२ ॥
भोजवृष्ण्यन्धकमधुशूरसेनदशार्हकैः ।
श्लाघनीयेहितः शश्वत्कुरुसृञ्जयपाण्डुभिः ॥ ६३ ॥
(१)स्निग्धस्मितेक्षितोदारैर्वाक्यैर्विक्रमलीलया ।
नृलोकं रमयामास मूर्त्या सर्वाङ्गरम्यया ॥ ६४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्य चेष्टितं भूमेरनुग्रह इत्याह–अक्षौहिणीनामिति द्वाभ्याम् । अभाराय भारपरिहाराय ॥ ५९ ॥

सुरेश्वरैरपि मनसाऽप्यपरिमेयानि अवितर्क्याणि सङ्कर्षणसहितश्चक्रे ॥ ६० ॥

सङ्कल्पमात्रेण भूभारहरणसमर्थस्यापि कर्मकरणं यशोविस्तारद्वारा भक्ताऽनुग्रहार्थमित्याह---कलाविति द्वाभ्याम् । दुःखशोकतमांसि नुदतीति तथा तद्यशो व्यतनोत् ॥ ६१ ॥

यस्मिन् सतां कर्णपीयूषे यशोरूपे तीर्थवरे श्रोत्रमेवाञ्जलिः पानसाधनं यस्य स पुरुषः सकृदप्युपस्पृश्याऽऽचमनमात्रं कृत्वा तत्सौन्दर्याकृष्टचित्तः कर्मवासनां धुनुते ॥ ६२ ॥

तदेवाऽऽह–द्वाभ्याम् । भोजादिभिः श्लाघनीयमीहितं यस्य ॥ ६३ ॥

सर्वैरङ्गै रम्यया मूर्त्या च ॥ ६४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेव व्यनक्ति—नहीति । अस्य भगवतः जन्मनः कर्मणः देवमनुष्यादिसजातीयचेष्टाया वा आत्ममायां विना. स्वसङ्कल्पं विना अन्यो हेतुः पुण्यापुण्यादिरूपो न विद्यते हे महीपते ! अनेन जन्मकारणं स्वसङ्कल्प एव, न तु जीवस्येव पुण्यापुण्यादिकमित्युक्तम्. तत्र हेतुं वदन् विशिनष्टि—ईशस्य प्रकृतिपुरुषयोर्नियन्तुः नतु भृत्यादीन्नियमयन्नपि राजादिः कर्मवश्य एव दृष्ट इत्यतो विशिनष्टि, द्रष्टुरिति. पुण्यापुण्यादिकर्तॄन् क्षेत्रज्ञान् पश्यतः न तु पुण्यापुण्यादिकं कुर्वत इत्यर्थः । तत्कर्तुर्हि तद्वश्यतेति भावः । कथम् एकः सर्वान् क्षेत्रज्ञान् पश्यति? इत्यतो विशिनष्टि परस्यात्मनः इति परमात्मन इत्यर्थः । चिदचिदात्मकं लोकत्रयमप्यन्तःप्रविश्य व्याप्यगतैर्धर्मैरस्पृष्टस्सन् योऽन्तरात्मतया बिभर्ति स परमात्मा, तथा गीतं भगवता “परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः” इति. भरणमत्रधारकत्वेन चिदचिद्वस्तुनोः कर्मानुगुणं प्रेरणम् ॥ ५७ ॥

ननु, अवतारदशायां देवमनुष्यादिसजातीयचेष्टां कुर्वन्नप्ययं केवलं द्रष्टैव न तु तत्कर्तेति कथमुच्यते ? इत्यत आह—यन्मायेति । यस्य भगवतो माया चेष्टितं स्वसङ्कल्पैकहेतुकं चेष्टितं तत्पुंसो जीवस्य सर्गाद्यर्थमेव काँश्चिदुत्पादयितुं काँश्चित्पातुं काँश्चिच्च संहर्तुमेव, न तु स्वस्य पुण्यापुण्यत्वादिरूपार्थमिति भावः । अव्ययो लयः, तर्हि किं जीवसर्गाद्यर्थेन मायारूपेण चेष्टितेन प्रयोजनम् ? प्रत्युतान्यानर्थकारिणा चेष्टितेन स्वस्यानर्थमापद्येतेत्यत्राह, अनुग्रह इति. माया चेष्टितरूपो व्यापारोऽनुग्रहः अनुग्रहरूप एव, जीवाननुग्रहीतुमेव चेष्टत इति यावत्. चेष्टितस्यानुग्रहरूपतामेव दर्शयति—तन्निवृत्तेरात्मलाभाय चेष्यत इति. स च मायाचेष्टितरूपो व्यापारस्तन्निवृत्तेः सर्गादिनिवृत्तेः पश्चात् आत्मलाभाय मोक्षाय चाऽत्रधारणार्थः आत्मलाभायैवेष्यते रामकृष्णादिरूपेणावतीर्णेन भगवता ये सृष्टाः पालिताः संहृताश्च ते सर्वे तद्दिव्यमङ्गलविग्रहसम्बन्धसहशय्यासनभोजनसन्दर्शनादिभिर्देहावसाने मुक्ता भवेयुरित्येवमर्थमेव भगवान् चेष्टत इत्यर्थः । यद्वा, तच्चेष्टितमनुग्रहरूप एव निवृत्तेरात्मलाभाय निवृत्तिधर्मपूर्वकात्मलाभायैव इष्यते सृष्ट्यादिसमर्थं मामवलोक्य मत्प्राप्तिसाधनं निवृत्तिधर्मं मद्भक्तिरूपमनुष्ठाय मुच्येरन् इत्येवमर्थञ्चेष्टत इत्यर्थः ॥ ५८ ॥

अवतारप्रयोजनं हरिशब्देन सूचितं व्यनक्ति—अक्षौहिणीनामिति । नृपाणामिव लाञ्छनानि येषां तैर्नृपवदवभासमानैः इत्यर्थः असुरैरासुरसंपत्त्या जातैरनेकाक्षौहिणीसंख्यानां सेनानां पतिभिः ऐश्वर्यादिभिराक्रम्यमाणाया भुवः पृथ्व्याः अभाराय भाराभावायोद्यमः अवताररूपः कृतः येन स भुवो भारापहरणायावतीर्ण इति भावः ॥ ५९ ॥

तथैव चाकरोदित्याह–कर्माणीति । सुरेश्वरैः ब्रह्मादिभिरपि मनसाऽप्यपरिमेयानि अवितर्क्याणि कर्माणि सङ्कर्षणसहितो भगवान् मधुसूदनः श्रीकृष्णश्चक्रे पूतनाशकटयमलार्जुनकेशिकुवलयापीडचाणूरमुष्टिकतोसलकंसचैद्यादिसंहाररूपाणि कर्माणीति भावः ॥ ६० ॥

प्रधानं प्रयोजनं दर्शयति–कलाविति । कलौ युगे जनिष्यमाणानां भक्तानामनुग्रहाय तेषां दुःखादिकं नुदत्यपनयतीति तथा तत्सुपुण्यं वदतां शृण्वतां च पुण्यावहं यशो व्यतनोत् भूभारहरणस्य संकल्पमात्रेणापि सिद्धेरिदमेवावतारस्य मुख्यं प्रयोजनमिति भावः ॥ ६१ ॥

यशोवितानस्य भक्तानुग्रहरूपतां दर्शयितुं यशो विशिनष्टि–यस्मिन्निति । सतां साधूनां कर्णयोः श्रोत्रयोः पीयूषे अमृततुल्ये यस्मिन् यशोरूपे तीर्थश्रेष्ठे श्रोत्रमेवाञ्जलिः पानसाधनं यस्य सः पुरुषः सकृदप्युपस्पृश्याचम्य कर्मवासनाः धुनुते

(१) स्निग्धस्मितेक्षणोदारैर्वाक्यैर्विभ्रमलीलया ॥ इति वीर० ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्सौन्दर्यादिगुणाकृष्टचित्तः कर्मवासनाः क्षपयति मुक्तो भवतीत्यर्थः ॥ ६२ ॥

तदेवाह, द्वाभ्याम्—भोजादिभिः कुर्वादिभिश्च श्लाघनीयमीहितं चेष्टितं यस्य, सः स्निग्धैः सानुरागैरीक्षितैः अवलोकनैः धीरैर्गम्भीरैर्वाक्यैर्वचोभिश्च विक्रमलीलया विक्रमः पादविक्षेपः तद्रूपया लीलया च सर्वैरङ्गै रम्यया मूर्त्या च नृलोकं रमयामास ॥ ६३—६४ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु, यदि श्रीनारायणो जीववज्जन्मकर्माणि भजते तर्हि संसारनिवृत्तये तत्सेवा व्यर्थेति तत्राह—नहीति । विषमो दृष्टान्तः, तथा हि; जीवस्य जन्मादिमत्त्वे पुण्यपापे कारणं विधिवद्धत्वात् तदनियतत्वादीश्वरस्य न हि ते स्तः । न हि कार्यमकारणमिति न्यायात् कारणं वक्तव्यं चेत् लोकानुग्रहोद्बुद्धात्मेच्छैवेति ब्रूमः । अनुग्रहोद्बोधस्यापि धर्मपाप्मनोः क्षयवृद्धिदर्शनमित्युक्तम्, अतस्तत्सेवा न व्यर्थेत्यर्थः । हरेरविधिबद्धत्वेऽपि जन्मादिदर्शनात् अतर्कितत्वेन पुण्यादिलेपित्वेन दुःखित्वं स्यादिति । तत्राह—ईशस्येति । ईशस्य क्वचिन्न मे दुःखित्वं स्यादिति तन्निवारणसमर्थत्वादन्यस्य तदभावात् जीव एव ईशः किं न स्यात् ? इति तत्राह; परस्येति । ननु, किं तद्वैलक्षण्यम् ? येनेशादन्यो जीवः स्यादिति तत्राह—द्रष्टुरिति । “यः सर्वज्ञः सर्ववित्”इति श्रुतेः । न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत इत्यादेश्च सार्वज्ञ्यं जीवाद्भिन्नत्वेन मुख्यं लक्षणं सार्वज्ञ्यं स्वाभाविकं न तु नैमित्तिकमित्याशयेनाह—आत्मन इति । एवंविधः क इत्यतो वाह—आत्मन इति । “आत्मा देहे धृतौ जीवे स्वभावे परमात्मनि”इति यादवः ॥ ५७ ॥

ननु, जीवव्यावर्तकं लक्षणं जगत्कर्तृत्वादिकं तत्प्रकृतेरतः सार्वज्ञ्यमात्रेण कथमीश्वरो जीवाद्व्यावर्त्यः ? विशेषणस्य “सर्वज्ञस्त्रिपुरान्तकस्त्रिनयनः”इत्यादावन्यविषयत्वेन व्यभिचरित्वादुक्तदोषाऽनिस्तार इत्यत्राह—यन्माययेत्यादि । यस्येश्वरस्याधीनायाः मायायाः प्रकृतेश्चेष्टितं परिमाणलक्षणं पुंस इत्युपलक्षणम् प्रपञ्चस्य स्थित्युत्पत्तिसंहाराय भवति स्थित्यादेर्हेतुर्भवतीत्यर्थः । तदेकविषयत्वद्योतनाय चतुर्थीयम् एकवद्भावादेकवचनं “प्रकृतिं पुरुषं चैव प्रविश्य पुरुषोत्तमः” इति स्मृतिं हिशब्देन दर्शयति । यदनुग्रहः प्रकृतिचेष्टायाः निवृत्ते हेतुः निवृत्तिश्चात्मलाभाय सच्चिदानन्दस्वरूपाविर्भावाय“बलमानन्द ओजश्च”इत्यादिश्रुत्येष्यते निरूप्यते हरेः प्रपञ्चनिर्माणादिकं तत्तत्पदार्थविशेषज्ञानं विना न युज्यते तदूबलादपोहितुं न पार्यते प्रामाणिकत्वादतो निरुपमचरितं सार्वज्ञ्यं हरेरेवाऽन्यस्यौपचारिकमित्यतो जीवव्यावृत्तिलक्षणसद्भावाद्युक्तेति भावः ॥ ५८ ॥

ननु, कीदृशोऽनुग्रहो येन तन्निवृत्तिः स्यादिति तत्राह—अक्षौहिणीनामिति । भुवो भारायमाणानां असुराणामभावाय नाशाय ॥ ५९ ॥

अपरिमेयानि परिमातुमशक्यानि ॥ ६० ॥

यशोलक्षणं पराक्रमं दुःखशोकतमांसि नुदतीति दुःखशोकतमोनुत् ॥ ६१ ॥

तत्तत्फलमाह—यस्मिन्निति । सत्कर्मपीयूषे प्रशस्तजनकथाऽमृते यशस्तीर्थवरे यशोलक्षणशास्त्रपावनजलश्रेष्ठे श्रोत्रे एवाञ्जलिर्यस्य स तथा उपस्पृश्य स्नानपानाचमनानि कृत्वा पापकर्मवासनाः पापकर्मकरणश्रद्धालक्षणाः ॥ ६२ ॥

श्लाघनीये हितः पूज्यमानचरितः ॥ ६३ ॥

स्निग्धस्मितेक्षितनोदारैर्मनोहरैः विक्रमलीलया विक्रमविलासेन सर्वाङ्गसुन्दरया मूर्त्या च नृलोकं मनुष्यजनं “नृ नये” इति धातोर्नयति भक्तिपूर्वकं तत्त्वं जानातीति नृलोको ज्ञानिसमूहस्तमिति वा ॥ ६४ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नन्वन्यस्य जन्मकर्मणोर्हेतुः प्राचीनकर्मैव स्यात् तस्य च हेतुर्माया श्रीभगवतस्तु किं स्यात् ? इत्याशङ्क्याह—न ह्यस्येति । “साधवो हृदयं मह्यं साधूनां हृदयं त्वहम्” इति न्यायेनात्माऽभिन्नत्वेन सम्मतेषु साधुषु या माया कृपा तां विना तत्र हेतवः ईशस्येत्यादयः ॥ ५७ ॥

कृपामेव कैमुत्येन दर्शयति—स्थित्याद्यर्थं यन्मायायां प्रकृतौ चेष्टितं वीक्षणरूपं तदपि जीवेष्वनुग्रह एव पर्यवसीयते बुद्धीन्द्रियादिसम्पादनात् अत एवाऽनुग्रहस्तस्य स्थित्यादेर्निवृत्तेर्हेतोर्जीवानामात्मनो भगवतो लाभाय चेष्यते किमुत धर्मादेः तथाच वक्ष्यते “बुद्धीन्द्रियमनःप्राणान्”इत्यादि ॥ ५८ ॥

सम्प्रतित्वसङ्ख्येयभक्तजनाश्रयत्वरूपायां परमभक्तायां पृथिव्यां परिव्यक्तयैव कृपयैव स्वयमवततारेत्याह—अक्षौहिणीनामिति युग्मकेन ॥ ५९—६५ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु, जीवस्य जन्मकर्मणोर्हेतुः प्राचीनं कर्मैव स्यात् तस्य च हेतुर्माया, श्रीभगवतस्तु किं स्यात् ? इत्यत आह—न ह्यस्येति । आत्मनः स्वस्य आत्मसु जीवेषु वा मायां कृपां विना उत्तरश्लोके अनुग्रह इति मायार्थविवरणात् “माया दम्भे कृपायां च”इति विश्वप्रकाशात् मायाशब्देनात्र कृपैवोच्यते कृपाया फलमभिव्यञ्जयति—ईशस्य जन्मकर्मभ्यां दर्शिताभ्यां सर्वजीवोद्धारसमर्थस्येत्यर्थः । सामर्थ्ये हेतुः परस्य सर्वोत्कृष्टस्य कृपायां हेतुः आत्मनो जीवान् द्रष्टुः संसारदुःखाब्धौ पतितान् विलोकयितुः ॥ ५७ ॥

कृपाया एव हेतुत्वं कैमुत्येन दर्शयति—यावेति । पुंसः प्रकृतीक्षणकर्तुः मायायां यच्चेष्टितमीक्षणादिकं कर्म जीवानां स्थित्याद्यर्थं हि निश्चितं तच्चापि अनुग्रहः अनुग्रहादेव हेतोः किमुत मायागन्धेनापि रहितं गोवर्द्धनधारणादिचेष्टितमिति भावः । बुद्धीन्द्रियादिकं प्राप्य जीवा विषयभोगादिकं प्राप्नुवन्त्विति या कृपा तत एव मायायां चेष्टितमित्यर्थः । ननु, विषयभोगादिहेतुभ्यः स्थित्यादिभ्यः पुनः संसारदुःखमेव स्यादिति कोऽयमनुग्रहस्तत्राह-

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तन्निवृत्तेस्तेषां स्थित्यादीनां भक्तिज्ञानवैराग्यैर्निवृत्तेरात्मनो भगवतो यो लाभस्तदर्थं चेष्यते बुद्धीन्द्रियादिकं विना भक्तिज्ञानाद्यपि न सिद्ध्येदिति जीवमात्रेषु कृपैव हेतुरित्यर्थः । यदुक्तं "बुद्धीन्द्रियमनः प्राणान् जनानामसृजत् प्रभुः । मात्रार्थं च भवार्थं च आत्मने कल्पनाय च" इति ॥ ५८ ॥

श्रीकृष्णस्य तु जन्मकर्मणोर्हेतुः स्पष्टमेव पृथिव्यां पृथिवीस्थजनेषु साधकसिद्धभक्तेष्वपि कृपैव दृश्यत इत्याह--अक्षौहिणीनामिति सप्तभिः । भुवो भारहरणात् असुराणामपि वधेन संसारहरणात् कृपोक्ता ॥ ५९—६० ॥

भुवि स्थितेषु कृपामुक्त्वा भुविस्थास्यत्स्वपि कृपामाह—कलाविति । तमोऽविद्या ॥ ६१ ॥

ननु, सुपुण्यमित्युक्त्या यशः स्वर्गजनकमवगम्यते तन्नैवमित्याह—यस्मिन्निति । सद्भिः कर्णपेयपीयूषमये यशोरूपे तीर्थवरे श्रोत्रमेवाञ्जलिः पानसाधनं यस्य स उपस्पृश्य आचमनमात्रं कृत्वा किं पुनरापीय सकृदेकवारमपि किम्पुनर्बहुशः कर्मवासनामविद्यां यस्य परोक्षवर्तिनोऽपि यत् किञ्चिद्यशः श्रवणमात्रेणैव संसारं तरन्तीत्यर्थः ॥ ६२ ॥

तत्समकालभवत्वेनापरोक्षवर्तिनस्तल्लीलापरिकरास्त्वगण्यमहिमानः परममान्या एवेत्याह—भोजेत्यादि ॥ ६३ ॥

ये तु तस्याऽतिप्रेमाविषयीभूता नेत्राञ्जलिभ्यां तदीयरूपमाधुर्यपानासक्ताः श्रोत्रादीनपि सफलयन्ति ते त्वतिधन्या इत्याह, स्निग्धं स्मितं यत्र तथाभूतं यदीक्षितमवलोकनं तेनोदारैर्मनोवाञ्छापूरकैः कदाचिद्विक्रमस्य स्वमधुरचरणविन्यासस्य वीररसव्यञ्जकस्य स्वशौटीर्यस्य वा लीलया नृलोकं मनुष्यजातिं स्वप्रियजनसमूहम् ॥ ६४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु, धर्मत्राणाय पापनिराकरणायास्य प्रादुर्भावश्चेत्तर्हि अस्यापि जन्मकर्मणोर्हेतुरुपादेयत्वेन धर्मफलं पुण्यानुष्ठानतो निराकरणीयत्वेन पापफलं चास्तीत्यत्राह—नहीति । हे महीपते ! ईशस्य चेतनाचेतननियन्तुः परस्य पूर्णानन्दस्य द्रष्टुः सर्वसाक्षिणः आत्मनः सर्वात्मनोऽस्य हरेः देवक्यां जातस्य आत्मसु जीवेषु या माया "माया दम्भे कृपायां च" इति कोशात् तां विना जीवानुग्रहं विनेत्यर्थः । अन्यो हेतुर्जन्मनः कर्मणो वा नास्तीत्यन्वयः ॥ ५७ ॥

ननु, "ममैवांशो जीवलोके जीवभूतः सनातनः । क्षेत्रज्ञं चापि मां विद्धि" इति भगवद्वचनात् जीवस्य भगवदात्मकतयैव कृतार्थत्वादुक्तानुग्रहस्य किं प्रयोजनमित्यत्र अनादिमायावश्यस्य सृष्टिसंहारप्रवाहपतितस्य भगवत्पराङ्मुखस्य जीवस्य सृष्टिसंहारनिवृत्तये भगवत्प्राप्तये च तदनुग्रह इष्यत इत्याह—यन्मायेति । "देवात्मशक्तिं स्वगुणैर्निगूढाम्" "न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः । मायया ऽपहृतज्ञाना आसुरं भावमाश्रिताः । मम माया दुरत्यया" इत्यादिश्रुतिस्मृतिप्रसिद्धायाः यस्य मायायाः जीवविमोहिन्याः चेष्टितं पुंसो जीवस्य स्थित्युत्पत्त्यप्ययाय भवति तस्य अनुग्रहः स्थित्यादेर्निवृत्तये आत्मलाभाय परमात्मप्राप्तये च इष्यते इत्यन्वयः ॥ ५८ ॥

तस्माज्जीवाऽनुग्रहार्थं भगवतः प्रादुर्भावादिकमित्याह—अक्षौहिणीनामित्यादिसप्तभिः । अभाराय भारनिराकरणाय उद्यमः प्रादुर्भावः ॥ ५९ ॥

सुराणामीश्वरैर्ब्रह्मशिवादिभिरपि मनसाऽपि तीव्रध्यानपरेणान्तःकरणेनाऽपि अपरिमेयानि परिमातुमनर्हाणि ॥ ६० ॥

दुःखानि आध्यात्मकादीनि शोकं मरणादिभयजं अतः अनाद्यज्ञानं नुदतीति तथा ॥ ६१ ॥

कीदृशं यशो व्यतनोदत्राह—यस्मिन् सतां साधूनां कर्णपीयूषे यशस्तीर्थवरे यश एव तीर्थवरं तस्मिन् श्रोत्रमेवाञ्जलिः पानपात्रं यस्य स पुरुषः सकृदपि उपस्पृश्य आचमनमात्रं कृत्वा एकवारं किञ्चिदप्यास्वाद्य तत्प्रवणः सन् कर्मवासनां धुनुते ॥ ६२ ॥

भोजादिभिः श्लाघनीयमीहितं यस्य सः यद्वा सामान्यतः सर्वैः श्लाघनीयेहितः भोजादिभिः सह नृलोकं रमयामासेत्युत्तरेणान्वयः ॥ ६३ ॥

विविधक्रमं लीलया च सर्वैरङ्गैः रम्यया मूर्त्या च नृलोकं रमयामास ॥ ६४ ॥

भाषा टीका ।

हे महीपते ! इन श्रीहरि के जन्म और कर्म का कारण आपको इच्छा के विना और कुछ भी नहीं हैं, क्योंकि ? आप नियंता हैं पर हैं द्रष्टा हैं और आत्मा है इसी से आपके जन्म कर्म दिव्य हैं ॥ ५७ ॥

जिन श्रीहरी की माया का चेष्टित ही इस पुरुष (जीव) के करण कलेवरादि प्रदान द्वारा उत्पत्ति स्थिति नाश का हेतु है, अर्थात् संसार में जन्म लेना, स्थित रहना और मरना इनका कारण है । और जिनका अनुग्रह ही इस सांसारिक जन्मादि निवृत्ति का और मोक्ष प्राप्ति का कारण है ॥ ५८ ॥

नृप चिन्ह धारण करने वाले अक्षौहिणियों के पति असुरों से भूमि देवी को आक्रांत देखकर इसी के भार हरने के लिये आप प्रभुने उद्यम कियाँ ॥ ५९ ॥

बडे २ सुरेश्वरों के मन में और विचार में भी न आ सकें ऐसे अपरिमेय कर्मों को भगवान् श्रीमधुसूदन बलदेवजी के सहित करते हुए ॥ ६० ॥

और कलियुग के विषैं उत्पन्न होने वाले भक्तों के अनुग्रहार्थ उनके दुःख, शोक, और अज्ञान को नाश करने वाले ऐसे पुण्य यश को विस्तार करते हुए ॥ ६१ ॥

महात्माजनों के कर्णों को अमृत रूप, ऐसे जिनके यश रूप तीर्थ सरोवर में पुरुष श्रोत्र रूप अंजलि से एक वार आचमन करकें अर्थात् कर्णों से एकवार आपके चरिताऽमृत को सुनकें कर्मों की वासनाओं को छोडदेता है ॥ ६२ ॥

यस्याऽऽननं मकरकुण्डलचारुकर्णभ्राजत्कपोलसुभगं सविलासहासम् ।
नित्योत्सवं न ततृपुर्दृशिभिः पिबन्त्यो नार्यो नराश्च मुदिताः कुपिता निमेश्च ॥ ६५ ॥
जातो गतः पितृगृहाद्व्रजमेधितार्थो हत्वा रिपून् सुतशतानि कृतोरुदारः ।
उत्पाद्य तेषु पुरुषः क्रतुभिः समीजे आत्मानमात्मनिगमं प्रथयन् जनेषु ॥ ६६ ॥
पृथ्व्याः स वै गुरुभरं क्षपयन् कुरूणामन्तःसमुत्थकलिना युधि भूपचम्वः ।
दृष्ट्या विधूय विजये जयमुद्विघोष्य प्रोच्योद्धवाय च परं समगात् स्वधाम ॥ ६७ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्याम् अष्टादशसहस्रिकायां संहितायाम्
वैयासिक्यां नवमस्कन्धे श्रीसूर्यसोमवंशानुकीर्तने यदुवंशानुकीर्तनं नाम
चतुर्विंशोऽध्यायः ॥ २४ ॥

समाप्तश्चाऽयं नवमः स्कन्धः ॥ ९ ॥

॥ श्रीकृष्णार्पणमस्तु ॥

भाषा टीका।

भोज, वृष्णि, अंधक, मधु, शूरसेन, दशार्ह, ये सब लोग जिनकी सदाश्लाघा करते, और कुरु, सृंजय, पांडुलोग अर्थात् इनके वंश सदा जिनकी लीलाओं को गाते रहे ॥ ६३ ॥

उन श्रीकृष्ण की स्नेह युक्त मंदमुसक्यान पूर्वक चितवन से, और उदार वचनों से तथा अतिमानुष लोकोत्तर पराक्रमों से और दिव्यरस मयी लीलाओं से, तथा सर्वांग सुंदर परम-रमणीय अपनी श्रीमूर्त्ति से इस मनुष्य लोक को रमाते हुए ॥ ६४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

तत्प्रदर्शनार्थं मुखशोभामाह—यस्याऽऽननं दृशिभिर्नेत्रैः पिबन्त्यो नार्यो नराश्च न ततृपुर्न तृप्ताः निमेषोन्मेषमात्रव्यवधानमप्यसहमानास्तत्कर्तुर्निमेः कुपिताश्च बभूवुः, कथम्भूतमाननम्? मकरकुण्डलाभ्यां चारू कर्णौ भ्राजन्तौ कपोलौ च तैः सुभगम् सविलासो हासो यस्मिन् नित्यम् उत्सवो यस्मिन् ॥ ६५ ॥

श्रीकृष्णस्य चरितं समासतो वर्णयति—जात इति द्वाभ्याम्। जातो निजेन रूपेण पश्चात्पुरुषो मनुष्याकारस्सन् व्रजं गतः व्रजवासिनामेधिता अर्था येन तेषु दारेषु सुतानां शतान्युत्पाद्य आत्मनिगमं स्वकीयं वेदमार्गम् ॥ ६६ ॥

अन्तः समुत्थेन कलिना निमित्तेन गुरुभारं क्षपयन् दृष्ट्यैव भूपचमूर्विधूय विजये जयमर्जुनेन जितमित्येवमुद्घोषं कृत्वा परं तत्त्वमुद्धवायोपदिश्य स्वधाम सम्यक् स्वेनैव रूपेण जगामेति ॥ ६७ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
चतुर्विंशोऽध्यायः ॥ २४ ॥
समाप्तश्चायं नवमः स्कन्धः ॥ ९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

मूर्तेः सर्वाङ्गरम्यत्वं सूचयितुं स्थालीपुलाकन्यायेन तावन्मुखशोभामाह—यस्येति । यस्य श्रीकृष्णस्याननं दृशिभिर्नेत्रैः पिबन्त्यो ऽतितृष्णया पश्यन्त्यो मुदिता नार्यो नराश्च न ततृपुः न तृप्ताः निमेषोन्मेषमात्रव्यवधानमप्यसहमानाः निमेषोन्मेषकर्तुर्निमेः कुपिताश्च बभूवुः इक्ष्वाकुतनयस्य निमेः निमेषादिकर्तृत्वं तच्चरित्र एवोक्तं पुरस्तात्, कथंभूतमाननम्? मकरकुण्डलाभ्यां चारू कर्णौ कपोलौ च तैः सुभगं सविलासो हासो यस्मिन् नित्यमुत्सवशोभातिशयो यस्मिन् ॥ ६५ ॥

श्रीकृष्णचरितं समासतो वर्णयति—जात इति द्वाभ्याम् । जातस्तावन्निजेन रूपेण जातः पुरुषः पश्चान्मनुष्याकारस्सन् पितृगृहात् कारागृहाद्व्रजं गतः व्रजवासिनामेधिता वर्धिता अर्थाः पुरुषार्थाः येन रिपून् पूतनाशकटादीन् हत्वा कृताः पाणिना गृहीता उरवः षोडशसहस्रसङ्ख्याकाः अष्टौ च रुक्मिण्यादयः दाराः कलत्राणि यस्य सः तेषु दारेषु सुतानां शतान्युत्पाद्यात्मनिगममात्मनो नियोगरूपं वेदं

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

जनेषु प्रथयन् प्रथयितुमिति भावः। क्रतुभिः सर्वैः स्वात्मानमेव समीजे समाराधितवान् ॥ ६६ ॥

स वै भगवान् कुरूणामन्तः परस्परं समुत्थेन कलिना कलहेन निमित्तेन पृथ्व्या उरु अधिकं भरं स्रपयन् युधि संग्रामे भूपानां चक्रं सैन्यं दृष्ट्यैवाभिभूय विजयेऽर्जुने जयमुद्घोष्य सर्वान् जितो ऽयमर्जुन इत्येवंविधमुद्घोषं कारयित्वा परं तत्त्वमुद्धवाय प्रोच्योपदिश्य स्वं धाम स्थानं वैकुण्ठाख्यमगात् तेनैव रूपेण ययावित्यर्थः ॥ ६७ ॥

इति श्रीवत्सान्वयपयःपारावारराकासुधाकरस्य सर्वविद्यानिधेः श्रीशैलगुरोः सुतेन तच्चरणकमलपरिचर्याप्रसक्ततत्सूक्तिसमधिगतश्रीमद्भागवतार्थहृदयेन श्रीवैष्णवदासेन श्रीवात्स्यवीरराघवार्यविदुषा कृतायां श्रीमद्भागवतचन्द्रचन्द्रिकाख्यायां श्रीभागवतव्याख्यायां नवमस्कन्धे चतुर्विंशोऽध्यायः ॥ २४ ॥

श्रीमते रामानुजाय नमः ॥

समाप्तश्चायं नवमस्कन्धः ॥ ९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

रतिकरणप्रकारं दर्शयति—यस्येति । मकराकारकुण्डलाभ्यां चारू कर्णौ ताभ्यां भ्राजत्कपोलाभ्यां सुभगं सुन्दरं विलासेन सहितो हासो यस्य स तथा तं नित्यम् उत्सवो यस्य स तथा तं तस्य वाऽऽनन्दजनकमित्यर्थः। न ततृपुः नालम्बुद्धिं प्राप्ताः निमेर्निमेषस्येति षष्ठी द्वितीयार्थे निमेषं प्रति कुपिताः विकासविरोधित्वात् ॥ ६५ ॥

तेषु दारेषु आत्मनिगमम् आत्मज्ञानं स्वगुणप्रतिपादकवेदलक्षणशास्त्रं वा प्रथयन् प्रख्यापयन् ॥ ६६ ॥

स कृष्णः स्वधाम स्वमूलरूपं समगात् स गतवानेकोऽभूदित्यन्वयः। "पूर्णमदः पूर्णमिदम्" इत्याद्युपनिषद्वे इत्यनेन सूचयति, पृथ्व्याः गुरुभरमसुरलक्षणं भूपचक्रं भूपसमूहलक्षणं चक्रं विधूय संहृत्य उद्विद्युष्य डिण्डिमघोषं कारयित्वा वरं वरणयोग्यं ज्ञानं प्रोच्य विस्तरेणोपदिश्य इति ॥ ६७ ॥

नाम्ना क्षत्रवसुन्धरासुरमहावंशावलीमन्दिरम्—
व्याख्याव्याजविनोदतोऽद्य नवमस्कन्धो मयाऽऽम्रेडितः ॥
सर्वज्ञो विजयध्वजाय यतये यद्धं महाभूतिदो—
हारीहारमनोहरो ह्यहरहः प्रीतोऽस्तु विश्वम्भरः ॥ १ ॥
पदरत्नावलिर्भूयान्नवमस्कन्ध अर्पिता ।
तुलसीवद्धरेः पादद्वन्द्वे द्वन्द्वापहारिणी ॥ २ ॥

श्रीमदेन्द्रतीर्थपूज्यपादशिष्यविजयध्वजतीर्थस्य कृतौ पदरत्नावल्यां श्रीमद्भागवतव्याख्यायां नवमस्कन्धे चतुर्विंशोऽध्यायः ॥ २४ ॥

(विजयध्वजतीर्थपाठेन एकविंशोऽध्यायः)

समाप्तश्चायं नवमस्कन्धः ॥ ९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अथ सर्वमेव युगपदस्फुरितं तच्चरितमापाततो निजोत्कण्ठाकुण्ठनेच्छया च समासेन वर्णयति—जात इति । पितृगृहाच्छ्रीवसुदेवभवनाज्जातः प्रादुर्भूतः तस्मादेव व्रजं गतः तदेतद्वक्रकथनानुरूपेण प्रोच्योप्यपरितुष्यन्नाह; एधितार्थ इति. ततश्च एधिताः पूर्वतोऽपि समेधिताः अर्थः श्रीमन्नन्दादौ पितृत्वादिरूपा येन सः स्थापितश्च श्रीकृष्णसन्दर्भे दर्शयिष्यते च श्रीदशमस्य क्रमसन्दर्भे "पुत्रीभूते जनार्दने" "नन्दस्त्वात्मज उत्पन्ने" "नन्दः किमकरोद्ब्रह्मन्" इत्यादौ। ननु, क्रतुषु तास्ता देवता एवेज्यन्ते कथमात्मानमीज इति तत्राह—पुरुष इति। पूर्णं देवतादिदेहेषु शेते अन्तर्यामित्वेन निश्चलं तिष्ठतीति स तथा तत्रैव पर्यवसानादिति भावः। ननु, तेन वा कियान् लाभः स्यात् तस्य परमपूर्णस्य तत्राह—आत्मनिगममिति । तत्तल्लक्षणैव तत्तदेव मुख्यं प्रयोजनमिति भावः। शाब्दत्वेनाव्यवहितत्वेनचार्थनिगमे सति किमर्थमध्याहारव्यवधाने सह्ये तर्ह्येव सह्ये यदि विरुद्धे अपि न स्याताम् इति तस्मात् पुरुषशब्दोऽतिव्यवहितो गत इत्यत्र न योज्यः। उक्तं हि नराकृतेः परमत्वं "नचान्तर्न बहिर्यस्य न पूर्वं नापिचापरम्" इत्यादिभिः ॥ ६६ ॥

"अतिक्रम्यगतीस्तिस्रोमामेष्यसि ततः परम्" इत्येतत्पर्यवसानपरं प्रोच्य स्वधाम स्वरूपं निजनित्यलोकं सम्यक् तत्तत्परिकरादिभिः साकमेवागादिति ॥ ६७ ॥

इति श्रीमद्भागवते महापुराणे नवमस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
चतुर्विंशोऽध्यायः ॥ २४ ॥
समाप्तश्चाऽयं नवमस्कन्धः ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तेष्वपि व्रजवासिनस्तेष्वपि गोप्यस्तत्प्रियनर्मसखायश्च तन्माधुर्यपानप्रवराः परमधन्यतमा इत्याह—यस्येति । सर्वाङ्गेष्वपि मध्ये परममधुरमाननं तदाननमप्यूर्ध्वाधोभागाभ्यां द्विधा विभक्तं महामाधुर्यं भवति. तत्रापि सर्वमहामाधुर्याणां चक्रवर्ती हासाऽमृतमहामधुरिमा तदधरभागमध्ये निवसतीत्यधरभागं वर्णयति, मकरकुण्डलाभ्यां चारु देदीप्यमानौ यौ कर्णौ ताभ्यां भ्राजन्तौ यौ कपोलौ ताभ्यां सुभगं द्रष्टृजनमनोहरं विलासैर्हर्षौत्सुक्यचापलादिभिर्योत्यमानैः सहितो हासो यत्र तत् यद्वा मकरकुण्डलाभ्यां सकाशादपि चारू कर्णौ "भूषणभूषणाङ्गम्" इत्युक्तेस्तयोरपि शोभावर्द्धकत्वात् अर्थात् मकरकुण्डलाभ्यां ताभ्यां सकाशादपि भ्राजन्तौ कपोलौ अन्तर्वर्तिचर्व्यमाणताम्बूलस्य पार्श्वस्थयोर्हासकुण्डलयोश्च छविभरत्वात् ताम्बूलहेतुकदरोत्तुङ्गिमवद्धेकतरत्वादतिस्वच्छत्वादतिसुकुमारत्वाच्च अर्थात् मकरकुण्डलाभ्यां ताभ्यां सकाशादपि सविलासो हासः बिम्बाधरदशनसृक्कणीशोभानुरञ्जितत्वात् सर्वमाधुर्यमहाराजचक्रवर्तित्वात् स्वज्योत्स्नाप्रवाहनिर्वापितसर्वसंतापश्रेणिकत्वात् सर्वभक्तचेतश्चकोरार्तलोभनयित्वात् युवतिजनकामाम्बुधिवर्द्धकत्वात् व्रजकुलबालाकुलजातिधर्मधैर्यध्वंसकमहोन्मादप्रवर्तकत्वात् सर्वमङ्गलधर्म-

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यत्त्वात् यत्र तत् दृशिभिर्नेत्राञ्जलिभिः पिबन्त्योपि न ततृपुः निमेषोन्मेषमात्रव्यवधानमप्यसहमानास्तत्कर्तुर्निमेः कुपिता बभूवुरिति, निमेषासहत्वेन रूढमहाभावलक्षणेनात्र स्त्रियो गोप्य एव नान्याः नराः कृष्णप्रियनर्मसखास्सुबलादयः नान्ये ज्ञेयाः गोपीः प्रियनर्मसखांश्च विनारूढभावस्यान्यत्रोदयसम्भवाभावात् यदुक्तमुज्ज्वलनीलमणौ–

"आद्या प्रेमान्तिकां तत्रानुरागां तां समञ्जसा ।
रतिर्भावान्तिमां सीमां समर्थैव प्रपद्यते ॥
रतिर्नर्मवयस्यानामनुरागान्तिमांस्थितिम् ।
तेष्वेव सुबलादीनां भावान्तामेव गच्छति"

इति ॥ ६५ ॥

अथ के ते जन्मकर्मणी इत्यपेक्षायां सर्वमेव युगपत्स्फुरितं तच्चरितमापाततो निजोत्कण्ठाकुण्ठनेच्छयाराजोत्कण्ठावर्द्धनेच्छया च समासेन वर्णयति–जात इति द्वाभ्याम् । पितुर्वसुदेवस्य गृहात् व्रजं गतः किमर्थम् एधितः प्रकटीकृत्य वर्द्धितः वृद्धिसीमां प्रापितोऽर्थः सर्वपुरुषार्थशिरोमणिः प्रेमा येन सः प्रेमप्रख्यापनस्यैवावतारमुख्यप्रयोजनत्वात् प्रेम्णाश्च व्रज एव वृद्धिसीमाप्राप्तत्वाच्च रिपून् हत्वेति रिपुभ्यो मोक्षप्रदानमप्येकं प्रयोजनमिति तेषु दारेषु सु[illegible]न्युत्पाद्येत्यादिना वर्णाश्रमधर्मस्थापनं च दर्शितं नराकृतिपरब्रह्मत्वात् पुरुषः आत्मानं समीजे ईज्यमानस्यान्यस्याभावात् किमर्थं समीजे तत्राह—आत्मनिगमम् आत्मानुगतं स्वकीयं वेदमार्गम् ॥ ६६ ॥

भूभारहरणं प्रयोजनमाह–पृथ्व्या इति । भूपचम्वः भूपचमूः दृष्ट्यैव विधूय तत्प्रयोजनमाह, विजये अर्जुने जयम् उत्कर्षेण विघोष्य अर्जुनेन जितमिति जनेषु ख्यापयित्वेत्यर्थः । भक्तिज्ञानवैराग्यप्रख्यापनमप्येकं प्रयोजनं तदाह—प्रोच्येति । स्वधाम द्वारकां समगात् सङ्गतः प्राप्तो बभूव प्रपञ्चगोचरतां परित्यज्येति भावः नारायणस्वरूपेण स्वधाम वैकुण्ठं चागात् ॥ ६७ ॥

इति सारार्थदर्शिण्यां हर्षिण्याम् भक्तचेतसाम् ।
नवमस्य चतुर्विं[illegible]तः सङ्गतः सताम् ॥ २४ ॥
मन्तुसिन्धौ निमज्जन्तमन्तः[illegible]न्तापसन्दितम् ।
करुणादृष्टि वृष्ट्यैव सन्तःकर्ष[illegible]न्तु मां ततः ।
वैशाखशुक्लपञ्चम्यां राधाकृष्णसरस्तटे ।
नवमस्कन्धटीकेयमवाप परिपूर्णताम् ॥
नवमस्कन्धीय टीका श्लोकाङ्का (९५०)
ओंनमो भगवते वासुदेवाय ।
श्रीगोपालो विजयते ॥
समाप्तोऽयं नवमस्कन्धः ॥ ९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यस्याननं दृशिभिः पिबन्त्यो नार्यो नराश्च पिबन्तः न ततृपुः स नृलोकं रमयामासेति पूर्वेणान्वयः, कथम्भूताः ? दृङ्निमेषोन्मेषकर्तुर्निमेः तं प्रति कुपिताः दृङ्निमेषोन्मेषव्यवधानमप्यसहमाना इत्यर्थः । तद्दर्शनसुखेन मुदिताश्च कीदृशमाननं मकरकुण्डलाभ्यां चारू कर्णौ भ्राजन्तौ कपोलौ च तैः सुभगं सविलासो हासो यस्मिन् नित्यमुत्सवो यस्मिंस्तत् ॥ ६५ ॥

भगवच्चरितं सङ्क्षेपतो वर्णयति—जात इति, श्लोकद्वयेन । पुरुषः "पुरुषान्न परं किञ्चित्"इत्यादिश्रुतिवेद्यः परमेश्वरो जातःस्वेच्छया निजरूपेण वसुदेवगृहे आविर्बभूव तस्माद्व्रजं नन्दव्रजं गतः तत्र भक्तानामेधिता अर्थाः पुरुषार्था येन सः रिपून् हत्वा कृतोरुदारः तेषु दारेषु पुत्रानुत्पाद्य आत्मनिगमं वेदमार्गं जनेषु प्रथयन् आत्मानमीजे ॥ ६६ ॥

कुरूणां दुर्योधनभीमादीनामन्तःसमुत्थेन कलिना हेतुभूतेन पृथ्व्याः उरुभरं क्षपयन् युधि भूपचम्वः दृष्ट्या विधूय विजये अर्जुने जयं विघुष्य परं तत्त्वं पूर्वमर्जुनाय युद्धारम्भे उद्धवाय च स्वधामारोहणवेलायामुपादिश्य सम्यक्तेनैव रूपेण स्वधाम निजं लोकं जगाम ॥ ६७ ॥

इति श्रीसनकसम्प्रदायप्रवर्तकाचार्य-
श्रीभगवन्निंबार्कचरणचिन्तकशुकसुधीप्रणीते
श्रीमद्भागवतसिद्धान्तप्रदीपे नवमस्कन्धीये
चतुर्विंशाध्यायार्थप्रकाशः ॥ २४ ॥
समाप्तोऽयं नवमस्कन्धः ॥ ९ ॥

भाषा टीका ।

पहिले जो कही कि—सर्वांग सुंदर मूर्ति से लोक को रमाते भये सो अब उस सर्वांग सौंदर्य के उपलक्षक (जानने वाली) आपके श्री मुखकी शोभा का कुछ वर्णन करते हैं । कैसा आप का आनन (मुख) है, कि—मकराकृत कुंडलों से शोभा वाले सुन्दर कर्ण और कुंडलों की झलकन से शोभायमान सुन्दर कपोल जिसमें, और बहुत ही सुन्दर सौभाग्य युक्त विलास पूर्वक मन्दहास जिसमें, और दर्शन करने वालों को नित्य उत्सव जिसमें, ऐसे सौन्दर्य, सौकुमार्य, माधुर्य, मंदहास विलासादि विशिष्ट श्री मुखारविन्द को नारी और नर नेत्रों से सदा पान करते हुए भी तृप्ति को नहीं प्राप्त होते हुए, और दर्शन करके बडे मोद को प्राप्त होते । परंच जब बीच में दर्शन के विरोधी पलक आडे आजाते तब तौ निमि राजा पर बडे कुपित होते और सदा ही चाहते, कि—पलक न लगें और सदा इस मुखको निरखते ही रहें ॥ ६५ ॥

अब उस मुखकमल के ध्यान को शुकदेवजी के हृदय में आने से, एक विषयक ज्ञान अपने दूसरे सम्बन्धिका स्मरण करा देता है । सो श्रीविग्रह के ध्यान से समग्र लीलाओं का स्मरण हो आया, इसी से संक्षेप से दो श्लोकों में श्री कृष्ण चरित्रों का वर्णन् करते हैं । श्रीमथुरा में श्रीवसुदेव की पत्नी श्रीदेवकी देवी में अपने परत्व सूचक निज रूप से प्रकट होकर फिर अपने पिता के गृह से नन्द के व्रज को गये, और वहां जाकर व्रज वासियों के सब अर्थ बढाये और अपने [आश्रितों के] शत्रुओं का नाश कर द्वारका में श्रीरुक्मिणी प्रभृति बहुत राजकन्याओं के साथ विवाह कर बहुत सी पत्नी बनाई । और उनके विषै सैकडों पुत्रों को उत्पादन कर, अपने वेदमार्ग को इस जगत् में प्रख्यात करने

भाषा टीका।

के लिये अखिलेश्वर होकर भी आप अपने आत्मा ही को यज्ञों से यजन करते हुए ॥ ६६ ॥

और पृथिवी के बडे भारी भार को उतारने के लिये कौरवन के विषै कलह रूप अग्नि को प्रकट करा कर युद्ध के विषै आये हुए राजा लोगों की सेनाओं को अपनी दृष्टि से विधूनन कर के अर्जुन की जीतका डङ्का बजवा कर उद्धव को अपने परम तत्व का उपदेश कर अपने परम पद नित्य निजधाम को पधारे ॥ ६७ ॥

नवमस्कन्धभावार्थबोधिनी भक्तिपोषिणी ।
भाषाभागवताचार्यकृता भूयात् सतां मुदे ॥ १ ॥
इति श्रीमद्भागवत नवमस्कन्ध में चतुर्विंश अध्याय की, उभयवेदान्ताचार्य—श्रीमत्सुदर्शनाचार्यान्तेवासि-
श्रीबलरामस्वामिचरणाश्रित-
श्रीवृन्दावनस्थ पं० भागवताचार्यकृत
भाषा टीका समाप्त॥ २४ ॥
नवमस्कन्ध भी समाप्त भया, ॥ ९ ॥
श्रीरुक्मिणीरमणो जयति ।

इति श्रीमद्भागवते महापुराणे नवमस्कन्धे चतुर्विंशोऽध्यायः ॥ २४ ॥

समाप्तोऽयं नवमस्कन्धः ॥ ९ ॥

॥ हरि ओम् तत् सत् ॥

॥ श्रीकृष्णार्पणमस्तु ॥

संशोधकौचास्य ग्रन्थरत्नस्य काञ्चीमण्डलान्तर्वर्ति 'कान्दूर' पं० श्रीरङ्गाचार्य—'श्रीवृन्दावनस्थ' पं० भागवताचार्यौ ॥

॥ श्रीः ॥

विज्ञापन ।

परपक्षगिरिवज्रः ।

अयि विचक्षणाः ! अद्यातिप्रहर्षसमयो वरीवर्त्ति अहं तत्रभवद्भ्यो भवद्भ्यो ऽद्भुतग्रन्थं निवेदयामि यद्ग्रन्थान्वेषणं सहस्राणि विद्वांसो
ऽकार्षुः चातकास्स्वातिविन्दूनिव, तथा ऽपि तद्ग्रन्थदर्शनमपि दुर्लभमभूत् तत्पाठनविचारणादि तु दूरापास्तमेवासीत् तमेव ग्रन्थमत्या-
नन्देन समस्तभारतवासिनां श्रीमतां सेवायां निवेदयामि यं ग्रन्थं 'शारीरकहार्द्दसंचयनामकं' कथयन्ति, केचित्तु परपक्षगिरिवज्राख्यम्
अध्यासगिरिवज्राख्यमपि ब्रुवन्ति, एष ग्रन्थो वेदान्तिनां शिरोधार्य्यो ऽस्ति, किञ्च सर्वमनीषिणामेतत्सुविदितमस्ति, निगमकल्पतरोरस-
मयफलं वेदान्तशास्त्रमेवास्ति, यद्यपि वेदान्तशास्त्रस्य स्वस्वसिद्धान्तानामनुकूला अनेके ग्रन्था मुद्रितास्सन्ति, तथापीदृशः को ऽपि
ग्रन्थोऽद्यावधि न मुद्रितो ऽस्ति, यद्ग्रन्थावलोकनेनैव सर्वं सिद्धान्तज्ञानं भवति, एतस्मिन् ग्रन्थेऽद्भुतचमत्कारोऽस्ति एतदवलोकनेनैव
सर्वशास्त्रसिद्धान्तज्ञानपूर्वकसत्यासत्यविचारो भवति, अन्यवेदान्तग्रन्थस्यावलोकनावश्यकता ऽपि न भवति, सर्वेषां विपश्चितामेतद्ग्र-
न्थावलोकनेन पूर्णानन्दावाप्तिर्भवति, एष च ग्रन्थो विदुषां पठनपाठनादिषु प्रचारणीयो ऽस्ति, किम्बहुलेखनेनैतद्ग्रन्थावलोकयितॄणां
ब्रह्मानन्दास्वादसमुद्रस्तरङ्गितइव भवति, एतद्ग्रन्थावलोकनेन विद्वन्मण्डल्यां वाग्विलासे सङ्कोचः कदा ऽपि न भवति, एष च ग्रन्थो
निम्नलिखितप्रकरणैर्विभूषितो ऽस्ति, एतस्मिन् ग्रन्थे चत्वारो ऽध्यायास्सन्ति, तत्र प्रथमे ऽध्याये विषयसम्बन्धगिरिनिपातप्रयोजनाधि-
कारिगिरिनिपात अध्यासगिर्यधिष्ठानगिरिनिपातादीनि महाविस्तीर्णानि त्रयोविंशतिः प्रकरणानि सन्ति. द्वितीये चाध्याये जिज्ञास्यो-
पपत्तिगिरिनिपातादीनि दश प्रकरणानि सन्ति तृतीयेऽध्याये साङ्ख्यगिरिनिपातादीनि दश प्रकरणानि सन्ति चतुर्थेऽध्याये जीवन्मुक्ती
गिरिनिपातो ऽस्ति, एवं चत्वारिंशत्प्रकरणैर्विभूषितो ऽष्टसहस्रश्लोकसंख्यापरिमितो ग्रन्थोऽस्तीति विज्ञेयं मनीषिभिरितिशम् मूल्यम्
रौप्यकत्रयम् ।

पूज्यपादश्रीविश्वनाथचक्रवर्तिविरचितम्

श्रीकृष्णभावनामृतम् ।

श्रीकृष्णभावनामृतम् श्रीकृष्णचंद्राष्टकालिकसेवानिरूपणपरम् क्रीडानिकुंजस्थ किंकरीशुकशारिकादीनां परस्परसेवानिरूपण-परंसुस्पष्टपद्यात्मकं महाकाव्यम् तदनुगुणमिताक्षरसंस्कृतटीकयालंकृतम्, मूल्यम् रौप्यकत्रयम् ।

श्रीमद्भागवत संबन्धीय नियमावली ।

इतने बड़े परिश्रम और अध्यवसाय पर भी सर्व साधारण के सुलभ संग्रह के अर्थ पूर्ण ग्रंथ का मूल्य केवल ५०) रुपया अग्रिम रखा गया है राजा महाराजा और संमान्य मनुष्यों के सन्मान रक्षाके लिये उनसे केवल १००) रु० मात्र लिया जायगा डाक-महसूल २४) रु० अलग पडेगा ।

असमर्थ ग्राहकों से चार किस्तों में रुपया लिया जायगा—प्रथम किस्त १२) रु० पञ्चमस्कन्ध तक, द्वितिय किस्त १२) षष्ठस्कन्ध तक, तृतिय किस्त १२) सप्तमस्कन्ध तक, चतुर्थ किस्त १४) दशमस्कन्ध तक और डाक महसूल २४) द्वादशस्कन्ध तक लियाजायगा।

श्रीजगन्नाथवल्लभनाटकम् ।

इह खलु जगति विद्यास्थानेष्वनेकेषु पठनीयेषु सत्स्वपि शास्त्रांतराणां सहिष्णुवेद्यत्वेन सक्ष्ममतिवेद्यत्वेन च तेष्वल्पजनादरणीयेषु जातेषु इदानीं स्थूलमतिवेद्यत्वेनसुकुमारवेद्यत्वेचकाव्यनाटकादीन्येव मनुष्याणांसमययापनयोग्यानि तानिच भगवद्विषयकाणिचेद्भुक्तिमुक्ति प्रदानीनि विचार्येदानींजगन्नाथवल्लभनाटकं सर्वजनसौकर्यायप्रकाशितम् इदंचनाटकं श्रीराधाकृष्णरहस्यक्रीडा विषये प्रतापरुद्रनृपतितोपाथरामानंदराय कविनानिर्मितम्. अत्रचपंचांकाः संति तत्रप्रथमेंके नटनटीसूत्रधाराणांसंवादपूर्वकप्रस्तावनानंतरं श्रीराधाकृष्णमंदनिका विदूषकाणां वृत्तांतैः पूर्वरागनिरूपणम् १ द्वितीयेचभावपरीक्षादिनिरूपणम् २ तृतीयेंभावप्रकाशादिनिरूपणम् ३ चतुर्थे श्रीराधिकाया-अभिसरण क्रियानिरूपणम् ४ पंचमे श्रीराधाकृष्णयोः संगमनिरूपणम् अस्मिन् ग्रन्थे मध्ये मध्ये गीतगोविंदवद्गागपद्यान्यपिविद्यंते मूल्यम् द्वादश आणकाः ॥।)

वेदान्तसारः ।

भो भो वेदवेदान्तसकलशास्त्रपारावारपारङ्गताः !

विदितमेव भवतां श्रीमद्वैय्यासिकसूत्रार्थयाथात्म्यप्रतिपादकं बालानामपि वेदान्तार्थसंशयनिवारणाकरं वेदान्तसारो नाम ग्रन्थ-रत्नम्. तदिदमिदानीं सुललितैर्नागराक्षरैरपूर्वतया मुद्रितं सत् जाज्वलीति. अतस्सर्वैरप्येतद्ग्रन्थरत्नं केवलेन रूप्यकत्रयमूल्येन ग्रहीत्वा मनोनयनानन्दं प्राप्नुवन्तु भवन्तः । अस्य मूल्यं रूप्यत्रयम् ।

श्रीश्रीनिम्बार्कदर्शनम्--भो भोः परिनिष्ठितविद्वांसः! अस्मन्मुद्रणालये अद्यावधि क्वाप्यमुद्रितम् भाष्यत्रयोपेतम् 'श्रीमन्निम्बार्क-दर्शनम्' सम्मुद्र्यते, मुद्रितश्च द्वितीयाध्यायपर्यन्तं तत्त्वर्यंतां ग्रहणोत्सुकैः पञ्चमुद्रा-मूल्येन, पश्चादधिकेन लभ्येत इति विदन्तु ।

श्रीमद्भागवत कार्यालय—श्रीदेवकीनन्दन प्रेस
श्रीवृन्दावन—जिला मथुरा । } विद्वज्जन कृपाकांक्षी—श्रीनित्यस्वरूप ब्रह्मचारी ।